TEXT DARK AND LIGHT

TEXT FLY WITHIN THE BOOK ONLY

THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY

OU_182123

UNIVERSAL
LIBRARY

OUP—880—5-8-74—10,000

OSMANIA UNIVERSITY LIBRARY

Call No. R6294·503 D53 — Accession No G·H·803

Author

Title धर्मकोश: संपा · लक्ष्मणशास्त्री जोशी।

1938· Vol·1, pt·2·

This book should be returned on or before the date last marked below

धर्मो विश्वस्य जगतः प्रतिष्ठा

धर्मकोशः

व्यवहारकाण्डम्

उत्तरार्धः

विवादपदानि

संपादकः
लक्ष्मणशास्त्री जोशी, तर्कतीर्थः
अध्यक्षः, प्राच्यपाठशालामण्डलस्य

बलिप्रतिपत्, संवत् १९९५

Publishers —
Prāṇapāthaśāla Mandala,
Wai, Dist. Satara
(INDIA)

[*All rights reserved*]

Printer .—
Lakshman Narayan Chapekar.
Āryasaṃskṛti Press,
198(17) Sadashiv Peth,
Tilak Road, Poona 2.

DHARMAKOŚA

VYAVAHĀRAKĀNDA

VOL. I] VIVĀDAPADĀNI [PART II

[*Titles of Law*]

1938

EDITED BY

Laxmanshastri Joshi, *Tarkateerth*,

President, Prājna Pāthaśālā Mandala.

Checked 2016

EDITORIAL STAFF

Editor-in-chief :—

Laxmanshastri Joshi, Tarkateerth,
President, Prājñapathaśāla Mandala, Wai.

Sub-editors .—

1. Rangnathshastri Joshi, Sahityashastri, Wai.
2. K. L. Daptari, Esqr., B.A., LL.B., Nagpur
3. Prof. Dr. V. G. Paranjape, M.A., LL.B., D.Litt., Fergusson College, Poona.
4. Prof. N. R. Phatak, B.A., Bombay.
5. Prof. P. R. Damle, M.A., LL.B., Wadia College, Poona.
6. P. B. Gajendragadkar, Esqr., M.A., LL.B., Secretary, Hindu Law Research and Reforms Association, Bombay.
7. B. N. Khare, Esqr., Wai

Secretary:—

Pt. Vasudeoshastri Konkar, Pravachanpatu, Wai.

TABLE OF CONTENTS

Preface . . . . . i-iii

A Ground-plan of the Vyavahārakāṇḍa . . iv-vii

Appendix 1 [मेधातिथेरस्मत्कृता म. म. गिंगानाथ झा कृता च शुद्धिः] . . viii-xi

,, **2** [मेधातिथेरस्मत्कृता शुद्धिः] . . . xii-xvi

,, **3** [प्रो. जॉलि-सपादित-नारदस्मृतावनुद्धृतमसहायभाष्यम्] . . xvii-xviii

,, **4** [असहायभाष्यस्यास्मत्कृता शुद्धिः] . . . xviii

विवादपदेपृद्धृतग्रन्थपरिचयः . . . . ixx-xxiv

ग्रन्थनामसंक्षेपाः . . . . xxv-xxvii

विवादपदानां विषयानुक्रमणिका . . . . xxviii-xlviii

ऋषिक्रमेण विषयानुक्रमणिका . . . . xlix-lxxxi

अनुपलभ्यमानस्मृतीनां संग्रहः lxxxii

विवादपदानि ५९९-१५८९

ऋणादानम् . . . ५९९-७३४

वृद्धिः ५९९-६३५, आधि. ६३५-६६१; प्रतिभूः ६६१-६७७; ऋणप्रतिदानम् ६७७-७१६; ऋणोद्ग्राहणम् ७१६-७३२, प्रमेयक्रिया ७३२-७३४.

उपनिधिः ७३५-७५६; अस्वामिविक्रयः ७५७-७६९; संभूयसमुत्थानम् ७७०-७९०; दत्ताप्रदानिकम् ७९१-८०८; अभ्युपेत्याशुश्रूषा ८०९-८४०; वेतनानपाकर्म ८४१-८५६; संविद्व्यतिक्रमः ८५७-८७७;

क्रयविक्रयानुशयः . . . ८७८-९०१

विक्रीयासंप्रदानम् ८७८-८९०, क्रीत्वानुशयः ८९०-९०१.

स्वामिपालविवादः ९०२-९२१; सीमाविवादः ९२२-९६२; स्त्रीपुंधर्माः ९६३-१११९;

दायभागः . . . ११२०-१५८९

दायभागपदार्थः ११२०-११४३; पैतृकद्रव्यविभागस्तत्कालश्च ११४३-११५७, पितृकर्तृको विभाग. ११५८-११७४; पैतामहद्रव्यस्वाम्यविचारः ११७५-११८०; पुत्राणा सोद्धारसमविषमविभागाः ११८०-११९४; भ्रातॄणा सहवासविधिः ११९५-११९९; पुरुषपरम्पराया विभागविधिः ११९९-१२०३; विभाज्या-विभाज्यविवेकः १२०४-१२३३, सवर्णसापत्नभ्रातृविभाग. १२३३-१२३८; असवर्णभ्रातृविभागः १२३८-१२५२; पुत्रप्रकाराः तेषा दायहरत्वविचारश्च १२५३-१३८५; दायानर्हाः १३८५-१४०४; पैतृकद्रव्ये पत्नीना मातॄणा च भागः १४०५-१४१४; पैतृकद्रव्ये भगिनीना भाग. १४१५-१४२२; स्त्रीधनं, स्त्रीधनकृत्य, स्त्रीधनविभागश्च १४२३-१४६३, मृतापुत्रधनाधिकारक्रमः १४६४-१५४०; संसृष्टिविभागः, मृतापुत्रसंसृष्टिधनाधिकारश्च १५४०-१५६२; विभक्तजविभागः १५६२-१५६८; विभागानन्तरागतविभागः १५६९-१५७०; विभागदोष पुनर्विभागादिविधिः १५७०-१५७४; विभागसदेहे निर्णयविधिः १५७५-१५८२; विभक्ताविभक्तकृत्यम् १५८३-१५८९.

Preface

We are glad to be able to issue the second part of the first volume of Dharmakos'a to our readers this year The first part of the first volume dealing with the 'adjective law' (Vyavahāramātṛkā), which was published last year, forms a compendium of texts relating mainly to judicial procedure and evidence. As in the first part, here also we have incorporated texts from the Vedas, the Mbh, the Rāmāyana, the Purāṇas, the Arthas'āstra and the S'ukranīti along with the proper Dharmas'āstra texts. This part and the third to be printed will cover the entire portion relating to 'titles of law (Vyavahārapadāni) The titles of law included in this part, barring a few exceptions can very well be regarded as constituting the civil law. The 'titles of law' which will be incorporated in the third part will be such as might be styled as criminal law The thirteen titles of law which have been included in this part are as follows: – (1) ऋणादानम् (Non payment of debts) (2) उपनिधि (Deposits) (3) अस्वामिविक्रय (Sale without ownership) (4) सभूयसमुत्थानम् (Partnership) (5) दत्ताप्रदानिकम् (Resumption of gifts) (6) अभ्युपेत्याशुश्रूषा (Breach of a contract of service) (7) वेतनानपाकर्म (Non-payment of wages) (8) सविद्व्यतिक्रम· (Transgression of a compact) (9) क्रयविक्रयानुशय (Rescission of purchase and sale) (10) स्वामिपालविवादः (Disputes between master and herdsman) (11) सीमाविवाद (Boundary-disputes and land-disputes) (12) स्त्रीपुंधर्मो. (Duties of men and women) (13) दायभागः (Inheritance) The third part will contain six titles of law which will be as follows:—(1) साहसम् (Heinous offence or Felony) (2) स्तेयम् (Theft and robbery) (3) वाग्दण्डपारुष्यम् (abuse and assault) (4) स्त्रीसंग्रहणम् (adultery) (5) द्यूतसमाह्वयम् (Gambling and Betting) (6 प्रकीर्णकम् (Miscellaneous).

From the various Smṛti texts that we have studied, it does not appear that a fixed order was ever intended for these titles. They have been arranged differently in Manu, Yājñavalkya, Nārada and Kautilya-arthas'āstra. If we exclude the 'adjective law' from the chapter on धर्मस्थीय in the Kautilīya-arthas'āstra it contains only seventeen of the titles, of which the one on 'ownership' has been included under 'possession' by the authors of the Smṛti-texts and the portion on 'adultery' which appears in the ordinary titles, has been given a separate chapter namely कन्याप्रकर्म in the chapter कटकशोधन by Kautilya and has not been included in the chapter on the धर्मस्थीय Theft (चौर्यम्) and Felony (साहसम्) have been included in one and the same title and the क्षेत्रपथहिंसा relating to स्वामिगोलविवाद figures under वास्तुक in the Arthas'āstra On the other hand the titles on 'breach of service' and 'miscellaneous which appear in Arthas'āstra do not occur among the eighteen titles of Manu smṛti. Yājñavalkya makes no mention of the eighteen titles although there are provisions relating to each in his work In fact the classification of the text of Yājñavalkaya into the eighteen titles appears to be entirely the work of the commentators Nārada groups 'non-payment of wages' with 'disputes between master and herdsman' and 'felony' with 'theft' A separate title bearing the name 'precautions against thief' (चौरप्रतिषेधः) based on ths Nepāli Version of the Nāradasmṛti appears as an appendix in

Dr. Jolly's edition of the Nārada Smṛti This is obviously an interpolation as 'theft' does not appear amongst its eighteen titles and 'theft has not only been treated in the section on 'felony' in the current versions of the Nārada Smṛti and the Nāradīyamanusaṃhitā of the T S S., but there is an express statement in Nārada-smṛti (14/12) to the effect that 'theft' is a variety of 'felony' Nārada includes 'adultery' in his title on 'duties of men and women' He futher sub-divides the eighteen main titles into one hundred and thirtytwo sub-titles. 'Disputes between master and herdsman' and 'miscellaneous' do not find a place in the enumeration of Bṛhaspati. The number eighteen is specifically mentioned in Manu. (8-147. Dharmakoś'a Vol I, Part I, p 8, 9), Nārada (1/16-9 Dharmakoś'a Vol I, Part I p 14) Bṛhaspati (Dharmakoś'a Vol. I, Part I, p 17), Kātyāyana (Dharmakoś'a, Vol I, Part I, p. 18) and Agnipurāna (253/131, Dharmakoś'a Vol. I, Part I, p 19, while the titles themselves have been specifically mentioned in Arthaś'āstra, (1/1, Dharmakoś'a Vol. I, Part I, p 7-8) Manu, Nārada, Bṛhaspati and Agnipurāna The Mānasollāsa has numbered the titles of law as twentytwo and has specifically mentioned them (Vide Dharmakoś'a Vol I Part I,p 19). The author of the Mitāksarā also is of the opinion that there need not be any definite order observed in the arrangement of the titles, cf व्यवहारपदाना परस्परहेतुहेतुमद्भावाभावात् 'तेषामाद्यमृणादान' इत्यादि पाठक्रमो न विवक्षित· । (मिताक्षरा 2/159).

According to Bṛhaspati the titles of law are of two kinds, one originating in wealth and the other in injuries, meaning thereby that in the first kind proper decision of the property-disputes is the main purpose and punishment is subordinate, while in the second, punishment is predominant We have also adhered to this division while classifying the titles.

Our copy of the Vyavahāra-kalpataru has been made from the manuscript of the Saraswati Bhuvana Library in Benares It extends from the beginning to the middle of the chapter on Sīmā-Vivāda. The original Ms. being incomplete our copy also is naturally incomplete From the chapter on Sīmāvivāda onwards to the end, our copy has been made from the Bikaner State Library Ms, which lacks only last three or four folios. All references to and v.l. for the texts from the section on Sīmāvivāda are naturally to the Bikaner State Library copy Both the copies are corrupt and from the extracts from Vyavahārakalpataru which occur in Vivādaratnākara, Smṛtisāra, Vivādacintāmaṇi, Dandaviveka, Saraswatī Vilāsa, Vīramitrodaya and Bālambhatti ; it appears that the commentary on the Smṛti-passages has been dropped in several places. On the other hand some passages which have been quoted from Vyavahārakalpataru in these works are to be found in neither of the Mss.. Quotations from the Kalpataru contained in these works have been cited by us under the respective headings.

It was after our section on the Vyavahāramātṛkā and the section on the Vivādapadāni upto the sub-section Krayavikrayānuś'aya had been printed that we could secure a copy of the Madanaratna from the Bikaner State Library and hence references to and v.l. for the Madanaratna have been given only from the sub-section on Krayavikrayānuś'aya onwards. In some places quotations from the commentary also have been included. As there were not additional Smṛti passages and v.l. to be recorded from the remaining portion of the Madanaratnā it was not found necessary to add an appendix about them. The Ms. of the Madanaratna must be incomplete, since our copy extends only upto the

section on Dyūtasamāvhaya.

The work referred to by us as S'ukranīti is really S'ukranītisāra; but it has been referred to as S'ukranīti by several scholars. It is not possible to mention a definite date for this work. It quotes several verses most often in their original form, in rare places with a few alterations, from Vasiṣṭha, Manu, Yājñavalkya, Narada, Bṛhaspati, Bhṛgu, Kātyāyana, Vyāsa, Pitāmaha, Prajāpati, Hārīta and other texts. References to and V.L for the S'ukranīti have been given in connection with the various Smṛti-texts and they have not been quoted in connection with S'ukranīti itself barring a few sections likeLekhya where they have been repeated for the proper understanding of the context The S'ukranīti has been given precedence over the Smṛtisangraha, but that the latter text is earlier than the former is clear from the fact that the S'ukranīti quotes the Sangrahakāra along with the Smṛti-texts. Prof. P. V Kane has fixed the date of the author of the Smṛtisangraha between the 8th and the 10th century and hence the S'ukranītisāra which is commonly referred to as S'ukranīti, cannot be earlier than the 8th century

Most texts from the Agnipurāṇa bearing on law are found in Yājñavalkya and Nārada. And therefore with the exception of four or five verses, other verses from it have not been given a separate place and references to and V. L. for the Agnipurāṇa will be found in the references to and V. L. for the same verses in Yajñavalkya and Nārada.

Some repetition occurs in the subject headings of the Vaidika passages, which could have been avoided, but as we were particular about quoting the texts according to the strict order of the different Vedas and within each according to Maṇḍala or Kāṇḍa of each, we have not been afraid of repetition.

A considerable portion of Hārīta being in the form of Sūtras we have given it a place immediately after Gautam.

Quotations from शंख: and शंखलिखितौ have been given under a common heading as 'शंख: शंखलिखितौ च'

Some extracts from the treatises such as—Bālarūpa, Pārijāta, Halāyudha, S'rīkaranibandha, Dharmakos'a and Prakās'a which are not extant to day are included in the Smṛtisāra of the India office Library Ms. No. 301. We have reproduced passages, though corrupt, of the above Nibandhakārs from the Smṛtisāra bearing on the two chapters namely मृतापुत्रधनाधिकार: and संसृष्टिविभाग:.

A few texts from the Smṛtis and the Mbh. which were inadvertantly omitted from the main work in this part will form an appendix of the part third. Tables of succession for the elucidation of some portions of the दायभाग, an index of important words, an index of s'lokahalves and a list of errata will be found in the part third.

Prajña-Paṭha-S'ālā
Wai (Satara)
24-10-1938.

Laksmans'ātri Joshi
Tarkateertha,
Editor-in-chief.

A ground-plan of the Vyavaharakanda

(1) The Vyavahāra-kāṇḍa is divided into two parts: one concerns itself with the elements of the legal procedure (व्यवहारमातृका) and the other with the eighteen titles of law (विवादपदानि). The section on Vivādapadāni comprises twenty topics.

(2) Every possible endeavour has been made to arrange, chronologically, the texts from the S'rutis, Sūtras, Smṛtis and treatises, and the commentaries on them.

(3) The commentaries on the S'rutis, Sūtras and Smṛtis are placed immediately after them, and according to their chronological order; for example, under the passage परिषदं ह्यरण्यस्य, Ṛv. VII.4.7 (p.1253), the explanation from the Nirukta has been first given and then follows the relevant Bhāṣya of Sāyaṇa; so also under वसिष्ठविहितां Manu VIII. 140 (p.611), extracts from Medhātithi, Govindarājīyā, Smṛti-candrikā Vivādaratnākara and other works have been given in their chronological order.

(4) For the S'rutı works the order adopted is as follows: the Saṁhitās of Ṛgveda, the Yajurveda, the Sāmaveda and the Atharvaveda; then the Brāmaṇas in the same order as their Saṁhitās. Since all the Sāma-verses are derived from the Ṛgveda, they must be both regarded as of the same epoch. European scholars place the Atharvaveda immediately after the Ṛgveda; but, we have not attached any importance to this sequence followed by them.

(5) In the case of many Smṛtis, it is not possible to determine their dates of composition even in a very tentative manner. Extracts from Smṛtis, with a well-ascertained chronology, have been given in their chronological order; in the case of those whose dates have not been determined, we have followed the order in which they have been mentioned by Prof. Kane in his History of Dharmas'astra, vol. I.

(6) Texts even with a similar purport from the S'rutis and the Smṛtis have been quoted in full. Some texts have been attributed to different Smṛtis by the writers of legal treatises; these texts have been quoted separately under the name of each Smṛti-writer according to their topical order. Likewise, when a text occurs only incidentally in a certain topic and has an essential connection with another, it has been mentioned under both topics.

(7) For every text the oldest commentaries have been as far as possible cited.

(8) The commentaries of the earliest authors have been first given in full and the commentaries of the later authors which coincide in all respects, or in some respects with that of the earlier ones have not been repeated; but, a note has been made on the earlier comment showing the degree of coincidence and the respects, in which e. g. explanations of words or sentences, citations of other views, refutation, the conclusion arrived at or the summary of results, it agrees with the later one; e. g. when the commentary of Aparārka coincides with the Mitākṣarā there is a note on the passage from the latter, अप. मितागतम् or अप. मितावत्; i. e. Aparārka coincides with Mitākṣarā; अप. वाक्यार्थो मितावत् or मितागत: would show that their senses coincide; अप. पदार्थो मितावत् or मितागत: would show that their explanation of the words of the text coincides; अप. मितावद्भाव: would

show that although the Aparārka explains the Smṛti texts in some respects differently, its purport is the same as that of the Mitākṣarā; अप. यथाश्रुतम् would show that the interpretation of Aparārka is in accordance with the obvious meaning and therefore no quotation has been elicited from it.

(9) If the explanations of the treatises lay additional emphasis on a point explained by earlier authors, this explanation has been quoted in certain places.

(10) The order of explanations in the case of contemporaneous treatise-writers or commentators has been fixed with regard to convenience of arrangement, e. g. in the case of those from व्यवहारमयूख, विवादताण्डव and व्यवहारोद्योत, which are contemporaneous.

(11) While reading an anthology of Vaidika literature it must be remembered that few direct statements about legal usages are to be found there and that it is only incidentally, for instance in metaphors or in connection with other matters, that there are any references to legal facts and that even these are not at all definite or specific, some of them being vague and some of a general order. It is the definite and the particular statement which can be of use for historical conclusions.

(12) The incorrect readings of the printed texts have been corrected. There are, for instance, several incorrect readings in the Bhāṣya of Medhātithi on Manu VIII and IX as printed by the late Mr. V. N. Mandlik and by Prin. J. R. Gharpure. We have corrected the mistakes in several places and relegated the incorrect readings to the foot-notes. The text has been collated with that of three Mss. from the India Office Library and one belonging to the proprietor of the Gujarat Printing Press; but in several places the readings of Mss. were found to be corrupt and the readings have been fixed very often with reference to the context by the editor.

(13) Prof. Jolly has left off a considerable portion from the Bhāṣya of Asahāya, probably because it was evanescent and obscure. A good deal of this portion appears, in an amended form, in this work. The corrupt portion, however, has not been printed in the foot-notes, as in the case of Medhātithi, but, appears in an independent appendix. For the text of the Bhāṣya of Asahāya the only available Ms. was the one in the Mss. Library of the Bhandarkar Institute, and corrected by one Kalyāṇabhaṭṭa.

(14) The Bhāṣya of Asahāya, the commentary of Viś'varūpa, the Bhāṣya of Medhātithi, and the Mitākṣarā have been fully utilized. Even where the Viś'varūpa and the Mitākṣarā agree, the Mitākṣarā passage has been quoted, for, most successors of Vijñāneś'vara quote only the Mitākṣarā. The Govindarājīyā also has been quoted in full, although it is very often a reproduction of Medhātithi, for the reason that the Bhāṣya of Medhātithi is often unintelligible. In portions where the commentary of Govindarāja was corrupt, that of Kullūkabhaṭṭa, which agrees with it in principle, has been substituted instead.

(15) The order of passages quoted from the extant Smṛti works such as Manu and Yājñavalkya has not been adhered to, while classifying them topically.

(16) The writers of treatises have made minute sub-divisions while classifying the subject-matter of the Smṛti-texts. We have not adopted them; for the texts, being thus separated under sub-divisions, far being classified render it impossible to follow the main purpose or the argument of the Smṛti-writer.

(17) For all the texts quoted, the foot-notes contain full references to the

use made of them by writers of treatises.

(18) We have used Dr. Jolly's text of Nārada-smṛti for the Dharmakoś'a. The first three sections of this work constitute the Vyavahāramatṛkā and the sections beginning with 'non-payment of debt' have been remembered by us from 4 to 21 so that the fourth section of our quotation would be the first 'title of law' of Dr. Jolly's edition; while the appendix in Dr. Jolly's work which has been derived from the Nepāli version of the

(23) The commentary portion on the various texts must be read with due regard to the readings in the foot-notes; for the commentary does not necessarily adopt the reading adopted by us.

Explanation of the conventions adopted in the foot-notes.

Instructions for the use of the v. l.

(1) The texts quoted in the व्यवहारकाण्ड have been printed in black. The commentaries have been printed below in smaller type In the foot-notes after the

by Pt. Sambashiva Shastri in the T.S.S. contains twenty sections, which have been rembered by us according to our order for these sections, and hence been quoted accordingly in references to and v.l. for this text.

(20) No independent references have been made under Gautama Dharmasūtra to Maskaribhāṣya; under Manusmṛti to Medhātithi, Govindarajīyā, Manwarthavivṛtti, Manwarthamuktāwali, Manwarthacandrikā, Nandinī, Manubhāvārthacandrikā and under Yājñavalkya-smṛti to Mitākṣarā Aparārka and Viramitrodaya. The references for these works are the same as for their respective Smṛtis.

(21) We have not adopted Prin. Gharpure's numbering of Verses for Manusmṛti VIII. The verse VIII. 28 has been treated by us as an interpolation as it is repeated in XI. 188.

(22) All readings which appear to be preferable or authentic from the philological or historical point of view have been incorporated in the original texts quoted, and the readings that were thought to be of the same worth or inferior have been given in brackets in the foot-notes. Most of the variants are those that have been adopted by the various treatise-writers.

various signs such as *, +, ×; then follow references to the text and the v.l.. The corrupt readings from the Bhāṣya of Medhātithi come next and have been indicated by means of figures.

(2) Abbreviations for the different words quoted such as the Vedas, the Sūtras, the Smṛtis, the Purāṇas, the treatises etc,have been printed in black; references to chapters and verses and the v. l. having been printed in small type; e. g.विचि.११ चिर (चिराव) (p. 607).

(3) References to texts from the Vedas, the Sūtras, the Smṛtis and the Purānas are given by the universally accepted method The treatises have been referred to by the page.

(4) Only the portion of text for which a v. l. exists has been first given and then the v. l. follows itself within brackets.

(5) No v. l from Mss. which is obviously grammatically incorrect has been quoted The same rule has been adopted in most cases for printed books. But a v. l, in works edited by learned scholars have been quoted even when they were found to be incorrect.

(6) When there exists a v. l. for a complete stanza or a complete hemistich it has been quoted without repeating the portion for which it stands,

(7) When a portion is missing in a particular work, after the name of the work the portion is mentioned in brackets and the sign 0 is marked after the portion to show that it is missing; likewise when a portion is added in a work it is mentioned in brackets with the sign + before the brackets; e g. उ. २।१३।१० (बन्धु०) (p. 1274), **विता.** ६०० ज्ञाना-र्द्धुः+(न ज्येष्ठं पुत्र दद्यात्) (p. 1274).

(8) All works are cited chronologically for purposes of their references to the v. l. in the foot-notes When a later work has the same reading as an earlier work or some portion which is common to it and the earlier expressions, 'वत्' and 'शेष-वत्' have been respectively used; e. g. 'स्मृचवत्', 'शेषं स्मृचवत्'.

In the references and the v. l statements like **विर.** ४५ प्रतिदापयेत् (दातुमर्हति) विष्णु-नारदौ (p. 670) and **स्मृच.**१३२ हि (तु) उत्त. (p. 695) occur, and then indications like विरवत् and स्मृचवत् follow. Here they are to be understood referring only to the v.l. and not to विष्णुनारदौ or उत्त..

(9) A semi-colon marks a close of the reference and the v.l. of each work, and a full point is added after all works quoted in connection with a text have been exhausted.

If a text recurs in a work and the same v. l. occurs in all the quotations, the references to pages are separated by means of commas; e. g. **प्रका.** ९१, ९४ (p. 630). A colon has been used between a v. l. and the reference when the same text appears with a v. l. on different pages; e.g. **नृप्र.**१८ यः...धनं (यत्सबन्धनं): १९ स्वकं (स्वयं) (p. 622).

(10) The same text is quoted by different treatise-writers under the names of different Ṛṣis; in such cases the text has been quoted under the name of the Ṛṣi to whom it has been attributed by the majority of the early treatise-writers; while the Ṛṣi to whom the modern writers attribute it are mentioned in the foot-notes. When a text, on the other hand, is attributed by some of the early treatises to a certain Ṛṣi and by others to another, it has been regarded as of both.

(11) When a text has been quoted by the early writers without mention of a name and by a single modern writer to a specified Ṛṣi, it has been regarded as his.

(12) The treatise-writers attribute a text to several Ṛṣis, e. g. to Nārada and Bṛahaspti or to Manu, Nārada, Hārīta and Baudhāyana. In such cases the text has been regarded as coming from each one of the Ṛṣis.

(13) Texts which have been quoted as coming from no specified Ṛṣi but merely with words like इति स्मरण, स्मृतिः, स्मृत्यन्तरम्, have been quoted under the heading स्मृत्यन्तरम्.

(14) Texts quoted neither as from a specific Ṛṣi nor as स्मरणं, स्मृतिः, स्मृत्यन्तरम्, have been quoted under the heading "अनिर्दिष्टकर्तृकवचनम्" and are indicated in the foot-notes by the sign (=), which shows that the provenance is not specified.

(15) A v. l. is given in the place where the commentary quotation contains a reference to it with the words इति पाठान्तरम्, इत्यन्यः पाठः or इत्यपि पाठः.

(16) In the section of Dāyabhāga the Bālaṁbhaṭṭī on the two stanzas, II, 135 and II, 145 which covers a considerable number of pages has been quoted in the usual way with figures for chapter and verse and also with figures for pages.

(17) No. v. l. has been given in the case of synonyms of the type of तटाक-तडाक, शस्य-सस्य, लोष्ट-लोष्ठ, ऋक्थ-रिक्थ, चोर-चौर, मृन्मय-मृण्मय, कोष-कोश.

(18) No, v. l. has been given in the case of alternative forms for Saṁdhis, e. g. नासौष्ठ-नासौष्ठ.

(19) पू. stands for पूर्वार्धः and उत्त. for उत्तरार्धः.

*Appendix I

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	§आदर्शपुस्तकम्	म. म. गंगानाथ झा
६१२	१	२६	महत्वात् द्वैगुण्यं	महत्वादिकत्वाद्वैगुण्यं	महत्वाद्वैगुण्यं (as in S.)
६१३	,,	८	संख्यायाऽस्य द्वै	संख्यायाऽस्य द्वै	संख्यायां स्याद्वै
,,	२	३०	पत्सर्वा वा दीयते	पत्सर्वै वा नीयन्ते	पत्सर्वैवानीयते (as in N.)
६१४	१	६	अप्याहृते	अप्याहृते	अथाहृते
६१५	,,	१२	कृतानु	कृतानु	कृता तु
,,	,,	१४	प्राप्तस्तस्यानुसा-रादधिका	प्राप्तस्तस्यानुसा-रादधिका	प्राप्तस्तस्य या पुरुष-सारादधिका (as in S.)
६१६	,,	६	मार्गणीया	मार्गणी	ग्रहणीया
६१९	,,	३०	भाख्यमन्यस्मा	भाख्यमन्यस्मा	भाख्यं तस्मा
६३८	२	१२-३	आधिं प्रविष्टं	आधि ... प्रविष्टे	तावदाधि तु भुञ्जीत यावद्वै द्वैगुणं धनं प्रविष्टे (as in I. O.)
६६४	,,	१४-५	भूर्न जातः	भूतज्जातः	भूस्तज्जातः
,,	,,	१६	गृहीत्वा	गृहीत्वा	हित्वा (Read N. & S.)
६६५	१	२७	यद्यपि न	यद्यपि न	यद्यपि (as in S.)
,,	,,	३०-३१	चेन्मैवं । निरादेशनेन	चेन्मैवं । निरादेशने न	omit चेन्मैवं निरादेशने
६८०	,,	२६	तदुक्थे	तदृष्टे	तच्छिष्टे
,,	२	३	करणार्थं	करणार्थं	भरणार्थं
७१७	१	७	ग्रहः	ग्रहः	संग्रहः (as in N. &. S.)
,,	,,	१०	तरावपि	तरावपि	तरोऽपि
७२०	,,	१३	यो यावन्निह्नुवीतार्थं	यावदृण	यावन्त (as in N. & S.
,,	२	५	इतरथैक	इत्यप्येके	इत्यथैक
७३८	,,	१३	नितरा न च	नितरां न च	नितरां च
,,	,,	२६	विप्रत्ययो	विप्रत्ययो	विप्रलयो
७३९	१	११	स मुद्रयित्वा	समुद्रयित्वा	सोऽमुद्रयित्वा
७४०	१	१९	प्रत्यनन्तरे उत्पत्स्यनन्तरे	उत्पत्स्यनन्तरे उच्यते	प्रत्यनन्तरे उच्यते
,,	,,	२३	याचेन्निक्षे	यावन्निक्षे	याचते निक्षे (as in N.)
७४२	२	१४	तेनैव त	तेनैव त	तेनैत (as in P.)
,,	,,	३१	ग्रहीतुनिं	गृहीतनि	गृहीतुनि
७४४	,,	१	विविधः कुठा	विविधः कुठा	विविधकुठा

* मेधातिथिभाष्ये येऽस्माकमाभिमताः म. म. गंगानाथ झा महोदयैः कृताः शोधनविशेषास्तेऽस्माभिः ग्रन्थे संगृहीताः। येऽस्माकं नाभिमता अथवा येषामर्थे विवादः स्यात् तेऽत्र समुद्धृताः।

§ जे. आर. घारपुरे (मुंबई) महोदयैः संपादितं (ख्रिस्ताब्दाः १९२०) पुस्तकं सर्वत्र आदर्शत्वेन स्वीकृतम्

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्	गंगानाथ झा
७४५	१	४	विध्यर्थाः	विध्यर्थाः	विधिः अर्थवादः
७५८	२	१३	ज्ञातो	ज्ञातो	ज्ञान्तो
,,	,,	२१	अथवा अन्वयो विक्रीणाति (?) तस्य	अथवा अन्वयो विक्रीणाति तस्य	अथवा यो न क्रीणाति न तस्य (as in S.)
७५९	,,	२	तु द्रव्यं	तु द्रव्यं	तद्द्रव्यं
७६०	१	४	अनेन	अन्येन	येन
,,	,,	५	प्रकाशं	प्रकाश	प्रकाशे
,,	,,	७	शोधिते द्रव्ये शुद्धः	शोधिते द्रव्ये शुद्धः	शोधितो द्रव्यशुद्धः
७७४	२	६	तच्चोदकेन	तच्चेदेकेन	तच्चातिदेशेन (Mandlik)
,,	,,	९	हिरण्मयौ प्राकाशावध्वर्यवे	हिरण्मये प्रकाशवदध्वर्यव	हिरण्मये प्रकाशवदध्वर्यव
७७५	१	१०	सोमापाहरणार्थ	सोमापाहरणार्थ	सोमापहरणार्थ(as in I.O.)
८२१	२	२२	येत	यते	येत्
,,	,,	२३	स्वस्वदासाः	तस्य दासाः	तस्य दास्यां:
८२२	१	४	इत्यधमर्णस्या	इत्यवर्णस्या	इत्यन्यवर्णस्या
,,	,,	१५	श्रितो न	श्रितो	श्रितेन
८२३	२	३-४	स्तान् प्रयत्नेन स्वकर्मणि कारयेत् । अल्प एवा	स्ते प्रयत्नेन स्वकर्मभ्यश्चा-वयेदनल्प एवा	स्ते प्रयत्नेन स्वकर्मभ्यः श्रावयितु न लभेरन्। अनल्प एवा
८६४	,,	१५	साष्ट	शाब्द	साष्ट
८८०	१	१५	वणिक्पण्ये	वाणिक्पण्ये	वणिक्पणे
,,	,,	२२	वणिजां	वणिजां	वणिजा (M.)
,,	,,	२३	वदुपेक्ष्यम्	वदपेक्ष्यम्	वदेव जात
,,	२	१२	क्रेता जातानु	क्रेता यावतानु	क्रीतानुशयः । जातानु
८८१	१	१८	स च	स च	वाचा
,,	,,	१९	Sनुशयो	Sनुशमय्य	Sनुशय्य
८८२	,,	२४	विपर्ययेऽसकृत्त्वेन	विपर्ययेऽसकृत्वेन	विपर्ययासक्तत्वेन
९११	,,	२१	त्रयति	त्रयति	त्रयतो
१०४१	२	३-४	क्षणां विदुष्टा पूर्वं प्रतिगृहीता	क्षणां विदुष्टा पूर्वं प्रतिगृहीतां	क्षामदृष्टपूर्वां प्रतिगृहीता [क्षामनष्टां पूर्वप्रतिगृहीतां quoted by Viramitrodaya Samskara.]
१०४२	१	३	कामावशत्वेन	कामवशत्वेन	कामावेशत्वेन
,,	२	२२	पित्र्यानल	पित्रा नाल	पित्रा अल
१०४४	१	६	प्रायश्चित्ते न	प्रायश्चित्ते	प्रायश्चित्तविधानेन न
,,	,,	२३	पर	वरं	omit वरं
१०४५	२	१४-५	तेन सर्वक्रियाविषये	तेन सर्वक्रियाविषयं	omit तेन सर्वक्रियाविषयं
१०४७	१	४	पत्युः	प्रत्या	पत्या
[illegible]			[illegible]	[illegible]	ततश्च प्रतिषेधमन्यमाना यत्किञ्चित् स्त्रीसंबन्धि कर्म येनकेनचित् क्रियते (as in S.)

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्	म. म. गंगानाथ झा
१०५६	२	१५	मस्य त्वन्य	मस्य त्वन्य	मस्त्वन्य
१०६१	१	२२	स्मादवधेनैषा	स्मादबाधनैषा	स्माद्वचनान्वैषा
१०६२	,,	१७	धोऽय	धोऽयं	धेऽय
१०६३	,,	४	संख्या	सख्या	संस्था (as in S.
१०६६	,,	६	। न । औरसे	। औरसे न	। औरसे
१०६८	,,	९	नो नानादिः, वेने	न आदि वेने	नो न आदि वेने
,,	२	४	उक्त	उक्त	इत्युक्तं
१०६९	,,	१३	वस्त्रां, नि	वस्त्रां, नि	वस्त्रानि
१०७०	,,	५	नायां हे	नाद्यावद्धे	नाय च हे
१०७१	१	२६	णाव्याक्रियते	णाव्याक्रियते	णेन व्याक्रियते
१०७२	,,	२५	च्छेदस्य	च्छेदस्य	च्छेदकस्य
११२६	२	२४-२५	षाश्रवणेऽपि	षश्रवणेऽपि	षः । सर्ववर्णेऽपि
११३७	१	१	आवर्जनः (।)	आवर्जनः	omit (not in S.)
११४९	२	२२	समये सक्रा- मितमिति ।	शयने सक्रामति ।	तथा ... क्रामति (here it is out of place)
११८९	,,	२२-४	दशावयवाद्वा...	दशावयवाद्वा...	वय बादवर्गाद वरमेकमादरीत
			वर्गे दशशब्दः	वर्गे दशशब्दः	यदि दशगावोऽश्वा वा सन्ति तदैक श्रेष्ठमादरीत दशावयवे वर्गे दशशब्दः (as in S.)
१२११	२	११	यतस्तल्लभ्यते	यतस्तल्लभ्यते	यद्धनं लभ्यते (as in S.)
१२१३	१	३	मित्रवि	मन्त्रे वि	मैत्रे वि
१२४७	२	७	सर्वत्र स्वरिक्थो	सर्वं स्वरिक्थो	सर्वत्र स्वत्वो
१२९४	१	१५	इति यागेव	दियोगेन	इति मन्त्रादियोगेन
,,	,,	१६	न तु सवादाभावेन	ननु सवादभावेन	ननु सबन्धाभावेन (as in Mad.)
,,	,,	१७	मुच्यते स तु वच	मुच्यते सुतवच	इत्युच्यते पुनर्वच
१२९५	,,	६-७	मेव धन,...युज्यते	मेव धन...युज्यते	मेव धन...युज्यते (omit)
१२९९	,,	२	पुंसाऽसं	पुमांस	पुंसा स
,,	,,	१५	तथोक्ति	तथोक्ति	यच्चोक्त
,,	,,	१९	प्रतिषेधस्तत्प्रति	प्रतिषेधस्तदप्रति	प्रतिषेधस्तदतिक्रमे विवाहस्य संस्कारतैव नास्ति शूद्राया-धानस्यैवाहवनीयाद्यर्हता । भगि-न्यादिप्रति (as in S.)
,,	,,	३१-२	तया च स्व	तथा च स्व	यथा च सह
,,	२	४	भवति । परि	भवत्यपरि	भवत्वयं परि
,,	,,	७	धर्मलक्षण	धर्मलक्षण	धर्मलक्षणभयलक्षणवान्
,,	,,	,,	प्रत्यया	प्रत्यया	प्रत्यक्षा
१३९९	२	२१	ते चेदपत्यमात्रे कानीनं स्मरन्ति	ते चेदपत्यमात्रे कानीनं स्मरन्ति	तेन चापत्यमात्रो कानीनो भवति (as in S.)

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्	म. म. गंगानाथ झा
१३०३	१	७	सानस	सान् सं	सा न स
,,	,,	१३	किमु	किमु	कि
,,	२	४	निधिर्न च पुत्रकर्माङ्गम	निधेर्न च पुत्रक- र्मांगमोऽ	निधेर्न च पुत्रः कर्माङ्गम
,,	,,	१२-३	अथ क्षेत्रजादिषु पुत्रि- कापुत्रेण	अथ क्षात्रिया- पुत्रिकापुत्रस्वे	पुत्रिकापुत्रस्य पुत्रत्वे
१३१८	१	१३	दृश्येत	दृश्येत	दृश्येन
१३२६	२	८	विशेषनिर्देशा	विशदशा	विशेषादंशा
१३९४	,,	६	सतानाना	संतानाना	तन्तूना
१४१७	,,	१६	दायः	अय दायः	अदायः
,,	,,	२३-६	यत् पित्राऽवश्य दातव्य तदृक्थादुद्धृत्य शेष विभ- जेरन्नित्यर्थ'। यथा च ऋणापाकरणादि व्याहृ- यते, तद्वत्कन्यादानम्। अवश्यकर्तव्यत्वात्। 'कन्याभ्यश्च प्रादा- निकम्' (कौ. ३।५) इति।	(०)	यत् पित्राऽवश्य दातव्य तत्रका (कन्यांश ?) उद्धृत्य शेष विभजेरन्नित्यर्थः। यथा- वाकरणादिमव्याहृयते (?) तद्व- त्कन्यादानम्। अवश्यकर्तव्या- त्। यथा कन्याभ्यः (as in S)
,,	,,	३२	तत्रोच्यते	यथा वोच्यते	यथा नोच्यते
,,	,,	,,	चोच्यते, न पुन	चोच्यंत न पुन	यच्चोच्यते तत्पुन
१५४४	,,	४	ष्टास्ते ग	ष्टार्थे ग	ष्टोऽर्थे ते ग
५६३	,,	१	यद्विभागद्वय	यद्विभागद्वय	यद्विभाग भागद्वय
,,	,,	८	समेव, 'वि	त एवमेव वि	तत एव वि

*Appendix 2

पृष्ठं	स्तम्भः	पक्तिः	धर्मकोशः	आदर्शपुस्तकम्
६११	२	८	परिमे	परमे
६१२	१	१	द्विकं शत	द्विशता
,,	,,	२-३	मासग्रहण	मास
,,	,,	१९	क्येऽपि	कोऽपि
,,	,,	२१	यद्यपि नात्र सख्या संख्यान्तर	यथा मात्रान्यत्वे सङ्गान्तर
,,	२	२०	यदाहं	यदाय
६१३	१	२	गुण्य	गुण्य
,,	,,	९	वेत्याद्य	वेत्यादि
,,	,,	१५-६	तिः । रूपकाणि जनयितु	तिरूपकाणि जनयतु
,,	,,	२१	श्रुत्या	स्तुत्या
,,	२	१०	द्विगुणवृद्धयर्थ	द्विगुणो हि वृद्धयर्थ
,,	,,	१६	प्रति प्रतिभूः	प्रति प्रति प्रतिभूः
६१४	१	६	त्यस्य	न्यस्य
६१६	,,	२८	नैव दद्याद्यद्यप्यध	नैवादद्याद्यस्याध
,,	२	४	चिद्दूर	चिदून
,,	,,	५	च	न
,,	,,	२५	एषा क्रमेलकादिजीविनाम्	एषा क्रमेण कार्चेवाधिकादीनां
६१८	,,	३	त्वदीया युग्या	तदीय पुण्य
,,	,,	४	नेतु	हेतु
,,	,,	१६	आस्थितवान्	(०)
६३८	,,	३	पिण्डित	पिहित
,,	,,	४	विधः	विध
,,	,,	२२	इयत्वं चात्र	इयत्वात्र
,,	,,	२७	दच्यव	त्प्रच्यव
,,	,,	२८	तेनैते स्मृती विषयव्यवस्थया व्याख्येये	तेनैतत्स्मृतिव्यवस्थाया व्याख्येयम्

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्
६४०	१	९	धन	बन्धन
६४०	,,	१०	कदाचित्समत्या यत्र भुङ्क्ते भुक्तैव	कयाचिदतिमत्या-त्यन्तमुक्तैव
,,	,,	१६	एव दापयेत्	एवं वा
,,	,,	१६-७	मूल्यं हिरण्यं यत्र भुज्यते	मूलहिरण्यं
,,	२	२४	सर्ववृद्धिहानिः इह त्वर्धवृद्धिग्रहणमुच्यते	सर्वस्य हि ग्रहणमुच्यते
,,	,,	२५	द्धे	द्धो
,,	,,	,,	सर्वा	सर्व
,,	,,	२६	धने रहस्युपभुज्यमानभोगे	धनं रहस्युपभुज्य भोगेन चाधिर्न-इयति ।
६४१	१	२	द्धनं	द्धनं न
,,	,,	३	ख्यातं	ख्यानं
,,	,,	७	निधिन्या	निधिर्न्या
,,	,,	२१	मोक्तव्या	भोक्तव्या
६६३	,,	३	निग्रहे तन्निष्क्रयणं	निग्रहान्त विक्रयणं
,,	,,	१८-९	व्याख्येयमेव द्रष्टव्या	व्याख्यायन्ते द्रष्टव्ये
,,	,,	२६	यद्वा	यं चा
,,	२	१	जयेत्	जनं
,,	,,	८-९	यत्र तु न किंचित्पित्रा दत्तं	यत्किंचित्पित्रा दत्तं स
६६४	१	१०	षेधे दर्शनम्र	षेधदर्शनं म्र
,,	२	११	विज्ञातप्रकृतौ च	प्रतिज्ञातप्रकृतौ न
,,	,,	१३	उत	ततः
,,	,,	१४	येत्	यति

* अस्माभिः मेधातिथिभाष्यस्य अन्यान्यादर्शपुस्तकान्यालोच्य कल्पनया च स्वीकृता ये शोधनविशेषाः आदर्शपुस्तकापेक्षया इष्टतरा मतास्तेऽत्र सगृहीताः ।

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्
६८०	२	२८	नवो	जयो
६८१	१	६	योगक्रयादि	या गन्ध्यादि
,,	,,	१२	गः	गे
,,	,,	,,	महांश्च पी	महाशपी
६८१	,,	१३	दाप्य	वाप्य
,,	,,	१६	प्रेक्ष्य च	प्रेक्ष्यश्च
,,	,,	२०	वत्ता	वता
,,	,,	२०	करण	कारण
,,	२	२१	पत्रे चारो	यत्रैवारो
,,	,,	,,	यावती संभवेद्	यावत्सवत्सरा
,,	,,	२६-९	साक्षिण शक्त-श्रवणमात्रे साक्षि-त्वम्। यद्वृद्धि ददाति, तत्समक्ष-मधमर्णार्थसम्बन्धो-ऽपि प्रत्यक्षी-भवति। यतः श्रवणात् श्रवणे च साक्षिता भविष्यति। तत-श्चित्ते तिष्ठति धने दशवर्षोपेक्षि-तमित्यादि व्यन-श्वरो भविष्यति।	साक्षिशक्तश्रवण-मात्रे साक्षित्व ददाति तत्समक्ष-मधमर्णो अर्थस-न्धोऽपि प्रत्यक्षी-भवति। यतः श्रवणाश्रवणे च ततश्चित्तं तिष्ठति धने दशवर्षोपेक्षि-तमित्यादि व्यन-श्वरो भविष्यति।
७१७	१	१	इहा	नेहा
,,	२	५	कर्मोपकरण	कर्णोदकवद्
,,	,,	६	तव्यः	तव्यम्
,,	,,	८	द्वल	द्वाल
,,	,,	१४	न तु स्वगृह-बन्धनादि	ननु स्वगृहसब-न्धिधनादि
,,	,,	२३	कचन वृद्धवश	किचन वृद्धया
७१८	१	२२	गृहीतं गृहीत्वा वा	गृहीत्वा
,,	२	५	च धनमार्गणे	न धनमार्गेण
,,	,,	६-७	राजपुत्रैराहा-नयेत् अहमने-नैतत्प्रदेशे रुध्ये देहि धनमिति।	राजपुत्रैराहा-यनेनाईतरप्रदेशो-ऽनुरुध्येद हि धनमिति।
,,	,,	७	च पृष्टो	चापृष्टो

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्
७१८	२	९	दाप्यः	(०)
७२०	१	३	तोऽधमर्णः	तो धर्मेण
,,	,,	१६	दर्शनीयः	दर्शन
,,	,,	१७	सत्रे पञ्चकमिति, अर्थात्	सत्रेषु पञ्चकमि-त्यर्थः
७३८	२	२६	विधे न	विधेन
७३९	१	१३	नीयते	जीयते
,,	,,	१५-६	राज्ञामुद्रापह्न	राज्ञापह्न
,,	,,	२४	धानदेश	धानादेश
,,	,,	२८	अथा	यथा
,,	,,	३०	दिव्यादितो	दिव्योदितो
,,	२	१	एकदेशे एक-देशान्तरमन्तरेण	एकदेशान्तरेण
,,	,,	७	निक्षेपविधिरय-मुक्त्वा अ	निक्षिप्तविधिरय-मुक्तोऽ
७४०	१	८	माति	मान्ति
,,	,,	११	सत्या	सन्नो
,,	२	६	आनाय्य	मानशत्
,,	,,	१७	स्तस्य नि	स्तस्मान्नि
७४१	१	२१	प्यनिक्षिप्य	प्यपनीय
,,	,,	२४	प्रतिपद्य	प्रतिपाद्य
७४२	,,	११	रर्दनीयः	रर्दशनीयः
,,	,,	२१	विरुध्येत	विकल्पितः
,,	,,	२२	सिद्धो	सिद्धौ
,,	,,	२४	नेयम्	नेया
,,	२	९	सा सम	साम
,,	,,	१७	राजोप	राज्ञोप
७४३	१	३	हण	हृणे
,,	२	२१	धनवैकल्पिको	धनं वैकल्पिके
,,	,,	२८	जाति निग्राह्यां	जातिर्निग्राह्या
७५९	१	२१	येतेऽस्मिन्व्यव	णतेऽस्मिन्यव
,,	,,	२४	पात् कु	षाक्
७६०	,,	८	स्वत्वो	स्व वा
७७४	,,	८	णीयं	णीया
,,	२	१०	विंद्य	विंद्या
,,	,,	११	दक्षिणाः	दक्षिणा
७७६	१	२१	बहुनि कर्माणि	बहूनि कर्माणि
८२०	,,	५	त्याद्युपपद्यते	त्यापद्यते

पृष्ठं	स्तम्भः	पक्तिः	धर्मकोश.	आदर्शपुस्तकम्
८२०	१	२४	तव्यौ	तव्यो
,,	२	२०	मा	न
८२१	,,	२७	सर्वस्य प्रे	सर्वस्याप्रे
८२२	१	९	तस्यौ	तस्यो
,,	,,	१३	च्छतो न	च्छतो
,,	२	५	पितापुत्रौ	पुत्रौ
,,	,,	६	सह ध	सहजध
,,	,,	७	निर्धना को-ऽन्योऽयेति	निर्धनः कोऽन्या-र्थेऽनति
,,	,,	१०	यद्दासध	यदा स्वध
,,	,,	१३	तत्र तेषा स्वामित्वम् ।	तत्तेषा स्वामिनि
,,	,,	२१	दासधन	तासां धन
८२३	१	१५	भर्त्रा स्वामिना	स्वामी न
,,	,,	,,	धनमस्य	धनस्य
,,	,,	१६	गृह्णाति, अतो	ह्रीयतेऽनो
,,	,,	१७	दानं द्र	दानद्र
,,	,,	,,	तेनानुपनी	तेनोपनी
,,	,,	१८	स्वच्छन्दमेव	स्वगृहस्थमिव
८४५	,,	२६	त्यनेन	त्येन
८६४	,,	१६	देश., सं	देशसं
,,	,,	२२	तदय	तद्य
,,	,,	२४	महे	माह
,,	,,	,,	य.	ये
,,	,,	२९	त्तिना	त्तेन
,,	२	२०	ष्कान्	ष्का
,,	,,	२४	यद्वा	यदि च
८८०	१	६	क्रेतृकं कै	क्रेम(?)तृकं क
८८१	,,	१८	भवेत्	भावः
,,	,,	२१	यद्दत्तं	दत्तं
,,	२	७	ल्कदेयायाः क	ल्कादेर्यो यत्क
,,	,,	२२	णाक	ण क
,,	,,	२८	नेऽभिख्याप्य	नेनाख्याप्य
८८२	,,	२	मुक्तं अथ	मुक्त्वाऽथ
९०७	,,	१८	वरा श्रेष्ठां अवरा	वरान् श्रेष्ठान् अवरान्
,,	,,	२६	गोपाले	गोपालेन
९०८	१	१	विनिमय इति	विनिमयस्येति
,,	२	,,	पुरुषकारः	(०)

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्
९०८	२	९	युद्धोषेण	न्युद्घोषणम्
,,	,,	,,	पशुं	पशुः
,,	,,	१४	कथंचिज्ज्ञात	कथं विज्ञात
९०९	,,	१	सत्य	सत्या
,,	,,	१८-९	पक्षिवद्	(०)
९१०	१	८	वेगसंस्कारक्षय- भूमिस्थानानि	वेगसंस्कारक्षयो भूमौ स्थानादि
,,	२	७	स्थगयेत्	(०)
,,	,,	१५	पाले	(०)
,,	,,	१६-७	गृहादौ कार्य- न्यग्रतया	गृहे यदा नाप्यसौ
,,	,,	१८	रूपकमात्र- चेतन	रूपमात्रचेतन.
९११	१	१६	बहिर्ग्रामिकं	बाहिग्रामं
,,	,,	२२	फलं देयम्	फलदेये
,,	,,	२३	च	च ते
,,	२	१३	स्यास	स्य स
,,	,,	१५	मर्थं	मर्थं
१०४१	१	१८	तथाविधा या	तथाविधायाः
,,	२	८	कन्या अविकृता	कन्यादिविकृता
१०४२	,,	,,	स्या	स्य
,,	,,	२३	व्या	व्यः
१०४४	१	२०	शुल्के	शुल्केन
१०४५	,,	४	कृताः	गताः
,,	,,	१३	चशब्देन	चशब्द
,,	२	११	रक्षणं कुर्युः	रक्षणमकुर्वतः
,,	,,	१३	चा-	च
१०४६	,,	१६	निवृत्तेर्न रक्षा	निवृत्ते रक्षा
,,	,,	,,	प्रसिद्धमात्मोप	प्रसिद्धात्मनोप
१०४७	१	९	च्येत	च्यते
,,	२	८	शुद्धान्ता	शुद्धान्ना
,,	,,	,,	नादितो	नादिना
,,	,,	१९	यत्स्यादासदी	यस्यासंदी
१०४८	,,	२१	यां	या
१०४९	१	८	शरीर	शील
,,	२	६	दविहितमन्त्रे	दविशेषेण
१०५२	१	५	वत्	च
,,	,,	१०	शोभा	सेवा
१०५४	,,	६	निश्चायकः	निश्चलः

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्
१०५५	१	१४	अवियुक्तौ	नियुक्तौ
१०५६	२	२७	भृत्याद्यति	स्यादेवाति
१०५७	१	१२	वेदन, न	वेदनेन
,,	,,	३०	ज्ञापनानव	शापनाव
,,	,,	३१	विधान	विधानयोः
१०५८	,,	१३	मात्रया	मात्रेण
१०६१	,,	२	अगर्हितानि वस्तूनि व्यज	गर्हितानि वस्तूनि विज
,,	,,	१७	नास्या जातु	नास्याज्ञाने
,,	,,	२९	पूर्णे तु	पूर्वे तु
,,	,,	३१	विहि	निहि
,,	२	९-१०	भवन्नीति	भवतीति
,,	,,	१२	यज्ञि	याज्ञि
,,	,,	२९	विप्रसुता षट् राजन्या	विपसूता. षट् राजन्याः
१०६५	१	९	याश्वाक	याश्व क
,,	,,	३१	स्त्रियाः	स्त्रिया
,,	२	१२	घृताक्त इति	(०)
,,	,,	१८	गमन न	गमनेन न
,,	,,	२७	नासपत्ति	न सपत्ति
,,	,,	२९	गुण	गुणा
१०६६	१	६	वत्। मन्त्रस्या	ता तस्या
,,	२	१६	तयोरिव मृत	तयोर्मृत
,,	,,	१७	त्यभेदेन विधि- वत्प्रति	त्तिभेदः। न च विध्यभावप्रति
१०६९	१	२९	निजः सो	निजसो
,,	२	७	अधिगम्यैना यथा	(०)
१०७०	,,	१२	त्वेव	ष्वेव
१०७२	,,	१०	भार्याः	भार्यायां
११२६	,,	२४-५	षाश्रव	षश्रव
११२७	१	२८	विपाशन	विपासन
,,	२	२५	पूर्वोत्तरप्र	पूर्वोक्तप्र
११२८	,,	१	विनियोज्य	नियोज्य
,,	,,	४	एव वाग्नि	एवाग्नि
,,	,,	१८	चाऽग्नौ	वाऽग्नौ
,,	,,	२०	गृह्य	गृह
११४९	,,	२२	समये संक्रामि- तमिति।	शयने सक्रामति

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्
११९०	१	२०	योऽत्र	यत्र
१२०८	,,	२८-९	विभाषैक	विधावेक
१२०९	२	२-३	प्रचक्षत इत्याह	प्रवेत्रेत्याह
१२१०	,,	३	ममैत	मर्यैत
१२१२	१	१०	इत्वोप	दन्योप
१२१३	,,	३	मित्र	मन्त्रे
,,	२	८	चेत्स्वय विधा- शौयादिना (from Bā- lambhatti P.153)	ग्रहणादन्यदर्थय- न्पित्रा
,,	,,	९	तदकामो	तदाकामो
,,	,,	१८	नास्ति	(०)
१२३६	१	१३	नात्राकार- प्रश्लेषः	नात्रानट- त्प्रश्लेषः
,,	२	१	शा.	शः
,,	,,	२	याः	यः
१२४५	,,	२९	माणा	माणौ
,,	,,	३०	जातानां	जातीयाना
१२४६	१	१४	कीनाशः कर्षकः	एकस्या तु विजा. तीयाया
,,	,,	१६	गोवृषो वाहः	(०)
,,	,,	१७	'शुन	सुत
१२४८	,,	१३ ४	क्षत्रियजाताश्च स्वजातीय- विजातीयाः शूद्रपर्यन्ताः	क्षत्रियाजातास्व- जातीयविजातीयासु शूद्रपर्यन्तासु
१२४९	,,	१७	सवर्णवद्वि	सवर्णाद्वि
१२९४	,,	१५	भिसधि	भिसबन्ध
,,	,,	१६	प्यभिसधिः	प्यभिसबन्धे
१२९५	,,	७	यात्र	याय
१२९८	२	१४-५	ततश्च...तद्धन (पुत्रिकाभर्ता हरेतैवाविचार- यन्। यदि) न सस्कि	ततश्च तद्धन...न सस्तू
,,	,,	१८	परिपूर्णत्वायार्थ- वादस्य	अपरिपूर्णत्वायार्थ- वत्तस्य
,,	,,	,,	तदीय	तदय

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्
१२९८	२	१९	स्तथा धन न	स्ते न
,,	,,	२०	इति सिद्धे	इतः साध्य
,,	,,	२४	सस्कारहीना	देवहिता
,,	,,	२५	त्पुसाऽस	त्पुसा स
,,	,,	२६	युङ्क्ते' इति ऊढा	युङ्क्तेति' रूढा
१२९९	१	१३	अनूढा	चोढा
,,	२	४	सस्काराभावा	स्वकरणाभवा
,,	,,	६	स्वः स्याद	स्वस्याद
,,	,,	७	भावेन	भावो न
,,	,,	१८	र्थाभेदेऽप्यु	र्थभेदे चाप्यु
,,	,,	१९	एव च	चैव
,,	,,	,,	र्यदि पदार्थः स एव	रिति पदार्थस्तु
,,	,,	२३	सर्वत्र	सत्र
,,	,,	२५	पुत्र	पुण्य
१३००	,,	५	स्तद्विशेषो	स्त निवेशो
१३०३	१	४	मपि	मन्य
,,	,,	९	था	च्च
,,	,,	२०	धार्थं	धात्र
,,	२	१	भूयसा	भूयास
,,	,,	४	ज्ञापचारे	ज्ञोपचार
,,	,,	५	णोड	णो
१३०४	,,	४	धातां' 'त	द्यात्त
,,	,,	७	नो मातेति विनियोग	नाधिति योग
१३०५	,,	२०	यमिति	य इति
१३०६	१	३	पुत्र	पुत्रा
,,	२	१	त्पुत्रकार्या-धिकारी सः	त्पुरुषकार्या-धिकारिणः
,,	,,	१८	प्रज	प्रजा
,,	,,	१२	पातित्येन	प्रत्यक्षत्वेन
,,	,,	,,	क्वचिदपि	क्वचिदेव
१३१०	१	१८	त्यर्थस्तथापि	त्यर्थेऽपि
,,	,,	१९	अपि तु	(०)
,,	,,	२८-९	त्रान्यस्य	त्रस्यान्य
,,	२	१२-३	क्रियते इति क्रिया	क्रियते

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्
१३१०	२	१३	मिति विधि-स्तस्य	मित्यस्य विधि
१३१६	,,	२	मन्येत	मन्यन्ते
,,	,,	४	प्रजया	सप्रजया
,,	,,	२४	त्सोद्धारा	त्सोदरे
,,	,,	२९	'भ्रातरः समेत्य' इति	भ्रातरि सहिते
१३१८	१	६	नोच्येत	नोच्यते
,,	,,	१०	स्थानं, न ह्य	स्थाने ह्य
१३२२	२	११	षधेन	षधे
,,	,,	१२-३	क्षेत्र...तस्य पिता	(०)
,,	,,	१६	मात्रा धने	मातृधने
,,	,,	१७	चारिणा	चारिणः
,,	,,	,,	तेन च	न च
१३२३	१	१	दर्शितम्	दर्शयति
१३२६	२	५	अतोऽस्य	अतोऽस्ति
,,	,,	१३	दत्रिमे	कृत्रिमे
,,	,,	१४-५	त्वाह पू	त्वाहापु
१३२७	,,	६	स्वधा	(०)
,,	,,	७	ददतः	(०)
,,	,,	९	विद्धानाम्। द्या	विद्धद्या
,,	,,	१३	इति	(०)
,,	,	१४	युक्त, तेन	दुक्तं न
१३९२	,,	२५	निमित्ते	नैमित्ते
,,	,,	२६	न च	ननु च
,,	,,	,,	सिद्धैव	सिद्धे वा
१३९३	१	२३	वा सुपान	वानुमासं
,,	२	८	योग्य	योग
,,	,,	,,	कारोऽश	कारः श
१३९४	१	६	शक्तया	शक्नोति
,,	२	८	वात	वान्त
१३९७	,,	२१	परधन	परे धनेन
,,	,,	२२	सर्वज्ये	सर्वे ज्ये
,,	,,	२३	न्तव्यः अवि	न्तव्यमवि
,,	,,	२४	धनदण्ड-श्चार्था	धन चार्था

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्
१३९८	१	१५-९	अनादेशकृता अकृतदारा दासीभार्याः। पतितस्य पृथक् प्रतिषेधात् अभ्यासे वर्त- मानानामेषां प्रतिषेधः। न चादत्वा उप- युक्त एषां धनादानीयम- क्रीकृत्य यदि यौतकं यां वृद्धि नयेत्। (I. o. Mss.)	(०)

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	आदर्शपुस्तकम्
१४१७	१	१४	चाप्रत्ता	चोपात्ता
,,	,,	२२	तुल्य, वा	तुल्यवा
,,	२	२१-२	दस्वर्णं पैतृकं च यत्। भ्रातृभिस्त- द्विभक्त- व्यम्।	(०)
१५४४	१	७	हीयेत पातित्या	हीयते पादेत्या
,,	२	४	ये च	येषा
,,	,,	२२	तरस्मिन् प्रमीते सो	तरप्रमेयसो
,,	,,	२४	परिलोपो	परलोको
१५६३	,,	६	दुक्तं 'दद्यादप- हरेच्चांश	दुत्थं दद्यादपरे- षां स्वांश
,,	,,	९	या तु बुद्धया(?)	यानुबुद्धवा

Appendix 3

*असहायभाष्यम्

पृष्ठं	स्तम्भः	पंक्तिः	असहायभाष्यम्
६२३	१	१-२६	अत्रार्यं ऋणशब्दः.....वसर वक्ष्यामः।
६२५	,,	४-६	किं यदिद...एतदुच्यते।
,,	,,	१२-५	सा च कायाऽ. .एव द्रष्टव्यः।
,,	२	२-८	अनया.....व्याख्याता।
६२७	,,	२४	मार्गणक
६४८	१	९	अत आधिभेदो भवति।
,,	२	११	घटितसुवर्णरौप्यादिः
,,	,,	१२	गुपू रक्षणे धातुः। तेन
६५०	१	१०	स पूर्वं एवावधौ
,,	,,	१८-२२	वर्धमान.....निष्क्रयः।
६६९	२	१३-५	अमुकादित्य.....कञ्चित्
,,	,,	२७-२९	युक्तिभिस्तु.....युक्त-
६७०	१	१-५	विशेषः।
,,	२	१३	परोक्ष.....तस्मै
,,	,,	१४-८	यच्च न.....योरपि ॥'

पृष्ठ	स्तम्भः	पंक्तिः	असहायभाष्यम्
६७०	२	२१-२	ऋणिक.....प्रमाणमिति।
६९१	,,	१५-६	कृती स्फुटोऽपि ..मबुद्ध्वा...
,,	,,	१६-२३	ईदृश च.....ग्राह्यन्ते।
६९२	,,	२१-३	
६९३	१	१-३६	'एतत्पुरुषसता...सिद्धिर्निर्ऋणत्वे।
,,	२	१-१३	
६९४	१	१०-११	श्रोत्तर.....नियोगो
,,	,,	१५-७	तथा च.....प्रयच्छन्ति।
,,	,,	१८-२०	महाजनेन.....धारितं
,,	,,	२३-३६	तदुभयमपि.....विधि-
,,	२	१-३६	रुक्तः।
६९५	,,	१२-४	तच्च.....भवति।
,,	,,	२३	
६९६	१	१-४	अत्र पितुः.....स्पितम्।
,,	,,	४	दासीसंबन्धे
,,	२	२-३	उद्यानकं.....कृत

* प्रो. जॉलि-महोदयेन स्वपादित-नारदस्मृतावनुद्धृतासहायभाष्यांशानां संग्रहः।

पृष्ठं	स्तम्भः	पंक्तिः	असहायभाष्यम्
६९६	२	२४	कुटुम्बप्रतीत
६९७	१	३-५	व्यवहारकश्च... . स्थितः (?)
६९८	२	२०-२१	आपत्काले..... ...भर्तुः ... प्राप्यामिति ।
७००	१	५-६	अथ ऋणिकस्य.....ततस्तां
,,	,,	७	धनिक एव तत्प्रतिगृह्णाति ।
,,	,,	१९-२२	यः यस्य.....इति न्यायात् ।
,,	२	२८-९	यस्य पुनः.....दधादि-
७०१	१	१-६	त्युक्तम् ।
,,	,,	१२	निर्भोग्या
७०४	२	६-८	येन कथम...व्ययेदिति
७०५	१	१३-६	ऋणिकात्...पत्र इति ।
७०६	,,	१७-९	तथा चोक्त.. .चीरके ॥'
७२४	,,	१५	केवल राज्ञो वा गुरुस्थानमितस्य
७२५	१	५	विनय
,,	,,	५-६	मिथ्या कस्य अप्रति ...
७४६	२	१६-२१	यः पुनः...भवति किल
,,	,,	२५-७	यत्र चाय...हितमिति ।
७४८	१	७-१०	यस्तु निक्षेपो ..न भवति ।
,,	२	४-६	तत्र निक्षि...येत् इति ।
७४९	१	१६-८	यो निक्षिप्तं...द्रव्यचौरः
,,	२	२-५	अन्वाहित...मुच्यते ।
७४९	,,	८-९	एतेषु. ..रिति ।
७८३	,,	१६-८	इति सभूय...द्वितीयः ।
८०१	१	३	लब्धया
,,	,,	२०	पुनरसौ.. संजात (?)
८२७	२	११-४	यः शिष्यः...कर्मणः
,,	,,	१४	भवति निःशेष

Appendix 4

पृष्ठं	स्तम्भः	पंक्तिः	धर्मकोशः	*असहायभाष्यम्
६२३	१	९	वृद्धिः	वृद्धि
,,	,,	१७	युक्तमेव	युक्त एव
,,	,,	२१	क्षमः	मोक्षः
,,	,,	२२	प्रसाद	प्रासाद
,,	,,	२५	पोत्तम	पोक्तम
६२४	२	८	शते मास	शतमास
६२५	१	४	यदिद मुनि-प्रोक्त	यदि त मुनि-मक्तं
,,	,,	७	स्रावणी	श्रावणी
,,	२	४	द्र.४०	मास ४०
६४८	,,	१८	स्याभोगः	स्य भोगः
६७०	१	२६	समुपस्थापक	समस्थायक
,,	,,	३२	पुरस्ताद्	पुरः तद्रा
,,	२	१५	ण प्रतिभू	णां प्रतिरूप
६९४	१	७	श्रीधरस्य	श्रीधरः
,,	,,	१०	श्रोत्तर	श्रोक्त
,,	,,	२८	अर्थः प्र	अर्थप्र
,,	,,	२९	सनिधिः	सविधिः
,,	,,	३६	ण्णस्त्वम् ।	ण्णत्वम् ।
,,	२	१५	त्प्रपौत्रा	त्पौत्रा
६९४	२	३१-२	अयथार्थकरणात्	यथार्थकात्
६९६	,,	२	उद्यानक (?)	उद्यामक
६९९	१	१०	कुटुम्बार्थे कृत	कुटुम्बस्य प्रार्थ-कृत
७०१	,,	३	पुत्रयो	पुत्रहारिणो
,,	,,	७	पुत्रः स्त्रीहारी च विद्यते	पुत्रहारी च विद्यते
,,	,,	१२	निर्भोग्या	निर्भाग्या
७०४	,,	१	आपदु	यदु
७४६	२	१८	निराकरोति	विकारीति
,,	,,	२०	मतिविस्रम्भाद-विशङ्कितो	पतिविश्रम्भादपि शङ्कितो
७४९	१	१६	मिथ्याशया... ...द्वा	मिथ्याशाव्याद्वा
७५०	,,	४	न्यासविधिः	न्यास (जॉ.)
७८१	२	१०	सामु	साम
८२७	,,	११	कृत	वृत्ति
,,	,,	११-२	शुश्रूषेत	रूषाथयेजल्पतः त
			शिल्पतः, कृतं	

* 'भाडारकर-प्राच्यविद्यासशोधनमदिर' पुणे, इत्यत्र सगृहीतं कल्याणभट्टसशोधितासहायभाष्यस्य लिखित पुस्तकं सर्वत्र आदर्शत्वेन स्वीकृतम ।

विवादपदेषूद्धृतग्रन्थपरिचयः

क्रमांकः	ग्रन्थः	ग्रन्थप्रकाशनादिस्थानम्
१	ऋग्वेदसंहिता	F. Max Müller (2nd edition).
२	तैत्तिरीयसंहिता	Anandashram, Poona.
३	काठकसंहिता	Dr. Leopold Von Schroéder, Leipzig.
४	कपिष्ठलसंहिता	Dr Raghuvira, M.A.,Ph.D., Lahore.
५	मैत्रायणीयसंहिता	Dr. Leopold Von Schroeder, Leipzig.
६	शुक्लयजुर्वेदकाण्वसंहिता	The Chowkhamba Sanskrit Series, Benares.
७	शुक्लयजुर्वेदमाध्यंदिनसंहिता	Nirnayasagar Press, Bombay.
८	सामवेदसंहिता	Vedapracharak Press, Jagarawa, Dist. Ludhiyana.
९	अथर्ववेदसंहिता	Shankar Pandurang Pandit, Bombay.
१०	ऐतरेयब्राह्मणम्	Anandashram, Poona.
११	शाङ्ख्यायनब्राह्मणम्	,, ,,
१२	तैत्तिरीयब्राह्मणम्	,, ,,
१३	शतपथब्राह्मणम्	Vaidikayantralaya, Ajmer.
१४	ताण्ड्यब्राह्मणम् (पञ्चविंशब्राह्मणम्)	Asiatic Society of Bengal, Calcutta.
१५	सामविधानब्राह्मणम्	Shri Mahendranath Sarkar, Calcutta.
१६	सामन्त्रब्राह्मणम् (मन्त्रब्राह्मणम्)	Satya Vrata Sāma-S'rami, Calcutta 1890.
१७	सहितोपनिषद्ब्राह्मणम्	A. C. Burnell, Manglore, 1877.
१८	जैमिनीयब्राह्मणम्	Von W Caland, Amsterdam, 1919.
१९	जैमिनीयोपनिषद्ब्राह्मणम्	H. Oertal, Journal of the American Oriental Society.
२०	गोपथब्राह्मणम्	Jiwananda Vidyasagar, Calcutta.
२१	ऐतरेयारण्यकम्	Anandashram, Poona.
२२	शाङ्ख्यायनारण्यकम्	,, ,,
२३	तैत्तिरीयारण्यकम्	,, ,,
२४	बृहदारण्यकोपनिषद्	Nirnayasagar Press, Bombay.
२५	छान्दोग्योपनिषद्	,, ,, ,,
२६	कठोपनिषद्	,, ,, ,,
२७	महानारायणोपनिषद्	,, ,, ,,
२८	कौषीतकिब्राह्मणोपनिषद्	E. B Gowell, Calcutta 1861
२९	निरुक्तम्	Anandashram, Poona
३०	आश्वलायनश्रौतसूत्रम्	,, ,,
३१	शाङ्ख्यायनश्रौतसूत्रम्	Dr Alfred Hillebrandt, Ph D..
३२	आपस्तम्बश्रौतसूत्रम्	Dr Richard Garbe, Calcutta
३३	कात्यायनश्रौतसूत्रम्	Chowkhamba Sanskrit Series, Benares.
३४	लाट्यायनश्रौतसूत्रम्	Anandachandra Vedantavagish, Calcutta 1872.
३५	मानवश्रौतसूत्रम्	J. M. Van Gelder, Leiden.
३६	आश्वलायनगृह्यसूत्रम्	Niranayasagar, Bombay.
३७	शाङ्ख्यायनगृह्यसूत्रम्	The Chowkhamba Sanskrit Series, Benares.
३८	आपस्तम्बगृह्यसूत्रम्	Anandashram, Poona.
३९	बौधायनगृह्यशेषसूत्रम्	L. Shrinivasacharya, Mysore, 1904.
४०	हिरण्यकेशीयगृह्यसूत्रम्	Dr J. Kirste, Vienna, 1889
४१	पारस्करगृह्यसूत्रम्	Ladharam, Fort Printing Press, Bombay.
४२	खादिरगृह्यसूत्रम्	Government Oriental Library Series, Mysore.

क्रमांकः	ग्रन्थः	ग्रन्थप्रकाशनादिस्थानम्
४३	गोभिलगृह्यसूत्रम्	Asiatic society of Bengal, Calcutta.
४४	मानवगृह्यसूत्रम्	Vedaprakasha Press, Itawa.
४५	वैतानसूत्रम्	Dr. Richard Garbe, Sanskrit Text Society, London.
४६	कौशिकसूत्रम्	Journal of the American Oriental Society, Vol. XIV.
४७	जैमिनीयसूत्रम्	Anandashram, Poona
४८	ऋग्विधानम्	Auctor Rudolf Meyer, Berlin, 1873
४९	बृहद्देवता	Asiatic Society of Bengal, Calcutta.
५०	गौतमधर्मसूत्रम्	Government Oriental Library Series, Mysore.
५१	आपस्तम्बधर्मसूत्रम्	The Chowkhamba Sanskrit Series Benares.
५२	बौधायनधर्मसूत्रम्	Anandashram, Poona.
५३	हिरण्यकेशीयधर्मसूत्रम्	(Mss.) B. O. R. Institute, Poona.
५४	वसिष्ठस्मृतिः	(1) Anandashram (क) Poona, (2) Manmathnath Datta (ख) Calcutta, 1909.
५५	विष्णुस्मृतिः	Manmathnath Datta, Calcutta
५६	महाभारतम्	Chitrashala Press, Poona & Kumbhaghonam Edition.
५७	कौटिलीयमर्थशास्त्रम्	Trivandrum Sanskrit Series.
५८	मनुस्मृतिः	(1) V. N. Mandlik (क) Bombay, (2) J. R. Gharpure (ख) Bombay; (3) Jiwananda Vidyasagar (ग) Calcutta; (4) Nirnayasagar Press (घ) Bombay.
५९	वाल्मीकिरामायणम्	Kumbhaghonam Edition.
६०	याज्ञवल्क्यस्मृतिः	J.R.Gharpure, Bombay & Nirnayasagar Press, Bombay.
६१	नारदीयमनुसहिता	Trivandrum Sanskrit Series.
६२	नारदस्मृतिः	Prof. Julius Jolly, The Asiatic Society, Calcutta.
६३	पराशरस्मृतिः	Jiwananda Vidyasagar, Calcutta.
६४	बृहद्यमस्मृतिः	Anandashram, Poona.
६५	वृद्धहारीतस्मृतिः	,, ,,
६६	लघुहारीतस्मृतिः	,, ,,
६७	अग्निपुराणम्	,, ,,
६८	ब्रह्मपुराणम्	,, ,,
६९	शुक्रनीतिसार.	Satyasadan Press, Allabag.

क्रमांकः	ग्रन्थः	ग्रन्थकर्ता	ग्रन्थवर्णनम्	ग्रन्थकालः	ग्रन्थप्रकाशनादिस्थानम्	
७०	असहायभाष्यम्	असहायाचार्यः	नारदटीका	A. D. 700-750	(1) B. O R. Institute, Poona. (2) Julius Jolly's edition.	लिखितः मुद्रितः
७१	विश्वरूपः	विश्वरूपाचार्यः	याज्ञवल्क्यटीका	,, ,, 720-773 by K. L. Daptari. ,, ,, 800-825 by P. V. Kane.	Trivandrum Sanskrit Series.	,,
७२	मेधातिथिभाष्यम्	मेधातिथिः	मनुटीका	,, ,, 825-900	(1) J. R. Gharpure, Bombay; (2) V. N. Mandlik, Bombay.	,,
७३	गोविन्दराजीया	गोविदराजः	,,	,, ,, 1050-1100	V. N. Mandlik, Bombay.	,,
७४	मिताक्षरा	विज्ञानेश्वरः	याज्ञवल्क्यटीका	,, ,, 1070-1100	(1) J. R. Gharpure, Bombay; (2) Nirnayasagar Press, Bombay.	,,
७५	व्यवहारमातृका	जीमूतवाहनः	मूलग्रन्थः	,, ,, 1090-1130	Asiatic Society of Bengal, Calcutta.	,,
७६	दायभागः	,,	,,	,, ,, ,, ,,	,, ,, ,, ,,	,,
७७	अपरार्कः	अपरादित्यः	याज्ञवल्क्यटीका	,, ,, 1115-1130	Anandashram, Poona.	,,
७८	व्यवहारकल्पतरुः	लक्ष्मीधरः	मूलग्रन्थः	,, ,, 1100-1150	(1) Prajnapathashala, Wai, (Satara) (2) Bikaner Sanskrit Mss. Library.	लिखितः ,,
७९	मस्करिभाष्यम्	मस्करी	गौतमधर्मसूत्रटीका	,, ,, 1100-1300	Govt Oriental Library Series, Mysore.	मुद्रितः
८०	मिताक्षरा	हरदत्तः	,,	,, ,, ,, ,,	Anandashram, Poona.	,,
८१	उज्वला	,,	आपस्तम्बधर्मसूत्र-टीका	,, ,, ,, ,,	The Chowkhamba Sanskrit Series, Benares.	,,
८२	मन्वर्थविवृतिः	सर्वज्ञनारायणः	मनुटीका	,, ,, ,, ,,	V N. Mandlik, Bombay.	,,
८३	स्मृतिचन्द्रिका	देवण्णभट्टः	मूलग्रन्थः	,, ,, 1150-1225	J. R Gharpure, Bombay.	,,
८४	मन्वर्थमुक्तावलिः	कुल्लूकभट्टः	मनुटीका	,, ,, 1150-1300	(1) V N. Mandlik, Bombay; (2) Nirnayasagar Press, Bombay.	,,
८५	विवादरत्नाकरः	चण्डेश्वरः	मूलग्रन्थः	,, ,, 1314-1324	Asiatic Society of Bengal, Calcutta.	,,
८६	स्मृतिसारः	हरिनाथः	,,	,, ,, 1300-1350	India Office Mss., London.	लिखितः

क्रमांकः	ग्रन्थः	ग्रन्थकर्ता	ग्रन्थवर्णनम्	ग्रन्थकालः	ग्रन्थप्रकाशनादिस्थानम्	
८७	पराशरमाधवः	माधवाचार्यः	मूलग्रन्थः	A. D. 1330-1385	Bombay Sanskrit Series.	मुद्रितः
८८	मदनरत्नम्	मदनसिंहदेवः	,,	,, ,, 1425-1450	Bikaner Sanskrit Mss. Library.	लिखितः
८९	सुबोधिनी	विश्वेश्वरभट्टः	याज्ञ मिताक्षराटीका	,, ,, 1360-1390	J. R. Gharpure, Bombay.	मुद्रितः
९०	मदनपारिजातः	,,	मूलग्रन्थः	,, ,, ,, ,,	Asiatic Society of Bengal, Calcutta	,,
९१	दीपकलिका	शूलपाणि·	याज्ञवल्क्यटीका	,, ,, 1375-1460	India Office Mss., London.	लिखितः
९२	व्यवहारचिन्तामणिः	वाचस्पतिमिश्रः	मूलग्रन्थः	,, ,, 1450-1480	Baroda Oriental Mss. Library.	,,
९३	विवादचिन्तामणिः	,,	,,	,, ,, ,, ,,	Vyenkateshwar Press, Bombay.	मुद्रितः
९४	व्यवहारनिर्णयः	वरदराजः	,,	,, ,, 1450-1500 by P. V Kane ,, ,, 1100-1350 by P. K. Gode	India Office Mss. Library.	लिखितः
९५	स्मृतिचिन्तामणिः	गंगाधरः	,,	,, ,, 1450-1500	,, ,,	,,
९६	दण्डविवेकः	वर्धमानः	,,	,, ,, ,, ,,	Gaekwad's Oriental Series, Baroda.	मुद्रितः
९७	नृसिंहप्रसादः	दलपतिराजः	,,	,, ,, 1490-1512	Saraswatibhuvan, Benares.	लिखितः
९८	व्यवहारतत्त्वम् } स्मृतितत्त्वस्य	रघुनन्दनः	,,	,, ,, 1490-1570	Jiwananda Vidyasagar, Calcutta.	मुद्रितः
९९	दायतत्त्वम् }					
१००	सरस्वतीविलासः	श्रीप्रतापरुद्रदेवः	,,	,, ,, 1497-1539	Govt O Library Series, Mysore.	,,
१०१	मन्वर्थचन्द्रिका	राघवानंदः	मनुटीका	Later than 1400 A. D.	V. N. Mandlik, Bombay.	,,
१०२	विवादचन्द्रः	मिसरुमिश्रः	मूलग्रन्थ	A. D. 1469-1505 by Ramkrishna Jha. In the 15th Century by P. V Kane	Maithil Nibandha Mala Patna	,,
१०३	वैजयन्ती	नंदपण्डितः	विष्णुटीका	A. D. 1595-1630	(1) Baroda Oriental Mss. Library. (2) B O. R. Institute, Poona	लिखितः
१०४	दत्तकमीमासा	,,	मूलग्रन्थः	,, ,, ,, ,,	Yajneshawar Bhattacharya, (2nd Edition) Calcutta.	मुद्रितः
१०५	~~नारदीयमनुसंहिताभाष्यम्~~	भवस्वामी	नारदटीका	.. . ...	Trivandrum Sanskrit Series	,,
१०६	वीरमित्रोदयः	मित्रमिश्रः	याज्ञवल्क्यटीका	,, ,, 1540	The Chowkhamba Sanskrit Series, Benares.	,,
१०७	व्यवहारप्रकाशः	,,	मूलग्रन्थः	,, ,, ,,	,, ,,	,,

१०८ संस्कारप्रकाशः	मित्रमिश्रः	मूलग्रन्थः	A. D. 1540	The Chowkhamba Sanskrit Series, Benares.	मुद्रितः
१०९ व्यवहारोद्योतः	दिनकरभट्टः	,,	,, ,, 1575-1640	Prajñapathashala, Wai (Satara).	लिखितः
११० दायभागनिर्णयः	भट्टोजीदीक्षितः	,,	,, ,, 1575-1650	(Ms) B. O. R. Institute, Poona.	,,
१११ व्यवहारमयूखः	नीलकंठः	,,	,, ,, 1540 by Chinnaswāmi ,, ,, 1610-1660 by P. V. Kane	J. R. Gharpure, Bombay.	मुद्रितः
११२ विवादताण्डवम्	कमलाकरः	,,	,, ,, 1610-1640	Lakshmi Vilas Press, Baroda.	,,
११३ निर्णयसिन्धुः	,,	,,	,, ,, ,,	The Chowkhamba Sanskrit Series, Benares.	,,
११४ राजधर्मकौस्तुभः	अनंतदेवः	,,	,, ,, 1650-1675	Gaekwad's Oriental Series, Baroda.	,,
११५ बालम्भट्टी	बालभट्ट पायगुडे	याज्ञ. मिताक्षराटीका	,, ,, 1730-1800	J. R. Gharpure, Bombay.	,,
११६ विवादार्णवसेतुः (विवादार्णवभंजनः)	वीरेश्वरः वाणेश्वरः by Kane	मूलग्रन्थ	,, ,, 1773	Venkateshwar Press, Bombay.	,,
११७ विवादभङ्गार्णवः	जगन्नाथः	,,	,, ,, 1776	Govt. Orienal Library Series, Mysore.	लिखितः
११८ व्यवहारप्रकाशः	शरभोजी	,,	,, ,, 1798-1833	Saraswati Mahal Library, Tanjore.	,,
११९ व्यवहारार्थसमुच्चयः	,,	,,	,, ,, ,, ,,	,, ,, ,, ,,	,,
१२० विवादचन्द्रिका	अनंतरामः	,,	In the end of 18th Century A D	Prajñapathashala Wai, Satara)	,,
१२१ विवादव्यवहारः	गोपालसिद्धांतवागीशः	,,	After 15 th Century ,, ,,	B. O R. Institute, Poona.	,,
१२२ नन्दिनी	नन्दनाचार्यः	मनुटीका	.. .. ..	V. N Mandlik, Bombay.	मुद्रितः
१२३ मनुभावार्थचन्द्रिका	रामचंद्रः	,,	... ..	,, ,,	,,
१२४ बौधायनविवरणम्	गोविंदस्वामी	बौधायनधर्मसूत्रटी.	. ... ..	The Chowkhamba Sanskrit Series. Beneres	,,
१२५ कृष्णम्भट्टी	कृष्णभट्टः	निर्णयसिन्धुटीका		,, ,, ,,	,,
१२६ दत्तकचन्द्रिका	कुबेर	मूलग्रन्थ.		Yajneshwar Bhattacharya (2nd Ed.) Calcutta.	,,
१२७ संस्काररत्नमाला	गोपीनाथभट्टः	,,		Anandashram, Poona	,,
१२८ शाबरभाष्यम्	शबरस्वामी	टीकाग्रन्थः	,, ,, 5th Century	,, ,,	,,

क्रमांकः	ग्रन्थः	ग्रन्थकर्ता	ग्रन्थवर्णनम्	ग्रन्थकालः	ग्रन्थप्रकाशनादिस्थानम्	
१२९	नीलकण्ठी टीका	नीलकण्ठः	महाभारतटीका	In the 17th Century A.D. by Dr. V. S Sukhathankar	Nirnayasagar Press, Bombay.	मुद्रितः
१३०	श्रीमूला	गणपतिशास्त्री	कौटिलीयार्थशास्त्रटी.	A D. 1925	Trivandrum Sanskrit Series.	,,
१३१	ऋग्वेदसंहितासायणभाष्यम्	सायणाचार्यः	टीकाग्रन्थः	,, ,, 1330-1385	F Max Muller (Second edition.).	,,
१३२	तैत्तिरीयसंहितासायणभाष्यम्	,,	,,	,, ,, ,,	Anandashram, Poona.	
१३३	शुक्लयजुर्वेदमाध्यदिनसहिता-उवटभाष्यम्	उवटाचार्यः	,,	,, ,, 1010-1050	Nirnayasagar Press, Bombay.	,,
१३४	शुक्लयजुर्वेदमाध्यदिनसंहिता-महीधरभाष्यम्	महीधराचार्यः	,,	... ...	,, ,, ,,	,,
१३५	शुक्लयजुर्वेदकाण्वसंहितासायण-भाष्यम्	सायणाचार्यः	,,	,, ,, 1330-1385	The Chowkhamba Sanskrit Series, Benares.	,,
१३६	अथर्ववेदसंहितासायणभाष्यम्	,,	,,	,, ,, ,,	Shankar Pandurang Pandit, Bombay.	,,
१३७	ऐतरेयब्राह्मणसायणभाष्यम्	,,	,,	,, ,, ,,	Anandashram, Poona	,,
१३८	तैत्तिरीयब्राह्मणसायणभाष्यम्	,,	,,	,, ,, ,,	,, ,,	,,
१३९	ताण्ड्यब्राह्मणसायणभाष्यम्	,,	,,	,, ,, ,,	Asiatic Society of Bengal, Calcutta.	,,
१४०	सामविधानब्राह्मणसायण-भाष्यम्	,,	,,	,, ,, ,,	Shri Mahendranath Sarkar, Calcutta.	,,
१४१	ऐतरेयारण्यकसायणभाष्यम्	,,	,,	,, ,, ,,	Anandashram, Poona	,,
१४२	तैत्तिरीयारण्यकसायणभाष्यम्	,,	,,	,, ,, ,,	,, ,,	,,
१४३	बृहदारण्यकोपनिषद्-शांकर-भाष्यम्	शंकराचार्यः	,,	A. D. 688 by Late B. G Tilak A. D. 788 by Late Prof. K. B Pathak.	Nirnayasagar Press, Bombay	,,
१४४	दुर्गाचार्यभाष्यम्	दुर्गाचार्यः	,,	A. D. 1000	,, ,,	,,

ग्रन्थनामसंक्षेपाः

७७	अप.	अपरार्कः
६७	अपु.	अग्निपुराणम्
७०	अभा.	असहायभाष्यम्
९	असं.	अथर्ववेदसंहिता
१३६	असा.	अथर्ववेदसंहितासायणभाष्यम्
३६	आगृ.	आश्वलायनगृह्यसूत्रम्
५१	आध.	आपस्तम्बधर्मसूत्रम्
३८	आपगृ.	आपस्तम्बगृह्यसूत्रम्
३२	आपश्रौ.	आपस्तम्बश्रौतसूत्रम्
३०	आश्रौ.	आश्वलायनश्रौतसूत्रम्
८१	उ.	उज्वला
४८	ऋग्वि.	ऋग्विधानम्
१	ऋसं.	ऋग्वेदसंहिता
१३१	ऋसा.	ऋग्वेदसंहितासायणभाष्यम्
२१	ऐआ.	ऐतरेयारण्यकम्
१४१	ऐआसा.	ऐतरेयारण्यकसायणभाष्यम्
१०	ऐब्रा.	ऐतरेयब्राह्मणम्
१३७	ऐब्रासा.	ऐतरेयब्राह्मणसायणभाष्यम्
२६	कउ.	कठोपनिषद्
४	कसं.	कपिष्ठलसंहिता
३३	काश्रौ.	कात्यायनश्रौतसूत्रम्
३	कासं.	काठकसंहिता
१२५	कृभ.	कृष्णम्भट्टी
५७	कौ.	कौटिलीयमर्थशास्त्रम्
२८	कौउ.	कौषीतकिब्राह्मणोपनिषद्
४६	कौसू.	कौशिकसूत्रम्
४२	खागृ.	खादिरगृह्यसूत्रम्
४३	गोगृ.	गोभिलगृह्यसूत्रम्
२०	गोब्रा.	गोपथब्राह्मणम्
७३	गोरा.	गोविन्दराजीया
५०	गौध.	गौतमधर्मसूत्रम्
८०	गौमि.	गौतममिताक्षरा
१०२	चन्द्र.	विवादचन्द्रः
२५	छाउ.	छान्दोग्योपनिषद्
१९	जैउब्रा.	जैमिनीयोपनिषद्ब्राह्मणम्
१८	जैब्रा.	जैमिनीयब्राह्मणम्
४७	जैसू.	जैमिनीयसूत्रम्
१४	ताब्रा. पञ्चा.	ताण्डयब्राह्मणम् (पञ्चविंशब्राह्मणम्)
१३९	तासा.	ताण्ड्यब्राह्मणसायणभाष्यम्
२३	तैआ.	तैत्तिरीयारण्यकम्
१४२	तैआसा.	तैत्तिरीयारण्यकसायणभाष्यम्
१२	तैब्रा.	तैत्तिरीयब्राह्मणम्
१३८	तैब्रासा.	तैत्तिरीयब्राह्मणसायणभाष्यम्
२	तैसं.	तैत्तिरीयसंहिता
१३२	तैसा.	तैत्तिरीयसंहितासायणभाष्यम्
१२६	दच.	दत्तकचन्द्रिका
१०४	दमी.	दत्तकमीमांसा
९६	दवि.	दण्डविवेकः
७६	दा.	दायभागः
९९	दात.	दायतत्त्वम्
११०	दानि.	दायभागनिर्णयः
९१	दीक.	दीपकलिका
१४४	दुभा.	दुर्गाचार्यभाष्यम्
१२२	नन्द.	नन्दिनी
१०५	नाभा.	नारदीयमनुसंहिताभाष्यम्
६१	नासं.	नारदीयमनुसंहिता
६२	नास्मृ.	नारदस्मृतिः
२९	नि.	निरुक्तम्
१२९	नीटी.	नीलकण्ठी (टीका)
९७	नृप्र.	नृसिंहप्रसादः
८७	पमा.	पराशरमाधवः

६३	पस्मृ.	पराशरस्मृतिः
४१	पागृ.	पारस्करगृह्यसूत्रम्
११८	प्रका.	व्यवहारप्रकाशः
११५	बाल.	बालम्भट्टी
२४	बृउ.	बृहदारण्यकोपनिषद्
४९	बृदे.	बृहद्देवता
६४	बृयस्मृ.	बृहद्यमस्मृतिः
१४३	बृशांभा.	बृहदारण्यकोपनिषच्छाङ्करभाष्यम्
३९	बौगृ.	बौधायनगृह्यशेषसूत्रम्
५२	बौध.	बौधायनधर्मसूत्रम्
१२४	बौवि.	बौधायनविवरणम्
६८	ब्रह्मपु.	ब्रह्मपुराणम्
५६	भा.	महाभारतम्
१२३	भाच.	मनुभावार्थचन्द्रिका
२७	मउ.	महानारायणोपनिषद्
१०१	मच.	मन्वर्थचन्द्रिका
९०	मपा.	मदनपारिजातः
७९	मभा.	मस्करिभाष्यम्
८४	ममु.	मन्वर्थमुक्तावलिः
८२	मवि.	मन्वर्थविवृतिः
५८	मस्मृ.	मनुस्मृतिः
४४	मागृ.	मानवगृह्यसूत्रम्
३५	माश्रौ.	मानवश्रौतसूत्रम्
७४	मिता.	मिताक्षरा
७२	मेधा.	मेधातिथिभाष्यम्
५	मैसं.	मैत्रायणीयसंहिता
६०	यास्मृ.	याज्ञवल्क्यस्मृतिः
८८	रत्न.	मदनरत्नम्
११४	राकौ.	राजधर्मकौस्तुभः
६६	लहास्मृ.	लघुहारीतस्मृतिः
३४	लाश्रौ.	लाट्यायनश्रौतसूत्रम्
५४	वस्मृ.	वसिष्ठस्मृतिः
५९	वारा.	वाल्मीकिरामायणम्
१२०	विच.	विवादचन्द्रिका
९३	विचि.	विवादचिन्तामणिः
११२	विता.	विवादताण्डवम्
११७	विभ.	विवादभङ्गार्णवः
८५	विर.	विवादरत्नाकरः
१२१	विव्य.	विवादव्यवहारः
७१	विश्व.	विश्वरूपः
५५	विस्मृ.	विष्णुस्मृतिः
१०६	वीमि.	वीरमित्रोदयः
६५	वृहास्मृ.	वृद्धहारीतस्मृतिः
१०३	वै.	वैजयन्ती
४५	वैसू.	वैतानसूत्रम्
१०९	व्यउ.	व्यवहारोद्योतः
७८	व्यक.	व्यवहारकल्पतरुः
९२	व्यचि.	व्यवहारचिन्तामणिः
९८	व्यत.	व्यवहारतत्त्वम्
९४	व्यनि.	व्यवहारनिर्णयः
१०७	व्यप्र.	व्यवहारप्रकाशः
१११	व्यम.	व्यवहारमयूखः
७५	व्यमा.	व्यवहारमातृका
१३	शब्रा.	शतपथब्राह्मणम्
२२	शाआ.	शाङ्ख्यायनारण्यकम्
३७	शागृ.	शाङ्ख्यायनगृह्यसूत्रम्
११	शाब्रा.	शाङ्ख्यायनब्राह्मणम्
१२८	शाभा.	शाबरभाष्यम्
३१	शाश्रौ.	शाङ्ख्यायनश्रौतसूत्रम्
१३३	शुउ.	शुक्लयजुर्वेदमाध्यन्दिनसंहिता-उवट-भाष्यम्
६	शुका.	शुक्लयजुर्वेदकाण्वसंहिता
६९	शुनी.	शुक्रनीतिसारः
१३४	शुम.	शुक्लयजुर्वेदमाध्यन्दिनसंहिता-महीधरभाष्यम्
७	शुमा. / शुसं.	शुक्लयजुर्वेदमाध्यंदिनसंहिता
१३५	शुसा.	शुक्लयजुर्वेदकाण्वसंहितासायण-भाष्यम्
१३०	श्रीमू.	श्रीमूला

१०८	संप्र.	संस्कारप्रकाशः
१७	संब्रा.	संहितोपनिषद्ब्राह्मणम्
१२७	संर.	संस्काररत्नमाला
११९	समु.	व्यवहारार्थसमुच्चयः
१००	सवि.	सरस्वतीविलासः
१५	साब्रा.	सामविधानब्राह्मणम्
१६	सामब्रा. / मब्रा.	साममन्त्रब्राह्मणम् (मन्त्रब्राह्मणम्)
८	सासं.	सामवेदसंहिता
१४०	सासा.	सामविधानब्राह्मणसायणभाष्यम्
११३	सिन्धु.	निर्णयसिन्धुः
८९	सुबो.	सुबोधिनी
११६	सेतु.	विवादार्णवसेतुः
८३	स्मृच.	स्मृतिचन्द्रिका
९५	स्मृचि.	स्मृतिचिन्तामणिः
८६	स्मृसा.	स्मृतिसारः
४०	हिगृ.	हिरण्यकेशीयगृह्यसूत्रम्
५३	हिध.	हिरण्यकेशीयधर्मसूत्रम्

विवादपदानां विषयानुक्रमणिका

ऋणादानम्

[पृ. ५९९–७३२]

वृद्धिः

[पृ. ५९९–६३५]

वेदाः—(५९९-६०६) ऋणादानवैदिकलिङ्गानि. **गौतमः**—(६०६-८) धर्म्यवृद्धिपरिमाणम्, तस्या ग्रहणावधिः; वृद्धयुपरमावधिः; वृद्धिप्रकाराः; पश्चादि-द्रव्यवृद्धयुपरमावधिः. **हारीतः**—(६०८-९) धर्म्या वृद्धिः; वृद्धयुपरमावधिः. **वसिष्ठः**—(६०९-१०) वृद्धिग्रहणनिन्दा; वृद्धिपरिमाणनियमः; वृद्धयुपरमावधिः. **विष्णुः**—(६१०-११) वृद्धिपरिमाणनियमः, अकृत-वृद्धिः; वृद्धयुपरमावधिः. **कौटिलीयमर्थशास्त्रम्**—(६११) वृद्धिपरिमाणनियमः; वृद्धयुपरमावधिः. **मनुः**—(६११-९) वृद्धिपरिमाणनियमः; वृद्धयुपरमावधिः; अकृतवृद्धिग्रहणमर्यादा; वृद्धिग्रहणनिषेधः; वृद्धिविशेष-स्थापकाः. **याज्ञवल्क्यः**—(६१९-२२) धर्म्या वृद्धिः कृतवृद्धिश्च; वृद्धयुपरमावधिः. **नारदः**—(६२२-८) ऋणादाने विषयभेदाः; कुसीदलक्षणम्; वृद्धिपरिमाणम्; वृद्धिप्रकाराः तल्लक्षणानि च; देशभेदेन वृद्धिपरिमाण-भेदाः; वृद्धयुपरमावधि, प्रीतिदत्तवृद्धिः, वार्धुषलक्षणम्, वार्धुषग्रहणाधिकारी; अकृतवृद्धयपवादः. **बृहस्पतिः**—(६२८-३१) व्यवहारपदोपक्रमः, कुसीदनिरुक्तिः; ऋण-दानविधिः; वृद्धिप्रकाराः तल्लक्षणानि च; शिखावृद्ध्या [ ]मुपरमावधिः. **कात्यायनः**—(६३१-४) ऋण-[ ]नाधिकारी; वृद्धिप्रकाराः तल्लक्षणानि च; वृद्धयु-परमावधिः; याचितपण्यमूल्यादिवृद्धिः तदपवादश्च. **पितामहः**—(६३४) वृद्धयुपरमावधिः. **व्यासः**—(६३४) वृद्धिपरिमाणम्; वृद्धिप्रकाराः तल्लक्षणानि च; वृद्धयुपरमावधिः; वृद्धयपवादः. **भरद्वाजः**—(६३५) वृद्धयुपरमावधिः. **संवर्तः**—(६३५) वृद्धयपवादः. **अनिर्दिष्टकर्तृकवचनानि**—(६३५) वृद्धिप्रकाराः तल्लक्षणानि च. **शुक्रनीतिः**—(६३५) वृद्धयुपरमा-वधिः; अधर्म्यवृद्धिनिषेधः.

आधिः

[पृ. ६३५-६६१]

गौतमः—(६३५) भोग्याधेरपि गोप्याधित्वम्. **हारीतः**—(६३५-६) आधिपालनम्; आधिसिद्धिः. **वसिष्ठः**—(६३६) आधिसिद्धिः. **विष्णुः**—(६३६-८) भोग्याधौ वृद्धयभावः; आधिपालनम्; आधिमोच-नावधिः; गोप्याधेर्भोग्याधित्वम्; आधिसिद्धिः. **कौटि-लीयमर्थशास्त्रम्**—(६३८) आधिविधिः. **मनुः**—(६३८-४१) भोग्याधौ वृद्धयभावः; आधेः संक्रमण-विक्रयौ न; बलादाधिभोगनिषेधः; अननुज्ञातभोग-निष्कृतिः. **याज्ञवल्क्यः**—(६४१-७) आधिसिद्धिः; आध्यन्तरकरणम्; गोप्यभोग्याध्योरुपचारभोगनाशादि-विचारः; गोप्यभोग्याध्यवधिः; चरित्रबन्धसत्यङ्कारौ; आधिमोचनम्. **नारदः**—(६४७-५०) बन्धलक्ष-णम्; आध्यवधिः; गोप्यभोग्याध्योरुपचारभोगनाशादि विचारः; आधिसिद्धिः; बलादाधिभोगनिषेधः; अननु-ज्ञाताधिभोगे कर्तव्यता; भोग्याधिवृद्धिचालनविक्रय-विचारः; आध्यन्तरकरणम्. **बृहस्पतिः**—(६५०-५) आधिप्रकाराः; गोप्याधिभोग्याधिभोगनाशादिविचारः; आधिनाशे आध्यन्तरकरणम्, आधिमोचनम्; गोप्या-धिभोगकालः; आधिसिद्धिः. **कात्यायनः**—(६५५-८) अप्रत्ययभोग्याधिः; पशुदासाद्याधिर्न पीडनीयः; आधिनाशे आध्यन्तरकरणम्; गोप्यभोग्याधिभोगनाश-विचारः, आधिमोचनम्; बञ्चनया आधिभोगे दण्डः; सत्यङ्कारः; आधिसिद्धिः. **व्यासः**—(६५८-६०) सप्रत्ययभोग्याधिः; आधिनाशे आध्यन्तरकरणम्; सदोष-धनिकाधिनाशविचारः; आधिमोचनम्; आधिसिद्धिः. **प्रजापतिः**—(६६०) अन्वाधिः. **यमः**—(६६०) गोप्यभोग्याधिभोगनाशविचारः. **मरीचिः**—(६६०) आधिप्रकाराः. **भरद्वाजः**—(६६०) आधिप्रकाराः; आधिभोगनाशविचारः, अन्वाधिश्च. **स्मृत्यन्तरम्**—(६६१) [आधिभोगनाशविचारः]. **अनिर्दिष्टकर्तृक-वचनानि**—(६६१) [आधिपालनम्].

[ ] एतच्चिह्नान्तर्गतो विषयः मूलग्रन्थे न निर्दिष्टः तत्रायं विषयो ज्ञेयः।

प्रतिभूः

[पृ. ६६१-६७७]

हारीतः—(६६१-२) प्रतिभूग्रहणनिमित्तानि; प्रातिभाव्यदानम्; अधमर्णात् प्रातिभाव्यद्रव्यसाधनम्. **विष्णुः**—(६६२) प्रतिभूनिमित्तानि; प्रातिभाव्यदानम्, ऋणिकात् प्रातिभाव्यद्रव्यसाधनम्. **कौटिलीयमर्थशास्त्रम्**—(६६२) प्रातिभाव्यानधिकारः; प्रातिभाव्यदानाधिकारः पौत्रपर्यन्तम्. **मनुः**—(६६२-५) दर्शनप्रातिभाव्यद्रव्यदानम्; प्रातिभाव्यद्रव्यदानाधिकारः कियत्पुरुषपर्यन्तम्. **याज्ञवल्क्यः**—(६६५-९) प्रातिभाव्यनिमित्तानि, प्रातिभाव्यदानाधिकारः कियत्पुरुषपर्यन्तम्; अनेकप्रतिभूभ्यः प्रातिभाव्यद्रव्यग्रहणप्रकारः; अधमर्णात् प्रातिभाव्यद्रव्यसाधनम्; अधमर्णात् प्रातिभाव्यद्रव्यवृद्धिः कियती साधनीया. **नारदः**—(६६९-७०) ऋणादौ विस्रम्भहेतुः प्रमाहेतुश्च; प्रातिभाव्यनिमित्तानि; प्रातिभाव्यद्रव्यदानाधिकारः; अधमर्णात् प्रातिभाव्यद्रव्यग्रहणप्रकारः. **बृहस्पतिः**—(६७१-२) प्रातिभाव्यनिमित्तानि; प्रातिभाव्यद्रव्यदानाधिकारः कियत्पुरुषपर्यन्तम्; प्रतिभुवे कालदानम्; अधमर्णात् प्रातिभाव्यद्रव्यग्रहणप्रकारः. **कात्यायनः**-(६७२-५)प्रातिभाव्यानधिकारिणः; प्रातिभाव्यनिमित्तानि; प्रातिभाव्यमुक्तिः; प्रातिभाव्यद्रव्यदानसमयः; प्रातिभाव्यद्रव्यदानं कियत्पुरुषपर्यन्तम्; अधमर्णात् प्रातिभाव्यद्रव्यग्रहणप्रकारः. **पितामहः**—(६७५-६) प्रातिभाव्यद्रव्यदानम्. **व्यासः**-(६७६) प्रातिभाव्यनिमित्तानि; प्रातिभाव्यद्रव्यदानं कियत्पुरुषपर्यन्तम्. **उशनाः**—(३७६) [प्रातिभाव्यद्रव्यदाने नियमविशेषः]. **वृद्धवसिष्ठः**—(६७६-७) प्रातिभाव्यनिमित्तानि, प्रातिभाव्यद्रव्यदानाधिकारः कियत्पुरुषपर्यन्तम्. **व्याघ्रः**—(६७७) प्रतिभूप्रकाराः. **वृद्धहारीतः**—(६७७) प्रातिभाव्यद्रव्यदानम्. **लघुहारीतः**—(६७७) [प्रातिभाव्यद्रव्यदानम्].

ऋणप्रतिदानम्

[पृ. ६७७-७१६]

गौतमः—(६७७-८) ऋणप्रतिदातारः; पुत्रादिभिः अप्रतिदेयानि ऋणादीनि. **हारीतः**—(६७८) ऋणपत्रप्रामाण्यम्. **वसिष्ठः**—(६७८)पुत्रादिभिः अप्रतिदेयानि ऋणादीनि. **विष्णुः**—(६७८-९) ऋणप्रतिदातारः; रिक्थग्राहस्त्रीग्राहादिऋणप्रतिदातृविचारः; स्त्रीपतिपितृपुत्रकृतर्णसाध्यताविचारः; विभक्ताविभक्तकृतकुटुम्बार्थकृतर्णप्रतिदानविचारश्च; ऋणप्रतिदाने लेख्यादिविधिः. **कौटिलीयमर्थशास्त्रम्**— (६७९-८०) ऋणप्रतिदातारः; दशवर्षोपेक्षितस्त्रीपतिपितृपुत्रकृतर्णसाध्यताविचारः; अप्रतिदेयानि ऋणादीनि. **मनुः**—(६८०-८२) कुटुम्बार्थे कृतमृणं विभक्तैरपि देयम्; प्रतिदानाशक्तौ कर्मपरिवर्तनम्. **याज्ञवल्क्यः**—(६८२-९०) कुटुम्ब- मविभक्तकृतस्य ऋणस्य रिक्थहर्तारः प्रतिदातारः; स्त्रीपतिपितृपुत्रकृतर्णप्रतिदानविचारः; पितृकृतमृणं पुत्रपौत्रैः प्रतिदेयम्; पुत्रेणाऽप्रतिदेयानि ऋणादीनि; त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः; आधिभोगकालः; रिक्थग्राह्योषिद्ग्राहानन्याश्रितद्रव्यपुत्रादीनामृणप्रतिदातृत्वम्; ऋणप्रतिदाने कृते उपगतपत्रग्रहणादिविधिः. **नारदः**—(६९० ७०६) ऋणप्रतिदातारः; कुटुम्बार्थे कृतमृण सर्वे रिक्थिनः दद्युः; त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः; प्राप्तव्यवहार एव ऋणप्रतिदाता; ऋणानपाकरणनिन्दा; अनपाकरणीयमृणम्; अनपाकरणीयर्णापवादः; कुटुम्बार्थमस्वतन्त्रकृतमृणमपाकरणीयम्; प्रोषितपित्रादिकृतमृणं विंशतिवर्षादूर्ध्वं देयम्; एकच्छायाश्रितजीवदजीवत्कृतर्णापाकरणविचारः; पितृपुत्रकृतर्णस्य स्त्रीणा प्रतिदातृत्वविचारः; भार्याकृतर्णापाकरणविचारः; वर्गविशेषेषु स्त्रीकृतमृणं पत्या अपाकरणीयम्; स्त्रीहारिरिक्थहारिपुत्रादीनामृणप्रतिदातृत्वविचारः; उत्तमर्णब्राह्मणाभावे ऋणापाकरणप्रकारः; ऋणप्राप्तौ उपगतपत्रकरणपत्रपाटनादिविधिः, तदकरणे धनिदण्डः. **बृहस्पतिः**—(७०६-९) कीदृशमृणं दातव्यम्; पुत्रेण पितुरभावे देयम्; पैतामहपित्र्यात्मीयर्णदानक्रमः; विभावितमृणं देयम्; पैतामहमृणमवृद्धिकं देयम्, प्रपौत्रेण तु न देयम्; आपद्ग्रस्तजीवत्पितृणं देयम्; कुटुम्बार्थकृतमृणं देयम्; धनस्त्रीहारिपुत्रादीना ऋणप्रतिदानाधिकारः; पुत्रादिकृतर्णदानविचारः; पुत्रैरप्रतिदेयानि ऋणादीनि; उपगतपत्रादिविधिः, तदकरणे धनिदण्डः. **कात्यायनः**—(७०९-१४) कदा कीदृशं च पैतामहं पित्र्यं चर्णं प्रतिदेयम्; कियत्पुरुषपर्यन्तमृणं देयम्; धनस्त्रीहारिपुत्रादीनामृणप्रतिदानाधिकारः; आपद्ग्रस्तपितृणं पुत्रैर्देयम्; एकच्छायाया ऋणदानप्रकारः; कुटुम्बार्थकृतमृणं कुटुम्बिना देयम्; पुत्रकृतर्णप्रतिदानविचारः; कामकृतक्रोधकृतर्णनिवर्तनम्; मातृकृतभार्याकृतर्णप्रतिदानविचारः; ऋणानपाकरणकर्मविपाकः. **पितामहः**—(७१४) पितृमातृकृतर्णप्रतिदानाधिकारः. **व्यासः**—(७१४) ऋणान-

पाकरणकर्मविपाकः; पितृकृतं सदोषर्णं न देयम्. **उशना**—(७१४) [पितृकृतं सदोषर्णं न देयम्]. **प्रजापतिः**—(७१५) आपदि ऋणप्रतिदानापवादः, उत्तमर्णब्राह्मणाभावे ऋणापाकरणम्. **गोभिलः**—(७१५) अज्ञातर्णदोषापाकरणम्. **वृद्धहारीतः**—(७१५) त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः; पुत्रेणाप्रतिदेयानि ऋणादीनि; पितृकृतमृणं पुत्रपौत्रैः प्रतिदेयम्; रिक्थग्राहयोर्षिद्ग्राहानन्याश्रितद्रव्यपुत्रादीनामृणप्रतिदातृत्वम्; प्रतिभूदत्तधनप्रतिदानम्, स्त्रीपतिपुत्रकृतर्णप्रतिदानविचारश्च. **वृद्धप्रपितामहः**—(७१५) [त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः]. **स्मृत्यन्तरम्**—(७१५) सदोषदानम्. **संग्रहकारः (स्मृतिसंग्रहः)**—(७१५ ६) ऋणदातृस्त्रीहारिणः स्त्रीसंग्रहोऽशास्त्रीयः; उत्तमर्णब्राह्मणाद्यभावे ऋणापाकरणम्.

ऋणोद्ग्राहणम्

[पृ. ७१६–७३१]

विष्णुः—(७१६) धनी स्वधनं स्वयं साधयन् राज्ञा न वाच्यः; धनस्य राजद्वारा साधने अधमर्णदण्डादिविधिः, उत्तमर्णशुल्कं च. **कौटिलीयमर्थशास्त्रम्**—(७१६) ऋणप्रतिग्रहीतृक्रमः. **मनुः**—(७१६–२०) सर्वैरुपायैः स्वधनं साधयेत्; पञ्च स्वधनोद्ग्राहणोपायाः; धनी स्वधन स्वयं साधयन् न राज्ञो वाच्यः; धनस्य राजद्वारा साधने अधमर्णदण्डादिविधिः; अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्यः. **याज्ञवल्क्यः**—(७२१-३) ऋणग्रहणानधिकारिणः; धनी स्वधनं स्वयं साधयन् न राज्ञो वाच्यः; राजद्वारा साधने अधमर्णदण्डादिविधिः; ऋणोद्ग्राहणे ऋणप्रतिग्रहीतृक्रमः; राजद्वारा धनसाधने अधमर्णदण्डः उत्तमर्णशुल्कं च; अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्यः. **नारदः**—(७२३–५) पञ्च ऋणोद्ग्राहणोपायाः; धनी स्वधनं स्वयं साधयन् न राज्ञो वाच्यः; असमर्थाधमर्णः शनैः शनैर्दाप्यः; राजद्वारा धनसाधने अधमर्णदण्डः; अधमर्णस्य ऋणपरिमाणाज्ञाने निर्णयोपायः. **बृहस्पतिः**—(७२५-७) पञ्च ऋणोद्ग्राहणोपायाः तल्लक्षणानि च; अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्यः; पूर्णावधौ धनाप्राप्तौ चक्रवृद्ध्यादिव्यवस्था; नष्टाधमर्णद्रव्यविक्रयद्वारा ऋणोद्ग्राहणविधिः; संदिग्धेऽर्थे राजन्यनिवेद्य न प्रवर्तितव्यम्. **कात्यायनः**—(७२७–३०) ऋणोद्ग्राहणोपायाः; अधमर्णयोग्यता-विशेषपौर्वापर्यादिविवेकेन तत्तदुपायप्रयोगः; संदिग्धेऽधमर्णपीडने दण्डः; अधमर्णावरोधविधिः; योग्यता-विशेषवान् नावरोद्धव्यः किं तु शपथेन निरोद्धव्यः; अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्यः; अशक्तोऽब्राह्मणः निरोद्धव्यः; अधमर्णोऽशुभं कर्म न कारयितव्यः पूर्णावधौ धनाप्राप्तौ पुनर्वृद्धिः; ऋणप्रतिग्रहीतृक्रमः कालिकार्धे वृद्धिग्रहणविचारः. **व्यासः**—(७३० मिथ्याभियोगिदण्डः. **यमः**—(७३०–३१) अधमर्णे राज्ञा दापयितव्यः; अप्रदाने चक्रवृद्धिव्यवस्था. **भरद्वाजः**—(७३१) गृहीतधनसमधनाभावे ग्राह्यधनम् ऋणोद्ग्राहणे क्षेत्रारामगृहविक्रयादिविधिः. **वृद्धहारीतः**—(७३१) [ऋणप्रतिदानम्; उद्धृतऋणिदण्डः नष्टऋणपत्रे साक्षिविधिः; वस्त्रादिऋणोद्ग्राहणविधिः] **अनिर्दिष्टकर्तृकवचने**—(७३१) अपीडयैव ऋणं ग्राह्यम्; धनालाभे पत्रपरिवर्तनम्, **शुक्रनीतिः**—(७३१) [ऋणप्रतिदानम्; चतुर्गुणवृद्धौ गृहीताया न ऋणोद्ग्राहणम्]. **ऋणादानपरिशिष्टम्**—**नारदः**—(७३१) वृद्धिः. **वृद्धहारीतः**—(७३१-२) [वृद्धिः] आधिः. **लघुहारीतः**—(७३२) वृद्धिः.

प्रमेयक्रिया

[पृ. ७३२–७३४]

वसिष्ठः, याज्ञवल्क्यः, नारदः, बृहस्पतिः, वृद्धहारीतः, बृहद्यमः—प्रमेयक्रिया.

उपनिधिः

[पृ. ७३५-७५६]

गौतमः—(७३५) राजदैविकचोरादिनष्टनिक्षेपविचारः. **विष्णुः**—(७३५) निक्षेपापहारादिदोषे दण्डविधिः. **महाभारतम्**—(७३५) उपनिधिलिङ्गम्. **कौटिलीयमर्थशास्त्रम्**—(७३५-८) ऋणादानातिदेशः; उपनिधिप्रत्यर्पणापवादः; उपनिधिभोगप्रणाशविक्रयाधानापहारेषु कृत्यम्; आधावतिदेशः; अन्वाधियाचितकावक्रीतकवैयापृत्यविक्रयनिक्षेपेषु विशेषः, उपनिधिविधेः अतिदेशश्च. **मनुः**—(७३८-४५) निक्षेपस्थापनविधिः; निक्षेपपालनप्रतिदानप्रत्यादानानि; राजदैविकचोरादिनष्टनिक्षेपविचारः; निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम्; निक्षेपाद्यपहारादिदोषे दण्डविधिः; निक्षेपप्रतिदापनम्; प्रीतिदत्तादिषु निक्षेपविधेः अतिदेशः. **वाल्मीकिरामायणम्**—(७४५) न्यासलिङ्गम्. **याज्ञवल्क्यः**—

(७४५-६) उपनिधिलक्षणम्; राजदैवचोरादिनष्टनिक्षेपविचारः; उपनिधिप्रतिदापनम्; उपनिध्यपहारे दण्डविधिः; उपनिधिविधेः याचितादिषु अतिदेशः. **नारदः**—(७४६-५०) निक्षेपलक्षणं उपनिधिलक्षणं च; निक्षेपादिस्थापनविधिः; ससाक्षिकासाक्षिकनिक्षेपप्रतिदानप्रत्यादानविधिः; राजदैवचोरादिनष्टनिक्षेपविचारः; निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम्; निक्षेपापह्नवादिदोषे दण्डविधिः; निक्षेपविधेः याचितादिषु अतिदेशः. **बृहस्पतिः**—(७५०-५२) न्यासलक्षणं उपनिधिलक्षणं च, तत्स्थापनविधिः, ससाक्षिकासाक्षिकन्यासपालनप्रतिदानविधिः; राजदैवचोरादिनष्टनिक्षेपविचारः; निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम्; न्यासप्रतिदापनम्; न्यासापहारे दण्डविधिः, न्यासविधेः अन्वाहितादिषु अतिदेशः. **कात्यायनः**—(७५२-५) उपनिध्यन्वाधियाचितकलक्षणानि; राजदैवचोरादिनष्टनिक्षेपविचारः; निक्षेपप्रतिदापनम्, उपनिधिग्रहणम्; उपनिध्यपहारादिदोषे दण्डविधिः; निक्षेपादिषु वृद्धिविधिः, याचितादिषु अतिदेशविवरणम्. **व्यासः**—(७५५-६) निक्षेपलक्षणम्; निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम्; न्यासादिप्रतिदापनम्; न्यासाद्यपहारादिदोषे दण्डविधिः. **स्मृत्यन्तरम्**—(७५६) निक्षेपनाशे निक्षेपो देयः. **अनिर्दिष्टकर्तृकवचने**—(७५६) निक्षेपप्रतिदापनं, तद्वृद्धिश्च. **मत्स्यपुराणम्**—(७५६) निक्षेपाद्यपहारादिदोषे दण्डविधिः. **पट्त्रिंशन्मतम्**—(७५६) राजदैवचोरादिनष्टनिक्षेपविचारः.

अस्वामिविक्रयः

[पृ. ७५७-७६९]

विष्णुः—(७५७) अस्वामिविक्रये ज्ञानाज्ञानकृतक्रयविक्रयदोषतारतम्यम्; अज्ञानतश्चेत् स्वामी स्वं लभते. **शङ्खः**—(७५७) अस्वामिविक्रये स्वामिने द्रव्यं देयम्. **कौटिलीयमर्थशास्त्रम्**—(७५७) अस्वामिविक्रयकारिणो दण्डः तद्द्रव्यनिर्णयश्च; स्वत्वं विभाव्य स्वामी द्रव्यं लभतेऽन्यथा दण्ड्यः. **मनुः**—(७५८-६०) अस्वामिविक्रेतुर्निन्द्यत्वम्; अज्ञानतोऽस्वामिविक्रेतुः स्वामिसंबन्धासंबन्धभेदेन दण्डतारतम्यम्; ज्ञानतोऽस्वामिविक्रेतुश्चौरदण्डः; विशुद्धक्रयः; प्रकाशक्रये मूलालाभे न दोषः, स्वामी स्वं लभते; मूलालाभे क्रयदोषशङ्काया दण्डः, स्वामी स्वं लभते; अस्वामिकृतनिवर्तनम्. **याज्ञवल्क्यः**—(७६०-६२) अशुद्धक्रयस्वरूपम्, स्वामी स्वं लभते; नष्टापह्नवविचारः; अस्वामिक्रेतृग्रहणोत्तरविधिः; स्वामी स्वत्वं विभाव्य स्वं लभते. **नारदः**—अस्वामिविक्रयस्वरूपम्; अस्वामिकृतनिवर्तनम्; स्वामी स्वं लभते; शुद्धाशुद्धक्रयौ; अशुद्धक्रयस्वरूपम्; आगमाधीना क्रेतुः शुद्धिः; अस्वामिविक्रेतुर्दण्डादिविधिः; स्याम्यनर्पिततदीयवस्तुभोगे विधिः. **बृहस्पतिः**—(७६४ ६) अस्वामिविक्रयस्वरूपम्; शुद्धक्रयः; अशुद्धक्रयः; मूलदर्शने क्रेतुः शुद्धिः; अस्वामिविक्रेतुर्दण्डादिविधिः; अस्वामिविक्रये प्रमाणहीनवादे निर्णयविधिः; अविज्ञाताश्रयक्रीतादिविधिः. **कात्यायनः**—(७६६-८) अस्वामिकृतनिवर्तनम्; मूलानयनक्रयशुद्धयोर्विचारः; स्वामी स्वत्वं विभाव्य स्वं लभते; क्रेत्रा आत्मविशुद्धिः साध्या; अविज्ञाताश्रयक्रीतादिविधिः. **व्यासः**—(७६८-९) अस्वामिविक्रयस्वरूपम्; मूलदर्शने क्रेतुः शुद्धिः; अस्वामिविक्रये दण्डादिविधिः. **मरीचिः**—(७६९) शुद्धक्रयः; अविज्ञातक्रये विधिः. **यमः**—(७६९) अस्वामिकृतनिवर्तनम्. **मत्स्यपुराणम्**—(७६९) ज्ञानाज्ञानकृतास्वामिविक्रयदोषविचारः. **शुक्रनीतिः** (७६९) अस्वामिनः क्रये दण्डः.

संभूयसमुत्थानम्

[पृ. ७७०-७९०]

जैमिनीयसूत्रम्—(७७०) ज्योतिष्टोमे ऋत्विजां दक्षिणाविभागाधिकरणम्. **वसिष्ठः**—(७७०) कार्यत्यागिनौ ऋत्विगाचार्यौ हेयौ. **विष्णुः**—(७७०) ऋत्विब्भरणे तत्कार्यतद्दक्षिणाव्यवस्था. **शङ्खः शङ्खलिखितौ च**—(७७१) [ऋत्विब्भरणे तत्कार्यव्यवस्था]; ऋत्विब्भरणप्रवासव्याधिपातित्यादौ तत्कार्यतद्दक्षिणाव्यवस्था, याज्यऋत्विजोरन्यतरेणान्यतरस्य त्यागे व्यवस्था. **कौटिलीयमर्थशास्त्रम्**—(७७१-३) संघभूतसंभूयसमुत्थातृकर्षकवेदेहकचोरयाजकवणिजा वेतनदक्षिणाफलादिविभागविधिः; कर्तृकर्मत्यागादौ दण्डविधिः. **मनुः**—(७७२-७)ऋत्विजा संभूय क्रियास्वरूपम्; वृतेन ऋत्विजा कर्मासमापने व्यवस्था; संभूयकारिणामृत्विजां दक्षिणाव्यवस्था; ऋत्विजा संभूयसमुत्थानस्य स्थापत्यादावतिदेशः; ऋत्विग्याज्ययोरन्यतरेणान्यतरस्य त्यागे व्यवस्था. **याज्ञवल्क्यः**—(७७७-८०) संभूयकारिणा वणिजा लाभालाभव्यवस्था; अन्यतमेन निपिद्धाननुमतकरणे प्रमादनाशने आपत्कृतरक्षणे च विधिः; पण्ये राजभाव्यशुल्कादिनिरूपणम्, राज्ञोऽतिक्रमे दण्डश्च; तरिकेण स्थलजशुल्कग्रहणे कृते, योग्यनिकटब्राह्मणानिमन्त्रणे च दण्डः; संभूयकुर्वता-

मन्यतमस्य देशान्तरमरणे तद्द्रव्याधिकारनिरूपणम्; लाभशून्यजिह्माशक्तानां विधिः; वणिजा संभूयकारिणामृत्विक्कर्षकादावतिदेशः. **नारदः** — (७८०-८४) संभूयसमुत्थानपदनिरुक्तिः; लाभव्यययोराधारः स्वाशप्रक्षेपः, संभूयकर्मणि समयानुसारेण कर्तव्यनिर्वाहः; अन्यतमेन निषिद्धाननुमतकरणे प्रमादनाशने व्यसनाद्रक्षणे च व्यवस्था; अन्यतमे प्रोषिते मृते वा तद्द्रव्याधिकारनिरूपणम्; ऋत्विग्व्यसनेऽतिदेशः ऋत्विक्त्रैविध्यम्; याज्यर्त्विजोरन्यतरेणान्यतरस्य त्यागे व्यवस्था; वणिजा राजशुल्कं प्रदेयम्; राजशुल्कदानस्य श्रोत्रियरङ्गोपजीव्यादिषु विशेषः. **बृहस्पतिः**—(७८४-८) संभूयकर्माधिकारिणः तदनधिकारिणश्च; लाभव्यययोराधारः स्वाशप्रक्षेपः; बहुसंमतपुरुषकृतिः सर्वकृतिर्मन्तव्या; संभूयकर्मणि विवादविधिः; दैवराजकृते क्षयहानौ चेत्सर्वेषामेव; अन्यतमेन अविहितनिषिद्धकरणे प्रमादनाशने व्यसनाद्रक्षणे च विधिः; अन्यतमे मृते तद्द्रव्याधिकारनिरूपणम्; ऋत्विक्त्रैविध्यम्; अन्यतमे मृते तदृणापाकरणविधिः, शेषद्रव्यव्यवस्था च; कर्षकादीना संभूयकर्मविधिः; शिल्पिना नटाना च संभूयकर्मणि लाभतारतम्यम्. **कात्यायनः**— (७८८-९) अविभक्तशिल्पिवणिजा विभागे समभागः; आपदि समुदितद्रव्यरक्षणे दशमांशदानम्; शिल्पिना लाभतारतम्यम्; चौराणा संभूयकर्मणि लाभतारतम्यम्; वणिक्कर्षकशिल्पिचोराणा लाभहानिविचारः. **व्यासः**—(७८९) संभूयकर्मस्वरूपम्; राजशुल्कदानम्. **अनिर्दिष्टकर्तृकवचनम्**—(७८९) ऋत्विग्दक्षिणाविभागः. **मत्स्यपुराणम्**—(७८९)वृतेन ऋत्विजा कर्माकरणे दण्डः. **बौधायनकारिका**—(७८९) ऋत्विजा दक्षिणाविभागः. **शुक्रनीतिः** — (७९०) रक्षकाय दशमांशदान, शिल्पिनर्तकगायककचोरधनप्रयोजकवणिक्कर्षकाणा संभूयकर्मविधिः; ऋत्विग्याज्यौ त्यागिनौ दण्डयौ.

दत्ताप्रदानिकम्

[पृ. ७९१-८०८]

वेदाः—(७९१-२) सर्वस्वदाननिन्दा;भूमिदानम्; भूमिदाननिषेधः; दक्षिणासु पुत्रदानम्; सर्वस्वदाननिन्दा; अश्वमेधे दारदानम्; अश्वमेधे भूमिपुरुषब्राह्मणस्वदानविचारः; पुरुषमेधे भूमिपुरुषब्रह्मस्वदानविचारः; विश्वजिति भूमिपुरुषब्रह्मस्वदानविचारः; भूमिदाननिषेधः; **पुरुषदानम्**; सर्वस्वदाननिन्दा; पृथिवीदानस्तुतिः; दानप्रकाराः; स्त्रीपुरुषाणां देयादेयत्वविचारः. **जैमिनीयसूत्रम्**—(७९२-३) विश्वजिति पित्रादीनामदेयत्वाधिकरणम्; विश्वजिति पृथिव्या अदेयत्वाधिकरणम्; विश्वजिति धर्मार्थसेवकशूद्रस्यादेयताधिकरणम्. **गौतमः**—(७९३-४) अधर्मसंयुक्ताय प्रतिश्रुतमप्यदेयम्; दानेऽप्रमाणवाक्यानि; अदेयदत्ते स्वत्वं न; अदेयदाने प्रायश्चित्तम्. **हारीतः**—(७९४) अदेयदाननिन्दा; सर्वस्वमदेयम्; अदेयदाने प्रतिश्रुतस्यादाने च दोषः. **विष्णुः**—(७९४) अदेयदानदण्डः प्रायश्चित्तं च. **शङ्खः**— (७९४) [अदेयदानप्रायश्चित्तम्]. **कौटिलीयमर्थशास्त्रम्**—(७९४) देयमदेयं च; धर्मदानार्थदानकामदानभयदानरोषदानदर्पदानविचारः. **मनुः**—(७९५-६) प्रतिश्रुत दत्तं वा अधर्मसंयुक्ताय न देयम्; अधार्मिको हठात्साधयन् दण्ड्यः; अदेयदातृप्रतिग्रहीतारौ दण्डयौ. **याज्ञवल्क्यः**—(७९६-७) देयमदेयं च; शुद्धप्रतिग्रहः, दत्तानपहारः. **नारदः**—(७९७-८०२) दत्ताप्रदानिकनिरुक्तिः; देयादेयदत्तादत्तानि तदवान्तरभेदाश्च; अदेयमष्टविधम्; देयम्; सप्तविधं दत्तम्; षोडशविधमदत्तम्; अदेयदातृप्रतिग्रहीतारौ दण्डयौ. **बृहस्पतिः**—(८०२-४) प्रकरणप्रतिज्ञा; अष्टविधमदेयम्; देयम्; प्रतिग्रहीतृतारतम्येन दानमहिमतारतम्यम्; अष्टविधं दत्तम्; षोडशविधमदत्तम्, पुनर्लभ्यं दत्तम्; अदेयदातृप्रतिग्रहीतारौ दण्डयौ. **कात्यायनः**—(८०४-६) देयमदेयं च; प्रत्युपकारकभूतिलक्षणम्; दत्तस्य पुनर्हरणम्; उत्कोचलक्षणं तत्संबन्धिदण्डः; प्रतिश्रुतं देयम्. **व्यासः**—(८०६) प्रतिग्रहीतृतारतम्येन दानमहिमतारतम्यम्. **देवलः**—(८०६) दानाङ्गानि षट्. **प्रजापतिः**—(८०७) देयं क्षेत्रम्. **दक्षः**— (८०७) नव अदेयानि;सफलं दानम्. **भरद्वाजः**—(८०७) दाननिमित्तानि; धर्मदानार्थदानकामदानव्रीडादानहर्षदानलौकिकदानानि. **व्याघ्रः**—(८०७) स्त्रीधनदानविचारः. **अनिर्दिष्टकर्तृकवचनानि**—(८०७) विश्वजिति सर्वस्वदानम्; देयमदेयं च. **मत्स्यपुराणम्**— (८०८) प्रतिश्रुत्याप्रदाने दण्डः. **शुक्रनीतिः**—(८०८) दानप्रकाराः.

अभ्युपेत्याशुश्रूषा

[पृ.८०९-८४०]

वेदाः—(८०९-१४) दासा धनम्; दासा अव्रताः कृष्णाश्च; दासा अभिभवनीयाः; दासः वर्णविशेषः; दासाः कृष्णजातीयाः; दासभार्याः इन्द्रेण जिताः; इन्द्रेण

दासा अप्रशस्ताः कृताः; दास आर्यवश्यः; संपदा दास आर्यो भवति; आर्यार्थे दासप्रजा विनाश्याः; दासः परिचरिता; दासधनं आर्यैर्ग्राह्यम्; दक्षिणासु दासा देयाः; दासस्वरूपम्; दासार्यभेदः इन्द्रकृतः; दास्यः स्त्रियो दक्षिणासु देयाः; कर्मकरस्वरूपम्; ऊढवधूदासी; दासीनृत्यम्; दास्यम्; दासार्यौ; दासा अभिभवनीयाः; दासी तत्कर्माणि च; यज्ञादौ दासीपुत्रो निन्द्यः बहिष्कार्यश्च; शूद्राः परिचरितारः; दासीदानम्; परिचारकः; यज्ञादौ दासीपुत्रो निन्द्यः बहिष्कार्यश्च; शूद्राः परिचरितारः; परिचर्या भृत्यकर्म; दासीदानम्; दास्यम्; दास्यो धनम्; परिचर्या शूद्रस्य जन्मतो धर्मः; दासीदानम्; भृत्यः प्रथमं भोजनीयः; दासः दासी धनम्; अन्नार्थं परिचर्या; दासनिरुक्तिः. **गौतमः**—(८१५-६) शिष्यविधिः; शूद्रस्य दास्यम्. **आपस्तम्बः**–(८१६) शूद्रस्य दास्यम्; दासकर्मकराणा संविभागः. **बौधायनः**—(८१६) [शूद्रस्य दास्यम्]. **वसिष्ठः**—(८१६) [शूद्रस्य दास्यम्]. **विष्णुः**–(८१६) शूद्रस्य दास्यम्, उत्तमवर्णे दास्ये नियोजयन् दण्ड्यः; त्यक्तप्रव्रज्यस्य दासभावः; दासभार्यायाश्च दासीत्वम्. **कौटिलीयमर्थशास्त्रम्**—(८१६-८) दासकल्पः. **महाभारतम्**—(८१८-९) दासधर्माः; शूद्रस्त्रयाणा वर्णाना परिचारकः दासो वा भवति; द्यूते अब्राह्मणप्रजापुत्रभ्रातरः आत्मा पत्नी च दासा भवन्ति; पत्नी द्यूते देया दासी भवति, युद्धजितो दासः. **मनुः**–(८१९-२३) वैश्यशूद्रो स्वकर्मणि प्रवर्तनीयौ; आपदि क्षत्रियवैश्यौ ब्राह्मणेन स्वस्वकर्मणा भर्तव्यौ; ब्राह्मणेन संस्कृतद्विजा दास्ये न नियोज्याः, शूद्रो दास्यमेवार्हति; सप्तविधा दासाः; भार्यापुत्रदासा न धनस्वाम्यमर्हन्ति; ब्राह्मणेन शूद्रद्रव्यं हरणीयम्. **याज्ञवल्क्यः**—(८२३-४)दास्यमोक्षकारणानि; दास्यमोक्षकारणापवादः, आनुलोम्येनैव दास्यम्; अन्तेवासिविधिः. **नारदः**—(८२४–३४)अभ्युपेत्याशुश्रूषापदनिरुक्तिः;शुश्रूषकभेदाः तेषा साधारणधर्मश्च; शिष्यविधिः; अन्तेवासिविधिः; भृतकविधिः; भृताना दासाना च क्रमेण शुभान्यशुभानि च कर्माणि; आनुलोम्येनैव दास्यम्; पञ्चदश दासाः; दास्यादमोच्याः; दास्यमोक्षकारणानि; दास्यमोक्षे घटस्फोटविधिः; भार्यापुत्रदासाना न धनस्वाम्यम्. **बृहस्पतिः**—(८३४-५) वेतनानपाकर्मस्वामिपालवादाभ्युपेत्याशुश्रूषाणा समानत्वम्; शुश्रूषकचातुर्विध्यनिमित्तानि; अर्थभृतभेदाः. **कात्यायनः**—(८३५–९) अन्तेवासिविधिः; ब्राह्मणेतरेष्वेव वर्णानुलोम्येन दास्यम्; ब्राह्मणेतरेष्वेव आपदि समवर्णदास्यम्; दासकर्माणि; अमोच्यं प्रव्रज्यावसितदास्यम्; दास्यामार्यसंततौ दास्याः सान्वयो मोक्षः; दासधनम्; दासोढा दासी भवति; ब्राह्मणीकुलस्त्रीधान्यादीना विक्रयदासीकरणादौ दण्डः; दासीसुतदास्यविचारः; दासीगमनविचारः. **देवलः**—(८३९) पुत्रभार्यादासशूद्राणा धनस्वाम्यविचारः. **उशना**—(८३९) दास्यानर्हाः. **दक्षः**–(८३९) परिव्रज्यावसितदण्डः. **कण्वः**—(८३९) दास्यानर्हाः. **मार्कण्डेयपुराणम्**–(८३९) प्रातिलोम्येन दास्यम्. **महाभारतम्**—विनतायाः पणजितदास्यम्, गरुडस्य मातृदास्यात् दास्यं च. **ब्रह्मपुराणम्**–(८४०) विनतायाः पणजितदास्यम्, गरुडस्य मातृदास्यात् दास्यं च.

वेतनानपाकर्म

[पृ. ८४१–८५६]

वेदाः—(८४१–२) नृत्यकारिण्यः स्त्रियः; वेश्यानिदर्शनम्, भृतिनिदर्शनम्; वेश्यागमकवचनानि. **आपस्तम्बः**—(८४२) क्षेत्रपरिग्रहीताऽनुत्थाता भाविफलं दाप्यः; निर्धनक्षेत्रपरिग्रहीताऽनुत्थाता ताडनीयः; पशुपेऽतिदेशः. **विष्णुः**—(८४३) भृतकदोषसंबन्धी विधिः; स्वामिदोषसबन्धी विधिः. **कौटिलीयमर्थशास्त्रम्**—(८४३–४) कर्मकरकल्पः. **मनुः**—(८४४–५) वेतनानपाकर्मप्रतिज्ञा; भृतकदोषसंबन्धी विधिः; निर्दोषो भृतकः तद्वेतन च. **याज्ञवल्क्यः**—(८४५-८) कर्मत्यागिभृतकविधिः; उपस्कररक्षणं भृत्यधर्मः; आयुधीयभारवाहकादिदोषसंबन्धी विधिः; त्याजकस्वामिदोषसंबन्धी विधिः; अपरिभाषितभृतिविधिः; अनेकभृत्यसाध्यकर्मवेतनविधिः. **नारदः**–(८४८-५२) परिभाषितापरिभाषितवेतनविधिः; उपस्कररक्षणं भृत्यकर्म; भृतकदोषसबन्धी विधिः; स्वामिदोषे विधिः; सदोषस्वामिसंबन्धी विधिः, सदोषवाहकविधिश्च; पण्यस्त्रीविधिः, भूमिगृहभाण्डेषु भाटकविधिः. **बृहस्पतिः**—(८५२–३) सीरवाहकभागविधिः; भृतकदोषसंबन्धी विधिः; स्वामिदोषसबन्धी विधिः. **कात्यायनः**—(८५३–४) सदोषभृतकसदोषवाहकसदोषस्वामिसंबन्धी विधिः; गृहापणभाण्डहरत्यश्वादिभाटकविधिः. **व्यासः**–(८५४) गृहभूमिभाटकविधिः. **वृद्धमनुः**—(८५४-५) अपरिभाषिता भृतिः; सदोषभृतकविधिः; उपस्करनाशसंबन्धी विधिः; वाहनकर्मणि सदोषस्वामिसंबन्धी

विधिः. **मत्स्यपुराणम्**—(८५५) [विद्याशिल्पवेतनविधिः; पण्यस्त्रीविधिः]. **शुक्रनीतिः**—(८५६) भृतिप्रकाराः.

संविद्व्यतिक्रमः

[पृ. ८५७-८७७]

वेदाः—(८५७-९) मुख्यस्य सहकारिणा च संवित् इष्टा, दम्पत्योः संवित् इष्टा; समानाना संवित् इष्टा; युद्धे सहकारिणा संवित् इष्टा, दाने सहकारिणा संवित् इष्टा; सर्वकार्येषु समानाना गणाना संवित् इष्टा, संविदः साधारणलिङ्गानि; ग्रामेषु स्वकीयपरकीयाणा संवित् इष्टा; संविदा श्रेष्ठः स्वेषु कार्यः; संविदः साधारणलिङ्गानि; कुलसंवित् इष्टा; ग्रामेषु स्वकीयपरकीयाणा संवित् इष्टा; ब्राह्मणेषु संवित् इष्टा, संविद्दानम्. **विष्णुः**—(८५९) समयानपाकर्मलक्षणम्; संविल्लङ्घनगणद्रव्यहरणदण्डः. **शङ्खलिखितौ**—(८५९-६०) [समयानपाकर्मलक्षणम्]. **महाभारतम्**—(८६०-६१) विनापि राज्ञा लोकसमयः प्रजारक्षकः; राजा प्रजया निर्मितः; संघः ऐकमत्येनैवावतिष्ठते; गणरक्षणरीतिः. **कौटिलीयमर्थशास्त्रम्**—(८६१-३) समुदायकर्मसमयः; समुदायार्थनाट्यादिकर्मणि अनंशदोऽनधिकारी; सर्वहितादेशपालनम्; श्रेष्ठ्यनियमः संघे, उक्तसमयस्यातिदेशः देशजातिसंघेषु; संघवृत्तम्. **मनुः**—(८६४-५) ग्रामदेशसंघविलङ्घने दण्डविधिः. **याज्ञवल्क्यः**—(८६५-९) त्रैविद्यविधौ वर्णाश्रमधर्मसंविद्धर्मराजकृतधर्मरक्षणाधिकृतब्राह्मणनियुक्तिः; संविल्लङ्घनगणद्रव्यहरणदण्डः, समूहहितवादिवचनाकरणे दण्डः; समूहाधिकृता राज्ञा सत्कार्याः; समूहाधिकृतेन लब्धं समूहायैव देयं, अन्यथा दण्डः; कीदृशाः समूहकार्यचिन्तका भवेयुः; उक्तत्रैविद्यसंविद्विधेः श्रेण्यादावतिदेशः. **नारदः**—(८६९-७२) समयानपाकर्मलक्षणम्, पाषण्डनैगमश्रेण्यादीना समयः राज्ञा रक्षणीयः; राज्ञा पाषण्डादीना कीदृशः समयः निराकरणीयः, ते च गणाः कथं नियम्याः. **बृहस्पतिः**—(८७२-५) [संविद्विधानप्रतिज्ञा ('एषा हि' इत्यादिरेकश्लोकः); त्रैविद्यसंविद्विधिः ('वेदविद्याविदो' इत्यादिश्लोकत्रयम्); ग्रामश्रेणिगणाना संविल्लक्षणं, तत्संविद्विषयाः, तत्संवित्पालनं, तत्सविद्भङ्गे दण्डः, तत्संवित्करणम्, ग्रामश्रेणिगणादीनां कार्याध्यक्षविधिः ('ग्रामश्रेणिगणाना' इत्यादयो दश श्लोकाः); ग्रामश्रेणिगणाना अपराधकर्तुर्दण्डः ('यस्तु साधारणं' इत्यादिश्लोकत्रयम्); ग्रामश्रेणिगणाध्यक्षाणां समुदायिनां राज्ञश्च अधिकारमर्यादा ('तैः कृतं' इत्यादिश्लोकत्रयम्); ग्रामश्रेणिगणद्रव्यस्य राजभागस्य च विचारः ('संभूयैकमतिं' इत्यादिश्लोकचतुष्टयम्)]. **कात्यायनः**—(८७५-७) [समूहसंविद्धर्मः राजशासनं च, तयोर्भङ्गे दण्डः; गणैः गणिन अपराधिनो दण्ड्या राजानुमत्या; गणिना गणार्थकृतर्णादिभाक्त्वविचारः; समूही समूहेऽशभागी]. **स्मृत्यन्तरम्**—(८७७) [समयभङ्गिब्राह्मणदण्डः].

क्रयविक्रयानुशयः

[पृ. ८७८-९०१]

विक्रीयासंप्रदानम्

[पृ. ८७८-८९०]

वेदाः—(८७८) अल्पमूल्येन विक्रयोत्तर समयाभावेऽनुशयो न कार्यः. **विष्णुः**—(८७८) गृहीतमूल्येऽनुशये दण्डः. **कौटिलीयमथशास्त्रम्**—(८७८-९) विक्रीयासंप्रदानम्, क्रीत्वानुशयः; विवाहेऽनुशयः; द्विपदचतुष्पदेषु अनुशयः; कन्योपधिः विवाहे. **मनुः**—(८७९-८३) क्रयविक्रयानुशये परीक्षाकालः; परीक्षाकालोत्तरमनुशये दण्डः; पण्यानुशयधर्मस्यान्यत्र वेतनादिष्वतिदेशः; विवाहे कन्योपधिविषयेऽनुशयः; कन्याविषयानुशयमर्यादा सप्तपदी. **याज्ञवल्क्यः**—(८८३-५) गृहीतमूल्यपण्यविक्रेत्रनुशयः; अप्रदत्ते पण्ये दुष्टे विक्रेतुर्हानिः; क्रेतर्यगृह्णति अन्यत्र विक्रेयम्; सत्यंकारव्यवस्थातिक्रमे दण्डः. **नारदः**—(८८६-९) विक्रीयासंप्रदाननिरुक्तिः; पण्यनिरुक्तिः; पण्यस्य षड्विधदानादानविधिः; विक्रेतुरनुशये स्थावरजङ्गमभेदेन दापनभेदः; अर्धहानौ दापनप्रकारः स्थायिचरक्रेतृभेदे; अप्रदत्ते पण्ये दुष्टे विक्रेतुर्हानिः; विक्रयोपधौ दण्डः; क्रेतुः क्रीत्वाऽग्रहणे विक्रेतृसमदोषः; अदत्तमूल्ये समयाधीना व्यवस्था; वाणिज्यं लाभमूलकमथापि ऋजुमार्गेण कर्तव्यम्. **बृहस्पतिः**—(८८९) पण्यनिरुक्तिः; सदोषपण्यविक्रये दण्डः; विक्रेतुर्न्यायव्योऽनुशयः. **कात्यायनः**—(८८९) क्रये विक्रये वाऽनुशये दण्डः परीक्षाकालश्च. **व्यासः**—(८८९-९०) अनुशयव्यावृत्त्यर्थं मध्यस्थव्यवस्था, सत्यङ्कारेऽनुशयो न कार्यः. **स्मृत्यन्तरम्**—(८९०) दशाहात्परतोऽनुशयो न कार्यः.

क्रीत्वानुशयः

[पृ. ८९०-९०१]

विष्णुः-(८९०-९१) क्रीते केतुरनुशये क्रेतुर्हानिः; विनिमयपरिवृत्तिनिरुक्तिः, तयोः स्वत्वकारणत्वं च; क्रेयस्वरूपम्; क्रीते उपधिनाऽनुशये दण्डविधिः; वस्त्राणामुपभोगेऽनुशये कालः कर्तव्यता च; पशुशकटानामनुशयेऽवधिः; द्रव्यविशेषे मूल्यनियमः; परिवृत्तिहीनक्रयप्रतिबन्धक्रयोक्तलाभादिषु व्यवस्था; क्वचित् परिवृत्तेः परावर्तनम्. **मनुः**—(८९१ २) अविक्रेयपण्यम्. **याज्ञवल्क्यः**—(८९२-३) क्रीते द्रव्यभेदेन परीक्षाकालः अनुशयावधिरूपः; अनुशयकारणाभावेऽनुशये दण्डविधिः. **नारदः**— (८९३-५)क्रीतानुशयनिरुक्तिः; क्रीते प्रतिदानावधिः; परीक्ष्य क्रीतेऽनुशयो न कार्यः; क्रये परीक्षाकालो द्रव्यभेदेन; समयमङ्गीकृत्य क्रीते वस्त्रे नानुशयः कार्यः; क्षेत्रे विक्रीते विक्रेत्रनुशयावधिः; अनुशयकारणाभावेऽनुशयो व्यर्थः. **बृहस्पतिः**—(८९५-६) परीक्ष्य क्रेयम्; परीक्षाकालपूर्वमेवानुशयः कार्यः; क्रये मूल्यनिश्चयः; स्थावरक्रयविधिः. **कात्यायनः**—(८९६-८) भूक्रये परीक्षाकालः; योग्यकाले क्रीतं सदोषं दृष्टं प्रतिदेयम्; निर्दोषक्रयेऽनुशये दण्डः; साधारणक्रये एकस्याधिकारमर्यादा; मूल्यनिश्चयः; मूल्यनियामकः; क्रयपरिवर्तनयोः स्वरूपम्; स्थावरक्रयोक्तलाभरुचिक्रयविधिः, मूल्यव्यवस्था अनुशयव्यवस्था च. **व्यासः**—(८९९) द्रव्यविशेषेषु परीक्षाकालाः अनुशयावधिश्च. **प्रजापतिः**—(८९९) स्थावरक्रयविधिः, मूल्यव्यवस्थापकविचारश्च. **सुमन्तुः**—(८९९ ९००) क्रये तत्तुल्यक्रियासु चानुशयावधिः, क्रयसिद्धिः, भूक्रयविधिः. **भारद्वाजः**— (९००) प्रतिबन्धक्रयभूक्रयाज्ञाक्रयोक्तलाभादिविधिः. **जातूकर्णिः** — (९०१) भूक्रये सामन्तादिविधिः. **पञ्चाध्यायी**-(९०१)[क्रये सामन्तादिविधिः]. **वृद्धकात्यायनः**—(९०१) परिवर्तनक्रयोक्तलाभादिविचारः क्रयसिद्धिश्च. **स्मृत्यन्तरम्**—(९०१) क्रयसिद्धिः.

स्वामिपालविवादः

[पृ. ९०२--९२१]

वेदाः—(९०२-३) स्वामिपशुपालतत्कर्तव्यतालिङ्गानि; पशुपालप्रकाराः. **गौतमः**—(९०३-४)शस्यरक्षणम्, तदर्थं पशुदण्डविधिः. **आपस्तम्बः**—(९०४) [शस्यरक्षणं, तदर्थं पशुदण्डविधिः], पालस्य स्वामिनश्च विवादः. **विष्णुः**—(९०४-५) शस्यरक्षणं तदर्थं पशुदण्डविधिः. **शङ्खः शङ्खलिखितौ च**--(९०५-६) [शस्यरक्षणम्, तदर्थं पशुदण्डविधिः].**कौटिलीयमर्थशास्त्रम्**-(९०६-७) पशुकृतक्षेत्रपथहिंसा. **मनुः**--(९०७-११) स्वामिपालवादप्रतिज्ञा; पालभृतिः; शस्यरक्षणम्, तदर्थं पशुदण्डविधिः. **याज्ञवल्क्यः**-(९१२-५) पालस्य स्वामिनश्च विवादः, पालभृतिश्च; गोप्रचारकरणम्; द्विजस्य तृणैधःपुष्पेष्वधिकारः; शस्यरक्षणम्, तदर्थं पशुदण्डविधिः. **नारदः**—(९१५-९) पालभृतिः; पालस्य स्वामिनश्च विवादः; शस्यरक्षणम्, तदर्थं पशुदण्डविधिः. **बृहस्पतिः**—(९१९) पालस्य भृतिः ; पालस्य स्वामिनश्च विवादः ; सस्यरक्षणम्, तदर्थं पशुदण्डविधिः. **कात्यायनः**-(९१९-२०) [पालस्य स्वामिनश्च विवादः; सस्यरक्षणम्, तदर्थं पशुदण्डविधिः]. **व्यासः**--(९२०) पालस्य स्वामिनश्च विवादः. **उशना**--(९२०)सस्यरक्षणम्, तदर्थं पशुदण्डविधिः. **स्मृत्यन्तरम्**—(९२१) [सस्यरक्षणम्, तदर्थं पशुदण्डविधिः]. **ब्रह्मपुराणम्**—(९२१) पालस्य स्वामिनश्च विवादः. **भाष्यकारः**—(९२१) सस्यरक्षणम्, तदर्थं पशुदण्डविधिः.

सीमाविवादः

[पृ. ९२२-९६२]

वेदाः--(९२२-५) क्षेत्रमितिः; अप्रस्वती आर्तना चेति द्विविधा उर्वरा; क्षेत्रं हिरण्यं पशवश्च धनम्; क्षेत्रे स्वाम्यम्; कृषिकर्म, वापीकुल्यादिकृत्रिमाकृत्रिमजलस्थानानि च; क्षेत्रवादलिङ्गम्; सेतुलिङ्गम्; कर्षकसीरपत्योर्भेदः; कुलपा व्राजपतिं प्रति धनमर्पयन्ति; पृथी वैन्यः कृषिकर्मप्रवर्तयिता, सेतुः क्षेत्रस्वाम्यं च.**वसिष्ठः**--(९२५) पथि गृहादिकृते च अनुकूलदेशव्यवस्था; सीमावादे क्रियाविधिः. **विष्णुः**--(९२५)मार्गादिदूषणे दण्डविधिः; सीमाभेदे दण्डविधिः.**शङ्खः शङ्खलिखितौ च**— (९२५-६) सीमाविवादे क्रियाविधिः; पथि गृहादिकृते च अनुकूलदेशव्यवस्था; सीमाभेदादौ दण्डविधिः. **कौटिलीयमर्थशास्त्रम्**—(९२६-३३) गृहवास्तुकम्; वास्तुविक्रयः; सीमाविवादः; क्षेत्रविवादः; मर्यादास्थापनम्; बाधाबाधिकम्; उदकमार्गनिरोधे सस्यादिहिंसने च दण्डः. **मनुः**— (९३३-४०) सीमानिश्चयकालः;प्रकाशाप्रकाशसीमाचिह्नविधिः; सीमा-

विवादे क्रियाविधिः; चिह्नसाक्षिसमन्तमौलवनचारिणा पूर्वपूर्वाभावे उत्तरोत्तरं प्रामाण्यम्; साक्षिणा सीमानिर्णये धर्मविशेषः; साक्षिणा मृषाकरणे दण्डः; प्रमाणान्तरेणानिश्चये राजा निर्णेता; गृहाद्याहरणे दण्डः; मार्गादिदूषणे दण्डविधिः. **याज्ञवल्क्यः**—(९४०-४३) क्षेत्रसीमाविवादे सामन्तगोपकर्षकवनचारिणः चिह्नप्रदर्शनद्वारा प्रत्यायकाः; सामन्तसाक्षिसख्या, सीमाविवादे धर्मविशेषश्च; साक्षिणा मृषाकरणे दण्डः; प्रमाणान्तरेणानिश्चये राजा निर्णेता; क्षेत्रसीमावादविधेरन्यत्र आरामादिष्वतिदेशः; सीमाभेदादौ दण्डविधिः, परक्षेत्रानपहरणापवादः; उक्तापहारः स्वामिनिवेदनपूर्वक एव युक्तः; कर्षकेणाङ्गीकृतक्षेत्रकरणत्यागे विधिः. **नारदः**—(९४४-९)क्षेत्रजविवादनिरुक्तिः;पञ्चविधा सीमा; प्रकाशाप्रकाशलिङ्गसाक्षिसामन्तकर्षकगोपादिभिः सीमानिर्णयः; मृषोक्तौ दण्डविधिः; इतरप्रमाणाभावे राजा निर्णेता; क्षेत्रसीमावादस्य गृहोद्यानादावतिदेशः; सीमावृक्षजे स्वामित्वविधिः, मार्गरोधनिषेधः; सेतुतडागादिविधिः, कृष्टाकृष्टविधिः. **बृहस्पतिः**—(९४९-५४) सीमावादप्रतिज्ञा; राज्ञा ससाक्षिकं सपत्रं वा क्षेत्रं देयम्; ग्रामगृहक्षेत्रादिप्रवेशकाले प्रकाशाप्रकाशचिह्नानि ससाक्षिकाणि कार्याणि; सीमानिर्णये साक्षिणः के कीदृशाश्च; सीमाज्ञापनविधिः; क्षेत्रगृहग्रामादौ राजकृतः नदीकृतश्च स्वामिसंबन्धः, परगृहपीडापरिहारः; लोकमार्गपीडापरिहारः; कृष्टाकृष्टविधिः. **कात्यायनः**—(९५४-६०) षड्भूवादनिमित्तानि; षड्विधभूवादेषु भोगसाक्षिलेख्यप्रामाण्यम्; क्षेत्रविवादे सामन्ततत्सक्ततत्संसक्तमौलादिप्रामाण्यम्; सामन्तमौलवृद्धोद्धृतनिरुक्तिः; सीमावादे एकसाक्षिणः उक्तिविधिः; सामन्तादीना पूर्वदोषे संख्यागुणातिरेकेण साक्षित्वम्; साक्षिसामन्तादीनामनृतोक्तौ दण्डविधिः; दशग्रामादिसीमाकरणम्; प्रमाणान्तराभावे राजा निर्णेता; राजदैविकाभावे साक्ष्यप्रामाण्यम्; क्षेत्रसीमावादस्यातिदेशः गृहादौ; परस्परगृहादीना संबाधपरिहारादि; मार्गतीर्थादिषु पीडापरिहारः; सीमावृक्षफलस्वाम्यविधिः; स्वाम्यनुमतिमन्तरेण कृषिफलालाभः; कृष्टाकृष्टविधिः. **व्यासः**—(९६१) सीमाप्रकाराः; कृष्टाकृष्टविधिः. **प्रजापतिः**—(९६१-२) सीमाक्षेत्रवृक्षफलस्वाम्यविधिः. **वृद्धमनुः**—(९६२) ग्रामसीमापालनम्. **वृद्धहारीतः**—(९६२) सीमाकरणम्. **अनिर्दिष्टकर्तृवचनम्**—(९६२) कूपवापिपुष्करिणीतडागसरःसीमाः. **मार्कण्डेयपुराणम्**—(९६२) ग्रामपुरखेटकर्वटलक्षणानि.

स्त्रीपुंधर्माः

[पृ. ९६३–१११९]

वेदाः—(९६३-१०११)(**ऋसं.**९६३-९१) गृहनेत्री स्त्री, पतिपत्नीसंबन्धः; भ्रातृभगिन्यौ; गृहनेत्री स्त्री; कन्याजारः, अनेकजायापतिरेकः, क्षुद्रा नारी पतिप्रिया; अनेकजायापतिरेकः, पतिपत्नीसंबन्धः; कन्यालाभार्थं धनदानम्; राक्षसविवाहः; वृद्धाविवाहः; स्त्रीपुरुषप्रेम; मातृभगिन्यादिसंबन्धः; स्त्रीपुरुषभोगसंबन्धः; जारसंबन्धः; स्त्रीपुरुषभोगसंबन्धः, गृहस्थिता पत्नी; पतिपत्नीसंभोगः ब्रह्मचर्यं च; गुरुसंभोगसंलापश्रवणदोषः; गृहस्थधर्मः; व्यङ्गः कन्याद्वेष्यः साङ्गः कन्याप्रियः; पतिपत्नीसंभोगः; व्यभिचारिणी पाप निगूहति, युवतीना युवप्रेम; पतिपत्नीसंभोगः; प्रजाकामना; गृहनेत्री पत्नी; पतिपत्नीप्रेम; दुराचाराः स्त्रियः; पतिपत्नीप्रेम, विवाहकामाः कन्याः; प्रजाकामना, प्रेमविवाहबद्धदम्पती, अर्धं भार्या शरीरस्य सुपत्नी, सुपत्नी, स्वसुर्जारः; पतिः अन्यं भार्यां गमयति; सूर्यायै पूष्णो दानम्; पतिपत्नीप्रेम, अनेकजायापतिरेकः; गृहे वर्तमानाः स्त्रियः, जारसंबन्धः; अधनो जामाता; पतिपत्नीकर्तव्य सौभाग्यं च, स्वाभाविकः स्त्रीदोषः; स्त्रीधर्मः; स्त्रीपुरुषप्रेम; जारसंबन्धः; अनेकजायापतिरेकः; भ्रातृभगिन्योर्विवाहः; सुपत्न्यः; अनुगमननिषेधः, भ्रातृभगिन्यौ; स्वयंवरः गान्धर्वविवाहः; स्त्रीपुरुषसंबन्धः; गृहस्थधर्मः; वृद्धाविवाहः; राक्षसविवाहः, नियोगः, पतिपत्नीप्रेम; अनेकजायापतिरेकः; पितृदुहित्रोर्विवाहः, राक्षसविवाहः; अष्टपुत्रा सुभगा; कन्या याचनीया; पतिपत्नीसंबन्धः; गृहनेत्री स्त्री; वधूवस्त्रदोषः, पाणिग्रहणम्; पतिपत्नीसंबन्धः; सकृमबहुपतिकत्वलिङ्गम्; पूर्वं देवः अनन्तरं मनुष्यः पतिः; पतिपत्नीसंबन्धः; धनप्रजायूंषि गार्हस्थ्येऽग्नम्; पत्न्याः गृहे आधिपत्यम्; पतिपत्नीसंबन्धः; दम्पत्योः संभोगः; बहुप्रजा एव भद्रम्; पतिपत्नीसंबन्धः; गार्हस्थ्यम्, संभोगः; अनेकजायापतिरेकः; पत्नी युद्धे सारथिः; पतित्यक्ता स्त्री; सपत्नीद्वेषः; भ्रातुः पतित्वं जारत्वं वा; एकया द्वयोर्विवाहः. (**तैसं.** ९९१-४) सुपत्नी, पतिपत्नीसंबन्धः; भ्रातृभगिनीविवाहलिङ्गम्; राज्ञो भार्याद्वयम्; बहुस्त्रीकामना; स्त्रीणा यथाकामसभोगाभ्यनुज्ञा; रजस्वलाधर्माः, अमावास्यापौर्णमास्योर्भोगनिषेधः; सुपत्नी; अनेकजायापतिरेकः; जाया गृहपत्नी; स्त्रीसङ्गनिषेधः;

हीनवयस्या विवाहः; स्त्रियाः प्रियः; पत्नी पुरुषार्धम्; अनेकजायापतिरेकः; कन्यादानम्; स्त्रीपुरुषसंयोगः. (कासं. ९९४-५) सुपत्नी; स्त्रीणा सुरापानम्; स्त्रीदोषाः; अग्रेदीधिषुपरिविविदानदोषः; अनेकजायापतिरेकः; +[व्यभिचारदोषत्वनिमित्तम्].(मैसं. शुमा. ९९५-६) अनेकजायापतिरेकः; स्त्रीभोगनिषेधः; स्त्री स्वभावतो दुष्टा; दुहितृगमनम्; स्त्र्यसमर्था; स्त्री देया; अनेकजायापतिरेकः; स्त्रीपुरुषसंयोगः· अग्रेदीधिषुपरिविविदानदोषः. (असं. ९९६-१००४) दुर्भगा स्त्री; विवाहेच्छोः कन्यामनोग्रहणम्; कामिन्याः पुरुषस्य च संभोगकामना परस्परवशीकरण च; पतिपत्नीर्ध्यामन्युनाशयत्नः; नवपत्न्याः सुभगत्वं पत्यनुकूलत्व च प्रार्थ्यते; पत्युः पत्न्यनुकूलत्व प्रार्थ्यते; जायाना पतिनिष्ठा; स्त्रीवशीकरणम्; कुटुम्बसामनस्यम्; संभोगकाले सर्वस्वापनम्; एकस्या अनेकपतयः, ब्रह्मपत्न्या एक एव पतिः; पतिपत्नीसामनस्यम्, पतिव्रता; पतिपत्नीशुभकामना; जायाकामस्य जायाप्रार्थना, परिविवित्तिदोषः, कुटुम्बसामनस्यम्; दैवविवाहः, स्नुषाश्वशुरसंबन्धः; स्त्रीपुनर्विवाहलिङ्गम्; पत्युः पत्न्याश्च वयनरूप एकं कर्म, ब्रह्मचारिण्या विवाहः; वराः ज्येष्ठवरश्चेति वरप्रकारौ; वर्णभरणं वधूकर्म; कन्यादानम्; वध्वः पतिगृहगमनम्; एकस्याः पतिद्वयम्; वध्वः वैवाहिकालङ्कारादीनि, पत्न्याः पतिनिष्ठा, गृहे अन्यजनसंबन्धश्च, पत्न्यै वस्त्रदानम्; दीर्घायुर्ध्यं वध्वः प्रार्थ्यते, पाणिग्रहणम्, धर्मपत्नीत्वम्; प्रजार्थं विवाहः; वध्वः वस्त्रधारणम्, पतिपत्नीसंबन्धः; गृहजनाविरोधित्वं पत्न्या आशास्यते; दम्पत्योर्भोग्यसंपत्; इष्टा देवैरे प्रीतिः पत्न्याः; प्रजार्थं विवाहः; आशिषः; अनिष्टनिवारणम्; सापिण्ड्यविवाहदोषः; कन्यादानम्; सवर्णाविवाहः; अनुगमनम्; अनुगमननिषेधः. (ऐब्रा.१००४-५) भार्याया वस्त्रसंपत्, राज्ञः वावाता जाया; रात्रौ जायाः पत्युराकूतं जानन्ति; स्नुषाश्वशुरसंबन्धः; अप्रतिवादिनी पत्नी; पत्न्याः स्वस्त्रपेक्षया श्रैष्ठ्यम्; अनेकजायापतिरेकः; जायानिरुक्तिः. (शाब्रा.१००५)सुपत्नी;पत्नीभोजनकालः; यज्ञानर्हाः पत्न्यः; अनेकजायापतिरेकः. (तैब्रा.१००५-७) सुभगाः स्त्रियः; पतिप्रीतिकामना; यज्ञे पत्न्या जारो निर्देष्टव्यः; अपत्नीको यज्ञानर्हः; पतिवशीकरणम्; दैवविवाहः; स्त्रीसंभोगः अन्ये गुणाश्च काम्यन्ते; सुपत्नी. (शब्रा.१००७-१०) जायाया यज्ञाङ्गत्वम्; स्त्रीणामबलत्वम्; मनोः स्वदुहित्रा विवाहः; सापिण्ड्ये विवाहः; पुरुषसंनिधौ न स्त्रीणा भोजनम्; दम्पतीसंबन्धः; यज्ञे पत्न्या जारो निर्देष्टव्यः; विवाहानन्तरं पतिगृहानिवृत्तिः काम्यते; यावज्जीवं पितृदत्तपतेरत्यागो धर्मः; आत्मनोऽर्धं जाया; सुपत्नी; प्रजायै जाया; अनेकजायापतिरेकः; स्त्रीपुरुषाणा विविधधर्माः; अनेकजायापतिरेकः; स्त्रीपुरुषाणा संभोगसंवादः; आत्मनोऽर्धं भार्या; अनेकजायापतिरेकः. (तात्रा., जैउब्रा., छाउ., गोब्रा., ऐआ. १०१०-११) भ्रातृभगिन्योर्विवाहः; अनेकजायापतिरेकः; सदृशात्सदृशी प्रजा, सपिण्डविवाहः; बालभार्या; अनेकजायापतिरेकः; पतिव्रता; यज्ञे वामदेव्यव्रतम्. **गौतमः**—(१०११-४) विवाहे कन्यायाः जातिप्रवरादिसापिण्ड्यादिविचारः; कन्याविवाहकालः; स्त्रीधर्माः; मृते भर्तरि नियोगविधिः; नष्टे प्रव्रजिते प्रोषिते वा भर्तरि कालप्रतीक्षावधिः; अकृतविवाहे ज्येष्ठभ्रातरि कनीयसः कर्तव्यम्. **हारीतः**—(१०१४-७) स्त्रीरक्षा; भार्यापरित्यागः; पत्नीधर्माः; भार्यायाः सुरापाननिषेधः; भार्यापरित्यागः; पत्यौ प्रोषिते पत्नीधर्मः; विधवाधर्मः; स्वैरिणीपुनर्भ्वादयः; साध्वी. **आपस्तम्बः**—(१०१७-९) पतिकर्तव्यम्; द्वितीयदारकर्तव्यता; विवाहे गोत्रसापिण्ड्यविचारः; दम्पत्योः शुद्धिविचारः; नियोगविधिनिषेधौ; विधवाधर्माः. **बौधायनः**—(१०१९-२०) कन्याविवाहकालः; स्वयंवरः; बलादपहृतकन्यापुनर्दानम्; कन्यापुनर्विवाहः; भार्यागमनविधिः; स्त्रीरक्षा; भर्तृसेवाधर्माः; भार्यापरित्यागः; नियोगः; अनियोज्या अगम्याश्च स्त्रियः. **वसिष्ठः**—(१०२०-२२) विवाहे गोत्रप्रवरसापिण्ड्यादिविचारः; कन्याविवाहकालः; स्वयंवरः; वाग्दत्तायाः पुनरन्यत्र दानम्; अक्षतयोनिपुनर्विवाहः; भार्यापरित्यागः; पत्यौ प्रोषिते पत्नीधर्मः; नियोगः; प्रोषितज्येष्ठभ्रातृप्रतीक्षा. **विष्णुः**—(१०२२-४) विवाहे गोत्रप्रवरसापिण्ड्यादिविचारः; स्वयंवरः; धर्मार्थं भार्या द्विजजातिजा; पूर्वदत्ता न पुनर्देया; भार्या न त्याज्या; स्त्रीरक्षा; पत्नीधर्माः; पत्यौ प्रोषिते पत्नीधर्माः; प्रतीक्षाकालः; नियोगः; विधवाधर्माः. **शङ्खः शङ्खलिखितौ च**—(१०२४-६) स्वयंवरः; कन्यापुनर्दानम्; सवर्णासवर्ण भार्याः;स्त्रीरक्षा;भार्यापरित्यागः; अधिवेदनम्; पत्नीधर्माः; पत्यौ प्रोषिते पत्नीधर्माः; स्वैरिणीपुनर्भ्वादयः. **महाभारतम्**—(१०२६-३४) प्रजार्थं विवाहः; स्त्रीरत्नं शुद्धम्; भर्तृपतिपदनिरुक्तिः; स्त्रीणां पुनर्विवाहश्चाभिचारधनस्वाम्यनिषेधः; पत्नीधर्माः; जायामहिमा; पतिधर्मः; स्त्रीणा स्वैरसंभोगः धर्म आसीत्; स्त्रीणा श्वेतकेतुकृतः

पुनर्विवाहनियोगनिषेधः; बहूनामेकपत्निता; पत्नीधर्माः; ऋतुमत्या विवाहे दानम्; पत्नीधर्माः; पत्युरनुगमनम्; विधवाधर्माः; स्त्रीरक्षा; स्त्रीणा समानवर्णे व्यभिचारोऽदोषोऽल्पदोषो वा; बहुभार्यस्य संभोगविधिः; पत्नीपरित्यागः; स्त्रीरक्षा; स्त्रीदोषः; नियोगः पुनर्विवाहश्च. **कौटिलीयमर्थशास्त्रम्**—(१०३४-४१) विवाहधर्मः; आधिवेदनिकम्; शुश्रूषाधर्मपारुष्यद्वेषातिचारोपकारव्यवहारप्रतिषेधाश्च; निष्पतनम्, पथ्यनुसरणम्, ह्रस्वप्रवासः दीर्घप्रवासश्च. **मनुः**—(१०४१-७५) कन्यायाः पुनर्दाननिषेधः; प्रतिगृहीतकन्यात्यागः; कन्यादानकालः; कन्यास्वयंवरः; ऋतुमत्याः शुल्कं न देयम्; वधूवरयोर्विवाहकालः; कन्याया वैवाहिकशुल्कसंबन्धी विधिः; स्त्रीपुंधर्मप्रतिज्ञा; स्त्रीणामस्वातन्त्र्यविधिः; रक्षणविधिः; रक्षणप्रयोजनम्; जायापदनिरुक्तिः; जायारक्षणोपायाः; स्त्रीणा स्वभावदोषाः दूषणानि च; उत्कृष्टभर्ता स्त्रीरक्षणयोग्यः; स्त्रीरक्षणविध्युपसंहारः; दारमाहात्म्यम्; स्त्रीलालनम्; पतिव्रतास्तुतिः; व्यभिचारनिन्दा; अनेकभार्याभिर्वर्तनप्रकारः; दम्पत्योः परस्पराव्यभिचारविधिः; भार्याभरणं नित्यधर्मः; सहधर्मचरणविधिः; स्त्रीत्यागविचारः अधिवेदनविचारश्च; दुष्टस्त्रीणा दण्डः प्रायश्चित्तं च; स्त्रीधर्माः पतिव्रतावृत्तं च; प्रोषितभर्तृकाविचारः; विधवाधर्माः नियोगनिषेधश्च; नियोगविधिः; नियोगनिषेधविचारः+(प्रतिप्रसवश्च वाग्दत्तायाम्); बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः; पुनर्दारक्रिया. **वाल्मीकिरामायणम्**—(१०७५-७) पतिव्रतावृत्तम्; पतिव्रतावृत्तम्–स्त्रीदोषाः गतिनिष्ठा च. **याज्ञवल्क्यः**–(१०७७-९२)कन्यादातृक्रमः;कन्यास्वयंवरविधिः; दत्तकन्याहरणविचारः; सदोषकन्यादाननिर्दोषकन्यात्यागदूषणविचारः; दारसंग्रहफलम्; स्त्रीरक्षणविधिः; रक्षणविधौ स्त्रीगमनविधिः; रक्षणविधौ स्त्रीलालनविधिः; रक्षणविधौ स्त्रीणा गुर्वंधीनत्वविधिः; स्त्रीधर्मः; पतिव्रतावृत्तम्; प्रोषितभर्तृकावृत्तम्; स्त्रीत्यागविचारः, अधिवेदनविचारश्च; स्त्रीणामनन्यपरत्वविधिः; अधिवेदनकारणाभावे अधिवेदने विधिः; पुनर्भूचैरिणीस्वरूपम्, नियोगविधिश्च; अनेकभार्यकर्तव्यम्; पुनर्दारक्रिया. **नारदः**— (१०९२–११०६) स्त्रीपुंधर्मविवादपदनिरुक्तिः; वरणपाणिग्रहणस्वरूपम्; विवाह्यजातिः; विवाहे सापिण्ड्यगोत्रादिविचारः; विवाह्यपुरुषलक्षणविचारः; चतुर्दशनपुंसकादिविचारः; कन्यादातृक्रमः; कन्यास्वयंवरविधिः; दत्तकन्यापुनर्हरणसदोषकन्यादानसदोषप्रतिग्रहीत्रादिविचारः; अष्टौ विवाहाः; स्त्रीरक्षा; स्त्रीत्यागविचारः; प्रोषितभर्तृकावृत्तम्, तद्भ्रातृन्यपतिविधिश्च; स्त्रीपुनर्विवाहः; नियोगविधिः; दम्पत्योर्वादस्थाविषयः; बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः; पुनर्भूस्वैरिणीप्रकाराः; वर्णसंकरासंकरौ; संकरजातिविचारः. **बृहस्पतिः**— (११०६–९) स्त्रीपुंधर्मप्रतिज्ञा; स्त्रीरक्षा; स्त्रीरक्षणोपायाः; स्त्रीधर्माः; स्त्रीदोषाः; पतिव्रतावृत्तम्; प्रोषितभर्तृकावृत्त, तदभ्रातृन्यपतिविधिश्च; विधवाधर्माः, अन्वारोहणविचारश्च; नियोगविधिनिषेधः. **कात्यायनः**–(११०९–११) कन्यायाः पुनर्दानादानपुनर्विवाहविचारः; अनेकभार्यस्य कर्तव्यं, स्त्रीधर्माश्च; विधवाधर्माः; नियोगविधिः, परपूर्वाविचारश्च; बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः. **व्यासः**— (१११९) पतिव्रतावृत्तम्; स्त्रीदोषाः; त्याज्यस्त्रीविचारः; अन्वारोहिणीप्रशंसा; विधवाधर्माः. **देवलः**–(१११९-३) स्त्रीत्यागविचारः; स्त्रीधर्माः; अधिवेदनविचारः; स्त्रीपुनर्विवाहः, पतित्यागविचारश्च; प्रोषितभर्तृकाधर्माः,+[तदभ्रातृन्यपतिविधिश्च]. **उशना**— (१११३) ब्राह्मण्या अन्वारोहणनिषेधः; नियोगविधिः. **यमः**—(१११३–४) पतित्व सप्तमे पदे, ब्राह्मण्याः सुरापाननिषेधः; स्त्रीत्यागविचारः; विधवाधर्माः; नियोगविधिः. **दक्षः**–(१११४–५) स्त्रीरक्षा; अधिवेदनविचारः; दम्पत्योर्धर्माः द्विदारदोषश्च. **पैठीनसिः**– (१११५) विवाहे सापिण्ड्यविचारः; स्त्रीरक्षा; स्त्रीधर्माः; ब्राह्मण्या अन्वारोहणनिषेधः. **अङ्गिराः**–(१११५-६) अन्वारोहणविचारः. **शातातपः**—(१११६)स्त्रीपुनर्विवाहविचारः. **वृद्धमनुः**–(१११६) नियोगविचारः. **ऋष्यशृङ्गः**—(१११७) स्त्रीधर्माः. **सुमन्तुः**—(१११७) स्त्रीत्यागविचारः. **प्रचेताः**—(१११७) विधवाधर्माः. **पराशरः**—(१११७) स्त्रीत्यागपतित्यागस्त्रीपुनर्विवाहविचारः; विधवाधर्माः; अन्वारोहणविचारः; बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः. **विराट्**–(१११७)अन्वारोहणविचारः. **व्याघ्रपात्**—(१११७) अन्वारोहणविचारः. **गार्ग्यः**—(१११७) स्त्रीत्यागविचारः. **स्मृत्यन्तरम्**—(१११८) विवाहे गोत्रसापिण्ड्यविचारः; स्त्रीरक्षा; पत्नी न क्रेतव्या; स्त्रीप्रशंसा; अधिवेदनाविचारः; प्रोषितभर्तृकाविधिः; विधवाधर्माः. **अनिर्दिष्टकर्तृकवचनानि**—(१११८) स्त्रीणा एकानेकपतिवरणाविचारः; नियोगविधिः. **मत्स्यपुराणम्**—(१११८) स्त्रीरक्षा. **ब्रह्मपुराणम्**—(१११८–९) विधवाधर्माः; स्त्रीपुनर्विवाहनियोगान्वारोहणविचारः. **विष्णुधर्मे**—(१११९) प्रोषितभर्तृकावृत्तम्. **शुक्र-**

नीतिः—(१११९) पतिव्रतावृत्तम्; विधवावृत्तम्; प्रोषितभर्तृकावृत्तम्.

दायभागः

[पृ.११२०–१५८९]

दायभागपदार्थः

[पृ.११२०–११४३]

वेदाः—(११२०–२२) रिक्थम्; क्रयः; संविभागः; कर्मयोगः; प्रतिग्रहः; परिग्रहः; विजितम्. **गौतमः**—(११२२–५) अर्थागमः सर्ववर्णसाधारणः; स्वत्वोत्पत्तिनिमित्तम्; वर्णविशेषेणार्थागमविशेषः; स्वत्वोत्पत्तिनिमित्तम्; पैतृके स्वत्वोत्पत्तिः; विभागप्राशस्त्यम्. **विष्णुः**—(११२५-६) पैतृके स्वत्वोत्पत्तिः; पैतृकधनस्वरूपं तद्विभागस्वरूपं च. **वसिष्ठः**—(११२६) सर्ववर्णसाधारणोऽसाधारणश्चार्थागमः. **मनुः**–(११२६-८) सर्ववर्णसाधारणोऽसाधारणश्चार्थागमः; दायभागप्रतिज्ञा; व्याख्यासु दायभागपदार्थः; विभागप्राशस्त्यम्. **नारदः**—(११२९-४१) षड्विधोऽर्थागमः; अर्थार्जनविधिः; त्रिविधं धनं शुक्लशबलकृष्णरूपम्; धनसाध्यानि; सर्ववर्णसाधारणो वर्णविशेषनियतश्चार्थागमः; दायभागप्रतिज्ञा, व्याख्यासु दायभागपदार्थः, स्वत्वोत्पत्तिनिरूपणं, विभागस्वत्वयोः संबन्धः, स्वत्वकालविभागकालविचारश्च. **बृहस्पतिः**–(११४१) स्थावररूपार्थागमः; दायपदार्थः; विभागप्राशस्त्यम्. **व्यासः**— (११४२) विभागप्राशस्त्यम्. **देवलः**—(११४२) विभागप्राशस्त्यम्. **निघण्टुकारः**—(११४२) दायपदार्थः. **स्मृत्यन्तरम्**—(११४२) भूमिरूपार्थागमः. **संग्रहकारः (स्मृतिसंग्रहः**—(११४२) दायपदार्थः; वर्णविशेषानुसारेण अर्थागमः; स्वाम्यस्वत्वनिरूपणम्; विभागस्वत्वयोः संबन्धः; विभागप्राशस्त्यम्.

पैतृकद्रव्यविभागस्तत्कालश्च

[पृ.११४३–११५७]

वेदाः—(११४३-४) भ्रातरो भागहराः; दायादा अनेके भवन्ति; भ्रातृणा भूमिविभागः; भ्रातृणा पैतृकदायहरत्वम्; जीवति पितरि पुत्राणा रिक्थविभागकालः. **गौतमः**—(११४४-५) पितुरूर्ध्वं रिक्थविभागकालः; जीवति पितरि रिक्थविभागकालः. **हारीतः**–(११४६) अनापदि जीवति पितरि अर्थास्वातन्त्र्यं पुत्राणाम्; पित्रोरापदि ज्येष्ठः प्रभवति. **बौधायनः**—(११४६-७) जीवति पितरि रिक्थविभागकालः; पितृषु मृतेषु विभागकालः. **शङ्खः शङ्खलिखितौ च**—(११४७-९) अनापदि जीवति पितरि जीवन्त्या मातरि वा अर्थास्वातन्त्र्यं पुत्राणाम्; पित्रोरापदि ज्येष्ठः प्रभवति; जीवति पितरि तदनुमत्या रिक्थविभागकालः; पितुरूर्ध्वं रिक्थविभागकालः. **कौटिलीयमर्थशास्त्रम्**—(११४९) जीवतोः पित्रोरननुमतौ न रिक्थविभागः; पित्रोरूर्ध्वं रिक्थविभागकालः. **मनुः**—(११४९-५१) [जीवतोः पित्रोरननुमतौ न रिक्थविभागः; पित्रोरूर्ध्वं रिक्थविभागकालः]. **याज्ञवल्क्यः**—(११५१-२) पित्रोरूर्ध्वं ऋणरिक्थविभागकालः पुत्राणाम्. **नारदः**—(११५२-५५) पित्रोरूर्ध्वं पैतृकरिक्थविभागः; जीवति पितरि रिक्थविभागः; व्याख्यासु विभागकालाः; विभागानधिकारी पिता. **बृहस्पतिः**—(११५५) पित्रोरूर्ध्वं रिक्थविभागकालः; जीवति पितरि रिक्थविभागकालः. **देवलः**–(११५६)पितुरूर्ध्वं रिक्थविभागकालः; जीवति पितरि सदोषे विभागकालः, जीवति पितरि स्वाम्यविचारश्च. **संग्रहकारः (स्मृतिसंग्रहः)**—(११५७) पितृद्रव्यमातृद्रव्यविभागकालः; पितुरूर्ध्वं विभागकालः.

पितृकर्तृको विभागः

[पृ.११५८–११७४]

वेदाः—(११५८-६३) पिता प्रजाभ्यो धनं विभजति, वृद्धपितुः सकाशात् पुत्रा धनं हरन्ति; पितृधने पुत्रस्वाम्यम्; पुत्राः पित्रे धनं ददति; पितृधने पुत्रस्वाम्यम्; माता पुत्रं प्रति भागदायिनी; पिता प्रातिस्विकव्यवहाराय पुत्राय भागं ददाति; ज्यायान् कनीयसे भागं ददाति; पिता पुत्रेभ्यो धनं ददाति; पुत्रः पितृभ्यां धनं ददाति; पितरः पुत्रेभ्यो भागं ददति; सर्वेषां भ्रातृणां भागार्हत्वम्; पित्रर्जितं धनं पितापुत्रसाधारणम्; पितृधनं पुत्रधनं च उभयसाधारणम्; पिता पुत्रेभ्यो दायं विभजति; ज्येष्ठपुत्रः द्विभागधनभागी पिता वा; जीवति पितरि पुत्रकृतपैतृकधनविभागः; पिता धनं पुत्रेभ्यो विभजति; पितापुत्रयोर्द्रव्यं साधारणम्. **हारीतः**— (११६३-४) पितृकृतविभागविधिः. **आपस्तम्बः**—(११६४-६) पितृकृतविभागविधिः; ज्येष्ठस्य दायहरत्वं ज्येष्ठपुत्रपितृभार्याणामुद्धारश्च साध्यते बाध्यते च. **शङ्खः शङ्खलिखितौ च**—(११६६-७) पितृकृत-

समविषमविभागविधिः. **याज्ञवल्क्यः**--(११६८-७०) पितृकृतसमविषमविभागविधिः. **नारदः**—(११७०-७२) पितृकृतसमविषमविभागविधिः. **बृहस्पतिः**—(११७२-३) पितृकृतसमविषमविभागविधिः. **कात्यायनः**— (११७३-४) मातृपितृपुत्राणा समविभागविधिः; स्वार्जिते पितुरधिकांशहरत्वम्.

पैतामहद्रव्यस्वाम्यविचारः

[पृ. ११७५-११८०]

विष्णुः—(११७५), **याज्ञवल्क्यः**—(११७५-९), **बृहस्पतिः**— (११७९-८०), **व्यासः**—(११८०) पैतामहे द्रव्ये पितापुत्रयोः स्वाम्यं तद्विभागश्च.

पुत्राणां सोद्धारसमविषमविभागाः

[पृ. ११८०-११९४]

वेदाः— (११८०-८१) ज्येष्ठो भ्राता द्विभागहारी; गुणवान् भ्राता उद्धारभाक्; पितुरिष्टो भ्राता उद्धारभाक्; पुत्राणा ज्येष्ठादितारतम्यानुसारेण विषमविभागः; विभागो जीवति पितरि पित्रधीनः. **गौतमः**—(११८१-३) पुत्राणामुद्धारविचारः; उद्धृतावशिष्टस्य समविभाग इति प्रथमः कल्पः; ज्येष्ठस्य द्व्यंशित्वं इतरेषा समांश इति द्वितीयः कल्पः; ज्येष्ठादितारतम्येन विभागतारतम्यं इति तृतीयः कल्पः. **हारीतः**—(११८३) पुत्राणामुद्धारविचारः. **बौधायनः**—(११८३) ज्येष्ठोद्धारः. **वसिष्ठः**-(११८४) ज्येष्ठस्य द्व्यंशित्वम्; पुत्राणामुद्धारविचारः. **विष्णुः**—(११८४) पुत्राणा समविभागः ज्येष्ठोद्धारश्च. **महाभारतम्**—(११८४)पुत्राणा समविभागः, ज्येष्ठस्याधिकभाक्त्वम्; सवर्णानेकभार्यापुत्राणा विषमविभागः. **कौटिलीयमर्थशास्त्रम्**-(११८४-६) पुत्राणामुद्धारविचारः; अन्तरालवर्णाना समो विभागः. **मनुः**-(११८६-९१) पुत्राणामुद्धारविचारः; समगुणपुत्राणा उद्धारनिषेधः; उद्धारव्यतिरेकेण समाशाः; ज्येष्ठादितारतम्येन विभागतारतम्यम्. **याज्ञवल्क्यः**-(११९२) संभूयार्जितस्य समो विभागः. **नारदः**-(११९२-३) ज्येष्ठादितारतम्येन विभागतारतम्यम्.**बृहस्पतिः**-(११९३) ज्येष्ठस्य द्व्यंशित्वम्; पुत्राणा समांशित्वम्; गुणिने उद्धारः; संभूयार्जितस्य समो विभागः. **देवलः**- (११९३-४)पुत्राणामुद्धारविचारः; ज्येष्ठलक्षणम्. **उशना**—(११९४) ज्येष्ठोद्धारः. **पैठीनसिः**—(११९४) पुत्राणां समो विभागः. **अनिर्दिष्टकर्तृकवचने**-(११९४) ज्येष्ठादितारतम्येन विभागतारतम्यम्. **संग्रहकारः (स्मृतिसंग्रहः)**—(११९४) उद्धारनिषेधः.

भ्रातृणां सहवासविधिः

[पृ.११९५-११९९]

वेदाः-(११९५) ज्येष्ठ एव पुत्रो दायादः. **गौतमः**-(११९५) विकल्पेन ज्येष्ठ **एव** दायादः, **इतरेषा** भरणमात्रम्. **हारीतः**-(११९५) सर्वेषामध्ययनसमाप्तिपूर्वं सहवासविधिः. **शङ्खः शङ्खलिखितौ च**—(११९५) जीवति पितरि सहवासविधिः;वृद्धयर्थं सहवासविधिः. **कौटिलीयमर्थशास्त्रम्**—(११९५) सहवासविधिः. **मनुः**—(११९६-८) विकल्पेन ज्येष्ठ एव दायादः, इतरेषा भरणमात्रम्; ज्येष्ठप्रशंसा; ज्येष्ठे इतरेषा वृत्तिः. **नारदः**—(११९८) सर्वानुमत्या सहवासविधिः. **व्यासः**—(११९९) जीवति पितरि सहवासविधिरितरथा विभागः. **संग्रहकारः (स्मृतिसंग्रहः)**—(११९९) इतरेषामनधिकारनिमित्त अन्यतरस्यैव दायहरत्वम्.

पुरुषपरम्परायां विभागविधिः

[पृ. ११९९-१२०३]

कौटिलीयमर्थशास्त्रम्—(११९९-१२००) आ चतुर्थात् पितृतो भागकल्पना अग्रे समभागः; प्राप्तव्यवहाराप्राप्तव्यव्यवहारादिविभागविचारः. **याज्ञवल्क्यः**—(१२००) पितृतो भागकल्पना. **बृहस्पतिः**—(१२००-१२०१) स्वार्जिते समभागः, रिक्थे तु पितृतो भागकल्पना **कात्यायनः**—(१२०१-३) प्राप्तव्यव्यवहाराप्राप्तव्यव्यवहारादिविभागविचारः,वास्तुक्षेत्रादिविभागः; पितृतो भागकल्पना आ चतुर्थात्. **देवलः**—(१२०३) अविभक्ताना पितृतो भागकल्पना आ चतुर्थात्, अग्रे समभागः, सवर्णापुत्राणा समो विभागः.

विभाज्याविभाज्यविवेकः

[पृ. १२०४-१२३३]

गौतमः— (१२०४-५) विद्याधनविभागविचारः; अविद्यार्जितधनविभागविचारः; अविभाज्यद्रव्यविशेषाः; स्त्रियोऽविभाज्याः. **वसिष्ठः**— (१२०५) स्वार्जिते द्व्यंशित्वम्. **विष्णुः**— (१२०५-६) पितृदत्तमविभा-

ज्यम्; पैतामहे नष्टमृध्दृते स्वार्जितं च पिता न विभजेत्; अविभाज्यद्रव्यविशेषाः; स्त्र्यलङ्कारोऽविभाज्यः. **शङ्खः शङ्खलिखितौ च**—(१२०७) अविभाज्यद्रव्यविशेषाः; पूर्वनष्टभूम्युद्धारकर्तुश्चतुर्थभागोऽधिकः. **कौटिलीयमर्थशास्त्रम्**—(१२०७-८)साधारणद्रव्यानधीनस्वार्जितमविभाज्यम्; अविभाज्यद्रव्यविशेषाः; ऋणरिक्थविभागः समः. **मनुः**— (१२०८-१५) अविभाज्यद्रव्यविशेषाः; स्त्र्यलङ्कारश्चाविभाज्यः; विद्याधनविभागविचारः; अविद्यार्जितधनविभागविचारः; विद्याधनमैत्रौद्वाहिकमाधुपार्किकान्याविभाज्यानि; अनीहमानस्य न विभागः; स्वार्जितमविभाज्यम्; पैतामहं नष्टमुद्धृत स्वार्जितं च पिताऽकामो न विभजेत्; सभूयार्जितं पित्रा समं विभाज्यम्. **याज्ञवल्क्यः**— (१२१५-९) अविभाज्यविचारः; पितृप्रसादलब्धमविभाज्यम्. **नारदः**- (१२१९-२१) मणिमुक्तादयोऽविभाज्याः, स्थावरं विभाज्यम्; शौर्यमार्याविद्याधनपैतृकप्रसादाना विभाज्याविभाज्यविचारः; ऋणापाकरणावशिष्टमेव रिक्थं विभाज्यम्. **बृहस्पतिः**— (१२२१-४) पैतामहं नष्टमुद्धृत स्वार्जितं च नाकामः पिता दद्यात्; पितुरूर्ध्वं समो विभागः; सभूयार्जितं समं विभाज्यम्; विभाज्यद्रव्यविशेषाः; मनुकृताविभाज्यविचारपरीक्षा; पितृदत्तविद्याशौर्यभार्याधनान्यविभाज्यानि; समविषमविभागविकल्पः. **कात्यायनः**— (१२२४-३०) पैतामहं नष्टमुद्धृतं स्वार्जितं च पिता नाकामो विभजेत्; विद्याशौर्यादिधनानां विभाज्याविभाज्यत्वविचारः, तल्लक्षणानि च; मनुकृतविभाज्यविचारपरीक्षा; देशजातिसंघग्रामाणां भिन्नो दायभागधर्मो भवति; पैतृकधनेन ऋणशुद्धयुत्तरं दायविभागः; विभाज्यो दायः. **व्यासः**— (१२३०-३२) स्वार्जितविद्याशौर्यसमुदायपितृप्रसादलब्धवैवाहिकादिधनमविभाज्यम्; अविभाज्यद्रव्यविशेषाः. **उशना**— (१२३२) अविभाज्यद्रव्यविशेषाः. **प्रजापतिः**— (१२३२-३) विद्याशौर्यादिधनान्यविभाज्यानि; स्थावरविभागविचारः. **लौगाक्षिः**- (१२३३) योगक्षेमावविभाज्यौ. **वृद्धयाज्ञवल्क्यः**—(१२३३) स्थावरातिरिक्तं पितृप्रसादलब्धमविभाज्यम्. **स्मृत्यन्तरम्**—(१२३३) गृहविभागः.

सवर्णसापत्नभ्रातृविभागः

[पृ. १२३३-१२३८]

गौतमः-(१२३३-४) **ज्येष्ठस्योद्धारः ज्यैष्ठिनेयस्य च**; जन्मज्येष्ठमातृज्येष्ठाना समो विभागः; पुत्राणा दौहित्रीणा वा मातृतो भागकल्पना. **महाभारतम्**-(१२३४) मातृतो ज्येष्ठत्वादितारतम्येन विभागः. **कौटिलीयमर्थशास्त्रम्**-(१२३४-५) नानास्त्रीपुत्राणा ज्येष्ठत्वनिमित्तानि, ज्येष्ठत्वाधीनो विभागः; सूतमागधादीना विशेषः. **मनुः**— (१२३५-७) मातृज्येष्ठजन्मज्येष्ठादीना विभागहेत्वस्था; जन्मत एव ज्यैष्ठ्यमिति सिद्धान्तः. **बृहस्पतिः**-(१२३७-८) सापत्नभ्रातृविभागः समः, ज्येष्ठस्योद्धारश्च; सापत्नभ्रातृणा मातृतो विभागः. **व्यासः**—(१२३८) सापत्नभ्रातृणा मातृतो विभागः. **उशना**—(१२३८) सोदरसापत्नभ्रातृणा समो विभागः.

असवर्णभ्रातृविभागः

[पृ. १२३८-१२५२]

गौतमः—(१२३८-९) जातिज्येष्ठगुणवयोज्येष्ठयोः समभागविधिः, उद्धारव्यतिरिक्तविभागविधिश्च. **बौधायनः**-(१२३९) जातिज्येष्ठगुणवयोज्येष्ठयोः समभागविधिः; नानावर्णस्त्रीपुत्राणा विभागविधिः. **वसिष्ठः**-(१२३९-४०) ब्राह्मणस्य त्रैवर्णिकपुत्रविभागविधिः. **विष्णुः**—(१२४०-४३) नानावर्णस्त्रीपुत्राणा विभागविधिः, असवर्णैकपुत्रानेकपुत्रविभागविधिः, शूद्रापुत्रस्यैकस्यैवार्धांशः इतरेषामभावे शेषांशविनियोगश्च. **शङ्खः शङ्खलिखितौ च**— (१२४३) नानावर्णस्त्रीपुत्राणा विभागविधिः.**महाभारतम्**-(१२४३-५)नानावर्णस्त्रीपुत्राणा विभागविधिः, शूद्रापुत्रविभागविचारः, असवर्णपुत्रविभागे वैषम्यनिमित्तविचारश्च. **कौटिलीयमर्थशास्त्रम्**-(१२४५) नानावर्णस्त्रीपुत्राणा विभागविधिः, सवर्णासवर्णैकपुत्रविभागविधिः, शूद्रापुत्रस्यैकस्यैव सत्त्वे तृतीयांशः शेषांशविनियोगश्च. **मनुः**—(१२४५-९) नानावर्णस्त्रीपुत्राणा विभागविधिः; शूद्रापुत्रस्य दशमांशः; असवर्णसमाना शूद्रेतराणां समसवर्णांशहरत्वम्; शूद्रपुत्राणा समांशहरत्वम्. **याज्ञवल्क्यः** — (१२४९-५०) नानावर्णस्त्रीपुत्राणा विभागविधिः. **नारदः**— (१२-५०-५१) नानावर्णस्त्रीपुत्राणा विभागविधिः. **बृहस्पतिः**-(१२५१-२)नानावर्णस्त्रीपुत्राणां विभागविधिः; जातिज्येष्ठगुणवयोज्येष्ठयोः समांशविधिः; क्षत्रियापुत्रस्य प्रतिग्रहभूनिषेधः, शूद्रापुत्रस्य भूनिषेधश्च; शूद्रापुत्रस्य चैकस्य तृतीयांशहरत्वम्, शेषविनियोगश्च; पितुः

पिण्डोदककर्मियाधिकारक्रमः. **देवलः**— (१२५२) असवर्णैकपुत्रः सर्वोशहरः, एकः शूद्रापुत्रस्तृतीयांशहरः इतरेषामभावे; शूद्रापुत्रस्य भूमिनिषेधः. **बृहन्मनुः**— (१२५२) प्रतिग्रहभूर्ब्राह्मणीसुतानामेव; स्थावरं त्रैवर्णिकासुतानाम्.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

[पृ. १२५३–१३८५]

वेदाः— (१२५३-६२) पुत्रमहिमा; औरस एव पुत्रो युक्तः; जनकस्यैव प्रजा; औरसपुत्र एव दायहरः न दुहिता; दुहिता संस्कारार्हा; दुहिता पुत्रिका सतानपिण्डदानार्था; दुहितुर्दायाद्यत्वविचारः; द्यामुष्यायणपुत्रलिङ्गानि; क्षेत्रजपुत्रलिङ्गं नियोगविधिलिङ्गं च; दत्तपुत्रलिङ्गम्; गूढजपुत्रलिङ्गम्; पुत्रप्रयोजनम्; पुत्रमहिमा; दुहितुर्दैयता; पुत्रदानम्; दत्तकलिङ्गम्; पुत्रमहिमा; पुत्रिकालिङ्गम्; पुनर्विवाहलिङ्गम्; पुत्रमहिमा; औरस स्वयंदत्तद्यामुष्यायणक्रीतपुत्रलिङ्गानि; ज्येष्ठत्व पुत्रत्वं च पितुरिच्छाधीनम्; पुत्राणा विक्रेयता; पितुरधीनं दायादत्वम्; पुत्रमहिमा. **गौतमः**—(१२६२-४) पुत्रिका; प्रसङ्गाद्भ्रातृकोपयमनिषेधः; क्षेत्रजः; रिक्थभाजः षड्विधपुत्राः; गोत्रमात्रभाजः षड्विधपुत्राः; पुत्राणा गोत्रभाजा रिक्थभाक्त्वं कदाचित्. **हारीतः**—(१२६४-६) पुत्रमहिमा, बहुभ्रातृणा तत्पत्नीना च भ्रातृपुत्रेण चरितार्थता; क्षेत्रजः; बन्धुदायादाः षट्, अबन्धुदायादाश्च षट् पुत्राः; षड्विधपुत्राणा दायपरिमाणम्; काण्डपृष्ठसंज्ञकाः पुत्राः. **आपस्तम्बः**—(१२६६-८) औरसपुत्रः; अनौरसपुत्रोत्पादनदोषः; क्षेत्रजः, तत्करणनिषेधश्च; अपत्यदानक्रयनिषेधः. **बौधायनः**—(१२६८-७१) औरसादित्रयोदशपुत्रविधिः तल्लक्षणानि च; तत्र औरसः; दौहित्रः; क्षेत्रजः, दत्तः; कृत्रिमः; गूढजः; अपविद्धः; कानीनः; सहोढः; क्रीतः; पौनर्भवः; स्वयंदत्तः; निषादपारशवौ; सप्त रिक्थभाजः षड् गोत्रमात्रभाजश्च पुत्राः; औपजङ्घनिमते औरसेतरपुत्रनिषेधः. **वसिष्ठः**—(१२७१-९) पुत्रमहिमा; बहुभ्रातृणा तत्पत्नीना च भ्रातृपुत्रेण चरितार्थता; औरसादिमुख्यगौणपुत्राणां विधिः, तल्लक्षणानि च; औरसादिषड्दायादपुत्रविचारः; औरसः; क्षेत्रजः; पुत्रिका; पौनर्भवः; कानीनः; गूढजः; सहोढादयः षडदायादाः; सहोढः; दत्तकः; क्रीतः; स्वयमुपागतः; अपविद्धः; शूद्रापुत्रः; एतेषामदायादाना कदाचिद्दायादत्वम्. **विष्णुः**— (१२७९-८१) पुत्रमहिमा; सर्वभ्रातृणा तत्पत्नीना च भ्रातृपुत्रेण पुत्रवत्त्वम्; औरसादिद्वादशपुत्राणां विधिः, तल्लक्षणानि च; औरसः; क्षेत्रजः; पुत्रिकापुत्रः; पौनर्भवः; कानीनः; गूढजः; सहोढः; दत्तकः; क्रीतः; स्वयमुपागतः; अपविद्धः; कृत्रिमः; द्वादशपुत्राणा क्रमेण दायहरत्वम्; दायहरणपिण्डदानसंबन्धः. **शङ्खः शङ्खलिखितौ च**— (१२८१-८३) औरसः; पुत्रमहिमा; क्षेत्रजः; पुत्रिका,पुत्रिकापुत्रश्च; औरसादयः षड् दायादाः पुत्रास्तेषा दायहरत्वतारतम्यम्; पूर्वेषामभावे अदायादषण्णां दायादत्वक्रमः. **महाभारतम्**—(१२८३-८) पुत्रमहिमा; पुत्रमहिमा, पुत्रप्रकारः, क्षेत्रजपुत्रविधिर्विशेषतश्च; श्वेतकेतुपूर्वः श्वेतकेतूत्तरश्च क्षेत्रजविधिः; दुहिता दौहित्रश्च दायहरः; पुत्रदौहित्रसाम्यम्; विक्रीतकन्यापुत्रः कन्यापितुरेव; कन्यापुत्रविक्रयनिषेधः; आर्षविवाहनिषेधः; औरसानन्तरजनिरुक्तजपतितजदत्तकृताध्यूढापध्वंसजकानीनापस्वदाख्याः पुत्राः; रेतजः क्षेत्रजः कृतकश्च;कृत्रिमकानीनाध्यूढक्षेत्रजापसदाना संस्काराः; अपविद्धा दुहिता;जनयितुः पुत्रः. **कौटिलीयमर्थशास्त्रम्**—(१२८८-९) औरसादिमुख्यगौणपुत्राणा विधिः तल्लक्षणानि च, तेषा सवर्णानामनुलोमानामनेकपितृकाणा च दायहरत्वम्. **मनुः**— (१२८९-१३२८) पुत्रमहिमा; बहुभ्रातृणा तत्पत्नीना च एकेन भ्रातृपुत्रेण पुत्रवत्त्वम्;पुत्रिका,पुत्रिकापुत्रः,दौहित्रश्च; तेषा श्राद्धकर्तृत्वदायहरत्वविचारः; औरसादिद्वादशगौणमुख्यपुत्रविधिः, तल्लक्षणानि च; औरसः; क्षेत्रजः; दत्तकः; कृत्रिमः; गूढजः; अपविद्धः; कानीनः; सहोढः; क्रीतकः; पौनर्भवः; प्रसङ्गात् पुनर्भूसंस्कारः; स्वयंदत्तः; पारशवः; यः शूद्रस्य दासीसुतः तस्याशः; पुत्रप्रतिनिधिविधिः; पुत्रप्रतिनिधिनिषेधः; सर्वेषा पुत्रप्रतिनिधीना दायहरत्वम्; उदकपिण्डदानसबन्धः; आपदि पुत्रकरणविधिः; कुपुत्राणा निन्दा; क्षेत्रजस्य दायहरत्वविचारः; बन्धुदायादा अबन्धुदायादाश्च; मुख्यगौणपुत्राणा दायहरत्वक्रमः; अनेकविधपुत्राणा औरसक्षेत्रजादीना समवाये दायहरत्वविचारः; दत्तकस्य न जनकगोत्ररिक्थभाक्त्वम्. **वाल्मीकिरामायणम्**—(१३२८-९) पुत्रमहिमा; औरसपुत्रप्रतिनिधितारतम्यम्; ज्येष्ठविचारः; औरसक्षेत्रजक्रीतदत्तपुत्रविचारः; दत्तकसुता. **याज्ञवल्क्यः**— (१३३०-४६) औरसपुत्रिकासुतक्षेत्रजगूढजकानीनपौनर्भवदत्तकक्रीतकृत्रिमस्वयंदत्तसहोढजापविद्धाः, तेषा विधिर्लक्षणानि च; औरसादीना द्वादशविधपुत्राणा पिण्डदत्वदायादत्वविचारः; अत्र द्वादशविधपुत्राः सजातीया एव ग्राह्याः; शूद्रदासीपुत्रस्याशहरत्वविचारः;

क्षेत्रजो द्व्यामुष्यायणः, तस्य पिण्डदत्वदायहरत्वविशेषश्च. **नारदः**—(१३४६-७) औरसक्षेत्रजादयो द्वादशपुत्राः, तेषां दायपिण्डदातृत्वविचारः; द्व्यामुष्यायणशुल्कदत्तापुत्र-अनियुक्तापुत्रधर्मपुत्राणा दायपिण्डदत्वविचारश्च. **बृहस्पतिः**—(१३४८-९) पुत्रमहिमा; भ्रातृणा एकपत्नीना वा एकस्य एकस्या वा पुत्रेण पुत्रवत्त्वम्; औरसपुत्रिकयोस्त्रयोदशेषु सुतेषु वरिष्ठत्व, सर्वेषा दायहरत्वपिण्डदत्वादिविचारश्च; पुत्रकरणविधिः तत्प्रयोजनं च; इदानीमकर्तव्यपुत्रप्रकाराः. **कात्यायनः**-(१३४९-५०) औरसक्षेत्रजादीना सवर्णासवर्णानां दायहरत्वपिण्डदत्वादिविचारः. **प्रजापतिः**—(१३५०) विधवायाः पुत्रदानप्रतिग्रहाधिकारः. **देवलः**—(१३५०-५१) पुत्रमहिमा; औरसक्षेत्रजादयो द्वादश पुत्राः, तेषा सवर्णासवर्णाना दायहरत्वपिण्डदत्वविचारश्च. **यमः**—(१३५१-२) पुत्रमहिमा; औरसादिद्वादशपुत्राणा द्व्यामुष्यायणत्वदायहरत्वपिण्डदत्वविचारः; पुत्रीकरणविधिः; काण्डपृष्ठसंज्ञाः पुत्राः. **मरीचिः**—(१३५२) गोत्रान्तरगताना दायाशौचज्ञातिविचारः. **दक्षः**—(१३५२) अग्रजदाननिषेधः. **शातातपः**—(१३५२) दत्तपुत्रस्यौर्ध्वदेहिकाधिकारः. **पराशरः**-(१३५२) कलौ चत्वारः पुत्राः. **अत्रिः**—(१३५२-५) पुत्रमहिमा पुत्रीकरणविधिश्च. **वृद्धयाज्ञवल्क्यः**-(१३५५) सजातीयविजातीयदत्तक्रिक्थहरत्वापिण्डदत्वविचारः. **बृहद्यमः**—(१३५५) पुत्रीकरणविधिः; नव पुत्रत्वार्हाः; तेषां दायहरत्वविचारः. **वृद्धहारीतः**—(१३५५) सप्त पुत्राः; पिण्डदाः. **लघुहारीतः**—(१३५५) पुत्रिका. **सुमन्तुः**—(१३५५) पुत्रमहिमा. **शाकलः**—(१३५५) दत्तकपुत्रः कीदृशो ग्राह्यः. **जाबालिः**—(१३५६) पुत्रिका दत्तकश्च. **पारस्करः**-(१३५६) दत्तस्य द्व्यामुष्यायणत्वम्. **पैठीनसिः**—(१३५६) पुत्रमहिमा; द्व्यामुष्यायणाः. **कातीयलौगाक्षिसूत्रम्**—(१३५६) द्व्यामुष्यायणाना दायहरत्वपिण्डदत्वविचारः. **काष्णाजिनिः**-(१३५६-८) द्व्यामुष्यायणाना दत्तकादीना पैतृककर्मस्वरूपम्. **बृहन्मनुः**-(१३५८-६२) दत्तक्रीतादीना सपिण्डत्वगोत्रवत्त्वादिविचारः; परिग्रहविधिरहितस्थानधिकारः. **बृहत्पराशरः**-(१३६२) भ्रातृणा एकपत्नीना एकस्य एकस्या वा पुत्रेण पुत्रवत्त्वम्. **शौनकः**-(१३६३-७१) पुत्रसंग्रहप्रयोगविधिः; तत्प्रसङ्गात् टीकाया पुत्रग्रहणे सापिण्ड्यदौहित्रभागिनेयत्वादेर्विचारः; पुत्रग्रहणे सापिण्ड्यगोत्रजातिदौहित्रभागिनेयत्वादेर्विचारः; कलौ दत्तौरसावेव पुत्रौ. **वृद्धगौतमः**-(१३७१-३) संस्काररूपः परिग्रहविधिः पुत्रत्वोत्पादकः; औरसादिपुत्रान्तरसद्भावे दत्तस्य दायहरत्वविचारः; संस्काराकरणे दत्तस्यादायार्हत्वम्; संस्काररूपः प्रतिग्रहविधिः. **स्मृत्यन्तरम्**-(१३७३-४) औरसादीना पञ्चदशपुत्राणा दायहरत्वपिण्डदत्वविचारः; कलौ क्षेत्रजोत्पादननिषेधः, पुत्रग्रहणे अवस्थानियमः; दत्तकः कदा, कः, कीदृशः, कथं च ग्राह्यः. **अनिर्दिष्टकर्तृकवचनानि**—(१३७४) कलौ क्षेत्रजवर्जनम्; पुत्रपरिग्रहः; दुहितृमहिमा. **ब्रह्मपुराणम्**—(१३७४-५) औरसादयो द्वादश पुत्राः, तेषा गोत्रपिण्डदत्वदायहरत्वाशौचादिविचारः; वर्णभेदेन पुत्रीकरणविचारः; औरसे सति इतरेषा पुत्राणा अंशभाक्त्वविचारः. **स्कन्दपुराणम्**—(१३७५) क्रीतदुहिता. **पद्मपुराणम्**—(१३७६) कृत्रिमदुहिता. **लिङ्गपुराणम्**—(१३७६) क्रीतदुहिता. **हरिवंशः**—(१३७६) दत्तकपुत्रः दत्तकदुहिता च; कृत्रिमदुहिता. **गरुडपुराणम्**—(१३७६) पुत्रप्रतिनिधिविधिः. **कालिकापुराणम्**—(१३७६-८३) औरसादयो द्वादश पुत्राः, तेषा राज्याभिषेकदायहरत्वादिविचारः;दत्तादीना संस्कारपुत्रीकरणश्राद्धकृत्त्वादिविवेकः; द्व्यामुष्यायणः. **मत्स्यपुराणम्**—(१३८३) सापिण्ड्यम्. **आदिपुराणम्**—(१३८३-४) कलौ दत्तौरसेतरपुत्रनिषेधः. **प्रवराध्यायः**—(१३८४) द्व्यामुष्यायणः. **संग्रहकारः (स्मृतिसंग्रहः)**-(१३८४) सोदरभ्रातृणा सपत्नीना च एकस्य एकस्या वा पुत्रेण पुत्रवत्त्वम्; दत्तकः; काण्डपृष्ठः; दत्तकसापिण्ड्यविचारः. **बौधायनगृह्यशेषसूत्रम्**—(१३-८४-५) पुत्रप्रतिग्रहकल्पः.

दायानर्हाः

[पृ. १३८५-१४०४]

वेदाः—(१३८५) स्त्रियो दायानर्हाः; शूद्रा आर्यदासी धनानर्हा; प्रजाया अंशार्हानर्हभेदः; पत्नी दायानर्हा; दुहितृणा स्त्रीणा च दायानर्हत्वम्. **गौतमः**-(१३८५-७) शूद्रापुत्रः प्रतिलोमश्च जीवनमात्रं लभते न पूर्णदायम्; अन्यायवृत्तः सवर्णापुत्रोऽपि दायानर्हः; जडक्लीबादयो दायानर्हा भर्तव्याः; जडादीनामपत्यानि दायार्हाणि; देवरातिरिक्तजोऽनियोगजो दायानर्हः. **हारीतः**—(१३८७) व्यभिचारिणी भर्तव्या. **आपस्तम्बः**—(१३८७) क्लीबोन्मत्तपतिताः दायानर्हाः; अधर्मविनियोगिनः पुत्रा दायानर्हाः. **बौधायनः**—(१३८७-९) अप्राप्तव्यव-

हाराः, अन्धादयः, अकर्मिणश्च दायानर्हा भर्तव्याः, मातृभिन्नाः पतिता न भर्तव्याः; स्त्री स्वातन्त्र्यं दायं च नार्हति. **वसिष्ठः**—(१३८९) मुन्याश्रमगताः क्लीबोन्मत्तपतितादयश्च दायानर्हाः; पतितमुन्याश्रमातिरिक्ता भर्तव्याः. **विष्णुः**—(१३८९-९०) पतिततदुत्पन्नाः क्लीबादयः प्रतिलोमस्त्रीजाताश्च भागानर्हाः; ते सर्वे दायादैः भर्तव्याः; पतितप्रतिलोमातिरिक्तानामौरसा दायार्हाः; कानीनादयश्चत्वारः पुत्रा दायानर्हाः. **शङ्खः शङ्खलिखितौ च**— (१३९०) पतितो दायानर्हः; शूद्रापुत्रो दायानर्होऽपि प्रजीवन लभते; अपुत्रस्त्रीणा प्रजीवनमात्रम्; यज्ञानर्हा दायानर्हाः; व्यभिचारिणी भर्तव्या. **महाभारतम्**— (१३९०-९१) शापास्त्रीणा अदायादत्वम्; अन्धो राज्यानधिकारी; पितुरनिष्टो ज्येष्ठोऽपि दायानधिकारी राज्यानधिकारी च; जीवति पितरि पत्यौ स्वामिनि च, सुतः भार्या दासश्च धनानधिकारी; पतितौ पितरौ भर्तव्यौ. **कौटिलीयमर्थशास्त्रम्**—(१३९१-२) पतिततज्जाताः जडोन्मत्तान्धादयश्च दायानर्हाः; पतितातिरिक्ता भर्तव्याः; जडोन्मत्तादीनामपत्यानि निर्दोषाणि दायार्हाणि; दायानर्हा भगिन्यः, ता भर्तव्याः; सदोषो ज्येष्ठोऽपि दायानर्हः; स्त्रीणा धनस्वाम्यनिमित्तानि. **मनुः**—(१३९२-८) पतितक्लीबजात्यन्धादयो दायानर्हाः; पतिता दायानर्हाः; पतितस्त्रियो भर्तव्याः; स्त्रीणा साध्वीना दायार्हत्वं नासाध्वीनाम्; जीवति पितरि पत्यौ स्वामिनि च, सुतः भार्या दासश्च धनानधिकारी; सर्वे दायानर्हा भर्तव्याः; दायानर्हाणा निर्दोषाण्यपत्यानि दायार्हाणि; अनियोगजोऽधिकोऽविधिजः कामजो वा क्षेत्रजो दायानर्हः; आर्याणा शूद्रापुत्रो दायानर्हः, ज्येष्ठोऽपि भ्राता भ्रातृवञ्चको दायानर्हो दण्डार्हश्च; विकर्मस्था भ्रातरो दायानर्हाः; कनिष्ठेभ्योऽदत्ते यौतकनिषेधः. **याज्ञवल्क्यः**— (१३९८-१४००) पतितक्लीबजात्यन्धादयो दायानर्हा भर्तव्याः; दायानर्हाणामपत्यानि निर्दोषाणि दायार्हाणि, तेषा दुहितरो भर्तव्याः; दायानर्हाणा साध्व्यो भार्या भर्तव्या नेतराः; व्यभिचारिणी भर्तव्या; साध्व्यास्त्यागे तस्यास्तृतीयभागहरत्वम्. **नारदः**—(१४०१-२) पितृद्विट्पतितषण्ढादयो दायानर्हाः; महारोगिजडोन्मत्तादयो दायानर्हा भर्तव्याः; दायानर्हाणामपत्यानि निर्दोषाणि दायार्हाणि; अनियोगजः क्षेत्रजो दायानर्हः; व्यभिचारिणी भर्तव्या; जीवति पितरि, पत्यौ, स्वामिनि च, सुतः भार्या दासश्च धनानधिकारी. **बृहस्पतिः**—(१४०२-३) सवर्णाजा अपि सदोषा अधार्मिकाः पुत्रा दायानर्हाः; आर्याणा शूद्रापुत्रो भर्तव्यः न दायार्हः; अनन्वयिनो धनं राजगामि. **कात्यायनः**-(१४०३-४) अक्रमोढजसगोत्रजप्रव्रज्यावसितप्रतिलोमजा दायानर्हाः पितृद्रव्यात् भर्तव्याः; अवन्धुद्रव्य राजगामि. **देवलः**—(१४०४) अधर्म्यपुत्राः, क्लीबकुष्ठ्यादयः, पतिततज्जाः, मुन्याश्रमिणश्च दायानर्हाः; पतितातिरिक्ता भर्तव्याः, तत्पुत्रा दायिनः. **वृद्धहारीतः**—(१४०४) साध्व्यो भर्तव्याः नासाध्व्यः; मुन्याश्रमिणः पाषण्डादयश्च भागानर्हाः. **लघुहारीतः**—(१४०४) नवयुवती विधवा भर्तव्या.

पैतृकद्रव्ये पत्नीनां मातृणां च भागः

[पृ. १४०५—१४१४]

वेदाः—(१४०५) पत्नी गृहभाण्डस्वामिनीः, पत्नी दायार्हा, पत्युरिच्छया विभागार्हा. **आपस्तम्बः**—(१४०५-७) पत्नी कौटुम्बिकधनस्वामिनी; दम्पत्योर्न विभागः. **वसिष्ठः**—(१४०७) भ्रातृस्त्रीणा दायार्हत्वम्. **विष्णुः**—(१४०७-८) मातृणा पुत्रसमदायार्हत्वम्; अनूढदुहितरोऽशहारिण्यः. **मनुः**—(१४०८) मातृणा दायार्हत्वम्. **याज्ञवल्क्यः**—(१४०८-१३) जीवति पितरि पत्नीना पुत्रसमधनार्हत्वम्; अजीवत्पितृकविभागे माता पुत्रसमदायार्हा. **नारदः**—(१४१३) अजीवत्पितृकविभागे माता पुत्रसमदायार्हा. **बृहस्पतिः**—(१४१३) अजीवत्पितृकविभागे माता पुत्रसमदायार्हा; कन्या चतुर्थभागहरा. **कात्यायनः**—(१४१३) जीवत्यजीवति वा पितरि माता समाशहारिणी. **व्यासः**—(१४१४) मातरः पुत्रसमदायार्हाः **देवलः**—(१४१४) माता पुत्रसमदायार्हा.

पैतृकद्रव्ये भगिनीनां भागः

[पृ. १४१५-१४२२]

वेदाः—(१४१५) अनूढदुहिता पैत्र्यभागहारिणी; भगिन्या अंशो भ्रातृभागे (?); उभयोर्भ्रातृभगिन्योर्दायार्हत्वविचारः. **आपस्तम्बः**—(१४१५-६) पैतृकधनविभागे भार्याया भागः. **वसिष्ठः**-(१४१६) भगिनीना पैतृकद्रव्यभागः प्रसवोत्तरम्. **विष्णुः**-(१४१६) विशेषणविशिष्टभगिनीनामेवांशभाक्त्वम्; भगिनीसंस्कारकर्तव्यता. **शङ्खः शङ्खलिखितौ च**-(१४१६) पैतृकद्रव्ये कन्याभागः; भ्रातृद्रव्यं भगिनी हरति. **कौटिलीय-**

मर्यशास्त्रम्-(१४१६-७) भगिन्यो भागहारिण्यः; कन्यासंस्कारकर्तव्यता. **मनुः**-(१४१७-९) भगिन्यश्चतुर्थभागहारिण्यः. **याज्ञवल्क्यः**-(१४१९-२१) भगिन्यः चतुर्थभागहारिण्यः; असंस्कृतसंस्कारकर्तव्यता. **नारदः**-(१४२१) विशेषणविशिष्टा भगिनी समभागहारिणी. **कात्यायनः**-(१४२१-२)विशेषणविशिष्टाः कन्याश्चतुर्थभागहारिण्यः. **व्यासः**—(१४२२) असंस्कृतकन्यादिसंस्कारकर्तव्यता. **देवलः**— (१४२२) कन्याः संस्कारार्थद्रव्यहारिण्यः. **पैठीनसिः**— (१४२२) पैत्र्यधनविभागे कन्याभागः. **स्मृत्यन्तरम्**—(१४२२) भगिनी चतुर्थभागहारिणी.

स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

[पृ. १४२३-१४६३]

वेदाः—(१४२३-४) वैवाहिकं स्त्रीधनं भर्तुरपि भोग्यम्; विवाहे कन्यायै पित्रा देयं धनम्, कन्या तद्भोग्यधनेन सह देया; विवाहे पिता कन्यायै धनं ददाति; विधवा धनस्वामिनी, पत्नी पतिधनदायभागार्हा, स्त्रीधनं पुरुषो गृह्णाति प्रतिदत्ते च. **जैमिनीयसूत्रम्**—(१४२४-५) स्त्रीणा धनस्वाम्यविचारः. **गौतमः**—(१४२५ ७) मातृधनविभागः; भगिनीशुल्कविभागः. **बौधायनः**—(१४२७) मातृधनविभागः; कन्याधनविभागक्रमः. **वसिष्ठः**—(१४२७-८) पैतृकद्रव्यभागः भगिनीना प्रसवोत्तरम्; मातृधनविभागः. **विष्णुः**—(१४२८) स्त्रीणा वृत्तिरूपो दायः; षड्विध स्त्रीधनम्; स्त्रीणा सौदायिकधने स्वातन्त्र्यम्; धर्मविवाहोढाऽन्यविवाहोढाऽप्रजस्त्रीधनविभागः; भगिनीशुल्कविभागः, मातृधनविभागः. **शंखः शंखलिखितौ च**-(१४२८ ९) पैतृकद्रव्ये कन्याभागः, मातृधनविभागः, भ्रातृद्रव्यं भगिनी हरति; मातृधनविभागः; स्त्रीशुल्कं पत्युः, पुत्रिकाधनं न भर्तुः. **महाभारतम्**—(१४२९) स्त्रीधने कुटुम्बधने च स्वातन्त्र्यविचारः; स्त्रीणा वृत्तिरूपो दायः; मातृधनविभागः; सापत्नसवर्णमातृधनविभागः. **कौटिलीयमर्थशास्त्रम्**—(१४३०-३१) स्त्रीणा धनागमाः; स्त्रीणा वृत्तिरूपो दायः; स्त्रीधने भर्तुरधिकारमर्यादा; मृते भर्तरि पुनर्विवाहे नियोगे वा कृतेऽकृते वा स्त्रीधनकृत्यम्; स्त्रीधनविभागः; आधिवेदनिकं धनम्; स्त्रीणा धनस्वाम्यहानिनिमित्तानि. **मनुः**—(१४३१-४१) षड्विध स्त्रीधनम्; कुटुम्बधने स्त्रीधने च स्वातन्त्र्यविचारः; मातृधनविभागः; धर्मविवाहोढाऽप्रजस्त्रीधनविभागः; **आसुरादिविवाहोढाऽप्रजस्त्रीधनविभागः**; अप्रजसापत्नमातृधनविभागः. **याज्ञवल्क्यः**— (१४४१-८) मातृधनविभागः; स्त्रीणा आधिवेदनिकं धनम्; विविधं स्त्रीधनम्; अप्रजस्त्रीधनविभागः; स्त्रीधनविभागः; धर्मविवाहोढाऽन्यविवाहोढाऽप्रजस्त्रीधनविभागः; शुल्कपूर्वकवाग्दत्ताविषये धनवादः; आपदि गृहीतं स्त्रीधनं भर्ता न प्रतिदद्यात्. **नारदः**-(१४४८-५०)भर्तृदत्तस्थावरातिरिक्ते धने स्त्रीणा सर्वदा स्वातन्त्र्यम्; स्त्रीणा धनविनियोगेऽस्वातन्त्र्यम्; षड्विध स्त्रीधनम्; मातृधनविभागः; स्त्रीधनविभागः; धर्मविवाहोढाऽन्यविवाहोढाऽप्रजस्त्रीधनविभागः; शुल्कपूर्वकवाग्दत्ताविषये धनवादः. **बृहस्पतिः**—(१४५०-५२) मातृधनविभागः; मातृतुल्यानां मातृष्वस्रादीना धनस्य विभागक्रमः. **कात्यायनः**— (१४५२-६०) षड्विधं स्त्रीधनम्; अध्यग्न्यध्यावाहनिकप्रीतिदत्तसौदायिकान्वाधेयशुल्कानां निरुक्तिः; स्त्रीणा वृत्तिरूपो दायः; स्त्रीधनत्वापवादः; स्त्रीणा सौदायिके स्थावरादावपि स्वातन्त्र्यम्; भर्तृदये स्त्रीणा स्वातन्त्र्यादिविचारः; स्त्रीभिर्हार्यं धनम्; स्त्रीधने पत्युरधिकारमर्यादा; स्त्रीणा स्वधने स्वातन्त्र्यम्; धनानधिकारिणी; स्त्रीधनविभागः; शुल्कपूर्वकवाग्दत्ताविषये धनवादः. **व्यासः**—(१४६०-६१) सौदायिकं शुल्कं च; स्त्रीणा वृत्तिरूपो दायः. **देवलः** — (१४६१-२) स्त्रीधनम्, तत्र स्त्रीणा स्वातन्त्र्यम्; पत्युः स्त्रीधनेऽधिकारमर्यादा; मातृधनविभागः; अप्रजस्त्रीधनविभागः; मृतकन्याधनविभागक्रमः. **उशना**—(१४६२) मातृधनविभागः. **यमः**—(१४६२) आसुरादिषु अप्रजस्त्रीधनविभागः. **वृद्धहारीतः**— (१४६२) भगिनी चतुर्थभागहारिणी; स्त्रीधनमविभाज्यम्, विविधं स्त्रीधनम्. **बृहद्यमः**—(१४६२) पुत्रवती पत्नी भागहारिणी. **कण्वः**—(१४६२) स्त्रीधने स्त्रीणा स्वातन्त्र्यम्; भर्तुरधिकारमर्यादा. **पारस्करः** — (१४६२-३) मातृधनविभागः. **पैठीनसिः**—(१४६३) पैत्र्यधनविभागे कन्याभागः; स्त्रीशुल्कं पत्युः; मृतपुत्रिकाधनं न पत्युः; मृतकन्याधनविभागः. **लौगाक्षिः**— (१४६३) पतिधने स्त्रीणां स्वाम्यं न स्वातन्त्र्यम्. **वृद्धकात्यायनः**—(१४६३) अप्रजस्त्रीधनविभागः. **सूतः**—(१४६३) जामात्रे दत्तं दुहितुः दौहित्रीणा वा भवति. **स्मृत्यन्तरम्**-(१४६३) अप्रजदुहितृधनविभागः. **अनिर्दिष्टकर्तृकवचनानि**—(१४६३) अध्यग्निकाध्यावाहनिकप्रीतिदत्तपादवन्दनि-

कानां निरुक्तिः. संग्रहकारः (स्मृतिसंग्रहः)—(१४६३) ब्राह्मणीकन्याया दायभागः.

मृतापुत्रधनाधिकारक्रमः

[पृ.१४६४–१५४०]

वेदाः— (१४६४) ब्राह्मणधनं न राजगामि. **गौतमः**— (१४६४–६) प्रत्यासन्नाः सपिण्डसगोत्रसप्रवराः क्रमेण अपुत्रमृतधनभाजः; नियुक्ता पत्नी वा; सर्वेषामभावे ब्राह्मणानामनपत्यानां धनं श्रोत्रियगाम्येव, इतरेषां राजगामि; विभक्तानपत्यधनभाक् ज्येष्ठ एव. **हारीतः**—(१४६६) अपुत्रमृतपत्नी यौवनादिदोषवती प्रजीवनमात्रभाक्. **आपस्तम्बः**–(१४६६–७) अपुत्रमृतधनभाजः क्रमेण प्रत्यासन्नाः सपिण्डाः, आचार्यान्तेवासिनौ दुहिता वा, सर्वाभावे राजा. **बौधायनः**—(१४६७–९) सपिण्डसकुल्यनिरुक्तिः; अनपत्यमृतधनभाजः प्रत्यासन्नाः सपिण्डाः सकुल्याः आचार्यान्तेवासिऋत्विजः राजा च क्रमेण; ब्रह्मस्वं न राज्ञः किं तु श्रोत्रियस्य. **वसिष्ठः**—(१४६९-७०) अविभक्तानपत्यमृतधनभाक् पत्नी; अपुत्रमृतधनभाजः क्रमेण सपिण्डाः आचार्यान्तेवासिनौ राजा च; ब्रह्मस्वं श्रोत्रियाणामेव न राज्ञः. **विष्णुः**—(१४७०-१) अपुत्रमृतधनभाजः क्रमेण पत्नीदुहितृपितृमातृभ्रातृतत्पुत्रबन्धुसकुल्यसहाध्यायिराजानः; ब्रह्मस्वं ब्राह्मणानामेव न राज्ञः, अपुत्रमृतधनभाक् न पुत्रिका बान्धवा वा किन्तु ज्ञातयः; अपुत्रमृतधनभाक् दौहित्रः; मृतवानप्रस्थधनभाजौ क्रमेण आचार्यशिष्यौ. **शङ्खः शङ्खलिखितौ च**—(१४७१-३) अपुत्रमृतधनभाजः क्रमेण भ्रातृपितृसगोत्रशिष्यसब्रह्मचारिणः; भ्रातृभावे ज्येष्ठा पत्नी वा; अपुत्रस्त्रीणा प्रजीवनमात्रम्; ब्रह्मस्वं ब्राह्मणपरिषदः न राज्ञः; बालस्त्रीधनादीन्यपि न राज्ञः; अनपत्यमृतभ्रातृधनभाजो भ्रातरो न भार्या दुहितरो वा, ताः प्रजीवनमात्रभाजः. **महाभारतम्**—(१४७३) मृतापुत्रधनहारिणः दुहितृदौहित्राः. **कौटिलीयमर्थशास्त्रम्**—(१४७३-४) धर्म्यविवाहजाः पुत्रा दुहितरो वा रिक्थभाजः; अपुत्रधनभाजः सोदरभ्रातरः कन्याश्च, तदभावे पिता भ्रातरो तत्पुत्राश्च क्रमेण; अदायकं राजा हरेत्; ब्रह्मस्वं ब्राह्मणानामेव. **मनुः**—(१४७४-९) मृतापुत्रधनहारिणः दुहितृदौहित्राः; अनपत्यमृतधनभाजौ क्रमेण माता पितामही च; अपुत्रमृतधनभाजः पिता भ्रातरः प्रत्यासन्नाः सपिण्डाः सकुल्या आचार्यशिष्यौ राजा च क्रमेण; ब्रह्मस्वं ब्राह्मणानामेव न राज्ञः; मृतापुत्रधनभाजः क्रमेण प्रत्यासन्नाः सपिण्डाः सकुल्या आचार्यः शिष्यः ऋत्विजः सत्त्रियश्च. **याज्ञवल्क्यः**—(१४७९–१५११) अपुत्रमृतधनभाजः क्रमेण पत्नी दुहितरः पितरौ भ्रातरः तत्सुता गोत्रजा बन्धुः शिष्यः सहाध्यायिनश्च; मृतवानप्रस्थयतिब्रह्मचारिणा धनभाजः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः. **नारदः**—(१५११–२) अनपत्यमृतधनभाक् पतिव्रता पत्नी; अपुत्रमृतधनभाजः क्रमेण दुहिता सकुल्या बान्धवाः सजातीया राजा च; ब्रह्मस्वं ब्राह्मणानामेव, तत्स्त्रियो प्रजीवनमात्रभाजः. **बृहस्पतिः**—(१५१२–२०) अपुत्रमृतसर्वधनभाक् पत्नी साध्वी एव, पत्न्यभावे दुहिता दौहित्रश्चापुत्रमृतधनभाक्. अपुत्रमृतधनभाजः क्रमेण माता भ्राता तत्पुत्रः प्रत्यासन्नाः सपिण्डाः सकुल्या बान्धवाः शिष्याः श्रोत्रियाश्च; अब्राह्मणानां पत्नीभ्रात्रभावे राजाऽपुत्रमृतधनभाक्; विभक्तापुत्रमृतस्यावरातिरिक्तधनभाक् पत्नी; अपुत्रमृतविधवा प्रजीवनभाक्; पित्र्यकर्माधिकारः पत्न्याः सोदरस्य तत्पुत्रस्य सपिण्डस्य शिष्यस्य च क्रमेण; विधवायाः प्रजीवनस्वरूपम्. **कात्यायनः**—(१५२०–२४) मृतापुत्रधनभाक् पत्नी; भर्तृधनभाक् पत्नी दुहिता च क्रमेण; अपुत्रमृतधनभाजः क्रमेण पत्नी दुहितरः पिता माता भ्राता तत्पुत्राश्च; अपुत्रविभक्तमृतधनभाजः क्रमेण पिता भ्राता जननी पितामही च, अविभक्तापुत्रमृतस्त्री अशं भरणं वा प्राप्नोति; भर्तुरौर्ध्वदेहिककरणाधिकारः; ब्राह्मणद्रव्यमदायिकं श्रोत्रियगामि, अब्राह्मणादायिकद्रव्यं राज्ञः; मृतसंस्कर्ता धनहारी. **व्यासः**—(१५२४–५) अपुत्रमृतधनभाजः क्रमेण पत्नी दुहिता दौहित्रश्च, तेषा श्राद्धकृत्त्व च. **देवलः**—(१५२५–६) अपुत्रमृतधनहरी दुहिता; अपुत्रमृतधनभाजः क्रमेण सोदराः दुहितरः पिता भ्रातरः माता भार्या कुल्याः सहवासिनश्च; अदायिकमब्राह्मणधनं राजा हरति, ब्रह्मस्वं श्रोत्रियाः; मृतसंस्कर्ता धनहारी. **उशना**—(१५२६) अपुत्रमृतधनभाक् पत्नी. **प्रजापतिः**—(१५२६) अपुत्रमृतधनभाक् पत्नी, विधवा भरणभाक्. **यमः**—(१५२६) अपुत्रमृतधनभाजः क्रमेण भ्राता पितरौ जेष्ठपत्नी सगोत्राः शिष्याः सब्रह्मचारिणश्च. **वृद्धहारीतः**–(१५२६-७) विभक्तापुत्रमृतधनभाजः क्रमेण पत्नी दुहितरः पितरौ भ्रातरः तत्सुताः सपिण्डाः संबन्धिबान्धवाश्च. **लघुहारीतः**—(१५२७) मृतापुत्रधनभाजः क्रमेण पत्नी दुहितरः पितरौ भ्रातरः तत्सुतो

गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः. **पराशरः**—(१५२७) अपुत्रमृतधनभाक् कुमारी ऊढा च क्रमेण. **पैठीनसिः**—(१५२७) अपुत्रमृतधनभाजः क्रमेण भ्राता पितरौ ज्येष्ठा पत्नी सगोत्राः शिष्याः सब्रह्मचारिणः श्रोत्रियाः; अब्राह्मणद्रव्यं राजगामि. **बृहन्मनुः**—(१५२७-८) सपिण्डता सोदकता सगोत्रता च; अपुत्रमृतधनभाक् पत्नी. **वृद्धशातातपः**—(१५२८-९) आत्मबान्धवपितृबान्धवमातृबान्धवाः. **स्मृत्यन्तरम्**—(१५२९) माता धनहारिणी; पत्नी श्राद्धकरी; अविभक्तमृतापुत्रधनहरी पत्नी; विधवा भरणार्हा. **अनिर्दिष्टकर्तृकवचने**—(१५२९) माता मृतापुत्रधनभाक्; दायः सप्तपौरुषः. **संग्रहकारः (स्मृतिसंग्रहः)**—(१५२९-३०) विभक्तासंसृष्टापुत्रमृतधनभाजः क्रमेण पत्नी नियोगकर्त्री पुत्रिका माता पितामही पिता च; मृतापुत्रधनभाजः क्रमेण सोदराः पितृसंततिः पितामहसंततिः सपिण्डाः सकुल्याः आचार्यः शिष्यः सब्रह्मचारी श्रोत्रियश्च ब्राह्मणे; सोदकाभावे राजा शूद्रे; आचार्याभावे राजा क्षत्रियवैश्ययोः. **मार्कण्डेयपुराणम्**—(१५३०) सप्तपौरुषनिरुक्तिः. **स्मृतिसारः**—(१५३०-४०) अथ बालरूपमते अपुत्रधनाधिकारः; पारिजातेऽपुत्रधनाधिकारः, तत्रैव संसृष्टिविभागः; हलायुधे अपुत्रधनाधिकारः, तत्रैव संसृष्टिविभागः; कल्पतरौ संसृष्टिविभागः; श्रीकरनिबन्धे अपुत्रधनाधिकारः; धर्मकोषे लिखितम्–संसृष्टिविभागः; प्रकाशे लिखितम्–विभागसंदेहे निर्णयः; श्रीकरनिबन्धे लिखितम्–अपुत्रधनाधिकारः.

संसृष्टिविभागः, मृतापुत्रसंसृष्टिधनाधिकारश्च

[पृ.१५४८–१५६२]

वेदाः—(१५४०) संसृष्टधनं प्रार्थयति. **गौतमः**—(१५४०-४१) मृतापुत्रसंसृष्टिधनभाक् संसृष्टी. **वृद्धहारीतः**—(१५४१)मृतापुत्रस्थावरं न संसृष्टिनः. **विष्णुः**—(१५४१–३) संसृष्टिधनविभागः सम एव; संसृष्टिजननमरणयोः संसृष्टिधनविभागः; ससर्गार्हाः; मृतसंसृष्टिधनहारी पिण्डदः; असहोदरसंसृष्टिनोऽपि मृतसंसृष्टिधनहारिणः; मृतापुत्रसंभूयसमुत्थातृधनभाक् पत्न्यादिः; मृतापुत्रसंसृष्टिधनभाक् न पत्नी. **कौटिलीयमर्थशास्त्रम्**–(१५४३) संसृष्टिभिः पुनर्विभागः कर्तव्यः; संसृष्टिना उत्थाता ब्रध्नभाक्. **मनुः**—(१५४३–६) संसृष्टिधनविभागः सम एव; संसृष्टिनः विभागानधिकारप्राप्तौ मरणे वा तदीयांशविभागः. **याज्ञवल्क्यः**—(१५४६–५२) संसृष्टिजननमरणयोः संसृष्टिधनविभागः; मृतापुत्रसंसृष्टिधनविभागाधिकारः. **नारदः**—(१५५२–६) संसृष्टविभागः; मृतापुत्रसंसृष्टिधनविभागाधिकारः; मृतापुत्रस्त्रीणा दुहितृणा च भरणाशभाक्त्वम्; मृतापुत्रपत्न्याः पतिपक्षः पितृपक्षो राजा वा प्रभुः; मृतापुत्रभ्रातृपितृमातृकधनभाजः पत्न्यः सपिण्डाश्च. **बृहस्पतिः**—(१५५६–६०) संसर्गार्हाः; संसृष्टिधनविभागः सम एव; अनपत्याभार्यापितृकसंसृष्टिनः विभागानधिकारप्राप्तौ मरणे वा तदीयाशविभागः; तदीयभगिन्या अंशः; संसृष्टिना उत्थाता ब्रध्नभाक्; मृतापुत्रधनभाजः क्रमेण पत्नी सोदरा दायादा दौहित्राश्च; मृतानपत्यभार्याभ्रातृपितृमातृकधनभाजः सपिण्डाः; मृतरिक्थाशः श्राद्धे विनियोज्यः. **कात्यायनः**—(१५६०-६१) मृतापुत्रससृष्टिधनविभागाधिकारः; संसृष्टिनामुत्थाता ब्रध्नभाक्; मृतापुत्रपत्न्याः पतिपक्षः पितृपक्षो वा प्रभुः. **प्रजापतिः**—(१५६१) मृतापुत्रसंसृष्टिधनाधिकारः. **यमः**–(१५६१) मृतापुत्रसंसृष्टिधनाधिकारः. **वृद्धयाज्ञवल्क्यः**—(१५६२) मृतापुत्रसंसृष्टिधनाधिकारः. **बृहन्मनुः**—(१५६२) मृतापुत्रसंसृष्टिधनाधिकारः.

विभक्तजविभागः

[पृ. १५६२–१५६८]

गौतमः—(१५६२) विभागानन्तरजातः पैतृकादेवांशं गृह्णाति. **विष्णुः**–(१५६२-३) विभागानन्तरजातः विभक्तभ्रातृभागेभ्योंऽशं गृह्णीयात्. **मनुः**—(१५६३-५) विभागानन्तरजातः पैतृकांशमात्रभाक्, संसृष्टिनश्चेद् भ्रात्रादयः तेभ्यः समो भागो ग्राह्यः. **याज्ञवल्क्यः**—(१५६५-७) विभागानन्तरजातः पैतृकधनात् भ्रातृविभक्तधनाद् अंशं गृह्णाति. **नारदः**—(१५६७) विभागानन्तरजातः पैतृकांशमात्रभाक्; संसृष्टिनश्चेद् भ्रात्रादयः समो भागो ग्राह्यस्तेभ्यः. **बृहस्पतिः**—(१५६७-८) विभागानन्तरजातः पैतृकद्रव्यादेवांशं गृह्णाति, नैव पूर्वं विभक्तः; विभक्तपितृधनव्यवहारे न विभक्ताना संबन्धः. **वृद्धहारीतः**—(१५६८) विभागानन्तरजातः अंशभाक्. **लघुहारीतः**—(१५६८) विभागानन्तरजातः अंशभाक्.

विभागानन्तरागतविभागः

[पृ. १५६९–१५७०]

विष्णुः—(१५६९), **बृहस्पतिः**— (१५६९-७०) विभागानन्तरागतविभागः.

विभागदोषे पुनर्विभागादिविधिः

[पृ. १५७०-१५७४]

वेदाः-(१५७०-७१) भागानर्हाः; सर्वे भागार्हा भागिनः कर्तव्याः, भागार्हो भागी कर्तव्य एव, अन्यथा दोषः. **कौटिलीयमर्थशास्त्रम्**-(१५७१) ससाक्षिको विभागः कर्तव्यः; विभागदोषे पुनर्विभागः. **मनुः**— (१५७१-२) विभागानन्तरोपलब्धस्य समो विभागः; विभागोत्तरलब्धसाधारणधन पुनर्विभजनीयम्. **याज्ञवल्क्यः**—(१५७२-३) विभागानन्तरोपलब्धापहृतद्रव्यविभागः समः कर्तव्यः. **बृहस्पतिः**—(१५७३) अपहृतसाधारणद्रव्यसाधनम्. **कात्यायनः**— (१५७३ ४) प्रच्छादितापहृतनष्टहृतसाधारणधनविभागः समः विभागानन्तरोपलम्भे.

विभागसंदेहे निर्णयविधिः

[पृ.१५७५—१५८२]

विष्णुः—(१५७५) प्रमाणसंदेहे पुनर्विभागः; विभागहेतवः. **शंखः शंखलिखितौ च**—(१५७५) विभागसंदेहे साक्षित्वाधिकारनिर्णयः. **मनुः**-(१५७५) विभागसंदेहे पुनर्विभागः कर्तव्यः; पुनर्विभागनिषेधः. **याज्ञवल्क्यः**—(१५७५-९) विभागनिर्णये प्रमाणानि. **नारदः**— (१५७९-८१) विभागनिर्णये प्रमाणानि. **बृहस्पतिः**—(१५८१-२) विभागनिर्णये प्रमाणानि. **कात्यायनः**—(१५८२) विभागनिर्णये प्रमाणानि. **भारद्वाजः**—(१५८२) समविषमविभागनिवर्तनकालावधिः. **वृद्धयाज्ञवल्क्यः**—(१५८२) विभागनिर्णये प्रमाणानि, तत्र दिव्यं न देयम्. **सुमन्तुः**-(१५८२) समविषमविभागनिवर्तनकालावधिः.

विभक्ताविभक्तकृत्यम्

[पृ.१५८३-१५८९]

नारदः— (१५८३-४) पृथग्धर्मक्रियाकर्मगुणा असंमतकार्यकारिणो भ्रात्रादयः दानविक्रयादौ स्वतन्त्राः; अनुजसंस्कारार्थं पैतृकस्य स्वार्जितस्य वा धनस्य विनियोगः, कुटुम्बोपकारकोऽन्यो भरणीयः. **बृहस्पतिः**— (१५८४-६) विभागपत्रसाक्षिक्रिया; भोगः भागनिर्णये प्रमाणम्,स्वेच्छाकृतभागविसंवादी दण्ड्यः;विभागे वृत्तेऽपि स्थावरमविभाज्यं, तत्र नैकः कश्चित् स्वतन्त्रो विभक्तोऽपि; पूर्वजैरनुज्ञाता संस्काराः कार्या मध्यगाद्धनात्. **व्यासः**-(१५८६-७) विभागे वृत्तेऽपि स्थावरमविभाज्यं, तत्र नैकः कश्चित्स्वतन्त्रो विभक्तोऽपि; मध्यगधनात् असंस्कृतसंस्कारः कर्तव्यः; सुतानुमतिं विना स्थावरदासविक्रयदानादौ न स्वातन्त्र्यम्. **मरीचिः**—(१५८७-८) विभक्तैः श्राद्धादि पृथक् कार्यम् ; विभक्ताना त्वेकेन ज्येष्ठेन. **वृद्धयाज्ञवल्क्यः**—(१५८८) कुलक्रमायातस्थावरादेर्विक्रयदानादौ न कश्चित्स्वतन्त्रो विभक्तोऽपि. **बृहद्यमः**—(१५८८) संसृष्टिकृत्यम्. **लघुहारीतः**— (१५८८) विभक्तकृत्यम्. **शाकलः**—(१५८८) अविभक्ताना देवकार्यमेकमेव, विभक्ताना पृथक्. **आश्वलायनः**—(१५८८) एकपाकाना विभक्तानामेकः पञ्चयज्ञान् करोति; अनेकाना तु पृथगनुष्ठानम्. **स्मृत्यन्तरम्**—(१५८८-९) अविभक्तस्थावरस्य दानविक्रयादौ स्वातन्त्र्यनिमित्तानि; अविभक्तैः परस्परानुमत्या क्षेत्रादि देयम् ; भूमिविक्रये ग्रामज्ञातिसामन्तदायादानामनुमतिर्ग्राह्या. **अनिर्दिष्टकर्तृकवचनानि**—(१५८९) स्थावरमविक्रेयम् ; अविभक्ताना पृथग्ग्रामदेशाना दैवपित्र्यकर्मपृथक्त्वम्.

ऋषिक्रमेण विषयानुक्रमणिका

[विवादपदेषु क्रमेण ये ऋषयः संगृहीताः तेषु निर्दिष्टाना विषयाना प्रकरणानुपूर्व्या संग्रहः]

वेदाः

ऋणादानम्—

ऋणादानवैदिकलिङ्गानि ५९९–६०६.

दत्ताप्रदानिकम्—

सर्वस्वदाननिन्दा; भूमिदानम्; भूमिदाननिषेधः; दक्षिणासु पुत्रदानम्; सर्वस्वदाननिन्दा; अश्वमेधे दारदानम् ७९१. अश्वमेधे भूमिपुरुषब्राह्मणस्वदानविचारः; पुरुषमेधे भूमिपुरुषब्रह्मस्वदानविचारः; विश्वजिति भूमिपुरुषब्रह्मस्वदानविचारः, भूमिदाननिषेधः; पुरुषदानम्; सर्वस्वदाननिन्दा; पृथिवीदानस्तुतिः; दानप्रकाराः; स्त्रीपुरुषाणा देयादेयत्वविचारः ७९२.

अभ्युपेत्याशुश्रूषा—

दासा धनम्; दासा अव्रताः कृष्णाश्च ८०९. दासा अभिभवनीयाः ८०९,८१२. दासः वर्णविशेषः; दासाः कृष्णजातीयाः; दासभार्याः इन्द्रेण जिताः; इन्द्रेण दासा अप्रशस्ताः कृताः; दास आर्यवश्यः; सपदा दास आर्यो भवति ८०९. आर्यार्थे दासप्रजा विनाश्याः; दासः परिचरिता; दासधनं आर्यैर्ग्राह्यम्; दक्षिणासु दासा देयाः; दासस्वरूपम्; दासार्यभेदः इन्द्रकृतः; दास्यः स्त्रियो दक्षिणासु देयाः ८१०. कर्मकरस्वरूपम्; ऊढवधूदासी; दासीनृत्यम् ८११. दास्यम् ८१२,८१४. दासार्यौ; दासी तत्कर्माणि च ८१२. यज्ञादौ दासीपुत्रो निन्द्यः बहिष्कार्यश्च ८१२,८१३. शूद्राः परिचरितारः; दासीदानम् ८१३,८१४. परिचारकः ८१३. परिचर्या भृत्यकर्म; दास्यो धनम्; परिचर्या शूद्रस्य जन्मतो धर्मः; भृत्यः प्रथमं भोजनीयः; दासः दासी धनम्; अन्नार्थे परिचर्या; दासनिरुक्तिः ८१४.

वेतनानपाकर्म—

नृत्यकारिण्यः स्त्रियः, वेश्यानिदर्शनम्; भृतिनिदर्शनम्; वेश्यागमकवचनानि ८४१-२.

सविद्व्यतिक्रमः—

मुख्यस्य सहकारिणा च संवित् इष्टा; दम्पत्योः संवित् इष्टा; समानाना सवित् इष्टा; युद्धे सहकारिणा सवित् इष्टा; दाने सहकारिणा संवित् इष्टा; सर्वकार्येषु समानाना गणाना संवित् इष्टा ८५७–८. संविदः साधारणलिङ्गानि; ग्रामेषु स्वकीयपरकीयाणा संवित् इष्टा; सविदा श्रेष्ठः स्वेषु कार्यः; संविदः साधारणलिङ्गानि; कुलसवित् इष्टा ८५८–९. ब्राह्मणेषु संवित् इष्टा; +[संविदानम्] ८५९.

क्रयविक्रयानुशयः—

विक्रीयासंप्रदानम्

अल्पमूल्येन विक्रयोत्तरं समयाभावेऽनुशयो न कार्यः ८७८.

स्वामिपालविवादः—

स्वामिपशुपालतत्कर्तव्यतालिङ्गानि; पशुपालप्रकाराः ९०२–३.

सीमाविवादः—

क्षेत्रमितिः; अप्रस्वती आर्तना चेति द्विविधा उर्वरा; क्षेत्रं हिरण्यं पशवश्च धनम्; क्षेत्रे स्वाम्यम् ९२२. कृषिकर्म, वापीकुल्यादिकृत्रिमाकृत्रिमजलस्थानानि च ९२३–४. क्षेत्रवादलिङ्गम्; सेतुलिङ्गम्; कर्षकसीरपत्योर्भेदः; कुलपा व्राजपतिं प्रति धनमर्पयन्ति; पृथी वैन्यः कृषिकर्मप्रवर्तयिता सेतुः क्षेत्रस्वाम्यं च ९२४-५.

स्त्रीपुंधर्माः—

गृहनेत्री स्त्री (पत्नी) ९६३,९७०,९८३. पतिपत्नीसंबन्धः ९६३,९६४,९८२,९८५,९८६,९८८,९९१,१००१. भ्रातृभगिन्यौ ९६३,९७९. कन्याजारः ९६३. अनेकजायापतिरेकः ९६३, ९६४, ९७३, ९७५, ९८१, ९८९, ९९३, ९९४,९९५, १००५,१००८,१००९,१०१०. शुद्धा नारी पतिप्रिया; कन्यालाभार्थे धनदानम् ९६४. राक्षसविवाहः ९६४,९८०,९८२.वृद्धाविवाहः९६४,९७९.स्त्रीपुरुषप्रेम ९६४–५, ९७५. भ्रातृभगिन्यादिसंबन्धः ९६५–६. स्त्रीपुरुष(भोग)संबन्धः ९६६,९७९,९९४,९९५. जारसंबन्धः ९६६, ९७२, ९७५. गृहस्थिता पत्नी ९६७. पतिपत्नीसंभोगः ब्रह्मचर्यं च ९६७–८. पतिपत्नीसंभोगः ९६९,९७०. गुरुसंभोगसंलापश्रवणदोषः; गृहस्थधर्मः ९६८–९,९७९. व्यङ्गः कन्याद्वेष्यः, साङ्गः

कन्याप्रियः ९६९. व्यभिचारिणी पापं निगूहति ९६९. युवतीना युवप्रेम ९७०–१. प्रजाकामना ९७०, ९७१. पतिपत्नीप्रेम ९७०, ९७१, ९७३, ९८०–१. दुराचाराः स्त्रियः ९७०-७१. विवाहकामाः कन्याः, प्रेमविवाहबद्धदम्पती; अर्ध भार्या शरीरस्य ९७१. सुपत्नी(त्न्यः) ९७१-२, ९७८, ९९१, ९९३, ९९४, १००५, १००६-७, १००८. स्वसुर्जारः; पतिः अन्य भार्या गमयति; सूर्यायै पूष्णो दानम् ९७२. गृहे वर्तमानाः स्त्रियः; अधनो जामाता; पतिपत्नीकर्तव्यं सौभाग्यं च ९७३–४. स्वाभाविकः स्त्रीदोषः; स्त्रीधर्मः ९७४. भ्रातृभगिन्योर्विवाहः ९७५–८, १०१०. अनुगमननिषेधः ९७८, १००४. स्वयंवरः गान्धर्वविवाहः ९७९. नियोगः ९८०. पितृदुहित्रोर्विवाहः ९८१. अष्टपुत्रा सुभगा; कन्या याच्ननीया ९८२-३. वधूवस्त्रदोषः ९८४. पाणिग्रहणम् ९८५, १००१. सक्रमबहुपतिकत्वलिङ्गम्; पूर्व देवः अनन्तरं मनुष्यः पतिः; धनप्रजायूंषि गार्हस्थ्येष्टम् ९८५–६. पत्न्याः गृहे आधिपत्यम् ९८६. दम्पत्योः संभोगः ९८६, ९८८. बहुप्रजा एव भद्रम्; गार्हस्थ्यम्; सभोगः ९८८–९. पत्नी युद्धे सारथिः; पतित्यक्ता स्त्री; सपत्नीद्वेषः ९९०-९१. भ्रातुः पतित्वं जारत्वं वा; एकया द्वयोर्विवाहः; भ्रातृभगिनीविवाहलिङ्गम्; राज्ञो भार्याद्वयम् ९९१. बहुस्त्रीकामना; अमावास्यापौर्णमास्योर्भोगनिषेधः ९९२-३. जाया गृहपत्नी; स्त्रिसंगनिषेधः; हीनवयस्या विवाहः; स्त्रियाः प्रियः; पत्नी पुरुषार्धम् ९९४. कन्यादानम् ९९४, १००४. स्त्रीणा सुरापानम् ९९४–५. स्त्रीदोषाः; अग्नेदीधिषुपरिविविदानदोषः ९९५, ९९६. स्त्रीभोगनिषेधः; स्त्री स्वभावतो दुष्टा; दुहितृगमनम्; स्व्यसमर्थाः; स्त्री देया ९९५. दुर्भगा स्त्री; विवाहेच्छोः कन्यामनोग्रहणम्; कामिन्या पुरुषस्य च संभोगकामना परस्परवशीकरणं च ९९६–७. पतिपत्नीर्ष्यामन्युनाशयत्नः; नवपत्न्याः सुभगत्वं पत्यनुकूलत्वं च प्रार्थ्यते ९९७–८. पत्युः पत्न्यनुकूलत्वं प्रार्थ्यते; जायाना पतिनिष्ठा; स्त्रीवशीकरणम् ९९८. कुटुम्बसामनस्यम् ९९८, ९९९. संभोगकाले सर्वस्वापनम्; एकस्या अनेकपतयः; ब्रह्मपत्न्या एक एव पतिः ९९८–९. पतिपत्नीसामनस्यम् ९९९. पतिव्रता ९९९, १०१०. पतिपत्नीशुभकामना; जायाकामस्य जायाप्रार्थना; परिविवित्तिदोषः; दैवविवाहः ९९९. स्नुषाश्वशुरसंबन्धः ९९९, १००५. स्त्रीपुनर्विवाहलिङ्गम् ९९९–१०००. पत्युः पत्न्योश्च वयनरूपं एकं कर्म; ब्रह्मचारिण्या विवाहः; वराः ज्येष्ठवरश्रेति वरप्रकारौ; वर्णभरणं वधूकर्म; कन्यादानम्; वध्वः पतिगृहगमनम्; एकस्याः पतिद्वयम्; वध्वः वैवाहिकालङ्कारादीनि; पत्न्याः पतिनिष्ठा गृहे अन्यजनसंबन्धश्च १०००. पत्न्यै वस्त्रदानम्; दीर्घायुष्यं वध्वः प्रार्थ्यते; धर्मपत्नीत्वम्; प्रजार्थं विवाहः; वध्वः वस्त्रधारणम्; गृहजनाविरोधित्वं पत्न्या आशास्यते; दम्पत्योर्भोग्यसंपत्; इष्टा देवरे प्रीतिः पत्न्याः; आशिषः; अनिष्टनिवारणम् १००१–४. सापिण्ड्यविवाहदोषः; सवर्णाविवाहः; अनुगमनम्, भार्यायां वस्त्रसंपत्, राज्ञः वावाता जाया; रात्रौ जायाः पत्युराकूतं जानन्ति १००४–५. अप्रतिवादिनी पत्नी, पत्न्याः स्वस्रपेक्षया श्रैष्ठ्यम्; जायानिरुक्तिः, पत्नीभोजनकालः; याज्ञानर्हाः पत्न्यः १००५–६. सुभगाः स्त्रियः; पतिप्रीतिकामना १००६. यज्ञे पत्न्या जारो निर्देष्टव्यः १००६, १००८. अपत्नीको यज्ञानर्हः; पतिवशीकरणम्; दैवविवाहः; स्त्रीसंभोगः अन्ये गुणाश्च काम्यन्ते १००६. जायाया यज्ञाङ्गत्वम्; स्त्रीणामबलत्वम्; मनोः स्वदुहित्रा विवाहः; सापिण्ड्ये विवाहः; पुरुषसंनिधौ न स्त्रीणा भोजनम् १००७–८. दम्पतीसंबन्धः; विवाहानन्तरं पतिगृहानिवृत्तिः काम्यते; यावज्जीवं पितृदत्तपतेरत्यागो धर्मः; आत्मनोऽर्धं जाया; प्रजायै जाया १००८. स्त्रीपुरुषाणा विविधधर्माः; स्त्रीपुरुषाणा संभोगसंवादः १००९. आत्मनोऽर्धं भार्या; सदृशात्सदृशी प्रजा; सपिण्डविवाहः; बालभार्या १०१०. यज्ञे वामदेव्यव्रतम् १०११.

दायभागः—

दायभागपदार्थः

रिक्थम्; क्रयः; संविभागः; कर्मयोगः ११२०-२१. प्रतिग्रहः; परिग्रहः ११२१. विजितम् ११२२.

पैतृकद्रव्यविभागस्तत्कालश्च

भ्रातरो भागहराः; दायादा अनेके भवन्ति; भ्रातॄणां भूमिविभागः ११४३–४. भ्रातृणा पैतृकदायहरत्वम्; जीवति पितरि पुत्राणा रिक्थविभागकालः ११४४.

पितृकर्तृको विभागः

पिता प्रजाभ्यो धनं विभजति; वृद्धपितुः सकाशात् पुत्रा धनं हरन्ति; पितृधने पुत्रस्वाम्यम्; पुत्राः पित्रे धनं ददति ११५८-९. पितृधने पुत्रस्वाम्यम्; माता पुत्र प्रति भागदायिनी; पिता प्रातव्यवहाराय पुत्राय भागं ददातिः ज्यायान् कनीयसे भागं ददातिः पिता पुत्रेभ्यो

धनं ददाति; पुत्रः पितृभ्यां धनं ददाति; पितरः पुत्रेभ्यो भागं ददति ११५९-६०. सर्वेषा भ्रातृणा भागार्हत्वम्; पित्रर्जितं धनं पितापुत्रसाधारणम् ११६०-१. पितृधनं पुत्रधनं च उभयसाधारणम्; पिता पुत्रेभ्यो दायं विभजति ११६१-२. ज्येष्ठपुत्रः द्विभागधनभागी पिता वा; जीवति पितरि पुत्रकृतपैतृकधनविभागः ११६२-३. पिता धनं पुत्रेभ्यो विभजति; पितापुत्रयोर्द्रव्यं साधारणम् ११६३.

पुत्राणा सोद्धारसमविषमविभागाः

ज्येष्ठो भ्राता द्विभागहारी ११८०-१. गुणवान् भ्राता उद्धारभाक्; पितुरिष्टो भ्राता उद्धारभाक्; पुत्राणा ज्येष्ठादितारतम्यानुसारेण विषमविभागः; विभागो जीवति पितरि पित्रधीनः ११८१.

भ्रातृणां सहवासविधिः

ज्येष्ठ एव पुत्रो दायादः ११९५.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

पुत्रमहिमा; औरस एव पुत्रो युक्तः; जनकस्यैव प्रजा; औरसपुत्र एव दायहरः न दुहिता; दुहिता संस्कारार्हा १२५३-४. दुहिता पुत्रिका संतानपिण्डदानार्था; दुहितुर्दायाद्यत्वविचारः १२५४-६. द्यामुष्यायणपुत्रलिङ्गानि १२५६-७. क्षेत्रजपुत्रलिङ्ग नियोगविधिलिङ्ग च १२५७-८. दत्तपुत्रलिङ्गम्; गूढजपुत्रलिङ्गम्; पुत्रप्रयोजनम्; पुत्रमहिमा; दुहितुर्दैयता; पुत्रदानम्; दत्तकलिङ्गम् १२५८-९. पुत्रमहिमा; पुत्रिकालिङ्गम्; पुनर्विवाहलिङ्गम्; पुत्रमहिमा १२५९-६०. औरसस्वयंदत्तद्यामुष्यायणक्रीतपुत्रलिङ्गानि; ज्येष्ठत्वं पुत्रत्वं च पितुरिच्छाधीनम्; पुत्राणा विक्रेयता; पितुरधीनं दायादत्वम् १२६०-१. पुत्रमहिमा १२६१-२.

दायानर्हाः

स्त्रियो दायानर्हाः; शूद्रा आर्यदासी धनानर्हा; प्रजाया अंशार्हानर्हभेदः; पत्नी दायानर्हा; दुहितॄणा स्त्रीणां च दायानर्हत्वम् १३८५.

पैतृकद्रव्ये पत्नीनां मातॄणां च भागः

पत्नी गृहभाण्डस्वामिनी; पत्नी दायार्हा; पत्युरिच्छया विभागार्हा १४०५.

पैतृकद्रव्ये भगिनीनां भागः

अनूढदुहिता पैत्र्यभागहारिणी; भगिन्या अंशो भ्रातृभागे(?); उभयोर्भ्रातृभगिन्योर्दायार्हत्वविचारः १४१५.

स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

वैवाहिक स्त्रीधनं भर्तुरपि भोग्यम्; विवाहे कन्यायै पित्रा देयं धनम्; कन्या तद्भोग्यधनेन सह देया; विवाहे पिता कन्यायै धनं ददाति; विधवा धनस्वामिनी १४२३-४. पत्नी पतिधनदायभागार्हा; स्त्रीधनं पुरुषो गृह्णाति प्रतिदत्ते च १४२४.

मृतापुत्रधनाधिकारक्रमः

ब्राह्मणधनं न राजगामि १४६४.

ससृष्टिविभागः, मृतापुत्रससृष्टिधनाधिकारश्च

संसृष्टधनं प्रार्थयति १५४०.

विभागदोषे पुनर्विभागादिविधिः

भागानर्हः; सर्वे भागार्हा भागिनः कर्तव्याः; भागार्हो भागी कर्तव्य एव, अन्यथा दोषः १५७०-७१.

जैमिनीयसूत्रम्

संभूयससुत्थानम्—

ज्योतिष्टोमे ऋत्विजा दक्षिणाविभागाधिकरणम् ७७०.

दत्ताप्रदानिकम्—

विश्वजिति पित्रादीनामदेयत्वाधिकरणम् ७९२. विश्वजिति पृथिव्या अदेयत्वाधिकरणम्; विश्वजिति धर्मार्थसेवकशूद्रस्यादेयताधिकरणम् ७९३.

दायभागः—

स्त्रीधन, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

स्त्रीणा धनस्वाम्यविचारः १४२४-५.

गौतमः

ऋणादानम्—

वृद्धिः

धर्म्यवृद्धिपरिमाणम्, तस्या ग्रहणावधिः ६०६-७. वृद्ध्युपरमावधिः; वृद्धिप्रकाराः; पश्चादिद्रव्यवृद्ध्युपरमावधिः ६०७-८.

आधिः

भोग्याधेरपि गोप्याधित्वम् ६३५.

ऋणप्रतिदानम्

ऋणप्रतिदातारः; पुत्रादिभिः अप्रतिदेयानि ऋणादीनि ६७७-८.

उपनिधिः—

राजदैविकचोरादिनष्टनिक्षेपविचारः ७३५.

दत्ताप्रदानिकम्—

अधर्मसंयुक्ताय प्रतिश्रुतमप्यदेयम्; दाने अप्रमाण

वाक्यानि ७९३. अदेयदत्ते स्वत्वं न; अदेयदाने प्रायश्चित्तम् ७९४.

अभ्युपेत्याशुश्रूषा—

शिष्यविधिः; शूद्रस्य दास्यम् ८१५–६.

स्वामिपालविवादः—

शस्यरक्षणम्, तदर्थं पशुदण्डविधिः ९०३–४.

स्त्रीपुंधर्माः—

विवाहे कन्याया जातिप्रवरादिसापिण्ड्यादिविचारः; कन्याविवाहकालः १०११-२. स्त्रीधर्माः, मृते भर्तरि नियोगविधिः १०१२-३. नष्टे प्रव्रजिते प्रोषिते वा भर्तरि कालप्रतीक्षावधिः १०१३. अकृतविवाहे ज्येष्ठभ्रातरि कनीयसः कर्तव्यम् १०१४.

दायभागः—

दायभागपदार्थः

अर्थागमः सर्ववर्णसाधारणः; स्वत्वोत्पत्तिनिमित्तम् ११२२-३. वर्णविशेषेणार्थागमविशेषः; स्वत्वोत्पत्तिनिमित्तम् ११२३-४. पैतृके स्वत्वोत्पत्तिः; विभागप्राशस्त्यम् ११२४-५.

पैतामहद्रव्यस्वाम्यविचारः

पितुरूर्ध्वं रिक्थविभागकालः ११४४–५. जीवति पितरि रिक्थविभागकालः ११४५–६.

पुत्राणां सोद्धारसमविषमविभागाः

पुत्राणामुद्धारविचारः ११८१-२. उद्धृतावशिष्टस्य समविभाग इति प्रथमः कल्पः; ज्येष्ठस्य द्व्यंशित्व इतरेषां समांश इति द्वितीयः कल्पः; ज्येष्ठादितारतम्येन विभागतारतम्यं इति तृतीयः कल्पः ११८२–३.

भ्रातॄणां सहवासविधिः

विकल्पेन ज्येष्ठ एव दायादः, इतरेषां भरणमात्रम् ११९५.

विभाज्याविभाज्यविवेकः

विद्याधनविभागविचारः; अविद्यार्जितधनविभागविचारः; अविभाज्यद्रव्यविशेषाः; स्त्रियोऽविभाज्याः १२०४-५.

सवर्णसापत्नभ्रातृविभागः

ज्येष्ठस्योद्धारः ज्यैष्ठिनेयस्य च; जन्मज्येष्ठमातृज्येष्ठानां समो विभागः १२३३-४. पुत्राणां दौहित्रीणां वा मातृतो भागकल्पना १२३४.

असवर्णभ्रातृविभागः

जातिज्येष्ठगुणवयोज्येष्ठयोः समभागविधिः, उद्धारव्यतिरिक्तविभागविधिश्च १२३८–९.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

पुत्रिका १२६२-३. प्रसङ्गादभ्रातृकोपयमनिषेधः; क्षेत्रजः; रिक्थभाजः षड्विधपुत्राः, गोत्रमात्रभाजः षड्विधपुत्राः १२६३–४. पुत्राणां गोत्रभाजां रिक्थभाक्त्वं कदाचित् १२६४.

दायानर्हाः

शूद्रापुत्रः प्रतिलोमश्च जीवनमात्रं लभते न पूर्णदायम् १२८५–६. अन्यायवृत्तः सवर्णपुत्रोऽपि दायानर्हः, जडक्लीबादयो दायानर्हा भर्तव्याः; जडादीनामपत्यानि दायार्हाणि १२८६. देवरातिरिक्तजोऽनियोगजो दायानर्हः १२८७.

स्त्रीधन, स्त्रीधनकृत्य, स्त्रीधनविभागश्च

मातृधनविभागः १४२५–६. भगिनीशुल्कविभागः १४२६–७.

मृतापुत्रधनाधिकारक्रमः

प्रत्यासन्नाः सपिण्डसगोत्रसप्रवराः क्रमेण अपुत्रमृतधनभाजः, नियुक्ता पत्नी वा १४६४–५. सर्वेषामभावे ब्राह्मणानामनपत्यानां धनं श्रोत्रियगाम्येव, इतरेषां राजगामि; विभक्तानपत्यधनभाक् ज्येष्ठ एव १४६५-६.

ससृष्टिविभागः, मृतापुत्रससृष्टिधनाधिकारश्च

मृतापुत्रसंसृष्टिधनभाक् संसृष्टी १५४०–४१

विभक्तजविभागः

विभागानन्तरजातः पैतृकादेवांशं गृह्णाति १५६२.

हारीतः

ऋणादानम्—

वृद्धिः

धर्म्या वृद्धिः; वृद्ध्युपरमावधिः ६०८-९.

आधिः

आधिपालनम् ६३५-६. आधिसिद्धिः ६३६.

प्रतिभूः

प्रतिभूग्रहणनिमित्तानि; प्रातिभाव्यदानम्; अधमर्णात् प्रातिभाव्यद्रव्यसाधनम् ६६१-२.

ऋणप्रतिदानम्

ऋणपत्रप्रामाण्यम् ६७८.

दत्ताप्रदानिकम्—

अदेयदाननिन्दा; सर्वस्वमदेयम्; अदेयदाने प्रतिश्रुतस्यादाने च दोषः ७९४,८०८.

स्त्रीपुधर्माः—

स्त्रीरक्षा; भार्यापरित्यागः; पत्नीधर्माः १०१४–६. भार्यायाः सुरापाननिषेधः; भार्यापरित्यागः; पत्यौ प्रोषिते पत्नीधर्मः; विधवाधर्मः १०१६. स्वैरिणीपुनर्भवादयः; साध्वी १०१७.

दायभागः —

पैतृकद्रव्यविभागस्तत्कालश्च

अनापदि जीवति पितरि अर्थास्वातन्त्र्यं पुत्राणाम्, पित्रोरापदि ज्येष्ठः प्रभवति ११४६.

पितृकर्तृको विभागः

पितृकृतविभागविधिः ११६३–४.

पुत्राणां सोद्धारसमविषमविभागाः

पुत्राणामुद्धारविचारः ११८३.

भ्रातृणां सहवासविधिः

सर्वेषामध्ययनसमाप्तिपूर्वं सहवासविधिः ११८५.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

पुत्रमहिमा, बहुभ्रातृणां तत्पत्नीनां च भ्रातृपुत्रेण चरितार्थता; क्षेत्रजः १२६४-५. बन्धुदायादाः षट्, अबन्धुदायादाश्च षट् पुत्राः; षड्विधपुत्राणां दायपरिमाणम् १२६५-६. काण्डपृष्ठसंज्ञकाः पुत्राः १२६६.

दायानर्हाः

व्यभिचारिणी भर्तव्या १३८७.

मृतापुत्रधनाधिकारक्रमः

अपुत्रमृतपत्नी यौवनादिदोषवती प्रजीवनमात्रभाक् १४६६.

आपस्तम्बः

अभ्युपेत्याशुश्रूषा —

शूद्रस्य दास्यम्; दासकर्मकराणां संविभागः ८१६.

वेतनानपाकर्म—

क्षेत्रपरिग्रहीताऽनुत्थाता भाविफलं दाप्यः; निर्धनक्षेत्रपरिग्रहीताऽनुत्थाता ताडनीयः; पशुपेऽतिदेशः ८४२.

स्वामिपालविवादः—

[सस्यरक्षणं तदर्थं पशुदण्डविधिः]; पालस्य स्वामिनश्च विवादः ९०४.

स्त्रीपुधर्माः—

पतिकर्तव्यम्; द्वितीयदारकर्तव्यता १०१७ ८. विवाहे गोत्रसापिण्ड्यविचारः; दम्पत्योः शुद्धिविचारः; नियोगविधिनिषेधौ १०१८. विधवाधर्मः १०१९.

दायभागः—

पितृकर्तृको विभागः

पितृकृतविभागविधिः ११६४-५. ज्येष्ठस्य दायहरत्वं ज्येष्ठपुत्रपितृभार्याणामुद्धारश्च साध्यते बाध्यते च ११६५-६.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

औरसपुत्रः; अनौरसपुत्रोत्पादनदोषः १२६६. क्षेत्रजः, तत्करणनिषेधश्च १२६७. अपत्यदानक्रयनिषेधः १२६८.

दायानर्हाः

क्लीबोन्मत्तपतिताः दायानर्हाः; अधर्मविनियोगिनः पुत्रा दायानर्हाः १३८७.

पैतृकद्रव्ये पत्नीनां मातृणां च भागः

पत्नी कौटुम्बिकधनस्वामिनी; दम्पत्योर्न विभागः १४०५–७.

पैतृकद्रव्ये भगिनीनां भागः

पैतृकधनविभागे भार्याया भागः १४१५–६.

मृतापुत्रधनाधिकारक्रमः

अपुत्रमृतधनभाजः क्रमेण प्रत्यासन्नाः सपिण्डाः, आचार्यान्तेवासिनौ दुहिता वा, सर्वाभावे राजा १४६६–७.

बौधायनः

अभ्युपेत्याशुश्रूषा—

[शूद्रस्य दास्यम्] ८१६.

स्त्रीपुधर्माः—

कन्याविवाहकालः; स्वयंवरः; बलाद्धृतकन्यापुनर्दानम्; कन्यापुनर्विवाहः; भार्यागमनविधिः १०१९–२०. स्त्रीरक्षा; भर्तृसेवाधर्मः; भार्यापरित्यागः; नियोगः; अनियोज्या अगम्याश्च स्त्रियः १०२०.

दायभागः—

पैतृकद्रव्यविभागस्तत्कालश्च

जीवति पितरि रिक्थविभागकालः ११४६–७. पितृषु मृतेषु विभागकालः ११४७.

पुत्राणां सोद्धारसमविषमविभागाः

ज्येष्ठोद्धारः ११८३.

असवर्णभ्रातृविभागः

जातिज्येष्ठगुणवयोज्येष्ठयोः समभागविधिः; नानावर्णस्त्रीपुत्राणा विभागविधिः १२३९.

पुत्रप्रकारा., तेषा दायहरत्वविचारश्च

औरसादित्रयोदशपुत्रविधिः तल्लक्षणानि च, तत्र औरसः; दौहित्रः १२६८-९. क्षेत्रजः; दत्तः; कृत्रिमः; गूढजः १२६९. अपविद्धः; कानीनः; सहोढः; क्रीतः; पौनर्भवः; स्वयंदत्तः; निषादपारशवौ; सप्त रिक्थभाजः, षड् गोत्रमात्रभाजश्च पुत्राः १२७०-७१.औपजङ्घनिमते औरसेतरपुत्रनिषेधः १२७१.

दायानर्हाः

अप्राप्तव्यवहाराः, अन्धादयः, अकर्मिणश्च दायानर्हा भर्तव्याः; मातृभिन्नाः पतिता न भर्तव्याः १३८७-८. स्त्री स्वातन्त्र्यं दायं च नार्हति १३८८-९.

स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

मातृधनविभागः; कन्याधनविभागक्रमः १४२७.

मृतापुत्रधनाधिकारक्रम.

सपिण्डसकुल्यानिरुक्तिः; अनपत्यमृतधनभाजः प्रत्यासन्नाः सपिण्डाः सकुल्याः आचार्यान्तेवासिऋत्विजः राजा च क्रमेण; ब्रह्मस्वं न राज्ञः किंतु श्रोत्रियस्य १४६७-९.

वसिष्ठः

ऋणादानम्—

वृद्धिः

वृद्धिग्रहणनिन्दा; वृद्धिपरिमाणनियमः; वृद्धयुपरमावधिः ६०९-१०.

आधिः

आधिसिद्धिः ६३६.

ऋणप्रतिदानम्

पुत्रादिभिः अप्रतिदेयानि ऋणादीनि ६७८.

प्रमेयक्रिया—

प्रमेयक्रिया ७३२.

संभूयसमुत्थानम्—

कार्यत्यागिनौ ऋत्विगाचार्यौ हेयौ ७७०.

अभ्युपेत्याशुश्रूषा—

[शूद्रस्य दास्यम्] ८१६.

सीमाविवादः—

पथि गृहादिकृते च अनुकूलदेशव्यवस्था; सीमावादे क्रियाविधिः९२५.

स्त्रीपुंधर्माः—

विवाहे गोत्रप्रवरसापिण्ड्यादिविचारः १०२०-२१. कन्याविवाहकालः; स्वयंवरः; वाग्दत्तायाः पुनरन्यत्र दानम्; अक्षतयोनिपुनर्विवाहः; भार्यापरित्यागः १०-२१-२. पत्यौ प्रोषिते पत्नीधर्मः; नियोगः; प्रोषितज्येष्ठभ्रातृप्रतीक्षा १०२२.

दायभागः—

दायभागपदार्थः

सर्ववर्णसाधारणोऽसाधारणश्चार्थागमः ११२६.

पुत्राणां सोद्धारसमविषमविभागाः

ज्येष्ठस्य द्व्यंशित्वम्; पुत्राणामुद्धारविचारः ११८४.

विभाज्याविभाज्यविवेकः

स्वार्जिते द्व्यंशित्वम् १२०५.

असवर्णभ्रातृविभागः

ब्राह्मणस्य त्रैवर्णिकपुत्रविभागविधिः१२३९.

पुत्रप्रकारा., तेषा दायहरत्वविचारश्च

पुत्रमहिमा; बहुभ्रातृणा तत्पत्नीना च भ्रातृपुत्रेण चरितार्थता १२७१-२. औरसादिमुख्यगौणपुत्राणां विधिः, तल्लक्षणानि च; औरसादिषड्दायादपुत्रविचारः; औरसः; क्षेत्रजः; पुत्रिका १२७२-३. पौनर्भवः; कानीनः; गूढजः; सहोढादयः षडदायादाः; सहोढः; दत्तकः १२७३-८. क्रीतः; स्वयमुपागतः; अपविद्धः; शूद्रापुत्रः; एतेषामदायादाना कदाचिद्दायादत्वम् १२७८-९.

दायानर्हाः

मुन्याश्रमगताः क्लीबोन्मत्तपतितादयश्च दायानर्हाः; पतितमुन्याश्रमातिरिक्ता भर्तव्याः १३८९.

पैतृकद्रव्ये पत्नीनां मातृणा च भागः

भ्रातृस्त्रीणा दायार्हत्वम् १४०७.

पैतृकद्रव्ये भगिनीनां भागः

भगिनीना पैतृकद्रव्यभागः प्रसवोत्तरम् १४१६.

स्त्रीधन, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

पैतृकद्रव्यभागः भगिनीना प्रसवोत्तरम्; मातृधनविभागः १४२७-८.

मृतापुत्रधनाधिकारक्रमः

अविभक्तानपत्यमृतधनभाक् पत्नी १४६९-७०.

अपुत्रमृतधनभाजः क्रमेण सपिण्डाः आचार्यान्तेवासिनौ राजा च, ब्रह्मस्वं श्रोत्रियाणामेव न राज्ञः १४७०.

विष्णुः

ऋणादानम्—

वृद्धिः

वृद्धिपरिमाणानियमः; अकृतवृद्धिः; वृद्धयुपरमावधिः ६१०-११.

आधिः

भौग्याधौ वृद्धयभावः आधिपालनम्; अधिमोचनावधिः ६३६-७. गोप्याधेर्भोग्याधित्वम्; आधिसिद्धिः ६३७-८.

प्रतिभूः

प्रतिभूनिमित्तानि; प्रातिभाव्यदानम्; ऋणिकात् प्रातिभाव्यद्रव्यसाधनम् ६६२.

ऋणप्रतिदानम्

ऋणप्रतिदातारः; रिक्थग्राहस्त्रीग्राहादिऋणप्रतिदातृविचारः ६७८-९. स्त्रीपतिपितृपुत्रकृतर्णसाध्यताविचारः; विभक्ताविभक्तकृतकुटुम्बार्थकृतर्णप्रतिदानविचारश्च ६७९.

ऋणोद्ग्राहणम्

धनी स्वधनं स्वयं साधयन् राज्ञा न वाच्यः; धनस्य राजद्वारा साधने अधमर्णदण्डादिविधिः, उत्तमर्णशुल्कं च ७१६.

उपनिधिः—

निक्षेपापहारादिदोषे दण्डविधिः ७३५.

अस्वामिविक्रयः—

अस्वामिविक्रये ज्ञानाज्ञानकृतक्रयविक्रयदोषतारतम्यम्; अज्ञानतश्चेत् स्वामी स्वं लभते ७५७.

सैंभूयसमुत्थानम्—

ऋत्विङ्मरणे तत्कार्यतद्दक्षिणाव्यवस्था ७७०.

दत्ताप्रदानिकम्—

अदेयदानदण्डः प्रायश्चित्तं च ७९४.

अभ्युपेत्याशुश्रूषा—

शूद्रस्य दास्यम्; उत्तमवर्णे दास्ये नियोजयन् दण्ड्यः; त्यक्तप्रव्रज्यस्य दासभावः; दासभार्यायाश्च दासीत्वम् ८१६.

वेतनानपाकर्म—

भृतकदोषसंबन्धी विधिः; स्वामिदोषसंबन्धी विधिः ८४३.

संविद्व्यतिक्रमः—

समयानपाकर्मलक्षणम्; संविल्लङ्घनगणद्रव्यहरणदण्डः ८५९.

क्रयविक्रयानुशयः—

विक्रीयासप्रदानम्

गृहीतमूल्येऽनुशये दण्डः ८७८.

क्रीत्वानुशयः

क्रीते क्रेतुरनुशये क्रेतुर्हानिः; विनिमयपरिवृत्तिनिरुक्तिः तयोः स्वत्वकारणत्वं च ८९०-९१. क्रेयस्वरूप, क्रीते उपधिनानुशये दण्डविधिः; वस्त्राणामुपभोगेऽनुशये कालः कर्तव्यता च; पशुशकटानामनुशयेऽवधिः; द्रव्यविशेषे मूल्यनियमः; परिवृत्तिहीनक्रयप्रतिबन्धकयोक्तलाभादिषु व्यवस्था; क्वचित् परिवृत्तेः परावर्तनम् ८९१.

स्वामिपालविवादः—

[शस्यरक्षणम्, तदर्थं पशुदण्डविधिः] ९०५.

सीमाविवादः—

मार्गादिदूषणे दण्डविधिः, सीमाभेदे दण्डविधिः ९२५.

स्त्रीपुंधर्माः—

विवाहे गोत्रप्रवरसापिण्ड्यादिविचारः; स्वयंवरः १०२२-३. धर्मार्थं भार्या द्विजजातिजा; पूर्वदत्ता न पुनर्देया; भार्या न त्याज्या; स्त्रीरक्षा; पत्नीधर्माः; पत्यौ प्रोषिते पत्नीधर्माः; प्रतीक्षाकालः; नियोगः; विधवाधर्माः १०२३-४.

दायभागः—

दायभागपदार्थः

पैतृके स्वत्वोत्पत्तिः; पैतृकधनस्वरूपं तद्विभागस्वरूपं च ११२५-६.

पैतामहद्रव्यस्वाम्यविचारः

पैतामहे द्रव्ये पितापुत्रयोः स्वाम्यं तद्विभागश्च ११७५.

पुत्राणां सोद्धारसमविषमविभागः

पुत्राणां समविभागः ज्येष्ठोद्धारश्च ११८४.

विभाज्याविभाज्यविवेकः

पितृदत्तमविभाज्यम्; पैतामहं नष्टमुद्धृतं स्वार्जितं च पिता न विभजेत् १२०५. अविभाज्यद्रव्यविशेषाः;

स्त्र्यलङ्कारोऽविभाज्यः १२०६.

असवर्णभ्रातृविभागः

नानावर्णस्त्रीपुत्राणा विभागविधिः, असवर्णैकपुत्रानेकपुत्रविभागविधिः, शूद्रापुत्रस्यैकस्यैवार्धांशः इतरेषामभावे शेषाशविनियोगश्च १२४०–३.

पुत्रप्रकाराः, तेषा दायहरत्वविचारश्च

पुत्रमहिमा; सर्वभ्रातृणा तत्पत्नीना च भ्रातृपुत्रेण पुत्रवत्त्वम्; औरसादिद्वादशपुत्राणा विधिः तल्लक्षणानि च; औरसः; क्षेत्रजः; पुत्रिकापुत्रः; पौनर्भवः; कानीनः; गूढजः; सहोढः; दत्तकः; क्रीतः; स्वयमुपागतः; अपविद्धः; कृत्रिमः १२७९–८०. द्वादशपुत्राणा क्रमेण दायहरत्वम् १२८०-८१. दायहरणपिण्डदानसबन्धः १२८१.

दायानर्हाः

पतिततदुत्पन्नाः क्लीबादयः प्रतिलोमस्त्रीजाताश्च भागानर्हाः, ते सर्वे दायादैः भर्तव्याः; पतितप्रतिलोमातिरिक्तानामौरसा दायार्हाः १३८९. कानीनादयश्चत्वारः पुत्रा दायानर्हाः १३९०.

पैतृकद्रव्ये पत्नाना मातृणा च भागः

मातृणा पुत्रसमदायार्हत्वम्; अनूढदुहितरोंऽशहारिण्यः १४०७–८.

पैतृकद्रव्ये भगिनीना भागः

विशेषणविशिष्टभगिनीनामेवाशभाक्त्वम्; भगिनीसंस्कारकर्तव्यता १४१६.

स्त्रीधन, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

स्त्रीणा वृत्तिरूपो दायः; षड्विधं स्त्रीधनम्; स्त्रीणा सौदायिकधने स्वातन्त्र्यम्; धर्मविवाहोढान्यविवाहोढाऽप्रजस्त्रीधनविभागः; भगिनीशुल्कविभागः; मातृधनविभागः १४२८.

मृतापुत्रधनाधिकारक्रमः

अपुत्रमृतधनभाजः क्रमेण पत्नीदुहितृपितृमातृभ्रातृतत्पुत्रबन्धुसकुल्यसहाध्यायिराजानः, ब्रह्मस्वं ब्राह्मणानामेव न राज्ञः १४७०–१. अपुत्रमृतधनभाक् न पुत्रिका बान्धवा वा किन्तु ज्ञातयः; अपुत्रमृतधनभाक् दौहित्रः; मृतवानप्रस्थधनभाजौ क्रमेण आचार्यशिष्यौ १४७१.

ससृष्टिविभागः, मृतापुत्रससृष्टिधनाधिकारश्च

संसृष्टिधनविभागः सम एव; संसृष्टिजननमरणयोः संसृष्टिधनविभागः; संसर्गार्हाः; मृतसंसृष्टिधनहारी पिण्डदः १५४१. असहोदरसंसृष्टिनोऽपि मृतसंसृष्टिधनहारिणः; मृतापुत्रसंभूयसमुत्थातृधनभाक् पत्न्यादिः; मृतापुत्रसंसृष्टिधनभाक् न पत्नी १५४२ ३.

विभक्तजविभागः

विभागानन्तरजातः विभक्तभ्रातृभागेभ्योंऽशं गृह्णीयात् १५६२–३.

विभागानन्तरागतविभागः

विभागानन्तरागतविभागः १५६९.

विभागसंदेहे निर्णयविधिः

प्रमाणसंदेहे पुनर्विभागः; विभागहेतवः १५७५.

शङ्खः शङ्खलिखितौ च

अस्वामिविक्रयः—

अस्वामिविक्रये स्वामिने द्रव्यं देयम् ७५७.

संभूयसमुत्थानम्—

ऋत्विङ्मरणे तत्कार्यव्यवस्था; ऋत्विङ्मरणप्रवासव्याधिपातित्यादौ तत्कार्यतद्दक्षिणाव्यवस्था; याज्यऋत्विजोरन्यतरेणान्यतरस्य त्यागे व्यवस्था ७७१.

दत्ताप्रदानिकम्—

[अदेयदाने प्रायश्चित्तम्] ७९४.

मर्यादातिक्रमः—

[समयानपाकर्मलक्षणम्] ८५९.

स्वामिपालविवादः—

[शस्यरक्षणं, तदर्थं पशुदण्डविधिः] ९०५.

सीमाविवादः—

सीमाविवादे क्रियाविधिः ९२५. पथि गृहादिकृते च अनुकूलदेशव्यवस्था; सीमाभेदादौ दण्डविधिः ९२६.

स्त्रीपुंधर्माः—

स्वयंवरः; कन्यापुनर्दानम्; सवर्णासवर्णभार्याः; स्त्रीरक्षा; भार्यापरित्यागः; अधिवेदनम्; पत्नीधर्माः १०२४-५. पत्यौ प्रोषिते पत्नीधर्माः; स्वैरिणीपुनर्भूदयः १०२६.

दायभागः—

पैतृकद्रव्यविभागस्तत्कालश्च

अनापदि जीवति पितरि जीवन्त्या मातरि वा अर्थास्वातन्त्र्यं पुत्राणाम्; पित्रोरापदि ज्येष्ठः प्रभवति ११-४७–८. जीवति पितरि तदनुमत्या रिक्थविभागकालः;

पितुरूर्ध्वं रिक्थविभागकालः ११४८–९.

पितृकर्तृको विभागः

पितृकृतसमविषमविभागविधिः ११६६–७.

भ्रातॄणां सहवासविधिः

जीवति पितरि सहवासविधिः; वृद्धत्रयं सहवासविधिः ११९५.

विभाज्याविभाज्यविवेकः

अविभाज्यद्रव्यविशेषाः; पूर्वनष्टभूम्युद्धारकर्तुश्चतुर्थभागोऽधिकः १२०७.

असवर्णभ्रातृविभागः

नानावर्णस्त्रीपुत्राणां विभागविधिः १२४३.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

औरसः; पुत्रमहिमा १२८१–२. क्षेत्रजः; पुत्रिका, पुत्रिकापुत्रश्च; औरसादयः षड् दायादाः पुत्रास्तेषां दायहरत्वतारतम्यम्; पूर्वेषामभावे अदायादपणा दायादत्वक्रमः १२८२–३.

दायानर्हाः

पतितो दायानर्हः, शूद्रापुत्रो दायानर्होऽपि प्रजीवन लभते; अपुत्रस्त्रीणां प्रजीवनमात्रम्; यज्ञानर्हा दायानर्हाः, व्यभिचारिणी भर्तव्या १३९०.

पैतृकद्रव्ये भगिनीनां भागः

पैतृकद्रव्ये कन्याभागः; भ्रातृद्रव्यं भगिनी हरति १४१६.

स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

पैतृकद्रव्ये कन्याभागः; मातृधनविभागः १४२८-९. भ्रातृद्रव्यं भगिनी हरति; मातृधनविभागः; स्त्रीशुल्कं पत्युः; पुत्रिकाधनं न भर्तुः १४२९.

मृतापुत्रधनाधिकारक्रमः

अपुत्रमृतधनभाजः क्रमेण भ्रातृपितृसगोत्रशिष्यसब्रह्मचारिणः; भ्रात्रभावे ज्येष्ठा पत्नी वा १४७१–३. अपुत्रस्त्रीणां प्रजीवनमात्रम्; ब्रह्मस्वं ब्राह्मणपरिषदः न राज्ञः; बालस्त्रीधनादीन्यपि न राज्ञः; अनपत्यमृतभ्रातृधनभाजो भ्रातरो न भार्या दुहितरो वा, ताः प्रजीवनमात्रभाजः १४७३.

विभागसंदेहे निर्णयविधिः

विभागसंदेहे साक्षित्वाधिकारनिर्णयः १५७५.

महाभारतम्

उपनिधिः—

उपनिधिलिङ्गम् ७३५.

अभ्युपेत्याशुश्रूषा—

दासधर्माः; शूद्रस्त्रयाणां वर्णानां परिचारकः दासो वा भवति ८१८–९. द्यूते अब्राह्मणप्रजापुत्रभ्रातरः आत्मा पत्नी च दासा भवन्ति; पत्नी द्यूते देया दासी भवति; युद्धजितो दासः ८१९. विनायाः पणजितदास्यम्, गरुडस्य मातृदास्यात् दास्य च ८४०.

संविद्व्यतिक्रमः—

विनापि राज्ञा लोकसमयः प्रजारक्षकः; राजा प्रजया निर्मितः; संघः ऐकमत्येनैवावतिष्ठते ८६०–१.गणरक्षणरीतिः ८६१.

स्त्रीपुंधर्माः—

प्रजार्थं विवाहः, स्त्रीरत्नं शुद्धम्; भर्तृपतिपदनिरुक्तिः; स्त्रीणां पुनर्विवाहव्यभिचारधनस्वाम्यनिषेधः; पत्नीधर्माः, जायामहिमा; पतिधर्मः १०२६–७. स्त्रीणां स्वैरसंभोगः धर्म आसीत्; स्त्रीणां श्वेतकेतुकृतः पुनर्विवाहनियोगनिषेधः, बहूनामेकपत्निता १०२७–८. पत्नीधर्माः; ऋतुमत्या विवाहे दानम्; पत्नीधर्माः १०२८–३०. पत्युरनुगमनम्; विधवाधर्माः; स्त्रीरक्षा; स्त्रीणां समानवर्णे व्यभिचारोऽदोषोऽल्पदोषो वा; बहुभार्यस्य संभोगविधिः; पत्नीपरित्यागः १०३०–१. स्त्रीरक्षा; स्त्रीदोषाः १०३१–३. नियोगः पुनर्विवाहश्च १०३३.

दायभागः—

पुत्राणां सोद्धारसमविषमविभागाः

पुत्राणां समविभागः; ज्येष्ठस्याधिकभाक्त्वम् ११८४.

सवर्णसापत्नभ्रातृविभागः

मातृतो ज्येष्ठत्वादितारतम्येन विभागः १२३४.

असवर्णभ्रातृविभागः

नानावर्णस्त्रीपुत्राणां विभागविधिः; शूद्रापुत्रविभागविचारः; असवर्णपुत्रविभागे वैषम्यनिमित्तविचारश्च १२४३–५.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

पुत्रमहिमा; पुत्रमहिमा, पुत्रप्रकाराः, क्षेत्रजपुत्रविधिर्विशेषतश्च १२८३–४. श्वेतकेतुपूर्वः श्वेतकेतूत्तरश्च

क्षेत्रजविधिः १२८४–६. दुहिता दौहित्रश्च दायहरः; पुत्रदौहित्रसाम्यम्; विक्रीतकन्यापुत्रः कन्यापितुरेव; कन्यापुत्रविक्रयनिषेधः; आर्षविवाहनिषेधः; औरसानन्तरजनिरुक्तजपतितजदत्तकृताध्यूढापध्वंसजापसदाख्याः पुत्राः १२८६–७. रेतजः क्षेत्रजः कृतकश्च; कृत्रिमकानीनाध्यूढक्षेत्रजापसदाना संस्काराः; कृत्रिमा दुहिता १२८७–८. जनयितुः पुत्रः १२८८.

दायानर्हाः

शापात्स्त्रीणा अदायादत्वम्; अन्धो राज्यानधिकारी १३९०. पितुरनिष्टो ज्येष्ठोऽपि दायानधिकारी राज्यानधिकारी च; जीवति पितरि पत्यौ स्वामिनि च सुतः भार्या दासश्च धनानधिकारी; पतितौ पितरौ भर्तव्यौ १३९१.

स्त्रीधन, स्त्रीधनकृत्य, स्त्रीधनविभागश्च

स्त्रीधने कुटुम्बधने च स्वातन्त्र्यविचारः; स्त्रीणा वृत्तिरूपो दायः; मातृधनविभागः; सापत्नासवर्णमातृधनविभागः १४२९.

मृतापुत्रधनाधिकारक्रमः

मृतापुत्रधनहारिणः दुहितृदौहित्राः १४७३.

कौटिलीयमर्थशास्त्रम्

ऋणादानम्—

वृद्धिः

वृद्धिपरिमाणनियमः; वृद्धयुपरमावधिः ६११.

आधिः

आधिविधिः ६३८.

प्रतिभूः

प्रातिभाव्यानधिकारः; प्रातिभाव्यदानाधिकारः पौत्रपर्यन्तम् ६६२.

ऋणप्रतिदानम्

ऋणप्रतिदातारः ६७९. दशवर्षोपेक्षितस्त्रीपतिपितृपुत्रकृतर्णसाध्यताविचारः; अप्रतिदेयानि ऋणादीनि ६८०.

ऋणोद्ग्राहणम्

ऋणप्रतिग्रहीतृक्रमः ७१६.

उपनिधिः—

ऋणादानातिदेशः; उपनिधिप्रत्यर्पणापवादः; उपनिधिभोगप्रणाशविक्रयाधानापहारेषु कृत्यम्; आधावतिदेशः ७३५-६. अन्वाधियाचितकावक्रीतकवैयापृत्यविक्रयनिक्षेपेषु विशेषः, उपनिधिविधेः अतिदेशश्च ७३६-८.

अस्वामिविक्रयः—

अस्वामिविक्रयकारिणो दण्डः तद्द्रव्यनिर्णयश्च; स्वत्वं विभाव्य स्वामी द्रव्यं लभतेऽन्यथा दण्ड्यः ७४७.

सभूयसमुत्थानम्—

सघभृतसंभूयसमुत्थातृकर्षकवैदेहकचोरयाजकवणिजा वेतनदक्षिणाफलादिविभागविधिः; कर्तृकर्मत्यागादौ दण्डविधिः ७७१-३.

दत्ताप्रदानिकम्—

देयमदेयं च; धर्मदानार्थदानकामदानभयदानरोषदानदर्पदानविचारः ७९४-५.

अभ्युपेत्याशुश्रूषा—

दासकल्पः ८१६-८.

वेतनानपाकर्म—

कर्मकरकल्पः ८४३–४.

संविद्व्यतिक्रमः—

समुदायकर्मसमयः; समुदायार्थनाट्यादिकर्मणि अनंशदोऽनधिकारी; सर्वहितादेशपालनम्; श्रैष्ठ्यनियमसंघे; उक्तसमयस्यातिदेशः देशजातिसंघेषु ८६१-२ संघवृत्तम् ८६२-३.

क्रयविक्रयानुशयः—

विक्रीयासंप्रदानम्

विक्रीयासंप्रदानम् ८७८-९. क्रीत्वानुशयः; विवाहेऽनुशयः; द्विपदचतुष्पदेषु अनुशयः; कन्योपधिः विवाह ८७९.

स्वामिपालविवादः—

पशुकृतक्षेत्रपथहिंसा ९०६-७.

सीमाविवादः—

गृहवास्तुकम् ९२६-८. वास्तुविक्रयः ९२८-९ सीमाविवादः; क्षेत्रविवादः; मर्यादास्थापनम् ९२९-३० बाधाबाधिकम् ९३०-१. उदकमार्गनिरोधे सस्यादिहिंसे च दण्डः ९३१-२.

स्त्रीपुधर्माः—

विवाहधर्मः; आधिवेदनिकम् १०३४-५. शुश्रूषाभारुष्यद्वेषातिचारोपकारव्यवहारप्रतिषेधाश्च १०३५-

निष्पतनं, पथ्यनुसरणं, ह्रस्वप्रवासः दीर्घप्रवासश्च १०३८-९. ह्रस्वप्रवासो दीर्घप्रवासश्च १०३९-४०.

दायभागः—

पैतृकद्रव्यविभागस्तत्कालश्च

जीवतोः पित्रोरननुमतौ न रिक्थविभागः; पित्रोरूर्ध्वं रिक्थविभागकालः ११४९.

पुत्राणां सोद्धारसमविषमविभागाः

पुत्राणामुद्धारविचारः ११८४-५. अन्तरालवर्णानां समो विभागः ११८५-६.

भ्रातॄणां सहवासविधिः

सहवासविधिः ११९५-६.

पुरुषपरम्पराया विभागविधिः

आ चतुर्थात् पितृतो भागकल्पना अग्रे समभागः; प्राप्तव्यवहाराप्राप्तव्यवहारादिविभागविचारः ११९९–१२००.

विभाज्याविभाज्यविवेकः

साधारणद्रव्यानधीनस्वार्जितमविभाज्यम्; आविभाज्यद्रव्यविशेषाः; ऋणरिक्थविभागः समः १२०७–८.

सवर्णसापत्नभ्रातृविभाग

नानास्त्रीपुत्राणा ज्येष्ठत्वनिमित्तानि; ज्येष्ठत्वाधीनो विभागः; सूतमागधादीना विशेषः १२३४-५.

अवसर्णभ्रातृविभागः

नानावर्णस्त्रीपुत्राणा विभागविधिः, सवर्णासवर्णैकपुत्रविभागविधिः, शूद्रापुत्रस्यैकस्यैव सत्त्वे तृतीयाशः शेषाशविनियोगश्च १२४५.

पुत्रप्रकाराः, तेषा दायहरत्वविचारश्च

औरसादिमुख्यगौणपुत्राणा विधिः तल्लक्षणानि च; तेषा सवर्णानामनुलोमानामनेकपितृकाणा च दायहरत्वम् १२८८–९.

दायानर्हाः

पतिततजाताः जडोन्मत्तान्धादयश्च दायानर्हाः; पतितातिरिक्ता भर्तव्याः; जडोन्मत्तादीनामपत्यानि निर्दोषाणि दायार्हाणि; दायानर्हा भगिन्यः, ता भर्तव्याः; सदोषो ज्येष्ठोऽपि दायानर्हः १३९१. स्त्रीणा धनस्वाम्यनिमित्तानि १३९२.

पैतृकद्रव्ये भगिनीना भागः

भगिन्यो भागहारिण्यः; कन्यासंस्कारकर्तव्यता १४१६–७.

स्त्रीधनं, स्त्रीधनकृत्य, स्त्रीधनविभागश्च

स्त्रीणा धनागमाः; स्त्रीणा वृत्तिरूपो दायः; स्त्रीधने भर्तुरधिकारमर्यादा; मृते भर्तरि पुनर्विवाहे नियोगे वा कृतेऽकृते वा स्त्रीधनकृत्यम्; स्त्रीधनविभागः १४३०-१. आधिवेदनिक धनम्; स्त्रीणा धनस्वाम्यहानिनिमित्तानि १४३१.

मृतापुत्रधनाधिकारक्रमः

धर्म्यविवाहजाः पुत्रा दुहितरो वा रिक्थभाजः; अपुत्रधनभाजः सोदरभ्रातरः कन्याश्च, तदभावे पिता भ्रातरो तत्पुत्राश्च क्रमेण; अदायकं राजा हरेत्; ब्रह्मस्वं ब्राह्मणानामेव १४७३–४.

संसृष्टिविभागः, मृतापुत्रसंसृष्टिधनाधिकारश्च

संसृष्टिभिः पुनर्विभागः कर्तव्यः; संसृष्टिना उत्थाता द्व्यशभाक् १५४३.

विभागदोषे पुनर्विभागादिविधिः

ससाक्षिको विभागः कर्तव्यः; विभागदोषे पुनर्विभागः १५७१.

मनुः

ऋणदानम्—

वृद्धिः

वृद्धिपरिमाणनियमः ६११–२. वृद्धयुपरमावधिः ६१२–४. अकृतवृद्धिग्रहणमर्यादा ६१४–५. वृद्धिग्रहणनिषेधः ६१५–९. वृद्धिविशेषस्थापकाः ६१९.

आधिः

भोग्याधौ वृद्ध्यभावः; आधेः संक्रमणविक्रयौ न ६३८–९. बलादाधिभोगनिषेधः; अननुज्ञातभोगनिष्कृतिः ६४०–१.

प्रतिभूः

दर्शनप्रातिभाव्यद्रव्यदानम् ६६२-३. प्रातिभाव्यद्रव्यदानाधिकारः कियत्पुरुषपर्यन्तम् ६६३–५.

ऋणप्रतिदानम्

कुटुम्बार्थे कृतमृणं विभक्तैरपि देयम्; प्रतिदानाशक्तौ करणपरिवर्तनम् ६८०-८२.

ऋणोद्ग्राहणम्

सवरुपायैः स्वधनं साधयेत् ७१६-७. पञ्च स्वधनोद्ग्राहणोपायाः ७१७-८. धनी स्वधनं स्वयं साधयन् न राज्ञो वाच्यः; धनस्य राजद्वारा साधने अधमर्णदण्डादि-

विधिः ७१८-२०. अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्यः ७२०.

उपनिधिः—

निक्षेपस्थापनविधिः ७३८-९. निक्षेपपालनप्रतिदानप्रत्यादानानि ७३९-४१. राजदैविकचोरादिनष्टनिक्षेपविचारः; निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम् ७४१-३. निक्षेपाद्यपहारादिदोषे दण्डविधिः ७४३-४. निक्षेपप्रतिदापनम्; प्रीतिदत्तादिषु निक्षेपविधेः अतिदेशः ७४४-५.

अस्वामिविक्रयः—

अस्वामिविक्रेतुर्निन्द्यत्वम्; अज्ञानतोऽस्वामिविक्रेतुः स्वामिसंबन्धासंबन्धभेदेन दण्डतारतम्यम् ७५८-९. ज्ञानतोऽस्वामिविक्रेतुश्चौरदण्डः; विशुद्धक्रयः; प्रकाशक्रये मूलालाभे न दोषः, स्वामी स्वं लभते ७५९-६०. मूलालाभे क्रयदोषशङ्काया दण्डः; स्वामी स्वं लभते; अस्वामिकृतनिवर्तनम् ७६०.

संभूयसमुत्थानम्—

ऋत्विजा संभूयक्रियास्वरूपम्; वृतेन ऋत्विजा कर्मासमापने व्यवस्था ७७३-४. संभूयकारिणामृत्विजा दक्षिणाव्यवस्था ७७४-६. ऋत्विजा संभूयसमुत्थानस्य स्थापत्यादावतिदेशः; ऋत्विग्याज्ययोरन्यतरेणान्यतरस्य त्यागे व्यवस्था ७७६-७.

दत्ताप्रदानिकम्—

प्रतिश्रुतं दत्तं वा अधर्मसंयुक्ताय न देयम्; अधार्मिको हठात्साधयन् दण्ड्यः ७९५-६. अदेयदातृप्रतिग्रहीतारौ दण्ड्यौ ७९६.

अभ्युपेत्याशुश्रूषा—

वैश्यशूद्रौ स्वकर्मणि प्रवर्तनीयौ ८१९-२०. आपदि क्षत्रियवैश्यौ ब्राह्मणेन स्वस्वकर्मणा भर्तव्यौ; ब्राह्मणेन संस्कृतद्विजा दास्ये न नियोज्याः ८२०. शूद्रो दास्यमेवार्हति; सप्तविधा दासाः ८२१-२. भार्यापुत्रदासा न धनस्वाम्यमर्हन्ति ८२२-३. ब्राह्मणेन शूद्रद्रव्य हरणीयम् ८२३.

वेतनानपाकर्म—

वेतनानपाकर्मप्रतिज्ञा; भृतकदोषसंबन्धी विधिः ८४४-५. निर्दोषो भृतकः तद्वेतनं च ८४५-६.

सविध्यतिक्रमः—

ग्रामदेशसंघसंविल्लङ्घने दण्डविधिः ८६४-५.

क्रयविक्रयानुशयः—

विक्रीयासंप्रदानम्

क्रयविक्रयानुशये परीक्षाकालः ८७९-८०. परीक्षाकालोत्तरमनुशये दण्डः ८८०-८१. पण्यानुशयधर्मस्यान्यत्र वेतनादिष्वतिदेशः; विवाहे कन्योपधिविषयेऽनुशयः ८८१-२. कन्याविषयानुशयमर्यादा सप्तपदी ८८२-३.

क्रीत्वानुशयः

अविक्रेयपण्यम् ८९१-२.

स्वामिपालविवादः—

स्वामिपालवादप्रतिज्ञा; पालभृतिः ९०७-९. शस्यरक्षणम्, तदर्थं पशुदण्डविधिः ९०९–११.

सीमाविवादः—

सीमानिश्चयकालः; प्रकाशाप्रकाशसीमाचिह्नविधिः ९३३–५. सीमाविवादे क्रियाविधिः; चिह्नसाक्षिसामन्तमौलवनचारिणा पूर्वपूर्वाभावे उत्तरोत्तरं प्रामाण्यम् ९३५-७. साक्षिणा सीमानिर्णये धर्मविशेषः ९३७-८. साक्षिणा मृषाकरणे दण्डः ९३८. प्रमाणान्तरेणानिश्चये राजा निर्णेता; गृहाद्याहरणे दण्डः; मार्गादिदूषणे दण्डविधिः ९३९-४०

स्त्रीपुंधर्माः—

कन्यायाः पुनर्दाननिषेधः; प्रतिगृहीतकन्यात्यागः; कन्यादानकालः १०४१–२. कन्यास्वयंवरः; ऋतुमत्याः शुल्कं न देयम् १०४२. वधूवरयोर्विवाहकालः; कन्यायावैवाहिकशुल्कसंबन्धी विधिः १०४३–४. स्त्रीपुंधर्मप्रतिज्ञा; स्त्रीणामस्वातन्त्र्यविधिः, रक्षणविधिः, रक्षणप्रयोजनम् १०४४–६. जायापदनिरुक्तिः; जायारक्षणोपायाः १०४७. स्त्रीणा स्वभावदोषाः दूषणानि च १०४८–५०. उत्कृष्टभर्ता स्त्रीरक्षणयोग्यः; स्त्रीरक्षणविद्युपसंहारः; दारमाहात्म्यम्; स्त्रीलालनम् १०५१-३. पतिव्रतास्तुतिः, व्यभिचारनिन्दा; अनेकभार्याभिर्वर्तनप्रकारः १०५३–४. दम्पत्योः परस्पराभ्यभिचारविधिः १०५४–५. भार्याभरणं नित्यधर्मः; सहधर्मचरणविधिः; स्त्रीत्यागविचारः, अधिवेदनविचारश्च १०५५–८. दुष्टस्त्रीणां दण्डः प्रायश्चित्तं च; स्त्रीधर्माः पतिव्रतावृतं च १०५८–६०. प्रोषितभर्तृकाविचारः १०६०–६१. विधवाधर्माः नियोगनिषेधश्च १०६२–४. नियोगविधिः १०६४–६. नियोगनिषेधविचारः १०६६–९. बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः १०६९-७५. पुनर्दारक्रिया १०७५.

दायभागः—

दायभागपदार्थः

सर्ववर्णसाधारणोऽसाधारणश्चार्थागमः ११२६-७. दायभागप्रतिज्ञा; व्याख्यासु दायभागपदार्थः ११२७-८. विभागप्राशस्त्यम् ११२८–९.

पैतृकद्रव्यविभागस्तत्कालश्च

[जीवतोः पित्रोरननुमतौ न रिक्थविभागः; पित्रोरूर्ध्वं रिक्थविभागकालः;] ११४९-५१.

पुत्राणां सोद्धारसमविषमविभागाः

पुत्राणामुद्धारविचारः ११८६–९. समगुणपुत्राणां उद्धारनिषेधः; उद्धारव्यतिरेकेण समांशाः ११९०. ज्येष्ठादितारतम्येन विभागतारतम्यम् ११९१-२.

भ्रातॄणां सहवासविधिः

विकल्पेन ज्येष्ठ एव दायादः, इतरेषा भरणमात्रम्; ज्येष्ठप्रशंसा ११९६-८; ज्येष्ठे इतरेषां वृत्तिः ११९८.

विभाज्याविभाज्यविवेकः

अविभाज्यद्रव्यविशेषाः; स्त्र्यलङ्कारश्चाविभाज्यः १२०८–१०. विद्याधनविभागविचारः १२१०. अविद्यार्जितधनविभागविचारः; विद्याधनमैत्रौद्वाहिकमाधुपर्किकान्यविभाज्यानि १२११. अनीहमानस्य न विभागः; स्वार्जितमविभाज्यम् १२१२-३. पैतामहं नष्टमुद्धृतं स्वार्जितं च पिताऽकामो न विभजेत् १२१३–४. संभूयार्जितं पित्रा समं विभाज्यम् १२१४–५.

सवर्णसापत्नभ्रातृविभागः

मातृज्येष्ठजन्मज्येष्ठादीना विभागव्यवस्था १२३५-६. जन्मत एव ज्यैष्ठ्यमिति सिद्धान्तः १२३६–७.

असवर्णभ्रातृविभागः

नानावर्णस्त्रीपुत्राणा विभागविधिः; शूद्रापुत्रस्य दशमांशः १२४५–८. असवर्णसमाना शूद्रेतराणा समसर्वांशहरत्वम्; शूद्रापुत्राणा समाशहरत्वम् १२४९.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

पुत्रमहिमा १२८९–९०. बहुभ्रातॄणा तत्पत्नीना च एकेन भ्रातृपुत्रेण पुत्रवत्त्वम् १२९०–९४. पुत्रिका, पुत्रिकापुत्रः, दौहित्रश्च, तेषा श्राद्धकर्तृत्वदायहरत्वविचारः १२९४–१३०२. औरसादिद्वादशगौणमुख्यपुत्रविधिः तल्लक्षणानि च; औरसः १३०२–३. क्षेत्रजः; दत्तकः १३०४ ५. कृत्रिमः १३०५–६. गूढजः; अपविद्धः; कानीनः १३०६–७. सहोढः १३०७–८. क्रीतकः; पौनर्भवः १३०८. प्रसंगात् पुनर्भूसंस्कारः; स्वयंदत्तः; पारशवः १३०९-१०. यः शूद्रस्य दासीसुतः तस्यांशः; पुत्रप्रतिनिधिविधिः १३१०-१४. पुत्रप्रतिनिधिनिषेधः; सर्वेषा पुत्रप्रतिनिधीना दायहरत्वम् १३१४–५. उदकपिण्डदानसंबन्धः १३१५-६. आपदि पुत्रीकरणविधिः; कुपुत्राणा निन्दा; क्षेत्रजस्य दायहरत्वविचारः १३१६-९. बन्धुदायादा अबन्धुदायादाश्च १३१९–२१. मुख्यगौणपुत्राणा दायहरत्वक्रमः १३२१–२. अनेकविधपुत्राणां औरसक्षेत्रजादीना समवाये दायहरत्वविचारः १३२२–७. दत्तकस्य न जनकगोत्ररिक्थभाक्त्वम् १३२७–८.

दायानर्हाः

पतितक्लीबजात्यन्धादयो दायानर्हाः; पतिता दायानर्हाः; पतितस्त्रियो भर्तव्याः १३९२–३. स्त्रीणा साध्वीना दायार्हत्वं नासाध्वीनाम्; जीवति पितरि, पत्यौ, स्वामिनि च सुतः, भार्या, दासश्च धनानधिकारी; सर्वे दायानर्हा भर्तव्याः १३९३–४. दायानर्हाणा निर्दोषाण्यपत्यानि दायार्हाणि १३९४–५. अनियोगजोऽधिकोऽविधिजः कामजो वा क्षेत्रजो दायानर्हः १३९५–६. आर्याणा शूद्रापुत्रो दायानर्हः १३९६–७. ज्येष्ठोऽपि भ्राता भ्रातृव्यको दायानर्हो दण्डार्हश्च १३९७–८. विकर्मस्था भ्रातरो दायानर्हाः; कनिष्ठेभ्योऽदत्ते यौतकनिषेधः १३९८.

पैतृकद्रव्ये पत्नीनां मातॄणां च भागः

मातॄणा दायार्हत्वम् १४०८.

पैतृकद्रव्ये भगिनीनां भागः

भगिन्यश्चतुर्थभागहारिण्यः १४१७-९.

स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

षड्विधं स्त्रीधनम् १४३१-२. कुटुम्बधने स्त्रीधने च स्वातन्त्र्यविचारः; मातृधनविभागः १४३२-९. धर्मविवाहोढाऽप्रजस्त्रीधनविभागः १४३९-४०. आसुरादिविवाहोढाऽप्रजस्त्रीधनविभागः; अप्रजसापत्नमातृधनविभागः १४४०-४१.

मृतापुत्रधनाधिकारक्रमः

मृतापुत्रधनहारिणः दुहितृदौहित्राः; अनपत्यमृतधनभाजौ क्रमेण माता पितामही च १४७४-५. अपुत्रमृतधनभाजः पिता भ्रातरः प्रत्यासन्नाः सपिण्डाः सकुल्या आचार्यशिष्यौ राजा च क्रमेण; ब्रह्मस्वं ब्राह्मणानामेव न राज्ञः १४७५-६. मृतापुत्रधनभाजः क्रमेण प्रत्यासन्नाः सपिण्डाः सकुल्या आचार्यः शिष्यः ऋत्विजः सत्क्रियश्च १४७६-९.

संसृष्टिविभागः, मृतापुत्रसंसृष्टिधनाधिकारश्च

संसृष्टिधनविभागः सम एव; संसृष्टिनः विभागानधिकारप्राप्तौ मरणे वा तदीयांशविभागः १५४३-६.

विभक्तजविभागः

विभागानन्तरजातः पैतृकांशमात्रभाक्; संसृष्टिनश्चेत् भ्रात्रादयः तेभ्यः समो भागो ग्राह्यः १५६३-५.

विभागदोषे पुनर्विभागादिविधिः

विभागानन्तरोपलब्धस्य समो विभागः १५७१. विभागोत्तरलब्धसाधारणधनं पुनर्विभजनीयम् १५७२.

विभागसंदेहे निर्णयविधिः

विभागसंदेहे पुनर्विभागः कर्तव्यः; पुनर्विभागनिषेधः १५७५.

वाल्मीकिरामायणम्

उपनिधिः—

न्यासलिङ्गम् ७४५.

स्त्रीपुंधर्माः—

पतिव्रतावृत्तम् १०७५-६. पतिव्रतावृत्तम्-स्त्रीदोषाः पतिनिष्ठा च १०७६-७.

दायभागः—

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

पुत्रमहिमा; औरसपुत्रप्रतिनिधितारतम्यम्; ज्येष्ठविचारः; औरसक्षेत्रजक्रीतदत्तपुत्रविचारः १३२८-९. दत्तकसुता १३२९.

याज्ञवल्क्यः

ऋणादानम्—

वृद्धिः

धर्म्या वृद्धिः, कृतवृद्धिश्च ६१९–२२. वृद्ध्युपरमावधिः ६२२.

आधिः

आधिसिद्धिः; आध्यन्तरकरणम् ६४१–२. गोप्यभोग्याध्योरुपचारभोगनाशादिविचारः ६४२–३. गोप्यभोग्याध्यवधिः ६४३-५. चरित्रबन्धसत्यङ्कारौ; आधिमोचनम् ६४५-७.

प्रतिभूः

प्रातिभाव्यनिमित्तानि; प्रातिभाव्यद्रव्यदानाधिकारः कियत्पुरुषपर्यन्तम् ६६५-७. अनेकप्रतिभूभ्यः प्रातिभाव्यद्रव्यग्रहणप्रकारः; अधमर्णात्प्रातिभाव्यद्रव्यसाधनम् ६६७–८. अधमर्णात् प्रातिभाव्यद्रव्यवृद्धिः कियती साधनीया ६६८–९.

ऋणप्रतिदानम्

कुटुम्बार्थमविभक्तकृतस्य ऋणस्य रिक्थहर्तारः प्रतिदातारः; स्त्रीपतिपितृपुत्रकृतर्णप्रतिदानविचारः ६८२-४. पितृकृतमृणं पुत्रपौत्रैः प्रतिदेयम् ६८४-५. पुत्रेणाप्रतिदेयानि ऋणादीनि; त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः; आधिभोगकालः ६८५-६. रिक्थग्राहयोषिद्ग्राहानन्याश्रितद्रव्यपुत्रादीनामृणप्रतिदातृत्वम् ६८६-९. ऋणप्रतिदाने कृते उपगतपत्रग्रहणादिविधिः ६८९-९०.

ऋणोद्ग्राहणम्

ऋणग्रहणानधिकारिणः, धनी स्वधनं स्वयं साधयन् न राज्ञो वाच्यः; राजद्वारा साधने अधमर्णदण्डादिविधिः ७२१–२. ऋणोद्ग्रहणे ऋणप्रतिग्रहीतृक्रमः; राजद्वारा धनसाधने अधमर्णदण्डः उत्तमर्णशुल्कं च ७२२–३. अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्यः ७२३.

प्रमेयक्रिया—

प्रमेयक्रिया ७३२.

उपनिधिः—

उपनिधिलक्षणम्; राजदैवचोरादिनष्टनिक्षेपविचारः; उपनिधिप्रतिदापनम् ७४५–६. उपनिध्यपहारे दण्डविधिः; उपनिधिविधेः याचितादिषु अतिदेशः ७४६.

अस्वामिविक्रयः—

अशुद्धक्रयस्वरूपम्; स्वामी स्वं लभते ७६०-६१. नष्टापहृतविचारः; अस्वामिक्रेतृग्रहणोत्तरविधिः ७६१-२. स्वामी स्वत्वं विभाव्य स्वं लभते ७६२.

संभूयसमुत्थानम्—

संभूयकारिणा वणिजा लाभालाभव्यवस्था; अन्यतमेन निषिद्धाननुमतकरणे प्रमादनाशने आपत्कृतरक्षणे च विधिः ७७७-८. पण्ये राजभाव्यशुल्कादिनिरूपणम्, राज्ञोऽतिक्रमे दण्डश्च; तरिकेण स्थलजशुल्कग्रहणे कृते, योग्यनिकटब्राह्मणानिमन्त्रणे च दण्डः ७७८-९. संभूयकुर्वतामन्यतमस्य देशान्तरमरणे तद्द्रव्याधिकारनिरूपणम्; लाभशून्यजिह्माशक्ताना विधिः; वणिजा संभूयकारिणामृत्विक्कर्षकादावतिदेशः ७७९-८०.

दत्ताप्रदानिकम्—

देयमदेयं च; शुद्ध[illegible]हः; दत्तानपहारः ७९६-७.

अभ्युपेत्याशुश्रूषा—

दास्यमोक्षकारणानि ८२३-४. दास्यमोक्षकारणापवादः; आनुलोम्येनैव दास्यम्; अन्तेवासिविधिः ८२४.
वेतनानपाकर्म—
कर्मत्यागिभृतकविधिः; उपस्कररक्षणं भृत्यधर्मः; आयुधीयभारवाहकादिदोषसंबन्धी विधिः; त्याजकस्वामिदोषसंबन्धी विधिः ८४६–७. अपरिभाषितभृतिविधिः ८४७-८. अनेकभृत्यसाध्यकर्मवेतनविधिः ८४८.
संविद्व्यतिक्रमः—
त्रैविद्यविधौ वर्णाश्रमधर्मसंविद्धर्मराजकृतधर्मरक्षणाधिकृतब्राह्मणनियुक्तिः ८६५–७. संविल्लङ्घनगणद्रव्यहरणदण्डः; समूहहितवादिवचनाकरणे दण्डः; समूहाधिकृता राज्ञा सत्कार्याः ८६७-८. समूहाधिकृतेन लब्धं समूहायैव देयं, अन्यथा दण्डः; कीदृशाः समूहकार्यचिन्तका भवेयुः ८६८-९. उक्तत्रैविद्यसंविद्विधेः श्रेण्यादावतिदेशः ८६९.
क्रयविक्रयानुशयः—
विक्रीयासंप्रदानम्
गृहीतमूल्यपण्यविक्रेत्रनुशयः ८८३-४. अप्रदत्ते पण्ये दुष्टे विक्रेतुर्हानिः ८८४-५. क्रेतर्यगृह्णति अन्यत्र विक्रेयम्; सत्यङ्कारव्यवस्थातिक्रमे दण्डः ८८५.
क्रीत्वानुशयः
क्रीते द्रव्यभेदेन परीक्षाकालः अनुशयावधिरूपः; अनुशयकारणाभावेऽनुशये दण्डविधिः ८९२-३.
स्वामिपालविवादः—
पालस्य स्वामिनश्च विवादः, पालभृतिश्च; गोप्रचारकरणम्; द्विजस्य तृणैधःपुष्पेष्वधिकारः ९१२-३. शस्यरक्षणम्, तदर्थं पशुदण्डविधिः ९१३-५.
सीमाविवादः—
क्षेत्रसीमाविवादे सामन्तगोपकर्षकवनचारिणः चिह्नप्रदर्शनद्वारा प्रत्यायकाः; सामन्तसाक्षिसंख्या, सीमाविवादे धर्मविशेषश्च ९४०-४१. साक्षिणा मृषाकरणे दण्डः; प्रमाणान्तरेणानिश्चये राजा निर्णेता ९४१. क्षेत्रसीमावादविधेरन्यत्र आरामादिष्वतिदेशः; सीमाभेदादौ दण्डविधिः; परक्षेत्रानपहरणापवादः ९४२-३. उक्तापहारः स्वामिनिवेदनपूर्वक एव युक्तः; कर्षकेणाङ्गीकृतक्षेत्रकरणत्यागे विधिः ९४३.
स्त्रीपुंधर्माः—
कन्यादातृक्रमः; कन्यास्वयंवरविधिः १०७७-८. दत्तकन्याहरणविचारः १०७८. सदोषकन्यादाननिर्दोषकन्यात्यागदूषणविचारः; दारसंग्रहफलम्; स्त्रीरक्षणविधिः; रक्षणविधौ स्त्रीगमनविधिः १०७९-८३. रक्षणविधौ स्त्रीलालनविधिः; रक्षणविधौ स्त्रीणा गुर्वधीनत्वविधिः १०८३-४. स्त्रीधर्माः; पतिव्रतावृत्तम् १०८४-५. प्रोषितभर्तृकावृत्तम् १०८५. स्त्रीत्यागविचारः, अधिवेदनविचारश्च १०८६-८ स्त्रीणामनन्यपरत्वविधिः; अधिवेदनकारणाभावे अधिवेदने विधिः; पुनर्भूस्वैरिणीस्वरूपम्, नियोगविधिश्च १०८८-९१. अनेकभार्यकर्तव्यम्, पुनर्दारक्रिया १०९१-२.
दायभागः—
पैतृकद्रव्यविभागस्तत्कालश्च
पित्रोरूर्ध्वं ऋणरिक्थविभागकालः पुत्राणाम् ११–५१–२.
पितृकर्तृको विभाग.
पितृकृतसमविषमविभागविधिः ११६८–७०.
पैतामहद्रव्यस्वाम्यविचारः
पैतामहे द्रव्ये पितापुत्रयोः स्वाम्य तद्विभागश्च ११७५–९.
पुत्राणा सोद्धारसमविषमविभागाः
समूयार्जितस्य समो विभागः ११९२.
पुरुषपरम्पराया विभागविधिः
पितृतो भागकल्पना १२००.
विभाज्याविभाज्यविवेकः
अविभाज्यविचारः १२१५–९. पितृप्रसादलब्धमविभाज्यम् १२१९.
असवर्णभ्रातृविभागः
नानावर्णस्त्रीपुत्राणा विभागविधिः १२४९–५०.
पुत्रप्रकाराः, तेषा दायहरत्वविचारश्च
औरसपुत्रिकासुतक्षेत्रजगूढजकानीनपौनर्भवदत्तककृतकृत्रिमस्वयंदत्तसहोढजापविद्धाः, तेषा विधिः लक्षणानि च १३३०-३५. औरसादीना द्वादशविधपुत्राणा पिण्डदत्वदायादत्वविचारः १३३५–७. अत्र द्वादशविधाः पुत्राः सजातीया एव ग्राह्याः १३३७ ८. शूद्रदासीपुत्रस्याशहरत्वविचारः १३३८–४२ क्षेत्रजो व्यामुष्यायणः, तस्य पिण्डदत्वदायहरत्वविशेषश्च १३४२–६.
दायानर्हाः
पतितक्लीबजात्यन्धादयो दायानर्हा भर्तव्याः १३९८-९. दायानर्हाणामपत्यानि निर्दोषाणि दायार्हाणि, तेषा दुहितरो भर्तव्याः १३९९-१४००. दायानर्हाणा साध्यो

भार्या भर्तव्या नेतराः; व्यभिचारिणी भर्तव्या; साध्व्यास्त्यागे तस्यास्तृतीयभागहरत्वम् १४००.

पैतृकद्रव्ये पत्नीनां मातॄणां च भागः

जीवति पितरि पत्नीना पुत्रसमधनार्हत्वम् १४०८–११. अजीवत्पितृकविभागे माता पुत्रसमदायार्हा १४११-१३.

पैतृकद्रव्ये भगिनीनां भागः

भगिन्यः चतुर्थभागहारिण्यः; असंस्कृतसंस्कारकर्तव्यता १४१९-२१.

स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

मातृधनविभागः १४४१-२. स्त्रीणां आधिवेदनिकं धनम् १४४२-३. विविधं स्त्रीधनम् १४४३-४. अप्रजस्त्रीधनविभागः १४४४-५. स्त्रीधनविभागः; धर्मविवाहोढाऽन्यविवाहोढाऽप्रजस्त्रीधनविभागः १४४५-७. शुल्कपूर्वकवाग्दत्ताविषये धनवादः; आपदि गृहीतं स्त्रीधनं भर्ता न प्रतिदद्यात् १४४७-८.

मृतापुत्रधनाधिकारक्रमः

अपुत्रमृतधनभाजः क्रमेण पत्नी दुहितरः पितरौ भ्रातरः तत्सुता गोत्रजा बन्धुः शिष्यः सहाध्यायिनश्च १४७९-१५०९. मृतवानप्रस्थयतिब्रह्मचारिणां धनभाजः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः १५०९-११.

संसृष्टिविभागः, मृतापुत्रसंसृष्टिधनाधिकारश्च

संसृष्टिजननमरणयोः संसृष्टिधनविभागः; मृतापुत्रसंसृष्टिधनविभागाधिकारः १५४६-५२.

विभक्तजविभागः

विभागानन्तरजातः पैतृकधनात् भ्रातृविभक्तधनादंशं गृह्णाति १५६५-७.

विभागदोषे पुनर्विभागादिविधिः

विभागानन्तरोपलब्धापहृतद्रव्यविभागः समः कर्तव्यः १५७२-३.

विभागसंदेहे निर्णयविधिः

विभागनिर्णये प्रमाणानि १५७५-९.

नारदः

ऋणादानम्—

वृद्धिः

ऋणादाने विषयभेदाः ६२२–३. कुसीदलक्षणम्; वृद्धिपरिमाणम्; वृद्धिप्रकाराः तल्लक्षणानि च ६२४–५. देशभेदेन वृद्धिपरिमाणभेदाः ६२५–६. वृद्ध्युपरमावधिः; प्रीतिदत्तवृद्धिः ६२६–७. वार्धुषलक्षणम्; वार्धुषग्रहणाधिकारी; अकृतवृद्धयपवादः ६२७-८. वृद्धिः ७३१ (प.).

आधिः

बन्धलक्षणम् ६४७-८ आध्यवधिः; गोप्यभोग्याध्योरुपचारभोगनाशादिविचारः ६४८–९. आधिसिद्धिः ६४९-५०. बलादाधिभोगनिषेधः; अननुज्ञाताधिभोगे कर्तव्यता; भोग्याधिवृद्धिचालनविक्रयविचारः; आध्यन्तरकरणम् ६५०.

प्रतिभूः

ऋणादौ विस्रम्भहेतुः प्रमाहेतुश्च; प्रातिभाव्यनिमित्तानि; प्रातिभाव्यद्रव्यदानाधिकारः ६६९–७०. अधमर्णात् प्रातिभाव्यद्रव्यग्रहणप्रकारः ६७०.

ऋणप्रतिदानम्

ऋणप्रतिदातारः ६९०-९१. कुटुम्बार्थे कृतमृणं सर्वे रिक्थिनः दद्युः; त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः ६९१-५. प्रातिव्यवहार एव ऋणप्रतिदाता; ऋणानपाकरणनिन्दा; अनपाकरणीयमृणम् ६९५-६. अनपाकरणीयर्णापवादः; कुटुम्बार्थमस्वतन्त्रकृतमृणमपाकरणीयम्; प्रोषितपित्रादिकृतमृणं विंशतिवर्षादूर्ध्वं देयम् ६९६-७. एकच्छायाश्रितजीवदजीवत्कृतर्णापाकरणविचारः ६९७-८. पतिपुत्रकृतर्णस्य स्त्रीणां प्रतिदातृत्वविचारः; भार्याकृतर्णापाकरणविचारः ६९८-९. वर्गविशेषेषु स्त्रीकृतमृणं पत्या अपाकरणीयम्; स्त्रीहारिरिक्थहारिपुत्रादीनामृणप्रतिदातृत्वविचारः ६९९–७०४. उत्तमर्णब्राह्मणाभावे ऋणापाकरणप्रकारः ७०४-५. ऋणप्राप्तौ उपगतपत्रकरणपत्रपाटनादिविधिः, तदकरणे धनिदण्डः ७०५–६.

ऋणोद्ग्राहणम्

पञ्च ऋणोद्ग्राहणोपायाः ७२३-४. धनी स्वधनं स्वयं साधयन् न राज्ञो वाच्यः; असमर्थाधमर्णः शनैः शनैर्दाप्यः; राजद्वारा धनसाधने अधमर्णदण्डः ७२४-५. अधमर्णस्य ऋणपरिमाणाज्ञाने निर्णयोपायः ७२५.

प्रमेयक्रिया—

प्रमेयक्रिया ७३३.

उपनिधिः—

निक्षेपलक्षणं उपनिधिलक्षणं च; निक्षेपादिस्थापनविधिः ७४६–७. ससाक्षिकासाक्षिकनिक्षेपप्रतिदानप्रत्या-

दानविधिः ७४७-८. राजदैवचोरादिनष्टनिक्षेपविचारः; निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम्; निक्षेपप्रतिदानम्; निक्षेपाद्यपहारादिदोषे दण्डविधिः ७४८-९. निक्षेपविधेः याचितादिषु अतिदेशः ७४९-५०.

अस्वामिविक्रयः—

अस्वामिविक्रयस्वरूपम्; अस्वामिकृतनिवर्तनम्, स्वामी स्वं लभते; शुद्धाशुद्धक्रयौ ७६२-३. अशुद्धक्रयस्वरूपम्; आगमार्धीना क्रेतुः शुद्धिः; अस्वामिविक्रेतुर्दण्डविधिः ७६३. स्वाम्यनर्पिततदीयवस्तुभोगे विधिः ७६४.

संभूयसमुत्थानम्—

संभूयसमुत्थानपदनिरुक्तिः; लाभव्यययोराधारः स्वांशप्रक्षेपः ७८०-८१. संभूयकर्मणि समयानुसारेण कर्तव्यनिर्वाहः; अन्यतमेन निषिद्धाननुमतकरणे प्रमादनाशने व्यसनाद्रक्षणे च व्यवस्था ७८१-२. अन्यतमे प्रोषिते मृते वा तद्द्रव्याधिकारनिरूपणम् ७८२-३. ऋत्विग्व्यसनेऽतिदेशः; ऋत्विक्त्रैविध्यम्; याज्यर्त्विजोरन्यतरेणान्यतरस्य त्यागे व्यवस्था; वणिजा राजशुल्कं प्रदेयम् ७८३-४. राजशुल्कदानस्य श्रोत्रियराज्ञोपजीव्यादिषु विशेषः ७८४.

दत्ताप्रदानिकम्—

दत्ताप्रदानिकनिरुक्तिः ७९७-८. देयादेयदत्तादत्तानि तदवान्तरभेदाश्च; अदेयमष्टविधम् ७९८-९. देयम् ७९९-८००. सप्तविधं दत्तम्; षोडशविधमदत्तम् ८००-८०१. अदेयदातृप्रतिग्रहीतारौ दण्ड्यौ ८०१-२. भाटकविधिः ८५१-२.

संविद्व्यतिक्रमः—

समयानपाकर्मलक्षणम् ८६९-७०. पाषण्डनैगमश्रेण्यादीनां समयः राज्ञा रक्षणीयः ८७०. राज्ञा पाषण्डादीना कीदृशः समयः निराकरणीयः; ते च गणाः कथं नियम्याः ८७१-२.

क्रयविक्रयानुशयः—

विक्रीयासंप्रदानम्

विक्रीयासंप्रदाननिरुक्तिः; पण्यनिरुक्तिः; पण्यस्य षड्विधदानादानविधिः; विक्रेतुरनुशये स्थावरजङ्गमभेदेन दापनभेदः८८६-७.अर्धहानौ दापनप्रकारः स्थायिचरक्रेतृभेदे; अप्रदत्ते पण्ये दुष्टे विक्रेतुर्हानिः विक्रयोपधौ दण्डः ८८७-८. क्रेतुः क्रीत्वाऽग्रहणे विक्रेतुसमदोषः; अदत्तमूल्ये समयाधीना व्यवस्था; वाणिज्यं लाभमूलकमथापि ऋजुमार्गेण कर्तव्यम् ८८८-९.

क्रीत्वानुशयः

क्रीतानुशयनिरुक्तिः; क्रीते प्रतिदानावधिः ८९३-४. परीक्ष्य क्रीतेऽनुशयो न कार्यः; क्रये परीक्षाकालो द्रव्यभेदेन; समयमङ्गीकृत्य क्रीते वस्त्रे नानुशयः कार्यः ८९४-५. क्षेत्रे विक्रीते विक्रेत्रनुशयावधिः; अनुशयकारणाभावेऽनुशयो व्यर्थः ८९५.

स्वामिपालविवादः—

पालभृतिः; पालस्य स्वामिनश्च विवादः ९१५-६. शस्यरक्षणम्, तदर्थं पशुदण्डविधिः ९१६-९.

सीमाविवादः—

[redacted]

वाहकविधिश्च ८५०. पण्यस्त्रीविधिः; भूमिग्रहमाण्डेषु

[redacted]

कन्यादानसदोषप्रतिग्रहीत्रादिविचारः १०९७-८. अष्टौ

विवाहाः; स्त्रीरक्षा १०९८-९. स्त्रीत्यागविचारः १०९९-११००. प्रोषितभर्तृकावृत्तम्, तदङ्गोऽन्यपतिविधिश्च ११००-११०१. स्त्रीपुनर्विवाहः; नियोगविधिः ११०१-२. दम्पत्योर्वादस्याविषयः; बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः ११०२-३. पुनर्भूस्वैरिणीप्रकाराः ११०३-४. वर्णसंकरासंकरौ; सकरजातिविचारः ११०४-६.

दायभागः—

दायभागपदार्थः

षड्विधोऽर्थागमः; अर्थार्जनविधिः; त्रिविधं धनं शुक्लशबलकृष्णरूपम् ११२९-३०. धनसाध्यानि; सर्ववर्णसाधारणो वर्णविशेषनियतश्चार्थागमः ११३०-३१. दायभागप्रतिज्ञा, व्याख्यासु दायभागप्रदार्थः, स्वत्वोत्पत्तिनिरूपणं, विभागस्वत्वयोः संबन्धः, स्वत्वकालविभागकालविचारश्च ११३२-४१.

पैतृकद्रव्यविभागस्तत्कालश्च

पित्रोरूर्ध्वं पैतृकरिक्थविभागः; जीवति पितरि रिक्थविभागः; व्याख्यासु विभागकालाः ११५२-४. विभागानधिकारी पिता ११५५.

पितृकर्तृको विभागः

पितृकृतसमविषमविभागविधिः ११७०-७२.

पुत्राणां सोद्धारसमविषमविभागाः

ज्येष्ठादितारतम्येन विभागतारतम्यम् ११९२-३.

भ्रातॄणां सहवासविधिः

सर्वानुमत्या सहवासविधिः ११९८.

विभाज्याविभाज्यविवेकः

मणिमुक्तादयोऽविभाज्याः, स्थावरं विभाज्यम् १२१९. शौर्यभार्याविद्याधनपैतृकप्रसादाना विभाज्याविभाज्यविचारः १२२०-२१. ऋणापाकरणावशिष्टमेव रिक्थं विभाज्यम् १२२१.

असवर्णभ्रातृविभागः

नानावर्णस्त्रीपुत्राणा विभागविधिः १२५०-५१.

पुत्रप्रकाराः, तेषा दायहरत्वविचारश्च

औरसक्षेत्रजादयो द्वादश पुत्राः, तेषा दायपिण्डदातृत्वविचारः, द्व्यामुष्यायण-शुल्कदत्तापुत्र-अनियुक्तापुत्र-धर्मपुत्राणा दायपिण्डदत्वविचारश्च १३४६-७.

दायानर्हाः

पितृद्विट्पतितषण्ढादयो दायानर्हाः; महारोगिजडोन्मत्तादयो दायानर्हा भर्तव्याः; दायानर्हाणामपत्यानि निर्दोषाणि दायार्हाणि १४०१-२. अनियोगजः क्षेत्रजो दायानर्हः; व्यभिचारिणी भर्तव्या; जीवति पितरि, पत्यौ, स्वामिनि च सुतः, भार्या, दासश्च धनानधिकारी १४०२.

पैतृकद्रव्ये पत्नीनां मातॄणा च भागः

अजीवत्पितृकविभागे माता पुत्रसमदायार्हा १४१३.

पैतृकद्रव्ये भगिनीनां भागः

विशेषणविशिष्टा भगिनी समभागहारिणी १४२१.

स्त्रीधनं, स्त्रीधनकृत्य, स्त्रीधनविभागश्च

भर्तृदत्तस्थावरातिरिक्ते धने स्त्रीणा सर्वदा स्वातन्त्र्यम् १४४८-९. स्त्रीणा धनविनियोगेऽस्वातन्त्र्यम्; षड्विधं स्त्रीधनम्; मातृधनविभागः; स्त्रीधनविभागः; धर्मविवाहोढाऽन्यविवाहोढाऽप्रजस्त्रीधनविभागः १४४९-५०. शुल्कपूर्वकवाग्दत्ताविषये धनवादः १४५०.

मृतापुत्रधनाधिकारक्रमः

अनपत्यमृतधनभाक् पतिव्रता पत्नी; अपुत्रमृतधनभाजः क्रमेण दुहिता सकुल्या बान्धवाः सजातीया राजा च; ब्रह्मस्वं ब्राह्मणानामेव, तत्स्त्रियो प्रजीवनमात्रभाजः १५११-२.

ससृष्टिविभागः, मृतापुत्रससृष्टिधनाधिकारश्च

संसृष्टिविभागः; मृतापुत्रससृष्टिधनविभागाधिकारः १५५२-३. मृतापुत्रस्त्रीणा दुहितॄणा च भरणाशभाक्त्वम् १५५३-५. मृतापुत्रपत्न्याः पतिपक्षः पितृपक्षो राजा वा प्रभुः; मृतापुत्रभ्रातृपितृमातृकधनभाजः पत्न्यः सपिण्डाश्च १५५५-६.

विभक्तजविभाग.

विभागानन्तरजातः पैतृकांशमात्रभाक्; संसृष्टिनश्चेद् भ्रात्रादयः समो भागो ग्राह्यस्तेभ्यः १५६७.

विभागसंदेहे निर्णयविधिः

विभागनिर्णये प्रमाणानि १५७९-८१.

विभक्ताविभक्तकृत्यम्

पृथग्धर्मक्रियाकर्मगुणा असंमतकार्यकारिणो भ्रात्रादयः दानविक्रयादौ स्वतन्त्राः १५८३-४. अनुजसंस्कारार्थं पैतृकस्य स्वार्जितस्य वा धनस्य विनियोगः; कुटुम्बोपकारकोऽन्यो भरणीयः १५८४.

बृहस्पतिः

ऋणादानम्—

वृद्धिः

व्यवहारपदोपक्रमः; कुसीदनिरुक्तिः; ऋणदानविधिः;

द्विप्रकाराः तल्लक्षणानि च ६२८-९. शिखावृद्धयानामुपरमावधिः ६३०-३१.

आधिः

आधिप्रकाराः ६५०–५१. गोप्याधिभोग्याधिभोगाशादिविचारः; आधिनाशे आध्यन्तरकरणम्; आधिमोचनम् ६५१-४. गोप्याधिभोगकालः; आधिसिद्धिः ६५४–५.

प्रतिभूः

प्रातिभाव्यनिमित्तानि; प्रातिभाव्यद्रव्यदानाधिकारः केयत्पुरुषपर्यन्तम् ६७१-२. प्रतिभुवे कालदानम्; अधमर्णात् प्रातिभाव्यद्रव्यग्रहणप्रकारः ६७२.

ऋणप्रतिदानम्

कीदृशमृणं दातव्यम्; पुत्रेण पितुरभावे देयम् ७०६-७. पैतामहपित्र्यात्मीयर्णदानक्रमः; विभावितमृणं देयम्; पैतामहमृणमवृद्धिकं देयं प्रपौत्रेण तु न देयम्; आपद्ग्रस्तजीवित्वितृणं देयम् ७०७–८. कुटुम्बार्थकृतमृणं देयम्; धनस्त्रीहारिपुत्रादीना ऋणप्रतिदानाधिकारः; पुत्रादिकृतर्णदानविचारः; पुत्रैरप्रतिदेयानि ऋणादीनि ७०८–९. उपगतपत्रादिविधिः, तदकरणे धनिदण्डः ७०९.

ऋणोद्ग्राहणम्

पञ्च ऋणोद्ग्राहणोपायाः तल्लक्षणानि च ७२५–६. अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्यः, पूर्णावधौ धनाप्राप्तौ चक्रवृद्ध्यादिव्यवस्था; नष्टाधमर्णद्रव्यविक्रयद्वारा ऋणोद्ग्राहणविधिः ७२६-७. संदिग्धेऽर्थे राजन्यनिवेद्य न प्रवर्तितव्यम् ७२७.

प्रमेयक्रिया--

प्रमेयक्रिया ७३४.

उपनिधिः—

न्यासलक्षणं उपनिधिलक्षणं च, तत्स्थापनविधिः; ससाक्षिकासाक्षिकन्यासपालनप्रतिदानविधिः ७५०-५१. राजदैवचोरादिनष्टनिक्षेपविचारः; निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम्; न्यासप्रतिदापनम् ७५१-२. न्यासापह्नवे दण्डविधिः; न्यासविधेः अन्वाहितादिषु अतिदेशः ७५२.

अस्वामिविक्रयः—

अस्वामिविक्रयस्वरूपम्; शुद्धक्रयः; अशुद्धक्रयः ७६४-५. मूलदर्शने क्रेतुः शुद्धिः; अस्वामिविक्रेतुर्दण्डादिविधिः; अस्वामिविक्रये प्रमाणहीनवादे निर्णयविधिः ७६५. अविज्ञाताभयक्रीतादिविधिः ७६६.

मैभूयमुत्थानम्—

संभूयकर्माधिकारिणः तदनधिकारिणश्च; लाभव्यययोराधारः स्वाशप्रक्षेपः ७८४-५. बहुसंमतपुरुषकृतिः सर्वकृतिर्मन्तव्या; संभूयकर्मणि विवादविधिः; दैवराजकृते क्षयहानी चेत्सर्वेषामेव; अन्यतमेन अविहितनिषिद्धकरणे प्रमादनाशने व्यसनादरक्षणे च विधिः ७८५-६. अन्यतमे मृते तद्द्रव्याधिकारनिरूपणम्; ऋत्विक्त्वैविध्यम्; अन्यतमे मृते तद्दणापाकरणविधिः, शेषद्रव्यव्यवस्था च; कर्षकादीना संभूयकर्मविधिः ७८६-७. शिल्पिना नटाना च संभूयकर्मणि लाभतारतम्यम् ७८७-८. चोराणा संभूयकर्मणि लाभतारतम्यम् ७८८.

दत्ताप्रदानिकम्—

प्रकरणप्रतिज्ञा; अष्टविधमदेयम्; देयम् ८०२-३. प्रतिग्रहीतृतारतम्येन दानमहिमतारतम्यम्; अष्टविधं दत्तम् ८०३-४. षोडशविधमदत्तम्; पुनर्लभ्यं दत्तम्; अदेयदातृप्रतिग्रहीतारौ दण्ड्यौ ८०४.

अभ्युपेत्याशुश्रूषा—

वेतनानपाकर्मस्वामिपालवादाभ्युपेत्याशुश्रूषाणा समानत्वम्; शुश्रूषकचातुर्विध्यनिमित्तानि ८३४-५. अर्थभूतभेदाः ८३५.

वेतनानपाकर्म—

सीरवाहकभागविधिः ८५२-३. भृतकदोषसबन्धी विधिः; स्वामिदोषसंबन्धी विधिः ८५३.

संविद्व्यतिक्रमः—

[संविद्विधानप्रतिज्ञा ('एषा हि' इत्यादिरेकश्लोकः); त्रैविद्यसंविद्विधिः ('वेदविद्याविदो' इत्यादिश्लोकत्रयम्); ग्रामश्रेणिगणाना संविल्लक्षणं, तत्संविद्विषयाः, तत्संवित्पालनं, तत्संविद्भङ्गे दण्डः, तत्संवित्करणम्; ग्रामश्रेणिगणादीना कार्याध्यक्षविधिः ('ग्रामश्रेणिगणाना' इत्यादयो दश श्लोकाः) ८७२–४. ग्रामश्रेणिगणानां अपराधकर्तृदण्डः ('यस्तु साधारणं' इत्यादिश्लोकत्रयम्); ग्रामश्रेणिगणाध्यक्षाणा समुदायिनां राज्ञश्च अधिकारमर्यादा ('तैः कृतं' इत्यादिश्लोकत्रयम्) ८७४. ग्रामश्रेणिगणद्रव्यस्य राजभागस्य च विचारः ('संभूयैकमतिं' इत्यादिश्लोकचतुष्टयम्] ८७५.

क्रयविक्रयानुशयः—

विक्रीयासप्रदानम्

पण्यनिरुक्तिः; सदोषपण्यविक्रये दण्डः; विक्रेतुर्न्या-

व्योऽनुशयः ८८९.

क्रीत्वानुशयः

परीक्ष्य क्रेयम्; परीक्षाकालपूर्वमेवानुशयः कार्यः ८९५-६. क्रये मूल्यनिश्चयः; स्थावरक्रयविधिः ८९६.

स्वामिपालविवादः—

पालस्य भृतिः; पालस्य स्वामिनश्च विवादः; सस्यरक्षणम्, तदर्थं पशुदण्डविधिः ९१९.

सीमाविवादः—

सीमावादप्रतिज्ञा; राज्ञा ससाक्षिकं सपत्रं वा क्षेत्रं देयम्; ग्रामगृहक्षेत्रादिप्रवेशकाले प्रकाशाप्रकाशचिह्नानि ससाक्षिकाणि कार्याणि ९४९-५०. सीमानिर्णये साक्षिणः के कीदृशाश्च ९५०–५१. सीमाज्ञापनविधिः; क्षेत्रगृहग्रामादौ राजकृतः नदीकृतश्च स्वामिसंबन्धः ९५१-३. परगृहपीडापरिहारः; लोकमार्गपीडापरिहारः ९५३-४. कृष्टाकृष्टविधिः ९५४.

स्त्रीपुंधर्माः—

स्त्रीपुंधर्मप्रतिज्ञा; स्त्रीरक्षा; स्त्रीरक्षणोपायाः; स्त्रीधर्माः; स्त्रीदोषाः ११०६. पतिव्रतावृत्तम्; प्रोषितभर्तृकावृत्तं, तदङ्गोऽन्यपतिविधिश्च; विधवाधर्माः, अन्वारोहणविचारश्च ११०७-९. नियोगविधिनिषेधः ११०९.

दायभागः—

दायभागपदार्थः

स्थावररूपार्थागमः; दायपदार्थः; विभागप्राशस्त्यम् ११४१.

पैतृकदव्यविभागस्तत्कालश्च

पित्रोरूर्ध्वं रिक्थविभागकालः; जीवति पितरि रिक्थविभागकालः ११५५.

पितृकर्तृको विभागः

पितृकृतसमविषमविभागविधिः ११७२–३.

पैतामहद्रव्यस्वाम्यविचारः

पैतामहद्रव्यस्वाम्यविचारः ११७९–८०.

पुत्राणा सोद्धारसमविषमविभागा.

ज्येष्ठस्य द्यंशित्वम्; पुत्राणा समांशित्वम्; गुणिने उद्धारः; संभूयार्जितस्य समो विभागः ११९३.

पुरुषपरम्परायां विभागविधिः

स्वार्जिते समभागः, रिक्थे तु पितृतो भागकल्पना १२००-१२०१.

विभाज्याविभाज्यविवेकः

पैतामहं नष्टमुद्धृतं स्वार्जितं च नाकामः पिता दद्यात्; पितुरूर्ध्वं समो विभागः १२२१–२. संभूयार्जितं समं विभाज्यम्; विभाज्यद्रव्यविशेषाः; मनुकृताविभाज्यविचारपरीक्षा १२२२–३. पितृदत्तविद्याशौर्यभार्याधनान्यविभाज्यानि १२२३-४. समविषमविभागविकल्पः १२२४.

सवर्णसापत्नभ्रातृविभागः

सापत्नभ्रातृविभागः समः ज्येष्ठस्योद्धारश्च; सापत्नमातृणा मातृतो विभागः १२३७–८.

असवर्णभ्रातृविभागः

नानावर्णस्त्रीपुत्राणा विभागविधिः; जातिज्येष्ठगुणवयोज्येष्ठयोः समांशविधिः; क्षत्रियापुत्रस्य प्रतिग्रहभूनिषेधः, शूद्रापुत्रस्य भूनिषेधश्च; शूद्रापुत्रस्य चैकस्य तृतीयाशहरत्वम्, शेषविनियोगश्च; पितुः पिण्डोदकक्रियाधिकारक्रमः १२५१–२.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

पुत्रमहिमा; भ्रातृणा एकपत्नीनां वा एकस्य एकस्या वा पुत्रेण पुत्रवत्त्वम्, औरसपुत्रिकयोस्त्रयोदशेषु सुतेषु वरिष्ठत्वं, सर्वेषा दायहरत्वपिण्डदत्वादिविचारश्च; पुत्रीकरणविधिः तत्प्रयोजनं च; इदानीमकर्तव्यपुत्रप्रकाराः १३४८–९.

दायानर्हाः

सवर्णजा अपि सदोषा अधार्मिकाः पुत्रा दायानर्हाः १४०२. आर्याणां शूद्रापुत्रो भर्तव्यः न दायार्हः; अनन्वयिनो धनं राजगामि १४०३.

पैतृकद्रव्ये पत्नीना मातृणां च भागः

अजीवत्पितृकविभागे माता पुत्रसमदायार्हा, कन्या चतुर्थभागहरा १४१३.

स्त्रीधन, स्त्रीधनकृत्य, स्त्रीधनविभागश्च

मातृधनविभागः; मातृतुल्याना मातृष्वस्रादीना धनस्य विभागक्रमः १४५०-५२.

मृतापुत्रधनाधिकारक्रमः

अपुत्रमृतसर्वधनभाक् पत्नी साध्वी एव १५१२-५. पत्न्यभावे दुहित्रा दौहित्रश्चापुत्रमृतधनभाक् १५१५-७. अपुत्रमृतधनभाजः क्रमेण माता भ्राता तत्पुत्रः प्रत्यासन्नाः सपिण्डाः सकुल्या बान्धवाः शिष्याः श्रोत्रियाश्च १५१७-८. अब्राह्मणानां पत्नीभ्रात्रभावे राजाऽपुत्रमृतधनभाक्; विभक्तापुत्रमृतस्थावरातिरिक्तधनभाक् पत्नी १५१८-९. अपुत्रमृतविधवा प्रजीवनभाक्; पित्र्य-

कर्माधिकारः पत्न्याः सोदरस्य तत्पुत्रस्य सपिण्डस्य शिष्यस्य च क्रमेण १५१९-२०. विधवायाः प्रजीवनस्वरूपम् १५२०.

ससृष्टिविभागः, मृतापुत्रससृष्टिधनाधिकारश्च

संसर्गाहाः १५५६-७. संसृष्टिधनविभागः सम एव; अनपत्याभार्यापितृकसंसृष्टिनः विभागानधिकारप्राप्तौ मरणे वा तदीयाशविभागः; तदीयभगिन्या अशः; संसृष्टिना उत्थाता द्व्यंशभाक् १५५७-९. मृतापुत्रधनभाजः क्रमेण पत्नी सोदरा दायादा दौहित्राश्च १५५९. मृतानपत्याभार्याभ्रातृपितृमातृकधनभाजः सपिण्डाः; मृतरिक्थाशः श्राद्धे विनियोज्यः १५६०.

विभक्तजविभागः

विभागानन्तरजातः पैतृकद्रव्यादेवाशं गृह्णाति, नैव पूर्वं विभक्तः १५६७–८. विभक्तपितृधनव्यवहारे न विभक्ताना संबन्धः १५६८.

विभागानन्तरागतविभागः

विभागानन्तरागतविभागः १५६९-७०.

विभागदोषे पुनर्विभागादिविधिः

अग्रहृतसाधारणद्रव्यसाधनम् १५७३.

विभागनिर्देहे निर्णयविधिः

विभागनिर्णये प्रमाणानि १५८१-२.

विभक्ताविभक्तकृत्यम्

विभागपत्रसाक्षिक्रिया; भोगः भागनिर्णये प्रमाणम्; स्वेच्छाकृतभागविसंवादी दण्ड्यः १५८४-५. विभागे वृत्तेऽपि स्थावरमविभाज्य, तत्र नैकः कश्चित् स्वतन्त्रो विभक्तोऽपि १५८५-६. पूर्वजैरनुज्ञाना संस्काराः कार्या मध्यगाद्धनात् १५८६.

कात्यायनः

ऋणादानम्—

वृद्धिः

ऋणग्रहणानाधिकारी; वृद्धिप्रकाराः तल्लक्षणानि च ६३१-२. वृद्ध्युपरमावधिः; याचितपण्यमूल्यादिवृद्धिः तदपवादश्च ६३२-४.

आधिः

अप्रत्ययभोग्याधिः; पशुदासाद्याधिर्न पीडनीयः; आधिनाशे आध्यन्तरकरणम्; गोप्यभोग्याधिभोगनाशविचारः ६५५-६. आधिमोचनम्; वञ्चनया आधिभोगे दण्डः; सत्यङ्कारः; आधिसिद्धिः ६५६-८.

प्रतिभूः

प्रातिभाव्यानधिकारिणः ६७२-३. प्रातिभाव्यनिमित्तानि; प्रातिभाव्यमुक्तिः; प्रातिभाव्यद्रव्यदानसमयः ६७३-४. प्रातिभाव्यद्रव्यदानं कियत्पुरुषपर्यन्तम् ६७४-५. अधमर्णात् प्रातिभाव्यद्रव्यग्रहणप्रकारः ६७५.

ऋणप्रतिदानम्

कदा कीदृशं च पैतामहं पित्र्यं चर्णं प्रतिदेयम्; कियत्पुरुषपर्यन्तमृणं देयम् ७०९-१०. धनस्त्रीहारिपुत्रादीनामृणप्रतिदानाधिकारः ७१०-११. आपद्ग्रस्तपित्रर्णं पुत्रैर्देयम् ७११-२. एकच्छायाया ऋणदानप्रकारः; कुटुम्बार्थकृतमृणं कुटुम्बिना देयम् ७१२-३. पुत्रकृतर्णप्रतिदानविचारः; कामकृतक्रोधकृतर्णनिवर्तनम्; मातृकृतभार्याकृतर्णप्रतिदानविचारः ७१३-४. ऋणानपाकरणकर्मविपाकः ७१४.

ऋणोद्ग्राहणम्

ऋणोद्ग्राहणोपायाः; अधमर्णयोग्यताविशेषपौर्वापर्यादिविवेकेन तत्तदुपायप्रयोगः ७२७-८. संदिग्धेऽर्थे अधमर्णपीडने दण्डः; अधमर्णावरोधविधिः; योग्यताविशेषवान् नावरोद्धव्यः किन्तु शपथेन निरोद्धव्यः ७२८-९. अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्यः; अशक्तोऽब्राह्मणः निरोद्धव्यः; अधमर्णोऽशुभं कर्म न कारयितव्यः; पूर्णावधौ धनाप्राप्तौ पुनर्वृद्धिः; ऋणप्रतिग्रहीतृक्रमः ७२९-३०. कालिकार्धे वृद्धिग्रहणविचारः ७३०.

उपनिधिः—

उपनिध्यन्वाधियाचितकलक्षणानि ७५२-३. राजदैवचोरादिनष्टनिक्षेपविचारः; निक्षेपप्रतिदापनम् ७५३-४. उपनिधिग्रहणम्; उपनिध्यपहारादिदोषे दण्डविधिः; निक्षेपादिषु वृद्धिविधिः; याचितादिषु अतिदेशविवरणम् ७५४-५.

अस्वामिविक्रयः—

अस्वामिकृतनिवर्तनम्; मूलानयनक्रयशुद्ध्योर्विचारः ७६६-७. स्वामी स्वत्वं विभाव्य स्वं लभते; क्रेत्रा आत्मविशुद्धिः साध्या ७६७–८. अविज्ञाताश्रयक्रीतादिविधिः ७६८.

सभूयसमुत्थानम्—

अविभक्तशिल्विवणिजा विभागे समभागः; आपदि समुदितद्रव्यरक्षणे दशमाशदानम्; शिल्पिना लाभतारतम्यम्; चौराणा संभूयकर्मणि लाभतारतम्यम् ७८८–९. वणिक्कर्षकशिल्पिचोराणा लाभहानिविचारः ७८९.

दत्ताप्रदानिकम्—

देयमदेयं च ८०४–५. प्रत्युपकारकभृतिलक्षणम्; दत्तस्य पुनर्हरणम् ८०५–६. उत्कोचलक्षणं, तत्संबन्धिदण्डः; प्रतिश्रुतं देयम् ८०६.

अभ्युपेत्याशुश्रूषा—

अन्तेवासिविधिः; ब्राह्मणेतरेष्वेव वर्णानुलोम्येन दास्यम् ८३५-६. ब्राह्मणेतरेष्वेव आपदि समवर्णदास्यम्; दासकर्माणि ८३६. अमोच्य प्रव्रज्यावसितदास्यम्; दास्यामार्यसंततौ दास्याः सान्वयो मोक्षः; दासधनम्; दासोढा दासी भवति ८३७–८. ब्राह्मणी कुलस्त्रीधाव्यादीना विक्रयदासीकरणादौ दण्डः ८३८-९. दासीसुतदास्यविचारः; दासीगमनविचारः ८३९.

वेतनानपाकर्म—

सदोषभृतकसदोषवाहकसदोषस्वामिसंबन्धी विधिः ८५३-४. गृहापणभाण्डहरत्यश्वादिभाटकविधिः ८५४.

संविद्व्यतिक्रमः—

[समूहसंविद्धर्मः राजशासनं च, तयोर्भङ्गे दण्डः, गणैः गणिन अपराधिनो दण्ड्या राजानुमत्या; गणिना गणार्थकृतर्णादिभाक्त्वविचारः; समूही समूहेऽशभागी] ८७५–७.

क्रयविक्रयानुशयः—

विक्रीयासंप्रदानम्

क्रये विक्रये वाऽनुशये दण्डः, परीक्षाकालश्च ८८९.

क्रीत्वानुशयः

भूक्रये परीक्षाकालः ८९६-७. योग्यकाले क्रीतं सदोषं दृष्टं प्रतिदेयम्; निर्दोषक्रयेऽनुशये दण्डः; साधारणक्रये एकस्याधिकारमर्यादा; मूल्यनिश्चयः; मूल्यनियामकः, क्रयपरिवर्तनयोः स्वरूपम् ८९७–८. स्थावरक्रयोक्तलाभरुचिक्रयविधिः; मूल्यव्यवस्था अनुशयव्यवस्था च ८९८.

स्वामिपालविवादः—

[पालस्य स्वामिनश्च विवादः; सस्यरक्षणं, तदर्थं पशुदण्डविधिः] ९१९–२०.

सीमाविवादः—

षड्भूवादनिमित्तानि ९५४-५. षड्विधभूवादेषु भोगसाक्षिलेख्यप्रामाण्यम्; क्षेत्रादिवादे सामन्ततत्सक्ततत्संसक्तमौलादिप्रामाण्यम् ९५५–६. सामन्तमौलवृद्धोद्धृतनिरुक्तिः ९५६–७. सीमावादे एकसाक्षिणः उक्तिविधिः; सामन्तादीना पूर्वदोषे संख्यागुणातिरेकेण साक्षित्वम्; साक्षिसामन्तादीनामनृतोक्तौ दण्डविधिः ९५७–८. दशग्रामादिसीमाकरणम्; प्रमाणान्तराभावे राजा निर्णेता; राजदैविकाभावे साक्ष्यप्रामाण्यम्; क्षेत्रसीमावादस्यातिदेशः गृहादौ; परस्परगृहादीना संबाधपरिहारादि ९५८–९. मार्गतीर्थादिषु पीडापरिहारः ९५९. सीमावृक्षफलस्वाम्यविधिः; स्वाम्यनुमतिमन्तरेण कृतिफलालाभः; कृष्टाकृष्टविधिः ९६०.

स्त्रीपुंधर्माः—

कन्यायाः पुनर्दानादानपुनर्विवाहविचारः; अनेकभार्यस्य कर्तव्यं, स्त्रीधर्माश्च ११०९-१०. विधवाधर्माः; नियोगविधिः, परपूर्वाविचारश्च १११०. बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः ११११.

दायभागः—

पितृकृतो विभागः

मातृपितृपुत्राणा समविभागविधिः ११७३–४. स्वार्जिते पितुरधिकाशहरत्वम् ११७४.

पुरुषपरम्परायां विभागविधिः

प्राप्तव्यवहाराप्राप्तव्यवहारादिविभागविचारः; वास्तुक्षेत्रादिविभागः; पितृतो भागकल्पना आ चतुर्थात् १२०१–३.

विभाज्याविभाज्यविवेकः

पैतामहं नष्टमुद्भृतं स्वार्जितं च पिता नाकामो विभजेत्; विद्याशौर्यादिधनानां विभाज्याविभाज्यत्वविचारः तल्लक्षणानि च १२२४–८. मनुकृतविभाज्यविचारपरीक्षा १२२८-९ देशजातिसंघग्रामाणां भिन्नो दायभागधर्मो भवति; पैतृकधनेन ऋणशुद्ध्युत्तरं दायविभागः; विभाज्यो दायः १२२९–३०.

पुत्रप्रकाराः, तेषां दायरत्वविचारश्च

औरसक्षेत्रजादीना सवर्णासवर्णाना दायहरत्वपिण्डदत्वादिविचारः १३४९–५०.

दायानर्हाः

अक्रमोढजसगोत्रजप्रव्रज्यावसितप्रतिलोमजा दायानर्हाः पितृद्रव्यात् भर्तव्याः; अवबन्धुद्रव्यं राजगामि १४०३–४.

पैतृकद्रव्ये पत्नीनां मातृणां च भागः

जीवत्यजीवति वा पितरि माता समांशहारिणी १४१३.

स्त्रीधनं, स्त्रीधनकृत्य, स्त्रीधनविभागश्च

षड्विधं स्त्रीधनम्; अध्यग्न्यध्यावाहनिकप्रीतिदत्त-सौदायिकान्वाधेयशुल्काना निरुक्तिः १४५२-४. स्त्रीणा वृत्तिरूपो दायः; स्त्रीधनत्वापवादः १४५४-५. स्त्रीणा सौदायिके स्थावरादावपि स्वातन्त्र्यम् १४५५-६. भर्तृदाये स्त्रीणा स्वातन्त्र्यादिविचारः; स्त्रीभिर्हार्ये धनम्; स्त्रीधने पत्युरधिकारमर्यादा; स्त्रीणा स्वधने स्वातन्त्र्यम्; धनानधिकारिणी १४५६-९. स्त्रीधनविभागः १४५९-६०. शुल्कपूर्वकवाग्दत्ताविषये धनवादः १४६०.

मृतापुत्रधनाधिकारक्रमः

मृतापुत्रधनभाक् पत्नी १५२०-२१. भर्तृधनभाक् दुहिता च क्रमेण; अपुत्रमृतधनभाजः क्रमेण पत्नी दुहितरः पिता माता भ्राता तत्पुत्राश्च १५२१. अपुत्रविभक्तमृतधनभाजः क्रमेण पिता भ्राता जननी पितामही च; अविभक्तापुत्रमृतस्त्री अंशं भरणं वा प्राप्नोति १५२२-३. भर्तुरौर्ध्वदेहिककरणाधिकारः; ब्राह्मणद्रव्यमदायिकं श्रोत्रियगामि; अब्राह्मणादायिकद्रव्य राज्ञः; मृतसंस्कर्ता धनहारी १५२३-४.

संसृष्टिविभागः, मृतापुत्रसंसृष्टिधनाधिकारश्च

मृतापुत्रसंसृष्टिधनविभागाधिकारः; संसृष्टिनामुत्थाता द्व्यंशभाक् १५६०-६१. मृतापुत्रपत्न्याः पतिपक्षः पितृपक्षो वा प्रभुः १५६१.

विभागदोषे पुनर्विभागादिविधिः

प्रच्छादितापहृतनष्टहृतसाधारणधनविभागः समः विभागानन्तरोपलम्भे १५७३-४.

विभागसंदेहे निर्णयविधिः

विभागानिर्णये प्रमाणानि १५८२.

पितामहः

ऋणादानम्—

वृद्धिः

वृद्धयुपरमावधिः ६३४.

प्रतिभूः

प्रातिभाव्यद्रव्यदानम् ६७५-६.

ऋणप्रतिदानम्

पितृमातृकृतर्णप्रतिदानाधिकारः ७१४.

व्यासः

ऋणादानम्—

वृद्धिः

वृद्धिपरिमाणम्; वृद्धिप्रकाराः तल्लक्षणानि च; वृद्धयुपरमावधिः; वृद्धयपवादः ६३४.

आधिः

सप्रत्ययभोग्याधिः; आधिनाशे आध्यन्तरकरणम्; सदोषधनिकाधिनाशविचारः; आधिमोचनम् ६५८-९. आधिसिद्धिः ६५९–६०.

प्रतिभूः

प्रातिभाव्यनिमित्तानि; प्रातिभाव्यद्रव्यदानं कियत्पुरुषपर्यन्तम् ६७६.

ऋणप्रतिदानम्

ऋणानपाकरणकर्मविपाकः; पितृकृतं सदोषर्णं न देयम् ७१४.

ऋणोद्ग्राहणम्

मिथ्याभियोगिदण्डः ७३०.

उपनिधिः—

निक्षेपलक्षणम्; निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम् ७५५-६. न्यासादिप्रतिदापनम्; न्यासाद्यपह्नारादिदोषे दण्डविधिः ७५६.

अस्वामिविक्रयः—

अस्वामिविक्रयस्वरूपम्; मूलदर्शने क्रेतुः शुद्धिः; अस्वामिविक्रये दण्डादिविधिः ७६८.

संभूयसमुत्थानम्—

संभूयकर्मस्वरूपम्; राजशुल्कदानम् ७८९.

दत्ताप्रदानिकम्—

प्रतिग्रहीतृतारतम्येन दानमहिमतारतम्यम् ८०६.

वेतनानपाकर्म—

गृहभूमिभाटकविधिः ८५४.

क्रयविक्रयानुशयः—

विक्रीयासंप्रदानम्

अनुशयव्यावृत्त्यर्थं मध्यस्थव्यवस्था; सत्यंकारेऽनुशयो न कार्यः ८८९-९०.

क्रीत्वानुशयः

द्रव्यविशेषेषु परीक्षाकालाः अनुशयावधिश्च ८९९.

स्वामिपालविवादः—

पालस्य स्वामिनश्च विवादः ९२०.

सीमाविवादः—

सीमाप्रकाराः; कृष्टाकृष्टविधिः ९६१.

स्त्रीपुंधर्माः—
पतिव्रतावृत्तम्; स्त्रीदोषाः; त्याज्यस्त्रीविचारः; अन्वारोहिणीप्रशंसा; विधवाधर्माः ११११.
दायभागः—
दायभागपदार्थः
विभागप्राशस्त्यम् ११४२.
पैतामहद्रव्यस्वाम्यविचारः
पैतामहद्रव्यस्वाम्यविचारः ११८०.
भ्रातृणा सहवासविधिः
जीवति पितरि सहवासविधिरितरथा विभागः ११९९.
विभाज्याविभाज्यविवेकः
स्वार्जितविद्याशौर्यसमुदायपितृप्रसादलब्धवैवाहिकादिधनमविभाज्यम् १२३०-३१. अविभाज्यद्रव्यविशेषाः १२३१-३२.
सवर्णसापत्नभ्रातृविभागः
सापत्नभ्रातृणा मातृतो विभागः १२३८.
पैतृकद्रव्ये पत्नीना मातृणा च भागः
मातरः पुत्रसमदायार्हाः १४१४.
पैतृकद्रव्ये भगिनीनां भागः
असंस्कृतकन्यादिसंस्कारकर्तव्यता १४२२.
स्त्रीधन, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च
सौदायिकं शुल्कं च; स्त्रीणां वृत्तिरूपो दायः ८६०–६१.
मृतापुत्रधनाधिकारक्रमः
अपुंसमृतधनभाजः क्रमेण पत्नी दुहिता दौहित्रश्च, तेषा श्राद्धकृत्त्वं च १५२२-५.
विभक्ताविभक्तकृत्यम्
विभागे वृत्तेऽपि स्थावरमविभाज्यं, तत्र नैकः कश्चित्स्वतन्त्रो विभक्तोऽपि १५८६–७. मध्यगधनात् असंस्कृतसंस्कारः कर्तव्यः; सुतानुमतिं विना स्थावरदासविक्रयदानादौ न स्वातन्त्र्यम् १५८७.

देवलः

दत्ताप्रदानिकम्—
दानाङ्गानि षट् ८०६.
अभ्युपेत्याशुश्रूषा—
पुत्रभार्यादासशूद्राणा धनस्वाम्यविचारः ८३९.
स्त्रीपुंधर्माः—
स्त्रीत्यागविचारः १११-२. स्त्रीधर्माः, अधिवेदनविचारः, स्त्रीपुनर्विवाहः, पतित्यागविचारश्च; प्रोषितभर्तृकाधर्मः ११२-३.
दायभागः—
दायभागपदार्थः
विभागप्राशस्त्यम् ११४२.
पैतृकद्रव्यविभागस्तत्कालश्च
पितुरूर्ध्वं रिक्थविभागकालः, जीवति पितरि सदोषे विभागकालः, जीवति पितरि स्वाम्यविचारश्च ११५६-५७.
पुत्राणा सोद्धारसमविषमविभागाः
पुत्राणामुद्धारविचारः ११९३-४. ज्येष्ठलक्षणम् ११९४.
पुरुषपरम्पराथा विभागविधिः
अविभक्तानां पितृतो भागकल्पना आ चतुर्थात्, अग्रे समभागः; सवर्णापुत्राणा समो विभागः १२०३.
असवर्णभ्रातृविभागः
असवर्णैकपुत्रः सर्वाशहरः, एकः शूद्रापुत्रस्तृतीयाशहरः इतरेषामभावे; शूद्रापुत्रस्य भूमिनिषेधः १२५२.
पुत्रप्रकाराः, तेषा दायहरत्वविचारश्च
पुत्रमहिमा; औरसक्षेत्रजादयो द्वादश पुत्राः, तेषां सवर्णासवर्णानां दायहरत्वपिण्डदत्वविचारश्च १३५०-५१.
दायानर्हाः
अधर्म्यपुत्राः, क्लीबकुष्ठयादयः, पतिततजाः, मुन्याश्रमिणश्च दायानर्हाः; पतितातिरिक्ता भर्तव्याः; तत्पुत्रा दायिनः १४०४.
पैतृकद्रव्ये पत्नीनां मातृणा च भागः
माता पुत्रसमदायार्हा १४१४.
पैतृकद्रव्ये भगिनीनां भागः
कन्याः संस्कारार्थद्रव्यहारिण्यः १४२२.
स्त्रीधन, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च
स्त्रीधनम्, तत्र स्त्रीणा स्वातन्त्र्यम्; पत्युः स्त्रीधनेऽधिकारमर्यादा १४६१. मातृधनविभागः; अप्रजस्त्रीधनविभागः, मृतकन्याधनविभागक्रमः १४६२.
मृतापुत्रधनाधिकारक्रमः
अपुत्रमृतधनहरी दुहिता; अपुत्रमृतधनभाजः क्रमेण सोदराः दुहितरः पिता भ्रातरः माता भार्या कुल्याः सहवासिनश्च १५२५–६. अदायिकमब्राह्मणधनं राजा हरति; ब्रह्मस्वं श्रोत्रियाः; मृतसंस्कर्ता धनहारी १५२६.

उशना

ऋणादानम्—

ऋणप्रतिदानम्

[पितृकृतं सदोषर्णं न देयम्] ७१४.

अभ्युपेत्याशुश्रूषा—

दास्यानर्हाः ८३९.

स्वामिपालविवादः—

सस्यरक्षणम्, तदर्थं पशुदण्डविधिः ९२०-२१.

स्त्रीपुंधर्माः—

ब्राह्मण्या अन्वारोहणनिषेधः; नियोगविधिः १११३.

दायभागः—

पुत्राणा सोद्धारसमविषमविभागाः

ज्येष्ठोद्धारः ११९४.

विभाज्याविभाज्यविवेकः

अविभाज्यद्रव्यविशेषाः १२३२.

सवर्णसापत्नभ्रातृविभागः

सोदरसापत्नभ्रातृणा समो विभागः १२३८.

स्त्रीधन, स्त्रीधनकृत्य, स्त्रीधनविभागश्च

मातृधनविभागः १४६२.

मृतापुत्रधनाधिकारक्रमः

अपुत्रमृतधनभाक् पत्नी १५२६.

प्रजापतिः

ऋणादानम्—

आधिः

अन्वाधिः ६६०.

ऋणप्रतिदानम्

आपदि ऋणप्रतिदानापवादः; उत्तमर्णब्राह्मणाभावे ऋणापाकरणम् ७१५.

दत्ताप्रदानिकम्—

देयं क्षेत्रम् ८०७.

क्रयविक्रयानुशयः—

क्रीत्वानुशयः

स्थावरक्रयविधिः, मूल्यव्यवस्थापकविचारश्च ८९९.

सीमाविवादः—

सीमाक्षेत्रवृक्षफलस्वाम्यविधिः ९६१-२.

दायभागः—

विभाज्याविभाज्यविवेकः

विद्याशौर्यादिधनान्यविभाज्यानि; स्थावरविभागविचारः १२३२-३.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

विधवायाः पुत्रदानप्रतिग्रहाधिकारः १३५०.

मृतापुत्रधनाधिकारक्रमः

अपुत्रमृतधनभाक् पत्नी;विधवा मरणभाक् १५२६.

ससृष्टिविभागः, मृतापुत्रसंसृष्टिधनाधिकारश्च

मृतापुत्रसंसृष्टिधनाधिकारः १५६१.

यमः

ऋणादानम्—

आधिः

गोप्यभोग्याधिभोगनाशविचारः ६६०.

ऋणोद्ग्राहणम्

अधमर्णो राज्ञा दापयितव्यः; अप्रदाने चक्रवृद्धिव्यवस्था ७३०-३१.

अस्वामिविक्रयः—

अस्वामिकृतनिवर्तनम् ७६९.

स्त्रीपुंधर्माः—

पतित्वं सप्तमे पदे; ब्राह्मण्याः सुरापाननिषेधः; स्त्रीत्यागविचारः; विधवाधर्माः; नियोगविधिः १११३-४.

दायभागः—

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

पुत्रमहिमा; औरसादिद्वादशपुत्राणा द्व्यामुष्यायणत्वदायहरत्वपिण्डदत्वविचारः १३५१-२. पुत्रीकरणविधिः; काण्डपृष्ठसंज्ञाः पुत्राः १३५२.

स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

आसुरादिषु अप्रजस्त्रीधनविभागः १४६२.

मृतापुत्रधनाधिकारक्रमः

अपुत्रधनभाजः क्रमेण भ्राता पितरौ ज्येष्ठपत्नी सगोत्रः शिष्याः सब्रह्मचारिणश्च १५२६.

ससृष्टिविभागः, मृतापुत्रससृष्टिधनाधिकारश्च

मृतापुत्रसंसृष्टिधनाधिकारः १५६१.

मरीचिः

ऋणादानम्—

आधिः

आधिप्रकाराः ६६०.

अस्वामिविक्रयः—
शुद्धक्रयः; अविज्ञातक्रये विधिः ७६९.
दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
गोत्रान्तरगताना दायाशौचज्ञातिविचारः १३५२.
विभक्ताविभक्तकृत्यम्
विभक्तैः श्राद्धादि पृथक् कार्यम्, विभक्तानां त्वेकेन ज्येष्ठेन १५८७-८.

दक्षः
दत्ताप्रदानिकम्—
नव अदेयानि; सफलं दानम् ८०७.
अभ्युपेत्याशुश्रूषा—
परिव्रज्यावसितदण्डः ८३९.
स्त्रीपुंधर्माः—
स्त्रीरक्षा; अधिवेदनविचारः; दम्पत्योर्धर्माः, द्विदारदोषश्च १११४-५.
दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
अप्रजदाननिषेधः १३५२.

भारद्वाजः
ऋणादानम्—
वृद्धिः
वृद्ध्युपरमावधिः ६३५.
आधिः
आधिप्रकाराः, आधिभोगनाशविचारः, अन्वाधिश्च ६६०.
ऋणोद्ग्राहणम्
गृहीतधनसमधनाभावे ग्राह्यधनम्; ऋणोद्ग्राहणे क्षेत्रारामगृहविक्रयादिविधिः ७३१.
दत्ताप्रदानिकम्—
दाननिमित्तानि; धर्मदानार्थदानकामदानव्रीडादानहर्षदानलौकिकदानानि ८०७.
क्रयविक्रयानुशयः—
क्रीत्वानुशयः
प्रतिबन्धक्रयभूक्रयाज्ञाक्रयोत्तलाभादिविधिः ९००.
दायभागः—
विभागसंदेहे निर्णयविधिः
समविषमविभागनिवर्तनकालावधिः १५८२.

संवर्तः
ऋणादानम्—
वृद्धिः
वृद्ध्यपवादः ६३५.

उतथ्यः
ऋणादानम्—
प्रतिभूः
प्रातिभाव्यद्रव्यदाने नियमविशेषः ६७६.

वृद्धवसिष्ठः
ऋणादानम्—
प्रतिभूः
प्रातिभाव्यनिमित्तानि; प्रातिभाव्यद्रव्यदानाधिकारः कियत्पुरुषपर्यन्तम् ६७६–७.

व्याघ्रः
ऋणादानम्—
प्रतिभूः
प्रतिभूप्रकाराः ६७७.
दत्ताप्रदानिकम्—
स्त्रीधनदानविचारः ८०७.

गोभिलः
ऋणादानम्—
ऋणप्रतिदानम्
अज्ञातर्णदोषापाकरणम् ७१५.

शातातपः
स्त्रीपुंधर्माः—
स्त्रीपुनर्विवाहविचारः १११६.
दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
दत्तपुत्रस्यौर्ध्वदैहिकाधिकारः १३५२.

पराशरः
स्त्रीपुंधर्माः—
स्त्रीत्यागपतित्यागस्त्रीपुनर्विवाहविचारः; विधवाधर्माः; अन्वारोहणविचारः; बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः १११७.

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
कलौ चत्वारः पुत्राः १३५२.
मृतापुत्रधनाधिकारक्रमः
अपुत्रमृतधनभाक् कुमारी ऊढा च क्रमेण १५२७.

अत्रिः

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
पुत्रमहिमा, पुत्रीकरणविधिश्च १३५२-५.

लौगाक्षिः

दायभागः—
विभाज्याविभाज्यविवेकः
योगक्षेमावविभाज्यौ १२३३.
स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च
पतिधने स्त्रीणा स्वाम्य न स्वातन्त्र्यम् १४६३.

वृद्धयाज्ञवल्क्यः

दायभागः—
विभाज्याविभाज्यविवेकः
स्थावरातिरिक्तं पितृप्रसादलब्धमविभाज्यम् १२३३.
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
सजातीयविजातीयदत्तकरिक्थहरत्वपिण्डदत्वविचारः १३५५.
ससृष्टिविभागः, मृतापुत्रससृष्टिधनाधिकारश्च
मृतापुत्रससृष्टिधनाधिकारः १५६२.
विभागसंदेहे निर्णयविधिः
विभागनिर्णये प्रमाणानि, तत्र दिव्यं न देयम् १५८२.
विभक्ताविभक्तकृत्यम्
कुलक्रमायातस्थावरादेर्विक्रयदानादौ न कश्चित् स्वतन्त्रो विभक्तोऽपि १५८८.

वृहद्यमः

प्रमेयक्रिया—
प्रमेयक्रिया ७३४.
दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
पुत्रीकरणविधिः; नव पुत्रत्वार्हाः, तेषां दायहरत्वविचारः १३५५.
स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च
पुत्रवती पत्नी भागहारिणी १४६२.
विभक्ताविभक्तकृत्यम्
संसृष्टिकृत्यम् १५८८.

वृद्धहारीतः

ऋणादानम्—
वृद्धिः
[वृद्धिः] ७३१ (प.).
आधिः
आधिः ७३१--२ (प.).
प्रतिभूः
प्रातिभाव्यद्रव्यदानम् ६७७.
ऋणप्रतिदानम्
त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः; पुत्रेणाप्रतिदेयानि ऋणादीनि; पितृकृतमृणं पुत्रपौत्रैः प्रतिदेयम्; रिक्थग्राहयोषिद्ग्राहानन्याश्रितद्रव्यपुत्रादीनामृणप्रतिदातृत्वम्; प्रतिभूदत्तधनप्रतिदानम्; स्त्रीपतिपुत्रकृतर्णप्रतिदानविचारश्च ७१५.
ऋणोद्ग्राहणम्
[ऋणप्रतिदानम्; उद्धतऋणिदण्डः; नष्टऋणपत्रे साक्षिविधिः; वस्त्रादिऋणोद्ग्राहणविधिः] ७३१.
प्रमेयक्रिया—
प्रमेयक्रिया ७३४.
सीमाविवादः—
सीमाकरणम् ९६२.
दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
सप्त पुत्राः; पिण्डदाः १३५५.
दायानर्हाः
साध्व्यो भर्तव्याः नासाध्व्यः; मुन्याश्रमिणः पाषण्डादयश्च भागानर्हाः १४०४.
स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च
भगिनी चतुर्थभागहारिणी; स्त्रीधनमविभाज्यम्; विविधं स्त्रीधनम् १४६२.
मृतापुत्रधनाधिकारक्रमः

विभक्तापुत्रमृतधनभाजः क्रमेण पत्नी दुहितरः पितरौ भ्रातरः तत्सुताः सपिण्डाः संबन्धिबान्धवाश्च १५२६-७.
संसृष्टिविभागः, मृतापुत्रसंसृष्टिधनाधिकारश्च
मृतापुत्रस्यावरं न संसृष्टिनः १५४१.
विभक्तजविभागः
विभागानन्तरजातः अंशभाक् १५६८.

लघुहारीतः

ऋणादानम्—
वृद्धिः
वृद्धिः ७३२ (प.).
प्रतिभूः
प्रातिभाव्यद्रव्यदानम् ६७७.
दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
पुत्रिका १३५५.
दायानर्हाः
नवयुवती विधवा भर्तव्या १४०४.
मृतापुत्रधनाधिकारक्रमः
मृतापुत्रधनभाजः क्रमेण पत्नी दुहितरः पितरौ भ्रातरः तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः १५२७.
विभक्तजविभागः
विभागानन्तरजातः अंशभाक् १५६८.
विभक्ताविभक्तकृत्यम्
विभक्तकृत्यम् १५८८.

सुमन्तुः

क्रयविक्रयानुशयः—
क्रीत्वानुशयः
क्रये तत्तुल्यक्रियासु चानुशयावधिः; क्रयसिद्धिः ८९९-९००. भूक्रयविधिः ९००.
स्त्रीपुंधर्माः—
स्त्रीत्यागविचारः १११७.
दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
पुत्रमहिमा १३५५.
विभागसंदेहे निर्णयविधिः
समविषमविभागनिवर्तनकालावधिः १५८२.

शाकलः

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
दत्तकपुत्रः कीदृशो ग्राह्यः १३५५.
विभक्ताविभक्तकृत्यम्
अविभक्तानां देवकार्यमेकमेव, विभक्तानां पृथक् १५८८.

जाबालिः

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
पुत्रिका दत्तकश्च १३५६.

कण्वः

अभ्युपेत्याशुश्रूषा—
दास्यानर्हाः ८३९.
दायभागः—
स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च
स्त्रीधने स्त्रीणा स्वातन्त्र्यम्, भर्तुरधिकारमर्यादा १४६२.

पारस्करः

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
दत्तस्य व्यामुष्यायणत्वम् १३५६.
स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च
मातृधनविभागः १४६२-३.

पैठीनसिः

स्त्रीपुंधर्माः—
विवाहे सापिण्ड्यविचारः; स्त्रीरक्षा; स्त्रीधर्माः; ब्राह्मण्या अन्वारोहणनिषेधः १११५.
दायभागः—
पुत्राणां सोद्धारसमविषमविभागाः
पुत्राणां समो विभागः ११९४.
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
पुत्रमहिमा, द्व्यामुष्यायणाः १३५६.
पैतृकद्रव्ये भगिनीनां भागः
पैत्र्यधनविभागे कन्याभागः १४२२.
स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

पैत्र्यधनविभागे कन्याभागः; स्त्रीशुल्कं पत्युः; मृतपुत्रिकाधनं न पत्युः; मृतकन्याधनविभागः १४६३.

मृतापुत्रधनाधिकारक्रमः

अपुत्रमृतधनभाजः क्रमेण भ्राता पितरौ ज्येष्ठा पत्नी सगोत्राः शिष्याः सब्रह्मचारिणः श्रोत्रिया.; अब्राह्मणद्रव्यं राजगामि १५२७.

अङ्गिराः

स्त्रीपुंधर्माः—

अन्वारोहणविचारः १११५–६.

वृद्धमनुः (बृहन्मनुः)

वेतनानपाकर्म—

अपरिभाषिता भृतिः;सदोषभृतकविधिः;उपस्करनाशसंबन्धी विधिः ८५४–५. वाहनकर्मणि सदोषस्वामिसंबन्धी विधिः ८५५.

सीमाविवादः—

ग्रामसीमापालनम् ९६२.

स्त्रीपुंधर्माः—

नियोगविचारः १११६.

दायभागः—

असवर्णभ्रातृविभागः

प्रतिग्रहभूर्ब्राह्मणीसुतानामेव; स्थावरं त्रैवर्णिकासुतानाम् १२५२.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

दत्तक्रीतादीना सपिण्डत्वगोत्रत्वत्वादिविचारः १३५८–६२. परिग्रहविधिरहितस्यानधिकारः १३६२.

मृतापुत्रधनाधिकारक्रमः

सपिण्डता सोदकता सगोत्रता च; अपुत्रमृतधनभाक् पत्नी १५२७–८.

कातीयलौगाक्षिसूत्रम्

दायभागः—

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

द्व्यामुष्यायणाना दायहरत्वपिण्डदत्वविचारः १३५६.

काष्णाजिनिः

दायभागः—

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

द्व्यामुष्यायणानां दत्तकादीनां पैतृककर्मस्वरूपम् १३५६-८.

बृहत्पराशरः

दायभागः—

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

भ्रातॄणां एकपत्नीना एकस्य एकस्या वा पुत्रेण पुत्रवत्त्वम् १३६२.

शौनकः

दायभागः—

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

पुत्रसंग्रहप्रयोगविधिः, तत्प्रसंगात् टीकायां पुत्रग्रहणे सापिण्ड्यदौहित्रभागिनेयत्वादेर्विचारः १३६३-५. पुत्रग्रहणे सापिण्ड्यगोत्रजातिदौहित्रभागिनेयत्वादेर्विचारः १३६५-७०. पुत्रदातुरेकानेकपुत्रत्वादिचारः १३७०-७१. कलौ दत्तौरसावेव पुत्रौ १३७१.

वृद्धगौतमः

दायभागः—

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

संस्काररूपः परिग्रहविधिः पुत्रत्वोत्पादकः १३७१-२. औरसादिपुत्रान्तरसद्भावे दत्तस्य दायहरत्वविचारः; संस्काराकरणे दत्तस्यादायार्हत्वम्; संस्काररूपः प्रतिग्रहविधिः १३७२–३.

ऋष्यशृङ्गः

स्त्रीपुंधर्माः—

स्त्रीधर्माः १११७.

प्रचेताः

स्त्रीपुंधर्माः—

विधवाधर्माः १११७.

विराट्

स्त्रीपुंधर्माः—

अन्वारोहणविचारः १११७.

व्याघ्रपात्

स्त्रीपुंधर्माः—

अन्वारोहणविचारः १११७.

गार्ग्यः

स्त्रीपुंधर्माः—

स्त्रीत्यागविचारः १११७.

वृद्धप्रपितामहः

ऋणादानम्—

ऋणप्रतिदानम्

[त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः] ७१५.

वृद्धशातातपः

दायभागः—

मृतापुत्रधनाधिकारक्रमः

आत्मबान्धवपितृबान्धवमातृबान्धवाः १५२८-९.

आश्वलायनः

दायभागः—

विभक्ताविभक्तकृत्यम्

एकपाकानां विभक्तानामेकः पञ्चयज्ञान् करोति, अनेकानां तु पृथगनुष्ठानम् १५८८.

जातूकर्णिः

क्रयविक्रयानुशयः—

क्रीत्वानुशयः

मूक्रये सामन्तादिविधिः ९०१.

पञ्चाध्यायी

क्रयविक्रयानुशयः—

क्रीत्वानुशयः

[क्रये सामन्तादिविधिः] ९०१.

वृद्धकात्यायनः

क्रयविक्रयानुशयः—

क्रीत्वानुशयः

परिवर्तनक्रयोक्तलाभादिविचारः क्रयसिद्धिश्च ९०१.

दायभागः—

स्त्रीधनं, स्त्रीधनकृत्यं, स्त्राधनावभागश्च

अप्रजस्त्रीधनविभागः १४६३.

सूतः

दायभागः—

स्त्रीधन, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

जामात्रे दत्तं दुहितुः दौहित्रीणा वा भवति १४६३.

निघण्टुकारः

दायभागः—

दायभागपदार्थः

दायपदार्थः ११४२.

बौधायनगृह्यशेषसूत्रम्

दायभागः—

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

पुत्रप्रतिग्रहकल्पः १३८४-५.

स्मृत्यन्तरम्

ऋणादानम्—

आधिः

आधिभोगनाशविचारः ६६१.

ऋणप्रतिदानम्

सदोषदानम् ७१५.

उपनिधिः—

निक्षेपनाशे निक्षेपो देयः ७५६.

सविद्यातिक्रमः—

[समयभङ्गिब्राह्मणदण्डः] ८७७.

क्रयविक्रयानुशय —

विक्रीयासम्प्रदानम्

दशाहात्परतोऽनुशयो न कार्यः ८९०.

क्रीत्वानुशयः

क्रयसिद्धिः ९०१.

स्वामिपालविवादः—

[सस्यरक्षणम्, तदर्थं पशुदण्डविधिः] ९२१.

स्त्रीपुंधर्माः—

विवाहे गोत्रसापिण्ड्यविचारः; स्त्रीरक्षा; पत्नी न क्रेतव्या; स्त्रीप्रशंसा; अधिवेदनविचारः; प्रोषितभर्तृकाविधिः विधवाधर्माः १११८.

दायभागः—

दायभागपदार्थः

[मिरूपार्थागमः ११४२.

विभाज्याविभाज्यविवेकः

गृहविभागः १२३३.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

औरसादीना पञ्चदशपुत्राणा दायहरत्वपिण्डदत्वाविचारः; कलौ क्षेत्रजोत्पादननिषेधः; पुत्रग्रहणे अवस्था नियमः; दत्तकः कदा, कः, कीदृशः, कथं च ग्राह्य १३७३-४.

पैतृकद्रव्ये भगिनीगां भागः

भगिनी चतुर्थभागहारिणी; अनुज्ञाना संस्कारकर्म पूर्वजेन कर्तव्यम् १४२२.

स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च
अप्रजदुहितृधनविभागः १४६३.
मृतापुत्रधनाधिकारक्रमः
माता धनहारिणी; पत्नी श्राद्धकरी; अविभक्तमृतापुत्रधनहरी पत्नी; विधवा भरणार्हा १५२९.
विभक्ताविभक्तकृत्यम्
अविभक्तस्थावरस्य दानविक्रयादौ स्वातन्त्र्यनिमित्तानि; अविभक्तैः परस्परानुमत्या क्षेत्रादिर्देयम्; भूमिविक्रये ग्रामज्ञातिसामन्तदायादानामनुमतिर्ग्राह्या १५८८-९.

अनिर्दिष्टकर्तृकवचनानि

ऋणादानम्—
वृद्धिः
वृद्धिप्रकाराः तल्लक्षणानि च ६३५.
आधिः
[आधिपालनम्] ६६१.
ऋणोद्ग्राहणम्
अपीड्यैव ऋणं ग्राह्यम्; धनालाभे पत्रपरिवर्तनम् ७३१.
उपनिधिः—
निक्षेपप्रतिदापनम्, तद्वृद्धिश्च ७५६.
संभूयसमुत्थानम्—
ऋत्विग्दक्षिणाविभागः ७८९.
दत्ताप्रदानिकम्—
विश्वजिति सर्वस्वदानम्; देयमेदयं च ८०७.
सीमाविवादः—
कूपवापिपुष्करिणीतडागसरःसीमाः ९६२.
स्त्रीपुंधर्माः—
स्त्रीणा एकानेकपतिवरणविचारः; नियोगविधिः १११८.
दायभागः—
पुत्राणां सोद्धारसमविषमविभागाः
ज्येष्ठादितारतम्येन विभागतारतम्यम् ११९४.
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
कलौ क्षेत्रजवर्जनम्; पुत्रपरिग्रहः; दुहितृमहिमा १३७४.
स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च
अध्यग्निकाध्यावाहनिकप्रीतिदत्तपादवन्दनिकानां निरुक्तिः १४६३.
मृतापुत्रधनाधिकारक्रमः
माता मृतापुत्रधनभाक्; दायः सासपौरुषः १५२९.
विभक्ताविभक्तकृत्यम्
स्थावरमविक्रेयम्; अविभक्तानां पृथग्ग्रामदेशानां दैवपित्र्यकर्मपृथक्त्वम् १५८९.

मार्कण्डेयपुराणम्

अभ्युपेत्याशुश्रूषा—
प्रातिलोम्येन दास्यम् ८३९.
सीमाविवादः—
ग्रामपुरखेटकर्वटलक्षणानि ९६२.
दायभागः—
मृतापुत्रधनाधिकारक्रमः
सासपौरुषनिरुक्तिः १५३०.

ब्रह्मपुराणम्

अभ्युपेत्याशुश्रूषा—
विनतायाः पणजितदास्यम्; गरुडस्य मातृदास्यात् दास्यं च ८४०.
स्वामिपालविवादः—
पालस्य स्वामिनश्च विवादः ९२१.
स्त्रीपुंधर्माः—
विधवाधर्माः; स्त्रीपुनर्विवाहनियोगान्वारोहणविचारः १११८-९.
दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
औरसादयो द्वादश पुत्राः, तेषा गोत्रपिण्डदत्त्वदायहरत्वाशौचादिविचारः; वर्णभेदेन पुत्रीकरणविचारः १३७४-५. औरसे सति इतरेषां पुत्राणा अंशभाक्त्वविचारः १३७५.

स्कन्दपुराणम्

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
क्रीतदुहिता १३७५.

पद्मपुराणम्

दायभागः

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
कृत्रिमदुहिता १३७६.

लिङ्गपुराणम्

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
क्रीतदुहिता १३७६.

हरिवंशः

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
दत्तकपुत्रः दत्तकदुहिता च; कृत्रिमदुहिता १३७६.

गरुडपुराणम्

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
पुत्रप्रतिनिधिविधिः १३७६.

कालिकापुराणम्

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
औरसादयो द्वादश पुत्राः, तेषा राज्याभिषेकदायहरत्वादिविचारः; दत्तादीना संस्कारपुत्रीकरणश्राद्धकृत्त्वादिविवेकः; द्यामुष्यायणः १३७६-८३.

मत्स्यपुराणम्

उपनिधिः—
निक्षेपाद्यपहारादिदोषे दण्डविधिः ७५६.
अस्वामिविक्रयः—
ज्ञानाज्ञानकृतास्वामिविक्रयदोषविचारः ७६९.
सभूयसमुत्थानम्—
वृतेन ऋत्विजा कर्माकरणे दण्डः ७८९.
दत्ताप्रदानिकम्—
प्रतिश्रुत्याप्रदाने दण्डः ८०८.
वेतनानपाकर्म—
[विद्याशिल्पवेतनविधिः; पण्यस्त्रीविधिः] ८५५.
स्त्रीपुंधर्माः—
स्त्रीरक्षा १११८.
दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
सापिण्ड्यम् १३८३.

आदिपुराणम्

दायभागः—
पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च
कलौ दत्तौरसेतरपुत्रनिषेधः १३८३-४.

विष्णुधर्मे

स्त्रीपुंधर्माः—
[प्रोषितभर्तृकाधर्मः] १११९.

बौधायनकारिका

संभूयसमुत्थानम्—
ऋत्विजा दक्षिणाविभागः ७८९.

शुक्रनीतिः

ऋणादानम्—
वृद्धिः
वृद्धयुपरमावधिः; अधर्म्यवृद्धिनिषेधः ६१५.
ऋणोद्ग्राहणम्
ऋणप्रतिदानम्; चतुर्गुणवृद्धौ गृहीतायां न ऋणोद्ग्राहणम् ७३१.
अस्वामिविक्रयः—
अस्वामिनः क्रये दण्डः ७६९.
संभूयसमुत्थानम्—
रक्षकाय दशमाशदानम्; शिल्पिनर्तकगायकचोरधनप्रयोजकवणिक्कृषकाणा संभूयकर्मविधिः; ऋत्विग्याज्यौ त्यागिनौ दण्डयौ ७९०.
दत्ताप्रदानिकम्—
दानप्रकाराः ८०८.
वेतनानपाकर्म—
भृतिप्रकाराः ८५६.
स्त्रीपुंधर्माः—
पतिव्रतावृत्तम् १११९.

भाष्यकारः

स्वामिपालविवादः—
सस्यरक्षणम्, तदर्थं पशुदण्डविधिः ९२१.

षट्त्रिंशन्मतम्

उपनिधिः—
राजदैवचोरादिनष्टनिक्षेपविचारः ७५६.

प्रवराध्यायः

दायभागः—

पुत्रप्रकारा, तेषां दायहरत्वविचारश्च

द्व्यामुष्यायणः १३८४.

संग्रहकारः (स्मृतिसंग्रहः)

ऋणादानम्—

ऋणप्रतिदानम्

ऋणदातृस्त्रीहारिणः स्त्रीसंग्रहोऽशास्त्रीयः ७१५. उत्तमर्णब्राह्मणाद्यभावे ऋणापाकरणम् ७१६.

दायभागः—

दायभागपदार्थः

दायपदार्थः; वर्णविशेषानुसारेण अर्थागमः; स्वाम्यस्वत्वनिरूपणम्; विभागस्वत्वयोः संबन्धः; विभागप्राशस्त्यम् ११४२-३.

पैतृकद्रव्यविभागस्तत्कालश्च

पितृद्रव्यमातृद्रव्यविभागकालः; पितुरूर्ध्वं विभागकालः ११५७.

पुत्राणां सोद्धारसमविषमविभागाः

उद्धारनिषेधः ११९४.

भ्रातृणां सहवासविधिः

इतरेषामनधिकारनिमित्तं अन्यतरस्यैव दायहरत्वम् ११९९.

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

सोदरभ्रातृणां सपत्नीनां च एकस्य एकस्या वा पुत्रेण पुत्रवत्त्वम्; दत्तकः; काण्डपृष्ठः; दत्तकसापिण्ड्यविचारः १३८४.

स्त्रीधन, स्त्रीधनकृत्य, स्त्रीधनविभागश्च

ब्राह्मणीकन्याया दायभागः १४६३.

मृतापुत्रधनाधिकारक्रमः

विभक्तासंसृष्टापुत्रमृतधनभाजः क्रमेण पत्नी नियोगकर्त्री पुत्रिका माता पितामही पिता च; मृतापुत्रधनभाजः क्रमेण सोदराः पितृसंततिः पितामहसंततिः सपिण्डाः सकुल्याः आचार्यः शिष्यः सब्रह्मचारी श्रोत्रियश्च ब्राह्मणे, सोदकाभावे राजा शूद्रे, आचार्याभावे राजा क्षत्रियवैश्ययोः १५२९-३०.

* अनुपलभ्यमानस्मृतीनां संग्रहः

१ हारीतः
२ शङ्खः
३ शङ्खलिखितौ
४ बृहस्पतिः
५ कात्यायनः
६ पितामहः
७ व्यासः
८ देवलः
९ उशना
१० प्रजापतिः
११ यमः
१२ मरीचिः
१३ दक्षः
१४ भरद्वाजः
१५ संवर्तः
१६ उतथ्यः
१७ वृद्धवसिष्ठः
१८ व्याघ्रः
१९ गोभिलः
२० शातातपः
२१ अत्रिः
२२ लौगाक्षिः
२३ वृद्धयाज्ञवल्क्यः
२४ सुमन्तुः
२५ शाकलः
२६ जाबालिः
२७ कण्वः
२८ पाराशरः
२९ पैठीनसिः
३० अङ्गिराः
३१ वृद्धमनुः (बृहन्मनुः)
३२ कार्ष्णाजिनिः
३३ बृहत्पराशरः
३४ शौनकः
३५ वृद्धगौतमः
३६ ऋष्यशृङ्गः
३७ प्रचेताः
३८ विराट्
३९ व्याघ्रपात्
४० गार्ग्यः
४१ वृद्धशातातपः
४२ आश्वलायनः
४३ जातूकर्णिः
४४ वृद्धकात्यायनः
४५ सूतः
४६ संग्रहकारः

§ स्मृत्यन्तरम्

§ अनिर्दिष्टकर्तृकवचनम्

---

* येषां वचनानि निबन्धेषूपलभ्यन्ते, मनुयाज्ञवल्क्यादिवच्च स्मृतिग्रन्थः नोपलभ्यते तेषामत्र निर्देशः

§ निबन्धग्रन्थेषु यानि वचनानि ऋषिनिर्देशं विना समागतानि तेषामत्र संग्रहः ।

धर्मकोशः

व्यवहारकाण्डम्

ऋणादानम्

* वेदाः

ऋणादानवैदिकलिङ्गानि

असि सत्य ऋणयावानेनोऽस्या धियः प्राविताथा वृषा गणः ।

सत्यः सत्कर्मार्हः, ऋणयावा स्तोतॄणामृणस्यापगमयिता । बहुलस्य धनस्य दातेत्यर्थः । अनेद्यः । प्रशस्यनामैतत् । सर्वैरनिन्दितः वृषा जलानां वर्षिता । एवंभूतो मरुद्गणोऽस्या धियोऽस्मदीयस्यास्य कर्मणोऽथानन्तरं प्राविताऽसि । प्रकर्षेण रक्षिता भवति । ऋसा.

[1]ये मर्त्यं पृतनायन्तमूमैर्ऋणावानं न पतयन्त सर्गैः।

ये मरुतो मर्त्यं मरणधर्माणं ऊमैः स्वरक्षणैरुदकनिगमनसाधनैर्वा पृतनायन्तं पृतनामात्मन इच्छन्तं वैरिणं मेघं वा सर्गैः सृष्टैः स्वकीयप्रहारविशेषैः पतयन्त । पातयन्ति । तेषामेव ध्वनिः श्रूयत इत्यर्थः । पातने दृष्टान्तः । सर्गैर्ऋणवानं न । ऋणवन्तमधमर्णमिव । तं यथा पीडयित्वा तदीय धनमपहरन्ति तद्वत् । ऋसा.

[2]असि सत्य ऋणया ब्रह्मणस्पते ।

त्व सत्यः सत्यपराक्रमः सत्यप्रज्ञो वाऽसि । ऋणया ऋणस्य यावयिताऽसि । ऋसा.

सँ ऋणचिदृणया ब्रह्मणस्पतिर्दुहो हन्ता मह ऋतस्य धर्तरि ।

स ब्रह्मणस्पतिर्महो महत ऋतस्य यज्ञस्य धर्तरि धारके यजमाने ऋणचित् स्तोतृकाममृणमिव चिनोतीति ऋणचित् । किञ्च ऋणयाः पापरूपस्य ऋणस्य यावयिता पृथक्कर्ता च दुहः कर्मणो द्रोग्धुरसुरस्य हन्ता भवेति । ऋसा.

[3]वीळुद्वेषा अनु वश ऋणमाददिः स ह वाजी समिथे ब्रह्मणस्पतिः ।

वीळून् दृढान् प्रबलान् राक्षसादीन् द्वेष्टीति ताद्दशो ब्रह्मणस्पतिर्वैशा वशाया गोः । सुपा सुलुगिति षष्ठया लुक् । ऋत्यक इति प्रकृतिभावः । ऋणमस्माभिर्यज्ञैर्देवेभ्यः प्रदेयमवदानात्मकमनुक्रमेणाददिरादाता भवत्विति शेषः । ऋसा.

[4]दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ।

दीर्घाधियो दीर्घाणि धियः कर्माणि ज्ञानानि वा येषां ताद्दशाः । असुर्यम् । असवः प्राणाः । तेन च तद्धेतुभूता आपो लक्ष्यन्ते । असुमुदकं ददातीत्यसुरो मेघः । तत्र भव मेघान्तर्वर्तमानमुदकं रक्षमाणाः । तत्तत्काले वृष्ट्युत्पादनाय रक्षन्तः । ऋतावानः सत्यवन्तो यज्ञवन्तो वा । ऋणानि स्तोतृभिरन्येभ्यः प्रदेयानि । चयमाना अपगमयन्तः । ऋसा.

[5]पर ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजम् । अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान्वरुण तासु शाधि ॥

हे वरुण ऋणा ऋणानि पित्रादिभिः कृतानि अस्माभिर्देयानि परा सावीः । परा सुव । पराचीन प्रेरय । अध अधुना मत्कृतानि मया निष्पादितानि ऋणानि परा सुव । अपि च हे राजन् स्वामिन् वरुण अहमन्यकृतेनान्यैरर्जितेन धनेन मा भोजम् । भोगं मा लभेयम् । किं कारणमिति चेदुच्यते । भूयसीर्भूयस्यो बहुतरा उषसोऽव्युष्टा इन्नु । सत्यमव्युष्टा एव । अपररात्रेर्भूताय ऋणानि चिन्तयतो जाग्रतो मम व्युष्टा अप्यव्युष्टकल्पा आसन् । हे वरुण तासूषःसु नोऽस्मान् जीवान् जीवनवत आशाधि । आ समन्तादनुशिष्टान् कुरु । ऋणान्यपकृत्य भोगपर्याप्तं धनं प्रयच्छेत्यर्थः । ऋसा.

---

* ऋणत्रयापाकरणसंबन्धिवचनानि दायभागे द्रष्टव्यानि ।

(१) ऋसं.१।८७।४. (२) ऋसं.१।१६९।७. (३) ऋसं.२।२३।११. (४) ऋसं.२।२३।१७. (५) ऋसं.२।२४।१३.

(१) ऋसं.२।२७।४; तसं.२।१।११।४; मैसं.४।१२।१ : ४।१७७।१०; कासं.११।१२.

(२) ऋसं.२।२८।९, मैसं.४।१४।९ : ४।२२८।१५.

आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन् रन्धयानः ।

(१) आ हर नः प्रमगन्दस्य धनानि । मगन्दः कुसीदी, माङ्गदो मामागमिष्यतीति च ददाति तदपत्य प्रमगन्दोऽत्यन्तकुसीदिकुलीनः । नि.६।३२

(२) अय च आगमिष्यति इत्येवमनुचिन्य परेभ्यो धनानि ददाति । दुभा.६।३२

मा भ्रातुरग्ने अनृजोरृणं वेर्मा सख्युर्दक्षं रिपोर्भुजेम ।

अनृजोः कुटिलचित्तस्य भ्रातुर्ऋणमृणवदेय हविर्मा वेः। मा कामयेथाः। तथा वयमपि सख्युर्मित्रस्य रिपोः शत्रोर्दक्षं भोगसमर्थं धन मा भुजेम। मा भुक्षीमहि। ऋसा.

ऋणा चिद्यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो बबाधे ।

यत्र यासु उषःसु तदुपलक्षितेष्वहःस्वृणा चित् ऋणान्यपि नोऽस्मान्बाधन्त इति शेषः। ता उषसश्चोग्र उद्गूर्णबल ऋणया ऋणस्य हन्तेन्द्रः। यातिर्बधकर्मा। दूरेऽजाता अननुभूताः सतीर्बबाधे। अपीडयत्। ऋसा.

ईयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे ।

इय सरस्वती रभस वेगवन्त ऋणच्युत वैदिकस्य देवर्षिपितृसबन्धिनो लौकिकस्य च ऋणस्य च्यावयितार दिवोदास एतत्सज्ञ पुत्र दाशुषे हवीषि दत्तवते वध्र्यश्वाय एतत्सज्ञाय ऋषयेऽददात्। दत्तवती। ऋसा.

न नूनं ब्रह्मणामृणं प्राशूनामस्ति सुन्वताम् ।
न सोमो अप्रता पपे ।

प्राशूना, ये सोम प्राश्नुवन्ति ते प्राशवः। तेषा सोम सुन्वता ब्रह्मणा ब्राह्मणानामृण देवर्ण न नूनमस्ति। न खलु विद्यते। किञ्चाप्रताविस्तीर्णधनेन सोमो न पपे। न पीयते। प्रभूतधनेनैव सोमः पीयत इत्यर्थः। ऋसा.

यथा कलां यथा शफं यथ ऋणं संनयामसि ।
एवा दुष्वप्न्य सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥

सज्ञापित पशु दानार्थं सस्कुर्वतो यथा येन प्रकारेण कला शफमिति सदायान्यत्र सनयन्ति। अथापरो यथाशब्दः पूरणः। अथवा। यथा कला हृदयाद्यवयवमवदानार्हं सनयन्ति यथा च शफ शफोपलक्षितमनवदानार्हं शफास्थ्यादिक सनयन्ति। यथा वा ऋण शनैः सनयन्ति एवैव दुष्वप्न्य सर्वमाप्त्ये वर्तमान स नयामसि। सनयामः। अपसारयामः। ऋसा.

उग्रं युयुज्म प्रतनासु सासहिमृणकातिमदाभ्यम् ।

उग्र उद्गूर्णबलमिन्द्र युयुज्म। योजयामः। कीदृशमिन्द्रम्। प्रतनासु सग्रामेषु सासहि शत्रूणामभिभवितार ऋणकर्तारं ऋणभूतस्तुतिम्। यस्मै स्तुतिर्ऋणवदवश्य क्रियते न तादृशम्। अथवा ऋणवदवश्यफलप्रदस्तुतिकम्। अदाभ्य केनाप्यहिंस्यम्। ऋसा.

कृतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणा । ऋणा च धृष्णुश्चयते ।

कृतान्यस्य यस्यैतस्य सोमस्य दस्युतर्हणा दस्यूनामसुराणा कर्त्वा कर्माणि स इदस्माभिरेव सोऽय धृष्णु धृष्टः सोमो यजमानानामृणा चर्णान्यपि चयते। काम प्रदानेन चातयति। ऋसा.

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः । द्विषस्तरध्या ऋणया न ईयसे ॥

हे सोम सु सुष्ठु वाजसातयेऽस्मभ्यमन्नदानायैव परि प्रधन्व। परिः प्रगच्छ। यद्वा। वाजसातयेऽन्नलाभाय सग्राम प्रगच्छ। किञ्च सक्षणिः सहनशीलस्त्व वृत्राणि शत्रूनपरि गच्छ। तदेवोच्यते। नोऽस्माकमृणया ऋणानीव यापयिता त्व द्विषः शत्रूस्तरध्ये तरीतु हन्तुमीयसे। परिगच्छसि। ऋसा.

ऋणावा बिभ्यदधनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ।

ऋणावाक्षपराजयाद्दणवान् कितवः सर्वतो बिभ्य-

(१) ऋसं ३।५३।१४. (२) ऋसं.४।३।१३. (३) ऋसं ४।२३।७. (४) ऋसं.६।६१।१; कासं.४।१६; ऐब्रा.२२।७; आश्रौ.८।१।१२; शाश्रौ.१०।५।४ : ६।६ : ८।३; ऋग्वि.२।२३।३; बृदे.५।११९. (५) ऋसं.८।३२।१६. (६) ऋसं.८।४७।१७; असं.६।४६।३: १९।५७।१. पैप्पलादमन्त्र इत्युल्लिखित अथर्वपरिशिष्टे.

(१) ऋसं ८।६१।१२. (२) ऋसं.९।८७।२.

(३) ऋसं.९।११०।१; असं.५।६।४ त्व (त्वा) रध्या... यसे (दध्यर्णवेनेयसे), सासं.१।४२८. २।७१४, कासं. ३८।१४, ऐब्रा.३७।७; आपश्रौ.१६।१८।७.

(४) ऋसं.१०।३४।१०.

द्धनं स्तेयजनितमिच्छमानः कामयमानोऽन्येषां ब्राह्मणादीनामस्त गृहम् । अस्त परत्यमिति गृहनामसु पाठात् । नक्त रात्रावुपैति । चौर्यार्थमुपगच्छति । ऋसा.

[1]त्वं ह त्यदृणया इन्द्र धीरोऽसिन्व पर्व वृजिना शृणासि ।

इन्द्र धीरः प्राज्ञस्त्व ह त्य खलु त्यत्तदृणयाः स्तोतृविषयाणा ऋणाना प्रापयितासि । किञ्च त्वमसिन्व शस्त्रमिव पर्व पशूना पर्वाणि वृजिना वृजिनानि स्तोतॄणामुपद्रवाणि शृणासि । हंसि । ऋसा.

उप ऋणेव यातय ।

हे उप उपोदेवते त्वमृणेवर्णानीव तत्तमो यातय । अपगमय । स्तोतॄणामृणानि यथा धनप्रदानेनापकरोषि तथा तमोऽप्यपसारयेत्यर्थः । ऋसा.

यत्कुसीदमप्रतीत्तं मयि येन यमस्य बलिना चरामि । इहैव सन्निरवदये तदेतत्तदग्ने अनृणो भवामि ।

यत्कुसीदमृणमप्रतीत्तमनर्पित मयि वर्तते, येन यमस्य बलिनोत्तमर्णस्य बलिः प्रत्यर्पणीयमृण येनाहमृणेन युक्त इदानी वर्ते तदेतदृणमिहैव सत्रस्मिन्नेव जन्मनि यजदेशे वर्तमानो निरवदये निःशेषणापकरोमि तत्तेनैव कारणेन हेऽग्ने यमरूपादुत्तमर्णादहमनृणो भवामि । तैसा.

अग्निर्वाव यम इयं यमी कुसीदं वा एतद्यमस्य यजमान आदत्ते यदोषधीभिर्वेदिं स्तृणाति यदनुपौष्य प्रयायाद्ग्रीववद्धमेनममुष्मिंल्लोके नेनीयेरन् । यत्कुसीदमप्रतीत्तं मयीत्युपोपतीहैव सन्यमं कुसीदं निरवदायानृणः सुवर्गं लोकमेति ।

यमस्य बलिना चरामीत्यस्मिन्मन्त्रेऽभिधीयमानो यमोऽग्निरेव तस्य होमाधारत्वेन नियतत्वात् । इयं वेदिरूपा भूमिर्यमी । यजमानो वेदिमदरन्ध्रा भूमेर्निर्गत्य प्रयाण कुर्यात्तदानीं यमस्य भृत्या गले रज्वा बद्धमेन यजमान स्वर्गलोक भृश नयेयुः । इदानीं दाह विधते । यत्कुसीदमिति । उपोपपति दहेदित्यर्थः । इहैवास्मिन्नेव जन्मनि यज्ञप्रदेशे एवावस्थितः सन्यम प्रति विद्यमान कुसीदमृण निःशेषमनेन दाहेनापाकृत्यानन्तरमृणरहितः स्वर्गं प्राप्नोति इति । तैसा.

शरीरं यज्ञशमलं कुसीदं तस्मिन्त्सीदतु योऽस्मान्द्वेष्टि ।

योऽस्मान्द्वेष्टि तस्मिन्द्वेषिणि पुरुषे यज्ञशमल यज्ञानुष्ठाने मलिन कदाचिदप्यनुष्ठानरहितमित्यर्थः । तादृश यत्कुसीद निरन्तर धनवृद्ध्यार्जनेन यज्जीवन तत्सीदतु द्वेषी पुमान् यज्ञे विमुखः केवलो वणिग्भूत्वा यथाकथञ्चित्तिष्ठत्वित्यर्थः । तैसा.

[2]यद्देवमृणमहं बभूव धिष्ण्यं वा संचकर जनेभ्यः । अग्निर्नस्तस्मादिन्द्रश्च सं विदानौ प्रमुञ्चताम् ॥

यत्कुसीदमप्रतीतं मयेह येन यमस्य निधिना चरावः । एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति हस्तानृणानि ॥

यद्धस्ताभ्यां चकर किल्बिषान्यक्षाणां वग्मुमवजिघ्रमापः । उग्रं पश्याञ्च राष्ट्रभृच्च तान्यप्सरसामनुदत्तानृणानि ॥

उग्र पश्येद्राष्ट्रभृत्किल्बिषाणि यदक्षवृत्तमनुदत्तमेतत् । नेन्न ऋणानृणवानीप्समानो यमस्य लोके निधिरजराय ॥

यदापिपेष मातरं पुत्रः प्रमुदितो धयन् । एतत्तदग्ने अनृणो भवाम्यहतौ पितरौ मया ॥

यदह आपिपेष आपिष्टवान् पद्भ्याम् । मातर पुत्रः प्रमुदितः प्रहृष्टः सन् । धारयन् पिबन् स्तनम् । तदेतत तव समक्ष हे अग्ने, अनृणः ऋणत्रयरहितः । कृतकृत्यो भवामि । यत एवमतो ब्रवीमि उल्क्षिप्य भुजम् । अहतौ आहसितौ पितरौ । 'पितामात्रा' इत्येकशेषः । मया यो हि प्रत्युपकर्तुमसमर्थः तेनैव मातापितरौ हिंसितौ भवतः इत्यभिप्रायः । शुउ.

यथा कलां यथा शफं यथर्णं संनयन्ति ।
एवा दुष्वप्न्यं सर्वं द्विषते सं नयामसि ॥

यथा वा ऋण अधमर्णाः पुरुषाः सनयन्ति संप्र-

(१) ऋसं.१०।८९।८. (२) ऋसं.१०।१२७।७.

(३) तैसं.३।३।८।१-२; माश्रौ २।५।५।१८ मयि (मयेह), संब्रा.२।३।२० मयि (मयेह); आपश्रौ.१३।२४।१५; गोगृ. ४।४।२६ (४) तैसं. ३।३।८।३ ४.

(१) तैसं.७।३।११।१, तैआ.१०।१।११, मउ.२०।१२. (२) मसं.४।१४।१७. (३) शुमा.१९।११; शब्रा.१२।७।३।२१; तैआ.२।३।१; काश्रौ.१९।२।२८. (४) असं.६।४६।३.

दानेन गमयन्ति । असा.

यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत संगृणामि । वैश्वानरस्य महतो महिम्ना शिवं मह्यं मधुमदस्त्वन्नम् ॥

हे देवाः अनृतेन असत्यवदनेन अन्यदीय अपह्नुत्य यद् अन्नं अद्मि भक्षयामि । उत्तमर्णाय पुनर्दास्यन् अदास्यन् पुनः प्रदान अकरिष्यश्च संगृणामि दास्यामीति केवलं प्रतिजानामि । तत् सर्वं अन्न वैश्वानरस्य विश्वनरहितस्य महतः अतिशयितप्रभावस्य देवस्य महिम्ना माहात्म्येन मह्य शिवं सुखकरं मधुमत् माधुर्यवत् अस्तु भवतु । असा.

अपमित्यमप्रतीत्तं यदस्मि यमस्य येन बलिना चरामि । इदं तदग्ने अनृणो भवामि त्वं पाशान् विचृतं वेत्थ सर्वान् ॥

अपमित्यं अपमातव्य अपाकर्तव्य धान्यादिक ऋणं उत्तमर्णाद् गृहीतं अप्रतीत्त पुनस्तस्मै न प्रत्यर्पितम् । ईदृशं यदृणमेव अहं अस्मि भवामि । ऋणवाहुल्यख्यापनार्थं तादात्म्यव्यपदेशः । यस्मादेवं तस्माद्बलिना बलवता येन ऋणेन शासितुः यमस्य वशे चरामि हे अग्ने त्वत्प्रसादाद् इदमिदानीं तत तेन ऋणेन अनृणः ऋणरहितो भवामि । त्व खलु तान्सर्वान् ऋणोद्भवान् पारलौकिकान् पाशान् बन्धनरज्जुविशेषान् विचृत विचर्तितु मोचयितु वेत्थ जानासि । शक्तो भवसीत्यर्थः । असा.

इहैव सन्तः प्रति दद्म एनज्जीवा जीवेभ्यो नि हराम एनत् । अपमित्य धान्यं यज्जघसाहमिदं तदग्ने अनृणो भवामि ॥

इहैव इह लोके एव सन्तः विद्यमाना एनदृणं प्रति दद्मः उत्तमर्णाय प्रत्यर्पयामः । एतदेव विवृणोति । जीवाः इह लोके जीवन्तः एव जीवेभ्यः जीवद्भ्य उत्तमर्णेभ्यो देहत्यागात् पुरैव एनदृणं नि हरामः नितरा नियमेन वा अपाकुर्मः । धान्य व्रीहियवादिक उत्तमर्णसकाशाद् अपमित्य प्रस्थादकादिसंख्यया परिवृत्य गृहीत्वा यदहं जघस भक्षितवान् अस्मि । हे अग्ने इदमिदानीं तत् तस्मात् परकीयधान्यभक्षणात् त्वप्रसादेन अनृणः ऋणरहितः ऋणनिमित्तनरकपातरहितो भवामि । असा.

अनृणा अस्मिन्ननृणाः परस्मिन् तृतीये लोके अनृणाः स्याम । ये देवयानाः पितृयाणाश्च लोकाः सर्वान् पथो अनृणा आ क्षियेम ॥

हे अग्ने त्वत्प्रसादाद् अस्मिन् भूलोके अनृणाः । ऋणमत्र लौकिकं वैदिक च परिगृह्यते । लौकिकं तावद् उत्तमर्णाद् गृहीतं हिरण्यधान्यादिक प्रसिद्धम् । वैदिकं तु 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इति [तैसं. ६।३।१०।५] तेन सर्वेण ऋणेन रहिताः स्याम भवेम । परस्मिन् लोके स्वर्गादौ एतद्देहपरित्यागेन दिव्यशरीरपरिग्रहेण सुकृतफलभोगस्थानेऽपि अनृणाः स्याम । ऋणादाननिमित्तो भोगप्रतिबन्धस्तत्रापि मा भूद् इत्यर्थः । तृतीये लोके स्वर्गादपि उत्कृष्टे नाकपृष्ठादौ वय अनृणा भवेम । अन्येऽपि ये लोकाः देवयानाः देवा एव येषु यान्ति गच्छन्ति ते तथोक्ताः । ये च लोकाः पितृयाणाः पितृणा असाधारणभोगभूमयः तान् सर्वान् लोकान् तत्प्राप्त्युपायभूतान् पथः मार्गाश्च । यद्वा लोक्यन्ते इति लोकाः पन्थानः देवानेव यैर्यान्ति ते देवयानाः पितॄनेव यैर्यान्ति ते पितृयाणाः । ये एव उभये विभिन्ना मार्गाः तान् सर्वान् अनृणाः ऋणप्रतिबन्धरहिताः सन्तः आ क्षियेम अभिगच्छेम । असा.

यद्वस्ताभ्यां चकृम किल्बिषाण्यक्षाणां गत्नुमुपलिप्समानाः । उग्रंपश्ये उग्रजितौ तदद्याप्सरसावनु दत्तामृणं नः ॥

हस्ताभ्यां, इन्द्रियाणामुपलक्षण एतत् । हस्तपादादीन्द्रियैः किल्बिषाणि पापानि यत् चकृम वय कृतवन्तः स्मः । अक्षाणा इन्द्रियाणा गत्नु गन्तव्य शब्दस्पर्शादिविषयं उपलिप्समानाः उपलब्धु अनुभवितु इच्छन्तः । यद् ऋण चकृमेत्यर्थः । हे उग्रंपश्ये तीक्ष्णदर्शने । हे उग्रजितौ उग्रान् उद्गूर्णबलान् प्रतिकर्तुं अशक्यान्

(१) असं.६।७१।३. (२) असं.६।११७।१; गोभा. २।४।८; वैसू.२४।१५; कौसू.६७।१९ : १३३।१. (३) असं.६।११७।२.

(१) असं.६।११७।३; तैब्रा.३।७।९।८; तैआ.२।१५।१; आपश्रौ.१३।२२।५; माश्रौ.२।५।५।२२.

(२) असं.६।११८।१; तैब्रा.३।७।१२।३.

शत्रून् जयत इति उग्रजितौ। तत्रैका उग्रपश्या। अपरा उग्रजित्। एतन्नामानौ अप्सरसौ अद्य इदानीं नः अस्माकं तत् प्राग् उदीरित ऋण अनु दत्त्वा आनुकूल्येन उत्तमर्णेभ्यः प्रयच्छतम्। असा.

उग्रंपश्ये राष्ट्रभृत् किल्बिषाणि यदक्षवृत्तमनु दत्तं न एतत्। ऋणान्नो नर्णमेर्त्समानो यमस्य लोके अधिरज्जुरायत्॥

हे उग्रंपश्ये। राष्ट्रभृतः पृथगुपादानाद् अत्र एकवचनान्त एतत्। हे राष्ट्रभृत् राष्ट्र राज्य बिभर्ति पोषयतीति राष्ट्रभृत्। एतत्संज्ञे अप्सरसौ यानि अस्माभिः कृतानि किल्बिषाणि पापानि यच्च पाप अक्षवृत्त अक्षेषु इन्द्रियेषु निपिद्धानिषिद्धविभागपरिहारेण स्वस्वविषयप्रवृत्तेषु निष्पन्नम्। नः अस्माक ऋणभूत एतत् सर्व पापं अनु दत्त आनुकूल्येन यथास्मान् न बाधते तथा दत्त प्रयच्छतम्। निवारयत इत्यर्थः। अनुदानप्रकारमाह। ऋणान्न इति। ऋणान् ऋणिनः। अनपाकृतिनो नः अस्मान्। यद्वा ऋणात इति पदच्छेदः। ऋणित्वाद्धेतोः नः अस्मान् यमस्य पुण्यपापानुरूप दण्डयितुर्देवस्य संबन्धिनि लोके स्थाने उत्तमर्णः ऋण एच्छमानः ऋण ग्रहीतु अभित इच्छन् अधिरज्जुः अस्मद्ग्रहणाय पाशहस्तो भूत्वा न आयत न प्राप्नोति। तथा अनुदत्त इति संबन्धः। असा.

यस्मा ऋणं यस्य जायामुपैमि यं याचमानो अभ्यैमि देवाः। ते वाचं वादिषुर्मोत्तरां महेवपत्नी अप्सरसावधीतम्॥

यस्मै उत्तमर्णाय वस्त्रहिरण्यदानादिक ऋण अह धारयामि। यस्य पुरुषस्य जाया भार्या उपैमि कामुकः सन् उपगच्छामि। तथा य पुरुष स्वामिन उत्तमर्ण वा याचमानः इष्ट धन प्रार्थयमानः हे देवाः अभ्येमि अभिगच्छामि। ते सर्वे मत् मत्तः उत्तरा उत्कृष्टतरा वाच प्रतिकूला मा वादिषुः मा ब्रुवन्तु। हे देवपत्नी देवपत्न्यौ देवाना पत्न्यौ जायाभूते अप्सरसौ अधीतं मद्विज्ञापनं चित्तेऽवधारयतम्। असा.

यदिदीव्यन्नृणमहं कृणोम्यदास्यन्नप्त उत संगृणामि। वैश्वानरो नो अधिपा वसिष्ठ उदिन्नयाति सुकृतस्य लोकम्॥

अदीव्यन् व्यवहर्तुं अशक्नुवन् यद् ऋणमह कृणोमि करोमि हे अग्ने अदास्यन् पुनः प्रदानं अकरिष्यन्। संगृणामि दास्यामीति केवलं प्रतिजानामि। वैश्वानरः। विश्वनरहितः सर्वेषा प्राणिना हितकारी अत एव अधिपाः अधिक पालयिता वसिष्ठः वासयितृतमः एवभूतोऽग्निः सुकृतस्य पुण्यकर्मणः फलभूत लोक [नः अस्मान्] उन्नयाति उन्नयतु ऊर्ध्व प्रापयतु। स्वयमेव नयत्वित्यर्थः। असा.

वैश्वानराय प्रति वेदयामि यदृणं संगरो देवतासु। स एतान् पाशान् विचृतं वेद सर्वानथ पक्वेन सह सं भवेम॥

वैश्वानराय विश्वनरहिताय अग्नये प्रति वेदयामि विज्ञापयामि। किं तद् इत्याह यदृण इति। यदिशब्दो यच्छब्दार्थः। यद् ऋण लौकिक देवतासु देवताविषये यः सगरः अवश्यकर्तव्यतया प्रतिज्ञा 'ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' [तैस. ६। ३।१०।५] इति तद्धि वैदिक ऋणम्। तत् सर्व वैश्वानराय निवेदयामीत्यर्थः। स ताहशो वैश्वानरोऽग्निः एतान् लौकिकवैदिकऋणात्मकान सर्वान् पाशान पाशवद्बन्धकान् विचृत विचर्तितु विश्लेषयितु वेद जानाति। अथ ऋणरूपपाशच्छेदनानन्तरं पक्वेन परिपक्वेन स्वर्गादिफलेन सह वय स भवेम सगच्छेमहि। असा.

ततं तन्तुमन्वेके तरन्ति येषां दत्तं पित्र्यमायनेन। अवन्ध्वेके ददतः प्रयच्छन्तो दातुं चेच्छिक्षान् स स्वर्ग एव॥

एके केचन जना ऋणिनः सन्तः देहपातोत्तरकाल तत विस्तीर्ण तन्तु पुत्रपौत्रादिलक्षण सतान अनुलक्ष्य तरन्ति ऋण अतिक्रामन्ति। पुत्रादिभिस्तस्य पितृगतस्य ऋणस्य अपाकरणात्। येषा जनाना ऋणवता पित्र्य पितुरागतमपि ऋण आयनेन आगमनेन पुत्रपौत्रादिषु प्रवेशनेन दत्त उत्तमर्णेभ्यः प्रत्यर्पित भवति। ते तरन्तीति पूर्ववत्र सबन्धः। अस्त्वेव पुत्रपौत्रादिसतानवताम्। येषा तु

(१) असं.६।११८।२. (२) असं.६।११८।३. (३) असं. ६।११९।१; बौध.३।७।१०,१९.

(१) असं.६।११९।२; बौध.३।७।१३.

(२) असं.६।१२२।२.

तदभावः कथं ते अनृणाः स्युरिति तत्राह अबन्ध्वेक इति । अबन्धवः । बध्नाति कुलं सततं अविच्छिन्नं करोतीति बन्धुः पुत्रपौत्रादिलक्षणः संतानः । तद्रहिता एके जना ददतः । हिरण्यधान्यादिकं ददते उत्तमर्णाय पितृकृत आत्मकृत चेति उभयविधमपि ऋणं प्रयच्छन्तः इह लोक एव प्रत्यर्पयन्तो दातुं चेत् शिक्षान् सर्वात्मना प्रत्यर्पयितुं यदि शक्नुवन्ति शक्त्यभावेऽपि तदिच्छामात्रं वा विद्यते स एव तेषां स्वर्गः । तावन्मात्रेणापि सर्वं ऋणं अपाकृत्य स्वर्गभाजो भवन्तीत्यर्थः । असा.

ऋणमस्मिन्संनयत्यमृतत्वं च गच्छति । पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ×॥

अक्रन् कर्म कर्मकृत इत्याह । देवानृणं निरवदाय । अनृणा गृहानुपप्रेतेति वावैतदाह ।

अदीव्यन्नृणं यदहं चकार । यद्वाऽदास्यन्त्संजगारा जनेभ्यः । अग्निर्मा तस्मादेनसः ।

अदीव्यन्समीचीन व्यवहारमकुर्वन्नहं यादृशं चकार कपटेन परकीयं यद्वस्तु गृहीतवानस्मि, यद्वा यच्चान्यद्वस्तु, अदास्यन्नप्रत्यर्पयिष्यन् जनेभ्यः सकाशादादाय सम्यग्भक्षितवानस्मि । तैब्रासा.

यदा पिपेष मातरं पितरम् । पुत्रः प्रमुदितो धयन् । अहिꣳसितौ पितरौ मया तत् । तदग्ने अनृणो भवामि ।

यदा बालः पुत्रः शिशुरहं प्रमुदितः प्रकर्षेण हृष्टो धयन्स्तन पिबन्मातरं पिपेष पीडितवानस्मि तथा पितरं च हस्तपादोपघातेन पीडितवानस्मि तत्तदानीं पितरौ मातापितरावुभौ मयाऽहिंसितावनुपद्रुतौ भवताम् । तत्तन्मातापित्रोर्विषये हेऽग्नेऽहमनृणो भवामि । प्रत्युपकारराहित्यरूप यत्पाप तेन मुक्तो भूयासम् । तैब्रासा.

यावतीभ्यो ह वै देवताभ्यो हवींषि गृह्यन्त ऽऋणमु हैव तास्तेन मन्यन्ते ।

ऋणं ह वै पुरुषो जायमान एव । मृत्योरात्मना जायते स यज्यजते यथैव तत्सुपर्णी देवेभ्य आत्मानं निरक्रीणीतैवमेवैष एतन्मृत्योरात्मानं निष्क्रीणीते ।

अथ सप्तमेऽहन् । एवमेवैतास्विष्टिषु संस्थितास्वेषैवावृदध्वर्यविति ह वै होतरित्येवाध्वर्युरसितो धान्वो राजेत्याह तस्यासुरा विशस्तऽइमऽआसतऽ इति कुसीदिन उपसमेता भवन्ति तानुपदिशति मायावेदः सोऽयमिति कांचिन्मायां कुर्यादेवमेवाध्वर्युः संप्रेष्यति न प्रक्रमान् जुहोति ।

अग्निर्वाव यम इयं यमी । कुसीदं वा एतद्यमस्य यजमान आदत्ते, यदोषधीभिर्वेदिं स्तृणाति । तां यदनुपौष्य प्रयायात्, यातयेरन्नेनममुष्मिल्लोके यमे यत् कुसीदमपमित्यमप्रतीतमिति वेदिमुपोपन्ती हैव सन्यमङ्कुसीदं निरवदाय अनृणो भूत्वा स्वर्गं लोकमेति ।

यत्कुसीदमप्रतीत्तं मयेह येन यमस्य निधिना चरामि । एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते दधामि ॥

इहास्मिन् जन्मनि मया स्वीकृत यत्कुसीदमृणमप्रतीत्त केनाप्यालस्यादिना उत्तमर्णेभ्यो न प्रत्यर्पित, यमस्य दुष्टशिक्षाधिकारिणो निधिना निधिस्थानीयेन प्रत्यर्पयितव्येन येनर्णेन युक्तोऽहं चरामि, एतदेतेन होमेन तत्तस्माद्दणान्मुक्तोऽहमनृणो भूयासम् । जीवन्नेव ते तव प्रसादात् (तत्) तादृश प्रतिदधामि प्रत्यर्पयामि । अनेन होमेन तुष्टस्त्वमस्मिन्नेव जन्मनि मा प्रत्यर्पणसमर्थं कुर्विति भावः । तैआसा.

यददीव्यन्नृणमहं बभूवादित्सन्वा संजगर जनेभ्यः । अग्निर्मा तस्मादिन्द्रश्च संविदानौ प्रमुञ्चताम् ॥

अहमदीव्यन् पुत्रादिरक्षणरूप व्यवहारं कर्तुमसमर्थः सन्यद्दण बभूव प्राप्तवानस्मि, यद्वा तद्दणं जनेभ्यः उत्तमर्णेभ्योऽदित्सन्प्रत्यर्पयितुं अनिच्छन् संजगर सम्यग्भक्षितवानस्मि, अग्निरिन्द्रश्च संविदानौ परस्परमैक्यं गतौ मा तस्माद्दणान्मुञ्चताम् । तैआसा.

× व्याख्यान दायभागे द्रष्टव्यम् ।

(१) **ऐब्रा.**३।१. (२) **तैब्रा.**१।६।५।५. (३) **तैब्रा.**३।७।१२।३. (४) **तैब्रा.**३।७।१२।४. (५) **शब्रा.**१।१।२।१९. (६) **शब्रा.**३।६।२।१६.

(१) **शब्रा.**१३।४।३।११. (२) **गोब्रा.**२।४।८. (३) **तैआ.**२।३।२; **मब्रा.**२।३।१८ तत्ते दधामि (दत्ते ददानि). (४) **तैआ.**२।४।१.

यद्बद्धास्याभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्रमानः । उग्रंपश्या च राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि ॥

उग्रंपश्ये राष्ट्रभृत्किल्बिषाणि यदक्षवृत्तमनुदत्तमेतत् । नेत्र ऋणानृणव इत्समानो यमस्य लोके अधिरज्जुगाय ॥

हे उग्रपश्ये हे राष्ट्रभृत् किल्बिषाणि ऋणरूपाणि यानि कृतानि, यदक्षवृत्तं यद् द्यूते पणादिरूप प्रतिश्रुत अप्रणीत, एतत्सर्वमनुदत्तमनुकूले युवामेव दत्तवत्यौ । ऋणानृणयुक्तान्नोऽस्मान्समानः सदृश उत्तमर्णोऽधिरज्जुबन्धनार्थमधिकरज्जुयुक्तः सन्नायास्मानादाय बध्वा नेदृणवो नैवर्णयादृणप्रयुक्त बन्धन कुर्यादित्यर्थः । कृवेति तदुच्यते—यमस्य लोके मरणादूर्ध्वभाविनि गन्तव्ये लोके । द्वितीय इत् शब्दः एवकारार्थः सन्नायेत्यनेन सबध्यते, आदायैव रज्जुभिर्बध्वेत्यर्थः । तैआसा.

[1]वैश्वानराय प्रतिवेदयामो यदीनृणः संगरो देवतासु । स एतान् पाशान्प्रमुचन्प्रवेद स नो मुञ्चातु दुरितादवद्यात् ॥

यदीनृण यदेव प्रसिद्धमृण देवतासु सगरः प्रतिज्ञारूपेण स्तुत्या सपादितम् । सगरशब्दः प्रतिज्ञावाची । प्रतिज्ञा चैव श्रूयते-'त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इति । तदेतदृण त्रिविध वैश्वानरायास्मत्स्वामिने प्रतिवेदयामो विज्ञापयामः । तत्र देवताशब्देनर्षयः पितरश्चोपलक्षिताः । स वैश्वानर एतानृणत्रयरूपान्पाशान्प्रमुचन्प्रमोक्षयन् प्रवेद प्रकर्षेण जानाति । सोऽभिज्ञो वैश्वानरो नोऽस्मान् दुरितात् परलोकविरोधिनः पापादवद्याद्दिह लोके निन्दादोषाच्च मुञ्चातु मुक्तान् करोतु । तैआसा.

[2]वैश्वानरः पवयान्नः पवित्रैर्यत्संगरमभिधावाभ्याशाम् । अनाजानन्मनसा याचमानो यदत्रैनो अव तत्सुवामि ॥

वैश्वानरो देवो नोऽस्मान्पवित्रैः शुद्धहेतुभिर्होमादिभिः पवयाच्छोधयतु । यद्येन शोधनेन सगर श्रुत्युक्ता प्रतिज्ञा-

(१) **तैआ.**२।४।१. (२) **तैआ.**२।६।१.

(३) **तैआ.**२।६।१; **असं.**६।११९।३ पवयान्नः पवित्रैः (पविता मा पुनातु) यदत्रै (यत्तत्रै).

मृणत्रयरूपामाशा मयाऽपि प्रत्यर्पणीयत्वेन आशंसनीयामभिधाबाभ्याभिमुख्येन शीघ्र प्राप्नोमि, तादृशं पावन कुर्यादित्यर्थः । अनाजानन्नृणनिर्मोचनोपायान्सर्वानप्यजानन् मनसा याचमानोऽनृणो भूयासमिति सर्वदा प्रार्थयमानोऽस्मि । अत्रोपायापरिज्ञाने यदेनः पापमस्ति तत्पापमवसुवामि वैश्वानरप्रसादेन विनाशयामि । तैआसा.

[3]अमी ये सुभगे दिवि विचृतौ नाम तारके । प्रेहामृतस्य यच्छतामेतद्बद्धकमोचनम् ॥

दिव्याकाशे विचृतौ नाम विचृत्नामयुक्ते द्वे तारके लोके मघाशब्देन व्यवहियमाणे सुभगे सौभाग्ययुक्ते अमी अमू प्रत्यक्षेणास्माभिर्दृश्यमाने ये विद्येते ते उभे इह कर्मण्यमृतस्यर्णापाकरणरूपममृत सुख प्रयच्छताम् । एतत्तारकाभ्या दत्तममृत सुख बद्धकस्य मम मोचनमृणमोचनसाधनम् । ऋणत्रयेण यो बद्धः स एव वाऽ(चा)ल्यन्तकुत्सितत्वाद्बद्धक इत्युच्यते । पितृदेवताकाभ्यामाभ्या तारकाभ्या नामवृत्त्यादि प्रकाशनेन तस्माद्दृणत्रयान्मुक्तो भवामीत्यभिप्रायः । तैआसा.

[4]विजिहीर्ष्व लोकान्कृधि बन्धान्मुञ्चासि बद्धकम् । योनेरिव प्रच्युतो गर्भः सर्वान्पथो अनुष्व ॥

अत्र मन्त्रद्रष्टा कश्चिद्दृषिरधमर्ण सबोध्य ब्रूते —हे अधमर्ण विजिहीर्ष्व विहर्तुमिच्छ पारतन्त्र्यराहित्येन सुखसचारो विहारः तत्सिध्यर्थं लोकान् कृधि पुण्यानुष्ठानेनोत्तमलोकान् सपादय । बद्धकमृणेन कुत्सितेन बद्धमात्मान बन्धाद्दृणत्रयरूपान्मुञ्चासि मुक्त कुरु । बन्धाद्विमोके दृष्टान्तः—योनेः प्रच्युतो गर्भ इव, उदरमध्ये सर्वावयवसकोचेन निर्बध्यमानो गर्भो योनेर्बहिः पतितो यथा निर्बन्धान्मुक्तो भवति तद्वत् । तद्दृणत्रयान्मुक्तस्त्व सर्वान्पथः पुण्यलोकमार्गाननुष्व सेवस्वेत्यर्थः । तैआसा.

तैतं तन्तुमन्वेके अनुसंचरन्ति येषां दत्तं

(१) **तैआ.**२।६।१, **असं.**३।७।४ (अमू ये दिवि सुभगे विचृतौ नाम तारके। वि क्षेत्रियस्य मुञ्चतामधम पाशमुत्तमम्॥) ६।१२१।३ (उदगाता भगवती विचृतौ नाम तारके। प्रेहामृतस्य यच्छता प्रैतु बद्धकमोचनम् ॥).

(२) **तैआ.**२।६।१; **असं.**६।१२१।४ (वि जिहीष्व लोकं कृणु बन्धान् मुञ्चासि बद्धकम्। योन्या इव प्रच्युतो गर्भः पथः सर्वा अनु क्षिय ॥). (३) **तैआ.**२।६।२.

पित्र्यमायनवत्। अबन्ध्वेके ददतः प्रयच्छाद्दातुं चेच्छक्नुवा॑ स स्वर्ग एषाम्॥

एके पुरुषाः केचिन्तन पुत्रपौत्रादिरूपेण विस्तीर्णं तन्तुमनु स्वकीय सतानमनुप्रविश्यानुसंचरन्ति पुण्यलोकाननुक्रमेण प्राप्नुवन्ति। द्विविधो हि विग्रहः पुत्ररूपश्चात्मरूपश्चेति। तयोर्मध्ये पुत्ररूपेणेह लोके पुण्य कुर्वन्नेवास्ते। पितृरूपेण लोकान्तरेषु सचरति। एतदेवाभिप्रेत्यैतरेयोपनिषद्युक्तम्— 'सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते। अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति' इति। अत आकारभेदेन तन्तुमनुप्रविश्येति पुण्यलोकाननुसचरतीत्युभयमप्युपपद्यते। येषा पुरुषाणा पित्र्यमृण मायनवद्दत्त, आयनमागमः शास्त्र तदस्यास्तीत्यायनवद्यथाशास्त्र दत्तमित्यर्थः। पित्र्यमित्येतदन्ययोरपि द्वयोर्ऋणयोरुपलक्षणम्। तदृणत्रय यैर्दत्त तादृशाः केचिदनुसचरन्तीति पूर्ववान्वयः। एकेऽपरे केचित्पुरुषा अबन्धु पुत्रपौत्रादिबन्धुरहिताः सन्तः पित्र्यमृणमपाकर्तुमशक्ता अपि ददतो धनदायिन उत्तमर्णस्य प्रयच्छात् प्रयच्छन्ति तद्धन प्रत्यर्पयन्ति, ते पुरुषा दातुं शक्नवाञ्शक्तवन्तश्चेत्, एषा पुरुषाणा स स्वर्गो भवत्येव। पुत्रोत्पत्तेर्दैवाधीनत्वेऽपि गृहीत धनमवश्य प्रत्यर्पणीयमेवेत्यर्थः। तैआसा.

यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वाऽकरिष्यन्। यद्देवानां चक्षुष्यागो अस्ति यदेव किं च प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु॥

हे देवा अह दास्यन्नदास्यन्प्रत्यर्पण चिकीर्षुरचिकीर्षुर्वा, तात्कालिकेन सर्वथा प्रत्यर्पयिष्यामीत्येतादृशेनानृतवचनेन धनमादाय यदन्नमद्मि भक्षयामि, अथवा किंचित्कार्य परकीय करिष्यामीत्यनेनानृतेन वचनेन धनमादाय तत्कार्यमकरिष्यन् यदन्नमद्मि, यदपि देवाना चक्षुषि दृष्टिविषये मया कृतमागः पापमस्ति, आदित्याभिमुख्येन मूत्रविसर्गादि। किं च यदेव किञ्चिच्छद्मादिधन प्रतिजग्राह प्रतिगृहीतवानस्मि, तस्मात् सर्वस्मादेनसो विमुच्यायमग्निरनृणमृणरहित करोतु। तैआसा.

(१) तैआ.२।६।२.

यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजामविम्। यद्देवानां चक्षुष्यागो अस्ति यदेव किं च प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु॥

बहुधा विरूप द्रव्यदोषात् कर्तृदोषाद्देशकालदोषादिना वा बहुप्रकारेण शास्त्रनिषिद्धं यदन्नमद्मि तथा वस्त्रादीनपि निषिद्धान् स्वीकरोमि। यद्देवानामित्यादि पूर्ववत्। तैआसा.

गौतमः

धर्म्यवृद्धिपरिमाणम्। तस्या ग्रहणावधिः।

कुसीदवृद्धिर्धर्म्या विंशतिः पञ्चमाषिकी मासम्*।

वृद्ध्यर्थं प्रयुक्तस्य द्रव्यस्य कुसीदसज्ञा। माषः कार्षापणस्य विंशतितमो भाग इत्युशनसोक्तम्। पञ्चमाषा वृद्धिरूपेण दीयन्ते यत्र विंशतौ सा पञ्चमाषिकी। कार्षापणाना विंशतिः प्रतिमासं पञ्चमाषिकी यथा भवति तथा भवन्ती कुसीदवृद्धिर्धर्मादनपेता। अत्र मनुः— 'वसिष्ठविहिता वृद्धि सृजेद्वित्तविवर्धिनीम्। अशीतिभाग गृह्णीयान्मासाद्वार्धुषिकः शते' ॥ इति। अत्रापीयमेव वृद्धिरुक्ता। ×गौमि.

नातिसांवत्सरीमेके।

(१) येयमशीतिभागलक्षणा धर्म्या वृद्धिस्तामतिसांवत्सरी संवत्सरेऽतिक्रान्ते भवा न गृह्णीयात्, एकस्मिन्नेव सवत्सरे प्रतिमासमशीतिभागो ग्राह्यस्तत ऊर्ध्वं न किंचिदपि ग्राह्यमेषा धर्म्या भवतीत्येके मन्यन्ते। अतिसावत्सरीमिति रूपसिद्धिश्चिन्त्या। गौमि.

(२) मासमतिक्रम्य संवत्सरवृद्धिर्न ग्राह्येत्येके मन्यन्ते। एतदुक्त भवति—मासि मासि यद्गृहीतव्यं तत्सर्वं सभूय संवत्सरे परिपूर्णे एव गृह्णामीत्येवं मत्वा प्रतिसंवत्सरं

* स्मृच. व्याख्यान 'नातिसावत्सरी वृद्धि' इति मनुवचने द्रष्टव्यम्। × मभा. गौमिवत्।

(१) तैआ.२।६।२, असं.६।७१।१ (यदन्नमद्मि बहुधा विरूप हिरण्यमश्वमुत गामजामविम्। यदेव कि च प्रतिजग्राहमग्निष्टद्धोता सुहुतं कृणोतु॥); वैसू.४।१६; कौसू.४५।१७.

(२) गौध.१२।२६; व्यक.१०६; मभा.; गौमि.१२।२६; स्मृच.१५८; विर.६; सवि.२२२ विंशतिः (स्यादिशतेः) पञ्च (पाञ्च) (मासम् ०); समु.७९ तिः (तेः).

(१) गौध.१२।२७; व्यक.१०५; मभा.; गौमि.१२।२७.

न ग्रहीतव्यमिति । प्रतिसंवत्सरप्रतिषेधात् प्रतिमासं **प्रतिषाण्मासं चाभ्यनुज्ञायते** । ततश्च मासिमासि षण्मासे-षण्मासे वा ग्रहीतव्यं न प्रतिसंवत्सरमित्येकेषाममिप्रायः । **प्रतिमासवृद्धिग्रहणे** चैतद्द्रष्टव्यम् । यावद्धनसंव्यवहारः तावद् ग्राह्यमेवेति गौतमः । तद्विच्छेदे तु 'नातिसांवत्स-रीम्' इति व्यवस्थितविभागो द्रष्टव्यः । मभा.

वृद्धयुपरमावधिः

[1]**चिरस्थाने द्वैगुण्यं प्रयोगस्य** ।

(१) प्रयोगस्येत्येकवचननिर्देशात् प्रयोगान्तरकरणे द्वैगुण्यातिक्रमोऽभिप्रेतः । चिरस्थान इति निर्देशात् शनैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो दर्शितः । ×मिता.२।३९

(२) स्वमतमाह—चिरस्थान इति । यावता कालेन प्रयुक्तं धनं द्विगुणं भवति तावन्तमेव कालं धर्म्यया वृद्ध्या विवर्धते नातःपरमिति । सुवर्णादिद्रव्यविषय-मेतत् । +गौमि.

[2]**षोडशमासैर्द्विगुणा भवति** ।

वृद्धिप्रकाराः

[3]**चक्रकालवृद्धिः** ।

अथापदि वृद्धयन्तराण्याह— चक्रकालवृद्धिरिति । वृद्धिशब्दः प्रत्येकमभिसंबध्यते । यावता कालेन यावती वृद्धिस्तामपि मूलीकृत्य तावतो मूलस्य पुनर्वृद्धिश्चक्र-वृद्धिः । यथाह नारदः— 'वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धि-रुदाहृता' इति । इयतः कालस्येयती वृद्धिरिति यत्र समयेन गृह्यते सा कालवृद्धिः । +गौमि.

[4]**कारिताकायिकाशिखाधिभोगाश्च** ।

(१) कारिता शास्त्रानपेक्षया यस्मिन्नात्मनैव क्रियते प्रतिसंवत्सरं निष्कस्य तत्पादमर्धं वा देयमित्येवमादिः सा कारिता वृद्धिः । कायिका अभ्युपगताया वृद्धेरधिकं दिवसेदिवसे मासिमासि संवत्सरेसंवत्सरे वा यस्मिन् गृह्यते सा कायिका । तथा च नारदः — 'कायाविरोधिनी शश्वत् पणपादादिकाधिका' इति । शिखा धान्यस्य, यथा चतुर्णां प्रस्थाना पञ्चम इत्यादि । अधिभोगः वृद्ध्यर्थमहरहर्यस्मिन् घृतादि गृह्यते साऽधिभोगवृद्धिः । वृद्धिशब्दानुकर्षणार्थश्चकारः । गौरवप्रदर्शनार्थः पृथङ्-निर्देशः । मभा.

(२) वृद्धय इति शेषः । प्रयोक्त्रा ग्रहीत्रा च देश-कालकार्यावस्थापेक्षया प्रभूता न्यूना वा स्वयमेव कल्पिता वृद्धिः कारिता । कायिका कायकर्मसंशोध्या । शिखावृद्धि कात्यायन आह – 'प्रत्यहं गृह्यते या हि शिखावृद्धिस्तु सा स्मृता' । इति । आधिभोग आहितस्य क्षेत्रस्य भोगोऽनुभवः । तत्रानुभव एव वृद्धिः । सा च शतेनापि सवत्सरैर्न निवर्तते । क्षेत्र चोत्तमर्णस्य न भवति यदा कदाचिदपि मूलप्रदाने सत्यधमर्णस्य भवति । अधि-भोग इत्यन्ये× । भोगमधिकृत्य वर्तत इत्यधिभोगवृद्धिः । तत्राप्येष एवार्थः । एतासु चक्रवृद्ध्यादिषु वृद्धेर्द्वैगुण्या-त्परमपि भवत्येव । गौमि.

पश्चाद्दिव्यवृद्धयुपरमावधिः

[5]**कुसीदं पशूपजलोमक्षेत्रशदबाह्येषु नातिपञ्च-गुणम्** ।

(१) अधिकृतमपि कुसीदग्रहणं क्रियते अन्यरूपोऽयं प्रयोग इति ज्ञापनार्थम् । पशूपज घृतादि तत्क्रीत्वा अमुष्मिन् काले मूल्य दातव्य, तस्मिन्नदीयमान वर्धत इति यत् परिभाषितमित्यभिप्रायः । वत्सस्य ग्रहण मा भूदित्युपशब्दप्रयोगः । लोम ऊर्णादि । प्रकृतिग्रहणेन विकाराणामपि ग्रहणं द्रष्टव्यम् । तस्यापि क्रयमूल्यस्या-दीयमानस्यैव । क्षेत्रशदः क्षेत्र यदा परिमितेन धान्येन

× अय पक्षः 'मस्करिभाष्ये' समुपलभ्यते ।

× सवि., व्यप्र., व्यउ. मितावत् ।

+ मभा. गौमिवद्भावः ।

(१) **गौध.**१२।२८; **मेधा.**८।१५२, **मिता.**२।३९; **अप.** २।३९; **व्यक.**११०; **मभा.**; **गौमि.**१२।२८; **विर.**१७ चिरस्थाने (चिरकालव्यवधाने); **पमा.**२२८; **विचि.**११ चिर (चिराय); **स्मृचि.**९ विचिवत्; **सवि.**२२८; **व्यप्र.** ११०; **व्यउ.**७६; **विता.**४८८; **सेतु.**९ स्थाने (कालाव-स्थानात्); **समु.**८१; **विम्ब.**२४ (प्रयोगस्य०) शेषं विरवत्.

(२) **स्मृच.**१५९; **समु.**७९. (३) **गौध.**१२।३१; **मभा.**; **गौमि.** १२।३१. (४) **गौध.**१२।३२; **मभा.**; **गौमि.**१२।३२.

प्रयुज्यते तस्मिन्काले अदीयमानं वर्धत इति । वाह्यः प्रापणनिमित्त यथा वलीवर्दादिभिः कस्यचिद्धान्य प्रापयति असुस्मिन्काले‌ऽस्य शुल्कमदीयमान वर्धत इति। एतेषु यत्कुसीदमुपरि सवृद्धिक दातव्यमिति प्रयुक्तमित्यर्थः । तत्पञ्चगुणत्वं नातिवर्तते । पशूपजग्रहणेनैव सिद्धस्य लोम्नः पुनर्ग्रहणं मयूरपत्रकृतानामपि ग्रहणार्थम्। 'पक्षाणा पत्ररोमाणामग्रे ब्रूहि मया श्रुतम्' इति श्रुतिदर्शनात् । 'चिरस्थाने द्वैगुण्य प्रयोगस्य' इत्यत्रैव वक्तव्यमिति चेत् नैष दोषः— एषा चक्रवृद्धिप्रयोगाभावज्ञापनार्थ इहोपदेश इति। पञ्चगुणमित्यनेन सिद्धे नातिग्रहण प्रयोगान्तरे अतिक्रमणसूचनार्थम् । मभा.

(२) पशोरुपजात पशूपज घृतक्षीरादि। ऊर्णाकम्बल चामरवालव्यजनादि लोम । क्षेत्रशदः क्षेत्रभोगः । वाह्य बलीवर्दादि । वाह्यमिति प्रायेण पठन्ति, तत्राप्येष एवार्थः । एतेषु पशूपजादिषु प्रयुक्तेषु तत्कुसीद यावत् पञ्चगुणं वर्धते पञ्चगुणता नात्येति । ×अपर आह— पशूपजादिषु मूलत्वेन कल्पितस्य द्रव्यस्य तदानीमप्रदाने यावत्पञ्चगुणं वर्धते, धर्म्यया च वृद्ध्या पञ्चगुणता नात्येति । *गौमि.

भुक्ताधिर्न वर्धते । दित्सतोऽवरुद्धस्य च ।

(१) विश्वासार्थं यदाधीयते कास्याभरणादि स आधिः । स चेदुपभुक्तः प्रयुक्तोऽर्थो न वर्धते । भोग एव तत्र वृद्धिरिति । धनिने धनं दातुमिच्छतोऽधमर्णस्य धन न वर्धते । धनी वृद्धिलोभाद्यावेन न गृह्णाति चेत्तस्मिन्नेव दिवसे परहस्ते स्थाप्यं तदारभ्य वृद्धिर्न वर्धते। तथा यो दित्सन्नधमर्णो राजादिनाऽवरुद्धस्तस्यापि दातुमसमर्थस्य द्रव्य तत आरभ्य न वर्धते । गौमि.

(२) एवमवरुद्धस्य च निःस्वो भूत्वा देशान्तरगतस्येत्यर्थः । चकारः पूर्वविशेषणाशङ्का मा भदिति । तद्दिवसादारभ्येति द्रष्टव्यम् । केचिद्राज्ञादिना निगडबन्धनमाहुः तत्र भूमिदेवाः प्रमाणम् । × मभा.

(३) भुक्तो गोप्याधिर्यस्य धनस्य, स न वर्धते । धन दित्सतोऽधमर्णस्य वृद्धिर्न भवति । तथावरुद्धस्य गृहीतमृण मोक्तुमवरुद्धस्याधमर्णस्यावरोधनदिनावधि वृद्धिर्न देया भवति । +विर.२१

हारीतः

धर्म्या वृद्धिः । वृद्धयुपरमावधिः ।

आधिं विना लग्नकं वा प्रयुक्तं बन्धकाद्विना ।
साक्षिलेख्यविहीनं तु विसंवादे न सिध्यति ॥
पुराणपञ्चविंशत्यां मासे अष्टपणा वृद्धिः ।
एवं सद्विमासैश्चतुर्भिर्वर्षैर्द्वित्वमायातं संतिष्ठते ।
एषा धर्म्या वृद्धिः, नानया धर्मात् च्यवते ।

पुराणः षोडशपणाः। द्विपर्यागतं द्विगुणीभूतम्। एव प्रतिमास द्विक शत भवति । सतिष्ठते न पुनर्वर्धते । एतदुभयमपि अधमर्णब्राह्मणविषयम् । विर.८

पुराणे पणिकं मासमित्येके ।

(१) एतत् संकरजात्यधमर्णविषय चातुर्वर्ण्ये द्विकशतादीना धर्म्यत्वाभिधानात् । विर.११

(२) इति हारीतवचनाच्च 'पुराणे पणम्' इति बृहस्पतिवचनाच्च, एकस्मिन् मासे पुराणे पणो वृद्धिरित्यर्थः । यत्र देशे यथा वृद्ध्याचारस्तत्र तथैव वृद्धिः । चन्द्र.८

तूले तु द्विगुणं धान्यं त्रिगुणमेव वर्धते ।

× शेष गौमिगतम् । + चन्द्र. विरवत् ।

(१) **स्मृच.**१३७; **प्रका.**८५; **समु.**७३.

(२) **व्यक.**१०६ त्वमायातं (पर्यागतं) म्यां (मैं); **विर.**८ त्वमायात (पर्यागतं); **विचि.**४ सतिष्ठते (सत्तिष्ठत) म्यां (मैं); **वीमि.**२।३९ से अष्ट (सेनाष्ट) (वर्षैः०) शेष **विरवत्**; **सेतु.**४-५ सद्वि (षड्भिः) सैः + (चतुः) ष्ठते (ष्ठेत्) नान (नैन); **विव्य.**२२ अष्ट (साष्ट) त्वमायात (पर्यागत) मांत् (मैं:).

(३) **व्यक.**१०८; **विर.**११; **विचि.**१४ समि (स इ), **चन्द्र.**८ (इत्येके०), **सेतु.**५ : १३ णि (लि).

(४) **व्यक.**१०८; **विर.**१२; **विचि.**१३ तूले तु (तूणे) भेव + (च) (तथो...गुणम्०); **चन्द्र.**८ भेव + (च) (तथो... गुणम्०); **वीमि.**२।३९ (काले द्विगुण धान्य त्रिगुणमेव वर्धते).

× अय पक्षः 'मस्करिभाष्ये' समुपलभ्यते ।

* विर. गौमिगतम् ।

(१) **गौध.**१२।२९-३०; **मभा.**; **गौमि.**१२।२९-३०; **स्मृच.**१५७ धैते (धैत) ते + (वस्त्रालङ्कारादि.) (दित्स ..च०); **विर.**२१; **पमा.**२२५ ते +(वस्त्रालङ्कारादिः) (दित्स ...च०); **विचि.**११ (न वर्धतेऽवरुद्धस्य ऋणम्); **सवि** २२६ (दित्स ..च०); **चन्द्र.**९, **व्यप्र.**२३४ पमावत्; **सेतु.** १५; **प्रका.**९३ स्मृचवत्; **समु.**८० स्मृचवत्; **विव्य.**२४ (न वर्धतेऽवरुद्धस्य).

तथोर्णा कार्पासः संवत्सरेण तृणशलाकं घृतलवण-गुडमष्टगुणम् ।

(१) तूले नवशस्यागमे द्वित्रादिभिरपि मासैर्नवशस्यागमे द्विगुण धान्य भवतीत्यर्थः। यदि तूलागमे न दत्त तदा त्रिगुणमेव, न ततः परं वर्धते । तथोर्णेति, धान्यवदूर्णा कार्पासोऽपि वर्धते इत्यर्थः । शलाका ईषिका, तृणादिषु संवत्सरेणाष्टगुणा वृद्धिरित्यर्थः । विर.१२

(२) धान्य तु प्रतिवर्षं द्विगुणं भवति । चन्द्र.८

वसिष्ठः

वृद्धिग्रहणनिन्दा

समर्घं धनमादाय महार्घं यः प्रयच्छति ।
स वै वार्धुषिको नाम ब्रह्मवादिषु गर्हितः ॥
ब्रह्महत्यां च वृद्धिं च तुलया समतोलयत् ।
अतिष्ठत् भ्रूणहा कोट्यां वार्धुषिः समकल्पत॥इति॥

वृद्धिपरिमाणनियम.

कामं वा परिलुप्तकृत्याय पापीयसे दद्यात् ।
वसिष्ठवचनप्रोक्तां वृद्धिं वार्धुषिके शृणु ।
पञ्च मासास्तु विंशत्या एवं धर्मो न हीयते ॥

विंशतिः पलानाम् । विर.६

द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं स्मृतम् ।
मासस्य वृद्धिं गृह्णीयात् वर्णानामनुपूर्वशः ॥

वृद्ध्युपरमावधिः

वज्रशुक्तिप्रवालानां हेम्नश्च रजतस्य च ।
द्विगुणा त्विष्यते वृद्धिः कृतकालानुसारिणी ॥

वज्रसाहचर्याच्छुक्तिरिति मुक्ताफलं लक्षणयोच्यते । कात्यायनेन तु 'मणिमुक्ताप्रवालानाम्' इति वाचकशब्देनोक्तम् । तदप्यत्र लक्षणानिश्चये कारणम् ।

स्मृच.१६०

ताम्रायःकांस्यरीतीना त्रपुणः सीसकस्य च ।
त्रिगुणा तिष्ठते वृद्धिः कालाच्चिरकृतस्य तु ॥
दन्तचर्मास्थिशृङ्गाणां मृन्मयानां तथैव च ।
अक्षया वृद्धिरेतेषां पुष्पमूलफलस्य च ॥

अक्षया मूलप्रतिदानाभावे शतगुणाऽपि वर्धत एवेत्यर्थः । स्मृच.१६१

द्विगुणं हिरण्यं त्रिगुणं धान्यम् । धान्येनैव रसा व्याख्याताः । पुष्पमूलफलानि च । तुलाधृतमष्टगुणम् ।

(१) इति तत्यत्र देशे त्रिगुण देयमवतिष्ठते तद्विषय दरिद्राधमर्णविषयं वा । ×स्मृच.१६०

(२) रसा इक्षुरसादयः, तेऽपि त्रिगुणा इत्यर्थः । एवं पुष्पादीनि । तुलाधृतं कर्पूरादि । एतद् वृद्ध्यन्तरावरुद्ध-तुलाधृतान्यविषयम् । विर.१९

(३) इयमष्टगुणता सुवर्णादिव्यतिरिक्तविषया ।

× व्यप्र. स्मृचवत् ।

(१) **वस्मृ**.२।४६ धनमादाय (धान्यमुद्धृत्य); **मभा**.१०। २४ मादाय (मुद्धृत्य), **नाभा**.२।९४.

(२) **वस्मृ** २।४६ (क) त्व (म्प) : (ख) ब्रह्म... वृद्धिं (वृद्धिञ्च भ्रूणहत्या) समकल्पत (न्यवपात ह); **नाभा**. २।९५ तोलं (धार). (३) **वस्मृ**.२।४७ (क) दद्यात् (दद्याताम्); **मभा** १०।२४ (=)दद्यात् (दद्याताम्).

(४) **वस्मृ**.२।५५ (ख) षा (पां); **अप**.२।३७ (=); **व्यक**.१०६ एव (मिति); **स्मृच**.१५८ उक्त.; **विर**.६ व्यकवत्; **विचि** ३ पा (षा) एव (मेव); **सवि**. २२१-२२२ मनुः; **सेतु**.३ चन (चने) शेष विचिवत् ; **प्रका**. ९३ उक्त.; **समु**.७९ मनुः, **विव्य**.२१ एवं (मेव).

(५) **वस्मृ**.२।५४, **अप**.२।३७.

(६) **स्मृच**.१६० द्वि (त्रि); **पमा**.२२७ हेम्नश्च (रत्नस्य) त्विष्य (दाय) कृत (कृता); **स्मृचि**.९; **नृप्र**.१९ त्वि (ही) कृत (कृता); **व्यप्र**.२२०, **प्रका**.९४ स्मृचवत्, **समु**.८०.

(१) **स्मृच**.१६०; **पमा**.२२७ च्चिर (न्तर); **स्मृचि**. ९ आय. (आणा) तु (च); **नृप्र**.१९ तु (च); **व्यप्र**.२२९ च्चि (चि)ते (तो), **व्यम** ७६ ते (तो), **विता** ४८७ तिष्ठ (त्विष्य) च्चिर (च्थिर), **प्रका**.९४, **समु**.८० तिष्ठ (त्विष्य).

(२) **स्मृच**.१६१, **पमा**.२२९; **सवि**.२२९; **व्यप्र**. २३१, **विता** ४८८ दन्तचर्मा (चर्मवर्मा); **प्रका**.९४ दन्त (दन्ति), **समु**.८१.

(३) **वस्मृ**.२।४८-५१ धृत (घृत); **मिता**.२।३९ धृत (घृतं त्रितय), निर्णयसागरमुद्रितपुस्तके तु नाय पाठभेदः; **व्यक**.११०, **मभा**.१२।२८; **गौमि** १२।२८ पुष्प (वृक्ष); **स्मृच**.१६० (द्विगुण हिरण्यं०), **विर**.१८ त्रिगुणं + (च); **पमा**.२२६ फलानि (फलादीनि) धृत (घृत), **विचि**.१३ मूलफला (फलमूला); **नृप्र**.१८ धान्ये ख्याताः (रसा अपि त्रिगुणाः); **सवि**.२२७ (धान्येनैव रसा व्याख्याताः पुष्प-फलानि च) स्मृत्यन्तरम्; **व्यप्र**.२२९; **व्यउ**.७६ (तुलाधृतमष्टगुणम्०); **व्यम**.७६ (=)(द्विगुणं...ख्याताः०); **सेतु**. ११:३१५ (तुलाधृतमष्टगुणम्); **समु**.८१.

तेषां वृद्धिविशेषस्य विशेषवाक्येन विधानात्। विचि.१३

अथाप्युदाहरन्ति—

राजानुमतभावेन द्रव्यवृद्धिं विनाशयेत्।
पुना राजाऽभिषेकेण द्रव्यवृद्धिं च वर्जयेत्॥

विष्णुः

वृद्धिपरिमाणनियम.। अकृतवृद्धिः।

[1]अथोत्तमर्णोऽधमर्णात् यथादत्तमर्थं गृह्णीयात्। द्विकं त्रिकं चतुष्कं पञ्चकं च शतं वर्णानुक्रमेण प्रतिमासम्।

[2]सर्वे वर्णा वा स्वप्रतिपन्नां वृद्धिं दद्युः।

अकृतामपि वत्सरातिक्रमे यथाभिहिताम।

(१) यथाभिहित धर्मशास्त्र इति शेषः। न च यथा प्रत्यर्थिना मध्यस्थेनार्थिना वाऽभिहिता तथा दद्यादिति। यथाभिहितमिति वचनार्थः कस्मान्न स्यादिति वाच्यम्। यत आह मनुः— 'कृतानुसारादधिका व्यतिरिक्ता न सिध्यति। कुसीदपथमाहुस्तं पञ्चक शतमर्हति'॥ इति। यत्तु वैष्णववचने 'संवत्सरातिक्रमे'इत्युक्तं तद्याचितक-विषयम्। *स्मृच.१५६

(२) अकृतामनवधारिता च यथाभिहिता वर्णक्रमेण प्रतिमास प्रतिशत द्विकादिरूपाम्। विर.१६

[3]यो गृहीत्वा ऋणं पूर्वं श्वो दास्यामीति सामकम्।
न दद्यात्तोभतः पश्चात्तदहा वृद्धिमाप्नुयात्॥

सममेव सामकम्। अवृद्धिकमिति यावत्। एतदुक्त

* सवि, व्यप्र. स्मृचवत्।

(१) **वस्मृ**.२।५२-५३.

(२) **विस्मृ**.६।१-२; **व्यक**.१०७ शत (सर्व); **विर**.८ व्यकवत्; **व्यप्र**.२२८ मर्णात् (मर्णकात्) पञ्चक + (च).

(३) **विस्मृ**.६।३-४ क्रमे (क्रमेण) भिहि (विहि); **व्यक**.१०९ हितम् (हितम्); **स्मृच**.१५६ दद्युः (दद्यात्) वत्स (सवत्स) हितम् (हितम्); **ममु**.८।१५२; **विर**.१६; **विचि**.१०; **सवि**.२२५ दद्युः (दद्यात्) वत्स (सवत्स); **मच**.८।१५२ (वृद्धि दद्यरकृतामपि); **व्यप्र**.२३२ (अकृतामपि०); **सेतु**.९ भिहि (विहि), **प्रका**.९३ स्मृचवत्; **समु**.७९ स्मृचवत्. अत्रोद्धृतेषु निबन्धग्रन्थेषु 'सर्वे वर्णा वा स्वप्रतिपन्नां' इत्यशो नोपलभ्यते।

(४) **विस्मृ**.६।४० पूर्वं (सर्व) त्तदहा वृद्धिमाप्नु (त्तथा वृद्धिमवाप्नु); **स्मृच**.१५५ ह्या (हः); **पमा**.२२२; **स्मृचि**.

भवति। प्रतिदानकालावधिमङ्गीकृत्य गृहीतमवृद्धिकमपि ऋणमवधेरनन्तरकालादारभ्य वर्धते एवेति।

*स्मृच.१५५

वृद्ध्युपरमावधिः

[4]दीयमानं प्रयुक्तमर्थं उत्तमर्णस्यागृह्णतस्ततः परं न वर्धते।

[5]हिरण्यस्य परावृद्धिर्द्विगुणा। त्रिगुणा वस्त्रस्य। धान्यस्य चतुर्गुणा। रसस्याष्टगुणा। संततिः स्त्रीपशूनाम्।

स्त्रीणा पशूना च दास्यादीना गोमहिष्यादिना च पोषणासमर्थस्य कस्मैचित् क्षीर व्यूढिं वा व्यवस्थाप्य पोषणसतत्यर्थं प्रयुक्तस्य चिरावस्थाने सततिरेव वृद्धिर्न वृद्ध्यन्तरमित्यर्थः। विर.१८

[6]किण्वकार्पाससूत्रचर्मवर्मायुधेष्टकाङ्गाराणामक्षया।

[7]अनुक्तानां द्विगुणा।

ये तु कम्बलादयो हिरण्ये द्विगुणा वृद्धिरित्यादि धर्मशास्त्रेषु अनुक्तास्तेषा द्विगुणैव वृद्धिः। 'अनुक्ताना द्विगुणा'इति विष्णुस्मरणात्। चिरकालप्रदानेनाधमर्णो-

* पमा., व्यप्र. स्मृचवत्।

८; **सवि** २२५ श्वो (यो) दहा वृद्धिमाप्नु (दा वृद्धिमवाप्नु); **व्यप्र** २३१:२३२ चतुर्थपाद., **व्यम**.७५ पूर्वं (सर्वं) त्तदहा (त्तदिनात्); **विता**.४८२ पूर्वं (सर्वं) मकम् (मके), **प्रका**.९३ स्मृचवत्; **समु**.७९ दद्धा (दद्धो).

(१) **विस्मृ**.६।१०; **विर**.२१. (२) **विस्मृ**.६।११-१५ त्रिगुणा...चतुर्गुणा (धान्यस्य त्रिगुणा वस्त्रस्य चतुर्गुणा); **व्यक**.११० त्रिगुणा वस्त्रस्य (वस्त्रस्य त्रिगुणा); **विर**.१८; **विचि**.१२ (हिर ..तुर्गुणा०); **स्मृचि**.९ विचिवत्; **सवि**.२२७ (त्रिगुण धान्यरसादिः); **चन्द्र**.६ धान्य...ष्टगुणा (चतुर्गुणा रसस्य); **व्यप्र**.२२९ (परा०) वृद्धिर्द्विगुणा (द्विगुणा वृद्धिः); **व्यम**.७६ व्यप्रवत्; **सेतु**.१०,३१५ (संततिः स्त्रीपशूनाम्): ११ (रसस्याष्टगुणा); **समु**.८१ व्यप्रवत्.

(३) **विस्मृ**.६।१६ चर्म (चर्मा) (वर्मा०); **अप**.२।३९ कार्पा (कर्पा) रा (रका); **व्यक**.११०; **स्मृच**.१६१; **विर**.१९; **पमा**.२२९; **सवि**.२२९ सूत्र (मात्र); **व्यप्र**.२३१; **विता**.४८८ (किण्व .. युध०); **प्रका**.९४; **समु**.८१.

(४) **विस्मृ**.६।१७; **अप**.२।३९ नां + (हि); **व्यक**.११०; **स्मृच**.१६०; **विर**.१९; **पमा**.२२८; **व्यप्र**.१९; **व्यप्र**.२३०; **समु**.८१.

परि वृद्धिस्थितायैव प्रयुक्तधनस्य द्वैगुण्यानतिक्रमो नान्यत्रेत्यर्थः । *स्मृच.१६०

पलद्वयं तथा दासी धेनुः पलचतुष्टयम् ।
पलाष्टकममड्याहोऽश्वो भूमौ तु षोडश ॥
स्तेयं ब्रह्मस्वविषये सुवर्णाभरणे तथा ।
पश्चात्तत्तेन दातव्यं तस्मादेकादशाधिकम् ॥

अयमर्थो ब्राह्मणसबन्धिसुवर्णव्यतिरिक्तद्रव्यापहारे । क्षत्रियसुवर्णापहारे च । सवि.२३०

कौटिलीयमर्थशास्त्रम्

वृद्धिपरिमाणनियमः । वृद्ध्युपरमावधिः ।

[3]सपादपणा धर्म्या मासवृद्धिः पणशतस्य । पञ्चपणा व्यावहारिकी । दशपणा कान्तारगाणाम् । विंशतिपणा सामुद्राणाम् ।

ततः परं कर्तुः कारयितुश्च पूर्वः साहसदण्डः । श्रोतृणामेकैकं प्रत्यर्धदण्डः ।

राजन्ययोगक्षेमवहे तु धनिकधारणिकयोश्चरित्रमवेक्षेत । धान्यवृद्धिः सस्यनिष्पत्तावुपार्धा, परं मूल्यकृता वर्धेत । प्रक्षेपवृद्धिरुदयादर्धम् । संनिधानसन्ना वार्षिकी देया ।

चिरप्रवासः संस्तम्भप्रविष्टो वा मूल्यद्विगुणं दद्यात् । अकृत्वा वृद्धिं साधयतो वर्धयतो वा मूल्यं वा वृद्धिमारोप्य श्रावयतो बन्धचतुर्गुणो दण्डः । तुच्छश्रावणायामभूतचतुर्गुणः । तस्य त्रिभागमादाता दद्यात्, शेषं प्रदाता ।

दीर्घसत्रव्याधिगुरुकुलोपरुद्धं बालमसारं वा नर्णमनु वर्धेत । मुच्यमानमृणमप्रतिगृह्णतो द्वादशपणो दण्डः । कारणापदेशेन निवृत्तवृद्धिकमन्यत्र तिष्ठेत् ।

मनुः

वृद्धिपरिमाणनियमः

[4]वसिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्धिनीम् ।
अशीतिभागं गृह्णीयान्मासाद्वार्धुषिकः शते ॥

(१) अशीतीति विधेयनिर्देशः । वसिष्ठविहितामित्यादिरर्थवादः । वसिष्ठो भगवान् त्रिकालज्ञो लोभादिदोषरहित इति, तां वृद्धिं गृहीतवानत एषा प्रशस्ता । धनं तया वृद्धिमुपैति । न च लोभदोषोऽस्ति । सृजेत् प्रयुञ्जीत । यदा धन (१) तदधमर्णस्य ता वृद्धिं धनप्रयोगकाले निर्दिशेत् । सर्वद्रव्येषु वस्त्रधान्यहिरण्यादिष्वेतदेव वृद्धिपरिमाण संख्येयपरिमेयादिषु । 'रसस्याष्टगुणा वृद्धिः' इत्यादिषु द्वैगुण्यापवाद इति वक्ष्यामः । ×मेधा.

(२) वसिष्ठोक्ता वृद्धिं धर्मत्वात् धनवृद्धिकरीं वृद्धिजीव्युत्पादयेत् । सा कति ? अत आह अशीतिभागमिति । शते प्रयुक्ते मासात् गतात् तस्माच्छतादशीतिभाग वृद्ध्यर्थं गृह्णीयात् । *गोरा.

(३) अशीतिभाग इति वसिष्ठविहिता वृद्धिः पणशतात्पञ्चकाक्रिण्यः । एतच्च सबन्धके, स्मृत्यन्तरदर्शनात्, अनेन न त्वेवाधाविति बन्धकावताराच्च । मवि.

(४) निष्कशते प्रयुक्ते मासस्य सपादनिष्कपरिमितां वृद्धिं वार्धुषिकवृद्ध्यर्थं धनप्रयोक्ता गृह्णीयादित्यर्थः । एतत्सबन्धकविषयम् । +स्मृच.१५५

(५) मासात् मासमतीत्येत्यर्थः । भोग्याधिविषयमेतत् । विर.७

[5]द्विकं शतं वा गृह्णीयात्सतां धर्ममनुस्मरन् ।
द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी ॥

---

* व्यप्र. स्मृचवत् ।

(१) **स्मृचि.**९. (२) **सवि.**२३०; **समु.**८१ पूर्वार्धे (स्तेये ब्रह्मस्वभूतेषु सुवर्णहरणेऽथवा). (३) **कौ.**३।११.

(४) **मस्मृ.**८।१४०; **मभा.**१२।२६ मासाद् (मास); **गौमि.**१२।२६ शते (शतः); **व्यक.**१०६; **स्मृच.**१३९

× मच. मेधागतम् । * समु. गोरावत् ।

+ पमा., विचि., व्यप्र. स्मृचगतम् ।

तृतीयपादः : १५५ उत्त.: १५८ (वसिष्ठविहितां वृद्धिमुत्सृजेद्वित्तवर्धिनीम्) पू.; **विर.**७; **पमा.**२२१ मासाद् (मासि) उत्त.; **विचि.**३; **स्मृचि.**७; **नृप्र.**१८सृ (विसृ) विवर्धि(वर्धि); **व्यप्र.**२२७; **सेतु.**३; **प्रका.**९२ उत्त.; **समु.**७९ उत्त.,८० सृजेद्वित्तविव (उत्सृजेद्वित्तव) पू.; **विव्य.**२१.

(१) **मस्मृ.**८।१४१; **व्यक.**१०६; **स्मृच.**१५५ प्रथमपादः; **विर.**८; **विचि.**४ उत्त.; **स्मृचि.**७ हि (तु); **नृप्र.**१८ उत्त.; **वीमि.**२।३९ उत्त.; **व्यप्र.**२२७ पू.; **विता.**४८१ पू.; **सेतु.**४ उत्त.; **समु.**७९ पू.; **विव्य.**२२ उत्त.

१ परमे.

(१) द्वौ वृद्धिरस्मिन् शते दीयते [1]द्विकं शतम्। पूर्वयाऽजीवतो बहुकुटुम्बस्यायं द्विकशतविधिः। [3]मास-ग्रहणमनुवर्तते। सतामित्यादिरत्रायमर्थवादः। सता धर्ममिति। एषाऽपि वृद्धिः साधूनां धर्मः। नैतया साधुत्वं हीयते। नात्यन्तमर्थपर उच्यते। तद्दर्शयति। न भवत्यर्थ-किल्बिषी। अन्यायेन परस्वग्रहणात्यापमर्थकिल्बिष, तदस्यास्तीत्यर्थकिल्बिषी। *मेधा.

(२) अबन्धके त्वाह—द्विकमिति। पणाना शता-त्पणद्वयमित्येतत् ब्राह्मणात्। अर्थकिल्बिषी परस्वग्रहण-दोषवान्। ×मवि.

(३) यत्तु मनुना विकल्पेनोक्तम्—'द्विक शतं वा' इति तद्व्यवस्थितविकल्पत्वेनैवोक्तम्। +स्मृच.१५५

(४) सबन्धकविषयमेतदुक्त पक्षद्वयं ब्राह्मणविषय नान्यवर्णविषयमिति सूचयन्नाह—द्विकमिति। नन्द.

[1]द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं समम्।
मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः॥

(१) ब्राह्मणादिवर्णक्रमेण चतुर्णां वर्णाना सकाशाद् द्विकादयश्चत्वारः कल्पा यथासंख्येन ग्राह्यतयाऽनुज्ञायन्ते। समं न पादेन वाऽधेन वाऽधिकम्। तदाधिक्येऽपि सपाद-द्विक सार्द्धद्विकमिति द्विकादिव्यपदेशस्यानिवृत्तेराशङ्का निवारणार्थं समग्रहणम्। [5]यद्यपि नात्र संख्या सख्यान्तर-व्यपदेशं निवर्तयति। इदमपि पूर्वेणाजीवतः कल्पान्तरं, यस्य वा महते धर्माय गृहारम्भो, राजा च नातिधार्मिक स्तत्रायं विधिः। येऽसाधुभ्योऽर्थमादायेति न्यायेन। समामिति पाठान्तरम्। सवत्सरं यावदेषा वृद्धिर्न परतोऽपि। महत्त्वात् द्वैगुण्यं स्यात्। —मेधा.

(२) द्विक द्वौ वृद्धिर्दीयते यस्मिन्मूलधने तथा। एवं त्रिकाद्यपि समं मात्रयाऽप्यनधिकम्। व्यक.१०७

(३) अबन्धकालग्रकप्रयोगविषयमेतत्। द्विकशत-स्थाने वर्णान्तरे त्रिकशतादिविधानात्। स्मृच.१५५

(४) ब्राह्मणादिवर्णाना क्रमेण द्विकं त्रिक चतुष्कं पञ्चक शत समं इतो नाधिकं मासस्य संबन्धिनीं वृद्धिं गृह्णीयात्। नन्वशीतिभागो लघुः, द्विकशतग्रहण गुरु, कथमिमौ ब्राह्मणस्य लघुगुरुकल्पौ विकल्पेताम्। अत्र मेधातिथिगोविन्दराजौ तु पूर्ववृद्धया निर्वाहासंभवे द्विकशतपरिग्रह इति व्याचक्षते। इद तु वदामः—सबन्ध-केष्वशीतिभागग्रहणं बन्धकरहिते तु द्विकशतवृद्धिपरि-ग्रहः। तदाह याज्ञवल्क्यः—'अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके। वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा॥ वेदान्तोद्गीतमहसो मुनेर्व्याख्यानमाद्रिये। तद्विरुद्धं स्वबुद्धया च निबद्धमधुनातनैः॥ +मभु.

वृद्ध्युपरमावधिः

[6]कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता।
धान्ये सदे लवे वाह्ये नातिक्रामति पञ्चताम्॥

(१) लाभार्थो धनप्रयोगः कुसीदम्। तत्र वृद्धिः। अथवा प्रयुज्यमान प्रयोक्तृसंबन्धि धनमेव कुसीदम्। यदाऽहं स्वल्प दत्वाऽधिक ग्रहीष्यामीति धन दीयते तत्कुसीद, तत्र वृद्धिः। सा द्विगुणत्व नातिक्रामति। तावदुत्तमर्णेन वृद्धयर्थं धनं दत्तवताऽधमर्णाद्ग्रहीतव्य, यावन्मूलधन द्विगुण प्रविष्टम्। ननु वृद्धेर्द्वैगुण्य श्रूयते। मूलेन सह त्रिगुण प्राप्नोति। नैवम्। गुणोऽवयव उच्यते। स तावदवयविनमपेक्षते। प्रकृत च धनम्। अतः

* गोरा. मेधावत्। × विर., मच , विता. मविगतम्। + शेष मविवत्। ÷ गोरा. मेधावत्पदार्थो.।

(१) **मस्मृ.**८।१४२; **मेधा.** समामिति पाठान्तरम् **व्यक.**१०७, **स्मृच.**१५५ च शतं समम् (शतमेव च); **विर** ८ ष्क च (ष्क वा); **पमा.**२२१ समम् (तथा); **विचि.**४, **स्मृचि.**७; **नृप्र.**१८ शत समम् (धन स्मृतम्), **सवि.**२२२ समम् (तथा) मनुपूर्व (मानुपूर्व्यं); **व्यप्र** २२७, **सेतु.**४; **प्रका.**९२ स्मृचवत्; **समु** ७९ स्मृचवत्, **विव्य.**२२.

१ द्विशता. २ जिव. ३ मासमनु. ४ कोऽपि. ५ यथा मात्रान्यत्वेऽपि संज्ञान्तरव्यप. ६ त्वादिकत्वाद्वै.

+ मच. ममुवद्भावः।

(१) **मस्मृ.**८।१५१, **मेधा.** हृता (हिता) अप्याहुरेति पाठान्तरम्; **मिता.**२।३९ हृता (हिता), **अप.**२।३९ मिता-वत्, **मभा.**१२।२८ मितावत्, पू, **मवि.** मितावत्; **व्यक.** ११०; **स्मृच.**१५८:१६० मितावत्, **विर.**१७; **पमा.** २२६ उत्त.:२२८ मितावत्, पू., **विचि.**११, **स्मृचि.**९ विष्णुः; **नृप्र.**१८; **सवि.**२२८ मितावत्, पू.; **चन्द्र.**१ उत्त.; **वीमि.**२।३९, **व्यप्र.**२२९ उत्त.: २३० मितावत्, पू.; **व्यउ.**७६ मितावत्, **व्यम.**७५ उत्त.: ७६ मितावत्, पू.; **विता.**४८६ उत्त.:४८८ पू.; **सेतु.**९-१० नाति (वाति); **प्रका.**९४ मितावत्; **समु.**८१ मितावत्; **विव्य.**२४.

१ मदाय.

प्रयोगविषयस्य धनस्यानेन प्रकारेण द्वैगुण्यमुक्त भवति। तथा च स्मृत्यन्तरम्—'चिरस्थाने द्वैगुण्य प्रयोगस्य' 'मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने' इति। वृद्धिश्चानेकरूपा। कार्षापणेषु प्रयुक्तेषु कार्षापण एव वर्धते। क्वचित् संततिः स्त्रीपशूनां वेति संततिः। क्वचिदाधिभोगः गोभूम्यादेः। तत्रेद द्वैगुण्यं सरूपवृद्धिविषयं केचिदाहुः। तत्र हि मुख्य वृद्धेर्द्वैगुण्य प्रतीयते, संततौ न विज्ञायते। किं सख्यायाऽस्य द्वैगुण्यमुत परिमाणेनोन्मानता वेयमतो (१) वेत्यादिनिश्चये। पशूना मूल्याद्धि महार्घत्व हस्त्यश्वादिषु क्रयविक्रयादौ दृश्यत एव। महाप्रमाणा हि महार्घा भवन्ति। ननु च संततौ सारूप्यमस्त्येव। गोः संततिर्गौरेव। तत्र भेदोपन्यासो न युक्तो वृद्धिसरूपा संततिश्चेति। उच्यते। नैकजातीयत्वमात्रेण सारूप्यं भवति। किन्तु वयःपरिमाणादिसाम्येन। अतो युक्तो भेदोपन्यासः। भोगलाभेऽपि कुतो द्वैगुण्यप्रतीतिः[३]। रूपकाणि जनयितुं गावः प्रयुज्यन्ते। गोभूम्यादिषूपयोगवसादयो यथासंभवं भुज्यन्ते। तत्र कीदृशं द्वैगुण्यम्। समाचारश्च क्वचिद्दृश्यते। वर्षशतानि भूमिरामूलहिरण्यादानाद्भुज्यते। पठति च याज्ञवल्क्यः—'आधिश्च भुज्यते तावद्यावत्तन्न प्रदीयते' इति। अत्रोच्यते। वृद्धिमात्रे श्रूयमाणे द्वैगुण्य कथ विशेषेऽवस्थाप्यते। न हि श्रुत्या सामान्यप्रतिपत्तिर्भवन्ती विना प्रमाणेन विशेषेऽवस्थातुमर्हति। यत्तु संततावनुपपन्न द्वैगुण्यमिति। अवगमे यत्नः क्रियता, मूलमर्षेण परिनिश्चितवता वृद्धिस्तत्सामान्यात् यत एव तज्ज्ञाताना भवति, भूमिभोगेऽपि यवसगोधूमादौ तत्पर्य्यमानस्यार्थतः शक्यत एव समत्व निश्चेतुम्। उपकारवचनोऽपि गुणशब्दोऽस्ति। क एव सति समगुणो भवति क उपकारको भवतीति गम्यते। अनेन यावन्मल्यं गोधान्यविनिमयादुत्पद्यते तावदेव चेत्तत उत्पन्ना वृद्धिस्तदा भवति समगुणत्वं परिमाणादिसाम्याभावेऽपि। यस्तु क्वचित्समाचारो, भवतैव परिहृतः, क्वचिद्ग्रहणं प्रयुञ्जाने समाचारभ्रंशसंभवे स्मृतयो नियामिका अर्थवत्यः। 'अक्षीणि मे दर्शनीयानि पादा मे सुकुमारतरा' इतिवत्प्रयोगाद्बहुषु बहुवचनमिति शास्त्रमारभ्यते। असति विप्रयोगदर्शने प्रत्याख्यायते। उपसर्जनोपसर्गपौर्वापर्यप्रयोगसिद्ध्यर्थमुक्तम्। न हि क त्यपचतीति प्रयोक्तव्ये पचति प्रेति प्रयुङ्क्त इ वचनमपि 'आधिस्तु भुज्यते तावद्यावत्तन्न प्रदी यावद्दानात्तद्द्विगुणमप्रविष्ट, इत्यपि शक्यते स्मृत्यन्तरैकवाक्यत्वाच्चैतदेव युक्तमध्यवसातुं, उपपा चैतन्निपुणतोऽन्यत्र। सकृदाहिता। सकृदित्यनेन व्यव पितोऽङ्गीकृतः पुनः पुनः प्रयोग इति यावत्। आधानं पनमुच्यते। वचनव्यवस्थया च निरूपणम्। स्थापन पुनः प्रयोगश्च द्विगुणीभूते धने अदीयमाने भवति यदा द्विगुणंवृद्ध्यर्थ उत्तमर्णः, अधमर्णश्च तदीयेन ध महत्कार्य करिष्यन् करणपरिवृत्तिं करोतीति, या प्रा वृद्धिरिय वाऽत्रप्रभृति वर्धत इति, तदा द्विगुणभूत पुनर्वर्धत एव। पुरुषान्तरसंचारेण वा यदि द्विगुणी धनिकस्योपयुज्यते, तदाऽधमर्ण उच्यमानोऽन्य ददतमर्षयति 'एष त इयद्धिरण्योभिर्दीयतीति' तत्र हस्तं दीयमान पुनर्वर्धते। न चाय दान प्रति प्रति किं तु निक्षेप्ता दातैव। एतत्तु ऋजुना पुरुषान्त संक्रान्तमिति व्याख्यातम्। अथवा प्रागर्पि द्वैगुण्या बन्धमन्यस्मै प्रत्यर्पयति दीनारेषु सलाभेषु द्वित्वे त बन्धस्य, एष तु धर्माक्षको बन्धस्य, प्रागुवृद्धौ स्थित तस्मादहः प्रभृति पुनर्द्वैगुण्यमाप्नोति। यदा त बन्धक तदनुज्ञयोत्तमर्णेनान्यत्राधाय स्वधनं गृह्यते वर्धते। एष पुरुषान्तरसंचारः। उभयत्र द्विगुणी प्रयोक्ताऽधमर्णकेन प्रकारेणान्यस्माद्ग्रहणमनुज्ञाप्य यदि वाऽस्मादन्यद् गृह्यते, ग्रहीता देशान्तरं गमि कार्यान्तरेण चान्यत्र सचारयति। ऋजुस्तु तस्मादेव मर्णादनधीकृते प्रयोगे द्विगुणाधिकां वृद्धिं नेच्छ अत आह पुरुषान्तरमसक्रान्ते पुनः क्रिया। प्रयो च वक्ष्यामः। ये तु व्याचक्षते। या वृद्धिरुपा सांवत्सरी युगपत्सर्वा वा दीयते तत्रायं विधिः। या प्राप्तदानाऽपि सर्वा न दीयते तत्र द्विगुणादधिकग्रहणम तेषा न शब्दो यथार्थो नाप्याहित इति। सांव तावदुपचिता ग्राह्या द्वितीयसवत्सरे पुनरानयनमस्त्ये न क्वचिद् द्वैगुण्यनियमः स्यात्। अथ यो द्विगुणी

१ गुण्य. २ दिनि. ३ तिरूप. ४ नयतु. ५ स्तु.

१ णो हि वृष्यर्थ. २ प्रति प्रतिप्रतिभू: ३ त्सर्वे वा नीत्र

लाभ धनमानयति तत्राधिकनिषेधोऽस्तु प्राग्द्वैगुण्याद् वृद्धिमात्रदानसमर्थो वृद्धि ददाति, मूल तस्यापरिमितग्रहणमिति । एतदपि न किंचित् । यः संवहति तस्यानुग्रहो न्याय्यो नाधिकग्रहणम् । यस्तु राजा द्विगुणीभूतमपि कथंचिदाप्यते तस्याधिकमोक्ष इत्येतदन्याय्यम् । न चाहितेर्यस्य शब्दस्यायमर्थः । अप्याहुतेति पाठान्तरम् । तथापि सकृच्छब्दो न निश्चितार्थो, न्यायस्तु परित्यक्तः, स्वकृतश्च पाठः स्यान्न मानवी स्मृतिरत्युक्तैव व्यवस्था न्याय्या ।

धान्यादिषु पञ्चता पञ्चगुणता नात्येति । स्मृत्यन्तरे धान्ये चतुर्गुणोक्ता 'हिरण्यवस्त्रधान्यानां वृद्धिर्द्वित्रिचतुर्गुणा' इति । तत्र व्यवस्था, यदि दरिद्रभूतः प्रयोक्ता गृहीता च महाधनसंपन्नस्तेन धान्येन महान्तमर्थं कृतवान्तदा पञ्चगुणाऽन्यथा चतुर्गुणा, सद फलं वार्क्ष, धान्यस्य पृथगुपादानात् । लव उदीच्येषूर्णाविषयः प्रसिद्धः । वाह्यो गर्दभोष्ट्रबलीवर्दादिः । मेधा.

(२) या वृद्ध्यर्थप्रयुक्तधनसंबन्धिनी वृद्धिरतिभूयस्यपि । काले गते सकृदधमर्णादानीता शनैः शनैः मासं प्रत्यब्दं वाऽसौ द्वैगुण्यं नातिक्रामति, मूलद्विगुणैव भवति न ततोऽधिका लभ्यते । धान्ये पुनर्वृद्धिप्रयुक्ते सदेव वृक्षफले लवे वा ऊर्णमये वाहनीये च बलीवर्दादौ प्रयुक्ते भूयस्यपि काले गते सकृदधमर्णादाहृता सती मूलधान्यादिना सह पञ्चगुणता नातिक्रामति । *गोरा.

(३) उपचयार्थं प्रयुक्त द्रव्य कुसीद, तस्य वृद्धिः कुसीदवृद्धिः, सा द्वैगुण्य नात्येति नातिक्रामति । यदि सकृदाहिता सकृत्प्रयुक्ता । पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे द्वैगुण्यमत्येति । सकृदाहृतेति पाठे तु शनैः शनैः प्रतिदिनं प्रतिमासं प्रतिसवत्सरं वाऽधमर्णादाहृता द्वैगुण्यमत्येतीति व्याख्येयम् । शदः क्षेत्रफलपुष्पमूलफलादि । लवो मेषोर्णाचमरीकेशादिः । वाह्यो बलीवर्दतुरगादिः । धान्यशदलववाह्यविषया वृद्धिः पञ्चगुणत्वं नातिक्रामतीति । +मिता.२।३९

(४) द्विगुणापि वृद्धिरधमर्णसंप्रतिपत्त्या मूले निवेशिता पुनर्वर्धत इति सकृद्ग्रहणात्सिध्यति । सुवर्णविषयं चैतत् । धान्यादावदत्ते तद्वृद्धिश्चिरकालमदीयमाना मूलात्पञ्चगुणत्वं नातिक्रामति । ×अप.२।३९

(५) कुसीदवृद्धिः । कुसीदपदं वाणिज्यवृद्धिव्यवच्छेदार्थम् । सकृदाहिता मुल्यग्रहणकालग्राह्या वृद्धिः । या तु प्रत्यहप्रतिमासग्राह्या वृद्धिः सा वृद्धिर्ग्रहणानन्तरं पुनः पुनराधीयत इति न सकृदाहिता । धान्य इति । लवः शराद्यस्त्रं ऊर्णेति केचित् । एतत्स्वया भोक्तव्यं,भोगनिमित्तं चैतावदेतावता कालेन वर्धत इति प्रयुङ्क्ते । +मवि.

(६) कुसीदेति । यदा ऋणिकः स्वयमेव ऋणं सवृद्धिकं पुरुषान्तरदेय करोति, यदा वा मूलीकरोति धनिको वा धनिकान्तरे त्वार्धिं कृत्वा स्वधनं गृह्णाति तदा तद्दिनमारभ्य द्वैगुण्यपर्यन्त प्रतिदानपर्यन्तं वा वर्धत इति मन्तव्यम् । एवं त्रैगुण्यादावपि सकृदाहिता वृद्धिर्नात्येति । वस्त्रादावन्यथा त्वत्येति न्यायसाम्याच्चिरस्थान एव त्रैगुण्यादौ वृध्युपरमोऽन्यथा तु वर्धत एवेत्यपि मन्तव्यम् । धान्ये इति । तत्प्रत्यर्पणसमयसमृद्धाधमर्णविषयम् । स्मृच.१६०

(७) सभवति कश्चिदेताहशो यो धान्यशतमश्वशतं वा द्विकशतमर्यादया उद्धारेण गृह्णाति, स महतापि कालेन धान्यादिपञ्चशतमेव दातुमर्हति नाधिकमिति । अत्र च धान्ये पञ्चगुणत्वमुक्त, बृहस्पतिना धान्ये चतुर्गुणत्वमुक्त, विष्णुमरीचिवसिष्ठहारीतैश्च त्रिगुणत्वमुक्तं, तदत्राधमर्णापकृष्टगुणत्वमध्यगुणत्वोत्कृष्टगुणत्वैर्व्यवस्था, महार्घसमार्घधान्यके कालदेशभेदेन वा व्यवस्था । एवमन्यत्रापि । विर.१७-१८

(८) लवो लवनीयं लोमादि आविकं विहाय । *विचि.१२

(९) षाड्गुण्यनिषेधपरमिति मदनरत्ने । *व्यप्र.२२९

अकृतवृद्धिग्रहणमर्यादा

कृतानुसारादधिका व्यतिरिक्ता न सिध्यति ।
कुसीदपथमाहुस्तं पञ्चकं शतमर्हति ॥

---

* मच. गोरागतम् । ममु.बाचार्यार्थः गोरागतः मितागतश्च ।
+ पमा., सवि., व्यम., नन्द. मितागतम् ।
१ व्यरत्न.

× विता. अपगतम् । + माच. मविगतम् ।
* शेषं मितागतम् । सेतु. विचिवत् ।

(१) मस्मृ.८।१५२; व्यक.१०८; स्मृच.१५६:१५८ पू.; विर.१४ व्यति (अति); सवि.२२५ पथ (पद); व्यप्र.२३१; प्रका.९३; समु.८०.

(१) अनुसरन्त्यनुधावन्त्यनुवर्तन्ते सर्व एवार्था एत-त्यनुसारः। शास्त्रोदितः समाचारः। स च विविधो-शीतिभागादिः पञ्चकशतपर्यन्तस्तस्मादधिका वृद्धिः ता यावत्तथाऽधमर्णेनोत्तमर्णस्य न सिध्यति, कुतो तिरिक्ता, यतः शास्त्रबाह्येत्यर्थः।

अर्थवादान्तरमाह। कुसीदपथमाहुस्तमिति। कु-रुषा यत्र सीदन्ति कुसीद, धर्मेण तद्धनिनो लक्ष्यन्ते। सीदिनामयं पन्था मार्गो व्यवहारो न साधूनामिति न्दा यस्यावश्यमधिका कर्तव्या महद्धि कार्यमयं दीयेन धनेन साधयतीति बुद्ध्या। तदा वर्णविभाग-नपेक्ष्य पञ्चकं शतं ग्रहीतुमर्हति। लिप्सेदर्थम्। दमुच्यते पाठान्तरं 'कृतानुसारादधिकेति'। यस्या-कचनस्य सतः स्वल्पा कृता, तेनैव धनेनान्यथा वा हार्थता प्राप्तस्तस्यानुसारादधिका क्रियमाणा न ध्यति, यः परं पञ्चकशतमर्हति। मेधा.

(२) ग्रहीतृनृगतमर्थितावविशेषमुत्तमर्णेन विज्ञाय क्तवृद्धेरधिका वृद्धिः कृता सती यतः शास्त्रबाह्या, ा च नो सिध्यति। प्रतिषिद्धवृद्धिमार्ग कलैनं शिष्टाः हुः। यदपरं शूद्रविषये यदुक्तं पञ्चकं शत तदसावुत्त-मर्णो द्विजातेरादातुमर्हति। शूद्रविट्क्षत्रियद्विजातेरप्या-तुमर्हति। गोरा.

(३) कृतानुसारात् तदनुसारात् अधिका शास्त्रीय-वेऽपि न सिध्यति। एवमशीतिभागाधिकवृद्धिनियमेन णं गृह्यते तदाऽशीतिभागादिः शास्त्रीया। आर्ततया दधिकं शतात्पञ्चकग्रहणं शूद्र उक्तं तच्चतुर्षु वर्णेषु ाह्यम्। न तु ततो व्यतिरिक्ता विशेषेणातिरिक्ता कृतत्व-मात्रेण सिध्यति। एतच्च कुसीदपथ वृद्धिजीविवर्त्माहुः। मत्रैव वृद्धिकृतो दोष इत्यर्थः। *मवि.

(४) कुसीदपथमाहुरिति उच्छास्त्रवृद्धिं निन्दयति। ास्त्रकृतवृध्यनुसारो हि यो वृद्धिग्रहणे लौकिकाना समया-चारः स कृतानुसारः। तस्मादधिका वृद्धिरुत्तमर्णादे-कृतवृद्धौ न सिध्यति। यतः सा व्यतिरिक्ता धर्मशास्त्र-बाह्येत्यर्थः। अत एव कुसीदपथमाहुस्तं न धर्मपथं इति निन्दाऽप्युपपन्ना। 'पञ्चकं शतमर्हति' इति सामान्येनोक्तं तत्प्रतियाचितप्रीतिदत्तादिविषय मन्तव्यम्। +स्मृच.१५६

(५) कृता या वृद्धिर्द्विकं त्रिकमिति शास्त्रेण वर्णक्रमे-णोक्ता तस्याः शास्त्रानुसारादधिका व्यतिरिक्ताऽकृता। अतोऽन्या वृद्धिरकृतेत्यर्थः। किं तु कृताऽपि वृद्धिर्वर्णक्रमेण द्विकत्रिकशतादिरूपैर्या मासे ग्राह्या। तथा च विष्णुः— 'वृद्धि दद्युरकृतामपि वत्सरातिक्रमे यथाभिहिता वर्ण-क्रमेण' द्विकत्रिकादिनेत्यर्थः। किं त्वकृतवृद्धावपि विशे-षान्तरमाह। कुत्सितात्प्रसरत्यय पन्था इति कुसीदपथः अयमुत्तमर्णो यच्छूद्रविषयोक्त पञ्चक शत द्विजातेरपि गृह्णातीत्येवं कुत्सितपन्थाः पूर्वोक्ताद्धर्म्यवृद्धिकरादपकृष्ट इत्येव मन्वादय आहुः। इय चाऽकृता वृद्धिरुद्धारविषये याचनादूर्ध्वं बोद्धव्या। तदाह कात्यायनः— 'प्रीति-दत्त न वर्धेत यावन्न प्रतियाचितम्। याच्यमानं न दत्तं चेद्वर्धते पञ्चकं शतम्'॥ मनु.

(६) पूर्वोक्तशास्त्रानुसारात् द्विकशतादिरूपादधिका अधमर्णेनाकृता वृद्धिर्न सिध्यति, यतः कुसीदपथमाहु-स्तम्। यदा तु व्यवहारावष्टम्भात् उत्तमर्णोऽधिकम-धमर्णेनाकारितं लाभमिच्छति तदा ब्राह्मणे पञ्चकं शतं ग्रहीतुमर्हति, न ततोऽधिकमधमर्णाकारितम्। विर.१४

(७) लोकेन कृतानुसारात् परिमाणादधिका शास्त्रो-क्तादधिका च कुसीदवृद्धिरुभयानुमतेत्येतावता न सिध्यति। तथा हि यत् पञ्चकं शतमर्हति तदेव कुसीद-मर्हतीति तथाहुराचार्याः। नन्द.

(८) अनुसारात् कृतवृद्धयनुसारात् कृता वृद्धिः अधिका व्यतिरिक्ता पञ्चकोत्तरशतातिरिक्ता न सिध्यति। भाच.

वृद्धिग्रहणनिषेधः

नातिसांवत्सरीं वृद्धिं न चादृष्टां विनिर्हरेत्।
चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या॥

(१) संवत्सरे भवा सावत्सरी। ता अतिक्रान्ता अति-

* मच. मविगतं ममुगत च।

+ व्यप्र. स्मृचगत विरगतं च।

(१) **मस्मृ.**८।१५३ विनि (पुन); **मेधा.** चादृ (चादि); **मवि.** मेधावत्; **व्यक.**१०७ दृष्टा विनि (दिष्टां पुन); **स्मृच.** १५७; **विर.**९ व्यकवत्; **विचि.**७ ष्टां विनि (ष्टं पुन) च या (तथा) गौतम.; **सवि.**२२९ पू.; **मच. व्यकवत्; प्रका.**

सावत्सरी । भवप्रत्ययार्थः सामर्थ्यादन्तर्भूतः । अथवा संवत्सरमतिक्रान्ता अतिसंवत्सरेति प्राप्ते वृद्धीकारौ छन्दस्तुल्यत्वात्कर्तव्यौ । येषा वृद्धिरनन्तरप्रक्रान्तपञ्चक शतं सर्षवर्णविषया सा सवत्सर यावद्ग्रहीतव्या । नातीते संवत्सरे । अथवा यावत् सवत्सरम् । सवत्सरो वर्षः तावद्वृद्धिर्न मार्गणीया । अधमर्णेनापि सवत्सरादूर्ध्वं न विलम्बितव्यम् । विनिर्हरेद्विनिष्कृष्य स्वधनादारभ्योपनयेदित्यर्थः । अर्वागपि संवत्सराद्या दीयते साऽप्यतिक्रान्तसवत्सरैव । अथवा मासादारभ्य सवत्सरस्य यावद्वृद्धिः परिमाणतो निरूपितव्या । मासेन यद्वर्धते सवत्सरेण वेत्येव प्रयोगः कर्तव्यो, न तु सवत्सरद्वयस्य, लाभार्थी कदाचिच्चिरकाल ग्राहयति कि मे कतिपयाः, मासिकेन लाभेन यदि द्वे वर्षे ततोऽधिक वा गृह्णासि, तद्ग्रहणे एषा वेयता कालेन वृद्धिस्तत्रार्वाचीनमपि ददद्धमर्णं द्विसावत्सरी यथाकालकृता तदा दाप्येत 'एका वृद्धिमनादेया न दद्यान्नापि दापयेत्' इति । यथा मासिकी वृद्धिः प्रथमे मासि द्वितीय एवाह्नि शोधयन्दाप्यते, तथा यदैवमभ्युपैति सवत्सरेण यद्वर्धत इति, तदा तथैव दाप्यते न तु तदधिककालकृता । न चाद्दष्टा विनिर्हरेत् । शास्त्रे या न दृष्टा दशैकादशिकाद्या पञ्चकादधिका न ता गृह्णीयात् । 'व्यतिरिक्ता न सिध्यति' इत्यस्यैवायमनुवाद इति केचित् । इद तु युक्तम् । अदृष्टामनुपचितामित्यर्थः । यावद्बहुभिर्मासैर्न संहर्तीभूता तावन्न ग्राह्या दिवसवृद्धिर्मासवृद्धिः ।

ननु च 'मासस्य वृद्धि गृह्णीयात्' इत्युक्तम् । परिमाण मासिक तद्वृद्धेर्न तु ग्रहणम् । 'चक्रवृद्धिः कालवृद्धिः कारिका कायिका च या' तामपि न विनिर्हरेदित्यनुषङ्गः । नैवं दद्याद्यर्ध्येधमर्णस्य प्रतिषेधस्तथापि सामर्थ्यादुत्तमर्णस्यैव द्रष्टव्यः, अधमर्णो ह्यार्तः कि न करोति । अथवा विनिर्हारो ग्रहणमेव । तेनोत्तमर्णस्यैव शाब्दः प्रतिषेधः ।

ननु च द्विकादिवृद्धिविधानाच्चक्रवृद्ध्यादीनां प्राप्तिरेव नास्ति । कि प्रतिषेधानुषङ्गेण ? उच्यते । अप्राप्तः प्रतिषेधः पाक्षिकीं वृद्धिमनुमापयति । यथा आधाने न ब्रह्मसामाभिगायेदित्यविहित सामगान प्रतिषेधेनास्तीति ज्ञापयति । तेनैता अपि प्रतिषेधद्वारेणाभ्यनुज्ञायन्ते । केषाचिद्दूरव्यवहारिणा चक्रवृद्ध्यादयोऽपि भवन्ति । ते च स्थलपथवारिपथिका वणिजः । यथोक्तम्—'कान्तारगास्तु दशक सामुद्रा विशक शतम् । दद्युर्वा स्वकृतां वृद्धि सर्वे सर्वासु जातिषु' इति (यास्मृ.२।३८) । कान्तारगादीनामेव स्वकृता सर्वजातिविषयासाधारणी वृद्धिर्न त्वन्येषाम् । तत्र चक्रवृद्धिः स्मृत्यन्तरे पठिता 'वृद्धेर्वृद्धिश्चक्रवृद्धिः' । अन्ये तु चक्रवद्यानगन्त्र्यादिमतां तद्वृद्धिश्चक्रवृद्धिः । तेषा यस्मिन्नहनि चक्र वर्तते तत्रैव वृद्धिः । यदा तु नदीसतारे दुर्दिनादिना अप्रयाणं, तदा नास्ति वृद्धिः । एवमन्येषामपि बलीवर्दादिवाह्यप्रयोक्तृणामीदृशी वृद्धिश्चक्रवृद्धिरुच्यते । कालवृद्धिः 'प्रतिमास तु कालिका' । मासग्रहणमुपलक्षणार्थम् । याऽनुपचिता वृद्धिर्दिवसे गृह्यते मासि मासि वा यस्याः कालो न प्रतीक्ष्यते, अथ चैतस्मिन्काले यदि न ददासि तदा द्विगुणीभवति धनमित्येकरूपा कालवृद्धिः । कारिता । इत्थंकृता यावती वा परस्परंगेपकारापेक्षयोत्तमर्णाधमर्णौ कुरुतः एषाऽपि दिग्भागवणिजामेव । अन्येषा तु 'व्यतिरिक्ता न सिध्यति' इत्युक्तम् । 'पञ्चक शतमर्हतीति' । अथवा हिरण्ये प्रयुक्ते वासासि वृद्ध्या गृह्यन्ते, तत्राधिलक्षण द्रव्यं, सा कारिता, यथाभोगलाभे न्यासरूपविषये च स्यात् । कायिका कायकर्मणा संशोध्या । कायजीविका च एषा क्रमेलकादिजीविनाम् । मेधा.

(२) यदि द्वयोर्वा त्रयाणा वर्षाणा रूपकान् न गृह्णाति ततो ददाति । या तु संवत्सरमतिक्रान्ता वृद्धिस्ता न गृह्णीयात् । अदृष्टा चानुपचितामसंहतीभूतामेकद्विपञ्चाहादिजाता न गृह्णीयात् । चक्रवत् गन्त्र्यादियानप्रयोगे सति या वृद्धिः सा चक्रवृद्धिः । सा पूर्वोक्तवृद्धेरधिकाऽपि स्यादित्येवं नानुज्ञाता । सा चार्यस्याभिमता प्रथमानिर्देशान्न विनिर्हरेदित्येतत्संबन्धाभावाच्चक्रवृद्धि समारूढ इति च वक्ष्यमाणत्वात्, अत एव चेह वृद्धेर्वृद्धिश्चक्रवृद्धिरित्येवमादिका चक्रवृद्धिशब्देनोच्यते । अपि तु गन्त्र्याश्रिता वा कालिका 'प्रतिमासं तु कालि-

९३; समु.८०; भाच. दृष्टा विनि (भीष्टा पुन); विष्ण.२३ दृष्टां विनि (दिष्ट पुन) च या (तथा) गौतमः.

१ नैवा. २ स्याध.

१ चिदूनव्य. २ न. ३ षां क्रमेण काचैवाधिकादीनाम् ।

केति' स्मरणान्मासि ग्राह्या । कारितेच्छाकृता परस्परापेक्षया वणिक्प्रभृतीनां स्यादन्येषा पुनः कृतानुसारादधिकेत्युक्तम् । कायिका कायकर्मसंख्या वाच्या स्यात् । गोरा.

(३) अथ व्यवहारसिद्धा अप्यधर्महेतुत्वाऽकर्तव्या वृद्धिराह–नातिसांवत्सरीमिति । अतिसांवत्सरीं संवत्सरमात्रेणातिक्रान्तामतिशयिता द्विगुणतां गताम् । तथा नादृष्टा साहत्येन दर्शनायोग्या प्रत्यहग्राह्या विनिर्हरेत् गृह्णीयात् । तथा चक्रवृद्धिः वृद्धेरपि वृद्धिस्ता न गृह्णीयात् । कालवृद्धिः प्रतिमासं प्रदेया । कारिता द्विगुणादूर्ध्वं वृद्धिरशास्त्रीयत्वेऽपि तदूर्ध्वमपि मूल्य वर्धत इति ऋणिकेनार्थितया कृता । कायिका यावन्न मूलमर्घ्यते तावत्कायेन कलार्थ कार्यमिति । केचित्तु प्रथमान्तत्वादस्य पूर्वेणानन्वयात्कर्तव्यमित्यस्यार्थस्यार्थ इत्याहुः । तत्तुच्छम् । यच्छब्देन येति पूर्वप्रकान्तप्रक्रियानुकर्षार्थेन त्वपास्तम् । मवि.

(४) अत्राद्यपादार्थं केचिदेवमाहुः । आ द्वैगुण्याद्वृद्धिग्रहणविधानादत्सरादूर्ध्वमपि वृद्धिग्रहणे दोषाभावादभ्युदयार्थां चेत्संवत्सरादूर्ध्वं या वृद्धिस्ता न विनिर्हरेत् न गृह्णीयादिति । अय तावद् ग्राह्यः विरोधाभावात् । अन्ये तु संवत्सराधिका वृद्धि न गृह्णीयात् । यदि वृद्धिमहत्त्वेन तावदेव द्वैगुण्य भवेदित्यध्याहृत्यार्थमाहुः । ते मन्दाः । 'कुसीदवृद्धिर्द्वैगुण्य नात्येति' इत्यनेन फलतो गतार्थत्वापत्तेः । वत्सरमात्रेण द्वैगुण्यापादकवृद्धिमहत्त्वस्यानिषिद्धस्यानुपपत्तेश्च ।

अपरे पुनरेव व्याचक्षते । शूद्राधमर्णे प्रतिमासं पञ्चक शत गृह्णीयादिति या वृद्धिः प्रागुक्ता सा ब्राह्मणाद्यधमर्णके कथंचिदङ्गीकारवशाद्गृह्यमाणा संवत्सरं यावद् ग्रहीतव्या । न ततः परमिति । अयमर्थोऽस्तु प्राक्तनार्थवत् बहुदोषाभावात् । 'न चादृष्टां विनिर्हरेत्' इत्यस्यायमर्थः । धर्मशास्त्रेष्वदृष्टा च षट्क शतमित्येवभूता स्वबुद्धिकल्पिता वृद्धि न गृह्णीयात् इत्यर्थः । ननु 'कृतानुसारादधिका व्यतिरिक्ता न सिध्यति' (मस्मृ.८।१५२) इत्यनेन गतार्थमिद वाक्यमेवं व्याख्यायमाने स्यात् । अस्तु व्यर्थोऽनुवादः । गत्यन्तराभावादिति केचिदाचक्षते । दाढर्यार्थमुक्तस्यैव पुनरभिधानमित्यन्ये मन्यन्ते । वस्तुतस्त्वनेन निषेधे कृतेऽप्यकृतवृद्धौ वृद्धिसंप्रतिपत्त्यभावात् शास्त्रोक्तैव वृद्धिः सिध्यति । नान्या संप्रतिपत्तिमात्रलभ्या वृद्धिरिति कथनार्थं तद्वचनमित्यगतार्थतैव । न विनिर्हरेदिति पदद्वयमुत्तरार्धपदैरनुषङ्गात्संबध्यते । ततश्चायमर्थः । या चक्रवृद्ध्यादिभेदेन चतुर्विधा वृद्धिस्ता न गृह्णीयादिति । एतदुक्त भवति । चक्रवृद्ध्यादयः स्वरसतो न ग्राह्या इति ।

नन्वशीतिभागादिवृद्धिरपि प्रतिमासं ग्राह्या कालिका भवति । सा च स्वरसतो गाह्या । तथाऽनतिभूरिपरिमाणा कारिताऽपि स्वरसतो ग्राह्यैव । तथा कायिकाऽप्यतिपीडारहिता । तेन तासा कथं प्रतिषेधः । उच्यते । न चोक्तस्तासा प्रतिषेधः । कासां तर्हि प्रतिषेधः ? उच्यते । यथा 'पञ्चमाप्यास्तु विंशत्या एवं धर्मो न हीयते' इति वसिष्ठवचनविहिता वृद्धिः । 'वसिष्ठविहिता वृद्धिमुत्सृजेद्वित्तवर्धिनीम्' इति मानववचनानन्तरे प्रतिषेध्यते । एव 'कुसीदवृद्धिर्धर्म्या विंशतिः पञ्चमापिकी मासम्' (गौध. १२।२६) इति गौतमेन विहिता कालिकाऽत्र प्रतिषिध्यते । कायिकाऽप्यतिपीडावती । तेन न कश्चिद्दोषः ।

ननु गौतमोक्तकालिका धर्म्यत्वेन विहिता कथ प्रतिषिध्यते । उच्यते । यथा 'एवं धर्मो न हीयते' इति धर्म्यत्वेनापि वसिष्ठविहिता प्रतिषिद्धा तथैव प्रतिषिध्यते । अत्यर्थाधिकपरिमाणत्वेनाधर्म्यत्वं चोक्तं मनुना 'वित्तवर्धिनीम्' इति वदता । कथं तर्हि वसिष्ठगौतमयोर्धर्म्यत्वेनाभिधानम् । पञ्चकशतवच्छूद्राधमर्णविषयत्वेनेति ब्रूमः । एवं च शूद्रेतराधमर्णविषयत्वेऽधर्म्यत्वात्तत्रैव कथंचिदङ्गीकारवशात्प्राप्ता मनुना प्रतिषिद्धेति मन्तव्यम् ।

केचित्तु त्रैवर्णिकेष्वपि धर्म्यत्वमापादयितुं गौतमादिवचनमेव व्याचक्षते । 'माषो विंशतितमो भागः पणस्य परिकीर्तितः' इति स्मृत्युक्तो मापः कार्षापणस्य विंशतितमो भागः पञ्चमापिकीत्यत्र परिगृह्यते । तथा च सति कार्षापणविंशतेः प्रयुक्तायाः पञ्चमापिकी वृद्धिरशीतिभागवृद्धिरेव नामान्तरेणेति नास्त्यधर्म्यत्वाशङ्केति ।

अन्ये पुनरन्यथा व्याचक्षते । 'पञ्चकृष्णलको माष' इति प्रसिद्धो माषोऽत्रापि मापशब्दार्थो भवतु । तथापि सुवर्णविंशतेः प्रयुक्तायाः पञ्चमापिकी वृद्धिरशीतिभागवृद्धेरीषदधिकेति कुतोऽस्या वृद्धेरधर्म्यतेति व्याख्याद्वय-

मप्ययुक्तम् । वसिष्ठवचने तावदुभयथाव्याख्यानेऽपि 'वसिष्ठविहिता' इत्यादिमनुवचनविरोधो दुर्वारः । धर्म्यत्वे 'वित्तवर्धिनीमुत्सृजेत्' इत्यस्याघटनात् । गौतमवचने त्वेवं षोडशमासैर्द्विगुणा भवतीति स्ववाक्यशेषविरोधो दुष्परिहरः । तथा हि प्रथमव्याख्यातृणा व्याख्याने षोडशमासैः कार्षापणचतुष्कं भवति। द्वितीयव्याख्यातृणां तु सुवर्णपञ्चकं भवति । तस्माद्व्याख्याद्वयमप्यसंबद्धम् । मत्पक्षे पुनर्वाक्यशेषाविरोधः । व्यावहारिकनिष्कविंशतेः प्रसिद्धमाषपञ्चककृद्धौ षोडशमासैर्द्विगुण्यसिद्धेः । किन्तु धर्म्यत्वविरोधः । स चास्माभिः परिहृतः । तेन न चोद्यावकाशः । यत एव स्वरसतो न ग्राह्या इति प्रतिषेधः । न पुनः सर्वथा न ग्राह्या इति । *स्मृच.१५८-१५९

(५) ममैकस्मिन्मासि मासद्वये मासत्रये वा गते तस्य वृद्धिं विगणय्यैकदा दातव्येत्येवविधनियमपूर्वकवृद्धिग्रहणमुत्तमर्णः संवत्सरपर्यन्तं कुर्यात् । नातिक्रान्ते संवत्सरे नियमस्य वृद्धि गृह्णीयात् ! न च शास्त्राददृष्टामुक्तधर्म्यद्विकत्रिकशताद्यधिकां गृह्णीयात् । अधर्मत्वबोधनार्थो निषेधः । चक्रवृद्ध्यादिचतुष्टयी चाशास्त्रीया न गृह्णीयात् । तत्र चक्रवृद्धिः स्वरूपेणैव गर्हिता । कालवृद्धिस्तु द्विगुणाधिकग्रहणेन, कायिका चातिवाहदोहादिना, कारिता ऋणिकेन याऽनापत्काल एवोत्तमर्णपीडया कृता । चतस्रोऽपि वृद्धीरशास्त्रीया न गृह्णीयात् । +ममु.

(६) संवत्सरमतिक्रान्ता अतिसांवत्सरी । यद्युत्तमर्णः स्वल्पैरेव दिवसैरधमर्णकर्तृकं धनदानमाशङ्क्य वृद्धिं नियमयेत्, तदा संवत्सरपर्यन्तमेव, न तु तदधिकदिनवृद्धिमपीत्यर्थः । हलायुधस्तु यदाऽशान्तलाभे ऋणे लाभग्रहणवासनावानुत्तमर्णः स्यात्, तदा सवत्सरादर्वागेव लाभं गृह्णीयात्, न तु संवत्सरादूर्ध्वमित्याह । न चादिष्टा पुनर्हरेदिति न शास्त्रानुक्तप्रकारेण वृद्धिं हरेत् । चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या वृद्धिस्ता शास्त्रानुक्तप्रकारेण न हरेदित्यर्थः । विर.९

(७) कारिता द्विगुणेन मूल्यमिति कारिता । भाच.

* सवि. स्मृचगतम् । + मच. ममुगतम् ।

चक्रवृद्धिं समारूढो देशकालव्यवस्थितः ।
अतिक्रामन्देशकालौ न तत्फलमवाप्नुयात् ×॥

(१) वाराणसीं यास्यामि त्वदीया युग्या मे भाण्डं च नेतुरेषा च ते वृद्धिरिति । तत्र यदि कान्तारनदीसंतरणराष्ट्रोपप्लवादिना तं देशं न गतस्ततोऽर्वाग्देशाल्कियता लाभेन प्रवृत्त्या व्यावृत्तस्तदा यथानिरूपिता वृद्धिर्न दाप्यते । यतस्तं देशं यावद्वहता या वृद्धिरप्राप्ताना सा कथं स्यात् ? दीर्घमध्वानं वहता युग्यानां महाक्लेशः स्वामिनश्च तावन्तं कालं कृतैव वृद्धिर्युग्योपकारः । शीघ्रं तु प्रतिनिवृत्ताना स्वामिनः पुनरन्यत्रोपकारणं संपद्यत एव । एष एवातिक्रमः । एवं कालातिक्रमो मासं मे वहन्तु बलीवर्दाः इयती तव वृद्धिरिति, तत्र यदि पक्षात्ययेति । तत्र चक्रवृद्धिमधमर्णः समारूढः प्रतिपन्नोऽङ्गीकृतवानिति यावत्, तस्या वृद्धौ देशकालौ व्यवस्थितौ यत्तया पूर्वोक्तेन प्रकारेण देशविशेषं कालविशेष वा आस्थितवान्, न निर्विशेषणमेव कृतवान्, स एवविधोऽधमर्णस्तौ देशकालौ अतिक्रामन् न प्राप्नुयात्तत्फलं वृद्ध्याख्य नाप्नुयान्न भजेत् न दद्यादित्यर्थः । मेधा.

(२) यदि चक्रवृद्धिः कार्या तदा मयात्र देशेऽत्र काले शोधनीयेति यत्र व्यवस्था कृता सा यदि ततोऽन्यत्रान्यदा च याचते तदा चक्रवृद्धिर्न लभ्यते अपि तु अशीति भागादिर्धर्म्यैवेत्यर्थः । तत्फलं चक्रवृद्धिलाभम् । +मवि.

(३) अतिक्रामन् देशकालौ यदि परिभाषितं देशं कालं वाऽतिक्रामति न सनिहितस्तत्र भवति ततः स्वदोषान्न तत्फलमवाप्नुयात् न तां वृद्धिं लभत इत्यर्थः । फलप्रतिषेधान्मूलं लभते । यथोक्तप्रतिषेधादन्यां वृद्धिं लभेतेति गम्यते । स्मृच.१५९

× गोरा व्याख्यान अशुद्धिसदेहान्नोध्दृतम् ।

+ नन्द. मविवद्भावः ।

(१) **मस्मृ**.८।१५६; **व्यक**.१२६; **स्मृच**.१५९; **विर**.७३; **व्यप्र**.२६०; **सेतु**.१२; **प्रका**.९३; **समु**.८०; **भाच**. चतुर्थे पादे 'धनं धनिक आप्नुयात्' इति पाठः व्याख्यानात् प्रतीयते.

१ तदीयं पुण्यं मे. २ हेतु. ३ (आस्थितवान्०)

(४) चक्रवृद्धिशब्देनात्र चक्रवच्छकटादिभाररूपा वृद्धिरभिमता । चक्रवृद्धिमाश्रित उत्तमर्णो देशकालव्यवस्थितो यदि बाराणसीपर्यन्तं लवणादि शकटेन वहामि तदा ममेद यद्धन दातव्यमिति वेतनरूपदेशव्यवस्थितिः। यदि मासं यावद्वहामि तदा मासं यद्धनं दातव्यमिति कालव्यवस्थितिः । एवमभ्युपगतदेशकालनियमस्थौ देशकालौ दैवादपूरयन् शकटादिनाऽवहन् लाभरूपफलं सकलं न प्राप्नोति । +ममु.

(५) देशकालव्यवस्थितः चक्रवृद्धि समारूढः, अमुकदेशे अमुककाले वा द्विगुण धन मया ग्राह्यमिति व्यवस्थापितचक्रवृद्धिः, स यदि तद्देशकालातिक्रमेण चक्रवृद्ध्या धनमर्थयते, तदा न चक्रवृद्धिमद्धन लभते इत्यर्थः । विर.७३

(६) देशकालव्यवस्थितः अस्मिन् देशे अस्मिन् काले स्थितः सन् चक्रवृद्धि समारूढः दातुमुद्यतः अधमर्णः। देशकालौ अतिक्रामन् त कालं तं देश अतिक्रामन् ग्रहीतु नायाति मर्यादानन्तरं धन धनिक आप्नुयात् । भाच.

वृद्धिविशेषस्थापकाः

समुद्रयानकुशला देशकालार्थदर्शिनः ।
स्थापयन्ति च यां वृद्धिं सा तत्राधिगमं प्रति ॥

(१) किं तत्र नैवास्ति वृद्धिरथवा पञ्चक शत नेत्याह—समुद्रयानकुशला इत्यादि । समुद्रयानग्रहण यात्रोपलक्षणार्थम् । स्थलपथिका वारिपथिकाश्च वणिजो या वृद्धिं स्थापयन्ति सा तत्राधिगम प्रति निश्चय प्रति । सैव निश्चेतव्येत्यर्थः । देशकालार्थदर्शिनोऽस्मिन्प्रदेश इयानर्थलाभोऽस्मिनियानिति ये पश्यन्ति जानते। न तु समुद्रयान एव च ये कुशलाः कर्णधारादयः ।

अन्ये पूर्वश्लोकमेव व्याचक्षते यद्दच्छाध्याहारेण । अधमर्णेन या देशकाल चाश्रिता तां च प्राप्य तद्देशोदितं फलं लाभाख्यमन्यस्मादेशाद्यदि नाप्नुयात्तदा कीदृशी तत्र वृद्धिरित्याकाङ्क्षायामुत्तरश्लोकः। चक्रवृद्धिग्रहणं कारिताया अपि प्रदर्शनार्थम् । लोभातिशयभाजा वणिजा क्षयव्ययायसविधिज्ञाः परस्परस्य यां वृद्धिं स्थापयेयुस्ता राजा प्रमाणीकुर्यात् । तत्राधिगमं प्रतीति । प्रतिः कर्मप्रवचनीयोऽधिगमस्य लक्षणत्वाल्लक्षणेत्थंभूताख्याने तद्युक्ते च द्वितीया । ×मेधा.

(२) वार्यध्वयानकुशला अस्मिन् देशे कालेऽस्मिन्नर्थे हिरण्यादिक ऊह्यमाने अयं लाभ इत्येवमादिवेदिनो वणिक्प्रभृतयो या वृद्धिं तथाविधविषये निरूपयन्ति सा तत्र निश्चयार्थं विज्ञेया । गोरा.

(३) समुद्रयानकुशला इति वणिङ्मात्रोपलक्षणम् । व्यक.१०८

(४) दुर्गो देशः कालश्चाल्पोऽर्थस्तल्लभ्यो बहुरिति जानन्तः समुद्रयानकुशलाः । वर्त्मनो दुर्गत्वेन मूलनाशस्यापि संभवात् । यामिति बहुलामपि वृद्धिं कुर्वन्ति, साधिगमं प्रति अधिगम लाभं प्रति, ऋणिकेन वाणिज्यफले प्राप्ते एव देया नान्यथा । अत्राधिकवृद्धिग्रहणं समुद्रादौ प्रायिकीं विपत्तिमनुसधायेत्यतः समुद्रयायिनां दैवाल्लाभाभावे वृद्धेरप्यदानमित्यर्थः । समुद्रेति चैवंविधाकारादेरप्युपलक्षणम् । मवि.

(५) स्थलपथजलपथयाने निपुणा इयदेशपर्यन्तमियत्कालपर्यन्तमूह्यमाने सति एतावॉल्लाभो ग्रहीतु युक्त इत्येव देशलाभधनज्ञा वणिगादयो या वृद्धिं तथाविषये चावस्थापयन्ति सैव तत्र व्यवस्था तत्राधिगमं धनप्राप्ति प्रति प्रमाणम् । *ममु.

याज्ञवल्क्यः

धर्म्या वृद्धिः कृतवृद्धिश्च

अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके ।
वर्णक्रमाच्छतं द्विचतुःपञ्चकमन्यथा ॥

(१) एव तावत् सामान्येन न्यायस्वरूपमभिधायेदानीमृणादानादिव्यवहारस्थानक्रमेण विशेषतः प्रस्तौति।

+ मेधावद्भावः । मच. ममुगतम् ।

× विर. मेधागत व्यकगत च । * मच. ममुगतम् ।

(१) **यास्मृ.**२।३७; **अपु.**२५३।६३; **विश्व.**२।३९; **मिता.**; **अप.**; **व्यक.**१०६-१०७; **गौमि.**१२।२६; **स्मृच.** १५५; **ममु.**८।१४२; **विर.**७; **पमा.**२२१; **सुबो.**२।२५४ च्छतं (च्छुत); **विचि.**३ पू.; **स्मृचि.**७; **नृप्र.**१८; **सवि.**२२१ क्रमाच्छत द्विचि (क्रमाच्च तद्वत् त्रि); **मच.**८।१४२:८।४१० पू.; **वीमि.**; **व्यप्र.**२२७; **व्यउ.**७४; **व्यम.**७५; **विता** ४८०; **सेतु.**३ पू.; **प्रका.**९२; **समु.**७९; **विव्य.**२१ पू.

तद्वाच्यता मन्वादिभिर्ऋणादानस्योक्ता। अतस्तदेव तावदुच्यते— अशीतिभाग इत्यादि। यद्यप्यविशेषेणाशीतिभागोऽभिहितः, तथापि ब्राह्मणस्यैवायम्। अन्येषां तु पादवृद्ध्या वृद्धिकल्पनम्। तथा च बृहस्पतिः—'पादोपचयात् क्रमेणेतरेषाम्' इति। अन्यथा तु बन्धकरहिते द्विकत्रिकत्व वृद्धेरित्यभिप्रायः। यच्चैतद्वृद्धिपरिमाणमुक्तं अत ऊर्ध्वं न गृह्णीयात्। न त्ववाग् ग्रहणे विरोधः। विश्व.२।३९

(२) साधारणासाधारणरूपा व्यवहारमातृकामभिधायाधुना अष्टादशानां व्यवहारपदानामाद्य ऋणादानपद दर्शयति— 'अशीतिभागो वृद्धिः स्यात्' इत्यादिना, 'मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने' इत्येवमन्तेन। तत्र प्रथममुत्तमर्णस्य दानविधिमाह, तत्पूर्वकत्वादितरेषा 'अशीतिभागो वृद्धिः स्यात्' इत्यादि। मासि मासि प्रतिमासम्। बन्धक विश्वासार्थं यदाधीयते आधिरिति यावत्। बन्धकेन सह वर्तते इति सबन्धकः प्रयोगस्तस्मिन्सबन्धके प्रयोगे प्रयुक्तस्य द्रव्यस्य अशीतितमो भागो वृद्धिर्धर्म्या भवति। अन्यथा बन्धकरहिते प्रयोगे, वर्णानां ब्राह्मणादीनां, क्रमेण द्वित्रिचतुःपञ्चक शतं धर्म्यं भवति। ब्राह्मणेऽधमर्णे द्विक शत, क्षत्रिये त्रिक, वैश्ये चतुष्क, शूद्रे पञ्चक' मासिमासीत्येव। द्वौ वा त्रयो वा चत्वारो वा पञ्च वा द्वित्रिचतुःपञ्चाः अस्मिन् शते वृद्धिर्दीयते इति द्वित्रिचतुःपञ्चक शतम्। 'सख्याया अतिशदन्तायाः कन्' (व्यासू. ५।१।२२) इत्यनुवृत्तौ 'तदस्मिन्वृध्यायलाभशुल्कोपदा दीयते' (व्याम.५।१।४७) इति कन्। 'वृद्धेर्वृद्धिश्चक्रवृद्धिः प्रतिमास तु कालिका। इच्छाकृता कारिता स्यात्कायिका कायकर्मणा'॥ इयं च वृद्धिर्मासि मासि गृह्यत इति कालिका। इयमेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवस गृह्यमाणा कायिका भवति। ×मिता.

(३) अन्यथा बन्धकलग्नकराहित्य इत्यर्थः।

*स्मृच.१५५

(४) अथ सर्वासु स्मृतिषु प्रमाणनिरूपणानन्तरमेवाष्टादशपदनिरूपणम्। प्रमाणनिरूपणानन्तरं प्रमेयनिरूपणं न्याय्यमिति तदनन्तरमेव अष्टादशपदाख्यं प्रमेयं निरूप्यते। तत्र ऋणादान एव मानुषदिव्यात्मकसकलप्रमाणसाध्यत्वेन व्यवहारस्य निरूपणात्प्राथम्यादुद्देशक्रमेण प्रथम ऋणादानाख्यं विवादपदं निरूप्यते। अत एवोक्त 'तेषामाद्यमृणादानम्' इति। तेन पणविंशत्या पणपादो मासि मासि वृद्धिर्भवति। एतदुक्तं भवति—समानजातीये सर्वत्र द्विक शतमेव न्याय्यम्। तथा च क्षत्रियस्य क्षत्रियेऽधमर्णे द्विकं शतम्। वैश्येऽधमर्णे त्रिकं शतम्। शूद्रेऽधमर्णे चतुष्कं शतम्। तथा वैश्यस्य वैश्येऽधमर्णे द्विकं शतम्। शूद्रेऽधमर्णे त्रिकं शतम्। तथा शूद्रस्य शूद्रेऽधमर्णे द्विक शतमिति। अनन्तरं त्रिक शतं, एकान्तरे चतुष्क शतं धर्म्यं भवतीति। +सवि.२२१-२२२

(५) एव च सबन्धकेऽपि अशीतितमभागरूपवृद्धिस्थाने मापद्वयोनसुवर्णद्वयादिसुवर्णशतादौ क्षत्रियादिना वृद्धिर्देयेत्यूहनीय न्यायसाम्यात्। +वीमि.

(६) ऋणत्व च धनप्राप्तिप्रयोजनकस्वत्वाविनाशकधनदानत्वम्। कालिकवृद्धिदानपूर्वकग्रहणत्वं वा। आद्यलक्षणे पुत्रसंप्रदानदाने व्यभिचारवारणाय प्रयोजनकान्तम्। विक्रये व्यभिचारवारणाय स्वत्वाविनाशकेति। द्वितीये प्रतिग्रहेऽतिप्रसङ्गवारणाय पूर्वकान्तम्। तदृणं द्विविधम्। सबन्धकमबन्धक च। उत्तमर्णस्य निकटे यद्वस्तु विश्वासार्थं स्थाप्यते तद्बन्धकम्। तद्भेदेन वृद्धिभेदमाह याज्ञवल्क्यः—अशीतीति। व्यउ.७४

कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्।
दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु॥

(१) चातुर्वर्ण्यातिरेकेण तु— कान्तारगास्तु दशकमिति। कान्तारगा अरण्यवासिनः, तद्गामिनो वा।

× अप., गौमि., ममु., मच, व्यप्र., विता. वाक्यार्थो मितावत्। पमा. मितावद्भावः। 'कुसीदवृद्धिर्धर्म्या' इति गौतमवचनव्याख्याने हरदत्तेन तु गौतमयाज्ञवल्क्ययोर्विरोधः प्रदर्शितः, न समन्वयः। * शेषं मितागतम्।

+ शेष मितागतम्।

(१) **यास्मृ** २।३८; **अपु.**२५३।६५ पूर्वार्धे (ग्रामान्तरास्तु दशक सामुद्रादपि विंशतिम्); **विश्व.**२।४१; **मेधा.** २।१५३; **मिता**; **अप.**; **व्यक.**१०७; **स्मृच.**१३६ उत्त.: १५५; **विर.**११ स्वकृ (त्मकृ); **पमा.**२२२; **स्मृचि.**८; **नृप.**१८ पृ.; **सवि.**२२४; **वीमि.**; **व्यप्र.**२२८; **व्यउ.** ७४; **व्यम.**७५; **विता.**४८२; **प्रका.**९२; **समु.**७९.

सामुद्राः समुद्रव्यवहारिणः । ते प्रतिमासं दशकं विशकं च शतं दद्युः । यद्वा कान्तारं वर्णापशदत्व ये गच्छन्ति, ते कान्तारगाः, वर्णापशदा इत्यर्थः । सह मुद्रया नियमेन वर्तत इति समुद्रो वर्णाश्रमविषयः, तमतिलङ्घयन्ति ये, ते विपरीतलक्षणया वा सामुद्राः, विकर्मस्था इत्यर्थः । दद्युर्वा स्वपरिभाषिता वृद्धि, सर्वे ब्राह्मणादयोऽपि, सर्वास्वपशदजातिष्वित्यर्थः । आपत्कल्पश्चायं ब्राह्मणादीनामित्येतद् वाशब्देन द्योतयति । विश्व.२।४१

(२) कान्तारगादीनामेव स्वकृता सर्वजातिविषया साधारणी वृद्धिर्न त्वन्येषाम् । मेधा.८।१५३

(३) ग्रहीतृविशेषेण प्रकारान्तरमाह–– कान्तारगास्तु इति । कान्तारमरण्यं तत्र गच्छन्तीति कान्तारगाः । ये वृद्ध्या धन गृहीत्वाऽधिकलाभार्थमतिगहन प्राणधनविनाशशङ्कास्थानं प्रविशन्ति ते दशक शत दद्युः । ये च समुद्रगास्ते विशक शत मासि मासीत्येव । एतदुक्तं भवति कान्तारगेभ्यो दशक शत, सामुद्रेभ्यश्च विशक, उत्तमर्ण आदद्यात् मूलविनाशस्यापि शङ्कितत्वादिति । इदानीं कारिता वृद्धिमाह–– 'दद्युर्वा' इति । सर्वे वा ब्राह्मणादयोऽधमर्णाः, अबन्धके सबन्धके वा, स्वकृता स्वाभ्युपगता, वृद्धि सर्वासु जातिषु दद्युः । ×मिता.

(४) कान्तार महावनं तद्गच्छन्तीति कान्तारगा वस्त्रादिविक्रयकारिणस्ते दशक शत दद्युः । समुद्र तरन्तीति सामुद्रास्ते तु विशकं शत दद्युः । निष्कादिशते गृहीते निष्कादिर्विंशति प्रतिमास दद्युः । एव दशकेऽपि शते । अथवोत्तमर्णसंमता स्वकृता सर्वे वर्णा ब्राह्मणादयो वर्णजातिषूत्तमर्णेषु वृद्धि दद्युः । एतच्च बन्धकाभावेऽधमर्णाना कान्तारसमुद्रगमनौत्सुक्ये च वेदितव्यम् । अप.

(५) एवमुक्ताशीतिभागादिशास्त्रीयवृद्धिपरिमाणेन सह विकल्पमधमर्णाभ्युपगतवृद्धिपरिमाणस्याह–– दद्युर्वेति । स्मृच.१५५

(६) दशक शत विशकं च शतं कृतायामकृतायामपि वृद्धौ दापयितव्याः । विर.११

(७) मिता.टीका–– सर्वे वा ब्राह्मणादयोऽधमर्णा इति । अत्र ब्राह्मणादीनामधमर्णत्व मूर्धावसिक्तादिजातीना उत्तमर्णत्व च प्रदर्शनमात्रम् । हीनोत्तरभावमपरिगणय्य व्यत्ययेन यथाकथचिदुत्तमर्णत्वं अधमर्णत्वं च भवतीत्यर्थः । *सुबो.

[1]संततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा ।
वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ॥

(१) पशुस्त्रीणा वृद्धिः फलभोग्यत्वेनार्पिताना या प्रसूतिः सा धनिकस्य स्यात् । तुशब्दात् सततिरेव, नापरा वृद्धिरित्यर्थः । पशुस्त्रीणामिति पुंस्पशुसंतानव्यवच्छेदार्थम् । अथवा पशूना स्त्रीणा च दासीनामिति योज्यम् । इक्ष्वादिरसस्याष्टगुणा परा वृद्धिः । वस्त्राणा चतुर्गुणा, धान्याना त्रिगुणा, हिरण्यादीना द्विगुणा । तच्चाशीतिभागाद्यनुसारेण यावता कालेन हिरण्य द्विगुण, तावतैव धान्यादेः स्वपरिमाणयोगः ।

विश्व.२।४०

(२) अधुना द्रव्यविशेषे वृद्धिविशेषमाह–– सततिस्तु पशुस्त्रीणामिति ।

पशुस्त्रीणा सततिरेव वृद्धिः । पशूना स्त्रीणा च पोषणासमर्थस्य तत्पुष्टिसततिकामस्य प्रयोगः सभवति । ग्रहण च क्षीणपरिचर्यार्थिनः ।

अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमन्तरेणापि चिरकालावस्थितस्य कस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षित आह–– रसस्येत्यादि ।

रसस्य तैलघृतादेर्वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य स्वकृतया वृद्ध्या वर्धमानस्याष्टगुणा वृद्धिः परा । नातःपरं वर्धते । तथा वस्त्रधान्यहिरण्याना यथासख्य चतुर्गुणा त्रिगुणा द्विगुणा वृद्धिः परा । वसिष्ठेन तु रसस्य त्रैगुण्यं उक्तम् 'द्विगुण हिरण्य त्रिगुणं धान्यम् । धान्येनैव रसा व्याख्याताः पुष्पमूल-

× पमा., सवि., वीमि., व्यप्र., विता. मितागतम् ।

* बाल. सुबोवत् ।

(१) **यास्मृ.**२।३९; **अपु.**२५३।६४ द्विगुणा परा (द्विगुणा तथा); **विश्व.**२।४० अपुवत्; **मिता.**; **अप.**; **स्मृच.** १५५ प्रथमपादः; **पमा.**२२६; **सुबो.**२।५६(=) उत्त.; **नृप्र.**१८; **सवि.**२२४ प्रथमपादः; **वीमि.**; **व्यप्र.**२२८: २५४ उत्त.; **व्यउ.**७५; **विता.**४८५; **समु.**८०; **भाच.** ८।१५१ द्विगुणा परा (द्विगुणाः स्मृताः) उत्त.

फलानि च । तुलाधृतमष्टगुणम्' इति । मनुना तु धान्यस्य पुष्पमूलफलादीना च पञ्चगुणत्वमुक्तम्— 'धान्ये शदे लवे वाह्ये नातिक्रामति पञ्चताम्' इति । शदः क्षेत्रफल पुष्पमूलफलादि । लवो मेषोर्णाचमरीकेशादिः । वाह्यो बलीवर्दतुरगादिः । धान्यशदलववाह्यविषया वृद्धिः पञ्चगुणत्वं नातिक्रामतीति । तत्राधमर्णयोग्यतावशेन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्टव्या। एतच्च सकृत्प्रयोगे सकृदाहरणे च वेदितव्यम्। पुरुषान्तरसक्रमणेन प्रयोगान्तरकरणे तस्मिन्नेव वा पुरुषे रेकसेकाभ्या अनेकशः प्रयोगान्तरकरणे सुवर्णादिकं द्वैगुण्यातिक्रम्य पूर्ववद्वर्धते । सकृत्प्रयोगेऽपि प्रतिदिन प्रतिमास प्रतिसंवत्सरं वा वृद्ध्याहरणेऽधमर्णदेयस्य द्वैगुण्यासभवात्पूर्वाहृतवृद्ध्या सह द्विगुण्यमतिक्रम्य वर्धत एव। यथाह मनुः— 'कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता' इति। सकृदाहितेत्यपि पाठोऽस्ति । *मिता.

(३) पशुस्त्रीणा महिषीप्रभृतीनाम् । एतच्च (वचन) स्वकृतवृद्धौ चिरकालमदत्तायां वेदितव्यम् । +अप.

(४) स्त्रियो दास्यः । सतत्यभावे तु प्रयुक्तस्य पश्चादेः पुष्टिरविनाशो वा लाभ इति । ×स्मृच.१५५

(५) मिता.टीका —स्त्रीणा दासीना न कुलस्त्रीणाम्। अधमर्णदेयस्य द्वैगुण्यासंभवादिति । द्वैगुण्यासभवस्त्वेव द्रष्टव्यः । प्रतिमास प्रतिसंवत्सरं वा यस्मिन्दिने वृद्धिर्दीयते तस्मादिनात्पूर्व अभिवृद्धस्य विच्छेदः पुनरपि नूतनत्वेनाभिवृद्धिः । एव च वस्तुतः प्रयोगान्तरमेव भवतीति । यावद्द्वैगुण्य प्राप्नोति तावदविच्छेदेन वृद्धस्य द्रव्यस्य स्थित्यभावादिति। =सुबो.

(६) बन्धकिताना पशूना गवादीनां स्त्रीणां दास्यादीना च संततिरेव गवादिप्रयोक्तुर्वृद्धिः ।

परे तु बन्धकत्वेन स्थापितस्य गोदास्यादेर्वृद्धि तदभावे संततिमेव वृद्धिं गवादिस्वामिनोऽधर्मणा दद्युरिति व्याचक्षते । ÷वीमि.

---

* 'कुसीदवृद्धिरि'ति मनुवचनस्य मिताक्षराव्याख्यान मनौ (पृ. ६१४) द्रष्टव्यम्। पमा., व्यउ., विता. मितागतम्। + शेषवाक्यार्थो मितावत्। व्यप्र.वाक्यार्थः अपवत्। × सवि. स्मृचवत् । = बाल. सुबोवत् । ÷ वाक्यार्थो मितावत्।

वृद्धयुपरमावधिः

[1]**दीयमानं न गृह्णाति प्रयुक्तं यः स्वक धनम्।**
मध्यस्थस्थापितं तस्याद्वर्धते न ततः परम् ॥

(१) यथोत्पत्त्या च ददतः— दीयमान न गृह्णीत इति । स्वक धनमिति वचनादात्मनेपदयोगाच्च संनिहितधनिकविषयमेतत्। अन्यथा तु वर्धत एवेत्यभिप्रायः। विश्व.२।४६

(२) मध्यस्थस्थापित न वर्धते—दीयमानमिति । किं च । उपचयार्थं प्रयुक्तं धन अधमर्णेन दीयमानमुत्तमर्णो वृद्धिलोभाद्यदि न गृह्णाति, तदाधमर्णेन मध्यमहस्ते स्थापित यदि स्यात्तदा, ततः स्थापनादूर्ध्वं, न वर्धते । अथ स्थापितमपि याच्यमानो न ददाति ततः पूर्ववद्वर्धत एव । *मिता.

(३) न गृह्णाति रक्षणाक्षमत्ववृद्धिलोलुपत्वादिहेतुनेति शेषः । मध्यस्थस्थापनाभावे स्थापितस्यापि याच्यमानस्याप्राप्तौ पूर्ववद्वर्धत एव । प्रतिदानोद्यमस्य कृतत्वासभवात् । स्मृच.१५७

(४) कृतवृद्धयपवादश्च याज्ञवल्क्येन दर्शितः —दीयमानमिति । प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य परम् । पमा.२२५

नारदः

ऋणादाने विषयभेदाः

[2]**ऋणं देयमदेयं च येन यत्र यथा च यत्।**
दानग्रहणधर्माश्च ऋणादानमिति स्मृतम् ॥

---

* अप. मितागतम् ।

(१) **यास्मृ.**२।४४; **अपु.**२५४।४; **विश्व.**२।४६ ज्ञाति (ज्ञीत), **मिता.**; **अप.**; **व्यक.**१११; **स्मृच.**१५७ यः (यत्) ध्यस्य (ध्यस्य) तत्स्यात् (तत्त); **विर.**२१; **पमा.**२२५; **विचि.**११; **स्मृचि.**८ यः (यं) तत् (चेत्) वर्धते न (न वर्धेत) व्यासः; **नृप्र.**१८ यः . धनम् (यत्सबन्धनम्):१९ स्वक (स्वय); **सवि.**२२६ यः (यत्) तत्स्यात् (यच्च); **चन्द्र.**४ यः (चेत्); **वीमि.**, **व्यप्र.**२३४ यः (यत्) तत् (चेत्); **व्यउ.**७७ (=); **व्यम.**७५ यः (यत्) तत्स्यात् (तस्मात्); **विता.**५०२ तत् (चेत्); **सेतु.**१४-१५ यः (यत्) स्थापि (स्यापि); **प्रका.**९३ यः (यत्) तत्स्यात्(तत्त); **समु.**८० वः (यत्); **विव्य.**२४.

(२) **नासं.**२।१; **नास्मृ.**४।१ मांश्च (मांभ्यां); **अपु.**२५३।१३; **अभा.**३१नास्मृवत्; **मेधा.**८।४ यत्र (यावत्) प्रथमपादत्रयम्; **मिता.**२।३७; **अप.**२।३७ यत्र यथा (यस्य

(१) अत्रायं ऋणशब्दः स्मृतितन्त्रसमयसाकेतिकः। यस्य पार्श्वात् येन किमपि गृहीतं तस्य संबध्यमानपुरुषसहितस्य तेन संबध्यमानपुरुषसहितेन तत्संव्याजमपि, यत्र पुनः प्रदेय प्रत्यर्पणीय तत्र एवाय ऋणशब्दो रूढिमुपागतो नान्यत्र। स च पुनरपि साकेतिकशब्द द्वयोपलक्षितो विषयव्यापकत्वेन स्थितः। तथा एकमधमर्णमुक्त, द्वितीयमुत्तमर्णमुक्त चेति। तत्र तावदधमर्णम्। यथा 'हिरण्यधान्यवस्त्राणा वृद्धिर्द्वित्रिचतुर्गुणा। रसस्याष्टगुणा वृद्धिः स्त्रीपशूना च सततिः' ॥ इत्यादिक मधमर्णमुक्तम्। उत्तमर्ण पुनः। पितृपितामहप्रपितामहेष्टजनबन्धुवर्गेभ्यो नित्यजलाञ्जलिप्रदानतिलोदकपितृतर्पणपूर्वक नित्यनैमित्तिकैकोद्दिष्टपार्वणकालस्य वृद्धिश्राद्धेषु पिण्डप्रदानोपलक्षितमुत्तमर्णमिदमिति। अत्र केचिच्चोदयन्ति। हिरण्यधान्यवस्त्राणामेक अधमर्णगृहीत भुक्त च युज्यते सतत्या देयम्। उत्तमर्णमपि पितृपैतामहसक्रान्त हिरण्यधान्य संततयाऽनृणीकर्तु युक्तमेव दातुम्। या पुनरसक्रान्तपूर्वजस्य वराटकमात्रधनाऽपि संततिः सा कथमधमर्णोत्तमर्णप्रदानाधिकारिणी भवत्विति। अत्रोच्यते। न सम्यक्। आक्षोद्यमिदम्। यतः येन शरीरेण धर्मार्थकाममोक्षपुरुषार्थानामुपभोगसाधनक्षमः पुरुषो भवति। तदेव शरीरं हिरण्यधान्यादिकपदार्थसर्वाभ्यधिक पूर्वजप्रसादसक्रान्त सततेः। अतः साधूत्तमर्णाधमर्णप्रदानाधिकारिणी पूर्वा संततिरिति। यथा च संतत्या कियद्दूरं, यावदिदमृणद्वयमपि दातव्यमित्येतत्पुरत एव पुरुषोत्तमविचारप्रावसरं वक्ष्यामः। एव ऋणशब्दमात्रस्य निगम उक्तः। इदानीं येन यत्र यथा च यच्च तद्देयमदेय चेत्यादिक सविस्तरवक्ष्यमाणपदार्थ दानधर्मग्रहणधर्माभ्यामुपलक्षित यदृणादानव्यवहारपद तत्पञ्चविंशतिव्यवहारभेदभिन्न अभिधीयते। अभा.३१-३२

(२) तथा 'ऋणं देयमि'ति। तत्र देयमृणं स्वकृतं पितृकृत च, यस्य च ऋक्थ हरेत्। अदेयं स्वकृतं द्विगुणादधिक पितृकृत च द्यूतादिभिः[1]। येनेति पुत्रेण भर्त्रा पित्रा चेति[2]। तथा 'न स्त्री पतिकृत दद्याद्दण पुत्रकृत तथा। अभ्युपेताद्दते यद्वा सह पत्या कृतं भवेत्' ॥ यद्यपि 'अदेयमित्यत्रैतदन्तर्भूत तथापि द्यूतादिकृत विशेषानपेक्ष स्वरूपतोऽदेयम्। इद तु कर्तृनियमादिति। गोबलीवर्दवद्भवति च भेदः। यावदिति द्वैगुण्यपर्यन्त, तत्रापि भेदः पूर्ववत्। यत्रेति पाठे देशकालग्रहणम्। यत्रैव गृहीत तत्रैव देयम्। सत्या धनिकेच्छाया देशान्तरेऽपि। सति संभवे कालोऽपि, शरद्यन्विच्छेत् प्रयुक्त, ग्रैष्मे वा, सत्सु सस्येषु, यदा वाऽस्य धनागम मन्येतेति। यथा सति संभवे सर्व, असति कश्चिदशो यावत्कमेण सशुद्धमिति। सर्वाभावे परिक्षीणे च 'कर्मणापि सममिति'। दानग्रहणधर्मा इति, साक्षिलेख्यादयः। मेधा.८।४

(३) तच्च ऋणादान सप्तविधम्। ईदृशमृण देय, ईदृशमदेय, अनेनाधिकारिणा देय, अस्मिन् समये देय, अनेन प्रकारेण देय, इत्यधर्मर्ण पञ्चविधम्। उत्तमर्ण दानविधिरादानविधिश्चेति द्विविधमिति। एतच्च नारदेन स्पष्टीकृत ऋणं देयमित्यादिना। +मिता.२।३७

(४) द्यूतादिकुत्सितेतरकार्यार्थं पित्रादिकृतमृणं देयम्। कुटुम्बभरणाद्यावश्यकेतरकार्यार्थं पित्रादिकृतमृणमदेयम्। पुत्रपौत्राद्यधिकारिणा बाल्यापगमानन्तरादिकाले द्वैगुण्यादिप्रकारेण देयमिति यत्तत्सर्व, तथा बन्धग्रहणादिधनप्रयोगधर्माः शनैरित्यादिप्रयुक्तधनादानधर्माश्च यस्मिन् विवादविषय उक्ताः तत्पदमृणादानमिति स्मृतमित्यर्थः। स्मृच.२

(५) मिता.टीका — तत्र तावदृणस्य प्रदानं आदानं वा यस्मिन्निति व्युत्पत्तावपि योगरूढोऽय ऋणादानशब्दः तदेतदभिप्रेत्याह —तच्चेति। बाल.२।३७

यदा) (दानग्रहणधर्माश्च तदृणादानमुच्यते), व्यक.१०५; स्मृच.२; ममु.८।४ ऋणा...म् (तदृणादानमुच्यते); विर.५ यथा च यत् (यदा भवेत्); पमा.२२०, विचि.१-२; स्मृचि.७; सवि.२२१ मिति स्मृतम् (विधिः स्मृतः) शेष विरवत्; मच.८।४ (दानं ग्रहणधर्मश्च तदृणादानमुच्यते); घोमि.२।३७; व्यप्र.२२४; मिता.४७८ धर्मो (धर्म), सेतु.१; प्रका.८५; समु.७१; विव्य.२१ ऋणा...म् (ऋणादानमिहोच्यते).

+ पमा., सवि., व्यप्र., मिता. मितागतम्।

१ भागेनेति. २ त्यतथा. ३ (०). ४ न.

कुसीदलक्षणम्

[1]स्थानलाभनिमित्तं यद् दानग्रहणमिष्यते ।
तत्कुसीदमिति प्रोक्तं तेन वृत्तिः कुसीदिनाम् ॥

(१) अत्र स्थानशब्दो द्रव्याश्रितः स्वस्थानाश्रितः परदेशाश्रितश्च द्रष्टव्यः । तत्रथा । स्थानस्थितस्य अविनष्टद्रव्यपिण्डस्य यो वृद्धिलाभः । तथा स्वस्थाने स्वस्यैव व्यवहारकस्य यो लाभः । तथा स्थाने स्थाने देशे यो वृद्धिक्रमाचारेण लाभः तस्य स्थानलाभः । तस्य निमित्तं दान प्रयोग्य ग्रहण सवृद्धिकस्य तस्येति दानग्रहणमिष्यते । एतच्च प्रायोग्यदानग्रहण स्मृतिसमयशब्देन कुसीदमिति नाम प्रोक्तम् । तेन कुसीदेन प्रायोग्येन कुसीदिना प्रायोजकाना वृत्तिरिति । अभा.५१

(२) स्थान प्रयुक्तधनस्थितिः, लाभः कलादिप्राप्तिः, तन्निमित्त दान दीयमान मूलधन धनिकेन, ग्रहण गृह्यमाणं तदेव खादकेन । *विर.५

(३) कलाशून्यत्वे तुल्यत्वाद्वौणः प्रयोगः । न हि तेन वृत्तिर्गुणश्चावश्यापाकरणीयत्वमिति न्यायचतुर्थाध्याये व्यक्तम् । यस्यैव दान तस्यैव तत्सजातीयस्यैव वा ग्रहणम् । अत एव वाणिज्यार्थप्रयुक्तस्यापि न(?)र्णत्वम् । ×विचि.२

(४) स्थानमविनाशः, लाभ उदयः, स्थानलाभौ निमित्तमस्येति स्थानलाभनिमित्तम् । मूलाविनाशेन वृद्धिनिमित्तमित्यर्थः । दत्तिर्दान, गृह्यतेऽस्मादिति ग्रहण वृद्धिरुभयार्थमिष्यते । प्रयोग इत्यर्थः । स प्रयोगः कुसीदमित्युच्यते । तेन कुसीदेन वृत्तिः प्रयोगजीविनाम् । नाभा.२।८६

वृद्धिपरिमाणम्

[2]वसिष्ठविहितां वृद्धि सृजेद्वित्तविवर्धिनीम् ।
अशीतिभागं गृह्णीयाच्छते मासस्य वार्धुषी ॥

एकशतस्य प्रयुक्तस्य मासे भुक्तेऽशीतिभागवृद्धया सपादो द्रम्मो भवति । इय वसिष्ठविहिता अतिधर्मवती वृद्धिः । एना वृद्धि वित्तविवर्धिनी प्रयोजकः सृजेत् प्रवर्तयेदिति । अभा.५१

[3]द्विकं त्रिकं चतुष्कं च पञ्चकं च समं स्मृतम् ।
मासस्य वृद्धि गृह्णीयाद्वर्णानामनुपूर्वशः ॥

अत्र ब्राह्मणेषु प्रयोगवृद्धौ द्विक शत धर्म्यम् । क्षत्रियेषु त्रिक, वैश्येषु चतुष्क, शूद्रेषु पञ्चकम् । इय शते मासवृद्धिर्वर्णानामनुक्रमेणेति । अभा.५१

[4]द्विकं शतं वा गृह्णीत सतां वृत्तमनुस्मरन् ।
द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी ॥

अथवा सर्ववर्णेष्वपि साधुपुरुषेभ्यः सकाशाद् द्विकमेव शत गृह्णीयात् । एतत्सता वृत्तमित्येव स्मरन् । एवमनया बुद्धया प्रयोजकोऽर्थकिल्बिषी न भवति । अभा.५१

वृद्धिप्रकारा· तल्लक्षणानि च

[5]कायिका कालिका चैव कारिता च तथा परा ।
चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधा ॥

इत्यत्र श्लोके चतुर्विधवृद्धिनामचतुष्टयमिदमुक्तम् । लक्षणं त्विदमुच्यते । अभा.५१

कायाविरोधिनी शश्वत्पणपादादि कायिका ।
प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मता ॥

---

* चन्द्र , व्यप्र., सेतु. विरगतम् । × शेष विरगतम् ।

(१) **नास्मृ.**२।८६ यद् (हि) प्रोक्तं (ज्ञेय); **नास्मृ.**४।९८ यद् (हि), **अभा.**५१ नास्मृवत् ; **व्यक.**१०५ प्रोक्तं (ज्ञेय), **विर.**५, **विचि.**२ व्यकवत् , **स्मृचि.**९ व्यकवत् ; **नृप्र.**१८ नास्मृवत् , पू.; **चन्द्र.**२ स्थान (स्थाने) वृत्तिः (वृद्धिः); **वीमि.** २।३७ व्यकवत्,उक्त ;**व्यप्र.**२२५व्यकवत् ;**सेतु.**१-२व्यकवत् ; **विब्य.**२१ दान...ध्यते (दान ग्रहणमुच्यते) पू. (२) **नास्मृ.** ४।९९; **अभा.**५१.

(१) **नास्मृ.**४।१००; **अभा** ५१.(२) **नास्मृ.**४।१०१; **अभा.**५१.

(३) **नास.**२।८७ कारिता (कारिका) परा (स्मृता), **नास्मृ.** ४।१०२ (कालिका कारिता चैव कायिका च तथा परा । चक्रवृद्धिश्च शास्त्रेऽस्मिन् वृद्धिर्दृष्टा चतुर्विधा ॥), **अभा.**५१ नास्मृवत् , **मिता.**२।३७, **व्यक.**१०७ श्च शा (स्तु शा); **नृप्र** १८ तस्य वृद्धि (वृद्धिवृद्धि) शेष नास्मृवत् , **व्यउ.**७५ व्यकवत्; **विता.**४७८; **समु.**७९ श्च शास्त्रेषु तस्य (स्ततः प्रोक्ता तस्मात्).

(४) **नास.**२।८८ वृद्धिः सा (सा वृद्धि) मता (स्मृता); **नास्मृ.**४।१०३-१०४ शश्वत् (स्वस्व) यिका (क्रमात्) मता (स्मृता); **अभा.**५१ नास्मृवत्; **मेधा** ८।१५३ (प्रतिमास तु कालिका), **मिता.**२।३७; **व्यक.**१०७ पणपादादि (पणार्धाद्या तु) वर्न्ती (वति); **मभा.**१२।३२ यिका (धिका) पू., **स्मृच.**१५४ वृद्धिः .. ता (सा वृद्धिः कालिकेरिता) उत्त.; **विर.**१० व्यकवत्; **विचि.**५ व्यकवत् , पू., पणवाश्चेति हलायुधे पाठः; **स्मृचि.**७ पूर्वार्ध तु कात्यायनस्य; **नृप्र.**१८ वृद्धिः सा (सा वृद्धिः); **व्यप्र.**२२६ उत्त.; **व्यउ.**

वृद्धिः सा कारिता नाम यार्णिकेन स्वयंकृता ।
वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता * ॥

(१) अनेन श्लोकद्वयेन चतुर्विधाऽपि वृद्धिर्व्याख्याता । किं यदिदं मुनिप्रोक्तं सक्षिप्तव्याख्यानं तदपि विस्तरव्याख्यान विनाऽपि नातिपरिस्फुटं भवतीत्यत एतदुच्यते । अतीतकाला वृद्धिः फल यस्या प्राप्यते । सा कालिका वृद्धिरुच्यते । प्रतिमासवृद्धिः स्रावणी वृद्धिः फलदेत्यर्थः । सा च शास्त्रोक्ता वर्णानुक्रमेण पञ्चकशतमवधिभूता दृष्टा या पुनर्ऋणिकेनैव अपात्र भूतेन अथवा पात्रभूतेनैव सविशेषार्तिवशात्स्वमुखेनैव दशैकादधिका करवृद्धिर्वा कृता । 'वृद्धिः सा कारिता नाम यार्णिकेन स्वयं कृतेति' । अथ कायोच्यते । सा च कायाऽविरोधिनी । धरणविधारणादिना न प्रार्थयति । इयं दूरादेव न घटते । अत्र कायशब्दो द्रव्यपिण्डप्रतिबन्ध एव द्रष्टव्यः । द्रव्यपिण्डो द्रव्यकायः । तस्याविरोधिनी मूलद्रव्यकायस्याविनाशिनी । सा च स्वस्वपरिमाणपादादिका । किमुक्त भवति । ऋणिकस्योपरि यो द्रव्यपिण्डकायो दिवसभाटकवृद्ध्याचारेण स्वः स्वः दिनप्रतिदिनं पणः पणो देयः । पादः पादो वा देयः । **इत्यनेन** क्रमेण तं पणं पादं वा प्रतिदिन गृह्णतो धनिकस्य सुचिरकालेनापि मूलद्रव्यकायमध्यात्किञ्चिन्न पतति । अपरिमितद्रव्यप्रवेश इति । यदा तदा स द्रव्यपिण्डकाय ऋणिकेनाग्वण्डित एव संपूर्णो देयः । इत्येषा कायाविरोधिनी वृद्धिः कायिकेति नामोच्यते । **अतश्चक्रवृद्धिरुच्यते** । यस्यां पुनर्वृद्धौ एको द्रम्मः पञ्चशतेन दत्तः । तत्र विशतिभिर्मासैर्जात द्र. २ । एतद्द्रव्य अन्यैर्विंशतिभिर्मासैर्जातं द्र. ४ । एतेऽपि अन्यैर्विंशतिभिर्भूता द्र. ८ । पश्चादन्यैर्विंशतिभिर्जाता द्र. १६ । पुनरन्यैर्द्र. ३२ । इयं वृद्धिरपि पुनर्वृद्धिरुच्यते । अनया वृद्धया यावदेक एव मूलिकद्रम्मः कस्यापि राज्ञ उपरि स्थितः वर्षः ३३ मास ४ तावत्कालेन द्र. ४० । अत्र विशतिमात्रिकाः परिवर्ता भवन्ति । स च एकद्रम्मः पञ्चशतपञ्चकवृद्धया यावद्विशतिवारगुणितः तावत्तेन राज्ञा तस्य मूलिकैकद्रम्म धनिकस्य दातव्य जातम् । एवं चतुर्विधापि वृद्धिरिय सविस्तरा व्याख्याता ।

अभा.५१-५२

(२) कायाविरोधिनी मूलधनाविरोधिनी, शश्वत्पणार्धाद्या तु प्रतिदिन देयत्वेन पणतदर्धादिका । प्रथममुभाभ्या कृता या वृद्धिः सा तु कारिता । व्यक.१०७

(३) कायाविरोधिनीति, कायः मूलधनशरीरम् । शश्वत् पणार्धाद्या पणतदर्धादिक्रमेण नित्यमुभाभ्या व्यवस्थापिता, सा नारदमते कायिका । हलायुधेन तु पणार्धाद्येत्यत्र पणवाद्येति लिखित, व्याख्यात च पणस्य मूलधनस्य यावदवस्थान तावत् शश्वत् वर्षसहस्रमपि उत्तमर्णेन वाह्यते प्राप्यते सा कायिकेति । तच्च सकलनिबन्धान्तरेषु पणार्धाद्या इति पाठदर्शनादुपेक्षितम् । वृद्धेरपि पुनर्वृद्धिरिति यत्र वृद्धिरूपं धनं दातुमशक्तोऽधमर्णः सवृद्धिकमिद दास्यामीति अङ्गीकरोति, तत्र या वृद्धिः सा चक्रवृद्धिरित्यर्थः । *विर.१०

(४) अत्र व्यासोक्ता कायिका भोगलाभान्तर्गतैव । नारदोक्ता तु तद्भिन्नेति द्रष्टव्यम् । ×विचि.५

देशभेदेन वृद्धिपरिमाणभेदाः

[1]ऋणानां सार्वभौमोऽयं विधिर्वृद्धिकरः स्मृतः ।
देशाचारस्थितिस्वन्या यत्रर्णमवतिष्ठते ॥

(१) अर्थाना वृद्धिकरविधिः सर्वभूमिसामान्यो

* मभा. व्याख्यान 'कारिता कायिका' इत्यादिगौतमवचने (पृ ६०७) द्रष्टव्यम् ।

७५, **विता.**४७८; **सेतु** ५-६; **प्रका.**९२ स्मृचवत्, उत्त., **समु.**७९ स्मृचवत्; **विव्य.**२२ व्यकवत्, पृ.

(१) **नासं.**२।८९ कारिता (कारिका); **नास्मृ** ४।१०३-१०४; **अभा.**५१; **मेधा.**८।१५३ (वृद्धेर्वृद्धिश्चक्रवृद्धि·); **मिता.**२।३७ यर्णिकेन (अधमर्णेन); **व्यक.**१०७ उत्त., **मभा.** १२।३१ उत्त.; **गौमि.**१२।३१ उत्त.; **विर.**१०, **स्मृचि** ७ उत्त., कात्यायन., **नृप्र.**१८, **व्यप्र.**२२६; **व्यउ.**७५, **विता.** ४७९ नाम यर्णि (याऽधमर्णि); **सेतु.**६ उत्त., **समु** ७९, **विव्य.**२२ उत्त

* सेतु. विरगत विचिगत च । × शेष विरगतम् ।

(१) **नासं.**२।९० वृद्धिकर· (वृद्धौ कृत·) स्थितिस्वन्या (विधिस्वन्यो) मव (मधि); **नास्मृ.**४।१०५ ऋणा (अर्था) देशाचार (या देशाव), **अभा** ५२ नास्मृवत्; **व्यक.**१०८ स्वन्या (स्तुल्या); **स्मृच** १५९, **विर** १२; **विचि.**१४ स्मृतः (पर); **स्मृचि** ८ ऋणा (पण्या) स्मृतः (पर.), **सचि.** २२७; **चन्द्र.**८ स्मृतः (परः) तिष्ठ (शिष्य), **व्यप्र.**२३०; **व्यम.**७६ यत्रर्ण (यधर्ण); **सेतु.**१३ विचिवत्; **प्रका.**९४; **समु.**८०.

ष्टः। अन्या तु देशावस्थितिर्या यत्र प्रसिद्धा सा तत्रैव यत्रर्णमप्यवतिष्ठते, व्यवहारतः प्रतिष्ठते। अभा.५२

(२) स्मृतः, ऋणाना वृद्धिकरो विधिः सर्वत्र भूमा वपीष्टः। यत्र द्वैगुण्यादाऋण वर्धमानमवतिष्ठते तत्र देशाचारस्थितिः। देशान्तराचारस्थितितोऽन्येत्यर्थः। स्मृच.१५९

(३) योऽयमाशीतादिवृद्धिप्रकारः स सार्वभौम एव शास्त्रीयत्वात्। देशाचारस्थितिस्तु अन्या सार्वत्रिकत्व-विरोधिनी। विर.१२

(४) अतोऽन्यो देशाचारापेक्षया। नाभा.२।९०

[1]द्विगुणं त्रिगुणं चैव तथाऽन्यस्मिंश्चतुर्गुणम।
तथाऽष्टगुणमन्यस्मिन् देयं देशेऽवतिष्ठते॥

(१) कस्मिंश्चिद्देशे द्विगुणावधिवृद्धिरेव, केष्वपि पुनस्त्रिगुणचतुर्गुणाष्टगुणाऽपि अन्यदेशेष्ववतिष्ठते। ×अभा.५२

(२) अन्यस्मिन्देशेऽन्यस्मिन्काले च यावता प्रस्थ लभते उत्पत्तेः प्राक् तावतैव प्रस्थचतुष्टयमुत्पत्तौ लब्धव्यमिति देशकालज्ञाने यत्र द्वैगुण्यादिलाभस्तत्र वर्णक्रमेणैव वाऽस्तु। अस्तु वा मासस्थाने तूनम्। द्वित्रैरपि मासैस्तूने द्विगुणमूनोपचये तु त्रिगुण धान्य, पुराणे तु मासेन पणैर्वृद्धिरिति संकरजातिपरमिति तु रत्नाकरः। धान्ये त्रिगुणपञ्चगुणत्वे कालभूम्नेति शिष्टाः। विचि.१४

वृध्द्युपरमावधिः

[2]हिरण्यधान्यवस्त्राणां वृद्धिर्द्वित्रिचतुर्गुणा।
रसस्याष्टगुणा वृद्धिः स्त्रीपशूनां च संततिः॥

(१) हिरण्यं यथा कयापि वृद्ध्या गृहीतं, तथा तावदेव वर्धते यावद्द्विगुणीभूतम्। धान्यं जल्पितवृद्ध्या तद्दीयमानं प्रतिग्राह्यं तावत् वर्धते यावत् त्रिगुणम्। वस्त्रं तावद्वर्धते यावच्चतुर्गुणम्। रसस्तावद्यावदष्टगुणो भूतः। स्त्रीपशूना च समाधत्तानां या संततिरुत्पद्यते सा द्रम्म-धनिकस्य भवतीति। अभा.५२

(२) स्त्रीपशूना तु संततिः प्रतिदिवसभुक्तिर्गर्वा दोहादिर्वा, स्त्रीणा प्रतिदिवस कर्म। नाभा.२।९२

[3]सूत्रकर्पासकिण्वानां त्रपुणः सीसकस्य च।
आयुधानां च सर्वेषां चर्मणस्ताम्रलोहयोः॥
अन्येषां चैव सर्वेषामिष्टकानां तथैव च।
अक्षय्या वृद्धिरेतेषां मनुराह प्रजापतिः॥
तैलानां चैव सर्वेषां मद्यानां मधुसर्पिषाम्।
वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य च॥

प्रीतिदत्तवृद्धिः

[4]न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित्।
अनाकारितमप्यूर्ध्वं वत्सरार्धाद्विवर्धते॥

(१) एषामनन्तरोक्ताना वस्तूना प्रीतिसंव्यवहारेण दत्तानामविचारिता वृद्धिर्नास्ति तावद्यावत्षण्मासं, ततः परं त्वकारितापि वृद्धिः षण्मासादुपरि भवतीति। अभा.५२-५३

(२) अनाकारितमयाचितमिति क्रियाविशेषणत्वान्न-पुसकलिङ्गत्वम्। अप.२।३७

(३) वयस्यादेरुपभोगार्थमर्पितविषये त्वाह नारदः— न वृद्धिरिति। अनाकारिता अकृता। प्रीतिदत्तानां प्रतियाचनप्रतिदानदिननिर्देशशून्यानामिति शेषः। अनाकारितमपीत्यादेरयमर्थः। प्रतिदान-दिननिर्देशे तु तद्दिनमारभ्य षण्मासादूर्ध्वं वर्धते प्रीति-

---

× स्मृच., पमा., सवि. अभावत्।

(१) **नास.**२।९१ देय (देशे), **नास्मृ.**४।१०६ चैव (वाऽपि) तथाऽन्यस्मिन् (तथाऽन्यत्र); **अभा.**५२ नास्मृवत्, **स्मृच.**१५९; **विर.**१२; **पमा.**२२७ ष्ठते (ष्ठति); **विचि** १४; **नृप्र.**१९, **सवि.**२२७; **चन्द्र.**८; **व्यप्र.**२३० देय (तत्तु); **सेतु.**१३ ऽवतिष्ठते (च तिष्ठति); **प्रका.**९४; **समु** ८०

(२) **नास.**२।९२ रस (घृत) च (तु); **नास्मृ.**४।१०७ त्रिच (त्रिश्च); **अभा.**३१,५२; **मेधा.**८।१५१ (=) धान्य-वस्त्राणा (वस्त्रधान्यानां) पू.; **समु.**८० वृद्धिः (प्रोक्ता).

(१) vulg.**नास्मृ.**४।१०७**इत्यस्योपरिष्टात् श्लोकत्रयमिदम्।**

(२) **नाम.**२।९३ प्रीति (प्रति); **नास्मृ.**४।१०८ द्विवर्ष (त्रिवर्ष); **अभा.**५२ नास्मृवत्; **मिता.**२।३८; **अप.**२।३७ कारिता (कारितं); **व्यक.**१०९; **स्मृच.**१५६; **विर.**१६; **पमा.**२२२; **विचि.**९; **स्मृचि.**८ रार्धात् (राद्वा); **नृप्र.**१८ द्वि (त्तु); **सवि.**२२४; **व्यप्र.**२३१; **व्यउ.**७५; **व्यम.**७५ द्विवर्ष (द्वि वर्ष); **विता.**४८३; **सेतु.**८; **प्रका.**९३ **नासंवत्**; **समु.**७९; **विव्य.**२४ रार्धात् (राद्वि).

दत्तमपीति। *स्मृच.१५६

(४) दत्तानामिति दानमत्र समर्पणमात्रपरम्।
विचि.९

(५) वृद्धिर्देशाचारव्यवस्थया। नाभा.२।९३

[1]प्रीतिदत्तं तु यत्किञ्चिन्न तद्वर्धत्ययाचितम्।
याच्यमानमदत्तं चेद्वर्धते पञ्चकं शतम्॥

प्रीतिदत्त यत्किमपि भवति तत्तावन्न वर्धते यावन्न याचितम्। यदा पुनर्याच्यमानमपि न दीयते तदा षण्मासादर्वागपि तद्दिवसादारभ्य पञ्चकशतवृद्ध्या वर्धते। अभा.५३

वार्धुषलक्षणम्

[2]एष वृद्धिविधिः प्रोक्तः प्रीतिदत्तस्य धर्मतः।
वृद्धिस्तु योक्ता धान्यस्य वार्धुषं तदुदाहृतम्॥

(१) एष विधिः प्रीतिदत्तस्य कर्मण उद्दिष्टः। कर्मशब्दः क्वचिद्धिरण्यपर्यायवाचको दृष्टः। या पुनर्धान्यस्य वृद्धिर्भवति, ततो वार्धुषिक नाम वर्तमानमुच्यते। अभा.५३

(२) वृद्धिस्तु योक्ता धान्यानामिति धान्यानां वृद्धिमनुक्त्वा गृहीतानां याचितानां अदाने या वर्णक्रमेण द्वैगुण्यादिरूपा वृद्धिरुक्ता, सैव भवति, सा च वार्धुष्यमुच्यते इत्यर्थः। विर.१६

(३) एष वृद्धिविधिः प्रोक्तः 'कायिका कालिका इत्यारभ्य प्रवृद्धस्याष्टगुणत्वाद्धान्यानां वृद्धिर्योक्ता, 'त्रिगुणे'ति वा, वार्धुषमिति यदेतदुदाहृतं, तदेतत् केचिद् धान्यानां त्रिगुणे प्रयोगे वार्धुषिक इत्युच्यते। अन्ये धान्यविषया योक्ता तां य उपजीवति सर्वविषया त्रिगुणमुपजीवतीत्यर्थः, स वार्धुषिक इति।
नाभा.२।९४

वार्धुषग्रहणाधिकारी

[3]आपदं निस्तरेद्वैश्यः कामं वार्धुषकर्मणा।
आपत्स्वपि हि कष्टासु ब्राह्मणस्य न वार्धुषम्॥

(१) किल कृषिगोरक्षादिवृत्तिर्वैश्यस्य शास्त्रविहिता शास्त्रोत्पादकैव। तत्पुनर्धान्यवृद्धिप्रयोजनं तस्याप्यनिषिद्धम्। तेनैतदुक्तं, यदि कांचिदापद्भवति, ततस्तामापदं काममिच्छया वार्धुषिकर्मणा निस्तरेत्। ब्राह्मणस्य पुनरिदं वार्धुषिकं च कष्टास्वप्यापत्सु न विहितमतिनिषिद्धत्वादिति। अभा.५३

(२) आपद्ग्रहणं तत्र काम्यनैमित्तिकाद्यप्रवृत्तिः। तामवस्थां वार्धुषकर्मणा निस्तरेद् वैश्यः। 'आपदं निस्तरेदिति' वचनादुत्तरकालमुत्सृजेदिति गम्यते। ब्राह्मणप्रतिषेधादेव क्षत्रियवैश्ययोः सिद्धे वैश्यग्रहणात् क्षत्रियस्यापि नेष्यत इति गम्यते। अन्य आह—ब्राह्मणप्रतिषेधात् क्षत्रियवैश्ययोरनुज्ञायते, वैश्यग्रहणं प्रदर्शनार्थमिति। वैश्यस्य स्ववृत्तित्वादितरयोः प्रतिषेधो युक्ततरः। नाभा.२।९५

अकृतव्यवहारापवादः

[4]पण्यमूल्यं भृतिर्न्यासो दण्डो यश्च प्रकल्पितः।
वृथादानाक्षिकपणा वर्धन्ते नाविवक्षिताः॥

(१) पण्यमूल्यं विक्रीतक्रयाणकमूल्यम्। भृतिः कर्मकरवृत्तिः। न्यासः स्थापनिकमुक्तं द्रव्यम्। दण्डो दोषविनयो राजकुले। अवहारक उच्छिल्लक गृहीतम्। वृथादानं यच्चारणमार्गणकादीनां प्रतिपन्नम्। आक्षिक-

---

* व्यप्र. स्मृचगतम्।

(१) **नास्मृ.**४।१०९; **अभा.**५३; **अप.**२।३७ न्न तद् (त्तत्र) (याच्यमानमयच्छंस्तु वर्धयेत् पञ्चकं शतम्); **नृप्र.**१८ धैत्य (धैद) उत्तरार्धं अपवत् : २१ न्न तद्वर्धत्य (द्वर्धते न त्व); **विता.**४८३ अपवत् :५३१ नृप्र.२१वत्.

(२) **नासं.**२।९४ प्रीतिदत्तस्य (प्रवृद्धस्येह) न्यस्य (न्यानां), **नास्मृ.**४।११० धर्मतः (कर्मणः); **अभा.**५३ नास्मृवत्; **व्यक.**१०९ न्यस्य (न्यानां); **विर.**१६ व्यकवत्.

(१) **नार्यं** २।९५, **नास्मृ** ४।१११ पक (पिक); **अभा.** ५३ नास्मृवत्; **स्मृच.**१५९ तृतीयपाद विना; **प्रका.** ९४ पू.

(२) **नास्मृ.**२।३६ यश्च प्रकल्पितः (यच्चावहारकम्); **अभा.**२६ नास्मृवत्; **मिता.**२।३८ भृति (धृति); **व्यक.**११० यश्च प्रकल्पितः (यच्चाभिहारिकम्); **स्मृच.**१५७; **विर.**२० व्यकवत्; **पमा.**२२४; **विचि.**१० यश्च प्रकल्पितः (यश्चाभिहारिकम्); **स्मृचि.**८; **नृप्र.**१८; **सवि.**२२६ मूल्य (माला) यश्च (यत्र); **चन्द्र** ९ व्यकवत्; **वीमि.**२।३९ (=) पण्य (पण्य) नाविव (नोऽविव) शेष व्यकवत्, **व्यप्र.**२३३, **व्यउ.** ७५ पण्य (पण्यं) स्मृत्यन्तरम्; **व्यम.**७५ मूल्य (मूल); **विता.**४८४; **सेतु.**१३ व्यकवत्: ३१५ विचिवत्; **प्रका.** ९३ (=); **समु.**८०.

पणा द्यूतहारितद्रव्यम् । एते पणाः सुचिरकालागतेनापि धनिना सामकाः स्वरूपस्थिता ग्रहीतव्याः, एते अविचारिता अविवक्षिता न वर्धन्त इत्यर्थः । अभा.२६

(२) अविवक्षिता अनाकारिता इति । मिता.२।३८

(३) पण्यस्य वस्त्रादेर्मूल्य पण्यमूल्यम् । उक्तेषु षट्सु अकृतवृद्धिर्नास्तीत्यर्थः । अत्र पण्यमूल्यस्यावृद्धिः प्रवासप्रतियाचनाभावे । न्यासस्य त्ववृद्धिः प्रतियाचनाभावे यथास्थितस्यैव । अतो न पूर्वोक्तप्रकरणोक्तवचनविरोधापत्तिः । ×स्मृच.१५७

(४) न्यासो निक्षेपः । पण्यमूल्यन्यासयोश्च याचितादत्तान्ययोरुपादानं, तयोः पूर्वं वृद्धिविधानात् । दण्ड उत्तमसाहसादिरूपः । आभिहारिक छलादिना गृहीतम् । वृथादान धर्ममनुद्दिश्य दत्तमर्पितम् । अविवक्षिताः उभाभ्यां अपरिभाषितवृद्धयः । विर.२०

(५) कात्यायनेन तु यन्निक्षेपपण्यमूल्ययोरकृतापि वृद्धिरुक्ता तच्छङ्खप्रोषितपरम् । *विचि.१०

बृहस्पतिः

व्यवहारपदोपक्रम.

पदाङ्गसहितस्त्वेष व्यवहारः प्रकीर्तितः ।
विवादकारणान्यस्य पदानि शृणुताधुना ॥
ऋणादानप्रधानानि द्यूताह्वानान्तिकानि च ।
क्रमशः संप्रवक्ष्यामि क्रियाभेदांश्च तत्वतः ॥

पद भाषादि, अङ्ग सशयप्रयोजनादि, तत्सहितः । पदानि अधिकरणानि ऋणादीनि । केनचित् विवादकरणानीति पठित्वा विवादः क्रियते येषु ऋणादानादिषु तानीति व्याख्यात, तत्र पदमनर्थक स्यात् । द्यूताह्वानान्तिकानि द्यूताह्वानावसानानि । विर.४

कुसीदनिरुक्ति.

कुत्सितात् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते ।

× पमा., सवि., व्यप्र. स्मृचगतम् । * शेष विरगतम् ।

(१) **व्यक.**१०५; **विर.**४ स्त्वेष व्यवहारः प्र (स्सम्यग् विवादस्त्वेष) न्यस्य (न्यत्र), **पमा.**२१९, **व्यप्र.**२२४ शृणुताधुना (शृणुतानि तु); **समु.**७३.

(२) **व्यक.**१०५ प्रधा (प्रदा), **विर.**४ व्यकवत्, **पमा** २१९; **व्यप्र.**२२४ नप्रधाना (नोद्ग्रहादी), **समु.**७३.

(३) **व्यक.**१०६ प्र (तु) ततः (च तत्); **विर.**५ व्यकवत्; **विचि.**२, **व्यप्र** २२५; **व्यम.**७४ मृणं तत. (मतः

चतुर्गुणं वाऽष्टगुणं कुसीदाख्यमृणं ततः ॥

कुत्सितात् सीदतश्राधमर्णात् सकल धनं यद् गृह्यते निर्विशङ्कैरुत्तमर्णैः । चतुर्गुणं वाऽष्टगुणमिति वाकारोऽनास्थाया, तेन द्वैगुण्यादिलाभः । अत्र कुसीदमृणमित्येव लक्षणम् । तच्च नारदोक्तौ स्फुटमेव, शेष तु कुसीदपदे अवयवव्युत्पत्तिमात्रकथनम् । विर.५

ऋणदानविधिः

परिपूर्णं गृहीत्वाधिं बन्धं वा साधु लग्नकम् ।
लेख्यारूढं साक्षिमद्वा ऋणं दद्याद्धनी सदा ॥

(१) परिपूर्णं सवृद्धिकमूलद्रव्यपर्याप्तमित्यर्थः । स्मृच.१३५

(२) आधिबन्धशब्दौ भोग्याधिपरौ । लग्नकसाधुत्वं ऋणदापयितृत्वस्थैर्यार्थ । ऋणप्रयोक्तुश्चायमुपदेशः । विर.५

(३) यथाविश्वासमेतेषां करणम् । अयमुपदेशः । आधिर्भोग्यः । बन्धोऽत्र भोगलाभादन्यतः सुवर्णादि । अतो भेदः । विचि.३

(४) नन्वाधिबन्धयोरेकार्थत्वेन लोकप्रसिद्धत्वात्कथं बन्ध वेत्युक्तिरित्याशङ्क्याह विवक्षितं बन्धशब्दस्यार्थमाह नारदः — 'निक्षेपो मित्रहस्तस्थो बन्धो विश्वासकः स्मृतः' । इति । व्यप्र.२२४

(५) यावत्तावकमृण न शोध्यते तावदेतद्गृहक्षेत्रादिदानविक्रयाधिकरणाद्यहं न करिष्यामीति निर्बन्धो बन्धः । लग्नकः प्रतिभूः । व्यम.७४

वृद्धिप्रकाराः तल्लक्षणानि च

वृद्धिश्चतुर्विधा प्रोक्ता पञ्चधाऽन्यैः प्रकीर्तिता ।
षड्विधाऽस्मिन् समाख्याता तत्वतस्तां निबोधत ॥

स्मृतम्), **सेतु.**२; **समु.**८० शड्कैः (शड्क) वा (चा) शेष व्यमवत्; **विव्य.**२१.

(१) **व्यक.**१०६, **स्मृच.**१३५; **विर.**५; **पमा.**२२०; **विचि.**२; **नृप्र.**१८; **व्यप्र.**२२४; **व्यम.**७४; **सेतु.**२; **प्रका.**८५; **समु.**७३, **विव्य.**२१.

(२) **अप.**२।३७ षड्विधाऽस्मिन् (षड्विधाऽन्यैः) स्तां (स्ता); **व्यक.**१०७, **स्मृच.**१५४; **विर.**९; **पमा.**२२०; **विचि.**५ षड्विधाऽस्मिन् (षड्विधाऽन्यैः); **स्मृचि.७** चतुर्विधा (चतुर्गुणा) शेष विचिवत्; **नृप्र.**१८ धत (धय) शेष विचिवत्; **सवि.**२२२ विचिवत्; **वीमि.**२।३७

(१) अस्मिन्नस्मदीये धर्मशास्त्रे । स्मृच.१५४

(२) षड्विधा मे इति क्वचित्पाठः । तत्र मे मम मते । व्यप्र.२२५

कायिका कालिका चैव चक्रवृध्दिरथाऽपरा ।
कारिता च शिखावृद्धिर्भोगलाभस्तथैव च ॥
कायिकां भोगवृद्धिं च कारितां च शिखात्मिकाम् ।
चतुष्टयीं वृद्धिमाहुश्चक्रवृद्ध्या तु पञ्चमीम् ॥
कायिका कर्मसंयुक्ता मासग्राह्या तु कालिका ।
वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता ॥

गोधोटकादेराधीकृतस्य दोहनवाहनादिकः कायिको व्यापार एव यत्र वृद्धित्वेन कल्पितः सा कायिकेत्यर्थः । मासग्राह्या प्रतिमास लभ्या वृद्धिः कालिका । वृद्धेरपि प्रतिमासं मूलभावेन पुनर्वृद्धिश्चक्रवृद्धिः । ऋणिकेच्छया कृता वृद्धिः कारिता 'इच्छाकृता कारिता स्यात्' इति स्मृत्यन्तरेऽभिधानात् । तेन छान्दसोऽय स्वार्थ एव कारितेति णिच् प्रत्ययो द्रष्टव्यः । परप्रेरणया तु कारिता वृद्धिर्निपिद्धैव । ×स्मृच.१५४

प्रत्यहं गृह्यते या तु शिखावृद्धिस्तु सा मता ।
शिखेव वर्धते नित्यं शिरश्छेदान्निवर्तते ॥
मूले दत्ते तथैवैषा शिखावृद्धिस्ततः स्मृता ।
गृहात् स्तोमः शदः क्षेत्राद्भोगलाभः प्रकीर्तितः ॥

(१) उदाहरणम्— तण्डुलप्रस्थस्य प्रत्यहं तण्डुलमुष्टिर्गृह्यत इति । गौमि.१२।३२

(२) प्रतिदिनलभ्या तु शिखासादृश्याच्छिखावृद्धिरिति व्यपदिश्यते । कि पुनः शिखासादृश्यमित्यपेक्षिते बृहस्पतिरेवाह 'शिखेव वर्धते नित्य शिरश्छेदान्निवर्तते । मूले दत्ते तथैवैषा शिखावृद्धिस्तु सा स्मृता' ॥ प्रत्यह गृह्यते इति सप्रतिपन्नदिनसख्याविशिष्टवृद्धिग्रहणकालोपलक्षणार्थम् ।

गृहात्तोष इत्यादेरयमर्थः । निवासनिबन्धनो गृह सकाशात्सतोषः । क्षेत्रात्सभूतं धान्यादिफल च भोगलाभाख्यो वृद्धिप्रभेद इति । गृहक्षेत्रग्रहण स्थावरात्मकभोग्याधेरप्युपलक्षणार्थम् । *स्मृच.१५४

(३) स्तोमोऽत्र गृहवासनिमित्तक भाटकम्। गृहमत्रोपलक्षण, तेन घट्टादावपि स्तोम एव लाभ इति बोद्धव्यम् । विर.१३

(४) शस्यादिफललाभः शद इत्युच्यते । शदृल्

× सवि., व्यप्र. स्मृचवत् ।

* सवि. स्मृचगतम् ।

विचिवत्, **व्यप्र.**२२५ विचिवत्; **विता.**४७९ कीर्तिता (कीर्तिताः) शेष विचिवत्, **सेतु.**५ अपवत्, द्वितीयपाद विना, **प्रका.**९२, **समु.**७८, **विव्य.**२२ स्मृचिवत्

(१) **अप.**२।३७ थापरा (तोऽपरा), **व्यक**१०७; **स्मृच.** १५४ कारिता च (कारिताऽथ), **विर.**९; **पमा.**२२० भोंग (भोग) शेष अपवत्; **दीक.**३५; **विचि.**५ रथा (स्तथा) रिता च (रिताऽथ); **स्मृचि.**७ विचिवत्, **सवि.**२२२ विचिवत्; **वीमि.**२।३७ विचिवत्; **व्यप्र.**२२५ थापरा (तोऽपरा) च शिखा (सशिखा); **विता** ४८० उक्त, **सेतु.**५ रथापरा (स्तथैव च) रिता च (रिताऽथ) स्तथैव च (स्तथापरा), **प्रका** ९२ स्मृचवत्; **समु.**७८ स्मृचवत्; **विव्य.**२२ रथा (स्तथा) रिता च (रिताऽथ). (२) **सवि** २२४.

(३) **अप.**२।३७ सद्या (सादृश्या); **गौमि.**१२।३२ प्रथमपादः; **स्मृच.**१५४; **ममु.**२।१५३ कर्म (काय) तु (च), **पमा.**२२० ऋणि (तृणि); **सवि.**२२३; **मच.**८।१५३ ममुवत्; **व्यप्र.**२२५; **विता.**४८० प्रथमपादः; **प्रका.**२८३, **समु.**७८ पमावत्; **नन्द.**८।१५३ संयुक्ता (सशोध्या) तु (च) कारिता (कारिका).

(१) **अप.**२।३७ मता (स्मृता), **व्यक.**१०८ अपवत्; **गौमि.**१२।३२ या तु (या हि)मता(स्मृता)कात्यायनः,**स्मृच.** १५४ अपवत्; **विर** १२, **पमा.**२२१ पू.; **विचि.**५-६; **स्मृचि.**८ नित्य (या तु); **नृप्र.**१८ तु सा स्मृता (प्रकीर्तिता) पू.; **सवि.**२२३ अपवत्, **व्यप्र.**२२५ पू., अपवत् : २२६ उत्त.; **विता.**४८० तु (च) मता (स्मृता) पू.; **सेतु.**६; **प्रका.** ९२ अपवत्, **समु.**७८-७९ अपवत्; **विव्य.**२२-२३.

(२)**अप.**२।३७ स्ततः (स्तु सा) लाभः प्रकीर्तितः (लाभ तथैव च),**व्यक.**१०८,**गौमि.**१२।३२पू., कात्यायनः;**स्मृच.**१५४ स्ततः (स्तु सा) स्तोम. (तोषः) लाभ. (कामः);**विर.**१२पू., १३ उत्त.; **पमा.**२२१ उत्त.; **विचि.**६; **स्मृचि.**८; **सवि.**२२३ स्ततः (स्तथा) स्तोमः शदः (तोषः फल); **व्यप्र.**२२६ पू.: २२५ स्तोम. शद. (तोषः फल) उत्त., **विता.**४८० (गृह्यते तु क्षेत्रफलं भोगलाभः स सस्मृतः) उत्त ; **प्रका.**९२ स्ततः (स्तु सा) स्तोमः शदः (तोषः फल), **समु.**७९ स्ततः (स्तु सा); **विव्य.**२३.

शातन इति धात्वनुसारात् । विचि.६

(५) बन्धकीकृताद् गृहान्निवासादिजनितः सतोषः । व्यप्र.२२६

शिखावृद्ध्यादीनामुपरमावधि

[1]शिखावृद्धिं कायिकां च भोगलाभं तथैव च ।
धनी तावत्समादद्यात् यावन्मूलं न शोधितम् ॥

(१) भोग्यादिषु द्विगुणाधिकापि वृद्धिः । चन्द्र.२

(२) शिखावृद्ध्यादीनामनुपरममाह—शिखावृद्धिमिति । न शोधित न प्रतिदत्तमृणिकेनेत्यर्थः । व्यप्र.२३१

[2]याच्यमाना न चेद्दद्यात् वर्धते पञ्चकं शतम् ॥
पादोपचयात् क्रमेणेतरेषाम् ।

[3]हिरण्ये द्विगुणा वृद्धिस्त्रिगुणा वस्त्रकुप्यके ।
धान्ये चतुर्गुणा प्रोक्ता सदवाह्यलवेषु च ॥
उक्ता पञ्चगुणा शाके बीजेक्षौ षड्गुणा स्मृता ।
लवणस्नेहमद्येषु वृद्धिरष्टगुणा स्मृता ।
गुडे मधुनि चैवोक्ता प्रयुक्ते चिरकालिके ॥

(१) कुप्य त्रपुसीसकम् । शदः क्षेत्रफलम् । तच्च गोबलीवर्दन्यायाद्धान्यव्यतिरिक्त पुष्पमूलफलादिकम् । वाह्यो बलीवर्दतुरगादिः । लवो मेषलोमचमरीकेशादिः । स्नेहो मधूच्छिष्टादिः । 'प्रयुक्ते चिरकालिक' इति पदद्वय सप्तम्येकवचनान्तेन हिरण्यादिपदेन संबध्यते । शदवाह्यलवेषु चिरकालिकेष्वित्यध्याहारः । एव लवणस्नेहमद्येष्वप्यध्याहारः । स्मृच.१५९-१६०

(२) हिरण्ये सुवर्णरजते, कुप्यशब्दोऽत्र हिरण्यरजतान्यताम्रादिपरः । विर.१८

(३) तदेतत्सर्वमधमर्णयोग्यतानुसारेण दुर्भिक्षादिकालवशेन व्यवस्थापनीयम् । पमा.२२७

(४) अत्र चिरकालशब्देन प्रतिश्रुताया अशीतिभागाया वृद्धेर्यस्मिन् समये द्वैगुण्यादिप्रापकत्व भवति ततोऽधिकः कालो गृह्यते । व्यप्र.२२८

[4]तृणकाष्ठेष्टकासूत्रकिण्वचर्मास्थिवर्मणाम् ।
हेतिपुष्पफलानां च वृद्धिस्तु न निवर्तते ॥

(१) किण्व सुराद्रव्योपादानकारणम् । चर्म फलकः । वर्म कवचम् । हेतिः शस्त्रम् । अप.२।३९

(२) चर्म बाणादिनिवारक फलकम् । वर्म कवचम् । हेतिरायुधम् । पुष्पफलयोर्वृद्ध्यनिवृत्तिः प्रतिदानवेलाया अत्यन्तसमृद्धाधमर्णविषये वेदितव्या । अन्यथा पूर्वप्रकरणोक्तत्रिगुणादिप्रतिपादकवचनविरोधापत्तेः । *स्मृच.१६१

(३) अस्थि दन्तशङ्खादि । चर्म कृष्णशारादेः कृत्तिः । अत्र वृद्धिविशेषवत्तया पुष्पफलयोर्बोधनात् विरोधे तत्र दुर्लभे पुष्पफले विवक्षिते, अत्र तु सुलभे इति परीहारः । +विर.१९

---

(१) **अप.**२।३७, **व्यक.**१०८; **स्मृच** १६१, **विर.**१३, **पमा.**२३०; **विचि** ६, **सवि.**२३० भोग (भाग), **चन्द्र.**२ का (की); **व्यप्र.**२३१, **व्यउ.**३५, **सेतु.**७, **प्रका** ९४, **समु.**८१; **विश्व** २३. (२) **स्मृच.**१८०. (३) **विश्व** २।३९.

(४) **अप.**२।३९ सदवाह्य (शदे वाह्ये), **व्यक** ११०; **स्मृच.**१५९; **विर.**१८, **पमा.**२२६, **दीक.**३५ कुप्यके (कुप्ययो.), **विचि.**१२, **स्मृचि.**९ वस्त्रकुप्यके (कुप्यवस्त्रके), **सवि.**२२७ स्मृचवत्; **चन्द्र.**७ पू, **वीमि.**२।३९, **व्यप्र.**२२८, **व्यम** ७५, **सेतु.**१० वेषु (वेऽपि), **प्रका.**९४; **समु.**८०, **विश्व.**२५ प्रोक्ता सदवाह्य (वृद्धि शदे वाह्ये).

(५) **अप.**२।३९ जेक्षौ षड् (जेक्ष्वष्ट), **व्यक.**११०; **स्मृच.**१५९ ष्टगुणा स्मृता (ष्टगुणा मता) ·१५३ (=) प्रथमार्धः, **विर** १९, **पमा.**२२७ स्नेह (स्नेद) शेष स्मृचवत्, **विचि.**१२-१३, **स्मृचि.**९ क्षौ (च); **सवि.**२२७ बीजेक्षौ षड्गुणा स्मृता (बीजस्था षड्गुणा स्थिता) कालिके (कालिका), **चन्द्र.**७ कालिके (कालिका), **वीमि.**२।३९; **व्यप्र.**२२८ स्मृचवत्; **विता.**४८७ प्रयुक्ते (षड्गुणा) अन्त्यार्धद्वयम्; **सेतु.**१० प्रथमार्धः : ११५; **प्रका.**९१,९४; **समु** ८०; **विश्व.**२५ प्रथमार्धः.

* पमा स्मृचवत् । + चन्द्र विरवत् ।

(१) **अप.**२।३९; **व्यक.**११०; **स्मृच.**१६१; **विर.**१९ चर्मास्थिवर्म (पर्णास्थिचर्म); **पमा.**२२९, **विचि.**१३ किण्व (किण्ण) चर्मास्थिवर्म (पर्णास्थिचर्म) स्तु न निवर्तते (श्व न विधीयते); **सवि.**२२८; **चन्द्र.**७ किण्वचर्मास्थिवर्म (किल्वपर्णास्थिचर्म) निवर्तते (विधीयते); **व्यप्र.**२३०; **विता.**४८७ न निवर्तते (नातिवर्तते); **सेतु.**११ चर्मास्थिवर्म (पूर्णास्थिचर्म) स्तु न निवर्तते (श्व न विधीयते); **प्रका.**९४; **समु.**८१; **विश्व.**३५ किण्वचर्मास्थिवर्म (किल्वपर्णास्थिचर्म) स्तु न निवर्तते (श्व न विधीयते.)

(४) किण्णं पैठीमूलम् । हेतिरस्त्रम् । एतच्चाकृतवृद्धिनिषेधार्थम् । कार्यवशात्तु वृद्धिरङ्गीकृता भवत्येव । अत एव 'फालकैटाविकस्य च' इति 'पुष्पफलमूलानि च' इति कात्यायनवसिष्ठाभ्यां द्विगुणत्रिगुणवृद्धिकथनम् । धान्येऽनेकवृद्धयो मूल्यानुसारेण । तेन प्रयोगकाले शस्योत्पत्तेश्च प्राक् यादृशं मूल्यं शस्योत्पत्यनन्तरं तस्मादल्पह्रासे त्रिगुणम् । ततोऽधिकह्रासे चतुर्गुणम् । ततोऽधिकह्रासे पञ्चगुणमिति । एतच्च सर्ववृद्धिकथनमूनमात्र एव । कालान्तरस्यानुपदेशात् । विचि.१३

(५) देशविशेषविषया वा वेदितव्या । *व्यप्र.२३०

अशीतिभागो वर्धते लाभे द्विगुणतामियात् ।
प्रयुक्तं सप्तभिर्वर्षैस्त्रिभागोनैर्न संशयः ॥

द्वैगुण्यहेतुभूतं चिरकालमुदाहर्तुं अशीतिभागवृद्ध्या प्रयुक्त धन अष्टमासाधिकषड्वत्सरे पूर्णे द्वैगुण्य आपद्यत इत्याह स एव–– अशीतिभाग इति । लाभे प्रतिमासमशीतिभागात्मके सगृह्यमाणे । स्मृच.१६०

भोगो यत् द्विगुणादूर्ध्वं चक्रवृद्धिश्च गृह्यते ।
मूलं च सोदयं पश्चात् वार्धुष्यं तद्विगर्हितम् ॥

अस्यार्थः, भोगद्वारा द्विगुणाधिकधने प्रविष्टेऽपि क्षेत्रादिविषयस्य यो भोगः, या च चक्रवृद्धिः, यदपि आधुन्मोचनसमये पुनः सोदयधनग्रहणं, तदवार्धुष्यं विगर्हितं अधर्माय तद्भवति, न तु भोगादिकं तन्न लभते एव तल्लाभस्य तैस्तैर्वाक्यैर्बोधनात् । ×विर.१४

कात्यायनः

ऋणग्रहणानधिकारी

न स्त्रीभ्यो दासबालेभ्यः प्रयच्छेत् किञ्चिदुद्धृतम् ।
दाता न लभते तत्तु तेभ्यो दत्तं तु यद्वसु ॥

* शेष स्मृचवत् । × विचि. विरगतम् ।

(१) व्यक.१०६ नैनं (नैव); स्मृच.१६०; विर.७ व्यकवत्; प्रका.९४; समु.८१.

(२) व्यक.१०९; ममु.८।१५३ भो (भा) मूल (पूर्ण); विर.१४; विचि.८ यत् (यो) तद्वि (तत्तु); मच.८।१५३ ममुवत्; धामि.२।३९ तद्वि (तत्तु):२।६४ गो यत् (गाय) तद्वि (तत्तु); विव्य.२३ गो यत् (गाय) तद्वि (तत्र).

(३) व्यक.१०६ तु य (च य); स्मृच.१३७ किञ्चि (क्वचि); विर.६; पमा.२५५ किञ्चिदुद्धृतम् (क्वचिदुद्धते) दाता (दानं);

(१) स्त्र्यादीनामस्वतन्त्रत्वादिति भावः । उद्धृत प्रयोगाय गृहीतम् । स्मृच.१३७

(२) उद्धृतमुद्धरणमृणमिति यावत् । विर.६

वृद्धिप्रकारा. तल्लक्षणानि च

ऋणिकेन तु या वृद्धिरधिका संप्रकल्पिता ।
आपत्कालकृता नित्यं दातव्या कारिता तु सा ।
अन्यथा कारिता वृद्धिर्न दातव्या कथंचन ॥

(१) शास्त्रोक्तादधिका धनदानप्रलोभनार्थं स्वय कल्पिता कारिताख्या दातव्या । न पुनरेवविधा धनिकेन कारिता दातव्येत्यर्थः । स्मृच.१५४

(२) ऋणिकेन तु या स्वकार्यतया आशीतभागद्विकशतादिरूपवृद्धितोऽधिका वृद्धिर्व्यवस्थापिता, सा कारिता, सा च तेन देया, अन्यथा तेनाव्यवस्थापिता बलेन स्वीकारिताऽपि न देयेत्यर्थः । विर.१०–११

यदि स्वयं कृता न स्यात्कारितां वृद्धिमाप्नुयात् ॥
एकान्तेनैव वृद्धिं तु शोधयेत्तत्र चर्णिकम् ।
प्रतिकालं ददात्येव शिखावृद्धिस्तु सा स्मृता ॥
आधिभोगस्त्वशेषो यो वृद्धिस्तु परिकल्पितः ।
प्रयोगो यत्र चैवं स्यादाधिभोगः स उच्यते ॥

(१) अशेषः स्थावरमात्रसंबन्धीत्यर्थः । स्मृच.१५४

(२) आहितस्य भोगो वृद्धिरित्येवं कल्पयित्वा यत्र

विचि.२ यच्छेत् (दद्यात्); चन्द्र.५; सेतु २ यच्छेत् (दद्यात्) तु य (च य); प्रका.८५; समु ७३; विव्य.२१ विचिवत्.

(१) व्यक.१०७; स्मृच.१५४, ममु.८।१५३ तु या (कृता) तु सा (तथा), विर.१० कारिता तु सा (सा तु कारिता) नं दातव्या (दातव्या न); विचि.५ कल्पि (कीर्ति); स्मृचि.८ विचिवत्; सवि.२२३; मच.८।१५३ ऋणि (धनि) का स (कार्मं) त्काल (त्काले); व्यप्र.२२६ कारिता तु सा (सा तु कारिता) बृहस्पतिः; व्यम.७४ तृतीयार्धं विना; सेतु.६ कल्पि (कीर्ति) कारिता तु सा (सा तु कारिता); प्रका.९२ स्मृचवत्; समु.७९; विव्य.२ कल्पि (कीर्ति) त्काल (त्काले).

(२) समु.८०. (३) स्मृच.१५४ (=); सवि.२२३; व्यप्र.२२६ उत्त.; व्यम.७४ उत्त., प्रका ९२; समु.७९ र्णिकम् (र्णिकः).

(४) व्यक.१०८; स्मृच.१५४; विर.१२ तः (ता); विचि.६; व्यप्र.२२६ गो य (गे य); सेतु.६-७; प्रका.९२; समु.७९.

ऋणप्रयोगः तत्र या वृद्धिरसावशेष आधिभोग इत्यर्थः । विर.१३

(३) यस्मिन् ऋणादानप्रयोगे स्थावरोपभोग आधित्वेन परिकल्पितः तत्र सा वृद्धिः आधिभोग इत्युच्यत इत्यस्यार्थः । व्यप्र.२२७

वृद्धेरपरमावधिः

कुप्यं पञ्चगुणं भूमिः तथैवाऽष्टगुणा मता ।
सद्य एवेति वचनात् सद्य एव प्रदीयते ॥
मणिमुक्ताप्रवालानां सुवर्णरजतस्य च ।
तिष्ठति द्विगुणा वृद्धिः फालकैटाविकस्य च ॥

तिष्ठति चिरादपि द्वैगुण्याधिका न भवतीत्यर्थः । फाल फलोद्भवं कार्पासादि । कैट कीटभव वस्त्रादि । आविक मेषभव कम्बलादि । विर.१७

[उ]**तैलानां चैव सर्वेषां मद्यानामथ सर्पिषाम् ।**
वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य च ॥

याचितपण्यमूल्यादिवृद्धिः तदपवादश्च

कृत्वोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत् ।
ऊर्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात् ॥

(१) यश्च याचितकमादाय याचितोऽप्यदत्त्वा देशान्तरं व्रजति त प्रति तेनैवोक्तम्— कृत्वोद्धारमित्यादि । +मिता.२।३८

+ पमा., व्यप्र., व्यम. मितावत् ।

(१) **सवि.**२३०. (२) **व्यक.**११० फाल (शाण), **स्मृच** १६०, **विर.**१७, **विचि.**१२ धृति (धनौ), **स्मृचि.**९, **सवि.** २२८ रज (रचि) द्वि (त्रि) चतुर्थपाद विना; **चन्द्र** ६, **वीमि.**२।३९ फा (का), **व्यप्र.**२२९ फा (फ), **व्यम.७५** फा (पं) कस्य च (तस्य तु); **विता** ४८७ पृ, **सेतु** ९, **समु** ८० सुवर्ण (स्वर्णस्य).

(३) **व्यक.**११० लानां (लानि) मथ (मपि); **स्मृच.** १६०, **विर.**१९ ज्ञेया (प्रोक्ता); **पमा.**२२८ चैव (च), **विचि.**१२ विरवत्; **स्मृचि.**९; **सवि.**२२७; **चन्द्र.**६ विरवत्; **वीमि** २।३९ विरवत्, **व्यप्र.**२२९, **व्यम.७६**; **सेतु** १० मथ (मपि) ज्ञेया (प्रोक्ता); **प्रका.**९४, **समु.८१.**

(४) **मिता** २।३८ त्वो (तो); **अप.**२।३७ त्वो (तो) ऊर्ध्वं मासत्रयात्तस्य (ऋतुत्रयस्योपरिष्टात्) वृ (ऋ); **व्यक.** १०९; **विर.**१५ स्तु (श्च); **पमा.**२२३ त्रयात्त (प्रयात); **विचि.८**; **नृप्र.**१८; **व्यप्र.**२३२; **व्यड.७५** (=) मितावत्; **व्यम** ७५; **सेतु.७**; **समु** ७९; **विव्य.२३.**

(२) उद्धारोऽत्र कलामव्यवस्थाप्य गृहीतं धनम् । दिशं व्रजेत् अर्थिसादेश्य त्यजेत् । तस्य अधमर्णस्य देयं तद्धनं भवति । विर.१५

पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् ।
ऋतुत्रयस्योपरिष्टात् तद्धनं वृद्धिमाप्नुयात् ॥

अप्रतियाचितविषयमेतत् । किमत्र वृद्धेः परिमाणम् । उच्यते । अधमर्णाद्यङ्गीकारायत्तपरिमाणस्यात्रासंभवादन्यस्य च पुरुषबुद्धिकल्पितस्य शास्त्रबाह्यस्ययुक्तत्वाच्छास्त्रोक्तमेव परिमाण ग्राह्यम् । तच्च पूर्वस्मिन् प्रकरणे दर्शितम् 'अशीतिभागम्' इत्यादिना ।

*स्मृच.१५६

[२]**निक्षेपं वृद्धिशेषं च क्रयविक्रयमेव च ।**
याच्यमानमदत्तं चेद्वर्धते पञ्चकं शतम् ॥

(१) क्रयविक्रयशब्देन पण्यमूल्यं लक्ष्यते । स्मृच.१५६

(२) वृद्धिशेषमिति यद्यपि कर्मधारयसमासोऽभ्यर्हितत्वात् अत्र विवक्षितः, तथापि वृद्धिपदसमानाधिकरणः

* पमा., सवि., व्यप्र. स्मृचगतम् ।

(१) **व्यक.**१०९; **स्मृच** १५६ यो (यौ) तद्धनं वृद्धिमा (धनं वृद्धिमवा); **विर.**१५; **पमा.**२२४ स्मृचवत्; **विचि** ८; **स्मृचि.**८ द्धन (त्पण्य) नारद., **नृप्र.**१८ तद्धन (मौल्य) मा (मवा); **सवि.**२२५, **व्यप्र** २३२, **व्यम.७५**; **विता.**४८४ दिश (दिशि); **सेतु** ७-८, **प्रका.**९३ स्मृचवत्; **समु.७९** नारदः, **विव्य.२३**

(२) **मिता.**२।३७ यवि (य वि) नमदत्त चेत् (नो न चेद्दद्यात्), **व्यक.**१०९ नमदत्त (नेन चेद्दद्यात्), **स्मृच** १५६, २१८, **विर.**१५ यवि (य वि), **पमा.**२२४ क्षेप (क्षिप्त); **विचि.८** मितावत्; **स्मृचि.८** अदत्त चेत् (न चेद्दद्यात्) नारद.; **नृप्र.**१८,२४ अदत्त चेत् (न चेद्दद्यात्); **सवि.**३१० (=), **चन्द्र** ३४ स्मृचिवत्; **वीमि.**२।६५ मितावत्; **व्यप्र.** २३२ क्षेप (क्षिप्त) यमे (य प). २८३ यवि (य वि) शेष स्मृचिवत्. ३४३ (=) यवि (य वि); **व्यड.७७** याच्यमानमदत्त (याचितस्ते न दद्यात्) उत्त., स्मृत्यन्तरम्: ८० याच्यमानमदत्तं चेत् (दीयमान न चेद्दद्यात्); **व्यम.७५** क्षेपं (क्षिप्त) यवि (यं वि): ८५ यवि (यं वि) शेष स्मृचिवत्; **विता.५६०** यविक्रय (य याचित) नमदत्तं (नो न दद्यात्) : ६१९ यवि (य वि) नमदत्त (नो न दद्यात्) नारदः; **सेतु.८** यवि (यं वि) चेत् (वै); **समु.७९** पमावत्; **विव्य.२३** मितावत्.

शेषपदार्थः शेषिणमपेक्षते एव तदाकाङ्क्षाया च वृद्धिशब्देन साक्षादुपस्थापिताया एव वृद्धेः शेषित्वे युक्तमिति वृद्धेरेव शेषः स च दत्तवृद्धेरन्यः। क्रय क्रयद्रव्य वस्त्रादि। विक्रयं विक्रयसाधनमूल्यम्। तेन यो मूल्य गृहीत्वा विक्रीतमपि वस्त्रादि याचित न ददाति, स पञ्चकशतक्रमेण वृद्धि दद्यादित्यर्थः। विर.१५

(३) याचिते ततः षण्मासानन्तर पणशते पञ्चपणात्मिका वृद्धिः शूद्रेण देया। द्विक त्रिकमित्याद्येकवाक्यतावलात्। विचि.९

(४) प्रतियाचने त्वेतस्य निक्षिप्तवृद्धिशेषयोश्च तद्दिनमारभ्य प्रतिमासं शते पञ्चक वर्धत इत्याह स एव— निक्षिप्तमित्यादि। व्यप्र.२३२

[1]**प्रीतिदत्तं न वर्धेत यावन्न प्रतियाचितम्।**
याच्यमानमदत्तं चेत् वर्धते पञ्चकं शतम्॥

(१) अतश्चास्य प्रीतिदत्तस्यायाचितस्यापि दानदिवसादारभ्य यावद्द्विगुणं कालक्रमेण वृद्धिरित्यनेन वचनेनोच्यत इति तदप्यसत्। अस्यार्थस्यास्माद्वचनादप्रतीतेर्द्विगुणं प्रतिदातव्यमित्येतावदिह प्रतीयते। मिता.२।५६

(२) प्रीतिदत्तं प्रीत्या प्रामितकदत्तम्। अत्र मासत्रयोपरि वृद्धिः। पूर्वलिखितकात्यायनवचनैकवाक्यतावलात्। विचि.९

(३) प्रतियाचनदिनमारभ्य पणशतस्य पणपञ्चकं प्रतिमासं वर्धत इत्यर्थः। व्यप्र.२३२

[2]**यो याचितकमादाय तमदत्त्वा दिशं व्रजेत्।**
ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्॥

(१) **मिता.**२।५६ (प्रीतिदत्तं तु यत्किञ्चिद्धर्षते न त्वयाचितम्); **व्यक.**१०९; **स्मृच.**१५६; **ममु.**८।१५२ नमद (न न द); **विर.**१५; **पमा.**२२३; **विचि.**९ अदत्तं चेत्(न चेद्दत्ते); **नृप्र.**१८ ममुवत्; **सवि.**२२६ चेत् (च) स्मरणम्, **मच.** ८।१५२ ममुवत्; **चन्द्र.**५ विचिवत्; **व्यप्र.**२३१ सविवत्: २५४ मितावत्, स्मरणम्; **व्यउ.**३१ मितावत्, स्मृतिः, **व्यम.**७५; **सेतु.**८ नमदत्तं चेत् (ने न चेद्दत्त); **प्रका.**९३; **समु.**७९; **विव्य.**२४ विचिवत्.

(२) **मिता.**२।५८; **व्यक.**१०९; **स्मृच.**१५६; **विर.** १६ तम (तद्) (ऋतुत्रयस्योपरिष्टात् तद्धनं वृद्धिमाप्नुयात्); **पमा.**२२३; **विचि.**९ तम(न तत्)उत्तरार्ध विरवत्; **स्मृचि.** ८ तद्धनं (तत्पण्य) नारदः; **नृप्र.**१८ ऊर्ध्वं ... तस्य (ऋतुत्रय-

(१) कृतोद्धार याचितकमादायेत्यर्थः। स्मृच.१५६

(२) याचितकमर्पितम्। विर.१६

(३) एतच्चाप्रतियाचितविषयम्। +पमा.२२३

(४) देशान्तरगमन तत्राऽविवक्षितम्। विचि.९

स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित्।
तं ततोऽकारितां वृद्धिमनिच्छन्तं च दापयेत्॥

(१) यः पुनः स्वदेशे स्थित एव याचितो याचितक न ददाति त याचितकालादारभ्य वृद्धि दापयेद्राजा। *मिता.२।३८

(२) अत्र च वत्सरातिक्रमे द्विकादिरूपा वृद्धिर्बोद्धव्या। विर.१६

(३) ततः प्रतियाचितकालादारभ्येत्यर्थः। एतत् कञ्चिदवधिमपरिकल्प्य याच्ञाऽऽप्राते ज्ञेयम्। अवधि स्वीकृत्य तदतिक्रमे त्वतिक्रमदिनमारभ्य तद्धनस्य वृद्धिर्ज्ञेया। 'तदहा वृद्धिमाप्नुयात्' इति न्यायसाम्यात्। व्यप्र.२३२

चर्मशस्त्रासवद्यूतपण्यमूल्येषु सर्वदा।
स्त्रीशुल्के च न वृद्धिः स्यात् प्रातिभाव्यागतेषु च॥

+ व्यप्र. पमावत्। * स्मृच. मितावत्।

स्योपरिष्टात्); **सवि.**२२५; **चन्द्र.**५ विरवत्; **व्यप्र.**२३२; **व्यम** ७५ सवत्सरात् (मासत्रयात्); **विता.**४८३ व्यमवत्; **सेतु.**८ विरवत्; **प्रका.**९३; **समु.**७९.

(१) **मिता.**२।३८; **अप.**२।३७ (स्वदेशस्थोऽपि वा यस्तु न दद्याद्याचितोऽसकृत्। स भर्त्राऽऽकारितो वृद्धिमनिच्छन्नपि चावहेत्); **व्यक.**१०९ तं ततो (स तत्रा) शेषं अपवत्; **स्मृच.** १५६; **विर.**१६ पूर्वार्ध अपवत्, त ततो (स तत्रा) न्त च दापयेत् (नपि चावहेत्); **पमा.**२२३ ततोऽ (ततः); **विचि.**९ न्त च दापयेत् (नपि चाहरेत्) शेष विरवत्; **स्मृचि.**८ दापयेत् (वाहरेत्) शेषं विरवत्, नारदः, **नृप्र.**१८ कचित् (सकृत्)च्छन्तं च(च्छन्नपि);**सवि.**२२५ शेऽपि(शेऽव) स्मरणम्; **चन्द्र.**५ पूर्वार्ध अपवत्, त ततोऽ (स तस्य) न्त च दापयेत् (नपि चाहरेत्); **व्यप्र.**२३२; **व्यउ.**७५ (=) ततो (नृपो); **व्यम.**७५ सविवत्; **विता.**४८३ त ततोऽ(ततोऽना); **सेतु.**९ विरवत्; **प्रका.**९३ ततोऽ(ततः); **समु.**७९ पमावत्; **विव्य.** २४ विरवत्, नारदः.

(२) **व्यक.**१११ च न (न च); **स्मृच.**१५७ ल्येषु (ल्ये च); **विर.**१०; **पमा.**२२५ धूत (धूते) ल्येषु (ल्ये च) ल्के च (ल्केषु); **सवि.**२२६ विरवत्; **वीमि.**२।३९ (वर्मशस्त्र-

(१) सर्वदेति वदन् प्रतियाचनादेः परस्तादपि नास्त्यकृता वृद्धिरिति दर्शयति। पण्यमूल्ये वचनान्तरा-विरोधः पूर्ववदवसेयः। यद्यपि सर्वदेति सर्वशेषः प्रतिभाति तथाऽप्यविरोधाय पण्यमूल्याशेषता मन्तव्या।
स्मृच.१५७

(२) शस्यं धान्यस्तम्बः। आसवो मद्यविशेषः। स्त्रीशुल्कमासुरादिविवाहे देयद्रव्यं वेश्यादिदेयं च। प्रतिभाव्यागतं लग्नकस्य प्रतिभाव्यात् देयता गतम्। चर्मादावकृता वृद्धिर्न भवतीति तात्पर्यम्। विर.२०

(३) एवं चर्मणोऽपि वृद्ध्यभावोक्तिः प्रतियाचना भावे। तथा च न तच्छेषताऽपि। एव च न पूर्वोक्ता क्षयवृद्धिप्रतिपादकवसिष्ठादिवचनविरोधः। ×व्यप्र.२३४

पितामहः

वृद्ध्युपरमावधिः

[1]रूप्यं पञ्चगुणं भूमिस्तथैवाऽष्टगुणा मता॥
सस्यः स्याद्द्वादशगुणं चोरितं रत्नहाटकम्।
ब्राह्मणस्वं च रूप्यादि सद्योऽप्येकादशाधिकम्॥

व्यासः

वृद्धिपरिमाणम्

[2]सबन्धे भाग आशीतः षाष्ठो भागः सलग्नके।
निराधाने द्विकशतं मासलाभ उदाहृतः॥

(१) अशीतिषष्ठिभागौ आधिप्रतिभूसहितयोः प्रयोगयोः प्रतिमासं यथाक्रम ग्राह्यौ। तद्रहिते तु प्रयोगे पञ्चाशद्भागः प्रतिमासं ग्राह्य इत्यर्थः। द्वे दीयते वृद्धिरस्मिञ्छत इति द्विक शतम्। अनेन वचोभङ्ग्या पञ्चाशद्भाग उक्तः। ब्राह्मणाधमर्ण एवाय द्विकं शतमिति नियमः। क्षत्रियाद्यधमर्णे अन्यथा नियमः। *स्मृच.१५५

× शेष स्मृचवत्। * व्यप्र. स्मृचवत् विरवच्च भावः।

स्याव (धि?) धृतमूल्यपण्येषु सर्वदा) च न (न च); व्यप्र. २३३ चर्म (चर्म) शेष पमावत्; प्रका.९३; समु.८०.

(१) समु.८१. (२) सवि.२३०; समु ८१ऽप्येका (थका).

(३) व्यक.१०६ षाष्ठो (साष्ट); स्मृच.१३७ (=): १५५; विर.७ व्यकवत्; पमा.२२१ ने (रे); दीक.३५ षाष्ठो (षष्ठि); विचि.३-४ षाष्ठो (साष्ट) मास (मासि); वीमि. २।३७ (=); व्यप्र.२२७ ष्ठो (ष्टो); व्यम.७५; विता.४८० सव (संव) पू, सेतु.४ षाष्ठो (साष्ट) द्विकशतं (द्विशतकं), प्रका.८५,९२; समु.७९; विव्य.२२ व्यकवत्.

(२) आशीतः अशीतितमः। अयमेव अशीत्यष्टमभागसहितः सलग्नके। तेन पणद्वयोनपुराणद्वय लभ्यते। निराधान इत्यत्राधानशब्दो लग्नकसहिताधानपरः। तेन लग्नकबन्धकशून्ये पुराणद्वय लभ्यते। एतच्च ब्राह्मणविषय, क्षत्रियादौ पुराणत्रयादिविधानात्। ×विर.७

वृद्धिप्रकाराः तल्लक्षणानि च

[3]दोह्यवाह्यकर्मयुता कायिका समुदाहृता॥
(१) दोह्य गवादि, वाह्य बलीवर्दादि। विर.१०
कायाविरोधिनी शश्वत्पणपादादि कायिका।
गृहोपभोगभोग्यस्तु स्तोम इत्यभिधीयते॥

वृद्ध्यपरमावधिः

शाककार्पासबीजेक्षौ षड्गुणा परिकीर्तिता।
वदन्त्यष्टगुणान् काले मद्यस्नेहरसासवान्॥

वृद्ध्यपवादः

प्रातिभाव्यं भुक्तबन्धमगृहीतं च दिस्सतः।
न वर्धते प्रपन्नस्य दमः शुल्कं प्रतिश्रुतम्॥

(१) भुक्तबन्धग्रहण उपभुक्तगोप्याधौ निक्षेपोपभोग इव वृद्धिर्मा भूदित्येवमर्थम्। स्मृच.१५७

(२) भुक्त बन्ध गोप्य यस्य धनस्य तत् भुक्तबन्धं, गोप्याधिभोगे न वृद्धिरिति। दिस्सतः अधमर्णात् उत्तमर्णेनागृहीतधनम्। प्रपन्नस्य धनिकवशगतस्य। यश्चोत्तमसाहसादिरूपो दमः। प्रतिश्रुत यच्च शुल्क दातुमङ्गीकृतम्। दिस्सतो यदगृहीत धन न वर्धते इति। विर.२१

× एवमेव कल्पतरौ व्याख्यानम्। विचि. विरवद्भाव।

(१) व्यक.१०७; गौमि.१२।३२ युता (युक्ता), स्मृच. १५४ कर्मयुता (क्रियायुक्ता); विर.९, विचि.५; स्मृचि.७, व्यप्र.२२५; सेतु.५; प्रका.९२ स्मृचवत्, समु.७९ स्मृचवत्, विव्य २२.

(२) समु.७९ काया (कार्या) भोग (भोग्य).

(३) स्मृच.१६०; पमा.२२८, स्मृचि.९; नृप्र.१९; सवि. २२७ जेक्षौ (जेषु) परिकीर्तिता (वृद्धिरिष्यते) पू.; व्यप्र.२२९ कार्पास (पाषाण); व्यम.७६ जेक्षौ (जेषु) पू.; विता.४८७ उत्तरार्धं (विष्णुर्वदत्यष्टगुणा काले स्नेहे रसासवे); प्रका.९४; समु.८०.

(४) व्यक.१११; स्मृच.१५७ स्तनः (स्वः); विर. २१; पमा.२२५ पन्न (यत्न); विचि.११; चन्द्र.५; वीमि. २।३९; व्यप्र.२३४; प्रका.९३; समु.८०; विव्य.२४.

भरद्वाजः

वृद्धयुपरमावधिः

[1]**हिरण्यधान्यवस्त्राणां वृद्धिर्द्वित्रिचतुर्गुणा ।**
घृतस्याष्टगुणा वृद्धिस्ताम्रादीनां चतुर्गुणा ॥
[2]**तैलानां षड्गुणा वृद्धिः स्त्रीपशूनां तु संततिः ।**
चतुर्गुणा स्यात्कोशानां कार्पासस्य चतुर्गुणा ॥
काष्ठानां चन्दनादीनां वृद्धिरष्टगुणा भवेत् ।
एवं वृद्धिविधिः प्रोक्तो नास्ति वृद्धिस्ततः परा ॥
न वृद्धेर्वृद्धिरस्तीति धर्मकारानुशासनम् ।
न चान्यसंश्रिता वृद्धिरिति वृद्धेश्च कर्हिचित् ॥

इत्यत्र वृद्धिसंश्रितवृद्धीना शास्त्रनिषेधात् शास्त्रदृष्टत्वमिति । अत्र चन्दनादीनामित्यादिशब्दस्तु गन्धमात्रोपलक्षकः । ताम्रादीनामित्यादिशब्देन सुवर्णरजतव्यतिरिक्तानां त्रपुसीसादीनां ग्रहणम् । कोशशब्दो धान्यानामुपलक्षकः । कार्पासशब्दग्रहणेन तण्डुलप्रभृतीनामुपलक्षणम् । धान्यस्य त्रिगुणपञ्चगुणयोर्व्यवस्था पूर्वमेवोक्ता । सवि.२२९-२३०

संवर्तः

वृद्धयपवादः

न वृद्धिः स्त्रीधने लाभे निक्षेपे च यथास्थिते ।
संदिग्धे प्रातिभाव्ये च यदि न स्यात्स्वयंकृता ॥

(१) **अभा.**३१, **सवि.**२२९ (=), **समु.**८०. (२) **सवि.** २२९ (=), **समु.**८० चतुर्गुणा . शाना (कोशाना स्यात् पञ्चगुणा) स्तत. (रत.). (३) **सवि.**२२९ (=); **समु.**८० रानु (रस्य) न्य (प्य) रिति वृद्धे (रतिवृद्धि).

(४) **व्यक.**१११; **स्मृच.**१५७; **विर.**२० यथा (तथा), लाभो वृद्धिः, यथास्थित इति वदन् निक्षेपे व्यक्तत्व न्यत्वादिकरणे वृद्धिर्भवतीति दर्शयति । संदिग्धे येनकेनचित् सदेहेन दातुमनुचितत्वेन स्थिते प्रातिभाव्ये ऋणिद्रव्यार्पणादौ साक्षात्प्रतिभूविषयेऽपि प्रतियाचनादेः परस्तादपि न वृद्धिः, यदि न स्यात्स्वयंकृतेति वदन् स्त्रीधनादावपि कृता चेत् वृद्धिर्देयैवेति दर्शयति । स्मृच.१५७

अनिर्दिष्टकर्तृकवचनानि

वृद्धिप्रकाराः तल्लक्षणानि च

[1]**वृद्धेर्वृद्धिश्चक्रवृद्धिः प्रतिमासं तु कालिका ।**
इच्छाकृता कारिता स्यात्कायिका कार्यकर्मणा ॥
एकां वृद्धिमनादेयां न दद्यान्नापि दापयेत् ॥

शुक्रनीतिः

वृद्धयपरमावधि । अधर्म्यवृद्धिनिषेधः ।

[2]**मूलात्तु द्विगुणा वृद्धिर्गृहीता चाधमर्णिकात् ॥**
तदोत्तमर्णमूलं तु दापयेन्नाधिकं ततः ।
धनिकाश्चक्रवृद्ध्यादिमिपतस्तु प्रजाधनम् ॥
संहरन्ति ह्यतस्तेभ्यो राजा संरक्षयेत् प्रजाः ॥

पमा.२२४ क्षेप (क्षिप्ते); **दीक.**३६, **विचि.**१० विरवत्; **नृप्र.**१८ प्रातिभाव्ये (प्रीतिभावे) क्षेप पमावत्, **सवि.**२२६, **चन्द्र.**४ विरवत्; **वीमि.**२।३९ विरवत्; **व्यप्र.**२३३ पमावत्, **विता.**४८५ पमावत्; **संतु १४** विरवत्, **प्रका.**९३; **समु.**८०, **विव्य.**२४ पमावत्.

(१) **मिता.**२।३७; **स्मृच.**१५४ तृतीयपादः, **स्मृत्यन्तरम्**, **समु.**७९ कायि...णा (पणपादादि कालिका) उक्त.; **भाच.**८।१५३ णा (णि). (२) **मेधा.**८।१५३.

(३) **शुनी** ४।८१०-८१२

आधिः

गौतमः

भोग्याधेरपि गोप्याधित्वम्

[1]**भोग्याधिरपि गोप्याधिर्भवतीति । पारिभाषिकत्वाद्व्यवहारस्य ।**

पारिभाषिकत्वं परिभाषानिबन्धनमित्यर्थः । अथाऽयं भोग्याधिर्दीपोत्सवकालपर्यन्तं प्रयुक्तं धनं वृद्ध्यर्थमुप भुज्यताम् । तदानीं प्रयुक्तधनाप्रदाने दीपोत्सवप्रभृति न भुज्यताम् । ततःपरं प्रयुक्तधनं वृद्ध्या द्विगुणीभूते द्वैगुण्यानन्तर तद्धन यदि न दास्यामः तदा आधिस्तव भविष्यतीति । सवि.२४४

(१) **सवि.**२४४.

हारीतः

आधिपालनम्

बन्धं यथा स्थापितं स्यात्तथैव परिपालयेत् ।

(१) **स्मृच.**१३७ पू. : १३८; **पमा.**२३१:२३२ मूल वा तद्व्यतिक्रमात् (मूल वा नाशमाप्नुयात्) उक्त., व्यास:;

अन्यथा नश्यते लाभो मूलं वा तद्व्यतिक्रमात् ॥

आधिग्रहणादूर्ध्वमाधेर्नाशहासविकारासारत्वव्यक्त्यन्तरत्वादयो यथा न भवन्ति तथा धनी प्रत्यर्पणपर्यन्त प्रयत्नेन पालयेदित्यर्थः। स्मृच.१३७

यथा येन प्रकारेण गोप्यत्वेन भोग्यत्वेन वा स्थापित अधमर्णेनाधीकृत तथैव गोप्यमाधिं गोप्यत्वेनैव धनी पालयेत्। अन्यथा गोप्य भोग्यत्वेन भोग्य वा गोप्यत्वेन पालित चेत्समयातिक्रमाल्लाभो नश्यते। मूलं वा द्रव्य नश्यत इत्यर्थः। *स्मृच.१३८

[५]विश्वासार्थं कृतस्त्वाधिर्न प्राप्तो धनिना यदा।
प्रापणीयस्तदा तेन देयं वा धनिने धनम् ॥

तेनाधिपालेनेत्यर्थः। यदा प्रापयितुमशक्य तदैव द्वितीयः कल्पः। स्मृच.१५०

[६]दैवराजोपघाते तु न दोषो धनिनः क्वचित् ॥
[७]आधेः समधिकं द्रव्यं गृहीतं ग्राहकेण तु।
अधिकं तव दास्यामि तद्ब्याद्धनिकस्य सः ॥
[८]तत्समो द्विगुणो वाऽऽधिर्धनिकस्य समर्पितः।
आधौ नष्टे धनं नष्टं धनिकस्याधिरेव च ॥

धनं समं द्विगुण वा। धनिकस्याधिनाशोऽत्राध्यन्तराभावादुक्तः। एतदुक्त भवति। ध्वस्ताधिधनसमान धननाशो धनिकस्य स्यादिति। स्मृच.१४०

आधिसिद्धिः

[९]लेख्यं यस्य भवेद्धस्ते भोगं तस्य विनिर्दिशेत् ॥

अत्रापि यस्य हस्ते लेख्यमस्ति तस्यर्णलाभ इति। मिता.२।९०

वसिष्ठः

आधिसिद्धि

[१०]तुल्यकाले निसृष्टानां लेख्यानामाधिकर्मणि।
येन भुक्तं भवेत्पूर्वं तस्याधिर्बलवत्तरः ॥

तुल्यकालोत्पन्नाना लेख्याना सद्भावसाम्येऽपि भोग्याधिसिद्धौ भोगस्य प्रधानकारणत्वात्। तत्प्राथम्यनिबन्धना बलवत्ता युक्तेत्यर्थः। *स्मृच.१४४

[११]यद्येकदिवसे तौ तु भोक्तुकामावुपागतौ।
विभज्याधिः समं तेन भोक्तव्य इति निश्चयः ॥

तेन ताभ्यामित्यर्थः। गोप्याधावपि तदुपादानादिकर्तुर्जयः। तस्यैवाधिसिद्धेर्जातत्वात्। स्मृच.१४४

विष्णुः

भोग्याधौ वृद्धयभावः। आधिपालनम्।

[१२]आध्युपभोगे वृद्ध्यभावः। दैवराजोपघातमृते विनष्टमाधिमुत्तमर्णो दद्यात्।

आध्युपभोगे गोप्याधिभोगे। विर.२१

आधिमोचनावधिः

[१३]अन्त्यवृद्धौ प्रविष्टायामपि। न स्थावरमाधिमृते वचनात्।

क्षेत्रादेर्भोगद्वारेण परमवृद्धावुत्तमर्णप्रविष्टायामपि यावत् मूलधनं न दीयते, तावत् पर्याप्तकाले प्रविष्टे तत्र आधि परित्यक्ष्यामीति विशेषव्यवस्थां विना उत्तमर्णो नाधि त्यजेदित्यर्थः। ×विर.१३-१४

[१४]गृहीतधनप्रवेशार्थमेव यत् स्थावरं दत्तं, तत् गृहीतधनप्रवेशे दद्यात्।

---

* सवि., व्यप्र. स्मृचवत्। × विचि., वै. विरवत्।

(त्तरा), **सवि.**२३६-२३७ माधिकर्मणि (मधिकारिणा); **व्यप्र.**२३९-२४०; **व्यम.७७**; **विता.५४५** निसृ (विसृ); **प्रका.८८** स्मृचवत्; **समु.७५**.

(१) **स्मृच.१४४**; **पमा.२३४** ये (दे) तेन (तत्र); **सवि.** २३७ धिः (धि); **व्यप्र.२४०**; **व्यम.७७** समं तेन (समस्तत्र), **प्रका ८८**; **समु.७५**.

(२) **विस्मृ.६।५-६तमृते** (ताहृते); **व्यक.११२ विस्मृवत्**; **विर.२१** (दैव ...दद्यात्०):२४; **सेतु.१६**.

(३) **विस्मृ.६।७-८**; **व्यक.१०८:११३** यामपि (यां च) (न स्था...नात् ०), **विर.१३:२८व्यकवत्**; **विचि.७**; **चन्द्र.३**; **वीमि.२।६४** (भाधि०); **सेतु.७**.

(४) **विस्मृ.६।९**; **व्यक.११३**; **स्मृच.१४७**; **विर.** १४,२९; **सवि.२४२** यत् (यत्तु); **प्रका.८९**; **समु.७६**.

(१) एवंभूतपरिभाषया चाहितं क्षयाधिमाचक्षते । एवंभूतपरिभाषाकरणे तु सोदयादत्यन्ताभ्यधिकेऽपि प्रविष्टे सामकदान विना न कदाचिदाधिलाभ इत्यनुसधेयम् । स्मृच.१४७

(२) एवंविधमाधि लौकिकाः क्षयाधिमाचक्षते । केचिदिममेव परिभाषितार्धि, केचित्सविदाधिमाहुः । सवि.२४२

गोप्याधेर्भोग्याधित्वम्

[1]पारिभाषिकोऽपि गोप्याधिर्भोग्याधिरपि भवति ।

गोप्याधेर्भोग्याधित्वमप्याह विष्णुः— पारिभाषिक इति । अपिशब्दः कालादीन् समुच्चिनोति । पारिभाषिकः परिभाषया प्राप्तः । यथा — अयमाधिस्त्वत्प्रयुक्तधने द्विगुणीभूते यदि न मोच्येत तदिनमारभ्य द्विगुणधनस्य भोग्य इति गोप्यभोग्याधिः । दीपोत्सवादिसमये तत्प्रयुक्त मूल्यमेव धनं यदि न दीयते तदाप्रभृति प्रयुक्तधनमारभ्य वा अयमाधिर्भोग्याधिरिति कालकृतभोग्याधिः । पारिभाषिक इति वचनेनेद ज्ञाप्यते–भोग्याधिरपि कालाधिर्भविष्यति। यथा–अय भोग्याधिः स्वप्रयुक्तधनवृद्ध्यर्थदीपोत्सवकालपर्यन्त अनुभुज्यता तदा यदि मूल्य न दास्यामस्तदा आधिस्तव भविष्यतीति भोग्यकालाधिः । भोग्यगोप्याधिमप्याह गौतमः । तथा च गौतमसूत्रम्— 'भोग्याधिरपि गोप्याधिर्भवतीति पारिभाषिकत्वाद्व्यवहारस्य' इति । अन्वाधिरप्येवमेवोह्यः । खण्डाधिरपि दीपोत्सवपर्यन्त मासमात्रं मासद्वयपर्यन्त वा पारिभाषिकवृद्ध्या यावद्वृद्ध धनं तावद्धनं मूलीकृत्य तद्धनस्याधीकरण खण्डाधिरिति । सवि.२४३–२४४

[2]स कचित् क्रि (क्र) यान्त इति ।

अयमर्थः—अय पूर्वोक्ताधिः । क्रि(क्र)यान्तः क्वचित् विषयभेदेन दीपोत्सवादिसमये द्विगुणद्रव्याप्रदाने तद्द्विगुणद्रव्यस्यायमाधिर्विक्रीत इति । क्रि(क्र)यान्तः कालाधिः द्विगुणाधिश्च । भोग्याधिरपि क्रि(क्र)यान्तः । यथा— अयमाधिर्वृद्ध्यर्थमनुभूयता दीपोत्सवादिसमये मूल्यं यदि न दीयते तदा मूल्यस्यैव अयमाधिर्विक्रियत इति । एषु क्रयान्तसङ्करादिषु परिभाषावशात् क्रयान्तताया तेषा क्रयधर्माः—'पूर्वाह्णे ग्राममध्ये च ज्ञातिसामन्तसंनिधौ । हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी' ॥ इत्यादिधर्माः सन्त्येव । अतो ज्ञात्यादिभिः प्रत्ययेनैवेत्यादिवक्ष्यमाणन्यायेन ज्ञात्याद्यनुमत्या भाव्यम् । सवि.२४४-२४५

आधिसिद्धिः

[3]गोचर्ममात्राधिकां भुवमन्यस्याधीकृतां तस्मादनिर्मोच्यान्यस्य यः प्रयच्छेत्स वध्यः । ऊनां चेत्षोडशसुवर्णान् दण्ड्यः ।

अनेन चाधिरनिर्मुक्तो येन गृहीतस्तस्याधिर्न सिध्यति, येन पूर्वं गृहीतस्तस्य सिध्यति । अनिर्मुक्तमाधिमन्यत्र कुर्वतो वध्यत्वदण्ड्यत्वे भवत इत्युक्तम् । विर.३६

[4]एकोऽश्नीयाद्युत्पन्नं नरः संवत्सरं फलम् ।
गोचर्ममात्रा सा क्षौणी स्तोका वा यदि वा बहुः ॥
[5]यैर्योनिक्षिप्त आधिस्तौ विवदेतां यदा नरौ ।
यस्य भुक्तिर्जयस्तस्य बलात्कारं विना कृता ॥

भुक्तिर्बलात्कार विना कृता भुवो भुक्तिरित्यन्वयः । तस्य सा भूमिरिति शेषः । हलायुधेन तु यस्य भुक्तिर्जयस्तस्येति पठित, तत्र सुगमतैव । विर.३६

[6]तुल्यकालोपभोगौ चेद्भोगोऽपि समको भवेत् ।

(१) **विस्मृ.**५।१७७-१७८; **अप.**२।६० वध्यः (वध्यः) दण्ड्य· (दाप्यः), **व्यक.**११५ यः प्रय...ध्यः (प्रयच्छन् वध्य·), **स्मृच** १४४ वध्य· (बन्ध्यः) ऊना र्णान् (ऊना चेत्तु सुवर्ण), **विर.**३६ धिर्का भुव (मपि भूमि), **पमा.** २३४ र्णान् (र्ण), **विचि.**१६ च्छेत् (च्छति) ऊना (ऊना), **चन्द्र.**१४ अन्यस्य (अन्यत्र) च्छेत् (च्छति) वध्य. (वध्यः) ऊनां (ऊन); **व्यप्र** २४० (तस्मादनिर्मोच्य०) र्णान् (र्ण); **विता.**५४६ (तस्मादनिर्मोच्य०) (ऊना चेत् ०) र्णान्+(वा), **सेतु** १८ विरवत्, विचिवच्च, **प्रका.**८८ स्मृचवत्; **समु.** ७५ धी (धि) र्णान् (र्ण).

(२) **विस्मृ.**५।१७९, **अप.**२।६०, **व्यक.**११५; **विर.** ३६; **विचि.**१६-१७, **चन्द्र.**१४; **सेतु.**१८, **विव्य.**२६.

(३) **विस्मृ.**५।१८० जयः (फल); **अप.**२।६० त्कारं (त्कार); **व्यक.**११५, **स्मृच.**१४४ ययो (द्वयो) धिस्तौ (धौ तु); **विर.**३६ जैय (भुव), **पमा.**२३३, **विचि.**१७ कृता (भवेत्); **सवि.**२३६ स्तौ (स्त); **चन्द्र.**१५ विचिवत्; **व्यप्र.** २३९, **विता.**५४२-५४३ (=) देतां (देतै) शेष अपवत्; **सेतु.**१९ विचिवत्; **प्रका.**८८ स्मृचवत्; **समु.**७५ स्मृचवत्; **विव्य.**२६ जैयः (बैलं) शेष विचिवत्.

(४) **विचि.**१७, **सेतु** १९, **विव्य.**२६.

(१) **सवि.**२४४. (२) **सवि.**२४४.

प्रदाने विक्रये चैव विधिरेष प्रकीर्तितः ॥

एतच्च प्रायिकम । उभयत्र दृष्टबलतोऽन्येऽदृष्टेन निर्णयः । विचि.१७

कौटिलीयमर्थशास्त्रम्

आधिविधि

नाधिः सोपकारः सीदेत् । न चास्य मूल्यं वर्धेत । निरुपकारः सीदेन्मूल्यं चास्य वर्धेतान्यत्र निसर्गात् ।

उपस्थितस्याधिमप्रयच्छतो द्वादशपणो दण्डः । प्रयोजकाऽसंनिधाने वा ग्रामवृद्धेषु स्थापयित्वा निष्क्रयमार्धिं प्रतिपद्येत । निवृत्तवृद्धिको वाधिस्तत्कालकृतमूल्यस्तत्रैवावतिष्ठेत, अनाशविनाशकरणाधिष्ठितो वा । धारणकसंनिधाने वा विनाशभयादुद्वृताधं धर्मस्थानुज्ञातो विक्रीणीत । आधिपालप्रत्ययो वा ।

स्थावरस्तु प्रयासभोग्यः फलभोग्यो वा । प्रक्षेपवृद्धिमूल्यशुद्धमाजीवममूल्यक्षयेणोपनयेत् । अनिसृष्टोपभोक्ता मूल्यशुद्धमाजीवं बन्धं च दद्यात् । शेषमुपनिधिना व्याख्यातम् । एतेनादेशोऽन्वाधिश्च व्याख्यातौ ।

मनुः

भोग्याधौ वृद्धयभावः । आधेः सक्रमणविक्रयौ न ।

न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात् । न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः ॥

(१) बहुधा प्रयोगो गृहीत्वाऽऽधिमन्यथा च । आधिरपि द्विविधो गोप्यो भोग्यश्च । भोग्योऽपि द्विविधः, समयादूह्यमानभोगः सरूपतो वा । आधिर्दोग्ध्री गौः पिण्डितसुवर्णादि । तत्र भोग्यमाधिमधिकृत्येदमुच्यते । न त्वेवाधौ सोपकार इति । विविधः सोपकारः, क्षीरिणी गौः क्षेत्रारामादि च तस्मिन् भुज्यमाने । कुसीदे भवा कौसीदी अनन्तरोक्ता वृद्धिस्तामाप्नुयात् । आधिं तु भुञ्जानो नान्यां वृद्धिं लभेत । गोप्येऽप्याधौ कालसंरोधाच्चिरमवस्थानाद्द्विगुणीभूतेऽप्यमोक्षमाणे न निसर्गोऽस्ति न विक्रयः । अन्यत्र च विधिनाऽर्पणं निसर्गः । अन्यत्र संक्रामितं द्विगुणीभूतमपि पुनर्वर्धत एव । तथा च पठिष्यति 'सकृदाहृतेति' । विक्रयः प्रसिद्धः । सोऽपि न कर्तव्यः । किं तर्ह्यस्यामवस्थायां कर्तव्यम् । आधिं भुञ्जीत, यावद्द्विगुणं धनं प्रविष्टम् । ततो 'मोक्ष्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने' । भोग्यस्तावदेवम् । अभोग्यस्तावत् एवम् । अभोग्यस्त्वाधिः शान्तलाभस्तिष्ठत्येव, यावदाधाता नागतः।यस्तु कथंचिद्धनिको दरिद्रतामुपगतस्तावन्मात्रशेषधनः स कञ्चित्कालं प्रतीक्ष्य राजनि निवेद्य विक्रीणीत बन्धं, ततो विक्रयादुत्पन्नं द्विगुणमात्मनो धनं गृहीत्वा, शेषं मध्यस्थहस्ते ऋणिकसात्कुर्यात् ।

ननु च 'आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्षयेत्' इति पठ्यते । एतदुत्तरत्र व्याख्यास्यामः । प्रणाश्यैत्व चात्र पूर्वस्वामिनः स्वाम्यहानिः प्रयोक्तुश्च स्वत्वापत्तिः । यदि च निसर्गविक्रयौ न स्तः कीदृशमस्य स्वाम्यमुच्यते ? तस्मात्प्रतिषेधसामर्थ्येन प्रणाशवचनं प्रतिषिद्धभोगस्य भोगानुज्ञानार्थं व्याख्यायते । वस्त्रादिविषयं वा । तस्य हि भुज्यमानस्य प्रणाश एव । न क्षेत्रादेरिव तिष्ठतः स्वरूपादपच्यवमानस्य भोग्यता सम्भवति । तेनैते[१] स्मृती विषयव्यवस्थया व्याख्येये । गोणौ चात्र प्रणाशनिसर्गौ । विक्रयप्रतिषेधस्तु मुख्य एव । न ह्यसौ गौणतया प्रतिपत्तुं शक्यते । एतदेव प्रस्तुत्य 'न स्याता विक्रयाधाने' इति स्मृत्यन्तरपठितम् । अत इह निसर्गोऽन्यत्राधानं विक्रयसाहचर्यात् । सदृशौ हि तौ केनचिदंशेन । *मेधा.

(१) कौ.३।१२.

(२) **मस्मृ.**८।१४३;**मिता.**२।५८;**अप.**२।५९पू.,**व्यक.** १११ पू. : ११४ धान्निसर्गो (धौ विशुद्धो) उत्त., **स्मृच.**१३९ पू.:१४२ उत्त., **विर.**२३,३२ पू.:३१ उत्त., **विचि.**१५ पू.: १८ उत्त.:१८ (अनिर्मुक्तस्य चैवाधेर्न दान न च विक्रयः) उत्त.; **स्मृचि.**१० उत्त.; **चन्द्र.**१२ रोधा (बोधा) ऽस्ति न (नापि) उत्त.; **व्यप्र.**२३६ पू.:२४३ उत्त.; **व्यउ.**७३ पू.:७२ उत्त., **विता.**५३७ उत्त.; **सेतु.**१७ चाधेः (वाधे.) न्निसर्गोऽस्ति (न निसर्गो) उत्त. :१८ विचिवत् , उत्त.; **प्रका.**८६-८७ क्रयः (क्रिये); **समु** ७४; **विव्य.**२६ उत्त.:२७ विचिवत् , उत्त., **भाच.** न त्वे (ननु).

* गोरा. मेधावद्भावः ।

१ हित. २ ध. ३ ष्टे. ४ श्यत्वान्न पू. ५ प्रपच्य. ६ तत्कृतिव्यवस्थायां व्याख्येयम् ।

(२) कालेन संरोधः कालसरोधश्चिरकालमवस्थानं तस्मात्कालसरोधाच्चिरकालावस्थानादाधेर्न निसर्गोऽस्ति नान्यत्राधीकरणमस्ति न च विक्रयः। एवमाधीकरणविक्रयप्रतिषेधाद्धनिनः स्वत्वाभावोऽवगम्यत इति। भोग्याधि प्रस्तुत्येदमुच्यते—'न चाधेः कालसरोधान्निसर्गोऽस्ति न विक्रयः' इति। भोग्यस्याधेश्चिरकालावस्थानेऽप्याधीकरणविक्रयनिषेधेन धनिनः स्वत्व नास्तीति।

×मिता.२।५८

(३) सोपकारे, गोप्याधिनापि प्रसंगादुपकारसिद्धौ वृद्धिर्न ग्राह्या। कौसीदी कुसीदवृत्तिसबन्धिनीम्। कालसरोधात् कालातिक्रमेऽपि द्विगुण्योर्ध्वं आधेर्बन्धकद्रव्यस्य न निसर्गो दानमस्ति, न च विक्रयोऽस्ति, कि तु प्रतिरोधादिना धनस्यैव ग्रहणम्। मवि.

(४) यद्येवं भोग्याधौ न कदाचिद्वृद्धिः कथ तर्हि याज्ञवल्क्येन–'गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते' (यास्मृ.२।५९) इति भोग्याधावप्युपेक्षया कार्याक्षमत्वे धनिकेन कृते वृद्धिप्रतिषेधः कृतः। प्राप्त्यभावात् प्रतिषेधानुपपत्तेः। उच्यते। यत्राधाता आधेरुपभोग वृद्धिदानमप्यापद्यभ्युपगच्छति तत्र प्राप्ता वृद्धिः 'सोपकारेऽथ हापित' इत्यनेन प्रतिषिध्यते। न च वृद्धिभोगयोः समुच्चयेनाभ्युपगतिरेव नास्ति। 'न त्वेवाधावि'तिमनुवचननिवारितत्वादिति वाच्यम्। मनुवचनस्य भोग्याधौ कदाचिदभोगेऽस्तु वृद्धिरिति शङ्काव्युदासार्थत्वात्। तस्मादन्यथापालिते सर्वत्राधौ लाभनाशो न गोप्यमात्र इति सिद्धम्। एतेन 'गोप्ये लाभस्य हानिः, भोग्ये तु लाभाभावान्मूलहानिरिति' शम्भूक्ति निरस्तम्। स्मृच.१३९

तस्यायमर्थः। कालसरोधश्चिरकालावस्थानम्। द्विगुणीभूतेऽप्यमोक्षणमिति यावत्। तस्मात्कालसंरोधात्केवलादग्रहणकाले विनिमयसंप्रतिपत्तिरहिताधेर्न निसर्गोऽस्ति। नान्यत्राधीकरण दान वाऽस्ति। विक्रयश्च नास्ति। किन्तु शान्तलाभस्तिष्ठत्येव तावत्। यावदाधाता न विमोक्ष्यत इति। स्मृच.१४२

(५) भूमिगोधनादौ भोगार्थं बन्धके दत्ते धनप्रयोगभवामनन्तरोक्ता वृद्धिमुत्तमर्णो न लभते। कालसरोधाच्चिरकालावस्थानाद्द्विगुणीभूतमूलधनप्रवेशेऽपि न निसर्गोऽन्यस्मै दान न वान्यतो विक्रयः। मेधातिथिगोविन्दराजौ तु आधेश्चिरकालावस्थानेऽपि न निसर्गो नान्यत्र बन्धकेनार्पणमिति व्याचक्षाते। अत्र तु सर्वदेशीयशिष्टाचारविरोधः बन्धकीकृतभूम्यादेरन्यत्राधीकरणसमाचारात्। *ममु.

(६) कालसंरोधाश्चिरकालावस्थान, निसर्गोऽन्यत्राधीकरणम्। विक्रयः स्वस्वत्वव्युदासहेतुक्रिया। तेन चिरकालावस्थितोऽपि गृहीत आधिः स्वय यावति धने गृहीतस्तदधिकधनेऽपि अन्यस्मिन् उत्तमर्णेन नाधीकर्तव्यः। न च तस्य स्वीयत्वभ्रमात् दानविक्रयात्यन्तपरिवर्ताः करणीया इत्यर्थः। न्यायसाम्यादकृतव्यवस्थगोप्याधिविषयताप्येतस्य, अतो भोग्याधिविषयमेतदिति कल्पतरौ प्रायो वादः। हलायुधस्तु निसर्गपदेन दानमाह, तन्मते प्रत्याधिनिषेधो नानेन। कश्चित्तु स्वयमन्यस्मिन् कृत आधिः कालसरोधादयधिकरणेन अधमर्णेनान्यत्राधिः कर्तव्यो न चान्यत्र विक्रेतव्य इत्यस्यार्थमाह। तन्न, एतत्पूर्वखण्डे 'न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्' इत्यत्रावश्य कर्तृतया अन्वितस्योत्तमर्णस्यैव प्रकृतत्वात्। अत एव कल्पतरुपारिजातमिताक्षरासूत्तमर्णेन न कर्तव्य इति पूरणं कृतम्। आधानविक्रययोः फलभेदेन विरोधात्। स्वत्वजनकस्य विक्रयस्य कालसरोधेन निषिद्धुमशक्यत्वात् आधानाशे कालसंरोधस्य फलविरोधमुखेन निषेधकत्वेऽपि फलवैषम्यप्रसङ्गात्। 'अनिर्मुक्तस्य चैवाधेर्न दान न च विक्रय' इति वाक्यस्य अमूलकतया निबन्धुभिरलिखनाच्चानादेयत्वात्। 'आधिः प्रणश्येत् द्विगुणे धने' इत्यादि याज्ञवल्क्यवचनं परिभाषिताधौ न चाधेः कालसंरोधादिति वाक्यं चापरिभाषिताधाविति न विरोधशङ्काऽपि।

×विर.३१–३२

(७) हापित इति शेषः। एतच्च बलात्कारविषयम्।

+व्यप्र.२३६

×व्यक., भाच. मितावद्भावः। विवादचन्द्रोद्धृतं स्मृतिसारमतं मितावत्। व्यउ., विता. मितागतम्।

*मच. ममुवद्भावः।

×विचि. विरगतम्। +उत्तरार्धम्याख्यानं मितावत्।

बलादाधिभोगनिषेधः

न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत् ।
मूल्येन तोषयेच्चैनमाधिस्तेनोऽन्यथा भवेत् ॥

(१) ननु च प्रागप्येतदुक्तं 'न त्वेवाधाविति'। सत्यम्। यत्र यावत्येव वृद्धिस्तावानेव भोगः स पूर्वस्य विषयः। यत्र तु महती वृद्धिः स्वल्पोपभोगश्चेद् बलादिना भुञ्जानस्य सर्वेण सर्ववृद्धिहानिः। यत्र क्षेत्रगवादिर्वन्धस्तद्भोगश्च न वृद्धिसमितः। स चोपचितामपि वृद्धिं न ददाति। न च धनं द्विगुणं तत्र। कदाचित् संमत्या यत्र भुक्ते, भुक्तैव वृद्धिर्निश्चेतव्या। यदि तु वस्त्रादि भुज्यमानं नश्येत्तत्र मूल्येन तोषयेदेनमाधातारमितरोऽपि वृद्धिं लभते। अतोऽन्यथाऽदत्तमूल्यमाधिस्तेनो भवेत्। यजातीयमाधिं भुक्तवांस्तदपहारे यो दण्डः स एव दाप्यः। स्तेनश्चौरः। अन्ये व्याचक्षते। बलाद्भुक्ते वृद्धिहानिः। भुञ्जीत तन्मूल्यतः। एव दापयेत् यद्दणिकस्य मूल्य, मूल्यं हिरण्यं यत्र भुज्यते। यत्र भुञ्जान उच्यते 'मा मे बन्धं विनीनशो मा भुङ्क्थाः कतिपयैरहोभिर्मोक्षयामि' तथाप्युच्यमानो भुङ्क्त एवेति सोऽस्य विषयः। मेधा.

(२) मा भुङ्क्ष्व इति स्वामिवचनमवगणयन् यद्बलाद्बन्धं च भुञ्जीत, तथा भुञ्जानो वृद्धिं नामुयात्। यदि भोगेन बन्धः क्षयं यातस्तदा अक्षतबन्धसंबन्धिमूल्येन बन्धस्वामिनं तोषयेदन्यथा बन्धचौरः स्यात्। गोरा.

(३) गोप्याधौ तु पृथगारब्धं मनुना 'न भोक्तव्य' इति। *मिता.२।५८

(४) यदा तु वृद्धिरतिभूयसी तदा वृद्धिं गृह्णीयात्। किं तु मूल्येन तोषयेत्। यावता तावद्भोगसिद्धिस्तद्देयम्। +मवि.

(५) भोगप्रतिषेधं कुर्वन्तमाधातारमाक्रम्य गोप्याधिभुञ्जानस्यात्यन्तापराधित्वादल्पभोग एव सर्ववृद्धिनाशः स्यादित्यर्थः। सर्वमूलनाशस्तु नारिमन्विषये विकल्प्यते। अत्यन्ताधिकहानित्वात्। स्मृच.१३८

सलाभर्णापगतावशिष्टार्धशस्य मूल्येनेत्यर्थः।
×स्मृच.१४०

(६) गोप्याधिविषयं वचनमिदम्। वस्त्रालङ्कारादिगोप्याधिर्बलान्न भोक्तव्यः। भुञ्जानो वृद्धिमुत्सृजेत्प्राङ्मूल्येनात्रैनं तोषयेत्। यद्वा भोगेनासारतामाधौ नीते सारवस्त्राधिमूल्यदानेन स्वामिनं तोषयेदन्यथा बन्धकचौरः स्यात्। *ममु.

(७) यदा तु निषिध्यमानो बलाद् भुङ्क्ते, तदा सर्ववृद्धित्यागः। यदा तु वृद्धिं न त्यजति, तदा यावत् तेन भुक्तं तावद् भोगप्रत्याकलनया मूल्येन एनमाधातारं भोक्ता तोषयेत्। विर.२४

(८) भुञ्जान एनमधमर्णं मूल्येन भुक्तेन फलेन तोषयेत्। भुक्तं फलमधमर्णाय दद्यादित्यर्थः। नन्द.

अननुज्ञातभोगनिष्कृतिः

यः स्वामिनाऽननुज्ञातमाधिं भुङ्क्तेऽविचक्षणः ।
तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः ॥

(१) उक्तं 'न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत्' इति सर्ववृद्धिहानिः इह त्वर्धवृद्धिग्रहणमुच्यते। तत्र निषिद्धे भोगे बलादाधि भुञ्जानो वृद्धिमुत्सृजेदिति, सैवा हारयत्येव वृद्धिम्। अनभिहितप्रतिषेधेने रहस्युपभुज्यमानेभोगे रूपसुवर्णालङ्कारादावर्द्धवृद्धित्यागोऽनेन श्लोकेनोच्यते।

* मिता. मितागतम्।

(१) **मस्मृ.**८।१४४; **मेधा.**८।१५० कर्तव्यो (कर्तव्य) दाधिर्भु (दाधि भु) पू.; **मिता.**२।५८ पू.; **व्यक.**११२, **स्मृच.**१३८ पू.: १४० क्वचैन (देव) उत्त.; **विर.**२४ क्वैन (दूवैन); **पमा.**२३७ स्मृचवत्; **स्मृचि.**११; **नृप्र.**२२, **सवि.**२३१ पू.; **व्यप्र.**२३६: २३८ उत्त.; **व्यउ.**७३ पू.; **व्यम.**७६ उत्त.; **विता.**५३८ पू.: ५४२ उत्त.; **प्रका.**८६ स्मृचवत्; **समु.**७४-७५ स्मृचवत्.

१ बन्धन. २ कयाचिदतिमत्यात्यन्तमुचैव. ३ एव वा यद्द. ४ (यत्र भुज्यते०).

+ पूर्वार्धव्याख्यान गोरावत्।

×सवि. स्मृचवद्भावः। व्यप्र. स्मृचगतम्। *मत्र ममुगतम्।

(१) **मस्मृ.**८।१५०; **अप.**२।५९ मों (भों); **व्यक.**११२ अपवत्; **स्मृच.**१३८; **विर.**२३ अपवत्; **पमा.**२३७; **विचि.**१५ अपवत्; **स्मृचि.**१० यः (यत्) मों (भों) भोग (भाग); **नृप्र.**२२; **सवि.**२३१ नार्ध (नाधि); **चन्द्र.**१०; **वीमि.**२।५९ अपवत्; **व्यप्र.**२३६ अपवत्; **विता.**५३८ नमु (नभि); **क्षेतु.**१६ अपवत्; **प्रका.**८६; **समु.**७४; **विव्य.**२५ तमार्धि (त आधि) क्षेपै अपवत्.

१ सर्व. २ धनं. ३ नभोगे + (न चाधिर्नश्यति.)

यत्तु नवं महार्घमलङ्करणवस्त्रादि परिधीयमानं नाशितं तत्र न केवलं वृद्धिहानिर्यावद्धनं नष्टं तत्परिपीडय मूलतः प्रविशतीति महत्तरैर्व्याख्यातम्। यच्चना तु व्याख्यातं, यत्र स्वामी व्यवहरति अध्यधीनश्च, तत्राध्यधीनेन बन्धो दत्तः, स्वामिना च दृष्टः, तत्र धारणकेन कस्मिंश्चिदवसरे अध्यधीनः पृष्टः, प्रयोजनं ममानेन बन्धेनास्ति, तत्रोपनिधिन्यायेन तेनानुज्ञातः, कालान्तरे भुञ्जानं यदि स्वामी पश्यस्तदनुज्ञात बन्धं क्षपितवान्। सतीदृशे विषयेऽर्धवृद्धित्यागः। तदयुक्तम्। यतस्तुल्यो व्यवहारः परस्परापेक्षः स्वामिभृत्ययोः। तत्र तत्रान्यतरेणानुज्ञातेनायमनुज्ञातः प्रयुज्यते। अधर्मतः स्वामिशब्दस्यार्थे स्वत्वमीदृशि विषये भवति। अन्यथा बन्धं यो ददाति सोऽवश्य स्वाम्येन, अध्यधीनस्तु न स्वामी यद्येवं चौरस्तर्हि, तस्मात्स्वामित्वाध्यारोप उपयोगे वाऽध्यधीने स्वाम्यनुज्ञाव्यवहारादब्रह्मदत्तवदतः पूर्व एवार्थः (?)।

स्वामिग्रहणं पादपूरणार्थम्। भुङ्क्तेऽविचक्षण इत्यकारः संहितया प्रश्लिष्टनिर्दिष्टो वेदितव्यः। यस्य ह्यस्ति बुद्धिर्वृद्धिर्ममास्त्येवाधिको लाभो वस्तुभोगे इति सोऽविचक्षणः। न हि लोके शास्त्रवियोजनीया स्थितिः। यदुभौ लाभश्च भोगश्च वृद्धिः स्यात्। तेन सा वृद्धिर्मोक्तव्या। निष्कृतिः परशुद्धिर्विनियम इति यावत्। अन्ये तु द्विगुणीभूतेऽप्यमोक्ष्यमाणे प्रतिषेधमिममिच्छन्ति, तस्य हि स्वल्पोऽपराध इति वदन्तः। प्रथमं तावदादावेव तैर्याज्ञवल्क्यवचनस्य विषयो देयः 'आधिः प्रणश्येदिति'। मेधा.

(२) यो वृद्धिदत्तं धनं भोगेनाविनाश्यरूपं स्वामिनाऽननुज्ञातो मूर्खो रहसि भुङ्क्ते। बलभोगे न भोक्तव्यो बलादाधिरित्युक्तं, तेन तस्य शुद्धयर्थमर्धवृद्धिस्त्यक्तव्या। ×गोरा.

(३) अल्पभोगविषयमेतत्। महोपभोगे तु गोप्याधिभोगे न वृद्धिरित्युक्तम्। ततश्च भोगानुसारेण वृद्धिहान्यनुसारः कार्यः। अप.२।५९

(४) अर्धवृद्धिर्भोक्तव्येत्याधेरुपभुक्तस्याविकारे सतीति बोद्धव्यम्। विकारे तु सति सकलवृद्धित्याग एवेत्यर्थः। व्यक.११२

(५) अननुज्ञातं अनुज्ञां विना न तु बलात्। एतच्च वृद्धेरल्पत्वे, बहुत्वे तद्भोगोचितमूल्यदान, प्रतिषिद्धाधिभोगे प्रागुक्तम्। मवि.

(६) यस्त्वाधातारं वञ्चयित्वा गोप्याधिं भुङ्क्ते तस्य भोगानुसारेण लाभद्रव्य एव भागशो नाश इत्याह मनुः—यः स्वामिनेति। अर्धग्रहणमननुज्ञातभोगानुसारेण कल्पितनिष्कृतिक्षमपरिमाणोपलक्षणार्थम्। अन्यथा महाभोगस्यार्धवृद्धिविसर्जनेन निष्कृत्यसभवात् तस्य भोगस्य निष्कृतिरिति वाक्यशेषविरोधः स्यात्। अथ विरोधपरिहारार्थं अल्पभोगविषयमेवैतद्वचनमित्युच्येत। तर्ह्यननुज्ञातमहाभोगविषये लाभहानिरनेनानुक्ता स्यात्। न चानेनानुक्तत्वेऽपि 'गोप्याधिभोगे नो वृद्धिः' इति याज्ञवल्क्यवचनेनात्र लाभहानिरुच्यत इति वाच्यम्। बलकृतात्यल्पभोगविषयत्वात्तस्य। तस्मादर्धग्रहणस्योपलक्षणत्वमेव युक्तम्। भोग्याधौ तु गोप्यत्वेन पालिते लाभस्यैव नाशः। समयातिक्रममात्रेण मूलनाशपक्षानवतारात्। न च भोग्याधौ वृद्ध्यभावाल्लाभनाशपक्षस्याप्यनवतार इति वाच्यम्। भोगस्यापि लाभत्वात्। न च तत्राभोगे वृद्धिलाभो भविष्यतीति वाच्यम्। यत आह मनुः 'न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्' इति। *स्मृच.१३८-१३९

(७) 'अकाममननुज्ञातमार्धिं यः कर्म कारयेत्। भोक्ता कर्मफलं दाप्यो वृद्धिं वा लभते न सः'॥ इति कात्यायनवचनादनिच्छतो भोगे सर्ववृद्धिहानिः। आधीकृतदासाद्यपेक्षितभोगे त्वर्धस्य। गोप्याधिभोगे तु सर्ववृद्धिहानिः। +विचि.१५

याज्ञवल्क्यः

आधिसिद्धिः। आध्यन्तरकरणम्।

आधेः स्वीकरणात्सिद्धौ रक्ष्यमाणोऽप्यसारताम्।
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत्॥

* पमा., व्यप्र., विता. स्मृचगतम्।

+ वीमि., सेतु. विचिगतम्।

(१) **बालम्भ.**२।६०; **अपु.**२५४।२०; **विश्व.**२।६२ धन ... त्(धनं वा धनिने वहेत्); **मिता.**; **अप.**; **व्यक.**११५ प्रथम-

× **मनु.**, मच. गोरावत्।

१ द्धनं + (न). २ स्यान. ३ न्यांये. ४ भोक्त.

(१) ऋणिकार्पितस्य—आधेः स्वीकरणादिति। समर्पितस्यापि स्वीकरणेनोपभोग्यत्वसिद्धिः स्यात्। यत्नेनापि तु रक्ष्यमाणोऽप्यसारता यातश्चेद् यदि पाल्यमानोऽप्यसारीभूतः, ततोऽन्य आधेयः स्यात्। यद्वा अस्मिन्नवसरे धनभाग् वा धनी भवेत्। धनिने वा धनं सोदय देय, आध्यन्तरं वा कार्यमित्यभिप्रायः। विश्व.२।६२

(२) तत्र प्रतिभूर्निरूपितः। इदानीमाधिर्निरूप्यते। आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णोऽधिक्रियते आधीयत इत्याधिः। स च द्विविधः कृतकालोऽकृतकालश्च। पुनश्चैकैकशो द्विविधः। गोप्यो भोग्यश्च। मिता.२।५८

अपि च। आधेर्भोग्यस्य गोप्यस्य च, स्वीकरणादुपभोगात्, आधिग्रहणसिद्धिर्भवति न साक्षिलेख्यमात्रेण नाप्युद्देशमात्रेण। यथाह नारदः—'आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा। सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा'॥ इति। अस्य च फल—'आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा' इति। या स्वीकारान्ता क्रिया सा पूर्वा बलवती। स्वीकाररहिता तु पूर्वाऽपि न बलवतीति। स चाधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यद्यसारतामविकृत एव सवृद्धिकमूल्यद्रव्यापर्याप्तता गतस्तदाधिरन्यः कर्तव्यो धनिने धन वा देयम्। रक्ष्यमाणोऽप्यसारतामिति वदता आधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम्।

*मिता.२।६०

(३) आधिसाधनमाह—आधेः स्वीकरणात् इति। आधेः स्वीकरणात्परिग्रहादाधित्वसिद्धिः। स्वीकरण च भोग्याधौ भोगपर्यन्त, गोप्याधौ तु भाण्डागारप्रवेशपर्यन्तम्। यत्रसावाधिर्धनिना रक्ष्यमाणोऽप्यसारतामवलम्भ्यते याति, एकया सवत्सरवृद्ध्या सहित मूलधनमपाकर्तव्यम्। न शक्नोति चेत्तदाऽधमर्णेनान्य आधिराधेयः। धन वा स्वप्रयुक्तं धनी लभते। +अप.

(४) मिता. टीका—आधेर्गोप्यस्य भोग्यस्य च स्वीकरणादुपभोगादिति। गोप्यस्य स्वीकारमात्रं भोग्यस्योपभोग इति द्रष्टव्यम्। भोगस्योपभोगेनैव सिद्धिरित्यत्र नारदवचन प्रमाणयति। 'आधिस्तु द्विविधः प्रोक्त' इति। अथवा आधेर्गोप्यस्य भोग्यस्य च स्वीकरणादित्यस्यान्या व्याख्या। तद्यथा। स्वीकरणशब्दस्यैव पर्याय उपभोगादि इति। अयमभिसंधिः। 'भुजिः पालनेऽभ्यवहारे च' वर्तते। गोप्याधावुपभोगो नाम परिपालन अत्रोपेत्युपसर्गो व्याप्तौ वर्तते। तथा चोपसर्गसूत्रम्। 'उपसामीप्यसामर्थ्यव्याप्त्याचार्यकरणदोषाख्यानदानदाक्षिण्यवीप्सारम्भपूजोद्योगकार्याहित्यमरणानशनेष्विति'। भोग्याधावुपभोगो नामाभ्यवहरणम्। फलावुपभोग इति यावत्। सुबो.

(५) अपिर्विरोधार्थः। गवादौ दैवाद्वन्धकावस्थाया नष्टे मूलहानिरित्यत्रापि जात्याचार एव मानम्। वीमि.

गोप्यभोग्याध्योरुपचारभोगनाशादिविचारः

गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते।
नष्टो देयो विनष्टश्च दैवराजकृताहते॥

(१) गोप्याधिभोगिनो वृद्धिः प्रणश्येदिति शेषः। सोपकारेऽथेत्यपिशब्दार्थोऽथशब्दः। सोपकारेऽप्याधौ वृद्धिर्न स्यादित्यर्थः। वाहदोहादियुक्तो गवादिः सोपकारः। अविकाराशङ्कया पृथग्वचनम्। भावित इति भोक्त्राभ्युपगते साक्षिभिर्वा भुक्तोऽनेनायमित्येवं भाविते। नष्ट आधिर्विनष्टो वा दैविकाद् अग्न्याद्युपद्रवाद् राजकीयाद्वा विना अधमर्णिकाय देयः। स्वरूपहानं विनाशः। अपहारस्तु नाशः। स्पष्टमन्यत्। विश्व.२।६१

(१) **याज्ञ्म.**२।५९; **अपु.**२५४।१९ गे नो (गिनो) हापि (भावि); **विश्व.**२।६१ ष्टश्च (ष्टो वा) शेष अपुवत्; **मिता.**, **अप.**; **व्यक.**१११-११२ ऽथ (च); **स्मृच.** १३८ प्रथमपादः : १३९, **विर.**२३ ऽथ (च) पू. : २५ दैवराज (राजदैव) उत्त.; **पमा.**२३७; **विचि.**१५ व्यकवत्, पू., कात्यायनः; **स्मृचि.**१० ऽथ (ऽपि) मनुः; **सवि.**२३१ प्रथमपादः : २३२ स्मृचिवत्; **चन्द्र.**९ कारेऽथ (चारे च) पू.; **वीमि.**; **व्यप्र.**२३६ पू., २३७ ष्टश्च (ष्टश्चेत्) उत्त.; **व्यउ.**७३; **व्यम.**७६ भोगे नो (भोगतो) **ष्टश्च** (ष्टश्चेत्); **विता.**५३९; **सेतु.**१५ व्यकवत्, पू., **कात्यायनः**; **समु.**७४ हापि (भावि).

* विर., पमा., व्यप्र., व्यउ., विता. मितागतम्।

+ शेषव्याख्याने **मितावज्ञावः**। चन्द्र. अपगतम्।

पादः; **विर.**२६, **पमा.**२३३; **नृप्र.**२२-२३; **चन्द्र.**११ प्रथमपादः; **वीमि.**; **व्यप्र.**२३९; **व्यउ.**७३; **व्यम.**७७; **विता.**५४२; **समु.**७४.

(२) किं च । गोप्याधेस्ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति । अल्पेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या । समयातिक्रमात् । तथा सोपकारे उपकारकारिणि बलीवर्दताम्रकटाहादौ भोग्याधौ सवृद्धिके, हापिते हानि व्यवहाराक्षमत्वं गमिते, नो वृद्धिरिति संबन्धः । नष्टो विकृतिं गतः ताम्रकटाहादिश्छिद्रभेदनादिना पूर्ववत्कृत्वा देयः । तत्र गोप्याधिर्नष्टश्चेत्पूर्ववत्कृत्वा देयः । उपभुक्तोऽपि चेद्वृद्धिरपि हातव्या । भोग्याधिर्यदि नष्टस्तदा पूर्ववत्कृत्वा देयः । वृद्धिसद्भावे वृद्धिरपि हातव्या । विनष्टः आत्यन्तिक नाशं प्राप्तः सोऽपि देयो मूल्यादिद्वारेण । तद्दाने सवृद्धिक मूल्यं लभते । यदा न ददाति तदा मूलनाशः 'विनष्टे मूलनाशः स्याद्दैवराजकृताहते' इति नारदवचनात् । दैवराजकृताहते । दैवमग्न्युदकदेशोपप्लवादि । दैवकृताद्विनाशाद्विना । तथा स्वापराधरहिताद्राजकृतात् । दैवराजकृते तु विनाशे सवृद्धिक मूल्यं दातव्यमधमर्णेनाध्यन्तर वा । यथाह—'स्रोतसाऽपहृते क्षेत्रे राज्ञा चैवापहारिते । आधिरन्योऽथ कर्तव्यो देय वा धनिने धनम्' ॥ इति । तत्र स्रोतसापहृत इति दैवकृतोपलक्षणम् । *मिता.

(३) गोप्यस्याधेर्गोमहिषीवस्त्रहिरण्यरजतादेरुक्तमर्णेन वाहनदोहनभूषणादौ भोगे कृते नो वृद्धिर्भवति प्रयुक्तं धनं न वर्धत इत्यर्थः । तथा सोपकारे फलभोग्यभूम्यादावुपेक्षया हापिते हानि नीते नो वृद्धिरिति संबन्धः । हानिरत्र कार्याक्षमत्वम् । यत्राधमर्ण आधेरूपभोग वृद्धिदानं वाऽभ्युपगच्छति तद्विषयमेतत् । +अप.

(४) नष्टो भग्नत्वचोरितत्वादिना सर्वथा व्यवहाराक्षमता नीतः । विनष्टो नामात्यन्तनाश प्राप्तः । +विर.२५

(५) मिता.टीका—विनष्ट आत्यन्तिक नाशं प्राप्त इत्यादिकमप्युभयाधिविषय बोध्यम् । सुबो.

गोप्यभोग्याध्यबधिः

आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते ।
काले कालकृतो नश्येत्फलभोग्यो न नश्यति ॥

* पमा., सवि., वीमि., व्यप्र., व्यम., विता. मितागतम् । + शेष मितागतम् ।

(१) **यास्मृ.**२।५८; **अपु.**२५४।१८; **विश्व.**२।६०; **मेधा.**८।१४३ (=) क्ष्यते (क्षयेत्) **पू.**; **मिता.**; **अप.**२।५८: २।६४ पू.; **व्यक.**११३; **स्मृच.**१४१ प्रथमपादत्रयम् : १४३ चतुर्थपादः; **विर.**२९; **पमा.**२३८, **स्मृचि.**१०पू.; **नृप्र.**२२; **सवि.**१६४ (=) **पू.** : २३९ (=) : २४३ तृतीयपादः : ३१४ प्रथमपादः : ४४५ (=) पू.; **मच.**८।१४३ क्ष्यते (च्यते); **चन्द्र.**१३ उत्त.; **वीमि.**; **व्यप्र.**२४२; **व्यउ.**७२; **व्यम.** ७७ मचवत्; **विता.**५३६; **राकौ.**४००; **प्रका.**८०; **समु.** ७५; **भाच.**८।१४३ मचवत्; **विव्य.**२५.

यादेरभावात्। धनिनश्च स्वत्वहेतोः प्रतिग्रहक्रयादेरभावात्। मनुवचनविरोधाच्च 'न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः' इति। (मस्मृ.८।१४३) कालेन संरोधः कालसंरोधश्चिरकालमवस्थानं तस्मात्कालसंरोधाच्चिरकालावस्थानादाधेर्न निसर्गोऽस्ति नान्यत्राधीकरणमस्ति न च विक्रयः। एवमाधीकरणविक्रयप्रतिषेधाद्धनिनः स्वत्वाभावोऽवगम्यत इति। उच्यते—आधीकरणमेव लोके सोपाधिकस्वत्वनिवृत्तिहेतुः। आधिस्वीकारश्च सोपाधिकस्वत्वापत्तिहेतुः प्रसिद्धः। तत्र धनद्वैगुण्ये, निरूपितकालप्राप्तौ च, द्रव्यदानस्यात्यन्तनिवृत्तेरनेन वचनेनाधमर्ण्यात्यन्तिकी स्वत्वनिवृत्तिः, उत्तमर्णस्य चात्यन्तिकं स्वत्वं भवति। न च मनुवचनविरोधः। यतः (मस्मृ.८।१४३)—'न त्वेवाधौ सोपकारे कौसीदी वृद्धिमाप्नुयात्' इति। भोग्याधि प्रस्तुत्येदमुच्यते—'न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः' इति। भोग्यस्याधेश्चिरकालावस्थानेऽप्याधीकरणविक्रयनिषेधेन धनिनः स्वत्वं नास्तीति। इहाप्युक्तं फलभोग्यो न नश्यतीति। गोप्याधौ तु पृथगारब्ध मनुना (८।१४४) 'न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत्' इति। इहापि वक्ष्यते—गोप्याधिभोगे नो वृद्धिरिति। आधिः प्रणश्येद्द्विगुणे इति तु गोप्याधि प्रत्युच्यत इति सर्वमविरुद्धम्। ×मिता.

(३) आधिरुक्तलक्षणो वृद्धिदानाभावे निमित्ते मूलधनद्वैगुण्ये जाते तावद्धनं दत्त्वाऽधमर्णेन यदि न मोक्ष्यते तदाऽसौ नश्येदधमर्णस्य स्वं न भवेत्। *अप.

(४) अत्र कल्पतरुः। आधिः प्रणश्येदिति द्विगुणीभूते धने यद्याधिरधमर्णेन न मोक्ष्यते, तदा नश्यति, धनप्रयोक्तुः स्वो भवति। कालकृतः कृतकालः, तेन यः कालोऽवधिः, तस्मिन् प्राप्ते यदि न मोक्ष्यते, तदा नश्यतीत्यर्थः। यदाह हलायुधः। अस्यार्थः। यदि गोप्याधिरधमर्णेन द्विगुणीभूते धने न मोक्ष्यते, तदोत्तमर्णस्यैव तत्र स्वत्वमुत्पद्यते, अधमर्णस्य तु स्वत्वं नश्यति। कालकृतस्तु गोप्यो भोग्यो वा यत्रेतावति काले अहमेन न मोचयामि तदा तवैव स्वीभवति इति परिभाषितः। स धनद्वैगुण्यादर्वाक् ऊर्ध्वं वा परिभाषितकाले नश्यत्येवाधमर्ण्यमिति। अनयोश्चाधिमात्रे गोप्याधौ वा द्विगुणीभूते कपर्दके सति धनिकस्यैव स्वत्वं जायते इत्यापाततोऽभिमतं यद्यपि लक्ष्यते, तथापि कात्यादौ परिभाष्य बन्धकिते आधातुरनुमतिं विना धनिकस्वत्वोचितव्यवहारस्य विशेषामदर्शनादन्यथैव तद्व्याख्येयम्। आधिर्द्विगुणे धने यदि मया न मोक्ष्यते, तदा तवैवायमिति परिभाषितः, स प्रणश्येत् द्विगुणे धने यदि न मोक्ष्यते अत्र हेतुमन्निगदः। काले कालकृतो नश्येत्, कालकृतः कृतकालः कृतः कालविशेषोऽवधिर्यस्य स्वस्वत्वध्वंसे उत्तमर्णस्वत्वे च सः काले तादृशि वृत्तो नश्येत्। यतः यत्र यथा स्वामी स्वे द्रव्ये स्वस्वत्वं परस्वत्व वा नियमयति, तत्र तथैव तत् स्यादित्युत्सर्गादित्याशयः। फलभोग्यो न नश्यतीति फलभोग्यस्तु भोग्याधिरकृतकालः संवत्सरसहस्रेणापि न नश्यतीति। ÷विर.३०

(५) अयमभिसधिः—विज्ञानेश्वरमते वाचनिकोऽत्र स्वत्वध्वसः परस्वत्वापत्तिश्च। चन्द्रिकाकारमते नैयायिकः, क्रयप्रतिग्रहाद्यभावे विनिमयेनैवाधौ धनिकस्य स्वत्वापत्तिः। व्रीह्यादाविव तिलविनिमयकर्तरीति न्यायप्रतिपादनात्। अपरे त्वाहुः—परिभाषावशाद्द्विगुणधनस्य मूल्यत्वेन क्रयान्ताधिर्भविष्यतीति सोपाधिकक्रय इति स्वत्वस्य लौकिकत्वाद्वाचनिकत्वं न युज्यते। विनिमयस्य स्वत्वापादकत्वं 'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु' इत्यादिवचनस्य नियमपरत्वात्पारिभाषिकक्रयान्त इति भारुच्यपरार्कादीनां मतमिति क्रयान्तो वाचिकदानान्तो वेति। अयमाशयः—आधिस्थले विनिमय एव न संगच्छते। परिभाषावशात् दीपोत्सवादिसमये एतद्दृढमह दास्यामि अन्यथाऽयमाधिस्तव भविष्यतीति तत्र परिभाषयैव धनस्य सोपाधिकक्रयद्रव्यतया प्रतीतेः। यद्वा 'काले कालकृतो नश्येत्' इत्यत्रापि परिभाषयैवाधिनाशः प्रतीयते। तस्मात्परिभाषा नाम वाचनिकदानमिति दानमेव स्वत्वापादकम्। अतो दानान्ततया आधिः स्वत्वापादकः। अनेनैवाभिप्रायेणोक्तं विज्ञानयोगिना—'वचनात्स्वत्वम्' इति।

×स्मृच., पमा., व्यप्र., विता. मितागतम्। *मितावद्भावः। ÷व्यवहारकल्पतरुव्याख्यान अत्रैव द्रष्टव्यम्।

वचन परिभाषा वाचनिकदानमिति यावत् ।

×सवि.२४२–२४३

(६) [मिताक्षरारत्नाकरव्याख्यानद्वयमुपन्यस्योक्तम्] द्विगुण इति परमवृद्धिपरम् । कालकृतः कृतकालः अस्मिन्काले यदि न मोच्यते तदा तवैवेति स्वीकृत्यादितः तस्मिन् अमोचितः सर्वोऽप्याधिर्नश्यति । एवं च 'द्विगुणे धन' इति यथाश्रुतमेव ग्राह्यम् । शिष्टव्यवहारादिविरोधे तु कालविशेषोपलक्षणपरमिति व्याख्या तु साधीयसीति प्रतिभाति । वीमि.

चरित्रबन्धसत्यङ्कारौ

चरित्रबन्धककृतं सवृद्धया दापयेद्धनम् ।
सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥

(१) यदा त्वाधिरपुष्यमाण एव, स तु बन्धकमात्रतया क्रियते, तदा—चरित्रबन्धककृतमिति । चरित्रबन्धककृत सोदयमर्थं दाप्यः । नाधित्यागमात्रेण मोच्य इत्यर्थः । अन्यत्राप्येवमेव विश्वासव्यवहारे सत्यङ्काराय च यद् द्रव्यमर्पित, तद् विसवदता द्विगुण प्रत्यर्पणीयम् । सत्यङ्कारिणस्तु विसंवादतस्तद्धानिरेव । विश्व.२।६३

(२) 'आधिः प्रणश्येद्द्विगुणे'इत्यस्यापवादमाह—चरित्रबन्धकेति । चरित्रं शोभनचरितं, चरित्रेण बन्धक चरित्रबन्धक तेन यद्द्रव्यमात्मसात्कृतं परगधीन वा कृतम्। एतदुक्त भवति, धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्मसात्कृतम् । यदि वाऽधमर्णस्य स्वच्छाशयत्वेनाल्पमूल्यमाधि गृहीत्वा बहुद्रव्यमेव धनिनाऽधमर्णाधीन कृतमिति । तद्धनं स नृपो वृद्धया सह दापयेत् । अयमाशयः—एवरूप बन्धक द्विगुणीभूतेऽपि द्रव्ये न नश्यति । किं तु द्रव्यमेव द्विगुण दातव्यमिति । तथा सत्यङ्कारकृतम् । करणं कारः । भावे घञ् । सत्यस्य कारः सत्यङ्कारः—'कारे सत्यागदस्य' इति मुम् । सत्यङ्कारेण कृत सत्यङ्कारकृतम् । अयमभिसधिः—यदा बन्धकार्पणसमय एवेत्थ परिभाषितं 'द्विगुणीभूतेऽपि द्रव्ये मया द्विगुण द्रव्यमेव दातव्यं नाधिनाश' इति तदा तद्द्विगुण दापयेदिति । अन्योऽर्थः । चरित्रमेव बन्धकं चरित्रबन्धकम् । चरित्रशब्देन गङ्गास्नानाग्निहोत्रादिजनितमपूर्वमुच्यते । यत्र तदेवाधीकृत्य यद्द्रव्यमात्मसात्कृतं तत्र तदेव द्विगुणीभूत दातव्यं नाधिनाश इति । आधिप्रसङ्गादन्यदुच्यते—सत्यङ्कारकृतमिति । क्रयविक्रयादिव्यवस्थानिर्वाहाय यदङ्गुलीयकादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुण दातव्यम् । तत्रापि येनाङ्गुलीयकाद्यर्पित स एव चेद्व्यवस्थातिवर्ती तेन तदेव दातव्यम् । इतरश्चेद्व्यवस्थातिवर्ती तदा तदेवाङ्गुलीयकादि द्विगुणं प्रतिदापयेदिति । +मिता.

(३) एवविधे त्वाधौ धनमप्रयच्छतोऽधमर्णस्य नास्त्यानृण्यमित्यभिप्रायः । स्मृच.१४३

(४) सत्यङ्कारो द्विगुणेऽपि द्रव्ये न तवाधिर्भविष्यति किन्तु द्विगुणं द्रव्यमेव मया दातव्यमिति व्यवस्थाविशेषकृतमाधीकृतं द्रव्यं द्विगुणं प्रतिदापयेदन्यथा त्वाधिर्नश्यतीत्यर्थः । *वीमि.

आधिमोचनम्

उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत् ।
प्रयोजकेऽसति धनं कुले न्यस्याधिमाप्नुयात् ॥

(१) यदा त्रुणिकः सोदयं द्रव्यमादायोपस्थितः, तदा उपस्थितस्येति । सोदय द्रव्यमादायोपस्थितस्याधिमनु-

+ अप., विर. मिताक्षराया द्वितीयेऽर्धे गतम् । व्यक., व्यप्र. मितागतम् । स्मृच., पमा., सवि. अर्धद्वय मितागतम् । विता. मितागत वीमिगत च । व्यम. पूर्वार्धव्याख्यान मितागतम्, उत्तरार्धव्याख्यान वीमिगतम् ।

* मितावद्व्याख्याय अधिकमिदमुत्तरार्धव्याख्यानम् ।

× मितावद्भावः ।

(१) **याज्ञ्म.**२।६२; **अपु.**२५४।२२ स्तेनो (दण्डो); **विश्व.**२।६४ स्तेनो (दण्ड्यो); **मिता.**, **अप.**; **व्यक.**११३; **स्मृच.**१४६; **विर.**२७; **पमा.**२४१; **स्मृचि.**१० ऽन्यथा (ऽथवा); **नृप** २२; **सवि.**२४१ (=) कुले (मूले) उत्त.; **चन्द्र.**१३ पू.; **वीमि.**; **व्यप्र.**२४५; **व्यउ.७१**; **व्यम.** ७८, **विता.**५४८; **सेतु.**१७ स्तेनो (स्तेयं) न्यस्या (दत्वा); **प्रका.**८९; **समु.**७६.

त्सृजन् प्रयोक्ता दण्ड्यः स्यात् । यदा त्वसंनिहितो धनप्रयोक्ता, तदा तस्मिन् प्रयोजकेऽसति तत्कुटुम्बे समर्थ्य द्रव्यमाधिमाप्नुयात् निस्संशय गृह्णीयादित्यर्थः । एवं धनिककुले द्रव्य समर्पयित्वा आधिर्ग्राह्यः ।

विश्व.२।६४

(२) किं च । धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्यो, धनिना न वृद्धिलोभेन स्थापयितव्यः । अन्यथा अमोक्षणे स्तेनः चौरवद्दण्डयः स्यात् । असंनिहिते पुनः प्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिक धनं निधाय अधमर्णकः स्वीय बन्धक गृह्णीयात् । ×मिता.

(३) हलायुधस्तु यदि ग्रामादिकमाधि कृत्वा द्वितीयेऽह्नि आधिकपर्दक उत्तमर्णायाधमर्णो दातुमुपस्थितः । तदा तेन तद्धनं गृहीत्वा तस्याधिर्मोक्तव्यः, न तु वृद्धिलोभात् स्वयमेव धर्तव्यः, धारणे चौरवत् शास्य इति पूर्वार्धं व्याख्याय 'अत्रैव धन मूलीकृतमि'त्यादिबृहस्पतिवाक्यमवतारितवानिति । +विर.२८

(४) क्वचित्प्रयोजकोऽसति कुल इति पाठः । तत्र प्रयोजको धनप्रयोक्ता, असति धनिके इति शेषः । आप्नुयात्तदानीमेवेति शेषः । तथा च उत्तमर्णेऽसंनिहिते तदाप्तहस्ते सवृद्धिक धन निधाय, प्रयोजको धनप्रयोक्ताऽधमर्णः, तदानीमेव स्वाधिमाप्नुयादित्यर्थः ।

*व्यप्र.२४५–२४६

तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः ।
विना धारणकाद्वापि विक्रीणीत ससाक्षिकम् ॥

(१) तत्काले कृत मूल्य यस्य स तत्कालकृतमूल्यः । यदि मूल्यात् ह्रासः स्यात्, तदा तत्कालकृत यन्मूल्य, तद् धनिकेन देयम् । इत्येतया परिभाषया वृद्धिशून्यो धनिकहस्ते तिष्ठेत् । यदा तु धन द्विगुणीभूत, ऋणिकश्चासंनिहितः । तदा तत्काले श्रावयित्वाधि निर्विकल्प गृह्णीयात् । विनैव धारणकात् ससाक्षिक विक्रीणीतेत्यर्थः ।

विश्व.२।६५

(२) अथ प्रयोक्ताऽप्यसंनिहितस्तदाप्ताश्च धनस्य ग्रहीतारो न सन्ति, यदि वा असंनिहिते प्रयोक्तर्याधिविक्रयेण धनदित्साऽधमर्णस्य, तत्र किं कर्तव्यमित्यपेक्षित आह–तत्कालकृतेति । तस्मिन्काले यत्तस्याधर्मूल्यं तत्परिकल्प्य तत्रैव धनिनि तमाधि वृद्धिरहितं स्थापयेन्न तत ऊर्ध्वं विवर्धते । यावद्धनी धन गृहीत्वा तमाधि मुञ्चति यावद्वा तन्मूल्यद्रव्यमृणिने प्रवेशयति । यदा तु द्विगुणीभूतेऽपि धने द्विगुण धनमेव ग्रहीतव्यं न त्वाधिनाश इति विचारितमृणग्रहणकाल एव, तदा द्विगुणीभूते द्रव्ये असंनिहिते वाऽधमर्णे धनिना किं कर्तव्यमित्यत आह– विना धारणकाद्वाऽपीति । धारणकादधमर्णाद्विना अधमर्णेऽसंनिहिते, साक्षिभिस्तदाप्तैश्च सह तमाधि विक्रीय तद्धनं गृह्णीयाद्धनी । वाशब्दो व्यवस्थितविकल्पार्थः । यदा ऋणग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव ग्रहीतव्य न त्वाधिनाश इति न विचारितं, तदा 'आधिः प्रणश्येद्द्विगुणे' इत्याधिनाशः । विचारिते त्वय पक्ष इति । *मिता.

(३) उत्तमर्णेन मूलधन द्विगुणं फलभोग्याधेरुपजीव्याधमर्णाय स आधिः प्रत्यर्पणीय इत्यनन्तर वक्ष्यति । तत्र विषये यद्यधमर्णस्तदीयो वा स्वजनः कोऽप्यसंनिहितो विद्यते तदोत्तमर्णेन साक्षिसमक्ष स आधिर्विक्रेतव्य इतीदानीमाह––विना धारणकाद्वापीति । धारणकादधमर्णाद्विना तदसंनिधानादिति यावत् । वाशब्दस्तत्स्वजनासंनिधिसमुच्चयार्थः । ×अप.

(४) अथवाऽधमर्णः प्रयोक्तृकुले न्यस्तधनोऽपि प्रयोक्तुरागमनादूर्ध्वमेवाधि तन्मूल्यधन वा ऋणापाकरणकाले परिकल्पितमवृद्धिकमवाप्नुयात् । एतदप्याह वचोभङ्ग्या स एव 'तत्कालकृतमूल्यो वा' इति । तिष्ठेदाधिरिति शेषः । तत्र प्रयोक्तृकुल इत्यर्थः । स्मृच.१४६

(५) धारणकोऽधमर्णेनाधिमोचनोचितसमयै

× अप., स्मृच., पमा., सवि., व्यम., विता., सेतु मितागतम् । वीमि. मितावद्भावः । + स्वमत मितावत् ।

* शेष मितावत् ।

(१) **याज्ञ्य.**२।६३; **अपु.**२५४।१३ गीत (गीते); **विश्व.**२।६५; **मिता.** रण (रणि); **अप.; व्यक.**११४ उत्त.; **स्मृच.**१४६ पू.; **विर.**२८ पू., ३४ उत्त.; **पमा.**२४४ पू.; **स्मृचि.**१० पू.; **नृप्र.**२३ उत्त.; **वीमि.; व्यप्र.**२४५उत्त.:२४६ पू. मितावत्; **व्यउ.**७४; **व्यम.**७८ पू.; **विता.**५४८-५४९ मितावत्; **प्रका.**८९ पू.; **समु.**७६.

असंनिहितस्तिष्ठति तदा उत्तमर्णः ससाक्षिक तमाधिं विक्रीणीत, तत्र स्वकीयं धनं गृहीत्वाऽवशिष्टं राज्ञे दद्यादिति विवेकः। अपिकारेणाऽधमर्णदायादसंग्रहः। ×वीमि.

(६) एतच्चाधिमोचनं यदि भोग्याधिर्गोण्याधिश्च तावता कालेन मोचनीय इत्यवधिं कृत्वा स्थापितस्तदाऽधमर्णेनावधेरर्वाग्लोभेन न कर्तव्यम्। –व्यप्र.२४६

यदा तु द्विगुणीभूतमृणमाधौ तदा खलु।
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने॥

(१) वृद्ध्यर्थं प्रथमदिवसादारभ्य प्रयोक्त्रा भुज्यमानेऽपि—यदा तु द्विगुणीभूतमिति। धने प्रविष्टे सत्याधिर्मोच्यः। न त्ववीगेव। द्विगुणद्रव्याप्रदानलक्षणोऽस्य प्रणाशः स्यादित्यभिप्रायः। विश्व.२।६६

(२) भोग्याधौ विशेषमाह—यदा तु द्विगुणीभूतमिति। यदा प्रयुक्त धन स्वकृतया वृद्ध्या द्विगुणीभूत, तदाधौ कृते, तदुत्पन्ने आध्युत्पन्ने द्रव्ये द्विगुणे धनिनः प्रविष्टे, धनिनाऽऽधिर्मोक्तव्यः। यदि वाऽऽदावेवाधौ दत्ते, द्विगुणीभूते द्रव्ये त्वयाधिर्मोक्तव्य इति परिभाषया कारणान्तरेण वा भोगाभावेन यदा द्विगुणीभूतमृण तदा, आधौ भोगार्थं धनिनि प्रविष्टे, तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः। अधिकोपभोगे तदपि देयम्। सर्वथा सवृद्धिकमूलर्णापाकरणार्थाध्युपभोगविषयमिद वचनम्। तमेन क्षयाधिमाचक्षते लौकिकाः। यत्र तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि यावन्मूलदान तावदुपभुङ्क्त एवाधिम्। एतदेव स्पष्टीकृत बृहस्पतिना–'ऋणी बन्धमवाप्नुयात्। फलभोग्यं पूर्णकाल दत्त्वा द्रव्यं तु सामकम्॥ यदि प्रकर्षितं तत्स्यात्तदा न धनभाग्धनी। ऋणी च न लभेद्बन्धं परस्परमत विना'॥ इति। *मिता.

(३) एवं च सति—'आधिः प्रणश्येद् द्विगुणे धने यदि न मोक्ष्यते'। इत्यनेन वाक्येन यदा तु द्विगुणीभूतमित्यस्यैव विरोधो नैवाऽऽशङ्कनीयो भिन्नविषयत्वात्। तथा हि–द्विगुणे मूलधने प्रविष्ट आधिर्मोच्यत इति उत्तमर्णाधमर्णयोः प्रतिप्रतिविषय 'यदा तु द्विगुणीभूतमित्यादिक वाक्यम्। प्रयुक्तस्य धनस्य प्रतिपादनावधि य आधिः कृतस्तद्विषय 'आधिः प्रणश्येद् द्विगुणे' इत्यादिकम्। यदा तु द्विगुणीभूतमित्यादिवचनप्रतिपादित आधिः क्षयाधिरिति कथ्यते। स च ऋणव्यवहारारम्भे मध्ये वा कृतो भवत्येव क्षयावधिः। +अप.

(४) मिता.टीका—यदा प्रयुक्त धनमिति। अयमाशयः। ऋणत्वेन प्रयुक्ते धने वृद्ध्या सह द्विगुणे जाते धने पश्चादाधिर्दत्तो भोगार्थं यदा तदा आधेः सकाशादुत्पन्ने धने द्विगुणे धनिनः प्रविष्टे सत्याधिर्मोक्तव्य इति। यदि वाऽऽदावेवेति। अयमाशयः। ऋणग्रहणकाल एवाधिं दत्त्वा अधमर्ण एव ब्रवीति। 'यदा द्रव्य वृद्ध्या सह द्विगुण जायते तदाऽयमाधिस्त्वया मोक्तव्यो न ततः पूर्वमिति'। एव च परिभाषया यावद्द्विगुण भवति तावदाधेर्भोगाभावः। अथवा यावद्द्विगुण भवति तावदृणग्रहणकालदत्तस्याप्याधेर्देविकराजकव्यसनरूपकारणान्तरवशाद्भोगाभावः। एवमुभयथाऽपि ऋणग्रहणकाले दत्तस्याप्याधेर्भोगाभावेन हेतुना ऋण द्विगुणे जाते पश्चादाधिमुपभोक्तु धनिनि प्रविष्टे सति आध्युत्पन्नद्रव्येऽपि द्विगुणे जाते वृद्ध्या सह द्विगुणीभूतर्णसमे सत्याधिर्मोक्तव्य इति। *सुबो.

(५) अधर्मभीरुणा तदा स आधिर्मोच्यः। 'भोगाय द्विगुणादूर्ध्व चक्रवृद्धिश्च गृह्यते। मूल च सोदय पश्चाद्दापयेत तत्तु गर्हितम्'॥ इति बृहस्पतिवचनात्, न तु विशेषव्यवस्थामन्तरेण न वर्धतेऽर्णमित्यप्याहुः। +वीमि.

नारदः

बन्धलक्षणम्

निक्षेपो मित्रहस्तस्थो बन्धो विश्वासकः स्मृतः॥

× पूर्वार्धव्याख्यान मितागतम्। – अवतरणिकाया मितावद्भाव।

* व्यक., विर., पमा., विता. मितागतम्। स्मृच., विचि., सवि., चन्द्र., व्यप्र. मितावद्भावः।

+ शेष मितागतम्। * बाल. सुबोवत्।

(१) **याज्ञ.**२।६४; **अपु** २५४।२४ च्य ...न्ने (च्यश्चाधिस्तदुत्पाद्यः); **विश्व.**२।६६; **मेधा.**८।१५१ (=) उत्त.; **मिता.**; **अप.**; **व्यक.**१११; **स्मृच.**१४७ धने (तदा); **विर.**२८; **पमा.**२४५; **विचि.**७ तदा (तथा) प्रवि (प्रवृ); **मूप्र.**२३; **सवि.**२४१; **चन्द्र.**१३; **वीमि.**; **व्यप्र.**२४७; **व्यम.**७८; **विता.**५४९; **प्रका.**८९ स्मृचवत्; **समु.**७६; **विव्य.**२३.

(१) **स्मृच.**१३६; **व्यप्र.**२२४; **प्रका.**८५ **बृहस्पतिः**; **समु.**७३.

(१) उत्तमर्णाधमर्णयोः यः सख्यातस्य पार्श्वे निक्षिप्तमेवाधमर्णधनमुत्तमर्णविश्वासार्थं अधमर्णेनापदिष्ट बन्ध इति गीयते इत्यर्थः। स्मृच.१३६

(२) उत्तमर्णस्य विश्वासहेतुस्तन्मित्रहस्तस्थो निक्षेप एव बन्धशब्देनोच्यत इत्यर्थः। व्यप्र.२२५

आध्यवधि·

अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः।
कृतकालोपनेयश्च यावद्देयोद्यतस्तथा॥

(१) अत आधिभेदो भवति। अधिक्रियत अन्यधनिना सबन्धाधिकारमानीयते इत्याधिः। स च द्विविधः। चलाधिः स्थिराधिश्च। सोऽपि द्विलक्षणो ज्ञेयः। एकः कृतकालोपनेयः, द्वितीयो यावद्देयोद्यतः। तत्र कृतकालोपनेयो यः स द्विप्रकारः। एको दीयमाने धने प्राप्तकालावधौ आधिपालैः समर्पणीयः। द्वितीयस्तु अतिपुष्यमाणो धनिना एवं विचार्य गृह्यते। यथा पञ्च वर्षाणि दश वा इयन्त कालं..... न मोचनीयः। तत्परतो ऋणिके। अयमपि कृतकालोपनेय उच्यते। एष द्विविधोऽपि व्याख्यातः। यावद्देयोद्यत उच्यते। अस्मिन्दिवसे गृहीत द्रव्य तस्मिन्नेव वृद्धिफलभोग्यन्यायेन समर्पितः। यावद्देय धन जात तावदेव तत्क्षण समर्पितः। यथा यावद्देय धन तिष्ठति तावदपरिमितकालमपि भोक्तव्यः। अनेन क्रमेण य उद्यतः समर्पितः स यावद्देयोद्यताधिरुच्यते। एवं कृतकालोपनेयो यावद्देयोद्यतश्चाधिर्द्विविधोऽपि सविस्तर व्याख्यात इति। अभा.५६ ५७

(२) कृते काले आधानकाल एवामुष्मिन्काले दीपोत्सवादौ, मयाऽयमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीति। एव निरूपिते काले, अपनेयः आत्मसमीपं नेतव्यो मोचनीय इत्यर्थः। देय दानं देयमनतिक्रम्य यावद्देयमुद्यतो नियतः स्थापित इत्यर्थः। यावद्देयमुद्यतो यावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिर-

(१) **नासं.**२।१०५ विज्ञेयो (तु ज्ञेयो); **नास्मृ.**४।१२४; **अभा.**५६; **मिता.**२।५७ कालो (कालेऽ); **अप.**२।५७ कालोप (कालाप) ; **विर.**२२; **पमा.**२३०, **विचि.**१४ कालोप (कालाप) यत (ऽन्यत); **स्मृचि.**९-१०; **नृप्र.**२२; **व्यप्र.**२३५; **व्यउ.**७२; **व्यम.**७६; **विता.**५३५ (=); **राकौ.**४०० उत्त.; **समु.**७३; **विव्य.**२५ **बृहस्पतिः**.

निरूपितकाल इत्यर्थः। *मिता.२।५७

(३) यद्गृहीत द्रव्यं तस्योपरि क्रियत इत्याधिः। गृहीतद्रव्यार्थ वा अधिक्रियते दाननियमार्थं वा स्थाप्यते इत्याधिः। कृते काले उपनेयः कृतकालोपनेयः। तस्मिन् काले द्रव्यं दत्वा ग्रहीतव्यः। अग्रहणे यथाभाषित वा। ×नाभा.२।१०५

गोप्यभोग्याध्योरुपचारभोगनाशादिविचार·

स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च।
उपचारस्तथैवास्य लाभहानिर्विपर्यये॥

(१) स पुनराधिरन्यप्रकारेण द्विविधः। एको गोप्यो घटितसुवर्णरौप्यादिः। ... ... गुपू रक्षणे धातुः। तेन रक्षणीय इत्यर्थः। द्वितीयो भोग्यः, प्रकाश एव गृहक्षेत्रादिः। उपचारस्तथैवास्येति। अस्य द्विविधस्याप्याधेर्गुप्तस्य कालान्तरोपाश्रयोपचारः। भोग्यस्य फलोपाश्रयोपचारः। विपर्यये फलहानिरिति। विपरीताथों विपर्यय उच्यते। यतो गोप्यस्य भोगः क्रियते ततस्तस्य कालान्तरे फल हानिर्भवति। अथ प्रकाशस्याभोगः क्रियते। ततस्तस्य सस्यनिवासादिफलहानिर्भवति। इत्यय विपर्यय इति। अभा.५७

(२) उपचारो रक्षण कर्तव्यमिति शेषः। विपर्यये विनाशे। व्यक.१११

(३) गोप्यभोग्ये द्वे शाब्दे एव। लेख्याधिरूढत्वसाक्षिमत्त्वे चोहनीये। उपचारो लक्षण, तथैव प्रकारभेदानुसारेणास्य कर्तव्यत्वम्। विर.२२

(४) गोप्यो रक्षणीयः आ द्रव्यग्रहणात्। द्रव्यग्रहणोत्तरकाल प्रतिदान गोप्यस्य यथा निहित तथैव।

* अप., विर., पमा., विता. मितागतम्।

× शेष मितागतम्।

(१) **नासं.**२।१०६ उपचारः (प्रतिदान); **नास्मृ.**४।१२५; **अभा.**५७; **मिता.**२।५७ पू.; **अप.**२।५७ पू., **व्यक.**१११ उत्त.; **स्मृच.**१४०उत्त ; **विर.**२२ गोप्यो भोग्य (भोग्यो गोप्य); **पमा.**२३० पू.; **विचि.**१५ उत्त.; **स्मृचि.**१० पू., **नृप्र.**२२ पू.; **सवि.**२३३ पुनः (चापि) पू.; **व्यप्र.**२३५; **व्यउ.**७२; **विता.**५३५ (=) पू.; **राकौ.**४०० पू.; **समु.**१५ उत्त.; **प्रका.**८६ उत्त.; **समु.**७३-७४; **विव्य.**२५ उत्त., **बृहस्पतिः**.

भोग्यस्य यथा भुज्यमानं तथैव । भोगेन यत्क्षीणं तत्क्षीणमेव । लाभहानिर्विपर्यय इति। गोप्यस्य भोगे वृद्धिहानिः । भोग्यस्य च भोगे भोगस्तत्र लाभः । तच्च द्रव्यमभुक्त, भोगस्य लाभत्वात् तदभावे लाभहानिः ।
नाभा.२।१०६

प्रमादाद्धनिनस्तद्वदाधौ विकृतिमागते ।
विनष्टे मूलनाशः स्याद्दैवराजकृताद्ऋते ॥

(१) अत्र यथा लाभहानिर्विपर्यये भवति तद्वद्धनिनः प्रमादादाधिनाशे मूलनाशोऽपि भवति । तत्र प्रमादः । चलादिवृषभादिकस्याकालवाहनमतिवाहन चेत्यादि । गोप्याधेश्च धनिकप्रमादः प्रकाशमोचनम् । इत्यादिना धनिप्रमादेन आधिनाशे सजाते विकृति वा प्राप्ते काणकुटभग्नादौ मूलनाशो भवति । यदा पुनः प्रकाश राजदैविकादाधिनाशो भवति तदा धनिनो मूलनाशो नास्ति । राजिक यथा, स्वल्पेऽपराधेऽपि राजगृहीतसर्वस्वेन सह तन्मध्यस्थाधेर्नष्टस्य तथैव चौरापहृतस्यापि आधेर्मूलनाशो नास्तीत्येवोक्तम् । अभा.५७

(२) दैवमग्न्युदकदेशोपप्लवादि । दैवकृताद्विनाशाद्विना । तथा स्वापराधरहिताद्राजकृतात् । +मिता.२।५९

(३) यथा विपर्यये लाभहानिः तद्वद्विकृतिमागते । यदि विकृतिमेवार्पयेदिति । अयं च पक्षो विकृतस्याधेः पूर्ववत्कारणपर्यालोचनाभसद्भावे । अन्यथा प्राचीन एव पक्षः । प्रमादादिति धनिकदोषोपलक्षणार्थम् । तेन भोगव्यतिरिक्तदोषाद्विकृतिमागतेऽप्याधौ पूर्ववत्कृत्वार्पणं लाभहानिर्वा, भोगाद्विकृतिमागते तु गोप्याधौ द्वयमपीत्यनुसधेयम् । विकृतिमागत इत्यनेनैव ह्रासव्यक्त्यन्यत्वासारत्वाद्यपि संगृहीतम् । आधेरयथास्वरूपत्वतौल्यात् । तेन तत्राप्येष एव विधिर्ज्ञेयः ।
×स्मृच.१४०

(४) धनिन उत्तमर्णस्य प्रमादादाधौ विकृतिमागतेऽन्यथाभूते तद्वदेव स्यात् यथा 'लाभहानिर्विपर्यये' इति वृद्धिहानिः, तथात्रापि। गोप्यविषय एतत्, भोग्ये वृद्धयभावात् । भोग्ये तु मूलच्छेदः । विनष्टे द्वयोरपि मूलनाशः । नाभा.२।१०७

यद्याधेर्मूलनाशः स्याद्दैवराजकृतात्क्वचित् ।
आध्यर्थस्त्वृणिना देयस्त्वशक्तौ भोगतो भवेत् ॥

प्रतिसंवत्सर यावान् भोगस्तावान् वृद्धित्वेन दातव्य इत्यर्थः । सवि.२३२

आधिसिद्धि.

आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा ।
सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा ॥

(१) यस्मिन्नत्र जङ्गमः स्थावरो वा प्रकारद्वयमध्ये आरूढ एवाधिर्न तु भुक्तः । ततो भोगेन विना तयोर्लिखितमात्राधिचिह्नयोरपि सिद्धिर्नास्तीति । अभा.५९

(२) सिद्धिराधित्वसिद्धिः । अन्यथा विना भोग अधमर्णोद्दिष्टस्योत्तमर्णस्वीकारमात्रेणेति यावत् । गोप्याधौ निभोगे भोगस्थानीयभाण्डागारान्तर्निधानादिव्यापारादाधिसिद्धिरध्यवसेया । एवमस्माकमेतदीय गृहाद्याधिरिति ऋणिकसंनिधौ मध्यस्थजनेषु आवेदन दूरस्थत्वादिना भोगाग्रलाभे त्वाधिसाधकमित्यव-

+ विर. मितागत स्मृचगत च ।

(१) **नासं**.२।१०७; **नास्मृ**.४।१२६; **अभा**.५७; **मिता.** २।५९ उत्त.; **अप.**२।५९ नाश. (हानिः) उत्त., **व्यक.** १११-११२ अपवत्, **स्मृच.**१४० गंत (गत.) चतुर्थपाद विना; **विर.**२२ पृ. : २४ अपवत्, उत्त.; **पमा.** २३६ उत्त ; **विचि.**१५ अपवत्; **स्मृचि** १० उत्त.; **सवि.**२३२ उत्त.; **चन्द्र.**१० नाशः (हानिः) दैवराज (द्राजदैव) उत्त.; **वीमि.**२।५९ उत्त.; **व्यप्र.**२३५ पृ : २३८ उत्त.; **व्यउ.**७२-७३, **व्यम.**७६ उत्त.; **विता.** ५३९ उत्त.; **सेतु.**१५-१६ अपवत्; **प्रका.**८६ स्मृचवत्; **समु.**७४; **विव्य.**२५ अपवत्.

× व्यप्र. स्मृचगतम् ।

(१) **सवि**.२३२; **समु.**७४ नाश. (हानिः) कृतात् (कृता) (२) **नासं**.२।११६ आधिस्तु (आधिर्यो) क्तो (क्तः) जङ्गम· स्थावर (स्थावरो जङ्गम); **नास्मृ.**४।१३९ स्यो (त्रो) स्यापि (स्यास्य) यद्य (यत्रा); **अभा.**५९ स्यो (त्रो) स्यापि (स्यास्य); **मिता.**२।६०; **व्यमा.**३४८ स्तु (श्च); **अप.**२।६० व्यमावत्; **स्मृच.**१४३; **पमा.**२३३; **स्मृचि.**९ द्विविधः (द्वियुण·) रस्तथा (रात्मकः) पृ.; **नृप्र.**२३; **सवि.**२३३ पृ.: २३६ जङ्गमः स्थावर (स्थावरो जङ्गम); **वीमि.**२।६०; **व्यप्र.**२३९ यस्ति (यपि); **व्यउ.**७३; **व्यम.**७७; **विता.** ११६,५४२; **प्रका.**८७; **समु.**७५; **विव्य.**१९ व्यमावत्,

गन्तव्यम्। स्मृच.१४३

(३) 'अधिक्रियत इत्याधिः' इति य आधिरुक्तः स द्विविधो ज्ञेयः, स्थावरो भूम्यादिः जङ्गमश्च गवादिः। उभयस्याप्यस्य सिद्धिः प्रामाण्य विना पत्रेण, यत्राहितो भोगोऽस्ति। विना भोगेन न भवतीत्यर्थः। पत्र च नास्ति भोगश्च न चेद् दुर्विचारं तत्। नाभा.२।११६

बलादाधिभोगनिषेधः

नै भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत।
मूल्येन तोषयेच्चैनमाधिस्तेनोऽन्यथा भवेत्॥

कृतकालोपनेयो य आधिः स पूर्वं एवावधौ बलावष्टम्भेन न भोक्तव्यः। अथ कथमपि कृतम्। ततः कालान्तरवृद्धि परित्यजेत्। यच्च मूल्यमाधिर्लभते तेन मूल्येनाधिधनिन परितोषयेत। अन्यथा आधिस्तेनदोष प्राप्नुयादिति। अभा.५७

अननुज्ञाताधिभोगे कर्तव्यता

यः स्वामिनाभ्यनुज्ञातमाधिं भुङ्क्तेऽविचक्षणः?।
तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्क्रयः॥

वर्धमानकलान्तरेण आधि समर्पित, आधिस्वामिनः पार्श्वात् असप्राप्ताभ्यनुज्ञात एव, य आधिं भुङ्क्ते स अविचक्षणो मूर्खः। तेन (आधिना धनिना संभावितेन?) धनिना यथारूढवृद्धेरर्धं परित्यजनीयम्। एष स्थल-भोगस्य निष्क्रयः। अभा.५८

भोग्याधिवृद्धिचालनविक्रयविचारः

नै त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्।
न चावेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः॥

अस्य भाष्यम्। अत्र यः सोपकार आधिः स वृद्धि-फलभोग्य एव। तस्मिन् सोपकारे आधौ कौसीदीं वृद्धिं न कश्चिदाप्नुयात्। यावच्च विचारितकालावधि संरोधो न चालनीयः। तावदवान्तर एवाधेर्न तस्य क्वचिद्दानमस्ति न विक्रय इति। अभा.५८

आध्यन्तरकरणम्

रक्ष्यमाणोऽपि यत्राधिः कालेनेयादसारताम्।
आधिरन्योऽथवा कार्यो देयं वा धनिने धनम्॥

(१) यत्र धनिना प्रयत्नरक्ष्यमाणाधिः कालेन शीर्ण-तामसारतामाप्नोति। तत्रार्णिकेन धनिकस्याधिरन्योऽधि-कर्तव्यः। अथवा धनमेव दातव्यमिति। अभा.५८

(२) असारता सवृद्धिकमूलद्रव्यापर्याप्तता। केचिदेक-सवत्सरभववृद्धिसहितमूलद्रव्यापर्याप्ततामसारतामाहुः। तच्चिन्त्यम्। एवविधविशेषाश्रयणे किं कारणमिति चोद्य-संभवात्। अन्यः पूर्वस्थितो वा आधिः पर्याप्तः कार्यः। अन्यग्रहणस्य पर्याप्तत्वेन भाव्यमित्येतावन्मात्रपरत्वात्। ×स्मृच.१३७

बृहस्पतिः

आधिप्रकारा.

आधिर्बन्धः समाख्यातः स च प्रोक्तश्चतुर्विधः।
जङ्गमः स्थावरश्चैव गोप्यो भोग्यस्तथैव च।
यादृच्छिकः सावधिश्च लेख्यारूढोऽथ साक्षिमान्॥

(१) चतुर्विधः स्वरूपप्रकारकालप्रमाणैः, तत्र स्वरूप-मेव द्विविध स्थावरजङ्गमभेदेन। कालो द्विविधः, स्वविधिनियमानियमाभ्याम्। प्रमाण द्विविध लेख्य-साक्षिभेदेन। *व्यक.१११

(२) यद्यप्यत्राधिरष्टविधो दर्शितः तथापि गोप्यभोग्य-यादृच्छिकसावधिरूपभेदाना अत्रानेकविशेषविध्युप-योगार्थं तात्पर्यातिशयेन कथन नान्येषामिति वक्तु 'प्रोक्तश्चतुर्विधः' इत्युक्तम्। यावदेण तव न ददामि तावत् अयमाधिरित्येव कालविशेषावधिशून्यतया कृतो

---

(१) नास्मृ.४।१२७, अभा.५७. (२) नास्मृ.४।१२८; अभा.५७-५८. (३) नास्मृ.४।१२९; अभा.५८. (४) नास्मृ.२।१०८ ऽथवा कार्यो (ऽधिकर्तव्यो); नास्मृ.

× व्यप्र स्मृचगतम्। * विर, वीमि. व्यकवद्भावः। ४।१३० आधिरन्योऽथवा कार्यो (तत्राधिरन्यः कर्तव्यो); अभा.५८ रक्ष्य(रक्ष) शेष नास्मृवत्; व्यक.११२ यत्रा (यस्त्वा) निने (निनो); स्मृच.१३७; विर.२६ यत्रा (चेदा); पमा.२३२, विचि.१६ विरवत्; स्मृचि.१० त्राधिः (आधिः) व्यासः; नृप्र.२२; सवि.२३३ (=) कालेन (कालेना) निने (निनो); चन्द्र.११ रक्ष्य (वक्ष्य) यत्रा (चेदा) कार्यो (देयो); व्यप्र.२३९ स्मृचिवत्; सेतु.३१६ विरवत्; प्रका.८६; समु.७४; विव्य.२६ यत्राधिः (चैवाधिः) निने (निके).

(१) व्यक.१११; स्मृच.१३५; विर.२२; पमा.२३०; नृप्र.२२ श्रुतुर्विधः (स्तु षड्विधः); सवि.२३३ प्रथमार्धद्वयम्; वीमि.२।५८; व्यप्र.२३४; व्यम.७६ प्रथमार्धद्वयम्; सेतु.१५; प्रका.८५; समु.७३.

यादृच्छिकः । दीपोत्सवकाले ऋण दत्वाऽयमाधिर्मया मोक्ष्यते नो चेत्त्वैव भवतीत्येव कृतः सावधिः । यद्येवमाधिरेव बन्ध इति इहोच्यते कथ तर्हि पूर्वस्मिन् वचने बन्ध वेति भेदेनोक्तम् । उच्यते । अत्र बन्ध पदस्य यो विवक्षितोऽर्थः स हि नारदेन दर्शितः— 'निक्षेपो मित्रहस्तस्थो बन्धो विश्वासकः स्मृतः' ।

+स्मृच.१३५-१३६

(३) लेख्यारूढ इति साक्ष्यतिरिक्तप्रमाणवान् इत्यर्थः । वीमि.२।५८

गोप्याधिभोग्याधिभोगनाशादिविचार

अंशान्तलाभे च ऋणे तथा पूर्णेऽवधौ धनी ।
यो भुङ्क्ते बन्धकं लोभात् न स लाभो भवेत् पुनः।
न्यासवत् परिपाल्योऽसौ वृद्धिर्नेष्यति हापिते॥

अत्र गोप्याधिः शान्तलाभे ऋणे भोक्तव्य इति परिभाषितोऽशान्तलाभे ऋणे न भोक्तव्यः । भोग्याधिस्तु इयत्समयेनायमस्मिन् काले भोक्तव्य इति परिभाषितः पूर्णेऽवधौ भोक्तव्य इत्यर्थः । पारिजाते तु पूर्णे इत्यत्रा कारप्रश्लेष आदृतः, अवधिमपेक्ष्य व्यवस्थापितभोगे आधौ अवधावपूर्णे आधिर्न भोक्तव्य इत्युक्तम् । उभय मपि चैतयुक्तम् । न्यासवत् परिपाल्योऽसाविति नासौ हापनीयः, हापिते तु वृद्धिर्नेष्यतीत्यर्थः ।

*विर.२३

भुक्ते चासारतां प्राप्ते मूलहानिः प्रजायते ।
बहुमूल्यं यत्र नष्टमृणिकं तत्र तोपयेत् ॥

(१) मूलहानिः असारत्वानुसारेणेत्यभिप्रायः । न च तोपयेदिति वचनाद्यावता धनेन तुष्येत्तावद्धन देयमिति शङ्कनीयम् । यत आह (मस्मृ. ८।१४४) 'मूल्येन तोपयेदेनमाधिस्तेनोऽन्यथा भवेत्' इति । स्मृच.१४०

(२) बहुमूल्य लभ्यधनापेक्षया । विर.२५

(३) अवृद्धिऋणविषयकमेतत् । विचि.१६

(४) बहुमल्याधिनाशे तु सलाभमृणादुपरि आधिमूल्यमाधात्रे देयम् । व्यप्र.२३८

आधिनाशे आध्यन्तरकरणम्

[1]दैवराजोपघातेन यत्राधिर्नाशमाप्नुयात् ।
तत्रान्यं दापयेद् बन्धं सोदयं वा धनं ऋणी ॥

राजघातोऽत्र उच्छृङ्खलेन राज्ञा कृत उपद्रवः । न तु धनिकापराधनिमित्तकः । व्यप्र.२३७

आधिमोचनम्

[2]बन्धहस्तस्य यद्दत्तं चित्रेण चरितेन वा ।
अदत्तेऽर्थेऽखिलं बन्धं नाकामो दाप्यते क्वचित् ॥

(१) चित्र लेख्यम । चरित साक्ष्यादि ।

व्यक.११२

(२) अस्यार्थः—गृहीतबन्धकस्य उत्तमर्णस्य कृते यदाधिधन देय तस्मिन् समस्ते दत्त एव पर बहुमूल्य मपि बन्धक उत्तमर्णेन मोक्तव्यम् । कियद्बन्धकधन गृहाण, बहुमूल्य बन्धक समर्पय, शेषबन्धकधनदाने तव पत्रिका ददामि साक्षिण वा करोमीत्युक्तऽप्येव चित्र चरितादिना प्रकारेण राज्ञा बन्धक न दापयितव्य इति विर.२७

+पमा. स्मृचगतम् । * व्यप्र. विरगतम् ।

(१) **व्यक.**१११, **विर.**२२, **पमा** २३२ इयति हापिते (इयेत दापिते) तृतीयार्थ., **नृप्र.**२२ न्यासवत् (न्यास. स) हापिते (दापिते) तृतीयार्थः, **व्यप्र.**२३५-२३६; **समु.**७८ तृतीयार्थ..

(२) **अप.**२।५९; **व्यक.**११२; **स्मृच.**१४० चा (त्व) मूल्य (मूल्यो) नष्टम् (नष्ट.), **विर.**२५, **पमा** २३२ चा (वा), **विचि.**१६; **नृप्र.**२२ पमावत्; **चन्द्र.**१० तत्र (तत्); **वीमि.**२।५९ मूल (फल), **व्यप्र.**२३८ मूल्यं (मूल्यो) नष्टम् (नष्टः); **व्यम.**७६ चा (त्व) पू ; **विता.**५४१ उत्त , **सेतु.**१७ चा (वा) : ३१५; **प्रका.**८६ स्मृचवत्; **समु.** ७४-७५ स्मृचवत्; **विव्य.**२५-२६ यत्र (यदि).

(१) **व्यक.**११२ दैव (दैव), **विर.**२५ दैवराजो (राज दैवो), **पमा** २३२ तेन (ते च) उत्तरार्धे (तत्राधि दापयेद्बन्धा त्सोदय धनमन्यथा), **दीक** ३७ दापयेत् (प्राप्यते), **विचि** १६ यत्रा (यद्या) पयेद्(प्यते) सोदय (शोधयेत्), **स्मृचि** १० यत्रा (यद्या) दापयेत् (प्राप्यते) सोदय (शोधयेत्), **चन्द्र** ११ दैव .धि (राजदैवकदोषेण यद्याधि) य वा धन ऋण (ये वा ऋणी धनम्), **व्यप्र.**२३७ सोदय (शोधयेत्) **व्यम.**७७ तत्रा.. बन्धं (तत्राधि दापयेद्बन्धात्), **विता.**५४१ तत्रा ...बन्ध (तत्राधि दापयेद्राजा), **सेतु.**३१६ यत्रा (यद्या सोदय (शोधयेत्); **समु.** ७४ ऋणी (तृणी) शेष व्यमवत् **विव्य.**२६ धन ऋणी (धनी ऋणम्) शेषं विचिवत्.

(२) **व्यक.**११२ खिलं (खिले), **विर.**२७.

[1]धनं मूलीकृतं दत्त्वा यदाधिं प्रार्थयेदृणी ।
तदैव तस्य मोक्तव्यस्त्वन्यथा दोषभाग्धनी ॥

(१) भोग्याधावेवमेव । गोप्याधौ तु मूलीकृतं सवृद्धिकं दत्त्वा यदा प्रार्थयते तदैव मोक्तव्यः । मूलीकृतग्रहणस्याधमर्णदेयधनपरत्वात् । दोषः स्तेयदोषः ।

*स्मृच.१४६

(२) एतच्चावधिविरहितभोग्याधिविषयम् । विर.२७

[2]हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधेः ।
बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च ।
तदन्तरा धनं दत्त्वा ऋणी बन्धमवाप्नुयात् ॥

मिता.टीका—द्वैगुण्यानन्तर कृतकालानन्तरमपि चतुर्दशदिनाभ्यन्तरे द्रव्य दद्याच्च नोत्तरत्रेति सूचितम् । तेन चात्यन्त द्रव्यदान द्वैगुण्याद्यनन्तरं निवर्तते । निवृत्ते च द्रव्यदाने 'आधिः प्रणश्येत्' इत्यनेन वचनेना धमर्णस्यात्यन्तिकी स्वत्वनिवृत्तिरुत्तमर्णस्य चात्यन्तिकी स्वत्वप्राप्तिरुपादिश्यत इति । सुबो.२।५८

फलभोग्यं पूर्णकालं दत्त्वा द्रव्यं तु सामकम् ॥
यदि प्रकर्षितं तत्स्यात्तदा न धनभाग्धनी ।
ऋणी न लभते बन्धं परस्परमतं विना ॥

(१) अस्यार्थः । फल भोग्यं यस्यासौ फलभोग्यः बन्ध आधिः । स च द्विविधः । सवृद्धिकमूलापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च । तत्र च सवृद्धिमूलापाकरणार्थ बन्ध पूर्णकाल पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयादृणी । यदा सवृद्धिक मूल फलद्वारेण धनिनः प्रविष्टं तदा बन्धमाप्नुयादित्यर्थः । वृद्धिमात्रापाकरणार्थ तु बन्धक सामक दत्त्वाऽऽप्नुयादृणी । समं मूल सममेव सामकम् । अस्यापवादमाह—'यदि प्रकर्षितं तत्स्यात्' । तद्बन्धकं प्रकर्षितमतिशयित वृद्धेरप्यधिकफल यदि स्यात्तदा न धनभाग्धनी । सामक न लभते धनी । मूलमदत्त्वैव ऋणी बन्धमाप्नुयादिति यावत् । अथ त्वप्रकर्षित तद्बन्धकं वृद्धयेऽप्यपर्याप्त तदा सामक दत्त्वाऽपि बन्ध न लभेताधमर्णः, वृद्धिशेषमपि दत्त्वैव लभेतेत्यर्थः । पुनरुभयत्रापवादमाह—'परस्परमतं विना' । उत्तमर्णाधमर्णयोः परस्परानुमत्यभावे यदि प्रकर्षितमित्याद्युक्तम् । परस्परानुमतौ तूत्कृष्टमपि बन्धक यावन्मूलदान तावदुपभुङ्क्ते धनी निकृष्टमपि मूलमात्रदानेनैवाधमर्णो लभत इति । *मिता.२।६४

(२) एवं चायमर्थः । तद्बन्धन यदि प्रकर्षित समग्रवृद्धिपर्याप्तकर्षान्वितं परिभाषितकालैकदेशे स्यात् तदा न परिभाषितकालात्यये सति धनी धनभाक् । ऋणी च तस्मिन्सति न लभते बन्ध, किन्तु समग्रवृद्धिपर्याप्तप्रकर्षानन्तरमेव धनी मूलधनभाक् ऋणी च मूलमात्र दत्त्वा बन्धं लभत इति । परस्परमत विनेति वदन्दर्शयति । परिभाषितकालैकदेशे समग्रवृद्धिपर्याप्तप्रकर्षप्रवेशोऽस्तु वा मा वा । सर्वथा यावत्परिभाषितकालं वृद्ध्यर्थमाधिभोगः कियतामिति ऋणिकेनोक्ते यत्र धनिकेन ॐइत्युक्तं, तत्र वृद्धेरभ्यधिकप्रकर्षप्रवेशेऽपि परिभाषितकालात्यय एव सामकं दत्त्वा बन्धमृणी लभते न पुनः परिभाषितकालमध्य इति । स्मृच.१४७-१४८

[3]क्षेत्रादिकं यदा भुक्तमुत्पन्नमधिकं ततः ।

---

* पमा, व्यप्र. स्मृचवत् ।

(१) **व्यक.**११२ धनी (भवेत्); **स्मृच.**१४६ व्यस्त्व (व्यो श्च), **विर.**२७ यदा (यथा), **पमा.**२४३ विरुवत्, **नृप्र.**२३, **सवि.**२४१ स्त्व (म); **चन्द्र** १३ यदा (यथा) तस्य (च स) दोष (स्तेय), **व्यप्र.**२४५, **सेतु.**१७ मूली (ऋणि) यदा (यस्या) मोक्तव्यस्त्व (भोक्तव्य त्व) भाग्ध (बान्ध), **प्रका** ८९ स्मृचवत्; **समु.**७६ धैर्ये (प्रया) शेषं स्मृचवत्

(२) **मिता.**२।५८:२।६४ (ऋणी बन्धमवाप्नुयात्); **सुबो.**२।५८ प्रथमार्धं (परिपूर्णे कृते काले धने च द्विगुणे सति) द्वितीयार्धं विना; **स्मृचि.**१० बन्धमवा (बन्धकमा), **सवि.**२४० काले (काल), **व्यप्र** २४२ कृतावधे. (कृतेऽवधौ) च (तु); **व्यउ.**७२, **व्यम.**७७ कृतावधेः (धृतावधौ) च (तु) प्रथमार्धद्वयम्; **विता.**५३६.५५० (ऋणी बन्धमवाप्नुयात्); **समु.**७६ (बन्धके द्विगुणीभूते ऋणी बन्धमवाप्नुयात्).

(३) **मिता.**२।६४, **नृप्र.**२३, **व्यउ.**७४ तु (च); **विता.**५५०; **समु.**७६.

(४) **मिता.**२।६४ न लभते बन्धं (च न लभेद्बन्धं); **स्मृच.**१४७; **पमा.**२४६, **सुबो.**२।६४ चतुर्थपादं विना, **व्यउ.**७४ मितावत्; **विता.**५५० मितावत्; **समु.**७६.

* विता मितागतम् ।

(१) **व्यक.**११३; **स्मृच.**१४६; **विर.**२९; **पमा.**२४४; **नृप्र.**२३ मूलो (मौलो); **व्यप्र.**२४६; **व्यम.**७८; **विता.**५५० दय प्रविष्ट (दयौ प्रविष्टौ); **प्रका.**८९; **समु.**७६.

मूलोदयं प्रविष्टं चेत्तदाधिं प्राप्नुयादृणी ॥

आधीकृतं क्षेत्रादिकम्। धनिकेन लाभशान्तेः पश्चा देव यदा भुक्त ततो भुज्यमानाद्यद्धनमुत्पन्नमधिक क्षेत्रार्थव्ययादभ्यधिकं मूलोदयतुल्यं यदा यस्मिन्काले धनिनि प्रविष्टं तदा तस्मिन्काल एवाधिमृणी लभत इत्यर्थः। स्मृच.१४६

परिभाष्य यदा क्षेत्रं प्रदद्याद्धनिके ऋणी।
त्वयैतच्छान्तलाभेऽर्थं भोक्तव्यमिति निश्चितम्॥
प्रविष्टे सोदये द्रव्ये प्रदातव्यं त्वया मम।
कुसीदादिविधिस्त्वेष धर्म्यः संपरिकीर्तितः॥

(१) 'त्वयैतदि'त्यादिपरिभाष्य यदा ऋणग्रहणकाले क्षेत्राद्याधि प्रदद्यात्। तत्र प्रागुक्तविधयाऽऽधिलाभ इत्यर्थः। *स्मृच.१४७

(२) शान्तलाभेऽर्थे परिसमाप्तलाभे निमित्तीभूते सति। विर.२९

पूर्णावधौ शान्तलाभे बन्धे स्वामी धनी भवेत्।
अनिर्गते दशाहे तु ऋणी मोक्षितुमर्हति॥

(१) तद् वृद्ध्यर्थप्रयुक्तवस्त्रादिविषयम्। ब्राह्मणेभ्यो दधि दीयतामित्यादिवत् सामान्यविशेषन्यायात्। लाभशान्तिरपि वस्त्रादौ त्रैगुण्यादिविधायकवचनानुसारेणावगन्तव्या। एव च चतुर्दशदिनादूर्ध्वमाधौ स्वत्वापत्तेरर्थेष्टविनियोगो हिरण्यप्रयोक्तुरविरुद्धः। वस्त्रादिप्रयोक्तुस्तु दशदिनादूर्ध्वमेवेति मन्तव्यम्। +स्मृच.१४२

(२) अत्र दिनदशकद्विसप्ताहयोः सुस्थितासुस्थितादमर्णावादाय व्यवस्था। +विर.३१

यत्राहितं गृहक्षेत्रं भोगेन प्रकर्षान्वितम्।
तत्रर्णी नाप्नुयाद् द्रव्यं धनी चैव ऋणं तथा॥
पूर्णे प्रकर्षे तत्स्वाम्यमुभयोरपि कीर्तितम्।
अपूर्णे तु प्रकुर्यातां परस्परमतेन तौ॥

(१) प्रकर्षो वृद्धिः। व्यक.११४

(२) विषयज्ञान विना नास्यार्थो ज्ञातु शक्य इति विषयस्तावदभिधीयते। शान्तलाभे धने जाते वृद्धिमात्रावाप्त्यर्थमयमाधिर्भोक्तव्य इति परिभाषा कृत्वा आधिर्दत्त ऋणकाले लाभशान्तिकाले वा। अस्माच्चाधेरेतावति काल उत्पन्न वृद्धेरपर्याप्तमपि समग्रवृद्ध्यर्थमेवास्विति परिभाषाकरणकालेऽनुक्त च। अथवा तत्रास्माच्चाधेरित्याद्यस्त्वित्यन्तमुक्तमेवेति द्विधा विषयः। अर्थोऽप्यभिधीयते। आधुत्पन्नोऽर्थ उत्पत्यर्थव्ययादवशिष्टः प्रकर्षपदेनात्रोक्तः तस्मिन्समग्रवृद्ध्यपर्याप्ते धने प्रविष्टे ऋणी मलमात्र दत्वा बन्ध परिभाषितकालात्ययेऽपि नाप्नुयात्। धनी च ऋण मूलमात्र तदा नाप्नुयात् न गृह्णीयात्। किन्तु पूर्णे प्रकर्षे समग्रवृद्धिपर्याप्ते धनिनो मूलमात्रे ऋणिनो बन्ध इत्येवमुभयोस्तत्साम्य परिकीर्तितम्। तस्मात्तस्मिन्नेव काले सामक दत्वाऽऽधि मोचयेदिति शेषः। यदाऽप्यपूर्णः समग्रवृद्धेरपर्याप्तमिति समग्रवृद्ध्यर्थमेवास्विति परिभाषाकरणकाले कृते न तौ धनिकर्णिकाविति स्वाम्यकरणस्य च फल परिभाषितकालात्यये समग्रवृद्धिपर्याप्तप्रकर्षप्रवेशाभावेऽपि सामकमेव दत्वा ऋणिकेन बन्धमोचन, परस्परमतेनेति वदन् तदभावे धनिनः स्वाम्य वृद्धिशेषेऽपीति दर्शयति। स्मृच.१४७

---

* पमा. स्मृचवत्। + पमा., व्यप्र., विता स्मृचगतम्।

(१) **व्यक.**११३, **स्मृच.**१४७, **विर.**२९ तम् (त.); **पमा.**२४४ प्रद ...के (दद्यात् धनिने) त्वयै (तदा) भो (मो) श्चितम् (श्चयः); **नृप्र.**२३ पू.; **सवि.**२४१ भो (मो); **व्यप्र.** २४६ श्चितम् (श्चयः), **प्रका.**८९; **समु.**७६ ऋणी (स्मृणा).

(२) **व्यक.**११३ त्वया (पुनः); **स्मृच.**१४७ पू.; **विर.** २९ व्यकवत्; **पमा.**२४४ प्रविष्टे (आधिस्तु) पू., **सवि.**२४१ पू.; **व्यप्र.**२४६ पू.; **प्रका.**८९ पू.; **समु.**७६ पू.

(३) **व्यक.**११३; **स्मृच.**१४२; **विर.**३१, **पमा.** २४० णांव (र्णे वि) शान्त (सान्त) बन्धे (बन्ध); **चन्द्र.**१३ क्षि (चि); **वीमि.**२।५८ धनी (धने) मोक्षि (प्रोच्छि); **व्यप्र.** २४३ चन्द्रवत्; **विता.**५३७ क्षितु (चन) उत्त.; **प्रका.**८७, **समु.**७५ धनी (धने).

+ वीमि. विरवत्।

(१) **व्यक.**११४ क्षेत्र (क्षेत्रे) णां ना (न प्रा) ऋणं (ऋणी); **स्मृच.**१४७ द्रव्य (बन्धे) था (दा); **विर.**३२; **पमा.**२४५ हित (धिक) ना (चा) द्रव्य (बन्ध), **विचि.**१७ गृह (गृह); **स्मृचि.**१० तत्रर्णी ना (ऋणी न प्रा); **चन्द्र.**१२ ऋण (धन), **प्रका.**८९ स्मृचवत्; **समु** ७६ द्रव्य (बन्ध); **विव्य.**२६ पू.

(२) **व्यक.**११४, **स्मृच** १४७ उभयोरपि (तूभयोः परि) तु (ऽपि); **विर.**३२; **पमा.**२४६ अपि (परि); **विचि.**१७; **स्मृचि.**१० तत् (तु); **चन्द्र.**१२ स्मृचिवत्, **प्रका.**८९ स्मृचवत्, **समु.**७६ स्मृचवत्.

(३) यत्र गृहक्षेत्रं भोगे भोगनिमित्त आहित आधीकृत न प्रकर्षान्वित प्रकर्षेण पूर्णेनावधिनान्वित न भवति तत्र ऋणी नाप्नुयात् धन, धनी चैव ऋण नाप्नोति। पूर्णे प्रकर्षे अवधौ तत्र स्वाम्यमुभयोरपि ऋणिकस्य धनग्रहणे धनिकस्य ऋणग्रहणे। अपूर्णे तु परस्परानुमत्या स्वातन्त्र्यमित्यर्थः। *विर.३३

गोप्याधिभोगकालः

गोप्याधिर्द्विगुणादूर्ध्वं कृतकालस्तथाऽवधेः।
आवेदयित्वर्णिकुले भोक्तव्यः समनन्तरम्॥

(१) तत् स्वत्वापत्तेरर्वागाधेर्भोगमात्रविधिपरम्। न पुनर्यथेष्टविनियोगो न कदाचिदाधेरस्तीत्येवंपरम्। समनन्तरमित्यभिधानात्। तस्मान्न बार्हस्पत्यवचनयोः परस्परविरोधः। +स्मृच.१४२

(२) तद्भोगमात्रविधिपरम्। न पुनः स्वत्वापत्तिपरम्। पमा.२४०

नष्टे मृते वा ऋणिके धनी पत्रं प्रदर्शयेत्।
तत्कालावधिसंयुक्तं स्थानलेख्यं च कारयेत्॥

यदा त्वधमर्णः पलायितो मृतो वा भवेत्, ऋणिकुले च श्रावणमशक्य, तदा राजस्थाने धनी पत्र प्रदर्शयेत्। तत्कालावधिसयुक्त तत्र लेख्य च कारयेत् नियन्ध कारयेदित्यर्थः। एव च आधि भुञ्जानस्य न दोषः। विर.३३

आधिसिद्धिः

न भुङ्क्ते यः स्वमाधानं नादद्यान्न निवेदयेत्।
प्रमीतसाक्षिऋणिकं तस्य लेख्यमपार्थकम्॥

अत्र यथातथेत्यध्याहरणीयम्। प्रमीतसाक्षिऋणिक साक्षिऋणिकशून्यं तेन यथा साक्षिऋणिकौ विना लिखितमसाक्षिऋणिक लेख्यमपार्थक भवति, तथा यो न भुङ्क्ते स्वमाधान आधिं त नात्मीय करोति न च तमाधि गृहीतमन्यस्मै बोधयति तस्य संपूर्णमपि लेख्यं साध्याशे न प्रमाणमित्यर्थः। अत्र च न भुङ्क्ते इति भोग्याधौ द्रष्टव्य, नादद्यादिति गोप्याधौ द्रष्टव्यं, न निवेदयेदित्युभयत्र। एतच्च प्रायिकतया भुक्ताभुक्तयोर्विभावनाभावेऽपि भोग्यगोप्ययोराधित्वस्थैर्यात्। विर.३५

गृहवार्यापणं धान्यं पशुस्त्रीवाहनानि च।
उपेक्षया विनश्यन्ति यान्ति चासारतां तथा॥

आपणः पण्यविक्रयस्थानम्। गृहादीन्याधीकृतानि यदि आधिग्रहीतृदोषात् विनश्यन्ति असारता वा यान्ति तदा आधित्वमेव तेषा नश्यतीत्यर्थः। तेन तदाधिदोषेण आधिकर्त्रा आध्यन्तरादि न दातव्यमिति तात्पर्यम्। विर.३५

क्षेत्रमेकं द्वयोर्बन्धे दत्तं यत्समकालिकम्।
येन भुक्तं भवेत्पूर्वं तस्य तत्सिद्धिमाप्नुयात्॥

(१) दत्तमधमर्णेनोद्दिष्टमित्यर्थः। क्षेत्रग्रहण भोग्याद्युपलक्षणार्थम्। स्मृच.१४४

(२) समकालिकं पूर्वापरभूततया अशक्यावधारणम्। आभ्या वाक्याभ्या पूर्वापरभूततया अशक्यावधारणे आधित्वाभिमतद्वये, यस्य बलात्कारशून्या भुक्तिस्तस्याधित्व भवतीत्युक्तम्। विर.३६-३७

तुल्यकालोपस्थितयोर्द्वयोरपि समं भवेत्।
प्रदाने विक्रये चैव विधिः स परिकीर्तितः॥

---

* विचि. विरगतम्। + व्यप्र. स्मृचवत्।

(१) **अप.**२।५८ लस्तथावधेः (लो यथाविधि) आवेद (श्राव); **व्यक.**११४ आवेद (श्राव), **स्मृच.**१४२ लस्तथावधेः (लो यथावधि), **विर.**३३ वधे. (पर) आवेद (श्राव), **पमा.** २४० सम (तद), **चन्द्र** १२ व्यकवत्; **व्यप्र.**२४३ पमावत्, **व्यम.७७** लस्तथा (लकृता) सम (तद) व्यासः; **प्रका.८७** लस्तथावधे. (लो यथाविधि), **समु.७५** स्मृचवत्.

(२) **अप.**२।५८; **व्यक.**११४; **विर.**३३.

(३) **व्यक ११४; विर.३५; चन्द्र.११** (=) धान (धि च) पार्थ (नर्थ).

(१) **व्यक.**११४ वार्या (भार्या); **विर.३५.**

(२) **अप.**२।६०तत्सिद्धिमाप्नुयात् (सिद्धिमवाप्नुयात्); **व्यक.११५** भवेत् (तयोः); **स्मृच.१४४; विर.३६; पमा.**२३३ दत्तं यत् (यद्दत्तं), **स्मृसा.८२** द्वयोर्बन्धे (तयोर्बन्धु) येन (यत्र), **सवि.२३६; व्यप्र.२४०; विता.५४५;** सेतु १९ बन्धे (बेंधे); **प्रका.८८, समु.७५.**

(३) **अप.**२।६० पू.; **व्यक.११५; स्मृच.१४४** समं भवेत् (च सभवे) पू., **विर.३७; स्मृसा.८२** स परि (संपरि); **सवि.२३७** पू.; **चन्द्र.५** (=) (तुल्यकालोपभोगश्चेद्भोगोऽपि समको भवेत्। विक्रये चैव दाने च विधिरेष प्रकीर्तितः॥); **व्यप्र.२४०** पू.; **सेतु.१९; प्रका.८८** पू.; **समु.७५** समं भवेत् (च संभवः) उत्तरार्धं (प्रदाने विक्रये चाधौ विधिरेष प्रकीर्तितः).

(१) उपस्थितयोरुपादानादिक कर्तुमिति शेषः । स्मृच.१४४

(२) यत्र तु द्वयोरपि न तादृशो भोगस्तत्राह—तुल्येति । विर.३७

कात्यायनः

अप्रत्ययभोग्याधि

द्रव्यं गृहीत्वा वृद्ध्यर्थं भोगयोग्यं ददाति चेत् ।
जङ्गमं स्थावरं वाऽपि भोग्याधिः स तु कथ्यते ।
मूल्यं तदाऽधिकं दत्त्वा स्वक्षेत्रादिकमाप्नुयात् ॥

वृद्धिमात्रापाकरणार्थं भोग्याधौ अधमर्ण उत्तमर्णतः प्राप्तं मूल्यं दत्त्वा स्वं क्षेत्रादिकमाप्नुयात् । एषोऽप्रत्ययभोग्याधिरिति वचनाभिप्रायः । सवि.२३४

पशुदासाद्याधिर्न पीडनीयः

यस्त्वाधिं कर्म कुर्वाणं वाचा दण्डेन कर्मभिः ।
पीडयेत् भर्त्सयेच्चैव प्राप्नुयात् पूर्वसाहसम् ॥

(१) कर्म कुर्वाणेऽपि अश्वाद्याधावतिक्रमकरणे दण्डो न मूलधनहानिर्भवतीत्याह स एव—यस्त्वाधिमिति । अकुर्वति पीडनभर्त्सनकारिणो न दण्डः । कुर्वाणमित्यभिधानात् । स्मृच.१३९

(२) एतद्वाक्यं प्रकरणादेवविधभर्त्सनादौ तत्कर्तुर्वृद्धिग्रहणाभावमेवाह, प्रसङ्गाच्च पूर्वसाहसाभिधानमिह । विर.२५

(३) आहितदास्यादिपीडने स एवाह—यस्त्वाधिमिति । पमा.२३८

आधिनाशे आध्यन्तरकरणम्

न चेद्धनिकदोषेण निपतेद्वा म्रियेत वा ।
आधिमन्यं स दाप्यः स्यादृणान्मुच्येत नर्णिकः॥

(१) **सवि.**२३४; **समु.**७७ तृतीयार्धे (मूल तद्दत्तमखिल दत्त्वा स्व क्षेत्रमाप्नुयात्). (२) **व्यक.**११२; **स्मृच.**१३९ व प्रा (वमा); **विर.**२५ यस्त्वा (यश्चा); **पमा.**२३८; **सवि.** २३५ (=) धि क (धिक) च्चैव (त्रैव); **व्यप्र.**२३७ कर्मभिः (मर्मभिः); **प्रका.**८६ क्रमेण मनुः; **समु.**७४. (३) **व्यक.** ११२ निप (निष्प) दाप्यः (कार्यः); **स्मृच.**१३८; **विर.**२६ निप (निष्प); **विचि.**१७ निपतेद्वा (निष्पतेत); **सवि.**२३६ न चे (स चे) नर्णि (सर्णि); **व्यप्र.**२३७ विरवत्; **व्यम.** ७७; **विता.**५४१; **प्रका.**८६; **समु.**७४.

(१) धनिकदोषादन्यत आध्यपचारे ऋणिक ऋणान्न मुच्यते । तेनान्यमाधिं स ऋणिको धनिने राज्ञा दाप्य इत्यर्थः। स्मृच.१३८

(२) धनिकदोष विनैव यत्राधिर्व्यवहारायोग्यो भवति तदा तत्समानमाध्यन्तरमधमर्णेन देय, न तु विनैव दानमृणादसौ मुक्तो भवतीत्यर्थः । यत्तु बन्धकितगवादौ देवान्नष्टे धनिकस्य धन याति, आधातुराधीकृतगवादिक धन यातीति केऽपि वदन्ति, तत्राविगीतशिष्टाचार एव मूलम् । तत्र च भोग्याधिर्विषय इति मन्तव्यम् ।

+विर.२६

आधीकृतं तु यत्किञ्चिद्विनष्टं दैवराजतः ।
तत्रर्णं सोदयं दाप्यो धनिनामधमर्णिकः ॥

गोप्यभोग्याधिभोगनाशविचार

बलादकामं यत्राधिमनिसृष्टं प्रवेशयेत् ।
प्राप्नुयात्साहसं पूर्वमाधाता चाधिमाप्नुयात् ॥

अनिसृष्टमनाहितम् । भोग्याधौ बलादल्पस्यापि अनाहितस्य भोगे भोक्तुर्दण्डः । सर्वमूलनाशश्च स्यादिति तात्पर्यार्थः । वञ्चनया तु भोगे कृते भोगानुसारेण मूलनाशः । अन्यथा बलाद्ग्रहणानर्थक्यापत्तेः ।

स्मृच.१३९

अकाममननुज्ञातमाधिं यः कर्म कारयेत् ।
भोक्ता कर्मफलं दाप्यो वृद्धिं वा न लभेत सः ॥

(१) चेतनरूपाधिविषयमेतत् । अप.२।५९

(२) कर्मफल दास्याद्याधौ वेतन, शकटाद्याधौ भाटकादिकम् । न तु दास्यादिकृतावधातादिकर्मणः फल

+ विचि. विरगतम् ।

(१) **स्मृच.**१३७; **विर.**२७ दैवराजतः (राजदैवतः) तत्रर्णं (तद्दृण); **सेतु.**३१६ विरवत्; **प्रका.**८६; **समु.**७४. (२) **स्मृच.**१३९; **विर.**३८ (=) निसृष्टं (निर्दिष्ट), **सवि.** २३५ (=) धाता चा (धाताऽप्या); **सेतु** २० (=) निसृष्ट (निर्दिष्ट) पूर्व (कृत्य); **प्रका.**८६, **समु.**७४.

(३) **अप.**२।५९; **व्यक.**११२ न लभेत (लभते न); **स्मृच.**१३९ व्यकवत्; **पमा.**२३८ अका (आका)शेष व्यकवत्; **विचि.**१५ व्यकवत्, **सवि.**२३५ यः (यत्) शेष व्यकवत्; **चन्द्र.**१० व्यकवत्; **व्यप्र.**२३७; **व्यम.**७६; **विता.** ५३८; **सेतु.**१६ व्यकवत्; **समु** ७४, **विश्व.**२५.

तण्डुलादिकम्। अपराधाननुरूपत्वात्। अत्रापि कर्मानुसारेणेति द्रष्टव्यम्। दाप्यो बन्धः स्वामिने राज्ञेति शेषः। अकाममिति दास्यादिबुद्धिमदाधिविषयम्। अन्यत्रासम्भवात्। स्मृच.१३९

(३) एव गोप्याधितया स्थापितेऽश्वादौ तद्धाटक दाप्यो वृद्धिर्वा त्याजनीयेत्यर्थः। व्यप्र.२३७

आधिमोचनम्

आधाता यत्र न स्यात्तु धनी बन्धं निवेदयेत्।
राज्ञस्ततः स विख्यातो विक्रेय इति धारणा।
सवृद्धिकं गृहीत्वा तु शेषं राजन्यथार्पयेत्॥

(१) आधातृग्रहणमत्रापि पूर्ववदुपलक्षणार्थम्। राजन्यर्पयेदिति ज्ञात्यादिप्रत्यासन्नाभाववविषयम्। तत्सद्भावे तत्रैवार्पणस्य न्याय्यत्वात्। यत्र शेषार्पण क्रियते तेनैव यदि सवृद्धिक धन दत्वा बन्धो गृह्यते तदा न विक्रयः। प्रयोजनस्य सिद्धत्वात्। अत एव 'तिष्ठेद्येति' प्रतीक्षणपक्षोऽप्युक्तः। अन्यत्र त्वाधीकरणमप्यस्मिन्विषये न विरुद्ध दण्डापूपन्यायात्कि तु मूलमेवान्यत्राधीकृत्यादेय न तु सवृद्धिकम्। स्मृच.१४२

एवमुक्तो ज्ञात्यादावर्पणान्तो विधिर्बहुमूल्याधिविषय एव। शेषार्पणादेस्तत्रैव संभवात्। सममूल्ये तु ससाक्षिक विक्रीय स्वयमेव सर्वं गृह्णीयात्। स्वल्पमूल्येऽप्येव विक्रीय गृहीत्वा ऋणशेषमृणदानाधिकारिणि कथञ्चिदाप्ते सतो गृह्णीयादित्यायुक्तवचनत एवोह्यम्। ×स्मृच.१४३

(२) यदा आधाता अन्यो वा तदधिकारी न भवति, तदा तमार्धि द्विगुणे ऋणधने सति विक्रीय स्वलभ्य द्विगुणं धनं गृहीत्वा उत्तमर्णस्तन्मूल्यशेष राजन्यर्पयेदित्यर्थः। विर.३४

वञ्चनया आधिभोगे दण्ड

आधिं दुष्टेन लेख्येन भुङ्क्ते यद्दणिकाद्धनी।
नृपो दमं दापयित्वा आधिलेख्यं विनाशयेत्॥
ऋणिकद्रव्यभोगानिष्कृत्यर्थं वृद्धिहानिरत्रायुक्तेया। स्मृच.१४१

सत्यङ्कारः

सत्यङ्कारविसंवादे द्विगुणं प्रतिदापयेत्।
अकुर्वतस्तु तद्धानिः सत्यङ्कारप्रयोजनम्॥

आधिसिद्धि

आधिमेकं द्वयोर्यस्तु कुर्यात् का प्रतिपद्धवेत्।
तयोः पूर्वकृतं ग्राह्य तत्कर्ता चोरदण्डभाक्॥

(१) प्रतिपद् व्यवस्था, पर्वतरं करणमिति शेषः। *व्यक.११५

(२) ऋणग्रहणोपक्रमत्वादाधिक्रिया प्रतिपदित्युच्यते। पूर्वकृतं पूर्वमुपादानादिना सिद्धम्। +स्मृच १४४

आधानं विक्रयो दानं साक्षिलेख्यकृतं यदा।
एकक्रियानिबन्धेन लेख्यं तत्रापहारकम्॥

(१) एकक्रियानिबन्धेन एकजातीयदानादिक्रिया-

× सवि., व्यप्र. स्मृचवत्।

(१) **अप.**२।५८ श्रुत (शा त); **व्यक.**११४ श्रुत (शे त); **स्मृच.**१४२ व्यकवत्; **विर.**३४ न स्यात्तु (नष्ट. स्यात्) स वि (समा) त्वा तु (त्वा तत्); **पमा.**२४१, **विचि.**१७ न स्यात्तु (नष्टः स्यात्) स्ततः (स्तृणः) ख्यातो (ख्रियो), **स्मृचि.**१० न स्यात्तु (नष्टः स्यात्) बृहस्पति.; **सवि.**२४५ तो विक्रेय इति धारणा (प्य विक्रय कुरुते धनी), **चन्द्र.**११ त्वा तु (त्वार्थ) शेष स्मृचिवत्; **व्यप्र.**२४४ न स्यात्तु (वै न स्यात्) ख्या (शा), **विता.**५४९ व्यप्रवत्; **प्रका.**८७ व्यकवत्; **समु.**७५ व्यकवत्, **विरुद्ध.**२६ आधाता यत्र न स्यात्तु (दाता यत्र तु नैव स्यात्).

* विर. व्यकवत्। + व्यप्र स्मृचवत्।

(१) **स्मृच.**१४१, **सवि.**२४६ दु (मृ) दम (धन); **व्यप्र.**२३९ धि दु (धिङ्) दाप (प्राप) विना (तु ना), **विता.**५४२ (आधौ नष्टे तु लेख्येन भुङ्क्ते य ऋणिकाद्धनम्) विनाश (तु पाट), **प्रका.**८७ दु (न), **समु.**७५ यदृणि (यर्त्रणि).

(२) **विश्व.**२।६३.

(३) **व्यक.**११५ कृत (तर), **स्मृच.**१४४, **विर.**३५ स्तु (त्र) तयो....र्ता (द्वयो. पर्वतर ग्राह्यमाधाता), **पमा.**२३४ यस्तु कुर्यात् का (कृत्वा यश्चैका), **सवि** २३७ का प्रतिपद्धवेत् (कोऽत्र पतिर्भवेत्), **चन्द्र** १४ कुर्यात् (तत्र) शेषं विरवत्, **व्यप्र.**२४०, **व्यम.**७७ का (तं) पद्धवेत् (यद्धवेत्), **विता** ५४५ का प्रतिपद्धवेत् (कार्यव्ययपाश्रयात्), **सेतु.**१८ विरवत्, **प्रका** ८८, **समु.**७५.

(४) **व्यक.**११५, **स्मृच.**१४४ साक्षिलख्य (लेख्यसाक्षि) यदा (यथा) निबन्धेन (विरुद्धं तु); **विर.**३७, **पमा.**२३४ साक्षिलेख्य (लेख्यसाक्ष्य) निबन्धेन (विरुद्धं तु), **सवि.**२३७ स्मृचवत्, **व्यप्र.**२४० साक्षिलेख्य (लेख्यसाक्षि) शेष स्मृचवत्, **सेतु.**१९, **प्रका.**८८ स्मृचवत्; **समु.**७५ व्यप्रवत्.

निमित्तेन । व्यक.११५

(२) साक्षिलेख्यसिद्धानामाध्यादीनां मध्ये लेख्यसिद्धं विरोधे ग्राह्यमित्याह कात्यायनः—आधानमिति । लेख्यं लेख्यकृतं लेख्यसिद्धमिति यावत् । अपहारक बलवत् । स्मृच.१४४

(३) यत्रैका क्रिया साक्षिमती, अन्या च साक्षिलेख्यवती, तत्र लेख्य साक्षिमत् अपहारकं बलवत् आधित्वसाधकमिति यावत् । एकक्रियानिबन्धेन एकस्य पुंसः क्रियाया निबन्धेन लेख्ये निवेशेन हेतुनेत्यर्थः । हलायुधस्तु यत्राधानक्रिया विक्रयक्रिया वा साक्ष्यादिगुणवल्लेख्यवती, तत्र एकक्रियानिबन्धेन एकेन श्रेष्ठेन क्रियाया निबन्धेन लेख्ये निवेशेन लेख्यमपहारक भोगाभावमात्रेणाधातुर्विमतेर्बाधकमित्याह । अत्र च 'न भुङ्क्ते यः स्वमाधानमि'त्यादिना विरोधः । विर.३७

(४) गोप्याधौ लेख्यमेव प्रबल प्रमाणमित्याह कात्यायनः—आधानमिति । सवि.२३७

यस्तु सर्वस्वमादिश्य प्राक्पश्चान्नामचिह्नितम् ।
आदध्यात्तत्कथं तु स्याच्चिह्नितं बलवत्तरम् ॥

अस्यार्थः । यः पूर्वमविशेषेण सर्वस्वमाधित्वेनोद्दिश्य कस्यचिद्धस्तादृणं गृहीत्वा कालान्तरे पुनर्धनिकसप्रतिपत्त्या क्षेत्रादिकं किंचिदेव घटादिचिह्नित पूर्वगृहीतार्थमेव दद्यात् तत्र चिह्नित बलवत्तरम् । पूर्वाधिराधिक्रियान्तरादिक्रियाप्रतिबन्धकधनिकेनैव त्यक्तत्वादिति, चिह्नितमिति विरोध्यन्तरक्रियोपलक्षणार्थम् । तेन यदा प्रथममाधिमादाय धनी धनं दत्त्वा पश्चाद् वञ्चकत्वं विज्ञायाधिमन्तरेणैव तदूर्ध्वमृणमास्ता त्वयीति प्रकारान्तरेण पुनः क्रिया करोति तदा निराधिक्रियैव बलवतीत्यवगन्तव्यम् । *स्मृच.१४५

मर्यादाचिह्नितं क्षेत्रं गृहं वाऽपि यदा भवेत् ।
ग्रामादयश्च लिख्यन्ते तदा सिद्धिमवाप्नुयात् ॥

* व्यप्र. स्मृचगतम् ।

(१) **व्यक.**११५ सर्वस्वमादिश्य (सर्वं समुद्दिश्य), **स्मृच.**१४५; **विर.**३७ (=) स्वमादिश्य (मनुद्दिश्य) तु (न), **सवि.**२३८ ध्या (द्या), **व्यप्र.**२४१ मादिश्य (मुद्दिश्य) तु (न), **प्रका.**८८, **समु** ७६. (२) **व्यक.**११५; **स्मृच.**१४३ 'मर्या . गृह' इत्यशो नास्ति, **विर.**३७; **सवि.**२३६, **प्रका.** ८७; **समु.**७५ यदा भवेत् (दापयेत्).

(१) ग्रामादयश्च क्षेत्राद्याधेर्व्यावर्तकत्वेनेति शेषः । आदिशब्देन देशादयो गृह्यन्त इति । स्मृच.१४३

(२) अनेन लेख्यारूढत्वमपि आधिसिद्धौ निमित्तमिति सूचितम् । सवि.२३६

अनिर्दिष्टं च निर्दिष्टमेकत्र च विलेखितम् ।
विशेषलिखितं ज्याय इति कात्यायनोऽब्रवीत् ॥

(१) एकत्र आधीकरणादौ, विशेषलिखित निर्दिष्टलिखित, तदनिर्दिष्टलिखितात् ज्याय इत्यर्थः । लेख्ये निवेशितं विलेखितम् । +स्मृच. १४४

(२) अनिर्दिष्टं नाम आधातुराधीकरणकाले यद्यद्धन निरूपितस्वरूप तद्धन निर्दिष्टम् । तद्विपरीतमनिर्दिष्टमित्युच्यत इति । सवि. २३७

यो विद्यमानं प्रधनमनादिष्टस्वरूपकम् ।
आकाशभूतमादध्यादादिष्टं नैव तद्भवेत् ॥
यद्यत्तदाऽस्य विद्येत तदादिष्टं विनिर्दिशेत ॥

(१) प्रशब्दः पादपूरणार्थः । अनादिष्टस्वरूपक अनिरूपितस्वरूपकम् । आकाशभूत अविद्यमानप्रायम् । आदिष्ट नैव तद्भवेत् निर्दिष्ट नैव तद्भवेत् । अनिर्दिष्ट भवेदिति यावत् । आदिष्ट निर्दिष्टम् । एव चायमर्थः । आधातुराधीकरणकाले यद्धन विद्यते निरूपितस्वरूप च तद्धन आधित्वेनादिष्ट निर्दिष्टमित्युच्यते । तद्विपरीतं तु धनमाधित्वेन कल्प्यमानमनिर्दिष्टमित्युच्यते । +स्मृच. १४४-१४५

(२) यो विद्यमानमनिर्दिष्टस्वरूपमेवाकाशभूत वृद्धौ निधाय आदध्यात्, न तदादिष्टमाहित भवतीत्यर्थः । एतदेव स्पष्टीकृतम् । 'यद्यत्तदे'ति । एवञ्चाकाशाधौ क्वचित्

+ व्यप्र. स्मृचवत् ।

(१) **व्यक.**११५ लेखि (शेषि), **स्मृच.**१४४; **विर.** ३८ व्यकवत्; **पमा.**२३५ ष्टं च (ष्टाच), **सवि.**२३७, **व्यप्र.**२४०, **सेतु** २० व्यकवत्, **प्रका.**८८, **समु** ७५.

(२) **व्यक** ११५, **स्मृच.**१४४, **विर.**३८(=) प्रधनमनादिष्ट (स्वधनमनिर्दिष्ट), **पमा.**२३५ प्रधन (प्रथम) उत्तरार्धं (आकाशभूतमानेन अनिर्दिष्ट च तद्भवेत्), **व्यप्र.**२४१ नादिष्ट (निर्दिष्ट); **प्रका.**८८, **समु.**७६.

(३) **व्यक** ११५, **स्मृच.**१४४, **पमा.**२३५ यत्त (यद्य) **व्यप्र.**२४१, **समु.**७६ पमावत् .

व्यवह्रियमाणे आधित्व विनापि व्यवस्थाविशेषात् भोगदानम्। विर.३८

व्यासः

सप्रत्ययभोग्याधि.

काञ्चिद् वृद्धिं समाभाष्य द्रव्यमादाय तत्वतः।
मत्क्षेत्रं भुङ्क्ष्व वृद्ध्यर्थमधिकं मूलनाशनम्।
इत्याधिः प्रत्ययाधिः स्याद्द्वैगुण्ये निष्क्रयो भवेत्॥

अत्र भोग्यो द्विविधः सप्रत्ययभोग्याधिः अप्रत्ययभोग्याधिश्चेति। सवृद्धिकमूलापाकरणार्थो यः स सप्रत्ययभोग्याधिरिति उच्यते। वृद्धिमात्रापाकरणार्थो यः सोऽप्रत्ययभोग्याधिरित्युच्यते। तत्र सप्रत्ययभोग्याधिमाह व्यासः— 'काञ्चिद्वृद्धिं' इति। सवृद्धिकमूलापाकरणार्थो यः स सप्रत्ययभोग्याधिरिति वचनार्थः। सवि.२३३-२३४

आधिनाशे आध्यन्तरकरणं, सदोषधनिकाधिनाशविचारः

[१]दैवराजोपघाते तु न दोषो धनिनः क्वचित्।
ऋणं दाप्यस्तु तन्नाशे बन्धं वाऽन्यमृणी तदा॥
ग्रहीतृदोषान्नष्टश्चेद्वृन्धो हेमादिको भवेत्।
ऋणं सलाभं संशोध्य तन्मूल्यं दाप्यते धनी॥

(१) आधितोऽप्यधिकभूतसलाभर्णविषयमेतत्।

+स्मृच.१४०

(२) सलाभमृणं संशोध्य—सम्यक् विचार्य विनष्टाधेर्मूल्यं दत्वा सवृद्धिकं धनं गृह्णीयात्। अन्यथा मूलनाश इत्यर्थः। व्यप्र.२३८

आधिमोचनम्

[१]हिरण्ये द्विगुणीभूते पूर्णे काले कृतेऽवधौ।
बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य तु॥

(१) अनेनार्वाक् चतुर्दशदिनादाधिनाशो नेत्यर्थादुक्तम्। स्मृच.१४१

(२) अत्र द्वैगुण्यग्रहणं त्रैगुण्यादीनामुपलक्षणार्थम्। वक्ष्यमाणबृहस्पतिवचने शान्तलाभ इति सामान्येनेवाभिधानात्। व्यप्र.२४२

[२]तदन्तरा धनं दत्वा ऋणी बन्धमवाप्नुयात्॥
[३]फलभोग्यं पूर्णकालं दत्वा द्रव्यं तु सामकम्॥

(१) धनमत्र सवृद्धिकमूलं विवक्षितम्। अतोऽन्तरा ऋणिकप्रतीक्षणायोक्तकालमध्य इत्यर्थः। ऋणिकप्रतीक्षणकालश्च लाभशान्तिमारभ्य द्विसप्तदिनम्। लाभशान्तितः पूर्वकालमध्येऽपि सवृद्धिके धने दत्ते बन्धावाप्तिर्दण्डापूपन्यायात् अनेनैव वचनेनोक्तेति मन्तव्यम्। फलभोग्याधि मूलमात्रं दत्वा फलकालान्ते वर्तमानमाप्नुयाद्ऋणीत्याह स एव 'फलभोग्यमिति'। 'ऋणी बन्धकमाप्नुयात्' इति पूर्वार्धे पठितमिहानुपज्यते। सममेव सामकम्। मूलमात्रमिति यावत्। फलभोग्यग्रहणात् स्वरूपेण भोग्ये वस्त्राद्याधौ न कालव्यवस्था। स्मृच.१४६

ननूर्ध्वमपि चतुर्दशदिनात् धनं दत्वा बन्धकमृणी

+ पमा. स्मृचवत्।

(१) **सवि** २३४ त्याधिः (इत्यादि); **समु** ७६ निष्क्रयो (न क्षयो). (२) **स्मृच**.१३७, **विर** २६ दैवराजोपघाते तु (राजदैवोपघातेषु) प्यस्तु (प्यन्तु); **पमा**.२३२ नः (ना) तदा (तथा) (अन्यथा नश्यते लाभो मूल वा नाशमाप्नुयात्।) इति अधिको द्वितीयार्धः., **नृप्र**.२२; **व्यप्र**.२३७ पू., **व्यम** ७७ पू.; **विता**.५४१ पू; **प्रका**.८६; **समु**.७४.

(३) **अप** २।५९ ध्य (ध्य), **व्यक**.१२, **स्मृच**.१४० दिको (धिको) प्यते (पयेत्), **विर**.२५ ष्टश्चेद्वन्धो (ष्ट चेद्बन्धन) को (क), **पमा**.२३६ (गृहीतदोषो नष्टश्च वृद्धौ देयाधिको भवेत्), **त्रिचि**.१६, **स्मृचि**.१० सलाभ (लाभ च) प्यते धनी (पयेद्धनम्) शेष विरवत्, **सवि**.२३३ प्यते (पयेत्), **चन्द्र**.१० को (क) प्यते धनी (पयेद्धनम्), **वीमि**.२।५९ ग्रहीतृ (गृहीत) ध्य (ध्य), **व्यप्र** २३८ सविवत्, **व्यम** ७६ ग्र (गृ) शेष सविवत्, **विता**.५४१ ग्र (गृ) हेमादिको (मोहादिको) प्यते धनः (पयेद्धनम्); **मेतु** १७ ष्टश्चे (ष्ट चे) न्धो (न्ध) हेमादिको (हेमादिक), **प्रका**.८६ सविवत्, **समु**.७४ सविवत्, **विश्व**.२६ सविवत्.

(१) **अप**.२।५८; **व्यक**.११३ द्वि (त्रि) क्ष्य तु (क्षते); **स्मृच**.१४१ र्णे (वें) कृते (कृता); **विर**.३१ क्ष्य तु (क्षते); **पमा**.२३९ तेऽवधौ (तावधे.); **दीक**.३७ नी (न) शेष विरवत्; **नृप्र**.२२ धौ (धिः) तु (च), **चन्द्र**.१४ कृते (कृता) द्वि (त्रि) क्ष्य तु (क्षते), **वीमि**.२।५८ तु (च) उत्त.; **व्यप्र**.२४२, **प्रका**.८७ स्मृचवत्; **समु**.७५ कृते (कृता).

(२) **अप**.२।५८ तद (अतोऽ) मवा (कमा); **व्यक**.११३ तद (अतोऽ)वा; **स्मृच**.१४१,१४६ अपवत्; **विर**.३१ व्यकवत्; **पमा**.२३९.२४४ व्यकवत्; **दीक**.३७ तद (ततोऽ) न्यमवा (न्य समा); **नृप्र**.२२ बन्ध (चाधि), **सवि**.२४०(=); **व्यप्र**.२४२; **प्रका**.८९ अपवत्; **समु**.७५ अपवत्.

(३) **व्यक**.११४, **स्मृच**.१४६, **विर**.३१; **पमा**.२४३; **सवि**.२४१ (=), **व्यप्र**.२४६; **प्रका**.८९; **समु**.७५.

किमिति न प्राप्नोति । स्वत्वध्वंसकाभावात्, धनद्वैगुण्यमवधिभूतकालातिक्रमणं च तद्ध्वसकमिति चेन्न । दानविक्रयादेरेव तद्ध्वसकत्वात् । आदिशब्दपरिगृहीतवर्गान्तर्गतं द्वैगुण्यादिकमपीति चेन्न । स्वत्वध्वंसकतया लोकप्रसिद्धानामेवादिशब्देन परिग्रहाद्द्वैगुण्यादिकमपि तथेति चेन्न । न हि लोके द्वैगुण्यादेस्तथा प्रसिद्धिरस्ति । उच्यते । सत्यम् । द्वैगुण्यादेर्नास्त्येव तथा प्रसिद्धिः । द्रव्यविनिमयस्य तु तथा प्रसिद्धिरस्त्येव । तिलविक्रयप्रतिषेधाद्विक्रयाकरणेऽपि विनिमयेन तिलाना स्वत्वनिवृत्तिदर्शनात् । ततश्चात्रापि कृतकालाधौ ऋणग्रहणकाल एव 'यद्यहमियता कालेन न ददामि तदा आधिरेवानृण्याय तव भविष्यती'ति धनिकर्णिकयोर्धनविनिमयसंप्रतिपत्तेर्जातत्वात् अवधिभूतकाले स्वत्वध्वसो युक्त एव । एतदेव नारदनिमित्त याज्ञवल्क्येन 'कालकृत' इत्यनेनोक्तम् । द्वैगुण्ये तु यद्यपि ऋणग्रहणकाले 'यद्यहं द्वैगुण्येऽप्याधि न मोक्षयामि तदा आधिरेवानृण्याय तव भविष्यती'ति धनिकार्णिकयोर्धनविनिमयसंप्रतिपत्तिनियमाभावः । तथापि यत्रैवेय सप्रतिपत्तिः कृता तत्रैव द्वैगुण्ये स्वत्वध्वंसो हेतुसद्भावात्तद्विषय चाधिः प्रणश्येदिति वचनमित्यवद्यम् । एवं क्रयप्रतिग्रहाद्यभावेऽपि विनिमयेनैवाधौ धनिकस्य स्वत्वापत्तिः । व्रीह्यादाविव तिल विनिमयकर्तुरिति युक्तमुक्तं 'बन्धकस्य धनी स्वामी'ति । द्विसप्तदिनप्रतीक्षण तु विनिमयदाढर्यज्ञानार्थमुक्तम् । दृढविक्रयादेरिव दृढविनिमयस्यैव स्वत्वध्वसादिनिमित्तत्वात् । एव च 'अतोऽन्तरा धनं दत्वे'त्यपि वचनं युक्तमेव । स्मृच.१४१

(२) यदि त्वपरिभाष्यैव विश्वासार्थ बन्धक समर्प्य ऋण गृह्यते, तदा बन्धकशून्यऋणवत् ऋणोद्ग्राहणप्रकरणोक्ता एव धनग्रहणोपायप्रकाराः । बन्धकस्तु विश्वासार्थमाधात्रा समर्पितो रक्षणीयो धनिकेन । प्राप्ते सर्वकपर्दके तस्मै समर्पणीय इति मन्तव्यम् । विर.३१

(३) ननु आधेः स्वत्वनिवृत्तिहेतोर्दानविक्रियादेरभावात् उत्तमर्णस्यापि स्वत्वापत्तिरयुक्ता । प्रतिग्रहादेरभावात् आधीकरणमेव स्वत्वनिवृत्तिं प्रति कारणमिति चेत्, तन्न । 'न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रय' इति मनुवचनविरोधात् । कालसंरोधाच्चिरकालावस्थानादेः । निसर्गोऽन्यत्राधीकरणं नास्ति । विक्रयोऽपि नास्ति । मैवम् । न केवल दानादिरेव स्वत्वनिवृत्तिकारणम् । प्रतिग्रहादिरेव वा स्वत्वापत्तिकारणम् । किं तु द्वैगुण्ये निरूपितकालप्राप्तौ च द्रव्यादानमपि । तस्य याज्ञवल्क्यवचनेनैव ऋणिधनिनोरात्यन्तिकस्वत्वनिवृत्तिस्वत्वापत्योः कारणत्वावगमात् । न च मनुवचनविरोधः । तस्य कृतकालभोग्याधिविषयत्वेनाप्युपपत्तेः । पमा.२३९

(४) तत् तस्मात्कारणात् । अन्तरा चतुर्दशदिवसमध्ये इत्यर्थः । व्यप्र.२४२

गोप्याधि द्विगुणादूर्ध्वं मोचयेदधमर्णिकः ॥

(१) इति द्विगुणादूर्ध्वं प्रयुक्तधने शान्तलाभे सतीत्यर्थः । मोचयेत् सवृद्धिकमूलदानेनेति शेषः । एतच्च द्वैगुण्यादिनिबन्धनाधिनाशाभावविषये वेदितव्यम् । तन्निबन्धनाधिनाशविषये तु तन्नाशात्प्रागेव मोचयेत् । स्मृच.१४६

(२) 'तदन्तरा धन दत्वा ऋणी बन्धमवाप्नुयात् । गोप्याधि द्विगुणादूर्ध्वं मोचयेदधमार्णिकः' ॥ इति वचनद्वयस्य द्वैगुण्यानन्तरमेवाधिर्मोक्तव्यः मध्ये दिगुणमेव दातव्य धन न तु यथाकालप्राप्तवृद्धियुक्तद्वैगुण्यात्पूर्व न दातव्यमित्येव व्याख्यान न युज्यते चन्द्रिकाकारकुलार्कव्याख्याविरुद्धमिति वाच्यम् । भारुचिमतानुसारेण व्याख्यानादिदमेव व्याख्यान सम्यक् । स्थावरस्याधौ धनद्वैगुण्य गोप्यस्यापादकम् । उत्तमर्णस्तु गोप्यलाभार्थ धन प्रयुक्तवान् । न वृद्ध्यर्थम् । अतो यदा कदाचिदपि प्रयुक्तद्रव्यदाने द्विगुणमेव धन दातव्यम् । द्विगुणानन्तरमेव परस्वत्वापत्तिर्नास्ति – 'बन्धकस्य धनी स्वामी द्विसप्ताह प्रतीक्ष्य तु'। इति । धनिनो बन्धकस्वामित्व चतुर्दशदिनानन्तरमेव इत्यतो न द्वैगुण्यानन्तरं बन्धकस्वामित्वम् । अतो द्वैगुण्यात्पूर्वमपि द्विगुणमेव दातव्यमिति भारुचिमततत्वम् । अतश्चन्द्रिकाकारादिमतमसमंजसमिति ध्येयम् । सवि.२४०–२४१

आधिसिद्धिः

यावत्प्रकर्षितं तत्स्यात्तावन्न धनभाग्धनी ।

(१) स्मृच.१४६; पमा.२४४ कः (के); सवि.२४०, व्यप्र २४५; प्रका.८८; समु.७६. (२) स्मृच.१४८, समु.७६.

ऋणी न लभते बन्धं परस्परमतं विना ॥
आधेः प्रवेशने रोधो ऋणिकेन कृतो यदि ।
दाप्यः स भोगमाधर्यं दण्डयित्वाधिषड्गुणम्(?)॥
आधयो द्विविधाः प्रोक्ताः स्थावरा जङ्गमास्तथा ।
सिद्धिरस्योभयस्याऽपि भोगो यद्यस्ति नान्यथा ॥

प्रजापतिः

अन्वाधि

धनी धनेन तेनैव परमाधि नयेद्यदि ।
कृत्वा तदाधिलिखितं पूर्वं चास्य समर्पयेत् ॥

यद्वन्धस्वामिनि धन प्रयुक्त तत्तुल्येनैव धनेन परं धनिकान्तरमाधि नयेत् । न त्वधिकेनेत्यर्थः । अय चान्वाधौ नियमः सप्रतिपत्या द्विगुण्यादर्वाक् अन्वाधौ द्रष्टव्यः । *स्मृच.१४३

यमः

गोप्यभोग्याधिभोगनाशविचार.

[४]वैशाख्यां यस्य भोग्याधेरषाढ्यां निष्क्रयो भवेत् ।
हीनं यद्धनिनो दोषादेतत्पूरणमर्हति ॥
[५]हीनस्यापूरणे वृद्धिश्चक्रवृद्ध्या विवर्धते ।
सर्वाधीनां बलाद्भोगान्निष्क्रयो नास्ति तत्वतः॥
बलाद्भुक्ते सकाले वा निष्क्रयात्त्रिगुणो दमः ॥

मरीचिः

आधिप्रकारा

श्रावणात्पूर्वलिखितो भोग्याधिः श्रेष्ठ उच्यते ।
गोप्याधिस्तु परेभ्यस्तु दत्वा यो गोप्यते गृहे ॥
अर्थप्रत्ययहेतुर्यः प्रत्ययाधिः स उच्यते ।
आज्ञाधिर्नाम यो राज्ञा संसदि त्वाज्ञया कृतः ॥

श्रावण समदि प्रकाशनम् । पमा.२३१

भरद्वाजः

आधिप्रकारा· । आधिभोगनाशविचारः । अन्वाधिश्च ।

[१]आधिश्चतुर्विधः प्रोक्तो भोग्यो गोप्यस्तथैव च ।
अर्थप्रत्ययहेतुश्च चतुर्थस्त्वाज्ञया कृतः ॥
[२]आर्षणात्पूर्वलिखितो भोग्याधिः श्रेष्ठ उच्यते ।
गोप्याधिस्तु परेभ्यः स्वं दत्वा यो गोप्यते गृहे ॥
[३]अर्थप्रत्ययहेतुर्यः प्रत्ययाधिः स उच्यते ।
आज्ञाधिर्नाम यो राज्ञा संसदा वाज्ञया कृतः ॥
[४]प्रच्छाद्याधिमृणी कुर्यात्क्रयार्थे बलवच्च यः ।
दण्डं स त्रिगुणं दत्वा पुनराधर्यर्थको भवेत् ॥
[५]आधेः प्रवेशकाले तु भोगं नेच्छति चेद्धनी ।
भोगो नास्त्येवात ऊर्ध्वं न वर्धयति तद्धनम् ॥
[६]भोगाधिक्यं च भोग्याधेर्ह्रासं च न विचारयेत्।
लेख्ये तु लिखितं यावत्तावद्वोक्तव्यमेव तु ॥
[७]प्रत्ययाधौ तु भोक्तव्या वृद्धिर्या पूर्वलेखिता ।
तावदेव तु भोक्तव्यमिति शास्त्रविनिश्चयः ॥
[८]यत्तु तत्राधिकं वृद्धेर्दयं तद्दणिने पुनः ।
हीनं यावत्तु तद्वृद्धेस्तावत्संपूरयेद्दणे ॥

सप्रत्ययभोग्याधौ निष्क्रयकाले सवृद्धिकमूलस्यापर्याप्त पूरयेत् । अधिक चेदादद्यादिति वचनस्य तात्पर्यार्थः ।
सवि.२३४

[९]स्वामिना चाननुज्ञात आधेराधिं करोति चेत् ।
स्वधनात्स तु हीनः स्यात्करोत्यापदि पूर्ववत् ॥

आपदि आपत्काले पूर्ववत् स्वधन हीयेतेत्यर्थः ।
सवि.२३४

[१०]कूपवप्रखलप्राया आधिग्राहेण नाशिताः ।
विनाशका भवन्त्याधेरेवंरूपास्तथापरे ॥

* व्यप्र. स्मृचवत् ।

(१) **समु.**७४. (२) **व्यक** ११४ स्याऽपि (स्य स्यात्), **विर.** ३४; **दीक.**३७ (आधिश्च द्विविधः प्रोक्त. स्थावरो जगमस्तथा). (३) **स्मृच.**१४३; **पमा.**२४२, **सवि.**२४३ चा (वा), **व्यप्र.**२४४ सविवत्; **प्रका.**८७, **समु** ७५. (४) **सवि.** २३४; **समु.**७७ ष्क (ष्कि) भरद्वाज·. (५) **सवि.**२३४, **समु.**७७ बलाद् (त्ववाग्) नास्ति तत्वतः (द्विगुणो दमः) भरद्वाजः. (६) **सवि.**२३४. (७) **पमा.**२३१.

(१) **पमा.**२३१ श्चतुर्वि (स्तु द्विवि) भोग्यो गोप्य (गोप्यो भोग्य), **नृप्र.**२२ पमावत्, **व्यप्र.**२३५ श्चतुर्वि (स्तु त्रिवि) श्च (र्यश्च); **समु.**७३. (२) **व्यप्र.**२३५; **समु** ७३ आर्ष (श्राव). (३) **व्यप्र.**२३५, **समु.**७३. (४) **सवि.**२३२; **समु.** ७५ र्थं बलवच्च यः (दीन् बलदर्पितः). (५) **सवि.**२३३ काले तु भोग (ने काले मोहात्); **समु.**७४ नास्त्येवात ऊर्ध्वं (न श्यतश्चोर्ध्वं) (६) **सवि.**२३३ भोगा (भोग्या); **समु.**७६. (७) **सवि.**२३४, **समु.**७६. (८) **सवि.**२३४; **समु.**७६ दृणे (दृणी). (९) **सवि.**२३४-२३५; **समु.**७७ स्वामिना चा (यः स्वामिना). (१०) **समु.**७७.

स्मृत्यन्तरम्

प्रत्ययाधेरुक्तकाले वृद्ध्यभावे स्वयं धनी ।
आधि प्रविश्य तत्काले भुञ्जीत लिखिते स्थितम् ।
स्रोतसाऽपहृते क्षेत्रे राज्ञा चैवापहारिते ।
आधिरन्यः प्रदातव्यो देयं वा धनिने धनम् ॥

(१) **समु.**७६. (२) **मिता.**२।५९ (=) न्यः प्रदात (न्योऽधर्कर्त), **स्मृच.**१३८ न्य प्रदात (न्योऽधिकर्त) ने (नो), **विर.**२६ याज्ञवल्क्यः, **सवि.**२३२ (=) न्य प्र (न्योऽथ) ने (नो), **चन्द्र.**१२, **व्यप्र.**२३७ मितावत्; **व्यउ** ७३ न्यः प्रदात (न्योऽधिकर्त); **विता** ५३९ मितावत्, **प्रका.**८६ व्यउवत्; **समु.**७४ ने (ना) शेष व्यउवत्.

(१) तत्र स्रोतसापहृत इति दैवकृतोपलक्षणम् । मिता.२।५९

(२) तदपि धनिकस्याधिदोषे पक्षद्वयविधिपरम् । अन्यथा अग्न्याद्यपहृते पक्षद्वयमनेनानुक्त स्यात् । स्मृच.१३८

(३) आधिरन्य इति क्षेत्ररूप एवाधिर्देयः । यदि तन्न ददाति तदा सवृद्धिकं धन अधमर्णेन देयम् । विर.२७

अनिर्दिष्टकर्तृकवचनानि

परोपनिहितं द्रव्यं संरक्षेदारपुत्रवत् ।
नष्टं दैवेन राज्ञा वा तद्देयं न यमोऽब्रवीत् ॥
ज्येष्ठावधि समासाद्य मोचयेद्धोग्यमाहितम् ॥

(१) **समु.**८७ (२) **सवि** २४१

प्रतिभूः

हारीतः

प्रतिभूग्रहणनिमित्तानि

अभये प्रत्यये दाने उपस्थाने प्रदर्शने ।
पञ्चस्वेषु प्रकारेषु ग्राह्यो हि प्रतिभूर्बुधैः ॥

अभयमुपद्रवाकरणम् । उपस्थापनमत्र बन्धद्रव्यार्पणमभिमत न दर्शनम् । तस्य स्वपदेनैवोपात्तत्वात् पञ्चस्वित्यस्याघटनाच्च । *स्मृच.१४८

प्रातिभाव्यदानम् । अधमर्णात् प्रातिभाव्यद्रव्यसाधनम् ।

खादको वित्तहीनश्चेल्लग्नको वित्तवान्यदि ।
मूल्यं तस्य भवेद्देयं न वृद्धिं दातुमर्हति ॥

(१) लग्नकः प्रतिभूः । खादकोऽधमर्णः । लग्नको यदि वित्तवान्मृतस्तदा तस्य पुत्रेण मूलमेव दातव्यं न वृद्धिरिति व्याख्येयम् । ×मिता.२।५४

* व्यप्र. स्मृचवत्। × सवि , विता. मितावत्।

(१) **स्मृच.**१४८ ने प्र (नेऽथ) हि (ऽपि), **पमा** २४९ भये (भक्षणे) ने प्र (नेऽपि) हि (ऽपि), **नृप्र** २१, **व्यप्र.**२४८, **व्यउ.**२८, **प्रका.**८९ ने प्र (नेऽथ), **समु.**७७ प्रकावत् .

(२) **मिता.**२।५४ नश्चे (न. स्या) स्मरणम् ; **स्मृच.**१४०, १५०, **पमा.**२४८ श्चेत् (श्च) नारदः; **नृप्र.**२१ नारद., **सवि.**२४९ (=), **व्यप्र.**२३८ मितावत्, **व्यउ.**२९ नारद , **विता.**५२८ मितावत् , नारदः, **प्रका.**८६,९०; **समु.**७७.

(२) खादको बन्धभक्षकः । बहुमूल्याधिनाशको धनिक इति यावत् । मूल्य बहुमूल्यस्याधेर्मूल्यम् । साक्षात्प्रतिभूरत्र वृद्धि दातुं नार्हति । खादकेनाप्यत्र 'मूल्येन तोषयेदेनमिति' वचनान्मूल्यमात्रमेव देयम् । एव अवशिष्टप्रतिभुवामपि स्मृत्यन्तरे देयद्रव्यविधयो द्रष्टव्याः । विप्रत्ययं लेख्यदिव्यदर्शने चाकृते सति 'ऋण दाप्याः प्रतिभुव' इत्यादि दापनविधायकस्मृत्यन्तराद्बोध्याः तुल्यन्यायाद्वा कल्पनीयाः । तथा हि ऋणिद्रव्यार्पणप्रतिभूरप्रतिकुर्वति ऋणिके ऋणिद्रव्यमर्पयेत् । अभयप्रतिभूर्भयोपस्थितौ तत्प्रतीकारमाचरेत् । प्रमाणप्रतिभूः प्रमाणाकरणे विवादास्पद धन दद्यात् । विवादप्रतिभूरप्रतिकुर्वति वादिनि साधितधन दण्डधन च दद्यात् । दासाद्यपहृत पुनरलब्ध चेद्विश्वासप्रतिभूर्मूल्यद्वारेण दद्यादित्याद्यास्तत्र कल्पनीयाः। *स्मृच.१५०

द्विगुणं त्रिगुणं वाऽपि यः साधयति लग्नकम् ।
राजगामि तु तद्द्रव्यं साधको दण्डमर्हति ॥

लग्नकग्रहण धनिकस्याप्युपलक्षणार्थम् । अविद्यमान वृद्धिसाधनान्यायस्य धनिकेऽपि तुल्यत्वादेव धनिकोऽपि

* पमा., व्यप्र. स्मृचवत्।

(१) **स्मृच.**१४१, **व्यप्र.**२३८, **प्रका.**८७, **समु.**७७ तु तद् (तदा).

अन्यायकृद्दण्डभाक् । +स्मृच.१४१

सर्वे प्रतिभुवो दाप्याः प्रातिभाव्ये प्रमोषिते ।

अयमर्थः—चतुर्विधे प्रातिभाव्ये मिथ्याभूते सति तद्धन राज्ञा धनिने दाप्याः प्रतिभुव इति वचनार्थः पूर्वमेवोक्त इति नेह प्रपञ्चितः । तदयमत्र निष्कर्षः—ऋणादानसमये विश्वासार्थं बन्धक लग्नको वा कार्यः । अत्र बन्धक गोप्याधिर्भोग्याधिश्चेति द्विविधम् । तत्र गोप्याधिर्द्वैगुण्यनिबन्धनः कालकृतश्चेति द्विविधः । कालकृतः सवृद्धिकोऽवृद्धिकश्चेति द्विविधः । भोग्याधिस्तु सप्रत्ययोऽप्रत्ययः क्षयाधिरन्वाधिश्चेति चतुर्विधः । तत्र गोप्याधिर्यदि भुज्यते तदा न वृद्धिः । अतिभुक्तौ मूलनाशः । ऋणापर्याप्ते चेदपि मूलनाश एव ऋणिके वाऽवशिष्टं दातव्यम् । अधिक द्विगुण गृहीत्वाऽवशिष्ट ऋणिने तदभावे तज्ज्ञातिषु द्वैगुण्यधन दातव्यम् । द्विगुणादूर्ध्वमेव धन दत्वा आधिर्मोक्तव्यः । क्षयाधौ तु द्विगुणे धने तच्छुद्धभोगात्प्राप्ते तदाऽऽधिर्मोक्तव्यः । कालकृते द्विविधे काले प्राप्ते आधिर्मोक्तव्यः । भोग्याधावतिभुक्तौ भुक्तानुसारेण धन दापयेत् । अन्वाधिस्तु गृहीतसमधनस्यैव । तदधिके तु न सिध्यति । सर्व पारिभाषिक चेत् सिध्यत्येव । क्रियान्तगोप्याधौ तु दृश्यसमकालमेवाधिः सिध्यति पारिभाषिकत्वादिति तन्मत दूषितमधस्तात् । (सकरादयस्तु) संस्कारादयस्तु परिभाषावशादेव सिद्धाः । लग्नकोऽपि विश्वासप्रतिभूर्विश्वासापनये धन दाप्यः । दर्शनप्रतिभूस्तु तदभावे धनं दाप्यः । उभयोस्तु देशान्तरगतयोः मृतयोर्वा तत्पुत्रेण तद्धन मूलमात्रमेव दातव्यम् । दानप्रतिभुवा ऋणिके नष्टे दरिद्रे वा जाते सवृद्धिकं धनं दातव्यम् । तदभावे तत्पुत्रेणापि सवृद्धिकमेव दातव्यमितीयं गमनिका । सवि.२५१-२५२

विष्णुः

प्रतिभूनिमित्तानि । प्रातिभाव्यदानम् । ऋणिकात् प्रातिभाव्यद्रव्यसाधनम् ।

दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते ।
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥

+ व्यप्र. स्मृचवत् ।

(१) **सवि.**२५१. (२) **विस्मृ.**६।४१, **गौमि.**१२।३८ **यौ** (ये) विष्णुयाज्ञवल्क्यौ.

बहवश्चेत् प्रतिभुवो दद्युस्तेऽर्थं यथाकृतम् ।
अर्थेऽविशेषिते त्वेषु धनिकच्छन्दतः क्रिया ॥

यथाकृतमहमेतावदर्थं दास्यामीति स्वस्वाभ्युपगतमर्थं दद्युः । यदा तु समाशतया विषमाशतया वाऽर्थो न विशेषितः सपूर्णो वा प्रत्येकमभ्युपगतस्तदा प्रतिभूषु धनिकच्छन्दतो धनिकेच्छया क्रियार्थादान भवति । यस्मादिच्छेत्तस्मात् गृह्णीयादित्यर्थः । वै.

यं चार्थं प्रतिभूर्दद्याद्ऋनिकेनोपपीडितः ।
ऋणिकस्तं प्रतिभुवे द्विगुणं दातुमर्हति ॥

कौटिलीयमर्थशास्त्रम्

प्रातिभाव्यानधिकार । प्रातिभाव्यदानाधिकारः पौत्रपर्यन्तम् ।

असारं बालप्रातिभाव्यम् ।

जीवितविवाहभूमिप्रातिभाव्यमसङ्ख्यातदेशकालं तु पुत्राः पौत्रा वा वहेयुः ।

मनुः

दर्शनप्रातिभाव्यद्रव्यदानम्

यो यस्य प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः ।
अदर्शयन् स तं तस्य प्रयच्छेत् स्वधनाद्दणम् ॥

(१) ऋणप्रयोगे द्विविधो विश्रम्भः प्रतिभूराधिर्वा । तत्र प्रतिभूपक्षे इदमुच्यते । त्रिविधश्च प्रतिभूः दर्शने प्रत्यये दाने च । तत्र दर्शनप्रतिभुवमधिकृत्येदमाह । यस्य दर्शनाय प्रतिभूस्तिष्ठेदमुष्मिन्प्रदेशे मयैष तव दर्शनीयः, स तथाऽकुर्वन्स्वधनात्तस्य ऋण यतेत प्रयत्न कुर्याद्दातुमिति शेषः । दद्यादिति यावत् । ऋणग्रहणं व्यवहारवस्तुमात्रोपलक्षणार्थम् । तेन यावन्तोऽर्थविषया व्यवहारे भूत्वाऽनुकम्पयन्ते, तद्वस्तु दद्याद्दर्शनेनान्यतरेणाभियुक्तः (?) । वाक्पारुष्यसंग्रहणादौ पणपरिभाषा

(१) **विस्मृ** ६।४२. (२) **विस्मृ.**६।४३ यं चा (यम); **विर.**४५ विष्णुनारदौ, **सेतु.**२३ नोप (नैव) विष्णुनारदौ; **समु.**७८ उत्तरार्धे (द्विगुण प्रतिदातव्यमृणिकैस्तस्य तद्धनम्). (३) **कौ.**३।११ (४) **मस्मृ.**८।१५८ (ख) प्रयच्छेत (यतेत); **मेधा.**मस्मृवत्; **गोरा.** मस्मृवत्; **स्मृच.**१४९; **समु.**मस्मृवत्; **पमा.**२४७, **सवि.**२४७ यन् स (यश्च) स्वधनाद्दणम् (स धनं नृणाम्); **व्यप्र.**२४८ तस्य (तस्मै) कात्यायनः; **व्यउ.**२८ तं तस्य (तत्तस्मै); **प्रका.**९०: **समु.**७७.

कर्तव्या । यदि न दर्शयति चेत्तन्मया दातव्यम् । अकृतायां तु परिभाषायां राजदण्डमेव दाप्यः । शरीरे तु निग्रहे तन्निष्कर्षणं सुवर्णम् । *मेधा

(२) दर्शनाय अदीयमाने ऋणिक दर्शयिष्यामीति । एतच्चोपलक्षणम् । अयमेतादृशो धनी पुत्री आप्त श्रेत्यादिष्वर्थेषु मद्वचसा प्रत्ययः क्रियतामित्येव प्रत्यय प्रतिभूरपि प्रत्ययविपर्यये प्रयच्छेदित्यपि द्रष्टव्यम् । मवि.

(३) ऋणमत्र सवृद्धिक विवक्षितम् । प्रतिभूपुत्रदेयर्णं त्ववृद्धिकत्वस्मरणात् । स्मृच.१४९

प्रातिभाव्यद्रव्यदानाधिकारः कियत्पुरुषपर्यन्तम्

प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत् ।
दण्डशुल्कावशिष्टं च न पुत्रो दातुमर्हति ॥

(१) प्रतिभुवः कर्म प्रातिभाव्यम् । प्रतिभुवा यत्कर्तव्य परर्णसशोधनादि तत्प्रातिभाव्यम् । अर्हता योग्यता साऽनेन प्रतिषिध्यते । तस्या च प्रतिषिद्धायामधिकार-प्रतिषेधः । अनधिकृतश्च न ददातीत्येव न दातव्यमि त्युक्तं भवति । सर्वत्रार्हतां क्रियापदे व्याख्येयमेव द्रष्टव्या । कथं पुनः पुत्रस्य प्रातिभाव्यादिप्राप्तिस्तर्हि । तद्दण्डस्य पित्राऽगृहीतत्वात् । नैष दोषः । यत्पन दातव्य-तयाऽङ्गीकृत तद्गृहीततुल्यफलत्वाद् गृहीतमेव । तन्नि-श्चितस्वरूपत्वमापन्नाः, अतः प्रतिषिध्यन्ते ।

वृथादानं परिहासादिनिमित्त प्रतिश्रवण, कुरुकार्य-मिदं मम, पैरिनिष्पन्ने इदं दास्यामीति । निष्पादिते कार्ये पित्राऽदत्ते प्रतिश्रुते, कथचित्पुत्रो न दाप्यते । एव पारितोषिकादि बन्दिपरिहासादिविषयम् । यद्वाऽहममु-ष्माद्धणिज एतस्येयदापये इति । तत्र तु मनुष्ये प्रेषिते कथंचिदातुमघटितेऽसनिधानाद्धणिजोऽन्यतोऽपि कारणा-द्दत्तान्तरे पितरि मृते, पुत्रो न दाप्यते । अक्षनिमित्त-माक्षिक, सभिकाय यद्व्ययितेऽन्यतो वा यत्प्रयोजयेत् तद् गृहीतमिति शक्यते ज्ञातुम् । तस्य प्रतिषेधः । यः परिवृक्त-वान्यवोऽक्षमालास्वेव शय्यासनविहारी प्रसिद्धः क्रीडन-कस्तद्दणमाक्षिकमिति शक्यते निश्चेतुम् । सुरापाननिमित्त सौरिकम् । सुराग्रहण मद्योपलक्षणार्थम् । तेन य. पान शौण्डोऽत्यन्तमद्यपस्तद्दणप्रतिषेधः । दण्डशुल्कयोरवशेषः । यत्र पित्रा दण्डाशः शुल्काशश्च कश्चिद्दत्तः परिपूर्णो दण्डशुल्कौ न दत्तौ, तादृशस्य प्रतिषेधः । यत्र तु न किञ्चित्पित्रा दत्त तद्दाप्यते । स्मृत्यन्तरेऽप्यविशेषणोक्त 'प्रातिभाव्यवणिक्शुल्कमद्यतदण्डाः पुत्रान्नाभ्यामवेयुः' इति (गौध. १२।३८) । तत्र विकल्पः । महत्यपराधे महति च धने पित्रिकेऽवशेषस्य प्रतिषेधः । शुल्केऽप्येवम् । स्वल्पे तु सर्वस्य । मेधा.

(२) प्रतिभुवा यद्देय, वृथादान पारितोषिकादि यत्पित्रा देयत्वेनाङ्गीकृत, यत्तसमाहृत्याम्या यज्जित पित्रा, सुरापानादेः यद्ध्वजिनः सुरामूल्य, दण्डशेष शुल्कशेष च यत्पितृसबन्धि पितरि मृते, पुत्रो दातु नार्हति । गोरा.

(३) दर्शने प्रत्यये च प्रतिभूरनिमित्तं यद्देय तत्प्रतिभूरेव दद्यात्, न तु तद्रिक्थग्राहिणोऽपि पुत्रादयः । वृथादान चारणादिषु । आक्षिक द्यूतहारितम् । सौरिक तत्पीतसुरामूल्यम् । दण्डावशिष्ट परिणीतकन्यादिनिमित्त-दत्तशुल्कावशिष्ट च दण्डशुल्कावशिष्टम् । अवशेष-मित्युपलक्षणम् । सर्वमप्यदत्तमदेयमेव । –मवि.

(४) दण्ड यद्देय दण्ड, शुल्क यद्गृहीदेय तदवशेष च पितृसंबन्धिनम् । *ममु.

(५) वृथादानमफलदानम् । अत्र यत्सुरापानयोर-नर्हयोर्निमित्तत्व विवक्षितम् । विर.५७

(६) पितृप्रतिश्रुतादि पुत्रैर्देयमिति सिद्धमकृत्य तददेय संकलयति—प्रातिभाव्यमिति। राजदण्डपण्यस्त्री-घट्टादिस्वीकृतशेष च न पुत्रो दातुमर्हतीत्यन्वयः । ×मच.

---

* गोरा., ममु., मच. वाक्यार्थो मेधावत् ।

(१) **मस्मृ.**८।१५९ शिष्ट (शेषं); **व्यक.**१२१ आक्षिक (साक्षिकं); **स्मृच.**१५१,१७०; **विर.**५७; **पमा.**२६६ च यत् (तथा); **स्मृचि.**१३; **सवि.**२५७ मस्मृवत्; **सेतु.**२८ मस्मृवत्; **प्रका.**९८; **समु.**८४.

१ ग्रहीतं विक्रय. २ व्याख्यायन्ते द्रष्टव्ये. ३ निष्पन्नमिदं. ४ यं चाह.

– स्मृच., सवि., भाच. मविवद्भाव. ।

* शेषं मेधागतं मविगत च ।

× मच. मविवद्भावः ।

१ जन. २ यत्किंचित्पित्रा दत्त स तद्दा.

दर्शनप्रातिभाव्ये तु विधिः स्यात्पूर्वचोदितः ।
दानप्रतिभुवि प्रेते दायादानपि दापयेत् ॥

(१) पूर्वश्लोके यो विधिर्मया चोदित उक्तः, यथा पुत्राणा न भवति पैत्रिक प्रातिभाव्य, तद्दर्शनप्रातिभाव्ये । यद्येव, प्रत्ययप्रतिभुवः पुत्रा दाप्यन्तामत आह दानप्रतिभुवि प्रेते दायादाः पुत्रा दाप्यन्ते । नान्यस्मिन् । यद्येव, प्रथमोऽर्द्धश्लोकोऽनर्थकः । दानप्रतिभुवः पुत्राणा साधनानुक्त सामर्थ्यादन्यस्य प्रतिभुवो नास्ति पुत्राणा संबन्ध इति गम्यते । अथ विस्पष्टार्थमुच्यते । प्रत्ययग्रहणमपि कर्तव्यमितरथा प्रतिषेधे[1] दर्शनग्रहणाद्विधौ च दानग्रहणादुभयपरिभ्रष्टस्य कि विधिः उत प्रतिषेध इति सशयः स्यात् । नास्ति संशयः । स्मृत्यन्तरे स्पष्टमुक्तत्वात् । 'दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा । न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय ये स्थिताः ॥' इति (यास्मृ. २।५४) । इहापि दानप्रतिभुवीत्यस्य विधित्वादन्यत्राप्राप्तिः । दर्शनग्रहणमुपलक्षणार्थम् । अनुवादे चोपलक्षणत्वमदोषः । किं प्रयोजनमिति चेत् विचित्रा श्लोकाना कृतिर्मानवी । मेधा.

(२) योऽस्य प्रातिभाव्य न पुत्रो दातुमर्हतीति पूर्वोक्तविधिः स दर्शनप्रतिभूकर्मणि पितृकृते विज्ञेयः । दानार्थं पुनर्यः प्रतिभूः स्थितः तस्मिन्मृते किंपथभाजः अपि दापयेत् किमुत पुत्रान् । गोरा.

(३) दर्शनेति प्रत्ययस्याप्युपलक्षणम् । मवि.

(४) दायादशब्दः सुतेष्वेव व्यवतिष्ठते । अन्यथा सपिण्डमात्राभिधाने 'तत्सुतौ तु न दाप्याविति निश्चय' इति पूर्वोक्तवचनविरोधापत्तेः । 'प्रातिभाव्यागत पौत्रैर्दातव्य न क्वचिद्भवेत्' इति बृहस्पतिवचनविरोधापत्तेश्च । स्मृच.१५२

(५) दायादान् पुत्रानपि दापयेत् पुत्रेभ्यः दापयेदित्यर्थः । भाच.

(६) [स्मृतिचन्द्रिकामतमुपन्यस्योक्तम्] केचिदिद प्रतिभूबन्धकविषय, पूर्वोदाहृतवचनानि त्वबन्धकप्रतिभूविषयाणीति विषयभेदान्न विरोध इत्याहुः । व्यप्र.२५१

अदातरि पुनर्दाता विज्ञातप्रकृतावृणम् ।
पश्चात्प्रतिभुवि प्रेते परीप्सेत्केन हेतुना ॥

(१) अनेन श्लोकेन सदिहानः प्रश्न कृत्वोत्तरेण निश्चाययति । सदेहहेतुश्लोकः पदद्वयेनादातरि विज्ञातप्रकृताविति । सप्तम्यन्तानि समानाधिकरणानि पदानि व्याख्यायन्ते । अदातरि प्रतिभुवि विज्ञातप्रकृतौ चेत् ऋणमुत्तमर्णः केन हेतुना परीप्सेत् लब्धुमिच्छेत्, किं केवलेनैवात्मव्यापारेण उत[2] प्रतिभुवः पुत्रमपि व्यापारयेत्[3] । कुतः सदेहः ? उक्तम् । मृतो दानप्रतिभूर्न जातः, तादृशे मृते कस्तत्पुत्राणा सबन्धः । यतस्तु खलु विज्ञातप्रकृतिर्विज्ञातकारणः प्रतिभूत्वेन धन गृहीत्वा स्थित इत्येतन्निश्चितम् । अतो भवति बुद्धिः अस्ति तत्पुत्राणा सबन्धो, यतस्तेन ऋणसशुद्ध्यर्थमस्य निसृष्टमिति । पुनःशब्दः पूर्वस्माद्विशेषमाह । यदि दानप्रतिभुवः पुत्राः सबध्यन्ते । यस्तर्ह्यदाता तस्मिन्मृते, दातोत्तमर्णः । पश्चात्तत उत्तरकालमित्यर्थः । शेष व्याख्यातम् । परीप्सा प्राप्तीच्छा । मेधा.

(२) तद्ग्रहणपूर्वकत्वेऽस्य प्रतिभूः स्थित इत्येव विज्ञातप्रातिभाव्यकरणे पुनर्दर्शनस्वप्रत्ययप्रतिभुवि प्रेते सत्यनन्तरं धनप्रयोक्ता केन हेतुना प्रतिभूपुत्राद्धन प्राप्तुमिच्छेत् किं तस्य प्राप्तिहेतुर्विद्यते उत नेति यतोऽसौ दानप्रतिभूपुत्रो न भवत्यतोऽप्राप्त्याशङ्का वियते । यतस्तु धनग्रहणपूर्वक तत्पिता दर्शनप्रतिभूर्वा स्थितोऽस्ति तत्पुत्रात्प्राप्त्याशङ्का । *गोरा.

(३) उक्तमुपपादयति अदातरीति । प्रतिभुव्यदातरि दानार्थमभूते विज्ञानप्रकृतौ प्रथममेव दर्शनादिनियम-

---

(१) **मस्मृ.**८।१६०; **व्यक** ११७ उत्त. : १२१ पू., **मभा** १२।३८ उत्त.; **गोमि** १२।३८ दानप्र (तस्य प्र) उत्त, क्रमेण नारद, **स्मृच.**१५१-१५२.१७०पू., **विर.**५७ विधिः स्यात्पूर्व (विधिरेष प्र) पू.; **पमा** २६६ पू., **सवि.**२५७ पू.; **व्यप्र.**२५१ उत्त; **व्यउ.**३० उत्त.; **सेतु.**२८ स्यात्पूर्व (पूर्व प्र) पू; **प्रका.**९०-९१:९८ पू.; **समु.**७८ उत्त., व्यासः : ८४ पू.

१ षेध. २ नं घ.

* व्यक., ममु. गोरावद्भावः ।

(१) **मस्मृ.**८।१६१; **व्यक.**११७, **स्मृच.**१५१, **विर.**४३; **सवि.**२५० अदा (आदा); **प्रका.**९१; **समु.**७८.

१ प्रतिज्ञात. २ न. ३ ततः. ४ यति. ५ भूतज्जातः ।

करणेन निश्चितादातृस्वभावे प्रेते ऋण दातोत्तमर्णः केन हेतुना तत्पुत्रादावर्थमीप्सेत । यत एव दानार्थ नासौ प्रतिभूः कृतः । पित्रा च देयत्वेनाङ्गीकृतमेव दायादेन देयमतोऽन्यथा न देयमित्यर्थः । ×मवि.

(४) अत्र पदार्थाः प्रथममुच्यन्ते । अदातरि दर्शयितरि, दाता धनप्रयोक्ता । विज्ञातप्रकृतौ प्रायेणाय किंचिद् गृहीत्वा कस्यचित्प्रतिभर्भवतीति विज्ञातस्वभावे । ऋण प्रातिभाव्यागतमृणम् । परीप्सेत् लब्धुमिच्छेत् । वाक्यार्थस्तु अदातरि विज्ञातप्रकृतौ प्रतिभुवि प्रेते पश्चात्तत्पुत्रादृणं दाता 'न तत्पुत्रा ऋण दद्युरिति शास्त्राविरुद्धेन केन हेतुना परीप्सेदिति । स्मृच.१५१

(५) अदातरि दानप्रतिभूव्यतिरिक्ते प्रतिभुवि, विज्ञातप्रकृतौ बन्धकं गृहीत्वा प्रतिभूरभूदिति विज्ञातस्वरूपे, प्रेते मृते, दाता ऋणदाता, पश्चात् ऋण केन हेतुना परीप्सेत् साधयितुमिच्छेदिति प्रश्नः । अत्रोत्तर निरादिष्टधन इत्यादि । *विर.४३

(६) पुनरिति वाक्योपन्यासे अधमर्णे ऋणादातरि सति विज्ञातप्रकृतौ, दातोत्तमर्णः केन हेतुना धन परीप्सेत्कस्माद्धन लभेतेति महर्षिप्रश्नसद्भावेन स्वयमुपन्यासोऽय हे महर्षयः एव पृच्छति चेदित्यर्थः । नन्द.

[1]**निरादिष्टधनश्चेत्तु प्रतिभूः स्यादलंधनः ।**
स्वधनादेव तद्दद्यान्निरादिष्ट इति स्थितिः ॥

(१) निरादिष्ट निसृष्ट स्वधनादर्पित, भव लप्स्यक इद ते धन मत्तः, त्वया सशोधनीय यद्यह न दद्याम् । अलधनः पर्याप्तधनः । यावद्धनमुत्तमर्णाय दातव्य तावत्परिपूर्ण प्रसृष्टम् । स्वल्पे तु निसृष्टे बहुनि सशोध्ये न दापयितव्यः । पूर्वस्य प्रश्नस्योत्तरमिदम् । यद्यपि न दानप्रतिभूरय निरादिष्टस्तत्तत्पुत्रो दाप्यते स्वधनादेव । तद्वद्यो निरादिष्टपुत्र इति द्रष्टव्य, तस्यैव प्रकृतत्वात्, साक्षात्प्रतिभुवस्तु प्रतिभूत्वादेव प्राप्तिरिति चेन्मैव । निरादेशनेन इति स्थितिरेषा शास्त्रमर्यादा । विचारादेव अलधन इति सिद्धे यन्निरादिष्टोऽलधन इति चैवमभिधान तत्पद्यग्रन्थानुरोधेन । मेधा.

(२) असौ दर्शनप्रतिभूः प्रत्ययप्रतिभूर्वा यदि निसृष्टधनो भवति । भव प्रतिभूरिद ते विश्वासार्थ धनमित्येव प्राप्तधनश्च यावत्यसौ प्रतिभः स्थितः तावत्प्रमाण तस्य हस्ते दत्त तदा स्वधनादेव तद्धन निरादिष्टपुत्रः प्रकृतं उत्तमर्णाय दद्यादिति शास्त्रमर्यादा । +गोग.

(३) तदा निरादिष्टो दत्तधनः स तस्मिन्द्रव्ये व्ययितेऽपि स्वधनादेवाकृष्य दद्यात् । तथा च तदायादैरपि तदेयमेवेत्यर्थः । अलधनमिति सर्वदानमपेक्ष्य अल्पे तु स्थापिते तावदेव शोधनीय न सर्व धन देयम् । ×मवि.

(४) निरादिष्ट समर्पितं बन्धत्वेन धन यस्य असौ निरादिष्टधनः । अल पर्याप्त बन्धत्वेनोपात्त धन यस्यासावलधनः । निरादिष्टशब्देनासमस्तेन निरादिष्टधनस्य दर्शनप्रतिभुवः पुत्रो लक्ष्यते । स्थितिः शास्त्रमर्यादा । वाक्यार्थस्तु निरादिष्टधनोऽलधनः दर्शनप्रतिभूर्मृतश्चेत्स्यान्निरादिष्टः स्वधनादेव तद्दण दद्यादिति स्थितिरिति । अनेन निरादिष्टधनत्वेनैव हेतुना परीप्सेदित्युत्तरमर्थादुक्तम् । अस्यैव वचनस्याध्याहारलक्षणाश्रयण विहायार्थान्तरमुच्यते । निरादिष्टधनः प्रतिभूरलधनश्चेत्स्यात्स एव निरादिष्टस्वधनादेव दद्यादिति । अनिरादिष्टधनवदधमर्ण दर्शयन्नुच्यते निरादिष्टधनः । किन्तु दानप्रतिभूवद्दद्यादिति तात्पर्यार्थः । एतच्चार्थान्तर देवस्वामिनोक्तम् । *स्मृच.१५२

याज्ञवल्क्यः

प्रातिभाव्यनिमित्तानि । प्रातिभाव्यद्रव्यदानाधिकारः कियत्पुरुषपर्यन्तम् ।

[2]दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते ।
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥

+ मसु., मच. गोरावत् । × शेषं गोरागतम्। नन्द. मविवद्भावः ।

* विर., सवि. स्मृचगतम् ।

(१) **यास्मृ.**२।५३; **अपु.**२५४।१३ द्यौ (द्यौ) वितरस्य (वितथस्य); **विश्व.**२।५५; **मिता.**; **अप**; **गोमि.**१२।३८ आद्यौ (आद्ये) विष्णुयाज्ञवल्क्ययौ; **स्मृच.**१५० उत्त.; **स्मृचि.**११; **वीमि.**; **व्यप्र.**२४८; **व्यउ.**२८ पू, **व्यम** ७८, **विता.**५२५; **राकौ.**३९९; **प्रका.**९० उत्त.; **समु.**७७.

× मच., भाच. मविगतम् ।

* हलायुधव्याख्यान मविवत्।

(१) **मस्मृ** ८।१६२; **व्यक.**११७; **स्मृच.**१५१; **विर.**४३; **सवि.**२५०; **प्रका.**९१; **समु.**७८.

(१) क्व पुनर्विषये प्रातिभाव्यं—दर्शने प्रत्यये इति। अपसर्पणाशङ्कायां दर्शनार्थं, अविश्वासे विश्वासार्थं, सिद्धार्थप्रदानेन च प्रातिभाव्यम्। विधीयत इति विचिकित्सानिवृत्त्यर्थम्। अगृहीतं ददतो दापयतो वा विचिकित्सा मा भत। तत्र दर्शनप्रत्ययप्रतिभुवौ वितथे विसंवादिते कार्यिणि दाप्यौ स्यय, न तु तत्पुत्राः। इतरस्य तु दानप्रतिभुवः पुत्रा अपीत्यभिप्रायः। अपिशब्दोऽन्येषामपि रिक्थभाजा प्राप्त्यर्थः। ननु च दर्शनप्रतिभरपि प्रत्ययार्थ एव। नैवम। प्रत्यायितस्यापि निमित्तान्तराद् भवत्येवादर्शनम्। यद्वा मृते कार्यिणि दातृत्वार्थं दर्शनप्रातिभाव्यवचन द्रष्टव्यम। तथा च बृहस्पतिः—'उपस्थाप्यविपन्नावुपस्थाप्यस्य पुनः प्रतिभर्दाप्यः' इति। एतच्चार्थार्पणेनोपविश्वास्य यत्र दर्शनप्रातिभाव्य क्रियते, तद्विषयमेव। तथा च नारदः—'ऋणिष्वप्रतिकुर्वत्सु प्रत्यये वा विवादिते। प्रतिभस्तद्गृहणं दद्यादनुपस्थापयस्तथा॥' इति। यदोपस्थान सभवतीति शेषः। मृतस्य चोपस्थापनासभवाज्जीवदधिकार इति नारदाभिप्रायः। विकल्पप्रसङ्गे विषयव्यवस्थोक्तैव। विश्व.२।५५

(२) अधुना प्रातिभाव्य निरूपयितुमाह—दर्शने इति। प्रातिभाव्य नाम विश्वासार्थं पुरुषान्तरेण सह समयः। तच्च विषयभेदात्त्रिधा भिद्यते। यथा—दर्शने दर्शनापेक्षाया एन दशयिष्यामीति। प्रत्यये विश्वासे मत्प्रत्ययेनास्य धन प्रयच्छ नाय त्वा वञ्चयिष्यते, यतोऽमुकस्य पुत्रोऽय उर्वराप्रायभूरस्य ग्रामवरो वाऽस्तीति दाने वयय न ददाति तदानीमहमेव दास्यामीति। प्रातिभाव्य विधीयत इति प्रत्येक सबध्यते। आद्यौ तु दर्शनप्रत्ययप्रतिभुवौ, वितथे अन्यथाभावे अदर्शने विश्वासव्यभिचारे च, दाप्यौ राज्ञा प्रस्तुतं धनमुत्तमर्णस्य। इतरस्य दानप्रतिभुवः सुता अपि दाप्याः। वितथ इत्येव शाठ्येन निर्धनत्वेन वाऽधमर्णेऽप्रतिकुर्वति। इतरस्य सुता अपीति वदता पूर्वयोः सुता न दाप्या इत्युक्तम्। सुता इति वदता न पौत्रा दाप्या इति दर्शितम्। *मिता.

* अप. वाक्यार्थो मितावत्।

(३) अपिशब्दादानप्रतिभूरपि जीवनदशाया विसंवादे दाप्य इति दर्शयति। स्मृच.१५०

(४) दान इति स्वयमेव दानेऽभियोज्यादुद्ग्राह्यार्पणे चेत्यर्थः। ×वीमि.

(५) यत्तु योगीश्वरेण प्रतिभुवा त्रैविध्यमेवोक्त—दर्शने इत्यादि, तदानार्पणयोरनतिभेदाभिप्रायेण। दानं स्वधनार्पण धनिकाय। अर्पण तु धारणिकधनमानीय तस्य अर्पणम्। धनिकस्य स्वय लाभे उभयतो न विशेषः। व्यप्र.२४८

दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा।
न तत्पुत्रा ऋणं दद्युर्दद्युरन्यदायाय यः स्थितः॥

(१) पूर्वश्लोकार्थमेव स्पष्टयति—दर्शनप्रतिभूर्यत्रेति। श्लोकान्तरारम्भसामर्थ्यान्मृतवचनाच्च जीवतः पुत्रैः शक्तितोऽन्वेषण कार्यमित्यभिप्रायः। विश्व.२।५६

(२) एतदेव स्पष्टीकर्तुमाह—दर्शनप्रतिभूर्यत्रेति। यदा तु दर्शनप्रतिभूः प्रात्ययिको वा प्रतिभूर्दैव गतस्तदा तयोः पुत्राः प्रातिभाव्यायातं पैतृकमृण न दद्युः। यस्तु दानाय स्थितः प्रतिभूर्दैवं गतस्तस्य पुत्रा दद्युर्न पौत्राः। ते च मूलमेव दद्युर्न वृद्धिम्। 'ऋण पैतामहं पौत्रः प्रातिभाव्यागत सुतः। सम दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः' ॥ इति व्यासवचनात्। यत्र दर्शनप्रतिभूः प्रत्ययप्रतिभूर्वा बन्धक पर्यातं गृहीत्वा प्रतिभूर्जातस्तत्र तत्पुत्रा अपि तस्मादेव बन्धकात् प्रातिभाव्यायातमृण दद्युरेव। +मिता.

(३) पौत्रनिवृत्त्यर्थोऽयमनुवादः। *अप.

× शेष मितागतम्।

+ पमा मितावत्। सवि., विता. मितावद्भावः।

* मितावद्भावः।

(१) **यास्मृ.**२।५४, **अपु.**२५४।१४ दैर्दुः ...तः (दानाय समुपस्थिता); **विश्व.**२।५६, **मेधा.**८।१६० (=) यः स्थितः (ये स्थिताः)); **मिता.**, **अप.** मेधावत्; **व्यक.**११६ मेधावत्; **स्मृच.**१५०, **विर.**४० मेधावत्; **पमा.**२५० यः (चेत्); **विचि.**१९; **स्मृचि.**११; **नृप्र.**२१ मेधावत्; **सवि.**२४८ (=) मेधावत्; **मच.**८।१६० (=); **वीमि.**; **व्यप्र.**२५०; **व्यउ.**२९; **विता.**५२६ (=); **राकौ.**३९९; **सेतु** २१ प्रात्य (प्रत्य) शेष मेधावत्; **प्रका.**९०; **समु.**७७; **विव्य.**२७,

(४) मिता.टीका—यत्र दर्शनप्रतिभूरिति । अत्र तस्मादेव बन्धकाद्दर्शने दाप्या इत्यभिधानात्तस्य बन्धकस्य पर्याप्तत्वेऽपि यावद्बन्धकमर्हति तावद्देय नातोऽधिक, यावद्दर्शन तावद्देयमिति गम्यते । मुयो.

(५) वस्तुतस्तु जीवति प्रतिभुवि व्यवस्था प्रथमश्लोकेऽभिहिता, इतरस्य प्रोपितस्येत्यर्थात् । मृते प्रतिभुवि द्वितीयश्लोकेनेत्यपौनरुक्त्यमिति तत्त्वम् । वीमि.

अनेकप्रतिभूभ्यः प्रातिभाव्यद्रव्यग्रहणप्रकारः

बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम् ।
एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ॥

(१) एकस्येव तु यदा कार्यिणः—बहवः स्युरिति । बहवः प्रतिभुवो यदि स्युरंशतो धन दद्युः । एकच्छायास्थितेष्वेषु धनिकस्येच्छया व्यस्तसमस्तत्वेन कृत्स्न धन दापयेत् । एकच्छायाकाः समानग्राहकत्वेन प्रतिभुवः न द्रव्योपभोक्तारः । एतदेव चैष्विति सर्वनाम्ना स्पष्टीकृतम् । विश्व.२।५७

(२) यस्मिन्ननेकप्रतिभूसंभवस्तत्र कथ दाप्यस्तत्राह—बहवः स्युरिति । यद्येकस्मिन्प्रयोगे द्वौ बहवो वा प्रतिभुवः स्युस्तदर्ण संविभज्य स्वांशेन दद्युः । एकच्छायाश्रितेषु प्रतिभूषु एकस्याधमर्णस्य छाया सादृश्य तामाश्रिता एकच्छायाश्रिताः । अधमर्णो यथा कृत्स्नद्रव्यदानाय स्थितस्तथा दाने प्रतिभुवोऽपि प्रत्येक कृत्स्नद्रव्यदानाय स्थिताः । एव दर्शने प्रत्यये च । तेष्वेकच्छायाश्रितेषु प्रतिभूषु सत्सु धनिकस्योत्तमर्णस्य यथारुचि यथाकामम् । अतश्च धनिको वित्ताद्यपेक्षाया स्वार्थ य प्रार्थयते स एव कृत्स्न दाप्यो नाशतः । एकच्छायाश्रितेषु यदि कश्चिद्देशान्तरं गतस्तत्पुत्रश्च सनिहितस्तदा धनिकेच्छया सर्व दाप्यः । मृते तु कस्मिंश्चित्तत्सुतः स्वपित्रशमवृद्धिक दाप्यः । ×मिता.

(३) एकामधमर्णस्य छाया सादृश्य प्रत्येक श्रिता एकच्छायाश्रिताः । +अप.

(४) मिता.टीका — एकच्छायाप्रविष्टानामिति । एकच्छायाप्रविष्टसुतोऽपि धनिकेच्छया सर्व दाप्यः । तेष्वेकच्छायाश्रितेषु कस्मिंश्चिन्मृते तत्सुतः स्वपित्र्यमशमेव दाप्यो न सर्वमित्यर्थः । मुयो.

(५) रुच्यविशेषे तु 'सम स्यादश्रुतत्वात्' इति न्यायेनात्रापि यथाशमेव दद्युः । +व्यप्र.२५१

अधमर्णात् प्रातिभाव्यद्रव्यसाधनम्

प्रतिभूर्दापितो यत्तु प्रकाश धनिनां धनम् ।
द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत्* ॥

(१) द्रव्यानुपभोक्तृत्वाच्च—प्रतिभूर्दापितो यत्रेति । प्रकाशवचनाद् यत् प्रतिभुवो हस्तनिर्गत तदेव द्विगुणं देयम् । न तु धनिकाय यावद् देयमित्यभिप्रायः । हिरण्यविषयश्चाय श्लोकः । विश्व.२।५८

(२) प्रातिभाव्यर्णदानविधिमुक्त्वा प्रतिभूदत्तस्य प्रतिक्रियाविधिमाह—प्रतिभूर्दापितो यत्तु इति ।

यद्द्रव्य प्रतिभूस्तत्पुत्रो वा धनिकेनोपपीडितः, प्रकाश सर्वजनसमक्ष, राज्ञा धनिनो दापितो न पुनर्द्विगुण्यलोभेन स्वयमर्पित्य दत्तम् । यथाह नारदः—'य चार्थ प्रतिभूर्दद्याद्धनिकेनोपपीडितः । ऋणिकस्त प्रतिभुवे द्विगुण प्रतिदापयेत्' ॥ इति । ऋणिकैरधमर्णैः, तस्य प्रतिभुवस्तद्द्रव्य द्विगुण प्रतिदातव्य स्यात् । तच्च कालविशेषमनपेक्ष्य सद्य एव द्विगुण दातव्यम । वचना-

(१) **याज्ञ्स्मृ**.२।५५; **अपु**.२५४।१५; **विश्व.**२।५७ श्रित (स्थिते); **मिता., अप.**; **व्यक**.११७ यदि (यदा); **स्मृच.** १५२; **विर.**४४ व्यकवत्; **पमा.**२५१ वः स्यु· (वस्तु) ष्वेषु (ष्वेवं) रुचि (तथा); **विचि.**२०:२४ (=) उक्त; **स्मृचि.११**; **नृप्र.**२१ व्यकवत्; **सवि.**२५० वः स्युः (वस्तु); **चन्द्र.१७** एकच्छायाश्रितेष्वेषु (एकेच्छया कृतेष्वेव); **वीमि.**; **व्यप्र.**२५१; **व्यउ.**३०; **व्यम.७५**; **विता.**५३०; **सेतु.**२२ व्यकवत्; **प्रका.९१, समु.७८, विव्य.**२८व्यकवत्.

×व्यक. एकच्छायाश्रितपदार्थो मितावत्। विचि., सवि., व्यम. मितागतम् । + शेष मितागतम् ।

* विर व्याख्यान 'यस्यार्थे येन यद्दत्त' इतिकात्यायनवचने द्रष्टव्यम् ।

(१) **याज्ञ्स्मृ** २।५६, **अपु.**२५४।१६ तु (त्र) नां (नो); **विश्व.**२।५८ तु (त्र) नां (ने) द्भवेत् (द्धनम्), **मिता.** नां (नो); **अप.** तु (त्र) नां (ने) प्रति (तत्र); **व्यक.११८** मितावत्, **स्मृच.** १५३ अपुवत्; **विर.४५**; **पमा.**२५२ पूर्वार्ध अपवत्; **स्मृचि.**११-१२; **नृप्र.**२१ अपवत्; **वीमि.** तु (त्र) ऋणि (धनि), **व्यप्र.**२५२-२५३, **व्यउ.**३०-३१, **व्यम.७९**; **विता** ५३०, **प्रका.९१** अपुवत्, **समु.७८** यत्तु (य तु).

रम्भसामर्थ्यात् । एतच्च हिरण्यविषयम् । ननु इद प्रतिभूरिति वचन द्वैगुण्यमात्र प्रतिपादयति । तच्च पूर्वोक्तकालक्रमाबाधेनाप्युपपद्यते । यथा जातेष्टिविधानं शुचित्वाबाधेन । अपि च सद्यः सवृद्धिकदानपक्षे पशुस्त्रीणा सद्यः संतत्यभावान्मूल्यदानमेव प्राप्नोतीति । तदसत्—'वस्त्रधान्यहिरण्याना चतुस्त्रिद्विगुणा परा' इत्यनेनैव कालकलाक्रमेण द्वैगुण्यादिसिद्धेः । द्वैगुण्यमात्रविधाने चेद वचनमनर्थक स्यात् । पशुस्त्रीणा तु कालक्रमपक्षेऽपि संतत्यभावे स्वरूपदानमेव । यदा प्रतिभूरपि द्रव्यदानानन्तर कियताऽपि कालेनाधमर्णेन संधट्टते तदा सततिरपि सभवत्येव । यद्वा पूर्वसिद्धसतत्या सह पशुस्त्रियो दास्यन्तीति न किंचिदेतत् । अथ प्रातिभाव्य प्रीतिकृतम् । अतश्च प्रतिभुवा दत्त प्रीतिदत्तमेव । न च प्रीतिदत्तस्य याचनात्प्रागृद्धिरस्ति । यथाह—'प्रीतिदत्तं तु यत्किंचिद्वर्धते न त्वयाचितम् । याच्यमानमदत्त चेद्वर्धते पञ्चक शतम्' ॥ इति । अतश्चाप्रीतिदत्तस्यायाचितस्यापि दानदिवसादारभ्य यावद्द्विगुणं कालक्रमेण वृद्धिरित्यनेन वचनेनोच्यत इति । तदप्यसत् । अस्यार्थस्यास्माद्वचनादप्रतीतेर्द्विगुण प्रतिदातव्यमित्येतावदिह प्रतीयते । तस्मात्कालक्रममनपेक्ष्यैव द्विगुण प्रतिदातव्य वचनारम्भसामर्थ्यादिति सुष्ठूक्तम् । *मिता.

(३) अधमर्णेरिति बहुवचनमविवक्षितम् । ×अप.

(४) तद्धनिकपीडितप्रतिभूविषयम् । स्मृच.१५३

(५) मिता.टीका—नन्विद वचनमिति । 'द्विगुण प्रतिदातव्यमिति' द्वैगुण्यमात्र प्रतिपाद्यते । तच्च द्वैगुण्य पूर्वोक्तमासादिरूपे काले यत्काला वृद्धिस्तस्य यः क्रमो वर्धते तमबाधित्वैवोपपद्यत इत्यर्थः । एतदुक्त भवति । स्वस्वकृतवृद्ध्यनुसारेण यदा कालान्तरे द्वैगुण्यमेति धन तदैव दत्तद्रव्याय प्रतिभुवे द्विगुणं धन दातव्यमधमर्णेन । अन्यथा यावती वृद्धिः तत्सहित मूलधनं देयं न द्विगुण इति । 'सद्यो द्वैगुण्यदानमयुक्तमि'ति ।

परिहरति । तदसदित्यादिना । एतदुक्तं भवति । 'वस्त्रधान्यहिरण्याना चतुस्त्रिद्विगुणा परा' इत्येतद्वचनारम्भसामर्थ्येनैव कालक्रमेण द्वैगुण्यादेः प्राप्तत्वात् पुनरत्र कालक्रमायातद्वैगुण्यविधानमनुपपन्न स्यात् । अतश्च पूर्वमप्राप्त यत्सद्यो द्वैगुण्य तदेवावश्यं विधेयम् । जातेष्टिविधायकवाक्यस्य आनर्थक्याभावात् । 'शुचिना कर्म कर्तव्यमि'त्येतदबाधेनाप्युपपत्तिरिति विशेष इति । मुयो.

(६) इद च द्विगुणादिवृद्धियोग्यकाले द्रष्टव्यम् । प्रतिभूकृतदानदिनानन्तरं त्रिपक्षानन्तरं वृद्धयुपक्रमः । वीमि.

अधमर्णात् प्रातिभाव्यद्रव्यवृद्धिः कियती साधनीया

'संततिः स्त्रीपशुष्वेव धान्यं त्रिगुणमेव च ।
वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणः स्मृतः ॥

(१) पश्चादौ तु—ससंतति स्त्रीपशव्यमिति । तथाशब्दः सत्कारार्थः । यस्य यावती परा वृद्धिरुक्ता, तस्य तद्वृद्धियुक्त ससत्कारं प्रतिभुवे देयमित्यर्थः । विश्व.२।५९

(२) प्रतिभूदत्तस्य सर्वत्र द्वैगुण्ये प्राप्तेऽपवादमाह—संततिः स्त्रीपशुष्वेवेति । हिरण्यद्वैगुण्यवत्कालानादरेणैव स्त्रीपश्वादयः प्रतिपादितवृद्ध्या दाप्याः । श्लोकस्तु व्याख्यात एव । यस्य द्रव्यस्य यावती वृद्धिः पराकाष्ठोक्ता तद्द्रव्य प्रतिभूदत्त खादकेन तया वृद्ध्या सह कालविशेषमनपेक्ष्यैव सद्यो दातव्यमिति तात्पर्यार्थः । यदा तु दर्शनप्रतिभूः संप्रतिपन्ने काले अधमर्णं दर्शयितुमसमर्थस्तदा तद्वेषणाय तस्य पक्षत्रय दातव्यम् । तत्र यदि त दर्शयति तदा मोक्तव्योऽन्यथा प्रस्तुतं धन दाप्यः । *मिता.

(३) याः पशुस्त्रियो गोमहिष्यादय उत्तमर्णाय प्रतिभुवा दत्ताः सत्यो यावत्संततिमत्यो जातास्तावत्संतति-

* पमा., विता. मितागतम् । ×शेषं मितागतम् ।

* व्यप्र. मितागतम् ।

(१) **यास्मृ.**२।५७; **अपु.**२५४।१७ सत ...ष्वेव (ससंतति स्त्रीपशव्य) त्रि (द्वि) स्मृतः (तथा); **विश्व.**२।५९ पूर्वार्धे (ससंतति स्त्रीपशव्य धान्य त्रिगुणमेव तु) प्रोक्त (देयं) स्मृतः (तथा); **मिता.** स्मृतः (तथाः); **अप.**; **स्मृच.**१५३; **पमा.** २५३; **नृप्र.**२१; **वीमि.** सत ...ष्वेव (ससंतति स्त्रीपशव्यं) णः स्मृतः (णाः स्मृताः); **व्यप्र.**२५४; **व्यउ.**११(=); **विता.**५३१ मितावत्; **प्रका.**९१; **समु.**७८.

कास्ता अधमर्णेन प्रतिभुवे देयाः। स्पष्टमन्यत्। अप.

(४) स्त्री च पशुश्च स्त्रीपशव्य तत्प्रतिभुवा दत्त ससंतति अधर्मेण (?) दानकाले यावती संततिर्जाता तावत्सहितमधमर्णेन प्रतिभुवे देयमित्यर्थः। सततिपद च युगधर्मकर्मादेरप्युपलक्षकम्। संततिः स्त्रीपशुष्वेवेति मिताक्षराया पाठः। तदर्थश्च स्त्रीपशुषु संततिर्वृद्धिरूपा या उत्तमर्णाधमर्णाभ्या प्राक् व्यवस्थापिता सा प्रतिभुवेऽधमर्णेन देयेत्यर्थः। एवकारेणाऽधिकवृद्धेर्गणनासिद्धाया व्यवच्छेदः। चकाराभ्या धान्यादावेव पञ्चगुणत्वादेः क्षौद्रादावत्रानभिहितगुणवत्वादेश्च समुच्चयः। वीमि.

नारदः

ऋणादौ विस्रम्भहेतुः प्रमाहेतुश्च

[1]**विस्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च।**
लिखितं साक्षिणश्च द्वे प्रमाणे व्यक्तिकारके॥

(१) वृद्धिलाभार्थप्रयोगस्य क्रियमाणस्य विश्वासमूलहेतू द्वावेव प्रतिभुवो द्वितीयमाधिः। तेषा च द्रव्यवृद्धिप्रमाणप्रतिभ्वाधीनां चतुर्णामप्यज्ञाना व्यक्तिकारके सदेहप्रणाशने द्वयमेव प्रमाणम्। लिखितं साक्षिणश्चेति। अभा.५४

(२) एवं चावन्धकप्रयोगोऽपि लभ्यते। स्मृच.१३७

(३) आधिग्रहण गोभूहिरण्यादि दित्सतः समानि रिक्तमूल्यम्। नाभा.२।१००

प्रातिभाव्यनिमित्तानि

उपस्थानाय दानाय प्रत्ययाय तथैव च।
त्रिविधः प्रतिभूर्दृष्टस्त्रिष्वेवार्थेषु सूरिभिः॥

(१) अत्र यदा धनिकेनर्णिको विधृतः एव ब्रूते। यथा मया तव किञ्चिन्न दातव्यम्। धनिकस्तु ब्रूते यद्याचारेण प्रतिष्ठापयामि ततोऽह गृह्णामि। न्याय करणस्यैवोपस्थानप्रतिभुव देहि। एवमुक्त्वा ऋणी धनिकस्य यं प्रतिभुवं प्रयच्छति। एवमुक्त्वा यथा अमुकं हि ते मया न्यायोपस्थानं करणीयम्। अस्मिन्नर्थे त्व मयाऽस्योपस्थानप्रतिभूर्दत्तः। एवमुक्तः स पुरुषो यथा स्थितो धनिकेन च गृहीतः। तदाऽसौ उपस्थान प्रतिभूरित्युच्यते। इदानीं दानप्रतिभूरुच्यते। स च यदा धनिकपार्श्वात् द्रव्यमृणिको ग्रहीतुमुद्यतः द्वितीय तृतीय वा पुरुषं सामान्यग्राहक स्वाशदायक वा पाठयित्वा प्रतिभुव प्रयच्छति। तदाऽसौ द्रव्यदानप्रतिभूः स्थित इत्युच्यते। अथ च द्वितीयः। तथा यदा धनिकेनर्णिको विधृत एव ब्रूते। यथा मया तव किञ्चिन्न दातव्यमासीत्। तत्तदा काल एव सर्व मया प्रवेशितमिति कारणोत्तरं प्रयच्छति मिथ्योत्तरं वा ददाति। ततश्च धनिको वदति। यद्येव तर्हि अमुकादित्यभुवने समनन्तरागामि पष्ठया तण्डुलभक्षणप्रत्ययार्थमेव मम कञ्चित्प्रतिभुव प्रयच्छ। एवमुक्तः ऋणी अस्मिन्नर्थे य पुरुष प्रत्ययकरणाय तस्य प्रयच्छति स प्रत्ययप्रतिभूरित्युच्यते। इति त्रिविधोऽप्युक्त इति। अभा.५४

(२) उपस्थानाय प्रयोजनकाले ढौकनाय समीपे स्थापनाय, प्रयोजनकाले अह दर्शयिता अदर्शने दातेति। दानाय अह दातेति। प्रत्ययाय अशीलविप्रतिपत्तये। नाभा.२।१०१

प्रातिभाव्यद्रव्यदानाधिकारः

[2]**ऋणिष्वप्रतिकुर्वत्सु प्रत्यये वाऽथ हापिते।**
प्रतिभूस्तद्दृणं दद्यादनुपस्थापयंस्तथा॥

(१) अत्रातिव्याप्त्या ऋणिकभयत्रासजननार्थमेव मुनिना प्रत्ययोपस्थानप्रतिभुवोरपि ऋणदानविधिरुक्तः। युक्तिभिस्तु पुनरनेनैव बाधितः। यतः। एक तावदिदमस्ति। 'उक्तानि प्रतिपिद्धानि पुनः सभावितानि च। सापेक्ष निरपेक्षाणि मुनिवाक्यानि के विदुः'॥ अन्यथा अनेनैव

(१) **नासं.**२।१०० रके(रणे); **नास्मृ.**४।११७; **अभा.**५४, **विश्व.**२।५९ (=) पू.; **मिता.**२।५७ पू.; **व्यक.**१०६, **स्मृच** १३७; **विर.**५; **नृप्र.**२१; **विता.**५२५ स्तम्भ (श्वास) पू., **राकौ.**४०० पू.; **सेतु.**३; **प्रका.**८५; **समु.७३.**

(२) **नासं.**२।१०१; **नास्मृ.**४।११८; **अभा.**५४; **गौमि.** १२।३८ च (हि); **विर.**४१; **नृप्र.**२१ सूरि (भूरि).

(१) **नासं.**२।१०२ वाऽथ हापिते (वा विवादिते); **नास्मृ.** ४।११९वाऽथ(वाऽपि); **अभा.**५४ वाऽथ हापिते(नाविरोधतः), **विश्व.**२।५५ नासवत्; **स्मृच.**१४९ वा (चा); **विर.**४१ वाऽथ हापिते (ऽपि विरोधिते); **पमा.**२४८ स्तदृण (स्तु ऋण), **नृप्र.**२१ वा (चा) स्तदृण (स्तु ऋण) दनुप (ढनं चा) था (दा); **व्यप्र.**२४९; **व्यउ.**२९; **प्रका.**९० स्मृचवत्; **समु.** ७७ स्मृचवत्

मुनिना एतदुक्तम्। 'यत्र विप्रतिपत्तिः स्याद्धर्मशास्त्रार्थशास्त्रयोः। अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेत्॥ अन्यच्च—'धर्मशास्त्रविरोधे तु परस्परमुपस्थिते। लोकाचाराऽविरुद्धार्थो युक्तियुक्तो विधिः स्मृतः॥' अतोऽस्मिन लोकाचाराविरुद्धार्थयुक्तियुक्तविशेषः। अभा.५४५५

(२) यदोपस्थान संभवतीति शेषः। मृतस्य चोपस्थापनासंभवाज्जीवदधिकार इति नारदाभिप्रायः। विश्व.२।५५

(३) 'ऋणिष्वप्रतिकुर्वत्सु' इति दानप्रतिभूविषयम्। 'प्रत्यये चाऽथ हापिते' इति प्रत्ययप्रतिभविषयम्। 'अनुपस्थापयन्निति' कथंचिदधमर्णगृहीतवन्धोपस्थान प्रतिभूविषयम्। अप्रतिकुर्वत्सु शाठ्येन निर्धनत्वादिना वा ऋणमददत्सु। प्रत्यये हापिते विश्वासे व्यभिचारिते। अनुपस्थापयन्नुत्तमर्णपार्श्वस्थमाधि कथंचिदधमर्णगत पुनरुत्तमर्णसमीपस्थमकुर्वन्। स्मृच.१४९

(४) इद च वाक्य लक्ष्मीधराद्यालिखितमपि हलायुध निबन्धे दर्शनात् लिखितम्। *विर.४५

(५) अनुपस्थापयन्नृणिनमदर्शयन्नृणिनः सकाशादाधि ऋण पर्याप्त तद्धनं वोत्तमर्णायानर्पयन्निति दर्शनद्वयापेण प्रतिभूविषयमिति विवेकः। *व्यप्र.२४९

बहवश्चेत्प्रतिभुवो दद्युस्तेऽर्थं यथाकृतम्।
अर्थेऽविशेषिते तेषु धनिनश्छन्दतः क्रिया॥

(१) बहवश्चेत्प्रतिभुवः स्थिताः स्वकीयस्वकीयाश मुपस्थित द्रव्य गृह्णन्ति। ततस्ते यथाकृतमृण तथैव स्वांशस्थितं दद्युः। अथ सामान्यग्राहकत्वेन यदृच्छादापनीयत्वेन समुपस्थापकत्वेनाजीवतः श्रेष्ठगामित्वेनार्थीऽविशेषितो भवति। ततो धनिकश्छन्दतः क्रिया, तेषा मध्ये यत्र सुलभ धनं धनी पश्यति तमेव विधृत्य गृह्णाति। तथा चोक्तमेव सामान्यग्राहपत्रलक्षणविचारप्रकरणे कल्याणभट्टेन। 'ये जीवन्ति मृताना हि ये श्रेष्ठा जीवतामपि। धनी तान्स्वेच्छया दत्ते जीवच्छ्रेष्ठानुगामिनः' ॥ तथा चायमेव महर्षिर्नारदः पुरस्ताद् विशेषमिम वक्ष्यति। 'दाप्यः परर्णमेकोऽपि जीवत्स्वधिकृतैः कृतम्। प्रेतेषु तु न तत्पुत्रः परर्ण दातुमर्हति॥' अभा.५५

(२) एकैकस्मिन् बहवः प्रतिभुवः स्युः। तेषा दान प्रसङ्गे यथाकृत दद्युः, विशेषिते अहमियदहमियद् ददामीति, तथैव ते दद्युः। अविशेषिते तु सामान्येन प्रतिभूत्वे धनिनो यथेष्टतः सनिहितास्ते दद्युः। सनिहितेष्वपि कामचारतः। नाभा.२।१०३

अधमर्णात् प्रातिभाव्यद्रव्यग्रहणप्रकार.

[1]यं चार्थं प्रतिभूर्दद्यात् धनिकेनोपपीडितः।
ऋणिकस्तं प्रतिभुवे द्विगुणं प्रतिदापयेत्॥

(१) यदा धनिकेनोपपीड्य प्रतिभूरेव धन ग्राह्यते, तदा ऋणिकः परोक्षत्वादिक स्वकीय क्रूरमाभाव्य तस्मै प्रतिभुवे द्विगुण प्रतिदापयेत्। यच्च न कलान्तरेण द्विगुण प्रतिभूवाहनमहादोषस्य प्रायश्चित्तमिद सद्यो द्विगुणद्रव्यदापनम्। तथा चोक्त प्रकरणकारकल्याणेन 'ऋणिद्वय तद्धनिन ऋणिनस्तद्धनिद्वयम्। प्रतिभव्यवहाराङ्गे न पीड्यमुभयोरपि॥' अथ ऋणिनः प्रत्यक्षस्याप्यविदितमप्यपीडितोऽपि प्रतिभूरेव साध्यात् द्विगुणलोभात्स्वयमेव धनं ददाति, ततः ऋणी कृतस्य तत्सममेव दद्यान्न द्विगुणम्। ऋणिकदोषपीडापीडितलोकः प्रमाणमिति। अभा.५६

(२) एतदपि प्रतिदानविलम्बविषयम्। स्मृच.१५३

(३) एतत् द्विगुणदानं त्रिपक्षानन्तरं बोध्यम्। व्यप्र.२५३

यस्य दोषेण यत्किञ्चिद्धिनश्येत्तु हियेत वा।
वोढव्यं तद्धनेत्तेन यत्नाज्ञानविनाशितम्॥

(१) **नासं.**२।१०४ यं चार्थं (यमर्थं) दाप (पाद); **नास्मृ.** ४।१२१ य चार्थं (यमर्थं), **अभा.**५५ नासवत्; **मिता.** २।५६; **अप.**२।५६; **स्मृच.**१५३ कस्त (कं त); **विर.**४५ प्रतिदापयेत् (दातुमर्हति) विष्णुनारदौ; **पमा.**२५२ कस्त (कस्तु) दाप (पाद); **स्मृचि.**११ कस्त प्रतिभुवे (क तत्प्रतिभुवि); **नृप्र.**२१ पमावत्; **व्यप्र.**२५३; **व्यउ.**३१ कस्तं (कस्तत्); **वित.**५३०; **सेतु.**२३ नोप (नैव) शेष **विरवत्, विष्णुनारदौ; प्रका.**९१ स्मृचवत्; **समु.**७८ स्मृचवत्.

(२) **स्मृच.**१५३; **प्रका.**९१. **समु.**७८.

* शेष स्मृचगतम्।

(१) **नासं.**२।१०३ चेत् (स्युः) ष्वेषु (त्वेषु); **नास्मृ.** ४।१२०अर्थेऽ (अर्थे) **अभा.**५४.

बृहस्पतिः

प्रातिभाव्यनिमित्तानि

दर्शने प्रत्यये दाने ऋणिद्रव्यार्पणे तथा ।
चतुष्प्रकारः प्रतिभूः शास्त्रे दृष्टो मनीषिभिः ॥

(१) प्रत्ययो विश्वासः । दानं ऋणापकरणार्थमर्थार्पणम् । ऋणिद्रव्यार्पणं ऋणिनो यद्द्रव्यं गृहोपकरणादि तदर्पणम् । *स्मृच.१४८

(२) ऋणिद्रव्यार्पणे ऋणिद्रव्यस्य धनिकायार्पणे । वीर.४०

(३) ऋणे दान इति संबन्धः । अर्पणमत्र याचितकविषयम् । तेन यत्किञ्चित् केनचित्प्रार्थ्य नीत तत्राऽपरो वदति । यद्ययं नानीयार्पयति तदा मयार्पणीयमिति तेन तत्रार्पणमात्रं न दानम् । ऋणे तु दानमेव द्वयोरिति भेदः । विचि.१८–१९

आहैको दर्शयामीति साधुरेषोऽपरोऽब्रवीत् ।
दाताऽहमेतद्द्रविणमर्पयामीति चाऽपरः ॥

(१) एको दर्शनप्रतिभूरहमेनं पलायनप्रवृत्तं दर्शयामीति प्रातिभाव्यं भजन्नाह । अपरः प्रत्ययप्रतिभूरेष साधुरवञ्चको मत्प्रत्ययेनास्य धनं देहीति ब्रूते । दानप्रतिभूर्यदाऽस्य न ददाति द्रविणं गृहीत सवृद्धिक तदा तस्य द्रविणस्याहमेव दातेति वदति । अपरः ऋणिद्रव्यार्पणप्रतिभूर्यदाऽयं गृहीतं धन न ददाति तदाऽहमेतदीयं धन अर्पयामीति ब्रवीति । इति वाक्यचतुष्टयस्यार्थः । ×स्मृच.१४८

(२) विवादरूपन्यायकरणे शपथादौ च लग्नकः कात्यायनोक्तः दर्शनादावेव प्रविष्ट इति चतुष्टयम् । विचि.१९

(३) अर्पयामि दापयिष्यामीत्यर्थः । व्यम.७८

प्रातिभाव्यद्रव्यदानाधिकार. कियत्पुरुषपर्यन्तम्

आद्यौ तु वितथे दाप्यौ तत्कालावेदितं धनम् ।
उत्तरौ तु विसंवादे तौ विना तत्सुतौ तथा ॥

आद्यौ दर्शनप्रत्ययप्रतिभुवौ । वितथे अहमेन दर्शयिष्यामि साधुरेष इत्येवविधयोः प्रतिभूवाक्ययोः मिथ्यात्वे । उत्तरौ दानर्णिद्रव्यार्पणप्रतिभुवौ । विसंवादे शाठ्यादिना धने ऋणिकेनाप्रतिदत्ते । तौ विना उत्तरयोः प्रवासे मरणे वा जात इत्यर्थः । एतदुक्त भवति । ऋण वा अन्यद्वा धनादिक अहं तव दास्यामीत्येव प्रतिभुवा यत्राङ्गीकृत तत्र प्रतिभूर्दाप्यः । तस्याभावे तत्पुत्रो वा दाप्यः । अन्यत्र तु प्रतिभूरेवेति । एव च प्रमाणप्रतिभुवा त्वेवमनङ्गीकागत् प्रमाणप्रतिभुव एव दाप्याः । न पुत्राः । विवादप्रतिभुवा तु साधितधन दण्डधनं च दास्यामीत्यङ्गीकृतत्वात् दानप्रतिभूवत्सति संभवे स एव दाप्योऽन्यथा तु तत्पुत्र इत्यवगन्तव्यम् ।
*स्मृच.१५०–१५१

[२]उपस्थाप्यविपत्तावुपस्थाप्यस्य पुनः प्रतिभूर्दाप्यः ।

× पमा, व्यप्र. स्मृचगतम् । * पमा., सवि. स्मृचगतम् ।

(१) **अप.**२।५३; **व्यक.**११६; **स्मृच.**१५०, **वीर.**४० सुतौ तथा (सुतावपि); **पमा.**२५०; **दीक.**३७, **विचि.**१९ विरवत्, **स्मृचि.**११; **सवि.**२४९; **चन्द्र** १५ पू.:१६ विरवत्, उत्त.; **वीमि.**२।५७ रौ तु (रौ च) शेष विरवत्, **व्यप्र.**२४८ कात्यायनबृहस्पती : २५०; **व्यउ.**२८ कात्यायनः : २९; **व्यम.**७८; **सेतु.**२०-२१ विरवत्; **प्रका.**९०; **समु.**७७ विरवत्; **विव्य.**२७.

(२) **विश्व.**२।५५.

* व्यप्र स्मृचगतम् ।

(१) **अप.**२।५३; **व्यक.**११६ ऋणि (ऋणे); **स्मृच.**१४८; **वीर.**४०; **पमा.**२४६; **दीक.**३७ व्यकवत्; **विचि.**१८ व्यकवत्; **स्मृचि.**११ ऋणि (ऋणे) शास्त्रे (शास्त्र), **नृप्र.**२१ द्रव्यार्पणे (प्रत्यर्पणे); **सवि.**२४६ (=) शास्त्रे (शास्त्र); **व्यप्र.**२४७; **व्यउ.**२७ ऋणि (ऋणे) पूर्वपादत्रयम्; **वित.**५२७; **सेतु.**२० व्यकवत्; **प्रका.**८९ व्यकवत्; **समु.**७७; **विव्य.**२७.

(२) **अप.**२।५३ मीति चापरः (म्यपरो वदेत्); **व्यक.**११६ मीति चापरः (म्यपरोऽब्रवीत्); **स्मृच.**१४८; **वीर.**४० मीति (म्येनं) शेष व्यकवत्; **पमा.**२४६ रेषो (रित्व); **दीक.**३७ आहै...मीति (आद्यौ कोऽह दर्शयामि) (दाता त्वयैतद्द्रविणमर्पयाम्यपरो वदेत्); **विचि.**१९ मीति (म्येन) शेष **अपवत्**; **स्मृचि.**११ मीति (म्येन) शेषं व्यकवत्; **नृप्र.**२१ रेषो (रित्व) दाताऽहमेतत् (दास्याम्यहं ते); **सवि.**२४७ व्यकवत्; **वीमि.**२।५७ आहै (अथै) शेषं अपवत्; **व्यप्र.**२४७ पमावत्; **व्यम.**७८ पमावत्; **वित.**५२७ रेषो... मीत् (रित्वपरो वदेत्); **सेतु.**२० विरवत्; **प्रका.**८९; **समु.**७७; **विव्य.**२७ मीति सा (म्येनं सा).

[1]पुत्रेणापि समं देयमृणं सर्वं तु पैतृकम् ॥
सम मूलमात्रम् । ऋण प्रातिभाव्यागत पैतृकम् ।
स्मृच.१५२

[2]प्रातिभाव्यागतं पौत्रैर्दातव्यं न कचिद्भवेत् ॥
प्रतिभुवे कालदानम्

[3]नष्टस्यान्वेषणे कालं दद्यात्प्रतिभुवे धनी ।
देशानुरूपतः पक्षं मासं सार्धमथापि वा ॥
[4]नात्यन्तं पीडनीयाः स्युर्ऋणं दाप्याः शनैः शनैः ।
स्वसाक्ष्ये न नियोज्याः स्युर्विधिः प्रतिभुवामयम् ॥
(१) सार्धमासादधिकं न दद्यान्नियमार्थत्वाद्वचनस्य ।
स्मृच.१४९

(२) नष्टस्य पलायितस्याधमर्णस्य । स्वसाक्ष्ये स्वसमक्षे तिष्ठति दित्सति वा अधमर्णे न प्रतिभुवो दर्शनाय धनदानाय वा नियोज्या इत्यर्थः । विर.४५

अधमर्णात् प्रातिभाव्यद्रव्यग्रहणप्रकार.

[5]प्रातिभाव्यं तु यो दद्यात्पीडितः प्रतिभावितः ।
त्रिपक्षात्परतः सोऽर्थं द्विगुणं लब्धुमर्हति* ॥

* अत्र 'प्रतिभूर्दापितो यत्तु' इति याज्ञवल्क्यवचनव्याख्यानानि (पृ. ६६७) द्रष्टव्यानि ।

(१) **स्मृच.**१५२; **व्यप्र.**२५२; **प्रका.**९१; **समु.**७८.
(२) **स्मृच.**१५२; **समु.**७८.

(३) **अप.**२।५३ पणे (षण) नुरू (ध्वरू); **व्यक.**११७-११८, **स्मृच.**१४९ दे (दि); **विर.**४५; **पमा.**२४७; **विचि.**२१, **स्मृचि.**११ सार्धमथापि वा (मासार्धमेव च), **मृप्र.**२१; **सवि.**२४८; **चन्द्र.**१७; **व्यप्र.**२४८-२४९, २५४; **व्यउ.**२८; **विता.**५३१ रूपतः पक्ष (रूप पक्ष वा), **सेतु.**२२; **प्रका.**९० दे (दि), **समु.**७७; **विव्य.**२८ यमः.

(४) **अप.**२।५३ साक्ष्ये न (साक्ष्येण); **व्यक.**११८, **विर.**४५; **विचि.**२१ न्त (न्त) ऋण (धन) पू.; **स्मृचि.**११ प्याः (प्य) पू.; **चन्द्र.**१६ न्त (र्थं) पू.; **व्यप्र.**२५२ पू.:२५४; **व्यउ.**३१ न्त (न्त); **सेतु.**२२ अपवत्.

(५) **व्यक.**११८; **विर.**४५; **दीक.**३७ तु (च); **विचि.**२१; **स्मृचि.**१२ प्रतिभावितः (प्रतिभाविकः) सोऽ (स्वा) क्रमेण याज्ञवल्क्यः; **चन्द्र.**१७ प्रतिभावितः (प्रातिभाविकः); **वीमि.**२।५७ प्रतिभावितः (प्रातिभावतः); **व्यप्र.**२५३ तु (च) लब्धु (दातु); **व्यम.**७९; **सेतु.**२३; **विव्य.**२८ यमः.

त्रिपक्षात्परतस्तत्राऽकारितोऽपि वृद्धिर्भवति । ततः कालेन द्वैगुण्यं न त्वेतावतैव द्वैगुण्यम् । तथान्यदपि व्ययित ऋण्यर्थे द्रव्य प्रतिभुवा ऋणिना देयम् ।
विचि.२१

[6]साधुत्वाच्चेन्मन्दधिय ऋणं दद्युरभाषिताः ।
तदन्यदापिताः कस्मात् लभेरंस्ते कथं पुनः ॥
अभाषिता मध्यस्थेन । विर.४६

कात्यायनः

प्रातिभाव्यानधिकारिण

[7]नै स्वामी न च वै शत्रुः स्वामिनाऽधिकृतस्तथा ।
निरुद्धो दण्डितश्चैव संदिग्धश्चैव न कचित् ॥
[8]नैव रिक्थी न मित्रं च न चैवान्त्यवासिनः ।
राजकार्यनियुक्तश्च ये च प्रव्रजिता नराः ॥
[9]नाशक्तो धनिने दातुं दण्डं राज्ञे च तत्समम् ।

(१) **अप.**२।५३ भाषि (भावि) उत्तरार्धे (यदर्थं दापितास्तस्मान्न लभेरन् कथंचन), **विर.**४६.

(२) **मिता** २।५७, **व्यक.**११६, **स्मृच.**१३६; **विर.**३९ दिग्धश्चैव (शयस्थश्च), **पमा.**२५३-२५४ सदि .. .. चित् (शिल्पिनश्चाऽब्रवीद् भृगु.), 'शिल्पि .भृगुः' अय पादः वस्तुतः'वणिजः कर्षकाश्चैव'इत्यस्य द्वितीयपादः, लेखकप्रकाशकप्रमादेन अत्र पठितः । अत्रैवाग्रे पुनः प्रमादेन 'साक्षित्वं प्रातिभाव्य च सदिग्धश्चैव न कचित् ' इति पठितम् । प्रथमपादो वस्तुतः नारदस्य, द्वितीयपादस्तु प्रकृतश्लोकस्यैव चतुर्थपादः । अन्यथा अन्वयासंगतेः ।; **स्मृचि.**१२; **व्यप्र.**२५५; **व्यउ.**२७ सदि . चित् (संशयस्थो न कुत्रचित्), **विता.**५३३ (=), **सेतु.**२३ न च वै (नापि वा) व सदिग्धश्चैव (व संशयस्थश्च); **प्रका.**८५ क्रमेण बृहस्पतिः.

(३) **मिता.**२।५७ क्त (क्ता); **व्यक.**११६, **स्मृच.**१३६; **विर.**३९ त्यन्त (न्तेनि) राजकार्यं (नैव राज); **पमा.**२५४ मितावत्; **स्मृचि.**१२ त्यन्त (न्तेनि) कृतश्च (कृता ये); **व्यप्र.**२५५ मितावत्; **व्यउ.**२७ अन्यत्रवासिनः इति पाठः; **विता.**५३३-५३४ (=) च न (वै न); **सेतु.**२३-२४ वान्त्यन्त (वान्तेनि) (नैव राजा नियुक्तश्च ये न प्रव्रजिता नराः); **प्रका.**८५ क्रमेण बृहस्पतिः.

(४) **मिता.**२।५७ नाश (न श); **व्यक.**११६ द्वितीयार्धो नास्ति; **स्मृच.**१३६ द्वितीयार्धो नास्ति, भूः स्व (भूल); **विर.**३९ व्यकवत्; **पमा.**२५४ ना (न) शेषं स्मृचवत्; **विचि.**

जीवन्वाऽपि पिता यस्य तथैवेच्छाप्रवर्तकः ।
नाविज्ञातो ग्रहीतव्यः प्रतिभूः स्वक्रियां प्रति ॥

(१) सदिग्धोऽभिशस्तः । अत्यन्तवासिनो नैष्ठिकब्रह्मचारिणः । मिता.२।५७

(२) तत्सम विवादास्पदीभूतद्रव्यसमम् । नैव रिक्थीत्यविभक्तविषयम् । स्मृच.१३६

(३) स्वाम्यत्र अनभिभाव्यप्रभुः । संशयस्थ इत्यासन्नमरणविषयः । अभिशस्त इति केचित् । ऋक्थी धनिकेन ऋणिकेन वा साधारणऋक्थः । अन्तेनिवासिनः शिष्याः । मिताक्षराकारेण तु अत्यन्तवासिन इति पठित्वा नैष्ठिकब्रह्मचारिण इति विवृतम् । दण्डं राज्ञे च तत्सम दातुमशक्त इत्यनुषङ्गः । एतच्चादानपक्षे प्राप्तराजदण्डाभिप्राय यस्मिन् मृते धनप्राप्तिविश्वासो न भवति स प्रतिभूर्न ग्राह्य इत्येतत्तात्पर्यक चेदमिति मन्तव्यम् । विर. ३९

प्रातिभाव्यनिमित्तानि

दानोपस्थानवादेषु विश्वासशपथाय च ।
लग्नकं कारयेदेवं यथायोगं विपर्यये ॥

(१) उपस्थान दर्शनम् । विवादो व्यवहारः । शपथ दिव्यम् । दानविश्वासौ प्रसिद्धौ । एषु अर्थेषु लग्नकं प्रतिभुवं विवादधनं दापयेत् । अप.२।५३

(२) उपस्थान दर्शनम् । वादो विवादः । तत्र प्रतिवाद्यानयनानन्तर सभ्यैर्लग्नकग्रहण साधितधनादिप्राप्त्यर्थ कार्यम् । दासादौ चोरत्वादिशङ्कायां विश्वासाय प्रतिभूः कार्यः । शपथाय लग्नकग्रहण शपथविलम्बे कार्यम् । एवमन्यत्रापि विपर्यये कार्यस्य न्यासविपये यथासभवं लग्नकं कारयेदित्यन्वयः । ततश्च पूर्वमाधिविक्रयदानधूर्तदायादसभावनाया सत्या गोप्याधावाधिपालाख्यः प्रतिभूर्भोग्याधौ भुक्त्वापकाख्यो बहुमूल्याधावपि प्रत्यर्पकाख्यश्चानेनैव सगृहीत इत्यवगन्तव्यम् । स्मृच.१४९

(३) असाधुमेव साधु वदन् प्रत्ययप्रतिभस्तथा दर्शनमकारयन् दर्शनप्रतिभूः प्रकृतधनं दाप्यो न तु तयोः सुतोऽपीत्यर्थः । विचि.१९

पराश्रयमभव्यं वाऽप्यसत्संसर्गमेव वा ।
अपकारक्षमो यस्तु द्वेषात्कर्तुमनाः क्वचित् ॥
कारयेत्प्रत्ययायैव तद्भयाल्लग्नकं तथा ।
विसंवादेऽथ शीलस्य दाप्यते प्रतिभूस्तथा ॥

पराश्रयं शत्रुसमाश्रय अभव्यमनिष्ट असत्ससर्ग चौरादिससर्ग योऽपकारक्षमः कर्तुमर्हति, तद्भयात् प्रत्ययाय विश्वासाय लग्नक कारयेदिति पूर्वखण्डार्थः । विसंवादे व्यभिचारे शीलस्य चरितस्य प्रत्ययाय दाप्यते च प्रतिभूरित्युत्तरखण्डार्थः । वस्तुतस्तु यत्र यत्राऽविश्वासस्तत्र तत्र विश्वासाय राज्ञा प्रतिभूर्दाप्य इत्येवानुगतम् । विर.४२-४३

प्रातिभाव्यमुक्तिः । प्रातिभाव्यद्रव्यदानसमयः ।

दर्शनप्रतिभूर्यस्तु देशे काले च दर्शयेत् ।
यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत् ॥

(१) यो यस्य दर्शनप्रतिभूरभूत् यत्र देशे काले च धनिकस्य तद्दर्शनापेक्षा तत्र त दर्शयेदित्यर्थः । दर्शितश्चेत्प्रातिभाव्यादसौ मोच्य इत्याह स एव–यद्यसाविति । +स्मृच.१४९

दर्शनप्रतिभूर्यस्तु देशे काले न दर्शयेत् ।
निबन्धमावहेत्तत्र दैवराजकृतादृते ॥

---

२१ व्यकवत्; **स्मृचि.**१२ च (तु) स्व (स्वां) शेषं व्यकवत्, याज्ञवल्क्यः; **व्यप्र** २५५; **व्यउ** २७ तो (ते), **विता** ५३४ (=); **सेतु.**२३ व्यकवत्; **प्रका.**८५ स्मृचवत्, क्रमेण बृहस्पतिः.

(१) **अप.**२।५३ वादेषु विश्वास (विश्वासविवाद) कारयेदेव (दापयेदेव); **व्यक.**११६ अपवत्; **स्मृच** १४८; **विर** ४१ कारयेदेव (दापयेद्देय) शेष अपवत्; **पमा.**२४९ ग वि (गवि); **विचि.**१९ (=) विरवत्; **नृप्र.**२१; **सवि.**२४७ नो (सो); **चन्द्र** १५ र्यये (र्ययः); **व्यप्र.**२४८ थाय (थेषु) ग (र्य्यं); **व्यउ.**२८; **प्रका** ८९ गं (र्य्यं); **समु.**७७; **विव्य.** २७ (=) विरवत्.

+ व्यप्र. स्मृचवत् ।

(१) **व्यक.**११६; **विर.**४२.

(२) **स्मृच.**१४९ स्तु (स्त), **सवि** २४७, **व्यप्र.**२४७, **व्यउ.**२८, **प्रका.**९० स्मृचवत्.

(३) **अप.**२।५३ स्तु (स्त) दैव (चैवं), **व्यक.**११६, **स्मृच.**१४९ नप्र (ने प्र), **विर.**४१ स्तु (त्र) देशे काले (काले देशे) दैवराज (राजदैव); **पमा.**२४७ ले न (ले च) न्धमा (न्धं वा) बृहस्पतिः, **विचि.**२० वहे (हरे); **नृप्र.**२१ देशे

निबन्धं देयद्रव्यमावहेत् धनिने प्रापयेत् । दैवकृतं दीर्घरोगज्ञातिमरणादि । राजकृतमासेधनबन्धनादि ।
स्मृच.१४९

नष्टस्यान्वेषणार्थं तु देयं पक्षत्रयं परम् ।
यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत् ॥

यदा तु दर्शनप्रतिभूः संप्रतिपन्ने काले अधमर्णं दर्शयितुमसमर्थः तदा तदन्वेषणाय पक्षत्रयं दातव्यम् । तत्र यदि त दर्शयति तदा मोक्तव्योऽन्यथा प्रस्तुतं धन दाप्यः ।
मिता.२।५७

काले प्रतीते प्रतिभूर्यदि तं नैव दर्शयेत् ।
स तमर्थं प्रदाप्यः स्यात्प्रेते चैवं विधिः स्मृतः ॥

(१) प्रतीते प्रतिपन्ने अन्वेषणार्थं कल्पित इति यावत् । तमर्थं दर्शनीयाद्यलभ्य, एवंविधिः स तमर्थं प्रदाप्यः स्यादिति विधिः । यदि प्रतिभुवा दर्शनीयो दैवकृते राजकृते वा निमित्ते असति न दर्शितः तदैव प्रागुक्तो विधिः ।
+स्मृच.१४९

+ व्यप्र. स्मृचवत् ।

काले (काले देशे) दैव (देव); **व्यप्र** २४९ स्तु (स्त); **व्यउ.** २९ त्र (स्य), **व्यम.**१४९ व्यप्रवत्; **सेतु.**२१ स्तु (त्र) देशे काले (काले देशे) वहे (हरे); **प्रका.**९० स्मृचवत्; **समु.**७७ व्यप्रवत्; **विव्य.**२७ स्तु (त्र) वहे (हरे).

(१) **मिता.**२।५७ देय (दाप्य); **अप.**२।५३ मितावत्; **स्मृच.**१४९; **पमा.**२४८; **नृप्र.**२१; **सवि.**२४७ उत्त.: २४८; **व्यप्र.**२४७ उत्त. : २४९, २५४; **व्यउ.**२८ उत्त.: २९; **व्यम** ७८; **विता.**५३१ (=); **प्रका.**९०; **समु.**७७.

(२) **मिता.**२।५७ ले प्र (ले व्य) स तम .. स्यात् (निबन्धं दापयेत्तत्तु), **व्यक.**११६ ले प्र (ले व्य) स तम ... स्यात् (निबन्धं दापयेत्तत्र); **स्मृच.**१४९; **विर.**४२ व्यकवत्; **पमा.**२४८ धिः स्मृत. (धीयते), **विचि.**२० मितावत्; **स्मृचि.**११ प्रती (व्यती) नैव दर्श (न प्रदाप) स तम स्यात् (निबन्ध दापयेत्तत्त) व (क) बृहस्पतिः, **नृप्र.**२१ (स तमर्थं प्रदातव्यः प्रेते चैव विधीयते); **सवि.**२४८ ले प्र (लेऽप्य) दि त (दीद) प्रेते (ऋणे); **चन्द्र.**१६ प्रती (व्यती) नैव (न प्र) स तम स्यात् (निरुद्धमाहरेन्नत्र); **व्यप्र.**२४९ व (ष); **व्यउ.**२९; **विता.**५३१ (=) प्रती (व्यती) (निबन्धमाह्रयेत्तत्रदैवराजकृताद्दते); **सेतु.**२१ प्रती (व्यती) तं नै (तत्रै) स तम. . स्यात् (निबन्ध दापयेत्तत्र); **प्रका.**९०; **समु.**७७; **विव्य.** २७ मितावत्

(२) दैवराजोपघाते तु उपघातकालेऽतीते यो न दर्शयेत् सोऽपि निबन्ध दद्यात् । प्रेते चैवं विधिः स्मृतः, प्रेतेऽप्यधमर्णे दर्शनप्रतिभूर्धनं दद्यादित्यर्थः। ×विर.४२

देशकालौ क्रियाकारे यद्यल्पमपि लङ्घयेत् ।
साधितं प्रतिभूर्दाप्यस्तमर्थं साधिते विधिः॥

क्रियाकारे दिव्यकृतौ यौ देशकालौ तौ यदि शपथप्रतिभूरल्पमपि लङ्घयेत् तत्र दिव्यं न प्रवर्तयेत्, तदाऽसावर्थः प्रतिभूदेयत्वेन साधितो भवतीति तमर्थं प्रतिभूर्दाप्यः । साधिते अयमेव विधिः प्रकारो मत इत्यर्थः ।
विर.४२

प्रातिभाव्यद्रव्यदान कियत्पुरुषपर्यन्तम्

गृहीत्वा बन्धकं यत्र दर्शनेऽस्य स्थितो भवेत् ।
विना पित्रा धनात्तस्माद्दाप्यः स्यात्तद्गुणं सुतः ॥

(१) यत्र दर्शनप्रतिभः प्रत्ययप्रतिभूर्वा बन्धकं पर्याप्तं गृहीत्वा प्रतिभूर्जातस्तत्र तत्पुत्रा अपि तस्मादेव बन्धकात् प्रातिभाव्यायातमृणं दद्युरेव । यथाह कात्यायनः —गृहीत्वेति । दर्शनग्रहण प्रत्ययस्योपलक्षणार्थम्। विना पित्रा पितरि प्रेते दूरदेशं गते वेति । *मिता २।५४

(२) स्वविस्रम्भार्थमधमर्णार्दर्थं गृहीत्वा यो दर्शनप्रतिभूत्वमापद्य स्थितः सस्थितो मृत इति यावत् । तत्सुतो वादिना धनिना ऋणिकार्थधारणनिबन्धनं प्रातिभाव्यमिति विभाव्य याच्यमानं प्रातिभाव्यागतमृणं दाप्य इत्यर्थः । यद्यपि तत्सुतग्रहणाद्दर्शनप्रतिभूसुतविषयोऽयमपवादः न प्रमाणप्रतिभूसुतविषय इति प्रति-

× चन्द्र. विरवत् । * पमा., सवि., व्यप्र. मितागतम् ।

(१) **व्यक** ११६ वल्प (थेक) प्यः (र्प्य) ते (तो); **विर.**४२.

(२) **मिता.**२।५४; **व्यक.**११७ नेऽ(न) विना ...स्मात (विभाव्य वादिना तत्र); **स्मृच.**१५१ त्र (स्तु) नेऽस्य स्थितो भवेत् (नप्रतिभूः स्थितः) दृणं सुतः (त्सुतोऽप्यृणम्); **विर.** ४३ वे (व) शेषं व्यकवत्; **पमा.**२५१; **विचि.**२० व्यकवत्; **स्मृचि.**११ नेऽ(न); **नृप्र.**२१; **सवि.**२४९ (=); ऽस्य (यः); **चन्द्र.**१६ सुतः (सुतैः) शेषं व्यकवत्; **व्यप्र.**२५१; **व्यउ.**२९ नेऽ(न); **व्यम.**७९ नेऽ(न); **विता.**५२९ यत्र (त्वत्र) स्य (स्या); **सेतु.**२१ विना ... स्मात् (विभाव्यो वादिना तत्र); **प्रका.**९० स्मृचवत्; **समु.**७८ स्मृचवत्पूर्वार्धः, विना ...स्मात् (विभाव्य वादिना तत्र) दृणं सुतः (त्सुता ऋणम्); **विव्य.**२८ व्यकवत्, नारदः.

भाति तथापि प्रतिभूसुतदापने प्रमीतस्य पितुरधमर्णादर्थग्रहणपूर्वकं प्रातिभाव्यमात्रं विवक्षितं निमित्तम्। न तु दर्शनप्रतिभूसुतत्वमपि इत्यस्मादेव वचनादपवादोऽन्यत्रापि विवक्षितनिमित्तसद्भावे स्मृत एवेति मन्तव्यम्। विवक्षितनिमित्तद्योतनार्थमेव च मनुना प्रश्नोत्तरत्वेनापवादो दर्शितः–'अदातरि पुनरि'त्यादिना। स्मृच.१५१

(३) लग्नकसुतस्य देयं कलारहितम्। *विचि.२०

(४) द्रव्यग्रहणे प्रातिभाव्याङ्गीकारे तु पुत्रपौत्राभ्यामपि सवृद्धिक देयम्। तथा च कात्यायनः—गृहीत्वा बन्धकमिति। व्यम.७८

[1]प्रातिभाव्यागतं पौत्रैर्दातव्यं न तु तत्क्वचित्।
पुत्रेणाऽपि समं देयमृणं सर्वत्र पैतृकम्॥

(१) प्रातिभाव्यागतमृणं सर्वत्र पुत्रेण समं देयम्। पौत्रैर्न देयमित्यर्थः अप.२।५४

(२) पुत्रेण निष्कलं देयम्। विर.४४

अधमर्णात् प्रातिभाव्यद्रव्यग्रहणप्रकारः

[2]प्रातिभाव्यं तु यो दद्यात्पीडितः प्रतिभावितः।
त्रिपक्षात्परतःसोऽर्थं द्विगुणं लब्धुमर्हति॥

प्रतिभावितः प्रतिभूत्वेन कारितः। त्रिपक्षात्प्राक्तु सममेव लब्धुमर्हतीत्यर्थोऽपि गम्यते। यद्यपि प्रायेण प्रीत्यैव प्रतिभूर्भवति न च प्रीतिदत्ते वृद्धिरस्ति न च द्वैगुण्यमेतावति काले धर्म्यं भवितुमर्हति तथापि वचनबलात्सर्वं भविष्यति। न हि वचनस्यातिभारोऽस्तीत्यवगन्तव्यम्। एवमुक्तो द्विगुणलाभो हिरण्यविषयः। स्मृच.१५३

[3]यस्यार्थे येन यद्दत्तं विधिनाऽभ्यर्थितेन तु।
साक्षिभिर्भावितेनैव प्रतिभूस्तत्समाप्नुयात्॥

(१) यस्य प्रातिभाव्यकारयितुः कृते येन प्रतिभुवा धनिकादिभिर्याचितेन साक्ष्यादिभिश्चान्यार्थमर्पितार्थोऽयमिति अवधृतेन यत्स्वकीयं सुवर्णपशुधान्यवस्त्रादिक धनिकादिभ्यो दत्त तत्सममेवार्थं प्रातिभाव्यकारयितुः सकाशात्स प्राप्नुयादित्यर्थः। ×स्मृच.१५३

(२) एतच्च त्रिपक्षादर्वाक्। याज्ञवल्क्यायुक्तद्वैगुण्य तु त्रिपक्षादूर्ध्वमित्यविरोधः। ग्रहेश्वरमिश्रैस्तु यस्यार्थे येन यद्दत्तमित्यादि प्रतिभुवा धनिकसमाधानाय यदन्यदपि दत्त स्यात्तदपि तेन ऋणिकपार्श्वे ग्रहीतव्यमित्यत्रार्थेऽवतारितमिदम्। विर.४६

पितामहः

प्रातिभाव्यद्रव्यदानम्

[4]आधिपालकृतस्त्वाधिर्मितकालोपलक्षितः।
न चेत्स धनिने दत्तस्तस्याधेस्तैः समर्पणम्॥

(१) अचिरेण ऋणी स्वापराधादिनाऽन्याक्रान्तं यदि नाधिमर्पयति तदाऽस्माभिराधिः समर्प्यते इति वदद्भिर्यैः प्रतिभूभिर्य आधिरर्पणीयतयाऽङ्गीकृतः तस्य ऋणिकेनासमर्पितस्य तैः समर्पण कार्यमित्यर्थः। तैरिति बहुवचनमेकत्वादिसंख्योपलक्षणार्थम्। स्मृच.१५०

(२) एवमभयादिप्रतिभूष्वपि तुल्यन्यायतया योज्यम्। अभयप्रतिभूरधमर्णादुत्तमर्णस्य भयोपस्थितौ तत्प्रतीकारमाचरेत्। तद्भयेन द्रव्यक्षतौ तदीयं तद्द्रव्यं दद्यात्। प्रमाणप्रतिभूः प्रमाणप्रदर्शन कारयेत्। अशक्तौ विवादास्पदीभूत धन दद्यात्। वादप्रतिभूर्वाद-

---

* चन्द्र. विचिवत्।

(१) **अप.**२।५४; **व्यक.**११७; **विर.**४४; **दीक.**३७ पौ (पु) तु तत् (ततः); **चन्द्र.**१६ तत्क (कृत्व); **व्यप्र.**२५०; **व्यम.**७८ न तु (तु न); **विता.**५२८ तु तत् (ऋणं).

(२) **अप.**२।५६; **स्मृच.** १५३; **पमा.** २५३ पीडितः (दण्डितः); **नृप्र.**२१ पमावत्; **व्यप्र.**२५३ तु (च) लब्धु (दातु); **व्यउ.**३१ व्यप्रवत्; **विता.**५३० तु (च) भावि (भूत्व); **प्रका.**९१; **समु.**७८.

(३) **अप.**२।५६; **व्यक.**११८ ऽभ्यर्थि (कल्पि) भावि (साधि), **स्मृच.**१५३ धिना (वादे) त्समा (मवा); **विर.**४६ र्थि (र्दि), **विचि.**२१ विधिनाऽभ्यर्थि (धनिना पीडि) स्तत् (स्त), **स्मृचि** १२ (यस्यार्थे न च यद्दत्तं धनिना पीडितेन वै); **चन्द्र.**१७ विधिनाऽभ्यर्थि (धनिना पीडि); **वीमि.** २।५३ चन्द्रवत्; **व्यप्र.**२५२ विरवत्; **व्यउ.**३० यस्यार्थे येन यद्दत्त (परस्यार्थे येन दत्त), **सेतु.**२३ चन्द्रवत्; **प्रका.** ९१ स्मृचवत्; **समु.**७८ स्मृचवत्; **विभ्य.**२८ यद्दत्त (दत्त स्यात्) शेष चन्द्रवत्.

(१) **स्मृच.**१५०; **व्यप्र.**२४९ मित (भिन्न) क्षितः (क्षणम्) त्स ध (त्स्वध); **व्यउ.**२९ मित (भिन्न) क्षितः (क्षणः) स्तैः (स्तत्); **प्रका.**९०; **समु.**७७.

×व्यप्र. स्मृचवत्।

पराजितस्याधमर्णस्य देयमुत्तमर्णाय दद्यात् पराजय-दण्डं च राज्ञे इति। ×व्यप्र.२४९-२५०

[1]यो यस्य प्रतिभूर्भूत्वा मिथ्या चैव तु गच्छति।
धनिकस्य धनं दाप्यो राज्ञा दण्डं च तत्समम्॥
[2]कुर्याच्चेत्प्रतिभूर्वादं ऋणिकार्थेऽर्थिना सह।
सोपसर्गस्तदा दण्ड्यो विवादाद्द्विगुणं धनम्॥

उपसर्गो विघ्नकारी। स्मृच.१५३

व्यासः

प्रातिभाव्यनिमित्तानि

[3]लेख्येऽकृते च दिव्ये वा दानप्रत्ययदर्शने।
गृहीतबन्धोपस्थाने ऋणिद्रव्यार्पणे तथा॥

प्रतिभुवो ग्राह्या इति शेषः। लेख्येऽकृते लेख्या-दर्शने दिव्ये वा अकृत इत्यनुषङ्गः। एतदुक्तं भवति। विवादनिर्णये दृष्ट अदृष्ट वा प्रमाणं यत्र कालव्यवधानेन भविष्यति तत्रापि प्रमाणाय प्रतिभूर्ग्राह्य इति। दान-प्रत्ययदर्शनानि प्रागेव व्याख्यातानि। गृहीतबन्धोपस्थान याचितकत्वेन क्रेतुर्दर्शनाद्यर्थं वा उत्तमर्णानुज्ञयाऽधमर्ण-गृहीतस्य बन्धस्य पुनरर्पणम्। *स्मृच.१४८

प्रातिभाव्यद्रव्यदान कियत्पुरुषपर्यन्तम्

[4]विप्रत्यये लेख्यदिव्यदर्शने चाकृते सति।
ऋणं दाप्याः प्रतिभुवः पुत्रं तेषां न दापयेत्।
दानवादप्रतिभुवौ दाप्यौ तत्पुत्रकौ तथा॥

विप्रत्यये वितथे प्रत्यये प्रत्ययप्रतिभूर्दाप्य इत्यर्थः। एवमन्येषामभयगृहीतबन्धोपस्थानादिप्रतिभुवा अङ्गी-कारानङ्गीकारावालोच्य प्रत्ययप्रतिभूवद्दानप्रतिभूवद्वा दापनविधय ऊह्याः। स्मृच.१५१

[5]ऋणं पैतामहं पौत्रः प्रातिभाव्यागतं सुतः।
समं दद्यात् तत्सुतौ तु न दाप्याविति निश्चयः॥

(१) प्रातिभाव्यव्यतिरिक्तं पैतामहं ऋणं पौत्रः सम यावद्गृहीतं तावदेव दद्यान्न वृद्धिम्। तथा तत्सुतोऽपि प्रातिभाव्यागतं पित्र्यमृणं सममेव दद्यात्। तयोः पुत्र-पौत्रयोः सुतौ पौत्रप्रपौत्रौ च प्रातिभाव्यायातं अप्राति-भाव्यं च ऋणं यथाक्रममगृहीतधनौ न दाप्याविति। ×मिता.२।५४

(२) पैतामहं ऋणं समं वृद्धिरहितं दद्यात्। एवं प्राति-भाव्यनिमित्तं प्रतिभूपुत्रः। तयोरधमर्णपौत्रप्रतिभूपुत्रयोः पुत्रावृणं प्रातिभाव्यागतं च न दाप्यौ। *अप.२।५४

उतथ्यः

[6]प्रतिभुवा प्रदत्तं यदृष्टे ऋणिके धनम्।
द्विगुणं न प्रतिभुवे प्रदेयमृणिकेन तत्॥

प्रष्टुं योग्यदेशकालस्थर्णिकादिविषयमेतत्। तेना-न्यत्रापृष्टेऽपि ऋणिके नायं प्रतिषेधः। किं तु पृष्टतुल्य-तैव लग्नकालग्रकोपक्षयप्रतिक्रिया साधारणीमपि लग्न-कोपक्षयप्रतिक्रियाविधिप्रसङ्गात्। स्मृच.१५३

बृद्धवसिष्ठः

प्रातिभाव्यनिमित्तानि। प्रातिभाव्यद्रव्यदानाधिकारः

कियत्पुरुषपर्यन्तम्।

[7]नव प्रतिभुवो लोके पृथगर्थसमाश्रिताः।

× सवि., व्यप्र., व्यउ, विता. मितावत्।

* व्यक., स्मृच., विर., चन्द्र. अपवत्।

(१) **मिता**.२।५४; **अप**.२।५४; **व्यक**.११७; **स्मृच**.१५२; **विर**.४४; **पमा**.२५०; **विचि**.२० (समं दाप्यस्त-त्सुतस्तु न दाप्य इति निश्चयः); **स्मृचि**.११ (=), **नृप्र**.२१ सुतः (पुनः); **सवि**.२४९ (सम दद्यात्तु तत्पुत्रो न दद्यादिति निश्चयः). २५२ दद्यात् (दद्युः); **चन्द्र**.१६ तौ (तः) प्याधि (प्य इ); **वीमि**.२।५० पौत्रः (देय) (सम दाप्यस्तत्सुतस्तु न दाप्य इति निश्चयः); **व्यप्र**.२५०; **व्यउ**.२९; **व्यम**.७८; **विता**.५२८ (तु०) विति+(हि); **राकौ**.४०० व्यागत (व्य गत) सम (स्वय); **सेतु**.२२; **प्रका**.९१; **समु**.७८; **विव्य**.२८ व्या (व्य) दद्यात् (दाप्यः) तौ (तः) प्याधि (प्य इ).

(२) **स्मृच**.१५३; **प्रका**.९१; **समु**.७८.

(३) **अभा**.५५.

× शेष स्मृचवत्। * पमा. स्मृचवत्।

(१) **स्मृच**.१५३; **पमा**.२५२ दण्ड च (दण्डेन); **व्यप्र**.२५२ (=); **व्यउ**.३० धनं (ऋणं) ज्ञा (जा); **प्रका**.९१; **समु**.७८.

(२) **स्मृच**.१५३; **पमा**.२५२ च्चेत् (च्च) धनम् (दमम्); **व्यप्र**.२५२; **व्यउ**.३०; **विता**.५२७ यें (र्थो) धनम् (दमम्); **प्रका**.९१; **समु**.७८ धनम् (दमम्).

(३) **स्मृच**.१४८; **पमा**.२४९ वा (च); **नृप्र**.२१ वा (च); **व्यप्र**.२४८; **व्यउ**.२८ दान (दाने) ऋणि (ऋण); **प्रका**.८९; **समु**.७७.

(४) **स्मृच**.१५० तृतीयपादः : १५१; **पमा** २५१ चा (वा); **विता**.८४ वाद (वादे) तृतीयार्धम्; **प्रका**.९०; **समु**.७७-७८.

अन्योन्यार्थस्य पूरस्था स्वस्वनामार्थनिर्गमाः ॥

उक्तं च वसिष्ठेन तदभिलिख्यते—नवेति। अभा.५५

सामान्यग्राहकोऽत्रैको द्वितीयः स्वांशदायकः।
दर्शनेऽथ उपस्थाने प्रत्यये धर्मजल्पिते ॥
पालने च सतौ (?) शीले नव प्रतिभुवो ह्यमी।
सुता अपि तयोर्दद्युर्यौ स्थितौ द्रव्यदायकौ ॥
शेषाः प्रतिभुवः सन्न न दाप्यन्ते न तत्सुताः ॥

अत्र सामान्यग्राहकांशावेव दायिनौ। शेषसन्नप्रतिभुवा द्रव्यदाननिषेधो विहितः। स्वस्वनामार्थकारित्वमेव तेषाम्। एतदपि न तत्सुतानामिति। पुनश्चोक्तं तेनैव मुनिना विशिष्टतरम्। अभा.५५

धनिन ऋणिकानां हि ये स्युः प्रतिभुवः स्थिताः।
ते गवामिव गोपालाः रक्षपालास्तपोवने ॥
समर्पयन्ति धनिके जीवसन्तकाम् (?)।
राजदैविकहान्या तु रक्षपालो न गृह्यते ॥
प्रतिभूः प्राणरक्षां यः करोति धनिकर्णिनोः।
अनेन किं न पर्याप्तं प्रतिभूः प्रकृतस्तयोः ॥
ऋणिद्वयं तध्दनिन ऋणिकस्य धनिद्वयम्।
प्रतिभूर्व्यवहाराङ्गं न पीडयमुभयोरपि ॥

एवमिम लोकाचाराविरुद्धार्थं युक्तियुक्तं धर्ममनुसरता वृद्धवसिष्ठेन दर्शनादिसप्तप्रतिभुवां संव्यवहारभङ्गरक्षाप्रतिष्ठमाननेनेति। अभा.५५

व्याघ्रः

प्रतिभूप्रकारा

[1]पाददर्शी च विश्वास्यो ह्यर्थदश्चेति कीर्तिताः ॥

वृद्धहारीतः

प्रातिभाव्यद्रव्यदानम्

[2]प्रातिभाव्यमृणं साक्ष्यं देयं तस्मै यथोचितम्।
दीयते स्यात्प्रतिभुवा धनिने तु ऋणं यथा ॥
द्विगुणं तत्प्रदातव्यं दण्डं राज्ञे च तत्समम्।
पुत्रादिभिर्न दातव्यं प्रातिभाव्यमृणं स्त्रिया ॥

लघुहारीतः

[3]स्वादुको वित्तहीनः स्यात् लग्नको वित्तवान् यदि।
मूलं तस्य भवेद्देयं न वृद्धि दातुमर्हति ॥
द्विगुणं त्रिगुणं वाऽपि यः साधयति लग्नकम्।
राजग्राह्यं च तद्द्रव्यं साधको दण्डमर्हति ॥

(१) मभा.१२।३८. (२) बृहास्मृ.७।२५२-२५३.
(३) लहास्मृ.४७-४८.

ऋणप्रतिदानम्

गौतमः

ऋणप्रतिदातारः

[1]रिक्थभाज ऋणं प्रतिकुर्युः।

(१)यस्य धन ये भजन्ति गृह्णन्ति त एव तद्दणं दद्युरित्यर्थः, न दायादमात्रेण। पुत्रस्त्रीहारिणामपि ग्रहणार्थं बहुवचनम्। तथाह नारदः—'धनस्त्रीहारिपुत्राणा ऋणभाग्यो धन हरेत्। पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनपुत्रयोः' ॥ इति। एव च रिक्थभाक्त्वे सत्यसति च पुत्रेणावश्यं दातव्य स्त्रीहारिणा च। अन्यैस्तु रिक्थ भाग्भिरेव। पुत्राणा च मध्ये येषा रिक्थभाक्त्व ऋण भाक्त्व च विद्यते त एव ऋणं दद्युः, न पुत्रमात्रेणेति द्रष्टव्यम्। मभा.

(२) ये यस्य रिक्थभाजस्ते तद्दण प्रतिदद्युः। पुत्रपौत्रैस्तु रिक्थाभावेऽपि देयम्। गौमि.

पुत्रादिभिः अप्रतिदेयानि ऋणादानि

[2]प्रातिभाव्यवणिक्शुल्कमद्यद्यूतदण्डा न पुत्रानध्याभवेयुः।

प्रतिभुवस्त्रयः। यथाऽऽह व्याघ्रः—'पाददर्शी च

(१) गौध.१२।३७; मिता.२।१४५; मभा.; गौमि.१२।३७; स्मृच.२८६ प्रति (अपा) स्मरणम्; पमा.५५३; स्मवि.३८४; व्यउ.१६० रिक्थभाज (रिक्थिन); विता ४११,४५४.

(१) गौध.१२।३८; विश्व.२।२६८ भवे(वहे); मेधा ८।१५९ न पुत्रानभ्या (पुत्रान्नाभ्या) स्मृत्यन्तरम्; मिता. २।४७ (मद्यशुल्कद्यूतकामदण्डान्पुत्रा नाध्याबहेयुः); मभा.; गौमि.१२।३८ प्रा (प्र)शंसे मेधावत्; विर.५८; विचि.२५; चन्द्र.२१ दण्डा वेयुः (दण्डान् पुत्रा नाध्याभिभवेयुः); वीमि.२।४७ दण्डा...वेयुः (दण्डान् पुत्रानध्यावहेयुः); व्यप्र. २६५ मितावत्; विता.५१७ (मद्यशुल्कद्यूतदण्डा न पुत्रानभिभवेयुः); सेतु.२९ दण्डा ध्या (दण्डं पुत्रान्नाध्यभि); लमु.८४ (मद्यशुल्कद्यूतदण्डा न पुत्रानध्याभवेयुः).

विश्वास्यो ह्यर्थदश्चेति कीर्तिताः'। इति । अत्र दानप्रतिभुव मुक्त्वा इतरयोर्ग्रहणम्। कुतः? 'दानप्रतिभुवि प्रेते दायादानपि दापयेत्' इति मनुवचनात् । प्रतिभूनिमित्तं यद्दणं तत्प्रातिभाव्यम्। वणिग्वाणिज्यनिमित्त चेत्यं :। यथा मूल्यं ददामीति परिभाष्य कस्यचित्सकाशे द्रव्यं गृहीत्वा वाणिज्यकरणार्थं देशान्तरं गत्वा म्रियेत, पुत्रेण तदप्राप्तं च भवति ततस्तद्दण पुत्रस्योपरि न भवतीत्यभिप्रायः । शुल्क आसुरादिविवाहे शुल्क प्रतिश्रुत्य विवाह कृत्वा यद्यसौ म्रियते तच्छुल्क पुत्रस्योपरि न भवतीति। मद्यं मद्यनिमित्तं ब्राह्मणस्य प्रतिषिद्धत्वात् क्षत्रियादिविषयमेतद्द्रष्टव्यम् । द्रव्य ददामीति मद्यपाने कृते द्रव्यमदत्वाऽसौ म्रियेत तदपि पुत्रस्य न भवतीति । तथा द्यूतनिमित्त च ऋणम् । तथा दण्डनिमित्त च व्यवहाराऽपजयनिमित्तम्। नैते पुत्रानध्याभवेयुः पुत्राणामुपरि न भवन्तीत्यर्थः। रिक्थभाक्त्वे सति द्रष्टव्यम्। ×मभा.

हारीतः

ऋणपत्रप्रामाण्यम्

[1]यावत् स्थितिप्रमाणं स्याल्लिखितं निरपाकृति ॥

अपाकरणं नामात्र दृष्टधनप्रवेशलेखनं प्रतिपत्र साक्ष्यादि सम्यक्स्थले व्यवहारनिवेशन चेत्येषमादि। सवि.२५९

वसिष्ठः

पुत्रादिभिः अप्रतिदेयानि ऋणादीनि

[2]प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्।
दण्डशुल्कावशिष्टं च न पुत्रो दातुमर्हति ॥

विष्णुः

ऋणप्रतिदातारः

[3]धनग्राहिणि प्रेते प्रव्रजिते द्विदशाः समाः प्रोषिते वा तत्पुत्रपौत्रैः धनं देयम्। नातःपरमनीप्सुभिः।

(१) प्रव्रजिते संन्यस्त इत्यर्थः। द्विदशाः समाः प्रोषिते वा विंशतिवर्षव्यापितया वा प्रवासे धनग्राहिणा कृत इत्यर्थः। नातःपरमनीप्सुभिरित्यस्य विंशतिवर्षादूर्ध्वं न विलम्बितं कार्यम् । ऋणप्रतिदानानीप्सुभिरपीत्यर्थः। अथवाऽयमर्थः। अतः परं पौत्रेभ्यः परं ऊर्ध्वं ये जातास्तैः प्रपौत्रादिभिरनीप्सुभिर्न देयमिति । एतदुक्त भवति। पुत्रपौत्राणामेव जात्यन्धादिव्यतिरिक्तानां निरुपाधिकं रिक्थार्हत्व नान्येषा प्रपौत्रादीनामिति रिक्थग्रहणाभावे प्रपौत्रादिभिरवश्य पुत्रपौत्रवन्न देयमिति। स्मृच.१७१

(२) नातः परं अतस्तृतीयात्पुरुषात्परं चतुर्थादिभिर्न देयम्। अनीप्सुभिरित्यनेन प्रपितामहादीनां यदि हितेच्छा तदा तेषामपि ऋण चतुर्थादिभिर्देयमित्युक्तम्। विर.५०

(३) 'नातः परमभीप्सुभिरि'त्यपि पाठस्तस्यायमर्थः। विंशतिवर्षादूर्ध्वं न विलम्बः कार्यः ऋणप्रतिदानमभीप्सुभिरिति। व्यप्र.२६५

(४) द्विदशाः समा इति कुटुम्बार्थकृताद्दणादन्यत्रेति स्मृतिसारः। वीमि.२।५०

रिक्थग्राहस्त्रीग्राहादिऋणप्रतिदातृविचारः

[4]सपुत्रस्य वाऽप्यपुत्रस्य वा रिक्थग्राही ऋणं दद्यात्।

तद्दायानर्हपुत्रस्य सद्भावेऽप्यसद्भावेऽपि वा तदनादरेण रिक्थग्राही ऋणं दद्यादित्येवंपरम्। *व्यप्र.२६७

[5]विधनस्य स्त्रीग्राही।

× गौमि. मभावद्भावः ।

(१) सवि.२५९. (२) वस्मृ.१६।२६.

(३) विस्मृ.६।२७-२८ दशाः (दश) प्रोषिते (प्रवसिते); व्यक.११९ प्रोषिते (प्रवसिते); स्मृच.१७१; विर.५० व्यकवत्; विचि.२२ प्रोषि ...धन (प्रवसिते वा तत्र पुत्रपौत्रैः); सचि.२५८; चन्द्र.१९ धन (ऋण) प्रोषि ... धनं (प्रवसिते वा तत्पुत्रपौत्रैः) पर (पूर्व); वीमि.२।५० दशाः समाः (दशाऽसमाः) प्रोषि. . धन (प्रवसिते वा पुत्रपौत्रैर्वा ऋणं); व्यप्र.२६५ (धनं०) ना (वा) नी (भी); व्यम.८२ (नातः ... प्सुभिः०); वित्ता.५११; प्रका.९९; समु.८४ धनं (ऋणं).

(१) विस्मृ.६।२९ वाऽप्यपु (वाऽप्यु); व्यक.१२२ वा रि (रि); स्मृच.१७२ ऋणं (धनं); विर.६१ वाऽप्यपुत्रस्य वा (अपुत्रस्य च) ऋण (धनं); व्यप्र.२६७ वा रि (रि) (ऋणं०); व्यम.८३; समु.८५ स्मृचवत्.

(२) विस्मृ.६।३० विध (निर्ध); व्यक.१२२; स्मृच.१७२; विर.६१ वि (अ); व्यप्र.२६७ ग्राही (हारी); समु.८५ ग्राही (धनग्राही).

---

* 'रिक्थग्राही' इति याज्ञवल्क्यवचनस्य स्मृच. व्याख्याने इदमेवोक्तम्।

(१) सपुत्रस्य वाऽप्यपुत्रस्य वेति अनुवर्तते । विधनस्येति वदन् धनहारिरहितस्येति दर्शयति ।

+स्मृच.१७२

(२) यदि धनाभावे रिक्थग्राही नास्ति तदा यो यदीया स्त्रिय भार्यात्वेन स्वीकरोति स तदीयमृण दद्यात् । वै.

स्त्रीपतिपितृपुत्रकृतर्णसाध्यताविचारः । विभक्ताविभक्तकृतकुटुम्बार्थकृतर्णप्रतिदानविचारश्च ।

न स्त्री पतिपुत्रकृतम् । न स्त्रीकृतं पतिपुत्रौ ।

तदुक्तदेयभूतव्यतिरिक्तविषयमिति मन्तव्यम् ।

स्मृच.१७५

तत्सामान्येन प्रतिषेधबोधक विशेषेण विधायक-प्रागुक्तवचनविषयव्यतिरिक्तविषयेऽवतिष्ठत इत्यविरुद्धम् ।

स्मृच.१७७

न पिता पुत्रकृतम् ।

अविभक्तैः कृतमृणं यस्तिष्ठेत् स दद्यात् ।

पैतृकमृणमविभक्तानां भ्रातृणां च ।

विभक्ताश्च दायानुरूपमंशम् ।

(१) अविभक्तैरिति बहुवचन पूर्ववात्र चाऽविवक्षितम् ।

स्मृच.१७६

(२) अविभक्तैरेकच्छायाश्रितैर्यद्दण कृत तदेकोऽपि यस्तेषा मध्ये तिष्ठेत् स दद्यात्, पैतृकमप्यविभक्ताना भ्रातृणा मध्ये यस्तिष्ठेत् स सर्वमेकोऽपि दाप्यः, विभक्ताश्च भ्रातरो यथाश दद्युरित्यर्थः । विर.५३

(३) विभागात्प्राक् पित्रा कृतमृणमविभक्ताना भ्रातृणा चकारात् पौत्राणा संभूय देय भवति । वै.

गोपशौण्डिकशैलूषरजकव्याधस्त्रीणां पतिर्दद्यात् ।

तदधीनवृत्तित्वात् । वै.

वाक्प्रतिपन्नं कुटुम्बिना देयम् । कस्यचित् कुटुम्बार्थे कृतं च ।

ऋणमिति शेषः । कुटुम्बार्थमपि परेण कृत ऋणं गृहिणा चेत् प्रतिपन्न दातु स्वीकृत, तदा तेन देयम् । कुटुम्बार्थकृत देयमेवेत्यर्थः । विर.५६

ऋणप्रतिदाने लेख्यादिविधि.

असमग्रदाने लेख्यासंनिधाने चोत्तमर्णः स्वलिखितं दद्यात् ।

सभाक्षिकमृणं ससाक्षिकमेव दद्यात् । लिखितेऽर्थे प्रविष्टे लिखितं पाटयेत् ।

लिखितार्थो गृहीतमृणम् । तस्मिन्नुत्तमर्णे प्रविष्टे सति तल्लिखित ऋणपत्र पाटयेच्छिन्द्यात् । वै.

कौटिलीयमर्थशास्त्रम्

ऋणप्रदातारः

प्रेतस्य पुत्राः कुसीदं दद्युः । दायादा वा रिक्थहराः सहग्राहिणः प्रतिभुवो वा । न प्रतिभाव्यमन्यत् ।

असंख्यातदेशकालं तु पुत्राः पौत्रा दायादा वा रिक्थं हरमाणा दद्युः ।

+ व्यप्र. स्मृचवत् ।

(१) **विस्मृ.**६।३१-३२; **व्यक.**१२२ (न स्त्री पतिपुत्रकृतम्०); **स्मृच.**१७५ व्यकवत् : १७७ (न स्त्रीकृत पतिपुत्रौ०); **विर.**५९ व्यकवत्; **विचि.**२८; **चन्द्र.**२४ पुत्रौ+(वा); **वीमि.**२।४६ व्यकवत्; **व्यप्र.**२७३, **सेतु.**२९: ३१६ स्मृच.१७७ वत्; **समु.**८६, **विव्य.**२९.

(२) **विस्मृ.**६।३३.

(३) **विस्मृ.**६।३४-३६; **व्यक.**१२० (मृण०); **स्मृच.**१७६ (पैतृ...णां च०); **विर.**५२ कृतमृण+(तदेकोऽपि यस्तेषा मध्ये) यस्तिष्ठे (तिष्ठे) मृणम (मप्य) णा च (णाम्); **व्यप्र.**२७५ ष्ठेत् (ष्ठति) (पैतृ.. मशम्०) : २७४ (अवि.. दद्यात्०) पैतृक ...तृणां (पैतृकमविभक्ता मातृक) (अंशम्०); **विता.**५०५ (पैतृकं मातृकं च विभक्ताश्च दाप्या अनुरूपमंशम्); **सेतु.**२७ विरवत्; **समु.**८६ मंशं +(दद्युः) शेषं स्मृचवत्.

(१) **विस्मृ** ६।३७.(२) **विस्मृ** ६।३८-३९, **स्मृच.**१७४ वाक् (प्राक्) (कुटुम्बिना०) कस्य (यस्य कस्य) कृत च (वा); **विर.**५५ वाक् (प्राक्) (कुटुम्बिना०) र्थे कृत च (र्थकृत वा), **समु** ८६ (कुटुम्बार्थे कृत च०) शेष स्मृचवत्.

(३) **विस्मृ.**६।२६, **व्यमा.**३१५ अदाने (वधाने); **व्यक.**१२९, **स्मृच.**१६३, **विर.**८०, **पमा.**२६०, **दीक.**४०; **नृप्र.**१९ (स्व०), **सवि.**२५४, **व्यप्र.**२७६; **बाल.**२।९३, **सेतु.**४०, **प्रका.**९५; **समु.**८१.

(४) **विस्मृ.**६।२४-२५ मृण (मास) तेऽर्थे (तार्थे); **व्यमा.**३१५ मृण (मर्थ), **व्यक.**१२९, **विर.**८१.

(५) **कौ.** ३।११.

दशवर्षोपेक्षितस्त्रीपतिपितृपुत्रकृतर्णसाध्यताविचारः

दशवर्षोपेक्षितमृणमप्रतिग्राह्यमन्यत्र बालवृद्धव्याधितव्यसनिप्रोषितदेशत्यागराज्यविभ्रमेभ्यः ।

दम्पत्योः पितापुत्रयोः भ्रातॄणां चाविभक्तानां परस्परकृतमृणमसाध्यम् ।

अग्राह्याः कर्मकालेषु कर्षका राजपुरुषाश्च । स्त्री वाऽप्रतिश्राविणी पतिकृतं ऋणं अन्यत्र गोपालकार्धसीतिकेभ्यः ।

पतिस्तु ग्राह्यः स्त्रीकृतं ऋणमप्रतिविधाय प्रोषित इति ।

अप्रतिदेयानि ऋणादीनि

प्रातिभाव्यं दण्डशुल्कशेषमाक्षिकं सौरिकं कामदानं च नाकामः पुत्रो दायादो वा रिक्थहरो दद्यात् ।

मनुः

कुटुम्बार्थे कृतमृण विभक्तैरपि देयम्

गृहीता यदि नष्टः स्यात्कुटुम्बार्थे कृतो व्ययः ।
दातव्यं बान्धवैस्तत्स्यात्प्रविभक्तैरपि स्वतः ॥

(१) उक्त येन गृहीतमृण तेन प्रतिदातव्यम्। तदभावे पुत्रपौत्रैस्तदभावे तद्दक्थहारी न तद्व्यतिरेकेणान्यस्य दान प्राप्तमिष्यते । अत्र क्वचिद्विपये तदर्थमिदमुच्यते । येन गृहीत धन स चेन्नष्टो मृतो देशान्तर गतो वा। कुटुम्बे च कृतो व्ययः । दातव्य, बान्धवैस्तद्भ्रातृतत्पुत्रपितृव्यादिभिः, प्रविभक्तैर्विभक्तधनैरपि स्वतः स्वधनादित्यर्थः । यावद् भ्रातरः सह वसन्ति तेषा यद्दण मुपजात तद्गृहमध्यादेव दीयत । तद्दक्थेऽस्य विभागः। यथोक्त 'पितृव्येणाविभक्तेन भ्रात्रा वा यद्दण कृतम् । मात्रा वा यत्कुटुम्बार्थ दद्युस्तत्सर्वमृत्विथनः ' ॥ इति । अविभक्तानामन्यतमेन यत्कुटुम्बार्थमृण कृत तत् भ्रातृपितृव्यतत्पुत्रादयः सर्वे दद्युर्न त्वकुटुम्बार्थमित्यर्थः । अविभक्तग्रहणात्तेषामेव तथाविधमृण संभवेत् प्रायः । न हि प्रविभक्ताः परकीयकुटुम्बकरणार्थमृण गृह्णन्तो दृश्यन्ते । प्रविभक्तैरपीत्याह । अपिशब्दादविभक्तैश्च । यदि कश्चिद् भ्रातृणा विभक्ताना स्वकुटुम्बभरणमकृत्वा प्रवसेदितरश्च महासत्त्वतया तदीय कुटुम्ब बिभृयात्, तत्र विभक्तेनापि भ्रात्रा पितृव्येण वा यद्दण कृत तदितरो दद्यादेव देशान्तरागतः । मेधा.

(२) अविभक्तो विभक्तो वा भ्रात्रादिसाधारणकुटुम्बव्ययार्थ विभक्तभ्रातृकुटुम्बव्ययार्थ च ऋण गृहीत्वा कुटुम्बव्ययकृत् मृतो बाधितो वा तदा तद्दण अविभक्तैर्विभक्तैर्वा ऋक्थिभिः स्वधनाद्दातव्यम्। *गोरा.

(३) स्वतो धनात् मृतसंबन्धिनः स्वीयाद्वा । +मवि.

(४) ऋणस्य ग्रहीता पितृव्यादि यदि नष्टः प्रोषितो वा मृतो वा स्यात्तदा रिक्थिभिर्विभक्तैस्तत्कुटुम्बव्ययाय कृतमृण दातव्य, स्वतः किमुताविभक्तैरित्यर्थः । एव वृत्तिकारेण व्याख्यातम् । अस्मिन् व्याख्याने वचनानन्तरे वा पृथक्वाविभक्तग्रहण स्यादिति मत्वा भाष्यकारेण प्रविभक्तधनैः पितृव्यादिभिः स्वतः स्वधनाद्दातव्य इत्यर्थ इति मनुवचनार्थ उक्तः । ×स्मृच.

प्रतिदानाशक्तौ करणपरिवर्तनम्

ऋणं दातुमशक्तो यः कर्तुमिच्छेत् पुनः क्रियाम् ।
स दत्त्वा निर्जितां वृद्धि करणं परिवर्तयेत् ॥

(१) वृद्धिद्विगुणीभूतमृण धनपरिक्षयाद्दातुमशक्तो यः स पुनः क्रिया कारयितव्यः । करण लेख्यसाक्ष्यादि परिवर्तयितव्यः । वृद्धि तु दद्यात् निर्जितां, यावती गणनया भवतीत्यर्थः । द्विगुणादधिक न ग्राह्यमिति यदुक्त तस्यायमपवादः, नैवो ह्यय प्रयोग इति । कुतः

---

* ममु गोरावत् । विर., मच., मन्द. गोरावद्भाव ।

+ शेष गोरावत् । × व्यवहारप्रकाशे चन्द्रिकैवोधृता ।

÷ गोरा.व्याख्यान अशुद्धिसदेहान्नोध्दृतम् ।

(१) **मस्मृ.**८।१५४; **व्यक.**१२६, **स्मृच.**१६२, **विर.** ७२, **पमा.**२५९, **नृप्र.**१९ जिर्ता (यता); **सवि.**२५३; **व्यप्र.**२६०; **विता.**५०० निर्जि (निर्मि); **प्रका.**९५; **समु.**८१.

१ जयो.

(१) **कौ.**३।१६.

(२) **मस्मृ** ८।१६६; **अप.**२।४५ स्यार्थे (स्वे च) तो (त) **स्तत्स्याप्रविभक्तैरपि** (स्तस्मात् प्रविभक्तधनै·), **व्यक** १२०; **स्मृच.**१७६ स्यार्थे (स्वे च), **विर.**५३ तो (त), **दीक.**३६ **विरवत्**; **दात.**१७८ विरवत्, **व्यप्र.**२७५, **सेतु.**२७ स्त्रविभक्तैरपि (द्विभक्तैरपि च); **समु.**८६ स्मृचवत्.

१ दृष्टे.

पुनः द्वैगुण्यापवादार्थता, यावता नेह किञ्चिदीदृशं वचनमस्ति, वृद्धिसहित धनं वर्धते मूलधन वा। केवल पुनः क्रिया श्रूयते। सा च करण परिवर्तयेदिति व्याख्यान्तरेण व्याख्याता। यदि न वर्धते किमर्थं तर्हि करणपरिवर्तनम्? उच्यते। शान्तलाभे धनेऽदीयमाने योगक्रयादिसभावना, साक्षिणश्च दीर्घं गच्छति काले विस्मरेयुः, यथोक्त—'यत्र कार्ये भवेद्येन कृतोपेक्षा दशाब्दिकी। विवादस्तत्र नैव स्यात्साक्ष्येषु विशेषतः'॥ तथा 'दशवर्षोपेक्षितमृणमसाध्यमिति (कौ.३।११)। तथा च पूर्वे स्म व्याचक्षते। अथ च राज्ञ उपदेशः पीडितस्यानुग्रहः। यदि च द्विगुणस्य नवीकरणेन पुनः प्रयोगः, वृद्धिसहितस्य पुनर्वृद्धिर्महांश्च पीडितस्यानुग्रहः। अथ सर्वं तदानीमवष्टभ्य न दीप्यते, एषोऽनुग्रहो निर्धनस्येदृशोऽनुग्रहो दैवेनैव कृतः। तथा च सर्वस्मृतिष्वस्यामवस्थायां विहितम्। 'अथ शक्तिविहीनः स्याद्ऋणी कालविपर्ययात्। प्रेक्ष्य च तमृण दाप्यः काले देशे यथोदयम्'॥ यद्यधमर्णो दैवदोषान्निर्धनीभूतस्तदा न दुर्गावरोधादिना राजा पीडयितव्यः। किं तर्हि कर्तव्यम्? यदाऽस्य कथञ्चिद्धन भवेत्तदा यथासभव शनैः शनैर्दापयितव्यः। प्रेक्ष्य, शक्तिधनवत्त्वं ज्ञात्वेत्यर्थः। दाप्यः उचितस्य, वक्ष्यति 'कर्मणाऽपि समं कुर्यात्' इति। तस्मात् करणपरिवृत्तौ यदेवोक्तमस्माभिस्तदेव प्रयोजनम्। मेधा.

(२) ऋण समूला वृद्धिम्। पुनः क्रिया कला दत्वा मूलस्य पुनर्वृद्धिनियमम्। निर्जिता तावत्कालेन सञ्चिताम्। करण पत्रसाक्ष्यादिव्यवस्था परिवर्तयेत् पुनः कुर्यात्। मवि.

(३) प्रमाणमात्रवाचकोऽपि क्रियाशब्दोऽत्र ऋणविषयप्रमाणपरत्वाल्लेख्यसाक्षिष्वेवावतिष्ठते। एव चायमर्थः। प्रतिदानकाले धनासपत्त्यादिवशात्सवृद्धिकमूलदानाऽशक्तो योऽधमर्णः ऋणस्य चिरंतनत्वं परिहरतो धनिकस्य समाधानार्थं क्रिया लेख्यादिरूपा पुनः कर्तुमिच्छेत्स निष्पन्ना वृद्धि दत्वा करणं परिवर्तयेत्। पुनर्लेख्यादिक्रिया वर्तमानवत्सरादिचिह्निता कुर्यादिति। *स्मृच.१६२

(४) निर्जितामुत्तमर्णेन स्वत्वतया आत्मसात्कृताम्। +मनु.

(५) निर्जिता धनिकस्य न्यायतो लभ्याम्। तेन निर्जिता वृद्धि कियतीमपि सकला वा दत्वा किञ्चिद्वृद्धिमति मूले मूलमात्रे वा कलया करणं लेख्यं परिवर्तयेत्। विर.७३

(६) ऋणाद्दते जीवितुमसमर्थः पूर्वोत्तमर्णादृणान्तरं लिप्सुरेव कुर्यादित्याह—ऋणमिति। पुनःक्रिया ऋणान्तरं, निर्जिता मासिमासि लभ्यत्वेनानीतामुत्तमर्णप्राप्या ता सपूर्णा दत्वा करण क्रियते लिख्यते ऋणमत्रेति पत्रान्तर कुर्यादित्यर्थः। मच.

(७) पुनः क्रिया ऋणस्य पुनः स्वीकरणक्रियाम्। करण मूल्यमात्रस्य ऋणस्य स्वीकरणम्। नन्द.

अदर्शयित्वा तत्रैव हिरण्यं परिवर्तयेत्।
यावती संभवेद्वृद्धिस्तावतीं दातुमर्हति॥

(१) अदर्शयित्वा हिरण्यं अदत्वा निर्धनत्वाद् वृद्धिहिरण्य, तत्रैव पुनः करण परिवर्तयेत्। साक्षिसमक्षमेवं ब्रूयात्—'एतावन्मूलमस्मै धारयामि, एतावती च वृद्धिरिति'। पत्रे चारोपयेत्। यावती संभवेत् वृद्धिरिति तावद्व्याचक्षते। पुनः करणे वृद्धिसहितमूलीभूते लघीयसी वृद्धिः कर्तव्या, यावत्या वृद्धया नातिपीड्यते, या प्रागासीत्ततो न्यूनेत्यर्थः। यज्ञासहायनारदाना तु मते काकिणीमात्रमपि शक्तः करणपरिवृत्तिकाले दापयितव्यः। येन साक्षिणः शक्तश्रवणमात्रे साक्षित्वम्। यैर्दृवृद्धि ददाति, तत्समक्षमधमर्णार्थसबन्धोऽपि प्रत्यक्षीभवति। यतः श्रवणात् श्रवणे साक्षिता भविष्यति। ततश्चित्ते तिष्ठति धन दशवर्षोपेक्षितमित्यादि विनै-

* पमा, सवि. स्मृचगतम्। + मेधाबद्धाव.।

(१) **मस्मृ** ८।१५५; **व्यक.**१२६ उत्त, **स्मृच** १६२; **विर.**७३, **पमा.**२६०, **नृप्र.**१९; **सवि** २५३, **व्यप्र.**२६०, **प्रका.**९५, **समु.**८१.

१ यत्रैवारो. २ यावत्सवत्सरा वृ. ३ साक्षिश. ४ (यद्वृद्धि०). ५ मर्णो अर्थ. ६ णाश्रवणे च कृता. ७ नि. ८ त्त, ९ धने, १० व्यनश्वरो.

१ या गन्त्र्यादि. २ गे. ३ हाशर्षा. ४ वाप्य. ५ क्ष्यश्च. ६ दर्पिथि. ७ ता. ८ कार.

श्वरं भविष्यति । +मेधा.

(२) दौर्गत्या वृद्धिहिरण्यमप्यदत्वा तत्रैव पुनः क्रियमाणे लेख्यादौ तदारोपयेत् । यत्परिमाणं किं वृद्धिधनं तदानीं संभवति तावदुत्तमर्णेति अवशिष्टं करणमारोपयेत् । *गोरा.

(३) एतत्स्फोरयति —अदर्शयित्वेति । मूलभूतं हिरण्यं धनिके अदर्शयित्वा अदत्वा क्रियां परिवर्तयेत् । तदा च यावती संभवेत्तावता कालेन वृद्धिं, तामेव दातुमर्हति, न तु मूलस्य पुनः स्थापनार्थमधिकं तेन देयमित्यर्थः । मवि.

(४) अस्यार्थः । हिरण्यमदर्शयित्वा निर्जिता वृद्धिमदत्वा तत्रैव पूर्वकृतकरण एव परिवर्तयेत् । निर्जिता वृद्धिं मूलत्वेनारोपयेत् । तस्यास्तु वृद्धिर्न प्रयुक्तधनवृद्धितुल्या । किन्तु अत्यन्तालूपरिमाणेवारोपणीयेति वृद्धावप्यशमात्रदानशक्तेन शक्याश दत्वा पश्चादशक्याशान्तर पूर्वकरण एव पूर्ववदारोपणीयम् । न्यायसाम्यात् ।

+स्मृच.१६२

(५) करण लेख्य परिवर्तयेदित्यर्थः । ×विर.७३

(६) अदर्शयित्वा आदौ लेख्यमदत्वा छेदनादिभयात् । ×मच.

याज्ञवल्क्यः

कुटुम्बार्थमविभक्तकृतस्य ऋणस्य लिखितृदातारः प्रतिदातारः.

अविभक्तैः कुटुम्बार्थे यद्दृणं तु कृतं भवेत् ।
दद्युस्तद्विखिथनः प्रेते प्रोषिते वा कुटुम्बिनि ॥

(१) एव तावत् पैतृकमृणं देयम् । भ्रात्रादिकृते तु कथम् । तत्रापि—अविभक्तैरिति । कुटुम्बे भवः कुटुम्बी भ्रात्रादिः । तेन कुटुम्बनिमित्त यद् ऋण कृत, तत् सर्वैरेव तस्मिन् प्रेते प्रोषिते वा रिक्थभाग्भिरविभक्तैर्देयम् । विभक्तानामपि रिक्थभाजा संभवाद-

+व्यप्र. मेधावद्भावः ।

* व्यक., मसु. गोरागतम् । + सवि. स्मृचवद्भावः ।

× शेष स्मृचगतम् ।

(१) **याज्ञ्स्मृ.**२।४५, **अपु.**२५४।६, **विश्व.**२।४८; **मिता.**, **अप.**, **व्यक.**१२०, **स्मृच.**१७५, **विर.**५३, **पमा.**२७०; **विच.**२३ थ(र्थे), **स्मृचि.**१३, **नृप्र.**२०, **सवि.**२५३ (=) कैः (क्ते) र्थे(र्थं), **चन्द्र.**२०, **वीमि.**; **व्यप्र.**२७५, **व्यउ.**७७, **विता** ५०२, **सेतु.**२७; **समु.**८६; **विव्य.**२८ नारदः.

विभक्तैरित्युक्तम् । विश्व.२।४८

(२) इदानीं देयमृणं यदा येन च देयं तदाह—अविभक्तैरिति । अविभक्तैर्बहुभिः कुटुम्बार्थमेकैकेन वा यद्दृणं कृतं तद्दृणं कुटुम्बी दद्यात् । तस्मिन्प्रेते प्रोषिते वा तद्विखिथनः सर्वे दद्युः । *मिता.

(३) अधमर्णे मृते प्रोषिते वा यैर्ऋणमपाकरणीयं तानाह—अविभक्तैरिति । कुटुम्बिनि गृहपतौ, प्रोषिते मृते वा तत्कुटुम्बभरणार्थमविभक्तधनैर्भ्रात्रादिभिर्यत्कृतमृणं तद्विखिथनः सर्वे दद्युः । अविभक्तैरिति बहुवचनमविवक्षितार्थम् । अप.

(४) अविभक्तधनैर्भ्रात्रादिभिः समप्रधानैः कुटुम्बव्ययाय यद्दृणं कृतं तैः सदा न देयम् । किन्तु तदानाधिकारिणि कुटुम्बिनि प्रेते प्रोषिते वा दातव्यमित्यर्थः ।

×स्मृच.१७६

(५)मिता.टीका—कुटुम्बी दद्यादित्यधिकारिवर्णनम्। तस्मिन् प्रेते प्रोषिते वेति कालाभिधानम् । तद्विखिथन इत्यप्यधिकारिण एवोक्तिः । सुबो.

(६) अथ ऋण यादृशं यैः प्रतिदेयं यैश्च न प्रतिदेयं तदाह सप्तभिः श्लोकैः—अविभक्तैरिति । अविभक्तैर्भ्रातृपित्रादिभिः कुटुम्बस्याऽवश्यभरणीयस्यार्थे भरणनिमित्त यद्दृणं कृतं भवति तद्दृणं ऋखिथनोऽविभक्ता भ्रात्रादयः सर्वे, कुटुम्बिनि कुटुम्बार्थमृणादिकारिणि पित्रादौ प्रेते मृते प्रोषिते वा दद्युः। तुशब्देन ऋणकर्त्रैव देयमिति स्वासाधारणकार्यार्थं कृतस्य । परैः ऋखिथभिर्दानं च व्यवच्छिद्यते । वीमि.

स्त्रीपतिपितृपुत्रकृतर्णप्रतिदानविचारः

न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता ।
दद्याद्ऋते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा ॥

(१) अविभक्तत्वेऽपि तु—न योषित् इत्यादि । विश्व.२।४९

(२) येन देयमित्यत्र प्रत्युदाहरणमाह—न योषि-

* पमा., व्यप्र. मितागतम् । × विर. स्मृचवद्भावः ।

(१) **याज्ञ्स्मृ.**२।४६; **अपु.**२५४।७; **विश्व.**२।४९; **मिता**, **अप.**; **व्यक.**१२२; **विर.**५९, **पमा.**२६८; **स्मृचि.**१४; **नृप्र.**२०; **वीमि.**; **व्यप्र.**२७३; **व्यउ.**७७पिता (तथा) र्थान्न (र्थं न); **व्यम.**८३; **विता.**५०३-५०४; **समु.**८६.

दिति । पत्या कृतमृण योषिद्भार्या नैव दद्यात् । पुत्रेण कृतं योषिन्माता न दद्यात् । तथा पुत्रेण कृतं पिता न दद्यात् । तथा भार्याकृत पतिर्न दद्यात् । कुटुम्बार्थादृते इति सर्वशेषः । अतश्च कुटुम्बार्थं येन केनापि कृत तत् कुटुम्बिना देयम् । तदभावे तदायहरैर्देयमित्युक्तमेव । *मिता.

(३) एव च स्त्रीधनस्य अन्यत्रोपयोगाभावेऽपि कुटुम्बार्थं ऋणपरिहारे उपयोगोऽस्तीत्याशयः ।

व्यउ.७७

गोपशौण्डिकशैलूषरजकव्याधयोषिताम् ।
ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया +॥

(१) गोपो गोपालः । शौण्डिकः कल्पालः । शैलूषो नटः । रजको वस्त्रनिर्णेजकः रङ्गकश्च । व्याधो लुब्धकः । एते स्त्रीकृतमप्यृण दद्युः, स्त्रीप्रधानत्वादेतेषाम् । तथा च नारदः — 'तेषा तत्प्रत्यया वृत्तिः कुटुम्ब च तदाश्रयम्' इति । हेत्वभिधानं चान्येऽप्येवप्रकारा उक्ता यथा स्युरिति । विश्व.२।५०

(२) 'न पतिः स्त्रीकृत तथें'त्यस्यापवादमाह — गोपशौण्डिकेति । गोपो गोपालः । शौण्डिकः सुराकारः । शैलूषो नटः । रजको वस्त्राणा रङ्गकः । व्याधो मृगयुः । एतेषा योषिद्भिर्यदृण कृत तत्तत्पतिभिर्देयम् । यस्मात्तेषा, वृत्तिर्जीवन, तदाश्रया योषिदधीना । 'यस्माद् वृत्तिस्तदाश्रये'ति हेतुव्यपदेशादन्येऽपि ये योषिदधीनजीवनास्तेऽपि योषित्कृतमृण दद्युरिति गम्यते । ×मिता.

(३) गोपादिस्त्रीकृतमृणं यद्यपि न कुटुम्बार्थं तथापि तत्पतिभिरपनेयमित्येतदर्थमिदं वाक्यम् । अन्यथा तु 'कुटुम्बार्थान्न पतिः स्त्रीकृतं तथें'त्यनेनैव सिद्धत्वाद्वचनमिदमपार्थकं स्यात् । +अप.

प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम् ।
स्वयं कृतं वा यद्दृणं नान्यत्स्त्री दातुमर्हति ॥

(१) पुरुषमात्राविशेषेण तु — प्रतिपन्नमिति । दम्पत्योरविभक्तधनत्वेऽप्यभ्युपेतादिव्यतिरेकेण स्त्रिया न देयमित्यभिप्रायः । कुतः पुनः स्त्रीणा स्वातन्त्र्येणर्णप्रसङ्गः, कुतो वा दानमिति । स्त्रीणामपि हि स्वातन्त्र्येण धन वक्ष्यति 'भर्त्रा प्रीतेन यद दत्त' इत्यत्र । स्वशरीरोपभोगार्थ स्त्रीणामृणप्रसङ्गोऽविरुद्धः । अत्रैव स्त्रीणामृणसबन्धः । विश्व.२।५१

(२) पतिकृत भार्या न दद्यादित्यस्यापवादमाह — प्रतिपन्नमिति । मुमूर्षुणा प्रवत्स्यता वा पत्या नियुक्तया ऋणदाने यत्प्रतिपन्न तत्पतिकृतमृण देयम् । यच्च पत्या सह भार्यया ऋण कृत तदपि भर्त्रभावे भार्यया अपुत्रया देयम् । यच्च स्वयमेव कृत ऋणं तदपि देयम् । ननु प्रतिपन्नादि त्रय स्त्रिया देयमिति न वक्तव्यम् । सदेहाभावात् । उच्यते – 'भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्' ॥ इति वचनान्निर्धनत्वेन प्रतिपन्नादिष्वदानाशङ्कायामिदमुच्यते 'प्रतिपन्न स्त्रिया देयमि'त्यादि । न चानेन वचनेन स्त्र्यादीना निर्धनत्वमभिधीयते । पारतन्त्र्यमात्रप्रतिपादनपरत्वात् । एतच्च विभागप्रकरणे स्पष्टीकरिष्यते । नान्यत्स्त्री दातुमर्हतीत्येतत्तर्हि न वक्तव्यम् । विधानेनैवान्यत्र प्रतिषेधसिद्धेः । उच्यते — 'प्रतिपन्न स्त्रिया देय पत्या वा सह यत्कृतम्' इत्येतयोरपवादार्थमुच्यते । अन्यत्सुराकामादिवचनोपात्त प्रतिपन्नमपि पत्या सह कृतमपि न देयमिति । मिता.

(३) ऋणविशेषादन्यदृणं स्त्री न दद्यादित्याह — प्रति-

---

* अप., पमा., व्यप्र., विता. मितागतम् ।

+ स्मृच. व्याख्यान 'अन्यत्र रजकव्याध' इत्यादिनारदवचने द्रष्टव्यम् । × वीमि. मितागतम् ।

(१) **यास्मृ.**२।४८; **अपु.**२५४।८ स्ता (स्त्वा); **विश्व.**२।५०; **मिता.**; **अप.**; **व्यक.**१२२; **स्मृच.**१७५; **विर.**५९; **पमा.**२६९; **स्मृचि.**१४ क्रमेण कात्यायनः; **नृप्र.**२०; **वीमि.**, **व्यप्र** २७४; **व्यम.**८३; **विता.**५०६ स्तासा (स्तेषां) नारदः; **सेतु.**२९, **समु.**८६.

+ शेषं मितागतम् ।

(१) **यास्मृ.**२।४९; **अपु.**२५४।९; **विश्व.**२।५१ वा यदृणं (ऋणं वापि); **मिता.**; **अप.**, **व्यक.**१२२, **स्मृच.**१७६ प्रथमपादः, **विर.**६० सह यत्कृत (यत्कृत सह); **पमा.**२७०; **विचि.**२८ पू.; **नृप्र.**२० कृतं वा (कृतं च); **चन्द्र** २५ विरवत; **वीमि.**; **व्यप्र.**२७४, **व्यम.**८३; **विता.**५०७ यदृण (ऽथ ऋण) नारदः; **राकौ.**३९६; **सेतु.**३० पत्र (दत्त) वा (च): ३१६; **समु.**८६.

पन्नमिति । कुटुम्बानुपयोग्यपि यत्पतिपुत्रकृतमृणं प्रतिपन्नमङ्गीकृतं पत्या सह च यत्कृतं यच्च स्वयकृत तत्स्त्रिया देयम् । अन्यद्दण स्त्री न दद्यात् । स्वयंकृतमिति वचन कुटुम्बानुपयोगिमातृकमृण पुत्रेण देयमित्येतदर्थम् । अन्यथा हि वचनमनर्थक स्यात् । ज्ञातमेवैतद्दत्तेऽपि वचनात्स्वयकृतमृण स्वय देयमिति । अप.

(४) प्रतिपन्न पतिकृत पुत्रकृत वा ऋणमह दास्यामीति अभ्युपेतमित्यर्थः । 'न स्त्री पतिकृत दद्याद्दण पुत्रकृत तथा । अभ्युपेताद्दते' इति नारदस्मरणात् । एव च पतिपुत्रेतरकृत प्रतिपन्नमपि न स्त्रिया देयमिति परिसंख्यार्थ याज्ञवल्क्यवचनमिति मन्तव्यम् । स्पष्टत्वेन विध्यर्थत्वासभवात् । स्मृच.१७६

(५) कुटुम्बार्थ विनापि धर्मार्थे प्रतिपन्नादित्रये मातृके पुत्रदेयत्वार्थमिदमिति वयम् । 'ऋणमात्मीयवत्पित्र्यं पुत्रैर्देयमि' त्युक्तेश्च । पित्रोरिद पित्र्यम् । यद्यप्यन्यस्याप्रसक्तेर्विधानादन्यनिषेधसिद्धेश्च नान्यदिति पर्युदासो व्यर्थः, तथापि सुराद्यतादौ प्रतिपन्नमपि न देयमित्यर्थमेतत् । ×विता.५०८

पितृकृतमृणं पुत्रपौत्रैः प्रतिदेयम्

[1]**पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा ।**
पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम् ॥

(१) अन्यत्रापि तु—पितरि प्रोषिते इत्यादि । पितरि मृते प्रोषिते वा विशतिवर्षाणि प्रतीक्ष्य, व्यसनाभिभूते पुत्रादिभिर्ऋण देयम् । अपि वेति च प्रकारार्थम् । अन्यस्मिन्प्येवप्रकारे व्याख्यादावसमाधेयेन्द्रियवैकल्ये हेतावुत्पन्न इत्यर्थः । तथा निह्नवे यदि च पिता विप्रतिपन्नः तदा साक्षिभावितं पुत्रादिभिरेवर्ण देयम् । सोऽपि हि प्रकृतिविपर्ययादसामर्थ्येनायोग्य एव । ऋणवच्चास्वस्थासु पैतृक रिक्थमपि पुत्रादिभिर्ग्राह्यमित्यवगन्तव्यम् । विश्व.२।५२

(२) पुनरपि यद्दण दातव्य, येन च दातव्य, यत्र च काले दातव्य, तत् त्रितयमाह—पितरि प्रोषिते इति । पिता यदि दातव्यमृणमदत्वा प्रेतो दूरदेश गतोऽचिकित्सनीयव्याध्याद्यभिभूतो वा तदा तत्कृतमृणमाख्यापनेऽवश्य देय पुत्रेण पौत्रेण वा पितृधनाभावेऽपि पुत्रत्वेन पौत्रत्वेन च । तत्र क्रमोऽप्ययमेव—'पित्रभावे पुत्रः पुत्राभावे पौत्रः' इति । पुत्रेण पौत्रेण वा निह्नवे कृते अर्थिना साक्ष्यादिभिर्भावितमृण देय पुत्रपौत्रैरित्यन्वयः । अत्र पितरि प्रोषित इत्येतावदुक्त, कालविशेषस्तु नारदेनोक्तो द्रष्टव्यः । प्रेतेऽप्यप्राप्तव्यवहारकालो न दद्यात् । प्राप्तव्यवहारकालस्तु दद्यात् । स च कालस्तेनैव दर्शितः—'गर्भस्थैः सदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः । बाल आषोडशाद्वर्षात्पौगण्डश्चेति शब्द्यते ॥ परतो व्यवहारज्ञः स्वतन्त्रः पितराकृते' ॥ इति । यद्यपि पितृमरणादूर्ध्वं बालोऽपि स्वतन्त्रो जातस्तथापि नर्णभाग्भवति । पुत्रपौत्रैरिति बहुवचननिर्देशाद्बहवः पुत्रा यदि विभक्ताः स्वाशानुरूपेण ऋण दद्युः । अविभक्ता श्रेत्सभूयसमुत्थानेन गुणप्रधानभावेन वर्तमानाना प्रधानभूत एव वा दद्यादिति गम्यते । यथाह नारदः—'अत ऊर्ध्वं पितुः पुत्रा ऋण दद्युर्यथाशतः । अविभक्ता विभक्ता वा यस्ता चोद्वहते धुरम्' ॥ इति । अत्र च यद्यपि पुत्रपौत्रैर्ऋण देयमित्यविशेषेणोक्त, तथाऽपि पुत्रेण यथा पिता सवृद्धिकं ददाति तथैव देयम् । पौत्रेण तु सम मूलमेव दातव्य न वृद्धिरिति विशेषोऽवगन्तव्यः । 'ऋणमात्मीयवत्पित्र्य देय पुत्रैर्विभावितम् । पैतामहं समं देयमदेयं तत्सुतस्य तु' ॥ इति बृहस्पतिवचनात् । ×मिता.

(३) पानादिव्यसनासक्ते वा । यदि पुत्रादयो ब्रूयुर्न वयं विद्मोऽस्मत्पिता पितामहो वा किं तुभ्य धारयत इति तदा प्रत्यर्थिना साक्ष्यादीनामन्यतमेन प्रमाणेन भावितं

× शेष मितागतम् ।

(१) **याज्ञ.**२।५०, **अपु.**२५४।१० ऽपि (ऽथ), **विश्व.**२।५२; **मिता.**; **अप.**, **व्यक.**११८; **गौमि.**१२।३७ वा (च), **स्मृच.**१२१,१७० उत्त. : २८६,२९५ तृतीयपाद , **विर.**४७; **पमा.**२६५; **सुबो.**२।४७ (=), २।९०(=) तृतीयपादः : २।५० उत्त.; **दीक.**३९ (=) तृतीयपादः; **विचि.**२२ ऽपि वा (तथा); **व्यनि.** (=), **स्मृचि.**१३; **नृप्र.**२० पुत्र(पित्र्यं); **सवि.**२५८ उत्त.; **मच.**८।१६६ भिष्णु (दियु) भावि (भाषि), **वीमि.**; **व्यप्र.**२६४; **व्यम.**८२; **विता.**५१०; **राकौ.**१९६; **सेतु.**२५, **समु.**८४; **विभ्य.**२८.

× व्यप्र., विता. मितागतम् ।

सदेयम्। अत्र च प्रवासादिषु निमित्तेषु ऋणादानविधानात्पैतृकधनाभावेऽपि पुत्रैर्ऋणं देयं तदभावे च पौत्रैः। अप.

(४) अपिकारेण प्रव्रजितपरिग्रहः। पुत्रपौत्रैरित्यनेन प्रपौत्रादिव्यवच्छेदः 'नातः परमनीप्सुभि'रित्यभिधानात्। वीमि.

पुत्रेणाऽप्रतिदेयानि ऋणादीनि

सुराकामकृतं दण्डशुल्कावशिष्टकम्।
वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकम्॥

(१) स्वस्थपितृकृतमवस्थे तस्मिन् रिक्थभाग्भिर्देयम्। न पुनरस्वस्थकृतमपीत्यभिप्रायः। अस्वास्थ्यप्रकारप्रपञ्चार्थश्चाय श्लोकः। दण्डशुल्कावशिष्टकं तु वचनाददेयम्। सुरां पीत्वा यन्मूल्य न दत्तं, यच्च कामसंयोगेन स्त्रीणा प्रतिज्ञातं, द्यूतहारित दण्डाद्यवशिष्ट वृथादान च तथैवेह यस्य फल नामुत्रेति निश्चित, तत् पुत्रादिभिरदेयम्। शुल्क पथि राजभाव्यं दानम्। अशास्त्रचोदित वृथादानम्। स्पष्टमन्यत्। विश्व.२।५३

(२) पुत्रपौत्रैर्ऋण देयमिति वक्ष्यति तस्य पुरस्तादपवादमाह—सुराकामकृतमिति। सुरापानेन यत्कृतमृण, कामकृत स्त्रीव्यसननिर्वृत्त, द्यूते पराजयनिर्वृत्त, दण्डशुल्कयोरवशिष्ट, वृथादान धूर्तवन्दिमल्लादिभ्यो यत्प्रतिज्ञातम्—'धूर्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे। चाटचारणचौरेषु दत्त भवति निष्फलम्'॥ इति स्मरणात्। एतद्ऋण पित्रा कृत पुत्रादिः शौण्डिकादिभ्यो न दद्यात्। अत्र दण्डशुल्कावशिष्टकमित्यवशिष्टग्रहणात्सर्व दातव्यमिति न मन्तव्यम्। अनेनादेयमृणमुक्तम्। +मिता.

(३) पितुः परलोकशुद्ध्यर्थं त्विच्छया दद्यात्। एवकारेण पित्रा धर्मार्थं प्रतिश्रुतस्यादान व्यवच्छिद्यते। वीमि.

त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः। आधिभोगकालः।

ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु।
आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते॥

(१) निर्व्याजप्रमाणशुद्ध च—ऋण लेख्यगतमित्यादि। यद् ऋण लेख्यगत लेख्यारूढमित्यर्थः। तद् देय पुरुषैस्त्रिभिरेव कर्तृतत्पुत्रपौत्रैरित्यर्थः। तुशब्दो व्यवच्छेदार्थः। तथा च नारदः—'क्रमादव्याहत प्राप्त पुत्रैर्यन्नर्णमुद्धृतम्। दद्युः पैतामह पौत्रास्तच्चतुर्थान्निवर्तते'॥ इति। अस्यापवादः–आधिस्तु भुज्यते, न चतुर्थान्निवर्तते। किमनवधिक एव। नहि। तावत्, यावत् तद् देय न प्रदीयते। विश्व.२।९३

(२) लेख्यप्रसङ्गेन लेख्यारूढमृणं त्रिभिरेव देयमित्याह—ऋणमिति। यथा साक्ष्यादिकृतमृण त्रिभिरेव देय तथा लेख्यकृतमप्याहर्तृतत्पुत्रतत्पुत्रैस्त्रिभिरेव देयं न चतुर्थादिभिरिति नियम्यते। ननु पुत्रपौत्रैर्ऋण देयमित्यविशेषेण ऋणमात्र त्रिभिरेव देयमिति नियतमेव। बाढम्। अस्यैवोत्सर्गस्य पत्रारूढर्णविषये स्मृत्यन्तरप्रभवामपवादशङ्कामपनेतुमिद वचनमारब्धम्। तथाहि –पत्रलक्षणमभिधाय कात्यायनेनाभिहितम्—'एव कालमतिक्रान्त पितृणा दाप्यते ऋणम्' इति। इत्थ पत्रारूढमृणमतिक्रान्तकालमपि पितृणा सबन्धि दाप्यते। अत्र पितृणामिति बहुवचननिर्देशात् कालमतिक्रान्तमिति वचनाच्च चतुर्थादिर्दाप्य इति प्रतीयते। तथा हारीतेनापि—'लेख्य यस्य भवेद्धस्ते लाभ तस्य विनिर्दिशेत्' इति। अत्रापि यस्य हस्ते लेख्यमस्ति तस्यर्णलाभ इति सामान्येन चतुर्थादिभ्योऽप्यृणलाभोऽस्तीति प्रतीयते। अतश्चैतदाशङ्कानिवृत्त्यर्थमेतद्वचनमित्युक्तम्। वचनद्वय च योगीश्वरवचनानुसारेण

+ अप., व्यप्र. मितागतम्।

(१) **यास्मृ.**२।४७, **अपु** २५४।११; **विश्व** २।५३; **मिता.**; **अप.**; **पमा.**२६७, **स्मृचि.**१३, **नृप्र.**२० काम (पान); **वीमि.**; **व्यप्र.**२६५; **व्यङ.**७८ काम (पानं) उशना; **व्यम.**८२; **विता.**५१६; **समु** ८४; **भाच.**८।१५९.

(१) **यास्मृ** २।९०; **अपु.**२५५।२३; **अभा.**३३; **विश्व.** २।९३ कृतं (गत); **मेधा.**८।१५१ धिस्तु (धिश्च) उक्त.; **मिता**; **अप.**, **व्यक.**१०८ उक्त.:११९; **स्मृच.**१६१ उक्त.; **विर.**१३ उक्त.:४९, **विचि.**७ उक्त.:२२-२३; **सवि.**२३१ तन्न प्र (न्न प्रति) उक्त.; **मच** ८।१६४ कृत (गतं) तु (च); **चन्द्र.**३ तन्न (नैव), **वीमि.**, **विता.**१३० तन्न प्र (लेख्य न); **सेतु.**७ (=) उक्त.:२५; **प्रका.**९४ उक्त.; **समु.८१** उक्त.:८४ पू.; **विव्य.**२३:२८ (=) पू.

योजनीयम्। अस्यापवादमाह—आधिस्तु भुज्यत इति। सबन्धकेऽपि पत्रारूढ ऋण त्रिभिरेव देयमिति नियमाद्दणापाकरणानधिकारेणाध्याहरणेऽप्यनधिकारप्राप्ताविदमुच्यते। यावच्चतुर्थेन पञ्चमेन वा ऋण न दीयते तावदेवाधिर्भुज्यत इति वदता सबन्धकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शितः। नन्वेतदप्युक्तमेव 'फलभोग्यो न नश्यती'ति। सत्यम्। तदप्येतस्मिन्नसत्यपवादवचने पुरुषत्रयविषयमेव स्यादिति सर्वमनवद्यम्। *मिता.

(३) पुत्रपौत्रैर्ऋणं देयमित्युक्तत्वात्। अत एवायमनुवादः। आधिस्तु भुज्यते तावदित्यादि विधानार्थम्। न ह्याधिगतमृणं पुरुषसंख्यानियमविषय भवति। एवं च यद्धारीतेन—'लेख्यं यस्य भवेद्धस्ते भोग तस्य विनिर्दिशेत्' इति निरवधिकमुक्तं, तदाधिविषय ग्राह्यम्। एतद्वचनमन्तरेण हि फलभोग्यो न नश्यतीति वाक्य पुरुषत्रयविषय स्यादिति तन्निवृत्त्यर्थोऽर्थवानेष वाक्यारम्भः। +अप.

(४) तुशब्देन ऋणमित्यत्राऽन्वितेन प्रातिभाव्यागते पौत्रदेयत्व व्यवच्छिद्यते। आधिर्भोग्याधिः। वीमि.

रिक्थग्राहयोषिद्ग्राहानन्याश्रितद्रव्यपुत्रादीनामृणप्रतिदातृत्वम्

[1]**रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च।**
पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः॥

(१) ऋणिके सत्यय दानक्रमः। तदभावे तु —रिक्थग्राह ऋणमित्यादि। रिक्थानुसारित्वाद् ऋणाना रिक्थग्राहिण एव निर्विचिकित्स दद्युः। निर्धनस्य तु नियोगाद् विना योऽस्य भार्या संगृह्णीयात्, स दद्यात्। एतच्चाब्राह्मणविषयम्। तद्योषितामेवान्यगामित्वसंभवात्। तथैव चेति धनग्राहिवदविकल्पयन् योषिद्ग्राह्यपि दद्यादित्यर्थः। तदेव हि द्रव्य द्रव्यहीनस्येत्यभिप्रायः। एतस्मादेव चातिदेशात् रिक्थाभाव एव योषिद्ग्राहादयः प्रत्येतव्याः। पुत्रोऽनन्याश्रितद्रव्य इति। अन्यस्मिन् नाश्रितं द्रव्यं यस्य असावनन्याश्रितद्रव्यः पुत्रो दद्यात्। न चेद् द्रव्यमन्येन गृहीतमित्यर्थः। न त्वद्रव्यस्यैव पुत्रो दद्यात्। ऋणस्य द्रव्यानुसारित्वादित्येतत् प्रागेव ज्ञापितम्। किमिद पुनरनन्याश्रितद्रव्य इति। मैवम्। प्रागप्येतत्पदानुसारादेव व्याख्यातम्। अतिदेशादभ्युच्चय एव। अथवा बहुपुत्रस्य यद्येकः पितृधनमितरानुमतो गृह्णीयात्, तदा धनग्राहिण इतरेषा च तुल्यमृणभाक्त्व, यतोऽन्यैरपि स्वेच्छया स्वाशोत्सङ्कलन कृतमिति इमामाशङ्का निरस्यति —पुत्रोऽनन्याश्रितद्रव्य इति। येनैव पुत्रेण द्रव्यमाश्रित, स एव दद्यात्। नान्योऽनुमन्ताऽपीत्यर्थः। अत एव च ज्ञायते भागशः पुत्रा ऋणं दद्युरिति। ज्येष्ठो वा भूयो दद्यात्, रिक्थविभागे विशेषदर्शनाद् इत्येषा दिक्। सर्वथा धनपातिसंबन्धानुसारेणैव हि ऋणसंगतिः। तथैवाऽपुत्रस्यान्ये रिक्थभाज एवर्णभाजः ऋणभाक्त्वमपि प्रतिपद्यन्ते इत्यभिप्रायः। तथा च कात्यायनः—'रिक्थहर्त्रा ऋण देय तदभावे च योषितः। पुत्रैश्च तदभावेऽन्यै रिक्थभागिभिर्यथाक्रमम्'॥ इति। बृहस्पतिश्च—'धनस्त्रीहारिपुत्राणा पूर्वाभावे यथोत्तरं आधमर्ण्य तदभावे क्रमशोऽन्येषा रिक्थभाजा' इति। यद्वा, अनन्याश्रितद्रव्य इत्यस्यान्योऽर्थः— पितरि मृते यस्य पैतृक रिक्थ केनापि परिनिक्षिप्तादिहेतुनान्यस्मिन्नाश्रित सोऽन्याश्रितद्रव्यः न तदप्राप्यैव पैतृकमृण दद्यादित्यत्रैव हेतुः। पुत्रहीनस्य रिक्थिनः। अन्येऽपि तु भवन्ति इति शेषः। यावदसौ न्याय्यमपि पैतृकं रिक्थ नाप्नुयात्, तावदृण किमिति दद्यादित्यभिप्रायः। सर्वाणि चैतानि स्मृत्यन्तरात् सम्यग् व्याख्यातानीत्यवगन्तव्यम्। यथाह कात्यायनः— 'यावन्न पैतृक द्रव्य विद्यमान लभेत्सुतः। सुसमृद्धोऽपि दाप्यः स्यात्तावन्नैवाधमर्णिकः' इति॥

विश्व.२।४७

* विता. मितागतम्। +शेष यथाश्रुत व्याख्यानम्। वीर. अपवत्।

(१) **याज्ञ्स्मृ.**२।५१, **अपु** २५४।५; **अभा.**३७ कथग्राह (कथग्राही) दाप्यो (दद्यात्) पू, **विश्व** २।४७ दाप्यो (दद्यात्), **मिता.**; **अप.**; **व्यक.**१२३कथग्राह (कथग्राही), **स्मृच.**१७१, **वीर.**६३ कथग्राह (कथग्राही)ऽनन्या (नान्या) ·६४ व्यकवत्; **पमा.**२७१; **विचि.**२७ ग्राह ऋणं (ग्राही धन) ग्राहस्त (ग्राही त); **नृप्र.**२०; **सवि** २६० व्यकवत्, **चन्द्र.**२४ **द्रव्यः** (धनः) शेष अभावत्, चतुर्थपादं विना, **वीमि. द्रव्यः** (धनः); **व्यप्र.**२६६; **व्यउ.७८; व्यम.**४६ प्रथमपादः : ८२; **विता.**५१७, **राकौ.**३९८; **समु.**८५, **विव्य.**२९ (=) विचिवत्.

(२) ऋणापाकरणे ऋणी तत्पुत्रः पौत्र इति त्रयः कर्तारो दर्शितास्तेषां च समवाये क्रमोऽपि दर्शितः। इदानीं कर्त्रन्तरसमवाये च क्रममाह–रिक्थग्राह इति। अन्यदीयं द्रव्यमन्यस्य क्रयादिव्यतिरेकेण यत्स्वीय भवति तद्रिक्थम्। विभागद्वारेण रिक्थ गृह्णातीति रिक्थग्राहः स ऋणं दाप्यः। एतदुक्तं भवति यो यदीयं द्रव्य रिक्थरूपेण गृह्णाति स तत्कृतमृण दाप्यो न चौरादिः। योषितं भार्या गृह्णातीति योषिद्ग्राहः स तथैवर्ण दाप्यः। यो यदीया योषित गृह्णाति स तत्कृतमृण दाप्यः। योषितोऽविभाज्यद्रव्यत्वेन रिक्थव्यपदेशानर्हत्वाद्वैदेन निर्देशः। पुत्रश्चानन्याश्रितद्रव्य ऋण दाप्यः। अन्यमाश्रितमन्याश्रित मातृपितृसबन्धिद्रव्य यस्यासावन्याश्रितद्रव्यः न अन्याश्रितद्रव्योऽनन्याश्रितद्रव्यः। पुत्रहीनस्य रिक्थिन ऋणं दाप्य इति संबन्धः। एतेषा समवाये क्रमश्च पाठक्रम एव 'रिक्थग्राह ऋण दाप्यस्तदभावे योषिद्ग्राहस्तदभावे पुत्र' इति। नन्वेतेषा समवाय एव नोपपद्यते–'न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः' इति पुत्रे सत्यन्यस्य रिक्थग्रहणासभवात्। योषिद्ग्राहोऽपि नोपपद्यते, 'न द्वितीयश्च साध्वीना क्वचिद्भर्तोपदिश्यते' इति स्मरणात्। तथा तद्दण पुत्रो दाप्य इत्यप्ययुक्तम्। 'पुत्रपौत्रैर्ऋण देयम्' इत्युक्तत्वात्। अनन्याश्रितद्रव्य इति विशेषणमप्यनर्थक पुत्रे सति द्रव्यस्यान्याश्रयणासंभवात्, सभवे च रिक्थग्राह इत्यनेनैव गतार्थत्वात्। पुत्रहीनस्य रिक्थिन इत्येतदपि न वक्तव्यम्। पुत्रे सत्यपि रिक्थग्राह ऋण दाप्य इति स्थितम्। असति पुत्रे रिक्थग्राहः सुतरा दाप्य इति सिद्धमेवेति। अत्रोच्यते–पुत्रे सत्यप्यन्यो रिक्थग्राही संभवति। क्लीबान्धबधिरादीना पुत्रत्वेऽपि रिक्थहरत्वाभावात्। तथा च क्लीबादीननुक्रम्य 'भर्तव्याः स्युर्निरंशकाः' इति वक्ष्यति। तथा– 'सवर्णापुत्रोऽप्यन्यायवृत्तिर्न लभेतैकेषाम्' इति गौतमस्मरणात्। अतश्च क्लीबादिषु पुत्रेषु सत्सु अन्यायवृत्ते च सवर्णापुत्रे सति रिक्थग्राही पितृव्यतत्पुत्रादिः। योषिद्ग्राहो यद्यपि शास्त्राविरोधेन न संभवति तथाप्यतिक्रान्तनिषेधः पूर्वपतिकृतर्णापाकरणाधिकारी भवत्येव। योषिद्ग्राहो यः चतसृणां स्वैरिणीनामन्तिमां गृह्णाति, यश्च पुनर्भुवा तिसृणा प्रथमाम्। पुत्रस्य पुनर्वचन क्रमार्थम्। अनन्याश्रितद्रव्य इति बहुषु पुत्रेषु रिक्थाभावेऽप्यंशग्रहणयोग्यस्यैवर्णापाकरणेऽधिकारो नायोग्यस्यान्धादेरित्येवमर्थम्। पुत्रहीनस्य रिक्थिन इत्येतदपि पुत्रपौत्रहीनस्य प्रपौत्रादयो यदि रिक्थ गृह्णन्ति तदा ऋणं दाप्या नान्यथेत्येवमर्थम्। पुत्रपौत्रौ च रिक्थग्रहणाभावेऽपि दाप्यावित्युक्तम्। यथाह नारदः–'क्रमादव्याहत प्राप्त पुत्रैर्यन्नर्णमुद्धृतम्। दद्युः पैतामह पौत्रास्तच्चतुर्थांनिवर्तते'॥ इति सर्व निरवद्यम्। यद्वा योषिद्ग्राहाभावे पुत्रो दाप्य इत्युक्तम्। पुत्राभावे योषिद्ग्राहो दाप्य इत्युच्यते। पुत्रहीनस्य रिक्थिन इति रिक्थशब्देन योषिदेवोच्यते। 'सैव चास्य धन स्मृतम्' इति स्मरणात्, 'यो यस्य हरते दारान्स तस्य हरते धनम्' इति च। ननु योषिद्ग्राहाभावे पुत्र ऋण दाप्यः पुत्राभावे योषिद्ग्राह इति परस्परविरुद्धम्। उभयसद्भावे न कश्चिद्दाप्य इति। नैष दोषः। अन्तिमस्वैरिणीग्राहिणः प्रथमपुनर्भृग्राहिणः सप्रधनस्त्रीहारिणश्चाभावे पुत्रो दाप्यः। पुत्राभावे तु निर्धननिरपत्ययोषिद्ग्राही दाप्य इति। 'पुत्रहीनस्य रिक्थिन' इत्यस्यान्या व्याख्या–एते धनस्त्रीहारिपुत्रा ऋण कस्य दाप्या इत्यपेक्षाया उत्तमर्णस्य दाप्यास्तदभावे तत्पुत्रादेः, पुत्राद्यभावे कस्य दाप्या इत्यपेक्षायामिदमुपतिष्ठते 'पुत्रहीनस्य रिक्थिन' इति। पुत्राद्यन्वयहीनस्योत्तमर्णस्य यो रिक्थी रिक्थग्रहणयोग्यः सपिण्डादिस्तस्य रिक्थिनो दाप्याः। +मिता.

(३) अत्र प्रतिपद वाक्यसमाप्तिः। प्रतिवाक्यमृण दाप्य इति संबध्यते। रिक्थग्राह ऋण दाप्यः। पितृधन रिक्थ, ततश्च पुत्रो रिक्थग्राहः प्रथमतः। तदभावे क्षेत्रजादिः पुत्रप्रतिनिधिः। तदभावे पत्नीदुहित्रादिः। अत्र च न पुत्रपरो रिक्थग्राहशब्दः, 'पुत्रपौत्रैर्ऋण देयम्' इत्यनेनैव पित्र्य धन पुत्रेणापाकरणीयमिति विहितत्वात्। ततश्चायमर्थः—क्षेत्रजादिको रिक्थग्राहो यदीय रिक्थ गृह्णाति तदीयमृणमुत्तमर्णाय राज्ञा दाप्य इति। परस्य योषित भार्या यो गृह्णाति स योषिद्ग्राहः। सोऽपि तस्याः पाणिग्राहस्य यद्दण तद्दाप्यः। अत्र च विवक्षितः पाठक्रमः। ततश्च रिक्थग्राहाभावे योषिद्ग्राह

+ पमा., विता. मितागतम्।

ऋणप्रदः । (योषिद्ग्राहपद मिताक्षरावद् व्याख्यायोक्तम्—) योषिद्ग्राहस्तथैव चेति शौण्डिकादिविषयं वा । पुत्रैः पैतृकमृणमपाकरणीयमित्युक्तं, तत्र विशेषमाह—पुत्रोऽनन्याश्रितद्रव्य इति । यः पुत्रोऽनन्याश्रितद्रव्यः स्वाधीनधनः स पित्र्यमृण दाप्यः । अन्याश्रितमन्याधीनं द्रव्यं धन यस्य सोऽन्याश्रितद्रव्यः स न भवतीत्यनन्याश्रितद्रव्यः । ततश्च ये भ्रातरो भ्रातृविशेषाधीनधना न ते दाप्याः । किं तु यस्तेषु स्वातन्त्र्येण वर्तते स एव दाप्यः । अत्र पाठक्रमो न विवक्षितः । न ह्यत्र दानरूपो धात्वर्थो विधीयते । किं तु तदीयोऽनन्याश्रितद्रव्यत्वलक्षणो धर्मः । स (न) च धर्मोऽनुष्ठेयः । किं तु धर्मवान्धात्वर्थः । ततश्च यत्र धात्वर्थो विधीयते क्रमेण तत्र क्रमनियमो विवक्ष्यते नान्यत्र । अतो नात्र क्रमो विवक्षितः । यत्तु नारदेनोक्तम्– 'धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत् । पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोः' ॥ इति, तत्पितृधनविभागानर्हपुत्रविषयम् । पुत्रहीनस्य रिक्थिन इति पौत्ररूपरिक्थिविषयम् । तेषा हि पुत्रवतोऽपि पितामहस्य रिक्थग्रहणयोग्यताऽस्ति नान्येषा भ्रात्रादीनाम् । तत्र पुत्रपौत्रैर्ऋणं देयमिति पुत्रवतोऽपि पितामहस्य पौत्रैर्ऋणमपाकरणीयमिति अतिप्रसङ्ग निवारयितुमिदमुच्यते– पुत्रहीनस्य रिक्थिन इति । अत्र रिक्थिशब्दो रिक्थग्रहणयोग्ये वर्तते न गृहीतरिक्थ एव । तेन निर्धनस्य पितामहस्य पुत्राभाव एव पौत्रा ऋणापकरणेऽधिक्रियन्ते न पुत्रसद्भावे । गृहीतरिक्थास्तु पुत्रसद्भावेऽपि । पैतामहमृण देय यथाशमपाकुर्युः । पुत्रोऽनन्याश्रितद्रव्य इत्यस्यापरा व्याख्या, अन्यशब्देनात्र प्रकृतत्वात्पितोच्यते। तेनान्याश्रितद्रव्यशब्देन पितृधनमुच्यते । तत्र विद्यते यस्य सोऽनन्याश्रितद्रव्यः पुत्रः । अतो रिक्थग्राहयोषिद्ग्राहयोरभाव ऋणं दाप्यः । तत्सद्भावे तु तावेव यथाक्रमं दाप्यौ । सन्ति दायानर्हा अपि केचन पुत्राः । एतामयमर्थः सिद्धः—रिक्थग्राहः पुत्राविर्दाप्यस्तदभावे योषिद्ग्राहस्तस्याप्यभावे दायानर्हः पुत्र इति । *अप.

(४) अत्र पदार्थास्तावदुच्यन्ते । विभागक्रमेण यो द्रव्य गृह्णाति स रिक्थग्राहः । रागादिवशात् परभार्या यो भार्यात्वेन स्वीकरोति स योषिद्ग्राहः । न पुनः पुत्रोत्पादकतया नियुक्तो जारो वा । तयोरुपगममात्रकारित्वेन ग्राहकत्वाभावात् । यो दायानर्हतया षड्ग्वादिः मातापित्राश्रितद्रव्यवान्न भवति सोऽनन्याश्रितद्रव्यः । यो रिक्थग्राहः स एव पुनश्च रिक्थिपदेनोक्तः ।

अत्र पादार्था उच्यन्ते, तत्राद्यन्तपादयोरयमर्थः । दानानर्हपुत्राभावेऽपि रिक्थग्राही ऋण दद्यादिति । यथैव षड्ग्वादिलक्षणपुत्रसद्भावेऽपि रिक्थग्राह ऋणं ददाति तथैव षड्ग्वादिलक्षणपुत्रसद्भावे चासद्भावे च रिक्थग्राहाभावे सति योषिद्ग्राहः ऋण दद्यादिति द्वितीयपादस्यार्थः । धनहारिस्त्रीहारिणोरभावे दायानर्हः पुत्रो दद्यादिति तृतीयपादस्यार्थः । +स्मृच.१७१-१७२

(५) पुत्र इत्यादिना जीवत्यपि पुत्रे अन्याश्रितद्रव्यश्चेत् पुत्रो न ऋण दातुमर्हति । अत्र न ऋण दाप्य इति सबन्धः । अत्र च पितृधनग्रहणयोग्यः पुत्रो विवक्षितः न तु लब्धपितृधनः तस्य ऋक्थग्राहिपदेनैव गतत्वात् । ×वीर.६३

(६) मिता.टीका—इति परस्परविरुद्धमिति । अत्र हि किविधो विरोधः । तथा हि योषिद्ग्राहाभावे पुत्रेणर्ण देयमिति एकः क्रमः प्रतीयते । 'योषिद्ग्राहस्तथैव' च 'पुत्रोऽनन्याश्रितद्रव्यः' इत्यनेन । 'पुत्रहीनस्य रिक्थिन' इत्यनेन तु पुत्राभावे तु योषिद्ग्राहेणर्ण देय इति पूर्वोक्तविपरीतक्रमः प्रतीयते । एव च क्रमे परस्परविरोध इत्येको विरोधः । यदा योषिद्ग्राहः पुत्रश्च द्वावपि स्तः तदोभयसद्भावे परस्पराभावोपलक्षितयोरेवर्णदत्वनियमात् उपलक्षकाभावे सति न कस्यापि ऋण देयमिति कृत्वा 'यदा तु न सकुल्याः स्युर्न च सबन्धिबान्धवाः । तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु च क्षिपेदि'त्यायवश्यर्णदेयत्वप्रतिपादकवचनविरोध इत्यपरो विरोधः । एतद्द्वयमपि सूचितपरस्परविरुद्ध इत्यनेन उभयसद्भाव इत्यनेन च पूर्वोक्तमाक्षेप परिहरति । नैष दोष इति । अनेके योषिद्ग्राहिणस्तत्र द्वे कोटी अन्तिमस्वैरिणीग्राही

* अत्र मिताक्षरोक्तः परस्परविरोधपरिहारोऽनेनोक्तोऽपि नोद्धृतः । व्यक. पदार्था अपरार्कोक्तप्रथमकल्पानुसारेण व्याख्याताः ।

+ अपरार्कस्य अपरव्याख्यानबद्धाशः ।

× कल्पतरुमतं मितागतम् ।

प्रथमपुनर्भूग्राही, प्रकृष्टधनयुक्तस्त्रीहारीत्येका कोटिः निरपत्यनिर्धनयोषिद्ग्राहीत्यन्या कोटिः । एव स्थिते प्रथमकोट्यन्तर्भूतयोषिद्ग्राहाभावे पुत्र ऋण दाप्यत इत्यभिधीयते 'पुत्रोऽनन्याश्रितद्रव्य' इत्यनेनेत्याह । अन्तिमस्वैरिणीग्राहिण इति। पुत्राभावे द्वितीयः कोट्यन्तर्भूतो योषिद्ग्राह ऋण दाप्य इत्यभिधीयते । 'पुत्रहीनस्य रिक्थिन' इत्यनेनेत्याह । पुत्राभावे तु निर्धन इति । ×सुबो.

(७) अतो योग्योऽपि पुत्रोऽनन्याश्रितधन एव ऋण दाप्यः तेन पितुरधिकारे यो निषिच्यते स एव ता धुरमुद्वहति तस्यैव देय नापरपुत्रस्य । तदय सक्षेपः । धनस्त्रीहारिणोरपि सत्वे द्रविणार्हो धुर्यश्च स एव । अनीदृशपुत्रसत्वेऽपि धनहारी । धनहार्यभावे पूर्ववत् पुत्रसत्वेऽपि स्त्रीहारी । उभयोरभावेऽयोग्योऽपि पुत्र एवाधमर्ण्य दद्यात् । *विनि.२७

(८) अरयार्थः—पुत्रहीनस्य योग्यपुत्रादिविधुरस्य रिक्थिनो धनवतो मृतस्य यदृण तद्रिक्थग्राही दाप्यः । राज्ञेति शेषः । प्रातिनाशे तद्दायहरो भ्रात्रादिर्दापनीय इत्यर्थः । तदभावे योषिद्ग्राहः । यश्च तिसृणा स्वैरिणीना अन्तिमा यश्च पुनर्भुवा तिसृणा स्वैरिणीना प्रथमा तदीया योषितमतिक्रान्तनिषेधः परिगृह्णाति स योषिद्ग्राहः । तदभावे अनन्याश्रितद्रव्यः । अन्य आश्रितमप्राप्त तद्द्रव्य यस्य सोऽन्याश्रितद्रव्यः । स्वगामिधन इत्यर्थः । ततो नञ्समासे तद्विपरीतः । परप्राप्तदायः क्लीबत्वादिदोषैर्दायहरणायोग्य (?) यो विधीयते स च दाप्य इति । अत्रेदमाशङ्क्यते – यदा न सन्ति पुत्रादयः कस्तदीयमृणमपाकुर्यादित्यस्यामाकाङ्क्षाया अन्यान् कर्तॄन् क्रमिकान् निरूपयितुमिदं वचनमारभ्यत इति मदुक्तरीत्या ऋजुमार्गेण व्याख्याने सिद्धे वक्रमार्गानुसरण हेयम् । सवि. २६०-२६२

(९) अत्र कश्चिद्वादभयङ्करकुदाह–'अहो बत जगत्ख्यातविज्ञानेश्वरयोगिनः । पूर्वापरविरोधेऽपि नानुसंधानमद्भुतम्' ॥ रिक्थग्रहणार्हस्य गृहीतरिक्थस्य पुत्रस्यान्येन रिक्थग्राहिणा सह कदा वा स समावेशः संभवति । अपि च पुत्रहीनस्य रिक्थिन इति पदं त्रिभिरपि सबध्यते द्वाभ्यामेव वा । प्रथमे पुत्र इति व्याघातस्य मुख्यमुदाहरणम् । द्वितीये भिन्नविषयता, तेषामप्यसमावेश इत्येतदपि इति । तन्मन्दधिया धनमात्रम् । रिक्थग्रहणार्हपुत्रसत्वे एतद्वचनाप्रवृत्तेः पुत्रहीनस्येति त्रिभिरपि सबध्यते । न च पुत्रहीनस्य पुत्र इति व्याघातः । पुत्रहीनस्य रिक्थग्रहणार्हपुत्रहीनस्य पुत्रो रिक्थग्रहणानर्हपुत्र इत्यर्थस्योक्तत्वात् । *व्यप्र.२७०

ऋणप्रतिदाने कृते उपगतपत्रग्रहणादिविधि.

[5]**लेख्यस्य पृष्ठेऽभिलिखेद् दत्त्वा दत्त्वर्णिको धनम् ।**
धनी वोपगतं दद्यात्स्वहस्तपरिचिह्नितम् ॥

(१) एवञ्च न्यायागमपरिनिष्ठितप्रामाण्यस्य– लेख्यस्येत्यादि । यन्मूल्यात् कालान्तराद्वा दद्यात्, तत् तस्यैव पत्रस्य पृष्ठे लेखयेत् । धनिको वान्यत् स्वहस्तपरिचिह्नितमृणिकायोपगत दद्यात् । अन्यथा दत्तमप्यदत्त स्यात् । विश्व.२।९६

(२) एव शोधिते पत्रे ऋणे च दातव्ये प्राप्ते यदा कृत्स्नमेव ऋण दातुमसमर्थस्तदा कि कर्तव्यमित्यत आह, लेख्यस्येति । यदाऽधमर्णिकः सकलमृण दातुमसमर्थस्तदा शक्त्यनुसारेण दत्वा पूर्वकृतस्य लेख्यस्य पृष्ठेऽभिलिखेत् एतावन्मया दत्तमिति । उत्तमर्णो वा उपगत प्राप्तं धनं तस्यैव लेख्यस्य पृष्ठे दद्यादभिलिखेत्

* वचनव्याख्यानं मितावत् स्मृचवच्च ।

(१) **यास्मृ.**२।९३; **अपु.**२५५।२६ दत्वा ..धनम् (प्रविष्टमधमर्णिनः) वो (चो), **विश्व.**२।९६ दत्वा धनम् (प्रविष्टमधमर्णिकात्); **मिता.**; **व्यमा.**३१५ दत्वर्णिको धनम् (दत्वा धन ऋणी) वो (चो), **अप**; **व्यक.**१२९ व्यमावत्; **स्मृच.**१६२-१६३ : १६४ उत्त.; **विर.**८० व्यमावत्, **स्मृसा.**९८ ष्ठेऽभि (ष्ठतो) दत्वर्णिको धनम् (दत्वा धन ऋणी) कात्यायनः; **पमा.**१३८ ऽभि (वि): २६० पू.; **स्मृचि.**४४ पृष्ठेऽभिलिखेत् (पृष्ठतो लेख्य) शेष व्यमावत्; **नृप्र.**१९ ऽभि (वि) दत्वर्णिको (तदृणिनो) पू.; **सवि.**२५४ वो (चो) उत्त., स्मृतिः : २५९ ख्य (ख) दत्वा (यद्वा); **मच.**८।१६४; **वीमि.**; **व्यप्र.**२७६; **व्यउ.**४५ वो (चो), **व्यम.**८१; **विता.**१३४ दत्वा ...धनम् (दत्वोत्तमर्णिके धनम्), **सेतु.**३९ चिह्नि (निष्ठि) शेषं व्यमावत्; **प्रका.**९५; **समु.**८१,

× बाल. सुबोवत् ।

* चन्द्र. विचिगतम् । वीमि विचिवद्भावः ।

एतावन्मया लब्धमिति । कथम् । स्वहस्तपरिचिह्नित स्वहस्तलिखिताक्षरचिह्नितम् । यद्वोपगतं प्रवेशपत्रं स्वहस्तलिखितचिह्नितमधमर्णायोत्तमर्णो दद्यात् । ×मिता.

(३) एतावदनेन प्रतिदत्तमिति लिखितान्तरमुपगतमित्युच्यते । *अप.

(४) ऋणपत्रासनिधाने तु शुद्ध्यै अधमर्णत्वनिवृत्तिनिश्चयायाऽन्यल्लेख्यं परिशोधनप्रतिपादकं कारयेत् । वीमि.

दत्त्वर्णं पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारयेत् ।
साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकम् ॥

(१) ऋणं दत्त्वा लेख्य पाटयेत् । शुद्ध्यै शुद्ध्यर्थं निरपवादत्वायेति । यद्वा अन्यत्तु कारयेद् अन्यदेव वा लेख्यं कार्यम् । ऋणिकस्येच्छया विकल्पः । लेख्यव्यतिरेकेणाऽपि तु ससाक्षिक यद् गृहीत, तत् ससाक्षिकमेव दातव्य परिशोधनीयत्वात् । सर्वथा लेख्यबलार्थं लेख्यान्तराद् विशुद्धिः, साक्षिमति च साक्ष्यन्तरात् । यथैवार्था गृहीतः तथैव प्रतिदेय इत्यर्थः । विश्व.२।९७

(२) ऋणे तु कृत्स्ने दत्ते लेख्य कि कर्तव्यमित्यत आह, दत्त्वर्णमिति । क्रमेण सकृदेव वा कृत्स्नमृण दत्त्वा पूर्वकृत लेख्यं पाटयेत् । यदा तु दुर्गदेशावस्थित लेख्य नष्टं वा तदा शुद्ध्यै अधमर्णत्वनिवृत्त्यर्थमन्यल्लेख्य कारयेदुत्तमर्णोनाधमर्णः । पूर्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्रमधमर्णाय दद्यादित्यर्थः । ससाक्षिके ऋणे कृत्स्ने दातव्ये किं कर्तव्यमित्यत आह साक्षिमच्चेति । यत्तु ससाक्षिकमृण तत्पूर्वसाक्षिसमक्षमेव दद्यात् । ×मिता.

(३) बहुभिरवशिष्टतरसाक्षिसमक्षमृणमपाकुर्यात् (?) । *अप.

(४) पूर्वसाक्षिणां कथञ्चिदसंभवे साक्ष्यन्तरसमक्षं वा दातव्यम् । ससाक्षिकमिति सामान्योक्तेः । पक्षद्वयसमर्थनार्थत्वात् । पूर्वसाक्ष्यन्तरं तु पूर्वसाक्ष्यबाधनक्षमत्वाय संख्यागुणाधिकमेव कार्यम् । +स्मृच.१६२

(५) चकारेण स्वस्य लिखितत्वाभावे प्रामाणिकहस्तचिह्नितमिति समुच्चीयते । तुकारेण असाक्षिके ऋणे ससाक्षिकपरिशोधनव्यवच्छेदः । चकारेणाऽसाक्षिके ऋणेऽसाक्षिक दान समुच्चीयते । वीमि.

नारदः

ऋणप्रतिदातारः

[9]**पितर्युपरते पुत्रा ऋणं दद्युर्यथांशतः ।**
विभक्ता ह्यविभक्ता वा यो वा तामुद्वहेद्धुरम् ॥

(१) अत्र येषा पित्रा कृतमृण स यावज्जीवति तावत्स्वयमेव दद्यात् । तस्मिंस्तु पितर्युपरते मृते तद्दण तत्पुत्रा एव दद्युः । यदि विभक्तास्ततः स्वांशतो दद्युः ।

× स्मृच., सवि., विता. मितागतम् । व्यप्र. मितागत वीमिगत च । * शेष मितागतम् ।

(१) **यास्मृ.**२।९४; **अनु** २५५।२७ वान्य (चान्य) द्वा (त्त); **विश्व.**२।९७ भवे .तव्यं (भवेद्यत्तु दातव्य तत्); **मिता** ; **अप** , **व्यक** १२९ वान्य (चान्य); **स्मृच** ६० पू. : १६२; **विर.**८१ द्धर्यै (द्धौ), **स्मृसा.**९८ लेख्य (त्पत्र) यद्वा (यत्तु); **पमा.**१२८ लेख्य (त्पत्र) पू. : २६२ उत्तरार्धे (साक्षिण ख्यापयेद्यद्वा दातव्यं वा ससाक्षिकम्); **विचि.**३६ वान्यत्तु (चान्यच्च) तद्दातव्यं (दातव्यं तत्); **स्मृचि.**४४ स्मृसावत्; **नृप्र** १९ द्धर्यै वा (द्धाव); **सवि.** २५२ उत्त. : २५९-२६० न्यत्तु (न्यत्र); **मच.**८।१६४; **वीमि.** यद्वा (यत्तु), **व्यप्र.**१४२ पू. : २७७-२७८, **व्यउ.**४५ शुद्ध्यै वा (शुद्धयद्वा); **व्यम.**१२ पू.; **विता.**१३५ त्तु (च्च); **सेतु.** ३९,३१८ विचिवत्; **प्रका.**३९ पू. : ९५; **समु** ८१.

(१) **नासं.**२।२ यो वा तामुद्वहेत् (यस्तामुद्वहते); **नास्मृ.** ४।२ ह्यवि (अवि) द्वहे (द्धरे); **अभा.**३२ द्वहे (द्धरे); **मिता.** २।५० पितर्युपरते (अत ऊर्ध्वं पितुः) उत्तरार्धे (अविभक्ता विभक्ता वा यस्तावद्वहते धुरम्); **अप.**२।५१ पितर्युपरते (अत ऊर्ध्वं पितुः) उत्तरार्धे (विभक्ता वाऽविभक्ता वा यस्ता चोद्वहते धुरम्); **व्यक.**११८ थांशतः (थार्थतः) ह्यवि (वाऽवि) द्वहे (द्धरे); **स्मृच.**१६९; **विर.**४७; **पमा.**२६४; **दीक.**३६ थाशतः (थागतम्) पू; **विचि.**२२; **स्मृचि** १२ उद्वहेद्धुरम् (धुरमुद्वहेत्); **नृप्र.**२० अभावत्; **सवि.**२५६ ह्यवि (वाऽवि); **चन्द्र.**१९ ह्यवि (अवि) शेषं स्मृचिवत्; **व्यप्र.** २६४ विभक्ता ह्यविभक्ता (अविभक्ता विभक्ता); **व्यउ.**७८ पितर्युपरते (अत ऊर्ध्वं पितुः) उत्तरार्धे (अविभक्ता विभक्ता वा यस्तां चोद्वहते धुरम्), **व्यम.**८२ ह्यवि (अवि); **विता.**५१२ मितावत्; **राकौ.**३९७ व्यउवत्; **सेतु.**२४; **प्रका.**९८; **समु.** ८४ सविवत्.

अथाऽविभक्तास्ततः सामान्यमेव दद्युः । यो वा तामुद्धरेद्धुरमिति । अत्रैतदुक्त भवति । यदि ज्येष्ठः सुचिरदूरप्रवसितो भवति । कुष्ठक्षयपातकादिभिरयोग्यो भवति । तदा यः कोऽपि पितृधनभारस्य धुरमुद्धरेत्, स कनिष्ठोऽपि पितृकृतमृणं दद्यादित्यर्थः । *अभा.३२

(२) विभक्तास्तु समानमेव धनं दद्युः । अविभक्तास्तु समप्रधानतया वर्तमानाः संभूयसमुत्थानेन दद्युः । गुणप्रधानतया वर्तमानेष्वविभक्तेषु प्रधानभूत एव सर्वं दद्यात् । गुणभूतस्याधिकारात् । यत्र पुनः पित्रा सह विभक्ताश्चाविभक्ताश्च पुत्राः सन्ति तत्र येषां विभागादूर्ध्वं पित्रा यद्दणं कृत तत्तैर्न देयम् । अविभक्तेषु सुतेषु संविभक्तानां विभागतः पितृद्रव्यार्हत्व स्यापगतत्वेन मृते पितरि पुनः पितृद्रव्याग्रहणात् । अत एव कात्यायनः 'पित्रर्णं विद्यमाने तु न च पुत्रो धनं हरेत् । देयं तद्धनिकद्रव्य मृते गृह्णस्तु दाप्यते' ॥ ÷स्मृच.१६९

(३) पितरि मृते ऊर्ध्वकाल पुत्राः पित्रा कृतमृण ज्येष्ठाशादिविभागानुरूप विभक्ता अविभक्ता वा विभक्तुकामा ऋणं दत्वा शेष यथार्ह विभजेयुः । अशानुरूप्येण वा प्रतिपद्योत्तरकाल दद्युः । अविभक्तुकामाना ज्येष्ठो वा गुणाधिको वा यस्तु भरणक्षमः, यदधीनास्ते सह वसन्ति, स दद्यात् । नाभा.२।२

कुटुम्बार्थे कृतमृण सर्वे रिक्थिन. दद्युः

[1]**पितृव्येणाऽविभक्तेन भ्रात्रा वा यद्दणं कृतम् ।**
मात्रा वा यत्कुटुम्बार्थे दद्युस्तत्सर्वमृक्थिनः ॥॥

(१) इत्यत्र पितुर्भ्राता पितृव्यशब्देनोच्यते । तेन पितृव्येणाऽविभक्तेन यद्दणं कृतम् । अथवा मात्रा भ्रात्रा वा कुटुम्बार्थे यद्दणं कृतं भवति । ये केचित्तद्रिक्थभाजस्ते सर्वे तत्सर्वमिति । यदि विभक्तास्ततः स्वांशतो दद्युः । अथवा अविभक्तास्ततः सामान्यमेव दद्युरिति । अभा.३२

(२) ऋणकर्तरि प्रेते प्रोषिते वेति शेषः । तस्मिन्प्रधानभूते स्थिते सति एषा गुणभूतानां ऋणादानानधिकारात् । *स्मृच.१७६

(३) कुटुम्बार्थं इति सर्वेषां शेषः । नाभा.२।३

त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः

क्रमादव्याहृतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतम् ।
दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्तते ॥॥

(१) इत्यस्मिन् श्लोके तथाग्रतो द्वितीयश्लोकेऽपि चतुर्थपुरुषो ऋणदायकः कृती स्फुटोऽपि कैश्चिन्मन्दमतिभिर्मुनिकृतवचनभावार्थमयुद्ध्वा .....ईदृश च युक्तिविरुद्ध अज्ञानतः प्रवर्तितम् । संजल्पता उपेक्षमाणानामपि पापानुबन्धजननमेव भवतीत्येतदुच्यते । ननु येन स्वयमेव कृतमृण सोऽवश्य ददात्येव । न तु चर्वितचर्वण कोऽपि करोति । तन्न कोऽपि गणयति । ये पुनस्तदीयपुत्रतः संततिपुरुषाः स्वयमकृतमपि ऋणं संततिसंबन्धेन दाप्यन्ते लग्नाः । त एव पितामहाः पौत्रिका ग्राह्यन्ते । तेनैतदुक्तम् । स्वयमकृतैर्णैरपि संततिगुणदाप्यैः पुत्रैर्यन्नर्णमुद्धृत तत्तेषामेव ये पौत्राः स्वयमकृतधनदायकाः । तेषामेव स्वकीयपितामहाना स्वयमकृतर्णदायकाना सक्त तद्दणम् । तस्मादेव क्रमादव्याहृतं प्राप्तं त एव दद्युरिति । तच्चतुर्थादिति च । तेभ्यः संततिगुणदायकेभ्यः पुत्रेभ्यो यश्चतुर्थः । तस्मादृणसंबन्धो निवर्तते । मूलिकस्य पञ्चमत्वात् । यः पुनर्मूलिकचतुर्थः स पितृपितामहप्रपितामहानामुत्तमर्णाऽधमर्ण-

* चन्द्र. अभागतम् । ÷ व्यप्र.वाक्यार्थः स्मृचगतः ।

+ मेधा. व्याख्यान 'ग्रहीता यदि नष्टः स्यात्' इति मनुवचने (पृ ६८०) द्रष्टव्यम् ।

(१) **नासं.**२।३ सर्वमृक्थिन· (रिक्थिनोऽखिलम्); **नास्मृ.**४।३ नासवत्; **अभा.**३२; **मेधा.**८।१६६ यें (यैं); **अप.**२।४५; **व्यक.**१२० यत्कु (स्वकु) क्रमेण याज्ञवल्क्यः; **स्मृच.**१७६ मृक्थि (रिक्थि), **विर.**५३ वा यत्कु (वापि कु) मृक्थि (रिक्थि); **पमा.**२७१ स्मृचवत्; **विचि.**२७; **स्मृचि.**१३-१४ वा यत्कु (वापि कु); **नृप्र.**२० विरवत्; **सवि.**२५३ नासंवत्; **चन्द्र.**२४; **व्यप्र.**२७५ नासंवत्; **व्यम.**८४ स्मृचवत्; **समु** ८६ स्मृचवत्.

* व्यप्र. स्मृचवत् ।

(१) **नासं.**२।४; **नास्मृ.**४।४; **अभा.**३२; **विश्व.**२।९३; **मिता.**२।५१; **अप.**२।५१; **व्यक.**११९ दद्युः (देयं) पौत्रा (पौत्रै) क्रमेण बृहस्पतिः; **गौमि.**१२।३७ व्याहृत (भ्यागत); **स्मृच.**१७१; **विर.**४९ व्यकवत्; **पमा.**२६५ ऋर्ण (इर्ण); **स्मृचि.**१३; **व्यप्र.**२६४ व्यकवत् : २६९; **विता.**५२०; **प्रका.**९९ व्यकवत्; **समु.**८४.

दाता सर्वमुनिभिरपि समर्थितः। तथा चायमपि द्वितीयश्लोकेनैतन्निःसंदिग्धं कर्तुकामः प्राह--इच्छन्तीति। अभा.३२ ३३

(२) क्रमात् पितृपितामहपरम्परया चतुर्थात् प्रपौत्रात्। विर.४९

(३) क्रमात् प्राप्तमृणमव्याहतमविसंवादितम्। नैतदेवमिति यद् विसंवादितं तद् व्यवहर्तव्यम्। ओमित्येव न दातव्यम्। अविसंवादितं तु पुत्रेण दत्तं भुज्यमानमभुज्यमानं वा तत्पौत्रो दद्यात्। चतुर्थात्तु निवर्तते। एकेन पत्रेण त्रिपुरुषं लभ्यते। तृतीये तु पुनः पत्रं कर्तव्यम्। अकरणे तद्दोषाच्चतुर्थं हीयते। भूम्यादिषु भुज्यमानेषु न हानिः। अत एव ऋणग्रहणं कृतमाधमननिवृत्त्यर्थम्। आधमनं त्वादानाद् दशपुरुषमपि न हीयते। नाभा.२।४

(४) पुत्रपौत्रयोः प्रपौत्राद्यपेक्षया वैषम्यं दर्शयति --क्रमादिति। व्यप्र.२६९

इच्छन्ति पितरः पुत्रान्स्वार्थहेतोर्यतस्ततः।
उत्तमर्णाधमर्णभ्यो मामयं मोक्षयिष्यति॥

(१) इत्यस्मिन्द्वितीयश्लोके उत्तमर्णाधमर्णयोरेकयोगनिर्देशोऽयमेतदर्थं कृतः, येन एकयोगनिर्दिष्टानामर्थिना सह वा प्रवृत्तिः सह वा निवृत्तिर्भवति। यथा मूलिकचतुर्थपितृपितामहप्रपितामहानां त्रयाणामपि पुरुषाणामुत्तमर्णं पितृपिण्डोदकादिकं ददाति। तथा हिरण्यधान्यादिकमधमर्णमेतेषां त्रयाणामपि ददात्येवेत्यर्थः। अभा.३३

(२) पितृकृतर्णस्यापाकरणमावश्यकमित्यत्र हेतुमाह नारदः—इच्छन्तीत्यादि। यतस्ततो भार्योपगमनपुत्रकरणपुत्रप्रतिग्रहाद्युपायानां मध्ये येनकेनचिदुपायेनेत्यर्थः। उत्तममृणं 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते' इत्यादि श्रुत्युक्तम्। अधममृणं परहस्तात्कुसीदविधिना गृहीतम्। अथवोत्तमर्णाधमर्णशब्दतो लक्षणया कुसीदविधिना गृहीतमेवर्णमवगन्तव्यम्। *स्मृच.१६८

(३) उत्तमर्णाधमर्णेभ्य इति उत्तमानां देवर्षिपितॄणां ऋणानि उत्तमर्णानि अधमानां मनुष्याणां ऋणानि अधमर्णानि तेभ्यः। हलायुधस्तु मनुष्यर्णप्रकरणमेवेदमिति मत्वा उत्तमर्णाय देयानि अधमानि ऋणानि उत्तमर्णाधमर्णानि इत्याह। अधमत्वं तु ऋणानामदत्तानामत्यन्तानिष्टहेतुतया। शेषं सुगमम्। ×विर.५५

अंतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः।
ऋणात्पिता मोचनीयो यथा न नरकं व्रजेत्॥

पुत्रेण व्यवहारज्ञतया जातेन निष्पन्नेनेति व्याख्येयम्। श्राद्धे तु बालस्याप्यधिकारः। +मिता.२।५०

तस्मादधिकमादाय स्वामिने न ददाति यः।
स तस्य दासो भृत्यः स्त्री पशुर्वा जायते गृहे॥
पूजनीयास्त्रयोऽतीता उपजीव्यास्त्रयोऽग्रतः।
एतत्पुरुषसंतानमृणयोः स्याच्चतुर्थके = ॥

पूजनीयास्त्रयोऽतीता इति। अतीताः पितृपितामहप्रपितामहास्त्रयोऽपि चतुर्थकेनोत्तमर्णाधमर्णयोर्द्वयोरपि निर्ऋणीकर्तव्यास्त्रयोऽग्रत इति। तेनैव चतुर्थकेन पुत्रपौत्रप्रपौत्रास्त्रयोऽप्युत्तमर्णाधमर्णयोर्निर्ऋणीकरणार्थमेव उपजीव्या इति। 'एतत्पुरुषसंतानमृणयोः स्याच्चतुर्थके'। एकपुरुषसंततिक्रमोद्दिष्टचतुर्थपुरुषस्येति। तथा च याज्ञवल्क्येनापि यदुक्तम्—'ऋण लेख्यकृत देय पुरुषै-

---

(१) **नासं.**२।१५; **नास्मृ.**४।५ मोक्ष (मोच); **अभा.**३३ नास्मृवत्; **व्यक.**१२०; **स्मृच.**१६८ णेभ्यो (र्णाभ्यां); **विर.** ५४; **पमा.**२६३ मोक्ष (मोच) शेष स्मृचवत्; **स्मृचि.**१२; **नृप्र.**१९-२० पमावत्, **सवि.**२५५ स्मृचवत्; **चन्द्र.**१८ ततः (सुतः) शेष पमावत्; **व्यप्र.**२६३ पमावत्; **विता.**५१२ पमावत्; **प्रका.**९७ स्मृचवत्; **समु.**८३ स्मृचवत्.

* पमा, नाभा., व्यप्र., विता. स्मृचगतम्।

× अत्र स्वमते व्यवहारकल्पतरुव्याख्यानमेवोद्धृतम्।

÷ जॉलिना असंपूर्णत्वात् न गृहीतमिदं वचनम्।

+ व्यप्र., विता. मितागतम्। = नायं नारदीयः, किन्तु भाष्यात् वृद्धप्रपितामहस्येति प्रतिभाति।

(१) **नासं.**२।६ मोचनीयो (समुद्धार्यो) व्रजेत् (पतेत्); Vulg. **नास्मृ** ४।५ इत्यस्योपरिष्टात्, ऋणात् पिता (पिता ऋणात्), **अभा.**३७; **मिता.**२।५० (=), **अप.**२।५० क्रमेण **बृहस्पतिः**; **व्यक.**१२०-१२१रक (रके), **स्मृच.**१६८; **विर.**५४; **पमा.**२६३; **स्मृचि.**१२; **नृप्र.**२०; **सवि.**२५५ क व्रजे (के पते), **चन्द्र.**१८, **व्यप्र.**२६३; **व्यउ.**७८ स्मृत्यन्तरम्; **विता.**५१२; **राकौ.**३९७; **प्रका.**९७-९८; **समु.**८३.

(२) vulg. **नास्मृ.**४।५ इत्यस्योपरिष्टात्.

(३) **नास्मृ.**४।६; **अभा.**३३.

स्त्रिभिरेव तु। आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते'॥ इत्यत्रापि येन स्वकीयनामकमारोप्य लेख्ये स्वयमेव कृतमृण भवति तेन तदवश्यमेव दातव्यमित्यत्र को विचारः। विचारस्त्वयम्। यत्स्वयमकृतऋणोऽपि संततिपूर्वपुरुषसंबन्धगुणदाप्यैः कियन्मात्रैस्तद्दण दातव्यमित्यस्मिन्नर्थे इदमभिहितं मुनिना। पुरुषैस्त्रिभिरेव तु। ते च पुरुषास्तदीयसंततिपूर्वान्तरोत्पन्नाः पुत्राद्यः संबध्यन्ते। न सोऽपि, तत्पुत्रपौत्रप्रपौत्रैः स्वीयसंतत्युत्पन्नैः पुरुषैस्त्रिभिर्दातव्यमित्यर्थः। येन पुनः स्वयकृतमृण सोऽस्वयंकृतऋणदायकपुरुषाणा असमानधर्मित्वाद्ग्राह्यः। यदपि मुनिभिरभिहितम्। यत्तु किल चतुर्थाद्वा पञ्चमाद्वा ऋणदानमेव सर्व निवर्तते तदपि विच्छिन्नभुक्तिचिन्हैरिति दानस्य दूरपुरुषान्तरे मा क्वचिदसमर्थकृटपत्राणामपि सभवो भविष्यति। इत्यप्यमन्दमुनिभावार्थः। एतत्कारणनिराकरणमात्रमेवैतदभिहितम्। न पुनः परमार्थतः। सिद्धादेशेन चतुर्थात्पुरुषात्परत ऋणदानसबन्धनिवृत्यर्थ, परमार्थतस्त्वय मुनिहृदयभावार्थो यतो यावत् व्यवहारस्य धन न प्रवेशित तावत्तदीयसततिपूर्वपुरुषान्तरशतस्यापि मध्ये कोऽपि निर्ऋणी न भवति। अस्य चार्थस्य च परीक्षाकरणार्थ अनेनैव मुनिना अस्य श्लोकस्योत्तरार्धे इदमभिहितम्। 'आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते'। अत्र यदि सत्यमेव परमार्थात् पुरुषतश्चतुर्थात्परत ऋणदानसबन्धो निवर्तते ततः तच्चतुर्थान्निवर्तत इति। अस्मादेव मुनिवचनबलात्। चतुर्थेन पुरुषेण स्वयमेव निर्ऋणीभूतेन द्रव्यमदत्त्वैव व्यवहारकपार्श्वात् गृह क्षेत्र चाधिरुद्धालनीयो भवति। तेनापि निर्विकल्पमेव भोक्तव्यो भवति। न चैतत्कोऽपि कर्तु लभते, शक्नोति वा सोऽतः स्वकीयपूर्वजकृतमृण व्यवहारकस्य दत्वा स्वकीयमाधि लभते। नान्यथा। अतः सत्यमिदमुच्यते सद्भिः–'उक्तानि प्रतिषिद्धानि पुनःसभावितानि च। सापेक्षनिरपेक्षाणि स्मृतिवाक्यानि के विदुः'॥ इति। तथा च 'धर्मशास्त्रार्थकुशलाः कुलीना' इत्यस्य विवरणे सविशेषतरमिदमुक्तम्। इह धर्मशास्त्रे तु केचित् स्मूनितन्त्रसमयसाकेतिकशब्दगूढार्थदुःखबोधाः श्लोका भवन्ति। केचिन्मुनिहृदयान्तर्गतभावगूढार्थदुरवबोधा भवन्ति। तेषु चोक्तप्रतिषिद्धपुनःसभावितसापेक्षनिरपेक्षदशविधवाक्यार्थप्रकरणसबन्धे सति वाक्येषु असप्राप्तगुरुपारंपर्योपदेशार्थविचारक्षोदकौशला मन्दमतयः न सारासाराधानुसारदण्डप्रमाणनिर्णयविदः सभासदः सभायोग्या न भवन्ति इति। अत एतदुक्तं 'धर्मशास्त्रार्थकुशलाः कुलीनाः कुलपौरुषाः स्वभावादेवाधर्मरुचयो न भवन्ति। सत्यवादिनः स्वभावादेव नानृतं ब्रुवते। समाः शत्रौ च मित्रे चेति। तस्मिन्व्यवहारावसरे धर्माधिकरणस्थिता धर्ममेव केवलमनुसृत्य कस्याप्युपरि मत्सरस्नेहभावाश्रयानुवर्तनात्पक्षवादिनो न भवन्ति ये ते नृपतेः स्युः सभासद इति। 'अन्धो मत्स्यानिवाश्नाति निरपेक्षः सकण्टकान्। परोक्षमर्थवैकल्याद्भापते यः सभा गतः'॥ इति। इत्येव सततिपुरुषशतेऽपि अप्रवेशितधनस्यासिद्धिर्निर्ऋणत्वे। चतुर्थे पुरुषे सर्वस्मृतिपूत्तमर्णाधमर्णदायक सुप्रतिष्ठितमपि, येऽधमर्णदान वाच्यं कुर्वन्ति ते मन्दमतयो वाच्या निरपेक्षाः सकण्टकमत्स्याशनपापभाजो भवन्ति इति कः सदेहः। अत एव मन्दमतिस्मार्तनिगकरणमिद धर्मसार्थक कल्याणभट्टस्य, तथा ह्युक्तमेवैतत् कपिलाचार्येण पष्टितन्त्रे। 'अपारसंसारमहार्णवस्य प्राप्त परं पारमिदं सुपात्रम्। मत्पक्षपातेन विनार्थयुक्तिः प्रणीयते यावदुपैति शान्तम्'॥ यच्चास्मिन्नेवार्थे पाटलिपुत्रवृत्तमुपाख्यान अभिलिख्यते। श्रीपाटलिपुत्रनगरे ब्राह्मणः श्रीधरो नाम व्यवहारकः। तेन स्वसततिसहितस्यात्मनो वर्तनार्थमतिक्लेशार्जित धन वणिग्देवधरनाम्नः पुत्रपौत्रप्रपौत्रसततिमहाधनसपन्नस्योपरि द्विकशतमासकलान्तरलाभवृद्ध्या प्रयुक्त द्रम्माणा दश सहस्राणि। ततस्तस्यैकमासे गते देवधरेण कलान्तरे द्रम्मशतद्वय दत्तम्। यावद्द्वितीयमासः प्रविष्टः तावद्देवधरः सन्निपातदोषान्मृतः। देवधरस्य पुत्रो विपूचिकामृतः। देवधरस्य प्रपौत्रो महीधरो बालस्तिष्ठति। स द्यूतमद्यवेश्याव्यसनी। सूनुभिर्मातुलैः प्रतिग्राहितः। तेऽपि स्मार्तदुर्धरनाम्ना ब्राह्मणेनागत्याभिहिताः। यथा व्यवहारकश्रीधरस्य रूपकोऽपि न दातव्यः। अहं वः स्मृत्याचारेण स्थानमध्येऽपि रक्षयिष्यामि। तैश्चोक्तम्। यद्येव ततो द्रम्मसहस्रमेक लक्षपात दास्यामः। वयं भवद्भिरेव संतुष्टाः। एव तेषां परस्पर निष्पन्ने द्वितीयमासे च परिपूर्णे सजाते

व्यवहारकश्रीधरेण ते महीधरकुटुम्बधुरंधरमातुलाः कलान्तरेण द्रम्मशतद्वय प्रार्थिताः । तैश्चोक्तम् । तव मूलमपि नास्ति । कुतः कलान्तरम् । ब्राह्मणस्मार्तदुर्धरेण कथितम् ' तच्चतुर्थान्निवर्तत ' इति । तच्छ्रुत्वा श्रीधरः अदृष्टमुद्गरपाताभिघात इव मूर्छामधिगम्य लब्धचेतनः सकुटुम्बपरिवारस्वजनपरिवृतः शालामधिगम्य श्रीधरस्य अदृष्टमुद्गरपाताभिघातवृत्तान्तेन देवधरप्रपौत्रं महीधरं समातुलमाहूय उभयपक्षेऽपि न्यायाविचलौ प्रतिभुवौ गृहीत्वा महीधरमातुला उक्ताः । श्रीधरस्य कलान्तरं कस्मान्न प्रयच्छतः। तैश्चोत्तरदानाय स्वकीयजयपराजयदत्तनियोगो ब्राह्मणदुर्धरो नियुक्तः । तेन चोक्तम् एते वणिजोऽस्माक पूर्वजपारम्पर्येण मित्रस्थाने। तेनाहं ब्रवीमि । किं न श्रुत भवद्भिरिति नारद वचनम् । 'दद्युः पैतामह पौत्रास्तच्चतुर्थान्निवर्तत' इति । तेन देवधरप्रपौत्रो महीधरश्चतुर्थो न ददाति । तथा च याज्ञवल्क्येनाप्युक्तम्– 'ऋण लेख्यकृत देय पुरुषैस्त्रिभिरेव तु' । अत्रापि त्रय एव पुरुषा ऋण प्रयच्छन्ति । एतत्स्मार्तदुर्धरवचनमुपहस्य महाजनेन स्मृतिवाक्यविषयविभागवाह्य स्मार्तदुर्धरस्य प्रतिबोधार्थं च त्रिकालावधारित दत्तसमस्तमहाजनानुमतिपरिणीतमकलशास्त्रपरमार्थो भट्टः स्मार्तशेखरो नाम प्राह । हे दुर्धर भवान् स्मृतिशास्त्रवाक्यार्थविभागेषु न क्षुण्णः। न चापि शब्दार्थव्याख्याने । तदुभयमपि प्रतिपाद्यमेव । इह समस्तस्मृतिशास्त्रेष्वपि षट्त्रिंशतिप्रकारो वाक्यार्थो भवति। तद्यथा—'विधिश्च नियमश्चैव परिसख्या तथाऽपरा । उत्सर्गश्चापवादश्च निषेधः प्रसवस्तथा ॥ समुच्चयो विकल्पश्च यदङ्गाङ्गित्वमेव च । अर्थवादोऽनुवादश्च व्यवस्था लिङ्गदर्शनम् ॥ अर्थः प्रकरण लिङ्ग शब्दस्यान्यस्य सनिधिः । अन्यथानुपपत्तिश्च तथाऽर्थापत्तिरेव च ॥ भूतार्थवाद औपम्य गौणमुख्यार्थदर्शनम् । पुनरुक्त निरासश्च न निर्बीजार्थवादता ॥ एवमाद्यास्तु वाक्यार्थाः स्मृतितन्त्रे प्रकीर्तिताः । जिज्ञासमानैः स्मृत्यर्थं वेदितव्याः प्रयत्नतः ॥ विस्तरान् स्मृतिवाक्यार्थानेतानज्ञाय तत्वतः । यस्मात्तत्वाभिमानी स्यात्शाभवीवोन्मुखः प्लवेत्' ॥ तत् दुर्द्धरत्वमेतेषा स्मृतिवाक्यानामक्षुण्णत्वाद्वाच्यः। यथा शब्दार्थव्याख्यानेऽप्यक्षुण्णस्वम् । तथोच्यते। यदेतन्नारदोक्त–'क्रमादव्याहत प्राप्त पुत्रैर्यन्नर्णमुद्धृतम् । दद्युः पैतामहं पौत्राः' इत्येतद्विधिवाक्यार्थस्य च अप्रवृत्तौ प्रवर्तन सार्थको विषयविभागः, प्रवृत्तौ तु प्रवर्त्तनमविषयः चार्वितचर्वणदोषात् । तदिह येन स्वयकृतमृणं स स्वकृतकर्मनिस्तारणार्थं ऋणादानेऽपि स्वयंवृत्त एव । नास्य विधिवाक्यस्य विषयोऽसौ । तेन अत्र पुरुषगणनाया न संबध्यते, सिद्धस्य साधनं व्यर्थमिति । ये पुनः स्वयमकृतऋण दाप्यन्ते लग्नाः, ते पुत्रपौत्रप्रपौत्राः त्रयः पुरुषाः । एतेष्वेव अप्रवृत्तिप्रवर्त्तनविषयो यो विधिवचनस्मृतिवाक्यार्थो न सिद्धसाधनविषयः । अतस्तदस्वयंकृतमपि संततिसंबन्धपूर्वक्रमागतम् । पुत्रैर्यन्नर्णमुद्धृतं तत्तेषामेव पुत्राणाम् । ये पौत्राः समानधर्मिणः ते स्वपैतामहं ऋणं दद्युरिति । शब्दार्थव्याख्यानेऽप्यक्षुण्णस्वम् । यथोक्तं तच्चतुर्थान्निवर्तते । तत्तस्मात्प्रपौत्रात्संततिक्रमायातविशोधितऋणसबन्धात्परतो निवर्तते । पञ्चमो न ददातीत्यर्थः । एवमर्थः चतुर्थपुरुषऋणदानस्य एक साधनमिदम् । यच्च याज्ञवल्क्येनोक्त 'ऋण लेख्यकृत देय पुरुषैस्त्रिभिरेव तु' । अयमपि विधिवचनवाक्यार्थः । अप्रवृत्तिप्रवर्तनविषय एव । अतो येन कृतमृण तदीयैः सततिपुरुषैरकृतमपि त्रिभिरेव दातव्यमिति । द्वितीयोऽयं प्रकारः । तथा च । इच्छन्ति पितरः पुत्रानिति । अत्र उत्तमर्णयोरेकयोगनिर्देशात् तृतीयः प्रकारः । तथा च वृद्धप्रपितामहोऽप्येतदाह । यदुक्त—'पूजनीयास्त्रयोऽतीता उपजीव्यास्त्रयोग्रतः । एतत्पुरुषसंतानमृणयोः स्याच्चतुर्थके' ॥ अयमुत्तमर्णयोश्चतुर्थपुरुषदापने चतुर्थः प्रकारः । यत्पुनस्तच्चतुर्थान्निवर्तते इत्येके चतुर्थपुरुषादयः । पुरुषशतमपि यावत् व्यवहारकस्य द्रव्यमदत्वा कश्चिदाधिं न लभते । न निर्ऋणी कोऽपि भवति । तत्र चतुर्थस्य व्यवहार इत्ययं चतुर्थपुरुषऋणदापने पञ्चमः प्रकारः । अतो जड स्मार्तदुर्धर स्मृत्यर्था न व्याख्यायन्ते । अयथार्थकरणात् अज्ञानजनितपापं तत्तेषामुपतिष्ठते । अन्यच्च कुस्मार्तदुर्धर किमिदमपि त्वया न श्रुतम् 'रिक्थग्राही ऋणं दद्याद्योधिद्ग्राहस्तथैव च' । तथा 'यतो रिक्थमृणं ततः' । तथा च 'धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत्' । एष सामान्यपैतृकधनस्य विधिरुक्तः ।

यत्पुनरिदं श्रीधरसक्तमेव धन दशसहस्रमात्रं स्वरूपस्थितमेव तिष्ठति । तद्धि मासकलान्तरितमेव लञ्चोपचारलोभाच्छ्रीधरस्योद्दालितुमिच्छसि, न लज्जसीत्युक्त्वा दुःस्मार्तदुर्धरस्यावसायः । अभा.३३–३७

प्राप्तव्यवहार एव ऋणप्रतिदाता

गर्भस्थैः सदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः ।
बाल आषोडशाद्वर्षात्पौगण्डश्चेति कथ्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते ॥
अप्राप्तव्यवहारश्चेत्स्वतन्त्रोऽपि हि नर्णभाक् ।
स्वातन्त्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम् ॥

अत्र किल पितरि मृते पुत्रः स्वतन्त्रः स्यात्, स च ऋणभागपि संभवति । तन्निषेधार्थमाह । अप्राप्तव्यवहारो यावत्पोगण्ड इत्यर्थः । तावत्स्वतन्त्रोऽपि अक्षमत्वादृणभाग् न संभवति । स्वतन्त्रत्वं ज्येष्ठे भवति । ज्येष्ठत्वं गुणैर्वयसा च कृतं भवतीति । अभा.४२

ऋणानपाकारणनिन्दा

याच्यमानं न दद्याद्यदृणं वाऽऽधिप्रतिग्रहम् ।
तद्द्रव्यं वर्धते तावद्यावत्कोटिशतं भवेत् ॥
ततः कोटिशते पूर्णे वेष्टितस्तेन कर्मणा ।
अश्वः खरो वृषो दासो भवेज्जन्मनि जन्मनि ॥

(१) अत्र याच्यमानग्रहण याच्यमानस्य ऋणादेरप्रतिदाने क्लेशातिशयप्रतिपादनार्थम् । न तु याच्यमानस्यैवाप्रतिदाने क्लेशो नान्यस्येत्यभिधानार्थमिति मन्तव्यम् । स्मृच.१६२

(२) प्रतिग्रहः प्रतिश्रुतम् । व्यप्र.२७७

तपस्वी चाग्निहोत्री च ऋणवान् म्रियते यदि ।
तपश्चैवाग्निहोत्रं च सर्वं तद्धनिनां धनम् ॥

(१) अत्राजन्माग्निहोत्रपालनमखण्डिततपःसमाचरणं चातिकष्टेन निर्वाह्यते । द्वयमप्येतदपि महाफलम् । तच्च प्रभूतमपि पय इव ऋणिकैकचुलुकप्रवेशेन विनाशितम् । परिपाकफलस्याक्षमत्वं भवति । सर्वं च तद्धनिकस्यैव भवति, न ऋणिकस्येति । अभा.३७

(२) तस्मादवश्य दातव्य ऋणमित्यदाननिन्दया ऋणदान विधीयते । न ह्यस्य सुकृतमन्यं गच्छति, आत्मनि समवेतत्वात् । काममेतस्माद् दोषान्निष्फलं भवेत्, परगमनं तु दुरुपपादमिति । नाभा.२।७

अनपाकरणीयमृणम्

नैव पुत्रर्णं पिता दद्याद्दद्यात्पुत्रस्तु पैतृकम् ।
कामक्रोधसुराद्यूतप्रातिभाव्यकृतं विना ॥

(१) अत्र पितुः पुत्रस्य परस्परमेकत्वसंबन्धः समान

(१) विचि.२४ (=); चन्द्र.२०; विता.५११ (=) आष्ट (अष्ट); विव्य.२९. अन्यस्थलादिनिर्देशः (पृ.५६१-५६२) इत्यत्र द्रष्टव्यः ।

(२) नार्स.२।२७ श्वेत् (स्तु) हि नर्ण (न चर्ण); नास्मृ.४।३१; शुनी.४।७७९; अभा.४२, मिता.२।५०; अप.२।५१; व्यक.१०४ उत्त.: १२० श्वेत् (श्व) पू.; स्मृच.१६८ पू. : १३२ हि (तु) उत्त.; विर.५४ श्वेत् (श्व) पू.; स्मृसा.१२४ स्मृचवत्, उत्त.; व्यचि.१०३ स्मृचवत्, उत्त.; विचि.२४ श्वेत् (स्तु) हि (च) पू.; नृप्र.२०; व्यत.२३२ स्मृचवत्, उत्त.; चन्द्र.२० श्वेत् (स्तु) ऽपि हि नर्ण (न तदृर्ण) पू. : १७१ हि (च) उत्त.; व्यसौ.९४ स्मृचवत्, उत्त.; व्यप्र.९५ स्मृचवत्, उत्त. : २६३ स्मरणम्; विता.५१२ (=); राकौ.३९७; प्रका.८३ स्मृचवत्, उत्त.; समु.७२ स्मृचवत्, उत्त. : ८४ श्वेत् (स्तु) पू.; विव्य.२९ श्वेत् (स्तु) पि हि (पि न).

(३) नास्मृ.४।७ दद्याद्यदृणं वाऽऽधि (दीयेत ऋणं वापि) तद्द्रव्यं (तद्धनं); स्मृच.१६२; पमा.२६२ वाऽऽधि (वाधि); नृप्र.१९; व्यप्र.२७७ वाऽऽधि (वापि); व्यम.८१ यदृणं (येदृणं) शेषं व्यप्रवत्; विता.५०९ यदृणं वाऽऽधि (यो ऋणं वापि); प्रका.९५; समु.८१.

(१) नास्मृ.४।८ (कोटिशते तु सपूर्णे जायते तस्य वदमेनि। ऋणसशोधनार्थाय दासो जन्मनि जन्मनि ॥); स्मृच.१६२; पमा.२६२; नृप्र.१९ दासो भवेज्जन्मनि जन्मनि (भृत्यः पशुर्वा जायते गृहे); व्यप्र.२७७; व्यम.८१; विता.५०९ उत्त.; प्रका.९५; समु ८१.

(२) नार्स.२।७ ऋणवान् म्रियते (म्रियते चेदृणी) सर्वं तत् (तत्सर्वं); नास्मृ.४।९; अभा.३७; व्यक.१२१ सर्वं तत् (तत्सर्वं) धनं (भवेत्); विर.५४ चाग्निहोत्री च (वाग्निहोत्री वा) शेषं व्यकवत्; पमा.२६१ नां धनम् (ने भवेत्) सवि.२५२(=) श्रौवाग्नि (स्या चाग्नि) नां धनम् (नो भवेत्); चन्द्र.१८ चाग्निहोत्री च (अग्निहोत्री वा) शेषं व्यकवत्.

(३) नार्स.२।८ कृतं (कृतार्); नास्मृ.४।१०; अभा.३७; अप.२।४७.

एव । कः केन कृत ऋणं दद्यादिति विशेष्यते । पुत्रकृतमृणं पिता न दद्यात् । अत्र तावन्निषेधः । 'दद्यात्पुत्रस्तु पैतृकम्' इत्यत्र विधिः । किं तु एतदपि विकल्पितम् । यत्कामान्धेन दासीसम्बन्धे कृतम् । यत्पुत्रस्यैवोपरि क्रोधान्धेन कृतम् । तथा यत्सुरापानव्यसनान्धेन कृतम् । तथा यद्द्यूतव्यसनान्धेन कृतम् । तथा यत्परस्य प्रतिभुवा स्थितेन कृतम् । एतावन्न दद्यात् । अभा.३७

(२) पुत्रसम्बन्धि पुत्रेण कृत ऋण वक्ष्यमाणापवादरहितमपि न पित्रा दातव्यम् । न पितुराभवति । पित्रा कृतं पुत्रो दद्यात्, तद्रिक्थहरत्वात् तदधीनत्वाच्च पुत्रेण दातव्यम् । अस्यापवादः—कामकृत दास्यादिभिः, क्रोधकृत पुत्रादिद्वेषेण सह भार्यादिभिर्वा । नाभा.२।८

अनपाकरणीयर्णापवादः

[1]**पितुरेव नियोगाद्वा कुटुम्बभरणाय वा ।**
कृतं वा यदृणं कृच्छ्रे दद्यात्पुत्रस्य तत्पिता ॥

(१) अथवा कुटुम्बभरणार्थं कृत, अथवा क्वचिदपि प्राणान्तिककृच्छ्रे यत्कृत, तत्पुत्रकृतमपि पिता दद्यादित्युक्तम् । अभा.३७

(२) अत्र च पूर्वत्र च पुत्रग्रहण कुटुम्बोपलक्षणार्थम् । पितृग्रहणं चेह गृहप्रभोरुपलक्षणार्थम् । *स्मृच.१७४

(३) पितुरेव नियोगाद्, न मात्रादीनाम् । एवशब्दोऽवस्थान्तरे मात्रादिनियोगाद् वा, कुटुम्बभरणाय वा अनियोगादपि कृत, कृच्छ्रे वा यत्कृतं व्याधिराजकुलबन्दिग्राहनिमित्ते बालादीना, तदपि दाप्यः । पूर्वस्यापवादोऽयम् । नाभा.२।९

कुटुम्बार्थमस्वतन्त्रकृतमृणमपाकरणीयम्

[2]**शिष्यान्तेवासिदासस्त्रीवैयावृत्यकरैश्च यत् ।**
कुटुम्बहेतोरुत्क्षिप्तं दातव्यं तत्कुटुम्बिना ॥

* पमा. स्मृचगतम् ।

(१) **नासं.**२।९ द्वा (यत्); **नास्मृ.**४।११ द्वा (यः) कृतं वा यदृण (ऋण वा यत्कृत); **अप.**२।४६; **व्यक.**१२१; **स्मृच.**१७४; **विर.**५६ यदृणं (यदि वा); **पमा.**२६९ कृतं वा (कृतं तु); **स्मृचि.**१४; **मूप्र.**२०; **व्यप्र.**२७३; **व्यम.**८३ उत्त.; **विता.**५०४; **समु.**८५ द्वा (च्च).

(२) **नासं.**२।१० रुक्षिप्तं दात (रुच्छिन्न वोढ); **नास्मृ.**४।१२ वैयावृत्त्य (प्रेष्यकृत्य); **अभा.**३७ रुक्षिप्तं (रुच्छिन्नं)

(१) इत्यत्र न केवलमीदृशं पुत्रकृतमेव पिता दद्यात् । कुटुम्बहेतोरुच्छिन्नं उद्यानक गृहीत्वा व्ययितं तच्छिष्यादिभिरपि कृतं कुटुम्बिना दातव्यम् । तत्र शिष्यो विद्यार्थी । अन्तेवासी जल्पितकालावधिवासी शिष्यः । दासो गृहजातः क्रीतो वा । स्त्री पत्नी माता वा । वैयावृत्यकरः । व्यावृत्तस्य भावो वैयावृत्यम् । तत्कर्तुं शीलमस्येति वैयावृत्यकरः । व्यापारकारीत्यर्थः । एतैरपि कुटुम्बार्थे कृतमृणं कुटुम्बिना दातव्यमित्युक्तम् । अभा.३७

(२) शिष्यो वेदविद्यार्थी । शिल्पविद्यार्थी त्वन्तेवासी । कुटुम्बहेतोः कुटुम्बार्थम् । उत्क्षिप्तमसन्निधानादिना स्वानुज्ञा विनाऽपि कृतमृण कुटुम्बिनैव ऋणकर्तुः प्रवासव्यसनाद्यभावेऽपि देय कुटुम्बभरणस्य स्वकार्यत्वादित्यर्थः । *स्मृच.१७४

(३) वैयावृत्यकरः व्यापारकरः, उच्छन्नमुद्धारः । विर.५५

(४) एतैर्यत्कृत कुटुम्बार्थे अवर्तमाने स्वामिनो वा परोक्षमुद्यत गृहीत न स्वार्थं तत्स्वामिना दातव्य अप्रतिविहितत्वात्, प्रतिविहिते तु स्वामिना वर्तमाने यद्विशेषार्थं पानभोजनविशेषप्रेक्षणादिनिमित्त कुटुम्बार्थेऽपि गृहीतं, न दातव्यम् । ×नाभा.२।१०

ग्राहको यदि नष्टः स्यात्कुटुम्बे च कृतो व्ययः ।
दातव्यं ज्ञातिभिस्तस्य विभक्तैरपि तद्धनम् ॥

अत्रैतेषा नामोद्दिष्टाना मध्ये येन केनापि कुटुम्बार्थे कृतमृणं कुटुम्बप्रतीत, स यदि देशान्तर गतो रोगादिना नष्टवान्, ततो व्यवहारकस्य तद्धण ज्ञात्वाद्यैर्विभक्तैरपि दातव्यमित्युक्तम् । अभा.३८

प्रोषितपित्रादिकृतमृणं विंशतिवर्षादूर्ध्वं देयम्

[3]**नार्वाक् संवत्सराद्विंशात्पितरि प्रोषिते सुतः ।**
ऋणं दद्यात् पितृव्ये वा ज्येष्ठे भ्रातर्यथापि वा ॥

(१) इत्यत्र यानि कुटुम्बव्ययकृच्छ्रकृतादीनि ऋणानि

* पमा., व्यप्र. स्मृचगतम् । × शेष स्मृचगतम् ।

तत् (तु); **स्मृच.**१७४ नास्मृवत्, **विर.**५५ वृत्य (पृत्य) रुक्षिप्त (रुच्छन्न) तत् (तु), **पमा.**२६७ नास्मृवत्; **व्यप्र.**२७२ नास्मृवत्; **विता.**५०२ रुक्षिप्त (स्तु कृतं)शेष नास्मृवत्; **समु.**८५ नास्मृवत्. (१) **नास्मृ.**४।१३; **अभा.**३८ ग्राहको (ग्राहो तु).

(२) **नासं.**२।११; **नास्मृ.**४।१४; **अभा.**३८; **मिता.**२।५०; **अप.**२।५०; **व्यक.**११९; **विर.**५०; **विचि.**२३;

शेषादिभिरपि कृतानि विभक्तदायादैरपि व्यवहारकाणां निर्विकल्पं दातव्यान्येवेति । तत्कथमपि तेषु कालहरण नास्ति । यदा पुनः व्यवहारकश्च सपादिकसार्धकद्विगुणादिलाभं प्रतिपद्यते । तद्गृहीतद्रव्येण भाण्डमायोगस्थितः (१) पिता वा पितृव्यो वा ज्येष्ठो भ्राता वा जलवर्त्मना स्थलवर्त्मना वा दूरे देशान्तरगतो भवति । न चागच्छति जीवमानश्च श्रूयते । अस्मिन्विषये 'नार्वाग्विंशतिमाद्वर्षात्पितरि प्रोषिते सुतः' इत्यादिक सार्थकम्,... । अभा.३८

(२) अविभक्तेन पित्रा पितृव्येण ज्येष्ठभ्रात्रा वा यद्दण कृत तन्नैयायिकं सत् तस्मिन्प्रोषिते पुत्रादिना विंशतिवर्षानन्तरं देयमिति रत्नाकरार्थः । स्मृतिसारकृतस्तु विभक्तेन पित्रादिना यत्स्वार्थमृण कृत तस्मिन्प्रोषिते पुत्रादिना देय, तत्रैव कालनियमः । न त्वविभक्तेन कुटुम्बार्थकृतेऽपि । तत्र च तस्यापि ऋणिकत्वात् । एकच्छायातुल्यमेव, एव वाक्यमदृष्टार्थ न भवति । अतो यत्रैव बलादेव दानमृणग्रहणनिमित्तता विनाऽपि तत्रैव वाक्ये न कालविधिः । कुटुम्बार्थकृत त्ववर्गाय देयम् । याज्ञवल्क्यस्यैव वचनात् । तदाह—'अविभक्तैः कुटुम्बार्थं यद्दण तु कृत भवेत् । दद्युस्तदखिलाः प्रेते प्रोषिते वा कुटुम्बिनि' ॥ न चात्रापि कालप्रतीक्षा मानाभावात् । किं तु विभक्तस्यैव सेत्याहुः । *विचि२३.

(३) विंशत्याः पूरणाद् विंशात् संवत्सरादर्वाक् पितरि देशान्तरं गते पितृव्ये वा ज्येष्ठे वा भ्रातरि सुतः कनीयान् भ्राता भ्रातृव्यो वा नर्ण दद्यात् । अर्वादूर्ध्वं दद्यात् । ज्येष्ठग्रहणात् कनीयसि नास्ति प्रसङ्गः । इयन्तं कालमस्वतन्त्रत्वान्नेष्टेऽसौ । ×नाभा.२।१०

एकच्छायाश्रितजीवदजीवत्कृतर्णापाकरणविचारः

व्याधितोन्मत्तवृद्धानां तथा दीर्घप्रवासिनाम् ।
ऋणमेवंविधं पुत्रो जीवतामपि दापयेत् ॥

दाप्यः परर्णमेकोऽपि जीवत्स्वविद्युतैः कृतम् ।
प्रेतेषु न तु तत्पुत्रः परर्णं दातुमर्हति ॥

(१) अत्राऽस्य श्लोको मुनिहृदयान्तर्गतगूढभावार्थदुरवबोधः । स्फुटान्धक एव इव वा । आध्याहार्यं विषयविभागं उद्दिश्य स्फुटीक्रियते । अयं श्लोकः सामान्यग्राहकप्रतिभूविषये द्रष्टव्यः । बहुभिरेककालकृतैः सामान्यग्राहकैः भूत्वा यद्दणं कृतं भवति तेषु बहुष्वपि अक्षमेषु जीवत्सु यो द्रव्यदानक्षमः स धनिकेन शोध्यो दाप्यः । परर्णमप्यसाविति । तथा चोक्तमेव नवविधप्रतिभूप्रकरणे सामान्यग्राहकपत्रे वचनमिदम् । 'ये जीवन्ति मृताना हि ये श्रेष्ठा जीविनामपि । धनी तान् स्वेच्छयादत्ते जीवच्छ्रेष्ठानुगामिनः' ॥ इति ।

दाप्यः परर्णमेकोऽपीत्यस्य श्लोकस्य यथार्थ व्याख्यानं विधिवचनविषयं चेति । उत्तरार्धं तु निषेधविषय व्याख्यायते । प्रेतेषु तेषु सामान्यग्राहकेषु लोकान्तरीभूतेषु यथा पिता तथा तत्पुत्रोऽपि न परर्णं दातुमर्हति । स्वकीयाशमात्रमेव ददद्विशुद्धयतीत्युक्तम् । अभा.३८

अस्यायमर्थः । सामान्यग्राहकत्वाधिकृतैर्बहुभिः कृतमृणं यत् तत्तेषु जीवत्सु एकोऽपि परकीयमृणं दापयितव्यः, मृतेषु तेषु न तदीयपुत्रः परर्णं दातुमर्हति । अभा.५५

(२) अवियुतैः एकच्छायाश्रितैः यद्दण कृतं तदेकोऽपि जीवन् सर्वं दाप्यः । सर्वेषु तु एकच्छायावत्सु ऋणिकेषु मृतेषु तत्पुत्रा अंशकल्पनया दातुमर्हन्ति न त्वेक एव सर्वं दातुमर्हतीत्यर्थः । विर.५२

(३) प्रोषिते पितरि पुत्रो न दद्यादित्युक्तम् । तस्य विशेष उच्यते—विंशतेरर्वागपि ग्रामनगरविषयसमूहैस्तदर्थं नियुक्तैरुद्यतमृण वय दातार इति साधारणेनैकोऽपि दृष्टो दाप्यो जीवता मध्ये । असान्निध्ये तेषा पुत्रा अपि दाप्याः । मृते पुत्रप्रतिषेधात् सर्वेषु तु मृतेषु न पुत्रा दाप्याः, यदर्थं तदुद्यत त एव दाप्याः, अनभिज्ञत्वात् पुत्राणाम् । जीवत्सु त्वागतास्ते चोन्मोच-

* चन्द्र. विचि.व्याख्यानोद्धृतस्मृतिसारव्याख्याने गतम् ।
× व्यप्र. नाभागतम् ।

स्मृचि.१३ व्ये वा (व्ये च); **नृप्र**.२० पि वा (पि च); **चन्द्र**.१९; **व्यप्र**.२६५; **व्यम**.८२ स्मृचिवत्; **विता**.५१०-५११ व्ये (व्यो) ज्येष्ठे भ्रातर्य (ज्येष्ठो भ्राता च); **सेतु**.२५; **समु**.८४; **विव्य**.२८.

(१) Vulg. **नास्मृ**.४।१४ इत्यस्योपरिष्टात् ।

(१) **नासं**.२।१२ वियुतै. (धिकृतैः) न तु (तु न); **नास्मृ**.४।१५; **अभा**.३८,५५ नासवत्, **व्यक**.१२० प्रेते (मृते); **विर**.५२ एको (श्चैको) त्सव (त्र) प्रेतेषु न तु (मृतेषु तु न), **विचि**.२४ त्सवि (त्रपि) शेष विरवत्; **समु**.७८ प्रेतेषु न तु (मृतेषु तु न) मनुः.

यिष्यन्ति । अथवा तथैवाधिकृतैः कृतमृणं साधारणं भवितेति तदस्येयद् अस्येयदिति तदेकोऽपि दृष्टः समर्थो वा दाप्यः । जीवत्सु तेषु केषुचिन्मृतेषु केषुचिज्जीवत्सु न मृतपुत्रा दाप्याः । सर्वेषु तु मृतेषु न पुत्राणा प्रसङ्गः, उपेक्षितत्वात् । अथवा तटाकारामदेवकुलवाणिज्यान्यर्थेन प्रव्राजितेनाधिकृतैस्तथैवोद्यतमृणं जीवत्सु तेष्वेको दाप्यः, तथा गृहीतत्वात्, कार्यस्य च साधारणत्वात् । मृतेषु तेषु न तत्पुत्रः परकीय ऋण दद्यात् । यद्यपि साधारण, तथापि यावत् पितुराभवति तावत् दद्यात् । विवेच्य तु गृहीते प्रसङ्ग एव नास्ति परर्णदाने । नाभा.२।१२

पतिपुत्रकृतर्णस्य स्त्रीणा प्रतिदातृत्वविचारः

न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथा ।
अभ्युपेताहृते यद्वा सह पत्या कृतं भवेत् * ॥

(१) अत्र स्त्री अभ्युपेताहृत इति । स्वय प्रतिपन्नं विना पुत्रकृतमृण न दद्यात् । प्रतिपन्न तु दद्यादित्यर्थः । तथा सह पत्या कृतं विना पतिकृतमपि न दद्यात् । स्त्रीसहकृतं तु दद्यादित्यर्थ इत्युक्तम् । अभा.३८

(२) स्त्री पतिकृतमृणं स्वधनान्न दद्यात्, 'यतो रिक्थमि'त्युत्तरत्र वचनात् पत्युः स्वाद् देयमेव । किमेष एवोत्सर्गः । अभ्युपेताहृते । जीवति पत्यावहं दास्नीत्यभ्युपेतं दातव्यमेव । यद्वा पत्या सह कृतमुभाभ्यामर्थितम् । पुत्रकृतस्याप्येषैव गतिः । नाभा.२।१३

दद्यादपुत्रा विधवा नियुक्ता वा मुमूर्षुणा ।
यो वा तद्रिक्थमादत्ते यतो रिक्थमृणं ततः ॥

(१) अत्र या स्त्री विधवीभूता अपुत्रा च । तत्र यदि पत्या म्रियमाणेन निरूपिता ततः पतिकृतमृणं दद्यात् । अथवा सैव रिक्थग्राहिणी ऋणं दद्यात् । अथवा तस्या अयोग्यत्वात् दायादा रिक्थं गृह्णन्ति । ततो य एव रिक्थ गृह्णाति स एव ऋणं ददाति । यतो रिक्थं संचरति तत ऋणमपीत्युक्तम् । *अभा.३९

(२) अपुत्राऽविद्यमानपुत्रा पत्या मुमूर्षुणा नियुक्ता या सा पतिकृतं दद्यात् । अपुत्रेति वचनात् न सपुत्रा । विधवेति वचनान्न देवरादिसमाश्रिता । नियुक्तेति वचनान्नानियुक्ता । मुमूर्षुणेति वचनान्न स्वस्थेन दास्यादिप्रसक्तेन वा । पतिधनेऽसत्येतत् । सति तु यस्तस्य रिक्थमादद्यात्, स दद्यात् । अभावे रिक्थभाजो, राज्ञा ग्राह्यत्वाद् रिक्थस्य, राजा दद्यात् । नाभा.२।१४

भार्याकृतर्णापाकरणविचारः

न च भार्याकृतमृणं पत्युर्वाऽपि कथं भवेत् ।
आपत्कृताहृते पुंसां कुटुम्बार्थो हि दुस्तरः ॥

(१) अत्र भार्याकृतमृण पत्युर्न संबध्यते । आपत्कृताहृत इति । पतिपुत्रदुहित्रादिकुटुम्बस्य आपदुद्धरणार्थं तु पत्नीकृतमपि ऋण कुटुम्बपतिर्दद्यात् । यतः कुटुम्बार्थो हि दुस्तरः । आपत्काले तु सप्राप्ते दूरव्यवहितस्य भर्तुः...प्राप्यमिति । *अभा.३९

(२) आभवेदिति देयं भवेदित्यर्थः । व्यक.१२२

---

* जाह्नवीना 'दद्यादपुत्रा विधवा' इत्यस्य व्याख्याग्रन्थ. अस्मिन् श्लोकव्याख्याने मूलपुस्तकानुसारेण पुनः संगृहीतोऽस्माभिर्नोपदृतः ।

(१) **नासं.**२।१३ भवेत् (तथा); **नास्मृ.**४।१६; **अभा.**३८; **मेधा** ८।४; **व्यक.**१२२; **स्मृच.**१७६; **विचि.**२९ पू.; **वामि.**२।४९ पृ.; **व्यप्र.**२७३ पू.; **बाल.**२।४६ : २।४९ ; **सेतु.**३० पू ; **समु** ८६ उत्तरार्धे (अभ्युपेताहृते स्वेष धर्मः प्रोक्तो मनीषिभि); **विव्य.**३० पू.

(२) **नासं.**२।१४ दपु (स्वपु) क्ता वा (क्ता या) दत्ते (दद्यात्), **नास्मृ** ४।१७ पुत्रा (पुत्र); **अभा.**३९; **व्यक.**१२२ क्ता वा (क्ता या) दत्ते (दद्यात्); **स्मृच** १७७ पुत्रा (पुत्र) दत्ते (दद्यात्); **विर.**६१ उत्तरार्धे (यो वा तद्रिक्थमादद्याद्यात्तस्य ऋणं च सः); **पमा.**२७० उत्तरार्धे (या सा तद्रिक्थमादद्याद्यतो रिक्थमृण ततः); **व्यप्र** २७४ स्मृचवत्; **बाल.**२।४६ : २।४९ व्यकवत्; **समु.**८६ यो (या) शेषं स्मृचवत्.

(१) **नासं.**२।१५ पत्यु...त् (कथचित् पत्युराभवेत्) दु (वि); **नास्मृ.**४।१८; **अभा.**३९; **अप.**२।४८ पत्यु .. त् (कथंचित् पत्युराभवेत्) पुंसां (पुंसः); **व्यक.**१२२ अपवत्; **स्मृच.**१७५ पूर्वार्धे (न भार्यया कृतमृणं कथचित् पत्युरावहेत्); **विर.**५९ (=) अपवत्; **विचि.**२८ पूर्वार्धे (न भार्यया कृतमृण कथचिद्यत्पुरा भवेत्) त्कृता (त्काला) पुंसां (पुस.); **चन्द्र.**२४ (आपत्कालकृताहृते) एतावदेव; **व्यप्र.**२७४ पत्यु .. त् (कथचित् पत्युराभवेत्) कात्यायनः; **विता.**५०५ नासवत्; **सेतु.**२९ पूर्वार्धे (न भार्यया कृतमृणं कथंचित् पत्युराभवेत्) शेष विचिवत्; **समु.**८५ स्मृचवत्; **विव्य.**३० अपवत्

(३) आपन्ने कुटुम्बे तदभ्युद्धरणार्थं तत्कृत दातव्यम् । यस्मात् पुंसां कुटुम्बभरणार्थो हि विस्तरः सर्वः प्रयासः पुरुषेण कर्तव्यः । नाभा.२।१५

वर्गविशेषेषु स्त्रीकृतमृण पत्या अपाकरणीयम्

अन्यत्र रजकव्याधगोपशौण्डिकयोषिताम् ।
तेषां तत्प्रत्यया वृत्तिः कुटुम्बं च तदाश्रयम् ॥

(१) अत्र रजकः प्रसिद्धः । शौण्डिको वरटः । एतेषा रजकादीना स्त्रीप्रत्ययमेव लोकसंव्यवहारो वर्तन जीवनं च । कुटुम्बमपि तदीयस्त्रीसमाश्रयमेव । एतेषा स्त्रीभिः कृतमृण कुटुम्बार्थं कृत, आपत्कृत विना, नित्यमेव रजकादयः पतयः निर्विकल्प दद्युरिति । अभा.३९

(२) तेषां रजकादीनाम् । तत्प्रत्यया वृत्तिः योषिदधीनं वर्तनमित्यर्थः । तेनानापदि कृतमकुटुम्बार्थं कृतमपि पतिभिर्देयमित्यभिप्रायः । रजकादिग्रहण योषिदधीनवृत्तीना तैलिकशैलूषादीनामुपलक्षणार्थम् । स्मृच.१७५

(३) एवमन्यत्रापि यत्र प्राधान्य स्त्रीणा तत्र तथैव न तु जात्यादरः कार्यः । तत्र योषिदेव सर्वमनुसंधत्ते । पुरुषोऽज्ञ एव । इद तु प्रपञ्चमात्र कुटुम्बार्थं ब्राह्मणादिस्त्रीकृतस्यापि कुटुम्बिदेयत्वादिति । विचि.२८

(४) स्त्रीकृत पतिर्न दद्यादित्युक्त तस्यायमपवादः । रजकव्याधगोपशौण्डिकाना योषितो रजकव्याधगोपशौण्डिकयोषितः । एताभिः कृत दद्यात् पतिः । अत्र कारणमाह—तेषा तत्प्रत्यया वृत्तिः । तत्प्रत्ययः प्रत्ययो यस्याः सा तत्प्रत्यया वृत्तिः । नाभा.२।१६

स्त्रीहारिरिक्थहारिपुत्रादीनामृणप्रतिदातृत्वविचारः

पुत्रिणी तु समुत्सृज्य पुत्रं स्त्री याऽन्यमाश्रयेत् ।
तस्या ऋणं हरेत्सर्वं निस्वायाः पुत्र एव तु ॥

(१) अत्र या स्त्री विधवा पुत्रवती च क्रमागतस्त्रीधनवती च कामान्धा पुत्रमुत्सृज्य त्यक्त्वा अन्य भर्तारमाश्रयेत्, स्त्रीधनस्वकीयसहिताऽपि । तस्या यत्स्त्रीधन तत्सोऽन्य एव भर्ता गृह्णीयान्न पुत्राः । या पुनर्निःस्वा स्त्रीधनरहिता भर्तृधनसहिताऽन्य याति, तद्धनमन्यो भर्ता न लभते । तस्य पितृधनस्य पुत्रः स्वामीति । अभा.३०

(२) ऋणी स्त्रीहारी । अप.२।५१

(३) अन्य मातुलादिकम् । स्मृच.१७४

(४) यदि पुत्र परित्यज्य समस्तपूर्वधनशून्या पुरुषान्तरमाश्रयेत् तत्पतिकृतमृण पुत्र एव दद्यादित्यर्थः । विर.६५

(५) स्त्रिया ऋणदानप्रतिषेधार्थमिदमुच्यते । पुत्रवती या नारी पुत्रमुत्सृज्यानिच्छया पुत्रस्यान्य पतिमाश्रयेत्, तस्याः स्व धन हरेत् सर्वम् । सर्वग्रहण षड्विधस्याप्युपसग्रहणार्थम् । एवशब्दान्नर्णीति गम्यते । ततश्च सा निःस्वैव भवति तस्यै दत्त हीयते, तस्मान्न दातव्यमिति विधिः । अथवा यद्यन्यमाश्रयेत्, धन सर्व पुत्राय दत्वा शरीरमात्रेणाश्रयेत् । निःस्वायाः यः पतिः स न तस्या धन लभते । यत् तया कृतमृण स एव तद् दद्यान्न पुत्र इति । नाभा.२।१७

(६) मातुर्दौस्थ्येऽपि निर्धनायास्तस्या ऋणं पुत्रेण दातव्यमित्याह —पुत्रिणी तु समुत्सृज्येति । अन्य भर्तारमिति शेषः । व्यप्र.२७५

(७) इद तु रिक्थग्राहपुत्रपरम् । व्यम.८४

(८) अन्यः जारः । विता.५०६

या तु सप्रधनैव स्त्री सापत्या चान्यमाश्रयेत् ।
सोऽस्या दद्याद्ऋणं भर्तुरुत्सृजेद्वा तथैव ताम् ॥

---

(१) **नासं.**२।१६ षिताम् (षितः); **नास्मृ.**४।१९; **अभा** ३९ अन्यत्र रजक (पतिर्दद्याद्रज); **विश्व.**२।५० उक्त, **अप.**२।४८; **व्यक.**१२२ तत्प्रत्यया (तु तत्परा); **स्मृच** १७५; **विचि.**२८ तत्प्रत्यया (च तत्परा); **व्यप्र.**२७४ व्यकवत्, कात्यायनः; **विता.**५०५ व्याधगोपशौण्डिक (व्याधोपशौण्डिकादि); **समु.**८६; **विव्य.**३० विचिवत्.

(२) **नास** २।१७ ऋणं (रिक्थं); **नास्मृ.**४।२० ऋण (द्रव्य) त्सर्व (त्सोऽन्यो); **अभा.**३९ नास्मृवत्; **अप.**२।५१ तु (च) ऋण (ऋणी); **व्यक.**१२४ ऋण (धन); **स्मृच.**१७४; **विर** ६५ स्त्री याऽन्यमाश्रयेत् (या स्व्यन्यमाश्रिता) तु (च), **सवि.**२६३ ऋण (द्रव्य), **व्यप्र.**२७५; **व्यम.**८४; **विता.** ५०५-५०६ त्सर्व (त्सैव) तु (च); **समु.**८६.

(१) **नासं.**२।१८ तु (च); **नास्मृ.**४।२१; **अभा.**३९; **मिता.**२।५१ चान्य (वान्य); **अप** २।५१; **व्यक.**१२४; **स्मृच.**१७३ तु सप्रध (पुनः सध); **विर.**६५; **पमा.**२७५

(१) अत्र या तु स्त्री विधवा बालपुत्रवती च भर्तृसक्तधनसहिता चान्य भर्तारमाश्रयेत्। सोऽन्य एव भर्ता तदीयपूर्वभर्तृकृतमृण दद्यात्। प्रधनकादितदीयपरिग्रहप्रतिपादितत्वात्। अथ ऋणिकस्य बहुत्वात् पुष्यमाणं न पश्यत्यन्यो भर्ता ततस्ता तथैवाधिनाशितप्रधनकामुत्सृजन्विशुध्यति। धनिक एव तत्प्रतिगृह्णाति।
*अभा.३९

(२) प्रकृष्टेन धनेन सह वर्तते इति सप्रधना। बहुधनेति यावत्। मिता.२।५१

(३) या स्त्री सधना सवाऽतनया च रक्षार्थं मातुलादिकमाश्रयेत्। स चाश्रयभूतो मातुलादिर्भर्तृकृतर्णं दापयेत्। यदि तु स दातुं नेच्छति तदा सधना सतनया त्यजेत् इति। स्मृच.१७३-१७४

(४) इति तत् आश्रितभर्त्रादिविषयम्। पमा.२७५

(५) कीदृशस्य योषिद्ग्राहस्यर्णदानेऽधिकार इत्यपेक्षिते—या तु सप्रधनैवेति। व्यप्र.२६९

अधनस्य सपुत्रस्य मृतस्योपैति यः स्त्रियम्।
ऋणं वोढुः स भजते तदेवास्य धनं स्मृतम्॥

(१) यः यस्य तु पुरुषस्य ऋणयुक्तस्य च अपुत्रस्य च स्त्रियमुपैति गृह्णाति, स तत्पत्नीपरिग्रहमात्रसग्रहादपि प्रथमपतिकृतमृण दद्यात्। यतस्तदेव तस्य रिक्थ, 'यतो रिक्थमृण ततः' इति न्यायात्। +अभा.४०

* विर. अभागतम्। + नाभा. अभागतम्।

मितावत्; **सवि.**२६१ सप्रधनैव स्त्री (सप्रदिनैनैव) चान्य (वान्य) सोऽस्या (सा वा); **व्यप्र.**२६९ मितावत्; **व्यउ** ७९ उत्त., स्मृत्यन्तरम्; **व्यम.**८३; **विता.**३०९ सापत्ना चा (सापत्न्याच्चा) उत्तरार्धे (ऋण पतिकृत दद्याद्विसृजेद्वा तथैव ताम्): ५१९ मितावत्, **समु** ८५ स्मृचवत्.

(१) **नासं.**२।१९ वास्य (तस्य), **नास्मृ.**४।२२ उत्तरार्धे (स आभजेदृण वोढुः सैव तस्य धन यत), **अभा** ३९-४० उत्तरार्धे (स आभजेद्धन वोढुः तदेवास्य धन यतः); **मिता.** २।५१ तदेवास्य (सैव चास्य); **अप.**२।५१; **व्यक.**१२३; **स्मृच.**१७३; **विर.**६२; **पमा.**२७५ मितावत्, **विचि.**२९; **स्मृचि.**१४ स्मृतम् (यत.); **सवि.**२६१ तदेवास्य (सैव चान्य); **व्यप्र.**२६८ : २७१ मितावत्; **व्यउ.**७९ वोढुः (चोढुः) शेष मितावत्; **विता.**५१९-५२० तदेवास्य (सैव तस्य); **समु.**८५; **विव्य.**३०.

(२) तत्र स्त्रियमुपैतीत्यस्य यथाश्रुतार्थपरत्वे नियुक्तदारयोरपि ऋणभागित्वमिति प्रागुक्तविरोधः। स्त्रीग्राहपरत्वे यौनरुक्त्यमिति शङ्क्यम्। उच्यते। धनग्राहयोषिद्ग्राहविहीनस्य योषिदुपभोक्ताऽपि ऋणभागिति प्रतिपादनार्थं वचनमारब्धमिति न सकटं किंचित्। स्मृच.१७३

(३) इदमपि नारदीयवचनं कात्यायनोक्तशौण्डिकादिविषय नेतव्यम्। विर.६३

धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत्।
पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोः॥

(१) अत्र यस्य पुरुषस्य ऋणयुक्तस्य मृतस्य धनं दायादैराक्रम्य गृहीतम्। पत्नी च निर्धना पुत्रमप्युत्सृज्य अन्यस्य गृहे प्रविष्टा। पुत्रोऽपि धनमातृविहीनः केवलस्तिष्ठति। तदा व्यवहारकस्त्रयाणा मध्ये विधृत्य कस्य धन गृह्णातु। केन च तद्दातव्यमिति। अस्यार्थस्य निगमार्थमेतदुक्तम्। एषा मध्येऽपि ऋणभाग्यो धन हरेत्। धनस्य प्राधान्यात्। धनग्राही ऋणं दद्यात्। तस्मिन्विद्यमाने नान्यः कश्चिदिति। यस्य तु सऋणस्य मृतस्य पुरुषस्य धनस्याभावान्न धनहारी कश्चिज्जातः। स्त्रिया अप्यभावान्न स्त्रीहारी कश्चिदस्ति। पितृमातृधनवर्जितः पुत्रः केवलस्तिष्ठति। तदा असतोः स्त्रीहारिधनहारिणोः पुत्र एव बीजसंभवसंबन्धात्पितृकृतमृणं प्रयच्छति इति। यस्य तु धनस्य हारी न कश्चिदस्ति। न पुत्रो विद्यते। पत्न्येव धनपुत्रविहीनाऽन्यस्य गृहे प्रविष्टा। तदा धनहारिपुत्रयोरसतोरविद्यमानयोः स्त्रीहारी ऋणं दद्यादिति। त्रयाणामपि धनस्त्रीहारिपुत्राणा समुदितानामपि मध्ये येन ऋण देय तद्दर्शितम्। तथा द्वयोरभावे एकैकेन येन ऋणं देय तदपि सग्रन्थपाठं दर्शितम्। यस्य पुनः धनस्त्रीहारिपुत्राणा मध्ये एकैकस्य वस्तुत अभावः द्वयोर्द्वयोस्तु विद्यमान-

(१) **नासं.**२।२०; **नास्मृ.**४।२३; **अभा.**३७ पू.:४०; **मिता.**२।५१; **अप.**२।५१; **व्यक.**१२३; **मभा.**१२।३७ धनिपु (धनपु); **स्मृच.**१७२ हारी (हारि); **विर.**६३; **पमा.** २७६, **दीक.**३६ स्मृचवत्; **विचि.**२६; **सवि.**२६२ उत्तरार्धे (पुत्रोऽसुतः स्त्रीधनिनोः स्त्रीहारिधनपुत्रयोः); **चन्द्र.**२३; **व्यप्र.**२६७ : २७०-२७१; **व्यउ** ७९; **व्यम.**८३; **विता.** ५२०; **समु.**८५; **विव्य.**१९.

त्वमस्ति । तत्राक्षरैरनुक्तोऽपि निगमोऽर्थापत्तितारतम्यादवगन्तव्यः । तथाहि यस्य पुत्रः धनहारी च विद्येते स्त्रीहारी नास्ति तत्रापि धनहारिपुत्रयोर्द्वयोरपि विद्यमानयोः धनप्राधान्याद्धनग्राही ऋणं दद्यात् । यथात्र धनहारिस्त्रीहारिणोर्द्वयोरपि विद्यमानयोः धनहारी एव ऋणं दद्यादित्युक्तम् । यस्य पुनर्निर्धनत्वाद्धनं नास्ति । पुत्रः स्त्रीहारी च विद्येते । तदा तयोः स्त्रीहारिपुत्रयोर्द्वयोर्मध्ये केन ऋणं देयमित्यत्रापि अर्थापत्तितारतम्यापेक्षया । यदि रूपयौवनसंपन्ना काममदोद्धता प्रधानाभिमता च स्त्री तदा तस्य स्त्रीहारी ऋणं दद्यात् । यतस्तदेव तस्य धनमित्युक्तमेव । अथवा सापि स्त्री निर्भोग्या कर्मकारित्वग्रासमात्रभोजना ततः पुत्रोऽसतोः स्त्रीधनिनोरिति न्यायात् पुत्र एव ऋणं दद्यात् । इति विस्फुटीकृतमिदम् । अभा.४०

(२) धनस्त्रीहारिपुत्राणा समवाये यो धन हरेत्स ऋणभाक् । पुत्रोऽसतोः स्त्रीधनिनोः । स्त्री च धनं च स्त्रीधने ते विद्येते ययोस्तौ स्त्रीधनिनौ तयोः स्त्रीधनिनोरसतोः पुत्र एव ऋणभाक् भवति । धनिपुत्रयोरसतोः स्त्रीहार्ये वर्णभाक् । स्त्रीहार्यभावे पुत्र ऋणभाक् पुत्राभावे स्त्रीहार्राति विरोधप्रतिभासपरिहारः पूर्ववत् ।

×मिता.२।५१

(३) 'स्त्रीहारी धनिपुत्रयोरि'त्यत्रासतोरित्यनुषङ्गः । स्त्रीहारिपुत्रयोस्तु विद्यमानयोर्बाले व्यसनाभिभूते द्रविणानर्हे ऋणदानासमर्थे पुत्रे स्त्रीहारी ऋणं दद्यादित्यर्थः । यदा तु निरुपद्रवो द्रविणार्हो धुर्यश्च पुत्रो भवति तदा स एव ऋणभाक् न स्त्रीहारी इत्यर्थः । +व्यक.१२३

(४) स्त्रीग्राहधनग्राहयोरभावे दायानर्हः पुत्र ऋणभागित्यर्थः। यत्पुनस्तेनैवानन्तरमुक्तं 'स्त्रीहारी धनपुत्रयोः' इति तदयुक्तमिव प्रतिभाति । धनहारिमात्राभावे स्त्रीहारी ऋणभागिति वचनान्तरेण प्राक्प्रतिपादितार्थविरोधात्। पुत्रस्य स्त्रीहारिराहित्ये ऋणभाक्त्वमिति स्वोक्तेन विरोधाच्च । सत्यमस्ति विरोधः । तथापि विषयभेदादसावपि गच्छति । तथाहि 'विधनस्य स्त्रीग्राहीति' विष्णुवचनेन पक्षद्वयमुक्तम् । सपुत्रस्य धनहारिरहितस्य ऋण स्त्रीहारी दद्यात् । अपुत्रस्य वा धनहारिरहितस्येति । तत्र द्वितीयः पक्षः स्त्रीहारी धनपुत्रयोरित्यनेनोक्तः । धनहारिपुत्रयोरसतोः स्त्रीहारी ऋणभागिति द्वितीयपक्षसमानत्वात् । वचनान्तरेण प्राक्प्रतिपादितोऽर्थः प्रथमपक्ष एव । अतो न तेन सह द्वितीयपक्षस्येवास्यापि विरोधः । विकल्पितत्वात् । 'पुत्रोऽसतोः स्त्रीधनिनोः' इत्यनेन सपुत्रस्य स्त्रीहारिधनहारिरहितस्य ऋण दायानर्हः पुत्रो दद्यादित्युक्तम् । 'पुत्रोऽनन्याश्रित' इति वचनेन तुल्यार्थत्वात् । एव च न प्राक्प्रतिपादितेन स्वोक्तेन विरोध इति युक्तमुक्तं नारदेन ।

स्मृच.१७२

(५) धनेति । व्यसनग्रस्ते द्रविणार्हेऽपि पुत्रे सति धनग्राहक ऋण दाप्य इत्यर्थः । स्त्रीधनिनोरिति समस्तादिनिप्रत्ययः । तेन व्यसनादियुतोऽपि पुत्रोऽसति स्त्रीहारिणि धनहारिणि च दद्यात् । स्त्रीहारी धनहारिणि योग्यपुत्रे चासति दद्यात् । अतो धनग्राहिणि सति द्वयोर्न देयम् । अयोग्ये च पुत्रेऽसति धनहारिणि स्त्रीहारी दद्यात् ।

*विचि.२६

(६) धन च स्त्री च धनस्त्रियौ ते हर्तुं शीलं ययोस्तौ धनस्त्रीहारिणौ, तौ च पुत्रश्च धनस्त्रीहारिपुत्राः तेषामिति निर्धारणा षष्ठी । तेषां मध्ये यो धन हरेत् स ऋण दद्यात्, यस्य तद् धनम् । असतोः स्त्रीधनिनोः पुत्रो दद्यात् । 'न स्त्री पतिकृत दद्यात्' इति प्रतिषेधात् स्त्री विद्यमानापि न प्रसक्ता । तस्या सत्यामपि पुत्र एव दाता । पुत्रेऽसति स्त्रीहारीति वचनात् स्त्रीहारिण्यसति पुत्र इत्ययमर्थो न संभवति । तस्मान्न मुमूर्षुणा नियुक्ता, रजकादिस्त्री च । तस्यामसत्यां धनहारिणि चेत्यर्थः । तस्यां हि विद्यमानायां तदधीनत्वात् कुटुम्बस्य सैव दद्यात्, न पुत्रः । धनिपुत्रयोरसतोः स्त्रीहारीति पूर्वस्य विषयः प्रदर्शितः । अथवा (धन) स्त्रीहारिपुत्राणामृणभाक् पुत्रः स्त्रीधनिनोश्च यो धन हरेत्, असतोर्धनिपुत्रयोः स्त्रीहारी चेत्ययमर्थो व्यवहितकल्पनया ज्ञेयः । नाभा.२।२०

(७) स्त्रीधनिनोरसतोः पुत्र एव ऋणभागित्यन्वयः ।

× शेष 'रिक्थग्राह ऋण दाप्यः' इति याज्ञवल्क्यवचने (पृ. ६८७) द्रष्टव्यम् । पमा., व्यम, विता. मितागतम् ।

+ विर. व्यकगतम् ।

* चन्द्र, विचिगतम् ।

स्त्री च धनं च स्त्रीधने तद्वतोः स्त्रीधनहारिणोरित्यर्थः। अत्र स्त्रीहारी धनिपुत्रयोरिति पुत्राभावे योषिद्ग्राहस्यर्णदायित्वाभिधानं दायार्हपुत्राभावे मन्तव्यम्। अपुत्रस्य चेत्यनुवृत्तौ—'विधनस्य स्त्रीहारी' इति विष्णुनाऽभिधानात्। 'पुत्रोऽसतोः स्त्रीधनिनोः' इति स्वोक्तिविरोधाच्च। व्यप्र. २६७

अन्तिमा स्वैरिणीनां या प्रथमा च पुनर्भुवाम्।
ऋणं तयोः पतिकृतं दद्याद्यस्ते समश्नुते ॥

(१) अयं ग्रन्थकारश्चतस्रः स्वैरिण्यो वक्ष्यति, तिस्रः पुनर्भवः। (१२, ४६, ४९) एतयोरन्तिमोत्तमयोः स्वैरिणीपुनर्भ्वोः स्त्रियोर्यः संग्रहीता स एव तत्पूर्वपतिकृतमृणं दद्यादिति समुदायार्थः। विशेषार्थश्चायम्। अत्र उत्तमशब्दः सर्वसाधारणः। एतासां सप्तानामपि मध्ये यैव काचिद्भाग्यसौभाग्यगुणैरुत्तमा तस्या एव ग्रहीता तत्पतिकृतमृणं दद्यान्न पुत्र इति विशेषनियमात्। अभा.४०

(२) स्वैरिणीनामन्तिमा नारदेनोक्ता। यथा—'देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते। उत्पन्नसाहसान्यस्मै साऽन्तिमा स्वैरिणी मता ॥ कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता। पुनर्भ्वामथ सा प्रोक्ता पुनःसंस्कारकर्मणा' ॥ अत्र चैतयोरन्यस्वैरिण्यपेक्षया श्रेष्ठत्वात्तद्ग्राही तत्पतिकृतमृण दद्यादित्यर्थः। *व्यक.१२३

(३) एवं च यः प्रथमेतरपुनर्भुवमुपगच्छति स नियुक्तमात्रो न योषिद्ग्राह इति पुनर्भूभर्तृकृतर्णदानानधिकारीति मन्तव्यम्। एवं यः स्वैरिणीं चतुर्थीव्यतिरिक्तामुपगच्छति सोऽपि जारमात्रो न योषिद्ग्राह इति स्वैरिणीपतिकृतर्णानधिकारीति मन्तव्यम्। आद्यपुनर्भ्वास्तु यः पाणिं गृह्णाति स योषिद्ग्राहो भवत्येव भार्यात्वेनैव स्वीकारात्। चतुर्थ्या अपि स्वैरिण्या भार्यात्वेनैव स्वीकार इति स्वीकर्ता योषिद्ग्राह एव। तेन ताभ्या पुनर्भ्वाः प्रथमायाः पत्या कृतमृणं स्वैरिण्याश्चतुर्थ्याः पत्या कृतं च ऋणं देयम्। तथा च तेनैवोक्तम्। अन्तिमा स्वैरिणीना इत्यादि। पतित्वेनेति शेषः। स्मृच.१७३

(४) ते एव स्त्रियौ परिगृह्णन् तत्पतिकृतमृणं दद्यात्, न स्व्यन्तरपतिकृतम्। +विर.६१

(५) उत्तमा स्वैरिणीनामन्त्या चतुर्थी। पुनर्भ्वामुत्तमा तृतीया। तयोः पतिकृतमृण स दद्याद् यस्ते प्राप्नोति भुङ्क्त इत्यर्थः। स्वैरिणीं प्रथमा यो गृह्णाति न तस्य प्रसङ्गः पूर्वस्यामृतत्वात्। द्वितीयस्यापि नास्ति प्रसङ्गः रिक्थभाजां देवरादीनां विद्यमानत्वात्। तृतीयस्यापि नास्ति प्रसङ्गः। धनेन क्रीणाति पत्युश्चर्ण ददाति इति नास्ति प्रसङ्गः। तदेवास्य धनमित्युक्तम्। क्रमाच्च तद्धनाप्रसङ्गः। चतुर्थ्यामस्ति प्रसङ्गः, बान्धवैर्दत्तामसौ गृह्णाति। तस्मात् तत्संबन्धृणवान् भवति स्वेच्छया प्रतिगृहीतत्वात्। तथा पुनर्भ्वा प्रथमा यो गृह्णाति स न भवति पुनस्संस्कृताग्रहणात्, यथा पूर्वः तस्याश्च पूर्वेणसंबन्धत्वात्। तथैव द्वितीयायामपि, पूर्वस्यैव जीवनात्। इतरोऽल्पकालसबन्धो ग्रहीतरि विद्यमाने कस्मात् तद् दास्यति। अतः स्वैरिण्यामिव तृतीयायामुपपद्यते। नाभा.२।२१

***परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम्।**
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा ॥

---

* विचि. व्यकवत्।

(१) **नासं.**२।२१ पूर्वार्धे (उत्तमा स्वैरिणीनां या पुनर्भ्वामुत्तमा तथा) सम (उपा), **नास्मृ.**४।२४ प्रथमा (उत्तमा), **अभा.**४० नारस्मृवत्, **मिता.**२।५१ स्ते समश्नुते (स्तामुपाश्रितः); **अप.**२।५१; **व्यक.**१२३ प्रथमा . वाम् (पुनर्भ्वा प्रथमा च या); **स्मृच.**१७३ सम (उपा); **विर** ६१ व्यकवत्, **पमा.**२७५ समश्नुते (उपाश्रितः); **विचि.**२९ या (तु) च (तु) शेषं व्यकवत्; **नृप्र.**२१ व्यकवत्; **सवि.**२६१ स्ते सम (स्तामुपा); **चन्द्र.**२५ प्रथमा .. वाम् (पुनर्भूः प्रथमा च या); **वीमि.**२।५१ च (या); **व्यप्र.**२६८ स्मृचवत्, **व्यउ.७९** स्मृचवत्; **विता.**५१९ मितावत्; **सेतु.३१** व्यकवत्; **समु. ८५** स्मृचवत्.

+ चन्द्र. विरवत्। * 'परपूर्वाः स्त्रिय' इत्याद्यष्टश्लोकानां व्याख्यासंग्रहः स्त्रीपुंधर्मप्रकरणे द्रष्टव्यः।

(१) **नास.**१३।४५; **नास्मृ.**१५।४५; **मिता.**२।५१; **अप.**२।५१ तु (च); **स्मृच.**१७३; **विर.**६१ अववत्; ४५० तासा (स्तासां) तु (च); **पमा.**२७४ अपवत्; **नृप्र.**२०; **सवि.**२६० स्त्रिवि (द्विवि); **व्यप्र.**२६८; **व्यउ.७८** तासां (स्तासां); **विता.**५१९; **राकौ.**४९८; **सेतु. ३१** अपवत्; **विभ.३२** व्यउवत्; **समु.८५.**

[1]कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारकर्मणा ॥
[2]देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते ।
उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्तिता ॥
[3]असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्तिता ॥
स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति ।
कामात्समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा ॥
[4]कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता ।
पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्तिता ॥
मृते भर्तरि तु प्राप्तान्देवरादीनपास्य या ।
उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता ॥
प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा तु या ।
तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता ॥
भार्या स्नुषा च भृत्या च भार्यायाश्च परिग्रहः ।
एतावद्भिर्ऋणं देयं भूमिं यश्चोपजीवति ॥

अत्र भार्यास्नुषादीनामपेक्षा नामोद्दिष्टाना मध्ये येनैव तत्कुटुम्बार्थे कृतमृण तेनैव देयम् । अत्रास्वातन्त्र्यदोषसभवो नास्ति । अय प्रथमः पक्षः । द्वितीयः पुनस्त्व-

---

(१) **नासं.**१३।४६ प्रो (सो), **नास्मृ** १५।४६ कर्मणा (मर्हति), **मिता.**२।५१ प्रोक्ता (नाम), **अप** २।५१ र्मणा (र्मणि); **व्यक.**१२३; **स्मृच** १७३ र्या (र्वा), **विर.**६२ · ४५०; **पमा.**२७४, **विचि.**२९; **नृप्र.**२० न्यैवा (न्या या), **सवि.**२६० र्या (र्वा) प्रथमा (प्रथम) र्मणा (र्मणि), **चन्द्र.**२६ र्या (र्वा) प्रोक्ता (ज्ञेया); **वीमि.**२।५१; **व्यप्र.**२६८; **व्यउ.** ७८; **विता.**५१९ नासंवत्, **राकौ.**३९८ पू, **सेतु.**३१, **विभ.**३२ अपवत्; **समु.**८५.

(२) **नासं.**१३।४७, **नास्मृ** १५।५२ वेक्ष्य (पेक्ष्य) सा द्वितीया प्रकीर्तिता (अन्त्या सा स्वैरिणी स्मृता), **अभा.**४१ भिर्या (भिर्वा) सा द्वितीया प्रकीर्तिता (सान्तिमा स्वैरिणी मता), **मिता.**२।५१, **अप.**२।५१; **व्यक.**१२३ उत्तरार्धं अभावत्, **स्मृच.**१७३; **विर.**६२ स्मै सा द्वितीया (स्मिन् द्वितीया सा): ४५१ सा द्वि ..ना (सान्तिमा स्वैरिणी स्मृता); **पमा.**२७४, **विचि.**२९ विर.४५१ वत्, **नृप्र** २०; **सवि.**२६० वेक्ष्य (पेक्षा); **चन्द्र.**२५ वेक्ष्य (पेक्ष्य) सा द्वि ..ता (सा त्वन्या स्वैरिणी स्मृता); **वीमि.**२।५१; **व्यप्र.**२६८; **व्यउ.**७८; **विता.** ५२९ र्तिता (र्त्यते); **सेतु.**३१ विर.६२वत्; **विभ.**३२ न्यस्मै (न्यस्मिन्); **समु.**८५.

(३) **नासं.**१३।४८ र्णाय (र्णीया); **नास्मृ.**१५।४८; **अभा.**४१ उत्तरार्धं (सवर्णायासपिण्डाय पुनर्भूः सा तृतीयका); **मिता.**२।५१, **अप.**२।५१ नासवत्, **विर.**६२: ४५१ सा तृतीया (तृतीया सा), **पमा.**२७४ नासवत्; **नृप्र.** २०; **वीमि.**२।५१, **व्यप्र.**२६८, **व्यउ.**७८ य सपिण्डाय (मसपिण्डार्थं) शेष विरवत्; **विता.**५१९. **सेतु.**३१; **विभ.** ३२ बान्धवै (गुरुभि); **समु.**८५ नासवत्.

(४) **नासं.**१३।४९ स्त्री प्रसूताऽ (प्रसूता वाऽ) प्रथ .. र्णी (स्वैरिणी प्रथमा); **नास्मृ.**१५।४९ त्समा (द्या स); **मिता.** २।५१; **अप.**२।५१ तु जी (च जी); **स्मृच.**१७३; **विर.** ६२:४५१ प्रथ ...तु (स्वैरिणी प्रथमा च); **पमा.**२७४; **सवि.** २६० तु सा (ति सा), **वीमि.**२।५१, **व्यप्र.**२६८ उत्तरार्धं नासवत्, **व्यउ** ७८ वा (या) तु सा (स्मृता), **विता.**५१९ कामात्समा (या काममा), **सेतु.**३१, **विभ.**३२; **समु.**८५.

(१) **नासं.**१३।५० त्वन्य पुरुष (त्वन्यपुरुषा); **नास्मृ.**१५। ४७ यायात् (इया), **मिता.**२।५१, **अप.**२।५१; **स्मृच.**१७३; **विर.**६२.४५० पुरुष (पतिमा) शेष नारस्मृवत्, **पमा.**२७४; **सवि.**२६०-२६१; **वीमि.**२।५१ सा द्वितीया (द्वितीया सा); **व्यप्र.**२६९, **व्यउ.**७८ यायात् (याति) शेष वीमिवत्, **विता.**५१९, **सेतु** ३१; **विभ.**३२ विरवत्, **समु.**८५.

(२) **नास.**१३।५१ तु (या) दीनपास्य या (नप्यपास्य तु); **नास्मृ.**१५।५० तु (स) तृतीया (द्वितीया), **मिता.**२।५१; **अप.**२।५१ तु (तत्), **स्मृच.**१७३ प्राप्तान् (प्राप्ता); **विर.** ६२ उप (उपा) शेष स्मृचवत्: ४५१ तु प्राप्तान् (या नारी) या (तु) उत्तरार्धे (कामतस्तु भजेदन्य सा द्वितीया प्रकीर्तिता); **पमा.**२७४; **सवि.**२६३ स्य या (स्य वा), **वीमि.**२।५१; **व्यप्र.**२६९; **व्यउ.**७८ सविवत्; **विता.**५१९; **सेतु.**३१ विर.६२वत्; **विभ.**३२ तु प्राप्तान् (या प्रोक्ता) स्य या (स्य तु), **समु.**८५.

(३) **नासं.**१३।५२ तु या (च या); **नास्मृ.**१५।५१ तु या (च या) चतुर्थी (तृतीया); **मिता.**२।५१ नासवत्; **अप.**२।५१; **स्मृच.**१७३ नासंवत्, **विर.**६२:४५१ पूर्वार्धे (देशापहृतविक्रीता क्षुत्तृष्णाव्यसनार्दिता) चतुर्थी (तृतीया); **पमा.** २७५ नासवत्; **विचि.**२९, **नृप्र.**२०-२१; **सवि.**२६१; **वीमि.**२।५१; **व्यप्र.**२६९; **व्यउ.**७९ रा तु या (रान्वया); **विता.**५१९ नासंवत्; **सेतु.**३१; **विभ.**३२ पूर्वार्धं विरवत्; **समु.**८५.

(४) **नास्मृ.**४।२५; **अभा.**४१.

यम् । यदि तेषां मध्ये येनैव कुटुम्बार्थे आपदुद्धरणार्थे कृतमृण तद्गृहपतिना दायादैर्वा दातव्यमिति । अथवा एतेषां मध्ये य एव कश्चित्तत्कुटुम्बभूमिमुपजीवति, स एव तत्कृतमृणं प्रयच्छत्येष तृतीयः पक्ष इति । अभा.४१

भार्या स्नुषा प्रस्नुषा च भार्यायाश्च प्रतिग्रहः ।
एतान् हरन्नृणं दाप्यो भूमिं यश्चोपजीवति ॥
दारमूलाः क्रियाः सर्वा वर्णानामनुपूर्वशः ।
यो यस्य हरते दारान्स तस्य हरते धनम् ॥

उत्तमर्णब्राह्मणाभावे ऋणापाकरणप्रकारः

ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति सः ।
निर्वपेत्तत्सकुल्येषु तदभावेऽस्य बन्धुषु ॥
यदा तु न सकुल्याः स्युर्न च संबन्धिबान्धवाः ।
तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत् ॥

(१) अत्र ब्राह्मणस्य यत्किमपि येन दातव्यं विद्यते ।

(१) Vulg **नास्मृ.**४।२१ इत्यस्योपरिष्टात्, **मिता.**२।५१ (=) चतुर्थार्धः; **विता.**५२० चतुर्थार्धः, स्मृतिः.

(२) **नासं.**२।९६ तु (च) निर्व . ल्येषु (सपिण्डेभ्योऽस्य निर्वपेत्); **नास्मृ** ४।११२निर्वपेत्तत्स (निक्षिपेत्तत्स्व), **अभा.**५३ सान्व...सः (अन्वयश्चास्य नास्ति चेत्) निर्व . ल्येषु (निक्षिपेत स्वकुल्येभ्यः), **मिता.**२।५१ न चास्ति स (च नास्ति चेत्) ऽस्य (स्व); **व्यक.**१२९ न चा (च ना) निर्व...ल्येषु (सकुल्येभ्योऽस्य निनयेत्), **स्मृच.**१७७; **विर** ८२ न चा (तु ना) शेष व्यकवत्; **पमा.**२७७ सः (चेत्), **धिचि.**३० सः (यः) उत्तरार्धं व्यकवत्, **सवि.**२६४ सः (न) पेत्तत् (पेत्तु)·२७६; **चन्द्र.**२६ पूर्वार्धं मितावत्; **व्यप्र.**२७० पेत्तत् (पेत्तु):२७६; **व्यउ.**७९ निर्वपेत्तत् (निचयैतत्), **व्यम.**८४ यस्य (यश्च); **विता.**५२३ पमावत्; **राकौ.**३९९ सः (वा) निर्वपेत्तत् (निरन्वये), **सेतु.**३२ उत्तरार्धं व्यकवत्, **समु.**८६; **विव्य.**३० व्यकवत्.

(३) **नासं.**२।९७ तु (च) द्विजेभ्यस्तु (स्वजातिभ्यः), **नास्मृ.**४।११३ जेभ्यस्तु (जातिभ्यः); **अभा** ५३ नास्मृवत्, **मिता.**२।५१; **व्यक.**१३० नास्मृवत्; **स्मृच.**१७७; **विर.** ८२ नास्मृवत्; **पमा.**२७७; **सुबो.**२।५१ (=) निक्षि (च क्षि); **धिचि.**३० तु (च) शेष नास्मृवत्; **सवि.**२६४; **चन्द्र.** २६ तु न सकुल्याः (सकुल्या नास्य); **व्यप्र.**२७०,२७६, **व्यम.**८४; **विता.**५२३; **राकौ.**३९९ यदा (दातु) तेष्वसत्स्वप्सु (तेष्वसमु); **बाल.**२।५१; **सेतु.**३२ विचिवत्; **समु.** ८६; **विव्य.**३० नास्मृवत्.

तस्य ब्राह्मणस्याऽपि यदा अभावः तदा तदीयसकुल्येषु निक्षिपेत् । कुल्यान्यस्थीन्युच्यन्ते । तान्येकानि समानि येषां ते सकुल्याः पितृपितृव्यतत्सुतादयः । तेषु सकुल्येषु निक्षिपेत् । तदभावेऽस्य बन्धुषु मातृभगिनीभागिनेयादिष्विति । यदेति । स्पष्टार्थः श्लोकः । ईदृश च ब्राह्मणस्योग्रत्वं दृष्टम् । येन कथमप्यात्मपार्श्वे न धारणीयं इत्युक्तम् । यद्यपि तत्पुण्योद्देशेन तडागखननेन तथा व्ययेदिति । अभा.५३

(२) ब्राह्मणस्य ग्रहणमुत्तमर्णोपलक्षणार्थम् । उत्तमर्णस्य देय यद्दण तत्तदभावे तत्संतानस्य तनयादेस्तद्द्रव्यग्राहिण ऋणप्रतिदात्रा देयम् । ससतानस्योत्तमर्णस्याभावे तत्सकुल्येष्वन्तरङ्गानतिक्रमेण देयम् । सकुल्यानामप्यभावे मातुलादिषु बन्धुष्वन्तरङ्गानतिक्रमेण देयमिति । यदा तु पूर्वोक्तानामभावः तदाप्याह स एव–यदा तु नेत्यादि । स्मृच.१७७

(३) बान्धवाः अन्वयसकुल्यान्यमातापितृसबन्धाः । ब्राह्मणस्येति वर्णमात्रोपलक्षणम् । विर.८२

(४) क्षत्रियादेस्तु राजैव गृह्णीयात् । विचि.३०

(५) निक्षेपो नाम होमः । सवि.२६४

(६) ब्राह्मणस्य तु यद् दातव्य ब्राह्मणाद् गृहीतमृणं सान्वयस्य, सहान्वयेन सान्वयः तस्य । अन्वयः पुत्रपौत्रादिः ब्राह्मणाद् गृहीतमृण पुत्रपौत्रादिसहितस्य दातव्यमित्यर्थः । न चायमाचारो लोके । तस्माद् ब्राह्मणाद् यद् गृहीतमृण तत् तस्यैव निवपेत्, तदभावेऽन्वयस्य । न चेदस्ति सोऽन्वयः,सपिण्डेभ्योऽस्य । अस्येति प्रकृतस्य ब्राह्मणस्य निर्देशः । निवपेत् दद्यादित्यर्थः । वपेरनेकार्थत्वात्, प्रकरणे दृष्टार्थस्य छेदार्थे केशान् वपतीति दर्शनात् । सपिण्डाश्चेति विशेषिताः–'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते'इति । तेषामभावस्तदभावः । सपिण्डाभावेऽस्य बन्धुषु । बान्धवाः पितृमातृसबन्धाः, प्रत्यासत्तितोऽनुक्रान्तत्वात् । बन्धुवपीष्यते प्रत्यासत्तिः ।

यदा सपिण्डा बान्धवा न सन्ति, तदा सकुल्येभ्यः । तदभावे तत्सबन्धिबान्धवेभ्यः । यदाऽस्य सकुल्या न स्युः, सकुल्या निवृत्तपिण्डोदका एकपुरुषप्रभवाः, यदा च संबन्धिबान्धवाः संबन्धिना पितृमातृसंबन्धिना, बान्धवाः संबन्धिनः, न स्युरित्येव, तदास्य स्वजातिभ्यो

ब्राह्मणेभ्यो दद्यादसंबद्धेभ्यः सामर्थ्यात् । तेष्वप्य सत्सु कदाचिदसान्निध्य भवति अनिच्छत्सु वाऽप्सु निक्षिपेत् । 'आपो वै सर्वा देवताः', 'ब्राह्मणो वै सर्वा देवताः', इति च श्रुतेः स्वजातीयत्व तासामस्तीति । क्षत्रियस्य यथोक्ताभावे राजा स्वजातीय इति तस्म दद्यात् । वैश्यस्याप्येवमेव । राज्ञोऽवकीर्णिकस्य (?) चोपदेशः । नाभा.२।९६-९७

(७) अन्वयः पुत्रसततिः दुहितृसततिश्च । व्यप्र.२७६

ऋणग्राही उपगतपत्रकरणपत्रपाठनादिविधि. ।

तदकरणे धनिदण्डः ।

गृहीत्वोपगतं दद्यादृणिकायोदयं धनी ।
अददद्याच्यमानस्तु शेषहानिमवाप्नुयात् ॥

(१) ऋणिकात् वृद्धिस्कन्धक वाऽनुदयभूत गृहीत्वा धनी उपगत दद्यात् । ऋणिकस्य तां तु प्रविश्योपगत उपरिपृष्ठ वा याच्यमानोऽपि अप्रयच्छन् शेषहानिमवा प्नुयात् । ऋणी वदति प्रवेशितधनमिद पत्र इति ।

अभा.५३

(२) उदयमृणिकेनोपार्जित गृहीत्वा धनी ऋणिकायोपगतं दद्यादित्यन्वयः । उदयशब्देनोपार्जित ब्रुवन् 'ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्' इत्युक्तविषयेऽप्यय पक्षो विज्ञेय इति दर्शयति । तेन पत्रपृष्ठे लेखनपक्षोऽप्यनेन विकल्पितत्वादस्मिन्नेव विषये विज्ञेयः । ऋणग्रहणविधिबलादस्मिन्नेव विषये भागशो ग्रहणम् । अन्यत्र कृत्स्नस्यैवर्णस्य ग्रहणमिति मन्तव्यम् । तेन यत्र भागशो ग्रहणविधिस्तत्रैव दत्ताशस्य वृद्धिनिवृत्तिः । अन्यत्र तु यावत्कृत्स्न न ददाति तावदीयमानमकृत्स्नं प्रत्याख्येयम् । दत्तांशस्यापि वा वृद्धिर्ग्राह्येव । तत्राकृत्स्नदानस्य निक्षेपमात्रतुल्यत्वात् । न च परिक्षीणविषये स्तोक दीयमान वृद्धिभागभयात्प्रत्याख्येयम् । परिक्षीणस्यानुसारणीयत्वाच्छनैर्दाप्यत्वविधानाच्च । परिक्षीणविषयेऽप्याधिमोचन कृत्स्नर्णापाकरणानन्तरं सकृदेव । न पुनर्दत्ताशानुसारेण बहुशः । यावद्दण तव न ददामि तावदयमाधिरिति बहुमूल्यस्यानृण्यपर्यन्तमाधीकरणात् । न चाधीकृतधनस्वामित्वेनासावपरिक्षीण इति वाच्यम् । प्रतिबद्धधनस्वामित्वेन निःस्वतुल्यत्वात् । अभिभोगेन वृद्धिन्यायेन दत्ताशानुसारेण भोगनिवृत्तिः । प्रतिनिष्क मशीतिभागादि वृद्धयङ्गीकारो हि धार्यमाणधनानुसारेण कृतः । तेन प्रतिदत्ताशस्याधार्यमाणस्य वृद्धिनिवृत्तिर्युक्ता । आधिभोगस्तु भोग्याधित्वस्थित्यनुयायी । स्वल्पधनप्रयोगविषयेऽपि बहुमूल्यस्याप्याधित्वेन स्थितस्याशेषस्यैव भोग्यत्वदर्शनात् । न चाङ्गीकारवशात्तत्र तथा भोग्यत्वदर्शनमिति वाच्यम् । कृत्स्न भोग्य त्वयैतदित्येवमनुक्तेऽपि दर्शनात् । भोग्याधित्वेन स्थितिश्चाविमोचनात् । विमोचन च कृत्स्नर्णापाकरणानन्तर सकृदेवेत्युक्तम् । तेन परिक्षीणविषयेऽपि न दत्ताशानुसारेणाध्यशभोगनिवृत्तिः । यथा कायिकवृद्ध्या गवादिकमाधीकृत्य निष्के ऋणिना गृहीते चतुःस्तनभव क्षीरं प्रतिदत्तेऽपि निष्ककदेशे धनी गृह्णाति न पुनः दत्ताशानुसारेण एकस्तन त्रिस्तन वाऽधमर्णायार्पयति । अश्वे त्वाधिभूते धनी स्वयमेवाश्वमारुह्य कृत्स्न मार्ग गच्छति । तथेहापीत्यलमतिबहुनाऽऽधिप्रपञ्चेन । यस्तु दौरात्म्याद्याच्यमानोऽपि उपगत न ददाति तस्य हानिमाह स एव 'न दद्याद्याच्यमानस्तु शेषहानिमवाप्नुयात्' । शेषो दास्यमानतया स्थितो भागः । शेषस्य स्वल्पत्वे सत्येतद्द्रष्टव्यम् । तस्यानल्पत्वे त्वधिकहानिता नाप्नुयात् । अपि तु गृहीतभागस्य वृद्धिदाननियन्धना हानिम् । *स्मृच.१६३

(३) उदय वृद्धयर्थं गृहीत्वा उपगतं उपगतार्थसकेत पत्रपृष्ठे उपगतपत्र वा ऋणिकाय दद्यादिति । केचिदेतद्वचन प्रतिदिनं वा प्रतिमास वा परिभाषया स्वीकर्तव्यद्रव्यविषयमिति मन्यन्ते । अपरे तु उदयमृणिकेनोपार्जित गृहीत्वा धनी ऋणिकायोपगत कारयेत् । बलात्कारेणापि—'धनदानासह बुद्ध्वा स्वाधीनं कर्म कारयेत्' इति कात्यायनस्मरणात् इति । सवि.२५४

(४) गृहीत्वोदयमुपगतमददतो देहीति याच्यमान-

---

(१) **नार.**२।९८; **नास्मृ.**४।११४; **अभा.**५३; **व्यमा.**३१५; **अप.**२।९३; **व्यक.**१२९, **स्मृच.**१६३ अदद (न दद्या); **विर.**८० नस्तु (न तु), **पमा.**२६१ कायोदय (काक्षे धन) नस्तु (न तु) शेष (दोष), **नृप** १९; **सवि.**२५४ पू; **व्यप्र.**२७६ नस्तु (नश्य); **प्रका.**९५ स्मृचवत्; **समु.**८२ स्मृचवत्.

* व्यप्र. स्मृचगतम् ।

स्याऽदानदोषाच्छेषहानि मूलहानिमवाप्नुयात् मूलमपि विनष्टं भवति । एष दण्डः । नाभा.२।९८

[1]यदि नो लेखयेद्दत्तमृणिना चोदितोऽपि सन् ।
ऋणिकस्यापि वर्धेत यथैव धनिकस्य तत् ॥

(१) यदि प्रविष्टधनमुपगतोपरिपृष्ठयोर्न प्रयच्छति धनी । ततो यथा धनिकद्रव्य वर्धते तथैव ऋणिकस्यापि तदिति । अभा.५३

(२) यथैव तद्द्रव्यमृणिकस्योपरि स्थित धनिकाय वर्धते तथैवर्णिकाय धनिकस्योपरि स्थित वर्धत इत्यर्थः । स्मृच.१६४

[2]लेख्यं दद्याद्विशुद्धर्णे तदभावे प्रतिश्रवम् ।
धनिकर्णिकयोरेवं विशुद्धिः स्यात्परस्परम् ॥

(१) यत्किञ्चित्पत्रलिखितमृण तन्निःशेष धनिकस्य ऋणी दद्यात् । तदभावे प्रतिश्रयमिति । हृतप्रणष्टाद्य पायवाहुल्यात्तदभावे लेख्याभावे धनी ऋणिकस्य प्रतिश्रयं विशुद्धिपत्र दद्यात् । एव धनिकर्णिकयोः परस्पर विशुद्धिर्भवति । तथा चोक्त विपष्टिपत्रप्रकरणे कल्याणभट्टेन । 'पाटन वा विशुद्धिर्वा सर्वदत्तधने भवेत् । पृष्ठ बोपगत वा स्यात्सशेषधनचीरके' ॥ इति कुसीदवार्धुषिकभेदः षष्ठः श्लोकः । अतः प्रतिभूभेदो भवति । अभा.५४

(२) लेख्यमृणपत्र तदसनिधाने प्रतिश्रुत शोधनपत्र, न तु साक्षिणः कार्याः तैः पत्रस्थानपोद्यत्वादिति तात्पर्यम् । व्यमा.३१५

(३) प्रतिश्रवशब्देन साक्षिश्रवण विवक्षितम् । ×अप.२।९४

(४) प्रतिश्रव प्रतिदत्त इत्यस्मिन्नर्थे साक्षिसिद्धे श्रोत्रियादिश्रावणम् । स्मृच.१६२

(५) प्रतिश्रवः लोके दत्तमनेनेति ख्यापनम् । विर.८१

(६) ऋणे शुद्धे गृहीते ग्रहणपत्र तस्मै दद्यात् शुद्धर्णिकाय । तदभावे लेख्यस्यानुपलब्धौ प्रतिश्रव प्रतिपत्र गृहीत मयेति पत्र दद्यात् । नाभा.२।९९

(७) प्रतिश्रवः प्रतिदानश्रवणाय शुद्धिपत्रम् । व्यम.८१

बृहस्पतिः

कीदृशमृण दातव्यम् । पुत्रेण पितुरभावे देयम् ।

[3]परहस्ताद् गृहीतं यत् कुसीदविधिना ऋणम् ।
येन यत्र यथा देयमदेयं चोच्यतेऽधुना ॥
[4]याचमानाय दातव्यमप्रकालमृणं कृतम् ।
पूर्णावधौ शान्तलाभमभावे च पितुः सुतैः ॥

(१) अप्रकालमदीर्घकालमिति यावत् । कृतं दीपोत्सवादौ प्रतिदेयमित्येव सावधित्वेन कृतम् । शान्तलाभमुपरतवृद्धिकम् । एतदुक्त भवति । अदीर्घकालमृण याञ्चानन्तर दातव्यम् । सावधित्वेन कृत तु पूर्णेऽवधौ । शान्तलाभ तु लाभशान्त्यनन्तरम् । ऋणिकाभावे च तत्सुतैरप्येवमेव दातव्यमिति । एतच्च याञ्चादेः समनन्तर प्रतिदानविधानम् । न ततः प्राक् प्रतिदानव्युदासकं सति सभवे शीघ्रमपाकरणीयत्वाद्दणस्य ।

---

(१) **नास्मृ** ४।११५ : Vulg.**नास्मृ** ४।११३ इत्यस्योपरिष्टात्,/यदि नोपलिखेद्दत्तमृण वावेदयेन्न यत्।धनिकस्यैव वर्धेत तदृण यत्र लेखितम्॥), **अभा** ५३; **स्मृच** १६४ (यदि वा नोपरि लिखेदृणिना चोदितोऽपि सन् । धनिकस्यैव वर्धेत तथैव ऋणिकस्य तत् ॥), **पमा** २६१ स्मृचवत्, **नृप्र**.१९ स्मृचवत्, **प्रका**.९५ स्मृचवत्, **समु** ८२ स्मृचवत् .

(२) **नास**.२।९९ द्विशुद्धणे (दृणे शुद्धे), **नास्मृ** ४।११६ श्रवम् (श्रयम्), **अभा**.५४ नास्मृवत्; **व्यमा**.३१५ श्रवम् (श्रुतम्); **अप**.२।९४ नासवत्, **व्यक**.१२९, **स्मृच** १६२ नासवत्; **विर**.८१ द्वणे (द्वयर्थे), **पमा** २६२ पूर्वार्धे (लेख्यं दत्वा ऋणी शुद्धेयत्तदभावे प्रतीश्वरम्) त्परस्परम् (त्प्रतिश्रवम्), **नृप्र** १९ दद्याद्विशुद्धणे (दत्वा ऋणी शुद्धेयत्), **व्यप्र**.२७७; **व्यम**.८१ श्रवम् (श्रवः), **प्रका**.९५ नासवत्, याज्ञवल्क्यः, **समु**.८१ नासवत् .

× व्यप्र. अपवत् ।

(१) **व्यक**.११८ देयमदेय (देय न देयं), **विर**.४७; **सेतु**. २४ चो (वो) (२) **व्यक** ११८ लमृण कृतम् (लेकृत धनम्) च (वा), **स्मृच** १६१,१६८; **विर**.४७ मृण कृतम् (कृतमृणम्), **पमा**.२६२ प्र (ल्य) र्णा (र्णेऽ); **विचि**.२२ मृण कृतम् (कृतमृणम्) शेष पमावत्, **स्मृचि**.१२ प्र (न्य) शेष विरवत्, **सवि**.२५२,२५५; **चन्द्र**.२८ च (तु) शेष विरवत्; **व्यप्र**. २६३ प्र (ल्य),**सेतु**.२४ विरवत्; **प्रका**.९५,९७; **समु**. ८१ प्र (ल्य).

यस्तु ऋण नापाकरोति तस्यादृष्टहानिः पुराणे दर्शिता— 'तपस्वी चाग्निहोत्री च ऋणवान्म्रियते यदि। तपश्चैवाग्निहोत्र च सर्व तद्ऋनिनो भवेत्' ॥ तेनावश्यमृणमपाकरणीयमित्यर्थः। *स्मृच.१६१

(२) प्रकालोऽवधिः। विर.४७

(३) यत्र धनिकेच्छैव दानावधित्वेनोभाभ्यां नियमिता तत्याचमानमात्राय देयम्। यत्र चान्यावधिर्नियमितस्तत्तत्पूर्तौ देयम्। यत्र त्ववधिर्न कृतस्तत्र परम वृद्धिप्राप्त सदेयमित्यर्थः। विचि.२२

(४) सावधौ तु पूर्णावधाववधिपूरणे, शान्तलाभ द्विगुण्येन शिथिलिताऽपरलाभ देयमित्यर्थः। न द्विगुणी भवनमात्रावधेः पूर्वमपीत्यर्थः। चन्द्र.२८

(५) निरवधिक याचनानन्तरमेव देय परमवृद्धौ जातायामिति मदनरत्ने। व्यप्र.२६३

पैतामहपित्र्यात्मीयर्णदानक्रम.

[1]**पित्र्यमेवाग्रतो देयं पश्चादात्मीयमेव च।**
तयोः पैतामहं पूर्वं देयमेवमृणं सदा ॥

पितृकृतस्वकृतर्णसमवाये तु पितृकृतमादौ देयम्। स्मृच.१६९

पित्र्यात्मीयर्णदानात्पूर्वमेव पैतामहर्ण पौत्रेणात्म पितृपितामहकृतर्णत्रयसमवाये देयम्। तयोस्ताभ्या पित्र्यात्मीयाभ्यामित्यर्थः। एव पौत्रेण रिक्थार्हत्वेन ऋणदान धुर्यपौत्रान्तरस्याभावे धुर्यस्य वा पितृव्यस्य धुर्यसद्भावे त्वधुर्यस्यानधिकारात्समप्रधानभूतेषु पौत्रादिषु विभक्तेषु यथाशतः ऋणापाकरणम्। अविभक्तेषु तु संभूयसमुत्थानेनेत्यादि अत्राप्यवगन्तव्यम्। पौत्रविषयवचनाना विशेषमात्रप्रदर्शनपराणा प्रदर्शितविशेषादन्यत्पुत्रैः समानमित्यभिप्रायिकार्थावगमात्। गृहीतरिक्थाना तु पौत्राणामधिकारो वृद्धिसहितर्णापाकरणे 'देयं पैतामह सम' इत्यस्यागृहीतरिक्थविषयत्वात्। 'तयोः पैतामहं पूर्वं देयमेव ऋण सदा' इत्युक्तस्तु क्रमात्मको विशेषोऽगृहीतरिक्थानामपि पौत्राणा सदेत्यभिधानात्। स्मृच.१७१

विभावितमृण देयम। पैतामहमृणमवृद्धिक देयम्।

प्रपौत्रेण तु न देयम्।

ऋणमात्मीयवत् पित्र्यं पुत्रैर्देयं विभावितम्।
पैतामहं समं देयं न देयं तत्सुतस्य तु ॥

(१) सम यावद्गृहीत तावदेव देय न वृद्धिः। तत्सुतस्य प्रपौत्रस्यादेयमगृहीतधनस्य। मिता.२।५०

(२) तत्सुतस्येति कर्तरि षष्ठी। ततश्च तत्सुतेन न देयमित्यर्थः। अप.२।५०

(३) आत्मीयवत् सवृद्धिक देयमित्यर्थः। व्यक.११९

(४) न वय विघ्न इति यत्र पुत्रैर्निह्नवः क्रियते तत्र प्रमाणेन विभावितं चेद्देय नो चेन्न देयमिति विभावितपदस्यार्थः। स्मृच.१६९

आपदग्रस्तजीवत्पितृण देयम्

सान्निध्ये तु पितुः पुत्रैः ऋणं देयं विभावितम्।
जात्यन्धपतितोन्मत्तक्षयश्वित्रादिरोगिणः ॥

(१) मिता २।५० पुत्रैर्देयं (देय पुत्रै) न देय (अदेयं); अप.२।५० तु (तत्), व्यक.११९ अपवत्, गोभि.१२।३७ अपवत्; स्मृच १६९ पू, विर ४९, पमा.२६५ न देय (अदेय), दीक ३६ पित्र्य पुत्रैर्देय (पुत्रैदेय पित्र्य), स्मृचि. १३ पमावत्, नृप्र.२० पमावत्, सवि.२५६ पू.; व्यप्र. २६४, व्यउ ५८ पमावत्, व्यम.८२ ऋणमा (ऋण चा) तु (च), विता ५१५ पमावत्, राकौ.३९७ पमावत्; सेतु. २५ पुत्रै (पौत्रै) तस्य (तेन); प्रका.९८ पू.; समु ८४-८५.

(२) अप.२।५० तु (ऽपि) कात्यायनः; व्यक १२०; स्मृच.१६९; विर ५१ तु (ऽपि); पमा.२६४ तु (ऽपि); विचि.२३ तु (ऽपि) पतितो (बधिरो), स्मृचि.१३ विचिवत्, कात्यायन, नृप्र.२० तु (ऽपि) श्वित्रादि (त्वग्दोष) कात्यायनः; सवि.२५६ पमावत्; चन्द्र.२० (जात्यन्धबधिरोन्मत्तक्षयचित्रादिरोगिणः। सान्निध्येऽपि ऋण देयं पितुः पुत्रैर्विभावितम्॥); सेतु २६ तु (ऽपि) गिणः (गिणाम्); प्रका.९८; समु.८४; विव्य.२८ विचिवत्, मनुः,

---

* सवि. स्मृचवत्।

(१) अप.२।५०; व्यक.११८, स्मृच.१६९ पू:१७१ मृ (ऋ) उत्त, विर.४७; पमा २६४ वमृ (तद्), स्मृचि. १२ पमावत्; नृप्र.२० पमावत्; सवि.२५६ पित्र्यमेवाग्रतो (आदौ पितृकृत) पू; व्यप्र.२६६ पित्र्यमेवाग्रतो (पित्र्य पूर्वमृणं); व्यम.८२; विता.५१६ मृ (ऋ); प्रका.९८ पू, समु.८५.

(१) अविप्रतिपत्तौ तु याचमानाय दातव्यमित्यादिनोक्तयाञ्चानन्तरकाल एव दातव्यम् । कालान्तरास्मृतेः । क्षयश्चित्रादीत्यादिशब्देन क्षयश्चित्रादिसदृशाः दुश्चिकित्स्या एव रोगा गृह्यन्ते । न पुनर्ज्वरादयः । स्मृच.१६९

(२) अत्र यदि पिता सर्वथा दानासमर्थः तदा पुत्रेण ऋण दातव्यमिति समुदायार्थ इति पारिजातस्वरसः । वस्तुतस्तु यत्सावशानधिकारप्रयोजकरूपवान् पिता अविभक्तधनश्च पुत्रस्तदा पुत्रेणैव तद्दण देयम् । यदा त्वसाधारणधनः पिता तथाभूतोऽपि तदा तेनैव दातव्यम् । यदा तु पिता सर्वथैव ऋणदानासमर्थः पुत्रस्तु समर्थस्तदा पुत्रेणैव दातव्यमिति । *विर.५१

कुटुम्बार्थकृतमृण देयम्

[1]**पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः ।**
यद्गृहीतं कुटुम्बार्थे तद्गृही दातुमर्हति ॥

शिष्यग्रहणेनान्तेवास्यपि गृहीतः । छायामात्रस्य विवक्षितत्वात् । गृहीत्यनेन न गृहीमात्रस्याभिधान किन्तु कुटुम्बिनः । तस्यैव विवक्षितत्वात् । स्मृच.१७४

धनस्त्रीहारिपुत्रादीना ऋणप्रतिदानाधिकारः

धनस्त्रीहारिपुत्राणां पूर्वाभावे यथोत्तरं आधमर्ण्यम् । तदभावे क्रमशोऽन्येषां रिक्थभाजाम् ।
[2]उज्जामादिकमादाय स्वामिने न ददाति यः ।
स तस्य दासो भृत्यः स्त्री पशुर्वा जायते गृहे ॥

उज्जामशब्देन ऋणमुच्यते । आदिशब्देन निक्षेपादिकमुच्यते । व्यक.१२१

ऋणभाग् द्रव्यहारी च यदि सोपद्रवः सुतः ।
स्त्रीहारी तु तथैव स्यादभावे धनहारिणः ॥

यथैव धनहारी ऋणभाक् तथैव धनहार्यभावे स्त्रीहारी स्यादित्यर्थः । स्मृच.१७२

पुत्रादिकृतर्णदानविचारः

[3]ऋणं पुत्रकृतं पित्रा शोध्यं यदनुमोदितम् ।
सुतस्नेहेन वा दद्यान्नान्यथा दातुमर्हति ॥

(१) यथा पुत्रपितृशब्दयोरुपलक्षणार्थत्व नारदीये तथा 'ऋण पुत्रकृत' इत्यादिबार्हस्पत्यवचनेऽप्यवगन्तव्यम् । शोध्यमपाकरणीयम् । अनुमोदितग्रहणं प्रतिश्रुतस्याप्युपलक्षणार्थम् । 'देय प्रतिश्रुतं यत्स्याद्यच्च स्यादनुमोदितम्' इति कात्यायनस्मरणात् । स्नेहादान प्राङ्निरूपितनानाविधदेयर्णव्यतिरिक्तविषय भार्याकृतर्णविषयेऽपि समान, सुतग्रहणस्य स्नेहमात्रोदाहरणतया कृतत्वात् । स्मृच.१७५

(२) 'न पुत्रेण कृत पिता' इत्यस्य क्वचिदपवादमाह बृहस्पतिः—ऋण पुत्रकृतमित्यादि । पमा.२६८

(३) कुटुम्बार्थमनुज्ञात पुत्रर्ण पित्रा देय, नान्यत् । चन्द्र.२४

[4]शौण्डिकव्याधरजकगोपनापितयोषिताम् ।
अधिष्ठाता ऋणं दाप्यस्तासां भर्तृक्रियासु तत् ॥

तासामृणमधिष्ठाता भर्ता दाप्यः यस्मात् भर्तुरेव क्रियासु तद्दण ताभिः कृतमिति योजना । अत्र च तदाश्रयवृत्तित्वमेव प्रयोजक न तु जात्यादरः । विर.६०

पुत्रैरप्रतिदेयानि ऋणादीनि

[5]**सौराक्षिकं वृथादानं कामक्रोधप्रतिश्रुतम् ।**
प्रातिभाव्यं दण्डशुल्कशेषं पुत्रान्न दापयेत् ॥

---

* विवादचिन्तामणिस्थ पारिजातमत विरवत् ।

(१) **अप.**२।४५; **स्मृच.**१७४; **विर.**५४; **पमा.**२६७; **विचि.**२७-२८; **स्मृचि.**१३ पुत्रस्त्री (पुत्रैश्च); **नृप्र.**२०; **दात.**१७८; **सवि.**२५३ पितृव्य (पितृद्रव्य) **पुत्रस्त्री** (पुत्र).२६३ गृही (ग्राही); **चन्द्र.**२४; **व्यप्र.**२७२; **विता.**५०२, सेतु २७; **समु.**८५; **विव्य.**२९ जीविभि (यायिभिः). (२) **विश्व.**२।४७. (३) **व्यक १२१; विर.**५५ **भृत्यः** (पुत्रः); **चन्द्र.**१८ उज्जामादिक (उत्तमर्ण) भृत्यः (पुत्रः). (४) **स्मृच.**१७२ हारी तु (ग्राही न) उत्त.; **विर.**६४, **विचि.**२६; **वीमि.**२।५० द्रव्य (व्यव) च (तु) थै (दै); **व्यप्र.**२६७ तु (च) उत्त, **व्यम.**८३ व्यप्रवत्, उत्त.; **समु.**८५ व्यप्रवत्, **उत्त.**

(१) **अप.**२।४६, **स्मृच.**१७५; **विर** ५६; **पमा.**२६८; **दीक.**३६ दद्या (कुर्या); **विचि.**२८; **स्मृचि.**१४; **नृप्र.**२०; **चन्द्र.**२४ शोध्य (मोच्य), **व्यप्र.**२७३; **विता** ५०४ शोध्य यदनु (सशोध्यमनु); **सेतु.**२८; **समु.**८६.

(२) **विर.**६०; **सेतु.**३०. (३) **व्यक.**१२१ त्राज्ञ (त्र न); **स्मृच.**१६९ शुल्क (शुल्के); **विर.**५७; **पमा.**२६५ व्यकवत्; **विचि.**२५ व्यकवत्; **स्मृचि** १३ शुल्क (शुल्के) त्राज्ञ (त्रो न); **सवि.**२५६-२५७ क्षिक (क्षिके) दान (दान) त्राज्ञ (त्रैर्न); **चन्द्र.**१७ उत्त.: २१; **वीमि.**३।४७

(१) सौरं चाक्षिक च सौराक्षिकं सुरासपादननिमित्तक द्यूतपराजयनिमित्तक चेति यावत्। स्मृच.१६९

प्रातिभाव्यं दर्शनप्रतिभूदेयमत्र विवक्षितम्।

स्मृच.१७०

(२) वृथादान नर्तकादिदत्तम्। सवि.२५७

(३) वृथादान धर्मकृत्यनित्यनैमित्तिकार्थव्यतिरेककृतम्। दण्डशेष पित्र्यन्यायजातदण्डे पितृदत्तावशेष शुल्कशेष पित्रा कन्याद्युपग्रहीतृदत्तावशिष्टम्। चन्द्र.२१

उपगतपत्रादिविधिः। तदकरणे धनिदण्डः।

धर्मादिनोद्ग्राह्य ऋणं यस्तूपरि न लेखयेत्।
न चैवोपगतं दद्यात्तस्य तद्वृद्धिमाप्नुयात्॥

अक्षरार्थस्तु धर्मोपधिबलात्कारगृहसरोधनाद्युपायैरधमर्णादकृत्स्नमृणमुपादाय यो धनी ऋणलेख्योपरि ममैतावत्प्राप्तमिति न लिखेत् न च प्रवेशपत्रं दद्यात्तस्य तद्दिनमारभ्य यावल्लेखन लेखदान वा न करोति तावदधमर्णादुपात्त धन वृद्धिमाप्नुयात्। अधमर्णाय वर्धते इति यावत्। स्मृच.१६४

कात्यायनः

कदा कीदृश च पैताम्ह पित्र्य चर्ण प्रतिदेयम्।

कियत्पुरुषपर्यन्तमृण देयम्।

यद्दृष्टं दत्तशेषं वा देयं पैतामहं तु तत्।
सदोषं व्याहृतं पित्रा नैव देयमृणं क्वचित्॥

यत्पित्रा दृष्ट यच्च तेन दत्तावशेषित तत्पैतामह पौत्रेण देयम्। यत्तु तेन व्याहृत निराकृतं यच्च सुरादिव्यसननिमित्तत्वेन दोषयुक्त न तत्पैतामह देयमित्यर्थः। अप.२।५०

पित्रा दृष्टमृणं यत्तु क्रमायातं पितामहात्।
निर्दोषं नोद्धृतं पुत्रैर्देयं पौत्रैस्तु तद्भृगुः॥

पित्रा दृष्ट, स्वपितृकृतत्वेन पित्रा निःसंदिग्धमवगत पितामहात्क्रमप्राप्त पूर्वपुरुषाभावादिना प्राप्तं निर्दोषं अदेयत्वापादकदोषरहित पुत्रैर्नोद्धृत पुत्रैर्दुश्चिकित्स्यरोगादिवशादनपाकृतम्। स्मृच.१७०

पैतामहं तु यत्पुत्रैर्न दत्तं रोगिभिः स्थितैः।
तत्स्यादेवंविधं पौत्रैर्देयं पैतामहं समम्॥

सम वृद्धिरहितं मूलमात्रमिति यावत्। स्मृच.१७०

पुत्राभावे तु दातव्यमृणं पौत्रेण यत्नतः।
चतुर्थेन न दातव्य तस्मात्तद्विनिवर्तयेत्॥

एव च प्रपितामहादिकृतर्णापाकरणानधिकारः चतुर्थादेरगृहीतरिक्थस्यैव न पुनर्गहीतरिक्थस्येत्यवगन्तव्यम्। स्मृच.१७१

यद्देयं पितृभिर्नित्यं तदभावे तु तद्धनात्।
तद्धनं पुत्रपौत्रैर्वा देयं तत्स्वामिने तदा॥

पितृधनसद्भावे तस्मादेव ऋणम्। धनाभावेऽपि पुत्रत्वात्पौत्रत्वाद्देयमित्यर्थः। सवि.२५८

एवं कालमतिक्रान्तं पितॄणां दाप्यते ऋणम्॥

पत्रलक्षणमभिधाय कात्यायनेनाभिहितम्— एवं कालमिति। इत्थं पत्रारूढमृणमतिक्रान्तकालमपि पितॄणां संबन्धि दाप्यते। अत्र पितॄणामिति बहुवचननिर्देशात्कालमतिक्रान्तमिति वचनाच्च चतुर्थादिर्दाप्य इति प्रतीयते। मिता.२।९०

प्रति (परि); **व्यप्र.**२६५-२६६ क्षिक (क्षिके) त्रात्र (त्रो न), **व्यम.**८२ व्यकवत्; **सेतु.**२८ शुल्क (शुल्कं); **प्रका.**९८ स्मृचवत्; **समु.**८४; **विव्य.**२९ व्यकवत्.

(१) **व्यक.**१२९ वृद्धि (हानि); **स्मृच** १६४ धर्मा ...ऋणं (ऋण धर्मादितो ग्राह्य); **विर.**८० धर्मा (धर्म्या) ऋण (धन); **व्यप्र.**२७७; **सेतु.**४० ऋण (धनं), **प्रका** ९५ स्मृचवत्, **समु.**८२ तद्वृद्धिमा (वृद्धिमवा).

(२) **अप.**२।५०; **व्यक** ११८; **स्मृच.**१७० उत्त., **विर.** ४८; **विचि.**२५ व्याहृत (व्याहृतं); **सवि.**२५८ उत्त, **चन्द्र** २१ तु तत् (च यत्); **विता.**५१५; **प्रका.**९९ षं व्या (ष्या); **समु.**८४ उत्त.

(१) **अप.**२।५० (=); **व्यक.**११८; **स्मृच.**१७०; **विर.** ४८; **सवि.**२५८, **विता.**५१५; **प्रका.**९८–९९; **समु.**८४.

(२) **व्यक.**११८, **स्मृच.**१७० रो (यो), **विर.**४८; **प्रका.**९९; **समु.**८४.

(३) **व्यक.**११८–११९ न दातव्य (यदादत्त); **स्मृच.** १७१ येत् (ते), **विर.**४९ पुत्रा (पित्र्य) शेषं व्यकवत्; **पमा.**२६५ स्मृचवत्, **स्मृचि.**१३ पुत्रा (पित्र्य) न दातव्य (तु दातव्य); **व्यप्र.**२६४ पुत्रा(पित्र); **समु.**८४.

(४) **सवि.**२५८; **समु.**८४ तद्धन (स्वधनात्) दा (था).

(५) **मिता.**२।९०; **विता.**१२९; **समु** ८४.

सुस्थेनार्तेन वा देयं श्रावितं धर्मकारणात् ।
अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः ॥
पितृणां सूनुभिर्जातैर्दानेनैवाधमादृणात् ।
विमोक्षस्तु यतस्तस्मादिच्छन्ति पितरः सुतान् ॥
नाप्राप्तव्यवहारैस्तु पितर्युपरते क्वचित् ।
काले तु विधिना देयं वसेयुर्नरकेऽन्यथा ॥

(१) क्वचिदित्यत्र देयमित्यनुषज्यते । विधिना ऋण प्रतिदानप्रकरणे प्रदर्शितेन विधिना । स्मृच.१६८

(२) नाप्राप्तव्यवहारैः हेयोपादेयपरिज्ञानविशेषसहितः षोडशवर्षैरित्यर्थः । व्यप्र.२६३

पित्र्यर्णे विद्यमाने तु न च पुत्रो धनं हरेत् ।
देयं तद्धनिके द्रव्यं मृते गृह्णंस्तु दाप्यते ॥

(१) विभक्तः पुत्रो विभागानन्तर पितृकृते ऋणे तिष्ठति तस्मिन्मृते तद्धन न गृह्णीयात् किं तु धनिकाय दद्यात् । यदि किञ्चित्ततोऽवशिष्ट भवति तर्हि गृह्णीयात् । पितृधनाभावे रिक्थग्रहणराहित्येऽपि स्वधन दद्यादित्यर्थः । अत्र पुत्रग्रहण पौत्रस्याप्युपलक्षणम् । 'पुत्रपौत्रैर्ऋण देय इति वचने उभयोः साम्येन ग्रहणात् । पौत्रस्यावृद्धिकदान तु वाचनिकमिति न तस्यानेन साम्यपाठेन निवृत्तिः । व्यप्र.२६६

(२) द्रव्यमृते इति संबन्धः । द्रव्य विनेत्यर्थः । व्यम.८२

यावन्न पैतृकं द्रव्यं विद्यमानं लभेत सुतः ।
सुसमृद्धोऽपि दाप्यः स्यात् तावन्नैवाधमर्णिकः ॥
पूर्वं पैतामहं देयं पित्र्यं देयं ततः परम् ।
पश्चाद्देयं तथात्मीयमेवं देयमृणं सुतैः ॥

धनस्त्रीहारिपुत्रादीनामृणप्रतिदानाधिकार·

पूर्वं दद्याद्धनग्राहः पुत्रस्तस्मादनन्तरम् ।
योषिद्ग्राहः सुताभावे पुत्रे वाऽत्यन्तनिर्धने ॥

दायभागानर्हस्यापि भूयिष्ठधनवत्त्वे योषिद्ग्राहो न दाप्य इत्याह कात्यायनः—पूर्वं दद्यादिति । पूर्वं रिक्थग्राहो दद्यात्तदभावे बहुतरधनयुक्तो दायानर्हः पुत्रो दद्यात्तस्याभावे योषिद्ग्राहो दद्यादित्यर्थः । व्यप्र.२७१

रिक्थहर्त्रा ऋणं देयं तदभावे च योषितः ।
पुत्रैश्च तदभावेऽन्यै रिक्थभागिभिर्यथाक्रमम् ॥
ऋणं तु दापयेत्पुत्रं यदि स्यान्निरुपद्रवः ।
द्रविणार्हश्च धुर्यश्च नान्यथा दापयेत्सुतम् ॥
व्यसनाभिप्लुते पुत्रे बाले वा यत्र दृश्यते ।
द्रव्यहृद्दापयेत्तं तु तस्याभावे पुरन्ध्रिहृत् ॥

(१) द्रविणार्हः पितृधनार्हः । धुर्यः पितृधुरो वोढा । अप.२।५०

(२) द्रविणार्ह इति वदन् द्रव्याग्रहणेऽपि अर्हत्वे सति पुत्रो दाप्य इति दर्शयति। दुश्चिकित्स्यरोगादिनोपद्रुतः पितृद्रव्यानर्हश्चान्धादिर्धुर्यश्च पितृकृतर्णापकरणानधिकारीति 'नान्यथा दापयेत्सुतम्' इत्यनेनोक्तम् ।

---

(१) **विचि** २४:६२ देयं (दत्त); **सेतु.**१५४ देयं (दत्त). **विच.**२३ सेतुवत्; **विश्व.**३८ सेतुवत्. (२) **व्यक** १२० **स्मृच.**१६८; **पमा.**२६३; **व्यप्र.**२६३; **प्रका.**९८; **समु** ८३. (३) **अप.**२।५० रैस्तु (रेण), **व्यक.**१२०, **स्मृच.**१६८ रै (र); **विर.**५४; **पमा.**२६३ ना (न) रै (र), **विचि** २४ ना (अ); **सवि.**२५६ रै (र), **व्यप्र.**२६३; **सेतु** २८; **प्रका.**९८ रै (र); **समु.**८४.

(४) **स्मृच.**१६९ व्य (त्र) के (क); **पमा.**२६४; **नृप्र** २० ऋस्तु (ऋन् हि); **सवि.**२५६ के (क) व्य (व्य) नारदः, **व्यप्र.**२६६ गृह्णन् (पुत्रः), **व्यम.**८२ व्यं (व्य) गृह्णन (पुत्र·); **प्रका.**९८ व्य (त्र) के (कं); **समु.**८४ प्येत् (पयेत्) शेषं स्मृचवत्. (५) **विश्व.**२।४७.

(१) **विचि** २४:६२ देयं (दत्त); **सेतु.**१५४ देयं (दत्त). **विच.**२३ सेतुवत्; **विश्व.**३८ सेतुवत्. (२) **व्यक** १२० **स्मृच.**१६८; **पमा.**२६३; **व्यप्र.**२६३; **प्रका.**९८; **समु** ८३. (३) **अप.**२।५० रैस्तु (रेण), **व्यक.**१२०, **स्मृच.**१६८ रै (र); **विर.**५४; **पमा.**२६३ ना (न) रै (र), **विचि** २४ ना (अ); **सवि.**२५६ रै (र), **व्यप्र.**२६३; **सेतु** २८; **प्रका.**९८ रै (र); **समु.**८४.

(४) **स्मृच.**१६९ व्य (त्र) के (क); **पमा.**२६४; **नृप्र** २० ऋस्तु (ऋन् हि); **सवि.**२५६ के (क) व्य (व्य) नारदः, **व्यप्र.**२६६ गृह्णन् (पुत्रः), **व्यम.**८२ व्यं (व्य) गृह्णन (पुत्र·); **प्रका.**९८ व्य (त्र) के (कं); **समु.**८४ प्येत् (पयेत्) शेषं स्मृचवत्. (५) **विश्व.**२।४७.

(५) **व्यक.**१२३; **स्मृच.**१७२ ले (लो) त्त तु (त्तत्र); **विर.**६४ त्त तु (त्तत्र), **दीक.**३६ व्यहृत् (व्य तु) त्त तु (त्तत्र); **विचि.**२७ त्त (त्तत्), **चन्द्र** २३ (व्यसनाभिप्लुतः पुत्रो बालो वा यदि दृश्यते) त्त तु (त्तत्र); **वीमि.**२।५१ ते पुत्रे बाले (तः पुत्रो बालो), **व्यप्र.**२७२ यत्र (यः प्र), **विता.**५१३ त्र दृश्यते (त्प्रदीयते) त्त तु (त्तत्र); **समु.**८५ स्मृचवत्; **विश्व.**२९ विरवत्, उत्त.

धुर्यश्चेति गुणप्रधानभावेन वर्तमाननानापुत्रविषयम्। स्मृच.१६९

तत्तस्यां दशायां दायार्हपुत्रस्य अनधिकारप्रदर्शनार्थं न तु दायानर्हपुत्रस्य, व्यसनोपप्लुतत्वाद्यवस्थायामेव धनग्राहादिरुक्तक्रमेण ऋणभाक्। अन्यत्र तु दायार्हपुत्र एव प्रथमतः, पश्चाद्धनग्राहादिरिति क्रमान्तरविधानार्थं तस्यात्राश्रुतत्वात्। आदौ दायानर्हपुत्रदानासामर्थ्यस्याच्च। यत्पुनस्तेनैवोक्तम्—'पूर्वं दद्याद्धनग्राहः पुत्रस्तस्मादनन्तरम्। योषिद्ग्राहः सुताभावे पुत्रो वाऽत्यन्तनिर्धनः'॥ इति तद्योषिद्ग्राहापेक्षयाऽत्यन्तबहुधनो यः पुत्रस्तस्य धनग्राहानन्तर्यार्थमिति सर्वमविरुद्धम्। न च योषिद्ग्राहदानाधिकारशास्त्रान्यथानुपपत्त्या योषिद्ग्रहणमपि पूर्वपतिकृतमृणं दातु शास्त्रीयमिति शङ्कनीयम्। यतो रागप्राप्तयोषिद्ग्रहणसंभवात् न शास्त्रस्यानुपपत्तिरित्याह संग्रहकारः—'यस्तु दद्याद्ऋणं वोढुः पुनर्भूस्वैरिणीपतिः। न तेन तदुपादानं शास्त्रतो विहितं भवेत्'॥ स्मृच.१७२-१७३

(३) धुर्यः ऋणोद्वहने समर्थः। व्यसनाभिप्लुतत्वादिमति यत्र द्रव्यद्वद् दृश्यते, तदा तं दापयेदिति योजना। विर.६४

(४) तदय संक्षेपः। धनस्त्रीहारिणोरपि सत्वे द्रविणार्हो धुर्यश्च स एव। अनीदृशपुत्रसत्त्वेऽपि धनहारी। धनहार्यभावे पूर्ववत्। पुत्रसत्वेऽपि स्त्रीहारी। उभयोरभावेऽप्योग्योऽपि पुत्र एवाधमर्णं दद्यात्। ×विचि.२७

(५) सत्यपि दायार्हे पुत्रे तस्य यदा दुश्चिकित्स्यरोगाद्युपद्रवेण बाल्येन वा ऋणदानासामर्थ्ये तस्यामवस्थाया तत्पितृधनं स्वसमीपे यः स्थापयति पितृव्यादिः स ऋणं दद्यात्। तस्याभावे योषिद्ग्राहो दद्यादित्याह स एव—ऋणं त्विति। व्यप्र.२७१-२७२

अमतेनैव पुत्रस्य प्रधना याऽन्यमाश्रयेत्।
पुत्रेणैवापहार्यं तद्ऋनं दुहितृभिर्विना॥
ऋणार्थमाहरेत्तत्तु न सुखार्थं कदाचन।
अयुक्ते कारणे यस्मात् पितरौ तु न दापयेत्॥

× चन्द्र. विचिवत्।

(१) व्यक.१२४; विर.६४; चन्द्र.२७ तृभिः (तरं). (२) व्यक.१२४; विर.६५; चन्द्र.२७ त्तत्तु (त्तन्तुं) खार्थं (खाय) पू.

या स्वपुत्रं तु जह्यात् स्त्री समर्थमपि पुत्रिणी।
आहृत्य स्त्रीधनं तत्र पित्र्यर्णं शोधयेत् मनुः॥

अमतेन असंमत्या। प्रधना प्रकृष्टस्त्रीधना। दुहितृभिर्विना दुहितॄणामभावे। या स्त्री समर्थमपि पुत्र परित्यज्य स्त्रीधनमादाय पुत्रस्य असंमत्या पुरुषान्तरं श्रितवती, तस्याः स्त्रीधनमपि आच्छिद्य पुत्रेण ऋणं शोधनीयमिति तृतीयवाक्यार्थः। समर्थमपीत्यनेन असमर्थमपि। पुत्रपरित्यागे तु तस्याः स्त्रीधन पुत्रेणाच्छेत्तव्यमिति दर्शितम्। विर.६५

बालपुत्राधिकार्था च भर्तारं याऽन्यमाश्रिता।
आश्रितस्तद्ऋणं दद्याद्बालपुत्राविधिः स्मृतः॥
[3]**दीर्घप्रवासिनिर्बन्धुजडोन्मत्तादिलिङ्गिनाम्।**
जीवतामपि दातव्यं तत्स्त्रीद्रव्यसमाश्रितैः॥

दीर्घप्रवासिप्रभृतीना या स्त्री यच्च द्रव्यं, तद्ग्राहकैरित्यर्थः। विर.६६

आपद्ग्रस्तपित्र्यं पुत्रैर्देयम्

[4]विद्यमानेऽपि रोगार्ते स्वदेशात्प्रोषिते तथा।
विंशात्संवत्सरादूर्ध्वं ऋणं पितृकृतं सुतैः॥

(१) विंशात्संवत्सरात् प्रवासादारभ्येति शेषः। कुत्र गत इति अज्ञाते सुतैर्देय अन्यत्र प्रस्थापनादिनाऽपि पित्रैव दातुं शक्यत्वात्। रोगार्ते तु स्वरूपसंख्यादि-

(१) व्यक.१२४; विर.६५.

(२) अप.२।५१; व्यक.१२४; स्मृच.१७४ भर्ता (त्राता); विर.६६; पमा.२७५ र्या च भर्तारं (र्यो वा भर्यार्ता); सवि.२६३ धिकार्था (दिकर्ता) भर्ता (त्राता) ता (ताः) विधिः स्मृतः (दिविश्रुतम्); व्यप्र.२७५ च (या) याऽन्य (चाऽन्य); समु.८५ स्मृचवत्.

(३) अप.२।५१ न्धु (न्ध) त्तादि (त्तार्त) व्य (व्यं); व्यक.१२४; विर.६६; विचि.३० वता (विना); चन्द्र.२६ जडोन्मत्तादि (प्रजडोन्मत्त); वीमि.२।५१ निर्बन्धु (निर्भूत); सेतु.३२ विचिवत्; विव्य.३० त्तादि (त्तान्ध).

(४) अप.२।५० तथा (ऽपि वा); व्यक.११९ तथा (स्वतः); स्मृच.१६९; विर.५० नेऽपि (ने तु); पमा.२६४; दीक.३६ नेऽपि (ने च); नृप्र.२० नेऽपि (ने तु) शात् (शत्); सवि.२५६ तथा (ऽथवा) शात् (शत्); व्यप्र.२६५ पू.; व्यम.८२ तथा (ऽथवा) सुतैः (तथा); विता.५११ शात् (शत्); सेतु.२६ स्मृचवत्; प्रका.९८; समु.८४.

विप्रतिपत्तौ निर्णयात् पश्चादेव देयम् । ×स्मृच.१६९

(२) एतच्च रोगार्तस्य शक्यप्रतिक्रियत्वसंभावनाया प्रोषितस्य पुनरागमनसंभावनाया च ज्ञेयम् । यदि त्वसाध्यत्वेनैव रोगावधारण प्रवासिनश्च पुनरागमनव्यतिरेकावधारण भवति, तदा जीवतोऽपि वृद्धस्य पितुः पुत्रस्तत्काल एव ऋण दातुमर्हति । विंशतिवर्षाणि यावत् प्रतीक्षा न कर्तव्या । विर.५०

[3]व्याधितोन्मत्तवृद्धानां तथा दीर्घप्रवासिनाम् ।
ऋणमेवंविधं पुत्रान् जीवतामपि दापयेत् ॥

एकच्छायाया ऋणदानप्रकार.

[4]एकच्छायाश्रिते सर्वं दद्यात्तु प्रोषिते सुतः ।
मृते पितरि पित्रंशं परर्णं न बृहस्पतिः ॥

(१) सर्वं परर्णमपि न पित्रशमात्रमित्यर्थः । न तु सवृद्धिकमिति व्याख्येयम् । *स्मृच.१५२

(२) यत् परेण सह पित्रा एकच्छायया कृतमृण तत् परस्याभावे प्रोषिते पितरि पित्रश पराश च पुत्रो दद्यात् । मृते पितरि पित्रशमात्र दद्यादित्यर्थः । +विर.५१

(३) अनेवविधस्यापि देयत्वात् कालप्रतीक्षावारणार्थमेव वाक्यम् । ÷विचि.२४

[5]एकच्छायाप्रविष्टानां दाप्यो यस्तत्र दृश्यते ।
प्रोषिते तत्सुतः सर्वं पित्रंशं तु मृते समम् ॥

(१) एकच्छायावतामृणग्राहिणा मध्ये यत्रैको ग्रहीतैव दृश्यते, तदा स एव सर्वं दाप्यः। यदि वा प्रोषितपितृकस्तत्सुतो दृश्यते, सोऽपि सर्वं दाप्यः। यदि च प्रमीतपितृको दृश्यते, तदासौ पित्रशमेव दाप्यो न तु सर्वमेवेत्यर्थः । ×विर.५२

(२) सर्वं सवृद्धिकमृणम् । मृते तु पितुरंशमवृद्धिकं दद्यादित्यर्थः । *व्यप्र.२५२

कुटुम्बार्थकृतमृण कुटुम्बिना देयम्

[6]कुटुम्बार्थमशक्ते तु गृहीतं व्याधिते तथा ।
उपप्लवनिमित्तं च विद्यादापत्कृतं तु तत् ॥
[7]कन्यावैवाहिकं चैव प्रेतकार्ये च यत्कृतम् ।
एतत्सर्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ॥

(१) अशक्ते कुटुम्बभरणासमर्थे कुटुम्बिनीत्यर्थः। कन्यावैवाहिक कन्याविवाहनिमित्तक यत्कृत येन धनेन कृत प्रभोः प्रभुणा कुटुम्बिनेति यावत् । स्मृच.१७५

(२) प्रभोरिति कर्तरि षष्ठी, तेन प्रभुणा दातव्यमित्यर्थः । विर.५६

[8]प्रोषितस्यामतेनापि कुटुम्बार्थमृणं कृतम् ।
दासस्त्रीमातृशिष्यैर्वा दद्यात्पुत्रेण वा भृगुः ॥

× सवि. स्मृचवत् ।

* अत्र प्रतिभूविषयत्वेनाय श्लोको व्याख्यातः । व्यप्र , व्यउ. स्मृचवत् । + अत्र ऋणिविषयत्वेनाय श्लोको व्याख्यात. । चन्द्र. विरगतम् । ÷ शेष विरवत् ।

. (१) **अप.**२।५०; **व्यक.**११९; **विर.**५१; **विता.**५११ त्रान् (त्रो); **सेतु.**२६,३१६ कात्यायनबृहस्पती . ३१६ पू.

(२) **व्यक.**१२०; **स्मृच.**१५२; **विर** ५१ श्रिते (कृत) बृहस्पतिः (कदाचन); **विचि.**२४ दद्यात्तु (प्रदद्यात्) शेष विरवत् ; **चन्द्र** २० दद्यात्तु (दद्याच्च) शेष विरवत् ; **व्यप्र** २५२; **व्यउ.**३०; **सेतु.**२७ र्ण (र्णे) शेष विरवत् ; **प्रका.**९१; **समु.**७८.

. (३) **मिता.**२।५५ या (यां); **विर.**५२ (प्रोषितस्य सुतः सर्वं पित्रंशर्ण मृतस्य च); **पमा.**२५२ या (यां) समम् (सुतः); **सवि.**२५० समम् (तु सः); **व्यप्र.**२५१; **व्यउ.**

× अत्र ऋणिपरत्वेनाय श्लोको व्याख्यात. ।

* पमा., सवि , व्यप्र , व्यउ., विता. एषु मिताक्षरानुसारेण प्रतिभूविषयत्वेनाय श्लोको व्याख्यातः ।

३० समम् (तु सः), **व्यम.**७९ श (शात्) समम् (सुतः); **विता.**५३० मितावत् ; **समु.**७८ पमावत् .

(१) **अप.**२।४५ के तु (क्तेन) तथा (न वा) त्त च वि (ते च द) त तु (ते तु); **व्यक.**१२१ क्ते तु (क्तेन) बृहस्पतिः; **स्मृच.**१७४ हीत (हीत) तु तत् (च यत्); **विर.** ५६ क्ते तु (क्तेन) तथा (न वा); **पमा.**२६९ त व्याधिते (ते व्याधिना); **स्मृचि.**१४, **नृप्र.**२० क्ते (क्तौ) तत् (यत्); **व्यत.**२३३ विरवत् ; **दात.**१७८ तथा (ऽथवा) त्त च (त्त तु), **सवि.**२६३ तथा (न वा) नारदः; **चन्द्र.**२३ विरवत् ; **व्यप्र.**२७२; **विता.**५०३ विरवत् ; **समु.**८६.

(२) **अप.**२।४५; **व्यक.**१२१ बृहस्पतिः; **स्मृच.**१७५; **विर.**५६; **पमा.**२६९ यें च (येंषु); **स्मृचि.**१४ यें च (येंषु) प्रभोः (पितुः); **नृप्र.**२०; **व्यत.**२३३; **दात.** १७८; **सवि.**२५३ यें च (येंऽपि) प्रभोः (च यत्) : २६३ यें च (यें तु) नारदः; **चन्द्र.**२३; **व्यप्र.**२७२ क (के) यें च (येंषु); **विता.**५०३ व्यप्रवत् ; **समु.**८६.

(३) **अप.**२।४६ स्त्रीमातृ (स्त्र्यमात्य); **व्यक.**२११

पुत्रेण दासादिभिर्वा यत् प्रोषितस्यामतेनाऽपि तत्कुटुम्बपोषणार्थमृणं कृतं, तदसौ प्रोषितो दद्यादिति भृगुर्मन्यते इति योजना । विर.५६

पुत्रकृतर्णप्रतिदानविचारः

[1]**ऋणं पुत्रकृतं पित्रा न देयमिति धर्मतः ।**
देयं प्रतिश्रुतं यत्स्याद्यच्च स्यादनुमोदितम् ॥

(१) इति तदुक्तनानाविधदेयर्णेतरर्णविषयमित्यवगन्तव्यम् । धर्मत इति वदन् स्नेहतो देयमिति दर्शयति । स्मृच.१७५

(२) प्रतिश्रुतमत्र ऋणादानसमयाङ्गीकृतम् । आदानानन्तरस्वीकृत चानुवर्णितम् । पुत्रग्रहण चोपलक्षणम् । विर.५७

[2]**देयं पुत्रकृतं तत्स्याद्यच्च स्यादनुवर्णितम् ।**
कृतं संवादितं यच्च श्रुत्वा चैवानुमोदितम् ॥

कृतमकृच्छ्रे इति शेषः । कृच्छ्रकृत तु अप्रतिपन्नमपि देयम् । स्मृच.१७४

कामकृतक्रोधकृतर्णनिवर्तनम्

[3]**लिखितं मुक्तकं वाऽपि देयं यत्तु प्रतिश्रुतम् ।**
परपूर्वस्त्रियै तत्तु विद्यात् कामकृतमृणम् ॥

[4]**यत्र हिंसां समुत्पाद्य क्रोधाद्द्रव्यं विनाश्य वा ।**
उक्तं तुष्टिकरं यत्तु विद्यात् क्रोधकृतं तु तत् ॥

(१) मुक्तक लेखनरहितम् । परपूर्वस्त्रियै परभार्यायै । यत्र हिंसामित्यादेरयमर्थः । परस्य हिंसा धनविनाश वा क्रोधात्कृत्वा तत्तुष्टये यद्द्रव्य दास्यामीति प्रतिश्रुतं तदृण क्रोधकृतमिति । स्मृच.१७०

(२) परपूर्वाशब्दश्च अपरिणीतस्त्रीमात्रपरः । विर.५८

मातृकृतभार्याकृतर्णप्रतिदानविचारः

[5]**देयं भार्याकृतमृणं भर्त्रा पुत्रेण मातृकम् ।**
भक्तस्यार्थे कृतं यत् स्यादभिधाय गते दिशम् ॥

पत्यौ पुत्रे वा भार्याया मातुश्च वृत्तिमकल्पयित्वा स्थिते अन्यत्र गते वा भार्यया मात्रा वा भक्ताच्छादनाय यदृण कृतं तत्पतिपुत्राभ्यां देयमित्यर्थः । अभिधायेति प्रायोवादः । अनभिधानेऽपि न्यायसाम्यात् । विर.५९

[6]**भर्त्रा पुत्रेण वा सार्धं केवलेनात्मना कृतम् ।**
ऋणमेवंविधं देयं नान्यथा तत्कृतं स्त्रिया ॥

अन्यथा तत्कृत केवल भर्त्रा पुत्रेण वा कृत स्त्रिया तयोरभावेऽपि न देयम् । किन्तु भर्त्रा पुत्रेण वा सार्ध संभूय गृहीतमृणं तयोरभावे देयम् । स्वयमेव गृहीतं तु तयोरभावेऽपि इत्यर्थः । एवंविधमिति वदन्नन्यदप्यस्ति स्त्रिया देयमिति दर्शयति । किं तदित्यपेक्षिते याज्ञवल्क्यः– 'प्रतिपन्न स्त्रिया देयम्' इति । *स्मृच.१७६

मा (भ्रा) बृहस्पति , **स्मृच.**१७४, **विर.**५६, **पमा** २६८ मा (भ्रा) भृगुः (पिता), **सवि** २६३ स्यामतेना (स्य मृत वा) दास (दातु.); **व्यप्र** २७२ मते (गते) मा (भ्रा); **व्यम.**८३, **समु.**८६.

(१) **व्यक.**१२१ बृहस्पतिः; **स्मृच१७५; विर.**५७ मोदि (वर्णि); **सवि.**२६३ उक्त , **व्यप्र.**२७३; **व्यम.**८३ उक्त.; **विता.**५०४ पित्रा न देयमिति (यत्तद्देयमेवेति), **सेतु.** २८ यत्स्यात् (यच्च), **समु** ८६.

(२) **स्मृच.**१७४, **समु.**८६ वर्णि (मोदि).

(३) **अप.**२।४७ तत्तु (यत्तु) ऋणम् (नृणाम्); **व्यक** १२१-१२२ (=); **स्मृच.**१७० वा (चा) ऋणम् (नृणाम्), **विर.**५८ खित (खित्वा); **पमा.**२६६ तत्तु (दत्त), **विचि.**२५-२६ त मु (त्वा सू) ऋणम् (धनम्); **स्मृचि** १३ यत्तु (यत्र); **सवि.**२५७ वा (चा) विधा (विन्धा) कृ (श्रु); **चन्द्र.**२२ यत्तु (कर्तुः) तत्तु (यत्तत्); **वीमि.**२।४७ खितं (खित्वा) वा (चा), **व्यप्र.**२६६ ऋणम् (नृणाम्), **सेतु.**२९ तं मु (त्वा सू); **प्रका.**९८ स्मृचवत्; **समु.**८४ ऋ (त्तृ).

(१) **अप.**२।४७; **व्यक.**१२२ (=); **स्मृच.**१७० वा (तु) ; **विर.**५८; **पमा.**२६६ यत्तु (तत्तु) तु (च); **विचि.** २६, **स्मृचि.**१३ वा (तत्), **सवि.**२५७ त्र (स्य) कृत तु तत् (प्रतिश्रुतम्); **चन्द्र.**२२ समुत्पा (समासा) यत्तु (तत्तु) तु तत् (ऋणम्); **वीमि.**२।४७, **व्यप्र.**२६६, **सेतु.**२९; **प्रका.**९८ वा (तु), **समु.**८४ वा (च).

(२) **व्यक.**१२२; **स्मृच.**१७४ भक्तस्या (भर्तुर्), **विर.** ५९; **व्यप्र.**२७३ भि (वि) शम् (वम्); **समु.**८६.

(३) **अप.**२।४९; **व्यक.**१२२; **स्मृच.**१७६ लेना (लं वा); **विर.**६०; **विचि.**२८ वा सार्ध (सार्ध वा) ले (ल) नात्म (चात्म); **वीमि.**२।४९पू.; **व्यप्र.**२७३, **बाल.**२।४६, २।४९, **सेतु.**३० वा सार्ध (सार्ध वा) लेना (ल वा) देय (दद्याद्) : ३१६ पूर्ववत्, याज्ञवल्क्यः; **समु.**८६ लेना (लं वा).

* व्यप्र. स्मृचगतम् ।

[1]मर्तुकामेन या भर्त्रा उक्ता देयमृणं त्वया ।
अप्रपन्नाऽपि सा दाप्या धनं यद्याश्रितं स्त्रिया ॥

(१) अत्रार्थादनाश्रितभर्तृधना स्त्री अप्रपन्ना चेन्न देयमिति गम्यते । स्मृच.१७६

(२) प्रत्यासन्नमरणेन प्रत्यासन्नप्रवासेन वा भर्त्रा । यदि भर्तृधन तदाश्रितमित्यर्थः । मर्तुकामेनेत्युपलक्षणम् । विर.६०

(३) अप्रतिपन्ना चेत् पतिधनाभावेऽपि कर्मकराऽपि सेवया धन संपाद्य ऋणापाकरण कर्तव्यम् । पतिधनसंबन्धे तु यतो रिक्थ तत एव ऋणापाकरणन्यायात् । औत्सर्गिकर्णापाकरणे अधिकारो विधवाया इत्याह अपरार्कः । ×सवि.२६४

[2]निर्धनैरनपत्यैस्तु यत्कृतं शौण्डिकादिभिः ।
तत्स्त्रीणामुपभोक्ता तु दद्यात्तदृणमेव हि ॥
[3]शौण्डिकव्याधरजकगोपनाविकयोषिताम् ।
अधिष्ठाता ऋणं दाप्यस्तासां भर्तृक्रियासु तत् ॥

अधिष्ठाताऽत्र पतिरेव । भर्तृक्रियासु तत्, यतो भर्तुः कर्तव्येषु प्रयोजनेषु तदृण जात तासामित्यर्थः।*व्यक.१२२

ऋणानपाकरणकर्मविपाकः

[4]ऋणं गृहीत्वा पुरुषो यदि पञ्चत्वमाव्रजेत् ।
यत्किञ्चित् कुरुते पुण्य तत्सर्वमुत्तमर्णिकम् ॥

[5]उद्धारादिकमादाय स्वामिने न ददाति यः ।
स तस्य दासो भृत्यः स्त्री पशुर्वा जायते गृहे ॥

पितामहः

पितृमातृकृतर्णप्रतिदानाधिकारः

[6]अविभक्ता ऋणं दद्युः पित्र्यं मातृकमेव वा ।
तदभावे विभक्ताश्च न तु तेन प्रतिश्रुतम् ॥

मातापितृसंबन्धिद्रव्याभावे ताभ्या प्रतिश्रुत न देयमिति वरदराजः । सवि.२५२

व्यासः

ऋणानपाकरणकर्मविपाकः

[7]तपस्वी चाग्निहोत्री च ऋणवान् म्रियते यदि ।
तपश्चैवाग्निहोत्रं च सर्वं तद्धनिनो भवेत् ॥

पितृकृत सदोषर्ण न देयम्

[8]दण्डो वा दण्डशेषो वा शुल्कं तच्छेष एव वा ।
न दातव्यं तु पुत्रेण यच्च न व्यावहारिकम् ॥

(१) व्यावहारिकं व्यवहारार्हपुरुषकृतम् । व्यक.१२१

(२) अत्र दण्डो वेत्यनेनैव तच्छेषोपादानात् पुनः तच्छेषग्रहणादतिमहति दण्डे वा दातव्यमिति कियच्छेष तु सर्वथा न दातव्यम् । अल्पेऽपि दण्डे सर्व न दातव्यमिति लभ्यते । विर.५८

(३) व्यवहारबहिःकृतमित्यर्थः । विचि.२५

उशना

[9]दण्डं वा दण्डशेषं वा शुल्कं तच्छेषमेव वा ।
न दातव्यं तु पुत्रेण यच्च न व्यावहारिकम् ॥

× अत्रोध्दृत अपरार्कमत अपरार्के नोपलभ्यते ।

* व्यप्र. व्यकवत् ।

(१) **अप.**२।४९मर्तृ(भर्तृ) उक्ता(प्रोक्ता),**व्यक.**१२२यद्याश्रि (यद्भार्षि); **स्मृच.**१७६ मर्तु (भर्तृ), **विर.**६० न या (न वा), **पमा.**२७० त्वया (तथा) प्रप (प्रतिप) यद्याश्रितं स्त्रिया (दद्यात्सुतो यथा); **दीक.**३६, **विचि.**२९ विरवत्, क्रमेण नारदः; **सवि.**२६३ प्रप (प्रस), **चन्द्र** २५ भर्त्रा (पत्या) नारदः; **वीमि.**२।४९ देयमृण त्वया (देहि ऋण प्रिये) सा दाप्या (स तदा) क्रमेण नारद ; **व्यप्र** २७४; **व्यम** ८४ यद्याश्रि (दद्यात्स्थि), **बाल.**२।४९ विरवत्, **सेतु** ३० विरवत्, नारदः, **समु** ८६ मर्तु(भर्तृ), **विव्य.**२९ नारदः.

(२) **अप** २।५१, **व्यक.**१२३; **विर** ६२ तत् स्त्री (यः स्त्री); **विचि.**३० हि (तु), **चन्द्र.**२६, **वीमि.**२।५१ हि (तु); **व्यम.**८३ मुप (मपि); **सेतु.**३२ हि (तु); **समु.**८५; **विव्य** ३०. (३) **व्यक.**१२२; **व्यप्र.**२७४. (४) **स्मृचि.**१३.

(१) **स्मृच.**१६१, **पमा.**२६१; **व्यप्र.**२७७; **व्यम.**८१; **प्रका.**९५; **समु.**८१.

(२) **सवि.**२५२; **समु.**८४.

(३) **स्मृच.**१६१ पुराणम्; **नृप्र.**१९; **व्यप्र.**२७७ चा (वा) त्री च (त्री वा); **व्यम.**८२; **विता.**५०९.

(४) **व्यक.**१२१; **विर.**५८; **विचि.**२५ यच्च न (यद्यन्न); **स्मृचि.**१३ व वा (व च); **चन्द्र.**२२ तु पुत्रेण (च पुत्रस्य); **वीमि.**२।४७ व्य (व्यः), **सेतु.**२९; **प्रका.**९८ ण्डो (ण्डं) षो (ष) ष ए (षमे) मनुः.

(५) **मिता.**२।४७; **अप.**२।४७ ण्डं (ण्डो) षं वा (षो वा);

न व्यावहारिकं सौरिकमित्यर्थः । स्मृच.१७०

प्रजापतिः

आपदि ऋणप्रतिदानापवादः

[1]दुर्भिक्षे राष्ट्रसंबाधे धर्मकार्ये तथापदि ।
ऋणं देयं मूलमेव न वृद्धिरिति निश्चयः ॥
वृद्धिं वृद्ध्येकदेशं वा मूलेऽप्यंशमथाऽपि वा ।
यथाशक्ति प्रदायैव करणं परिवर्तयेत् ॥

उत्तमर्णग्राह्याभावे ऋणापाकरणम्

[2]बन्ध्वभावे तु विप्रेभ्यो देयं क्षेप्यं जलेऽपि वा ।
जले क्षिप्तं तथाऽग्नौ च धनं स्यात्पारलौकिकम् ॥

आनृण्यापादनेन परलोकहित जलादौ प्रक्षिप्तं धनं भवतीत्युत्तरार्धस्यार्थः । अग्नौ चेत्यत्र हुतमिति शेषोऽध्याहार्यः । न पुनः क्षिप्तमित्यस्यानुषङ्गः कार्यः । स्मृच.१७७

गोभिलः

अज्ञातर्णदोषापाकरणम्

[3]ऋणेष्वज्ञायमानेषु गोलकमध्यमपर्णैर्जुहुयात् यत्कुसीदमिति ।

(१) यत्कुसीदमिति मान्त्रवर्णिकी च अग्निरत्र देवता, आनृण्यार्थश्चायं होमः । 'अनृणो भवामीति' मन्त्रलिङ्गात् । गोलकाः पलाशाः । स्मृच.१७७

(२) एवं निक्षेपे प्रतिश्रुते संकल्पे च ज्ञेयम् । विता.५५१

वृद्धहारीतः

त्रिपुरुषपर्यन्ता ऋणप्रतिदातारः

[4]लेखयेत्तद्दृणं सम्यक् समामासादिकल्पनैः ।
देयं सवृद्धया धनिने पुरुषैस्त्रिभिरेव तत् ॥

पुत्रेणाप्रतिदेयानि ऋणादीनि । पितृकृतमृणं पुत्रपौत्रैः प्रतिदेयम् रिक्थग्राहयोषिद्ग्राहानन्याश्रितद्रव्यपुत्रादीनामृणप्रतिदातृत्वम् । प्रतिभूदत्तधनप्रतिदानम् । स्त्रीपतिपुत्रकृतर्णप्रतिदानविचारश्च ।

[5]सुराकामद्यूतकृतं वृथादानं तथैव च ।
दण्डशुल्कावशिष्टं च पुत्रो दद्यान्न पैतृकम् ॥
पितरि प्रोषिते प्रेते व्यसनाधिष्ठितेऽपि वा ।
पुत्रपौत्रैर्ऋणं देयं निह्नुते साक्षिचोदितम् ॥
रिक्थग्राही ऋणं दद्याद्योषिद्ग्राहस्तथैव च ।
पुत्रो न स्वाश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः ॥
प्रातिभाव्यमृणं साक्ष्यं देयं तस्मै यथोचितम् ।
दीयते स्वात्प्रतिभुवा धनिने तु ऋणं यथा ॥
द्विगुणं तत्प्रदातव्यं दण्डं राज्ञे च तत्समम् ।
पुत्रादिभिर्न दातव्यं प्रातिभाव्यमृणं स्त्रिया ॥
प्रतिपन्नं स्त्रिया देयं पत्या चैव हि यत्कृतम् ।
स्वयंकृतं तु यद्दृणं नान्यत्स्त्री दातुमर्हति ॥

वृद्धप्रपितामहः

[6]पूजनीयास्त्रयोतीता उपजीव्यास्त्रयोग्रतः ।
एतत् पुरुषसंतानमृणयोः स्याच्चतुर्थके ॥

स्मृत्यन्तरम्

सदोषदानम्

[7]धूर्ते बन्दिनि मद्ये च कुवैद्ये कितवे शठे ।
चाटचारणचौरेषु दत्तं भवति निष्फलम् ॥

संग्रहकारः (स्मृतिसंग्रहः)

ऋणदातृस्त्रीहारिणः स्त्रीसंग्रहोऽशास्त्रीयः

[8]यस्तु दद्या णं वोढुः पुनर्भूस्वैरिणीपतिः ।
न तेन तदुपादानं शास्त्रतो विहितं भवेत् ॥

न च योषिद्ग्राहदानाधिकारशास्त्रान्यथानुपपत्त्या योषिद्ग्रहणमपि पूर्वपतिकृतमृणं दातुं शास्त्रीयमिति शङ्कनीयम् । यतो रागप्राप्तयोषिद्ग्रहणसंभवात् न शास्त्रस्यानुपपत्तिरित्याह संग्रहकारः— यस्तु दद्याद्दणमिति । तदुपादानं पुनर्भूणा स्वैरिणीना च

स्मृच.१७०; पमा.२६७; सवि.२५७; व्यप्र.२६५; व्यम.८२; विता.५१७; समु.८४.

(१) समु.७८. (२) समु.८१.

(३) स्मृच.१७७; व्यप्र.२७६; व्यम.८४ तु (ऽपि); विता.५५१ बन्ध्व (बन्ध); समु.८६ ऽपि (ऽथ).

(४) स्मृच.१७७ कमध्यमप (कामध्यम); व्यप्र.२७६ (मध्येमन पर्णेन जुहुयात् कुसीदम्); विता.५५१ (मध्यमपर्णेन जुहुयात्कुसीदमिति); समु ८६ स्मृचवत्.

(५) बृहास्मृ.७।२३६.

(१) बृहास्मृ.७।२४९-२५४. (२) अभा.३३,३५.

(३) मिता.२।४७; अप.२।४७; स्मृच.१७०; सवि.२५७ शठे (शवे) चौ (यो); व्यप्र.२६५(=); विता ५१६ चार (भाट); प्रका.९८ शठे (शवे); समु.८४ चा (चे).

(४) स्मृच.१७३; व्यप्र.२६९ स्तु (त्र) स्रतो (स्रेण); समु.८५.

ग्रहणम्। स्मृच.१७२-१७३

उत्तमर्णब्राह्मणाद्यभावे ऋणापाकरणम्

द्रव्यं यत्त्वधमर्णस्थं क्वचिद्ब्राह्मणगं भवेत्।
सुतादिब्राह्मणान्तानां रिक्थभाजामसंभवे॥
पलाशस्य पलाशेन जुहुयात् मध्यमेन तु।

(१) स्मृच.१७७; सवि.२६४त्त्वध (धर्व); व्यप्र.२७६; विता.५५१ स्मृतिसंग्रहः; समु.८७.

(२) स्मृच.१७७; सवि.२६४; व्यप्र.२७६ वाऽप्स्वेव यत्कुसीदमिति प्राप्येदथवाऽप्स्वेव तद्धनम्॥

क्वचिदुत्तमर्णादिबन्ध्वन्तानामभावविषय इत्यर्थः। 'यत्कुसीदमिति' पूर्वेणैव संबध्यते। मूलस्मृतौ जलक्षेपणमन्त्रास्मरणात्। निक्षिप्तादिधनेऽप्येष एव विधिर्निक्षेपादिस्वामिन्यतीते द्रष्टव्यम्। समानकारणादित्युक्त देवस्वामिना। स्मृच.१७७

(वार्ये); विता.५५१ वाऽप्स्वेव (वाप्सु च) स्मृतिसंग्रहः; समु.८७ तु (च).

ऋणोद्ग्राहणम्

विष्णुः

धनी स्वधन स्वयं साधयन् राज्ञा न वाच्यः

[1]प्रयुक्तमर्थं यथाकथञ्चित् साधयमानो न राज्ञो वाच्यः स्यात्।

(१) यथाकथञ्चित् स्मृत्याचारमार्गानुरोधेनेति शेषः। तद्विरोधेन साधयमानो राज्ञा निवारणीय एव दुष्टत्वात्। स्मृच.१६५

(२) यथाकथञ्चित् अवरोधबन्धादिना। विर.७४

(३) यथाकथञ्चित् यथाविधय प्रवर्तितेन धर्मादिनेत्यर्थः। विचि.३४

धनस्य राजद्वारा साधने अधमर्णदण्डादिविधिः। उत्तमर्णशुल्कं च।

[2]साध्यमानश्चेद्राजानमभिगच्छेत् तत्समं दण्ड्यः।

स्मृत्याचारमार्गाविरोधेनेति शेषो द्रष्टव्यः। अन्यथा दण्ड्यत्वानुपपत्तेः। तत्समं साध्यमानर्णसमम्। स्मृच.१६६

[3]उत्तमर्णश्चेद्राजानमियात् तद्विभावितोऽधमर्णो राज्ञे धनदशभागसमं दण्डं दद्यात्। प्राप्तार्थश्चोत्तमर्णो विंशतितममंशम्।

प्राप्तार्थेन दानं भृतित्वेन, न दण्डत्वेन, निरपराधित्वात्। स्मृच.१२२

सर्वापलाप्येकदेशविभावितोऽपि सर्वं दद्यात्*।

कौटिलीयमर्थशास्त्रम्

ऋणप्रतिग्रहीतृक्रमः

[1]नानर्णसमवाये तु नैकं द्वौ युगपदभिवदेयाताम्। अन्यत्र प्रतिष्ठमानात्। तत्राऽपि गृहीतानुपूर्व्या राजश्रोत्रियद्रव्यं वा पूर्वं प्रतिपादयेत्।

नानाभूतानामृणाना समवाये, एक धारणिकं, द्वौ धनिकौ, युगपत् एककाले नाभिवदेयाता नाभियुञ्जीयाता, धारणिकश्चेत् स्वदेशमपहाय विदेश न प्रतिष्ठते। श्रीमू.

मनुः

सर्वैरुपायैः स्वधन साधयेत्

[2]यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः।
तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकम्॥

(१) विस्मृ.६।१८ मानो (न्); व्यक.१२७ साधयमानो (संसाधयन्), स्मृच.१६५ राज्ञो (राज्ञा); विर.७४; विचि.३३; चन्द्र.२९ (प्रयुक्तमर्थ०) मानो (न्) राज्ञो (राज्ञा) वाच्यः (दण्ड्यः); व्यप्र.२५८ साधय (ससाध्य); विता ४९१; प्रका.९६ स्मृचवत्; समु.८२ स्मृचवत्; विव्य.१० मानो (न्) राज्ञो (राज्ञा).

(२) विस्मृ.६।१९; व्यक.१२७; स्मृच.१६६; विर.७४ नममि (नं); व्यप्र.२५९; विता.४९८; प्रका.९६; समु.८२

(३) विस्मृ.६।२०-२१ सम (संमित); अप.२।४२; व्यक.१२९ दशभागसमं (दशमांश) प्राप्तार्थ (प्राप्तेऽर्थे तत),

* स्थलनिर्देशादि (पृ. ५३७) इत्यत्र द्रष्टव्यम्।

स्मृच १२१; विर.७८ त्तद्वि (तदा) सम (मश) राज्ञे (राज्ञो); पमा.२००; विचि३५ दशभागसमं (दशमभाग) (अंशम्०); नृप्र.१७ तद्वि (तर्हि) (भाविताऽधमर्णो०) प्राप्तार्थ (समर्थ); व्यप्र.२७८ तद्विभाविते (ततस्तद्विभाविते ऽर्थे) दश (दशम); सेतु.३९ दशभागसम (दशमभागं) दण्डं + (दत्वा); प्रका.७६-७७; समु.६६. (१) कौ.३।११.

(२) मस्मृ.८।४८; व्यक.१२४ गृह्य दाप (ग्राह्य साध्य);

(१) ईहाप्राप्तार्थादुत्तमर्णाद्राज्ञे भागं वक्ष्यत्यधमर्णादण्डम्। तत्र स्वभागतृष्णया राजान उपायान्तरेण धनमार्गणं धनिकाना कारयेयुरतस्तन्निवृत्त्यर्थमिदमुच्यते। यैर्यैर्वक्ष्यमाणैरुपायैः स्वधन पूर्वप्रयुक्तमुत्तमर्णो लभेत तैस्तैरधमर्ण दापयेत्। संगृह्य स्थिरीकृत्य। अनेनैवोपायेनैतस्मादेतल्लभ्यत इत्येतन्निश्चित्येत्यर्थः। अथवाऽनुकूलमुपसान्त्वन ग्रहः। उत्तमर्ण एव उत्तमर्णिकः। उत्तम च तद्धनं चोत्तमर्ण तदस्यास्तीत्युत्तमर्णिकः। 'अत इनिठनाविति' (व्या. सू. ५।२।११५) रूपम्। एवमितरावपि सर्वधनादिषु प्रक्षेतव्यावन्यत्र वीरपुरुषको ग्राम इतिवद्बहुव्रीहिणैव सामानाधिकरण्यस्य मत्वर्थे चोक्तार्थाविशेषेण समासः। मत्वर्थीयश्च दुर्लभः। वृद्धिलाभार्थं प्रयोगविषय धनमृणम्। द्वौ च तस्य संबन्धिनौ प्रयोक्ता ग्रहीता च। प्रयोजकस्य च तदुत्तम भवति। स्वतन्त्रो धनदाने प्रत्यादाने च। इतरस्य तोपचयदानाद्ग्रहायासत्वाच्चाधमत्वम्। व्युत्पत्तिमात्रमेवेतत्। रूढयैव त्वेतौ प्रयोक्तृग्रहीत्रोर्वाचकौ। के पुनस्तत्रोपाया इत्येतत्प्रदर्शनार्थ उत्तरश्लोकः। मेधा.

(२) उत्तमर्णो यैर्यैरुपायैः स्वधनं लभते तैस्तैरुपायैः अधमर्ण निगृह्य तमर्थ दापयेत्। गोरा.

(३) यैर्वक्ष्यमाणैरुपायैः संप्रयुक्तमर्थमुत्तमर्णो लभते तैस्तैरुपायैर्वशीकृत्य तमर्थ दापयेत्। मनु.

(४) दापयेद्राजेति शेषः। मच.

पञ्च स्वधनोद्ग्राहणोपायाः

धर्मेण व्यवहारेण छलेनाचरितेन च।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च॥

स्मृच.१६४; विर.६७ मर्णि (मर्ण) दापयेदधमर्णि (साधयेदधमर्ण); विचि.३१ दाप (साध); स्मृचि.१२ विचिवत्; व्यप्र २५६ विचिवत्; सेतु ३३ विचिवत्; प्रका.९६; समु.८२.

(१) मस्मृ.८।४९; मिता.२।४०; अप.२।४०; व्यक.१२४; स्मृच.१६६ छलेना (छद्मना); विर.६७ धर्मे (धर्म्ये); पमा.२५६; विचि.३१; स्मृचि.१२; नृप्र.१९ छलेनाचरितेन (फलेन चतुरेण), वीमि.२।४०; व्यप्र. २५६,२५९; व्यउ.७६ तेन च (तेन वा) शेष विरवत्; विता.४९१; सेतु.३३; प्रका.९७ स्मृचवत्; समु.८२.

१ नेहा.

(१) तत्र धर्मस्कन्धकरीत्या स्तोकं स्तोक ग्रहण, इदमद्य, इद श्वः, इदं परश्वः, यथा कुटुम्बसंवाहोऽस्यैवं वयमपि तव कुटुम्बभूताः संविभागयोग्या इत्यादि पठितप्रयोगो धर्मः। यस्तु निःस्वः स व्यवहारेण दापयितव्यः। अन्यत्र कर्मोपकरणं धनं दत्वा कृषिवाणिज्यादिना व्यवहारयितव्यः। तत्रोत्पन्नं धनं तस्माद्ग्रहीतव्यम्। यस्तु व्यवहारो राजनिवेद्यस्तस्य सर्वोपायपरिक्षये योज्यत्वाद्बलग्रहणेन च गृहीतत्वात्। यस्तु साक्षान्न ददाति विद्यमानधनोऽपि स छलेन दापयितव्यः। केनचिदपदेशेन विवाहोत्सवादिना कटकाद्याभरणं गृहीत्वा न दातव्य, यावदनेन तद्धनं न दत्तम्। आचरितमभोजनगृहद्वारोपवेशनादि। बलं राजाधिकरणोपस्थानम्। तत्र राजा साम्नाऽप्रयच्छन्त निगृह्य च प्रपीड्य दापयतीति। न तु स्वगृहबन्धनादि बलं, यतः 'प्रकृतीना बल राजा' इति पठ्यते अस्मिन्नेव प्रसङ्गे उशनसा। अन्ये तु राज्ञ एवायमुपदेश इति वर्णयन्ति। राजधर्मप्रकरणात्। राजा ज्ञापित उपायैरेनं दापयेत्पराजित स्वयंप्रतिपन्न च। न तु सहसाऽवष्टभ्य सर्वस्वं धनिने प्रतिदापनीयः। यत उभयानुग्रहो राज्ञा कर्तव्यः। सर्वस्वादाने चाधमर्णस्य कुटुम्बोत्सादः स्यात्सोऽपि न युक्तः। उक्त हि 'नावसाद्य शनैर्दाप्यः काले काले यथोदयम्। ब्राह्मणस्तु विशेषेण धार्मिके सति राजनि'॥ इति, तस्मात् कर्चनवृद्धयशं संदापनीयः। कुटुम्बादधिकधनसंभवे सर्व दापनीयः। सर्वासंभवे च 'कर्मणाऽपि सम कुर्यात्' इति। अस्मिन् व्याख्याने छलाचारौ राजानमज्ञापयित्वा न कार्यौ। मेधा.

(२) कैः पुनस्तैरित्यत आह—धर्मेणेति। यदधमर्णस्य प्रयुक्तं धन तद्धर्मेण प्रीत्या, व्यवहारेण वक्ष्यमाणेन, छलेनोपधिपूर्वक प्रतिद्रव्यग्रहणेन, आचरितेनाभोजनादिना, बलेन गृहावरोधादिना पञ्चमेनोत्तमर्ण साधयेत्। गोरा.

(३) धर्मेण प्रीतियुक्तेन सत्यवचनेन। व्यवहारेण साक्षिलेख्याद्युपायेन। छलेन उत्सवादिव्याजेन भूषणादि-

१ कर्णोदकवद्. २ व्यम्.३ द्वाछ.४ नु.५ सबन्धिधनादि. ६ किंचनवृद्ध्वा.

ग्रहणेन । आचरितेन अभोजनेन । पञ्चमेनोपायेन बलेन निगडबन्धनादिना । उपचयार्थं प्रयुक्तं द्रव्यमेतैरुपायैरात्मसात्कुर्यादिति । *मिता.२।४०

(४) आचरितं देशाचारः । बलं भोजननिषेधादिना पीडनम् । अप.२।४०

(५) धर्मेण परस्वानादाननियमजनितपरलोकफलादि कथनेन । मवि.

(६) तत्र व्यवहारेणेति व्यपलापिविषयम् । अन्यत्संप्रतिपन्नविषयमिति मन्तव्यम् । +स्मृच.१६६

(७) पूर्वपूर्वसामर्थ्याभावे उत्तरोत्तरम् । विचि.३१

(८) व्यवहारेण व्यवहारबलप्रदर्शनेन । एषामुपायाना पूर्वपूर्वाभाव उत्तरो ग्राह्यः पाठक्रमात्सामर्थ्याच्च । नन्द.

(९) राज्ञो दण्डाभावादाकस्मिके विषाद्यैः स्वय मृते पापाद्यभावः । ×विता.४९१

धनी स्वधनं स्वय साधयन् न राज्ञो वाच्यः

यः स्वयं साधयेदर्थमुत्तमर्णोऽधमार्णिकात् ।
स राज्ञा नाभियोक्तव्यः स्वकं संसाधयन्धनम् ॥

(१) उक्तस्यैवार्थस्य स्पष्टीकरणार्थः श्लोकः । न छलादिनोपायेन स्वेच्छयोत्तमर्णोऽधमर्णाद्धनं संसाधयन् राज्ञा किंचिद्वक्तव्यः । मामविज्ञाय किमित्यस्मादाभरणादि स्वधनसंशुद्ध्यर्थं व्याजेन छद्मना गृहीतं, गृहीत्वा वा किं नास्मै प्रतिप्रयच्छसीति । मेधा.

(२) उत्तमर्णो व्यवहारमन्तरेणैव धर्मादिभिरुपायैर्वा नरैः स्वं राजनिरपेक्षमधमर्णात् धनं साधयेत् । स आत्मधनं साधयन् मदनपेक्ष बन्धनादि कृतवानसीति एवं राज्ञा न क्षेप्तव्यः । ÷गोरा.

धनस्य राजद्वारा साधने अधमर्णदण्डादिविधिः

यः साधयन्तं छन्देन वेदयेद्धनिकं नृपे ।
स राज्ञा तच्चतुर्भागं दाप्यस्तस्य च तद्धनम् ॥

(१) छन्द इच्छा । तेन राजानमज्ञापयित्वा यदा प्रागुक्तैश्चतुर्भिरुपायैः स्वेच्छया च धनमार्गणे प्रवृत्तं तथाभूत राजपुत्रैराह्वानयेत्, अहमनेनैतत्प्रदेशे रुध्ये, देहि धनमिति । स च पृष्टो, धारयामीति यत्प्रतिपद्यते, स राज्ञा चतुर्थं भागं दण्डापयितव्यः । यावत्तस्मै धारयति तस्य तत्र सर्वमृणं दाप्यः । शतं चेद्धारयति पञ्चविंशतिर्दण्डनीयः । शत तस्य दाप्यः । एव पञ्चविंशतिः । न स्त्रियं भ्रान्तिः कर्तव्या । शते राज्ञः पंचविंशतिः शिष्टं धनिकस्य । धनिको हि तथा दण्डितः स्यान्नार्णिकः । मेधा.

(२) योऽधमर्णो राजबलाभिमानी सामादिना साधयन्तमुत्तमर्णं नृपे निवेदयेत्, स राज्ञा ऋणचतुर्भाग दण्डार्थं तद्धन च दापनीयः । *गोरा.

(३) एतच्चतुर्भागेण दण्डयत्व दण्डयस्य दण्डदानाशक्तौ गुणवत्ताया च ज्ञेयम् । अन्यथा तु विष्णूक्तेनैव व्यवस्था । ×विर.७५

अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः ।
दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ॥

(१) यत्सर्वेषु व्यवहारपदेषु साधारणं तदुक्तम् । विशेषविवक्षायामिदमाह । सोपचयं कालान्तरे दास्यामीति यो धनमन्यस्मात् गृह्णाति सोऽधमर्णः । यस्तु सोपचयं

---

* भाच. पदार्थः मितावत् । + मनु , व्यप्र. स्मृचगतम् ।
× पदार्थः मितावत् ।
÷ मवि., मनु., मच. गोरावद्भावः ।

(१) **मस्मृ.**८।५० स राज्ञा ना (न स राज्ञा); **गोरा.** यः स्वयं (स्वय य) मर्णि (मर्ण); **व्यक.**१२७ मस्मृवत्; **स्मृच.**१६५ स्वयं (स्वक); **विर.**७४ मर्णि (मर्ण), **व्यप्र.** २५८; **सेतु.**३६; **प्रका.**९६ स्मृचवत , पू.; **समु.**८२ साधयन् (साधयेत्) शेष मस्मृवत्.

१ (गृहीतं०). २ (वा०).

* मनु , मच , नन्द. गोरावद्भावः ।
× व्यप्र. विरगतम् ।

(१) **मस्मृ.**८।१७६, **गोरा.** उत्तरार्धे (स राज्ञर्णचतुर्भागं दण्डार्थं तस्य तद्धनम्); **व्यक.**१२७ राज्ञा तत् (लाभस्य); **स्मृच.**१२२,१६६ राज्ञा तत् (राज्ञर्ण); **विर.**७५ राज्ञा तत् (राज्ञस्तु); **पमा.**२०१ राज्ञा तत् (च राज्ञा); **व्यप्र.**२५९; **विता.**४९८ साधयन्तं (साध्यमानः) शेषं स्मृचवत्; **प्रका.** ७७,९६-९७ स्मृचवत्; **समु.** ८२ वेदयेद्धनिकं (धनिकं वेदयेत्) शेष स्मृचवत्.

(२) **मस्मृ.**८।४७; **गोरा.** मधमर्णाद् (मधमर्णं); **व्यक.** १२७ चोदितः (देशितः) मधमर्णाद्वि (मुत्तमर्णेन); **विर.७६** मधमर्णाद् (मधमर्णं); **सेतु.**३७ विरवत्; **समु.**८२ गोरावत्.

१ न. २ मार्गेण. ३ वा राजपुत्रैराह्वयनेनाहंतरप्रदेशोऽनुरुध्येदं हि धनमिति. ४ चा. ५ (दाप्यः ०).

प्रत्यादास्यामीति प्रयुङ्क्ते स उत्तमर्णः। संबन्धिशब्दावेतौ। अधमर्णस्यार्थः। अर्थो धन प्रकरणाद्यदेवोत्तमर्णाय देयं तदेवोच्यते। तस्य सिद्धिरुत्तमर्ण प्रति निर्यातम्। द्वितीयोऽर्थशब्दः प्रयोजनवचनः। अयं समुदायार्थः। उत्तमर्णेन यदा राजा चोदितो ज्ञापितो भवति, अधमर्णेन यो गृहीतोऽर्थः स मे सिद्ध्यतु,दापयतु भवान्, राजा त्वधमर्णात्तदा दापयेद्धनिकस्यार्थम्। धनमस्यास्तीति धनिकः। उत्तमर्ण एव च प्रसिद्धया धनिक उच्यते। दापयेदिति संबन्धाच्चतुर्थी प्राप्ता। सा त्वपूर्णत्वात्संप्रदानभावस्य न कृता। यथा घृतः पृथु ददाति। रजकस्य वस्त्रं ददातीति। न ह्यत्र मुख्यो ददात्यर्थः। इहाप्युभयोः स्वस्वस्य भावादुभयोः स्वस्वाभावादपरिपूर्णा ददातीत्यर्थः। किमुत्तमर्णवचनादेवासौ दापयितव्यः। नेत्याह। विभावितमिति। यदा निश्चितेन प्रमाणेन धारयतीति प्रतिपद्यते। अथवा विभावितः स्वयंप्रतिपन्नः। यतो विप्रतिपन्नस्य वक्ष्यति 'अपह्नवेऽधमर्णस्येति'। कथ पुनः स्वयंप्रतिपन्नो विभावित इत्युच्यते। नैष दोषः। विस्मरणे स्वहस्तलेख्यादिना स्वयं प्रतिपन्नश्च भवति, विभावितश्च अप्रतिपन्नश्च जानानोऽपि मिथ्याप्रतिपन्नः। मेधा.

(२) अधमर्णेन धनग्राहिणा गृहीत तत्प्राप्त्यर्थ धनस्वामिना राजा ज्ञापितः सन् वक्ष्यमाणलेख्यादिना प्रतिपादितं धन धनस्वामिनोऽधमर्ण दापयेदित्युत्तरप्रपञ्चस्यैवायं सामान्यनिर्देशः। *गोरा.

अर्थेऽपव्ययमानं तु करणेन विभावितम्।
दापयेद्धनिकस्यार्थं दण्डलेशं च शक्तितः॥

(१) सत्यपि विभावके प्रमाणे, यो न स्वयं प्रतिपद्यते, न तस्य छलाद्युपायप्रयोगः कर्तव्यः। किं तर्हि? राजैव तेन शापयितव्यः। तत्र राज्ञाऽऽकारितेऽर्थे ऋणेऽपव्ययमानमपह्नुवानं नास्मै किंचन धारयामीति वदन्तं कारणेन साक्षिलेख्यशपथात्मकेन, विभावितं धारयामीति प्रतिपादित, दापयेदुत्तमर्णाय धन, दण्डलेशं च स्वल्पं दण्डं दण्डमात्रमित्यर्थः। अन्यत्र दशमं दण्डभागं वक्ष्यति। यस्तु तावद्दातुमशक्तः सोऽल्पमपि दशमाद्भागाद्दण्डं दापयितव्यः। अथवा यः प्रमादात्कथंचिद्विस्मृत्यापजानीते तस्याय यथाशक्ति दशमभागाल्पतो दण्डः। कारण प्रमाण त्रिविधम्। तदन्यैरिह सभवतीति परिगणितम्। तथा चाहुः– 'यत्र न स्यात्कृतं पत्रं साक्षी चैव न विद्यते। न चोपलम्भः पूर्वोक्तो दैवी तत्र क्रिया भवेत्'॥ इति। +मेधा.

(२) नाहमस्मै धारयामीत्येवं धने विप्रतिपद्यमानं अधमर्णं, करणेन लेख्यसाक्षिशपथात्मकेन, प्रतिपादितमुत्तमर्णस्य धनं दापयेत्। दण्डलेशं चापह्नवे द्विगुणमिति वक्ष्यमाणाद्दशमभागान्न्यूनमपि शक्त्यपेक्षया दापयेत्। *गोरा.

(३) तद्दशमाशदण्डदानासमर्थसद्वृत्ताधमर्णविषयमित्युक्त तद्ग्राह्ये। कारणेनेति वदन् द्विपाद्व्यवहारे त्वर्थदापनमेव। न दण्डदापनम्। तत्र निह्नवमिथ्याभियोगयोरभावादिति दर्शयति। एवमेव चतुष्पद्यपि व्यवहारे शंकाभियोगाऽज्ञानोत्तरादिना मिथ्याभियोगनिह्नवाभावे दण्डाभावोऽध्यवसेयः। यत्तु स्मृत्यन्तरं 'आद्ये तु दण्डपादस्य द्वितीयेऽर्ध तृतीयके। पादन्यूनं चतुर्थे च पादे संपूर्णदण्डभाक्'॥ इति तद्विगीतत्वादप्रमाणमिति प्रपञ्चितं विश्वरूपाचार्येण। अतो निह्नवमिथ्याभियोगनिमित्तो दण्डः चतुष्पद्येव व्यवहारे निमित्तसद्भावविषये ग्रहीतव्यः। तत्र ऋणादानविषयव्यवहारे दण्डविषयो दर्शितः। निक्षेपादिविषयव्यवहारे तु दण्डविशेषः तत्र तत्र पदे वक्ष्यते। स्मृच. १२२

यत्र तत्स्यात्कृतं यत्र करणं च न विद्यते।
न चोपलम्भः पूर्वोक्तस्तत्र दैवी क्रिया भवेत्॥

---

* मेधावद्भावः। मसु., विर, मच, नन्द., भाच. वाक्यार्थो गोरावत्।

(१) **मस्मृ.**८।५१; **मेधा.** करणे (कारणे); **गोरा.** पूर्वार्धे (अर्थे विवदमानं तु करणेन विभावयेत्); **व्यक.**१२७; **स्मृच.**१२२ मेधावत्; **विर.**७६; **पमा.**२०२, **व्यचि.**९६ मेधावत्; **दवि.**३५१ मेधावत्; **व्यत.**२३१ मेधावत्; **सवि.** ४९४ अर्थेऽपव्यय (ह्रस्तेऽपलप) स्मृत्यन्तरम्; **व्यसौ.**९२ मेधावत्; **वीमि.**२।११; **व्यप्र.**२७८ मेधावत्; **सेतु.**११४-११५ मेधावत्; **प्रका.**७७ मेधावत्; **समु.**६७ मेधावत्.

१ (ज्ञापितो०).

+ मवि., नन्द. मेधावद्भावः।

* मसु., विर. गोरावत्।

(१) **मस्मृ.**८।५१ श्लस्योपरिष्टात् प्रक्षिप्तश्लोकोऽयम्।

ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ॥

(१) यो राजसभायामानीतोऽधमर्णः ऋणं देयतया प्रतिजानीते, सत्यमस्मै धारयामि, स पञ्चक शतमर्हति **दण्डमिति शेषः** । अनेन संकल्पितेन विंशतितमो भागो दण्ड्यते । किमिति मत्सकाशमुत्तमर्णः प्रेषितो बहिरेव कस्मान्न परितोषित इत्यतोऽनेन शास्त्रव्यतिक्रमेण दण्डमर्हति । यस्तु व्यतिक्रमान्तरं करोति, अपह्नुते नाहमस्मै धारयामीति, स तैः प्रतिपादितस्तद्द्विगुणं तस्मात्पञ्चकाद्द्विगुणं दशकं शतमित्यर्थः । तन्मनोः प्रजापतेरनुशासनं सृष्टिकालप्रभृतिव्यवस्था नीतिरिति यावत् ।

अन्ये तु तच्छब्देन देयमेव प्रत्यवमृशन्ति । यावत्तस्मै देयं तद्द्विगुणं तेन 'यो यावन्निह्नुवीतार्थमि'त्यनेनैकवाक्य भवति । अन्यथा वाक्यभेदः । विषयविशेषानिर्देशादेकविषयत्वे विकल्पः प्राप्नोति । स च न युक्तो, द्विगुणस्यात्यन्तबहुत्वात् । असत्यपि निर्देशे तस्य विषयो दर्शनीयैः, तस्य प्रत्यासन्नं पञ्चकमिति, अर्थात् तस्यैवानुप्रत्यवमर्शो युक्तः । *मेधा.

(२) एतच्च भ्रान्त्यादिना यत्र विप्रतिपद्य पश्चात्संप्रतिपद्यते तद्विषये । यो यावन्निह्नुवीतार्थमित्यनेन द्विगुणदमदानं शपथदोषेण तथाकरणेऽवगन्तव्यम् । तत्रा धर्मज्ञात्वित्यभिधानात् । ×व्यक.१२८

अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्यः

कर्मणाऽपि समं कुर्याद्धनिकस्याधमर्णिकः ।
समोऽपकृष्टजातिश्च दद्याच्छ्रेयांस्तु तच्छनैः ॥

(१) निर्धनोऽधमर्णो निर्धनत्वान्न मुच्यते । किं तर्हि ? कर्म कारयितव्यः । प्रेष्यत्व व्रजेत् । यावता धनेन तत्कर्म कर्मकरः करोति, तत्तस्य प्रविष्ट, संपद्यपि कर्तव्यं, कर्म कुर्वतश्च सलाभधने प्रविष्टे दास्यान्मोक्षः । समं कुर्यादुत्तमर्णेन, अनन्तरं शुद्धे धने नोत्तमाधमव्यवहारः । इतरथैक उत्तमर्णोऽपरोऽधमर्णः एतच्च कार्यते । ब्राह्मणवर्णः समः समानजातीयः अवकृष्टजातिर्हीनजातीयः श्रेयांस्तूत्तमजातीयो गुणाधिको वा । शनैः क्रमेण यथोत्पादं दद्यात् । नारदे पठ्यते — 'ब्राह्मणस्तु परिक्षीणो शनैर्दद्याद्यथोदयमिति' । अतो राज्ञा धनिकधनसंशुद्ध्यर्थं परिक्षीणो ब्राह्मणो न पीडयितव्यः, उत्तमर्णश्च रक्षणीयः ।

*मेधा.

(२) समहीनजातिश्चाधमर्णो धनाभावे सति स्वजात्यनुरूपकर्मकरणेनाऽपि च संशुद्ध्येदुत्तमर्णेन समं निवृत्तोत्तमर्णाधमर्णव्यपदेश आत्मानं कुर्यात् । उत्कृष्टजातिः पुनर्न कर्म कारयितव्यः, अपि तु शनैः तद्धनं यथासंभवं दद्यात् । ×गोरा.

(३) समजातिरत्र ब्राह्मणेतरः कर्मणा क्षत्रविट्शूद्रान्समानजातीयान् 'हीनास्तु दापयेत्' इति कात्यायनेन विशेषितत्वात् । +ममु.

(४) शनैः शनैर्धनमेव दद्यात् न तु कर्मणा लौकिकेन सम कुर्यात् । विप्रस्य लौकिककर्मकरणे दण्डस्य वक्ष्यमाणत्वात् । आर्त्विज्यादौ तु न दोषः । हीनजातिमित्यनेन क्षत्रियो वैश्यस्य शनैर्दद्यात्, न तु कर्म कुर्यात् इत्येवमुत्तरत्र ब्राह्मणपदं राजसेवकगुणवत्त्वाद्युपलक्षक, तेऽपि दद्युस्तेन न प्रकृतविरोधः । मच.

(५) कर्मणाऽपि समं कुर्यात् ऋणसम भूतिकर्म कुर्यादित्यर्थः । नन्द.

---

* गोरा., ममु., विचि., मच., व्यप्र., नन्द., भाच. मेधागतम् । × शेष मेधागतम् ।

(१) **मस्मृ.**८।१३९; **व्यक.**१२८; **विर.**७७ ऋणे देये प्रतिज्ञाते (ऋणोदये प्रतिज्ञात); **विचि.**३४,१९१; **व्यप्र.** २७८; **सेतु.**३८; **समु.**६६; **विव्य.**३१ तद्द्वि (तु द्वि).

(२) **मस्मृ.**८।१७७ कस्या (काया) मोऽप(मोऽव) श्च (स्तु); **मिता.**२।४३ कस्या (केना); **अप.**२।४३ मोऽप (मोऽव); **व्यक.**१२५ च्छ्रेयां (च्छ्रेष्ठ) शेषं अपवत् ; **विर.**७०, **पमा.**२५७ कस्या (क वाऽ); **दीक.**३५-३६ कस्या (काया) श्च (स्तु); **स्मृचि.**१२ मितावत् ; **नृप्र.**१९ मितावत् ; **सवि.**

१ मेघृ. २ यावद्ऋणमित्यने. ३ शनै. ४ क्षेत्रु. ५ अर्थस्तस्यै.

---

* व्यक., विर., व्यप्र. मेधागतम् ।

× मिता., भाच. गोरावत् । + मेधावद्भावः ।

२५४ कस्या (को ना)समोऽपकृष्टजातिश्च (समापकृष्टजातिश्चेद्); **चन्द्र.**२७ स्याधमर्णिकः (श्चाधमर्णकम्) मोऽपकृ (मो वोत्कृ); **व्यप्र.**२६१; **व्यउ.**७७ श्च (स्तु) शेष मितावत् ; **व्यम.** ८०; **विता.**४९४ श्च (श्चेत्) शेष मितावत् ; **समु.**८३ मितावत्.

१ इत्यप्येकं.

याज्ञवल्क्यः

ऋणग्रहणानधिकारिणः

[1]भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि ।
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम् ॥

(१) ऋणस्य प्रतिनिर्यातनप्रकार उक्तः । को नु खलु ऋणग्रहीतेत्येतन्निरूपयितुमाह–भ्रातृणामिति। भ्रात्रादीनामविभक्तानां परस्परमृणसाक्ष्यप्रातिभाव्यानि न विद्यन्ते । तेनैव च विभक्ताविभक्तसंशये साक्ष्यादिभिर्निर्णयः । दम्पतिवचनं चात्र विभागासंभवादन्येषामपि रिक्थभाजामविभक्तानां साक्ष्याद्यभावप्रदर्शनार्थम् ।

विश्व.२।५४

(२) अधुना पुरुषविशेषे ऋणग्रहणं प्रतिषेधयन्प्रसङ्गादन्यदपि प्रतिषेधति—भ्रातृणामिति । प्रतिभुवो भावः प्रातिभाव्यम् । भ्रातृणा दम्पत्योः पितापुत्रयोश्चाविभक्ते द्रव्ये द्रव्यविभागात्प्राक्प्रातिभाव्यमृणं साक्ष्यं च न स्मृतं मन्वादिभिः । अपि तु प्रतिषिद्धं, साधारणधनत्वात् । प्रातिभाव्यसाक्षित्वयोः पक्षे द्रव्यव्ययावसानत्वात्, ऋणस्य चावश्यप्रतिदेयत्वात् । एतच्च परस्परानुमतिव्यतिरेकेण । परस्परानुमत्या त्वविभक्तानामपि प्रातिभाव्यादि भवत्येव, विभागादूर्ध्वं तु परस्परानुमतिव्यतिरेकेणाऽपि भवति । *मिता.

(३) अत्राविभक्तग्रहण भ्रातृविषयम् । पितापुत्रविषयं वा । न जायापतिविषयम् । अप.

(४) ततश्च ऋणदातुरपि ऋणग्रहीतृसकाशाद्विभक्तत्वं सिद्धम् । स्मृच.३१०

(५) अविभक्त इति भावे क्तः । अथशब्दः पितृव्यभ्रातृपुत्रादिसमुच्चयार्थः । चशब्दः ससृष्टिना समुच्चयार्थः । एवकारेण परस्परं प्रातिभाव्यादिकं न भवतीति लभ्यते । हिशब्दः पादपूरणार्थः । तुशब्दोऽनुमतेरसाधारणद्रव्यस्य च व्यवच्छेदार्थः, तेन यदा प्रातिभाव्य साक्षित्वं चापरो मन्यते तदा पुत्रादिः पित्रादेः प्रतिभूः साक्षी च भवत्येव । सौदायिके च द्रव्येऽविभक्तयोरपि परस्परमृणव्यवहारो भवत्विति । विभागे तु भ्रात्रादीनां प्रातिभाव्यं भवत्येव, अविभक्त इत्यभिधानात् बाधकाभावाच्च । वीमि.

(६) केचित्तु अनेनैव विभागात् प्राक् दम्पत्योः प्रातिभाव्यादि निषिद्धमभिदधता अनयोर्विभागोऽस्तीत्यर्थादुक्तं भवतीति । न चापस्तम्बवचनविरोधः ग्रहणाग्रहणवत् विकल्पाङ्गीकरणादित्याहुः । तदतिफल्गु । शाब्दार्थिकयोस्तुल्यबलत्वाभावेन विकल्पानुपपत्तेः । अत एव 'तुल्यार्थास्तु विकल्पेरन्' (पू. मी. १२।३।४।१०) इति भगवता जैमिनिनोक्तम् । 'पाणिग्रहणाद्धि सहत्व कर्मम्' इत्यादौ कर्मादिग्रहणानर्थक्यापाताच्च । किञ्च पूर्वोक्तप्रकारेणैवोपपत्तौ सत्यामष्टदोषदुष्टविकल्पाङ्गीकरणस्याप्यनुचितत्वात् । न चैवं ग्रहणाग्रहणादावपि विकल्पो न स्यात् । न स्याद्यदि गत्यन्तरयुतत्व स्यात् । न च तदस्तीत्यनन्यगतिकतया तस्याङ्गीकारात् ।

*व्यप्र.२५५ २५६

(७) न च दम्पत्योर्विभागनिषेधात्कथमेतदिति वाच्यम् । तद्विभागनिषेधकवाक्यानां साग्निककर्मजन्यफलविषयत्वेन ग्रहस्थाधिकारककर्मजन्यफलविषयत्वेन वा तयोरपि विभागसभवात् । व्यउ.२७

धनी स्वधनं स्वयं साधयन् न राज्ञो वाच्यः । राजद्वारा साधने अधमर्णदण्डादिविधिः ।

[1]प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत् ।
साध्यमानो नृपं गच्छन् दण्डयो दाप्यश्च तद्धनम् ॥

* शेषं मिताक्षराव्याख्यानं दायभागे 'जायापत्योर्न विभाग' इति आपस्तम्बवचने द्रष्टव्यम् । विर., स्मृसा., दात., विता. एषां 'जायापत्योर्न विभागः' इत्यापस्तम्बवचनस्थमिताक्षरावद्भावः ।

(१) **यास्मृ.**२।५२; **अपु.**२५४।१२ क्ते न तु (क्तेन च); **विश्व.**२।५४; **मिता.**; **अप.**; **व्यक.**११६ तु (तत्); **स्मृच.** १३६,३१०; **विर.**३९,६०७; **पमा.**२५४ मथ (मपि): ५७१; **स्मृसा.**८१:१५१ (=); **विचि.**२५४ न तु (तु न); **स्मृचि.**३६ साक्ष्य (न्याय्य); **दात.**१७९ व्यकवत्; **सवि.** ३५२:४४० साक्ष्य (साध्य); **वीमि.**; **व्यप्र.**४४,२५५; **व्यउ.**२७; **व्यम.**१०,६०; **विता.**५२४,५३४; **राकौ.** ३९९; **प्रका.**८५; **समु.**१६; **विच.**३२,१०४ व्यकवत्.

(१) **यास्मृ.**२।४०; **अपु.**२५३।६६ ते (ति) च्छन् (च्छेत्); **विश्व.**२।४२ यन्नर्थं (यानोऽर्थ) च्छन् (च्छेत्) दण्ड्यो दाप्यश्च (दाप्यो दण्डयश्च); **मिता.**; **अप.**; **व्यक.**१२७;

(१) प्रपन्नं न्यायेन स्वीकृत यदृच्छया साधयानोऽर्थं न राज्ञा किञ्चिद् वक्तव्यः । यदि तु साध्यमानो राजन्यावेदयेत्, ततो दण्ड्यो दाप्यश्च राज्ञैव तद्धन, धनिकायेति शेषः । विश्व.२।४२

(२) ऋणप्रयोगधर्मा उक्ताः । सांप्रतं प्रयुक्तस्य धनस्य ग्रहणधर्मा उच्यन्ते—प्रपन्नमिति । प्रपन्नमभ्युपगतमधमर्णेन धनं, साक्ष्यादिभिर्भावितं वा । साधयन्प्रत्याहरन् धर्मादिभिरुपायैरुत्तमर्णो नृपतेर्न वाच्यो निवारणीयो न भवति । धर्मादयश्चोपाया मनुना दर्शिताः । प्रपन्नं साधयन्नर्थं न वाच्य इति वदन् अप्रतिपन्नं साधयन् राज्ञा निवारणीय इति दर्शयति । यस्तु धर्मादिभिरुपायैः प्रपन्नमर्थं साध्यमानो याच्यमानो नृपं गच्छेद्राजानमभिगम्य साधयन्तमभियुङ्क्ते स दण्ड्यो भवति, शक्त्यनुसारेण धनिने तद्धनं दाप्यश्च । 'साध्यमानो नृपं गच्छेदि'त्येतत् 'स्मृत्याचारव्यपेतेने'त्यस्य प्रत्युदाहरणं बोद्धव्यम् । +मिता.

(३) दण्ड्य इति सामान्याभिधानमसमर्थविषये स्वल्पोऽपि दण्डो यथा स्यादित्येवमर्थम् ।
स्मृच.१६६

(४) मिता.टीका—प्रत्युदाहरण बोद्धव्यमिति । अयमभिप्रायः । 'स्मृत्याचारव्येपेतेन मार्गेणाधर्षितः परैः । आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्' इत्यनेनैतदुक्तं भवति । स्मृत्याचारविरुद्धेन मार्गेणाभिभूतः सन् यदि राज्ञे निवेदयति तदावेद्यमानं व्यवहारपदमिति । साध्यमानो नृपं गच्छेदित्यनेनैतदभिहित स्यात् स्मृत्याचाराविरुद्धमार्गेण राज्ञो न निवेदयेत् । यदि निवेदयति तन्निवेद्यमानं व्यवहारपदं न भवतीति । अत एव दण्डो विधीयते । दण्ड्यो दाप्यश्च तद्धनमिति । तद्विपरीतोदाहरणमित्यर्थः । सुबो.

(५) चकारात् नृपमगच्छन्नपि बलादिना धनमप्रयच्छन्नधमर्णो धन दाप्यो दण्ड्यश्चेति समुच्चीयते ।
वीमि.

ऋणोदग्रहणे ऋणप्रतिग्रहीतृक्रमः

गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः ।
दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम् ॥

(१) अथ यत्रैकमृणिन युगपद् धनिनः प्रार्थयेयुः, तदाय क्रमः—गृहीतानुक्रमादिति । ग्रहणानुक्रमादेवाधमर्णिकेनर्णमेकजातीयेभ्यो देयम् । जातिभेदे ब्राह्मणादिक्रमेणैव । तुशब्दात् तुल्यजातीयत्वेऽपि गुणाद्यपेक्ष क्रमं द्योतयति । विश्व.२।४३

(२) बहुपूत्तमर्णिकेषु युगपत्प्राप्तेष्वेकोऽधमर्णिकः केन क्रमेण दाप्यो राज्ञेत्यपेक्षित आह—गृहीतानुक्रमादिति । समानजातीयेषु धनिषु येनैव क्रमेण धनं गृहीतं तेनैव क्रमेणाधमर्णिको राज्ञा दाप्यः । भिन्नजातीयेषु तु ब्राह्मणादिक्रमेण । ×मिता.

(३) विप्रनृपग्रहणं वैश्यशूद्रयोः प्रदर्शनार्थम् ।
+अप.

(४) नृपतेः क्षत्रियस्येत्यर्थः । स्मृच.१६७

(५) श्रोत्रियस्य ब्राह्मणस्य राज्ञश्च ब्राह्मणान्तरर्णमदत्त्वैव देयम् । वीमि.

राजद्वारा धनसाधने अधमर्णदण्डः उत्तमर्णशुल्कं च

राज्ञाऽधमर्णिको दाप्यः साधिताद्दशकं शतम् ।
पञ्चकं च शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः ॥

× पमा., व्यप्र. मितागतम् । + शेषं मितागतम् ।

(१) **यास्मृ.**२।४१; **अपु.**२५४।१ नु (थः) वैव (यादौ); **विश्व.**२।४३ दाप्यो (दद्यात्) उत्तरार्धे (दद्यात्तु ब्राह्मणायाग्रे नृपाय तदनन्तरम्), **मिता.**; **अप.**; **व्यक.**१२९, **स्मृच.**१६७, **विर.**७९; **पमा.**२५६; **नृप्र.**१९; **चन्द्र.**२९ उत्त.; **वीमि.**; **व्यप्र.**२६२; **व्यउ.**७७; **व्यम.**८१; **विता.**५००, **प्रका.**९७, **समु.**८३.

(२) **यास्मृ.**२।४२; **अपु.**२५४।२ शतम् (स्मृतम्) च (तु); **विश्व.**२।४४ च (तु); **मिता.**२।४२:२।७६ पू.; **अप**; **व्यक.**१२९ विश्ववत्; **विर.**७८ विश्ववत्; **पमा.**२५७

+ अप., पमा मितागतम् ।

स्मृच.१६६ न वाच्यो (नावाच्यो) च्छन् (च्छेत्); **विर.**७४, **पमा.**२५५ च्छन् (च्छेत्); **विचि.**३४ पूर्वार्धे (प्रतिपन्न साधयानो न वार्यो नृपतेर्भवेत्) मानो (मानि); **स्मृचि.**१२; **नृप्र.**१९ पमावत्; **सवि** ४९० च्यो (र्यो) च्छन् (च्छेत्), **वीमि.**, **व्यप्र.**२५९; **व्यउ.**७६ पमावत्; **व्यम.**८०; **विता.** ४९१ पमावत्; **सेतु.**३६-३७ **प्रपन्न** (प्रतिपन्न); **प्रका.**९६ स्मृचवत्; **समु** ८२ पमावत्; **विव्य.**३१ प्रप ..र्धं (प्रतिपन्नं साधयानो) धनम् (ऋणम्).

(१) विप्रतिपन्नस्तृणिको राजन्यावेद्य साध्यः। तत्र च–राज्ञाऽधमर्णिक इति। ऋणिको राज्ञा सर्वं धनिकायार्थं दाप्यः। स्वयं च तस्मादेवाधमर्णिकाद् दशकं शत गृह्णीयात्। धनिकोऽपि साधितार्थसंख्यया पारितोषिकं राज्ञे पञ्चक शतं दद्यात्। उत्तमर्णिको धनिकः। स्पष्टमन्यत्। विश्व.२।४४

(२) यदा पुनरुत्तमर्णो दुर्बलः प्रतिपन्नमर्थं धर्मादिमिरुपायैः साधयितुमशक्नुवन्राज्ञा साधितार्थो भवति, तदाऽधमर्णस्य दण्डमुत्तमर्णस्य च भृतिदानमाह—राज्ञाऽधमर्णिक इति। अधमर्णिको राजा प्रतिपन्नार्थात्साधितादृशक शत दाप्यः। प्रतिपन्नस्य साधितार्थस्य दशममंश राजाऽधमर्णिकाद्दण्डरूपेण गृह्णीयादित्यर्थः। उत्तमर्णस्तु प्राप्तार्थः पञ्चक शत भृतिरूपेण दाप्यः। साधितार्थस्य विंशतितम भागमुत्तमर्णाद्राजा भृत्यर्थं गृह्णीयादित्यर्थः। अप्रतिपन्नार्थसाधने तु दण्डविभागो दर्शितः—'निह्नवे भावितो दद्यात्' इत्यादिना।

*मिता.

(३) मिता.टीका—नन्वत्र दण्डादिरूपेण ग्रहणमनुपपन्नं 'राज्ञाऽधमर्णिको दाप्यः' इति योगीश्वरवचनेऽधमर्णादृशमांशग्रहणमात्रस्यैव प्रतीतेः, उत्तमर्णात्पञ्चमांशग्रहणस्य प्रतीतेरिति चेत् मैवम्। ग्रहण तावत्प्रतीयते न तत्र विवादः। तत्र को हेतुरित्यपेक्षाया दृष्टसंभवेऽदृष्ट न कल्पनीयम्। दृष्टे सत्यदृष्टकल्पनाया अन्याय्यत्वात्। दृष्टहेतुश्चाधमर्णे अङ्गीकृतार्थाऽदानरूपोऽपराधः। उत्तमर्णे तु न कोऽप्यपराधः। अपि त्वशक्तिरेव। अत एव यथाक्रममपराधेनाशक्यत्वेन च हेतुनाऽधमर्णाद्दण्ड उत्तमर्णाद्भृतिरिति सर्वमनवद्यम्। सुबो.

(४) तुशब्देन प्राप्ते प्रागुत्तमर्णस्य दापनं व्यवच्छिद्यते। अपिशब्देन दण्ड्यत्वप्रयोजकरूपशून्यस्याऽपि साधनमात्रनिमित्तक दानमिति सूचितम्। हिशब्दस्तु क्वचित्पाठः, तत्राप्ययमेवार्थः। +वीमि.

(५) दशकग्रहणं निर्धनर्णिकपरम्। सधने तु विशेषमाह नारदः—'ऋणिकः सधन' इत्यादिना।

व्यम.८१

अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्य.

[1]हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्।
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्॥

(१) एव तावत् समृद्ध दापयेत्। असमृद्ध तु—हीनजातिमिति। विश्व.२।४५

(२) सधनमधमर्णिक प्रत्युक्तम्। अधुना निर्धनमधमर्णिक प्रत्याह–हीनजातिमिति। ब्राह्मणादिरुत्तमर्णो हीनजाति क्षत्रियादिजाति, परिक्षीणं निर्धन, ऋणार्थ ऋणनिवृत्यर्थ, कर्म स्वकर्म स्वजात्यनुरूपं कारयेत् तत्कुटुम्बाविरोधेन। ब्राह्मणस्तु पुनः परिक्षीणो निर्धनः शनैः शनैः यथोदय यथासंभवमृण दाप्यः। अत्र च हीनजातिग्रहण समानजातेरप्युपलक्षणम्। अतश्च समानजातिमपि परिक्षीण यथोचितं कर्म कारयेत्। ब्राह्मणग्रहण च श्रेष्ठजातेरुपलक्षणम्। अतश्च क्षत्रियादिरपि परिक्षीणो वैश्यादेः शनैः शनैर्दाप्यो यथोदयम्। ×मिता.

(३) कारयेद्बलात्कारेणापीति शेषः। स्मृच.१६७

(४) शनैः शनैः अवश्यकर्तव्यकुटुम्बभरणाद्यविरोधेन। वीमि.

नारदः

पञ्च ऋणोद्ग्राहणोपायाः

धर्मेण व्यवहारेण छलेनाचरितेन च।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च॥

+ शेष मितागतम्। × अप., व्यप्र. मितागतम्।

(१) **यास्मृ** २।४३; **अपु.**२५४।३; **विश्व.**२।४५; **मेधा.** ८।१७७ उत्त; **मिता**, **अप.**; **व्यक.**१२६ श्लोकार्धौ व्यत्यासेन पठितौ, **स्मृच.**१६३ उत्त.:१६७; **विर.७१**;**पमा २५७** र्थं (र्थे), **विचि.३२**, **स्मृचि.१२**; **नृप्र.१९**; **मच.८।१७७**; **चन्द्र.२७** हीनजाति (हीन जाति); **वीमि.**; **व्यप्र.२६१**; **व्यउ.७७**; **व्यम ८**•; **विता.४९३** (=); **सेतु.३४**; **समु.** ८३; **विव्य.३०** पू.

(२) **नास्मृ.४।१२२** मेन (केन); **अभा.५६** छले (बले) मेन (केन).

* अप., पमा., व्यप्र., विता. मितागतम्।

च (तु) ह्युत्तमर्ण (ऽप्युत्तमर्ण), **नृप्र.**१९ शक (शम) च (तु), **वीमि.** ह्युत्त (ऽप्युत्त); **व्यप्र.२७८**; **व्यउ.७७** विश्ववत्; **व्यम.८१**; **विता.१७७** पू.:४९३ (=) च (तु) मर्णि (मर्ण), **समु** ६६ च (तु) र्थो ह्यु (र्थश्चो).

अत्र चाणक्ये सामभेदोपप्रदानदण्डाश्चत्वार एव कार्यसाधनोपाया दृष्टाः। अत्रापि त एव चत्वारः केवलमन्यनामभिर्धर्मव्यवहारछलबलसंज्ञा निरुक्ताः। अधिकमत्राचरितं, अभोजनम्। तच्चऋणोद्ग्राहणविषयकमेव सोपयोगं न सार्वत्रिकम्। तदुक्तं धर्मेण, तत्साम्ना प्रियधर्मस्मरणेन प्रथममर्थं साधयेत्। तेनासिध्यमान भेदेन राजकीयसभाभयदर्शनेन व्यवहारेण। तथा प्रदानलोभ दर्शयित्वा छलेन। तथा दण्डेन स्वकीयबलेनैव पादबन्धनाचारीप्रक्षेपादिना (१)। एवमेतैः सामादिभिर्धर्मादिभिरुपायैः स्वकीयमर्थं साधयेत्। यथैतदाचरितमुक्तम्। तच्चरिर्गतिभक्षणयोरित्यस्य धातोर्भक्षणार्थरूपमिदम्। चरितं भक्षितम्। न चरितमभक्षितम्। अभोजनमित्यर्थः। तद्वाभोजनं तस्यैव साधनार्थं यः परकीयधन गृहीत्वा न प्रयच्छति। यः पुनर्धनी स्वकीयमर्थमुद्ग्राहयति तस्याभोजने प्रायश्चितं नास्ति। केवल राज्ञो वा गुरुस्थानमितस्य बालस्याप्युपरोधनार्थं वा आचरणात् प्राणान्तिकभयदर्शनार्थं वा। धनी स्वकीयभृत्यपुत्रेणाभोजन कारयति स्वय करोति वा। अयमेवैको विपयो धनिनः स्वय भोजने न सर्वत्रेति। अभा.५६

धनी स्वधन स्वय साधयन् न राज्ञो वाच्यः

यः स्वकं साधयेदर्थमुत्तमर्णोऽधमर्णकात्।
न स राज्ञा निषेद्धव्य ऐहिकामुष्मिकार्थतः॥

ये शठा दुष्टाः परकीय धन गृहीत्वा भक्षयित्वा युद्धयमाना राजाश्रिता भूत्वा आत्मान रक्षयितुमिच्छन्तो निषेध कारयन्ति। स्वछन्देन व्यवहारेण राज्ञा धनी स्वमर्थं साधयन्न निषेद्धव्यः। ऐहिकामुष्मिकार्थतः इति ऐहिकार्थसंव्यवहारभङ्गभयात्। आमुष्मिकार्थं साधुवर्तनभङ्गपातकभयात्। इति प्रतिभूभेदः समाप्तः। अभा.५६

असमर्थाधमर्ण. शनैः शनैर्दाप्य.

अथ शक्तिविहीनः स्यादृणी कालविपर्ययात्।
शक्त्यपेक्षमृणं दाप्यः काले काले यथोदयम्*॥

* मेधा.व्याख्यान 'ऋण दातुमशक्तो यः' इति मनुवचने (पृ.६८०) द्रष्टव्यम्।

(१) **नास्मृ.**४।१२३; **अभा.**५६. (२) **नासं.**२।११०; **नास्मृ.**४।१३१ अथ (अत्र); **मस्मृ.**८।१५३ इत्यस्योपरिष्टात्

(१) अथ कदाचिदृणी अन्यमर्थार्थिं कर्तुमशक्तः धनमपि दातुमशक्तः, ततो यथाशक्त्यनुसारेण स्कन्धकस्थित्या काले काले यथोदय यथालाभं धनं दाप्य इति। अभा.५८

(२) शक्तिहीनः ऋणं दातु कालविपर्ययाद्दुर्भिक्षादेः। व्यक.१२६

(३) दाप्यो ब्राह्मण इति शेषः। स्मृच.१६७

(४) अथ शक्तिविहीनोऽसमर्थः स्याद् दातुमृणी कालेन गच्छता, शक्त्यपेक्षमृण दाप्यः यथास्य कुटुम्बं न विनश्यति। धनिनश्च धन कथं दाप्यः। काले काले या या वृद्धिः ता ता दापयेदिति। अथवा यथोदय यथाविभवं स्तोकं स्तोकं मूलस्य। नाभा.२।११०

ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति।
राज्ञा दापयितव्यः स्याद् गृहीत्वांशं तु विंशकम्॥

(१) स्वयमुद्ग्रहणे निष्कये पञ्चक शत गृहीत्वेति। अभा.५८

(२) स्वल्पयत्नसाध्यत्वे च सति द्रष्टव्यम्। अप.२।४२

(३) विंशक विंशतितमं भागम्। एष च गुरुलघुदण्डविकल्पो दण्डनीयगुणजातिशक्त्यपेक्षया द्रष्टव्यः। विर.७८

राजद्वारा धनसाधने अधमर्णदण्डः

स्ववाक्संप्रतिपन्नौ तु ऋणिकं दशकं शतम्।
विनयं दापयेद्राजा द्विगुणं तु पराजितम्॥

प्रक्षिप्तश्लोकोऽयम्, शक्त्यपेक्ष (प्रेक्ष्यश्च त) काले काले (काले देशे); **अभा.**५८; **मेधा.**८।१५४ शक्त्यपेक्ष (प्रेक्ष्यश्च त) काले काले (काले देशे) क.पुस्तके गलितोऽय श्लोकः, ख. पुस्तके समुपलभ्यते, **व्यक.**१२६, **स्मृच.**१६७ पेक्ष (पेक्ष्य); **विर.**७१; **पमा.**२५८; **विचि.**३२-३३; **व्यप्र.**२६१; **व्यम.**८०; **विता.**४९७; **सेतु.**३५,३१७; **समु.**८३.

(१) **नासं.**२।१०९, **नास्मृ.**४।१३२ त्वाश तु विंशकम् (त्वा पञ्चक शतम्); **अभा.**५८ उत्तरार्धे (राज्ञा विवृत्य दाप्योऽसौ गृहीत्वा पञ्चक शतम्); **अप.**२।४२; **व्यक.**१२८; **स्मृच.**१२१; **विर.**७८; **पमा.**२००; **नृप्र.**१७; **व्यप्र.**२७८; **व्यम.**८१; **सेतु.**३८; **प्रका.**७६; **समु.**६६.

(२) **नास्मृ.**४।१३३; **अभा.**५८.

धनिना धारणिक आवेदितः सन् यदि स्ववाचैव संप्रतिपत्युत्तरेण प्रतिपद्यते । यथा सत्यमिदमस्ति । ममास्यैतद्दातव्यमिति । ततः स्ववाक्प्रतिपन्नगुणात् स्वयमेव धनिकस्याप्रतिपादनदोषाच्च राजा ऋणिक विनयं दापयेद्दशकमेव शतम् । अथासौ मिथ्या कस्य अप्रति.....धनी च यथासंभवं क्रियाभिः स्वधनं लभ्यं स्वरीकरोति । तदा तमृणिक पराजितं राजा तमेव दशकशतविनयं द्विगुणं प्रतिदापयेत् । विंशतिद्रम्मैकशतमित्यर्थः । अभा.५८

अधमर्णस्य ऋणपरिमाणाज्ञाने निर्णयोपायः

न स्याद्द्रव्यपरीमाणं कालेनेहर्णिकस्य चेत् ।
जातिसंज्ञाधिवासानामागमो लेख्यतः स्मृतः ॥

(१) अत्र पराजितस्य ऋणिकस्य यदि समस्तद्रव्यपूरणपरिमाणं न स्यात् । ततो देशकालानुसारेण स्कन्धकपत्रे लिखापनीय ऋणिकः । एवमपि संज्ञयैव साधित द्रव्यं भवति । जातिसंज्ञाधिवासाना लेख्यत आगम इति यदुक्त तत्पञ्चारूढपत्रम् । नवाङ्गसपूर्णमागमशब्देन सूचितम् । यथोक्तं त्रिषष्टिलेख्यप्रकरणकारककल्याणभट्टेन । तत्कालिकराजधनिकर्णिकसाक्षिलेखकैरङ्गैः पञ्चभिरेतैः पत्रं पञ्चारूढं भवति । तथा च कालप्रदेशधनिकर्णिकवित्तसंख्यासोपाश्रयर्णिकमतसाक्षिसलेखकान्तैरङ्गैरेभिरप्यचलक्रमस्थैः कल्याणभट्टगदितं भवतीह पत्रम् । इति ऋणादाने आधिभेदोऽष्टमः । अथ लेख्यभेदो भवति । अभा.५८

(२) 'विनष्टे मूलनाशः स्याद् धनिन' इत्युक्तम् । ऋणिकस्यापि द्रव्यमूल्यापरिज्ञाने मूल्यादधिक देयमित्यर्थादुक्तम् । अथ नश्येद् द्रव्य, मूल्यपरिमाणं न ज्ञायेत, तत्र विसंवादः स्यादित्यर्थः, कालेन विस्मरणाद् अन्योन्यातिसन्धित्सया वा । तत्र जातिसंज्ञाधिवासाना, जातिर्जातिभेदः, संज्ञा वज्रेन्द्रनीलमरतकादिका, अधिवास उत्पत्तिभूमिः, एतेषामागमस्तत्वावबोधो लेख्यतः स्मृतः यथा लिखितं तथा मूल्यपरिच्छेदः कर्तव्यः । नाभा.२।१११

(१) **नासं**.२।१११ न स्याद् (नश्येद्); **नास्मृ**.४।१३४. **भभा**.५८.

बृहस्पतिः

पत्र ऋणोद्ग्राहणोपायाः तल्लक्षणानि च

प्रतिपन्नमृणी दाप्यः सामादिभिरुपक्रमैः ।
धर्मोपधिबलात्कारैर्गृहसंरोधनेन च ॥

प्रतिपन्नः ऋणसत्ताया संप्रतिपन्नः । दाप्यः प्रतिदानोन्मुखी कार्यः । धनिनेत्येर्थः । स्मृच.१६४

यतो द्रव्यं विनिक्रीय ऋणार्थं चैव गृह्यते ।
तन्मूल्यमुत्तमर्णेन व्यवहार इति स्मृतः ॥
सुहृत्संबन्धिसंदिष्टैः सामोक्त्याऽनुगमेन च ।
प्रायेण वा ऋणी दाप्यो धर्म एष उदाहृतः ॥
छद्मना याचितं चार्थमानीय ऋणिकाद्धनी ।
अन्वाहितादि वाहृत्य दाप्यते यत्र सोपधिः ॥
बध्वा स्वगृहगानीय ताडनाद्यैरुपक्रमैः ।
ऋणिको दाप्यते यत्र बलात्कारः स कीर्तितः ॥
दारपुत्रपशून् बध्वा कृत्वा द्वारोपवेशनम् ।
यत्रर्णी दाप्यतेऽर्थं स्वं तदाचरितमुच्यते ॥

(१) **व्यक**.१२४; **स्मृच**.१६४ मृणी (ऋणी); **विर**.६९; **पमा**.२५५ उत्त.; **व्यप्र**.२५६ मृणी (मृण); **व्यम**.७९ व्यप्रवत्; **प्रका**.९६; **समु**.८२. (२) **मच**.८।४९.

(३) **व्यक**.१२५, **स्मृच**.१६४; **ममु**.८।४९ सामोक्त्या (साम्ना चा); **विर**.६७ धर्म (धर्म्य); **पमा**.२५५ वा ऋणी (धनिने); **विचि**.३१; **मच**.८।४९ मोक्त्याऽनुगमे (म्ना वानुनये); **व्यप्र**.२५७, **व्यम**.७९; **सेतु**.३३; **प्रका**.९६; **समु** ८२.

(४) **व्यक**.१२५ हृ (कृ); **स्मृच**.१६४ यत्र (तत्र); **ममु**.८।४९ द्धनी (द्वली) न्वाहि (न्याहृ) यत्र (तत्र); **विर**.६७; **पमा**.२५६, **विचि**.२१ चित चा (चयित्वा); **मच**.८।४९ चा (वा) न्वाहि (न्याहृ); **व्यप्र** २५७ वाहृत्य (सगृह्य); **व्यम**.७९ व्यप्रवत्; **सेतु**.३३ वा (चा) शेषं विचित्रवत्; **प्रका**.९६ स्मृचवत्; **समु**.८२.

(५) **व्यक**.१२५; **स्मृच**.१६४ बध्वा (यदा); **ममु**.८।४९ स (प्र); **विर**.६८ कीर्तितः (उच्यते); **पमा**.२५६ स्मृचवत्; **विचि**.३१ ममुवत्; **मच**.८।४९ स्व (ऽऽत्म); **व्यप्र**.२५७; **व्यम** ७९; **सेतु**.३४ विरवत्, **प्रका**.९६ स्मृचवत्; **समु**.८२ स्मृचवत्.

(६) **व्यक**.१२५ बध्वा (रुध्वा); **स्मृच**.१६४; **ममु**.८।४९ बध्वा (हृत्वा) त्रर्णी (त्रार्थी); **विर**.६८ दारपुत्र (पुत्र-

(१) सुहृत्संबन्धिसंदिष्टैर्मान्यजनादेशैः । सामोक्त्या प्रियपूर्ववाक्येन । अनुगमनेन अनुव्रजनेन । प्रायेण प्रार्थनाबाहुल्येन । लब्धेन उत्सवादिछलादानीतभूषणादिना । याचितं याचितकम् । अन्वाहितं अन्यस्मै दातुमर्पितम् । आदिग्रहणादन्यदपि यथाकथंचिदानीत सगृह्यते । अर्थं स्व स्वकीयमर्थं दाप्यते प्रतिदानोन्मुखी क्रियते । शेष व्यक्तार्थम् । धर्मादयश्चोपाया न यथाकाम प्रयोक्तव्याः । किन्तु यथायोग्यं प्रयोज्याः ।

स्मृच.१६४

(२) प्रायोपवेशन वा धनिकस्य धर्म्यः ऋणोद्ग्राहणोपाय इत्यर्थः । विर.६७

(३) उक्तप्रकारेणाधमर्णस्य भूषणादि स्वाधीनीकृत्य यत्र स ऋण दाप्यते स उपधिरित्यर्थः । व्यप्र.२५७

अनुत्तमजातीयो निर्धनोऽधमर्णः कर्म कारयितव्यः

[1]**निर्धनं ऋणिकं कर्म गृहमानीय कारयेत् ।**
शौण्डिकाद्यं ब्राह्मणस्तु दापनीयः शनैः शनैः ॥

शौण्डिकाद्य समापकृष्टजाती । ब्राह्मणग्रहणमुत्कृष्टजातेरुपलक्षणार्थम् । व्यप्र.२६१

पूर्णावधौ धनाऽप्राप्तौ चक्रवृद्ध्यादिव्यवस्था

[2]**पूर्णावधौ शान्तलाभमृणमुद्ग्राहयेद्धनी ।**
कारयेद्वा ऋणी लेख्यं चक्रवृद्धिव्यवस्थया ॥

(१) शान्तलाभं परमवृद्धिप्राप्तम् । व्यक.१२६

(२) शान्तलाभग्रहणमशान्तलाभस्योपलक्षणार्थम् । उद्ग्रहण धर्माद्युपायेन साधनम् । व्यप्र.२६०

दार) बध्वा (रुध्वा); **पमा.**२५६; **विचि.**३१ व्यकवत् ; **मच** ८।४९ वेश (सेव) ऋणी (ऋणी) ऽर्थं (ऽर्थं);**चन्द्र.** २८ दारपुत्र (पुत्रदार) प्रथमपादः, **व्यप्र.**२५७ यत्र ..स्व (यत्रर्णी वाऽर्थंतऽर्थं स्व); **व्यम.**७९ दारपुत्र (पुत्रदार) शेष व्यप्रवत्; **सेतु.**३४ दारपुत्र (पुत्रदार); **प्रका** ९६; **समु.**८२ सेतुवत्.

(१) **अप.**२।४१ निर्धनं ऋणिकं (ऋणिक निर्धनं); **व्यक.** १२५-१२६; **विर.**७१ कर्म . नीय (गेहमानीय कर्म), **विचि.**३२; **चन्द्र.**२७; **व्यप्र.**२६१ णिकं (णिनं); **सेतु.** ३४; **विव्य.**३० पृ.

(२) **व्यक.**१२६, **विर.**७२; **विचि.**३३, **चन्द्र.**२८ दधा (द्वा) कार (धार); **व्यप्र.**२६०; **व्यम.८०; विता.** ४९६-४९७; **सेतु.**३६ ऋणी (धनी).

[1]**द्विगुणस्योपरि यदा चक्रवृद्धिः प्रगृह्यते ।**
भोगलाभस्तदा तत्र मूलं स्यात्सोदयमृणम् ॥

अत्र यत्र तत्रेत्यध्याहार्यम् । तेन यत्र चक्रवृद्धिर्गृह्यते तत्र यथा सोदयमृण द्विगुणस्योपरी भवति, तथा भोगलाभोऽपि, एतदुक्त भवति । तथा भोगलाभे दैववशाद्धनिकस्यावृत्ते तेन भोगेन धन मूलीकृत्य कलया धारणीय, येनाग्रिमो द्विगुणस्योपरि धनिकस्याधिको भोगो भवतीति, भोगधन वा दातव्यमिति ।

विर.७२

नष्टाधमर्णद्रव्यविक्रयद्वारा ऋणोद्ग्राहणविधिः

[2]**हिरण्ये द्विगुणीभूते मृते नष्टेऽधमर्णिके ।**
द्रव्यं तदीयं संगृह्य विक्रीणीत ससाक्षिकम् ॥
रक्षेद्वा कृतमूल्यं तु दशाहं जनसंसदि ।
ऋणानुरूपं परतो गृह्णीतान्यत्तु वर्जयेत् ॥

अधमर्णग्रहणमृणदानाधिकारिणः पुत्रादेरुपलक्षणार्थम् । द्रव्यमाधीकृतद्रव्यम् । ऋणानुरूपं द्विगुणद्रव्यपर्याप्तम् । अन्यत्तु वर्जयेदिति वदन् द्विगुणीभूतेऽपि धने धनिकस्याधावस्वामित्व दर्शयति । ततश्च विनिमयहीनाधिविषयमनुवचनवदेतदपि वचन मन्तव्यम् । 'हिरण्ये द्विगुणीभूते' इत्युदाहरणतयोक्त, ततश्च वस्त्रादौ शान्तलाभेऽपि वचनमेतदूह्यम् । स्मृच.१४२

(१) **व्यक.**१२६ यदा (यथा), **विर.**७२, **धिवि.**३३ यदा (यथा) स्तदा (स्तथा) मूलं (मूल्यं); **व्यप्र.**२६० दयमृ (दय त्वृ); **विता.**४९७ भस्तदा (भोऽथवा) दयमृ (दय त्वृ); **सेतु.**३६.

(२) **अप.**२।३९ मृते . .र्णिके (नष्टे चैवाधमर्णके); **व्यक.** १२६; **स्मृच.**१४२; **विर.**७३; **पमा.**२४०; **विचि.**३३; **सवि.**२४५ मर्णि (मर्ण); **चन्द्र.**२८ मर्णि (मर्ण) णीत (णीयात्), **व्यप्र.**२४३ मृते (पश्चात्) णीत (र्णीते); **व्यम.** ७७; **विता.**५४९; **सेतु.**३६; **प्रका.**८७ गुणी (गुणे); **समु.** ७५; **विव्य.**३०.

(३) **अप.**२।३९ गृह्णीतान्यत्तु (गृहीत्वाऽन्यं तु); **व्यक.** १२६-१२७; **स्मृच.**१४२; **विर.**७३ मूल्य तु (मूल्यं च); **पमा.**२४०, **विचि.**३३; **सवि.**२४५ गृह्णीतान्यत्तु (गृहीत्वाऽन्यास्तु);**चन्द्र.**२९ तान्यत्तु (यान्न तु); **व्यप्र.**२४३;**विता.** ५४९ परतो(राजाग्रे)न्यत्तु (न्यत्र);**सेतु.**३६ तु द(तद्)पर ... न्यत्तु (गृह्णीयात्तदन्यत्तु वि); **प्रका.**८७; **समु.**७५ रक्षे(तिष्ठे).

स्वेधनं च स्थिरीकृत्य गणनाकुशलैर्नरैः ।
तद्बन्धुज्ञातिविदितं प्रगृह्णन्नापराध्नुयात् ॥
प्रतिपन्नस्य धर्मोऽयं व्यपलापी तु संसदि ।
लेख्येन साक्षिभिर्वाऽपि भावयित्वा प्रदाप्यते ॥

अयं पूर्वोक्तो धर्मगणः ऋणसत्ताया संप्रतिपन्नस्यार्णिकस्य । यस्तु व्यपलापी ऋणमपह्नोतुं तत्सत्ताया विप्रतिपन्नः स संसदि प्रमाणेनर्णं प्रसाध्य प्रतिदानोन्मुखी कार्य इत्यर्थः । स्मृच.१६६

संदिग्धेऽर्थे राजन्यनिवेद्य न प्रवर्त्तितव्यम्

अनावेद्य तु राज्ञे यः संदिग्धेऽर्थे प्रवर्तते ।
प्रसह्य स विनेयः स्यात्स चाप्यर्थो न सिध्यति ॥
न रोद्धव्यः क्रियावादी संदिग्धेऽर्थे कथंचन ।
आसेधयंस्त्वनासेध्यं दण्ड्यो भवति धर्मतः ॥

'न रोद्धव्य' इति प्रतिषेधदर्शनार्थम् । स्मृच.१६६

प्रदातव्यं यद्भवति न्यायतस्तद्दाम्यहम् ।
एवं यत्रार्णको ब्रूते क्रियावादी स उच्यते ॥
रूपसंख्यादिलाभेषु यत्र भ्रान्तिर्द्वयोर्भवेत् ।
देयानादेययोर्वाऽपि संदिग्धोऽर्थः स कीर्तितः ॥

रूपे धनस्वरूपे सुवर्णरजतादौ, सख्यायामियत्तायाम् । आदिपदादाध्यादौ । लाभे कलाया देयादेययोर्यत्र द्वयोरर्थिप्रत्यर्थिनोर्भ्रान्तिर्विप्रतिपत्तिर्भवति, सोऽर्थः संदिग्ध उच्यते । विर.७५-७६

कात्यायनः

ऋणोद्ग्राहणोपायाः । अधमर्णयोग्यतादिविशेषपीडोपयोगादिविवेकेन तत्तदुपायप्रयोगः ।

पीडनेनोपरोधेन साधयेदृणिकं धनी ।
कर्मणा व्यवहारेण सान्त्वेनादौ विभावितम् ।
आददीतार्थमेवं तु व्याजेनाचरितेन च ॥

पीडनेन बन्धनादिना उपरोधेन प्रायोपवेशनादिना कर्मणा उदकाहरणादिना एवं व्यवहारादिना च प्रयुक्तमृणमुद्ग्राहयेदित्यर्थः । विर.६८

राजानं स्वामिनं विप्रं सान्त्वेनैव प्रदापयेत् ।
रिक्थिनं सुहृदं वाऽपि छलेनैव प्रदापयेत् ॥
वणिजः कर्षकांश्चैव शिल्पिनश्चाब्रवीद्भृगुः ।
देशाचारेण दाप्याः स्युर्दुष्टान संपीड्य दापयेत् ॥

(१) अप.२।३९ नरैः. (नृभि), व्यक.१२७ ज्ञा (जा); विर ७३-७४ प्रगृ यात् (प्रतिगृह्णन्नवाप्नुयात्), विचि.३२ च (तु) ज्ञाति (ज्ञातृ); सेतु.३६.

(२) व्यक.१२७, स्मृच.१६६, विर.७५; व्यप्र २५९; व्यम.८०; विता.४९८ लार्यो(लार्यो), प्रका ९७; समु.८२.

(३) व्यक.१२७ वर्तते (वर्तयेत्) स चा ..ति (सर्वाऽर्थोऽस्य न शुध्यति) नारद.; स्मृच.१६६; पमा.२५८; व्यप्र. २६०; व्यम.८०; प्रका.९७, समु.८२-८३.

(४) व्यक.१२७ न रोद्ध (नासेद्ध); स्मृच.१६६, विर. ७५ व्यकवत्; विचि.३४ आसे (स्वासे) शेषं व्यकवत्; दवि. ३३४ दण्ड्यो .. मतः (तत्सम दण्डमर्हति) शेष व्यकवत्; चन्द्र.२८ दण्ड्यो ... मतः (द्विगुण दण्डमर्हति) शेषं व्यकवत्; व्यप्र.२५९; व्यम.८०; विता.४९८; सेतु.३७ व्यकवत्; प्रका.९७; समु.८२.

(५) व्यक.१२७ स्तद्दा (स्तद्वदा); स्मृच.१६६; विर. ७५ न्याय (धर्म); विचि.३४ व्यकवत्; व्यप्र.२६०; व्यम. ८०; सेतु.३७ न्याय (धर्म) शेषं व्यकवत्; प्रका.९७; समु. ८२ यत्रर्णि (यस्तृणि).

(६) व्यक.१२७ स (प्र); स्मृच.१६६ नादे (नां दे); विर. ७५ कीर्तितः (उच्यते); विचि.३४ देयाना (अदेय) ग्धो (ग्धा) स (प्र); व्यप्र.२६०, सेतु.३७ देयाना (अदेय) स (प्र); प्रका.९७; समु ८२ देयाना (अदेय).

(१) व्यक.१२४; विर.६८ तम् (तः), व्यप्र.२५७.

(२) मिता.२।४० न स्वामिन (तु स्वामिने); अप.२।४० न स्वामिन (तु स्वामिनो) लेनैव प्र (लेन न च); व्यक.१२५ दाप (साध), स्मृच.१६४; विर.६९ व्यकवत्; पमा.२५६ ज्ञान (जा तृ); विचि.३२ सुद्ध (दुर्द्ध) दाप (साध); स्मृचि. १२, नूप्र.१९ मितावत्; चन्द्र.२७ त्वेनैव प्रदाप (त्वनेनैव साध) पू.; व्यप्र.२५७ लेनैव प्रदाप (लेनैव प्रसाध); व्यउ. ७७ मितावत्, स्मृत्यन्तरम्; व्यम.७९; विता.४९२ त्वेनैव प्र (त्वनेनैव) शेष मितावत्, मनुः; सेतु.३४ सान्त्वे (स्त्रिय) शेष विचिवत्; प्रका.९६; समु.८२.

(३) मिता.२।४० दाप्याः स्युः (चान्यांस्तु) उत्त.; अप. २।४० मितावत्, उत्त.; व्यक.१४५ कांश्चै (कश्चै); स्मृच. १६५; विर.६९; पमा.२५४ अस्मिन् पृष्ठे प्रामादिकः पाठः : २५६ काश्चैव (काश्चापि); विचि.३२; स्मृचि.१२ मितावत्, उत्त.; व्यप्र.२५७ कां (का); व्यउ.७७ दाप्याः स्युः (वान्यांस्तु); व्यम.७९ कां (का); विता.४९३

(१) सान्त्वेन धर्माख्योपायेन । सपीड्यशब्देन बलात्काराचरिताख्योपाययोर्ग्रहणम् । स्मृच.१६५

(२) इदानीं कोऽधमर्णः केनोपायेन साध्यस्तदाह कात्यायनः—राजानमिति। वणिजः कर्षकाश्च शिल्पिनश्चाधिकृत्याब्रवीद्भृगुः, देशाचारेणैव ते दाप्याः स्युरिति। विर.६९

सदिग्धेऽर्थे अधमर्णपीडने दण्डः

[1]पीडयेद्यो धनी कश्चिद्गणिकं न्यायवादिनम् ।
तस्मादर्थात्स हीयेत तत्समं चाप्नुयाद्दमम् ॥

तेन विप्रतिपन्ने विप्रतिपत्तिनिवृत्तये व्यवहाराख्य एवोपाये प्रवृत्तिः कार्येत्यभिप्रायः । स चोपायः प्रतिज्ञादिदण्डान्तः प्रथमपरिच्छेदे निरूपित इत्युपरम्यते । स्मृच.१६५

अधमर्णावरोधविधिः

धार्योऽवरुद्धस्त्वृणिकः प्रकाशं जनसंसदि ।
यावन्न दद्यादेयं च देशाचारस्थितिर्यथा ॥

कः पुनर्देशाचार इत्यपेक्षिते स एवाह—धार्योऽवरुद्ध इति । यत्र देशे धनी स्वयमेवावरुध्य धारयति तत्र तथैव धार्यः । यत्र पुनरधमर्णसकाशाद्वेतनार्थिना निर्घृणेन पुरुषान्तरेण अवरुध्य ध्रियते तत्र तथा पुरुषान्तरद्वारा धार्य इति देशाचारस्थितिर्यथेत्यस्यार्थः । एवं चावरुध्य धारणमेव देशाचारानुरोधित्वादेशाचार इत्युच्यते । +स्मृच.१६५

[1]विण्मूत्रशङ्का यस्य स्याद्धार्यमाणस्य देहिनः ।
पृष्ठतो वाऽनुगन्तव्यो निबद्धं वा समुत्सृजेत् ॥

निबद्धं शृङ्खलादिना । अधमाधमर्णविषयो द्वितीयः पक्षः । तदितरविषयस्त्वाद्यः पक्ष इत्यौचित्यात् व्यवस्थाऽवगन्तव्या । स्मृच.१६५

[2]स कृतप्रतिभूश्चैव मोक्तव्यः स्याद्दिने दिने ।
आहारकाले रात्रौ च निबन्धे प्रतिभूः स्थितः ॥

स धार्यमाणो वणिगादिः । कृतदर्शनप्रतिभूरावश्यककृत्यकाले विमोक्तव्यः । पलायनप्रतिबन्धे प्रतिभूर्यतः स्थित इत्यर्थः । स्मृच.१६५

[3]यो दर्शनप्रतिभुवं नाधिगच्छेन्न चाश्रयेत् ।
स चारके निरोद्धव्यः स्याप्यो वाऽऽवेद्य रक्षिणः ॥

(१) चारके सचारके चरण इति यावत् । स्थाप्यः प्रस्थाप्यः । आद्यः पक्षः प्रतिभूलाभेऽपि यो न ददाति तद्विषयः । तस्यातिदौष्ट्यात् । अलब्धप्रतिभूविषयो द्वितीयः पक्षः । तस्यातिदौष्ट्याभावात् । स्मृच.१६५

(२) चारके कारागृहे निरोद्धव्यः धारणीयः रक्षिणो वावेद्य स्थापनीयः । विर.७०

योग्यताविशेषवान् नावरोद्धव्यः, किन्तु शपथेन निरोद्धव्यः

[4]न चारके निरोद्धव्य आर्यः प्रात्ययिकः शुचिः ।
सोऽनिबद्धः प्रमोक्तव्यो निबद्धः शपथेन वा ॥

प्रात्ययिकोऽपलापित्वेन विश्वासी । अनिबद्धः रक्षकेणासंबद्ध इत्यर्थः । एवं च रक्षिण आवेद्य प्रस्थाप्य

+ व्यप्र. स्मृचवत् ।

मितावत्: ४९३ श्वाब्रवीद्भृगुः (श्च प्रपीड्य तु) पू.; सेतु.३४; प्रका.९६; समु.८२ मितावत्.

(१) मिता.२।४०; अप.२।४०; व्यक.१२७ पीडयेद्यो (संपीड्येत्) कश्चित् (यत्र) इमम् (ङनम्); स्मृच.१६६ द्यो (त्त) कश्चित् (यत्र); पमा.२५८ स्मृचवत्; स्मृचि.१२; व्यप्र.२६० स्मृचवत्; व्यउ.७६ चा (वा); व्यम ८० स्मृचवत्; विता.४९२; प्रका ९७ स्मृचवत्; समु.८३ स्मृचवत्.

(२) व्यक.१२५; स्मृच १६५; विर ६७,६९; विचि ११ स्तृ (क्त); व्यप्र.२५७ देयं च (त्तदेय); व्यम.७९ न दद्यादेयं च (द्दद्यात्तदादेय); सेतु.३३ विचिवत्; प्रका.९६; समु.८२; विव्य.३०.

(१) व्यक.१२५ व्यो (व्य) बद्ध (रुद्ध), स्मृच.१६५; विर.६९ शद्का (सशा) व्यो (व्य) बद्धं (बन्ध); व्यप्र. २५८ यस्य (यत्र), व्यम.७९ यस्य (यत्र) तो वा (तश्चा) बद्धं (बन्ध); विता.४९५ यस्य (यत्र) चन्द्रिकायां मदनरत्ने च भृगुः, प्रका.९६; समु.८२.

(२) व्यक.१२५ तः (ते), स्मृच १६५; विर ६९ व्यः स्यात् (व्यश्च); व्यप्र.२५८ रात्रौ (प्राप्ते); व्यम.८०; विता.४९५-४९६ निब (निबं), प्रका.९६; समु.८२.

(३) व्यक.१२५, स्मृच.१६५; विर.७०; व्यप्र २५८; व्यम.८० चाश्र (वाश्र); विता.४९६ (=) चाश्र (वाश्र) चार (कार); प्रका.९६; समु ८२.

(४) व्यक.१२५; स्मृच.१६५; विर.७० व (रु); व्यप्र. २५८; व्यम.८०; विता.४९६ (=) चा (का) द्धः श (ध्यः श); प्रका.९६; समु.८२.

इत्यस्य स्थाने पक्षोऽयमिति गम्यते। इतरस्तु पक्षः परिशेष्यात् स चारके निरोद्धव्य इति पक्षस्य स्थाने द्रष्टव्यः। यद्यपि वणिगादिविषयता देशाचाराख्योपायस्योक्ता तथाप्यार्यादियोग्यानुग्रहपक्षप्रतिपादनात् धर्माख्योपायसाध्यविप्रादौ अपि देशाचाराख्योपायो योग्यानुग्रहपक्षसहितः प्रयोक्तव्य इति मन्तव्यम्। स्मृच.१६५

अनुत्तमजातीयो निर्धनोऽधमर्ण. कर्म कारयितव्य. । अशक्तोऽब्राह्मणः निरोद्धव्यः।

कर्षकान् क्षत्रविट्शूद्रान् समहीनांस्तु दापयेत्॥

तत् तेषा यथोदयं धनदानसामर्थ्ये मन्तव्यम्। कल्पतरौ तु कर्मणा क्षत्रविडिति पठितम्। तत्र कर्मणा दापयेदित्यन्वयान्न कोऽपि विरोधः। व्यप्र.२६१-२६२

धनदानासहं बध्वा स्वाधीनं कर्म कारयेत्।
अशक्तो बन्धनागारे प्रवेश्यो ब्राह्मणादृते॥

कर्मकरणासहं तु बन्धनागारे वासयेत्। प्रवेशनफल सामर्थ्योत्पत्तौ कथचिद्दण्डप्राप्तिः। यत्पुनस्तेनैवोक्त 'कृषिकान्क्षत्रविडिति' तद्यथोदय धनदानसहिष्णुविषयम्। 'धनदानासह बध्वा' इति सर्वथा धनदानासहविषयमिति न कश्चिद्विरोधः।

*स्मृच.१६७

अधमर्णोऽशुभ कर्म न कारयितव्यः

यदि ह्यादावनादिष्टमशुभं कर्म कारयेत्।
प्राप्नुयात् साहसं पूर्वमृणान्मुच्येत चार्णिकः॥

यदि उत्तमर्ण ऋणमोचनार्थमादौ अपरिभाषित निन्दितं कर्म कारयेत्, तदासौ राज्ञा पूर्वं साहसं दण्ड्यः। ऋणिकश्च ऋणान्मुच्येतेत्यर्थः। विर.७१

पूर्णावधौ धनाप्राप्तौ पुनर्वृद्धिः

ग्राह्यं स्याद्द्विगुणं द्रव्यं प्रयुक्तं धनिना सदा।
लभेत चेन्न द्विगुणं पुनर्वृद्धिं प्रकल्पयेत्॥

धनिकेन शान्तलाभमृण यथोक्तप्रकारेणोद्ग्राहणीयम्। तदभावे परमवृद्धया सह मूलीकृत्य पुनर्वृद्धयादिकं कृत्वा धारयितव्यमित्युक्तम्। विर.७२

ऋणप्रतिग्रहीतृक्रमः

नानर्णसमवाये तु यत्पूर्वकृतं भवेत्।
तत्तदेवाग्रतो देयं राज्ञः स्याच्छ्रोत्रियादनु॥

श्रोत्रियोऽत्र ब्राह्मणजातिमात्रशाली न श्रुताध्ययनशाली त्रैवर्णिकः। राजजात्यपेक्षयोत्कृष्टजातिपरत्वेनात्र श्रोत्रियपदप्रयोगात्। गृहीतजातिक्रमयोर्विरोधे जातिक्रमो ग्राह्यः। ब्राह्मणस्य पूज्यतयाऽनुग्राह्यत्वात्। एव क्षत्रियवैश्ययोः वैश्यशूद्रयोर्वा युगपदुपस्थाने वर्णक्रमेण दातव्यम्। पूर्वस्य पूर्वस्य श्रेष्ठत्वेन अनुग्राह्यत्वात्। एव क्रमेण ऋणापाकरणे क्रियमाणे यस्य ऋणापाकरणादर्वागल्पधन ऋणिकः परिक्षीणो जातः तस्य 'हीनजातिं परिक्षीण' इत्यादिनोक्तमार्गानुसरणमेव शरणम्।

+स्मृच.१६७

एकाहे लिखितं यत्र तत्र कुर्याद्गणं समम्।
ग्रहणं रक्षणं लाभमन्यथा तु यथाक्रमम्॥

---

* व्यप्र. स्मृचवत्।

(१) **व्यक.**१२६ कर्षकान् (कर्मणा), **स्मृच.**१६७ कर्ष (कृषि); **विर.**७१ तु (श्च) शेष व्यकवत्; **वीमि.**२।४३ व्यकवत्, **व्यप्र.** २६१-२६२ व्यकवत्, **सेतु.**३५ व्यकवत्, **प्रका.**९७; **समु.**८३.

(२) **स्मृच.**१६७, **दवि.**६७; **सवि.**२५४; **व्यप्र.**२६२ ब (ङु); **विता.**४९८ ब (ङु), **समु** ८३.

(३) **स्मृच.**१६७; **व्यप्र** २६२ क्तो (क्तौ); **विता.** ४९८ क्तो (क्तौ) रे (र), **समु.**८३ रे (र).

(४) **अप.**२।४३; **व्यक.**१२६; **विर.**७१; **विचि.**३२ ह्या (वा); **चन्द्र.**२८; **व्यप्र.**२६२, **विता.**४९४ (=); **सेतु.** ३५,३१७ च (व); **विव्य.**३०,

+ सवि., व्यप्र. स्मृचवत्।

(१) **अप.**२।३९ ना (ना); **व्यक.**१२६; **विर.**७२; **व्यप्र.**२६१.

(२) **व्यक** १२९ स्याच्छ्रोत्रियादनु (श्रोत्रियतो न च); **स्मृच.**१६७, **विर.**७९ (=) स्याच्छ्रो . . .दनु (श्रोत्रियतोऽनु च), **विचि** ३५ विरवत्; **सवि.**२५५ कृत (ऋण) ग्रः (ङ्गे), **चन्द्र** २९ स्या .. .. दनु (श्रोत्रियतोऽपि वा), **वीमि.**२।४१ वं (वं) शेष विरवत्; **व्यप्र** २६२ दनु (नु च); **व्यम** ८१ विरवत्; **सेतु** ३९ व्यकवत्; **प्रका.**९७, **समु.**८३ विरवत्, **विव्य.**३१ वं (वं) स्या...दनु (श्रोत्रियतोऽर्थतः).

(३) **अप.**२।४१ यत्र तत्र (यत्तु तत्तु); **व्यक** १२९, **स्मृच.**१६७; **विर.**(=) यत्र (यत्तु); **विचि.**३५ तत्र कुर्या

ग्रहणमाधिदानम्। रक्षणं तस्यैव पालनम्। लाभ भोगरूपलाभ च सममेव कुर्यात्। अन्यथा त्वहर्भेदे लिखितक्रमेण वा ऋणदानम्। *स्मृच.१६७

यस्य द्रव्येण यत्पण्यं साधितं यो विभावयेत्।
तद्द्रव्यमृणिकेनैव दातव्य तस्य नान्यथा॥

'तत्र कुर्याद्दण सम' इत्यादेः क्वचिदपवादमाह— यस्य द्रव्येण इति। यस्योत्तमर्णस्य धनाद्यत्पण्यमधमर्णेन वाणिज्यार्थं गृहीत तत्पण्यविक्रयावाप्त धन नानर्णसमवायेऽपि ऋणिकेन तस्यैवोत्तमर्णस्य ऋणापाकरणार्थं दातव्य नान्यथा पूर्वोक्तप्रकारेण दातव्यमित्यर्थः।

*स्मृच.१६८

कालिकार्घे वृद्धिग्रहणविचार

मूलग्रहणकालार्घद्विगुण्यं कालतो भवेत्।
मूलमेव ऋणी दद्यान्न वृद्धिं दातुमर्हति॥
द्विगुणं कालिकेर्घं तु मूलं तद्द्विगुणं भवेत्।
न निस्रवति यत्तस्माद्धनिको मूलभाग्भवेत्॥
द्विगुणादपि चोत्कर्षे कालिकेऽर्थस्य वादिनाम्।
विवादे न्यायतत्त्वज्ञैस्तदा राजा विनिर्णयेत्॥
आदानकालिकादर्घाद्द्विगुणं यदि कालिकम्।
मूलमात्रं तु पाश्र्वोनं तदर्धं पादमात्रकम्॥
द्विगुणादिक्रमेणैव लभते धनिको धनम्॥

व्यासः

मिथ्याभियोगिदण्डः

[3]**मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत्।**

कारणे विधिवैषम्याज्जितस्यैकतरस्य तु।
प्राङ्न्यायवादे तु तथा जितस्यैकतरस्य तु॥

(१) अभियोगादभियुक्तधनात्, कारणे प्रत्यवस्कन्दने। इमे याज्ञवल्क्यव्यासवाक्ये कामधेनाविह प्रकरणे अदृष्टे अपि कल्पतरौ दर्शनालिखिते। विर.७८

(२) मध्यविधधनस्य मिथ्याकारणप्राङ्न्यायवादे त्विदम्। विचि.३५

(३) कारणे कारणोत्तरे। असत्येन मिथ्योत्तरेण। प्रत्यवस्कन्दने प्राङ्न्याये मिथ्योत्तरे च वादिप्रतिवादिनोर्मध्ये यस्यैकतरस्य पराजयस्तस्याऽपि पूर्वोक्तधनात् द्विगुणो दण्ड इत्यर्थः। यत्तु मिताक्षराया मिथ्योत्तरेऽप्रह्नोतुः पराजये समो दण्डः, मिथ्याभियोक्तुर्द्विगुणो दण्डः। एव प्राङ्न्याये प्रत्यवस्कन्दने चार्थिनोऽपह्नववादित्वात् प्रत्यर्थिना प्राङ्न्यायकारणसाधने कृते प्रकृतधनसम एव दण्डः। यदि प्रत्यर्थी प्राङ्न्यायकारणं न साधयति तदा स मिथ्याभियोग्येवेति तस्य द्विगुणो दण्ड इत्युक्तम्। तत्पूर्वोक्तव्यासवचनविरोधाद्विभावनीय विद्वद्भिरिति। व्यप्र.२७९

यमः

अधमर्णा राज्ञा दापयितव्य। अप्रदाने चक्रवृद्धिव्यवस्था।

ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति।
राज्ञा दापयितव्यः स्यादृगृहीत्वा द्विगुणं ततः॥
कारयेद्वा ऋणी लेख्यं चक्रवृद्धिव्यवस्थया।
वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता॥
[3]**भोगलाभस्तथा तत्र मूलं स्यात्सोदयं त्वृणम्॥**

---

* व्यप्र. स्मृचवत्।

(कुर्याद्वा) रक्ष (लक्ष), **सवि.**२५५ रक्ष (लक्ष), **चन्द्र.**२९ विरवत्, **वीमि.**२।४१ लिखित (ग्रहण) रक्ष (लक्ष); **व्यप्र.** २६२; **व्यम** ८१, **विता** ५००; **सेतु.**३९; **प्रका.**९७ सविवत्; **समु** ८३, **विव्य.**३१ पू

(१) **अप.**२।४१; **व्यक** १२९, **स्मृच.**१६८, **विर.** ७९; **पमा.**२५९; **विचि.**३५, **सवि** २५५ तस्य (तत्र); **चन्द्र.**२९, **वीमि.**२।४१; **व्यप्र** २६२-२६३, **व्यम.८१**; **विता.**५०० तस्य नान्यथा (यस्य तद्भवेत्); **सेतु.**३९ : ३१७ (=); **प्रका.**९७ तस्य (यस्य); **समु** ८३, **विव्य.**३१.

(२) **समु.८३.** (३) **व्यक.१२८**; **विर.७७, विचि.३५** वैषम्या (रेष स्या) द तु (दे च) अन्त्यार्धद्वय, क्रमेण याज्ञवल्क्यः;

व्यप्र.२७९ वैषम्या (रेष स्या) दे तु (दे च) तथा जितस्यैकतरस्य तु (तथा यच्चासत्येन युज्यते); **सेतु.**३८-३९ विधिवैषम्या (तु विशेषः स्या) अन्त्यार्धद्वय, क्रमेण याज्ञवल्क्यः; **विव्य.**३१ स्यैकतरस्य तु (स्यैवातुरस्य च) दे तु (दे च) अन्त्यार्धद्वय, क्रमेण याज्ञवल्क्यः.

(१) **व्यक.**१२८; **स्मृच.**१६६; **विर.७८**; **पमा.**२५८ ततः (दमम्) मनुः. **विचि.३५** दापयितव्यः (स दापनीयः); **व्यम.८१**; **विता.४९९**; **सेतु.३८**; **समु.८३**; **विव्य.३१** दौरात्म्यान्न (दैवान्नैव) शेषं विचिवत्.

(२) **स्मृच.**१६७; **समु.८३** उदाहृता (प्रकीर्त्यते).

(३) **स्मृच.**१६७; **समु.८३.**

ततो दुरात्मर्णिकसकाशादित्यर्थः । द्विगुणमिति सवृद्धिकमूलप्रदर्शनार्थम् । धन वा द्विगुण कार्य अन्यथा त्वनुचितत्वात् । ऋणिकं तु प्रति प्रतिदानात्पक्षान्तरमाह स एव 'कारयेद्वा' इति । अनेनैव वचनेन द्विगुणद्रव्यानुरूपभोगसमर्थाधिः वाचकवृद्धिस्थाने भवतीति अवगम्यते । द्विगुणग्रहणाच्छान्तलाभ एव पूर्वोक्तलेख्यान्तरकरणपक्षो न पुनः पूर्णावध्यादाविति गम्यते । तेन तत्र यथासप्रतिपत्तिलेख्यान्तरं ऋणिना कार्यम् । न चक्रवृद्ध्यादिनियमेन । द्विगुणग्रहणादिप्रागुदितपक्षत्रये धनिकेच्छातो व्यवस्था । स्मृच.१६७

भरद्वाजः

गृहीतधनसमधनाभावे ग्राह्यधनम् । ऋणोद्ग्राहणे क्षेत्रारामगृहविक्रयादिविधिः ।

[1]ऋणिकस्य धनाभावे देयोऽन्योऽर्थस्तु तत्क्रमात् ।
धान्यं हिरण्यं लोहं वा गोमहिष्यादिकं तथा ॥
[2]वस्त्रं भूर्दासवर्गं च वाहनादि यथाक्रमम् ।
धनिकस्य तु विक्रीय प्रदेयमनुपूर्वशः ॥
[3]क्षेत्राभावे तथारामस्तस्याभावे गृहक्रयः ।
द्विजातीनां गृहाभावे कालहारो विधीयते ॥
[4]ऋणिकस्यार्थसद्भावे उत्तमर्णो भवेद्यदि ।
तस्मिन्नृणे हि तत्काले तत्क्रयेण विधीयते ॥
आध्यर्थः केवलार्थश्च धनिनो यत्र दृश्यते ।
केवलः प्रथमो देयः पश्चात्स्यादाधिनिष्क्रयः ॥

वृद्धहारीतः

[1]निर्धनस्तु शनैर्दद्यात् यथाकालं यथोदयम् ।
औद्धत्याद्वा बलाद्वा तु न दद्याद्धनिने ऋणम् ॥
दण्डयित्वा च तं राजा धनिने दापयेद्धनम् ।
छिन्ने दग्धेऽथवा पत्रे साक्षिभिः परिकल्पयेत् ॥
वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणादिभिः ।
न सन्ति साक्षिणस्तत्र देशकालान्तरादिभिः ॥
शोधयित्वा तु दिव्येन दापयेद्धनिने ऋणम् ॥

अनिर्दिष्टकर्तृकवचने

अर्पाद्यैव ऋण ग्राह्यम् । धनालाभे पत्रपरिवर्तनम् ।

[2]नावसाद्य शनैर्दाप्यः काले काले यथोदयम् ।
ब्राह्मणस्तु विशेषेण धार्मिके सति राजनि ॥
[3]ऋणं दातुमशक्तो यः पत्रं तु परिवर्तयेत् ।
मूलत्वेन लिखेद्वृद्धिं यावती यस्य शक्यते ॥

शुक्रनीतिः

[4]समर्थः सन्न ददाति गृहीतं धनिकाद्धनम् ॥
राजा संदापयेत्तस्मात् सामदण्डविकर्षणैः ।
लिखितं तु यदा यस्य नष्टं तेन प्रबोधितम् ॥
विज्ञाय साक्षिभिः सम्यक् पूर्ववदापयेत्तदा ॥
यदा चतुर्गुणा वृद्धिर्गृहीता धनिकेन च ।
अधमर्णान्न दातव्यं धनिने तु धनं तदा ॥

ऋणादानपरिशिष्टम् (अ)

नारदः

वृद्धि

[1]निक्षेपः प्रातिभाव्यं च ऋणशेषश्च यो भवेत् ।
याच्यमानं न दत्तं चेद्वृद्धिं तत्र विनिर्दिशेत् ॥

वृद्धहारीतः

[2]अंशीतिभागो वृद्धिः स्यान्मासे मासे सबन्धके ।
अबन्धके स्याद्द्विगुणं यथा तत्कालसांप्रतम् ॥
मध्यस्थस्थापितं द्रव्यं वर्धते न ततः परम् ॥

आधि·

आधिस्तु द्विविधः प्रोक्तः भोग्यं गोप्यं तथैव च ॥
क्षेत्रारामादिकं भोग्यं गोप्यं द्रव्यमुपस्करम् ।
गोप्याधिभोगे नो वृद्धिः सोपस्कारार्थदापिते ॥
नष्टं देयं विनष्टं च द्रव्यं राजकृताहते ।
उपस्थितस्य मोक्तव्यमाधिस्तेनोऽन्यथा भवेत् ॥
प्रयोजकेऽसति धनं कुले न्यस्याधिमाप्नुयात् ।
तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकम् ॥

(१) पगा.२५९, नृप्र.१९ (=) ह वा (हादि), समु ८३ स्तु तत् (स्ततः) हिरण्यं लोह वा (लोह हिरण्य च)

(२) पमा.२५९; नृप्र.१९(=) वस्त्र (रत्न) क्रमम (क्रमात्) यम (य चा); समु.८३.

(३) पमा.२५९; नृप्र.१९(=); समु.८३.(४) समु.८३.

(५) बृहास्मृ.७।२३७-२४०.

(१) मेधा.८।४९. (२) विता.५०१. (३) शुनी.४।८१२-८१४, ४।१३०८. (४) vulg. नास्मृ.४।११८इत्यस्योपरिष्टात्। (५) बृहास्मृ.७।२३५,७।२४०, ७।२४१-२४९,

विना धारणकाद्वाऽपि विक्रीणीत ससाक्षिकम ।
तं वनस्थमनाख्यायाधिमन्यस्य न दीयते ॥
तदा यदधिकं द्रव्यं प्रतिदेयं तथैव च ।
न दाप्योऽपहृतं तं तु राजदैविकतस्करैः ॥
न प्रदद्यात्तु तन्मोहात्स दण्डयश्चोरवत्तदा ।
अजीवन्स्वेच्छया दण्डयो दाप्योऽर्थं चापि सोदयम्
याचितान्वाहितन्यायान्नि(न्यासनि) क्षेपादिष्वयं
विधिः ॥

लघुहारीतः

वृद्धि.

वर्धितं द्विगुणं यत्स्यात् पुनस्तन्नैव वर्धते ।
या मातुः क्रुरुते वृद्धिर्न सा वृद्धिर्विधीयते ॥
मूले तु द्विगुणीभूते रिक्ते सिद्धे तथोदिते ।
मूलतस्तु भवेद्वृद्धिश्चतुर्भागेण नान्यथा ॥

(१) लहास्मृ.४५-४६.

प्रमेयक्रिया

वसिष्ठः

[1]यं पूर्वतरमाधाय विक्रीणाति तु तं पुनः ।
किमेतयोर्बलीयः स्यात्प्राक्तनं बलवत्तरम् ॥

यद्यप्याधीकरणेन न स्वामिभावो निवर्त्यते तथाऽपि प्रतिबध्यते । ततश्च प्रतिबद्धस्वामिभावेन कृतो विक्रयः परेण कृत इवासिद्धत्वाद्दुर्बलो बाध्य एवेत्यनवद्यम् । *स्मृच.१४५

[2]कृतं यत्रैकदिवसे दानमाधानविक्रयम् ।
त्रयाणामिति संदेहे कथं तत्र विचिन्तयेत् ॥
[3]त्रयोऽपि तद्धनं धर्म्यं विभजेयुर्यथांशतः ।
उभौ क्रियानुसारेण त्रिभागेन प्रतिग्रहः ॥

यत्र त्रयाणा दानादिक कृत तत्र कथमिति सदेहे निर्णयाय विचिन्तयेदित्यर्थः । उभौ धनिकक्रेतारौ । क्रियानुसारेण दत्तधनानुसारेण । आधाने क्रियेतिशब्दः करणव्युत्पत्त्या वर्तितुमुत्सहते । स्मृच.१४५

* पमा., सवि , व्यप्र. स्मृचवत् ।

(१) **स्मृच.**१४५; **पमा** २३६ णाति (र्णाति), **सवि** २३८ य (यः) शेष पमावत्; **व्यप्र.**२४१-२४२ सविवत्, **प्रका.**८८; **समु.**७६ तु त (कृत) शेषं पमावत्.

(२) **स्मृच.**१५४ दानमाधान (दानाधमन); **पमा.**२३६, **सवि.**२३८, **व्यप्र.**२४२ देहे (बन्धे) चिन्त (धि न), **प्रका** ८८ स्मृचवत्, **समु.**७६ स्मृचवत्.

(३) **स्मृच.**१४५ तद्धनं (तं धन); **पमा.**२३६ गेन प्रतिग्रहः (गोनं प्रतिग्रही); **सवि.**२३९ त्रि (वि); **व्यप्र.** २४२ ग्रह· (ग्रही); **प्रका.**८८ स्मृचवत्; **समु.**७६ व्यप्रवत्.

याज्ञवल्क्यः

[1]सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ॥

(१) सर्वविवादेष्वनिर्णीतेषूत्तरा क्रिया दिव्यलक्षणेव निर्णयाव्यभिचाराद् बलीयसी । आध्यादिषु तु पूर्वा लेख्यादिका । दिव्यक्रियायास्तत्रासभवात् । यतो देवदत्तेन यज्ञदत्तस्याहित तत्पुत्रैरपि भुज्यते । न च तेषा दिव्यप्रकृत्यवष्टम्भः, स्वानुभवाभावात् । अथवा लेख्यविषय एवाय श्लोकः । सर्वेष्वेव लेख्यविवादेषु उत्तरोत्तरसक्रमणादुत्तरलेख्यक्रियाबलीयस्त्व परीक्षाबाहुल्येन

(१) **यास्मृ.**२।२३, **अपु.**२५३।५१-५२ ष्वर्थ (ष्वेव), **विश्व.**२।२३ अपुवत्, **मिता.**२।६ उत्त. : २।२३:२।६०, **व्यमा.**३०२ उत्त.; **अप.**; **स्मृच.**१३२,१४५; **विर.**६१९ पूर्वा तु (पूर्वैव) शेष अपुवत्; **स्मृसा.**८२ विरवत्; **पमा.** २३५ उत्त.,२३६ पू.; **दीक.**३३ उत्त., **व्यचि.**६६(=) पूर्वा तु (पूर्वैव) उत्त.; **विचि.**२५६ त्तरा क्रि (त्तरक्रि) शेष विरवत्; **व्यनि.**, **स्मृचि.**१० बल ... या (चोत्तरा बलवत्तरा) तु बलवत्तरा (बलवती स्मृता) नारद.; **नृप्र.**५ उत्त.; **व्यत.** २२५ अपुवत्; **दात.**१७५, **सवि.**२३८ उत्त.; **चन्द्र.** १०१ विरवत्; **वीमि.**२।७ व्यचिवत्, उत्त.:२।२३ विरवत्: २।६० व्यचिवत्, उत्त.; **व्यप्र.**५३, १६३,२३९ उत्त. . २४१; **व्यउ.**४३,७३ उत्त.; **विता.**५६ उत्त.: ११२ त्तरा क्रि (त्तरक्रि); **राकौ.**३९५; **सेतु.**९१ धौ (दौ) तु (च) शेषं अपुवत् : १२७ धौ (दौ) शेषं अपुवत्; **प्रका.** ८३; **समु.**७६; **विच.**८७,१३९-१४० अपुवत्.

व्याजकरणापनोदनात् । आध्यादिषु तु परसस्थत्वान्मूल लेख्यप्राधान्येन पूर्वक्रियैव ज्यायसीत्यर्थः । विश्व.२।२३

(२) उभयत्र प्रमाणसद्भावे प्रमाणगतबलाबलविवेके चासति पूर्वापरयोः कार्ययोः कस्य बलीयस्त्वमित्यत आह—सर्वेष्विति । ऋणादिषु सर्वेष्वर्थविवादेषु उत्तरा क्रिया क्रियते इति क्रिया कार्यं बलवती । उत्तरकार्ये साधिते तद्वादी विजयी भवति । पूर्वकार्ये सिद्धेऽपि तद्वादी पराजीयते । तद्यथा, कश्चिद् ग्रहणेन धारण साधयति, कश्चित्प्रतिदानेनाधारण, तत्र ग्रहणप्रतिदानयोः प्रमाणसिद्धयोः प्रतिदान बलवदिति प्रतिदानवादी जयति । तथा, पूर्वं द्विक शत गृहीत्वा कालान्तरे त्रिकं शतमङ्गीकृतवान्, तत्रोभयत्र प्रमाणसद्भावेऽपि त्रिशतग्रहणं बलवत् । पश्चाद्भावित्वात्पूर्वाधमेनानुपपत्तेः । उक्तं च । 'पूर्वाधमेन नोत्पत्तिरुत्तरस्य हि सेत्स्यति' इति । आध्यादिषु त्रिषु पूर्वमेव कार्यं बलवत् । तद्यथा । एकमेव क्षेत्र अन्यस्याधि कृत्वा किमपि गृहीत्वा पुनरन्यस्याप्याधाय किमपि गृह्णाति तत्र पूर्वस्यैव तद्भवति नोत्तरस्य । एव प्रतिग्रहे क्रये च । नन्वाहितस्य तदानीमस्वत्वात्पुनराधानमेव न संभवति । एवं दत्तस्य क्रीतस्य च दानक्रयौ नोपपद्येते तस्मादिद वचनमनर्थकम् । उच्यते—अस्वत्वेऽपि मोहात्कश्चिल्लोभाद्वा पुनराधानादिकं करोति तत्र पूर्व बलवदिति न्यायमूलमेवेदं वचनमित्यवोचाम् । *मिता.२।२३

स्वीकारान्तक्रिया पूर्वा बलवती । स्वीकाररहिता तु पूर्वाऽपि न बलवती । मिता.२।६०

(३) आधीकरणेन तु यद्यपि स्वामिभावो न निवर्त्यते तथाऽपि प्रतिषिध्यते । ततश्च तस्य क्षेत्रस्याऽऽधित्वानिवृत्तौ पुरुषान्तरं प्रत्याधित्वं कर्तुं नैव शक्यते । अप.

(४) 'आधावितिं' स्वामित्वप्रतिबन्धापगमाभ्या प्रागेव पूर्वस्याः क्रियायाः कृतत्वादित्यभिप्रायः । +स्मृच.१४५

(५) आधौ प्रतिग्रहे इति, अत्र क्रियायोर्विरोधे एकस्य द्रव्यस्याधानक्रियायामेकत्र कृतायामन्यत्र तत्तुल्या क्रिया भवति यदा, तदा पूर्वाधिक्रिया बलवती उत्तरा अबला । यदा त्वेकत्र तदाधीकृत्य अन्यत्र विक्रयदानात्यन्तपरिवर्ताः क्रियन्ते, तदान्यत्राधीकृतमपि भोगोचितमपि दानादिनान्यस्य स्वं भवतीति स्वत्वफलानां तेषां नाबलवत्त्वम् । दानादौ पूर्वस्मिन् सत्युत्तरं दानादिकमबलमुदीच्यासाधारणस्वत्वलक्षणफलस्य पूर्वजातासाधारणपरस्वत्वोपलक्षणफलेनोत्पत्तिप्रतिबन्धात् । व्यवहारोऽप्येवमेव । *विर.६१९-६२०

(६) मिता.टीका—न्यायमूलमेवेद वचनमिति । एकग्राहितस्य दत्तस्य विक्रीतस्य वा पुनरन्यत्र आध्यादिकरणे स्वत्वमेव न सभवति इति असावेव न्यायः, एतन्मूलमेवेद वचनम् । एतन्न्यायसिद्धमेवार्थ सौकर्यायानुवदतीत्यर्थः । अथवा, न्यायस्यैव मूलमेतद्वचनम् । अनेन वचनेन आध्यादिषु पूर्वबलीयस्त्वे विहिते तद्बलादेकत्राहितादेर्वस्तुनः अन्यत्राधानादिक न घटते स्वत्वाभावादित्यसौ न्यायो निष्पन्न इत्युभयथाऽपि न्यायमूलमेवेद वचनमित्युक्तिरनुसंधेया । सुबो.

(७) एवकार उत्तरेत्यनन्तरं योज्यः, तेन पूर्वायास्तत्तुल्यबलत्व व्यवच्छिन्नम् । एव पूर्वेवेत्यत्रापीवकारो व्याख्येयः । क्वचित्तु सर्वेष्वर्थेति पूर्वा त्विति च पाठः । अत्रापवादमाह—आधौ आधीकरणे प्रातिग्रहे क्रयणे च पूर्वा तत्सजातीया बलवती । साजात्य च यथेष्टविनियोगप्रतिबन्धकत्वस्वत्वध्वसकत्वाभ्याम् । एव यत्रैकस्मिन्नाधीकरणानन्तरं परस्मिन्नाधीकरण तत्र पूर्वमाधीकरणं बलवत् । यत्र चैकेन प्रतिग्रहीते क्रीते वा परेण ग्रहादिः स्वत्वोपायः कृतः, तत्र प्रथमपरिग्रहादिर्बलवानिति पर्यवसितोऽर्थः । आध्यपेक्षया स्वत्वध्वंसको विक्रयादिः पूर्वकालीन उत्तरकालीनो वा बलवानेव स्यात् । एवं स्वामिनो यथेष्टविनियोगाप्रतिबन्धकनिक्षेपापेक्षया पूर्वकालीन उत्तरकालीनो वा यथेष्टविनियोगप्रतिबन्धक आधिर्बलवानित्यूह्यम् । वीमि.

नारदः

ऋणादिषु सर्वेषु बलवत्युत्तरा क्रिया ।
प्रतिग्रहाधिक्रीतेषु पूर्वा पूर्वा बलीयसी ॥

(१) ऋणादिषु व्यवहारपदेषु सर्वेष्वपि या या उत्तरा अन्तिमा क्रिया द्रव्यवृद्धिपरिच्छेदविषये भवति । तया तया पश्चिमा बाध्येत । सा उत्तरोत्तरा प्रमाणम् ।

* अप., पमा, सचि., व्यप्र मितावद्भावः । + शेषं मितावत् ।

* विचि., दात, चन्द्र. विरवत् ।

(१) **नास.**२।८५ वदृणा (क्रियर्णा) रा क्रिया (रोत्तरा); **नास्मृ.**४।९७; **अभा.**५० कृणा (दर्णा) रा क्रिया (रोत्तरा).

प्रतिग्रहे पुनर्येन प्रथमं ग्रामो लब्धस्तस्य प्रमाणम् । येन पश्चाल्लब्धस्तस्य न प्रमाणम् । आधिरपि यस्य पूर्वाधिस्तस्य प्रमाणम् । पश्चात्कृताधिरप्रमाणम् । क्रीतमपि येन पूर्वं क्रीतं तस्य प्रमाणम । पश्चात्क्रीतमप्रमाणम् । एवमेतेषु प्रतिग्रहाधिक्रीतेषु व्यवहारपदेषु पूर्वा क्रिया बलवतीति । अभा.५०-५१

(२) क्रिया पत्रसाक्षिभोगाः । ऋणादिष्वष्टादशस्वपि उत्तरोत्तरा बलवती । 'लिखित बलवन्नित्यमि'त्युक्त एवार्थोऽनूद्यते उत्तरविवक्षया । एवमवस्थिते 'प्रतिग्रहाधिक्रीतेषु' 'पूर्वं पूर्वं गुरु ज्ञेयमि'ति च 'भुक्तिर्बैन्यो गरीयसी'ति च तदुभयमनेन विशेषितम् । 'पूर्वं पूर्वं गुर्वि'ति प्रतिग्रहाधिक्रीतेषु । अन्यो वाऽनेन श्लोकेनाविरुद्धोऽर्थ उत्प्रेक्ष्यः । नास.२।८५

बृहस्पतिः

[1]विवादोऽष्टाद्दशोपेतः पूर्वोत्तरविशेषितः ।
व्याख्यातस्त्वधुना सम्यक् क्रियाभेदान्निबोधत ॥
पूर्वं कृता क्रिया या तु पालनीया तथैव सा ।
अन्यथा क्रियते यत्र क्रियाभेदस्तथा भवेत् ॥
विहाय करणं पूर्वं धनिको वाऽधमर्णिकः ।
कुर्यान्न्यूनाधिकं तुल्यं क्रियाभेदः स उच्यते ॥
[2]द्विकेनार्थं समादाय प्रपन्नः पञ्चकं तु यः ।
लाभं तत्र प्रमाणं स्यात्पश्चिमं तद्विनिश्चितम् ॥

पञ्चक लाभ प्रपन्न इति सबन्धः, प्रपन्नः स्वीकृतवान्, तेन यो द्विकशतलाभक्रमेण ऋण गृहीत्वा कदाचित्कार्यतया तस्मिन्नेव धने पञ्चकशतक्रमेण लाभं दातु प्रपन्नः, तस्य पश्चिममुत्तरस्यैव क्रिया प्रमाणमित्यर्थः । विर.६१९

[3]उत्तरोत्तरबन्धेन प्राग्बन्धः शिथिलो भवेत् ।
यः पश्चिमः क्रियाकारः स पूर्वाद्बलवत्तरः ॥
[4]न्यासं कृत्वा ततश्चार्थं गृहीत्वाधिं करोति यः ।
विक्रयं वा क्रिया तत्र पश्चिमा बलवत्तरा ॥

यत्र तूत्तर आधिर्न्यासं दत्वा कृतो विक्रयो वा मूल्यं गृहीत्वा कृतः, पूर्वो तु न तथा, तत्रोत्तराधिविक्रयौ बलवन्तावित्याह बृहस्पतिः—उत्तरोत्तरेति । उत्तरोत्तरबन्धेनेत्यत्र बन्धशब्दस्य क्रयेऽपि तात्पर्यमत्र तस्याप्युपसहारात्तदेतत्सर्वं दिनव्यवधाने । विर.६२०

[5]कृतं चेदेकदिवसे क्रियाधिप्रतिग्रहम् ।
त्रयाणामपि संदेहे कथं तत्र विचारणा ॥
त्रीण्येव हि प्रमाणानि विभजेरन् यथांशतः ।
उभौ चार्थानुरूपेण त्रिभागेण प्रतिग्रहः ॥

(१) अर्थानुसारेण भागद्वयं गृह्णीयातामिति शेषः । एव पूर्ववचनेऽपि ('त्रयोऽपीति' वसिष्ठवचनेऽपि) क्रियानुसारेणेत्यत्र विशेषो द्रष्टव्यः । त्रिभागेण प्रतिग्रही सबध्यते इति शेषः । प्रतिग्रह इति तु पाठे पूर्ववचनवन्निष्पद्यते इति शेषो ग्राह्यः । स्मृच.१४५

(२) त्रीण्येव प्रमाणानीति, तत्तत्क्रियाकर्तारो यथासभव तत्तद्वस्तु विभजेरन् । तत्रापि विशेषमाह उभौ चेत्यादिना, तेन तृतीयभाग प्रतिग्रहीता गृह्णीयात्, भागद्वये च एकमाधाता एक विक्रेता, हलायुधस्तु आधेरबलवत्त्वेनाधिग्रहीतुर्न्यून भागमाह । विर.६२१

वृद्धहारीतः

[6]कृते परिग्रहे चार्धौ पूर्वो वै बलवत्तरः ॥

बृहद्यमः

[7]आधौ प्रतिग्रहे क्रान्ते पूर्वा तु बलवत्तरा ।
सर्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया ॥

गृहीत्वाधि (परस्याधि कृत्वा चाधि) रत्नाकरे नारदः, **सेतु** १२८ कृत्वा धि (कृत्वोत्तर पूर्वं ततश्चाधि) क्रय (क्रिय); **विच.८७** विचिवत्, स्मृतिः; **विव्य.२६** (=) विचिवत्.

(१) **स्मृच.१४५** याधि (यादि) सदेहे (सदिग्धे); **विर.६२०**; **स्मृसा.८२** त चेदेक (ताश्चैकत्र) ग्रहम् (ग्रहाः) संदेहे (सदिग्धे); **विचि.२५८**, **सवि.२३९**, **चन्द्र.१०१** चेदेक (चैकत्र), **सेतु.९१**; **प्रका.८८** सदेहे (संदिग्धे), **समु.७६** प्रकावत्, **विव्य.२७**.

(२) **स्मृच.१४५** रन् (यु.) रूपे (सारे) ग्रहः (ग्रही); **विर.६२०**; **स्मृसा.८२** चा (वा); **विचि.२५८** त्रिभागेण (विभागेन); **सवि.२३९** स्मृचवत्; **चन्द्र.१०१**; **सेतु.९१** विचिवत्; **प्रका.८८** स्मृचवत्; **समु.७६** स्मृचवत्; **विव्य.२७**. (३) **बृहस्मृ.५।२३-२४**. (४) **बृयस्मृ.७।२४१**.

(१) **विर.६१८**. (२) **विर.६१९**.

(३) **विर.६१९**; **विचि.२५६** तद्वि (यद्धि); **सेतु.१२७**.

(४) **विर.६२०**; **स्मृसा.८२**; **विचि.२५७**; **सेतु.१२८**. (५) **विर.६२०**; **स्मृसा.८२**, **विचि.२५७** ततश्चार्थं गृहीत्वाधि (परत्राधि कृत्वा वाधि); **दात.१७५** विचिवत्, स्मृतिः; **चन्द्र** १०१ कृत्वा (दत्वा); **वीमि.२।२३** ततश्चार्थं

*

उपनिधिः

गौतमः

राजदैविकचोरादिनष्टनिक्षेपविचारः

[1]निध्यन्वाधियाचितावक्रीताधयो नष्टाः सर्वाननिन्दितान् पुरुषापराधेन ।

(१) निधिर्निक्षेपः । 'स्व द्रव्य यत्र विस्रम्भान्निक्षिपत्यविशङ्कितः' स निक्षेपः । अन्वाधिरुपनिधिः । औपनिधिकमिति स्मृत्यन्तरे प्रसिद्धम् । याचितमुत्सवादिष्वाभरणादि । अवक्रीतमदत्तमौल्यमर्धदत्तमौल्यं वा, आधिर्गोष्याधिः । एते निध्यादयो यदि पुरुषापराधेन विना नष्टा भवन्ति चोरादिभिरपहृताः सर्वास्तानिन्दितानाहुः । अदोषानाहुः । न केवलं पुत्रानेव नाभ्याभवेयुः । किं तर्हि ? येषा सकाशे निध्यादयः कृतास्तानपि नाभ्याभवन्ति । अनिन्दितेति ते यदि पूर्वं दृष्टदोषा भवन्ति तदा पूर्वमिदम् । पुरुषापराधस्तु यदि धारयितारः स्वद्रव्यवन्न रक्षयेयुः, यद्यग्निभयादौ स्वद्रव्यं गृहीत्वा निध्यादयुपेक्षेरन्स्वद्रव्यं वा गुप्त निधाय बहिर्निध्यादि स्थापयेयुः । एतस्मिन्पुरुषापराधे सति दद्युरेव ।

*गौमि.

(२) अवक्रीत भाटकगृहीत शकटादि । विर.८९

विष्णुः

निक्षेपापहारादिदोषे दण्डविधिः

[2]निक्षेपापहारी वृद्धिसहितं धनं धनिकस्य दाप्यः । [3]राज्ञा चौरवच्छास्यः । यश्चानिक्षिप्तं निक्षिप्तमिति ब्रूयात् ।

महाभारतम्

उपनिधिलिङ्गम्

[4]स जातमात्रान् पुत्रांश्च दारांश्च भवतामिह ।
प्रदायोपनिधिं राजा पाण्डुः स्वर्गमितो गतः ॥

कौटिलीयमर्थशास्त्रम्

ऋणादानादिदेशः । उपनिधिप्रत्यर्पणापवादः । उपनिधिभोगप्रणाशविक्रयाधानापहारेषु कूटत्वम् । आधावतिदेशः ।

[5]औपनिधिकम् । उपनिधिः ऋणेन व्याख्यातः । परचक्राटविकाभ्यां दुर्गराष्ट्रविलोपे वा, प्रतिरोधकैर्वा ग्राममार्गव्रजविलोपे, चक्रयुक्ते नाशे वा, ग्राममध्याग्न्युदकावाधे वा, किञ्चिदमोक्षयमाणे कुप्यमनिर्हार्यवर्जमेकदेशमुक्तद्रव्ये वा, ज्वालावेगोपरुद्धे वा, नावि निमग्नायां मुषितायां वा स्वयमुपरूढो नोपनिधिमभ्याभवेत् ।

उपनिधिभोक्ता देशकालानुरूपं भोगवेतनं दद्यात् । द्वादशपणं च दण्डम् । उपभोगनिमित्तं नष्टं विनष्टं वाऽभ्यावहेत्, चतुर्विंशतिपणश्च दण्डः । अन्यथा वा निष्पतने । प्रेतं व्यसनगतं वा नोपनिधिमभ्यावहेत् ।

आधानविक्रयापव्ययनेषु चास्य चतुर्गुणपञ्चबन्धो दण्डः । परिवर्तने निष्पातने वा मूल्यसमः ।

तेन आधिप्रणाशोपभोगविक्रयाधानापहारा व्याख्याताः ।

औपनिधिकमिति सूत्रम् । उपनिधिर्न्यासो निक्षेप इति पर्यायाः । तत्सबद्धमभिधीयते इति सूत्रार्थः । उपनिधिर्विप्रतिपत्तावृणवद् व्यवहार्य इत्यतस्तदनन्तरमस्याभिधानसगतिः । उपनिधिर्ऋणेन व्याख्यात इति । ऋण यथाधमर्णेन तत्पुत्रादिना च प्रत्यर्पणीयं, विप्रतिपत्तौ तु साक्ष्ययुयोगादिना विभावनीयं, तथैवोपनिधिरित्यतिदेशार्थः । उपनिधिरिति च आध्यादेशान्वाधीनाम-

---

* मभा. गौमिवत् ।

(१) गौध.१२।३९; व्यक.१३२ ध (द); मभा. न् पु (नपु); गौमि.१२।३९; विर.८९ ध (द); विचि.४० धि (हित) ध (द); वीमि.२।६७; सेतु.३१९ विचिवत्.

(२) विस्मृ.५।१६४ री (र्यं); स्मृच.१८०; व्यप्र. २८१; सप्र.८८ व्य: + (तत्समं दण्डं च).

(३) विस्मृ.५।१६५-१६९.

(१) भा.१।१४।१. (२) कौ.३।१२.१८मेव स्वकं ऊर्ध्वं शेषवत्

प्युपलक्षणम् । प्रत्यर्पणापवादमाह—परचक्राटविकाभ्यामिति । शत्रुसैन्येनाटविकेन च, दुर्गराष्ट्रविलोपे वा नोपनिधिमभ्यावहेत् उपनिधिं न प्रत्यर्पयेत् । प्रतिरोधकैर्वा ग्रामसार्थव्रजविलोपे चोरैर्ग्रामस्य सार्थस्य वणिक्समूहस्य व्रजस्य गवाश्वादिस्थानस्य च विलोपे, नोपनिधिमभ्यावहेत् । चक्रयुक्ते नाशे वा चक्र छत्रविशेषः तत्प्रयुक्ते नाशे वा, नोपनिधिमभ्यावहेत् । ग्राममध्याग्न्युदकावाधे वा ग्राममध्येऽग्निदाहजलप्रवाहबाधाया वा, नोपनिधिमभ्यावहेत् । किञ्चिदमोक्षधर्माणं कुप्यमनिर्हार्यवर्जमेकदेशमुक्तद्रव्ये वेति । अयमर्थः—अग्न्युदकबाधे कुप्यद्रव्यं निर्हार्यमेकदेशतो मोचयित्वा किञ्चिदवशिष्टं कुप्याशममोचयमानः कुप्यं नाभ्यावहेत् । अनिर्हार्यवर्जमिति च निर्हार्यद्रव्य एवैकदेशतो विमोक्षणस्य सम्भवो न त्वनिर्हार्यद्रव्य इति वस्तुस्थितिमात्र कथ्यते । तेनानिर्हार्यकुप्यविषये तूष्णीमवस्थानमप्यग्न्युदकबाधे नापराधायेत्युक्तप्रायम् । ज्वालावेगोपरुद्धे वेति । ज्वालावेगोपरोधवशादुपनिधिमोचनासमर्थे वा सति, नोपनिधिमभ्यावहेत् । नाग्नि निमग्नायां, मुषितायां वा चोरितायां वा सत्यां, स्वयमुपरूढः कृतात्मत्राणः, नोपनिधिमभ्यावहेत् ।

उपनिधिभोक्तेति । विना स्वाम्यनुज्ञामुपनिधिं भुञ्जानः, देशकालानुरूपं भोगवेतनं दद्यात् स्वामिने । द्वादशपणं दण्डं च दद्यात् राज्ञे । उपभोगनिमित्तं उपभोगाय गृहीतं द्रव्यं, नष्टं अन्यापहृतं, विनष्टं वा स्वरूपहानिं प्राप्तं वा अभ्यावहेत् प्रतिदद्यात् । चतुर्विंशतिपणश्च दण्डः नाशकस्य । अन्यथा वा निष्पतने उपभोगं विनधेपनिधेरन्यत्र गमने च, चतुर्विंशतिपणो दण्ड इति वर्तते । प्रेत, व्यसनगतं वा उपनिधिग्राहिणं, उपनिधिं, नाभ्यावहेत् न दापयेत् ।

आधानेत्यादि । अस्य उपनिधेः, आधानविक्रयापव्ययनेषु च आधीकरणपरस्वीकरणापलापेषु च, चतुर्गुणपञ्चबन्धो दण्डः उपनिहितं चतुर्गुणं देयं उपनिधात्रे चतुर्गुणस्य पञ्चभागो दण्डश्च राज्ञे । परिवर्तन इति । उपनिहितविनिमये, निष्पातने वा अन्यत्र सक्रामणे वा, मूल्यसमः, दण्ड इति वर्तते ।

तेनेति । उक्तेन विधानेन, आधिप्रणाशोपभोगविक्रयाधानापहाराः व्याख्याताः आधिप्रणाशोपभोगादिविषयं विधान उपनिधिप्रणाशोपभोगादिविधानेन यथोक्तेन तुल्यमित्यर्थः । श्रीमृ.

अन्वाधियाचितकावक्रीतकक्रयाविक्रयनिक्षेपेषु विशेषः, उपनिधिविषेः अतिदेशश्च ।

सार्थेनान्वाधिहस्तो वा प्रदिष्टां भूमिमप्राप्तश्चोरैर्भग्नोत्सृष्टो वा नान्वाधिमभ्यावहेत् । अन्तरे वा मृतस्य दायादोऽपि नाभ्यावहेत । शेषमुपनिधिना व्याख्यातम् ।

याचितकमवक्रीतकं वा यथाविधं गृह्णीयुस्तथाविधमेव अर्पयेयुः । भ्रेषोपनिपाताभ्यां देशकालोपरोधि दत्तं नष्टं विनष्टं वा नाभ्याभवेयुः । शेषमुपनिधिना व्याख्यातम् ।

वैयापृत्यविक्रयस्तु—वैयापृत्यकरा यथादेशकालं विक्रीणानाः पण्यं यथाजातं मूल्यमुदयं च दद्युः । शेषमुपनिधिना व्याख्यातम् ।

देशकालातिपातने वा परिहीणं संप्रदानकालिकेन अर्घेण मूल्यमुदयं च दद्युः ।

सार्थेनेति । अन्वाधिहस्तः अन्वाधिमध्वनि नयन्, वाशब्दो वाक्यभूषणम् । प्रदिष्टां निर्दिष्टां, भूमिं अध्वोत्तरावधिं, अप्राप्तः, चोरैः, सार्थेन अध्वगसङ्घेन सह, भग्नोत्सृष्टो वा मुषितविसृष्टश्च, अन्वाधिं, नाभ्यावहेत् न निष्क्रीणीयात् । अन्तरे वा अध्वमध्ये वा, मृतस्य अन्वाधिहस्तस्य, दायादोऽपि, नाभ्यावहेत् ।

याचितकमिति । याच्ञयोपयोगाय गृहीतं, अवक्रीतकं वा भाटकगृहीतं वा, यथाविधं गृह्णीयुस्तथाविधमेवार्पयेयुः । भ्रेषोपनिपाताभ्यामिति । भ्रेषो हस्त्यादिदुष्टसत्वजनितं भयं उपनिपातश्चोरादिभयं ताभ्यां, नष्टं विनष्टं वा, देशकालोपरोधि अमुकदेशान्न प्रस्थातव्यमिति वा एतावतः कालस्य न प्रस्थातव्यमिति वा देशकालोपरोधान्नष्टं विनष्टं वा, दत्तं नाभ्यावहेयुः ।

वैयापृत्यविक्रयस्त्विति । अभिधीयत इति शेषः । वैयापृत्यकराः इह पृशब्दः पठ्यते न तु वृशब्दः । व्यापृतो व्याप्रियमाणस्तस्य कर्म वैयापृत्यं कर्मणि ष्यञ् तत्कराः कर्मकरा इत्यर्थः । वैयावृत्यकरा इति वृशब्दपाठे यथा कर्मकरार्थता, तथा व्याख्यातमधस्तात् । यथादेशकालं स्वस्वकल्पितदेशकालाघनतिक्रम्य, पण्यं विक्री-

णानाः, यथाजातं यथोत्पन्नं, मूल्यं, उदय लाभ च, दद्युः पण्यस्वामिने ।

देशकालातिपातने वेति । देशातिक्रमणे कालातिक्रमणे वा स्वकृते सति, परिहीण लाभच्छेदं, सम्प्रदानकालिकेनार्घेण कल्पकालप्रसिद्धमूल्यकल्पनेन, मूल्य पण्यमूल्य, उदय च दद्युः । श्रीमू.

यथासंभाषितं वा विक्रीणाना नोभयमधिगच्छेयुः । मूल्यमेव दद्युः । अर्घपतने वा परिहीणं यथापरिहीणं मूल्यमूनं दद्युः ।

सांव्यवहारिकेषु वा प्रात्ययिकेष्वराजवाच्येषु भ्रंशोपनिपाताभ्यां नष्टं विनष्टं वा मूल्यमपि न दद्युः । देशकालान्तरितानां तु पण्यानां क्षयव्ययविशुद्धं मूल्यमुदयं च दद्युः । पण्यसमवायानां च प्रत्यंशम् । शेषमुपनिधिना व्याख्यातम् । एतेन वैयापृत्यविक्रयो व्याख्यातः ।

यथासंभाषित वेति । अमुकेनार्घेण विक्रेतव्यमिति स्वामिपरिभाषानुसारेण, कर्मकराः विक्रीणानाश्चेद्, उभय मूल्य लाभ च, नाधिगच्छेयुः, अर्थात् पण्यस्वामिनः । मूल्यमेव दद्युः मूल्य केवल पण्यस्वामिने दद्युः कर्मकराः, लाभं तु स्वय हरेयुरित्यर्थः । अर्घपतने वा परिहीण मिति । अर्घपतनवशात् किञ्चित् परिहीण यदि भवेत्, यथापरिहीण मूल्यमून दद्युः परिहीणानुरोधेन पण्यमूल्यमून पूरयित्वापयेयुः । सांव्यवहारिकेषु वेति । परपण्यक्रयविक्रयजीविषु, प्रात्ययिकेषु प्रत्ययार्हेषु, अराजवाच्येषु राजाप्रतिपिद्धेषु सत्सु, भ्रंशोपनिपाताभ्या, नष्ट विनष्ट वा पण्य, यदि भवेदिति शेषः, मूल्यमपि न दद्युः अर्थात् ते । देशकालान्तरितानां देशान्तरे कालान्तरे च विक्रेतुमर्पितानां पण्यानां, क्षयव्ययविशुद्ध क्षयः कालपरिवाससिमित्तः पण्यक्षयः व्ययः कर्मकरादिभक्तपरिव्ययस्ताभ्या परिनष्ट, मूल्य, उदय च लाभ च दद्युः । पण्यसमवायानां च प्रत्यशमिति । वणिजः स्वदत्तपण्यानि देशान्तरे विक्रीय ततः समानीतानां नानापण्यान्तराणां विषये प्रतिलाभांशं सांव्यवहारिकेभ्यो दद्युः । श्रीमू.

निक्षेपश्चोपनिधिना । तमन्येन निक्षिप्तमन्यस्यार्पयतो हीयेत । निक्षेपापहारे पूर्वापदानं निक्षेपारश्च प्रमाणम् । अशुचयो हि कारवः, नैषां करणपूर्वो निक्षेपधर्मः । करणहीनं निक्षेपमपव्ययमानं गूढमित्तिन्यस्तान् साक्षिणो निक्षेप्ता रहस्यप्रणिपातेन प्रज्ञापयेत्, वनान्ते वा मद्यप्रहवणविश्वासेन ।

रहसि वृद्धो व्याधितो वा वैदेहकः कश्चित् कृतलक्षणं द्रव्यमस्य हस्ते निक्षिप्यापगच्छेत् । तस्य प्रतिदेशेन पुत्रो भ्राता वाभिगम्य निक्षेपं याचेत । दाने शुद्धिः । अन्यथा निक्षेपं स्तेयदण्डं च दद्यात् ।

प्रव्रज्याभिमुखो वा श्रद्धेयः कश्चित् कृतलक्षणं द्रव्यमस्य हस्ते निक्षिप्य प्रतिष्ठेत । ततः कालान्तरागतो याचेत । दाने शुचिरन्यथा निक्षेपं स्तेयदण्डं च दद्यात् । कृतलक्षणेन वा द्रव्येण प्रत्यानयेदेनम् । बालिशजातीयो वा रात्रौ राजदायिकाद्दक्षणभीतः सारमस्य हस्ते निक्षिप्यापगच्छेत् । स एनं बन्धनागारगतो याचेत । दाने शुचिः, अन्यथा निक्षेपं स्तेयदण्डं च दद्यात् ।

अभिज्ञानेन चास्य गृहे जनमुभयं याचेत । अन्यतरादाने यथोक्तं पुरस्तात् ।

द्रव्यभोगानामागमं चास्यानुयुञ्जीत तस्य चार्थस्य व्यवहारोपलिङ्गनमभियोक्तुश्चार्थसामर्थ्यम् ।

एतेन मिथस्समवायो व्याख्यातः ।

तस्मात् साक्षिमदच्छन्नं कुर्यात् सम्यग्विभाषितम् ।
स्वे परे वा जने कार्यं देशकालाग्रवर्णतः ॥

निक्षेपश्चेति । भूषणादिनिर्माणार्थं कारुषु निक्षिप्यमाण स्वर्णादिक निक्षेपः, सः, उपनिधिना व्याख्यात इत्यनुवर्तते । तमिति । तं निक्षेपम् । अन्येन निक्षिप्तं, अन्यस्यार्पयत, तदन्यस्मै ददानस्य कारोः, हीयेत द्रव्यहानिर्भवति साक्षान्निक्षेप्तृहस्ते स पुनर्देय एवेत्यर्थः । निक्षेपापहारे, पूर्वापदान निक्षेपारश्च प्रमाणं कारुपूर्वचरित निक्षेप्तृसुजनता च पर्यालोच्य निर्णयः कर्तव्य इत्यर्थः । कुत एव, तत्राह—अशुचयो हीति । हि यतः, कारवः अशुचयः सत्यहीनाः । एषा, निक्षेपधर्मः निक्षेपव्यवहारः, करणपूर्वो न साक्षिलेख्यपूर्वो न क्रियते विश्वासादेव केवलात् क्रियते । करणहीनमिति । साक्ष्यादिरहितं निक्षेप, अपव्ययमानं अपलपन्तं कारु, गूढमित्तिन्यस्तान् साक्षिणः

निक्षेप्ता, रहस्यप्रणिपातेन रहस्ये प्रार्थनपूर्वकश्रावणेन, प्रज्ञापयेत् प्रबोधयेत् । वनान्ते वा, मद्यप्रहवणविश्वासेन मद्यगोष्ठीरचनविस्रम्भेण, रहसि साक्षिणः प्रज्ञापयेदिति वर्तते । प्रकर्षेण हूयते दीयते पानभोजनादिकमस्मिन्निति प्रहवणं गोष्ठीरचनमुच्यते ।

रहसीति । विजने, वृद्धो व्याधितो वा, वैदेहको भूषणवणिक्, कश्चित् कृतलक्षणं चिह्नविशेषयुक्तं द्रव्यं, अस्य कारोः, हस्ते निक्षिप्य अपगच्छेत् म्रियेत । तस्य प्रतिदेशेन वचनेन, पुत्रो भ्राता वा अभिगम्य निक्षेपं याचेत, चेदिति शेषः, दाने शुद्धिः तदा तदर्पणे, कारोरानृण्यं भवति । अन्यथा तदपलापे, निक्षेप स्वामिने, स्तेयदण्डं च राज्ञे, दद्यात् ।

कृतलक्षणेन वा द्रव्येण प्रत्यानयेदेनमिति । स्वनिक्षेपद्रव्यस्य यल्लक्षणं पूर्वकृतं तद्दर्शनेन वा तदुपलम्भेन वा कारुगृहान्निक्षेपं प्रत्याहरेत् । बालिशजातीयो वेति । मूर्खप्रायो जनः रात्रौ, राजदायिकाङ्क्षणभीतः राजदायिना राज्ञेऽर्पयिष्यता राजामात्यादिना यत् काङ्क्षणमभिलषणं तेन हेतुना भीतः, सारं रत्नादि प्रशस्तं वस्तु, अस्य कारोः, हस्ते निक्षिप्य अपगच्छेत् । स निक्षेप्ता, बन्धनागारगतः राजदाय्याकाङ्क्षितसारद्रव्यानुपहरणात् कारणान्तराद् वा कारागारं प्राप्तः, एन सारं याचेत । चेदिति शेषः । दाने तदा प्रत्यर्पणे शुचिः कारुः ।

अप्रत्यर्पितनिक्षेपादिकस्य कारोर्मरणे त्वाह—अभिज्ञानेन चेति । निक्षेपतद्ग्राहिकारुलक्षणाद्यभिज्ञानकथनेन, अस्य कारोः, गृहे जनं तत्पुत्रादिं उभय निक्षेपं सारं च याचेत । अन्यतराऽदाने अन्यतरानर्पणे, यथोक्त पुरस्तात् पूर्व यथोक्तं तथा कुर्यात् । निक्षेपं स्तेयदण्ड च दद्यादित्यर्थः ।

सत्यासत्यनिश्चयार्थं धर्मस्थकरणीयमाह—द्रव्यभोगानामिति । तद्गृहोपभुज्यमानद्रव्याणां, आगमं च, अस्य निक्षेपाद्यपलापकस्य अनुयुञ्जीत धर्मस्थः । तस्य चार्थस्य अनुयुक्तनिवेदितस्य चार्थस्य, व्यवहारोपलिङ्गनं व्यवहारैर्न्यायैः सत्यासत्यत्वानुमानं, कर्तव्यमिति शेषः ।

अभियोक्तुश्चार्थसामर्थ्यं अमुकद्रव्यनिक्षेताहमिति वदितुस्तथाविधद्रव्यनिक्षेपणयोग्यत्वं च, विभावनीयमिति शेषः ।

तस्मादिति । तस्माद् वस्त्वपलापसंभवात् सत्यासत्यनिर्णयस्य दुःसाधत्वाच्च, कार्यं, साक्षिमद्, अच्छद्मं, स्वे परे वा स्वजने परजने च, देशकालाभ्रवर्णतः देशतः कालतः संख्यातो रूपतश्च, सम्यग् विभाषितं विविच्य कथितं कुर्याद् वस्त्वपलापस्य परिहारार्थं परिज्ञानार्थं च । श्रीमू.

मनुः

निक्षेपस्थापनविधिः

कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि ।
महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद्बुधः ॥

(१) प्रख्याताभिजनः कुलजः । यस्य पितृपितामहा विद्वांसो धार्मिका महापरिग्रहाः स्वकुलाशं निगृह्यैव नाकार्ये प्रवर्तन्ते । स हि स्वल्पामपि गर्हणां सोढुमसमर्थः । नितरां न च निन्दन्ति जनाः । वृत्तं शीलमाचारो जनापवादभीरुता स्वाभाविकं संपन्नः तद्युक्तः । धर्मज्ञस्तु स्मृतिपुराणेतिहासाभ्याससजातत्तदर्थावबोधः । सत्यवादी बहुकृत्वः कार्येष्वदृष्टाकार्ये संभाव्यमानो वृत्ताभिधानः । महापक्षः सुहृत्स्वजनराजामात्याद्यनुगृहीतमहिमत्वेन दुष्टराजाधिकारिणा गम्यो न भवति । धनी स्वधनरक्षार्थमदृष्टभयाच्च न परद्रव्यापहारणे वर्तते । अस्ति मे पर्याप्तं धनं किं परकीयेन, कथंचिज्ज्ञाते दण्ड्यः स्यामिति । आर्यो धर्मानुष्ठायी ऋजुप्रकृतिर्वा । निक्षिप्यमाणं सुवर्णादिद्रव्यं कर्मसाधनेन यत्नोच्यते । निक्षिपेद्रक्षार्थं स्थापयेद्बुधः । एवं निक्षिपन् प्राज्ञो भवति । अन्यथा मूर्खः संपद्यते । सुहृद्भूत्वोपदिशति दृष्टं नायमदृष्टार्थोऽदृष्टकादिवदुपदेशः । ईदृशि पुरुषे निक्षिप्तस्य न विप्रत्ययो भवति, एवविधे न निक्षिप्तमनेनेति शङ्का न भवति । यस्तु नम्रकितवपानशौण्डादिः स केनचिदाकृष्टोऽपि सत्पित्राऽस्य हस्ते निक्षिप्तं मया चेति न शङ्कास्पदं सुवर्णादेर्महतो धनस्य निक्षेपधारक इति (?) काकणी मामिकेति युज्यमानो भवत्येव (?) । +मेधा.

+ गोरा., ममु., मच. मेधावत् ।

(१) **मस्मृ.**८।१७९; **व्यक.**१३०; **स्मृच.**१७८; **विर.** ८५; **पमा.**२८० यें (ते); **विचि.**३६; **स्मृचि.**१४; **नृप्र.** २३ यें (ते); **सवि.**२६५; **वीमि.**२।६५ पू.; **व्यप्र.**२८०; **विता.**५५४; **सेतु.**१३०; **समु.**८७ सविवृत.

(२) महापक्षे बहुबन्धौ । आर्ये उत्तमदेशजाते । मवि.

(३) निक्षेपग्रहणमुपलक्षणम् । व्यप्र.२८०

निक्षेपपालनप्रतिदानप्रत्यादानानि

यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः ।
स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः ॥

(१) यथेति । यादृशेन प्रकारेण समुद्रमक्षमुद्रं ससाक्षिकमसाक्षिकमित्येवमादि स तथैवेति । सोऽर्थो निक्षिप्तस्तथैव ग्रहीतव्यो, यथा दायो दीयते निक्षिप्यते तथा गृह्यते । यत्रैतन्निश्चित भवति सर्वकालमेवास्य हस्ते समुद्रयित्वा स्थापयति । तत्र विप्रतिपत्तावमुद्रिते लब्धे धारणको यदि ब्रवीति नैष मुद्रयति निक्षिप्य मे बलाद्गच्छति तत्रैवं शङ्कास्पदं नीयते । प्रमाणान्तरात्प्रायशो मुद्रणमन्यदा तु मुद्रानाशे कियदपहारितमिति परिमाणविशेषज्ञानाय प्रमाणान्तरं व्यापारणीयम् । राजा मुद्रापह्नवादेव सामान्यदण्डेन दण्डनीयः । निक्षेपदण्डस्तु द्रव्यपरिमाणे निश्चिते द्वितीयः । ननु च सर्वापह्नव एव विभावितो जित एव युक्तः । सत्यम् । यत्राविनाभावसिद्ध, यथा मुषिते ग्रामे देवदत्तोऽभियुज्यते, त्वयाऽन्यैश्चौरैः सहामुष्मिन्नहनि स ग्रामो हत इति, स आह नैव तस्मिन्नहनि त ग्राममहमगमं तत्र साक्षिभिरुक्त दृष्टं तस्मिन्नहनि, तत्र यन्मुष्ट तत्तु न दृष्टं, तत्र देवदत्तेन मेषोऽप्यपह्नुतस्तदहर्ग्रामसनिधानसिद्धेः, स्फुटे च कारणान्तरे संनिधावनुपलभ्यमाने सनिधानदेशदेशाचौरत्वमपि युक्तमनुमातुम् । इह तु प्रमादनष्टाना नराणा मुद्रितनिक्षिप्तममुद्रितमेव नीयते । यथा दायस्तथा ग्रहः । को मेऽभियोगावसर इत्यनया बुद्धया सभवत्यपह्नवः । न हि शक्नोत्यनुमातुं, अथापि कथञ्चिदनुमापयेत्, परिमाणं तु न विना प्रमाणान्तरं निक्षेतृवचनादेव सिध्यतीति । युक्तो दिव्यादितो निश्चयः । सर्वथा य एकदेशे एकदेशान्तरमन्तरेण न संभवति तत्रैवैकदेशपराजित इति निश्चयः । *मेधा.

(२) यथा दायः अंशः तथा ग्रहः ग्रहीतुं योग्यो ग्रहः निक्षेपः । भाच.

मिथो दायः कृतो येन गृहीतो मिथ एव वा ।
मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः ॥

(१) यो यथा निक्षिपेदित्यनेन निक्षेपविधिरयमुक्त्वा अन्येषु कार्येषु अनेन प्रतिपाद्यते । ऋणादानोपनिधिविक्रयाद्यपि येन यादृशेन प्रकारेण कृत तादृशेनैव प्रत्यर्पणीयम् । रहसि कृतस्य राजकुलेऽशमार्गणादिना प्रकाशन न कर्तव्यम् । तेन स्वहस्तलेख्येन ऋणे गृहीते न राजकुलेऽश दाप्यते । उत्तमर्णवर्नन क्षपणीयम् । अनेनैव निक्षेपेऽपि सिद्धे तत्र पुनर्वचन नित्यार्थम् । तेन निक्षेपादन्यत्र रहसि कृतस्याऽपि विप्रतिपत्त्याशङ्काया प्रकाश प्रतिदान कदाचिदस्ति । अथवेहाप्रकाशकृतस्य प्रकाशीकरण निषिध्यते । तत्र त्वन्योऽर्थः समुद्रोऽसमुद्र इत्यादि तेनापौनरुक्त्यम् । मिथःशब्दो रहसि विज्ञेयः । अथवा परस्परं मिथः, सर्व कार्य द्वाभ्या साध्य दानादि परस्परमेव क्रियत इति । पुनर्वचन तृतीयप्रतिषेधार्थम् । दायशब्दः सामान्यशब्दो निक्षेपादन्यानपि विक्रयादीनाह । मेधा.

(२) रहसि येन निक्षेपोऽर्पितो निक्षेपितः । निक्षेपधारिणाऽपि रहस्येव गृहीतः, स निक्षेपो रहस्येव प्रत्यर्पणीयः । न प्रत्यर्पणे साक्ष्याद्यपेक्ष्यं यस्माद्येन प्रकारेण दान तेनैव प्रत्यर्पण इति निक्षेपधारिनियमार्थं, प्रदातव्य इति यो यथा निक्षिपेद्धस्ते इति इद निक्षेतुर्नियमार्थं, ग्रहीतव्यश्रवणात् आधिक्ये सति यदस्य श्लोकस्य प्रति (?) विधिविषयत्व व्याख्यातं सामान्यविशेषं तावत् व्याख्यानं वा केषाचित्तच्छिष्टैः परीक्ष्यम् । +गोरा.

---

(१) **मस्मृ.**८।१८०, **व्यक.**१३१ मानवः (वा नरः) ग्रही (गृही) क्रमेण बृहस्पतिः; **स्मृच.**१८१ ग्रहीतव्यो (गृहीता स्यात्); **विर.**८६; **पमा.**२८१; **नृप्र.**२३-२४; **सवि.**२६९; **व्यप्र.**२८५; **विता.**५५६ ग्रही (गृही); **समु.** ८८.

१ शाऽपह्न. २ ना. ३ य. ४ ग्यो.

* गोरा., स्मृच., ममु, पमा., सवि., मच., व्यप्र., नन्द. मेधावत् । + ममु. गोरावत् । मवि., विर., मच., व्यप्र., नन्द., भाच., गोरावद्व्याख्यार्थः ।

(१) **मस्मृ.**८।१९५; **व्यक.**१३१ क्रमेण बृहस्पतिः; **विर.**८६ येन (यस्तु), **व्यप्र.**२८५; **समु.**८८-८९ वा (च) प्र (स).

१ (एकदेशे०). २ शान्तरेण. ३ क्षिप्तवि. ४ क्तो.

समुद्रे नाप्नुयात् किञ्चिद्यदि तस्मान्न संहरेत् ॥

(१) समुद्रे निक्षेपेऽन्यदप्यस्मिन्भाण्डे द्रव्यमभून्नाशितं कृमिभिरित्यादिकं पर्यनुयोगं नाप्नुयान्निक्षेपधारी। तत्र धारणकस्य एवं मूषकादिनाशे द्रष्टव्यम्। यदि दारुमये भाण्डे वस्त्रादि स्थापितं तीक्ष्णदशनैर्मूषकैर्दारु भित्त्वा भक्ष्येत न निक्षेपधारिणो दोषः। तत्रापि वासनपरिवेष्टितः स्थूलपोट्टलको मुद्रितो यदि निक्षिप्येत यत्तदीये दारुभाण्डे नैव माति[1] तदा बहिर्मूषकादिभक्षितेऽपि हि न दोषः। यदि चैतन्निक्षेप्तुर्ज्ञान भवति, धारकेण परिभाषित न मम भाण्डमन्यदस्ति, चरित्रज्ञो वाऽस्य निक्षेप्ता कदाचित्प्रत्यासन्नो भवति। मेधा.

(२) मुद्रिते पुनः प्रत्यर्पिते निक्षेपधारी न किञ्चिद्दोषजातं प्राप्नुयाद्यदि तस्मादश्रवणप्रतिमुद्रादिना न किञ्चिदपहरेत्। *गोरा.

(३) समुद्रे मुद्रासहिते प्रत्यर्पिते नाप्नुयात् किञ्चिदपहरणशङ्कादि। तथा असमुद्रेऽपि। मवि.

[2]निक्षेपोपनिधी नित्यं न देयौ प्रत्यनन्तरे।
नश्यतो विनिपाते तावनिपाते त्वनाशिनौ ॥

(१) [3]प्रत्यनन्तरे उत्पत्यनन्तर उच्यते, निक्षेप्तुः पुत्रो भ्राता भार्या वा यस्य निक्षेप्तुर्द्रव्ये स्वाम्यमस्ति। भार्यायास्तावत् स्वाम्यमुक्तमेव पुत्रस्यापि पैतामहे भ्रातुश्चैकधनस्य। तत्र तेषा कश्चिद्याचेन्निक्षेप्तर्यसंनिहिते देहि नोऽस्माकीनमेतदिति। तत्र कश्चिदनया बुद्ध्या दद्यात् साधारणमेतत् एकेन निक्षिप्तमपरेण नीतमिति को दोष इति। अत उच्यते। न देयौ निक्षेपोपनिधी प्रत्यनन्तरे। अर्थवाद हेतुसरूपमाह। नश्यतो विनिपाते तौ। विनिपातोऽन्यथात्व प्रत्यनन्तरस्य देशान्तरगमनादि। तस्मिन् सति तौ हीयेते। यदि तेन नीत्वा निक्षिप्तुः न दत्त तदा तेन पर्यनुयुक्तस्य धारणकस्य किमुत्तरं त्वदीयेन भ्रात्रैतद्धनं साधारणस्वामिना नीतमिति, नैतदुत्तरम् 'यथा दायस्तथा ग्रह' इत्युक्तम्। येनैव निक्षिप्तं स्वामिनाऽस्वामिना वा तस्मा एव देय तस्येवायं प्रपञ्चः। यदि तु प्रत्यनन्तरो विक्रियां न गच्छेत्तदा तद्दानेऽपि न दोषः। तदाह अनिपाते त्वनाशिनौ। तत्र ह्यस्त्युत्तरं, आनाय्य तस्मादर्पयामि। प्रत्यनन्तरेण नीते विनिपाते च तस्य, निक्षेप्ते याचमानाय स्वधन दातव्यमिति श्लोकार्थः। *मेधा.

(२) उपनिधिर्भाण्डादिस्थः समुद्रः। निक्षिप्तो निक्षेपस्त्वमुद्रः। उपनिधिपद च याचितायुपलक्षणम्। अनाशिनौ प्रत्यर्पणीयौ केवल त्वत्पुत्रे दत्तमिति विभाव्यमेव। ×मवि.

(३) निक्षिप्यते इति निक्षेपः मुद्राङ्कितमगणितं वा यन्निधीयते स उपनिधिः। ×ममु.

स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे।
न स राज्ञा नियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः ॥

(१) जीवतस्तस्य[3] निक्षेप्तुः प्रत्यनन्तरदान नास्तीत्युक्तम्। मृतस्य तु यस्तद्धनमस्तीत्यविजानते स्वयं दद्यान्न स व्यवहारलेख्यनादिक्लेशनीयोऽन्यदप्यस्ति न वेद वेति। यदि तस्याभविष्यदधिकमिदमिव तदपि अदास्यदिति न क्लिश्यते। अत्राप्याशङ्का यदि न निवर्तेत महाधनोऽसावभून्न चान्येन सम भुज्यते। प्रमाणान्तरं निश्चयाय विचारणीयम्। विषाग्न्यादिभिः शपथैर्नार्दनीयः। धटकोशसत्यतण्डुलास्तु न विरुध्यन्ते। न हि ते अतिक्लेशकराः। साक्ष्यभाव इत्यत्र द्वितीयो न्यायः। यश्च तयोर्न्यासः स इहापि द्रष्टव्यः। +मेधा.

(२) अनेन वचनेन वचोभङ्ग्या स्थापके मृते प्रत्यनन्तरे प्रत्यर्पण ग्राहकेण कार्यमित्युक्तम्। अयाचि

---

* ममु., मच., व्यप्र., भाच. गोरावत्।

(१) **मस्मृ**.८।१८८; **व्यक**.१३१; **स्मृच**.१७९ मुद्रे (मुद्र); **विर**.८६; **पमा**.२८३; **व्यप्र**.२८२,२८५, **समु**.८८.

(२) **मस्मृ**.८।१८५, **गोरा**. (नश्येतां विनिपाते वाऽविनिपाते त्वनाशितौ), **व्यक**.१३१, **विर**.८७, **समु**.८९ उत्तरार्धे (न श्रुतोऽविनिपाते तौ निपाते त्वविनाशितौ).

१ त्रि. २ ब्रो. ३ (प्रत्यनन्तरे०). ४ यावन्नि. ५ पत.

* गोरा., विर., मच., नन्द., भाच. मेधावत्।

× शेषं मेधावत्। + गोरा., मवि., ममु., विर., मच., नन्द., भाच. मेधागतम्।

(१) **मस्मृ**.८।१८६ ग. पुस्तके नियो (ऽभियो); **स्मृच**.१८२ नियो (ऽभियो); **विर**.८७ स्मृचवत्; **विचि**.३७, **स्मृचि**.१४-१५ स्मृचवत्, **वीमि**.२।६७; **व्यप्र**.२८६ स्मृचवत्; **व्यम**.८५ स्मृचवत्, **सेतु**.१३१ स्मृचवत्, **समु**.८९ स्मृचवत्; **विव्य**.३२

१ व्यक. २ मानशत. ३ स्मानिक्षे.

तेनार्पणमप्यवत्यभावदोषपरिहारार्थत्वात् 'भूषणं न तु दूषणम्' इत्यभिसंधायोक्तम्—स्वयमेवेति । प्रत्यनन्तरे कालहीनमयाचितेन न देयं भावदोषापत्तेः । प्रत्यनन्तरबहुत्वे तु नैकस्मिन्प्रत्यनन्तरे देयम् । सर्वप्रत्यनन्तरसंनिधौ देयम् । तथा सति निक्षेप्तुर्बन्धुभिः प्रत्यनन्तरभूतैरभियोक्तव्यो न भवति । *स्मृच.१८२

राजदैविकचोरादिनष्टनिक्षेपविचारः

[1]चौरैर्हृतं जलेनोढमग्निना दग्धमेव च ।
न दद्याद्यदि तस्मात्स न संहरति किञ्चन ॥

(१) चौरास्तु वेदिता अवेदिता वा सुरङ्गभिदादिना यदि मुष्णीयुः, कृतरक्षासंविधाने धारणिके स्वामिन एव नाशः । जलेनोढमुदकेन देशान्तरं नीतम् । मेधा.

(२) चौरैरित्यादि राजदैवोपघातोपलक्षणम् । किञ्चन अल्पमपि यद्यसौ न संहरति न गृह्णाति । एतेनाल्पस्यापि हरणे निक्षेपो दैवादिनष्टोऽपि देय इत्युक्तम् । अत्र च यथाशक्तिरक्षणे क्रियमाणे दोषाभाव उक्तो न त्वक्रियमाणेऽपीत्यर्थसिद्धत्वान्नोक्तम् । मवि.

निक्षेपस्य तदपह्ववादेश्च प्रमाणनिरूपणम्

[2]निक्षेपस्यापहर्तारमनिक्षेप्तारमेव च ।
सर्वैरुपायैरन्विच्छेच्छपथैश्चैव वैदिकैः ॥

(१) हरति यो निक्षिप्तमसाक्षिक, योऽप्यनिक्षिप्य नीत्वा वा याचते तमन्विच्छेत् । अन्वेषणा तत्वपरिज्ञाने यत्नः सर्वप्रमाणव्यापारेण, उपायाः प्रमाणानि सामादयो वा । तेन चलितवृत्तस्याप्रतिपद्यमानस्य ताडनबन्धनाद्यपि महति धने चोरवत्तत्त्वप्रतिपत्त्यर्थं प्रयोज्यम् । न तत्वानिश्चये निग्रहः । वैदिकग्रहण स्तुत्यर्थम् । मेधा.

(२) वैदिकैः वेदोक्तैरग्न्यादिभिः । मवि.

अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकम् ।
विचार्य तस्य वा वृत्तं साम्नैव परिसाधयेत् ॥

(१) तद्वस्तु धनानन्तरसद्भावलक्षणवाक्छलादिपरिहारेणैव प्रीतिपूर्वेणावक्रगतिदिव्यादिदानेन निश्चिनुयात् । तस्य वा निक्षेपधारिणः शीलमवेक्ष्य धार्मिकोऽयमिति ज्ञात्वा सामादिप्रयोगेणैव प्रतिनिश्चिनुयात न दण्डादिना दिव्यैर्वा । ×गोरा.

(२) अन्वेषणा निक्षेपादिरस्मिन् जनेऽस्तीत्यवधारणम् । स्वतस्तदच्छलेनैव भूतानुसरणेनैव कार्यं न छलानुसारेण परिसाधनं ग्राहकसकाशादादान तत्सद्वृत्तग्राहकविषये साम्नैव प्रियपूर्ववचसैव कार्यं, न भयदर्शनादिना । वृत्त विचार्य दुर्वृत्तग्राहकविषये तु छलानुसारेण वाऽन्विच्छेद्भयदर्शनानुपायान्तरेण छलादिना वा ऋणादानप्रकरणोक्तेन परिसाधयेदित्यस्मादेव वचनादवगम्यते । तथा सद्वृत्ते छलादिप्रयोगवच्छपथेन शोधनस्याप्यनुचितत्वम् । ग्राहके तु मृते पश्चाद्यदधीनमुपनिध्यादिजातं तेनैव स्थापके प्रत्यनन्तरे वा प्रत्यर्पणीयमित्येतदतिस्थूलत्वात् स्मृतिकारैरुपेक्षितमित्यस्मरणकारणमुन्नेयम् । यदि ग्राहकवदसौ स्वयं न ददाति तदा स्थापकः प्रत्यनन्तरो वा पूर्वोक्तमार्गेणान्विच्छेत् । संप्रतिपन्नं पूर्वोक्तप्रकारेण परिसाधयेत् । एतदपि स्मृतिकारैरनुक्तमूहेनापि ज्ञातुं शक्यत्वात् । *स्मृच.१८२

(३) अन्यथा धारिणः स्वतो लाभाद्यभावात्कोऽपि निक्षेपधारी न स्यादिति भावः । मच.

[2]निक्षेपेष्वेषु सर्वेषु विधिः स्यात्परिसाधने ॥

(१) निक्षेपेष्वपच्यमानेष्वनन्तरोक्तो विधिः 'साक्ष्यभाव' इत्यादिः परिसाधनार्थो विज्ञेयः । ÷मेधा.

(२) निक्षेपेषु निक्षिप्तेषु याचितान्वाहितनिक्षेपादिषु मवि

---

* व्यप्र. स्मृचवत् ।

(१) **मस्मृ.**८।१८९ च (वा); **अप.**२।६६; **व्यक.**१३१; **स्मृच.**१७९; **विर.**८८; **पमा.**२८२; **विचि.**३७; **चन्द्र.**३१-३२; **वीमि.**२।६७ नोढं (भग्नं); **व्यप्र.**२८२ च (वा); **सेतु.**१३१; **समु.**८७-८८; **विव्य.**३२ कात्यायनः ।

(२) **मस्मृ.**८।१९०; **स्मृच.**१८१; **पमा.**२८५, **स्मृचि.**१५; **व्यप्र.**२८४; **समु.**८९.

१ व्यपमोघ. २ णा म. ३ पा.

× ममु. गोरावत् ।

* व्यप्र. स्मृचवत् । ÷ गोरा., ममु. वाक्यार्थो मेधावत्

(१) **मस्मृ.**८।१८७; **गोरा.** (विचार्य तस्य वा देयं साम्नैव परितोषयन्); **व्यक.**१३३; **स्मृच.**१८२; **विर.**९४ वृत्त (वृद्धि); **मूप्र.**२४ विरवत् ; **व्यप्र.**२८६; **समु.**८९.

(२) **मस्मृ.**८।१८८ क., ख., ग. पुस्तकेषु त्परि (स्वरि) इति पाठः; **समु.**८९.

(३) विधिः सामान्यव्याजरूपः। मच.

यो निक्षेपं याच्यमानो निक्षेप्तुर्न प्रयच्छति।
स याच्यः प्राड्विवाकेन तन्निक्षेप्तुरसंनिधौ ॥

(१) व्यत्यस्तक्रमोऽयं श्लोकः समाम्नाये पठ्यते। प्रथममस्यार्धश्लोकं पठित्वा साक्ष्यभाव इति पठितव्यम्। ततः 'स याच्यं' इति एव पाठो युक्तः। तथा ह्यर्थसङ्गतिर्भवति। साक्ष्यभावादिष्वेषु प्राप्तेषु वचनमिदम्। यथा चर्णादानादिषु साक्ष्यभावसमनन्तरमेव दिव्यानि दीयन्ते न तद्वदत्र। किं तर्हि चरैरस्य वृत्तमनुचारयेत्। तत्र यदि निपुणतश्चार्यमाणो न क्वचिद् वृत्ते स्खलति तदा न शपथैरर्दनीयः। अथाप्यत्र प्रमाद्यति तदा निक्षेपहरणसंभावनाऽपि युक्तैव। तदा च दिव्यैः परिशोधनीयः। न पुनरेकनिक्षेपहरणेनापरनिक्षेपहरणं सिध्यति। कदाचिद्गरीयसा प्रयोजनेनैकमपहृत्य कृतप्रयोजन उत्पन्नानुशयो वाऽन्यस्य समर्पयति। अतोऽयं श्लोकसंघातो झटिति निक्षेपधारणकस्य शपथनिवृत्त्यर्थो न पुनः प्रमाणोपन्यासः। न च प्राड्विवाकनिक्षेपहरणे राजदण्डवदनिश्चितापरनिक्षेपहरणोऽपि प्रथमाभियोक्तुर्दापयितुं युक्तः। अनिश्चिते हि हरणे दाप्येत यदि शास्त्रेण तदा निर्णयार्थं व्यवहारशास्त्र स्यात्। ततश्च हेतुभिर्निर्णयः कर्तव्य इति विरुध्यते। तस्मान्न शास्त्रीयोऽयमर्थो न प्रमाणप्रसिद्धो न च लौकिकी व्यवस्थेति। साक्ष्यभाव इत्यायुक्तेन प्रकारेणान्यपरतया नेयम्। मेधा.

(२) स निक्षेपधारी प्राड्विवाकेन राजस्थापितेन पुंसा याच्योऽस्मै तदेहीति। असनिधौ स्थलान्तरे। मच.

साक्ष्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः।
अपदेशैश्च संन्यस्य हिरण्यं तस्य तत्त्वतः ॥

(१) पदार्थयोजनामिदानीमनुसरामः। 'स याच्यः प्राड्विवाकेन तन्निक्षेप्तुरसनिधौ' येन रहसि स्थापित साक्षिष्वसत्सु निक्षेप्त्रा तस्य याचमानस्य धारणवं यद्यपह्नुते न त्वया किञ्चिन्निक्षिप्तमिति, ततो निक्षेप राजाज्ञापितो न निक्षेपधारिण आकारं दर्शयेत्। कि तर्हि कुर्यात्। प्रणिधिभिश्चारैहिरण्यमात्मीय सुवर्ण रूप वाऽन्यस्य सन्यस्य निक्षिप्य याचितव्योऽर्थनीयः द्वितीय निक्षेप प्राड्विवाकेन। प्राड्विवाकग्रहणं निर्णयाधि कृतपुरुषोपलक्षणार्थम्। किं साक्षादेव याचितव्यं नेत्याह। प्रणिधीना मुखेन। यैरेव न्यस्त वयोरूपसमन्वितै वयसा समन्विता येन बाला न भवन्ति, तेषा हि परै प्रेरिताना मद्यज्ञनार्थो न्यास इति सभाव्यते। परिणत वयोभ्यस्तु नाशङ्का भवति। एव रूपसमन्वयं व्याख्येयः। रूपमेव कस्यचित्तादृश भवति यस्य दर्श नादेव चापल प्रतिभाति। तथा च रूपमेतद्याचकं 'भगवन्दीतरागतामू' इति तेनैव तदुक्त भवति तादृशाः प्रणिधयः कर्तव्याः येषा मद्यज्ञनार्थोऽयमुपक्रम इति नाशङ्कते धारणकः। अपदेशैः सव्याजैर्निक्षेप कारणैः राजोपद्रवग्रामगमनादिभिः। अनेन हेतुन त्वयि सप्रति निक्षिप्तामीत्यनृतसंभवात्कारणकथनमप देशः। एतच्च सर्वं प्राड्निक्षेप्तुरसंनिधौ कर्तव्यम्

मेधा

(२) प्राड्विवाकस्यापि प्रार्थनयाऽलब्धेऽप्युपायान्तर माह—साक्ष्यभाव इति द्वाभ्याम्। मच.

स यदि प्रतिपद्येत यथान्यस्तं यथाकृतम्।
न तत्र विद्यते किञ्चिद्यत्परैरभियुज्यते ॥

(१) स यदि निक्षेपधारी यदि प्रतिपद्येत वाढमस्ति गृहाणेत्यङ्गीकृत्य दद्यात्। यथान्यस्तं तथा कृतं समुद्रं अमुद्र यथाकृत वस्त्रादिसवर्तितममुद्रितमन्यद्वा अलङ्का रायनुपभुक्त परिमलशून्य गृहमुद्रया स्वचिह्नेन स्थापितम्। तादृशमेव चेद्दद्यान्न तत्र विद्यते किञ्चित्सत्य यत्परैः पूर्ववेदिकैरभियुज्यते एतेनास्माकीनः साक्ष्यभावान्निक्षेपोऽपह्नूयते इति। यथान्यस्तं यथाकृतमिति गूढागूढचिह्नकृतेन भेदः। अथवा ग्रहीतुर्निक्षेप्तु-

(१) मस्मृ.८।१८१; अप.२।६७ मानो निक्षेप्तुः (मान निक्षेप्त्रे), व्यक.१३३ याच्यः (वाच्यः), विर.९४; व्यप्र. २८५, समु.८९; भाच.व्यकवत्.

(२) मस्मृ.८।१८२; व्यक.१३४; विर.९४ तस्य (तत्र); समु ८९.

१ रैदहना. २ विकल्पितः. ३ सिद्धौ. ४ नेया.

(१) मस्मृ.८।१८३, अप.२।६७ कृतम् (ऋणम्); व्यक. १३३; विर.९४ त्परैर(त्परेण); व्यप्र.२८५ विरवत्; समु. ८९.

१ (स०). २ राज्ञोप.

व्यापारभेदेन भेदः । यथाकृतं यथागृहीत निर्विकल्पमविलम्बं च गृहीतं, तथैव प्रतिदातव्यं, प्रतिदाने यत्र कालग्रहणं न क्रियेत इत्यर्थः । मेधा.

[1]तेषां न दद्याद्यदि तु तद्धिरण्यं यथाविधि ।
द्वयं निगृह्य दाप्यः स्यादिति धर्मस्य धारणा ॥

(१) तेषां प्राड्विवाकप्रयुक्तनिक्षेप्तृणा यदि द्रव्यं निक्षिप्तं न दद्यात्, यथाविधीति यथाकृतपदेन व्याख्यात, स धारणकोऽवष्टभ्य राजपुरुषैरुभयमर्थिनो राजनिक्षेपं च दाप्यः । इति धर्मस्य धारणा व्यवस्था । तात्पर्यमत्र व्याख्यातम् । *मेधा.

(२) तेषामभियोक्तृणा तन्मूल्यहिरण्यमभियोक्तृभ्यो दाप्यम् । द्वयमपि द्विगुणं निगृह्य दण्डयित्वा ।
×स्मृच.१८१

(३) 'यो निक्षेपं' इत्यादिश्लोकचतुष्टयस्य चेदश एव पाठक्रमो मेधातिथिभोजदेवादिभिर्निश्चितः । गोविन्दराजेन तु 'साक्ष्यभावे प्रणिधिभिः' इति श्लोकोऽन्ते एव पठितः । तत्र च नार्थसङ्गतिः न वा वृद्धाम्नायादरः । मनु.

निक्षेपाद्यपहारादिदोषे दण्डविधिः

[2]यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते ।
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् ॥

* गोरा., मवि., मनु , विर., नन्द., भाच. एषा ' यो निक्षेपमि'त्यारभ्य ' तेषां न ' इत्यादि (मस्मृ.८।१८१-१८४) श्लोकचतुष्टयस्यार्थो मेधावत् । × व्यप्र. स्मृचवत् ।

(१) **मस्मृ.**८।१८४ क., ग.,घ.पुस्तकेषु द्वय (उभौ) इति पाठः, ख. पुस्तके तु, द्वय (स) इति पाठः, **अप.**२।६७ द्वयं (स्वयं); **व्यक.**१३३; **स्मृच.**१८१; **विर.**९५ अपवत्; **पमा.**२८६ द्वयं (इमं); **व्यप्र.**२८५; **समु.**८९.

(२) **मस्मृ.**८।१९१; **अप.**२।६७ वा तत्समं दमम् (दण्डं च तत्समम्); **व्यक.**१३२:१३३ वा तत्समं (च द्विगुण); **स्मृच.**१८१ दाप्यौ वा (प्रदाप्यौ); **विर.**९१ निक्षेपं नार्पयति (नार्पयति निक्षेपं); **पमा.**२८६; **विचि.**३९ द्विगुण दममिति मत्स्यपुराणे पाठः; **स्मृचि.**१५ स्मृचवत्; **व्यप्र.**२८४ तावुभौ (उभौ तौ); **व्यम.**८४ यश्चानि (पश्चान्नि); **वित्ता.**५५६; **सेतु.**१३३ विरवत्: ३१९ दमम् (धनम्) शेषं विरवत्, द्विगुणं दममिति मत्स्यपुराणे पाठः; **समु.**८९ स्मृचवत्; **विव्य.**३२.

१ इणे.

(१) निक्षिप्तमपह्नुवानस्यानिक्षितं याचमानस्य दण्डोऽयम् । यावति धने मिथ्या प्रवर्तते तावद्दण्ड्यते । मेधा.

(२) यो निक्षेपं न त्यजति यश्चानिक्षिप्यैवार्थयते तौ द्वौ महत्यपराधे कृतापराधे चौरवदुत्तमसाहसादिकं दण्डयौ । स्वल्पे वा तस्य निक्षेपस्य समं दण्डयौ । गोरा.

(३) चौरवच्छास्यौ साङ्गच्छेदादिना रत्नाद्यपहारे, अल्पे तु दाप्यौ चेति । मवि.

(४) चोरदण्डश्च प्रथमसाहस इत्युक्त मनुवृत्तौ । ×स्मृच.१८१

(५) तत्रैव श्लोके द्विगुणं दममिति मत्स्यपुराणे पाठः । स च दमः सधननिकृष्टाचारविषयः । मनुवचनं तु निर्धनसाचारविषयम् । विचि.३९४०

(६) विप्रादन्यौ चेत् चोरवत्कायेन दण्डोऽपि, विप्रौ चेद्दाप्यावेव तत्सम यावति निक्षेपधने विवादस्तत्तुल्यम् । मच.

[1]निक्षेपस्यापहर्तारं तत्समं दापयेद्दमम् ।
तथोपनिधिहर्तारमविशेषेण पार्थिवः ॥

(१) चोरवच्छिष्टिः पूर्वोक्ता । तया च शरीरनिग्रहस्तत्समधनवैकल्पिको जातिभेदेन ब्राह्मणादन्यत्र प्रदेश उक्तोऽनेन निवर्त्यते । पुनर्विधानेन चोरवच्छिष्टिर्वाग्दण्डधिग्दण्डादिरूपैव समुच्चीयते धनदण्डेन, साङ्गच्छेदादिरूपा । न च ब्राह्मणस्यापि वैकल्पिके पूर्वेण शारीरदण्डे प्राप्ते तन्निवृत्त्यर्थं पुनर्वचन युक्तम् । सामान्येन ब्राह्मणस्य शारीरदण्डप्रतिषेधात् । 'न जातु ब्राह्मण हन्यात्' इति (मस्मृ. ८।३८०) । उपनिधिः प्रीत्या यद्धुज्यते । अविशेषेण द्रव्यजातिं[3] निर्ग्राह्यां जातिं च नापेक्षते । अन्यैस्त्वपनिधिः परिभाषितः । स तत्रैव नेह । परिभाषाया अकरणाल्लौकिकार्थ एव ग्रहीतुं

× व्यप्र. स्मृचगत विचिगत च ।

(१) **मस्मृ.**८।१९२; **व्यक**१३२; **स्मृच.**१८० रमविशेषेण (रं विशेषेणैव); **विर.**९२ तत्स मद्रापयेत् (दापयेत्तत्समम्); **पमा.**२८५; **व्यप्र.**२८३ शेषेण (शेषेणैव); **व्यम.**८५ स्मृचवत्; **वित्ता.**५६१ स्मृचवत्; **समु.**८८ स्मृचवत्.

१ नं. २ स्पिके. ३ तिः. ४ माक्षा.

न्याय्यः । वक्ष्यति च 'प्रीत्योपनिहितस्य च' इति । मेधा.

(२) निक्षेपापहारिणं तत्समं दण्डयेदिति पूर्वसिद्धस्य पुनर्वचन प्रथमापराधे महत्यपि न पुनश्चौरवदित्येवमर्थम् । यैस्तु ब्राह्मणस्याङ्गविच्छेदादिचौरदण्डनिवृत्यर्थ इद पुनर्वचन इत्यादिष्टं तदसत्, 'न जातु ब्राह्मण हन्यात्' इत्यादेर्वक्ष्यमाणत्वात्तथा प्रीतिभोग्यद्रव्यापहारिण अविशेषेण जातिमात्राविशेषेण तत्सर्वमेव दापयेत् । गोरा.

(३) अत्र च वर्णविशेषेण दण्डविशेषाशङ्का निवारयति—निक्षेपस्येति । उपनिधिपद पूर्ववदुपलक्षणम् । अविशेषेण वर्णाविशेषेण । *मवि.

(४) निक्षेपापहारिणं निक्षिप्तसमधन दण्डयेत् । समशिष्टत्वादनिक्षिप्य याचितारमपि । उपनिधिर्मुद्रादिचिह्नितं निहितधनम् । ममु.

[1]उपधाभिश्च यः कश्चित्परद्रव्यं हरेन्नरः ।
ससहायः स हन्तव्यः प्रकाशं विविधैर्वधैः ॥

(१) उपधा व्याजः । छद्मेत्यनर्थान्तरम् । ताश्चानेकविधाः । द्रव्यपरिवर्तः कुङ्कुम दर्शयित्वा कुसुम्भादिदान तुलादिमानापचय इत्याद्याः । तत्र चान्य विधि वक्ष्यति 'नान्यदन्येन संसृष्टम्' इत्यादि । इह तु वित्रासनं राज्ञ उपकारदर्शन कन्यानुरागकथनमित्येवमाद्या गृह्यन्ते । चौरास्त्वा मुष्णन्ति यत्रह त्वा न रक्षामि, राजा तवात्यन्त कुपितो मया तु बहु समाहित, राजतस्ते नगराधिकार दापयामि,मुख्य वोपकार करोमि, पुष्पमित्रदुहिता त्वय्यत्यन्तमनुरागिणी मद्धस्त इदमुपायन प्रेषितवतीत्येवमाद्यनृतमुक्त्वाऽऽत्मीयमुपायनमानीय बहु प्रतिनयन्ति । तत्समक्ष च राजनि तत्समे वा कार्यान्तरमुपाशु निवेद्य कथयन्ति त्वदीयं कार्यमुपक्रान्तमिति । एतमाद्याभिरुपधाभिः परद्रव्य च भुञ्जते तेषामय राजमार्गे प्रकाश विविधः कुठारशूलारोपणहस्तिपदमर्दनाद्यनेकोपायसाधनो वध उच्यते । अन्ये तु प्रकरणान्निक्षेपविषयमेवेदमाहुः । तत्र हि प्रतिपद्यान्यत्र मया निहितं स च न संनिहितः श्वपरश्च आगच्छतीत्यसमर्पयन् हरतीति । *मेधा.

(२) अतिप्रसिद्धनिक्षेपच्छलेनापहारमाह—उपधाभिरिति । न निक्षिप्तमित्यादिछलोक्त्या निक्षेपादि परद्रव्य यो हरेत् । एतच्च भूयः करणे । मवि.

(३) ससहायः सत्यमयं वक्तीति मिथ्याभिधानेन साहाय्य गतेन सह । मच.

निक्षेपप्रतिदापनम्

[1]निक्षेपो यः कृतो येन यावांश्च कुलसंनिधौ ।
तावानेव स विज्ञेयो विब्रुवन् दण्डमर्हति ॥

(१) य इति निक्षिप्यमाणद्रव्यजातिनिर्देशः । यावानिति परिमाणस्य । य आह । सुवर्णमेतस्य हस्ते मया निक्षिप्त,कास्यं ददाति । शतं च स्थापितमर्थ ददाति । स पृच्छ्यते । कि रहस्युत कस्यचित्समक्षमिति । स चेदाह कुलसनिधौ । कुल साक्षिणः पुरुषास्तत्र ते पृष्टा यदाहुस्तदेव सत्य, विब्रुवन् विरुद्धं ब्रुवाणो दण्डयते । तत्रापि यदि ब्रूयात्साक्षिसमक्षं रूप्यं तैर्विनाऽन्यत्स्थापितमिति । अस्यत्र प्रमाणान्तरव्यापारणावसरः । अयमपि श्लोको नाधिकविध्यर्थः । ×मेधा.

(२) सकृत्करणं तूक्तम् । निक्षेपो निक्षेपादिः । कुलस्य ज्ञात्यादेः । यः सुवर्णादिः । विब्रुवन् मद्यमत्र रक्षणभागो देय इति वदन् । मवि.

प्रीतिदत्तादिषु निक्षेपविधे. अतिदेशः

[2]निक्षिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च ।
राजा विनिर्णयं कुर्यादक्षिण्वन्न्यासधारिणम् ॥

---

* नन्द , माच. मविगतम् ।

(१) **मस्मृ.**८।१९३; **गोरा.** श्व यः कश्चिद् (स्तु यत्किंचिद्); **व्यक.**१३२, **विर.**९२ श्व (स्तु).३१६; **विचि.** ३९; **दवि.**११४ श्व (स्तु); **सवि.**२६९, **वीमि.**२।६७; **सेतु.**१३३; **समु.**१५१ दक्षिवत्, **विव्य.**३२.

* गोरा , ममु., मच., नन्द , माच. मेधागतम् ।

× गोरा., स्मृच , ममु. मेधावद्भावः ।

(१) **मस्मृ.**८।१९४; **अप.**२।६७ य. (यत्) वांश्च (वान्वा); **व्यक.**१३३; **स्मृच.**१८१; **विर.**९४; **पमा.** २८५; **स्मृचि.**१५; **व्यप्र.**२८४; **समु.**८८.

(२) **मस्मृ.**८।१९६; **व्यक.**१३३; **स्मृच.**१८१ राजा .. यात् (कुर्याद्विनिर्णय राजा); **विर.**९५; **पमा.**२८७ स्मृचवत्; **व्यप्र.**२८५; **समु.**८९ अक्षि(क्षि) शेषं स्मृचवत् .

(१) प्रकरणोपसंहारोऽनेन क्रियते। प्रीत्योपनिहितस्य स्नेहेन किञ्चित्कालं भोगार्थं दत्तस्य, न्यासो निक्षेपस्तस्य धारणको यथा न पीड्यते तथा निर्णयः कर्तव्य इति। अक्षिण्वन्नपीडयन्। द्वित्रिश्लोका निक्षेपप्रकरणे विध्यर्थाः। सर्वमन्यदन्यतः सिद्ध सौहार्देनोक्तम्। *मेधा.

(२) निक्षिप्तस्येति याचितान्युपलक्षणम्। मवि.

(३) राज्ञा निक्षिप्तस्य धनस्यामुद्रस्य मुद्रादियुतस्य वोपनिधिरूपस्य तथा प्रीत्या कतिचित्कालं भोगार्थमर्पितस्य। ममु.

वाल्मीकिरामायणम्

न्यासलिङ्गम्

[1]पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ॥

याज्ञवल्क्यः

उपनिधिलक्षणम्

[2]वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते।
द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ॥

(१) आध्यनन्तरं विश्वासार्पितत्वसामान्यादुपनिधिरुच्यते—भाजनस्थमिति। क्वापि स्थितमनिर्दिष्टस्वरूपं कस्यचित् परिग्रहे एवमुक्त्वा यत् समर्प्यते 'त्वयेदं रक्षणीयमि'ति। हस्तशब्दः परिग्रहार्थः। न्यस्य क्षिप्त्वेत्यर्थः। तद् औपनिधिकसंज्ञकं यथा गृहीतं तथैव प्रत्यर्पणीयमित्यर्थः। विश्व.२।६७

(२) निक्षेपद्रव्यस्याधारभूतं द्रव्यान्तरं वासनं करण्डादि तत्स्थं वासनस्थं यद्द्रव्यं रूपसख्यादिविशेषमनाख्याय अकथयित्वा मुद्रितमन्यस्य हस्ते रक्षणार्थं विस्रम्भादर्प्यते स्थाप्यते तद्द्रव्यमौपनिधिकमुच्यते। प्रतिदेयं तथैव तत्। यस्मिन्स्थापित तेन यथैव पूर्वमुद्रादिचिह्नितमर्पितं तथैव स्थापकाय प्रतिदेय प्रत्यर्पणीयम्। मिता.

(३) अन्योन्यसप्रतिपत्तिमात्रनिबन्धत्वात्तस्य निक्षेपाख्यं विवादपदमुपक्रमते—वासनस्थमिति। उपनिधिरेवौपनिधिकम्। अप.

(४) तदौपनिधिकं नाम निक्षेपविशेषः। वीमि.

राजदैवचोरादिनष्टनिक्षेपविचार.

[3]न दाप्योऽपहृतं तं तु राजदैविकतस्करैः ॥

(१) यत्तु द्रव्यमुपनिहितं—न दाप्य इत्यादि। राजाद्यपहृतमनपराधी न दाप्यः। विश्व.२।६८

(२) प्रतिदेयमित्यस्य अपवादमाह—न दाप्य इति। तमुपनिधिं राजा दैवेनोदकादिना तस्करैर्वापहृतं नष्ट न दाप्योऽसौ यस्मिन्नपहितम्। धनिन एव तद्द्रव्य नष्ट यदि जिह्मकारितं न भवति। ×मिता.

उपनिधिप्रतिदापनम्

[4]भ्रेषश्चेन्मार्गितेऽदत्ते दाप्यो दण्डं च तत्समम् ॥

(१) दोषश्चेन्मार्गिते प्रयाचिते अदत्ते अनर्पिते तस्करापहारादिलक्षणो दोषश्चेत् दाप्योऽपहृतं, तत्समं च राज्ञे दाप्यो दण्डम्। ऋज्वन्यत्। विश्व.२।६८

(२) 'न दाप्य' इत्यस्यापवादमाह—भ्रेषश्चेदिति। स्वामिना मार्गिते याचिते यदि न ददाति तदा तदुत्तरकालं यद्यपि राजादिभिर्भ्रेषो नाशः संजातस्तथापि

---

* गोरा. मेधावत्।

(१) सवि.२६६.

(२) यास्मृ.२।६५; अपु.२५४।२५ वा (व्य) यदर्प्यते (तदर्पयेत्); विश्व.२।६७ वासन (भाजन), मिता., अप.; व्यक.१३०; गौमि.१२।३९ विश्ववत्; स्मृच. ३ विश्ववत्; विर.८३ र्प्यते (र्पयेत्); पमा २८० यद (सम); विचि.३६; स्मृचि.१४ न्यस्य यद (न्यः स्वयम); नृप्र.२३ तत् (च); सवि.२६५ विश्ववत्, वीमि; व्यप्र.२८० मनाख्याय (मविज्ञातं); व्यउ.७९ विरवत्; विता.५५७ ऽन्यस्य (यस्य); सेतु.१३०; समु. ८७ विश्ववत्; विव्य.३१ द्रव्यं तदौप (गृहीतमौप) तत् (च).

× अप., वीमि. मितावत्।

(१) यास्मृ.२।६६; अपु २५४।२६ दैविक (दैवत); विश्व.२।६८ तं तु (तत्तु); मिता.; अप. विश्ववत्, स्मृच.१७९ विश्ववत्; विर.८८ तं तु (तच्च) दैवि (दैव); पमा.२८२; नृप्र.२४ तु (च), सवि.२६६ विश्ववत्; वीमि.; व्यप्र.२८१; व्यउ.८० विश्ववत्; व्यम.८५ तं तु (यत्तु); विता.५५८; समु.८७.

(२) यास्मृ.२।६६; अपु.२५४।२६ भ्रे (प्रे) ण्डं...समं (ण्डश्च तत्समः); विश्व.२।६८ भ्रेष (दोष); मिता.; अप. भ्रेष (भ्रंश); विर.९०; नृप्र.२४, सवि.२६७, ४९० ण्ड च (ण्डश्च) नारदः : २९० भ्रेप (भ्रष्ट); वीमि.; व्यप्र.२८३; व्यउ.८०; विता.५५८ अपवत्; समु.८८.

तद्द्रव्य मूल्यकल्पनया धनिने ग्रहीता दाप्यो राज्ञे च तत्समं दण्डम्। *मिता.

उपनिध्यपहारे दण्डविधिः

आजीवन्स्वेच्छया दण्ड्यो दाप्यस्तं चापि सोदयम्॥

(१) स्वाम्यननुज्ञयैवोपनिधिक द्रव्यं—आजीवन् स्वेच्छया दण्ड्य इत्यादि। विश्व.२।६९

(२) यः स्वेच्छया स्वाम्यननुज्ञयोपनिहित द्रव्यमाजीवन् उपभुङ्क्ते व्यवहरति वा प्रयोगादिना लाभार्थमसाधुपभोगानुसारेण च दण्ड्यस्त चोपनिधि सोदयमुपभोगे सवृद्धिक व्यवहारे सलाभं धनिने दाप्यः। वृद्धिप्रमाणं च कात्यायनेनोक्तम्। मिता.

उपनिधिविधे. याचितादिषु अतिदेशः

याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः॥

(१) याचित कार्यार्थमाहृतं परकीयमुपस्करादि। अन्वाहित आध्यसामर्थ्ये यदन्यदर्पितम्। प्रतिग्रहप्रसङ्गेन वा यदलब्धमेव पात्रादि उपकरणत्वेनाहृतम्। न्यासो निर्दिष्टस्वरूप द्रव्य, यद्रक्षणार्थं समर्पितम्। निक्षपोऽन्यहस्ते एव यदन्यस्मै देयत्वेन निक्षिप्तम्। एतेष्वपि याचितादिष्वयमेवौपनिधिको विधिर्द्रष्टव्यः। विश्व.२।६९

(२) उपनिधेर्धर्मान्याचितादिष्वतिदिशति—याचितेति। विवाहाद्युत्सवेषु वस्त्रालङ्कारादि याचित्वानीत याचितम्। यदेकस्य हस्ते निहित द्रव्य तेनाप्यनु पश्चादन्यहस्ते स्वामिने देहीति निहित तदन्वाहितम्। न्यासो नाम गृहस्वामिनेऽदर्शयित्वा तत्परोक्षमेव गृहजनहस्ते प्रक्षेपो गृहस्वामिने समर्पणीयमिति। समक्ष तु समर्पणं निक्षेपः। आदिशब्देन सुवर्णकारादिहस्ते कटकादिनिमार्णाय न्यस्तस्य सुवर्णादेः, प्रतिन्यासस्य च परस्पर प्रयोजनापेक्षया त्वयेद मदीयं रक्षणीयं मयेदं त्वदीय रक्ष्यते इति न्यस्तस्य ग्रहणम्। एतेषु याचितान्वाहिता दिष्वयं विधिः। उपनिधेर्यः प्रतिदानादिविधिः स एष वेदितव्यः। ×मिता

(३) यद्यपि स्मृत्यन्तरे न्यासनिक्षेपयोः स्थापनादि धर्मा उपदिष्टाः तथाप्यस्या स्मृतौ नोपदिष्टा इत्युपदिष्टो पनिधिधर्माणामतिदेशोऽयं युक्तः। +स्मृच.१८२

(४) आदिपदेन गौतमोक्तावक्रीतादिसंग्रहः। वीमि.

नारदः

निक्षेपलक्षण उपनिधिलक्षण च। निक्षेपादिस्थापनविधि.।

[1]स्वं द्रव्यं यत्र विस्रम्भान्निक्षिपत्यविशङ्कितः। निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः॥

(१) स्वमिति स्वकीयं द्रव्य यो निक्षिपति तस्य निक्षेपः संबध्यते, यः पुनः परकीयं परादेशात्परनाम्ना च समर्पयति अपरादेशकारित्वात्तस्य निक्षेपस्य स्वयमर्पितस्यापि प्रतियाचमान निराकारोति। स्वं द्रव्यमिति। अस्य पदस्यायमर्थः। तदिह स्वं द्रव्यं यो निक्षिपति यच्च मतिविस्रम्भादविशङ्कितो निक्षिपति। अनेनोक्तेनैतदुक्त भवति किल यत्र अविश्वासात् शङ्का भवति तत्र साक्षिलिखितग्रहणविरहितं कोऽपि वराटकमपि न ददाति। यत्र पुनर्विश्वासान्निःशङ्कः पुरुषो भवति तत्र साक्षिलिखितग्रहणवर्जितमेव सुवर्णसहस्रादिकमपि निक्षिपति। यत्र चायमीदृशो विश्वासनिःशङ्कः पुरुषो भवति परं प्रव्रजते तत्रैव 'निक्षेपो नाम तत्प्रोक्तं व्यवहारपद बुधैरि'ति निक्षेपलक्षणमभिहितमिति। अभा.८१-८२

---

* अप., वीमि मितावत्।

(१) **यास्मृ.**२।६७; **अपु.**२५४।२७ स्तं (स्तत्); **विश्व.**२।६९ स्त (स्तत्); **मिता.**; **अप.**, **स्मृच.**१८० विश्ववत्; **पमा.**२८४, **सवि.**४९०; **वीमि**; **व्यप्र.**२८३; **व्यउ.**८०; **व्यम.**८५; **विता.**५६० (=) चापि (वापि), **समु.**८८.

(२) **यास्मृ.**२।६७, **अपु.**२५४।२७ पादिष्वय (पेष्वप्ययं); **विश्व.**२।६९ अपुवत्; **मिता.**; **अप.**; **स्मृच.**१८२; **विर.**१७; **पमा.**२८८; **स्मृचि.**११; **वीमि.**; **व्यप्र.**२८७; **व्यउ.**८०; **विता.**५६२; **समु.**८९.

× पमा.मितावत्। + शेष मितागतम्।

(१) **नासं.**३।१ स्व (स्व); **नास्मृ.**५।१; **अपु.**२५३।१४ पो (प)शेष नासवत्; **अभा.**८१; **मिता.**२।२५; **अप.**२।२५; **व्यक.**१३०; **स्मृच.**२ नासंवत्; **विर.**८३ स्तम्भा (श्वासा); **पमा.**२७९ नासंवत्; **दीक.**३८ उत्त.; **विचि.**३६; **स्मृचि.**१४; **वीमि.**२।६७; **व्यप्र.**२७९; **व्यम.**८४ नासंवत्; **विता.**५५४ स्वं (स्व) तत्प्रोक्त (तज्ज्ञेयं); **सेतु.**१२९ विरवत्; **समु.**८७ नासंवत्; **विव्य.**३१ व्यवहार (तद्विवाद).

(२) स्वग्रहणादात्मीयं, न चौर्यादिनापहृतं, यस्मिन विस्रम्भाद् विश्वासान्निक्षिपत्यविशङ्कितो नायमन्यथा करिष्यतीति, निक्षेपो नाम तद्विवादपदम् । निःशङ्क निक्षिप्यते स्थाप्यत इति निक्षेपः । स द्विविध इति वक्ष्यति । तस्य द्विविधस्यापि सामान्योपन्यासोऽयम् । नाभा.३।१

(३) तत्र निक्षेपो नाम स्वद्रव्यस्य विश्वासेन पुरुषान्तरे स्थापनम् । न च न्यासोपनिध्योरतिष्यातिस्तयोर्लक्ष्यत्वात् । निक्षेप एव ग्राहकस्यासमक्षं समर्पितो न्यास इत्युच्यते । व्यप्र.२७९

अन्यद्रव्यव्यवहितं द्रव्यमव्याकृतं च यत् ।
निक्षिप्यते परगृहे तदौपनिधिकं स्मृतम् ॥

निक्षेपलक्षणमभिहितम् । इदानीमौपनिधिकलक्षणमुच्यते । अन्यद्रव्यव्यवहितमिति मञ्जिष्ठापोटलमध्ये विंशतिगव्यूतका ग्रन्थिबद्धाः । अथवा ग्रन्थिमुद्रितं यथा वस्त्रमध्ये मौक्तिकहारः । तद्वाऽभ्यन्तरसारद्रव्यं तदवस्थं तस्यापि न कथितम् । तथा हस्ते निक्षिप्तमेवं स्थित द्रव्यं यन्निक्षिप्यते तदौपनिधिकमित्युच्यते । तदपि यथा स्थितं ग्रन्थिमुद्रितमेव प्रदेयम् । ग्रन्थिभेदे ग्रहीतुर्दोषो भवतीति । *अभा.८२

असंख्यातमविज्ञातं समुद्रं यन्निधीयते ।
तं जानीयादुपनिधिं निक्षेपं गणितं विदुः ॥

निक्षेपोपनिध्योर्गणितागणितत्वनिबन्धनो भेद इत्यर्थः। स्मृच.२

---

* नाभा. अभावद्भावः ।

(१) **नार.**३।२; **नास्मृ.**५।५ कृत (हृतं); **अभा.**८२ **नास्मृवत्**; **अप.**२।६५; **स्मृच.**३; **व्यप्र.**२८० उक्त.; **समु.**८७.

(२) **मिता.**२।६५ त जा (तज्जा); **अप.**२।६५; **स्मृच.**२; **मनु.**८।१४९ (वासनस्थमनाख्याय समुद्र यन्निधीयते) पू.; **पमा.**२७९ मितावत्, **दीक.**३३ (वासनस्थमनाख्याय समुद्रं यद्विधीयते) पू.; **स्मृचि १४** मितावत; **व्यत.**२२४ दीकवत्, पू.; **सवि.**२६५ मितावत्; **व्यप्र.**२८० मितावत्; **व्यउ.७९** मितावत्; **व्यम.८४**; **विता.**५५४-५५५; **सेतु.८९** दीकवत्, पू.; **समु.८७**; **विच.**१३८ मनुवत्, पू.; **भाच.**८।१४५.

कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि ।
महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद्बुधः ॥

एभिः सप्तभिरपि गुणैः संपन्ने पुरुषे निक्षेप निक्षिपेद्बुधः । स कालान्तरेऽपि विप्रतिपत्तिं न गच्छतीति । अभा.८२

साक्षिकासाक्षिकनिक्षेपप्रतिदानप्रत्यादानविधि

स पुनर्द्विविधः प्रोक्तः साक्षिमानितरस्तथा ।
प्रतिदानं तथैवास्य प्रत्ययः स्याद्विपर्यये ॥

(१) यो निक्षेपः साक्षिप्रत्यक्षो मुक्तः । असाववश्यं साक्षिप्रत्यक्षमेव समर्पणीयः । यः पुनरसाक्षिमान्स विनैव साक्षिभिरर्पणीयः । इत्यस्य द्विविधो निर्गमः । अथ विपर्ययो निक्षेपस्योपनिधेर्वा हानिर्मिथ्या भवति । तदानीं तदनुसारेण प्रत्ययो दिव्यशपथादिको भवतीति । +अभा.८२

(२) प्रत्ययः स्याद्विपर्यय इति, यदा राजदैवविनष्टं तन्निक्षिप्तमित्युक्त्वा निक्षेप न ददाति, तदा निक्षेपार्थाश्रयस्वाभिमतपुरुषेण राजदैवोपघातस्यानुरूपविभावनं कार्यमित्यर्थः । विर.८५

[3]यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः ।
स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः ॥

यः पुरुषो यस्य हस्ते यमर्थं येन प्रकारेण निक्षिपेत् । तेनैव पुरुषेण तस्यैव हस्तात्स एवार्थः तेनैव प्रकारेण ग्रहीतव्यः । यथा दायस्तथा ग्रह इति वचनात् । अभा.८२

स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे ।
न स राज्ञाऽभियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः ॥

निक्षेपदातुर्मृतस्य यः प्रत्यनन्तरस्तदीयद्रव्याधिकारी तस्य स्वयमेव गत्वा ग्राहकोऽयाचित एवाज्ञातो वा

+ नाभा. अभावद्भाव. ।

(१) **नास्मृ.**५।२; **अभा.**८२ धनिन्यार्ये (च धनिनि).

(२) **नास्मृ.**५।६;**अभा.**८२; **अप.**२।६५; **व्यक.**१३१; **स्मृच.**३; **विर.**८५; **पमा.**२८०; **विचि.**३६; **स्मृचि.१४**, **सेतु.**१३०; **समु.**८८; **विव्य.**३१ दान (देय).

(३) **नास्मृ.**५।३; **अभा.**८२.

(४) **नास्मृ.**५।१०, **अभा** ८३; **पमा.**२८७ ऽ भियो (नियो) मुश्च (मुस्तु).

साधुत्वान्न्यासं समर्पयति । स तेन साधनेन तदीय बन्धुभिः शेषोपनिधिस्तस्योपरि जल्पयित्वा नाभियोक्तव्यो न राज्ञेति । अभा.८३

राजदैवचोरादिनष्टनिक्षेपविचार.

[1]ग्रहीतुः सह योऽर्थेन नष्टो नष्टः स दायिनः ।
दैवराजकृते तद्वन्न चेत्तज्जिह्मकारितम् ॥

(१) यस्तु निक्षेपो युक्तश्चलो वा ग्रहीतुः सत्कधनेन तादृशेनैव सह नष्टः स निक्षेपदायिनो नष्टः, राजदैविक मपि तथैव योज्यम् । किंतु तज्जिह्मकारितमिति । तेनैव यदि कृतप्रपञ्चरक्षित न भवति । जिह्मकारिते निश्चित-ज्ञाने शिरोपस्थानेन सह साधनमर्थस्येति ।

अभा.८२-८३

(२) दायिनः स नष्ट इति वदता वचनभङ्गया ग्रहीता मूल्यद्वारेण न दाप्यो नष्ट धनमित्युक्तम् ।

स्मृच.१७९

(३) तज्जिह्मकारितं निक्षेपधारिकौटिल्यकारितम् । विर.८८

(४) ग्रहीतुरर्थेन तत्समेन तद्विशिष्टेन वा सह नष्टो निक्षेपः स दायिनो नष्टो भवति, न दाप्य इत्यर्थः । दैवराजकृतेऽपि दैवकृतमग्निदाहादि । राजकृत सर्वस्व-हरणे तत्रान्तर्भूते न दाप्यः । असति प्रमादे यदृच्छया निक्षेप एव हीयेत नश्येद्वा तस्य दैवेऽन्तर्भूतत्वात् तदपि न दाप्यः अजिह्मकारित बुद्ध्वा । नाभा.३।६

[2]चौरैर्हृतं जले मग्नमग्निना दग्धमेव च
न दद्याद्यदि तस्मात्स न संहरति किञ्चन ॥

यदि तस्मात्पुनर्निक्षेपात्किञ्चिद्गृहीत्वा कोऽपि नियोगः कृतः सप्रत्ययः स भाव्यते । तदा भाविनि चौर-जलाग्न्युपद्रवे तद्दद्यादसाविति । अभा.८३

निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम्

[3]अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकम् ।
विचार्य तस्य वा वृत्तं साम्नैव परिशोधयेत् ॥

तत्र निश्चितार्थप्रमाणपरिच्छेदपरिज्ञातमेवापह्नुत एवं शिरोपस्थानं दृष्ट नोपालब्ध एतदर्थ अच्छलमेवा . . . स्य प्रीतिपूर्वकमेव साम्नैव शेषशङ्कामपि विशोधयेत् इति ।

अभा.८३

निक्षेपप्रतिदापनम्

[4]न चेद्दद्यात्तु निक्षेप्तुस्तद्द्रव्यं तु यथाविधि ।
उपसंगृह्य दाप्योऽसौ दिव्यादिभिर्व्यवस्थितः ॥

अथ निक्षेपग्राही लोभं गच्छति निक्षेप्तुस्तद्द्रव्यं न प्रयच्छति तदावेदितो राज्ञा उपसंगृह्य दिव्यादिप्रमाण-साधितो द्विगुणदण्डाकोटितः कृतो दाप्यः । अभा.८२

निक्षेपापहारादिदोषे दण्डविधिः

[5]याच्यमानस्तु यो दातुर्निक्षेपं न प्रयच्छति ।
दण्ड्यः स राज्ञो भवति नष्टे दाप्यश्च तत्समम् ॥

(१) प्रकटार्थ एव श्लोकः । विशेषोऽयं याचिते-ऽनर्पिते राजदैविक ग्रहीतुर्न निक्षेप्तुरिति । अभा.८२

(२) चशब्दात् दण्ड्यश्चेति । नाभा.३।४

(३) नष्टे दैवतो राजतो वेति शेषः । व्यप्र.२८३

[6]यत्रार्थं साधयेत्तेन निक्षेप्तुरननुज्ञया ।
तत्राऽपि दण्ड्यः स भवेत् तं च सोदयमावहेत् ॥

---

(१) **नास्मृ**.३।६; **नास्मृ** ५।९; **अभा**.८२, **मिता**.२।६६, **अप**.२।६६; **व्यक**.१३१; **स्मृच**.१७९; **विर** ८८ कृते (हृते); **पमा**.२८२; **विचि**.३७ कृते (हृते) जिह्म (जैह्म्य); **सवि**. २६७, **चन्द्र**.३१ दैवराज (राजदैव) चेत्तज्जैह्म्य (चैतज्जैह्म्य): ३२पू.; **व्यप्र**.२८१ नष्टो (भ्रष्टो); **विता**.५५८; **सेतु**.१३१, **समु**.८७; **विव्य**.३२ जिह्म (जैह्म्य).

(२) **नास्मृ**.५।१२; **अभा**.८३.

(१) **नास्मृ**.५।११, **अभा**.८३, **पमा**.२८७ चान्विच्छे (वाऽन्विच्छे) शोध (साध).

(२) **नास्मृ**.५।४, **अभा**.८२ क्षेप्तु (क्षेप) दिव्या (द्रव्या).

(३) **नास** ३।४ दातु. (दात्रा) राज्ञो भवति (राज्ञा दाप्यश्च); **नास्मृ**.५।७ दातुः (दात्रा) राज्ञो भवति (राज्ञा दुष्टात्मा); **अभा**.८२ राज्ञो भवति (राज्ञा दुष्टात्मा); **व्यक**.१३२ श्च (स्तु); **विर**.९० व्यकवत्, **पमा**.२८४; **विचि**.३८ क्षेपं (क्षिप्त) नष्टे (नष्टो) श्च (स्तु); **व्यप्र**.२८३; **विता**.५५६-५५७, **सेतु**.१३२ पूर्वार्धे (याच्यमानोऽपि निक्षेप नो दातुर्न प्रयच्छति) श्च (स्तु); **समु** ८८ राज्ञो (राज्ञा).

(४) **नास**.३।५ यत्रा (यश्चा) त च (तच्च) वहेत् (प्नुयात्); **नास्मृ**.५।८ यत्रा (य चा) त ..हेत् (दाप्यस्तच्चापि सोद-यम्); **अभा**.८२ यत्रा (त चा) तं ...हेत् (दाप्यस्तच्चापि सोदयम्), **व्यक**.१३२ त च (तच्च) वहेत् (हरेत्), **विर**,

(१) यदि ग्राहको निक्षेपद्रव्येण तेन कचित्स्वार्थं स्वेच्छया साधयति । निक्षेप्तुरननुज्ञया असंमतेन तदा दण्ड्यः स भवेत् । तं च साधितमर्थं सोदयं सोपाश्रय दाप्य इति । अभा.८२

(२) अननुज्ञया विमत्या । विर.९०

(३) यश्च निक्षेप्तुरननुज्ञया प्रयुञ्जीत द्रव्य निक्षिप्तं क्रयं विक्रय वा कुर्यात्, तत्रापि दण्ड्यः स भवेत् परद्रव्यस्य विश्वासान्यस्तस्यानुज्ञयाऽपि स्वामिनः स्वार्थमुपभोगात् । तच्च द्रव्यं निक्षिप्त सोदयं दाप्यः सलाभ सवृद्धिक च । नाभा.३।५

अनेकार्थाभियुक्तेन सर्वार्थव्यपलापिना ।
विभावितैकदेशेन देयं यदभियुज्यते ॥
यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते ।
तावुभौ चौरवच्छास्यौ दण्डं दाप्यौ च तत्समम्॥

यो निक्षिप्तं द्रव्य मिथ्याशया...द्वा कालहरणादिना नार्पयति स चौरः । यश्चानिक्षिप्तमेव निक्षिप्तमुक्त्वा प्रार्थयति सोऽपि परद्रव्यचौरः तयोर्व्यवहारे यो मिथ्यावादी दिव्यावसन्नो भवति स राज्ञा चौरवच्छास्यः । द्रव्यसम च दण्ड दाप्य इति । अभा.८३

निक्षेपविधि याचितादिषु अतिदेश

एष एव विधिर्दृष्टो याचितान्वाहितादिषु ।
शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव च ॥

(१) अत्र योऽय विधिर्न्यासोपनिधिव्यवहारपदकयोरपि सविस्तरोऽभिहितः । एष एव याचितान्वाहित-शिल्पोपनिधिष्वपि । अत्र याचित कार्यार्थं प्रार्थयित्वा यदानीतम् । अन्वाहितं पौलवृषभ अन्वाहितसारं कार्यमात्रं सारकं समर्घ्य सारभूतो गुरुभरकरणार्थं च धुर्यकवृषभो यः समानीतो भवति स तदीयद्रव्यं अन्वाहितमुच्यते । अनु आहितमन्वाहितमिति । शिल्पे शिल्पिहस्तसंस्करणमुक्तो न्यासो व्याचक्षते । प्रतिन्यासस्तु कस्यापि हस्ते निक्षिप्त द्रव्य सोऽपि कार्यकालापेक्षया यदन्यस्य हस्ते निक्षिपति स प्रतिन्यासः । एतेषु सर्वेष्वयमेव विधिरिति । अभा.८३

(२) न्यासो गृहस्वामिनो दर्शयित्वा तत्परोक्षे गृहजने समर्पितं धनम् । प्रतिन्यासः परस्परन्यासः । एष तावन्निक्षेपोक्तविधिः । विर.९६

(३) एष एव विधिर्दृष्ट इति पूर्वोक्तातिदेशो याचितादिषु । 'स पुनर्द्विविध' इत्यारभ्य यावदयमतिदेशः सर्वो यथोक्तो द्रष्टव्यः निक्षेपप्रतिदानयाच्यमानादानस्वार्थसाधननाशेषु । याचित विवाहाद्यभ्युदयकर्मसु वस्त्रालङ्कारादि । तस्य ग्रहणादारभ्य तुल्यो विधिः । अन्वाहित अतदर्थे गमने आनुषङ्गिक यत् समर्पितम् । तद्यथा—मथुरायाः कश्चित् स्वार्थं कन्याकुब्जं प्रस्थितः । तस्य हस्ते कन्याकुब्जस्थस्य द्रव्यमिदमस्मद्गृहे देहीति समर्पितम् । तत्रापि साक्षिमदादिरेष एव विधिः । आदिग्रहणादाधिप्रणयादयुष्मानीतमित्येवमादि । शिल्पिषु उपनिधौ शिल्पिषु सुवर्णकारादिषु कटकादि दत्वेयता कालेन दातव्यमिति । तत्राप्येष एव विधिः । निक्षेपोपनिधिभावोपन्यासः अर्थाभेदादिति केचित् । एवञ्च 'षडेते विधयः समा' इत्युपपद्यते अन्यथा अष्टौ समाः स्युरिति । अन्यैर्निक्षेपोपनिधी मुक्त्वा याचितादयः षडुक्ताः । तत्रापि न्यासः 'इद त्वया रक्षितव्य'मिति निहितम् । प्रतिन्यासविषये प्रतिन्यासोऽपि 'यावदहं त्वदीयं रक्षामि तावदिद मदीयं त्वमपि रक्ष' इति । एतयोरपि स एव विधिः । नाभा.३।७

(४) अन्वाहित स्वस्मिन् स्थितं परधनं अन्यहस्ते कृतम् । व्यप्र.२८७

प्रतिगृह्णाति पोगण्डं यश्च सप्रधनं नरः ।
तस्याप्येष भवेद्धर्मः षडेते विधयः समाः ॥

९० दण्ड्य. स भवेत् (स भवेद्दण्ड्य.), **पमा.**२८४, **विचि.** ३८-३९ वहेत् (हरेत्), **चन्द्र.**३२ यत्रार्थं सा (पत्रार्थं गो) वहेत् (हरेत्), **व्यप्र** २८३ यत्रा (य स्वा); **सेतु** १३२ र्थं (र्थे) वहेत् (हरेत्); **समु.**८८.

(१) Vulg.**नास्मृ.** ५।८ इत्यस्योपरिष्टात्.

(२) **नास्मृ.**५।१३; **अभा.**८३.

(३) **नास्मृ.**५।१४ शिल्पिषू (शिल्पे चो); **अभा.**८३ नारसूवत्; **मिता.**२।६७, **व्यक.**१३४; **विर.**९६; **पमा.** २८७; **विचि.**३८; **स्मृचि.**१५ एष एव विधिर्दृष्टो (एव विधिश्च निर्दिष्टो); **सवि.**२६९; **चन्द्र.**३३ दिषु (धयो.) **पू.**; **व्यप्र.**२८६-२८७; **व्यम.**८५; **वित.**५६२; **समु.**८९.

(१) **नासं.**३।८ भवेद्धर्मः (विधिर्दृष्टः); **नास्मृ.**५।१५;

(१) योऽनाथं बाल सप्रधन नाथाबुध्या प्रतिगृह्णाति तदीयधनस्यापि अयमेव विधिर्द्रष्टव्यः। षडेते विधयः समा इति। याचितविधिः। अन्वाहितविधिः। शिल्पिहस्तगविधिः। न्यासविधिः। प्रतिन्यासविधिः। पोगण्डविधिश्चेति। षडेते विधयस्तुल्या द्रष्टव्याः। अभा.८३-८४

(२) प्रतिगृह्णाति यो दण्डमिति यो दण्ड रहो गृह्णाति तस्य पुरुषस्य कृतदण्डे दृष्टप्रमाणाभावे एष विधिः। एव च यश्च सप्रधन प्रकृष्टधनसबन्धं धन रहो गृह्णाति, तत्रापि धने दृष्टप्रमाणाभावे एष एव विधिः। हलायुधेन तु प्रतिगृह्णाति पोगण्डमिति पठित्वा व्याख्यात—पोगण्डे बाले सप्रधने प्रकृष्टधनसहिते निक्षेप्तुः सकाशान्निक्षेपनयेन गृहीते एष एव विधिर्दृष्ट इति पडेते निधय निधितुल्या इत्यर्थः। पठित्व च याचितान्वाहितादित्व शिल्पित्व उपनिधित्व न्यासत्व प्रतिन्यासत्व, दण्डवत्प्रधनग्रहण च पुरस्कृत्य न्यासधर्मातिदेशो न्यासादौ यथा कथञ्चित् तद्भेदविवक्षया। विर.९६-९७

बृहस्पतिः

न्यासलक्षण उपनिधिलक्षण च। तत्स्थापनविधि.।

ऋणादानं प्रयोगादिदापनान्तं प्रकीर्तितम्।
निक्षेपस्याधुना सम्यग्विधानं श्रूयतामिति॥
राजचौरारातिभयाद्दायादानां च वञ्चनात्।
स्थाप्यतेऽन्यगृहे द्रव्यं न्यासः स परिकीर्तितः॥

(१) अत्र च परं संबोध्य परस्थाने द्रव्यधारणमेव न्यासः। अन्यत्तु प्रपञ्चः, विश्वासोऽवश्य प्रातव्यमेवेत्यादिविनिश्चयः। अविशङ्कितः अप्रातिशङ्काशून्यः।विर.८३

(२) अयमेवागणितद्रव्यस्थापने उपनिधिरित्युच्यते। व्यप्र.२८०

अनाख्यातं व्यवहितमसंख्यातमदर्शितम्।
मुद्राङ्कितं च यद्दत्तं तदौपनिधिकं स्मृतम्॥

(१) दत्तं परहस्ते इति शेषः। स्मृच.२

(२) अनाख्यात सुवर्णादिरूपतोऽकथितम्। व्यवहितं द्रव्यान्तरेण संपुटादिना। असंख्यात पणादिभावेनाविदितसंख्यम्। यद्द्रव्यं स्थाप्यत इत्यनुषङ्गः। विर.८३

स्थानं गृहं गृहस्थं च तद्वर्णं विविधान् गुणान्।
सत्यं शौचं बन्धुजनं परीक्ष्य स्थापयेन्निधिम्॥

(१) निधिमुपनिधिमित्यर्थः। स्मृच.१७८

(२) निधि निक्षेपम्। विर.८६

ससाक्षिकासाक्षिकन्यासपालनप्रतिदानविधिः

ससाक्षिकं रहोदत्तं द्विविधं समुदाहृतम्।
पुत्रवत्परिपाल्यं तद्विनश्यत्यनवेक्षया॥
ददतो यद्भवेत्पुण्यं हेमकुप्याम्बरादिकम्।
तत्स्यात्पालयतो न्यासं तथैव शरणागतम्॥

कुप्यं त्रपुसीसादिकम्। स्मृच. १७८

अभा.८३; **व्यक.१३४** पोगण्ड (यो दण्ड) भवेद्धर्मः (विधिर्दृष्टः) विधयः समाः (निधयः स्मृताः); **विर.९६** व्यकवत्.

(१) **व्यक.१३०**; **विर.८३**; **सेतु.१२९** नं प्र (न प्र).

(२) **अप.२।६५** स प (तत्प) तः (तम्); **व्यक.१३०** राति (दिक) ऽन्य (यत्); **स्मृच.३** स प (तत्प) र्तितः (र्त्यते): १७८ अपवत्; **विर.८३** राति (दिक) गृहे (स्य यत्); **पमा.२७९** द्वाया (दक्ष) द्रव्यं न्यासः स (यत्तु स न्यासः); **दीक.३८** राजचौरा (चौरराजा); **नृप्र.२३**; **सवि.२६५** राति (दिपु) शेषं अपवत्; **व्यप्र.२७९**, **विता.५५५** रक्ष्यते(क्षिप्यते); **सेतु.१२९** राति (दिक) गृहे (त्र यत्); **समु.८७** अपवत्.

(१) **अप.२।६५**; **व्यक.१३०** च यद्दत्तं (वा यद्द्रव्य); **स्मृच.२,१७८**; **विर.८३** दत्त (द्द्रव्य); **पमा.२७९**; **नृप्र.२३**; **व्यप्र.२८०** विरवत्; **समु.८७.**

(२) **व्यक.१३०** (स्थाने गृहं गृहस्थत्व तद्धन विभवं गुणम्); **स्मृच.१७८** न् गुणान् (द् गुणात); **विर.८५** तद्वर्णं विविधान् (तद्बल विभव); **पमा.२८०** गृहस्थ च तद्वर्णं (स्थलं चेव तद्वर्णं); **स्मृचि.१४**; **नृप्र.२३** विविधान् (विभवं); **व्यप्र.२८०**; **विता.५५६**; **सेतु.१३०** विरवत्; **समु.८७.**

(१) **व्यक.१३१** तद्वि (तु वि); **स्मृच.१७८** तद्वि (तु वि) क्ष (पेक्ष); **विर.८५**; **पमा.२८१**समु (तद्)तद्वि(तु वि); **नृप्र.२३** पमावत्; **सवि.२६६** त्यनवे (दनपे); **व्यप्र.२८१** या (णे); **विता.५५५** पू.; **समु.८७** सविवत्.

(४) **अप.२।६५** थैव (था च); **व्यक.१३१**; **स्मृच.१७८**; **विर.८५**; **पमा.२८१** कु (रू); **स्मृचि.१५** पमावत्; **नृप्र.२३** पमावत्; **सवि.२६६** हैमकु (हैमरू) तथै (यथै); **व्यप्र.२८१**; **व्यम.८४**; **विता.५५६** कुप्याम्ब (कुप्यष) तथै (यथै); **समु.८७.**

[1]भर्तृद्रोहे यथा नार्याः पुंसः पुत्रसुहृद्वधे ।
दोषो भवेत्तथा न्यासे भक्षितोपेक्षिते नृणाम् ॥
[2]न्यासद्रव्यं न गृह्णीयान्नाशस्त्वयशस्करः ।
गृहीतं पालयेद्यत्नात्सकृद्याचितमर्पयेत् ॥

न्यासग्रहणं प्राचीनवचनत्रयेऽप्युपलक्षणार्थम् । तेन फलश्रुत्यादिकं निक्षेपादित्रयसाधारणमिति मन्तव्यम् ।
स्मृच. १७८

[3]स्थापितं येन विधिना येन यच्च यथाविधि ।
तथैव तस्य दातव्य न देयं प्रत्यनन्तरे ॥

(१) स्थापकेतरस्य यस्य स्थापितद्रव्ये स्वाम्यमस्ति स इह प्रत्यनन्तर इत्युच्यते । स्मृच.१८१

(२) प्रत्यनन्तरे पुत्रादौ । विर. ८७

राजदैवचोरादिनष्टनिक्षेपविचारः

[4]दैवराजोपघातेन यदि तन्नाशमाप्नुयात् ।
ग्रहीतृद्रव्यसहितं तत्र दोषो न विद्यते ॥

ग्रहीतुरिति शेषः । उपेक्षाद्यभावादित्यभिप्रायः । ग्रहीतृद्रव्यसहितमित्येतदुपेक्षाद्यभावनिश्चायकत्वेनोक्तम् । निक्षिप्तमात्रस्यापि नाशे कारणान्तरेणोपेक्षाद्यभावे निश्चिते ग्रहीतुर्दोषो न विद्यत इति अवगन्तव्यम् । दैवराजग्रहणं ग्रहीत्रसमाधेयनिमित्तोपलक्षणार्थम् ।
+स्मृच.१७९

निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम्

[5]गृहीत्वाऽपह्नुते यत्र साक्षिभिः शपथेन वा ।
विभाव्य दापयेन्न्यासं तत्समं विनयं तथा ॥
[6]रहोदत्ते निधौ यत्र विसंवादः प्रजायते ।
विभावकं तत्र दिव्यमुभयोरपि च स्मृतम् ॥

(१) निधावुपनिधौ । उभयोर्मध्ये एकस्येत्यर्थः । उभयोर्ग्रहणं 'रुच्या वाऽन्यतरः कुर्यात्' इत्ययमेव पक्षो यथा स्यादिति । ×स्मृच.१८१

(२) निधिर्निक्षेपः । उभयोर्निक्षेपतृनिक्षेपधारयितृत्वाभिमतयोः । विर.९६

न्यासप्रतिदापनम्

[7]भेदेनोपेक्षया न्यासं गृहीता यदि नाशयेत् ।
याच्यमानो न दद्याद्वा दाप्यस्तत्सोदयं भवेत् ॥

(१) नाशे मूल्यद्वारेण दाप्यः । अदाने तु स्वरूपत एव । अकृतवृद्धिप्रकरणसामान्येनोक्त वृद्धिपरिमाण नाशे ग्राह्यम् । अदाने तु 'याच्यमानो न चेद्दद्याद्वर्धते पञ्चक शतम्' इति विशेषेण तत्रैवोक्त ग्राह्यम् । 'भेदेनोपेक्षया' इति वदन् स्वीयद्रव्येण सहैवोपेक्षया नाशे न सोदय-

+ सवि , व्यप्र. स्मृचवत् ।

(१) **अप.**२।७५ तुं (तुः); **व्यक.**१३१; **स्मृच.**१७८, **विर.**८६; **पमा.**२८१; **विचि.**३६, **स्मृचि** १५; **सवि** २६६; **व्यप्र.**२८१; **विता.**५५६; **सेतु.**१३०, **समु.**८७.

(२) **व्यक.**१३१; **स्मृच.**१७८ पू., **विर.**८६, **पमा.** २८६ चतुर्थपादः; **विचि.**३६-३७; **स्मृचि.**१५ उत्त.; **सवि.**२६६ पू.; **चन्द्र.**३१ उत्त., याज्ञवल्क्यः; **व्यप्र.**२८१; **सेतु.**१३०; **समु.**८७ पू.; **विव्य.**३१.

(३) **व्यक.**१३१; **स्मृच.**१८१ दातव्यं (तद्देयं); **विर.** ८७ यच्च (यत्र); **पमा.**२८१ यथाविधि (विभावितम्) न दे (अदे) रे(रम्); **विचि.**३७; **स्मृचि.**१४ न दे (अदे); **नृप्र.** २३ पमावत्; **वीमि.**२।६७ (=); **व्यप्र.**२८५ स्मृचवत्; **व्यम** ८४ थाविधि (थाविधम्); **सेतु.**१३०; **समु.**८८ तस्य दातव्य (तच्च तद्देयं); **विव्य.**३२.

(४) **स्मृच.**१७९; **विर.**८८; **पमा.**२८१; **सवि.**२६६; **व्यप्र.**२८१ ग्रहीतृ (गृहीत) तत्र दोषो न (न तद्दोषोऽत्र); **व्यम.** ८५ ग्रहीतृ (गृहीत), **सेतु.**१३१ पू; **समु** ८७.

(१) **अप.**२।६७ त्र (श्र); **व्यक.**१३३ त्र (स्तु); **स्मृच.** १८०; **विर.**९३ त्र (स्तु) वा (च), **पमा.**२८५ गृहीत्वाऽप (ग्रहीता नि) य तथा (येन्नृपः), **सवि.**२६९ गृहीत्वा (ग्रहीता); **व्यप्र.**२८४; **विता.**५६२ उत्त.; **समु** ८८

(२) **अप.**२।६७; **व्यक.**१३४; **स्मृच.**१८१, **विर.** ९५; **पमा.**२८५ जायते (वर्तते); **स्मृचि.**१५; **सवि.**२६९; **व्यप्र.**२८४; **बाल.**२।६७ (=); **समु.**८९.

(३) **अप.**२।६६; **व्यक.**१३२; **स्मृच.**१८०; **विर.**९० स्तत् (स्त); **पमा.**२८३ ग्रहीता (ग्रहीत्वा) उत्तरार्धे (न दद्याद्याच्यमानो वा दाप्यः स्यात्सोदय भवेत्), **विचि.**३८ प्यः (प्यं); **सवि.**२६७-२६८ विरवत्; **चन्द्र** ३२; **व्यप्र.**२८२ विचिवत्: २८८ (=) विचिवत्, उत्त.; **व्यम.**८४ ग्रहीता (गृहीत्वा) प्यः (प्य); **विता.**५५९ ग्र (गृ) प्यः (प्य); **सेतु.** १३२ दि (दि) याच्य (वाच्य) प्यः (प्य); **समु.**८८ ग्र (गृ); **विव्य** ३२.

विधिरिति दर्शयति । तेन तत्र 'समं दाप्य उपेक्षितः' इति स्मृत्यन्तरविहितमूलमात्रमेव देयम् । एवं याच्यमानस्यादत्तस्य दैवराजकृतेऽपि नाशे स्थापकाय मूलमात्रं देयम् । स्मृच.१८०

(२) भेदेन स्वद्रव्यबहिर्भावेण उपेक्षया । *विर.९०

(३) [चन्द्रिकाकारमतमुपन्यस्योक्तम्] केचिदेतद्वचनमन्यथा व्याचक्षते—भेदः छलनम् । भेदेन वा उपेक्षया वा न्यासस्य ग्रहीता न्यास यदि नाशयेत् । न्यासग्रहणं निक्षेपोपनिध्योरुपसंग्रहणार्थम् । मूल्यसममेव दाप्यः । सममेव दण्ड्यः । 'याच्यमानो न दद्याद्वा' इत्यत्र वाशब्दः तुशब्दार्थः । यदि याच्यमानावसरे इदानीं न दीयते चेत् वृद्धिर्दातव्येत्युक्त तेन ग्रहीत्रा यद्यङ्गीक्रियते तदानीं न्यायत एव सोदय दद्यात्, ग्रहीता यदि कारणान्तराद् व्यासङ्गवशाद्वा प्रत्यर्पणासहिष्णुतया लोभाद्वा याचनानन्तरं न ददाति तस्य ऋणादानपदान्तर्भावात् 'याच्यमानमदत्तं चेद्वर्धते पञ्चक शतम्' इति कात्यायनः प्रवर्तत इत्याहुः । तदसत् । ऋणादानोपनिध्योः पदयोर्भेदस्य प्रकरणादौ दर्शितत्वात् । वृद्धिप्रकरणधर्मा अत्रैव प्रसरन्तीति । सवि.२६८

(४) यदि तु दोषकृतादेव राजदैवकेनापि नश्यति तदा सोदयं दाप्यः । ज्ञानपूर्वकदोषनाशिते सोदयदानं, न तु अज्ञानपूर्वकदोषनाशितेऽपि 'समं दाप्य उपेक्षित' इति वचनात् । चन्द्र.३२

न्यासापहारे दण्डविधिः

न्यासद्रव्येण यः कश्चित्साधयेत्कार्यमात्मनः ।
दण्ड्यः स राज्ञो भवति दाप्यस्तच्चापि सोदयम् ॥

(१) साधयेत्स्वाम्यननुज्ञयेति शेषः । स्वाम्यनुज्ञया तु साधयतो न दोष इति प्राचीनवचनेष्वेवार्थादवगम्यते । स्मृच. १८०

(२) अनुज्ञाप्य साधयतो निक्षिप्त प्रकारान्तरेण प्रयच्छतः सोदयदानदण्डाभावस्तु धनिकस्य राज्ञश्च सहिष्णुतया । विर.९१

न्यासविधेः अन्वाहितादिषु अतिदेशः

अन्वाहिते याचितके शिल्पिन्यासे सबन्धके ।
एष एवोदितो धर्मस्तथा च शरणागते ॥

(१) बृहस्पतिनाऽप्यनुपदिष्टधर्मकेष्वेवान्वाहितादिष्वतिदिष्टम्—अन्वाहित इति । शिल्पिन्यासे कङ्कणादिकरणाय स्वर्णकारादिहस्तन्यस्तहिरण्यादावित्यर्थः । अनेनाप्रतियाचितस्य शिल्पिन्यासस्य दैवादिना नाशे स्वर्णकारप्रभृतिर्न दाप्य इत्यादि धर्मोऽतिदिष्ट इति मन्तव्यम् । स्मृच.१८२-१८३

(२) सबन्धके बन्धकसहिते, तेन बन्धकेऽपि रहोदत्ते अतिदेशो लभ्यते । तथैव शरणागते भयादिना स्त्रीदासादौ शरणप्रविष्टे स्वामित्वाभिमतेन सह विवादे एष विधिरिति । विर.९६

(३) शिल्पिविषये जीर्णवस्त्रादावुपघाते न दोषः । नूतनवस्त्रादावुपघाते सम दाप्य कुविन्दादौ रजकादौ च । 'राजदैवोपघाते च न दोष' इत्यादौ व्यवहारे पूर्वोक्तनयैरेव निर्णयः कार्यः । रजकादौ विशेष उत्तरत्र वक्ष्यते । सवि.२७०

याचितं स्वाम्यनुज्ञातं प्रददन्नापराध्नुयात् ॥

(१) स्थापके मृते स्वयमेव प्रतियाचनाभावेऽपि भावदोषपरिहारार्थं प्रत्यनन्तरे दद्यात् इत्येतद्याचितकेऽप्यतिदिष्टधर्मवर्गान्तर्गतत्वेन प्राप्तमप्यवश्यानुष्ठेयं न भवतीत्याह बृहस्पतिः—याचितमिति । याचनादूर्ध्वमपीति दोषः । स्मृच.१८४

(२) प्रददन्यस्मै । विर.९७

कात्यायनः

उपनिध्यन्वाधियाचितकलक्षणानि

क्रयः प्रोषितनिक्षिप्तं बन्धान्वाहितयाचितम् ।
वैश्यवृत्त्यर्पितं चैव सोऽर्थस्तूपनिधिः स्मृतः ॥

---

* विचि. विरवत् ।

(१) व्यक.१३२ यः कश्चित् (यत्किञ्चित्); स्मृच. १८०; विर.९१ त्कार्य (र्थं); पमा.२८४; सेतु.१३३ विरवत्; समु.८८.

(१) अप.२।६७ न्यासे (त्यागे); व्यक.१३४; स्मृच. १८२; विर.९६; पमा.२८८; विचि.३९ सबन्धके (तथैव च) था च (थैव); स्मृचि.१५; सवि.२७० था च (थैव); व्यप्र.२८७; व्यम.८५; सेतु.१३३ तके (ते च)शेषं विचिवत; समु.८९ सब (च व).

(२) व्यक.१३४; स्मृच.१८४; विर.९७; समु.८९.

(१) अप.२।६५ तं चै (तथै); व्यक.१३०; स्मृच.३;

(१) क्रयः क्रयधनं, प्रोषितनिक्षिप्तमित्यत्र प्रोषितत्व-ग्रहणमुपलक्षणार्थम्। अन्यस्मै दातुं यदर्पित तदन्वाहितम्। अलङ्काराद्यर्थं परकीयमानीत याचितम्। कुसीदादिर्वैश्यवृत्तिः तदर्थं यदत्त परस्यार्पितोऽर्थः सोऽप्युप निधिः। ×अप.२।६५

(२) क्रयः क्रीतद्रव्य कुतश्चिन्निमित्ताद्विक्रेतृपार्श्वे स्थितम्। वैश्यवृत्त्यर्पितः वाणिज्यार्थ समर्पितः। एते सर्वे उपनिधयः उपनिधिद्रव्यवद्द्रष्टव्याः। विर.८४

(३) स्वामिनि गते देशान्तरमपरेण निक्षेपः। विचि.४०

[1]अनुमार्गेण कार्येषु अन्यस्मिन् वचानान्मम।
दद्यास्त्वमिति यो दत्तः स इहान्वाधिरुच्यते॥

एकस्मिन् यदर्पित वस्तु, तेन पुरुषान्तरे अमुष्मिन् स्वामिनि त्व दास्यसीति निक्षिप्त तदन्वाधिरित्यर्थः। हलायुधेन तु अत्र मार्गेणेति पठित्वा व्याख्यातं—अत्र कार्येषु एतेषु कार्येषु मार्गेण याचनेन अमुष्मिन् पुरुषे त्वं दद्या इति परिभाष्य यत्समर्पित तदन्वाधि-रुच्यत इति। विर.८४

[2]यच्चापि कार्यसिद्ध्यर्थं प्रतिदेयं त्वया तथा।
याचित्वा प्रगृहीतं तु तद्याचितकमुच्यते॥

राजदैवचोरादिनष्टनिक्षेपविचारः

[3]निक्षिप्तं यस्य यत्किञ्चित्तत्प्रयत्नेन पालयेत्।
दैवराजकृतादन्यो विनाशस्तस्य कीर्त्यते॥

यस्य पार्श्वे यत्स्थापितं तत्तेनावहितेन पालनीयम्। यतो दैवराजकृतादन्यो विनाशादिस्तस्य ग्राहकस्य दोषेण कृतेन कीर्त्यत इत्यर्थः। स्मृच.१७९

[4]अराजदैविकेनापि निक्षिप्तं यत्र नाशितम्।
ग्रहीतुः सह भाण्डेन दातुर्नष्टं तदुच्यते॥

(१) भाण्डेन अर्थेनेत्यर्थः। स्मृच.१७९

(२) अत्र च सर्वत्र ग्रहीतुर्द्रव्यनाशोपन्यासस्तदी याशेषदोषनिरासार्थः। तेन निक्षेपधारिदोषं विना निक्षिप्तमात्रमपि यदि नष्टं भवति, तदा न तस्य देय भवति, यदि तु तज्जैह्म्याद् विनश्यति, तदा देयमेवेति तात्पर्यार्थः। विर.८८

[5]ज्ञात्वा द्रव्यवियोगं तु दाता यत्र विनिक्षिपेत्।
सर्वापायविनाशेऽपि ग्रहीता नैव दाप्यते॥

(१) क्वचिद्येनकेनचिद्धेतुना नष्टमपि ग्रहीता मूल्य-द्वारेण न दाप्य इत्याह कात्यायनः—ज्ञात्वेति।

स्मृच.१७९

(२) वियोग राजोपद्रवादिना विनाशम्। सर्वापाय-विनाशेऽपि शङ्कितापायहेतोरपायहेत्वन्तरेणापि, तेन यत्रापायहेतुमुत्कटशङ्काविषयमुद्भावित बुध्वाऽपि निक्षि-पति, तत्र शङ्कितापायहेतोरपायहेत्वन्तरेणापि द्रव्यनाशे उपेक्षमाणोऽपि निक्षेपधर्ता न धन दाप्य इत्यर्थः। विर.८९

निक्षेपप्रतिदापनम्

[6]ग्राहकस्य हि यद्दोषान्नष्टं तु ग्राहकस्य तत्॥

यत्र तु निक्षेपधारिणा द्रव्यनाशहेतावुद्भावितेऽपि उपेक्षान्यतद्दोषादेव निक्षिप्त विनष्टमिति ज्ञायते, तदा निक्षेपधारक एव दद्यादित्याह स एव—ग्राहकस्येति। विर.८९

[7]यस्य दोषेण यत्किञ्चिद्विनश्येत ह्रियेत वा।
तद्द्रव्यं सोदयं दाप्यो दैवराजहृताद्विना॥

× स्मृच. अपवत्।

विर.८४ षं (सो); **विचि.**४० क्षिप्त (क्षेपो) न्धा (न्धो) र्थस्तू (र्थं उ); **चन्द्र.**३३ क्षिप्त (क्षेपो); **विव्य.**३३ त्वा (र्था) वृत्य (वृत्वा) र्थस्तू (र्थं उ).

(१) **व्यक.**१३० नु (र्थं) अन्य (अमु); **विर.**८४; **सेतु.**१२९ व्यकवत्; **समु.**८७ अन्यस्मिन् (अमुष्य) उत्तरार्धं (देय त्वयेति यद्दत्तं तदन्वाहितमुच्यते). (२) **समु.**८७.

(१) **स्मृच.**१७९; **व्यप्र.**२८२; **समु.**८७ पू., **बृहस्पतिः** ८८.

(१) **अप.**२।६६; **स्मृच.**१७९; **विर.**८८ दैवि (दैव); **पमा.**२८२ नापि (चापि); **व्यप्र.**२८१ अराजदैविकेनापि (राजदैविकचौरैर्वा); **समु.**८७.

(२) **व्यक.**१३२ यत्र (यदि) सर्वापाय (सर्वेषां च); **स्मृच.**१७९ सर्वा (सभ्या); **विर.**८९; **पमा** २८३ सर्वा (सर्वो), **व्यप्र.**२८२ पमावत्; **विता.**५५९ सर्वापाय (सर्वोपायैः); **समु.**८८.

(३) **व्यक.**१३२ हि (च) तु (तद्) तत् (तु); **विर.**८९; **सेतु.**१३२ हि (तु).

(४) **अप** २।६६; **व्यक** १३२ हि (कि) (तद्द्रव्य तेन

उपेक्षादिलक्षणोऽत्र दोषोऽभिमतः। स्मृच.१७९

न्यासादिकं परद्रव्यं प्रभक्षितमुपेक्षितम्।
अज्ञाननाशितं चैव येन दाप्यः स एव तत्॥

स एवेत्यनेन पुत्रदारादिर्न दाप्य इति विवक्षितम्। यदा तु तदपराधोऽपि स्यात्तदा सोऽपि दाप्यः। तदुक्तं गौतमेन—अनिन्दितान् पुरुषापराधेनेति। ×विर.९९

भक्षितं सोदयं दाप्यः समं दाप्य उपेक्षितम्।
किञ्चिन्न्यूनं प्रदाप्यः स्याद्द्रव्यमज्ञाननाशितम्॥

किञ्चिन्न्यूनमिति चतुर्थांशहीनम्। मिता.२।६७

उपनिधिग्रहणम्। उपनिध्यपहारादिदोषे दण्डविधिः।

ग्राह्यस्तूपनिधिः काले कालहीनं तु वर्जयेत्।
कालहीनं ददद्दण्डं द्विगुणं च प्रदाप्यते॥

(१) यद्व्यादुपनिधिरन्यहस्ते न्यस्तस्तद्व्यातीते काले स ग्राह्य इत्यर्थः। तद्व्यातीते कालेऽपि सकृद्-भयमेव याचितमर्पणीयम्। 'सकृद्याचितमर्पयेत्' इति बृहस्पतिस्मरणात्। तद्व्ये वर्तमाने स्वयमयाचित दीयमानं कालहीन तस्य दान दौष्ट्येनेवेति ददता दण्डो युक्तः। *स्मृच.१८१

(२) ग्राह्यो निक्षेपकारिणेति शेषः। काले व्यवस्थापितग्रहणसमये। कालहीने तत्समयहीने। तेन प्राप्ते तत्समये गृह्णीयात्, न तु अप्राप्ते। कालहीन इत्यादिना उपनिधिधार्यपि तत्समये वृत्ते अददद् द्विगुणं दण्डनीय इत्युक्तम्। उपनिधिः कात्यायनेनैव पूर्वमुक्तः। विर.९३

निक्षेपादिषु वृद्धिविधिः

निक्षेपं वृद्धिशेषं च क्रयं विक्रयमेव च।
याच्यमानं न चेद्दद्याद् वर्धते पञ्चकं शतम्॥
क्रयमूल्यं करार्थश्च निक्षेपोऽपह्नवे तथा।
चक्रवृद्ध्या विवर्धेत यावत्पञ्चगुणं भवेत्॥

क्रयमूल्यक्रयार्थौ क्रेतृविक्रेतृसंशयमूलकौ। सवि.२६९

याचितादिषु अतिदेशविवरणम्

सर्वेषूपनिधिष्वेते विधयः संप्रकीर्तिताः॥
यो याचितकमादाय न दद्यात्प्रतियाचितः।
स निगृह्य बलाद्ग्राह्यो दण्ड्यश्च न ददाति यः॥

निगृह्य बलादुपवासादि कारयित्वा स्वापकेन दाप्यो ग्राह्यः। एवमपि यो न ददाति स राज्ञा दण्डय इति। ×अप.२।६७

यदि तत्कार्यमुद्दिश्य कालं परिनियम्य वा।
याचितोऽर्धकृते तस्मिन्नप्राप्ते न तु दाप्यते॥

तात्पर्यं तावदुच्यते 'याच्यमाने न दद्याद्वा दाप्यस्तत्सोदयं भवेत्' इत्यय धर्मोऽतिदेशाद्याचितके प्राप्तोऽनेन क्वचित्प्रतिषिध्यते। प्रतिषेधवचनस्यायमर्थः।यत्कार्यं दीर्घकालसाध्य तत्कार्यमध्ये यदि याचितः यदि वा संवत्सरपर्यन्तं दीयतामित्येव काल परिनियम्य याचितः। तस्मिन् कार्यमध्ये परिनियतकालमध्ये वा प्रतियाच्यमानो याचितकं यो न ददाति असौ न सोदयं दाप्य इति। याचितकमात्रमेवास्मै कृते कार्ये परिनियतकालात्यये वा दद्यात्। +स्मृच.१८३

× विचि विरवत्। * पमा., व्यप्र., विता. स्मृचवत्। दातव्य सोदयं धनिने स्वयम्); **स्मृच.**१७९ न (ना); **विर.** ८९, **दीक.**३८ न (ना); **चन्द्र.**३१ (यस्य दोषेण यन्नष्टं देय भवति तस्य तत्) पू; **व्यप्र.**२८२; **विता.**५५८-५५९ द्विना (वृते); **सेतु** १३२; **समु** ८८; **विव्य.**३२.

(१) **व्यक.**१३४; **स्मृच.**१८०; **विर.**९९ तत् (तु); **पमा.**२८३ भक्षित (क्षिप्तं स), **विचि.**४० चैव (चापि); **चन्द्र.** ३१ (अज्ञाननाशित चैव न दाप्य इति निश्चयः) उत्त.; **व्यप्र.** २८२; **सेतु.**१३४, ३१९; **समु.**८८; **विव्य.**३२ विचिवत्.

(२) **मिता.**२।६७; **व्यप्र.**२८२ क्षित (क्षिते) न्यू (दू) प्यः स्या (प्य स्या) व्यासकात्यायनौ; **व्यउ.**८० शितम् (शिनः); **विता.**५६० ज्ञान (ज्ञात).

(३) **अप.**२।६७; **व्यक.**१३३ हीन (हीने); **स्मृच.** १८१; **विर.**९३ व्यकवत्; **पमा.**२८६; **व्यप्र** २८४-२८५ प्यते (पयेत्); **विता.**५५६ च (स); **समु.**८८.

---

* व्याख्यासंग्रहः स्थलादिनिर्देशश्च ऋणादाने (पृ. ६३२) द्रष्टव्यः। × स्मृच., व्यप्र. अपवत्।

+ पमा., व्यप्र., विता. स्मृचवत्।

(१) **सवि.**२६८ वरदराजः; **समु.**८८ र्धश्च (र्ध च) पोऽप (पाप) विवर्धेत (प्रदातव्यं). (२) **व्यक.**१३३-१३४; **विर.**९२, ९७. (३) **अप.**२।६७ न (नो) ण्ड्यश्च न (ण्डेन च); **व्यक.** १३३ : १३४अपवत्; **स्मृच.**१८४; **विर.**९२:९७ ण्ड्यश्च (ण्ड्यः स); **व्यप्र.**२८८; **व्यम.**८६ क्रमेण याश्चवत्स्यः; **विता.** ५७२ (=)उत्त.; **समु.**८९ तः (तम्). (४) **व्यक.**१३३ पू. : १३४ वा (च); **स्मृच.**१८३ ते त (ते य) न तु (नतु); **विर.** ९१; **पमा.**२८९ मुदि (मादि) नप्राप्ते न (प्राप्ते च न); **व्यप्र.** २८८ ते त(तो य); **व्यम** ८६; **विता.**५७२तो(ते); **समु.**८९.

[1]प्राप्तकाले कृते कार्ये न दद्याद्याचितोऽपि सन् ।
तस्मिन्नष्टे हृते वाऽपि ग्रहीता मूल्यमावहेत् ॥

ननु 'याचितानन्तरं नाशे दैवराजकृतेऽपि सः । ग्रहीता प्रतिदाप्यः स्यात्' ॥ इत्यादिस्मृत्या मूल्यमात्रदापनं उपदिष्टमिहातिदेशेनैव प्राप्तं किमर्थमिह पुनरुपदिश्यते । उच्यते । स्मृत्यन्तराद्दण्डोऽप्येवं प्राप्तस्तन्निवृत्त्यर्थमिहाप्युक्तम् । स्मृच.१८३

[2]अथ कार्यविपत्तिस्तु तस्यैव स्वामिनो भवेत् ।
अप्राप्ते वै स काले तु दाप्यस्त्वर्धकृतेऽपि तत् ॥

यदि याचितकाप्रतिदाने तत्स्वामिनः कार्यनाशः संभाव्यते तदा दद्यादित्यर्थः । व्यप्र.२८८

[3]यैस्तु संक्रियते न्यासो दिवसैः परिनिष्ठितैः ।
तदूर्ध्वं स्थापयन् शिल्पी दाप्यो दैवहतेऽपि तम् ॥

यैर्यावद्भिः । तं न्यासम् । विर.९८

[4]न्यासदोषाद्विनाशः स्याच्छिल्पिनं तं न दापयेत् ।
दापयेच्छिल्पिदोषात्तत्संस्कारार्थं यदर्पितम् ॥

रजकादिहस्ते नैर्मल्यार्थं दत्तस्य जीर्णवस्त्रादेर्यद्यवधातादिना नाशः अवधातादिश्च नैर्मल्याद्यर्थस्तदा शिल्पिदोषाभावात्तत्र शिल्पी न दाप्यः । नूतनादौ तु पटुतरावधातादिकृतनाशस्य शिल्पिदोषकृतत्वात्तन्मूल्यं दाप्य इत्यभिसंधायाह——न्यासदोषादिति । शिल्पिदोषादित्यत्र विनाशः स्यादित्यनुषज्यते । व्यप्र.२८७

स्वल्पेनापि च यत्कर्म नष्टं चेद्भृतकस्य तत् ।
पर्याप्तं दित्सतस्तस्य विनश्येत्तदगृह्णतः ॥

यत्कर्म वस्त्रनिर्माणादि स्वल्पेनापि प्रान्तवानादिना विकलं नष्टं चेद् भृतकस्य शिल्पिन एव नष्टं पुनर्वर्तनग्रहणमन्तरेणैव वानादिक्रियां कुर्यादित्यर्थः । यदि स्वामी पुनस्तन्त्वादिक नार्पयति तदा पुनः वानाद्यभावेऽपि वेतन शिल्पिने दत्तं न लभते । पर्याप्तं परिपूर्णं वस्त्र दित्सतो भृतकस्य यः स्वामी तस्य दीयमानमगृह्णतः तत्पर्याप्तं विनश्येदित्युत्तरार्धस्यार्थः । एव चात्र भृतको नष्टं दाप्य इति वचोभङ्ग्या भणितमवगन्तव्यम् ।

*स्मृच.१८३

व्यासः

निक्षेपलक्षणम्

[1]स्थानत्यागाद्राजभयाद्दायादानां च वञ्चनात् ।
स्वद्रव्यमर्प्यतेऽन्यस्य हस्ते निक्षेपमाहृतम् ॥

स्वद्रव्य स्वकीयं द्रव्य वस्त्रनिष्कादिकमन्यस्य कुलजत्वादिगुणवतो हस्ते समर्प्यते । ग्राहकसमक्षमेवार्प्यते क्षेमार्थं यत्तत्र निक्षेपशब्दो वर्तत इत्यर्थः । तच्चार्पणं ग्राहकस्य पुरतो गणनां कृत्वा कार्य 'निक्षेप गणितं विदुरि'ति स्मरणात् । स्मृच.१७८

निक्षेपस्य तदपह्नवादेश्च प्रमाणनिरूपणम्

[2]निक्षेपं निह्नुते यस्तु नरो बन्धुबलान्वितः ।
साक्षिभिर्वाऽथ दिव्येन विभाव्य प्रतिदाप्यते ॥

* पमा., व्यप्र. स्मृचवत् ।

(१) व्यक.१३४ नश्ये (नये); स्मृच.१८३ यत् (तत्); विर.९८ स्व (अ); पमा.२८९ स्व (शि) चेद्भृ (यद्भृ); व्यप्र.२८७; समु.१३४.

(२) स्मृच.१७८; समु.८७.

(३) स्मृच.१८० व्य (व्य); व्यप्र.२८४; विता.५६१; समु.८८

(१) व्यक १३४; स्मृच.१८३; पमा.२९० हृ (गृ); विचि.३७ प्र (प्रे) हृ (कृ) वाऽपि (वाऽथ) वहे (हरे); वीमि. २।६७ प्र (प्रे) ग्रहीता (गृहीत्वा) वहे (हरे); व्यप्र.२८८; व्यम.८६; विता.५७२ (=) प्र (प्रे); सेतु.१३२ प्र (प्रे) वाऽपि (वाद्य); समु.८९ प्र (प्रे); विव्य.३२ प्र (प्रे) वाऽपि (वाऽथ) वहे (हरे).

(२) व्यक.१३४; स्मृच.१८४; विर.९३ स (स्व); पमा.२९०; व्यप्र.२८८; विता.५७२ (=) स्तु (श्वेत्) प्रे वै (प्रेऽपि); समु ८९.

(३) व्यक.१३४; स्मृच.१८३ यैस्तु (यैश्चित्) ष्ठि (श्चि) रूपी (ल्प); विर.९८ स्तु (श्च); पमा.२८८ स्तु (श्च) ष्ठि (श्चि) यन् (येत्); विचि.३९ स्था (हा) तेऽपि तम् (तं तु तत्) बृहस्पतिः; स्मृचि.१५ हृते (कृते) शेषं पमावत्; चन्द्र.३३ यै (य) तम् (तत्); व्यप्र.२८७ यैस्तु सस्कि (यश्च सश्री) हृते (हृते) बृहस्पतिः; व्यम.८५ यैस्तु (यश्च) यन् (येत्) वह (वाद्य); विता.५६८ यैस्तु (यस्य) निष्ठि (कल्पि) वह (वाद्य); सेतु. १३३ ष्ठि (श्चि) तेऽपि तम् (तोऽपि सन्) बृहस्पतिः; समु. ८९ ष्ठि (श्चि); विव्य.३२ बृहस्पतिः.

(४) व्यक.१३४; स्मृच.१८३; विर.९८ नं तं न(नस्तत्र) त्तत् (च्च); पमा.२८८; व्यप्र.२८७; विता.५६८ पूर्वार्धे (शिल्पिदोषाद्विना नाशः शिल्पिनं नैव दापयेत्); समु.८९.

अपह्नवे त्ववृद्धिकमेव साधितं दाप्य इत्याह व्यासः —निक्षेपमिति । स्मृच.१८०

न्यासादिप्रतिदापनम्

[1]भक्षिते सोदयं दाप्यः समं दाप्य उपेक्षितम् ।
किंचिन्न्यूनं प्रदाप्यः स्याद्द्रव्यमज्ञाननाशितम् ॥
[2]याचनानन्तरं नाशे दैवराजकृतेऽपि सः ।
ग्रहीता प्रतिदाप्यः स्यात् अन्यथा दण्डमर्हति ॥

मूलमात्रमिति शेषः । प्रत्यर्पणविलम्बमात्रापराधे सवृद्धिकदापनायोगात् । पमा.२८४

न्यासापहारादिदोषे दण्डविधिः

[3]याच्यमानस्तु यो दातुर्निक्षेपं न प्रयच्छति ।
दण्डयः स राज्ञो भवति नष्टे दाप्यश्च तत्समम् ॥

नष्ट इत्यत्र दैवाद्राजतो वेति शेषोऽध्याहार्यः । स्मृच.१८०

यत्रार्थं साधयेत्तेन निक्षेप्तुरननुज्ञया ।
तत्रापि दण्डयः स भवेत्तं च सोदयमावहेत् ॥

यः पुनः स्थापितधनाद्व्यय कुरुते उपयोग वा लाभार्थ वा प्रयोगं तत्राप्याह स एव—यत्रार्थमिति । साधित र्थानुसारेण दण्डयः । स्मृच.१८

स्मृत्यन्तरम्

निक्षेपनाशे निक्षेपो देयः

[4]उपेक्षणाद्विरोधाद्वा निक्षिप्तस्य विनाशने ।
निक्षिप्तं तत्र देयं स्यान्न दैवाद्राजतस्तथा ॥

अनिर्दिष्टकर्तृकवचने

निक्षेपप्रतिदापनम् । तद्वृद्धिश्च ।

[5]न चेद्ददाति निक्षिप्तं स द्रव्यं च यथाविधि ।
उपसंगृह्य दाप्यः स्यात् इति धर्मो व्यवस्थितः ।
[6]निक्षेपाधरतोऽध्यर्धं त्रिमासात्त्रिगुणं भवेत् ।
अत ऊर्ध्वं विवर्धेत चक्रवृद्धिव्यवस्थया ॥

मत्स्यपुराणम्

निक्षेपापहारादिदोषे दण्डविधिः

[7]यो नार्पयति निक्षेपं यस्त्वनिक्षिप्य याचते ।
तावुभौ चौरवच्छास्यौ दाप्यौ वा द्विगुणं दमम् ।
[8]यो याचितकमादाय न दद्यात्तत्तथाविधम् ।
स निगृह्य बलादाप्यो दण्डयो वा पूर्वसाहसम् ।

षट्त्रिंशन्मतम्

राजदैवचोरादिनष्टनिक्षेपविचारः

[9]परोपनिहितं द्रव्यं संरक्षेदारपुत्रवत् ।
नष्टं दैवेन राज्ञा वा तदेयं न यमोऽब्रवीत् ॥

(१) व्यक१३२ क्षिते (क्षितं), स्मृच.१८० क्षितम्(क्षिते); विर.९१ व्यकवत्; पमा.२८३ क्षितम् (क्षिते) न्यू (दू); दीक.३८ क्षिते (क्षितं) न्यू (दू) प्यः स्या (प्य स्या); विचि.३९ व्यकवत्; सवि.२६८ स्मृचवत्; चन्द्र.३१ दाप्यः (दद्यात्) प्रथमपादः : ३२ क्षितम् (क्षिते) प्रदाप्यः (तु दाप्य) प्रथमपादं विना; वीमि.२।६७ व्यकवत्; व्यप्र.२८२ प्यः स्या (प्यं स्या) शेषं पमावत्, व्यासकात्यायनौ; सेतु.१३३ व्यकवत्, समु.८८ व्यकवत्; विव्य.३४ दाप्यः स (दद्यात् स) शेषं व्यकवत्.

(२) स्मृच.१८३ चना (चिता) चतुर्थपादं विना, स्मृतिः; पमा.२८३; व्यप्र.२८३ चतुर्थपादं विना; समु.८८ (ग्रहीता प्रतिदाप्यः स्यादिति धर्मविदो विदुः). (३) स्मृच.१८०.

(१) समु.८८. (२) नृप्र.२४.

(३) सवि.२६१. वरदराजः, समु.८८ वरदराजः.

(४) विर.९१; व्यप्र.२८४ (यो निक्षेपं नार्पयति यश्चा निक्षिप्य याचते) वा (च).

(५) अप.२।६७ याचितक (हि याचित) तत्तथाविधम (द्वितय ब्रुवन्) बलाद् (तथा); विर.९७.

(६) समु.८७.

अस्वामिविक्रयः

विष्णुः

अस्वामिविक्रये ज्ञानाज्ञानकृतक्रयविक्रयदोषतारतम्यम् ।

अज्ञानतश्चेत् स्वामी स्वं लभते ।

अज्ञानतः प्रकाशं यः परद्रव्यं क्रीणीयात् तत्र तस्यादोषः । स्वामी द्रव्यमाप्नुयात् । यद्यप्रकाशं हीनमूल्यं वा क्रीणीयात् तदा क्रेता विक्रेता च चोरवच्छास्यः ।

अज्ञानतो विक्रेतुरस्वामित्वाज्ञानतः । तत्र परद्रव्यक्रये । तस्य क्रेतुरदोषः । तस्करदोषो नास्तीत्यर्थः । विक्रेतुस्तदोषोऽस्त्येव । तेनात्र विक्रेतैव तस्करवद्दण्ड्यो न पुनः क्रेताऽपि । यत्र पुनर्विक्रेतुरस्वामित्व रहसि हीनमूल्येन वा विक्रयकरणादिना ज्ञात्वैव लोभादिना परद्रव्यं क्रीणाति तत्र क्रेतुरपि तस्करदोषोऽस्ति इति तस्करवद्दण्डः । तथा च स एव—यद्यप्रकाशमिति ।

×स्मृच.२१३

× सवि., व्यप्र. स्मृचवत् ।

(१) **विस्मृ.**५।१५९-१६१ ज्ञानतः (जानानः) वा (च) स्वः (स्वौ); **व्यक.**१३७ अज्ञा ...मुयात् (अज्ञानतः यः परद्रव्यं क्रीणीयात्तस्य दोषतः । क्रेता मूल्यमवाप्नोति स्वामी द्रव्यमवाप्नुयात् ॥) स्वः (स्वौ); **स्मृच.**२१३-२१४ मा (मवा) (विक्रेता०); **विर.**१०७ ज्ञानतः (जानन्) (प्रकाश०) व्य क्री (व्य विक्री) तत्र तस्या (तस्य न) द्रव्य (तद्द्रव्य) (यद्य . स्यः०), **विचि.**४४ (अज्ञान . मुयात्०) मूल्य वा (मूल्यमुपाशु) (विक्रेता च०);**दवि.**३२८ (अज्ञान मुयात्०) वा (च) स्य. (स्यौ); **सवि.**३०६ द्रव्य क्रीणीयात् (द्रव्य विक्रीणीते) स्वामी+ (तद्) मा (मवा)(यद्यप्रकाश प्रकाश वा हीनमूल्य विक्रीणीयात्तद। क्रेता विक्रेता च चौरवच्छास्यौ) यद्यप्रकाशमित्याद्यशः स्मृतिरित्युक्त्वोद्धृतः; **व्यप्र.**२९२ तत्र तस्या (तत्रास्या) मा (मवा); **विता.**५७५(अज्ञा ...मुयात्०); **सेतु.**१३८विचिवत्; **समु.**१०५-१०६ स्मृचवत्; **विव्य.**३४ विचिवत् .

शङ्खः

अस्वामिविक्रये स्वामिने द्रव्यं देयम्

अनात्मीयस्य विक्रेता गृहक्षेत्रादिकस्य तु ।
क्षेत्रं तत्सदृशं दद्यात् मूल्यं वा क्रेतुरिच्छया ॥

कौटिलीयमर्थशास्त्रम्

अस्वामिविक्रयकारिणो दण्डः तद्द्रव्यनिर्णयश्च

अस्वामिविक्रयस्तु । नष्टापहृतमासाद्य स्वामी धर्मस्थेन ग्राहयेत् । देशकालातिपत्तौ वा स्वयं गृहीत्वोपहरेत् । धर्मस्थश्च स्वामिनमनुयुञ्जीत, कुतस्ते लब्धमिति । स चेदाचारक्रमं दर्शयेत, न विक्रेतारं, तस्य द्रव्यस्यातिसर्गेण मुच्येत । विक्रेता चेद् दृश्येत, मूल्यं स्तेयदण्डं च । स चेदपसारमधिगच्छेदपसरेदापसारक्षयादिति । क्षये मूल्यं स्तेयदण्डं च दद्यात् ।

स्वत्व विभाव्य स्वामी द्रव्य लभतेऽन्यथा दण्ड्यः

नाष्टिकं च स्वकरणं कृत्वा नष्टप्रत्याहृतं लभेत । स्वकरणाभावे पञ्चबन्धो दण्डः । तच्च द्रव्यं राजधर्म्यं स्यात् ।

अस्वामिविक्रय इति सूत्रम् । अस्वामिकृतो विक्रयः अस्वामिविक्रयः । सः तद्दण्डश्चाभिधीयते इति सूत्रार्थः । अस्वामिविक्रयस्त्विति । प्रतिपाद्यत इति शेषः । नष्टापहृतमिति । तद् द्रव्यं आसाद्य कस्यचिद्वशे विद्यमानमुपलभ्य, स्वामी, धर्मस्थेन ग्राहयेदर्थात् यस्य वशे द्रव्यं विद्यते तम् । धर्मस्थश्च, स्वामिनं संप्रति तद्द्रव्योपनेतारं, अनुयुञ्जीत पृच्छेत्—कुतः ते त्वया लब्धमिति । स पृष्टो द्रव्यहस्तः, आचारक्रम द्रव्यागमपरिपाटी, दर्शयेत विभावयेच्चेत्, विक्रेतारं न दर्शयेत चेत्, तस्य द्रव्यस्य अतिसर्गेण स्वामिहस्तेऽर्पणेन, मुच्येत, न तु तस्य स्तेयदण्डः । विक्रेतेति । स चेद् दृश्येत, मूल्यं क्रेतुर्दद्यात्, स्तेयदण्डं च राज्ञे दद्यात् । स चेदिति ।

(१) **समु.**१०५. (२) **कौ.** ३।१६.

स विक्रेता अपसारमधिगच्छेच्चेत् अपराधिपदादात्मापसरणहेतुं विभावयेच्चेद् आत्मनो विक्रेतारमन्य प्रदर्शयेच्चेदित्यर्थः, अपसरेद् अपक्रामेद् दण्डं विना । आपसारक्षयादितीति । अयमुत्तरोत्तरापसाराधिगमेनापसरणक्रमोऽपसारक्षयावधिकः संभवतीत्यर्थः । क्षये चरमोपलब्धस्य विक्रेतुरपसारानधिगमे सति, मूल्यं स्तेयदण्डं च दद्यात् अर्थात् स एव । नाष्टिकं चेति । नाष्टिक नष्टवस्तुविषय, स्वकरणं स्वत्वसाधकं साक्षिलेख्यादि कृत्वा दर्शयित्वा, नष्टप्रत्याहृत लभेत । स्वकरणाभावे पञ्चबन्धः तद्द्रव्यमूल्यपञ्चभागो दण्डः । तच्च द्रव्यं राजधर्म्य राज्ञो न्यायप्राप्त स्यात् । श्रीम्.

मनुः

अस्वामिविक्रेतुर्निन्द्यत्वम्

[1]**विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसंमतः ।**
न तं नयेत साक्ष्यं तु स्तेनमस्तेनमानिनम् ॥

(१) अस्वामिविक्रयाख्यविवादपदमिदमनुक्रान्तम् । परस्य यद्द्रव्यादि स्व तच्चेदस्वामी तत्पुत्रादिरन्यो वा विक्रीणीते स्वामिनाऽननुज्ञातस्त स्तेन चौरं विद्यात् । यद्यपि यस्तस्मात् क्रीणाति स तमस्तेन मन्यते । न त नयेत साक्ष्य तु, तं पुरुषं न नयेत न प्रापयेत् साक्ष्यं न कारयेत्साक्षिकरणे न नियोक्तव्य इत्यर्थः । यथा चौरस्तादृश एवासौ । स्तेनत्वाच्च न साक्षित्वम् । न साक्षित्व एव प्रतिषेधः । किं तर्हि ? सार्वासु साधुजनसाध्यासु क्रियासु । परस्वमननुज्ञातेन विक्रीतं क्रेतुर्न स्व भवतीति सिद्धे साक्षिकर्मनिषेधद्वारेण प्रतिषेधो वैचित्र्यार्थः ।×मेधा.

(२) न तं नयेत साक्ष्यमिति न तं क्वापि प्रमाणीकुर्यादित्यर्थः । *व्यक.१३६

(३) अस्वामिविक्रयमाह—विक्रीणीत इति । न तं साक्ष्यन्त नयेत् साक्षिसमीपं नयेत् तद्वचनाद्विनैव निर्धारणसंभवे। एतेन महापराधत्वमस्य कथयति । मवि

(४) तं साक्ष्यं साक्ष्युक्तिविषयं न नयेत । तदं साक्ष्यनादर इति भावः । मच

अज्ञानतोऽस्वामिविक्रेतुः स्वामिसबन्धासबन्धभेदेन दण्डतारतम्यम्

[2]**अवहार्यो भवेच्चैव सान्वयः षट् शतं दमम् ।**
निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषम् ।

(१) पूर्वेण साधुजनकर्तृकासु क्रियासु साक्ष्यादिष्वपि अस्वामिविक्रयकारिणामनर्हतोक्ता। अनेन षट्शतो दण्ड उच्यते । षट्कार्षापणशतानि अवहार्यो दापयितव्यो दण्ड्य इति यावत् । सान्वयोऽन्वयोऽनुगमनसंबन्धः स यस्यास्ति, पुत्रभ्रात्रादिः स्वामिनोऽनुगतः सान्वयः । स ह्यननुज्ञातोऽपि विक्रीणानो न स्फुटचोरो, यतस्तस्येयं बुद्धिर्मदीयमेवैतद्यत्पितुरिति तं प्रतीयमपि संभावना भवति तस्यैव विक्रीय मूल्यं ददाति । यस्त्वत्यन्तासबन्धः स निरन्वयः । चौरकिल्बिषं निग्रहं निःसंशय प्राप्तः । अनपसरो, यदि तद्गृहं तस्य नापसृतं भवति तदाऽनपसरश्चौरवद्दण्ड्यः । यदि तु तद्गृहादेव केनचिद्दत्तं विक्रीत वा तस्य, तेन वा आज्ञा दत्वा तत्प्रतिगृहीतं, प्रकाशक्रयेण वा क्रीतं, तदा न चौरवद्दण्ड्यः । षट्शतमेव दाप्यः । अथवा अन्वयो विक्रीणाति (?) तस्य विक्रेयद्रव्यस्यान्यतः क्रयः, अपसरः क्रयादन्यः प्रतिग्रहादिरागमः । एतदुक्त भवति । यदि तेन तन्न कुतश्चन क्रीतं नापि प्रतिग्रहादिना लब्ध, तदा चौरः । *मेधा.

(२) अपसरत्यनेन स्वामिनः सकाशाद्धनमिति प्रतिग्रहादिर्धनोपायोऽपसरः स न विद्यते यस्य स तथा, एतच्च भागुरिमेधातिथिवृत्तिकाराणामनुमतम् । व्यक.१३६

(३) सान्वयस्तद्द्रव्ययोग्यसबन्धाभासवान् तथा

× गोरा. मेधावत् । * ममु. व्यकवत् ।

(१) **मस्मृ.**८।१९७ ग. पुस्तके साक्ष्य तु (साक्ष्यस्तु); **व्यक.**१३५; **मवि.**क्ष्य तु (क्ष्यन्तं); **स्मृच.**२१३ पू.; **विर.**१०३; **विचि.**४१; **स्मृचि.**१६ णीते (णाति) स्तेनमस्तेन (स्तेयमस्तेय), **नृप्र.**२७-२८ पू.; **दचि.**३२६; **सवि.**३०५ स्वं योऽस्वामी (स्वमस्वामी) पू.; **व्यप्र.**२९० पू.; **सेतु.**१३५; **विव्य.**३३.

* गोरा., विचि., मच. मेधागतम् ।

(१) **मस्मृ.**८।१९८; **मवि.** नप (नव); **व्यक.**१३५; **विर.**१०३ सान्व (स्वान्व) प्राप्तः स्या (प्राप्नुया); **विचि.**४१, १९२; **स्मृचि.**१६ दमम् (दमः); **दचि.**३२६; **सेतु.**१३५; **विव्य.**३३ प्राप्तः स्या (प्राप्नुया) : ५६; **नन्द.** नप (नाव); **भाच.** मविवत् .

तस्मिन्नजीवति विभक्ततद्भ्रात्रादिः । निरन्वयोऽत्यन्तोदासीनः संबन्धाभासेनापि रहितः । तथा सान्वयोऽप्यनवसरोऽकालेऽदेशे च विक्रय कुर्वन् । मवि.

(४) अनपसरश्च स्यात्, अपसरत्यनेनास्मात् सकाशाद्धनमित्यपसरः प्रतिग्रहक्रयादिः स यस्य स्वामिसबन्धिपुत्रादेः सकाशान्नास्ति । *ममु.

(५) अपसरणमपसरः स्वामिगृहाद्धनस्य ।*विर.१०३

(६) नावसरः अनुग्रहावसररहितः । नन्द.

ज्ञानतोऽस्वामिविक्रेतुश्चौरदण्डः

अनेन विधिना शास्यः कुर्वन्नस्वामिविक्रयम् ।
अज्ञानाज्ज्ञानपूर्वं तु चौरवद्दण्डमर्हति ॥

(१) एष च सर्वोऽज्ञानकृतविषयः ज्ञाने त्वन्यथेत्याह —अनेन विधिनेति । मवि.

(२) अज्ञातपरस्वविक्रयी षट्शतपणदमेन, ज्ञाततद्विक्रयी चोरदण्डेन हस्तच्छेदनादिना शास्यः ।

विचि.४१

विशुद्धक्रयः

[१]**विक्रयाद्यो धनं किञ्चिद् गृह्णीयात्कुलसंनिधौ ।**
क्रयेण स विशुद्धं हि न्यायतो लभते धनम्× ॥

(१) याहशेन क्रयेण स्वाम्य भवति तं दर्शयति, विक्रीयतेऽस्मिन्व्यवहारिण इति विक्रयः आपणभूमिः, ततो यो गृह्णीयाद्धनं गवादि, क्रीयमाणं द्रव्यं मूल्य वा स लभते न्यायतः क्रयेण कुलसनिधौ विशुद्ध, न्यायतः क्रय उचितेन मूल्येनासंभाव्यपापपुरुषात् कुलस्यान्यव्यवहर्तृमेलककारपुरुषसमूहस्य समक्षं गृहीतं, लभते नापहारयति । अन्यथाऽस्वामिना तु द्रव्यं प्रतिनीयतेऽस्य न्यायतो विक्रये, किन्तु मूल्यं लभते तस्माद्यस्तस्य विक्रयी । अन्यायतः क्रयेण तु दण्ड्यते मूल्यं च हारयति । एतदुक्त 'विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्य नृपो दमम् । क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी' ॥ एष एवार्थोऽनेन श्लोकेन प्रतिपाद्यते । +मेधा.

(२) कुल सघः स च स्वर्णकारादिर्माध्यस्थः । क्रयेण विशुद्ध विक्रेतरि सभाव्यं तावद्वस्तुसद्भाव तथा अमूल्यत्वादेशकालत्वादि क्रयाविशुद्धिरहितम् । अन्यथा स्वाम्यदर्शनेऽपि राज्ञ एव तदित्यर्थः । मवि.

(३) तदेतन्मार्गितद्रव्यविभावनाऽभावविषयम् । मार्गितद्रव्यविभावनासद्भावविषयेऽपि मनुमरीचिवचनबलात्प्रकाशक्रये क्रेतुर्धनलाभोऽस्त्विति चेत्, न । न हि वचनशतेनाप्यस्वामिविक्रीत क्रेतुः स्वं भवतीति प्रमातुं शक्यते । कि च सर्वत्र प्रकाशक्रये क्रेतुर्धनलाभे प्रागुक्तेन 'अथ मूलमनाहार्यं' इत्यादिवचनेन सह विरोधो दुर्वारः स्यात् । तस्मात् प्रकाशक्रयेऽपि मार्गितद्रव्य विभावनाभाव एव क्रेतुर्धनलाभ इत्यवगन्तव्यम् । शम्भुना तूक्तदोषपरिहाराय मनुमरीचिवचनाभ्या क्रेतुर्धनयोग्यतामात्रमुच्यते । न तु वस्तुतस्तस्येदं धनं भवतीत्युच्यत इत्युक्तम् । तदुक्त योग्यतामात्रकथनस्योपयोगाभावात् । *स्मृच.२१६

(४) विक्रीयतेऽस्मिन्निति विक्रयदेशो विक्रयः । ततो यत्क्रेयधन किञ्चित् व्यवहर्तृसमूहसमक्ष क्रीयतेऽनेनेति क्रयो मूल्य तेन यस्माद् गृह्णीयात् । अतो न्यायत एवास्वामिविक्रेतुसकाशात् क्रयणाद्विशुद्ध धन लभते । ममु.

प्रकाशक्रये मूलालाभे न दोषः । स्वामी स्व लभते ।

अथ मूलमनाहार्यं प्रकाशक्रयशोधितम् ।
अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम् ॥

+ मच., नन्द., भाच. मेधावत् ।

* व्यप्र , विता. स्मृचवद्भावः ।

* शेष मेधागतम् । × गोरा. अशुद्धिसंदेहान्नोद्धृतम् ।

(१) **मस्मृ.**८।१९९ इत्यस्योपरिष्टात् प्रक्षिप्तश्लोकोऽयम्, शास्यः(शास्ता), अयं श्लोकः सर्वज्ञनारायणेनैव व्याख्यातः, नार्न्यैर्मूलटीकाकृद्भिः; **व्यक.**१३५; **विर.**१०३; **विचि.**४१, १९२; **स्मृचि.**१६; **दवि.**३२६; **सेतु.**१३७; **समु.**१०६; **विव्य.**५६ चौर (वध).

(२) **मस्मृ.**८।२०१, अयं श्लोकः मस्मृ.८।८१ इत्यस्योपरिष्टात्पुनः प्रक्षिप्तश्लोकत्वेनोद्धृतः, क्रये (क्रमे); **व्यक.**१३६ द्ध हि (द्धस्तु), **स्मृच.**२१६, **विर.**१०३ व्यकवत्; **व्यप्र.** २१६ द्ध (द्धो); **विता.**५७७ उत्त., **सेतु.**१३५ व्यकवत्; **समु.**१०७.

१ न्यव, २ पाकु.

(१) **मस्मृ.**८।२०२ शोधितम् (शोधितः);**अप.**२।१७० नाष्टि (नास्ति) दण्डो (दण्ड्यो); **स्मृच.**२१५, **विर.**१०३; **पमा.**२९६; **विचि.**४३; **नृप्र.**२८; **चन्द्र.**१५ अथ (यत्र)

(१) असभाव्यपापात्तु पुरुषादित्यादि न्यायतः क्रय उक्तः। स चेद्विक्रेता शक्य आहर्तुं तदा पूर्वोक्तो विधिः 'स्वामी द्रव्यम्' इत्यादि (यास्मृ.२।१७०)। अथ स विक्रयी गतः, अनेन क्रीतं स्वामिना चिह्नीकृत, तेन च मूलं विक्रेता पुरुष आहर्तुं न शक्यते। प्रकाश जनसमक्षं प्रसिद्धाया विक्रयभुवः क्रीतमत ईदृशेन क्रयेण शोधिते द्रव्ये शुद्धः क्रेता अदण्ड्यो मुच्यते। धन तु नाष्टिकः स्वामी शापितस्त्वैत्वो लभते। नष्टमन्वेषते नाष्टिकः। नष्टमस्यास्तीत्येव ठनि कृते प्रज्ञादित्वात्स्वार्थिकोऽण् कर्तव्यः। नष्टं प्रयोजनमस्येति वा। तेनायं सक्षेपः। प्रकाशक्रये तु दण्डो न स्याद्धननाशस्तु स्थित एव। *मेधा.

(२) यदि तेन किञ्चिद्देशान्तरं गत्वा क्रीतद्रव्यमूल्यमाहर्तुमशक्यं तदा पूर्वश्लोकन्यायेन प्रकाशक्रयशोधित कृत्वा क्रेता दण्डत एव (?) राज्ञा द्रष्टव्यः। गोरा.

(३) अत्र च विषयोऽर्धमूल्यं क्रेतुर्दत्वा स्वधनं स्वामिना ग्राह्यम्। ममु.

(४) अथशब्दो यदर्थः। मूलमनाहार्यं विक्रेतुः सकाशान्नष्टं लभते। नन्द.

मूलालाभे क्रयदोषशङ्कायां दण्डः। स्वामी स्वं लभते।

अनुपस्थापयन्मूलं क्रयं वाऽप्यविशोधयन्।
यथाभियोगं धनिने धनं दाप्यो दमं च सः॥

यदा पुनः साक्ष्यादिभिर्दिव्येन वा क्रयं न शोधयति, मूलं च न प्रदर्शयति, तदा स एव दण्डभाग्भवति। मिता.२।१७०

अस्वामिकृतनिवर्तनम्

अस्वामिना कृतो यस्तु दायो विक्रय एव वा।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः॥

(१) न केवलमस्वामिसकाशाद्यत्क्रीत तत्र सिध्यति किं तर्हि? प्रतिगृहीतमपि। प्रतिग्रहेण प्रीत्या वा दान दायः सोऽपि न सिध्यति। 'विक्रीणीते परस्य' इत्यनेन विक्रेतुः प्रतिग्रहीतुश्चास्वाम्यमुच्यते। 'स्वामी रिक्थक्रये' त्यादिना स्वाम्याशङ्काया प्रातोऽयं प्रतिषेधः। व्यवहार एषा स्थितिर्नातिक्रमणीया। मेधा.

(२) व्यवहारे यथा मर्यादा तथा कृत न भवतीत्यर्थः। *ममु.

(३) क्रयाद्यसिद्धिमप्याह—अस्वामिनेति। स्वत्वरहितेन द्रव्येण अन्यायोपात्तेन परद्रव्येण वा यः क्रयः कृतः सोऽप्यस्वामिना कृतः स्यादेव। तथा वस्तुतो अस्वाम्यास्पदीभूतस्य विक्रय इत्यप्यविरोधः। व्यवहारे यथा मर्यादा तथा कृत न भवतीत्यर्थः। मच.

याज्ञवल्क्यः

अशुद्धक्रयस्वरूपम्। स्वामी स्वं लभते।

[1]स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते।
हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः॥

(१) उक्तो द्रव्याणा स्वत्वसम्बन्धः। इदानीमस्वामिविक्रयं दर्शयति—स्वं लभेतेति। अन्येनास्वामिना विक्रीतं द्रव्य दृष्ट्वा स्वामी गृह्णीयात्। क्रेतुश्च दोषः स्यात् अप्रकाशिते क्रये। प्रकाशक्रये तु मूल्यमात्रप्रणाशः। न तु स्तेयदोषः। क तर्हि दोषः। हीनाद् दासादिहस्ताद् गृह्णतः। तदा रहः प्रच्छन्नम्। हीनमूल्ये च स्तेयसभावनया गृहीते। वेलाहीने च तस्करः। क्रेता स्यादित्यर्थः। विश्व.२।१७२

(२) संप्रत्यस्वामिविक्रयाख्यं व्यवहारपदमुपक्रमते। तत्र किमित्याह — स्व लभेतेति। स्वं आत्मसंबन्धि द्रव्य अन्यविक्रीतमस्वामिविक्रीतं यदि पश्यति तदा लभेत गृह्णीयात्। अस्वामिविक्रयस्य स्वत्वहेतुत्वाभावात्।

---

* अप., मवि., स्मृच., ममु., विर., पमा, विचि., मच., विता. मेधावत्।

नाष्टि (नास्ति); **वीमि.**२।१६८ दण्ड्यो (दण्ड्ये); **व्यप्र.**२९५; **व्यम.**८७ हार्यं (हार्यो); **विता.**५७७; **सेतु.**१३६, **समु.**१०६; **विव्य.**३४.

(१) **मिता.**२।१७०. (२) **मस्मृ.**८।१९९; **व्यक.**१३६ **मनुयमौ; विर.**१०४ मनुयमौ; **विचि.**२५६(=); **स्मृचि.**१६ दाप्यो (क्रयो); **सेतु.**१२८,१३४(=).

१ स्वं वा.

---

* शेष मेधावत्।

(१) **यास्मृ.**२।१६८; **अपु.**२५७।१९; **विश्व** २।१७२; **मिता.**; **अप.**; **व्यक.**१३६-१३७; **स्मृच.**२१३-२१४ मूल्ये (मूल्यात्); **विर.**१०५ पू.:१०८ शिते (शिनः); **पमा.** २९२; **स्मृचि.**१६; **दवि.**३२८ उत्त.; **नृप्र.**२८; **मच.** ८।२०२; **वीमि.**; **व्यप्र.**२९१; **व्यउ.**८०; **विता.**५७४; **सेतु.**१३८ विरक्त; **समु.**१०६.

विक्रीतग्रहणं दत्ताहितयोरुपलक्षणार्थम् । अस्वामिविक्रीतत्वेन तुल्यत्वात् । अत एवोक्तम्— 'अस्वामिविक्रयं दानमाधिं च विनिवर्तयेत्' इति । क्रेतुः पुनरप्रकाशिते गोपिते क्रय्ये दोषो भवति । तथा हीनात्तत्तद्द्रव्यागमोपायहीनाद्रहसि चैकान्ते संभाव्यद्रव्यादपि, हीनमूल्येनाल्पतरेण च मूल्येन क्रये, वेलाहीने वेलया हीनो वेलाहीनः क्रयो राज्यादौ कृतस्तत्र च क्रेता तस्करो भवति । तस्करवद्दण्डादिभाग्भवतीत्यर्थः । ×मिता.

(३) अस्वामिना गोभूम्यादिक विक्रीत तद्यस्य स्वं स क्रेतुः सकाशाल्लभेत । क्रेतुश्च विक्रेतारमप्रकाशयतो दोषश्चौर्यं स्यात् । ततश्चौरवदस्य दण्डो भवति । वेलाहीने विक्रयवेलारहिते पण्य एव क्रेता तस्करः स्यात्तस्करदण्डभाक् स्यादित्यर्थः । जानाति ह्यसौ क्रयात्प्रागेव चोरयित्वाऽयमिद विक्रीणीत इति । *अप.

नष्टापहृतविचारः

[१]नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरः ।
देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत् ॥

(१) नष्ट वापहृतं वा द्रव्यमन्येन गृहीतमासाद्योपलभ्य द्रव्यग्राहिणं हर्ताऽयमिति व्यपदिश्य राजपुरुषैर्व्यवहारनिर्णयाय ग्राहयेत् । यदि तु राजकीयासनिधानं देशकालातिपत्तिश्चाशङ्कयेत,तदा स्वयमेव गृहीत्वा राज्ञे हर्तारमर्पयेत् । नन्वेतत् स्वभावसिद्धत्वादेवावाच्यम् ।सत्यम्। स्वातन्त्र्येण गृह्णतः स्तेनं च ददतो दोषाभावज्ञापनार्थमेतत् ।अन्या व्याख्या—नष्टापहृतमासाद्य क्रीत्वा स्वामिना प्रार्थ्यमाने हर्तारं ग्राहयेत् । मूल्यमर्पयेदित्यर्थः । देशकालातिपत्तौ वा प्रकाशकयेणाऽपि गृहीत्वा स्वयमर्पयेत् । तथाप्यदोष इत्यभिप्रायः । विश्व.२।१७३

(२) स्वाम्यभियुक्तेन क्रेत्रा किं कर्तव्यमित्यत आह —नष्टापहृतमिति । नष्टमपहृतं वा अन्यदीयं क्रयादिना प्राप्य हर्तारं विक्रेतारं नरं ग्राहयेत् चौरोद्धरणकादिभिः आत्मविशुध्यर्थं राजदण्डाप्राप्त्यर्थं च । अथाविदितदेशान्तरं गतः कालान्तरे वा विपन्नस्तदा मूलसमाहरणाशक्तेर्विक्रेतारमदर्शयित्वैव स्वयमेव तद्धनं नाष्टिकस्य समर्पयेत्। तावतैवासौ शुद्धो भवतीति श्रीकराचार्येण व्याख्यातं तदिदमनुपपन्नम् । 'विक्रेतुर्दर्शनाच्छुद्धिः' इत्यनेन पौनरुक्त्यप्रसङ्गात् । अतोऽन्यथा व्याख्यायते । नष्टापहृतमिति नाष्टिकं प्रति अयमुपदेशः । नष्टमपहृतं वात्मीयद्रव्यमासाद्य क्रेतुर्हस्तस्थं ज्ञात्वा तं हर्तारं क्रेतारं स्थानपालादिभिर्ग्राहयेत् । देशकालातिपत्तौ देशकालातिक्रमे स्थानपालाद्यसनिधाने तद्विज्ञापनकालात्प्राक् पलायनशङ्कायां स्वयमेव गृहीत्वा तेभ्यः समर्पयेत् । + मिता.

(३) देशकालातिपत्तौ राज्ञा ग्रहणे क्रियमाणे यदि देशमतीत्यापहर्ता न याति कालात्यये वाऽपहृतं द्रव्यं व्यपैति तदा स्वयमपहर्तारं गृहीत्वा राज्ञेऽर्पयेत् । *अप.

(४) विनष्टमपहृतं वा स्वकीयद्रव्यमासाद्याधिगन्तुरपहर्तुर्वा हस्ते दृष्ट्वापहर्तारमधिगन्तारं वा ग्राहयेत् ।
+ स्मृच.२१३

(५) देशकालवशेनाऽतिपत्तौ राजपुरुषाद्यसंनिधाने तु स्वयमेव क्रेता स्वाम्यभियुक्तो विक्रेतारं स्वामिनेऽर्पयेत् । अत्र हेतुः—विक्रेतुर्दर्शनादित्यादि । ×वीमि.

अस्वामिक्रेतृग्रहणोत्तरविधिः

[२]विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमम् ।
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी ॥

× विर., पमा., वीमि., व्यप्र., व्यउ., विता. मितावत् ।

* शेषं मितावत् । स्मृच. अपवत् मितावच्च ।

(१) **याज्ञ्स्मृ.**२।१६९; **अपु.**२५७।२० च (वा); **विश्व.** २।१७३ अपुवत्; **मिता.**; **अप**; **व्यक.**१३५; **स्मृच.** २१३ ऋणम् (ऋरः) च (वा); **विर.**१०० उत्तरार्धे (देशकालविपत्तौ च गृहीता स्वयमर्पयेत्); **पमा.**२९२ अपुवत्; **स्मृचि.** १६; **नृप्र.**२८ लाति (लवि); **सवि.**३०७ पू.; **वीमि.** ऋणम् (ऋरः); **व्यप्र.**२९२; **व्यउ.**८० (=) हर्ता (भर्ता); **विता.**५७४; **समु.**१०५.

÷ स्वपक्ष. विश्वरूपोक्तप्रथमपक्षवत् । विर. मिताक्षरोक्तश्रीकरपक्षवत् । सवि., विता. मितावत् ।

* शेषं मिताक्षरास्वपक्षवत् ।

+शेषं मिताक्षरास्वपक्षवत्। पमा.,व्यप्र. स्मृचवत् मितावच्च।

× पूर्वार्धव्याख्यान मिताक्षरोक्तश्रीकरपक्षवत् ।

(१) **याज्ञ्स्मृ.**२।१७०; **अपु.**२५७।२१ व्यमवा (व्यं समा) स्तस्य (स्तत्र); **विश्व.**२।१७४ स्तस्य (स्तत्र); **मेधा.**८।२०१; **मिता.**; **अप.**; **विर.**१०२ विश्ववत्; **स्मृचि.**१६-१७; **नृप्र.** २८; **मच.**८।२०२; **वीमि.**; **व्यप्र.**२९४; **व्यउ.**८० (=); **विता.**५७६; **समु.**१०६.

(१) हर्तृतया च राजन्यावेदितस्य–विक्रेतुर्दर्शनाच्छुद्धिरिति । विक्रेतारं दर्शयित्वा क्रेतुर्निर्दोषत्वम् । स्वामिनश्च तदा द्रव्यलाभः । विक्रयिणश्च हस्तात् क्रेतुर्मूल्यप्राप्तिः । दण्डप्राप्तिश्च राज्ञ इत्यवसेयम् । विश्व.२।१७४

(२) ग्राहिते हर्तरि किं कर्तव्यमित्यत आह––विक्रेतुरिति । यद्यसौ गृहीतः क्रेता न मयेदमपहृतमन्यसकाशात्क्रीतमिति वक्ति तदा तस्य क्रेतुर्विक्रेतुर्दर्शनमात्रेण शुद्धिर्भवति । न पुनरसावभियोज्यः । किन्तु तत्प्रदर्शितेन विक्रेत्रा सह नाष्टिकस्य विवादः । यथाह बृहस्पतिः–'मूले समाहूते क्रेता नाभियोज्यः कथंचन । मूलेन सह वादस्तु नाष्टिकस्य विधीयते' ॥ इति । तस्मिन्विवादे यद्यस्वामिविक्रयनिश्चयो भवति तदा तस्य नष्टापहृतस्य गवादिद्रव्यस्य यो विक्रयी विक्रेता तस्य सकाशात् स्वामी नाष्टिकः स्वीय द्रव्यमवाप्नोति, नृपश्चापराधानुरूप दण्डं, क्रेता च मूल्यमवाप्नोति । *मिता.

स्वामी स्वत्वं विभाव्य स्वं लभते

[1]आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ।
पञ्चबन्धो दमस्तस्य राज्ञे तेनाविभाविते ॥

(१) कथं पुनः स्वाम्यवगतिः । उच्यते–आगमेनोपभोगेनेति । आगमेन लेख्यादिना प्रकाशमस्खलितचिरभोगेन वा नष्टं द्रव्यमन्यहस्तगत मदीयमित्येव भाव्यम् । अतः प्रकारद्वयादन्यथा मदीयमिति वदतो विवादीभूतद्रव्यात् पञ्चबन्धः पञ्चमो भागो दमः स्यात् । तच्च द्रव्यमितरेणापि पूर्वोक्तप्रकारद्वयेनात्मीयमित्यभाव्य राजगाम्यवसेयम् । विश्व.२।१७५

(२) स्वं लभेतान्यविक्रीतमित्युक्तं तल्लिप्सुना किं कर्तव्यमित्यत आह— आगमेनोपभोगेनेति । आगमेन रिक्थक्रयादिना उपभोगेन च मदीयमिदं द्रव्यं तच्चैवं नष्टमपहृत वेत्यपि भाव्यं साधनीयं तत्स्वामिना । अतोऽन्यथा तेन स्वामिना अविभाविते पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशो दमो नाष्टिकेन राज्ञे देयः । अत्र चायं क्रमः । पूर्वस्वामी नष्टमात्मीयं साधयेत् । ततः क्रेता चौर्यपरिहारार्थं मूल्यलाभाय च विक्रेतारमानयेत् । अथानेतु न शक्नोति तदात्मदोषपरिहाराय क्रयं शोधयित्वा द्रव्य नाष्टिकस्य समर्पयेदिति । *मिता.

(३) न मयैतद्दानविक्रयादिनाऽन्यस्य स्व कृतं किन्तु नष्टमेवैतदिति भाव्यम् । विवादास्पदधनपञ्चमभागसंमितो धनभागो यत्र बध्यते स पञ्चबन्धः । आगमोपभोगो नाशश्च ज्ञातृभिः साध्यः । +अप

(४) अल्पापराधविषयमेतत् । ×स्मृच.२१५

नारदः

असंस्वामिविक्रयस्वरूपम्

[1]निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वाऽपहृत्य वा ।
विक्रीयतेऽसमक्षं यत्स ज्ञेयोऽस्वामिविक्रयः ॥

(१) असमक्ष स्वामिन इति शेषः । स्मृच.४

(२) परेण यस्य हस्ते न्यासो निक्षिप्तः, नष्टं वा क्वचित् पतितमन्यतो वा लब्ध्वा, स्वयमपहृत्य विक्रीयते तेन स्वामिनः परोक्षं, अस्वामिविक्रयो नाम विवादपदम् । नाभा.८।१

(३) निक्षिप्तग्रहणं याचितादीनामुपलक्षणार्थम् । व्यप्र.२९०

असंस्वामिकृतनिवर्तनम्। स्वामी स्वं लभते। शुद्धाशुद्धक्रयौ।

[2]अस्वामिना कृतो यस्तु क्रयो विक्रय एव च ।
अकृतः स तु विज्ञेयो व्यवहारेषु नित्यशः ॥

*विर. मितावत् । + शेषं मितावत्। ×पमा., व्यप्र. स्मृचवत्।

(१) **नासं.**८।१ ऽसमक्ष (परोक्षे); **नास्मृ.**१०।१ यत्स (यद्वि); **अपु.**२५३।१९ नासंवत्; **मिता.**२।१६८; **अप.**२।१६८; **व्यक.**१३५; **स्मृच.**४; **विर.**१००; **पमा.**२९०; **स्मृचि.**१६ वा (च) स ज्ञे ... यः (व्यवहारे यथास्थितः); **नृप्र.**२८; **व्यप्र.**२९०; **व्यउ.**८०; **विता.**५७३ पर (परं) यत्स (यः स); **सेतु.**१३४ यत्स (यत्तद); **समु.**१०५.

(२) **स्मृच.**२१३; **पमा.**२९१ च (वा); **विचि.**४०-४१ क्रयो (क्रायो) च (वा) षु नित्यशः (यथास्थितिः); **नृप्र.**२८; **सवि.**३०५ रेषु (रस्य); **व्यप्र.**२९१ यमः; **विता.**

* अप., वीमि., व्यप्र., व्यउ., विता. मितावत् ।

(१) **यास्मृ.**२।१७१; **अपु.**२५७।२२ राज्ञे तेनावि (राज्ञस्तेनाप्य); **विश्व.**२।१७५ स्तस्य राज्ञे तेनावि (स्तत्र राज्ञस्तेनाप्य); **मिता.**; **अप.** स्तस्य (स्तत्र); **व्यक.**१३६; **स्मृच.**२१४ पू. : २१५ अपवत्; **विर.**१०५ स्तस्य (स्तत्र) राज्ञे (राज्ञः); **पमा.**२९४ : २९८ अपवत्; **स्मृचि.**१७ अपवत्; **नृप्र.**२८; **वीमि.** स्तस्य (स्तत्र) राज्ञे (राज्ञा); **व्यप्र.**२९४; **व्यउ.**८१ बन्धो (मांशो) शेषं वीमिवत्; **व्यम.**८६ अपवत्; **विता.**५७६ नष्टं (नष्टे); **समु.**१०७ अपवत्.

द्रव्यमस्वामिविक्रीतं प्राप्य स्वामी तदाप्नुयात् ।
प्रकाशे क्रयतः शुद्धिः क्रेतुः स्तेयं रहःक्रयात् ॥

(१) अस्वामिना विक्रीत स्वकीयं द्रव्यं यस्य पार्श्वे दृष्ट तत्सकाशात् स्वामी तद्गृह्णीयादित्यर्थः । एतच्च स्वाम्यननुमत्या विक्रीतद्रव्यविषयम् । स्मृच.२१३

(२) गवादिद्रव्यमस्वामिना यथोक्तेन विक्रीतं यत्र स्वामी पश्येत्, ममेति विशोध्य लभेत । क्रेतुश्च महाजनप्रकाश क्रयाच्छुद्धिः, मूल्यं तु नष्टमेव । यदि पश्येत तत्सकाशाल्लभेत । यावदपरस्तावदपसरश्चोरः । रहःक्रयात्क्रेतुरस्त्येव स्तेयम् । अप्रकाशक्रये क्रेता चोरः, यदि विक्रेतारं नोपस्थापयति । उपस्थाप्य मुच्यते चौर्यात् । नाभा.८।२

अशुद्धक्रयस्वरूपम्

[२]अस्वाम्यनुमताद्दासादसतश्च जनाद्रहः ।
हीनमूल्यमवेलायां क्रीणंस्तद्दोषभाग्भवेत् ॥

५७४(=) क्रयो (दायो) च (वा); **समु.**१०५ पमावत्, **विश्व.**३३ विचित्र.

(१) **नासं** ८।२ प्रकाशे (प्रकाशं); **नास्मृ.**१०।२ तदा (समा) **प्रकाशे** क्रयतः (प्रकाशविक्रये) क्रयात् (क्रमात्); **विश्व.** २।१७२ प्राप्य (द्रव्य) तदा (समा) प्रकाशे (प्रकाश) क्रयात् (कृते); **मिता.**२।१६८(=); **व्यक.**१३६ तदा (समा) पू. १३७ क्रयात् (क्रमात्) उत्त., मनुः, **स्मृच.**२१३ पू.:२१४ क्रयात् (क्रेतात्) चतुर्थपादः; **विर.**१०५ तदा (समा) **पू.**. १०७ प्रकाशे (प्रकाश) उत्त.; **पमा.**२९१ पू.:२९३ शुद्धि. (सिद्धिः) क्रेतुः (क्रेतु) मनु; **नृप्र.**२८; **सवि.**३०५ **पू**; **व्यप्र.**२९१ प्रकाशे (प्रकाशे); **व्यउ** ८० (=); **व्यम.**८६ **प्रका** ...**द्धिः** (प्रकाशतः क्रय. **शुद्धः**) उत्त.; **विता.**५७६ क्रेतुः (क्रेतु)शेषं व्यमवत्, उत्त.; **सेतु.**१३७ प्रकाशे (प्रकाशं) क्रयात् (क्रेतात्) उत्त.; **समु.**१०५ पू.:१०६ तः शुद्धिः (शुद्धि. स्यात्) उत्त.

(२) **नासं.**८।३; **नास्मृ.**१०।३; **विश्व.**२।१७२; **अप.** २।१६८; **व्यक.**१३७; **स्मृच.**२१४; **विर.**१०८; **पमा.** २९४; **विचि.**४२; **त्रिवि.**३२८ (**अथास्यानुमतात् दासात् क्रीणंस्तद्दोषभाग् भवेत्**); **नृप्र.**२८ क्रीणन् (क्रीत); **चन्द्र.**३५ **द्दः** (विद्द); **वीमि.**२।१७१; **व्यप्र.**२९२; **व्यम.**८६ दस (द्रस); **सेतु.**१३८; **समु.**१०६; **विश्व.**३४.

(१) अस्वाम्यनुमतादस्वामिनैवानुमतात्स्वाम्यनुमतिशून्यादिति यावत् । दासग्रहणमस्वतन्त्रोपलक्षणार्थम् । तद्दोषभाक् तस्करदोषभागित्यर्थः । ×स्मृच. २१४

(२) अस्वाम्यनुमतात् स्वामिनाऽननुज्ञाताद् दासात् । दास इति ज्ञात्वा, दासी वा, पालहस्तिपकादेः, असतो बालाज्जनाद् रहो विविक्ते देशे राज्यादौ चाल्प दत्वा क्रीणन् तद्दोषभाक् चोरतुल्यो भवेत्, एतैर्हेतुभिस्तस्य चोरत्व ज्ञात्वा क्रयात् । नाभा.८।३

आगमाधीना क्रेतुः शुद्धि.

[३]न गूहेदागमं क्रेता शुद्धिरस्य तदागमात् ।
विपर्यये तुल्यदोषः सर्वं तद्दण्डमर्हति ॥

(१) विपर्यये आगमनिगूहने, तुल्यदोषो विक्रेतृतुल्यदोषः, तद्दण्ड विक्रेतृतुल्यदण्डमर्हति । विर. १०८

(२) न गूहेदागमं यस्य सकाशाद् गृहीत तन प्रच्छादयेत् प्रकाशक्रये, यतोऽस्य शुद्धिस्तदागमात् तद्द्रव्यस्यागमात् विक्रेतुर्वा दर्शनात् । विपर्यये आगमाभावे चोरेण तुल्यदोषः चोरदोष सर्वमाप्नुयात्, द्रव्यानुरूपद्रव्यशरीरादिदण्डः । नाभा.८।४

अस्वामिविक्रेतुर्दण्डादिविधि

[४]विक्रेता स्वामिनेऽर्थं स्वं क्रेत्रे मूल्यं च तत्कृतम् ।
दद्याद्दण्डं तथा राज्ञे विधिरस्वामिविक्रये ॥

यस्तेन दर्शितोऽस्मान्ममागम इति स्वय वापि क्रेतानपसरो वा द्रव्यस्वामिने द्रव्यं दत्वा क्रेतुश्च मूल्यं तत्कृत यद् गृहीत क्रेतुः सकाशात् राज्ञे चानुरूप दण्ड दद्यात् । एषोऽस्वामिविक्रये विधिः । नाभा.८।५

× पमा., व्यप्र. स्मृचवत् ।

(१) **नासं.**८।४ रस्य (ह्रस्य) द्दण्ड (द्रोष); **नास्मृ.**१०।४ दागम (तागम) रस्य (स्तस्य) सर्वं . ति (स्तेयदण्डं च सोऽर्हति); **व्यक.**१३७; **विर.**१०८, **विचि.**४३ सर्वं (सर्वः), **वीमि.**२।१७१ गूहे (क्रये); **सेतु.**१३९.

(२) **नासं.**८।५ स्वं क्रेत्रे (च क्रेतुः); **नास्मृ.**१०।५ त्कृतम् (त्समम्); **स्मृच.**२१५ तथा (तदा); **विर.**१०२ पूर्वार्धे (विक्रेता स्वामिनोऽर्थं च क्रेतुर्मूल्य च यत्कृतम्) तथा (यथा) रस्वा (नास्वा); **पमा.**२९६ ऽर्थं (यत्) तत्कृ (यत्कृ), **स्मृचि.**१७ नेऽर्थं स्व क्रेत्रे (नोऽर्थं च क्रेतुः) रस्वा (नास्वा), **समु.**१०६.

स्वाम्यनर्पिततदीयवस्तुभोगे विधिः

[1]उद्दिष्टमेव भोक्तव्यं स्त्री पशुर्वसुधाऽपि वा ।
अनर्पितं तु यो भुङ्क्ते भुक्तभोगं प्रदापयेत् ॥
[2]अनुदिष्टं तु यद्द्रव्यं वासः क्षेत्रं गृहादिकम् ।
स्वबलेनैव भुञ्जानश्चोरवद्दण्डमर्हति ॥
[3]अनड्वाहं तथा धेनुं नावं दासं तथैव च ।
अनिर्दिष्टं तु भुञ्जानो दद्यात्पणचतुष्टयम् ॥
दासी नौका तथा धुर्यो बन्धकं नोपभुज्यते ।
उपभोक्ता तु तद्द्रव्यं पण्येनैव विशोधयेत् ॥
[5]दिवसे द्विपणं दासीं धेनुमष्टपणं तथा ।
त्रयोदशं त्वनड्वाहमश्वं भूमिं च षोडश ॥
[6]नौकामश्वं च धेनुं च लाङ्गलं कार्मिकस्य च ।
बलात्कारेण यो भुङ्क्ते दाप्यश्चाष्टगुणं दिने ॥
[7]उलूखले पणार्धं तु मुसलस्य पणद्वयम् ।
शूर्पस्य च पणार्धं तु जैमिनिर्मुनिरब्रवीत् ॥

पण्येन पणसमूहेन । अत्रैको धेनुशब्दो गामभिधत्ते । अपरो दोग्ध्रीमहिष्यादिकम् । कार्मिकस्य कर्मोपजीविनः ।

व्यप्र. २९७

बृहस्पतिः

अस्वामिविक्रयस्वरूपम्

[9]निक्षेपानन्तरं प्रोक्तो भृगुणाऽस्वामिविक्रयः ।
श्रूयतां तं प्रयत्नेन सविशेषं ब्रवीम्यहम् ॥
[10]निक्षेपान्वाहितन्यासहृतयाचितबन्धकम् ।
उपांशु येन विक्रीतमस्वामी सोऽभिधीयते ॥

हृत अपहृतम् । इतराणि पूर्वार्धवर्तिपदानि बहुधा व्याख्यातानि । उपांशु अप्रकाशम् । अप्रक्षोऽप्य परद्रव्यतया प्रसिद्धाना प्रदर्शनार्थः । प्रायिकाभिप्रायेण उपांशुग्रहणम् । तेन प्रणष्टाधिगतादिकमपि परद्रव्यं येन विक्रीत प्रकाशमपि येन निक्षेपादिक विक्रीत सोऽप्य-स्वामी ।

स्मृच.२१३

शुद्धक्रयः

[11]येन क्रीतं तु मूल्येन प्राप्राज्ञे विनिवेदितम् ।
न तत्र विद्यते दोषः स्तेनः स्यादुपधिक्रयात् ॥

(१) उपधिक्रयः छद्मक्रयः ।

अप. २।१७१

(२)मूल्येनाहीनमूल्येन प्राक् राज्ञे विनिवेदितम् । क्रयात्प्रागेव प्रकाशितमित्यर्थः ।

स्मृच. २१४

अशुद्धक्रयः

[12]अन्तर्गृहे बहिर्ग्रामान्निशायामसतो जनात् ।
हीनमूल्यं च यत्क्रीतं ज्ञेयोऽसावुपधिक्रयः ॥

(१) विर.१००, सेतु.१३४ त (तत्).

(२) अप.२।१६८ (निक्षिप्तान्वाहित न्यासं हृतयाचित-बन्धकम्) व्यासः; व्यक.१३५; स्मृच.२१३; विर.१०० याचितबन्धकम् (बन्धकयाचितम्); पमा.२९१ येन (जन), नृप्र.२८, सवि.३०५; व्यप्र.२९० तन्यासहृत (तं न्यास हृतं); विता.५७४ सोऽभिधीयते (स तु समतः); समु.१०५ तन्यास (तं न्यासं). (३) अप.२।१७१ ख्ये (ले) ग्राज्ञे वि (गध्यक्ष)तत्र विद्यते (विद्यते तत्र); व्यक.१३७ग्राज्ञे वि(गध्यक्ष); स्मृच.२१४ पधि (पवि); विर.१०७ नः (यः) शेष व्यकवत्; पमा.२९३ स्मृचवत्; विचि.४४ क्रयात् (क्रये) शेष व्यकवत्; स्मृचि.१७ दितम् (देयत्) धिक्रयात् (विक्रयः); दवि.३२८ व्यकवत्; नृप्र.२८ प्राग्राज्ञे (राज्ञे च) पधि (पवि); सवि. ३०६ प्राग्राज्ञे वि (तप्राग्राज्ञे); व्यप्र.२९१; सेतु.१३८ क्रयात् (क्रये) शेष व्यकवत्; समु.१०५स्मृचवत्; विव्य.३४विचिवत्.

(४) व्यक.१३७ मान्निशायाम (मे निश्युपाश्च) च (तु); स्मृच.२१४ धि (वि); विर.१३६ शायाम (श्युपांश्च);

---

(१) स्मृच.२१७(=) भोगं (भाग); पमा.३०१; नृप्र. २७; व्यप्र.२९७; व्यम.८७, विता ५८१ क्तभोग (क्तेभागं), समु.१०७ स्मृचवत्.

(२) स्मृच.२१७ (=) क्षेत्र गृहा (क्षेत्रगवा), पमा. ३०१ नुद्दि (निर्दि); नृप्र.२७, व्यप्र २९७ वास. क्षेत्र (दासक्षेत्र); विता.५८१ त्र (त्र); समु.१०७.

(३) स्मृच.२१७(=) निर्दि (नुद्दि); पमा.३०१, नृप्र. २७; व्यप्र.२९७ दास (वास); समु.१०७ तथा (ततो) शेष स्मृचवत्.

(४) स्मृच.२१७(=) बन्ध (बन्धु); पमा.३०१ भुज्य (युज्य) तद् (त), नृप्र.२७, व्यप्र.२९७ तद (यद्); समु.१०७. (५) स्मृच.२१७ (=) डश (डशे); पमा.३०१ श त्व (शम); नृप्र.२७; व्यप्र.२९७, विता.५८१ मश्च (मश्च); समु.१०७ द्विपण (द्विगुण).

(६) स्मृच.२१७ कार्मि (क्रामु); पमा ३०१ गुण (पणं); नृप्र.२७; व्यप्र.२९७ मश्च च (मश्चाश्च); विता. ५८१ कार्मि (कर्षे); समु.१०७ कार्मि (कार्षि) श्चाष्ट (स्सोऽष्ट).

(७) स्मृच.२१७ (=) रम्र (मम्र); पमा.३०२ जैमिनिः दे पणे); नृप्र.२७; व्यप्र.२९७; विता.५८१; समु.१०७.

(१) असतो जनाद्दासादिजनादित्यर्थः । असद्ग्रहणमस्वामित्वज्ञापकदासत्वादिविक्रेतृविशेषणोपलक्षणार्थम् । स्मृच.२१४

(२) असतो जनाच्चण्डालादेरित्यर्थः । पमा.२९३

(३) एतद्वाक्य स्वामितोऽपि क्रयः कश्चिद्विरुद्धो भवतीत्युपक्रम्य कृत्यसागरस्मृतिसारयोरवतारितं व्याख्यातं च । अत्राप्यस्वामिविक्रयवद्व्यवहारः । दवि.३२८

मूलदर्शने क्रेतुः शुद्धिः

[1]पूर्वस्वामी तु तद्द्रव्यं यदागत्य विचारयेत् ।
तत्र मूलं दर्शनीयं क्रेतुः शुद्धिस्ततो भवेत् ॥

मूल विक्रेता, शुद्धिरभियोज्यत्वनिवृत्तिः । स्मृच.२१५

[2]मूले समाहृते क्रेता नाभियोज्यः कथंचन ।
मूलेन सह वादस्तु नाष्टिकस्य विधीयते ॥

अस्वामिविक्रेतुर्दण्डादिविधिः

[3]विक्रेता दर्शितो यत्र हीयते व्यवहारतः ।
क्रेत्रे राज्ञे मूल्यदण्डौ प्रदद्यात्स्वामिने धनम् ॥

यदा तु मूलत्वेन दर्शितो विक्रेता न किंचिदुत्तरं ददाति तदा त्वाह बृहस्पतिः — विक्रेता दर्शित इति । पमा.२९५

[4]परद्रव्येऽभिलषति योऽस्वामी लोभसंयुतः ।
अभावयंस्ततः पश्चाद्याच्यः स्याद्द्विगुणं दमम् ॥
क्रीत्वा सदोषं यः पण्यं विक्रीणात्यविचक्षणः ।
तदेव द्विगुणं दाप्यस्तत्समं विनयं तथा ॥

अस्वामिविक्रये प्रमाणहीनवादे निर्णयविधिः

[5]प्रमाणहीनवादे तु पुरुषापेक्षया नृपः ।
समन्यूनाधिकत्वेन स्वयं कुर्याद्विनिर्णयम् ॥

यस्मिन्वादे नाष्टिकस्यानुवर्तमानस्वत्वसाधकप्रमाणाभावः क्रेतुश्च प्रकाशक्रयसाधकप्रमाणाभावः तस्मिन्वादे नाष्टिकक्रेतृपुरुषयोः साधुत्वापेक्षया विषादास्पद धन समन्यूनाधिकत्वेन विभज्यैतावत्तवेति स्वयमेव राजा निर्णयं कुर्यादित्यर्थः । ननु प्रमाणहीनवादो न कुत्राऽपि सभवति । कथचिन्मानुषाभावेऽपि दिव्याभावस्य सर्वथा वक्तुमशक्यत्वात् । मैवम् । अस्वामिविक्रये वादे दिव्याभावस्तावदवगम्यते । 'अभियोक्ता धन कुर्यात्प्रथमं ज्ञातिभिः स्वकम् । पश्चादात्मविशुध्यर्थं क्रयं क्रेता स्वबन्धुभिः' ॥ इत्यादिवचनाना साक्षिनियामकाना तदितरप्रमाणाभावाभिधानपरत्वात् । कि च'प्रकाश च क्रयं कुर्यात्साधुभिर्ज्ञातिभिः स्वकैः । न तत्रान्या क्रिया प्रोक्ता दैविकी न च मानुषी' ॥ इति । साक्षीतरप्रमाणनिषेधादिव्याभावः सुव्यक्तः । एवं च यदुक्त कात्यायनेन — 'अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेत्' इति तद्दिव्यनिषेधस्मृत्यभावविषयमिति मन्तव्यम् । एतेनैतन्निरस्तम् । यच्छम्भुना मूलानयनक्रयप्रकाशनरूपमुभयमधिकृत्योक्तम् । अथोभयं कर्तुमसमर्थश्चौर्यं च न च मन्यते तदा द्रव्यापेक्षया दिव्यं देयम् । कात्यायनेनोक्तत्वात् । स्मृच.२१६

पमा.२९३ स्नुचवत्; **विचि.**४४ च (तु) शेष विरवत्; **स्मृचि.**१७ द्वे (ह) मात् (मे) मस (मश) धि (वि); **दवि.**३२८ ऽसावुपधि (दुष्ट. परि) शेष विरवत्, **नृप्र** २८ धि (वि); **सवि.** ३०६; **व्यप्र.**२९१ च (तु), **सेतु.**१३८ च (तु) शेष विरवत्; **समु.**१०६; **विव्य.**३४ व्यकवत्.

(१) **अप.**२।१६८ चा (धा) व्यासः; **व्यक.**१३५ तो (था); **स्मृच.**२१५; **विर.**१०१ अपवत्; **पमा.**२९५, **विचि.**४१ तु (ति) चा (धा); **नृप्र.**२८, **सवि.**३०६-३०७; **चन्द्र.**३४ त्य विचार (त्यावबोध), **व्यप्र** २९४ तद् (यद्); **सेतु.**१३९ चार (भाव); **समु** १०५, **विव्य.** ३३ गत्य विचा (पद्यपि धा).

(२) **मिता.**२।१७०; **स्मृचि.**१७ विधीयते (तदा भवेत्); **नृप्र.**२८ हृते (हिते) नाष्टि (नास्ति); **व्यउ.**८१ हृते (हृत).

(३) **व्यक.**१३५ क्रेत्रे राज्ञे मूल्यदण्डौ (क्रेतुराज्ञोर्मूलदमौ) ने (नो); **स्मृच.**२१५; **विर.**१०२ व्यकवत्; **पमा.** २९५; **विचि.**४२ त्रे राज्ञे मू (तुराज्ञोर्मू) ण्डौ (मौ); **स्मृचि.** १७; **नृप्र.**२८; **चन्द्र.**३५ क्रेत्रे ...ण्डौ (क्रेतुराज्ञोर्मूलदमौ); **व्यप्र.**२९४ ल्य (ल); **व्यम.**८६; **विता.**५०७ व्यप्रवत्; **समु.**१०५ ने (नो); **विव्य.**३३ क्रेत्रे . दण्डौ (क्रेतुराज्ञोधनदमौ).

---

(१) **विर.**१०६, **दवि.**३२७ उत्त

(२) **विव्य.**४४.

(३) **अप.**२।१७१ हीन (हीने); **व्यक.**१३७; **स्मृच.** २१६; **विर.**१०८; **पमा.**२९९; **विचि.**४३, **दवि.**३२९, **सवि.**३०८ (=) स्वयं (समं), **व्यप्र.**२९६ त्वेन (त्वे च) शेषं अपवत्; **विता.**५७८, **सेतु** १३६; **समु.**१०६.

अविज्ञाताश्रयक्रीतादिविधिः

वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः ।
अविज्ञाताश्रयात्क्रीतं विक्रेता यत्र वा मृतः ॥
स्वामी दत्त्वाऽर्धमूल्यं तु प्रगृह्णीत स्वकं धनम् ।
अर्धं द्वयोरपहृतं तत्र स्याद्व्यवहारतः ॥
अविज्ञातक्रयो दोषस्तथा चापरिपालनम् ।
एतद्द्वयं समाख्यातं द्रव्यहानिकरं बुधैः ॥

अविज्ञाताश्रयादनिश्चितवासस्थानात् । अयमर्थः, वणिग्वीथीपरिगतत्वादिकमादाय क्रय वस्तुनः परस्यापि यः करोति विक्रेतुरविज्ञानाताश्रयत्वात्तदानयनाशक्तिश्च स्यात् तदा विभावितस्वामिभावान्नष्टिकादर्धमूल्य गृहीत्वा तद्द्रव्य नाष्टिकायार्पयेत् । नाष्टिकेन तद्धन न रक्षितमित्यस्य दोषः क्रेता त्वविज्ञाताश्रयात्तद्धन क्रीतवानिति तस्य दोषः । तदेतद्दोषद्वयमुभयोरपि अर्धद्रव्यहानिकरमित्यर्थः । विर.१०९

कात्यायनः

अस्वामिकृतनिवर्तनम्

अस्वामिविक्रयं दानमाधिं च विनिवर्तयेत् ॥

(१) **अप.**२।१६८ उक्त : २।१७१ विज्ञात राजपूरुषैः (तच्च स्यात् व्यवहारतः) पू.; **व्यक.**१३७ धी (धि); **ममु.** ८।२०२; **विर** १०९; **दीक.४८** नारदः, **विचि.४३, स्मृचि.**१६ विक्रेता यत्र (क्रेता यत्र च); **दवि.**३२९; **मच.** ८।२०२; **चन्द्र.**३६ यात् (य), **वीमि.**२।१७१; **व्यम.८७, सेतु.**१३६; **विव्य.३४** त्र (दि).

(२) **अप.**२।१६८ क (य) प (पि); **व्यक.**१३७ ह (कृ); **ममु.**८।२०२ त स्व (यात्स्व), **विर.**१०९; **दीक.४८** नारदः; **विचि.४३-४४; स्मृचि.**१६ (स्वाम्यदत्त्वार्द्धमूल्यन्तु गृह्णीयात्स्तु बन्धनम्) पू.; **दवि.३२९, मच.८।२०२** प (पि) शेषं ममुवत्; **चन्द्र.३६, वीमि.२।१७१** त स्व (यात्स्व) पू.; **व्यम.८७** प (पि); **सेतु.१३७; विव्य.३४** रप (रुप) नारदः. (३) **अप.२।१६८,२।१७१; व्यक.१३७, विर.** १०९; **विचि.४३** यो (ये); **दवि.३२९; चन्द्र.३६** बुधैः (द्वयोः); **सेतु.१३७.**

(४) **मिता.२।१६८** (=), **व्यक.१३६, स्मृच.२१३, विर.१०४; पमा.२९१; विचि.४१, स्मृचि.१६; मृप्र.** २८, **सवि.३०५, चन्द्र.३४, व्यप्र.२९१** च (वा), **व्यउ.** ८० धि (धिः) स्मृत्यन्तरम्, **व्यम.८६** व्यपवत्; **विता.** ५७४ व्यपवत्; **सेतु.१३४; समु.१०५.**

(१) एव च विक्रयादितः **प्रागेवास्वामिहस्ते** हा नष्टमपहृत वा स्वकीयद्रव्यस्वामिनः **सकाशात्स्वामं** गृह्णीयादिति दण्डापूपन्यायसिद्धं बोद्धव्यम् ।
स्मृच.२१३

(२) अस्वामिविक्रय अस्वामिना कृत विक्रयम् । अस्वामिकृतत्वं दानाध्योरपि । तत्साहचर्यात् ।
व्यप्र.२९१

मूलानयनक्रयशुध्यादिविचार

प्रकाशं वा क्रयं कुर्यात् मूलं वाऽपि समर्पयेत् ।
मूलानयनकालश्च देयो योजनसंख्यया ॥

(१) यदा तु मूलभूतो विक्रेता देशान्तरस्थितस्तदा त्वाह कात्यायनः—मूलानयनकाल इति । योजन सख्यया देशविप्रकर्षापेक्षयेत्यर्थः । यदा तु कालविलम्बे नापि मूलदर्शनमशक्यं तदाप्याह स एव—प्रकाशं वा क्रयं कुर्यादिति । प्राकृतं क्रय साक्षिवचनाल्लोकविदित कुर्यादित्यर्थः । स्मृच.२१५

(२) प्रकाशक्रयोपदर्शनेन मूलोपदर्शनेन वा क्रेता आत्मानमनपराधं दर्शयेत् । विर.१०१

यदा मूलमुपन्यस्य पुनर्वादी क्रयं वदेत् ।
आहरेन्मूलमेवासौ न क्रयेण प्रयोजनम् ॥

(१) क्रयं वदेत् प्रकाशक्रयं वदेत् । अप.२।१७०

(२) यदा तु मूलमुपन्यस्य क्रय पुनरालम्बते तदा पूर्वापरविरोधेन अपराध्नुयादेव, न क्रयेण क्रयख्यापनेन प्रयोजनमपराधव्यावर्तनमित्यर्थः । अर्थविचारस्तु मूलानुसारेणेति भावः । विर.१०१-१०२

---

(१) **मिता.**२।१७० (=) यो योजन (यस्तत्राध्व); **अप.** २।१७०; **व्यक.१३५; स्मृच.२१५** उक्त.; **विर.१०१** श्च (स्तु); **पमा.२९६** उक्त.; **दीक.४८ बृहस्पतिः; विचि.** ४२ विरवत्; **मृप्र.२८; सवि.३०७** उक्त.; **चन्द्र.** ३४ विरवत्; **व्यप्र.२९५** उक्त.; **व्यउ.८१ मितावत्, उक्त., बृहस्पतिः; व्यम.८६ देयो योजन (तत्र देयोऽध्व) उक्त.; सेतु.** १३९ विरवत्; **समु.१०६; विव्य.३३** विरवत्.

(२) **अप.२।१७०; व्यक.१३५, स्मृच.२१५** मूल (क्रिया); **विर.१०१; पमा.२९७** स्य (स्येत) रेन्मू (रन्मू); **विचि.४२ क्रयं वदेत् (वदेत्क्रयम्); व्यप्र.२९६; विता.** ५७८; **सेतु.१३९** विरिवत्, **समु.१०३, विव्य.३३.**

असमाहार्यमूलस्तु क्रयमेव विशोधयेत् ।
विशोधिते क्रये राज्ञो वक्तव्यः स न किञ्चन ॥

असमाहार्यमूलस्तु मूलाहरणासमर्थस्तु क्रयमेव प्रकाशं दर्शयेत् । स तादृशो राज्ञा न दण्ड्यः ।

विर.१०६

अनुपस्थापयन्मूलं क्रयं वाप्यविशोधयन् ।
यथामियोगं धनिने धनं दाप्यो दमं च सः ॥
प्रकाशं च क्रयं कुर्यात्साधुभिर्ज्ञातिभिः स्वकैः ।
न तत्रान्या क्रिया प्रोक्ता दैविकी न च मानुषी ॥

प्रकाश च क्रयं ज्ञातिभिः स्वकैः कुर्यात् । न तत्रान्या क्रियेति ज्ञातिषु संभवेषु, असंभवेऽन्यापि बोद्धव्येत्यर्थः ।

विर.१०६

स्वामी स्वत्व विभाव्य स्वं लभते

दत्तक्रीताहितानां तु विरोधे निष्क्रयो भवेत् ।
क्षेत्रं तत्सदृशं दद्यादशक्तस्तुष्टिमावहेत् ॥
नाष्टिकस्तु प्रकुर्वीत तद्धनं ज्ञातृभिः स्वकम् ।
अदत्तत्यक्तविक्रीतं कृत्वा स्वं लभते धनम् ॥

(१) तद्धन नष्टधनं स्वक स्वकीय प्रकुर्वीत साधयेदित्यर्थः । धनस्य स्वकीयत्वावगतिः दानाद्यभावेन साधनीयेत्याह स एव—अदत्तत्यक्तविक्रीतमिति । दत्तं च त्यक्तं च विक्रीतं च दत्तत्यक्तविक्रीतम् । तद्विपरीतमदत्तत्यक्तविक्रीतं तथाभूतं भवतीति प्रमाणसिद्धं कृत्वा स्व स्वकीयं धन नाष्टिको विक्रेत्रादिसकाशाल्लभत इत्यर्थः ।

स्मृच. २१४

(२) ज्ञातृभिः साक्ष्यादिभिः, त्यक्तपदं दानविक्रयादिस्वत्वापवादक्रियापरम् । विर. १०४

यदि स्वं नैव कुरुते ज्ञातृभिर्नाष्टिको धनम् ।
प्रसङ्गविनिवृत्त्यर्थं चौरवद्दण्डमर्हति ॥

(१) प्रसङ्गोऽभिप्रायः । अप.२।१७१

(२) प्रसङ्गोऽतिप्रसङ्गः । स्मृच.२१५

(३) ज्ञातृभिरिति प्राधिकतयोक्त प्रमाणमात्रे तात्पर्यम् । ज्ञातिभिरिति क्वचित् पाठः । तत्रापि तथैव नेयम् । विर.१०५

(४) प्रसङ्गः स्वत्वसंदेहः । व्यप्र.२९३

क्रेत्रा आत्मविशुद्धि. साध्या

अभियोक्ता धनं कुर्यात्प्रथमं ज्ञातिभिः स्वकम् ।
पश्चादात्मविशुद्ध्यर्थं क्रयं क्रेता स्वबन्धुभिः ॥

(१) अभियोक्ता नास्तिकः । तेन ज्ञातिभिः स्वकीयत्व धनस्य साध्यम् । न चेत्स शक्नुयात्तथा कर्तुं, तदा क्रेता आत्मनो दोषपरिहारार्थं स्वबन्धुभिः साक्षिभूतैः क्रयं साधयेत् । अप.२।१७१

(२) अभियोक्ता नाष्टिको नष्टधन ज्ञात्वा प्रमाणेनात्मीयतया बोधयेत् । तदनु क्रेता क्रीतमिद प्रकाशमिति

---

(१) **मिता.**२।१७० (=) पू.; **अप.**२।१७१ ल (लै) शो वक्तव्यः स न (ज्ञा न वक्तव्यः स); **व्यक.**१३६; **स्मृच.** २१५ पू.; **विर.**१०६; **पमा.**२९६ विशो (प्रसा) शो (ज्ञा): २९७ पू.; **व्यप्र.**२९५ मनुः; **व्यउ.**८१ पू.; **विता.**५७७ मनुः; **व्यम.**८६-८७ शो (ज्ञा); **समु.**१०६ शो (ज्ञा) मनुः

(२) **व्यक.**१३७;**स्मृच.**२१५ धयन् (धयेत्);**विर.**१०८; **पमा.**२९७; **विचि.**४३ वाप्यवि (च परि); **सवि.**३०७ यन्मू (येन्मू) यन् (येत्) दम च सः (ऽयमअसा) व्यासः; **व्यप्र.** २९६; **व्यउ.**८१; **व्यम.**८७; **विता.**५७७; **सेतु.**१३८ वाप्यवि (चापरि); **समु.**१०६.

(३) **अप.**२।१७१ न्या (न्य); **व्यक.**१३७ अपवत्; **स्मृच.**२१५ या प्रो (याऽत्रो) : २१६; **विर.**१०६; **पमा.** २९६:२९९ च क्र (न क्र); **सवि.**३०८ हारीतः; **व्यप्र.** २९३; **समु.**१०६ शं च (शे वा) न्या (न्य). (४) **समु.**१०५.

(५) **अप.**२।१७१ ष्टि (रित) त्त (त्तं) स्व (सु); **व्यक.** १३६ तृ (ति); **स्मृच.**२१४; **विर.**१०४; **पमा.**२९४-२९५; **विचि.**४३ स्तु प्र (स्तत्र) धनं (धनी); **सवि.**३०६ व्यकवत्, पू; **चीमि.**२।१७१ धनम् (धनी); **व्यप्र** २९४ व्यकवत्; **विता.**५७६ ज्ञातृभिः (साक्षिभिः) पू.; **सेतु.**१३६ स्तु प्र (स्तत्र); **समु.**१०५ व्यकवत्.

(१) **अप.**२।१७१ रुते (वीत) ष्टि (रित); **व्यक.**१३६; **स्मृच.**२१५ तृ (ति); **विर.**१०५; **पमा.**२९७ स्मृचवत्; **विचि.**४४ ज्ञातृभिर्नाष्टिको (नाष्टिको ज्ञातृभि.); **स्मृचि.**१७ ष्टि (रित) शेष विचिवत्; **दवि.**३२७; **सवि.**३०७ व्यासः; **चन्द्र.**३६ ष्टि (रित) शेष विचिवत्; **व्यप्र.**२९२ स्मृचवत्; **विता.**५७६ ज्ञातृ (साक्षि);**सेतु.**१३७विचिवत्; **समु.**१०६.

(२) **अप.**२।१७१ ति (तृ); **व्यक.**१३६; **स्मृच.**२१४ पू.: २१६(=); **विर.**१०६; **पमा.**३००; **व्यप्र.**२९२ पू.: २९५(=); **व्यम.**८७; **विता.**५७६ ज्ञाति (साक्षि); **समु.** १०६.

विभावयेत्। ज्ञातग्रहण प्रमाणमात्रोपलक्षणम् । विर.१०६

अविज्ञाताश्रयक्रीतादिविधिः

वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः ।
अविज्ञाताश्रयात् क्रीतं विक्रेता यत्र वा मृतः ॥

वणिग्वीथीपरिगत वणिग्वीथ्यां प्राप्तम् । अनेन रहःक्रयो नास्तीति दर्शितम् । विज्ञातं राजपुरुषैः इत्यनेनाप्रकाशक्रयो नास्तीति दर्शितम् । अविज्ञाताश्रयात् अविज्ञातस्थानकात् । व्यप्र.२९५

स्वामी दत्वाऽर्धमूल्यं तु प्रगृह्णीत स्वकं धनम् ।
अर्धं द्वयोरपहृतं तत्र स्याद्व्यवहारतः ॥

द्वयोः क्रेतृनाष्टिकयोर्व्यवहारतः स्वकृतापचारतः स्वकीयधनार्धं हृत गतमित्यर्थः । स्मृच.२१७

अविज्ञातक्रयो दोषस्तथा वाऽपरिपालनम् ।
एतद्द्वयं समाख्यातं द्रव्यहानिकरं बुधैः ॥
अविज्ञातस्थानकृतं क्रेतृनाष्टिकयोर्द्वयोः ॥

अविज्ञातस्थानकात् क्रयोऽविज्ञातक्रयः । अथवा परमार्थतोऽय स्वामीत्यविज्ञानात् क्रयोऽविज्ञातक्रयः । स एव क्रेतुर्दोषोऽपचारः । अपरिपालनमुपेक्षा । सैव नाष्टिकस्यापचारः । एतद्द्वय अविज्ञातक्रयापरिपालनात्मकद्रव्यं क्रेतृनाष्टिकयोर्द्रव्यहानिकरत्वेन समाख्यातमित्यर्थः । रमृच.२१७

व्यासः

अस्वामिविक्रयस्वरूपम्

यांचितान्वाहितन्यासं हृत्वा वाऽन्यस्य यद्धनम् ।
विक्रीयते स्वाम्यभावे स ज्ञेयोऽस्वामिविक्रयः ॥

स्वाम्यभावे स्वामिनोऽसनिधौ इत्यर्थः । स्मृच.४

मूलदर्शने क्रेतुः शुद्धिः

मूले समाहृते क्रेता नाभियोज्यः कथंचन ।
मूलेन सह वादस्तु नाष्टिकस्य तदा भवेत् ॥

(१) नाष्टिकस्य नष्टस्वामिनः तस्मिन्वादे यदि मयाप्यन्यस्माद्विक्रेतुः सकाशात्क्रीतमित्यभियोज्यो वदति तदा तत्राप्ययमेव मूलदर्शनादिक्रमोऽनुसरणीयः । स्मृच.२१५

(२) समाहिते समर्पिते । विर.१०२

अस्वामिविक्रये दण्डादिविधिः

असंप्रत्ययपूर्वं यः क्रमाद्यैरुपपादयेत् ।
स तस्मै तत्समं दद्यान्मूल्यं वा क्रेतुरिच्छया ॥
वादी चेन्मार्गितं द्रव्यं साक्षिभिर्नैव भावयेत् ।
दाप्यः स्याद्द्विगुणं दण्डं क्रेता तद्द्रव्यमर्हति ॥

(१) महापराधविषये त्वाह व्यासः—वादी चेन्मार्गितमिति । क्रेतुर्द्रव्यलाभः पञ्चबन्धविषयेऽपि भवति । यदा च नाष्टिकः स्वकीयत्वमनुवर्तमान न विभावयति तत्रैव क्रेतुः क्रीतद्रव्यलाभो नान्यत्रेत्यनुसंधेयम् । स्मृच.२१६

(२) एतद्द्विगुणधनदण्डदान परद्रव्य ज्ञात्वाऽपि लोभात्तद्विक्रये पञ्चबन्धदमस्तु याज्ञवल्क्यीयो भ्रमप्रयुक्तक्रय इत्यविरोधः । विर. १०७

(३) साक्षिग्रहण प्रमाणान्तरोपलक्षणार्थमिति केचित्। यत्तूक्त साक्षिग्रहणमस्वामिविक्रयविवादे स्वत्वसाधने

---

(१) **स्मृच.**२१६ क्रीत (क्रेता); **पमा.**२९७; **नृप्र** २८, **व्यप्र.**२९५; **समु.**१०७ स्मृचवत् .

(२) **स्मृच.**२१६-२१७ प (पि); **पमा.**२९७ त स्व (यात् स्व): ३०० उत्त.; **नृप्र.**२८ अर्धं (अथ); **व्यप्र.**२९५-२९६; **समु.**१०७ स्मृचवत् .

(३) **स्मृच.**२१७ वाऽ (च), **पमा.**३००; **दीक.**४८ यो (ये) वा (चा) पू., नारदः; **नृप्र.**२८ द्वयं (सर्व); **व्यप्र.**२९६ वा (चा); **समु.**१०७ वा (चा). (४) **पमा.**३००.

(५) **अप.**२।१६८ तन्या (त न्या) ह (क्र) (वा०); **स्मृच.** ४, **विर.**१००, **व्यप्र.**२९०; **व्यम.**८६ वा (चा); **सेतु.** १३४ तन्या (त न्या); **समु.**१०५.

(१) **अप.**२।१७० ष्टि (स्ति); **व्यक.**१३५; **स्मृच.**२१५; **विर.**१०२ ह (हि) व्यः कथं (व्योऽथ कि); **पमा.**२९५; **विचि.**४२; **स्मृचि.**१६ दस्तु (दोऽपि) ष्टि (स्ति); **सवि.** ३०७; **चन्द्र.**३५ थ (दा) दस्तु (दोऽस्य) ष्टि (स्ति) तदा भवेत् (विधीयते); **व्यप्र.**२९४ तदा भवेत् (विधीयते); **व्यम.** ८६ व्यप्रवत्; **विता.**५७७ व्यप्रवत्; **सेतु.**१३९ ह (हि) **समु.**१०६; **विव्य.**३३. (२) **समु.**१०४.

(३) **अप.**२।१७१ (=) दण्डं (राज्ञा); **स्मृच.**२१६; **विर.**१०७ नैंव (नं वि); **पमा.**२९८ चेन्मार्गित (चोन्मार्गगं); **स्मृचि.**१७ नैंव (नं वि) ण दण्ड (णो दण्डः) द्रव्य (द्रण्ड); **व्यप्र.**२९३ विरवत्; **व्यम.**८६ विरवत्; **विता.** ५७६ द्रव्य (द्रन) शेषं विरवत् ; **समु.**१०७.

प्रमाणान्तरनिवृत्त्यर्थमिति मदनरत्ने । तदयुक्तम् । वस्तुतः स्वत्वहेतुभूतप्रतिग्रहादिसत्वे तत्साधकसाक्षिणामभावे दिव्याद्यवकाशस्य विद्यमानत्वात् । 'अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेत्' । इति कात्यायनवचनविरोधापत्तेश्च । न चैतद्यत्र दिव्यनिषेधकस्मृत्यभावस्तत्र दिव्यविधायकम् । अत्र तु— 'प्रकाशं च क्रयं कुर्यात्साधुमिर्ज्ञातिभिः स्वकैः । न तत्रान्या क्रिया प्रोक्ता दैविकी न च मानुषी' ॥ इति दिव्यनिषेधकस्मृतेः सत्वादिति वाच्यम्। एतद्वचनस्य क्रेत्रा क्रयसाधनं साक्षिसत्वे साक्षिभिरेव कर्तव्य नान्यमानुषेण न दिव्येन वेत्येतत्परत्वात् । नन्वेतद्वचनस्यैतादृशविषयपरत्वे मानाभावः । न च 'अलेख्यसाक्षिके दैवीं' इति वचनविरोधो मानम्। तस्य सामान्यशास्त्रत्वेनैतद्वचनानुरोधे तस्यैतदतिरिक्तविषयताया न्याय्यत्वादिति चेत्,न साक्ष्याद्यभावे दिव्यस्य च निषेधे अनिर्णयप्रसङ्गस्यैव मानत्वात् । अन्यथा— 'स्थावरेषु विवादेषु दिव्यानि परिवर्जयेत्' इति वचनस्य साक्ष्यादिसत्वे दिव्यनिषेधपरत्वं त्वदभिमतं न सिध्येत्। यत्तु तेनैव वक्ष्यमाणे 'प्रमाणहीने वादे' इति वचने प्रमाणहीनत्वाभिधानमपि अत्र दिव्याभावज्ञापकम् । दिव्याङ्गीकरणे प्रमाणहीनतया असंभवादित्युक्तम् । तत्र तत् प्रमाणहीने मानुषप्रमाणहीने अन्यतरेण दिव्याङ्गीकरणहीने चेति व्याख्येयम् । अन्यथा अनिर्णयः स्यात् । तस्मादत्रापि साक्ष्याद्यभावे दिव्य भवत्येवेति । अत एव मिताक्षरायामुक्त—यदा पुनः साक्ष्यादिभिर्दिव्येन वा क्रयं न शोधयतीत्यादि । केचित्तु स्थावरविवादे 'स्थावरेषु विवादेषु' इति वचनादिव्याभाव एव । एवमकृतेऽपि 'प्रमाणहीने वादे' इति वचनादिव्याभाव एव अनिर्णयप्रसङ्गानुरोधेन वचनान्यथाकरणस्यानुचितत्वादित्याहुः । तच्चिन्त्यम् । अदृष्टार्थत्वप्रसङ्गात् । व्यप्र.२९३

मरीचिः

शुद्धक्रयः

[1]वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः ।
दिवा गृहीतं यत्क्रेत्रा स शुद्धो लभते धनम् *॥

अविज्ञातक्रये विधिः

[2]अविज्ञातनिवेशत्वाद्यत्र मूलं न लभ्यते ।
हानिस्तत्र समा कल्प्या क्रेतृनाष्टिकयोर्द्वयोः ॥

अविज्ञातनिवेशत्वादविज्ञातस्थानत्वात् । मूल विक्रेता । स्मृच.२१७

यमः

अस्वामिकृतनिवर्तनम्

[3]अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।
अकृतः स तु विज्ञेयः व्यवहारे यथास्थितिः ॥

मत्स्यपुराणम्

ज्ञानाज्ञानकृतास्वामिविक्रयदोषविचारः

[4]अज्ञानाद्यः पुमान् कुर्यात्परद्रव्यस्य विक्रयम् ।
स निर्दोषो ज्ञानपूर्वं चौरवद्दण्डमर्हति ॥

इति वाक्यमज्ञाने निर्दोषत्वमवध्यत्वमाह न त्वदण्ड्यत्वबोधकम् । विर.१०४

शुक्रनीतिः

अस्वामिन क्रये दण्डः

[5]अस्वामिकेभ्यश्चौरेभ्यो विगृह्णाति धनं तु यः ।
अव्यक्तमेव क्रीणाति स दण्ड्यश्चौरवन्नृपैः ॥

---

(१) अप.२।१६८; व्यक.१३७ शात (शाते); स्मृच.

* स्मृच. व्याख्यानं 'विक्रयाद्यो धन' इत्यादि मनुवचने (पृ.७५९) द्रष्टव्यम् ।

२१६ त्रा (ता); विर ११० स्मृचवत्; पमा.२९८, दीक. ४८ स्मृचवत्; व्यप्र.२९६; समु.१०७.

(१) अप.२।१६८ ल (ल्य) ष्टि (स्ति) : २।१७१ ष्टि (स्ति) बृहस्पतिः; व्यक.१३८ ल (ल्य), स्मृच.२१७; विर.११० कल्प्या (ज्ञेया); पमा.३०१ लभ्य (विद्य); व्यप्र.२९६; व्यम.८७, विता.५७८; समु १०७.

(२) व्यक.१३६ रे (रो) ति.(त.) मनुयमौ; विर. १०४; व्यप्र.२९१ रे यथास्थितिः (रेषु नित्यशः); सेतु.१३४ तिः (ति).

(३) विर.१०४; दात.१८३.

(४) शुनी.४।८०७.

* संभूयसमुत्थानम्

जैमिनीयसूत्रम्

ज्योतिष्टोमे ऋत्विजा दक्षिणाविभागाधिकरणम्

समं स्यादश्रुतत्वात् ।

ज्योतिष्टोमे समाम्नायते, 'गौश्चाश्वश्च अश्वतरश्च' इति । तत्रायमर्थः समधिगतः — विभज्य दातव्यं इति । इदमिदानी साशयिक—किं समो विभागः, उत कर्मकृत वैषम्य, उत शब्दकृत? इति । किं प्राप्त? —समो भागः स्यात् 'अश्रुतत्वात्' विशेषस्य, यत्र विशेषो न श्रयते, तत्र समो विभागो भवितुमर्हति । कथमिव? एकस्मै सर्वं दातव्यं प्राप्नोति, यत्परस्मै दातव्यं न भवति, तत्र यावति एकस्मै दीयमाने नान्यः सविभज्यते, तावत् तस्मै एकस्मै न दातव्यं, अवशिष्ट दातव्य, एवमेकैकस्मै, तस्माद्विशेषाश्रवणात् सम देयमिति । शाभा.

अपि वा कर्मवैषम्यात् ।

अपि वेति पक्षव्यावृत्तिः—न सम स्यात्, कर्मकृतं वैषम्य भवेत्—यो बहुकर्म करोति, तस्मै बह्वी भृतिर्दीयते । तस्मात् कर्मानुरूप्येण वैषम्यमिति । शाभा.

अतुल्याः स्युः परिक्रये विषमाख्या विधिश्रुतौ परिक्रयात् न कर्मण्युपपद्यते दर्शनाद्विशेषस्य तथाभ्युदये ।

न चैतदस्ति—कर्मकृत वैषम्यं इति, किन्तर्हि उपकारकृत्; स उपकारः श्रुत्या विज्ञायते, तस्मात् श्रुतिकृत वैषम्यं; तेन 'अतुल्याः' 'परिक्रये' भवेयुः । 'विषमा' हि एषां 'आख्या', केचित् 'अर्द्धिनः', केचित् 'तृतीयिनः' केचित् 'पादिनः' येषामर्धं ते 'अर्द्धिनः', कथ च तेषामर्द्धं भवति? यदि तेभ्यः अर्द्धं दीयते । एवं 'तृतीयिनः' 'पादिनः' इति च दीक्षा 'विधिश्रुतौ' समाख्यायते, सा 'परिक्रयात्' कर्मकृते वैषम्ये न उपपद्यते । क्व पुनरयं विशेषो दृश्यते? 'अभ्युदये'—अभ्युदय इति अभ्युदयफल (ऋद्धिफलं) द्वादशाह ब्रूमः । 'अध्वर्युर्गृहपति दीक्षयित्वा ब्रह्माण दीक्षयति, तत उद्गातार, ततो होतारं ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्द्धिनो दीक्षयति । ब्रह्मच्छंसिन ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुण होतुः, ततस्त नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति । अग्नीध्र ब्रह्मणः, प्रतिहर्तारमुद्गातुः, अच्छावाक होतुः, ततस्तं उन्नेता दीक्षयित्वा पादिनो दीक्षयति । पोतार ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, ग्रावस्तुत होतुः, ततस्तमन्यो दीक्षयति ब्रह्मचारी वा आचार्यप्रेषितः इति 'अर्द्धिनः' 'तृतीयिनः' 'पादिनः' इति द्वादशाहे अनुवादः, यदि प्रकृतौ यथासमाख्य अमीषामिमे भागाः, ततो द्वादशाहे दर्शनमुपपद्यते । तस्मादर्द्धादिभिः समाख्यानात् समाख्याश्रुतिकृत वैषम्य भवितुमर्हतीति । शाभा.

वसिष्ठः

कार्यत्यागिनौ ऋत्विगाचार्यौ हेयौ

ऋत्विगाचार्यावयाजकानध्यापकौ हेयावन्यत्र हानात्पतति ।

विष्णुः

ऋत्विङ्मरणे तत्कार्यतद्दक्षिणाव्यवस्था

अथर्त्विजि मृते पश्चादन्यं वृणुयात् । पूर्ववृतस्यैव दक्षिणा । पश्चादाहूतः किंचिल्लभते चेति ।

---

* एतत्प्रकरणस्थानि श्रुति-श्रौतसूत्रगतानि ऋत्विग्दक्षिणाविभागविषयाणि वचनानि नास्माभिः संगृहीतानि ।

(१) जैसू १०।३।५३.

(२) जैसू.१०।३।५४

(३) जैसू.१०।३।५५

(१) वस्मृ.१३।१९; अप.२।२६५.

(२) सवि.२७५.

शङ्खः शङ्खलिखितौ च

तत्र चेदनुप्राप्ते सवने ऋत्विङ् म्रियेत, तत्र किं कार्यमिति जिज्ञासा तस्य सगोत्रः शिष्यो वा तत्कार्यमनुपूरयेत् । अथ चेदबान्धवः ततोऽन्यं ऋत्विजं वृणुयात् ।

तत्सर्वमवान्तरराणशून्यर्त्विक्कर्तृकयज्ञविषयमिति मन्तव्यम् । स्मृच.१८८

ऋत्विङ्मरणप्रवासव्याधिपातित्यादौ तत्कार्यतद्दक्षिणाव्यवस्था । याज्यऋत्विजोरन्यतरेणान्यतरस्य त्यागे व्यवस्था ।

अथ ऋत्विजि वृत्ते पश्चादन्यं वृणुयात्पूर्ववृतस्यैव दक्षिणा, पश्चाद्वृतः किञ्चिल्लभेत, प्रवसेच्चेत्तत्कालं निमित्तं वा अपेक्ष्य यक्ष्यमाणस्तत्कालमुदीक्षेत, नान्तरा यजेत स्यादात्ययिको वा, तं क्रतुं समापयेत् । प्रोष्य प्रत्यागतश्च किञ्चिल्लभेत । अथ चेत्प्रतिषिद्धः प्रवसेत्कामादनुप्राप्ते सवने ऋत्विक् शतं दण्डयः, स एव वा दुष्टः तस्य ऋत्विक्कुलोपाध्यायः । एवं व्याधितपतितोन्मत्तप्रहीणप्रध्वस्तेषु संप्रसादकरणमृत्विक्षु । कामाच्चेदपतितं याज्यं त्यजेदृत्विक्, प्राप्नुयात् द्विशतं दण्डम् । याज्यश्चैव तदेवाप्नुयात्त्यागे ऋत्विजोऽपतितस्य । कामं पतितमश्रोत्रियं त्यजेद्याज्यं चाभिशस्तमदातारम् ।

अस्यार्थः । पूर्ववृतेषु ऋत्विक्षु मध्ये एकस्य मरणादौ वृत्ते यदान्यं वृणुते, पूर्वाहूतस्य दक्षिणा, तन्मरणपक्षे तदायादाना कर्मानुरूपा सा । पश्चादाहूतः कश्चित् किञ्चित् कर्मानुरूप लभते । यदा तु काल मासपक्षादिक निमित्तं वान्यदपेक्ष्य उद्भाव्य गतः, तदा यजमानस्तं प्रतीक्षेत, नान्तरा यजेत । आत्ययिको वा, समयातिक्रमप्रतिसधानवान् क्रतुमृत्विगन्तरेण समापयेत् । पूर्ववृतश्च ऋत्विक् प्रोष्य प्रवास कृत्वा प्रत्यागतः किञ्चित् पारितोषिक यजमानाल्लभेत । यजमानप्रतिषिद्ध ऋत्विक्कामाद्व्रजन् पणशतं दण्डयः । अथ स्वभावत एव दुष्ट इति विज्ञायते, तदा यजमानस्य ऋत्विक्कुलपरीक्षाधिकृत उपाध्याय एव दण्डयः । एव व्याधिते पतिते उन्मत्ते प्रहीणे अभिशापादिना त्यक्ते प्रध्वस्ते कर्माक्षमताहेतुवार्धके संप्रसादकरण त संतोष्य ऋत्विगन्तरवरणेप्यनुज्ञाग्रहणम् । विर.१२१-१२२

कौटिलीयमर्थशास्त्रम्

सघभूतसभूयसमुत्थातृकर्षकवैदेहकचोरयाजकवणिजा वेतनदक्षिणाफलादिविभागविधि. । कर्तृकर्मत्यागादौ दण्डविधिः ।

संभूयसमुत्थानम् । संघभूताः संभूयसमुत्थातारो वा यथासंभाषितं वेतनं समं वा विभजेरन् । कर्षकवैदेहका वा सस्यपण्यारम्भपर्यवसानान्तरे सन्नस्य यथाकृतस्य कर्मणः प्रत्यंशं दद्युः । पुरुषोपस्थाने समग्रमंशं दद्युः । संसिद्धे तूद्धृतपण्ये सन्नस्य तदानीमेव प्रत्यंशं दद्युः । सामान्या हि पथि सिद्धिश्चासिद्धिश्च ।

(१) व्यक.१४०; स्मृच १८८ (तत्र कि . जिज्ञासा०) गोत्रः (गोत्रोऽथ) शखः; विर ११७-११८; सवि.२७५ प्राप्ते (प्रवृत्ते) (तत्र कि ...जिज्ञासा०) शखः; व्यप्र.३०३ तत्र चेद (अथ चेद) (तत्र कि ..जिज्ञासा०) गोत्रः शिष्यो वा (गोत्रोऽथ शिष्य.); विता.५९३ तत्र चे . गोत्र. (अथ चेदृत्विङ्म्रियेत तस्य सगोत्रोऽप्य), समु.९२ स्मृचवत्.

(२) अप २।२६५ वृत्ते (वृते) वृतस्यै श्वादृत· (वृतस्यैव दक्षिणायाः पश्चादाहूतः) चेत्तत्काल (चेत्काल) वा अपे ...यजेत (चावेक्षमाणस्त कालमपेक्षेत नान्तरा यजेत्) समाप (संपाद) प्राप्ते सवने (प्राप्तः सवने स) वा दुष्टः (चादुष्टः) ध्वस्तेषु सप्रसाद (ध्वस्तेष्वसंप्रदान) याज्यश्चैव (याज्यश्चैत्यजेत्) काम पतित (कामपतित); व्यक.१४१-१४२ वृत्ते (वृते) पूर्ववृत (पूर्वाहूत) श्वादृतः (श्वादाहूतः) वा अपेक्ष्य यक्ष्यमाणः (चापेक्ष्यमाण) समापयेत् (समुपपादयेत्) प्रोष्य... लभेत (प्रोष्यपागतश्च किञ्चिल्लभते) दुष्टः +(स्यात्) याज्यश्चैव (याज्यश्चैत्); स्मृच.१८८ (अथ ऋत्विजि वृते पश्चादन्य वृणुयात् पूर्वाहूतस्यैव दक्षिणा पश्चादाहूतः किञ्चिल्लभेत) शंखः; विर.१२०-१२१; विचि.५० वृत्ते (वृते) वा अपेक्ष्य ..क्षेत (चापेक्षमाणस्तत्कालमुदीक्षेत) प्रत्यागतश्च (प्रत्यागतः) दुष्टः +(स्यात्) (तस्य०) पाध्यायः+(तदुपनायकः) प्रहीण (हीन) सप्रसादकरण (सप्रसादात् प्रणाय) दण्डम् (दमम्) याज्यश्चैव (याज्यश्चैत्); वीमि.२।२६५ वृत्ते (वृते) वा अपेक्ष्य यक्ष्य (चापेक्ष) नान्तरा +(य) यजेत स्यादा (यजेत्तस्माद) प्रतिषिद्धः (प्रसिद्ध.) सवने (स धनं) (स एव वा .. मदातारम्०); व्यप्र. ३९३ (अथ ऋत्विजि वृते पश्चादन्यं वृणुयात् पूर्वाहूतस्यैव दक्षिणा पश्चादाहूतः किञ्चिल्लभत) शंखः; समु.९२ स्मृचवत्.

(१) कौ.३।१४; सवि.२७५ वरदराजोद्धृतम्; समु.९२.

प्रक्रान्ते तु कर्मणि स्वस्थस्यापक्रामतो द्वादशपणो दण्डः । न च प्राकाम्यमपक्रमणे ।

चोरं त्वभयपूर्वं कर्मणः प्रत्यंशेन ग्राहयेद्, दद्यात् प्रत्यंशमभयं च । पुनः स्तेये प्रवासनमन्यत्र गमने च । महापराधे तु दूष्यवदाचरेत् ।

याजकाः स्वप्रचारद्रव्यवर्जं यथासंभाषितं वेतनं समं विभजेरन् ।

अग्निष्टोमादिषु च क्रतुषु दीक्षणादूर्ध्वं याजकः सन्नः पञ्चममंशं लभेत । सोमविक्रयादूर्ध्वं चतुर्थमंशम् । मध्यमोपसदः प्रवर्ग्योद्वासनादूर्ध्वं तृतीयमंशम् । मध्यादूर्ध्वमर्धमंशम् । सुत्ये प्रातस्सवनादूर्ध्वं पादोनमंशम् । माध्यन्दिनात् सवनादूर्ध्वं समग्रमंशं लभेत । नीता हि दक्षिणा भवन्ति । बृहस्पतिसवनवर्जं प्रतिसवनं हि दक्षिणा दीयन्ते । तेनाहर्गणदक्षिणा व्याख्याताः ।

सन्नानामा दशाहोरात्राच्छेषभृताः कर्म कुर्युः । अन्ये वा स्वप्रत्ययाः ।

कर्मण्यसमाप्ते तु यजमानः सीदेत्, ऋत्विजः कर्म समापय्य दक्षिणां हरेयुः । असमाप्ते तु कर्मणि याज्यं याजकं वा त्यजतः पूर्वः साहसदण्डः ।

अनाहिताग्निः शतगुरयज्वा च सहस्रगुः ।
सुरापो वृषलीभर्ता ब्रह्महा गुरुतल्पगः ॥
असत्प्रतिग्रहे युक्तः स्तेनः कुत्सितयाजकः ।
अदोषस्त्यक्तुमन्योन्यं कर्मसंकरनिश्चयात् ॥

सभूयसमुत्थानमिति सूत्रम् । बहूना सभूय क्वचित् कर्मणि प्रवृत्तिरिति सूत्रार्थः । तत्कर्तारश्च द्विप्रकाराः परकर्मकराः स्वकर्मकराश्चेति । तत्रोक्ताः पूर्वे । परास्त्विहाभिधीयन्ते । संघभृता इति । समुदेत्य कर्मकराः संभूयसमुत्थातारो वा समुदेत्य वाणिज्यादिकारिणो वा, यथासंभाषितं वेतनं, विभजेरन्, सम वा विभजेरन्, संभाषणाभावे ।

कर्षकवैदेहका वेति । कृषीवला वणिजश्च, सस्यपण्यारम्भपर्यवसानान्तरे सस्याना पण्याना च आरम्भपर्यवसानयोरन्तरे मध्यकाले, सन्नस्य व्याधितस्य संधिनः, यथाकृतस्य कर्मणः प्रत्यंशं यावत् कृतं कर्म तावतः प्रविभागं, दद्युः । पुरुषोपस्थाने कर्मकरणाय व्याधितप्रतिपुरुषोपस्थितौ, समग्रं पूर्णं, अंशं दद्युः । संसिद्धे त्विति । उद्धृतपण्ये संसिद्धे देशान्तरविक्रयणाय समारोपितपण्ये शकटादौ प्रस्थानसज्जे सति, सन्नस्य व्याधितस्य संभूयवाणिज्यकारिणामन्यतमस्य, तदानीमेव प्रत्यंशं तदीयं पण्यभागं, दद्युः । कुतः, सामान्या हि पथि सिद्धिश्चासिद्धिश्चेति । मार्गे पण्याना रक्षा चापायश्चानियतौ यतः ।

प्रक्रान्ते त्विति । कर्मणि संभूयसमुत्थानलक्षणे, प्रक्रान्ते सति, स्वस्थस्य, अपक्रामतः अपसरतः, द्वादशपणो दण्डः । दण्ड दत्त्वापि नापक्रमणे स्वाच्छन्द्यमित्याह—न च प्राकाम्यमपक्रमण इति ।

चोरं त्वभयपूर्वं कर्मणः प्रत्यंशेन ग्राहयेदिति । चोरान्तरैः सह चौर्यकर्मकरणविषये संभाषितप्रत्यंशं कमपि चोरं पूर्वदत्ताभयं कृत्वा तेनैव तत्सहचरांश्चोरान् ग्राहयेत् । दद्यात् प्रत्यंशमभयं चेति । तस्य ग्राहितचोरस्य प्रतिश्रुतमभयं प्रत्यंशं च यथासंभाषितं दद्यात् । पुनः स्तेये दत्ताभयचोरेण पुनश्चौर्ये कृते, अन्यत्र गमने च देशान्तरं गत्वा चौर्यकरणे च, प्रवासनं कार्यमिति शेषः । महापराधे दूष्यवदाचरेत्, महापराधं त दूष्यवदुपाशु हन्यात् ।

याजका इति । ऋत्विजः, स्वप्रचारद्रव्यवर्जं स्वस्वव्यापारप्रातिस्विकदक्षिणाद्रव्यमपहाय, यथासंभाषितं वेतन सामुदायिक, सम तुल्य विभजेरन् ।

ऋत्विजोऽग्निष्टोमादिक्रतुकर्मारम्भपर्यवसानान्तरे व्याधितस्यावान्तरतत्तत्कर्मानुष्ठानावधिभेदेनांशभेदानाह—अग्निष्टोमादिषु च क्रतुष्वित्यादि । तत्र याजको दीक्षणाद् दीक्षाकर्मणः, ऊर्ध्वं सन्नः, स्वांशस्य पञ्चममंशं लभेत । सोमविक्रयाद् ऊर्ध्वं, चतुर्थमंशं लभेत । मध्यमोपसदः प्रवर्ग्योद्वासनात् मध्योपसत्सबन्धिनः प्रवर्ग्योत्सादनकर्मण ऊर्ध्वं, तृतीयमंश लभेत । प्रवर्ग्योपासनादिति मातृकयोः पाठः । मध्यात् मध्योपसदनकर्मण ऊर्ध्वं, अर्धमंशं लभेत । द्वितीयमंशमिति पाठे द्वितीयांशोऽर्धमेव । सुत्ये सुत्याहे, प्रातस्सवनादूर्ध्वं पादोनमंशं लभेत । माध्यन्दिनात् सवनादूर्ध्वं समग्रमंशं लभेत । नीता हि दक्षिणा भवन्तीति । माध्यन्दिनसवनकर्मणि निर्वृत्ते हि दक्षिणाः सर्वाः प्राप्ता भवन्ति ।

बृहस्पतिसवनवर्ज बृहस्पतिसवनमपहाय, प्रतिसवन सवने सवने, दक्षिणा दीयन्ते हि। तेनाहर्गणदक्षिणा व्याख्याता इति। उक्तरीत्या याजककार्येष्वहीनयज्ञेष्वपि दक्षिणानयनानुरोधेन याजकांशाः कल्प्याः।

सन्नानामिति। व्याधितानां भृतकानां कर्म,आ दशाहोरात्रात्, शेषभृताः अवशिष्टा भृतकाः, कुर्युः। अन्ये वा स्वप्रत्ययाः स्वाभिमताः, कुर्युः।

कर्मणीति। यज्ञकर्मणि, असमाप्ते तु, यजमानः सीदेत् व्याधितो भवेच्चेत्, ऋत्विजः, कर्म समापय्य, दक्षिणा तदर्था हरेयुः।

असमाप्ते त्विति। कर्मणि असमाप्ते, याज्य यजमानं त्यजतः याजकस्य, याजक त्यजतः याज्यस्य वा, पूर्वः साहसदण्डः।

विधिशेषं श्लोकाभ्या वदन्नध्यायमुपसंहरति—अनाहिताग्निरिति। शत गावो यस्य स शतगुः। शतगुरनाहिताग्निः शतगवधनः सन्नप्यकृताग्न्याधानः, सहस्रगुरयज्वा च सहस्रगवधनः सन्नप्यकृतयज्ञः, सुरापः मद्यपः, वृषलीभर्ता, ब्रह्महा,गुरुतल्पगः गुरुपत्नीगामी, असत्प्रतिग्रहे युक्तः असतः पापिष्ठजनात् प्रतिषिद्धद्रव्यस्य वा प्रतिग्रहे युक्तः आसक्तः, स्तेनः, कुत्सितयाजकः निन्दितान् यो याजयति स च, त्यक्तुमदोषः त्यागे दोषानुत्पादकः ससर्गानर्ह इत्यर्थः। कस्माद्, अन्योन्यं कर्मसकरनिश्चयात् कर्मदोषनिश्चयात्। श्रीमू.

मनुः

ऋत्विजां सभूय क्रियास्वरूपम्

ऋत्विजः समवेतास्तु यथा सत्रे निमन्त्रिताः।
कुर्युर्यथार्हं तत्कर्म गृह्णीयुर्दक्षिणां तथा॥

(१) अत्र सत्रशब्दो यज्ञमात्रविवक्षया प्रयुक्तो न पुनः सत्राख्ययज्ञविशेषविवक्षया। तत्र यजमानानामेव कर्तृत्वेन ऋत्विजामसंभवात्तेन सोमयागादावनेन वचनेन व्यापारलाभावुक्तौ। ×स्मृच.१८७

(२) तथेति कर्मानुसारेण दक्षिणां गृह्णीयुरित्यर्थः। पमा.३०६

वृतेन ऋत्विजा कर्मासमापने व्यवस्था

ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत्।
तस्य कर्मानुरूपेण देयोंऽशः सह कर्तृभिः×॥

(१) सभूयसमुत्थानस्य प्रक्रमोऽयम्। तत्र वैदिकं तावत्सभूयकार्यमुदाहरति। यज्ञो ज्योतिष्टोमादिः। तत्र यागरूपानेकाङ्गकर्मनिर्वर्तनार्थमृत्विग्वृतस्त्वया ममेदं हौत्रं कर्तव्यमाध्वर्यवमौद्गात्र चेति श्रौतेन विधिनाऽनुष्ठेयमित्युपगमश्च प्रवर्तितः। कथचिदपाटवादिना सामिकृतं यत्परिहापयेत्त्यजेत् तदानीं तस्य देयो दक्षिणाशः कर्मानुरूपेण, यावती तस्मिन् क्रतौ दक्षिणा ता निरूप्य चतुर्थे भागे कर्मणः कृते चतुर्थः तृतीये तृतीय इत्येतदानुरूप्यं, सह कर्तृभिः कर्त्तारः तत्पुरुषाः प्रधानर्त्विजां होत्रोद्गात्रादीना प्रस्तोतृमैत्रावरुणप्रभृतयः। मेधा.

(२) परिहापयेत् व्याध्यादिना न समापयेत्। सह कर्तृभिरन्यैस्तत्स्थानपूरणाय स्थितैः। मवि.

(३) स्वकीयकर्मकलापाशकर्तुः कृतानुसारेण भागो देय इत्याह मनुः—ऋत्विगिति। सह कर्तृभिः संभूयकारिभिरित्यर्थः। यद्वा कर्तृभिः सह देयो दक्षिणादानकाले देयो यजमानेनेत्यर्थः। अथवा कर्मणि ऋत्विक्परित्यक्तांशकर्तृभिः सह देय इत्यर्थः। एतदुक्तं भवति। स्वकर्मैकदेशकर्तुर्या दक्षिणा ता तस्य चैकदेशान्तरकर्तुश्च दक्षिणाकाले संभूयकारिसंघो यजमानो वा तत्तत्कर्मानुसारेणार्पयेदिति। +स्मृच.१८८

(४) यज्ञे कृतवरण ऋत्विक् यदि किंचित्कर्म कृत्वा व्याध्यादिना कर्म त्यजति तदा तस्येतरर्त्विग्भिः पर्यालोच्य कृतानुसारेण दक्षिणाशो देयः। *ममु.

× व्यप्र., व्यउ., विता. स्मृचवत्।

(१) **स्मृच.**१८७ थार्हं तत् (थार्हतः); **पमा.**३०६ तत् (ते); **नृप्र.**२६; **सवि.**२७३ **स्मृचवत्**; **व्यप्र.**३०१; **व्यउ.**८१; **विता.**५९० निम (निय); **समु.**९२ **स्मृचवत्**.

× गोरा.व्याख्यान अशुद्धिसदेहान्नोद्धृतम्।

+ पमा., सवि., व्यप्र., व्यउ., विता. स्मृचवत्।

* विर., विचि., मच. वाक्यार्थो ममुवत्।

(१) **मस्मृ.**८।२०६; **अप.**२।२६५; **व्यक.**१४० देयोंऽशः (देया तु); **स्मृच.**१८८ हाप (भाव); **बिर.**११८ रूपेण (सारेण); **पमा.**३०८; **विचि.**४८; **सवि.**२७४ वृतो (भृतो); **व्यप्र.**३०२; **व्यउ.**८३; **विता.**५९२ कर्मा (कार्या); **ममु.**९२

(५) संभूय च समुत्थानमातिदेशिकं भविष्यतीति कृत्वा दत्तस्यानपाकर्माह—ऋत्विगिति द्वादशभिः । तत्रादौ दक्षिणाया इष्टार्थतया भृतिरूपत्व प्रकटयन्नाह—ऋत्विगिति । मच.

दक्षिणासु च दत्तासु स्वकर्म परिहापयेत् ।
कृत्स्नमेव लभेतांशमन्येनैव च कारयेत्+ ॥

(१) माध्यदिने सवने दक्षिणा दीयन्त इति । तत उपरिष्टात्कर्म त्यजतामप्रत्याहरणीय लभेत न प्रतीप त्याजयेदित्यर्थः । अन्या भृतिं दत्वा अन्येन पुरुषेण यजमानस्तत्कर्म समापयेत् । ऋत्विग्भिः कर्म कर्तव्यं वरणाच्च ऋत्विजो भवन्ति । तच्च नियतकाले प्राक्क्रमेण आरम्भात् अतः क्रतु क्रियमाण विगुण भवति, समाप्तिश्चापि कर्तव्येति विगुण चेत्समापनीयमङ्गान्येव तदन्यकर्तृकाणि करिष्यामीति बुद्धिनिवृत्त्यर्थमुक्तमन्येनैवेति, तावदेव विगुण यदशक्य, शक्य तु सर्व कर्तव्यम् । केचित्कारयेदिति ऋत्विजोऽपि संबन्धमाहुः । गृहीत्वा दक्षिणा वाऽधिका दद्यात्स्वयमशक्नुवन्प्राग्दक्षिणाभ्यः (१) शेषकर्मसमापने यजमान एवाऽधिक्रियते । मेधा.

(२) अन्येनैव कारयेत् ऋत्विक् स्वकार्यशेषम् । मवि.

(३) अन्येन स्वगणवर्तिना मध्ये प्रत्यासन्नेन, येनकेनचिदन्येन वा कार्यमाणे त्वाध्वर्यवादिसमाख्याबाधापत्तेः । एवमृत्विजि मृतेऽप्यूह्यम् । ×रमृच.१८८

(४) माध्यन्दिनसवनादौ दक्षिणाकाले दक्षिणासु दत्तासु व्याध्यादिना कर्म परित्यजन्न तु शाठ्यात्स कृत्स्नमेव दक्षिणाभाग लभेत । कर्मशेष प्रकृतमन्येन कारयेत् । *ममु.

+ गोरा. व्याख्याने अशुद्धिसदेहान्नोद्धृतम् ।

× सवि., व्यप्र. स्मृचवत् ।

* विचि. ममुवत् स्मृचवच्च ।

(१) **मस्मृ.**८।२०७ हापयेत् (हापयन्); **अप.**२।२६५; **व्यक.**१४० हापयेत् (हारयन्); **स्मृच.**१८८ हाप (भाव); **विर.**११८ मस्मृवत्; **पमा.**३०९ च द (प्रद) शेष मस्मृवत्; **विचि.**४९ नैव च (नैव तु) शेष मस्मृवत्, **सवि.**२७५ नैव च (नैव तु); **वीमि.**२।२६५ मेव (मेवं) शेष व्यकवत्; **व्यप्र.**३०२; **व्यउ.**८३; **विता.**५०२ (दक्षिणासु प्रदत्तासु यदि कर्म त्यजेन्नरः) च (तु); **समु.**९२; **विश्व.**३५ नारदः.

सभयकारिणामृत्विजा दक्षिणाव्यवस्था

यस्य कर्मणि यास्तु स्युरुक्ताः प्रत्यङ्गदक्षिणाः ।
स एव ता आददीत भजेरन्सर्व एव वा ॥

(१) इदमपरं प्रकृतोपयोगि वैदिकं कथ्यते । वैदिके कर्मणि सामस्त्येन दक्षिणा आम्नायन्ते, न प्रतिपुरुषं विभागेन, तस्य द्वादशशतं दक्षिणेति । तच्चोदकेन क्रत्वन्तराणि तद्विकाराण्यनुगच्छन्ति राजसूयादीनि, तत्र च केषुचिदङ्गकर्मसु प्रतिपदमन्या दक्षिणाऽऽम्नाता पुरुषविशेषसंयोगेन 'हिरण्मयौ प्राकाशावध्वर्यवे' इत्यादि, ताः प्रत्यङ्गदक्षिणाः सपद्यन्ते । किमध्वर्योश्चातुर्विद्यवादिकबहुदातिसबन्धः, सर्वेषामृत्विजा दक्षिणाः अध्वर्युस्तु द्वारमात्र, उत तस्यैव सा अन्येषा प्रकृताशः । संशयोपन्यासार्थः श्लोकः । प्रतिपद पुरुषविशेषाश्रया अङ्गेषु दक्षिणाः प्रत्यङ्गदक्षिणाः । अथवा वीप्सायां प्रत्यङ्गशब्दः । अङ्गमङ्गमाश्रिताः प्रत्यङ्गाः । स एव ता आददीत, मुख्य एव पुरुषस्य ददातिना संयोगः उत कर्तृत्वाविशेषादन्येऽपि भजेरंल्लभेरन् । प्रधानदक्षिणाया इव इति कथयित्वा प्रश्नः । पुरुषविशेषमुक्तास्तदर्था एवेति निर्णयः । एव ददातिर्मुख्यार्थो भवति । पुरुषसयोगश्च नादृष्टार्थः । ÷मेधा.

(२) प्रत्यङ्गदक्षिणाः प्रतिस्व कर्मणा दक्षिणाः । स एव यादृदीत यमृत्विज प्रति यथोद्यते । सर्वे भजेरन् यत्रर्त्विग्विशेषानुक्तिः । मवि.

(३) पूर्णाहुतौ हुतायां वरं दद्यादित्यङ्गकर्मोल्लेखेन या दक्षिणा विहितास्ताः प्रत्याह स एव— यस्य कर्मणीति । यस्य कर्मणि यत्कर्तृके कर्मणि या दक्षिणा उक्ताः स एव तत्कर्मकर्तैव ता आददीतेत्यर्थः । एवं च पूर्णाहुतौ अध्वर्युर्वरं गृह्णीयात् । तत्र तस्य कर्तृत्वात् । भजेरन् सर्व एवेति पक्षान्तरमनेककर्तृकाङ्गदक्षिणाविषयम् ।

÷ गोरा., ममु., विर., विचि., मच , भाच. मेधावत् ।

(१) **मस्मृ.**८।२०८ यस्य (यस्मिन्); **अप.**२।२६५(=); **व्यक.**१४१ प्रत्यङ्ग (प्रत्यंश); **स्मृच.**१८७; **विर.**११९ यकवत्; **विचि.**५० ता आ (ताश्चा); **सवि.**२७४ एव वा (एव न); **वीमि.**२।२६५; **समु.**९२.

१ तच्चेदेके. २ एमये प्रकाशवदवयव इत्यादि. ३ धावा. ४ णाध्व.

तेन स्तोत्रदक्षिणा स्तोत्रकारिण एव छन्दोगा भजेरन्। ×स्मृच.१८७

रथं हरेत चाध्वर्युर्ब्रह्माधाने च वाजिनम्।
होता चाऽपि हरेदश्वमुद्गाता चाप्यनः क्रये॥

(१) रथमध्वर्युराधाने हरेद् ब्रह्मा च वाजिनं वेगवन्तमश्वं होता वा अश्वं वृषमन्यं वा, कासुचिच्छाखास्वाधान एता दक्षिणाः। अतः सोमक्रये यच्छकटं तदुद्गातुः। तत्र शकटेऽन्यतरोऽनड्वान् युक्तः स्यात्। अन्यतरो वियुक्त इत्यपि पठ्यते। तेन च सोमः क्रीत उपाहियते। अन्ये त्वपूर्वमन आहुर्न सोमापाहरणार्थं, न हि क्रयेण शक्यते विशेषयितुम्। +मेधा.

(२) आद्यमुदाहरति रथमिति। आधाने अग्न्याधाने। अश्वं होता ज्योतिष्टोमे। क्रये सोमक्रये। मवि.

(३) निविद्वरं निविच्छंसन् लब्धं वरं उद्गातृशब्देनोद्गातृगणमध्यस्थः सुब्रह्मण्यो गृह्यत इति मदनरत्ने। व्यप्र.३०१

सर्वेषामर्धिनो मुख्यास्तदर्धेनार्धिनोऽपरे।
तृतीयिनस्तृतीयांशाश्चतुर्थांशास्तु पादिनः॥

(१) एव तावत्पुरुषविशेषसंयोगिनीनामङ्गदक्षिणाना विधिरुक्तः। प्रधानदक्षिणानां सामान्यतः श्रुतानामिदानीं विभागमाह—सर्वेषामिति। सर्वेषामृत्विजा ये मुख्यास्तेऽर्धिनः। यावती तस्मिन्क्रतौ सामस्त्येन दक्षिणा आम्नाता तस्यास्तेऽर्द्धिनोऽर्द्धहराः। सोमयागेषु हि षोडशर्त्विजः तत्र चत्वारो मुख्या होताध्वर्युर्ब्रह्मोद्गातेति। तेषामर्धं, तस्य द्वादशशत दक्षिणेति ततोऽर्धं षट्पञ्चाशत्। तदर्धेनाऽष्टाविंशत्याऽर्धिनस्तद्वन्तोऽपरे, येषां ततोऽनन्तरं वरणमाम्नात मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारः। तृतीयिनः तृतीयाशाः। अंशशब्दोऽर्धशब्देन समानार्थः। अर्धशब्दश्च नावश्य समप्रविभाग एव किञ्चिन्न्यूनेऽधिकेऽपि सामीप्येन वर्तते। तेन तृतीयो भागः षट्पञ्चाशतः षोडश गृह्यन्ते। एकैकस्य चतस्रो भवन्ति। समस्त तृतीय भाग प्रयच्छन्ति, षट्पञ्चाशतो तृतीय च होतुरच्छावाकः। अध्वर्योर्नेष्टा। ब्रह्मणोऽग्नीत् उद्गातुः प्रतिहर्ता। ये च पादिनस्ते चतुर्थ भाग कर्मणः कुर्वन्तीति पादिनः। चतुर्थे च स्थाने मैत्रावरुणस्थानान्ते चतुर्थांशाः। द्वादशसमुदाये पूर्ववत्। एव 'त शतेन दीक्षयन्ती'त्यत्रापि क्रुतिः कर्तव्या। अर्धिनो दीक्षयति पादिनो दीक्षयतीत्येवमादिभिः शब्दैः तत्र द्वादशक्रमविधिरेव। अन्यत्र श्रुतो व्यवहार इहापि तथैव रीत्या कृत इति। मेधा.

(२) अस्यायमर्थः। 'ज्योतिष्टोमेन शतेन दीक्षयन्ती'ति वचनेन गवा शतमृत्विगानतिरूपे दक्षिणाकार्ये विनियुक्तम्। ऋत्विजश्च होत्रादयः षोडश। तत्र कस्य कियानंश इत्यपेक्षायामिदमुच्यते। सर्वेषा होत्रादीनां षोडशर्त्विजा मध्ये ये मुख्याश्चत्वारो होत्रध्वर्युब्रह्मोद्गातारः ते गोशतस्यार्धिनः सर्वेषा भागपूरणोपपत्तिवशादष्टाचत्वारिंशद्रूपार्धेनार्धभाजः। अपरे मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्तदर्धेन तस्य मुख्याशस्यार्धेन चतुर्विंशतिरूपेणार्धभाजः। ये पुनस्तृतीयिनः अच्छावाकनेष्ट्राग्नीध्रप्रतिहर्तारस्ते तृतीयिनो मुख्यस्यांशस्य षोडशगोरूपेण तृतीयाशेन तृतीयाशभाजः। ये तु पादिनः ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्यास्ते मुख्यभागस्य यश्चतुर्थांशो द्वादशगोरूपस्तद्भाजः। ननु कथमयमशनियमो घटते, न तावदत्र समयो नापि द्रव्यसमवायो

× सवि. स्मृचवत्।

+ गोरा., ममु., विर., विचि., मच., भाच. मेधावत्।

(१) **मस्मृ.**८।२०९ चापि (वापि), **अप.**२।२६५ तथा (दथा) **बृहस्पतिः**; **व्यक.**१४१ अपवत्, मनुबृहस्पती; **स्मृच.**१८७ चापि हरेदश्व (निविद्वर चाश्व); **विर.**१२० अपवत्, मनुविष्णू; **पमा.**३०७ चाश्व (वाश्व) चाऽपि (वाऽपि); **विचि.**५० अपवत्, **नृप्र.**२६ स्मृचवत्; **व्यप्र.**३०१ तथा (दथा) शेषं स्मृचवत्, मनुबृहस्पती, **समु.**९२.

(२) **मस्मृ.**८।२१० शास्तु (शाश्व), **मिता.**२।२६५ मस्मृवत्; **अप.**२।२६५ परे (र्धिनः) शास्तु (शाश्व); **व्यक.**१४० मनुबृहस्पती; **स्मृच.**१८७; **विर.**११८ परे (र्धिनः); **पमा.**३०७; **विचि.**४९ तद ... ऽपरे (द्वितीयास्तु तदर्धिनः) द्वितीयार्धे (तृतीयिनस्तृतीयास्तु चतुर्थांश्चैकपादिनः); **नृप्र.**२६; **सवि.**२७४; **वीमि.**२।२६५ विचिवत्; **व्यप्र.**३०१ मस्मृवत्; **व्यउ.८३ (=)**; **विता.**५९० र्धिनः (येन) मनुबृहस्पती; **समु.**९२.

१ तास्तृती.

नापि वचनं यद्वशादीदृग्भागनियमः स्यादतः 'समं त्यादश्रुतत्वादि'ति न्यायेन सर्वेषां समाशभाक्त्वं कर्मानुरूपेण चाशभाक्त्वमिति युक्तम् । अत्रोच्यते । ज्योतिष्टोमप्रकृतिके द्वादशाहेऽर्धिनस्तृतीयिनः पादिनः इति सिद्धवदनुवादो न घटते, यदि तत्प्रकृतिभूते ज्योतिष्टोमे अर्धतृतीयचतुर्थांशभाक्त्वं मैत्रावरुणादीना न स्यात्, अतो वैदिकार्द्धिप्रभृतिसमाख्याबलात्प्रागुक्तोऽशनियमोऽवकल्पत इति निरवद्यम् । +मिता.२।२६५

(३) द्वितीयमुदाहरति—सर्वेषामिति । मवि.

(४)मिता.टीका—द्वादशाहे दीक्षाक्रमवाक्ये अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति । तत उद्गातारं ततो होतारं ततस्तं प्रतिप्रस्थाता दीक्षयित्वा अर्धिनो दीक्षयति ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति । ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति इत्येवविधाऽर्ध्यादिसमाख्या श्रूयते । अतस्तद्वशात् ब्राह्मणाच्छंसिप्रभृतीना तदनुरूपो विभागो द्वादशाहप्रकृतौ ज्योतिष्टोमेऽध्यवसीयत इति । सुबो.२।२६५

ऋत्विजा संभूयसमुत्थानस्य स्यात्यादावतिदेशः

[1]संभूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः ।
अनेन विधियोगेन कर्तव्यांशप्रकल्पना ॥

(१) यथा यज्ञे यो बहुनि कर्मणि कायक्लेशकरणे विद्वत्तातिशयसाध्ये च नियुक्तो, भूयसीं दक्षिणा लभते, न्यूनकर्मकारी तु न्यूना तद्वल्लौकिकेषु गृहचैत्यादिकारिषु सभूय संहत्य वर्धकिस्थपतिसूत्रधारादिषु स्वसमयप्रसिद्धो यावानंशः सूत्रधारस्य, यावान्स्थपतेः तत्रानेन विधियोगेन विधिर्वैदिकोऽर्थस्तत्प्रसिद्धा व्यवस्था, विधियोगः वैदिक्या यज्ञगतया व्यवस्थयेत्यर्थः । एवं नाटकादिप्रेक्षाया नर्तनगायनवादकेषु भागप्रकृतिः । यद्यपि सर्वे विद्वांसः सर्वकर्मानुष्ठानशक्ताश्च, तथापि कर्मानुरूपेण भागो न पुरुषानुरूपेण इति संभूयसमुत्थानम् । *मेधा.

(२) एकीभूय गृहनिर्वर्तनादीनि स्वकार्याणि स्थपतिवर्धकिसूत्रधारादिभिः मनुष्यैः संपादयद्भिरनेन युक्तविधानाश्रयेण विज्ञानव्यापाराद्यपेक्षया भागकल्पना कार्या । गोरा.

(३) स्वानि कर्माणि यजमानव्यतिरिक्तानीति शेषः । अंशप्रकल्पना च तस्य द्वादशशतं दक्षिणेत्येवं क्रतुसंबन्धिमात्रतया विहिताया दक्षिणायामेव । न तु 'रथमध्वर्यवे निविदावरमश्वं होत्रे ब्रह्मणेऽश्वमाधाने सुब्रह्मण्याय सोमक्रये शकटम्' इत्येवं ऋत्विग्विशेषसंबन्धित्वेन विहिताया श्रुतिविरोधापत्तेः । *स्मृच.१७८

ऋत्विग्याज्ययोरन्यतरेणान्यतरस्य त्यागे व्यवस्था

ऋत्विजं यस्त्यजेद्याज्यो याज्यं चर्त्विक्त्यजेद्यदि ।
शक्तं कर्मण्यदुष्टं च तयोर्दण्डः शतं शतम् ॥

(१) यज्ञे कर्मकर ऋत्विग्घोतोद्गात्रादिः । यद्यपि वरणोत्तरकालमाप्रयोगसमाप्तेस्तद्व्यपदेशस्तथाप्यत्र प्रारब्धकर्मणोरितरेतरत्यागे विधिरयम् । किं तर्हि प्राग्वरणात् । भूतपूर्वगत्या ऋत्विग्व्यवहारः, यः प्रयोगान्तरे वृतः स एव शक्तः प्रयोगान्तरेऽपि वरितव्यः । न केवलं पूर्ववृतस्याय न्यायः किं तर्हि, तत्पित्रादिभिरपि । तथा हि 'पूर्वो जुष्टः स्वयंवृत' इति नारदः । न चायमेकपुरुषिको नियमः । किं तर्हि कुलधर्मोऽयम् । तथा च महाभारते सवर्तमरुत्तीयेषु प्रपञ्चित तेन, यत्कुलाः पित्रादिभिर्ऋत्विजो वृतास्त एव वरीतव्याः । याजकानामप्येष एव विधिस्तैरपि ते याजनीयाः । ऋत्विज कृतार्त्विज्य तत्कुलीन वाऽन्य यो न वृणीत यियक्षुः अपि त्वन्य याजकमर्थयेत् शक्त कर्मणि यज्ञे प्रयोगज्ञमदुष्टमभिशंसनाङ्गवैकल्यादिभिर्दोषैरयुक्तम् । एवमीदृश एवर्त्विगर्थ-

+ गोरा., व्यक., मवि, स्मृच., ममु, विर., पमा., विचि., सवि., मच., व्यप्र, व्यउ., वित्ता., नन्द. मितावत् ।

* मवि., ममु., मच., नन्द. मेधावत् ।

(१) **मस्मृ.**८।२११, **व्यक.**१४१ विधि (क्रम); **स्मृच.** १८७ विधि (कर्म), **पमा** ३०६; **नृप्र.**२६; **व्यप्र.**३०१ **स्मृचवत्**; **व्यउ.**८३ **बृहस्पतिः**; **समु.**९२.

१ बहूनि कर्माणि.

* पमा , व्यप्र. स्मृचवत् ।

(१) **मस्मृ.**८।३८८; **अप.**२।२६५; **व्यक.**१४२ याज्यं चर्त्वि (याज्यमृत्वि) शतं शतम् (श्रुतः शतम्); **विर.**१२२ याज्य चर्त्वि (याज्यमृत्वि) यदि (यदा), **विचि.**५२ याज्यं चर्त्वि (याज्यमृत्वि) दण्डः (दण्डं):१८२ यः (तु); **व्यप्र.** ३०३ याज्यं चर्त्वि (याज्यमृत्वि); **व्यउ.**८४ व्यप्रवत्; **समु.** ९२ व्यप्रवत्; **विश्व.**५५ यः (तु) याज्यं चर्त्वि (याज्यमृत्वि) **नारदः**.

मानो यदि नाङ्गीकुर्याद्याजकत्वं अदुष्टमेभिरेव दोषैरनाक्रान्तं याज्य शक्त विद्वत्तया च, तादृशे त्यागे तयोः शतं दण्डः । ऋत्विक् शतं दाप्यो याज्य त्यजन् याज्य ऋत्विजम् । न केवलमयमृत्विग्याजकधर्मः, शिष्याचार्ययोरपि । तथा च गौतमः 'अज्ञानादनध्यापनादृत्विगाचार्यौ पतनीयसेवायां च हेयावन्यत्र हानात्पतति इति (गौध.२१।१२-१३) । दातृसप्रदानयोरपि प्रतिग्रहे केचिद्धर्ममिममिच्छन्ति । ×मेधा.

(२) प्रसगादेतदुक्तम् । गोरा.

(३) ऋत्विजमित्यादि संविद्यतिक्रमशेषभूतमप्यत्र राज्ञाप्यृत्विड्न त्याज्य इति दर्शयितु राजधर्मेपूक्तम् । ऋत्विजं परंपरयायातम् । शतं पणाः । पुनश्च पूर्ववत् परिग्रह इत्यपि ग्राह्यम् । मवि.

(४) द्विशतैकशतदण्डयोः कामाकामकृतधनवत्ताधनवत्ताभ्या व्यवस्था । विर.१२२

(५) शतमिति कर्तृभेदविवक्षया वीप्सा । मच.

(६) प्रकीर्णकाख्यमनुद्दिष्टमपि स्मृत्यन्तरप्रसिद्ध व्यवहारपद प्रस्तौति—ऋत्विज यस्त्यजेदिति । कर्मणि यज्ञकर्मणि शक्तमिति ऋत्विग्विशेषणम् । अदुष्टमिति याज्यविशेषणम् । नन्द.

याज्ञवल्क्यः

सभूयकारिणा वणिजां लाभालाभव्यवस्था

समवायेन वणिजां लाभार्थं कर्म कुर्वताम् ।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ ॥

(१) वाणिज्यप्रसङ्गात् सभूयोत्थानमाह—समवाये नेति । सर्व लाभमेकीकृत्य यथाद्रव्य विभागः कार्यः, लाभस्य मूल्यानुसारित्वात् । कर्मापेक्षया वा यथा संवित् परिभाषा अन्योन्यमाकृता मर्यादा कृतेत्यर्थः । स्पष्टमन्यत् । विश्व.२।२६४

(२) संभूयसमुत्थानं नाम विवादपदमिदानीमभिधीयते — समवायेनेति । सर्वे वयमिद कर्म मिलिताः कुर्म इत्येवरूपा संप्रतिपत्तिः समवायः, तेन ये वणिङ्नटनर्तकप्रभृतयो लाभलिप्सवः प्रातिस्विक कर्म कुर्वते तेषा लाभालाभावुपचयापचयौ यथाद्रव्य येन यावद्धनं पण्यग्रहणाद्यर्थं दत्त तदनुसारेणावसेयौ। यद्वा। प्रधानगुणभावपर्यालोचनयाऽस्य भागद्वयमस्यैको भाग इत्येवरूपया संविदा समयेन यथा संप्रतिपन्नौ तथा वेदितव्यौ । *मिता.

(३) समवायो मेलकः समूह इति यावत् । ×अप.

(४) समवायेन मूलद्रव्यसंसर्गेण । ×स्मृच.१८५

(५) यथाद्रव्यं समवायेन येन तेन स्वस्वद्रव्यानुसारेण यथा वा संविदा समवायेन । +विर.११२

(६) अव्यवस्थाया मूलधनानुसारेण वृद्धिक्षयौ । व्यवस्थाया तु व्यवस्थानुसारेणैव तावित्यर्थः । विचि.४५

(७) न त्वेकस्य कुशलत्वादिना विशेषव्यवस्था विना आधिक्यं लाभे उपक्षये च न्यूनता । चन्द्र.३६

अन्यतमेन निषिद्धाननुमतकरणे प्रमादनाशने आपत्क्रारक्षणे च विधिः

प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम् ।
स तद्दद्याद्विभूवाच्च रक्षिता दशमांशभाक् ॥

(१) एव कृतसमयाना व्यवहारापेतं स्वाच्छन्द्यात्—प्रतिषिद्धमित्यादि । प्रतिषिद्धमनादिष्टमन्यैर्वणिग्भिरननुष्ठितमिति शेषः । किञ्च प्रमादाद् यच्च नाशित, स तद् दद्यात् । अस्यानपेक्षयैव । विभ्रवात्तु रक्षिता दशमाशभाग् । रक्षितद्रव्याद् रक्षिता लाभाद् दशमाश प्राप्नुयादित्यर्थः । विश्व.२।२६५

× गोरा., मनु., भाच. मेधावत् ।

(१) **यास्मृ**.२।२५९; **अपु**.२५८।४९; **विश्व**.२।२६४ कृतौ (कृता); **मिता**.; **अप**.; **व्यक**.१३८; **स्मृच**.१८५; **विर**.११२; **पमा**.३०३; **विचि**.४५; **स्मृचि**.१७; **नृप्र**.२४ वाये (भागे) वणिजा (वाणिज्य); **चन्द्र**.३६ सविदा कृतौ (समुदाहृतौ); **वीमि**.; **व्यप्र**.२९९; **व्यउ**.८१ यथाद्र (तथाद्र); **विता**.५८३; **राकौ**.४८१; **सेतु**.१४०; **समु**.९०; **विभ्य**.३४ सविदा कृतौ (समुदाहृतम्),

* वीमि. मितावत् । × शेष मितावत् ।

+ शेषं मिताक्षरैवोद्धृता ।

(१) **यास्मृ** २।२६०; **अपु** २५८।५०; **विश्व**.२।२६५; **मिता**. दश (दश); **अप**.; **व्यक**.१३९ मितावत्; **विर**.११४; **स्मृचि** १७; **वीमि**. मितावत्; **व्यप्र**.३०० मितावत्; **व्यउ**.८३; **व्यम**.८८; **विता**.५८९; **राकौ**.४८१; **सेतु**.१४१; **समु**.९१ मितावत्.

(२) किं च । तेषां सभूय प्रचरतां मध्ये पण्यमिदमित्थं न व्यवहर्तव्यमिति प्रतिषिद्धमाचरता यन्नाशितमनादिष्टमननुज्ञात वा कुर्वाणेन, तथा प्रमादात्प्रज्ञाहीनतया वा येन यन्नाशित स तत्पण्य वणिग्भ्यो दद्यात् । यः पुनस्तेषां मध्ये चौरराजादिजनिताद्व्यसनात्पण्यं पालयति स तस्माद्रक्षितात्पण्याद्दशममंश लभते । मिता.

(३) येन तु परिरक्षित स तस्य दशममंशमधिकं भजेत । ×अप.

(४) तत्स एको दद्यात्, यश्च समुदायान्तर्गतः । आद्यचक्रकारेण यदि सर्वेषामेव प्रमादेन नाशितं तदा अंशक्रमेणैव क्षयः कल्पनीयो यथाशत इति । द्वितीयचक्रकारेण रक्षितुर्मरणे तत्पुत्रो दशमांश लभत इति समुच्चीयते । ×वीमि.

पण्यं राजभाव्यशुल्कादिनिरूपणम् । राज्ञोऽतिक्रमे दण्डश्च ।

अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत ।
व्यासिद्धं राजयोग्यं च विक्रीतं राजगामि तत्॥

(१) इदानीं राजभाव्य निरूपयति—अर्घप्रक्षेपणादिति । योऽर्घो राज्ञा प्रक्षिप्तः स्थापितः, तत एवार्घस्थापनाद् विक्रीतानां विंशतिभागो राजभाव्यः शुल्कः क्रेतृविक्रेतृभ्यामुभाभ्यामन्योन्यमिच्छयान्यतरेण वा देयः । यच्च राज्ञा व्यासिद्ध राजयोग्य च हस्त्यादिद्रव्य राजन्यनावेद्यानाख्याय विक्रीत तद् राजगाम्येव सर्वमित्यवसेयम्। विश्व.२।२६६

(२) इयतः पण्यस्येयन्मूल्यमित्यर्घस्तस्य प्रक्षेपणात् राजतो निरूपणाद्धेतोरसौ मूल्याद्विंशतितममंश शुल्कार्थं गृह्णीयात् । यत्पुनर्व्यासिद्धमन्यत्र न विक्रेयमिति राज्ञा प्रतिषिद्ध यच्च राजयोग्य मणिमाणिक्याद्यप्रतिषिद्धमपि तद्राज्ञेऽनिवेद्य लाभलोभेन विक्रीत चेद्राजगामि मूल्यदाननिरपेक्ष तत्सर्व पण्यं राजाऽपहरेदित्यर्थः । मिता.

(३) पण्यस्यार्धप्रक्षेपणान्मूल्यात् । राजयोग्य गजतुरङ्गादि । विक्रीतमपि राजगामि न क्रेतृगामि। +अप

(४) केचित्तु राज्ञा भागो न ग्राह्यः, किंतु पण्यमेव तन्मूल्य वा संपूर्ण राज्ञा ग्राह्यमित्याहुः । +वीमि.

[1]मिथ्या वदन्परीमाणं शुल्कस्थानादपासरन् ।
दाप्यस्त्वष्टगुणं यश्च स व्याजक्रयविक्रयी ॥

(१) राजभाव्यशुल्कनिमित्तं च पण्यद्रव्यादेः—मिथ्येत्यादि । विश्व.२।२६७

(२) यः पुनर्वणिक् शुल्कवञ्चनार्थं पण्यपरिमाण निह्नुते, शुल्कग्रहणस्थानाद्वाऽपसरति, यश्चास्येदमस्येदं वेत्येव विवादास्पदीभूतं पण्यं क्रीणाति विक्रीणीते वा ते सर्वे पण्यादष्टगुणं दण्डनीयाः । मिता.

(३) वणिक्शुल्कादष्टगुण दण्ड्यः । यश्च सव्याजौ शौल्किकप्रतारणवन्तौ क्रयविक्रयौ करोति, सोऽपि शुल्कादष्टगुणं दण्ड्यः । अप.

(४) इद मयाऽत्र स्थाप्यते न तु क्रीयते विक्रीयत इति वञ्चयित्वा क्रयविक्रयकारी च वणिक् पण्यादष्टगुणं दण्डं दाप्यः । +वीमि.

तरिकेण स्थलजशुल्कग्रहणे कृते, योग्यनिकटब्राह्मणाऽनिमन्त्रणे च दण्डः

तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान्दश ।
ब्राह्मणप्रानिवेश्यानामेतदेवानिमन्त्रणे ×॥

× शेष मितावत् ।

(१) **यास्मृ.**२।२६१; **अपु.**२५८।५१ अर्घ (अर्थ); **विश्व.**२।२६६ द्विंश भागं शुल्क (च्छुल्क विंशद्भाग); **मिता.**; **अप.**; **वीमि.**; **विता.**५८५; **समु.**९१.

+ शेष मितावत् ।

× अयं श्लोकः विश्वरूपाचार्यमते दण्डपारुष्यप्रकरणे साहसविषयः । दण्डविवेककारेणापि साहसे एव निबिष्टः । तदेव युक्तम् ।

(१) **यास्मृ.**२।२६२; **अपु.**२५८।५२ दपासरन् (दपक्रमन्), **विश्व.**२।२६७ सरन् (क्रमन्); **मिता.**; **अप.**; **विर** २९८ अपुवत्; **विचि.**१२६ विश्ववत्; **सवि.**४९५, नारदः; **वीमि.** स्व (श्वा); **विता.**५८५; **सेतु.**२३१,३२१ विश्ववत्; **समु.**९१ विश्ववत्.

(२) **यास्मृ.**२।२६३; **अपु.**२५८।२० दाप्यः (दण्ड्यः); **विश्व.**२।२२८ तरि (तारि) ब्राण (ब्राणः); **मिता.**; **अप.** णप्राति (णः प्रति); **दवि.**३०७ स्थलजं (स्थानिक) (ब्राह्मणान्प्रातिवेश्याश्च तद्देवानिमन्त्रयन्); **सवि.**४९५ कः (ते) नारदः; **वीमि.**; **विता.**५८६; **राकौ.**४८१; **समु** ९१.

(१) इदानीं दण्डपारुष्यसामान्यात् साहसव्यवहारमाह—तारिक इति । तारिकस्य स्थलनिमित्तराजभाव्यशुल्कग्रहणे ब्राह्मण्यदर्पाच्च योग्यप्रातिवेश्यब्राह्मणानिमन्त्रणे दशपणो दण्डः । ब्राह्मणग्रहण च गुणार्थत्वात् सर्वत्रैवर्णिकार्थम् । दर्पकृतत्वाच्चैवमादेः साहसत्वम् । विश्व.२।२२८

(२) अपि च । शुल्क हि द्विविध स्थलजं जलज च । तत्र स्थलज 'अर्घप्रक्षेपणाद्विश भाग शुल्कं नृपो हरेदि'त्यत्रोक्तम् । जलजं तु मानवेऽभिहितम् । तीर्यतेऽनेनेति तरिः नावादिः तज्जन्यशुल्केऽधिकृतस्तारिकः । स यदा स्थलोद्भव शुल्क गृह्णाति तदा दशपणान् दण्डनीयः । वेशो वेश्म, प्रतिवेश इति स्ववेश्माभिमुख स्ववेश्मपार्श्वस्य चोच्यते, तत्र भवाः प्रातिवेश्याः ब्राह्मणाश्च ते प्रातिवेश्याश्च ब्राह्मणप्रातिवेश्याः,तेषा श्रुतवृत्तसंपूर्णाना श्राद्धादिषु विभवे सत्यनिमन्त्रणे एतदेव दशपणात्मक दण्डन वेदितव्यम् । मिता.

(३) समीपगृहस्वामिनां निमन्त्रणाकरणे ब्राह्मणो दशपणानित्येव दाप्यः । अप.

(४) शुल्कमप्रयच्छतो वणिज इव असमुचितं शुल्क गृह्णतोऽपि राजाधिकृतस्य दण्ड इत्यभिदधानस्तत्तुल्यापराधेऽपि दण्डमाह—तरिक इति । प्रतिवेशः स्ववेश्मसन्निहित वेश्म तत्रस्था ये ब्राह्मणास्तान निमन्त्रणकार्येऽपि निमन्त्रयन् दशपणमितमेव दण्ड दाप्यः । चकारेण तदीयनिमन्त्रणं स्वीकुर्वन्निति समुच्चीयते । वीमि.

सभूयकुर्वतामन्यतमस्य देशान्तरमरणे तद्द्रव्याधिकारनिरूपणम्

[1]**देशान्तरगते प्रेते द्रव्यं दायादबान्धवाः ।**
ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपः ॥

(१) अथ किं सभूय व्यवहरतामन्यतरविपत्तौ तदीयं द्रव्यमन्यैर्वणिग्भिर्ग्रहीतव्यम् । नेत्युच्यते । किं तर्हि देशान्तरगत इति । देशान्तरगते प्रेते आयव्ययविशुद्ध तदीयमश यथाविभजमानं रिक्थिनोऽन्ये गृह्णीयुः । तदभावे तु राजा गृह्णीयात् । किमर्थ पुनरिदमुच्यते । ऋणदाने हि प्रतिषेधात् । तथा च गौतमः----'प्रातिभाव्यवणिक्शुल्कमद्यद्यूतदण्डा न पुत्रानध्यावहेयुरि'ति । ऋणवच्च धनसबन्धोऽपीति तदभाक्त्वमेव युक्तमित्याशङ्कानिवृत्त्यर्थमेतत् । स्पष्टमन्यत् । विश्व.२।२६८

(२) यदा संभूयकारिणा मध्ये यः कश्चिद्देशान्तरगतो मृतस्तदा तदीयमश दायादाः पुत्राद्यपत्यवर्गो, बान्धवा मातृपक्षा मातुलाद्याः, ज्ञातयोऽपत्यवर्गव्यतिरिक्ताः सपिण्डा वा, आगताः संभूय व्यवहारिणो ये देशान्तरादागतास्ते वा गृह्णीयुः ।

तैर्विना दायादाद्यभावे राजा गृह्णीयात् । वाशब्देन च दायादादीना वैकल्पिकमधिकारं दर्शयति । पौर्वापर्यनियमस्तु 'पत्नी दुहितर' इत्यादिना प्रतिपादित एवात्रापि वेदितव्यः । शिष्यसब्रह्मचारिब्राह्मणनिषेधो वणिक्प्रातिश्च वचनप्रयोजनम् । वणिजामपि मध्ये यः पिण्डदानर्णदानादिसमर्थः स गृह्णीयात् । सामर्थ्यविशेषे सर्वे वणिजः समृष्टिनो विभज्य गृह्णीयुः । तेषामप्यभावे दशवर्षं दायादाद्यागमन प्रतीक्ष्यानागतेषु स्वयमेव राजा गृह्णीयात् । मिता.

(३) दायादाः पुत्रा गृह्णीयुः । तदभावे बान्धवाः सबन्धिनः पत्नी दुहितर इत्याद्याः । तेषामभावे ज्ञातयः समानोदकाः । तेषामभावे संभूयकारिणस्तेन सहागताः । तदभावे नृपः । संभूयकारिणा द्रव्याधिकारित्व प्राप्त्यर्थं वचनम् । अन्यैस्तु 'पत्नी दुहितर' इत्याद्युक्तमनूद्यते । अप.

(४) वाशब्देन विकल्पः पौर्वापर्यं च समुच्चीयते । +वीमि.

लाभशून्यजिह्माशक्ताना विधिः । वणिजा संभूयकारिणामृत्विक्कर्षकादावतिदेश. ।

[1]**जिह्मं त्यजेयुर्निर्लाभमशक्तोऽन्येन कारयेत् ।**
अनेन विधिराख्यात ऋत्विक्कर्षककर्मिणाम् ॥

(१) संभूय च प्रवृत्ताना स्वामिकर्मकरादीनामन्योन्यमय

+शेष मितावत् ।

(१) **यास्मृ.**२।२६४; **अपु.**२५८।५३; **विश्व.**२।२६८ गता (गतै); **मिता.**; **अप.** द्रव्यं (धन); **स्मृचि.**१८ द्रव्य (तस्य) उत्तरार्धं (ज्ञातयो वा हरेयुस्तेऽवनतास्तैर्विना नृपः), **वीमि.**; **विता.**५८६ क्रमेण मनुः; **समु.**९१ विश्ववत्.

(१) **यास्मृ.**२।२६५; **अपु.**२५८।५४ लां (लों), **विश्व.** २।२६९ राख्यात (ना ख्यातं); **मिता.**; **अप.**; **व्यक.** १३९ पू.:१४० कर्मि (कर्म); **स्मृच.**१८५ प्रथमपादः, **विर.**

विधिः —जिह्ममित्यादि। अन्योन्यं स्वामिकर्मकरसामाजिकादयः जिह्म कुटिलं व्यभिचारिणं त्यजेयुः, तथा लाभशून्यम्। प्रवृत्तस्तु स्वयमशक्तोऽन्येनाविरोधिना स्वकार्यं सामाजिक कारयेत् । योऽस्य सभूयोत्थाने विधिरुक्तः, अनेनैव विधिना निरूपितमृत्विगाद्यनुष्ठानमपि द्रष्टव्यम्। स्मृत्यन्तरात्तु वशेषिकर्त्विगाद्यनुष्ठानप्रपञ्चोऽन्वेष्टव्यः । स्पष्टमन्यत् । विश्व.२।२६९

(२) किं च। जिह्मो वञ्चकः त निर्लाभ निर्गतलाभमाच्छिद्य त्यजेयुर्बहिः कुर्युः। यश्च सभूयकारिणा मध्ये भाण्डप्रत्यवेक्षणादिकं कर्तुमसमर्थोऽसावन्येन स्वं कर्म भाण्डभारवाहन तदायव्ययपरीक्षणादिक कारयेत् । प्रागुपदिष्ट वणिग्धर्ममृत्विगादिष्वतिदिशति—अनेनेति। अनेन लाभालाभौ यथाद्रव्यमित्यादिवणिग्धर्मकथनेन ऋत्विजा होत्रादीना कृषीवलाना नटनर्तकतक्षादीना च शिल्पकर्मोपजीविना विधिर्वर्तनप्रकार आख्यातः ।

मिता.

(३) सभूयकारिणा यो जिह्मः कुटिलः प्रातिस्विककर्मकारीति यावत्। तमितरे निर्लाभं लाभरहित कृत्वा त्यजेयुः पेटकाद्बहिः कुर्युः। यदि पुनर्न जैम्ह्यात्कर्म करोति किं त्वशक्तेस्तदाऽन्येन तत्कारयेत् । अप.

(४) जिह्मो वञ्चकः वञ्चनया समुदायकार्यानिष्पादकः । *वीमि.

नारदः

सभूयसमुत्थानपदनिरुक्ति

वणिक्प्रभृतयो यत्र कर्म संभूय कुर्वते ।
तत्संभूयसमुत्थानं व्यहारपदं स्मृतम् ॥

(१) संभूय एकत्र मिलित्वा संव्यवहारं प्रति यत्तदुत्थान नाम व्यवहारपदमुच्यते । अभा. ८४

(२) वणिजो वाणिज्यं ऋत्विजो यज्ञ कृषीवलाः कृषिं हेमकारादयः शिल्प नर्तकादयो नृत्तादिक स्तेनाः स्तेयं यत्र सहत्य कुर्वते तत्सभूय क्रियमाण वाणिज्यादिक सभूय समुत्तिष्ठन्ते समेधन्तेऽनेनेति व्युत्पत्त्या सभूयसमुत्थानाख्य व्यवहारपदमित्यर्थः । स्मृच. ३

(३) सभूय धनमेलक कृत्वा । विर. १११

(४) कर्मात्मार्थं कुर्वन्ति । समुपतिष्ठन्ते ऋद्धिं प्राप्नुवन्ति ऐकमत्येनोत्कृष्टामवस्था प्राप्नुवन्त्यनेनेति समुत्थानम् । नाभा.४।१

(५) यद्यपि फलभूतस्य स्वर्गस्य ऋत्विग्गामित्वाभावादात्मनेपदस्यानुपपन्नत्वेन प्रभृतिशब्देन ऋत्विग्ग्रहणमनुचितम्। तथापि आत्मनेपदाऽविवक्षयेदमुक्तम्। न च ऋत्विङ्मात्रे आत्मनेपदाऽविवक्षणे अन्याशे च विवक्षणे वैरूप्यप्रसग इति वाच्यम्। सभूयकर्तृत्वमात्रस्य लक्षणत्वेनान्यत्र वास्तवतत्सत्वेऽपि लक्षणवैयर्थ्यप्रसङ्गेनाप्रवेशात्। व्यप्र.२९८

लाभव्यययोराधारः स्वाशप्रक्षेपः

फलहेतोरुपायेन कर्म संभूय कुर्वताम् ।
आधारभूतः प्रक्षेपस्तेनोत्तिष्ठेयुरंशतः ॥

(१) यद्वणिग्भिर्मिलित्वा द्रम्मसहस्रपिण्डेन वाणिज्यं प्रारब्धम्। तत्रैकेनार्धं पञ्च शतानि निक्षिप्तानि। अन्येन पञ्चमाशे शतद्वयम्। अन्येनापि शतद्वयमेव। अपरेण दशमाशे शतमेकम्। एतेषा स्वाशप्रक्षेपो लाभव्यययोराधारभूतः । अभा.८४

(२) संभूय कर्म कुर्वतामाधारभूत आश्रयभूतो मूलधनं प्रक्षेपः। ततस्तमवेक्ष्योत्तिष्ठेरन्पृथग्धना भवेयुः ।

अप.२।२५९

---

* शेष मितावत्

११५ पू.; **विचि.**४६,४८, **स्मृचि** १८ विधिरा (विधिना), **सवि.**२७२ प्रथमपादः; **चन्द्र.**३७ लाभमशक्तोऽ (लाभमशक्त्या) पू.; **वीमि.** व्यकवत्; **व्यप्र** २९९ पू.; **व्यम.**८८ अशक्तो (अशक्तो), **विता** ५८९; **राकौ.**४८१; **सेतु.**१४२ पू. : १४४; **समु.**९१-९२ लाभ (लोभ); **विच.**९७; **विव्य.**३५ पू.

(१) **नासं.**४।१; **नास्मृ.**६।१; **अपु.**२५३।१५ स्मृत (विदुः); **अभा** ८४; **अप.**२।२५९; **व्यक.**१३८; **स्मृच.**३, **विर.**१११; **पमा.**३०२; **नृप्र.**२४; **सवि.**२७१ तत्सभूय (सभूय च); **व्यप्र.**२९७; **व्यउ** ८१; **व्यम** ८८; **विता.** ५८२; **सेतु.**१४०; **समु.**९०.

(१) **नासं.**४।२; **नास्मृ.**६।२; **अभा.**८ ९; **अप.**२।२५९ उत्तरार्धं (आधारभूताः प्रक्षेपा उत्तिष्ठेरंस्ततोंऽशतः); **व्यक.** १३८ पस्तेनो ...तः (प उत्तिष्ठेरस्ततोंऽशतः); **स्मृच.**१८४ **व्यकवत्**; **विर.**१११ **व्यकवत्**; **नृप्र.**२४; **सवि.**२७१; **समु.**९० **व्यकवत्**.

(३) ततो मूलधनप्रक्षेपानुसारादुत्तिष्ठेरन्। लाभभाजो भवेयुरित्यर्थः। ×स्मृच.१८४

(४) आधारभूतः निदानभूतः। ततः कारणादंशतः उत्तिष्ठेरन् वाणिज्याद्यर्थमुद्योगं कुर्वीरन्। विर.१११

समोऽतिरिक्तो हीनो वा तत्रांशो यस्य यादृशः।
क्षयव्ययौ तथा वृद्धिस्तत्र तस्य तथाविधाः॥

तत्रायव्ययौ स्वकीयस्वकीयाशावतारेण संबध्येते। *अभा.८४

संभूयकर्मणि समयानुसारेण कर्तव्यनिर्वाहः

भाण्डपिण्डव्ययोद्धारभारसारान्ववेक्षणम्।
कुर्युस्तेऽव्यभिचारेण समये स्वे व्यवस्थिताः॥

(१) यः प्रथमारम्भे समयः कृतः, तत्राव्यभिचारेण अविलोपनेन भाण्डपिण्डव्ययोद्धारसारासारान्ववेक्षणानि स्वाशानुसारेण कर्तव्यानीति। अभा.८४

(२) भाण्डं क्रयविक्रयसमूहः, पिण्डं पाथेय, व्ययो वेतनं, उद्धारस्तस्माद्देयद्रव्यात्प्रयोजनविशेषादाकर्षण, भार उद्वाह्यः, सारं प्रकृष्टं चन्दनादि, अन्ववेक्षण रक्षणयोजनादि, अव्यभिचारेण याथातथ्येन, समये नियमबन्धे प्रथमकृते व्यवस्थिताः कुर्युः। विर.११२-११३

(३) भाण्डं साधारणद्रव्येण गृहीत द्रव्यम्। पिण्डः सर्वसमुदायः। व्ययो भृतिः शुल्कनाविकादिनिमित्तः। उद्धारस्तत उद्धृतं द्रव्य, सारमसारं वा। बाह्यतः प्रयोजनार्थमुद्यतमित्यन्ये। भाराः पुरुषादिवाह्याः। सारं प्रधानं द्रव्यं चन्दनकुङ्कुमादि, भाराणां वा मध्ये सारद्रव्याणि। तेषामन्वहमवेक्षणं कुर्युस्ते यथाकृतेन व्यवहारक्रमेण स्वसमये आदौ कृते स्थिताः। प्रत्यह वारक्रमेण परस्परतः सपाद्यं मतिसाम्यम्।

नाभा.४।४

अन्यतमेन निषिद्धाननुमतकरणे प्रमादनाशने व्यसनाद्रक्षणे च व्यवस्था

प्रमादान्नाशितं दाप्यः प्रतिषिद्धकृतं च यत्।
असंदिष्टश्च यत्कुर्यात्सर्वैः संभूयकारिभिः॥

(१) एतैश्च सर्वैरपि सामुदायिकैः समर्पितं प्रमादाद्यो नाशयति। स तन्नाशितं दाप्यः प्रतिषिद्ध च। असमतकृतं च यत्किमपि हानिकारि भवति, तदपि दाप्य एवेति। अभा.८४

(२) प्रमादात् तस्य यन्नष्टं, न प्रसह्य चोरराजकुलादिना हृत, स दाप्यः, तद्दोषान्नष्टत्वात्।

नाभा.४।५

दैवतस्कररराजाग्निव्यसने समुपस्थिते।
यस्तत्स्वशक्त्या रक्षेत तस्यांशो दशमः स्मृतः॥

(१) दैवात्प्रदीपने दह्यमानं यः कश्चिदेक एव रक्षति। तथा तस्करवृन्दात्। तथोन्मार्गीभूतग्रहणोद्यतराज्ञः पार्श्वाद्यः स्वकीयेन प्राणव्यायामेन तत्सामान्यभाण्डं रक्षति। तस्य दशमाशः क्लेशफले भवति।

अभा.८४

(२) एतैः सर्वनाशे समुपस्थिते सर्वेषा यस्तद् व्यसन स्वशक्त्या पुरुषकारलोकयात्रादिना सम्यग् रक्षेत् तद् द्रव्यं हिंसाघातस्य सर्वभाण्डदशभागः। नित्यो नायं नियमः, भूयानपि व्यसनरक्षानुरूपतः

× नाभा स्मृचवत्। * स्मृच., नाभा. अभावत्।

(१) **नासं.**४।३ तत्रा (यत्रां) स्तत्र ...धाः (स्तस्य तत्र तथाविधा); **नास्मृ.**६।३; **अभा.**८४; **अप.**२।२५९ (=) तत्रां (यत्रां) क्षयव्य (क्षयाक्ष); **स्मृच.**१८४ तत्रा (यत्रां); **विर.**१११ स्तत्र .. ...धाः (स्तस्य तत्र तथाविधा); **सवि.**२७१ समो (समे) तत्राशो यस्य (यस्याशो यत्र) उत्तरार्धे (आयव्ययौ **यथा वृद्धिस्तस्य तत्र** तथा विधिः); **व्यप्र.**२९८ विरवत्; **व्यउ.**८२ विधाः (विधा); **विता.**५८२; **सेतु.**१४० नासवत्, **बृहस्पतिः**; **समु.**९० स्मृचवत्.

(२) **नासं.**४।४ ऽव्यभिचा (व्यवहा); **नास्मृ.**६।४; **अभा.**८४ भार (सारा); **अप.**२।२५९ (=) न्ववे (र्थवे) समये स्वे (समयेन); **व्यक.**१३८,१३९; **स्मृच.**१८५; **विर.**११२; **पमा.**३०४ रान्व (राध); **व्यप्र.**२९९ अभावत्; **व्यउ.**८२; **विता.**५८३; **बाल.**२।२६५; **समु.**९०.

(१) **नासं.**४।५ ष्टश्च (ष्ट च); **नास्मृ.**६।५ सर्वैः (सर्व); **अभा.**८४, **व्यक.**१३९; **विर.**११४ ष्टश्च यत् (ष्टन्तु यः).

(२) **नासं.**४।६ जाग्नि (जोत्ये) रक्षेत (सरक्षेत); **नास्मृ.**६।६ जाग्नि (जन्यो), **अभा** ८४ जाग्नि (जन्य) यस्तत् (यत्तत्); **व्यक.**१३९ रक्षेत (रक्षेत्तु); **विर.**११४ रक्षेत (रक्षेत्तु); **विचि.**४५ यस्त... क्षेत (स्वशक्त्या रक्षयेद्यस्तु); **स्मृचि.**१७ विचिवत्; **व्यप्र.**३००; **बाल.**२।२६० विरवत्; **सेतु.**१४१ विचिवत्; **समु.**८७ यस्तत् (यस्तु) रक्षेत (संरक्षेत्) **बृहस्पतिः**; **विव्य.**३५ विचिवत्.

तत्प्रसादाद्धि तेषां फलसंबन्धः । नाभा.४।६

अन्यतमे प्रोषिते मृते वा तद्द्रव्याधिकारनिरूपणम्

एकस्य चेत्स्याद्व्यसनं दायादोऽस्य तदाप्नुयात् ।
अन्यो वाऽसति दायादे शक्ताश्चेत्सर्व एव वा ॥

(१) तेषां सभूयकारिणां मध्ये यद्येकस्य कस्यापि मृत्युः स्यात् । तदा तदीयाश्च पुत्रादिदायादा अधिकारिणस्तदाप्नुयुः । असति दायादे तेषामेकतमो वा यस्तन्निर्हर्तुं शक्तः । अथवा यदि शक्तास्तदा तदीयाश्च सर्व एव ते गृह्णीयुरिति । इति सभूयसमुत्थाने सामवायिकभेदः प्रथमः । अभा.८४

(२) व्यसन मरण, सक्तः सबद्धः, सर्वे सभूयकारिणः । अप.२।२६४

(३) एकस्याशक्तौ सभूयसमुत्थायिमध्ये यस्तु तस्य दायादः, स तद्द्रव्यरक्षण कृत्वा दशमांशमाप्नुयात् । तस्याप्यभावे सभूयकारिणा मध्ये यः कश्चिदेकः स्वव्यापारतदीयव्यापारशक्तः स्वतद्व्यापारं कृत्वा दशमाशमाप्नुयात् । समशक्तास्तु सभूयसमुत्थायिनः सर्व एव तद्व्यापार कृत्वा दशमाशमाप्नुयुरित्यर्थः । विर.११५

(४) रक्षणशक्तस्य त्वेकस्य मरणे नारदः—एकस्येति । शक्तस्य मरणे तदायादो भाण्डमवेक्ष्य तद्दशममश तदभावे सर्वे वणिजो भाण्ड रक्षयित्वा सभूय दशममंश गृह्णीयुरित्यर्थः । विचि.४७

(५) तेन विना सब निर्वोढुमशक्ताश्चेत् सर्व एव वा गृह्णीयुः । नाभा.४।७

कश्चिच्चेत्संचरन्देशात् प्रेयादभ्यागतो वणिक् ।
राजाऽस्य भाण्डं तद्रक्षेत् यावद्दायाददर्शनम् ॥

(१) दायादः पुत्रः । अप.२।२६४

(२) कश्चित् देशान्तरादभ्यागतः स्वदेशे सञ्चरन् म्रियेत चेत् सभाण्डो वणिक्, राजा तद्भाण्डं संरक्षेद् यावत् पुत्राद्यन्यतमदायाददर्शनम् । दायाद आगते दायादत्व विज्ञाय समर्पयेत् । नाभा.४।१४

दायादेऽसति बन्धुभ्यो ज्ञातिभ्यो वा समर्पयेत् ।
तदभावे सुगुप्तं तद्धारयेद्दशवत्सरान् ॥

असति दायादे पुत्रे भ्रातरि वा बन्धुभ्यो दापयेत्, तदभावे ज्ञातिभ्यः मातृसंबद्धेभ्यस्तस्य वणिजो दापयेत् तदभावे सुगुप्त तद् राजा दश वर्षाणि रक्षेत् । यानि न स्थिराणि द्रव्याणि तानि विक्रीय मूल्यं स्थापयेद् दश वर्षाणि । नाभा.४।१५

अस्वामिकमदायादं दशवर्षस्थितं ततः ।
राजा तदात्मसात्कुर्यादेवं धर्मो न हीयते ॥

यदि कश्चित् यथोक्तानामन्यतम आगच्छेत्, तस्मै समर्पयेत्, अथ नागच्छेत् पूर्णेषु दशवर्षेषु—अस्वामिकमिति । अस्वामिक विनष्टस्वामिक अविद्यमान-

---

(१) **नासं**.४।७ त्स्या (त्त) शक्ता (ऽशक्ता), **नास्मृ**.६।७, **अभा**.८४ शक्ता (शक्त); **मिता**.२।२६४ व्यसनं (स्मरण) एव वा (एव ते); **अप** २।२६४ शक्ता (सक्त) एव वा (एव च); **व्यक**.१३९ अभावत्; **विर**.११५ शक्ता (शक्त) एव वा (एव च); **विचि** ४७ विरवत्; **चन्द्र**.३८ एकस्य (तस्य) शेषं विरवत्; **वीमि** २।२६० पू, **विता**.५८६ वाऽसति (ऽप्यसति) शेषं मितावत्, **सेतु**.१४२ अभावत्, **समु**.९२ शक्ता (शक्त) शेषं मितावत्.

(२) **नासं**.४।१४ तद्र (संर); **नास्मृ**.६।१६ शात् (शान्) दभ्या (दाभ्या) तद्रक्षेद् (रक्षेत), **अभा**.८६ तद्रक्षेद् (रक्षेत); **अप**.२।२६४ शात् (शान्); **व्यक**.१३९ ऽस्य भाण्ड (भाण्ड तु); **विर** ११५; **विचि**.४७ च्चेत्सच (च्च सस); **चन्द्र**.३८; **सेतु**.१४२ शात् (शान्) च्चेत्सच (च्च सस).

(१) **नासं**.४।१५ वा (ऽस्य) वत्सरान् (तीः समाः); **नास्मृ** ६।१७ वत्सरान् (तीः समाः), **अभा**.८६ उत्तरार्धे (तदभावाय गुप्त तद्धारयेद्दशतीः समाः), **मिता**.२।२६४ सुगुप्त तद्धा (तु गुप्तं तत्का) उत्त., **अप**.२।२६४ समर्प (तदर्प) सुगुप्त (स्वगुप्त), **व्यक**.१४० सुगुप्त (स्वगुप्त); **विर**. ११६ वा समर्प (ऽपि तदर्प) तद्धा (तु धा); **विचि**.४७ वा समर्प (ऽथ तदर्प) तद्धार (तद्रक्ष); **चन्द्र** ३८ भ्यो वा सम (भ्यश्च तद्र) सुगुप्त तद् (स्वगुप्त तु); **विता**.५८६ सुगुप्त (तु गुप्त) उत्त.; **सेतु** १४३ वा समर्प (ऽथ तदर्प) सुगुप्त तद्धार (तु गुप्त तद्रक्ष); **समु**.९२ मितावत्, उत्त., **विव्य**.३५ समर्प (तदर्प) तद्धार (तद्रक्ष).

(२) **नासं**.४।१६ र्षस्थि (र्षोषि); **नास्मृ**.६।१८; **अभा**. ८६; **मिता**.२।२६४; **अप**.२।२६४ ततः (धनम्); **व्यक**. १४०; **विर**.११७; **विचि**.४८; **चन्द्र**.३८; **विता**.५८६; **बाल**.२।१७३, **सेतु** १४३; **समु**.९२.

दायादबन्धुज्ञातिकं दशवर्षस्थित तत उर्ध्वं राजा तद् द्रव्यमात्मसात् कुर्यात्। एवं धर्मो न हीयते। उर्ध्वं यदि कश्चिदागच्छेत्, इच्छातो दानमदानं वेति।
नाभा.४।१६

ऋत्विग्व्यसनेऽतिदेशः

ऋत्विजां व्यसनेऽप्येवमन्यस्तत्कर्म निस्तरेत्।
लभेत दक्षिणाभागं स तस्मात्संप्रकल्पितम्॥

(१) ऋत्विजामपि एकयज्ञे संश्रये प्रचरता यज्ञे-कस्य कस्यापि व्यसनं भवति। तदा तदीयकर्मधुरमन्यः कश्चिन्निर्वाहयेत्। दक्षिणाभागमपि तत्प्रकल्पित निर्वाहक एव लभेत्। अभा.८५

(२) तत् कर्मान्यो दायादो निस्तरेत् समापयेत्। तदभावे पूर्ववदन्यो निस्तरेत्। लभेत दक्षिणाभाग तस्मादारभ्य यतोऽसौ व्यसनी, त कर्मशेषानुरूपम्।
नाभा.४।७

ऋत्विक्त्रैविध्यम्। याज्यर्त्विजोरन्यतरेणान्यतरस्य त्यागे व्यवस्था।

ऋत्विक् तु त्रिविधो दृष्टः पूर्वजुष्टः स्वयंकृतः।
यदृच्छया च यः कुर्यादार्विज्यं प्रीतिपूर्वकम्॥

एतच्च त्रिविधत्वमेतदर्थं दर्शित यत् 'क्रमागते-ष्विति'। (अग्रिमश्लोकेऽस्यान्वयः) अभा.८५

ऋत्विग्याज्यमदुष्टं यस्त्यजेदनपकारिणम्।
अदुष्टं चर्त्विजं याज्यो विनेयौ तावुभावपि॥

(१) अदुष्टमपि अनपकारिणमपि याज्य यदि ऋत्विक् कर्मारूढोऽपि क्रोधलोभादिना अवान्तर एव त्यजति। अथवा एवमृत्विजं याज्य एव त्यजति। ततः प्राप्तव्यवहारयोर्द्वयोरपि तयोर्दोषवान्स एव राज्ञा विनय ग्राह्यः। अभा.८५

(२) अदुष्टानपकारिग्रहणादन्यतरसद्भावे त्यागे न दण्ड इति गम्यते। नाभा.४।९

क्रमागतेष्वेष धर्मो वृतेष्वृत्विक्षु च स्वयम्।
यादृच्छिकेषु याज्यस्य तत्त्यागे नास्ति किल्बिषम्॥

(१) ये ऋत्विजः पूर्वसेविताः क्रमागताः। तथा ये स्वय वृता भवन्ति। तेषा त्यागेऽय युक्तपरित्यागविनय-विचारो दृष्टः। यस्तु न पूर्वजुष्टो न च स्वयवृतः, यद्-च्छयागतः प्रीतिपूर्वकमार्त्विज्य करोति। तस्य तत्कुर्वत एवान्यः कश्चिद् गुणातिरिक्तः स्नेहातिरिक्तो वा समागतो भवति। तदा तं यदृच्छयागतं परित्यजतस्त स्नेहातिरिक्तं तदीयकर्माधिकारयतो दक्षिणाभागं च तस्य प्रयच्छतो याज्यस्य छद्मावकाशो नास्तीति। इति संभूयसमुत्थाने ऋत्विग्याज्यव्यवहारभेदो द्वितीयः। अभा.८५

(२) संयोज्ये ऋत्विजि। विर.१२२

(३) त्यागे दण्ड उक्तोऽतिदिश्यते 'विनेयावि' ति पूर्वजुष्टस्वयंवृतेषु। नाभा.४।११

वणिजा राजशुल्क प्रदेयम्

शुल्कस्थानं वणिक् प्राप्तः शुल्कं दद्याद्यथोदितम्।
न तद्व्यतिहरेद्राज्ञो बलिरेष प्रकीर्तितः॥

---

(१) **नासं.**४।८; **नास्मृ.**६।८; **अभा.**८५; **अप.**२।२६५ निस्त (निर्हे); **व्यक.**१४०; **स्मृच.**१८८; **विर.**११७ निस्त (विस्त); **पमा.**३०९ निस्त (विस्त) लभेत (लभते); **विचि.** ४८ ऽप्येव (चैव); **सवि.**२७५ स तस्मात्सप्र (तस्मात् संप्रति); **चन्द्र.**३८ मन्य (मन्यै) निस्त (कार) त्सप्र (त्परि); **व्यप्र.** १०२ मन्यस्तत् (मन्येन) भाग (दान); **विता.**५९३ लभेत (लभते); **सेतु.**१४३ विचिवत्; **समु.**९२; **विव्य.**३५ ऽप्येव (चैव) निस्त (विस्त) तस्मात्सं (तस्मात्सु).

(२) **नासं.**४।१० दृष्टः पूर्व (प्रोक्तः पूर्वैः) कृतः (वृत:); **नास्मृ.**६।१०; **अभा.**८५ तु (च); **व्यक.**१४२; **विर.**१२२ तु (च) दृष्टः पूर्व (ज्ञेयः पूर्वैः); **विचि.**५२ च (तु) शेषं विर-वत्; **दात.**१९७ च (ऽपि) उत्त.; **व्यप्र.**३०३ तु (च); **व्यउ.** ८४ पूर्व (पूर्वैः); **समु.**९२ दृष्टः (प्रोक्तः) कृतः (वृतः) स्मृत्यन्तरम्.

(३) **नासं.**४।९ चर्त्वि (ऋत्वि); **नास्मृ.**६।९ चर्त्वि (चर्त्वि);

व्य. का. ९९

अभा.८५; **व्यक.**१४२; **विर.**१२२; **विचि.**५२ ष्ट च (ष्ठश्चा), **व्यप्र.**३०३ नास्मृवत्; **व्यउ.**८४.

(१) **नासं.**४।११ पु याज्यस्य (तु सांयाज्ये); **नास्मृ.** ६।११; **अभा.**८५ वृतेषु (वृतऋ); **व्यक.**१४२ त्विक्षु (त्विजि) उत्तरार्धे (यादृच्छिके तु सयोज्ये त्यक्ते नास्त्येव किल्बिषम्); **विर.**१२२ उत्तरार्धं व्यकवत्; **विचि.**५२ ष्वेष (स्वयं) उत्तरार्धे (यादृच्छिके तु सयोज्ये त्यागे नास्त्येव किल्बिषम्); **समु.**९२ च (तु) याज्य ... स्ति (सयोज्ये त्यागे नास्त्येव).

(२) **नासं.**४।१२ दितम् (पगम्) द्राज्ञो (द्राक्षां) कीर्ति (कल्पि); **नास्मृ.**६।१२; **अभा.**८५ दितम् (पगम्); **अप.** २।२६२ दितम् (चितम्) तिष्ठेरेद्राज्ञो (भिचरेद्राक्षां) बृह-स्पतिः; **विर.**२९७ तिष्ठेरेद्राज्ञो (भिचरेद्राक्षां).

(१) अथ शौल्किकभेदो भवति शुल्कस्थानमिति। यच्छुल्क नाम एष राज्ञो बलिः प्रवर्तितभागः, त व्यतिक्रम्य वणिङ्न व्यतिहरेत्। अभा.८५

(२) शुल्कस्थान प्राप्तो वणिक् यथाप्राप्त शुल्क दद्यात्, न शुल्क व्यतिहरेत्, व्यतिहरण अदानं, दद्यादेव, यतो राज्ञां भाग एष प्रकल्पितः। 'प्रवर्तित' इत्यन्यः पाठः। नाभा.४।१२

शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी।
मिथ्योक्त्वा च परीमाणं दाप्योऽष्टगुणमत्ययम्॥

अत्राष्टगुणशुल्कविनयस्य स्थानत्रयमुद्दिष्टम्। एक शुल्कस्थान परिहृत्यादत्तशुल्कस्यैव वणिजो गच्छतः। द्वितीयमदत्तशुल्कभाण्डस्य अकाले क्रयविक्रये कुर्वतः। तृतीय भाण्डपरिमाणं मिथ्या जनस्य कथयतः। एतेष्वपराधेषु पतितो वणिक् शुल्काष्टगुणमत्ययं दण्ड दद्यादिति। अभा.८५

राजशुल्कदानस्य श्रोत्रियरङ्गोपजीव्यादिषु विशेषः

सदा श्रोत्रियवर्ज्याणि शुल्कान्याहुः प्रजानता।
गृहोपयोगि यच्चैषां न तु वाणिज्यकर्मणि॥

अत्र श्रोत्रियशब्देन ब्राह्मणः परिगृहीतः। ब्राह्मणस्य यत्किमपि गृहोपयोगि द्रव्य भवति तद्राजे राज्ञा शुल्कम्। अथ सोऽपि वाणिज्य कुर्वन् किंचिन्नयत्यानयति वा ततः शुल्क ददाति। अभा.८५

प्रतिग्रहो द्विजातीनां धनं रङ्गोपजीविनाम्।
स्कन्धवाह्यं च यद् द्रव्यं न तद्युक्तं प्रदापयेत्॥

ब्राह्मणस्य प्रभूतमपि यत् प्रतिग्रहधनं, तथा रङ्गो पजीविनामपि नटगायनादीनाम्। तथा च सर्वजनसामा न्यमपि स्कन्धवाह्य यत्किमपि वाहनारूढमेतत्त्रिविधमपि द्रव्यं राजा शुल्कं न दापयेत्।

इति संभूयसमुत्थाने शौल्किकभेदस्तृतीयः। समाप्त चैतत्संभूयसमुत्थानं तृतीयं व्यवहारपदम्।

अभा.८६

(१) **नासं.**४।१३; **नास्मृ.**६।१३; **अभा.**८५; **अप.** २।२६२ मिथ्यो ... माण (मिथ्यावादी च सस्थाने); **विर.**२९७ मिथ्यो... ... माण (मिथ्यावादी च सस्थाने); **दवि.**९३ अपवत्.

(२) **नास्मृ** ६।१४; **अभा.**८५.

(३) **नास्मृ.**६।१५; **अभा.**८६.

बृहस्पतिः

सभूयकर्माधिकारिणः तदनधिकारिणश्च

कुलीनदक्षानलसैः प्राज्ञैर्नाणकवेदिभिः।
आयव्ययज्ञैः शुचिभिः शूरैः कुर्यात्सह क्रियाम्॥

(१) सह क्रियां वाणिज्यकृषिशिल्पक्रतुसंगीतस्तैन्या त्मिकामित्यर्थः। तत्र वाणिज्यक्रिया नाणकवेदिभिराय व्ययज्ञैः संभूय कार्या। कृषिक्रिया तु आयव्ययज्ञैः। शिल्पक्रिया संगीतक्रिया च प्राज्ञैः। क्रतुक्रिया कुलीनैः प्राज्ञैः शुचिभिः। स्तैन्यक्रिया शूरैर्वाणिज्यादिषड्विध क्रियादक्षैः अनलसैश्चेत्यवगन्तव्यम्। दक्षानलसग्रहण भाग्याधिकव्याध्यपीडिताना प्रदर्शनार्थं, नाणकवेदिग्रहणं चाढ्यानाम्। *स्मृच.१८४

(२) सैन्यक्रियाया शूरत्वमात्रम्। दक्षत्वाऽनलसत्वे तु सर्वत्रोपयुज्येते। +पमा.३०२

(३) नाणकस्तत्तद्देशीयविभिन्नमुद्राङ्किता दीनारादयः। सवि.२७१

अशक्तालसरोगार्तमन्दभाग्यनिराश्रयैः।
वाणिज्याद्याः सहैतैस्तु न कर्तव्या बुधैः क्रियाः॥

आश्रयो मूलधनम्। अप.२।२५९

लाभव्यययोराधारः स्वाशप्रक्षेपः

प्रयोगं कुर्वते ये तु हेमधान्यरसादिना।
समन्यूनाधिकैरंशैर्लाभस्तेषां तथाविधः॥

* व्यप्र., व्यउ. स्मृचवत् पमावच्च। + शेष स्मृचवत्।

(१) **अप.**२।२५९ याम्(याः); **व्यक.**१३८,**स्मृच.**१८४; **विर.**१११ अपवत्; **पमा.**३०२; **नृप्र.**२४; **सवि.**२७१ नाणं (भाण्ड) कुर्यात् (कार्या) याम् (या) नारदः, श्लोकार्धौ व्यत्यासेन पठितौ, **व्यप्र.**२९८; **व्यउ.**८२; **सेतु.**१४० नाणक (लाभादि) कुर्यात् (कार्या) याम् (या), **समु.**९०.

(२) **अप.**२।२५९; **व्यक.**१३८; **स्मृच.**१८४; **विर.** १११ अपवत्; **पमा.**३०३ श (स); **नृप्र.**२४; **व्यप्र.** २९८ श (स) य (या) यैः (याः); **व्यउ.**८२ यैः (याः); **समु.**९०.

(३) **अप.**२।२५९ कात्यायनः; **व्यक.**१४२ दिना (दिकम्), **स्मृच.**१८४; **विर.**१२३, **पमा.**३०३; **नृप्र.**२४, **व्यप्र.**२९८ तथा (यथा); **व्यउ.**८२; **सेतु.**१४४; **समु.**९०.

समो न्यूनोऽधिको वांऽशो येन क्षिप्रस्तथैव सः ।
व्ययं दद्यात्कर्म कुर्याल्लाभं गृह्णीत चैव हि ॥

बहुसमनपुरुषकृतिः सर्वकृतिमन्तव्या

बहूनां संमतो यस्तु दद्यादेको धनं नरः ।
करणं कारयेद्वाऽपि सर्वैरेव कृतं भवेत् ॥

करणं लेख्यादिकम् । स्मृच.१८५

सभूयकर्मणि विवादविधिः

परीक्षकाः साक्षिणश्च त एवोक्ताः परस्परम् ।
संदिग्धेऽर्थे वञ्चनायां न चेद्विद्वेषसंयुताः ॥

त एव सभूयसमुत्थायिन एव । विर.११३

यः कश्चिद्वञ्चकस्तेषां विज्ञातः क्रयविक्रये ।
शपथैः स विशोध्यः स्यात्सर्ववादेष्वयं विधिः ॥

(१) विशोध्यः सभ्यैरिति शेषः । सर्ववादेऽपि वञ्च नेतरविवादेऽपीत्यर्थः । स्मृच.१८५

(२) शपथैरिति प्रमाणमात्रोपलक्षणम् । प्रमाणान्तरस्यापि सभवात् । विर.११३

---

(१) अप.२।२५९(=)व्ययं (दाय); व्यक.१३८, स्मृच.१८५ हि (ह); विर.११२, पमा.३०३ न्यूनो (न्यूना); नृप्र.२४ मो (मौ) नो (ना) को (कौ) सः (च); व्यप्र.२९८; व्यउ.८२ लीत चैव (ञ्चात्तथैव); विता.५८२; समु.९०.

(२) अप.२।२५९ करण (ऋण च) कात्यायन°, व्यक.१४२; स्मृच.१८५ नरः (रहः); विर.१२३; पमा.३०६, सवि.२७२ द्वापि (द्भावे) व्यासः; व्यप्र.२९९ वैरे (वेर्ण); व्यउ.८२ व्यप्रवत्; व्यम.८८; विता.५८४, सेतु.१४४, समु.९० स्मृचवत्.

(३) अप.२।२५९ वञ्चनाया (ऽवञ्चनीया), व्यक.१३८ त ए (तथै); विर.११३, पमा.३०५ यां (र्थां); नृप्र.२४ र्थे (र्था); सवि २७२ र्थे (र्था) व्यासः; व्यप्र.२९९, व्यउ.८३; व्यम ८८, विता.५८४; समु.९० न (नो).

(४) अप.२।२५९; व्यक.१३८-१३९; स्मृच.१८५ स वि (सवि) ष्व (ऽप्य); विर.११३; पमा.३०५; विचि.४६; स्मृचि.१८ स वि (सवि), नृप्र.२४; सवि.२७२ ष्व (ऽप्य) व्यासः : ३१८; चन्द्र.३७; व्यप्र.२९९ स वि (सोऽपि) ष्व (ऽप्य); व्यउ ८३ स वि (सोऽपि); व्यम.८८ व्यउवत्; विता.५८४; सेतु.१४१; समु.९०.

दैवराजकृते क्षयहानी चेत्सर्वेषामेव

क्षयो हानिर्यदा तत्र दैवराजकृताद्भवेत् ।
सर्वेषामेव सा प्रोक्ता कल्पनीया यथांशतः ॥

(१) संभूयकारिभिः सर्वैरिति शेषः । क्षयायैव हानिः उपचयार्थव्यतिरिक्ता हानिरिति यावत् । दैवराजग्रहण प्रातिस्विकदोषेतरनिमित्तोपलक्षणार्थम् । ×स्मृच.१८५

(२) क्षयो मूलहानिः, हानिर्लाभहानिः । विर.११३

अन्यतमेन अविहितनिषिद्धकरणे प्रमादनाशने व्यसनाद्रक्षणे च

विधिः

अनिर्दिष्टो वार्यमाणः प्रमादाद्यस्तु नाशयेत् ।
तेनैव तद्भवेद्देयं सर्वेषां समवायिनाम् ॥

(१) अनिर्दिष्टः समवाय्यननुज्ञातः स्वबुद्ध्यैव कुर्वन् समवायिद्रव्यं यो नाशयेत् निवार्यमाणो वा समवायिभिरित्याद्यपादार्थः । प्रमादः प्रज्ञाहीनता । सा प्रातिस्विकदोषोपलक्षणार्थतयाऽत्रोक्ता । तेन कामक्रोधलोभाद्यपि समुत्थाननाशनिमित्तभूत सर्वमेवात्रोक्तमिति मन्तव्यम् । यस्त्वित्यादिवचनशेष सुगमम् । स्मृच.१८५

(२) अनिर्दिष्टोऽप्यवार्यमाणः सन् प्रमादनष्ट न दाप्यः वार्यमाण इति वचनादेव । चन्द्र.३७

दैवराजभयाद्यस्तु स्वशक्त्या परिपालयेत् ।
तस्यांशं दशमं दत्त्वा गृह्णीयुस्तेऽशतोऽपरम् ॥

× पमा., व्यप्र. स्मृचवत् ।

(१) व्यक.१३९ द्भ (भ); स्मृच.१८५ यो (य) द्भ (म); विर.११३; पमा.३०५ यो (य); विचि.४५; स्मृचि.१७ याज्ञवल्क्यः; नृप्र.२६ यो (य); सवि.२७२ क्षयो (क्रिया) द्भ (म) नारदः, व्यप्र.३०० क्षयो (द्रव्य), व्यउ.८२ द्भ (भ) तः (का); विता.५८९ दै (दे) शेष स्मृचवत्; सेतु.१४१ दै (दे); समु.९१ स्मृचवत्; विव्य.३४ व्यकवत्.

(२) अप.२।२६०; व्यक.१३९; स्मृच.१८५; विर.११३; पमा.३०५; विचि.४५; नृप्र.२८ वस्तु (वदि); सवि.२७२ उत्तरार्धे (तस्यार्श यदमन्त्रत्वात् गृह्णीयुस्ते ततोऽपरम्) नारदः; चन्द्र.३७, व्यप्र.३००, व्यउ.८३ (अ०) णः+(च) वार्य (धार्य); सेतु.१४१; समु.९१; विव्य.३४.

(३) अप.२।२६०; व्यक.१३९; स्मृच.१८५ तोऽपरम् (तः परे); विर.११४ दैवराज (राजदैव); पमा.३०६ स्तेऽशतो (स्ते ततः); विचि.४५; नृप्र.२६ दै (दे) स्तेऽशतो परं (स्ते परस्परं); सवि.२७२ त्वा (ञ्चात) स्तेंश (स्ते त) नारद ;

तस्य तस्मै दशममंश दद्युः । ते तत्समवायिनः पालयेत् । समवायिद्रव्यमिति शेषः । स्मृच.१८५

अन्यतमे मृते तद्द्रव्याधिकारनिरूपणम्

यदा तत्र वणिक्कश्चित्प्रमीयेत प्रमादतः ।
तस्य भाण्डं दर्शनीयं नियुक्तै राजपूरुषैः ॥
यदा कश्चित्समागच्छेत्तस्य ऋक्थहरो नरः ।
स्वाम्यं विभावयेदन्यैः स तदा लब्धुमर्हति ॥

(१) आम्या दायाधिकारः प्रतिपादितः । विर.११६

(२) दर्शनीय राज्ञे इति शेषः । विचि.४७

एवं क्रियाप्रवृत्तानां यदा कश्चिद्विपद्यते ।
तद्वन्धुना क्रिया कार्या सर्वैर्वा सहकारिभिः ॥

(१) क्रिया आर्त्विज्यादिका । विर.११७

(२) तदवान्तरसंगतिरहितर्त्विक्कर्तृकदर्शपौर्णमासादियागविषयमित्यभिहित स्मृतिचन्द्रिकायाम् । व्यप्र.३०३

कृषिकर्त्रैविध्यम्

आगन्तुकाः क्रमायातास्तथा चैव स्वयंकृताः ।
त्रिविधास्ते समाख्याता वर्त्तितव्यं तथैव तैः ॥

अन्यतमे मृते तद्गृहावाकरणविधिः । शेषद्रव्यव्यवस्था च ।

ज्ञातिसंबन्धिसुहृद्भामृणं देयं सबन्धकम् ।
अन्येषां लग्नकोपेतं लेख्यसाक्षियुतं तथा ॥
स्वेच्छादेयं हिरण्यं तु रसधान्यं तु सावधि ।
देशस्थित्या प्रदातव्यं ग्रहीतव्यं तथैव तत् ॥

हिरण्यदाने अवधौ स्वेच्छा, रसादौ त्ववधेरावश्यकत्वम् । विर.१२३

समवेतैस्तु यद्दत्तं प्रार्थनीयं तथैव तत् ।
न याचते च यः कश्चिल्लाभात्स परिहीयते ॥

अधमर्णादिभ्यो दत्ते यस्तु प्रतियाचनादिना समवायिद्रव्यं समवायिभिः सह न साधयति तस्य लाभहानिरित्याह बृहस्पतिः—समवेतैरित्यति । याचनग्रहणमशानुसारेण करणीयकर्मणः प्रदर्शनार्थम् । तेन कर्मान्तराकरणेऽप्यकरणानुसारेण लाभहानिरित्यस्मादेव वचनात्प्रतिपत्तव्यम् । स्मृच.१८६

कर्षकादीना समूयकर्मविधिः

प्रयोगः पूर्वमाख्यातः समासेनोदितोऽधुना ।
श्रूयतां कर्षकादीनां विधानमिदमुच्यते ॥
वाह्यकर्षकवीजाद्यैः क्षेत्रोपकरणेन च ।
ये समानास्तु तैः सार्धं कृषिः कार्या विजानता ॥

(१) वाह्याः लाङ्गलादिवाहका बलीवर्दाः । कर्षकाः कृष्यर्थं स्वीकृताः पुरुषाः । आद्यशब्देन कृष्यर्थस्य धनस्य ग्रहणम् । स्मृच.१८६

(२) वाहकः बलीवर्दादिः । पमा.३०९

पर्वते नगराभ्याशे तथा राजपथस्य च ।
ऊषरं मूषकव्याप्तं क्षेत्रं यत्नेन वर्जयेत् ॥

चन्द्र.३७ स्तेऽ(स्त्व)शेषं विरवत्; व्यप्र.३००; व्यउ.८३, सेतु १४१, समु ९१ स्मृचवत्; विव्य.३५ भया (कृता).

(१) व्यक.१३९, विर.११६; विचि.४७; स्मृचि.१८ यदा (तदा) क्ति (क्त), सेतु.१४२.

(२) व्यक.१३९ त्तस्य (त्तत्र) स्वाम्यं (श्राव्यं); विर.११६, विचि ४७ त्तस्य (त्तदा), स्मृचि.१८ त्तस्य (त्तत्र), सेतु. १४३ स्मृचिवत्.

(३) अप.२।२६४ वं (क); व्यक.१४०; स्मृच.१८८; विर.११७ दा (दि); विचि.४८; सवि.२७५ विरवत्; चन्द्र.३८ अपवत्; व्यप्र.३०३, विता.५९३ व (क) दा (दि) कारि (वाप्ति), सेतु.१४४ विरवत्; समु.९२.

(४) व्यक.१४१, विर.१२०.

(५) अप.२।२५९ कात्यायनः; व्यक.१४२; विर.१२३; सेतु.१४४.

(६) अप.२।२५९ सधान्यं तु (सा धान्य च) कात्यायनः; व्यक १४२ ण्य तु (ण्यर्ण), विर १२३, विचि.५२ उत्त.; सेतु.१६ ण्य तु (ण्याद्य) . १४४ ण्य तु (ण्यर्ण).

(१) अप.२।२५९ न याचते च (न च याचेत) कात्यायनः; व्यक.१४२ उत्त ; स्मृच.१८६; विर.१२३; पमा.३०६; विचि.५२; सवि.२७२, वीमि.२।२५९ ते च (तेऽत्र); व्यप्र.३००, व्यउ.८३, विता.५८९ च यः (तु यः); सेतु.१६,१४४; समु.९१.

(२) अप.२।२६५; व्यक.१४३; विर.१२३; विचि. ५२ विधानमि (विवादप); स्मृचि.१८ उत्त.; सेतु.१४४; समु.९२ उत्त

(३) अप.२।२६५ त्रो (त्रा); व्यक.१४३; स्मृच.१८६; विर.१२३, पमा.३०९ कर्ष (वाह) माना (माः स्यु); विचि.५२; स्मृचि.१८; नृप्र.२६ ये समानास्तु (ये वै समाः स्युः); व्यप्र.३०३; व्यउ.८३; विता ५९४; सेतु. १४४-१४५ ह्य (द्यैः); समु.९२.

(४) व्यक.१४३ पर्वते नगरा (विवीते च गवा); स्मृच.

(१) विवीतशब्देन यवसाद्यर्थं रक्षितो भूभाग उच्यते। व्यक.१४३

(२) पर्वते पर्वतान्ते । नगराभ्याशे नगरसमीपे । राजपथस्य समीप इति शेषः । एतदुक्तं भवति । पर्वताद्यासन्नमनासन्नमपि ऊषरं मूषिकाव्याप्तं च क्षेत्रं वर्जयेदिति । लाभविभागादिकं यत्संभूय वाणिज्यकृष्यादिकर्मकारिणामसाधारणं पूर्वस्मिन्प्रकरणे दर्शितं तदत्राप्यनुसंधेयम् । स्मृच.१८६

[1]गर्तानूपं सुसेकं च समन्तात्क्षेत्रसंयुतम् ।
प्रकृष्टं च कृतं काले वापयन्फलमश्नुते ॥

प्रकृष्टं प्रकर्षेण कृष्टम् । काले माघादौ । व्यक.१४३

[2]कृशातिवृद्धं क्षुद्रं च रोगिणं प्रपलायिनम् ।
काणं खञ्जं च नादद्याद्वाह्यं प्राज्ञः कृषीवलः ॥

काण एकाक्षः । खञ्जः हीनचरणः । स्मृच.१८६

[3]वाह्यबीजात्ययाद्यस्य क्षेत्रहानिः प्रजायते ।
तेनैव सा प्रदातव्या सर्वेषां कृषिजीविनाम् ॥
[4]एष धर्मः समाख्यातः कीनाशानां पुरातनः ॥

(१) कीनाशाः कृषीवलाः । अप.२।२६५

(२) सभूयकारिणामिति शेषः। वाह्यबीजग्रहणं कृषिसाधनानामुपलक्षणार्थमिति मन्तव्यम् । स्मृच.१८६

शिल्पिनां नटानां च संभूयकर्मणि लाभतारतम्यम्

[5]हिरण्यकुप्यसूत्राणां काष्ठपाषाणचर्मणाम् ।
संस्कर्ता तु कलाभिज्ञः शिल्पी प्रोक्तो मनीषिभिः ॥

कुप्यं हेमरूप्यव्यतिरिक्तं त्रपुसीसादिकम् । हेमरूप्ये प्रस्तुत्य 'ताभ्यां यदन्यत्तत्कुप्यम्' इत्यमरसिंहेनोक्तेः । स्मृच.१८६

[6]हेमकारादयो यत्र शिल्पं संभूय कुर्वते ।
कर्मानुरूपं निर्वेशं लभेरंस्ते यथांशतः ॥

निर्वेशो भृतिः । व्यक.१४३

[7]हर्म्यं देवगृहं वाऽपि चार्मिकोपस्कराणि च ।
संभूय कुर्वतां चैषां प्रमुखो ह्यंशमर्हति ॥

अवच्चकत्वेन कर्मकरणादिधर्मजातं यत्पूर्वतरप्रकरणे दर्शितं तदत्राप्यनुसंधेयम् । स्मृच.१८७

[8]नर्तकानामेष एव धर्मः सङ्घिरुदाहृतः ।
तालज्ञो लभतेऽध्यर्धं गायनास्तु समांशिनः ॥

---

१८६ शे (से) षक (षिका); **विर.**१२३-१२४ पर्व (विर्वा)शे(से), **पमा.**३०९ मूष (मुषि), **नृप्र.**६२ स्मृचवत्, **व्यप्र** ३०३, **व्यउ.८२; विता.५९४, समु.९२** ष (षि).

(१) **व्यक.१४३; विर.१२४, समु.९२** र्तां (र्मां) यु (मि) प्र (सु).

(२) **व्यक.१४३** क्षुद्र (बाल), **स्मृच.१८६; विर.१२४, पमा.३१०** च ना (विना); **व्यप्र.३०४, विता.५९४, समु ९२.** (३) **अप.२।२६५** स्य (त्र); **व्यक.१४३, स्मृच १८६, विर.१२४, पमा.३१०, विचि.५३; स्मृचि.१८, सवि २७३** हारीतः; **चन्द्र** ३९ त्यथाच (दिना य), **वीमि.२।२६५** त्यथा (त्परा) कृषिजीविनाम् (क्षेत्रकारिणाम्); **व्यप्र.३०४; व्यउ. ८३; विता.५९४; सेतु.१७** नाम् (ना) . १४५; **समु.९२.**

(४) **अप.२।२६५; व्यक.१४३; विर.१२४, सेतु १४५; समु.९३.**

(५) **अप.२।२६५** प्रो (चो); **व्यक १४३** कु (रू) प्रो (चो); **स्मृच.१८६** तु (च), **विर.१२४** फला (फली) शेष व्यकवत्; **पमा ३११, विचि ५३** प्रो (चो), **स्मृचि.१८** तु (तत्) प्रो (चो), **नृप्र.२६, व्यप्र.३०४** तु (तत), **व्यउ ८३** व्यप्रवत्, **विता.५९४** व्यप्रवत्, **सेतु १४५** प्रो (चो); **समु.९३** तु (च)

(१) **अप २।२६५, व्यक.१४३, स्मृच.१८७; विर. १२४** यत्र (ये तु), **पमा.३१०, विचि.५३; स्मृचि.१८** वेंश (र्घोष), **नृप्र २६** ररते (युरते), **सवि.२७३** रूपं (रूप) स्ते (स्तु), **चन्द्र.३९, वीमि.२।२६५** नृपवत्; **व्यप्र.३०४; व्यउ.८३, विता ५९४, सेतु.१४५, समु ९३.**

(२) **अप.२।२६५** चा (धा), **व्यक.१४३** चा (धा) प्रमुखो (प्रामुख्यात्), **स्मृच १८७** खो (ख्यो), **विर.१२५** ऽपि (पी), **पमा ३१०** चार्मिकोपस्कराणि च (धार्मिको यत् पुराणि च) चैं (ते), **विचि ५३** अंश (ऽर्द्धांश), **नृप्र.२६** चैं (ते) खो (ख्यो); **सवि २७३** ऽपि (पी) णि (दि) ध्य (ह्यं), **व्यप्र. ३०४** चार्मि (वाहि) चैं (ते) खो (ख्यो); **व्यउ ८३-८४** चैं ते) खो (ख्यो), **व्यम.८८** चा (धा) चैं (ते); **विता.५९६** च (वा) शेषं व्यमवत्; **सेतु.१४५** ह (ध) खो (ख्यो); **समु ९३.**

(३) **अप.२।२६५, व्यक.१४३, स्मृच.१८८, विर. १२५, पमा ३१२** ध्य (ह्य) कात्यायनः; **विचि.५३** एव धर्मो) मं स (र्मवि), **स्मृचि.१८** पमावत्, कात्यायनः, **सवि. २७६** नास्तु (काना) नः (नाम्); **चन्द्र.३९; वीमि. २।२६५** विचिवत्, **व्यप्र.३०४, व्यउ.८३; व्यम.८८** र्घं (र्द्धो); **विता.५९६; सेतु १४५** विचिवत्; **समु.९३.**

एष धर्मः शिल्पिमुख्योक्तो धर्मः । तेनायमर्थः । प्रमुखो द्व्यशमर्हतीति । योऽत्र संभूय हर्म्यादिक कुर्वतां शिल्पिना मुख्यस्योक्तः स एव धर्मो द्व्यंशभागित्वरूपो नर्तकादीना सभूय नृत्तादिक कुर्वता मुख्यस्य सद्भिरुदाहृत इति । अध्यर्धमर्धादिक भाग तालज्ञो लभते ।

स्मृच.१८८-१८९

चौराणा सभूयकर्मणि लाभतारतम्यम्

स्वाम्याज्ञया तु यच्चौरैः परदेशात्समाहृतम् ।
राज्ञे दत्वा तु षड्भागं भजेयुस्ते यथांशतः ॥

परदेशाद्वैरिदेशादित्यर्थः । प्रबलतरवैरिदेशादाहृतविषयमेतत् । स्मृच.१८९

[1]चतुरोंशान् भजेत् मुख्यः शूरस्त्र्यंशमवाप्नुयात् ।
समर्थस्तु हरेत् द्व्यंशं शेषास्त्वन्ये समांशिनः ॥

मुख्यो बुद्धिशरीरव्यापारवान् । शूरः साहसिकः । समर्थः अन्यापेक्षया व्यापारवान् । विर.१२५

कात्यायनः

अविभक्तशिल्पिवणिजा विभागे समभाग

[2]समवेतास्तु ये केचिच्छिल्पिनो वणिजोऽपि वा ।
अविभज्य पृथग्भूतैः प्राप्तं तत्र फलं समम् ॥

अयमर्थः—पित्रादिधनमविभज्य भ्रातृभिर्यत्फलमविभक्तैः प्राप्तं तत्सम विभजनीय न विषममिति ।

अप.२।२५९

आपदि समुदितद्रव्यरक्षणे दशमांशदानम्

[3]चौरतः सलिलादग्नेर्द्रव्यं यस्तु समाहरेत् ।
तस्यांशो दशमो देयः सर्वद्रव्येष्वयं विधिः ॥

(१) समाहरेत्स्वशक्त्या प्रत्याहरेदित्यर्थः । असमग्रद्रव्यपालनेऽप्ययं विधिर्ज्ञेय इत्यन्त्यपादार्थः ।

स्मृच.१८६

(२) समाहरेत् रक्षेत् । सर्वद्रव्येष्वनेकस्वाभिकेष्वित्येके तत्र प्रकरणविरोधात्, नारदवाक्येन सहैकार्थता मन्यमानाभ्या कामधेनुहलायुधाभ्यामलिखनाच्च ।

विर.११४

शिल्पिना लाभतारतम्यम्

[4]शिक्षकाभिज्ञकुशला आचार्याश्चेति शिल्पिनः ।
एकद्वित्रिचतुर्भागान् हरेयुस्ते यथोत्तरम् ॥

अत्र शिक्षकाभिज्ञकुशलाचार्याश्चत्वारो यथोत्तरं घटनाज्ञानोत्कर्षेण भिद्यन्ते । विर.१२५

चौराणा सभूय कर्मणि लाभतारतम्यम्

[5]परराष्ट्राद्धनं यत्स्याच्चौरैः स्वाम्याज्ञया हृतम् ।
राज्ञे दशांशमुद्धृत्य विभजेरन् यथाविधि ॥

(१) **व्यक.**१३९, **स्मृच.**१८६, **विर.**११४, **पमा.** ३०५; **विचि.**४६, **स्मृचि.**१७ द्रव्ये (शाले); **नृप्र.**२६ चौ (चो), **सवि.**२७३, **व्यप्र** ३००, **व्यउ** ८३; **सेतु.** १४२; **समु** ९१.

(२) **अप.**२।२६५ र्या (र्यं), **व्यक.** १४३ अपवत्; **स्मृच.**१८७, **विर.**१२४, **पमा** ३१० शिक्षकाभिज्ञ (शिल्पाकरश्च) यथोत्तरम् (यथाशत.), **विचि.**५३, **नृप्र** २६ हरेर (लभे), **दवि** ३३४ पू, **सवि.**२७३ शिक्षकाभिज्ञ (शिक्षकाबीज) र्या (र्यं); **वीमि.**२।२६५ र्या (र्यं) भागान् (र्थांशान्), **व्यप्र.**३०४; **व्यउ** ८३; **व्यम.**८८ शिक्ष (शिष्य) एक (एव); **विता.**५८५ शिक्ष (शिष्य), **सेतु** १४५ अपवत्; **समु.**९३ अपवत्.

(३) **व्यक.**१४३ यत्स्या (यस्मा) हृतम् (कृतम्) मुद्धृत्य (माहृत्य); **स्मृच.**१८९ मुद्धृत्य (मुत्सृज्य); **विर.**१२५; **पमा.** ३११ यत्स्या .म्या (यस्य चोरैश्चेद्रा), **विचि.**५४ राज्ञे (राज्ञो); **स्मृचि.**१८; **सवि.**२७६ विचिवत्; **चन्द्र.**३९ (परराष्ट्राद्धन चौरैर्यद्धत स्वाम्यनुज्ञया) मुद्धृत्य (मुत्सृज्य) यथाविधि (यथाशतः), **व्यप्र.**३०५; **व्यउ.**८३; **विता.**५९६; **सेतु.**१४६ विचिवत्; **समु.**९३ राज्ञे (राज्ञो) शेषं स्मृचवत्; **विव्य.**३५.

चौराणां मुख्यभूतस्तु चतुर्रोऽशांस्ततो हरेत् ।
शूरोंऽशांस्त्रीन् समर्थो द्वौ शेषास्त्वेकैकमेव च ॥
[२]तेषां चेत्प्रसृतानां यो ग्रहणं समवाप्नुयात् ।
तन्मोक्षणार्थं यद्दत्तं वहेयुस्ते यथांशतः ॥

अत्र राज्ञः षड्भागदशमभागौ परदेशसंनिधानासंनिधानादिना बोद्धव्यौ । तेषां च प्रसृतानामिति चोरयितुमितस्ततो गताना यः कश्चिद् ग्रहणमवरोधन प्राप्तः सन् धन दत्वा आत्मान मोक्षयति, तद्धन सर्वैरेव विभज्य शोधनीयमित्यर्थः । विर.१२६

वणिक्कर्षकशिल्पिचोराणा लाभहानिविचारः

वणिजां कर्षकाणां च चोराणां शिल्पिनां तथा ।
अनियम्यांशकर्तॄणां सर्वेषामेष निर्णयः ॥

लाभहान्योः समयेन प्रतिपुरुषमंशमनियम्य वाणिज्यादिकर्तॄणामित्यर्थः । स्मृच.१८९

(१) व्यक.१४३; स्मृच.१८९ चौ (चो); विर १२६ शेषा (शिष्टा) मेव च (मेव तु), पमा.३११ स्ततो (स्तथा), स्मृचि.१८ शेषा (शिष्टा), चन्द्र.३९ मुख्य (मुख) चतुरोऽशांस्त (चतुर्थांश त) (द्वौ०) शेषा (शिष्टा) मेव च (मेव हि), व्यप्र.३०५, व्यउ.८३; विता ५९६ शूरोऽशांस्त्रीन् (शूर शस्त्र); सेतु.१४६; समु.९३.

(२) व्यक.१४३-१४४ वहेयुस्ते यथांशतः (तस्य कार्या समा क्रिया); स्मृच.१८९; विर.१२६ चेत् (च) शेष व्यकवत्; पमा.३११ ताना (ता यो); विचि.५४ यो (तु) समवा (यः समा) शेष व्यकवत्; स्मृचि.१८ ताना +(तु) समवा (अवा) यद्दत्त वहेयुस्ते (यद्वृत्त दधुस्तेऽपि); सवि.२७६ वहेयुस्ते यथाशतः (तस्य कार्या समक्रिया); चन्द्र.४० यो (च) समवा (चेत्समा) क्षणार्थं (क्षार्थ तु) शेष व्यकवत्; व्यप्र.३०५ यो (च) समवा (समभा); व्यउ.८३ यो (च) मोक्षणार्थं (रक्षणार्थं); व्यम.८८ यो (च); विता.५९७-५९८ यो (च). सेतु.१४६ व्यकवत्; समु.९३.

(३) व्यक.१४४ निर्णयः (निश्चयः); स्मृच.१८९; विर १२६, पमा.३१२ काणा (णानां) मेष (मेव); विचि.५४ व्यकवत्; स्मृचि.१८; चन्द्र.४०, व्यप्र.३०५; व्यउ.८३ बृहस्पतिः; व्यम.८८; विता.५९८ चोराणां (पौराणां); सेतु १४६ मेष (मेव); समु.९३; विव्य.३६ नारदः.

व्यासः

संभूयकर्मस्वरूपम् । राजशुल्कदानम् ।

[३]समक्षमसमक्षं वाऽवञ्चयन्तः परस्परम् ।
नानापण्यानुसारेण प्रकुर्युः क्रयविक्रयौ ॥
[४]अगोपयन्तो भाण्डानि शुल्कं दद्युश्च तेऽध्वनि ।
अन्यथा द्विगुणं दाप्याः शुल्कस्थानाद्बहिःस्थिताः ॥

अनिर्दिष्टकर्तृकवचनम्

ऋत्विग्दक्षिणाविभागः

[५]दक्षिणानां तुरीयांशं पंचविंशतिधा कृतम् ।
विभजेन्महदादिभ्यः अर्कतुर्युगपावकाः ॥

मत्स्यपुराणम्

त्रुटेन ऋत्विजा कर्माकरणे दण्डः.

[६]निमन्त्रितो द्विजो यस्तु वर्तमानः प्रतिग्रहे ।
निष्कारणं न गच्छेत स दाप्योऽष्टशतं दमम् ॥

बौधायनकारिका

ऋत्विजा दक्षिणाविभागः

पंचविंशतिधा कृत्वा वर्गीया दक्षिणाः क्रमात् ।
द्वादशैवाथ षट्कं च चतस्रस्तिस्र एव च ॥

द्वादशाधिकगोशतरूपाया दक्षिणायाः प्रथमं चत्वारो भागाः कर्तव्याः । तत्रैको भागो होतृवर्गस्यापरो भागो ब्रह्मवर्गस्यापरोऽध्वर्युवर्गस्यापर उद्गातृवर्गस्य । पुनरेकैकस्य भागस्य पञ्चविंशतिर्भागाः कर्तव्याः । तेष्वाद्याना होत्रादीना द्वादश भागाः द्वितीयाना षट् तृतीयाना चत्वारश्चतुर्थाना त्रय इत्यर्थः । पशुबन्धादौ तु विषमविभागानभिधानात् 'सम स्यादश्रुतत्वात्' (जैसू.

(१) अप.२।२५९; व्यक.१३८; स्मृच.१८५ रेण (रात्ते); विर.११३ नानापण्या (परस्परा); पमा.३०४ स्मृचवत्, विचि.४६; स्मृचि.१७ याज्ञवल्क्यः; नृप्र.२४ स्मृचवत्, सवि.२७१ समक्षम (असमक्ष) रेण (रात्ते); व्यप्र. २९९ रेण (रात्ते); व्यउ.८२ स्मृचवत्; विता.५८३ व्यप्रवत्; सेतु.१४१; समु.९०.

(२) स्मृच.१८५; पमा.३०४; सवि.२७२ अगो (संगो), व्यप्र.२९९ शुल्कं दद्युश्च (दद्युः शुल्क च); व्यउ.८२ व्यप्रवत्; विता.५८३ व्यप्रवत्; समु.९०.

(३) विता.५९०. (४) अप.२।२६३.

(५) व्यप्र.३०२.

१०।३।१३।५३) इति न्यायेन समत्वेनैव विभाग इति मन्तव्यम् ।

शुक्रनीतिः

रक्षकाय दशमांशदान शिल्पिनर्तकगायककुचोरधनप्रयोजकवणिक्कर्षकाणां सभूयकर्मविधिः

जलतस्कररराजाग्निव्यसने समुपस्थिते ।
यस्तु स्वशक्त्या संरक्षेत्तस्यांशो दशमः स्मृतः ॥
हेमकारादयो यत्र शिल्पं संभूय कुर्वते ।
कार्यानुरूपं निर्वेशं लभेरंस्ते यथार्हतः ॥
संस्कर्ता तत्कलाभिज्ञः शिल्पी प्रोक्तो मनीषिभिः ।
हर्म्यं देवगृहं वापी वाटिकोपस्कराणि च ॥
संभूय कुर्वतां तेषां प्रमुख्यो ऽंशमर्हति ।
नर्तकानामेव धर्मः सद्भिरेष उदाहृतः ॥

(१) शुनी.४।७९५-८०४.

तालज्ञो लभतेऽर्धार्धं गायनास्तु समांशिनः ।
परराष्ट्राद्धनं यत्स्यात् चौरैः स्वाम्याज्ञया हृतम् ॥
राज्ञे षष्ठांशमुद्धृत्य विभजेरन् समांशकम् ।
तेषां चेत्प्रसृतानां च ग्रहणं समवाप्नुयात् ॥
तन्मोक्षार्थं च यद्दत्तं वहेयुस्ते समांशतः ।
प्रयोगं कुर्वते ये तु हेमधान्यरसादिना ॥
समन्यूनाधिकैरंशैर्लाभस्तेषां तथाविधः ।
समो न्यूनोऽधिको ह्यंशो योऽनुक्षिप्तो तथैव सः ॥
व्ययं दद्यात्कर्म कुर्यात् लाभं गृह्णीत चैव हि ।
वणिजानां कर्षकाणामेष एव विधिः स्मृतः ॥

ऋत्विग्याज्यौ त्यागिनौ दण्ड्यौ

ऋत्विग्याज्यमदुष्टं यस्त्यजेदनपकारिणम् ।
अदुष्टं चर्विजं याज्यो विनेयौ तावुभावपि ॥

(१) शुनी.४।८०८.

*दत्ताप्रदानिकम्

वेदाः

सर्वस्वदाननिन्दा

अमेध्यो वा एष यः सर्वं ददाति ।

भूमिदानम्

अथ योऽदक्षिणेन यज्ञेन यजेत, तं यजमानं विद्याददक्षिणेन हि वा अयꣳ यज्ञेन यजतेऽथ न वसीयान्भवतीत्युर्वरा समृद्धा देया, सैव तस्य प्रायश्चित्तिः ।

इन्द्रो मरुत्वान् प्राच्या दिशः पातु, बाहुच्युता पृथिवी द्यामिवोपरि+ ।

मरुत्वान् मरुद्भिः एकोनपञ्चाशत्संख्याकैर्देवैः सहितः इन्द्रो मा मा संस्कर्तार प्राच्या दिशः प्राचीदिक्संबन्धिभयहेतोः पातु । तत्र दृष्टान्तः । बाहुच्युता बाहुभ्यो दातृसबन्धिभ्यश्च्युता विनिर्गता । यद्वा बाहुषु प्रतिग्रहीतृसबन्धिषु च्युता प्राप्ता । उदकपूर्वं दत्तेत्यर्थः । तादृशी दातृसात्कृता पृथिवी द्यामिव यथा द्यां दिवं स्वर्गं भूदानप्राप्य उपरि आगामिनि काले दातृप्रतिग्रहीतृभ्या उपभोग्य लोक पाति तद्वत् मा पात्विति सबन्धः । 'भूमि यः प्रतिगृह्णाति यश्च भूमि प्रयच्छति । उभौ तौ पुण्यकर्माणौ नियतौ स्वर्गगामिनौ' ॥ असा.

भूमिदाननिषेध.

नै मा मर्त्यः कश्चन दातुमर्हति । विश्वकर्मन् भौवन मां दिदासिथ । निमङ्क्ष्येऽहं सलिलस्य मध्ये मोघस्त एष कश्यपायाऽऽस संगरः इति ।

भुवनाख्यस्य पुत्र हे विश्वकर्मन् कश्चिदपि मनुष्यो मा भूमि दातु नार्हति । अत एव मीमासका विचार्य सर्वस्वदाने महाभूमिदान निवारितवन्तः । एव सति त्व मा भूमि दिदासिथ कश्यपाय त्वदीयाचार्याय दातु मिच्छसि । अहं तु सलिलस्य समुद्रस्य मध्ये निमङ्क्ष्ये निमज्जनं करिष्ये । तथा सति ते कश्यपाय त्वदीयाचार्यस्य कश्यपस्यैष संगरो भूमिप्रतिग्रहविषयो मोघ आस व्यर्थ एव बभूवेति । ईदृशमपि महाभूमिमज्जनं महाभिषेकमहिम्ना निवारितमिति तात्पर्यार्थः ।

ऐब्रासा.

दक्षिणासु पुत्रदानम्

उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ । तस्य ह नचिकेता नाम पुत्र आस । तꣳ ह कुमारꣳ सन्तं दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश । स होवाच । तत कस्मै मां दास्यसीति द्वितीयं तृतीयम् । तꣳ ह परीत उवाच । मृत्यवे त्वा ददामीति । तꣳ ह स्मोत्थितं वागभिवदति गौतमकुमारमिति । स होवाच परेहि मृत्योर्गृहान् । मृत्यवे त्वाऽदामिति ।

सर्वस्वदाननिन्दा

रिरिचान इव वा एतस्य आत्मा भवति यः सर्वं ददाति ।

अश्वमेधे दारदानम्

उदधसानीयायाꣳ संस्थितायाम् । चतस्रश्च जायाः कुमारीं पञ्चमीं चत्वारि च शतान्यनुचरीणां यथा समुदितं दक्षिणां ददति ।

---

* दासदासीदान अभ्युपेत्याशुश्रूषाप्रकरणे पुत्रकन्यादान च दायभागप्रकरणे द्रष्टव्यम् ।

+ 'बाहुच्युता पृथिवी द्यामिवोपरि' इत्यय पादः अथर्ववेदे १८।३।३ सूक्ते दशवार (२५-२८,२९-३५) पठितः, विस्तरभयादत्रैकवारमेव सगृहीतः ।

(१) मैसं.२।१।३. (२) मैसं.१।४।१३.

(३) असं.१८।३।३।२५.

(४) ऐब्रा.३९।२१; शाश्रौ.१६।१६।३ निमङ्क्ष्ये (उपमङ्क्ष्ये) मोघस्त एष कश्यपायाऽऽस सगर (मृषवै ते सगरः कश्यपाय).

(१) तैब्रा.३।११।८; कउ १।१ आदितो ददामीत्यन्तम् । 'परीत' इति पद नास्ति ।

(२) शाब्रा.२५।१५. (३) शब्रा १३।५।४।२७.

अश्वमेधे भूमिपुरुषब्राह्मणस्वदानविचारः

अथातो दक्षिणानाम् । मध्यं प्रति राष्ट्रस्य यदन्यद्भूमेश्च पुरुषेभ्यश्च ब्राह्मणस्य च वित्तात्, प्राची दिग्घोतुर्दक्षिणा ब्रह्मणः प्रतीच्यध्वर्योरुदीच्युद्गातुस्तदेव होतृका अन्वाभक्ताः *।

पुरुषमेधे भूमिपुरुषब्रह्मस्वदानविचारः

अथातो दक्षिणानाम् । मध्यं प्रति राष्ट्रस्य यदन्यद्भूमेश्च ब्राह्मणस्य च वित्तात्सपुरुषं प्राची दिग्घोतुर्दक्षिणा ब्रह्मणः प्रतीच्युद्गातुस्तदेव होतृका अन्वाभक्ताः ।

अथ ब्राह्मणो यजेत । सर्ववेदसं दद्यात्सर्वं वै ब्राह्मणः सर्वꣳ सर्ववेदसꣳ सर्वं पुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुध्यै ।

विश्वजिति भूमिपुरुषब्रह्मस्वदानविचारः

अथातो दक्षिणानाम् । मध्यं प्रति राष्ट्रस्य यदन्यद्ब्राह्मणस्य वित्तात्सभूमि सपुरुषं, प्राची दिग्घोतुर्दक्षिणा ब्रह्मणः प्रतीच्यध्वर्योरुदीच्युद्गातुस्तदेव होतृका अन्वाभक्ताः ।

भूमिदाननिषेधः

तꣳ ह कश्यपो याजयांचकार । तदपि भूमिः श्लोकं जगौ, न मा मर्त्यः कश्चन दातुमर्हति विश्वकर्मन् भौवन मन्द आसिथ । उपमङ्क्ष्यति स्या सलिलस्य मध्ये मूषैप ते संगरः कश्यपायेति ।

पुरुषदानम्

वरुणस्त्वा नयतु देवि दक्षिणे प्रजापतये पुरुषम् ।

सर्वस्वदाननिन्दा

प्राणैर्वा एष व्यृध्यत इत्याहुर्यः सर्वं ददाति । दुष्कृं वा एष करोति यः सर्वं ददाति । पशुभिर्वा एष व्यृध्यत इत्याहुर्यः सर्वं ददाति ।

* एतद्वचनसगत कात्यायनश्रौतसूत्रे वचनद्वयम्-तृतीय तृतीय मन्वहं ददाति भूमिपुरुषब्राह्मणस्ववर्जम् । (का श्रौ.२०।१०९) ज्येष्ठपुत्रमपभज्य भूमिशूद्रवर्जम् (का श्रौ.२२।१०) अत्र कर्कः— ब्राह्मणस्व यदुण्डादुत्पन्न तन्न देय तस्य ब्राह्मणेष्वेव विनियोगः ।

(१) शाम्रा.१३।५।४।२४.
(२) शाम्रा.१३।६।२।१८-१९. (३) शाम्रा.१३।७।१।१३.
(४) शाम्रा.१३।७।१।१५. (५) ताम्रा.१।८.
(६) ताम्रा.१६।५. (७) ताम्रा.१६।६.

पृथिवीदानस्तुतिः

त्रीण्याहुरतिदानानि गावः पृथिवी सरस्वती । नरकादुद्धरन्त्येते जपवापनदोहनात् ॥

दानप्रकाराः

श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् ।

स्त्रीपुरुषाणां देयादेयत्वविचारः

स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते न पुंसः । पुंसोऽपीत्येके शौनःशेपे दर्शनात् *।

जैमिनीयसूत्रम्

विश्वजिति पित्रादीनामदेयत्वाधिकरणम्

स्वदाने सर्वमविशेषात् ।

इदमामनन्ति विश्वजिति 'सर्वस्व ददाति' इति । तत्र संदेहः—कि यावत् किञ्चित् स्वशब्देन उच्यते, यथा माता पिता—इत्येवमाद्यपि सर्व देयं, उत यत्र प्रभुत्वयोगेन स्वशब्दस्तदेव देयम् ? इति । किं प्राप्तम् ? 'अविशेषात्' माता पिता—इत्येवमाद्यपि दातव्यम् । 'ननु दान-इत्युच्यते स्वत्वनिवृत्तिः, परस्वत्वापादन च, तत्र पित्रादीना अशक्य स्वत्वं निवर्तयितु, न हि कथञ्चित् पिता न पिता भवति' । उच्यते, सत्य न असौ न पिता भवति, शक्यते तु परविधेयः कर्तु, परस्वत्वापादन च दानं अर्थाच्च स्वत्वत्यागः । तस्मात् सर्व देय इति । शाभा.

यस्य वा प्रभुः स्यादितरस्याशक्यत्वात् ।

वा शब्देन पक्षो विपरिवर्तते । 'यस्य' प्रभुत्वयोगेन स्वत्व, तदेव देय न इतरत् । कस्मात् ? प्रभुत्वयोगिनः शक्यत्वात्, 'इतरस्य' च 'अशक्यत्वात्' न हि पित्रादीना शक्यते स्वत्व परित्यक्तुम् । 'ननु च उक्त परविधेयीकरणं तस्य शक्यम्' इति । उच्यते, प्रभुत्वयोगिनः स्वस्य अत्र दीयमानस्य सर्वस्व, उच्यते, न अप्रभुत्वयोगिनः स्वस्य दान, न च एतन्न्याय्यं, यत् पित्रादीनां परिचारकत्वं यस्य चैतत् न्याय्यं अपि भवेत्, स दद्यादपि । 'अत्र आह, ननु यत्र स्वशब्दो

* व्याख्यान दायभागे द्रष्टव्यम् ।

(१) संब्रा.४. (२) तैआ.७।११।३.
(३) नि.३।३. (४) जैसू.६।७।१. (५) जैसू.६।७।२.

वर्तते, तदेयं इत्युक्ते पित्रादयो दातव्या गम्यन्ते । तस्मात् तान्प्रति प्रभुत्वाय स्मृतिं बाधित्वाऽपि यतितव्यं' इति । अत्र उच्यते–स्वशब्दोऽयमात्मीयधनज्ञातीना प्रत्येकं वाचको न समुदायस्य तत्र आत्मीये सर्वताया कृतायां कृते शास्त्रार्थे न अशक्येषु ज्ञातिषु सर्वता कल्पनीया, नापि स्मृतिर्बाधितव्या । अपि च गवादीनामात्मीयाना चोदकेन प्राप्तौ सत्यामवश्य आत्मीय गता सर्वता उपादेया, तस्या च उपात्ताया कृतः शास्त्रार्थः—इति ज्ञातीना उपादाने न किञ्चिद् कारणमस्ति, तस्मात् न पित्रादयो देयाः । तस्मात् यत्र एव प्रभुत्वयोगेन स्वत्वं, तदेव देय इति । शाभा.

विश्वजिति पृथिव्या अदेयत्वाधिकरणम्

[1]न भूमिः स्यात् सर्वान् प्रत्यविशिष्टत्वात् ।

अत्रैव सर्वदाने संशयः–किं भूमिर्देया, न ? इति । का पुनर्भूमिरत्राभिप्रेता ? यदेतन्मृदारब्धं द्रव्यान्तरं पृथिवीगोलकं, न क्षेत्रमात्र मृत्तिका वा । तत्र किं प्राप्तम् ? अविशेषाद्देया, प्रभुत्वसंबन्धेन हि तत्र स्वशब्दो वर्तते, शक्यते च मानसेन व्यापारेण स्वस्य स्वता निर्वर्तयितुमिति । एव प्राप्ते ब्रूमः—'न भूमिर्देया' इति । कुतः ? क्षेत्राणा ईशितारो मनुष्या दृश्यन्ते, न कृत्स्नस्य पृथिवीगोलकस्य इति । 'आह य इदानी सार्वभौमः, स तर्हि दास्यति' । सोऽपि न इति ब्रूमः । कुतः ? यावता भोगेन सार्वभौमो भूमेरीष्टे, तावता अन्योऽपि, न तत्र कश्चिद्विशेषः सार्वभौमत्वेऽस्य त्वेतदधिकं, यत्, असौ पृथिव्या संभूतानां व्रीह्यादीना रक्षणेन निर्विष्टस्य कस्यचित् भागस्य ईष्टे, न भूमेः, तन्निर्विष्टाश्च ये मनुष्याः, तैरन्यत् सर्वप्राणिना धारणविक्रमणादि यत् भूमिकृतं, तत्रेशित्वं प्रति न कश्चिद्विशेषः । तस्मात् न भूमिर्देया । शाभा.

विश्वजिति धर्मार्थसेवकशूद्रस्यादेयताधिकरणम्

[2]शूद्रश्च धर्मशास्त्रत्वात् ।

विश्वजित्येव संदिह्यते—किं परिचारकः शूद्रो देयः, न ? इति । किं प्राप्तम् ? सर्वस्य स्वस्य विहितत्वाद्देयः इति । एवं प्राप्ते ब्रूमः 'शूद्रश्च' न देयः इत्यन्वादेशः कुतः 'धर्मशास्त्रत्वात्' धर्मशासनोपनतत्वात् तस्य, 'एवं असौ तस्मै त्रैवार्णिकाय उपनत इमं शुश्रूषमाणो धर्मेण संभेत्स्यते' इति, सोऽन्यस्मै दीयमानो न इच्छेदपि, न च अनिच्छतः तस्य स प्रभवति, न च बलात् स्वीकर्तव्यः, यस्वन्यायेन स्वीकुर्यात्, स दद्यादपि, धर्मोपनतमात्रेण तु न शक्यो दातुम् । शाभा.

गौतमः

अधर्मसयुक्ताय प्रतिश्रुतमप्यदेयम्

[1]प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात् ।

(१) दास्यामीति प्रतिश्रुत्याप्यधर्मसंयुक्तविषये न दद्यात् । यदि तेन द्रव्येणाधर्मसंयुक्त वेश्यागमनाद्यसौ करिष्यतीति विजानीयात् । अधर्मसंयुक्त इति वचनादन्यत्र प्रतिश्रुतमददत्प्रत्यवेयादिति दर्शयति । गौमि.

(२) दानापवादमधुनोच्यते प्रतिश्रुत्येति । अधर्मसंयुक्तः गुर्वाद्यर्थमुद्दिश्य यः प्रार्थयते न च करोति तस्मै प्रतिश्रुतमपि न दद्यात् । अपिशब्दात्संकल्पितमपि । मभा.

दाने अप्रमाणवाक्यानि

[2]क्रुद्धहृष्टभीतार्तलुब्धबालस्थविरमूढमत्तोन्मत्तवाक्यान्यनृतान्यपातकानि ।

(१) प्रतिश्रवणविषये विशेषमाह क्रुद्धेति । क्रुद्धादिवाक्यान्यनृतान्यथार्थान्यप्यपातकानि न पापं जनयन्ति । क्रुद्धः क्रोधाविष्टः । हृष्टो हर्षाविष्टः । भीतो भयाविष्टः । एतेषा गुणान्तरैराविष्टत्वाद्वाक्यमप्रमाणम् । तस्मात्प्रतिश्रुत्यादानेऽपि तेषामदोषः । गौमि.

(२) अधर्मसयुक्तत्वं न यस्यकस्यचिद्वचनात् प्रतिपत्तव्यमित्याह क्रुद्धेति । क्रोधहर्षभयरोगलोभाविष्टाना बालादीनां च वचनेनाधर्मसंयुक्तत्व नाध्यवसेयं, अप्रमाणत्वात्तेषा वचनस्य । वाक्यग्रहणमन्यत्राप्येषा वचनस्याप्रामाण्यप्रसिद्ध्यर्थम् । मभा.

---

(१) जैसू.६।७।१. (२) जैसू.६।७।६.

(१) गौध.५।२४; मेधा.८।२१२; मिता.२।१७६; अप.२।१७६; व्यक.१४५; मभा. क्वाय (क्ते); गौमि.५।२१; स्मृच.१९२; ममु.८।२१२; विर.१३३; विचि.६०; स्मृचि.१९; चन्द्र.४३; वीमि.२।१७६; व्यप्र.३१०; व्यम.८९; विता.६०६; राकौ.४७१; सेतु.१५१ (सं०); समु.९४ मभावत् ; विच.२० सेतुवत्.(२) गौध.५।२५; मभा. ; गौमि.५।२२,विर.१३६ (अपातकानि०).

अदेयदत्ते स्वत्वं न । अदेयदाने प्रायश्चित्तम् ।

अदेयदानस्य निषिद्धत्वात्परस्वत्ववानुपपत्तिः ।
अनापदि पुत्रदारादिदाने षड्वार्षिकं चरेत् ।
द्वादशवार्षिकं चरेत् ।

हारीतः

अदेयदाननिन्दा

अदेयदानं जैह्म्यं च कलञ्जस्य निषेवणम् ।
मद्यपस्य मुखास्वादः चत्वार्येवं समानि च ॥

अत्राहुः—कलञ्जस्य निषेवणं आस्वाद एव । मद्यपस्य मुखास्वाद इति सत्सनियोगशिष्टत्वात् । केचित्तु कलञ्जं गृञ्जनमित्याहुः । अपरे त्वाहुः—भवतु वा पातित्यहेतुभूतकलञ्जभक्षणसंनियोगशिष्टत्व अदेयदानस्य तावन्मात्रेणास्य पापाधिक्य नास्ति । प्रायश्चित्तविधिपर्यालोचनयैव पापपरिज्ञानमाहुराचार्या इति । सवि.२७८

सर्वस्वमदेयम्

आपद्यपि विरक्तो च सर्वस्वं न प्रदीयते ॥

अत्र ज्ञापकमप्याहुर्लक्ष्मीधरप्रभृतयः—'विश्वजिति सर्वस्व दद्यात्', 'न केसरिणो दद्यात्' इति केसरिदाननिषेधः सर्वस्वदान निषेधतीति । अत्र केचित् 'विश्वजिति सर्वस्व' इत्यत्र सर्वशब्दः केसरिव्यतिरिक्तसर्वपरः । अत्र स्वशब्दस्यात्मीयवाचितया आत्मीयादीना पुत्रादीनामदेयत्वादेव स्वत्वनिवृत्तेरभावादित्याहुः । तन्न, सर्वस्व दद्यादिति विधिः निषेधशिरस्को भवत्येव सर्वस्वदान विधातुमित्याहुराचार्याः । सर्वस्वदक्षिणाविधयस्त्वदेयद्रव्यव्यतिरिक्तविषयाः । पुत्रदारादौ तु आर्ज्यार्जकभावसंबन्धरूपस्य स्वत्वस्य विद्यमानत्वात् । पुत्रदारादिक स्वमेव । तच्च महापातकादिना निवर्तत इत्युक्त प्राक् । अतश्च सर्वशब्दः सकुचिद्वृत्तिर्न भवति । अत एव 'औदुम्बरी सर्वा वेष्टयितव्ये'त्यत्र सर्वशब्दः सकुचिद्वृत्तिर्न भवतीति प्रतिपादित गुरुणा । राज्ञा सर्वस्वहरण साहसेषु विहितम् । बलात्कारेण गृहीतेऽपि द्रव्ये स्वत्वमुत्पद्यते । किं च न तत्प्रदान, अपि तु दण्ड्यतया सर्वस्वग्रहणम् । प्रकृते तु दानविचारो दानविषय इति तत्रास्माकमनास्था । सवि.२७९-२८०

(१) सवि.२७७. (२) सवि.२७८. (३) सवि.२७९. (४) सवि २७७-२७८. (५) सवि.२७९.

अदेयदाने प्रतिश्रुतस्यादाने च दोषः

अथासद्द्रव्यदानमस्वर्ग्यं, यच्च दत्वा परितप्यते ।
प्रतिश्रुतार्थाप्रदानेन दत्तस्याच्छेदनेन च ।
विविधान्नरकान् याति तिर्यग्योनौ च जायते ॥
वाचा यच्च प्रतिज्ञातं कर्मणा नोपपादितम् ।
ऋणं तद्धर्मसंयुक्तमिह लोके परत्र च ॥

विष्णुः

अदेयदाननिन्दा, प्रायश्चित्त च

अदेयं न देयम् ।
प्रतिश्रुतस्याप्रदायी तदापयित्वा प्रथमसाहसं दण्डयः ।
जैह्म्ये त्रिरात्रिमुपोष्य पञ्चगव्येन शुध्यति ।
पुत्रदारादिदाता पतितो भवति ।
दातृशब्दो विक्रेतुरुपलक्षकः । सवि.२७८

शङ्खः

अदेयं दत्वा तत्परावर्त्य त्रिरात्रमुपवसेत् ।

कौटिलीयमर्थशास्त्रम्

देयमदेयं च । धर्मदानार्थदानकामदानभयदानरोषदानदर्पदानविचारः ।

दत्तस्यानपाकर्म । दत्तस्याप्रदानमृणादानेन व्याख्यातम् ।

दत्तमव्यवहार्यमेकत्रानुशये वर्तेत । सर्वस्वं पुत्रदारं आत्मानं प्रदायानुशयिनः प्रयच्छेत् । धर्मदानमसाधुषु, कर्मसु चौपघातिकेषु वा । अर्थदानमनुपकारिषु अपकारिषु वा कामदानमनर्हेषु च । यथा च दाता प्रतिग्रहीता च नोपहतौ स्यातां, तथानुशयं कुशलाः कल्पयेयुः ।

दण्डभयादाक्रोशभयादनर्थभयाद् वा भयदानं प्रतिगृह्णतः स्तेयदण्डः प्रयच्छतश्च । रोषदानं परहिंसायाम् । राज्ञामुपरि दर्पदानं च । तत्रोत्तमो दण्डः । इति दत्तस्यानपाकर्म ।

दत्तस्यानपाकर्मेति सूत्रम् । 'तुभ्यमह सप्रददे' इति प्रतिज्ञादिपूर्वं वाचा दत्तस्य अप्रदानमिति सूत्रार्थः ।

(१) विच.९. (२) सवि.२७७. (३) विस्मृ.५।१७४; समु.९४ प्रथम (पूर्व). (४) सवि.२७८. (५) सवि.२७८. (६) सवि.२८१. (७) कौ.३।१६.

क्रयविक्रयविषयस्त्वावदनुशय उक्तः, धर्मादिदानविषय स्त्वधुनाऽभिधीयते । दत्तस्याप्रदानमिति । तद्, ऋणादानेन व्याख्यात ऋणादानवद् द्रष्टव्यम् । दत्तम नपाकृतं ऋणमिव साक्ष्यादिभिर्विभाव्य ग्राह्यमित्यर्थः ।

अनुशयविषय दत्तमाह—दत्तमव्यवहार्यमित्यादि । वाग्दत्त व्यवहारायोग्य चेद्, एकत्र अनुशये वर्तेत अनुशये एव केवले वर्तेत । न त्वनुशयात् कदापि मुच्येतेत्यर्थः । सर्वस्व पुत्रदारं आत्मान प्रदाय, अनुशयिनः, प्रयच्छेत् पुनर्दद्यात् सर्वस्वादिकम् । धर्मदानमसाधुष्विति । अनुशये वर्तेतेत्यनुवर्तते । साधव इति बुद्धया धर्मदान तेषु प्रतिज्ञात असाधुत्वज्ञानानन्तरं अनुशये वर्तेत । कर्मसु चौषधातिकेषु वेति । गोरक्षादिप्रशस्तकर्मार्थ धार्मिकत्वबुद्धया चोरपारदारिकादिषु कृत धर्मदान अनुशये वर्तेत । अर्थदानमनुपकारिष्वपकारिषु वेति । उपकारित्वबुद्धयानुपकारिषु अपकारिषु वा कृतमर्थदान अनुशये वर्तेत । कामदानमनर्हेषु चेति, कामनिमित्त दान अनर्हेषु अर्हत्वबुद्धया कृत अनुशये वर्तेत । यथा चेत्यादि सुगमम् ।

दण्डभयादिति । ताडनभयाद्, आक्रोशभयात् निन्दनभयात्, अनर्थभयाद्वा रोगोन्मादायुत्पत्तिभयाद् वा, क्रियमाण भयदान, प्रतिगृह्णतः कृत्याभिचारादिवृत्तेः, प्रयच्छतश्च भीरोः, स्तेयदण्डः । रोषदान परहिंसायामिति । कोपदान परमारणार्थं, प्रतिगृह्णतः प्रयच्छतश्च स्तेयदण्डः इति सबध्यते । राज्ञामुपरि दर्पदान चेति । नृत्तगीतादिकलाकुशलेभ्यो राजभिः कृतात् पारितोषिकदानादधिकतरं पारितोषिकदान च, कश्चित्कुर्याच्चेदिति शेषः । तत्र विषये उत्तमः उत्तमसाहसो दण्डः ।

श्रीमू.

मनुः

प्रतिश्रुतं दत्त वा अधर्मसयुक्ताय न देयम्

धर्मार्थं येन दत्तं स्यात्कस्मैचिद्याचते धनम् ।
पश्चाच्च न तथा तत्स्यान्न देयं तस्य तद्भवेत् ॥

(१) **मस्मृ.**८।२१२, **व्यमा.**३४८; **अप.**२।१७५ पूर्वार्ध (कस्मैचिद्याचमानाय दत्त धर्माय यद्भवेत्) तत्स्या (तस्मा), **व्यक.**१४६; **स्मृच.**१९४ च्च न (च्चेन्न) तस्य (तेन); **विर.**१३७ दत्त स्यात् (यद्दत्तं) तस्य (तेन); **विचि.**६३ तस्य

(१) यः कश्चिदाह सान्तानिकोऽहं यियक्षुर्वा देहि मे किंचिदिति । तस्मै यदि दत्तं भवेत् स च न यजेत न विवाहकर्मणि प्रवर्तेत । तद्धन द्यूतेन वेश्याभिर्वा क्षपयेदन्यत्र वा विनियुञ्जीत वृद्धिलाभकृष्यादौ, न देय तस्य, तद्दत्तस्य दानप्रतिषेधो नोपपद्यते । अतः प्रत्याहरणीयमिति वाक्यार्थः। अथवा नष्टान्तो (नः क्तान्तः) गौणो व्याख्येयो दत्त प्रतिश्रुत न देयम् । तथा च गौतमः 'प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात्' । किं पुनरत्र युक्तमुभयमित्याह दत्तस्य प्रत्याहरणं प्रतिश्रुतस्य वाऽदानम् । तथा च स्मृत्यन्तरे उभय पठितम् । आह हि नारदः 'कर्त्ताहमेतत्कर्मेति उपक्रम्य 'यद्दत्त स्यादविज्ञानाददत्त तदपि स्मृतम्' इति । प्रयोजनविशेषोद्देशेन यद्दत्त तस्मिन्ननिवर्त्यमाने व्यवस्थितमपि प्रतिग्रहीतुर्गृहादाहर्तव्यम् । दानस्योपक्रममात्रं तदानीं समर्पणं समाप्तिस्तु निर्वृत्ते प्रयोजने इति नारदस्य मतम् । +मेधा.

(२) धर्मार्थं स्वधर्मसिद्धयर्थम् । न तथा धर्मार्थं भवति दानार्हत्वादिना प्रतिग्रहीतुः । ×मषि.

(३) न तथा तत्स्याददत्तं न स्यात् । मच.

(४) अथ दत्तानपाकर्मात्मकं विवादपदं श्लोकद्वयेनाह—धर्मार्थं येनेति । कस्मैचिद्याचते धर्मार्थं येन धनं दत्त स्यात्पश्चाच्चेन्न तथा तद्धर्मार्थं न मया दत्तमिति प्रदात्रानुशयादभियुक्तं चेदित्यर्थः, तस्मै प्रदात्रे तेन प्रतिग्रहीत्रा तद्धन न देय प्रदात्रा नापहार्यमित्यर्थः । नन्द.

(५) कस्मैचित् भिक्षुकाय धनं याचते धर्मार्थं दत्त स्यात्, पश्चाद्दत्तानन्तर, तद्धन न तथा तत् स्यात् तस्य स्वामिनः न देय पूर्वस्वामिना, तस्य ग्रहीतुः तद्भवेत् विवादपदम् । भाच.

अधार्मिको हठात्साधयन् दण्डयः

यदि संसाधयेत्तत्तु दर्पाल्लोभेन वा पुनः ।
राज्ञा दाप्यः सुवर्णं स्यात्तस्य स्तेयस्य निष्कृतिः ॥

+ गोरा , स्मृच., ममु., विर. मेधावत् । × विचि. मविवत् । (तेन): १९२ दत्त स्यात् (यद्दत्त); **सवि.**२८३ दत्तं स्यात् (यद्दत्त) न देय तस्य (अदेय तेन); **चन्द्र.**४६ विरवत्; **सेतु.**१५५ विरवत्; **समु.**९८ स्मृचवत्; **विच.**२४ विरवत्; **विव्य.**५६.

(१) **मस्मृ.**८।२१३; **अप.**२।१७५; **व्यक.**१४६; **स्मृच.**१९४; **विर.**१३७; **विचि.**६३ राज्ञा (राजा) स्तेयस्य

(१) संसाधन राजनिवेदनादिना ऋणवत्प्रतिश्रुतस्य मार्गणं, स्वीकृतस्य प्रतियाच्यमानस्य राजनिवेदन अय मह्य दत्वा प्रतिजिहीर्षतीति सिद्धस्य दृढीकरणं संसाधनमेतद् । दर्पाल्लोभेनेति कारणानुवादः[1] । एव कुर्वतो दण्डः सुवर्ण स्यात्तस्य स्तेयस्य निष्कृतिरिति चौरदण्डमाशङ्कमानः सुवर्ण विधत्ते । अचौरशङ्कया च दत्त किल तेन तस्मै न स्वय हृतं, कथमयं चौरः स्यादिति शङ्का निवर्तयितुं स्तेयशब्दः प्रयुक्तः । सत्यपि चौरत्वे वाचनिकः सुवर्णदण्डोऽन्यासु क्रियासु चौरवद्व्यवहर्तव्यः । *मेधा.

(२) हठादपि दण्डितस्य दण्डेन पापनिर्हरणं भवतीत्यस्मान्निष्कृतिवचनादवसीयते । ×गोरा.

(३) सुवर्ण दाप्यः शतम् । मवि.

(४) तद्धन सुवर्ण दाप्यः । स्मृच.१९४

(५) संसाधयेदनुतिष्ठेत् तत्प्रतिग्रहणकाले प्रदात्रे निवेदितं धर्म विवाहयज्ञादिक मानवः प्रतिग्रहीता, स्वर्ण प्रतिभाषितं 'पञ्चकृष्णलिको माषस्ते सुवर्णस्तु षोडशे'ति तद्दाप्यो दण्डरूपेण । अपह्नवार्थे प्रतिपादनमर्थप्राप्तमेव । नन्द.

अदेयदातृप्रतिग्रहीतारौ दण्डयौ

अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति ।
उभौ तौ चौरवच्छास्यौ दाप्यौ चोत्तमसाहसम्॥

(१) अस्वस्य दाने प्रतिग्रहे च दण्डः स्मर्यते । मिता.२।२४

(२) अदेयग्रहणमदत्तस्याप्युपलक्षणम् । पमा.३१४

दत्तस्यैषोदिता धर्म्या यथावदनपक्रिया ॥

(१) पूर्वेणार्धेन पूर्वविवादोपसंहारः । उत्तरेण वक्ष्यमाणोपक्रमः । दत्तस्यैषा अनपक्रियोदिता । अपक्रिया क्रियापायः । तस्य नञा प्रतिषेधः । दानमेवं न चलितं भवति । एषैव दाने स्थितिरिति यावत् । धर्मादनपेता धर्म्या । कथ प्रतिश्रुत्यादीयमाने धर्मो न नश्यतीति ? नैषा शङ्का कर्तव्या । एष एवात्र धर्मो यत्र दीयते दत्त च प्रत्यादीयते । उदिता उक्ता, यथावच्छब्दसमुदाय एव याथातथ्ये वर्तते । सम्यङ्निरूपितेत्यर्थः । अथवा यथाशब्दो योग्यतायां वर्तते तामर्हतीति वतिः कर्तव्यः । मेधा.

(२) एतद्दत्तस्याप्रतिपादनं धर्मादनपेतम् । गोरा.

(३) अपगच्छति धनमन्य प्रत्यनेनेति अपक्रिया दानं तदभावोऽनपक्रिया पुनरादानम् । मच.

(४) अनपाक्रिया अनपाकरण प्रदानमिति यावत् । नन्द.

याज्ञवल्क्यः

देयमदेय च । शुद्धप्रतिग्रह । दत्तानपहारः ।

[1]स्वं कुटुम्बाविरोधेन देयं दारसुताहते ।
नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम् ॥

(१) पारितोषिकदानप्रसङ्गेनादृष्टार्थोऽपि दानसाधारणो विधिरुच्यते—स्वकुटुम्बमिति । स्वशब्दो विभक्तपुत्रादिनिवृत्त्यर्थः । अविरोधश्च ग्रासाच्छादनमात्रसंपल्लक्षणो विज्ञेयः । दारसुतग्रहणं च सर्वज्ञातिधर्मोपनतादिलक्षणार्थम् । नान्वये सति सर्वस्वं पृथक् कुटुम्बतया अवस्थितेऽपीत्यर्थः । देयं यच्चेत्यत्र देय प्रत्यर्पणीयं निक्षेपादि । अन्यसंश्रितं साधारण पराधीनं वा स्वमेव । अस्य पाठान्तरम्—'यच्च प्रतिश्रुतम्' इति । देयत्वेनान्यस्मै प्रतिश्रुतमित्यर्थः । विश्व.२।१७९

(२) अधुना विहिताविहितमार्गद्वयाश्रयतया दत्ता-

---

* विर, मच., भाच. मेधावत् । × शेष मेधावत् ।

(दोषस्य) : १९२; **चन्द्र.**४६ दण्ड्यः (दाप्यः); **सेतु.**१५५ राज्ञा (राज्ञो) स्तेयस्य (दोषस्य); **समु.**९८; **विच.** २४ स्तेयस्य (दोषस्य); **विव्य.**५७ वा पुन. (मानवः), **भाच.**संसाध (संधार).

(१) **शुनि.**४।८१४ तावुभौ (उभौ तौ); **मिता.**२।२४ (=); **पमा.**३१४ दाप्यौ (दण्ड्यौ); **स्मृचि.**२० दाप्यौ (दण्ड); **नृप्र** २६; **सवि.**१२६ (=); **व्यप्र.**३०७; **व्यउ.**८४; **व्यम.**८९; **विता.**१४५ (=) पमावत् : ६०१; **समु.**९८ अदेय (अदत्त).

(१) **मस्मृ.**८।२१४ पू.; **स्मृच.**१९५; **समु.**९६.

(१) **यास्मृ.**२।१७५; **अपु.**२५७।२६ स्व (स्व) यच्चा-...तम् (देयं यच्चान्यसश्रुतम्); **विश्व.**२।१७९ स्वं (स्व) यच्चा ...तम् (देयं यच्चान्यसंश्रितम्); **मिता.**; **अप.**; **व्यक.** १४४; **स्मृच.**१८९ प्रथमपादं विना : १९१ पू.; **विर.** १२८; **पमा.**३१४ पू.; **विचि.**५७ स्वं (स्व); **स्मृचि.**१९ पू.; **नृप्र.**२७; **वीमि.**; **व्यप्र.**३०८ पू.; **व्यउ.**८५ स्वं (स्व) पू.; **व्यम.**८९ स्वं (स्व) पू.; **राकौ.**४७०; **सेतु.**१४८ नान्व (अन्व) उत्त.; **समु.**९३.

नपकर्म दत्ताप्रदानिकमिति च लब्धाभिधानद्वय दानाख्य व्यवहारपदं अभिधीयते । तत्स्वरूप च नारदेनोक्तम् । 'दत्वे'ति । तदेतत्संक्षेपतो निरूपयितुमाह—स्वमिति । स्वमात्मीयं कुटुम्बाविरोधेन कुटुम्बानुपरोधेन कुटुम्बभरणावशिष्टमिति यावत् । तद्दद्यात् । तद्भरणस्यावश्यकत्वात् । तथा च मनुः 'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः । अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीदि'ति ॥ ' स्व कुटुम्बाविरोधेने'त्यनेनादेयमेकविधं दर्शयति । 'स्वं दद्यादि'त्यनेन चास्वभूतानामन्वाहितयाचितकाधिसाधारणनिक्षेपाणा पञ्चानामप्यदेयत्वं व्यतिरेकतो दर्शितम् । स्वं दद्यादित्यनेन दारसुतादेरपि स्वत्वाविशेषेण देयत्वप्रसङ्गे प्रतिषेधमाह—दारसुतादिति । दारसुतादृते दारसुतव्यतिरिक्तं स्वं दद्यान्न दारसुतमित्यर्थः । तथा पुत्रपौत्राद्यन्वये विद्यमाने सर्व धन न दद्यात् । 'पुत्रानुत्पाद्य संस्कृत्य वृत्तिं चैषा प्रकल्पयेदि'ति स्मरणात् । तथा हिरण्यादिकमन्यस्मै न देयम् । प्रतिश्रुतमन्यस्मै । +मिता.

(३) इदं दत्त संप्रदानादनपहार्यमिद चापहार्यमिति विवेकार्थं देयमदेय चाह—स्वमिति । स्वं स्वकीयं पुत्रकलत्रव्यतिरिक्त यत्र च कुटुम्बाशनाच्छादनविनाशरूपो विरोधो नास्ति तद्देयम् । अर्थादनेवंविधं न देयम् । तथाऽन्वये स्वसंताने च सति सर्वस्वमदेयम् । एतच्च प्राग्दायविभागात् । विभक्तदायेषु तु पुत्रेषु सर्वस्वदानमनिषिद्धम् । तथा यद्धनमन्यस्मै देयत्वेन प्रतिश्रुतमङ्गीकृत तत्ततोऽन्यस्मै न देयम् । एव च सति यद्देयं तद्दत्त सन्नापहार्यम् । अदेयं त्वपहार्यमिति । स्वमितिपदेनास्व याचितकादि व्युदस्यते । अप.

(४) तदनेकसुतशून्यविषयम् । तत्र हि पुत्रदाने कृते संतानविच्छेदापत्तेः । ×स्मृच.१९१

(५) अत्र निषिद्धाचरणादधर्मो भवति, न तु दानासिद्धिरेव सर्वस्वदानादाविति स्मृतिसारः । *वीमि.

प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः ।
देयं प्रतिश्रुतं चैव दत्वा नापहरेत्पुनः ॥

+ व्यप्र. मितावत् । ×पमा. स्मृचवत् । * शेष मितावत् ।

(१) **याज्ञ्स्मृ.**२।१७६; **अपु.**२५७।२७; **विश्व.**२।१८०; **मिता.**२।११४ पू., स्मरणम् : २।१७६; **अप.**; **व्यक.**१४५; (१)अदेयव्यतिरिक्तानां तु देयाना—प्रतिग्रहः प्रकाशः स्यादिति । यत्त्वप्रकाश्यं दानमिति, तद् दानविषय, इदं तु प्रतिग्रहविषयमित्यविरोधः । स्पष्टमन्यत् । विश्व.२।१८०

(२) एवं दारसुतादिव्यतिरिक्तं देयमुक्त्वा प्रसङ्गाददेयधनग्रहण च प्रतिग्रहीत्रा प्रकाशमेव कर्तव्यमित्याह—प्रतिग्रह इति । प्रतिग्रहणं प्रतिग्रहः, स प्रकाशः कर्तव्यो विवादनिराकरणार्थम् । स्थावरस्य च विशेषतः प्रकाशमेव ग्रहणं कार्यम् । तस्य सुवर्णादिवदात्मनि स्थितस्य दर्शयितुमशक्यत्वात् । एव प्रासङ्गिकमुक्त्वा प्रकृतमनुसरन्नाह—देयमिति । देय प्रतिश्रुतं चैव । यद्यस्मै धर्मार्थं प्रतिश्रुत तत्तस्मै देयमेव, यद्यसौ धर्मात्प्रच्युतो न भवति । प्रच्युते न पुनर्दातव्यम् । 'प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यादि'ति गौतमस्मरणात् । दत्त्वा नापहरेत्पुनः । न्यायमार्गेण यद्दत्तं तत्समविधमपि पुनर्नापहर्तव्यम् । किंतु तथैवानुमन्तव्यम् । यत्पुनरन्यायेन दत्त तदद्दत्तं पोडशप्रकारमपि प्रत्याहर्तव्यमेवेत्यर्थादुक्त भवति । *मिता.

(३) प्रतिग्रहः प्रकाशः प्रकटः ससाक्षिकः कार्यः । तथा, इद ते दास्यामीति यत्प्रतिश्रुतमङ्गीकृतं तद्दातव्यं दत्त च नापहार्यम् । अप.

नारदः

दत्ताप्रदानिकनिरुक्तिः

दत्त्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति ।
दत्ताप्रदानिकं नाम तद्विवादपदं स्मृतम् ॥

* वीमि., व्यप्र. मितावत् ।

स्मृच.१९२; **विर.**१३२ पुनः (द्रुधः); **पमा.**३१८ उत्त.: ५६८ पू., स्मरणम्; **सवि.**२८५; **वीमि.**; **व्यप्र.**३०९ पू.: ३१० उत्त. : ४५९ पू., स्मरणम्; **व्यउ.**८५ रस्य (रेषु) पू.; **विता.**२९० पू., स्मरणम् : ६०२; **राकौ.**४७०; **समु.**९४ उत्त.

(१) **नास.**५।१; **नास्मृ.**७।१; **अपु.**२५३।१६ व्यम (व्य च); **अभा.**८६; **मिता.**२।१७५ तद्वि ... तम् (व्यवहारपद हि तत्); **अप.**२।१७५ स्मृतम् (विदुः); **व्यक.**१४४; **स्मृच.**३ मितावत् ; **विर.**१२७; **पमा.**३१२; **विचि.**५४ यः (यत्); **स्मृचि.**१८; **नृप्र.**२६; **सवि.**२७७; **चन्द्र.**४२ मिच्छ (महं) **पू.**; **व्यप्र.**३०६ मितावत् ; **व्यउ.**८४ मितावत् ; **व्यम.**८९ मितावत् ; **विता.**५९८ मितावत् ; **सेतु.**

(१) इदानीं चतुर्भेद दत्तस्यादान नाम चतुर्थ व्यवहारपद भविष्यति । सुबोधाधिकारः श्लोकोऽयम् । अभा.८६

(२) असम्यगविहितमार्गाश्रयेण द्रव्य दत्वा पुनरादातुमिच्छति यस्मिन् विवादपदे तद्दत्ताप्रदानिक दत्तस्याप्रदानं पुनर्हरणं यस्मिन्दानाख्ये तद्दत्ताप्रदानिक नाम व्यवहारपदम् । विहितमार्गाश्रयत्वेन तत्प्रतिपक्षभूतं तदेव व्यवहारपदं दत्तानपकर्मेत्यर्थादुक्त भवति । दत्तस्यानपकर्म अपुनरादान यत्र दानाख्ये विवादपदे तद्दत्तानपकर्म । मिता.२।१७५

(३) यस्मिन्दाने दत्तं द्रव्यं कर्मकारकादिवैगुण्यात्पुनः संप्रदानादपहार्य तद्दान दत्तस्याप्रदानमस्मिन्विद्यत इति व्युत्पत्त्या दत्ताप्रदानिकाख्य व्यवहारपदमिति श्रौतोऽर्थः । तथा कर्मकारकाद्यवैगुण्यादत्तस्यानपाकर्मापनयनमस्मिन्निति व्युत्पत्त्या दत्तानपाकर्माख्यमपीदमेव पदमित्यार्थिकोऽर्थः । स्मृच.३

(४) दत्वा द्रव्यममम्यगपात्रे यः पात्रबुद्धया क्रोधाद्याविष्टो वा पुनस्तदादित्सति, तद् दत्ताप्रदानिक नाम विवादपदम् । दत्तं च न च प्रदानप्रयोजन तत्रास्ती त्यन्वर्थसज्ञा । नाभा.५।१

देयादेयदत्तादत्तानि तदवान्तरभेदाश्च

अदेयमथ देयं च दत्तं चादत्तमेव च ।
व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः ॥

(१) देय ज्ञेयं दानविषये अदेय च दत्त ज्ञेय कीदृशमदत्त चेत्ययं दानमार्गश्चतुर्विधोऽपि व्यवहारे विज्ञेयः । अभा.८६

(२) तत्र देयमित्यनिषिद्धदानक्रियायोग्यमुच्यते । अदेयमस्वतया निषिद्धतया वा दानानर्हम् । यत्पुनः प्रकृतिस्थेन दत्तमव्यावर्तनीयं तद्दत्तमुच्यते । अदत्तं तु, यत्प्रत्याहरणीयं तत्कथ्यते । *मिता.

तत्र ह्यष्टावदेयानि देयमेकविधं स्मृतम् ।
दत्तं सप्तविधं विद्याददत्तं षोडशात्मकम् ॥

तत्राष्टप्रकारमदेयम् । देयमेकप्रकारमेव । सप्तप्रकार दत्तम् । अदत्त षोडशप्रकारम् । एतानि प्रतिपदमुच्यन्ते । अभा.८६

अदेयमष्टविधम्

अन्वाहितं याचितकमाधिः साधारणं च यत् ।
निक्षेपः पुत्रदारं च सर्वस्वं चान्वये सति ॥
आपत्स्वपि हि कष्टासु वर्तमानेन देहिना ।
अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतम् ॥

* स्मृच., सवि. मितावत् ।

(१) **नासं.**५।३ त्र ह्य (त्रेहा), **नास्मृ.**७।३ त्र ह्य (त्रेहा) विद्याद् (ज्ञेय); **अभा** ८६ नास्मृवत्; **मिता.**२।१७६ विद्याद् (प्रोक्त) उक्त.; **अप.**२।१७५ नासवत्; **व्यक** १४४; **विर.** १२७, **पमा.**३१७ मितावत्, उक्त.; **विचि.**५५, **स्मृचि.** १९ मितावत्, उक्त.; **नृप्र.**२६ नासवत्; **व्यप्र.**३१० विद्याद् (ज्ञेयं) उक्त.; **व्यउ** ८५ मितावत्, उक्त.; **व्यम.**८९ मितावत्, उक्त.; **विता.**६०७ मितावत्, उक्त., **बाल.**२।१७६ ह्यष्टा (त्वष्टा) पू; **सेतु.**१४७; **समु.**९३ त्र ह्य (त्रेहा) शेष मितावत्, **विच.**१२, **विव्य.**३६.

(२) **नासं.**५।४ माधि. (माधि) क्षेपः (क्षेपं); **नास्मृ.** ७।४; **अभा.**८६; **विश्व.**२।१७९ क्षेपः (क्षेप); **मिता.**२। १७५ दार च (दाराश्च), **अप** २।१७५ दार च (दाराश्च); **व्यक.**१४४ वंस्वं चा (वं मुख्या), **स्मृच.**१९०:१९१ क्षेपः (क्षेप) उक्त., **विर.**१२७; **स्मृसा.**११० अपवत्, नारदः; **पमा.**३१३ विश्ववत्; **विचि.**५५-५६, **स्मृचि.**१९ दार (दारौ); **नृप्र.**२६; **सवि.**२८० अपवत्; **चन्द्र.**४० चतुर्थपादः; **व्यसौ.**४६ अपवत्, **व्यप्र.**३०६ अपवत्; **व्यउ.** ८४ दक्षः; **व्यम.**८९ क्षेपः (क्षेपं) शेष अपवत्; **विता.** ५९९, **सेतु.**१४८; **समु.**९३; **विच.**१३.

(३) **नासं.**५।५, **नास्मृ.**७।५; **अभा.**८६; **विश्व.**२। १७९ आप...ष्टासु (आपद्यपि च कष्टाया), **मिता.**२।१७५ हि (च); **अप.**२।१७५ मितावत्; **व्यक.**१४४; **स्मृच.** १९०:१९१ चतुर्थपादं विना, **विर.**१२८; **स्मृसा.**११०;

१४७; **समु.**९३ यः (यत्) शेष मितावत्; **विच.**१२ चन्द्रवत्, **विव्य.**३६.

(१) **नासं.**५।२ अदेयमथ (अथ देयम); **नास्मृ.**७।२, **अभा.**८६ नासवत्; **मिता** २।१७५ चादत्त (वादत्त) शेष नासवत्; **अप.**२।१७५ नासवत्; **व्यक.**१४४; **स्मृच.**३ नासवत्; **विर.**१२७, **पमा.**३१३, **विचि.**५५ चादत्त (वादत्त), **स्मृचि.**१९; **नृप्र.**२६, **सवि.**२७७ मनुः; **वीमि.** २।१७५ नासंवत्; **व्यप्र.**३०६ रेषु (रेण); **व्यउ.**८४ रेषु (रे स); **व्यम.**८९ रे षु (रे स) शेष नासवत्, **विता.**५९९ रेषु (रे तु); **राकौ.**४७०; **सेतु.**१४७, **समु.**९३ नासंवत्; **विच.**१२, **विव्य.**३६ मार्ग (माङु) ध. (धम्).

(१) अत्र परस्य सामान्यकार्यकरणमात्र किंचिद्वस्तु समर्प्य अतिसविशेषकार्यकरणक्षमवस्तु ततः समानीयते । अनु पश्चात् । अन्वाहितमेतदादौ कृत्वा । अन्यत्सुबोध सर्वम् । एतान्यष्टावदेयानि दत्तान्यपि वलन्ति । अभा.८६

(२) एतददेयत्वमात्राभिप्रायेण न पुनः स्वत्वाभावाभिप्रायेण । पुत्रदारसर्वस्वप्रतिश्रुतेषु स्वत्वस्य सद्भावात् । मिता.२।१७५

(३) अन्वाहितमन्यस्मै दातुमर्पितम् । अन्वाहितवत्स्त्रीधनमपि अदेय स्वत्वाभावात् । स्मृच.१९०

(४) अत्र चादेयपरिगणनप्रवृत्तानां मुनीनां स्वस्वोक्तान्यव्यवच्छेदे न तात्पर्यम् । विर.१२८

(५) आपत्कालेऽपि पुत्रदाराद्यन्वयाना पुत्रदारसर्वस्वानामदेयतेत्यर्थः । तत्समतौ तु देयतामाह कात्यायनः—विक्रयमिति । विचि.५६

(६) अन्वाहितं 'मथुराया प्रस्थितस्तत्रस्थस्य पूर्वगृहीत तस्मै दत्वा पश्चादिदं मम पुत्राय कन्याकुब्जगतो देहि'ति यत् समर्पितम् । याचितक 'कतिपयान्यहानि दत्त क्रियता, तेन दत्तकार्य कृत्वा प्रतिदास्यामी'ति गृहीतम् । पुत्राश्च दाराश्च, तेषा दान प्रत्यस्वामित्वात् । कष्टापद् मरणम् । नाभा.५।५

(७) साधारण बहुस्वामिक रिक्थादिक न त्वविभक्तस्वामिक सुवर्णादिकम् । तस्याविभक्तसर्वसंमतौ देयत्वेन वक्ष्यमाणत्वात् । व्यप्र.३०६

देयम्

कुटुम्बभरणाद्द्रव्यं यत्किञ्चिदतिरिच्यते ।
तद्देयमुपहृत्यान्यद्ददद्दोषमवाप्नुयात् ॥

(१) कुटुम्बे कुटुम्बिनाऽवश्यमेव भरणीय तस्माद् व्ययाद्यत्किञ्चिदतिरिच्यते तदेव दातव्यम् । एकविधमेव दृष्टम् । यत्पुनर्दीयमान कुटुम्बपीडाकारि तद्दत्वा दोषमाप्नुयान्न पुण्यमिति । अभा.८६

(२) अन्यमुपहृत्य भर्तव्यकुटुम्बमुपरुध्येत्यर्थः । उपरोधश्च निःस्वतया भोजनाच्छादनोच्छेदनिबन्धनोऽत्र मतो न तु ताम्बूलादिभोगसाधनवैकल्यनिबन्धनः । स्मृच.१३०

(३) प्रत्यवायमाप्नुयात् दण्ड्यश्च भवेद् राज्ञा । नाभा.५।६

यस्य त्रैवार्षिकं वित्तं पर्याप्त भृत्यवृत्तये ।
आधिकं वाऽपि विद्येत स सोमं पातुमर्हति ॥

एतन्न कुटुम्बभरणवित्तप्रमाणमुक्तम् । यस्याधिकमस्ति स सोमपान यज्ञत्व स्वय कर्तुमर्हति विप्र इति । अभा.८७

पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुः ॥

(१) एतेषु सप्तस्वन्यविरुद्धस्थानेषु यद्दत्त तदेव दत्तमित्युच्यते । शेषं पुनः षोडशविधमदत्तं विज्ञेयम् । तदुच्यते । अभा.८७

(२) अयमर्थः—पण्यस्य क्रीतद्रव्यस्य यन्मूल्य दत्त, भृतिर्वेतन कृतकर्मणे दत्त, तुष्ट्या वन्दिचारणादिभ्यो दत्त, स्नेहाद् दुहितृपुत्रादिभ्यो दत्तं,

---

पमा.३१३; विचि.५६; स्मृचि.१९ यान्या (यमा); **नृप्र.२६; सवि.२८०** मितावत्, बृहस्पतिः; **व्यप्र.३०६; व्यम.८९** उक्त.; **विता.५९९; सेतु.१४८; समु.९३; विच.१३.**

(१) **नासं.५।६** उत्तरार्धे (तद्देयमुपहृत्यान्यद् ददद्दाग. समाप्नुयात्); **नास्मृ.७।६** उत्तरार्धे (तद्देयमपहृत्यान्यस्कुटुम्बी दोषमाप्नुयात्): vulg. ७।६ (तद्देयमविहिंस्यान्यन्यायन्यथ न्यायं समाप्नुयात्); **अभा.८६** उत्तरार्धे (तद्देय सुहृदन्यस्मात् कुटुम्बी दोषमाप्नुयात्); **अप.२।१७५** हृत्या (हन्या), **स्मृच.१९०** हृत्यान्यत् (हत्यान्यं); **पमा.३१४** हृत्या (रुद्रय);

सवि.२८३ भरणाद् (भरण) उत्तरार्धे (तद्देयमुपरुध्यान्यद्ददद्दागः समाप्नुयात्); **व्यप्र.३०७-३०८; व्यउ.८५; विता.६०१** हृत्या (हृत्या), **समु.९३** स्मृचवत्.

(१) **नास्मृ.७।७; अभा.८६.**

(२) **नासं.५।७** रतः (रितम्); **नास्मृ.७।८** शुल्का (भक्त्य) दानविदो विदुः (सप्तविध स्मृतम्); **अभा.८६** शुल्का (भुक्ता) दानविदो विदुः (सप्तविधं स्मृतम्); **मिता.२।१७६; अप.२।१७५** च (तु); **व्यक.१४५** दानविदो (सप्तविधं); **स्मृच.१९२; विर.१३३; पमा.३१७** र्थं (र्थे); **स्मृचि.१९; नृप्र.२७** दानविदो विदुः (सप्तविध स्मृतम्); **सवि.२८४** नृप्रवत्; **व्यप्र.३१०; व्यउ.८५; व्यम.८९** र्थं च (र्थाय); **विता.६०७; राकौ.४७१** व्यमवत्; **सेतु.१५२; समु.९६; विच.२१.**

प्रत्युपकारतः उपकृतवते प्रत्युपकाररूपेण दत्त, स्त्रीशुल्कं परिणयनार्थं कन्याज्ञातिभ्यो यद्दत्तं, यच्चानुग्रहार्थमदृष्टार्थं दत्तं तदेतत्सप्तविधमपि दत्तमेव न प्रत्याहरणीयम् । +मिता.२।१७६

(३) यच्च शुल्कादिनिमित्तं राजकृताधिकारिपुरुषादिभ्यो यच्च स्त्रीभ्यो भार्यादिभ्यो यच्चानुग्रहार्थं दीनानाथादिभ्यस्तद्दान दानविदो विदुः । अप.२।१७५

(४) एतच्च बृहस्पतिना श्रद्धादत्तत्वेनाभिहितम् । अनुग्रहसंप्रीत्योस्तुष्टितोऽभेदमादाय नारदीयं सप्तत्व, भेदमादाय वार्हस्पत्यमष्टत्वाभिधानमित्यविरोधः । इतरेतरव्यवच्छेदे न तात्पर्यम् । ×विर.१३३

(५) सर्वत्रानुपहत्य पुत्रादीननुमान्य चेति द्रष्टव्यम् । नाभा.५।७

सप्तविध दत्तम्

मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि ।
दीनानाथविशिष्टेभ्यो दत्तं तु सफलं भवेत् ॥

उपकारिणि परोपकारपरे । सफल फलातिशयोपेतमित्यर्थः । स्मृच.१९३

षोडशविधमदत्तम्

अदत्तं तु भयक्रोधशोकवेगरुगन्वितैः ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥
बालमूढास्वतन्त्रार्तमत्तोन्मत्तापवर्जितम् ।
कर्ता ममायं कर्मेति प्रतिलाभेच्छया च यत् ॥

+ पमा., सवि. मितावत् । × पदार्थो मितावत् ।

(१) **स्मृच.**१९३; **व्यप्र.**३११; **समु.**९६.

(२) **नासं.**५।८ शोकवेगरुग (वेगशोकरुजा), **नास्मृ.**७।९ शोकवेग (द्वेषशोक) परी (परि); **अभा.**८७ शोकवेगरुग (द्वेषशोकरुजा), **मिता.**२।१७६; **अप.**२।१७५; **व्यक.**१४६, **स्मृच.**१९३; **विर.**१३४ शोकवेग (कामशोक); **पमा.**३१७ भय (क्षय) शोक (शोका); **विचि.**६१ विरवत्; **स्मृचि.**१९ परी (परि); **दवि.**३३०; **नृप्र.**२७, **सवि.**२८५-२८६ रुग (सम); **चन्द्र.**४४ शोकवेग (लोभमोह); **वीमि.** २।१७६ विरवत्; **व्यप्र.**३११, **व्यउ.**८५; **व्यम.**८९; **विता.**६०८, **राकौ.**४७१; **सेतु.**१५२-१५३ विरवत्, **समु.**९७; **विच** २१ विरवत्; **विब्य.**३७ विरवत्, बृहस्पतिः.

(३) **नासं.**५।९ मूढास्वतन्त्रार्त (प्रमूढास्वतन्त्र); **नास्मृ.** ७।१०, **अभा.**८७, **मेधा.**८।२१२ ममाय (ह्मेतत्) तृतीयपाद.; **मिता.**२।१७६ ममायं (ममेद), **अप.**२।१७५ जितम् (जितैः) यत् (तत्); **व्यक.**१४६ जितम् (जितैः) च (तु) शेष नासवत्, **स्मृच.**१९३; **विर.**१३४ न्त्रार्त (न्त्रैश्च) जितम् (जितैः), **पमा.**३१८; **विचि.**६१ न्त्रार्त (न्त्रार्ति) जितम् (जितैः) च (ऽपि), **स्मृचि.**१९, **नृप्र** २७ मितावत्, **सवि.**२८६ जितम् (जितैः), **चन्द्र.**४४ न्त्रार्त (न्त्रस्त्री) जितम् (जितैः), **वीमि.**२।१७६ सविवत्, **व्यप्र.**३११, **व्यउ.**८५, **व्यम** ८९, **विता** ६०८, **राकौ.**४७१, **सेतु.**१५३ सविवत्, **विभ.**६० पू., **समु.**९७; **विच** २१ जितम् (जितैः) च (ऽपि), **विब्य.**३७ सविवत्, बृहस्पति.

(१) **नासं.**५।१० तदपि स्मृतम् (तत्प्रकीर्तितम्), **नास्मृ.** ७।११ चाधर्म (वा धर्म); **अभा** ८७; **मेधा.**८।२१२ ज्ञानाद (ज्ञातम) उत्त.; **मिता.**२।१७६ चाधमसहि (वाऽधर्मसयु) तदपि (इति तत्); **व्यक.**१४६ नास्मृवत्; **स्मृच.**१९३; **विर.**१३६, **पमा.**३१८ तदपि (इति तत्); **स्मृचि.**१९-२० चा (वा) (यद्दत्त स्यादभिज्ञानाददत्तमिति तत्स्मृतम्); **नृप्र.**२७ चा (वा) शेषं पमावत्; **सवि** २८६ त्युक्ते (त्युक्त्वा) सहि (संयु) उत्तरार्धे (दत्त यत्स्यादपि ज्ञानाददत्त षोडशात्मकम्), **चन्द्र** ४५ क्ते कार्ये (क्त्वाऽऽचार्ये) सहि (सयु); **व्यप्र.**३११ कार्ये चाध (ऽकार्ये वा ध) तदपि (इति तत्); **व्यउ.**८५ सहि (सयु) तदपि (इति तत्); **व्यम.**८९ चाधर्मसहि (वाऽधर्मसञ्ज्ञि) तदपि (इति तत्), **विता.**५०८ चाधर्म सहि (वा धर्मसञ्ज्ञि) तदपि (इति तत्); **राकौ.**४७१; **समु.**९७.

अपात्रे पात्रमित्युक्ते कार्ये चाधर्मसंहिते ।
यद्दत्तं स्यादविज्ञानाददत्तं तदपि स्मृतम् ॥

(१) दुष्टेन साधुरटव्या प्रामोऽभिहितः । द्रम्माणा शत ददासि ततो जीवसि अन्यथा म्रियसे । सोऽपि भयाद्ददति, दास्यामीत्येव भयप्रतिश्रुतमदत्तमिति विज्ञेयम् । एतदेकम् । तथा गृहस्थो दूरदेशागतः सहसैव पत्न्या आसने प्रतिपादिते क्रोधाद् गृहोपरि द्वेषे च समुत्पन्ने वदति । ब्राह्मण यन्मदीयगृहे किंचिदासनशयनीयादिक च पश्यसि तत्सर्व मया तव दत्तम् । इत्युक्तेऽपि क्रोधद्वेषदत्तमदत्तमिति विज्ञेयम् । एतद्द्वितीयम् । अत्यन्तेष्टमरणाच्छोकार्तो वदति, अह वन यास्याम्यद्यैव स्वगृह तु मया ब्राह्मणेभ्यो दत्तमिति । एतत्तृतीय ज्ञेयम् । तथा रुजान्वितः संनिपाततो वदति, ब्राह्मण मया तव सुवर्ण-

शतं दत्तम्। एतद्युजान्वितदत्तमदत्त चतुर्थम्। तथा व्यवहारको यः सभ्य वदति, यदि मम जय ददासि ततोऽहं लब्धया शत दास्यामीत्येतदुत्कोचप्रतिश्रुत दत्तमप्यदत्त पञ्चमम्। तथा हास्येन यद्दत्त तत्परिहासदत्तमपि अदत्त षष्ठम्। तथा यस्य कामुकस्य चूतमञ्जरी नाम वेश्या प्राणप्रियतरा...त्रिंशद्योजनस्थितठक्कुरस्य समर्पिता। त च विरहाग्निदीप्त कश्चिदागत्य वदति। यद्यहं तव चूतमञ्जरी दर्शयामि ततः किं ममाद्गुलीयक(पट्टयुगलिका) ददासि। स च वदति। अवश्य प्रयच्छामि। अथ च तव प्रतिभूः। इति...प्रच्छन्ना प्रकटीकृत्य चूतवृक्षसक्ता मञ्जरी दर्शिता। इति व्यत्यासच्छलयोगतो दत्तमदत्त सप्तमम्। व्यत्यासः व्यपदेशः।तत्सहित छल व्यत्यासच्छलमिति।तथा बालेन दत्तमदत्तम्। तथा मूढेन दत्तमदत्तं नवमम्। तथा अस्वतन्त्रेण दत्त दशममदत्तम्। तथा देशको नदीपूरनीयमान आर्तो यद्वदति, यो मा म्रियमाण रक्षयति तस्याहं सुवर्णशत दास्यामीति प्रतिश्रुतेऽपि तेनार्तेन दत्तमदत्तमेकादशम्। सुरामत्तेनापवर्जित दत्त परित्यक्तमदत्त द्वादशम्। उन्मत्तेन सग्रहेण अपवर्जित दत्तमदत्त त्रयोदशम्। तथा कर्ता ममाय कर्मेति किंचिदनागतमेव समर्पित पुनरसौ विज्ञानी तस्यानाहितः संजातः (?) एतदपि प्रतिलाभेच्छया दत्त चतुर्दशम्। तथा शूद्रस्य यज्ञोपवीत दृष्ट्वा अज्ञानाद् ब्राह्मणबुद्ध्या दान दत्तमेतदपात्रमित्युक्ते दत्तमदत्त पञ्चदशम्।तथा देवार्चकस्य सुवर्णमुखकोशदेशोपशोभार्थं द्रव्य यद्दत्त, यावता द्यूतवेश्याद्यधर्मेण तद्विनाशितुमुद्यतः। ईदृशेऽकार्ये वा धर्मसंहिते दत्तमदत्तं षोडशम्। एवमेतद् सोदाहरण षोडशप्रकारमपि दत्तमुपवर्णितमिति। अभा.८७-८८

(२) भयेन बन्दिग्राहादिभ्यो दत्तम्। क्रोधेन पुत्रादिवैरनिर्यातनायान्यस्मै दत्तम्। पुत्रवियोगादिनिमित्तशोकावेशेन दत्तम्। उत्कोचेन कार्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तम्। परिहासेनोपहासेन दत्तम्। एकः स्व द्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति दानव्यत्यासः। छलयोगतः शतदानमभिसंधाय सहस्रमिति परिभाष्य ददाति। बालेनाप्राप्तषोडशवर्षेण। मूढेन लोकवादानभिज्ञेन। अस्वतन्त्रेण पुत्रदासादिना। आर्तेन रोगाभिभूतेन। मत्तेन मदनीयमत्तेन। उन्मत्तेन वातिकाद्युन्मादग्रस्तेन अपवर्जित दत्तम्। यथायं मदीयमिद कर्म करिष्यतीति प्रतिलाभेच्छया दत्त, अचतुर्वेदाय चतुर्वेदोऽहमित्युक्त्वते दत्तम्। यज्ञं करिष्यामीति धनं लब्ध्वा यतादौ विनियुञ्जानाय दत्तमित्येव षोडशप्रकारमपि दत्तमदत्तमित्युच्यते। प्रत्याहरणीयत्वात्। आर्तदत्तस्यादत्तत्व धर्मकार्यव्यतिरिक्तविषयम्। *मिता.२।१७६

(३) व्यत्यासच्छलयोगतः प्रच्छन्नतया ग्रहीतु परप्रतारणार्थं जनसमक्षे दत्तम्। ×स्मृच.१९३

(४) परिहास उपहासो दानाभिसधिमन्तरेण दानबोधकवचनमिति यावत्। व्यत्यासोऽन्यस्मै दातव्यस्यान्यस्मै दानमन्यस्मिन् दातव्ये अन्यस्य वा यद्दान, छल बहु परिभाष्यात्पदानं,छल प्रमाद इति प्रकाशकारादयः। मूढः स्वभावादेव कार्याकार्यविवेकशून्यः। अपवर्जितो बन्धुवहिष्कृतः। प्रतिलाभेच्छया सप्रदानकर्तृकामत्यवचनमूढतया। कामधेनुमिताक्षराभ्या बालमूढास्वतन्त्रार्तेति लिखित,व्याख्यात च मिताक्षराया आर्तो रोगाभिभूत इति। रुगन्वितश्चासाध्यरोगान्वित इति विवृतम्। कामधेन्वादावपवर्जितमिति पाठः। अपवर्जित दत्तमिति मिताक्षराहलायुधाभ्या व्याख्यात च। विर.१३४–१३५

(५) रुक् उपतापः भयादिकृतो य उपतापस्तदन्वितेत्यिन्वयः। ×व्यप्र.३११

अदेयदातृप्रतिग्रहीतारौ दण्ड्यौ

गृह्णात्यदत्तं यो मोहाद्यश्चादेयं प्रयच्छति।
दण्डनीयावुभावेतौ धर्मज्ञेन महीक्षिता॥

* अत्रत्यमिताक्षरायाः कश्चिदंशो निपतित इति भाति रत्नाकरात्। पमा. रत्नाकरोद्धृतानुसारेण मितावत्।

× शेष मितावत्।

(१) **नारं.**५।११ मोहा (लोभा) उत्तरार्धे (अदत्तादायको दण्ड्यस्तथादेयस्य दायकः); **नास्मृ.**७।१२ मोहा (लोभा) उत्तरार्धे (अदेयदायको दण्डयस्तथाऽदत्तप्रतीच्छकः); **शुनी.** ४।८।१५ (अदत्त यश्च गृह्णाति सुदत्त पुनरिच्छति); **अभा.** ८८ नास्मृवत्; **मिता.**२।१७६ नास्मृवत्; **व्यक.**१४६-१४७; **स्मृच.**१९०; **विर.**१३७; **पमा.**३१४ मोहा (लोभा): ३२१ नास्मृवत्; **विचि.**६३ क्षिता (भृता); **स्मृचि.**२० नास्मृवत्; **नृप्र.**२६; **सवि.**२८१ (=) क्षिता (भुजा): २८८ यो मोहाद् (लोभाद्यो); **चन्द्र.**४६ विचिवत्; **व्यप्र.**३०७; **व्यउ.**८४ देयं (दत्त); **विता.**६०१ उत्तरार्धं नास्मृवत्; **सेतु.**

(१) अत्रैवमेतत्षोडशप्रकारमपि दत्तमदत्तमुक्तम् । तद्यो लोभात्प्रतिगृह्णाति । यश्चाष्टप्रकारमप्यदेयं प्रयच्छति एतौ द्वावपि अदेयदायको अदत्तप्रतीच्छको राज्ञा दण्ड्याविति । इति नारदीयसंहितायाः कल्याणविवरणे दत्ताप्रदानिकं नाम व्यवहारपदं चतुर्थं चतुर्भेदम् । अभा.८८

(२) अदत्तग्रहणमदेयस्याप्युपलक्षणार्थम् । तेनादेयप्रतिग्रहीतुरदत्तप्रतिग्रहीतुश्च दण्डोऽनेन वचनेनोक्त इति मन्तव्यम् । गृहीतस्य च परावर्तनमपि महीक्षिता कार्यमित्यदत्तादेयग्रहणाद्गम्यते । अदत्तेनादेयेन च दानसिद्ध्यभावात्परस्वत्वानुपपत्तेः । *स्मृच.१९०

बृहस्पतिः

प्रकरणप्रतिज्ञा । अष्टविधमदेयम् ।

एषाऽखिलेनाभिहिता संभूयोत्थाननिष्कृतिः ।
अदेयदेयदत्तानामदत्तस्य च कथ्यते ॥
सामान्यं पुत्रदाराधिसर्वस्वन्यासयाचितम् ।
प्रतिश्रुतं तथाऽन्यस्य न देयं त्वष्टधा स्मृतम् ॥

सामान्य स्वमनेकस्वामिकं रथ्याद्यत्र विवक्षितं, न त्वविभक्तकुटुम्बस्वामिकं कनकादिकं, तस्य देयत्वेन वक्ष्यमाणत्वात् । यद्यप्यनेकस्वामित्वेन रथ्यादिकमपि कुटुम्बधनतुल्यं तथापि स्वतन्त्रानेकस्वामिकत्वाददेयम् । तथा हि न तावत्स्वाम्यन्तरानुमतिमन्तरेण केनचित्स्वामिना तद्दातुं शक्यते, स्वतन्त्रबहुस्वामिके रथ्यादावनुमतिर्दुर्घटैव । कुटुम्बधने तु स्वतन्त्रकतिपयस्वामिकेऽनुमतिः सुलभैवेति भेदः ।

ननु पुत्रदारसर्वस्वेषु पित्रादिस्वामिकेषु दानार्हेषु कथमदेयत्वम् । उच्यते । यथा यजमानधनानामपि माषाणाम् 'अयज्ञिया वै माषा' इतिनिषेधश्रुतेरयज्ञियत्वं तथा पुत्रदारसर्वस्वानि स्वभूतान्यपि 'देयं दारसुताद्दते । नान्वये सति सर्वस्वम्' इत्यादिदाननिषेधकस्मृतिबलादेयानि । आधिन्यासयाचितकेषु त्वदेयत्वं स्वत्वाभावादेवेति मन्तव्यम् । अन्यस्मै प्रतिश्रुतमन्यस्मै वाचा दत्तं यद्यपि वाग्दाने स्वत्वं नापैति तथाऽपि 'नान्वये सति सर्वस्वं, यच्चान्यस्मै प्रतिश्रुतमिति'निषेधस्मृतिबलात्सर्वस्ववददेयं प्रतिश्रुतमपीति मन्तव्यम् । सर्वस्वस्याप्यदेयत्वमविभक्तान्वयद्रव्यसंयुक्तस्यैव दातुस्तस्यैव दाननिषेधात् । तेन स्वसंतानविहीनस्य स्वसंतानाय दत्तदायस्य वा सर्वस्वं देयम् ।

*स्मृच१८९

देयम्

कुटुम्बभक्तवसनादेयं यदतिरिच्यते ।
मध्वास्वादो विषं पश्चादातुर्धर्मोऽन्यथा भवेत् ॥

(१) भक्तं भोजनम् । वसनमाच्छादनम् । धनधान्यादिद्रव्यमत्र यत्पदेनोक्तम् । स्मृच.१९०

(२) अत्र 'दातुर्धर्मोऽन्यथा भवेत्' इति विहिताकरणाद्धर्मसिद्धिर्न भवतीति न । किन्तु प्रतिषिद्धाचरणादधर्मोऽपि । दानसिद्धिस्तु स्वे भवत्येव । दृष्टस्य स्वत्वस्य कूटतकारणसत्त्वात् । तेन तन्नाच्छेत्तुं शक्यत इत्यस्वे एव दानानिष्पत्तिः । एव स्थावरेऽपीति स्मृतिसारः । संमत्यपेक्षा तु मध्यग एव नामध्यगे । विचि.५७-५८

---

* पमा., व्यप्र. स्मृचवत् ।

१५५ यश्चा (यश्चात्) प्रय (प्रतीं) क्षिता (भृता); **समु.**९३, **विच.**२३ विचिवत्.

(१) **अप.**२।१७५; **स्मृच.**१८९; **विर** १२७, **पमा.** ३१२ दत्तस्य (दत्ताना); **व्यप्र** ३०५; **सेतु.**१४७; **समु.**९३.

(२) **अप.**२।१७५ धिसर्वस्व (दि सर्वस्व), **व्यक.**१४४ अपवत्; **स्मृच.**१८९ मान्य (मान्य) स्य न (स्येत्य); **विर.** १२७, **पमा** ३१३ दारादि (दारादि) तथा (अथा); **विचि** ५५ मान्य (मान्य), **स्मृचि.**१९ मान्य (मान्य) वंस्व (वंस्व), **नृप्र.**२६, **सवि.**२७७ अपवत्; **चन्द्र** ४० मान्य (मान्य) न्यस्य (न्यस्मिन्); **वीमि.**२।१७६ मान्यं (मान्य); **व्यप्र** ३०६ वंस्व (वंस्व) चितम् (चिते) तथा (अथा); **व्यउ** ८४ राधि (रादि) वंस्व (वंस्व) तथा (अथा); **विता.** ६०० धिसर्वस्व (दि सर्वस्व) तथा (अथा) स्मृतम् (मतम्); **सेतु.**१४७ मान्यं (मान्य) वंस्व (वंस्व); **समु.**९३ स्मृचवत्; **विच.**१३ न्यस्य (न्यस्मै) त्वष्ट (अष्ट): ५१ उत्तरार्धं (अदेयान्याहुरष्टैव यच्चान्यस्मै प्रतिश्रुतम्) मनुः; **विव्य.**३६ मान्य (मान्य).

* विचि. स्मृचवत् ।

(१) **अप.**२।१७५; **व्यक.**१४५; **स्मृच.**१९० पू.; **विर.**१२९; **विचि.**५७; **चन्द्र** ४१; **व्यप्र.**३०८ पू.; **व्यम.** ८९ पू.; **विता.**६०१ पू.; **सेतु.**१४९; **समु.**९४ पू.; **विच.**१७; **विव्य.**३६-३७ नारदः.

सप्तागमाद्गृहक्षेत्राद्यद्यत् क्षेत्रं प्रदीयते ।
पित्र्यं वाथ स्वयम्प्राप्तं तद्दातव्यं विवक्षितम् ॥

(१) सप्तभ्य आरामादिभ्यो यद्यत्प्रदीयतेऽधिकं भवति तद्दातव्य विवक्षितमित्यर्थः । सप्तागमाद्गृहक्षेत्राद्यद्यत्क्षेत्र प्रदीयत इति च पाठे सप्तविधशौर्याद्यागमप्रकारलब्धाद्गृहक्षेत्रादुद्धृत्य दातव्यम् । न त्वनागमम् इत्यर्थः । +अप.२।१७५

(२) क्षेत्रग्रहणमुपलक्षणम् । पित्र्य वशपरम्परायातम् । स्वयम्प्राप्त स्वयमर्जितम् । पित्र्यस्वयम्प्राप्तयोरुपादानं क्रीतादीनामुपलक्षणार्थम् । पित्र्य वा स्वयम्प्राप्त वा यद् गृहक्षेत्रादिक प्रदीयते तत्सप्तागमान्विताद् गृहक्षेत्रादुद्धृत्य दातव्यमिति स्मृतिशास्त्र विवक्षितमित्यर्थः । अत्र सप्तागमाद्गृहक्षेत्रादित्यभिधान गृहक्षेत्रादिदान कुटुम्बपर्याप्ते सागमके गृहक्षेत्राद्यन्तरे सत्येव नान्यथेत्येवमर्थम् । व्यप्र.३०८

स्वेच्छादेयं स्वयम्प्राप्तं बन्धाचारेण बन्धकम् ।
वैवाहिके क्रमायाते सर्वदानं न विद्यते ॥

(१) बन्धकमाधिस्तद्बन्धाचारेणाऽऽधिरूपेण देयम् । तद्विवाहलब्ध चेत्तस्या भार्याया सत्या सर्वमदेयम् । तथा पितामहादिक्रमायातं पुत्रसद्भावे । अप.२।१७५

(२) स्वार्जित त्वविभक्तधनैरननुज्ञातमपि देयम् । 'स्वय प्राप्तमिति तेनैवाभिहितत्वात् । एव च स्वार्जितं स्थावरमपि सप्ताधिक ज्ञात्यननुज्ञात देयम् । *स्मृच.१९१

(३) बन्धाचारेणेति बन्धक यथा स्वसबन्धि तथा परस्याऽपि कार्यम् । तेनायमर्थः । इद वसु मयि बन्धकमसि मया त्वयि दीयते त्वयाऽपि बन्धकाङ्क गृहीत्वा एतत्स्वामिनि देयमित्यर्थः । निचि.५९

सौदायिकं क्रमायातं शौर्यप्राप्तं च यद्भवेत् ।
स्त्रीज्ञातिस्वाम्यनुज्ञातं दत्तं सिद्धिमवाप्नुयात् ॥

(१) यत्सौदायिक विवाहलब्धं तत्तया भार्ययाऽनुज्ञात देयम् । क्रमायात चाविभक्तधनैर्ज्ञातिभिः । भृत्येन सता युद्धे लब्ध स्वामिनाऽनुज्ञातमित्यर्थः । अप.२।१७५

(२) स्त्रियाऽनुज्ञात सावशेष देयम् । *स्मृच.१९१

अविभक्ता विभक्ता वा दायादाः स्थावरे समाः ।
एको ह्यनीशः सर्वत्र दानाधमनविक्रये +॥

प्रतिग्रहीतृनारतम्येन दानमहिमनारतम्यम्

शूद्रे त्वेकगुणं दानं वैश्ये द्विगुणमेव च ।
क्षत्रिये त्रिगुणं प्राहुः ब्राह्मणे षड्गुणं (भवेत्)
स्मृतम् ॥
श्रोत्रिये तच्च साहस्रं उपाध्याये तु तद्द्वयम् ।
आचार्ये त्रिगुणं ज्ञेयमाहिताग्निषु तद्द्वयम ॥
आत्मिके शतसाहस्रं अनन्तं त्वग्निहोत्रिणि ।
सोमपे शतसाहस्रमनन्तं ब्रह्मवादिनि ॥
स्त्रीधनं स्त्रीस्वकुल्येभ्यः प्रयच्छेत्तं तु वर्जयेत् ।
कुल्याभावे तु बन्धुभ्यस्तदभावे द्विजातिषु ॥

अष्टविध दत्तम्

भृतिस्तुष्टया पण्यमूल्यं स्त्रीशुल्कमुपकारिणे
श्रद्धानुग्रहसंप्रीत्या दत्तमष्टविधं स्मृतम् ॥

* शेष अपवत् । पमा , व्यप्र, स्मृचवत् ।

+ व्याख्यासग्रह. स्थलादिनिर्देशश्च दायभागे द्रष्टव्यः ।

+ स्मृच., पमा. अपवत् । * पमा. स्मृचवत् ।

(१) **अप.**२।१७५ (=) गमा (रामा) प्रदा (प्रचा) व्य (त्रा), **व्यक.**१४५; **स्मृच.**१९० गमाद् (राम) प्रदा (प्रचा); **विर.**१३०; **विचि.**५८ यद्यत् (त्स्व स्व) वाथ (चाथ), **चन्द्र.** ४३ यद्यत् (यस्य); **व्यप्र** ३०८ प्रजापतिबृहस्पतौ, **व्यउ.** ८५; **सेतु.**१५०; **समु** ९४ स्मृचवत्; **विच.**१७, **विभ्य.**३७.

(२) **अप.**२।१७५ (=); **व्यक.**१४५, **स्मृच.**१९१ उत्त., **विर.**१३० सर्व (सर्वे); **पमा.**३१७ विरवत्, उत्त ; **विचि.** ५८; **चन्द्र.**४२ हिके (हिक) याते (यात) उत्त .४३ पू.; **व्यप्र.**३०८ पू.; **विता.**६०२ पू, ६०४ उत्त., क्रमेण कात्यायनः; **सेतु.**१५० बन्धा (बद्धा); **समु.**९४ उत्त.; **विच.**१७-१८ विरवत्.

(१) **अप.**२।१७५ (=) यिक (यिक), **व्यक.**१४५; **स्मृच.**१९१ शौर्य (शौर्यं); **विर.**१३० द्भवेत् (द्धनम्) ज्ञात (मत), **पमा.**३१७, **विचि.**५८ विरवत्, **सवि.**२८५ मनु.; **चन्द्र.**४२ विरवत्, **व्यप्र.**३०९, **व्यउ.**८५; **सेतु** १५० (=) ज्ञात (मत); **समु.**९४; **विच.**१८,५३ सेतुवत् .

(२) **सवि.**२८४; **समु.**९७ त्वेक (सम).

(३) **सवि.**२८४; **समु.**९७ तच्च (शत).

(४) **सवि.**२८४; **समु.**९७ स्मिके (स्मशे) त्रिणि (त्रिणे).

(५) **सवि.**२८४; **समु.**९७ स्वकुल्ये (सकुले) जयेत् (जिता).

(६) **व्यक.**१४५ स्मृतम् (विदुः); **स्मृच.**१९३ भृति. (भृत्या) सप्री (ण प्री) स्मृतम् (विदुः), **विर** १३३ व्यकवत्;

भृतिर्वेतनम्। तुष्ट्या नटादिषु दत्तम्। पण्यमूल्यं विक्रेतरि दत्तम्। स्त्रीशुल्क विवाहशुल्कं कन्याप्रदे दत्तम्। उपकारिणे प्रत्युपकारत्वेन दत्तम्। अनुग्रहेण पुत्रादिभ्यो दत्तम्। संप्रीत्या मित्रादिषु दत्तम्। प्रीतिदानस्य पूर्ववैवान्तर्भावात्सप्तत्वम्। विचि.६०-६१

षोडशविधमदत्तम्

क्रुद्धहृष्टप्रमत्तार्तबालोन्मत्तभयातुरैः।
मत्तातिवृद्धनिर्धूतैः संमूढैः शोकिरोगिभिः।
नर्मदत्तं तथैतैर्यत्तददत्तं प्रकीर्तितम्॥

प्रमत्तेन दुर्ग्रहगृहीतेन, निर्धूतो अवधूतः, नर्मदत्त परिहासेन दत्त, आर्तदत्तस्य अदत्तत्व धर्मकार्यव्यतिरिक्तविषयम्। स्मृच.१९४

पुनर्लभ्यं दत्तम्। अदेयदातृप्रतिग्रहीतारौ दण्ड्यौ।

प्रतिलाभेच्छया दत्तमपात्रे पात्रशङ्कया।
कार्ये चाधर्मसंयुक्ते स्वामी तत्पुनरामुयात्॥
अदत्तभोक्ता दण्ड्यः स्यात् तथाऽदेयप्रदायकः॥

काात्यायनः

देयमदेय च

विक्रयं चैव दानं च न नेयाः स्युरनिच्छवः।
दाराः पुत्राश्च सर्वस्वमात्मन्येव तु योजयेत्॥

विचि.६०; **स्मृचि.**१९; **सवि.**२८५, **वीमि.**२।१७६ श्रद्धा (शुद्धा); **व्यप्र.**३११ अष्ट (सप्त) स्मृतम् (विदुः), **सेतु.**१५२; **समु.**९६ भृति (भृत्या) स्मृतम् (विदु); **विच** २०

(१) **अप** २।१७५ शोकिरो (शोकेव) नर्म (नन्द), **व्यक** १४६ हृष्ट (कृष्ट) शोकि (शोक), **स्मृच.**१९४ शोकिरो(शोकेव), **विर.**१३६ हृष्ट (कृष्ट) मूढै. (मूढ) त्तददत्तं (ददत्त तत्), **विचि.**६२, **दीक.**४९ हृष्ट (कृष्ट) शोकिरो (शोकेव), **चन्द्र** ४६ समू (प्रमू) शोकिरो (शोकरा) अन्त्यार्धद्वयम्, **सेतु.**१५४ **दृष्ट** (कृष्ट)समू (प्रमू) त्तददत्त (ददत्त तत्), **समु.**९८ शोकिरो (शोकेव) तथैतै (तथान्यै), **विच.**२३.

(२) **अप.**२।१७५ चाधर्म (वा धर्म), **व्यक.**१४६, **स्मृच.**१९४; **विर.**१३६, **विचि.**६३; **दीक.**४९ कार्ये चा (तथैवा); **वीमि** २।१७६ अपवत्; **व्यप्र.**३१२; **व्यउ.**८६ कार्ये चा (कार्य वा) युक्ते (युक्त); **विता** ६१०-६११; **सेतु** १५५; **समु.**९८; **विच.**२४.

(३) **सवि.**२८८; **समु.**९८ स्मृत्यन्तरम्.

(४) **अप.**२।१७५ न्ये (नै); **व्यक.**१४४ अपवत्; **स्मृच.** १९१ (सर्व ...येत्०); **विर.**१२८, **पमा.**३१५, **दीक.**४८

(१) यथा दारा विक्रय दानं वा भर्त्रा न नेयास्तथा मातापितृभ्या पुत्रा अपि मातृपितृवियोगानिच्छवो न देयाः स्युरित्यर्थः। 'न देयाः स्युरनिच्छव' इत्येतदनापद्विषयम्। +स्मृच.१९१

(२) तेषा त्रयाणा विमतावेतत्त्रय स्वयमेवोपभोक्तव्यम्। तेषामनुमतौ पुनस्तेषा दानमित्यर्थः। सर्वस्वमनुमतावपि न देय तत्सत्वमात्र एव दाननिषेधादित्यन्ये। पुत्रानुमतावेव वसिष्ठः — 'शुक्रशोणितसंभवः पुत्रो मातापितृनिमित्तकः तस्य दानविक्रयपरित्यागेषु मातापितरौ प्रभवतः'। तत्रापि विशेषः एकस्मिन्पुत्रे इत्याह स एव—'न त्वेक पुत्र दद्यात्प्रतिगृह्णीयाद्वा स हि सतानाय पूर्वेषा न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुः' एकः पुत्रः स्वदानेऽनुमतोऽपि न देयः। 'स हि' इति हेतुमन्निगदस्वरसात्। विचि.५६-५७

आपत्काले तु कर्तव्यः दानं विक्रय एव वा।
अन्यथा न प्रवर्तेत इति शास्त्रविनिश्चयः॥

अत्र पूर्ववाक्ये(सामान्यमित्यादि दक्षवचने)दारपुत्रयोरापत्सु कष्टास्वपि दानादिनिषेधात् सर्वस्वस्य चान्वये सति कष्टास्वप्यापत्स्वेतन्निषेधात् आपत्काले तु कर्तव्यमित्यनेन दानादिरोधनं दारपुत्रयोरिच्छामादाय सर्वस्वस्य चान्वयसमतिमादाय, अनिच्छुदारपुत्रयोरन्वयाननुमत्या च सर्वस्वस्य न दानादित्यविरोधः। ×विर.१२८-१२९

स्वं द्रव्यं दीयमानं च यः स्वामी न निवारयेत्।
ऋक्थिभिर्वा परैर्वाऽपि दत्तं तेनैव तद्भृगुः॥

+ व्यप्र. स्मृचवत्। × चन्द्र विरवत्।

ने (दे) पृ, **विचि.**५६; **चन्द्र.**४०; **वीमि.**२।१७५ श्र (स्तु); **व्यप्र.**३०७ अपवत्; **बाल.**२।१३० पू.; **सेतु.**१४८; **समु.**९४, **विच.**१४ दीकवत्, पृ.; **विव्य.**३६.

(१) **अप.**२।१७५; **व्यक.**१४४, **स्मृच.**१९१ तेंत (तंन्त), **विर.**१२८ प्र (तु) श्रयः (णैयः); **पमा.**३१५ तु (ऽपि); **दीक.**४८ पृ.; **विचि.**५६; **स्मृचि.**१९ एव वा (मेव च); **नृप्र.**२७ स्मृचवत्; **चन्द्र.**४० पृ.; **वीमि.**२।१७५ पू.; **व्यप्र.**३०७; **व्यउ.**८४ (=), **बाल.**२।१३५ (पृ. २३८) वर्तेत (कर्तव्य); **सेतु.**१४८; **समु.**९४ स्मृचवत्; **विच.**१४; **विव्य.**३६ तु (प्र) पृ.

(२) **दात.**१७८; **समु.**४६ स्व (यद्); **विच.**९२ नं च यः (नस्तु यत्), **विव्य.**१८.

सर्वस्वं गृहवर्जं तु कुटुम्बभरणाधिकम् ।
यद्द्रव्यं तत्स्वकं देयमदेयं स्यादतोऽन्यथा ॥

(१) इति तत्सप्तानधिकगृहविषयम् । स्वकं स्वकीय यथेष्टविनियोगार्हद्रव्यमिति यावत् । स्मृच.१९०

(२) तद्गृहान्तराभावविषयम् । व्यप्र.३०८

न दारेषु न पुत्रेषु न बन्धुष्वनपेक्षकाः ।
सर्वकार्येषु पुरुषाः स्वद्रव्ये प्रभविष्णवः ॥
अतश्च सुतदाराणां वशित्वं त्वनुशासने ।
विक्रये चैव दाने च वशित्वं न सुते पितुः ॥

स्वेच्छया यः प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहम् ।
न दद्याद्दण्डवद्दाप्यः प्राप्नुयात्पूर्वसाहसम् ॥

ब्राह्मणाय प्रवृत्तधर्मपरित्यागरहितायेति शेषः । स्मृच.१९२

प्रत्युपकारकभृतिलक्षणम्

भयत्राणाय रक्षार्थं तथा कार्यप्रसाधनात् ।
अनेन विधिना लब्धं विद्यात्प्रत्युपकारकम् ॥

भयत्राणाय भयाद्रक्षणाय । रक्षार्थं बालधनादिरक्षणार्थम् । कार्यप्रसाधनाद्विवाहादिसंपादनेन विधिना लब्धं भयत्राणादिलक्षणोपकारकरणाल्लब्धमिति यावत् । स्त्रीशुल्कं परिणयनार्थं कन्याज्ञातिभ्यो दत्तम् । अनुग्रहार्थं परोपकारः कर्तव्य इति विधिबलाद्दत्तम् । ×स्मृच.१९३

अविज्ञातोपलब्ध्यर्थं दानं यत्र निरूपितम् ।
उपलब्धिक्रियालब्धं सा भृतिः परिकीर्तिता ॥

सप्रयोजनक्रियासंपादनार्थं दत्ता भृतिरुच्यत इत्यर्थः । स्मृच.१९३

प्राणसंशयमापन्नं यो मामुत्तारयेदितः ।
सर्वस्वं तस्य दास्यामीत्युक्तेऽपि न तथा भवेत् ॥

उपकारिणे यदि सर्वस्वमर्प्यते तदा दत्तं न भवति। स्मृच.१९३

दत्तस्य पुनर्हरणम्

कामक्रोधास्वतन्त्रार्तक्लीबोन्मत्तप्रमोहितैः ।
व्यत्यासपरिहासाच्च यद्दत्तं तत्पुनर्हरेत् ॥
यदि कार्यप्रसिद्ध्यर्थं उत्कोचा स्यात्प्रतिश्रुता ।
तस्मिन्नपि प्रसिद्धेऽर्थे न देया स्यात्कथंचन ॥
अथ प्रागेव दत्ता स्यात्प्रतिदाप्यः स तां बलात् ।
दण्डं चैकादशगुणमाहुर्गार्गीयमानवाः ॥

× व्यप्र. स्मृचवत् ।

(१) व्यक.१४५, स्मृच.१९० स्व (स्व) चतुर्थपाद विना, विर.१२९ स्याद (स्यात्त); पमा.३१४; विचि.५७; स्मृचि.१९ धि (दि); नृप्र.२७; सवि.२८३ स्मृचवत्; चन्द्र.४१ स्मृचवत्; व्यप्र.३०८ विरवत्; विता.६०२; सेतु.१४९ त्स्वक (त्स्वय); समु ९४ स्मृचवत्, विच.१७ विरवत्; विव्य.३६.

(२) सवि २८३; समु ९४ क्षका. (क्षिणाः).

(३) अप.२।१७६ श्रुत्य (ज्ञाय); व्यक.१४५; स्मृच.१९२; विर.१३२; विचि.६०; सवि.२८५, चन्द्र.४४; व्यप्र.३१०; व्यउ.८५, व्यम.८९; विता.६०६, सेतु.१५२ यः (यत्), विभ.५१ (=) तृतीयपाद.; समु.९४; विच.२०.

(४) अप.२।१७५; व्यक.१४६ रक (रिक); स्मृच.१९३ रकम् (रत.), विर.१३५ व्यकवत्; व्यप्र.३११, व्यउ.८५, समु.९६ स्मृचवत्.

(१) अप.२।१७५, व्यक.१४६; स्मृच.१९३; विर.१३४; व्यप्र.३१०; व्यउ.८५ ब्ध्य (ब्धा); समु.९६.

(२) अप २।१७५ तस्य (ते प्र); व्यक.१४६, स्मृच.१९३; विर १३४; चन्द्र.४४; समु.९७.

(३) अप.२।१७५ क्लीबो (मत्तो) सप (सात्प); व्यक.१४६; स्मृच.१९४; विर.१३५ सपरिहासाच्च (साच्च परीहासात्), पमा.३१९, विचि.६१ साच्च (साभ्या), स्मृचि.२०; सवि.२८६, चन्द्र.४५ पू.; व्यप्र.३१२ साच्च (राय), व्यउ.८६ व्यप्रवत्, व्यम.९० व्यप्रवत्; विता.६०९ व्यप्रवत्, सेतु.१५३ विचिवत्, समु.९७, विच.२३ विचिवत्; विव्य.३७

(४) अप.२।१७५ यदि कार्य (या तु काम्य) ध्देऽऽ (ध्य); व्यक.१४६ यैप्र (यैस्य); स्मृच.१९४ यदि कार्यप्र (या तु कार्यस्य); विर.१३५ स्यात् (या) शेष व्यकवत्; पमा.३१९ स्मृचवत्; विचि.६१; स्मृचि.२० स्मृचवत्; सवि.२८६ (यत्तु कार्यस्य सिद्ध्यर्थमुत्कोचा सा प्रकीर्तिता) नारदः; चन्द्र.४५; व्यप्र.३१२ यदि (या तु) श्रुता (क्रिया); व्यउ.८६ प्रसि (न सि) शेष व्यप्रवत्; व्यम.९० यदि (यस्तु) यैप्र (यैस्य) चा (चः) ता (तः) या (य), विता.६०९ उत्कोचा (उक्ता वा) पि (प्य) शेष स्मृचवत्; सेतु १५३ पि (थे) ऽर्थे न (तु न); समु.९७ स्मृचवत्; विच.२३ सेतुवत्; विव्य.४७ पि (प्य) या (यः).

(५) अप.२।१७५; व्यक.१४६ त्प्रतिदाप्यः (त्प्रातिदायः)

अत्रार्तेन दत्त धर्मकार्यमन्तरेण दत्त बोद्धव्यम् । 'मुस्थेनार्तेन वा दत्त श्रावित धर्मकारणात् । अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशय' इति कात्यायनवचनात् विर.१३६

उत्कोचलक्षण, तत्सबन्धिदण्डः

[1]स्तेयसाहसिकोद्वृत्तपारदारिकशंसनात् ।
दर्शनाद्वृत्तनष्टस्य तथाऽमत्यप्रवर्तनात् ॥
प्राप्तमेतैस्तु यत्किंचित्तदुत्कोचाख्यमुच्यते ।
न दाता तत्र दण्डयः स्यान्मध्यस्थश्चैव दोषभाक्॥

(१) एतदुक्त भवति । यदि मह्य न प्रयच्छसि तदा त्वत्कृत कथयामीति भीतिमुत्पाद्य स्तेनादिसकाशाद्यत्किंचिद्धनमादत्ते, तथा यदि मह्य न प्रयच्छसि तदा त्वा वारकस्य दर्शयामीति भीतिमुत्पाद्य पलायित-

हुर्गार्गीय (हरत्कोऽपि) वा. (व), **स्मृच.**१९४, **विर** १३६ अथ (तथा) मान (गाल), **पमा** ३१९, **विचि.**६२-६३ णमा (ण प्रा) मान (गाल), **चन्द्र** ४५ ष्य (ंया), **व्यप्र.** ३१२ स ता (ततो), **व्यउ** ८६ व्यप्रवत् , पू , **व्यम** ९० दत्ता (दत्त) स ता (तता), **विता.**६०९ माहुगर्गीयमानवा (ममार्गीय च मानवात्) शेष व्यमवत्, **सेतु** १५४ स ता (सता) ण्ड (त्त) मान (गाल); **समु.**९७, **विच.**२३ मान (गाल), **विड्य.**३७ ण्ड (त्त)

(१) **अप.**२।१७५ दारि (जायि), **व्यक.**१४७ दारि (जायि) नारद.; **स्मृच** १९४ स्तेय (स्तेन) दारि (जायि), **विर.** १३७; **पमा.**३२० स्तेय (स्तेन) शसनात् (सङ्गमात्) नादवृ (नोदवृ); **विचि** ६२ स्तेय (स्तेन); **दवि.**३३१ त्तन (त्तिन) शेष स्मृचवत्, **सवि.**२८६ स्तेय (स्तेन) सिक्रोद्वृत्त (सद्वृत्त) द्वृत्तन (व्रतन), **चन्द्र.**४५ शसनात् (सशयात्), **व्यप्र** ३१२ चन्द्रवत्; **व्यउ** ८६, **व्यम.**९० द्वृत्तनष्टस्य (व्रष्टवृत्तस्य), **विता** ६१०, **सेतु.**१५४, **समु.**९७ विचिवत्; **विच** २१, **विड्य** ३८ स्तेय (स्तेन) शस (शास)

(२) **अप.**२।१७५, **व्यक.**१४७ नारदः; **स्मृच.**१९४; **विर.**१३७ दोषभाक् (दण्ड्यते), **पमा** ३२० त्तदुत्कोचाख्यमु (दुत्कोचाख्य तदु), **विचि.**६२ दाता तत्र (तत्र दाता) श्चैव (स्तत्र), **दवि** ३३१ ख्य (त्र) श्चैव दोष (श्च न दण्ड); **सवि** २८६ पू , नारद., **चन्द्र** ४५ पमावत्, पू , **व्यप्र.**३१२ पमावत्, **व्यउ.**८६ स्थ (म) शेष पमावत्, **व्यम** ९० पमावत्, पू., मनु., **विता.**६१० पमावत्, **सेतु.**१५४ श्चैव (त्तत्र);**समु** ९७;**विच.**२०-२१सेतुवत्,**विड्य.**३८ विचिवत्.

मकाशाद्यत्किंचिदादत्ते, तथा यदि मह्य प्रयच्छसि तदा सत्यं कृतमिति स्वामिनः पुरस्तादसत्यमपि सत्यतया वच्मीत्यनुकूलमुक्त्वा दासादिसकाशाद्यत्किंचिदादत्ते, तत्सर्वमुत्कोचाख्य तद्राज्ञा दात्रे दाप्यम् । उत्कोचापादकग्राहकौ च दण्डनीयाविति । स्मृच.१९४

(२) तत्र मध्यस्थो दापकश्च यो वृत्तः स दण्डनीयः। एकादशगुण ग्रहीतैव दण्डय इति 'यदि कार्यस्ये'त्यादिसहितैतद्वाक्यार्थः । एकादशगुणत्व च स्वीकृतोत्कोचापेक्षया । विर.१३८

[1]नियुक्तो यस्तु कार्येषु स चेदुत्कोचमाप्नुयात् ।
स दाप्यस्तद्धनं कृत्स्नं दमश्चै (देयं चै) कादशाधिकम् ॥
[2]अनियुक्तस्तु कार्यार्थमुत्कोचं यमवाप्नुयात् ।
कृतप्रत्युपकारार्थः तस्य दोषो न विद्यते ॥

प्रतिश्रुत देयम्

[3]स्वस्थेनार्तेन वा दत्तं श्रावितं धर्मकारणात् ।
अदत्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः ॥

व्यासः

प्रतिग्रहीतृनारतम्येन दानमहिमतारतम्यम्

[4]अन्धादिषु शतं दानमनन्तं दुहितुर्भवेत् ।
पित्र्ये शतगुणं दानं सहस्रं मातुरुच्यते ।
भगिन्यां शतसाहस्रं सोदर्ये दत्तमक्षयम् ॥

देवलः

दानाङ्गानि षट्

दाता प्रतिग्रहीता च श्रद्धा देयं च धर्मयुक् ।
देशकालौ च दानानामङ्गान्येतानि षड् विदुः ॥

(१) **सवि.**२८६; **समु.**९७ दम (दम).

(२) **सवि.**२८६; **समु.**९७-९८ यम (यद्य) र्थ. (र्थं).

(३) **मिता.**२।१७६; **अप.**२।१७५दत्त(देय) तु मृ(तन्मृ); **व्यक.**१४७ दत्त (देय) नारदः, **स्मृच.**१९४; **विर.**१३६ स्व (सु); **पमा.**३२०; **विचि.**२४ स्व (सु); **नृप्र.**२७; **सवि.** २८७ तत् (स्यात्), **चन्द्र** २२ तु (ऽपि):४५; **वीमि.**२।४७ वा दत्त (चादेय) : २।१७६ उक्त , **व्यप्र** ३१३ मृते (गृहे); **व्यउ.**८६, **व्यम.**९०; **विता.**६११, **सेतु.**१५४ स्व (सु); **समु** ९८; **विच.**२३ स्व (सु), **विड्य** ३८

(४) **सवि.**२८३; **समु.**९६-९७ पित्र्ये (पित्रे) भगिन्यां (भगिन्याः) सोदर्ये (सोदरे). (५) **विच.**९.

प्रजापतिः

देय क्षेत्रम्

संप्रागमाद्गृहक्षेत्राद्यद्यत् क्षेत्रं प्रदीयते ।
पित्र्यं वाऽथ स्वयं प्राप्तं तद्दातव्यं विवक्षितम् ॥

दक्षः

नव अदेयानि । सफल दानम् ।

सामान्यं याचितं न्यास आधिर्दाराश्च तद्धनम् ।
अन्वाहितं च निक्षेपः सर्वस्वं चान्वये सति ॥
आपत्स्वपि न देयानि नव वस्तूनि पण्डितैः ।
यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः ॥
मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि ।
दीनानाथविशिष्टेभ्यो दत्तं तु सफलं भवेत् ॥

भरद्वाजः

दाननिमित्तानि । धर्मदानार्थदानकामदानव्रीडादान-हर्षदानलौकिकदानानि ।

पण्यं मूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः ।
दानमेकात्मकं प्राहुः तद्भवेत्तोयपूर्वकम् ।
विना तोयप्रदानेन धर्मदानं न विद्यते ॥

अत्र आपस्तम्बः—'सर्वाण्युद (क) पूर्वाणि दानानि' इति । अत्र गौतमः—स्वतिवाच्य भिक्षादान अपूर्व तथाऽतिथिषु चैव धर्मेषु । सवि. २८४

प्रयोजनमवीक्ष्यैव पात्रेभ्यो यत्र दीयते ।
तदर्थदानमित्याहुरैहिकं फलमेव च ॥
दृष्ट्वा प्रयोजनं स्त्रीणां प्रसंगाद्यत्प्रदीयते ।
अनर्हेषु च रागेण कामदानं तदुच्यते ॥
संसदि व्रीडयाऽऽश्रित्य परेभ्यो यत्प्रदीयते ।
व्रीडादानमिति प्राहुः तदानं तत्त्वदर्शिनः ॥
दृष्ट्वा प्रियं तथा श्रुत्वा हर्षाद्यच्च प्रयच्छति ।
हर्षदानं तदित्याहुः दृष्टमेवास्य तत्फलम् ॥
कल्याणे च विपत्तौ च यत्प्रियेषु प्रदीयते ।
दानं लौकिकमित्येवं दृष्टार्थं तत्प्रदीयते ।
अदत्तान्याहुरेतानि दत्तान्यपि मनीषिणः ॥

व्याघ्रः

स्त्रीधनदानविचारः

न दातव्यं न होतव्यं स्त्रीधनं जातु केनचित् ।
पत्यनुज्ञातपूर्वं चेत् स्त्रिया दातव्यमेव तत् ॥

अनिर्दिष्टकर्तृकवचनानि

विश्वजिति सर्वस्वदानम्

विश्वजिति सर्वस्वं दद्यात् । न केसरिणो दद्यात् ।

देयमदेय च

क्रमागतं गृहक्षेत्रं पित्र्यं पैतामहं तथा ।
पुत्रपौत्रसमृद्धस्य न (ह्य) देयमननुज्ञया ॥
प्रतिश्रुत्याप्रदानेन दत्तस्य हरणेन च ।
जन्मप्रभृति यद् दत्तं सर्वं नश्यति भारत ॥

(१) **पमा.**३१६ प्रदी (प्रच), **स्मृचि.**१९ सप्तागमा (सप्तारामा) प्रदी (विधी) ऽथ (यत्), **व्यप्र.**३०८ प्रजापति-बृहस्पती; **विता.**६०२ याज्ञवल्क्यः.

(२) **शुनी.**४।८०४-८०५ राश्च (सश्च), **व्यक.**१४४; **स्मृच.**१९० याचित (याचित) न्यास (न्यासं), **विर.**१२८; **पमा.**३१३ निक्षेप. (निक्षेप), **स्मृचि.**१९, **चन्द्र.**४१ न्यास आधिर्दाराश्च (न्यासमाधिदारांश्च), **व्यप्र.**३०७; **विता.**६०० निक्षेपः (निवेश); **सेतु.**१४८ अन्वाहितं च (आहित चैव) चा (वा) उत्त.; **समु.**९३, **विच.**१४ उत्त.

(३) **शुनी.**४।८०५ पू.; **व्यक.**१४४; **स्मृच.**१९०; **विर.**१२८; **पमा.**३१३; **सवि.**२८१ उत्त.; **चन्द्र.**४१, **व्यप्र.**३०७; **व्यउ.**८४; **व्यम.**८९ उत्त.; **विता.**६०० पू.; **समु.**९३.

(४) **व्यक.**१४६; **विर.**१२४; **दात.**१७७ कारिणि (कारिणे); **सवि.**२८३-२८४ गुरौ (गुरोः) भ्यो (वु) सफलं (फलवद्); **चन्द्र.**४४ तु (च); **सेतु.**१५२; **विच.**२१ दातवत्.

(५) **सवि.**२८४; **समु.**९७ अन्त्यार्धद्वयम्.

(१) **सवि.**२८८, **समु.**९७ वैक्ष्यै (पेक्ष्यै) यत्र (यत्प्र) मेव च (मस्य तु).

(२) **सवि.**२८८ दृष्ट्वा (दृष्ट) त्प्रदी (त्प्रती); **समु.**९७.

(३) **सवि.**२८८, **समु.**९७ याऽऽश्रित्य (या श्रुत्वा).

(४) **सवि.**२८८, **समु.**९७ च्च प्रयच्छति (तु प्रदीयते) तत्फलम् (वै फलम्).

(५) **सवि.**२८८; **समु.**९७ णे च (णेषु) मित्येवं (मित्याहुः) त्प्रदीयते (त्पुनर्भवेत्) अन्त्यार्धद्वयम्.

(६) **मभा.**१८।१.

(७) **सवि.**२८०. (८) **सवि.**२८३.

(९) **नाभा.**५।५.

मत्स्यपुराणम्

प्रतिश्रुत्याप्रदाने दण्डः

प्रतिश्रुत्याप्रदातारं सुवर्णं दण्डयेन्नृपः ॥

शुक्रनीतिः

दानप्रकाराः

[२]देवतार्थं च यज्ञार्थं ब्राह्मणार्थं गवार्थकम् ।
यद्दत्तं तत्पारलौक्यं संविद्दत्तं तदुच्यते ॥
बन्दिमागधमल्लादिनटनार्थं च दीयते ।
पारितोष्यं यशोऽर्थं तु श्रिया दत्तं तदुच्यते ॥
उपायनीकृतं यत्तु सुहृत्संबन्धिबन्धुषु ।
विवाहादिषु चाचारदत्तं ह्रीदत्तमेव तत् ॥
राज्ञे च बलिने दत्तं कार्यार्थं कार्यघातिने ।
पापभीत्याथवा यच्च यत्तु भीदत्तमुच्यते ॥

हारीतः

प्रतिश्रुतार्थप्रदानेन दत्तस्याच्छेदनेन च ।
विविधान्नरकान् याति तिर्यग्योनौ च जायते ॥

[१]वाचा यच्च प्रतिज्ञातं कर्मणा नोपपादितम् ।
ऋणं तद्धर्मसंयुक्तमिह लोके परत्र च*॥

यः पुनः प्रतिश्रुतं न ददाति दत्तं वाऽपहरति तस्य दोषमाह हारीतः—प्रतिश्रुतार्थादानेनेति । प्रतिश्रुतार्थस्तु विना दानेन ऋणवन्नापैतीत्याह स एव—वाचैवेति । यद्धर्मसंयुक्त प्रतिग्रहीतृप्रवृत्तधर्मसंपत्यर्थं वाचा प्रतिज्ञात न पश्चात् समर्पित तदिह परत्र च ऋणवन्नापैतीत्यर्थः । ऋणवदित्यभिधानेन अर्थादप्रदायको दाप्यो दण्डयश्चेत्युक्तम् । स्मृच.१९२

* एतद् हारीतस्य श्लोकद्वय (पृ.७९४) इत्यत्र समुल्लिखितम्। तत्र व्याख्यान स्थलादिनिर्देशश्च न संगृहीत. । अतः पूर्वनिर्दिष्टमपि पुनरत्र संगृहीतम् ।

च्छेद (सच्छेद); **विचि.**६०, **स्मृचि** १९; **सवि.**२८५ श्रुतार्था (श्रुतस्या) विविधान्नरकान् याति (कल्पकोटिशत मर्त्यः) कात्यायनः, **चन्द्र.**४३ च्छेदनेन (पह्नवेन), **व्यप्र.**३१०; **विता.**६०६ स्मृचवत्; **सेतु.**१५१ दत्तस्याच्छे (दत्तस्य छे), **समु.**९४; **विच.**२० सेतुवत्.

(१) **व्यक.**१४५, **विर.**१३२; **विचि.**६० श्रुत्या (श्रुता), **व्यप्र.**३१०; **व्यउ.**८५; **विता.**६०६; **सेतु.**१५२ विचिवत्, **विच.**२०. (२) **शुनी.**३।२०२-२०६. (३) **व्यक.** १४५ श्रुता (श्रुत्वा) स्या (स्यो); **स्मृच.**१९२ स्या (स्यो); **विर.**१३२ श्रुतार्था (श्रुत्याप्र); **दीक.**४९स्या-

(१) **व्यक.**१४५ यच्च (च यत्), **स्मृच.**१९२ वाचा यच्च (वाचैव यत्), **विर.**१३३; **विचि.**६०, **स्मृचि.**१९ व्यकवत्; **सवि.**२८५ वाचा यच्च प्रतिशातं (वचसा यत्प्रतिश्रुत्य), **चन्द्र.** ४३; **व्यप्र.**३१० स्मृचवत्, **विता** ६०६ स्मृचवत्; **सेतु.** १५१; **विभ.**५१ (=); **समु.**९४ सवित्; **विच.**२० (=).

अभ्युपेत्याशुश्रूषा

वेदाः

दासा धनम्

उषस्तमश्यां यशसं सुवीरं दासप्रवर्गं रयिमश्वबुध्यम्[1]॥

हे उष उषोदेवते त रयिं धनमश्याम्। प्राप्नुयाम्। कीदृशम्। यशसं यशसा कीर्त्या युक्तम्। सर्वैः प्रशस्यमित्यर्थः। सुवीरं शोभनैर्वीरैः पुत्रादिभिर्युक्तं, दासप्रवर्गं प्रकृष्टो वर्गः सघः प्रवर्गः। दासाना कर्मकराणा प्रवर्गो यस्मिन् तम्। अनेकैर्भृत्यैरुपेतमित्यर्थः। अश्वबुध्यम्। अश्वा बुद्ध्या बोद्धव्या येन धनेन तादृशम्। ऋसा.

दासा अव्रताः कृष्णाश्च

मनवे शासदव्रतान त्वचं कृष्णामरन्धयत[2]॥

अयमिन्द्रो मनवे मनुष्याय मनुष्याणामर्थाय अव्रतान् शिक्षितवान् कृष्णा त्वच हिंसितवान्। ऋसा.

दासा अभिभवनीया

शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः[3]।

वावृधानः स्तोत्रैर्वर्धमानः शुभ्रस्तेजसा युक्तस्त्वमस्मे अस्माकं दासीरुपक्षपयित्रीर्विश आसुरीः प्रजाः सूर्येण सुष्ठु प्रेरकेण। आयुध हि प्रेरयति त्व युध्यस्वेति। एवरूपेण बाह्वोर्निहितेन वज्रेण सह्याः। अभिभव। ऋसा.

दास. वर्णविशेष.

येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः। श्वघ्नीव यो जिगीवां लक्षमाददर्यः पुष्टानि स जनास इन्द्रः॥

येनेन्द्रेणेमानि विश्वा च्यवना नश्वराणि भुवनानि कृतानि। स्थिरीकृतानि। यश्च दासं वर्णं शूद्रादिकम्। यद्वा दासमुपक्षपयितारमधरं निकृष्टमसुरं गुहा गुहाया गूढस्थाने नरके वाकः। अकार्षीत्। लक्ष लक्ष्य जिगीवान्। जितवान् योऽर्योऽरेः। शत्रोः सबन्धीनि पुष्टानि समृद्धान्यादत् आदत्ते। तत्र दृष्टान्तः। श्वघ्नीव। श्वभिर्मृगान् हन्तीति श्वघ्नी व्याधः। यथा व्याधो जिघृक्षस्तं मृगं परिगृह्णाति तद्वत्। ऋसा.

दासा. कृष्णजातीयाः। दासभार्याः इन्द्रेण जिताः।

स वृत्रहेन्द्रः कृष्णयोनीः पुरंदरो दासीरैरयद्वि॥

वृत्रहा वृत्रस्य हन्ता पुरंदरः शत्रपुरां दारयिता स इन्द्रः कृष्णयोनीर्निकृष्टजातीर्दासीरुपक्षपयित्रीरासुरीः सेना व्यैरयत्। व्यनुदत्। यद्वा कृष्णयोनीः कृष्णाख्येनासुरेण निषिक्तरेतस्का दासीर्भार्या व्यैरयत्। व्यनुदत्। तथा मन्त्रः। यः कृष्णगर्भा निरहन्नृजिश्वना। ऋसा.

इन्द्रेण दासा अप्रशस्ताः कृताः

विश्वस्मात्सीमधमां इन्द्र दस्यून्विशो दासीरकृणोरप्रशस्ताः॥

हे इन्द्र त्व सीमेनान्दस्यून्विश्वस्मात्सर्वस्मादुगुणादधमान् हीनानकृणोः। अकरोः। कि च दासीः कर्महीना विशो मानुषीः प्रजा अप्रशस्ता गर्हिता अकृणोः। ऋसा.

दास आर्यवश्य.

वित्वक्षणः समृतौ चक्रमासजोऽसुन्वतो विषुणः सुन्वतो वृधः। इन्द्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः॥

समृतौ सग्रामे वित्वक्षणो विशेषेण तनूकर्ता शत्रूणा तदर्थं चक्रमासजो रथचक्रस्यासंजयितासुन्वतोऽयजमानस्य विषुणः पराङ्मुखः सुन्वतो यजमानस्य वृधो वर्धयितेन्द्रो विश्वस्य दमिता शिक्षयिता विभीषणो भयजनक आर्यः स्वामी यथावशं यथेच्छ दास दासकर्माणं जनं नयति स्ववशम्। ऋसा.

संपदा दास आर्यो भवति

आ संयतमिन्द्र णः स्वस्ति शत्रुतूर्याय बृहतीम-

(१) ऋसं.१।९२।८. (२) ऋसं.१।१३०।८. (३) ऋसं. २।११।४. (४) ऋसं.२।१२।४; असं.२०।३४।४; शाश्रा. २१।४, २२।४. (१) ऋसं.२।२०।७. (२) ऋसं.४।२८।४. (३) ऋसं.५।३४।६. (४) ऋसं.६।२२।१०.

मृध्राम् । यया दासान्यार्याणि वृत्रा करो वज्रिन्त्सुतुका नाहुषाणि ॥

हे इन्द्र शत्रूणां तारणाय बृहतीं महतीम् मृध्रामहिंसिता संयतं सयतीं संगच्छमानां स्वस्तिं क्षेमलक्षणां संपदं हे इन्द्र नोऽस्मभ्यमा भर । वज्रिन् वज्रवन्निन्द्र यया स्वस्त्या दासानि कर्महीनानि मनुष्यजातान्यार्याणि कर्मयुक्तानि करः अकरोः । नाहुषाणि मनुष्यसंबन्धीनि । नहुषा इति मनुष्यनामैतत् । वृत्रा वृत्राणि शत्रून् सुतुका सुतुकानि शोभनहिंसोपेतान्यकरोः । ऋसा.

आर्यार्थं दासप्रजा विनाश्या·

आभिर्विश्वा अभियुजो विपृचीरार्याय विशोऽव तारीर्दासीः ॥

अपि चाभिः स्तुतिभिरेवाभियुजोऽभियोक्त्रीर्विपृचीः सर्वतो वियमाना दासीः कर्मणामुपक्षपयित्रीर्विश्वाः सर्वा विशः प्रजा आर्याय यज्ञादिकर्मकृते यजमानायाव तारीः । विनाशय । ऋसा.

दास· परिचरिता

अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णये-ऽनागाः । अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥

मीळ्हुषे सेक्त्रे कामाना वर्षित्रे भूर्णये जगतो भर्त्रे देवाय दानादिगुणयुक्ताय वरुणायानागास्तत्प्रसादात्पापः सन्नहमरमलं पर्याप्तं कराणि । परिचरण करयाणि । दासो न यथा भृत्यः स्वामिने सम्यक् परिचरति तद्वत् । अर्यः स्वामी मं च देवोऽचितोऽजानतोऽस्मानचेतयत् । चेतयतु । प्रज्ञापयतु । गृत्सं स्तोतारं च कवितरः प्राज्ञतरो देवो राये धनाय धनप्राप्त्यर्थं जुनाति । जुनातु प्रेरयतु । ऋसा.

दासधन आर्येभ्यो देयम्

अपि वृश्च पुराणवद्व्रततेरिव गुष्पितमोजो दासस्य दम्भय । वयं तदस्य संभृतं वस्विन्द्रेण वि भजेमहि नभन्तामन्यके समे ॥

अपि च हे इन्द्र पुराणवत्प्रत्नो यथा व्रततेरिव यथा वल्ल्या गुप्तिं निर्गता शाखा वृश्चति तथा शत्रूणां वृश्च । छेदय । तदेवाह । दासस्य दासनामकस्य शत्रोरोजो बलं दम्भय । नाशय । अथ परोक्षस्तुतिः । वयं नाभाकाः अस्य दासस्य संभृतं वस्विन्द्रेण हेतुना वि भजेमहि । सिद्धमन्यत् । ऋसा.

दक्षिणासु दासा देयाः

शतं मे गर्दभानां शतमूर्णावतीनाम् ।
शतं दासाँ अति स्रजः ॥

दासस्वरूपम्

अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः । त्वं तस्यामित्रहन्वधर्दासस्य दम्भय ॥

अकर्माविद्यमानयागादिकर्मा दस्युरुपक्षपयिताभ्याभिमुख्येन स्वरूपतो नोऽस्मानमन्तुरज्ञाता । यद्वा । अत्रावेत्युपसर्गस्य वकारलोपो द्रष्टव्यः । अवमन्तुरवमन्ताभिभविता । अन्यव्रतः श्रुतिस्मृतिव्यतिरिक्तकर्मामानुषो मनुष्यसव्यवहाराद्बाह्यः । असुरप्रकृतिरित्यर्थः । य एवभूतोऽस्ति हे अमित्रहञ्छत्रूणां हन्तरिन्द्र त्वं दासस्योपक्षपयितव्यस्य वधर्हन्ता सन् दम्भय । त शत्रुं हिन्धि ॥ ऋसा.

उत दासा परिविषे स्मद्दिष्टी गोपरीणसा । यदुस्तुर्वश्च मामहे ॥

उतापि च स्मद्दिष्टी कल्याणदेशिनौ गोपरीणसा गोपरीणसौ गोभिः परिवृतौ बहुगवादियुक्तौ दासा दासवत्प्रेष्यवस्थितौ तेनाधिष्ठितौ यदुश्च तुर्वश्चैतन्नामकौ राजर्षी परिविषेऽस्य सावर्णमनोर्भोजनाय मामहे । पशून्प्रयच्छतः । ऋसा.

दासार्यभेदः इन्द्रकृतः

अयमेमि विचाकशद्विचिन्वन्दासमार्यम् ॥

अथेन्द्रो ब्रवीति । विचाकशत् पश्यन्यजमानान् दासमुपक्षपयितारमसुरमार्यमपि च विचिन्वन् पृथक्कुर्वन्नयमहमिन्द्र एमि ।

दास्यः स्त्रियो दक्षिणासु देयाः

उप मा श्यावाः स्वनयेन दत्ता वधूमन्तो दश रथासो अस्थुः ॥

स्वनयेन दत्ताः श्यावास्तद्वर्णाश्चैर्युक्तत्वात् श्यावा

(१) ऋसं.६।२५।२, मैसं.४।१४।१२; तैब्रा.२।८।३।३.
(२) ऋसं.७।८६।७. (३) ऋसं.८।४०।६; असं.७।९०।१; कौसू.३६।३५.
(१) ऋसं ८।५६।३ (२) ऋसं.१०।२२।८.
(३) ऋसं.१०।६२।१०. (४) ऋसं.१०।८६।१९; असं.२०।१२६।१९.
(५) ऋसं.१।१२६।३,

वधूमन्त आरूढाभिर्वधूभिस्तद्वन्तो दशैतत्संख्याका रथासो रथा उपास्थुः । उपस्थिताः । ऋसा.

द्वेया॑ अग्ने रथिनो विंशतिं गा वधूमतो मघवा मह्यं संराट् । अभ्यावर्ती चायमानो ददाति दूणाशेयं दक्षिणा पार्थवानाम् ॥

अधुना भरद्वाजः स्वस्मा अभ्यावर्तिना दत्तं धनजातमग्नये प्रकथयति । हे अग्ने मघवा धनवान् प्रभूतदानो वा सम्राट् राजसूययाजी चायमानश्चयमानस्य पुत्रोऽभ्यावर्त्ययेतदाह्वयो राजा रथिनो रथसहितान्वधूमतः स्त्रीयुक्तान् द्वयान्मिथुनभूतान् विंशति विंशतिसंख्याकान् गाः पशून् मह्य ददाति । प्रायच्छत् । पार्थवाना पृथोर्वंशजस्याभ्यावर्तिनो राज्ञः सबन्धिनी । पूजार्थं बहुवचनम् । इयं दक्षिणा दुर्नशा केनापि नाशयितुमशक्या भवति । ऋसा.

द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमन्ता सुदासः । अर्हन्नग्ने पैजवनस्य दानं होतेव सद्म पर्येमि रेभन् ॥

देववतो राज्ञो नप्तुः पौत्रस्य पैजवनस्य पिजवनपुत्रस्य सुदासो राज्ञो गोर्गवा द्वे शते वधूमन्ता वधूसयुक्तौ द्वा द्वौ रथा रथौ च देय दान दानभूतान् रेभन् इन्द्र स्तुवन् अत एवार्हन् योग्योऽह वसिष्ठो हे अग्ने सद्म यज्ञगृह होतेव वषट्कर्तेव पर्येमि । ऋसा.

अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्वधूनाम् । मंहिष्ठो अर्यः सत्पतिः ॥

इदमादिकेन प्रगाथेन त्रसदस्योर्दानमृषिः प्रशंसति । पौरुकुत्स्यः पुरुकुत्सपुत्रस्त्रसदस्युर्मे मह्य वधूना पञ्चाशतमदात् । दत्तवान् । कीदृशः । महिष्ठो दातृतमोऽर्योऽभिगन्तव्यः स्वामी वा सत्पतिः सता श्रेष्ठाना स्तोतॄणा पालयिता । ऋसा.

अध स्या योषणा मही प्रतीची वशमश्व्यम् । अधिरुक्मा वि नीयते ॥

अधाधुना स्या सा योषणा योषा राज्ञा प्रदत्ता मही महती पूज्या प्रतीच्यस्मदभिमुख्यश्व्यमश्वपुत्र वश मा प्रति साधिरुक्माभरणा सती वि नीयते । ता कन्या मा प्रत्यानयन्तीत्यर्थः । ऋसा.

पळश्वा॑ आतिथिग्व इन्द्रोते वधूमतः । सचा पूतक्रतौ सनम् ॥

आतिथिग्व इन्द्रोते पूतक्रतौ शुद्धप्रज्ञे शुद्धकर्मोपेते वा तस्मिन्वधूमतो वधूभिर्वडवाभिस्तद्वतः षडश्वान् सचक्षाश्वमेधयोः पुत्राभ्या दत्तेनाश्वादिधनेन सचा सह सनम् । लब्धवानस्मि । ऋसा.

कर्मकरस्वरूपम्

हिन्वानासो रथा इव दधन्विरे गभस्त्योः । भरासः कारिणामिव ॥

सोमा रथा इव यथा रथास्तथा हिन्वानासो हिन्वाना यागदेशं प्रति गच्छन्तो भरासो भराः कारिणामिव यथा भारवाहिना बाह्वोर्धीयन्ते तथा गभस्त्योर्ऋत्विजा बाह्वोः । गभस्ती बाह इति बाहुनामसु पाठात् । दधन्विरे । धीयन्ते । ऋसा.

ऊढवधूदासी

रेभ्यासीदनुदेयी नाराशंसी न्योचनी । सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतम् ।

रेभी । रेभ्यः काश्यनर्चः । सा रेभ्यनुदेयी आसीत् । दीयमानवधूविनोदनायानुदीयमाना वयस्यासीत् । तथा नाराशसी । मनुष्याणा स्तुतयो नाराशस्यः । सा नाराशसी न्योचनी । उचतिः सेवाकर्मा । सा वधूशुश्रूषार्थं दीयमाना दास्यभवत् । सूर्याया मम भद्र वासो विचित्र दुकूलादिकमाच्छादनयोग्य वस्त्र गाथया परिष्कृतमलकृतमेति । 'गाथा गीयते' इत्यादि ब्राह्मणोक्ता गाथा । तया गाथया यत्परिष्कृतमस्ति तद्वासोऽभवदिति । ऋसा.

दासीनृत्यम्

उदकुम्भानधिनिधाय दास्यो मार्जालीयं परि नृत्यन्ति पदो निन्नतीरिदंमधु गायन्त्यः ।

अत्र दासीसख्या सूत्रकारो दर्शयति—'मार्जालीयस्यान्तेऽष्टौ दासकुमार्य उदकुम्भैर्विकम्पन्ते' इति । ता एतास्तान्कुम्भान् शिरसि धृत्वा मार्जालीयस्य धिष्ण्यस्य

(१) ऋसं.६।२७।८. (२) ऋसं.७।१८।२२; शाश्रौ.१६।११।१५; बृदे.५।१६२. (३) ऋसं.८।१९।३६; बृदे.६।५१. (४) ऋसं.८।४६।३३.

(१) ऋसं.८।६८।१७. (२) ऋसं.९।१०।२, सासं.२।४७०. (३) ऋसं.१०।८५।६; असं.१४।१।७ कृतम् (कृता). (४) तैसं ७।५।१०.

परितो नृत्यन्ति नृत्यं कुर्वन्ति । कीदृश्यो दास्यः, पदो निघ्नतीर्दक्षिणान्पादान्भूमौ ताडयन्त्यः । इदंमध्वित्येतं शब्दं गायन्त्यः । तैसा.

बलायानुचरम् ।

बलाय अनुचरं सेवकम् । शुम.

दास्यम्

त्रयो दासा आञ्जनस्य तक्मा बलास आदहिः ॥

आञ्जनस्य आञ्जनसाधनस्य द्रव्यस्य त्रयो रोगा दासाः दासवद् वशवर्तिनः । तान् अनुक्रामति । तक्मा । कृच्छ्रजीवनहेतुर्ज्वरस्तक्मशब्दवाच्यः । बलासः शारीरं बलं अस्यति क्षिपतीति बलासः सन्निपातादिः । आत् अनन्तरं अहिः सर्पः । तज्जन्यविकार इत्यर्थः । एते प्राणापहारिणो रोगाः आञ्जनप्रभावेन निवर्तन्त इत्यर्थः । असा.

दासार्यौ

सत्यमहं गभीरः काव्येन सत्यं जातेनास्मि जातवेदाः । न मे दासो नार्यो महित्वा व्रतं मीमाय यदहं धरिष्ये ॥

दासा अभिभवनीया

एकं रजस एना परो अन्यदस्येना पर एकेन दुर्णशं चिदर्वाक् । तन् ते विद्वान् वरुण प्र ब्रवीम्यधोवचसः पणयो भवन्तु नीचैर्दासा उप सर्पन्तु भूमिम् ॥

दासी तत्कर्मणि च

उरुगूलाया दुहिता जाता दास्यसिक्न्या ॥
तक्मन् व्याल वि गद व्यङ्ग भूरि यावय ।
दासीं निष्टक्रीमिच्छ तां वज्रेण समर्पय ॥

यदन्यत् कृष्णः शकुन एह गत्वा त्सरन् विषक्तं बिल आससाद । यद्वा दास्यार्द्रहस्ता समङ्क्त उलूखलं मुसलं शुम्भतापः ॥

यदस्याः पल्पूलनं शकृद् दासी समस्यति ।
ततोपरूपं जायते तस्मादव्येष्यदेनसः ॥

(१) शुसं.३०।१३; तैब्रा.३।४।७।१. (२) असं.४।९।८.
(३) असं ५।११।३. (४) असं.५।११।६.
(५) असं.५।१३।८. (६) असं.५।२२।६.
(७) असं.१२।३।१३, कौसू ८।१४.
(८) असं.१२।४।९.

यज्ञादौ दासीपुत्रो नित्यः बहिष्कार्यश्च

ऋषयो वै सरस्वत्यां सत्रमासत ते कवषमैलूषं सोमादनयन्दास्याः पुत्रः कितवोऽब्राह्मणः कथं नो मध्येऽदीक्षिष्टेति तं बहिर्धन्वोदवहन्नत्रैनं पिपासा हन्तु सरस्वत्या उदकं मा पादिति स बहिर्धन्वोदूहूळः पिपासया वित्त एतदपोनप्त्रीयमपश्यत् प्र देवत्रा ब्रह्मणे गातुरेतिवि ति तेनापां प्रियं धामोपागच्छत्तमापोऽनूदायंस्तं सरस्वती समन्तं पर्यधावत् ।

भृग्वङ्गिरःप्रभृतय ऋषयः कदाचित्सरस्वत्यामेतन्नामकनदीतीरे सत्रमासत । द्वादशाहमारभ्योपरितनं त्रयोदशरात्रादिकं बहुयजमानकं कर्म सत्रमित्युच्यते । तदुद्दिश्य तत्र स्थितवन्तः सत्रमन्वतिष्ठन्नित्यर्थः । तदानीं तेषां मध्ये कश्चिदिलूषाख्यस्य पुरुषस्य पुत्रः कवषनामकोऽवस्थितोऽभूत् । ते च ऋषयस्त कवषं सोमयागान्निःसारितवन्तः । तेषामभिप्राय उच्यते । दास्यापुत्र इत्युक्तिरधिक्षेपार्था । कितवो द्यूतकारस्तस्मादब्राह्मणोऽयम् । ईदृशो नोऽस्माक शिष्टाना मध्ये स्थित्वा कथं दीक्षा कृतवानिति तेषामभिप्रायः । तं कवष सरस्वतीतीराद्बहिर्दूरे धन्व जलरहिता भूमिं प्रत्युदवहन्नुद्धृतवन्तो बलादपसारितवन्तः । धन्वदेशे बलात्प्रेरयितृणामयमभिप्रायः— अत्र जलवर्जितदेश एन कवष पिपासा मारयतु सरस्वत्या नद्याः पवित्रमुदकमय पापिष्ठो मा पवित्रमिति । स च कवषोऽत्र सरस्वत्या बहिर्दूरं धन्व निर्जलं देश प्रत्युदूहूळ उत्कर्षेणापसारितः पिपासया वित्तो लब्ध आक्रान्तस्तत्परिहारार्थमेतत्प्र देवत्रेत्यादिकमपोनप्त्रीयमृचं वेदमध्ये विचार्यापश्यत् । तेन सूक्तेन जपितेनापा जलाभिमानिनीना देवताना प्रियं स्थानमुपागच्छत् । तं चाऽगतमापो देवता अनूदायन्ननुग्रहेणोत्कर्षं यथा भवति तथा प्राप्तवत्यः । ततः सरस्वती नदी त कवषं पर्यधावत्परितः प्रवाहवेगेन प्रवृत्ता आसीत् । ऐब्रासा

तस्माद्वाप्येतर्हि परिसारकमित्याचक्षते यदेनं सरस्वती समन्तं परिससार ॥

(१) ऐब्रा.८।१. (२) ऐब्रा ८।१.

यद्यस्मिन्स्थाने सरस्वती नद्येनं कवषं समन्त सर्वासु दिक्षु परिससार तत्स्थानमेतर्ह्यप्येतस्मिन्नपि काले तीर्थविशेषाभिज्ञाः पुराणकर्तारः परिसारकमित्येतन्नाम्ना व्यवहरन्ति। ऐब्रासा.

[1]**ते वा ऋषयोऽब्रुवन्विदुर्वा इमं देवा उपेमं ह्वयामहा इति तथेति तमुपाह्वयन्त तमुपहूयैतदपोनप्त्रीयमकुर्वत प्र देवत्रा ब्रह्मणे गातुरेत्विति ॥**

ते भृग्वादयः परस्परमिदमब्रुवन्निम कवष देवाः सर्वेऽपि विदुर्वै जानन्त्येवातोऽस्य कितवत्वादिदोषो नास्ति तस्मादिममस्मत्समीप प्रत्याह्वयाम इति विचार्य तमुपहूय तेन इष्टमेतदपोनप्त्रदेवताक प्र देवत्रेत्यादि सूक्तमकुर्वत प्रयुक्तवन्तः। ऐब्रासा.

शूद्रा. परिचरितार.

[2]**अथ यत्पः शूद्राणां स भक्षः शूद्रांस्तेन भक्षेण जिन्विष्यसि शूद्रकल्पस्ते प्रजायामाजनिष्यतेऽन्यस्य प्रेष्यः कामोत्थाप्यो यथाकामवध्यो यदा वै क्षत्रियाय पापं भवति शूद्रकल्पोऽस्य प्रजायामाजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा शूद्रतामभ्युपैतोः स शूद्रतया जिज्यूषितः ॥**

यदि ते क्षत्रियस्य कश्चिदत्विगपो जलभक्षमाहरेत्तदानीं स जलात्मकः शूद्राणां भक्षस्तेन भक्षेण शूद्रान्प्रीणयिष्यसि। ततस्तव सततौ शूद्रसदृशः पुत्र उत्पद्यते। शूद्रश्चान्यस्योत्तमवर्णत्रयस्य प्रेष्यः प्रेषणीयो भृत्यो भवति। तथा कामोत्थाप्यो मध्यरात्रादौ यदाकदाचिद्दिन इच्छा भवति तदानीमयमुत्थाप्यते। तथा तदीयं काममिच्छामनतिक्रम्य वध्यः कुपितेन स्वामिना ताड्यो भवति। एते शूद्रगुणाः। क्षत्रियस्य कदाचित्पापे सति शूद्रसमानः पुत्रो जायते। तस्मात्क्षत्रियादन्यः पुत्रः पौत्रो वा शूद्रत्व प्राप्तुं समर्थो भवति। स पुत्रः शूद्रतया शूद्रवर्णतया दासत्ववृत्त्या जीवितु प्रवृत्तो भवति। ऐब्रासा.

दासीदानम्

[3]**स होवाचालोपाङ्गो दश नागसहस्राणि दश दासीसहस्राणि ददामि ते ब्राह्मणोप माऽस्मिन् यज्ञे ह्वयस्वेति।**

योऽयमङ्गनामको राजोक्तः सोऽयमलोपाङ्गः संपूर्णावयव इत्यर्थः। महदस्याङ्गसौष्ठवम्। स कदाचित्स्वकीयाभिषेककर्तुर्यदमयनामके पुरोहिते स्वार्थ यागं कुर्वाणे सति तं प्रत्येवमुवाच। हे ब्राह्मणार्स्मिस्त्वदीये यज्ञे मामुपह्वयस्व समाह्वानं कुरु। अहमागत्य त्वदीययज्ञे दक्षिणासपूर्त्यर्थं तुभ्यं गजसहस्राणि दासीसहस्राणि च ददामीति। सेय बहुदानसपत्तिः सद्बुद्धिश्च महाभिषेकप्रसादलब्धा। ऐब्रासा.

परिचारकः

[4]**देश नागसहस्राणि दत्त्वाऽऽत्रेयोऽवचत्नुके। श्रान्तः पारिकुटान्प्रैष्सहानेनाङ्गस्य ब्राह्मणः ॥**

अङ्गराजस्य पुरोहितो ब्राह्मण आत्रेयोऽवचत्नुकनामदेशे गजसहस्राणि दशसख्याकानि दत्त्वा दानेन श्रान्तः सन् पारिकुटान्परिचारकान्प्रैष्सत्प्रेषितवान्। हे परिचारका यूय दत्तेत्येवमुक्तवानित्यर्थः। ऐब्रासा.

यथादौ दासीपुत्रो निन्द्यः बहिष्कार्यश्च

[5]**माध्यमाः सरस्वत्यां सत्रमासत तद्वापि कवषो मध्ये निषसाद तं हेम उपोदुर्दास्या वै त्वं पुत्रोऽसि न वयं त्वया सह भक्षयिष्याम इति स ह क्रुद्धः प्रद्रवत्सरस्वतीमेतेन सूक्तेन तुष्टाव तं हेयमन्वियाय तत उ हेमे निरागा इव मेनिरे तं हान्वावृत्योचुर्ऋषे नमस्ते अस्तु मा नो हिंसीस्त्वं वै नः श्रेष्ठोऽसि यं त्वेयमन्वेतीति तं ह क्षपयांचक्रुस्तस्य ह क्रोधं विनिन्युः।**

शूद्राः परिचरितारः

[6]**द्विपदो नश्चतुष्पदः। ध्रुवाननपगान्कुर्विति पुरस्तात्प्रत्यञ्चमुपगूहति। तस्मात्पुरस्तात्प्रत्यञ्चः शूद्रा अवस्यन्ति। स्थविमत उपगूहति। अप्रतिवादिन एवैनान् कुरुते।**

कर्मकराः शूद्राः स्वाम्यभिमुखाः स्वामिनः पुरस्तात् सर्वदा अवतिष्ठन्ते अप्रतिवादिनः उक्तकारिणः।

तैसा.१।१।१३

(१) ऐब्रा.८।१. (२) ऐब्रा.३५।३.
(३) ऐब्रा.३९।८.

(१) ऐब्रा.३९।८ (२) शाब्रा.१२।३.
(३) तैब्रा.३।३।११.

परिचर्या भृत्यकर्म

[1]यो वै ब्राह्मणं वा क्षंसमानोऽनु चरति क्षत्रियं वायं मे दास्यत्ययं मे गृहान् करिष्यतीति यो वै तं वाचेन वा कर्मणा वाभिरिराधयिषति तस्मै वै स देयं मन्यतेऽथ य आह किं नु त्वं ममासि यो मे न ददासीतीश्वर एनं द्वेष्टोरीश्वरो निर्वेदं गन्तोस्तस्मान्नोपतिष्ठेतैतदित्त्वेवैष एतं याचते यदिन्द्रे यज्जुहोति तस्मान्नोपतिष्ठत ॥ अथ यस्मादुपैव तिष्ठेत । उत वै याचन्दातारं लभतऽएवोतो भर्ता भार्यं नानुबुध्यते स यदैवाह भार्यो वै तेऽस्मि बिभृहि मेत्यथैनं वेदाथैनं भार्यं मन्यते तस्मादुपैव तिष्ठेतेदमित्तु समस्तं यस्मादुपतिष्ठेत ।

[2]ते संप्रपद्यन्ते । अध्वर्युश्च यजमानश्चाग्नीध्रश्च प्रतिप्रस्थाता चोन्नेताथ योऽन्यः परिचरो भवत्युभे द्वारेऽअपिदधति रक्षोभ्यो ह्यविभयुः ।

दासीदानम्

[3]उदवसानीयायाꣳ सꣳस्थितायाम् । चतस्रश्च जायाः कुमारीं पञ्चमीं चत्वारि च शतान्यनुचरीणां यथा समुदितं दक्षिणां ददति ।

दास्यम्

[4]सोहं भगवते विदेहान्ददामि मां चापि सह दास्यायेति ।

दास्यां धनम्

[5]सं होवाच । देवेषु वै गौतम तद्वरेषु मानुषाणां ब्रूहीति ॥ स होवाच । विज्ञायते हास्ति हिरण्यस्यापात्तं गोऽअश्वानां दासीनां प्रवराणां परिधानानां मा नो भवान्वहोरनन्तस्यापर्यन्तस्याभ्यवदान्यो भूदिति स वै गौतम तीर्थेनेच्छासाऽइत्युपैम्यहं भवन्तमिति वाचा ह स्मैव पूर्वऽउपयन्ति ॥

[6]इमा रामाः सरथाः सतूर्या नहीदृशा लम्भनीया मनुष्यैः । आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः ॥

परिचर्या शूद्रस्य जन्मतो धर्मः

[7]सं पत्त एव प्रतिष्ठाया एकविꣳशमसृजत तमनुष्टुप् छन्दोऽन्वसृज्यत न काचन देवता शूद्रो मनुष्यस्तस्माच्छूद्र उत बहुपशुरयज्ञियो विदेवो हि न हि तं काचन देवताऽन्वसृज्यत तस्मात् पादावनेज्यन्नाति वर्द्धते पत्तो हि सृष्टस्तस्मादेकविꣳशस्तोमानां प्रतिष्ठा प्रतिष्ठाया हि सृष्टस्तस्मादनुष्टुभं छन्दाꣳसि नानु ष्यूहन्ति ।

यस्मात् विदेवः तस्माच्छूद्रः पादावनेज्यं त्रैवर्णिकाना पादप्रक्षालनरूप कर्मातिक्रम्य न वर्द्धते, एतदितरशुश्रूषोपलक्षणं द्विजातिशुश्रूषातिरिक्तं किञ्चिदपि धर्मं नानुतिष्ठदित्यर्थः । तथा च स्मर्यते–'शूद्रस्य द्विजशुश्रूषा परमो धर्म उच्यते । अन्यथा कुरुते किञ्चिद्भवेत्तस्य निष्फलमिति' । तासा.

दासीदानम्

[8]यं कामयेतेकराजः स्यान्नास्य चक्रं प्रतिहन्येतेत्येकवृषेणाभिषिञ्चेदभिषेक्त्रे दद्याद् ग्रामवरं दासीशतꣳ सहस्रं तदधीनश्च भवेत् ।

भृत्यः प्रथम भोजनीय.

[9]भृत्यातिथिशेषभोजी काले दारानुपेयात् ।

दासः दासी धनम्

[10]प्रवृतोश्वतरीरथो दासीनिष्कोऽत्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते ।

[11]गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति ॥

अन्नार्थं परिचर्या

[12]श्रेष्ठिनि संवशेयुरपि विद्विषाणाः एवमेवैत च्छ्रेष्ठिनो वशेयान्नमन्नस्यानुचर्याय क्षमन्ते ॥

दासनिरुक्तिः

[13]दाँसो दस्यतेरुपदासयति कर्माणि ।
उपदासयति उपक्षपयति कृष्यादीनि कर्माणि ।

दुभा.२।१७

(१) शब्रा.२।३।४।६-७. (२) शब्रा.४।३।५।९
(३) शब्रा.१३।५।४।२७ (४) शब्रा.१४।७।२।३०.
(५) शब्रा.१४।९।१।९-१०. (६)कउ.१।१।२५.

(१) ताब्रा.६।१।११ (२) साब्रा.३।५।३.
(३) साब्रा.१।३।६. (४) छाउ.५।१३।२.
(५) छाउ.७।२४।२. (६) गोब्रा.२।५।९. (७) नि.२।१७

*गौतमः

शिष्यविधिः

[1]शिष्यशिष्टिरवधेन।

शिष्यशिष्टिः शिष्यशासन, अवधेन वध मुक्त्वा, निर्भर्त्सनादिना कर्तव्यमित्यर्थः। अधिकारादेव सिद्धे शिष्यग्रहणमन्यस्यापि शासनीयस्य भार्यापुत्रादेरयमेव धर्म इति ज्ञापनार्थम्। मभा.

अशक्तौ रज्जुवेणुविदलाभ्यां तनुभ्याम्।

यदि भर्त्सनादिभिः शासितुमशक्यस्ततो रज्ज्वा तन्वा, तनुना वेणुविदलेन वेति। द्वन्द्वनिर्दिष्टयोरपि विकल्पो रज्ज्वा वेणुदलेन वेति मानवे दर्शनात्। ताभ्यां दुर्बलाभ्यां ताडयित्वापि शासनीयः। गौमि.

अन्येन घ्नन्नाज्ञा शास्यः।

अन्येन हस्तपादादिना क्रोधेन घ्नन्नाज्ञा दण्ड्यः। गौरवार्थं राजग्रहणम्। मभा.

द्वादश वर्षाण्येकवेदे ब्रह्मचर्यं चरेत्।

एकवेदमध्येष्यमाणो द्वादशवर्षाण्यभिहितरूपं ब्रह्मचर्यं चरेत् कुर्यात्। ब्रह्मचर्यशब्देन यमनियमकलाप उच्यते। ब्रह्मार्थत्वात्। मभा.

प्रति द्वादश वा।

प्रतिवेदं वा द्वादशवर्षाणि ब्रह्मचर्यं चरेत्। मभा.

सर्वेषु ग्रहणान्तं वा।

सर्वेषु वेदेषु यावतैव कालेनाध्ययनमभिनिर्वर्तयेत् तावन्तमेव कालं ब्रह्मचर्यं चरेत् तस्य तदर्थत्वात्। सर्वग्रहण यत्रैकमधीयीत यदि वा द्वौ यदि वा सर्वानित्येवमर्थम्। तथा च मनुः—'वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्' इति। सोऽयमुक्तावधेरूर्ध्वमवाप्य वा अपवादः। नियमेनाधीत वीर्यवद्भवतीति नियमोक्तिः। मभा.

विद्यान्ते गुरुरर्थेन निमन्त्र्यः।

विद्यासमाप्तौ, न तु व्रताना, गुरुराचार्यः अर्थेन प्रयोजनेन निमन्त्र्यः प्रष्टव्यः किं गुर्वर्थं करवाणीति। मभा.

कृत्वाऽनुज्ञातस्य वा स्नानम्।

कृत्वा दत्वेत्यर्थः, गुरूपदिष्टमर्थम्। तेन वा अल गुरूदक्षिणया इत्यनुज्ञातस्य स्नान समावृत्तिः। मभा.

शूद्रस्य दास्यम्

परिचर्या चोत्तरेषाम्।

परिचर्या परिचरण शुश्रूषा उत्तरेषा त्रयाणां वर्णानाम्। चशब्दात् कृष्यादि च। सच्छूद्रस्य शुश्रूषा इतरस्य कृष्यादिरिति केचित्। गौतमस्य तावदयमभिप्रायः—यः सच्छूद्रस्तेनोभयमप्यविरोधेन कर्तव्य, इतरेण कृष्यादयेवेति। इतरेषामिति सिद्धे उत्तरग्रहणं योग य उत्तरस्तत्रतत्र फलभूयस्त्वज्ञापनार्थम्। तथा च आपस्तम्बः—'पूर्वस्मिन् पूर्वस्मिन् वर्णे निश्रेयसं भूयः' इति। मभा.

तेभ्यो वृत्तिं लिप्सेत।

यान् परिचरेत् तेभ्य एव जीवन लब्धुमिच्छेत्। एव च वृत्त्यर्थिन एव परिचर्या नावश्य सर्वस्येति सिद्धम्। मभा.

तत्र पूर्वं पूर्वं परिचरेत्।

यथा याजनाध्यापनप्रतिग्रहेषु ब्राह्मणस्य प्रतिग्रहो मुख्या वृत्तिस्तथा शूद्रस्य परिचर्या। तत्रापि पूर्वस्मिन् पूर्वस्मिन् वर्णे इति। गौमि.

[2]यं चार्यमाश्रयीत भर्तव्यस्तेन क्षीणोऽपि।

यं ब्राह्मणादिमाश्रयेत परिचरेत् तेनासौ पोषणीयः। चशब्दादनार्य स्वजातीयमपि कर्मान्तरेणार्याणामेव परिचरणोपदेशात्। यं चाश्रयेतेति वक्तव्ये आर्यग्रहण समानजातीयेऽपि साधूना विशेषज्ञापनार्थम्। तेनेति तस्यावश्यकर्तव्यतासूचनार्थम्। क्षीणोऽपि व्याधिजरोपहतोऽपीत्यर्थः। मभा.

तेन चोत्तरः।

तेन च शूद्रेणोत्तरो यमाश्रयेत। एव च वृत्तिक्षीणस्य शूद्राश्रयणमप्यस्तीति ज्ञापयति। आश्रयणमप्यात्मसंदर्शनमात्रम्। मभा.

* श्रुतिस्मृतिषूक्ताः शिष्यधर्माः वर्णाश्रमधर्मकाण्डे सप्रपञ्च संग्रहीष्यन्ते। तथा शूद्रवृत्तिविषयीणि वचनान्यपि सप्रपञ्च वर्णाश्रमधर्मकाण्डे संग्रहीष्यन्ते।

(१) **गौध.**२।४९-५६; **मभा.**; **गौमि.**२।४९-५५.

(१) **गौध.**१०।५६-५७; **मभा.**, **गौमि.**१०।५७-५८.

(२) **गौध.**१०।५९; **गौमि** (३) **गौध.**१०।६०-६२; **मभा.**; **गौमि** १०।६३-६५ यार्यमाश्रयीत (यायमाश्रयेद्)॰

तदर्थोऽस्य निचयः स्यात्।

तदर्थः उत्तरपोषणार्थः अस्य शूद्रस्य निचयः संचयः स्याद्भवति। यस्मादित्यध्याहर्तव्यम्। एवं चास्य अन्यार्थो द्रव्यपरिग्रहः प्रतिषिद्धो भवति। हेतुवचनमपि पूर्ववदसारद्रव्येण भरणं न भवति, किन्तु स्वकुटुम्बाविरोधेन सर्वस्वदानेनेति। मभा.

सर्वे चोत्तरोत्तरं परिचरेयुः।

सर्वे निकृष्टाः अधिकं वर्णं शुश्रूषेयुः। ननु च शूद्रस्योक्तत्वात् ब्राह्मणस्य चोत्तराभावात् क्षत्रियवैश्यार्थः आरम्भः अतो बहुवचनानुपपत्तिः परिचरेयुः सर्व इति। उच्यते—समानजातीयमप्यधिकगुणं हीनः परिचरेदिति बहुवचनम्। सर्वशब्दादनुलोमाश्चापि, अन्यथा वर्णाधिकारान्न भवति इति। शूद्रस्यापि स्वजातौ गुणाधिकपरिचरणार्थश्चकारः। मभा.

आपस्तम्बः

शूद्रस्य दास्यम्

शुश्रूषा शूद्रस्येतरेषां वर्णानाम्।

यथा ब्राह्मणादीनामुपनयनादयो धर्माः प्रधानभूताः तादृशं शूद्रस्य कर्माह—शुश्रूषेति। इतरेषां ब्राह्मणादीनां वर्णानां या शुश्रूषा सा शूद्रस्य परमो धर्मः। उ.

पूर्वं मन् पूर्वस्मिन् वर्णे निःश्रेयसं भूयः।

सर्वप्रकारं कृतायाः अपि वैश्यशुश्रूषायाः मात्रयाऽपि कृता क्षत्रियशुश्रूषा बहुतरं फलं साधयति। एवं क्षत्रियशुश्रूषाया ब्राह्मणशुश्रूषा। उ.

दासकर्मकराणां संविभागः

[3]**ये नित्या भाक्तिकास्तेषामनुपरोधेन संविभागो विहितः।**

ये नित्या भाक्तिकाः भक्तार्हाः कर्मकरादयः तेषामुपरोधो यथा न भवति तथा वैश्वदेवान्ते अभ्यागतेभ्यः संविभागः कर्तव्यः। उ.

काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्न त्वेव दासकर्मकरम्।

दासो भूत्वा यः कर्म करोति स दासकर्मकरः तं आत्मानुपरोधेनापि नोपरुन्ध्यात्। किं पुनरागतार्थं तं नोपरुन्ध्यादिति। उ.

बौधायनः

शूद्रेषु पूर्वेषां परिचर्या।

अदधादित्येव। पूर्वेषां ब्राह्मणादीनाम्। परिचर्या शुश्रूषा। बौवि.

वसिष्ठः

एतेषां परिचर्या शूद्रस्य। नियता वृत्तिः।

विष्णुः

शूद्रस्य दास्यम्

शूद्रस्य द्विजातिशुश्रूषा।

उत्तमवर्णं दास्ये नियोजयन् दण्ड्यः

यस्तूत्तमवर्णं दास्ये नियोजयति तस्योत्तमसाहसो दण्डः।

अस्वतन्त्रस्य स्वामीच्छया दासत्वं प्रातिलोम्येनापि प्रतिपादित मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्याने, अत एव कात्यायनादिभिः प्रातिलोम्येन दासत्वनिषेधे स्वतन्त्रपदमुपात्तम्। +व्यक.१५४

त्यक्तप्रव्रज्यस्य दासभावः। दासभार्यायाश्च दासीत्वम्।

त्यक्तप्रव्रज्यो राज्ञो दास्यं कुर्यात्।

दासेन या परिणीता सा दासीत्वमापद्यते।

अधिकाधिकद्रव्यदानान्मुच्यते।

कौटिलीयमर्थशास्त्रम्

दासकल्पः

दासकर्मकरकल्पः। उदरदासवर्जमार्यप्राणमप्राप्त-

+ विर. व्यकवत्।

(१) बौध.१।१०।५. (२) वस्मृ.२।२४-२५.

(३) विस्मृ.२।४.

(४) विस्मृ.५।१५० वर्णं (वर्णान्) जयति (जेयत्); अप.२।१८३; व्यक.१५४; स्मृच.१९८, विर.१५४ साहसो (साहस); विचि ७३, व्यप्र.३२३; व्यम.९१ नियोजयति (ऽभियोजयति); विता.६३६ वर्णं (वर्णान्); सेतु.१६५, समु.१००.

(५) विस्मृ.५।१५१ (६) सवि.२९४.

(७) सवि.२९३. (८) कौ.३।१३.

(१) गौध.१०।६५; मभा.; गौमि.१०।६८.

(२) आध.१।१।७-८.

(३) आध.२।९।१०-११.

व्यवहारं शूद्रं विक्रयाधानं नयतः स्वजनस्य द्वादशपणो दण्डः । वैश्यं द्विगुणः । क्षत्रियं त्रिगुणः । ब्राह्मणं चतुर्गुणः । परजनस्य पूर्वमध्यमोत्तमवधा दण्डाः क्रेतृश्रोतृणां च । म्लेच्छानामदोषः प्रजां विक्रेतुमाधातुं वा । न त्वेवार्यस्य दासभावः ।

अथवार्यमाधाय कुलबन्धन आर्याणामापदि निष्क्रयं चाधिगम्य बालं साहाय्यदातारं वा पूर्वं निष्क्रीणीरन् ।

सकृदात्माधाता निष्पतितः सीदेत् । द्विरन्येनाहितकः । सकृदुभौ परविषयाभिमुखौ ।

वित्तापहारिणो वा दासस्यार्यभावमपहरतोऽर्धदण्डः । निष्पतितप्रेतव्यसनिनामाधाता मूल्यं भजेत ।

प्रेतविण्मूत्रोच्छिष्टग्राहणमाहितस्य नग्नस्नापनं दण्डप्रेषणमतिक्रमणं च स्त्रीणां मूल्यनाशकरम् । धात्रीपरिचारिकार्धसीतिकोपचारिकाणां च मोक्षकरम् । सिद्धमुपचारकस्याभिप्रजातस्य अपक्रमणम् ।

धात्रीमाहितिकां वाकामां स्ववशामधिगच्छतः पूर्वः साहसदण्डः, परवशां मध्यमः । कन्यामाहितिकां वा स्वयमन्येन वा दूषयतः मूल्यनाशः शुल्कं तद्द्विगुणश्च दण्डः ।

आत्मविक्रयिणः प्रजामार्यां विद्यात् । आत्माधिगतं स्वामिकर्माविरुद्धं लभेत, पित्र्यं च दायम् । मूल्येन चार्यत्वं गच्छेत् । तेनोदरदासाहितकौ व्याख्यातौ ।

प्रक्षेपानुरूपश्चास्य निष्क्रयः ।

दण्डप्रणीतः कर्मणा दण्डमुपनयेत् ।

आर्यप्राणोध्वजाहृतः कर्मकालानुरूपेण मूल्यार्धेन वा विमुच्येत ।

गृहजातदायागतलब्धक्रीतानामन्यतमं दासमूनाष्टवर्षं विबन्धुमकामं नीचे कर्मणि विदेशे दासीं वा सगर्भामप्रतिविहितगर्भभर्मण्यां विक्रयाधानं नयतः पूर्वः साहसदण्डः क्रेतृश्रोतृणां च । दासमनुरूपेण निष्क्रयेणार्यमकुर्वतो द्वादशपणो दण्डः । संरोधश्चाकारणात् । दासद्रव्यस्य ज्ञातयो दायादाः । तेषां अभावे स्वामी । स्वामिनः स्वस्यां दास्यां जातं समातृकं अदासं विद्यात् । गृह्या चेत् कुटुम्बार्थचिन्तनी, माता भ्राता भगिनी चास्याः अदासाः स्युः ।

दासं दासीं वा निष्क्रीय पुनर्विक्रयाधानं नयतो द्वादशपणो दण्डः अन्यत्र स्वयंवादिभ्यः । इति दासकल्पः ।

दासकर्मकरकल्प इति सूत्रम् । दासाः गर्भदासाः कर्मकराः कर्षकगोपालादयः तेषां कल्पः आधानविक्रयादिविधान उच्यते इति सूत्रार्थः । 'पतिमत्या पुत्रवत्या च स्त्रिया दासाहितकाभ्याम्' इति विवादपदनिबन्धे मनुष्याणामाधानमुक्तम् । विक्रीतक्रीतानुशये च विक्रय उक्तः । तत्र क आधातव्यो विक्रेतव्यो वेत्येतदधुनाभिधीयते । उदरेत्यादि । उदरदासवर्जं अशननिरुपायोऽन्याच्छादनदानेन रक्ष्यमाण उदरदासः तद्वर्जं, आर्यप्राण आर्यजीवितम् । क्रेतृश्रोतृणां च क्रेतृणा शूद्रादिं मूल्यदानेन स्वीकुर्वता तत्साक्षिणा च ।

आपत्कल्पमाह—अथवेति । कुलबन्धने कुलस्य कृच्छ्रप्राप्तौ, आर्याणामापदि बहूनामार्याणा विपत्प्राप्तौ च, आर्यं आधाय आपन्निवृत्त्यपेक्षितधनग्रहणेन धनिके आहित कृत्वा न तु विक्रीय, निष्क्रय चाधिगम्य धनिकप्रत्यर्पणीये धने हस्तप्राप्ते सति, बाल आहितपूर्व कुमारं, साहाय्यदातारं वा स्वयमाधीभावेन कृतोपकारमबालमपि वा, पूर्व निष्क्रीणीरन् प्रथम धन दत्वा प्रत्यानयेयुः शान्तविपदा तन्निष्क्रयणमेव प्रथममानुष्ठेयं कृत्यमित्यर्थः ।

सकृदात्माधाता निष्पतितः सीदेदिति । धनग्रहणेन स्वयमेवात्मानमार्धं कृत्वा धनिकसकाशात् सकृदपसृतश्चेत् पुनर्धनिकमुपगन्तुं नार्हेत्, सद्य एव तद्दणं निर्यातयेच्चेत्यर्थः । द्विरिति । अन्येनाहितकः, द्विः, निष्पतितः सीदेत् । सकृदिति । उभौ आत्माधातान्याहितकश्च, सकृत् परविषयाभिमुखौ परविषयगामिनौ सीदेतामिति विपरिणतसबन्धः ।

प्रेतविण्मूत्रोच्छिष्टग्राहणमिति । आहितस्य प्रेतादि ग्राहणं, स्त्रीणा आहितानां, नग्नस्नापनं विवस्त्रपुरुषस्नापनं

दण्डप्रेषणं लगुडताडनं, अतिक्रमणं च उपभोगश्च, मूल्यनाशकरम्। धात्रीत्यादि। धात्री उपमाता परिचारिका शुश्रूषिका अर्धसीतिका कर्षकस्त्री उपचारिका आस्तरणवीजनाद्युपचारकर्त्री एतासामाहितानां च मोक्षकरं अर्थात् प्रेतविण्मूत्रादिग्राहणादिकम्। सिद्धमिति। दास्याः भक्तदायी भर्ता भवस्तेनैव वेतनेन दासीस्वामिनः कर्म कुर्वाण उपचारकः उपचारकस्य, अभिप्रजातस्य दास्या प्रजामुत्पादितवतः, अपक्रमण अपूर्णेऽपि कालेऽपसरण सिद्धम्।

आत्मविक्रयिण इति। तस्य, प्रजा आत्मविक्रयात् प्रागुत्पन्नमपत्यं, आर्या विद्याद् अदासी जानीयात्। आत्माधिगतमित्यादि। आत्मविक्रयी स्वामिकर्माविरोधेनात्मनार्जित धन पितृदाय च लभेत। मूल्यदानेन दासभावमोक्ष च प्रतिपद्येत। तेनोदरदासाहितकौ व्याख्यातावितिं। तयोरप्यात्माधिगतलाभः पितृदायलाभ आर्यत्वप्रत्यापत्तिश्च भवतीत्यर्थः। श्रीमृ.

महाभारतम्

दासधर्मा

कर्ण उवाच—

त्रयः किलेमे ह्यधना भवन्ति दासः पुत्रश्चास्वतन्त्रा च नारी। दासस्य पत्नी त्वधनस्य भद्रे हीनेश्वरा दासधनं च सर्वम्॥

प्रविश्य राज्ञः परिवारं भजस्व तत्ते कार्यं शिष्टमादिश्यतेऽत्र। ईशास्तु सर्वे तव राजपुत्रि भवन्ति वै धार्तराष्ट्रा न पार्थाः॥

अन्यं वृणीष्व पतिमाशु भामिनि यस्माद्दास्यं न लभसि देवनेन। अवाच्या वै पतिषु कामवृत्तिर्नित्यं दास्ये विदितं तत्त्ववास्तु॥

पराजितो नकुलो भीमसेनो युधिष्ठिरः सहदेवार्जुनौ च। दासीभूता त्वं हि वै याज्ञसेनि पराजितास्ते पतयो नैव सन्ति॥

प्रयोजनं जन्मनि किं न मन्यते पराक्रमं पौरुषं चैव पार्थः। पाञ्चालस्य द्रुपदस्यात्मजामिमां सभामध्ये यो व्यदेवीद् ग्लहेषु॥

(१)भा.२।७१।१–५.

भीमसेन उवाच—

नाहं कुप्ये सूतपुत्रस्य राजन्नेष सत्यं दासधर्मं प्रदिष्टः॥

शूद्रस्त्रयाणां वर्णानां परिचारकः दासो वा भवति

ब्राह्मणः प्रचरेद्धैक्षं क्षत्रियः परिपालयेत्। वैश्यो धनार्जनं कुर्याच्छूद्रः परिचरेच्च तान्॥
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥
शूद्रस्यापि हि यो धर्मस्तं वक्ष्यामि भारत।
प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत्॥
तस्मात् शूद्रस्य वर्णानां परिचर्या विधीयते।
तेषां शुश्रूषणाच्चैव महत्सुखमवाप्नुयात्॥
शूद्र एतान् परिचरेत्त्रीन्वर्णाननुपूर्वशः।
संचयांश्च न कुर्वीत जातु शूद्रः कथंचन॥
पापीयान् हि धनं लब्ध्वा वशे कुर्याद्धरीयसः।
राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिकः।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्।
अवश्यं भरणीयो हि वर्णानां शूद्र उच्यते॥
छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च।
यातयामानि देयानि शूद्राय परिचारिणे॥
अधार्याणि विशीर्णानि वसनानि द्विजातिभिः
शूद्रायैव प्रदेयानि तस्य धर्मधनं हि तत्॥
यं च कञ्चिद् द्विजातीनां शूद्रः शुश्रूषुराव्रजेत्
कल्प्यां तेन तु ते प्राहुर्वृत्तिं धर्मविदो जनाः।
देयः पिण्डोऽनपत्याय भर्तव्यौ वृद्धदुर्बलौ।
शूद्रेण तु न हातव्यो भर्ता कस्यांचिदापदि॥
अतिरेकेण भर्तव्यो भर्ता द्रव्यपरिक्षये।
न हि स्वमस्ति शूद्रस्य भर्तृहार्यधनो हि सः॥
वर्णानां परिचर्यार्थं त्रयाणां भरतर्षभ।
वर्णश्चतुर्थः संभूतः पद्भ्यां शूद्रो विनिर्मितः॥
शूद्रो ह्येतान्परिचरेदिति ब्रह्मानुशासनम्॥
शूद्रश्चतुर्थो वर्णानां नानाकर्मस्ववस्थितः।
कर्म शूद्रे कृषिर्वैश्ये दण्डनीतिश्च राजनि॥

(१) भा.२।७१।७. (२) भा.५।१३२।३०.
(३) भा.६।४२।४४, गीता.१८।४४.
(४) भा.१२।६०।२७-३७. (५) भा.१२।७२।५.
(६) भा.१२।७२।८ (७) भा.१२।९१।३-४.

मानुषा मानुषानेव दासभावेन भुञ्जते ।
वधबन्धनिरोधेन कारयन्ति दिवानिशम् ॥
वृत्तिः सकाशाद्वर्णेभ्यस्त्रिभ्यो हीनस्य शोभना ।
प्रीत्योपनीता निर्दिष्टा धर्मिष्ठान् कुरुते सदा ॥
वृत्तिश्चैनास्ति शूद्रस्य पितृपैतामही ध्रुवा ।
न वृत्तिं परतो मार्गेच्छुश्रूषां तु प्रयोजयेत् ॥
अजिह्मैरशठक्रोधैर्हव्यकव्यप्रयोक्तृभिः ।
शूद्रैर्निर्मार्जनं कार्यमेवं धर्मो न नश्यति ॥
यश्च शुश्रूषते शूद्रः सततं नियतेन्द्रियः ।
अतोऽन्यथा मनुष्येन्द्र स्वधर्मात्परिहीयते ॥
दमेन शोभते विप्रः क्षत्रियो विजयेन तु ।
धनेन वैश्यः शूद्रस्तु नित्यं दाक्ष्येण शोभते ॥
नित्यं त्रयाणां वर्णानां शुश्रूषुः शूद्र उच्यते ॥
वाणिज्यं पाशुपाल्यं च तथा शिल्पोपजीवनम् ।
शूद्रस्यापि विधीयन्ते यदा वृत्तिर्न जायते ॥
पादजाः परिचारकाः ।
द्विजानां परिचर्या च शूद्रकर्म नराधिप ॥

द्यूते अब्राह्मणप्रजापुत्रभ्रातर आत्मा पत्नी च दासा भवन्ति

युधिष्ठिर उवाच—

पुरं जनपदो भूमिरब्राह्मणधनैः सह ।
अब्राह्मणाश्च पुरुषा राजञ्छिष्टं धनं मम ।
एतद्राजन मम धनं तेन दीव्याम्यहं त्वया ॥
राजपुत्रा इमे राजन शोभन्ते यैर्विभूषिताः ।
एतन्मम धनं राजंस्तेन दीव्याम्यहं त्वया ॥
नकुलो ग्लह एवैको विद्धयेतन्मम तद्धनम् ॥
अयं धर्मान सहदेवोऽनुशास्ति लोके ह्यस्मिन पण्डितारूयां गतश्च । अनर्हता राजपुत्रेण तेन दीव्याम्यहं चाप्रियवत् प्रियेण ॥

(१) भा.१२।२६२।३८-३९. (२) भा.१२।२९३।१-२
(३) भा १२।२९३।१२. (४) भा.१२।२९३।१५.
(५) भा.१२।२९३।२१. (६) भा.१२।२९४।२.
(७) भा.१२।२९४।४. (८) भा.१२।२९६।६.
(९) भा.१२।२९६।२१. (१०) भा.२।६५।९.
(११) भा.२।६५।११-१२. (१२) भा.२।६५।१४.
(१३) भा.२।६५।१७.

अनर्हता लोकवीरेण तेन दीव्याम्यहं शकुने फाल्गुनेन ॥
अनर्हता राजपुत्रेण तेन दीव्याम्यहं भीमसेनेन राजन् ॥
अहं विशिष्टः सर्वेषां भ्रातृणां दयिते स्थितः ।
कुर्यामहं जितः कर्म स्वयमात्मन्युपप्लुते ॥
तयैवंविधया राजन पाञ्चाल्याऽहं सुमध्यया ।
ग्लहं दीव्यामि चार्वङ्ग्या द्रौपद्या हन्त सौबल*॥

पत्नी द्यूते देया दासी भवति

शिष्टा ते दमयन्त्येका सर्वमन्यज्जितं मया ।
दमयन्त्याः पणः साधु वर्ततां यदि मन्यसे ॥

युद्धजितो दासः

जीवितुं चेच्छसे मूढ हेतुं मे गदतः शृणु ।
दासोऽस्मीति तथा वाच्यं संसत्सु च सभासु च ।
एवं ते जीवितं दद्यामेष युद्धजितो विधिः ॥
राजानं चाब्रवीद्भीमो द्रौपद्याः कथ्यतामिति ।
दासभावं गतो ह्येष पाण्डूनां पापचेतनः ॥

मनुः

वैश्यशूद्रा स्वकर्मणि प्रवर्तनीयौ

वाणिज्यं कारयेद्वैश्यं कुसीदं कृषिमेव च ।
पशूनां रक्षणं चैव दास्यं शूद्रं द्विजन्मनाम् ॥

(१) इह केचिद व्याचक्षते । अनिच्छन्तावपि वैश्यशूद्रौ बलादेव तानि कर्माणि कारयितव्यौ यत एतयोः स्वधर्मोऽयम् । सत्यपि दृष्टार्थत्वेऽदृष्टार्थता विद्यते नियमविधित्वात् । एवं च सति ब्राह्मणोऽपि हठात्प्रतिग्राहयितव्य इत्यापतति । प्रत्यक्षदृष्टत्वात् नायमुक्त इति चेदत्राप्येष एव प्रत्यक्षः । तदयुक्तम् । सत्या धनार्थितायाः शास्त्रतो नियमः । न तु विधिनिबन्धनैव प्रवृत्तिर्यत्र स्वय

* अय जनपदभूम्यब्राह्मणधनाब्राह्मणप्रजापुत्रभ्रातृणा पत्न्याः आत्मनश्च देयादेयताविचारः दत्ताप्रदानिके अभ्युपेत्याशुश्रूषाया चानुसंधेयः ।

(१) भा.२।६५।२३.
(२) भा.२।६५।२७. (३) भा.२।६५।३०.
(४) भा.२।६५।४१. (५) भा.३।६१।३.
(६) भा.३।२७२।१०-११. (७) भा.३।२७२।१६.
(८) मस्मृ.८।४१०; विर.६२५ दास्यं शूद्र (शूद्रं दास्य).

प्रयोजकमस्ति न तत्र विधेः प्रयोक्तृत्वं, नियामांशे तु विधेर्व्यापारः। स चेदृशो नियमः। वैश्यमेव कारयेद्वाणिज्यमन्यं कुर्वाणमसत्यामापदि दण्डयेत्। एव ब्राह्मणमेव प्रतिग्रहं तथा च प्रतिग्रहसमर्थोऽपि सतोषपरश्च स्यादित्याद्युपपद्यते। यदपि श्रूयतेऽनिच्छतोऽपीति सोऽर्थवादः। शूद्रमेव दास्यमित्येवं सर्वत्र नियमरूपता द्रष्टव्या। मेधा.

(२) वाणिज्यधनप्रयोगकृषिपशुरक्षणानि दृष्टादृष्टार्थत्वाद्वैश्य शूद्र च द्विजन्मनां दास्यं नियमेन राजा कारयेत्। अकुर्वाणौ राज्ञा दण्ड्यौ इहोपदेशात्। *गोरा.

(३) दास्य मलोच्छिष्टापनयनादिकर्म। मवि.

(४) शूद्र द्विजानां ऋणार्थं राजा दास्य कारयेत्। भाच.

आपदि क्षत्रियवैश्यौ ब्राह्मणेन स्वस्वकर्मणा भर्तव्यौ

क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्शितौ।
बिभृयादानृशंस्येन स्वानि कर्माणि कारयेत्॥

(१) वृत्या कर्शितौ ब्राह्मणो बिभृयाद्भक्तदानादिना क्षत्रियवैश्ययोर्भरण कुर्यादानृशस्येनानुकम्पया स्वानि कर्माणि कारयेत्। ब्राह्मणस्य यानि स्वानि समित्कुशोदकुम्भाहरणादीनि, अथवा क्षत्रियवैश्ययोर्यानि स्वानि, क्षत्रियो ग्रामरक्षादौ नियोक्तव्यो वैश्यः स्वकृषिपशुपाल्यादौ, महाधनो यो ब्राह्मणो महापरिच्छदश्च सामर्थ्यात्तस्यैष विधिः। स्वानि कर्माणीति वचनात् दास्य न कारयितव्यौ गर्हितोच्छिष्टमार्जनादि। +मेधा.

(२) वृत्तिकर्शितावित्यत्र द्वितीया पाशमन्त्रस्थद्वितीयावत्कर्मत्वमात्रविवक्षया प्रयुक्ता। एव चायमर्थः। वृत्तिकर्शितं क्षत्रिय वैश्यं च दासभूतमकौर्येण कर्माणि कारयन् स्वामी पोषयेदिति। वृत्तिकर्शितावितिवदन्नगत्यैव क्षत्रियवैश्ययोर्दासत्वाङ्गीकारः कार्यो न पुनः सति संभवे इति दर्शयति। स्वानीतिवदन् न सबन्धिजनकर्माणि कारयेदित्याह। कर्माणीति सामान्याभिधानेन जघन्यकर्माण्येव कारयितव्यानीति नास्ति नियम इति सूचयति। वृत्तिकर्शितौ बिभृयादिति वदन् आकाङ्क्षानुसारेण क्षत्रियवैश्ययोर्दास्यं कारयितव्यम्। न तु प्रभुत्वमात्रेणेत्येतदपि ज्ञापयति। ×स्मृच.१९८

(३) ब्राह्मणः क्षत्रियवैश्यौ भृत्यभावेन पीडितौ करुणया स्वामी कर्माणि रक्षणकृष्यादीनि कारयन् ग्रासाच्छादनादिना पोषयेत्। एव धनवान्ब्राह्मणः तौ उपगतौ अबिभ्रन् राज्ञा दण्डनीय इति प्रकरणसामर्थ्यादुगम्यते। *ममु.

(४) स्वानि कर्माणि कारयन्नतु दासकर्माणि तानि कारयतो दण्डविधानार्थोऽयमारम्भः। नन्द.

ब्राह्मणेन सस्कृतद्विजा दास्ये न नियोज्याः

दास्यं तु कारयेन्मोहाद्ब्राह्मणः संस्कृतान् द्विजान्।
अनिच्छतः प्राभवत्याद्राज्ञा दण्ड्यः शतानि षट्॥

(१) संस्कृता उपनीताः। यद्यपि द्विजग्रहणादेवैतल्लभ्यते तथापि त्रैवर्णिकजात्युपलक्षणार्थं मा विज्ञायीति। यो ब्राह्मणः समानजातीयान्दास्यं पादधावनोच्छिष्टावकरणसंमार्जनादिरूपमनिच्छतः, प्रभवतो भावः प्राभवत्यं प्रभुत्वं, शक्त्यतिशययोगतो बलादिना यः कारयति स षट् शतानि दण्ड्यः। लोभादेतत्। द्वेषादिभिस्त्वधिको दण्ड्यः। शत्रन्तस्य भवतेर्भावप्रत्यये प्राभवत्यादिति

---

* ममु. गोरावत्।

+ मवि., विर.,भाच. मेधातिथिर्द्वितीयपक्षवत्।

(१) **मस्मृ.**८।४११ रयेत् (रयन्); **अप.**२।१८३; **व्यक.**१५४ कर्शितौ (कर्षितन्), **स्मृच.**१९८, **विर.**१५३ व्यकवत्; **पमा.**३४२; **विचि.**७२; **व्यप्र.**३१८ रयेत (रयन्); **व्यम.**९१ स्वानि कर्माणि (स्वामी कर्म तु); **सेतु.**१६६; **समु.**९९.

१ (बृप०). २ ब्यो.

× व्यप्र. स्मृचवत्।

* गोरा. ममुवत्, अशुद्धिबाहुल्यात् नोद्धृतम्।

(१) **मस्मृ.**८।४१२ कारयेन्मोहा (कारयेल्लोभा); **गोरा.** दास्यं तु (वो दास्य), **अप.**२।१८३; **व्यक.**१५४ प्राभवत्याद्रा (प्रभावत्वाद्रा); **स्मृच.**१९८ दण्ड्यः (दाप्यः); **मवि.** प्राभवत्याद्रा (प्रभुत्वेन रा); **विर.**१५३ व्यकवत्; **पमा.** ३४३ वत्या (वत्वा); **विचि.**७२ येन्मो (यन्मो) प्राभवत्या (प्रभावित्वा):१८२ न्मोहा (लोभा) शेषं मवित्; **व्यप्र.**३१९; **विता.**६३५ दण्ड्यः (दाप्यः) शेषं मवित्, क्रमेण कात्यायनः; **सेतु.**१६६ विश्वित्; **समु.**९९ स्मृचवत्,

१ न. २ क्य,

रूपं, प्रभुत्वेनेति वचनाद्गुरोर्न दोषः । अनिच्छत इति वचनादिच्छतामल्पो दण्डः । *मेधा.

(२) द्विजानिति वदन् न दण्डः शूद्रविषये इति दर्शयति । स्मृच.१९८

शूद्रो दास्यमेवार्हति

शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा ।
दास्यायैव हि सृष्टोऽसौ स्वयमेव स्वयंभुवा ॥

(१) क्रीतमक्रीतं भक्ताद्युपनतं, वक्ष्यमाणस्य विधेरनुवादोऽयम् । दास्यायैवेत्यर्थवादः । मेधा.

(२) शूद्रं पुनर्भक्तादिना भृतमभृत वा दास्य कारयेत् । ×गोरा.

(३) क्षत्रियं चैव वैश्य चेत्यादिश्लोकत्रये ब्राह्मणशब्दस्त्रैवर्णिकोपलक्षणार्थः । नन्द.

न स्वामिना निसृष्टोऽपि शूद्रो दास्याद्विमुच्यते ।
निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति ॥

(१) यमाश्रितः सप्तभिः दासयोनिभिस्तेन निसृष्टोऽपि तन्मुक्तोऽपि । किन्तु निसर्गजं सहजं जातिसहभावि कस्तस्माच्छूद्रात्तद्दास्यमपोहत्यपनयति । यथा शूद्रजातिर्न तस्यापनेतु शक्यैव दास्यमपि । अर्थवादोऽयम् । यतो वक्ष्यति निमित्तविशेषे शूद्रस्य दास्यान्मोक्षम् । मेधा.

(२) स्वामिप्रसादादपि शूद्रस्य चतुर्वर्णाभ्यन्तरस्य जघन्यतमभृतकस्य वा न दास्यविमोक्ष इत्यर्थः । एव च प्रसादमन्तरेण न परदास्याद्विमुच्यते इति शूद्रेतर-

* मच. मेधावत् । × ममु., मच. गोरावत् ।

(१) **मस्मृ.**८।४१३ ख.,ग.,घ. पुस्तकेषु, स्वयमेव (ब्राह्मणस्य); **अप.**२।१८३ स्वयमेव (ब्राह्मणस्य); **व्यक.**१५४, **स्मृच.**१९८, **विर.**१५४, **पमा.**३४३ मेव वा (मेव च), **सवि.**२९६ दास्य (दास) सृष्टोऽसौ (सृष्टः स) कात्यायन., **व्यप्र.**३१९ अपवत्; **विता.**६३५; **सेतु.**१६६, **समु.**१००

(२) **मस्मृ.**८।४१४; **अप.**२।१८२ निसृ (ऽतिसृ) त्तदपो (त्त व्यपो), **व्यक.**१५० निस् (विसृ) द्वि (त्र) कस्तस्मात्तद (कस्तं तस्माद्व्य); **विर.**१४६ व्यकवत्; **विचि.**६८ व्यकवत् : ७१ निसृष्टोऽपि (विसृष्टो हि) गेंज (गैर्त्व) कस्तस्मात्तद (कथं तस्माद्य); **सेतु.**१६६ निस् (विसृ) द्वि (त्र) कस्तस्मात्तद (कथं तस्माद्य); **समु.**१००.

गृहजातादिविषयमित्यविरोधः । *व्यक.१५०

(३) न स्वामिनेति । यस्मादसौ ध्वजाहृतत्वादिना दासत्वं गतः स तेन त्यक्तः स्वदास्याभावेऽपि शूद्रो ब्राह्मणस्य दास्यान्न विमुच्यते । तस्माद्दास्यं शूद्रस्य सहजम् । कः शूद्रत्वजातिमिव दास्यमपनयति । अदृष्टार्थमप्यवश्यं शूद्रेण ब्राह्मणादिद्विजशुश्रूषा कर्तव्येत्येवपरमेतत् । अन्यथा वक्ष्यमाणदास्यकरणपरिगणनमनर्थकं स्यात् । ममु.

(४) इति मार्कण्डेयपुराणे हरिश्चन्द्रवाक्यं तद्दासनिन्दापरम् । अन्यथा शूद्रेषु दास्यात्तत्क्रयणादिकं न प्रसज्येतेति । विचि.६८

सप्तविधा दासाः

ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ ।
पैतृको दण्डदासश्च सप्तैते दासयोनयः ॥

(१) ध्वजग्रहण वाहनोपलक्षणार्थम् । ध्वजिनी सेनोच्यते । तत आहृतः । सग्रामे जितः सन् दासीकृतः । किं पुनरिदं क्षत्रियस्य वचनम् । युद्धे जितः क्षत्रियो दासीभवति । नेति ब्रूमः । शूद्रस्यैव प्रकृतत्वात् । 'दास्यायैव हि सृष्टोऽसौ' इति । स्वामिनं जित्वा तदीयो दास आहृतः आहर्तुर्दास्य प्रतिपद्यते । ननु शूद्रस्य विशेषेणैव दास्यमुक्तं 'निसर्गजं तत्तस्य' इति । नैवं तथा सत्यव्यवस्था स्यात्कस्यासौ दास इति न विज्ञायेत । सर्वे हि त्रैवर्णिकाः स्वस्वदासाः । पूर्वापरनरवतश्चानियमोऽविधित्वात्तस्य । ननु ते सर्वे चोत्तरोत्तरे परिचरेयुरिति क्षत्रियादीनामपि दास्यमस्ति । तदसत् । अन्यद्दास्यमन्या परिचर्या । निकृष्टकर्मकारित्वमप्यज्ञातस्य दास्यम् । सर्वस्य प्रेषितस्याप्रतिबन्धः । परिचर्या तु शरीरसंवाहनमर्थदारादिरक्षाधिकारः । नारदेन चैतत्प्रपञ्चितम् । भक्तलाभार्थं दास्य प्रतिपन्नो भक्तदासः । गृहे जातो गृहजो दास्यामुत्पन्नो गर्भदासः । क्रीतो मूल्येन स्वामिनः सकाशात् । दत्त्रिमः प्रीत्याऽदृष्टार्थं वा दत्तः । क्रमागतः

* विर. व्यकवत् ।

(१) **मस्मृ** ८।४१५ पैतृको (पैत्रिको), **मिता.**२।१८२; **अप.**२।१८३ श्च (स्तु) मैते (मैता); **पमा.**३३७; **स्मृचि.**६०; **व्यप्र.**३२०; **व्यउ.**१०१, **विता.**६३७, **बाल.**२।१३४ दत्त्रि (कृत्रि); **समु.**१०० वाजवत्.

१ कास्तस्य दा. २ स्या.

पैत्रिकः। अथ गृहजस्यास्य च को विशेषो गृहजस्तदीया यामेव दास्या जात इतरस्तु क्रमागतः। दण्डदासो राज्ञे दण्ड दातुमशक्तो दासीक्रियते। 'कर्मणाऽपि समं कुर्यात्' इत्यधमर्णस्यापि दास्यमिच्छन्ति तदयुक्तम्। अन्यद्दास्यमन्यच्च तत्कर्मकारित्वम्। न चाय दण्डो येनान्तर्भवेत्। न च दासयोनिपुरुषधारणमुक्त केवल कर्मणापीति। तथा दासकर्माऽप्यस्ति। ननु च धर्मोप नतोऽपि शूद्रो दास इष्यते। तत्र कथ सत दास योनयः। नैष दोषः। न तस्योत्पत्तिकं दासत्वमिच्छाधीनत्वाद्धर्मार्थिनो, न हि तस्य दानाधानक्रिया युज्यन्ते क्रीतगृहजादिदासवत्। एव ह्युक्त, यथा यथा हि सद्वृत्तमिति, तेनैव ध्रुवतैतत्प्रदर्शित भवति। न तस्य नित्य दास्य कि तर्हि फलविशेषार्थिनः, ततश्चानिच्छतो न दास्यमस्ति। अतो यदि शूद्रो विद्यमानधनः स्वातन्त्र्येण जीवेद्ब्राह्मणाद्यनपाश्रितो न जातु दुष्येत्। मेधा.

(२) सत ध्वजाहृतत्वादीनि दासत्वकारणानि।

*गोरा

(३) यत्तु मनुना 'ध्वजाहृतो भक्तदासो' इत्यादिना सप्तविधत्वमुक्त तत्तेषा दासत्वप्रतिपादनार्थ न तु परिसख्यार्थम्। मिता.२।१८२

(४) ध्वजाहृतो युद्धजित इति कश्चित्। ध्वज लिङ्ग तेनाहृतो वडवाहृतापरनामदासीसबन्धादास्य प्राप्त इति यावदिति तु युक्तम्। भक्तदासो दुर्भिक्ष्यभक्त दानेन दासीकृतः। गृहजो दासाज्जातः। दत्रिमो दत्तः केनचित्। पैतृकः पितृतो दायभागादागतः। दण्ड दासो दण्डदेयस्य शोधनार्थं दास्य यातः। प्रव्रज्यावसितो राज्ञो दास इत्येवरूपो वा। दण्डार्थं दास्या दण्डदासः। दासरूपा योनयो जातयः। मवि.

(५) ध्वजा गृहदासी। व्यप्र ३२०

भार्यापुत्रदासा न धनस्वाम्यमर्हन्ति

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्॥

* शेष मेधावत्। मनु., नन्द., भाच. गोरावत्।

(१) **मस्मृ.**८।४१६ यस्यै (यस्य), **शाभा.**६।१।१२, **शुनी.**४।७८५।८५, **मिता.**२।४७ (=), **गौमि.**२८।

१ वर्ग. २ तस्यो.

(१) एते त्रयोऽर्जितधना अप्यधनाः, स्वामिनो धनं, यत्किञ्चित्ते धनमर्जयन्ति तद्धन तस्य स्व यस्य ते स्वत्वमापन्नाः। भार्याधनं भर्तुः, पितुः पुत्रस्य, स्वामिनो दासस्य। ननु च यतेते निर्धनाः कथमेषा कर्मभिरधिकारः। तत्रेद नोपपद्यते। 'पितापुत्रौ चेदाहिताग्नी स्याता येभ्यः पिता दद्यात्तेभ्यः पुत्र इति'। दम्पत्योरपि 'सह धर्मश्चरितव्यः'। 'धर्मे चार्थे च कामे च नातिचरितव्या त्वयेति'। यदि च निर्धनो कोऽन्योऽर्थेऽतिचारः। शूद्रस्यापि पाकयज्ञैः स्वय यजेतेति निर्धनत्वे विरुध्यते। स्वच्छन्दशूद्रविषयत्वेन विरोधो न भवेत्। अस्ति तावद्दासाना स्वधने स्वाम्य यद्दासधनमिति व्यपदिश्यते, न ह्यसति संबन्धे व्यपदेशः। अर्जन च स्वत्व नापादयतीति विप्रतिषिद्ध, तस्माद्विरुद्धमिद, यत्ते समधिगच्छन्ति न तत्र तेषा स्वामित्वम्। यथा कश्चिद् ब्रूयाद्यस्या अह पुत्रः सा न मम जननीति तादृगेतत्। असति वा स्त्रीणा स्वाम्ये 'पत्न्यैवानुगमन क्रियते' 'पत्नी वै पारिणाह्यस्येश' इत्यादि श्रुतयो निरालम्बनाः स्युः। अत्रोच्यते। पारतन्त्र्यविधानमेतत्। असत्या भर्तुरनुज्ञाया न स्त्रीभिः स्वातन्त्र्येण यत्रकचिद्धन विनियोक्तव्यम्। एव पुत्रदारयोरपि द्रष्टव्यम्। अन्ये तु मन्यन्ते भार्यापुत्रग्रहण दासार्थं तस्य चैतद्वचनमुत्तरार्थं, आपदि दासधनग्रहणे न विचिकित्सितव्य भर्तुरेव हि तत्स्व तथा हि—विस्रब्धमिति। *मेधा.

(२) पुत्रादिसाहचर्याज्ज्ञानेन परमार्थतो निर्धनत्व भार्याया गम्यते। कि तु धनव्ययादावस्वातन्त्र्यमात्रम्। तेन यस्यैते तस्यानुज्ञया स्वधनस्यापि विनियोग कुर्यु-

* गोरा., मिता., स्मृच., ममु., दात., मच., व्यप्र., व्यम.,विना ष्पु अस्वामित्व अस्वातन्त्र्यपरमित्येव मेधावद्भाव.। २९; **स्मृच.**२८१ त्रय. स्मृता (निर्धना सर्व स्व ये) स्मृतिः; **नृप्र** २०, **व्यनि.**यस्यै (तस्यै), **दात** १८० (=), **व्यप्र.**४१५,५४२ मस्मृवत्; **व्यम.**६९ स्मृचवत्; **विता.**५०८,६४३ मस्मृवत्; **राकौ.**३९६ पुत्रश्च दासश्च (दासश्च पुत्रश्च); **बाल.**२।१३४, **विभ.**४४; **समु.**१३५ स्मृचवत्, कात्यायनः.

१ (पिता०). २ हजध ३ नः. ४ स्या. ५ ऽनति. ६ दा स्वध. ७ तत्तेषां. ८ मिनि. ९ आसां ध.

रिति स्मृतिवाक्यस्य तात्पर्यमवसेयम्। अथवा निधन-त्वाभिधायकस्मृतिवाक्यस्य शिल्पादिप्रातधनविषयत्व ज्ञेयम्। स्मृच.२८१

(३) अत्र भार्यापुत्रयोरधनत्वप्रसङ्गादुपन्यासः। भार्यापुत्रदासाः भर्तृपितृस्वामिषु जीवत्स्वधनाः अजीवत्सु सधनाः स्मृत्यन्तरानुगुण्यात् यत एवं ततः। नन्द.

ब्राह्मणेन शूद्रद्रव्य हरणीयम्

[1]विस्रब्धं ब्राह्मणः शूद्राद्द्रव्योपादानमाचरेत्।
न हि तस्यास्ति किंचित्स्वं भर्तृहार्यधनो हि सः॥

(१) अत्र कश्चिदाह धर्मोपगतशूद्रविषयमिदं, तदयुक्तं, विशेषे प्रमाणाभावात्। तस्मात्सर्वदासः शूद्रस्तस्यैव प्रतिग्राह्यत्वमुच्यते। विस्रब्ध निःशङ्क शूद्रधन कथं प्रतिगृह्णीयात् प्रतिषिद्धं हि तदित्येषा शङ्का न कर्तव्या। यतो न तस्य किंचिदर्थो यस्य निचयः स्यादित्युक्तं भवति। भर्त्रा स्वामिना ह्रियते धनमस्य एतदेवार्जने तस्य प्रयोजनं, स्वामी गृह्णाति, अतो विस्रब्धं द्रव्योपादान[2] द्रव्यग्रहण कुर्यात्। तेनानुपनीयमानमपि स्वेच्छन्दमेव विनियुञ्जीत, सति प्रयोजने एतदुक्तं भवति। अविद्यमानधनस्य दासाच्छूद्रात्प्रति गृह्णतो न दोषः। मेधा.

(२) विस्रब्धमिति। निर्विचिकित्समेव प्रकृतादास-शूद्राद्धनग्रहण कुर्याद्ब्राह्मणः। यतस्तस्य किंचिदपि स्व नास्ति। यस्माद्भर्तृहार्यधनोऽसौ। एव चापदि बला दपि दासाद्ब्राह्मणो धन गृह्णन्न राज्ञा दण्डनीय इत्येवमर्थमेतदुच्यते। *ममु.

(३) विस्रब्धं कृतविश्वासं यथा स्यात्तथा शूद्रात्सत-विधदासात् द्रव्योपादानं द्रव्यादान तदाचरेत्। तत्र हेतुः 'भर्तृहार्यधनो हि स' इति। भर्त्रर्थमेवाहार्य जीवे-त्स्वारुककर्मभिरित्यादिनोक्तं धनं यस्य स इत्यर्थः। मच.

(४) विस्रब्धं शूद्रप्रतिग्रहः भयरहितः, ब्राह्मणस्त्रै-वर्णिकः। नन्द.

[1]वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत्।
तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेतामिदं जगत्॥

स्वकर्म व्यतिक्रामन्तः क्षोभयेयुराकुलीकुर्युर्जगदतस्तान् प्रयत्नेन स्वकर्माणि कारयेत्। अल्प एवातिक्रमे भूयसा दण्डेन योजनीया वैश्या अपि। बन्धन नास्ति। अपि धनशक्यः स्वधर्मः। मेधा.

याज्ञवल्क्यः

दास्यभोक्षकारणानि

बलादासीकृतश्चोरैर्विक्रीतश्चापि मुच्यते।
स्वामिप्राणप्रदो भक्त्यागान्निष्क्रयादपि॥

(१) दास्यकारणगृहजत्वाद्यभावे बलाद्यो दासीकृतः, चोरैर्वान्यहस्ते दासत्वेन विक्रीतः स मोक्तव्यः। नात्र क्रेतुर्दोषप्रसङ्गः। यस्यापि हि दासत्वकारणमस्ति, सोऽपि हि स्वामिन प्राणसशयात् स्वप्राणत्यागनिश्चयावष्टम्भेन मोक्षयित्वा दास्यान्मुच्यते। यस्तु भाक्तः भक्तदासः, स तस्यागानिष्क्रयाद्वा मुच्यते। अपिशब्दात् स्वामिप्रसादा-दिपरिग्रहः। विश्व.२।१८६

(२) साप्रतमभ्युपेत्याशुश्रूषाख्यमपर विवादपदमभि-धातुमुपक्रमते। दासान्तेवासिनोस्तु धर्मविशेष वक्तुमाह— बलादिति। बलात् बलावष्टम्भेन यो दासीकृतः। यश्चोरैरपहृत्य विक्रीतः। अपिशब्दादाहितो दत्तश्च स मुच्यते। यदि स्वामी न मुञ्चति तर्हि राज्ञा मोचयितव्यः। चौरव्याघ्राद्यवरुद्धस्य स्वामिनः प्राणान्यः प्रददाति रक्ष-त्यसावपि मोचयितव्यः। तदिद सर्वदासाना साधारण दास्यनिवृत्तिकारणम्। भक्तदासादीना प्रातिस्विकमपि मोक्षकरणमुच्यते। अनाकालभृतभक्तदासौ भक्तस्य त्यागाद्दासभावादारभ्य स्वामिद्रव्य यावदुपभुक्तं ताव-

* गोरा. ममुवत्, अशुद्धिबाहुल्यान्नोद्धृतम्।

(१) मस्मृ.८।४१७.

१ (भर्त्रा०). २ स्वामी न. ३ नस्य. ४ हीयते वि. ५ नद्र. ६ तेनोप. ७ स्वगृहस्थमिव.

(१) मस्मृ.८।४१८; विर.६२५; मच. ब्राह्मणो वा स्वानीति कचित्पाठः.

(२) यास्मृ.२।१८२; अपु.२५७।३३ तन्निष्क्रया (निष्क्र-यणा); विश्व.२।१८६ भक्तत्यागात्त (भाक्तस्तत्यागा); मिता.; अप.त्यागा (स्त्यागा); व्यक.१५२; स्मृच.२०० पू.; विर. १४८, पमा.३४६ पू.; वीमि.; व्यप्र.३२१ पू.; व्यउ. १०२; व्यम.९२ पू.; विता.६३८; बाल.२।१३४ (पृ.१८३ पू.: १८४); समु.१००.

१ स्ते प्रयत्नेन स्वकर्मभ्यश्चावयेदनल्प एवा.

दत्त्वा मुच्येते । आहितर्णदासौ तु तन्निष्क्रयाद्यद्गृहीत्वा स्वामिना आहितो यच्च दत्त्वा धनिनोत्तमर्णान्मोचितस्तस्य निष्क्रयात्सवृद्धिकस्य प्रत्यर्पणान्मुच्यते । तदेवं गृहजातक्रीतलब्धदायप्राप्तात्मविक्रयिणा स्वामिप्राणप्रदानतत्प्रसादरूपसाधारणकारणव्यतिरेकेण मोक्षो नास्ति । विशेषकारणानभिधानात् । मिता.

(३) अपिकारेण दास्यमोक्षहेतुकारणान्तरसमुच्चयः । *वीमि.

(४) मुच्यते, उक्तमोचनहेतुमन्तरेणैव शीघ्र मोचनीय इत्यर्थः । *व्यप्र.३२१

दास्यमोक्षकारणापवादः । आनुलोम्येनैव दास्यम् ।

प्रव्रज्यावसितो राज्ञो दास आमरणान्तिकम् ।
वर्णानामानुलोम्येन दास्यं तु प्रतिलोमतः ॥

(१) एवं दास्यान्निर्मोचनप्राप्तावयमपवादः—प्रव्रज्यावसित इति । प्रव्रज्य प्रतिनिवृत्तो राज्ञो दासः स्यात् । न चात्र स्वामिप्राणरक्षणेनापि मोक्षः । ब्राह्मणोऽपि च प्रव्रज्यावसितो राज्ञो दासः स्यात् प्रातिलोम्येनापि । अतोऽन्यत्र तु वर्णानामानुलोम्येन दास्यम् । यथा 'मोक्षितो महताश्वर्णादि'त्येवमादौ न प्रातिलोम्येन प्रत्येतव्यम् । स्मृत्यन्तराच्च दासत्वनिमित्तानि गृहजत्वादीनि, दास्यनिर्मोचनप्रकाराश्चान्वेष्याः । सर्वथा प्रातिलोम्येन दास्याभाव इति स्थितम् । यत्र पारिभाषिकमुभयोरनुमते दास्यमन्यद्वा तत् तथैव कर्तव्यम् । विश्व.२।१८७

(२) प्रव्रज्यावसितस्य तु मोक्षो नास्तीत्याह—प्रव्रज्यावसित इति । प्रव्रज्या सन्यासस्ततोऽवसितः प्रच्युतः । अनभ्युपगतप्रायश्चित्तश्चेद्राज्ञ एव दासो भवति मरणमेव तद्दासत्वस्यान्तोऽन्यस्मिन्काले न मोक्षोऽस्ति । वर्णापेक्षया दास्यव्यवस्थामाह—वर्णानामानुलोम्येनेति । ब्राह्मणादीना वर्णानामानुलोम्येन दास्यम् । ब्राह्मणस्य क्षत्रियादयः । क्षत्रियस्य वैश्यशूद्रौ । वैश्यस्य शूद्र इत्येवमानुलोम्येन दासभावो भवति न प्रातिलोम्येन । स्वधर्मत्यागिनः पुनः परिव्राजकस्य प्रातिलोम्येनापि दासत्वमिष्यत एव । *मिता.

(३) वर्णानामिति प्रव्रज्यावसित इति च ब्राह्मणभिन्नपरम् । +वीमि.

अन्तेवासिविधि

कृतशिल्पोऽपि निवसेत्कृतकालं गुरोर्गृहे ।
अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः ॥

(१) यतश्चैतदेव अतः—कृतशिल्पोऽपीति । शिल्पशिक्षणार्थं प्रतिपन्नशिष्यभावोऽन्तेवासी । स यदा परिभाष्येयन्त कालं त्वद्गृहे मया शिल्पविद्याशिक्षया वस्तव्यमित्यास्ते, अन्तरालेऽपि कृतविद्यः स्यात्, तदापि हि कृत पारिभाषिक कालं गुरोर्गृहे निवसेत् । गुरुणापि च तस्य भोजनपरिधानादिक देयम् । यच्चासौ शिल्पे नार्जयेत्, तद्गुरोरेवार्पयेदित्यवसेयम् । विश्व.२।१८८

(२) अन्तेवासिधर्मानाह— कृतशिल्पोऽपीति । अन्वासीते गुरोर्गृहे कृतकाल वर्षेचतुष्टयमायुर्वेदादिशिल्पशिक्षार्थं त्वद्गृहे वसामीति यावदङ्गीकृतं तावत्कालं वसेत् । यद्यपि वर्षेचतुष्टयादर्वागेव लब्धापेक्षितशिल्पविद्यः । कथ निवसेत । गुरुप्राप्तभोजनः गुरोः सकाशात्प्राप्तं भोजन येन स तथोक्तः । तत्फलप्रदः तस्य शिल्पस्य फलमाचार्याय प्रददातीति तत्फलप्रदः । एवभूतो वसेत् । ×मिता.

(३) अभ्युपेत्याशुश्रूषालक्षणव्यवहारपदविषयं चैतत् । +अप.

नारदः

अभ्युपेत्याशुश्रूषापदनिरुक्तिः

अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिपद्यते ।
अशुश्रूषाऽभ्युपेत्यैतद्विवादपदमुच्यते ॥

* शेष मितावत् ।

(१) **यास्मृ.**२।१८३; **अपु.**२५७।३४ कम् (कः); **विश्व**२।१८७; **मिता.**; **अप.**अपुवत्; **स्मृच.**१९९ अपुवत्, **पू.**, **पमा.**३४४ पू.; **सवि.**२९३ पू.; **वीमि.** आम (स्वाम) कम् (कः); **व्यप्र.**३२० अपुवत्, **पू.**; **व्यउ.**१०२; **व्यम.**९१ पू; **विता.**६३१, ६३७ अपुवत्, **पू.**; **समु.**१०० अपुवत्, **पू.**

* अप. मितावत्। +शेष मितावत्। ×वीमि. मितावत्।

(१) **यास्मृ.**२।१८४, **अपु.**२५७।३५ शिष्यो (शिष्यो), **विश्व.**२।१८८ कृतका (कृत का); **मिता**; **अप.**; **स्मृच** १९६ विश्ववत्; **पमा.**३३९; **नृप्र.**२४; **वीमि.**; **व्यप्र.** ३१५; **विता.**६२९; **राकौ.**४७५; **समु.**९८ विश्ववत्.

(२) **नासं.**६।१; **नास्मृ.**८।१ तु (च); **अपु.**२५३।१७

(१) इदानी शुश्रूषाभ्युपगमो नवभेद उच्यते। अत्राशुश्रूषाभ्युपेत्य व्यवहारपदस्य नाम लक्षणमात्रमिदमुद्दिष्टमधिकारश्लोकेऽस्मिन्निति। अभा.८८

(२) आज्ञाकरण शुश्रूषा तामङ्गीकृत्य पश्चाद्यो न संपादयति तद्विवादपदमभ्युपेत्याशुश्रूषाख्यम्। मिता.२।१८२

(३) य इति सामान्यशब्दोक्तशिष्यान्तेवासिभृतकाधिकर्मकृद्दासाख्यपञ्चविधशुश्रूषकत्वशात्पञ्चविधत्वमस्य पदस्यार्थात्सिद्धमिति न तेन पृथग्भेदो दर्शितः। स्मृच.४

(४) मनुना च वेतनाप्रदान एवास्य विवादपदस्य कयाचिद्विवक्षयाऽन्तर्भावमभिप्रेत्य पृथगनभिधानात्। वीमि.२।१८२

शुश्रूषकभेदाः तेषां साधारणधर्मश्च

शुश्रूषकः पञ्चविधः शास्त्रे दृष्टो मनीषिभिः।
चतुर्विधः कर्मकरस्तेषां दासास्त्रिपञ्चकाः॥

अत्र शुश्रूषकः पञ्चप्रकारो दृष्टः। चतुःप्रकारः कर्मकरः। पञ्चदशप्रकारो दास इति। अभा.८८

शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्मकृत्।
एते कर्मकरा ज्ञेया दासास्तु गृहजादयः॥

(१) अत्र शिष्यश्चान्तेवासी च भृतकश्चाधिकर्मकृच्चैते चत्वारोऽपि कर्मकरा उक्ताः। ये पुनः पञ्चदश दासास्तान्गृहदासीजातमादौ उक्त्वाग्रतः सविस्तरं वक्ष्यति। अभा.८८

(२) शिष्यो वेदविद्यार्थी। अन्तेवासी शिल्पशिक्षार्थी। मूल्येन यः कर्म करोति स भृतकः। कर्म कुर्वतामधिष्ठाताधिकर्मकृत्। मिता.२।१८२

(३) अधिकर्मकृत् कुटुम्बव्यापारे स्थापितः। इतर इच्छातः कर्म प्रतिपन्नाः, दासास्तु नियोगतोऽस्वतन्त्राः। नाभा.६।३

सामान्यमस्वतन्त्रत्वमेषामाहुर्मनीषिणः।
जातिकर्मकृतस्तूक्तो विशेषो वृत्तिरेव च॥

(१) येषां च शुश्रूषककर्मकरदासानां सर्वेषामपि अस्वतन्त्रत्व सामान्य यस्तु विशेषः स जातिवशादेषां वृत्तिश्च कर्मानुसारिणी। इति शुश्रूषकभेदः। अभा.८८

(२) एषा कर्मकराणां दासाना चास्वतन्त्रत्वलक्षणं धर्मं साधारणमाहुर्मनीषिणो मन्वादयः। जातिकृतः कर्मकृतो वृत्तिकृतश्च विशेषः शिष्यान्तेवासिदासानामेवोक्त इत्यर्थः। स्मृच.१९५

(३) दासस्य तूक्तो विशेषः 'गृहजात' इत्यादि। वृत्तिश्चोक्ता 'उच्छिष्टमन्न दातव्यं जीर्णानि वसनानि च' इत्यादि। चतुर्विधाः कर्मकराः। कर्मापि द्विविध शुभमशुभं च। कस्य शुभ कस्याशुभमित्युत्तरेण विशेष्यते। नाभा.६।४

तु (च) ऽभ्युपेत्यै (मुपेत्यै), अभा.८८ नास्मृवत्, **मिता.** २।१८२; **अप** २।१८४; **व्यक.**१४७, **स्मृच.**४, **विर.**१३९, **पमा.**३३४ नास्मृवत्, **सवि.**२८९ बृहस्पति., **वीमि.** २।१८२, **व्यप्र.**३१३, **व्यम.**९०, **विता.**६२५; **राकौ.** ४७४ तु (च) अशुश्रूषाऽ (शुश्रूषाभ); **समु.**९८.

(१) **नासं** ६।२ तेषा (शेषा), **नास्मृ.**८।२, **अभा** ८८; **मिता.**२।१८२ विधः (विधा) करः (कराः), **अप.**२।१८४ नासवत्, **व्यक.**१४७ तेषा (शेषा) शेषं मितावत्; **विर** १३९ दृष्टो (पूक्तो) तेषा (शेषा), **पमा.**३३५ नासवत्; **सुबो.** २।१९६ (=) मितावत्, **विचि.**६४ नासवत्; **सवि.** २८९ तेषा दासास्त्रि (शेषा दासास्तु); **व्यप्र.**३१३, **व्यउ.**१०२ दृष्टो (प्रोक्तो) पू., **विता.**६२५, **राकौ.**४७४ नासंवत्, **बाल.**२।१३४, **सेतु.**१५६ तेषा दासास्त्रि (शेषा दासास्तु) शेष मितावत्, **समु** ९८ क. (का.) विध (विधाः) दृष्टो (दृष्टा) शेष मितावत्, **विच.**१४३ नासवत्.

(२) **नासं.**६।३ शेया (प्रोक्ता); **नास्मृ.**८।३; **अभा.**८८, **मिता.**२।१८२; **अप.**२।१८४; **व्यक.**१४७, **स्मृच.**१९५; **विर.**१४०; **पमा.**३३५; **सुबो.**२।१८२ पू.: २।१९६(=)

पू.; **विचि.**६४; **नृप्र.**२४ पू.; **सवि.**२९०-२९१ (=); **व्यप्र.**३१३; **व्यउ.**१०२; **विता.**६२६ स्त्वधि (श्राधि); **राकौ.**४७४ एते (राज्ञे), **बाल.**२।१३४, **सेतु.**१५६ कर्मकृत (धर्मकृत्), **समु.**९८, **विच.**१४३, **विव्य.**३८.

(१) **नासं.**६।४; **नास्मृ.**८।४ स्तूक्तो (श्लोक्तो), **अभा.** ८८ नास्मृवत्; **मिता.**२।१८२ कृत (कर); **अप.**२।१८४ कृत (कर) रेव च (तस्तथा); **व्यक.**१४७ रेव च (तस्तथा); **स्मृच.**१९५ व्यकवत्, **विर.**१४० कृत (कर) रेव च (तस्तथा); **पमा** ३३५ त्वमेषा (त्वं तेषा) जाति (जात) शेष अपवत्; **विचि.** ६४ पू., **नृप्र.**२४, **सवि.**२९१ (=); **व्यप्र.**३१३ त्वमेषा (त्व तेषा) शेष व्यकवत्; **व्यउ** १०१ जाति स्को (जातकर्मकर. प्रोक्तो); **विता.**६२६ मितावत्; **राकौ.**४७४ व्यप्रवत्; **बाल.** २।१३४ पू.; **समु.**९८ व्यकवत्; **विच.**१४३ प.

शिष्यविधि.

आ विद्याग्रहणाच्छिष्यः शुश्रूषेत्प्रयतो गुरुम् ।
तद्वृत्तिर्गुरुदारेषु गुरुपुत्रे तथैव च ॥

(१) यावद्विद्याग्रहणसमाप्तिस्तावच्छिष्यो गुरुं शुश्रूषयेत् । गुरुपत्नीं गुरुपुत्रं च तद्वदेवेति । अभा.८८

(२) यावद् विद्याग्रहणं तावच्छुश्रूषेत प्रयतश्च गुरुम् । विसर्जनोत्तरकालमनियमः, धर्मार्थी शुश्रूषेत, न दण्ड्यः । प्राक् तु विनेयोऽशुश्रूषन् । गुरुदारेषु गुरुपुत्रेषु च तथैव गुरुवृत्तिः । नाभा.६।८

ब्रह्मचारी चरेद्भैक्षमधःशय्यनलङ्कृतः ।
जघन्यशायी सर्वेषां पूर्वोत्थायी गुरोर्गृहे ॥

(१) जघन्यशायी पश्चाच्छायी । शेषं प्रसिद्धम् । अभा.८८

(२) गुप्तसर्वेन्द्रियो भिक्षां चरेद् यथोक्तम् । अधःशय्यनलङ्कृत इति प्रदर्शनार्थं, गन्धमाल्यविरागवसनच्छत्रोपानहादिरहितः । एतेषामतिक्रमे गुरोरशक्तत्वे राज्ञा विनेय इत्येवमर्थं इहोपन्यासः आचारोक्तस्य । सर्वग्रहणं प्रकृतापेक्षम् । प्रकृताश्च गुरुभार्यापुत्राः । तेषु शयितेषु शयनशीलः, दृष्टार्थमेतत् । कदाचिज्जाग्रत्सु कार्यं किञ्चित् भवेदिति । तेभ्यश्च पूर्वोत्थायी । एतदपि तथैव दृष्टार्थम् । नाभा.६।९

नासंदिष्टः प्रतिष्ठेत तिष्ठेद्वा गुरुणा क्वचित् ।
संदिष्टः प्रतिकुर्वीत शक्तश्चेदविचारयन् ॥

अनादिष्टो न गच्छेन्न तिष्ठेत् । यचादिष्टस्तदविचारयन्, यदि शक्तः । नो चेत्स्वरूपं निवेदयेत् । अभा.८८

यथाकालमधीयीत यावन्न विमना गुरुः ।
आसीनोऽधो गुरोः पार्श्वे फलके वा समाहितः ॥

स्पष्टार्थोऽध्ययनविधिः । अभा.८८

स्रोतोवहेव सर्वत्र विद्या निम्नानुसारिणी ।
निम्नवर्ती भवेत्तस्मात्तदर्थी सर्वदा गुरोः ॥

स्रोतोवहा नदी यथा सा निम्नानुसारिणी तथा विद्यापि । तस्माद्यो विद्यार्थी तेन सर्वदा गुरोः प्रणतेन भवितव्यमिति । अभा.८९

अनुशास्यश्च गुरुणा न चेदनुविधीयते ।
अविधिनाथवा बद्ध्वा रज्ज्वा वेणुदलेन वा ॥

(१) यदि गुरोरादेशकारी न भवति । ततो गुरुणा अनुशास्यः शिक्षणीयः । बद्ध्वा रज्ज्वा वंशा वयवेन वा आस्फालनीयः । अविधिनेति निष्ठुरमित्यर्थः ।

(२) अवधेन ताडनहेतुदण्डादिव्यतिरेकेण । विर.२७२

भृशं न ताडयेदेनं नोत्तमाङ्गे न वक्षसि ।
अनुशास्याथ विश्वास्यः शास्यो राज्ञान्यथा गुरुः॥

(१) कुपितेनापि गुरुणा न भृशं ताड्यः शिष्यः । उत्तमाङ्गे न ताडयो न वक्षसि । ताडितोऽध्यनन्तरमाश्वास्यः । यदि पुनरतिक्रोधादधिकं ताडनं गुरुः करोति । तदा स गुरुरेव शिष्येण विदितो राज्ञा शास्यो दण्डनीय इत्यर्थः । अभा.८९

(२) अननुविधीयमानमनुशासदपि रज्ज्वादिना न भृशं ताडयेत् । नाभा.६।१३

समावृत्तश्च गुरवे प्रदाय गुरुदक्षिणाम् ।
प्रतीयात्स्वगृहानेषा शिष्यवृत्तिरुदाहृता ॥

---

(१) नास्मृ.८।१२; अभा.८९.

(२) नासं.६।१२ शास्य (शिष्य) अवि...ध्वा (अवधेनाथवा शिष्यान्), नास्मृ.८।१३, अभा.८९; अप.२।२२२ श्यश्च गुरुणा (स्यो गुरूणा तु) अवि...ध्वा (अवधेनाथ वा हन्याद्), विर.२७२ श्च (स्स) अविधि (अवधे) बध्वा (तन्त्या).

(३) नासं.६।१३ उत्तरार्धे (अनुशिष्य च विश्वास्यो दण्ड्यो राज्ञान्यथा गुरुः); नास्मृ.८।१४; अभा.८९ राज्ञा (राज्ञो); अप.२।२२२ वक्ष (चोर) स्याथ (स्य च); विर. २७२ स्याथ (स्यश्च) राज्ञा (राज्ञो); दवि.२३१ स्याथ (स्य च); नृप्र.२५ विरवत्.

(४) नासं६।१४; नास्मृ.८।१५; अभा.८९; अप.२।१८४ त्तश्च (त्तस्तु); व्यक.१४७-१४८; स्मृच.१९५; विर.

---

(१) नासं ६।८ षेत् (पत्), नास्मृ ८।८, अभा.८८, अप २।१८४; व्यक.१४७, स्मृच १९५; विर.१४०, पमा.३३७; त्रिचि.६४; नृप २५; सावे २९० तद्वृत्तिः (एतच्च); व्यप्र.३१४; वित.६२७; राको.४७५; सेतु १५६; समु.९८; त्रिच.१४३.

(२) नासं.६।९; नास्मृ.८।९; अभा.८८ क्ष्वैक्ष (क्ष्वैक्ष्य).

(३) नासं.६।१० द्वा गुरुणा (द्वापि गुरुं) प्रति (कर्म) चार (लम्ब); नास्मृ ८।१०; अभा.८८ दिष्ट. (दिग्धः).

(४) नासं.६।११ पार्श्वे (कूचें); नास्मृ.८।११; अभा.८८.

(१) यदा च शिष्यः समावृत्तो भवति समाप्तविद्यः। तदा गुरवे दक्षिणा दत्त्वा गृहं प्रति गच्छेदिति। अभा.८९

(२) समावृत्तश्चेति चशब्दात् समाप्तविद्यः। नाभा.६।१४

अन्तेवासिविधिः

स्वशिल्पमिच्छन्नाहर्तुं बान्धवानामनुज्ञया।
आचार्यस्य वसेदन्ते कालं कृत्वा सुनिश्चितम्॥

(१) यश्च शिल्पादिविज्ञानविद्यार्थी भवति स कालं निश्चितमवधिं कृत्वा गुरुगृहे वसेदिति। अभा.८९

(२) क्रमादन्तेवासिविधिरुच्यते—आत्मनोऽभिमतं शिल्पं नानाप्रकारं तस्माच्छिल्पोपाध्यायसकाशादाहर्तुं ग्रहीतुमिच्छन् पित्रादिभिरनुज्ञातस्तस्यान्ते वसेत् तेन सह कालव्यवस्थां कृत्वा। नाभा.६।१५

आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनम्।
न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत्॥

(१) आचार्यश्च तेन अन्तेवासिना तदेव शिल्पकर्म कारयेन्नान्यत्, स्वगृहे दत्तभोजन शिक्षयेत् पुत्रवत्पश्येन्न कर्मकरवत्। अभा.८९

(२) एवं चान्तेवासिना कङ्कणादिकर्मफलार्पणमात्रेण गुरुशुश्रूषा कार्येत्यवसेयम्। स्मृच.१९६

शिक्षयन्तमदुष्टं च यस्त्वाचार्यं परित्यजेत्।
बलाद्वासयितव्यः स्याद्वधबन्धौ च सोऽर्हति॥

(१) यस्तु शिष्यो महापातकाद्यदुष्ट गुरु शिक्षयन्तं परित्यजेदसौ तेन गुरुणा बलाद्वासयितव्यः। वधबन्धौ च सोऽर्हति। अभा.८९

(२) वासयितव्यः स्यादाचार्यपार्श्व इति शेषः। वधोऽत्र ताडनं न प्राणच्छेदः। अपराधस्याल्पत्वात्। स्मृच.१९६

शिक्षितोऽपि कृतं कालमन्तेवासी समाप्नुयात्।
तत्र कर्म च यत्कुर्यादाचार्यस्यैव तत्फलम्॥

(१) यः शिष्यः विनयकृतकालः प्रथमं गुरोः शुश्रूषेत शिल्पतः, कृतं काल असौ शिक्षितोऽपि निष्पन्नोऽपि समाप्तिं नयेत्। तत्कालमध्ये यदन्तेवासी कर्म कुर्यात् तस्य कर्मणः फलं गुरोरेव भवति निःशेषं न शिष्यस्य किंचित्। अभा.९०

(२) कृतं कालमाचार्यसमीपस्थितत्वधित्वेन परिभाषितं काल तत्र समापनीये कालशेषे प्रतिदिनमभ्यासोपरमेऽप्याचार्यस्यार्थलाभार्थं अवश्यमभ्यस्तं कर्म कार्यम्। कालशेषे गुरुगृह एव भोजनम्। स्मृच.१९६

(३) तत्र यत् कर्म कुर्यान्छिक्षितः स्वशिल्पनिमित्तं राज्ञोऽन्यस्माद्वा तन्निमित्तं यल्लभते। नाभा.६।१८

१४०; **नृप्र.**२५ पू., **सवि.**२९०, **व्यप्र.**३१४, **विता.** ६२७; **सेतु.**१५६-१५७,३२०; **समु.**९८ अपवत्, **विच** १४३ अपवत्.

(१) **नासं** ६।१५; **नास्मृ** ८।१६; **अभा.**८९ च्छत्रा (च्छेदा); **मिता.**२।१८४ काल कृत्वा (कृत्वा काल); **अप.**२। १८४; **व्यक.**१४८ स्व (स्वं) बृहस्पति ; **स्मृच.**१९६; **विर** १४१ व्यकवत्; **पमा.**३३८ स्व (स्व) त्रा (त्वा); **विच.**६४-६५ बृहस्पतिः; **सवि** २८९-२९०; **व्यप्र** ३१५, **व्यउ** १०३ बान्धवा (ब्राह्मणा) शेषं मितावत्, **विता.**६२९मितावत्, **सेतु.** १५७; **समु** ९८; **विच.**१४४, **विव्य.**३८ बृहस्पतिः.

(२) **नासं.**६।१६ गृहं (गृहात्), **नास्मृ.**८।१७; **अभा.** ८९; **मिता.**२।१८४; **अप.**२।१८४; **व्यक.**१४८ बृहस्पतिः, **स्मृच.**१९६; **विर.**१४१ खोज (जीव); **पमा.**३३८; **विचि.** ६५; **नृप्र.**२५; **सवि.**२९०; **वीमि.**२।१८४ उक्त.; **व्यप्र.** ३१५; **व्यउ.**१०३; **विता.**६२९; **सेतु.**१५७; **समु.**९८; **विच.**१४४; **विव्य.**२८ उक्त., बृहस्पतिः.

(१) **नासं.**६।१७ यस्त्वा (य आ), **नास्मृ.**८।१८ च यस्त्वाचार्यं (य आचार्यं स), **अभा** ८९ नास्मृवत्; **मिता.** २।१८४ दुष्ट च यस्त्वा (सदुष्ट य आ), **अप** २।१८४, **व्यक.** १४८, **स्मृच** १९६; **विर** १४१, **पमा** ३३९ बन्धौ (बन्ध); **विचि** ६५, **नृप्र.**२४ पमावत्, **वीमि.**२।१८४, **व्यप्र.** ३१५, **व्यउ.**१०३ द्वधबन्धौ (द्वध बन्ध) शेष मितावत्; **विता.**६२९ च यस्त्वा (तु य आ), **राकौ.**४७५; **सेतु** १५७; **समु** ९८, **विव्य** ३८ उक्त, बृहस्पतिः.

(२) **नासं.**६।१८; **नास्मृ** ८।१९, **अभा.**९०, **मिता.** २।१८४; **अप** २।१८४ प्रयात् (पयेत्); **व्यक.**१४८ स्फलम् (द्धनम्) शेषं अपवत्, **स्मृच.**१९६ अपवत्, **विर.**१४२ अपवत्; **पमा.**३३९ अपवत्; **विचि** ६५ अपवत्; **नृप्र.**२५, **सवि.**२९० कृत काल (श्रित काम) एनुयात् (चरेत्) कात्यायन, **व्यप्र.**३१५ अपवत्; **व्यउ.**१०३; **विता.**६२९ कृतं(कृति); **राकौ.**४७५ अपवत्; **सेतु.**१५७ अपवत्; **समु.**९८ अपवत्; **विव्य.**३८ अपवत्, बृहस्पतिः.

गृहीतशिल्पः समये कृत्वाचार्यं प्रदक्षिणम् ।
शक्तितश्चानुमान्यैनमन्तेवासी निवर्तते ॥

शिक्षितश्च शिष्यः संपूरितशिल्पकालसमयस्त गुरुमनुज्ञा वाच्य प्रदक्षिणीकृत्य च गुरुगृहान्निवर्तते स्वगृह प्रेयादिति । अभा.९०

[2]**वेतनं वा यदि कृतं ज्ञात्वा शिष्यस्य कौशलम् ।**
अन्तेवासी समादद्यान्न चान्यस्य गृहे वसेत् ॥

अथ शिष्यस्य विज्ञानकौशल दृष्ट्वा गुरुणा तस्य किंचिद्वेतन जल्पित भवति । ततः शिष्यस्तदादद्यात् । न चान्यगृहे वसेदिति । इत्यन्तेवासिवृत्तम् । इति नारदीयधर्मशास्त्रे कल्याणभट्टकृतभाष्ये अन्तेवासिप्रकरण समाप्तम् । अभा.९०

भृतकविधि

[3]**भृतकस्त्रिविधो ज्ञेय उत्तमो मध्यमोऽधमः ।**
शक्तिभक्त्यनुरूपा स्यादेषां कर्माश्रया भृतिः ॥

भक्तिरुपचारः । कर्माश्रया कार्यनिबन्धना ।
विर.१४३

(१) **नासं**.६।१९ शक्ति (शिक्षि) तंते (तंयेत्), **नास्मृ** ८।२० चार्य (चार्य) णम् (णाम्); **अभा**.९० तशिल्पः (ते शिल्पि) चार्य (चार्य) णम् (णाम्) मान्यै (मन्यै), **मिता**.२।१८४ शक्ति (शिक्षि), **अप**.२।१८४, **व्यक**.१४८ नास्मृवत्, **स्मृच** १९६ चार्य (चार्य) तेने (तंयेत्), **विर**.१४२ चार्य (चार्य) मान्यै (मन्यै); **पमा**.३३९, **विचि** ६५ चार्य (चार्य), **सवि** २९० हारीत., **वीमि**.२।१८४ मितावत्, **व्यप्र** ३१५, **व्यउ**.१०३ चार्य (चार्य) शक्ति (शिक्षि), **विता** ६२९ व्यउवत्; **सेतु**.१५७,३२० विचिवत्, **समु**.९८-९९ चार्य (चार्य) तेने (तंयेत्)

(२) **नास्मृ**.८।२१, **अभा**.९०.

(३) **नासं**.६।२०, **नास्मृ** ८।२२, **अप** २।१८४ उत्त म. (उत्तमाधममध्यमः) भक्त्य (तश्चा) कर्मा (वत्सा), **व्यक**.१४८; **स्मृच** १९६ शक्तिभक्त्य (भृत्यशक्त्य) उत्त., **विर**.१४३, **पमा**.३४० भृतक (भृत्यस्तु) भक्त्य देषां (भक्तानुसारात्या तेषां), **विचि** ६६ उत्त म. (उत्तमाधममध्यमा) भक्त्यनुरूपा स्यात् (भक्तानुरूपत्वात्), **नृप्र**.२५, **व्यप्र** ३१६, **विता** ६३१, **सेतु** १५८ उत्त.. म. (उत्तमाधममध्यम) रूपा स्या (रूपत्वा), **समु**.९९ स्मृचवत्.

उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीवलः ।
अधमो भारवाहः स्यादित्येवं त्रिविधो भृतः ॥

आयुधैः सेवकः उत्तमः । कर्षको मध्यमः । अधमो भारवाहः काष्ठोदकयवसधान्यवहनादिप्रत्युत्पन्नप्रतिदिवसकर्मकरः । एष त्रिविधो भृतः । नाभा.६।२१

अर्थेष्वधिकृतो यः स्यात्कुटुम्बस्य तथोपरि ।
सोऽधिकर्मकरो ज्ञेयः स च कौटुम्बिकः स्मृतः ॥

(१) सर्वेषु प्रभृतकेष्वधिकृत उपरिकृतोऽधिष्ठायक इति यावत् । अर्थेऽधिकृत इति केचित् पठन्ति । तथा चायमर्थः । अर्थेषु क्षेत्रहिरण्यादिष्वधिकृतः पालकत्वेन नियुक्त इति । कुटुम्बस्योपरीत्यत्र कृत इत्यध्याहार्यम् । कुटुम्बस्योपरिकरणमायव्ययकर्तृत्वेन नियोग एव । +स्मृच.१९७

(२) तथाधिकर्मकृतमाह–अर्थेष्विति । अर्थेषु कार्येषु, अनयोर्द्वयोरप्यधिकर्मकरकौटुम्बिकसंज्ञे व्यवहाराय ।
विर.१४३

(३) बृहस्पतिनाप्यस्यार्थभृत एवान्तर्भावः कृतः । नारदेन तु सामान्यविशेषभावेन भेदेन गणनम् ।
विचि.६६

+ व्यप्र. स्मृचवत् ।

(१) **नासं** ६।२१, **नास्मृ**.८।२३ त्येव (त्येष), **मिता**.२।१८२ वाहः (वाही); **अप**.२।१८४, **व्यक** १४९ मस्त्वा (मो ह्या) मस्तु (मश्च) त्येवं (त्येष), **विर**.१४३ नास्मृवत्; **पमा**.३३६ त्वायुधीयोऽत्र (कार्यकर्ता च) वाह. (वाहा), **सुबो**.२।१९६ (=) मितावत्, **विचि**.६६ स्त्वा (श्चा) स्तु (श्च) त्येव (त्येष); **नृप्र**.२५, **सवि** २९१(=) मितावत्, **व्यप्र**.३१६ (आयुधी तूत्तम प्रोक्तो मध्यमस्तु कृषीवल.। भारवाहोऽधमः प्रोक्तस्तथा च गृहकर्मकृत् ॥), **विता**.६३१ मितावत्, **सेतु**.१५८ विचिवत्; **समु**.९९ मितावत्, **विव्य**.३८ विचिवत्, बृहस्पतिः.

(२) **नासं**.६।२२, **नास्मृ**.८।२४ सोऽधि (सोऽपि); **अप** २।१८४ अर्थे (सर्वे) शेष नास्मृवत्; **व्यक** १४९, **स्मृच**.१९७ अर्थे (सर्वे) करो (कृतो), **विर**.१४३; **पमा**.३४० करो (कृतो) स च (स न), **विचि** ६६, **नृप्र** २५ स्मृत.(तथा), **व्यप्र**.३१६ स्मृचवत्; **व्यम** ९० सोऽधि (सोऽपि) शेषं स्मृचवत्; **विता** ६३१ स्मृचवत्, क्रमेण बृहस्पति; **सेतु**.१५८; **समु**.९९ अर्थे (सर्वे), **विच**.१४४.

मृतानां दासाना च क्रमेण शुभान्यशुभानि च कर्माणि

शुभकर्मकरा ह्येते चत्वारः समुदाहृताः ।
जघन्यकर्मभाजस्तु शेषा दासास्त्रिपञ्चकाः ॥

शिष्यादयोऽधिकर्मकरान्ताः चत्वारः शुभकर्मकराः । अशुभकर्मकराः शेषा दासाः पञ्चदशोच्यन्ते ।
नाभा.६।२३

कर्मापि द्विविधं ज्ञेयमशुभं शुभमेव च ।
अशुभं दासकर्मोक्तं शुभं कर्मकृतां स्मृतम् ॥

(१) कर्म शुभाशुभतया द्विविध दृष्टम् । तत्र शुभ कर्मकराणामशुभ दासानामिति । अभा.८८

(२) कर्मकृतः शिष्यादिचतुष्टयस्य । विर.१४३

गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् ।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥
इच्छतः स्वामिनश्चाङ्गैरुपस्थानमथान्ततः ।
अशुभं कर्म विज्ञेयं शुभमन्यदतः परम् ॥

(१) निगदव्याख्यातौ श्लोकौ । अशुभकर्मभेदः । अभा.८८

(२) अवस्करः संमार्जनरेणुराशिः । शोधनशब्दः प्रत्येक गृहद्वारादिषु चतुर्ष्वभिसंबध्यते । उज्झन त्यागः । अन्ततो मूत्रपुरीषविरामे लेपनिर्मार्जनार्थं स्वामीच्छया स्वहस्तार्चर्पणम् । स्मृच.१९७

(३) अङ्गैर्हस्तादिभिरुपस्थान संवाहन तच्चाङ्गानामेव. अन्ततः समीपतः । विर.१४४

(४) संवाहनपादोद्वर्तनादिना स्वामिन इष्टैरङ्गैरुपस्थान हस्तादिभिः । अन्तत इत्यन्यत्र वक्तव्य कर्तव्यमित्यर्थः । नाभा.६।७

आनुलोम्येनैव दासत्वम्

वर्णानां प्रातिलोम्येन दासत्वं न विधीयते ।
स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मता ॥

(१) यथोत्तमवर्णं प्रति हीनवर्णा सवर्णा वा भार्या भवति न पुनर्हीनवर्णं प्रत्युत्तमवर्णा तथैव दासोऽपि भवेदित्यर्थः । स्मृच.१९८

(२) स्वधर्मः स्वकीयाश्रमधर्मः स्वधर्मत्यागिनोऽन्यत्र स्वधर्मत्यागिन परित्यज्येत्यर्थः । विर.१५२

(३) एतच्च प्रव्रज्यावसितो हीनवर्णस्यापि दासो भवतीत्यभिधान क्षत्रियवैश्यप्रव्रज्यावसितविषय न तु ब्राह्मणप्रव्रज्यावसितविषयम् । तस्य निर्वास्यत्वाभिधानेन दासत्वाभावात् । व्यप्र.३१७

पञ्चदश दासाः

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अनाकालभृतस्तद्वदाहितः स्वामिना च यः ॥

---

(१) **नासं** ६।२३, **नास्मृ** ८।२५ ह्वेञ् (स्वेने), **अप.** २।१८४, **व्यक** १४९, **स्मृच.** १९७ पू, **विर.** १४३, **विचि.** ६६, **सेतु.** १५९ बृहस्पति, **समु.** ९९, **विच** १४४ बृहस्पति.

(२) **नासं** ६।५ शुभ क (शेष क) कृता (कृत.), **नास्मृ** ८।५, **अभा.**८८ कृता (कृत), **मिता** २।१८२, **अप** २।१८३ ज्ञेय (प्रोक्त); **व्यक.** १४९ ज्ञेय (प्रोक्त) कृता (कृत·), **विर.** १४३ व्यकवत्, **पमा.** ३३५ कृता (करे), **विचि.** ६६ ज्ञेय (प्रोक्त) च (वा) कृता (करे); **सवि.** २९१(=) अभावत्, **वीमि** २।१८२ उत्त., **व्यप्र.**३१३; **विता.**६२६; **राकौ.**४७४, **सेतु.**१५९ व्यकवत्, बृहस्पतिः, **समु.**९९ भ कर्म म (भमन्यदुदीरितम्), **विच.**१४४ व्यकवत्, बृहस्पति.

(३) **नासं.**६।६; **नास्मृ.**८।६, **अभा** ८८, **मिता** २।१८२, **अप.**२।१८३ ज्ञानम् (त्करम्); **व्यक** १४९; **स्मृच.**१९७; **विर.**१४४; **पमा.**३३५, **विचि.**६६, **मृप्र.**२५ ग्रहणोज्झनम् (गुदशोधनम्), **सवि.**२९१ (=) च्छिष्ट (च्छिष्ट); **वीमि.**२।१८२, **व्यप्र.**३१३, **विता.**६२६ ज्ञानम् (ज्ञतम्); **राकौ.**४७४ श्चा (ग्रा); **सेतु.**१५९स्कर (कर) बृहस्पतिः, **समु.**९९, **विच.**१४४-१४५ रथ्याव (रथ्योप) बृहस्पति..

(४) **नासं.**६।७ इच्छ (इष्ट); **नास्मृ** ८।७ इच्छ (इष्ट) मथा (मथोऽ); **अभा.**८८ इच्छ (इष्ट) मथान्ततः (मथोन्नतिः); **मिता** २।१८२; **अप.**२।१८३; **व्यक.**१४९ इच्छ (इष्ट); **स्मृच** १९७ इच्छ (इष्ट) भमन्यदतः (भं तु यदतः); **विर.**१४४ दतः (त्ततः); **पमा.**३३५; **विचि.**६६ इच्छ (गच्छ) श्चाङ्गै स्वाङ्गै), **मृप्र** २५ इच्छ (इष्ट), **सवि.**२९१ (=) इच्छ ..ङ्गै (इष्टतः स्वामिना स्वाङ्गै); **वीमि.**२।१८२; **व्यप्र.** ३१३, **विता.**६२६ अथान्त (तथान्त); **राकौ.**४७४; **सेतु.** १५९ श्चाङ्गै (स्वाङ्गै) बृहस्पतिः; **समु.**९९ स्मृचवत्; **विच.**१४५ सेतुवत्, बृहस्पति. .

(१) **नासं.**६।३७; **नास्मृ.**८।३९; **मिता.**२।१८३; **अप.** २।१८३ दासत्वं न (न दासत्व); **व्यक.**१५३, **स्मृच.**१९७, **विर.**१५२; **पमा.**३४१; **विचि.**७२, **चन्द्र** ५२; **वीमि.** २।१८३, **व्यप्र.**३१७, **व्यउ.**१०२; **व्यम.**९१ पू.; **राकौ.** ४७६; **सेतु** १६५; **समु.**९९; **विव्य** ४० प्राति (आनु).

(२) **नासं.**६।२४ अनाकाल (अशनादि) दाहितः (दाधत्तः);

मोक्षितो महतश्चर्णाद्युद्धे प्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥

(१) गृहे दास्या जातो गृहजातः । क्रीतो मूल्येन । लब्धः प्रतिग्रहादिना । दायादुपागतः पित्रादिदासः । अनाकालभृतो दुर्भिक्षे यो दासत्वाय मरणाद्रक्षितः । आहितः स्वामिना धनग्रहणेनाधिता नीतः । ऋण मोचनेन दासत्वमभ्युपगतः ऋणदासः । युद्धप्राप्तः समरे विजित्य गृहीतः । पणे जितः यत्रास्मिन विवादे पराजितोऽहं तदा त्वद्दासो भवामीति परिभाष्य जितः । तवाहमित्युपगतः 'तवाह दास' इति स्वय संप्रतिपन्नः । प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः ।

नास्मृ.८।२६ गृह (गृहे) भृतस्तद्वदा (भृतो लोकेऽऽ), **मिता** २।१८ ३; **अप** २।१८२ गृह (गृहे); **व्यक.**१४९ अना (अन्ना), **स्मृच.**१९९, **विर** १४४ व्यकवत्; **पमा.**३३६ व्यकवत्, **विचि.**६७ व्यकवत्; **नृप्र.**२५, **सवि.**२९१ (=); **वीमि.** २।१८२ स्तद्वदा (श्चैव आ), **व्यप्र** ३१९ वीमिवत्; **व्यउ** १०१, **व्यम.**९१, **विता.**६३७, **बाल.**२।१३४, **सेतु** १५९ व्यकवत्; **समु.**१००; **विच** १४५ व्यकवत्; **विव्य** ३८ व्यकवत्.

(१) **नासं.**६।२५ पूर्वार्धे (ऋणाच्च मोक्षितोऽनल्पाद युद्धप्राप्तः पणे जित.) वसित. (पसृत·), **नास्मृ** ८।२७युद्धे प्राप्त (प्राप्तो युद्धात्), **मिता.**२।१८२ युद्धे (युद्ध); **अप.**२।१८२ **व्यक.**१५०, **स्मृच.**१९९, **विर.**१४४, **पमा** ३३६. **विचि.**६७ वसि (वासि), **नृप्र** २५, **सवि.**२९१(=)मितावत्, **वीमि.**२।१८२ मोक्षि (मोचि) शेष मितावत्; **व्यप्र** ३१९ **व्यउ.**१०१ मितावत्; **व्यम.**९१; **विता.**६३७, **बाल** २।१३४ मितावत्, **सेतु** १५९, **समु.**१०० मोक्षि (मोचि). **विच.**१४५; **विव्य.**३८.

(२) **नासं.**६।२६ हृतः (भृतः); **नास्मृ.**८।२८; **मिता** २।१८२ नासवत्; **अप.**२।१८२; **व्यक** १५० नासवत्, **स्मृच.**१९९ नासवत्; **विर.**१४४ हृतः (कृतः), **पमा.**३३६, **विचि.**६७ नासंवत्, **नृप्र.**२५; **सवि.** २९१ (=), **वीमि.**२।१८२, **व्यप्र.**३१९, **व्यउ.**१०१, **व्यम.**९१, **विता** ६३७, **बाल.**२।१३४, **सेतु.**१६० शेष (क्षेप) शेष नासवत्, **समु.**१०० नासवत्, **विच.**१४५ नासंवत्; **विव्य.**३८ नासंवत्.

कृतः एतावत्काल त्वद्दास इति अभ्युपगमितः । भक्त दासः सर्वकालं भक्तार्थमेव दासत्वमभ्युपगम्य य प्रविष्टः । वडवाहृतः वडवा गृहदासी तयाहृतः तल्लोभे तामुद्वाह्य दासत्वेन प्रविष्टः । य आत्मानं विक्रीणी असावात्मविक्रेतेत्येवं पञ्चदश प्रकाराः ।

+मिता.२।१८

(२) द्यूतजित इति प्रकाशपारिजातौ ।

*व्यक.१५

(३) गृहजातः स्वगृहदास्या जातः । क्रीतो मूल्ये स्वाम्यन्तरात्प्राप्तः । लब्धस्तत एव प्रतिग्रहादिना प्राप्तः भक्तदासो भक्षितं भक्तं मूल्यद्वारेण यावत्ते ददामि तावदहं ते दास इत्यभ्युपगतः । वडवाभृतो वडव गृहदासीमुद्वाह्य तत्स्वाम्यनुमत्यर्थं दासत्वेन प्रविष्टः आत्मनो विक्रेता स्वयमेवात्मनो विक्रयमर्थार्थ कृत वान् । *स्मृच.१९

(४) दुर्भिक्षेऽशनवसनादिना भृतोऽशनादिभृतः केनचिन्निमित्तेन प्रव्रज्याया अपक्रान्तः शाक्यादिः आश्रमादपक्रान्तस्य चण्डालत्वादसम्भाष्य एव सः । वडवा दासी अनियतपुंस्कत्वसामान्यात् ।

*नाभा

दास्यादमोच्या·

तत्र पूर्वश्चतुर्वर्गो दासत्वान्न विमुच्यते ।
प्रसादात्स्वामिनोऽन्यत्र दास्यमेषां क्रमागतम् ।

अत्राद्यानां गृहजातक्रीतलब्धदायागताना चतुर्ण दासत्वापगमः स्वामिप्रसादवशादेव नान्यथेत्याह—तत्रेति । स्मृच.१९

+ अप. मितावत् व्यकवच्च । पमा., विर., विचि., सवि. व्यप्र., व्यउ. मितावत् ।

* शेषं मितावत् ।

(१) **नासं.**६।२७, **नास्मृ.**८।२९ स्वामिनो (द्धनिनो) **अप.**२।१८२; **व्यक.**१५० तत्र (एतत्) दास...ते (नै दास्यात् प्रमुच्यते); **स्मृच.**१९९; **विर.**१४५ दास... (नैव दास्यात् प्रमुच्यते); **पमा.**३४३; **विचि.**६८ दास(दास्य) **सवि.**२९२; **चन्द्र.**४७ न वि (त्रैव) व्यासः; **व्यप्र.**३२० **व्यम.**९१; **विता.**६३७; **सेतु.**१६१; **समु.**१००; **विच** १४६; **विव्य.**३९ वर्गो (र्गोक्तो).

[1]**विक्रीणीते स्वतन्त्रः सन् य आत्मानं नराधमः।**
स जघन्यतमस्तेषां सोऽपि दास्यान्न मुच्यते ॥

प्रसादात्स्वामिनोऽन्यत्रेत्यत्रानुपज्यते। ततश्चायमर्थः। आत्मविक्रेतापि गृहजातादिवत् स्वामिप्रसादादन्यतो दास्यान्न विमुच्यत इति। एवं च गृहजातादयोऽप्यात्मविक्रेतृपञ्चमाः स्वामिप्रसादादनाकालभृतादय इव दास्यान्मुच्यन्त इति वचोभङ्गया दर्शितमिति मन्तव्यम्।

स्मृच.१९९

[2]**राज्ञ एव तु दासः स्यात् प्रव्रज्यावसितो नरः।**
न तस्य प्रतिमोक्षोऽस्ति न विशुद्धिः कथञ्चन ॥

(१) नरो विप्रेतरोऽभिमतः। विप्रस्य दास्यप्रतिषेधात्। स्मृच.१९९

(२) न केनचिदपि प्रकारेण तस्य मोक्षः शुद्धिर्वास्ति, नित्यदासो नित्याशुद्धोऽसव्यवहार्यश्च स्पर्शनादिना।

नाभा.६।३३

[3]**पारिव्राज्यं गृहीत्वा तु यः स्वधर्मं न तिष्ठति।**
श्वपदेनाङ्कयित्वा तु राजा शीघ्रं प्रवासयेत् ॥

(१) **नासं**.६।३५ णीते (णाति) स जघ (सुजघ); **नास्मृ** ८।३७ (विक्रीणीते य आत्मान स्वतन्त्र. सन्नराधम.। स जघन्यतरस्तेषां नैव दास्यात् प्रमुच्यते ॥), **अप.**२।१८२ नरा (नरोऽ) तमस्त (तरश्चै), **व्यक** १५०, **स्मृच.**१९९, **विर.** १४५, **पमा.**३४४; **विचि** ६८ सन् य आत्मान (सन्नात्मान यो), **सवि.**२९२, **चन्द्र** ४७ य आत्मान (स्वात्मान यो) व्यासः, **व्यप.**३२०, **व्यम** ९१, **विता.**६३७, **सेतु.** १६१; **समु.**१००, **विच.**१४६ य आत्मान (यथात्मान). **विव्य.**३९ विचिवत्.

(२) **नासं**.६।३३ वसितो (पसूतो) न विशुद्धि. (विशुद्धिर्वा); **नास्मृ**.८।३५ राज्ञ एव (राज्ञामे) प्रति (विप्र); **अप.** २।१८३, **व्यक.**१५०-१५१, **स्मृच.**१९९ न विशुद्धि. (नात्र शुद्धिः); **विर** १४६ तु (हि) प्रति (हि वि), **पमा** ३४४ तु (हि), **विचि.**६७ प्रति (हि वि); **सवि.**२९३; **चन्द्र.**४७ तु (स) मोक्षो (लोको), **व्यप्र** ३१८; **विता.**६३३, **सेतु.**१६० विचिवत्; **समु** १०० स्मृचवत्; **विच.**१४५ विचिवत्; **विव्य.**३९ विचिवत्.

(३) **स्मृच.**१९९ यः स्व (यस्तु); **पमा.**३४५ तु राजा (तं राजा); **व्यप्र.**३१८ दक्षनारदौ; **व्यम.**९१ पारिव्राज्य (परिव्रज्यां) दक्षनारदौ; **विता.**६३३ पमावत्, दक्षनारदौ, **समु.**१००.

श्वपदेन शुनः पादसदृशतप्तायसेन राज्ञो दास्यमकुर्वतोः क्षत्रियवैश्ययोरपि निर्वासनमुक्तविधिना कार्यम्। स्वधर्मे न तिष्ठतीति सामान्येनैवाभिधानात्।

स्मृच.२००

[4]**द्वावेव कर्मचण्डालौ लोके दूरबहिष्कृतौ।**
प्रव्रज्योपनिवृत्तश्च वृथाप्रव्रजितश्च यः ॥

तद्राजदासेतरविषयम्। राजदासस्य बहिष्कारानुपपत्तेः। एवं च प्रव्रज्यावसितेतरदासविमोक्षः स्वामिनः प्रसादप्राणरक्षणाभ्यां भवतीत्यवगन्तव्यम्।

स्मृच.२००

दास्यमोक्षकारणानि

[5]**यश्चैषां स्वामिनं कश्चिन्मोक्षयेत्प्राणसंशयात्।**
दासत्वात्स विमुच्येत पुत्रभागं लभेत च ॥

एषा पञ्चदशविधदासानां मध्य इत्यर्थः। एतच्च स्वामिनः प्रसादात्प्राणरक्षणाद्वा दास्यापगमन प्रव्रज्यावसितेतरविषयम्। स्मृच.१९९

[6]**अनाकालभृतो दास्यान्मुच्यते गोयुगं ददत्।**
संभक्षितं यद् दुर्भिक्षे न तच्छुध्येत कर्मणा ॥

---

(१) **अप** २।१८३; **स्मृच.**२००, **सवि.**२९३ ज्योपनि (ज्यापरि) हारीतः, **समु** १००.

(२) **नासं**.६।२८; **नास्मृ** ८।३०; **मिता.**२।३२ न्मोक्ष (न्मोच):२।१८२ यश्चैषां (यो वैषा) न्मोक्ष (न्मोच); **अप.**२। १८२,**व्यक.**१५२ न्मोक्ष (न्मोच),**स्मृच.**१९९ मिता.२।१८२ वत्; **विर.**१४७; **पमा.**३४६ व्यकवत्, **विचि.**६९ च (सः), **सवि.**२९२ पूर्वार्धे (यो वैषा स्वामिन कश्चि [न्मोचये] द्वोपायेत् प्राणसकटात्), **चन्द्र.**४८ व्यकवत्, **व्यप्र.**३४ व्यकवत्: ३२० मिता.२।१८२ वत्; **व्यउ.**१०२ यश्चै (तयै) भाग (लाभं) मनु., **व्यम.**९१ मिता. २।१८२ वत्; **विता.** ६३७ मिता. २।१८२ वत्; **बाल.**२।१३४ यश्चैषां (यो वैषा); **सेतु.**१६३(=) विचिवत्; **समु.**१०० मिता. २।१८२ वत्; **विच.**१४७ विमु (प्रमु) च (सः); **विव्य.** ३९ न्मोक्ष (न्मोच) स्त विमु (त्वरिमु) च (सः).

(३) **नासं**.६।२९; **नास्मृ** ८।३१; **मिता.**२।१८२; **अप.** २।१८२ काल (काले) यद्दुर्भिक्षे (च यद्दुर्भे) धेत (ध्यति); **व्यक.** १५१ अना (अन्ना) उत्तरार्धे (भक्षित चापि यद्दूर्भे न तच्छुध्यति कर्मणा), **स्मृच.**२०० पू.; **विर.**१४७ अना (अन्ना) उत्तरार्धे (भक्षित चापि यद्दस्तु न तच्छुध्यति कर्मणा);

दुर्भिक्षे भृतः पञ्चमो गोयुगं दत्वा मुच्यते । स्वामिप्रसादान्मोक्षो प्राणरक्षणाच्चेति सर्वथा स्थितेऽनिच्छत्यपि स्वामिनि निर्योगतो मोक्षहेतव उच्यन्ते । हेतौ लिङ् । यस्माद् दुर्भिक्ष उपयुक्त न कर्मणा प्रतिदिवसकृतेन शुध्यति, प्राणा हि तेन रक्षिताः । तस्माद् गोयुगं दातव्यम् । नाभा.६।२९

आहितोऽपि धनं दत्वा स्वामी यत्नेनमुद्धरेत् ।
अथोपगमयेदेनं सोऽपि क्रीतादनन्तरः ॥

(१) आहितदासस्वाधात्रा स्वगृहीतऋणे प्रत्यर्पिते सत्युत्तमर्णदास्याद्विमुच्यते । स्मृच.२००

(२) अथोपगमयेदिति । यस्मिन्नाहितो दासस्तमेव यदि ग्राहयेत्तदासौ क्रीतादनन्तरः क्रीतादवशिष्टो भवतीत्यर्थः । विर.१४८

(३) पक्ष आधत्तो यथागृहीत धन दत्वा, प्रभुर्यत्नेन मोक्षयेद् मुच्येत दास्यात् । अथ यत्नेतावता कालेन नोद्धरामीति ततः प्रविष्टोऽय भविष्यतीत्याधत्त त कालमतिगमयेत् । सोऽपि क्रीतधर्मा क्रीतस्य या गतिः सा तस्य । नाभा.६।३०

ऋणं तु सोदयं दत्वा ऋणी दास्यात्प्रमुच्यते ।
कृतकालव्यपगमात्कृतकोऽपि विमुच्यते ॥

सप्तम ऋणान्मोक्षितः । स ऋणं वृद्धि च दत्वा मुच्यते । अष्टमः कृतकः कृते काले पूर्णे मुच्यते । नाभा.६।३१

तवाहमित्युपगतो युद्धे प्राप्तः पणे जितः ।
प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यकर्मणा ॥

तवाहमित्युपगतादयस्त्रयो दासविशेषास्तु स्वामिनिर्वर्त्याखिलव्यापारनिर्वर्तकदासान्तरप्रदानाद्विमुच्यते । स्मृच.२००

भक्तस्योपेक्षणात् सद्यो भक्तदासः प्रमुच्यते ।
निग्रहाद् वडवायाश्च मुच्यते वडवाभृतः ॥

पमा.३४५ अन्ना (अन्ना) युग (द्वय) सभ (तद्व), **विचि.**६९ उत्तरार्ध (भक्षित चापि यद्दुर्ग तन्न शुध्यति कर्मणा), **सवि.** २९३ पू., कात्यायन, **चन्द्र.**४८ उत्तरार्ध (भक्षित चापि यद्दुर्ग न तच्छुध्यति कर्मणा); **वीमि.**२।१८३ युग (द्वय), **व्यप्र.**३२१, **व्यउ.**१०२, **व्यम.**९१ पू, **विता.**६३८, **बाल.**२।१३४, **सेतु** १६१(=) अन्ना (अन्ना) उत्तरार्ध (भक्षित चापि यद्दुर्ग तन्न शुध्यति कर्मणा), **समु.** १०० न तत् (तत्तु), **विच** १४६ (=) सेतुवत्, **विव्य.**२९ उत्तरार्ध (भक्षितस्यापि यद्दुर्ग तन्न शुध्यति कर्मणा).

(१) **नाम.**६।३० आहितोऽपि (आधत्तोऽथ); **नास्मृ** ८।३२ सोऽपि (स वि), **मिता.**२।१८२ पू., **अप.**२।१८२, **व्यक** १५१ पू.; **स्मृच.**२०० पू.; **विर.**१४७; **पमा.**३४५ पू.; **विचि.**६९, **चन्द्र.**४९; **वीमि.**२।१८३ पू.; **व्यप्र.**३२१ पू.; **व्यउ.**१०२ पू; **व्यम.**९१ पू.; **विता.**६३८ पू., **बाल.**२।१३४ पू.; **सेतु.**१६२; **समु.**१०० पू.; **विच.** १४७.

(२) **नास्मृ.**६।३१ पूर्वार्ध (दत्वा तु सोदयमृणमृणी दास्याद् विमुच्यते) लक्ष्यप (लाभपूर्व), **नास्मृ.**८।३३, **मिता** २।१८२, **अप.**२।१८२ तु (च) त्यमु (द्विमु) कृत ..मात् (कृतर्णालब्धपूरमात्); **व्यक.**१५१ त्यमु (द्विमु) व्यपग(व्यपर), **स्मृच** २००, **विर.**१४७ व्यकवत्, **पमा.**३४६ पूर्वार्ध (स्वपयाप्तमृण दत्वा तदृणात् स विमुच्यते), **विचि** ६९ व्यकवत्, **चन्द्र** ४९ त्यमु (द्विमु) उत्तरार्ध (कृतकालात्पुरमे कृतकालो विमुच्यते), **वीमि.**२।१८३, **व्यप्र.**३२१ कृतकोऽपि (कृतो दासो), **व्यउ.**१०२(=), **व्यम** ९१ व्यप्रवत्, **विता** ६३८-६३९ ऋणी दास्यात् (ऋणदासः) कोऽपि (दासो), **बाल** २।१३४ व्यप (व्यय), **सेतु** १६२ व्यकवत्, **समु.** १०० त्यमु (द्विमु), **विच** १४७ व्यकवत्, **विव्य** ३९ समुवत्, पू., बृहस्पतिः.

(१) **नास्मृ.**६।३२ युद्धे (युद्ध) शीर्षप्र (मूरुप), **नास्मृ.** ८।३४ युद्धे (ध्वज) पणे जित. (पणार्जित) मुच्येरन्(मुच्यते), **मिता.**२।१८२ युद्धे (युद्ध), **अप.**२।१८२ युद्धे (ध्वज) मुच्येरन् (मुच्यते), **व्यक.**१५१ मुच्येरन् (मुच्यते), **स्मृच.** २००, **विर.**१४७ व्यकवत्, **पमा.**३४६, **चन्द्र** ४९ व्यकवत्, **वीमि.**२।१८३ मितावत्, **व्यप्र.**३२१ मितावत्, **व्यउ.**१०२ (=), **व्यम.**९१ रस्तुल्य (रत्नल्य), **विता** ६३८ मितावत्; **बाल** २।१३४ मितावत्, **सेतु** १६२ युद्धे (रणे) शेष व्यकवत्, **समु.**१००, **विच** १४७ सेतुवत्; **विव्य.**३९ (=) सेतुवत्, बृहस्पति.

(२) **नास्मृ.**६।३४, **नास्मृ.**८।३६ वायाश्च (वाना तु) भृतः (हृत.), **मिता.**२।१८२ पेक्ष (क्षेप) याश्च (यास्तु) भृत. (हृत), **अप.**२।१८३ (=) पेक्ष (क्षेप) प्रमु (विमु) निग्र ..श्च (वडवाया निग्रहेण) भृत. (हृतः); **व्यक.**१५१, **स्मृच** २०० पेक्ष (क्षेप) याश्च (यास्तु); **विर.**१४८ भृतः (कृतः), **पमा.**३४५-३४६ पेक्षणात्सद्यो (क्षेपणेनैव) याश्च (यास्तु) भृतः (हृतः); **विचि.**६९-७०; **चन्द्र** ४९ प्रमु (विमु), **वीमि.**२।१८३

(१) गृहदासीलोभेन दासत्वमापन्नस्तत्संभोग-त्यागाद्विमुच्यत इति । स्मृच.२००

(२) त्रयोदशो भक्तदास उक्तः। सः भक्तस्याप्रदानात् मुच्यते, भक्तार्थं हि दासत्वमभ्युपगतः । चतुर्दशो वड-वाभृतः। स निग्रहादास्या वारणान्मुच्यते। नाभा.६।३४

चौरापहृतविक्रीता ये च दासीकृता बलात् ।
राज्ञा मोचयितव्यास्ते दासत्वं तेषु नेष्यते ॥

चौरैरपहृत्य विक्रीताः, बलभृश्च ये बलाद् दासी-कृताः, राज्ञा मोच्याः । तद्दोषाद्धि ते तामवस्था गताः । अत एव तेषा दासत्व नेष्यते । तेष्विति विषयसप्तमी । तेषा दोषाभावादनभ्युपगमाच्च । नाभा.६।३६

तवाहमिति चात्मानं योऽस्वतन्त्रः प्रयच्छति ।
न स तं प्राप्नुयात्कामं पूर्वस्वामी लभेत तम् ॥

(१) तवाहमित्युपगतो दास इत्युक्तः पूर्वं, तत् स्वतन्त्रविषयम् । नाभा.६।३८

(२) अस्वतन्त्रः परदासत्वेनास्वतन्त्रः । काम नूतन-स्वामिदास्य कामयमान इतरदासीभवन्त त दासं पूर्व-स्वामी गृह्णीयादित्यर्थः । एव यदेतद्दासमधिकृत्योक्त तत्सर्वं दास्यामपि समानन्यायत्वाद्योजनीयम् ।

व्यप्र.३२२

दास्यमोक्षे घटस्फोटविधि

स्वं दासमिच्छेद्यः कर्तुमदासं प्रीतमानसः ।
स्कन्धादाय तस्यासौ भिन्द्यात्कुम्भं सहाम्भसा ॥
साक्षताभिः सपुष्पाभिर्मूर्ध्नन्यद्भिरवाकिरेत् ।
अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेत् ॥

स्वदासमदास कर्तुं यदीच्छति तुष्टः, तस्य स्कन्धाद् घट गृहीत्वाद्भिः पूर्णं स्वयमेव सहाद्भिः भिन्द्याद् घटम् । यत् त्वया कर्तव्यं अहमेव तत् करोमि न त्वया कृतेन मम प्रयोजनमस्तीति घटग्रहणेन ताभ्या ख्यापित भवति । नाभा.६।४०

ततः प्रभृति वक्तव्यः स्वाम्यनुग्रहपालितः ।
भोज्यान्नोऽथ प्रतिग्राह्यो भवत्यभिमतः सताम् ॥

प्रमु (स मु) याश्च (यास्तु) भृत (हृत.), **व्यप्र.**३२१स्मृचवत्, **व्यउ** १०२ याश्च (यास्तु) भृत. (हृत·), **व्यम.**९१ याश्च (यास्तु); **विता** ६३८-६३९ मितावत्, **बाल.**२।१३४ मितावत्; **सेतु.**१६३ (=); **समु.**१०० स्मृचवत्; **विच.** १४७ पेक्षणात् (पेक्षया), **विव्य.**३९(=)सदर्भेण तु बृहस्पति.

(१) **नास** ६।३६ चौ (चौ) मोच (मोक्ष), **नास्मृ** ८।३८ नासवत्, **मिता** २।१८२ दासत्व तेषु (दास्य तेषु हि); **अप** २।१८२; **व्यक** १५१, **स्मृच.**२०० चौरापहृत (चौरोपहृत), **विर.**१४७; **पमा** ३४७, **विचि.**६८-६९, **सवि** २९४ दासीकृता (दासाहृता), **चन्द्र.**४८ राज्ञा (दास्यात्) तेषु (तस्य), **व्यप्र.**३२१, **व्यउ** १०२ मितावत्, **विता** ६३८ मितावत्; **सेतु.**१६३, **समु.**१००; **विच.**१४७.

(२) **नास.**६।३८ पूर्वार्धे (तवास्मीति य आत्मानमस्व-तन्त्रः प्रयच्छति), **नास्मृ** ८।४०; **व्यक.**१५१ स त (स तत्), **स्मृच.**२०० स त (समं), **विर.**१४७ मिति चात्मान (मित्यु-पगतो); **पमा.**३४७ चात्मा (वात्मा), **विचि.**६८; **सवि.** २९४ कात्यायन, **चन्द्र** ४८ विरवत्, **व्यप्र** ३२२, **व्यम** ९२; **सेतु.**१६२ त्काम (त्काल) शेषं विरवत्; **समु.**१०० स्मृचवत्; **विच.**१४७ विरवत्.

(१) **नास** ६।४० स्व (स्व) थ (थ) स्याम्नो (स्याथ), **नास्मृ** ८।४२ स्व (स्व), **मिता** २।१८२. **अप** २।१८३ (=), **व्यक** १५२ स्याम्नो (स्याशु), **स्मृच** २०१, **विर.** १४९ व्यकवत्, **पमा.**३४७ नास्मृवत्; **विचि** ७० व्यक-वत्, **सवि.**२९४ नास्मृवत्, **वीमि.**२।१८३ व्यकवत्, **व्यप्र.** ३२२, **व्यउ.**१०२ नास्मृवत्; **व्यम** ९२ नास्मृवत्, **विता.** ६४१-६४२, **बाल.**२।१३४, **सेतु** १६३ व्यकवत्, **समु.** १००, **विव्य** ४० स्व (स्व) शेष व्यकवत्.

(२) **नास.**६।४१ साक्ष (अक्ष) न्यद्भिर (न्येनम), **नास्मृ.**८।४३, **मिता.**२।१८२ इति चोक्त्वा (इत्यर्थं कत्वा) मथोत्सृ (मवास्तु), **अप** २।१८३ (=) मथोत्सृ (मवास्तु), **व्यक.** १५२ किरेत् (किरन्), **स्मृच** २०१; **विर** १४९ व्यकवत्; **पमा** ३४७ ख तमथो (खस्तु तथो), **विचि.**७० व्यकवत्; **सवि.**२९४ मुख (मुख), **वीमि.**२।१८३ स (सु) मुख (मुखः) शेष व्यकवत्, **व्यप्र.**३२२; **व्यउ** १०३ मथोत्सृ (मवास्तु) शेष व्यकवत्, **व्यम.**९२; **विता** ६४२ मितावत्, **बाल.**२।१३४, **सेतु** १६३-१६४ व्यकवत्; **समु.**१००; **विव्य.**४० व्यकवत्.

(३) **नास** ६।४२ त्रोऽथ प्रतिग्राह्यो (त्रः प्रतिगृह्यश्च) त्काम (त्काल स.), **व्यक.**१५२ त्रोऽथ (त्रश्च); **स्मृच** २०१; **विर** १४९ व्यकवत्; **पमा.**३४७, **विचि** ७०; **सवि** २९५ बृहस्पति., **वीमि.**२।१८३; **व्यप्र** ३२२ ऽथ (ऽप्य), **व्यम.** ९२; **सेतु.**१६४ भवत्य (भवेद); **समु.**१००.

(१) स्वाम्यनुग्रहेण कष्टतरदशापाकरणरूपेण पालितः निजस्वरूपं नीतः संभाषणादियोग्यो भवति तदानीमेवेत्यर्थः । दासीमदासीं कर्तुमिच्छतोऽपि समानमेतद्विधानम् । दासमित्यत्र लिङ्गवचनयोरुद्देश्यविशेषणयोरविवक्षितत्वात् । स्मृच.२०१

(२) ततः प्रभृति स्वाम्यनुग्रहपालित इति संज्ञया वक्तव्यः । अभिमतः पूज्यः । विर.१४९

(३) इहाचारवचनमकरणे निगृह्यकरणार्थम् । नाभा.६।४२

भार्यापुत्रदासानां न धनस्वाम्यम्

[1]अधनास्त्रय एवैते भार्या दासस्तथा सुतः ।
यत् ते समधिगच्छन्ति यस्यैते तस्य तद् धनम् ॥

अनियतदेशत्वाच्च भार्यादीनामधना एव त्रय उक्ताः । न तैर्धनतृष्णया भर्तृपितृकार्योत्सर्गः कर्तव्यो भार्यादिभिः । यच्च ते स्वाम्यर्थमहापयन्त केनचित प्रकारेण लभेरन्, स्वामिन एतद् धनम् । नाभा.६।३९

बृहस्पतिः

वेतनानपाकर्मस्वामिपालवाग्दण्डयुपेत्याशुश्रूषाणां समानत्वम्

[2]अदेयादिकमाख्यातं भृतानामुच्यते विधिः ।
अशुश्रूषाभ्युपेत्येतत्पदमादौ निगद्यते ॥

शुश्रूषामभ्युपेत्याऽशुश्रूषोरेतत्पद विवादपदमित्यर्थः । विचि.६३

[3]वेतनस्यानपाकर्म तदनु स्वामिपालयोः ।
क्रमशः कथ्यते वादो भृतभेदत्रयन्त्विदम् ॥

भृतो मूल्येन तत्कर्मकरः । इद विवादपदम् । विर.१३९

शुश्रूषकचातुर्विध्यनिमित्तानि

[4]अनेकधा तेऽभिहिता जातिकर्मानुरूपतः ।
विद्याविज्ञानकामार्थनिमित्तेन चतुर्विधाः ॥
[5]एकैकः पुनरेतेषां क्रियाभेदात्प्रपद्यते ॥

(१) भृत्या इत्यनुवृत्तौ—अनेकधेति । व्यक.१४७

(२) वेदविद्या शिष्यस्य शुश्रूषकत्वे निमित्तं शिल्पविज्ञानमन्तेवासिनः कर्मार्थी भृतकादेः । स्मृच.४

[3]विद्या त्रयी समाख्याता ऋग्यजुःसामलक्षणा ।
तदर्थं गुरुशुश्रूषां प्रकुर्याच्छास्त्रचोदिताम् ॥
[4]विज्ञानमुच्यते शिल्पं हेमकुप्यादिसंस्कृतिः ।
नृत्यादिकं च तच्छिक्षन् कुर्यात्कर्म गुरोर्गृहे ॥

कङ्कणकटकादिनिर्माणविषय नृत्तगीतादिकरणविषय चकारात्स्तम्भकुम्भादिरचनाविषय च विज्ञानं शिल्पज्ञानमुच्यते । तत्प्राप्त्यर्थमन्तेवासी गुरोर्गृहे कर्मकङ्कणकटकादिकं कुर्यादित्यर्थः । अनेन हेमकारादिजातिकृतः कङ्कणकटकादिकर्मकृतश्च विशेषोऽन्तेवासिना दर्शितः । स्मृच.१९५

[5]यो भुङ्क्ते परदासीं तु स ज्ञेयो वनिताभृतः ।
कर्म तत्स्वामिनः कुर्याद्यथान्योऽर्थभृतो नरः ॥

---

(१) नाभा.६।३९ एवैते (एवोक्ता); नास्मृ ८।४१ यस्यैते (यस्य ते) शेष नारदवत्: Vulg. उत्तरार्धं (तेषा यत्किंचनद्रव्यं तत्स्वद्रव्य प्रकीर्तितम्), व्यक.१५२, विर.१४९, विचि. ७० २५५ (=) पू.; चन्द्र.५ प्रथमपादः :५० भार्या (पत्नी); सेतु.१६४ यत्ते (य ते).

(२) व्यक.१४७; विर.१३९; विचि.६३ अशुश्रूषाभ्यु (शुश्रूषामभ्यु), सेतु.१५५ भृत्ता (भृत्या) पू.

(३) व्यक १४७, विर.१३९, विचि ६३-६४ नु (र्थं) व्यते (ल्यते) दो (दौ); सेतु १५६ नु (र्थं) भृत (भृत); विव्य. ३८ विचिवत्, चतुष्पाद विना, नारदः.

(१) व्यक १४७, स्मृच.४ तेऽभि (त्वभि); विर.१४०; विचि ६४ उत्त, सवि.२८९ उत्त., नारद.; सेतु.१५६; समु.९८ स्मृचवत्.

(२) व्यक.१४७, स्मृच ४ क. (क) दात्प्रपद्यते (दमभिधत), विर.१४०; सवि.२८९ नारद., समु.९८.

(३) व्यक.१४७, स्मृच १९५; विर.१४० चोदि (देशि), पमा.३३८ च्छास्त्र (च्च प्र); विचि.६४ विरवत्; नृप २५ पमावत्; सवि.२८९ नारदः; व्यप्र.३१४; सेतु. १५६ विरवत्; समु.९८.

(४) व्यक.१४८ मकु (मरू) क्षन् (क्षां); स्मृच १९५ (नृत्तादिकं च यत्प्राप्तु कर्म कुर्याद्गुरोर्गृहे); विर.१४१ स्कृ (स्थि); पमा ३३८ मकु (मरू) च्छिक्षन् (त्वाप्त), विचि.६४; नृप.२५ पमावत्; सवि २८९ च्छिक्षन् (त्वाप्त) नारदः; व्यप्र.३१४ र्पं (र्ये) छिक्ष्न् (त्वाप्तु), विता ६२९ (विज्ञानमुच्यते कर्म हेमकुप्यादिसस्कृतिम् । नृत्यादिकं च तत्प्राप्तुं कर्म कुर्याद्गुरोर्गृहे), सेतु.१५७; समु ९८ स्मृचवत्; विच.१४४.

(५) व्यक.१४८ निता (डवा) तत् (चेत्), स्मृच.१९६; विर.१४२था ऽन्योऽर्थ (थात्रेन); पमा.३३९ निता (डवा) शेषं

बहुधाऽर्थभृतः प्रोक्तस्तथा भागभृतोऽपरः ।
हीनमध्योत्तमत्वं च सर्वेषामेव चोदितम् ॥
दिनमासार्धषण्मासत्रिमासाब्दभृतस्तथा ।
कर्म कुर्यात्प्रतिज्ञातं लभते परिभाषितम् ॥

(१) तत्स्वामिनो दासीस्वामिन इत्यर्थः । अर्थभूतस्य बहुविधत्वमर्थाल्पत्वमहत्वतारतम्येन ज्ञेयम् । तत्तारतम्यं च भृत्यशक्त्यनुसारतः प्रत्येतव्यम् । स्मृच.१९६

(२) भागभृतोऽत्र कर्मफलांशभृतः । विर.१४२

अर्थभृतभेदाः

आयुधी चोत्तमस्तेषां मध्यमः सीरवाहकः ।
भारवाहोऽधमः प्रोक्तस्तथैव गृहकर्मकृत् ॥

सीरवाहकः कर्षकः । यथैव भारवाहोऽधमः प्रोक्तस्तथैव पाककरणाद्यखिलगृहव्यापारकृदधमः प्रोक्त इत्यर्थः । कालकृतस्तु भृत्याना विशेषः कालाल्पत्वमहत्वनिबन्धनः । स च प्रागेव दिनमासेत्यादिनोक्तोऽनुसंधेयः । स्मृच.१९७

द्विप्रकारो भागभृतः कृषिगोजीविनां स्मृतः ।
जातशस्यात्तथा क्षीरात्स लभेत न संशयः ॥

(१) भागमिति शेषः । विर.१४३

(२) भोगभृतस्याप्यर्थभृतविशेषत्वाच्चतुष्ट्वम् । विचि.६६

कात्यायनः

अन्तेवासिविधि

यैस्तु न ग्राह्येच्छिल्पं कर्माण्यन्यानि कारयेत् ।
प्राप्नुयात्साहसं पूर्वं तस्माच्छिष्यो निवर्तते ॥

शिल्पमशिक्षयतः स्वकीयानि च कर्माणि कारयतो गुरोः शिष्येण त्यागो राज्ञा च प्रथमसाहसो दण्डः कार्य इत्यर्थः । अप.२।१८४

ब्राह्मणेतरेष्वेव वर्णानुलोम्येन दास्यम्

स्वतन्त्रस्यात्मनो दानाद्दासत्वं दारवद्भृगुः ।
त्रिषु वर्णेषु विज्ञेयं दास्यं विप्रस्य न क्वचित् ॥

यथा भर्तुः सभोगार्थं स्वशरीरदानाद्दारत्वं तथा स्वतन्त्रस्यात्मनः परार्थत्वेन दानाद्दासत्वमिति भृगुराचार्यो मन्यते इत्यर्थः । अनेनात्यन्तपारार्थ्यमाश्रित्य शुश्रूषका दासाः, पारार्थ्यमात्रमाश्रित्य शुश्रूषकास्तु कर्मकरा इति भेदोऽप्युक्त इत्यवगन्तव्यम् । अत्यन्तपारार्थ्यं तु तेषां भवति यैस्तु स्वपुरुषार्थवृत्तिनिरोधेन पारार्थ्यमाश्रित एवभूतदासत्वं ब्राह्मणेतरेष्वेव 'त्रिषु वर्णेषु' इति तेनैवाभिधानात् । अनेन दासाना जातितो भेद उक्तः । ×स्मृच.१९७

विरवत्; **विचि** ६५ नित्या (डवा) र्थं (त्र), **चन्द्र**.४६ र्थं (र्थे); **नृप्र** २४ नित्या (डवा), **व्यप्र**.३१६, **विता**.६३१, **सेतु**.१५८ नित्या (डवा) न्योऽर्थभृतो (र्थभृतको), **समु**.९९; **विच**.१४४ नित्या (डवा) कर्म तत् (तत् कर्म) शेष विरवत्; **विव्य**.३८ नः (ने) न्योऽर्थभृतो (त्रभृतको).

(१) **व्यक**.१४८ मत्वं (माना); **स्मृच**.१९६; **विर**.१४२ र्थं (त्र); **पमा**.३३९, **विचि**.६५ पू, **नृप्र** २५, **व्यप्र**.३१६ र्थभृ (र्थकृ); **विता**.६३१ पू.; **सेतु**.१५८ भा (भो) पू; **समु**.९९ ऽपरः (नरः).

(२) **व्यक**.१४८ त्रि (द्वि) ब्द (च्च) **स्मृच**.१९६ भते (भेत); **विर**.१४२ त्रि (द्वि); **पमा** ३४०; **नृप्र**.२५ त्रिमासाब्द (द्वित्रिमास), **व्यप्र**.३१६ ब्द (च्च); **विता** ६३१; **सेतु**.१५८ त्रि (द्वि) भते (भेत); **समु**.९९ स्मृचवत्.

(३) **व्यक**.१४९ थैव (था च); **स्मृच** १९६ चो (यो), **विर**.१४३ थैव (था च); **दावि**.८५; **व्यम**.९० (आयुधी तूत्तमः प्रोक्तो मध्यमस्तु कृषीवलः) थैव (था च); **समु**.९९.

(४) **अप** २।१८४; **व्यक**.१४९, **स्मृच**.१९६ रो (रा) भृतः (भृताः) विनां (वनः), **विर**.१४३; **पमा** ३४० षिगोजीविनां (षणो जीवितः) त्स लभेत (लभते तु); **विचि**.६५ भाग (भोग), **नृप्र**.२५ कृषिगोजीविना (कृषिणा जीविना), **व्यप्र**.३१६ जीवि (बीजि) नाद , **विता**.६३१ स लभेत न सशयः (यो भाग वै लभेत स), **सेतु** १५८ विचिवत्; **समु**.९९ पवार्ध स्मृचवत्, उत्तरार्धं (जातसस्यात्तथाक्षीराल्लभन्ते परिभाषितम्), **विव्य** ३८ विचिवत्.

(१) **अप** २।१८४, **व्यक**.१४८; **स्मृच**.१९६, **विर**.१४१; **पमा** ३३८; **सवि**.२९०; **व्यप्र** ३१५; **समु** ९८.

(२) **अप**.२।१८३; **व्यक** १५३ विप्रस्य (विप्रे तु); **स्मृच** १९७; **विर** १५२ विप्रस्य न क्वचित् (विप्रे न विद्यते); **पमा** ३४० प ३४१ चतुर्थपादः; **दीक** ४९ उत्त., **विचि**. ७२ उत्त ; **सवि**.२९५ उत्त ; **चन्द्र**.५२ त्रिषु वर्णेषु (वर्णत्रयस्य) उत्त ; **व्यप्र**.३१७, **व्यम**.९०; **विता**.६३३ उत्त.; **राकौ**.४७५ पू.; **समु**.९९; **विव्य**.४० उत्त.

× व्यप्र. स्मृचवत् ।

वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः ।
राजन्यवैश्यशूद्राणां त्यजतां हि स्वतन्त्रताम् ॥

स्वतन्त्रता त्यजतामत्यन्तपारार्थ्यं भजतामित्यर्थः । प्रतिलोमत इत्येतत्स्वधर्मपरित्यागिभ्यो यतिभ्योऽन्यत्र द्रष्टव्यम् । स्मृच.१९७

ब्राह्मणेतरस्यैव आपदि समवर्णदास्यम्

समवर्णेऽपि विप्रं तु दासत्वं नैव कारयेत् ।
शीलाध्ययनसंपन्नस्तदूनं कर्म कामतः ॥

(१) शीलाध्ययनसंपन्नो ब्राह्मणस्तदून शीलाध्ययनन्यून ब्राह्मण कर्म कारयेत् इत्यर्थः । व्यक.१५४

(२) 'दास्यदासमेते'ति वचनाद्विप्रस्य सवर्णप्रतिदासत्वमापदि प्राप्तमिवाभातीति बुद्ध्या तन्निषेधार्थमाह—समवर्णोऽपीति । यस्मात्परोपकारः कर्तव्यः तस्मादून कर्म मध्यमोत्तमकर्मव्यतिरिक्तमपि कर्म कामतो वेतनमन्तरेण स्वेच्छया परहितार्थमपरः कुर्यादिति ।

+स्मृच.१९८

(३) शीलाध्ययनसंपन्न ब्राह्मण न, तदून शीलाध्ययनन्यून ब्राह्मण कर्म कारयेत् । विर.१५२

तत्रापि नाशुभं किंचित् प्रकुर्वीत द्विजोत्तमः ।
ब्राह्मणस्य हि दासत्वान्नृपतेजो विहन्यते ॥

(१) तत्रापि नाशुभं विण्मूत्रशोधनादिकं **कारये**दित्यर्थः । व्यक.१५४

(२) स्वकीयेच्छया विशिष्टपुरुषोपकारार्थं तत्कर्म कुर्वन्नपि ब्राह्मणो नाशुभ कर्म कुर्यादिति ।

+स्मृच.१९८

क्षत्रविट्शूद्रधर्मस्तु समवर्णे कदाचन ।
कारयेद्दासकर्माणि ब्राह्मणं न बृहस्पतिः ॥

(१) क्षत्रविट्शूद्रधर्मस्त्विति क्षत्रियवैश्यशूद्राणा तु समानवर्णानामपि सावर्ण्यऽपि कदाचिद्दासस्वामिभावो भवेत् । ब्राह्मण तु समानवर्ण समानगुण न कारयेदिति बृहस्पतिर्मन्यते इत्यर्थ इति पारिजातहलायुधस्वरसः । क्षत्रविट्शूद्रधर्मस्तु ब्राह्मणो ब्राह्मण दासकर्माणि न कारयेदिति विज्ञानेश्वरस्वरसः । सर्वश्चायमर्थ उपग्राह्य एवेति । *व्यक.१५४

(२) अत्र ('ब्राह्मणस्य हि दासत्वात्' इति पूर्वोक्तवाक्यमन्तर्भाव्य) वाक्यत्रयं, तत्राद्यवाक्यस्य प्रातिलोम्येन दासत्वे कारिते कार्यितुस्तेजोहानिर्जायत इत्यर्थः । दासत्व तु न सकरजातिधर्म इति द्वितीयवाक्यस्यार्थः । दास्यवदासकर्माण्यपि सर्वथा ब्राह्मण न कारयेत् इति समवर्णोऽपीति तृतीयवाक्यस्यार्थ इति न किंचित्पुनरुक्तमिव । स्मृच.१९८

दासकर्माणि

विण्मूत्रोन्मार्जनं चैव नग्नत्वपरिमर्दनम् ।
प्रायो दासीसुता कुर्युर्गवादिग्रहणं च यत् ॥

नग्नत्वपरिमर्दन परिधानेन नग्नत्वे सति, परिमर्दनं सवाहनमिति पारिजातः । व्यक.१४९

+ व्यप्र. स्मृचवत् ।

(१) **अप**.२।१८३, **व्यक** १५३, **स्मृच**.१९७ वर्णाना (वर्णाक), **विर** १५२, **पमा** ३४१, **सवि** २९५ नारद २९६ पू, **व्यप्र**.३१७ हि (च), **व्यम** ९१, **विता** ६३३ पू. ८०८, **समु** ९९

(२) **अप** २।१८३ वर्ण (वर्णो) पन्न. (पन्न), **व्यक**.१५३-१५४ कामत (कारयेत्), **स्मृच**.१९८ वर्णे (वर्णो) पन्नः (पन्ने), **विर** १५२ पन्न (पन्न), **पमा** ३४२ सम प्र तु (अनवण तु विप्रस्य) शीला (श्रुता) पन्न (पन्न), **दीक** ४१ पू., **विचि** ७२ वर्णेऽपि विप्र तु (वर्ण तु विप्रस्तु) पन्न (पन्न), **सवि** २९५ ऽपि (तु) पू., नारद, **व्यप्र** ३१८ समवर्णेऽपि (सवर्णोऽपि हि), **व्यम**.९१ समवर्णेऽपि विप्र (सवर्णेऽपि तु विप्रे) पन्न (पन्ने), **विता** ६३४ समवर्णेऽपि (सवर्णोऽपि तु) तदून (न ह्यून) न्नः (न्ने), **सेतु** १६५ वर्णेऽपि विप्र तु (वर्ण तु विप्रस्तु); **समु** ९९; **विव्य**.४० वर्णेऽपि विप्र तु (वर्ण तु विप्रस्य).

(३) **अप** २।१८३ हि (तु), **व्यक** १५४, **स्मृच**.१९८, **विर**.१५२; **पमा**.३४२ पू.; **विचि**.७२; **व्यप्र**.३१८

+ व्यप्र. स्मृचवत् ।

* विवादरत्नाकरे 'विज्ञानेश्वर' इत्यत्र 'लक्ष्मीधर' इति पठितम् । शेष व्यकवत् ।

किंचित् (कर्म) प., **व्यम**.९१ पृ; **विता** ६३४ पृ.; **सेतु**. १६५, **समु**.९९.

(१) **व्यक**.१५४, **स्मृच**.१९८ वर्ण (वर्णे); **विर**.१५२; **विचि**.७२, **सेतु** १६५; **समु** ९९ स्मृचवत्.

(२) **व्यक** १४९ न्मा (न्मोत्स); **विर**.१४४; **सेतु**. १५९ न्मार्जन (न्मोत्सर्जने).

अमोच्य प्रव्रज्यावसितदास्यम्

प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजातयः ।
निर्वासं कारयेद्विप्रं दासत्वं क्षत्रविट् भृगुः ॥

(१) निर्वास कारयेद्राजेति शेषः । स्मृच.१९९

(२) क्षत्रविट् क्षत्रियवैश्यौ । विर.१४६

प्रव्रज्यावसितो दासः मोक्तव्यश्च न केनचित् ॥

दास्यामाधेयतो दास्या सान्वया मोक्ष

स्वदासीं यस्तु संगच्छेत्प्रसूता च भवेत्ततः ।
अवेक्ष्य बीजं कार्या स्याददासी सान्वया तु सा ॥

(१) अवेक्ष्य बीजं स्वामिना तस्या जनित पुत्रम् । सान्वया तत्पुत्रसहिता सा अदासी कार्या, इद अन्य पुत्राभावे । अन्यथा अन्य एव पुत्रस्तदर्थक्रियायामिति न सान्वयाऽदासी कार्या इति । एवमेव पारिजातप्रकाशौ । +व्यक.१५२

(२) स्वकृतगर्भाधानमनुसधाय स्वामिना स्वदासी सतानसहिता दासत्वविमोचकविधिना स्वकृतगर्भाधानादेर्दासत्वपरिहारार्थमदासित्वेन कार्या स्यादित्यर्थः । ×स्मृच.२०१

दासधनम्

दासस्य तु धनं यत्स्यात्स्वामी तस्य प्रभुः स्मृतः ।
प्रसादविक्रयाद्यत्तु न स्वामी धनमर्हति ॥

(१) स्वामिप्रसादात्स्वविक्रयाद्य यल्लब्ध दासेन तद्दासधन स्वामी नार्हति । यत्तु प्रकाश स्वामिना दासे विकीतम् । यद्वा स्वविक्रये दासेन मूल्यतया लब्धम् । यद्वा प्रसादे स्वामिना दासस्य कृते दत्त तत्र दासधनेऽपि न स्वामी प्रभुरिति प्रकाशदत्तायुधकामधेनुपारिजातप्रभृतय.। प्रकाशविक्रयाद्यत्तु तत्स्वामी धनमर्हतीति केश्चिल्लिखित, तदपि प्रकाशविक्रयाद्यर्थ धन तत्स्वामी दास एवार्हति न दासत्रभोस्तत्र प्रभुत्वमिति, स्वरसखण्डनेनापि प्रतिप्रसवपरतया । अन्यथा आनर्थक्याद्व्यवहारविरोधाच्चोपेक्ष्यम् ।

*व्यक.१५२-१५३

(२) इति कात्यायनेन दासधनप्रभुत्वे स्मृतेऽपि दासीधनेऽपि स्वामिनः प्रभुत्व स्मृतमिति मन्तव्यम् । स्मृच.२०१

दासोढा दासी भवति

दासेनोढा त्वदासी या साऽपि दासीत्वमाप्नुयात् ।
यस्माद्धर्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्यतः ॥

+ विर., वीमि. व्यकवत् ।

× व्यप्र. स्मृचवत् ।

* विवादरत्नाकरे 'केश्चित्' इत्यत्र 'लक्ष्मीधरण' इति पठितम् । शेष व्यकवत् । विचि , वीमि व्यकवत् ।

(१) **अप** २।१८३ भृगु. (नृप), **व्यक.**१५१ (=),**स्मृच.** १९९; **विर** १४६(=) अपवत्, **पमा.**६४५ यत्र (ये तु) **क्षत्रविट् भृगु.** (क्षत्रिय विश), **विचि** ६७ यत्र (ये तु) शेष **अपवत्; दवि** २७१ (=) अपवत्; **सवि** २९३, **चन्द्र.**४७ दास...भृगुः (क्षत्रविट् च तथा नृप), **वीमि.**२।१८३(=) दास...भृगुः (दासत्वक्षत्रवित्नृप.), **व्यप्र.**३१७, **व्यम.**९१ **क्षत्रविट्** (क्षत्रिये), **विता.**६३३, **राकौ.**४७६, **सेतु** १६०, १६२ अपवत्, **समु** १००, **विच** १४६ अपवत्, 'दास्य **क्षत्रविशौ** नृप' इति प्रायश्चित्तविवेके पाठ , **विव्य.**३९ **विट् भृगुः** (वैश्ययो·) (२) **सवि.**२९३

(३) **अप.**२।१८३ स्व (स्वां) वेक्ष्य (वाक्ष्य), **व्यक** १५२, **स्मृच.**२०१ स्याददा (स्यान्न दा), **विर** १४८, **विचि.**७० कार्या स्याददासी (कार्य्या अदासी), **चन्द्र.**५० स्व (स्वा) **वीमि.**२।१८३ ततः (तश) शेष विचिवत्; **व्यप्र.**३२२ **स्व** (स्वां); **व्यम.**९२ व्यप्रवत्; **विता.**६४२ व्यप्रवत्; **सेतु** १६४; **समु.**१००; **विव्य.**३९ **च** (तु) शेष विचिवत्.

(१) दासात्सत्वमिति पाठे सत्व प्राणी, तददास्याः सत्या वोढुर्दासाचेदवातं तदा तद्दासस्वामिनो दासता यातीति वेदितव्यमित्यर्थः। अप.२।१८३

(२) दासेनेति यो यस्य दासस्तेन तददास्यपि परिणीता तस्य दासी भवतीत्यर्थः। दासपदेन प्रथमेन सप्रतियोगिकदासत्वस्याभिधानाददासीत्यत्रापि सैव व्याख्येया। तत्रादासी द्विविधा—कस्यापि न दासी कस्यचिद्दासी वा, उभयत्रापि सामान्यतोऽप्यपेक्षणीयानुमतेरनुमतिरपेक्षणीया। यदि तु नञो व्युत्पत्त्या कस्यापि या न दासी, सा अदासीत्यभिमत, तत्रापि या कस्यापि दासी, तस्यामपि सामान्यतो विशेषतो वा स्वामिस्वीकारेण दासत्वत्यक्ताया ऊढाया विवाहयितृस्वामिस्वत्वास्पदत्व भवितुमर्हत्येव, तच्च न्यायाद्वाक्यगत्या वेति न कश्चित्फलतो विशेषः। +व्यक.१५३

(३) अर्थाच्च दासोढत्वं पूर्वस्वामिदास्यमोक्षहेतुरुक्तः। अत एव तत्प्रकरणे वाक्यमिद, स्वाम्यनुमत्या च दासकृतं प्रमाणमतस्तद्विमतिविषये चेटिकापरिणयवन्न पूर्वस्वामिस्वत्वहानिरिति। ×विचि.७१

(४) दासपदमत्र मुख्यदासपरं, यस्मादिति हेतुमन्निगदेन दासोढत्वमेव पूर्वस्वाम्यसत्त्वे तद्दासस्वामिस्वत्त्वे च हेतुरतः स्वामिसंमत्यपेक्षापि नाभिगम्यते। अदा स्यात्तु स्वाम्येव नास्ति स्वामिसमत्यपेक्षत्वे वाक्यमेवेद मप्रयोजक स्यात्। स्वाम्यननुमतदासकृतेरप्रामाणिकत्वात स्वाम्यननुमतचेटिकापरिणयवत् यदि च स्वाम्यनुमत्य पेक्षापि प्रयोजिका तदा सामान्यतः साऽप्यस्त्येव दास्या विवाहस्याचारागतत्वात्। स्वामिसमति विना विवाहिताया क्रमेण प्रतिमुण्डं गौरीवराटिका देया न भवति किन्तु विवाहितामात्रस्य, तद्देयताप्रयोजकस्य देशाचारस्य तावन्मात्रविषयत्वात् प्रकारान्तराभावात्, साधारण गौरीवराटिकया असाधारणदासपरिणये गौरीवराटिकामात्रं समाधेयम्। न तु विवाहितापि साधारणी भवति तद्दासोढत्वेन दीयमानत्वात्। एवमन्यदासस्य स्वीयत्व भ्रमेण स्वार्थेन परिणयने बोद्धव्यम्। यस्य कुले गौरी वराटिकैव न गृह्यते तस्य दासोढत्वमप्रयोजकमेव कुलाचारेणापवादकेन स्मृत्युक्तेरपवादात्। तथा बुद्ध्वा परिणयनेन तथा स्वीकारात्। चन्द्र.५१

(५) आधुनिकास्तु यदि प्रागनुमतिं विना दासेनोढा तदा गौरीवराटिकामात्रमग्रस्वामिने दातव्यमुत्तरस्वामिना, न तु दास्यानुत्पत्तिरेव। *वीमि.२।१८३

ब्राह्मणीकुलस्त्रीधात्र्यादीना विक्रयदासीकरणादौ दण्डः

औदद्याद्ब्राह्मणीं यस्तु विक्रीणीयात्तथैव च।
राज्ञा तदकृतं कार्यं दण्डयाः स्युः सर्व एव ते॥
कामात्तु संश्रितां यस्तु कुर्यादासीं कुलस्त्रियम्।
संक्रामयेत वान्यत्र दण्ड्यस्तच्चाकृतं भवेत्॥

कामादिच्छातः, यस्त्विच्छयोपगतामपि कुलस्त्रिय दासीकुर्यात् अन्यस्मै वा समर्पयेत्, स दण्डय इत्यर्थः। व्यक.१५४

बालधात्रीमदासीं च दासीमिव भुनक्तिः यः।
परिचारकपत्नीं च प्राप्नुयात्पूर्वसाहसम्॥
विक्रोशमानां यो भक्तां दासीं विक्रेतुमिच्छति।
अनापदिस्थः शक्तः सन्प्राप्नुयाद्द्विशतं दमम्॥

+ विर. व्यकवत्। × शेष व्यकवत्।

सेतु.१६४-१६५ (=):३२० क्रमेण बृहस्पतिः; विचि.१४७ वतः (स्मृतः); विव्य.४०.

* स्वमत विचिवत्।

(१) अप.२।१८३ विक्रीणीयात् (विक्रीणीत), व्यक. १५४, विर १५४. विचि.७३, व्यप्र ३२३ अपवत्; व्यम.९१, विता.६३५; सेतु.१६६, समु.९९, विव्य. ४१

(२) अप.२।१८३ कुर्यादासी (दासी कुर्यात्), व्यक.१५४ येत वा (येदथा) शेष अपवत्, विर.१५४ यस्तु (यश्च) येत वा (येत्तथा) शेष अपवत्; विचि.७३ पूर्वार्धे (कामात्सस्रजतीं यस्तु दासी कुर्यात्कुलस्त्रियम्) मयेत (मयति); व्यप्र.३२३ वा (चा); व्यम.९१; विता.६३५; सेतु. १६७ कामात्तु (कामतः) मयेत (मयति) शेषं अपवत्; समु.९९.

(३) अप.२।१८३ पत्नी च (पत्नी वा) त्रीमदासी च (त्रीं महादासीं); व्यक.१५५; विर.१५५ पत्नी च (पत्नी वा); विचि.७३; व्यप्र.३२३ विरवत्; व्यम.९१ मदासीं (मधात्रीं); विता.६३५ मदासी (मधात्री) पत्नीं च (पत्नीं वा) पूर्व (त्सर्व); सेतु.१६७:२७० त्रीमदासीं (त्रीं स्वदासीं) प्रथमपादः; समु ९९.

(४) अप.२।१८३भक्तां(भक्त);व्यक.१५५भक्तां(भुक्तां);

(१) बालधात्री बालस्य स्तन्यदानेन पोषण कुर्वाणा अदासी निक्षिप्तां शरणागतां वा, परिचारकः सेवकः, विक्रोशमानां नाहं विक्रेतव्येति वदन्तीम् ।

व्यक.१५५

(२) द्विशतं पणानामिति शेषः । भक्तामित्यनेन दुष्टाया विक्रयणे दण्डाभाव इति दर्शितम् ।

व्यप्र.३२३

दासीसुतदास्यविचारः । दासीगमनविचारः ।

दासीसुताश्च ये जातास्तस्याः पत्या परेण वा ।
उत्पादको यदि स्वामी न दासास्तस्य सूनवः ॥
अन्यदीया तु या दासी न दास्यन्यस्य सा भवेत् ।
शुल्कं दत्वा तु तां गच्छेददत्वा दास्यमर्हति ॥

यस्तु शुल्कं दत्वा दास्या अपत्य उत्पादितवान् तदपत्यं तस्यैव बीजप्राधान्यात् । शुल्कमदत्त्वैव गच्छति अपत्यं चोत्पन्न तदपत्यं दासीस्वामिन एवेति भारुचिप्रभृत्य आहुः । वरदराजस्तु द्वयोरित्याह—'अतोऽपत्य द्वयोरिष्ट पितुर्मातुश्च धर्मतः' इति वदन् ।

सवि.२९५

नं देवदास्या गमने शुल्कदो दासतां व्रजेत् ।
न चेच्छुल्कं तु बीजार्थं तद्बीजं क्षेत्रिणो भवेत् ॥

देवलः

पुत्रभार्यादासशूद्राणा धनस्वाम्यविचारः

पितर्य्युपरते पुत्रा विभजेयुर्धनं पितुः ।
अस्वाम्यं तु भवेदेषां निर्दोषे पितरि स्थिते* ॥
पत्यौ जीवति नारीणां दासानां स्वामिनि स्थिते ।
तद्धनियतमस्वाम्यं सर्वार्थेष्वब्रवीन्मनुः ॥

* स्थलादिनिर्देशः दायभागे द्रष्टव्यः ।

विश्रब्धं ब्राह्मणः शूद्राद्द्रव्योपादानमाचरेत् ।
न हि तस्यास्ति किञ्चित्स्वं भर्तृहार्यधनो हि सः ॥

उशना

दास्यानर्हाः

न गुरुर्न सपिण्डश्च न विप्रो नान्ययोनयः ।
दासभावं न तेऽर्हन्ति न च विद्याधिको द्विजः ॥

अयमर्थः—ब्राह्मणस्य अन्ययोनिर्न दासः विद्याधिकश्च । एवं क्षत्रियादेर्ब्राह्मणः । समवर्णे तु विद्याधिको न दासः अन्ययोनिरपि न दास इति ध्येयम् । सवि.२९६

दक्षः

परिव्रज्यावसितदण्डः

पारिव्राज्यं गृहीत्वा तु यः स्वधर्मं न तिष्ठति ।
श्वपदेनाङ्कयित्वा तं राजा शीघ्रं प्रवासयेत् ॥

कण्वः

दास्यानर्हाः

अज्ञातयोनयः सर्वे नैव दासा द्विजन्मनाम् ।
विद्याधिकः सजातश्च सपिण्डो गुरवोऽपि च ॥

मार्कण्डेयपुराणम्

प्रातिलोम्येन दास्यम्

चाण्डालेनाननुज्ञातः प्रवेक्ष्ये ज्वलनं यदि ।
चाण्डालदासतां प्राप्स्ये पुनरन्यत्र जन्मनि ॥

मार्कण्डेयपुराणे चाण्डालदासता प्राप्तस्य हरिश्चन्द्रस्य वाक्यम् । विर.१४५

विर.१५५ व्यकवत्; **विचि.**७१, **व्यप्र**३२३ मानां (माणां), **व्यम.**९१ द्विशत दशम् (त्पूर्वसाहसम्); **विता.**६३६; **सेतु.**१६७; **समु.**१०० व्यमवत्; **विव्य.**४१.

(१) **सवि.**२९५ दासास्तस्य सूनवः (दासी कारयेत्प्रभुः) **बृहस्पतिः**; **समु.**१०१श्च ये . स्या. (स्तु दासा. स्युः जाताः).

(२) **सवि.**२९५ न दास्यन्यस्य (दास्यन्यस्य तु) व्यासः; **समु.**१०१. (३) **समु.**१०१.

(४) **व्यक.**१५२; **विर.**१५०; **विचि.**७१; **सेतु.**१६४.

(१) **व्यक.**१५२; **विर.**१५०, **विचि.**७१; **सेतु.**१६४; **विभ.**७६ किञ्चित्स्व (यत्किञ्चित्).

(२) **सवि.**२९६; **समु.**९९ विप्रो ..यः (विप्रेष्वस्ययो-निजः) तेऽर्हन्ति (गच्छन्ति).

(३) **अप.**२।१८३ (श्वपदेनाङ्कित तं तु राजा शीघ्रं विवासयेत्); **व्यक.**१५१ शीघ्र (सर्वं); **विर.**१४६ पदे(पादे); **विचि.**६७; **दवि.**२७१विरुवत्; **चन्द्र.**४८ विरवत्; **व्यप्र.**३१८ त (तु) दक्षनारदौ; **व्यम.**९१ पारिव्राज्यं (परिव्रज्यां) त (तु) दक्षनारदौ; **विता.**६३३ दक्षनारदौ; **सेतु.**१६१ तु यः स्वधर्मं न (य. स्वधर्मं नानु):१६३ यः स्वधर्मे न (स्वधर्मं नानु); **विच.**१४६ सेतु.१६१ वत्; **विव्य.**३९.

(४) **समु.**९९.

(५) **व्यक.**१५०; **विर.**१४६.

* विनतायाः पणजितदास्यम्। गरुडस्य मातृदास्यात् दास्य च ।

महाभारतम्

[1]उच्चैःश्रवा हि किं वर्णो भद्रे प्रब्रूहि मा चिरम् ॥

विनतोवाच—

श्वेत एवाश्वराजोऽयं किं वा त्वं मन्यसे शुभे ।
ब्रूहि वर्णं त्वमप्यस्य ततोऽत्र विपणावहे ॥

कद्रूरुवाच—

कृष्णवालमहं मन्ये हयमेनं शुचिस्मिते ।
एहि सार्धं मया दीव्य दासीभावाय भामिनि ॥

सौतिरुवाच—

एवं ते समयं कृत्वा दासीभावाय वै मिथः ।
जग्मतुः स्वगृहानेव श्वो द्रक्ष्याव इति स्म ह ॥
ततस्ते तं हयश्रेष्ठं ददृशाते महाजवम् ।
शशाङ्ककिरणप्रख्यं कालवालमुभे तदा ॥
निशाम्य च बहून्वालान्कृष्णान्पुच्छसमाश्रितान् ।
विषण्णरूपां विनतां कद्रूर्दास्ये न्ययोजयत् ॥
ततः सा विनता तस्मिन्पणितेन पराजिता ।
अभवद्दुःखसंतप्ता दासीभावं समास्थिता ॥

[2]सौतिरुवाच—

स विचिन्त्याब्रवीत्पक्षी मातरं विनतां तदा ।
किं कारणं मया मातः कर्तव्यं सर्पभाषितम् ॥

विनतोवाच—

दासीभूताऽस्मि दुर्योगात्सपत्न्याः पतगोत्तम ।
पणं वितथमास्थाय सर्पैरुपधिना कृतम् ॥

सौतिरुवाच—

तस्मिंस्तु कथिते मात्रा कारणे गगनेचरः ।
उवाच वचनं सर्पांस्तेन दुःखेन दुखितः ॥
किमाहृत्य विदित्वा वा किं वा कृत्वेह पौरुषम् ।
दास्याद्वो विप्रमुच्येयं तथ्यं वदत लेलिहाः ॥

सौतिरुवाच—

श्रुत्वा तमब्रुवन् सर्पा आहरामृतमोजसा ।
ततो दास्याद्विप्रमोक्षो भविता तव खेचर ॥

ब्रह्मपुराणम्

ब्रह्मोवाच—

[3]दासत्वमगमत्पूर्वं नागानां गरुडः खगः ।
मातृदास्यात्तदा दुःखपरिसंतप्तमानसः ।
कदाचिच्चिन्तयामास रहः स्थित्वा विनिश्वसन् ॥

गरुड उवाच—

कस्यापराधान्मातस्त्वं पितुर्वा मम वाऽन्यतः ।
दासीत्वमाप्ता वद तत्कारणं मम पृच्छतः ॥

ब्रह्मोवाच—

साऽब्रवीत्पुत्रमात्मीयमरुणस्यानुजं प्रियम् ॥

विनतोवाच—

नैव कस्यापराधोऽस्ति स्वापराधो मयोदितः ।
यस्या वाक्यं विपर्येति सा दासी स्यान्मयोदितम्॥
कद्रूश्चापि तथैवाहं सा मया संयुता ययौ ।
कद्रूवा ममाभवद्वादश्छद्मनाऽहं तया जिता ॥
विधिर्हि बलवांस्तात कां कां चेष्टां न चेष्टते ।
एवं दासीत्वमगमं कद्रूवाः कश्यपनन्दन ॥
यदा दासी तु जाताऽहं दासोऽभूस्त्वं द्विजन्मज॥

---

* अय विषय. महाभारते १३।२१-२९ (कुम्भकोणम्), पद्मपुराणे सृष्टिखण्डे अ. ४४ इत्यत्र च समागतः ।

(१) भा.१।२०।२-५. (२) भा १।२३।२-४.

(३) भा.१।२७।१२-१६.

(१) ब्रह्मपु. १५९।२,६-१०.

वेतनानपाकर्म

वेदाः

नृत्यकारिण्यः स्त्रियः

अधि पेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहम् ॥[1]

उषाः पेशांसि जगत्स्वाश्लिष्टानि कृष्णवर्णानि तमास्यध्याधिक्येन वपते। तत्र दृष्टान्तः। नृतूरिव। नृस्तूर्वतिः केशेन रिक्तीकरोतीति नृतूर्नापितः। स यथा केशान्निःशेषेण छिनत्ति एवमुषाऽपि अन्धकारं समूलं हिनस्तीत्यर्थः। यद्वा। नृतूरिव नृत्यन्ती योषिदिव। पेशांसि। रूपनामैतत्। सर्वैर्दर्शनीयानि रूपाण्युषा अधि वपते। स्वात्मन्यधिकं धारयति। एव प्रथमतोऽन्धकारं स्वकिरणैर्निरस्य वक्षः स्वकीयमुरःप्रदेशमपोर्णुते। तमसाऽनाच्छादितं करोति। स्वयमाविर्भवतीत्यर्थः। बर्जह पयस उत्पत्तिस्थानं दोहनसमये उस्रा गौर्यथाऽविष्करोति तद्वत्। ऋसा.

वेश्यानिदर्शनम्

परा शुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः ॥[2]

शुभ्राः शोभनालङ्कारा अयासोऽभिगन्तारो मरुतो यव्या मिश्रणशीलया विद्युता परा मिमिक्षुः। प्रकर्षेण सिञ्चन्त्युदकसंस्त्रायम्। साधारण्येव। यथा लोके साधारण्या स्त्रिया संगता युवानो रेतो मुञ्चन्ति तद्वत्। ऋसा.

भृतिनिदर्शनम्

वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन्। पुरूतमासः पुरुहूत वज्रिवो भृतिं न प्र भरामसि ॥[3]

हे इन्द्र वय घ खलु ते तवापूर्व्या नूतनानि ब्रह्माणि परिवृढानि स्तोत्राणि प्र भरामसि संभरामः। पुरूतमासो बहुतमा वयमृत्विग्यजमानरूपेण वृत्रहन् वृत्रस्य हन्तः पुरुहूत बहुभिराहूत हे वज्रिवो वज्रयुक्तेन्द्र। किमिव। भृतिं न भृतिमिव। त यथा नियमेन प्रयच्छन्ति तद्वत्। नियमेन प्रदानतात्पर्याद्भृतिदृष्टान्तत्वमविरुद्धम्। ऋसा.

प्रिया चिन्नस्य प्रियसास ऊती स तू धनं कारिणे न प्र यंसत् ॥[4]

प्रिया, प्रियस्य यस्य सोमस्य, यद्वा प्रियाणि प्रयच्छतो यस्य सोमस्य, प्रियसासोऽत्यन्त प्रियतमा धारा, ऊती ऊत्यै रक्षणाय भवन्ति। स तु क्षिप्रमस्मभ्यं धनं प यंसत् प्रयच्छतु। तत्र दृष्टान्तः। कारिणे न भृतकाय भृतिं यथा प्रयच्छन्ति तद्वत्। ऋसा.

प्र पुनानाय वेधसे सोमाय वच उद्यतम्। भृतिं न भरा मतिभिर्जुजोषते ॥

पुनानाय प्रवित्रेण पूयमानाय वेधसे कर्मणो विधात्रे मतिभिः स्तुतिभिः जुजोषते प्रीयमाणाय, यद्वा मतिभिः स्तोतृभिः सह जुजोषते प्रीणयित्रे सोमायोद्यतमुद्युक्त वचः प्र भर। प्रकर्षेण सपादय। अभिषुहीत्यर्थः। तत्र दृष्टान्तः। भृतिं न यथा भृतका भृतिं संपादयन्ति तद्वत्। ऋसा.

वेश्यागमकवचनानि

ब्रह्मचारी च पुँश्चली चर्तीयेते।
अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥

---

(१) ऋसं.१।९२।४.

(२) ऋसं.१।१६७।४.

(३) ऋसं.८।६६।११.

(४) शुसं.२३।१८; तैसं ७।४।१९।१ अम्बिकेऽम्बालिके (अम्बाल्यम्बिके) सुभद्रिकां (सुभगे) सिनीम् (सिनि): ७।४।१९।२-३ नयति (यभति); कासं.(अश्व.) ४।८; मैसं. ३।१२।२० अम्बे अम्बिके (अम्ब्यम्बिके); तैब्रा.३।९।६।३ तैसं.७।४।१९।१ वत्; शब्रा.१३।२।८।३; आपश्रौ.२०।१७, १२।१७,१८।४; काश्रौ.२०।६।१२.

हे अम्बे हे अम्बिके हे अम्बालिके, न मां नयति अश्वं प्रति प्रापयति कश्चन कश्चिदपि मदगमनेन च। ससस्ति। सस् स्वप्ने। य अन्या परिगृह्य शेते। कुत्सितोऽश्वः अश्वकः। अकुत्सितोऽपीर्ष्यया कुत्स्यते। कुत्सिता सुभद्रा सुभद्रिका। इयमपि इर्ष्यया कुत्स्यते। काम्पीलवासिनीम्। काम्पीलनगरे हि सुभगा सुरूपा विदग्धा विनीताश्च स्त्रियो भवन्ति। शुउ.

इदावत्सरायातीत्वरीमिद्वत्सरायातिष्कद्वरीं वत्सराय विजर्जरा[1] संवत्सराय पलिक्नीम्।

इदावत्सराय अतीत्वरीमत्यन्तं कुलटा 'पुश्चली कुलटेत्वरी'। इद्वत्सराय अत्यतिष्कद्वरी अतिस्कन्दति स्रवति इत्यतिष्कद्वरी। वत्सराय विजर्जरा शिथिलशरीराम्। संवत्सराय पलिक्नी श्वेतकेशाम्। शुम.

मागधः पुंश्चली कितवः क्लीबोऽशूद्रा अब्राह्मणास्ते प्राजापत्याः।

मागधः पुंश्चली कितवः क्लीबः एते चत्वारोऽपि शूद्रब्राह्मणव्यतिरिक्ताः प्रजापतिदेवताः। शुम.

नास्य धेनुः कल्याणी नानड्वान् सहते धुरम्। विजानिर्यत्र ब्राह्मणो रात्रिं वसति पापया॥

श्रद्धा पुंश्चली मित्रो मागधो विज्ञानं वासोहरुष्णीषं रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः। भूतं च भविष्यच्च परिष्कन्दौ मनो विपथम्। मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः। कीर्तिश्च यशश्च पुरःसरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद।

उषाः पुंश्चली मन्त्रो मागधो विज्ञानं०।
अमावास्या च पौर्णमासी च परिष्कन्दौ मनो०।
इरा पुंश्चली हसो मागधो विज्ञानं०।
अहश्च रात्री च परिष्कन्दौ मनो०।
विद्युत्पुंश्चली स्तनयित्नुर्मागधो विज्ञानं०।
श्रुतं च विश्रुतं च परिष्कन्दौ मनो०।

महानग्न्युलूखलमतिक्रामन्त्यब्रवीत्। यथा तव वनस्पते निरघ्नन्ति तथैवति॥

आपस्तम्बः

क्षेत्रपरिग्रहीताऽनुत्थाता भाविफल दाप्यः

[2]क्षेत्रं परिगृह्योत्थानाभावात्फलाभावे यः समृद्धः स भावि तदपहार्यः।

वैश्यो वैश्यवृत्तिर्वा परस्य क्षेत्र कृष्यर्थं परिगृह्य यदि उत्थान कृषिविषय यत्नं न कुर्यात्, तदभावाच्च फल न स्यात्, तत एतस्मिन्निमित्ते स कर्षकः समृद्धश्चेत्तस्मिन् भोगे यद्भावि फलं तदपहार्यः अपहारयितव्यः। राज्ञा क्षेत्रस्वामिने दाप्यः। उ.

निर्धनक्षेत्रपरिग्रहीताऽनुत्थाता ताडनीयः। पशुपेऽतिदेशः।

[3]अवशिनः कीनाशस्य कर्मन्यासे दण्डताडनम्। तथा पशुपस्य। अवरोधनं चाऽस्य पशूनाम्।

कीनाशः कर्षकः। तस्याऽवशिनः अस्वतन्त्रस्य निर्धनस्य कर्मन्यासे स चेत् कृषिकर्म न्यसेत् विच्छिन्द्यात् तस्य दण्डेन ताडन कर्तव्यं स दण्डेन ताडयितव्यः। अर्थाभावान्नार्थदण्डः। अपर आह। अवशी अवश्यः अविधेयः यः क्षेत्रं परिगृह्य अवशिनः कीनाशस्य कृषिकर्म न्यसेत् न स्वय कुर्यात्, तदा स परिग्राहको दण्डेन ताडयितव्य इति। यदि वा अवशिन इति बहुव्रीहिः। यस्य कीनाशस्य वशी स्वतन्त्रः क्षेत्रवान्नास्ति, स यदि पूर्वकृष्टस्य क्षेत्रस्य कृषिकर्म न्यसेत् न कुर्यात्, तस्य दण्डताडनं दण्ड इति राजपुरुषस्योपदेशः। पशुपो गोपालः तस्यापि कर्मन्यासे पालनस्याऽकरणे दण्डेन ताडनं दण्डः। ये चाऽस्य पशवो रक्षणाय समर्पितास्तेषा चाऽवरोधनमपहरण कर्तव्यमन्यस्य गोपस्य समर्पणीया इति। उ.

---

(१) शुमा.३०।१५; तैब्रा.३।४।११ तीत्वरी (परस्कद्वरी) तिष्कद्वरी (तीत्वरी).

(२) शुमा ३०।२२; शुका.३४।२२ (पुश्चली कितवः कितवोऽशूद्राब्राह्मणास्ते प्राजापत्याः). (३) असं.५।१७।१८.

(४) असं.१५।२।५-८. (५) असं.१५।२।१३-१४.

(६) असं.१५।२।१९-२०. (७) असं.१५।२।२५-२८.

(१) असं.२०।१३६।६ अस्मिन्सूक्ते 'महानग्नी' पदं नववार पठितमपि अस्माभिर्निदर्शनार्थं एक एव मन्त्रः संगृहीतः।

(२) आध २।२८।१; हिध.२।२०.

(३) आध.२।२८।२-४; हिध.२।२०; व्यक.१५६ अवशिन. (उद्वसतः) (कर्मन्यासे०):१६१-१६२ अवशिनः (उद्वसतः) (कर्मन्यासे०) अवरोधन (अन्वेक्षणं); विर.१५८ अवशिनः (उद्वसतः) (कर्मन्यासे०) दण्ड (दण्डेन) पशुपस्य

विष्णुः

भृतकदोषसंबन्धी विधिः । स्वामिदोषसबन्धी विधिः ।

[1]भृत्यो वेतनं गृहीत्वा यदि कर्म न करोति वेतनाद्द्विगुणं गृह्णीयात् ।

भृतकश्चापूर्णे काले भृतिं त्यजन् सकलमेव मूल्यं जह्यात् । राज्ञे च पणशतं दद्यात् । तद्दोषेण यद्विनश्येत् तत्स्वामिने देयम्, अन्यत्र राजदैवोपघातात् । स्वामी चेद्भृतकमपूर्णे काले जह्यात् तस्य सर्वमेव मूल्यं दद्यात् । पणशतं च राज्ञेऽन्यत्र भृतकदोषात् ।

तस्येति चतुर्थ्यर्थे षष्ठी । शेष इत्यनुवृत्तौ 'चतुर्थ्यर्थे बहुलं छन्दसि' इति पाणिनिस्मरणात् । दोषोऽत्र चौर्यादिरभिप्रेतः । न पुनर्बह्वाशित्वादिः । स्मृच.२०४

भृतकविनाशे भृतकं वा तच्छिष्टं वा राज्ञे निवेदयेत् ।

राजग्रहणाद्राजभृतकविषयमेतत् । सवि.३०४

कौटिलीयमर्थशास्त्रम्

कर्मकरकल्पः

कर्मकरस्य कर्मसंबन्धमासन्ना विद्युः । यथासंभाषितं वेतनं लभेत । कर्मकालानुरूपमसंभाषितवेतनम् ।

कर्षकः सस्यानां, गोपालकः सर्पिषां, वैदेहकः पण्यानामात्मना व्यवहृतानां, दशभागमसंभाषितवेतनो लभेत । संभाषितवेतनस्तु यथासंभाषितम् ।

कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपरिचारकादिराशाकारिकवर्गस्तु यथान्यस्तद्विधः कुर्यात् । यथा वा कुशलाः कल्पयेयुः तथा वेतनं लभेत । साक्षिप्रत्ययमेव स्यात् । साक्षिणामभावे यतः कर्म ततोऽनुयुञ्जीत ।

वेतनादाने दशबन्धो दण्डः, षट्पणो वा । अपव्ययमाने द्वादशपणो दण्डः पञ्चबन्धो वा ।

नदीवेगज्वालास्तेनव्यालोपरुद्धः सर्वस्वपुत्रदारात्मदानेनार्तत्राताराम्राहूय निस्तीर्णः कुशलप्रदिष्टं वेतनं दद्यात् । तेन सर्वत्रार्तदानानुशया व्याख्याताः ।

लभेत पुंश्चली भोगं संगमस्योपलिङ्गनात् ।
अतियाच्ञा तु जीयेत दौर्भाग्यविनयेन वा ॥

कर्मकरकल्पमाह --कर्मकरस्येति । कर्षकगोपालकादेः कर्मकरस्य, कर्मसंबन्ध कर्मस्वभियोगं, आसन्ना विद्युः तदन्तिकस्था भूत्वा उपलभेरन् । यथासंभाषितं परिभाषितप्रकारं वेतनं लभेत, कर्मकरः । असंभाषितवेतन, कर्मकालानुरूपं कर्मणः तत्कालस्य चानुगुणं लभेत । कारुशिल्पीत्यादि । कार्वादयः षट् प्रतीताः तदादिः, आशाकारिकवर्गः आशया कारिका क्रिया येषा त आशाकारिकाः तेषां वर्गः, यथान्यस्तद्विधः तजातीयोऽपर इव कुर्यात्, कर्म । यथा वा कुशलाः तत्कर्मगुणविशेषज्ञाः कल्पयेयुः स्थापयेयुरेतावद्देयमिति,

---

(पशुपालस्य); **विचि.७४** अवशिनः (उद्वसतः) न्यासे (नाशे); **सेतु.१६८** व्यक.१५६ वत्.

(१) **सवि.२९९.**

(२) **विस्मृ.५।१५२-१५६** श्चापूर्णे (श्चापूर्ण) मूल्यं जह्यात् (मूल्य दद्यात्) (देयम्०) राजदैवोप (दैवोप) सर्वमेव (सर्व) राज्ञेऽन्यत्र भृतकदोषात् (राजनि । अन्यत्र भृतकदोषात्); **अप.२।१९४** यद्विनश्येत् (यन्नश्येत्) राजदैवोप (दैवोप); **व्यक.१५८** राज्ञे च (राज्ञे) तत्स्वामिने (स्वामिने) च राज्ञेऽन्यत्र भृतकदोषात् (राजन्यन्यत्र भृतदोषात्); **स्मृच**-२०३-२०४ (भृतकश्चापूर्णे ... मूल्य जह्यात्०) राज्ञे च ..दद्यात् (पणशत राज्ञे दद्यात्) तद्दोषेण+(च) चेभृतकमपूर्णे (चेभृत पूर्णे) भृतकदोषात् (भृतदोषात्); **विर.१६१** त्यजन्+(स्वामिदोषविरहेण) राज्ञे च (राज्ञे) भृतकदोषात् (दैवात्); **विचि.७६** भृति (कर्म) (तद्दोषेण यद्वि ... घातात्०) सर्वमेव (सकलमेव) पणशत च राज्ञेऽन्यत्र (पणशतं राजन्यत्र); **सवि.३००** भृति (कर्म) राज्ञे च (राज्ञे) तद्दोषेण (स्वदोषेण च) तत्स्वा (स्वा) राजदैवोप (दैवराजोप) ऽन्यत्र भृतक (दद्यात् अन्यत्र भृत); **व्यप्र.३२६** (भृति०) राजदैवो (दैवो) राज्ञेऽन्यत्र (राजन्यन्यत्र); **व्यम.९३** (भृति०) (तद्दो .घातात्०); **विता.६४९-६५०** (चापूर्णे काले भृति०) सकलमेव (सकल) नश्येत् (नष्ट) राज दैवो (दैवो) चेद्भृतकम् (चेद्) सर्वमेव (सर्व) राज्ञेऽन्य ... दोषात् (राजनि); **सेतु.१७०** चापूर्णे (अपूर्णे) भृति (कर्म) मूल्य जह्यात् (मूल्य दद्यात्) सर्वमेव (स कृतमेव) च राज्ञे (राज्ञे); **समु.१०२** (भृति०) राज्ञे च पणशतं (पणशतं च राज्ञे) तद्दोषेण+(च) (स्वामी चेद्भृ...दोषात्०); **विव्य.४१** भृति (कर्म) (तद्दोषेण ... दोषात्०).

(१) **सवि.३०४.** (२) **कौ.३।१३.**

तथा वेतनं लभेत । साक्षिप्रत्ययमेव स्यादिति, अन्योन्यविप्रतिपत्तौ साक्षिप्रमाणकमेव वेतनं देयम् । साक्षिणामभावे, यतः कर्म ततोऽनुयुञ्जीत यत्र तादृशं कर्म कृतं तत्र कियद्दत्तमिति पृष्ट्वा जानीयात् । नदीवेगेत्यादि । नदीवेगादिभिश्चतुर्भिरापत्स्थानैरुपरुद्धः, आर्त्तः, सर्वस्वपुत्रदारात्मदानेन त्रातारमाहूय 'यो मा रक्षति तस्मै सर्वस्वादिक दास्यामि' इति प्रतिज्ञया रक्षकमाहूय, निस्तीर्णः आहूतेन रक्षितः, कुशलप्रदिष्ट निपुणनिर्दिष्ट वेतन दद्यात्, रक्षकाय । यथाप्रतिज्ञात दानं निस्तरणोत्तरकालेऽनुशयानस्य कर्तुमनिच्छतोऽयं विधिः । लभेतेति । पुञ्श्चली बन्धकी, भोग मैथुनभृति, लभेत, सङ्गमस्य उपलिङ्गनात् चिह्नेन विभावनात् । अतियाच्ञा तु अतिमात्रभृतिप्रार्थिनी तु पुञ्श्चली, जीयेत दण्डयत । दौर्मैत्याविनयेन वा जीयेत दुर्बुद्धित्वप्रयुक्तेन पुरुषकामप्रातिकूल्याचरणेन च दण्डयेत श्रीमू.

गृहीत्वा वेतनं कर्म अकुर्वतो भृतकस्य द्वादशपणो दण्डः । संरोधश्चाकारणात् ।

अशक्तः कुत्सिते कर्मणि व्याधौ व्यसने वा अनुशयं लभेत, परेण वा कारयितुम् । तस्य व्ययकर्मणा लभेत भर्ता वा कारयितुम् ।

नान्यस्त्वया कारयितव्यो मया वा नान्यस्य कर्तव्यं इत्यवरोधे भर्तुरकारयतो भृतकस्याकुर्वतो वा द्वादशपणो दण्ड । कर्मनिष्ठापने भर्तुरन्यत्र गृहीतवेतनो नासकामः कुर्यात् ।

उपस्थितमकारयतः कृतमेव विद्याद् इत्याचार्याः ।

नेति कौटल्यः । कृतस्य वेतनं, नाकृतस्यास्ति । स चेदल्पमपि कारयित्वा न कारयेत्, कृतमेव अस्य विद्यात् । देशकालातिपातनेन कर्मणामन्यथाकरणे वा नासकामः कृतमनुमन्येत । संभाषितादधिकक्रियायां प्रयासं न मोघं कुर्यात् ।

तेन सङ्गभृता व्याख्याताः । तेषामाधिः सप्तरात्रमासीत् । ततोऽन्यमुपस्थापयेत् । कर्मनिष्पाकं च । न चानिवेद्य भर्तुः संघः कञ्चित् परिहरेद्, उपनयेद् वा । तस्यातिक्रमे चतुर्विंशतिपणो दण्डः ।

(१) कौ.३।१४

संघेन परिहृतस्यार्धदण्डः । इति भृतकाधिकारः ।

मनुः

वेतनानपाकर्मप्रतिज्ञा

अतःपरं प्रवक्ष्यामि वेतनस्यानपक्रियाम् ॥

(१) वेतन भृतिस्तस्यानपक्रिया । वेतनेन स्वकर्म कुर्वता यो धर्मः स इदानीमुच्यत इति प्रतिज्ञा । मेधा.

(२) वेतन कर्ममूल्यम् । तस्यानपक्रिया भृत्यायासमर्पणम् । समर्पितस्य वा परावर्तनम् । स्मृच.२०१

(३) अतोऽनन्तरं भृतेरसमर्पणादिकं वक्ष्यामि । +ममु.

भृतकरोपसबन्धी विधि.

भृतोऽनार्तो न कुर्याद्यो दर्पात्कर्म यथोदितम् । स दण्ड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनम् ॥

(१) उद्दिष्टेन मूल्येनोद्दिष्ट कर्म करोति स इह भृतोऽभिप्रेतः । भृत्यकर्मविशेषेण स्वीकृतो भृतः । देहि मे पञ्चरूपकाणीदं ते कर्म कर्ताऽस्मीयता कालेनेत्याभाष्य प्रविष्टः स चेत्कर्म न समापयति, कृष्णलानि सौवर्णानि ताम्ररजतयोर्वा कर्मस्वरूपमनुबन्धादि च ज्ञात्वा दण्ड्यते । तानि च रूपकाणि वेतनार्थं कल्पितानि न लभेत । यत्नवानार्तो दर्पान्न करोति यथोदित कर्म । व्याध्यादिनाऽपीडितस्य दर्पादकुर्वतो भृतिहानिर्दण्डन च । अतः स एव वक्तु न लभते । यावन्मया कर्माशः कृतस्तदानुरूप्येण देहीति । ऋत्विजामाप्येतं दण्ड केचिदिच्छन्ति स्वेच्छया त्यजता, तदयुक्तम् । अत्र हि महानर्थो यजमानस्य सामिकृत्ये यजमानेऽतो दण्डो

+ गोरा. अशुद्धिवाहुल्यान्नोद्धृतम् ।

(१) **मस्मृ** ८।२१४ अत.पर (अत ऊर्ध्वं); **सवि.**४९, २९७ स्थानप (स्थानपा); **व्यप्र.**३२३, **समु** १०१.

(२) **मस्मृ.**८।२१५; **मिता** २।१९८ भृतो (भृत्यो) चास्य (तस्य), **अप.**२।१९३ भृतो (भृत्यो) चास्य (तच्च); **व्यक.** १५७ दितम् (चितम्), **स्मृच.**२०३ ऽना (ना) न्यष्टौ (नष्टौ); **विर.**१६०:१६० उक्त., बृहस्पति.; **पमा.**३२६ मितावत्; **विचि.**७५-७६ ऽना (ना) न कुर्याद्यो (यो न कुर्यात्); **सवि.** २९९-३०० थोदि (थेरि) न्यष्टौ (नष्टौ); **वीमि.**२।१९३ कुर्याद्यो (यो कुर्यात्); **व्यप्र.**३२६ चास्य (तस्य); **व्यउ.** ८९ मितावत्, नारद., **व्यम** ९२ कुर्याद्यो (यः कुर्यात्) न्यष्टौ (नष्टौ); **विता.**६४८ भृतो (भृत्यो) शेषं व्यमवत्; **सेतु.** १६९ विचिवत्; **समु.**१०२ स्मृचवत्.

महानत्र युक्तः । यजमानस्य च यन्नष्टं तद्दापनीयाः । दीक्षोपसदेवव्रतैः शरीरापचये समुत्थातव्यम् । अन्यो यः शिल्पी कचन कर्मणि प्रवर्तयति तडागखनने देवस्य गृहकरणेऽह ते समापयिता प्रवर्तस्वेति, पश्चाच्चापसरेत् तेन स्वामिनः क्षयव्ययायासाः सर्वे संवोढव्याः । भाण्डवाहवणिग्न्यायेन । एष हि न्यायः कात्यायनेन सर्वत्रातिदिष्टः । भाण्डवाहकदोषेण वणिजो यदि द्रव्य नश्येत्तद्भाण्डवाहको वहेत् । 'यो वाऽन्यः कस्यचित्कर्मणि धनमावध्यार्धतो निवर्तेते'ति कात्यायनीये सूत्रे धनमावध्याऽऽसज्य धनव्ययं कारयित्वा यद्यर्द्धकृते निवर्तेत सोऽपि तद्धहेदित्यनुषङ्गः । एव योऽपि षाण्मास्यः सावत्सरो वा यथोपपादककर्मकारी भक्तदासस्तस्याप्येष एव न्यायः । आह च नारदः—कर्माकुर्वन्प्रतिश्रुत्य कार्यो दत्त्वा भृति बलात् । भृति गृहीत्वाऽकुर्वाणो द्विगुण भृतिमावहेत्' ॥ 'कालेऽपूर्णे त्यजन् कर्म भृति नाशनमर्हति' ॥ *मेधा.

(२) तदल्पदण्डत्वाद्भागासिद्धिविषयम् । दानप्रतिषेधाद्दत्तमप्यदत्तप्रायत्वात्प्रत्याहरणीयम् । स्मृच.२०३

(३) यत्र वेतन गृहीत कर्मारम्भश्च न तत्राह—भृतोऽनार्त इति । अनार्तः कर्माकरणहेतुराजदैवोपघातरहितः । विर.१६०

(४) अर्धन्यूनकर्मकरणविषयमिति मदनरत्ने ।
व्यप्र.३२६

यथोक्तमार्त्तः सुस्थो वा यस्तत्कर्म न कारयेत् । न तस्य वेतनं देयमल्पोनस्यापि कर्मणः ॥

(१) अथवा स्वामी नो वारयत्यनेन च तत्कर्म कारितं स्यात्स्यां भृति दत्वा तदा तत्सममसौ स्वस्थः कारयितव्यः । अथापि स्वामी ब्रूयान्न मे किंचित्कर्तव्यमस्तीति । तत्रापि कृतानुरूपेण लभेतैव यथोक्तमार्त्तः । मेधा.

(२) यस्त्वपगतव्याधिः स्वस्थ एव वा आलस्यादिना स्वारब्धं कर्माल्पोन न करोति परेण वा न समापयति तस्मै वेतनं न देयमिति । मिता.२।१९८

(३) यथोक्तं यथाप्रतिश्रुतम् । अप.२।१९३

(४) यथोक्तमार्त्ते स्वस्थे वा यः प्रकार उक्तः । मवि.

(५) किंचिन्मात्रासिद्धौ तु पूर्वोक्तमेव दण्ड वर्ज भवतीत्याह स एव —यथोक्तमार्त्त इति । स्वस्थो न कारयेदिति वदन् स्वस्थेऽपि स्वयं कर्तृत्वनियमो नास्तीति दर्शयति । स्मृच.२०३

(६) किंचिच्छेषस्यापि कर्मणो वेतनं न देयम् । ममु.

निर्दोषो भृतकः तद्वेतनं च

आर्तस्तु कुर्यात्स्वस्थः सन् यथाभाषितमादितः । सुदीर्घस्यापि कालस्य स्वं लभेतैव वेतनम् ॥

(१) अनार्त्तस्य दण्ड उक्तो भृतिहरण च । आर्त्तस्येदानीमुच्यते—आर्त्तस्त्विति । आर्त्तो यो भृत्योऽर्द्धकृत कर्म यदि हित्वा गच्छेत्स स्वस्थः सन्पुनरागत्य यथोक्तमादौ तत्कुर्यात् । बहुनाऽपि कालेन पीडया मुक्तः प्रत्यागतः कृतकर्मशेषे लभेतैव वेतनम् । ×मेधा.

(२) यदा पुनर्व्याधावपगतेऽन्तरितदिवसान्परिगण्य पूरयति तदा लभत एव वेतनम् । मिता.२।१९८

---

* गोरा., मवि., ममु., मच., नन्द., भाच. मेधावत् ।

(१) **मस्मृ.**८।२१७ ग. पुस्तके **सुस्थो** (स्वस्थो) इति पाठः; **मिता.**२।१९८ **सुस्थो** (स्वस्थो); **अप.**२।१९३ मितावत्; **व्यक.**१५७ मितावत्; **मवि.** मितावत्, **स्मृच.**२०३; **विर.**१६०; **पमा.**३२६ सुस्थो वा यस्तत् (स्वस्थो वा यस्तु); **विचि.**७६; **मच.** मितावत्; **वीमि.**२।१९८ मितावत्; **व्यप्र.**३२६; **व्यउ.**८९ मितावत्; **व्यम.**९२ मितावत्; **विता.**६४८ **सुस्थो** (स्वस्थो) मल्पोन (मल्पेना); **सेतु.**१६९; **समु.**१०२ मितावत्; **विव्य.**४१; **भाच.** मितावत्.

१ **लेनं.**

× गोरा., ममु., विर., मच., भाच. मेधावत् ।

(१) **मस्मृ.**८।२१६ सुदीर्घ (स दीर्घ) **स्व** (तत्); **मिता.**२।१९८ सुदीर्घ (स दीर्घ); **अप.**२।१९३ स्व (स); **व्यक.**१५७ सु (अ) स्वं लभेतैव (लभेतैव च); **स्मृच.**२०३ स्व लभेतैव (लभेतैव च); **विर.**१६० आर्त...स्थः (आर्तः कुर्यात्सुस्थः) स्व लभेतैव (लभते च स); **पमा.**३२९ स्वं (तत्); **विचि.**७६ तंस्तु (त्तोऽपि) स्व (स); **नृप्र.**२५; **चन्द्र.**५२ स्वं लभेतैव (लभेत स तु); **वीमि.**२।१९८ मितावत्; **व्यप्र.**३२६ पमावत्; **व्यउ.**८९ मितावत्; **व्यम.**९२; **विता.**६४८ स्व लभेतैव (लभेतैव च); **सेतु.**१७० स्वस्थः (त्सुस्थः) स्वं (स); **समु.**१०२.

(३) सुदीर्घस्यापि कालस्य दीर्घेणापि कालेन कुर्यादित्यन्वयः। मवि.

(४) यस्त्वार्तः स्वार्तिसमये धनाद्यभावेन न कारयति किं त्वार्त्यपगमानन्तरं स्वय करोति तत्रार्ते दीर्घकालतया कालक्षेपेऽपि भृत्यदोषाभावाद्वेतनमसौ निर्विवादं लभत इत्याह—आर्तस्त्विति। स्मृच.२०३

एष धर्मोऽखिलेनोक्तो वेतनादानकर्मणः॥

वेतनादानकर्मण इति विवादपदस्यास्य नामधेयमेवमेतत्तेन न चोद्यमेतत्। कथं वेतनस्यादानकर्मोक्त यावता दानकर्माप्युक्तं 'तल्लभेतैव वेतनम्' इति। नाम्नो हि येनकेनचिदन्वितेन संबन्धिना नामता न विरुद्धा। न हि यावन्तः तत्रार्थास्ते सर्वे प्रवर्तन्ते। तथा चाग्निहोत्रे यद्यप्यग्निप्रजापत्योर्होमस्तथाप्यग्निहोत्रमिति नाम प्रवर्तत एव। तदुक्त तत्रैवं स्थूणा दर्शे या च समानीचा स्यादिति। मेधा.

याज्ञवल्क्यः

कर्मत्यागिभृतकविधिः। उपस्कररक्षण भृत्यधर्मः।

गृहीतवेतनः कर्म त्यजन् द्विगुणमावहेत्।
अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः॥

(१) परिभाषाप्रसङ्गेन स्वामिकर्मकरयोः परिभाषानुसारिव्यवहारव्यभिचारे विनय वक्तुमाह—गृहीतवेतन इति। गृहीत्वा वेतनं कर्म तुल्यं न कुर्यात्, ततो गृहीतवेतनो द्विगुणमावहेद् दद्यादित्यर्थः। अगृहीते तु वेतने समं यावत् पारिभाषिकं वेतनं दत्त्वा कर्म कार्यं कारयितव्यम्। सर्वकर्मकरैश्चात्तवेतनैरुपस्करः समर्पितो यः कर्मकरणार्थं, स पालनीयः। विश्व.२।१९७

(२) संप्रति वेतनस्यानपाकर्माख्य व्यवहारपद प्रस्तूयते। तत्र निर्णयमाह—गृहीतवेतन इति। गृहीतं वेतन येनासौ स्वाङ्गीकृत कर्म त्यजन् अकुर्वन् द्विगुणां भृति स्वामिने दद्यात्। यदा पुनरभ्युपगतं कर्म अगृहीते एव वेतने त्यजति तदा समं यावद्वेतनमभ्युपगतं तावदाप्यो न द्विगुणम्। यद्वाऽङ्गीकृता भृतिं दत्वा बलात्कारयितव्यः। तैश्च भृत्यैरुपस्कर उपस्करणं लाङ्गलादीना प्रग्रहयोक्त्रादिकं यथाशक्त्या रक्षणीयमितरथा कृष्यादिनिष्पत्त्यनुपपत्तेः। मिता.

(३) दाप्य इति। स्वामिने दद्यात् न तु राज्ञे दण्डमित्यर्थः। स्मृच.२०३

(४) गृहीतवेतनो भृतकोऽधिकर्मकृच्च। वीमि.

आयुधीयभारवाहकादिदोषसंम्बन्धी विधि.। त्याजकस्वामिदोषसबन्धी विधिः।

अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः।
प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम्॥

(१) शाठ्येनैव च अराजदैविकादित्यादि। विश्व.२।२०१

(२) आयुधीयभारवाहकौ प्रत्याह—अराजदैविक मिति। न विद्यते राजदैविक यस्य भाण्डस्य तत्तथोक्तम्। तद्यदि प्रज्ञाहीनतया वाहकेन नाशितं तदा नाशानुसारेणासौ तद्भाण्ड दापनीयः। यः पुनः विवाहाद्यर्थं मङ्गलवति वासरे प्रतिष्ठमानस्य तत्प्रस्थानौपयिक कर्म प्रागङ्गीकृत्य तदानीं न करिष्यामीति प्रस्थानविघ्नमाचरति तदाऽसौ द्विगुणा भृति दाप्यः। अत्यन्तोत्कर्षहेतुकर्मनिरोधात्। मिता.

(३) 'भृत्यै रक्ष्य उपस्करः' इत्युक्तं, तत्राऽरक्षणे कर्मप्रातिकूल्ये च दण्डमाह—अराजदैविकमिति। तुशब्देन राजदैविकनष्टं व्यवच्छिनत्ति। प्रस्थानविघ्नकारी भृतको भृत्यान्तरासभवे द्विगुणा भृति प्रकर्षेण ताडनादिनाऽतिशयपीडाकरेण प्रकारेण दाप्यः। एवकारेण कालान्तरे कर्मकारणव्यवच्छेदः। चकारेणार्धमार्गे विलम्बातिशयकारिणः समुच्चयः। वीमि.

(१) **मस्मृ.**८।२१८; **गोरा.** एष (एव).

(२) **यास्मृ.**२।१९३; **अपु.**२५७।४३; **विश्व.**२।१९७ दाप्यो (कार्यं) रक्ष्य (पाल्य); **मिता.**;**अप.**;**व्यक.**१५७; **स्मृच** २०३ तृतीयपादः; **विर.**१५९ वहेत् (हरेत्); **पमा.**३२४ उत्त.; **विचि.**७५ भृत्यै (भृतै); **नृप्र.**२५; **वीमि.**; **व्यप्र.** १२५ चतुर्थपादं विना; **व्यउ.**८६; **विता.**६४७; **सेतु.** १६९; **समु.**१०१; **विव्य.**४१ विरवत्.

(१) **यास्मृ.**२।१९७; **अपु.**२५७।४७; **विश्व.**२।२०१ विक (विकात्) कृच्चैव (कर्ता च), **मिता.**; **अप.** विक (विकात्); **व्यक.**१५८ अपवत्, **विर.**१६२ विक (वकात्); **पमा.**३२८; **स्मृचि.**२०; **सवि.**३०० णां भृतिम् (णं स्मृतम्); **वीमि.**; **व्यप्र.**३२७ उत्त.; **व्यम.** ९३ उत्त.; **विता.**६५० उत्त.; **समु.**१०२.

[1]प्रक्रान्ते सप्तमं भागं चतुर्थं पथि संत्यजन् ।
भृतिमर्धपथे सर्वां प्रदाप्यस्त्याजकोऽपि च ॥

(१) कर्मकरवच्च स्वाम्यपि—प्रक्रान्त इत्यादि । प्रक्रान्तादिसप्तमभागादिक्रमेण त्याजकः स्वाम्यपि कर्मकरेभ्यो दाप्यः । स्पष्टमन्यत् । विश्व.२।२०२

(२) कि च । प्रक्रान्ते अध्यवसिते प्रस्थाने स्वाङ्गीकृत कर्म यस्त्यजति असौ भृतेः सप्तम भाग दाप्यः । नन्वत्रैव विषये प्रस्थानविघ्नकृदित्यादिना द्विगुणभृतिदानमुक्त, इदानीं सप्तमो भाग इति विरोधः । उच्यते । भृत्यान्तरोपादानावसरसंभवे स्वाङ्गीकृतं कर्म यस्त्यजति तस्य सप्तमो भागः । यस्तु प्रस्थानलग्नसमय एव त्यजति तस्य द्विगुणभृतिदानमित्यविरोधः । यः पुनः पथि प्रक्रान्ते गमने वर्तमाने सति कर्म त्यजति स भृतेश्चतुर्थ भागं दाप्यः । अर्धपथे पुनः सर्वा भृति दाप्यः । यस्तु त्याजकः कर्मात्यजन्तं त्याजयति स्वामी पूर्वोक्तप्रदेशेष्वसावपि पूर्वोक्तसप्तमभागादिकं भृत्याय दापनीयः । एतच्चाध्याधितादिविषयम् । *मिता.

अपरिभाषितभृतिविधिः

दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः ।
अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता ॥

(१) अपरिभाष्य वेतन कर्मणि कृते यद्यपरिभाषितत्वव्याजेन स्वामी न किञ्चिद् दातुमिच्छेत्, तत्र कथमित्यपेक्षित आह—दाप्यस्त्विति ।

स्वय च न दद्यादिति शेषः । अपरिभाष्य वाणिज्यं पाशुपाल्यं कृषि वा यः करोति तस्य तदुत्पन्नोपचयदशमभागभाक्त्वमित्यवसेयम् । विश्व.२।१९८

(२) भृतिमपरिच्छिद्य यः कर्म कारयति तं प्रत्याह—दाप्यस्त्विति । यस्तु स्वामी वणिक् गोमी क्षेत्रिको वा अपरिच्छिन्नवेतनमेव भृत्य कर्म कारयति तस्माद्वाणिज्यपशुसस्यलक्षणात्कर्मणो यल्लब्ध तस्य दशम भागं भृत्याय महीक्षिता राज्ञा दापनीयः । *मिता

(३) सस्यदशमभागभृतिरियमल्पप्रयाससाध्यकृषक्षेत्रकर्तृविषयम् । बह्वायाससाध्यकृषक्षेत्रकर्तृविषये त्वाह बृहस्पतिः 'त्रिभाग पञ्चभाग वा गृह्णीयात्सीरवाहकः' इति । स्मृच.२०१-२०२

(४) इद तु सीरवाहकपरम् । वीमि.

[1]देशं कालं च योऽतीयाल्लाभं कुर्याच्च योऽन्यथा ।
तत्र स्यात्स्वामिनश्छन्दोऽधिकं देयं कृतेऽधिके ॥

(१) यथा स्वामिना निर्दिष्टः कर्मकरः—देशं कालमित्यादि । स्वाम्युक्तदेशकालादिविपर्ययेणान्यथा वा कर्मणि कृते भृतिदान प्रति स्वामिनः स्वेच्छा । विनयातिरेकाच्च कर्मकरैरधिके कर्मणि कृते स्वामिना स्वेच्छयैवाधिकं देयमित्यवसेयम् । विश्व.२।१९९

(२) अनाज्ञप्तकारिणं प्रत्याह—देशमिति । यस्तु भृत्यः पण्यविक्रयायुचित देश कालं च पण्यविक्रयाय-कुर्वन् दर्पादिनोल्लङ्घयेत्तस्मिन्नेव वा देशे काले च लाभमन्यथा व्ययाद्यतिशयसाध्यतया हीनं करोति तस्मिन् भृतके भृतिदान प्रति स्वामिनश्छन्दः इच्छा भवेत् । यावदिच्छति तावद्दद्यान्न पुनः सर्वामेव भृतिमित्यर्थः । यदा पुनर्देशकालाभिज्ञतया अधिको लाभः कृतस्तदा पूर्वैपरिच्छिन्नाया भृतेरपि किमपि धनमधिक स्वामिना भृत्याय दातव्यम् । +मिता.

---

* स्मृच., वीमि. मितावत् ।

(१) **यास्मृ** २।१९८; **अपु.**२५७।४८, **विश्व.**२।२०२ त्यजन् (त्यजेत्); **मिता.**; **अप.**; **व्यक.**१५८, **स्मृच.**२०४ जको (ज्यको); **विर** १६३; **पमा.**३२८; **स्मृचि.**२०; **नृप्र.** २५; **सवि.**३०० सर्वा (सर्व); **वीमि.**; **व्यप्र.**३२७, **व्यउ.** ८७ विश्ववत्; **व्यम.**९३ पू; **विता.**६५०; **समु.**१०२.

(२) **यास्मृ.**२।१९४; **अपु.**२५७।४४; **विश्व.**२।१९८ क्षिता (भृता); **मिता.**; **अप.**प्यस्तु (प्यस्तद्) णिज्य (णिज्या); **व्यक.**१५५ विश्ववत्; **स्मृच.**२०१; **विर.**१५६ विश्ववत्; **पमा.**३२२; **स्मृचि.**२० म भाग (मो भागो) क्षिता (भृता); **नृप्र.**२५; **सवि.**२९८; **वीमि.**; **व्यप्र.**३२४; **व्यउ.**८७; **व्यम.**९२; **विता.**६४४; **समु.**१०१.

* विर. मितावत् । + स्मृच., विर. मितावत् ।

(१) **यास्मृ.**२।१९५; **अपु.**२५७।४५ लाभ (लकर्म) स्यात् (तु); **विश्व.**२।१९९ लाभं (लकर्म); **मिता.**; **अप.**; **व्यक.**१५५ अपुवत्; **स्मृच.**२०२; **विर.**१५७ अपुवत्; **पमा.**३२३ तत्र स्यात् (तदा तु); **स्मृचि.** २० कृतेऽधिके (अधिक कृते); **सवि.**२९८ sधिक (रिक्थं); **वीमि.**; **व्यप्र.**३२४; **व्यउ.**८७; **विता.**६४५; **समु.** १०१.

(३) आद्यचकारेण क्रेतृविशेषादिक द्वितीयचकारेणाऽमूलह्रास समुच्चिनोति । ×वीमि.

अनेकभृत्यसाध्यकर्मवेतनविधिः

यो यावत्कुरुते कर्म तावत्तस्य तु वेतनम् ।
उभयोरप्यसाध्यं चेत्साध्ये कुर्याद्यथाश्रुतम् ॥

(१) असमाप्तकर्मत्यागे तु वेतनहानिप्राप्तावपवादः—यो यावदिति । यथेच्छयेत्यर्थः । स्वाभ्यपि शाठ्येनाकारयन् यथाकृत वेतन दाप्यः स्मृत्यन्तरानुसारात् ।
विश्व.२।२००

(२) अनेकभृत्यसाध्यकर्मणि भृतिदानप्रकारमाह—यो यावदिति । यदा पुनरेकमेव कर्म नियतवेतनमुभाभ्या क्रियमाण उभयोरप्यसाध्य चेद्याध्याद्यभिभवादुभाभ्या, अपिशब्दाद्बहुभिरपि यदि न परिसमापित, तदा यो भृत्यो यावत्कर्म करोति तावत्तस्मै तत्कृतकर्मानुसारेण मध्यस्थकल्पित वेतन देयं न पुनः समम्। न चाक्षयवशः कर्मणि वेतनस्यापरिभाषितत्वाददानमिति मन्तव्यम् । साध्ये तूभाभ्या कर्मणि निर्वर्तिते यथाश्रुत यावत्परिभाषित तावदुभाभ्या देय न पुनः प्रत्येक कृत्स्नवेतन नापि कर्मानुरूप परिकल्प्य देयम् । *मिता.

(३) अनेकपुरुषैर्यत्साध्य कर्म, तत्र उभयोरप्यसाध्ये कर्मानुरूपेण वेतन देयम् । यत्र तु स्वामिकर्मकारयोरुभयोरन्यतरस्य वा साध्य भवति, तत्र यथा त यथाविहित वेतनं कार्यमित्यर्थः । तदभिधानमग्रे । +विर.१५७

नारदः

परिभाषितापरिभाषितवेतनविधिः

भृतानां वेतनस्योक्तो दानादानविधिक्रमः ।
वेतनस्यानपाकर्म तद्विवादपदं स्मृतम् ॥

(१) अस्यार्थः । भृत्याना वेतनस्य वक्ष्यमाणश्लोकैरुक्तो दानादानविधिक्रमो यत्र विवादपदे तद्वेतनस्यानपाकर्मेत्युच्यते । मिता २।१९३

(२) भृत्यानां भृत्यर्थं कर्म कुर्वतां वेतनस्य भृतेर्दानादानविधिः क्रमः ईदृशस्य देय ईदृशस्यादेयं दत्तमध्येवंविधात्प्रत्यादेयं क्वचित् द्विगुणमादेयमित्याद्युक्तं यत्र विवादपदे तत् वेतनस्य भृतेरनपाकर्म अनपनयनमननुरूपकरण वाऽत्र विद्यत इति व्युत्पत्त्या वेतनानपाकर्माख्यमित्यर्थः । अनेनैव दैयादिसाध्यभेदादस्य पदस्यानेकविधत्वमुक्तम् । +स्मृच.४

(३) वेतनं कर्ममूल्यम् । तस्यानपाकर्म भृत्याया ऽसमर्पण समर्पितस्य परावर्तन वा । पमा.३२१

भृत्याय वेतनं दद्यात्कर्मस्वामी यथाक्रमम् ।
आदौ मध्येऽवसाने वा कर्मणो यद्विनिश्चितम् ॥

(१) तुभ्यमियद्दास्यामीति यद्वेतनं परिमाणतो विनिश्चितं तत्त्रिधा विभज्य कर्मण आदिमध्यान्तेषु दद्यादित्यर्थः । ×स्मृच.२०१

(२) यथाकृतं यथाव्यवस्थापितम् । कर्मण आदौ मध्ये अवसाने वा, आदौ पञ्च, मध्ये सप्त, अवसाने अष्टाविंशतिरिति क्रमेण इति पारिजातः । विर.१५६

× शेष मितावत् ।

* स्मृच., वीमि. मितावत् । +पारिजातमत मितावत् ।

(१) **यास्मृ** २।१९६, **अपु**.२५७।४६; **विश्व**.२।२००(उभयोरप्यशाठ्य चेच्छाठ्ये कुर्याद् यथाकृतम्); **मिता**.; **अप** तु (च) साध्य (शाठ्य) त्साध्ये (च्छाठ्ये), **व्यक**.१५६; **स्मृच**.२०२; **विर**.१५७ त्साध्ये (त्साध्य); **पमा**.३२३; **विचि**.७४ पू.; **नृप्र**.२५; **सवि**.२९९; **वीमि**.विरवत् ; **व्यप्र**.३२५; **व्यउ**.८७, **विता** ६४६; **सेतु**.१६८ साध्यं चेत्साध्ये (साध्यत्वात् साध्य); **समु**.१०१.

(२) **नासं**.७।१; **नास्मृ** ९।१; **अपु** २५३।१८ क्रमः +नाभा. स्मृचवत् । × व्यप्र. स्मृचवत् ।

(श्व य.), **मिता**.२।१९३ भृता (भृत्या), **अप**.२।१९३ मितावत् ; **स्मृच**.४ भृता (भृत्या) विधि (विधि.) वेतन (वेतन); **विर**.१५६ स्योक्तो मः (स्योक्तिर्दानाधमनविक्रये), **पमा**. ३२१ मितावत् ; **स्मृचि**.२०; **नृप्र** २५; **वीमि**.२।१९३ मितावत् , **व्यप्र** ३२३; **व्यउ** ८६, **व्यम**.९२, **विता**.६४३ मितावत्, **राकौ**.४७९, **सेतु** १६७ स्योक्तो (स्योक्तिः) क्रमः (क्रये), **समु**.१०१ मितावत् .

(१) **नारं**.७।२ क्रमम् (कृतम्); **नास्मृ**.९।२ भृत्या (भृता), **मिता**.२।१९३; **अप**.२।१९३ नासवत्; **व्यक**. १५५ भृत्या (भृता) क्रमम् (कृतम्) वा (च); **स्मृच**.२०१ वा (च); **विर**.१५६ क्रमम् (कृतम्) ऽवसाने वा (विरामे च); **पमा**.३२१ वा (च); **विचि**.७४ भृत्या (भृता) क्रमम् (कृतम्) मणो (मेणा), **स्मृचि**.२० नासवत्, **नृप्र**.२५; **सवि**.२९७ स्मृचवत्; **व्यप्र**.३२३ वा (तु); **व्यउ**.८६; **विता**.६४४ नासवत्; **राकौ**.४७९; **सेतु**.१६७ क्रमम् (कृतम्) मेणो (मेणां); **समु** १०१ स्मृचवत्; **विव्य**.४१ विचिवत् .

(३) अतिक्रमे दोषविवक्षया विधिस्तावदुच्यते। तव कर्म करिष्यामीत्यभ्युपगम्य प्रतिग्रहसद्भावे कारयिता तस्मै भृत्याय यथाकृतमुभाभ्यां तथा भृतिं दद्यात्। आदौ वा प्रत्यायितश्चेत्, कर्मणो मध्ये वार्धकृते, अवसाने समाप्ते वा यथा परिभाषितम्। कर्मणो यद् विनिश्चितं कर्मोद्दिश्योभाभ्यामनुमतम्। नाभा.७।२

भृतावनिश्चितायां तु दशभागमवाप्नुयुः।
लाभगोवीर्यसस्यानां वणिग्गोपकृषीवलाः॥

(१) दशभाग दशमं भागमित्यर्थः। गोवीर्यं पाल्यमानगवादिपशुप्रभवं पयःप्रभृति अवाप्नुयुः। यथाक्रमेणेति शेषः। स्मृच.२०१

(२) वणिग् लाभस्य दशभाग लभेत, गोपोऽपि गवा दशमं, कर्षकोऽप्यबीजसस्यस्य दशमं, बीज समुदायात् स्वामिने दत्त्वा शेषस्य दशम, सर्वत्र वा मूलद्रव्य मुक्त्वोदयस्य दशम भागम्। नाभा.७।३

उपस्कररक्षण भृत्यकर्म

कर्मोपकरणं चैषां क्रियां प्रति यदाहितम्।
आप्तभावेन तद्रक्ष्यं न जैह्म्येन कदाचन॥

एषा कर्मस्वामिना कर्मोपकरण लाङ्गलादिक कृष्यादिक्रियामुद्दिश्य यद्भृत्यपार्श्वे निहितं तत्तेन सदा निःशाठ्येन रक्ष्यमित्यर्थः। स्मृच.२०२

---

(१) **नासं.**७।३ गमवा (ग समा) वीर्य (बीज); **नारमृ.** ९।३ नासवत्; **व्यक.**१५५; **स्मृच.**२०१; **विर.**१५६; **पमा.**३२१ लाभ (लाभ) वणिग्गोप (वणिजोऽप); **विचि.**७४ भागमवा (मं भागमा); **नृप्र.**२५; **सवि.**२९८ कात्यायनः; **व्यप्र.**३२४ लाभ (लाभं); **व्यउ.**८७ व्यप्रवत्; **विता** ६४४ लाभगोवीर्य (लाभ गोबीज); **सेतु.**१६७ लाभ (लाभे) शेष विचिवत्; **समु** १०१; **विव्य.**४१ विचिवत्.

(२) **नासं.**७।४ यदाहि (यदपि) उत्तरार्धे (आप्तभावेन कुर्वीत न जिह्मेन समाचरेत्); **नास्मृ.**९।४ (क्रियोपकरण चैषां क्रियां यत् प्रत्युदाहृतम्। तत्स्वभावेन कुर्वीत न जिह्मेन समाचरेत्॥); **विश्व.**२।१९७ यदाहि (यदपि) उत्तरार्धे (आप्तभावेन तत्पाल्यं न जिह्मेन कथञ्चन); **व्यक.**१५६ चैषां (तेषां); **स्मृच.**२०२; **विर.**१५८ कदाचन (कथञ्चन); **पमा.** ३२४ चैषां (तेषां) यदाहि (यथाहि); **नृप्र.**२५ उत्तरार्धे (आत्मभावेन यत्कुर्यात् न जैह्म्येन कदाचन); **सवि.**२९९; **समु.**१०१.

भृतकदोषसबन्धी विधिः। स्वामिदोषे विधिः।

कर्माकुर्वन् प्रतिश्रुत्य कार्यो दत्त्वा भृतिं बलात्।
भृतिं गृहीत्वाऽकुर्वाणो द्विगुणां भृतिमावहेत्॥

(१) प्रतिश्रुत्येत्येतत्प्रारम्भस्याप्युपलक्षणम्।
स्मृच.२०३

(२) तव कर्म करिष्यामीति भृति निश्चित्य प्रतिज्ञायाकुर्वाणो यथोक्ता भृति दत्त्वा बलाद् बन्धनादिना कार्यः। ण्यन्तः, कारयितव्य इत्यर्थः। गृहीत्वा भृतिं शाठ्यादकुर्वाणः परिभवाद्वा, द्विगुणा भृतिमावहेत्। दण्ड एकगुणः गृहीत इतरः। नाभा.७।५

कालेऽपूर्णं त्यजन्कर्म भृतेर्नाशमवाप्नुयात्।
स्वामिदोषादपक्रामन् यावत्कृतमवाप्नुयात्॥

(१) यस्तु कालविशेषादधिक कर्म प्रतिज्ञः प्रतिज्ञातकालापूर्तावेव कर्म त्यजति त प्रत्याह—काले पूर्णं त्यजन्निति। अस्मिन्नेव विषये महापारुष्यकरणादिस्वामिदोषतस्त्यजन् भृत्यो यावति काले कर्म तत्कालानुसारेण कल्पित वेतन लभत इत्याह—स्वामीति। स्मृच.२०३

(२) भृतेरखण्डायाः, तेन तदोपात्त्यागे कियत्यपि भृतिर्न देया। विर.१६१

---

(१) **नासं.**७।५; **नास्मृ.**९।५; **विश्व.**२।१९७; **मेधा.** ८।२१५ गुणा (गुण); **मिता.**२।१९३ पू.; **अप.**२। १९३ कार्यो (वार्यो); **व्यक.**१५७; **स्मृच.**२०३ पू.; **विर.**१५९ दत्त्वा (ऽदत्वा) वहेत् (हरेत्); **पमा.**३२५ वहेत् (नुयात्); **विचि.**७५ पू.; **नृप्र.**२५ पमावत्; **वीमि.**२।१९३ पू.; **व्यप्र.**३२५; **व्यउ.**८७ पू.; **व्यम.**९२ पमावत्; **विता.** ६४७ पमावत्; **सेतु.**१६९ पू., **समु.**१०१.

(२) **नासं.**७।७ भृतेर्ना (भृतिना) उत्तरार्धे (स्वामिदोषादपक्रामेद् यावत् कृतमालभेत); **मेधा.**८।२१५ भृते . त् (भृतिनाशनमर्हति) **पू.**; **अप.**२।१९४ भृतेर्ना (भृतिना); **व्यक.** १५७; **स्मृच.**२०३; **विर.**१६१ दपक्रामन् (दकरणे) कृत (कृति); **पमा.**३२६ विरवत्; **विचि.**७६ दप (दपा); **स्मृचि.**२० उत्त.; **नृप्र.**२५; **सवि.**३००; **चन्द्र.**५१; **वीमि.**२।१९३ उत्त.; **व्यप्र.**३२६; **विता.**६४८ स्वामि (रोगी) यावत्कृत (तावत्काल); **सेतु.**१७०; **समु.**१०२; **विव्य.**४१ पू.

सदोषस्वामिसंबन्धी विधिः । सदोषवाहकविधिश्च ।

अनयन्भाटयित्वा तु भाण्डवान्यानवाहने ।
दाप्यो भृतिचतुर्भागं सर्वामर्धपथे त्यजन् ॥

(१) भाटयित्वा भाटके गृहीत्वा, भाण्डवान् स्वामी, यानवाहने अश्वादिवृषादिरूपे । व्यक.१५९

(२) भाटकगृहीतेन यानादिना भाण्डनेतारं प्रत्याह– अनयन्निति । यानं शकटादि । वाहनमश्वादि । ते भाटयित्वा प्रापणादिकार्योपाधिकपरिक्रयं कृत्वा सहायार्थं परिक्रीतं यद्यपि न गृह्णाति तथापि भृतिचतुर्भागं मूल्यचतुर्थांशं दाप्य इत्यर्थः । अर्धपथे च सर्वदापनवचनात्ततो न्यूनपथे भाटकाहृतयानानि त्यजन् त्रिभागद्विभागकल्पनया दाप्य इत्यूह्यम् । *स्मृच.२०५

(३) एतावद् ददामीति नादयित्वा देशान्तरमुद्दिश्यानयन् भाण्ड स्वामी शकटं बलीवर्दं वा परिच्छिन्नाया भृतेश्चतुर्भागं दाप्यः । अर्धपथे भृत्यं त्यजन् स्वामी सर्वां स्वपरिभाषितां भृतिं दाप्यः । नाभा.७।६

अनयन् वाहको ऽप्येवं भृतिहानिमवाप्नुयात् ।
द्विगुणां तु भृतिं दाप्यः प्रस्थाने विघ्नमाचरन् ॥

(१) वाहको भाटकग्रहीता । व्यक.१५९

(२) विघ्नाचरणमङ्गीकृतकर्माकरणमेवात्र विवक्षितम् । न पुनरासेधादिकम् । स्मृच.२०४

(३) वहनार्थं भृतो वाहकोऽपि यदि न नयेद् भृतिषड्भागं दाप्यः । गृहीत्वा भृतिं प्रस्थानकाले विघ्नमाचरन् अभिप्रेतवेलायां नोपतिष्ठेत चेदित्यर्थः । द्विगुणां भृतिं दाप्यः । नाभा.७।९

भृतिषड्भागमाभाष्य पथि युग्यकृतं त्यजन् ।
अददत्कारयित्वा तु सोदयां भृतिमावहेत् ॥

(१) यदीयैरश्वबलीवर्दादिभिर्युग्यं भाण्डं नीयते स युग्यभृतः । तं प्रति वोढव्यद्रव्यषड्भाग भृतित्वेनाऽऽभाष्य न ददाति तं च त्यजति तदा सोदयां भृतिं तस्मै स्वामी दद्यादित्यर्थः । अप.२।१९८

(२) यो भृतिमाभाष्य गच्छामीति प्रतिज्ञाय पथि पण्य भृतभाण्डादि त्यजेत् । असाधुत्वात् भृतेः षड्भागं दाप्य इति प्रथमखण्डार्थः । स्वाम्यदद्भृत्ये व्रजति पथि भृतिमददत्सोदया भृतिमावहेदिति द्वितीयखण्डार्थः । व्यक.१५९

(३) विशिष्टमध्वानमुद्दिश्यैतावतीं भृतिं ददामीति यद् युग्यादिवाहनार्थं कृत भृतको यदि मार्गं आरब्धे गन्तुं केनचिद् भागेन तं त्यजेत् तस्या भृतेः षड्भागं दाप्यः । अददत् कारयित्वा कर्म भृतिं न ददाति चेद्, एवमित्याभाष्येत्येतदपेक्ष्यते, सबुद्धिकां भृतिं दाप्यः । नाभा.७।८

भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः ।
दाप्यो यत्तत्र नष्टं स्याद्दैवराजकृताद्ऋते ॥

(१) भाण्डं भृतकव्यापार्यमाणं द्रव्यं, व्यसनं विघटनं, वाहकदोषतः भृतकजनदोषतः । विर.१६२

(२) वाहकदोषेण सदाप्रत्यवेक्षणप्रमादादिना व्यसनमागच्छेद् विपद्येत । नाभा.७।१०

---

* व्यप्र. स्मृचवत् ।

(१) **नासं**.७।६ भाट (नाद) भाण्डवान् (भाण्ड वा); **नास्मृ**.९।७ सर्वा (सम): Vulg. (अददत्कारयित्वा तु दण्डधान्यादिक धनम्); **अप**.२।१९८ त्यजन् (त्यजेत्), **व्यक**.१५९ सर्वा (सर्वं); **स्मृच**.२०५; **विर**.१६४ तिच (तेश्च) सर्वा (सर्वं); **पमा**.३३० तिच (तेश्च); **चन्द्र**.५३ विरवत्; **व्यप्र**.३२८; **व्यउ**.८७-८८ भाट (भाण्ड) दाप्यो (यथा); **व्यम**.९३ भाण्डवान् (भाण्ड च); **विता**.६५२ भाट (भार) तिच (तेश्च); **समु**.१०२ व्यकवत्.

(२) **नासं**.७।९; **नास्मृ**.९।८: Vulg. (अनयंश्चापि तद्देश भृतिहानिमवाप्नुयात्); **अप**.२।१९८ पू.; **व्यक**.१५९; **स्मृच**.२०४ उत्त.; **विर**.१६४ निमवा (नि समा) पू.; **पमा**.३३० पू.; **चन्द्र**.५४ पू.; **व्यप्र**.३२७ उत्त.; **समु**.१०२.

(१) **नासं**.७।८ सो ..वहेत् (कर्मैव सोदयां भृतिम्); **नास्मृ**.९।६ भाष्य पथि (दद्यात्पण्यं); **अप**.२।१९८ कृतं त्यजन् (भृतं त्यजेत्); **व्यक**.१५९ युग्यकृतं (पण्यं भृतं) दयां (दयं) वहे (हरे); **विर**.१६४ युग्यकृतं (युग्मं परि).

(२) **नासं**.७।१० नष्टं स्याद् (नश्येत्तु); **नास्मृ**.९।९ दाप्यो यत्तत्र नष्टं (स दाप्यो यत्प्रणष्टं); **मिता**.२।१९७ नासंवत्; **व्यक**.१५८ यत्तत्र (यत्र तु); **स्मृच**.२०३ नासंवत्; **विर**.१६२; **पमा**.३२७; **स्मृचि**.२० नासवत्; **नृप्र**.२५ नासंवत्; **चन्द्र**.५३ त्तत्र (दत्र); **व्यप्र**.३२७ दैव (दैव); **व्यउ**.८७ नासंवत्; **विता**.१५०; **समु**.१०२ नासंवत्.

पण्यस्त्रीविधि·

[1]शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत्।
अनिच्छन् शुल्कदाताऽपि शुल्कहानिमवाप्नुयात्॥

वेश्या (भाण्डं ?) हार्टं गृहीत्वा त नेच्छन्ती तच्छुल्क द्विगुणमावहेत्। नाभा.७।२०

[2]व्याधिता सश्रमा व्यग्रा राजकर्मपरायणा।
आमन्त्रिता च नागच्छेदवाच्या वडवा स्मृता॥

अवाच्या निर्दोषा। वडवा पण्यस्त्री। व्यक.१६०

[3]अप्रयच्छंस्तथा शुल्कमनुभूय पुमान् स्त्रियम्।
अक्रमेण तु संगच्छेद् घातदन्तनखादिभिः॥
अयोनौ यः समाक्रामेद्बहुभिर्वाऽपि वासयेत्।
शुल्कं सोऽष्टगुणं दाप्यो विनयं तावदेव तु॥

(१) अक्रमेण कामशास्त्रोक्तविध्यतिक्रमेण। अयोनौ मुखादौ समाक्रामेत्, मैथुनं कुर्यात्। बहुभिर्वा सयेत् आत्मार्थं भाटयित्वा बहुभिः पुरुषैर्वाजयेत्। व्यक.१६०

(२) शुल्कं दत्त्वा प्रविष्टोऽनिच्छन्त्यामयोनौ अन्यस्मिन् प्रदेशे शुक्रोत्सर्गं बलात् कुर्याद् अष्टगुणं तच्छुल्कं दाप्यः। नाभा.७।२१

[4]वेश्याः प्रधाना यास्तत्र कामुकास्तद्गृहोषिताः।
तत्सभुत्थेषु कार्येषु निर्णयं संशये विदुः॥

प्रधाना इति स्त्रीलिङ्गनिर्देश आर्षः, तत्समुत्थेषु वेश्यागृहोषितकामुकसबन्धेषु संशये वेश्याकामुकविप्रतिपत्तिजे। व्यक.१६०

भूमिगृहभाण्डेषु भाटकविधिः

[5]परभूमौ गृहं कृत्वा स्तोमं दत्त्वा वसेत्तु यः।
स तद्गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम्॥

(१) स्तोमं वासमूल्यम्। व्यक.१६०

---

(१) **नासं.**७।२० गुण (स्तदा) पू, **नास्मृ.**९।१८ गुण वहेत् (स्तदाप्नुयात्) पू, **मिता.**२।२९२ शुल्कदाता (दत्त शुल्को); **अप.**२।१९८, **व्यक.**१६०; **स्मृच.**२०६; **विर.**१६६; **पमा.**३३३; **विचि.**७८, **स्मृचि** २७ मितावत्, **नृप्र.**२५ पू.; **सवि.**३००; **व्यप्र.**३३०; **व्यउ.**८८ दाताऽपि (दायी तु): १३८-१३९ शुल्कं स्त्री (गृहीतवेतना वेश्या) शेष मितावत्; **विता.**६५४ शुल्क (मूल्य) मनु· : ८११ मितावत्, **सेतु.**१७२; **समु.**१०३; **विव्य.**४२ दाताऽपि (दस्यापि).

(२) **मिता.**२।२९२ च (चेत्) वाच्या (दण्ड्या), **अप** २।१९८ श्रमा (श्रम) कर्म (धर्म) वाच्या (वाइया) स्मृति·, **व्यक** १६०; **स्मृच.**२०६ धिता सश्रमा (धिना सश्रमा) वाच्या (वाक्या) स्मृत्यन्तरम्; **विर.**१६६ कर्म (धर्म) च (तु) स्मृति·, **पमा.**३३३ सश्रमा (सश्रमा) स्मृतिः; **विचि.**७८ स्मृति., **सवि.**३००-३०१ पमावत्, बृहस्पति, **व्यप्र.**३३० बृहस्पतिः : ४०२ मितावत्; **व्यउ** ८८ बृहस्पतिः . १३८ मितावत्; **विता.**६५४ बृहस्पतिः : ८१० मितावत्; **सेतु** १७२ स्मृतिः; **विव्य.**४२ (=) विरवत्.

(३) **नासं.**७।२० स्तथा (स्तदा) पू, **नास्मृ.**९।१८ नासवत्, पू.; **मिता** २।२९२ अक्र ..च्छेद् (आक्रमेण च सगच्छन्), **अप.**२।१९८ गच्छेद् (गच्छन्), **व्यक.**१६० घात (घात) (=); **स्मृच.**२०६ अक्रमेण तु (अतिक्रमेण); **विर.**१६६ तु सं...दन्त (च संगच्छन् घातयस्तु); **पमा.**३३३ दन्त (येद्वा); **सवि.**३०१; **व्यप्र.**३३०; **व्यउ** ८९; **विता.**८११ तथा (पुमान्) तु ..च्छेद् (च संगच्छन्); **समु.**१०३ तु (च).

(४) **नासं.**७।२१ यः समाक्रामेत् (क्रमते यस्तु) शुल्कं सोऽ (शुल्कम) नय ता (नयस्ता) तु (च); **नास्मृ.**९।१९ य (वा); **मिता.**२।२९२ यः समाक्रामेत् (वाऽभिगच्छेद्वो) शुल्कं सोऽ (शुल्कम); **अप.**२।१९८; **व्यक.**१६०(=), **स्मृच.**२०६ वासयेत् (साधनै.); **विर.**१६६ (=); **पमा.** ३३३ ऽपि (वि) सोऽ(त्व). **विचि.**७८ मत्स्यपुराणम्; **सवि.** ३०१, **व्यप्र** ३३०, **व्यउ** ८९; **विता.**६५४ उत्त., क्रमेण बृहस्पति :८११ मितावत्, **सेतु.**१७२ मत्स्यपुराणम्; **समु.** १०३ स्मृचवत्, **विव्य.**४२ मत्स्यपुराणम्.

(१) मिता २।२९२; **अर.**२।१९८; **व्यक.**१६०; **स्मृच.** २०६ वेश्या प्र (वेश्याप्र) यास्तत्र (ये तत्र); **विर.**१६७; **पमा.** ३३४ स्मृचवत्, **विचि.**७९ स्मृचवत्; **नृप्र.**२७; **सवि.** ३०१ स्मृचवत्; **व्यप्र.**३३०; **व्यउ.**८९; **विता.**८११; **सेतु.**१७२, **समु.**१०३ स्मृचवत्.

(२) **नासं.**७।२२ परभूमौ (पराजिरे) तृण...कम् (त्यक्त्वा सर्वं मुषोषितः); **नास्मृ.**९।२० परभूमौ (पराजिरे); **अप.** २।१९८, **व्यक.**१६०; **स्मृच.**२०५; **विर.**१६८; **पमा.** ३३१ काष्ठेष्टकादिकम् (काष्ठानि चेष्टकाम्); **विचि.**७९ दत्त्वा (कृत्वा), **नृप्र.**२७ तृण...कम् (त्यक्त्वा सर्वमुपोषितः); **सवि.** ३०१ हारीतः, **व्यप्र** ३२९, **व्यउ.**८८; **व्यम.**९३; **विता.** ६५३; **सेतु.**१७३ काष्ठेष्ट (काष्टेष्टि); **समु.**१०२.

(२) परस्य **गृहाङ्गणे** गृह कृत्वा हाट दत्त्वा वसेद् यः, स तद् गृहीत्वा गृहोपकरण निर्गच्छेत् पूर्णे समये। गृहोपकरण दार्वादि। त्यक्त्वा सर्व भाण्ड हित्वा निष्क्रामेत्। मुधोषितः (भाण्डे ? हाटे) न विनोषितः। तस्य तदेव दान वासनिमित्तम्। नाभा.७।२२

स्तोमाद्विना वसित्वा तु परभूमावनिश्रितः।
निर्गच्छेत्तृणकाष्ठानि न गृह्णीयात् कथंचन॥
यान्येव तृणकाष्ठानि त्विष्टका विनिवेशिताः।
विनिर्गच्छंस्तु तत्सर्वं भूमिस्वामिनि वेदयेत्॥

(१) निवेदयेल्लाभयेत्प्रापयेदिति यावत्। लाभार्थस्य विदे रूपमिदम्। व्यक.१६१

(२) स्वामिनि स्वामिने वेदयेन्निवेदयेदित्यर्थः। अनिश्रित इति वदस्तृणकाष्ठादिग्रहणाग्रहणपरिभाषाविहीनविषयमेतदिति दर्शयति। परिभाषितविषये तु यथा परिभाषा कृता तथैव स तद्गृहीत्वा निर्गच्छेदिति मूलग्रहव्यतिरिक्तविषयमित्याचाराविरोधाय कल्पनीयम्। शम्भुस्तु तद्गृहीत्वेत्यस्य गृह गृहीत्वा गृहोपकरण गृहीत्वेति यावदिति व्याख्यान कृतवान्। तत्तृणकाष्ठादिकमित्यादिना विरुद्धमित्युपेक्षणीयम्। +स्मृच.२०५

स्तोमवाहीनि भाण्डानि पूर्णकालान्युपानयेत्।
ग्रहीतुराभवेद्भग्नं नष्टं चान्यत्र संग्रवात्* ॥

(१) स्तोमेन भाटकेन घृततैलादिद्रव्यान्तरप्रापणार्थं यानि मृन्मयानि भाण्डानि तानि स्तोमवाहीनि, तानि पूर्णभाटककालानि तत्स्वामिनमुपानयेत्। तेषा मध्ये यत्तदवलेपाद्भग्नं प्रध्वस्त वा तत्स्तोमग्रहीतुराभवेत्। नेतरेण तदेयमित्यर्थः। एतच्च संग्रवादन्यत्र। संग्रवे तु भाण्डस्वामिने भग्नादिभाण्डमूल्य देयम्। संग्रवो द्रव्यान्तरेणाऽऽस्कालनम्। ×अप.२।१९८

(२) स्तोमो वेतन, संग्रवो राजदैविकम्। तेन राजदैविकमन्तरेण विघटित शकटादि ग्रहीतुरेव समाधेयं स्यादिति पूर्णकाल तत्स्वामिने समर्पणीयमित्यर्थः।

+विर.१६९

बृहस्पतिः

सीरवाहकभागविधिः

[1]**त्रिभागं पञ्चभागं वा गृह्णीयात् सीरवाहकः॥**

व्यवस्थितविकल्पश्चायम्। स्मृच.२०२

[2]**भक्ताच्छादभृतः सीराद्भागं गृह्णीत पञ्चमम्।**
जातसस्यात्त्रिभागं तु प्रगृह्णीयादथाभृतः॥

+ व्यप्र. स्मृचवत्। * नाभा. अशुद्धत्वान्नोद्धृतम्।

(१) **नास्मृ.**९।२१ स्तोमाद्वि (स्तोम वि) श्रित· (च्छतः) कथ (कदा); **अप.**२।१९८ स्तोमाद्विना (स्तोमादिना), **व्यक** १६१ वसि (ह्युषि) पर ..तः (पर भाव नियच्छत·), **स्मृच** २०५ ष्ठानि (ष्ठादि); **विर.**१६८ स्मृचवत्; **पमा** ३३१ स्मृचवत्; **विचि.७९** स्तोमाद्वि (स्तोम वि) श्रित (च्छतः) च्छंस्तृण (च्छेत्तृण); **सवि.**३०१ श्रितः (च्छत) ष्ठानि (ष्ठादि) हारीतः; **व्यप्र.**३२९; **व्यउ.**८८ यात् (त); **व्यम.**९३ अपवत्, पू.; **समु.**१०२ वसि (ह्युषि) ष्ठानि (ष्ठादि); **विब्य.**४२ विचिवत्.

(२) **अप.**२।१९८ शिताः (शिता); **व्यक** १६१ भूमिस्वामिनि (भूस्वामिनि नि); **स्मृच.**२०५ अपवत्, **विर.**१६८ व्यकवत्; **पमा** ३३१; **सवि.**३०१-३०२ त्वि...ताः (इष्टका वा निवेशिता) हारीतः; **व्यप्र.**३२९; **व्यउ.**८८; **व्यम.**९३, **विता.**६५३ स्वामिनि (स्वामी नि); **समु** १०२.

(३) **नास.**७।२३ चान्य (वान्य); **नास्मृ.**९।२२, **अप** २।१९८ नासवत्, **वृद्धमनुः**; **व्यक.**१६१; **स्मृच.**२०५; **विर.**१६९ कालान्युपान (काल तु पाल), **पमा.**३२२ भवे (वहे) चान्य (वान्य); **विचि.७२** लान्यु (लेऽप्यु) चान्य (वान्य), **सवि.**३०१ नये (वहे) भवे (वहे) वात् (व.); **चन्द्र.**५४ पूर्णकालान्यु (कृतकार्याण्यु) तुरा (तुर्वा); **व्यप्र.** ३२९; **व्यउ.**८८ काला (पाना); **सेतु.**१७३ लान्यु (लेऽप्यु); **समु.**१०२.

(१) **अप.**२।१९४; **व्यक.**१५६; **स्मृच.**२०२; **विर.** १५७; **पमा.**३२२; **विचि.७४**; **नृप्र.**२५; **सवि.**२९८; **वीमि.**२।१९४; **व्यप्र.**३२४; **व्यम.**९२; **विता.**६४४; **सेतु** १६८; **समु.**१०१.

(२) **अप.**२।१९४; **व्यक.**१५६ यादथा (तोपधा); **स्मृच.** २०२, **विर.**१५८ राद्धा (रभा) शेष व्यकवत्; **पमा.**३२२ स्यात् (स्यो) याद (यात्त); **विचि.७४** भृतः सीराद् (नभृतसीरी) स्यात्रि (स्यत्रि) शेष व्यकवत्; **सवि.**२९८ भक्ता (वस्त्रा) सीरा (सारा) दथा (दथो); **वीमि.**२।१९४ गृह्णीत (भुञ्जीत) पू; **व्यप्र.**३२४; **व्यम.**९२; **विता.**६४४; **सेतु.**

× स्मृच., पमा., व्यप्र. अपवत्।
+ विचि., चन्द्र. विरवत्।

(१) उपधया व्यापारफलेन शस्यादिना भृतः, तेन भक्ताच्छादनभृतादन्य इत्यर्थः । नारदीयं च दशमाशकल्पनं सीरवाहकेतरभृतकविषयम् ।

*व्यक.१५६

(२) कथमत्र व्यवस्थेत्यपेक्षिते स एवाह—भक्तेति । अशनाच्छादनाभ्यां भृतः कृषीवलो लाङ्गूलविकृष्टक्षेत्रजातसस्यात्पञ्चम भाग गृह्णीयात् । ताभ्यां भृतस्तु तृतीयं भागमित्यर्थः । अथवा यत्र इयदास्यामीति परिभाषाया अभावस्तत्र मनूक्त (८।१५७) द्रष्टव्यम् ।

+स्मृच.२२०

भृतकदोषसबन्धी विधिः

भृतकस्तु न कुर्वीत स्वामिनः शाठ्यमण्वपि ।
भृतिहानिमवाप्नोति ततो वादः प्रवर्तते ॥

ततः शाठ्यकरणाद्विवादः स्वामिना सहासख्यप्रवर्तने तत्र पराजितो भृतकः शाठ्यानुसाराद्भृतिहानिमवाप्नोतीत्यर्थः । स्मृच.२०२

गृहीतवेतनः कर्म न करोति यदा भृतः ।
समर्थश्चेदमं दाप्यो द्विगुणं तच्च वेतनम् ॥

(१) समर्थश्चेन्न करोतीति संबन्धः । व्यक.१५७

(२)दम शक्त्यपराधानुसारेण राज्ञे दद्यात् । गृहीतं च वेतनं द्वैगुण्येन स्वामिने दद्यादित्यर्थः ।

स्मृच.२०२

प्रतिश्रुत्य न कुर्याद्यः स कार्यः स्याद्बलादपि ।
स चेन्न कुर्यात्तत्कर्म प्राप्नुयाद्द्विशतं दमम्×॥

स्वामिदोषसबन्धी विधिः

प्रभुणा विनियुक्तः सन्भृतको विदधाति यत् ।
तदर्थमशुभं कर्म स्वामी तत्रापराध्नुयात् ॥

(१) तदर्थं स्वाम्यर्थं, अशुभ चौर्यादि, स्वामी तत्रापराध्नुयात् स्वामिन एव तत्र दोषो न तु भृतकस्येत्यर्थः । व्यक.१५८

(२) अशुभ कर्म सीमोल्लङ्घनाद्यन्यायेन क्षेत्रकर्षणादिक स्वाम्यनुज्ञया भृत्येनाशुभकर्मकरणे स्वामिनो दण्ड इति वक्तुमिदमुक्तम् । स्मृच.२०४

कृते कर्मणि यः स्वामी न दद्याद्वेतनं भृते ।
राज्ञा दापयितव्यः स्याद्विनयं चानुरूपतः ॥

कात्यायनः

सदोषभृतकसदोषवाहकसदोषस्वामिसबन्धी विधिः

कर्मारम्भं तु यः कृत्वा सिद्धिं नैव तु कारयेत् ।
बलात्कारयितव्योऽसौ अकुर्वन् दण्डमर्हति ॥
विन्नयन् वाहको दाप्यः प्रस्थाने द्विगुणां भृतिम् ॥

× वस्तुतः बृद्धमनोरिद वचनम् ।

(१) विर.१६० त्तत्कर्म म् (इर्षाच्च भृत. कर्म यथोदितम्),चन्द्र.५२ शत (गुण), व्यप्र.३२५ बृद्धमनु-बृहस्पती,सेतु.१६९.

(२) अप.२।१९७, व्यक.१५८, स्मृच.२०४ यत् (य.), विर.१६२; विचि.७६-७७; दवि.८५; सवि. ३०१ स्मृचवत्, चन्द्र.५३; व्यप्र.३२९ स्मृचवत्; व्यउ.८८ स्मृचवत्; व्यम.९३ स्मृचवत्, सेतु.१७०; समु.१०२ स्मृचवत्, विव्य.४२ तत्रापराध्नु (तत्पुनराप्नु).

(३) अप.२।१९८ भृते (भृते.), व्यक १५९; स्मृच. २०४; विर.१६५ अपवत्; पमा.३३२; विचि.७७ अपवत्, व्यप्र.३३० द्विनय (द्वेतन); व्यउ.८८ व्यप्रवत्; व्यम.९३ व्यप्रवत्; विता.६५२ व्यप्रवत्, सेतु.३२० अपवत्; समु १०२.

(४) अप.२।१९३ ऽसौ (स्याद्) नारदः; व्यक.१५७ सिद्धि (सर्वं) तु का (च का); स्मृच.२०३; विर.१६० सिद्धिं (सर्वं); पमा.३२५ विरवत्, सवि.२९९; व्यप्र.३२५; विता.६४८ सिद्धि (सिद्ध), समु.१०१.

(५) स्मृच.२०३ णा भृतिम् (ण भृतम्); पमा.३२७; व्यप्र.३२७ विन्नयन् (विघ्न यो); समु.१०२ स्मृचवत्.

---

* विचि. व्यकवत् ।

+ पमा., सवि. स्मृचवत् ।

१६८ विचिवत्; समु.१०१, विव्य.४१ भृतः सीरात् (नभृत्सीरी) स्यात्रि (स्य द्वि) शेषं व्यकवत्

(१) अप.२।१९३; व्यक.१५६-१५७; स्मृच. २०२; विर.१५९; पमा.३२४ मिनः (मिना) निमवा (नि समा) ततो (तदा); सवि.२९९ वाद. (हानिः), समु १०१.

(२) अप.२।१९३; व्यक.१५७; स्मृच.२०२; विर. १५९; पमा.३२४; विचि.७५; स्मृचि.२०; नृप्र.२५; सवि.२९९ तवेतनः (त्वा वेतनं) नारदः; चन्द्र.५२ यदा भृतः (कदाचन) तच्च (तत्र); व्यप्र.३२५; विता. ६४७ तच्च (तत्र); सेतु.१६९; समु.१०१; विव्य.४१ श्रेद् (स्तु).

यदा च पथि तद्भाण्डमासिध्येत ह्रियेत वा।
यावानध्वा गतस्तेन प्राप्नुयात्तावतो भृतिम् ॥

शौल्किकादीनामासेधेन प्रतिबद्धभाण्डस्वामिविषये राजाद्यपहृतभाण्डस्वामिविषये चाह—यदेति। स्मृच२०४

त्यजेत्पथि सहायं यः श्रान्तं रोगार्त्तमेव वा।
प्राप्नुयात्साहसं पूर्वं ग्रामे त्र्यहमपालयन् ॥

यः स्वामी ग्रामे त्र्यहमपाल्यैव मुश्रान्त रोगार्त्त वा भृतक त्यजेत्स राज्ञा दण्ड्य इत्यर्थः। व्यक.१५९

गृहापणभाण्डहरत्यश्वादिभाटकविधि.

गृहवार्यापणादीनि गृहीत्वा भाटकेन यः।
स्वामिने नार्पयेद्यावत्तावद्दाप्यः स भाटकम् ॥

(१) वारिशब्देनात्र तदाधारपात्र मणिकादिक लक्ष्यते। नार्पयेत्कृतकृत्यः सन्निति शेषः। स्मृच.२०५

(२) वारि परखानित प्रतिष्ठितमिह विवक्षितम्। विर.१६८

हरत्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः।
नार्पयेत्कृतकृत्यः सन् तावद्दाप्यः स भाटकम् ॥

व्यासः

गृहभूमिभाटकविधि

स्नेहेन तु चिरं लब्ध्वा मन्दिरं कुरुते तु यः
निर्गच्छतस्तस्य दारु दत्तस्तोमस्य नान्यथा ॥

तस्य परभूमौ मन्दिरकर्तुर्निर्गच्छतस्तत्स्थान परित्यज्य गच्छतो यद्दार्वादिक मन्दिररूपेण स्थित तद्भाटके दत्ते तद्दातुरेव नो चेद्भूस्वामिन एवेत्यर्थः। स्मृच.२०६

बृहन्मनुः

अपरिभाषिता भृति.। तदोपभृतकविधिः। उपस्करनाशसंबन्धी विधिः।

समुद्रयानकुशला देशकालार्थदर्शिनः।
नियच्छेयुर्भृतिं यां तु सा स्यात्प्रागकृता यदि ॥
प्रतिश्रुत्य न कुर्याद्यः स कार्यः स्याद्बलादपि।
स चेन्न कुर्यात्तत्कर्म प्राप्नुयाद्द्विशतं दमम् ॥

द्विशत कार्षापणद्विशतम्। पमा.३२५

प्रमादान्नाशितं दाप्यः समं द्विर्द्रोहनाशितम्।
न तु दाप्यो हृतं चौरैर्दग्धमूढं जलेन वा ॥

---

(१) अप २।१९८ ण्डमासिध्येत (ण्ड निषिध्यत) नध्वा (नध्व) वतो (वर्ता) बृद्धमनु., व्यक.१५९ ह्रिये (ह्रिये) प्राप्नुयात्तावतो (तावर्ता लभते), स्मृच २०४ च (तु) वतो (वर्ता), विर.१६४ यदा (यथा) प्राप्नुयात्तावतो (तावर्ता लभते), पमा.३२९ यदा (यथा), विचि ७७, चन्द्र.५४ व (त) स्तेन (स्तस्य); व्यप्र.३२८ भृतिम् (धनम्), व्यउ ८७ यावान (एवम) शेष व्यप्रवत्, व्यम.९३ पमावत्, विता. ६५० तो भृतिम् (तो भृति.), सेतु १७१ यदा (परा) प्राप्नुयात्तावतो (तावतो लभते), समु १०२ च (तु) त्तावतो (त्तावर्ता).

(२) अप २।१९८, व्यक.१५९ श्रान्त (आर्त) वा (च), स्मृच.२०४; विर.१६५, पमा ३३२ वा (च), विचि. ७७ प्राप्नु (आप्नु), स्मृचि.२० पमावत्, व्यप्र.३२९, व्यउ.८८ पमावत्, व्यम.९३ त्यजे (त्यज्य), विता.६५१, सेतु.१७१ विचिवत्; समु.१०२; विव्य ४२

(३) अप.२।१९८, व्यक.१६१, स्मृच २०५, विर १६८ प्य. स (प्यस्तु); पमा ३३१ मिने (मिनो), विचि. ७९ पमावत्; व्यप्र.३२८, सेतु.१७३, समु.१०२, विव्य. ४२ यावत् (त्तत्).

(१) व्यक.१६१. स्मृच २०५ कृत्य. सन् तावद् (कृत्यार्थ स तु), विर १६९, पमा ३३० नार्प (निर्य) तावद्दा (स्तावद्दा), चन्द्र.५४ नार्प (अर्प) सन् तावद्दाप्यः (च यावद्दाप्यात्), व्यप्र ३२८, व्यउ.२८, व्यम.९३, विता.६५३; सेतु.१७३, समु १०२ स्मृचवत्, विव्य ४२ खरोष्ट्रादीन् (खरादीनि)

(२) अप २।१९८ तु चिर (स्थण्डिल), व्यक.१६१(=) लब्ध्वा (भुक्त्वा) दारु (हातु·), स्मृच.२०६ लब्ध्वा (काल); विर.१६८ (=) लब्ध्वा (भुक्त्वा), सवि.३०२ हारीतः; समु.१०२ स्मृचवत्.

(३) अप.२।१९४, व्यक.१६० शला (शलान्) दर्शि (वेदि) सा स्यात् (तस्य), विर.१५८; विचि.७५ दर्शि (वेदि), व्यप्र.३२४, विता.६४५ वा (या); सेतु.१६८ विचिवत्; विव्य.४१ विचिवत्.

(४) अप.२।१९३, व्यक.१५७; स्मृच.२०३; पमा. ३२५, विचि.७५ उक्त, व्यप्र.३२५ बृद्धमनुबृहस्पती; विता.६४८ शत (गुण) उक्त, समु.१०२.

(५) अप.२।१९७ द्रोह (मोह), व्यक.१५८; स्मृच.

प्रमादान्नाशितमनवधानान्नाशितं सममेव दद्याद्द्रोहनाशितं तीव्रप्रहारादिना नाशित तद्द्विर्दाप्यो द्विगुण दद्यादित्यर्थः। भृत्यदोषाभावे यदन्यत एव नष्टं तन्न देयमित्याह स एव—न तु दाप्य इति। ऊढं नीतम्। स्मृच.२०३

[1]यः कर्मकाले संप्राप्ते न कुर्याद्विघ्नमाचरेत्।
उद्धृत्यान्यस्तु कार्यः स्यात्स दाप्यो द्विगुणां भृतिम्॥

वाहनकर्मणि सदोषस्वामिसंबन्धी विधिः

[2]पथि विक्रीय तद्भाण्डं वणिग्भृत्यं त्यजेद्यदि।
अथ तस्यापि देयं स्याद्भृतेरर्धं लभेत सः॥

अगतस्यापि यावद्गन्तव्यमगतस्यापि। व्यक.१५९

[3]यो भाटयित्वा शकटं नीत्वा चान्यत्र गच्छति।
भाटं न दद्याद्दाप्यः स्यादनूढस्यापि भाटकम्॥

(१) भाट भाटकम्। कार्योपाधिकपरिक्रयमूल्यमिति यावत्। अरूढस्यापि अकृतोपकारस्यापि शकटादेर्भाटक दाप्य इत्यर्थः। स्मृच.२०५

(२) शकटमिति वाह्यमात्रोपलक्षणम्। अनूढस्यापि अवाहितस्यापि। विर.१६९

२०३; **विर.**१६२; **पमा.**३२७, **विचि.**७६, **सवि.**३०० उत्त., कात्यायनः; **चन्द्र.**५३ वा (च) उक्त.; **व्यप्र.**३२७; **व्यम.**९३; **सेतु.**१७०; **समु.**१०२; **विव्य.**४१ तु दाप्यो (तद्दाप्यो).

(१) **अप.**२।१९८ उद्धृत्या (तद्वृत्तोऽ); **व्यक.**१५८ उध्धृत्या (तद्भृत्योऽ); **विर.**१६३; **पमा.**३२७; **सेतु.**१७१ म कुर्याद्विघ्नमा (कार्यविघ्नं समा) उध्धृत्या...स्यात् (उद्धर्तोऽन्यस्य कार्यस्य).

(२) **अप.**२।१९८; **व्यक.**१५९ अथ (अग), **स्मृच.**१०४ मनुः, **विर.**१६४ व्यकवत्; **पमा.**३२९; **विचि.**७७ व्यकवत्; **स्मृचि.**२० अथ (आग) रर्थं (रर्थं); **चन्द्र.**५४ अथ (आग); **व्यप्र.**३२८; **व्यम.**९३; **सेतु.**१७१ अथ (अग) भेत (भेत्तु); **समु.**१०२ मनुः.

(३) **अप.**२।१९८ पू.; **व्यक.**१६१; **स्मृच.**२०५ नूढ (रूढ); **विर.**१६९ चान्य (वान्य); **पमा.**३३० भाट ..स्यापि (भाण्ड न दद्यात्परतो दाप्यः स्यात्सोऽपि); **विचि.**७९ चान्य (नान्य) दाप्यः स्याद (दाप्योऽसाव); **स्मृचि.**२१ पू., मनुः, **चन्द्र.**५४ दाप्यः स्याद (दाप्योऽसाव) भाटकम् (वेतनम्); **व्यप्र.**३२८ विरवत्; **व्यउ.**८८ मनुः; **विता.**

मत्स्यपुराणम्

[4]मूल्यमादाय यो विद्यां शिल्पं वा न प्रयच्छति।
दण्ड्यः स मूल्यं सकलं धर्मज्ञेन महीभृता॥
[5]गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति।
तां दमं दापयेद्यादितरस्यापि भाटकम्॥

अनूढस्य भुजङ्गस्य भाटक शुल्कं, तच्च द्विगुणम्। विर.१६६

[6]अन्यमुद्दिश्य वेश्यां यो नयेदन्यस्य कारणात्।
तस्य दण्डो भवेद्राज्ञः सुवर्णस्य च माषकम्॥
[7]नीत्वा भोगं न यो दद्याद्दाप्यो द्विगुणवेतनम्।
राज्ञश्च द्विगुणं दण्डं तथा धर्मो न हीयते॥
[8]बहूनां व्रजतामेकां सर्वे ते द्विगुणं धनम्।
तस्यै दद्युः पृथक् राज्ञे दण्डं च द्विगुणं परम्॥

अत्र द्विगुणो दमो दण्डः, स च स्त्रियै राज्ञे च, द्विगुणो दण्डोऽत्र स्फुट एव। विर.१६७

६५२-६५३, **सेतु.**१७३ चान्यत्र (ऽन्यत्र प्र) दाप्यः स्याद (दाप्योऽसाव); **समु.**१०२ स्मृचवत्; **विव्य.**४२ दाप्यः स्याद (दाप्यो ऽसाव).

(१) **अप.**२।१९८ भृता (क्षिता); **व्यक.**१५९ अपवत्; **विर.**१६३ स मूल्यं (स मूल); **विचि.**७७; **स्मृचि.**२०; **दवि.**११४; **सेतु.**१७१; **विव्य.**४२.

(२) **अप.**२।१९८ दम (धन) दितर (दनूढ); **व्यक.**१६०; **स्मृच.**२०६; **विर.**१६६ तां....रस्या (भाटं न दद्याद्दाप्या स्यादनूढस्या), **पमा.**३३४, **सवि.**३०१ दितर (दुत्तर) भाट (भाण्ड); **व्यप्र.**३३०; **व्यउ.**८९; **विता.**६५४; **समु.**१०३.

(३) **अप.**२।१९८; **व्यक.**१६०; **विर.**१६७; **विचि.**७८ वेश्या यो (यो वेश्या) च (तु); **व्यप्र.**३३०; **व्यउ.**८९, **विता.**६५५ वेश्यां यो (यो वेश्यां) माषकम् (माषकः); **सेतु.**१७२ वेश्यां यो (यो वेश्यां).

(४) **अप.**२।१९८; **व्यक.**१६० दाप्यो (दण्ड्यो) दण्डं तथा (दण्डमेव); **विर.**१६७ व्यकवत्; **विचि.**७८; **व्यप्र.**३३०; **व्यउ.**८९; **विता.**६५५, **सेतु.**१७२.

(५) **अप.**२।१९८धनम् (दमम्) तस्यै दद्युः (दद्युःपृथक्); **व्यक.**१६० धनम् (दमम्) तस्यै (संप्र); **विर.**१६७ व्रजता (भुजता) शेष व्यकवत्; **विचि.**७८ तस्यै (तस्मा), **व्यप्र.**३३० ते (तत्); **व्यउ.**८९ व्यप्रवत्; **सेतु.**१७२ व्यकवत्.

शुक्रनीतिः

भृतिप्रकाराः

कार्यमाना कालमाना कार्यकालमितिस्त्रिधा ।
भृतिरुक्ता तु तद्विज्ञैः सा देया भाषिता यथा ॥
अयं भारस्त्वया तत्र स्थाप्यस्त्वेतावतीं भृतिम् ।
दास्यामि कार्यमाना सा कीर्तिता तन्निदेशकैः ॥
वत्सरे वत्सरे वाऽपि मासि मासि दिने दिने ।
एतावतीं भृतिं तेऽहं दास्यामीति च कालिका ॥
एतावता कार्यमिदं कालेनापि त्वया कृतम् ।
भृतिमेतावतीं दास्ये कार्यकालमिता च सा ॥
न कुर्याद् भृतिलोपं तु तथा भृतिविलम्बनम् ।
अवश्यपोष्यभरणा भृतिर्मध्या प्रकीर्तिता ॥
परिपोष्या भृतिः श्रेष्ठा समान्नाच्छादनार्थिका ॥
भवेदेकस्य भरणं यया सा हीनसंज्ञिका ॥
यथा यथा तु गुणवान् भृतकस्तद्भृतिस्तथा ॥

(१) शुनी.२।३८५-३९१.

वेदाः

मुख्यस्य सहकारिणां च संवित् इष्टा

त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ॥

हे सोम त्वं पितृभिः सह संविदानः संगच्छमानः द्यावापृथिवी द्यावापृथिव्यावन्वा ततन्थ। क्रमेण विस्तारयसि। ऋसा.

दम्पत्योः संवित् इष्टा

अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षम्। तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम् ॥

यमः पुनरप्याह। हे यमि त्वमन्यमु अन्यं पुरुषमेव सु सुष्ठु परिष्वज। अन्य उ अन्योऽपि पुरुषस्त्वा परि ष्वजाते। तत्र दृष्टान्तः। लिबुजेव वृक्ष यथा वल्ली गाढ वृक्ष परिष्वजते तद्वत्। तथा सति। वाशब्दः समुच्चये। त्व तस्य च पुरुषस्य मनः इच्छ कामय। तस्य त्व वशवर्तिनी भवेत्यर्थः। स च पुरुषः तव मन इच्छतु। अधाथ परस्परवशवर्त्तित्वानन्तरं त्व तेन सह सुभद्रां सुकल्याणीं संविद परस्परसंभोगसुखसंवित्तिं कृणुष्व। कुरुष्व। ऋसा.

समानानां सवित् इष्टा

अन्या वो अन्यामवत्वन्यान्यस्या उपावत। ताः सर्वाः संविदाना इदं मे प्रावता वचः॥

हे ओषधयः वो युष्माकं मध्येऽन्यौषधिरन्यामोषधिमवतु। प्राप्नोतु। अवतिरत्र गत्यर्थः। तथान्यान्यस्याः समीपमुपावत। उपगच्छत। एवं याः सन्ति क्षित्यामोषधयः ताः सर्वाः संविदानाः परस्परमेकमत्यं प्राप्ताः सत्य इदं मे मदीयं वचः प्रार्थनालक्षणं वचनं प्रावत प्ररक्षत। ऋसा.

युद्धे सहकारिणां संवित् इष्टा

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः॥

ब्रह्मणा मन्त्रेण सह सविदान ऐकमत्यं प्राप्तो रक्षोहा रक्षसा हन्ताग्निरितोऽस्मात्स्थानाद्राक्षसादिक बाधतां हिनस्तु। ऋसा.

दाने सहकारिणां सवित् इष्टा

प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः॥

प्रजापतिर्विधाता मह्यं स्तोत्र एता गा रराणः प्रयच्छन्। विश्वैः सर्वैर्देवैः पितृभिश्च संविदान ऐकमत्यं गतः। ऋसा.

सर्वकार्येषु समानानां गणानां संवित् इष्टा

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्। देवा भागं यथा पूर्वे संजानाना उपासते॥

हे स्तोतारः यूयं सं गच्छध्वं, संगताः संभूता भवत। तथा संवदध्व सह वदत। परस्परं विरोधं परित्यज्यैकविधमेव वाक्यं ब्रूतेति यावत्। वो युष्माकं मनांसि

---

* 'संज्ञान' 'संजानानः' 'संवित्' 'संविदानः' इति पदानि सर्वेषु वेदेषु अभीक्ष्ण पठितानि दिग्दर्शनार्थमेवात्र कतिचित् संगृहीतानि इति मन्तव्यम्।

(१) ऋसं.८।४८।१३; तैसं.२।६।१२।२; कासं.१७।१९, २१।१४; मैसं.४।१०।६; शुमा.१९।५४; ऐब्रा.३।३२।१; तैब्रा.२।६।१६।१; आश्रौ.२।१९।२२, ५।१९।१; शाश्रौ. ३।१६।४, ८।४।२.

(२) ऋसं.१०।१०।१४; असं.१८।१।१६; नि.११।३४.

(३) ऋसं.१०।९७।१४; तैसं.४।२।६।३; कासं.१६।१३; मैसं.२।७।१३, ४।१४।६; शुमा.१२।८८, तैब्रा.२।८।४।८; कौसू ३३।८.

(१) ऋसं.१०।१६२।१; असं.२०।९६।११; शागृ.१।२१।२; मागृ. २।१८।२; ऋग्वि. ४।१७।१; बृदे. ८।६५.

(२) ऋसं. १०।१६९।४; तैसं. ७।४।१७।२; कासं. (अश्व.) ४।६.

(३) ऋसं. १०।१९१।२; मैसं. २।२।६ सं वदध्वं (संजानिध्व); असं. ६।६४।१ स गच्छध्व सं वदध्वं (सं जानीध्वं-सं पृच्यध्वं); तैब्रा.२।४।४।४.

सं जानताम् । समानमेकरूपमेवार्थमवगच्छन्तु । यथा पूर्वे पुरातना देवाः संजानाना ऐकमत्यं प्राप्ता हविर्भागमुपासते यथास्वं स्वीकुर्वन्ति तथा यूयमपि वैमत्यं परित्यज्य धनं स्वीकुरुतेति शेषः । ऋसा.

[1]समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् । समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥

एषामेकस्मिन्कर्मणि सह प्रवृत्तानामृत्विजा स्तोतॄणां वा मन्त्रः स्तुतिः शस्त्राद्यात्मका गुप्तभाषणं वा समान एकविधोऽस्तु । तथा समितिः प्रातिरपि समान्येकरूपाऽस्तु । तथा मनो मननसाधनमन्तःकरणं चैषां समानमेकविधमस्तु । चित्तं विचारजं ज्ञानं तथा सह सहित परस्परस्यैकार्थेनैकीभूतमस्तु । अह च वो युष्माकं समानमेकविधं मन्त्रमभि मन्त्रये। ऐकविध्याय संस्करोमि । तथा वो युष्माक स्वभूतेन समानेन साधारणेन हविषा चरुपुरोडाशादिनाऽहं जुहोमि । ऋसा.

[2]समानी व आकूतिः समाना हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहासति ॥

हे ऋत्विग्यजमानाः वो युष्माकमाकूतिः संकल्पोऽध्यवसायः समान्येकविधोऽस्तु । तथा वो युष्माकं हृदयानि समानान्येकविधानि सन्तु । तथा वो युष्माक मनोऽन्तःकरणं समानमस्तु । यथा वो युष्माकं सुसह शोभनं साहित्यमसति भवति तथा समानमस्त्वित्यन्वयः । ऋसा.

सविदः साधारणलिङ्गानि

[3]संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात् ।

[4]संविज्ञ मे ।

ग्रामेषु स्वकीयपरकीयाणां सवित् इष्टा

[5]संज्ञानं नो दिवा पशोः संज्ञानं नक्तमर्वतः । संज्ञानं नः स्वेभ्यः संज्ञानमरणेभ्यः संज्ञानमश्विना युवमिहास्मासु नियच्छतम् ।

अरणाः प्रतिकूलाः पुरुषाः, संज्ञानं ऐकमत्यं, नियच्छत स्थापयतम् । असा.

सविदा श्रेष्ठः स्वेषु कार्यः

[6]देवा वै न समजानत ते चतुर्धा—व्युदक्रामन्नग्निर्वसुभिस्सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैस्तान्बृहस्पतिरब्रवीद्याजयानि वस्सं वै ज्ञास्यध्व इति । तव गृहे याजयानीतीन्द्रमब्रवीत्तव वै श्रैष्ठ्याय संज्ञास्यन्त इति । ..... तानिन्द्रस्य गृहेऽयाजयत्ततो वै ते समजानत त इन्द्रस्यैव श्रैष्ठ्याय समजानत। ... ये स्वा न संजानीरँस्तानेतया याजयेत् । यं कामयेतावं श्रेष्ठः स्यादिति तस्य गृहे समेव जानत एता एवैनं देवता भागधेयमभि संजानानाः संज्ञापयन्ति । ..... सैषा संज्ञानी नामेष्टिस्समेव जानते ।

सविदः साधारणलिङ्गानि

[7]संज्ञानमस्तु मेऽमुना ।

मे ममामुना देवदत्तादिना संज्ञानं सङ्गतं ज्ञानं अस्तु । इष्टेन मम प्रीतिरस्तु । अमुना सह मे संज्ञानं संगतमस्तु । शुम.

[8]संज्ञानाय स्मरकारीम् ।

कुलसंवित् इष्टा

[9]येन देवा न वियन्ति नो च विद्विषते मिथः । तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः ॥

(१) ऋसं.१०।१९१।३; मैसं.२।२।६ मन. (व्रत) मन्त्रमभि मन्त्रये वः (क्रतुमभिमन्त्रयध्व); असं.६।६४।२ मनः (व्रतं) (समानेन वो हविषा जुहोमि समान चेतो अभिसविशध्वम्); तैब्रा.२।४।४।५, शागृ.५।९।४.

(२) ऋसं.१०।१९१।४; मैसं.२।२।६ समानी व आकूतिः (समाना वा आकूतानि); असं. ६।६४।३; तैब्रा.२।४।४।५; आगृ. ३।५।८; विस्मृ. २१।१४.

(३) तैसं.४।२।४।१; कासं.१६।११; कस.२५।२; मैसं.२।७।११; शुमा.१२।४६; तैब्रा.१।२।१।१७; शब्रा. ७।१।१।८; माश्रौ.६।१।५; काश्रौ.१७।१।४; आपश्रौ. ५।९।६.

(४) तैसं.४।७।३।१; कासं.१८।८; कसं.२८।८; मैसं.१८।८; शुमा.१८।७.

(५) कासं.१०।१२; मैसं.२।२।६ मिहास्मासु (मिहास्मभ्य); माश्रौ.५।१।१०।९.

(६) कासं.११।३.

(७) शुमा.२६।१; शुका.२८।२.

(८) शुमा.३०।१; तैब्रा.३।४।१।६.

(९) असं.३।३०।४.

येन ब्रह्मणा देवा इन्द्रादयः न वियन्ति विमतिं न प्राप्नुवन्ति। नो च नैव च मिथः परस्परं विद्विषते, विद्वेषं न कुर्वते। तत् संज्ञानं समानज्ञाननिमित्त ऐकमत्यापादकं ब्रह्म मन्त्रात्मकं सामनस्यं वः युष्माक गृहे पुरुषेभ्यः तदर्थं, कृण्मः कुर्मः। असा.

समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि। सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः॥

हे सामनस्यकामाः वः युष्माकं समानी एका प्रपा पानीयशाला भवतु। अन्नभागश्च सहैव भवतु। तदर्थं अहं वः युष्मान् समाने योक्त्रे एकस्मिन् बन्धने स्नेहपाशे सह युनज्मि सह बध्नामि। सम्यञ्चः संगताः एकफलार्थिनो भूत्वा समानज्ञानाः सन्तः अग्निं सपर्यत पूजयत। कथमिव स्थिता इति तत्राह—अरा नाभिमिव अभितः। अभितो वर्तमाना अराः। एवमेक अग्निं अभितो वर्तमानाः परिचरतेत्यर्थः। असा.

ग्रामेषु स्वकीयपरकीयाणा सवित् इष्टा

[1]**संज्ञानं नः स्वेभिः संज्ञानमरणेभिः।**
संज्ञानमश्विना युवमिहास्मासु नि यच्छतम्॥

स्वेभिः स्वकीयपुरुषैः नः अस्माक संज्ञानं संगत ज्ञान ऐकमत्यं भवत्विति शेषः। तथा अरणेभिः अरणैः अरमणैः अनुकूल अवदद्भिः। प्रतिकूलैः पुरुषैः। यद्वा अरातिभिः सह संज्ञानं समानज्ञानं भवतु। हे अश्विना अश्विनौ युवं युवा इह अस्मिन्विषये, इह इदानीं वा, अस्मासु सज्ञानं समानज्ञानं स्वीयैः परैश्च सह ऐकमत्य नि यच्छत नियमयतम्। स्थापयतमित्यर्थः। असा.

[2]**सं जानामहै मनसा सं चिकित्वा मा युष्महि मनसा दैव्येन। मा घोषा उत् स्थुर्बहुले विनिर्हते पतदिन्द्रस्याहन्यागते॥**

मनसा अन्यदीयेन सं जानामहै समानज्ञाना भवाम। यद्वा मनः कर्म। परकीयं मनः संयोजयामः। चिकित्वा ज्ञात्वा। संगतकार्यकारिणो भवाम। यद्वा पूर्वं मनसा सगतिरुक्ता। इदानीं निश्चयात्मकज्ञानेन संगतिः प्रार्थ्यते चिकित्वा चिकित्वना ज्ञानेनेत्यर्थः। सं जानामहै इत्यनुषङ्गः। स्वेषा परेषां च मनसा ज्ञानेन च सगता भवामेत्यर्थः। किं च दैव्येन देवसंबन्धिना देवताविषयेण मनसा मा युष्महि मा वियुक्ता भूम। अपि च बहुले विनिहुते। कौटिल्ये निमित्ते घोषाः वैमनस्यनिबन्धनाः शब्दाः मा उत्स्थुः उत्थिता मा भूवन्। यद्वा बहुले तमसि रात्रावित्यर्थः। तथा अहनि अह्नि वासरे आगते च इन्द्रस्य इषुः अशनिः अशनिरूपा मर्मभेदिनी परकीया वाक् मा पप्तत् अस्मासु मा पतत्। अहोरात्रोपलक्षितेषु सर्वेषु दिवसेष्वपि वैमनस्यनिबन्धनाः परेषा वाचः अस्मासु मा पतन्तु किन्तु अनुकूला एव भवन्तु इत्यर्थः। असा.

ब्राह्मणेषु सवित् इष्टा

[3]**सोम राजन्त्संज्ञानमा वपैभ्यः सुब्राह्मणा यतमे त्वोपसीदान्॥**

हे राजन् सोम एभ्यः भोक्तृभ्यो ब्राह्मणेभ्यः संज्ञानं आवप निधेहि। यतमे यज्जातीयाः सुब्राह्मणाः भूग्वङ्गिरोविदः त्वा त्वा उपसीदान् उपसन्ना भवन्ति।

[4]**संविदा देयम्।**

विष्णुः

समयानपाकर्मलक्षणम्। सविल्लघनगणद्रव्यहरणदण्डः।

[5]**बहुभिः साधुभिर्महाजनरक्षणार्थं कृता संवित् समयः। अस्यान्यथाकरणं समयानपाकर्म।**
गणद्रव्यस्यापहर्ता विवास्यः।
तत्संविदं यश्च लङ्घयेत्।

शङ्खलिखितौ

[6]**यां विनोपद्रवो दुष्परिहरो धर्मकार्यं च दुस्साधं सा पारिभाषिकी धर्मक्रिया। तदनपाकरणं समयानपाकरणमिति।**

---

(१) असं.३।३०।६.

(२) ऋसं. (खिल) १०।१९१।२; कासं.१०।१२; मैसं.२।२।६; असं.७।५४।१; तैब्रा.२।४।४।६; कौसू. ९।२, १२।५.

(३) असं.७।५४।२.

(१) असं.११।१।२६. (२) तैआ.७।११।३.

(३) सवि.३२८. (४) विस्मृ.५।१६२.

(५) विस्मृ.५।१६३. (६) सवि.३२८.

गणश्रेणिसमूहनार्थं जातानां स्थिरीकरणरूपस्य समयस्थानपाकर्म—अनुल्लङ्घनं यत्तत्समयानपाकर्म। विरुद्धलक्षणया दर्शादिवत्समयानपाकर्माख्यं विवादपदम्। संविद्व्यतिक्रम इत्येतस्यैव नामान्तरम्। पाषण्डपूगाः श्रेणिनैगमानां संघाः। समूहस्तु ब्राह्मणानां सहतिः। व्रातः आयुधधराणां व्रततिः। सवि.५६

महाभारतम्

विनापि राज्ञा लोकसमयः प्रजारक्षकः

[1]अराजकाः प्रजाः पूर्वं विनेशुरिति नः श्रुतम्।
परस्परं भक्षयन्तो मत्स्या इव जले कृशान्॥
समेत्य तास्ततश्चक्रुः समयानिति नः श्रुतम्।
वाक्शूरो दण्डपरुषो यश्च स्यात्पारजायिकः॥
यश्च नः समयं भिन्द्यात्स्याज्या नस्तादृशा इति।
विश्वासार्थं च सर्वेषां वर्णानामविशेषतः।
तास्तथा समयं कृत्वा समयेनावतस्थिरे॥

राजा प्रजया निर्मितः

सहितास्तास्तदा जग्मुरसुखार्ताः पितामहम्।
अनीश्वरा विनश्यामो भगवन्नीश्वरं दिश॥
यं पूजयेम संभूय यश्च नः प्रतिपालयेत्।
ततो मनुं व्यादिदेश मनुर्नाभिननन्द ताः॥

मनुरुवाच—

बिभेमि कर्मणः पापाद्राज्यं हि भृशदुष्करम्।
विशेषतो मनुष्येषु मिथ्यावृत्तेषु नित्यदा॥

भीष्म उवाच—

तमब्रुवन् प्रजा मा भैः कर्तृनेनो गमिष्यति।
पशूनामधिपञ्चाशत् हिरण्यस्य तथैव च॥
धान्यस्य दशमं भागं दास्यामः कोशवर्धनम्।
कन्यां शुल्के चारुरूपां विवाहेपूद्यतासु च॥
मुखेन शस्त्रपत्रेण ये मनुष्याः प्रधानतः।
भवन्तं तेऽनुयास्यन्ति महेन्द्रमिव देवताः॥
स त्वं जातबलो राजन् दुष्प्रधर्षः प्रतापवान्।
सुखं धास्यसि नः सर्वान् कुबेर इव नैर्ऋतान्॥
यं च धर्मं चरिष्यन्ति प्रजा राज्ञा सुरक्षिताः।
चतुर्थं तस्य धर्मस्य त्वत्संस्थं वै भविष्यति॥
तेन धर्मेण महता सुखं लब्धेन भावितः।
पाह्यस्मान् सर्वतो राजन्देवानिव शतक्रतुः॥
विजयाय हि निर्याहि प्रतपन्रश्मिवानिव।
मानं विधम शत्रूणां धर्मं जनय नः सदा॥
स निर्ययौ महातेजा बलेन महता वृतः।
महाभिजनसंपन्नस्तेजसा प्रज्वलन्निव॥
तस्य दृष्ट्वा महत्त्वं ते महेन्द्रस्येव देवताः।
अपतन्त्रिसिरे सर्वे स्वधर्मे च ददुर्मनः॥
ततो महीं परिययौ पर्जन्य इव वृष्टिमान्।
शमयन् सर्वतः पापान् स्वकर्मसु च योजयन्॥
एवं ये भूतिमिच्छेयुः पृथिव्यां मानवाः क्वचित्।
कुर्यू राजानमेवाग्रे प्रजानुग्रहकारणात्॥
नमस्येरंश्च तं भक्त्या शिष्या इव गुरुं सदा।
देवा इव च देवेन्द्रं तत्र राजानमन्तिके॥
सत्कृतं स्वजनेनेह परोऽपि बहु मन्यते।
स्वजनेन त्ववज्ञातं परे परिभवन्त्युत॥
राज्ञः परैः परिभवः सर्वेषामसुखावहः।
तस्माच्छत्रं च पत्रं च वासांस्याभरणानि च॥
भोजनान्यथ पानानि राज्ञे दद्युर्गृहाणि च।
आसनानि च शय्याश्च सर्वोपकरणानि च॥
गोप्ता तस्माद्दुराधर्षः स्मितपूर्वाभिभाषिता।
आभाषितश्च मधुरं प्रत्याभाषेत मानवान्॥
कृतज्ञो दृढभक्तिः स्यात् संविभागी जितेन्द्रियः।
ईक्षितः प्रतिवीक्षेत मृदु वल्गु च सुष्ठु च॥

सघः ऐकमत्येनैवावतिष्ठते

[1]भेदाद्विनाशः संघानां संघमुख्योऽसि केशव।
यथा त्वां प्राप्य नोत्सीदेदयं संघस्तथा कुरु॥
नान्यत्र बुद्धिक्षान्तिभ्यां नान्यत्रेन्द्रियनिग्रहात्।
नान्यत्र धनसंत्यागाद्गुणः प्राज्ञेऽवतिष्ठते॥
धन्यं यशस्यमायुष्यं स्वपक्षोद्भावनं सदा।
ज्ञातीनामविनाशः स्याद्यथा कृष्ण तथा कुरु॥
आयत्यां च तदात्वे च न तेऽस्त्यविदितं प्रभो।
षाड्गुण्यस्य विधानेन यात्रा यानविधौ तथा॥
यादवाः कुकुरा भोजाः सर्वे चान्धकवृष्णयः।

(१) भा.१२।६७।१७-३९.

(१) भा.१२।८१।२५-३१.

त्वय्यासक्ता महाबाहो लोका लोकेश्वराश्च ये ॥
उपासन्ते हि त्वद्बुद्धिमृषयश्चापि माधव ।
त्वं गुरुः सर्वभूतानां जानीषे त्वं परां गतिम् ॥
त्वामासाद्य यदुश्रेष्ठमेधन्ते यादवाः सुखम् ॥

गणरक्षणरीतिः

गणानां वृत्तिमिच्छामि श्रोतुं मतिमतां वर ।
यथा गणाः प्रवर्धन्ते न भिद्यन्ते च भारत ।
अरींश्च विजिगीषन्ते सुहृदः प्राप्नुवन्ति च ॥
भेदमूलो विनाशो हि गणानामुपलक्षये ।
मन्त्रसंवरणं दुःखं बहूनामिति मे मतिः ॥
एतदिच्छाम्यहं श्रोतुं निखिलेन परंतप ।
यथा च ते न भिद्येरंस्तच्च मे वद पार्थिव ॥

भीष्म उवाच—

गणानां च कुलानां च राज्ञां भरतसत्तम ।
वैरसंदीपनावेतौ लोभामर्षौ नराधिप ॥
लोभमेको हि वृणुते ततोऽमर्षमनन्तरम् ।
तौ क्षयव्ययसंयुक्तावन्योन्यं च विनाशिनौ ॥
चारमन्त्रबलादानैः सामदानविभेदनैः ।
क्षयव्ययभयोपायैः प्रकर्षन्तीतरेतरम् ॥
तत्रादानेन भिद्यन्ते गणाः संघातवृत्तयः ।
भिन्ना विमनसः सर्वे गच्छन्त्यरिवशं भयात् ॥
भेदे गणा विनश्यन्ति भिन्नास्तु सुजयाः परैः ।
तस्मात्संघातयोगेन प्रयतेरन् गणाः सदा ॥
अर्थाश्चैवाधिगम्यन्ते संघातबलपौरुषैः ।
बाह्याश्च मैत्रीं कुर्वन्ति तेषु संघातवृत्तिषु ॥
ज्ञानवृद्धाः प्रशंसन्ति शुश्रूषन्तः परस्परम् ।
विनिवृत्ताभिसंधानाः सुखमेधन्ति सर्वशः ॥
धर्मिष्ठान् व्यवहारांश्च स्थापयन्तश्च शाश्वतः ।
यथावत्प्रतिपश्यन्तो विवर्धन्ते गणोत्तमाः ॥
पुत्रान् भ्रातॄन् निगृह्णन्तो विनयन्तश्च तान्सदा ।
विनीतांश्च प्रगृह्णन्तो विवर्धन्ते गणोत्तमाः ॥
चारमन्त्रविधानेषु कोशसंनिचयेषु च ।
नित्ययुक्ता महाबाहो वर्धन्ते सर्वतो गणाः ॥
प्राज्ञान् शूरान् महोत्साहान् कर्मसु स्थिरपौरुषान् ।
मानयन्तः सदा युक्ता विवर्धन्ते गणा नृप ॥

(१) भा.१२।१०७।६-३२.

द्रव्यवन्तश्च शूराश्च शस्त्रज्ञाः शास्त्रपारगाः ।
कृच्छ्रास्वापत्सु संमूढान् गणाः संतारयन्ति ते ॥
क्रोधो भेदो भयं दण्डः कर्षणं निग्रहो वधः ।
नयत्यरिवशं सद्यो गणान् भरतसत्तम ॥
तस्मान्मानयितव्यास्ते गणमुख्याः प्रधानतः ।
लोकयात्रा समायत्ता भूयसी तेषु पार्थिव ॥
मन्त्रगुप्तिः प्रधानेषु चारश्चामित्रकर्षण ।
न गणाः कृत्स्नशो मन्त्रं श्रोतुमर्हन्ति भारत ॥
गणमुख्यैस्तु संभूय कार्यं गणहितं मिथः ॥
पृथग्गणस्य भिन्नस्य विततस्य ततोऽन्यथा ।
अर्थाः प्रत्यवसीदन्ति तथाऽनर्था भवन्ति च ॥
तेषामन्योन्यभिन्नानां स्वशक्तिमनुतिष्ठताम् ।
निग्रहः पण्डितैः कार्यः क्षिप्रमेव प्रधानतः ॥
कुलेषु कलहा जाताः कुलवृद्धैरुपेक्षिताः ।
गोत्रस्य नाशं कुर्वन्ति गणभेदस्य कारकम् ॥
आभ्यन्तरं भयं रक्ष्यमसारं बाह्यतो भयम् ।
आभ्यन्तरं भयं राजन् सद्यो मूलानि कृन्तति ॥
अकस्मात्क्रोधमोहाभ्यां लोभाद्वाऽपि स्वभावजात् ।
अन्योन्यं नाभिभाषन्ते तत्पराभवलक्षणम् ॥
जात्या च सदृशाः सर्वे कुलेन सदृशास्तथा ।
न चोद्योगेन बुद्ध्या वा रूपद्रव्येण वा पुनः ॥
भेदाच्चैव प्रदानाच्च नाम्यन्ते रिपुभिर्गणाः ।
तस्मात्संघातमेवाहुर्गणानां शरणं महत् ॥

कौटिलीयमर्थशास्त्रम्

समुदायकर्मसमयः । समुदायार्थनाव्यादिकर्मणि अनंशदोऽनधिकारी । सर्वहितादेशपालनम् । श्रेष्ठ्यनियमः संघे ।

उक्तसमयस्यातिदेशः देशजातिसंघेषु ।

समयस्यानपाकर्म । कर्षकस्य ग्राममभ्युपेत्याकुर्वतो ग्राम एवात्ययं हरेत् । कर्माकरणे कर्मवेतनाद् द्विगुणं, हिरण्यादाने प्रत्यंशद्विगुणं भक्ष्यपेयादाने च प्रहवणेषु द्विगुणमंशं दद्यात् ।

प्रेक्षायामनंशदः सस्वजनो न प्रेक्षेत । प्रच्छन्नश्रवणेक्षणे च सर्वहिते च कर्मणि निग्रहेण द्विगुणमंशं दद्यात् ।

(१) कौ.३।१०.

सर्वहितमेकस्य ब्रुवतः कुर्युराज्ञाम् । अकरणे द्वादशपणो दण्डः । तं चेत्संभूय वा हन्युः पृथगेषामपराधद्विगुणो दण्डः । उपहन्तृषु विशिष्टः ।

ब्राह्मणतश्चैषां ज्यैष्ठ्यं निमम्येत । प्रहवणेषु चैषां ब्राह्मणे नाकामाः कुर्युः । अंशं च लभेरन् । तेन देशजातिकुलसंघानां समयस्यानपाकर्म व्याख्यातम् ।

राजा देशहितान् सेतून् कुर्वतां पथि संक्रमान् । ग्रामशोभाश्च रक्षाश्च तेषां प्रियहितं चरेत् ॥

समयस्यानपाकर्मेति सूत्रम्। बहुभिः संभूय कल्प्यमाना व्यवस्था समयः तस्य अनपाकर्म अत्यागः तदिहोच्यत इति सूत्रार्थः । उद्देशक्रमेणास्य प्रकरणस्य व्याख्यानसंगतिः । कर्षकस्येति । कृषीवलस्य, ग्राममभ्युपेत्याकुर्वतः ग्रामजनसमुदायकार्यमङ्गीकृत्याननुतिष्ठतः, ग्राम एव, अत्ययं दण्ड हरेत्, न तु राजा । दण्डविधिमाह—कर्माकरण इति । कर्मणः समुदायकार्यस्य अकरणे, कर्मवेतनाद् आत्मलभ्याद् वेतनभागाद्, द्विगुण दण्ड दद्यात् । हिरण्यादाने समुदायकार्यार्थं सर्वैर्हिरण्ये दीयमाने सति स्वय हिरण्यस्य अदाने, प्रत्यशद्विगुण एकैकदेयस्य हिरण्यांशस्य द्विगुण दण्ड दद्यात् । भक्ष्यपेयादाने च प्रहवणेषु गोष्ठीभोजनादिषु भक्ष्यपेययोरात्मदेययोरदाने च, द्विगुणमंशं दण्डं दद्यात् । प्रेक्षायामिति । कुशीलवनटनर्तकादिकर्मणि, अनंशदः स्वदेयमंशमददानः, सस्वजनो न प्रेक्षेत स्वय नेक्षेत स्वजनमपि नेक्षयेत् । प्रच्छन्नश्रवणेक्षणे च प्रच्छन्नं स्थित्वा गीताद्याकर्णने नाट्याद्यवलोकने च, द्विगुणमंशं स्वदेयांशद्विगुणं दण्ड दद्यात् । सर्वहिते च कर्मणि, निग्रहेण प्रतिबन्धाचरणेन द्विगुणमश स्वदेयांशद्विगुणं दण्डं, दद्यात् ।

सर्वहितमिति । सर्वजनानुकूलं, ब्रुवतः एकस्य आज्ञां एकस्यापि नियोगवचनं कुर्युरनुतिष्ठेयुः अर्थादन्ये सामयिकाः । अकरणे द्वादशपणो दण्डः । तं चेदिति । वेति पक्षान्तरे । तं सर्वहितवक्तार संभूय हन्युश्चेद्, मत्सरवशादन्ये सामयिका इत्यार्थम्। पृथक् प्रत्येक, एषा हन्तृणाम् । अपराधद्विगुणः अकरणापराधोक्तदण्डद्विगुणश्चतुर्विंशतिपणात्मकः, दण्डः । उपहन्तृषु विशिष्टः साक्षाद् घातकेषु पूर्वोक्त एव दण्डः सातिशयः ।

ब्राह्मणतश्चेति । एषां सामयिकानां, ब्राह्मणतो ब्राह्मणात् प्रभृति, ज्यैष्ठ्य नियम्येत अलङ्घ्यवचनत्वलक्षणं ज्येष्ठत्वं व्यवस्थाप्येत । प्रहवणेष्विति । प्रीतिभोजनादिषु, एषा सामयिकाना मध्ये, ब्राह्मणे विषये, नाकामाः कुर्युः अंश च लभेरन् अविज्ञाततदभिप्राया अंशं न कल्पयेयुः अश च लभेरन् । सत्यां तदिच्छायामित्यर्थः । तेनेति । तेन यथोक्तेन समयानपाकर्मन्यायेन, देशजातिकुलसंघानां देशीयजनसघस्य जातीयजनसंघस्य कुलीयजनसंघस्य चेत्येतेषा, समयस्यानपाकर्म, व्याख्यातं उक्तप्रायम् । श्रीमू.

सघवृत्तम्

[1]**संघलाभो दण्डमित्रलाभानामुत्तमः । संघा हि संहतत्वादधृष्याः परेषाम् । ताननुगुणान् भुञ्जीत सामदानाभ्याम् । विगुणान् भेददण्डाभ्याम् । काम्बोजसुराष्ट्रक्षत्रियश्रेण्यादयो वार्ताशस्त्रोपजीविनः । लिच्छिविकव्रजिकमल्लमद्रककुकुरकुरुपाञ्चालादयो राजशब्दोपजीविनः ।**

सर्वेषामासन्नाः सत्रिणः संघानां परस्परन्यङ्गद्वेषवैरकलहस्थानान्युपलभ्य क्रमाभिनीतं भेदमुपचारयेयुः—'असौ त्वा विजल्पति' इति। एवमुभयतः बद्धरोषाणां विद्याशिल्पद्यूतवैहारिकेष्वाचार्यव्यञ्जना बालकलहानुत्पादयेयुः । वेशशौण्डिकेषु वा प्रतिलोमप्रशंसाभिः संघमुख्यमनुष्याणां तीक्ष्णाः कलहानुत्पादयेयुः । कृत्यपक्षोपग्रहेण वा। कुमारकान् विशिष्टच्छन्दिकया हीनच्छन्दिकानुत्साहयेयुः। विशिष्टानां चैकपात्रं विवाहं हीनेभ्यो वारयेयुः । हीनान् वा विशिष्टैरेकपात्रे विवाहे वा योजयेयुः । अवहीनान् वा तुल्यभावोपगमने कुलतः पौरुषतः स्थानविपर्यासतो वा व्यवहारमवस्थितं वा प्रतिलोमस्थापनेन निशामयेयुः । विवादपदेषु वा द्रव्यपशुमनुष्याभिघातेन रात्रौ तीक्ष्णाः कलहानुत्पादयेयुः । सर्वेषु च कलहस्थानेषु हीनपक्षं राजा कोशदण्डाभ्यामुपगृह्य प्रति-

(१) कौ.११।१.

पक्षवधे योजयेत्, भिन्नानपवाहयेद् वा । एकदेशे स्थानान् वा निवेश्य भूमौ चैषां पञ्चकुलीं दशकुलीं वा कृष्यां निवेशयेत् । एकस्था हि शस्त्रग्रहणसमर्थाः स्युः । समवाये चैषामत्ययं स्थापयेत् । राजशब्दिभिरवरुद्धमवक्षिप्तं वा कुलमभिजातं राजपुत्रत्वे स्थापयेत् । कार्तान्तिकादिश्चास्य वर्गो राजलक्षण्यतां संघेषु प्रकाशयेत् । संघमुख्यांश्च धर्मिष्ठानुपजपेत्—'स्वधर्ममनुष्य राज्ञः पुत्रे भ्रातरि वा प्रतिपद्यध्वम्' इति । प्रतिपन्नेषु कृत्यपक्षोपग्रहार्थमर्थं दण्डं च प्रेषयेत् । विक्रमकाले शौण्डिकव्यञ्जनाः पुत्रदारप्रेतापदेशेन 'नैषेचनिकम्' इति मदनरसयुक्तान् मद्यकुम्भान् शतशः प्रयच्छेयुः । चैत्यदैवतद्वारारक्षास्थानेषु च सन्निधिः समयकर्मनिक्षेपं सहिरण्याभिज्ञानमुद्राणि हिरण्यभाजनानि च प्ररूपयेयुः, दृश्यमानेषु च संघेषु 'राजकीयाः' इत्यावेदयेयुः । अथावस्कन्दं दद्यात् । संघानां वा वाहनहिरण्यकालिके गृहीत्वा संघमुख्याय प्रख्यातं द्रव्यं प्रयच्छेत् । तदेषां याचिते 'दत्तममुष्मै मुख्याय' इति ब्रूयात् । एतेन स्कन्धावाराटवीभेदो व्याख्यातः ।

संघमुख्यपुत्रमात्मसंभावितं वा सत्री ग्राहयेत्—'अमुष्य राज्ञः पुत्रस्त्वं शत्रुभयादिह न्यस्तोऽसि' इति । प्रतिपन्नं राजा कोशदण्डाभ्यां उपगृह्य संघेषु विक्रमयेत् । अथार्थस्तमपि प्रवासयेत् ।

बन्धकीपोषकाः पूर्वकनटनर्तकसौभिका वा प्रणिहिताः स्त्रीभिः परमरूपयौवनाभिः संघमुख्यानुन्मादयेयुः । जातकामानामन्यतमस्य प्रत्ययं कृत्वाऽन्यत्र गमनेन प्रसभहरणेन वा कलहानुत्पादयेयुः । कलहे तीक्ष्णाः कर्म कुर्युः—'हतोऽयमित्थं कामुकः' इति ।

विसंवादितं वा मर्षयमाणमभिसृत्य स्त्री ब्रूयात्—असौ मां मुख्यस्त्वयि जातकामां बाधते; तस्मिन् जीवति नेह स्थास्यामि' इति घातमस्य प्रयोजयेत् ।

प्रसह्यापहृता वा उपवनान्ते क्रीडागृहे वा अपहर्तारं रात्रौ तीक्ष्णेन घातयेत् । स्वयं वा रसेन । ततः प्रकाशयेत्—'अमुना मे प्रियो हतः' इति । जातकामं वा सिद्धव्यञ्जनः सांवत्सरिकीभिरोषधीभिस्संवास्य रसेनातिसंधायापगच्छेत् । तस्मिन्नपक्रान्ते सन्निधिः परप्रयोगमभिशंसेयुः—'आढ्यविधवा गूढाजीवा योगस्त्रियो वा दायनिक्षेपार्थं विवदमानास्संघमुख्यानुन्मादयेयुः' इति । अदितिकौशिकस्त्रियो नर्तकीगायना वा प्रतिपन्नान् गूढवेश्मसु रात्रिसमागमप्रविष्टांस्तीक्ष्णा हन्युर्बध्वा हरेयुर्वा । सत्री वा स्त्रीलोलुपं संघमुख्यं प्ररूपयेत्—'अमुष्मिन् ग्रामे दरिद्रकुलमपसृतं; तस्य स्त्री राजार्हा, गृहाणैनाम्' इति । गृहीतायामर्धमासान्तरं सिद्धव्यञ्जनो दूष्यः संघमुख्यमध्ये प्रक्रोशेत्—'असौ मे मुख्यां भार्यां स्नुषां भगिनीं दुहितरं वाऽधिचरति' इति । तं चेत्संघो निगृह्णीयात्, राजैनमुपगृह्य विगुणेषु विक्रमयेत् । अनिगृहीते सिद्धव्यञ्जनं हि रात्रौ तीक्ष्णाः प्रवासयेयुः । ततस्तद्व्यञ्जनाः प्रक्रोशेयुः—'असौ ब्रह्महा ब्राह्मणीजारश्च' इति ।

कार्तान्तिकव्यञ्जनो वा कन्यामन्येन वृतामन्यस्य प्ररूपयेत् 'अमुष्य कन्या राजपत्नी राजप्रसविनी च भविष्यति; सर्वस्वेन प्रसह्य वैनां लभस्व' इति । अलभ्यमानायां परपक्षमुद्धर्षयेत् । लब्धायां सिद्धः कलहः ।

भिक्षुकी वा प्रियभार्यं मुख्यं ब्रूयात्—'असौ ते मुख्यो यौवनोत्सिक्तो भार्यायां मां प्राहिणोत्, तस्याहं भयाल्लेख्यमाभरणं गृहीत्वागतास्मि, निर्दोषा ते भार्या, गूढमस्मिन् प्रतिकर्तव्यमहमपि तावत् प्रतिपत्स्यामि' इति । एवमादिषु कलहस्थानेषु स्वयमुत्पन्ने वा कलहे तीक्ष्णैरुत्पादिते वा हीनपक्षं राजा कोशदण्डाभ्यामुपगृह्य विगुणेषु विक्रमयेदपवाहयेद्वा ।

संघेष्वेवमेकराजो वर्तेत । संघाश्चाप्येवमेकराजादेतेभ्योऽतिसंधानेभ्यो रक्षयेयुः ।

संघमुख्यश्च संघेषु न्यायवृत्तिहितः प्रियः ।
दान्तो युक्तजनस्तिष्ठेत्सर्ववित्तानुवर्तकः ॥

मनुः

ग्रामदेशसंघसंविल्लङ्घने दण्डविधिः

अत ऊर्ध्वं प्रवक्ष्यामि धर्मं समयभेदिनाम् ॥

(१) समयः संवित् संकेतः इदं मया भवतामनुमते निश्चितं कर्तव्यमित्यभ्युपगमः । तं भिन्दन्ति व्यतिक्रामन्ति ते समयभेदिनः । 'संविदश्च व्यतिक्रमः' इति यदुद्दिष्टं तदिदानीमुच्यते । पूर्वेणार्धेन पूर्वप्रकरणोपसंहारोऽपरेण यथोद्दिष्टप्रकरणान्तरसूचनम् । मेधा.

(२) अनन्तरं समयव्यतिक्रमकारिणां दण्डादिव्यवस्थां वक्ष्यामि । गोरा.

(३) समयभेदिनां इदमस्माभिः परिहर्तव्यं इति निश्चयकारिणाम् । मच.

[1]यो ग्रामदेशसंघानां कृत्वा सत्येन संविदम् ।
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् ॥

(१) शालासमुदायो ग्रामस्तन्निवासिनो मनुष्या गृह्यन्ते । तेषामेव संविदः संभवात् । एवं ग्रामसमुदायो देशः, संघः एकधर्मानुगतानां नानादेशवासिनां नानाजातीयानामपि प्राणिनां समूहः । यथा भिक्षूणां संघो वणिजां संघश्चातुर्विद्यानां संघ इति । ग्रामादीनां यत्कार्यं यथा पारग्रामिकैर्ग्रामो नोऽपहृतप्रायः अस्माकीने गोप्रचारे गाश्चारयन्ति उदकं च भित्त्वा नयन्ति । तद्यदि वो मतं तदद्य एतदेषां कर्तुं न दद्मे । एवं नः प्रतिबन्धतां यदि तैः सह दण्डादण्डिर्भवति राजकुले वा व्यवहारस्तत्र सर्वे वयमेककार्या नो चेदुपेक्षामहे । तत्र यैः संवदते वाढम् । किमिति प्राक्तनी ग्रामस्थितिस्तैर्व्यतिक्रम्येत्येवं प्रोत्साह्य; विसंवदेद्बलात्तैरेव सह सङ्गच्छेत स्वेषु वा भाग्यन्तरः स्यात्स राज्ञा स्वराष्ट्रान्निर्वासयितव्यो निष्कासयितव्यः । स्वविषयेऽस्य वस्तुं न देयम् । एव वणिक्काठब्राह्मणादिकार्ये ईदृशे कृतसंवित्तिना नातिक्रमितव्यम् । यत्कार्यं ग्रामाद्युपकारकं शास्त्राचारप्रसिद्धं पुरराष्ट्राविरोधि तत्संविद्व्यतिक्रमे दण्डोऽयम् । लोभादिति स्वेनोपकारगन्धेन परग्रामणीकृतेनास्वातन्त्र्यं लोभः । अज्ञानात्तु विसंवदमानस्यान्यः कल्पः । ×मेधा.

(२) अनुबन्धाल्पत्वे तु—यो ग्रामेति । +मिता.२।१८७

(३) यस्तु मुख्यः शपथेन स्वमार्गं स्थापयितुमशक्यस्तत्रोक्तं मनुना—यो ग्रामेति । सत्येन शपथेनेत्यर्थः । स्मृच.२२६

(४) विप्रवासयेद्दण्डपुरःसरम् । ब्राह्मणस्य न दण्डः केवलं ग्रामत्याग इति । मच.

[1]निगृह्य दापयेद्देनं समयव्यभिचारिणम् ।
चतुःसुवर्णान् षणिष्कांश्छतमानं च राजतम् ॥

(१) निगृह्यावष्टभ्य पीडयित्वा काललाभमकारयित्वा दण्ड्यः । चत्वारि सुवर्णानि येषां निष्काणां परिमाणं ते चतुःसुवर्णा निष्काः । यद्यपि 'चतुःसुवर्णिको निष्क' इत्यत्रोक्तं तथापि शास्त्रान्तरे 'साष्टं शतं सुवर्णानां निष्कमाहुर्महाधियः' इत्येवमादिपरिमाणान्तरं पश्यन् विशिनष्टि संज्ञाकारणसामर्थ्यादेव लभ्यत इति चेत् पद्यग्रन्थत्वान्न दोषः । अन्ये तु सहार्थे बहुव्रीहिं कृत्वा त्रीन् दण्डानाहुः । चतुर्भिः सुवर्णैः सह षणिष्कान् दण्डनीयो दश निष्काः प्रतिपादिता भवन्ति । बहुव्रीहिसिद्ध्यर्थं सहार्थे कथंचिन्मत्वर्थो योजितव्यः । न हि चित्राभिर्गोभिः सहितश्चित्रगुर्देवदत्त इति भवति । एते च त्रयो दण्डा यद्वा त्रिभिरेक इति कार्यापेक्षया योजनं, निर्वासनदण्डेन विकल्प्यते दण्डोऽयम् । *मेधा.

(२) मनुप्रतिपादितदण्डाना निर्वासनचतुःसुवर्णषणिष्कशतमानानां चतुर्णामन्यतमो जातिशक्त्याद्यपेक्षया

---

(१) **मस्मृ.**८।२१८.

(२) **मस्मृ.**८।२१९; **मिता.**२।१८७; **अप.**२।१८७; **व्यक.**१६५; **स्मृच.**२२६; **विर.**१८२; **पमा.**३५७; **दवि.**२६७; **सवि.**३२९; **वीमि.**२।१८७; **व्यप्र.**३३५; **व्यउ.**९२; **विता.**६६०; **समु.**१११ कात्यायनः.

१ देश. २ वर्धतां. ३ माह. ४ ये. ५ वित्तेन.

× गोरा., मवि., मसु. मेधावत् ।

+ अप., सवि., वीमि. मितावत् ।

* गोरा., मसु., विर., मच. मेधावद्भावः

(१) **मस्मृ.**८।२२० देनं (च्चैनं); **मिता.**२।१८७ र्णान्षणिष्कान् (र्णं षणिष्कं); **अप.**२।१८७ मस्मृवत्; **व्यक.**१६५ मस्मृवत्; **स्मृच.**२२६ मितावत्; **विर.**१८२; **पमा.**३५७; **नृप्र.**३०; **दवि.**२६७; **सवि.**३२९ मितावत्; **वीमि.**२।१८७ च (तु) शेषं मितावत्; **व्यप्र.**३३५; **व्यउ.**९२ मितावत्; **विता.**६६० मितावत्; **समु.**११२ मितावत्, कात्यायनः.

१ ध्का. २. यदि च ३ दण्डो न.

कल्पनीयः । *मिता.२।१८७

(३) अत्रापि चत्वारो देशनिर्वासनादयो दण्डा अपराधानुसारेण व्यवस्थाप्याः । अप.२।१८७

(४) चतुर्भिः सुवर्णैर्यो निष्कस्तान् षट्पलानीत्यर्थः । एतच्च दीनारादिनिष्कव्यवच्छेदार्थं विशेषणम् । शतमानमेकम् । मवि.

(५) अथ चैन संविद्व्यतिक्रमकारिणं निबोध्य चतुरः सुवर्णान् षण्निष्कान् प्रत्येकं चतुःसुवर्णपरिमितान् राजतं च शतमानं विंशत्यधिकरक्तिकाशतत्रयपरिमाणं त्रयमेतद्विषयलाघवगौरवापेक्षया समन्वितं व्यस्तं वा राजा दण्डं दापयेत् । ममु.

(६) तथा पञ्चसौवर्णिको निष्क इति च यत्परिमाणान्तरं तद्व्यवच्छेदार्थम् । विर.१८३

(७) यत्तु कश्चिदेतेषा चतुर्णां दण्डानां क्रमेण ब्राह्मणादिचतुर्वर्णविषयत्वमित्याह । तदज्ञानविलसितम् । एतादृशव्यवस्थायां प्रमाणाभावात् । ब्राह्मणस्य प्रवासनं क्षत्रियादीनां चतुःसुवर्णादिदण्ड इत्यस्यानुचितत्वाच्च । ×व्यप्र.३३५

एवं दण्डविधिं कुर्याद्धार्मिकः पृथिवीपतिः ।
ग्रामजातिसमूहेषु समयव्यभिचारिणाम् ॥

(१) जातिसमूहेषु च नानाजातीयाना समानजातीयानां वा संघेषु तद्विषयो व्यभिचारो येषामित्यर्थः । प्रकरणोपसंहारः । मेधा.

(२) धर्मप्रधानो राजा ग्रामेषु ब्राह्मणादिषु व्यतिक्रमिणं एतद्दण्डविधानमनुतिष्ठेत् । +गोरा.

(३) सुवर्णनिष्कशतमानशब्दाः प्राग्दिव्यप्रकरणे व्याख्याताः । अत्र त्रयोऽर्थदण्डा दण्ड्यानामर्थसत्तानुसारेण व्यवस्थापनीयाः । निर्वासनं तु निर्बन्धिविषये व्यवस्थापनीयम् । धार्मिकग्रहणादधार्मिकस्य दण्डविधावौदासीन्यमप्यस्तीत्यवगम्यते । यदा चाधार्मिको राजा दण्डविधौ उदासीनस्तदा ग्रामादय एव दण्डविधिं कुर्युः 'निसृष्टार्था हि ते स्मृता'इत्युक्तत्वात् । अमुख्यानां तु समयव्यभिचारिणामौद्धत्यानुसारेण दण्डः कल्पनीयः । स्मृच.२२६

याज्ञवल्क्यः

त्रैविद्यविधौ वर्णाश्रमधर्मसविद्धर्मराजकृतधर्मरक्षणाधिकृत-ब्राह्मणनियुक्तिः

राजा कृत्वा पुरे स्थानं ब्राह्मणान् न्यस्य तत्र तु ।
त्रैविद्यं वृत्तिमद्ब्रूयात्स्वधर्मः पाल्यतामिति ॥

(१) पारिभाषिकस्य चानन्यथाकरणप्रसङ्गेन भूयः समयानपाकरणार्थं समूहक्रियामुपोद्घातत्वेनाह—राजेति । यदुक्तं—'तत्र दुर्गाणि कुर्वीत जनकोशात्मवृद्धये' इति, तद्गुणविधानायैवायमारम्भः । राजा कृत्वा पुरे दुर्गे स्थानं स्थलीं भाविकालसंरक्षणार्थं ब्राह्मणान् न्यस्य समुदायत्वेनावस्थाप्य त्रैविद्यं ऋग्यजुःसामपारगं सदाचारब्राह्मणात्मकं वृत्तिमत् कृत्वा ब्रूयात् स्वधर्मः पाल्यतामिति । वर्तनहेतुर्वृत्तिः, तद्युक्तं वृत्तिमद् ग्रामगृहक्षेत्राक्षयनिध्यादिस्थापितमर्थं दत्त्वेत्यर्थः । स्वधर्मो वर्णाश्रमधर्मस्थित्यव्यभिचारः, राज्ञश्चान्यथाप्रवृत्तावुपदेशेन सन्मार्गावतारणम् । स्पष्टमन्यत् । विश्व.२।१८९

(२) संप्रति संविद्व्यतिक्रमः कथ्यते । तदुपक्रमार्थं किंचिदाह—राजा स्वपुरे दुर्गादौ स्थानं धवलगृहादिकं कृत्वा तत्र ब्राह्मणान् न्यस्य स्थापयित्वा तद्ब्राह्मणजातं त्रैविद्यं वेदत्रयसंपन्नं वृत्तिमद्भूहिरण्यादिसंपन्नं च कृत्वा स्वधर्मो वर्णाश्रमनिमित्तः श्रुतिस्मृतिविहितो भवद्भिरनुष्ठीयतामिति तान् ब्राह्मणान् ब्रूयात् । +मिता.

(३) संविद्व्यतिक्रमलक्षणस्य व्यवहारपदस्योपयो-

---

* व्यक., पमा., व्यउ. मितावत् ।

× शेषं मितावत् । + ममु., मच, गोरावत् ।

(१) **मस्मृ.**८।२२१ क., ख., घ. पुस्तकेषु एवं (एतत्) इति पाठः, ग. पुस्तके तु एवं (एतं) इति पाठः; **व्यक.**१६५ एवं (एतं); **स्मृच.**२२६; **विर.**१८२ दण्ड (धर्म्य); **पमा.**३५८; **मच.**२।२२१ व्यकवत्; **व्यप्र.**३३५ दण्ड (धर्म); **समु.** ११२ कात्यायनः.

+ विर., पमा., सवि. मितावत् ।

(१) **यास्मृ.**२।१८५; **अपु.**२५७।३६; **विश्व.**२।१८९; **मिता.**; **अप.** त्रैविद्यं (त्रैविद्यान्); **व्यक.**१६४ अपवत्; **स्मृच.**२२२ न्यस्य तत्र (तुमतेन); **विर.**१७७ कृत्वा (कृत्वा) शेषं अपवत्; **पमा.**३४८ अपवत्; **नृप्र.**३० पुरे (पुर); **सवि.**३२८ पाल्यतामिति (परिपाल्यताम्); **वीमि.**; **व्यप्र.**३३१ ब्राह्मणान् (ब्राह्मण्यं); **विता.**६५६ व्यप्रवत्; **राकौ.**४७७; **समु.**११० अपवत्.

गिनमर्थं तावदाह—राजा कृत्वा पुरे स्थानमिति। राजा निजनगरे स्थानं स्थीयते यत्र विशिष्टनिवेशनाद्युपेते भूभागे तत्स्थानं वृत्तिमत्कुटुम्बनिर्वाहसमर्थस्थावरजङ्गमधनोपेतं निर्माय तथा ब्राह्मणास्त्रैविद्यान्ऋग्यजुःसामरूपविद्यात्रयोपेतांस्तत्र स्थाने न्यस्य निवेश्य यथार्हं गृहवृत्त्यादि दत्त्वा स्वधर्मो वर्णाश्रमादिधर्मः पाल्यतां क्रियतामिति तान्ब्राह्मणान्ब्रूयात्। केचित्पठन्ति त्रैविद्य वृत्तिमदिति। तदा त्रैविद्यं वृत्तिमच्च यथा तथा कुर्यादित्यर्थः। तिसृणामृगादिविद्यानां समाहारस्त्रैविद्यम्। स्थानस्य च तद्विशिष्टता तद्युक्तब्राह्मणवत्तया। एवं च ब्राह्मणसमूहरचनाभिधानात्संकेतसमयक्रिया संविच्छब्दवाच्या कर्तव्येत्यर्थादुक्तं भवति। न हि ता विना समूहस्थाधाश्चौरादयो निराकर्तुं शक्या इष्टापूर्तक्रियादिधर्माश्च संपादयितुम्। अप.

(४) तुशब्देन वृत्तिपरिकल्पनं विना व्यवस्था व्यवच्छिद्यते। +वीमि.

(५) ब्राह्मणानां समूहो ब्राह्मण्यम्। ब्राह्मणमाणवाडवाद्यत्' इति सूत्रेण यत्। विद्या वेदाः तिसृणां विद्यानां समाहारस्त्रिविद्यम्। त्रिविद्यमधीते इति त्रैविद्यम्। व्यप्र.३३१

[1]निजधर्माविरोधेन यस्तु सामयिको भवेत्।
सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः॥

(१) श्रुतिस्मृत्युक्तो निजधर्मः, तदविरोधेनार्थाद्यनुगुणः तदनुगुणो वा योऽपि सामयिकः स्वपरिभाषाकृतो भवेत् यथोक्तमध्यकाहूतानागमनदण्डादिकः, सोऽपि राज्ञा प्रयत्नेन सम्यग् रक्षणीयः। किञ्च धर्मो राजकृतश्च यः यथैव स्वनिवेशितस्थाने, तथैव राजान्तरकृतस्थानान्तरेष्वपि ब्रह्मशालानिवेशयात्रोत्सवादिकः। तथा च नारदः 'यो धर्म इति'। धर्मो राजकृत इत्यत्र पुनर्धर्मवचनं न राजान्तरकृतत्वात् पालनीयम्। किं तर्हि धर्मानुगुण्येन धर्मत एष्टेत्यभिप्रायः। तथा च नारदः समूहधर्मानुपसंहरन्नाह 'दोषवत् करणं यदि'ति।

विश्व.२।१।१०

(२) एवं नियुक्तैस्तैर्यत्कर्म कर्तव्यं तदाह— निजधर्माविरोधेनेति। श्रौतस्मार्तधर्मानुपमर्देन समयान्निष्पन्नो यो धर्मो गोप्रचारोदकरक्षणदेवगृहपालनादिरूपः सोऽपि यत्नेन पालनीयः। तथा च राज्ञा निजधर्माविरोधेनैव यः सामयिको धर्मो 'यावत्पथिकं भोजनं देयमसदराति-मण्डलं तुरङ्गादयो न प्रस्थापनीया' इत्येवंरूपः सोऽपि रक्षणीयः। मिता.

(३) ब्राह्मणाः स्थाने राज्ञा निवेशनीया इत्युक्तं तैस्तु निर्विष्टैर्यत्कार्यं तदाह— निजधर्माविरोधेनेति। निजेन स्वकीयेन श्रौतादिधर्मेणाविरुद्धो योऽपि गणोपयोगी स सामयिकः समयादिनिर्वृत्तो धर्मः। यथा— व्याध्याद्युपद्रवसमये प्रतिक्षेत्रं प्रतिगृहं वा धनमेतावद् गृहयज्ञादिशान्तिकसिद्धये देयम्। यथा वा सर्वैर्जनपदैः स्वव्यापारपरिहारेणामुत्र स्थानविशेष आगन्तव्यं यो नागच्छेत्तस्यायं दण्ड इति। यद्वा सभाप्रपादेवकुलतडागादीनां जीर्णानामुद्धारो दीनानाथादीनां च संस्कारो यज्ञभिक्षादिनिमित्तं च दानं साधारणधनेनामया व्यवस्थयैतत्कर्तव्यमिति। यश्च राज्ञा समर्थधर्मः कृतो यो युष्मास्वधिकं पठति वेत्ति वा तस्यैतावती पूजा कार्येत्यादि। स उभयविधोऽपि यत्नतः परिपाल्यः। अप.

(४) सामयिकः समुदायिभिर्निर्वृत्तो धर्मः। स्मृच.२२४

(५) सामयिकः समूहयोगक्षेमार्थं मासं राजोपस्थानं कार्यमित्यादिरूपः। मासं शान्तिः करणीयेत्यादिरूपो राजकृतो धर्मः। ×विर.१८१

(६) तुशब्देन निजधर्मविरुद्धस्य सामयिकस्य रक्षणं व्यवच्छिनत्ति। अपिशब्देन बृहस्पत्युक्तराजतदीयपुरुषव्यवस्थापितातिरिक्तसमयबन्ध समुच्चि-

+ शेषं मितावत्

(१) यास्मृ.२।१८६; अपु.२५७।१७; ावश्व.२।१९०; मिता.; अप.; व्यक.१६४; स्मृच.२२४; विर.१८१; पमा.३४९; विचि.८४ रक्ष्यो (रक्षेत्); मृप्र.३०; दवि. २७१; सवि.३२९; वीमि. सांम (सामा); व्यप्र.३३१, ३३३; व्यउ.९०; व्यम.९४; वित्ता.३५७; राकौ.४७७; समु.१११; विश्व.४।३ यस्तु (यश्च).

+ पमा., व्यप्र., व्यउ. मितावत्।

× विचि. विरवत्।

नोति । चक्रारेण राजाधिकृतं समुच्चिनोति । वीमि.

संविद्धनगणद्रव्यहरणदण्डः

गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः ।
सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् ॥

(१) पालनव्याजेन—गणद्रव्यमिति । यो गणद्रव्य हरेद्, धर्माविरोधिनीं संविद परिभाषां समूहकृता लङ्घयेत्, तमपहृत्य सर्वस्वं राष्ट्राद् राजा विप्रवासयेत् । तच्चापहृत्य समूहायैवार्पयेत् । न तु स्वयं गृह्णीयात् । कृत्वेति वचनात् कर्तैव राजा न ग्रहीतेति गम्यते । स्वायम्भुवेऽप्येवमभिप्रायः प्रतिषेधः—'न जातु ब्राह्मणमिति । अतः समूहार्पणमनवद्यम् । एवमन्यत्रापि समूहार्थं दण्डदानादि योज्यम् । विश्व.२।१९१

(२) एवं समयधर्मः परिपालनीय इत्युक्त्वा तदतिक्रमादौ दण्डमाह—गणद्रव्यमिति । यः पुनर्गणस्य ग्रामादिजनसमूहस्य संबन्धि साधारणं द्रव्यमपहरति । संवित्समयस्तां समूहकृता राजकृतां वा यो लङ्घयेदतिक्रामेत्तदीयं सर्वं धनमपहृत्य स्वराष्ट्राद्विप्रवासयेन्निष्कासयेत् । अथ च दण्डोऽनुबन्धाद्यतिशये द्रष्टव्यः ।

*मिता.

(३) यस्तु मुख्यः स्वमार्गे राज्ञाऽपि स्थापयितुमशक्यस्तत्रोक्तं याज्ञवल्क्येन—गणद्रव्यमिति । राज्ञेति शेषः । एवंविधदण्डप्रयोगे तस्यैव सामर्थ्याद्यदा समूहस्यापि कथंचित्सामर्थ्यमस्ति तदा प्रकृतत्वात् गणस्यैव दण्डप्रयोगकर्तृत्वमवगन्तव्यम् । स्मृच.२२६

(४) मुख्यानामपराधविशेषे दण्डविशेषमाह—गणद्रव्यमिति । मुख्यदण्डने समूहस्यैवाधिकारः । अत एव कात्यायनः—'साहसी भेदकारी च गणद्रव्यविनाशकः । उच्छेद्याः सर्वं एवैते विख्याप्यैव नृपे भृगुः' ॥

नृपे विख्याप्य गणेनोच्छेद्या इत्यर्थः । समूहाशक्तौ तस्य दण्डो राज्ञा विधेयः । व्यप्र.३१५

समूहहितवादिवचनाकरणे दण्डः

कर्तव्यं वचनं सर्वैः समूहहितवादिनाम् ।
यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमम् ॥

(१) नन्वयं भिन्नाभिप्रायपुरुषाधीनत्वात् समूहधर्मो दुःश्लिष्ट एव । मैवम् । कार्यापेक्षयैकाभिप्रायत्वोपपत्तेः । किंच—कर्तव्यं वचनं सर्वैः समूहहितवादिनः । समुदायिनोऽन्यस्य वा । 'यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमम्' ॥ राज्ञा समूहायैवेत्यर्थः । महता हि प्रयत्नेन राज्ञा समूहधर्मः पालनीयः धर्माभिवृद्ध्या समूहस्य राजोपकारित्वात् । विश्व.२।१९२

(२) इदं च तैः कर्तव्यमित्याह—कर्तव्यं वचनं सर्वैरिति । गणिनां मध्ये ये समूहहितवादनशीलास्तद्वचनमितरैर्गणानामन्तर्गतैरनुसरणीयम् । अन्यथा दण्ड इत्याह—यस्तत्र विपरीत इति । यस्तु गणिनां मध्ये समूहहितवादिवचनप्रतिबन्धकारी स राज्ञा प्रथमसाहस दण्डनीयः । मिता.

(३) यस्तु हितवादिनां प्रतिकूलः स्यात्स समूहेन प्रथमसाहस दण्ड्यः । +अप.

(४) राजव्यवस्थापित इव ग्रामादिसमूहवादिव्यवस्थापितोऽप्यर्थो न लङ्घनीय इत्याह—कर्तव्यमिति । समूहहित सेतुबन्धनकारित्वादिकं वदता कर्तव्यमिति ब्रुवतां वचनं तत्सर्वैरेव संपादनीयम् । यस्तु तत्र विपरीतः प्रतिकूलः स्यात् स प्रथमसाहसं दमं दाप्यः । वीमि.

समूहाधिकृता राज्ञा सत्कार्याः

समूहकार्यं आयातान्कृतकार्यान् विसर्जयेत् ।
सदानमानसत्कारैः पूजयित्वा महीपतिः ॥

---

*अप., विर., सवि., वीमि., व्यम. मितावत् ।

(१) याज्ञ्स्मृ.२।१८७; अपु.२५७।३८; विश्व २।१९१; मित्र.२।१८७।२।३२ पू.; अप.; व्यक.१६५ येच्च (येत्तु), स्मृच.२२६; विर.१८३ येच्च (येत्तु) हरणं (ग्रहणं); पमा. ३५५ व्यकवत्; विचि.८४ व्यकवत्; नृप्र.३०; दवि. २६८; सवि.३९९; वीमि.; व्यप्र.३१५; व्यउ.११(=)पू.; ९१ व्यकवत्; व्यम.९४; विता.१९(=)पू.; ६५९-६६०; राकौ.४७७; समु.१११.

+ स्मृच. अपवत् ।

(१) याज्ञ्स्मृ.२।१८८; अपु.२५७।३९; विश्व.२।१९२ वादिनाम् (वादिनः); मिता.; अप.; व्यक.१६४; स्मृच. २२४; विर.१७९; पमा.३५४; विचि.८३ सर्वैः (तैषां); नृप्र.३०; दवि.२६७ उत्त.; वीमि.; व्यप्र.३१४; व्यउ. ९१ उत्त.९२; विता.६५७; राकौ.४७८; समु.१११ उत्त.

(२) याज्ञ्स्मृ.२।१८९; विश्व.२।१९३; मिता.;

(१) यतश्चैतदेवं, अतः—समूहकार्यं इत्यादि। क्षिप्रं कार्यान्तराणि परिहाप्यापीति शेषः। ननु च परस्वत्वापत्तिपर्यन्तत्वाद् दानस्य समूहिनां च प्रत्येकं स्वत्वायोग्यत्वाद् व्यतिरिक्तस्वत्वापत्तिक्षमसमूहलक्षणत्वाभावात् समूहदानमनुपपन्नमेव। अत एव च गणद्रव्यं प्रार्थ्यमाना वक्तारो भवन्ति नेदमद्याप्यस्मदीयं भवतीति। तथा चर्त्विजामपि न परिषदं प्रत्युत्सर्ग इष्यते। अतोऽयमुत्सर्गमात्रे गौणो दानव्यपदेश इति केचित्। तथा च सति तु समूहद्रव्यहरणे न दोषः स्याद्, इष्यते च, दण्डदर्शनात्। अतो वक्तव्यमेतत्। तत्रान्ये पण्डितम्मन्याः पाषण्डादिवद् 'इष्टप्रयोजनान्येव दण्डादिवचनानी'ति वर्णयन्ति। तथापि च धर्मार्थः समूहदानादिष्यवहारोऽनालम्बन एव स्यात्। अत्रोच्यते। सत्यं समुदायिनां स्वत्वाभावः। समुदायस्य तु स्वत्वसंबन्धः केन वार्यते। यत्तु व्यतिरिक्तः समुदायो नेत्युक्तम्। तथैव तत्। समुदायिन एवैककार्यावच्छेदेनेतरेतरापेक्षाः समुदायता प्रतिपद्यन्ते। शक्यते चैवमेकैकस्येतरेतरापेक्षस्य स्वत्वसंबन्ध इति वक्तुम्। न चैवंभूतानां दानचोदना नास्ति। गवादीनामविभक्तदक्षिणावचनाद् अन्यत्र बहूनामपि दानसंबन्ध इति गम्यते। ब्राह्मणाय च दानं चोदितम्। न च सापेक्षत्वेन देयमिति। न चेयं स्वत्वाभिमानभ्रान्तिः, बाधानुपलम्भात्। तत्रैतत् स्यात्। सर्वसमुदायसंनिधाने कथं दानोपपत्तिरिति। तदप्यसत्। ग्रहीतृणामितरेतरापेक्षाणामेव स्वत्वयोगात् समयसामर्थ्याच्चर्त्विग्यजमानानामिव शरीरेन्द्रियमनःसाधारण्यात् प्रवसद्यजमानवच्च समयबलेन मनःसान्निध्याच्छास्त्रचोदितत्वाच्च समूहस्थितेर्ऋत्विग्यजमानसाम्यमेव। यत्तु समुदायिनामात्मीयत्वाभिधानम्। तन्नैरपेक्ष्याभिप्रायम्। विभागविधानाच्चर्त्विजां परिषदं प्रत्युत्सर्गो न्यायानपेक्षत्वेऽप्यव्याहत एव। ये तु समुदायिदानासंभवाद् ऋत्विजां दक्षिणाविभागं मन्यन्ते तेषामश्वो दक्षिणेत्येवमादौ द्रव्यैकत्वेन विभागासंभवान्मूल्यदानायोगाच्च दुःश्लिष्टैवेत्यलं प्रसङ्गेन। विश्व.२।१९३

(२) राज्ञा चेत्थं गणिषु वर्तनीयमित्याह—समूहकार्य इति। समूहकार्यनिवृत्त्यर्थं स्वपार्श्वे प्राप्तान् गणिनो निर्वर्तितात्मीयप्रयोजनान् दानमानसत्कारैः स राजा परितोष्य विसर्जयेत्। +मिता.

समूहाधिकृतेन लब्धं समूहायैव देयं, अन्यथा दण्डः

समूहकार्यप्रहितो यल्लभेत तदर्पयेत्।
एकादशगुणं दाप्यो यद्यसौ नार्पयेत्स्वयम्॥

(१) समूहदत्तापहारिणं प्रत्याह—समूहकार्येति। समूहकार्यार्थं महाजनैः प्रेरितो राजपार्श्वे यद्धिरण्यवस्त्रादिकं लभते तदप्रार्थित एव महाजनेभ्यो निवेदयेत्। अन्यथा लब्धादेकादशगुणं दण्डं दापनीयः। ×मिता.

(२) यल्लभेत समूहमान्यत्वनिमित्तेनेति शेषः। स्वकीयसेवाध्ययनादिनिमित्तेन तु लब्धस्य प्रातिस्विकत्वेन समुदायेऽर्पणविध्ययोगात्। समूहकार्यप्रतिहितेनार्पित च सर्वे समूहिनः समविभागेन विभज्य गृह्णीयुः। *स्मृच.२२७

कीदृशाः समूहकार्यचिन्तका भवेयुः

धर्मज्ञाः शुचयोऽलुब्धा भवेयुः कार्यचिन्तकाः।
कर्तव्यं वचनं तेषां समूहहितवादिनाम्॥

(१) शास्त्रनिबन्धनत्वाच्च समूहस्थितेः—वेदज्ञाः शुचयोऽलुब्धा भवेयुः कार्यचिन्तकाः। स्मृत्यन्तराच्चतुष्पष्ट्यादिसंख्यायुक्ताः। कर्तव्य वचनमिति। सर्वैः समुदायिभिरिति शेषः। विश्व.२।१९५

(२) एवंप्रकाराश्च कार्यचिन्तकाः कार्या इत्याह—

+ अप., वीमि., मितावत्। × अप. मितावत्।
* वीमि. स्मृचवत्।

(१) **यास्मृ.**२।१९०; **अपु.**२५७।४० भेत त (भेत्तत्त); **विश्व.**२।१९४; **मिता.** यस्तौ (यस्मै); **अप.**; **व्यक.**१६६; **स्मृच.**२२७; **विर.**१८६; **पमा.**३५८ मितावत्; **चिचि.** ८५; **नृप्र.**३०; **वीमि.**कार्यं (कार्ये); **व्यप्र.**१३७ वीमिवत्; **व्यउ.**९२; **विता.**६५७ वीमिवत्, क्रमेण बृहस्पतिः; **समु.**११२.

(२) **यास्मृ.**२।१९१; **अपु.**२५७।४१ धर्मं (वेद); **विश्व.**२।१९५ अपुवत्; **मिता.**; **अप.** अपुवत्; **वीमि.**; **विता.**६५७; **समु.**१११.

धर्मज्ञाः शुचयोऽलुब्धा भवेयुरिति । श्रौतस्मार्तधर्मज्ञा बाह्याभ्यन्तरशौचयुक्ताः अर्थेष्वलुब्धाः कार्यविचारकाः कर्तव्याः । तेषां वचनमितरैः कार्यमित्येतदादरार्थं पुनर्वचनम् । मिता.

(३) एवंविधाः समूहकार्याणां साधकबाधकविचारकाः स्युः । वेदज्ञत्वादिविशिष्टानां कार्यचिन्तकत्वं विधीयते, अन्यदनूद्यते । अप.

(४) एतेषां समूहहितवादिनां वचनमकरणे दण्डप्रसक्त्याऽवश्यं सर्वैः कर्तव्यमित्यर्थः । वीमि.

उक्तत्रैविद्यसंविद्विधेः श्रेण्यादावतिदेशः

[1]श्रेणिनैगमपाषण्डिगणानामप्ययं विधिः ।
भेदं चैषां नृपो रक्षेत्पूर्ववृत्तिं च पालयेत् ॥

(१) योऽयं ब्राह्मणानां समूहविधिरुक्तः—श्रेणिनैगमपाषण्डीति । कर्मकरादिशिल्पिसमूहः श्रेणिः । सार्थवाहादिसमूहो नैगमः । गुग्गुलिकादिसमुदायः पाषण्डाः । वणिक्समूहो गणः, हस्त्यारोहादिसमूह इत्यन्ये । पूगादिलक्षणार्थो वा गणशब्दः । तथा च नारदः—पाषण्डनैगमश्रेणीति । किंच भेदश्चैषामन्योन्यं समुदायिना वा राज्ञा रक्षणीयः । चशब्दादन्यसंघातराजादिविरोधिन्यवहारश्च । तथा च नारदः—'प्रतिकूलं च यदि'ति । पूर्वकल्पितां च धर्माविरोधिनीं वृत्तिं पालयेत् । चशब्दात् स्वयं च वर्धयेदित्यभिप्रायः । विश्व.२।१९६

(२) इदानीं त्रैविद्यानां प्रतिपादितं धर्मं श्रेण्यादिष्वतिदिशन्नाह— श्रेणिनैगमपाखण्डीति । एकपण्यशिल्पोपजीविनः श्रेणयः । नैगमाः ये वेदस्यासत्प्रणीतत्वेन प्रामाण्यमिच्छन्ति पाशुपतादयः । पाखण्डिनो ये वेदस्य प्रामाण्यमेव नेच्छन्ति । नग्नाः सौगतादयः । गणो व्रातः । आयुधीयादीनामेककर्मोपजीविनाम् । एषां चतुर्विधानामप्ययमेव विधिः । यो 'निजधर्माविरोधेने'त्यादिना प्रतिपादितः । एतेषां च श्रेण्यादीनां भेदं धर्मव्यवस्थां नृपो रक्षेत् । पूर्वोपात्तां वृत्तिं च पालयेत् । मिता.

(३) एकजातिनिविष्टानां समानवृत्त्युपजीविनां समूहः श्रेणिर्यथा रजकश्रेणिरिति । सह देशान्तरवणिज्यार्थं ये नानाजातीया अधिगच्छन्ति ते नैगमा अवैदिकाः प्रव्रज्यास्थिताः पाषाण्डिनो, ब्राह्मणेभ्योऽन्ये समानजीविका इह गणाः, एषामप्ययमेव धर्मः यो निजधर्माविरोधेनेत्येवमादायुक्तः । तथा श्रेण्यादीनां परस्परभेदं मतिभेदं नृपो रक्षेन्निवारयेत् । प्राक्तनीं च तेषां वृत्तिं पालयेत् । अप.

(४) श्रेणयः समानकर्मकराः कारवः, नैगमाः नानापौरसमूहाः, पाखण्डाः प्रव्रज्यावसिताः, गणो ब्राह्मणसमूहः । व्यक.१६४

(५) पाखण्डिनो वेदप्रामाण्यानभ्युपगन्तारः । आद्यचकारेण प्रागुक्तानां ब्राह्मणानां समुच्चयः । द्वितीयचकारेणाऽवृत्तीनां वृत्तिं कल्पयेदिति समुच्चीयते । वीमि.

नारदः

समयानपाकर्मलक्षणम्

[2]पाषण्डनैगमादीनां स्थितिः समय उच्यते ।
समयस्यानपाकर्म तद् विवादपदं स्मृतम् ॥

(१) तस्य च लक्षणं नारदेन व्यतिरेकमुखेन दर्शितं—पाखण्डीति । पारिभाषिकधर्मेण व्यवस्थानं समयः तस्यानपाकर्माव्यतिक्रमः परिपालनं तद्व्यतिक्रम्यमाणं विवादपदं भवतीत्यर्थः । *मिता.२।१८५

(२) पाषण्डाः क्षपणादयः । नैगमाः सार्थिका वणिजः । आदिशब्देन त्रैविद्यब्राह्मणसमूहश्रेणिपूगव्रातगणगुल्मग्रामदेशादयो गृह्यन्ते । ×स्मृच.५

(३) पाषण्डास्त्रयीबाह्याः । नैगमाः पौराः । विर.१७७

(४) नैगमा वणिजः, प्रकृतय इत्यन्ये । तेषां पूर्व-

(१) **यास्मृ.**२।१९२; **अपु.**२५७।४२; **विश्व.**२।१९६; **मिता.**; **अप.** ष (षा); **व्यक.**१६४ पाषण्डि (पाखण्ड); **विर.** १८९ पाषण्डि (पाषण्ड); **सवि.**३३० श्रेणि (श्रेणी); **वीमि.**; **व्यप्र.**३३७ वृत्तिं च (वृत्तं च); **विता.**६६० पूर्ववृत्तिं (पूर्वा वृत्तिं); **राकौ.**४७८; **समु.**१११ विरवत्.

* पमा., व्यप्र., व्यउ. मितावत् । × शेषं मितावत् ।

(१) **नास्मृ.**११।१; **नास्मृ.**१३।१ षण्ड (षण्डि); **अपु.** २५३।२२; **मिता.** २।१८५ षण्ड (खण्डि); **व्यक.**१६३; **स्मृच.**५; **विर.**१७७; **पमा.**३४८; **मूप्र.**३०; **सवि.** ३२८; **व्यप्र.**३३१; **व्यउ.**८९; **व्यम.**९३; **विता.**६५६ मितावत्; **समु.**११०.

कृत्वा सर्वैर्मानैर्वा संहत्य कृता स्थितिः समयः ।
नाभा.११।१

पाखण्डिनः वेदमार्गविरोधिनो वाणिज्यादिकराः । नैगमास्तद्विरोधिनः । व्यम.९३

पाषण्डनैगमश्रेण्यादीनां समयः राज्ञा रक्षणीयः

पाषण्डनैगमश्रेणीपूगव्रातगणादिषु ।
संरक्षेत्समयं राजा दुर्गे जनपदे तथा ॥

(१) नैगमश्चात्र ब्राह्मणसमूहः । पूगो ग्रामेयकादिसमूहः । शास्त्रकर्तृसमूहो व्रातः । विश्व.२।१९६

(२) पूगो वणिगादिसमूहः । व्रातो नानायुधधरसमूहः । आदिशब्देन वृद्धगुल्मवर्गा उच्यन्ते ।
+व्यक.१६४

(३) पाषण्डा वेदोक्तलिङ्गधारिव्यतिरिक्ताः सर्वे लिङ्गिनः । तेषु मैठादिहिताचरणाद्याः समयाः सन्ति । नैगमाः[2] सार्थकवणिक्प्रभृतयः । तेषु सकञ्चुकसदेशहरपुरुषतिरस्कारिणो दण्ड्या इत्येवमादयो बहवः समयाः विद्यन्ते । श्रेणयः एकशिल्योपजीविनः कुविन्दादयः । तासु इदमनयैव श्रेण्या विक्रेयमित्यादिकाः समयाः सन्ति पूगा हस्त्यश्वारोहकादयः । व्रातगणशब्दौ कात्यायनेन व्याख्यातौ 'नानायुधधरा व्राता' इत्यादि । तत्र पूगे व्राते चान्योन्यमृत्सृज्य समरे न गन्तव्यमित्यादयः सन्ति समयाः । गणे तु 'पञ्चमेऽह्नि पञ्चमे वाऽब्दे कर्णवेधः कर्तव्य' इत्येवमादिरस्ति समयः । गणादिष्वित्यत्रादिशब्देन ब्रह्मपुरीमहाजनः परिगृहीतः । तत्र गुरुदक्षिणाद्यर्थमागतो माननीय इत्यादिसमयोऽस्ति । दुर्गे तैं धान्यादिकं गृहीत्वाऽन्यत्र यास्यतो न तद्विक्रेयमित्यस्ति समयः । जनपदे तु क्वचिद्विक्रेतृहस्ते दशबन्धं ग्रहणं कार्यं क्वचित्क्रेतृहस्ते इत्यादिकोऽस्त्यनेकविधः समयः । जनपदे तथेत्यत्र तथाशब्दोऽनुक्तग्रामघोषपुरादीनां प्रदर्शनार्थः । तत्र न गोप्रचारस्थाने खातव्यमित्यादिकोऽस्ति ग्रामे समयः । आभीरस्त्रीपुरुषव्यभिचारे न दण्ड इत्यादिकोऽस्ति घोषे समयः । परे तु विभेवार्थापणमाढ्यादीन्यथाशक्तिपरिपालयद्भिर्बन्दिग्राहकादयो नि हन्तव्या इत्यादयः समयाः सन्ति । तदेतत्समयजातं यथा न भ्रश्यते न च व्यतिवर्तते तथा राजा कुर्यादित्यर्थः । *स्मृच.२२३

(४) पूगो नानाजातीयानियतवृत्तिसमूह इत्यन्ये
+विर.१८०

(५) अथवा नैगमा आप्तप्रणीतत्वेन वेदप्रामाण्यमिच्छन्ति ये पाशुपतादयः । ×पमा.३५२

(६) आदिपदेन संघादिसंग्रहः, तत्रार्हतसौगतादिसमूहः संघः, चाण्डालादिसमूहो गुल्मः, अनुक्तसमुदायो वर्गः । दवि.२६७

[1]यो धर्मः कर्म यच्चैषामुपस्थानविधिश्च यः ।
यच्चैषां वृत्त्युपादानमनुमन्येत तत् तथा ॥

(१) धर्मो जैनावनादिकः । कर्म व्रतं पर्युषितभिक्षाटनादिकम् । उपस्थानविधिः समुदायिकार्यार्थपटहादिध्वनिमाकर्ण्य मण्डपादौ मेलन प्रत्युपादानं । जीवनाय तापसवेषादिपरिग्रहः । एषां पाषण्डादीनामित्यर्थः । ÷स्मृच.२२५

(२) धर्मः पारम्परिकाचारः । कर्म जीवनानुकूलोचितव्यापारः । वृत्त्युपादानमुपादीयमाना वृत्तिः ।
विर.१८०

(३) वृत्तिश्च वणिगादीना वाणिज्यहस्त्यारोहणादि ।
नाभा.११।३

+ विचि. व्यंकवत् ।

(१) **नासं.**११।२; **नास्मृ.**१३।२ षण्ड (षण्डि); **विश्व.**२।१९६ श्रेण्यौ (श्रेणि); **व्यक.**१६४; **स्मृच.**२२३; **विर.**१८० विश्ववत्; **पमा.**३५१ विश्ववत्; **विचि.**८३ विश्ववत्; **भूप्र.**३० गणा (सभा); **दवि.**२६६; **व्यप्र.**३३२; **व्यउ.** ९१; **व्यम.**९४ षण्ड (खण्डि) श्रेणी (श्रेणि) तथा (षु च); **बाल.**२।१९२ षण्ड (षण्डि) श्रेणी (श्रेणि); **समु.**१११; **विव्य.**४१.

१ अभिचरणाद्याः इति माधवीयपाठः

२ सार्थिका वणिग्प्रभृतयः इति माधवीयपाठः

* नाभा., व्यप्र., व्यउ. स्मृचवत् । + शेष व्यंकवत् ।
× शेष स्मृचवत् । ÷ पमा. स्मृचवत् ।

(१) **नासं.**११।३; **नास्मृ.**१३।३; **विश्व.**२।१९०; **व्यक.**१६४; **स्मृच.**२२५ वृत्त्यु (प्रत्यु); **विर.**१८०; **पमा.**३५६; **व्यप्र.**३३६; **बाल.**२।१९२ यच्चैषां (यत्तेषां); **समु.**१११.

१ जटावत्वादिः इति माधवीयपाठः

राज्ञा पाषण्डादीनां कीदृशः समयः निराकरणीयः ।
ते च गणाः कथं नियम्याः ।

प्रतिकूलं च यद् राज्ञः प्रकृत्यवमतं च यत् ।
बाधकं च यदर्थानां तत् तेभ्यो विनिवर्तयेत् ॥

(१) प्रतिकूलं च यद्राज्ञः । यथा—'यस्य राज्ञस्त्वि'ति । एवं च सीर्थकादिशूद्रकर्तृकं त्रैवर्णिकपौरादीना विवादे धर्मविवेचनादिकं 'प्रतिकूल च यद्राज्ञ' इत्यस्योदाहरणमिति मन्तव्यम् । प्रकृत्या स्वभावत एवावमतमवज्ञातं यद्यथा पाषण्डादिषु ताम्बूलभक्षणादिकं यच्चार्थाना बाधनं रसवादादिक तत्तेभ्यः सकाशाद्राजा विनिवर्तयेत् । +स्मृच.२२५–२२६

(२) अर्थाना बाधकं द्यूतादिकम् । विर.१८६

(३) पूर्वस्यापवादः । राज्ञोऽनिष्टं, यथा परराष्ट्रे नीयमानं द्रव्यं राजा यद् नेच्छतीति ज्ञातं न तन्नेयं महोदयमपि । प्रकृतीनामवमतमनिष्टं च तेलकोत्थापनादि । 'प्रकृत्यावमतमि'ति पाठे स्वभावतो बीभत्सं येन कृतेन लज्जते । अर्थाना बाधकं प्रेक्षणमहाव्ययोत्सवादि। तत् तेभ्यो निवर्तयेत् ये एवमाद्याचरन्ति ते वार्याः सान्त्वेनैव । नाभा.११।४

[२]मिथः संघातकरणमहिते शस्त्रधारणम् ।
परस्परोपघातं च तेषां राजा न मर्षयेत्*॥

(१) इत्यादिकान् विरोधान् नृपः प्रतिकुर्यात् । विश्व.२।१९६

(२) मिथः संघातकरणं उपस्थानविधेः पूर्वं पृथक् पृथगवान्तरस्तोमकरणम् । अहिते कलहादौ परस्परोपतापो राजकीयाश्रयेणान्योन्यमर्थहरणादिकः । +स्मृच.२२६

(३) मिथः संघातकरणं प्रकृतिसंघातप्रतिकूलावान्तरमेलककरणम् । अहेतौ भयादिहेतुमन्तरेण, परस्परोपघात परस्परानिष्टकरणम् । ×विर.१८५

(४) अहिते च कलहादौ शस्त्रधारणम् । नाभा.११।५

[१]पृथग्गणांस्तु ये भिन्युस्ते विनेया विशेषतः ।
आवहेयुर्भयं घोरं व्याधिवत्ते ह्युपेक्षिताः ॥

(१) गणग्रहणमत्र समूहमात्रपरम् । न पुनः कुलसमूहरूपविशेषपरम् । तेन पाषण्डादावपि भेदका ये ते राज्ञा विशेषतो विनेयाः । विशेषग्रहणाच्चारीरेणापि दण्डेन विनेयाः । स्मृच.२२५

(२) विभिन्दन्ति राज्ञो दोषकथनेन परस्तुत्या च । नाभा.११।६

[२]दोषवत्करणं यत् स्यादनाम्नायप्रकल्पितम् ।
प्रवृत्तमपि तद् राजा श्रेयस्कामो निवर्तयेत् ॥

(१) तथा च नारदः समूहधर्मानुपसंहरन्नाह—दोषवदिति । विश्व.२।१९०

(२) पारम्पर्यप्रसिद्धं यन्न भवति । व्यक.१६६

(३) लोभादिदोषवत्कारणकं श्रुतिस्मृतिविरुद्धं विधवादौ वेश्यात्वादिक पाषण्डादिभिः प्रकल्पितं प्रवृत्तमपि राजा निवर्तयेदित्यर्थः । *स्मृच.२२६

+ पमा., व्यप्र. स्मृचवत् ।

* एतद्वचन पराशरमाधवे नोपलब्ध,व्याख्याग्रन्थस्तु समुपलभ्यते ।

(१) **नासं.**११।४; **नास्मृ.**१३।४ प्रति (नानु) शः (जा); **विश्व.**२।१९६ मत (सरं); **अप.**२।१८७; **व्यक.**१६६; **स्मृच.**२२५ शः (ज्ञा) त्यव (त्याव) धक (धन); **विर.**१८५; **पमा.**३५६ पू.; **व्यप्र.**३३७; **समु.**१११ त्यव (त्याव) बाधकं (साधनं).

(२) **नासं.**११।५ घातं (ताप); **नास्मृ.**१३।५ हिते (हित); **विश्व.**२।१९६ घातं (तापं) तेषां...येत् (तेभ्यो राजा निवर्तयेत्); **अप.**२।१८७ हिते (हेतोः); **व्यक.**१६५-१६६ क्रमेण बृहस्पतिः; **स्मृच.**२२६ घातं (ताप) न मर्षयेत् (निवर्तयेत्); **विर.**१८५ हिते (हेतौ); **दवि.**२६६; **समु.**१११; न मर्षयेत् (निवर्तयेत्).

१ आधिकारिकशूद्रकर्तृकं इति माधवीयपाठः ।

२ चौरादीनां इति व्यवहारप्रकाशे ।

+ पमा. स्मृचवत् । × दवि. विरवत् ।

* पमा., व्यप्र, स्मृचवत् ।

(१) **नासं.**११।६ णांस्तु ये (णान् ये वि); **नास्मृ.**१३।६ स्तु (श्च); **व्यक.**१६५ णास्तु (णाश्च) व्याधिवत्ते (बाधन्ते ते); **स्मृच.**२२५; **विर.**१८३ णांस्तु (णाश्च); **नृप्र.**३० विनेया (नियम्या), **दवि.**२६८ पू ; **व्यप्र.**३३६; **समु.**१११.

(२) **नासं.**११।७; **नास्मृ.**१३।७; **विश्व.**२।१९०; **अप.**२।१८७ स्कर (त्कार) कल्पि (वर्ति); **व्यक.**१६६ पू.; **स्मृच.**२२६ स्कर (त्कार) नाम्नाय (धुना च); **विर.**१८६; **पमा.**३५६; **व्यप्र.**३३७; **समु.**१११ स्मृचवत्, पू.

(४) दोषवत्करणमनिष्टफला कृतिः, अनाम्नायप्रकल्पितं आगमाप्रसिद्ध, तेभ्यः पाषण्डादिभ्यः । विर.१८६

(५) प्रवृत्तमपि कालानुकालं क्रियमाणं श्रेयस्कामो नोपेक्षेत निवर्तयेत् । नाभा.११।७

बृहस्पतिः

[1]एषा हि स्वामिभृत्यानां वै क्रिया परिकीर्तिता ।
संविद्विधानमधुना समासेन निबोधत ॥
[2]वेदविद्याविदो विप्रान् श्रोत्रियानग्निहोत्रिणः ।
आहृत्य स्थापयेत्तत्र तेषां वृत्तिं प्रकल्पयेत् ॥

तत्र राजधान्या आर्यनिवासार्हतया कृते स्थान इत्यर्थः । स्मृच.२२२

[3]अनाच्छेद्यकरास्तेभ्यो प्रदद्याद्गृहभूमयः ।
मुक्तभाव्याश्च नृपतिर्लेखयित्वा स्वशासने ॥

(१) तेषां वृत्तिं प्रकल्पयेदित्येतस्यार्थः स्वेनैव विवृतः–अनाच्छेद्यकरा इत्यादि । अनाच्छेद्यकराः अग्राह्यकराः । अग्राह्यराजभागधेयका इति यावत् । एतदुक्तं भवति । आगामिनृपतिभिरग्राह्यकराः स्वेन विसृष्टकराश्च गृहभूमीः प्रदद्यादिति । स्वशासने लेखनप्रकारो लेख्यप्रकरणोक्तोऽनुसंधेयः । एवं प्रकल्पितवृत्तिशालि आर्यवृन्दं स्वधर्मानुष्ठाननिष्ठं कर्तुं राजा प्रार्थयेत् । ×स्मृच.२२२

(२) गृहभूमय इति द्वितीयार्थे प्रथमा आर्षत्वात् समाधेया । मुक्तभाव्यास्त्यक्तराजदेयाः । विर.१७८

(३) भुक्तभाव्यास्तु न विश्रुतकराः । ×पमा. ३४९

(४) मुक्तभाव्या मुक्तमुत्सृष्ट भाव्य भूम्यादिफलं यासा ता इत्यर्थः । व्यम.९४

[1]नित्यं नैमित्तिकं काम्यं शान्तिकं पौष्टिकं तथा ।
पौराणां कर्म कुर्युस्ते संदिग्धे निर्णयं तथा ॥

पौराणा पुरवासिनामित्यर्थः । एव राजनियुक्तसमुदायविशेषस्य कार्यविशेष उक्तः । व्यप्र.३३२

[2]ग्रामश्रेणिगणानां च संकेतः समयक्रिया ।
बाधाकाले तु सा कार्या धर्मकार्ये तथैव च ॥

(१) गणाना चेत्यत्र चशब्दः पाषण्डादीना समुच्चयार्थः । एवं चायमर्थः । ग्रामश्रेणीगणपाषण्डनैगमादीना क्षुद्रोपद्रवकाले जीर्णोद्धारादिधर्मकार्ये च या परिभाषितसमयक्रिया विना उपद्रवो दुष्परिहारः धर्मकार्यं च दुःसाध सा पारिभाषिकी समयक्रिया येन येनोपाधिना ग्रामादिशब्दाभिलप्यजात्या कृता तत्तदुपाध्युपहितैः कार्येति । स्मृच.२२२

(२) ग्रामो ग्रामवासिसमूहः । श्रेणिः समानजातीयैकवृत्तिकारसमूहः । गणो ब्राह्मणसमूहः । बाधा चौरादिपीडा । धर्मकार्ये सभाप्रपादिसंस्कारे । विर.१७९

[3]चाटचोरभये बाधा सर्वसाधारणी स्मृता ।
तत्रोपशमनं कार्यं सर्वैर्नैकेन केनचित् ॥

× व्यप्र. स्मृचवत् ।

(१) **विर.**१७७

(२) **अप.**२।१८५; **व्यक.**१६३, **स्मृच** २२२; **विर.** १७८ आह (सत्कृ), **पमा.**३४८ यान (यांश्चा), **दीक** ४९ वेदविधा (राजा वेद); **नृप्र.**३०; **व्यप्र** ३३१; **व्यउ.**९०; **व्यम.**९४; **बाल.**२।१८५ हूय (हूय); **समु.**११०.

(३) **अप.**२।१८५ भ्यो (पां) मयः (मिकाः) मुक्त (मुक्ता) ने (नैः); **व्यक.**१६३; **स्मृच.**२२२ प्र (न); **विर.**१७८ भ्यो (पां); **पमा.**३४९ मु (भु); **नृप्र.**३० मुक्त (मुक्ता) ने (नम्); **व्यप्र.**३३१मय. (मिकाः) मुक्तभा (युक्ता भ) ने(नम्); **व्यउ.**९० व्या (व्य) ने (नम्); **व्यम.**९४, **बाल.**२।१८५ दद्याद् (देया) पू.; **समु.**११०.

(१) **अप.**२।१८५; **व्यक.**१६३; **स्मृच.**२२२; **विर.** १७८ निर्णय तथा (ऽर्थे च निर्णयम्); **पमा** ३४९ विरवत्; **दीक.**५०; **नृप्र.**३०; **व्यप्र.**३३२; **व्यउ.**९० णा (णं); **विता.**६५७ ग्धे (ग्ध); **समु.**११०

(२) **अप.**२।१८५ नां च (र्थं तु) तः (त); **व्यक.१६३; स्मृच.**२२२ णि (णी); **विर.**१७८; **पमा.**३५० स्मृचवत्; **विचि.**८२ त. (त); **नृप्र.**३०, **वीमि.**२।१८६ ग्राम (पूग) तः (त); **व्यप्र.**३३२; **व्यउ.**९०; **विता.**६५६ तथैव च (कथचन); **समु.**११०; **विव्य.**४३ तः (त).

(३) **अप.**२।१८५ भये (भय) णी (णा); **व्यक.१६३** चाट (बधे) णी (णा) त्रोपश (त्रापि ग), **स्मृच.२२२; विर.** १७८ चा (वा) बैनैं (वैं लो); **पमा.**३५० चा (वा) बैनैं (वैंगै); **विचि.**८३ चा (वा) शम (गम); **नृप्र.**३० चा (वा);

चाटो वृकः । उपग्रमनमुपशमनादानं समय इति यावत् । समयस्वरूपनिरूपणार्थं द्वित्राः समयाः प्रदर्श्यन्ते । अवर्षेणोपद्रवे प्रतिक्षेत्र प्रतिगृहं वा एतावद्धन ग्रहयज्ञादिशान्तिकसिद्धये देयमित्येकः समयः । तथा चोरोपद्रवे प्रतिगृहमेकैको दक्षः शस्त्रपाणिरेकत्रागन्तव्य इति । तथा राजोपद्रवे राजदर्शनार्थं प्रतिगृहमेकैकः श्रेष्ठ आगन्तव्य इति । स्मृच.२२२-२२३

[1]सभाप्रपादेवगृहतडागारामसंस्कृतिः ।
तथाऽनाथदरिद्राणां संस्कारो यजनक्रिया ॥
[2]कुलायननिरोधश्च कार्यमस्माभिरंशतः ।
यत्रैतल्लिखितं पत्रे धर्म्या सा समयक्रिया ॥
[3]पालनीया समस्तैस्तु यः समर्थो विसंवदेत् ।
सर्वस्वहरणं दण्डस्तस्य निर्वासनं पुरात् ॥

सभा जनाश्रयो मण्डपः । प्रपा पानीयशालिका । आराम उपवनम् । संस्कृतिः जीर्णोद्धारः । संस्कार उपनयनादिकः प्रेतदहनादिश्च । यजनक्रिया सोमयागादिकर्त्रे दानम् । कुलायनं दुर्भिक्षादिपीडितयूथागमनम् । तस्मिन्सति यत्संविधानं विधेयं तदेव तच्छब्देनोक्तम् । निरोधो निरोधनम् । दुर्भिक्षापगमपर्यन्त कुलायनधारणमिति यावत् । अस्माभिर्ग्रामादिशब्दप्रवृत्तिनिमित्तभूतोपाधिशालिभिः अंशतो गृहक्षेत्रपुरुषादिप्रयुक्त्या संगृहीतधनेन मध्यकत्वेन स्थितेन धनेन वा समर्थैः समुदायिभिरिति शेषः । स्मृच.२२३

[1]तत्र भेदमुपेक्षां वा यः कश्चित्कुरुते नरः ।
चतुःसुवर्णाः पणिनष्का दण्डस्तस्य विधीयते ॥

सुवर्णचतुष्टयपणिष्कयोः शक्त्यादितारतम्यानुसारेण गुणवदगुणवद्विषयत्वेन वा व्यवस्था मतव्या ।

व्यप्र.३३६

[2]कोशेन लेख्यक्रियया मध्यस्थैर्वा परस्परम् ।
विश्रासं प्रथमं कृत्वा कुर्युः कार्याण्यनन्तरम् ॥

कोशेन देवतास्नानोदकपानेन । लेख्यक्रियया समयपत्रेण । मध्यस्थैः परस्परं समयातिक्रमाभावाय कोशादिभिर्विश्वासमुत्पाद्य सामयिककार्याणि कर्तव्यानीति ।

व्यप्र.३३३

[3]विद्वेषिणो व्यसनिनः शालीनालसभीरवः ।
लुब्धातिवृद्धबालाश्च न कार्याः कार्यचिन्तकाः ॥

(१) शालीना लज्जाशीलाः । स्मृच.२२४

(२) शालीनोऽप्रगल्भः । विर.१७९

[4]शुचयो वेदधर्मज्ञाः दक्षा दान्ताः कुलोद्भवाः ।
सर्वकार्यप्रवीणाश्च कर्तव्याश्च महत्तमाः ॥

व्यप्र.३३२ धा (धाः) णी (णा.) ता (ता); व्यउ.९० चाट (चार) वैनैं (वैं नैं); विता.६५६ भये (भयं) णी (णा) ता (ताः) पू; समु.११०, विव्य.४३

(१) अप.२।१८६ गा (का) यज (योज); व्यक.१६४ गृह (तादि) स्कृ (स्थि); स्मृच २२३ डागा (टाका), विर.१८१; पमा.३५० गृह (गृह); व्यप्र.३३२ स्मृचवत्; व्यउ.९० स्मृचवत्; विता.६५६; समु.१११ स्मृचवत्.

(२) व्यक.१६५ उत्त.; स्मृच.२२३ धश्च (धं च) लि (हे); विर.१८१ यन (यन) पत्रे (सम्यक्); पमा.३५० यन (यन) त्रैतत् (त्वेवं) त्रे (त्रं); व्यप्र.३३२; व्यउ.९०; विता.६५६ कुलायननिरोधश्च (कुल्यानयनरोधं च) पत्रे (तत्र); समु.१११ धश्च (धं च).

(३) अप.२।१८६ या (याः) स्तै (यैं); व्यक.१६५; स्मृच.२२६ प्रथमपाद विना; विर.१८१ या (याः); पमा.३५१; विचि.८४; दवि.२६८; व्यप्र.३३२ स्तु यः (स्तैर्यः); व्यउ.९० स्तु यः समर्थो (स्तैर्यः समं च); समु.११२.

(१) अप.२।१८६ दण्डस्तस्य (तस्य दण्डो); व्यक.१६५ उत्तरार्धं (चतु.सुवर्णा षष्टिं वा तस्य दण्डो विधीयते); विर.१८२; विचि.८४; दवि.२६८; व्यप्र.३३६ र्णाः (र्ण) शेषं अपवत्; विता.६६१ र्णाः (र्ण) ष्काः (ष्कः) शेषं अपवत्; समु.११२ र्णाः (र्ण) ष्काः (ष्कं) शेष अपवत्.

(२) अप.२।१८५; व्यक.१६३ शेन (शे तु); स्मृच.२२३ प्रथम कृत्वा कुर्युः (परम कुर्युः कृत्वा); विर.१७८ न लेख्य (ण लेख); पमा.३५३; विचि.८३, नृप्र.३० वा (च); व्यप्र.३३३; व्यउ.९१; समु.१११; विव्य.४३ कार्या (कर्मा).

(३) अप.२।१८५; व्यक.१६३-१६४; स्मृच.२२४ लस (रस); विर.१७९; पमा.३५३ लुब्धातिवृद्ध (वृद्धा लुब्धाश्च); नृप्र.३०; व्यप्र.३३४; व्यउ.९१; समु.१११.

(४) अप.२।१८५ व्याश्च (व्यास्तु); व्यक.१६४; स्मृच.२२४; विर.१७९ क्षा दा (क्षाः क्षा) र्य (र्यैं); पमा.३५३ अपवत्; विचि.८३ दक्षा दान्ताः (दान्ता दक्षाः) श्च (स्तु); नृप्र.३०; दवि.२६७ अपवत्; व्यप्र.३३४; व्यउ.९१; समु.१११ अपवत्; विव्य.४३ विचिवत्.

[1]द्वौ त्रयः पञ्च वा कार्याः समूहहितवादिनः ।
कर्तव्यं वचनं तेषां ग्रामश्रेणिगणादिभिः ॥

समुदायिभिर्विचित्रमतिभद्रिरपरिमितैश्च सम्यगसम्यक्त्वमेकमत्येन कार्यस्य निश्चेतुमशक्यमिति मत्वा तैः द्वित्राः पञ्च वा कार्यचिन्तकाः कार्या इति। ×स्मृच.२२४

[2]यस्तु साधारणं हिंस्यादिक्षपेत्त्वैविद्यमेव वा ।
संधिक्रियां विहन्याच्च स निर्वास्यस्ततः पुरात्॥

साधारणं दण्डादिद्रव्यं दण्ड्यादेः साहाय्यकरणादिना नाशयेदित्यर्थः । क्षिपेदाक्षिपेत् । ततः पुरात्समुदायस्थानात् । अत्रैविद्याक्षेपे तु वाक्पारुष्यपदे दण्डो वक्ष्यते। समुदायिमात्रस्य मर्मोद्घाटकादौ निर्वासनं दण्डः।

स्मृच.२२५

[3]अरुन्तुदः सूचकश्च भेदकृत्साहसी तथा ।
श्रेणिपूगनृपद्वेष्टा क्षिप्रं निर्वास्यते ततः ॥

अरुन्तुदो मर्मोद्घाटकः । सूचकः पिशुनः । भेदकृत्समूहिषु विमतिकृत् । ततः समूहस्थानान्निर्वास्यते । समूहेनेति शेषः । न च वाच्यं समूहस्य दण्डनेऽनधिकारात्समूहेनेति शेष इत्येतदयुक्तमिति । यत आह स एव 'कुलश्रेणिगणाध्यक्षाः' इति । स्मृच.२२५

[4]कुलश्रेणिगणाध्यक्षाः पुरदुर्गनिवासिनः ।
वाग्विधग्दमं परित्यागं प्रकुर्युः पापकर्मिणाम् ॥

[1]तैः कृतं यत्स्वधर्मेण निग्रहानुग्रहं नृणाम् ।
तद्राज्ञाऽप्यनुमन्तव्यं निसृष्टार्था हि ते स्मृताः॥

(१) अध्यक्षा महत्तमाः । वाग्दमं धिग्दमं वाऽपराधानुसारेण । वाग्विश्रममितिपाठे वाग्विश्रमोऽसंभाष्यता । परित्यागोऽसंव्यवहार्यता । निसृष्टार्था अनुज्ञातकार्याः । अप.२।१८७

(२) वाग्दमः पापिष्ठोऽसीत्यादि भर्त्सनम् । धिग्दमो धिगिति कुत्सनम् । परित्यागोऽङ्ककरणं निर्वासनं वा एतदर्थदण्डादेरप्युपलक्षणार्थम् । निग्रहानुग्रहमिति सामान्यतः पुनरभिधानात् । *स्मृच.२२५

(३) निसृष्टार्थाः संदिष्टकृत्याः । विर.१८४

[2]बाधां कुर्युर्यदैकस्य संभूता द्वेषसंयुताः ।
राज्ञा तु विनिवार्यास्ते शास्याश्चैवानुबन्धतः ॥

(१) अनुबन्धः आग्रहः । अप.२।१८७

(२) अनुबन्धतो निबन्धानुसारेण । स्मृच.२२५

(३) समूहिनामप्यधर्मेण द्वेषादिना कार्यकरणे दण्डमाह—बाधां कुर्युरिति । अनुबन्धतः निग्रहतारतम्यानुसारेण । व्यप्र.३३५

[3]मुख्यैः सह समूहानां विसंवादो यदा भवेत् ।
तदा विचारयेद्राजा स्वमार्गे स्थापयेच्च तान् ॥

× व्यप्र. स्मृचवत् ।

(१) अप.२।१९१; व्यक १६४; स्मृच २२४; विर. १७९; पमा.३५४, विचि.८३; दवि.२६७, व्यप्र.३३४; व्यउ.९१; विता.६५७; समु.१११; विव्य.४३ समूह (ससक्त).

(२) अप.२।१८७ सधि (सवित्) ततः पुरात् (पुरात्ततः); व्यक.१६५ सधि (संवित्) च्च (च्चु); स्मृच.२२५ सधि (सधि); विर.१८३ व्यकवत्; पमा.३५४ व्यकवत्; सवि. ३२९ सधि (साधि) स निर्वास्यस्ततः (क्षिप्र निर्वास्यते); व्यप्र.३३५; व्यउ.९१; विता.६६१; समु.१११.

(३) अप.२।१८७ द्वेष्टा (द्विट्); व्यक.१६५; स्मृच. २२५ अपवत्; विर १८४ ततः (पुरः); पमा ३५५ ततः (तदा); विचि.८५; दवि.२६८ ततः (पुरात्); सवि.३२९ द्वेष्टा (द्विट् चेत्); व्यप्र.३३६ अपवत्; विता.६६१ अपवत्; सेतु.३२४ श्रेणिपूग (श्रेणीपुरो); समु.१११ अपवत्.

(४) अप.२।१८७ कर्मि (कारि); व्यक.१६५; स्मृच. २२५ म (मौ) मि (मं); विर.१८४; पमा.३५६ कुल (पुर) कर्मिणाम् (कारिण.); सवि.३२९ णि (णी) कर्मि (कारि); व्यप्र ३४६ कुल (पूग) दम (दण्ड) कर्मि (कारि); समु १११ म (मौ) कर्मि (कारि).

* व्यप्र. स्मृचवत् ।

(१) अप.२।१८७ यत् (च) ज्ञा (ज्ञो); व्यक.१६५ उत्त.; स्मृच.२२५ त्त्व (च्च); विर.१८४; पमा.३५६; सवि. ३२९ त यत्(तौ यौ) ग्रह (ग्रहौ); व्यप्र.३३६; समु.१११.

(२) अप.२।१८७ दै (दे) तु (ते) स्ते (स्तु) बन्धतः (बन्धिन); व्यक.१६५ कस्य (वास्य) भूता द्वेष (भृता विप्र) तु (ते) स्ते (स्तु) बन्धतः (बन्धिनः); स्मृच २२५ दै (दे) तु वि (ज्ञात्वा) स्ते (स्तु); विर.१८४ तु (ते) स्ते (स्तु) बन्धतः (बन्धिनः); पमा. ३५५ तु विनिवार्यास्ते (सर्वे गृहीतार्थाः); व्यप्र.३३५; व्यउ. ९१ न्धतः (न्धिता.); विता.६६१; समु.१११ तु वि (ज्ञात्वा) स्ते (स्तु).

(३) अप.२।१८७; व्यक.१६५; स्मृच.२२६ तान् (यत्); विर.१८४ मार्गे (धर्मे); पमा.३५५; नृप्र.१०;

समूहिषु यत्समूहेन कर्तुमशक्यं मुख्यानामौद्धत्यनिवारणादिकं तदपि राजा कुर्यात् । तथा च बृहस्पतिः— मुख्यैरिति । स्मृच.२२६

[1]संभूयैकमतिं कृत्वा राजभागं हरन्ति ये ।
ते तदष्टगुणं दाप्या वणिजश्च पलायिनः ॥

(१) राजभाव्य हरन्तीति चतुर्थपादेनानुषङ्गनीयः । स्मृच.२२७

(२) राजभाव्यं राज्ञे देयम् । दवि.२६९

[2]ततो लभेत यत्किंचित् सर्वेषामेव तत्समम् ।
षाण्मासिकं मासिकं वा विभक्तव्यं यथांशतः ॥

(१) एव विभज्य ग्रहणमतुच्छद्रव्यविषयम् । तुच्छद्रव्यं तु लब्धं निःस्वादिभ्यः समूहेन देयम् । स्मृच.२२७

(२) राजाधिकारे बृहस्पतिः—तत इति । षाण्मासिकादिपदमुपलक्षणार्थम् । विर.१८६

[3]देयं वा निःस्ववृद्धान्धस्त्रीबालातुररोगिषु ।
सांतानिकादिषु तथा धर्म एष सनातनः ॥

(१) यदि समूहप्रहितैर्लब्ध विभज्यमान मासप्रभृति षण्मासान् यावद्ऋणिना निर्वाहसमर्थं भवति, तदा यथाभागं विभजनीयम् । अल्प चेन्निःस्वादिभ्यः प्रदेयम् । अप.२।१९०

(२) एकपुरुषस्य षण्मासनिर्वाहाय पर्याप्तं कुटुम्बस्य वैकस्य मासनिर्वाहाय पर्याप्तं लब्ध चेन्निःस्वादिभ्यो देयमिति तात्पर्यार्थः । ×स्मृच.२२७

(३) आतुरादन्यो रोगी, हलायुधेन तु आतुर इत्यत्र अकर इति पठितं, अकरो हस्तशून्य इति च व्याख्यातम् । संतानिकादिष्वित्यनेन पूर्वोक्तव्यतिरिक्तगणश्रेण्यादिकर्तव्यबुद्धिविषयपरिग्रहः । विर.१८७

[4]यत्तैः प्राप्तं रक्षितं वा गणार्थे वा ऋणं कृतम् ।
राजप्रसादलब्धं वा सर्वेषामेव तत्समम् ॥

(१) तस्यायमर्थः । समूहकार्यार्थं प्रहितैर्यत्सीमाविवादावधिकं क्षेत्रारामादिकं धर्माधिकरणे न्यायतः प्राप्तं परैरपहियमाणं वा रक्षित तथा समूहप्रयोजनार्थमुपात्तमृणं समूहकृतानुकूल्यादिजनितराजप्रसादलब्धं वा यत्तदेतत्सर्व सर्वेषा समूहानां समं ज्ञेयमिति । ×स्मृच.२२७

(२) समूहाकारेण नगरादिकं प्रविश्य तदाकारविच्छेदे सति प्रातिस्विकलब्धमप्यविभक्तार्जितधनवत्साधारणमित्यर्थः । सवि.३३१

कात्यायनः

[5]समूहानां तु यो धर्मस्तेन धर्मेण ते सदा ।
प्रकुर्युः सर्वकर्माणि स्वधर्मेषु व्यवस्थिताः ॥

सामयिकनिजधर्मानतिक्रमेण समूहकार्याणि सुसमुदायिनः कुर्युरित्यर्थः । स्मृच.२२४

[6]अविरोधेन धर्मस्य निर्गतं राजशासनम् ।
तस्यैवाचरणं पूर्वं कर्तव्यं तु नृपाज्ञया ॥

सवि.३३० विसं (संवि) सुमन्तुः; **समु.**१११ उत्त., नारदः.

(१) **अप.**२।१८७ मति (तमं) गं (व्य); **व्यक.**१६६; **स्मृच.**२२६ ग (व्यं); **विर.**१८५ ति (त) वणिज (विनेया); **विचि.**८५ तिं (तं) जश्च (जः प्र); **दवि.**२६९ तदष्ट (तद्दश); **सवि.**३३० मति (तमं) राजभागं (गणद्रव्यं) उत्तरार्धं (एतदष्टादशगुणं वणिजश्च पलायिनः); **सेतु.**३२४ जश्च (जः प्र); **समु.**११२ स्मृचवत्.

(२) **अप.**२।१९०; **व्यक.**१६६; **स्मृच.**२२७ भे (भ्ये); **विर.**१८६ भे (भ्ये) ण्मासि (ण्मासि); **पमा.**३५८ भे (भ्ये) मासिकं वा (वत्सरं वा); **विचि.**८६ पू.; **सवि.**३३० षाण्मासिकं मासिक वा (षाण्मासं मासिकं वाऽपि); **व्यप्र.**३३७ **स्मृचवत्**; **व्यउ.**९२ स्मृचवत्; **विता.**६६१ पू.; **समु.**११२.

(३) **अप.**२।१९०; **व्यक.**१६६; **स्मृच.**२२७; **विर.**१८६ **वा** निःस्व (बालिश) सां (स) धर्म एष (एष धर्मः); **पमा.**३५९ वा निःस्व (बधिर); **सवि.**३३० न्ध (तैं); **व्यप्र.**३३८; **व्यउ.**९२; **विता.**६६२ पू.; **समु.**११२.

× व्यप्र. स्मृचवत् ।

(१) **अप.**२।१९० त्तैः (तनैः) ऋण (पर्ण); **व्यक.**१६६; **स्मृच.**२२७; **विर.**१८७ वा गणार्थे (च गणार्थ) ऋणं कृतम् (प्रकल्पितम्); **सवि.**३३० तं वा (तं च) कात्यायनः; **व्यप्र.**३३८ वा स (च स); **व्यउ.**९२ ण कृतम् (णे कृते) वा *सर्वेषामेव तत्समम् (च गणकृतमृणं तथा)*; **विता.**६६२ **में (र्थे)**; **समु.**११२ ऋणं कृतम् (प्रकल्पितम्).

(२) **व्यक.**१६४ तु (च); **स्मृच.**२२४; **विर.**१८० र्माणि (कार्याणि); **नृप्र.**३०; **व्यप्र.**३३३; **व्यउ.**९१.

(३) **व्यक.**१६४; **स्मृच.**२२४; **विर.**१८१; **दीक.**६०

धर्मस्य श्रौतस्मार्तादिधर्ममार्गस्य। निर्गत निर्मितमित्यर्थः। राजशासनं राज्ञाऽनुशिष्टो धर्मस्तस्यैव श्रौतस्मार्तमार्गाविरोधेन विहितस्यैव। यः पुनः श्रौतस्मार्तमार्गविरोधेन राज्ञा निर्मितो धर्मः यथाऽस्माभिर्दत्तस्य गृहक्षेत्रादेराधिविक्रयदानादिक न कार्यमिति तस्याचरण न कर्तव्यमित्येवकारकरणात् गम्यते। कथमत्र श्रौतस्मार्तमार्गविरोधः। उच्यते। द्रव्यार्जनविधिनाऽर्जितस्य द्रव्यस्य यथेष्टविनियोगः कार्य इत्ययमपि श्रौतस्मार्तमार्ग एव तद्विरोधस्तत्रास्त्येवेत्यलं प्रत्युदाहरणसमर्थनविस्तरेण। स्मृच.२२४

राज्ञा प्रवर्तितान् धर्मान्यो नरो नानुपालयेत्।
गर्ह्यः स पापो दण्ड्यश्च लोपयन् राजशासनम्॥

तच्छ्रौतस्मार्तमार्गाविरुद्धराजप्रवर्तितधर्मविषय इति मन्तव्यम्। स्मृच.२२४

युक्तियुक्तं च यो हन्याद्वक्तुर्योऽनवकाशदः।
अयुक्तं चैव यो ब्रूयात्स दाप्यः पूर्वसाहसम्॥
साहसी भेदकारी च गणद्रव्यविनाशकः।
उच्छेद्याः सर्व एवैते विख्याप्यैवं नृपे भृगुः॥

केचिन्नृपे भृगुरिति पठन्ति। तदाऽयमर्थः। साहसिकत्वादिकं नृपे विख्याप्य गणेनोच्छेद्या इति।

स्मृच.२२६

एकपात्रेऽथ पङ्क्त्यां वा संभोक्ता येन यो भवेत्।
अकुर्वंस्तत्तथा दण्ड्यस्तस्य दोषमदर्शयन्॥

भोजनविरोधिनं दोषमदर्शयन् तत्तथा अकुर्वाणो दण्ड्यः। विर.१८५

गणमुद्दिश्य यत्किंचित् कृत्वर्णं भक्षितं भवेत्।
आत्मार्थं विनियुक्तं वा देयं तैरेव तद्भवेत्॥

(१) तैरेव समूहकार्यप्रहितैरेव तदृणं प्रतिदेयं भवतीत्यर्थः। परिभाषितपाथेयानर्पणेऽपि तैः कृतमृणं गणेन न देय एवकारकरणात्। किन्तु पाथेयमेव देयम्।

स्मृच.२२७

(२) गणमुद्दिश्य गणप्रयोजनमन्तरेणैव गणप्रयोजनममिधाय ऋणं कृत्वा संघकृतऋणमेव यैः कैश्चिद्भक्षितं तैरेव तद्देयं न संघेनेत्यर्थः। विर.१८७

गणानां श्रेणिवर्गाणां गताः स्युर्ये तु मध्यताम्।
प्राक्तनस्य धनर्णस्य समांशाः सर्व एव ते॥

(१) ये पुनः समुदायं प्रसाद्य तदन्तर्भावमापन्ना ये च समुदायक्षोभादिना ततो बहिर्भावं तान्प्रत्याह

बृहस्पतिः; **व्यप्र.३३४** निर्गतं (निर्जित); **व्यउ.९१** व्यप्रवत्; **समु.१११.**

(१) **व्यक.१६४; स्मृच.२२४** शा (ज) धर्मान्यो (एतान्यो); **विर.१८१** गर्ह्यः (ग्राह्यः); **विचि ८४,२६०-२६१; दवि.२७२; व्यप्र.३३४; व्यउ.९१; सेतु.२९०** गर्ह्यः स (गर्ह्यश्च):३२४ वर्ति (तिष्ठि) श्च (स्तु); **समु.१११** स्मृचवत्; **विव्य.४३.**

(२) **अप.२।१८८** युक्तियुक्तं च (युक्तियुक्तं तु) स्स दाप्यः (त्प्राप्नुयात्); **व्यक.१६४** स्स दाप्यः (त्प्राप्नुयात्); **स्मृच.२२५; विर.१७९** व्यकवत्; **पमा.३५४** द्वक्तुर्यो (द्वः कार्यो), **विचि.८३** चैव (तत्र) शेष व्यकवत्; **दवि.२६७; व्यप्र.३३४-३३५** च यो (वचो) शदः (शतः); **व्यउ.९१** पूर्वं (सर्वं) शेषं व्यप्रवत्; **सेतु.३२४** अपवत्; **समु.१११.**

(३) **अप.२।१८७; व्यक.१६५; स्मृच.२२६** नृपे (नृपैः); **विर.१८३** स्मृचवत्; **विचि.८४; व्यप्र.३३५** प्यैव (प्यैव); **समु.११२** स्मृचवत्.

---

(१) **अप.२।१८७** ऽथ पङ्क्त्यां वा (च वा पङ्क्त्या) स्तत्तथा (स्तं तथा), **व्यक.१६६; विर.१८५**पङ्क्त्यां(पङ्क्त्यां); **विचि.८५** त्तथा (त्तदा); **दवि.२१५, सवि.३३०** संभोक्ता (न भोक्ता) कुर्वंस्तत्तथा (कुर्वन्स तथा); **सेतु ३२४** पङ्क्त्यां वा (वा पङ्क्त्यां) स्तत्तथा (स्तु तदा); **समु.१११** ऽथ (स) स्तत्तथा (स्तु तथा); **विव्य.४३** पात्रेऽथ (पात्रेण) (अकुर्वंस्तत्तथा (अकुर्वन्त तदा).

(२) **अप.२।१९०** यत्किंचित्(यैः कैश्चित्); **व्यक.१६६; स्मृच.२२७; विर.१८७; पमा.३५९; विचि.८६; सवि.३३१** कृत्वर्णं (कृत्वृणं); **व्यप्र.३३८; व्यउ.९२; सेतु.३२४; समु.११२.**

(३) **अप.२।१९०** मध्यताम् (मध्यतः); **व्यक.१६६; स्मृच.२२७** गणानां श्रेणि (गणिनां शिल्पि); **विर.१८७; पमा.३५९** नस्य धनर्णस्य (नस्याधमर्णस्य) शेष स्मृचवत्; **विचि.८६; व्यप्र.३३८** यें तु (यैंऽपि); **व्यउ.९२** व्यप्रवत्; **समु.११२** स्मृचवत्.

स एव—गणिनामिति । +स्मृच.२२७

(२) अर्वागपि ये सर्वसंमत्या गणादिमध्यप्रविष्टास्तेऽपि सर्वे पूर्वधनस्य ऋणस्य च भागिनो भवन्तीत्यर्थः । विर.१८८

तथैव भोज्यवैभाज्यदानधर्मक्रियासु च ।
समूहस्थोंऽशभागी स्यात्प्रगतस्त्वंशभाग् न तु ॥

+ पमा, व्यप्र. स्मृचवत् ।

(१) **अप** २।१९० (तथैव भोज्यं वैभाज्य धन धर्मक्रियासु च); **व्यक.**१२६; **स्मृच** २२७ वैभाज्य (वैभाव्य) सु च (दिषु) स्थो (स्थे); **विर.**१८८; **पमा.**३६० भोज्यवैभाज्य (भोजनैर्भाव्यं) भाग् न तु (भागभाक्), **विचि.**८६ दान (दास); क्रियेतिपद भोज्यादिभिः प्रत्येकमभिसंबध्यते । भोज्यं मोदकादि । वैभाज्यं धान्यादि । प्रगतस्त्वंशभाग् न तु, प्रगतः निजप्रयोजनमात्रेण गणादिभ्यो बहिर्भूतः नाशभागित्यर्थः । विर.१८८

स्मृत्यन्तरम्

शैवकेशैर्वीज्यमानं ब्राह्मणं ह्युग्रशेखरम् ।
दिग्वस्त्रं गमयेद्राजा दुष्टं समयलङ्घिनम् ॥

व्यप्र.३३८, **व्यउ.**९२ वैभाज्य (वैभाव्य) त्प्रगत (दागत) न तु (भवेत्); **समु.**११२ वैभाज्य (वैभाव्य) दान (दातु).

(१) **समु.**१११.

क्रयविक्रयानुशयः

विक्रीयासंप्रदानम्

वेदाः

अल्पमूल्येन विक्रयोत्तर समयाभावेऽनुशयो न कार्यः

भूयसा वस्नमचरत्कनीयोऽविक्रीतो अकानिषं पुनर्यन्। स भूयसा कनीयो नारिरेचीदीना दक्षा वि दुहन्ति प्र वाणम्॥

अत्र ऋग्द्वये संप्रदायविद्भिः पूर्वाचार्यैः केचित् श्लोकाः पठ्यन्ते। ते एव लिख्यन्ते। 'अल्प यः परिगृह्णाति मूल्य पण्येन भूयसा। स क्रेतारं पुनर्गच्छेन्न विक्रीतरूवयं मया॥ इति ब्रुवन्कामयते पुनर्मूल्यस्य पूरणम्। स विक्रेता पुनर्मूल्यं भूयसा न प्रपूरयेत्॥ हीनं न लभते वस्न यदा विक्रीतवान्पुरा। यथासमयमेव स्यात्तयोर्न पुनरन्यथा॥ अयं विक्रय एवेति समयश्चेत् कृतो भवेत्। अथ मूल्यार्थमेतत्स्याद्विचार्यैव तु निर्णयः॥ इत्येवं समयोऽकारि तदा मूल्यं प्रपूर्यते। तस्मादादौ मया कार्यः समयोऽत्रेति चिन्तयन्॥ वामदेवो वशीकृत्य शक्रं स्तोत्रेण भूयसा। विक्रीणन् समयं चक्र इन्द्रं क इममित्यृचि। अतश्च ऋच एकार्थो भूयसा वस्नमित्ययम्' इति॥ अयमर्थः प्रतिपाद्यते कश्चित् भूयसा भूम्ना पण्येन द्रव्येण कनीयः अल्पतरं वस्नं वसु मूल्यं धनं, अचरत् प्राप्नोति। पुनर्यन् क्रेतारं पुनर्गच्छन् स विक्रेताऽयमर्थो मया अविक्रीतः इति ब्रुवन् अकानिषं मूल्यपूर्तिं कामयते। व्यत्ययेन उत्तमपुरुषः। स विक्रेता भूयसा धनेन कनीयः अल्पतरं मूल्यं नारिरेचीत् क्रेतुः सकाशान्न रिक्तीकरोति। न लभत इत्यर्थः। दीनाः असमर्थाः दक्षाः समर्थाश्च वाण वचन वि प्र दुहन्ति यथोक्त क्रयकाले तथैव लभन्ते। ऋसा.

कं इमं दशभिर्ममेन्द्रं क्रीणाति धेनुभिः।
यदा वृत्राणि जङ्घनदथैनं मे पुनर्ददत्॥

मम मदीय इमं स्वभूतं इन्द्र धेनुभिः प्रीणयित्रीभिः दशभिः दशसंख्याकाभिः स्तुतिभिः कः क्रीणाति क्रयं करोति। तदानीं हे क्रेतारो युष्माक मध्ये एवमपि समयः क्रियते। यदा अयमिन्द्रः वृत्राणि त्वदीयान् शत्रून् जङ्घनत् हन्यात् अथ अनन्तरमेव एनं इन्द्रं मे मह्य पुनर्ददत् पुनर्दद्यात्। ऋसा.

विष्णुः

गृहीतमूल्येऽनुशये दण्डः

गृहीतमूल्यं यः पण्यं क्रेतुर्नैव दद्यात्तस्यासौ सोदयं दाप्यः। राज्ञा च पणशतं दण्ड्यः।

गृहीतं मूल्यं विक्रेत्रा यस्य पण्यस्य तद्गृहीतमूल्यं तस्य तस्मै क्रेत्रे इति यावत्। असौ गृहीतमूल्यस्य विक्रयानुशयाभावेऽप्यनर्पकः। स्मृच.२१८

अर्धवशादधिकं चेत्क्रेतारं प्रत्यर्पणकाले प्रापयेत्।

कौटिलीयमर्थशास्त्रम्

विक्रीयासप्रदानम्

विक्रीतक्रीतानुशयः। विक्रीय पण्यमप्रयच्छतो द्वादशपणो दण्डः अन्यत्र दोषोपनिपाताविषह्येभ्यः।

पण्यदोषो दोषः। राजचोराग्न्युदकबाध उपनिपातः। बहुगुणहीनमार्तकृतं वाविषह्यम्।

वैदेहकानामेकरात्रमनुशयः। कर्षकाणां त्रिरात्रम्। गोरक्षकाणां पञ्चरात्रम्। व्यामिश्राणां उत्तमानां च वर्णानां वृत्तिविक्रये सप्तरात्रम्।

---

(१) ऋसं.४।२४।९. (२) ऋसं.४।२४।१०.

(१) **विस्मृ** ५।१२६-१२७ यः पण्यं (पण्य यः); **अप.** २।२५४; **व्यक.**१६७; **स्मृच.**२१८ यः (यत्); **विर.** १९०; **पमा.**३६७ च (चापि), **दीक.**५३ तस्यासौ (स्स तस्मै) च (तु); **विचि.**८७ त्य (त्य·); **वीमि.**२।२५७ तुनैंव (तुर्वै); **व्यप्र.**३४३ तस्यासौ (त्तस्य); **सेतु.**१७९ त्य (त्यो) त्तस्यासौ (तस्मै); **समु.**१०६; **विव्य.**४३ त्यं (त्यो) नैंव (नैं).

(२) **सवि.**३१०. (३) **कौ.**३।१५.

आतिपातिकानां पण्यानामन्यत्राविक्रेयमित्यविरोधेनानुशयो देयः। तस्यातिक्रमे चतुर्विंशतिपणो दण्डः, पण्यदशभागो वा।

क्रीत्वानुशयः

क्रीत्वा पण्यमप्रतिगृह्णतो द्वादशपणो दण्डः, अन्यत्र दोषोपनिपातेभ्यः। समानश्चानुशयः विक्रेतुरनुशयेन।

विवाहेऽनुशयः

विवाहानां तु त्रयाणां पूर्वेषां वर्णानां पाणिग्रहणासिद्धमुपावर्तनम्। शूद्राणां च प्रकर्मणः। वृत्तपाणिग्रहणयोरपि दोषमौपशायिकं दृष्ट्वा सिद्धमुपावर्तनम्। न त्वेवाभिप्रजातयोः।

कन्यादोषमौपशायिकमनाख्याय प्रयच्छतः षण्णवतिर्दण्डः शुल्कस्त्रीधनप्रतिदानं च।

वरयितुर्वा वरदोषमनाख्याय विन्दतो द्विगुणः शुल्कस्त्रीधननाशश्च।

द्विपदचतुष्पदेषु अनुशयः

द्विपदचतुष्पदानां तु कुष्ठव्याधिताशुचीनामुत्साहस्वास्थ्यशुचीनामाख्याने द्वादशपणो दण्डः।

आ त्रिपक्षादिति चतुष्पदानामुपावर्तनम्, आ संवत्सरादिति मनुष्याणाम्। तावता हि कालेन शक्यं शौचाशौचे ज्ञातुमिति।

दाता प्रतिग्रहीता च स्यातां नोपहतौ यथा।
दाने क्रये वानुशयं तथा कुर्युः सभासदः॥

विक्रीतक्रीतानुशय इति सूत्रम्। मूल्यग्रहणेन दत्त विक्रीत मूल्यदानेन गृहीतं क्रीतं तयोरनुशयो विसवादोऽभिधीयत इति सूत्रार्थः। क्रयविक्रयविधिरध्यक्षप्रचारे प्रतिपादितः। तद्विपयोऽनुशयोऽनुशयदण्डश्चानुक्ताविहाभिधीयेते। दोषादीन् व्याचष्टे—पण्यदोषो दोष इत्यादि। बहुगुणहीन बहुगुणा मूल्यहानिं प्राप्तम्। आर्तकृतं अस्वस्थमानसकृतम्। वृत्तिविक्रये स्वजीविकाहेतुभूतभूमिविक्रये। आतिपातिकानामिति। कालपरिवासासहाना सद्योविक्रेयाणा, पण्याना पुष्पक्षीरादीनाम्, अन्यत्राविक्रेयमिति परिवासदोषात् तथाविधं पण्यमन्यत्र विक्रेतुमर्हं न भवेदित्येतत् पर्यालोच्य, अविरोधेन तत्तत्पण्यरक्षानुकूल्येन, अनुशयो देयः। विवाहानां त्रिति। त्रयाणा पूर्वेषां वर्णानां ब्राह्मणक्षत्रियवैश्यानां, विवाहानां विवाहविषये, पाणिग्रहणासिद्धमुपावर्तनं पाणिग्रहणेनावरुद्धं पाणिग्रहणावधिकं कन्याप्रत्याहरणं भवति। पाणिग्रहणात् सिद्धमिति पाठे पाणिग्रहणमवधीकृत्येति ल्यब्लोपे पञ्चमी। शूद्राणां च, प्रकर्मणः योनिक्षतिमवधीकृत्य, उपावर्तनं भवति। वृत्तपाणिग्रहणयोरपीति। तथाभूतयोरपि स्त्रीपुंसयोः, दोषमौपशायिकं उपशायिकासंबद्धं दोष योनिक्षतिक्लैब्यादिरूपं दृष्ट्वा साक्षात्कृत्य, सिद्धमुपावर्तनम्। न त्वेवाभिप्रजातयोरिति। जनितप्रजयोरुपावर्तन नास्त्येव। कन्यादोषमित्यादि। षण्णवतिः षण्णवतिपणः। शुल्कस्त्रीधनप्रतिदान च शुल्कस्त्रीधनयोर्गृहीतयोः प्रत्यर्पण च। वरयितुर्वेत्यादि। विन्दतः परिणयतः। द्विपदचतुष्पदाना त्विति। तेषा, कुष्ठव्याधिताशुचीनाम्, उत्साहस्वास्थ्यशुचीनामाख्याने उत्साहस्वस्थशुचित्वकथने, द्वादशपणो दण्डः। आ त्रिपक्षादितीति। पक्षत्रयावधिकमित्येवं चतुष्पदानामुपावर्तनम्। आ सवत्सरादिति सवत्सरावधिकमित्येव, मनुष्याणामुपावर्तनम्। तावता हीत्यादि। शौचाशौचे दुष्टत्वमदुष्टत्वं च। श्रीमू.

कन्योपधिः विवाहे

कन्यामन्यां दर्शयित्वाऽन्यां प्रयच्छतः शत्यो दण्डस्तुल्यायां, हीनायां द्विगुणः।

कन्यामन्यामित्यादि। तुल्याया सजातीयाया सत्याम्। हीनाया हीनजातीयाया सत्याम्। श्रीमू.

मनुः

क्रयविक्रयानुशये परीक्षाकालः

क्रीत्वा विक्रीय वा किंचिद्यस्येहानुशयो भवेत्।
सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वा॥

(१) **कौ.** ४।१२.

(२) **मस्मृ.**८।२२२; **विश्व.**२।१८१ किंचिद् (द्रव्यं) चैवा (चोपा); **मिता.**२।१७७ त वा (त च); **अप.**२।२५८ हात्त (हे त); **व्यक.**१६७ अपवत्; **स्मृच.**२१९ चिद्य (च य) वाददीत वा (व ददाति च); **विर.**१९०अपवत्; **पमा.**३६४; **सुबो.**२।२५४प्रथमपाद विना; **रत्न.**१०४; **विचि.**८८ अपवत्; **चन्द्र.** ५८ किंचिद् (पण्य) हात्त (हे त); **वीमि.**२।१७७ चन्द्रवत्; २।२५७ अपवत्; **व्यप्र.**३४१; **व्यउ.**९३; **विता.**६१३

(१) यत्तु स्वायंभुवं 'क्रीत्वेत्यादि' तत् परीक्ष्य क्रीते द्रष्टव्यम् । विश्व.२।१८१

(२) यद्द्रव्यं प्रचुरक्रयविक्रयं व्यवहारकाले च गच्छति न नश्यति मूल्यतश्च नापचीयते त्रपुताम्रभाण्डादि स्थिरार्घं तादृशस्यानुपभुक्तस्य दशाहमध्ये आदानप्रत्यर्पणे । यत्तु विरलक्रेतृकं कैश्चिद्देवयात्रोत्सवादौ विक्रीयते अनियतार्घं च तस्य तदहरपरेद्युर्वा । फलकुसुमादौ तु तत्क्षण एवानुशयः पश्चात्तापः । क्रीत्वा यस्यानुशयो न ममैतदुपयुज्यते स दशाहमध्ये दद्यात् । विक्रेता प्रतीपं गृह्णीयात् । विक्रेतुरनुशये आददीत । न मया साधु कृतं यद्विक्रीतमिति । तदा क्रेता तस्मै प्रतिपादयितव्यः । एकस्थानवासिना चैष कालो देशान्तरवासिना तात्कालिकी प्रतिनिवृत्तिः । केचिद्दोभूम्यादिविषय विधिमिममिच्छन्ति । न वस्त्रादौ । स्मृत्यन्तरे हि वाणिक्कप्यष्येऽन्यो विधिराम्नायते । एवं नारदः पठति 'क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतमिति मन्यते । विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाहन्यवेक्षितम् ॥ इति । द्वितीयेऽह्नि ददत्क्रेता मूल्यात्पंशाशमावहेत् । द्विगुण तत्तृतीयेऽह्नि परतः क्रेतुरेव तत्' ॥ विक्रयार्थं यद्द्रव्य तत्पण्य, यद्विक्रीय तदुत्पन्नेन द्रव्यान्तरक्रयादिना पुरुषो व्यवहरति जीविकाधनमर्जयितु तथा पणभूमौ प्रसारितमप्रसारित च भवति वणिजा, तत्रेह पण्यग्रहणात्किञ्चिद्विशेषो विवक्षितः । इतरथा क्रीत्वा मूल्येन इत्येतावदुपेक्ष्यम् । कः पुनरसौ विशेषः? उच्यते, यत्क्रीतमपि पण्यत्वमजहद्वणिग्भिः विक्रीयते, तर्हि विक्रयार्थमेव क्रीणन्ति। तेषा वणिजामितरेतरक्रीणता विक्रीणाना च नारदीयो विधिरन्येषा मानव इति केचित् । किं पुनरत्र युक्तम् । पण्यधर्मादैर्व्यवस्था वाऽनुसरणीया । तथा चाश्वाना बलसंचारो हस्तिनामङ्कुशारोहणं विक्रयविभावकमित्यादिना व्यवहारस्तेषु पण्येषु सिद्धो भवति । अविक्षितमविनष्टमुपनिध्यादौ वस्त्रादेर्यावन्मात्र नाशस्तावतो मूल्यमुपनिधात्रे दीयते, द्रव्य तु गृह्णातीह त्वीपन्नाशेऽपि सर्वं मूल्यं देयं क्रेतुः । ÷मधा.

(३) तदुक्तलोहादिव्यतिरिक्तोपभोगाविनश्वरगृहक्षेत्रयानशयनासनादिविषयम् । सर्वं चैतदपरीक्षितक्रीतविषयम् । ×मिता.२।१७७

(४) किञ्चिद्द्रव्यं विनश्वररूप स्थिरार्घं भूमिताम्रपट्टादि । ममु.

(५) अनुशयोऽकरणमतिः पश्चात्ताप इत्यन्ये । विर.१९१

परीक्षाकालोत्तरमनुशये दण्डः

परेण तु दशाहस्य न दद्यान्नापि दापयेत् ।
आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षट् ॥

(१) दशाहात्परतो न । क्रेता जातानुशयश्चापि विक्रेता यदि राजनि विवदेता तौ ततः षट् शतानि दण्ड्यौ । न दद्यादिति नायमदृष्टार्थः प्रतिषेधः । किं तर्हि ज्ञायते स्थितिरीदृशी । अनिच्छन् क्रेता दशाहादूर्ध्वं न त्याजनीयो नापि विक्रेता ग्राहयितव्यः । अतश्च यदि साम्नोभयेच्छाया दानादाने स्याता तत्र न कश्चिद्दोषः । +मेधा.

(२) उपभोगेनाविनश्वरेषु स्थिरार्घेष्वनुशयकालातिक्रमेणानुशय कुर्वतो मनूक्तो दण्डो द्रष्टव्यः । *मिता.२।२५८

(३) दशाहस्य परेणेति बीजविषयम् । वस्त्राद्यरत्नदोह्यपुरुषस्त्रीषु एकपञ्चसप्तव्यहमासार्धमासानामवधीनां स्मृत्यन्तरे उक्तत्वात् । नाददीत विक्रीत वस्त्वादातुं न यतेत । शतानि पणानाम् । मवि.

(४) वास्तवानुशयकारणसद्भावविषयमेतद्दानादान मूल्यदशमाशदानायुक्तेः । स्मृच.२१९

÷ गोरा., ममु., मच., भाच. पदार्थाः मेधावत् ।
× विर., पमा , व्यप्र. मितावत् ।
+ ममु., मच., नन्द. मेधावत् । * पमा. मितावत् ।

(१) **मस्मृ.**८।२२३ ख. पुस्तके ण्ड्यः (ण्ड्यौ); **विश्व.** २।१८५ राज्ञा दण्ड्य. (दण्ड्यो राज्ञा); **मिता.**२।२५८; **अप.** २।२५८ ऋापि (अ च) दण्ड्यः (ड्याप्यः); **व्यक.**१६७ ऋापि (ऋैव), **स्मृच.**२१९; **विर.**१९१ ऋापि (ऋैव), **पमा.**१६४; **रत्न.**१०४; **विचि.**८८ न(ना) ऋापि (ऋैव), **वीमि.**२।१७७ विचिवत्; **व्यप्र.**३४१; **व्यउ.**९४ शा (शो): ९६; **मिता.** ६११; **सेतु** ३२१ विरवत्; **समु.**१०७; **विव्य.**४४ **विरवत्.**

(५) दशाहग्रहणं परीक्षाकालस्य पूर्वोक्तस्योपलक्षणम्। सर्वमेतदपरिभाषणे। परिभाषणे तु तदनुसारेणैव प्रतिदानतदभावादिकं मन्तव्यम्। व्यप्र.३४१

स्याच्चतुर्विंशतिपणो दण्डस्तस्य व्यतिक्रमे।
पणस्य दशमे भागे दाप्यः स्यादतिपातिनि॥
क्रीत्वा विक्रीय वा पण्यमगृह्णन्ननुतप्यते तथा।
पणाद्द्वादश दाप्यश्च मनुष्याणां च वत्सरान्॥
पणाद्द्वादश दाप्यः स्यात्प्रतिबोधे न चेद्ब्रवेत्।
पशूनामप्यनाख्याने त्रिपदादर्पणं भवेत्॥

पण्यानुशयधर्मस्यान्यत्र वेतनादिष्वतिदेशः

यस्मिन्यस्मिन्कृते कार्ये यस्येहानुशयो भवेत्।
तमनेन विधानेन धर्म्ये पथि निवेशयेत्॥

न केवलं वणिजां पण्यधर्मोऽयं दशाहिकोऽनुशयः। किं तर्हि। वेतनसंविद्वृद्धिप्रयोगादिषु, यस्मिन् यस्मिन्निति वीप्सयाऽशेषकार्यपरिग्रहोऽनेन विधानेन दाशाहिकेन विधिना। धर्मादनपेतो धर्म्यः पन्था मार्गः। निवेशयेत्स्थापयेद्राजा। अतिदेशोऽयं कृते कार्ये इति। प्रक्रान्ते पुनः सर्वेण सर्वनिवृत्तेः। तत्र ह्यनुशयो भवेत्। स च निरूपिते स्थापिते वाऽन्तरेऽनुशयो दशाहप्रतीक्षणम्। यत्र पुनर्वृद्ध्यर्थं धनं नीतमृत्विक् च वृतो वेतनं च यद्दत्तं कृतसमये विरोध आरब्धस्तत्र नायं धर्म इति केचित्। न हि कृतमकृतं भवति। एतच्च न कृतं निवृत्तमुच्यते। न प्रक्रान्तम्। न ह्ययं 'आदिकर्मणि क्तः'। न हि मुख्यार्थत्यागे कारणमस्ति। यत्तु कृतं नाकृतं भवतीति कृतमपि तत्साध्यकार्यप्रतिषेधादकृतमेव। यथा भुक्तं वान्तमिति लौकिकेष्वपि पदार्थेषु शास्त्रावसेयव्यवस्था। केषु शास्त्रत एव निवृत्त्यनिवृत्ती विज्ञेये। अथापि वृत्ताः पदार्थास्तथापि प्रत्याहरणं विधीयते। निष्पन्नेऽपि धनप्रयोगे स्वस्थाननीतेष्वपि रूपकेषु प्रत्यानयनं कर्तव्यमन्यतरानुशयात्। क्षयव्ययाः शास्त्रधर्मेण नीतेषु वोढव्याः। तथा च गृहीतमात्रेषु मासिकीं वृद्धिमिच्छन्ति। यत्रैवं बन्ध एष भोक्तव्य इयन्तं कालमित्येवमाद्यन्तर्दशाहमनुशये निवर्त्यते। ऋत्विजां तु वरणं विवाह इव कन्यानां संविदे दशाहादूर्ध्वं प्रवर्तितव्यमस्मिन् शास्त्रे सति। ×मेधा.

विवाहे कन्योपधिविषयेऽनुशयः

अन्यां चेद्दर्शयित्वाऽन्या वोढुः कन्या प्रदीयते।
उभे त एकशुल्केन वहेदित्यब्रवीन्मनुः॥

(१) विक्रयप्रकारत्वाच्छुल्कदेयायाः कन्याया अस्मिन्नवधौ धर्म उच्यते। शुल्ककाले रूपवतीं दर्शयित्वा गृहीतशुल्को यस्य रूपहीनां ददाति वयोहीनां गुणहीनां वा तस्योभेऽपि शुल्कदेनैकेन शुल्केन हर्तव्ये। कन्यानामेवायं धर्मः। गवाश्वादिद्रव्याणां त्वस्मिन्व्यतिक्रमेऽन्यो विधिर्वक्ष्यते। +मेधा.

(२) प्रदीयते शुल्केनानेनेति उन्मत्तादिदोषवत्यपि प्रथम दोषकथने दण्डो नास्ति नापि निवृत्तिः। एतच्च द्रव्यान्तरेऽपि द्रष्टव्यं न्यायसाम्यात् कन्यापदस्योपलक्षणत्वात्। मवि.

(३) आर्षेयादिविवाहेषु कन्यायाः शुल्कं प्राप्तमनूद्य तत्र विशेषमाह— अन्या चेदिति। मच.

नोन्मत्ताया न कुष्ठिन्या न च या स्पृष्टमैथुना।
पूर्वं दोषानभिख्याप्य प्रदाता दण्डमर्हति॥

(१) उन्मत्तादिदोषान्कथयित्वा ददतो दण्डो नास्तीति प्रतिषेधद्वारेणाकथयतो दण्डमाह। न केवलं शुल्के देयाया अन्यस्या अपि ब्राह्मादिविवाहेन विवाहयिष्यमाणायाः। दत्ताऽप्यदत्ता भवति दण्डश्च। 'प्राप्नुयाच्चौरकिल्बिषमि'ति जानानस्य। अजानतः षट्शतं प्रकृतत्वात्। उन्मत्तायाः कुष्ठिन्या ये कुष्ठोन्मादादयः या च स्पृष्टमैथुना तस्याश्च यो दोषो मैथुनस्पर्शस्तान्दोषान्पूर्वं वाक्प्रदानेऽभिख्याप्य प्रकाश्यैतद्दोषा कन्येत्येवमुक्त्वा ददतो नास्ति दण्ड इति पदयोजना। मेधा.

---

(१) **मस्मृ.**८।२२३ इत्यस्योपरिष्टादेते प्रक्षिप्तश्लोकाः।

(२) **मस्मृ.**८।२२८ र्म्ये (र्मे); **व्यक.**१६७ मस्मृवत्; **स्मृच.**२१९; **विर.**१९१; **विचि.**८८; **चन्द्र.**५८ तम (तद); **सेतु.**१८४; **समु.**१०७; **विव्य.**४४.

× गोरा., मवि., स्मृच., ममु., विर., चन्द्र., मच., नन्द. एषु अतिदेशव्याख्यानं मेधावत्।

+ गोरा., ममु., नन्द., भाच. मेधावत्।

(१) **मस्मृ.**८।२०४; **नन्द.**उद्वहेदिति पाठः.

(२) **मस्मृ.**८।२०५ ख. पुस्तके त्ताया (त्तया); **भाच.** अभि (अवि).

१ शुल्कादेयौ यत्कन्या. २ णक. ३ दानेनाख्या.

(२) दण्डं, 'यस्तु दोषवतीमि'ति वक्ष्यति। ×गोरा.

यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति।
तस्य कुर्यान्नृपो दण्डं स्वयं पण्णवतिं पणान्॥

(१) या कन्या दोषैर्युक्ता सा च दात्रा वराय नाख्यायते न प्रकाश्यत एवमेव दीयते, तत्र दातुर्दण्डो विदिते राज्ञा कार्यः। स्वयंग्रहणमादरार्थम्। कन्यादोषाश्च धर्मप्रजासामर्थ्यविघातहेतवः, क्षयो व्याधिर्मैथुनसंबन्धश्च। नोन्मत्ताया इत्येतत्प्रकरणोक्तो दण्डोऽयं वा। मेधा.

(२) यस्त्विति। पूर्वोक्तकन्याविक्रयविषयदण्डसामान्यस्य विशेषोक्तिरियमत्र। तस्य संगतिसंभवात्। कुर्यात् दण्डम्। अर्थात्कन्यामपि प्रतिपादयेत् पूर्वकृतशुल्कं वरो न दद्यात्। मवि.

(३) अनुशयप्रसंगेनैतत्कन्यागतमुच्यते। *ममु.

(४) अनुपक्रान्तमपि क्रयविक्रयसाधर्म्यात्कन्याप्रदानविषयं विवादमाह—यस्तु दोषवतीमिति। स्वयं कन्याभर्त्रादिभिरनिवेदितोऽपि। नन्द.

अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन्॥

(१) अकन्या वृत्तमैथुनसंबन्धेति यो वदेत्तं च दोषं न भावयेत्तदा शतं कार्षापणं दण्ड्यः। अन्ये मन्यन्तेऽस्यत्वाद्दण्डस्य महत्वाच्चाक्रोशस्येति करणस्य च पदार्थविपर्ययेऽसकृत्त्वेन दर्शनादकन्येति शब्दस्वरूपं विवक्षितम्। अकन्येयमित्येतेनैव शब्देनाक्रोशेत्तस्य शतं दण्डः। कः पुनरत्र विशेषः? उच्यते। स इदं वादी पृच्छ्यते कथमियमकन्येति। स चेद्ब्रूयान्निर्लज्जा नृशंसाऽश्लीलवादिनी नैष कन्यानां धर्मः। एतच्च न साधयेत्तदाऽयं दण्डः कन्यागुणनिषेध उक्ते सति। अथवा कन्याशब्दं प्रथमवयोवचनमाश्रित्य परोक्षे प्रार्थयमानस्य ब्रूयात्किं तावन्नासौ कन्या अतिस्वल्पा वृद्धा वा, तत्र कन्या दत्ता यदि राजानं ज्ञापयेदभिरूपतमा कन्या मदीया प्रार्थ्यमानाऽनेन तस्यामभिलाष एवमुक्तं अथ पराजितं तत्र प्राप्तकालाया यद्येवमुक्तं तदा पराजितस्यायं दण्डः। +मेधा.

(२) अकन्या नेयं स्त्री किं तु क्लीबमिति। मवि.

कन्याविषयानुशयमर्यादा समाप्ता

पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः।
नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः॥

(१) पाणिग्रहणं विवाहो दारकर्म। मन्त्राणां तत्र विद्यमानत्वात्स चाग्निमयक्षतेत्येताभ्यां संबन्धेनासाविवाहे प्रागकर्तृत्वं दर्शयति। परमार्थतस्तु विवाहविधौ कन्यामुपयच्छेदिति विहितं तादृशमेवार्थं मन्त्रा अभिवदन्ति। न पुनर्मन्त्रेषु कन्याशब्दश्रवणात्कन्यानां विवाहः मन्त्राणामविधायकत्वात्। एष एवार्थस्तद्विपरीतप्रतिषेधमुखेन दृढीक्रियते। नाकन्यासु क्वचिन्नृणाम्। न कस्यांचिद्वेदशाखाया मनुष्याणामकन्याविषयो विवाहः श्रुतः। लुप्तक्रियाः यासां धर्मेऽग्निहोत्रादावपत्योत्पादनविधौ चाधिकारो नास्त्यतस्ता न विवाह्याः। अतः कन्यामकन्येति वदन्महता दण्डेन योजनीय इति पूर्वश्लोकादनन्तरमुच्यते। अप्राप्तमैथुना स्त्री कन्योच्यते। मेधा.

(२) अकन्या तु यदि सा वस्तुतः स्यात्तदा त्याज्यैवेत्युपपादयति—पाणिग्रहणिका इति। कन्यास्वेव कन्याविषयाः। एवं नाकन्यासु क्लीबेषु। मवि.

(३) युक्तश्चास्याकन्येति वादिनो दण्डो यस्मात् पाणिग्रहेति। 'अर्यमणं नु देवं कन्या अग्निमयक्षत' इत्येवमादयो वैवाहिका मनुष्याणा मन्त्राः कन्याशब्दश्रवणात्कन्यास्वेव व्यवस्थिताः। नाकन्याविषये। क्वचिच्छास्त्रे धर्मविवाहसिद्धये व्यवस्थिताः असमवेतार्थत्वात्। अत एवाह। ताः क्षतयोनयो वैवाहिकमन्त्रैः संस्क्रियमाणा अपि यस्मादपगतधर्मविवाहादिशालिन्यो भवन्ति। नासौ धर्म्यो विवाह इत्यर्थः। न तु क्षतयोनेर्वैवाहिकमन्त्रहोमादिनिषेधकमिदम्। 'या गर्भिणी संस्क्रियते'

× शेष मेधावत्। ममु., मच. गोरावत्।

* शेषं मेधावत्।

(१) **मस्मृ.**८।२२४; **बाल.**२।२८९; **समु.**११९, १५७ य प्रयच्छति (योपपादयेत्).

(२) **मस्मृ.**८।२२५; **समु.**१५७.

+ गोरा., ममु., मच., नन्द. मेधातिथेः प्रथमकल्पवत्।

(१) **मस्मृ.**८।२२६; **मभा.**२८।१८ पू.; **बाल.**२।२८९. १ मुक्त्वा.

तथा 'बोढुः कन्यासमुद्भवम्' इति क्षतयोनेरपि मनुनैव विवाहसंस्कारस्य वक्ष्यमाणत्वात्। देवलेन तु 'गान्धर्वेषु विवाहेषु पुनर्वैवाहिको विधिः। कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः'॥ इति गान्धर्वेषु विवाहेषु होममन्त्रादिविधिरुक्तः। गान्धर्वैश्चोपगमनपूर्वकोऽपि भवति। तस्य क्षत्रियविषये सुधर्मत्वं मनुनोक्तम्। अतः सामान्यविशेषन्यायादितरविषयोऽयं क्षतयोनिविवाहस्याधर्मत्वोपदेशः। +ममु.

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे*॥

(१) दारा भार्या तस्या लक्षणं निमित्तं विवाहमन्त्रास्तैस्तत्र प्रयुक्तैर्विवाहाख्यः संस्कारो निर्वर्तते। द्विजातीनां पुनर्मन्त्राः। तत्र शूद्रस्य दारप्रसङ्गो, न हि तस्य मन्त्राः सन्ति मन्त्रवर्जं सर्वान्येतिकर्तव्यताऽस्ति। अतो विवाहाख्यसंस्कारोपलक्षणं मन्त्रास्तेषां मन्त्राणां निष्ठा समाप्तिः सप्तमे पदे विज्ञेया लाजाहोममभिनिर्वर्त्य त्रिःप्रदक्षिणमग्निमावर्त्य सप्तपदानि स्त्री प्रक्रम्यते 'एप एकपदी भव' इत्यादि यावत् 'सखा सप्तपदी भवे'ति। तस्मिन्प्रक्रान्ते कन्यायाः पदे कन्यापितुर्बोढुर्वाऽनुशयो नास्ति। उन्मादवत्यपि भार्यैव। न त्याज्या। मैथुनवत्यास्तु नैवासौ विवाहः। सत्यपि लाजाहोमादावितिकर्तव्यतास्वरूपे न भार्या सा। अतस्तत्र द्रव्यान्तरवदनुशयः। यथा च शूद्रकर्तृकेणाधानेन नाहवनीयो भवति। सपिण्डायाश्च कृतेऽप्यग्निसंस्कारे न विवाहस्वरूपत्वं, तत्र तु प्रसिद्धम्–'संस्कारकरणादेव प्रायश्चित्तीयते पुमान्'। कन्या चान्यस्याप्यविवाह्या, वसिष्ठवचनात्। यदि प्रजनविघातरोगगृहीतामूढ्वा न त्यजति का तर्हि गतिः। सत्यधिकारे अन्यामुद्वाहयिष्यति। तद्यस्त्वप्रियवादिनीतिवत्। कृते तु जातपुत्रायामाधाने यदि क्षयो व्याधिः स्यात्तथापि नैनामधिविन्देदधिवेदनिमित्तानां परिगणनात्। तत्रापि यदि 'कामतस्तु प्रवृत्तानाम्' इत्येतत्प्रयोजकमिष्यते न निवारयामस्तेनैव संक्षेपतः कन्यानां धर्मो यथाऽन्येषां द्रव्याणां दशाहादूर्ध्वमपि साम्ना प्रत्यर्पणं, नैवं कन्याना कृतविवाहानां शुल्कदेयानामपि, प्राग्विवाहाद्द्रव्यान्तरधर्मः। या तु धर्माय दीयते तस्या नैवानुशय इति वचनात्। तत्रापि 'दत्तामपि हरेत्कन्या ज्यायाश्चेद्वर आव्रजेत्' इत्यस्त्येवापहार आ सप्तमपदात्। सप्तमे तु पदे दानानिवृत्तेर्गवादिद्रव्यदानवन्नास्त्यपहारः। अथैवं केनचित्कस्मैचिद्वि दत्ताया न तयोरन्योन्येच्छयाऽनुशयो दानादाने, दानस्य तदानीमेव निवृत्तत्वात्। प्रतिगृहीतं चेद्दात्रे पुनः प्रयच्छेत्तद्दानान्तरमेव तत्स्यान्न पूर्वदाननिवृत्तिः। एवं सगुणयोः कन्यावरयोर्नान्योन्येच्छया त्यागोऽस्ति प्रागपि विवाहात्। विवाहे कृते दोषवत्या अपि नास्ति त्यागः कन्यायाः। सृष्टमैथुना या कन्यैव न भवत्यतोऽसौ त्यज्यते। कन्याया यतो विवाहो विहितो विवाहश्चोपभोगस्थानीयो यथा परिभुक्तं वस्त्रमन्तर्दशाहमपि नैव विक्रेतेऽर्प्यते तथैव कन्या कृतविवाहा। पुनश्चायमर्थो निर्णेष्यते 'सकृत्कन्या प्रदीयत' इत्यत्रान्तरे। +मेधा.

(२) पाणिग्रहणिका मन्त्रा नियतमिति। ववाहिका मन्त्राः निश्चितं भार्यात्वे निमित्तं तैः प्रयुक्तैर्भार्या भवति तेषा पुनर्मन्त्राणा सखा सप्तपदी भवेति मन्त्रेण कन्यायाः सप्तमे पदे दत्ते सति शास्त्रज्ञैः समाप्तिर्बोद्धव्यैव च। सप्तमात्पदादर्वागकन्यात्वपरिज्ञानेऽनुशये स त्यजेन्नोर्ध्वं, कानीनसहोढगूढोत्पन्नाना शास्त्रे वोढुः पुत्रदर्शनात्। गोरा.

(३) किंच सप्तपदीगमनात्प्राग्दोषदर्शने कन्याया अशुल्काया अपि त्याग इत्युपपादयति—पाणिग्रहणिका इति। दारलक्षणं दारहेतुः। निष्ठा अनिवर्तमानोचिता समाप्तिः। मवि.

याज्ञवल्क्यः

गृहीतमूल्यपण्यविक्रेत्रनुशयः

गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति।
सोदयं तस्य दाप्योऽसौ दिग्लाभं वा विगागते॥

+ मच. ममुवद्भावः।

* ममु., मच., भाच. एषु रप्टमैथुनकन्याविषयेऽनिर्णयः।

(१) **मस्मृ.**८।२२७; **बाल.**२।१२७.

+ नन्द. मेधावद्भावः।

(१) **यास्मृ.**२।२५४; **अपु.**२५८।४४; **विश्व.**२।२६० दिगा (दिशां); **मिता.**; **अप.**; **स्मृच.**२१८ यः (यत्) चतुर्थपादं विना; **पमा.**३६५; **रत्न.**१०४; **नृप्र.**२९ यः पण्यं

(१) क्रयविक्रयप्रसंगात् विक्रीयासंप्रदानमिदानीमाह—गृहीतमूल्यमिति । यदि दत्त्वान्यथामूल्यं क्रेता पण्यं न गृह्णीयात्, तदा क्रेतुरेव दोषः। अन्यथा तु विक्रेतुरेवेत्यभिप्रायः। विश्व.२।२६०

(२) प्रासङ्गिकं परिसमाप्याधुना विक्रीयासंप्रदान प्रक्रम्यते। तत्स्वरूपं च नारदेनाभिहितम्। तत्र विक्रेयद्रव्यस्य चराचरभेदेन द्वैविध्यमभिधाय पुनः षड्विधत्वं तेनैव प्रत्यपादि। एतत्षट्प्रकारकमपि पण्यं विक्रीयासंप्रयच्छतो दण्डमाह— गृहीतमूल्यमिति। गृहीतं मूल्यं यस्य पण्यस्य विक्रेत्रा तद्गृहीतमूल्यं तद्यदि विक्रेता प्रार्थ्यमानाय स्वदेशवणिजे क्रेत्रे न समर्पयति, तच्च पण्यं यदि क्रयकाले बहुमूल्यं सत्कालान्तरेऽल्पमूल्येनैव लभ्यते, तदाऽर्घह्रासकृतो य उदयो वृद्धिः पण्यस्य स्थावरजङ्गमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः। यदा मूल्यह्रासकृतः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावदेव यतो मूल्यस्येयत्पण्यमिति प्रतिपन्नं तावदेव, तदा तत्पण्यमादाय तस्मिन्देशे विक्रीणानस्य यो लाभस्तेनोदयेन सहितं द्विक त्रिकमित्यादिप्रतिपादितवृद्धिरूपोदयेन वा सहितं क्रेतुर्वाञ्छावशादापनीयः। यथाह नारदः—'अर्घश्चेदत्र हीयेत सोदयं पण्यमावहेत्। स्थानिनामेष नियमो दिग्लाभ दिग्विचारिणामि'ति॥ यदा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मिन्पण्ये वस्त्रगृहादिके य उपभोगस्तदाच्छादनसुखनिवासादिरूपो विक्रेतुस्तत्सहितं पण्यमसौ दाप्यः। यथाह नारदः – 'विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति। स्थावरस्य क्षये दाप्यो जङ्गमस्य क्रियाफलमि'ति॥ विक्रेतुरुपभोगः क्षय उच्यते। क्रेतृसंबन्धित्वेन क्षीयमाणत्वात्। न पुनः कुड्यपातसस्यघातादिरूपः। तस्य तु 'उपहन्येत वा पण्यं दह्येतापहियेत वा। विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः'॥ इत्यत्रोक्तत्वात्। यदा त्वसौ क्रेता देशान्तरात्पण्यग्रहणार्थमागतस्तदा तत्पण्यमादाय देशान्तरे विक्रीणानस्य यो लाभस्तेन सहितं पण्य विक्रेता क्रेत्रे दापयितव्यः। अयं च क्रीतपण्यसमर्पणनियमोऽनुशयाभावे द्रष्टव्यः। सति त्वनुशये 'क्रीत्वा विक्रीय वा किंचिदि'त्यादि मनूक्तं वेदितव्यम्।

+मिता.

(३) यस्य पण्यस्य मूल्यं विक्रेत्रा गृहीत तद्गृहीतमूल्यं तद्यो विक्रेता क्रेतुर्न समर्पयति स तत्पण्यं तन्निबन्धनेन सोदयमुदयेन धनलाभेन सहितं क्रेतुर्दापयेत्। यदि पुनर्विक्रेतु दिगन्तरे पण्यं नीतं तदा तत्र दिगन्तरे तस्य विक्रीतस्य पण्यस्य यो लाभो भवति, तेन सहितं तत्तस्य देयम्। न (स) चोपचय उच्यते। अत्रोदयो (न) दिग्लाभरूपः। किं तु सर्वा मूल्यस्य वृद्धिः। पण्यस्य च तत्कालविक्रये यो लाभस्तेनोभयेन सहितं पण्य देयम्। विक्रीयानुशयाभावे पण्यमप्रयच्छत एतत्।

अप.

(४) अर्घह्रासवृद्धिग्रहणाभावात्तत्साम्यविषयमिदं वचनमिति गम्यते। सोदयमित्यादेरयमर्थः। अदीयमानपण्यस्य यावती वृद्धिः 'निक्षेप वृद्धिशेषं च क्रयविक्रयमेव च। याच्यमानमदत्त चेद्वर्धते पञ्चक शतम्'॥ इति अकृतवृद्धिप्रकरणोक्तं परिमाणतः कल्पते तत्सहितं पण्य दाप्य इति अर्धसाम्ये पण्योपचयरूपोदयासंभवादेवं व्याख्या कृता। *स्मृच.२१८

अप्रदत्ते पण्ये दुष्टे विक्रेतुर्हानिः

राजदैवोपघातेन पण्ये दोषमुपागते।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः॥

(१) गृहीतमूल्ये तु—राजदैवोपघातेनेति। ममेदं पण्यमर्पयेत्येव याचितस्याप्यनर्पयतो यस्तत्रापचयः

(यद्द्रव्यं); **सवि.**३१० यः (यत्) क्रेतुर्नै (क्रीतं नै); **वीमि.**; **व्यप्र.**३४३; **व्यउ.**९५; **व्यम.**९५ वा (च); **विता.**६१८; **राकौ.**४८०; **समु.**१०६ वा (च).

+ पमा., व्यप्र., व्यउ. मितावत्। * सवि. स्मृचवत्।

(१) **यास्मृ.**२।२५६; **अपु.**२५८।४६ षमु (ष उ); **विश्व.**२।२६१; **मिता.**; **अप.** ण्ये दोषमु (ण्यदोष उ); **व्यक.**१६८ अपवत्; **स्मृच.**२१९ अपवत्; **विर.**१९२ याचि (याति) शेषं अपवत्; **पमा.**३६८; **रत्न.**१०५; **विचि.**८७ अपवत्; **नृप्र.** २९ राजदैवो (दैवराजो); **सवि.**३११ निर्वि (निश्च); **चन्द्र.** ५८ ण्ये दोष (ण्यनाश); **वीमि.** षमु (ष उ); **व्यप्र.**३४४; **व्यउ.**९५; **व्यम.**९५; **विता.**६१९ दै (दे); **राकौ.**४८०; **सेतु.**१८० ण्ये दोषमुपागते (ण्यदोष उपस्थिते); **समु.**१०७; **विव्य.**४३ (=) अपवत्.

स विक्रेतुरेवेत्युक्तम्। यदि तु राजकृताद् व्यासेधाद् दैविकाद्वा पर्जन्यादिदोषात् पण्यं दोषवत् स्यात्, तत्र या मूल्यहानिः, सा विक्रेतुरेवेत्यवसेयम्। विश्व.२।२६१

(२) अपि च। यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयति, अजातानुशयोऽपि, तच्च राजदैविकेनोपहतं भवति, तदाऽसौ हानिर्विक्रेतुरेव। अतोऽन्यदतुष्टं पण्यं विनष्टसदृशं क्रेत्रे देयम्। मिता.

(३) तेन ग्राहकस्य तुष्टयं पण्यान्तरं मूल्यं वा प्रत्यर्पणीयम्। *अप.

क्रेतर्यगृह्णति अन्यत्र विक्रेयम्

[1]विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णति।
हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा भवेत्॥

(१) किंच। यदा पुनर्जातानुशयः क्रेता पण्य न जिघृक्षति तदा विक्रीतमपि पण्यमन्यत्र विक्रेयम्। यदा पुनर्विक्रेत्रा दीयमान क्रेता न गृह्णाति, तच्च पण्य राजदैविकेनोपहत, तदा क्रेतुरेवासौ हानिर्भवेत्। पण्याग्रहणरूपेण क्रेतृदोषेण नाशितत्वात्। ×मिता.

(२) तस्य मूल्यं न प्रत्यर्पणीयमित्यर्थः। अप.

[2]अन्यहस्ते च विक्रीतं दुष्टं वाऽदुष्टवद्यदि।
विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत्॥

(१) क्रेत्रा तूत्सकलितमेव हि—अन्यहस्ते त्विति। यस्त्वन्यत्र क्रेत्रा तूत्संकलितमेव विक्रीतमपि पुनर्विक्रीणीयाद्, अदुष्टमिति वा कृत्वा दुष्टमपि, तस्य द्रव्यमूल्याद् द्विगुणो दण्डः। क्रेतुश्च द्रव्यमूल्यं वा प्रत्यर्पणीयम्। स्पष्टमन्यत्। विश्व.२।२६२

(२) किंच। यः पुनर्विनैवानुशयमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते, सदोषं वा पण्यं प्रच्छादितदोषं विक्रीणीते, तदा तत्पण्यमूल्याद्द्विगुणो दमो वेदितव्यः। सर्वश्चायं विधिर्दत्तमूल्ये पण्ये द्रष्टव्यः। अदत्तमूल्ये पुनः पण्ये वाऽज्ञात्रक्रये क्रेतृविक्रेत्रोर्नियमकारिणः समयादते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोषः। मिता.

(३) चकाराद्द्विगुणमेव मूल्य क्रेतुः प्रत्यर्पणीयम्। *अप.

(४) नारदस्त्वस्यार्थः श्लोकद्वयेन वदन् विशेषमाह—निदोषं दर्शयित्वेत्यादिना। स्मृच.२।१९

(५) बुद्धिपूर्वविषयमेतत्। व्यप्र.३४५

सत्यकारव्यवस्थातिक्रमे दण्डः

[3]सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत्॥

(१) आधिप्रसङ्गादन्यदुच्यते— सत्यङ्कारकृतमिति। क्रयविक्रयादिव्यवस्थानिर्वाहाय यदङ्गुलीयकादि परहस्ते कृत तद्व्यवस्थातिक्रमे द्विगुणं दातव्यम्। तत्रापि येनाङ्गुलीयकाद्यर्पित स एव चेद्व्यवस्थातिवर्ती तेन तदेव दातव्यम्। इतरश्चेद्व्यवस्थातिवर्ती तदा तदेवाङ्गुलीयकादि द्विगुण प्रतिदापयेदिति। मिता.

(२) सत्यङ्कारः सत्यापनं कृतस्य क्रयस्य सत्याकरणमिति यावत्। 'क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम्'इत्यमरकोषाभिधानात्। सत्यङ्काराय कृतं समर्पित सत्यङ्कारकृत क्रयं सत्य कर्तुं यद्विक्रेतृहस्ते कृतमित्यर्थः। व्यप्र.३४६

---

* शेष मितावत्। × पमा., व्यप्र. मितावत्।

(१) **यास्मृ.**२।२५५, **अपु** २५८।४५ पूर्व (पूर्वं); **मिता.**. **अप.**; **व्यक.**१६८, **स्मृच.**२१९ पू.; **विर.**१९४; **पमा** ३६९ र्वं (र्वं); **रत्न.**१०५; **विचि.**८९ र्वं (र्वं); **नृप्र.**२९; **चन्द्र.**५९ श्वेत् (श्व); **वीमि.**; **व्यप्र.**३४४; **व्यउ.**९५; **व्यम.**९५ उत्त.; **विता.**६१९ चन्द्रवत्; **सेतु.**१८१; **समु.**१०७ हि (तु).

(२) **यास्मृ.**२।२५७; **अपु.**२५८।४७ दुष्ट (दृष्ट) मूल्यात्तु (तन्मूल्यात्); **विश्व.**२।२६२ च (तु) णीते (यते) मूल्यात्तु (तन्मूल्यात्); **मिता.**; **अप.** त्तु(च्च), **व्यक.**१६८ णीते (यते); **स्मृच.**२१९ णो (ण); **विर.**१९६ णीते (यते) मस्त (मन्त) णो (णं); **वीमि.** व्यकवत्; **व्यप्र.**३४५ स्तत्र (स्तस्य); **व्यउ.**९५ मूल्यात्तु (तन्मूल्यात्); **विता.**६२२ स्ते च (स्तेन); **समु** १०७.

* शेष मितावत्।

× व्याख्यानविस्तरः ऋणादाने (पृ.६४५) द्रष्टव्यः।

(१) **यास्मृ.**२।६१; **अपु** २५५।२१, **विश्व.**२।६३; **मिता.**; **अप.** दाप (पाद) : २।२५७ नारदः; **व्यक.** १६८; **स्मृच.**२२०; **विर.**१९३ अपवत्; **पमा.**३७१; **रत्न.**१०५; **विचि.**८९ अपवत्; **सवि.**३१२; **व्यप्र.**३४६; **व्यउ.**९६ र (रं); **विता.**६२३; **विव्य.**४४.

नारदः

विक्रीयासंप्रदाननिरुक्तिः

[1]**विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते ।**
विक्रीयासंप्रदानं तद्विवादपदमुच्यते ॥

पण्यविक्रयार्थं मूल्यं गृह्णाति पण्यं च न ददातीति विवादपदमनेनोक्तम् । अप.२।२५४

पण्यनिरुक्तिः

[2]**लोकेऽस्मिन् द्विविधं द्रव्यं जङ्गमं स्थावरं तथा ।**
क्रयविक्रयधर्मेषु सर्वं तत्पण्यमुच्यते ॥

लोके यद् द्रव्यं जङ्गमं हस्त्यश्वमनुष्यादि, स्थावरं क्षेत्रहिरण्यगृहादि, सर्वं तत् पण्यमुच्यते । यत्र पण्यसंशब्दनं करोति तत्रैतस्य स्थावरजङ्गमाख्यस्य ग्रहणं द्रष्टव्यम् । नाभा.९।२

पण्यस्य षड्विधदानादानविधिः

[3]**षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः ।**
गणिमं तुलिमं मेयं क्रियया रूपतः श्रिया ॥

(१) गणितं क्रमुकफलादि । तुलितं कनककस्तूरी-कुङ्कुमादि । मेयं शाल्यादि । क्रियया वाहदोहादिरूपयोपलक्षितमश्वमहिष्यादि । रूपतः पण्याङ्गनादि । श्रिया दीप्त्या मरकतपद्मरागादीति । ÷मिता.२।२५४

(२) श्रिया धनेन ग्रामारामादि । ×अप.२।२५४

(३) क्रियया शिल्पविशेषादाभरणादि । ×नाभा.९।३

विक्रेतुरनुशये स्थावरजङ्गमभेदेन दापनभेदः

[4]**विक्रीय पण्यं मूल्येन क्रेतुर्यो न प्रयच्छति ।**
स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलम् ॥*

(१) विक्रेतुरुपभोगः क्षय उच्यते । क्रेतृसंबन्धित्वेन क्षीयमाणत्वात् । न पुनः कुड्यपातस्य घातादिरूपः । तस्य तु 'उपहन्येत वा पण्यमि'त्यत्रोक्तत्वात् । +मिता.२।२५४

(२) स्थावरस्य क्षयमिति स्थावरविषयं, क्रेतुरुपभोगक्षयं दाप्य इत्यर्थः । क्रिया भारवाहनादिका । फल क्षीरादि । अप.२।२५४

(३) स्थावरस्य ग्रामक्षेत्रादेः । जङ्गमस्य गवाश्वादेः । क्षयः सस्याद्युपघातेनोपक्षयः । क्रिया वाहनदोहनादिका । फलं क्षीरादि । व्यक.१६७

(४) क्रयकालापेक्षया दापनकालेऽर्धवृद्धावेतद् द्रष्टव्यम् । ×स्मृच.२१७

(५) मूल्यं गृहीत्वा क्रेतुर्यः पण्यं न ददाति यावत्कालं तावत्कालकृत भोजनवस्त्रादेर्भुज्यमानस्य यावान् क्षयः तावान् दाप्यः, यदि भुज्यते । यदि न, सर्वथा तावत्कालमभुक्तत्वाद् भोगस्य च दातुमशक्यत्वाद् भुज्यमानस्य क्षयलब्धेर्द्रव्यं च भुक्तमेव भवतीति

---

(१) **नासं.**९।१ दीयते (यच्छति); **नास्मृ.**११।१ तुर्य(त्रे य); **अपु.**२५३।२० तुर्यन्न प्र (त्रे यच्च न); **मिता.**२।२५४; **अप.**२।२५४; **व्यक.**१६७, **स्मृच.**४, **विर** १८९; **पमा.** १६५ नास्मृवत्; **रत्न.**१०४; **नृप्र.**२९ पू.; **सवि.**३०९(=), **वीमि.**२।२५४; **व्यप्र.**३४२; **व्यउ.**९४; **व्यम.**९५, **विता.**६१८; **राकौ.**४८०; **सेतु.**१७८ यंत्र (र्यो न) दीयेत (यच्छति); **समु.**१०६.

(२) **नासं.**९।२ जङ्गम स्थावर (स्थावर जङ्गम); **नास्मृ** ११।२; **मिता.**२।२५४ द्रव्यं (पण्य) पू.; **अप.**२।२५४ नासवत्; **व्यक.**१६७ षु(तु) शेषं नासवत्; **स्मृच.**४; **विर.**१८९ नासवत्; **पमा.**३६५ नासवत्; **रत्न.**१०४पू.; **नृप्र.**२९; **दवि.**९८ धर्मे (धर्म्ये); **सवि.**३०९(=) नासवत्; **व्यप्र.**३४२ मितावत्, पू.; **व्यउ.**९४ पू.; **विता.**६१८ मितावत्, पू.; **बाल.**२।२५४ षु (तु) शेष मितावत्; **सेतु.**१७८ नासवत्; **समु.**१०६.

(३) **नासं.**९।३ धिः स्मृतः (धिक्रमः); **नास्मृ.**११।३; **मिता.**२।२५४ म (त); **अप.**२।२५४; **व्यक.**१६७ मं (तं); **स्मृच.**४; **विर.**१८९ तु (च); **पमा.**३६५; **रत्न.**१०४; **नृप्र.**२९ पू.; **दवि.**९८ उत्त.; **सवि.**३०९ (=) तु (वि) म (तं); **व्यप्र.**३४२; **व्यउ.**९४; **विता** ६१८ मं (तं); **बाल.**२।२५४ पू.; **समु.**१०६.

÷ व्यक., स्मृच., विर., पमा., सवि., व्यप्र, व्यउ. मितावत्। × शेष मितावत्।

* व्याख्यानविस्तरः 'गृहीतमूल्यं' इति याज्ञवल्क्यवचने (पृ. ८८३) द्रष्टव्यः । + पमा., व्यप्र. मितावत् स्मृचवच्च ।

(१) **नासं.**९।४ क्रेतुर्यो (यः क्रेतुः); **नास्मृ.**११।४ तुर्यो (त्रे यो) स्य क्ष (स्योद); **मिता.**२।२५४ क्षयं (क्षये) शेष नासवत्; **अप.**२।२५४ ध्ये (ले) र्यो न (यैन्न); **व्यक.**१६७; **स्मृच.** २१७ रस्य (र स) मस्य (म स); **विर.**१९०; **पमा.**३६७ तुर्यो (त्रे यत्) स्य क्ष (स्योद); **रत्न.**१०४; **विचि.**८६; **नृप्र.**२९; **सवि.**३०९ (=) ध्ये (ले) क्रेतुर्यो (यः क्रेतुः): ३१० तृतीयपादः; **चन्द्र.**५७; **वीमि.**२।२५७ नासवत्; **व्यप्र.**३४२; **व्यउ.**९५ नासवत्; **विता.**६१९ नासवत्; **सेतु** १७८; **समु.**१०६; **विभ्य.**४३.

जङ्गमस्य यावत्कालं तत्कर्मनिमित्तं मूल्यं दाप्यं तच्च द्रव्यम्। नाभा.९।४

अर्घहानौ दापनप्रकारः स्थायिचरक्रेतृभेदे

अर्घश्चेदपहीयेत सोदयं पण्यमावहेत्।
स्थायिनामेष नियमो दिग्लाभो दिग्विचारिणाम्*॥

(१) क्रयकालगृहीतेन मूल्येन यावत्पण्यमर्पणकालेऽर्घह्रासवशात् साभ्यधिकं लभ्यते तत्सोदयं तदावहेत् क्रेतारं प्रापयेत् क्रेत्रे दद्यादिति यावत्। देशान्तरे हृत्वा विक्रेतुं ये क्रीणन्ति तदितरे क्रेतारः स्थायिनः तद्विषयोऽयं 'स्थावरं सक्षय दाप्य' इत्यादिवचनोक्तो नियम इत्यर्थः। कथं तर्ह्यस्थायिना नियम इत्यपेक्षिते स एव 'दिग्लाभो दिग्विचारिणाम्' इति। यत्पण्यं यस्मिन्दिगन्तरे विक्रेतुं क्रीतं तत्पण्यं तस्मिन्दिगन्तरे विक्रीणानस्य यो लाभस्तेन सहित देयमित्यर्थः। ×स्मृच.२१८

(२) अथवानेनार्घेण पण्य ददामीति धनिनो मूल्यं गृहीत्वा पण्ये गृहीतेऽर्घहानिः स्यात्, पूर्वोक्तेनार्घेण सोदय पण्य दद्यात्। तद्यथा—दीनारस्य पञ्चपलं कृत्वा कुङ्कुमं ददामीति द्रव्यं गृहीत्वा कुङ्कुमे गृहीते पञ्चपले वर्तमाने तस्मिन्काले अददद् दीनारस्य पञ्चपलद्रव्ये जाते पञ्चपलेनैवार्घेण सवृद्धिकं दद्यात्। स्थानिधर्मोऽयम्। दिग्विचारिणा तत्रत्येनार्घेण ददामीति द्रव्ये गृहीते तत्र तत्रार्घाद् यथाभाषिताद्धानिः स्यात्, तेनैवार्घेण सोदयं पण्यं दाप्यः। तद्यथा—काश्मीरेषु दशपलः कुङ्कुमार्घो वर्तते। तेनार्घेण तदेव ददामीति तत्र गतस्य पञ्चपलोऽर्घो जातः। तत्र दशपलार्घेणैव पण्यं दाप्यः। +नाभा.९।५

(३) अर्वाक् चेदपचीयेतेति कल्पतरौ पाठः। अर्वाक् विक्रीतस्य क्रेत्रे समर्पणात्पूर्वं अपचीयेत हीनमूल्य भवेत्। व्यप्र.३४२

अप्रदत्ते पण्ये दुष्टे विक्रेतुर्हानिः

उपहन्येत वा पण्यं दह्येतापह्रियेत वा।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः॥

(१) विक्रीयासप्रयच्छतो यद्विक्रीत पण्य स्वपार्श्व एव स्थित तस्य दैवादिवशान्नाशे तत्तुल्यं पण्य क्रेत्रे विक्रेत्रा देयमिति वचोभङ्गया नारद आह—उपहन्येतेति। स्मृच.२१९

(२) उपहन्येत दूष्येत। *नाभा.९।६

विक्रयोपधौ दण्डः

निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति।
मूल्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु॥

निर्दोषं कुङ्कुमादि पण्यं दर्शयित्वा तदर्घेण द्रव्यं गृहीत्वा सदोष क्लिन्नमन्यद्द्रव्यमिश्रं वा ददाति, स मूल्यं द्विगुणं दाप्यः, विनयं च तत्परिमाणम्। नाभा.९।७

---

* मिता व्याख्यान 'गृहीतमूल्यम्' इति याज्ञवल्क्यवचने (पृ.८८४) द्रष्टव्यम्।

× विर., सवि., व्यप्र. स्मृचवद्भावः।

+ प्रथमकल्पः स्मृचवत्। * शेष स्मृचवत्।

(१) **नासं.**९।६;**नास्मृ.**११।६पण्यं (द्रव्य);**मिता.**२।२५४; **अप.**२।२५४;**व्यक.**१६७-१६८; **स्मृच.**२१९; **विर.**१९२; **पमा.**३६८; **रत्न.**१०५; **विचि.**८७; **नृप्र.**२९; **सवि.**३११ (=), **व्यप्र.**३४४; **व्यउ.** ९५ पहि (प्सु क्ष) तः (ति); **विता.**६१९; **सेतु.**१८० यासं (यांश); **समु.**१०७; **विव्य.** ४३ नर्थो (र्थो हि).

(२) **नासं.**९।७ सदोष यः (यः सदोषं) तद् (स) व तु (व च); **नास्मृ.**११।७ तद् (तु) व तु (व च); **मिता.** २।२५७ मूल्यं तद् (स मूल्यात्) नय (नयः); **व्यक.**१६८ तद् (तु); **स्मृच.**२१९; **विर.**१९२ तद् (तु); **पमा.**३६९ व तु (व च); **रत्न.**१०५; **नृप्र.**२९मूल्यं(सोऽपि); **सवि.**३११ (=) सदोषं यः (यः सदोष); **चन्द्र.**५९ तद् (स) व तु (व हि); **व्यप्र.**३४५; **व्यउ.**९५ मूल्यं तद् (स मूल्यात्) :९६; **विता.** ६२० मूल्यं तद् (स मूल्यं); **सेतु.**१८० तद् (तु); **समु.** १०७ तद् (स).

तथाऽन्यहस्ते विक्रीय योऽन्यस्मै संप्रयच्छति ।
सोऽपि तद्द्विगुणं दाप्यो विनयं तावदेव तु ॥

बुद्धिपूर्वकविषयमेतत् । दण्डदाप्यद्रव्ययोरतिमहत्त्वात् । अबुद्धिपूर्वके परावर्तनमेव । ×स्मृच.२१९

मणयः पद्मरागाद्या दीनारादि हिरण्मयम् ।
मुक्ताविद्रुमशङ्खाद्याः प्रदुष्टाः स्वामिगामिनः ॥

दीयमानं न गृह्णाति क्रीत्वा पण्यं च यः क्रयी ।
विक्रीणानस्तदन्यत्र विक्रेता नापराध्नुयात् ॥

क्रयी जातानुशय इति शेषः । स्मृच.२१९

क्रेतुः क्रीत्वाऽग्रहणे विक्रेतुसमदोष.

दीयमानं न गृह्णाति क्रीतं पण्यं च यः क्रयी ।
स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः ॥

अप्रयच्छतो विक्रेतुर्यो दोषः स एवास्य भवेदित्यन्वयः । क्रेतुर्दोषाभिधानस्य फलं पण्यमूल्य क्रेत्रे विक्रेत्रा न प्रत्यर्पणीयमिति । दीयमानमिति वदन् अदीयमानमगृह्णतो न मूल्यहानिरिति दर्शयति । यत्र विक्रेत्रा न याचितं, न च क्रयी दीयमानाग्राहकः, उपागतश्च पण्यदोषः, तत्र द्वयोः समा हानिः कल्प्या क्रयानन्तरमग्रहणशैथिल्येन द्वयोरप्यपराधसाम्यात् । स्मृच. २१९

अदत्तमूल्ये समयाधीना व्यवस्था

दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्तितः ।
अदत्तेऽन्यत्र समयान्न विक्रेतुरतिक्रमः ॥

(१) उत्तरार्धस्यायमर्थः । अदत्तमूल्ये पण्ये च वाङ्मात्रेण क्रये कृते न परावर्तितव्यमित्येवमादिसमयाभावे सति प्रवृत्तौ वा निवृत्तौ वा न कश्चिद्दोष इति । स्मृच. २२०

(२) अन्यत्र समयान्मासादिना मूल्यदानव्यवस्था विना । विर. १९४

वाणिज्य लाभमूलकमथापि ऋजुमार्गेण कर्तव्यम्

लाभार्थं वणिजां सर्वपण्येषु क्रयविक्रयः ।
स च लाभोऽर्धमासाद्य महान्भवति वा न वा ॥

(१) अव्यवस्थितार्थं विशेषमाह स एव—लाभार्थमिति । विर. १९५

(२) वणिजा क्रयविक्रयः सर्वोऽतिरिक्तलाभार्थः । स च लाभोऽर्धवशान्महान् भवति नवा, कदाचिदल्पः, कदाचिन्नैव । नाभा.९।११

तस्माद्देशे च काले च प्रक्रमेतार्घविद्वणिक् ।
न जैह्मेन प्रवर्तेत श्रेयानेष वणिक्पथः ॥

× पमा. स्मृचवत् ।

(१) **नास.**९।८ स्मै सं (हस्ते) तु (च); **नास्मृ.**११।८ स्ते क्रीय (स्तविक्रीत) तावदेव तु (चैव राजनि); **मिता** ३।२५७ तथाऽन्यहस्ते (अन्यहस्ते च) स (तत्) सोऽपि (द्रव्यं) णं (णो); **अप.**२।२५७ तथाऽन्यहस्ते (अन्यहस्ते तु) य यो (त यो) सं (तत्) सोऽपि (द्रव्यं); **व्यक.**१६८, **स्मृच.**२१९ स (तत्), **विर.**१९३ स्मृचवत्; **पमा.**३६९ तथान्यहस्ते (अन्यहस्ते च) योऽन्यस्मै स (तथान्यस्मै); **रत्न.**१०५; **विचि** ८९ तथान्यहस्ते (अन्यहस्ते तु) योऽ (अ) सं (यः); **नृप्र.**२९ स्मै स (हस्ते) तावदेव तु (च तथैव च); **वीमि.**२।२५७ तथान्यहस्ते (अन्यहस्ते तु) स (तत्) सोऽपि (द्रव्य); **व्यप्र.**३४५ स्मृचवत्, **व्यउ.**९५; **विता.**६२० वीमिवत्; **सेतु.**१८० तथाऽन्यहस्ते (योऽन्यहस्ते तु) योऽ (भ) स (तत्) बृहस्पतिः; **समु.**१०७.

(२) **नास्मृ.**२।३४; **अभा.**२६.

(३) **नास.**९।९ क्रीत्वा पण्यं च य. (पण्य क्रीतं हि यत्); **नास्मृ.**११।९ त्वा (तं); **व्यक.**१६८; **स्मृच.**२१९; **विर.** १९४; **रत्न** १०५; **सवि.**३११-३१२ त्वा (तं) णानः (तं च) कात्यायन; **व्यप्र.**३४४ नास्मृवत्; **व्यम.**९५; **विता.**६२०च (तु); **सेतु.**१८१ (=) णानः (णीत); **समु.**१०७; **विभ्य.**४४.

(४) **अप.**२।२५५; **व्यक.**१६८ स ए (यत्र) योऽ (यैः); **स्मृच.**२१९; **पमा.**३६९; **विचि.**८७ (=) त (त) च (तु); **नृप्र.**२९ यो (वा); **सवि.**३११; **चन्द्र.**५९ तं (त्वा); **व्यप्र.**३४४; **समु.**१०७; **विभ्य.**४४ (=).

(१) **नास.**९।१० (अदत्तमूल्ये विक्रीते न विक्रेतुरतिक्रमः), **नास्मृ.**११।१० प (व), **मिता.**२।२५७ तिक्रमः (विक्रयः); **व्यक.**१६८; **स्मृच.**२२०; **विर.**१९४; **पमा.**३७०; **रत्न.** १०५, **विचि** ८७ विक्रे (च क्रे), **सवि.**३१२ रति (रपि); **नृप्र** २९ मितावत्; **चन्द्र.**५८ त्र वि (त्र तु) र (रि); **वीमि.** २।२५७ मितावत्, **व्यप्र.**३४५, **व्यउ.**९५ मितावत्; ९६; **व्यम.**९५; **विता** ६२३; **सेतु.**१७९ विचिवत्; **समु.**१०७.

(२) **नास.**९।११ र्थं (र्थो) र्वं (र्वः); **नास्मृ.**११।११ र्थं (र्थे); **व्यक.**१६८; **विर.**१९५; **विचि.**९० र्थं (र्थ); **सवि.** ३१२ नासंवत्, व्यासः; **सेतु.**१८१ नास्मृवत्; **समु.**१०९ नासंवत्, बृहस्पति.

(३) **नास.**९।१२ (तस्माद्देशे च काले च वणिगर्थं प्रकल्पयेत्) जै (जि); **नास्मृ.**११।१२ (तस्माद्देशे च काले च वणिग्गर्थं समाश्रेयेत्) जैह्मेन (जिह्मं च); **व्यक.**१६८, **विर.**१९५

मूल्यमव्यवस्थाप्य क्रीते देशकालानुसारेण व्यवस्थापको वणिक् प्रक्रमेत अनुरूपं मूल्यं प्रकल्पयेत्, न जैह्मेन न कुटिलतया प्रवर्तेत, उचितं मूल्यं न खण्डयेदित्यर्थः। विर.१९५

बृहस्पतिः

पण्यनिरुक्तिः। सदोषपण्यविक्रये दण्डः।

समासेनोदितस्त्वेष समयाचारनिश्चयः।
क्रयविक्रयसंजातो विवादः श्रूयतामयम्॥
जङ्गमं स्थावरं चैव द्रव्ये द्वे समुदाहृते।
क्रयकाले पण्यशब्द उभयोरपि च स्मृतः॥
ज्ञात्वा सदोषं यः पण्यं विक्रीणीते विचक्षणः।
तदेव द्विगुणं दाप्यस्तत्समं विनयं तथा॥

विक्रीणीत दोषमनुक्त्वेति शेषः। विर.१९२

विक्रेतुर्न्यायोऽनुशयः

मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भयेन वा।
अस्वतन्त्रेण मूढेन त्याज्यं तस्य पुनर्भवेत्॥

कात्यायनः

क्रये विक्रये वाऽनुशये दण्डः, परीक्षाकालश्च

क्रीत्वा प्राप्तं न गृह्णीयाद्यो न दद्याददूषितम्।
स मूल्यादशभागन्तु दत्त्वा स्वं द्रव्यमाप्नुयात्॥
अप्राप्तेऽर्थे क्रियाकारे कृते नैव प्रदापयेत्।
एवं धर्मो दशाहात्तु परतोऽनुशयो न तु॥

(१) यस्तु विक्रयानुशयादनर्पकः, यश्च क्रयानुशयादत्तमूल्यस्य पण्यस्याग्राहकः तौ प्रत्याह 'क्रीत्वा प्राप्तमि'ति। अदूषितं जलादिनेति शेषः। अर्थक्रियाकालो दोह्यादिपण्यस्य दोहनकालः। तस्मिन्नप्राप्ते सत्यग्रहणे अदाने वा कृतेऽपि नैव दशम मूल्यभागं प्रदापयेत्। किं तु तमदत्त्वैव च स्वद्रव्यमाप्नुयात्। एवमुक्तो धर्मो दशाहात्प्रागर्थक्रियाकालादूर्ध्वं वेदितव्यः। दशाहात्परतस्त्वनुशयो न कर्तव्यः। अनुशयकालस्यातीतत्वादित्यभिप्रायः। वास्तवस्यानुशयकारणस्याभावे प्रागुक्तो धर्मः। +स्मृच.२१८

(२) प्राप्त स्ववशता नीतम्। स्ववशतामनीते तु स एव विशेषमाह—अप्राप्तेऽर्थे इति। क्रियाकारे साक्षिलेख्यादौ। स्ववशतामगतस्य क्रीतस्यापि अग्रहणेन मूल्यादशभागदानमित्यर्थः। विर.१९१-१९२

व्यासः

अनुशयव्यावृत्त्यर्थं मध्यस्थव्यवस्था। सत्यकारेऽनुशयो न कार्यः।

परार्थं दिस्सितं द्रव्यं तथैवाधिक्रियादिषु।
मध्यस्थस्थापितं कार्यमन्यथा न प्रसिद्धयति॥
सत्यङ्कारं च यो दत्त्वा यथाकालं न हृष्यते।
पण्यं भवेन्निसृष्टं तद्दीयमानमगृह्णतः॥

र्थे (र्थं); विचि.९०; नृप्र.२९ प्रक्रमेतार्घविद्वणिक् (वणिगर्घं निरूपयेत्); सवि.३१३ पूर्वार्ध. नारसंवत्, व्यासः; सेतु.१८१; समु.१०९ पूर्वार्धः नारदवत्, बृहस्पतिः.

(१) विर.१८९, सेतु.१७८ निश्चयः (निर्णयः) ज्ञा (ज्ञा).

(२) विर.१८९.

(३) व्यक.१६८ ते वि (तावि); स्मृच.२२० यः (यत्); विर.१९२ ते वि (तावि); पमा.३७० य: पण्यं (पण्यं यो); रत्न.१९५; विचि.८९-९० णीते (णात्य); चन्द्र.५९; व्यप्र.३४५ दे (दै); व्यम.९५ व्यकवत्, याज्ञवल्क्यः; सेतु.१८० विचिवत्; समु १०७; विव्य.४४ ज्ञात्वा (क्रीत्वा) णीते (णात्य).

(४) व्यक.१६८ भवेत् (हरेत्); स्मृच.२२०; विर.१९३ व्यकवत्; पमा.३७०; रत्न.१०५; विचि.८९ वा (च) भवेत् (हरेत्); सवि.३१२ मूढे (मुग्धे) कात्यायनः; चन्द्र.५९ विचिवत्; वीमि.२।२५८ येन वा (वेन वा) ढेन (ल्येन) भवेत् (हरेत्); व्यप्र ३४५; व्यउ.९६; व्यम.९५ ल्यं भ (ल्येन) याज्ञवल्क्यः; सेतु.१८० व्यकवत्; समु.१०७.

(५) व्यक.१६७; स्मृच.२१८ स्व द्र (स्वद्र); विर.

+ पमा., सवि., व्यप्र. स्मृचवत्।

१९१; पमा.३६७; रत्न.१०५; विचि.८८; सवि.३१०, भागं तु (म भाग) स्व द्र (स्वद्र); व्यप्र.३४३; सेतु.१७९; समु.१०६ स्मृचवत्, विव्य.४४.

(१) व्यक.१६७; स्मृच.२१८ थें (र्थं) रे (ले) हातु (हे तु); विर.१९२; पमा ३६७ क्रियाकारे (कृच्छ्रकाले); विचि. ८८; सवि.३१० रे (ले) हातु (हे तु); व्यप्र.३४३ थें (र्थं) रे (ले) व (ष); सेतु.१७९ ते (त); समु.१०६ रे (ले).

(२) समु.१०७.

(३) व्यक.१६८; स्मृच.२२०; विर.१९४ दत्वा (दद्यात्) तदीय (तु दीय); पमा ३७० ण्य भवेन्नि (ण्यमेव नि), रत्न.१०५; सवि.३१२ पण्य भवेन्निसृष्ट तत् (पण्यभावेन दृष्ट तु); व्यप्र.३४५; व्यउ.९६ दत्वा (दद्यात्); विता. ६२३; सेतु.१८१ दत्वा (दद्यात्) दृश्य (गृह्य) न्निसृ (द्विसृ), समु.१०७.

(१) क्रेतृदोषवशेन क्रयासिद्धौ त्वाह व्यासः—सत्यङ्कारमिति। निसृष्टं भवेदुसृष्ट भवेदित्यर्थः। अत्र पण्यस्योत्सर्गः सत्यङ्कारद्रव्योत्सर्गान्तोऽभिमतः। अन्यथा वाङ्मात्रक्रयकर्तृतौल्ये विक्रेतुः सत्यंकारग्राहकता न स्यात्। अत्रापि विक्रीतमपि विक्रेयमित्युक्तमनुसंधेयम्। *स्मृच.२२०

(२) यः क्रेता क्रयणार्थं सत्यङ्कारद्रव्यं दद्यात् तस्य पण्यं दीयमानमगृह्णतः तन्निसृष्टं त्यक्तमेव भवेत्, विक्रेत्रे, तेन तद्द्रव्यं न क्रेत्रा विक्रेतुः पार्श्वे ग्राह्यमित्यर्थः। विर.१९४

* पमा. स्मृचवत्।

स्मृत्यन्तरम्

दशाहात्परतोऽनुशयो न कार्यः

दशाहे समतिक्रान्ते आधिः सिध्येदस्थिरीकृतः।
क्रीतं क्षेत्रादिकं चैव स्वीकारस्य प्रदर्शनात्॥

(१) समु.१०७.

क्रीत्वानुशयः

विष्णुः

क्रीते क्रेतुरनुशये क्रेतुर्हानिः

क्रीतमक्रीणतो या हानिः सा क्रेतुरेव स्यात्।

विनिमयपरिवृत्तिनिरुक्तिः तयोः स्वत्वकारणत्वं च

सजातीययोर्द्रव्ययोर्विनिमयः। विजातीययोस्तु परिवृत्तिः।

न च परिवृत्तेः क्रय एवान्तर्भाव इति वाच्यं, क्रये तु मूल्यं त्रिवर्षफलं, परिवृत्तौ तु स्वतस्तुल्यमेव। यद्यपि रिक्थक्रयादिगौतमसूत्रे परिवृत्तिविनिमययोः परिगणनाभावात् स्वत्वहेतुता नास्तीति प्रतिभाति, तथापि तिलक्रयस्य निषिद्धत्वात् प्रतिग्रहस्यातिदुष्टत्वात् तिलान् दत्वा व्रीह्यादिग्रहणस्थले विनिमयपरिवृत्त्योरिव स्वत्वापादकत्वमिति लोकप्रसिद्धिः। यत्तु 'आधिः प्रणश्येद् द्विगुण' इत्यादौ तिलविनिमयवद्धनद्वैगुण्यं स्वत्वापादक न भवति। अपि तु क्रयान्तपर्यवसानात्स्वत्वापादकमित्युक्तम्। तत्तु विनिमयस्य स्वत्वापादकत्वं नास्तीत्येवपरं न भवति। किंतु तस्मिन् स्थले क्रयान्तपर्यवसानाद्वाचिकादानान्ततया वा स्वत्वापादकत्वं, अन्यत्र तु तिलविनिमयादौ विनिमयपरिवृत्त्योरपि क्रयादीनामिव स्वत्वापादकत्वं लोकप्रसिद्धं नापह्नोतुं शक्यमित्याह भारुचिः। वस्तुतस्तु—विनिमयपरिवृत्त्योः पारिभाषिक्योः परिभाषया तयोर्वाचनिकदानरूपेण स्वत्वहेतुत्वसिद्धिरस्त्येवेत्युक्तं तत्रैव। पूर्वस्मिन्प्रकरणे विक्रीयासंप्रदानता अत्र तु परिवृत्त्यनुशय इति प्रकरणभेदः। क्रीत्वाऽनुशय इति समाख्या तु परिवृत्तिविनिमययोरपि लक्षणयेत्याह भारुचिः। सवि.३१४-३१५

(१) विस्मृ.५।१२८. (२) सवि.३१४.

परिवृत्तिविनिमयौ क्रयवत्।

क्रयेण तुल्यं वर्तते क्रयवत्। यथा क्रयः स्वत्वापादकः तथा परिवृत्तिविनिमयाविति वतेरर्थः। अयमर्थः—'स्वामी रिक्थक्रयसंविभागे'त्यादि गौतमसूत्रं नियमार्थमिति विनिमयपरिवृत्त्योः क्रयान्ततया वाचनिकदानान्ततया वा स्वत्वापादकत्वमिति विष्णुस्मृतेस्तात्पर्यं वर्णयन्ति भारुच्यसहायप्रभृतयः। विज्ञानयोगिवरदराजप्रभृतयस्तु 'सप्त वित्तागमा धर्म्या' इति सप्तसंख्यायाः अयोगव्यवच्छेदपरत्वाद्विनिमयपरिवृत्त्योरपि पृथक् स्वत्वापादकत्वमिति विष्णुस्मृतेरर्थ इत्याहुः। गौतमसूत्रं तु पुरस्ताद्व्याख्यास्यते। परिवृत्तिविनिमययोः स्वरूपमाह स एव—'विजातीययोर्द्रव्ययोरेकं गृहीत्वा एकस्य प्रदानं परिवृत्तिः। सजातीययोर्द्रव्ययोर्विनिमय' इति। ननु तिलान् दत्वा तिलग्रहणमेव विनिमयः; स च न संगच्छते। प्रयोजनाभावादिति चेन्नैव, तिलान् दत्वा कालव्यवधानेन तिलग्रहणं विनिमय इति। यद्वा तिलानां बीजत्वार्हाणां बीजत्वेन संपादनार्थं तैलजननसमर्थैस्तिलैः सह विनिमय इति न काचित् क्षतिः। यद्यपि सुवर्णादिकं मूल्यं दत्वा क्षेत्रगृहादि पण्यं गृह्यते। तथापि सा न परिवृत्तिः। मूल्यात्सकाशात्फलाधिक्यात्। 'त्रिवर्षमूलफलकं

(१) सवि.३१८.

क्रेयमिति[1] विष्णुस्मरणात्। यावता मूल्येन क्रेय क्षेत्रं तन्मूल्यं वर्षत्रयादर्वागेव याति चेत्क्रेयमिति परिवर्तना-द्विजातीयाधिक्ये मूल्याधिक्ये मूल्यसमय (?) एव भवति। विनिमयस्तु तथैवेति तेषा परस्परभेदः।

सवि.३१८-३१९

क्रेयस्वरूप, क्रीते उपधिनानुशये दण्डविधिः

स्थावरजङ्गमात्मकं क्रेयमुच्यते।
त्रिवर्षमूलफलकं क्रेयम्।
लाभाद्याजान्तरमुत्पादयति स दण्ड्यः।

अपशकुनतोऽपि विक्रेता स्वक्रीत दुष्क्रीतं मन्यते तदा क्रयः परावर्तते। यदा बहुदोषत्वं ज्ञात्वा हिरण्य-स्वल्पमूल्येन क्रीणाति न तत्र दुष्क्रीत मन्यत इति न तत्र परावर्तते क्रयः। यदा क्रीत्वाऽप्यन्यत्र ततोऽ-प्यधिकलाभे अपशकुनादिव्याजमुत्पादयति तदा व्यव-हारो न परावर्त्यः। अपि तु दण्ड्यः। सवि.३१६

वस्त्राणामुपभोगेऽनुशये काल. कर्तव्यता च

सकृद्धौतस्य नाशे मूल्यादष्टमभागो हीयते। द्विर्धौतस्य नाशे पादहानिः। त्रिर्धौतस्य नाशे तृती-यांशहानिः। चतुर्धौतस्य नाशे अर्धमूल्यं हीयते। पञ्चमे अर्धादष्टमभागहानिः। षष्ठे त्विच्छातो न शास्यतः।

पशुशकटानामनुशयेऽवधिः

अनसां दोह्यानां बलीवर्दादिवाह्यानां सीमोल्ल-ङ्घने न परावृत्तिः।

अयमर्थः--समीपग्रामस्थाना दूरग्रामस्थानामपि ग्रामान्तरे क्रीताना शकटगोमहिषादीना तद्ग्रामसीमो-ल्लङ्घने व्यवहारस्यापरावृत्तिः। सीमोल्लङ्घनात्प्रागेव शकटादिपरीक्षणं ततः परं नास्तीति।

सवि.३१७-३१८

द्रव्यविशेषे मूल्यनियमः

चतुर्थो भागो लाभः। पञ्चमो भागस्सत्यः कुङ्कुमादौ।

(१) सवि.३२१. (२) सवि.३१९.
(३) सवि.३१६. (४) सवि.३१७.
(५) सवि.३१७. (६) सवि.३१८.

परिवृत्तिहीनक्रयप्रतिबन्धक्रयोक्तलाभादिषु व्यवस्था। क्वचित् परिवृत्तेः परावर्तनम्

अब्दान्मण्यादिविनिमयः परावर्तते।
तथैवार्धाधिकेन मिश्रिता परिवर्तना।

अर्धाधिकद्रव्येणेति शेषः। रत्नहीरादिमिश्रितद्रव्यं दत्वा यत्किञ्चिद्धान्यादिकं हयादिकं वा गृह्णाति सा परिवर्तना। सवि.३२०

हीनक्रयपरिवृत्त्योर्व्यावर्तनम्।

हीनक्रयो नामाल्पद्रव्येणाधिकक्षेत्रादेः क्रयः। परि-वृत्तिरप्यल्पद्रव्यस्याधिकद्रव्येण परिवृत्तिः। एतच्चाशा-परिवृत्तिविनिमयविषय वेदितव्यम्। रुचिक्रये तु स्वरुच्या स्वत्वनिवृत्तिः परस्वत्वापत्तिश्च संकल्पमात्रादित्युक्तं प्राक्। अतश्च किंचिदपि द्रव्यं मूल्ये प्रविष्टं चेत्क्रेयं स्थावरं जङ्गम च क्रेतुरेव न तु विक्रेतुः; किं त्ववशिष्टं द्रव्यं दातव्य ग्रहीतव्य च। सवि.३२२

स्वल्पमपि द्रव्यं क्रेयं व्याप्नोति।
अनुशयते क्रेता, प्रतिबन्धो विक्रेतुरेव।

अय प्रतिबन्धक्रयः स्थावरे नास्ति। सवि.३२१

प्रतिबन्धक्रयो नास्ति स्थावरे।

तत्तु पूगाद्यारामस्थावरविषयमित्येके। अपरे तु फलितव्रीह्यादिक्षेत्रविषयमिति। अन्ये तु साधारणक्षेत्र-विषयमित्याहुः। सवि.३२२

उक्तलाभे आज्ञायां न निरोधः।

ज्ञात्यादिकृत इति शेषः। सवि.३२३

मनुः

अविक्रेयपण्यम्

नान्यदन्येन संसृष्टरूपं विक्रयमर्हति।
न सावद्यं न च न्यूनं न दूरे न तिरोहितम्॥

(१) सवि.३२०. (२) सवि.३२१.
(३) सवि.३२१. (४) सवि.३२२.
(५) सवि.३२२. (६) सवि.३२३.
(७) मस्मृ ८।२०३ क., ख., घ.पुस्तकेषु सावद्यं (चासारं) दूरे न (दूरेण) इति पाठः; स्मृच.२२२; विर.१९९ सृष्ट (सृष्ट); पमा.३७१ दन्येन (दन्य) सावद्यं (चासारं); विचि. ९२; सवि.३१७ सृष्टरूप (सृष्ट विरूपं); सेतु.१८४; विव्य.४५ विक्रय (विक्रेतु) दूरे न (दूरेण).

(१) अस्वामिविक्रयप्रसङ्गेनान्योऽपि विक्रये धर्म उच्यते। नान्यत् कुङ्कुमादिद्रव्यं कुद्रव्येण तदाभासेन कुसुम्भादिना संसृष्टं विक्रेयम्। यच्च सावद्यं चिरकालं भाण्डेऽवस्थितत्वात् प्राप्तविभाव जीर्णमजीर्णाभासं वस्त्रादि न च न्यून तुलामानादिना। दूरस्थित च, ग्रामे मम विद्यन्ते वासासि गुडादि वा द्रव्य, तिरोहित स्थगित वस्त्रादिनाऽन्तर्हित यस्य वा स्वरूपं केनचिद्-द्रव्यरागेणान्तर्धीयते पुराणं नववत्प्रतिभाति तत्तिरोहितं न विक्रेतव्यम्। इद द्रव्यमीदश च प्रदर्श्य विक्रयः कर्तव्यः। अन्यथाकृतस्तु न कृतो दशाहादूर्ध्वमपि प्रत्यर्पणे न दोषः। अन्यस्य दण्डस्येहा नाम्नातत्वादुपधाभिरित्येष एव दण्डः, प्रकरणभेदेन पठितत्वात्। अस्वामिविक्रयदण्ड इत्यन्ये। +मेधा.

(२) नान्यदन्येन विजातीयेन संसृष्ट रूपं नाणक विक्रयमर्हति विक्रीतमपि निवर्त्यमित्यर्थः। रूपपद विक्रीतमात्रोपलक्षणम्। मवि.

(३) मनुस्तु क्रीत्वानुशयानुत्पत्यर्थ कतिपयपण्याना विक्रयानर्हत्वमाह—नान्यदिति। स्मृच.२२२

(४) रूपं पण्यम्। *विर.१९९

याज्ञवल्क्यः

क्रीते द्रव्यभेदेन परीक्षाकालः अनुशयावधिरूपः

दशैकपञ्चसप्ताहमासत्र्यहार्धमासिकम्।
बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम्×॥

(१) अस्वामिविक्रयो निरूपितः। स्वामिविक्रये च —दशैकपञ्चेत्यादि। परीक्षाकालाच्चोर्ध्वं क्रीतं विक्रीत वा स्याद् यत् तदनुपहतम्। यत्तु स्वायम्भुवं—'क्रीत्वा विक्रीय वा द्रव्यं यस्येहानुशयो भवेत्। सोऽन्तर्दशा-हात् तद् द्रव्य दद्याच्चोपाददीत वा'॥ इति, तत् परीक्ष्य क्रीते द्रष्टव्यम्। दशाहादिक्रमेण बीजादीनां क्रमशः परीक्षाकालाः। दशाहो बीजाना गोधूमादीनाम्। एकाह-श्चायसः। अयोग्रहण सर्वताम्रादिलक्षणार्थम्। एवं वाह्यादिष्वपि योज्यम्। वाह्य बलीवर्दादयः। रत्नानि मरकतादीनि। स्त्रियो दास्याद्याः दोह्य गवादि पुमांसो दासादयः। विश्व.२।१८१

(२) अथ क्रीतानुशयः कथ्यते। बीजं व्रीह्यादिबीजम्। अयो लोहादि। वाह्यो बलीवर्दादिः। रत्नं मुक्ताप्रवाला-दिकम्। स्त्री दासी। दोह्यं महिष्यादि। पुमान् दासः। एषां बीजादीना यथाक्रमेण दशाहाधिकः परीक्षाकालो विज्ञेयः। परीक्ष्यमाणे च बीजादौ यद्यसम्यक्त्वबुध्याऽनुशयो भवति तदा दशाहाभ्यन्तर एव क्रयनिवृत्तिर्न पुनरूर्ध्व-मित्युपदेशप्रयोजनम्। सर्व चैतदपरीक्षितक्रीतविषयम्। यत्पुनः परीक्ष्य न पुनः प्रत्यर्पणीयमिति समय कृत्वा क्रीतं तद्विक्रेत्रे न प्रत्यर्पणीयम्। *मिता.

(३) मासशब्दात्प्राक्तनोऽहःशब्दो दशादिशब्दैः प्रत्येकमभिसंबध्यते। +अप.

अनुशयकारणाभावेऽनुशये दण्डविधिः

क्षयं वृद्धिं च वणिजा पण्यानामविजानता।
क्रीत्वा नानुशयः कार्यः कुर्वन् षड्भागदण्डभाक्॥

(१) इदानीं क्रयविक्रयानुशयस्य विषय प्रदर्शयति—क्षयं वृद्धिं चेति। चन्द्रगत्यादिवशेन पण्यानामर्घ-हानिर्वृद्धिर्वा भवति। तच्चैव विजानता वणिजा क्षयं वृद्धिं वा निरूपयाविरोधे सति क्रीत्वा विक्रीय वा नानु-शयः कार्यः। कुर्वतो वा पण्यमूल्यषड्भागो राजदण्डः। स्पष्टमन्यत्। विश्व.२।२६३

+ गोरा., मसु. मेधातिथेरन्यपक्षवत्। * शेष मेधावत्।

× अग्नौ सुवर्णमक्षीणं इत्यादयश्चत्वारः श्लोकाः क्षयवृद्धि-निरूपकाः (यास्मृ.२।१७८-१८१) स्तेयप्रकरणे द्रष्टव्याः.

(१) **यास्मृ.**२।१७७; **अपु.**२५७।२८ परी (प्रती); **विश्व.** २।१८१; **मिता.**; **अप.**२।१७७ : २।२५८ प्रथम-पादः; **विर.**१९७ मासव्यहार्ध (व्यहमासार्ध); **सुबो.**२। १७७ उत्त.; **विचि.**९०; **चन्द्र.**६० मासिकम् (मासकम्); **वीमि.**२।१७७ सप्ताह (सप्ताह); **व्यउ.**९३ सप्ताह (सप्ताह) मासिकम् (मासकम्); **राकौ.**४७२; **सेतु.**१८२; **समु.** १०८; **विव्य.**४४ सिकम् (सिकं).

* विर., वीमि. मितावत्। + शेषं मितावत्।

(१) **यास्मृ.**२।२५८; **अपु.**२५८।४८; **विश्व.**२। २६३ नाम (नां तु); **मिता.**; **अप**; **व्यक.**१६९ वणिजा (वणिजां); **स्मृच.**२२१; **विर.**१९८ क्रीत्वा (क्रेत्वा) शेष व्यकवत्; **पमा** ३६२; **रत्न.**१०३; **विचि.**९१ मवि (मभि) शेष व्यकवत्; **चन्द्र.**६० नाम (नां च) शेष व्यकवत्; **वीमि.**; **व्यप्र.**३४१ क्षयं... णिजा (वृद्धिं क्षय वा वणिजां); **व्यउ.**९४ व्यप्रवत् : ९६ वणिजा (वाणिज्यं); **वित.** ६२४; **सेतु.**१८३ मवि (मभि); **समु.**१०९

(२) विक्रयानुशयोऽभिहितः। क्रीतानुशयस्वरूपं तु प्राक् प्रपञ्चितं। अधुना तदुभयसाधारणं धर्ममाह—शयमिति। परीक्षितक्रीतपण्यानां क्रयोत्तरकालं क्रयकालपरिमाणतोऽर्धकृतां वृद्धिमपश्यता क्रेत्रा अनुशयो न कार्यः। विक्रेत्रा च महार्घनिबन्धनं पण्यक्षयमपश्यता नानुशयितव्यम्। वृद्धिक्षयपरिज्ञाने पुनः क्रेतृविक्रेत्रोरनुशयो भवतीति व्यतिरेकादुक्त भवति। अनुशयकालावृधिस्तु नारदेनोक्तः। अपरीक्षितक्रयविक्रये पुनः पण्यवैगुण्यनिबन्धनानुशयावधिः 'दशैकपञ्चसप्ताहै'त्यादिना दर्शित एव। तदनया वाचोयुक्त्या वृद्धिक्षयपरिज्ञानस्यानुशयकारणत्वमवगम्यते। यथा पण्यपरीक्षाविधिरलात्पण्यदोषाणामनुशयकारणत्वम्। अतः पण्यदोषतद्वृद्धिक्षयकारणत्रितयाभावेऽनुशयकालाभ्यन्तरेऽपि यद्यनुशय करोति तदा पण्यषड्भाग दण्डनीयः। अनुशयकारणसद्भावेऽप्यनुशयकालातिक्रमेणानुशय कुर्वतोऽप्येवमेव दण्डः। उपभोगेनाविनश्वरेषु स्थिरार्घेष्वनुशय कालातिक्रमेणानुशय कुर्वतो मनूक्तो दण्डो द्रष्टव्यः। ×मिता.

नारदः

क्रीतानुशयनिरुक्तिः

[1]क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते।
क्रीतानुशय इत्येतद्विवादपदमुच्यते॥

(१) न बहु मन्यते न परामर्षपूर्वकमिति मन्यत इत्यर्थः। स्मृच.४

(२) पूर्वस्मिन् प्रकरणे विक्रीतस्य परावृत्तिः अत्र तु क्रीतस्येति संगतिः। न चास्य पूर्वत्रान्तर्भावः, क्रीतविक्रीतगतत्वेन भिन्नविषयत्वात्परावृत्तेः। ननु क्रयविक्रययोर्वीवधकलशतुल्यतया परस्परापेक्षत्वाद्वैवधिकं पण्यं युक्तमिति चेत्, सत्यम्। 'दशाहोऽनुशयः क्रय' इत्यत्र क्रयशब्दः परिवृत्तिविनिमययोरुपलक्षकः। तत्राप्यनुशयस्य तुल्यत्वात्। सवि.३१४

क्रीते प्रतिदानावधिः

[2]क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी।
विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाहृयविक्षतम्॥
[3]द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्रिशांशमावहेत्।
द्विगुणं तु तृतीयेऽह्नि परतः क्रेतुरेव तत्॥

(१) एतच्च बीजव्यतिरिक्तोपभोगादिविनश्वरवस्तुविषयम्। बीजादिकये पुनरन्य एव प्रत्यर्पणविधिरित्याह —दशैकेत्यादि। मिता.२।१७७

(२) एतच्चापरीक्षितपण्यविषयम्। अप.२।२५८

(३) यो दुष्क्रीत जातमिति क्षयादिकं जानन् इदं मन्यते तेन दुष्क्रीतं प्रतिदेयमिति संबन्धः। अविक्षत अविकृतं विकृत चेद्वैकृत्यसमाधानार्थं मध्यस्थजनकल्पित-

---

× पमा, व्यप्र मितावत्।

(१) **नासं**.१०।१ य. (यत्) क्रीता (क्रीत्वा), **नास्मृ**.१२।१, **अपु**.२५३।२१ पू, **मिता**.२।१७७; **व्यक**.१६९ क्रेता (क्रीतं) क्रीता (क्रीत्वा); **स्मृच**.४ नासवत्; **विर**.१९६ व्यकवत्; **पमा**.३६०; **रत्न**.१०२; **सवि**.३१४(=) नासंवत्; **वीमि**.२।१७७; **व्यप्र**.३३८; **व्यउ**.९३; **व्यम**.९४; **विता**.६१२; **राकौ**.४७२; **सेतु**.१८१ क्रेता (क्रीत); **समु**.१०८ नासवत्.

(१) **नासं** १०।२ यः (यत्) तस्मिन्नेवाहृयवि (तस्मिन्नेवाहृय्यवि); **नास्मृ**.१२।२ य. (यत्); **अपु**.२५३।२१ क्रीत्वा मूल्येन (क्रीत्वा मूल्य तु), **मेधा**.८।२२२ मन्यते क्रयी (इति मन्यते), **मिता**.२।१७७,२।२५८ नास्मृवत्; **अप**.२।२५८; **व्यक** १६९ दुष्क्रीत (दुःक्रीतं) विक्ष (वीक्षि); **स्मृच**.२२१; **विर**.१९६ व्यकवत्; **पमा**.३६३; **दीक**.५३ व्यकवत्; **रत्न**.१०३; **विचि**.९१ यः पण्य (यो द्रव्य); **नृप्र**.२९; **सवि**.३१७ यः (यत्) विक्ष (वीक्षि) कात्यायन.; **वीमि**.२।१७७ विचिवत्; **व्यप्र**.३४० नास्मृवत्; **व्यउ**.९३; **व्यम**.९५ व्यकवत्, **विता**.६१२-६१३ दुष्क्रीत (दुःक्रीत); **राकौ**.४७२; **सेतु**.१८२, ३२१-३२२; **समु**.१०९; **विव्य**.४५ क्रेतुः (क्रेतृ) विक्ष (वेक्षि) शेष विचिवत्.

(२) **नासं** १०।३ तु तृ (तत्तृ); **नास्मृ** १२।३ वहेत् (हरेत्), **मेधा**.८।२२२ त्रि (त्र्य) तु तृ (तत्तृ), **मिता**.२।१७७, २।२५८; **अप**.२।२५८ वहेत् (हरेत्) तु तृ (तत्तृ); **व्यक**.१६९ मावहेत् (माप्नुयात्) तु तृ (तत्तृ); **स्मृच**.२२१; **विर**.१९६ व्यकवत्, **पमा**.३६३ तत् (च); **दीक**.५३ नास्मृवत्; **रत्न**.१०३; **विचि**.९१ नास्मृवत्; **नृप्र**.२९ मावहेत् (माहरेत्), **सवि**.३१७ त्रिशांशमावहेत् (त्र्यशांशमाहरेत्) कात्यायनः; **चन्द्र**.६० नास्मृवत्; **वीमि**.२।१७७ नास्मृवत्; **व्यप्र**.३४१ नासंवत्; **व्यउ**.९३; **व्यम**.९५ अपवत्; **विता**.६१३; **राकौ**.४७२; **सेतु**.३२२ अपवत्; **समु**.१०९; **विव्य**.४५ नास्मृवत्.

द्रव्यसहितमेव क्रयदिनेऽपि प्रतिदेयं द्विगुण पञ्चदशाशं परतस्तृतीयस्याह: परत: क्रेतुरेव तत्क्रीत्वाऽनुशय क्षयादिकं जानन्नपि न कुर्यादित्यर्थ:। अपशकुनतोऽनुशये कृतेऽपि यदि क्रेता शकुनाभिज्ञस्तदा नारदेनोक्तं कार्य न्यायसाम्यात्। 'दुष्क्रीत मन्यत' इति सामान्येनोक्तेश्च अपशकुनतोऽपि क्रेता दुष्क्रीतं मन्यत एव। यत्र तु बहुदोषत्वेन ज्ञात्वाऽपि पण्यं स्वल्पमूल्येन क्रीणाति तत्र दुष्क्रीतं मन्यत इति न क्रय: परावर्तते। स्मृच.२२१

(४) मूल्यात्त्रिंशाश मूल्यादधिक त्रिंशत्तमभागमित्यर्थ:। विर.१९६

परीक्ष्य क्रीतेऽनुशयो न कार्य:

[1]क्रेता पण्यं परीक्षेत प्राक्स्वयं गुणदोषत:।
परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत्पुन:॥

क्रीत्वाऽनुशयो मा भूदिति स्वय क्रेता प्रागेव क्रयात्पण्य गुणाढ्य दुष्टं वेत्यवधारणार्थं परीक्षेतेत्यर्थ:। स्मृच.२२०

क्रये परीक्षाकालो द्रव्यभेदेन

[2]त्र्यहाद्दोह्यं परीक्षेत पञ्चाहाद्वाह्यमेव तु।
मुक्तावज्रप्रवालानां सप्ताहं स्यात्परीक्षणम्॥

[1]द्विपदामर्धमासं तु पुंसां तद्द्विगुणं स्त्रिया:।
दशाह: सर्वबीजानामेकाहो लोहवाससाम्॥

(१) व्यहात्क्रयदिनमारभ्येति शेष:। एवं पञ्चाहादावपि शेषो द्रष्टव्य:। अत्र विक्रेतु: प्रतिदेयमित्यादिविधिदर्शनात् 'व्यहाद्दोह्यम्' इत्यादिपरीक्षणं क्रीतदोह्यादिद्रव्यविषयमिति गम्यते। द्विपदा पुंसां दासानामित्यर्थ:। तद्द्विगुण मासमिति यावत्। स्त्रिया: दासीजनस्य। +स्मृच.२२१

(२) परीक्ष्य क्रीणीयादित्युक्तम्। परीक्षणस्यावधिरुच्यते। व्यहाद् दोह्याना गवादीनाम्। तावता कालेन सारासारता ज्ञातुं शक्या। पञ्चाहाद् वाह्याना अश्वादीना परीक्षणम्। मुक्तादीनां सप्ताहाद् ज्ञायते विशेष: कृत्रिमादि:। पुंसामर्धमासं, तावता कालेन शीलादिर्ज्ञायते। मासेन स्त्रिया: गूढप्रचारत्वादेतावता कदाचित् ज्ञायते। दशाहाद् बीजानामुपहतानुपहतत्वं ज्ञायते। लोहाना अयआदीना वस्त्रादीनां च दर्शनादेव ज्ञायते, तथापि दिवसेन सुज्ञातं भवति। नाभा.१०।६

(३) पूर्वोदाहृत 'चर्मकाष्ठे'त्यादि व्यासवचनेन भक्षणाद्यर्थं गृहीताना धान्यादीना सद्य: परीक्षणाभिधानात् सर्वबीजानामित्यत्र बीजशब्दो वापाद्यर्थगृहीतधान्यपर:। व्यप्र.३३९

समयमङ्गीकृत्य क्रीते वस्तु नानुशय: कार्य:

[2]परिभुक्तं तु यद्वास: क्लिष्टरूपं मलीमसम्।
सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्पुन:॥

---

(१) **नासं.**१०।४ र्न (र्ना), **नास्मृ** १२।४, **मिता.** २।१७७(८); **अप.**२।२५८ क्ष्या (क्षा); **व्यक.**१६९ अपवत्; **स्मृच.**२२०; **विर.**१९८ अपवत्; **पमा.**३६० अपवत्; **रत्न.**१०३; **विचि.**९१ अपवत्; **नृप्र.**२९; **सवि.**३१५; **चन्द्र.**६० अपवत्; **व्यप्र.**३३९-३४०; **व्यउ.**९३-९४ अपवत्; **विता.**६१६; **राकौ.**४७३; **सेतु.**१८३; **समु.**१०८; **विव्य.**४५ प्राक् (तत्) क्ष्या (क्षा) पुन: (तत:).

(२) **नासं.**१०।५ तु (च); **नास्मृ.**१२।५ मुक्तावज्र (मणिमुक्ता) साहं (साहः), **व्यक.**१६९; **स्मृच.**२२१ हाद्व्यहमेव तु (हाद्व्यहमेव वा); **विर.**१९९ तु (च) वज्र (रत्न) साह (साहात्); **पमा.**३६१ मुक्तावज्र (मणिमुक्ता) साह (साहात्) क्रमेण व्यास:, **रत्न.**१०३, **विचि.**९० क्षेत (क्ष्येत) तु (च) व्यासनारदौ, **स्मृचि.**२१ विचिवत्; **नृप्र.**२९; **सवि.**३१६ व्यहाद् (व्यह) कात्यायन:; **व्यप्र.**३३९; **व्यउ.**९३; **व्यम.**९४; **विता.**६१५ साहं (साहः); **सेतु.**१८२ तु (च) साहं (साहात्) व्यासनारदौ; **समु.**१०८ व्यहाद् (व्यह) पञ्चाहाद् (पञ्चाहं); **विव्य.**४४ विचिवत्.

+ व्यप्र. स्मृचवत्।

(१) **नासं.**१०।६ तु (स्यात्) शाह: (शाहं) काहो (काहं); **नास्मृ.**१२।६ मास तु (मास: स्यात्); **व्यक.**१६९; **स्मृच.**२२१ शाह: (शाहं) काहो (काहं); **विर.**१९९; **पमा.**३६१ तु (स्यात्) शाह: (शाहात्) काहो (काहात्) क्रमेण व्यास:; **रत्न.**१०३; **विचि.**९० व्यासनारदौ; **स्मृचि.**२१ पू; **नृप्र.**२९; **सवि.**३१६ स्मृचवत्, कात्यायन:; **व्यप्र.**३३९ शाह: (शाह); **व्यउ.**९३; **व्यम.**९४ तु (च) शेषं स्मृचवत्; **विता.**६१५ मासं (मासात्) गुणं (गुणात्); **सेतु.**१८२ पू., १८३ उत्त., व्यासनारदौ; **समु.**१०८ स्मृचवत्; **विव्य.**४४ लोह (लौह).

(२) **नासं.**१०।७ क्लिष्ट (क्लिन्न) तत्क्रीतं (विक्रीतं)

(१) परावृत्य समयमङ्गीकृत्य क्रीतं यदि सदोषं भवति तदपि विक्रेतुर्न भवति। दुष्क्रीतत्वेऽपि समयस्य बलीयस्त्वात्। एवमुक्तविशेषशास्त्राविषयक्रीत्वानुशये क्रयपरावृत्तिप्रकारोऽपि विक्रीयानुशयप्रसंगतः पूर्वस्मिन्यदेऽस्माभिर्दर्शितः। स इहाप्यनुसंधेयः। स्मृच.२२२

(२) सदोषमपि ज्ञात्वेति शेषः। एतत्तु ज्ञातदोषक्रीतवस्त्वन्तरेऽपि द्रष्टव्यं न्यायतौल्यात्। विर.२००

(३) परिभुक्तं मृदितं, न भोगमात्रेण। मलिनं सदोषमपि छिद्रादिसहितमपि न तत् प्रतिदातव्यम्। तथाभूतस्य ज्ञात्वा क्रीतत्वात्। तथाभूत च विक्रीणाति न परीक्षत एवेति नास्ति। नाभा.१०।७

क्षेत्रे विक्रीते विक्रेत्रनुशयावधिः

[1]**विक्रीते त्वाज्ञया क्षेत्रे क्षेत्रिणोऽनुशयो यदि।**
दत्वा समस्तं तन्मूल्यमा त्रिभोगात्समाप्नुयात्॥

अनुशयकारणाभावेऽनुशयो व्यर्थः

[2]**क्रीत्वा नानुशयं कुर्याद्वणिक् पण्यविचक्षणः।**
क्षयं वृद्धिं च जानीयात्पण्यानामागमं तथा॥

(१) नारदस्तु क्रीत्वानुशयानुत्पत्त्यर्थं क्रयात्प्राक् ज्ञातव्यमाह—क्षय वृद्धि चेति। अश्वादिपण्यानामत ऊर्ध्वमपचयो वृद्धिर्वा भविष्यतीति देशकालादिवशात् जानीयात्। कुलीनत्वादिज्ञानार्थमुत्पादकं जन्मभूम्वादिकं जानीयादित्यर्थः। यत्तु न जानाति तं प्रत्याह याज्ञवल्क्यः—'क्षयं वृद्धिं च वणिजा पण्यानाम विजानता। क्रीत्वा नानुशयः कार्यः कुर्वन् षड्भाग दण्डभाक्' ॥ अनुशयः पश्चात्तापः। स चापचयादिकम विजानता वणिजा क्रीत्वा वृथा न कार्यः। दौर्मत्यापत्तेः 'क्रीत्वा नानुशय कुर्याद्वणिक् पण्यविचक्षणः' इत्युक्त निषेधातिक्रमापत्तेश्च। अत एवानुशयं कुर्वन्नसौ मूल्य षड्भागदण्डभाक् भवतीत्यन्त्यपादेन दण्डाभिधानं उपपन्नम्। ननु विजानताऽप्यनुशयो न कार्यः। निषेध सद्भावात्। सत्यम्। किं त्वपवादबलात्क्रियते। स चापवादोऽनुशयात्तस्य प्रतिपादनस्य प्रतिपादनं कुर्वता नारदेनार्थाद्दर्शितः। स्मृच.२२१

(२) उपसंहारोऽयम्। क्रीत्वा विरूपक क्रीतमिति नानुशय कुर्यात्। वणिग् विचक्षणः तथा परीक्ष्य क्रीणीयाद यथा पश्चात्तापो न भवति। दानग्रहणयोश्च पण्याना क्षय वृद्धि च जानीयात्। तथा तत्र न वक्ष्यते। पण्यानामागम च। अदृश्यमानविशेषस्यापि जन्मभूम्या विशेषपरिच्छेदे भवति। अत्रोपदेशफलं यथोक्ताकरणे दण्डः। नाभा.१०।१६

बृहस्पतिः

परीक्ष्य क्रेयम्

[3]परीक्षेत स्वयं पण्यमन्येषां च प्रदर्शयेत्।
परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत्॥

अन्येषा पण्यगुणदोषविदामिति शेषः। बहुमतं क्रीत मिति शेषः। स्मृच.२२०

परीक्षाकालपूर्वमेवानुशयः कार्यः

[4]अतोऽर्वाक् पण्यदोषस्तु यदि संजायते क्वचित्।
विक्रेतुः प्रतिदेयं तत्क्रेता मूल्यमवाप्नुयात्॥

नं (नौ); **नास्मृ.**१२।७ भुक्त तु (भुक्त च); **व्यक.**१७० तत (यत्); **स्मृच.**२२२; **विर.**२०० व्यकवत्; **पमा.**३६४ नास्मृवत्; **रत्न.**१०४; **विचि.**९१; **नृप्र.**२९; **सवि.**३१६ कात्यायनः; **चन्द्र.**६१ छिष्ट (कल्प) तत् (यत्), **वीमि.**२।१७७ त्पुनः (त्ततः) शेष नास्मृवत्; **व्यप्र.**३४१ छिष्ट (कृष्ण); **व्यउ.**९४ व्यप्रवत्; **व्यम.**९५ व्यप्रवत्; **विता.**६१६ व्यप्रवत्, **सेतु.**१८२; **समु.**१०९; **विव्य.**४५ तत् (यत्) त्पुनः (त्ततः).

(१) **समु.**११०.

(२) **नासं.**१०।१६ पण्य (पण्ये) क्षयं वृद्धिं च (क्षयवृद्धौ च); **नास्मृ.**१२।१६ क्षयं वृद्धि च (वृद्धिक्षयौ तु); **व्यक.**१६९ नामागमं तथा (नां यस्य यादृशी); **स्मृच.**२२१; **विर.**१९८ व्यकवत्; **पमा.**३६२ उत्त.; **रत्न.**१०३; **विचि.**९१ व्यकवत्; **नृप्र.**३०; **सवि.**३१६ गमं (गति) उत्त., हारीतः; **व्यप्र.**३४०।३४१ उत्त.; **व्यउ.**९४; **समु.**१०९ जानी... तथा (जानानः पण्यानां यस्य यादृशम्) काश्यपः; **विव्य.**४५ व्यकवत्.

(१) **अप.**२।२५८; **व्यक.**१६९; **स्मृच.**२२०; **विर.**१९८; **पमा.**३६० उत्त.; **रत्न.**१०२; **विचि.**९१ गृहीत्वा (क्रेता च); **स्मृचि.**२१ कात्यायनः; **सवि.**११५; **वीमि.**२।१७७; **व्यप्र.**३३९ पण्य (क्रीत); **व्यउ.**९३ पण्य (क्रीत) गृहीत्वा (ग्रहीता); **विता.**६१३ पण्य (क्रीत)गृहीत्वा (ग्रहीता); **सेतु.**१८३; **समु.**१०८; **विव्य.**४५ दर्श (काश) गृहीत्वा (गृहीत).

(२) **व्यक.**१६९; **स्मृच.**२२१ क्रमेण नारदः; **विर.**

(१) अतोऽर्वाक् व्यहादेरभ्यन्तर इत्यर्थः। संजायत इत्यनेन ज्ञानतः सिद्धिरुक्ता न वस्तुनिष्पत्तिः। परीक्षाया ज्ञानतः सिद्धिहेतुत्वाद्यदीत्युक्तम्। स्मृच.२२१

(२) नारदोक्तक्रमेण परिक्षाकालमुक्त्वा बृहस्पतिः—अत इति। विर.१९९

क्रये मूल्यनिश्चयः

तेदर्थं द्रव्यपञ्चांशं व्ययंशं च क्रमशो विना।
त्रिभिस्सिद्धः क्रयो लाभः चतुर्थोंऽशो न पञ्चमः॥

स्थावरक्रयविधिः

प्रेष्टव्याः संनिधिस्थाश्चेत् क्रेत्रा ज्ञात्यादयस्स्मृताः।
अन्यथा चेत्कृतं कर्म ज्ञातीच्छां दर्शयेत्ततः॥

'तत्कर्म ज्ञातीनेवानुसरतीत्यर्थः' इति भारुचिः। सवि.३२२

त्रिपक्षादथवा मासत्रितयात्तद्वाप्नुयात्॥

तत्र कालनियममाह स एव—त्रिपक्षादिति। ज्ञातिरिति शेषः। सवि.३२२

ज्ञात्यादिप्रत्ययेनैव स्थावरक्रय इष्यते।
अन्यथा चेत्क्रयो न स्याद्दण्डश्चापि तयोर्भवेत्॥
ज्ञातिसामन्तधनिकाः क्रये ग्रामाद्बहिर्गताः।
नार्हन्ति ते प्रतिक्रोष्टुं क्रान्ते पक्षत्रये क्रये॥
यः कश्चिद्वञ्चकस्तेषां विज्ञातः क्रयविक्रये।
शपथैः स विशोध्यः स्यात्सर्ववादेष्वयं विधिः॥
सोदराश्च सपिण्डाश्च सोदकाश्च सगोत्रिणः।
सामन्ता धनिका ग्राह्याः सप्तैते योनयो मताः॥

योनयः कारणानि। अत्र एतेषा ज्ञातिसामन्त धनिकाना आज्ञाक्रये उक्तलाभक्रये च प्रवेशो नास्ति। यथाह विष्णुः—उक्तलाभे आज्ञाया न निरोध इति। ज्ञात्यादिकृत इति शेषः। आज्ञाक्रयोक्तलाभक्रययोः स्वरूपं सुमन्तुना दर्शितम्—मूल्यस्येति। सवि.३२३

मूल्यं दत्वाऽधिकं न्यूनं मूल्यस्यानुचितं स्मृतम्।
क्रयसिद्धे(द्धि) स्तु नैव स्याद्वत्सराणां शतैरपि।

अत्र ज्ञात्यादिप्रवेशोऽस्त्येव। रुचिक्रयत्वात्। सवि.३२६

मत्तमूढानभिज्ञातभीतैर्विनिमयः कृतः।
यच्चानुचितमूल्यं स्यात् तत्सर्वं विनिवर्तते॥

अत्र विनिमयपरिवृत्त्योः क्रयधर्मानतिदिशति हारीतः सवि.३२६

विक्रयेषु च सर्वेषु क्रूपवृक्षादि लेखयेत्।
जलमार्गादि यत्किंचिदन्यैश्चैव बृहस्पतिः॥
क्षेत्राद्युपेतं परिपक्वसस्यम्।
वृक्षं फलं वाऽप्युपभोगयोग्यम्॥
कूपं तटाकं गृहमुन्नतं च।
(क्रीते) क्षेत्रे च विक्रेतुरिदं वदन्ति॥

एषु क्रयपत्रेषु आलिखितेषु विक्रेतुर्भवन्तीत्यर्थः सवि.३२६

कात्यायनः

भूक्रये परीक्षाकाल.

भूमेर्दशाहोऽनुशयः क्रेतुर्विक्रेतुरेव च।
द्वादशाहः सपिण्डानामपि चाल्पमतः परम्॥

१९९; **पमा.**३६१ सजा (सज्ञा) क्रमेण व्यास:; **दीक.**४९; **रत्न.**१०३; **विचि.**९०; **सवि.**३१६ पमावत्, कात्यायनः; **व्यप्र.**३१९ क्रमेण नारदः; **व्यउ.**९३ तत् (त) नारदः; **व्यम.**९४; **सेतु.**१८२ पमावत्; **समु.**१०८ पमावत्.

(१) **समु.**१०९.

(२) **सवि.**३२२; **समु.**१११ स्मृताः (तदा).

(३) **सवि.**३२२; **समु.**१११ त्तदवा (तु तदा).

(४) **सवि.**२४३ न स्याद्दण्डश्चापि तयोर्भवेत् (यः स्यादग्रामे त्रिपक्षकम्); **समु.**१११ त्यादि (त्याधि) स्थावर (स्मारक).

(५) **समु.**१११. (६) **सवि.**३१८.

(७) **सवि.**३२३; **समु.**१११ ग्राह्याः (ग्रामः) योनयो (भूक्रये).

---

(१) **सवि.**३२६; **समु.**११० पूर्वार्धे (मूल्यात्पादाधिक न्यून मूल्यं त्वनुचितं स्मृतम्).

(२) **सवि.**३२६ हारीतः; **समु.**११० शात (शार्त वर्तते (वर्तयेत्).

(३) **सवि.**३२६; **समु.**१०९ दन्यैः (दन्यत्).

(४) **सवि.**३२६; **समु.**१०९ क्षेत्राद्यु (क्षीराद) क्रेत्रे च (क्रीतेऽपि).

(५) **पमा.**३६४ पूर्वार्धे (भूमेर्दशाहो विक्रेतुरायस्तक्रेतुरेव च) **रत्न.**१०३ पू.; **व्यप्र.**३३९ पू.; **व्यम.**९४ हो (हे) च (वा) पू.; **विता.**६१५ पू.; **समु.**१०८ च (वा) दः (दं).

भूमेर्गृहक्षेत्रादिरूपायाः । अनुशयः परावर्तनयोग्यः कालः परीक्षाकाल इति यावत् । व्यप्र.३३९

योग्यकाले क्रीतं सदोषं दृष्टं प्रतिदेयम्

[1]अविज्ञातं तु यत्क्रीतं दुष्टं पश्चाद्विभावितम् ।
क्रीतं तत्स्वामिने देयं पण्यं कालेऽन्यथा न तु ॥

अविज्ञात परीक्षाशैथिल्यात् तत्त्वतोऽपरिज्ञातम् । काले यस्य द्रव्यस्य यावान्परीक्षाकाल उक्तस्तस्मिन्नित्यर्थः । अन्यथा तत्कालात्यये दुष्टतया विभावितमपि क्रीत न तत्स्वामिने देयम् । एव निर्गुणत्वेन विभावितमपि क्रीतं तत्स्वामिने देयम् । दुष्टग्रहस्यानुशयहेतुमत्यरत्वात् । स्मृच.२२१

निर्दोषक्रयेऽनुशये दण्डः

[2]क्रीत्वा चानुशयात्पण्यं त्यजेद्योऽादि यो नरः ।
अदुष्टमेव काले तु स मूल्यादृशमं वहेत् ॥

(१) कालेऽनुशयकाले परमार्थतः पण्यमदुष्टमेव दुष्टबुद्ध्या त्यजेन्न गृह्णीयादित्यर्थः । स्मृच.२१८

(२) काले द्रव्यार्पणकाले, इदमप्यपरीक्षितक्रीते । विर.१९७

[3]क्रीत्वा गच्छन्ननुशयं क्रयी हस्तमुपागते ।
षड्भागं तत्र मूल्यस्य दत्त्वा क्रीतं त्यजेद्गुरुः ॥

(१) अनुशयकालादूर्ध्वमेतत् । अप.२।२५८

(२) अनुशयकालादूर्ध्वमनुशये सत्येतद्वचनमित्यपरादित्यमतिः । सा त्वयुक्ता 'परतोऽनुशयो न तु' इत्युक्तत्वात् । अनवस्थाप्रसंगाच्च । स्मृच.२१८

(३) हस्तमुपागते स्ववशमागते । एतेन स मूल्यादृशमं वहेदिति पूर्वोक्तं स्ववशानीतद्रव्यविषयम् । विर.१९७

(४) अत्र मूल्यदृशमभागदानं यद्यपभुज्यमानमपि न नश्यति भूम्यादिक तद्विषयं, उपभोगविनश्वरबीजादिविषय षड्भागदानमिति व्यवस्था ज्ञेया । ननु विजानताऽप्यनुशयो न कार्यः 'क्रीत्वा नानुशयं कुर्यात्' इति निषेधसद्भावादिति चेत्, सत्यम् । अपवादस्य सत्त्वात् । स चापवादो दर्शितः— 'क्रीत्वा मूल्येन' इति । व्यप्र.३४०

साधारणक्रये एकस्याधिकारमर्यादा

[4]साधारणं तु यत्क्रीतं नैको दद्यान्नराधमः ।
नादद्यान्न च गृह्णीयाद्विक्रीयाच्च न चैव हि ॥

मूल्यनिश्चयः

[5]द्रव्यं स्वं पञ्चधा कृत्वा त्रिभागो मूल्यमुच्यते ।
लाभश्चतुर्थो भागः स्यात् पञ्चमः सत्यमुच्यते ॥

एतत्कुङ्कुमवाणिज्यविषयम् । सवि.३१८

मूल्यनियामकः । क्रयपरिवर्तनयोः स्वरूपम् ।

[6]न सामन्तैर्न तद्ग्रामैस्तस्य मूल्यं नियम्यते ।
इदमस्येति यत्क्रेता विक्रेत्रा सह संवदेत् ॥
[7]आत्मीयस्य विजातीयद्रव्यमादाय चान्यतः ।
क्रयोऽर्थस्य परित्यागः साम्ये तु परिवर्तना ॥

नियम्यत इति । किं तु राज्ञेति शेषः । न तद्ग्रामीणैरिति तेषा ते पण्यादीनाम् । ग्रामो

---

(१) व्यक.१६९; स्मृच.२२१ पण्य कालेऽन्यथा (काले चेदन्यथा); विर. १९९; पमा.३६१, रत्न.१०३; विचि.९०-९१; स्मृचि.२१; नृप्र.३०; सवि.३१६ नारद ; वीमि.२।१७७; व्यप्र.३४०; व्यउ.९३-९४; व्यम.९४; विता.६१६ क्रीत त (दृष्ट त); सेतु १८२ (=) यत्क्रीतं (तत्क्रीतं); समु.१०८-१०९ स्मृचवत्, विव्य.४५(=).

(२) अप.२।२५८ चा (सा); व्यक.१६९ चा (त्व); स्मृच.२१८ चानुशयात् (ऽनुशयवान्); विर.१९७ चा (वा); रत्न.१०३; विचि.९२; सवि.३११ (=) चा (ऽप्य); चन्द्र.६१ अदुष्ट (अदृष्ट) वहे (हरे); वीमि.२।१७७; व्यप्र. ३४० ग्रादि यो (घातृते) दुष्ट (जुष्ट); व्यउ.९४ व्यप्रवत्; विता.६१६ दुष्ट (जुष्ट) उत्त.; सेतु.१८३ वहे (हरे); ३२२ वहे (हरे); समु.१०७ स्मृचवत् ; विव्य.४५ सेतुवत् .

(३) अप.२।२५८ क्रयी (क्रये); व्यक.१६९ क्रयी (क्रयं) गते (गतम्); स्मृच.२१८ द्रगुः (द्रुधः); विर.१९७; रत्न. १०३; विचि.९२ गते (गतम्); चन्द्र.६१ न (त्य); वीमि. २।१७७ स्मृचवत्; व्यप्र.३४० द्रगुः (न्नरः); व्यउ.९४ शय (शये) क्रयी (क्रये) तत्र (तस्य) द्रगुः (न्नरः); विता.६१६ मुपा (मुप) शेषं व्यप्रवत्; सेतु.३२२ गते (गतम्); समु. १०८ स्मृचवत्; विव्य.४५ गते (गतम्) तत्र (तस्य).

(१) सवि.३१७; समु.१०९ यत्क्रीतं (यत्क्षेत्र) स्मृत्यन्तरम्.

(२) सवि.३१८; समु.१०९ सत्यमु (सत्य उ).

(३) सवि.३१८; समु.१०९.

(४) समु.१०९.

ग्रामस्थपुरुषाः । इदमिति । एतदेव विक्रीतस्य क्षेत्रस्य मूल्यमिति । सवि.३१८

स्थावरक्रयोत्तलाभरुचिक्रयविधिः, मूल्यव्यवस्था अनुशयव्यवस्था च

ज्ञात्यादीनननुज्ञाप्य समीपस्थान (तन्द्रि) निन्दितान् ।
क्रयविक्रयधर्मोऽपि भूमेर्नास्तीति निर्णयः ॥
पलायिते तु करदे करप्रतिभुवा सह ।
कार्यं करदक्षेत्रं विक्रीणीयुः सभासदः ॥
प्रतिदाने व्यवस्थाप्य कालं पूर्वं सवृद्धिकम् ।
अस्येदं क्रयमित्युक्त्वा यत्तु निर्दिश्यते पुरा ॥
धनिकस्य तदा तत्स्वं उत्तलाभे भविष्यति ॥
अर्धाधिके क्रयसिद्धयेदुत्तलाभो दशा (द्वि) धिकः ।
अ (व) पक्रयस्त्रिभा (भो) गेन सत्र एव रुचिक्रयः ॥
सिध्यते वाचिकोऽप्याधिः स्थावरेषु दशाब्दिकः ।
जङ्गमेषु द्वादशाब्दादुत्तलाभोऽपि सिध्यति ॥
समवेतैस्तु सामन्तैरभिज्ञैः पापभीरुभिः ।
क्षेत्रारामगृहादीनां द्विपदां च चतुष्पदाम् ॥
कल्पितं मूल्यमित्याहुः भागं कृत्वा तदष्टधा ।
एकभागातिरिक्तं वा हीनं वाऽनुचितं स्मृतम् ॥
तद्धीनमूल्यमनुचितमूल्यं वेत्यभिधीयत इत्यर्थः ।
सवि.३२५

समाः शतमतीतेऽपि सर्वं तद्विनिवर्तते ।
क्रयविक्रयणे क्रेयं यन्मूल्यं धर्मतोऽर्हति ॥
तुर्ये पञ्चमे षष्ठे सप्तमेऽशेऽष्टमेऽपि वा ।
हीनो (ने) यदि विनिर्वृत्ते क्रयविक्रयणे सति ॥

(१) सवि.३२२.
(२) सवि.३२४; समु.११० याज्ञवल्क्यः.
(३) समु.१०९.
(४) सवि.३२६; समु.११० रुचि (क्रयः).
(५) समु.११०.
(६) सवि.३२५; समु.११०.
(७) सवि.३२५; समु.११० हीनं (न्यून).
(८) सवि.३२५; समु.११० उत्तरार्धं व्यासः.
(९) सवि.३२५; समु.११० व्यासः.

हीनमूल्यं तु तत्सर्वं कृतमप्यकृतं भवेत् ।
उक्तादल्पतरे हीने क्रये नैव प्रदुष्यति ॥
तेनाप्यंशेन हीयेत मूल्यतः क्रयविक्रये ।
कृतमप्यकृतं प्राहुरन्ये धर्मविदो जनाः ॥
हीनमूल्यं सर्वथा प्रत्यावर्तनीयमाह स एव-समाः शतमिति । सवि.३२५

तुल्ययोः क्षेत्रयोर्मूल्यं वैषम्ये कारणं विना ।
षण्मासाद्वत्सराच्चापि हीनमूल्यं निवर्तते ॥
अर्वाक् पक्षात्त्रिपक्षाच्च षण्मासाद्वत्सरादपि ।
हीनमूल्यं तु विज्ञेयं तत ऊर्ध्वं निवर्तते ॥
भूहीनमूल्या गावश्च परस्वं च निवर्तते ।
पञ्चांशव्यंशहानौ च विपरीतं प्रशस्यते ॥
मूल्यात्स्वल्पप्रदानेऽपि क्रयसिद्धिः कृता भवेत् ।
चक्रवृद्ध्या प्रदातव्यं देयं तत्समयाद्दते ॥
एतावता कालेन दास्यामीति समयाद्दते याच्यमानमदत्तं चक्रवृद्ध्या वर्धते । समयकरणे तस्मिन् काले पूर्वदत्तशेष देयम् । तस्मिन्नपि काले याच्यमान न दत्त चेच्चक्रवृध्या वर्धत एवेति ध्येयम् । सवि.३२७

याच्यमानमदत्तं चेच्चक्रवृद्ध्या प्रवर्धते ॥
ज्ञातिसामन्तधनिकाः क्रमेण क्रयहेतवः ।
तत्रासन्नतराः पूर्वं सपिण्डाश्च क्रये मताः ॥
चतुःसामन्तसान्निध्ये प्राच्यवान्पश्चिमं ग्रसेत् ।
अथोदीच्यः पश्चिमोऽथ सर्वाभावे तु दक्षिणः ॥
स्वग्रामे दशरात्रं स्यादन्यग्रामे त्रिपक्षकम् ।
राष्ट्रान्तरेषु षण्मासं भाषाभेदे तु वत्सरम् ॥
ज्ञातिसामन्तधनिकान् समीपस्थाननिन्दितान् ।
अननुज्ञाप्य कर्तारौ तत्समं दण्डमर्हतः ॥
ज्ञात्यादिप्रत्ययेनैव स्थावरक्रय इष्यते ।
परिवृत्तौ कृषौ दाने तथासौ नेष्यते बुधैः ॥

(१) सवि.३२५-३२६; समु.११० व्यासः.
(२) सवि.३२६; समु.११० तेना (केना) व्यासः.
(३) समु.११०.
(४) सवि.३२७; समु.११० त्र्यात्स्वल्प (त्र्यस्याल्प). देयं (शिष्टं).
(५) समु.११०. (६) समु.११०. (७) समु.११०.
(८) सवि.३२२-३२३; समु.१११. (९) समु.१११.

व्यासः

द्रव्यविशेषेषु परीक्षाकालाः अनुशयावधिश्च

चर्मकाष्ठेष्टकासूत्रधान्यासवरसस्य च ।
वसुकुप्यहिरण्यानां सद्य एव परीक्षणम् ॥

वसुशब्दोऽत्र यद्यप्यर्थमात्रवाची तथाऽप्यत्र गोबलीवर्दन्यायाच्चर्मादिव्यतिरिक्तार्थपरः । कुप्यं तु हेमरूप्यव्यतिरिक्तं त्रपुसीसादिकं ज्ञेयम् । तथा च हेमरूप्ये प्रस्तुत्यामरसिंहेनोक्तम् 'ताभ्यां यदन्यत् तत्कुप्यम्' इति। एवं चर्मादिकमत्यन्तास्थया परीक्ष्यम् । परीक्ष्य क्रीतस्य दोषदर्शनेऽपि त्यागायोगात्। स्मृच.२२०

[2]हेमरूप्याम्बररसाः परीक्ष्या दिवसेन तु ॥
[3]आत्मीयस्य विजातीयद्रव्यमादाय चान्यतः ।
क्रयो मूल्यस्य संत्यागः स्वत्वहेतुः परस्परम् ॥
परिवृत्तिस्सजातीयद्रव्ये विनिमयः स्मृतः ।
वैषम्येऽवक्रयः प्रोक्तो मिश्रे विनिमयः स्मृतः ॥
तत्राप्यसदृशैरन्यैर्हीनमूल्यैर्विमिश्रितैः ।
कुर्वन्त्यौपाधिकं चान्ये पण्यानां परिवर्तनम् ॥
अर्धाधिक्ये क्रयः सिध्येद्यद्याद्धीनं क्रयी धनम् ।
आ दशाहान्निवर्त्यः स्यात्क्रयो विक्रय एव च ॥
संधिश्च परिवृत्तिश्च विभागश्च समो यदि ।
आ दशाहान्निवर्त्याः स्युर्वैषम्ये नववत्सरात् ॥
[4]अष्टमांशाधिकन्यूनान्मूल्यात्सामन्तकल्पितान् ।
तस्यैवानुचितत्वेन क्रयस्यानुशयो द्वयोः ॥
[5]भूमेर्दशाहोऽनुशयः क्रेतुर्विक्रेतुरेव च ।
तात्कालिकास्तु सामन्तास्तकाला धनिकास्तथा ।
तात्कालिकाः सपिण्डाश्च वेदनीयाः क्रये मताः ॥

(१) **व्यक.**१६९ वसु (वस्त्र); **स्मृच.**२२० स्य च (स्य तु); **विर.**१९८ चर्म (तृण) वसु (वस्त्र); **पमा.**३६१ वसु-कुप्य (वस्त्ररूप्य); **रत्न.**१०२ कुप्य (कुड्य); **विचि.**९० वसु कु (वस्त्रकू); **स्मृचि.**२१ व्यकवत्; **सवि.**३१५ धान्यासव-रसस्य च (धान्यस्य पनसस्य तु); **चन्द्र.**६१ विरवत्; **व्यप्र.** ३३९; **व्यउ.**९३; **विता.**६१५; **सेतु.**१८२ चर्म (तृण) ष्टका (ष्टिका) न्यासवरस (न्यसवंरस) वसु (वस्त्र); **समु.**१०८; **विव्य.** ४४ धान्यासव (धान्यस्य च) वसु (वस्त्र).

(२) **समु.**१०८. (३) **समु.**१०९. (४) **समु.**११०.

(५) **सवि.**३२३; **समु.**१११ तात्कालिकास्तु (तत्कालि-कास्तु) तथा (स्मृताः).

प्रजापतिः

स्थावरक्रयविधिः, मूल्यव्यवस्थापकविचारश्च

[1]संविभागे विनिमये क्षेत्रयोरुभयोरपि ।
अनुस्मृतिकृता ताभ्यां कार्यसिद्धिर्भविष्यति ॥
[2]मणिगान्धर्ववीणानां नारीणां मूल्यकल्पना ।
नृपाज्ञयाऽऽपणस्थानां गोभूम्योरुभयेच्छया ॥

मूल्यनिर्णये प्रजापतिः—सविभाग इति । गान्धर्वा हयाः । गोशब्दो महिष्यादुपलक्षकः । सवि.३१८

[3]ज्ञातिसामन्तधनिकाननुज्ञाप्य समीपगान् ।
क्रयविक्रयणे कुर्याच्छ्रावयित्वा तु साक्षिणः ॥

सर्वत्र स्थावरक्रये ज्ञातिसामन्ताद्यनुमत्या भाव्यम् । सवि.३२२

सुमन्तुः

क्रये तत्तुल्यक्रियासु चानुशयावधिः

[4]संधिश्च परिवृत्तिश्च विभागश्च समा यदि ।
आ दशाहान्निवर्त्यास्स्युर्वैषम्ये नववत्सरात् ॥

साम्यपक्षे सामान्यतः प्राप्तदशाहान्निवृत्तिः । वैषम्ये सति नववर्षादूर्ध्वं निवृत्तिर्नास्तीत्येवमर्थमुक्ता । न च क्रयस्यैव दशाहानुशयो न परिवृत्त्यादेरिति वाच्यम् । 'दशाहोऽनुशयः क्रय' इति क्रयशब्दस्य तुल्यानामर्थक्रियाणामुपलक्षकत्वात् । सवि.३२०

क्रयसिद्धिः

[5]क्रय एवं भवेन्न्यूने विपरीतौ समावुभौ ॥

अयमर्थः—अर्धान्न्यूने समे वा क्रयः परावर्तते । 'अर्धाधिके क्रयस्सिद्ध्ये'दिति स्मृतेः । परिवृत्तिविनिमयौ तु विपरीतौ विषमौ परावर्तेते । न समौ, साम्ये परा-वृत्त्ययोगात् । आदशाहान्निवर्तन्त इति सर्वसमानत्वेनौ-त्सर्गिकत्वात् । दशाहस्यानुशयकालत्वात् । तद्बुद्धीन-क्रयः परिवृत्तिश्च परावर्त्येते । सवि.३२०

(१) **सवि.**३१८; **समु.**१०९-११० अनुस्मृति (अनु-स्यूतिः) बृहस्पतिः.

(२) **सवि.**३१८; **समु.**१०९ पूर्वार्धे (मणिभाश्वाश्वतरीणा-मागमैर्मूल्यकल्पना) येच्छया (योश्च या) बृहस्पतिः.

(३) **सवि.**३२२.

(४) **सवि.**३२०. (५) **सवि.**३२०.

माषमात्रमपि द्रव्यं क्रेतुर्विक्रेतरि स्थितम् ।
व्याप्नोति सकलां भूमिं कायमल्पं विषं यथा ॥

न चैतद्वचनं प्रतिबन्धकविषयम् । तत्प्रकरणे अपाठात् । भूमिविषयत्वात् । प्रतिबन्धकक्रयविषयं न भवतीति भारुच्यादिभिर्व्याख्यातत्वात् । वरदराजोऽप्येवमेवाह तेन स्वल्पद्रव्यप्रदानेऽपि क्रयसिद्धिरस्त्येवेति वदन् । सवि.३२१

अर्थदत्तमदत्तं तु क्रयमाहुरवक्रयम् ।
अवक्रयो निवर्तेत यदि काले न दीयते ॥

नन्वर्थदत्तस्य चादत्तस्य चावक्रयत्वात्कथं स्वल्पद्रव्यप्रदाने क्रयसिद्धिः। उच्यते। अवक्रयोऽपि सिध्यत्येव; यदि संकल्पितकाले मूल्यं दीयते, अन्यथा न सिध्यतीत्यभिसंधायाह स एव—अर्थदत्तमिति । सवि.३२१

भूक्रयविधिः

ज्ञात्यादीनननुज्ञाप्य समीपस्थान (निन्दि) तन्द्रितान् ।
क्रयविक्रयकर्तारौ तत्समं दण्डमर्हतः ॥

समीपस्थानित्येकग्रामवासिना ग्रहणम् । सवि.३२२

अथोदीच्यः पश्चिमोऽपि सर्वाभावे (तु)ऽपि दक्षिणः ।
चतुःसामन्तसान्निध्ये प्राची दिग्बलवत्तरा ।
उदीची च प्रतीची च सर्वाभावे तु दक्षिणा ॥

सामन्तान्प्रत्याह सुमन्तुः—अथेति । सवि.३२३

मूल्यस्य पादमर्धं वा मूल (मूल्य) माज्ञाक्रये (स्मृ) स्थितम् ।
मूल्यं तदाप्तमखिलं दत्वा क्षेत्रं समाप्नुयात् ।
आत्रिभोगात्ततः क्रेतुः परतो दृढतामियात् ॥

आज्ञाक्रयोक्तलाभक्रययोः स्वरूपं सुमन्तुना दर्शितम्—मूल्यस्येति । सवि.३२३

भारद्वाजः

प्रतिबन्धक्रयभूक्रयाज्ञाक्रयोक्तलाभादिविधिः

प्रतिबन्धः क्रये कृत्वा विक्रेत्रनुशयो यदि
क्रेत्रे स दाप्यस्तद्द्रव्यं द्विगुणं दममर्हति ॥
आज्ञाधिस्तत्क्रयश्चैव करे दण्डो विधीयते ।
उभावन्यत्र न स्यातामिति धर्मविदो विदुः ॥

अन्यत्र न स्यातामिति—आह्वानेऽपि नागता इत्यर्थः । सवि.३२४

किञ्चिच्च द्रव्यमादाय काले दास्यामि ते क्वचित् ।
नो चेन्मूलमिदं त्यक्तं केदारस्येति यः क्रयः ।
स उक्तलाभ इत्युक्तं उक्तकालेऽप्यनर्पणात् ॥

अतश्च आज्ञाक्रयोक्तलाभक्रययोः औपाधिकस्वत्वात् ज्ञात्यादीना तत्रानवकाश इत्यनुसंधेयम् । अनेन न्यायेन ज्ञायते क्रयान्तगोप्याधिप्रभृतिसंकराधिक्रयेषु सोपाधिकस्वत्वात् ज्ञात्यादिकृतो निरोधो नास्त्येवेति मन्तव्यम् । केचित्तु संकरादिषु ज्ञात्यादिप्रत्ययेन भाव्यमित्याहुः । सवि.३२४

उक्तलाभात्संगृहीता च भूमिः ।
उक्तलाभाद्दशाब्दोपभुक्तः ॥
स्वत्वं गच्छेदागतेन क्रमेण ।
तुल्यं सद्भिस्तद्वदेव संमतेन ॥
त्रिभोगेनाज्ञया क्रीत उक्तलाभो दशाब्दिकः ।
अवक्रयस्त्रिभोगेन सद्यः सिध्येद्गृणक्रयः ॥
ज्ञातिसामन्तधनिकाः क्रमाद्भूमिपरिग्रहाः ।
ततः सकुल्यास्सर्वेषामभावे त्वन्यजातयः ॥
अन्यग्रामोत्तमर्णेभ्यो वेष्यते भूमिविक्रयः ।
स्वग्रामिणां तदाभावे (?) ऋणे तूभयमिष्यते ॥
पूर्वाह्णेऽभ्युदिते सूर्ये ग्राममध्ये चतुष्पथे ।
श्रावणां श्रावयेद्विद्वान् ज्ञातिसामन्तसंनिधौ ।
मूल्यं यथावदादाय क्रये सर्वं तु दर्शयेत् ॥

---

(१) सवि.३२१; समु.११० स्मृत्यन्तरम्.
(२) सवि.३२१; समु.११० स्मृत्यन्तरम्.
(३) सवि.३२२.
(४) सवि.३२३.
(५) सवि.३२३; समु.११० मर्धं (स्वर्धं) तदाप्त (तद्दत्त) क्षेत्रं स (स्वं क्षेत्र)याज्ञवल्क्यः.

(१) सवि.३२१-३२२.
(२) सवि.३२४; समु.७३ विदो विदुः (विनिश्चयः) व्यासः.
(३) सवि.३२४(=); समु.१०९.
(४) समु.११०.
(५) समु.१११. (६) समु.१११.

जातूकर्णिः

भूक्रये सामन्तादिविधिः

चतुःसामन्तसान्निध्ये प्राची दिग्बलवत्तरा ।
उदीची च प्रतीची च सर्वाभावे तु दक्षिणा ॥
समानसलिलाः पश्चात्संसक्ताश्च ततः परम् ।
ततोऽपि बान्धवाः पश्चात्तत्संसक्तास्ततः परम् ।
न चेत्तत्र्यवधीयेत नदीस्रोतःपथादिभिः ॥

पञ्चाध्यायी

ज्ञातिसामन्तधनिकाः क्रये तात्कालिकाः स्मृताः ।
दशाहाद्यास्तु ते सर्वे क्रेतुर्विक्रेतुरेव वा ॥

वृद्धकात्यायनः

परिवर्तनक्रयोत्कलाभादिविचारः, क्रयसिद्धिश्च

अर्धाधिकेन द्रव्येण मिश्रिता परिवर्तना ।
क्रय एव भवेद्ऊने विपरीते समावुभौ ।
तत्र कोऽन्यन्तरं विद्यात् मृगरूपमनुष्यवत् ॥
संधिश्च परिवृत्तिश्च विषमा वा त्रिभोगतः ।
आज्ञयाऽपि क्रयश्चापि दशाब्दं विनिवर्तयेत् ॥

त्रिभोगतः त्रिपुरुषतः । स च वर्षमध्ये यद्यासीत् तदत्यन्तवैपम्यविषयम् । आज्ञाक्रयसमानयोगक्षेमत्वोक्तेः क्वचित्परिवृत्तिरपि परिवर्तनीयेत्याह विष्णुः—अद्भादिति ।

सवि.३२०

उत्कलाभक्रयं चापि दशाब्दं विनिवर्तयेत् ।
जङ्गमेषु द्वादशाब्दमुत्कलाभः परं स्थिरः ॥

स्मृत्यन्तरम्

क्रयसिद्धिः

अष्टमांशाधिकन्यूनान्मूल्यात्सामन्तकल्पितात् ।
क्रयसिद्धिस्तु नैव स्याद्वत्सराणां शतैरपि ॥
क्रययोग्या निगदिता विक्रये पुरतः स्थिताः ।
नार्हन्ति ते प्रतिक्रोष्टुं संक्रान्तास्तदहोन्तरे ॥
स्वग्रामज्ञातिसामन्तदायादानुमतेन च ।
हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी ॥

(१) समु.१११. (२) समु.१११. (३) समु.१०९.
(४) सवि.३२०; समु.११० या ऽपि (याधिः) दशाब्दं विनिवर्तयेत् (निवर्त्याः परिकीर्तिताः).
(५) समु ११०. (६) समु.११०. (७) समु.१११.
(८) मिता.२।११४; पमा.५६८; विचि.२५२; दात.

(१) तत्रापि ग्रामानुमतिः 'प्रतिग्रहः प्रकाशः स्यात् स्थावरस्य विशेषत' इति स्मरणात् व्यवहारप्रकाशनार्थमेवापेक्ष्यते न पुनर्ग्रामानुमत्या विना व्यवहारासिद्धिः । सामन्तानुमतिस्तु सीमाविप्रतिपत्तिनिरासाय । ज्ञातिदायादानुमतेस्तु प्रयोजनमुक्तमेव 'हिरण्योदकदानेने'ति । 'स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञये' ति स्थावरस्य विक्रयप्रतिषेधात् । 'भूमिं यः प्रतिगृह्णाति यश्च भूमि प्रयच्छति । उभौ तौ पुण्यकर्माणौ नियतौ स्वर्गगामिनौ'॥ इति दानप्रशंसादर्शनाच्च । विक्रयेऽपि कर्तव्ये सहिरण्यमुदकं दत्वा दानरूपेण स्थावरविक्रयं कुर्यादित्यर्थः ।

×मिता.२।११४

(२) एतद्धर्मषट्कमध्ये ज्ञातिसामन्तसंनिधिरावश्यकः। 'ज्ञात्यादिप्रत्ययेनैव स्थावरक्रय इष्यत' इत्यादिवचनानुसारात् रोधात् । पूर्वाह्णग्राममध्ययोस्तु न नियमः । हिरण्योदकदानेनेति तु नियतो धर्मः, भूक्रयस्य निषिद्धत्वात् । अतश्चैतद्धर्मषट्कं सति संभवे अङ्गीकर्तव्यमेव । असंभवे तु भूक्रये ज्ञातिसामन्तसंनिधानात्मकधर्मत्रयमवश्यमङ्गीकर्तव्यमिति भारुचेरभिप्रायः । आधुनिकानां वरदराजप्रभृतीनामपि समतमेतत्। विज्ञानयोगिनस्तु न संमतम्। यथाह विज्ञानयोगी—'पूर्वाह्ण इत्यनेन दानकाल उक्तः । ज्ञातीत्येतत् विभक्ताविभक्तत्वनिश्चयार्थमुक्तं पदम् । सामन्तपद तु गृहक्षेत्रादीनां परस्परं संकीर्णत्वफलाभिप्रायम्। हिरण्योदकदानेनेत्यादि भूक्रयस्य निषिद्धत्वादिति सर्वमेतद्धर्मषट्कं न नियतं स्वत्वस्य लौकिकत्वादि'ति तन्न सहन्ते भारुच्यादयः । स्वत्वस्य लौकिकत्वेऽपि भूक्रयस्य निषिद्धत्वात् तद्दानाङ्गतया धर्मपञ्चकस्य नियतत्वमिति । एतदेव (स्पष्टीकृतं मतं) सम्यङ्मतम् । सवि.३२४-३२५

× पमा., विचि., व्यप्र., विता. मितावत् ।

१७६; सवि.२४५ पूर्वार्धे (पूर्वाह्णे ग्राममध्ये च ज्ञातिसामन्तसन्निधौ) : ३२४ च (तु); चन्द्र.५८(=)स्वग्रा...न्त (ग्रामसामन्तपुत्रादि) च (वा) षड्भि....दिनी (भूमिर्गच्छति सक्षयम्); व्यप्र.४५९ च (वा); विता.२९० कात्यायम्; समु.९४.

स्वामिपालविवादः



वेदाः

स्वामिपशुपालतत्कर्तव्यतालिङ्गानि

उप ते स्तोमान् पशुपा इवाकरम् ।

हे रुद्र स्तोमान् स्तुतिरूपान्मन्त्रान् ते तुभ्यमुपाकर उपाकरोमि समर्पयामि । तत्र दृष्टान्तः । पशुपा इव । यथा पशूना पालयिता गोपः प्रातःकाले स्वस्मै समर्पितान् पशून् सायंकाले स्वामिभ्यः प्रत्यर्पयति एव त्वत्सकाशाल्लब्धान् स्तुतिरूपान्मन्त्रान् स्तुतिसाधनतया तुभ्य प्रत्यर्पयामीत्यर्थः । ऋसा.

प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिरस्तम् ।

वीराय विक्रान्ताय विविध शत्रूणामीरकाय वा मरुद्गणाय प्राज । हे स्तोतः स्तुतिं प्रगमय । तथा तवसे बलिने तुराय क्षिप्रगमनाय च तस्मै गणाय प्राज । तत्र दृष्टान्तः । पशुरक्षिः पशुपालको यूथेव । स यथा गोयूथानि सायंकालेऽस्त गृह शीघ्र गमयति तद्वत् शीघ्र स्तुति प्रेरयेत्यर्थः । ऋसा.

पुनरेता नि वर्तन्तामस्मिन् पुष्यन्तु गोपतौ ।

एता एना ईदृश्यो गाव आपो वा पुनर्नि वर्तन्ताम्, भूयो भूयो मा प्रत्यागच्छन्तु । आगत्य च गोपतौ धेनूना अपा पालके मयि पुष्यन्तु पुष्टा भवन्तु । ऋसा.

यन्नियानं न्ययनं संज्ञानं यत्परायणम् ।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ॥

नियानं गोष्ठाख्य स्थानं यत् अस्तीति शेषः । यच्छब्दयोगात् तच्छब्दोऽध्याहर्तव्यः । हुवे इति क्रियापद सर्वत्रानुषज्यते । तत्स्थानं हुवे आह्वयामि । गोसहितं गोष्ठ प्रार्थये इत्यर्थः । न्ययनम् । नियमेन गृहं प्रति गमनं तदस्ति तदपि प्रार्थये । निवर्तनम् । गत्वा गत्वा गृहं प्रति यदागमनमस्ति तदपि प्रार्थये । गोपोऽपि गोपा गवा पालकोऽस्ति तमपि हुवे प्रार्थये । ऋसा.

(१) ऋसं.१।११४।९; आश्रौ.४।११।६; शाश्रौ. ५।२६।३. (२) ऋसं.६।४९।१२. (३) ऋसं.१०।१९।३. (४) ऋसं.१०।१९।४.

यं उदानड्व्ययनं य उदानट्परायणम् ।
आवर्तनं निवर्तनमपि गोपा नि वर्तताम् ॥

यो गोपा गोपालो व्ययनं नष्टाना गवामन्वेषणार्थं विविध गमनमुदानट् व्याप्नोति अनुभवति । यः परायणं परागमनं उदानट् व्याप्नोति । वनं प्रति गवां चरणाय गमनमित्यर्थः । यश्चावर्तनं वनचारिणीभिर्गोभिः सह प्रवर्तनमनुभवति । योऽपि गोपा निवर्तनं गोभिः सह वनाद्गृहं प्रति निर्गमनमनुभवति । सोऽपि गोपालो नि वर्तताम् । गोभिः सह वनाद् गृह प्रति क्षेमेणागच्छतु । ऋसा.

गावो यवं प्रयुता अर्यो अक्षन्ता अपश्यं सहगोपाश्चरन्तीः ।
हवा इदर्यो अभितः समायन्कियदासु स्वपतिश्छन्दयाते ॥

गावो धेनवः प्रयुताः प्रकर्षेण मिश्रिताः परस्परेण सह भूता यव मद्गृष्टिजनितयवादिघासमक्षन् । अदन्ति । भक्षयन्ति । अर्यः सर्वस्य स्वाम्यहं ता गा अपश्यम् । पश्यामि । कीदृशीः । सहगोपाः पशुपालकेन सहिताश्चरन्तीर्घासं भक्षयन्तीः । एवंभूतास्ताः परया प्रीत्या पश्यामीत्यर्थः । किंच हवा वाहनदोहनार्थमाह्वानार्हा गावो अर्यः । द्वितीयार्थे प्रथमा । अर्यं स्वामिनं प्रत्यभितः सर्वतः समायन् । एकीभूयागच्छन्ति । आगतास्वासु गोषु स्वपतिः स्वानां गवा स्वामी कियत्क्षीरं छन्दयाते । दोग्धु कामयते । मदर्थं दोग्धीत्यर्थः । ऋसा.

मा वस्तेन ईशत माघशँसः । परि वो रुद्रस्य हेतिर्वृणक्तु । ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि । यजमानस्य पशुपा असि ।

(१) ऋसं.१०।१९।५; अस.६।७७।२.
(२) ऋसं.१०।२७।८.
(३) तैसं.१।१।१ (यजमानस्य पशुपा असि०); कासं. १।१; कसं.१।१ तैसंवत्; मैसं.१।१।१ (परि वो..... णक्तु०) शेषं तैसंवत्; शुसं.१।१मैसंवत्; माश्रौ.१।१।१.

मा वस्तेन ईशत माघशँस इत्याशिषमेवाशास्ते। परि वो रुद्रस्य हेतिर्वृणक्त्विति रुद्रमेव पशुभिः परिवृणक्त्यघासुकोऽस्य रुद्रः पशून् भवति यस्यैवं विदुषो यश्चैवं विद्वान् हविषे गाः प्रार्पयति ध्रुवा अस्मिन् गोपतौ स्यातेति हैवैनया वह्वीरिति भूमानमेवैना गमयति यजमानस्य पशून् पाहीति यजमानस्य पशूनां गोपीथाय। प्रतीचीं शाखामुपगूहति तस्माद्ग्राम्याः पशवः सायमारण्याद् ग्राममायन्ति। यत्पराचीमुपगूहेदरण्ये हीयेरन्।

मा वः स्तेन ईशत माघशँसा इत्याशिषमेवाशास्ते ध्रुवा अस्मिन् गोपतौ स्यात वह्वीरिति प्रैव जनयति। शुद्धा अपः सुप्रपाणे पिबन्तीः। इति पुनात्येवैनाः। रुद्रस्य हेतिः परि वो वृणक्तु। इति रुद्रादेवैनास्त्रायन्ते। पूषा वः परस्या अदितिः प्रेत्वरीया इन्द्रो वोऽध्यक्षोऽनष्टाः पुनरेत। इति त्रयो वा इमे लोका एभ्य एवैना लोकेभ्यः पुनरावर्तयति। यजमानस्य पशून् पाहीति यजमानस्यैव पशूनां गोपीथायाहिंसायै। प्रतीचीं शाखामुपगूहति तस्माद्ग्राम्याः पशवः सायमरण्याद्ग्राममायन्ति प्रत्यञ्च एनं पशवो भवन्ति य एवं वेद।

मा वस्तेन ईशत माघशँस इत्याह गुप्त्यै। रुद्रस्य हेतिः परि वो वृणक्त्वित्याह। रुद्रादेवैनास्त्रायते। ध्रुवा अस्मिन् गोपतौ स्यात वह्वीरित्याह। ध्रुवा एवास्मिन् वह्वीः करोति। यजमानस्य पशून् पाहीत्याह। पशूनां गोपीथाय। तस्मात्सायं पशव उपसमावर्तन्ते।

पशुपालप्रकाराः

अर्भेभ्यो हरिभ्यो जवायाश्वपं पुष्टयै गोपालं वीर्यायाविपालं तेजसेऽजपालम्।

(१) कासं.३०।१०; कसं.४६।८ गोपीथाय + (वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमिति। वसूनां वा एतद्रूपेण यत्पवित्रम्। तेभ्य एवैनत्करोति।).

(२) मैसं.४।१.

(३) तैब्रा.३।२।१।५.

(४) शुसं.३०।११, तैब्रा.३।४।१।९.

सं. गोपालांश्चाविपालांश्च सं ह्वयित्वा उवाच।

गौतमः

शस्यरक्षणम्। तदर्थं पशुदण्डविधिः। (×)

पशुपीडिते स्वामिदोषः।

पशुभिरुपहते सस्यादौ यस्य पशवस्तस्य दण्डो वक्ष्यमाणः। ×मभा.

पालसंयुक्ते तु तस्मिन्।

पालान्विते पाल एव दण्डभागित्यर्थः। तुशब्दः पालेन कारिते दण्डभूयस्त्वज्ञापनार्थः। भूयस्त्वमपि द्विगुण, "पालकारिते द्विगुणो दण्डः' इति स्मृत्यन्तरदर्शनात्। ×मभा.

पथि क्षेत्रेऽनावृते पालक्षेत्रिकयोः।

(१) पालस्यायत्नकरणादितरस्यापि वृतेरकरणात् तावर्धमर्धं दद्यादित्यर्थः। ×मभा.

(२) दीर्घकाल पशुतः सस्यपीडन इति शेषः। क्षेत्रिकः क्षेत्रकारी। तस्य वृतिमकुर्वतो राजभागविनाशनिबन्धनो दोषः। ततश्च सोऽपि दोषानुसारेण दण्ड्य इत्यभिप्रायः। सपालपशुस्वामिनस्तु दोषस्तदभावे पालकस्यैव विज्ञेयो भृत्यापराधनिबन्धनत्वात् स्वाम्यपराधेन एवं च यत्र पालस्य दोषो न विद्यते तत्र स पालपशुस्वामिनोऽपि दोषाभावाद्विनष्टधान्यादिमूल्यं क्षेत्रिकाय स्वामिना न देयमिति मन्तव्यम्। विपालपशुस्वामिनाऽपि न देयम्। पशोर्ध्यतिक्रमेऽपि पालस्येव तस्याप्यपरिहार्यतया व्यतिक्रमाभावादत एव दण्डभूयस्त्वमपि पालकवत् तस्यास्मिन्विषये वेदितव्यम्। अत एवास्य क्षेत्रिकेणापि शठो न याच्यम्। स्मृच.२०९

×गौमि.,मभावत्।

(१) शब्रा.४।१।५।४.

(२) गौध.१२।१६; मभा.; गौमि.१२।१६; स्मृच.२०९ पीडिते स्वामि (पीडने स्वामिनि); रत्न.१७६; वित्ता.६७४ पीडिते (पीडने); संमु.१०३ स्मृचवत्.

(३) गौध.१२।१७; मभा.; गौमि.१२।१७; स्मृच.२०९; वित्ता.६७४ (पालसंयुक्ते), संमु.१०३.

(४) गौध.१२।१८; मेधा.८।२४०; मभा.; गौमि.१२।१८; स्मृच.२०९; संमु.१०३.

पञ्च माषा गवि । षडुष्ट्रखरे । अश्वमहिष्योर्दश । अजाविषु द्वौ द्वौ ।

(१) माषाः पञ्च गोपीडिते सस्यादौ दण्डः । द्वन्द्वैकवद्भावः । उष्ट्रखरे तूपहन्तरि प्रत्येकं षण्माषा दण्डः । लिङ्गमविवक्षितम् । अश्वे महिषे च प्रत्येक दश माषा दण्डः । अजेषु अविषु चोपसहन्तृषु द्वौ द्वौ माषौ । संभूय चरन्तीति बहुवचनम् । प्रत्यजं प्रत्यविकं द्वौ द्वौ दण्डः । गौमि.

(२) बहुवचन वत्सनिवृत्यर्थम् । तत्पूर्वत्रापि द्रष्टव्यम् । द्वौ द्वौ माषौ दण्डः । अन्ते वीप्साभिधान पूर्वेऽभ्यनुषङ्गार्थ, इतरथा सदेहः स्यादिति । मभा.

सर्वविनाशे शदः ।

(१) सर्वविनाशे, प्ररोहणसामर्थ्ये यावद्विनाशित तावन्निष्पत्तिमवेक्ष्य, क्षेत्रस्वामिने शदः फल देयम् । राज्ञश्चानुरूपो दण्डः । मभा.

(२) शद इति भागाभिधानात् । +गौमि.

आपस्तम्बः

[3]**हित्वा व्रजमादिनः कर्शयेत्पशून्*।**

ये पशवो व्रजे गोष्ठे निरुद्धास्त व्रजं हित्वा आदिनः सस्यादेर्भक्षयितारो भवन्ति, तान् कर्शयेत् बन्धनादिना कृशान् कुर्यात् । कः ? यद्भक्षितं तद्वाम्, राजपुरुषो वा । उ.

नाऽतिपातयेत् ।

नाऽतिनिरोध कुर्यात् न ताडयेद्वेति ।

पालस्य स्वामिनश्च विवादः

[5]**अवरुध्य पशून्मारणे नाशने वा स्वामिभ्योऽवसृजेत् ।**

यदि पशुपः पशूनवरुध्य पालयितुं गृहीत्वा सभयस्थाने विसृज्योपेक्षया मारयेत् नाशयेद्वा । नाशनं चोरादिभिरपहरणम् । स स्वामिभ्यः पशूनवसृजेत् प्रत्यर्पयेत् पश्वभावे मूल्यम् । उ.

[4]**प्रमादादरण्ये पशूनुत्सृष्टान् दृष्ट्वा ग्राममानीय स्वामिभ्योऽवसृजेत् ।**

यदि स्वामिनः प्रमादादरण्ये पशूनुत्सृजेयुः विना पालकेन ततस्तान् दृष्ट्वा ग्राममानीय स्वामिभ्यः अर्पयेत् । कः ? यस्तत्र रक्षकत्वेन राज्ञा नियुक्तः । उ.

[2]**पुनः प्रमादे सकृदवरुध्य ।**

पुनः प्रमादादुत्सृष्टेषु सकृदवरुध्य स्वामिभ्योऽवसृजेत् । उ.

[3]**तत ऊर्ध्वं न सूर्क्षेत् ।**

ततो द्वितीयात् प्रयोगादूर्ध्वं 'ग्राममानीये'त्यादि यदुक्तं तन्न सूर्क्षेत् नाद्रियेत तस्मिन् विषये उपेक्षेत । उ.

विष्णुः

[4]**दिवा पशूनां वृकाद्युपघाते पाले त्वनायति पालदोषः । विनष्टपशुमूल्यं च स्वामिने दद्यात् ।**

अनायति उपघातनिवारणायानागच्छतीत्यर्थः । उपघातश्चात्र प्राणान्तिको विवक्षितो न पुनरुपद्रवलेशः । स्मृच.२०८

+ दोषं मभावत् । * आपस्तम्बीयस्वामिपालविवादः वेतनापाकर्मप्रकरणे (पृ. ८४२) द्रष्टव्यः, तत्प्रकरणाच्छेत्तुमशक्यत्वात्तत्रैवोद्धृतः ।

(१) **गौध.**१२।१९-२१; **मेधा.**८।२४१ (दशमहिषीष्वजाविषु द्वौ); **मभा.**; **गौमि.**१२।१९-२२; **व्यक.**१००; **विर.**२३५ माषा (माषान्) षडुष्ट्रखरे (षडुष्टे) विषु (विके); **विचि.**१०५ विरवत्; **दवि.**२८३; **सेतु.**१९८ (पञ्चमाषान् गवि षडुष्ट्रेषु महिष्यां दश अजाविके द्वे).

(२) **गौध.**१२।२३; **मभा.**; **गौमि.**१२।२३.

(३) **आध.**२।२८।५; **हिध.**२।२०. (४) **आध.**२।२८।६; **हिध.**२।२०. (५) **आध.**२।२८।७; **हिध.**२।२०.

(१) **आध.**२।२८।८; **हिध.**२।२० (द्वङ्मा०); **विर.**३४८ हिधवत्; **दवि.**२७५ हिधवत्.

(२) **आध.**२।२८।९; **हिध.**२।२०; **विर.**३४८; **दवि.**२७५.

(३) **आध.**२।२८।१०; **हिध.**२।२०; **विर.**३४८ सूर्क्षेत् (सृज्येत); **दवि.**२७५ विरवत्.

(४) **विस्मृ.**५।११६-१३७; **व्यक.**१६२ पाले...दोषः (पालेनापालिते पालकदोषः) विनष्टपशु (विनयं च); **स्मृच.**२०८ यति (याति); **विर.**१७४; **रत्न.**१०७; **चन्द्र.**५६ (पशूनां दिने वृकाद्युपघाते यदि पालो न तत्र याति तदा नष्टपशुमूल्यं गवाद्यन्तरं वा पत्यनुसोरेण दद्यात्); **व्यप्र.**३४८ पाल (पालक) पशुमूल्यं च (पशूनां मूल्यं); **व्यउ.**९७ पाल (पालक) मूल्यं च (मूल्यं); **विता.**६६६ (पालकदोषे विनष्ट पशुमूल्यं स्वामिने दद्यात्); **सेतु.**१७६ (पालदोषविनष्टपशुमूल्यं च स्वामिने दद्यात्); **स्मु.**१०३.

[1]अननुज्ञातो दुग्धं दुहन् पञ्चविंशतिकार्षापणान् दण्डयः।

[2]पशुषु विनष्टेषु तद्वालशृङ्गादिदर्शनात् शुध्यति।

शस्यरक्षणम्। तदर्थं पशुदण्डविधिः।

[3]पथि ग्रामे विवीतान्ते न दोषोऽनावृते चाल्पकालम्।

[4]उत्सृष्टवृषभसूतिकानां च।

[5]महिषी चेत्सस्यनाशं कुर्यात्तत्पालस्त्वष्टौ माषान् दण्डयः। अपालायाः स्वामी। अश्वस्तूष्ट्रो गर्दभो वा। गौश्चेत्तदर्धम्। तदर्धमजाविकम्। भक्षयित्वोपविष्टेषु द्विगुणम्।

[6]सर्वत्र स्वामिने विनष्टसस्यमूल्यं च।

---

(१) **विस्मृ.**५।१३८ तो दुग्धं दुहन् (तां दुहन्); **व्यक.** १६२ (पञ्च०); **विर.**१७४ तिका (तिं का) (दण्ड्यः०); **विचि.**८२.

(२) **सवि.**३०४.

(३) **विस्मृ.**५।१४६-१४८; **व्यक.**१००; **स्मृच.**२०९; (=) अनावृते चाल्पकालम् (ह्रस्वकालकम्); **विर.**२३१ चाल्प (वाल्प); **पमा.**३८० (पथि ग्रामप्रान्ते च न दोषोऽल्पकालम्); **रत्न.**१०८; **विचि.**१०३; **दवि.**२७८; **चन्द्र.**६७ (अनावृते-ऽप्यल्पकालम्); **वीमि.**२।१६३ ग्रामे (ग्राम) नावृते चाल्प (न्यवृते धान्यकालम्); **व्यप्र.**३५० ग्रामे (ग्राम) (अनावृते०) चा (अ); **व्यउ.**९९ पथि (पशु) शेषं व्यप्रवत्; **विता.**६७३ व्यप्रवत्; **सेतु.**१९७; **समु.**१०३ व्यप्रवत्.

(४) **विस्मृ.**५।१४९.

(५) **विस्मृ.**५।१३९-१४४; **अप.**२।१६०पाल:(पालकः) अपाला (अपालका) विकम्(विक उक्तो दण्डः) (भक्ष ... गुणम्०); **स्मृच.**२११ नाशं (घातं) तत्पाल (पाल) लायाः (लायां) (अश्वस्तू...द्विगुणम्०); **विर.**२३६ अपाला (अपालका) भक्ष (चेद्भक्ष); **रत्न.**१०९,१११; **विचि.**१०६ (अपालकायास्तत्स्वामी सपालायास्तु पालकः); **दवि.**२८३; **चन्द्र.**६७ (अपालायान्तु तत्स्वामी सपालायान्तु पालकः); **विता.**६७७ नाशं (विघातं) तत्पाल (पाल) (अश्वस्तूष्ट्रो...द्विगुणम्०) : ६८१ (महिष्यामष्टौ माषान् दण्डमुक्त्वाऽश्व उष्ट्रो गर्दभो वा); **सेतु.** २०० विचिवत्; **समु.**१०४ स्मृचवत्.

(६) **विस्मृ.**५।१४५; **व्यक.**१०१; **विर.**२३७ मूल्यं (मूलं); **विचि.**१०६; **दवि.**२७९; **चन्द्र.**६८ ने (नो) नष्ट (नष्टस्य); **सेतु.**१९९.

शङ्खः शङ्खलिखितौ च

[1]मार्गक्षेत्रे वृतिः कार्या यामुष्ट्रो नावलोकयेत्। नाश्वशूकरावन्तरं विन्देताम्।

[2]रात्रौ चरन्ती गौः पञ्च माषान्। दिवा त्रीन् मुहूर्ते माषं ग्रासे त्वदण्डः।

(१) एतदप्रत्यक्षचारकविषयम्। 'प्रत्यक्षचारकाणां तु चौरदण्डः स्मृतो बुधैः' इति नारदस्मरणात्। ग्रासे त्वदण्ड इत्यस्यायमर्थः। महिष्यादिभिः परसस्येषु कवलमात्रभक्षणे कथंचित्कृते पालस्य स्वामिनो वा स्वल्पोऽपि दण्डो नास्तीति। **स्मृच.**२१२

(२) चरन्ती यावत्सौहित्यं भक्षयन्ती तेन सौहित्यपर्यन्तं भक्षयन्ती त्रीन्माषान्, मुहूर्ते चरन्ती माषमेकं दण्ड्या, ग्रामे त्वदण्डः ग्रामसीमक्षेत्रादावदण्ड एवेत्यर्थः। माषोऽत्र कार्षापणस्य विंशतितमो भागः। **विर.**२३४

[3]सर्वेषामेव वत्सानां माषं, महिषी दश, खरोष्ट्रं षोडश, अजाविकं चतुरः।

[4]छागवृषभा अनिर्दशाहा गावः शस्यापबाधे न दण्डमवाप्नुयुः।

वृषभशब्देन बीजसेकृपित्रर्थोत्सृष्टवृषभयोर्ग्रहणम्। छागशब्दोऽपि तादृशछागपर एव। **विर.**२४०

[5]क्षुद्रपशवः सर्वथा अनिवार्याः, अश्वतरगजवाजिनश्चादण्ड्याः अवश्याः शनैरपवार्याः।

---

(१) **विर.**२३३. (२) **अप.**२।१६० रन्ती (रतां); **व्यक.**१००; **स्मृच.**२१२; **विर.**२३४ से (मे); **पमा.** ३८२ ग्रासे त्वदण्डः (दण्डं ग्रासे); **रत्न.**१०९; **विचि.** १०४ से त्वदण्डः (मे त्वदण्ड्याः); **दवि.**२८४; **व्यप्र.** ३५१; **व्यउ.**९९ तें माष (तंमात्र); **विता.**६७७ (माषान्०); **सेतु.**१९८ से (मे); **समु.**१०४ शंखः; **विव्य.**४९.

(३) **अप.**२।१६० त्सानां (त्सो) ष्ट्रं (ष्ट्रो); **व्यक.** १००; **स्मृच.**२११ (सर्वेषा...माषं०); **विर.**२३५; **विचि.**१०५ (महिषी...चतुरः०); **दवि.**२८३; **सेतु.**१९८ षं (षः) (महिषी...चतुरः०); **समु.**१०४ शंखः.

(४) **व्यक.**१०१; **विर.**२४०.

(५) **व्यक.**१०१; **विर.**२४१; **रत्न.**१११ (क्षुद्र... ऽनिवार्याः०); **विचि.**१०८ (क्षुद्रपशवोऽवश्याश्वतरगजवाजिनश्च) एतावदेव; **मिता.**६८० (अश्वतरगजवाजिनश्चादण्ड्याः); **सेतु.**२०१ (अनिवार्याः०) (अवश्याः...वार्याः०).

अश्वतरोऽश्वार्या रासभादुत्पन्नः, अवध्याः शीघ्रं निवारयितुमशक्याः । प्रकाशद्वारिजातयोस्तु अवध्या इति पठित्वा अताड्या इति व्याख्यातम् । विर.२४१

कौटिलीयमर्थशास्त्रम्[1]

पशुकृतक्षेत्रपथहिंसा

स्तम्भैः समन्ततो ग्रामाद्धनुश्शतापकृष्टमुपसालं कारयेत् ।

पशुमचारार्थं विवीतमालवनेनोपजीवयेयुः ।

विवीतं भक्षयित्वापसृतानामुष्ट्रमहिषाणां पादिकं रूपं गृह्णीयुः । गवाश्वखराणां चार्धपादिकम् । क्षुद्रपशूनां षोडशभागिकम् ।

भक्षयित्वा निपण्णानामेत एव द्विगुणा दण्डाः । परिवसतां चतुर्गुणाः । ग्रामदेववृषा वा अनिर्दशाहा वा धेनुरुक्षाणो गोवृषाश्चादण्ड्याः । सस्यभक्षणे सस्योपघाते निष्पत्तिः परिसंख्याय द्विगुणं दापयेत् । स्वामिनश्चानिवेद्य चारयतो द्वादशपणो दण्डः । प्रमुञ्चतश्चतुर्विंशतिपणः । पालिनामर्धदण्डः । तदेव पण्डभक्षणे कुर्यात् । वाटभेदे द्विगुणः ।

वेश्मखलवलयगतानां च धान्यानां भक्षणे । हिंसाप्रतीकारं कुर्यात् ।

अभयवनमृगाः परिगृहीता वा भक्षयन्तः स्वामिनो निवेद्य यथाऽवध्यास्तथा प्रतिषेद्धव्याः ।

पशवो रश्मिप्रतोदाभ्यां वारयितव्याः । तेषामन्यथा हिंसायां दण्डपारुष्यदण्डाः । प्रार्थयमाना दृष्टापराधा वा सर्वोपायैर्नियन्तव्याः । इति क्षेत्रपथहिंसा ।

स्तम्भैरिति । स्तम्भः शिलामयदारुमयवा, समन्ततः समन्तात्, ग्रामात्, समन्तग्रामादिति पाठे ग्रामपर्यन्तदेशादित्यर्थः, धनुश्शतापकृष्टं धनुश्शतविप्रकृष्टम्, उपसालं उपप्राकारं, कारयेत् ।

पश्चित्यादि । पशुसंचारखादनार्थं, विवीतमालवनेन विवीतं तृणसम्पन्नलयुक्तं स्थलं मालमुन्नतभूतलं वनं प्रसिद्धं एतैर्विशेषैः, उपजीवयेयुः अर्थाद् ग्रामजनान् ।

विवीतमिति । तद् भक्षयित्वा अपसृतानां उष्ट्रमहिषाणां, पादिकं रूपं पादपणं, गृह्णीयुः शिवीताध्यक्षाः । गवाश्वखराणां च, अर्धपादिकं रूपं पणाष्टांशं, गृह्णीयुः । क्षुद्रपशूनां, षोडशभागिकं रूपं पणषोडशभागं, गृह्णीयुः ।

भक्षयित्वा निपण्णानामिति । भक्षयित्वा अनपसृत्य विवीत एवोपविष्टानां उष्ट्रादीनां, एत एव द्विगुणा दण्डाः यथोक्ता एव पादपणादयो द्विगुणीभूता दण्डाः भवन्ति । परिवसतां, रात्रौ तत्रैव संविशतां, चतुर्गुणाः दण्डाः । भक्षणादौ केषाञ्चित् पशूनामदण्डमाह— ग्रामदेववृषा वेति । ग्रामवृषभाः देववृषभाश्च, अनिर्दशाहा धेनुर्वा अनतिक्रान्तदशाहा प्रसूता गौश्च, उक्षाणः वृद्धवृषभाः, गोवृषाश्च सेक्तारश्च, अदण्ड्याः ।

सस्यभक्षण इत्यादि । उष्ट्रमहिषादिभिः सस्ये भक्षिते सति, सस्योपघात भक्षितक्षेत्रैकदेशसञ्जात सस्यविनाशं, निष्पत्तिः परिसंख्याय कृत्स्नक्षेत्रनिष्पद्यमानफलपर्यालोचनया परिच्छेद्य, द्विगुणं तद्द्विगुण दण्ड, दापयेत् स्वामिने ।

स्वामिनश्चानिवेद्य चारयत इति । विवीताध्यक्षमविज्ञाप्य पशून् विवीते चारयतः तत्स्वामिनः द्वादशपणो दण्डः । अथवा अविज्ञाप्यैव स्वामिने प्रचारणं पशून् उपक्षेत्रं नियन्त्र्य चारयतः, द्वादशपणो दण्डः नाशितसस्यफलद्विगुणदण्डातिरेकेण । प्रमुञ्चतः निर्यन्त्रण पशून् विसृज्य चारयतः, चतुर्विंशतिपणः दण्डः भक्षितद्विगुणदण्डातिरेकेण । पालिना क्षेत्रपालकाना, अर्धदण्डः प्रमोक्तृदण्डस्यार्ध दण्डो भवति । 'उष्ट्रमहिषादीना बालत्वे' इति भाषोक्त्यनुरोधे तु बालानामिति पठनीयम् । तदेव पण्डभक्षणे कुर्यादिति । सस्यभक्षणोक्तमेव दण्डविधानं कदलीवार्ताकोर्वारुकादिवनभक्षणेऽनुतिष्ठेत् । वाटभेदे द्विगुण इति । वृतिं भित्वा क्षेत्रादिप्रवेशे पूर्वोक्तद्विगुणो दण्डः । वेश्मेत्यादि । वेश्मखलवलयगतानां, वेश्म गृहं खल धान्यपवनस्थानं वलयं राशिः तद्गतानां, धान्यानां, भक्षणे च, द्विगुणो दण्डः । हिंसाप्रतीकारं कुर्यादिति । भक्षणनिमित्तस्य धान्यादिनाशस्य निष्क्रय, कुर्यात्, सर्वत्र ।

अभयवनमृगाः परिगृहीता वेत्यादि । अभयवन-

(१) कौ.३।१०.

स्वामिनो मृगाः, ग्राम्यमृगाश्च, भक्षयन्तः स्वामिनो निवेद्य, यथा अवध्यास्तथा प्रतिषेद्धव्याः अवधेन वारणीया इत्यर्थः।

पशव इति। ते, रश्मिप्रतोदाभ्यां वारयितव्याः रज्जुतोत्राभ्यां देहे ताडनेन प्रतिषेद्धव्याः। तेषां पशूनाम्, अन्यथा प्रकारान्तरेण, हिंसाया, दण्डपारुष्यदण्डाः दण्डपारुष्यस्य ये दण्डा वक्ष्यन्ते त एव दण्डा भवन्ति। प्रार्थयमानाः वारकं प्रतियुध्यमानाः, दृष्टापराधा वा पूर्वहिंसितजना वा, पशवः, सर्वोपायैः बन्धनावरोधनादिभिः, नियन्तव्याः दमयित्वा वारयितव्याः। इति क्षेत्रपथहिंसेति। व्याख्यातेति शेषः। तदेवं वास्तुकं परिसमापितम्। श्रीमू.

मनुः

स्वामिपालवादप्रतिज्ञा। पालभृति।

[1]पशुषु स्वामिनां चैव पालानां च व्यतिक्रमे।
विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः॥

गवादिपशुविषये व्यतिक्रमे स्वामिना पालाना च गोपालादीना यो विवादो गौस्त्वया मे नाशिता ता मे देहीति, पालोऽपि विप्रतिपद्यते मदीयो दोग्धा नाभवदित्यत्र वादपदे यद्धर्मतत्त्वं, यादृशी व्यवस्था, ता तथावन्निपुणतो वक्ष्यामीत्यवधानार्थः पिण्डीकृतप्रकरणोपन्यासः। मेधा.

[2]दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे।
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात्॥

(१) दिवा पशूना योगक्षेमे दोष उत्पन्ने 'नष्ट विनष्टम्' इत्यादिके वक्ष्यमाणे पाले वक्तव्यता कुत्सनीयता। तेन स दोषो निवोढव्यः। रात्रौ स्वामिनि दोष उद्बन्धनादिमृतानां, तद्गृहे स्वामिगृहे यदि पालेन प्रवेशिता भवन्ति, अन्यथा चेत्तु यदि रात्रावपि पालेन न प्रवेशिता अरण्य एव वर्तन्ते, तदा पालो दोषभाक् स्यात्। एतदुक्तं भवति। पालहस्तगता गावो यदा क्षेत्रे कस्यचित्सस्यं भक्षयन्ति केनचिद्वा हन्यन्ते तदा पालस्य। अथ पालेन समर्पितास्तदा स्वामिनः। अयोगक्षेमे योगक्षेमशब्दः प्रयुक्तो लक्षणया। यथाऽन्धे चक्षुष्मानिति। ×मेधा.

(२) योगक्षेमे पशूनामप्राप्तानां प्रापणं प्राप्तरक्षणं च। मवि.

(३)वक्तव्यताऽपराधः। योगो यवसपानीयादिदानरूपः क्षेमोऽनिष्टनिवारणरूपः। नन्द.

[3]गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम्।
गोस्वाम्यनुमते भृत्यः सा स्यात्पालेऽभृते भृतिः॥

(१) कोऽसौ योगक्षेमः। अतः प्रपञ्चयति—गोप इति। गाः पाति गोपः गोपालकः। स कदाचिद्वृक्तादिना म्रियते कदाचित्क्षीरेण। तत्र क्षीरभृतो दशभ्यो [2]वैरा श्रेष्ठा अवरा वा। संहितायामकारप्रश्लेषाद्रक्षायामनुरूपकता। यस्य नान्यदत्तं स एकस्या गोः क्षीरमादद्यात् दशतः। अनया कल्पनया न्यूनाधिकरक्षणे भृतिः कल्पयितव्या। एवं दोह्यादोह्यधेनुवत्सतरीदम्यवत्सकादिचारणे क्वचित् त्रिभागः क्षीरस्य क्वचिच्चतुर्भागः स्वामिभिः कल्पयितव्यः। दिङ्मात्रप्रदर्शनार्थश्लोकोऽयम्। देशव्यवस्था त्वाश्रयणीया। भृतिं निरूपयिष्यामीति ग्रामगोपाले यदि गावस्त्यक्ता भवन्ति न तेन स्वामिनमननुज्ञाप्य दशमी गौर्दोह्येति। भक्तभृतोऽपि क्षीरेण

---

(१) **मस्मृ.**८।२२९, **व्यक.**१६१ व्यतिक्रमे (यथाविधि); **विर.**१७० व्यकवत्; **पमा.**३७२; **रत्न.**१०६, **व्यप्र.**३४६; **व्यउ.**९६; **विता.**६६३; **सेतु.**१७४ व्यकवत्; **समु.**१०३.

(२) **मस्मृ.**८।२३०; **अप.**२।१६४ क्षेमे (क्षेमो), **विर.**१७१ क्षेमेऽन्यथा चेत्तु (क्षेमावन्यथा चेत्); **विचि.**८१ पाले (गोपे) क्षेमेऽन्यथा चेत्तु (क्षेमान्यथात्वे तु) नारदः; **स्मृचि.**२१ क्षेमेऽन्यथा चेत्तु (क्षेमान्यथात्वे तु); **चन्द्र.**५५ स्मृचिवत्, **सेतु.**१७५ विरवत्; **समु.**१०३; **विव्य.**४६ क्षेमे (क्षेमो) चेत्तु (चेत्स्यात्).

× गोरा., ममु, मच. मेधावत्।

(१) **मस्मृ.**८।२३१, **मेधा.** वराम् (वरान्); **अप.**२।१६४ मते (मतो); **व्यक.**१६१, **स्मृच.**२०७ मते (मतो) त्पालेऽ (त्प्राग); **विर.**१७०; **पमा.**३७३; **रत्न.**१०६; **विचि.**८० क्षीरभृतो (क्षीरभृतिः); **सचि.**३०२ दशतो वराम् (दशत. परान्) **पू**; **व्यप्र.**३४७ स्मृचवत्; **व्यउ.**९७ गोपः (गवां) यस्तु (यः स्यात्) म्यनुमते (म्यनुभूतो) त्पालेऽ (त्प्राग); **विता.**६६३ गोपः (गवां) शेषं स्मृचवत्; **सेतु.**१७४ विचिवत्; **समु.**१०३; **विव्य.**४६ विचिवत्.

१ वरान् श्रेष्ठान् अवरान्वा. २ पालेन.

विनिमय इति बुद्ध्या दुहीत, तन्निवृत्त्यर्थमुक्तं गोस्वाम्यनुमत इति । स्वामिनोऽनुमतिमन्तरेण प्रवर्तमानो दण्ड्यः । साऽनन्तरोक्ता, अभृते भक्तादिना, भृतिर्भवेत् । क्षीरभृतो वा एषा भृतिः । भृत्यो भरणार्थं न धर्माय प्रवृत्तो गोरक्षायाम् । अथवा स्वेच्छया दशम्या गोः क्षीरमाददानश्चोरः स्यात् । अस्मिंस्त्वनुज्ञाते भृतिस्तस्येयमिति न दोषः । अत्रापि स्वामिनोऽननुमत्या दोष एवेति चेत्सत्यं कल्प्या काचिद्दण्डमात्रा । न चौरो भवति । अस्मिंस्तु चौरो निक्षेपहारी वा स्यात् । अयं श्लोक आदौ वक्तव्यः अतोऽनन्तरः क्वचित्पठ्यते । ×मेधा.

(२) क्षीरं दुह्यादिति च तत्तत्पशुविकारोपयोगोपलक्षणम् । तेन मेषादावूर्णादिग्रहणेऽपि तत्पालकस्यायं भागक्रम इत्याह—सा स्यादिति । +मवि.

(३) अक्षीरपशूनां तु भृतिः क्षीरमूल्यतः कल्पनीया । द्रव्यान्तरेणाभृतपालकविषये क्षीरभृते या प्रोक्ता भृतिः सैव भवतीत्याह स एव—सा स्यात्प्रागभृते भृतिः इति । *स्मृच.२०७

नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतम् ।
हीनं पुरुषकारेण प्रदद्यात् पाल एव तु ॥

नष्टं दृष्टिपथादपेत न ज्ञायते क्व गतम् । विनष्टं कृमिभिः, आरोहकनामानः कृमयो गवा प्रजनवर्त्मनाऽनुप्रविश्य नाशयन्ति । श्वहतं, प्रदर्शनार्थमेतत् । तेन गोमायुव्याघ्रादिहतानामेव स्थितिः । विषमे श्वभ्रदरीशिलादिसंकटादौ मृतं प्रदद्यात्पाल एव । हीनं पुरुषकारेण, पुरुषकारः पुरुषव्यापारः पालस्य तत्र संनिधानात् वृकनिवारणे दण्डादिना प्रवृत्तिः तेनापेतम् । यदि व्याप्रियमाणो व्याघ्रादेर्निवारणे नैव समर्थः, सहसैव वोत्पत्य कश्चित् पशुर्वेगेन श्वभ्रं गच्छेदनुगच्छताऽपि न शक्यः प्रत्यावर्तयितुं, न पाले दोषः । +मेधा.

[1]विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति ।
यदि देशे च काले च स्वामिनः स्वस्य शंसति ॥

(१) विघुष्य आघुष्य पटहाद्युद्घोषेण चौरैर्हृतं पशुं पालो न दाप्यते । विघोषणं च पालस्याशक्त्युपलक्षणार्थम् । यदि बहवश्चोराः प्रसह्य च मुष्णन्ति तदा पालो मुच्यते । सोऽपि यदि प्राप्तकालं तस्यामेव वेलायां स्वामिनः कथयति । देशे, यत्र स्वामी संनिहितः कथंचिज्ज्ञातस्तत्र, अथवा निवासदेशे स्वामिनः, तत्र यद्यसावसंनिहितोऽपि भवति तथापि तत्स्थानीयो भवति यो राजानमधिकारिणं वा ज्ञापयित्वा चोरानभिद्रवति । स्वस्येति राजनिवृत्त्यर्थम् । स्वो हि स्वामी स्वद्रव्यमोक्षणे यत्न कुरुते न तथा पालज्ञापितो राजा । दुष्करा च राजज्ञापना पालस्य । अथ मुषित्वा गतेषु ज्ञापयेद्दुष्येदेव । मेधा.

(२) विघुष्य प्रकाश्य बलादिति यावत् । देशे समीपदेशे काले दिवसादौ वा शंसति, दूरदेशविषमकालादौ त्वकथनेऽप्यदोष इत्यर्थः । मवि.

(३) विघुष्येति चौराणा बहुत्वप्रबलत्वकथनपरम् । ममु.

× गोरा., ममु., विर., मच. मेधावत् ।

+ शेषं मेधावत् । * व्यप्र. स्मृचवत् ।

(१) **मस्मृ.**८।२३२; **मिता.**२।१६४ विनष्ट (जग्धं च); **अप.**२।१६५ तु (तत्); **व्यक.**१६२ पाल (गोप) मनुनारदौ; **स्मृच.**२०७; **विर.**१७३ श्वहतं(श्वभ्रस्तं)पाल (गोप) मनुनारदौ; **पमा.**३७४; **रत्न.**१०६; **विचि** ८१ पाल (गोप) तु (च); **स्मृचि.**२१; **सवि.**३०३; **चन्द्र.**५६ श्वहत (गृहीत) पाल (गोप) तु (तत्); **व्यप्र.**३४७; **व्यउ.**९७; **विता.**६६५ मितावत्; **सेतु.**१७६ विचिवत्; **ममु.**१०३ मितावत्; **विव्य.** ४६ श्वहतं (प्रहतं) तु (च).

१ मयस्येति.

+ गोरा., मवि., ममु., विर., भाच. मेधावत् ।

(१) **मस्मृ.**८।२३३; **मिता** २।१६४ विघुष्य (विकम्य); **अप.**२।१६४ पालो दातुमर्हति (पालस्तत्र किल्बिषी); **व्यक.** १६२ मितावत्, मनुनारदौ; **स्मृच** २०७; **विर.**१७२; विघुष्य (विद्रिवेण) पालो (गोपो); **पमा.**३७४; **रत्न.**१०७; **विचि.**८१ स्वस्य (तच्च) शेष मितावत्; **स्मृचि.**२१ विघुष्य (विद्विषा); **नृप्र.**२७ पू.; **सवि.**३०३ ष्य तु हृतं (व्योपहृत); **चन्द्र.**५५ विघुष्य तु (सप्रकाशं) स्वस्य (तस्य); **वीमि.** २।१६४ मितावत्, मनुनारदौ; **व्यप्र.**३४७; **व्यउ.**९७; **विता** ६६७; **सेतु.**१७५; **समु** १०३; **विव्य.**४६.

१ (पुरुषकार.०) २ द्घोषणम्. ३ पशुः. ४ कथं विज्ञात.

कर्णौ चर्म च वालांश्च वस्तिं स्नायुं च रोचनाम्।
पशुस्वामिषु दद्यात्तु मृतेष्वङ्गानि दर्शयेत् ॥

(१) आयुषः क्षयान्मृतेषु पशुषु स्वामिनः कर्णाद्यर्पणीयम्। गोरोचना गवा शृङ्गेषु चूर्णं भवति। वस्तिरङ्गविशेषः। अङ्काः कर्णादयः स्वामिविशेषज्ञानार्थं चिह्नानि। तानपि दर्शयेत्। एव पालस्य शुद्धिः। अङ्गदर्शनेन हि प्रत्यभिज्ञा भवत्यय स पशुरिति। ×मेधा.

(२) एतेषामन्यतमं दद्यात्। शृङ्गाणि च दर्शयेदिति विकल्पः। मवि.

(३) कर्णौ चेत्यादिना मृतपशोरसाधारणचिह्नान्युपलक्ष्यन्ते। विर.१७५

अजाविके तु संरुद्धे वृकैः पाले त्वनायति।
यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत् ॥

(१) अजा चाविका चाजाविके। अविरेवाविकेङ्का। एते वृकैः शृगालप्रभृतिभिः सरुद्धे अवष्टब्धे,

---

× गोरा., ममु. मेधावत्।

(१) **मस्मृ.**८।२३४ उत्तरार्धे (पशुषु स्वामिनां दद्यान्मृतेष्वङ्गानि दर्शयेत्); **गोरा** ङ्गानि (ङ्गांश्च) वालांश्च (लोमांश्च); **मिता.**२।१६४ येत् (यत्); **व्यक.**१६३ स्नायुं च रोचनाम् (स्नायुनिरोचनम्) मिषु (मिनि); **मवि.** ष्वङ्गानि (शृङ्गाणि); **स्मृच.**२०८ स्नायुं च (स्नायुनि) ष्वङ्गानि दर्शयेत् (ष्वङ्गाभिदर्शने); **विर.**१७५ वस्ति स्नायुं च (वस्त्यस्थिस्नायु) मिषु (मिनि) तु (च); **पमा.**३७६ वस्ति...नाम् (वस्त्यस्थिस्नायुरोचनम्) पशुस्वामिषु (पशुषु स्वामिनां) (तु०): ३७७ वस्ति...नाम् (शृङ्गास्थिरोचनम्) स्मृत्यन्तरम्; **रत्न.**१०७; **स्मृचि.**२१ वस्ति...नाम् (वस्तिस्नायुनिरोचनम्); **व्यप्र.**३४८ ष्वङ्गानि दर्शयेत् (ष्वङ्गाभिदर्शनात्); **व्यउ.**९८ व्यप्रवत्; **व्यम.**९६ वस्तिं (वस्ति) स्नायुं (स्नायु) ष्वङ्गानि दर्शयेत् (ष्वङ्गाभिदर्शने); **विता.**६६८ वस्तिं (वस्ति) (पशुषु स्वामिनां दद्यान्मृतेष्वङ्गानि दर्शयेत्); **सेतु.**१७८ स्नायु च रोचनाम् (स्नायूनि रोचनाः) मिषु (मिनि) तु (च) ष्व (त्व); **समु.**१०३ स्नायुं च (स्नायूनि) ष्वङ्गानि दर्शयेत् (ष्वङ्गाभिदर्शने).

(२) **मस्मृ.**८।२३५; **गोरा.** विके तु (विकेषु); **अप.**२।१६५ यां (यत्); **व्यक.**१६२-१६३ मनुनारदौ; **स्मृच.**२०८; **विर.**१७५; **पमा.**३७६; **रत्न.**१०७; **नृप्र.**२७ यति (पति); **स्मृचि.**२१ त्किल्बिषं (द्बिषयं); **सवि.**३०४; **व्यप्र.**३४८; **व्यउ.**९८; **सेतु.**१७७; **समु.**१०३.

न प्रथमपात एव हते, अस्मिंश्चान्तरे सत्यमोक्षणेऽहतत्वान्न च पाल आयाति मोक्षयितुं, अनायत्यनागच्छति पाले, यत्तत्र प्रसह्य बलेनाभिभूय वृको हन्यात्पालस्य स दोषः। स्वामिनो दापयितव्यः। प्रायश्चित्तं चरेत्। गोर्मर्हत्त्वान्नोमायुना न शक्यते संरोद्धुमित्यजाविके इत्युच्यते। न पुनस्तद्रूपमतश्च बालानां गोवत्सानामेष एव न्यायः। ×मेधा.

(२) गवादेस्तु व्याघ्रादेरेव भयं तत्र च पालस्य रक्षणाशक्तेर्न दोषः। मवि.

(३) वृकग्रहणं व्याघ्रादीनामप्युपलक्षणार्थम्। नन्द.

तासां छेदवरुद्धानां चरन्तीनां मिथो वने।
यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्बिषी ॥

(१) अजाविकपूर्वश्लोके जात्यपेक्षं द्विवचनम्। पशुशकुनिद्वन्द्वत्वाद्विभाषितैकवद्भावः। इह तु तासामिति व्यक्त्यपेक्षो बहुवचने परामर्शः। अवरुद्धानां मिथ एकत्र प्रदेशे स्थापितानां संहतीभूतानां दिग्भ्यो विदिग्भ्यश्च निरुद्धगमनानां वने चरन्तीनां हृष्टिगोचराणां यदि कुतश्चन कुड्यात्सचारणोत्पतनानुक्रमेण निष्क्रम्य पक्षिवद् वृको हन्यान्न पालो दोषभाक्। अशक्यं ह्यनेकवृक्षक्षुपशरवल्लीगहनं वनं निर्विवरीकर्तुं छिद्रानुसारिणश्च वृकाः। मिथोग्रहणाच्चातिदूरविप्रकृष्टासु वधे दोष एव। पालहस्तगताः पशवस्तदुपेक्षायां यदि दोषमाप्नुयुः स पालेनैव समाधेय इति सिद्धे एष प्रपञ्चः सुखावबोधार्थः। +मेधा.

(२) मिथो वने वनगहने। नन्द.

शस्यरक्षणम्। तदर्थं पशुदण्डविधिः।

धेनुःशतं परीणाहो ग्रामस्य स्यात्समन्ततः।
शम्यापातास्त्रयो वाऽपि त्रिगुणो नगरस्य तु ॥

× गोरा., ममु., मच., भाच. मेधावत्।
+ गोरा., ममु., मच. मेधावत्।

(१) **मस्मृ.**८।२३६; **अप.**२।१६५ यामुत्प्लुत्य (यामुपेत्य); **व्यक.**१६३ मनुनारदौ; **स्मृच.**२०८ अपवत्; **विर.**१७५; **पमा.**३७६; **रत्न.**१०७; **चन्द्र.**५७ मुत्प्लुत्य (मुत्पत्य) उत्त.; **व्यप्र.**३४९ चन्द्रवत्; **समु.**१०३ अपवत्.

(२) **मस्मृ.**८।२३७ णाहो (हारो); **मेधा.** मस्मृवत्; **अप.**२।१६७ शतं. परीणाहो (शतपरीहारो); **व्यक.** १ ख्या. २ (पक्षिवद्०).

(१) चतुर्हस्तं धनुस्तेषां शतम्। चत्वारि हस्तशतानि। समन्ततश्चतसृषु दिक्षु ग्रामस्य परीहारः कर्तव्यः। अनुसस्या भूमिः पशूना सुखप्रचारार्था कर्तव्या। शम्या दण्डयष्टिः, सा बाहुवेगेन प्रेरिता यत्र पतति ततः प्रदेशादुद्धृत्य पुनः पातयितव्या यावत्त्रिस्तस्य परिमाणो वा शम्यापातः परीहारः। त्रिगुणो नगरस्य। ग्रामनगरे प्रसिद्धे। शम्यायाः पाताः प्रेरिताया वेगसंस्कारक्षयभूमिस्थानानि। +मेधा.

(२) धनुर्हस्तचतुष्कं तच्चतुःशत महाग्रामस्य परीणाहो वेष्टनेन त्याज्या भूमिः। परीहार इति क्वचित्पाठः। शम्यापाताः क्षिप्ताः शम्या यावति ते त्रयस्तत्त्रिगुणो देशः क्षुद्रग्रामस्य। एतयोर्द्वयोस्त्रैगुण्यं नगरस्य बृहत्त्वक्षुद्रत्वापेक्षया विकल्पेन। मवि.

तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि।
न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्॥

(१) तत्र परीहारस्थाने क्षेत्र न कर्तव्यम्। अथ कृतं कस्माद्वृतिर्न कृता। अतः क्षेत्रिण एवापराध्यन्ति। न पशुपालाः। न हि पाल एकैक पशुं हस्तबन्धन नेतुं शक्नोति। न च पशूनामन्यो निर्गमोऽस्ति। मेधा.

(२) धान्यमिति पशुभक्ष्योपलक्षणम्। मवि.

वृतिं च तत्र कुर्वीत यामुष्ट्रो नावलोकयेत्।
छिद्रं च पूरयेत्सर्वं श्वसूकरमुखानुगम्॥

कण्टकशाखादीना प्राकारविन्यासः पशुप्रवेशवारणार्थः क्षेत्रारामादीना वृतिरुच्यते। या क्वचित्पार्णिकेति प्रसिद्धा वारणा वृतिः तस्या उन्नतिरियती कर्तव्या यथोष्ट्रो नावलोकयति। किमिय द्वितीया तृतीयार्थे यामुष्ट्र इति। नेति ब्रूमः। कथ तर्हि वृतिमुष्ट्रो न पश्यति। महोत्सेधाया द्वितीयपार्श्वस्यादर्शनादद्दष्टेव वृतिः। छिद्रं च विवरमावारयेत्सर्व स्थगयेत्। श्वसूकरमुखेन यदनुगम्यते तन्मुखपरिमाणम्। तथा कुर्याद्यथा श्वमुखं न माति। तन्मुखादप्यल्पछिद्रमित्यर्थः। तथा कृतायां वृतौ। ×मेधा.

पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः।
सपालः शतदण्डार्हो विपालं वारयेत्पशुम्॥

(१) परिवृते पथि क्षेत्रे ग्रामसमीपवर्तिनि च परीहारमध्यगते। अन्तशब्दः समीपवचनः। यदि भक्षयेत्पशुः सपालश्च स्यात्सन्निहिते पाले, पालः शतदण्डार्हः पशोर्दण्डासभवात्। पालेऽसन्निहितेऽपि गृहादौ कार्यव्यग्रतया। पालः प्रसिद्धो न पुनस्तत्प्रेषितो वारिको रूपैकमात्रवेतनः। विपालाः पशवो वारयितव्या दण्डादिना, न तु दण्डनीयाः। विपालाश्चोत्सृष्टवृषादयः। अन्येषा तु विपालाना स्वामिनो दण्डः। अथवा अपरिवृत इति प्रश्लेषः। क्षेत्रसम्बन्धाच्च गम्यमानः क्षेत्रस्वामी सपाल इत्यन्यपदार्थतयाऽभिसंबध्यते। सहपालेन क्षेत्रे को दण्डयः। उभौ दण्ड्यौ। पालः क्षेत्रिकश्च। क्षेत्रिकस्तावत्किल किमिति पथि क्षेत्रे वृतिं न कृतवान्। पालेनापि वृतौ चासत्या किं क्षेत्रं खादयितव्यम्।

+ गोरा., ममु., मच., नन्द., भाच. मेधावत्। ९९; **ममु.** मस्मृवत्; **विर.**२३१शम्या (सम्या) तु (च), **रत्न.**१०८ पू.; **विचि.**१०३ शम्यापाता (सपातास्तु); **दवि.**२७८; **मच.**मस्मृवत्; **व्यम.**९६ मस्मृवत्, पू. **विता.**६७० पू.; **बाल.**२।१६७ मस्मृवत्; **सेतु.**१९७ शम्यापाताः (सपातास्तु) तु (चे); **समु.**१०३ समन्त (परं त) त्रि (द्वि); **विव्य.**४९ शम्यापाताः (सपातास्तु) त्रि (द्वि) तु (च).

(१) **मस्मृ.**८।२३८; **मिता.**२।१६२ तत्रा (यत्रा); **व्यक.**१००; **स्मृच.**२१०; **विर.**२३१; **पमा.**३८०; **रत्न.**१०८, **विचि.**१०३, **स्मृचि.**२२ क्रमेण नारदः; **वीमि.**२।१६२ मितावत्; **व्यप्र.**३५०; **व्यउ.**९९; **विता.**६७०; **सेतु.**१९७; **समु.**१०४.

(२) **मस्मृ.**८।२३९ च तत्र (तत्र प्र) नाव (न वि) पूर (वार); **मिता.**२।१६२ च पूर(निवार); **अप.**२।१६२ च तत्र

१ वेगसंस्कारक्षयो भूमौ स्थानादि.

× गोरा., मवि., ममु., मच., नन्द., भाच. मेधावत्। (तत्र प्र) पूर (वार); **गौमि.**१२।१८ पू.; **स्मृच.**२०९ उत्त.; **विता.**६७०; **समु.**१०३.

(१) **मस्मृ.**८।२४० क., ख, घ. पुस्तकेषु विपालं (विपालान्) पशुम् (पशून्) इति पाठः : ग. पुस्तके वार (चार) इति पाठ., **अप.**२।१६२ रतीये (स्ते यो); **मवि.** वार (चार); **व्यक.**१००; **स्मृच.**२१०; **विर.**२३२ वार (धार); **पमा.**३७८ पाल (पालान्) पशुम् (पशून्); **दवि.**२८४; **व्यप्र.**३४९; **व्यउ.**९८ वार (पाल); **विता.**६७०-६७१; **समु.**१०४.

१ (स्थगयेत्०). २ (पाले०). ३ गृहे यदा नाप्यसौ। ४ पमात्रचेतनः.

विपालं प्रमादाद्यूथच्युतं वारयेत्। तथा च गौतमः 'पथि क्षेत्रेऽनावृते पालक्षेत्रिकयोः' इति। ×मेधा.

(२) पथि परिवृते तथा क्षेत्रे तथा ग्रामान्तीये प्रागुक्तग्रामान्तरपरीणाहे च परिवृते। ग्रामपद नगरस्याप्युपलक्षणम्। सपालः पशुः शतं पणान् दण्डव्यः। पशोर्दण्डः पालस्यैवार्थात्। विपालान् देवादिपशून् स्वयमेव क्षेत्रस्वामी वारयेत्। मवि.

(३) वृतिमतिक्रम्य ग्रासादधिकसस्यघातिसपालपशुः कार्षापणशतदण्डार्हस्तत्पशुपालकः शतदण्डनं दण्डनीय इति यावत्। स्मृच.२१०

[1]क्षेत्रेष्वन्येषु तु पशुः सपादं पणमर्हति।
सर्वत्र तु सदो देयः क्षेत्रिकस्येति धारणा॥

(१) पथिक्षेत्रग्रामान्तीयेभ्योऽन्यानि क्षेत्राणि तद्भक्षणे सपादपणो दण्डः। ननु चात्र स्वल्पेन दण्डेन भवितव्यं दूरक्षेत्रात् संनिहिते क्षेत्रे। यत्तु पन्थानमतिक्रम्य क्षेत्र वैहिर्ग्रामिकं च तत्र महान् दण्डो युक्तः। किमिति गवा पालो गन्तुं तत्र ददाति। नैष दोषः। यत्र महादण्डो नोच्येत तदा प्रत्यह प्रवेशनिर्गमैर्गवा भक्षयन्तीना ग्रामान्तक्षेत्राण्युत्सीदेयुः। दण्डात्तु महतो बिभ्यतो यत्नेन रक्षन्ति। अन्यत्र गाः तृणविशेषार्थं कथंचिन्नयति स्वल्पो दण्डः। अत्रापि विपालाना वारणमेव। सर्वत्र क्षेत्रस्वामिनो गतफलं देयम्। कुशलैः च परिमाणे कल्पिते। क्षेत्रमस्यास्तीति व्रीह्यादित्वाठक्। इति धारणैष निश्चय इत्यर्थः। सर्वत्रग्रहणाच्च विपालेऽपि पशौ क्षेत्रिकस्य गतलाभः। यद्यपि पशुशब्दः सामान्यशब्दो महिष्यजाव्युष्ट्रगर्दभाविषु वर्तते तथापि स्मृत्यन्तरदर्शनाद्रोध्वयं दण्ड इति मन्यते। तथा च गौतमः 'दश महिषीष्वजाविषु द्वावित्याद्यन्यत्र कल्पना। मेधा.

(२) पशुभक्षितं फलं पालेन पशुस्वामिना वा दातव्यम्। +गोरा.

(३) अन्येषु क्षेत्रेषु वृतिरहितेषु गोप्रचारदेशव्यतिरिक्तेषु। नन्द.

अनिर्दशाहां गां सूतां वृषान् देवपशूंस्तथा।
सपालान्वा विपालान्वा न दण्ड्यान्मनुरब्रवीत्॥

अत्रापवादः—अनिर्दशाहामिति। गोग्रहणान्महिष्यादिषु दोषः। वृषाः उक्षाणः, देवपशवो देवयागार्थं यजमानेन कल्पिताः। प्रत्यासन्नयागा अथवेष्टकादिकूटस्थापिता हरिहरादीना प्रतिकृतयो देवा उच्यन्ते। तेषां पशवः तानुद्दिश्य केनचिदुत्सृष्टाः। तदा ह्यस्य देवानां पशूना च स्वस्वामिसंबन्धस्य संभवात् पुरुषस्वामिभावस्यासंभवात्, देवायतनमण्डनाना चैष धर्मः। न तु तत्पालकैर्वाहदोहाद्यर्थं ये देवगृहेषु धार्यन्ते। यतः पालका एव तेषा देवानामर्थे विनियुञ्जते। अतस्तत्र पालका एव स्वामिनः। अतो युक्तः स्वामिवतामन्येषां यो धर्मः स तत्र, आयतनमण्डनास्तु अपरिगृहीता अव्यवधानेन देवपशुशुद्धिमुत्पादयन्ति। वृषोत्सर्गादिविधानोत्सृष्टा वृषाः कैश्चित्परिगृह्यन्ते। ततः सपाला अथ चापरिगृहीतास्ततो विपाला उभयेषामदण्डः। मेधा.

एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः।
स्वामिनां च पशूनां च पालानां च व्यतिक्रमे॥

(१) सुबोधोऽयं श्लोकः। मेधा.

(२) पशुभिः सस्यभक्षणेन स्वामिना पालाना चापराधे देवपश्वादिसस्यभक्षणे धर्मप्रधानो राजा एतत् पूर्वोक्त कर्तव्यमनुतिष्ठेत्। गोरा.

× गोरा., ममु., मच., नन्द. मेधावत्।

+ ममु. गोरावत्।

(१) **मस्मृ.**८।२४१; **गोरा.** तु सदो देय. (त्वशित देय); **अप.**२।१६० पण (दण्ड) कर्त्तयेति (कार्येति); **व्यक.**१००; **स्मृच.**२०९ पू.; **विर.**२३४ पू.; **रत्न.**१०८ पू.; **विचि.**१०४; **विता.**६७४ पादं (पाद); **सेतु.**१९८ तु (च) सदो देयः (स दोषः स्यात्); **समु.**१०४.

१ वाह्यिग्रामं २ पार्थो. ३ फलदेये. ४ (च+ते).

(१) **मस्मृ.**८।२४२; **अप.**२।१६३ सपाला (अपाला) न दण्ड्या (अदण्ड्या), **व्यक.**१०१, **स्मृच.**२१२ सपालान्वा वि (अपालान्वा स); **विर.**२३९; **पमा.**३८३; **रत्न.**१११; **विचि.**१०७ वा वि (गत) न दण्ड्या (अदण्ड्या), **दवि,** २७९,२८१; **चन्द्र.**६८; **व्यप्र.**३५२ न दण्ड्या (अदण्ड्या); **व्यउ.**१०० अपवत्; **सेतु.**२०१ न दण्ड्या (अदण्ड्या); **बाल.**२।१६३ व्यप्रवत्; **समु.**१०५ स्मृचवत्.

(२) **मस्मृ.**८।२४४; **व्यक.**१६३; **स्मृच.**२१२; **विर.** १७६; **रत्न.**१११; **व्यप्र.**३५३, **व्यउ.**१०१; **समु.**१०५.

१ स्व स. २ मर्थ.

याज्ञवल्क्यः

पालस्य स्वामिनश्च विवादः । पालभृतिश्च ।

यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत्तथा ।
प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः ॥

(१) अथ च स्वामिपालयोरन्योन्यनियमः—यथेति । परिच्छिन्नवेतनो दत्तवेतनो वा गोपः प्रातर्यथार्पितान् सायं प्रत्यर्पयेत् । अर्पणवचनाच्चासमर्पितप्रणाशे नापराधः, गोपवचनं च पशूनित्युपक्रमात् सर्वपशुपालोपलक्षणार्थम् । प्रमादेनोपेक्षया मृताः प्रनष्टा वा ये पशवः ते च पालेनैव देयाः । विश्व.२।१६८

(२) व्यवहारपदानां परस्परहेतुहेतुमद्भावाभावात् 'तेषामाद्यमृणादानम्' इत्यादिपाठक्रमो न विवक्षित इति व्युत्क्रमेण स्वामिपालविवादोऽभिधीयते । इदानीं गोपं प्रत्युपदिश्यते—यथार्पितानिति । गोस्वामिना प्रातःकाले गणयित्वा यथा समर्पिताः पशवस्तथैव सायंकाले गोपो गोस्वामिने पशून् विगणय्य प्रत्यर्पयेत् । प्रमादेन स्वापराधेन मृतान्नष्टाश्च पशून् कृतवेतनः कल्पितवेतनो गोपः स्वामिने दाप्यः । मिता.

(३) यथा व्रणादिरहिताः संख्याविशेषविशिष्टाश्च । मूल्यद्वारेण प्रदाप्यः । वीमि.

पालदोषविनाशे तु पाले दण्डो विधीयते ।
अर्धत्रयोदशपणः स्वामिनो द्रव्यमेव च ॥

(१) राजन्यनिवेदितस्य पूर्वोक्तम् । आवेदने पुनः पालदोषेति । पालदोषादत्र विनाशः संवृत्त इत्येवं राजन्यावेदितेऽर्धत्रयोदशपणो दण्डः पालस्य । स्वल्पाशङ्कायां च विधीयते इत्युक्तम् । विश्व.२।१६९

(२) किंच । पालदोषेणैव पशुविनाशे अर्धाधिकत्रयोदशपणं दण्ड पालो दाप्यः । स्वामिनश्च द्रव्य विनष्टपशुमूल्यं मध्यस्थकल्पितम् । दण्डपरिमाणार्थः श्लोकोऽन्यत्पूर्वोक्तमेव । मिता.

(३) दोषान्मरणे चौरादिहरणे वा पशूना पालस्य अर्धपणत्रयोदशः पणोऽर्धाधिकद्वादशपणमितो दण्डः स्वग्राह्यो राज्ञा विधीयते । आद्यचकारेण श्वभिन्ननिपतितादिसंग्रहः । तुशब्देन बलात्कारेण गृहीत्वा चौरव्याघ्रादिक स्वामिने कथयितुः पालस्य दण्डादिक व्यवच्छिनत्ति । वीमि.

गोप्रचारकरणम् । द्विजस्य तृणैंध.पुष्पेष्वधिकारः ।

ग्रामेच्छया गोप्रचारो भूमौ राजवशेन वा ।
द्विजस्तृणैधःपुष्पाणि सर्वतः सर्वदा हरेत् ॥

(१) स्पष्टार्थः श्लोकः । विश्व.२।१७०

(२) ग्रामेच्छया ग्राम्यजनेच्छया भूम्यल्पत्वमहत्त्वापेक्षया राजेच्छया वा गोप्रचारः कर्तव्यः । गवादीना प्रचारणार्थं कियानपि भूमागोऽकृष्टः परिकल्पनीय इत्यर्थः । द्विजस्तृणेन्धनाद्यभावे गवाग्निदेवतार्थं तृणकाष्ठकुसुमानि सर्वतः स्ववदनिवारित आहरेत् । फलानि त्वपरिवृतादेव । मिता.

---

(१) **यास्मृ.**२।१६४; **अपु.**२५७।१५; **विश्व.**२।१६८; **मिता.**; **अप.**; **स्मृच.**२०७; **विर.**१७१ मृत (हृत); **पमा.**३७२ पू., ३७४ उत्त.; **रत्न.**१०६ पू.; **विचि.**८०-८१ वथा (अथा) मृत (हृत); **स्मृचि.**२१ विरवत्; **सवि.**३०३ विरवत्; **चन्द्र.**५५ विरवत्; **वीमि.** त्तथा (त्तदा); **व्यप्र.**१४६-३४७; **व्यउ.**९६-९७ ष्टां (ष्टा) प्यः (प्याः) नः (ने); **विता.**६६५; **सेतु.**१७५ विरवत्; **समु.**१०३; **विव्य.**४६ साय प्रत्य (सायमप्य) मृत (हृत) प्रदाप्यः (स दाप्यः).

(२) **यास्मृ** २।१६५; **अपु.**२५७।१६; **विश्व.**२।१६९ नो द्रव्य (ने धन); **मिता** ; **अप.** नो (ने); **व्यक.**१६०; **स्मृच.**२०८ दोष (दोषाद्) नो (ने); **विर.**१७३ णः (णाः) च (तु); **पमा.**३७५; **रत्न.**१०७; **विचि.**८२ णः (णाः); **स्मृचि.**२१ ण. (णाः) नो (ने); **चन्द्र.**५६ पाले (पाल) मेव च (मेव तु) शेष स्मृचिवत्; **वीमि.** षवि (पाद्वि), **व्यप्र.**१४८ अपवत्; **व्यउ.**९७ स्मृचिवत्; **व्यम.**९५ अपवत्; **विता.**६६६ अपवत्; **सेतु.**१७६ अर्ध (अर्ध) णः (णा.); **समु.**१०३ णः (णाः) शेष स्मृचवत्.

(१) **यास्मृ.**२।१६६; **अपु.**२५७।१७ भूमौ (भूमि); **विश्व.**२।१७० चारो (चार) णैधः(णैध) सर्वदा (स्ववदा); **मिता.**; **अप.** भूमौ (भूमि) सर्वदा (समुपा); **व्यक** ९९ वा (च); **विर.**२३० चारो (चार) वा (च) पू; **पमा.**३७७ राजवशेन (राजेच्छयाऽपि) पू.; **रत्न.**१०७ पू.; **विचि.**१०३ पृ; **दवि.**२७७ विरवत्, पृ.; **मच.**८।३३९ ग्रामे (ग्राम्ये) सर्वदा (स्ववदा); **वीमि.** सर्वदा (स्ववदा), **व्यप्र.**३४९ ग्रामे (ग्राम्ये) पू.; **व्यउ.**९८ भूमौ (भूमि) पू; **विता.**६६८ वीमिवत्; **राकौ.**४६७; **सेतु.**१९६ भूमौ (भूमि) वा (च) पू.; **समु.**१०३ भूमौ (भूमि) पृ. . १५१ णैधः (णैध) सर्वतः सर्वं (सर्वदा स्वव) उत्त., **विव्य** ४८ पू.

धेनुःशतं परीणाहो ग्रामक्षेत्रान्तरं भवेत् ।
द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतम् ॥

(१) ग्रामनगरोभयधर्मयुक्त कर्पटम् । स्पष्टमन्यत् । विश्व.२।१७१

(२) इदमपरं गवादीना स्थानासनसौकर्यार्थमुच्यते —धनुःशतमिति । ग्रामक्षेत्रयोरन्तरं धनुःशतपरिमितं परीणाहः । सर्वतोदिश अनुसस्य कार्यम् । खर्वटस्य प्रचुरकण्टकसंतानस्य ग्रामस्य द्वे शते परीणाहः । नगरस्य बहुजनसंकीर्णस्य धनुषां चतुःशतपरिमितमन्तरं कार्यम् । मिता.

शस्यरक्षणम् । तदर्थं पशुदण्डविधिः ।

मापानष्टौ तु महिषी सस्यघातस्य कारिणी ।
दण्डनीया तदर्धं तु गौस्तदर्धमजाविकम् ॥

(१) यदि तु पशुपालापराधात् स्वाम्यपराधाद्वा पशवः सस्योपघातं कुर्युः, तत्र कथम् । तत्रापि हि —मापानष्टौ इति । कार्षापणविंशतिभागो मापः । स्पष्टमन्यत् । विश्व.२।१६३

(२) परसस्यविनाशकारिणी महिषी अष्टौ मापान्दण्डनीया । गौस्तदर्धं चतुरो मापान् । अजा मेषाश्च मापद्वय दण्डनीयाः । महिष्यादीना धनसंबन्धाभावात्तत्स्वामी पुरुषो लक्ष्यते । मापश्चात्र ताम्रिकपणस्य विंशतितमो भागः । 'मापो विंशतिमो भागः पणस्य परिकीर्तितः' इति नारदस्मरणात् । एतच्चाज्ञानविषयम् । ज्ञानपूर्वं तु 'पणस्य पादौ द्वौ गा तु द्विगुणं महिषीं तथा । तथाऽजाविकवत्सानां पादो दण्डः प्रकीर्तितः' ॥ इति स्मृत्यन्तरोक्तं द्रष्टव्यम् । मिता.

(३) अत्रापराधानुसारेण दण्डनार्थं ताम्रिकमापो ग्राह्यः । न पुनः सौवर्णो राजतो वा । ताम्रिकश्च मापः कार्षापणस्य षोडशभागो भवति । यैस्त्वनुरूपदण्डनार्थं 'मापो विंशतिमो भागः पणस्य परिकीर्तितः' इति नारदेनोक्तमापः स्वीकृतः । तेषां 'संख्या रश्मिरजोमूला मनुना समुदाहृता । कार्षापणान्ता सा दिव्ये नियोज्या विनये तथा' ॥ इति बार्हस्पत्यवचनविरोधो दुर्वारः । मनुनोदाहृतमापास्वीकाराच्चाम्रिकमापस्य तु मनुनोक्तस्य स्वीकारे न केनापि विरोध इत्यलं परपक्षयुक्तायुक्तचिन्तया । यत्तु मनुनोक्तं 'सपाद पणमर्हति' इति तत्स्वामिमतिपूर्वपशुव्यतिक्रमविषयं, याज्ञवल्क्यवचन त्वबुद्धिपूर्वविषयमिति न तयोर्विरोधः । यत्तु विष्णुनोक्त 'महिषी चेत्सस्यघातं कुर्यात्पालस्वष्टौ मापान्दण्ड्यः । अपालाया स्वामी' इति तदसमूलसस्यनाशविषयम् । अन्यतरदण्डस्यात्यापराध एव युक्तत्वात् । यत्तु शंखलिखिताभ्यामुक्तं 'महिषी दश' इति तन्नारदोक्तमापाभिप्रायम् । तथात्वे फलतस्ताम्रिकाष्टमापात्मक एव दण्डो भविष्यति तेन न 'मापानष्टावि'ति याज्ञवल्क्यवचनेन विरोधः । न च 'संख्या रश्मी'त्यादि बार्हस्पत्यवचनेन । यच्च ताभ्यामेवोक्त 'खरोष्ट्रं षोडश अजाविकं चतुर' इति तद्भक्षयित्वोपविष्टखरादिविषयम् । यत्तु कात्यायनेनोक्त 'दापयेत्पणपाद गा द्वौ पादौ महिषीं तथा' इति, यच्च नारदेन 'गावः पाद प्रदण्ड्यास्तु महिष्यो द्विगुण ततः' तत्ताम्रिकमापस्वीकारपक्षे फलतः समानत्वादविरुद्धमेव । नारदोक्तपक्षे तु परं विरोधः । अत एव स च पक्षो नास्माकमिति सर्वमविरुद्धम् । स्मृच.२११

भक्षयित्वोपविष्टानां यथोक्तादद्विगुणो दमः ।
सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम् ॥

(१) **यास्मृ**.२।१६७; **अपु**.२५७।१८; **विश्व**.२।१७१ खर्व (कर्प), **मिता**.; **अप**. णाहो (हारो); **विर**.२३० खर्व (कर्व); **पमा**.३७७ ग्राम (ग्रामे); **रत्न**.१०८; **विचि**.१०३; **दवि** २७७; **वीमि**.; **व्यप्र**.३४९ द्वे (द्वि); **व्यउ**.९८ न्तरं (दिक); **व्यम**.९६ ग्रामक्षेत्रा (ग्रामाद्ग्रामा), **विता**.६६९; **सेतु** १९६; **समु**.१०३; **विव्य**.४८ धनुः (भूमिः).

(२) **यास्मृ** २।१५९; **अपु**.२५७।१०; **विश्व**.२।१६३; **मिता**.; **अप**.; **व्यक**.१००; **स्मृच**.२११; **विर**.२३५; **पमा**.३८०; **रत्न**.१०९; **स्मृचि**.२१; **सवि**.१८२ (=) षी (षी) कारिणी (काकिणीम्); **मच**.८।२४१; **वीमि**.; **व्यप्र**.३५०; **व्यउ**.९९; **व्यम**.९६; **विता**.६७६; **समु**.१०४ घात (नाश).

(१) **यास्मृ**.२।१६०; **अपु**.२५७।११ यथोक्तादद्विगुणो (द्विगुणो वसतां) विवीतेऽपि (विधीयेत); **विश्व**.२।१६४ यथोक्तादद्विगुणो (द्विगुणोऽवसतां); **मिता**.; **अप**.; **व्यक**.१००; **स्मृच**.२११ मेषां (मेतां) तेऽपि (तस्थे); **विर**.२३५ ष्ट्र (ष्ट्र); **पमा**.३८०; **रत्न**.१०९; **स्मृचि**.२२ (=) त्वोप (त्वा प्र) पू; **सवि**.४९२ विरवत्, नारदः; **मच**.८।२४१; **वीमि**.; **व्यप्र**.

(१) उपहत्य प्रपलायतामेवम्। यदि तु तत्रैवोपविशेयुः, ततः—भक्षयित्वोपविष्टानामिति। भक्षयित्वोपविष्टानामवसतां पूर्वोक्तद्विगुणो दण्डः कार्यः। वसतां तु चतुर्गुणः स्मृत्यन्तरात्। यच्चैतत् क्षेत्रोपघाते निरूपितं, तदेषां महिष्यादीनां विवीतेऽपि समं, तथैवेत्यर्थः। विवीते च गोप्रचारक्षेत्रे खरोष्ट्रं महिषीसमम्। एवं पीडानुसाराद्धस्त्यादिष्वपि दण्डकल्पना। विश्व.२।१६४

(२) अपराधातिशयेन क्वचिद्दण्डद्वैगुण्यमाह—भक्षयित्वोपविष्टानामिति। यदि पशवः परक्षेत्रे सस्यं भक्षयित्वा तत्रैवानिवारिताः शेरते तदा यथोक्ताद्दण्डाद् द्विगुणो दण्डो वेदितव्यः। सवत्सानां पुनर्भक्षयित्वोपविष्टानां यथोक्ताच्चतुर्गुणो दण्डो वेदितव्यः। 'वत्सानां द्विगुणः प्रोक्तः सवत्सानां चतुर्गुण' इति वचनात्। क्षेत्रान्तरे पशून्तरे चातिदेशमाह—सममेषामिति। विवीतः प्रचुरतृणकाष्ठो रक्ष्यमाणः परिगृहीतो भूप्रदेशः। तदुपघातेऽपीतरक्षेत्रदण्डेन सम दण्डमेषां महिष्यादीनां विद्यात्। खराश्च उष्ट्राश्च खरोष्ट्रं तन्महिषीसमम्। महिषी यत्र यादृशेन दण्डेन दण्ड्यते तत्र तादृशेनैव दण्डेन खरोष्ट्रमपि प्रत्येकं दण्डनीयम्। सस्योपरोधकत्वेन खरोष्ट्रयोः प्रत्येकं महिषीतुल्यत्वाद्दण्डस्य चापराधानुसारित्वात्खरोष्ट्रमिति समाहारो न विवक्षितः। मिता.

(३) विवीत प्रचुरतृणं गवादिचरणस्थानं परेण रक्ष्यमाणम्। वीमि.

यावत्सस्यं विनश्येत्तु तावत्स्यात्क्षेत्रिणः फलम्।
गोपस्ताड्यस्तु गोमी तु पूर्वोक्तं दण्डमर्हति॥

(१) राजदण्डवच्च—यावदिति। विश्व.२।१६५

(२) परसस्यविनाशे गोस्वामिनो दण्ड उक्तः इदानीं क्षेत्रस्वामिने फलमप्यसौ दापनीय इत्याह—यावत्सस्यमिति। सस्यग्रहणं क्षेत्रोपचयोपलक्षणार्थं यस्मिन् क्षेत्रे यावत्पलालधान्यादिकं गवादिभिर्विनाशितं तावत्क्षेत्रफलमेतावति क्षेत्रे एतावद्भवतीति सामन्तैः परिकल्पितं तत्क्षेत्रस्वामिने गोमी दापनीयः। गोपस्तु ताडनीय एव न फलं दापनीयः। गोपस्य ताडनं पूर्वोक्तधनदण्डसहितमेव पालदोषेण सस्यनाशे द्रष्टव्यम्। 'या नष्टा पालदोषेण गौस्तु सस्यानि नाशयेत्। न तत्र गोमिना दण्डः पालस्तं दण्डमर्हती'ति वचनात्। गोमी पुनः स्वापराधेन सस्यनाशे पूर्वोक्तं दण्डमेवार्हति न ताडनम्। फलदान पुनः सर्वत्र गोस्वामिन एव। तत्फलपुष्टमहिष्यादिक्षीरिणोपभोगद्वारेण तत्क्षेत्रफलभागित्वात्। गवादिभक्षितावशिष्टं पलालादिकं गोस्वामिनैव ग्रहीतव्यम्। मध्यस्थकल्पितमूल्यदानेन क्रीतप्रायत्वात्। मिता.

(३) गोमी गोस्वामी। अप.

पथि ग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते।
अकामतः कामचारे चौरवद्दण्डमर्हति॥

(१) अत्रापवादः—पथीति। अकामतः इति छेदः। ग्रामान्ते विवीतान्ते वा यत् क्षेत्रं तत्र प्रमादादवतीर्णेषु महिष्यादिषु नापराधः। अभिप्रायावतरणेत्वाह—कामकार इति। पालः स्वामी वा। यद्वोभावपि। विश्व.२।१६६

(२) क्षेत्रविशेषे अपवादमाह—पथीति। पथि

३५०; **व्यउ.**९९; **व्यम.**९६ विरवत्; **विता.**६७६ विरवत्; **राकौ.**४६६; **समु.**१०४-१०५.

(१) **यास्मृ.**२।१६१; **अपु.**२५७।१२ (यावत्सस्य विनष्टं तु तावत्क्षेत्री फलं लभेत्। पालस्ताड्योऽथ गोस्वामी पूर्वोक्तं दण्डमर्हति॥); **विश्व**.२।१६५ नश्ये लभ् (नश्येत तावत्क्षेत्री फलं लभेत्) गोप स्तु (पालस्ताड्येत) पूर्वोक्तं (पूर्ववत्); **मिता.**; **अप.** पूर्वार्ध विश्ववत्, गोप...स्तु (पालस्ताड्योऽथ); **स्मृच.**२१० उक्त.; **विर**२३७ त्रिणः (त्रिणां) गोप (पाल); **रत्न.**१०९; **सवि.**४९२ (=) नश्येत्तु (नाश्येत) स्ताड्यस्तु (स्वाद्यस्तु) तु (स्यात्); **मच.**८।२४१ पूर्वार्ध विश्ववत्; **वीमि.** तावत्...लभ् (क्षेत्री तावत्फलं लभेत्) स्तु (श्च); **व्यम.**९६; **विता.**६७४; **राकौ.**४६६; **समु** १०४.

(१) **यास्मृ.**२।१६२; **अपु** २५७।१३; **विश्व.**२।१६६ तान्ते (तान्त) चारे (कारे); **मिता.**; **अप.**; **व्यक.**१००; **स्मृच.**२१० ग्राम (ग्रामे); **विर.**२३२ स्मृचवत्; **रत्न.**१०८; **त्रिचि.**१०४; **दवि.**२७९; **सवि.**४९२ (=) स्मृचवत्; **चन्द्र.**६७ ग्राम (ग्रामे) चारे (तस्तु); **वीमि.**; **विता.**६७३; **राकौ.**४६७; **सेतु.**१९७ स्मृचवत्; **समु.**१०४; **विव्य.**४९ विवी (परी).

ग्रामसमीपवर्तिनि क्षेत्रे ग्रामविवीतसमीपवर्तिनि च क्षेत्रे अकामतो गोभिर्भक्षिते गोपगोमिनोर्द्वयोरप्यदोषः। दोषाभावप्रतिपादन च दण्डाभावार्थं विनष्टस्यमूल्यदानप्रतिषेधार्थं च। कामचारे कामतश्चारणे चौरवत् चौरस्य यादृशो दण्डस्तादृश दण्डमर्हति। एतच्चानावृतक्षेत्रविषयम्। मिता.

महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः।
पालो येषां न ते मोच्या दैवराजपरिप्लुताः॥

(१) उक्तग्रामसमीपादिव्यतिरेकेणापि —महोक्षोत्सृष्टेति। पालो येषा दैवराजपरिप्लुतः, ते मोच्या इति व्यवहितकल्पना। स्पष्टमन्यत्। विश्व.२।१६७

(२) पशुविशेषेऽपि दण्डाभावमाह–महोक्षोत्सृष्टेति। महाश्चासावुक्षा च महोक्षो वृषः सेक्ता। उत्सृष्टपशवः वृषोत्सर्गादिविधानेन देवतोद्देशेन वा त्यक्ताः। सूतिका प्रसूता अनिर्दशाहा। आगन्तुकः स्वयूथात्परिभ्रष्टो देशान्तरागतः। एते मोच्याः परसस्यभक्षणेऽपि न दण्ड्याः। येषा च पालो न विद्यते तेऽपि दैवराजपरिप्लुताः दैवराजोपहताः सस्यविनाशकारिणो न दण्ड्याः। आदिशब्दग्रहणाद्वत्स्यश्वादयो गृह्यन्ते। ते चोशनसोक्ताः। अत्रोत्सृष्टपशूनामस्वामिकत्वेन दण्ड्यत्वासंभवात् दृष्टान्तार्थमुपादानम्। यथोत्सृष्टपशवो न दण्ड्या एव महोक्षादय इति। मिता.

नारदः

पालभृतिः

गवां शताद्वत्सतरी धेनुः स्याद्द्विशताद्भृतिः।
प्रतिसंवत्सरं गोपे संदोहश्चाष्टमेऽहनि॥

(१) अथ नारदाभिप्रायतः प्राचीनपदशेषभूतस्य स्वामिपालविवादाख्यपदस्य विधिरुच्यते। मनोर्मत्या तु क्रयविक्रयानुशयाख्यपदानन्तरं स्वतन्त्रतयाऽस्य पदस्योद्देशात्तदनन्तरमेव तदुद्देशक्रमाद्वक्तव्यम्। नारदीयोद्देशक्रमानुसारिणश्च वयमियनवद्यमिहाभिधानम्।

प्रतिसंवत्सरं वत्सतरी समतिक्रान्तवत्सत्वावस्था गौः भृतिः पालके पाल्यमानगोशतवशाद्देया भवति। शतादधिके तु वत्सतरीस्थाने सवत्सा गौरष्टमेऽहनि सदोहश्च भवतीत्यर्थः। सदोहः सर्वदोहः। यदाह बृहस्पतिः 'तथा धेनुभृतः क्षीरं लभेत ह्यष्टमेऽखिलम्' इति।

एतेन शम्भूक्तं धेनुसदोहयोर्नैरपेक्ष्येण भृतित्वे निरस्तमित्युपेक्षणीयम्। अनया दिशा शतद्विशतसंख्यातो न्यूनाधिकसंख्याना गवा महिष्यादिपश्वन्तराणा च भृतीयत्ता कल्पनीया। परिभाषितभृतिविशेषाभावविषयमेतत्। +स्मृच.२०६-२०७

(२) वत्सतरी द्विहायनी गौः। विर.१७०

(३) बृहस्पतिरपि 'तथा धेनुभृतः क्षीर लभते ह्यष्टमेऽखिलम्' इति। धेनुभृतः धेन्वा भृतः द्विशतपालक इत्यर्थः। तथा च सदोहो धेन्वा समुचीयते न वत्सतर्येति मदनरत्ने। कल्पतरौ तु धेनुभृतो गोपाल इति व्याख्यातम्। तेन वत्सतर्यापि समुचीयत इति गम्यते। व्यप्र.३४६-४७

पालस्य स्वामिनश्च विवादः

उपानयेद्गा गोपाय प्रत्यहं रजनीक्षये।
चीर्णाः पीताश्च ता गोपः सायाह्ने समुपानयेत्॥

---

(१) **यास्मृ.**२।१६३; **अपु.**२५७।१४ कादयः (का च गौः) न (तु); **विश्व.**२।१६७ न्तुकादयः (न्तुकी च गौ.) न (च) प्लुताः (प्लुतः); **मिता.**; **अप.** न (च) दैवराज (राजदैव); **व्यक.**१०१; **विर.**२३९ न (च); **पमा** ३८३; **रत्न.** १११; **विचि.**१०७; **स्मृचि.**२२ न (तु); **चन्द्र.**६८ न (तु) प्लु (द्रु); **वीमि.**पालो (पाला) न (तु) दैवराज (राजदैव), **व्यप्र.**३५२ मोच्या (मोक्ष्या); **व्यउ.**१००; **विता.**६८०; **प्रेतु.**२००; **समु.**१०५ पालो (पाला) न (तु); **विद्य** ४९.

(२) **नास.**७।११ हश्चाष्ट (हो वाष्ट); **नास्मृ.**९।१०; **मिता.**२।१६४ भृतिः (भृतिः); **अप.**२।१६४; **व्यक.**१६१

+ पमा., सवि. स्मृचवत्।

स्सरं (स्सरे); **स्मृच.**२०७ ताभृतिः (ते भृतिः); **विर.**१७०; **पमा.**३७३ नासवत्; **रत्न.**१०६, **विचि.**८० व्यकवत्; **स्मृचि.**२२; **नृप्र.**२७; **सवि.**३०२ स्मृचवत्; **व्यप्र.**३४६ स्मृचवत्; **व्यउ** ९६ स्मृचवत्; **विता.**६६३ स्मृचवत्; **सेतु.** १७४; **समु.**१०३ स्मृचवत्; **विद्य.**४६ शताद्वत्स (शत वत्स) शेषं स्मृचवत्.

(१) **नास.**७।१२; **नास्मृ.**९।११ येद्गा गोपाय (यति या गोपः); **व्यक.**१६२; **स्मृच.**२०७ रजनी (रजनि) चीर्णाः पी (समर्पि); **विर.**१७१ द्गा (द्गां); **पमा.**३७२ गोपाय (गोपालः) गोपः (गावः); **रत्न.**१०६; **विचि.**८० विरवत्;

(१) गोग्रहणं पशूपलक्षणार्थम्। स्मृच.२०७

(२) गोपसमीपं नीत्वा स्वामी गोपायार्पयेद् दिवसे दिवसे प्रातः। ततः स गोपः चीर्णाः तृप्ताः पीतोदकाः सायाह्ने प्रत्यानीय स्वामिने समर्पयेत्। नाभा.७।१२

[1]विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति।
यदि देशे च काले च स्वामिनः स्वस्य शंसति*॥
कृमिचोरव्याघ्रभयादरीश्वभ्राच्च पालयेत्।
व्ययच्छेच्छक्तितः क्रोशेत् स्वामिने वा निवेदयेत्॥

व्ययच्छेत् व्यसननिरासाय यतेत। स्मृच.२०८

स्याच्चेद्गोव्यसनं गोपो व्ययच्छेत्तत्र शक्तितः।
अशक्तस्तूर्णमागत्य स्वामिने तन्निवेदयेत्॥
अव्ययच्छन्नविक्रोशन् स्वामिने चानिवेदयन्।
योढुमर्हति गोपस्तां विनयं चैव राजनि॥

* व्याख्यासंग्रहः मनौ (पृ ९०८) इत्यत्र द्रष्टव्यः। **सवि.**३०२ द्वा गोपाय (द्वा गोपाल) चीर्णाः पी (समर्पि); **व्यप्र.**३४६ विरवत्; **व्यउ** ९६ द्वा (द्वां) गोप (भूयः), **विता** ६६३-६६४ विरवत्, **सेतु** १७४ गोपाय (गोपालः), **समु.**१०३ चीर्णाः पी (समर्पि).

(१) **नास.**७।१८, (**नाभा** 'गोपयित्वा हृतं' इति न्यायपाठः); **नास्मृ.**९।१६ष्य तु (ष्याप) न. स्वस्य (नश्चापि), **व्यक.**१६२ विघुष्य (विक्रम्य) मनुनारदौ; **विर.**१७२ विघुष्य (विक्रेतः) पालो (गोपो) मनुनारदौ, **विचि.**८१ विघुष्य (विक्रम्य) स्वस्य (तच्च) मनुनारदौ, **वीनि.**२।१६५ व्यकवत्, मनुनारदौ; **सेतु** १७५ मनुनारदौ; **विव्य** ४६ विघुष्य (विक्रुश्य).

(२) **स्मृच.**२०८, **पमा.**३७५ वा (तु); **समु** १०३.

(३) **नास.**७।१३ अशक्तस्तूर्णमागत्य (अशक्तावभिपत्यार), **नास्मृ** ९।१२ स्याच्चे...गोपो (सा चेद् गौर्व्यसनं गच्छेत्) गत्य (गम्य); **अप.**२।१६५, **व्यक.**१६२, **स्मृच** २०८ तन्नि (ता नि), **विर.**१७३; **रत्न.**१०६; **नृप्र** ७७; **चन्द्र** ५६ तत्र शक्तितः (यत्र शङ्कितः), **व्यप्र** ३४८ गत्य (गम्य); **व्यउ** ९७; **विता.**६६५ तत्र शक्तितः (शक्तितः स्वयम्) गत्य (गम्य), **समु.**१०३ स्मृचवत्.

(४) **नास.**७।१४ स्तां (स्त) राजनि (राजतः); **नास्मृ.**२।१३ चैव (चापि), **व्यक.**१६२ चा (वा), **स्मृच.**२०८ व्यकवत्; **विर.**१७३ व्यकवत्; **पमा** ३७५; **रत्न.**१०७, **विचि.**८१, **चन्द्र.**५६ चा (वा) यन् (येत्) स्तां (स्तं),

(१) वोढुं दातुं, तां गाम्। **विर.**१७३

(२) चोरहरणादौ यथाशक्ति प्रतीकारमकुर्वन्नभिधावतेति जनतायामविक्रोशन् स्वामिने चानिवेदयन् उदासीनो गोपः तद् द्रव्यं स्वामिने दातुमर्हति। राज्ञश्च दण्डमौदासीन्यादनुमत तस्य भवतीति। नाभा.७।१४

[2]नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतम्।
हीनं पुरुषकारेण प्रदद्यात् गोप एव च*॥
[3]अजाविके तु संरुद्धे वृकैः पाले त्वनायति।
यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत्*॥
[4]तासां चेदवरुद्धानां चरन्तीनां मिथो वने।
यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्बिषी*॥
[5]अनेन सर्वपालानां विवादः समुदाहृतः।
मृतेषु च विशुद्धिः स्याद्बालशृङ्गादिदर्शनात्॥

शस्यरक्षणम्। तदर्थं पशुदण्डविधिः।

[6]ग्रामोपान्ते च यत्क्षेत्रं विवीतान्ते महापथे।
अनावृतं चेत्तन्नाशे न पालस्य व्यतिक्रमः॥

* व्याख्यासंग्रहः मनौ (पृ ९०८-९०९) इत्यत्र द्रष्टव्य.। **वीनि** २।१६५ गोपस्ता (दोष त), **व्यप्र.**३४८ स्ता (स्त); **व्यउ.**९७ व्यकवत्; **विता.**६६५ वोढु (दातु) शेषं चन्द्रवत्, **सेतु.**१७६ विनय (वित्तप), **समु** १०३ व्यकवत्; **विव्य** ४६ चा (वा) स्ता (स्त).

(१) **नास.**७।१५ प्रद ..च (गोपायैव निपातयेत्); **नास्मृ.**९।१४ नष्ट (नष्ट) प्र ..च. (पालयैव निपातयेत्), **व्यक.**१६२ मनुनारदौ; **विर.**१७३ हतं (प्रस्त) च (तु) मनुनारदौ; **सेतु** १७६ मनुनारदौ.

(२) **नास.**७।१६ तु स (तथा) या (यत्); **नास्मृ.**९।१५ तु स (तथा); **व्यक** १६२-१६३ मनुनारदौ; **विर.**१७५ मनुनारदौ; **सेतु** १७७ मनुनारदौ.

(३) **नास.**७।१७ तासां चेद (तासामन) यामुत्प्लुत्य (याः प्रसह्य); **व्यक.**१६३ चेदव (चेदनि) मनुनारदौ; **विर.**१७५ मनुनारदौ; **सवि** ३०४ त्प्लुत्य (पेत्य).

(४) **नास** ७।१९ अनेन (एतेन) च (तु) स्याद्बालशृङ्गा (स्यात्पालस्याङ्गा); **नास्मृ** ९।१७; **अप.**२।१६५; **व्यक.**१६३; **विर** १७५; **रत्न** १०७; **विचि.**८२ च (तु); **स्मृचि.**२१ ब्रह्मपुराणम्; **चन्द्र.**५७ समुदाहृतः (संप्रकीर्तितः); **व्यप्र.**३४८ शुद्धिः (शुद्धः) उक्त, व्यासः; **व्यउ.**९७ उक्त., व्यासः; **सेतु.**१७७; **समु.**१०३.

(५) **नास.**१२।३५ पाल (गोप); **नास्मृ.**१४।४० कृतं

(१) महापथ इति वदन्नपरिहार्यमार्गगामिनो व्यतिक्रमाभाव दर्शयति । अत्रार्थादण्डाभावोऽप्युक्तः ।

स्मृच.२१०

(२) विवीतो गवादिविनियोगार्थं रक्षितयवसो सूप्रदेशः, तस्यान्ते समीपे । विर.२३१

उत्क्रम्य तु वृतिं यः स्यात्सस्यघातो गवादिभिः ।
पालः शास्यो भवेत्तत्र न चेच्छक्त्या निवारयेत् ॥

वृतिमुत्क्रम्य गोमहिष्यादिभिः सस्यघाते पालः शासनीयः, शक्तः सन् न वारयेच्चेत् । उत्क्रम्येति वचनाद् वृत्यकरणे न दोषः । स चेच्छक्त इति वचनादशक्तौ न दोषः । नाभा.१२।२५

पथि क्षेत्रे वृतिः कार्या यामुष्ट्रो नावलोकयेत् ।
न लङ्घयेत् पशुर्नाश्वो न भिन्द्याद् यां च सूकरः ॥

यामुष्ट्रो नावलोकयेत् अतीत्य । पशुर्गवादिः । दृढत्वाच्च सूकरो या न भिन्द्यात् । अतोऽन्यादृशी वृतिः स्याच्चेत् ता भङ्क्त्वा लङ्घयित्वा वा सस्यभक्षणे न पालगोमिनौ दण्ड्यौ । नाभा.१२।३६

माँषं गां दापयेद्दण्डं द्वौ मापौ महिषी तथा ।
तथाजाविकवत्सानां दण्डः स्यादर्धमाषिकः ॥

(१) तत्पुनः प्ररोहयोग्यमूलावशेषभक्षणविषयम् ।

मिता.२।१५९

(२) अत्र राजतस्य मापस्य माषशब्देनाभिधान भक्षयित्वोपविष्टसवत्सविषयत्वं च मन्तव्यम् । 'वसता द्विगुणः प्रोक्तः सवत्साना चतुर्गुणः' इति स्मृतेः समानार्थत्वमेव सत्यस्य वचनस्य भविष्यति । दक्षिणापथे षोडशताम्रिकमाषाणामेकस्य च राजतमाषस्य तुल्यमूलत्वात् । अथवा अत्रापि ताम्रिकमाषस्यैवाभिधानमस्तु । तथापि मुहूर्तमात्रभक्षणविषयत्वादविरोधः ।

स्मृच.२११-२१२

गावः पादं प्रदाप्यास्तु महिष्यो द्विगुणं ततः ।
अजाविके सवत्से तु माषो दण्डः परः स्मृतः ॥
सन्नानां द्विगुणो दण्डो वसतां तु चतुर्गुणः ।
प्रत्यक्षचारकाणां तु चौरदण्डः स्मृतो बुधैः ॥

सन्नाना शस्यभक्षणश्रान्ताना वसता तत्रैव चरित्वा नीतरात्रीणाम् । तदेतदप्रत्यक्षचारकाभिप्रायम् । प्रत्यक्षचारकाः क्षेत्रिणा समक्ष एव बलेन चारकाः ।

विर.२३६

यो नष्टा पालदोषेण गौस्तु सस्यानि नाशयेत् ।
न तत्र गोमिनो दण्डः पालस्तं दण्डमर्हति ॥

(वृते), **अप.**२।१६२ च (तु) पथे (पथि); **व्यक.**१००, **स्मृच.**२१०; **विर.**२३१ महापथे (च यत्पुनः); **पमा.**३७९; **रत्न**१०८, **चन्द्र.**६७ च (पु) वि...पथे (विपरीते च यत्पुन), **विता.**६७२; **समु.**१०३.

(१) **नावं.**१२।२५ यः स्यात् (यत्र) शास्यो (दण्ड्या) न चेच्छक्त्या नि (स चेच्छक्तो न); **नास्मृ.**१४।२८ य. स्यात् (यत्र); **अप.**२।१६२, **व्यक.**१०० च्छक्त्या (च्छक्तौ), **स्मृच.**२१०; **विर.**२३२ च्छक्त्या (च्छक्तौ), **पमा.**३७९ **नास्मृवत्**; **रत्न.**१०८, **व्यप्र.**३४९ विरवत्, **व्यउ.**९९ तु वृतिं य. (वृति यस्य) शेष विरवत्; **विता.**६७१ विरवत्, **समु.**१०३.

(२) **नासं.**१२।३६; **नास्मृ.**१४।४१ नाँश्वो (वाश्वो); **अप.**२।१६२, **व्यक.**१०० पू.; **स्मृच.**२०९ भिन्द्या...रः (च भिन्द्याच्च सूकरैः); **विर.**२३३ या च (या तु), **पमा.**३७८ **नास्मृवत्**; **विता.**६७० यां च (यच्च) उत्त, कात्यायनः; **समु.**१०३ भिन्द्याद् यां च (च भिन्द्याच्च).

(३) **नासं.**१२।२८ तथा...ना (अजाविके च वत्से च) माषि (माष), **नास्मृ.**१४।३१ तथा नां (अजाविके सवत्से तु) माषि (माष), **मिता.**२।१५९, **स्मृच.**२११ दण्डः (दमः) षिकः (षकम्), **पमा.**३८१ महिषी (महिष), **रत्न.**१०९, **सवि.**४९१-४९२ दाप (दण्ड) माषि (माष), **वीमि.**२।१५९, **व्यप्र.**३५१; **व्यउ** ९९; **विता.**६७६ तथा...क (अजाविकस) माषि (माष), **समु.**१०५ माषि (माष).

(१) **अप.**२।१६०; **व्यक.**१००, **स्मृच.**२११ प्रदाप्यास्तु (प्रदण्ड्यास्तु) पू., **विर.**२३६ प्रदाप्यास्तु (प्रदण्ड्या. स्युः); **समु** १०५ स्मृचवत्.

(२) **नासं.**१२।३० सन्ना...सता (प्रोक्तः स द्विगुणः सन्ने वसन्त्या) स्मृतो बुधैः (स्मृतस्तथा), **नास्मृ.**१४।३४ गुणो दण्डो (गुण· प्रोक्तो) बुधै. (नृणाम्); **अप.**२।१६० तु चतु (च चतु); **व्यक.**१००; **स्मृच.**२१२ उत्त.; **विर.**२३६ अपवत्; **रत्न.**१११ उत्त ; **विचि.**१०५; **दवि.**३८४; **विता.**६७९; **सेतु.**१९९; **समु.**१०५.

(३) **नासं.**१२।३१ नष्टा (नष्टाः) गौ...येत् (गावः क्षेत्रसमाश्रिताः) पालस्त (पालस्तद्); **नास्मृ** १४।३५ नष्टा (नष्टाः) गौ ...येत् (गाव. क्षेत्र यदाप्नुयु·) मिनो (मिनां);

सामूलसस्यघाते तु तत्स्वामी प्राप्नुयात्सदम् ।
वधेन गोपो मुच्येत दण्डं स्वामिनि पातयेत् ॥

अशेषसस्यनाशे सर्वस्मिन् भक्षिते क्षेत्रस्वामी भक्षितं धान्यं लभेत गोस्वामिसकाशात् । ताडयित्वा पालो मोच्यः । दण्ड च राजकुले गोस्वामी दाप्यः ।

नाभा.१२।२६

गोभिस्तु भक्षितं सस्यं यो नरः प्रतियाचते ।
सामन्तानुमतं देयं धान्यं यत्तत्र वापितम् ॥
गवत्रं गोमिना देयं धान्यं वै कर्षकाय च ।
एवं हि विनयः प्रोक्तो गवां सस्यावमर्दने ॥

मिता.२।१६१ मिनो (मिना), **व्यक.**१०० या नष्टा (नष्टा या), **स्मृच.**२१० गौ ..नि (गौः क्षेत्र तु वि) गोमिनो दण्डः (स्वामिनो दोषः); **विर.**२३६-२३७ गौ...नि (गौः क्षेत्र तु वि) गोमि (स्वामि) पालस्त (पालस्तद्); **रत्न.**१०८ गोमि (स्वामि); **दवि.**२८२; **वीमि.**२।१६१(=); **विता.**६७४ या नष्टा (नष्टा या) गौ ..नि (गौ. क्षेत्र तु वि) गोमि (स्वामि); **समु** १०४ गोमि (स्वामि) दण्डः (दोषः) पालस्त (पालस्तद्).

(१) **नासं** १२।२६ घाते (नाशे) प्राप्नुयात्सदम् (धान्यमाप्नुयात्) गोपो (पालो), **नास्मृ** १४।२९ प्राप्नुयात्सदम् (सममाप्नुयात्) गोपो (पालो); **व्यक.**१०० प्राप्नुयात् सदम् (शदमवाप्नुयात्); **स्मृच.**२१० घाते (नाशे); **विर** २३७ प्राप्नुयात्सदम् (दण्डमाप्नुयात्) गोपो (पालो); **पमा** ३८४ घाते (नाशे) सदम् (शतम्), **रत्न** १०९; **विचि.**१०५ घाते (नाशे) प्राप्नुयात्सदम् (शदमाप्नुयात्); **दवि.**२८५; **व्यप्र.**३५२ स्मृचवत्; **व्यउ.**१०० स्मृचवत्; **विता.**६७५ स्मृचवत्; **सेतु.**१९९ घाते (नाशे) प्राप्नुयात्सदम् (दण्डमाप्नुयात्) गोपो (पालो); **समु.**१०४ स्मृचवत्; **विन्य.**४९ विचिवत्.

(२) **नासं.**१२।३३-३४ सस्य (धान्य) याचते (मार्गति) साम...देय (सामन्तस्य शदो देयो); **नास्मृ.**१४।३८ सस्य (धान्य) मत (मते) वापि (भक्षि); **मिता.**२।१६१; **अप.**२।१६१ यत्तत्र (यत्र तु); **व्यक.**१००; **स्मृच.**२१० देय (ज्ञेयं); **विर.**२३८ यत्तत्र वापि (यत्र तु भक्षि); **पमा.**३८५ मतं (मते) वापि (भक्षि), **रत्न.**१०८; **विचि.**१०६ वापि (नाशि); **स्मृचि.**२२; **दवि.**२७९; **व्यप्र.**३५२; **व्यउ.**१००; **विता.**६७४; **सेतु.**१९९ स्तु (श्व) वापि (नाशि); **समु.**१०४; **विन्य.**४९ मत (मते) यत्तत्र वापि (यस्य तु भक्षि).

(३) **नासं.**१२।३४ गोमिना (गोमिने) वै कर्षकाय च (तत्कृषकस्य तु) **पू.**; **नास्मृ.**१४।३९ गवत्र (गावस्तु) देयं (देया) वै...च (तत्कर्षिकस्य तु) गवां...ने (गोपैः सस्यावपातनात्); **मिता.**२।१६१ गवत्र गोमिना (पलालं गोमिनो) काय च (कस्य तु) पू., **अप.**२।१६१ गवत्र (गोजग्धं) काय च (कस्य तु); **व्यक.**१०१; **विर.**२३८ गोमि (स्वामि) **पू.**; **विचि.**१०६ वै (वा); **दवि.**२७९; **विता.**६७४ मितावत्, **पू.**; **सेतु.**१९९; **समु.**१०४ मिना (मिने) शेष मितावत्, **पू.**, **विन्य.**४९ मिना (मिने).

(१) **नासं.**१२।३२ वृक्षा...वेत् (निर्यम्रात् पतितोऽपि वा); **नास्मृ.**१४।३६ वा दष्टो (दष्टो वा); **अप.**२।१६३; **व्यक.**१०१, **स्मृच.**२१२ ग्राह (ग्रह); **विर.**२३९ग्राह (ग्रह) वज्राश (वज्राग्नि); **पमा.**३८२ ग्राह (ग्रह) अथ (अपि); **रत्न.**१०९; **विचि.**१०७ तो वा (तोऽपि); **दवि.**२८०; **व्यप्र.**३५१; **व्यउ.**९९-१०० स्मृचवत्; **विता.**६७९ ग्राह (गृह); **सेतु.**२०० ग्राह (पाल) तो वा (तोऽपि); **समु.**१०५ ग्राह (ग्रह) वृक्षाद् (श्वभ्रे).

(२) **नासं.**१२।३३ दोषः...च (पालदोषः स्याच्चैव) **उत्त.**; **नास्मृ.**१४।३७; **अप.**२।१६३ दोषो (दण्डो); **व्यक.**१०१; **स्मृच.**२१२; **विर.**२३९ नाम् (नः); **पमा.**३८२; **रत्न.**१०९; **विचि.**१०७ गोमिनाम् (गोमताम्); **दवि.**२८१; **चन्द्र.**६७ च (वा) शेष विचिवत्; **व्यप्र.**३५१; **व्यउ.**१००; **विता** ६७९ व्याधि (व्याध्याधि); **सेतु.**२०० **विचि.**वत्, **समु.**१०५.

(१) भक्षितं धान्यं भक्षितधान्यानुरूपं गवत्रं यवसम्, एतच्च यवसदानं विवीतचरणपक्षे । अत्र चैकस्मिन्नप्यपराधे परस्परविरुद्धशस्यदण्डदानबोधकाना दिनरात्रिकामाकामकृतादिव्यवस्थया विरोधः परिहरणीयः ।

विर.२३८

(२) गवत्र धान्यस्तम्बः । गोमी गोस्वामी तेन गवत्र धान्यं वा क्षेत्रिणे देयमित्यर्थः ।

विचि.१०६

राजग्राहगृहीतो वा वज्राशनिहतोऽपि वा ।
अथ सर्पेण वा दष्टो वृक्षाद्वा पतितो भवेत् ॥
व्याघ्रादिभिर्हतो वाऽपि व्याधिभिर्वाऽप्युपद्रुतः ।
न तत्र दोषः पालस्य न च दोषोऽस्ति गोमिनाम् ॥

(१) आतुरपशुविषये तु बहुसस्यनाशेऽप्येवमेवादण्ड इति दोषाभावाभिधानमुखेनाह— राजग्राहेति ।

आतुराणामनिवार्यत्वादिति शेषः । स्मृच.२१२

(२) 'पालो दण्ड्य' इत्युक्तम् । तस्यापवादः । राजग्राहगृहीतो वा पालः, वज्रपीडितो वा स्तनयित्नुशब्देन मोहितः, अशनिपीडितो दिव्येनाग्निना हतः, सर्पेण वा दष्टः, पर्वताग्राद् 'वृक्षा (ग्रा) दि'त्यन्यः पाठः, पतितो भग्नः, एतैः कारणैरप्रत्यवेक्षिता गावो भक्षयेयुः, न तत्र पालदोषः नापि गोमिनः, पाले समर्पितत्वात् पालदोषस्यापरिज्ञानाच्च पालेऽप्यस्वतन्त्रत्वात् । नाभा.१२।३२

[1]गौः प्रसूता दशाहात्तु महोक्षो वाजिकुञ्जराः ।
निवार्याः स्युः प्रयत्नेन तेषां स्वामी न दण्डभाक् ॥
[2]अदण्ड्या हस्तिनोऽश्वाश्च प्रजापाला हि ते मताः ।
अवण्ड्याऽऽगन्तुकी गौश्च सूतिका वाऽभिसारिणी ॥
[3]नष्टा भग्ना च लग्ना च वृषभः कृतलक्षणः ।
प्रोक्तं तु छिन्ननासायां वसन्त्यां तु चतुर्गुणम् ॥

बृहस्पतिः

पालस्य भृतिः । पालस्य स्वामिनश्च विवादे ।

[4]तेथा धेनुभृतः क्षीरं लभेत ह्यष्टमेऽखिलम् ॥
[5]सायं समर्पयेत् सर्वं यथा प्रातः समर्पितम् ॥
[6]कृमिचौरव्याघ्रभयाद्दरीश्वभ्राच्च पालयेत् ।
व्यायच्छेच्छक्तितः क्रोशेत्स्वामिने वा निवेदयेत् ॥

दरी कन्दरा, श्वभ्रं गर्तः, व्यायच्छेत्कृम्याद्युपद्रवेभ्यः शक्तितो रक्षां कुर्यात्, क्रोशेत् उच्चैः परान् श्रावयेत् । विर.१७२

सस्यरक्षणम् । तदर्थं पशुदण्डविधिः ।

[7]सस्यान्निवारयेद्वास्तु चीर्णे दोषो द्वयोर्भवेत् ।
स्वामी शददमं दाप्यः पालस्ताडनमर्हति ॥

(१) शदो दमश्चेति शददमं इत्यस्य विग्रहः । तदिदं समूलसस्यनाशविषयम् । तत्र पुनः प्ररोहाभावेनापराधाधिक्यात् स्वामिनोऽपि दण्डार्हत्वात् । स्मृच.२१०

(२) चीर्णे भक्षिते द्वयोः पालस्वामिनोः सद भक्षितसस्यानुरूपं फलं स्वामिनो देयं दमं दण्डं राज्ञे । स्वामिपालसमक्षविषयमेतत् । विर.२३७

कात्यायनः

[8]अजातेष्वेव सस्येषु कुर्यादावरणं महत् ।
दुःखेन हि निवार्यन्ते लब्धस्वादुरसा मृगाः ॥
गवां निर्गच्छतां ग्रामात्कश्चित्क्षेत्रे प्रमादतः ।
प्रसेत्प्रविश्य सस्यानि तद्दोषः स्वामिपालयोः ॥
यावत्सस्यं विनश्येत्तु तावद्देयं च गोमिना ।
कार्यं संप्रतिपत्त्या वा स्वामिकर्षकगोमिनाम् ॥

---

(१) नासं.१२।२७ महोक्षो वाजि (महोक्षाजावि) वार्याः स्युः (वार्यास्तु); नास्मृ.१४।३० हात्तु (ह्य च) जराः (जरौ); अप.२।१६३ हात्तु (हे तु); व्यक.१०१; स्मृच.२१२ हात्तु (ह्यान्त) राः (रैः) वार्याः स्युः (वार्यास्तु); विर.२४० हात्तु (ह्यन्तु) क्षो (क्षा) निवार्याः स्यु. (विनिवार्याः); पमा.३८२ नास्मृवत्; रत्न.१११; दवि.२८१ तेषा स्वामी (स्वामी तेषा) शेष विरवत्; व्यप्र.३५१ क्षो (क्षा), व्यउ.१०० क्षो (क्षा) वार्याः (धार्याः); विता.६८० हात्तु (ह्यन्तु) वार्याः (धार्याः); समु.१०५ हात्तु (ह्यान्त) वार्याः स्युः (वार्यास्तु).

(२) नासं.१२।२९ मताः (स्मृताः) ऽऽ गन्तुकी (गर्भिणी) वाऽभि (चाति); नास्मृ.१४।३२; रत्न.१११ उक्त.

(३) नास्मृ.१४।३३.

(४) अप.२।१६४ भेत ह्यष्ट (भते दश); व्यक.१६१; स्मृच.२०७ भेत (भेतान्); विर.१७० तथा (पर); पमा.३७३तथा (तया) त क्ष (तैवा)पू.; रत्न.१०६; विचि.८० भेत (भते); सवि.३०२ त क्ष (तास्या); व्यप्र.३४६ विचिवत्; विता.६६१.

(१) स्मृच.२०७ (यथा...पितम्०); सवि.३०३ स्मृचवत्; समु.१०३.

(२) व्यक.१६२, विर १७२; रत्न १०६, विचि. ८१ व्याय (आय), व्यप्र ३४७, व्यउ ९७ च्च (त्तु); विता. ६६५; सेतु.१७६; विव्य.४६ पू.

(३) व्यक.१००; स्मृच.२१०; विर.२३७ शद (सद्) क्रमेण नारदः; पमा.३८४ षो द्वयोः (षद्वय) शद (शत); रत्न. १०९; व्यप्र.३५२; व्यउ.१००; विता.६७४ दमं (दमो).

(४) अप.२।१६२; व्यक.१००; स्मृच.२०९ न हि (नेह) स्वादु (स्वादू); विर.२३३ न हि (नेह) ध्वस्वादु (ध्वास्वाद); रत्न.१०८ पू.; व्यप्र.३४९ हि (वि); व्यउ. ९८ व्यप्रवत्; विता.६७० पू.; समु.१०३.

(५) समु.१०३.

दापयेत्पणपादं गां द्वौ पादौ महिषीं तथा ।
तथाऽजाविकवत्सानां पादो दण्डः प्रकीर्तितः ॥
अधमोत्तममध्यानां पशूनां चैव ताडने ।
स्वामी तु विवदेद्यत्र तत्र दण्डं प्रकल्पयेत् ॥
[1]क्षेत्राराममविवीतेषु गृहेषु पशुराजिषु ।
ग्रहणं तत्प्रविष्टानां ताडनं च बृहस्पतिः ॥

व्यासः

पालस्य स्वामिनश्च विवादः

[2]पालग्रहे ग्रामघाते तथा राष्ट्रस्य विप्लवे ।
यत्प्रनष्टं हृतं वा स्यान्न पालस्तत्र किल्बिषी ॥

व्याससंवादाभ्यत्व निर्दोषत्वाभिधानादभिहितं भवतीत्यभिसंधाय निर्दोषत्वमेव पालकस्य क्वचिदाह—पालग्रह इति। स्मृच.२०७

उशना

सस्यरक्षणम् । तदर्थं पशुदण्डविधिः ।

[3]गोभिर्विनाशितं धान्यं यो नरः प्रतियाचते ।
पितरस्तस्य नाश्नन्ति नाश्नन्ति त्रिदिवौकसः ॥

[4]अदण्ड्या हस्तिनोऽश्वाश्च प्रजापाला हि ते स्मृताः।
अदण्डयाः काणकुण्ठाश्च वृषश्च कृतलक्षणः ॥

(१) काणः एकाक्षः । कूटः एकशृङ्गः । कृतलक्षणः प्रतीतायसेन कृतलाञ्छनः । अस्यास्वामिकत्वात् । स्वामिदण्डभावेऽपि सस्यरक्षणार्थं कदाचित्कृतलक्षणानां पाले कृते न तस्य दण्डभागित्वं तेषां दुर्निवारत्वादिति वक्तुं 'वृषश्च कृतलक्षण' इत्युक्तम् । स्मृच.२१२

(२) कुण्ठः खञ्जः, अत्र काणकुण्ठशब्दाभ्यामत्यन्तासमर्थ उच्यते । वृषश्च कृतलक्षणः त्रिशूलाद्यङ्कितः । विर.२४०

[5]अदण्डया मृतवत्सा च खञ्जा रोगवती कृशा ॥
[6]अदण्डयागन्तुका या गौः सूतिका चातिचारिणी।
अदण्डयाश्चोत्सवे गावः श्राद्धकाले तथैव च ॥

---

(१) स्मृच.२११ पू.; विर.२३५; विचि.१०५; दवि. २८३ पू.; वीमि.२।१५९; सेतु.१९८; समु.१०४ पू.

(२) अप.२।१६३ तत्र दण्ड प्र (दण्डं तत्र वि); व्यक. १०१ अधमो (प्रथमो); स्मृच.२०९ तत्र दण्ड (दण्डं तत्र); विर.२४१; विचि १०८; दवि.२८०; विता ६७१ ने (नम्) तत्र दण्डं (दण्डं तत्र); सेतु.२०२; समु.१०३.

(३) व्यक.१०१, स्मृच.२०८; राजि (कादि) च (वा); विर.२४१ राजि (वाटि); विचि.१०८;दवि.२८० राजि (पाति); विता.६७१ राजि (पादि); सेतु.१०२; समु. १०३ च (वा).

(४) अप.२।१६४ म्र (प्रा) प्लवे (भ्रमे) न पालस्तत्र (पालस्तत्र न), व्यक.१६२; स्मृच.२०७ प्लवे (भ्रमे); विर.१७२ म्र (प्रा); पमा.३७४ लस्त (लेष्व) धी (षम्); रत्न.१०७; विचि.८१, स्मृचि.२१ तथा राष्ट्रस्य विप्लवे (राष्ट्रस्य विप्लवे तथा) हृ (गृ); सवि ३०३ प्लवे (भ्रमे); चन्द्र.५५ म्र (प्रा) विप्ल (सप्ल); विता.६६७ प्लवे (भ्रमे); सेतु.१७६; समु. १०३ प्लवे (भ्रमे).

(५) अप.२।१६१, स्मृच.२०९; विर.२३२ त्रिदि (च दि); पमा.३८५; दीक.४७ विरवत्; रत्न.१११; विचि. १०६ विरवत्; दवि.२७९ याचते (लिप्सते) त्रि (च), चन्द्र.६७ धान्यं (क्षेत्रं) नाश्नन्ति त्रि (न चाश्नन्ति); व्यम. ३५३; व्यउ.१०१; व्यम.९६; विता.६८१; सेतु. १९९-२०० विरवत्; समु १०३; विव्य.८९ विरवत्.

(१) मिता.२।१६३ ऽश्वाश्च (श्वाश्वा) दण्ड्याः (दण्ड्यौ) कुण्ठाः (कुञ्जौ) वृषश्च (ये शश्वत्) णः (णाः), अप.२।१६३ वृषश्च (पृथक्त्व) णः (णाः), व्यक.१००-१०१; स्मृच.२१२ ऽश्वाश्च (श्वाश्वाः) कुण्ठा (कूटा); विर.२४०; रत्न.१११; विचि.१०७; दवि.२८१ दण्ड्या (दम्या)कुण्ठा(कुण्ठ); चन्द्र. ६८ ला हिते स्मृ (लहिते र) कुण्ठा (कुञ्जा); वीमि.२।१६३ पू., स्मृत्यन्तरम्; व्यप्र.३५१-३५२ ऽश्वाश्च (श्वाश्वा) कुण्ठा (कूटा) प (षा) णः (णाः); व्यउ.१०० व्यप्रवत्; विता. ६८० ऽश्वाश्च (श्वाश्वा) कुण्ठाश्च वृषश्च (कूटाश्च तथा च) णः (णाः); राकौ.४६७; सेतु.२०१ कुण्ठा (कुञ्जा); समु.१०४ कुण्ठा (कूटा); विव्य.१०४ ऽश्वाश्च (श्वाश्वाः) पू.

(२) पमा.३८४; व्यप्र.३५२ खञ्जा (सञ्ज); व्यउ. १०० खञ्जा (सञ्जा); समु.१०४ खञ्जा (राज्ञा).

(३) मिता.२।१६३ का या गौः (की गौश्च) चातिचा (वाऽभिसा); अप.२।१६३ चातिचा (चाऽभिसा) शेष मितावत्; व्यक.१०१; स्मृच.२१२ (अदण्ड्यागन्तुकी गौश्च प्रसूता अभिचारिणी); विर.२४०; पमा.३८४ अपवत्; रत्न.१११ उत्त.; विचि.१०७-१०८ चाति (व्यभि); दवि.२८१ चाति (चाभि) पू.; व्यप्र.३५२-३५३ अपवत्; व्यउ.१००; व्यम. ९६ उत्त.; विता.६८१ उत्त; सेतु.१०१ या गौः (गौश्च) चाति (व्यभि); समु.१०४ स्मृचवत्.

(१) आगन्तुकी अनभ्यस्तस्थाना । अभिचारिणी प्रचुरताडनात् स्वयूथाभिगामिनी । एवं कालविशेषे तेनैव गोमात्रविषये दण्डाभावो दर्शितः । स्मृच.२१२

(२) अतिचारिणी अत्यन्तमारणशीला । पारिजाते तु अभिसारिणीति पठित्वा वृषस्यन्तीति विवृतम् ।

विर.२४१

स्मृत्यन्तरम्

[1]पालकारिते द्विगुणो दण्डः ।
[2]न तत्र स्वामिनो दोषः पाले सति चतुष्पदाम् ।
अपाले स्वामिनो दोषः सस्यघाते स्मृतो बुधैः ॥
[3]पणस्य पादौ द्वौ गां तु द्विगुणं महिषीं तथा ।
तथाऽजाविकवत्सानां पादो दण्डः प्रकीर्तितः ॥

ब्रह्मपुराणम्

पालस्य स्वामिनश्च विवादः

गृ[4]हीतमूल्यो गोपालो गास्त्यक्त्वा निर्जने वने ।
ग्रामचारी नृपैर्वध्यः शलाकीव वनेचरः ॥

[1]गोपालहस्तसंस्था गौस्तद्दोषान्म्रियते यदि ।
तदा स एव दण्ड्यः स्याच्छुल्कं दाप्यस्तु गोपतेः॥
यदा रोगादिदोषेण म्रियते गौर्गृहे क्वचित् ।
तदा स गोपतिर्दण्डयो दत्वा गोपालवेतनम् ॥

गां जातरोगा, शलाकीवेति शलाकी शिरावेध्यादिः स यथा स्वप्रतिकर्तव्य स्वामिनं त्यक्त्वा स्वेच्छया वनगामी दण्ड्यः, तथायमपीत्यर्थः । यदा रोगादीति, यदा प्रतीकारसमर्थे गोपतौ तमप्रतिकुर्वति रोगादिना विनष्टा गौस्तदासौ राज्ञा दण्ड्यो गोपस्य वेतनं दापयितव्य इत्यर्थः । विर.१७४

भाष्यकारः

सस्यरक्षणम् । तदर्थं पशुदण्डविधिः ।

[3]सौवर्णैर्माषकैः संख्या दण्डकर्मसु शस्यते ।
पशूनां सस्यचरणे मापैरन्यैश्च राजतैः ॥

---

(१) **मभा.**१२।१७.

(२) **समु.**१०३.

(३) **मिता.**२।१५९ तु (तत्); **स्मृच.**२११ तु (तत्) र्धी (धी) पादो दण्डः प्रकीर्तितः (दण्डः स्यादर्धमाषकः); **पमा.** ३८१; **रत्न.**१०९; **व्यप्र.**३५१; **व्यउ.**९९; **विता.**६७७ र्धी (धी); **समु.**१०४.

(४) **व्यक.**१६२ गास्त्य (तांस्त्य); **विर.**१७४ गास्त्य (गां त्य); **रत्न.**१०७; **विचि.**८२ कीव वने (की वनगो); **व्यप्र.** ३४७ कीव(की च) शेषं व्यकवत्, व्यासः; **व्यउ.**९७ व्यासः; **सेतु.**१७७; **विव्य.**४६ गास्त्य (गा त्य) शेष विचिवत्.

(१) **व्यक.**१६२ ण्ड्य स्यात् (ण्ड्यस्तु); **विर.**१७४; **रत्न.**१०७; **विता.**६६७ पूर्वार्धे (गृहीतमूल्या त्यक्ता गौस्तद्दोषान्म्रियते यदा) स्तु (श्च).

(२) **व्यक.**१६२; **विर.**१७४; **रत्न.**१६७, **विचि.**८२ यदा (यदि); **स्मृचि.**२१; **चन्द्र.**५६ दण्ड्यो (दाप्यो) दत्वा (दद्यात्); **सेतु.**१७७.

(३) **विर.**२३४; **विचि.**१०४ श्च (स्तु); **दविं.**२९ शस्यते (कथ्यते) श्च (स्तु); **वीमि.**२।१५९ विचिवत्; **सेतु.** १९८ विचिवत्.

सीमाविवादः

वेदाः

क्षेत्रमितिः

क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम् ।

ऋभवो जेहमानं हीमक्रियां प्रति प्रयतमानमेकमसहायं पात्रं पानसाधनं त्वष्टा निर्मितं चमसं मानदण्डेन क्षेत्रमिव भूमिमिव, तेजनेन तीक्ष्णेन शस्त्रेण चमसचतुष्टयरूपेण कर्तुं वि ममुः । विशेषेण मान कृतवन्तः ।

ऋसा.

अप्रस्वती आर्तना चेति द्विविधा उर्वरा

सँ हि शर्धो न मारुतं तुविष्वणिरप्रस्वतीपूर्वरास्विष्टनिरार्तनास्विष्टनिः ।

स हि स एव स्तुत्यतया प्रसिद्ध एवाग्निस्तुविष्वणिः । तुवीति बहुनाम उरु तुवीति तन्नामसु पाठात् । बहुस्वनिः प्रभूतध्वनियुक्तो वर्तते । अत्यन्तज्वलितेऽग्नौ वायुसंपर्कात् भुगिभुगिति ध्वनिरुत्पद्यते । ज्वलतीत्यर्थः । ध्वनने दृष्टान्तः । मारुत शर्धो न मरुत्संबन्धि बलमिव मरुता समूहो यथा ध्वनयति तथेत्यर्थः । कुत्रेति । तदुच्यते । अप्रस्वतीषु खननप्रोक्षणादिकर्मोपेतासु । अप्र इति कर्मनाम अप्रो दस इति तन्नामसु पाठात् । उर्वरासूरुवरुणयुक्तासु श्रेष्ठासु वेदिभूमिषु । कीदृशोऽयम् । इष्टनिर्यष्टव्यः । औणादिकोऽनिक् तुडागमश्च । किंचार्तनासु । आर्तान्करोत्यार्तयति । आर्तयन्तीत्यार्तनाः पृतनाः । तासु । ण्यासश्रन्थो युच् । वृषादित्वादाद्युदात्तत्वम् । तासां जयायेष्टनिरेष्टव्यो यष्टव्यो वा ।

ऋसा.

क्षेत्र हिरण्यं पशवश्च धनम्

महि क्षेत्रं पुरु चन्द्रं विविद्वानादित्सखिभ्यश्चरथं समैरत् ।

योऽयमिन्द्रो महि महत् क्षेत्र केदारादि पुरु प्रभूतं चन्द्र हिरण्यं च विविद्वान् अर्थिभ्यः सखिभ्योऽस्मभ्यं लम्भयन् । आदित् अनन्तरं चरथं चरात्मकं गवादिकं च समैरत् सम्यक् प्रैरयत् । दत्तवानित्यर्थः । ऋसा.

क्षेत्र स्वाम्यम्

इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय ।
शिरस्ततस्योर्वरामादिदं म उपोदरे ॥

इन्द्रेण किं कामयसे तदहास्यामीत्युक्ता सा वरमनया प्रार्थयते । हे इन्द्र इमानि त्रीणि विष्टपानि स्थानानि सन्ति । तानि त्रीणि स्थानानि वि रोहय । उत्पादय । कानि तानि । ततस्य मम पितुः रोमवर्जितं शिरः । खलतिमित्यर्थः । तच्चापगमय । रोमशं कुर्वीत्यर्थः । उर्वरां तस्योपरं क्षेत्रं सर्वसस्याढ्यं कुरु । आदनन्तरं मे ममोपोदर उपोदरस्य समीपे यदिदं स्थानम् । गुह्यमित्यर्थः । तच्च त्वग्दोषे सत्यसंजातरोमकम् । तदपि त्वग्दोषपरिहारेण रोमयुक्तं कुरु । एतानि त्रीणि स्थानानि । एषोऽर्थः शाठ्यायनके प्रपञ्चेनोक्तः । तामब्रवीदपाले कि कामयसीति । साब्रवीदिमानि त्रीणि विष्टपेति खलतिर्हास्यै पिता स त हाखलति चकारोर्वरा हास्य न जज्ञे सो जज्ञ उपस्थे हास्यै रोमाणि नामुस्तान्यु ह जज्ञिर इत्यस्योत्तरा भूयसे निवर्चनायासौ च या न इति । ऋसा.

असौ च या न उर्वरादिमां तन्वं मम ।
अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि ॥

उक्तमेवार्थमनया विवृणोति । नोऽस्माकं पितुर्या सा

---

* वेदेषु क्षेत्रमानक्षेत्रप्रकारक्षेत्रस्वत्वसेतुकूपकुल्यादिविषयीणि वचनानि अत्रोद्धृतापेक्षया बहूनि सन्ति केवल दिक्प्रदर्शनार्थं कतिचित्संगृहीतानि ।

(१) ऋसं.१।११०।५.
(२) ऋसं.१।१२७।६.

(१) ऋसं.३।३१।१५. (२) ऋसं.८।९१।५.
(३) ऋसं.८।९१।६.

उर्वरा यदिदमूषरं क्षेत्रमस्ति । आदनन्तरं ममेमां तन्वमिदं त्वग्दोषदुष्टं गुह्यस्थानम् । अथो अथापि च ततस्य तातस्य यच्छिरो रोमवर्जितमस्ति । एतानि सर्वा सर्वाणि तानीमानि त्रीणि स्थानानि रोमशा रोमशानि कृधि । कुरु । ऋसा.

कृषिकर्म, वापीकूल्यादिकृत्रिमाकृत्रिमजलस्थानानि च

[१]युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् । गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥

हे सखायः यूयं सीरा सीराणि युनक्त । युङ्ग्ध्वमनड्वद्भिः सह । तदर्थं युगा युगानि वि तनुध्वम् । विस्तारयध्वम् । कृते च योनाविह सीताया बीज ग्राम्यमारण्य च वपत । निधत्त । तिलमाषव्रीह्यादिकं ग्राम्यसप्तकं वेणुश्यामाकनीवारादिकमारण्यबीजसप्तक च कृष्टाकृष्टयोर्निषपतेत्यर्थः । सप्त ग्राम्याः कृष्टे सप्तारण्या अकृष्ट इत्यापस्तम्बः । तथा नोऽस्माकं गिरा स्तुत्या प्रशस्त्या सहास्माकं श्रुष्टिरन्नं सभराः सभरमसत् । भवति । भवतु । तथा नेदीय इदन्तिकमेव सृण्यः । सृणिरङ्कुशः । अङ्कुशवद्वक्रो लवित्रः । पक्व स्तम्बमेयात् । आभिमुख्येन गच्छतु । ऋसा.

[२]सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ॥

कवयो मेधाविन ऋत्विजः सीरा सीराणि कर्षणसाधनानि युञ्जन्ति । योजयन्ति । युगा युगान्यपि पृथक् परस्परं वि तन्वते । भिन्नप्रदेशानि कुर्वन्ति । कीदृशाः कवयः । देवेषु विषये धीरा धीमन्तः । किमर्थम् । सुम्नया । सुम्नमिति सुखनाम । सुखेच्छया । अथवा । धीरा धीमन्तो देवेषु सुम्नया सुम्नेन । देवेषु सुखं भूयादिति । ऋसा.

[३]निराहावान्कृणोतन सं वरत्रा दधातन । सिञ्चामहा अवतमुद्रिणं वयं सुषेकमनुपक्षितम् ॥

हे सखायः आहावान् । आहूयन्ते पानार्थं गावो ऽत्रेत्याहावा निपानानि । अत्रौचित्यादग्निचयनप्रदेशकर्षणार्थगोपानसाधनद्रुममयपानपात्राण्युच्यन्ते । तानाहावान् निष्कृणोतन । निष्कुरुत । किमर्थमाहावकरण

(१) ऋसं.१०।१०१।३. (२) ऋसं.१०।१०१।४.
(३) ऋसं.१०।१०१।५.

वरत्रस्थापनं चेति । अत्रोच्यते । वयमवतमवटं सिञ्चामहै । कीदृशमवटम् । उद्रिणमुद्द्रावयन्तं सुषेकं सुष्ठु सेक्तुं शक्यं अनुपक्षितमनुपक्षीणं कदाचिदुदकोपक्षयरहितम् । ऋसा.

[१]इष्कृताहावमवतं सुवरत्रं सुषेचनं । उद्रिणं सिञ्चे अक्षितम् ॥

इष्कृताहावं संस्कृताहावमवतमवटं द्रोणं सिञ्चे । सेचयामि । पुनः कीदृशमवटम् । सुवरत्रं शोभनवरत्रोपेतं सुषेचनं शोभनोदकसेकोपेतं उद्रिणमुद्द्रावयन्तं अक्षितमक्षीणम् । ऋसा.

[२]प्रीणीताश्वान् हितं जयाथ स्वस्तिवाहं रथमित्कृणुध्वम् । द्रोणाहावमवतमश्मचक्रमंसत्रकोशं सिञ्चता नृपाणम् ॥

हे ऋत्विजः यूयमश्वान् व्यापनशीलान्बलीवर्दान्प्रीणीत । उचितघासोदकादिप्रदानेन प्रीणयत । यथा क्षेत्रकर्षणाय प्रभवन्ति तथा कुरुतेत्यर्थः । तथा कृत्वा हितं चयनायोचित कर्षण जयाथ । जयथ । संपादयथ । तथा रथं चयनाख्यं हलाख्यं वा स्वस्तिवाहमित् सुखस्य वाहकमेव कृणुध्वम् । कुरुध्वम् । तदर्थं द्रोणाहावम् । आह्वयन्त्यत्र पानार्थं बलीवर्दानित्याहावो जलाधारः पात्रविशेषः । स च द्रोणमयो द्रुममय आहावो यस्य तादृशमवतमवटवन्निम्नभूतमश्मचक्रं व्यासक्रमणमश्ममयचक्रं वांसत्रकोशं अंसत्रं कवचं यथा कायं रक्षति तद्वदुदकस्य कोशं कोशस्थानीयं नृपाण नृणा कर्मनेतृणा पानयोग्यमीदृशमवतं सिञ्चत हे ऋत्विजः । एवमृत्विक्स्तुतिर्वेति पक्षे । सूक्तस्य वैश्वदेवपक्ष एवं योजना । प्रीणीत प्रीणयताश्वान् । स्नानपानयोग्यान्नैः संग्रामयोग्यान्कुरुतेत्यर्थः । हितं जयाथ । हितमिति क्रियाविशेषणम् । कथं जयथ । बन्धुसुहृद्भ्यो यथा हित भवति तथा जयथ संग्रामम् । स्वस्तिवाहम् । स्वस्तीत्यविनाशनाम । अविनाशवाहनं रथमिद्रथं च कृणुध्वम् । इदिति चार्थे । अश्वरथं च दृढं कृत्वा संग्रामभूमिं गत्वा द्रोणाहावमित्यादीनि द्वितीयान्तानि

(१) ऋसं.१०।१०१।६. (२) ऋसं.१०।१०१।७.

कूपाख्यसंग्रामविशेषाणनि सिञ्चतेत्यनेन संबध्यन्ते। द्रोणो दुममयः स एव रथ आहाव आहावस्थानीयो यस्य संग्रामस्य तम्। अयतम्। कूपनामैतत्। कूपं संग्रामाख्यम्। अश्मचक्रं कूपप्रान्तनिबद्धाश्मसदृशप्रहरणायुधवन्तम्। असनानि वा क्षेपणानि वा चक्राख्यायुधविशेषा यस्मिन् तम्। व्याप्तचरणवन्त व्याप्तक्रमणवन्तं वा। चक्रं चकतेर्वा चरतेर्वा क्रामतेर्वेति निरुक्तम्। अंसत्रकोशं अंसत्राणि धनूंषि कवचानि च कोशस्थानीयानि यस्मिन् तं सिञ्चत। नृपाण यस्मिन् योद्धार उदकवत्पीयन्ते मार्यन्ते तम्। ईदृशं कूपसदृश संग्रामं सिञ्चत हे अस्मदीया योद्धारः। सूक्तस्य वैश्वदेवत्वाद्धे सैनिका विश्वेषा देवाना प्रसादेन सर्वमेतत्कुरुतेत्यर्थः। एवं निराहावानित्यादिषु कूपरूपव्याजेन संग्रामवर्णनमवगन्तव्यम्। ऋसा.

यो आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयंजाः। समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु॥

या आपो दिव्या अन्तरिक्षभवाः सन्ति। उत वापि च या आपो नद्यादिगताः सत्यः स्रवन्ति गच्छन्ति। याश्च खनित्रिमाः खननेन निवृत्ताः। उत वापि च याः स्वयंजाः स्वयमेव प्रादुर्भवन्त्यः समुद्रार्थाः। समुद्र एवार्थो गन्तव्यो यासा ताः समुद्रार्थाः। शुचयो दीप्तियुक्ताः पावकाः शोधयित्र्यश्च भवन्ति। ता आपो मामवन्त्विति। ऋसा.

आपो न सिन्धुमभि यत्समक्षरन्त्सोमास इन्द्रं कुल्या इव ह्रदम्।

यद्यदा सोमासः सोमा इन्द्रमभि समक्षरन् अभिक्षरन्ति। अभिगच्छन्तीत्यर्थः। तत्र दृष्टान्तौ दर्शयति। आपो न यथापः सिन्धुं समुद्रमभिसचरन्ति। कुल्या इव यथा च कुल्या ह्रदमभिसंक्षरन्ति तद्वदित्यर्थः। ऋसा.

क्षेत्रवादलिङ्गम्

अग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेत्। स्पर्धमानः क्षेत्रे वा सजातेषु वा। ... जयते।

(१) ऋसं.७।४९।२. (२) ऋसं.१०।४३।७.
(३) तैसं.२।२।३।१.

सेतुलिङ्गम्

द्वौ समुद्रौ वितताव्जूर्यौ पर्यावर्तेते जठरेव पादाः। तयोः पश्यन्तो अति यन्त्यन्यमपश्यन्तः सेतुनाऽति यन्त्यन्यम्॥

तत्र प्रथममन्त्रेण समुद्रद्वयरूपत्वमहोरात्रद्वयरूपत्वं चाऽऽरोप्य पूतभृदाधवनीयौ स्तूयेते। द्वौ समुद्रौ विततौ विस्तीर्णावजूर्यावजीर्णौ कदाचिदप्यशुष्यन्तौ। तादृशावेतौ पर्यायेणाऽऽवर्तेते। तत्र दृष्टान्तः—जठरा समुद्रस्योदरे पादा इव यथा पादसदृशा ऊर्मयः समुद्रमध्ये पर्यायेणाऽऽवर्तन्ते प्रथममेक आगच्छति पश्चादपर इति तथा पूतभृत्कदाचिदुपयुज्यते कदाचिदाधवनीय इति पर्यायः। तौ समुद्रात्मकौ पूतभृदाधवनीयौ पुनरहोरात्ररूपौ वर्तेते तयोर्मध्येऽन्यमहरात्मकं जनाः पश्यन्तोऽतियन्ति उत्तरन्ति। अथान्यं रात्रिरूपमपश्यन्तो जनाः सेतुसदृशेन नौरूपेण साधनेनातियन्ति। तैसं.

देवीरापो अपां नपादित्याह यद्वो मेध्यं यज्ञिय सदेवं तद्वो माऽव क्रमिषमिति वावैतदाहाच्छिन्नं तन्तुं पृथिव्या अनु गेषमित्याह सेतुमेव कृत्वाऽत्येति॥

आक्रमणमेव तत्सेतुं यजमानः कुरुते॥

कर्षकसीरपत्योर्भेदः। कुलपा व्राजपतिं प्रति धनमर्पयन्ति।

इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः।
परि त्वासते निधिभिः सखायः कुलपा न व्राजपतिं चरन्तम्॥

पृथी वैन्यः कृषिकर्मप्रवर्त्तयिता सेतुः क्षेत्रस्वाम्यं च

तां पृथी वैन्योऽधोक् तां कृषिं च सस्यं चाधोक्॥ ते कृषिं च सस्यं च मनुष्या उपजीवन्ति कृष्टराधिरुपजीवनीयो भवति य एवं वेद॥

स सेतुर्विधरण एषां लोकानामसंभेदाय॥

गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं

(१) तैसं.३।२।२।१. (२) तैसं.६।१।४।९.
(३) तैसं.६।५।३।३. (४) असं.६।३०।४.
(५) असं.७।७५।२. (६) असं ८।१३।११-१२.
(७) शब्रा.१४।७।२।२४; बृउ.४।४।२२ स (पप).
(८) छाउ.७।२४।२.

दासभार्यं क्षेत्राण्यायतनानीति ॥

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय ॥

वसिष्ठः

पथि गृहादिकृते च अनुकूलेदेशव्यवस्था। सीमावादे क्रियाविधि।

मार्गक्षेत्रयोर्विसर्गे तथा परिवर्तनेन तरुणगृहेष्वर्थान्तरेषु त्रिपादमात्रम्*।

गृहक्षेत्रविरोधे सामन्तप्रत्ययः। सामन्तविरोधे लेख्यप्रत्ययः। प्रत्यभिलेख्यविरोधे ग्रामनगरवृद्धश्रेणीप्रत्ययः।

विष्णुः

मार्गादिदूषणे दण्डविधिः

पैथ्युद्यानोदकसमीपेष्वशुच्युत्करादित्यागे पणशतम्। तच्चापास्य।

दण्ड्य इत्यनुवृत्तौ विष्णुः—पथीति। विर.२२२

सीमाभेदे दण्डविधिः

सीमाभेत्तारमुत्तमसाहसं दण्डयित्वा पुनः सीमां कारयेत्।

तत्र सीमाभेत्तारमित्यस्य सीमामुल्लङ्घ्य कर्षकमित्यर्थोऽध्यवसेयः। सीमाप्रदेशे पुनः कर्षणाद्यकरणमेव पुनः सीमाकरणम्। तद्यथा भवति तथा राजयते तेऽपि पुनः सीमा कारयेदित्यस्यार्थः। उत्तमसाहसाभिधानमर्धसीमातिक्रमविषयम्। समग्रसीमातिक्रमविषये त्वाहतुः शङ्खलिखितौ 'सीमाव्यतिक्रमेऽष्टसाहस्रम्' इति। दण्ड इति शेषः। दण्डाधिक्यात्समग्रसीमातिक्रमविषयत्वमस्य वचनस्य न्याय्यम्। ×स्मृच.२३६

सीमाविवादे मरणान्तिका जयव्यवस्था।

तत्तु विषयानन्तरेण राज्ञा विषयान्तरस्थस्य राज्ञः सीमाविवादे युद्धसाध्यविषये केचन त्रैविद्यवृद्धाः विवदमानराजद्वयमनुमान्य तत्सीमापरिज्ञातारं कुकूलधारणादिनियमेन नयेयुः। यदा सत्य (तस्य) भङ्गः स तु हन्तव्यं इति तद्विषयः। तत्प्रकारश्च अनेकस्मृतिसिद्धः संगृह्य किंचिदुच्यते। राज्ञोः सीमानिमित्ते विवदमानयोर्मध्यस्थैरागत्य तत्सीमानिर्णयार्थं तत्परिज्ञातृपुरुषं यं कंचन समाहूय तमेकेन नयनेन साञ्जनं अन्येन निरञ्जनमेकेन केशभागेन शिखावन्तमन्येन विस्रस्तकेशमेकेन पादेन सोपानत्कमन्येन निरुपानत्कं धृतकौपीनं बद्धमौलिं कृत्वा आमकुकूलमध्ये जलं निक्षिप्य तन्मध्ये गणेशमर्चयित्वा तत्कुकूले दिक्पालाद्यावाहनं दिव्यमातृकोक्तं विधाय वरुणपूजां कृत्वा धरणीवराहमावाह्य 'उद्धृतासी'ति मन्त्रेण पूजयित्वाऽपश्चाल्लोकं नयेत्। पश्चाद्भागं न लोकितवान् अपश्चाल्लोकः। तस्मिन्नेकादशपदचङ्क्रमणैः सीमामुन्नयति सति कुकूलजलशोषो वा कुकूलभङ्गो वा यदि स्यात्त तथैवानुयायिनः प्रत्यर्थिनो हन्युः। अत्र साद्यस्की जयपराजयव्यवस्था। न चात्र त्रिपक्षप्रतीक्षणमिति। सवि.३३७

शङ्खः शङ्खलिखितौ च

सीमाविवादे क्रियाविधिः

गृहक्षेत्रयोर्विरोधे सामन्तप्रत्ययः, सामन्तविरोधे अभिलेख्यप्रत्ययः, अभिलेख्यविरोधे ग्रामनगरवृद्धश्रेणिप्रत्ययः, ग्रामनगरवृद्धश्रेणिविरोधे दशवर्षभुक्तानुभुक्तमन्यत्र राजविप्रस्वात्।

सामन्तविरोधे सामन्तानां परस्परविमतौ अभिलेख्यं लिखितं दशवर्षभुक्तानुभुक्तं दशवर्षाणि निरन्तरं भुक्तं प्रमाणं तच्चान्यत्र राजविप्रस्वान्नृपतिब्राह्मणस्वभूतद्रव्यात्। विर.२०८

---

* पाठशुद्धिः 'मार्गक्षेत्रे' इत्यादि शङ्खवाक्यानुसारेण द्रष्टव्या।

(१) छाउ.८।४।१.

(२) वस्मृ.१६।८-११(ख) तरुणगृहे (ऋण ग्रहे) (सामन्तप्रत्ययः०) सामन्तविरोधे +(ऽपि) श्रेणी (श्रेणि).

(३) विस्मृ.५।१०५-१०६ ध्वशु ...त्यागे (ऽशुचिकारी) पास्य (पास्यात्); व्यक.९८; विर.२२२; विचि.९९ ध्वशुच्यु (ध्वस्यिष्यु) तच्चापास्य (तच्च प्रास्येत्); वृवि.२९७ ध्वशु (अशु) पास्य (पास्येत); सेतु.१९२ विचिवत्.

(४) विस्मृ.५।१६७ सीमां +(लिङ्गान्विता); व्यक.९८; स्मृच.२३६; विर.२२३; रत्न.११७; व्यप्र.३६६; व्यउ.११०; विता.७०८; समु.११६.

× व्यप्र. स्मृचवत्।

(१) सवि.३३७.

(२) व्यक.१७२; स्मृच.२३३ (गृह...सामन्तप्रत्ययः०) (अभि०) वर्ष...स्वात् (वर्षा मुक्तिरन्यत्र राजविप्लवात्); विर.२०८; व्यप्र.३६१ (सामन्तविरोधे लेख्यप्रत्ययः) एतावदेव; समु.११५ स्मृचवत्, शंखः.

पथि गृहादिकृते च अनुकूलदेशव्यवस्था

मार्गक्षेत्रे पथि विसर्गो राजमार्गरथपरिवर्तनं पूर्वमर्यादास्थापनं तोरणगृहरथ्यान्तरेषु त्रिपदं देवराजायतनेषु यथेष्टम्।

मार्गे यत्क्षेत्रं तत्र पथि स्थिते विसर्गः त्यागः पथिकाना गच्छतां, तेन स पन्था नावरोद्धव्य इत्यर्थः। राजमार्गे रथपरिवर्त्तन यावता देशेन रथपरिवृत्तिः स्यात्तावान्देशः राजमार्गे त्याज्य इत्यर्थः। पूर्वमर्यादास्थापनं यावती पौरैः पूर्वमर्यादा पूर्वसीमा कृता तस्याः स्थापनम्। तोरणगृहरथ्यान्तरेषु त्रिपद तोरणगृहरथ्यासमीपे पदत्रयपरिमितं देश त्यजेदित्यर्थः। +विर.२२१

सीमाभेदादौ दण्डविधिः

[२]क्षेत्रमर्यादाभेदे अष्टशतं सीमातिक्रमणे अष्टसहस्रं क्षेत्रोदकाहरणे अष्टशतम्।

यस्तु याज्ञवल्कीये सीमालिङ्गविनाशे प्रथमसाहस उक्तः स गृहसीमालिङ्गविनाशविषयः। दण्डाल्पत्वात्। क्षेत्रसीमालिङ्गविनाशविषये त्वपराधाधिक्याद्दण्डाधिक्यमाहतुः शंखलिखितौ 'क्षेत्रमर्यादाभेदेऽष्टशतम्' इति। दण्ड इति शेषः। एव ग्रामादिसीमालिङ्गविनाशे दण्डाधिक्यमूह्यम्। उक्तविधिना दण्डयित्वा पुनर्गृहादीना सीमालिङ्गानि कारयेदिति चोह्यम्। यत्तु याज्ञवल्कीये क्षेत्रापहरणे मध्यमसाहस उक्तः स तु बलादपहारविषयश्चत्वारिशदधिकपञ्चशतकार्षापणाधिकतया मध्यमसाहसस्य गुरुदण्डत्वात्। भयप्रदर्शनेनाज्ञानेन वा अपरहरणे कृते तु मनुना उक्तं 'गृहं तडागमारामं क्षेत्रं वा भीषया हरन्। शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतं दमम्'॥ यत्तु शंखलिखिताभ्यामुक्त 'क्षेत्रोदकापहरणेऽष्टशतम्' इति। दण्ड इति शेषः। तदेतद् बलात्कारेण सोदकशाल्यादिक्षेत्रापहरणे द्रष्टव्यम्। एवमपह्रियमाणक्षेत्रादिभूयस्त्वापेक्षया दण्डाधिक्यमूह्यम्। स्मृच.२३६

कौटिलीयमर्थशास्त्रम्

गृहवास्तुकम्

वास्तुकम्। सामन्तप्रत्यया वास्तुविवादाः।

गृहं क्षेत्रमारामः सेतुबन्धस्तटाकमाधारो वा वास्तुः।

कर्णकीलायससंबन्धोऽनुगृहं सेतुः। यथासेतुभोगं वेश्म कारयेत्।

अभूतं वा परकुड्यादपक्रम्य द्वावरत्नी त्रिपदीं पादे बन्धं कारयेत्।

अवस्करं भ्रमुदपानं वा न गृहोचितमन्यत्र अन्यत्र सूतिकाकूपादा निर्देशाहादिति। तस्यातिक्रमे पूर्वः साहसदण्डः।

तेनेन्धनावघातनकृतं कल्याणकृत्येष्वाचामोदकमार्गाश्च व्याख्याताः।

त्रिपदीप्रतिक्रान्तमध्यर्धमरत्निं वा प्रवेश्य गाढप्रसृतमुदकमार्गं प्रस्रवणप्रपातं वा कारयेत्। तस्यातिक्रमे चतुष्पञ्चाशत्पणो दण्डः।

एकपदीप्रतिक्रान्तमरत्निं वा चक्रिचतुष्पदस्थानमग्निष्ठं उदक्प्रस्थानं रोचनीं कुट्टनीं वा कारयेत्। तस्यातिक्रमे चतुर्विंशतिपणो दण्डः।

सर्ववास्तुकयोः प्राक्षिप्रकयोर्वा शालयोः किष्कुरन्तरिका त्रिपदी वा। तयोश्चतुरङ्गुलं नीप्रान्तरं समारूढकं वा। किष्कुमात्रमाणिद्वारमन्तरिकायां खण्डफुल्लार्थमसंपातं कारयेत्। प्रकाशार्थमल्पमूर्ध्वं वातायनं कारयेत्। संभूय वा गृहस्वामिनो यथेष्टं कारयेयुरनिष्टं वारयेयुः।

वानलट्याश्चोर्ध्वमार्यभागं कटप्रच्छन्नमव-

+ व्यक. विरवत्। व्यक व्याख्यानं त्रुटितत्वान्नाधृतम्।

(१) **व्यक.९८** राज...वर्तन (राजमार्गे रथस्य परिवर्तनं); **स्मृच.२३५** (राज...थेष्टम्०); **विर.२२०-२२१; रत्न.११७; व्यप्र.३६५** मार्गरथ (मार्गे रथस्य) पूर्व...ष्टम्०); **व्यउ.१०९** क्षेत्रे (क्षेत्र) शेषं व्यप्रवत्, **विता.७०५** मार्ग...वर्तन (मार्गः क्षेत्रे पथो विसर्गो राजमार्गे रथस्य परिवर्तनं) (पूर्व...ष्टम्०); **समु.११६** स्मृचवत्, शङ्खः.

(२) **व्यक.९८; स्मृच.२३६** तिक्रमणे (व्यतिक्रमे) सह (साह) काह (कापह); **विर.२२३; पमा.४०४** (सीमाव्यतिक्रमे त्वष्टसहस्रम्); **विचि.१००** तिक्रमणे (व्यतिक्रमे) दका (दक) शङ्खः; **व्यप्र.३६६; व्यउ.११०; विता.७०८** तिक्रमणे अष्ट (व्यतिक्रमे त्वष्ट) काह (कापह); **सेतु.१९३-१९४** क्रमणे (क्रमे); **समु ११६** क्षेत्र (ग्रामद्वय) तिक्रमणे (व्यतिक्रमे) काह (कापह) रणे +(तदुपरोधे वा) शङ्ख..

(१) **कौ.३।८.**

मर्शभित्तिं वा कारयेद् वर्षबाधभयात्। तस्यातिक्रमे पूर्वः साहसदण्डः।

प्रतिलोमद्वारवातायनबाधायां च, अन्यत्र राजमार्गेरथ्याभ्यः।

खातसोपानप्रणालीनिश्रेण्यवस्करभागैर्बहिर्बाधायां भोगनिग्रहे च।

परकुड्यमुदकेनोपघ्नतो द्वादशपणो दण्डः। मूत्रपुरीषोपघाते द्विगुणः।

प्रणालीमोक्षो वर्षति,[1] अन्यथा द्वादशपणो दण्डः।

प्रतिषिद्धस्य च वसतः। निरस्यतश्चावक्रयणं, अन्यत्र पारुष्यस्तेयसाहससंग्रहणमिथ्याभोगेभ्यः। स्वयमभिप्रस्थितो वर्षावक्रयशेषं दद्यात्।

सामान्ये वेश्मनि साहाय्यमप्रयच्छतः सामान्यमुपरुन्धतो भोगं च गृहे द्वादशपणो दण्डः। विनाशयतस्तद्द्विगुणः।

कोष्ठकाङ्गणवर्जानामग्निकुट्टनशालयोः।
विवृतानां च सर्वेषां सामान्यो भोग इष्यते॥

वास्तुकमिति सूत्रम्। गृहारामक्षेत्रादि स्थावरजातं वास्तु तत्संबद्धं वास्तुकम्। तदुच्यत इति सूत्रार्थः। गृहारामक्षेत्रादीनां विभक्तानामपि नित्यसमुपश्लिष्टावस्थायित्वात् तत्र विवादाः संभवन्तीति तन्निर्णयार्थमिदं प्रकरणमध्यायैस्त्रिभिर्विवित्यते। तत्र प्रथमे गृहवास्तुकं, द्वितीये वास्तुविक्रयः, तृतीये विवीतक्षेत्रपथहिंसा।

सामन्तप्रत्यया वास्तुविवादा इति। वास्तुगृहारामादिर्वक्ष्यमाणः तद्विवादाः, सामन्तप्रत्ययाः सामन्तोऽनन्तरवास्तुः तत्प्रमाणकाः। वास्तुपदार्थमाह—गृहमिति। गृहं, क्षेत्रं केदारादि, आराम उपवनं, सेतुबन्धः सीमाबन्धः पुष्पफलवाटपण्डमूलवापादिर्वा, तटाक पद्माकरः, आधारो वा उदकबन्धो वा, वास्तुः।

कर्णेत्यादि। कर्णेषु कोटिषु कीलाः निखाताः स्थूणाः कर्णकीलास्तेषु आयससंबन्धः आयसानां अयोमयसूत्राणां संबन्धः सम्यगावन्धनं कर्णकीलायससंबन्धः तल्लक्षणः, अनुगृहं, सेतुः सीमाबन्धः, स्थायिद्रव्यान्तरालैः कार्य इति शेषः। यथासेतुभोगं सेत्वन्तर्गतभूविस्तारानतिक्रमेण, वेश्म सङ्ग, कारयेत्।

पूर्वकृततथाविधसेत्वभावे आह—अभूत वेति। अपूर्वं,परकुड्यात् परकीयगृहकुड्याद् अपक्रम्य अपसृत्य, द्वौ अरत्नी त्रिपदीं वा पादे बन्धं कारयेत् द्विहस्तमान पदत्रयमान वा कुड्यमूले नेमिबन्ध कारयेत्, स्वभूमौ।

अवस्करमिति। मलमूत्रविसर्गस्थान, भ्रमं जलनिर्गमद्वारम्, उदपान वा कूप वा, गृहोचितं, अन्यत्र तद्योग्यप्रदेशादन्यस्मिन् प्रदेशे परगृहबाधोत्पादहेतौ, न कारयेत्। तत्रापवादः—अन्यत्र सूतिकाकूपात्, सूतिकास्नानोदकपतनार्थो गर्तः सूतिकाकूपः तं तु यथेष्टे देशे कारयेदित्यर्थः कुतः, आ निर्दशाहाद् आ दशाहातिक्रमात्। तदनन्तर त शोधयित्वा शुद्धमृदा पूरयेत्। तस्यातिक्रम इति। उक्तावस्करादिविध्युल्लङ्घने, पूर्वः साहसदण्डः।

तेनेति। तेन सूतिकोक्तकल्पेन, कल्याणकृत्येषु उपनयनविवाहादिमङ्गलकार्येषु, इन्धनावघातनकृत, एधःकाष्ठविदारणप्रयुक्त विधान, आचामोदकमार्गाश्च निस्स्रावजलमार्गाश्च, व्याख्याता उक्तप्रायाः। आकल्याणकृत्यसमाप्ति यथेष्टे देशे तेषा करणमनुमतमित्यर्थः।

भ्रमविधिमाह—त्रिपदीत्यादि। त्रिपदीप्रतिक्रान्त परकीयकुड्यात् पदत्रयदूरापक्रान्त, अध्यर्धमरत्निं वा प्रवेश्य सार्धहस्त वा परकुड्यादपक्रम्य स्वभूम्यन्तः प्रवेशित, गाढप्रसृत निरर्गलमलोदकप्रसरं, उदकमार्ग दीर्घिकाकार, कारयेत्। प्रस्रवणप्रपात वा कारयेत् सर्वमलिनजलप्रवाहपतनस्थान च तथाभूतं कारयेत्।तस्यातिक्रम इति। उक्तविधिलङ्घने चतुष्पञ्चाशत्पणो दण्डः।

एकपदीत्यादि। एकपदीप्रतिक्रान्त परकुड्यादेकपददूरापक्रान्त, अरत्निं वा एकहस्तदूरं वा प्रतिक्रान्तमित्यर्थ, चक्रिचतुष्पदस्थानं चक्रिस्थानं अजबलीवर्दस्थान चतुष्पदस्थान गजादिस्थान च, अग्निष्ठं चुल्लीम्, उदञ्जरस्थान उदञ्जर महजलपात्रं तन्निवेशस्थान, रोचनकर्मयन्त्र, कुट्टनीं वा उलूखलं च, कारयेत्। तस्य चक्रिस्थानादिविधेः, अतिक्रमे, चतुर्विंशतिपणो दण्डः।

सर्ववास्तुकयोरिति। उक्तेषु सर्वेषु वास्तुषु गृहचक्रिचतुष्पदस्थानादिषु मध्ये वास्तुकयोर्द्वयोः शालयोः, प्राक्षित्कयोः परस्परसनिकृष्टयोः प्रातयोः, किष्कुत्रिपदी वा

अन्तरिका साष्टाङ्गुलहस्तमान पदत्रयमानं वा अन्तरालं कर्तव्यम्। तयोः शालयोः, चतुरङ्गुल, नीप्रान्तर पटलप्रान्तान्तरालं, कार्यम्। समारूढकं वा परस्परो पर्यारूढ वा तत् कार्यं गृहपत्योरनुज्ञायाम्। किष्कुमात्रमिति। साष्टाङ्गुलहस्तपरिमाण, आणिद्वारं क्षुद्रद्वारं, अन्तरिका कारयेत्, किमर्थं, स्वण्डफुल्लार्थं स्फुटितसंस्कारार्थं, कथभूत, असपात असुकरजनगतागतम्। प्रकाशार्थमिति। प्रकाशलाभाय, अल्पं, ऊर्ध्वं, वातायनं गवाक्षं, कारयेत्। संभूय वेति। समानच्छन्दीभूय वा, गृहस्वामिनः यथेष्ट स्वाभिरुचितप्रकार, कारयेयुः, अर्थाद् अन्तरिकादिवातायनान्तमुक्तमनुक्त च यत्किञ्चित्। अनिष्ट अनभिमत, वारयेयुः।

वानलट्याश्चोर्ध्वमिति। वानलटी गृहवरण्डकः तस्या ऊर्ध्वम्, आवार्यभागं अवच्छादनीयं भाग, कटप्रच्छन्नं कटैस्तृणविशेषैराच्छादितं, कारयेत्। अवमर्शभित्तिं वा अल्पभित्तिं च, कटप्रच्छन्ना कारयेत्। कस्मात् वर्षबाधभयात् वृष्टिपीडापरिहारार्थम्। तस्यातिक्रमे उक्तविधेरननुष्ठाने, पूर्वः साहसदण्डः।

प्रतिलोमद्वारवातायनबाधाया चेति। प्रतिलोमेन द्वारेण परगृहजनप्रतिकूलेन द्वारेण वातायनेन च परोपद्रवोत्पादने, पूर्वः साहसदण्ड इति वर्तते। तत्रापवादः—अन्यत्र राजमार्गरथ्याभ्य इति। राजमार्गरथ्याभिमुख्येन द्वारवातायनयोः करणे तु सत्यामपि परबाधाया न दोष इत्यर्थः।

खातेत्यादि। खात गर्तादि, सोपानं आरोहण, प्रणाली जलनिर्गमपथः, निश्रेणिरधिरोहणी, अवस्करः मलमूत्रविसर्गस्थान, एतेषा भागैः एतत्करणार्थमपहृतैः भूमिभागैः, बहिर्बाधाया बहिर्जनपीडने, भोगनिग्रहे च परस्य भूम्युपभोगप्रतिबन्धे च, पूर्वः साहसदण्ड इत्येव।

परकुड्यमिति। परकीया भित्तिं, उदकेन जलावसेकेन उपघ्नतः, द्वादशपणो दण्डः। मूत्रपुरीषोपघाते परकुड्यस्य मूत्रपुरीषाभ्यामुपघाते, द्विगुणः चतुर्विंशतिपणो दण्डः। प्रणालीमोक्षो वर्षतीति। पर्जन्ये वर्षति सति प्रणालीद्वारेणोदकमोक्षः कर्तव्यः। अन्यथा अमोक्षणे अवृष्टिषु प्रणालीमोक्षणे वा, द्वादशपणो दण्डः।

अवक्रीतृविषयमाह—प्रतिषिद्धस्य च वसत इति। 'इयन्तं कालं त्वया शुश्रूषमाणेन मदन्तिके वस्तव्यमि'ति स्वामिपरिभाषिते कालेऽतीते सति 'इत ऊर्ध्वं मा वसे'ति निषिद्धस्यापि वासममुञ्चतोऽवक्रीतस्य, द्वादशपणो दण्ड इति वर्तते। निरस्यतश्चावक्रयणमिति। मूल्यदानपूर्वं शुश्रूषुस्वीकरण यावत्परिभाषितकालाननुवर्तनेन मध्ये त्यजतोऽवक्रेतुश्च, द्वादशपणो दण्डः। तत्रापवादः—अन्यत्र पारुष्यस्तेयसाहससंग्रहणमिथ्याभोगेभ्य इति। पारुष्यं वाग्दण्डपारुष्यं, स्तेयं चौर्य, साहस प्रसभकर्म, संग्रहणं स्त्रीसंग्रहणं, मिथ्याभोगः देहसंस्काराद्यकरणम्। एषा संभवे क्लृप्तकालपूर्त्तेः प्राक् त्यजतो न दोष इत्यर्थः। स्वयमभिप्रस्थित इति। क्लृप्तकालमखिलमनुपित्वा यथेच्छमपसृतोऽवक्रीतः, वर्षावक्रयशेष क्लृप्तवत्सरशेषमूल्य, दद्यात्।

सामान्य इति। उभयसाधारणे, वेश्मनि, साहार्य्यं, अप्रयच्छतः अकुर्वतः, सामान्य, गृहे भोगं, उपभोगं उपरुन्धतो निगृह्णतश्च, द्वादशपणो दण्डः। विनाशयतः, तद्द्विगुणः चतुर्विंशतिपणो दण्डः।

प्रान्ते श्लोकमाह—कोष्ठकाङ्गणवर्जानामिति। कोष्ठक गृहद्वारम्, अङ्गण अजिर, वर्ज अवस्करस्थान, वर्चानामिति क्वचित् पाठः इत्येतेषाम्, अग्निकुट्टनशालयोः अग्निशाला महानसः कुट्टनशाला उलूखलशाला तयोः, सर्वेषा च, विवृतानां अनावृतदेशाना, भोगः, सामान्यः साधारणः, इष्यते। श्रीमू.

वास्तुविक्रय.

ज्ञातिसामन्तधनिकाः क्रमेण भूमिपरिग्रहान् क्रेतुमभ्याभवेयुः। ततोऽन्ये बाह्याः।

सामन्तचत्वारिंशत्कुल्या गृहप्रतिमुखे वेश्म श्रावयेयुः। सामन्तग्रामवृद्धेषु क्षेत्रमारामं सेतुबन्धं तटाकमाधारं वा मर्यादासु यथासेतुभोगम्। 'अनेनार्घेण कः क्रेता' इति त्रिराघुषितमव्याहृतं क्रेता क्रेतुं लभेत।

स्पर्धया वा मूल्यवर्धने मूल्यवृद्धिः सशुल्का कोशं गच्छेत्। विक्रयप्रतिक्रोष्टा शुल्कं दद्यात्। अस्वामिप्रतिक्रोशे चतुर्विंशतिपणो दण्डः।

---

(१) कौ.३।९.

सप्तरात्रादूर्ध्वमनभिसरतः प्रतिक्रुष्टो विक्रीणीत। प्रतिक्रुष्टातिक्रमे वास्तुनि द्विशतो दण्डः अन्यत्र चतुर्विंशतिपणो दण्डः। इति वास्तुविक्रयः।

गताध्याये वास्तोः षट् प्रकारा उक्ताः। तत्र प्राधान्येन नेमिबन्धप्रस्रवणप्रपातपरस्परान्तरालानि चक्रिचतुष्पदस्थानादिकं चाभिहितम्। गृहादीना विक्रयादिक त्वस्मिन्नध्यायेऽभिधीयते।

ज्ञातीत्यादि। ज्ञातिसामन्तधनिकाः ज्ञातिर्दायादः सामन्तो निकटगृहवासी धनिकः ऋणप्रयोक्ता एते, क्रमेण पूर्वाभावे पर इति परिपाट्या, भूमिपरिग्रहान्, गृहादीन्, क्रेतुं, अभ्याभवेयुः अर्हेयुः, अभ्यावहेयुरिति वा पाठः लभेरन्नित्यर्थः। ततः तेषामभावे, अन्ये बाह्याः। अभ्याभवेयुः।

सामन्तेत्यादि। सामन्तचत्वारिंशत्कुल्याः नैकटिकैः चत्वारिंशता गृहिभिः समेताः, गृहप्रतिमुग्वे गृहस्याग्रे, वेश्म श्रावयेयुः 'विक्रेष्यामहे' इति प्रतिक्रोशेयुः। सामन्तग्रामवृद्धेष्विति। तेषु शुण्वत्सु,क्षेत्रम्, आराम सेतुबन्धं, तटाकम्, आधारं वा अल्पसरश्च, मर्यादासु तत्तत्सीमासु स्थित्वा, यथासेतुभोग 'इमेऽस्य सीमाबन्धाः एतावान् भोग' इति च यथास्थितसेतुभोगनिर्देशयुक्तं, श्रावयेयुरित्यनुपज्यते। अनेनेति,'अनेनार्घेण कः क्रेता' इति, त्रिः वारत्रयम्, आघुषित उद्घुष्य श्रावितं, गृहादिकम्, अव्याहत ज्ञाताज्ञप्रतिषिद्ध, क्रेता, क्रेतुं लभेत मूल्यदानेन स्वीकर्तुमर्हेत्।

स्पर्धया वा मूल्यवर्धन इति। क्रेतृसंघर्षेण निमित्तेन मूल्यस्य विक्रेतृनिर्दिष्टापेक्षयाधिक्यसभवे, मूल्यवृद्धिः सशुल्का कोश गच्छेत् मूल्यवृद्धवशः शुल्कसहितः राजभाण्डागारं प्राप्नुयात्। विक्रयप्रतिक्रोष्टा विक्रये मूल्यवर्धयिता, शुल्कं दद्यात्।

अस्वामिप्रतिक्रोश इत्यादि। भूम्यनधिकारिणः प्रतिक्रोशतश्चतुर्विंशतिपणो दण्डः। सप्तरात्रादूर्ध्वमिति। प्रतिक्रुश्य क्रयव्यवहारशुद्धयर्थं व्यवहारस्थानमनभिगच्छन् प्रतिक्रोष्टा आसप्तरात्रं प्रतीक्षणीयः। तत उर्ध्वं, प्रतिक्रुष्टो विक्रीणीत, अन्यस्मै। प्रतिक्रुष्टातिक्रमे प्रतिक्रुष्टकृतेऽतिक्रमे प्रतिक्रोष्टारमनादृत्य तदन्यस्मै विक्रये क्रियमाणे इति यावत्, वास्तुनि द्विशतः वास्तुविषये द्विशतपणः, दण्डः। अन्यत्र चतुष्पदादिविषये, चतुर्विंशतिपणो दण्डः। इति वास्तुविक्रयः व्याख्यात इति शेषः।

सीमाविवाद.। क्षेत्रविवादः। मर्यादास्थापनम्।

सीमविवादं ग्रामयोरुभयोः सामन्ता पञ्चग्रामी दशग्रामी वा सेतुभिः स्थावरैः कृत्रिमैर्वा कुर्यात्। कर्षकगोपालवृद्धकाः पूर्वभुक्तिका वा, अबाह्याः सेतूनामभिज्ञा बहव एको वा निर्दिश्य सीमसेतून् विपरीतवेषाः सीमानं नयेयुः। उद्दिष्टानां सेतूनामदर्शने सहस्रदण्डः। तदेव नीते सीमापहारिणां सेतुच्छिदां च कुर्यात्।

प्रनष्टसेतुभोगं वा सीमानं राजा यथोपकारं विभजेत्।

क्षेत्रविवादं सामन्तग्रामवृद्धाः कुर्युः। तेषां द्वैधीभावे यतो बहवः शुचयोऽनुमता वा ततो नियच्छेयुः। मध्यं वा गृह्णीयुः। तदुभयं परोक्तं वास्तु राजा हरेत् प्रनष्टस्वामिकं च। यथोपकारं वा विभजेत्।

प्रसह्यादाने वास्तुनि स्तेयदण्डः। कारणादाने प्रयासमाजीवं च परिसंख्याय बन्धं दद्यात्। मर्यादापहरणे पूर्वः साहसदण्डः। मर्यादाभेदे चतुर्विंशतिपणः।

तेन तपोवनविवीतमहापथश्मशानदेवकुलयजनपुण्यस्थानविवादा व्याख्याताः। इति मर्यादास्थापनम्।

सीमाविवादमाह—सीमविवादमित्यादि। द्वयोर्ग्रामयोः सीमाव्यतिक्रमविवादे प्रसक्ते, सामन्ता समीपवर्तिनी, पञ्चग्रामी दशग्रामी वा अर्थात् तत्स्था व्यवहारज्ञाः समुदेत्य गिरिनदीविपिनादिभिः स्थावरैः सेतुभिस्तुषाङ्गारभस्मादिभिश्च कृत्रिमैः कुर्यात् निर्णयेत्।

कर्षकगोपालवृद्धका इत्यादि। सामन्तग्रामाभावे कृषिकर्मिणो वृद्धगोपालकाः, पूर्वभोक्तारो वा सीमानं निर्णयेयुः। अबाह्यास्तदन्तर्देशवासिनः नष्टसीमासेतुविषयाविसंवादिज्ञानशालिनो बहवो लुब्धकादय तेष्वेक एव वा, सीमासेतून् निर्दिश्य अमुकप्रदेशः पूर्वसीमेत्यङ्गुल्यापदिश्य सीमानं नयेयुः समर्थयेयुः दर्शयेयुः। विपरीतवेषा

प्रत्यवाप्तानां विशेषणं, सीमानयनकाले विपरीतं वेषं रक्तवस्त्रमाल्यादिधारणरूप स्त्र्यादिवेष ते धारयेयुरित्यर्थः। सीमाख्यातृणां स्त्र्यादिवेषधारण तत्समुदाचारसिद्धं द्रष्टव्यम्। उद्दिष्टानामिति। निर्दिष्टाना सेतूनां, अदर्शने प्रदर्शनाभावे, सहस्रदण्डः सहस्रपणो दण्डः, निर्देष्टुः। तदेवेति। नीते सेतौ यथानिर्दिष्टे प्रदर्शनेन निर्णीते सति, सीमापहारिणा, सेतुच्छिदा च, सीमास्थित वृक्षभञ्जकाना च, तदेव दण्डविधान सहस्रपणलक्षणं कुर्यात्।

प्रनष्टसेतुभोग वेत्यादि। अत्यन्ताविज्ञातसेतुं अत्यन्ताविज्ञातभुक्ति च, सीमान क्षेत्रादिप्रदेश, राजा, यथोपकारं उपकारानुगुण्येन, विभजेत्।

क्षेत्रविवादमाह—क्षेत्रेत्यादि। क्षेत्रविवाद, सामन्तग्रामवृद्धाः, कुर्युः निर्णयेयुः। तेषां द्वैधीभावे पक्षभेदे सति, यतो बहवः शुचयोऽनुमता वा यस्मिन् पक्षे बहवः प्रविष्टास्ते च बाह्याभ्यन्तरशौचसपन्नाः लोकसमताश्च, ततो नियच्छेयुः तेन पक्षेण निर्णयेयुः। मध्य वा गृह्णीयुः सम पक्ष वा गृहीत्वा विभज्य निर्णयेयुः। तदुभयं परोक्तमिति। चेदित्यभ्याहर्तव्य बहुपक्षानुसारनिर्णयः समपक्षानुसारनिर्णयश्चेत्युभयं विवादिभ्या प्रतिषिद्ध चेत्, वास्तु विवादविषयभूत क्षेत्र, राजा हरेत् स्वय गृह्णीयात्। प्रनष्टस्वामिक च अपगतस्वामिक च वास्तु राजा हरेत्। यथोपकारं वा, विभजेत् अपगत स्वामिदायग्रहणार्हेभ्यो विभज्य वा दद्यात्।

प्रसह्यादान इति। बलाद् गृहीते सति वास्तुनि, स्तेयदण्डः चौर्यविहितो दण्डो ग्रहीतुः। कारणादाने प्रयासमित्यादि। ऋणादिकारणवशाद् गृहीते वास्तुनि क्षेत्रसंस्कारार्थं प्रयुक्त कायाद्यायासं क्षेत्रसमुत्थ फलं च मूल्यतः परिगणय्य, बन्ध दद्यात् तद्धने ऋणधनादुद्रिव्यमाने दृष्टे तमधिकमश भूस्वामिने प्रयच्छेत्। मर्यादापहरणे उभयभूम्योः सीमापहारे, पूर्वः साहसदण्डः। मर्यादाभेदे सीमाया एकदेशापहारेण भेदकरणे, चतुर्विंशतिपणः।

उक्त गृहादिसीमाविवादविधानं तपोवनादिसप्तकविषयेष्वपि विवादेषु योजनीयमित्याह—तेनेत्यादि। इति मर्यादास्थापनमिति। व्याख्यातम्। श्रीमू.

बाधाधिकम्

सर्व एव विवादाः सामन्तप्रत्ययाः। विवीतस्थलकेदारषण्डखलवेश्मवाहनकोष्ठानां पूर्वं पूर्वमाबाधं सहेत।

ब्रह्मसोमारण्यदेवयजनपुण्यस्थानवर्जाः स्थलप्रदेशाः।

आधारपरिवाहकेदारोपभोगैः परक्षेत्रकृष्टबीजहिंसायां यथोपघातं मूल्यं दद्युः। केदाराराम सेतुबन्धानां परस्परहिंसायां हिंसाद्विगुणो दण्डः।

पश्चान्निविष्टमधरतटाकं नोपरितटाकस्य केदारमुदकेनाप्लावयेत्। उपरि निविष्टं नाधरतटाकस्य पूरास्रावं वारयेद् अन्यत्र त्रिवर्षोपरतकर्मणः। तस्यातिक्रमे पूर्वः साहसदण्डस्तटाकवामनं च।

पञ्चवर्षोपरतकर्मणः सेतुबन्धस्य स्वाम्यं लुप्येतान्यत्रापद्भ्यः।

तटाकसेतुबन्धानां नवप्रवर्तने पाञ्चवर्षिकः परिहारः। भग्नोत्सृष्टानां चातुर्वार्षिकः। समुपारूढानां त्रैवर्षिकः। स्थलस्य द्वैवर्षिकः। स्वात्माधाने विक्रये च।

खातप्रावृत्तिमनदीनिबन्धायतनतटाककेदारारामपण्डवापानां सस्यवर्णभागोत्तरिकं, अन्येभ्यो वा यथोपकारं दद्युः।

प्रक्रयावक्रयाधिभागभोगनिसृष्टोपभोक्तारश्चैषां प्रतिकुर्युः। अप्रतीकारे हीनद्विगुणो दण्डः।

सेतुभ्यो मुञ्चतस्तोयमवारे षट्पणो दमः।
वारे वा तोयमन्येषां प्रमादेनोपरुन्धतः॥

सर्व एवेति। सर्व एव विवादाः, सामन्तप्रत्ययाः अनन्तरवास्तुनिमित्ताः। तत्त्वं च वास्तुषु परस्परेण परस्परस्य यदा पीडोत्पादस्तदैव तन्निवारणाय विवादाना प्रवर्तनात्। तत्र द्वयोरन्यतरस्यावश्यपीडनीयत्वप्राप्तौ नियममाह—विवीतस्थलेत्यादि। विवीत प्रवृद्धतृणस्तम्बो गवादिप्रचारदेशः स्थलं लूनापनीततृणस्तम्बा परिष्कृता भूमिः केदारः क्षेत्रं षण्डः कदल्यादिवनं खलं धान्यपवनस्थानं वेश्म प्रसिद्ध वाहनकोष्ठः गवाश्वादिस्थानं एषा सप्ताना मध्ये, पूर्वं पूर्वं कर्तृ, आबाधं

उत्तरोत्तरनिमित्तां पीडां, सहेत ।

ब्रह्मसोमारण्यदेवयजनपुण्यस्थानवर्जा इति । ब्रह्मारण्यं सोमारण्यं देवस्थानं यजनस्थानं पुण्यस्थानं च वर्जयित्वा सर्वे भूभागाः स्थलप्रदेशाः क्षेत्रयोग्याः प्रदेशाः वेदितव्याः ।

आधारपरिवाहकेदारोपभोगेरित्यादि । जलाधारखातेन ततो जलपरिवहनदीर्घिकारचनया स्थलीकेदारीकरणेन च परकीयकेदारोप्तधान्यबीजोपघाते उपघातानुसारेण धान्यमूल्यं दद्युः । केदारारामसेतुबन्धाना परस्परहिंसाया हिंसाद्विगुण उपहतफलद्विगुणः, दण्डः ।

पश्चान्निविष्टमिति । उत्तरकालोत्पन्न अधरतटाक, उपरितटाकस्य पूर्वोत्पन्नस्य, केदारं उदकेन नाप्लावयेत् नापूरयेत् । उपरिनिविष्टमिति । उपरितटाकं पश्चान्निविष्टं अधरतटाकस्य पूर्वसिद्धस्य, पूरास्राव प्रवाहस्तुतिं, न वारयेत् । अन्यत्र त्रिवर्षोपरतकर्मण इति । तच्चेदधरतटाक वर्षत्रयपरित्यक्तजलपायनसाध्यकृषिकर्म भवेत्, तदा पूरास्रावनिवारणे न दोष इत्यर्थः । तस्यातिक्रमे उक्तविधेर्लङ्घने, पूर्वः साहसदण्डः, तटाकवामन च जलनिर्गमनेन तटाकशून्यीकरण च दण्डः ।

पञ्चवर्षोपरतकर्मण इति । पञ्चवर्षोपेक्षितस्य, सेतुबन्धस्य, स्वाम्य स्वामित्व स्वामिनो लुप्येत नश्येत्, अन्यत्रापद्धर्म इति । परचक्राद्यापत्सु तूपेक्षितस्य स्वामित्व न हीयेत ।

तटाकसेतुबन्धानामिति । तेषा, नवप्रवर्तने नूतननिर्माणे, पाञ्चवर्षिकः पञ्चवर्षव्यापी, परिहारः करमोक्षः, कार्यः । भग्नोत्सृष्टानामिति । महाजलप्रवाहाद्युपहतोपरतकर्मणा, नवप्रवर्तने नूतनकृषिप्रवर्तने, चातुर्वर्षिकः परिहारः । समुपारूढानामिति । तृणस्तम्बवनादिच्छेदनोन्मूलनादिना नवक्षेत्रीकृताना स्थलाना नवप्रवर्तने, त्रैवर्षिकः परिहारः । स्थलस्येति । स्वत एव तृणस्तम्बादिशून्यतया सुकरसंस्कारस्य भूप्रदेशस्य, नवप्रवर्तने, द्वैवर्षिकः, परिहारः । स्वात्माधाने विक्रये चेति । आधीकरणे विक्रयणे चैषा स्वात्मा नवप्रवर्तक एव, प्रभुरिति शेषः । स्वाम्याधान इति वा पाठः ।

खातप्रावृत्तिमेत्यादि । खातप्रावृत्तिमं खननिर्वृत्तकूपपेयजलम्, नद्यायतन नद्याश्रयं नदीपेयजलं, निबन्धायतनं नदीसेतुबन्धाश्रयं तत्प्रवर्तितकुल्योपनेयजलं, तटाकं लक्षणया तटाकोपनेयजलं, केदारारामौ प्रतीतौ, पण्डवापः कदल्यादिवापस्थानं इत्येतेषां मध्ये, अन्यतमिति शेषः, सस्यवर्णभागोत्तरिकं दद्युः सस्यवर्णोत्तरिकं सस्यवर्णाधिक्ययुक्त भागोत्तरिक भागाधिक्ययुक्तं च यथा भवति तथा दद्युः, अर्थात् अधिकसस्यवर्णनिष्पादकायाधिकभागदायकाय च कृष्यर्थं । अन्येभ्यो वा अव्यसनिभ्यः कर्मण्येभ्यः, यथोपकारं दद्युः यथाफलोदयभागदानपरिभाषया दद्युः ।

प्रक्रयावक्रयाधिभागभोगनिसृष्टोपभोक्तार इति । प्रक्रयोपभोक्तारः क्षेत्रादिक क्रीत्वा भोक्तारः, अवक्रयोपभोक्तारः 'फलितेऽफलिते वा क्षेत्रादौ फलमेतावत् प्रतिनियत स्वामिने दास्यामी'ति संविदा क्षेत्रादिस्वीकारोऽवक्रयस्तदुपभोक्तारः, आध्युपभोक्तारः प्रणयगृहीतभोक्तारः, भागभोगोपभोक्तारः उपलब्धस्य फलस्यैतावान् भागो देय इति संविदा भोक्तारः, निसृष्टोपभोक्तारः यथादत्तभागग्रहणपरिभाषयोपभोक्तारश्च, एषा तटाकादीना, प्रतिकुर्युः उपघातप्रतिविधान कुर्युः । अप्रतीकारे प्रतीकाराकरणे, हीनद्विगुणो दण्डः ।

अध्यायप्रान्ते श्लोकमाह—सेतुभ्य इति । अवारे आत्मनोऽपर्याये, सेतुभ्यस्तटाकादिभ्यः, तोय मुञ्चतः क्षेत्रादिक पाययतः, षट्पणो दमः दण्डः । अन्येषा वारे पर्याये, प्रमादेन अज्ञानेन, तोय उपरुन्धतो वा अन्यक्षेत्रजलपायन प्रतिबध्नतश्च, षट्पणो दमः । श्रीमू.

उदकमार्गनिरोधे सस्यादिहिंसने च दण्डः

कर्मोदकमार्गमुचितं रुन्धतः कुर्वतोऽनुचितं वा पूर्वः साहसदण्डः ।

सेतुकूपपुण्यस्थानचैत्यदेवायतनानि च परभूमौ निवेशयतः पूर्वानुवृत्तं धर्मसेतुमाधानं विक्रयं वा नयतो वा नाययतो वा मध्यमः साहसदण्डः श्रोतृणामुत्तमः अन्यत्र भग्नोत्सृष्टात् ।

स्वाम्यभावे ग्रामाः पुण्यशीला वा प्रतिकुर्युः ।

पथिप्रमाणं दुर्गनिवेशे व्याख्यातम् । क्षुद्रपशुमनुष्यपथं रुन्धतो द्वादशपणो दण्डः । महा-

(१) कौ. ३।१०.

पशुपथं चतुर्विंशतिपणः। हस्तिक्षेत्रपथं चतुष्पञ्चाशत्पणः। सेतुवनपथं षट्छतः। श्मशानग्रामपथं द्विशतः। द्रोणमुखपथं पञ्चशतः। स्थानीयराष्ट्रविवीतपथं साहस्रः। अतिकर्षणे चैषां दण्डचतुर्था दण्डाः। कर्षणे पूर्वोक्ताः।

क्षेत्रिकस्याक्षिपतः क्षेत्रमुपवासस्य वा त्यजतो बीजकाले द्वादशपणो दण्डः अन्यत्र दोषोपनिपाताविषह्येभ्यः।

करदाः करदेष्वाधानं विक्रयं वा कुर्युः, ब्रह्मदेयिका ब्रह्मदेयिकेषु। अन्यथा पूर्वः साहसदण्डः, करदस्य वाकरदग्रामं प्रविशतः।

करदं तु प्रविशतः सर्वद्रव्येषु प्राकाम्यं स्याद्, अन्यत्रागारात्। तदप्यस्मै दद्यात्।

अनादेयमकृष्टतोऽन्यः पञ्चवर्षाण्युपभुज्य प्रयासनिष्क्रयेण दद्यात्।

अकरदाः परत्र वसन्तो भोगमुपजीवयेयुः।

ग्रामार्थेन ग्रामिकं व्रजन्तं उपवासाः पर्यायेणानुगच्छेयुः। अननुगच्छन्तः पणार्धपणिकं योजनं दद्युः।

ग्रामिकस्य ग्रामादस्तेनपारदारिकं निरस्यतश्चतुर्विंशतिपणो दण्डः ग्रामस्योत्तमः।

निरस्तस्य प्रवेशो ह्यधिगमेन व्याख्यातः।

अथ वास्तुकस्य तृतीयाध्याय आरभ्यते। पूर्वाध्याये सीमादिनिर्णयः क्षेत्रादीनामुक्तः। उदकमार्गनिरोधे सस्यादिहिंसने च दण्डविधिरिहोच्यते।

कर्मोदकमार्गमिति। कृष्यर्थजलमार्गम्, उचित पूर्वानुवृत्तं, रुन्धतः, अनुचित कुर्वतो वा नव प्रवर्तयतो वा, पूर्वः साहसदण्डः।

सेतुकूपपुण्यस्थानचैत्यदेवायतनानि चेति। सेत्वादीनि पञ्च, परभूमौ, निवेशयतः सृजतः, पूर्वानुवृत्तं धर्मसेतुमाधानं विक्रयं वा नयतो नाययतो वा पूर्वपुरुषैर्धर्मार्थं विसृष्टं सेतुकूपतटाकादिकं आधीकुर्वतो विक्रीणानस्य तत्पुत्रादेस्तत्प्रयोजकस्य वा, मध्यमः साहसदण्डः। श्रोतृणां तत्साक्षिणां उत्तमः साहसः। तत्रापवादः—अन्यत्र भग्नोत्सृष्टात्, उपहतासंस्कृतोपेक्षितसेत्वादिव्यतिरेकेण।

स्वाम्यभाव इति। प्रवर्तकतत्पुत्राद्यभावे, ग्रामाः ग्रामवास्तव्याः, पुण्यशीला वा ग्रामावास्तव्या अपि प्रतिकुर्युः संस्कुर्युः, अर्थाद् भग्न सेत्वादिकम्।

पथिहिंसा वक्तु तत्प्रमाण दुर्गनिवेशोक्त स्मारयति—पथिप्रमाणमित्यादि। क्षुद्रपशुमनुष्यपथमिति। क्षुद्रपशुमार्ग मनुष्यमार्ग च दुर्गनिवेशोक्त, रुन्धतः, द्वादशपणो दण्डः। महापशुपथ गवाश्वादिमार्ग, रुन्धतः, चतुर्विंशतिपणः। हस्तिक्षेत्रपथ रुन्धतः चतुष्पञ्चाशत्पणः। सेतुवनपथं रुन्धतः षट्छतः। श्मशानग्रामपथ रुन्धतो द्विशतः। द्रोणमुखपथ रुन्धतः पञ्चशतः। स्थानीयराष्ट्रविवीतपथं स्थानीय प्रसिद्ध राष्ट्रविवीते समाहर्तृसमुदयप्रस्थापनोक्ते तेषा पन्थानं, रुन्धतः, साहस्रः। अतिकर्षणे चैषामिति। अतिकर्षणमपकर्षणं न्यूनीकरणं उक्तानां पथामेकदेशापहरणेन प्रमाणतो न्यूनीकरणे, दण्डचतुर्थाः पूर्वोक्तदण्डचतुर्भागाः, दण्डाः। कर्षणे पथिषु कृषिकरणे, पूर्वोक्ताः दण्डाः।

क्षेत्रिकस्येति। बीजकाले, क्षेत्रं अक्षिपतः कर्षकायानर्पयतः, क्षेत्रिकस्य क्षेत्रस्वामिनः, त्यजत उपवासस्य वा कृषिमभ्युपेत्य बीजावापकाले क्षेत्रं मुञ्चतः कर्षकस्य वा, द्वादशपणो दण्डः। अन्यत्र दोषोपनिपाताविषह्येभ्य इति। दोषः क्षेत्रदोषः उपनिपातो राजचोरायुपद्रवः अविषह्य महारोगादि एतेषु निमित्तेषु क्षेत्रत्यागो न दोषाय।

करदा इति। करदायकाः, करदेषु आधान विक्रयं वा कुर्युः, न त्वकरदेष्वित्यर्थः। ब्रह्मदेयिकाः, ब्रह्मदायिका इत्यपि पाठः, ब्रह्मदेय ब्रह्मदायो वा करमोक्षितं ब्राह्मणभोग्य क्षेत्रादिकमुच्यते तथाविधभूमिस्वामिनः, ब्रह्मदेयिकेषु आधान विक्रयं वा कुर्युः, न त्वतथाभूतेषु। अन्यथा उक्तविधयतिक्रमेणाधानविक्रयकरणे, पूर्वः साहसदण्डः। आहितविक्रीतक्षेत्रस्वीकर्तुर्दण्डमाह—करदस्य वेत्यादि।

करदं त्विति। करदं ग्रामं, प्रविशतः करदस्य, सर्वद्रव्येषु धान्यचतुष्पदादिषु, प्राकाम्यं स्वाच्छन्द्यं स्वामित्वं, स्यात्, अन्यत्रागारात् विक्रेतृगृहवर्जम्। तदपि अस्मै दद्यात् क्षेत्रविक्रेता यदि गृहमपि विक्रेतुमिच्छेत् तदा क्षेत्रक्रेत्रे एव तद् विक्रीणीयात्।

अनादेयमिति। संस्कृतं ग्राह्यफलत्वादादेयं तद्विल-

मनादेयमसंस्कृतं क्षेत्रम्, अकृषतः संस्करणाशक्तत्वाद-कर्षयतः स्वामिनः, अन्यः स्वामिनियुक्तः, पञ्चवर्षाणि उपभुज्य, प्रयासनिष्क्रयेण दद्यात् कूपतटाकादिखननार्थं व्ययमात्मकृत गृहीत्वा प्रत्यर्पयेत् क्षेत्रम्।

अकरदा इति। अकरदा ब्रह्मदेयिकादयः, परत्र ग्रामान्तरे, वसन्तः भोग उपजीवेयुः क्षेत्रभोगमात्र गृह्णीयुः, हिरण्यकरदण्ड तु राजा गृह्णीयादिति भाषाटीका।

ग्रामार्थेनेति। ग्रामकार्यवशेन, ग्रामिकं ग्राममुख्यं, व्रजन्तं देशान्तर गच्छन्त, उपवासाः उपजीव्य ग्रामं वसन्तः कर्षकाः, पर्यायेण वारव्यवस्थया, अनुगच्छेयुः। अननुगच्छन्तः पणार्धपणिकं योजनं दद्युः एकैकस्य गन्तव्याध्वयोजनस्यैतावदिति व्यवस्थया देय द्रव्यमिह योजनं तत् सार्धपणात्मक ग्रामिकाय दद्युः।

ग्रामिकस्येति। ग्राममुख्यस्य, ग्रामाद्, अस्तेनपार-दारिक स्तेयेन परदाररतत्वेन वा दोषेणायुक्त, निरस्यतः बहिष्कुर्वतः, चतुर्विंशतिपणो दण्डः। ग्रामस्य ग्रामवासिसमुदायस्य बहिष्कुर्वतः, उत्तमः साहसदण्डः।

निरस्तस्येति। ग्रामान्निष्कासितस्य। चोरपारदारि-कादेः, प्रवेशः पुनर्ग्रामाभिगमनं, हिशब्दस्तुशब्दार्थे, अधिगमेन व्याख्यातः परगृहाभिगमनोक्तेन दण्डेन समानदण्ड इत्यर्थः। श्रीमू.

मनुः

सीमानिश्चयकाल.

[1]सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः।
ज्येष्ठे मासि नयेत्सीमां सुप्रकाशेषु सेतुषु॥

(१) सीमा प्रति विवादे सीमानिमित्ते लक्षणेत्थंभूतेति प्रतेः कर्मप्रवचनीयत्वात् द्वितीया, निमित्तमपि लक्षण-मिति शक्यते वक्तुम्। सीमा मर्यादा ग्रामादीना विभाग-परिमाणमियत्तापरिच्छेदनमिति यावत्। ज्येष्ठे मासि नयेन्निर्णयः कर्तव्यः। [2]मासविशेषेण निर्णयकरणे हेतुमाह संप्रकाशेषु सेतुषु। सेतवः सीमालिङ्गानि वक्ष्यमाणानि लोष्टपाषाणादिविशिष्टजातीयसीमा ग्राह्या, तृणगुल्मादीनि प्रागस्मात्कालात्[3] उत्थितेषु तृणेषु लोष्टपाषाणयोरन्य-स्याश्च भूमेर्न[4] विशेषो लक्ष्यते। पाषाणलक्षितायां यदा तत्र तृणानि न जायन्ते[5] तदा सा सीमेति निश्चीयते। एवं वल्लीस्थानादिष्वपि। प्राग्वसन्ताद्वासन्तिके दाहे विशेषो न (?) लक्ष्यते। हेत्वभिधानाच्च। यस्मिन्देशे यदा व्यज्यन्ते ततो मासात्कालहरणं कर्तु[6] न देयमन्यदा तु लिङ्गज्ञानार्थं कालापेक्षाऽपि भवतीत्येतावत्फलं ज्येष्ठ-ग्रहणे। मेधा.

(२) द्वयोर्ग्राममर्यादाविषयायां विप्रतिपत्तौ उत्प-न्नायां ज्येष्ठे मासि ग्रीष्मे तापसंशुष्कतृणत्वात्प्रकटीभूतेषु सीमालिङ्गेषु राजा सीमा निश्चिनुयात्। गोरा.

(३) ग्रामग्रहण क्षेत्रादेरुपलक्षणार्थम्। स्मृच.२३२

प्रकाशाप्रकाशसीमाचिह्नविधिः

[1]सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंशुकान्।
शाल्मलीसालतालांश्च क्षीरिणश्चैव पादपान्॥

(१) पादपा वृक्षाः। क्षीरिणोऽर्कोदुम्बरप्रभृतयः। एते च चिरस्थायित्वात् सीमादेश एव रोपयितव्या न ग्राममध्ये, सीमादेशादन्यत्र क्रियमाणा न निश्चायकाः स्युः। मेधा.

(२) न्यग्रोधो वटः, किंशुकः पलाशः। स्मृच.२२८

[2]गुल्मान्वेणूंश्च विविधान् शमीवल्लीस्थलानि च।
शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति॥

(१) मस्मृ.८।२४५ ख. पुस्तके सुप्र (संप्र); अप.२।१५१ येत्सीमां (येदेतां); व्यक.१७०; स्मृच.२३२; विर.२०१ व्याकवत्, पमा.३९६ मासि (मासे) सु (स); रत्न.११५; विचि.९२-९३ व्यकवत्; स्मृचि.२२ सु (स); सवि.३३७ ज्येष्ठे (ज्येष्ठ); व्यप्र.३६१-३६२; सेतु.१८४ व्यकवत्; समु.११५; विव्य.४६ व्यक-वत्; भाच. व्यकवत्.

(२) मस्मृ.८।२४७, मिता.२।१५१ कुब्ज (कुज्ज) तथा (यथा); व्यक.१७०; विर.२०२ न्वेणू (नन्यां); रत्न.११२; विचि.९३ तथा (यथा); स्मृचि.२२; व्यउ.१०४ शरान्

१ मासविशेषनिर्णये हेतुमाह. २ लादनुत्थितेषु. ३ शयन्ते. ४ नादेय. ५ लिङ्गाश.

(१) संहतप्रकाण्डा वीरुधो गुल्मानि । वेणव आरग्वधादयः । बहुत्वाच्च विविधग्रहणम् । वल्यो व्रततयः दीर्घाङ्कुरास्तृणजातयः । स्थ॑ला कृत्रिमा सशाङ्वलादिपिण्डिका । कुब्जकस्य गुल्मत्वात्पृथगुपदेश आदरार्थः । एव सीमा न कदाचिन्नश्यति । अन्यथा त प्रदेश कश्चित्कर्षणेन नाशयेत् । गुल्मादीनामुपदेशः प्रदर्शनार्थो न परिसंख्यार्थः । मेधा.

(२) गुल्मान्प्रकाण्डरहितान्वेणूश्च प्रचुरकण्टकत्वाल्पकण्टकत्वादिभेदेन नानाप्रकारान्सीमावृक्षान्वल्लीर्लताः स्थानानि कृत्रिमोन्नतभूभागान् शरान् कुब्जकगुल्माश्च प्रचुरालपभोगत्वेनादरार्थं पृथङ्निर्दिष्टान्सीमालिङ्गभूतान्कुर्यात् । एव कृते सीमा न नश्यति । मनु.

तडागान्युदपानानि वाप्यः प्रस्रवणानि च ।
सीमासंधिषु कार्याणि देवतायतनानि च ॥

(१) महाम्भासि तडागानि । वाप्यः पुष्करिण्यः । उदपानानि कूपप्रभृतीनि । प्रस्रवणान्युदकस्यन्दा ईषत्स्रवदुदका भूप्रदेशाः । देवतायतनानि यक्षगृहादीनि । एतानि प्रकाशकानि । न ह्येतानि स्वल्पेनायासेन नाशयितुं शक्यन्ते । नाश्यमानेषु च महान्प्रत्यवायो भवति । सर्वस्य चोदकार्थिनो देवतादर्शनार्थिनश्च तत्र संनिधानात् सुज्ञातश्च साक्षिणा सीमासधिर्भवति । मेधा.

(२) तडागानि पुष्करिण्यः । उदपानानि कूपाः । वाप्यः क्षुद्रपुष्करिण्यः । प्रस्रवणानि बृहत्खातानि । मवि.

(३) एतेषु सीमानिर्णयाय विख्याप्य कृतेषूदकाद्यर्थेजना अपि श्रुतिपरंपरया चिरकालेऽपि साक्षिणो भवन्ति । मनु.

(४) तत्र देशसीम्नि तडागः कार्यः । ग्रामसीम्नि वापी । क्षेत्रसीम्नि कूपः । गृहसीमाया प्रस्रवणम् । जलसंचरणार्थमर्थतो व्यवस्था । तत्र 'पञ्चाशद्भिर्भवेत्कूपः शतहस्ता तु वापिका । पुष्करिण्यस्तदर्धे तु यावद्धनुःशतद्वयम् ॥ तडागोऽष्टशतः प्रोक्तः सरस्तु चतुरस्रकम्' ॥ इत्यधिकसंख्यावच्छेदार्थम् । मच.

उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत् ।
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययम् ॥

(१) अन्यानि प्रच्छन्नानि करीषादीनि भवन्ति । कारयेद्राजा नवग्रामसंनिवेशे कृते निर्णयार्थम् । +मेधा.

(२) सीमापरिज्ञाने सर्वदा लोके जनाना भ्रान्तिं दृष्ट्वाऽदृष्टानि गुह्यानि वक्ष्यमाणानि सीमाचिह्नानि कारयेत् । गोरा.

(३) उपच्छन्नानि मृन्मध्यनिहितानि । मवि.

अश्मनोऽस्थीनि गोवालांस्तुषान्भस्मकपालिकाः ।
करीषमिष्टकाङ्गारांश्छर्करा वालुकास्तथा ॥
यानि चैवंप्रकाराणि कालाद्भूमिर्न भक्षयेत् ।
तानि संधिषु सीमायामप्रकाशानि कारयेत् ॥

(सेतु); **विता** ६८५ पू.; **सेतु**.१८४-१८५ विविधान् (बहुधा) तथा (यथा) नश्यति (हन्यते); **समु** ११३ शरान् (काशान्).

(१) **मस्मृ** ८।२४८; **मिता**.२।१५१; **व्यक**.१७०; **विर**.२०२; **विचि**.९३; **स्मृचि**.२२; **व्यउ**.१०४-१०५; **विता**.६८५ नानि च (णास्तथा); **सेतु**.१८५; **समु**.११३.

१ (स्थला०)

+ उपलब्धमुद्रितपुस्तकेषु अय ग्रन्थः 'तडागान्युदपानानि' इति श्लोकव्याख्याने प्रमादात् सगृहीतः ।

(१) **मस्मृ**.८।२४९; **मिता**.२।१५१; **व्यक**.१७० नित्य लोके (लोके नित्य), **स्मृच**.२२८ नित्य लोके (लोके नित्य); **विर**.२०३ व्यकवत्; **विचि**.९३ उप (भूमि) शेष व्यकवत्; **स्मृचि**.२२; **सवि**.३३३ च्छन्ना (चिह्ना) शेषं व्यकवत्; **व्यउ**.१०५; **राकौ**.४६३; **सेतु**.१८५ विचिवत्; **समु**.११३ स्मृचवत्.

(२) **मस्मृ**.८।२५०; **मिता**.२।१५१ रांश्छर्क (रशर्क); **व्यक**.१७१ वालां...काः (वालीस्तथा भस्मकपालिकाम्) रा ...स्तथा (रशर्कराश्मकपालिकाः); **विर**.२०३ कास्तथा (काश्च द); **रत्न**.११२; **विचि**.९३ स्तुषान् (स्तथा) शेषं विरवत्; **स्मृचि**.२२; **वीमि**.२।२५१ स्तुषान् (स्तथा); **व्यप्र**.३५४ मितावत्, बृहस्पतिः; **व्यउ**.१०५; **राकौ**.४६३; **सेतु**.१८५ विचिवत्; **समु**.११३.

(३) **मस्मृ**.८।२५१; **मिता**.२।१५१; **स्मृच**.२२८ सधि (सिद्धि) माया...नि (मायाः प्रकाशानि च); **विर**.२०३ याम (या अ); **रत्न**.११२; **विचि**.९३ विरवत्; **स्मृचि**.२२; **वीमि**.२।१५१ विरवत्; **व्यप्र**.३५४ उत्त., बृहस्पतिः; **व्यउ**.१०५ शानि (श्यानि); **विता**.६८७; **राकौ**.४६३; **सेतु**.१८५ विरवत्; **समु**.११३ विरवत्.

१ यम्.

(१) करीषं शुष्कं गोमयम्। अङ्गारा अग्निदग्धाः काष्ठावयवाः। पाषाणाः कठिना मृदः शर्कराः। कपालिका कलशैकदेशः। खदिरसारकालाञ्जनाद्यानि शर्करादितुल्यानि। कैवप्रकारता अत आह, कालाद् भूमिर्न भक्षयेत्। भूमेर्भक्षणमुपमया स्वरूपापादनम्। यथा भक्षितं भेदेन नोपलभ्यते तद्वद्भूमिसादापन्नमिव तादृशं कुर्यात्। मेधा.

(२) पाषाणास्थिगोवालतुषभस्मखर्परिकाशुष्कगोमयपकेष्टकाङ्गारदग्धत्वक्फणिकासिकता अन्यान्यप्येवविधानि खदिरसारिकाकालाञ्जनादीनि तानि ग्रामसंधिषु प्रच्छन्नानि स्थापयेत्। ×गोरा.

[1]विशेषेण प्रकाशे तु पलाशकिंशुकौ मतौ॥

सीमाविवादे क्रियाविधिः। चिह्नसाक्षिसामन्तमौलवनचारिणां पूर्वपूर्वाभावे उत्तरोत्तर प्रामाण्यम्।

ऐतैर्लिङ्गैर्नयेत्सीमां राजा विवदमानयोः।
पूर्वभुक्त्या च सततमुदकस्यागमेन च*॥

(१) उभयोर्ग्रामयोः शून्यत्वे लिङ्गैर्निर्णयः। वसतोः पूर्वभुक्त्या सततमविच्छिन्नयाऽस्मर्यमाणाधिकया, न हि त्रिपुरुषभोगेन, स ह्यत्र प्रतिषिद्धप्रामाण्यः 'आधिः सीमा' इत्यत्र, संभवति हि तत्रोपेक्षा बहुसाधारण्यात्सीमायाः, ये तु तत्र सीमशब्द पठन्ति तेषा भुक्तेः सिद्धमेव प्रामाण्यम्। लिङ्गाना प्रामाण्यस्योक्तत्वात्प्रमाणान्तरनिवृत्तिराशक्येतेति पुनरुच्यते। कोऽयमुदकागमः प्रामाण्येनोच्यते। यथाऽन्यानि लिङ्गानि नवसंनिवेशे क्रियन्ते तद्वदेवोदकप्रवाहोऽपि कर्तव्यः। अथवा ययोर्ग्रामयोः प्रदेशान्तरे स एवोदकागमो विभागहेतुः प्रदेशान्तरे च विप्रतिपत्तिस्तत्र स एव प्रमाणम्। अथवा महाग्रामविषयमेतत्। नद्याः पार एकोऽवार एको ग्रामस्तत्र न पारावारिभिर्वक्तव्यं 'अस्मदीया भूमिरत्रापि विद्यत' इति। यदि नामान्यतरशून्यत्वादतिक्रम्य न दत्तमपि, तथापि न भोगः प्रमाणं विभागः हेतुः स्वल्पेऽपहारे (?)। मेधा.

(२) विवदमानयोर्ग्रामयोः प्रागुक्तैरेतैरुक्तचिह्नै राजा सीमामुन्नयेत् वसतोः पुनरविच्छिन्नया भुक्त्या सीमानिर्णयो न तु त्रिपुरुषादिकतया। तस्याधिः सीमेति पर्युदस्तत्वात्। ग्रामद्वयसंधिस्थनद्यादिप्रवाहेण च पारावारग्रामयोः सीमा निश्चिनुयात्। ममु.

यदि संशय एव स्याल्लिङ्गानामपि दर्शने।
साक्षिप्रत्यय एव स्यात्सीमावादविनिर्णयः॥

कथ पुनर्लिङ्गेषु सत्सु संशयः। यानि तावत्प्रच्छन्नानि तानि यदि केनचित्कथचिदागम्य प्रच्छन्नमन्यत्र नीयेरन्नेव निश्चयः स्यात्। येऽपि प्रकाश्या न्यग्रोधादयस्तेऽपि न सीमायामेव रोहन्त्यन्यत्रापि जायन्ते ततः संदेह आभासत्वात्। यत्र पुनरिय सभावना नास्ति, तत्र प्रमाणमेव लिङ्गानि। साक्षिप्रत्ययः साक्षिहेतुकः। साक्षिणः प्रत्ययो यत्रेति। विनिश्चयः तत्त्वाधिगमः संशयितलिङ्गे अलिङ्गे वा सीमाविवादे साक्षिहेतुको निर्णय इति तात्पर्यम्। ×मेधा.

× ममु. गोरावत्।

* गोरा. अशुद्धिसदेहान्नोद्धृतम्।

(१) **विर.**२०३.

(२) **मस्मृ** ८।२५२; **मिता.**२।१५१ पू.; **व्यक.**१७१ वदमानयो. (वदता नृणाम्) कत्या च (कत्याऽपि); **स्मृच.**२२९ पू.; **विर.**२०४ वदमानयोः (वदतां नृणाम्); **पमा.**३८८; **रत्न.**१११ पू.; **विवि.**९३ न च (न वा); **स्मृचि.**२२ पू.; **नृप्र.**३१ पू.; **सवि** ३१२पू.; **व्यप्र.**३५५; **व्यउ.**१०५ पू.; **विता.**६९० पू.; **राकौ.**४६३ पू.; **सेतु.**१८६ विरवत्; **समु.**११४.

१ स्वरूपोपादानम्.

× व्याख्यानान्तराणि मेधावत्।

(१) **मस्मृ.**८।२५३ ख. निर्ण (निश्च), **मिता.**२।१५२ उत्त.; **अप.**२।१५१ एव स्या (एवास्मा) त्सीमावादवि (द्विवादे सीम), **व्यक.**१७१ त्सीमा...र्णयः (द्विवादे सीमनिश्चय.), **स्मृच.**२२९ र्णय. (श्चये), **विर.**२०५ व्यकवत्; **पमा.**३८८, **रत्न.**११३; **विवि.**९३ व्यकवत्, **बृहस्पतिः**; **नृप्र.**३१ र्णय. (र्णये); **सवि.**३३३ स्मृचवत्; **वीमि.**२।१५२ एव स्या (एवासी) र्णय. (र्णये) उत्त., **व्यप्र.**३५५; **विता.** ६९०; **बाल.**२।१५२ पू.; **सेतु.**१८६ वादविनिर्णयः (वादे विनिश्चय.); **समु.**११४ स्मृचवत्; **विव्य.**४७ बृहस्पतिः.

१ नद्या अपर एको वा वार एकग्रामस्तत्र. २ पारवारिणो. ३ दातुस्तमपि.

ग्रामेयककुलानां च समक्षं सीम्नि साक्षिणः।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः ॥

(१) यद्यप्यसंख्यातपुरुषको ग्रामस्तथापि द्वौ विवादिनौ द्वयोर्ग्रामयोर्भवतस्तयोः समक्षमन्येषा च ग्रामेयककुलाना च ग्रामीणपुरुषसमूहानां समक्षं सीम्नि साक्षिणः प्रष्टव्याः। साक्षिप्रश्नकाले सर्वैर्ग्रामीणैर्दत्तव्यवहारकैरपि संनिहितैर्भवितव्य नार्थिप्रत्यार्थिनोरन्यतरो वक्तु लभते। एव विसृष्टार्थे विवादे किमेते संनिधीयन्ते। अथवा येऽन्ये सामन्तेभ्यो ग्रामेभ्यः केचिद्वृद्धतमाः साक्ष्ये समुद्दिष्टास्तद्ग्रामीणैरन्यैः संनिहितैः भवितव्यम्। यतस्तैर्वृद्धेभ्यः श्रुतं भवति तत्समक्ष पृच्छ्यमाना न विपर्यन्ति वृद्धाः। सीमालिङ्गानि यत्र लिङ्गान्युभयथा, तत्र वृद्धेभ्यस्तानि निश्चित्य, सीम्नि निश्चयः। असत्सु लिङ्गेषु सीम्येव साक्ष्यं पृच्छ्यते काऽत्र सीमेति। ×मेधा.

(२) कुलाना विप्राणा चेति वा। मच.

ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयम्।
निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः ॥

ते साक्षिणो यथा यादृश निश्चय ब्रूयुः समस्ताः सर्व एव। न पुनर्वाक्यभेदोक्तौ न्यायः 'द्वैधे च बहूना-

× व्याख्यानान्तराणि मेधावत्।

(१) **मस्मृ.**८।२५४ क., ग, घ पुस्तकेषु ग्रामे (ग्रामां), **मिता.**२।१५२ ना च (ना तु), **अप.**२।१५१ मेय (मीण) ना च (ना तु) सीम्नि (सीम), **व्यक** १७१ ना च (नान्तु) सीम्नि (सीम), **स्मृच** २३१ व्यकवत्, **विर.**२०५ सीम्नि (सीम), **पमा.**३९२ मस्मृवत्; **रत्न.**११४, **स्मृचि.**२३, **व्यप्र.**३५८ मितावत्; **व्यउ.**१०६ यककुलाना च (ऽवेककुलाना तु), **विता** ६९३ यक (एक) ना च (नान्तु) सीम्नि (सीम); **राकौ.** ४६२; **समु.**११४ व्यकवत्.

(२) **मस्मृ.**८।२५५, **मिता.**२।१५२ निश्च (निर्ण), **अप.** २।१५१ सम...निश्च (सामन्ता. सीमनिर्ण) उत्तरार्धे—(तथा तां च निबध्नीयात्समस्तां तांश्च साक्षिण.), **व्यक** १७१ समस्ताः सीम्नि (सामन्ताः सीम) उत्तरार्धे (तथा त च निबध्नीयात् सामन्तारतांश्च नामतः:), **विर.**२०६ व्यकवत्, **पमा.**३९२; **रत्न.**११४; **स्मृचि.**२३ सीम्नि (सीम); **नृप्र** ३१ निश्च (निर्ण), **व्यप्र.**३५८ मितावत्; **व्यउ.**१०६ मितावत्; **विता.** ६९३ **निश्च** (निर्ण) नि ..मां (तथा तं च निबध्नीयात्); **सेतु.**१८७ पूर्वार्ध अपवत्, **समु.**११४ मितावत्.

साक्ष्यभावे तु चत्वारो ग्रामाः सीमान्तवासिनः।
सीमाविनिर्णयं कुर्युः प्रयता राजसंनिधौ ॥

(१) ग्रामसामन्ताः सीमान्तवासिनः प्रष्टव्याः। तेषां वचने निश्चय कुर्यात्। प्रयता साक्षिधर्मेण नान्तरेण। राजसंनिधाविति श्लोकपूरणम्। न तु सामन्ताः स्वेच्छया राजवन्निश्चिन्वन्ति। ×मेधा.

(२) तद्ग्रामद्वयस्य विवादीभूतस्य साक्षिणोऽभावे चतसृषु दिक्षु सीमान्तवासिनः चत्वारो ग्राम्याः साक्षिधर्मेण राजसमक्ष सीमानिर्णय कुर्युः। गोरा.

(३) तत्र च साक्षिणा निर्णेतृत्वं मुख्य तदभावे सामन्तानाम्। तदुक्त—साक्ष्येति। मिता.२।१५२

सामन्तानामभावे तु मौलानां सीमसाक्षिणाम्।
इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान् ॥

(१) सामन्तानां मौलानामिति विशेषणविशेष्यभावः स्तुत्यर्थः। ग्रामप्रतिष्ठानकाले भवा उत्पत्तिसहभुवो मौला उच्यन्ते। ते च सामन्ता नित्याः। नित्यसंनिहितत्वात्तेषामप्यभावः कथचिदुत्सन्नत्वात्तदा का गतिः। तदेमानपि वक्ष्यमाणान् पृच्छेत्। अथवा

* व्याख्यानान्तराणि मेधावत्।

× व्याख्यानान्तराणि मेधावत् गोरावच्च।

(१) **मस्मृ** ८।२५८ सीमान्त (सामन्त), **गोरा.** तु (च) ग्रामा (ग्राम्या), **मिता.**२।१५२, **अप.**१।१५१; **व्यक.** १७१, **स्मृच** २२९ ग्रामा. (ग्राम) सीमावि (सीमाया); **विर.** २०६ तु(च); **पमा** ३८८ मस्मृवत्, **रत्न.**११३, **विचि.**९४ तु (च) ग्रामा.(ग्राम), **नृप्र.**३१सीमावि (सीमाया) प्रयता (प्रजा वा), **सवि.**३३४तु (ऽपि) बृहस्पति., **वीमि** २।१५२विरवत्, **व्यप्र.**३५५ मस्मृवत्, **व्यउ** १०५ सीमावि (सीमाया) कात्यायन, **विता.**६९१; **राकौ** ४६२; **सेतु.**१८६-१८७ तु (च) शेषं व्यउवत्, **समु.**११४ व्यउवत्.

(२) **मस्मृ.**८।२५९ सीम (सीम्नि), **गोरा.**इमानप्यनु (इतरानपि), **व्यक.**१७२; **स्मृच.**२३०; **विर.**२०९; **पमा.** ३९०, **रत्न** ११३, **विचि.**९४; **नृप्र.**३१; **सवि.**३३४; **व्यप्र.**३५७ मस्मृवत्; **विता.**६९१-६९२ मस्मृवत्, **बाल.** २।१५२ पू.; **सेतु.**१८७ (=); **समु.**११४.

१ (न०). २ दुच्छन्न.

मौला अनुभाविनः, सामन्ता व्याख्याताः, व्यवहर्तव्याः। मौलानां पूर्वोक्तानां अभावे सामन्ताः प्रमाणम्। तदभावे वनगोचरा[1]नानुयुञ्जीत निपुणतः पृच्छेत्। +मेधा.

(२) सामन्तानामभावे तथा मौलानां मूलभूताना साक्षिणामभावे। इमान् वक्ष्यमाणान्। एतच्च वनसमीपग्रामविषयम्। मवि.

(३) सामन्तादीनामनुग्राहकमौलादीना सीमसाक्षिणा चाभावे इमानसभ्यानपि वक्ष्यमाणान्पुरुषाननुयुञ्जीत सीमालिङ्गानि पृच्छेदित्यर्थः। स्मृच.२३०

(४) ग्रामनिर्माणकालादारभ्य मौलाना पुरुषक्रमेण तद्ग्रामस्थानाम्। ममु.

(५) वनगोचराणा ग्रहण सीमासनिहितदेशकर्षकाणामसत्त्वे विज्ञेयम्। व्यप्र.३५७

(६) सामन्ताना अभावे तु मौलाः मूले भवा मौलाः तेषां सीम्नि साक्षिणा अभावे इमान् वनगोचरान् अपि साक्ष्ये नियुञ्जीत पृच्छेत्। भाच.

[2]व्याधांश्छाकुनिकान्गोपान्कैवर्तान्मूलखानकान्।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान्॥

(१) एते हि [3]ग्रामवासिनस्तत्र वनानि च भ्राम्यन्ति। ग्राममध्येन गच्छन्तः कदाचित्तद्वृत्त विद्युस्ते हि तेन पथा गच्छन्तो विवादास्पदं प्रदेशं पूर्वं काश्चित्पुरुषान्कृपतो दृष्ट्वा पृच्छेयुः। कोऽय ग्रामो यो भवद्भिः कृष्यत इति। एवमादिना संभवति पूर्वानुभवः। व्याधा मृगयाजीविनः। तेषामपि वनाद्भ्रष्टमृगमनुधावता भवति ग्रामसबन्धः। एवं शाकुनिकाः शकुनिबन्धजीविनः। तदन्वेषणे ये सर्वान्ग्रामानागोचरयन्ति। गोपा गवा तृणविशेषज्ञानाय तत्र तत्र परिभ्राम्यन्ति। कैवर्ता दाशास्तडागखननादिजीविनस्तत्र तत्र गच्छन्ति क्षास्माकीनं कर्मोपयुज्यते। मूलखा[1]नकाः मूलं वृक्षादेः खनयन्ति स्थूलकाशादेः। व्यालग्राहाः सर्पग्राहिणः जीविकार्थं तेऽपि सर्पास्तं त प्रदेशमन्विच्छन्त्यतः तेषामपि पारिग्रामिकैर्बहुभिः संबन्धः। उञ्छवृत्त्ययोऽपि दरिद्रा अनेकग्रामपर्यटनेन यात्रामात्र निर्वर्तयन्ति अन्यांश्च फलकुसुमेन्धनार्थिनः। *मेधा.

(२) उञ्छवृत्तीन् द्विजान्, अन्याश्च शबरादीन्। मवि.

[1]ते पृष्टास्तु यथा ब्रूयुः सीमासंधिषु लक्षणम्।
तत्तथा स्थापयेद्राजा धर्मेण ग्रामयोर्द्वयोः॥

ते धर्मेण पृष्टा इति योजना। सीमाश्च ताः संधयश्च सीमासधयः। ग्रामद्वयसंयोगः संधिः। स च सीमैव। लक्षण ज्ञापकम्। मेधा.

[2]क्षेत्रकूपतडागानामारामस्य गृहस्य च।
सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः॥

(१) आराम उद्यानभूमिः शाकवाटश्च सामन्तप्रमाणकस्तत्त्वनिश्चयः। व्याधादिनिवृत्त्यर्थमिदमुच्यते। सीमासेतुः सीमाबन्धः। सीमाविभावनार्थ य आबध्यते स्थाप्यते। ×मेधा.

(२) कूपस्य सीमा कूपस्य परितस्त्याज्यो यो देशस्तस्य सीमा। एवं तडागादौ। सामन्तप्रत्ययः सामन्ताः समन्तवासिनः तद्धेतुकः सीमानिर्णय इति शेषः। तथा सीमासु ये सेतवस्तेषामपि सीमानिर्णये कर्तव्ये। मवि.

साक्षिणा सीमानिर्णये धर्मविशेष.

[3]शिरोभिस्ते गृहीत्वोर्वी स्वग्विणो रक्तवाससः।
सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम्॥

+ गोरा., ममु., मच., नन्द. मेधावत्।

(१) **मस्मृ.**८।२६० गोचरान् (चारिणः); **मिता.**२।१५१ खान (खात), **व्यक.**१७२ अन्यांश्च (लब्धांश्च); **स्मृच.**२३०, **विर.**२०९ अन्यां (शून्यां); **पमा.**३९१; **रत्न.**११३, **विचि.**९४; **स्मृचि.**२२-२३ मितावत्; **नृप्र.**३१; **सवि.**३३४ खान (हीन); **वीमि.**२।१५१ मितावत्; **व्यप्र.**३५७; **व्यउ.**१०४; **विता.**६९२; **सेतु.**१८७ मितावत्(=); **समु.**११४.

१ रान्विनियु. २ ग्राम.

* गोरा., ममु., मच. मेधावत्।

× ममु., मच., नन्द., भाच. मेधावत्।

(१) **मस्मृ.**८।२६१; **व्यक.**१७२ स्तु (श्च); **स्मृच.**२३१, **विर.**२१०; **विचि.**९४; **राकौ.**४६४; **सेतु.**१८७ स्तु (श्च) संधिषु (सबन्धि); **समु.**११४.

(२) **मस्मृ.**८।२६२; **व्यक.**९७ सेतु (संधि), **विर.**२१८ व्यकवत्; **विचि.**९७ व्यकवत्; **स्मृचि.**१३ णैयः (र्णये); **सेतु.**१९० व्यकवत्; **समु.**११५.

(३) **मस्मृ.**८।२५६; **मिता.**२।१५२; **अप.**२।१५२

१ (मूलखानकाः०).

(१) मूर्ध्नोर्वा पृथ्वीं मृल्लोष्टकान् गृहीत्वा साक्षिणः स्नग्विणो यथासभवं माल्यधरा रक्तवर्णकुसुमधरा रक्तवाससो लोहिताच्छादनाः यद्यपि शुक्लस्य वर्णान्तरापादनेऽपि रञ्जिर्वर्तते भूयास्तु लोहिते प्रयोगो रक्तो गौर्लोहित इति। भयसञ्जननार्थं चैतत्, लोहितवाससश्च सशूका भवन्ति। 'यदस्माक सुकृत किंचिदर्जितमस्ति तन्निष्फलमस्त्विति' वाच्यन्ते। स्वैः स्वैरिति वीप्सया विशेषनामभिः सुकृतं तं कथयेयुः। तत्कन्यादानं तीर्थस्नानं चेत्यादि। समञ्जसं क्रियाविशेषणम्। सत्यादनपेतऋजुधार्मिको यो मार्गस्तेन नयेयुः। समजसमृजु स्पष्टमित्येकोऽर्थः। सत्यव्यवहारश्च स्पष्ट इत्युक्त समजसमिति। *मेधा.

(२) नयेयुरिति बहुवचनं द्वयोर्निरासार्थं नैकस्य। 'एकश्चेदि'ति नारदेनैकस्याभ्यनुज्ञानात्। मिता.२।१५२

(३) एतच्च वास्तुपुरुषरूपमिति तद्रूपधारिभिः सीमामयनमुक्तम्। मवि.

(४) समञ्जसं सम्यक् निर्णयेयुः। स्मृच.२३१

(५) सुकृतैः यदस्माकं सुकृत तन्निष्फल स्यादित्येवप्रकारैरिति केचित्। वस्तुतस्तु 'सत्येन शापयेद्विप्र' इत्यत्रोक्तः, अन्यथा स्वैः स्वैः इत्यनुपपत्तिः। ×मच.

साक्षिणां मृषाकरणे दण्डः

यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः।
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम्॥

(१) प्रमाणान्तरलिङ्गेभ्योऽन्यथासंभवद्भ्यः प्रत्ययितरपुरुषेभ्यो मिथ्यात्वेऽवधारिते प्रत्येक द्विशतो दण्डः। एकैकस्य साक्षित्वात्साक्षिणा च दण्ड्यत्वात्, न हि व्यासज्य वदन्ति साक्ष्यम्। सत्यप्रधानाः साक्षिणः सत्यसाक्षिणः पूयन्ते अनृताभिधानेन पापेन न संबध्यन्त इति। यथोक्तेन याथातथ्येन। न हि शब्दात्मकस्य वचनस्यात्रावसरः। प्रमाणान्तरसंवादमात्रमनेन लक्ष्यते। अथवा यथाशास्त्रमुक्तेन सत्येनेति यावत्। शास्त्रे हि सत्य वक्तव्यमित्येवमुक्तमतो यथोक्तेन सत्येनेत्युक्तं भवति। *मेधा.

(२) यथोक्तेन 'शिरोभिस्ते गृहीत्वोर्वीम्' इत्यादिनोक्तमार्गानतिक्रमेण। नयन्तः सीमाचङ्क्रमणं कुर्वाणाः। सत्यसाक्षिणः सत्यभूतसीमानुभवशालिनः। पूयन्ते पापेन न संबन्ध्यन्ते। विपरीत नयन्तः पूर्वसीमातिक्रमेण चङ्क्रमण कुर्वाणाः कार्षापणाना द्विशत दाप्या इत्यर्थः। विपरीतनयन तु चङ्क्रमणानन्तरक्षणमारभ्य सार्धमासाभ्यन्तरे दैवराजकृतव्यसनदर्शने वेदितव्यम्।

स्मृच.२३३-२३४

सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणाम्।
सर्वे पृथक्पृथक् दण्ड्या राज्ञा मध्यमसाहसम्॥

(१) पूर्वेभ्यः सामन्तानामधिको दण्डः। पृथक्पृथगित्यनुवादः। उक्तत्वान्न्यायस्य। क्षेत्रादिप्रातिवेश्या अवश्य ज्ञातारो भवन्ति। प्रत्यासत्तितः एषां दण्डमहत्त्वम्। सामन्तानां तु परकीयसीमावेदनं नावश्यमिति द्विशतो दमोऽनुवर्त्यः। तेन ग्रामसीमाया द्रष्टृणा सामन्तानां च द्विशतः। ये तु सामन्तशब्दमाश्रित्य ग्रामक्षेत्रादिसीमयोः सामन्तत्वात्तुल्यदण्डत्वमाहुस्ते न्यायविरोधादुपेक्षणीयाः। +मेधा.

(२) सीमाचिह्ननिमित्तं विवदमानानां मनुष्याणां यदि सामन्ता देशवासिनो मिथ्या ब्रूयुस्तदा ते सर्वे प्रत्येकं

---

* गोरा., ममु. मेधावत्। × भाच मचवत्।

मु (स्व); **व्यक.**१७३ णो (नो); **स्मृच.** २३१ युस्ते (युस्तां); **विर.**२१० णो (नो); **पमा.**३९३; **रत्न.**११४; **विचि.**९४ र्मयेयुस्ते (र्भुयुस्ते तु); **स्मृचि.**२३ विरवत्; **नृप्र.**३१; **सवि.** ३३५ ते गृहीत्वोर्वीं (स्वैर्गृहीताग्नि) युस्ते (युस्ता); **वीमि.** २।१५२ विचिवत्; **व्यप्र.**३५९; **व्यउ.**१०६; **विता.**६९५ युस्ते (युस्तां) सम् (साम्); **राकौ.**४६२; **सेतु** १८७ र्नयेयुस्ते (र्भुयुस्तेऽपि); **समु.**११५स्मृचवत्.

(१) **मस्मृ.**८।२५७; **मिता.**२।१५३; **व्यक.**१७३ स्युः (तु); **स्मृच.**२३३; **विर.**२११; **पमा** ३९८ व्यकवत्, कात्यायनः; **रत्न.**११४; **विचि.**९५; **स्मृचि** २३ द्विशत (र्दशमं); **नृप्र.**३२ यन्तस्तु (ये नैव); **व्यप्र.**३६०; **व्यउ.**१०६ यन्तस्ते (मेयुस्ते) पूय (स्तूय) दमम् (दमः); **व्यम.**९७ व्यकवत्; **विता.** ६९६; **सेतु.**३२२ व्यकवत्; **समु.**११६ स्तु (स्ते).

---

* गोरा., मवि., ममु., मच., नन्द. मेधावद्भावः।

+ गोरा. मेधावत्।

(१) **मस्मृ.**८।२६३; **व्यक.**१७३; **विर.**२११; **विचि.** ९५, **सेतु.**३२२ तौ (तुं); **समु.**११५.

१ त्ययितर. २ प्रत्यासोत्तरतः (?).

राज्ञा मध्यमसाहसं दण्डनीयाः । एवं चासामन्तरूपाणां पूर्वोक्तद्विशतो दमो ज्ञेयः । ममु.

प्रमाणान्तरेणानिश्चये राजा निर्णेता

[1]सीमायामविषह्यायां स्वयं राजैव धर्मवित् ।
प्रदिशेद्भूमिमेकेषामुपकारादिति स्थितिः ॥

(१) अविषह्या निश्चेतुमशक्या । लिङ्गसाक्ष्यभावात् । राजैव स्वेच्छया भूमिं प्रदिशेद्दद्यात् । इय वो भूमिरियं व इति । धर्मवित्पक्षपातो नैव कस्यचित्कर्तव्य इति । एतदाह उपकाराद्धेतोः । यया सीमया द्वावपि ग्रामौ समोपकारौ भवतः तेन यदि न्यूनाऽपि कस्यचिद्भूमिः स्यात्क्षेत्र चेत्सगुणं बहूत्पत्तिक तदपेक्षः प्रदेशः । ल्यब्लोपे पञ्चमी । उपकारमपेक्ष्य । अथवैकेषा प्रदिशेदपरेषामनिश्रितामपहरेत् । यदि विवादिग्रामस्ता सीमा यावद्वक्तुं न शक्नुयादितरे च शक्तास्तदन्येभ्यः प्रदिशेत् । एवमात्मनो बहूना च ग्रामीणानामुपकृतं भवति । मेधा.

(२) ग्रामद्वयस्य मध्यवर्तिनीं भूमि येषामेव ग्रामीणाना तया भूम्या उपकारो भवति तेषामेव देयेति मर्यादा । +गोरा.

(३) यदा तस्या भूमावन्यतरस्योपकारातिशयो दृश्यते तदा तस्यैव ग्रामस्य सकला भूः समर्पणीया । यथाह मनुः—सीमायामिति । ×मिता.२।१५३

(४) विवादसमाप्तेस्तेषा महानुपकारः स्यात् । मच.

गृहाद्याहरणे दण्डः

[2]गृहं तडागमारामं क्षेत्रं वा भीषया हरन् ।
शतानि पञ्च दण्डयः स्यादज्ञानाद्द्विशतो दमः ॥

(१) क्षेत्रादिप्रसङ्गादिदमुच्यते विभीषाग्रहणं हरणनिमित्तोपलक्षणार्थम् । अस्यैवैतन्निश्चितमित्येवं जानतो हरतः पञ्चशतो दण्डः । मध्यमसाहसे प्रकृते पञ्चशतग्रहण निमित्तभेदे न्यूनाधिकदण्डार्थम् । पूर्वे एनां संख्यामविवक्षिता मन्यन्ते । तेन व्यवहारं लेखयामि राज्ञा दण्डयामि चौरैर्दोषयामीति भयप्रदर्शनेन हरति [3]तस्य दण्डः, निमित्तान्तरे तु कल्प्यः । मेधा.

(२) भीषया भयोपदर्शनेन हरन् तत्सीमां लङ्घयन् । भीषयेति ज्ञानपूर्वकत्वोपलक्षणम् । मवि.

(३) अज्ञानाद् भ्रान्त्यादिना । विर.२२२

(४) स चेद्विप्रः स्याद्दण्डार्हो न वधार्हः एतदर्थम् । मच.

मार्गादिदूषणे दण्डविधिः

[4]समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि ।
स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत् ॥

राजमार्गे ग्रामनगरे रथ्यायामेध्य मूत्रपुरीषं समुत्सृजेदन्यतो वाऽऽनीय चण्डालादिर्निक्षिपेत् । अनापदि आपद्वेगेनात्यर्थमुक्तं भवति । चण्डालादेर्मूल्यं दत्वाऽपासयेत्स्वय वाऽन्यासंभवे । मेधा.

[5]आपद्गतस्तथा वृद्धो गर्भिणी बाल एव वा ।
परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः ॥

(१) आपद्गतः पूर्वोक्तः । वृद्धादयो ये बहिर्ग्रामं निर्गन्तुमशक्तास्ते गृह्यन्ते,शोणितमपि कर्तुमित्याशङ्क्यन्तेऽमेध्यमपि व्यपदेष्टं, न पुनरेवं कर्तव्यम् । पुनः करणे राजतो महान्प्रत्यवायो भवति । क्रोधगर्भमीदृशवचनं परिभाषणं तच्च शोध्यमिति राज्ञ उपदेशः । यद्युत्सृष्टारो

+ ममु. गोरावत् । × मवि , स्मृच., विर. मितावत् ।

(१) **मस्मृ.**८।२६५ मेके (मेते); **मिता.**२।१५३; **अप.** २।१५३ प्रदि (प्रवि); **स्मृच.**२३२ अपवत्; **विर.**२१६ द्या (द्या); **पमा.**३९६; **रत्न.**११५; **व्यप्र.**३६१; **व्यम.**९७ जैव (जा च) प्रदि (प्रादि); **विता.**७००; **समु.**११५ अपवत्.

(२) **मस्मृ.**८।२६४; **मिता.**२।१५५; **अप.**२।१५५; **स्मृच.**२३६ तो दमः (तं दमम्); **विर.**२२२ हरन्(वहन्); **पमा.**४०३; **रत्न.**११७; **विचि.**९९; **व्यप्र.**३६६; **व्यउ.** १०७,११७; **व्यम.**९८; **विता.**७०९; **सेतु.**१९३ शतो (गुणो); **समु.**११७ स्मृचवत्.

(१) **मस्मृ.**९।२८२, **अप.**२।१५४; **व्यक.**९८; **स्मृच.** २३५ द्वौ (द्वि) णौ (ण); **विर.**२२१; **पमा.**४०१; **रत्न.**११७; **विचि.**९८-९९; **दवि.**२९७ नापदि (लादिकम्) दथाद (दण्डयोऽ); **व्यप्र.**३६५; **व्यउ.**१०९ पदि (गपि); **व्यम.**९७; **विता.**७०६-७०७ समु (मत्वो); **सेतु.**१९२; **समु.११६.**

(२) **मस्मृ.**९।२८३ तस्तथा वृद्धो (तोऽथवा वृद्धा); **अप.** २।१५४ तच्च (न तु); **व्यक.**९८; **स्मृच.**२३५; **विर.** २२२; **पमा.**४०२ तस्तथा (तोऽथवा) ध्य (भ्य); **रत्न.**११७; **विचि.**९९; **व्यप्र.**३६५ द्धो (द्धा) वा (च); **व्यउ.**१०९ द्धो (द्धा); **विता.**७०७ वा (च); **सेतु.**१९२ गर्भि (गुर्वि) च्च (च्चा); **समु.११६.**

१ तस्यां दण्डो निमित्तान्तरानुकल्पः.

न ज्ञायन्ते तथा च रथ्या चण्डालादिभिरपासनीया । मेधा.

(२) व्याधितवृद्धगर्भिणीबाला न दण्डनीयाः किंतु ते पुनः किं कृतमिति परिभाषणीयाः । तच्चामेध्य शोधनीया इति शास्त्रमर्यादा । ममु.

याज्ञवल्क्यः

क्षेत्रसीमाविवादे सामन्तगोपकर्षकवनचारिणः चिह्नप्रदर्शनद्वारा प्रत्यायकाः

सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः ।
गोपाः सीमाकृषाणाश्च सर्वे च वनगोचराः ॥

(१) क्षेत्रादीना पृथक्त्वेनावस्थितानां सदेहापाकरणमुक्तम् । क्षेत्रादीनामेव तु सीमावादे कथ स्यादिति । उच्यते—सीम्न इति । सीम्नो मर्यादाया विवादे संशये। विवादीभूतक्षेत्रस्य सामन्ताः सर्वतः समीपक्षेत्रिणः स्थविरा गणाश्च समूहानि चातुर्वैद्यादीनि, तेषामपि हि सीमाज्ञातृत्वात् । यथाह बृहस्पतिः—'राजा क्षेत्र दत्वा चातुर्वैद्यप्रणिग्वारिकसर्वग्रामीणतन्महत्तरस्वामिपुरुषाधिष्ठितं परिच्छिन्द्यात् । शासन वा कुर्यादि'ति । अतो गणाः सीमाविवादे प्रमाणम् । किञ्च गोपाः गोपग्रहणं सर्वपशुपालोपलक्षणार्थम् । तथान्ये सीम्नः कृषाणः वृद्धहालिकाः । सर्वे च वनगोचराः व्याधशाकुनिकादयः । विश्व.२।१५४

(२) ग्रामद्वयसंबन्धिनः क्षेत्रस्य सीम्नो विवादे तथैकग्रामान्तर्वर्तिक्षेत्रमर्यादाविवादे च सामन्तादयः स्थलाङ्गारादिभिः पूर्वकृतैः सीमालक्षणैरुपलक्षिता चिह्निता सीमा नयेयुः निश्चिनुयुः । सीमा क्षेत्रादिमर्यादा । सा चतुर्विधा । जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति । सा च यथासंभवं पञ्चलक्षणा । समन्ताद्भवाः सामन्ताः । चतसृषु दिक्ष्वनन्तरग्रामादयस्ते च प्रतिसीमं व्यवस्थिताः । ग्रामादिशब्देन तत्स्थाः पुरुषा लक्ष्यन्ते । 'ग्रामः पलायित' इति यथा । सामन्तग्रहणं च तत्संसक्ताद्युपलक्षणार्थम् । स्थविरा वृद्धाः । आदिग्रहणेन मौलोद्भृतयोग्रहणम् । गोपाः गोचारकाः । सीमाकृषाणाः सीमासंनिहितक्षेत्रकर्षकाः । सर्वे च वनगोचराः वनचारिणो व्याधादयः । ×मिता.

(३) क्षेत्रस्य स्थावरस्य । *अप.

नयेयुरेते सीमानं स्थलाङ्गारतुपद्रुमैः ।
सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षिताम् ॥

(१) नृपब्राह्मणाधिष्ठिताश्च—नयेयुरित्यादि । तुषाङ्गारादीनि प्रच्छन्नचिह्नानि । निम्नस्थलद्रुमादीनि प्रकाशानि । एतैः सीमान्तं प्रणयेयुः प्रकर्षेणेद सीमान्तं चिह्नैः संपादयेयुः । स्पष्टमन्यत् । विश्व.२।१५५

(२) स्थलमुन्नतो भूप्रदेशः । अङ्गारोऽग्नेरुच्छिष्टम् । तुषा धान्यत्वचः । द्रुमा न्यग्रोधादयः । सेतुर्जलप्रवाहबन्धः । चैत्य पाषाणादिबन्धः । आदिशब्देन वेणुबालुकादीना ग्रहणम् । एतानि च प्रकाशाप्रकाशभेदेन द्विप्रकाराणि । एतैः प्रकाशाप्रकाशरूपैर्लिङ्गैः सामन्तादिप्रदर्शितैः सीमा प्रति विवदमानयोः सीमानिर्णयं कुर्याद्राजा । मिता.

(३) चैत्यः संप्रतिपन्नक्षेत्रद्वयस्वामिकल्पितो लिङ्गविशेषः । *अप

(४) चैत्यो ग्रामोपलक्षकवृक्षः । *वीमि.

सामन्तसाक्षिसंख्या, सीमाविवादे धर्मविशेषश्च

सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा ।
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः ॥

---

(१) **यास्मृ.**२।१५०; **अपु.**२५७।१ कृषाणाश्च (कर्षिणो ये); **विश्व.**२।१५४ दयः (गणाः) सीमाकृषाणाश्च (सीम्नः कृषाणोऽन्ये); **मिता.** णाश्च (णा ये); **अप.** सर्वे च (ये चान्ये); **पमा.**३९१ मितावत्; **स्मृचि.**२२ क्षेत्रस्य (क्षेत्रे स्यात्); **नृप्र.**३१; **वीमि.**; **व्यउ.**१०४; **विता.**६८७-६८८; **राकौ.**४६१; **समु.**११४.

× वीमि. मितावत् ।

* शेष मितावत् ।

(१) **यास्मृ.**२।१५१; **अपु.**२५७।२ नये (प्रणे) स्थला (स्थूला); **विश्व.**२।१५५ ते (तैः) नं (न्तं) ताम् (तम्); **मिता.**; **अप.**; **पमा.**३९१; **स्मृचि.**२२; **वीमि.** स्थला (स्थूला) ताम् (तम्); **व्यउ.**१०४ ते (तैः) ताम् (तम्); **विता.**६८८; **राकौ.**४६१ पू.; **समु.**११४.

(२) **यास्मृ.**२।१५२; **अपु.**२५७।३ द्यौ (द्य) धारि (चारि); **विश्व.**२।१५६ पि (थ); **मिता.**; **अप.** सम (समा); **व्यक.**१७१; **स्मृच.**२३१; **ममु.**८।२५६ उत्त.; **विर.**२०६ द्यौ (थ); **पमा.**३९३; **रत्न.**११३ पू.; **नृप्र.**३१; **मच.**८।२५६

(१) समा अपक्षपतिताः । समाश्च ते ग्रामाश्च समग्रामाः । वाशब्दश्चशब्दार्थे । पूर्वोक्ताः क्षेत्रसामन्तादयः समग्रामाः सामन्ताश्च । एषा मध्ये चत्वारोऽष्टौ, अथवा दश । अथवेति स्मृत्यन्तरोक्तकल्पार्थः । त्रयो द्वावेको वेति । ते च रक्तस्रग्वसनाः क्षितिधारिणो भूत्वा नयेयुः। रक्तकरवीरादिपुष्पमालिनः रक्तवाससश्च । क्षिति मृद मूर्ध्नि कुर्युः। अविशेषाभिधानेऽपि चैतद् द्विजातीनामेव। शूद्राणा तु यथाह बृहस्पतिः—'यदि शूद्रो नेता स्यात् त क्लैब्येनालङ्कारेणालङ्कृत्य शवभस्मना मुख विलिप्याग्नेयस्य पशोः शोणितेनोरसि पञ्चाङ्गुलानि कृत्वा ग्रीवायामान्त्राणि प्रतिमुच्य सव्येन पाणिना सीमालोष्ट मूर्ध्नि धारयेदिति । अत्र चाग्नेयः पशुश्छागः । रक्तकर्पटवसनादिः क्लैब्योऽलङ्कारः । स्पष्टमन्यत् । विश्व.२।१५६

(२) यदा पुनश्चिह्नानि न सन्ति विद्यमानानि वा लिङ्गालिङ्गतया संदिग्धानि तदा निर्णयोपायमाह —सामन्ता इति । सामन्ताः पूर्वोक्तलक्षणाः । समग्रामाश्चत्वारोऽष्टौ दशापि वेत्येव समसख्याः प्रत्यासन्नग्रामीणाः । रक्तस्रग्विणो रक्ताम्बरधरा मूर्ध्न्यारोपितक्षितिखण्डाः सीमान नयेयुः प्रदर्शयेयुः । सामन्ता वेति विकल्पाभिधानं स्मृत्यन्तरोक्तसाक्ष्यभिप्रायम् । तत्र च साक्षिणा निर्णेतृत्व मुख्य, तदभावे सामन्तानाम्। तदभावे तत्संसक्तादीना निर्णेतृत्वम्। सामन्ताद्यभावे मौलादयो ग्राह्याः। तेषामभावे सामन्तमौलवृद्धोपदृतादयः ।

+मिता.

(३) यत्र न सन्ति सीमनिर्णयसमर्थाः साक्षिणः, सामन्ताश्च नैव शक्नुवन्ति लिङ्गानि प्रदर्शयितु, तत्र किं कार्यमित्यपेक्षित आह—सामन्ता वेति । विवादविषयीभूतस्य ग्रामादेः समन्तात्सर्वतो वर्तमाना ग्रामाद्यो ग्रामादिस्थाः पुरुषाः सामन्तास्ते च समाः समसंख्याकाः । चत्वारोऽष्टौ दशापि वा । अनेन द्वयोः पक्षयोश्च व्यावृत्तिः ।

×अप.

साक्षिणां मृषाकरणे दण्डः । प्रमाणान्तरेणानिश्चये राजा निर्णेता।

अनृते तु पृथक् दण्ड्या राज्ञा मध्यमसाहसम्।
अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता ॥

(१) एते च सीमाप्रणेतारः—अनृते तु पृथगिति । तुशब्दो निश्चयार्थः । उक्तचिह्नव्यभिचाराच्चिह्नान्तरदर्शनाद्वा स्पष्टीकृतेऽनृतवादित्वे राज्ञा मध्यमसाहसे पञ्चकार्षापणशतान्येकैकशो दण्ड्याः। राजवचन तत्समक्ष सीमानयन यथा स्यात् । यदा प्रच्छन्नप्रकाशानि ज्ञानचिह्नानि न स्युः, तदा राजा प्रवर्तिता यदृच्छया सीमाकारक इत्यर्थः । विश्व.२।१५७

(२) यदा त्वमीषामुक्तसाक्ष्यवचसा त्रिपक्षाभ्यन्तरे रोगादि दृश्यते अथवा प्रतिवादिनिर्दिष्टाभ्यधिकसख्यागुणसाक्ष्यन्तरविरुद्धवचनता तदा ते मृषाभाषितग्रा दण्डनीयास्तदाह—अनृते त्विति । अनृते मिथ्यावादने निमित्तभूते सति सर्वे सामन्ताः प्रत्येक मध्यमसाहसेन चत्वारिंशदधिकेन पणपञ्चशतेन दण्डनीयाः । सामन्तविषयता चास्य साक्षिमौलादीना स्मृत्यन्तरे दण्डान्तरविधानादवगम्यते । 'अनृते तु पृथक् दण्ड्या' इत्येतद्दण्डविधानमज्ञानविषयम् । ज्ञानविषये साक्ष्यादीना कात्यायनेन दण्डान्तरविधानात् । एवमज्ञानादिनाऽनृतवदने साक्ष्यादीन् दण्डयित्वा पुनः सीमाविचारः प्रवर्तयितव्यः । यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि च न सन्ति तदा कथ निर्णय इत्यत आह— अभावे ज्ञातृचिह्नानामिति । ज्ञातृणा सामन्तादीना लिङ्गादीना च वृक्षादीनामभावे राजैव सीम्नः प्रवर्तिता प्रवर्तयिता । अन्तर्भावितोऽत्र ण्यर्थः । ग्रामद्वयमध्यवर्तिनीं विवादास्पदीभूतां भुवं समं प्रविभज्य अस्येय भूरस्येयमित्युभयोः समर्प्य तन्मध्ये सीमालिङ्गानि कुर्यात् ।

+मिता.

+ वीमि. मितावत् ।

× स्मृच. अपवत् ।

चतुर्थपादः; **वीमि.**; **व्यप्र.**३५६, **व्यउ.**१०५, **व्यम.**९६; **विता.**६९१ पू., ६९५; **सेतु** १८७(=)विरवत्;**समु.**११५.

+ अप., वीमि. मितावत् ।

(१) **यास्मृ.**२।१५३; **अपु.**२५७।४ वर्तिता (वर्तकः); **विश्व.**२।१५७ ज्ञातृ (ज्ञान); **मिता.**; **अप.** अपुवत् ; **पमा.** ३९५ उत्त.; **रत्न.**११५ उत्त.; **नृप्र.**३२ वर्तिता (यच्छति) उत्त.; **सवि.**४९१ पू.; **वीमि.**; **व्यप्र.**३६० पृ, ३६१ उत्त.; **व्यउ.**१०६ पू , १०७ उत्त.; **व्यम.**९७ उत्त ; **विता.** ६९९ उत्त.,**समु.**११५; **भाच.**८।२६५ चतुर्थपादः,

क्षेत्रसीमावादविधेरन्यत्र आरामादिष्वतिदेशः

आरामायतनग्रामनिपानोद्यानवेश्मसु ।
एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु ॥

(१) असत्यामप्यतद्भावाशङ्कायामस्याः स्मृतेर्न्याय-मूलता दर्शयितुमतिदेशमाह—आरामेति । आरामः पुष्प-फलोपचयहेतुर्भूभागः। आयतन निवेशनं पलालकूटाद्यर्थं विभक्तो भूप्रदेशः। ग्रामः प्रसिद्धः। ग्रामग्रहण च नगराद्यु-पलक्षणार्थम्। निपानं पानीयस्थान वापीकूपप्रभृतिकम्। उद्यानं क्रीडावनम्। वेश्म गृहम्। एतेष्वारामादिष्व-यमेव सामन्तसाक्ष्यादिलक्षणो विधिर्ज्ञातव्यः। तथा प्रव-र्षणोद्भूतजलप्रवाहेषु अनयोर्गृहयोर्मध्येन जलौघः प्रव-हति अनयोर्वेत्येवंप्रकारे विवादे आदिग्रहणात् प्रासादा-दिष्वपि प्राचीन एव विधिर्वेदितव्यः। *मिता.

(२) आयतनं देवालयः। ×अप.

(३) निपानं कूपाकृष्टपानीयोपलक्षितनिम्नभूभागः। विर.२१८

सीमाभेदादौ दण्डविधिः

मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा ।
क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः ॥

---

* वीमि. मितावत्। × शेष मितावत्।

(१) **यास्मृ.**२।१५४; **अपु** २५७।५ वहादिषु (वहेषु च), **विश्व.**२।१५८ अपुवत्; **मिता**, **अप.**; **व्यक.**९८; **विर.** २१८; **रत्न.**११४; **विचि.**९७, **नृप्र.**३२; **वीमि.**, **व्यप्र.** ३५८; **व्यउ.**१०७ वेश्मसु (कर्मसु), **विता.**६९२ उत्तरार्धं तु **कात्यायनः**; **सेतु.**१९०; **समु.**११५; **विव्य.**४७.

(२) **यास्मृ.**२।१५५; **अपु.**२५७।६ दे तु (देषु) सीमाति-क्रमणे (क्षेत्रस्य हरणे) क्षेत्र .. दण्डा (मर्यादायाश्च दण्ड्या. स्यु.), **विश्व.**२।१५९ तु सीमातिक्रमणे (च क्षेत्रस्य हरणे) उत्तरार्धे (सीमातिक्रमणे दण्डो ह्यधमोत्तममध्यमा), **मिता.** तु (च); **अप.**; **व्यक.**९७; **स्मृच.**२३६; **विर.**२२३; **पमा** ४०२ मितावत्; **रत्न.**११७; **विचि.**१०० तिक्रमणे (याः क्रामणे) (क्षेत्रस्य हरणे दण्ड्या मध्यमोत्तमसाहसम्); **नृप्र.**३२, **सवि.** ४९१ (=) तु (च) दण्डा (दण्डः); **वीमि.**; **व्यप्र.**३६५; **व्यउ.**१०७,१०९; **व्यम.**९८; **विता.**७०८ तु (च) दण्डा (दण्डया); **राकौ.**४६४, **बाल.**२।२५ उत्त.: २।१५० प्रथम-पादः; **सेतु.**१९३ (क्षेत्रस्य हरणे दण्डो मध्यमोत्तमसाहसम्); **समु.**११६.

(१) उक्तमर्यादक्षेत्रादीनां च—मर्यादाया इत्यादि। साहसदण्डा इति शेषः। मर्यादाभेदे प्रथमसाहसः सार्ध-द्विशतम्। क्षेत्रहरणे तूत्तमसाहसः साशीतिः पणसाहस्रः। सीमातिक्रमणे मध्यमः। विश्व.२।१५९

(२) सीमानिर्णयमुक्त्वा तत्प्रसगेन मर्यादाप्रभेद-नादौ दण्डमाह—मर्यादाया इति। अनेकक्षेत्रव्यवच्छे-दिका साधारणा भूमर्यादा तस्याः प्रकर्षेण भेदने, सीमातिक्रमणे सीमानमतिलङ्घ्य कर्षणे, क्षेत्रस्य च भयादिप्रदर्शनेन हरणे, यथाक्रमेण अधमोत्तममध्यम-साहसा दण्डा वेदितव्याः। क्षेत्रग्रहणं चात्र गृहारामा-द्युपलक्षणार्थम्। यदा पुनः स्वीयभ्रान्त्या क्षेत्रादिक-मपहरति तदा द्विशतो दमो वेदितव्यः। *मिता.

परक्षेत्रानपहरणापवादः

न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः ।
परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः ॥

(१) सर्वथा च परक्षेत्राद्यनपहरणप्रासादाह—न निषे-ध्य इति। स्वात उदकप्रवाहस्य प्रवृत्तस्य मार्गान्तरप्रव-र्तन सेतुः। कुल्येत्यर्थः। क्षेत्रमध्येन क्षेत्रान्तरप्रसेचना-यानीयमानो यद्यल्पोपघातः कृत्स्नस्य निष्पत्तित्वाद्बहुल्याच कल्याणकारकः, ततः क्षेत्रस्वामिना न निवारणीयः। तथा चैतदागोपालं प्रसिद्धमेव—'परभूमिं हरेत् कूपः स्वल्पक्षेत्रो बहुदकः' इति। स्वल्पक्षेत्रमध्येन क्षेत्रान्तर-प्रसेचनार्थं नीयमानाभिः कुल्याभिः परकीया भूमि हरेत् कूप इति। अतः प्रवादादिदमवगच्छामः सेतुर्न प्रतिषेध्य इति। यद्वास्यान्योऽर्थः। यस्य क्षेत्रे स्वल्प-दोषो बहूदकः खन्यमानः कूपः स्यात्, तस्यासौ खन्य-मानो राजोपकारकत्वेन क्षेत्रस्वामिनो भूमिं हरेदिति। विश्व.२।१६०

---

* अप., वीमि. मितावत्।

(१) **यास्मृ.**२।१५६; **अपु.**२५७।७; **विश्व.**२।१६० हरन् (हरेत्); **मिता.**; **अप.**; **व्यक.**९९; **स्मृच.**२३७ हरन् (परिहरन्); **विर.**२२४; **पमा.**४०५; **रत्न.**११८; **सवि.** ३३९-३४० षेध्यो (षिद्धो) सेतु (श्च) (परभूमौ हरेत्कूपं स्वल्पक्षेत्रे बहूदकम्); **चन्द्र.**६४ सेतु (श्वेत); **वीमि.** षेध्यो (षेधो); **व्यप्र.**३६६; **व्यउ.**११० पृ., १११ उत्त.; **व्यम.**९८ त्रो (त्रे) शेष विश्ववत्; **विता.**७१०; **राकौ.** ४६४; **समु.**११७.

(२) यः पुनः परक्षेत्रे सेतुकूपादिकं प्रार्थनयाऽर्थदानेन वा लब्धानुज्ञो निर्मातुमिच्छति तन्निषेधतः क्षेत्रस्वामिन एव दण्ड इत्याह—न निषेध्य इति। परकीया भूमिमपहरन् नाशयन्नपि सेतुर्जलप्रवाहबन्धः क्षेत्रस्वामिना न प्रतिषेध्यः, स चेदीषत्पीडाकरो बहूपकारकश्च भवति। कूपश्चाल्पक्षेत्रव्यापित्वेनाल्पबाधो बहूदकत्वेन कल्याणकारकश्चातो बहूदको नैव निवारणीयः। कूपग्रहणं च वापीपुष्करिण्याद्युपलक्षणार्थम्। यदा पुनरसौ सर्वक्षेत्रवर्तितया बहुबाधो नद्यादिसमीपक्षेत्रवर्तितया वाल्पोपकारकस्तदाऽसौ निषेध्य इत्यर्थादुक्तं भवति। +मिता.

उक्तापहारः स्वामिनिवेदनपूर्वक एव युक्तः

स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्तयेत्।
उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः॥

(१) एवञ्च सति क्षेत्रस्वाम्यननुज्ञयापि सेतुप्रवृत्तिप्रसक्तावाह—स्वामिन इति। विश्व.२।१६१

(२) क्षेत्रस्वामिनं प्रत्युपदिष्टमिदानीं सेतोः प्रवर्तयितारं प्रत्याह—स्वामिन इति। क्षेत्रस्वामिनमनभ्युपगम्य, तदभावे राजानं वा, यः परक्षेत्रे सेतु प्रवर्तयत्यसौ फलभाङ् न भवत्यपि तु तदुत्पन्ने फले क्षेत्रस्वामिनो भोगस्तदभावे राज्ञः। तस्मात्प्रार्थनया अर्थदानेन वा क्षेत्रस्वामिनं तदभावे राजानं वाऽनुज्ञाप्यैव परक्षेत्रे सेतुः प्रवर्तनीय इति तात्पर्यार्थः। ×मिता.

(३) स तस्य फलोपभोग दृष्टमदृष्ट वा न लभते। अप.

(४) तस्य सति संभवे क्षेत्रस्वामिन तदभावे राजान वाऽनुज्ञाप्यैव परेण परक्षेत्रे सेत्वादिः प्रवर्तनीय इत्यत्र तात्पर्यम्। न पुनरनिवेदने सेत्वादिवशादुत्पन्नपरक्षेत्रफलनिरूपणे वचनवैयर्थ्यप्रसङ्गात्। न हि सेत्वादिप्रवर्तनमात्रेण परः परक्षेत्रफलभोक्तृता प्रतिपद्यते। येन तन्निवारणार्थं वचनमर्थवद्भवेत्। केचित्तु सेत्वादिनिर्माणोत्पन्नदृष्टादृष्टफलभोक्तृनिरूपणार्थं वचनमेतदिति वदन्ति। यदत्र युक्तं तद्ग्राह्यम्। एवमेवानिवेद्य जीर्णोद्धारे कृतेऽपि बोद्धव्यम्। स्मृच.२३७

कर्षकेणाङ्गीकृतक्षेत्रकरणत्यागे विधिः

फालाहृतमपि क्षेत्रं यो न कुर्यान्न कारयेत्।
स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत्॥

(१) यत्तु स्वामिनार्पितं क्षेत्र कर्षको हलाङ्कितं कृत्वा क्रोधादिना न कुर्यात्। न कारयेद्वा। तत्र कथमित्यपेक्षित आह—फालाहतमिति। विश्व.२।१६२

(२) क्षेत्रस्वामिना सेतुर्न प्रतिषेध्य इत्युक्तमिदानीं तस्यैव प्रसक्तानुप्रसक्त्या क्वचिद्विध्यन्तरमाह—फालाहतमिति। यः पुनः क्षेत्रस्वामिपार्श्वे अहमिदं क्षेत्रं कृषामीति अङ्गीकृत्य पश्चादुत्सृजति न चान्येन कर्षयति तच्च क्षेत्र यद्यपि फालाहत ईषद्धलेन विदारितं न सम्यग्बीजवापार्हं तथापि तस्य कृष्टस्य फल यावत्तत्रोत्पत्स्यर्हं सामन्तादिकल्पितं तावदसौ कर्षको दापनीयः। तच्च क्षेत्रं पूर्वकर्षकादाच्छिद्यान्येन कारयेत्। +मिता.

(३) शदः क्षेत्रस्य फल, अकृष्टस्य क्षेत्रस्य शदोऽकृष्टशदः। अकृष्टेऽपि क्षेत्रे तं प्रदाप्य क्षेत्रमन्यस्यार्पयेदित्यर्थः। ×अप.

+ अप., वीमि. मितावत्। × वीमि. मितावत्।

(१) **यास्मृ.**२।१५७; **अपु.**२५७।८ वर्त (कल्प), **विश्व.** २।१६१ अपुवत्; **मिता.**; **अप.** योऽनि (ऽविनि); **व्यक.** ९९; **स्मृच.**२३७; **विर.**२२४ स्वामिने (स्वामिनो); **पमा.** ४०६; **रत्न.**११८; **विचि.**१०० मिने योऽ (मिनो ह्य); **नृप्र.** ३२; **सवि.**३४० मिने (मिनो) वर्त (कल्प) उत्प...भोग (तस्स्वामिनो भोगलाभ); **चन्द्र.**६४ मिने (मिनो) येत् (ते); **वीमि.**; **व्यप्र.**३६७; **व्यउ.**१०७ यो (वा): १११; **व्यम.** ९८; **विता.**७१०; **राकौ.**४६५; **सेतु.**१२४ विरवत्; **समु.**११७.

+ वीमि. मितावत्। × स्मृच., विर. अपवत्।

(१) **यास्मृ.**२।१५८; **अपु.**२५७।९ प्यः कृष्ट (प्योऽकृष्ट); **विश्व.**२।१६२ स...फल (त प्रदाप्याकृष्टशद); **मिता.** यो न कुर्यात्(न कुर्याद्यो); **अप.** विश्ववत्; **व्यक.**९९ विश्ववत्; **स्मृच.** २३८ विश्ववत्; **विर.**२२८-२२९ प्यः कृष्टफलं (प्योऽकृष्टसदं); **पमा.**४०७ मितावत्; **रत्न.**११८; **दीक.**४७ विरवत्, हलाहतमिति क्वचित्पाठः; **नृप्र.**३२; **सवि.**३४१; **चन्द्र.**६६ स...फलं (त प्रदाप्याकृष्टदम); **वीमि.**; **व्यप्र.**३६८ स प्रदाप्यः (तं प्रदाप्या); **व्यउ.**१०७ फालाहृत (फलाहित) यो न कुर्यात् (न कुर्याद्यो) स...कृष्ट (सप्रदाप्यः कृषि); **विता.**७१४; **राकौ.**४६५; **समु.**११७.

नारदः

क्षेत्रजविवादनिरुक्तिः

[1]सेतुकेदारमर्यादाविकृष्टाकृष्टनिश्चयः ।
क्षेत्राधिकारो यत्र स्याद्विवादः क्षेत्रजस्तु सः ॥

(१) अस्यार्थः—सेतुकेदारादिमर्यादादूरत्वसंनिहितत्वनिश्चये कर्तव्ये क्षेत्रविषयो विवादोऽसौ क्षेत्रज उच्यते इति । व्यक.१७०

(२) सेतुः जलप्रवाहबन्धः । केदारः क्षुद्रसेतुभिः कल्पितो देशः क्षेत्रमात्रं वा । मर्यादा क्षेत्रादिसीमा । विकृष्टो लाङ्गलादिनोद्भेदितो देशः । अकृष्टः खिलो देशः । तेषा निश्चयाः क्षेत्राधिकाराः क्षेत्रविषया यत्र भवेयुः स क्षेत्रजो विवाद इत्यर्थः । स्मृच.५

(३) केदारमर्यादा केदारसीमा, विकृष्ट खिल सदुत्कृष्ट, अकृष्टं प्रहत सदकृष्टम् । विर.२०१

(४) तत्र मन्वाद्युक्तसीमाशब्दस्योपलक्षणत्वमभिप्रेत्य। क्षेत्रजो विवादपद इत्युदितश्च । रत्न.१११

पञ्चविधा सीमा

[2]ध्वजिनी मत्स्यिनी चैव नैधानी भयवर्जिता ।
राजशासननीता च सीमा पञ्चविधा स्मृता ॥

ध्वजिनी वृक्षादिलक्षिता । वृक्षादीना प्रकाशत्वेन ध्वजतुल्यत्वात् । मत्स्यिनी सलिलवती। मत्स्यशब्दस्य स्वाधारजललक्षकत्वात् । नैधानी निखाततुषाङ्गारादिमती। तेषा निखातत्वेन निधानतुल्यत्वात् । भयवर्जिता अर्थिप्रत्यर्थिपरस्परसंप्रतिपत्तिनिर्मिता । राजशासननीता ज्ञातृचिह्नाभावे राजेच्छया निर्मिता । *मिता.२।१५१

* अप., स्मृच., विर., रत्न., व्यप्र., मितावत् ।

(१) **नासं**.१२।१ यः (याः) रो (रा) स्यात् (स्युः) तु सः (स तु); **नास्मृ**.१४।१ यः (ये) यत्र (यस्तु), **अपु**. २५३।२१ यः (याः) रो (रा) स्यात् (स्युः), **व्यक**.१७० य. (ये); **स्मृच**.५ तु सः (स्मृत·) शेष नासंवत्; **विर**.२०१ श्रयः (र्णयः); **रत्न**.१११; **व्यप्र** ३५३; **व्यउ**.१०३, **विता**. ६८३; **समु**.११३ स्मृचवत्.

(२) **मस्मृ**.८।२६५ इत्यत्र प्रक्षिप्तश्लोकोऽयम्; **मिता**.२। १५१; **अप**.२।१५१; **व्यक**.९६ मत्स्यिनी (सधिनी); **स्मृच**. ५; **विर**.२१४; **पमा**.३८५; **रत्न**.११२ पृ; **स्मृचि**.२२ पञ्च (पर्व); **नृप्र**.३१; **व्यप्र**.३५४; **व्यउ**.१०३; **विता**. ६८४; **राकौ**.४६१; **समु**.११३.

प्रकाशाप्रकाशलिङ्गसाक्षिसामन्तकर्षकगोपादिभिः सीमानिर्णयः

[3]प्रकाशैरप्रकाशैश्च लिङ्गैस्सीमां नयेन्नृपः ।
अर्थिप्रत्यर्थिनोर्यत्र साक्ष्यादिप्रत्ययैर्नयेत् ॥

प्रकाशैर्न्यग्रोधाश्वत्थकिंशुकादिवृक्षलतातृणगुल्मसेतुवल्मीककुल्यादिभिर्लिङ्गैः अप्रकाशैः करीषास्थ्यङ्गारशर्कराभिः भूमौ गूढ निक्षिप्तैर्लिङ्गैः । सवि.३३२

[4]क्षेत्रसीमाविरोधे तु सामन्तेभ्यो विनिश्चयः ।
नगरग्रामगणिनो ये च वृद्धतमा नराः ॥

सीमालिङ्गजा इति शेषः । स्मृच.२३०

[5]ग्रामसीमासु च बहिर्ये स्युस्तत्कृषिजीविनः ।
गोपाः शाकुनिका व्याधा ये चान्ये वनगोचराः ॥

एव सामन्तायुद्धृतपर्यन्तेष्वप्युत्कृष्टाना अभावे निकृष्टानामनुयोजनमप्यूह्यम् । अनुयोजन सत्यानृतजन्यपुण्यपापप्रतिपादकमन्वादिवचनैर्यथार्थकथनपरान् कृत्वा प्रस्तुतार्थप्रश्नकरणम् । तानि च वचनानि साक्ष्यनुयोजनविधिप्रकरणोक्तान्यनुसधेयानि । साक्षिप्रश्नविधिप्रकरणोक्तशपथैः शापिता एव सामन्तादयो विनिर्णय ब्रूयुः । स्मृच.२३० २३१

[6]समुन्नयेयुस्ते सीमां लक्षणैरुपलक्षिताम् ।
तुषाङ्गारकपालैश्च कूपैरायतनैर्द्रुमैः ॥

तानि लक्षाणान्युच्यन्ते—तुषाश्चाङ्गाराश्च कपालानि च । तेषा कुम्भास्तुषादिभिः पूर्णाः कुम्भाः सधिषु पूर्वैर्निहिताः तैरभिज्ञानैः, इह तुषाः, इहाङ्गाराः, अस्मिन् प्रदेशे कपालानीत्येव प्रतिज्ञाय पूर्व तथा दर्शयन्तो

(१) **सवि**.३३२.

(२) **नास**.१२।२; **नास्मृ**.१४।२ रोधे तु (वादेषु); **अप**. २।१५१ नारदवत्, **व्यक**.१७२; **स्मृच**.२३० उत्त.; **विर**. २०८; **सवि**.३३४ द्रुतमा (द्रोधता) रा (रः) उत्त.; **व्यप्र**, ३५७ उत्त.; **समु**.११४ उत्त.

(३) **नासं** १२।३ पा. (प)का (क); **नास्मृ**.१४।३ गोचराः (जीविनः) शेष नासवत्; **अप**.२।१५१ पृ.; **व्यक**.१७२; **स्मृच**.२३०; **विर**.२०९, **पमा**.३९१ स्युस्तत् (च स्युः); **रत्न**. ११३, **व्यप्र**.३५८, **विता** ६९२ स्तत् (स्तु); **समु**.११४.

(४) **नासं**.१२।४ लैश्च (लानां) कूपै (कुम्मै); **नास्मृ**. १४।४; **व्यक**.१७२ ते सीमा (सीमानं) लैश्च (लाश्चि); **विर**. २१० व्यकवत्; **समु**.११४ पूर्वार्धे (सीमाया निर्णय कुर्युर्ग्रामयोरुभयोरपि).

नयेयुः । आयतनैर्दुमैश्च प्रतिज्ञातैः इह देवकुलमासीद् इह वृक्ष इति । नाभा.१२।४

[1]अभिज्ञानैश्च वल्मीकैः स्थलनिम्नोन्नतादिभिः ।
केदारारामसमार्गैश्च पुराणैः सेतुभिस्तथा ॥

अभिज्ञानैश्च यैरभिज्ञायते सीमा तैर्वल्मीकादिभिः, इह वल्मीक आसीत्, इह स्थलम्, इह निम्नम्, इह गर्तम्, इहोन्नतः प्रदेशः, एते सधिष्ठवासन्नाः, तेषा चैतानि लिङ्गानि इति । तथा केदारैश्च इह केदारा आसन् अमुष्य ग्रामस्य, तेषामेते आभासा इति । मार्गैश्च अयमत्र मार्ग आसीद् ग्रामकाल इति । पुराणैश्च सेतुभिः इह सेतुरासीदमुष्य ग्रामस्य, तस्यैतच्चिह्नमिति । एतैर्नयेयुः । तथा मुनीत भवति । नाभा.१२।५

[2]निम्नगापहृतोत्सृष्टनष्टचिह्नासु भूमिषु ।
तत्प्रदेशानुमानैश्च प्रमाणैर्भोगदर्शनैः ॥

निम्नगया नद्या अपहृतेनापहरणेनोत्सृष्टानि स्वस्थानात्प्रच्युतानि नष्टानि वा लिङ्गानि यासु मर्यादाभूमिषु तत्र तत्प्रदेशानुमानादुत्सृष्टनष्टचिह्नाना प्राचीनप्रदेशानुमानात् ग्रामादारभ्य सहस्रदण्डपरिमितं क्षेत्रमस्य ग्रामस्य पश्चिमे भागे इत्येवविधात्प्रमाणाद्वा प्रत्यर्थिसमक्षमविप्रतिपन्नाया अस्मार्तकालोपलक्षितभुक्तेर्वा निश्चिनुयुः । मिता.२।१५२

[3]नैकः समुन्नयेत्सीमां नरः प्रत्ययवानपि ।
गुरुत्वादस्य कार्यस्य क्रियैषा बहुषु स्थिता ॥

(१) एकस्य निषेधः स उभयानुमतधर्मविद्यतिरिक्तविषय इत्यविरोधः । मिता.२।१५२

(२) एको न सीमा नयेत्, प्रत्ययितोऽपि । यतो बहुष्वेषा सीमापरिच्छेदक्रिया स्मृता । सम्यक् क्रिया चैव भवति । दण्डवृद्धिस्त्वन्यथाकरणे । बहुभिः कर्तव्यत्वे हेतुमाह—गुरुत्वादस्य धर्मस्येति । 'सर्वं भूम्यनृते हन्ती'त्यादिना अन्यथा प्रमादात् करणे प्रत्यवायबहुत्वाद् बहुभिः कृताया सुकृत भवतीति । नाभा.१२।९

[4]एकश्चेदुन्नयेत् सीमां सोपवासः समुन्नयेत् ।
रक्तमाल्याम्बरधरः क्षितिमारोप्य मूर्धनि ॥

मृषोक्तौ दण्डविधिः

[5]अथ चेदनृतं ब्रूयुः सामन्ताः सीमनिर्णये ।
सर्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाहसम् ॥
[6]सामन्तात्परतो ये स्युस्तत्संसक्ता मृषोदितैः ।
संसक्तसक्तसक्तास्तु विनेयाः पूर्वसाहसम् ॥
[7]शेषाश्चेदनृतं ब्रूयुर्नियुक्ता भूमिकर्मणि ।
प्रत्येकं तु जघन्यास्ते विनेयाः पूर्वसाहसम् ॥

तत्संसक्तादिवनगोचरान्ताना अनृतवादित्वे तु नारद आह—शेषाश्चेदिति । शेषाः सामन्तेभ्योऽवशिष्टास्तत्संसक्तास्तेभ्यो जघन्याः ससक्तसंसक्ताः ।

स्मृच.२३३

---

(१) **नासं.**१२।५ कैः (क) राम (गार), **नास्मृ** १४।५ नै (तै) कैः (क); **व्यक** १७२ मार्गै (सार्द्धै); **विर.**२१०

(२) **नासं.**१२।६ नैश्च (नाच्च), **नास्मृ.**१४।६ नासवत्; **मिता.**२।१५२ नैश्च (नाच्च) गैर्भो (णाद्भो) नै. (नात्); **अप.** २।१५१ स्तृ (न्मृ); **व्यक.**१७१, **विर.**२०५, **पमा.**३०४ मितावत्; **रत्न.**११२, **नृप्र.**३१; **व्यप्र** ३५५, **व्यउ.**१०६; **समु.**११५ मितावत्, बृहस्पति..

(३) **नासं.**१२।९ कार्य (धर्मै) स्थि (स्तृ); **नास्मृ** १४।९; **मिता.**२।१५२; **अप.**२।१५२; **व्यक.**१७३; **स्मृच.**२३१; **विर.**२११; **पमा.**३९४, **रत्न.**११४; **विचि.**९४, **स्मृचि.** २३; **नृप्र.**३१, **राकौ.**४६३ मनुः; **सवि** ३३५, **व्यप्र.** ३५९; **व्यम.**९६; **विता.**६९६; **सेतु.**१८८; **समु.**११५.

(१) **नासं.**१२।१०, **नास्मृ.**१४।१० सः समुन्नयेत् (साः समाहितः); **मिता.**२।१५२ क्षितिमारोप्य (भूमिमादाय); **अप.**२।१५२ पृ; **व्यक** १७३; **विर** २२१; **विचि.**९४; **स्मृचि.**२३ श्वेदुन्न (श्वैव न); **रत्न.**११४, **नृप्र.**३१ मितावत्; **व्यप्र.**३५९ मितावत्, **व्यउ.**१०६ उत्त.; **विता.**६९६ मितावत्, **सेतु.**१८८.

(२) **नासं.**१२।७ सीम (तद्धि); **नास्मृ.**१४।७ सीमनिर्णये (तद्धिनिश्चये); **मिता.**२।१५३; **स्मृच.**२३३; **पमा.** ३९७, **रत्न.**११४, **नृप्र.**३२; **व्यप्र.**३६०; **व्यउ.**१०६; **व्यम.**९७; **विता.**६९८; **राकौ.**४६४ (=) सम् (साः); **समु.**११५.

(३) **पमा.**३९७, **समु.**११५.

(४) **मिता.**२।१५३; **अप.**१।१५३ उत्तरार्धे (जघन्यास्तेऽपि प्रत्येकं विनेयाः पूर्वसाहसम्); **व्यक.**१७३ अपवत्; **स्मृच.** २३३, **विर.**२१२ अपवत्; **रत्न.**११५, **सवि.**४९१ याज्ञवल्क्यः; **व्यप्र.**३६०, **व्यउ.**१०६; **विता.**६९८; **समु.**११५.

[1]मौलवृद्धादयस्त्वन्ये दण्डनीयाः पृथक् पृथक्।
विनेयाः प्रथमेनैव साहसेनानृते स्थिताः ॥

(१) आदिशब्देन गोपशाकुनिकव्याधवनगोचराणा ग्रहणम्। यद्यपि शाकुनिकादीना पापरतत्वाल्लिङ्गप्रदर्शन एवोपयोगो न साक्षात्सीमानिर्णये तथापि लिङ्गदर्शन एव मृषाभाषित्वसभवाद्दण्डविधानमुपपद्यत एव। मिता.२।१५३

(२) गणवृद्धादय इत्यत्रादिशब्देन ग्रामनगरमौलवृद्धोद्धृतसीमाकर्षकवनगोचराः सगृहीताः। स्मृच.२३३

इतरप्रमाणाभावे राज्ञा निर्णेता

[2]यदा तु न स्युर्ज्ञातारः सीमाया न च लक्षणम्।
तदा राजा द्वयोः सीमामुन्नयेदिष्टतः स्वयम् ॥

इष्टतः इच्छात इत्यर्थः। स्मृच.२३२

क्षेत्रसीमावादस्य गृहोद्यानादावतिदेशः

[3]अनेनैव गृहोद्याननिपानायतनादिषु।
विवादविधिराख्यातस्तथा ग्रामान्तरेषु च ॥

एतेनैव विधिनाख्यातो देवकुलगृहोद्याननिपानमार्गगोप्रचाराद्यवधेः परिच्छेदो विवादे।

नाभा.१२।१२

सीमावृक्षजे स्वामित्वविधिः

[3]सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः।
फलपुष्पं च सामान्यं क्षेत्रस्वामिषु निर्दिशेत् ॥
[4]अन्यक्षेत्रोपजातानां शाखास्वन्यत्र संस्थिताः।
स्वामिनस्ता विजानीयादन्यक्षेत्रविनिर्गताः ॥

मार्गरोधनिषेधः

[3]अवस्करस्थलश्वभ्रभ्रमस्यन्दनिकादिभिः।
चतुष्पथसुरस्थानरथ्यामार्गान्न रोधयेत् ॥

अवस्करो विष्ठागृहादिशोधनार्थं पाशुनिचय इति हरिहरादयः, स्थलं वेदिका, श्वभ्रो गर्त्तः, भ्रमो जलनिर्गममार्गः, स्यन्दनिका पटलप्रान्तः। आदिशब्देनान्यदपि तादृशम्। रथ्यामार्गो राजमार्गः, रथ्या चत्वर इति कल्पतरुः। विर.२२०

[5]रोधयन्ति तु ये मोहाद्बलाद्वाऽपि कथंचन।
दण्डयेत्तान्दशान् राजा साहसेनोत्तमेन च ॥

सेतुतडागादिविधिः

[6]सेतुस्तु द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च।
तोयप्रवर्तनात्खेयो बन्ध्यः स्यात्तन्निवर्तनात् ॥

---

(१) **नारं**.१२।८ मौल (गणि) नीयाः(गत्या) नैव (न स्युः); **नास्मृ**.१४।८ मौल (गण) ण्डनीयाः (ण्ड दाप्याः) नैव (न स्युः); **मिता**.२।१५३ नीयाः (गत्या); **अप** २।१५३ मौल (गण) स्थिता. (तथा); **व्यक**.१७३ मौल (गण) ण्डनीयाः (ण्ड दद्यु); **स्मृच**.२३३ मौल (गण), **विर** २१२ मौल (गण) न्ये (यें) ण्डनीयाः (ण्ड दद्यु); **पमा** ३९७ ण्डनीयाः (ण्ड दाप्याः) नानृते (न व्यव); **सवि**.४९१ मौल (मौन) नीयाः (गत्या) याज्ञवल्क्यः, **व्यप्र**.३६० स्त्व (श्वा,, **व्यउ**.१०६ मितावत्; **विता**.६९८; **समु**.११५ मितावत्.

(२) **नास**.१२।११ तु (त्र) त्रये (ढ्रे); **नास्मृ**.१४।११ दा तु (दि च) या न च (याश्च न); **अप**.२।१५३ तु (च); **स्मृच**.२३२; **विर** २१६ या (या); **पमा** ३९५ या न च (याश्च न); **रत्न**.११५; **विचि**.९५-९६ या (या); **स्मृचि**.२३; **नृप्र**.३२; **वीमि**.२।१५३ या (यां) मुन्नयेदिष्टतः (न्नयेद्दृष्ट्वा च तत्); **व्यप्र** ३६१ तु (च); **विता** ७०० इष्टतः (च्छया); **सेतु**.१८९ न स्युः (स्युर्न) इष्टतः (च्छया); **समु**.११५.

(३) **नास**.१२।१२; **नास्मृ**.१४।१२ अने (एते).

(१) **नास्मृ**.१४।१३. (२) **नास्मृ**.१४।१४.

(३) **नास**.१२।१३ भ्रम (मार्ग) रोध (दृप); **नास्मृ**.१४।१५; **व्यक**.९८ गोत्र (गौ न); **स्मृच**.२३५ रथ्या (राज) उत्त.; **विर**.२२० गोत्र (गौ न); **पमा**.४०१ स्मृचवत्; **रत्न**.११७, **सवि**.३३९ रथ्या (राज) गोत्र (गौ न) उत्त.; **व्यप्र**.३६४ स्मृचवत्; **व्यउ**.१०८ स्मृचवत्; **व्यम**.९७ स्मृचवत्; **विता**.७०५ स्मृचवत्; **सेतु**.१९१ थसुर (थेष्वव); **समु**.११६.

(४) **नास्मृ** १४।१६.

(५) **नास**.१२।१५ खेयो बन्ध्य (खन्यो वध्य) (तोयप्रवर्तने खन्यो वध्यः स्याद् विनिवर्तने); **नास्मृ**.१४।१८ धो ज्ञेयः (ध. प्रोक्तः), **मिता**.२।१५६ स्तु(श्र); **अप**.२।१५७ बन्ध्य(बध्य) त्तन्नि (द्विनि); **व्यक**.९९ त्तन्नि (द्विनि); **स्मृच**.२३७ खेयो (खन्यो) शेष व्यकवत्; **विर**.२२६ धो शेयः (धः प्रोक्तः) त्तन्नि (द्विनि) परिवर्तनादित्यपि पाठः; **पमा**.४०६; **रत्न**.११८; **नृप्र**.३२ स्तु (श्र) बन्ध्य (बध्य); **व्यउ**.१०७; **स्तु** (श्र) र्तनाख्ये (र्तिनः खे); **विता**.७११; **राकौ**.४६४ स्तु (श्र) खेयो बन्ध्यः (क्षेपो बन्धः) शेष नास्मृवत्; **सेतु**.३२३ स्तु (श्र) धो ज्ञेयः (धः प्रोक्तः) स्यात्तन्नि (तोयाप्र); **समु**.११७ खेयो (खन्यो) बन्ध्य (बन्ध).

क्षेत्रस्थिताधिकोदकनिर्गमनार्थं खात्वा यः क्रियते सेतुः स खन्यः। आगतोदकधारणार्थं मृदादिभिर्यत्र जलप्रवाहो बध्यते स सेतुर्बन्ध्य इत्यर्थः।

स्मृच.२३७

नैान्तरेणोदकं सस्यं नाशश्चात्युदके सति।
य एवानुदके दोषः स एवात्युदके भवेत्॥

उदकेन विना सस्य नास्ति। अत्युदकेन च नाशः तस्यस्य। अतोऽनुदकात्युदकयोस्तुल्यो दोषः। अनुदके ऽनारम्भादल्पः क्षयः। अत्युदके प्रयासभूयस्त्वम्। तस्मात् सेतुस्तथा कार्यो यथोभय न भवति।

नाभा.१२।१६

परैक्षेत्रस्य मध्ये तु सेतुर्न प्रतिषिध्यते।
महागुणोऽल्पबाधश्चेद् वृद्धिरिष्टा क्षये सति॥

अस्यार्थः—अन्यक्षेत्रे अन्येन क्रियमाणः सेतुर्यदि बहूपकारकरः क्षेत्रस्वामिनश्चाल्पबाधाकरस्तदा नासौ निवर्त्यः। यतोऽल्पोपक्षये सत्यपि वृद्धिः शस्याद्युपचय-लक्षणा सर्वस्येष्टा भवति। +व्यक.९८

पूर्वैप्रवृत्तमुत्सन्नमपृष्ट्वा स्वामिनं तु यः।
सेतुं प्रवर्तयेत्कश्चिन्न स तत्फलभाग्भवेत्॥

+ स्मृच., विर. व्यक्तवत्।

(१) **नासं.**१२।१६ शश्वा (शोऽप्य) के सति (केन तु) (यावाननुदके दोषस्तावानत्युदके स्मृतः), **नास्मृ.**१४।१९ नाश-श्चात्युदके सति (नश्येदभ्युदकेन तु) त्यु (भ्यु) भवेत् (स्मृतः), **अप.**२।१५७; **व्यक.**९९; **स्मृच.**२३७ नुद (त्युद) वात्यु (वानु), **विर.**२२६ सति (भवेत्), **रत्न.**११८; **विता.**७११ विरवत्; **बाल.**२।१५६; **समु.**११७.

(२) **नासं.**१२।१४ बाध (दोष); **नास्मृ.**१४।१७ श्वेद् (श्व); **व्यक.**९८; **स्मृच.**२३७ नासवत्, **विर.**२२४; **पमा.** ४०५ पिध्य (बध्य); **रत्न.**११८, **विचि.**१००, **सवि.**३३९; **व्यप्र.**३६७ नासवत्; **व्यम.**९८ नासवत्, **विता.**७१० सेतुः (कूपो) बाध (दोष); **सेतु.**३२३; **समु.**११७.

(३) **नासं.**१२।१७, **नास्मृ.**१४।२० वृत्त (वर्त); **मिता.** २।१५६; **अप.**२।१५७; **व्यक.**९८; **स्मृच.**२३७; **विर.** २२५ त्स (च्छि) वर्त (कल्प); **पमा.**४०६; **रत्न.**११८; **सवि.**३४० वर्त (कल्प); **व्यप्र.**३६७, **व्यउ.**१०७; **व्यम.** ९८ स्कश्चित् (घस्तु); **विता.**७११ व्यमवत्; **राकौ.**४६४ त्स (च्छि); **समु.**११७ त्स (त्प).

मृते तु स्वामिनि पुनस्तद्वंश्ये वाऽपि मानवे।
राजानमामन्त्र्य ततः कुर्यात्सेतुप्रवर्तनम्॥

(१) यदा त्वन्यनिर्मितं सेतुं भेदनादिना नष्टं स्वयं संस्करोति तदा पूर्वस्वामिन तद्वंश्यं नृपं वा पृष्ट्वैव संस्कुर्यात्। यथाह—पूर्वेति। मिता.२।१५६

(२) पुराणसेतुमुत्सृष्ट भिन्नं वा स्वामिनम (न) नुज्ञाप्य यः संस्कुर्यात्, न तस्य तत्फल भवति। पूर्वस्वामिन एव। यदि धर्मार्थं कुर्यात्, न तु फलार्थम्॥ पूर्वसेतुमुत्सन्न दृष्टार्थ यदि कश्चिच्चिकीर्षति, स स्वामिन पृष्ट्वा, मृते वा तस्मिंस्तद्वंश्यं पुत्रादिं, तदभावे राजा-नमनुज्ञाप्य कुर्यात्। ततस्तत्फलभाक् स्यात्।

नाभा.१२।१७–१८

अतोऽन्यथा क्लेशभाक् स्यान्मृगव्याधानुदर्शनात्।
इषवस्तस्य नश्यन्ति यो विद्धमनुविध्यति॥

(१) अवमर्शनं निदर्शनम्। स्मृच.२३७

(२) अतोऽन्यथानुज्ञाप्य कुर्वतः क्लेशमात्र फलम्। मृगव्याधदृष्टान्तेन। यः पूर्वमन्येन विद्ध पश्चाद् विध्यति, इषवस्तस्य नश्यन्ति श्रमश्च व्यर्थः, तथा व्यर्थ बन्धन श्रमश्चार्थहानिश्च। अतो नैवं कर्तव्यम्। अत एव गम्यते न दण्ड्य इति। नाभा.१२।१९

धर्मार्थं कारितो येन तडागः सीमयोर्द्वयोः।
तन्मृत्तिकानुसारेण अंशो देयस्तयोर्द्वयोः॥
ग्रामे ससीम्नि विक्रीते सजले सपथेऽपि वा।
पौरोहित्यं ग्रामदेवो द्वयोर्नांशो न जायते॥

(१) **नासं.**१२।१८ तु (वा) वा (चा) कु.. नम् (प्रकुर्यात्सेतु-कर्म तत्), **नास्मृ.**१४।२१ द्वश्ये (हाश्ये) उत्तरार्ध नासवत्; **मिता.**२।१५६; **अप.**२।१५७ वा (चा); **व्यक.**९९; **स्मृच.** २३७ वा (चा); **विर.**२२५, **पमा.**४०६ उत्तरार्ध नासवत्; **रत्न.**११८, **सवि.**३४० तु (ऽपि) वा (चा) **याज्ञवल्क्यः**; **व्यप्र.**३६७; **व्यउ.**१०७ वा (चा) वे (वः) (राजानमथवा-मन्त्र्य कुर्यात्सेतुप्रवर्तनम्); **विता.**७११; **समु.११७** वा (चा).

(२) **नासं.**१२।१९ धानु (धनि); **नास्मृ.**१४।२२; **अप.**२।१५७; **व्यक.**९९; **स्मृच.**२३७ नुद (वम); **विर.** २२५ नुद (धंद); **रत्न.**११८; **व्यप्र.**३६७ धानु (धनि); **समु.**११७ नुद (वद).

(३) **स्मृचि.**२३. (४) **स्मृचि.**१६.

वापीकूपतडागादौ साक्षिणी जलवाहिका ।
पूर्वं ह्यधिकृता या च सैव प्रामाणिकी मता ॥

कृष्टाकृष्टविधिः

[1]खातखातस्य केदारमाहुः शल्यवतो मृगम् ।
इषवस्तस्य नश्यन्ति यो विद्धमनुविध्यति ॥

खिलभङ्गस्य भूमि प्रसाधितवतः केदारमाहुः । योऽन्यस्तत्र कर्षति स तत्फल न लभते। क्षयव्ययाभ्या च युज्यते । यथा शल्यवतः प्रथम व्यद्धुर्मृगमाहुः, पश्चाद् विध्यत इषुनाशः श्रमयोगश्च तथेति । नाभा.१२।३७

[2]अशक्तप्रेतनष्टेषु क्षेत्रिकेष्वनिवारितः ।
क्षेत्रं चेद् विकृषेत् कश्चिदश्नुवीत स तत्फलम् ॥

(१) अशक्ताः क्षेत्रकरणसामर्थ्यविकलाः, प्रेताः स्वर्याताः, नष्टाः कुत्र गता इति चिरकालमविज्ञाताः । क्षेत्रिकाः क्षेत्रस्वामिनः । एतदुक्त भवति । परक्षेत्रत्वेऽपि खिलभूतभूविषये कर्तुः फलभोगो न जातु फलदण्डदापनमिति प्रसङ्गात् । स्मृच.२३८

(२) क्षेत्रिकेष्वशक्तेषु (मृतेषु) नष्टेषु वा राजकुलादिभयाद्, अवृत्त्या वा केनचिदप्यनिवारितः कृषिकाले यः कृषेत् तस्य तत्फलं भवति । परक्षेत्रत्वेऽपि संज्ञश्चैवमर्थलाभः कुटुम्बवृद्धिश्च । अन्यथोभय न स्यात् । नाभा.१२।२०

[3]विकृष्यमाणे क्षेत्रे तु क्षेत्रिकः पुनराव्रजेत् ।
खिलोपचारं तत्सर्वं दत्वा क्षेत्रमवाप्नुयात् ॥

(१) खिलं दुष्कर्षं क्षेत्रम् । अप.२।१५८

(२) खिलोपचारः खिलभञ्जनार्थो व्ययः । तस्य इयत्तावधारण खिलभूतक्षेत्रकाटिन्यतारतम्यायतमिति । स्मृच.२३८

(३) तदृष्टभागोपचयादिः खिलभङ्गः । नाभा.१२।२१

व्याख्यातमेतत् पूर्वम् । अयं तु विशेषः—तत्र खिलविषय खिलभङ्गनिमित्तक्षय दत्त्वेत्युक्तम् । इह कृष्यमाणविषय बीजाद्युपक्षय दत्त्वेति । नाभा.१२।३८–३९

[4]तदृष्टभागापचयाद्यावत्सप्त गताः समाः ।
समाप्ते त्वष्टमे वर्षे भुक्तं क्षेत्रं लभेत सः ॥

(१) यदि क्षेत्रपतिर्व्यय न ददाति तदा कर्षकोऽष्टमं भाग तस्मै दद्यात् । यदि चाष्टवर्षपर्यन्तमपि क्षेत्रभोगं करोति, तदा व्ययादानेऽपि तत्सर्वं क्षेत्रमुत्पत्तिसहित क्षेत्रपतेरेवेति हलायुधपारिजातौ । प्रकाशकारेण तु ततोऽष्टमे वर्षे स्वामिन इत्येवं विवृतम् । विर.२२७

(२) खिलभङ्ग कृत्वा कृषति, यदि स्वाम्यागच्छेत्, तत्क्षेत्रमष्टभागोपचयादुपचितस्य अष्टभागादारभ्य द्वितीये द्वावष्टभागौ एवमुपचितादष्टभागादारभ्य सप्त समाः संवत्सरास्तुल्यमतीताः सप्तमे वर्षेऽष्टभागेन सप्राप्तेऽष्टमे वर्षे स्व क्षेत्र लभेत स्वामी । नाभा.१२।२२

[5]संवत्सरेणार्धखिलं खिलं स्याद्वत्सरैस्त्रिभिः ।
पञ्चवर्षावसन्नं तु क्षेत्रं स्यादटवीसमम् ॥

---

(१) **स्मृचि**.३२. (२) **नासं**.१२।३७.

(३) **नासं**.१२।२०:१२।३८पू, **नास्मृ**.१४।२३; **अप**.२।१५८ ष्व (पु); **व्यक**.९९; **स्मृच**.२३८ दक्षुवीत (दाप्नुयात्तु); **विर**.२२६ ष्व (पु); **पमा**.४०८, **रत्न**.११९; **विचि**.१०१; **सवि**.३४० शक्त (शक्तः) त्रि (त्र) कात्यायन, **चन्द्र**.६५ दक्षुवीत स तत्फलम् (स्स तु तत्फलमश्नुते); **व्यप्र**.३६८; **विता**.७१४ दक्षुवीत स (स्स लभेतैव); **सेतु**.१९५; **समु** ११७ स्मृचवत्.

(४) **नासं**.१२।२१ तु (चेत्) क्षेत्रमवा (स्व क्षेत्रमा): १२।३८-३९ तु (चेत्) खिलो (बीजा) क्षेत्रमवा (स्व क्षेत्रमा); **नास्मृ**.१४।२४ तु (चेत्) क्षेत्रमवा (स्वक्षेत्रमा); **अप**.२।१५८; **व्यक**.९९; **स्मृच**.२३८ क्षेत्रमवा (स्व क्षेत्रमा); **विर**.२२७ वि (नि); **पमा**.४०९ (कृष्यमाणेषु क्षेत्रेषु क्षेत्रिकः पुनरावजेत्); **रत्न**.११९; **विचि**.१०१ णे (ण) तु (पु); **सवि** ३४० तु (च) खि (शि) कात्यायन; **चन्द्र**.६५ विचिवत्; **व्यप्र** ३६९; **विता**.७१४; **सेतु**.१९५ णे (णः) तु (पु), **समु**.११७ क्षेत्रमवा (स्व क्षेत्रमा); **विव्य**.४८ सेतुवत्.

(१) **नासं**.१२।२२ गा (गो) गताः समा. (समा गताः) समा (सप्रा); **नास्मृ**.१४।२५ समा (संप्रा); **अप**.२।१५८ स्सप्त (दृष्ट); **विर**.२२७ गापचयाद् (गप्रचया); **सवि**.३४० क्त (क्त) कात्यायन; **चन्द्र** ६६ याद् (यं); **सेतु**.१९५ गापचयाद् (गप्रभुता) त्व (चा) समा (संप्रा); **समु**.११८ क्त (क्त).

(२) **नास**.१२।२३ क्षेत्र स्याद (स्यात्क्षेत्रम), **नास्मृ**.१४।२६ स्याद् (तद्) क्षेत्रं स्याद (स्यात्क्षेत्रम); **अप** २।१५८; **व्यक**.९९; **स्मृच**.२३८; **विर**.२२८; **पमा**.४०९; **रत्न**.११९; **विचि**.१०१ तु (च); **सवि**.३४० षावसन्न तु (षोऽवसानं तत्); **चन्द्र**.६६; **व्यप्र**.३६९; **विता**.७१५; **सेतु**.१९४ तु (च); **समु**.११८.

(१) सवत्सरोपेक्षितं क्षेत्रमर्धखिल ईषद्दुष्कर्षं भवति। त्रिवत्सरोपेक्षित तु खिल स्याद्दुष्कर्षं भवेत्। पञ्चवर्षोपेक्षित पुनः अटवीसम स्यात्। अत्यन्तदुष्कर्षं भवेदित्यर्थः। स्मृच.२३८

(२) अटवीसमेऽपि खिलोक्तत्यागकालभागग्रहणक्रमेण न्यूनाधिकत्यागकालभागग्रहणव्यवस्था ऊह्या। अत्र च खिलेषु चतुर्थादिसप्तन्यूनसख्यादिभागग्रहणस्य सर्वसिद्धतया अष्टमभागदान प्राचीनमिति खिल एवेत्याहुः। विर.२२८

(३) तस्य (खिलोपचारस्य) इयत्तावधारणार्थं विचारमाह—संवत्सरेणेति। पमा.४०९

(४) 'खिलोपचार'मित्युक्त, तद् विशेष्यते। संवत्सरोत्सृष्टमकृष्टं कृष्यमाणमर्धखिलम्। तत्र चतुर्भागोपचयादारभ्य तृतीये पादोन, चतुर्थे स्व क्षेत्रमाप्नोति। खिलमित्युक्त त्रिवर्षोत्सृष्टम्। तत्रोक्तो विधिः। पञ्चवर्षोत्सृष्टमटवीसमं राजाधीन भवति। अटव्या राजानमनुज्ञाप्य य आक्रामति तस्य तद् भवति। नाभा.१२।२३

[1]**क्षेत्रं त्रिपुरुषं यस्य गृहं वा स्यात् क्रमागतम्।**
राजप्रसादादन्यत्र न तद्भोगः परं नयेत्॥
गृहं क्षेत्रं च दृष्टे द्वे वासहेतू कुटुम्बिनाम्।
तस्मात्ते नोत्क्षिपेद्राजा तद्धि मूलं कुटुम्बिनाम्॥

(१) गृहक्षेत्रयोः करादिना त्रैपुरुषिकमभोगे सति राजप्रसादाद्विना न तद्भोक्तृपुरुषसकाशात्तयोर्भोगच्छेदः करणीय इत्यर्थः। विर.२२८

(२) क्षेत्रं गृह वा त्रिपुरुष भुज्यमान राजा प्रसन्नो यदि दद्यात्, न तत्र वक्तव्यम्, अन्यथा तस्य भोगः परस्य न दातव्यः। स एवोपचितदानेन भुञ्जीतेत्यर्थः। नाभा.१२।२४

बीजादि दत्त्वा स्वमाप्नुयादित्युक्तं, तत्र कारणमाह—गृह क्षेत्र च कुटुम्बिना वासहेतुर्यस्मात्, तस्मात् स्वमाप्नुयात्। इतरस्यापि बीजाद्युपयुक्तं दद्यात्। एवमुभयोरनुग्रहाज्जनपदस्य वृद्धिर्भवति। नाभा.१२।२९

वृद्धे जनपदे राज्ञो धर्मः कोशश्च वर्धते।
हीयते हीयमाने तु वृद्धिहेतुमतः श्रयेत्॥

बृहस्पतिः

सीमावादप्रतिज्ञा

[2]**क्रयविक्रयानुशये विधिरेष प्रदर्शितः।**
ग्रामक्षेत्रगृहादीनां सीमावादं निबोधत॥

गृहादीनामित्यत्रादिशब्देन नगरदेशौ स्वीक्रियेते तत्रापि सीमावादसद्भावात्। स्मृच.२३२

राज्ञा ससाक्षिकं सपत्र वा क्षेत्र देयम्

[3]**राजा क्षेत्रं दत्त्वा चातुर्वैद्यवणिग्वारिकसर्वग्रामीणतन्महत्तरस्वामिपुरुषाधिष्ठितं परिच्छिन्द्यात्। शासनं वा कुर्यात्।**

ग्रामगृहक्षेत्रादिप्रवेशकाले प्रकाशाप्रकाशचिह्नानि ससाक्षिकाणि कार्याणि

[4]**निवेशकाले कर्तव्यः सीमाबन्धविनिश्चयः।**
प्रकाशोपांशुचिह्नैश्च लक्षितः संशयापहः॥

(१) निवेशो ग्रामादिप्रवेशारम्भः। सीमाबन्धः सीमाया निबन्धन नियामकम्। उपांशु (श्च) प्रकाशम्। अप.२।१५१

(२) विनिश्चीयते सीमाबन्धो येन स विनिश्चयः पाषाणादिमयः स्थूलगुडकः। सीमाबन्धश्चासौ विनिश्चयश्च सीमाबन्धविनिश्चयः। सीमानियामकः स्थूलगुडक इत्यर्थः। एतदुक्त भवति। ग्रामादिप्रवेशकाले तत्सीमानियामकस्थूलगुडकः प्रकाशगुप्तलिङ्गोपेतः सीमासधौ स्थापनीय इति। स्मृच.२२८

---

(१) **नासं.**१२।२४ यस्य (यत्र); **नास्मृ.**१४।२७ यस्य (यस्यात्); **अप.**२।१५८; **व्यक.**९९; **विर.**२२८ रं (रान्).

(२) **नासं.**१२।३९ दृष्टे द्वे (विशेषं) तू (तुः) पू.; **नास्मृ.**१४।४२ द्व क्षेत्र (हक्षेत्रे); **व्यक.**९९ पू.; **विर.**२२८ दृष्टे (वस्तू) नोत्क्षि (नाक्षि).

(१) **नासं.**१२।४०; **नास्मृ** १४।४३ तु (च); **व्यक.** ९९; **विर.**२२८.

(२) **व्यक.**१७० प्रदर्शितः (उदाहृतः), **स्मृच.**२३२ उत्त.; **विर.**२०१, **सेतु.**१८४ प्रदर्शितः (प्रकीर्तितः); **समु.**११४ उत्त.

(३) **विश्व.**२।१५४.

(४) **अप.**२।१५० (=); **व्यक.**१७० बन्ध (विधि); **स्मृच.**२२७; **विर.**२०२ श्चयः (र्णयः); **रत्न.**११२; **सवि.** ३३२ विरवत्; **समु.**११३ भृगुः.

(३) निवेशकाले ग्रामादिनिर्माणकाले । प्रकाशचिह्नैर्वृक्षादिभिः । उपाशुचिह्नैः करीषेष्टकादिभिः ।
विर.२०२

[1]वापीकूपतडागानि चैत्यारामसुरालयाः ।
स्थलनिम्नतदीस्रोतः शरगुल्मनगादयः ॥

वापी पुष्करिणी । चैत्यमिष्टकाद्यैर्विरचितं स्थण्डिलम् । स्थलमुन्नतो देशः । निम्न परिखा । शराः तृणविशेषाः । गुल्माः कन्दशून्याः करवीरप्रकाराः । नगाः वृक्षाः । नगादय इत्यत्रादिशब्देन वेणुवल्लीवल्मीकवर्त्मपुरातनसैत्वादीना स्मृत्यन्तरोक्ताना ग्रहणम् ।
स्मृच.२२८

[2]प्रकाशचिह्नान्येतानि सीमायां कारयेत्सदा ।
निहितानि तथान्यानि यानि भूमिर्न भक्षयेत् ॥

निहितानि सीमाया निहितानि कारयेत् यानि भूमिर्न भक्षयेत् न नाशयेत् न मृत्तिकात्व नयेदिति यावत् ।
विर.२०३

[3]करीषास्थितुषाङ्गारशर्कराश्मकपालिकाः ।
सिकतेष्टकगोवालकार्पासास्थीनि भस्म च ॥

करीषं शुष्कगोमयम् । अस्थीनि पश्वादीनाम् । तुषा व्रीह्यादित्वचः । अङ्गाराः दग्धकाष्ठावयवाः शान्ताग्नयः । शर्कराः पाषाणवत्कठिना मृदः । कपालिकाः पक्वघटावयवानामवयवाः । कार्पासास्थीनि कार्पासबीजानि ।
स्मृच.२२८

[4]प्रक्षिप्य कुम्भेष्वेतानि सीमान्तेषु निधापयेत् ।
ततः पोगण्डबालानां प्रयत्नेन प्रदर्शयेत् ॥

निधापयेत् गर्ताभ्यन्तरेषु कुम्भी निधाय मृद्भिः प्रच्छादयेत् ।
स्मृच.२२८

[5]वार्द्धक्ये च शिशूनां ते दर्शयेयुस्तथैव च ।
एवं परम्पराज्ञाने सीमाभ्रान्तिर्न जायते ॥

तेऽपि च पोगण्डबालाः कालेन वार्द्धक्यमापन्नाः शिशूना किंचित्प्रबुद्धाना स्वज्ञातिज्ञापितानि सीमालिङ्गानि यत्नेन प्रदर्शयेयुः । एवमविच्छिन्ना ज्ञातृपरम्परा बहुतरकालात्यये ऽपि सीमाभ्रान्त्यनुत्पत्त्यर्थं कार्येत्यर्थः ।
स्मृच.२२९

सीमानिर्णये साक्षिणः के कीदृशाश्च

[6]आगमं च प्रमाणं च भोगकालं च नाम च ।
भूभागलक्षणं चैव ये विदुस्तेऽत्र साक्षिणः ॥

आगमः स्वत्वापादकः क्रयादिः । प्रमाण दण्डादिना परिकल्पित परिमाण यदा तूक्तद्विविधसाक्ष्यभावस्तदा सामन्तप्रदर्शितैर्लिङ्गैर्निर्णयेत् ।
स्मृच.२२९

---

(१) **अप** २।१५० वापीकूप (कूपवापी) तडागा (तडाका) पू.; **व्यक.**१७० गुल्मनगादयः (गुल्माश्मराजय.); **स्मृच** २२८ तडागा (तटाका), **विर** २०३ वापीकूप (कूपवापी) गुल्मनगादयः (गुल्माश्मराशयः), **पमा** ३८७; **रत्न** ११२; **विचि.**९३ गानि (गादि) गुल्मनगादयः (गुल्माश्मराशयः); **नृप्र.**३१ गानि (गादि) स्थलनिम्न (स्थल निम्न), **सवि.**३३२ नगा (लता) शेष स्मृचवत्, स्मृतिः; **व्यप्र.**३५४ स्थलनिम्न (स्थल निम्न); **समु.**११३ स्मृचवत्, भृगुः.

(२) **अप.**२।१५०; **व्यक.**१७०; **स्मृच.**२२८ पू., **विर.** २०३; **पमा.**३८७ पू.; **रत्न.**११२; **नृप्र.**३१ पू.; **सवि.** ३३३ पू., स्मृतिः; **व्यप्र.**३५४; **समु.**११३ निहितानि (निधेयानि) भृगुः.

(३) **अप.**२।१५० कार्पा (कर्पी); **व्यक.**१७१ पास्थितुषा (षमिष्टका) मनुः; **स्मृच.**२२८; **विर.**२०४; **पमा.**३८७; **रत्न.**११२, **सवि.**३३३ राश्म (राशि) स्मृतिः; **व्यप्र.**३५५; **व्यम.**९६; **विता.**६८७ लिकाः (लिका) मनुः; **सेतु.**१८६ कार्पा (कासी); **समु.**११३ भृगुः.

(१) **अप.**२।१५०, **व्यक** १७१ कुम्भे (भाण्डे) प्रदर्श (प्रकाश) मनुः; **स्मृच.**२२८ पू, २२९ उत्त.; **समु.**८।२५० पू.; **विर.**२०४; **पमा.**३८७ पू., ३८८ उत्त.; **रत्न.**११२; **सवि.**३३३ पूर्वार्धे (एतानि कुम्भे निक्षिप्य सीमान्तेषु निधानयेत्), **व्यप्र.**३५५; **व्यम.**९६ पू.; **विता.**६८७ प्रक्षि (निक्षि) पू., मनुः; **सेतु.**१८६; **समु** ११३ पू., ११४ उत्त., बाला (पाला) पूर्वार्धस्तु भृगोरित्युक्तम्.

(२) **अप.**२।१५०क्ये(के), **व्यक.**१७१ मनुः;**स्मृच.**२२९ क्ये च (क्येन); **विर.**२०४; **पमा.**३८८ क्ये (के) ज्ञाने (ज्ञाते); **रत्न.**११२, **सवि.**३३३ क्ये च (केन); **व्यप्र.**३५५ अपवत्; **सेतु.**१८६ अपवत्; **समु.**११४ स्मृचवत्.

(३) **मिता.**२।१५२; **स्मृच.**२२९ भोग (भोगं); **पमा.** ३९२ भोगकाल (भोग काम); **रत्न.**११३; **नृप्र** ३१ भोग (भाग); **सवि.**३३३; **व्यप्र.**३५५; **व्यउ.**१०५ भोग (भाग); **विता.** ६९०; **प्रका.**४९ भोग (भोगं) स्तेऽत्र (स्तेऽपि); **समु.**११४ स्मृचवत्.

गृहक्षेत्रविवादेषु सामन्तेभ्यो विनिर्णयः ।
नगरग्रामगणिनो ये च वृद्धतमा नराः ॥
कीनाशशिल्पिभृतका गोपव्याधोञ्छजीविनः ।
मूलखानककैवर्त्तकुल्या भेदकबाधकाः ॥

कीनाशः कृषीवलः, उञ्छजीविनः मूलशस्यावशिष्ट मञ्जरीजीविनः । तेऽपि पर्यटनशीलत्वात्प्रायः सीमज्ञा इति । एवं शिल्पभृतकादिषु चोह्यम् । विर.२०९

तदुत्पन्नास्तु सामन्ता येऽन्ये देशान्तरस्थिताः ।
मौलास्तु ते समुद्दिष्टाः प्रष्टव्याः कार्यनिर्णये ॥
अदुष्टास्ते तु यद्ब्रूयुः संदिग्धौ समवृत्तयः ।
तत्प्रमाणं तु कर्तव्यमेवं धर्मो न हीयते ॥
शपथैः शापिताः स्वैः स्वैर्ब्रूयुः सीमाविनिर्णयम् ।
दर्शयेयुश्च लिङ्गानि तत्प्रमाणमिति स्थितिः ॥

(१) निधानानि निहितानि तुषाङ्गारादीनि सीम लिङ्गानि । अप.२।१५१

(२) स्वैः 'सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः' । इत्यादिना उक्तव्यवस्थानतिक्रमेणेत्यर्थः ।

×स्मृच.२३१

सीमाशापनविधिः

ज्ञातृचिह्नैर्विना साधुरेकोऽप्युभयसंमतः ।
रक्तमाल्याम्बरधरो मृदमादाय मूर्धनि ।
सत्यव्रतः सोपवासः सीमां संदर्शयेन्नरः ॥

ज्ञातृचिह्नैर्विना ज्ञातृणा चिह्नानां चाभाव इत्यर्थः । एतदुक्तं भवति । साक्ष्यादिवनगोचरान्तानां सीमाज्ञातृणा प्रकाशोपायुलिङ्गाना चाभावे यः कश्चिदुक्तविशेषणविशिष्टो नरः सीमावित्सीमान्तमुक्तविधिना चङ्क्रममाणो दर्शयेदिति । स्मृच.२३१

यदि शूद्रो नेता स्यात् तं क्लैब्येनालङ्कारेणालङ्कृत्य शवभस्मना मुखं विलिप्याग्नेयस्य पशोः शोणितेनोरसि पञ्चाङ्गुलानि कृत्वा ग्रीवायामान्त्राणि प्रतिमुच्य सव्येन पाणिना सीमालोष्टं मूर्ध्नि धारयेत् ।

अत्र चाग्नेयः पशुश्छागः । रक्तकर्पटवसनादिः क्लैब्योऽलङ्कारः । विश्व. २।१५६

सर्वस्मिन्स्थावरे वादे विधिरेष प्रकीर्तितः ॥

क्षेत्रगृहग्रामादौ राजकृत. नदीकृतश्च स्वामिसबन्धः

अन्यग्रामात्समाहृत्य दत्ताऽन्यस्य यदा मही ।
महानद्याऽथवा राज्ञा कथं तत्र विचारणा ॥
नद्योत्सृष्टा राजदत्ता यस्य तस्यैव सा मही ।
अन्यथा न भवेल्लाभो नराणां राजदैविकः ॥

× विर. अपवत् स्मृचवच्च ।

(१) **विर.**२०९. (२) **विर.**२०९.

(३) **व्यक.**१७४; **विर.**२१३.

(४) **व्यक** १७४ नथौ समवृत्तय· (रंधे समदृष्टय:); **विर.**२१३

(५) **अप.**२।१५१ सीमाविनिर्णयम् (सीम्नि विनिश्चयम्) श्च लिङ्गानि (निधानानि); **व्यक.**१७२ ब्रूयुः (कुर्युः) शेष अपवत्, **स्मृच** २३१ स्थितिः (स्मृतिः), **विर.**२१० व्यकवत्; **पमा.**३९२ शपथैः शापिताः (शापिताः शपथैः); **रत्न** ११४, **सवि.**३३५ स्वैः स्वैः (चैव) स्थितिः (स्थितम्); **व्यप्र.**३५९; **विता.**६९३ श्च (स्त्रि), **समु.**११४.

(६) **अप.**२।१५२ सीमां स (सीमान्त); **व्यक.**१७३ ज्ञातृचिह्नैर्विना साधुः (ज्ञातिचिह्नविनाशे तु); **स्मृच.**२३१ अपवत्; **विर.**२११ ज्ञातृचिह्नैर्विना साधु. (ज्ञातृचिह्नाविनाशे तु); **पमा.**३९३ सीमां स (सीमान), **रत्न.**११४; **विचि.** ९४ ज्ञातृचिह्नैर्विना साधुः (ज्ञातृचिह्नविनाशे तु) प्रथमार्धः; **सवि.**३३५ अपवत्; **व्यप्र.**३५९ सद (ता द); **व्यम** ९६ पमावत्; **विता.**६९६ अपवत्; **बाल** २।१५२ विरवत्; **सेतु.**१८८ ज्ञातृचिह्नैर्विना साधु (ज्ञातृचिह्नविनाशे च) प्रथमार्धं. तृतीयार्धश्च, **समु.**११५ मृद (भूमि) प्रथमार्धद्वयम्.

(१) **विश्व.**२।१५६.

(२) **अप** २।१५४; **स्मृच.**२३३; **सवि.**३३८; **व्यप्र.** ३५८ सर्वस्मिन् (सर्वत्र), **विता.**६९३ व्यप्रवत्; **समु.**११५.

(३) **अप.**२।१५० पू, **व्यक.**९७ त्समाहृत्य (त्समाश्रित्य); **स्मृच.**२३४, **विर** २१६, **पमा** ३९८, **रत्न.**११६, **विचि.** ९६, **नृप्र** ३२, **सवि.**३३८, **वीमि.**२।१५३; **व्यप्र.**३६२; **विता.**७०० दत्तान्यस्य (दत्ता यस्य); **सेतु.**१८९; **समु.** ११६; **विश्व.**४७.

(४) **अप.**२।१५० न भवे (तु भवे) उत्त.; **व्यक.**९७ व्यासः; **स्मृच.**२३४; **विर.**२१७ दैवि (दैव); **पमा.**३९८ विरवत्; **रत्न.**११५; **विचि.**९६; **नृप्र.**३२; **सवि.**३३८; **चन्द्र.**६२ दैविकः (दैवकम्), **वीमि.**२।१५३ दैविकः (दैवतः); **व्यप्र.**३६२; **विता.**७०० नथो (थो) त्ता + (वा) दैवि (दैव), **समु.**११६.

क्षयोदयौ जीवनं च दैवराजवशान्नृणाम् ।
तस्मात्सर्वेषु कार्येषु तत्कृतं न विचालयेत् ॥

तत्कृतं दैवराजकृतम् । यद्यपि दैवशब्दो भाग्यमाचष्टे तथापि नदीकृत दैवकृतमित्युच्यते । भाग्यस्यैव मूलकारणत्वात् । स्मृच.२३४

ग्रामयोरुभयोर्यत्र मर्यादा कल्पिता नदी ।
क्षयोदयेन चाल्पा सा चालयन्दण्डमर्हति ॥
कुरुते दानहरणं भाग्याभाग्यवशान्नृणाम् ॥
एकत्र कूलपातं तु भूमेरन्यत्र संस्थितिम् ।
नदी तीरे प्रकुरुते तस्य तां न विचालयेत् ॥

(१) तीरे नदी प्रकुरुत इत्यन्वयः।तस्य नदीवशाल्लब्धभूमिकस्य ता नदीकृतभूमिसस्थिति पूर्वस्वामी न विचालयेदित्यर्थः । एतदनुप्तसस्यतीरविषयम् । स्मृच.२३४

(२) यत्र नदीकूलपातः क्रमेण ग्रामान्तरभूमि ग्रामान्तरे निवेशयति तत्र विचालन न कार्यम् ।
वीर.२१७

[1]क्षेत्रं सशस्यमुल्लङ्घ्य भूमिश्छिन्ना यदा भवेत् ।
नदीस्रोतःप्रवाहेण पूर्वस्वामी लभेत ताम् ॥

(१) ता ससस्या भूमि छेदनादूर्ध्वमपि पूर्वस्वामी यावदुप्तसस्यफलप्राप्तिस्तावल्लभत इत्यर्थः । फललाभादूर्ध्वं तु प्राचीनवचनतुल्यविषयतैव । *स्मृच.२३४

(२) यत्र तु नदी क्षेत्रादिक समुल्लङ्घ्य याति तत्र पूर्वग्रामस्यैव सा भूमिरित्यर्थः । वीर.२१७

[2]यां राज्ञा क्रोधलोभेन छलन्यायेन वा हृता ।
प्रदत्तान्यस्य तुष्टेन न सा सिद्धिमवाप्नुयात् ॥
[3]प्रमाणरहितां भूमि भुञ्जतो यस्य या हृता ।
गुणाधिकाय वा दत्ता तस्य तां न विचालयेत् ॥

प्रमाणरहिता भूमि भुञ्जतः स्वत्वे लिखितादिप्रमाणरहिता भूमिं भुञ्जत इत्यर्थः । स्मृच.२३४

[4]निवेशकालादारभ्य गृहवार्यापणादिकम् ।
येन यावद्यथा भुक्तं तस्य तन्न विचालयेत् ॥

(१) ग्रामादिप्रवेशकालादारभ्य गृहादिक तत्स्वामिना

---

(१) **अप.**२।१५० कार्यं (काले), **व्यक** ९७ पू.,. **स्मृच.** २३४, **वीर.**२१७ चाल (चार), **पमा.**३९८, **रत्न.**११५, **विचि.**९६ दैव (देव) तस्मा (यस्मा), **नृप्र** ३२, **सवि.**३१८; **वीमि.**२।१५३; **व्यप्र.**३६२, **विता.**७००, **सेतु.**१८९ दैवराज (राजदैव) तस्मा (यस्मा) चाल (चार), **समु.**११६; **विव्य.**४७.

(२) **अप.**२।१५०, **व्यक.**९७ उत्त , **स्मृच.**२३४ पू., **वीर.**२१७ चाल्या (ताल्या), **पमा.**३९८ प , **रत्न.**११६ पू , **विचि.**९६ सा (सौ), **नृप्र.**३२, **वीमि** २।१५३ विचिवत्, **व्यप्र.**३६२ पू.; **विता.**७०० पू.; **सेतु.**१८९ ता (का) चाल्या सा (चान्यासा), **समु.**११६ पू.

(३) **अप.**२।१५०; **स्मृच.**२३४, **पमा.**३९८; **रत्न.** ११६; **व्यप्र.**३६२, **विता.**७००, **समु.**११६.

(४) **अप.**१।१५० तीरे (तीर) तस्य ता (तस्येता) स्थितिम् (स्थितिः), **व्यक.**९७अपवत् ; **स्मृच.**२३४स्थितिम् (स्थितम्); **वीर.**२१७ त्र कूलपात तु (कूलनिपातस्तु) तीरे प्र (तीरेषु) ता न (तत्र); **पमा.**३९९; **रत्न.**११६, **विचि.**९६ स्मृचवत्; **नृप्र.**३२ कूलपात (जलपात), **सवि.**३३८ अपवत् , नारद.; **वीमि.**२।१५३; **व्यप्र** ३६२ तीरे (तीर), **विता.**७०० पातं (पाते) स्थितिम् (स्थितौ); **सेतु.**१८९ नदी तीरे (तीरे नदी), **समु.**११६; **विव्य.**४७ स्मृचवत् .

* पमा., रत्न , व्यप्र. स्मृचवत् ।

(१) **अप** २।१५० पूर्व (क्षेत्र), **व्यक** ९७ क्षेत्र सशस्य (क्षेत्रशस्य स) व्यास , **स्मृच.**२३४, **वीर** २१७; **पमा** ३९९ क्षेत्र सशस्य (क्षेत्रशस्य स) भेत (भेद्य), **रत्न** ११६, **विचि.**९६ सशस्य (समस्त), **नृप्र.**३२, **सवि.**३३८ मनु ; **वीमि.**२।१५३ सशस्य (समस्त) छिन्ना (स्वस्था) नदी (तदा); **व्यप्र.**३६२; **विता** ७०१, **सेतु** १९० विचिवत्; **समु.** ११६, **विव्य.**४७ विचिवत् .

(२) **अप.**२।१५० छलन्या (बलान्या), **व्यक** ९७ क्रोध (काम) व्यासः; **स्मृच.**२३४ हृता (कृता), **वीर.**२१७, **पमा.**३९९ छल (छला), **रत्न.**११६, **विचि.**९६; **नृप्र.** ३२ छलन्यायेन (छलेनान्येन), **सवि.**३३०, **चन्द्र.**६२ न सा (सापि), **व्यप्र.**३६३ तुष्टे (तुष्ट), **विता** ७०१ व्यप्रवत् ; **सेतु.**१८९ स्मृचवत्, **समु** ११६, **विव्य.**४७ पमावत् .

(३) **अप.**२।१५० काय वा दत्ता (कस्य दत्ता वा) न वि (नैव), **व्यक.**९७ व्यासः, **स्मृच.**२३४, **वीर** २१७ दत्ता (देया,; **पमा.**३९९, **रत्न.**११६, **विचि.**९६ ता भूमि (तेह्यर्थ) या (वा); **व्यप्र.**३६३ भुञ्जतो (भुञ्जानो) या (वै); **विता.**७०१; **सेतु.**१८९ या (वै) शेष विचिवत् ; **समु.**११६ या (वै); **विव्य.**४७ विचिवत् .

(४) **अप.**२।१५४; **व्यक.**९७ तन्न विचालयेत् (तत्रैव

येन यावत्प्रचारभूम्यायुषेतं तथा यस्यां दिशि द्वारादिमद्भुक्त तस्य तत्र विचालयेत्। प्रातिवेश्यादिजन इत्यर्थः। निवेशकालादारभ्येति वदन् कालान्तरादारभ्य भुक्त विप्रतिपन्न चेद्विचालयेदिति दर्शयति।

+स्मृच.२३४

(२) सूरसेनसमयादारभ्य चिरं येन गृहादिकं भुक्त तस्य तथा रक्षणीयम्। चन्द्र.६३

वातायनं प्रणालीश्च तथा निर्यूहवेदिकाः।
चतुःशालस्यन्दनिकाः प्राङ्निविष्टा न चालयेत्॥

(१) वातायन गवाक्षः। काष्ठादिमयो जलनिर्गमोपायः प्रणाली। निर्यूहो द्वारनिर्गमः काष्ठविशेषः। गृहकोणीति यावत्। वेदिका प्राङ्गना(णा)दिभूः। चतुःशाल चतुर्द्वार गृहम्। स्यन्दनिका पटलप्रान्तः।

*अप.२।१५४

+ रत्न., व्यप्र. स्मृचवत्।

* पमा., रत्न., व्यप्र अपवत् स्मृचवच्च।

चालयेत्), **स्मृच.**२३४, **विर**२१९, **पमा** ३९९, **रत्न.** ११६, **विचि.**९७, **नृप्र** ३२, **सवि.**३३९, **चन्द्र** ६३ वेश (देश) वा (का) तत्र (त्रान), **वीमि** २।१५४, **व्यप्र** ३६३, **व्यउ.**१०७ मनु, **व्यम.**९७ वार्षा (द्वारा) मनु; **विता.** ७०२-७०३ व्यमवत्, **सेतु** १९० वार्षाप (बाह्याङ्ग), **समु.** ११६, **विव्य.**४७ वथा (त्तथा) चाल (चार)

(१) **अप** २।१५४ यन (यन) लीश्च (लीस्तु), **व्यक.**९७ प्रणालीश्च (प्रणाल्यश्च), **स्मृच.**२३४ लीश्च (ली च) शाल (शाल), **विर.**२१९ यच (यना.) शाल (शाल) निकाः (निका) ष्टा (ष्टा), **पमा.**४०० शाल (शाल) निका. (निकां) ष्टा (ष्टा); **रत्न.**११६, **विचि** ९७ यन (यनः) लीश्च (ल्यश्च) निवि (निर्दि), **नृप्र.**३२ यनं (यन) लीश्च (ली च), **सवि.**३३९ लीश्च (ली च) निर्यू (निर्व्यू) स्यन्द (स्य ध) कात्यायनः, **चन्द्र.**६३ लीश्च (ल्यश्च) उत्तरार्धः विरवत्; **वीमि.**२।१५४ यन (यनाः) लीश्च (ल्यश्च) दिकाः (दिकाः) शाल (शाले), **व्यप्र.**३६३ लीश्च (ली च) निर्यू (निर्व्यू) दिकाः (दिका) निका (निकां) ष्टा (ष्टां); **व्यउ.**१०८ न+(वि) शेषं व्यप्रवत्; **विता.**७०३ लीश्च (ली च) शेषं पमावत्; **सेतु.**१९० यनं (यना) लीश्च (ल्यश्च) निर्यू (निर्व्यं) शाल (शाल्य) निवि (निर्दि), **समु.**११६ न+(वि) शेष स्मृचवत्, **विव्य.**४७ यन (यनाः) (चतुःशालः स्यन्दनिका प्राग्दिष्टान्न विचारयेत्).

(२) एवं निवेशकाले कल्पितं गवाक्षादिकं प्रातिवेश्यानिष्टकार्यापि न केनचिच्चालनीयमित्याह स एव—वातायनमिति। निर्यूहो गृहकोणा, वेदिका दारुपरिष्कृता चतुरस्रा विश्रान्तिभूः। चतसृणा शालाना समाहारश्चतुःशालम्। एतच्च तृणगृहोपलक्षणार्थमुक्तम्। तस्मादृष्टयुदकनिपातः स्यन्दनिकाः। अत्रापि मध्ये निविष्टाना विचालन पूर्ववदर्थादुक्तम्। +स्मृच.२३५

(३) प्रणाली जलनिर्गममार्गः, निर्यूहो नागदन्तकः, वेदिका प्रतोल्यादिसंस्कृता उन्नता भूमिः। +विर.२१९

(४) वेदिका रथ्यादिप्रदेशे सस्कृतोन्नता भूमिः।
रत्न.११६

(५) निर्व्यूहो द्वारनिर्गतकाष्ठविशेष इति कृत्यकल्पतरौ। निर्व्यूहो गृहकोण इति स्मृतिचन्द्रिकायाम्।
व्यप्र.३६३

परगृहपीडापरिहार

वर्चःस्थानं वह्निचयं गर्तोच्छिष्टाम्बुसेचनम्।
अत्यारात्परकुड्यस्य न कर्तव्यं कदाचन॥

(१) अत्यारादरत्निद्वयमविहायेत्यर्थः। स्मृच.२३५

(२) वर्चःस्थान मूत्रपुरीषोत्सर्गस्थान, वह्निचयं अग्निस्थान, क्वचित् वह्निस्थान वा। वह्निगृहमिति पाठः, स तु सुगम एव, अत्यारादतिसमीपे। विर.२१९-२२०

लोकमार्गपीडापरिहार

यान्त्यायान्ति जना येन पशवश्चानिवारिताः।
तदुच्यते संसरणं न रोद्धव्यं तु केनचित्॥

+ शेष अपवत्।

(१) **अप.**२।१५४ चय (मय), **व्यक** ९८, **स्मृच** २३५; **विर.**२१९ (=) म्बु (दि), **पमा** ४०० कदा (कर्य), **रत्न.** ११६, **विचि.**९८ चय (चर्यं) म्बु (नु) न कर्तव्य (कर्तव्य न), **चन्द्र.**६३ चय (गृह) सेच (सेव) कुड्य (कुण्ड्य); **वीमि.** २।१५४ वह्निचयं (ब्रह्मचर्यं) च्छिष्टाम्बुसेच (विष्ठानुसेव), **व्यप्र.** ३६४ पमावत्, **व्यउ** १०८ चय (धेय) म्बुसेच (नुवेश) करा (कर्य), **व्यम.**९७ पमावत्, **विता** ७०४ चय (गृह) ष्टाम्बु (ष्टक) कात्यायनः, **सेतु** १९१ म्बु (नु) न कर्तव्य (कर्तव्यं न); **समु.**११६.

(२) **अप** २।१५४, **व्यक.**९८, **स्मृच.**२३५, **विर.**२२०; **पमा** ४०१, **रत्न.**११६, **विचि** ९८ चित् (च), **सवि.**३३९; **चन्द्र.**६३ न्ति जना (न्त्यध्वना) श्वानिवारिताः (श्च निपा.

बृहस्पतिस्तु शकटादिकं संकटहेतुभूतं संसरणे चिरं न धार्यमित्याह—यान्त्यायान्तीति । स्मृच.२३५

यैस्तत्र संकरं श्वभ्रं वृक्षारोपणमेव च ।
कामात्पुरीषं कुर्याच्च तस्य दण्डस्तु माषकः ॥

संकरः सकीर्णता । अवरोध इति यावत् । वृक्षग्रहणं सस्यादेरुपलक्षणार्थम् । यद्यपि पञ्चकृष्णलको माषोऽत्रापि ग्राह्यतया प्रतिभाति तथाप्यपराधानुरूपत्वाय कार्षापणस्य विंशो भागो ग्राह्यः । तत्रापि माषव्यवहारात् । स्मृच.२३५

कृष्टाकृष्टविधिः

[1]गृहीत्वा वाहयेत्काले वापगोपनसंग्रहान् ।
अकुर्वन्स्वामिने दाप्यो मध्यं कृष्टसदं तु सः ॥

(१) क्षेत्रस्वामिपार्श्वे अहमिद क्षेत्र करिष्यामीति कृषीवलः क्षेत्रं गृहीत्वा ग्रीष्मादिकाले लाङ्गलादिक बलीवर्दादिभिर्वाहयेदित्यर्थः । वाहनग्रहण तदादिफलसंग्रहणान्तव्यापारस्योपलक्षणार्थम् । अत एव कृषिमात्र कुर्वन् कृषीवलो व्यापारैकदेशकरतया दुष्टत्वात्क्षेत्रफलमूल्यतया कल्पितं क्षेत्रस्वामिने राज्ञा दाप्य इत्याह स एव 'वापगोपनसंग्रहानकुर्वन्स्वामिने दाप्य' इति । वापो बीजान्तमावापः । गोपनसग्रहः सस्यादिरक्षणसग्रहः । यस्तु क्षेत्र गृहीत्वा क्षेत्रकरणकालार्धे गते कर्षण कुरुते स कालात्ययापरापानुरूप दम दाप्य इत्याह बृहस्पतिः 'मध्ये कृष्टे दम तु सः' इति । दाप्य इत्यनुषज्यते । स्मृच.२३८

(२) गृहीत्वा क्षेत्र वाहयेत्, अकुर्वन्वाप वपन गोपन रक्षणं संग्रहं शस्यसंचय दाप्यो मध्यम कृष्टसद नात्युत्कृष्ट नात्यपकृष्टमित्यर्थः । वीर.२२९

[1]क्षेत्रं गृहीत्वा यः कश्चिन्न कुर्यान्न च कारयेत् ।
स्वामिने स शदं दाप्यो राज्ञे दण्डं च तत्समम् ॥

शद क्षेत्रफलम् । स्मृच.२३८

[2]चिरावसन्ने दशमं कृष्यमाणे तथाऽष्टमम् ।
सुसंस्कृते तु षष्ठं स्यात्परिकल्प्य यथाविधि ॥

चिरावसन्ने चिरकालमकृष्टक्षेत्रे करिष्यामीति स्वीकृत्योपेक्षिते यावत्फलमनुपेक्षिते लभ्यते तस्य दशम भागं मूल्यद्वारेण दाप्यः । कृष्यमाणे अचिरावसन्ने क्षेत्रे स्वीकृत्योपेक्षिते त्वष्टम भागं दाप्यः । स्वसस्कृते तु क्षेत्रे स्वीकृत्योपेक्षिते षष्ठ भाग दाप्य इत्यर्थः ।

स्मृच.२३८

कात्यायनः

षड्भूवादनिमित्तानि

[3]आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च ।
अभोगभुक्तिः सीमा च षड्भूवादस्य हेतवः ॥

(१) तथाहि । ममात्र पञ्चनिवर्तनाया भूमेरधिका भूरस्तीति केनचिदुक्ते पञ्चनिवर्तनैव नाधिकेत्याधिक्ये विवादः । पञ्चनिवर्तना मदीया भूमिरित्युक्ते न, ततो न्यूनैवेति न्यूनतायाम् । पञ्चनिवर्तनो ममाश इत्युक्ते अश एव नास्तीत्यस्तिनास्तित्वविवादः संभवति । मदीया भूः प्रागविद्यमानभोगैव भुज्यते इत्युक्ते न सतता चिरन्तन्येव मे भुक्तिरित्यभोगभुक्तौ विवादः । इय मर्यादेय वेति सीमाविवाद इति षट्प्रकार एव विवादः संभवति । षट्प्रकारेऽपि भूविवादे श्रुत्यर्थाभ्या सीमाया अपि निर्णीयमानत्वात् सीमानिर्णयप्रकरणे तस्यान्तर्भावः । ×मिता.२।१५१

तिताः); **वीमि**.२।१५४ निवा (भिवा), **व्यप्र**.३६४, **व्यउ**.१०८; **व्यम**.९७, **विता**.७०५, **सेतु** ११९, **समु** ११६.

(१) **अप**.२।१५४; **स्मृच**.२३८ च (वा), **पमा** ४०१ संकर (मसरे) च (वा) चत (चेत्त), **रत्न** ११७, **व्यप्र** ३६५, **व्यउ**.१०९ स्मृचवत्; **व्यम**.९७ स्मृचवत्, **विता**.७०६ च (वा) च (द्वा), **समु** ११६ स्मृचवत्.

(२) **व्यक**.९९; **स्मृच**.२३८ त्काले (त्काल) मध्य कृष्टसदं (मध्ये कृष्टे दमं); **वीर**.२२९; **विचि** १०२; **चन्द्र** ६६ मध्य कृष्टसदं (मध्यकृष्टदमं); **सेतु**.१९४; **समु**.११७ स्मृचवत्.

× व्यउ., विता. मितावत् ।

(१) **स्मृच**.२३८; **पमा**.४०८; **रत्न** ११९; **विता**.७१४ शद (शत) व्यासबृहस्पती; **समु** ११७.

(२) **स्मृच**.२३८ सुप (स्वस) विधि (स्थितम्); **पमा**.४०८; **रत्न**.११९; **विता**.७१४ कल्प्य यथाविधि (कल्प्या यथास्थिति) व्यासबृहस्पती; **समु**.११७.

(३) **मिता**.२।१५१; **अप**.२।१५१ (=) भूवा (तु वा); **व्यक** १७०; **स्मृच**.५, २३२; **वीर**.२०१ चांशे (चास्ते) गभु (गे भु); **रत्न**.१११; **नृप्र** ३१ भूवादस्य (वादस्येह,; **व्यप्र**.३५३; **व्यउ**.१०४ भूवा (विवा); **विता**.६८४; **समु** ११३.

(२) अस्यां भुवि ममांशोऽस्तीत्युक्ते नेत्येवंविधोऽशोऽस्तित्वकारितः । अत्र तवांशो नास्तीत्युक्ते विद्यत इत्येवविधोऽशः नास्तित्वनिमित्तकः । *स्मृच.५

(३) अभोगे भोगशून्ये भुक्तिरेव भोगहेतुः ।
विर.२०१

षड्विधभूवादेषु भोगसाक्षिलेख्यप्रामाण्यम्

[1]तस्मिन्भोगः प्रयोक्तव्यः स च साक्षिषु तिष्ठति ।
लेख्यारूढश्चेतरश्च साक्षी मार्गद्वयान्वितः ॥

तस्मिन् सीमानिर्णये भोगः प्रयोक्तव्यः भोगः प्रमाणत्वेन ज्ञातव्यः । साक्षिषु भोगज्ञेष्विति विवक्षितम् । विर.२०५

[2]यस्य ग्रामस्य गृह्णीयात्तस्मै द्रव्ये ससाक्षिकम् ।
लेखयेद्धस्तितस्तस्य सजलं सपथं तथा ॥
सतृणं च सकाष्ठं च ससीमं च समुल्लिखेत् ।
साक्षिणश्चार्यपुरुषाः कर्तव्या नैकवर्णिकाः ॥
[3]तेषामभावे सामन्ता मौलवृद्धोद्धृतादयः ।
स्थावरे षट्प्रकारेऽपि कार्या नात्र विचारणा ॥

(१) सामन्ताद्यभावे मौलादयः, क्रमविधानात् ।
मिता.२।१५२

(२) तेषामिति साक्षिनिर्देशः । अप.२।१५१

(३) विप्रतिपन्नसीमाकस्य ग्रामादेश्चतसृषु दिक्ष्वनन्तरग्रामादिभोक्तारः ससक्तकाः त एव सामन्ता ज्ञेया इत्यर्थः । स्मृच.२२९

क्षेत्रादिवादे सामन्ततत्सक्ततत्ससक्तमौलादिप्रामाण्यम्

[4]क्षेत्रवास्तुतडागेषु कूपोपवनसेतुषु ।
द्वयोर्विवादे सामन्तः (न्त) प्रत्ययः सर्ववास्तुषु ॥

सामन्तः सीमान्तवासी । विर.२०७

[5]सामन्तभावात् सामन्तैः कुर्यात्क्षेत्रादिनिर्णयम् ।
ग्रामसीमासु च तथा तद्वन्नगरदेशयोः ॥

क्षेत्रादिनिर्णय क्षेत्रगृहयोः सीमानिर्णयमित्यर्थः । न चैव ग्रामक्षेत्रगृहादिष्वन्योन्यसामन्तैः अन्योन्यसीमानिर्णयः कार्यः । ग्रामसामन्ताना क्षेत्रगृहसीमासु अपरिचितत्वात् । एव क्षेत्रसामन्ताना ग्रामगृहसीमासु अपरिचितत्वात् । स्मृच.२३२

[6]स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात् ।
तत्संसक्तैस्तु कर्तव्य उद्धारो नात्र संशयः ॥
[7]संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्तिताः ।
कर्तव्या न प्रदुष्टास्तु राज्ञा धर्मं विजानता ॥

तत्संसक्तेषु सामन्तसक्तेषु । उद्धारः सीमाया उद्धारः सीमानिर्णय इति यावत् । एतदुक्तं भवति । चतसृषु दिक्षु स्थितसामन्तग्रामादिभ्योऽनन्तरत्वेन तत्तद्दिशि स्थितग्रामादिभोक्तारस्तत्ससक्तकास्तैः प्रदर्शितसीमालिङ्गैर्ग्रामादेः सीमा निर्णयेदिति । यदा तु तेषामपि प्रकटदोषसद्भावस्तदाप्याह स एव 'संसक्तसक्तदुष्टेषु तत्ससक्ताः प्रकीर्तिताः' इति । तत्संसक्ताः ससक्त-

---

* शेषं मितावत्; रत्न , व्यप्र. स्मृचवत् ।

(१) **अप.**२।१५१ स च (सर्व); **व्यक.**१७१; **स्मृच.**८० श्वेत (श्वोत्त) उत्त.; **विर.**२०५; **सेतु.**१८६ क्षी मार्गं (क्ष्यमाहुः) तः (तम्),**प्रका.**५१ स्मृचवत् , उत्त.;**समु.**३० स्मृचवत् ,उत्त.

(२) **स्मृचि.**२३.

(३) **मिता.**२।१५२ न्ता मौ (न्तमौ); **अप.**२।१५१ मौ (मू) कार्या नात्र (नात्र कार्या); **व्यक.**१७१ कार्या नात्र (नात्र कार्या); **स्मृच.**२२९ प्रथमपादः; **विर.**२०६ व्यकवत्; **पमा.**३९०; **रत्न.**११४; **वीमि.**२।१५२ मितावत् , पू.; **व्यप्र.**३५८; **व्यउ.**१०५; **विता.**६९२; **समु.**११४.

(४) **व्यक.**१७१ न्तः (न्तैः); **विर.**२०७ वास्तु (वस्तु); **रत्न.**११४ पू.; **व्यप्र.**३५८ पू.; **विता.**६९२ पू.

(१) **अप** २।१५१ (=) सामन्तभावात् (सामन्ताभावेऽ); **व्यक.**१७१-१७२,**स्मृच.**२३२ सामन्तभावात् (सामन्तभावे); **विर.**२०७ सामन्त (सीमान्त) तद्वत् (तत्त्वे); **पमा.**३९७ सामन्तभावात् (सीमान्तवासि), **रत्न.**११४, **नृप्र** ३२; **व्यप्र.** ३५८ क्षेत्रादि (दत्त्र वि)· ३६२ सामन्तभावात् (सामन्ताभावेऽ) सु च (दिषु); **विता** ६९२ क्षेत्रादि (दत्त्र वि); **समु.**११५ स्मृचवत्.

(२) **मिता** २।१५२; **अप.**२।१५१ (=) क्तैस्तु (क्तेषु); **व्यक.**१७२; **स्मृच.**२२९ अपवत्; **विर.**२०७ अपवत्; **पमा.**३८९ प्र (च) साम (सामा); **रत्न.**११३; **नृप्र.**३१; **वीमि.**२।१५२; **व्यप्र.**३५६; **व्यउ** १०५ प्रदु (प्रवि); **विता.**६९१; **समु.**११४.

(३) **मिता.**२।१५२; **अप.**२।१५१ (=) दोषे तु (दुष्टेषु) शा (ह्या); **व्यक.**१७२ दोषे तु (दुष्टेषु) स्तु (श्च); **स्मृच.** २२९ दोषे तु (दुष्टेषु) पृ ; **विर.**२०७ स्मृचवत्; **पमा.** ३८९ न प्र (स्त्ववि); **रत्न.**११३; **विचि.**९५ उत्त,; **वीमि.** २।१५२; **व्यप्र.**३५६; **व्यउ.**१०५; **विता.**६९१; **सेतु.** १८८; **समु.**११४.

संसक्तसंसक्ताः। एतदुक्तं भवति। चतुर्षूपु दिक्षु स्थित-संसक्तसंसक्तग्रामादिभ्योऽनन्तरत्वेन तद्दिशि स्थित-ग्रामादिभोक्तारः संसक्तससक्तससक्ताः। तैः प्रदर्शित-सीमालिङ्गैर्ग्रामादेः सीमा निर्णयेदिति। स्मृच.२२९

[1]त्यक्त्वा दुष्टांस्तु सामन्तानन्यान्मौलादिभिः सह।
संमिश्र्य कारयेत्सीमामेवं धर्मविदो विदुः॥

(१) 'अज्ञानोक्तौ दण्डयित्वा पुनः सीमा विचारये-दि'त्युक्त्वा 'त्यक्त्वा दुष्टास्तु' इति निर्णयप्रकार-स्तेनैवोक्तः। मिता.२।१५३

(२) ससक्तससक्तससक्ता अपि सामन्तकोटिनिविष्टा-स्तेनैतेपा सामन्तशब्देन निर्देशो नानुपपन्नः। ततश्चाय-मर्थः। दुष्टान्संसक्तससक्तससक्तास्त्यक्त्वा साक्षिसामन्त-तत्कोटिभ्योऽन्यान्सीमालिङ्गाभिज्ञान्मौलवृद्धोद्धृतसहिता-न्सीमा प्रति निर्णायकान् कारयेदिति। के पुनः साक्षि-सामन्ततत्कोटिभ्योऽन्य इत्यपेक्षिते नारदः 'नगरग्राम-गणिनो ये च वृद्धतमा नराः' इति। सीमालिङ्गज्ञा इति शेषः। स्मृच.२३०

सामन्तमौलवृद्धोद्धृतनिरुक्तिः

[2]संसक्तकास्तु सामन्तास्तत्संसक्तास्तथोत्तराः।
संसक्तसक्तसंसक्ताः पद्माकाराः प्रकीर्तिताः॥

(१) उद्धृतादय इत्यादिशब्देन येपा परिग्रहस्तेपा निर्देश स्वयमेव करोति। क्षेत्रादेर्विप्रतिपन्नसीमकस्य सर्वासु दिक्षु येऽनन्तरं क्षेत्रादिभोक्तारस्ते संसक्ताः। ये तु तदनन्तरास्ते सामन्ताः। येऽपि तदनन्तरास्ते

(१) **मिता.**२।१५३, **अप.**२।१५१ (=) क्त्य (श्रा); **व्यक.**१७२ स्तु (श्च) मिश्र्य (श्रित्य), **स्मृच.**२२९; **विर.**२०८ समिश्र्य (समीक्ष्य), **पमा.**३९८ नन्या (नन्य) मिश्र्य (मील्य), **रत्न.**११३; **विचि.**९५ अन्यान् (गत्वा); **नृप्र.**३२ समिश्र्य (समीक्ष्य); **सवि.**३३४ ला (ल्या) बृहस्पतिः; **व्यप्र** ३५६; **व्यउ.**१०७ अपवत्, मनुः; **विता.**६९१,६९९ अपवत्, **सेतु.** १८८ त्वा (क्त) स्तु (श्च) अन्यान् (गत्वा) क्त्य (श्र,; **समु.**११४.

(२) **मिता.**२।१५१, **अप** २।१५१ क्त्वास्तु (क्त्वास्त्वथ) स्तथो (स्त्वथो) संसक्ता. (सक्तान्ताः); **व्यक.**१७३; **विर.**२१३ क्त्वास्तु (क्त्वास्त्वथ) ससक्ता. (सक्तान्ता); **पमा.**३८९, **नृप्र.** ३१; **व्यउ.**१०४; **विता.**६८८ ससक्ताः (सामन्ता.), **समु.** ११४.

संसक्तससक्ताः। तेषामपि येऽनन्तरास्ते संसक्तसक्तसक्ताः। एव पद्माकाराः। षोडशसख्याका भवन्ति।

अप.२।१५१

(२) पद्मवन्मण्डलाकाराः सीमाविवादविषय परि-वेष्ट्य सर्वदिक्षु अवस्थिता इत्यर्थः। विर.२१३

[1]ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्तितम्।
गृहं गृहस्य निर्दिष्टं समन्तात्परिरभ्य च॥

(१) ग्रामादिशब्देन तत्स्थाः पुरुषा लक्ष्यन्ते। 'ग्रामः पलायित' इति यथा। सामन्तग्रहणं च तत्संसक्तानु-पलक्षणार्थम्। मिता.१।१५१

(२) तत्र ग्रामादिशब्देन प्रथमान्तेन लक्षणया ग्रामादिभोक्ता कथितः। ततश्चायमर्थः। विवादविष-यस्य ग्रामादेः समन्ततः पूर्वदक्षिणपश्चिमोत्तरदिक्षु स्थित-ग्रामादिभोक्तृजनस्तस्य सामन्तास्ततः सकाशाद्विवाद-विषयग्रामादिसीमालिङ्गानि परिभावयेन्निश्चिनुयात्। निर्णेता राजादिरिति। एव नगरदेशयोरपि तत्तत्साम न्तात्परिभावयेदिति विधिरुदाहरणमुखेनास्मिन्वचने सूचित इत्यवगन्तव्यम्। एवमेव केदाराराममोद्यानदेवा-लयकूपतडागप्रवर्षणोद्भूतजलप्रवाहस्थानादिसीमाविवा-दे साक्षितत्तत्सामन्तादितो निर्णेता निर्णयेत्। तथा च बृहस्पतिः 'सर्वस्मिन्स्थावरे वादे विधिरेषः प्रकीर्तितः'।

स्मृच.२३२-२३३

(३) ग्रामस्य ग्रामान्तरेण सह सीमाविवादे तत्प्रत्या सन्नोऽन्यो ग्रामसमूहः सामन्त उच्यते। एव गृहक्षेत्र योरपि समन्तात् परिरभ्य यः परितो वेष्टयित्वा स्थितः।

विर.२१३

[2]ये तत्र पूर्वसामन्ताः पश्चाद्देशान्तरं गताः।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्त्तिताः॥

(१) **मिता** २।१५१ च (हि); **अप.**२।१५१ रभ्य च (भावयेत्) नारद., **व्यक.**१७३ भ्य (क्त्य); **स्मृच.**२३२ समन्तात् (सामन्तान्) शेष अपवत्; **विर** २१३; **रत्न** ११३; **विचि.**९५; **सवि.**३३८ तम् (त.) निर्दि (विदि) समन्तात्प-रिरभ्य च (सामन्तान् परिभावयेत) मनु, **वीमि** २।१५१; **व्यप्र.**३५६ मितावत्, **व्यउ** १०४ मितावत्; **विता** ६८८ मितावत्; **राकौ.**४६१; **सेतु.**१८८; **समु.**११५ मितावत्.

(२) **मिता.**२।१५१ पूर्व (पूर्व); **अप.**२।१५१ मितावत्;

[1]निष्पाद्यमानं यैर्दृष्टं तत्कार्यं तद्गुणान्वितैः ।
वृद्धा वा यदि वाऽवृद्धास्ते तु वृद्धाः प्रकीर्तिताः॥

कार्यं सीमानिर्णये हेतुभूत, त्रयो गुणाः सत्यव्रताचाररूपाः । विर.२१४

उपश्रवणसंभोगकार्याख्यानोपचिह्निताः ।
उद्धरन्ति पुनर्यस्मादुद्धृतास्ते ततः स्मृताः ॥

(१) उपश्रवण परस्परप्रसिद्धिः, कार्य तत्करग्रहण, आख्यान वार्ता । अप.२।१५१

(२) उपश्रवण परम्पराप्रसिद्धिः सभोगो भुक्तिः कार्याख्यान तत्फलकरग्रहणवार्ता । +व्यक.९७

(३) कार्यज्ञातृत्व येषा पारम्पर्येण ते उद्धृता इति तृतीयश्लोकस्य तात्पर्यार्थः । एव च प्रकटदोषेण ससक्तससक्तससक्तेषु दृष्टेषु पूर्वसामन्तायुपेतनागरग्राम्य जनश्रेणीवयोवृद्धदर्शितैः सीमालिङ्गैः सीमानिर्णयः कार्य इत्यवबोद्धव्यम् । ×स्मृच.२३०

+ विर व्यकवत् स्मृचवच्च । × रत्न., व्यप्र. स्मृचवत् ।

व्यक.१७३ परि (सप्र); **स्मृच.**२३० व्यकवत्; **विर** २१३ पूर्व (सर्वे) परि (सप्र), **पमा** ३९० मितावत्, **रत्न** ११३; **विचि.**९५, **नृप्र** ३१, **पवि** ३३४ तु ते (त्ततो) परि (सप्र), **वीमि** २।१५१ मितावत्, **व्यप्र** ३५७ मितावत्, **व्यउ** १०५, **विता** ६८८, **सेतु.**१८८-१८९ तत्र (यत्र) तन्मूलत्वात्तु (तत्तन्मूलात्तु), **समु** ११४ मितावत्.

(१) **मिता.**२।१५१, **अप.**२।१५१ तदगु (नृगु) ते तु वृद्धाः प्र (वृद्धास्ते परि) नारद., **व्यक** १७४ तद्गु (त्रिगु) तु **वृद्धाः** प्र (वृद्धाः परि); **स्मृच.**२३० तद्गु (नृगु) तु वृद्धाः प्र (वृद्धाः परि); **विर.**२१४ व्यकवत्; **पमा.**३९० ष्याद्य (वध्य) तद्गु (सुगु) तु (च); **रत्न.**११३; **नृप्र** ३१ निष्पाद्य (निष्पद्य) तद्गु (तद्व); **सवि.**३३४ र्यं तद् (र्यस्य) तु वृद्धाः प्र (वृद्धाः परि); **वीमि.**२।१५१, **व्यप्र** ३५७ तद्गु (नृगु), **व्यउ.** १०४; **विता.**६८८ तद्गु (तद्व), **समु** ११४ तद्गु (सद्गु) तु वृद्धाः प्र (वृद्धाः परि).

(२) **मिता.**२।१५१; **अप.**२।१५१ पुन. (ततो), **व्यक.** १७४ ख्यानोप (ख्या लोप), **स्मृच.**२३० अपवत्; **विर.** २१४ पुन. (ततो) तत. स्मृता. (प्रकीर्तिताः); **पमा.**३९० कार्याख्या (भयस्था), **रत्न** ११३; **नृप्र** ३१ चिह्निताः (लक्षिताः) शेष अपवत्; **सवि.**३३४ पुन (ततो) दधृ (ध); **वीमि.** २।१५१; **व्यउ.**१०४, **विता.**६८८ तत. स्मृता.(प्रकीर्तिता.), **समु.**११४.

सीमावादे पक्षसाक्षिणः उक्तिविधिः

[4]एको यद्वन्नयेत्सीमामुभयोरीप्सितः क्वचित् ।
मस्तके क्षितिमारोप्य रक्तवासाः समाहितः ॥

सामन्तादीना पूर्ववदेषु सख्यागुणातिरेकेण साक्षित्वम्

[5]सामन्ताः साधनं पूर्वमनिष्टोक्तौ गुणान्विताः ।
द्विगुणास्तूत्तरा ज्ञेयास्ततोऽन्ये त्रिगुणा मताः ॥

(१) एते च सामन्तादयः सख्यागुणातिरेकेण सभवन्ति । मिता.२।१५२

(२) प्रतिवादिना सामन्तान्प्रत्यनिष्टोक्तौ दोषोद्भावन इत्यर्थः । उत्तराः ससक्तादयः । सामन्तादीनामसाक्षित्वेऽपि सीमालिङ्गानि वृक्षतुषादीनि प्रदर्शयता सीमानिर्णायकत्वमुपपद्यत एव । त एव हि तदभिज्ञाः । यद्यपि वृक्षादिस्वरूपमन्येऽपि जानीयुस्तथाऽप्यय वृक्षः सीमलिङ्गमय नेति विवेकोऽन्येषा नास्ति । तथाऽत्र प्रदेशे तुषाङ्गारकादि निखात विद्यत इति सामन्तादीनामेव शक्य ज्ञातुम् । अप.२।१५१

(३) अनिष्टोक्तौ प्रतिवादिना गुप्तदोषोद्भावने कृत इत्यर्थः । उत्तरास्तत्ससक्तादयोऽन्तरङ्गाः सामन्तकोटयो द्विगुणा ज्ञेयाः । ततः सामन्तकोटिभ्योऽन्ये बहिरङ्गा नागरादयो मौलवृद्धोद्धृतसहितास्त्रिगुणा मताः । एव तत्ससक्तादिष्वपि गुप्तदोषोद्भावने सत्युत्तरेषा द्वैगुण्यादिकमूह्यम् । स्मृच.२३०

(४) अनिष्टोक्तौ तेषा दोषोक्तौ तेषा शङ्कामात्रे तात्पर्य, तेन प्रथमसामन्तेषु दोषशङ्काया तत्संसक्ता द्विगुणाः, तेषामपि दोषशङ्काया तत्ससक्तास्त्रिगुणा ग्राह्या इति सामन्ता इत्यादेरर्थः । विर.२०८

साक्षिसामन्तादीनामनृतोक्तौ दण्डविधिः

[6]बहूनां तु गृहीतानां न सर्वे निर्णयं यदि ।
कुर्युर्भयाद्वा लोभाद्वा दाप्यास्तूत्तमसाहसम् ॥

(१) **अप** २।१५२.

(२) **मिता.**२।१५२ अनिष्टोक्तौ (निर्दोषाः स्युः); **अप.**२।१५१, **व्यक.**१७२, **स्मृच.**२३०; **विर.**२०८; **रत्न.**११३; **व्यप्र.**३६७; **व्यउ.**१०५-१०६ साध (शास) अनिष्टोक्तौ (निर्दोषा. स्युः) मनुः, **विता.**६९१ मितावत्; **समु.**११४.

(३) **मिता.**२।१५३ दाप्या (दण्ड्या); **अप.**२।१५३; **व्यक.**१७३, **स्मृच.**२२३; **विर.**२१२; **पमा.**३९७ सर्वे

(१) 'अनृते तु पृथक् दण्डया' इत्येतद्दण्डविधान मज्ञानविषयम्। 'बहूना तु गृहीतानामि'ति ज्ञानविषये साक्ष्यादीना कात्यायनेन दण्डान्तरविधानात्।

*मिता.२।१५३

(२) सीमासाक्षित्वेन परिकीर्तितानामशेषाणा साक्ष्यवादार्थमेलने कृते ते सर्वे यदि भयादिना साक्ष्यवाद न ब्रूयुस्तदा ते प्रत्येकमुत्तमसाहसं दाप्या इत्यर्थः। प्रत्येकमित्यनुक्तावप्येकैकस्य साक्षित्वात्तदत्र लभ्यते।

स्मृच.२३३

[1]नाज्ञानेन हि मुच्यन्ते सामन्ता निर्णयं प्रति ॥

अज्ञानेन ज्ञानेऽपि अज्ञानाभिधानेन। विर.२१२

अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेत्।
कीर्तिते यदि भेदः स्याद्दण्डयास्तूत्तमसाहसम् ॥

(१) यदा तु ते भयादिना सर्वे अनैकमत्येन ब्रुवते तदाऽप्येवमेव दाप्या इत्याह स एव—कीर्तिते यदीति। अज्ञानोक्ताविति निर्णयाभावोपलक्षणार्थम्। तेन भेदेनोक्तावपि निर्णयाभावात्पुनः सीमा विचारयेत्। कस्तत्र निर्णायक इत्यपेक्षिते शङ्खलिखितौ 'सामन्तविरोधे लेख्यप्रत्यय' इत्यादि। +स्मृच.२३३

(२) कीर्तिते सभूय साक्ष्ये उक्ते, पुनस्तेषा यदि भेदो वचनविरोधः स्यादित्यर्थः। विर.२१२

दशग्रामादिसीमाकरणम्

[2]दशग्रामशतग्रामसहस्रग्रामलक्षणाम्।
विषमां नृपतिः कुर्याच्चिह्नैः सीमां विनिश्चिताम् ॥

प्रमाणान्तराभावे राजा निर्णेता

[3]भयवर्जितभूपेन सर्वाभावे स्वयंकृता ॥

राजदैविकाभावे साक्ष्यप्रामाण्यम्

[4]सीमाचङ्क्रमणे कोशे पादस्पर्शे तथैव च।
त्रिपक्षपक्षसप्ताहं दैवराजिकमिष्यते ॥

(१) एतेषा साक्षिसामन्तप्रभृतीना सीमाचङ्क्रमणदिनादारभ्य यावत्त्रिपक्षं राजदैविकं व्यसनं चेन्नोत्पद्यते तदा तत्प्रदर्शनात्सीमानिर्णयः। अथ च राजदैविकव्यसनावधिः कात्यायनेनोक्तः सीमेत्यादिना।

मिता.२।१५२

(२) यद्यप्यत्र मन्वादिवचनाच्चङ्क्रममाणानन्तरमेव निर्णयः सपद्यत इति प्रतिभाति तथापि चङ्क्रमणदिनमारभ्य सार्धमासान्ते निर्णयो न ततोऽर्वागित्यवगन्तव्यम्। यदाह—सीमेति। यथासंख्यमिति शेषः। यदा तूक्तलक्षणस्य नरस्याभावस्तदापि न दिव्येन निर्णयः। 'वाक्पारुष्ये महीवादे दिव्यानि परिवर्जयेत्' इत्याद्यनेकवचनेन भूविवादे दिव्यनिषेधात्। सीमाविवादश्च भूविवाद एव। स्मृच.२३१-२३२

क्षेत्रसीमावादस्थातिदेशः गृहादौ

[5]क्षेत्रकूपतडागानां केदारारामयोरपि।
गृहप्रासादावसथनृपदेवगृहेषु च* ॥

परस्परगृहादीना संबाधपरिहारादि

[6]मेखलाश्रमनिष्काशगवाक्षान्नोपधारयेत्।
प्रणालीं गृहवास्तुं च पीडयन्दण्डभाग्भवेत् ॥

* अप. मितावत्। + रत्न., व्यप्र. स्मृचवत्।

* अथातिदेशा इत्युपक्रम्य एतद्वचनमुद्धृत कल्पतरौ। सीमां वि (सीमावि); **विर.**२१८ (=).

(सीमा); **रत्न.**११५, **नृप्र.**३२, **सवि.**४९१ दाप्या (दण्ड) याज्ञवल्क्य.; **व्यप्र.**३६१; **व्यउ.**१०६ नारद; **व्यम.**९७; **विता.**६९८ मितावत्, **समु.**११५.

(१) **अप.**२।१५३ नाज्ञा (न ज्ञा); **व्यक** १७३; **स्मृच.** २३३; **विर.**२१२ ना (अ) प्रति (यदि), **रत्न.**११५; **बाल.** २।१५३ (ना०) मु (विमु), **समु.**११५ हि (वि).

(२) **मिता.**२।१५३; **अप.**२।१५३ ण्ड्या (ण्ड); **व्यक.** १७३; **स्मृच.**२३३; **विर.**२१२; **पमा.**३९७ उक्त.: ३९८ क्तौ (क्तान्) पू; **रत्न.**११५, **सवि.**४९१ क्तौ (क्तान्); **व्यप्र.** ३६१; **व्यउ.**१०७ मनु, **विता.**६९८-६९९ क्तौ दण्डयित्वा (क्तौ तु तेषां वै) श्लोकार्धौ व्यत्यासेन पठितौ; **समु** ११५.

(३) **व्यक.**९७ लक्षणाम् (लक्षणान्) विषमाम् (विषयान्)

(१) एतेषा साक्षिसामन्तप्रभृतीना सीमाचङ्क्रमणदिनादारभ्य यावत्त्रिपक्षं राजदैविकं व्यसनं चेन्नोत्पद्यते तदा तत्प्रदर्शनात्सीमानिर्णयः। अथ च राजदैविकव्यसनावधिः कात्यायनेनोक्तः सीमेत्यादिना।

मिता.२।१५२

(२) यद्यप्यत्र मन्वादिवचनाच्चङ्क्रममाणानन्तरमेव निर्णयः सपद्यत इति प्रतिभाति तथापि चङ्क्रमणदिनमारभ्य सार्धमासान्ते निर्णयो न ततोऽर्वागित्यवगन्तव्यम्। यदाह—सीमेति। यथासंख्यमिति शेषः। यदा तूक्तलक्षणस्य नरस्याभावस्तदापि न दिव्येन निर्णयः। 'वाक्पारुष्ये महीवादे दिव्यानि परिवर्जयेत्' इत्याद्यनेकवचनेन भूविवादे दिव्यनिषेधात्। सीमाविवादश्च भूविवाद एव। स्मृच.२३१-२३२

क्षेत्रसीमावादस्थातिदेशः गृहादौ

[5]क्षेत्रकूपतडागानां केदारारामयोरपि।
गृहप्रासादावसथनृपदेवगृहेषु च* ॥

परस्परगृहादीना संबाधपरिहारादि

[6]मेखलाश्रमनिष्काशगवाक्षान्नोपधारयेत्।
प्रणालीं गृहवास्तुं च पीडयन्दण्डभाग्भवेत् ॥

* अथातिदेशा इत्युपक्रम्य एतद्वचनमुद्धृत कल्पतरौ। सीमां वि (सीमावि); **विर.**२१८ (=).

(१) **व्यक.**९७ (भयवर्जिता नृपेण सर्वाभावे स्वयकृता); **विर.**२१६.

(२) **मिता.**२।१५२; **अप.**२।१५३; **स्मृच.**२३२ हं (हात्); **पमा.**३९५ पक्षस (पक्षस) जि (ज); **रत्न.**११४; **नृप्र** ३१; **सवि.**३३६ जि (ज); **वीमि.**२।१५२ दैवराजिक (राजदैविक); **व्यप्र** ३५९; **व्यउ.**१०६ सविवत्; **व्यम.** ९६; **विता.**६९६ ह (ह); **समु.**११५.

(३) **मिता.**२।१५४; **व्यक.**९७ प्रासादावसथनृप (प्रासादावसथेष्वेव); **विर.**२१८ नृप (क्षेत्र); **रत्न.**११४; **व्यप्र.** ३५८ प्रा (प्र) थनृप (थेष्वेव); **व्यउ.**१०७; **विता.**६९२; **समु.**११५ प्रा (प्र)

(४) **अप.**२।१५४ श (स); **व्यक.**९७; **विर.**२१९;

(१) मेखला कुड्यमूलबन्धः । भ्रमो जलनिर्गमः । निष्कासो हर्म्यादिभित्तिनिर्गतं काष्ठादिनिर्मितमस्पृष्टभूमिकमुपवेशनस्थानम् । नोपधारयेन्न निरुन्ध्यात् । गृहवास्तुर्वासभूमिः । ×अप.२।१५४

(२) मेखला गृहादिमूलबन्धः, भ्रमोऽत्र जलनिर्गमप्रदेशः, निष्कासो निर्गमोचितदेशः । नोपधारयेन्न निरुन्ध्यात् । विर.२१९

[1]निवेशसमयादूर्ध्वं नेते योज्याः कदाचन ।
दृष्टिपातं प्रणालीं च न कुर्यात्परवेश्मसु ॥

योज्याः परानिष्टकरतयेति शेषः । दृष्टिप्रासः गवाक्षः । परवेश्मसु परवेश्माभिमुख्येनेत्यर्थः । स्मृच.२३५

[2]विण्मूत्रोदकचक्रं च बह्निश्वभ्रनिवेशनम् ।
अरत्निद्वयमुत्सृज्य परकुड्यान्निवेशयेत् ॥

मार्गतीर्थादिषु पीडापरिहारः

[3]सर्वे जनाः सदा येन प्रयान्ति स चतुष्पथः ।
अनिषिद्धा यथाकालं राजमार्गः स उच्यते ॥

अवेलायां यत्र मार्गे राजकीयैश्चङ्क्रमणं निषिध्यते स राजमार्ग इत्यर्थः । स्मृच.२३५

[4]न तत्र रोपयेत् किंचिन्नोपहन्यात्तु केनचित् ।
गुर्वाचार्यनृपादीनां मार्गादानात्तु दण्डभाक् ॥
यस्तत्र संकरश्वभ्रान्वृक्षारोपणमेव च ।
कामात्पुरीषं कुर्याच्च तस्य दण्डस्तु माषकः ॥

तत्र मार्गे सकरोऽवकरः । हरिहरादिभिः ससरणानुवृत्तौ प्रजापतिरिति मस्तके दत्त्वा यस्तत्रेति वाक्यमवतारित इह न फलतो विशेष इति । विर.२२१

[5]तडागोद्यानतीर्थानि योऽमेध्येन विनाशयेत् ।
अमेध्यं शोधयित्वा तु दण्डयेत्पूर्वसाहसम् ॥

(१) तडागादावमेध्यकर्तुरत्यन्तापराधित्वाद्दण्डेऽप्यत्यन्ताधिक्यमाह—तडागोद्यानेति । स्मृच.२३५

(२) अमेध्यं शोधयित्वा त्वमेध्यशोधनममेध्यकर्तृद्वारा कारयित्वेत्यर्थः । विर.२२२

[6]दूषयेत्सिद्धतीर्थानि स्थापितानि महात्मभिः ।
पुण्यानि पावनीयानि प्राप्नुयात्पूर्वसाहसम् ॥

कश्मलचेलनिर्णेजनादिना तीर्थदूषकस्याप्ययमेव दण्ड आह स एव—दूषयेत्सिद्धतीर्थानीति ।

स्मृच.२३५

[7]मर्यादाभेदने चैव सीमालिङ्गविनाशने ॥

× रत्न., व्यप्र. अपवत् ।

रत्न.११६, विचि.९७ श (स) धार (रोध), व्यप्र ३६३ धार (रोध), व्यउ.१०८ विचिवत्, व्यम ९७ विचिवत्, विता ७०३ व्यप्रवत्; सेतु १९० व्यप्रवत्, समु.११६ भ्रम (भ्रम) श (स) त्रोपधार (त्रीन्न रोध).

(१) अप.२।१५४ पात (पाते) लीं (ल); व्यक.९७ योज्याः (पोष्याः); स्मृच.२३५ पातं (प्रास); विर.२१९ लीं (ल) उत्त.; पमा ४००; रत्न.११६; विचि.९७ दा (ध) सु (नि); नृप्र.३२ उत्त; सवि.३३९ ज्याः (ग्या.) पू ; व्यप्र.३६४, व्यउ १०८ दा (ध); व्यम.९७; विता ७०४ दृ (वृ); सेतु. १९०-१९१ सु (नि); समु.११६ पात (प्रास).

(२) अप.२।१५४; व्यक.९८ कुड्या (कुथ्या), स्मृच. २३५ चक्र (वप्र); विर.२२०; पमा.४००; रत्न.११६, विचि.९८; सवि ३३९ चक्र च (वप्रांश्च) ज्यात् (ज्या) बृहस्पतिः, चन्द्र.६३ उत्त ; वीमि.२।१५४ भ्र (भ्रे) नम् (येत् ज्यात् (ज्या); व्यप्र ३६४ चक्र (सेक), व्यउ १०८; व्यम.९७; विता.७०४ चक्र च बह्नि (सेक च बहिः), राकौ. ४६५; सेतु १९१; समु ११६ चक्र (वप्र), विव्य.४७.

(३) व्यक.९८ जनाः सदा (जनपदा) स चतुष्पथः (सचतुष्पदाः); स्मृच.२३५; विर.२२१ पि (रु) ल (मं) शेषं व्यकवत्; दविं.२९७ (सर्वे जानपदा येन प्रयान्ति सचतुष्पदा) काल (काम), रत्न.११७, व्यप्र ३६४; व्यउ. १०९, व्यम.९७; सेतु १९२ विरवत्; समु ११६.

(१) व्यक ९८, विर.२२१, सेतु १९२ रोप (रोध) त्तु (च्चे).

(२) व्यक.९८ सकर (शोकर), विर.२२१; सेतु.१९२.

(३) अप.२।१५४ गो (कों); व्यक.९८; स्मृच.२३५; विर.२२२; पमा ४०२, रत्न.११७, विचि.९९; दविं. २९८, व्यप्र.३६५; व्यउ.१०९; व्यम.९८, विता.७०७; सेतु.१९३, समु.११६.

(४) अप.२।१६४ सिद्ध (सर्व) प्राप्नुयात् (दण्डयेत्); स्मृच.२३५, विर.२२२ येत्सि (यन् सि) पुण्यानि पाव (धान्यानि वाप); पमा.४०२ येत्सि (यन् सि); रत्न.११७; व्यप्र.३६५; व्यउ.१०९; विता.७०७ पावनीया (यानि तीर्थ); समु.११६.

(५) विता.७०७.

सीमावृक्षफलस्वाम्यविधिः

[1]सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः ।
फलं पुष्पं च सामान्यं क्षेत्रस्वामिषु निर्दिशेत् ॥

सीमोत्पन्नवृक्षादिफलपुष्पापहारदण्डप्राप्तिपरिहारोपयोगिनमर्थमाह–सीमामध्य इति । सामान्य साधारणम् । क्षेत्रस्वामिषु सवृक्षसीमकक्षेत्रयोः स्वामिषु । यद्येकक्षेत्रस्वाम्येव सर्वफलमाहरेत्तदा तस्मिन्नर्धफलापहारदण्डप्राप्तिः । स्मृच.२३६

[2]अन्यक्षेत्रेषु जातानां शाखा यत्रान्यसंस्थिताः ।
स्वामिनं तं विजानीयाद्यस्य क्षेत्रे तु संस्थिताः ॥

स्वाम्यनुमतिमन्तरेण कृतिफलालाभ

[3]क्षेत्रिकस्य तदज्ञानात्क्षेत्रे बीजं प्रकीर्यते ।
न तत्र बीजिनो भागः क्षेत्रिकस्यैव तद्भवेत् ॥
[4]अस्वाम्यनुमतेनैव संस्कारं कुरुते तु यः ।
गृहोद्यानतडागानां संस्कर्ता लभते न तु ॥
देयं स्वामिनि चायाते न निवेद्य नृपे यदि ।
अथावेद्य प्रयुक्तस्तु तद्गतं लभते व्ययम् ॥

(१) **अप.**२।१५५; **व्यक** ९८, **स्मृच** २३६, **विर.** २२३सामान्य (संजात); **पमा.**४०४, **रत्न** ११८, **विचि.**९८ विरवत्; **नृप्र.**३२, **वीमि** २।१५४ क्षेत्रयो (सेवयो) सामान्य (सजात); **व्यप्र** ३६६, **व्यउ.**११०, **व्यम** ९८, **विता** ७१० (फल पुष्प च सामान्य विज्ञेय क्षेत्रिणोर्द्वयो), **सेतु.** १९३ विरवत्, **समु.**११७, **विव्य** ४८ विरवत्.

(२) **अप.**२।१५५ तु स (षु सं), **व्यक** ९८, **स्मृच.** २३६ त्रेषु (त्रे तु) तु सस्थि (तु सश्रि), **विर** २२३ यत्रान्य (यान्यत्र) स्थिता. (स्थिता) त्रे तु (त्रेषु), **पमा** ४०४ त्रेषु (त्रे तु) स्थिताः (स्थिता); **रत्न.**११८; **विचि** ९८ यत्रान्य (श्चान्यत्र) त्रे तु (त्रेषु); **नृप्र.**३२ तु सस्थि (षु सश्रि) शेष विरवत्; **चन्द्र.**६३ त्रे तु (त्रेषु); **वीमि** २।१५४ चन्द्रवत्; **व्यप्र.**३६६ त्रेषु (त्रे तु) त्रे तु संस्थि (त्रस्य सश्रि), **व्यउ** ११० व्यप्रवत्; **व्यम.**९८ त्रेषु (त्रे तु) त्रे तु (त्रेषु), **विता** ७१० त्रेषु (त्रे तु) तु सस्थि (तु साश्रि), **सेतु** १९३ विचिवत्, **समु.** ११७ स्मृचवत्; **विव्य.**४८ विचिवत्. (३) **समु.११७.**

(४) **अप.**२।१५७गा (का), **व्यक** ९९; **स्मृच.**२३७; **विर.** २२५; **पमा.**४०७, **रत्न** ११८; **नृप्र** ३२ सस्कारं (सत्कार्य); **सवि.**३४० गृहो (कूपो) गा (का); **चन्द्र.**६४, **व्यप्र.**३६७; **विता.**७११ न तु (न तत्); **समु.**११७डागा (टाका).

(५) **अप.**२।१५७ पे (प) व्ययम् (फलम्); **व्यक.९९;** (१) आवेद्य नृपे तत्प्रयुक्तः सस्कर्ता संस्कारगतं व्यय लभते । स्मृच.२३७

(२) अस्वाम्यनुमतेनैव नृपे चानिवेद्य यदि परगृहोद्यानतडागाना सस्कार कुरुते तदा संस्कर्ता न किंचित्फल लभते । अथ स्वामिनि अनिवेद्य राजनि च निवेद्य करोति, तदा आयाते स्वामिनि तस्मात्सस्कारव्यय लभत इत्यर्थः । विर.२२६

कृष्टाकृष्टविधिः

[5]अशक्तितो न दद्याच्चेत्खिलार्थं यः कृतो व्ययः ।
तदष्टभागहीनं तु कर्षकः फलमाप्नुयात् ।
वर्षाण्यष्टौ स भोक्ता स्यात्परतः स्वामिने तु तत् ॥

(१) खिलार्थे यः कृतो व्ययः तत्प्रतिदानासमर्थः स्वामी कर्षकाय यदि खिलव्यय न दद्यात् तदा कर्षकः क्षेत्रफलस्याष्टम भाग अष्टौ वर्षाणि यावत्स्वामिने दत्वाऽवशिष्ट गृह्णीयात् । तदूर्ध्वं स्वामिने तत्क्षेत्र समर्पयेदित्यर्थः । यदेतत् 'विकृष्यमाणे क्षेत्र' इत्यादिना 'परतः स्वामिने तु तत्' इत्यन्तेनोक्त तत्सर्वं प्रतक्षेत्रिक विषये तत्पुत्राद्यागमने कार्यम् । अशक्तनष्टक्षेत्रिक विषये तु तेषामागमने तत्पुत्रादीनामागमने वा कार्यमित्यवगन्तव्यम् । स्मृच.२३९

(२) अनेनाष्टमे वर्षे कर्षकस्य भोगो विहितः । पूर्वेण 'तदष्टभागप्रचर्येति नारदवाक्येन तु निषिद्ध इति विरोधे पूर्व कष्टसाध्यकर्षणभूमिविषयमुत्तरञ्चातिकष्टसाध्यकर्षणभूमिविषयमिति व्यवस्था । विर.२२७-२२८

स्मृच.२३७ देय (व्यय); **विर.**२२५ तद्व (तत्कृ), **पमा** ४०७ स्मृचवत्; **रत्न** ११८; **चन्द्र.**६४-६५ ऋतु तद्वत (कृतु दत्त स), **व्यप्र** ३६७; **विता** ७११ चायाते न (वा याते त्व) व्यय (फलम्), **समु** ११७ युक्त (वृत्त).

(१) **अप** २।१५८ यः कृतो व्ययः (च कृतं व्ययम्) क (कात्); **व्यक** ९९ ने तु (नस्तु), **स्मृच** २३९ तः (तदा); **विर.**२२७ फल (कर्ष), **पमा.**४०९ ण्य (न), **रत्न.**११९, **विचि.** १०१ ने तु (नो हि); **सवि.**३४० खिलार्थे (तदर्थं) ण्य (श्च); **चन्द्र.**६६ ने तु तत् (नो भवेत्), **व्यप्र** ३६९ च्चेत् (च्च); **व्यउ.**१११ खिलार्थे (दखिलो), **विता.**७१५-७१६ ने तु (नस्तु); **सेतु.**१९५ विचिवत्; **समु** ११८ स्मृचवत्; **विव्य.** ४८ फलमा (समवा) ने तु (नो हि).

व्यासः

सीमाप्रकाराः

[1]निम्नोन्नता च ध्वजिनी नैधानी राजकारिता ।
स्थिता पञ्चविधा सीमा मत्स्यिनी तु चला स्मृता ॥

निम्ना च उन्नता च निम्नोन्नता । मत्स्यिनी तु चला जलस्थास्थिरत्वात् । विर.२१५

[2]ग्रामयोरुभयोर्यत्र गर्तः सीमाप्रवर्तकः ।
निम्नोपलक्षिता सा तु शास्त्रविद्भिरुदाहृता ॥

आसा विभागमाह–ग्रामयोरिति । सा निम्नेति शेषः । विर.२१५

[3]शरकुब्जकवल्मीका यत्र देवगृहाणि च ।
अश्मकूटाश्च दृश्यन्ते ज्ञेया सा तु समुन्नता ॥

[4]ग्रामयोरुभयोः सीम्नि वृक्षा यत्र समुन्नताः ।
समुच्छ्रिता ध्वजाकारा ध्वजिनी सा प्रकीर्तिता ॥

[5]इष्टकाङ्गारसिकताः शर्करास्थिकपालिकाः ।
निहिता यत्र दृश्यन्ते नैधानी सा प्रकीर्तिता ॥

[6]तुषाङ्गारकपालैस्तु कुम्भैरायतनैस्तथा ।
सीमा प्रचिह्निता कार्या नैधानी सा निगद्यते ॥

[7]साक्ष्यभावे द्वयोर्यत्र प्रभुणा परिकल्पिता ।
सामन्तानुमता सीमा सा ज्ञेया राजकारिता ॥

[8]स्वैच्छन्दगा बहुजला झषकूर्मसमन्विता ।
नित्यप्रवाहिनी यत्र सीमा सा मत्स्यिनी मता ॥

कृष्टाकृष्टविधिः

[9]क्षेत्रं गृहीत्वा यः कश्चिन्न कुर्यान्न च कारयेत् ।
स्वामिने स शदं दाप्यो राज्ञे दण्डं च तत्समम् ॥

[10]चिरावसन्ने दशमं कृष्यमाणे तथाष्टमम् ।
सुसंस्कृते तु षष्ठं स्यात्परिकल्प्य यथास्थिति ॥

तत्सम तस्य क्षेत्रशदस्यानुरूपमित्यर्थः । तदेव सारूप्यं दर्शयति । चिरावसन्न इति। चिरावसन्ने चिरकालमकृष्टे क्षेत्रे पूर्वोक्ते निमित्ते सति क्षेत्रफलस्य दशमं भागं दण्डनीयः । कृष्यमाणे वर्तमानविलेखने तु क्षेत्रेऽष्टमं, सुसंस्कृते तु षष्ठमिति । अप.२।१५८

प्रजापतिः

सीमाक्षेत्रवृक्षफलस्वाम्यविधिः

[11]अन्यक्षेत्रे तु जातानामग्रशाखाः परत्र चेत् ।
स एव तासां स्वामी स्याद्यत्क्षेत्रोपरि ताः स्थिताः॥
बीजिने तु तृतीयांशं दद्याद्वृक्षाकृते शदम् ।
द्वावंशौ क्षेत्रिणः स्यातां स्वामिभागः प्रशस्यते ॥

---

(१) **व्यक.**९७ स्थिता (स्थिरा), **विर.**२१५, **रत्न** ११२, **चिता.**६८४ स्थिता (स्थिरा) तु चला (सजला), **बाल.** २।१५१ व्यकवत्

(२) **व्यक.**९७, **विर.**२१५; **रत्न.**११२, **विता** ६८४; **बाल.**२।१५१.

(३) **व्यक** ९७, **विर.**२१५ ज्ञेया सा तु (सीमा सोक्ता), **रत्न.**११२; **विता.**६८४-६८५ ब्ज (ब्ध) शेष विरवत्; **बाल.**२।१५१ कुब्ज (कुज) का यत्र (कान्यत्र)

(४) **व्यक.**९७, **स्मृच.**२२८, **विर.**२१५; **पमा.**३८६, **रत्न.**११२, **नृप्र.**३१ समुन्नताः (समन्तत.) **सुबो.**२।१५१; **व्यप्र.**३५४, **विता** ६८५, **बाल.**२।१५१; **समु.**११४.

(५) **व्यक.**९७, **विर.**२१५; **रत्न.**११२; **विता.**६८५, **बाल.**२।१५१.

(६) **स्मृच.**२२८; **पमा.**३८६ मा प्र (मात्र); **नृप्र.**३१ प्रचिह्नि (प्रतिचि); **सुबो.**२।१५१ नी सा (नीति); **व्यप्र.** ३५४; **बाल.**२।१५१ नृप्रवत्; **समु.**११४.

(७) **व्यक.**९७ प्रभुणा (प्रभुता); **विर.**२१५ वे (वाद्); **रत्न.**११२; **विता.**६८५ सा ज्ञेया (ज्ञेया सा); **बाल.**२।१५१ कल्पि (कीर्ति).

(१) **व्यक.**९७ कात्यायन', **स्मृच.**२२८; **विर.**२१६ हिनी (हिणी); **पमा** ३८६ झष (मत्स्य) नित्य (प्रत्यक्) सीमा सा (सा सीमा), **रत्न** ११२, **नृप्र** ३१ पमावत्, **सुबो.** २।१५१ हिनी (हिणी) सीमा सा (सा सीमा); **व्यप्र** ३५४ विरवत्; **विता** ६८५ यत्र (या स्यात्); **बाल.**२।१५१ सुबोवत्, **समु.**११४ विरवत्.

(२) **अप.**२।१५८ शे (ज्ञा); **व्यक.**९९; **विर.**२२९ स शदं (तत्सम) ज्ञे (ज्ञो), **विचि.**१०२; **नृप्र.**३२ शद (शत); **सवि.**३५१ शे (ज्ञा) ण्ड (ण्ड्यः) नारद.; **व्यप्र** ३६८; **व्यम.**९८, **विता.**७१४ शद (शत), **सेतु** १९४.

(३) **अप** २।१५८ तु (ऽपि) ल्प्य (ल्प्य), **व्यक.**९९; **विर.** २२९ तथा (ततो) सु (अ) ति (तिः), **विचि** १०२ तथा (ततो); **सवि.**३४१ तथा (दशा) तु (पु) ल्प्य (ल्प्य) याज्ञवल्क्यः, **व्यप्र** ३६८ मम् (कम्) तु (ऽपि) ल्प्य (ल्प्य), **विता.** ७१४ रिकल्प्य (रीकल्प्या); **सेतु.**१९४ तु (पु).

(४) **समु.**११७.

यदि तेनोपरोधः स्यान्मूलेनारुह्य शाखिमाम्[1]।
छेत्तव्याः क्षेत्रिणा शाखा विख्याप्यैतत्स्वसीमनि॥
यत्र स्वल्पोपरोधःस्यात् शाखधान्यप्ररोहिणाम्।
कदलीक्रमुकादीनां तत्र स्वाम्येव भोगभाक्॥
परक्षेत्रे समुत्पन्नो ह्यन्यक्षेत्रे फलं ददत्।
शाखा छेद्या तु तत्रस्था फलं वा विभजेत्ततः॥

बृद्धमनुः

ग्रामसीमापालनम्

स्थापितां चैव मर्यादामुभयोर्ग्रामयोस्तथा।
अतिक्रामन्ति ये पापास्ते दण्ड्या द्विशतं दमम्॥

बृद्धहारीतः

सीमावारणम्

सीम्नोऽपवादे क्षेत्रेषु सामन्ताः स्थविरादयः।
गोपाः सीमाकृषाणाश्च सर्वे च वनगोचराः॥
नयेयुरेते सीमान स्थूलाङ्गारतुषद्रुमैः।
न तु वल्मीकनिम्नास्थिचैत्यान्यैरुपशोभिताम्॥

(१) समु.११७.

(२) अप.२।२५५, व्यक ९८; स्मृच २३६, विर २२३; रत्न.११७, विचि.१००, व्यप्र ३६६ तं दमम् (तो दम), व्यउ.११०, विता.७०८ ता यै (ता र्थे) दामु (दा उ) तथा (सदा); सेतु.१९३, समु ११६, विव्य ४८.

(३) बृहास्मृ.७।२६३-२६४.

अनिर्दिष्टकर्तृकवचनम्

कूपवापिपुष्करिणीतडागसरःसीमाः

पञ्चाशद्भिर्भवेत्कूपः शतहस्ता तु वापिका।
पुष्करिण्यस्तदर्धे तु यावद्धनुःशतद्वयम्॥
तडागोऽष्टशतः प्रोक्तः सरस्तु चतुरस्रकम्॥

मार्कण्डेयपुराणम्

ग्रामपुरखेटकर्वटलक्षणानि

तथा भद्रजनप्राया सुसमृद्धकृषीवला।
क्षेत्रोपभोगभूमध्ये वसतिर्ग्रामसंज्ञिता॥
सोत्सेधनं सप्राकारं सर्वतः परिखावृतम्।
योजनार्द्धार्द्धविष्कम्भमष्टभागोत्तरं पुरम्॥
प्रागुदक्प्रवणं शस्तं शुद्धवंशग्रहैर्युतम्।
तदर्द्धं तु तथा खेटं तस्मादूनं च कर्वटम्॥

एवं च यद्यावद्विधा कीर्णा ग्रामादि, तत्र तावद्यथानुसारेण गोप्रचारोऽनुक्तोऽप्यूह्यः। विर.२३०

(१) मच.८।२४८.

(२) विर २३०; दवि.२७७ भद्र (शूद्र); सेतु.१९७ दविवत्.

(३) विर २३०; दवि.२७७ धनं स (धवप्र) परिखा (खातका) गोत्तर (गायत); सेतु १९७ परिखा (खातका).

(४) विर.२३०, दवि.२७७ (तदर्धेन तथा खेट तत्पादोन च कर्वटम्) उक्त.; सेतु.१९७ वहि (विनि) था (दा) कर्व (सर्व).

स्त्रीपुंधर्माः



वेदाः

गृहनेत्री स्त्री । पतिपत्नीसबन्ध ।

आ घा योषेव सूनर्युषा याति प्रभुञ्जती ।

उषा देवी प्रभुञ्जती प्रकर्षेण सर्वं पालयन्त्या याति घ । प्रतिदिनमागच्छति खलु । तत्र दृष्टान्तः । सूनरी सुष्ठु गृहकृत्यस्य नैत्री योषेव गृहिणीव । ऋसा.

पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन्मनीषाः ।

हे शवसावन् बलवन्निन्द्र तैः प्रयुक्ता मनीषाः स्तुतस्त्वा त्वा स्पृशन्ति । प्राप्नुवन्ति । तत्र दृष्टान्तः । उशतीरुशत्यः कामयमानाः पत्नीः पत्न्य उशन्त कामयमान पतिं न । यथा पतिं सभजन्ते तद्वत् । ऋसा.

भ्रातृभगिन्यौ

जामिः सिन्धूनां भ्रातेव स्वस्राम् ।

सिन्धूना स्यन्दनशीलानामपामयमग्निर्जामिर्बन्धुः । तासामुत्पादकत्वात् । तथा चाम्नातम् । अग्नेराप इति । यद्वा । देवेभ्यः पलायितोऽप्सु वर्तमानः सन् तासामपा बन्धुर्बभूवेत्यर्थः । तत्र दृष्टान्तः । स्वस्रा स्वसृणा भ्रातेव । यथा भ्रातातिशयेन हितकरो भवति तद्वत् । ऋसा.

गृहनेत्री स्त्री

दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै ।

दुरोकशोचिर्दुष्प्रापतेजाः क्रतुर्न नित्यः । क्रतुः कर्मणा कर्ता । स इव ध्रुवः । यथा स कर्मसु ध्रुवोऽप्रमत्तः सन् जागर्ति तद्वदयमप्यग्निः कर्मसु रक्षसा दहने ध्रुवो जागर्तीत्यर्थः । योनौ गृहे वर्तमाना जायेव योषिदिव अग्निहोत्रादिगृहे वर्तमानो वह्निर्विश्वस्मै सर्वस्मै यष्ट्रजनायारमलं भूषण भवति । यथा जायया गृहमलङ्कृत भवति तद्वदग्निना यज्ञगृहमप्यलङ्कृतं सद्दृश्यत इत्यर्थः । ऋसा.

कन्याजारः । अनेकजायापतिरेकः ।

यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम् ।

यमो ह जात इन्द्रेण सह संगतः । यमाविहेह मातरेत्यपि निगमो भवतीति । यो जात उत्पन्नो भूतसंघो यच्च जनित्व जनयितव्यमुत्पत्स्यमान भूतजात तदुभयमपि यमो ह अग्निरेव । सर्वेषा भावानामाहुतिद्वारान्यधीनत्वात् । कनीना कन्यकाना जारो जरयिता । यतो विवाहसमय अग्नौ लाजादिद्रव्यहोमे सति तासा कन्यात्वं निवर्तते । अतो जरयितेत्युच्यते । तथा जनीना जायाना कृतविवाहाना पतिर्भर्ता । ऋसा.

उप प्र जिन्वन्नुशतीरुशन्तं पतिं न नित्यं जनयः सनीळाः ।
स्वसारः श्यावीमरुषीमजुष्रञ्चित्रमुच्छन्तीमुषसं न गावः ॥

उशतीरुशत्यः कामयमानाः सनीळाः । नीळो निवासस्थानम् । समाननिवासस्थानाः । एकपाण्यवस्थानात् । स्वसार इत्यङ्गुलिनाम । एवभूता अङ्गुलय उशन्तं कामयमानमग्नि जनयो जाया नित्यमसाधारणं पति न भर्तारमिवोप प्र जिन्वन् । उपेत्य हविष्प्रदानादिकर्मणा प्रीणयन्ति । प्रीणयित्वा च चित्र चायनीयं पूजनीयं तमग्निमञ्जलिबन्धनेनाजुषन् । असेवन्त । तत्र दृष्टान्तः । श्यावी श्यामवर्णा रात्रिसंबन्धात्कृष्णा तत उच्छन्ती सूर्यकिरणसंबन्धात्तमो वर्जयन्तीं अत एवारुपीमारोचमाना यद्वा शुभ्ररूपयुक्तामुषसं न उषोदेवता गावो रश्मयो यथा सेवन्ते तद्वत् । यथा रश्मय उषसा नित्यसंबद्धा एवं सर्वेषु यज्ञेष्वग्निपरिचरणेनाङ्गुलयो

(१) ऋसं.१।४८।५. (२) ऋसं १।६२।११.
(३) ऋसं १।६५।७. (४) ऋसं.१।६६।५.

(१) ऋसं.१।६६।८, नि.१०।२१.
(२) ऋसं.१।७१।१; आश्रौ.४।१३।७.

नित्यसंबद्धा इति तात्पर्यार्थः । ऋसा.

शुद्धा नारी पतिप्रिया

पुरःसदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी ।

यस्याग्नेः पुरःसदः पुरस्तात्सीदन्तः उपविशन्तः पुरुषाः शर्मसदो न वीराः पितृगृहे वर्तमानाः पुत्रा इव वर्तन्ते । पिता पुत्रानिवाग्निः स्वस्य परिचारकान् रक्षतीति भावः । सोऽयमग्निरतिशयेन शुद्धः कर्मयोग्यो भवति । तत्र दृष्टान्तः । अनवद्यानिन्दिता पतिजुष्टेव नारी स्वपतिना सेविता स्वीकृता योषिदिव । सा यथा पातिव्रत्येन शुद्धा सती सर्वकर्मयोग्या भवति एवमग्निरपि । ऋसा.

अनेकजायापतिरेकः

क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ।

क्षीरेण क्षरणशीलेन तेनापह्नुतेनोदकेन कुयवस्यासुरस्य योषे भार्ये स्नातः । स्नान कुर्वाते । तादृश्यौ स्त्रियौ शिफायाः । शिफा नाम नदी । तस्याः प्रवणे निम्ने प्रवेष्टुमशक्येऽगाधप्रदेशे हते नष्टे स्यातां । भवेताम् । ऋसा.

पतिपत्नीसबन्धः

अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम् । तुञ्जाते वृष्ण्यं पयः परिदाय रसं दुहे वित्त मे अस्य रोदसी ॥

अर्थिनो धनमपेक्षमाणाः पुरुषा अर्थमिद्वै अपेक्षित धन प्राप्नुवन्त्येव । नाह प्राप्नोमि । उ इत्येतत्पादपूरणम् । अपि च जायान्यदीया भार्या पति स्वपतिमा युवते । आभिमुख्येन प्राप्नोति । मदीया तु मद्विरहाद्वितासीत् । अपि च संयुक्तौ तौ जायापती वृष्ण्य वीर्यरूप पय उदक तुञ्जाते । प्रजननायान्योन्यसंघट्टनेन प्रेरयतः । तदनन्तरं रसं पुरुषस्य सारभूतं वीर्य परिदाय गर्भाशयेनादाय गर्भरूपेण धृत्वा दुहे । दुग्धे । पुत्ररूपेण जनयति । मम तु पुत्रोऽपि नोत्पद्यते । अत इद मदीयं दुःख हे द्यावापृथिव्यौ जानीतम् । उ । ऋसा.

(१) ऋसं.१।७३।३, ३।५५।२१. (२) ऋसं.१।१०४।३. (३) ऋसं.१।१०५।२.

कन्यालाभार्थं धनदानम्

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ।

हे इन्द्राग्नी वा युवा भूरिदावत्तरातिशयेन बहुधनस्य दातारावित्यश्रव हि । अश्रौष स्वलु । कस्मात्पुरुषात् । विजामातुः । श्वशुरिरूपादिभिर्गुणैर्विहीनो जामाता यथा कन्यावते बहु धन प्रयच्छति कन्यालाभार्थ ततोऽप्यतिशयेन दातारावित्यश्रव इन्द्राग्नी इत्यर्थः । उत वापि च स्यालात् । स्य सूर्यम् । तस्माल्लाजानावपति विवाहकाल इति स्यालः कन्याभ्राता । स यथा भगिनीप्रीत्यर्थ बहु धन प्रयच्छति ततोऽप्यतिशयेन दातारावित्यश्रव इन्द्राग्नी । वेति पादपूरणः । ऋसा.

राक्षसविवाहः । वृद्धाविवाहः । स्त्रीपुरुषप्रेम ।

यामिः पत्नीर्विमदाय न्यूहथुः ।

हे अश्विनौ विमदायैतन्नाम्न ऋषये याभिर्युष्मदीयाभिरूतिभिः पत्नीर्भार्याः पुरुमित्रस्य दुहितर न्यूहथुः नितरा युवा प्रापितवन्तौ । ऋसा.

सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।

सूर्यो देवी दानादिगुणयुक्ता रोचमाना दीप्यमानामुषसं पश्चादभ्येति । उषसः प्रादुर्भावानन्तर तामभिलक्ष्य गच्छति । तत्र दृष्टान्तः । मर्यो न योषाम् । यथा कश्चिन्मनुष्यः शोभनावयवा गच्छन्ती युवतिं स्त्रिय सततमनुगच्छति तद्वत् । ऋसा.

यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ।

कीदृशावश्विनौ । अर्भगाय बालाय स्वयवरलब्धभार्याय विमदायैतत्संज्ञाय राजर्षये मध्येमार्ग स्वयवरार्थमागतेस्तामलभमानैरन्यैर्नृपैः सह योद्धुमशक्नुवतेऽपि तस्मै सेनाजुवा शत्रुसेनायाः प्रेरकेण शत्रुभिर्दुष्प्रापेण रथेन यावश्विनौ जाया भार्यां परैरनुक्रान्ता न्यूहतुः शत्रून् निहत्य तदीय गृह प्रापयामासतुः । ऋसा.

(१) ऋपं.१।१०९।२; तैसं १।१।१४; कासं.४।१५.
(२) ऋसं.१।११२।१९. (३) ऋसं १।११५।२; मैसं.४।१४।४; अस.२०।१०७।१५. तैब्रा.२।८।७।१.
(४) ऋस.१।११६।१.

घोषायै चित्पितृषदे दुरोणे पतिं जूर्यन्त्या अश्विनावदत्तम् ।

घोषा नाम ब्रह्मवादिनी कक्षीवतो दुहिता । सा कुष्ठिनी सती कस्मैचिद्वरायादत्ता पितृगृहे निषण्णा जीर्णासीत् । साश्विनोरनुग्रहान्नष्टकुष्ठा सती पतिं लेभे । तदेतदाह । हे अश्विनौ पित्रा संबद्धे दुरोणे स्वकीयजनकगृहे कुष्ठरोगेण भर्तारमप्राप्य पितृपदे पितृसमीपे निषण्णायै जर्यन्त्यै जरा प्राप्नुवत्यै घोषायै चित् एतत्संज्ञायै ब्रह्मवादिन्या अपि रोगोपशमनेन पतिं भर्तारमदत्तम् । युवा दत्तवन्तौ । ऋसा.

युवं श्यावाय रुशतीमदत्तम् ।

हे अश्विनौ युवं युवा श्यावाय कुष्ठरोगेण श्याम वर्णायपये रुशतीं दीप्तत्वेन स्त्रियमदत्तम् । प्रायच्छतम् । ऋसा.

युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम् ।

पुरुमित्रो नाम कश्चिद्राजा । तस्य योषां कुमारीं शचीभिरात्मीयैः कर्मभिर्विमदायैतत्संज्ञायपये शत्रुभिः सह योद्धुमशक्ताय युवा न्यूहथुः । विमदस्य गृहं प्रापितवन्तौ । ऋसा.

पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने ।

पत्नीव पत्नी यथा पूर्वहूतिं पत्युः पूर्वाह्वानं वावृधध्यै वर्धयितुं शीघ्रगतिर्भवति तद्वदुषासानक्ताहोरात्रे देवते अपि पुरुधा बहुप्रकारं बहुविधैः स्तोत्रैर्विदाने ज्ञायमाने सत्यौ पूर्वहूतिं वावृधध्या अस्मदीयं पूर्वाह्वानं वर्धयितुं शीघ्रमागच्छतमिति शेषः । यद्वा । वावृधध्या अस्मद्वर्धनाय पुरुधा बहुप्रकारं विदाने वर्धनोपायान् जानत्यौ भवतमिति शेषः । ऋसा.

कन्येव तन्वा३ शाशदानाँ एषि देवि देवमियक्षमाणम् । संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ॥

तन्वा शरीरेण शाशदाना शाशाद्यमाना स्पष्टता प्राप्नुवती । कन्येव कमनीया कन्यकेव । सा यथा जनान्तिके विवसना संचरति तथा हे उषस्त्वं कन्या कमनीयाप्रगल्भा सती तन्वा शरीरेण शाशदाना स्पष्टता गच्छन्ती दृश्यसे । पश्चात्प्रगल्भा सती हे देवि देवनशील इयक्षमाणं यष्टुमिच्छन्तमभिमतं दातुमिच्छन्तं वा देव द्योतनस्वभाव सूर्यरूप प्रियमेषि । गच्छसि । ततः पश्चात् युवतिर्यौवनोपेता सती पुरस्तात्पत्युः सूर्यस्य पुरतः सस्मयमाना समीपद्धसन्ती हास्य कुर्वती विभात्यत्यन्त भासमाना वक्षांसि वक्षसोपलक्षितानवयवानाविष्कृणुषे । प्रकटीकरोषि । यद्वा । युवतिरिति लुप्तोपमा । यथा लोके प्रगल्भा योषित् पुरस्तात्प्रियतमस्य पुरतः सस्मयमाना दन्तप्रदर्शनायेषद्धसन कुर्वती वक्षांसि वक्षसोपलक्षितानि गोप्यानि बाहुमूलस्तनादीन्याविष्करोति तथा त्वमपीत्यर्थः । यद्वा । पुरस्तात्पूर्वस्यां दिशि सस्मयमाना स्मितोपमप्रकाश कुर्वती युवतिः सर्वेषु भावेषु मिश्रणशीला वक्षांसि । वक्ष इति रूपनाम । दन्तस्थानीयानि नीलपितादीनि रूपाण्याविष्करोषि । ऋसा.

मातृभगिन्यादिसबन्धः

सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कम् ।

हे उषोदेवि मातृमृष्टा मातृभिर्जननीभिः शुद्धीकृता योषेव सुसंकाशात्यर्थं प्रकाशमाना त्वं तन्वं स्वकीयां तनुं दृशे सर्वेषां दर्शनायाविः कृणुषे । प्रकटयसि । यथा लोके मात्रादिना स्वलङ्कृतात्यन्तं शोभना सती स्वकीय लावण्योपेत सर्वशरीरं दर्शनायाविष्करोति तद्वत्त्वमपीत्यर्थः । अत्र कमिति पादपूरणः । ऋसा.

अँद्मसन्न ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् ।

किंचाद्मसन्न । अत्राप्युपमार्थीयो नकारः । अद्यत इत्यद्मान्नम् । तस्य पाकाय गृहे सीदतीत्यद्मसत् पाचिका योषित् ससतो बोधयन्ती । सा यथा स्वपतः पुत्रादीन्भोजनाय बोधयति तद्वत् । यद्वा । अद्मेति गृहनाम वरूथमद्मेति तन्नाममु पाठात् । तत्र सीदती-

(१) ऋसं.१।११७।७. (२) ऋसं.१।११७।८.
(३) ऋसं.१।११७।२०.
(४) ऋसं.१।१२२।२. (५) ऋसं.१।१२३।१०.

(१) ऋसं.१।१२३।११.
(२) ऋसं.१।१२४।४; नि.४।१६.

त्यङ्गसजननी । सा यथा स्वपतः पुत्रादीनुपःकाले प्रबोधयति तथा भुवनाख्ये गृहे सीदन्ती तत्रत्यान्प्राणिनः प्रबोधयन्तीयमुषाः । एयुषीणामागमनशीलानां स्त्रीणां मध्ये शश्वत्तमा पुनःपुनरागच्छति । प्रातर्नियतमागच्छन्तीनां वारयोषितां मध्ये स्वयमेका सती नियतमागच्छतीत्यभिप्रायः । ऋसा.

स्वसा स्वस्रे ज्यायस्यै योनिमारैगपैत्यस्याः प्रतिचक्ष्येव ।

एकस्मादेवान्तरिक्षादुत्पन्नत्वात्परस्परं स्वसृभावः । तथाप्यहः प्राथम्यात्तेजस्वित्वाच्च ज्यायस्त्वम् । स्वयमेव सरतीति वा स्वसा । रात्रिः स्वस्रे ज्यायस्या उक्तरीत्या ज्येष्ठायै योनिमुत्पत्तिस्थानमपररात्ररूपमरैक् । अरिचत् । प्रादात् । प्ररेचयतीत्यर्थः । तथा च पूर्वत्राम्नातम् । रात्र्युपसे योनिमारैक् । इति । दत्त्वा चास्या उत्पन्नाया उषसः प्रतिचक्ष्येव ज्ञापयित्वेव स्वयमपसृत्यैव गच्छति । ज्यायस्यामागतायां तस्यै स्वस्थानं दत्त्वा स्वयं तत्सन्निधौ स्थातुमनुचितमिति विज्ञायैवापगच्छतीति भावः । ऋसा.

स्त्रीपुरुषभोगसबन्ध

आगधिता परिगधिता या कशीकेव जङ्गहे ।
ददाति मह्यं यादुरी याशूनां भोज्या शता ॥

सभोगाय प्रार्थितो भावयव्यः स्वभार्यां रोमशामप्रौढेति बुध्या परिहसन्नाह । भोज्या भोगयोग्यैषागधिता आसमतादृगृहीता स्वीकृता । तथा परिगधिता परितो गृहीता । आदरातिशयाय पुनर्वचनम् । गध्य गृह्णातेरिति यास्कः । यद्वा । आगधिता आ समतान्मिश्रयन्ती । आन्तरं प्रजननेन बाह्यं भुक्तादिभिरित्यर्थः । गध्यतिर्मिश्रीभावकर्मेति यास्कः । पूर्वस्मिन् पक्षे पुरुषस्य प्राधान्यं उत्तरस्मिंस्तु योषित इति भेदः । कीदृशी सा । यो जङ्गहे अत्यर्थं गृह्णाति कदाचिदपि न मुञ्चति । अत्रागे दृष्टान्तः । कशीकेव । कशीका नाम सूतवत्सा नकुली । सा यथा पत्या सह चिरकालं क्रीडति न कदाचिदपि विमुञ्चति तथैषापि । किञ्च भोज्यैषा यादुरी । यादुरीत्युदकनाम । रेतोलक्षणमुदकं प्रभूतं ददातीति यादुरी । बहुरेतोयुक्तेत्यर्थः । तादृशी सती याशूना सभोगानाम् । यश इति प्रजननस्य नाम । तत्संबन्धीनि कर्माणि याशूनि भोगाः । तेषां शता शतान्यसंख्यातानि मह्यं ददाति । ऋसा.

उपोप मे परा मृश मा मे दभ्राणि मन्यथाः ।
सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥

रोमशा नाम बृहस्पतेः पुत्री ब्रह्मवादिनी परिहसन्तं स्वपतिं प्रत्याह । भो पते मे माम् । द्वितीयार्थे चतुर्थी । उपोप । द्वितीय उपशब्दः पादपूरणः । उपेत्य परा मृश । सम्यक् स्पृश । भोगयोग्यामवगच्छेत्यर्थः । यद्वा । मे मम गोपनीयमङ्गमुपोप परा मृश । अत्यन्तमान्तरं स्पृश । परामर्शभावशङ्का निवारयति । मे मदङ्गानि रोमाणि दभ्राणि मा मन्यथाः । अल्पानि मा बुध्यस्व । दभ्रमल्पकमित्यल्पस्येति दभ्रं दभ्नोतेरिति यास्कः । अदभ्रत्वमेव विशदयति । अहं रोमशा बहुरोमयुक्तास्मि । यतोऽयमीदृशी अतः सर्वा संपूर्णाशयवास्मि । रोमशत्वे दृष्टान्तः । गन्धारीणामविकेव । गन्धारा देशाः । तेषां सन्निधन्यविजातिरिव । तद्देशस्था अवयो मेषा यथा रोमशाः तथाहमस्मि । यद्वा । गन्धारीणां गर्भधारिणीनां स्त्रीणामविकात्यर्थं तर्पयन्ती योनिरिव । तासामा प्रसवं रोमादिविकर्तनस्य शास्त्रे निषिद्धत्वाद्योनी रोमशा भवति । अतः सोपमीयते । यतोऽहमीदृशी अतो मामप्रौढा मावबुध्यस्वेत्यर्थः । ऋसा.

जारसबन्ध

प्र बोधया पुरन्धिं जार आ ससतीमिव ।

जारः पारदारिक आ ससतीमुपपत्यागमनध्यानेनेवत्स्वपन्तीं पुरन्धिमिव प्रकृष्टशरीरधारिणीं योषितमिव । तां यथा स्वसंकेतेन स प्रबोधयति तद्वत्त्वमपि कर्मव्यग्रेणेवत्स्वपन्त यजमान प्र बोधय । ऋसा.

स्त्रीपुरुषभोगसंबन्धः

तँमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मघुषीः प्रायवे पुनः ।
तासां जरां प्रमुञ्चन्नेति नाददसुं परं जनयञ्जीवमस्तृतम् ॥

(१) ऋसं.१।१२४।८. (२) ऋसं.१।१२६।६; नि.५।१५.

(१) ऋसं.१।१२६।७, नि.३।२०.
(२) ऋसं १।१३४।३. (३) ऋसं.१।१४०।८.

तमग्निमग्नुवोऽग्रतः स्थिताः। यद्वा। अङ्गुलिनामैतत्। अङ्गुलय इवाकुटिलाः। केशिनीः केशस्थानीयोर्ध्वभाविकाष्ण्योपेता ज्वालाः सं रेभिरे हि। परिरम्भ कुर्वन्ति खलु। आलिङ्गन्ति। किञ्चैव कुर्वत्यो मन्मुपीर्मृता अङ्गारभावमापन्ना अपि। म्रियतेः क्रमुप्रत्ययान्तात् ङीपि रूपम्। आयव आगच्छतेऽग्नये भर्त्रे पुनः स्वोपद्रवमजानत्य ऊर्ध्वाः प्र तस्थुः। ऊर्ध्वमुखा उन्नताः प्रतस्थिरे। मृतप्राया अपि प्रत्युत्थानं कृतवत्य इत्यर्थः। एवं कृतवतीषु सतीषु स भर्ताग्निस्तासा ज्वालाना जरा वयोहानि प्रमुञ्चन् प्रकर्षेण मोचयन् नानदज्जरापरिहाराय मन्त्रयन्निवात्यर्थं शब्दयन्। न केवल जराहानिरेव अपि तु पर निरतिशयमसु प्राणमस्तृतं काष्ठोदकादिप्रक्षेपेणाप्यहिंसित जीव प्राणधारणसामर्थ्यं जनयन्नुत्पादयन्नेति। गच्छति। तासा ज्वालाना सनिधिं प्राप्नोति। यथा लोके काश्चन रमण्यो रमणेन सह निर्भरं क्रीडित्वा पश्चात्प्रोषिते तस्मिन्विरहेण जीर्णा म्रियमाणाः पश्चात्तस्मिन्नागते सति स्वदौर्बल्यमगणयित्वा सतोषेण परिष्वङ्गाय चेष्टन्ते स भर्ता मन्त्रोच्चारणेन जरामपनीयोचितप्रदानेन प्राणयन् रक्षतीत्ययं भावोऽत्रानुसधेयः। ऋसा.

गृहस्थिता पत्नी

गुहा चरन्ती मनुषो न योषा सभावती विदथ्येव सं वाक्।

मेघपक्तिर्विद्युच्चोभे दृष्टान्तेन विशेष्येते। गुहा निगूढा गुहाया वान्तरिक्षे चरन्ती। तत्र दृष्टान्तः। मनुषो न योषा मनुष्यस्य परिवृढादेर्महिषीवत्। सा यथा सुवेषान्तःपुर एव मध्ये चरति तद्वत्। किं सर्वदैवमिति नेत्याह। सभावती। सभा जनसघः। तद्वती। वर्षकाल आविर्भवन्तीत्यर्थः। तत्र दृष्टान्तः। विदथ्या वागिव। विदथो यज्ञः। तदर्हतीति विदथ्या प्रैषस्तोत्रादिरूपा वाक्। सा यथा यज्ञसभा प्राप्याविर्भवति तद्वत्। यद्वा। विदथ्या वेदनार्हा विवदमानयोर्वाक्। सा यथा सभावती तद्वत्। सैवरूपा येषु मिथ्यक्ष ते मरुतो देवयजनमागच्छन्तित्यर्थः। ऋसा.

(१) ऋसं.१।१६७।१.

पतिपत्नीसभोगः ब्रह्मचर्यं च

पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः। मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः॥

हे अगस्त्य अह लोपामुद्रा पूर्वीः शरदः पुरातनानसख्यातान्सवत्सरान् दोषा रात्रीर्वस्तोरहानि तथा देह जरयन्तीरुपस उषःकालाश्च। सर्वत्रात्यन्तकालसयोगे द्वितीया। अद्यतनकालपर्यन्त बहुसंवत्सर कार्त्स्न्येन त्वच्छुश्रूषया शश्रमाणा श्रान्ताभूवम्। इदानीं तु जरिमा जरा तनूनामङ्गाना श्रियं सौन्दर्यं मिनाति। हिनस्ति। एवमपि नानुगृह्णासीत्यर्थः। अप्यू नु। अपिः सभावनायाम्। उ इत्यवधारणे। न्विति वितर्के। इदानीमपि किं संभावनीयम्। लोके हि पत्नीः स्त्रियो वृषणः सेक्तारः पुरुषा जगम्युः। गच्छेयुः संभोग कुर्युः। अतो मा किमित्यवमन्यसे। इदानीमपि वा सभावयेत्यर्थः। ऋसा.

ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिरवदन्नृतानि। ते चिदवासुर्नह्यन्तमापुः समू नु पत्नीर्वृषभिर्जगम्युः॥

हे पतेऽगस्त्य ये चिद्धि येऽपि तु पूर्वे पुरातना ऋतसापः सत्यस्यापयितारो व्याप्नुवाना महर्षय आसन् ते देवेभिर्देवैः साक सहर्तानि सत्यवाक्यान्यवदन्। वदन्ति। ये महत्तपो यज्ञ वानुतिष्ठन्ति ये च देववाक्यानि वेदस्मृतिरूपाणि वदन्ति ते चित्। चिदप्यर्थे। ते चिदवासुः। अवक्षिपन्ति रेतः। स्यतिरुपसृष्टो विमोचने वर्तते। ते न ह्यन्तमापुः। न हि ब्रह्मचर्यादेरन्तं प्राप्नुवन्। ब्रह्मचर्यमनिपिद्धतुकालगमनमपि कुर्वन्तीत्यर्थः। तथा पत्नीः पत्न्यश्च तपस्यमाना वृषभिर्भोगवर्षकैः पतिभिः सह समू नु जगम्युः। उ न्विति पूरणौ। संगच्छेरन्। अतस्त्वं कथं मा नानुभवसीत्यर्थः। ऋसा.

नँ मृषा श्रान्तं यदवन्ति देवा विश्वा इत्स्पृधो अभ्यश्नवाव। जयावेदत्र शतनीथमाजिं यत्सम्यञ्चा मिथुनावभ्यजाव॥

(१) ऋसं १।१७९।१.

(२) ऋसं.१।१७९।२.

(३) ऋसं.१।१७९।३; शाश्रा.१०।४।४।५.

अगस्त्यस्तामाह— भोः पत्नि त्वया मया न मृषा श्रान्तम्। व्यर्थं नैव खिन्नमावाभ्याम्। यतस्मादेवा अवन्ति रक्षन्ति तपोभिः प्रीता देवाः। विश्वाः सर्वाः सुधोऽन्यक्षवाव। अभितो व्याप्नुयाव। अत्रास्मिन्संसारे शतनीथमपरिमितभोगप्राप्तिसाधनमाज प्राप्ति परस्पर जयाव। जयलक्षण सुरतसंग्राम वा जयाव। यद्यस्मात्सम्यञ्चा सम्यक्परस्परं गच्छन्तौ प्रजयन्तौ वा मिथुना मिथुनौ स्त्रीपुरुषरूपौ सन्तावभ्यजाव। त्व चाहमपि परस्परमभिजयावेत्येव तयोक्त सभोग सभावयामास। ऋसा.

नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित्।
लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसन्तम्॥

अथ चतुर्थ्यर्थेषगस्त्य आह—हे जाये नदस्य नदनस्य जपशब्दयितुर्जपाध्ययनकर्तुरुधतो रेतो निरोद्धुर्ब्रह्मचर्यमास्थितस्य। उभे कर्मणि षष्ठ्यौ। उक्तलक्षण मा काम आगन्। आगमत्। नदनस्य मा रुधतः काम आगमदिति निरुक्तम्। करय हेतोरिति उच्यते। इतस्त्यत्सगमनिमित्तात् तथामुतो वसन्तादिकालात् कुतश्चित्कारणादाजातः सर्वत उत्पन्नः। यद्वा। इत एतल्लोकजनितादमुतो लोकान्तरजनिताद्वा कुत श्चिन्निमित्तात्कामात्। कथमिति उच्यते। इय लोपामुद्रा वृषण रेतसः प्रवर्तकं मा नी रिणाति। नितरा गच्छतु। किञ्च धीर धीमन्त नियमादविचाल्यि श्वान्त महाप्राण महाबलमधीरा कातरपा योषिद्धयति। उप भुक्ताम्। ऋसा.

गुरुसभोगसलापश्रवणदोषः

इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे।
यत्सीमागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः॥

अथानयोर्दम्पत्योः सभोगसलाप श्रुत्वा तत्प्रायश्चित्त चिकीर्षुस्तत्रास्याभाह। अनयोर्विनियोगः शौनकेनोक्तः। 'इम नु सोममित्येते द्वे ऋचौ प्रयतो जपन्। सर्वान्का-

(१) ऋसं.१।१७९।४, नि.५।२; बृदे.१।५३.

(२) ऋसं.१।१७९।५; ऋविं.१।२६।५.

मानवाप्नोति पापेभ्यश्च प्रमुच्यते'॥ उपेत्य मनसा प्राप्य प्रार्थयते। किं ब्रवीति उच्यते। यदागो गुर्वोः कामप्रलापश्रवणविषय पाप चक्रुम कृतवन्तो वय तत्तस्मादागसः स सोमः मु सम्यग्मृळतु। सुखयतु। पापजनितदुःख मा करोत्वित्यर्थः। महत्पापमनुभुज्यमान प्रार्थनया कथ लप्स्यत इति अत आह। हि यस्मान्मर्त्यो मनुष्यः पुलुकामो बहुकामनावान्। अल्पेनैव कर्मणा बहुकामानाकालयति। यस्मादेव तस्मात्परिहरेत्यर्थः। यद्वा। अयमपवर्जनीयतया प्राप्यत इवेत्याह। पुलुकामो हि खलु मर्त्यः कामहतः सन् कामेन निरुद्ध एव वर्तते। अतस्तयोस्त्सेकोऽयुक्तः। तच्छब्दश्रवणदोषोऽपि प्रामादिकोऽस्माक प्राप्तेन सोमेन परिहर्तव्य इत्यर्थः। यद्वा। अथ मन्त्रश्चद्रूपेण व्याख्येयो मनसोऽभिमानित्वाच्च तस्य पापस्यापि मनस्येव सभावितत्वात्। अस्मिन्पक्षे हृत्सु पीत हृदयस्थितमित्यर्थः। शिष्ट स्पष्टम्। ऋसा.

गृहस्थधर्मः

अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः। उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम॥

अथ विनियुक्तयोर्मन्त्रे द्वितीयया सूक्ते षष्ठ्यन्तेवास्याह—अयमगस्त्यो मद्गुरुः खनित्रैः फलस्योत्पादनसाधनैर्यज्ञस्रोवादिभिः खनमानः फलमभिमतमुत्पादयन् प्रजा प्रकर्षेण पुनःपुनर्जायमानमपत्य कुलस्यापतनसाधन पुत्रादिरूप बल चेच्छमानः सन्। यद्वा। प्रजा भृत्यादिरूपा चेच्छन्। ऋषिरतीन्द्रियद्रष्टा महानुभाव उग्र उद्गूर्णः ससारे संचरञ्छ्रेयपापः सन्नुभौ वर्णौ वर्णनीयावाकारौ काम च तपश्च पुपोष। सत्या आशिषो देवेषु देवेभ्यो जगाम। प्राप्तवान्। यतोऽयं महानुभावस्तस्मादस्माभातीत्यर्थः। ऋसा.

भूरि द्वे अचरन्ती चरन्तं पदन्तं गर्भमपदी दधाते।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात्॥

अचरन्ती अविचले द्वे एवैते द्यावापृथिव्यौ भूरिं

(१) ऋसं.१।१७९।६.

(२) ऋसं.१।१८५।२; मैस.४।१४।७; तैब्रा.२।८।४।८; शाश्रौ.६।५।७.

बहुतरं चरन्तं पद्वन्तं पादयुक्तं गर्भं गर्भवदाश्रितं कृत्स्नं प्राणिजातमपदी स्वय पादरहिते दधाते । धारयतः । अनयोर्मध्ये खलु सर्वं जगत्क्षेमेण वर्तते । धारणे दृष्टान्तः । पित्रोर्मातापित्रोरुपस्थ उत्संगे वर्तमान नित्य ध्रुवमात्मज सूनु न पुत्रमिव यथा स्नेहेन वर्धयन्तौ धारयन्तौ मातापितरौ तद्वत् । अथ प्रत्यक्षेणाह । हे द्यावा पृथिवी द्यावापृथिव्यौ । इतरेतरापेक्षया द्विवचनमुभयोः । नोऽस्मानभ्यान्महतो भयहेतोः पापाद्रक्षतम् । पालयतम् । यद्वा । अभ्वादभ्व महत् । अत्यर्थमित्यर्थः ।

ऋसा.

[1]संगच्छमाने युवती समन्ते स्वसारा जामी पित्रोरुपस्थे ।
अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात् ॥

संगच्छमाने परस्परमुपकारित्वेन सह युज्यमाने । वृष्टिहविषोश्च परस्परमुपकार्योपकारकभावः । यद्वा । पूर्वं संसृष्टे एव सत्यौ पश्चाद्वियुज्य वृष्टिहविषी अकुर्वन्त्यौ पश्चान्मनुष्यैः प्रार्थितैर्देवैर्विवाहिते सत्यौ संगते अभूतामित्याहुः । अयमर्थो द्यावापृथिवी महास्ताम् (तैब्रा. १।१।३।२) इत्यादिब्राह्मणे समाम्नातः । युवती नित्यतरुण्यौ मिथ्रयन्त्यौ वा सर्वेषु भावेषु समन्ते समानान्तिके समानपर्यन्ते वा स्वसारा परस्पर स्वसृभूते जामी बन्धुभूते । प्रजापतेः सकाशात्समुत्पन्नत्वात्परस्परं जामित्वम् । तथा च निगमौ 'दिव च पृथिवी चान्तरिक्षमथो स्वः' । 'यतो द्यावापृथिवी निष्टतक्षुः' इति । पित्रोः सर्वस्य पितृस्थानीययोः पालकयोस्तयोरुपस्थ उत्संगे स्थितं भुवनस्य भूतजातस्य नाभि बन्धकमुदकमभिजिघ्रन्ती अभिघ्राण कुर्वन्त्यौ स्पृशन्त्यौ । 'समानमेतदुदकम्' इत्यादिमन्त्रवर्णादुभयोरुदकप्रदत्व प्रसिद्धम् । ईदृश्यौ नो रक्षतम् ।

ऋसा.

व्यङ्गः कन्यादेष्यः, साङ्ग कन्याप्रिय

[2]स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक् । प्रति श्रोणः स्थाज्यनगच्छ सोमस्य ता मद इन्द्रश्चकार ॥

पुरा किल कन्यकाश्चक्षुर्हीनं पादहीनं पराङ्मुज जिघृक्षुमृषि दृष्ट्वाभिदुद्रुवुः । ततः स ऋषिरिन्द्रं स्तुत्वा चक्षुः पाद च लेभे । तदेतदाह । कनीना कन्यकानामपगोहमपगोहन तिरोभाव विद्वान् पराङ्मृषिराविर्भवन् सर्वेषां प्रत्यक्षो भवन् उदतिष्ठत् । श्रोणः पूर्वं पङ्गुरिदानीमिन्द्रस्य प्रसादाद्भिन्नजानुस्ताः कन्याः प्रति स्थात् । पूर्वमन्धोऽधुना चक्षुर्लाभाद्व्यचष्ट । ताः कन्यका विशेषेण पश्यति स्म ! तानीमानि कर्माणि स इन्द्रश्चकार ।

ऋसा.

पतिपत्नीसभोग

[3]सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ।

हे शतक्रतो वय सुमतिभिस्त्वद्विषयैः शोभनैः स्तोत्रैः सकृत् सकृदपि सु नसीमहि । सुपु व्याप्येमहि । तत्र दृष्टान्तः । वृषणो न । सेक्तारो युवानो यथा पत्नीभिर्व्याप्यन्ते तद्वत् ।

ऋसा.

व्यभिचारिणी पाप निगृह्यति

धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः ।

हे धृतव्रता धृतकर्माण आदित्या अदितेः पुत्रा इषिरा गमनशीलाः सर्वैरभ्येषणीयाः प्रार्थनीया वा हे विश्वे देवा मदारे मत्तो दूरदेश आगो विहिताननुष्ठानादिजनित पाप कर्त । कुरुत । करोतेश्छान्दसो विकरणस्य लुक् । तमनतनथनाश्चेति तवादेशः । तत्र दृष्टान्तः । रहसूरिव । रहस्यन्यैरज्ञाते प्रदेशे सूयत इति रहसूर्यभिचारिणी । सा यथा गर्भ पातयित्वा दूरदेशे परित्यजति तद्वत् ।

ऋसा.

[4]यो सुबाहुः स्वंगुरिः सुपूमा बहुसूवरी ।
तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥

या सिनीवाली सुबाहुः शोभनबाहुः स्वंगुरिः शोभनाङ्गुलिः सुपूमा सुपु प्रसवित्री । बहुसुवरी बह्वीना प्रजाना सवित्री । तस्यै सिनीवाल्यै विश्पत्न्यै विशा पालयित्र्यै । हविर्जुहोतन । जुहुत ।

ऋसा.

(१) ऋसं.२।१८।५. (२) ऋसं.२।१५।७.

(१) ऋसं.२।१६।८.

(२) ऋसं २।२९।१, बृदे.४।८४.

(३) ऋसं.२।३२।७, कास.१३।१६, असं.७।४६।२; शाश्रौ.२।१५।४.

युवतीनां युवप्रेम

तꣳसस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ।

तमपां नपातमग्निमस्मेरा अस्मयमाना दर्परहिता युवतयो युवानं युवराजमिव मर्मृज्यमाना अत्यर्थमलङ्कुर्वाणा आपः । मृज़ शौचालङ्कारयोः । परि यन्ति । परितो गच्छन्ति प्राप्नुवन्ति । ऋसा.

पतिपत्नीसभोगः

मेने इव तन्वा शुम्भमाने दम्पतीव क्रतुविदा जनेषु ।

मेने इव नार्याविव तन्वा शरीरेण शुम्भमाने शोभमानौ । दम्पतीव जायापती इव सगतौ जनेषु विषयेषु क्रतुविदा कर्मविदौ । ऋसा.

प्रजाकामना

स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ।

नोऽस्माकं सूनुः पुत्रस्तनयः सतानस्य विस्तारयिता विजावा पुत्रपौत्रादिरूपेण स्वय विजायत इति विजावा स्यात् । ऋसा.

अपीव योषा जनिमानि वत्रे ।

अपीव योषा जनिमानि । यथा योषा स्त्री जनिमानि जातान्यपत्यानि वृणोति तद्वत् । ऋसा.

गृहनेत्री पत्नी । पतिपत्नीप्रेम ।

जायेदस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहन्तु ।

हे मघवन्धनवन्निन्द्र अस्तम् । अस्यन्ते क्षिप्यन्ते पदार्था अत्रेत्यस्त गृहम् । जायेजायैव गृह भवति । 'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते' इति स्मृतेः । तथा सेत् सा जायैव योनिः पुरुषस्य मिश्रणस्थानम् । उ प्रसिध्यर्थः । तस्मात्तदित् तत्र गृह एव युक्ता रथे योजिता हरयोऽश्वास्त्वा त्वा वहन्तु । ऋसा.

(१) ऋस.२।३५।४; तैसं.२।५।१२।२, मैस.४।१२।४.
(२) ऋस.२।३९।२.
(३) ऋसं.३।१।२३; तैसं.४।२।४।३; कासं.१६।१।१; मैसं.२।७।११; शुमा.१२।५१; शब्रा.७।१।१।२७.
(४) ऋसं.३।३८।८. (५) ऋसं.३।५३।४.

अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते ।

हे इन्द्र सोममपाः । अत्रैव स्थित्वा सोमं पिब । पीत्वास्तं गृह प्र याहि । प्रकर्षेण गच्छ । ते तव गृहे कल्याणीमङ्गलकारिणी जाया शची विद्यते । सुरणं शोभनगीतादिध्वनिश्चास्ति । यद्वा । सुरणं सुरमणीयं यथा भवति तथा गृहे जाया तिष्ठति । ऋसा.

अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासाः ।

हे अग्ने ते त्वदर्थ यमुत्तरवेदिलक्षणं प्रदेश वयं चक्रम । कुर्मः । अय योनिस्तव स्थानं भवति । तत्र दृष्टान्तः । जायेव । यथा पत्य उशती पतिं कामयमाना सुवासाः शोभनवस्त्रोपेता जाया स्वात्मसमीपे तस्य स्थानं करोति तद्वत् । ऋसा.

दुराचाराः स्त्रियः

अभ्रातरो न योषणो व्यन्तः पतिरिपो न जनयो दुरेवाः ।
पापासः सन्तो अनृता असत्या इदं पदमजनता गभीरम् ॥

अभ्रातरो भ्रात्रादिबन्धुरहिता योषणो न गतभर्तृका योषित इव । वा पपूर्वस्य निगम इति विकल्पनादीर्घाभावः । ता यथा भर्तृगृहात्पितृगृह प्रत्यायन्ति तद्वद्व्यन्तो गच्छन्तः । यज्ञादीनपहायामार्गे वर्तमाना इत्यर्थः । तथा पतिरिपो न जनयः पतिद्वेषिण्यः स्त्रिय इव दुरेवा दुष्टगतयो दुराचारा अत एव पापासः पापाः सन्तोऽनृता मानससत्यरहिता असत्या वाचिकसत्यरहिता मनसा वाचाग्निमभजमाना इद पापिभिरनुभूयमानतया प्रसिद्धं गभीरमगाधं पद नरकस्थानमजनत । अजनयन्त । उत्पादयन्ति । ऋसा.

अवद्यमिव मन्यमाना गुहाकरिन्द्रं माता वीर्येण न्यृष्टम् ।
अथोदस्थात्स्वयमत्कं वसान आ रोदसी अपृणाज्जायमानः ॥

(१) ऋसं.३।५३।६; आश्रौ.६।११।९. (२) ऋसं.४।३।२.
(३) ऋसं.४।५।५. (४) ऋसं.४।१८।५.

गुहा गुहायां गह्वररूपे सूतिकागृहे जातमिन्द्रमवद्य मिव गर्हमिव मन्यमाना जानती मातेन्द्रजनन्यदिति वीर्येण सामर्थ्येन न्यृष्ट नितरां प्राप्तमकः । अकरोत् । अथानन्तरं जायमान उत्पद्यमान इन्द्रः स्वयमेवात्म तेजो वसान आच्छादकः सन् । दधान इत्यर्थः । उदस्थात् । उत्कर्षेणातिष्ठत् । किञ्च रोदसी द्यावापृथिव्यावापृणात् । समन्तात्पूरयामास । ऋसा.

ममच्चन त्वा युवतिः परास ।

हे इन्द्र ममच्चन माद्यन्त्येव । प्रमत्तैवेत्यर्थः । युवतिस्त्वदीया मातादितिस्त्वा त्वा परास । पराचिक्षेप ।

ऋसा.

वम्रीभिः पुत्रममुवो अदानं निवेशनाद्धरिव आ जभर्थ ।
व्यन्धो अख्यदहिमाददानो निर्भूदुखच्छित्सरन्त पर्व ॥

हे हरिवो हरिसंज्ञकाश्वोपेतेन्द्र त्व वम्रीभिरुपजिह्विकाभिरदानमद्यमानमधुवः । अग्र नाम काचित् । तस्याः पुत्रं निवेशनाद्वल्मीकाख्यात्स्थानादा जभर्थ । आहृत वानसि । आददान इन्द्रेणाहियमाणोऽधुवः पुत्रोऽन्धः पूर्वमन्धः सन् अहि सर्प व्यख्यत् । विशेषेणापश्यत् । ततो निर्भूत् । वल्मीकान्निर्गतोऽभूत् । उखच्छिद्वल्मीकाख्याया उखायाश्छेदकानि पर्व पर्वाण्यस्य सर्वाण्यङ्गानि शिथिलानि पर्वाणि समरन्त । समगच्छन्त । उपजिह्विकाभिः शिथिलीकृतान्यधुवः पुत्रस्य पर्वाणीन्द्रेण समधीयन्तेत्यर्थः । ऋसा.

पतिपत्नीप्रेम

अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम् ।

घृतस्य धारा अमुमग्नि समनेव समानमनस्का योषा योषितः पतिमिवाभि प्रवन्त । अभिनमयन्ति । निमग्न कुर्वन्ति । कीदृश्यस्ताः । कल्याण्यो भद्ररूपाः स्मयमानासो हसन्त्यः । ऋसा.

विवाहकामाः कन्याः

कन्या इव वहतुमेतवा उ अंज्यंजाना अभि चाकशीमि ।

कन्या इवानूढा बालिका इव । ता यथा वहतुमुद्वाहं प्राप्तुमेतवा उ एतु पतिं गन्तुमंज्यंजकमाभरणं तेजो वाञ्जाना व्यञ्जयन्त्यः । एव कुर्वत्यः कन्या इव स्वभर्तृभूतमाध्वरं वैद्युत वाग्निमादित्यं वा वहतुमेतुमंजि व्यञ्जक तदीय रूपमजाना व्यञ्जयन्तीर्घृतस्य धारा अभि चाकशीमि । अभिपश्यामि । ऋसा.

प्रजाकामना

प्रजाभिरग्ने अमृतत्वमश्याम् ।

प्रजाभिस्त्वदुत्ताभिर्हे अग्नेऽहममृतत्वं संतत्यविच्छेदलक्षणमश्याम् । प्राप्नुयाम् । ऋसा.

प्रेमविवाहबद्धदम्पती

वधूरियं पतिमिच्छन्त्येति य ईं वहाते महिषीमिषिराम् ।
आस्य श्रवस्याद्रथ आ च घोषात्पुरू सहस्रा परि वर्तयाते ॥

इय वधूरिन्द्रस्य पत्नी पतिमिच्छन्ती स्वप्रिय यज्ञगमनाय प्रवृत्तमिच्छन्त्येति । अनुगच्छति । य इन्द्रं ईमेना महिषी वहाते वहतीषिरा गमनवर्ता अस्येन्द्रस्य रथ आ अर्वागस्मदभिमुख श्रवस्यात् । अन्नमिच्छति । आ च घोषात् । आघुष्यति । शब्दयति । पुर्वत्यधिकं सहस्रा सहस्राणि धनानि परि परितो वर्तयाते । वर्तयति । प्रापयति । श्रवस्यादा च घुष्यादिति वा । ऋसा.

अर्धं भार्या शरीरस्य । सुपत्नी ।

उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी ।
अदेवत्रादराधसः ॥

उतापि च त्वैका शशीयसी । शशीयसीत्येतन्महिष्या नाम । सैव स्त्री । यद्वा । उतेत्ययमेवकारार्थे । स्त्रीषु सैव प्रशस्येत्यर्थः । त्वसमसिमनेमेत्यनुचानीति वचनात्

(१) ऋसं.४।५८।९; कासं.४०।७; शुमा.१७।९७; आपश्रौ.१७।१८।१.

(२) ऋसं.५।४।१०; तैसं.१।४।४६।१; वस्रु.१७।४; बौध.२।६।११।३३.

(३) ऋसं.५।३७।३. (४) ऋसं.५।६१।६.

(१) ऋसं.४।१८।८. (२) ऋसं.४।१९।९; नि.३।२०.

(३) ऋसं.४।५८।८; कासं.४०।७; शुमा.१७।९६; नि.७।१७,२०; आपश्रौ.१७।१८।१; शाश्रौ.१०।१२।१५, १४।५७।१,२.

त्वेति निघातः । सैव पुंसः पुरुषाद्वयसी वसीयसी भवति । कस्मात्पुंस इत्युच्यते । अदेवत्रात् । देवा न येन त्रायन्ते स्तुत्यादिना सोऽदेवत्रः । तस्मादराधसः । राधो धनम् । दानार्हधनरहितात् । लुब्धकादित्यर्थः । ऋसा.

[1]वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम् । देवत्रा कृणुते मनः ॥

या शशीयसी जसुरि व्यथितम् । जसिस्ताडनकर्मा-पक्षेपणकर्मा वा । तं वि जानाति । तथा तृष्यन्त वि जानाति । कामिन धनाद्यभिलाषवन्त वि जानाति । अनुकम्पयाभिमतं दत्तवतीत्यर्थः । देवत्रा देवेषु मनः कृणुते कुरुते देवप्रीत्यर्थं प्रदानबुद्धि करोति या सैव स्त्रीति पूर्वत्र सबन्धः । ऋसा.

उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः । स वैरदेय इत्समः ॥

उत घापि च । घेति पूरणः । नेमः । त्वो नेम इत्यर्धस्येति निरुक्तम् । नेमोऽर्धः । जायापत्योर्मिलितैकैककार्यकर्तृत्वादेक एव पदार्थः । अर्धं शरीरस्य भार्येत्यादि स्मृतेः । शशीयस्या अर्धभूतस्तस्यन्तः पुमानस्तुत इति ब्रुवे । बहुधा स्तुतोऽपि गुणस्यातिशयाहुल्यादस्तुत एवेति ब्रुवे पणिः स्तोताहम् । स च तस्यन्तो वैरदेये । वीरा धनाना प्रेरयितारो दानशीलाः । तैर्दातव्य धन देयम् । तस्मिन्धने समः । सर्वेभ्यो दातेत्यर्थः । इदिति पूरणः । ऋसा.

सुपत्नी

[2]पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।

पावीरवी शोधयित्री कन्या कमनीया चित्रायुश्चित्रगमना चित्रान्ना वा वीरपत्नी । वीरः प्रजापतिः पतिर्यस्यास्तादृशी । यद्वा । वीराणा पालयित्री । एवभूता सरस्वती धियमस्मदीयं कर्म यज्ञाख्यं धात् । दधातु । धारयतु । ददातु वा । ऋसा.

स्वसुर्जारः

[3]पूषणं न्वजाश्वमुप स्तोषाम वाजिनम् । स्वसुर्यो जार उच्यते ॥

अजाश्च छागवाहन वाजिनमन्नवन्त बलवन्तं वा पूषण पोषक देव नु अद्योप स्तोषाम । उपस्तवाम । यः पूषा स्वसुरुषसो जार उपपतिरित्युच्यते तं पूषणमित्यन्वयः । ऋसा.

मातुर्दधिपुमब्रवं स्वसुर्जारः शृणोतु नः । भ्रातेन्द्रस्य सखा मम ॥

मातुर्निर्मात्र्या रात्रेर्दधिषुं पतिं पूषणमब्रवम् । स्तौमि । स्वसुरुषसो जारश्च पूषा नोऽस्माक स्तोत्राणि शृणोतु । इन्द्रस्य भ्राता सहजातः पूषा मम स्तोतुः सखा मित्रभूतोऽस्तु । ऋसा.

पतिं अन्य भार्या गमयति

[4]ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ।

ताभिर्नाभिः सूर्यस्य दूत्या यासि । गच्छसि । कदाचिद्देवैः सार्धं सूर्येऽसुरवधार्थं प्रस्थिते सति तस्य भार्या स्वभर्तरि सजातौत्सुक्या बभूव ता प्रति सूर्यः पूषणं प्राहैषीत् तेन चात्र पूषा स्तूयते । अपि च त्वं श्रवो हविर्लक्षणमन्नमिच्छमान इच्छन् कामेन पश्वादिविषयेण स्तोतृभिः कृतो वशीकृतोऽसि । ऋसा.

सूर्यार्थं पूष्णो दानम्

[5]यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वञ्चम् ।

यं पूषण देवासः सर्वे देवाः सूर्यायै सूर्यस्य पत्न्यै यद्वा सावित्र्यै सूर्याख्याया अश्विनोर्वरणायाददुः दत्तवन्तः । कीदृश पूषणम् । कामेन पश्वादिविषयेण कृतं स्तोतृभिर्वशीकृत तवसं बलवन्तं प्रवृद्ध वा स्वञ्चं स्वञ्चनं सुष्ठु गच्छन्तम् । ऋसा.

---

(१) ऋसं.५।६१।७.

(२) ऋसं.५।६१।८.

(३) ऋसं.६।४९।७; तैस.४।१।११।२, कास १७।१८; मैसं.४।१४।३; आश्रौ.२।८।३,३।७।६,५।२०।६, शाश्रौ. ६।१०।२.

(१) ऋस.६।५५।४. (२) ऋस.६।५५।५.

(३) ऋसं ६।५८।३, मैसं.४।१४।१६, तैब्रा.२।५।५।५ ताभि (याभि). (४) ऋस.६।५८।४, मैसं.४।१४।१६; तैब्रा. २।८।५।४ य (त)

पतिपत्नीप्रेम

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना । योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयं समने पारयन्ती ॥

पूर्वत्र ऋग्द्वयेन कवचधनुषी स्तुते । अत्र ज्यास्तुतिः । इय ज्या समने संग्रामे धन्वन् धन्वनि । अधीति सप्तम्यर्थानुवादः । विततता विस्तृता पारयन्ती पारं नयन्ती प्रिय प्रियकर वाक्य वक्ष्यन्तीव कर्ण धन्विनो राज्ञः कर्णप्रदेशमा गनीगन्ति । आगच्छति । इदिति पूरणः । योषा नारी सखाय पतिमिव परिषस्वजानेषु परिष्वजमाना शिङ्क्ते । शब्दायते च । ऋसा.

अनेकजायापतिरेक.

राजेव हि जनिभिः क्षेष्येव ।

हे इन्द्र त्व जनिभिजार्याभी राजेव युभिर्दीप्तिभिः सह क्षेष्येव । निवसस्येव । हीति पूरणः। ऋसा.

जनीरिव पतिरेकः समानो नि मामृजे पुर इन्द्रः सु सर्वाः ।

अपि च स इन्द्रः सर्वाः पुरः शत्रुनगरीः समानः समवृत्तिरेकोऽसहायः पतिर्जनीरिव जाया इव सु नि मामृजे । सम्यक् शोधयेत् । ऋसा.

गृहे वर्तमाना. स्त्रिय.

प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः ।
स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयामसि॥

या यादृश्यो नारीर्नार्यः स्त्रियः प्रोष्ठेशयाः प्राङ्गणे शयानाः । या वह्येशयाः । वह्य वाहनम् । तस्मिन् शयानाः। यास्तल्पशीवरीस्तल्पशयाः । याः स्त्रियः पुण्यगन्धा मङ्गल्यगन्धाः । तास्तादृशीः सर्वाः स्त्रीः स्वापयामसि । वयं निद्रा कारयामः । ऋसा.

जारसंबन्धः

यतः परि जार इवाचरन्त्युषो ददक्षे न पुनर्यतीव ।

हे उषः यतो यैश्च तेजोभिः परि ददक्षे दृश्यसे त्वम् । जार इव पत्याविवाचरन्ती समीपे सचरन्ती साध्वी नारीव जारे रात्रेर्जरयितरि सूर्ये सचरन्ती त्व दृश्यसे । यथा लोके दुष्ट भ्रमणशीलमपि पतिमत्यज्यैव साध्वी सचरति तद्वत् तमविमुञ्चती त्वमित्यर्थः । न पुनर्यतीव यती पतिं परित्यज्येतस्ततः सचरन्ती व्यभिचारिणीव सूर्यमपरित्यजन्ती त्वम् । पुनरित्यय वैलक्षण्यद्योतनार्थः । ऋसा.

अधनो जामाता

मो ष्वद्य दुर्हणावान्त्सायं करदारे अस्मत् ।
अश्रीर इव जामाता ॥

दुर्हणावान् । परेर्दुःसहहनन दुर्हणम् । तद्वानिन्द्रोऽद्येदानीमस्मदारेऽस्माक समीप आगच्छतु । सु सुष्ठुतिशयेन साय दिवसस्यावसान सायंकाल मो करत् । मा कार्षीत् । जामाता । जायत इति जा अपत्यम् । तस्य निर्माता दुहितुः पतिः । अश्रीर इव । न श्रीरश्रीः । तदस्यास्तीत्यश्रीरः । गुणैर्विहीनः कुत्सितो जामाताऽसकृदाहूय. मानोऽप्यासायकाल विलम्बते । तद्वत्त्व कालविलम्ब मा कृथा इत्यर्थः । ऋसा.

पतिपत्नीकर्तव्य सौभाग्य च

यो दम्पति समनसा सुनुत आ च धावतः ।
देवासो नित्ययाशिरा ॥

अत्र यजने दम्पत्योः स्तुतिः । हे देवासो देवाः समनसा समनसौ कर्मणि समानमनस्कौ या यौ दम्पती यज्ञकारिणौ जायापती सुनुतः सोमाभिषव कुरुतः । यौ दम्पती ततस्तमभिषुत सोमम्मा धावतश्च दशापवित्रेण शोधयतः । तथा नित्यया । यत्र तृतीयसवने सोमोऽस्ति तत्राश्रयणद्रव्य गोक्षीरमस्त्येव । तस्मान्नित्यसंबन्धेनाशिराश्रयणेन गोक्षीरेण संयुत सोम यौ प्रयच्छतः तावन्नादीन् प्राप्नुत इत्युत्तरत्र संबन्धः । ऋसा.

प्रति प्राशव्या इतः सम्यंचा बर्हिराशाते ।
न ता वाजेषु वायतः ॥

---

(१) ऋसं.६।७५।३, तैसं.४।६।६।१; कासं ६।१, मैसं. ३।१६।३; क्षुमा.२९।४०; नि.९।१८; आपश्रौ.२०।१६।६.

(२) ऋसं.७।१८।२. (३) ऋस.७।२६।३.

(४) ऋसं.७।५५।८; अस.४।५।३ पूर्वार्धे (प्रोष्ठेशयास्तल्पेशया नारीर्यो वह्यशीवरीः).

(५) ऋसं.७।७६।३; पञ्चा.२५।८।४

(१) ऋसं.८।२।२०.

(२) ऋसं.८।३१।५.

(३) ऋस.८।३१।६.

तौ देवेभ्यो हविषा दातारौ दम्पती प्राशव्यान्। अश भोजने। प्रपूर्वस्याश्नौणादिको भाव उण्प्रत्ययः। प्राशुर्भक्षणम्। तस्मै साधून् हितान्वान्नादीन् प्रतीतः। प्रतिगच्छतः। यद्वा। प्राशितव्यान्। अत्र वर्णलोपः। तावेव सम्यञ्चा सम्यञ्चौ समीचीनौ संगतौ बर्हिर्यज्ञमाशाते। आनशाते। तत्र द्रव्यैर्व्याप्नुतः। तस्मात्तौ यष्टारौ भार्यापती वाजेषु देवैर्दत्तेषु अन्नेषु न वायतः। वयतिर्गत्यर्थः। न गच्छतः। सर्वदान्नसहितौ तिष्ठातामित्यर्थः। ऋसा.

नं देवानामपि ह्वुतः सुमति न जुगुक्षतः।
श्रवो बृहद्विवासतः॥

एतौ दम्पती देवानामिन्द्रादीना नापि ह्वुतः। अपह्नाप न कुरुतः। अपिह्नवोऽपलापः। देवेभ्यो हविः प्रदास्याम इति प्रतिज्ञाय पुनरदानमपलापः। ह्वुङ् अपनये। कथ नापलपन्तीत्यवसीयते। तदाह। सुमति युष्मदीयां शोभना मति न जुगुक्षतः। जुगुक्षतः। न सवरीतुमिच्छतः। संवारणमाच्छादनम्। न च्छादयत इत्यर्थः। किंतु स्तुति कुरुतः। किंच। बृहद्देवेभ्यो दीयमानत्वान्महच्छ्रवः। श्रव इत्यन्ननाम। महदन्न विवासतः। युष्मभ्यं प्रयच्छतः। विवाससिः परिचरणकर्मा। दानमपि च परिचरणमेव। देवैर्दत्तमन्न घृतादिभिर्मिश्रीकृत्य पुनःपुनर्यजत इत्यर्थः। ऋसा.

पुत्रिणा ता कुमारिणा विश्वमायुर्व्यश्नुत.।
उभा हिरण्यपेशसा॥

पुत्रिणा पुत्रवन्तौ तत्रापि कुमारिणा षोडशवर्षदेशीय पुत्रवन्तौ हिरण्यपेशसा हिरण्मयैराभरणैरलंकृतरूपावुभौ ता तौ दंपती विश्व सर्वमायुरायुष्य व्यश्नुतः। व्याप्नुतः। यज्ञेन तयोः पुत्रादिक धनमायुश्च संभवतीत्यर्थः। ऋसा.

[3]**वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम्।**
समूधो रोमशं हतो देवेषु कृणुतो दुवः॥

वीतिहोत्रा वीतिहोत्रौ। वीतिः प्रियकरो होत्रा यज्ञो ययोस्तौ। अनेन यज्ञेन तयोः सुखादिकं संभवति। तादृशौ। यद्वा। वीतिः कान्त्यर्थः। होत्रेति वाङ्नाम। अस्मद्विषया स्तुति कुरुतमिति पृथक्पृथग्देवैः काम्यमानस्तुती। अत एव क सुखप्रदं हवीरूपमन्न दशस्यन्ता देवेभ्यः प्रयच्छन्तौ कृतद्वसू। याचमानकृतधनौ। पात्रेपूपयुक्तधनावित्यर्थः। एवविधौ दम्पती अमृतायामरणाय संतानाभिवृद्धये रोमश रोमवन्त वृषणमूधो योनिं च स हतः। संयोजयत इति। मैथुनमनूद्यते। ततः सपुत्रादिकौ तौ देवेषु दुवः स्तुत्यन्नदानरूपा परिचर्या कृणुतः। कुरुतः। पञ्चभिर्दम्पती अस्तूयेताम्। ऋसा.

स्वाभाविकः स्त्रीदोषः

इन्द्रश्चिद्धा तदब्रवीत्स्त्रिया अशास्यं मनः।
उतो अह क्रतुं रघुम्॥

यो मेध्यातिथेर्धनप्रदाता प्रायोगिरासगः स पुमान् भूत्वा स्त्र्यभवत्। तदा यदिन्द्र उवाच तदिदमाह। तथा चाहुः। प्रायोगिश्चासगो यः स्त्री भूत्वा पुमानभूत् स मेध्यातिथये दान दत्वेति। इन्द्रश्चिद्धेन्द्रः खलु तदब्रवीत्। स्त्रिया मनश्चित्तमशास्य पुरुषेणाशिष्यं शासितुमशक्य प्रबलत्वादिति। उतो अपि च स्त्रियाः क्रतु प्रज्ञा रघु लघुमाह। ऋसा.

स्त्रीधर्मः

अधः पश्यस्व मोपरि संतरां पादकौ हर।
मा ते कशप्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ॥

एवमन्तरिक्षादागच्छन्नधस्थ इन्द्रः स्त्रिय सन्त स्वस्मात्पुस्त्वमिच्छन्तं प्रायोगि यदुवाच तदाह। हे प्रायोगे त्व स्त्री सत्यधः पश्यस्व। एष स्त्रीणा धर्मः। उपरि मा पश्यस्व। उपरिदर्शन स्त्रीणां धर्मो न भवति हि। पादकौ पादावपि स्तरां संश्लिष्टौ यथा भवतस्तथा हर। यथा पुरुषो विश्लिष्टपादनिधानो भवति तथा त्वया स्त्रिया न कर्तव्यमित्यर्थः। अपि च ते कशप्लकौ। कशश्च प्लकश्च कशप्लकौ। कशतिराहननकर्मा। कशप्लकावुभे अङ्गे मा दृशन्। पुरुषा न पश्यन्तु। तयोरदर्शनं वाससः सुष्ठु परिधानेन भवति। अतः सुष्ठु वाससा परिधानं कुरु। स्त्रियो ह्या गुल्फादभिसंवीता भवन्तीत्यर्थः। हि यस्मात्कारणाद् ब्रह्मा सन् स्त्री बभूविथ। ऋसा.

(१) ऋसं.८।३१।७.
(२) ऋसं.८।३१।८; आपगृ.३।८।१०.
(३) ऋसं.८।३१।९; आपगृ.३।८।१०.

(१) ऋसं.८।३३।१७. (२) ऋसं.८।३३।१९.

स्त्रीपुरुषधर्म

स्तोमं जुषेथां युवशेव कन्यनां विश्वेह देवौ सवनाव गच्छतम् ।

हे अश्विनौ देवौ युवामिहास्मिन् यज्ञे स्तोम जुषेथाम् । सेवेथाम् । युवशेव यथा युवानौ कन्यना कन्याना आह्वानं सेवेते । तद्वदित्यर्थः । ऋसा.

जारसबन्धः । अनेकजायापतिरेकः ।

अभि गावो अनूषत योषा जारमिव प्रियम् ।

हे सोम त्वा गावः शब्दा अभ्यनूषत । अभिष्टुवन्ति । योषा प्रिय जारमिव । सा यथा त स्तौति तद्वत् । ऋसा.

अभि त्वा योषणो दश जारं न कन्यानूषत । मृज्यसे सोम सातये ॥

हे सोम त्वा त्वा या दशसख्याका योषणोऽङ्गुलयः कन्या पितृमती कन्यका जारं न यथा प्रियमभिशब्दायते तद्वदभ्यनूषत अभिशब्दायन्ते ताभिः सातयेऽस्माक धनस्य लाभाय मृज्यसे । इन्द्रार्थं शोध्यसे । ऋसा.

मर्य इव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा ।

मर्य इव युवतिभिर्मर्त्यो यथा युवतिभिः सह सगतो भवति तद्वदयमपि सोमो युवतिभिर्मिश्रणशीलाभिर्वसतीवरीभिरद्भिः सह समर्षति । संगच्छते अभिषवकाले । पश्चात्सोमः शतयाम्नानेकयानसाधनच्छिद्रोपेतेन पथा मार्गेण दशापवित्रसंबन्धिनि कलशे द्रोणकलशे गच्छतीति शेषः । ऋसा.

सोम कृण्वन्त्सामन्यो विपश्चित्क्रन्द्नेत्यभि सख्युर्न जामिम् ।

साम सामानि कृण्वन् कुर्वन् सोमः सामन्यः सामगानकुशलः । सुष्ठु शब्दायमान इत्यर्थः । विपश्चित् सर्वं जानानः सोमः क्रन्दन् देवानाह्वयन्नभ्येति । ग्रहादीनि त्वरयाभिगच्छति । तत्र दृष्टान्तः । सख्युर्न सख्यु र्जामिं जाया यथेतरो लम्पटो वेगेनाभिगच्छति तद्वत् । ऋसा.

अपघ्नन्नेषि पवमान शत्रून्प्रियां न जारो अभिगीत इन्दुः ।

हे पवमान पूयमान सोम अभिगीतः स्तोतृभिरभिष्टुत इन्दुः पात्रेषु क्षरंस्त्व शत्रूनपघ्नन्नहिसन्नेषि । आगच्छसि । कथमिव । जारः प्रियां न प्रियतमामसतीं स्त्रीमन्यान्याधमानः सन्यथाभिगच्छति तद्वत् । ऋसा.

भ्रातृभगिन्योर्विवाहः

ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान् । पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥

अत्रास्मिन्सूक्ते वैवस्वतयोर्यमयम्योः संवाद उच्यते । अस्यामृचि यम प्रति यमी प्रोवाच । तिरोऽन्तर्हितमप्रकाशमानम् । निर्जनप्रदेशमित्यर्थः । पुरु चिद्बहुपि विस्तीर्णं चार्णव समुद्रैकदेशमवान्तरद्वीप जगन्वान् गतवती यमी । चिदिति पूजार्थे । पजितमिष्टम् । श्रेष्ठमित्यर्थः । सखायं गर्भवासादारभ्य सखीभूत यम सख्या सख्याय स्त्रीपुरुषसपर्कजनितमित्रत्वाय ओ ववृत्याम् । आवर्तयामि । आभिमुख्येन स्थित्वा लज्जा परित्यज्य त्वत्संभोग करोमीत्यर्थः । धर्मस्य त्वरिता गतिरिति न्यायेन कामस्य त्वरितत्वात् । अपि च पितुरावयोर्भविष्यतः पुत्रस्य पितृमतस्य तवार्थायाधि क्षम्यधि पृथिव्याम् । पृथिवीस्थानीये ममोदर इत्यर्थः । प्रतर प्रकृष्टम् । सर्वगुणोपेतमित्यर्थः । नपातं गर्भलक्षणमपत्य वेधा विधाता प्रजापतिर्दीध्यान आवयोरनुरूपस्य पुत्रस्य जननार्थमावा ध्यायन्ना दधीत । प्रजापतिर्धाता गर्भ दधातु ते (ऋसं. १०।१८४।१) इत्युक्तत्वात् । ऋसा.

न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति । महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ॥

(१) ऋसं.८।३५।५.

(२) ऋसं.९।३२।५; कौसू.४७।१६.

(३) ऋसं.९।५६।३.

(४) ऋसं ९।८६।१६; अस.१८।४।६० युवतिभिः समर्षति (योषाः समर्षसे); सासं.१।१५७:२।५०२.

(५) ऋसं.९।९६।२२.

(१) ऋसं.९।९६।२३.

(२) ऋसं.१०।१०।१; असं.१८।१।१.

(३) ऋसं.१०।१०।२; असं.१८।१।३.

यम आत्मानं परोक्षीकृत्य यमी प्रत्युवाच । हे यमि ते तव सखा गर्भवासलक्षणेन सखीभूतो यम एतदीदृश त्वयोक्तं स्त्रीपुरुषलक्षण सख्यं न वष्टि । न कामयते । यद्यस्मात्कारणाद्यमी सलक्ष्मा समानयोनित्वलक्षणा । विषुरूपा भगिनीत्वाद्विषमरूपा भवति भवति । तस्मान्न वष्टीत्यर्थः । इदानीं तिरः पुरू चिदर्णव जगन्वानित्यस्य प्रतिवचनमुच्यते । महो महतोऽसुरस्य प्राणवतः प्रज्ञावतो वा प्रजापतेः पुत्रासः पुत्रभूता वीराः । शत्रूणां विविधमीरयितारो धर्तारो धारयितारो दिवो द्युलोकस्य । प्रदर्शनमेतत् । द्युप्रभृतीनां लोकानामित्यर्थः । ऋसा.

उशन्ति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य । नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्वमा विविश्याः ॥

पुनरपि यमी यम प्रत्युवाच । घेति निपातोऽप्यर्थे । हे यम ते प्रसिद्धा अमृतासः प्रजापत्यादयोऽपि देवा एतदीदृश शात्रूणागम्यत्वेनोक्तं त्यजसम् । त्यज्यते परस्मै प्रदीयत इति त्यजस दुहितृभगिन्यादिस्त्रीजातम् । उशन्ति । कामयन्ते । एकस्य चित्सर्वस्य जगतो मुख्यस्यापि प्रजापत्यादेः स्वदुहितृभगिन्यादीना सबन्धोऽस्तीति शेषः । अतः कारणात्ते तव मनश्चित्तमस्मे अस्माकम् । ममेत्यर्थः । मनसि चित्ते नि धायि । निधीयताम् । अह त्वा कामये त्व मामपि कामयस्वेत्यर्थः । अपि च । जन्युरिति लुप्तोपममेतत् । जन्युरिव यथा जनयिता प्रजापतिः पतिर्भर्ता भूत्वा स्वदुहितुः शरीर संभोगेनाविष्टवान् तथा त्वमपि मम पतिर्भूत्वा तन्व मदीय शरीरमा विविश्याः । संभोगेनाविश योनौ प्रजननप्रक्षेपोपगूहनचुम्बनादिना मा समृक्ष्वेत्यर्थः । ऋसा.

नै यत्पुरा चकृमा कद्ध नूनमृता वदन्तो अनृतं रपेम । गंधर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ॥

यमो यमीं पुनर्ब्रूते । पुरा पूर्वं प्रजापतेर्यदगम्यागमनमपरिमितसामर्थ्योपेतत्वात्कृत तथा वय न चकृम । नाकुर्म । वयमृतानि सत्यानि वदन्तो ब्रुवन्तोऽनृतमसत्यं कद्ध कदा खलु निश्चित रपेम । वदेम । न कदाचिदपीत्यर्थः । अगम्यागमन न कुर्म इति यावत् । अपि चाप्सु । अन्तरिक्षनामैतत् । अन्तरिक्षे स्थितो गन्धर्वो गवा रश्मीनामुदकाना वा धारयितादित्योऽप्यान्तरिक्षस्था सा प्रसिद्धा योषादित्यस्य भार्या सरण्यूश्च नो नावावयोर्नाभिरुत्पत्तिस्थानम् । मातापितरावित्यर्थः । तत्तस्मात्कारणान्नावावयोर्जामि बान्धवमुत्कृष्टम् । एवं सत्यावयोरगम्यागमनरूपत्वात्कर्तुमयुक्त तस्मादेतन्न करोमीत्यभिप्रायः । ऋसा.

गर्भे नु नौ जनिता दम्पती कर्देवस्त्वष्टा सविता विश्वरूपः । नकिरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥

त्वष्टा रूपाणा कर्ता सविता सर्वेषा शुभाशुभस्य प्रेरको विश्वरूपः सर्वात्मको देवो दानादिगुणयुक्तो जनिता जनयिता प्रजापतिर्गर्भे नु गर्भावस्थायामेव नावावा दम्पती जायापती कः । कृतवान् एकोदरे सहवासित्वात् । अस्य प्रजापतेर्व्रतानि कर्माणि नकिः प्र मिनन्ति । न केनचित्प्रहिंसन्ति । न लोपयन्तीत्यर्थः । अतः कारणाद्गर्भावस्थायामेवावयोः प्रजापतिकृते दम्पतित्वे सति सभोगं कुर्वित्यर्थः । अपि च नावावयोरस्येद मातुरुदरे सहवासजनित दम्पतित्वं पृथिवी भूमिर्वेद । जानाति । उतापि च द्यौर्द्युलोकोऽपि जानाति । ऋसा.

को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत् । बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ॥

प्रथमस्याह्नः संबन्ध्यस्येदमन्योन्यसगमनं को वेद । जानाति । प्रथमेऽहनि यत्क्रियते तदनुमानमाश्रित्य न कश्चिदपि ज्ञातुं शक्नोतीत्यर्थः । इहास्मिन् प्रदेशे प्रत्यक्षतः क ईमिद संगमनं ददर्श । पश्यति । कः प्र वोचत् । प्रख्यापयति । न कोऽपीत्यर्थः । मित्रस्य वरुणस्य मित्रावरुणयोर्बृहन्महद्धाम स्थानमहोरात्रं यदस्ति तत्र नॄन् मनुष्यान् वीच्या नरकेण हे आहन

(१) ऋसं.१०।१०।३; असं.१८।१।३.
(२) ऋसं.१०।१०।४, असं.१८।१।४.

(१) ऋसं.१०।१०।५, असं.१८।१।५.
(२) ऋसं.१०।१०।६, असं.१८।१।७.

आहन्तर्मर्यादया हिंसितः। स्वकृतशुभाशुभकर्मापेक्षया मनुष्यादिप्राणिनां नरकपातेन स्वर्गप्रापणेन निग्रहानुग्रहयोः कर्तरित्यर्थः। एवंभूत हे यम त्वं कदु ब्रवः। किं वा ब्रवीषि। ऋसा.

यमस्य मा यम्यं काम आगन्त्समाने योनौ सहशेय्याय।
जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा॥

यमस्य तव कामोऽभिलाषो यम्य यमी मा मां प्रत्यागन्। आगच्छतु। ममोपरि तव यमस्य समोगेच्छा जायतामित्यर्थः। किमर्थम्। समाने योनावेकस्मिन् स्थाने शय्याख्ये सहशेय्याय सहशयनार्थम्। तदनन्तर पूर्णमनोरथा सती जायेव पत्ये यथा भार्या पत्युरर्थाय परया प्रीत्या विश्रस्ता सती रतिकामा स्वशरीरं प्रकाशयति एवं तन्वमात्मीय शरीरं रिरिच्याम्। विविच्याम्। त्वदर्थं प्रकाशयेयमित्यर्थः। किंच। चिदिति पूरणः। वि बृहेव। बृहू उद्यमने। धर्मार्थकामान्विविधमुद्यच्छावः। तत्र दृष्टान्तः। रथ्येव चक्रा रथस्यावयवभूते चक्रे यथा रथमुद्यच्छतस्तद्वत्। ऋसा.

न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति।
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा॥

यम्या प्रख्यातो यमः पुनराह। इहास्मिन् लोके देवाना संबन्धिनो ये स्पशोऽहोरात्रादयश्चाराश्चरन्ति सर्वेषां शुभाशुभलक्षणकर्मप्रत्यवेक्षणार्थं परिभ्रमन्ति एते चाराः क्षणमात्रमपि चरणव्यापाररहिता न तिष्ठन्ति। न नि मिषन्ति। मेषणं न कुर्वन्ति। शुभमशुभं वा यः करोति तं निरीक्षन्ते चेत्यर्थः। हे आहनो ममापहन्त्यसह्यभाषणेन दुःखयित्रि त्वं मन्मत्तोऽन्येन त्वत्सदृशेन सह तूयं क्षिप्रं याहि। सगच्छ। गत्वा च तेन वि वृह। धर्मार्थकामानुद्यच्छ। तत्र दृष्टान्तः। रथ्येव चक्रा यथा रथावयवभूते चक्रे रथमुद्यच्छतस्तद्वत्। ऋसा.

(१) ऋसं.१०।१०।७; असं १८।१।८.
(२) ऋसं.१०।१०।८; असं.१८।१।९.

रात्रीभिरस्मा अहभिर्दशस्येत्सूर्यस्य चक्षुर्मुहुरुन्मिमीयात्।
दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य विभृयादजामि॥

रात्रिभिरहभिरहोरात्रयोरस्मै यमाय कल्पित भाग सर्वो यजमानो दशस्येत्। प्रयच्छतु। सूर्यस्य संबन्धि चक्षुस्तेजो मुहुर्मुहुरस्मै यमायोन्मिमीयात्। उदेतु। दिवा पृथिव्या द्यावापृथिवीभ्या सह मिथुना मिथुनौ सबन्धू समानबन्धू अहोरात्रे अस्मै यमाय। एतज्ज्ञात्वेयं यमी र्यमस्याजाम्यभ्रातरं विभृयात्। धारयतु। यत्नेन परिगृह्णात्वित्यर्थः। ऋसा.

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत्॥

यत्र येषु कालेषु जामयो भगिन्योऽजाम्यभ्रातरं पतिं कृणवन् करिष्यन्ति ता तान्युत्तराणि युगानि कालविशेषा आ गच्छान्। आ गमिष्यन्ति। येति पूरणः। यस्मादेव तस्माद्धे सुभगे त्वमिदानीं मन्मत्तोऽन्य पतिं भर्तारमिच्छस्व। कामयस्व। तदनन्तर वृषभाय तव योनौ रेतः सेक्त्रे पुरुषायात्मीय बाहुमुप बर्बृहि। शयनकाल उपबर्हण कुरु। ऋसा.

[3]किं भ्रातासद्यदनाथं भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात्।
काममूता बह्वेतद्रपामि तन्वा मे तन्वं सं पिपृग्धि॥

यमी यमेन प्रत्याख्याता पुनराह। यद्यस्मिन् भ्रातरि सति स्वस्त्रादिकमनाथ नाथरहितं भवति स भ्राता किमसत्। किं भवति। न भवतीत्यर्थः। किं च यस्या भगिन्या सत्या भ्रातरं निर्ऋतिर्दुःख निगच्छात् नियमेन गच्छति प्राप्नोति सा स्वसा किमु। किं वा भवति। भ्रातृभगिन्योश्च परस्परं प्रीतियेन केनचिदुपायेनावश्य कार्येत्यभिप्रायः। साहं काममूता कामेन

(१) ऋसं १०।१०।९; असं.१८।१।१०.
(२) ऋसं.१०।१०।१०; असं.१८।१।११, नि.४।२०.
(३) ऋसं.१०।१०।११; असं.१८।१।१२.

मूर्च्छिता सती बहु नानाप्रकारमेतदीदृशमुक्तं वक्ष्यमाण च रपामि । प्रलपामि । एतज्ज्ञात्वा मे मम तन्वा शरीरेण तन्व शरीरं सं पिपृधि । सपर्चय । सभोगेन संश्लेषय । मां सम्यगुभुङ्क्ष्वेत्यर्थः । ऋसा.

नैं वा उ ते तन्वा तन्वं सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात् ।
अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥

यमो यमी प्रत्युक्तवान् । हे यमि ते तव तन्वा शरीरेण तन्वमात्मीय शरीरं न वै स पपृच्या । नैव सपर्चयामि । नैवाह त्वा सभोक्तुमिच्छामीत्यर्थः। यो भ्राता स्वसार भगिनीं निगच्छात् नियमेनोपगच्छति । सभुङ्क्त इत्यर्थः । त पापकारिणमाहुः । शिष्टा वदन्ति । एतज्ज्ञात्वा हे सुभगे सुष्ठु भजनीये हे यमि त्व मन्मत्तोऽन्येन त्वद्योग्येन पुरुषेण सह प्रमुदः सभोगलक्षणान्प्रहर्षान् कल्पयस्व । समर्थय । ते तव भ्राता यम एतदीदृश त्वया सह मैथुन कर्तु न वष्टि । न कामयते । नेच्छति । ऋसा.

बतो बतासि यम नैव ते मनो हृदयं चाविदाम ।
अन्या किल त्वां कक्ष्येव युक्तं परि ष्वजाते लिबुजेव वृक्षम् ॥

यमी प्रत्युवाच । हे यम त्व बतो दुर्वलोऽसि । बतेति निपातः खेदानुकम्पयोः । अनुकम्प्यश्चासि । ते त्वदीय मनो मनोगत संकल्प हृदय च बुद्धिगतमभ्य वसायं च नैवाविदाम । वय न जानीम एव । मत्तोऽन्या काचित्स्त्री त्वा परि ष्वजाते किल । तत्र दृष्टान्तद्वयमुच्यते । कक्ष्येव युक्त यथा कक्ष्या रज्जुर्युक्तमात्मना सबद्धमश्व परिष्वजते तद्वत् । लिबुजेव वृक्ष यथा लिबुजा बतति गाढ वृक्ष परिष्वजते तद्वच्च । अन्यस्या स्त्रियामासक्तस्त्व मा परिष्वङ्क्तु नेच्छसीत्यर्थः । ऋसा.

अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षम् ।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम् ॥

यमः पुनरप्याह । हे यमि त्वमन्यमु अन्य पुरुषमेव सु सुष्ठु परिष्वज । अन्य उ अन्योऽपि पुरुषस्त्वा परि ष्वजाते । तत्र दृष्टान्तः । लिबुजेव वृक्ष यथा वल्ली गाढ वृक्ष परिष्वजते तद्वत् । तथा सति । वाशब्दः समुच्चये । त्व तस्य च पुरुषस्य मन इच्छ । कामय । तस्य त्व वशवर्तिनी भवेत्यर्थः । स च पुरुषस्तव मन इच्छतु । अथाथ परस्परवशवर्तित्वानन्तरं त्वं तेन सह सुभद्रा सुकल्याणी संविद परस्परसभोगसुखसवित्ति कृणुष्व । कुरुष्व । ऋसा.

सुपत्न्यः

इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा सं विशन्तु ।
अनश्रवोऽनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥

अविधवाः । धवः पतिः । अविगतपतिकाः । जीवद्भर्तृका इत्यर्थः । सुपत्नीः शोभनपतिका इमा नारीर्नार्य आञ्जनेन सर्वतोऽञ्जनसाधनेन सर्पिषा घृतेनाक्तनेत्राः सत्यः सं विशन्तु । स्वगृहान्प्रविशन्तु । तथानश्रवोऽश्रुवर्जिता अरुदत्योऽनमीवाः। अमीवा रोगः। तद्वर्जिताः। मानसदुःखवर्जिता इत्यर्थः । सुरत्नाः शोभनधनसहिता जनयः । जनयन्त्यपत्यमिति जनयो भार्याः । ता अग्रे सर्वेषा प्रथमत एव योनि गृहमा रोहन्तु । आगच्छन्तु । ऋसा.

अनुगमननिषेधः

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि । हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥

---

(१) ऋसं १०।१०।१२, असं १८।१।१३ (वा उ०) तन्वा तन्व (तनू तन्वा) (पाप गच्छात्०)· १८।१।१४ तन्वा तन्व (तनूं तन्वा) पू.

(२) ऋसं.१०।१०।१३; असं.१८।१।१५, नि ६।२८.

(१) ऋसं.१०।१०।१४, असं.१८।१।१६, नि.११।३४.

(२) ऋसं १०।१८।७, असं.१२।२।३१;१८।३।५७; तैआ.६।१०।२; आगृ.४।६।१२; शाश्रौ.४।१६।६; कौसू. ७२।११.

(३) ऋसं.१०।१८।८; असं.१८।३।२; तैआ.६।१।३;

देवरादिकः प्रेतपत्नीमुदीर्ष्व नारीत्यनया भर्तृसकाशादुत्थापयेत् । सूत्रितं च । तामुत्थापयेद्देवरः पतिस्थानीयोऽन्तेवासी जरद्दासो वोदीर्ष्व नार्यभि जीवलोकम् । इति । हे नारि मृतस्य पत्नि जीवलोकं जीवाना पुत्रपौत्रादीना लोकं स्थानं गृहमभिलक्ष्योदीर्ष्व । अस्मात्स्थानादुत्तिष्ठ । गतासुमपक्रान्तप्राणमेतं पतिमुप शेषे । तस्य समीपे स्वपिषि । तस्मात्त्वमेहि । आगच्छ । यस्मात्त्वं हस्तग्राभस्य पाणिग्राहं कुर्वतो दिधिषोर्गर्भस्य निधातुः तवास्य पत्युः सबन्धादागतमिदं जनित्वं जायात्वमभिलक्ष्य सबभूथ संभूतासि अनुमरणनिश्चयमकार्षीः तस्मादागच्छ । ऋसा.

भ्रातृभगिन्यौ

जामिवदस्मे ते सन्तु सख्या शिवानि ।

जामिवद्यथा भ्राता स्वभगिन्या स्नेहयुक्ता मतिं जानाति तद्वत् । तस्मात्कारणादस्मे अस्माकं ते तव च सख्या सख्यानि शिवानि सन्तु । मङ्गलानि भवन्तु । अनपायानीत्यर्थः । ऋसा.

स्वयंवर. गांधर्वविवाह

[1]कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण । भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं वनुते जने चित् ॥

कियती किंपरिमाणा योषा स्त्रीजातिर्मर्यतो मनुष्यसंबन्धिनो भोगानाचरतो वधूयोः स्त्रीकामस्य सर्वात्मकस्यान्तर्यामिरूपेणावस्थितस्येन्द्रस्य परिप्रीता । अनुरक्ता । वशवर्तिनीत्यर्थः । कीदृशस्य । वार्येण वरणीयेन पन्यसा स्तोत्रेण स्तुतस्य सत इति शेषः । अपि च यद्या वधूर्भद्रा कल्याणी सुपेशाः शोभनरूपा च भवति सा द्रौपदीदमयन्त्यादिका वधूः स्वयमात्मनैव जने चिज्जनमध्येऽवस्थितमिति मित्रं प्रियमर्जुननलादिकं पतिं वनुते । याचते । स्वयंवरधर्मेण प्रार्थयते । स च प्रीयमाणो वरजनोऽहमेवेत्यभिप्रायः । रूपंरूपं प्रतिरूपो बभूव । इति मन्त्रलिङ्गात्सर्वात्मकत्वादिति । ऋसा.

स्त्रीपुरुषसंबन्धः

[2]यॉभिः सोमो मोदते हृष्यते च कल्याणीभिर्युवतिभिर्न मर्यः ।

अभिप्रुतः सोमो याभिर्वसतीवर्येकधनाख्याभिरद्भिः सह मोदते मुदितो भवति हृष्यते च । पुनरुक्तिरादरार्था । अत्यर्थं हृष्यतीत्यर्थः । तत्र दृष्टान्तः । कल्याणीभिः कमनीयाभिर्युवतिभिस्तरुणीभिः स्त्रीभिः सह मर्यो न यथा मनुष्यो मोदते तद्वत् । ऋसा.

[3]एवेद्यूने युवतयो नमन्त यदीमुशन्नुशतीरेत्यच्छ । सं जानते मनसा सं चिकित्रेऽध्वर्यवो धिषणापश्च देवीः ॥

युवतयस्तरुण्यः स्त्रियो यूने तरुणाय नमन्त यथा प्रह्वीभवन्ति एवैवं वसतीवर्येकधनाख्या आपः सोमाय प्रह्वीभवन्ति । यद्वा युवतयः सोमेन सह मिश्रयितव्या आपो यूनेऽभिषवादिकर्मणामात्मना सह मिश्रयित्रे कर्त्रेऽध्वर्यवे नमन्त । प्रह्वीभवन्त्येव । इदिति पूरणः । कदा यद्यदोशन्नभिषवार्थं वसतीवरीः कामयमानः सोमः सोमाभिषवं कर्तुं कामयमानोऽध्वर्युर्वोशतीः सोमेन सह मिश्रीभावमभिषवादिकर्माङ्गभावं च कामयमाना ईमेना अपोऽच्छ प्रातुमेति गच्छति तदोपनमन्ते । ऋसा.

गृहस्थधर्मः

[4]अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः । तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ॥

हे कितव बहु मन्यमानो मद्वचने विश्वासं कुर्वंस्त्वमक्षैर्मा दीव्यः । द्यूतं मा कुरु । कृषिमित्कृषिमेव कृषस्व । कुरु । वित्ते कृष्या सपादिते धने रमस्व । मतिं कुरु । तत्र कृषौ गावो भवन्ति । तत्र जाया भवति । तदेव धर्मरहस्यं श्रुतिस्मृतिकर्ता सविता सर्वस्य प्रेरकोऽयं दृष्टिगोचरोऽयं ईश्वरो वि चष्टे । विविधमाख्यातवान् । ऋसा.

वृद्धाविवाहः

[5]अमाजुरश्विद्भवथो युवं भगोऽनाशोश्विदवितारापमस्य चित् ।

आगृ.४।२।१८; शाश्रौ.१६।१३।१३, वैसू ३८।३; कौसू. ८०।४५; ऋग्वि.३।८।४.

(१) ऋसं.१०।२३।७. (२) ऋसं.१०।२७।१२.

(१) ऋसं.१०।३०।५; बृहास्मृ ८।६५.

(२) ऋसं १०।३०।६; कासं.१३।१६.

(३) ऋसं.१०।३४।१३. (४) ऋसं.१०।३९।३.

हे नासत्या नासत्यौ युवं युवाममाजुरश्विपितृगृहे जूर्यन्त्या अपि दुर्भगाया घोषाया भगो भवथः। शोभनरूपेणात्मान परिणमय्य पति दत्तवन्तौ स्थ इत्यर्थः। तथा च निगमान्तरम्। घोषायै चित्पितृपदे दुरोणे पति जूर्यन्त्या अश्विनावदत्तम् (ऋसं.१।११७।७) इति। ऋसा.

राक्षसविवाह.

युवं रथेन विमदाय शुन्ध्युवं न्यूहथुः पुरुमित्रस्य योषणाम्। युवं हवं वध्रिमत्या अगच्छतं युवं सुपुतिं चक्रथुः पुरन्धये ॥

हे अश्विनौ युवं युवा पुरुमित्रस्य पुरुमित्रनामधेयस्य योषणा दुहितरं शुन्ध्युव नाम जाया विमदाय विमदनामधेयायर्षये रथेन स्वसेनापरिवृतेन रथेन न्यूहथुः। प्रापयतम्। विमदस्य गृह नीतवन्तौ स्थ इत्यर्थः। तथा च निगमान्तरम्। 'यावर्भगाय विमदाय जाया सेनाजुवा न्यूहतू रथेन' (ऋस. १।११६।१) इति। किञ्च युव युवा वध्रिमत्याः सग्रामे शत्रुभिश्छिन्नहस्ताया हवमाह्वानमगच्छतम्। आगत्य च तस्यै हिरण्मय हस्त प्रायच्छतम्। तथा च निगमान्तरम्। 'अजोहवीन्नासत्या करा वा महे यामन्पुरुभुजा पुरन्धिः श्रुत तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तम्' (ऋस.१।११६।१३) इति। किञ्च युव युवा पुरन्धये बहुप्रजायै वध्रिमत्यै सुपुतिं सुप्रसव शोभनमैश्वर्यं वा चक्रथुः। कृतवन्तौ स्थः। ऋसा.

नियोग

[1]को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ।

वां युवा को यजमानः सधस्थे सहस्थाने वेद्याख्य आ कृणुते। आकुरुते। परिचरणार्थमात्माभिमुखीकरोति। तत्र दृष्टान्तौ दर्शयति। शयुत्रा शयने विधवेव यथा मृतभर्तृका नारी देवरं भर्तृभ्रातरमभिमुखीकरोति। मर्यं न यथा च सर्वे मनुष्य योषा सर्वा नारी सभोग कालेऽभिमुखीकरोति तद्वदित्यर्थः। ऋसा.

पतिपत्नीप्रेम

[2]जनिष्ट योषा पतयत्कनीनको वि चारुहन्वीरुधो दंसना अनु। आस्मै रीयन्ते निवनेव सिन्धवोऽस्मा अह्ने भवति तत्पतित्वनम् ॥

हे अश्विनौ युवयोः प्रसादादियं घोषा योषा स्त्रीगुणोपेता सुभगा जनिष्ट। जाता। अस्याः समीपे कनीनकः कन्याकामः पतिः पतयत्। पतनु। अस्मै कनीनकाय युवयोर्दसना अनु वृष्टिलक्षणानि कर्माणि लक्षीकृत्य वीरुध ओषधयो वि चारुहन्। विरोहन्तु। प्रादुर्भवन्तु। अस्मै कनीनकाय निवनेव प्रवणेनेव सिन्धव उदकान्या रीयन्ते। ता वीरुधोऽभिगच्छन्तु। किञ्चाह्ने केनाप्यहन्तव्यायास्मै कनीनकाय तत्संभोगसमर्थ पतित्वन यौवन भवति। भवतु। ऋसा.

[3]जीवं रुदन्ति वि मयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः। वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥

हे अश्विनौ युवयोरनुग्रहाद्ये नरः पतयो जायाना जीवं जीवनमुद्दिश्य रुदन्ति। रोदनेनापि जायाना जीवनमेवाशासत इत्यर्थः। ता जाया अध्वरे यज्ञे वि मयन्ते निवेशयन्ति च किञ्च तासु दीर्घा महतीं प्रसितिं भुजयोः प्रबन्धनमनु दीधियुः अनुदधति इदं वाम वननीयमपत्य पितृभ्यः समेरिरे संप्रेरयन्ति च तेभ्यः पतिभ्यो जनयो जायाः परिष्वजे परिष्वङ्गार्थं मयः सुख कुर्वन्तीति शेषः। ऋसा.

[4]न तस्य विद्म तदु षु प्र वोचत युवा ह यद्युवत्याः क्षेति योनिषु। प्रियोस्रियस्य वृषभस्य रेतिनो गृहं गमेमाश्विना तदुश्मसि ॥

हे अश्विनाश्विनौ तस्य तत्सुख वय न विद्म। न जानीमः। तत्सुख यूय सु सुष्ठु प्र वोचत। बहुवचन पूजार्थम्। युवा ह तरुणः खलु मत्पतिर्युवत्या यौवनान्विताया मम योनिषु गृहेषु यत्क्षेति निवसतीति। किञ्च प्रियोस्रियस्य प्रिययुवतेर्वृषभस्य सेक्तू रेतिनो रेतस्विनो मत्पतेर्गृहं गमेम। गच्छेम। वयं तद्गृहमुश्मसि। कामयामहे। ऋसा.

---

(१) ऋस.१०।३९।७. (२) ऋसं.१०।४०।२, नि.३।१५.
(३) ऋसं.१०।४०।९.

(१) ऋसं.१०।४०।१०, असं.१४।१।४६ मयन्ते (मयन्ति) दीधियु (दीध्यु) समे (समी) जनयः (जनये); आगृ.१।८।४; शागृ.१।१५।२, कौसू.७९।३०; आपगृ.२।४।६ जीवं (जीवां).
(२) ऋसं.१०।४०।११.

[1]आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अयंसत। अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्या॑ अशीमहि ॥

हे वाजिनीवसू अन्नधनौ शुभस्पती उदकस्य स्वामिनौ हे अश्विनाश्विनौ मिथुना मिथुनौ परस्पर सहितौ वा युवा सुमतिरागन् आगच्छतु । हृत्स्वस्मदीयेषु हृदयेषु कामा अभिलाषा न्ययसत । नियम्यन्ताम् । किञ्च युवा गोपा मम गोपयितारावभूतम् । भवतम् । अपि च प्रियाः सत्यो वयमर्यम्णः पत्युर्दुर्यान्गृहानशीमहि । प्राप्नुयाम । ऋसा.

ता॑ मन्दसाना मनुषो दुरोण आ धत्तं रयिं सहवीरं वचस्यवे । कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतम् ॥

हे अश्विनौ मन्दसाना मन्दसानौ ता तौ युवा मनुषो मनुष्यस्य मत्पतेर्दुरोणे गृहे वचस्यवे युष्मत्स्तुतिकामायै मह्य सहवीरं पुत्रादिसहित रयिं धनमा धत्तम् । स्थापयतम् । किञ्च हे अश्विनौ शुभस्पती उदकस्य स्वामिनौ युवा पतिगृह गच्छन्त्या मम तीर्थं पानाय सुप्रपाण कृतम् । कुरुतम् । किञ्च युवा पथेष्ठा मार्गस्थं स्थाणु वृक्ष दुर्मतिं दुर्बुद्धिं परिपन्थिनं चाप हतम् । अपगमयतम् । ऋसा.

अनेकजायापतिरेकः

पॅरि ष्वजन्ते जनयो यथा पतिम् ।

जनयो जाया यथा पतिं भर्तारं परि ष्वजन्ते आलिङ्गन्ति । ऋसा.

पितृदुहित्रोर्विवाहः

प्रॅथिष्ट यस्य वीरकर्ममिष्णदनुष्ठितं नु नर्यो अपौहत् । पुनस्तदा वृहति यत्कनाया दुहितुरा अनुभृतमनर्वा ॥

(१) ऋस.१०।४०।१२; असं.१४।२।५; आपगृ. २।६।५.

(२) ऋसं.८।८७।२:१०।४०।१३; असं.१४।२।६ (सा मन्दसाना मनसा शिवेन रयिं धेहि सर्ववीरं वचस्यम्) कृत (सुग) पथे (पथि), आपगृ.२।५।२५, कौसू.७७।८ ता (सा).

(३) ऋसं.१०।४३।१; अस.२०।१७।१; सासं.१।३५ स्ते (स्ता). (४) ऋसं.१०।६१।५.

यथा स्वाशेन भगवान्रुद्रः प्रजापतिर्वास्तोष्पति रुद्रमसृजत् तदेतदादिभिस्तिसृभिर्वदति । यस्य प्रजापतेरिण्णदेषणवद्वीरकर्मम् । लिङ्गव्यत्ययः । वीरकर्म । रेत इत्यर्थः । येन रेतसोत्पन्ना वीरा भवन्ति तादृग्रेतः प्रथिष्ट प्रथितमासीत् तद्रेतोऽनुष्ठित प्रजापतिनापत्यार्थं निषिक्त नर्यो नरेभ्यो हितो यद्वा नेतृभ्यो देवेभ्यो हितो रुद्रोऽपौहत् । अपोहति । तदेवाह । पुनस्तद्रेत आ बृहति । सर्वत उत्प्रिदति । उद्गमयति पुरुषाकारेण स्वयमुत्पन्नः सन् । कीदृग रेतः । यद्रेतः कनायाः कान्ताया दुहितुः स्वपुत्र्याः । तस्यामित्यर्थः । तत्र प्रजापतिनानुभृतमाः आसीत् । कीदृशो रुद्रः । अनर्वान्यस्मिन्नप्रत्युतः । प्रजापतिर्वै स्वा दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुषसमित्यन्ये । इति ब्राह्मणम् । ऋसा.

मॅध्या यत्कर्त्वमभवदभीके कामं कृण्वाने पितरि युवत्याम् । मनानग्नेतो जहतुर्वियन्ता सानौ निषिक्तं सुकृतस्य यौनौ ॥

काम यथेच्छ कृण्वाने कुर्वाणे पितरि प्रजापतौ युवत्या दुहितर्युपसि दिवि वा । दिवमित्यन्य इति हि ब्राह्मण प्रदर्शितम् । मध्या तयोर्मध्येऽन्तरिक्षमध्ये वाभीके समीपे यत्कर्त्व कर्माभवत् मिथुनीभावाख्यं तदानीं मनानग्नल्प रेतो जहतुः । त्यक्तवन्तौ । किं कुर्वाणाविति तत्राह । वियन्तौ परस्परमभिगच्छन्तौ । प्रजापतिना सानौ समुच्छ्रिते स्थाने सुकृतस्य यज्ञस्य योनौ निषिक्तमासीदित्यर्थः । ततो रुद्र उत्पन्न इत्यर्थः । ऋसा.

[2]पिता यत्स्वां दुहितरमधिष्कन्क्ष्मया रेतः संजग्मानो नि षिञ्चत् । स्वाध्योऽजनयन्ब्रह्म देवा वास्तोष्पति व्रतपां निरतक्षन् ॥

पिता प्रजापतिर्यदा स्वा दुहितर दिवमुषसं वाधिष्कन् अध्यस्कन्दत् तदानीमेव क्ष्मया पृथिव्या सह संजग्मानः सगच्छमानः प्रजापतिरस्मिँल्लोके रोहितो भूत्वा रेतो नि षिञ्चत् । निषेकमकरोत् । तामुष्ट्रयो भूत्वा रोहितं भूतामभ्यैदिति ब्राह्मणम् (ऐब्रा.३।३३) । तदानीं स्वाध्यः सु-

(१) ऋसं.१०।६१।६

(२) ऋसं.१०।६१।७.

ध्यानाः सुकर्माणो वा देवा ब्रह्माजनयन्। उदपादयन्। किं तद्ब्रह्मेति तदाह। वास्तोष्पति यज्ञवास्तुस्वामिन व्रतपा व्रतस्य कर्मणो रक्षःप्रभृतिभ्यः पालकं निरतक्षन्। समुदपादयन्। यज्ञवास्तुस्वामित्व दत्त्वा कर्मरक्षकत्वेन निर्मितवन्त इत्यर्थः। ऋसा.

राक्षसविवाहः। अष्टपुत्रा सुभगा।

कंमनुवं विमदायोहथुर्युवम्।

कमनुवं कामस्य दीपनौ वेनपुत्रौ जाया विमदायर्पये युवमूहथुः। प्रापयथः। ऋसा.

अष्टौ पुत्रासो अदितेर्ये जातास्तन्वस्परि।
देवाँ उप प्रैत्सप्तभिः परा मार्ताण्डमास्यत्॥

अष्टौ पुत्रासः पुत्रा मित्रादयोऽदितेर्भवन्ति येऽदितेस्तन्वः परि शरीराजाता उत्पन्नाः। अदितेरष्टौ पुत्रा अथर्वुब्राह्मणे परिगणिताः। तथा हि। तानुक्रमिष्यामो मित्रश्च वरुणश्च धाता चार्यमा त्वाशश्च भगश्च विवस्वानादित्यश्चेति। तथा तत्रैव प्रदेशान्तरेऽदिति प्रस्तुत्याम्नातम्। तस्या उच्छेषणमददुस्तत्प्राश्नात् सा रेतोऽधत्त तस्यै चत्वार आदित्या अजायन्त सा द्वितीयमपचदित्यष्टानामादित्यानामुत्पत्तिर्वर्णिता (तैसं. ६।५।६।१)। सादितिः सप्तभिः पुत्रैर्देवानुप प्रेत्। उपागच्छत्। अष्टम पुत्रं मार्ताण्ड सूर्य परास्यत्। उपरि प्राक्षिपदित्यर्थः। ऋसा.

कन्या याचनीया

यँदयातं शुभस्पती वरेयं सूर्यामुप।
कैकं चक्रं वामासीत्क देष्ट्राय तस्थथुः॥

हे शुभस्पती उदकस्य स्वामिनौ यद्यावयात अगच्छतम्। क प्रति। वरेय वरणीयायाः सूर्यायाः सबन्धिन वरेर्याचितव्य वा। सवितारमित्यर्थः। किमर्थम्। सूर्यामुप गन्तुम्। वा भवतोः सप्रति दृश्यमानमिदमेक चक्र कासीत्पुरा। क वा युवा देष्ट्राय दानाय प्रवृत्तौ तस्थथुरित्यश्विनोर्निवास पृच्छति। ऋसा.

पतिपत्न्योसबन्ध। गृहनेत्री स्त्री।

उँदीर्ष्वातः पतिवती ह्येषा विश्वावसुं नमसा गीर्भिरीळे। अन्यामिच्छ पितृपदं व्यक्तां स ते भागो जनुषा तस्य विद्धि॥

आभिर्नृणा विवाहः स्तूयते। हे विश्वावसो अतः स्थानात्कन्यासमीपादुदीर्ष्व। उत्तिष्ठ। एषा कन्या पतिवती हि संजाता। अत उदीर्ष्वेति वातःशब्दो योज्यः। विश्वावसुमेतन्नामान गन्धर्व नमसा नमस्कारेण गीर्भिः स्तुतिभिश्चेळे। स्तौमि। तर्ह्यना विहाय का स्वीकरोमीति यदि ब्रूषे तर्ह्यन्या पितृपद पितृकुले स्थिता व्यक्तामनूहेति परिस्फुटा विगताङ्गना वा। स्तनोद्गमादिराहित्येनाप्रौढामित्यर्थः। स तादृशः पदार्थस्ते तव भागः कल्पितः। तस्य त भाग विद्धि जानीहि जनुषा जन्मना। लभस्वेत्यर्थः। ऋसा.

उँदीर्ष्वातो विश्वावसो नमसेळामहे त्वा।
अन्यामिच्छ प्रफर्व्यं सं जायां पत्या सृज॥

अतोऽस्माच्छयनाद्धे विश्वावसो कन्यास्वामिन्गन्धर्व उदीर्ष्व। उद्गच्छ। विश्वावसुर्नाम गन्धर्वः कन्यानामधिपतिर्यतः। लभामि तेन कन्यामिति हि मन्त्रः। स तादृश देव त्वा नमसा नमस्कारेणेळामहे। स्तुमः। स त्वमन्या प्रफर्व्य बृहन्नितम्बा कन्यामिच्छ। जाया मा पत्या सह पुनः स सृज। ऋसा.

अँनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम्। समर्यमा सं भगो नो निनीयात्सं जास्पत्यं सुयममस्तु देवाः।

हे देवाः पन्थाः पन्थानो मार्गा अनृक्षराः। ऋक्षरः कण्टक उच्यते। कण्टकरहिता ऋजवोऽकुटिलाश्च सन्तु येभिर्यैः पथिभिर्नोऽस्माक सखायो वरेप्सिता वरेय वरेर्याचितव्य मितर प्रति यन्ति गच्छन्ति ते पन्था इति। किचार्यमा देवो नोऽस्मान् स निनीयात्। सम्यक् प्रापयेत्।

---

(१) ऋसं.१०।८५।१२.

(२) ऋसं १०।७२।८; मैसं ४।६।९, शब्रा.३।१।३।२, ताब्रा.२४।१२।६; तैआ १।१३।२.

(३) ऋसं १०।८५।१५; असं.१४।१।१५.

(१) ऋसं १०।८५।२१; आपगृ.३।८।१०, शागृ.१।१९।१, शाश्रौ.१६।१३।१३.

(२) ऋसं.१०।८५।२२; शाश्रौ.१६।१३।१३; आपगृ.३।८।१०.

(३) ऋसं.१०।८५।२३; असं.१४।१।३४; आपगृ.२।४।२; शागृ.१।६।१; कौसू.७५।१२:७७।३.

तथा भगो देवः सं निनीयात् । हे देवाः आसगतमस्तु पतिकुलमिति शेषः । तथेद जास्पत्यं जायापत्योर्युगल सुयममस्तु । सुमिथुनमस्तु । ऋसा.

प्र त्वा मुञ्चामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः । ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या दधामि ॥

पत्न्या योक्त्रविमोचने प्र त्वा मुञ्चामीत्येषा । सूत्रितं च । 'अथास्या योक्त्रं विचृतेत्प्र त्वा मुञ्चामि वरुणस्य पाशात्' इति । जात प्राणिनं सवित्रा प्रेरितो वरुण आत्मपाशैर्बध्नाति । तस्माद्वरुणस्य पाशात् हे वधु त्वा त्वा प्र मुञ्चामि येन त्वा त्वा सविता वरुणस्य प्रेरकः सुशेवः सुखोऽबध्नात् बन्धनं कृतवान् । यज्ञाङ्गपक्षे पत्नीं योक्त्रेण बध्नाति । बन्धनस्य वरुणोऽभिमानी । अतो वरुणपाशाद्योक्त्रात्प्र मुञ्चामि येन योक्त्रेण सविता कर्मणामनुज्ञाता देव ऋत्विक्पाशेनाबध्नात् । तं मोचयित्वा चर्तस्य यज्ञस्य योनौ स्थाने यागभूमौ सुकृतस्य लोके कर्मक्षेत्रे भूलोके चारिष्टामहिंसिता त्वा पुत्रार्थं पत्या सह दधामि । स्थापयामि । ऋसा.

प्रेतो मुञ्चामि नामुतः सुबद्धाममुतस्करम् ।
यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति ॥

इतः पितृकुलात्प्र मुञ्चामि त्वा नामुतो भर्तृगृहात्प्रमुञ्चामि । अमुतो भर्तृगृहे सुबद्धा करम् । यथेय कन्या हे इन्द्र मीढ्वः सेक्तः सुपुत्रा सुभगा सुष्ठु भाग्या वासति भवति तथा कुरु । ऋसा.

पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन । गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥

विवाहानन्तरभाविनि प्रयाणे पूषा त्वेतो नयत्वित्यनया रथादियानमारोहयेत् । सूत्रित च । 'पूषा त्वेतो नयतु हस्तगृह्येति यानमारोहयेत् । हस्तगृह्य ग्राह्यहस्तः पूषा त्वा त्वामितो नयतु । प्रापयतु । अश्विनाश्विनौ त्वा त्वा रथेन प्र वहताम् । प्रगमयताम् । गृहान् भर्तृसबन्धिनो गच्छ त्व गृहपत्नी यथासः भवसि स्वगृहस्वामिनी भवसि । वशिनी सर्वेषा गृहगताना वशं प्रापयित्री पत्युर्वशे वर्तमाना वा विदथ पतिगृहमा वदासि । आवदसि । गृहस्थितं भृत्यादिजनमावद । ऋसा.

इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि । एना पत्या तन्वं सं सृजस्वाधा जिव्री विदथमा वदाथः ॥

इह प्रियमित्येषा वध्वा गृहप्रवेशनी । सूत्रितं च । इह प्रियं प्रजया ते समृध्यतामिति गृह प्रवेशयेत् । इति । हे वधु ते तवेहास्मिन्पतिकुले प्रियं प्रजया सह समृध्यताम् । अस्मिन्गृहे गार्हपत्याय गृहपतित्वाय जागृहि । बुध्यस्व । एनानेन पत्या सह तन्व स्वीय शरीरं सं सृजस्व । संसृष्टा भव । अधाथ जिव्री जीर्णौ जायापती युवा विदथं गृहमा वदाथः । आभिमुख्येन वदतम् । ऋसा.

नीललोहितं भवति कृत्यासक्तिर्व्यज्यते ।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥

कृत्याभिचाराभिमानिनी देवता नीललोहितं भवति । नीलं च लोहित च तस्या रूपं भवतीत्यर्थः । सा कृत्यासक्तिरासक्तास्या सबद्धा व्यज्यते । त्यज्यत इत्यर्थः । तस्या कृत्यायामपगतायामस्या वध्वा ज्ञातय एधन्ते । वर्धन्ते । पतिर्बन्धेषु सासारिकेषु बध्यते । ऋसा.

परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु ।
कृत्यैषा पद्वती भूत्व्या जाया विशते पतिम् ॥

---

(१) ऋसं.१०।८५।२४, असं.१४।१।१९,५८; भाश्रौ.१।१।३; आगृ.१।७।१७; आपगृ.२।५।१२; शाश्रौ.१।१५।९; शागृ.१।१५।१; कौसू.७५।२३:७६।२८.

(२) ऋसं.१०।८५।२५; असं.१४।१।१७,१८; सामब्रा.१।२।३,४ मुञ्चामि (मुञ्चातु); आगृ.१।७।१३ मुञ्चामि (मुञ्चातु); शागृ.१।१८।३ आगृवत्; पागृ.१।६।२ आगृवत्; आपगृ.२।५।२; मागृ.१।११।१२ आगृवत्.

(१) ऋसं.१०।८५।२६; असं.१४।१।२० पूषा (भगः); आगृ.१।८।१; आपगृ.२।४।९; कौसू.७६।१० असंवत्.

(१) ऋसं.१०।८५।२७; असं.१४।१।२१ प्रजया (प्रजायै); आगृ.१।८।८; आपगृ.२।५।११; शागृ.१।१५।२२; कौसू.७७।२०.

(२) ऋसं.१०।८५।२८; असं.१४।१।२६; शागृ.१।१२।८; आपगृ.२।५।२३.

(३) ऋसं.१०।८५।२९; असं.१४।१।२५; आपगृ.३।९।११; कौसू.७९।२०.

शामुल्यम्। शामलमित्यर्थः। शमलं शारीरं मलम्। शरीरावच्छन्नस्य मलस्य धारक वस्त्र परा देहि। परात्यज। भृतप्रायश्चित्तार्थं ब्रह्मभ्यो ब्राह्मणेभ्यो वसु धनं वि भज। प्रयच्छेत्यर्थः। किमर्थं वधूवासः-परित्याग इति चेत् उच्यते। एषा कृत्या पद्वती पादवती सती जाया भूत्वी भूत्वा पति विशते। कृत्यारूपवासःप्रवेशात् कृत्या जाया भूत्वा विशत इत्युपचर्यते। अतस्तत्परित्यागे कृत्येव त्यक्ता भवतीत्यर्थः। यदि वधूवासः स्वय निधत्ते तदैव भवतीति वधूवास.सस्पर्शन निन्दायुक्तम्। ऋसा.

अश्रीरा तनूर्भवति रुशती पापयामुया।
पतिर्यद्वध्वो वाससा स्वमङ्गमभिधित्सते॥

अत्रापि वधूवासःसस्पर्शानिन्दोच्यते। तनूर्वस्य सबन्धिन्यश्रीराश्रीका भवति। कथ स्यादिति उच्यते। रुशती। रुशदिति वर्णनाम। दीप्तयायुयानया पापरूपया कृत्यया युक्ता चेत्तनूः। तदेवाह। पतिर्यदि वध्वो वाससा स्वमङ्गमभिधित्सते परिधातुमिच्छति। ऋसा.

ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनादनु।
पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः॥

वध्वश्चन्द्र हिरण्यरूप वहतु ये यक्ष्मा व्याधयोऽनु यन्ति प्राप्नुवन्ति जनादस्मद्विरोधिनः सकाशात्। यद्वा। जनाद्यमाख्यात्। तान्पुनर्नयन्तु प्रापयन्तु यज्ञिया यज्ञार्हा देवा इन्द्रादयः। यत आगता यस्मात्ते यक्ष्मा आगताः तत्र तान्नयन्तु। ऋसा.

मैं विदन्परिपन्थिनो य आसीदन्ति दम्पती।
सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः॥

परिपन्थिनः पर्यवस्थातारः शत्रवो मा विदन् मा प्राप-यन् ये परिपन्थिनो दम्पती आसीदन्ति अभिगच्छन्ति। सुगेभिः सुगैर्मार्गैर्दुर्ग दुःखेन गन्तु शक्य दुर्गम देश-मतीताम्। अतिगच्छताम्। अरातयोऽदातारः शत्रवोऽप द्रान्तु। अपगच्छन्तु। ऋसा.

सुमङ्गलीरियं वधूरिमां समेत पश्यत।
सौभाग्यमस्यै दत्त्वायाथास्तं वि परेतन॥

इय वधूः सुमङ्गलीः शोभनमङ्गला। अत इमा सर्वे आशीःकर्तारः समेत। सगच्छत। ता पश्यत च। ता सगताश्च दृष्ट्वास्या ऊढायै सौभाग्य दत्त्वाय दत्त्वायास्तम्। गृहनामैतत्। स्वस्वसबन्धिन वि परेतन। विविधं परागच्छत। ऋसा.

वधूवस्त्रदीप

तृष्टमेतत्कटुकमेतदपाष्ठवद्विषवन्नैतदत्तवे।
सूर्या यो ब्रह्मा विद्यात्स इद्वाधूयमर्हति॥

अनयापि वधूवस्त्रपरित्यागः प्रतिपाद्यते। एतद्वस्त्र तृष्ट दाहजनकम्। तथैतत्कटुकम्। तथापाष्ठवत्। अपाष्ठमपस्थितमूर्जीपम्। तद्वत्। तथा विषवत्। नैतद्वस्त्रमत्तवे। अत्तव्यम्। अनुपयोग्यम्। यो ब्रह्मा ब्राह्मणः सूर्यामिदानी प्रस्तुता देवीं विद्यात् सम्यग्जा-नीयात् स इत्स एव वाधूय वधूवस्त्रमर्हति। ऋसा.

आशसनं विशसनमथो अधिविकर्तनम्।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति॥

आशसन तूपाधानम्। तच्चान्यवर्ण भवति। विशसन शिरसि निधीयमानम्। तादृश दशान्ते निधीयमानमधिविकर्तन यत्त्रिधा वासो विकृन्तन्ति। तान्याशसनादीनि वासास्यवस्थितानि सूर्याया रूपाणि भवन्ति। तानि पश्य। एवभूतान्याशसनादीनि पुरा सूर्यास्वशरीरे स्थितान्यमङ्गलानि वासासि विधत्ते। तानि रूपाणि सूर्याविद्ब्रह्मा तु ब्राह्मण एव तस्माद्वाससः सकाशाच्छुन्धति। अपनयति। ऋसा.

---

(१) ऋसं.१०।८५।३०; असं १४।१।२७ अश्रीरा (अश्लीला), आपगृ.३।९।११.

(२) ऋसं.१०।८५।३१, असं १४।२।१०; आपगृ २।५।२४; शागृ १।२५।५.

(३) ऋसं.१०।८५।३२; अवं १२।१।३२:१४।१।११, सामब्रा.१।३।१२; आगृ.१।८।६; शागृ.१।२५।१४, गोगृ. २।४।२; आपगृ.२।५।२४, कौसू.७.७३.

(१) ऋसं.१०।८५।३३, असं.१४।२।२८; सामब्रा.१।२। १४; आगृ १।८।७; गोगृ.२।२।१४; पागृ.१।८।९; आपगृ. २।६।११; हिगृ.१।१९।४, मागृ १।१२।१, कौसू ७.७।१०.

(२) ऋसं.१०।८५।३४, असं १४।१।२९; आपगृ. १।१७।९ तृष्ट (क्रर).

(३) ऋसं.१०।८५।३५, असं १४।१।२८, आपगृ. ३।९।११.

पाणिग्रहणम् । पतिपत्नीसंबन्धः ।

गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः । भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥

हे वधु ते तव हस्तमहं गृभ्णामि । गृह्णामि । किमर्थम् । सौभगत्वाय सौभाग्याय । मया पत्या त्वं यथा जरदष्टिः प्राप्तवार्धक्यासः भवसि । भगोऽर्यमा सविता पुरन्धिः पूषा एते देवास्त्वा त्वां मह्यमदुः । दत्तवन्तः । किमर्थम् । गार्हपत्याय । यथाहं गृहपतिः स्यामिति । ऋसा.

तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति । या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम् ॥

हे पूषन्पोषकैतन्नामक देव शिवतमामत्यन्तमङ्गलभूतां तामेरयस्व । आ ईरय । सर्वतः प्रेरय । यस्यामूरौ बीजं रेतोलक्षणं मनुष्या वपन्ति आदधते । या नोऽस्माकमूरू उशती कामयमाना विश्रयाते । यस्यामूरावुशन्तः कामयमाना वयं शेपं स्पर्शनयोग्यं पुरुषजननं प्रहराम । ऊरौ व्यञ्जनसंबन्धं करवामेत्यर्थः । ऋसा.

सक्रमबहुपतिकत्वलिङ्गम् । पूर्व देवः अनन्तरं मनुष्य पतिः ।

तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह । पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥

गन्धर्वा हे अग्ने तुभ्यमग्रे पर्यवहन् । प्रायच्छन्नित्यर्थः । कां । सूर्याम् । केन सह । वहतुना सह । त्वं च तां सूर्यां वहतुना सह सोमाय प्रायच्छः । तद्वदिदानीमपि हे अग्ने पुनः पतिभ्योऽस्मभ्यं जायां प्रजया सह दाः । देहि । ऋसा.

(१) ऋसं.१०।८५।३६, सामब्रा १।२।१६, आगृ १।७।३; शागृ.१।१३।२, पागृ १।६।३; आपगृ.२।४।१५, मागृ. १।१०।१५; गोगृ २।२।१६, खागृ.१।३।३१.

(२) ऋसं १०।८५।३७; असं.१४।२।३८; आपगृ. ३।८।१०.

(३) ऋसं १०।८५।३८; असं १४।२।१; पागृ.१।७।३; आपगृ २।५।७,९,१०; मागृ.१।१।१२ मग्ने (मग्ने); कौसू.७८।१०.

पुनः पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥

पुनः स्वगृहीतां पत्नीमग्निरायुषा सह वर्चसा सहादात् । प्रायच्छत् । अस्या अग्निदत्ताया यः पतिः पुमान् स दीर्घायुः सन् शरदः शतं शतसंवत्सरं जीवाति । जीवतु । ऋसा.

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥

जाता कन्या सोमः प्रथमभावी सन् विविदे । लब्धवान् । गन्धर्व उत्तरः सन् विविदे । लब्धवान् । अग्निस्तृतीयः पतिस्ते तव । पञ्चान्मनुष्यजाः पतिस्तुरीयश्चतुर्थः । ऋसा.

सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥

सोमो गन्धर्वाय प्रथमं ददत् । प्रादात् । गन्धर्वोऽग्नये प्रादात् । अथो अपि चाग्निरिमां कन्यां रयिं धनं पुत्राश्च मह्यमदात् । ऋसा.

पतिपत्नीसंबन्धः । धनप्राप्तावृषि गार्हस्थ्येष्टम् ।

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् । क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥

इहैव स्तम् । इहैवास्मिंल्लोके स्तम् । भवतम् । मा वि यौष्टम् । मा पृथग्भूतम् । विश्वमायुर्व्यश्नुतम् । प्राप्नुतम् । किञ्च पुत्रैर्नप्तृभिः पौत्रैः सह स्वे गृहे मोदमानौ भवतमिति शेषः । ऋसा.

आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।

(१) ऋसं.१०।८५।३९, असं.१४।२।२; आपगृ.२।५।७, ९,१०; मागृ.१।१।१२.

(२) ऋसं.१०।८५।४०; असं १४।२।३ पूर्वार्धे (सोमस्य जाया प्रथम गन्धर्वस्तेऽपरः पतिः.); पागृ.१।४।१६; हिगृ. १।२०।२; आपगृ.२।४।१०.

(३) ऋसं.१०।८५।४१, असं १४।२।४;सामब्रा १।१।७; गोगृ.२।१।१०; पागृ १।४।१६; आपगृ.२।४।१०, हिगृ. १।२०।२; मागृ १।१०।१०; खागृ.१।३।९.

(४) ऋसं.१०।८५।४२; असं.१४।१।२२; आपगृ. २।६।१०; शागृ.१।१६।१२.

(५) ऋसं.१०।८५।४३; कासं.१३।१५,४०।१; मैसं.

क्ष्वर्यमा । अदुर्मङ्गली: पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे ॥

प्रजापतिर्देवो नोऽस्माकं प्रजामा जनयतु । अर्यमा चाजरसाय जरापर्यन्तं जीवनाय समनक्तु । सगमयतु । सा त्वमदुर्मङ्गलीर्दुर्मङ्गलरहिता सुमङ्गली । यद्वा । या मङ्गलाचारान् दूषयति सा दुर्मङ्गली । ततोऽन्यादुर्मङ्गली । तादृशी सती पतिलोक पतिसमीपमा विश । प्रामुहि । नोऽस्माक द्विपदे शं भव । तथा च श चतुष्पदे भव । ऋसा.

अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्य: सुमना: सुवर्चा: । वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥

हे वधु त्वमघोरचक्षु: क्रोधादभयंकरचक्षुरेधि । भव । तथापतिघ्नी भव । तथा पशुभ्य: शिवा हितकरी भव सुमना: सुवर्चाश्च भव । वीरसू: पुत्राणामेव प्रसवित्री देवकामा स्योना सुखकरा च भव । ऋसा.

इमां त्वमिन्द्र मीढ्व: सुपुत्रां सुभगां कृणु ।
दशास्यां पुत्राना धेहि पतिमेकादशं कृधि ॥

हे इन्द्र त्वमिमां वधूं सुपुत्रा सुभगा च कृणु । कृधि । अस्यां वध्वा दश पुत्राना धेहि । पतिमेकादशं कृधि । दश पुत्रा: पतिरेकादशो यथा स्यात्तथा कृधि । कृणु । ऋसा.

पत्न्या. गृहे आधिपत्यम्

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रवां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥

हे वधु श्वशुरादिषु त्वं सम्राज्ञी भव । देवृषु । देवरेष्वित्यर्थ: । ऋसा.

समंजन्तु विश्वे देवा: समापो हृदयानि नौ ।
सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥

विश्वे देवा: सर्वे देवा नौ हृदयानि मानसानि समंजन्तु । सम्यगञ्जन्तु । अपगतदु:खादिक्लेशानि कृत्वा लौकिकवैदिकविषयेषु प्रकाशयुक्तानि कुर्वन्त्वित्यर्थ: । आपश्च समंजन्तु । तथा मातरिश्वा नौ हृदयानि सं दधातु । आवयोर्बुद्धी: परस्परानुकूला: करोत्वित्यर्थ: । धाता च स दधातु । देष्ट्री दात्री फलानाम् । सरस्वतीत्यर्थ: । सा च सं दधातु । सधानं करोतु । ऋसा.

पतिपत्नीसबन्ध: । दम्पत्यो. सभोग. ।

न मत्स्त्री सुभसत्तरा न सुयाश्रुतरा भुवत् ।
न मत्प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिन्द्र उत्तर: ॥

मन्मत्तोऽन्या स्त्री नारी सुभसत्तरातिशयेन सुभगा न भुवत् । न भवति । नास्तीत्यर्थ: । किंच मत्तोऽन्या स्त्री सुयाश्रुतरातिशयेन सुसुश्रुतातिशयेन सुपुत्रा वा न भवति । तथा च मन्त्रान्तरम् । ददाति मह्यं यादुरी याशूना भोज्या शता । (ऋस. १।१२६।६) इति । किंच मन्मत्तोऽन्या प्रतिच्यवीयसी पुमांस प्रति शरीरस्यात्यन्तं च्यावयित्री नास्ति । किंच मत्तोऽन्या स्त्री सक्थ्युद्यमीयसी संभोगेऽत्यन्तमुत्क्षेप्त्री नास्ति । न मत्तोऽन्या काचिदपि नारी मैथुनेऽनुगुण सक्थ्युद्यच्छतीत्यर्थ: । मम पतिरिन्द्रो विश्वस्मादुत्तर: । उत्कृष्ट: । ऋसा.

उवे अम्ब सुलाभिके यथेवाङ्ग भविष्यति ।
भसन्मे अम्ब सक्थि मे शिरो मे वीव हृष्यति
विश्वस्मादिन्द्र उत्तर: ॥

एवमिन्द्राण्या शप्तो वृषाकपिर्ब्रवीति । उवे इति सबोधनार्थो निपात: । हे अम्ब मात: सुलाभिके शोभनलाभे त्वया यथैव येन प्रकारेणैवोक्त तथैव तदङ्ग क्षिप्रं

२।१३।२३; **असं.**१४।२।४० आ न: (आवा), **सामब्रा.** १।२।१८; **आपश्रौ.**१४।२८।४; **माश्रौ** १।६।४।२१; **आश्रौ.** १।८।९; **आपगृ.**३।८।१०; **शागृ.**१।६।६; **वृहास्मृ.**८।७०.

(१) **ऋसं.**१०।८५।४४; **असं.**१४।२।१७; **सामब्रा** १।२।१७; **गोगृ** २।२।१६; **पागृ** १।४।१६; **आपगृ.**२।४।४; **हिगृ.**१।२०।२; **मागृ.**१।१०।६; **शागृ.**१।१६।५; **कौसू.** ७७।२२.

(२) **ऋसं.**१०।८५।४५; **सामब्रा.**१।२।१९; **आपगृ.** २।५।२; **हिगृ.**१।२०।२; **ऋग्वि.**३।२२।४.

(३) **ऋसं.**१०।८५।४६; **अस.**१४।१।४४ (सम्राज्ञेधि श्वशुरेषु सम्राज्ञुत देवृषु । ननान्दु: सम्राज्ञेधि सम्राज्ञुत श्वश्रवा: ॥); **सामब्रा.**१।२।२०; **शागृ.**१।१३।१; **आपगृ.** २।५।२२; **ऋग्वि.**३।२३।१.

---

(१) **ऋसं.**१०।८५।४७; **सामब्रा** १।२।१५; **आगृ.**१।८।९; **शागृ.**१।१२।५; **पागृ.**१।४।१४; **आपगृ.**३।८।१०; **गोगृ.**२।२।१५; **खागृ.**१।३।३०.

(२) **ऋसं.**१०।८६।६; **अस.**२०।१२६।६.

(३) **ऋसं.**१०।८६।७; **असं.**२०।१२६।७.

भविष्यति । भवतु । किमनेन त्वदनुप्रीतिकारिणा ग्रहेण मम प्रयोजनम् । किंच मे मम पितुस्त्वदीयो भसद्भग उपयुज्यताम् । किंच मम पितुस्त्वदीय सक्थि चोपयुज्यताम् । किंच मे मम पितरमिन्द्र त्वदीय शिरश्च प्रियालापेन वीव यथा कोकिलादिः पक्षी तद्वद्धृष्यति । हर्षयतु । मम पितेन्द्रो विश्वस्मादुत्तरः । ऋसा.

[1]किं सुबाहो स्वंगुरे पृथुष्टो पृथुजाघने ।
किं शूरपत्नि नस्त्वमभ्यमीपि वृषाकपिं विश्वस्मादिन्द्र उत्तरः ॥

क्रुद्धामिन्द्र उपशमयति । हे सुबाहो हे शोभनबाहो स्वंगुरे शोभनाङ्गुलिके पृथुष्टो पृथुकेशसंघाते पृथुजघने विस्तीर्णजघने शूरपत्नि वीरभार्ये हे इन्द्राणि त्व नोऽस्मदीयं वृषाकपिं किमर्थमभ्यमीपि । अभिक्रुध्यसि । एकः किंशब्दः । यस्य पितेन्द्रोऽहं विश्वस्मादुत्तरः । ऋसा

[2]अवीरामिव मामयं शरारुरभि मन्यते ।
उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः ॥

पुनरिन्द्रमिन्द्राणी ब्रवीति । शरारुर्घातुको मृगोऽय वृषाकपिर्मामिन्द्राणीमवीरामिवाभि मन्यते । विजानाति । उतापि चेन्द्रपत्नीन्द्रस्य भार्याहमिन्द्राणी वीरिणी पुत्रवती मरुत्सखा मरुद्भिर्युक्ता चास्मि । भवामि । यस्या मम पतिरिन्द्रो विश्वस्मादुत्तरः । ऋसा.

[3]संहोत्रं स्म पुरा नारी समनं वाव गच्छति ।
वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः ॥

नारी स्त्री ऋतस्य सत्यस्य वेधा विधात्री वीरिणी पुत्रवतीन्द्रपत्नीन्द्रस्य भार्येन्द्राणी संहोत्र स्म समीचीनं यज्ञ खलु समनं वा सग्राम, समनमिति सग्रामनामसु पाठात् । अत्र प्रति पुरा गच्छति । महीयते । स्तोतृभिः स्तूयते च । तस्या मम पतिरिन्द्रो विश्वस्मादुत्तरः । ऋसा.

(१) ऋसं.१०।८६।८; असं.२०।१२६।८.
(२) ऋसं.१०।८६।९; असं.२०।१२६।९; नि.६।३१.
(३) ऋसं.१०।८६।१०.

[1]इन्द्राणीमासु नारिषु सुभगामहमश्रवम् ।
न ह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥

अथेन्द्राणीमिन्द्रः स्तौति । आसु सौभाग्यवत्तया प्रसिद्धासु नारिषु स्त्रीषु स्त्रीणा मध्य इन्द्राणीं सुभगा सौभाग्यवतीमहमिन्द्रोऽश्रवम् । अश्रौषम् । कि चास्या इन्द्राण्याः पतिः पालको विश्वस्मादुत्तर उत्कृष्टतर इन्द्रोऽपरं चनान्यद्भूतजातमिव जरसा वयोहान्या न हि मरते । न खलु म्रियते । यद्वा । इदं वृषाकपेर्वाक्यम् । तस्मिन्पक्षे त्वहमिति शब्दो वृषाकपिपरतया योज्यः । अन्यत्समानम् । ऋसा.

[2]नाहमिन्द्राणि रारण सख्युर्वृषाकपेरृते ।
यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥

हे इन्द्राणि अहमिन्द्रः सख्युर्मम सखिभूताद्वृषाकपेर्ऋते प्रिय वृषाकपिं विना न रण । न रमे । अप्यम्प्यु भवमद्भिर्वा मुसंस्कृतं प्रिय प्रीतिकरमिदमुपस्थित हविर्देवेषु देवाना मध्ये यस्य ममेन्द्रस्य सकाश गच्छति । यश्चाहमिन्द्रः सर्वस्मादुत्तरः । यद्वा । अयमर्थः । हे इन्द्राणि वृषाकपेः सख्युरिन्द्राद्दतेऽह वृषाकपिः न रारण । न रमे । अन्यत्समानम् । ऋसा.

[3]वृषभो न तिग्मशृङ्गोऽन्तर्यूथेषु रोरुवत् ।
मन्थस्त इन्द्र शं हृदे यं ते सुनोति भावयुर्विश्वस्मादिन्द्र उत्तरः ॥

अथेन्द्राणी ब्रवीति । तिग्मशृङ्गस्तीक्ष्णशृङ्गो वृषभो न यथा वृषभो यूथेषु गोसघेष्वन्तर्मध्ये रोरुवच्छब्द कुर्वन् गा अभिरमयति तथा हे इन्द्र त्व मामभिरमयेति शेषः । किच हे इन्द्र ते तव हृदे हृदयाय मन्थो दध्नो मथनवेलाया शब्द कुर्वन् श शकरो भवत्विति शेषः । किच ते तुभ्य य सोम भावयुर्भावमिच्छन्ती-

(१) ऋसं.१०।८६।११; तैसं.१।७।१३।१; कासं.८।१७; असं.२०।१२६।११; नि.११।३८.
(२) ऋसं.१०।८६।१२, तैसं.१।७।१३।२; कासं.८।१७; असं.२०।१२६।१२; नि.११।३९.
(३) ऋसं.१०।८६।१५; असं.२०।१२६।१५.

न्द्राणी सुनोति अभिषुणोति सोऽपि शङ्करो भवतीत्यर्थः। मम पतिरिन्द्रो विश्वस्मादुत्तरः। ऋसा.

नैं सेशे यस्य रम्बतेऽन्तरा सक्थ्या कपृत्।
सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र उत्तरः॥

हे इन्द्र स जनो नेशे मैथुन कर्तुं नेष्टे न शक्नोति यस्य जनस्य कपृच्छेपः सक्थ्या सक्थिनो अन्तरा रम्बते। लम्बते। सेत् स एव स्त्रीजन ईशे मैथुन कर्तुं शक्नोति यस्य जनस्य निषेदुषः शयानस्य रोमशमुपस्थ विजृम्भते विवृतं भवति। यस्य च पतिरिन्द्रो विश्वस्मादुत्तरः। ऋसा.

नैं सेशे यस्य रोमशं निषेदुषो विजृम्भते।
सेदीशे यस्य रम्बतेऽन्तरा सक्थ्या कपृद्विश्वस्मादिन्द्र उत्तरः॥

स जनो नेशे मैथुन कर्तुं नेष्टे यस्य जनस्य निषेदुषः शयानस्य रोमशमुपस्थ विजृम्भते विवृत भवति। सेत् स एव जन ईशे मैथुन कर्तुं शक्नोति यस्य जनस्य कपृत् प्रजननं सक्थ्या सक्थिनी अन्तरा रम्बते लम्बते। सिद्धमन्यत्। पूर्वोक्तव्यतिरेकोऽत्र द्रष्टव्यः। पूर्वस्यामृचि यियप्मुरिन्द्राणीन्द्र वदति अत्र त्वयियप्मुरिन्द्र इन्द्राणीं वदतीत्यविरोधः। ऋसा.

बहुप्रजा एव भद्रम्

पंशुर्ह नाम मानवी साकं ससूव विंशतिम्।
भद्रं भल त्यस्या अभूत्यस्या उदरमामयद्विश्वस्मादिन्द्र उत्तरः॥

इन्द्रविसृज्यमानमनेन मन्त्रेण वृषाकपिराशास्ते। हे भलेन्द्रेण विसृज्यमान शर। भलतिर्भेदनकर्मा। पशु र्नाम मृगी। हेति पूरणः। मानवी मनोर्दुहितेय विंशतिं विंशतिसख्याकान् पुत्रान् साकं सह ससूव। अजीजनत्। त्यस्यै तस्यै भद्र भजनीय कल्याणमभूत्। भवतु। लोडर्थे लुङ्। यस्या उदरमामयत् गर्भस्थैर्विंशतिभिः पुत्रैः पुष्टमासीत्। मम पितेन्द्रो विश्वस्मादुत्तरः। ऋसा.

(१) ऋसं.१०।८६।१६; असं.१०।१२६।१६; ऋभि.३।२४।४.

(२) ऋसं.१०।८६।१७; असं.२०।१२६।१७; शाश्रौ १६।१३।१०. (३) ऋसं.१०।८६।२३.

पतिपत्नीसंबन्धः। गार्हस्थ्यम्। संभोगः।

सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात्। अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं श्रथिता वैतसेन॥

इदमुत्तरं चोर्वशीवाक्यम्। आद्येन पुरात्मना कृतमुपसे निवेदयति। हे उषः सेयमुर्वशी वसु वासक वयोऽन्न श्वशुराय भर्तुः पुरूरवसः पित्रे दधती प्रयच्छन्ती तत्र गृहे स्थिता यदि पति वष्टि कामयते तदान्तिगृहात्। स्वभर्तृभोगगृहान्तिके यच्छ्वशुरस्य भोजनगृह तदन्तिगृहम्। तस्मादन्तिगृहात्सोर्वशेयस्तं पतिगृह ननक्षे। व्याप्नोति। यस्मिन् गृहे चाकन् कामयत उर्वशी। सा चोर्वशी दिवा नक्तमहनि रात्रौ च वैतसेन। शेपो वैतस इति पुंस्यजननस्येति निरुक्तम् (३।२१)। पुंस्यजननेन श्रथिता ताडिता च भवति। एवमुर्वशेयात्मानं परोक्षेण निर्दिदेश। ऋसा.

त्रिः स्म माह्नः श्रथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि। पुरूरवोऽनु ते केतमायं राजा मे वीर तन्वस्तदासीः॥

अनेन पुरूरवसमेव संबोध्योक्तवती। हे पुरूरवः त्व मा मामह्नोऽहनि वैतसेन दण्डेन पुव्यच्छनेन त्रिस्त्रिवारम्। द्वित्रिचतुर्भ्यः सुच् (व्याप्र. ५।४।१८)। श्रथयः स्म अश्रथयः। अताडयः। कृत्वोर्थप्रयोगे (व्याप्र. २।३।६४) इति। कालवाचिनोऽह्नःशब्दादधिकरणे षष्ठी। उतापि च। स्मेति पूरणः। अव्यत्यै। सपत्नीभिः सह पर्यायेण पतिमागच्छति सा व्यती। न तादृश्यव्यती। तस्यै मे मह्य पृणासि। पूरयसि। एव बुद्ध्या हे पुरूरवः ते तव केत गृहमन्वायम्। अन्वगमं पूर्वम्। हे वीर राजा त्व च मे मम तन्वः शरीरस्य तत्तदासीः। अभवः। सुखयितेति शेपः। परमत्रेवं मन्तव्य किमिति कातरो भवसीत्युवाच। ऋसा.

विद्युन्न या पतन्ती दविद्योद्धरन्ती मे अप्या काम्यानि। जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः॥

(१) ऋसं.१०।९५।४.

(२) ऋसं.१०।९५।५; नि.३।२१.

(३) ऋसं.१०।९५।१०, नि.११।३६.

अनयोर्वर्शी स्तौति । योर्वशी विद्युन्न विद्युदिव पतन्ती गच्छन्ती दविद्योत् द्योतते । किं कुर्वती । अप्या । अप इत्यन्तरिक्षनाम । तत्सबन्धीनि व्याप्तानि वा काम्यान्यस्मदभिमतान्युदकानि वा मे मह्यं भरन्ती संपादयन्ती । यदागतायास्तस्याः सकाशादपो व्याप्तः कर्मसु नर्यो नरेभ्यो हितः सुजातः सुजननः पुत्रो जनिष्टो अजनिष्ट उत्पद्यते तदानीं ममोर्वशी दीर्घमायुः प्र तिरत । प्रवर्धयति । प्रजामनु प्रजायसे तदु ते मर्त्यामृतम् (तैब्रा.१।५।५।६) इति हि मन्त्रः । ऋसा.

जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः । अशासं त्वा विदुषी सस्मिन्नहन्न म आशृणोः किमभुग्वदासि ॥

इत्थेत्थं गोपीथ्याय । गौः पृथिवी । पीथं पालनम् । स्वार्थिकस्तद्धितः । भूरक्षणाय जज्ञिषे हि । जातोऽसि खलु पुत्ररूपेण । आत्मा वै पुत्रनामेति श्रुतेः । पुनर्दैव्याह । हे पुरूरवः मे ममोदरे मय्योजोऽपत्योत्पादनसामर्थ्यं दधाथ । मयि निहितवानसि । तत्तथास्तु । अथापि स्यातव्यमिति चेत् तत्राह । अहं विदुषी भावि कार्यं जानती सस्मिन्नहन् सर्वस्मिन्नहनि त्वया कर्तव्य त्वा त्वामशासम् । शिक्षितवत्यस्मि । त्वं मे मम वचनं नाशृणोः । न शृणोषि । किं त्वमभुगभोक्ता पालयिता प्रतिज्ञातार्थमपालयन्वदासि ह्ये जाय इत्यादिकरूपं प्रलापम् । दिवसे त्रिवारं यमस्व एडकवालकमस्माक पुत्रत्वेन परिकल्पय अपत्योत्पादनपर्यन्तं वसामि नग्न त्वा यदाद्राक्ष तदा गच्छामीत्येवंरूपो मिथःसमय उर्वशी हासराः पुरूरवसमैळ चक्रमे तं ह विन्दमानोवाच त्रिः स्म माह्नो वैतसेन दण्डेनेत्यादि वाजसनेयकमुदाहृतम् । ऋसा.

कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन् । को दम्पती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ।

इद पुरूरवसो वाक्यम् । कदा कस्मिन्काले सूनुस्तवोदरजातः सन् पितरं मामिच्छात् । इच्छेत् । इषु इच्छायाम् । कदा वा विजानन्पितरं मामधिगच्छश्चक्रन् क्रन्दमानो नाश्रु वर्तयत् । नेति चार्थे । किंच कः किंविधः सन् सूनुः समनसा समनसौ समनस्कौ दम्पती जायापती त्वा मा च वि यूयोत् । विश्लेषयेत् । यु मिश्रणामिश्रणयोः । यौतेश्छान्दसः शपः श्लुः । तुजादित्वादभ्यासस्य दीर्घः । अधाधुना यद्यदाग्निस्तव हृदयस्थितस्तेजोरूपो गर्भः श्वशुरेषु दीदयत् दीप्यते । दीदयतिर्दीप्तिकर्मेति नैरुक्तो धातुः । ऋसा.

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् । न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ॥

तमितरा प्रत्युवाच । हे पुरूरवः त्व मा मृथाः । मृतिं मा प्राप्नुहि । तथा मा प्र पप्तः । अत्रैव पतनं मा कार्षीः । तथा त्वा त्वामशिवासोऽशुभा वृकासो वृका मा उ क्षन् । उ इत्येवकारार्थे । अक्षन् । माभ्यवहारयन्तु । किमित्येवमस्मदपर्यायग्रहं करोषि । मा कार्षीरित्यर्थः । अथ सस्नेहस्यासारतामाह । स्त्रैणानि स्त्रीणां कृतानि सख्यानि न वै सन्ति । न सन्ति खलु । अभावे कारणमाह । एतानि सख्यानि सालावृकाणां हृदयानि यथा वत्सादीना विश्वासापन्नानां घातुकानि तद्वत् । अत्र वाजसनेयक—मेतदाहुः न वै स्त्रैण सख्यमस्ति पुनर्गृहानिहीति हैवैन तदुवाच (शब्रा.११।५।१।९) इति । ऋसा.

यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः । घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ॥

यद्यदा विरूपा मनुष्यसंपर्काद्विगतसहजभूतदेवरूपापत्यानुकूल्येन नानारूपा वा मर्त्येषु मनुष्येष्वचरं तदानीं रात्रीः पूरयित्रीश्चतस्रः शरदोऽवसम् । न्यवसम् । अत्यन्तसंयोगे द्वितीया । तदानीं घृतस्य स्तोकं सकृदह्न आश्नाम् । तादेव तेनैव स्तोकेनाहमिद सप्रति तातृपाणा तृप्ता सती चरामि । ऋसा.

अनेकजायापतिरेकः

उभे धुरौ वहिरापिन्दमानोऽन्तर्योनेव चरति द्विजानिः ।

(१) ऋसं.१०।९५।११.
(२) ऋसं.१०।९५।१२.
(१) ऋसं.१०।९५।१५; शब्रा.११।५।१।९.
(२) ऋसं.१०।९५।१६, शब्रा ११।५।१।१०.
(३) ऋसं.१०।१०१।११.

हविर्धानशकटस्योभे धुरावापिब्दमान आपिशब्दमानो वह्निर्हविर्वाहकोऽनड्वान् योनावन्तरिव द्विजानिर्द्विजायः । तयोरन्तश्चरति । ऋसा.

पत्नी युद्धे सारथि । पतित्यक्ता स्त्री ।

परिवृक्तेव पतिविद्यमानद् पीप्याना कूचक्रेणेव सिञ्चन् । एषैष्या चिद्रथ्या जयेम सुमङ्गलं सिनवदस्तु सातम् ॥

अत्र मुद्गलानी सारथिः स्तूयते । एषा मुद्गलानी परिवृक्तेव । वृजी वर्जने । परित्यक्ता पत्या पत्या वियुक्ता योषिदिव । सा यथा पतिविद्यम् । विद्यो वेद्यो लम्भनीयः । पतिश्चासौ विद्यश्च । पतिविद्यमानशो तद्वत् पतिविद्यमानद् । आनड्व्यात्तिकर्मा । तथा पतिसमीप सारथित्वेनागत्य पीप्याना वर्धमाना भवति । किमिव । कूचक्रेणेव सिञ्चन् । कुः पृथिवी । तस्याश्चक्रो वलयः कूचक्रः । तेन वर्षणीयत्वेन निमित्तेन सिंचञ्जल वर्षन् मेघ इव । स यथान्तरिक्षे स्वल्पमात्रोऽपि वर्षणसमये महान्भवति तद्वदियमपि शत्रुमध्ये शरधारा वर्षन्ती वर्धत इत्यर्थः । तयैषैष्या । एषितव्यो गोसंघ एषः । तमिच्छतीत्येषैषी । ईदृश्या तया रथ्या सारथिभूतया जयेम शत्रुभिरपहृत गोसंघम् । तस्याः सात दत्त संभजनं वा सुमङ्गलं शोभनमङ्गलवत् सिनवत् । सिनमन्नम् । तद्वच्चास्तु । गोरूपान्नवच्च भवतु । ऋसा.

सपत्नीद्वेषः

इमां खनाम्योषधि वीरुधं बलवत्तमाम् ।
यया सपत्नीं बाधते यया संविंदते पतिम् ॥

इमामोषधि पाठाख्या वीरुध लतारूपा बलवत्तमा स्वकार्यकरणेऽतिशयेन बलवती खनामि । उन्मूलयामि । ययौषध्या सपत्नीम् । समान एकः पतिर्यस्याः सा सपत्नी । तामेषा वधूर्बाधते हिनस्ति । यया च पतिं भर्तारं संविदते । सम्यगसाधारण्येन लभते । ऋसा.

उत्तानपर्णे सुभगे देवजूते सहस्वति ।
सपत्नीं मे पराधमं पतिं मे केवलं कुरु ॥

हे उत्तानपर्णे उत्तानान्यूर्ध्वमुखानि पर्णानि पत्राणि यस्याः तादृशि हे सुभगे सौभाग्यहेतुभूते हे देवजूते देवेन स्रष्ट्रा प्रेरिते हे सहस्वत्यभिभवनवति ईदृशे हे पाठे मे मम सपत्नीं स्त्रियं पराधम । परागमय । धमतिर्गतिकर्मा । पतिं च मे ममैवं केवलमसाधारणं कुरु । ऋसा.

उत्तराहमुत्तर उत्तरेदुत्तराभ्यः ।
अधा सपत्नी या ममाधरा साधराभ्यः ॥

हे उत्तर उत्कृष्टतरे पाठे अहमुत्तरोत्कृष्टतरा भूयासम् । उत्तराभ्यो लोके या उत्कृष्टतराः सन्ति ताभ्योऽप्यहमुत्तरोत्कृष्टतरैव त्वत्प्रसादाद्भवेयम् । अथानन्तरं मम या सपत्नी साधराभ्यो निकृष्टाभ्योऽप्यधरा निकृष्टतरा भवतु । ऋसा.

नेह्यस्या नाम गृभ्णामि नो अस्मिन्रमते जने ।
परामेव परावतं सपत्नीं गमयामसि ॥

अस्याः सपत्न्या नाम संज्ञामपि नहि गृभ्णामि । नैव गृह्णामि । उच्चारयामि । नो खलु कांचिदस्मिन्जने सपत्न्याख्ये रमते । क्रीडति । अपि च तां सपत्नीं परा परावतमेवातिशयेन दूरदेशमेव गमयामसि । प्रापयामः । अतिशयेन भर्त्रा वियोजयाम इत्यर्थः । ऋसा.

अहमस्मि सहमानाथ त्वमसि सासहिः ।
उभे सहस्वती भूत्वी सपत्नीं मे सहावहै ॥

हे ओषधि अहं त्वत्प्रसादात् सहमानास्मि । सपत्न्या अभिभवित्री भवामि । अथापि च त्वमपि सासहिरसि । तस्या अभिभवित्री भवसि । आवामुभे अपि सहस्वती अभिभवित्र्यौ भूत्वी भूत्वा मे मम सपत्नी सहावहै । अभिभवाम । ऋसा.

उप तेऽधां सहमानामभि त्वाधां सहीयसा ।
माममु प्र ते मनो वत्सं गौरिव धावतु पथा वारिव धावतु ॥

---

(१) ऋसं १०।१०२।११.

(२) ऋसं.१०।१४५।१, असं.३।१८।१, आपगृ. १।९।६; कौसू.३६।१५, ऋग्वि.४।१२।१।३.

(३) ऋसं.१०।१४५।२; अस.३।१८।२; आपगृ.३।९।६.

(१) ऋसं.१०।१४५।३; असं.३।१८।४; आपगृ. ३।९।६.

(२) ऋसं.१०।१४५।४, असं.३।१८।३ ह्यस्या (हि ते) गृभ्णामि (जग्राह) जने (पतौ); आपगृ.३।९।६.

(३) ऋसं.१०।१४५।५; असं.३।१८।५; आपगृ.३।९।६.

(४) ऋसं.१०।१४५।६; असं.३।१८।६ उप (अभि) त्वाधां (तेऽधां); आपगृ.३।९।६; कौसू.३६।२१.

हे पते ते तव सहमानां सपत्न्या अभिभवित्रीमिमामोषधिमुपाधाम्। शिरस उपाधानं करोमि। सहीयसाभिभवित्रतरेण तेनोपधानेन त्वामभ्यधाम्। अभितो धारयामि। ते तव भर्तुर्मनो मामनुलक्ष्य प्र धावतु। प्रकर्षेण शीघ्रं गच्छतु। तत्र निदर्शनद्वयमुच्यते। गौरिव यथा गौर्वत्सं शीघ्रं गच्छति यथा निम्नेन मार्गेण वारिव वारुदकं यथा स्वभावतो गच्छति तद्वत्। अनेन निदर्शनद्वयेनौत्सुक्यातिशयः स्वाभाविकत्वं च प्रतिपाद्यते। ऋसा.

भ्रातुः पतित्वं जारत्वं वा

यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते।
प्रजां यस्ते जिघांसति तमितो नाशयामसि॥

हे योषित् यो राक्षसो भ्राता भ्रातृरूपो भूत्वा पतिर्भर्तृरूपो वा भूत्वा त्वा निपद्यते अभिगच्छति। अथवा जार उपपतिरूपो वा भूत्वाभिगच्छति। एवंभूतो यो राक्षसादिस्ते तव प्रजा जिघांसति हन्तुमिच्छति। स्पष्टमन्यत्। ऋसा.

एकया द्वयोर्विवाहः

विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः।

एकया सहेति लिङ्गाद्विनावभिधीयेते। द्वा द्वौ द्वित्वसख्योपेतावश्विनौ विभिः। गमनसाधनैरश्वैश्चरतः। संचरेते। किं चेमावश्विनावेकया सूर्याख्यया ताभ्यां स्वयंवृतया स्त्रिया सह प्र वसतः। प्रवासं सर्वत्र गमनं कुरुतः। प्रवासे दृष्टान्तः। प्रवासेव। यथा प्रवासिनौ द्वौ पुरुषावेकया स्त्रिया सह प्रवसतस्तद्वत्। ऋसा.

सुपत्नी। पतिपत्नीसंबन्धः।

आशासाना सौमनसं प्रजां सौभाग्यं तनूम्।
अग्नेरनुव्रता भूत्वा सं नह्ये सुकृताय कम्॥

या पत्नी वह्नेरनुसारिणी भूत्वा सौमनस्याद्याशासाना वर्तते तामेतां शोभनकर्मणे सुखं यथा भवति तथा बध्नामि। तैसा.

(१) ऋसं.१०।१६२।५; असं.२०।९६।१५; माश्रौ. २।१८।२.

(२) ऋसं.८।२९।८.

(३) तैसं.१।१।१०।१; कासं.१।१०; असं.१४।१।४२; तैब्रा.३।३।३।१; वैसू.२।६; आपश्रौ.२।५।२; माश्रौ. १।२।५।१२; आपगृ.२।४।८; कौसू.७६।७.

सुप्रजसस्त्वा वयꣳ सुपत्नीरुप सेदिम।
अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्॥

हेऽग्ने वयं त्वामुपसीदामः। कीदृश्यो वयं सुप्रजसः शोभनप्रजोपेताः। शोभनाः प्रतिर्यासां ताः सुपत्न्यः। त्वत्प्रसादाददब्धासः केनाप्यतिरस्कृताः। कीदृशं त्वां सपत्नदम्भन वैरिविनाशिनमदाभ्यं केनाप्यतिरस्कार्यम्। तैसा.

इमं वि ष्यामि वरुणस्य पाशं यमबध्नीत सविता सुकेतः। धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि॥

विष्यामि विमुञ्चामि। सुकेतः सुज्ञानः। सवित्रा बद्धेऽस्मिन्योक्त्ररूपे वरुणपाशे विमुक्ते सति धातुर्ब्रह्मणो योनौ स्थानेऽनुष्ठितस्य कर्मणः फलभूते लोके पत्या सह मे सुखं करोमि। तैसा.

समायुषा सं प्रजया समग्ने वर्चसा पुनः।
सं पत्नी पत्याहं गच्छे समात्मा तनुवा मम॥

हेऽग्नेऽहमायुषा संगच्छे, प्रजया संगच्छे, पातिव्रत्यलक्षणेन वर्चसा संगच्छे। अनेन पत्या पुनः पुनः पत्नी भूत्वा संगच्छे वियोगः कदाचिदपि मा भूदित्यर्थः। मम शरीरेण जीवात्मा चिरं संगच्छताम्। तैसा.

भ्रातृभगिनीविवाहलिङ्गम्

एष ते रुद्र भागः सह स्वस्राऽम्बिकया तं जुषस्व।

अम्बिकया पार्वत्या। तैसा.

राज्ञो भार्याद्वयम्

आदित्यं चरुं महिष्यै गृहे।
नैर्ऋतं चरुं परिवृक्त्यै गृहे।

(१) तैसं १।१।१०।१:३।३।६।१; तैब्रा.३।३।३।५; आपश्रौ.२।५।८:११।१६।१०.

(२) तैसं.१।१।१०।२:३।५।६।१; तैब्रा.३।३।१०।१; माश्रौ.१।३।५।१७; आपगृ.२।५।१२; मागृ.१।११।२०; आपश्रौ.३।१०।६:८।८।१४:१३।२०।१३.

(३) तैस.१।१।१०।२; तैब्रा.३।३।१०।२; आपश्रौ. ३।१०।८; माश्रौ.१।३।५।१८.

(४) तैसं.१।८।६।१; कासं.९।७:३६।१४; कसं. ८।१०; मैसं.१।१०।४:१।१०।२०; शुमा.३।५७; तैब्रा. १।६।१०।४; शब्रा.२।६।२।९-१०; आपश्रौ.८।१८।१: १२।२३।११; बृपास्मृ.९।११८.

(५) तैसं.१।८।९।१; कासं.१५।४; मैसं.२।६।५.

कृताभिषेका राज्ञः स्त्री महिषी, परिवृक्तिः प्रीतिरहिता राज्ञः स्त्री । तैसा.

बहुस्त्रीकामना

यां: स्त्रियः समनसस्ता अहं कामये हृदा ता मां कामयन्ता ꣳ हृदा ता म आमनसः कृधि स्वाहा।

स्त्रीणां यथाकामसभोगाभ्यनुज्ञा । रजस्वलाधर्माः ।

सं स्त्रीषꣳसादमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृह्णीतेति ता अब्रुवन्वरं वृणामहा ऋत्वियात्प्रजां विन्दामहै काममा विजनितोः सं भवामेति तस्मादृत्वियास्त्रियः प्रजां विन्दन्ते काममा विजनितोः सं भवन्ति वारेवृतꣳ ह्यासां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्त्सा मलवद्वासा अभवत्तस्मान्मलवद्वाससा न सं वदेत । न सहाऽऽसीत नास्या अन्नमद्याद्ब्रह्महत्यायै ह्येषा वर्ण प्रतिमुच्याऽऽस्तेऽथो खल्वाहुरभ्यञ्जनं वाव स्त्रिया अन्नमभ्यञ्जनमेव न प्रतिगृह्णं काममन्यदिति यां मलद्वाससꣳ संभवन्ति यस्ततो जायते सोऽभिशस्तो यामरण्ये तस्यै स्तेनो यां परांचीं तस्यै ह्रीतमुख्यपगल्भो या स्नाति तस्या अप्सु मारुको या । अभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखिते तस्यै खलतिरपमारी याऽऽङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन्या नखानि निकृन्तते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुꣳ सृजति तस्या उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर्व्रतं चरेदञ्जलिना वा पिबेदखर्वेण वा पात्रेण प्रजायै गोपीथाय ।

स्त्रियः सम्यक्सीदन्ति विश्रम्भेणोपविशन्ति यस्यां सभायामिति स्त्रीसभाविशेषः स्त्रीषꣳसादः । ऋत्वियाद्यदुसंबन्धाद्वीर्यात्प्रथमसंभोगादेव गर्भे जातेऽपि काममुदिश्याऽऽविजनितोरा प्रसवात्पुरुषेण संगच्छेमहि । गर्भोपद्रवः प्रत्यवायश्च निषिद्धदिनकृतोऽस्माकं मा भूदिति वरः । अत एव याज्ञवल्क्यस्मृतिः—'यथाकामी भवेद्वापि स्त्रीणा वरमनुस्मरन्' इति । यो ब्रह्महत्यायास्तृतीयो भागः सा मलवद्वासा रजस्वला योपिद्भवत् । यस्मादियं ब्रह्महत्याया रूपं शरीरे कञ्चुकवत्प्रतिमुच्याऽऽस्ते तस्मात्तया सह संभाषणं न कुर्यात् । तया सहैकस्मिन्गृहे वासो न कर्तव्यः । तत्स्वामिकं तत्सृष्टं वाऽन्न नाश्नीयात् । अपि चाभिज्ञाः केचिदेवमाहुः—स्त्रियाः शृङ्गारोपयोगित्वेनाभ्यञ्जनमेवान्नस्थानीयं, तदीयं तैलादिकमेव न गृह्णीयात् । तया वा स्वशरीराभ्यञ्जनं न कारयेत् । अन्यदन्नं सत्यामिच्छायां भोक्तव्यमिति । अभिशस्तो मिथ्यापवादयुक्तः यामरण्ये, मलवद्वाससꣳ संभवन्तीत्यनुवर्तते । परांचीमुच्चारणभीत्या लज्जया वा पराङ्मुखीम् । सभायामवाङ्मुखो वक्तुमशक्तो ह्रीतमुख्यपगल्भ इत्युच्यते । मारुको मरणशीलः । दुश्चर्मा कुष्ठी । प्रलिखते भित्तौ चित्रादिकं करोति । खलतिः केशशून्यः । अपमारी दुर्मरणयुक्तः । काणः कुण्ठिताक्षः । श्यावदन्मलिनदन्तः । कृणत्ति तृणादि छिनत्ति । उद्बन्धुको रज्जुं बद्ध्वा मरणशीलः । खर्वेण वह्निपक्वेन शरावादिना । खर्वो वामनः । यस्मादुक्ता दोषा वर्तन्ते तस्मात्तत्परिहाराय रजस्वलाव्रतं संभवादिवर्जनरूपं नियममाचरेत् । भोजनेऽञ्जलिरदग्धशरावादिर्वा साधनमस्तु । व्रताचरणमुत्पत्स्यमानायाः प्रजाया रक्षणार्थं भवति । अत्र मीमांसा । तृतीयाध्यायस्य चतुर्थपादे चिन्तितम् । 'न संवदेत मलवद्वाससेत्यपि पूर्ववत् । पुमर्थः स्यात्क्रतौ क्वापि संवादस्याप्रसक्तितः' ॥ दर्शपूर्णमासप्रकरणे श्रूयते 'मलवद्वाससा न संवदेत' इति । अस्य निषेधस्य प्रकरणात्क्रत्वङ्गत्वमिति चेन्न । अप्रसक्तप्रतिषेधप्रसङ्गात् । 'यस्य व्रत्येऽहन्यन्यनालम्भुका भवति । तामपरुध्य यजेत' इति रजस्वलाया निःसारणान्न क्रतौ संवादप्रसक्तिः । तस्मात्केवलपुरुषार्थस्यास्य प्रकरणादुत्कर्षः । तैसा.

अमावास्यापौर्णमास्योर्भोगनिषेधः

नामावास्यायां च पौर्णमास्यां च स्त्रियमुपेयाद्यदुपेयान्निरिन्द्रियः स्यात्सोमस्य वै राज्ञोऽर्धमासस्य रात्रयः पत्नय आसन् तासाममावास्यां च पौर्णमासीं च नोपैत् । ते एनमभि समनह्यंतां तं यक्ष्म आर्छद्राजानं यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म

(१) तैसं.२।३।९।२.

(२) तैसं.२।५।१।५-७.

(१) तैसं.२।५।६।४-५.

यत्पापीयानभवत्तत्पापयक्ष्मस्य यज्जायाभ्याम-विन्दत्तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्दन्ति ।

अर्धमासस्य शुक्लपक्षस्य रात्रय एको वर्गः, कृष्ण-पक्षस्य रात्रयः परो वर्गस्ते अमावास्यापौर्णमास्यावेनं सोममभिसमनह्येतामाभिमुख्येन संभोगाय गृहीतवत्यौ। बलात्कारेण भुज्यमानं तं सोममतिव्यवायेन क्षयव्याधिः प्राप्तवान् । तैसा.

सुपत्नी

[3] **या सुपाणिः स्वङ्गुरिः सुपूमा बहुसूवरी ।**
तस्यै विश्पत्नियै हविः सिनीवाल्यै जुहोतन ॥

शोभनौ पाणी यस्याः सा सुपाणिः । शोभना अङ्गु-लयो यस्याः सा स्वङ्गुरिः । सुपूमा सुष्ठु प्रसवित्री । बहुसूवरी बहूना यज्ञाना सवित्री । ईदृशी या सिनी-वाली तस्यै विश्पत्नियै विशा पालयित्र्यै सिनीवाल्यै हविर्जुहोतन हे ऋत्विग्यजमाना जुहुत । तैसा.

[4] **सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा ।**

सिनीवाली चन्द्रकलायुक्तामावास्याभिमानिनी देवता। सुकपर्दा कपर्दोऽत्र स्त्रीणामुचितः केशबन्धविशेषः । शोभनः कपर्दो यस्याः सा सुकपर्दा । सुकुरीरा स्त्रीभिः शृङ्गारार्थं शिरसि धार्यमाणं कनकाभरणं कुरीरः शोभनः कुरीरो यस्याः सा सुकुरीरा सुमुकुटा । स्वौपशा सम्यक् उपशेते शयन कुरुते यैरवयवविशेषैस्ते सर्वे-ऽप्युपशाः तेषा समूह औपशः शोभनः शयनविदग्धो विलासचतुर औपशोऽवयवसमूहो यस्याः सा ।

शुम.

[5] **वधूर्जजान नवगज्जनित्री त्रय एनां महिमानः सचन्ते ।**

वधूर्जजान नवगज्जनित्री, नवं वरं गच्छतीति नव-गन्नूतनविवाहवती वधूर्जनित्री, उत्तरोत्तरप्रजोत्पादिका यथा जजान जाता तद्वदियमपि व्युष्टिरुत्तरोत्तरप्रभात-निष्पादिकेत्यर्थः । त्रयस्त्रिंसंख्याका महिमानो महिमो-पेता अग्निसूर्यचन्द्ररूपा देवा एना व्युष्टिं सचन्ते सम-वयन्ति । देवतात्रयप्रकाशकानुग्रहादस्याः प्रभातरूप-त्वमित्यर्थः । तैसा.

अनेकजायापतिरेकः

[6] **छन्दस्वती उषसा पेपिशाने समानं योनिमनुसं-चरन्ती । सूर्यपत्नी वि चरतः प्रजानती केतुं कृण्वाने अजरे भूरिरेतसा ॥**

द्वे ह्युषसावेका सृष्टिकालीना प्रथमेति पूर्वमन्त्रोक्ता । अपरा प्रतिदिनसंचारिणी । साऽप्यस्या चरति प्रविष्टेति पूर्वमन्त्रोक्ता । एव सत्युषसा विचरतो द्वे अप्युषसौ विविध चरतः । कीदृश्यावुषसौ, छन्दस्वती छन्दोयुक्त-मन्त्रैः स्तूयमानतया छन्दस्वत्यौ, पेपिशाने भृश प्रकाश-यन्त्यौ, समानं योनिमनु संचरन्ती, उभयोः कालवि-शेषत्वात् कालसामान्यमेव तयोर्योनिर्हेतुः। ते च सूर्यपत्नी सूर्यस्य जाये, प्रजानती स्वय देवतारूपत्वेन प्रज्ञानवत्यौ, केतुं कृण्वाने ज्ञानं कुर्वत्यौ प्रकाशप्रदानेन हि प्राणिनां रूपज्ञानं जनयन्त्यौ, अजरे कदाचिदपि जरारहिते, भूरिरेतसा प्रभूतरेतस्के बहुव्यापारकारणभूते इत्यर्थः । तैसा.

[7] **तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।**

हे देवा ऋत्विजः सर्वे वय पत्न्यादिभिः सर्वैर्मनुष्यैरुत वा हिरण्यैर्हिरण्यादिभिः सर्वैः साधनद्रव्यैश्च सहितास्त-मग्निमनुगच्छेमानुगताः सन्तः फलं प्राप्स्याम इत्याशयः । तैसा.

---

(१) तैसं.३।१।११।४; मैसं.४।१२।६.

(२) तैसं.४।१।५।३; मैसं.२।७।५; कासं.१६।५; शुमा. ११।५६; शब्रा.६।५।१।१०.

(३) तैसं.४।३।११।१; कासं.३९।१० वधूर्जजान (वधू-र्मिमाय); मैसं.२।१३।१० कासंवत्; असं.३।१०।४,८।९।११ वधूर्जजान (वधूर्जिगाय); शागृ.३।१२।३.

(१) तैसं.४।३।११।१; कासं.३९।१०उषसा (उषसौ) रन्ती (रेते) केतुं कृण्वाने (केतुमती); मैसं.२।१३।१० रेतसा (रेतसौ) शेषं कासवत्; असं.८।९।१२ छन्दस्वती (छन्दः पक्षे) रन्ती (रेते) वि (स) केतु कृण्वाने (केतुमती); आपगृ. ८।२२।५.

(२) तैसं.४।७।१३।३; कामं.१८।१८; मैसं.२।१२।४; शुमा.१५।५०; शब्रा.८।६।३।१९.

जाया गृहपत्नी

यथा जायामानीय गृहेषु निपादयति तादृगेव तत्।

स्त्रीसगनिषेधः

नाग्निं चित्वा रामामुपेयादयोनौ रेतो धास्यामीति न द्वितीयं चित्वाऽन्यस्य स्त्रियमुपेयान्न तृतीयं चित्वा काञ्चनोपेयाद्रेतो वा एतन्नि धत्ते यदग्निं चिनुते यदुपेयाद्रेतसा व्यृध्येत।

रामां नोपेयात्। स्वकीयासु भार्यासु मध्ये रमणीयेयमिति मत्वा कामुको न प्रवर्तेत। पुत्रार्थं तस्यामीप्सितानुज्ञा। अयोनौ पुत्रोत्पत्त्यनुपयुक्तायां वृथैव रेतः स्थापयिष्यामीति तन्मा भूदित्यनुपगमनम्। द्वितीयचयनानुष्ठायी सार्ववर्णिकविवाहोपेतोऽन्यस्य वर्णान्तरस्य दुहितरं नोपेयात्। सवर्णायामीप्सितस्यानुज्ञा। तृतीयचयनानुष्ठायी सवर्णामसवर्णां रमणीयां पुत्रार्थिनीं वा कामपि नोपेयात्। तैसा.

अथो खल्वाहुरप्रजस्यं तद्यन्नोपेयादिति यद्रेतःसिचावुपदधाति ते एव यजमानस्य रेतो विभृतस्तस्मादुपेयाद्रेतसोऽस्कन्दाय।

तमिममगमनपक्षं दूषयित्वा सर्वत्र गमनमभ्यनुजानाति—अथो इति। अभिज्ञाः खल्वेवमाहुः—अनुपगमनमप्रजस्य प्रजोत्पादनहेतुर्न भवति। न चोपगमने रेतोहानिः शङ्कनीया। विराड्ज्योतिरित्यादिमन्त्राभ्यां रेतःसिचाविष्टके अनेनोपहिते। तस्मात्ते एवास्य यजमानस्य रेतः पालयतः। अतो रेतसो विनाशाभावाय प्रजोत्पत्त्यर्थमुपेयात्। तैसा.

हीनवयस्या विवाहः

न्यूनाद्धि प्रजा असृजत।

स्त्रियाः प्रियः

गायन्त्यः स्त्रियः कामयन्ते कामुका एनं स्त्रियो भवन्ति य एवं वेदाथो य एवं विद्वानपि जन्येषु भवति तेभ्य एव ददति।

(१) तैसं.५।३।७।२. (२) तैसं.५।६।८।३-४.
(३) तैसं.५।६।८।४. (४) तैसं.६।१।२।७.
(५) तैसं.६।१।६।६.

पत्नी पुरुषार्धम्

अर्धो वा एष आत्मनो यत्पत्नी।
पत्नी हि सर्वस्य मित्रम्।

अनेकजायापतिरेकः

एको बह्वीर्जाया विन्दते।
यदेकस्मिन्यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते यन्नैकां रशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दते।

कन्यादानम्

छन्दास्येव तद्वि वाहयति प्र वस्यसो विवाहमाप्नोति य एवं वेदाथो देवताभ्य एव यज्ञे संविदं दधाति तस्मादिदमन्योऽन्यस्मै ददाति।

यः पुमानेवमैन्द्रवायवाग्रत्वादीनां विवाहं जानाति स तेन वेदनेन छन्दोदेवतानामेव विवाहं कृतवान् भवति। स्वयं च धनिकतमात्कुलाद्विवाहं प्राप्नोति। अपि च यज्ञानुष्ठानकाले देवताविषयमभिज्ञानं दधाति धारयति। यस्मादेव छन्दसा विवाहः प्रवृत्तस्तस्माल्लोकेऽपीदं कन्याकारूपमपत्यमन्यः पिताऽन्यस्मै जामात्रे ददाति। तैसा.

स्त्रीपुरुषसंयोगः

माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः।

वृक्षस्य पर्यङ्कस्य उपरितनं भागं रोहतः मैथुनार्थम्। शुउ.

सुपत्नी

अदितिरिव त्वा सुपुत्रोपनिषदेयमिन्द्राणीवाऽविधवा।

स्त्रीणां सुरापानम्

सुरा वाव सा ततो राजन्यमसृजत तस्मा-

(१) तैसं.६।१।८।५. (२) तैसं.६।२।९।२.
(३) तैसं.६।५।१।४. (४) तैसं.६।६।४।३.
(५) तैसं.७।२।८।७.
(६) तैसं.७।४।१९।३; कासं.४।८; मैसं.३।११।१; शुमा.२३।२४; शब्रा.१३।२।९।७; तैब्रा.३।९।७।४; आश्रौ.१०।६।१०; शाश्रौ.१६।४।१.
(७) कासं.१।१०.
(८) कासं.१२।१२; मैस.२।४।२.

ज्यायांश्च कनीयांश्च स्नुषा च श्वशुरश्च सुरां पीत्वा सह लालपत आसते पाप्मा वै माल्व्यम्।

स्त्रीदोषाः

[1]स्त्र्यखलतिर्भावुका। स्त्री निर्वीर्याऽनिर्वीर्यः पुमान्।

अग्नेदीधिपुपरिविविदानदोषः.

[2]ते देवा अतिमृजाना आयन्त्सूर्याभ्युदिते तेऽमृजत यꣳ सुप्तꣳ सूर्योऽभ्युदेति सूर्याभ्युदितः सूर्याभिनिम्रुक्ते सूर्याभिनिम्रुक्तः इयावदति इयावदन् कुनखिनि कुनख्यग्नेदधुष्यग्ने दधुः परिवित्ते परिवित्तः परिविविदाने परिविविदानो वीरहणि वीरहा भ्रूणहनि भ्रूणहनमेनो नात्येति।

अनेकजायापतिरेकः

[3]तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा जनयो न पत्नीः।

तिस्रो देवीः। यास्तिस्रो देव्यो हविषा आज्येन वर्धमानाः इन्द्रं जुषाणाः सेवमानाः। जनयो न पत्नीः जाया इव पत्न्यः आसते। शुउ.

[4]अनृतं स्त्री, अनृतमेषा करोति या पत्युः क्रीता सत्यथान्यैश्चरति।

अनेकजायापतिरेकः

[5]मनोर्वै दश जाया आसन्।

स्त्रीभोगनिषेधः

[6]अग्निचिता स्त्री नोपेत्येर्ष्या हि सा।

[7]योऽग्निं चित्वान्यस्य स्त्रियमुपैति यथा हविः स्कन्नमेवꣳ स्याद्यथा हविषे स्कन्नाय प्रायश्चित्तिमिच्छन्त्येवमस्मै प्रायश्चित्तिमिच्छेयुर्यद्युपेयान् मैत्रावरुण्यामिक्षया यजेत।

स्त्री स्वभावतो दुष्टा

[8]त्रया वै नैर्ऋता अक्षाः स्त्रियः स्वप्नो यदीक्षते तेनाक्षैश्च स्त्रीभिश्च व्यावर्तते यां प्रथमां दीक्षितो रात्रीं जागर्ति तया स्वप्नेन व्यावर्तते।

दुहितृगमनम्

[9]प्रजापतिः स्वां दुहितरमभ्यैदुष्सं तस्य रेतः परापतत्।

स्त्र्यसमर्था। स्त्री देया।

[10]यत्स्थालीं परास्यन्ति न दारुमयं तस्मात्स्त्रियं जातां परास्यन्ति न पुमाꣳसमथ स्त्रिय एवातिरिच्यन्ते।

[11]निरिन्द्रिया स्त्री पुमानिन्द्रियवाꣳ स्तस्मात्पुमाꣳसः सभाꣳ यन्ति न स्त्रियः।

[12]तस्मात्स्त्रियः पुꣳसोऽतिरिच्यन्तेऽथ द्वे एकस्य रशने द्वे एकस्य तस्मात्स्त्रियं जातां परास्यन्ति न पुमाꣳसमथ स्त्रिय एवातिरिच्यन्ते।

अनेकजायापतिरेकः। स्त्रीपुरुषसयोगः।

[13]देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्धयन्।

[14]माता च ते पिता च तेऽग्रे वृक्षस्य क्रीडतः।

[15]होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीर्बृहतीर्महीः पतिमिन्द्रं वयोधसम्।

पेशस्वतीः रूपसमृद्धाः हिरण्ययीः हिरण्यालंकृतशरीराः बृहतीः प्रभावतः महत्यः। यक्षत् यजतु। भारतीः बहुवचन इडासरस्वत्युपलक्षणार्थम्। शुउ.

[16]देवीस्तिस्रस्तिस्रो देवीर्वयोधसं पतिमिन्द्रमवर्धयन्।

वयोधसं आयुषो धारयितारम्। शुउ.

[17]आनन्दाय स्त्रीषखम्।

---

(१) कासं.२८।८; कसं.४४।८.

(२) कासं.३१।७; मैसं.४।१।९; कसं.४७।७; तैब्रा.२।३।८.

(३) कासं.३८।६; मैसं.३।११।१; तैब्रा.२।६।८।३.

(४) कासं.३६।५; मैसं.१।१०।११.

(५) मैसं.१।५।८. (६) मैसं.३।३।१.

(७) मैसं.३।४।७. (८) मैसं.३।६।३.

(१) मैसं.३।६।५.

(२) मैसं.४।६।४. (३) मैसं.४।७।४.

(४) मैसं.४।७।९.

(५) मैसं.३।११।५:४।१३।८; कासं.१९।३; शुमा.२१।५४:२८।१८; तैब्रा.२।६।१०।४:३।६।१३।१; शाश्रौ.३।१३।२७; आश्रौ; २।१६।१२.

(६) शुमा.२३।२५.

(७) शुमा.२८।३१.

(८) शुमा.२८।४१; तैब्रा.२।६।२०।४.

(९) शुमा.३०।६; तैब्रा.३।४।१।२.

स्त्रीषण्ढं स्त्रियाः सङ्गाधम् । शुम.

अग्रेदीधिषूपरिविदानदोषः

संधये जारं गेहायोपपतिमार्त्यै परिवित्तं निर्ऋत्यै परिविविदानमराध्या एदिधिषुः पतिम् ।

संधये जारमुपपतिं गेहाय उपपतिं व्यभिचारिणं आर्त्यै परिवित्तं ऊढे कनिष्ठेऽनूढं निर्ऋत्यै परिविविदानं अनूढे ज्येष्ठे ऊढवन्तं आराध्यै देव्यै एदिधिषुःपतिं ज्येष्ठाया पुत्र्यामनूढायामूढा एदिधिषुः तत्पतिम् । शुम.

दुर्भगा स्त्री

भगमस्या वर्च आदिष्यधि वृक्षादिव स्रजम् ।
महाबुध्न इव पर्वतो ज्योक् पितृष्वास्ताम् ॥
एषा ते राजन् कन्या वधूर्नि धूयतां यम ।
सा मातुर्बध्यतां गृहेथो भ्रातुरथो पितुः ॥
एषा ते कुलपा राजन् तामु ते परि दद्मसि ।
ज्योक् पितृष्वसाता आ शीर्ष्णः समोप्यात् ॥
असितस्य ते ब्रह्मणा कश्यपस्य गयस्य च ।
अन्तःकोशमिव जामयोऽपि नह्यामि ते भगम् ॥
अमूर्या यन्ति योषितो हिरा लोहितवाससः ।
अभ्रातर इव जामयस्तिष्ठन्तु हतवर्चसः ॥

विवाहेच्छोः कन्यामनोग्रहणम्

परि त्वा परितत्नुनेक्षुणागामविद्विषे ।
यथा मां कामिन्यसो यथा मन्नापगा असः ॥
यथेदं भूम्या अधि तृणं वातो मथायति ।
एवा मथ्नामि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः ॥
सं चेन्नयाथो अश्विना कामिना सं च वक्षथः ।
सं वां भगासो अग्मत सं चित्तानि समु व्रता ॥
यत् सुपर्णा विवक्षवो अनमीवा विवक्षवः ।
तत्र मे गच्छताद्धवं शल्य इव कुलमलं यथा ॥

यदन्तरं तद् बाह्यं यद् बाह्यं तदन्तरम् ।
कन्यानां विश्वरूपाणां मनो गृभायौषधे ॥
एयमगन् पतिकामा जनिकामोहमागमम् ।
अश्वः कनिक्रदद् यथा भगेनाह सहागमम् ॥
यथा वृक्षं लिबुजा समन्तं परिषस्वजे ।
एवा परि ष्वजस्व मां यथा मां कामिन्यसो यथा मन्नापगा असः ॥
यथा सुपर्णः प्रपतन् पक्षौ निहन्ति भूम्याम् ।
एवा नि हन्मि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः ॥
यथेमे द्यावापृथिवी सद्यः पर्येति सूर्यः ।
एवा पर्येमि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः ॥
वाऋछ मे तन्वं पादौ वाऋछाक्ष्यौ वाऋछ सक्थ्यौ ।
अक्ष्यौ वृषण्यन्त्याः केशा मां ते कामेन शुष्यन्तु ॥
मम त्वा दोषणिश्रिषं कृणोमि हृदयश्रिषम् ।
यथा मम क्रतावसो मम चित्तमुपायसि ॥
वासां नाभिरारेहणं हृदि संवननं कृतम् ।
गावो घृतस्य मातरोमूं सं वानयन्तु मे ॥

कामिन्याः पुरुषस्य च सभोगकामना परस्परवशीकरण च

आ वृषायस्व श्वसिहि वर्धस्व प्रथयस्व च ।
यथाङ्गं वर्धतां शेपस्तेन योषितमिज्जहि ॥
येन कृशं वाजयन्ति येन हिन्वन्त्यातुरम् ।
तेनास्य ब्रह्मणस्पते धनुरिवा तानया पसः ॥
आहं तनोमि ते पसो अधि ज्यामिव धन्वनि ।
क्रमस्वर्श इव रोहितमनवग्लायता सदा ॥
यथायं वाहो अश्विना समैति सं च वर्तते ।
एवाममभि ते मनः समैतु सं च वर्तताम् ॥
आहं खिदामि ते मनो राजाश्वः पृष्ट्यामिव ।
रेष्मच्छिन्नं यथा तृणं मयि ते वेष्टतां मनः ॥

---

(१) शुमा.३०।९; तैब्रा.३।४।४।४ आर्त्यै (निर्ऋत्यै) निर्ऋत्यै (आर्त्यै) ध्या एदिधिषुःपतिम् (अराध्यै दिधिषूपतिम्).
(२) असं.१।१४।१-४; कौसू.३६।१५.
(३) असं.१।१७।१; नि.३।४ योषितो (जामयो); कौसू.३६।९. (४) असं.१।३४।५.
(५) असं.२।३०।१-५; कौसू.३५।२१.

(१) असं.६।८।१-३; कौसू.३५।२१.
(२) असं.६।९।१-३; कौसू.३५।२१.
(३) असं.६।१०१।१-३; कौसू.४०।१८.
(४) असं.६।१०२।१-३.

आञ्जनस्य मधुघस्य कुष्ठस्य नलदस्य च ।
तुरो भगस्य हस्ताभ्यामनुरोधनमुद्धरे ॥
रथजितां राथजितेयीनामप्सरसामयं स्मरः ।
देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ॥
असौ मे स्मरतादिति प्रियो मे स्मरतादिति ।
देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ॥
यथा मम स्मरादसौ नामुष्याहं कदा चन ।
देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ॥
[1]नि शीर्षतो नि पत्तत आध्यो नि तिरामि ते ।
देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ॥
अनुमतेन्विद मन्यस्वाकूते समिदं नमः ।
देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ॥
यद् धावसि त्रियोजनं पञ्चयोजनमाश्विनम् ।
ततस्त्वं पुनरायसि पुत्राणां नो असः पिता ॥
[2]यं देवाः स्मरमसिञ्चन्नप्स्वन्तः शोशुचानं सहाध्या । तं ते तपामि वरुणस्य धर्मणा ॥
यं विश्वे देवाः स्मर० ॥
यमिन्द्राणी स्मर ० ॥
यमिन्द्राग्नी स्मर ० ॥
यं मित्रावरुणौ स्मर ० ॥
न्यस्तिका रुरोहिथ सुभगंकरणी मम ।
शतं तव प्रतानास्त्रयस्त्रिंशन्नितानाः ।
तया सहस्रपर्ण्या हृदयं शोषयामि ते ॥
शुष्यतु मयि ते हृदयमथो शुष्यत्वास्यम् ।
अथो नि शुष्य मां कामेनाथो शुष्कास्या चर ॥
संवननी समुष्पला बभ्रु कल्याणि सं नुद ।
अमूं च मां च सं नुद समानं हृदयं कृधि ॥
यथोदकमपपुषोपशुष्यत्यास्यम् ।
एवा नि शुष्य मां कामेनाथो शुष्कास्या चर ॥
यथा नकुलो विच्छिद्य संदधात्यहिं पुनः ।
एवा कामस्य विच्छिन्नं सं धेहि वियावति ॥
अक्ष्यौ नौ मधुसंकाशे अनीकं नौ समञ्जनम् ।
अन्तः कृणुष्व मां हृदि मन इन्नौ सहासति ॥

(१) असं.६।१३०।१-३. (२) असं.६।१३१।१-३.
(३) असं.६।१३२।१-५. (४) असं.६।१३९।१-५.
(५) असं.७।३७।१.

[3]अभि त्वा मनुजातेन दधामि मम वाससा ।
यथासो मम केवलो नान्यासां कीर्तयाश्चन ॥
[4]इदं खनामि भेषजं मांपश्यमभिरोरुदम् ।
परावतो निवर्तनमायतः प्रतिनन्दनम् ॥
येना निचक्र आसुरीन्द्रं देवेभ्यस्परि ।
तेना नि कुर्वे त्वामहं यथा तेसानि सुप्रिया ॥
प्रतीची सोममसि प्रतीच्युत सूर्यम् ।
प्रतीची विश्वान् देवान् तां त्वाच्छावदामसि ॥
अहं वदामि नेत् त्वं सभायामह त्वं वद ।
ममेदसस्त्वं केवलो नान्यासां कीर्तयाश्चन ॥
यदि वासि तिरोजनं यदि वा नद्यस्तिरः ।
इयं ह मह्यं त्वामोषधिर्बध्नेव न्यानयत् ॥

पतिपत्नीर्ष्यामन्युनाशयत्नः

त्वाष्ट्रेणाहं वचसा वि त ईर्ष्यामभीमदम् ।
अथो यो मन्युष्टे पते तमु ते शमयामसि ॥
[5]ईर्ष्यायाः ध्राजिं प्रथमां प्रथमस्या उतापराम् ।
अग्निं हृदय्यं शोकं तं ते निर्वापयामसि ॥
यथा भूमिर्मृतमना मृतान्मृतमनस्तरा ।
यथोत मम्रुषो मन एवेर्ष्योर्मृतं मनः ॥
अदो यत् ते हृदि श्रितं मनस्कं पतयिष्णुकम् ।
ततस्त ईर्ष्यां मुञ्चामि निरूष्माणं इतेरिव ॥
अग्नेरिवास्य दहतो वायस्य दहतः पृथक् ।
एतामेतस्येर्ष्यामुद्राग्निमिव शमय ॥

नवपत्न्या सुभगत्व पत्यनुकूलत्व च प्रार्थयते

[6]आ नो अग्ने सुमतिं संभलो गमेदिमां कुमारीं सह नो भगेन । जुष्टा वरेषु समनेषु वल्गुरोषं पत्या सौभगमस्त्वस्यै ॥
सोमजुष्टं ब्रह्मजुष्टमर्यम्णा संभृतं भगम् ।
धातुर्दैवस्य सत्येन कृणोमि पतिवेदनम् ॥
इयमग्ने नारी पतिं विदेष्ट सोमो हि राजा सुभगां कृणोति । सुवाना पुत्रान् महिषी भवाति गत्वा पतिं सुभगा वि राजतु ॥
यथाखरो मघवंश्चारुरेष प्रियो मृगाणां सुषदा

(१) असं.७।३८।१. (२) असं.७।३९।१-५.
(३) असं.७।७८।३. (४) असं.६।१८।१-३.
(५) असं.७।४८।१. (६) असं.१।३६।१-५.

बभूव । एवा भगस्य जुष्टेयमस्तु नारी संप्रिया पत्याविराधयन्ती ॥

भगस्य नावमा रोह पूर्णामनुपदस्वतीम् ।
तयोपप्रतारय यो वरः प्रतिकाम्यः ॥

पत्युः पत्न्यनुकूलत्व प्रार्थ्यते

आ क्रन्दय धनपते वरमामनसं कृणु ।
सर्वं प्रदक्षिणं कृणु यो वरः प्रतिकाम्यः ॥
इदं हिरण्यं गुल्गुलवयमौक्षो अथो भगः ।
एते पतिभ्यस्त्वामदुः प्रतिकामाय वेत्तवे ॥
आ ते नयतु सविता नयतु पतिर्यः प्रतिकाम्यः ।
त्वमस्यै धेह्योषधे ॥
जायाः पुत्राः सुमनसो भवन्तु ।

जायाना पतिनिष्ठा

इहेदसाथ न परो गमाथेर्यो गोपाः पुष्टपतिर्व आजत् । अस्मै कामायोप कामिनीर्विश्वे वो देवा उपसंयन्तु ॥

स्त्रीवशीकरणम्

उत्तुदस्त्वोत् तुदतु मा धृथाः शयने स्वे ।
इषुः कामस्य या भीमा तया विध्यामि त्वा हृदि ॥
आधीपर्णां कामशल्यामिषुं संकल्पकुल्मलाम् ।
ता सुसंनतां कृत्वा कामो विध्यतु त्वा हृदि ॥
या ह्रीहानं शोषयति कामस्येषुः सुसंनता ।
प्राचीनपक्षा व्योषा तया विध्यामित्वा हृदि ॥
शुचा विद्धा व्योषया शुष्कास्याभि सर्प मा ।
मृदुर्नमन्युः केवली प्रियवादिन्यनुव्रता ॥
आजामि त्वाजन्या परि मातुरथो पितुः ।
यथा मम क्रतावसो मम चित्तमुपायसि ॥
व्यस्यै मित्रावरुणौ हृदश्चित्तान्यस्यतम् ।
अथैनामकृतुं कृत्वा ममैव कृणुतं वशे ॥

कुटुम्बसामनस्यम्

संहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या ॥
अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम् ॥
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ॥
येन देवा न वियन्ति नो च विद्विषते मिथः ।
तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः ॥
ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः
सराधुश्चरन्तः । अन्यो अन्यस्मै वल्गु वदन्त
एत सध्रीचीनान् वः संमनसस्कृणोमि ॥

समानी प्रपा सह वोन्नभागः समाने योक्त्रे सह वो युनज्मि । सम्यञ्चोग्निं सपर्यतारा नाभिमिवाभितः ॥

सध्रीचीनान् वः संमनसस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान् । देवा इवामृतं रक्षमाणाः सायंप्रातः सौमनसो वो अस्तु ॥

सभोगकाले सर्वस्वापनम्

सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत् ।
तेना सहस्रेना वयं नि जनान्त्स्वापयामसि ॥
न भूमिं वातो अति वाति नाति पश्यति कश्चन ।
स्त्रियश्च सर्वाः स्वापय शुनश्चेन्द्रसखा चरन् ॥
प्रोष्ठेशयास्तल्पेशया नारीर्या वह्यशीवरीः ।
स्त्रियो याः पुण्यगन्धयस्ताः सर्वाः स्वापयामसि ।
एजदेजदजग्रभं चक्षुः प्राणमजग्रभम् ।
अङ्गान्यजग्रभं सर्वा रात्रीणामतिशर्वरे ॥
य आस्ते यश्चरति यश्च तिष्ठन् विपश्यति ।
तेषां सं दध्मो अक्षीणि यथेदं हर्म्यं तथा ॥
स्वप्तु माता स्वप्तु पिता स्वप्तु श्वा स्वप्तु विश्पतिः ।
स्वपन्त्वस्यै ज्ञातयः स्वप्त्वयमभितो जनः ॥
स्वप्न स्वप्नाभिकरणेन सर्वं नि ष्वापया जनम् ।
ओत्सूर्यमन्यान्त्स्वापयाव्युषं जागृतादहमिन्द्र इवारिष्टो अक्षितः ॥

एकस्या अनेकपतयः । ब्रह्मपत्न्या एक एव पतिः

उत यत् पतयो दश स्त्रियाः पूर्वे अब्राह्मणाः
ब्रह्मा चेद्धस्तमग्रहीत् स एव पतिरेकधा ॥

(१) असं.२।३६।६-८. (२) असं.३।४।३.
(३) असं.३।८।४; १४।१।३२. (४) असं.३।२५।१-६.
(५) असं.३।३०।१-७.

(१) असं.४।५।१-५; ऋसं.७।५५।७.
(२) असं.४।५।६-७; ऋसं.७।५५।५.
(३) असं.५।१७।८-९.

ब्राह्मण एव पतिर्न राजन्यो न वैश्यः ।
तत् सूर्यः प्रब्रुवन्नेति पञ्चभ्यो मानवेभ्यः ॥

पतिपत्नीसांमनस्यम्

[1]अव ज्यामिव धन्वनो मन्युं तनोमि ते हृदः ।
यथा संमनसौ भूत्वा सखायाविव सचावहै ॥
[2]सखायाविव सचावहा अव मन्युं तनोमि ते ।
अधस्ते अश्मनो मन्युमुपास्यामसि यो गुरुः ॥
अभि तिष्ठामि ते मन्युं पाष्ण्र्या प्रपदेन च ।
यथाबशो न वादिषो मम चित्तमुपायसि ॥

पतिव्रता

[3]इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव ॥

इतः अस्मात् प्रयोगात् ताः गण्डमालाः । वाका वचनीयदोषाः अपचितामिव पूजितां पतिव्रता स्त्रियं प्राप्य यथा पराहता नश्यन्ति तथेत्यर्थः । असा.

पतिपत्नीशुभकामना

[4]तेन भूतेन हविषायमा प्यायतां पुनः ।
जायां यामस्मा आवाक्षुस्तां रसेनाभि वर्धताम् ॥
अभि वर्धतां पयसाभि राष्ट्रेण वर्धताम् ।
रय्या सहस्रबर्चसेमौ स्तामनुपक्षितौ ॥
त्वष्टा जायामजनयत् त्वष्टास्यै त्वां पतिम् ।
त्वष्टा सहस्रमायूंषि दीर्घमायुः कृणोतु वाम् ॥

जायाकामस्य जायाप्रार्थना

[5]आगच्छत आगतस्य नाम गृह्णाम्यायतः ।
इन्द्रस्य वृत्रघ्नो वन्वे वासवस्य शतक्रतोः ॥
येन सूर्यां सावित्रीमश्विनोहतुः पथा ।
तेन मामब्रवीद् भगो जायामा वहतादिति ॥
यस्तेऽङ्कुशो वसुदानो बृहन्निन्द्र हिरण्ययः ।
तेना जनीयते जायां मह्यं धेहि शचीपते ॥

परिवित्तिदोषः

[6]मा ज्येष्ठं वधीदयमग्र एषां मूलबर्हणात् परि पाह्येनम् । स प्राह्याः पाशान् वि चृत प्रजानन् तुभ्यं देवा अनु जानन्तु विश्वे ॥

उन्मुञ्च पाशांस्त्वमग्र एषां त्रयस्त्रिंशदुत्सिता येभिरासन् । स प्राह्याः पाशान् वि चृत प्रजानन् पितापुत्रौ मातरं मुञ्च सर्वान् ॥

येभिः पाशैः परिवित्तो विबद्धोऽङ्गेअङ्ग आर्पित उत्सितश्च । वि ते मुच्यन्तां विमुचो हि सन्ति भूणन्नि पूषन् दुरितानि मृक्ष्व ॥

[7]त्रिते देवा अमृजतैतदेनस्त्रिते एनन्मनुष्येषु ममृजे । ततो यदि त्वा प्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु ॥

[8]मरीचीर्धूमान् प्र विशानु पाप्मन्नुदारान् गच्छोत वा नीहारान् । नदीनां फेनाँ अनु तान् वि नश्य भूणन्नि पूषन् दुरितानि मृक्ष्व ॥

द्वादशधा निहितं त्रितस्यापमृष्टं मनुष्यैनसानि ।
ततो यदि त्वा प्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु ॥

कुटुम्बसांमनस्यम्

[9]मातुर्यदेन इषितं न आगन् यद् वा पितापराद्धो जिहीडे ॥
यदीदं मातुर्यदि वा पितुर्नः परि भ्रातुः पुत्राच्चेतस एन आगन् । यावन्तो अस्मान् पितरः सचन्ते तेषां सर्वेषां शिवो अस्तु मन्युः ॥

दैवविवाहः

[10]शुद्धाः पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु प्रपृथक् सादयामि । यत्काम इदमभिषिञ्चामि वोहमिन्द्रो मरुत्वान्त्स ददातु तन्मे ॥

स्नुषाश्वशुरसंबन्धः

[11]ये सूर्यात् परि सर्पन्ति स्नुषेव श्वशुरादधि ॥

स्त्रीपुनर्विवाहलिङ्गम्

[12]या पूर्वं पतिं वित्त्वाथान्यं विन्दतेपरम् ।
पञ्चौदनं च तावजं ददातो न वि योषतः॥

(१) असं. ६।४२।१; आपगृ.८।२३।३; वैसू.१२।१३; कौसू.३६।२८; हिगृ.१।१५।३ ज्यामिव (धामिव).
(२) असं.६।४२।२-३. (३) असं.६।२५।१-३.
(४) असं.६।७८।१,३; आपगृ.२।६।१०.
(५) असं.६।८२।१-३. (६) असं.६।११२।१-३.
(१) असं.६।१९।१; तैब्रा.३।७।१२।५.
(२) असं.६।११३।२-३. (३) असं.६।११६।२-३.
(४) असं.६।१२२।१,११।१।१७,२७.
(५) असं.८।६।२४. (६) असं.९।५।२७-३०.

समानलोको भवति पुनर्भुवापरः पतिः।
योजं पञ्चौदनं दक्षिणाज्योतिषं ददाति ॥
अनुपूर्ववत्सां धेनुमनड्वाहमुपबर्हणम्।
वासो हिरण्यं दत्त्वा ते यन्ति दिवमुत्तमाम् ॥
आत्मानं पितरं पुत्रं पौत्रं पितामहम्।
जायां जनित्रीं मातरं ये प्रियास्तानुप ह्वये ॥

पत्युः पत्न्याश्च वयनरूप एक कर्म

तन्त्रमेके युवती विरूपे अभ्याक्रामं वयतः षण्मयूखम्। प्रान्या तन्तूंस्तिरते धत्ते अन्या नाप घ्नाते न गमातो अन्तम् ॥
तयोरहं परिनृत्यन्त्योरिव न वि जानामि यतरा परस्तात्। पुमानेनद् वयत्युद्गृणत्ति पुमानेनद् वि जभाराधि नाके ॥
इमे मयूखा उप तस्तभुर्दिवं सामानि चक्रुस्तसराणि वातवे ॥

ब्रह्मचारिण्या विवाहः

ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।

वरा. ज्येष्ठवरश्चेति वरप्रकारौ

यन्मन्युर्जायामावहत् संकल्पस्य गृहादधि।
क आसं जन्याः के वराः क उ ज्येष्ठवरोऽभवत् ॥
तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे।
त आसं जन्यास्ते वरा ब्रह्म ज्येष्ठवरोऽभवत् ॥

वर्णभरण वधूकर्म

सर्वे देवा उपाशिक्षन् तदजानाद् वधूः सती।
ईशा वशस्य या जाया सास्मिन् वर्णमाभरत् ॥

कन्यादानम्। वध्वः पतिगृहगमनम्। एकस्याः पतिद्वयम्। वध्वः वैवाहिकालङ्कारादीनि।

चित्तिरा उपबर्हणं चक्षुरा अभ्यञ्जनम्।
द्यौर्भूमिः कोश आसीद् यदयात् सूर्या पतिम् ॥
रैभ्यासीदनुदेयी नाराशंसी न्योचनी।
सूर्याया भद्रमिद् वासो गाथयैति परिष्कृता ॥

(१) असं.१०।७।४२-४४. (२) असं.११।७।१८.
(३) असं.११।१०।१,२. (४) असं.११।१०।१७.
(५) असं.१४।१।६; ऋसं.१०।८५।७; शागृ.१।१२।४.
(६) असं.१४।१।७; ऋसं.१०।८५।६; शागृ.१।१२।३.

स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः।
सूर्याया अश्विना वराग्निरासीत् पुरोगवः ॥
सोमो वधूयुरभवदश्विनास्तामुभा वरा।
सूर्यां यत् पत्ये शंसन्तीं मनसा सवितादात् ॥
मनो अस्या अन आसीद् द्यौरासीदुत च्छदिः।
शुक्रावनड्वाहावास्तां यदयात् सूर्या पतिम् ॥
ऋक्सामाभ्यामभिहितौ गावौ ते सामनावैताम्।
श्रोत्रे ते चक्रे आस्तां दिवि पन्थाश्चराचरः ॥
शुची ते चक्रे यात्या व्यानो अक्ष आहतः।
अनो मनस्मयं सूर्यारोहत् प्रयती पतिम् ॥
सूर्याया वहतुः प्रागात् सविता यमवासृजत्।
मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यते ॥
यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः। कैकं चक्रं वामासीत् क देष्ट्राय तस्थथुः ॥

पत्न्याः पतिनिष्ठा गृहे अन्यजनसबन्धश्च

युवं भगं सं भरतं समृद्धमृतं वदन्तावृतोद्येषु।
ब्रह्मणस्पते पतिमस्यै रोचय चारु संभलो वदतु वाचमेताम् ॥
इहेदसाथ न परो गमाथेमं गावः प्रजया वर्धयाथ।
शुभं यतीरुस्रियाः सोमवर्चसो विश्वे देवाः क्रन्निह वो मनांसि ॥
आशासाना सौमनसं प्रजां सौभाग्यं रयिम्।
पत्युरनुव्रता भूत्वा सं नह्यस्वामृताय कम् ॥
यथा सिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा।
एवा त्वं सम्राज्ञ्येधि पत्युरस्तं परेत्य ॥
सम्राज्ञ्येधि श्वशुरेषु सम्राज्ञ्युत देवृषु।
ननान्दुः सम्राज्ञ्येधि सम्राज्ञ्युत श्वश्र्वाः ॥

(१) असं.१४।१।८-१४; ऋसं.१०।८५।८-१५ सूर्या पतिम् (सूर्यां गृहम्) वैतां (वित.) मघासु (अघासु) फल्गुनीषु व्युह्यते (अर्जुन्योः पर्युह्यते).
(२) असं.१४।१।३१,३२.
(३) असं.१४।१।४२; तैसं.१।१।१०।१ पत्युरनु (अग्नेरनु); कासं.१।१० तैसंवत्; तैब्रा ३।३।३।२; आपश्रौ.२।५।२ पू.; माश्रौ १।२।५।१२; आपगृ.२।५।८; वैसू.२।६ पू.; कौसू.७६।७ पृ. (४) असं.१४।१।४३-४९,५१.

पत्न्यै वस्त्रदानम्

या अकृन्तन्नवयन् याश्च तत्निरे या देवीरन्ताँ अभितोददन्त । तास्त्वा जरसे सं व्ययन्त्वायुष्मतीदं परि धत्स्व वासः ॥

दीर्घायुष्य वध्व. प्रार्थ्यते

जीवं रुदन्ति वि नयन्त्यध्वरं दीर्घामनु प्रसितिं दीध्युर्नरः । वामं पितृभ्यो य इदं समीरिरे मयः पतिभ्यो जनये परिष्वजे ॥

स्योनं ध्रुवं प्रजायै धारयामि तेऽश्मानं देव्याः पृथिव्या उपस्थे । तमा तिष्ठानुमाद्या सुवर्चा दीर्घं त आयुः सविता कृणोतु ॥

पाणिग्रहणम् । धर्मपत्नीत्वम् । प्रजार्थं विवाहः ।

येनाग्निरस्या भूम्या हस्तं जग्राह दक्षिणम् । तेन गृह्णामि ते हस्तं मा व्यथिष्ठा मया सह प्रजया च धनेन च ॥

देवस्ते सविता हस्तं गृह्णातु सोमो राजा सुप्रजसं कृणोतु । अग्निः सुभगां जातवेदाः पत्ये पत्नीं जरदष्टिं कृणोतु ॥

भगस्ते हस्तमग्रहीत् सविता हस्तमग्रहीत् । पत्नी त्वमसि धर्मणाहं गृहपतिस्तव ॥

वध्वः वस्त्रधारणम् । पतिपत्नीसुबन्धः । गृहजनाविरोधित्वं पत्न्या आश्रास्यते । दम्पत्योर्भोग्यसंपत् । इष्टा देवरे प्रीतिः पत्न्या ।

प्रजार्थं विवाहः । आशिषः । अनिष्टनिवारणम् ।

ममेयमस्तु पोष्या मह्यं त्वादाद् बृहस्पतिः । मया पत्या प्रजावति सं जीव शरदः शतम् ॥

त्वष्टा वासो व्यदधाच्छुभे कं बृहस्पतेः प्रशिषा कवीनाम् । तेनेमां नारीं सविता भगश्च सूर्यामिव परि धत्तां प्रजया ॥

इन्द्राग्नी द्यावापृथिवी मातरिश्वा मित्रावरुणा भगो अश्विनोभा । बृहस्पतिर्मरुतो ब्रह्म सोम इमां नारीं प्रजया वर्धयन्तु ॥

बृहस्पतिः प्रथमः सूर्यायाः शीर्षे केशाँ अकल्पयत् । तेनेमामश्विना नारीं पत्ये सं शोभयामसि ॥

इदं तदूपं यदवस्त योषा जायां जिज्ञासे मनसा चरन्तीम् । तामन्वर्तिष्ये सखिभिर्नवग्वैः क इमान् विद्वान् वि चचर्त पाशान् ।

अहं वि ष्यामि मयि रूपमस्या वेददित् पश्यन् मनसः कुलायम् । न स्तेयमद्मि मनसोदमुच्ये स्वयं श्रथानो वरुणस्य पाशान् ॥

प्र त्वा मुञ्चामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवाः । उरुं लोकं सुगमत्र पन्थां कृणोमि तुभ्यं सहपत्न्यै वधु ॥

उद्यच्छध्वमप रक्षो हनाथेमां नारीं सुकृते दधात । धाता विपश्चित् पतिमस्यै विवेद भगो राजा पुर एतु प्रजानन् ॥

भगस्ततक्ष चतुरः पादान् भगस्ततक्ष चत्वार्युष्पलानि । त्वष्टा पिपेश मध्यतोनु वर्ध्रान्त्सा नो अस्तु सुमङ्गली ॥

सुकिंशुकं वहतुं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् । आ रोह सूर्ये अमृतस्य लोकं स्योनं पतिभ्यो वहतुं कृणु त्वम् ॥

अभ्रातृघ्नीं वरुणापशुघ्नीं बृहस्पते । इन्द्रापतिघ्नीं पुत्रिणीमास्मभ्यं सवितर्वह ॥

मा हिंसिष्टं कुमार्यं स्थूणे देवकृते पथि । शालाया देव्या द्वारं स्योनं कृण्मो वधूपथम् ॥

ब्रह्मापरं युज्यतां ब्रह्मपूर्वं ब्रह्मान्ततो मध्यतो ब्रह्म सर्वतः । अनाव्याधां देवपुरां प्रपद्य शिवा स्योना पतिलोके वि राज ॥

तुभ्यमग्रे पर्यवहन्त्सूर्या वहतुना सह । स नः पतिभ्यो जायां दा अग्ने प्रजया सह ॥

पुनः पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥

सोमस्य जाया प्रथमं गन्धर्वस्तेपरः पतिः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥

सोमो ददद् गन्धर्वाय गन्धर्वो दददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥

आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अरंसत । अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याꣳ अशीमहि ॥

(१) असं.१४।१।५२-६४.

(१) असं.१४।२।१-७५.

मा मन्यमाना मनसा शिवेन रथि धेहि सर्ववीरँ
चचस्यम् । सुग तीर्थ सुप्रपाण शुभस्पती स्थाणुं
पथिष्ठामप दुर्मतिं हतम् ॥

या ओषधयो या नद्यो यानि क्षेत्राणि या वना ।
तास्त्वा वधु प्रजावतीं पत्ये रक्षन्तु रक्षसः ॥
एमं पन्थामरुक्षाम सुगं स्वस्तिवाहनम् ।
यस्मिन् वीरो न रिष्यत्यन्येषां विन्दते वसु ॥
इदं सु मे नरः शृणुत ययाशिषा दम्पती वाममश्नुतः । ये गन्धर्वा अप्सरसश्च देवीरेषु वानस्पत्येषु
येधि तस्थुः । स्योनास्ते अस्यै वध्वै भवन्तु मा
हिंसिषुर्वहतुमुद्यमानम् ॥

ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनाँ अनु ।
पुनस्तान् यज्ञिया देवा नयन्तु यत आगताः ॥
मा विदन् परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेन दुर्गमतीतामप द्रान्त्वरातयः ॥
सं काशयामि वहतुं ब्रह्मणा गृहैरघोरेण चक्षुषा
मित्रियेण । पर्याणद्धं विश्वरूपं यदस्ति स्योनं
पतिभ्यः सविता तत् कृणोतु ॥

शिवा नारीयमस्तमागन्निमं धाता लोकमस्यै
दिदेश । तामर्यमा भगो अश्विनोभा प्रजापतिः
प्रजया वर्धयन्तु ॥

आत्मन्वत्युर्वरा नारीयमागन् तस्यां नरो वपत
बीजमस्याम् । सा वः प्रजां जनयद् वक्षणाभ्यो
विभ्रती दुग्धमृषभस्य रेतः ॥

प्रति तिष्ठ विराडसि विष्णुरिवेह सरस्वति ।
सिनीवालि प्र जायतां भगस्य सुमतावसत् ॥
उद् व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत ।
मादुष्कृतौ व्येनसावघ्न्यावशुनमारताम् ॥

अघोरचक्षुरपतिघ्नी स्योना शग्मा सुशेवा सुयमा
गृहेभ्यः । वीरसूर्देवृकामा सं त्वयैधिषीमहि
सुमनस्यमाना ॥

अदेवृघ्न्यपतिघ्नीहैधि शिवा पशुभ्यः सुयमा
सुवर्चाः । प्रजावती वीरसूर्देवृकामा स्योनेममग्निं
गार्हपत्यं सपर्य ॥

उत्तिष्ठतः किमिच्छन्तीदमागा अहं त्वेडे अभिभूः
स्वाद् गृहात् । शून्यैषी निर्ऋते याजगन्धोत्तिष्ठाराते
प्र पत मेह रंस्थाः ॥

यदा गार्हपत्यमसपर्यैत् पूर्वमग्निं वधूरियम् ।
अधा सरस्वत्यै नारि पितृभ्यश्च नमस्कुरु ॥
शर्म वर्मैतदा हरास्यै नार्या उपस्तरे ।
सिनीवालि प्र जायतां भगस्य सुमतावसत् ॥
यं बल्बजं न्यस्थ चर्म चोपस्तृणीथन ।
तदा रोहतु सुप्रजा या कन्या विन्दते पतिम् ॥
उप स्तृणीहि बल्बजमधि चर्मणि रोहिते ।
तत्रोपविश्य सुप्रजा इममग्निं सपर्यतु ॥

आ रोह चर्मोप सीदाग्निमेष देवो हन्ति रक्षांसि सर्वा । इह प्रजां जनय पत्ये अस्मै सुज्यैष्ठयो
भवन् पुत्रस्त एषः ॥

वि तिष्ठन्तां मातुरस्या उपस्थान्नानारूपा पशवो जायमानाः । सुमङ्गल्युप सीदेममग्निं संपत्नी
प्रति भूषेह देवान् ॥

सुमङ्गली प्रतरणी गृहाणां सुशेवा पत्ये श्वशुराय
शम्भूः । स्योना श्वश्रूभ्यै प्र गृहान् विशेमान् ॥
स्योना भव श्वशुरेभ्यः स्योना पत्ये गृहेभ्यः ।
स्योनास्यै सर्वस्यै विशे स्योना पुष्टायैषां भव ॥
सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्त्वा दौर्भाग्यैर्विपरेतन ॥
या दुर्हार्दो युवतयो याश्चेह जरतीरपि ।
वर्चो न्वस्यै सं दत्ताथास्तं विपरेतन ॥
रुक्मप्रस्तरणं वह्निं विश्वा रूपाणि बिभ्रतम् ।
आरोहत् सूर्या सावित्री बृहते सौभगाय कम् ॥

आ रोह तल्पं सुमनस्यमानेह प्रजां जनय पत्ये अस्मै । इन्द्राणीव सुबुधा बुध्यमाना ज्योतिरग्रा
उषसः प्रति जागरासि ॥

देवा अग्रे न्यपद्यन्त पत्नीः समस्पृशन्त तन्वस्तनूभिः । सूर्येव नारि विश्वरूपा महित्वा प्रजावती
पत्या सं भवेह ॥

उत्तिष्ठेतो विश्वावसो नमसेडामहे त्वा । जामिमिच्छ पितृषदं न्यक्तां स ते भागो जनुषा तस्य
विद्धि ॥

अप्सरसः सधमादं मदन्ति हविर्धानमन्तरा

सूर्यं च । तास्ते जनित्रमभि ताः परेहि नमस्ते गन्धर्वर्तुना कृणोमि ॥

नमो गन्धर्वस्य नमसे नमो भामाय चक्षुषे च कृण्मः । विश्वावसो ब्रह्मणा ते नमोभि जाया अप्सरसः परेहि ॥

राया वयं सुमनसः स्यामोदितो गन्धर्वमावीवृताम । अगन्त्स देवः परमं सधस्थमगन्म यत्र प्रतिरन्त आयुः ॥

सं पितरावृत्विये सृजेथां माता पिता च रेतसो भवाथः । मर्य इव योषामधिरोहयैनां प्रजां कृण्वाथामिह पुष्यतं रयिम् ॥

आ रोहोरुमुप धत्स्व हस्तं परि ष्वजस्व जायां सुमनस्यमानः । प्रजां कृण्वाथामिह मोदमानौ दीर्घं वामायुः सविता कृणोतु ॥

आ वां प्रजां जनयतु प्रजापतिरहोरात्राभ्यां समनक्त्वर्यमा । अदुर्मङ्गली पतिलोकमा विशेमं शं नो भव द्विपदे शं चतुष्पदे ॥

देवैर्दत्तं मनुना साकमेतद् वाधूयं वासो वध्वश्च वस्त्रम् । यो ब्रह्मणे चिकितुषे ददाति स इद् रक्षांसि तल्पानि हन्ति ॥

यं मे दत्तो ब्रह्मभागं वधूयोर्वाधूयं वासो वध्वश्च वस्त्रम् । युवं ब्रह्मणेनुमन्यमानौ बृहस्पते साकमिन्द्रश्च दत्तम् ॥

स्योनाद्योनेरधि बुध्यमानौ हसामुदौ महसा मोदमानौ । सुगू सुपुत्रौ सुगृहौ तराथो जीवावुषसो विभातीः ॥

नवं वसानः सुरभिः सुवासा उदागां जीव उषसो विभातीः । आण्डात् पतत्रीवामुक्षि विश्वस्मादेनसस्परि ॥

शुम्भनी द्यावापृथिवी अन्तिसुम्ने महिव्रते । आपः सप्त सुस्रुवुर्देवीस्ता नो मुञ्चन्त्वंहसः ॥

सूर्यायै देवेभ्यो मित्राय वरुणाय च । ये भूतस्य प्रचेतसस्तेभ्य इदमकरं नमः ॥

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः । संधाता संधिं मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः ॥

अपास्मत् तम उच्छतु नीलं पिशङ्गमुत लोहितं यत् । निर्दहनी या पृषातक्यस्मिन् तां स्थाणावध्या सजामि ॥

यावतीः कृत्या उपवासने यावन्तो राज्ञो वरुणस्य पाशाः । व्यृद्धयो याः असमृद्धयो या अस्मिन् ता स्थाणावधि सादयामि ॥

या मे प्रियतमा तनूः सा मे विभाय वाससः । तस्याग्रे त्वं वनस्पते नीविं कृणुष्व मा वयं रिषाम ॥

ये अन्ता यावतीः सिचो य ओतवो ये च तन्तवः । वासो यत् पत्नीभिरुतं तन्नः स्योनमुप स्पृशात् ॥

उशतीः कन्यला इमाः पितृलोकात् पतिं यतीः । अव दीक्षामसृक्षत स्वाहा ॥

बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । वर्चो गोषु प्रविष्टं यत् तेनेमां सं सृजामसि ॥

बृहस्पतिना० ।

तेजो गोषु प्रविष्टं यत् तेन० ॥

बृहस्पतिना० ।

भगो गोषु प्रविष्टो यस्तेन० ॥

बृहस्पतिना० ।

यशो गोषु प्रविष्टं यत् तेन० ॥

बृहस्पतिना० ।

पयो गोषु प्रविष्टं यत् तेन० ॥

बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । रसो गोषु प्रविष्टो यस्तेनेमां सं सृजामसि ॥

यदीमे केशिनो जना गृहे ते समनर्तिषु रोदेन कृण्वन्तोघम् । अग्निष्ट्वा तस्मादेनसः सविता च प्र मुञ्चताम् ॥

यदीयं दुहिता तव विकेश्यरुदद् गृहे रोदेन कृण्वत्यघम् । अग्निष्ट्वा० ॥

यज्जामयो यद्युवतयो गृहे ते समनर्तिषु रोदेन कृण्वतीरघम् । अग्निष्ट्वा० ॥

यत् ते प्रजायां पशुषु यद्वा गृहेषु निष्ठितमघकृद्भिरयं कृतम् । अग्निष्ट्वा तस्मादेनसः सविता च प्र मुञ्चताम् ॥

इयं नार्युप ब्रूते पूल्यान्यावपन्तिका ।
दीर्घायुरस्तु मे पतिर्जीवाति शरदः शतम् ॥
इहेमाविन्द्र सं नुद चक्रवाकेव दम्पती ।
प्रजयैनौ स्वस्तकौ विश्वमायुर्व्यश्नुताम् ॥
यदासन्ध्यामुपधाने यद् वोपवासने कृतम् ।
विवाहे कृत्यां यां चक्रुरग्नाने तां नि दध्मसि ॥
यद् दुष्कृतं यच्छमलं विवाहे वहतौ च यत् ।
तत् संभलस्य कम्बले मृज्महे दुरितं वयम् ॥
संभले मलं सादयित्वा कम्बले दुरितं वयम् ।
अभूम यज्ञियाः शुद्धाः प्र ण आयूंषि तारिषत् ॥
कृत्रिमः कण्टकः शतदन् य एषः ।
अपास्याः केश्यं मलमप शीर्षण्यं लिखात् ॥
अङ्गादङ्गाद् वयमस्या अप यक्ष्मं नि दध्मसि ।
तन्मा प्रापत् पृथिवीं मोत देवान् दिवं मा प्रापदुर्वन्तरिक्षम् । अपो मा प्रापन्मलमेतद्रप्रे यमं मा प्रापत् पितॄंश्च सर्वान् ॥
सं त्वा नह्यामि पयसा पृथिव्याः सं त्वा नह्यामि पयसौषधीनाम् । सं त्वा नह्यामि प्रजया धनेन सा संनद्धा सनुहि वाजमेमम् ॥
अमोहमस्मि सा त्वं सामाहमस्म्यृक्त्वं द्यौरहं पृथिवी त्वम् । तावेह सं भवाव प्रजामा जनयावहै ॥
जनयन्ति नावग्रवः पुत्रियन्ति सुदानवः ।
अरिष्टासू सचेवहि बृहते वाजसातये ॥
ये पितरो वधूदर्शा इमं वहतुमागमन् ।
ते अस्यै वध्वै संपत्न्यै प्रजावच्छर्म यच्छन्तु ॥
येदं पूर्वागन् रशनायमाना प्रजामस्यै द्रविणं चेह दत्त्वा । तां वहन्त्वगतस्यानु पन्थां विराडियं सुप्रजा अत्यजैषीत् ॥
प्र बुध्यस्व सुबुधा बुध्यमाना दीर्घायुत्वाय शतशारदाय । गृहान् गच्छ गृहपत्नी यथा सो दीर्घं त आयुः सविता कृणोतु ॥

सापिण्ड्यविवाहदोषः

दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद् विषुरूपा भवाति । यमस्य यो मनवते सुमन्त्वग्ने तमृष्व पाह्यप्रयुच्छन् ॥

कन्यादानम् । सवर्णाविवाहः ।

त्वष्टा दुहित्रे वहतुं कृणोति तेनेदं विश्वं भुवनं समेति । यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥
अपागूहन्नमृतां मर्त्येभ्यः कृत्वा सवर्णामदधुर्विवस्वते । उताश्विनावभरद् यत् तदासीदजहादु द्वा मिथुना सरण्यूः ॥

अनुगमनम्

इयं नारी पतिलोकं वृणाना नि पद्यत उप त्वा मर्त्य प्रेतम् । धर्मं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि ॥

अनुगमननिषेधः

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि । हस्तग्राभस्य दधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥

भार्यायां वस्त्रसंपत्

अनग्नंभावुका ह होतुश्च यजमानस्य च भार्या भवन्ति यत्रैवं विद्वानेतया हविर्धानयोः संपरिश्रितयोः परिदधाति ।

अनग्नंभावुका आच्छादनबाहुल्यसंपत्त्या नग्नत्वरहिताः । ऐत्रासा.

राज्ञः वावाता जाया । रात्रौ जायाः पत्युराकूतं जानन्ति ।

ते देवा अब्रुवन्नियं वा इन्द्रस्य प्रिया जाया वावाता प्रासहा नामास्यामेवेच्छामहा इति तथेति तस्यामैच्छन्त सैनानब्रवीत्प्रातर्वः प्रतिवक्तास्मीति

(१) असं.३।३१।५,१८।१।५३; ऋसं.१०।१७।१ ति तेनेदं (तीतीदं); नि.१२।११.
(२) असं.१८।२।३३; ऋसं.१०।१७।१ कृत्वा (कृत्वी) दधु (ददु); नि.१२।१०.
(३) असं.१८।३।१; तैआ.६।१।३.
(४) असं.१८।३।२; ऋसं.१०।१८।८; तैआ.६।१।३; आगृ.४।२।१८; शाश्रौ.१६।१३।११; वैसू.३८।१; कौसू.८०।४५; ऋविं.३।८।४.
(५) ऐब्रा.५।३. (६) ऐब्रा.१२।११.

(१) असं.१८।१।३४; ऋसं.१०।१२।६.

मात्मिश्रयः पत्यावित्रच्छन्ते तस्मादु स्त्रयनुरात्रं पावित्रच्छते ।

इयं वै पुरतो दृश्यमानैवेन्द्रस्य प्रिया जाया सा ाता मध्यमजातीया । राज्ञां हि त्रिविधाः स्त्रियस्त-तमजातेर्महिषीति नाम । मध्यमजातेर्वावातेति । ामजातेः परिवृक्तिरिति । तस्याश्च वावातायाः प्रास-ा नाम राजप्रियत्वात् । रात्रौ राजामिप्रायं विचार-ु शक्यत्वात्परेद्युः प्रातःकाले यो युष्माक प्रत्युत्तरं तास्मि वक्ष्यामीति । यस्मादेव तस्माल्लोकेऽपि प्रियाः यः सर्वमवगन्तव्य वृत्तान्त पत्यावगन्तुमिच्छन्ते । माद्विविक्तावसरे सर्वमवगन्तु सुशकं तस्मादु तस्मा-ा कारणात्प्रिया स्त्री, अनुरात्रं रात्रिसमये विविक्त-ायां पत्यौ सर्वमवगन्तुमिच्छते । ऐत्रासा. ोना वा इन्द्रस्य प्रिया जाया वावाता प्रासहा म ।

स्नुषाश्वशुरसंबन्धः

स्नुषा श्वशुराल्लज्जमाना निलीयमानैति ।

अप्रतिवादिनी पत्नी

अप्रतिवादिनी ह्यस्य गृहेषु पत्नी भवति ।

पत्न्याः स्वसपेक्षया श्रैष्ठ्यम्

देवानां पत्नीः शंसत्यनूचीरग्नि गृहपति ास्मादनूची पत्नी गार्हपत्यमास्ते ।

ादाहू राकां पूर्वां शंसेज्जाम्यै वै पूर्वपेयमिति । ात्तस्माऽऽदृत्यं देवानामेव पत्नीः पूर्वाः ंसेदेष ह वा एतत्पत्नीषु रेतो दधाति ादग्निर्गार्हपत्योऽग्निनैवाऽऽसु तद्गार्हपत्येन पत्नीषु त्यक्षाद्रेतो दधाति प्रजात्यै ।

ाजायते प्रजया पशुभिर्य एवं वेद ।

ास्मात्समानोदर्या स्वसाऽन्योदर्यायै । जायाया नुजीविनी जीवति ।

अनेकजायापतिरेकः

ारिश्चन्द्रो ह वैधस ऐक्ष्वाको राजाऽपुत्र आस य ह शतं जाया बभूवुः ।

जायानिरुक्तिः

अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः । सखा ह जाया कृपणं ह दुहित्रा ज्योतिर्ह पुत्रः परमे व्योमन् ।

पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम् ।
तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ।
तज्जाया जाया भवति यदस्यां जायते पुनः ।
आभूतिरेषा भूतिर्बीजमेतन्निधीयते ।
देवाश्चैतामृषयश्च तेजः समभरन्महत् ।
देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः ॥

सुपत्नी

नितरां परिधानीयां शंसेत्तथा ह पत्न्यप्रच्या-वुका भवत्यनुदायिततरां तथा ह पत्न्यनुद्धृतमना इव भवति ।

पत्नीभोजनकालः । यज्ञानर्हाः पत्न्यः । अनेकजायापतिरेकः ।

अन्तभाजो वै पत्न्यः ।

अयज्ञिया वै पत्न्यो बहिर्वेदि हि ताः ।

आपो वरुणस्य पत्नय आसन् । ता अग्निरभ्य-ध्यायत् । ताः समभवन् । तस्य रेतः पराऽपतत् । तद्धिरण्यमभवत् ।

इन्द्रियं वै सोमपीथः । इन्द्रियमेव सोमपीथम-वरुन्धे । तेनेन्द्रियेण द्वितीयां जायामभ्यश्नुते ।

एतद्वै ब्राह्मणं पुरा वाजश्रवसा विदामक्रन् । तस्मात्ते द्वे द्वे जाये अभ्याक्षत । य एवं वेद । अभि द्वितीयां जायामश्नुते ।

पूर्वो दुह्याज्ज्येष्ठस्य ज्यैष्ठिनेयस्य । यो वाऽऽगत-श्रीः स्यात् । अपरो दुह्यात्कनिष्ठस्य कानिष्ठिनेयस्य । यो वा बुभूषेत् ।

इन्द्रं दुरः कवष्यो धावमानाः । वृषाणं यन्तु जनयः सुपत्नीः । द्वारो देवीरभितो विश्रयन्ताम् । सुवीरा वीरं प्रथमाना महोभिः ।

(१) ऐब्रा.३३।१. (२) शाब्रा.१५।४. (३) शाब्रा.१६।७. (४) शाब्रा.२७।४. (५) तैब्रा.१।१।३।८. (६) तैब्रा.१।३।१०।२,३. (७) तैब्रा.२।१।८।१. (८) तैब्रा.२।६।८।२.

(१) ऐब्रा.१२।११. (२) ऐब्रा.१२।११. (३) ऐब्रा. ।१३. (४) ऐब्रा.१३।१३. (५) ऐब्रा.३३।१

[1]तिस्रो देवीर्हविषा वर्धमानाः। इन्द्रं जुषाणा वृषणं न पत्नीः । अच्छिन्नं तन्तुं पयसा सरस्वती। इडा देवी भारती विश्वमूर्तिः ।

[2]भूरिति महिषी। भुव इति वावाता। सुवरिति परिवृक्ती। एषां लोकानामभिजित्यै ।

[3]पत्नयोऽभ्यक्षन्ति । श्रिया वा एतद्रूपम् । यत्पत्नयः । श्रियमेवास्मिन्तद्दधति ।

सुभगाः स्त्रियः

[4]धेनुः शिखण्डा युवतिः सुपेशाः । घृतप्रतीका भुवनस्य मध्ये। मर्मृज्यमाना महते सौभगाय। मह्यं धुक्ष्व यजमानाय कामान् ।

पतिप्रीतिकामना

[5]यां कामयेत दुहितरं प्रिया स्यादिति। तां निष्टपायां दध्यात्। प्रियैव भवति। नैव तु पुनरागच्छति।

यज्ञे पत्न्या जारो निर्देष्टव्यः

[6]पत्नीं वाचयति । मेध्यामेवैनां करोति । अथो तप एवैनामुप नयति। यज्जारꣳ सन्तं न ब्रूयात्। प्रियं ज्ञातिꣳ रुन्ध्यात्। असौ मे जार इति निर्दिशेत्। निर्दिश्यैवैनं वरुणपाशेन ग्राहयति ।

अपत्नीको यज्ञानर्हः

[7]अयज्ञो वा एषः । योऽपत्नीकः । न प्रजाः प्रजायेरन् ।

पतिवशीकरणम्

[8]प्रजापतिः सोमꣳ राजानमसृजत । तं त्रयो वेदा अन्वसृज्यन्त । तान् हस्तेऽकुरुत । अथ ह सीता सावित्री। सोमꣳ राजानं चकमे । श्रद्धामु स चकमे। सा ह पितरं प्रजापतिमुपससार । तꣳ होवाच। नमस्ते अस्तु भगवः। उप त्वाऽयानि। प्र त्वा पद्ये। सोमं वै राजानं कामये। श्रद्धामु स कामयत इति । तस्या उ ह स्थागरमलङ्कारं कल्पयित्वा। दशहोतारं पुरस्ताद्व्याख्याय । चतुर्होतारं दक्षिणतः। पञ्चहोतारं पश्चात् । षड्ढोतारमुत्तरतः। सप्तहोतारमुपरिष्टात्। संभारैश्च पत्निभिश्च मुखेऽलंकृत्य। आऽस्यार्धं वव्राज। ताꣳ होदीक्ष्योवाच। उप मा वर्तस्वेति। तꣳ होवाच । भोगं तु म आचक्ष्व । एतन्म आचक्ष्व । यत्ते पाणाविति। तस्या उ ह त्रीन्वेदान्प्रददौ । तस्मादु ह स्त्रियो भोगमव हारयन्ते ।

दैवविवाहः । स्त्रीसंभोगः अन्ये गुणाश्च काम्यन्ते।

[9]संकृतिमिन्द्र सक्युतिम्। सक्युतिं जघनक्युतिम्। कनात्काभां न आभर । प्रयप्स्वमिव सक्थ्यौ ।

वि न इन्द्र मृधो जहि। कनीखुनदिव सापयन्। अभि नः सुष्टुतिं नय । प्रजापतिः स्त्रियां यशः। मुष्कयोरदधात्सपम्। कामस्य तृप्तिमानन्दम् । तस्याग्ने भाजयेह मा । मोदः प्रमोद आनन्दः। मुष्कयोर्निहितः सपः । सृत्वेव कामस्य तृप्याणि। दक्षिणानां प्रतिग्रहे ।

मनसश्चित्तमाकूतिम्। वाचः सत्यमशीमहि। पशूनाꣳ रूपमन्नस्य । यशः श्रीः श्रयतां मयि । यथाऽहमस्या अतृपꣳ स्त्रियै पुमान् । यथा स्त्री तृप्यति पुꣳसि प्रिये प्रिया। एवं भगस्य तृप्याणि। यज्ञस्य काम्यः प्रियः। ददामीत्यग्निर्वदति । तथेति वायुराह तत्। हन्तेति सत्यं चन्द्रमाः । आदित्यः सत्यमोमिति । आपस्तत्सत्यमाभरन्। यशो यज्ञस्य दक्षिणाम्। असौ मे कामः समृध्यताम् ।

प्रजापतिरित्यादिमन्त्रषट्कस्य कन्याप्रतिग्रहे विनियोगमाह बौधायनः—'अथ यदि दक्षिणाभिः सह दत्ता स्यान्नात्र वरान् प्रहिणुयात्तां प्रतिगृह्णीयात्प्रजापतिः स्त्रियां यश इत्येताभिः षड्भिरनुच्छन्दसम्' इति। 'आपस्तम्बमतानुसारिणस्तु वध्वोः शिरसि तण्डुलप्रक्षेपे विनियोगमाहुः । तैत्रासा.

सुपत्नी

[10]अस्य स्नुषा श्वशुरस्य प्रशिष्टिम्। सपत्ना वाचं

(१) तैब्रा.२।६।८।३,४. (२) तैब्रा.३।९।४।५.
(३) तैब्रा.३।९।४।८. (४) तैब्रा.१।२।१।२७.
(५) तैब्रा.१।५।२।३. (६) तैब्रा.१।६।५।२.
(७) तैब्रा.२।२।२।६,३।३।३।१.
(८) तैब्रा.२।३।१०।१-३.

(१) तैब्रा.२।४।६।४-७. (२) तैब्रा.२।४।६।१२.

नसा उपासताम्। स्नुषा सपत्नाः श्वशुरो-
यमस्तु।
सं जास्पत्यँ सुयममाकृणुष्व।
अर्धो वा एष आत्मनः यत् पत्नी।
यथा ह वै योषा सुवर्णं हिरण्यं पेशलं बिभ्रती
पाण्यास्ते।
स्त्रियै चाभारꣳ समृध्यै।
इन्द्राणीवाविधवा भूयासम्। अदितिरिव सुपुत्रा।
रस्थूरि त्वा गार्हपत्य। उपनिषदे सुप्रजास्त्वाय।
सं पत्नी पत्या सुकृतेन गच्छताम्। यज्ञस्य
कृतौ धूर्यावभूताम्। संजानानौ विजहतामरातीः।
दिवि ज्योतिरजरमारभेताम्।

जायाया यज्ञाङ्गत्वम्। स्त्रीणामबलत्वम्।

तद्ध स्मैतत्पुरा जायैव हविष्कृदुपोत्तिष्ठति।
यद्यपि बहव्य इव स्त्रियः सार्धं यन्ति य एव
स्त्रियपि कुमारक इव पुमान् भवति स एव तत्र
प्रथम एत्यनूच्य इतराः।
जघनार्धो वाऽएष यज्ञस्य यत्पत्नी।
अस्ति वै पत्न्या अमेध्यं यदवाचीनं नाभेः।

नान्तर्वेद्यासादयेदतो वै देवानां पत्नीः संया-
यन्त्यवसभा अह देवानां पत्नीः करोति परः
पुꣳ सो ह्यस्य पत्नी भवतीति तदु होवाच याज्ञ-
वल्क्यो यथादिष्टं पत्न्या अस्तु कस्तदाद्रियेत
यत्परः पुꣳ सा वा पत्नी स्याद्यथा वा यज्ञो
वादिर्यज्ञ आज्यं यज्ञायज्ञं निर्मिमाऽइति तस्माद-
न्तर्वेद्येवासादयेत्।

मनोः स्वदुहित्रा विवाहः

तौꣳ ह मनुरुवाच कासीति। तव दुहितेति
कथं भगवति मम दुहितेति या अमूरप्स्वाहुतीर-
हौषीर्घृतं दधि मस्त्वामिक्षां ततो मामजीजनथाः
साशीरस्मि। तयार्चछ्रान्त्यश्चार प्रजाकामः।
तयेमां प्रजातिं प्रजज्ञे येयं मनोः प्रजातिर्याम्वेनया
कां चाशिषमाशास्त सास्मै सर्वा समार्ध्यत।

सापिण्ड्ये विवाहः

तद्वाऽएतत्। समानऽएव कर्मन्व्याक्रियते
तस्मादु समानादेव पुरुषादत्ता चाद्यश्च जायेतेऽ
इद्ꣳ हि चतुर्थे पुरुषे तृतीये संगच्छामहऽइति
विदेवं दीव्यमाना जात्या आसतऽएतस्मादु तत्*।

यस्मादेतत्समाने अभिन्ने व्यूहनकर्मणि विलक्षण-
माक्रियतेऽभिव्यज्यते भोक्तृत्व भोग्यत्व च तस्माद्य-
ज्ञानुकारेण भूतेष्वपि समानादभिन्नात्पुरुषात् भोक्ता
पतिः भोग्यश्च भार्या जायते। यथा समाने कर्मणि
जुहूपभृतौ। इद हि अधुनापि जात्या (समा)न
जातीयाः दीव्यमाना रममाणाः परितुष्टान्तःकरणाः
नाकार्यकरिण इवा परिप्लुना आसते कथं दीव्यमानाः।
विदेवम्। दिवेर्व्यवहारार्थस्य अन्योऽन्य भोक्तारो
भोग्यैः सह भोग्या भोक्तृभिः सह दीव्यामहे व्यवहृत्य
व्यवहृत्य (?)। इदं प्रत्यक्षमेव विवाहेन वय संगच्छा-
महे, एकस्मादेव पुरुषान्मूलभूतादुत्पद्य पुनरेककुटुम्बा-
रम्भेण समानापत्यारम्भेण च सयुज्यामहे इति भर्तृणा
योषिता चाभिमात्रवचनम्। एव व्यवहार दीव्यमाना
आसतेऽथ के पुनः संगच्छामहऽइत्याहुः किमनन्तर
एव पुरुषे नेत्याह चतुर्थे तृतीये वा, वाशब्दोऽत्र
लुप्तनिर्दिष्टो द्रष्टव्यः। चतुर्थे संगच्छामहऽइति
सौराष्ट्राणा व्यवहारः तृतीये सगच्छामहऽइति दाक्षिणा-
त्याना ते हि मातुलदुहितृषु पितृष्वसृपुत्रेषु संगच्छन्ते।

हरिस्वामिभाष्यम्

पुरुषसनिधौ न स्त्रीणां भोजनम्

स यत्र देवानां पत्नीर्यजति। तत्पुरस्तात्तिरः

(१) तैब्रा.२।४।१।१,२।५।२।४.
(२) तैब्रा.३।३।३।५. (३) तैब्रा.३।३।४।५.
(४) तैब्रा.३।१।२।२।९. (५) तैब्रा.३।७।५।१०,११.
(६) शब्रा.१।१।४।१३. (७) शब्रा.१।३।१।९.
(८) शब्रा.१।३।१।१२,२।५।२।२९,५।२।१।८.
(९) शब्रा.१।३।१।१३,५।२।१।८.
(१०) शब्रा.१।३।१।२१. (११) शब्रा.१।८।१।९,१०.

* तस्मात्समानादेव पुरुषादत्ता चाद्यश्च जायेत उत हि
तृतीये(यु) पुरुषे सगच्छामहे चतुर्थे सगच्छामह इति विदेयं
दीव्यमाना आसते जातीया अस्य रम इति।

काण्वशतपथब्राह्मणम्

(१) शब्रा.१।८।३।६. (२) शब्रा.१।९।२।१२.

करोत्युप ह वै तावद्देवता आसते यावन्न समिष्टयजुर्जुहूतीदं नु नो जुह्वत्विति ताभ्य एवैतत्तिरः करोति तस्मादिमा मानुष्य स्त्रियस्तिर इवैव पुरुसो जिघत्मन्ति या इव तु ता इवेति ह स्माह याज्ञवल्क्यः ।

दम्पतीसंबन्धः

पतिं वाऽअनु जाया ।

अथ यस्मान्न कृत्तिकास्वादधीत । ऽक्षाणाꣳ ह वाऽएता अग्रे पत्न्य आसुः सप्तऽर्षीनु ह स्म वै पुरऽक्षा इत्याचक्षते ता मिथुनेन व्यार्ध्यन्तामी त्वेवोत्तराहि सप्तऽर्षय उद्यन्ति पुर एता अशमिव वै तद्यो मिथुनेन व्यृद्धः स नेन्मिथुनेन व्यृध्याऽइति तस्मान्न कृत्तिकास्वादधीत ।

यज्ञे पत्न्या जारो निदेष्टव्यः

अथ प्रतिप्रस्थाता प्रतिपरैति । स पत्नीमुदानेष्यन्पृच्छति केन चरसीति वरुण्यं वाऽएतत्स्त्री करोति यदन्यस्य सत्यन्येन चरत्यथो नेन्मेऽन्तः-शल्पा जुहवदिति तस्मात्पृच्छति निरुक्तं वाऽएनः कनीयो भवति सत्यꣳ हि भवति तस्माद्वेव पृच्छति सा यन्न प्रतिजानीत ज्ञातिभ्यो हास्यै तदहितꣳ स्यात् ।

विवाहानन्तर पतिगृहानिवृत्तिः कथ्यते

तदु हापि कुमार्यः परीयुः । भगस्य भजामहाऽ इति या ह वै सा रुद्रस्य स्वसाम्बिका नाम सा ह वै भगस्येष्टे तस्मादु हापि कुमार्यः परीयुर्भगस्य भजामहाऽइति । तासामुतासां मन्त्रोऽस्ति । त्र्यम्बकं यजामहे सुगन्धि पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुत इति सा यदित इत्याह ज्ञातिभ्यस्तदाह मामुत इति पतिभ्यस्तदाह पतयो ह्येव स्त्रियै प्रतिष्ठा तस्मादाह मामुत इति ।

यावज्जीव पितृदत्तपतेरत्यागो धर्मः

तौ (अश्विनौ) होचतुः । सुकन्ये कमिमं जीर्णि कृत्यारूप मुपशेषऽआवामनुप्रेहीति सा होवाच यस्मै मां पितादात्रेवाहं तं जीवन्तꣳ हास्यामीति तद्वायमृषिराजह्नौ ।

आत्मनोऽर्धं जाया । सुपत्नी । प्रजायै जाया ।

स रोक्ष्यन् जायामामन्त्रयते । जायऽएहि स्वो रोहावेति रोहावेत्याह जाया तद्यज्जायामामन्त्रयतेऽर्धो ह वाऽएष आत्मनो यज्जाया तस्माद्यावज्जायां न विन्दते नैव तावत्प्रजायतेऽसर्वो हि तावद्भवत्यथ यदैव जायां विन्दतेऽथ प्रजायते तर्हि हि सर्वो भवति सर्व एतां गति गच्छानीति तस्माज्जायामामन्त्रयते ।

या वा अपुत्रा पत्नी सा परिवृत्ती ।

या वाऽअपुत्रा पत्नी सा निर्ऋतिगृहीता ।

न वै योषा कंचन हिनस्ति ।

सिनीवाली सुकपर्दा सुकुरीरा स्वौपशेति । योषा वै सिनीवाल्येतदु वै योषायै समृद्धꣳ रूपं यत्सुकपर्दा सुकुरीरा स्वौपशा ।

यैव प्रथमा वित्ता सा महिषी ।

गन्धर्वाप्सरोभ्यो जुहोति । गन्धर्वाप्सरसो हि भूत्वोदक्रामन्नथो गन्धेन च वै रूपेण च गन्धर्वाप्सरसश्चरन्ति तस्माद्यः कश्च मिथुनमुपप्रैति गन्धं चैव स रूप च कामयते । मिथुनानि जुहोति । मिथुनाद्वाऽअधि प्रजातिर्यो वै प्रजायते स राष्ट्रं भवत्यराष्ट्रं वै स भवति यो न प्रजायते तद्यन्मिथुनानि राष्ट्रं बिभ्रति ।

अनेकजायापतिरेकः

पुरुसे पूर्वस्मै जुहोति । अथ स्त्रीभ्यः पुमाꣳसं तद्वीर्येणात्यादधात्येकस्माऽइव पुरुसे जुहोति बह्वीभ्य इव स्त्रीभ्यस्तस्मादप्येकस्य पुरुसो बह्वयो जाया भवन्त्युभाभ्यां वषट्कारेण च स्वाहाकारेण च पुरुसे जुहोति स्वाहाकारेणैव स्त्रीभ्यः पुमाꣳसमेव तद्वीर्येणात्यादधाति ।

---

(१) शब्रा.१।१।२।१४. (२) शब्रा.२।१।२।४.
(३) शब्रा.२।५।२।२०. (४) शब्रा.२।६।२।१३,१४.
(५) शब्रा.४।१।५।९.

(१) शब्रा.५।२।१।१०. (२) शब्रा ५।३।१।१३.
(३) शब्रा.६।३।१।३९. (४) शब्रा ६।५।१।१०.
(५) शब्रा.६।५।३।१. (६) शब्रा.९।४।१।४,५.
(७) शब्रा.९।४।१।६.

स्त्रीपुरुषाणां विविधधर्माः

जायाया अन्ते नाश्नीयाद्वीर्यवान्हास्माज्जायते वीर्यवन्तमु ह सा जनयति यस्या अन्ते नाश्नाति।

तदेतदेवव्रतꣳ। राजन्यबन्धवो मनुष्याणामुतमां गोपायन्ति तस्मादु तेषु वीर्यवान्जायते।

उर्वशी हाप्सराः पुरूरवसमेडं चकमे तꣳ ह विन्दमानोवाच त्रिः स्मपाह्नो वैतसेन दण्डेन हतादकामाꣳ स्म मा निपद्यासै मो स्म त्वा नग्नं दर्शमेष वै न स्त्रीणामुपचार इति।

नैं वै स्त्रैणं सख्यमस्ति।

तँद्धाऽएतत्स्त्रीणां कर्म यदृर्णासूत्रम्।

तस्मादेतस्य यज्ञस्य। व्रतमेव दीक्षा वृषो वै व्रतं योषा दीक्षा वृषा सत्यं योषा श्रद्धा वृषा मनो योषा वाग्वृषा पत्न्यै यजमानस्तस्माद्यत्रैव पतिस्तत्र जायाथो यज्ञमुखऽएव तन्मिथुनानि करोति प्रजात्यै।

अनेकजायापतिनिरूक्तः

महिष्यभ्यनक्ति...वावाता...परिवृक्ता।

पत्न्योऽभ्यञ्जन्ति। श्रियै वाऽएतद्रूपं यत्पत्न्यः॥

चतस्रो जाया उपकल्पता भवन्ति। महिषी वावाता परिवृक्ता पालागली सर्वा निष्किन्योऽलङ्कृता मिथुनस्यैव सर्वत्वाय ताभिः सहाग्न्यगारं प्रपद्यते पूर्वया द्वारा यजमानो दक्षिणया पत्न्यः। सायमाहुत्याꣳ हुतायाम्। जघनेन गार्हपत्यमुदङ्वावातया सह संविशति तदेवापीतराः संविशन्ति सोऽन्तरोरूऽअसंवर्तमानः शेतेऽनेन तपसा स्वस्ति संवत्सरस्योदृचꣳ समश्नवाऽइति।

स्त्रीपुरुषाणा संभोगसवादः

* संज्ञप्तेषु: पशुषु पत्न्यः पान्नेजनैरुदायन्ति चतस्रश्च जायाः कुमारी पञ्चमी चत्वारि च शतान्यनुचरीणाम्। निष्ठितेषु पान्नेजनेषु। महिषीमश्वायोपनिपादयन्त्यथैनावधिवासेन संप्रोर्णुवन्ति स्वर्गं लोकं प्रोर्णुवाथामित्येष वै स्वर्गो लोको यत्र पशुꣳ संज्ञपयन्ति निरायत्याश्वस्य शिश्नं महिष्युपस्थे निधत्ते वृषा वाजी रेतोधा रेतो दधात्विति मिथुनस्यैव सर्वत्वाय। तयोः शयानयोः। अश्वं यजमानोऽभिमेथत्युत्सक्थ्या अव गुदं धेहीति तं न कश्चन प्रत्यभिमेथति नेद्यजमानं प्रतिप्रतिः कश्चिदसदिति। अथाध्वर्युः कुमारीमभिमेथति। कुमारि हये-हये कुमारि यकासकौ शकुन्तिकेति तं कुमारी प्रत्यभिमेथत्यध्वर्यो हये-हयेऽध्वर्यो यकोऽसकौ शकुन्तक इति। अथ ब्रह्मा महिषीमभिमेथति। महिषि हये-हये महिषि माता च ते पिता च तेऽग्रं वृक्षस्य रोहत इति तस्यै शतꣳ राजपुत्र्योऽनुचर्यो भवन्ति ता ब्रह्माणं प्रत्यभिमेथन्ति ब्रह्मन्हये-हये ब्रह्मन्माता च ते पिता च तेऽग्रे वृक्षस्य क्रीडत इति। अथोद्गाता वावातामभिमेथति। वावाते हये-हये वावात ऽऊर्ध्वामेनामुच्छ्रापयेति तस्यै शतꣳ राजन्या अनुचर्या भवन्ति ता उद्गातारं प्रत्यभिमेथन्त्युद्गातर्हये-हयऽउद्गातरूर्ध्वमेनमुच्छ्रयतादिति। अथ होता परिवृक्तामभिमेथति। परिवृक्ते हये-हये परिवृक्ते यदस्या अꣳ हुभेद्या इति तस्यै शतꣳ सूतग्रामण्यां दुहितरोऽनुचर्यो भवन्ति ता होतारं प्रत्यभिमेथन्ति होतर्हये-हये होतर्यदेवासो ललामगुमिति। अथ क्षत्ता पालागलीमभिमेथति। पालागलि हये-हये पालागलि यद्धरिणो यवमत्ति न पुष्टं पशु मन्यतऽइति तस्यै शतं क्षात्रसंग्रहीतॄणां दुहितरोऽनुचर्यो भवन्ति ताः क्षत्तारं प्रत्यभिमेथन्ति क्षत्तर्हये-हये क्षत्तर्यद्धरिणो यवमत्ति न पुष्टं बहु मन्यतऽइति।

---

(१) शब्रा १०।५।२।९,१०. (२) शब्रा.११।५।१।१.
(३) शब्रा.११।५।१।९. (४) शब्रा.१२।७।२।१.
(५) शब्रा.१२।८।२।६. (६) शब्रा १३।२।६।४-७.
(७) शब्रा.१३।४।१।८,९.
(८) शब्रा.१३।५।२।१-८. * एतत्सदृशवचनानि यथा-तैसं ७।४।१९।३; कासं.४८; मैसं.३।१३।१; शुभा.२३।२४; तैब्रा.३।९।७।४; शब्रा.१३।२।९।७; आश्रौ.१०।६।१०; शाश्रौ १६।४।१.

आत्मनोऽर्धं भार्या । अनेकजायापतिरेकः ।

सं वै नैव रेमे । तस्मादेकाकी न रमते स द्वितीयमैच्छत्स हैतावानास यथा स्त्रीपुमाꣳसौ संपरिष्वक्तौ । स इममेवात्मानं द्वेधा पातयत् । ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्धवृगलमिव स्व इति ह स्माह याज्ञवल्क्यस्तस्मादयमाकाश स्त्रिया पूर्यतऽएव ताꣳ समभवत्ततो मनुष्या अजायन्त ।

आत्मैवेदमग्रऽआसीत् । एक एव सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान्वै कामो नेच्छꣳश्च नातो भूयो विन्देत्तस्मा दप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते ।

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः । मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव कात्यायनी ।

स्त्रियमध उपसीत श्रीर्ह्येषा ।

ज्येष्ठो ज्यैष्ठिनेयस्तुवीत ।

एतावान् पुरुषो यदात्मा प्रजा जाया ।

तं पत्न्योऽपघाटिलाभिरुपगायन्त्यार्त्विज्यमेव तत्पत्न्यः कुर्वन्ति सह स्वर्गं लोकमयामेति ।

अपघाटिलाभिर्वीणाविशेषैः । तासा.

भ्रातृभगिन्यौर्विवाहः । अनेकजायापतिरेकः ।

सेयं ऋगस्मिन्सामन् मिथुनमैच्छत, तामपृच्छत् का त्वमसीति । साहमस्मीत्यब्रवीत्, अथ वाऽअहममोस्मीति । तद्यत् साचामश्च तत्सामाभवत् तत् साम्नस्सामत्वम् । तौ वै संभवावेति, नेत्यब्रवीत्, स्वसा वै मम त्वमस्यन्यत्र मिथुनमिच्छस्वेति । सा ब्रवीन्न वै तं विन्दामि येन संभवेयम्, त्वयैव संभवानीति । सा वै पुनीष्वेत्यब्रवीत्, अपूता वा असीति । साऽपुनीत यदिदं विप्रा वदन्ति तेन ।

सेयं ऋगिदं सामाभ्यप्लवत । तामपृच्छत् का त्वमसीति । साहमस्मीत्यब्रवीत् । अथवाऽहममोस्मीति । तद् यत् साचामश्च तत् साम्नः सामत्वम् । तौ वै संभवावेति । नेत्यब्रवीत् स्वसा वै मम त्वमसि । अन्यत्र मिथुनमिच्छस्वेति ।

सा पराप्लवत मिथुनमिच्छमाना सा समाः सहस्रं सप्ततिः पर्यप्लवत । तदेष श्लोकः—स्त्री स्मैवाग्रे संचरतीच्छन्ती सलिले पतिम् । समाः सहस्रं सप्ततिस्ततोऽजायत पश्यत । इति । असौ वा आदित्यः पश्यतः एष एव तदजायत । एतेन हि पश्यति । साऽवित्वा न्यप्लवत । साब्रवीन्न वै तं विन्दामि येन संभवेयम् । त्वयैव संभवानीति । सा वै द्वितीयामिच्छस्वेत्यब्रवीन्न वै मैकोऽवंस्यसीति । सा द्वितीयां वित्वा न्यप्लवत, तृतीयामिच्छस्वेत्यब्रवीन्नो वाव मा द्वे उवंस्यथ इति । सा तृतीया वित्वा न्यप्लवत । सोऽब्रवीदत्र वै मोऽवंस्यथेति ।

अति तिस्रो ब्राह्मणायनीस्सदृशी रिच्यते य एवं वेद ।

सदृशात्सदृशी प्रजा । सपिण्डविवाहः । बालभार्या ।

अनेकजायापतिरेकः । पतिव्रता ।

यादृशस्यो ह वै रेतो भवति तादृशं संभवति । यदि वै पुरुषस्य पुरुष एव यदि गोर्गौरेव, यद्यश्वस्याश्व एव, यदि मृगस्य मृग एव । यस्यैव रेतो भवति तदेव संभवति ।

तदेतन्मिथुनं यद् वाक् च प्राणश्च । मिथुनं ऋक्सामे । आचतुरं वाव मिथुनं प्रजननम् ।

मैटचीहतेषु कुरुष्वाटिक्या सह जाययोपस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवाच ।

तंयदब्रवीदाभिर्वो अहमिदं सर्वं जनयिष्यामि

(१) शब्रा १४।४।२।४,५; बृउ.१।४।३.
(२) शब्रा.१४।४।२।३०; बृउ.१।४।१७.
(३) शब्रा.१४।७।३।१; बृउ.४।५।१.
(४) शब्रा.१४।९।४।२. (५) ताब्रा.२।१।२.
(६) ताब्रा.३।४।३:३।१३।३. (७) ताब्रा.५।६।८;
(८) जैउब्रा.१।५४.

(१) जैउब्रा.१।५६. (२) जैउब्रा.१।५७ (३) जैउब्रा.१३।४.
(४) छाउ.१।१०।१. (५) गोब्रा.१।१।२.

यदिदं किञ्चेति, तस्माज्जाया अभवंस्तज्जायानां जायात्वं यद्यासु पुरुषो जायते ।

[1]तिसृभिर्हि सामसंमितं भवति । तस्मादेकस्य बह्व्यो जाया भवन्ति, न हैकस्या बहवः सहपतयः ।

[2]पत्नी वै धाय्या सा नीचैस्तरामिव शंस्तव्याऽप्रतिवादिनी हैवास्य गृहेषु पत्नी भवति ।

[3]यत्कुमारी मन्द्रयते यद्योषित्पतिव्रता ।
अरिष्टं यत्किच क्रियते अग्निस्तदनु वेधति ॥

कुमारी विवाहरहिता । यत्पाप पुरुषसंभोगरूपमुद्दिश्य । मन्द्रयते हर्षं करोति । यत्पाप परपुरुषसंभोगरूपमुद्दिश्य । पतिव्रतापि । यत्पाप भर्तृसंयोगाभावेन देहत्यागरूपमुद्दिश्य । ऐआसा.

यश्च वामदेव्यव्रतम्

[4]न कांचन परिहरेत्तद्व्रतम् ।

*गौतमः

विवाहे कन्याया. जातिप्रवरादिसापिण्ड्यादिविचार.

गृहस्थः सदृशीं भार्यां विन्देतानन्यपूर्वां यवीयसीम् ।

(१) साप्रत गृहस्थस्य धर्मा वक्तव्या इत्यत आह—गृहस्थस्सदृशीमिति । गृहस्थ इति भाविसंज्ञया व्यपदेशः, स्नातकस्य यावत्पाणिग्रहण तावदविरुद्धस्य गृहस्थधर्मस्य प्रवेशार्थः । सदृशीं जात्या न कुलतः । 'विद्या प्रणष्टा पुनरभ्युपैति जातिप्रणाशे त्विह सर्वनाशः । कुलापदेशेन यथाऽभिपूज्या तस्मात्कुलीना स्त्रियमुद्वहेत' ॥ स्मृत्यन्तरे उत्कृष्टकुलाया एवाधिगमश्रवणात् । भार्यां भरणीया लक्षणयुक्तामित्यर्थः । विन्देत याचेतेत्यर्थः । अनन्यपूर्वामन्यस्य वाचाऽप्यदत्तामित्यर्थः । यवीयसीमात्मनो हीनवयसीमित्यर्थः । मभा.

(२) ज्ञात्या कुलेन च सदृशीम् । ×गौमि.

[5]असमानप्रवरैर्विवाहः ।

(१) समान एकः प्रवरो येषा तैः सह न विवाहः । तद्यथा हरितकुत्सपिङ्गाङ्गदर्भहैमकभवानामाङ्गिरसाम्बरीषयौवनाश्वेति । हारीतः कौत्सो नोद्वहेदित्यादिप्रवरप्रपञ्च आपस्तम्बीये द्रष्टव्य. । गौमि.

(२) अस्यापवादः—समानप्रवरत्व समानार्षेयता, तदभावः असमानप्रवरत्वं, तैरसमानप्रवरैर्विवाहः कर्तव्यः । असमानप्रवरामिति वक्तव्ये एवमभिधान यदि मातृपक्षतः सगोत्रा भवति तदानीमपि दोषाभावज्ञापनार्थम् । एवञ्च पितृपक्षत एव सगोत्राप्रतिषेधः । तथा च मनुः—'असपिण्डा च या मातुरसगोत्रा च या पितुः' इत्यादि । मभा.

[6]ऊर्ध्वं सप्तमात्पितृबन्धुभ्यः । बीजिनश्च । मातृबन्धुभ्यः पञ्चमात् ।

(१) पितरमारभ्य तद्बन्धुवर्गे गण्यमाने सप्तमाच्छिरस ऊर्ध्वं जाता कन्यकामुद्वहेत् । मातरमारभ्य तद्बन्धुवर्गं गण्यमाने पञ्चमाच्छिरस ऊर्ध्वं जातामुद्वहेत् । बीजिनश्च सप्तमादूर्ध्वमिति चकारात्सिध्यति । यथा क्षेत्री वन्ध्यो रुग्णो वा देवर प्रार्थयते मम क्षेत्रे पुत्रमुत्पादयेति । यद्वा मृतानक्षये विधवा गुरवो नियुञ्जते, दृष्ट विचित्रवीर्यक्षेत्रे सत्यवतीवाक्याद्व्यासो धृतराष्ट्रादीनुत्पादितवानिति । यथाऽह याज्ञवल्क्यः—अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसौ रिक्थी पिण्डद' [illegible] च धर्मतः' ॥ इति । तद्विषयमेतद्बीजिनश्चेति । गौमि.

(२) बीजिनश्चेति । अनेनासमानप्रवरत्वेन प्राप्तौ सत्या प्रतिषेधः । *मभा.

कन्याविवाहकालः

[7]प्रदानं प्रागृतोः ।

ऋतुदर्शनात् प्रागेव कन्या देया । गौमि.

* वैदिको विवाहविधिस्तथा स्मृत्युक्तोऽष्टविवाहविषयकः अन्यश्च विवाहविधिः नात्र संगृहीतः । संस्कारकाण्डे संग्रहीष्यते ।

(१) गोब्रा.२।३।२०. (२) गोब्रा.२।३।२२.
(३) ऐआ.१।२७।४. (४) छाउ.२।१३.
(५) गौध.४।१; मभा.; गौमि.४।१; समु.११८.

× शेष मभावत् । * शेषं गौमिवत् ।

(१) गौध.४।२; मभा.; गौमि.४।२; समु.११८.
(२) गौध ४।३-५; मभा.; गौमि.४।३; समु.११८.
(३) गौध.१८।२२; गोरा.९।४; मभा.; गौमि.१८।२१; समु.९।४.

अप्रयच्छन् दोषी।[1]

तस्मिन्कालेऽप्रयच्छन् पित्रादिर्दोषवान् भवति। गौमि.

प्राग्वासस: प्रतिपत्तेरित्येके।[2]

दुर्विज्ञेयत्वाद्दतोः वासमः प्रतिपत्तेः प्राग्दद्यात्, यदैव लज्जिता तदैव दद्यादित्यर्थः। एवमेके मन्यन्ते। वरसभवतो विकल्पः। मभा.

त्रीन्कुमार्यृतूनतीत्य स्वयं युज्येतानिन्दितेनोत्सृज्य पित्र्यानलंकारान्।[3]

यदि कन्या पित्रादिर्न दद्यात्ततस्त्रीनृतूनतीत्य स्वयमेवानिन्दितेन कुलविद्याशीलादियुक्तेन भर्त्रा युज्येत पित्र्यान्पितृकुलायातानलंकारानुत्सृज्य। गौमि.

स्त्रीधर्मा.

अस्वतन्त्रा धर्मे स्त्री।[4]

सामान्या विशिष्टाश्चाश्रमधर्मा उक्ताः। स्त्रिय इदानीं वक्तव्या इत्याह—अस्वतन्त्रेति। अस्वतन्त्रा पराधीना धर्मे पारलौकिके भर्त्रा सहास्या धर्माधिकारः, न तु पुरुषवत् स्वातन्त्र्येण।

ननु च श्रौतस्मार्तानां पुरुषोद्देशेन विहितत्वात् स्वातन्त्र्येण स्त्रियाः प्राप्त्यभावात् प्रतिषेधानुपपत्तिः। अथोच्येत अस्वातन्त्र्यवचनं सहधर्मक्रियायां स्त्रिया अपि फलमस्तीत्येवमर्थमिति, तदयुक्तम्, सहधर्मचारिणीत्वादेवास्यार्थस्य लब्धत्वात्। तथा अस्वतन्त्रेति न ज्ञायते कितन्त्रया अनया भवितव्यमिति। भर्त्रधीनयेति चेत् न, उपरिष्टात् 'नातिचरेद्भर्तारम्' इत्यनेन भर्तृपरतन्त्रत्वस्य वक्ष्यमाणत्वात्। तेनाव्यभिचारो वक्ष्यत इति चेत् न, (च) अतिचारस्य धर्मार्थकामविषयस्य प्रतिषिद्धत्वादिति। तत्रोच्यते उपवासदानादेर्धर्मसाधनस्य भर्तुरनुज्ञाया सत्या स्त्रियाः प्राप्तत्वात्। तथा च शङ्खवचनं यदुदाहृतं 'कामं तु भर्तुरनुज्ञया' इत्यादि। +मभा.

नातिचरेद्भर्तारम्।[5]

(१) एवं च धर्मादन्यत्र कामचारे प्राप्ते आह—नातिचरेदिति। भर्तुरनुज्ञया विना तत्प्रतिषिद्धा वा न क्वचिदपि प्रवर्तेतेत्यर्थः। पतिमिति वक्तव्ये यो यो भरणं करोति त त प्रत्येवमिति भर्तृग्रहणम्। मभा.

(२) भर्तारं नातिक्रामेद्भर्तुरन्यं मनसाऽपि न चिन्तयेत्। गौमि.

वाक्चक्षुःकर्मसंयता।[6]

यावदर्थसंभाषिणी वाक्संयता। प्रेक्षकादीनामप्रेक्षिणी चक्षुःसंयता। स्वकुटुम्बार्थकर्मव्यतिरिक्तानां कर्मणामकर्त्री कर्मसंयता। एवंभूता स्यात्। *गौमि.

मृते भर्तरि नियोगविधिः

अपतिरपत्यलिप्सुर्देवरात्।[7]

(१) अथ नातिचरेद्भर्तारमित्यस्यापवादः—अपतिरिति। अनपत्यायाः यस्याः पतिर्मृतः साऽपत्यं लिप्समाना सती देवरालिप्सेत्। पत्युर्भ्राता देवरः कनिष्ठ इत्युपदेशः। गौमि.

(२) अपतिरविद्यमानभर्तृका अयोग्यपतिर्वा। तथा च बृहस्पतिः 'नष्टे मृते प्रव्रजिते क्लीबेऽथ पतिते पतौ। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते'॥ इति। अपत्यलिप्सुः यद्यनपत्या सत्यपत्यमिच्छति पुनर्देवरादुत्पादयेदित्यर्थः। देवरो भर्तुर्ज्येष्ठो यवीयान्वा। मभा.

गुरुप्रसूता नर्तुमतीयात्।[8]

(१) केन विधिनोत्पादयेदित्याह—गुरुप्रसूतेति। गुरुभिरनुज्ञाता, भर्तृपक्षैः पितृपक्षैश्च नियुक्तेत्यर्थः। ऋतुं नातीयात् ऋतुकालादन्यत्र न युज्येतेत्यर्थः। तत्राप्येकस्मिन्दिने यदि गर्भोत्पत्तिर्भवति, तत्रैव भवति नो चेत्तस्मिन् ऋतौ न भवतीति। यथा तलवकाराणां ब्राह्मणं—'यद्वा प्रथममहो रेतः सिच्यते स गर्भः सम्भवति, अतो यत्ततः सिच्यते मुधैव तत्परासिच्यते' इति। तत्रापि

+ गौमि. मभावद्भावः। * मभा. गौमिवत्।

(१) गौध.१८।१३; मभा; गौमि.१८।१२.
(२) गौध.१८।१४, मभा.; गौमि.१८।१३.
(३) गौध.१८।११; मभा.; गौमि.१८।१०.
(४) गौध.१८।१; मभा.; गौमि.१८।१.

(१) गौध.१८।१२; मभा.; गौमि.१८।१२.
(२) गौध.१८।१३, मभा.; गौमि.१८।१३.
(३) गौध.१८।१४; मभा.; गौमि.१८।१४.
(४) गौध.१८।१५; मभा.; गौमि.१८।१५.

तेनाभ्यज्येति द्रष्टव्यम् । यथाहोशना—'नियुक्ता वाङ्गघृताभ्यक्ता घृतेन सर्वाङ्गमात्मानमभ्यज्य गच्छेत्' ति ।

(२) गुरुभिः पतिपक्षैः पितृपक्षैर्वा । ×गौमि.

[1]पिण्डगोत्रर्षिसंबन्धेभ्यः ।

(१) पिण्डसंबन्धः सपिण्डः । गोत्रसंबन्धः स-त्रः । ऋषिसबन्धः समानप्रवरा ऽरितकुत्सादयः । तेभ्यः क्रमेणापत्यं लिप्सेत । गौमि.

(२) उत्तरसूत्रे वाशब्दस्याभाववैकल्पिकार्थस्यानु-र्षः । ततश्चाधिकारादेवराभावे सपिण्डमात्रादप्यपत्य-ुत्पादु स्यात् । तदभावे सगोत्रमात्रात् । अत्र सगोत्र-ब्देन समानोदको द्रष्टव्यः, 'सनिकृष्ट सनिकृष्ट गृह्णी-त्' इति स्मृत्यन्तरदर्शनात् । ऋषिसबन्धात् ऋषि-बन्धाः स्वकुल्याः । मभा.

[2]योनिमात्राद्वा ।

(१) अत्र स्मृत्यन्तरम्*। सर्वाभावे योनिमात्राद् ाह्मणजातिमात्रादिति । गौमि.

(२) सर्वाभावे ब्राह्मणजातिमात्राद्वा । मात्रशब्दो र्मवाची ततश्च गुणवदभावे निर्गुणादिति द्रष्टव्यम् । थग्ग्रहण कुल्लीने सति परगामित्वप्रतिषेधार्थम् । थाच वसिष्ठः—'न खलु तत्कुलीने विद्यमाने पर-ामिनी स्यात्' इति ।

[3]नादेवरादित्येके ।

अदेवरात् सपिण्डादेः सकाशादपत्य न जनयेदि-येके मन्यन्ते । देवराभावे अन्यतोऽपीत्याचार्यः । मभा.

नष्टे प्रव्रजिते प्रोषिते वा भर्तरि कालप्रतीक्षावधि.

[4]नष्टे भर्तरि षड्वार्षिकं क्षपणम् ।

मृते भर्तरि विधिरुक्तः, इदानी नष्टे आह—नष्टे भर्तरीति । देशान्तरतिरस्कृते भर्तरि षड्वर्षाण्यप-योत्पत्तिरनया न कर्तव्या । ततः परमिच्छन्ती गुरु-नियोगं कारयित्वा अपत्यमुत्पादयेदित्यभिप्रायः । कुतः? 'अनियुक्तायामुत्पन्न उत्पादयितुः पुत्रो भवतीत्याहुः' इति वसिष्ठस्मृतिदर्शनात् । मभा.

श्रूयमाणेऽभिगमनम् ।

(१) यदा तु भर्ता श्रूयते तस्मिन्देशे स्थित इति तदा तमभिगच्छेत् । गौमि.

(२) षड्वर्षादूर्ध्वं यदि भर्ता श्रूयमाणो भवति तस्मिन् श्रूयमाणे तमेवाभिमुख्येन गच्छेत्, नान्यस्मा-दपत्यमुत्पादयेदित्यभिप्रायः । मभा.

[5]प्रव्रजिते तु निवृत्तिः प्रसङ्गात् ।

(१) यदि तु भर्ता प्रव्रजितो भवति मोक्षाश्रय प्राप्तो भवति तदा सर्वस्मात्प्रसङ्गान्निवृत्तिः । स्वयमपि निवृत्ति-मुखी संयतैव स्यादिति । गौमि.

(२) यदि प्रव्रजितो भर्ता भवति तस्मिन् प्रसङ्गात्तं प्रति गमनान्निवृत्तिः त प्रति न गच्छेदित्यर्थः । अथवा प्रसङ्गादपत्योत्पादनान्निवृत्तिः, अपत्य नोत्पादयेत् । तुशब्दो विशेषार्थः । यदि भर्तुरपत्योत्पादनाभिलाषोऽस्ति तदानीमपत्यमुत्पादयेत् । अभिलाषाभावे नोत्पादयेत् सयतया भवितव्यमित्येके वर्णयन्ति । प्रव्रजिते अपत्य नोत्पादयेत् । तुशब्दात् स्वयमपि प्रव्रजेत्, देशान्तर-स्थस्याभिप्रायो ज्ञातुमशक्य इति । मभा.

[6]द्वादश वर्षाणि ब्राह्मणस्य विद्यासंबन्धे ।

विद्याधिगमार्थं प्रोषितस्य ब्राह्मणस्य भार्या द्वादश वर्षाणि क्षपयेत् अपत्योत्पत्ति तदभिमुखगमन च, प्रव्र-जिते तु निवृत्ति च कुर्यादिति द्रष्टव्यम् । अत्र ब्राह्मण-ग्रहणात् पूर्वं क्षत्रियादिविषयमिति गम्यते । अथवाऽत्र विद्याग्रहणादर्थार्थ गतस्य ब्राह्मणस्यैव । स्मृत्यन्तरसाम-र्थ्यात् कामविषये क्षपण नास्तीति । एवं च क्षत्रिया-देर्विद्यार्थ गतस्यापि ब्राह्मणादिभ्योऽर्धमर्ध परिकल्प्यम् । अर्थार्थ गतस्य वसिष्ठोक्त द्रष्टव्यम् । अनेनैव न्यायेन विद्यासबन्धेऽप्यप्रजाताया एकवर्षन्यूनभावो द्रष्टव्यः । ×मभा.

× शेष मभावत् । * स्मृत्यन्तरवचनं गलितमिति भाति ।

(१) **गौध.**१८।६; **मभा.**; **गौमि.**१८।६.

(२) **गौध.**१८।७; **मभा.**; **गौमि.**१८।६.

(३) **गौध.**१८।८; **मभा.**; **गौमि.**१८।७.

(४) **गौध.**१८।१५; **मभा.** इद वचन हरदत्तकृत-मिताक्षरायां (आनन्दाश्रममुद्रितपुस्तके) टिप्पण्यां संगृहीतम् ।

× गौमि. मभावद्भावः ।

(१) **गौध.**१८।१६; **मभा.**; **गौमि.**१८।१५.

(२) **गौध.**१८।१७; **मभा.**; **गौध.**१८।१६.

(३) **गौध.**१८।१८; **मभा.**; **गौमि.**१८।१७.

अकृतविवाहे ज्येष्ठभ्रातरि कनीयसः कर्तव्यम्

भ्रातरि चैवं ज्यायसि यवीयान्कन्याग्न्युपयमेषु ।

भ्रातर्यकृतदारे अनाहिताग्नौ च प्रोषिते ज्येष्ठे कनीयानेवमेव कुर्यात् । एवशब्दात् समस्तातिदेशः श्रूयमाणे तदभिगमन, प्रव्रजिते तु तदभिगमननिवृत्तिश्च ततो द्रष्टव्या । एव तर्हि प्रव्रजिते सयतत्वमपि प्राप्नोतीति चेत् न, स्मृत्यन्तरदर्शनात् । यथाहोशना—'प्रव्रजति ज्येष्ठे क्षपण नास्ति सद्य एव निविशेत्' इत्यादि । एवमप्यर्थार्थ गतस्य षड्वार्षिक प्राप्नोतीति चेत्, न तत्रापि स्मृत्यन्तरसामर्थ्यात्, यथाह वसिष्ठः—'द्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोर्गतः । न्याय्यः प्रतीक्षितु भ्रात्रा श्रयमाणः पुनःपुनः' ॥ इति। चकारात् स्मृत्यन्तरोक्तानामप्युपसग्रहः, यथाह वसिष्ठः—'अष्टौ दश द्वादश वर्षाणि ज्येष्ठ भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भवति' इति तत्र बहुशः श्रूयमाणे द्वादश, पुनःपुनरित्युक्तत्वात् । किंचिच्छ्रयमाणे दशवर्षाणि, सर्वथा अश्रयमाणे अष्टाविति द्रष्टव्यम् । क्षत्रियादेः पूर्ववदर्धमर्ध परिकल्प्यम् । अस्यापवादः—'उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीव एव च । राजयक्ष्मामयावी च न न्याय्यः स्यात्प्रतीक्षितुम् ॥ इत्यादिस्मृत्यन्तरोक्तो द्रष्टव्यः । ज्येष्ठग्रहणादेव कनीयसोऽर्थतः सिद्धः सबन्धिशब्दत्वादेकमातृकस्यैव दोष इति ख्यापनार्थम् । स्मार्तस्याप्यग्नेरुपसग्रहार्थं बहुवचनम् । +मभा.

पंडित्येके ।

एके मन्यन्ते षडेव वर्षाणि प्रतीक्षेतेति । प्रोषिते चात्यन्तवृद्धे स्थिते चात्यन्तधर्मपरे इदम् । ×गौमि.

हारीतः

स्त्रीरक्षा

एकव्रतस्कन्नभावात् परेन्द्रियोपहतत्वाच्च दुष्टाः कुलसंकरकारिण्यो भवन्ति, जीवति जारजः कुण्डो मृते भर्तरि गोलकः । तस्माद्रेतोपघातात्जायां रक्षेत्, जायानाशे कुलनाशः, कुलनाशे तन्तुनाशः, तन्तुनाशे देवपितृयज्ञनाशः, यज्ञनाशे धर्मनाशः, धर्मनाशे आत्मनाशः, आत्मनाशे सर्वनाशः ।

एकव्रतस्कन्नभावादिति एक एव पतिरिति यदयं व्रतनियमः तस्य स्कन्नभावात्प्रचलनात्, कुलं गृहं, तन्तुः पुत्रपौत्रादिसततिः । विर.४१०-४११

भार्यापरित्यागः

गर्भघ्नीमधोवर्णगां शिष्यसुतगामिनीं पानव्यसनासक्तां धनधान्यक्षयकरीं च वर्जयेत् ।

अत्रापि यत्राधोवर्णगमने पानव्यसने धनधान्यविक्रये च प्रायश्चित्तेन शुद्धिर्नास्तीति शास्त्रादवगम्यते तत्रैव विसर्जनविधानमिति मन्तव्यम् । विसर्जनं संव्यवहारपरित्यागः । स्मृच.२४६

पत्नीधर्मः

अथ पत्न्याचारमनुक्रमिष्यामो गृहं पत्नी न ह्यपत्नीकं विद्यात्, तस्मात्पत्नी गृहपरा स्यात्सुसमृष्टोपस्कृतसस्कारा सूपलिप्तार्चितवेश्मानि

नाश, यज्ञनाशे (नाशो यज्ञनाशो), **विर.**४१०; **रत्न.**१३३; **व्यप्र.**४०५ यज्ञनाशे (देवपितृयज्ञनाशे) सर्व (सर्वस्व), **व्यउ.** १४० व्यप्रवत्, **विभ.**२ एकव्रतस्कन्नभावात् (एकव्रते कर्मभावात्), **समु** ११९ (एकव्रत...रक्षेत्०).

(१) **व्यक.**१३२; **स्मृच.**२४६ गा शिष्यसुत (शिष्यगुरु) सना (सन) क्षय (विक्रय), **विर.**४२६ नी (नी च) पान (पाप), **पमा.**४७५ अधोवर्णगा (अधमवर्णा) क्षयकरी च (विक्रयकरी वि); **नृप्र.**३३ अधोवर्णगां (अधमवर्णा) क्षय (विक्रय); **विभ.**१६ वर्णगा शिष्यसुतगामिनी (वर्णेकेऽप्यशुभगामिनी च) सना (सन), **समु.**१२२ वर्णगा (वर्ण) सना (सन) क्षय (विक्रय).

(२) **व्यक.**१३४,१३५; **विर.**४३१-४३४; **स्मृच.**२५० (परशयनासनवस्त्राभरणानि मनसापि नाध्यवस्येत् । आ पुनः सस्कारात् । तथैकपात्रे मद्यमासादीनि उच्छिष्टनिर्माल्ये च अन्यत्र गुरुभर्तृसुतेभ्य.), **विभ.**१९-२० ह्यपत्नीक+(गृहम्) वैश्वदेवकाल इति प्रचोदन (वैश्वदेवकाले प्रतिचोदनम्) यच्चान्यदाह्निकं कुर्यात् हुते (यच्चान्यदाह्निक स्यात् कृते) उद्वाहाग्नौ (उद्वहत्यग्नौ) अनुपस्थायोदकधाना (अनुपदस्थोदकधाना); **समु.**१२३-१२४नाध्यवस्येत् (न ध्यायेत्) शेष स्मृच्चवत्.

+ गौमि मभावद्भावः । × मभा. गौमिवत् ।

(१) **गौध.**१८।१९, **मभा.**; **गौमि.**१८।१८.

(२) **गौध.**१८।२०; **मभा.**; **गौमि.**१८।१९.

(३) **व्यक.**१२८; **स्मृच.**२३९ (एकव्रत...रक्षेत्०) यज्ञ-

पतितानि प्रतिकुर्यात् अगुप्तं गोपयेत्, अन्यपुरुषेण सहेक्षणाभिभाषणं दुष्टप्रव्रजितसंसर्गञ्च वर्जयेत्, परगृहरथ्याचत्वरवीथीप्रव्रजितालयांश्च नाभिगच्छेत्, कूपपथस्थानं संधिवेलासंचरणं च वर्जयेत्, परशय्यनासनवस्त्राभरणानि मनसापि नाध्यवस्येदापुनःसंस्कारात्, तथैकपाठ्यं मद्यमांसानि उच्छिष्टनिर्माल्यञ्चान्यत्र गुरुभर्तृसुतेभ्यः। अनन्यपुरुषलोलुपानर्थान्वर्जयेत्। तथा प्रत्युद्वदनं आलस्यवैक्लव्यतौल्यादि, नोच्छिष्टा देवागारं प्रविशेत्। नाप्रोक्ष्याविमृष्यापर्यग्निकृत्य श्रापयेत्, नाप्रक्षालितपाणिर्यावत्कोत्पवनगोरसदधि गृह्णीयात् स्थाल्यपिधानदर्वीः प्रक्षाल्य उपकरणानि गुप्ते निधापयेत्। श्वो भूते प्रतिप्रक्षाल्य पचनार्थानुपकुर्यात्। गोरसधान्यानि चास्य निर्देशे गृह्णीयात्। शृते प्रक्षाल्योपलिप्य परिमृज्य तैजसानि वेश्मावमार्जनं प्रत्युपलेपनानि कृत्वा वैश्वदेवकाल इति प्रचोदनं स्नानहेतोः स्नात्वा शुक्ले वाससी परिधाय पाणिपादं प्रक्षाल्योत्कम्याचम्य देवागारं प्रविश्य नमस्कृत्यायतनेऽग्निमुपसमाधाय समिद्दर्भपुष्पबलिशान्तिपात्राण्याहृत्य भक्तमाज्येनाभिघार्य यच्चान्यदाह्निकं कुर्यात् हुते देवेभ्य उद्वाहाग्नौ देवपत्नीभ्यो बलिं हरेद्भर्तृनिर्देशे। कृते देवातिथ्ये यथास्वं गृहिणस्तर्पयित्वा शिष्यान् सुहृदः पतिं च तदनुज्ञाता शेषं पत्नी गुप्ते भुक्त्वा प्रतिस्वामिरुपस्पृश्य शेषं भाण्डं निर्णिज्य प्रक्षाल्य च बहिरुत्तरपूर्वस्यामदिशि वास्तुभूतपशुपतये रुद्राय नम इति निर्णीय, एवं सायं शृतादि। यथार्थमवशिष्टेषु नमो भगवते रुद्राय भस्मसदे भस्मना रक्षां करोमीति भस्मना द्वारमपिधाय स्वामिसुतादीनात्मानञ्चालभेत्। यच्चान्यद्रक्ष्यं स्यात्। नाप्रक्षालितपाणिपादा संविशेत्, न नग्नोच्छिष्टा, नानमनीया, नानमस्यभर्तृपादा, नाविरतोत्थाना, नानुसूर्योत्थायिनी अनुपस्थायोदकधाना अनुसरणवेश्मार्चिनी प्रदक्षिणा प्रशान्ता सौम्यार्हिता भर्तुः प्रियवादिनी नोपरिष्टात् स्थिता आसीत। नोच्चैर्न वितर्कस्थाने नाभीक्ष्णमीक्षेत परिमृज्य संवाहयित्वा उपासीत। व्यजनेनोष्णे वर्षे घर्माम्भांसि अस्य गात्रेभ्यः परिमृज्यात्। शिरसश्चावस्थितस्य समाधानम्। ग्रामान्तराहृतभारातिक्रान्तमायान्तमुपगच्छेतादुष्टमना अर्घ्यणार्चयेत्। व्रतधारणं देवकार्यं स्नानमनुज्ञातया कार्यमिति।

(१) आ पुनः संस्कारादपुनर्निर्णेतृजनादिसंस्कारात्। एकपात्रग्रहणमन्येन सह भोजनोपलक्षणार्थम्। मद्यमांसग्रहणमपेयाभक्ष्याणामुपलक्षणार्थम्। अत एव सुराप्यात्यर्थापहतकायया संस्पृष्ट दुष्ट भवतीत्याह स एव 'दैवे वा यदि पित्र्ये वा सुराप्यायतनं स्पृशेत्। रजस्वला पुश्चली वा रक्षसा गच्छतीह तत्'॥ अत एव मद्यमांसादीनीत्यादिग्रहणं कृतम्। उच्छिष्ट निर्माल्यं च उच्छिष्टनिर्माल्ये। गुरुः पिता। 'अन्यत्र गुरुभर्तृसुतेभ्यः' इति वदन् गुरुजनादीनामुच्छिष्टनिर्माल्यावर्जनेऽपि न दोष इति दर्शयति। अपेयादिवर्जनमवर्जनमवश्य कार्यम्। गर्भस्यापि दोषहेतुत्वात्। न हि दुष्टकारणजन्यमदुष्ट भवितुमर्हति। स्मृच.२५०

(२) सुसंमृष्टोत्पादितसंस्कारा प्रकृष्टमार्जनेन सपादितसंस्कारा, कूपपथस्थान कूपानुयायिवर्त्मावस्थानम्। परेति, परशय्यासनान्नवस्त्रादि पुनःसंस्कार प्रक्षालनादि विना नाध्यवस्येत् सर्वथैव नोपभुञ्जीतेत्यर्थः। ऐकपाठ्य सहभोजनम्। गुरवः श्वशुरादयः। लोलुपा सस्पृहा। अनर्थो निरर्थकधनव्ययः। प्रत्युद्वदन प्रतिकूलवचनम्। तौल्य स्वकुलायनुचितवेषभाषादीति प्रियस्वामी। अविमृश्य अविचार्य। यावक यजोपयुक्तचमसादि, उत्पवन चालनीस्थालीत्यादि। स्थाल्यादीनि द्रव्याणि भाविदिनपाकार्थं प्रक्षाल्य गुप्ते निधापयेत्। तत्र दिने भूते प्रतिप्रक्षाल्य पाक कुर्यादित्यर्थः। अस्य निर्देशे भर्तुरनुज्ञाने, स्नानहेतोः पत्युरिति शेषः। तेन वैश्वदेवकालो वृत्त इति स्नान विधीयतामिति पत्युः कृते प्रचोदन कुर्यादित्यर्थः। उत्कम्यान्तर्मुखस्थितश्लेष्मादिकमपास्य अन्नाद्यमभिघार्य भक्तमन्नाज्येनाभिघार्याभ्युक्ष्य। यच्चान्यदिति अन्यन्मण्डकादि आह्निकमहर्भोज्य तच्चाभिघार्येत्यन्वयः। भर्तृनिर्देशे तिष्ठेदिति शेषः। तदनुज्ञाता च शेष, च भिन्नक्रमे तेन भर्त्रनुज्ञानेन, शेष सशेषमपि भुक्त्वेत्यग्रेणान्वयः। प्रतिस्वामिः स्वार्थोपकल्पिताभिरद्भिः। निर्णिज्या-

न्नमलापकर्षणं कृत्वा । एव साय शृतादि, सायं संध्या-समयेऽपि शृतादि शृते प्रक्षाल्येत्यादि बलिपर्यन्त आल-भेत् भस्मलिप्तहस्तेन स्पृशेत् । यच्चान्यद्रक्ष्य तदप्याल-भेदित्यन्वयः । नानमनीया नाप्रह्वा, नानमस्यभर्तृपादा ।

विर.४३४–४३५

पतिप्रिया हिते युक्ता स्वाचारा विजितेन्द्रिया ।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् ॥

भार्याया सुरापाननिषेधः । भार्यापरित्यागः ।

दैवे वा यदि पित्र्ये वा सुराप्यायतनं स्पृशेत् ।
रजस्वला पुंश्चली वा रक्षसां गच्छतीह तत् ॥
पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत् ।
पतितार्धशरीरस्य निष्कृतिर्न विधीयते ॥
वारुणी यस्य विप्रस्य भार्या पिबति संनिधौ ।
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥

सनिधाविति वदन् ससर्गिण्येव भर्तरि बहिष्कार-विधिरिति दर्शयति । तेन सुरापीपरित्यागिनो नोक्तदोष इत्यवगन्तव्यम् । स्मृच.२५०

भार्याया व्यभिचारिण्याः परित्यागो न विद्यते ।
दद्यात्पिण्डं कुचेलं च अधःशय्यां च शाययेत् ॥

हारीतोऽप्यत्यर्थव्यभिचारिण्या भरणमावश्यकमि-त्याह—भार्याया इति । पिण्ड शुश्रिवृत्तिमात्रकृत्कदन्नमि त्यर्थः । अधः शय्या यस्याः सा अधःशय्या ताम् ।

स्मृच.२४२

अप्रजां नवमे वर्षे ।

पत्यौ प्रोषिते पत्नीधर्मः

न प्रोषितेऽलङ्कुर्यान्न वेणीं मुञ्चेत् ।

अत्र च सभर्तृकास्त्रीमात्रमधिकृत्य निषिद्धाना यत्पुनः प्रोषितभर्तृकामधिकृत्य निषेधवचन तदत्यन्त-निषेधार्थम् । विर.४४०

(१) विर.४३६; विभ.२१

(२) स्मृच.२५०, समु १२४.

(३) स्मृच.२५०.

(४) स्मृच.२४२, समु.१२१ अध. (ह्यध.) उत्त., नारद .

(५) स्मृच.२४४, समु.१२१.

(६) व्यक १३६; स्मृच.२५३; विर.४४०; विभ.२४ ऽलङ्कु (सस्कु); समु.१२५.

विधवाधर्मः

आहिताग्निश्चेत्प्रमीयेत, औपासनावक्षाणाग्निं परिमृज्य सर्पिराज्ञीभिः सूत्रसवनमिष्ट्वा नावसेत् । अनाहिताग्निश्चेदन्यमादध्याज्जनाग्निं वा परिगृह्य भर्तुः पितुः स्वजनगृहवर्जं जितजिह्वाहस्तपादेन्द्रिया स्वाचारवती दिवारात्रं भर्तारमनुशोचती व्रतोपवासैः क्षान्तायुषोऽन्ते पतिलोकं जयति सा भूयः पतिमालोकमाप्नोतीत्येवं ह्याह ।

पतिव्रता तु या नारी निष्ठां याति पतौ मृते ।
सा हित्वा सर्वपापानि पतिलोकमवाप्नुयात् ॥

(१) अर्धाधानपक्षे मृतस्य आहिताग्नेस्ताग्निना दहनम् । औपासनाग्निस्तु पत्न्यर्थमिन्धने ध्रियते । उल्कावस्थेन्धनान्यवक्षाणानीत्युच्यन्ते । एव चायमर्थः । उल्कावस्थमौपासनाग्नि परिगृह्य भूमिर्भूमेति चतसृभि-रनुसवनमिन्धाना श्वशुरादिगृहे वसेत् इति । एवमना-हिताग्नेर्मृतस्य भार्या वसेत् । इयास्तु विशेषः । औपा-सनाग्नेः स्वगृह्योक्तविधिना पुनःसधान लौकिकाग्नेर्वा परिग्रह कुर्यात् । तथा च स एव–अनाहिताग्निरिति । अनाहिताग्निश्चेत्प्रमीयेतेत्यनुपज्यते । परिगृह्य पूर्व-वत्समिन्धनमाचरेदिति शेषः । अनाहिताग्नेर्दहन-कर्मणि पूर्वस्थितस्यौपासनस्य प्रतिपत्तिर्जातेति पुन-रुत्पत्त्यर्थमन्यमादध्यादित्युक्तम् । कथ पुनः सर्वा-धानपक्षे मृतभर्तृकाया अग्निपरिचर्या । न चाना-हिताग्निभार्यायामुक्तमात्राप्यूह्यम् । वचनबलेनैव मृत-भर्तृकाया अलौकिकाग्निनिष्पत्तेः । उच्यते । निर्मथि-ताग्नि परिगृह्य पूर्ववत् समिन्धनमाचरेत् । 'निर्मन्थ्येन पत्नी' इत्यापस्तम्बेन । एतस्मिन्पक्षे निर्मन्थ्येन

(१) व्यक.१३७, स्मृच २५३-२५४ परिमृज्य (परि-गृह्य) सर्पि वसेत् (सपराज्ञाभिरनुसवनमिन्धाना वसेत्) गृह-वर्जं जित (स्य वा गृहमाश्रित्य सयत) रात्रौ (रात्रौ) शोचती (शोचन्ती) क्षान्ता (क्षशा) सा भूय· त्येव ह्याह (न भूयः पतिवियोगमाप्नोतीति), विर.४४३, विभ.२७-२८ औपा-सनावक्षाणाग्नि (तदुपासनाग्नि), समु १२५ स्मृचवत् .

(२) व्यक.१३७, स्मृच २५४ नारी (साध्वी) पतौ (प्रभौ) स्मृत्यन्तरम्; विर.४४३, विभ.२८; समु.१२५ स्मृचवत्, स्मृत्यन्तरम्.

पत्न्याः पितृमेधविधानात्। एवं स्त्रीविशेषेऽग्निविशेषसमिन्धनमुक्त्वा सर्वप्रमीतभर्तृकायाः साधारणधर्ममप्याह स एव—भर्तुरिति। स्मृच.२५३-२५४

(२) आहिताग्निः श्रौताग्निः। अवक्षाणमद्धदग्धोहमूकमायं गौरिति तिस्र ऋचः सर्पिराज्यः। अनाहिताग्निः स्मार्त्ताग्निः अन्यं गृह्यमाधानविधिना गृह्णीयात्। जनाग्निः लौकिकाग्निः स च विवक्षितः। विर.४४३

स्वैरिणीपुनर्भ्वोर्यः

असाध्वी या पतिं त्यक्त्वा वर्तते कामचारतः।
न सा सुखमवाप्नोति कल्पते नरकाय च॥
स्वैरिणी च पुनर्भूश्च रेतोधाः कामचारिणी।
सर्वभक्ष्या च विज्ञेयाः पञ्चैताः शूद्रयोनयः॥
एतासां यान्यपत्यानि उत्पद्यन्ते कदाचन।
न तान् पङ्क्तिषु युञ्जीत न ते पङ्क्त्यर्हकाः स्मृताः॥

रेतोधाः कुण्डमाता, कामचारिणी चनुःपुरुषगमना नन्तरसपरपुरुषगामिनी, सर्वभक्ष्या सुरापी। विर.४१२

साध्वी

शुश्रूषाचारा भर्त्रधीना साध्वी भवत्येवं ह्याह—
यस्य नारी वशा साध्वी सततं प्रियवादिनी।
शुश्रूषाचारा भर्तृमना सा देवी परिकीर्त्यते॥

आपस्तम्बः

परिरक्षितव्यम्। द्वितीयसंस्कृतव्या।

धर्मे चार्थे च कामे च नातिचरितव्या।
धर्मप्रजासंपन्ने दारे नाऽन्यां कुर्वीत।

श्रौतेषु गार्ह्येषु स्मार्तेषु च कर्मसु श्रद्धा शक्तिश्च धर्मसंपत्तिः। प्रजासंपत्तिः पुत्रवत्त्वम्। एवंभूते दारे सति नान्याम्। 'दारे' इति प्रकृते अन्यामिति स्त्रीलिङ्गनिर्देशादत्रार्थाद्भार्यामिति गम्यते। नान्या भार्या कुर्वीत नोऽद्वहेत्। उ.

(१) स्मृच २५२, ममु १२५.

(२) व्यक १३९, विर.४५२; विभ ३३.

(३) व्यक.१३९, विर ४५२, विभ.३३ पङ्क्त्यर्हकाः (पङ्क्तिवहाः)

(४) व्यक १३५. (५) मेधा ९।१०१.

(६) आध २।११।१२, हिध.२।१०; ममु.९।८१; मच.९।८१ स (सुम).

अन्यतराभावे कार्या प्रागग्न्याधेयात्।

धर्मप्रजयोरन्यतरस्याभावे कार्या उद्वाह्या। तत्रापि प्रागग्न्याधेयात् नोर्ध्वमाधानात्। एतदर्थमेवेदं वचनम्। उभयसंपन्ना न कार्येत्युक्ते अन्यतराभावे कार्येत्यस्याशस्य प्राप्तत्वात्। यदा चाऽन्यतराभावे कार्या तदा का शङ्का उभयाभावे कार्येति। उ.

आधाने हि सती कर्मभिः संबध्यते येषामेतदङ्गम्।

प्रागग्न्याधेयादित्यत्र हेतुः—आधाने इति। हि यस्मात् आधाने सती विद्यमाना सहान्विता कर्मभिः संबध्यते अधिक्रियते। कैः? येषामग्निहोत्रादीनामेतदाधानमङ्गमुपकारकम्। तैः। अत्र 'दारे सती'तिवचनात् मृते तस्मिन्प्रागूर्ध्वं वाऽऽधानात् सत्यामपि पुत्रसंपन्नौ धर्मसंपत्त्यर्थं दारग्रहणं भवत्येव। तथा च मनुः—'भार्यायै पूर्वमारिण्यै दत्वाऽग्नीनन्त्यकर्मणि। पुनर्दारक्रियां कुर्यात्पुनराधानमेव च'॥ इति। याज्ञवल्क्योऽपि—'आहरेद्विधिवद्दारानग्नीश्चैवाविलम्बयन्'। इति। न हि याज्ञिकेऽर्थे युक्तयः क्रमन्ते। तेनेतन्न चोद्यनीयम्—यजमानः पूर्वमन्यारम्भणीयया संस्कृतो न तस्यां संस्कारः पुनरापादयितुं शक्यः। या च भार्या आधानात्परमृता सा च पूर्वमसंस्कृता, न तस्या दर्शपूर्णमासादिष्वधिकारः। स कथं तया तेष्वर्हतीति। अन्यारम्भणीयाजन्यश्च संस्कारो यदि संयोगवदुभयनिष्ठः तदा भार्यानाशे नश्यतीति तस्य पुनः संस्कारोऽपि नाऽनुपपन्नः। यानि च नाऽन्यारम्भणीयामपेक्ष्यन्ते स्मार्तानि गार्ह्याणि च तैरविकारस्तस्याऽप्यविरुद्धः। ननु च प्रागग्न्याधानात् कर्मभिः संबध्यते गार्ह्यैः स्मार्तैश्च, तत्किमुच्यते आधाने हि सती कर्मभिः संबध्यत इति? सत्यम्, अस्मादेव च हेतुनिर्देशादवसीयते प्रागाधानात् सत्यामपि धर्मसंपत्तौ प्रजासंपत्तौ च रागान्धस्य कदाचिद्दारग्रहणे नातीव दोष इति। अथ यस्याहिताग्नेर्भार्या सत्येव कर्मण्यश्रद्दधाना अशक्ता वा भवति पुत्राश्च मृता अनुत्पन्ना वा तस्य कथम्? यद्येषा युक्तिः 'धर्म-

(१) आध २।११।१३, हिध.२।१०, ममु.९।८१.

(२) आध. २।११।१४, हिध.२।१०.

प्रजासंपन्न, इति कर्मभिः संवर्धत इति च, तदा कर्तव्यो विवाहः । न च 'प्रागप्रन्याधेया'दित्यस्य विरोधः । अन्यतरभावे कार्यत्वस्यैव स शेषः । न पुनरुभयाभावे कार्यत्वस्य । भारद्वाजसूत्रं तु यद्यप्यविशेषेणाहिताग्नेर्दारानुज्ञा प्रतीयते—'अथ यद्याहिताग्निः पुनर्दारक्रियां कुर्वात यद्यग्नीन्संसृजेत् लौकिकाः संपद्येरन् तस्य पुनरग्न्याधेयं कुर्वातत्याग्नमर्थ्यः, पुनराधानमित्यालेख्यनः, पुनरग्न्याधेयमित्याडुलोमिरि'ति । तथापि तस्याप्ययमेव विषयः । उ.

विवाहे गोत्रसापिण्डयविचारः

सगोत्राय दुहितरं न प्रयच्छेत् ।

कन्यागोत्रमेव गोत्र यस्य तस्मै कन्या न देया । यथा हारीताय हारीती, वात्स्याय वात्सीमित्यादि । उ.

मातुश्च योनिसंबन्धेभ्यः ।

मातृयोनिसंबन्धा. कन्याया मातुलादयः । चकारात् पितुरप्येवम् । तेभ्यः असगोत्रेभ्योऽपि न देया कन्यका । उ.

दम्पत्योः शुद्धिविचारः

चरिते यथापुरं धर्मादि सबन्धः ।

चरिते तु निपत यथापुर यथापूर्व धर्मात्, तृतीयार्थे पञ्चमी । धर्मेण सम्बन्धो भवति । द्विजशब्दोऽयं । यस्मादेव तस्मात् अकृत्य प्रायश्चित्त कारयितव्ये । ततो यज्ञविवाहादौ न कश्चिद्दोष इति । उ.

निर्योगविधिनिषेधौ

सगोत्रस्थानीयां न परेभ्यः समाचक्षीत ।

परदारप्रसङ्गादुच्यते —सगोत्रेति । योऽनपत्यः आत्मनः शक्त्यभाव निश्चित्य क्षेत्रज पुत्रमिच्छन् भार्या परत्र नियुङ्क्त, मृते वा तस्मिन् तन्निबन्धादयः संतानकाङ्क्षिणः, तद्विषयमेतत् । कुलान्तरप्रविष्टा सगोत्रस्थानीया । सा हि पूर्वं पितृगोत्रा सती भर्तृगोत्रधर्मैरधिक्रियेत । अतः भर्तृपक्षाणां **सगोत्रस्थानीया** भवति । भर्ता तु साक्षात्सगोत्रः । ता सगोत्रस्थानीया न परेभ्योऽसगोत्रेभ्यः समाचक्षीत, इयमनपत्या, अस्यामपत्यमुत्पाद्यतामिति । सगोत्रायैव तु समाचक्षीत, तत्रापि देवराय, तदभावे सपिण्डेभ्यः । उ.

कुलाय हि स्त्री प्रदीयत इत्युपदिशन्ति ।

कः पुनः सगोत्रस्य विशेषः? तमाह —कुलायेति । हि यस्मात् स्त्री कन्या प्रदीयमाना कुलायैव प्रदीयत इत्युपदिशन्ति धर्मज्ञाः । तस्मात् सगोत्रायैव समाचक्षीतेति । उ.

तदिन्द्रियदौर्बल्याद्विप्रतिपन्नम् ।

तमिम नियोग दूषयति—तदिन्द्रियेति । यद्यप्येव पूर्वं कृतवन्तः, तथाऽपि तदद्यत्वे विप्रतिपन्नं विप्रतिषिद्धम् । कुतः? इन्द्रियदौर्बल्यात् । दुर्बलेन्द्रिया ह्यद्यत्वे मनुष्याः । ततश्च शास्त्रव्याजेनापि भर्तृव्यतिक्रमेऽतिप्रसङ्गः स्यादिति । उ.

अविशिष्टं हि परत्वं पाणेः ।

सगोत्रविषयेऽपि यो विशेषः सोऽपि नास्तीत्याह —अविशिष्टमिति । येन पाणिना पूर्वमग्निसाक्षिक पाणिर्गृहीतः कन्यायाः, तस्मात् पाणेरन्यो भवति सगोत्रस्यापि पाणिः । यस्मादेव पाणेः परत्वमविशिष्ट समानम् । तस्मादविशेष इति । अविशिष्टमित्यपाठः । उ.

तद्व्यतिक्रमे खलु पुनरुभयोर्नरकः ।

पाणिरन्यो भवतु, को दोषः? तस्य पाणेर्व्यतिक्रमे उभयोर्दम्पत्योः नरको भवति । खलुपुनरिति प्रसिद्धिद्योतकौ निपातौ । अतः पत्याऽपि न स पाणिः त्याज्यः यः पूर्वं गृहीतः । भार्ययाऽपि न स पाणिस्त्याज्यो येन पूर्वमात्मनः पाणिर्गृहीतः । उ.

नियमारम्भणो हि वर्षीयानभ्युदय एवमारम्भणादपत्यात् ।

---

(१) आध.२।११।१५, हिध.२।१०.
(२) आध.२।११।१६; हिध.२।१०.
(३) आध २।२७।१, हिध २।१९ मातृसबन्ध (संबन्ध.)
(४) आध.२।२७।२; हिध.२।१९ सगोत्रस्थानीया न (न सगोत्रस्थानीयां).

(१) आध.२।२७।३; हिध.२।१९.
(२) आध.२।२७।४, हिध.२।१९.
(३) आध.२।२७।५; हिध.२।१९.
(४) आध.२।२७।६; हिध.२।१९ (खलु०).
(५) आध.२।२७।७; हिध.२।१९.

आरभ्यतऽनेनेत्यारम्भणः योऽयं दम्पत्योः परस्परनियमः, स आरम्भणो यस्य स नियमारम्भणः। एवभूतो योऽभ्युदयः स एव वर्षीयान्। बृद्धतरः। कस्मात् वर्षीयान्[1] एवमुक्तप्रकारेण नियोगलक्षणेन यदपत्यमारभ्यते तस्मादेवमारम्भणादपत्याद्वर्षीयानिति। उ.

विधवाधर्मः

[2]निर्मन्थ्येन पत्नी।

बौधायनः

कन्याविवाहकाल

दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे।
अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम्॥

गुणवते विद्याचारित्रबन्धुशीलसंपन्नाय, नग्निका वस्त्रपरिधानाभावेऽपि लज्जाशून्या, गुणहीनाय सर्वगुणाभावेऽपि कतिपयगुणसंपन्नाय, नोपरुन्ध्यादिति रजोदर्शनात्प्रागेव दद्यादित्यर्थः। बौधि.

त्रीणि वर्षाण्यृतुमतीं यः कन्यां न प्रयच्छति।
स तुल्यं भ्रूणहत्यायै दोषमृच्छत्यसंशयम्॥

तदतिक्रमे दोषमाह—त्रीणीति। यतश्चैतदेव तत ऋतुमत्तायाः प्रागेव दद्यादित्यभिप्रायः। बौधि.

न याचते चेदेव स्याद्याचते चेत्पृथक्पृथक्।
एकैकस्मिन्नृतौ दोषं पातकं मनुरब्रवीत्॥

न याचते न प्रार्थयते चेत् कञ्चिदपि। बौधि.

स्वयंवरः

[3]त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम्।
ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम्॥

तत्र प्रसङ्गादिदमन्यदुच्यते—त्रीणीति। सादृश्यं जातिगुणादिभिः। बौधि.

[4]अविद्यमाने सदृशे गुणहीनमपि श्रयेत्।

अत एवाऽऽह—अविद्यमान इति। गुणा अभिजनादयो न जातिः। बौधि.

बलाद्धृतकन्यापुनर्दानम्

[5]बलाच्चेत्प्रहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥

एवं स्वयंवरं परिसमाप्याऽधुना कन्यादानविषय एवाऽऽशङ्कानिवृत्त्यर्थमन्यदुच्यते—बलाच्चेदिति। प्रहरणं मैथुनार्थमाकर्षणम्। न तु क्षतयोनित्वापादनं, तथा च सति संस्कार एव नास्ति। बौधि.

कन्यापुनर्विवाहः

[6]निसृष्टायां हुते वाऽपि यस्यै भर्ता म्रियेत सः।
सा चेदक्षतयोनिः स्यादृतप्रत्यागता सती॥
पौनर्भवेन विधिना पुनःसंस्कारमर्हति॥

निसृष्टा उदकपूर्वं प्रत्ता। हुते वाऽपि होमेऽपि निर्वृत्ते भर्ता वोढा यदि म्रियते, सा चेद् भार्या अक्षतयोनिः अस्पृष्टमैथुना स्यात् गतप्रत्यागता। बौधि.

भार्यागमनविधि

[7]त्रीणि वर्षाण्यृतुमतीं यो भार्यां नाधिगच्छति।
स तुल्यं भ्रूणहत्यायै दोषमृच्छत्यसंशयम्॥

भर्तृविषय एव किञ्चिदुच्यते—त्रीणीति। यथा गर्भप्रध्वंसने भ्रूणहत्या भवति तथा तत्प्रागभावेऽपि, अविशेषादित्यभिप्रायः। बौधि.

ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति।
पितरस्तस्य तन्मासं तस्मिन् रजसि शेरते॥

ऋतुगमनातिक्रमनिन्दैषा। बौधि.

ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति।
तुल्यमाहुस्तयोर्दोषमयोनौ यश्च सिञ्चति॥

त्रयाणामपि भ्रूणहत्यादोषस्तुल्यः सत्पुत्रोत्पत्तिनिरोधात्। बौधि.

भर्तुः प्रतिनिवेशेन या भार्या स्कन्दयेदृतुम्।
तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं निर्धमेदगृहात्॥

प्रतिनिवेशः प्रतिकूलता अनिच्छा वा। स्कन्दयेत् गमयेत् शोषयेद्वा भर्तृदोषाद्रज औषधादिभिः शोषयन्तीमित्यर्थः। ग्राममध्ये जनसंनिधौ निर्धमेत् प्रस्थापयेत् त्यजेत्। ऋत्वतिक्रमे भर्तुर्यथा भ्रूणहत्या तथाऽस्या अपीति निन्दैषा। बौधि.

---

(१) स्मृच २५४. (२) बौध.४।१।१२ (३) बौध.४।१।१३.
(४) बौध.४।१।१४. (५) बौध.४।१।१५.
(६) बौध.४।१।१५. (७) बौध.४।१।१६.

(१) बौध.४।१।१७,१८. (२) बौध.४।१।१९.
(३) बौध.४।१।२०. (४) बौध ४।१।२१.
(५) बौध.४।१।२२; स्मृच.२४७ निर्धमेद् (तु नयेद्); पमा.४७७; समु.१२२.

ऋतुस्नातां न चेद्गच्छेन्नियतां धर्मचारिणीम् ।
नियमातिक्रमे तस्य प्राणायामशतं स्मृतम् ॥

ऋतुगमनातिक्रमे प्रायश्चित्तमाह—ऋतुस्नातामिति । नियमातिक्रमः ऋतुगमनातिक्रमः । ऋत्वतिक्रमो वा । ऋज्वन्यत् । बौधि.

स्त्रीरक्षा । भर्तृहिताधर्म. ।

***न स्त्री स्वातन्त्र्यं विन्दते ।**

अथाप्युदाहरन्ति—पिता रक्षति कौमारे भर्ता रक्षति यौवने । पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥

भर्तृहिते यतमानाः स्वर्गं लोकं जयेरन् ।

भर्तृहिते स्नापनप्रसाधनमर्दनादिभिर्भर्तारं नातिक्रमेदिति यावत् । बौधि.

भार्यापरित्याग

अशुश्रूषाकरीं नारीं बन्धकीं पतिहिंसकाम् ।
त्यजन्ति पुरुषाः प्राज्ञाः क्षिप्रमप्रियवादिनीम् ॥

त्यागश्च वधप्रतिनिधित्वेन कार्यः । पमा.४७७

अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् ।
मृतप्रजां पञ्चदशे सद्यस्त्वप्रियवादिनीम् ॥

अधिवेदनमत्र विवक्षितं, न त्यागः । तदपि सति संभवे । धर्माधिकारः पुनरस्त्येव । अप्रियवादिन्यास्तु विपन्ने (?)। तस्या अपि ग्रासाच्छादन देयम् । बौधि.

नियोगः

संवत्सरं प्रेतपत्नी मधुमांसमद्यलवणानि वर्जयेदधःशयीत ।

अयं परः स्त्रीधर्मः—संवत्सरमिति । मृतः पतिर्यस्याः तस्या अयं सांवत्सरिको नियमः । अत्यन्तं ताम्बूलमपि । तद्ग्रहणमेव ब्रह्मचर्यस्याऽपि ग्रहणम् । तच्च यावज्जीविकम् । बौधि.

षण्मासानिति मौद्गल्यः ।

अशक्तावनुग्रहोऽयम् । अन्यथा पितृमेधकल्पोक्तेन 'यावज्जीवं प्रेतपत्नी' इत्यनेन विरोधः स्यात् । बौधि.

अत ऊर्ध्वं गुरुभिरनुमता देवराज्जनयेत्पुत्रमपुत्रा ।

अत ऊर्ध्वं संवत्सरात् षड्भ्यो मासेभ्यः गुरुभिः श्वशुरप्रभृतिभिः अनुमता, तत्सुतेषु । देवरो द्वितीयो वरः स पत्युर्भ्राता । तस्मात्पुत्रमेक जनयेत् । तावतैव सपुत्रत्वसिद्धेः विवक्षितत्वाच्चैकवचनस्य । बौधि.

अनियोज्या अगम्याश्च स्त्रियः

अथाप्युदाहरन्ति—
वशा चोत्पन्नपुत्रा च नीरजस्का गतप्रजा ।
नाऽकामा संनियोज्या स्यात्फलं यस्यां न विद्यते ॥

सापत्न देवरनियोगे अनर्हां आह—वशा चोत्पन्नपुत्रेति । या पुरुषसंबन्धं नेच्छति । यस्यामुपगमनफलं न विद्यते गर्भस्य संभवात् । बौधि.

मातुलपितृष्वसा भगिनी भागिनेयी स्नुषा मातुलानी सखिवधूरित्यगम्याः ।

अन्यत्रापि देवरनियोगादगम्या आह—मातुलपितृष्वसेति । स्वसृशब्दो मातुलपितृशब्दाभ्यां प्रत्येक संबध्यते । भगिनी सोदरी । स्नुषा पुत्रस्य भार्या । मातुलानी मातुलस्य पत्नी । सखिवधूः सख्युश्च भार्या । बौधि.

वसिष्ठः

विवाहे गोत्रप्रवरसापिण्ड्यादिविचारः

गृहस्थो विनीतक्रोधहर्षो गुरुणाऽनुज्ञातः स्नात्वाऽसमानार्षामस्पृष्टमैथुनां यवीयसीं सदृशीं भार्यां विन्देत ।

---

* स्थलादिनिर्देश. दायभागे द्रष्टव्य. ।

(१) **बौध.**४।१।२३.

(२) **बौध.**२।२।५८.

(३) **व्यक.**१३२, **स्मृच** २४७ बन्ध (वर्ध) पतिहिंसकाम् (परहिंसिकाम्), **विर.**४२५ नारीं (बन्ध्या) काम् (कीम्); **पमा.**४७७(=); **नृप्र.**३३; **विभ.**१४ नारा (वध्या) पतिहिंसकाम् (परगेहिनीम्), **समु** १२२ स्मृतिवत्.

(४) **बौध.**२।२।६५; **व्यक** १३२, **स्मृच.**२४७ दश (नव); **विर.**४२५ मृत (प्रेत); **पमा** ४७६; **नृप्र.**३३; **विभ.**१४ विरवत्; **समु.**१२२ दश (नव) मृत (प्रेत).

(५) **बौध.**२।२।६६.

(१) **बौध.**२।२।६७.

(२) **बौध.**२।२।६८. (३) **बौध.**२।२।६९,७०.

(४) **बौध.**२।२।७१.

(५) **वस्मृ.**८।१; **समु.**११८.

पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्यः ।

कन्याविवाहकाल । स्वयंवरः ।

कुमार्यृतुमती त्रीणि वर्षाण्युपासीतोर्ध्वं त्रिभ्यो वर्षेभ्यः पति विन्देत्तुल्यम् ।

अथाप्युदाहरन्ति ।

पितुः प्रमादात्तु यदीह कन्या वयःप्रमाणं समतीत्य दीयते ।
सा हन्ति दातारमुदीक्षमाणा कालातिरिक्ता गुरुदक्षिणेव ॥

प्रयच्छेन्नग्निकां कन्यामृतुकालभयाप्तिता ।
ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति ॥

यावच्च कन्यामृतवः स्पृशन्ति तुल्यैः सकामामभियाच्यमानाम् । भ्रूणानि तावन्ति हतानि ताभ्यां मातापितृभ्यामिति धर्मवादः ॥

वाग्दत्तायाः पुनरन्यत्र दानम्

अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि ।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा ॥
बलाच्चेत्प्रहृता कन्या मन्त्रैर्यदि न संस्कृता ।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥
कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्यानुमन्यते ॥

अक्षतयोनिपुनर्विवाहः

पाणिग्रहे मृते बाला केवलं मन्त्रसंस्कृता ।
सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हति ॥

भार्यापरित्यागः

व्यवाये तीर्थगमने धर्मेभ्यश्च निवर्तते ॥
चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी तु विशेषेण जुङ्गितोपगता तथा ॥

व्यवायः संभोगः । तीर्थगमनशब्देनात्र स्मार्तकर्म प्रदर्शितम् । धर्मशब्देन श्रौतम् । चशब्देन संस्पर्शादिलौकिकम् । ततश्चायमर्थः । संभोगसहाधिकारसंस्पर्शनसभाषणादिभ्यो वर्जिता स्त्री निवर्तत इति । अनयैव वचोभङ्ग्या सभोगादेरात्यन्तिकवर्जन विसर्जनमित्युक्तम् ।

शिष्यो भर्तृशिष्यो, गुरुः पिता, जुङ्गितः पतितः प्रतिलोमजो वा । पतिघ्नी तु ज्ञातिभिः परित्याज्या । ज्ञातिपरित्यक्तायाः कदन्नप्रदानादिकमपि न कार्यम् । विशेषेणेत्युक्तत्वात् । चतस्र इत्युक्तिर्न ततोऽधिकपरित्याज्ययोपिदभावबोधनार्था जुङ्गितोपगतपदेन पतितोपगतप्रतिलोमजोपगतयोरभिधानात् पूर्वपरविरोधापत्तेः । कथ तर्हि चतस्र इत्युक्तिः । उच्यते । पतितप्रतिलोमजोपगतयोर्जुङ्गितोपगतपदार्थतयैक्यमुपेत्य चतस्र इति सकलना कृता । यत एव चतस्र इत्युक्तिः परित्याज्यान्तराभाव न बोधयति । स्मृच.२४६

व्यभिचाराद्दतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्तृवधे तासां तथा महति पातके ॥
या ब्राह्मणी स्यादिह वै सुरापी
न तां देवाः पतिलोकं नयन्ति ।

---

(१) **वस्मृ.**८।२; **समु.**११८

(२) **वस्मृ.**१७।५९.

(३) **वस्मृ.**१७।६०,६१ (ख) (पितुः प्रदानात् तु यदा हि पूर्वं कन्यावयो यः; समतीत्य दीयते) मुदी (मपी).

(४) **वस्मृ.**१७।६२.

(५) **वस्मृ.**१७।६३; **दा.**१७६ च्च (त्तु) मभि (मपि) भ्रूणानि तावन्ति (तावन्ति भूतानि); **मभा** १८।२३ वच्च (वन्तः); **विभ.**४.

(६) **वस्मृ.**१७।६४ (ख) तादौ (तार्थो); **बाल.**२।१२७ वाचा च (श्च वाचा) मन्त्रोपनीता स्यात् (तौ दम्पती स्याता); **विभ.**३४; **समु.**११९ तादौ (तोर्ध्वं).

(७) **वस्मृ.**१७।६५ (ख) बलाच्चेत् प्रहृता (यावच्चेदाहृता); **समु** ११९ च्चेत्प्र (दप).

(८) **विभ.**३४.

(१) **वस्मृ.**१७।६६ (ख) चेद (च त्व).

(२) **वस्मृ.**२१।११,१२ भ्यश्च (भ्यस्तु) तु वि (च वि) तथा (च या), **व्यक.**१३२, **स्मृच** २४६, **विर** ४२५ भ्यश्च (या च) पगता (पहता) तथा (च या); **पमा.**४७५ च या (तथा); **नृप्र.**३३ च या (तथा), **विभ.**१६; **समु.**१२२ तथा (च या).

(३) **व्यक.**१३२; **विर.**४२५.

(४) **वस्मृ.**२१।१३ (स्यादिह वै०) तिष्ठति (चरति) मृता जलौका भवत्यथ (ऽप्सुलुग्भवति), **व्यक.**१३६; **विभ.**२३ मृता (अप्सु) लौ (लू) शुक्तिका (शूकरी).

इहैव सा तिष्ठति क्षीणपुण्या
मृता जलौका भवत्यथ शुक्तिका वा ॥
ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण संगताः।
अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः।
प्रतिलोमं चरेयुस्ताः कृच्छ्रं चान्द्रायणोत्तरम् ॥
पतिव्रतानां गृहमेधिनीनां सत्यव्रतानां च शुचिव्रतानाम्। तासां तु लोकाः पतिभिः समाना गोमायुलोका व्यभिचारिणीनाम् ॥
पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत्।
पतितार्धशरीरस्य निष्कृतिर्न विधीयते ॥

पत्यौ प्रोषिते पत्नीधर्मः। नियोग।

[1]प्रोषितपत्नी पञ्च वर्षाण्युपासीतोर्ध्वं पञ्चभ्यो वर्षेभ्यो भर्तृसकाशं गच्छेत्। यदि धर्मार्थाभ्यां प्रवासं प्रत्यनुकामा न स्याद्यथा प्रेत एवं वर्तितव्यं स्यात्।

[2]एवं ब्राह्मणी पञ्च प्रजाताऽप्रजाता चत्वारि, राजन्या प्रजाता पञ्चाप्रजाता त्रीणि, वैश्या प्रजाता चत्वार्यप्रजाता द्वे, शूद्रा प्रजाता त्रीण्यप्रजातैकम्।

[3]अत ऊर्ध्वं समानोदकपिण्डजन्मर्षिगोत्राणां पूर्वः पूर्वो गरीयान्।

[4]न तु खलु कुलीने विद्यमाने परगामिनी स्यात्।

[5]प्रेतपत्नी षण्मासान् व्रतचारिण्यक्षारलवणं भुञ्जानाधः शयीतोर्ध्वं षड्भ्यो मासेभ्यः स्नात्वा श्राद्धं च पत्ये दत्त्वा विद्याकर्मगुरुयोनिसंबन्धान् संनिपात्य पिता भ्राता वा नियोगं कारयेत्तपसे। न सोन्मत्तामवशां व्याधितां वा नियुञ्ज्यात्। ज्यायसीमपि षोडश वर्षाणि न चेदामयावी स्यात्। प्राजापत्ये मुहूर्ते पाणिग्राहवदुपचरेत्। अन्यत्र संप्रहास्यवाक्पारुष्यदण्डपारुष्याच्च। प्रासाच्छादनस्नानानुलेपनेषु प्राग्गामिनी स्यात्।

*अनियुक्तायामुत्पन्न उत्पादयितुः पुत्रो भवतीत्याहुः। स्याच्चेन्नियोगिनो रिक्थम्। लोभान्नास्ति नियोगः। प्रायश्चित्तं वाऽप्युपदिश्य नियुञ्ज्यादित्येके।

प्रोषितज्येष्ठभ्रातृप्रतीक्षा

[6]द्वावशौ तु वर्षाणि ज्यायान् धर्मार्थयोर्गतः।
न्याय्यः प्रतीक्षितुं भ्रात्रा श्रूयमाणः पुनः पुनः ॥
[7]अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भवति।

विष्णुः

विवाहे गोत्रप्रवरसापिण्ड्यादिविचारः

[8]न सगोत्रां न समानार्षप्रवरां भार्यां विन्देत। मातृतस्त्वा पञ्चममात्पुरुषात्पितृतश्चासप्तमात्। नाकुलीनाम्। न च व्याधिताम्। नाधिकाङ्गीम्। न हीनाङ्गीम्। नातिकपिलाम्। न वाचाटाम्।

स्वयंवरः

ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरम्।
ऋतुत्रये व्यतीते तु प्रभवत्यात्मनः सदा ॥

---

(१) **वस्मृ.**२१।१४.

(२) **वस्मृ.**२१।१५,१६, **व्यक.**१३६ (पतत्यर्धं ..यते०).

(३) **वस्मृ.**१७।६७,६८ (ख) (प्रोषितपत्नी पञ्चवर्षा प्रवसेद्यथाकामा यथा प्रेतस्य एवञ्च वर्तितव्य स्यात्); **मभा.** १८।१८ वास प्रत्यनु (वसेदथ तु) (न स्याद्०); **विभ.**३० पञ्च (अष्ट) (वर्षेभ्यो०) (यदि ध...व्य स्यात्०).

(४) **वस्मृ.**१७।६९ (ख) (एव पञ्च ब्राह्मणी प्रजाता, चत्वारि राजन्या प्रजाता, त्रीणि वैश्या प्रजाता, द्वे शूद्रा प्रजाता); **मभा.**१८।१८ (एव ब्राह्मणी पञ्चाप्रजाता षट् प्रजाता, चत्वारि राजन्याऽप्रजाता पञ्च प्रजाता, त्रीणि वैश्या अप्रजाता चत्वारि प्रजाता, द्वे शूद्रा अप्रजाता त्रीणि प्रजाता)

(५) **वस्मृ.**१७।७०.

(६) **वस्मृ** १७।७१ (ख) (तु०); **मभा.**१८।७ (तु०) कु (तत्कु).

* स्थलादिनिर्देशः दायभागे द्रष्टव्यः।

(१) **वस्मृ.**१७।४९-५४ (ख) मासान् (मास) सोन्मत्ता (वोन्मता) वर्षाणि (वर्षा) वी स्यात् (विनी स्यात्) ग्राहवदुपचरेत् (ग्रहणवदुपचारः) संप्रहास्य (सस्याप्य) व्यदण्ड (व्याइण्ड) नानुले (नले). (२) **मभा.**१८।१९.

(३) **मभा.**१८।१९; **गौमि** १८।१८ विष्टम (विष्टं न) क्षी म (क्षीयो भ).

(४) **विस्मृ.**२४।९-१६. (५) **विस्मृ.**२४।४०,४१.

पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या वृषली ज्ञेया हरंस्तां न विदुष्यति ॥

धर्मार्थं भार्या द्विजजातिजा

[1]सवर्णासु बहुभार्यासु विद्यमानासु ज्येष्ठया सह धर्मकार्यं कुर्यात् । मिश्रासु च कनिष्ठयापि समानवर्णया । समानवर्णाया अभावे त्वनन्तरयैवापदि च । न त्वेव द्विजः शूद्रया ।

[2]द्विजस्य भार्या शूद्रा तु धर्मार्थं न भवेत्कचित् ।
रत्यर्थमेव सा तस्य रागान्धस्य प्रकीर्तिता ॥

[3]हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः ।
कुलान्येव नयन्त्याशु ससंतानानि शूद्रताम् ॥

[4]दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु ।
नाश्नन्ति पितृदेवास्तु न च स्वर्गं स गच्छति ॥

पूर्वदत्ता न पुनर्देया । भार्या न त्याज्या । स्त्रीरक्षा ।

यः कन्यां पूर्वदत्तामन्यस्मै दद्यात्स चौरवच्छास्यः । वरदोषं विना ।

[5]निर्दोषां परित्यजन् पत्नीं च ।

[6]सर्वकर्मस्वस्वतन्त्रता ।

बाल्ययौवनवार्धक्येष्वपि पितृभर्तृपुत्राधीनता ।

(१) **विस्मृ.**२६।१-४; **दा.**१६७ (सवर्णासु...वर्णया०) समानव (सव) (च०); **व्यक.**१३१; **विर.**४१९ बहु (बह्वीषु) ष्ठया (ष्ठयैव) सु च क (सु क) समानव (सव) (समानवर्णाया०) (आपदि च०).

(२) **विस्मृ.**२६।५.

(३) **विस्मृ.**२६।६, **दा.**१३५ मनुविष्णू; **व्यप्र.**४२४ मनुविष्णू, **विभ.**९७.

(४) **विस्मृ.**२६।७; **व्यक.**१३१; **विर.**४२१ वास्तु (वास्तत्) गं स (गं च).

(५) **विस्मृ.**५।१५७

(६) **विस्मृ.**५।१५८; **व्यक.**१३२, **स्मृच.**२४५ पा (पाया), **विर.**४२३; **रत्न.**१३४; **व्यप्र.**४१०; **व्यउ.**१४२ च + (चौरवद्दण्ड्य), **विता.**८२३ च + (चौरवद्दण्ड्य); **विभ.**१३, **समु.**१२२ च + (चौरवच्छास्य.).

(७) **विस्मृ.**२५।१२; **विर.**४२८ मंस्वस्व (मांस्व); **विता.**८२४ (सर्वकर्मसु०); **सेतु.**२८६ विरवत्.

(८) **विस्मृ.**२५।१३; **विर.**४२८ (अपि०) त्राधी (त्रपराधी); **सेतु.**२८६ विरवत्.

पत्नीधर्माः

अथ स्त्रीणां धर्माः । भर्तुः समानव्रतचारित्वम् । श्वश्रूश्वशुरगुरुदेवतातिथिपूजनम् । सुसंस्कृतोपस्करता । अमुक्तहस्तता । सुगुप्तभाण्डता । मूलक्रियास्वनभिरतिः । मङ्गलाचारतत्परता ।

सुसंस्कृतोपस्करता प्रक्षालनादिभिः संस्कृतपीठपिटरादिग्रहोपकरणता । अमुक्तहस्तता असह्ययपराङ्मुखता । मूलक्रिया मूलकर्म । मन्त्रयन्त्रादिना वशीकरणमिति यावत् । स्मृच.२५१

[1]नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम् ।
पति शुश्रूषते यत्तु तेन स्वर्गे महीयते ॥
[2]पत्यौ जीवति या योषिदुपवासव्रतं चरेत् ।
आयुः सा हरते भर्तुर्नरकं चैव गच्छति ॥

पतिशुश्रूषणमकृत्वोपवासव्रत न कार्यमिति प्रतिपादयितुमाह—पत्याविति । स्मृच.२५२

पत्यौ प्रोषिते पत्नीधर्माः

भर्तरि प्रोषितेऽप्रतिकर्मक्रिया । परगृहेष्वनभिगमनम् । द्वारदेशगवाक्षेष्वनवस्थानम् ।

प्रतिकर्मक्रिया अलंकृतेरकरणम् । स्मृच.२५३

प्रतीक्षाकालः । नियोग । विधवाधर्माः ।

अष्टौ विप्रसुता षड्राजन्या चतुरो वैश्या

(१) **विस्मृ** २५।१-८, **व्यक.**१३३; **स्मृच.**२५१ स्त्रीणां (स्त्री) भर्तु (कचित्) व्रत (वृत्त) (श्वश्रू. पूजनम्०) प्रभाण्डता (प्रता), **विर.**२२८ (अथ .र्मा ०) (व्रत०) (श्वश्रू०) थिपू (थीना पू), **विता.**८२४ (अथ स्त्री...भिरतिः०) तत्परता (तत्परा), **सेतु.**२८६ (अथ. र्मा ०) व्रतचारित्वम् (चारित्र्यम्) (श्वश्र०) थिपू (थीना पू) (अमुक्तहस्तता०) (मूलक्रि...रतिः०); **विभ** १७, **समु.**१२४.

(२) **विस्मृ.**२५।१५.

(३) **विस्मृ** २५।१६; **व्यक** १३५; **स्मृच.**२५२ सा हरते (हरति सा), **समु** १२४ स्मृचवत्

(४) **विस्मृ.**२५।९-११ प्रोषि (प्रवसि) क्षे (क्षके); **व्यक.**१३६, **स्मृच** २५३ ऽप्रतिकर्म (प्रतिकर्मा) क्षे (क्षके), **विर.**४२८ प्रोषि (प्रो) ऽप्र (प्र) ४३९ (क्रिया०), **विता** ८२४ प्रोषितेऽप्र (प्रीते प्र) देश (देशे) ष्वनव (चानव); **सेतु.**२८६ प्रोषितेऽप्र (प्रीते प्र); **विभ.**१७ (द्वार...स्थानम्०) शेषं सेतुवत्; **समु.** १२५ स्मृचवत्. (५) **मेधा.**९।७६.

द्विगुणं प्रसूतेति। न शूद्रायाः कालनियमः स्यात्। संवत्सरमित्येके।

मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा।

तदन्वारोहण भर्तारमनु आरोहण अग्न्यारोहणम्।

स्मृच.२५४

मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥

शङ्खः शङ्खलिखितौ च

स्वयंवर। कन्यापुनर्दानम्।

अनुज्ञातो गुरुणा मातापित्रोरनुमतो दारानाहरेत्।
वरयित्वा वरः कश्चित् प्रणश्येत्पुरुषो यदा।
रक्तागमान् त्रीनतीत्य कन्याऽन्यं वरयेद्वरम्॥
प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा।
धार्या सा वर्षमेकं तु देयान्यस्मै विधानतः॥
अथ प्रवृत्तिरागच्छेत् प्रतीक्षेत समात्रयम्।
अत ऊर्ध्वं प्रदातव्या कन्याऽन्यस्मै यथेच्छया॥

सवर्णासवर्णभार्याः

भार्याः कार्याः सजातीयाः श्रेयस्यः सर्वेषां स्युरिति पूर्वैः कल्पैः, ततोऽनुकल्पैः, चतस्रो ब्राह्मणस्यानुपूर्व्येण, तिस्रो राजन्यस्य द्वे वैश्यस्य, एका शूद्रस्य।

स्त्रीरक्षा

यस्मिन् भावोऽर्पितः स्त्रीणामार्तवे तच्छीलं पुत्रं जनयन्ति, यथा नीलवृषेण नीलवृषवत्सप्रभवः, श्वेतेन श्वेत एव जायते, एवं योनिरेव बलवती यस्माद्गुणाः संकीर्यन्ते।

अतो मानसप्यभिचारादपि स्त्रियं रक्षेदिति शेषः।

स्मृच.२४२

भार्यापरित्यागः

कामचारिणीं मलिनां कुचेलां पिण्डमात्रोपजीविनीं निवृत्ताधिकारामधःशय्यां निरुद्धां निवासयेदित्यर्थव्यभिचारिणीम्।

कामचारिणीं परपुरुषकामनया चरन्तीमित्यर्थः। स्वच्छन्दचारिण्यास्त्याज्यत्वादेव व्याख्या कृता।

स्मृच.२४२

अधिवेदनम्

धूर्तां वैनासिकीं स्त्रीजननीं वन्ध्यामप्रियवादिनीम्। अप्रियशीलां पुरुषद्वेषिणीमननुकूलां चाधिविन्देत्।

धूर्ता प्रतारिका। वैनासिकी विगतनासिका। स्त्रीजननी स्त्यपत्यमात्रजननी। एतदुक्तं भवति। धर्मकार्यपुत्रलाभयोः सिद्धिर्यया सह न सभवति तमतिक्रम्य भार्यान्तर विन्देदिति। कामसिद्धेस्तु यया परिपूरणं न भवति तामर्थैस्तोषयित्वा भार्यान्तरमुद्वहेदित्याह देवलः—एकामिति।

स्मृच.२४४

पत्नीधर्माः

श्वः श्वः पचनभाण्डानामुपलेपनं, सुसंमृष्टगृहद्वारोपलेपनं कृतशौचानुकूल्यदध्यक्षतदूर्वाप्रवालपुष्पकृतबलिकर्म, श्वश्रूश्वशुराद्यभिवादनानन्तरं गृहावश्यकानि कुर्यात्। न देवभृत्यातिथिभ्योऽग्रेअश्नीयात् न भर्तुरन्यत्र प्रतिकारौषधात्।

---

(१) विस्मृ.२५।१४, व्यक १३७, स्मृच.२५४, विर. ४४३, सेतु.२८७, विभ २७, समु.१२५.

(२) विस्मृ.२५।१७.

(३) समु ११८. (४) समु ११९.

(५) दा.१३४, व्यप्र.४६५ (कार्याः०) श्रेयस्यः सर्वेषां (सर्वेषां श्रेयस्य), विभ.९८ व्यप्रवत्

(६) व्यक.१२९; स्मृच २४१ (पुत्र०) (यथा. .यन्ते०); विर.४१४; व्यप्र.४०५ तच्छील पुत्र (तादृश तन्तु) (यथा.... यन्ते०): ४०८ (यथा...यन्ते०), व्यउ.१४० तच्छीलं (तादृश) (यथा ..यन्ते०) शेख.; विभ.५, समु.१२० (पुत्र०) (यथा...यन्ते०) शेखः.

(१) स्मृच.२४२; समु १२१ निरुद्धा निवा (निरुन्ध्यान्निवा) शेख.

(२) स्मृच.२४४, समु.१२१ शेखः.

(३) व्यक.१३३; स्मृच.२५१ श्वः श्व. (श्वः) कृतशौचानुकूल्य०) (दध्यक्षतपूर्व प्रवालपुष्यबलिकर्म श्वशुरयोरभिवादनम्। महावश्य कुर्यात्) (न देव ..षधात्०); विर. ४२९ भृत्यातिथि (भूतपति); सेतु.२८६ सुसमृ (स्वमृ) ष्पकृत (प्राहृत) बभिवाद (भिवन्द); विभ.१८ राद्यभि (स्वभि), समु.१२४ स्मृचवत्, शेखः.

श्वः श्वः आगामिनि आगामिनि दिने । न भर्तुरग्रे अश्रीयादित्यन्वयः । अन्यत्र प्रतिकारौषधात् रोगप्रतीकारकारणमौषध तु भर्तुरग्रेऽप्यश्रीयादित्यर्थः ।

विर.४२९

स्त्री परानन्नुव्यक्तवक्त्रा बहिर्निष्कामेत् नानुत्तरीया परिधावेत्, नानुत्सवे गन्धमाल्याभरणानि विकृतानि वासांसि विभृयात्, न परपुरुषमभिभाषेत अन्यत्र बालकप्रव्रजितवृद्धेभ्यः, न नाभिं दर्शयेत्, कुलवधूरागुल्फं श्वासः परिदध्यात्, न स्तनौ विवृतौ कुर्यात्, न हसेतानावृतं न महाजने ।

(१) विकृतानीति पुरस्तात्परस्ताच्च सबध्यते । प्रव्रजितश्चतुर्थाश्रमी । अनपावृत्तमसंवृतम् । क्रियाविशेषण चैतत् । महाजनसमीपे तु संवृत्तस्यापि हसनस्य प्रतिषेधार्थं पुनर्निषेधः कृतः । वेश्यादिस्त्रीभिः सह एकत्रावस्थानप्रतिषेधोऽपि ताभ्या दर्शितः ।

स्मृच.२५०

(२) अनावृतं मुखमनाच्छाद्य न महाजनव्यवहितमपि हसेदित्यर्थः । विर.४३०

न गणिकाधूर्तचारिणीक्षणिकामायाविनीकुहकशीलाविप्लुताभिः सहैकत्र तिष्ठेत्, संसर्गेण हि चारित्र्यं दुष्येत्, न भर्तुः प्रतिकूलमाचरेत्, न प्रकीर्णभाण्डभोजनीयोपस्करव्रव्या, नोत्तानखट्वासनपादुका स्यात् ।

(१) कुहकशीला शठस्वभावा । विप्लुता जागादिभिर्नष्टा । एकतः स्थितिनिषेधोऽय पुनःपुनः क्रियमाणविषय इति हेत्वभिधानादवगम्यते । न हि सकृदेकत्र स्थित्या कुलवधूना चारित्र्य दुष्यति । एव कायशुद्ध्युपघातहेतुभूतपरशयनादिसमर्ग वर्जयेत् ।

स्मृच.२५०

(२) गणिका वेश्या, ईक्षणिका दैवज्ञा, सा चात्र परचारित्र्यखण्डनानुकूलाभिसधिरुक्ता, मायाविनी समोहिका, सापि तथा धूर्तचारिणीतोऽस्या भेदविवक्षया उपादानम् । कुहकशीला चारित्र्यखण्डनोच्छेदकारिणी सा चोक्ताभ्योऽन्या विवक्षिता, विप्लुता पातित्यादिदोषवती । विर.४३१

सुरालशुनपलाण्डुगृञ्जनकमांसादीन्यभक्ष्याणि च वर्जयेत् । आहारमयं शरीरं तन्मयत्वाद्ब्राह्मणः संकीर्यते । मातुरशिनपीताद्धि गर्भः संभवति ।

न च व्रतोपवासनियमेज्यादानधर्मो वाऽनुग्रहकरः स्त्रीणामन्यत्र पतिशुश्रूषायाः, कामं तु भर्तुरनुज्ञया व्रतोपवासनियमादीनामभ्यासः स्त्रीधर्मः ।

न भर्तारं द्विष्याद्यद्यप्यष्ठीवलः स्यात्पतितोऽङ्गहीनो व्याधितो वा पतिर्हि देवता स्त्रीणाम् ।

अष्ठीवलः स्यात् अष्ठीवलाख्यरोगी स्यादित्यर्थः ।

स्मृच.२५१

न व्रतेनोपवासेन धर्मेण विविधेन च ।
नारी स्वर्गमवाप्नोति प्राप्नोति पतिपूजनात् ॥

(१) व्यक.१३३-१३४; स्मृच.२४९ परानन्नुव्यक्तवक्त्रा (नानुक्त्वा) (नानुत्तरीया परिधावेत्०) बालक (वणिक्) (कुलवधूः०) स्फ (स्फाभ्यां) तानावृतं (दनपावृत्त); विर ४३० (न महाजने०); सेतु.२८५ परा...वक्त्रा (नानुक्ता) नानुत्स (न चोत्स) स्फ (स्फाभ्यां) सेता(सेद)(न महाजने०), विभ.१८परा... वक्त्रा (नामुक्तवक्त्रा) बालक (वणिक्) स्फ (स्फाभ्यां); समु. १२३ परान...वक्त्रा (नानुक्ता) शेष स्मृचवत्.

(२) व्यक.१३४; स्मृच.२५० धूर्त (धूर्ता) (क्षणिका०) दुष्येत् (दुष्यति) (न भर्तुः...दुका स्यात्०); विर.४३१; विभ.१८-१९; समु.१२३ (न भर्तुः.. दुका स्यात्०) शेष स्मृचवत्.

(१) व्यक १३६, स्मृच २५० (आहार कीर्यते०) तर्पीता (ता), विर ४३७, विभ.२३ गर्भः स (जनन), समु. १२४ स्मृचवत्.

(२) व्यक.१३५, मभा १८।१ श्लोक.; गोमि.१८।१ सनि (सैनि) कर. (करा) काम (कर्म) श्लोक., स्मृच.२५२ (न च व्र. .याः काम तु०) मभ्यास. (मारम्भ).२९१ (न च व्र .. या.०) (तु०) मभ्यास (मारम्भ); समु १२४ (न च व्र... काम तु०) मभ्यासः (मारम्भ.) श्लोक .

(३) व्यक १३५, स्मृच २५१, समु.१२४ श्लोक..

(४) स्मृच.२५२ श्लोक.; समु.१२४ श्लोकः.

पत्न्यां प्रोषिते पत्नीधर्माः

सर्वासां प्रोषिते भर्तरि ब्राह्मणी चारित्र्यं रक्षेत्, इतरासां मातापितरौ, अनन्तरं राजन्या वा, प्रेङ्खाताण्डवविहारचित्रदर्शनाङ्गरागोद्यानयानविवृतशयनोत्कृष्टपानभोजनकन्दुककीडाधूपगन्धमाल्यालङ्कारदन्तधावनाञ्जनादीनामस्वतन्त्राणां प्रोषितभर्तृकाणां कुलस्त्रीणामनारम्भः ।

(१) प्रेङ्खा डोला । विहारो रथ्यादौ न पुनर्गृहेऽपि। विवृतशयन निष्प्रावरणतया शयनम् । प्रेङ्खादिप्रसाधनान्तानामनारम्भोऽस्वतन्त्राणां प्रोषितभर्तृकाणां कुलस्त्रीणामित्यन्वयः। सर्वासा क्षत्रियादिस्त्रीणामितरासा विप्रस्त्रीणा अनन्तरप्रत्यासन्नबन्धुः। स्मृच.२५३

(२) सर्वासामिति चतसृष्वपि ब्राह्मण्यादिष्वेकपत्नीषु मध्ये ब्राह्मणी स्वयमेव चारित्र्य रक्षेत्, तदितरासा मातापितरौ, अनन्तरञ्च तयोरसतोः राजन्या स्वस्येतरयोश्च चारित्र्य रक्षेत् । विर.४३९

स्वरिणीपुनर्भूदयः

[1]तिस्रः पुनर्भूश्चतस्रः स्वैरिण्यः तत्र पूर्वा पूर्वा जघन्या तासामपत्यानामृक्थपिण्डोदकयज्ञेषु यो विकल्पः स मातुरेव गुणवत्तया व्याख्यातः ।

महाभारतम्

प्रजार्थं विवाहः । स्त्रीरत्न शुद्धम् । भर्तृपतिपदसिरुक्ति ।

[2]वैवाहिकीं क्रियां सन्तः प्रशंसन्ति प्रजाहिताम् ॥
[3]स्त्रीरत्नं दुष्कुलाच्चापि विषादप्यमृतं पिबेत् ।
अदूष्या हि स्त्रियो रत्नमाप इत्येव धर्मतः ॥
भार्याया भरणाद्भर्ता पालनाच्च पतिः स्मृतः ॥

स्त्रीणा पुनर्विवाहव्यभिचारधनस्वाम्यनिषेध

[4]दीर्घतमा उवाच—
अद्यप्रभृति मर्यादा मया लोके प्रतिष्ठिता ॥
एक एव पतिर्नार्या यावज्जीवं परायणम् ।
मृते जीवति वा तस्मिन्नापरं प्राप्नुयान्नरम् ॥
अभिगम्य परं नारी पतिष्यति न संशयः ।
अपतीनां तु नारीणामद्यप्रभृति पातकम् ॥
यद्यस्ति चेद्धनं सर्वं वृथाभोगा भवन्तु ताः ।
अकीर्तिः परिवादाश्च नित्यं तासां भवन्तु वै ॥

पत्नीधर्माः । जायामहिमा । पतिधर्मः ।

[5]पतिव्रतानां नारीणां विशिष्टमिति चोच्यते ।
पतिशुश्रूषणं पूर्वं मनोवाक्कायचेष्टितैः ॥
भार्या पतिः संप्रविश्य स यस्माज्जायते पुनः ।
जायायास्तद्धि जायात्वं पौराणाः कवयो विदुः ॥
सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥
अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतम. सखा ।
भार्या मूलं त्रिवर्गस्य यः सभार्यः स बन्धुमान् ॥
भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः ।
भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विताः ॥
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः ।
पितरो धर्मकार्येषु भवन्त्यार्तस्य मातरः ॥
कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै ।
यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः ॥
संसरन्तमपि प्रेतं विषमेष्वेकपातिनम् ।
भार्यैवान्वेति भर्तारं सततं या पतिव्रता ॥
प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते ।
पूर्वं मृतं तु भर्तारं पश्चात्साध्व्यनुगच्छति ॥
एतस्मात्कारणाद्राजन्पाणिग्रहणमिष्यते ।
यदाप्नोति पतिर्भार्यामिह लोके परत्र च ॥
आत्मात्मनैव जनितः पुत्र इत्युच्यते बुधैः ।
तस्माद्भार्यां पतिः पश्येन्मातृवत्पुत्रमातरम् ॥
भार्यायां जनितं पुत्रमादर्शेष्विव चाननम् ।
ह्लादते जनिता प्रेक्ष्य स्वर्गं प्राप्येव पुण्यकृत् ॥
दह्यमाना मनोदुःखैर्व्याधिभिश्चातुरा नराः ।
ह्लादन्ते स्वेषु दारेषु घर्मार्ताः सलिलेष्विव ॥

(१) व्यक १३६, स्मृच २५३ र राजन्या (रो वा राजन्यो) जना+(दर्शनप्रसाधना), विर ४३९, विभ २३, समु.१२५ दीनाम (दीन्य) शेष स्मृचवत्, शश्च .

(२) व्यक.१३९, विर.४५२, विभ.३२.

(३) भा.(कुं) १।९४।२५. (४) भा १२।१६५।३२.

(५) भा.१।१०४।३०. (६) भा.१।१०४।३४-३७.

(१) भा. (कुं) १।९६।३. (२) भा.१।७४।३७.

(३) भा.१।७४।४०-५२.

सुसंरब्धोऽपि रामाणां न कुर्यादप्रियं नरः ।
रतिं प्रीतिं च धर्मं च तास्वायत्तमवेक्ष्य हि ॥
आत्मनो जन्मनः क्षेत्रं पुण्यं रामाः सनातनम् ।
ऋषीणामपि का शक्तिः स्रष्टुं रामामृते प्रजाम् ॥

स्त्रीणा स्वैरसभोग धर्म आर्षात्

[1]अथ त्विदं प्रवक्ष्यामि धर्मतत्त्वं निबोध मे ।
पुराणमृषिभिर्दृष्टं धर्मविद्भिर्महात्मभिः ॥
अनावृताः किल पुरा स्त्रिय आसन्वरानने ।
कामचारविहारिण्यः स्वतन्त्राश्चारुहासिनि ॥
तासां व्युच्चरमाणानां कौमारात्सुभगे पतीन् ।
नाधर्मोऽभूद्वरारोहे स हि धर्मः पुराऽभवत् ॥
तं चैव धर्मं पौराणं तिर्यग्योनिगताः प्रजाः ।
अद्याप्यनुविधीयन्ते कामक्रोधविवर्जिताः ॥
प्रमाणदृष्टो धर्मोऽयं पूज्यते च महर्षिभिः ।
उत्तरेषु च रम्भोरु कुरुष्वद्यापि पूज्यते ।
स्त्रीणामनुग्रहकरः स हि धर्मः सनातनः ॥

स्त्रीणा श्वेतकेतुकृत पुनर्विवाहनियोगनिषेधः

[2]अस्मिंस्तु लोके न चिरान्मर्यादेयं शुचिस्मिते ॥
स्थापिता येन यस्माच्च तन्मे विस्तरतः शृणु ।
बभूवोद्दालको नाम महर्षिरिति नः श्रुतम् ॥
श्वेतकेतुरिति ख्यातः पुत्रस्तस्याभवन्मुनिः ।
मर्यादेयं कृता तेन धर्म्या वै श्वेतकेतुना ॥
कोपात्कमलपत्राक्षि यदर्थं तन्निबोध मे ।
श्वेतकेतोः किल पुरा समक्षं मातरं पितुः ॥
जग्राह ब्राह्मणः पाणौ गच्छाव इति चाब्रवीत् ।
ऋषिपुत्रस्तदा कोपं चकारामर्षितस्तदा ॥
मातरं तां तथा दृष्ट्वा नीयमानां बलादिव ।
क्रुद्धं तं तु पिता दृष्ट्वा श्वेतकेतुमुवाच ह ॥
मा तात कोपं कार्षीस्त्वमेष धर्मः सनातनः ।
अनावृता हि सर्वेषां वर्णानामङ्गना भुवि ॥
यथा गावः स्थिताः पुत्र स्वे स्वे वर्णे तथा प्रजाः ।
ऋषिपुत्रोऽथ तं धर्मं श्वेतकेतुर्न चक्षमे ॥
चकार चैव मर्यादामिमां स्त्रीपुंसयोर्भुवि ।
मानुषेषु महाभागो न त्वेवान्येषु जन्तुषु ॥
तदाप्रभृति मर्यादा स्थितेयमिति नः श्रुतम् ।
व्युच्चरन्त्याः पतिं नार्या अद्यप्रभृति पातकम् ॥
भ्रूणहत्यासमं घोरं भविष्यत्यसुखावहम् ।
भार्यां तथा व्युच्चरतः कौमारब्रह्मचारिणीम् ॥
पतिव्रतामेतदेव भविता पातकं भुवि ।
नियुक्ता पतिना भार्या यद्यपत्यस्य कारणात् ।
न कुर्यात्तत्तथा भीरु सैनः सुमहदाप्नुयात् ॥
इति तेन पुरा भीरु मर्यादा स्थापिता बलात् ॥
उद्दालकस्य पुत्रेण धर्म्या वै श्वेतकेतुना ॥

बहूनामेकपत्निता

युधिष्ठिर उवाच —
सर्वेषां महिषी राजन्द्रौपदी नो भविष्यति ।
एवं प्रव्याहृतं पूर्वं मम मात्रा विशांपते ॥
अहं चाप्यनिविष्टो वै भीमसेनश्च पाण्डवः ।
पार्थेन विजिता चैषा रत्नभूता सुता तव ॥
एष नः समयो राजन् रत्नस्य सह भोजनम् ।
न च तं हातुमिच्छाम. समयं राजसत्तम ॥
सर्वेषां धर्मतः कृष्णा महिषी नो भविष्यति ।
आनुपूर्व्येण सर्वेषां गृह्णातु ज्वलने करान् ॥
द्रुपद उवाच —
एकस्य बह्व्यो विहिता महिष्यः कुरुनन्दन ।
नैकस्या बहवः पुंसः श्रूयन्ते पतयः क्वचित् ॥
लोकवेदविरुद्धं त्वं नाधर्मं धर्मविच्छुचिः ।
कर्तुमर्हसि कौन्तेय कस्मात्ते बुद्धिरीदृशी ॥
युधिष्ठिर उवाच —
सूक्ष्मो धर्मो महाराज नास्य विद्मो वयं गतिम् ।
पूर्वेषामानुपूर्व्येण यातं वर्मानुयामहे ॥
न मे वागनृतं प्राह नाधर्मे धीयते मतिः ।
एवं चैव वदन्त्यम्बा मम चैतन्मनोगतम् ॥
एष धर्मो ध्रुवो राजंश्चरैनमविचारयन् ।
मा च शङ्का तत्र ते स्यात्कथंचिदपि पार्थिव ॥
युधिष्ठिर उवाच —
न मे वागनृतं प्राह नाधर्मे धीयते मतिः ।
वर्तते हि मनो मेऽत्र नैषो धर्मः कथंचन ॥
श्रूयते हि पुराणेऽपि जटिला नाम गौतमी ।
ऋषीनध्यासितवती सप्त धर्मभृतां वरा ॥

(१) भा.१।१२२।३-८. (२) भा.१।१२२।८-२१.

(१) भा.१।१९५।२३-३१. (२) भा.१।१९६।१३-१९.

तथैव मुनिजा वार्क्षी तपोभिर्भावितात्मनः ।
संगताभूद्दश भ्रातृनेकनाम्नः प्रचेतसः ॥
गुरोर्हि वचनं प्राहुर्धर्म्यं धर्मज्ञसत्तम ।
गुरूणां चैव सर्वेषां माता परमको गुरुः ॥
सा चाप्युक्तवती वाचं भैक्षवद्भुज्यतामिति ।
तस्मादेतदहं मन्ये परं धर्मं द्विजोत्तम ॥
कुन्त्युवाच—
एवमेतद्यथा प्राह धर्मचारी युधिष्ठिरः ।
अनृतान्मे भयं तीव्रं मुक्त्येऽहमनृतात्कथम् ॥
व्यास उवाच—
अनृतान्मोक्ष्यसे भद्रे धर्मश्चैष सनातनः ॥

पत्नीधर्माः

युधिष्ठिर उवाच—
सत्स्त्रीणां समुदाचारे सर्वधर्मविदां वर ।
श्रोतुमिच्छाम्यहं त्वत्तस्तन्मे ब्रूहि पितामह ॥
भीष्म उवाच—
सर्वज्ञां सर्वतत्त्वज्ञां दैवलोके मनस्विनीम् ।
कैकेयी सुमना नाम शाण्डिली पर्यपृच्छत ॥
केन वृत्तेन कल्याणि समाचारेण केन वा ।
विधूय सर्वपापानि देवलोकं त्वमागता ॥
हुताशनशिखेव त्वं ज्वलमाना स्वतेजसा ।
सुता ताराधिपस्येव प्रभया दिवमागता ॥
अरजांसि च वस्त्राणि धारयन्ती गतक्लमा ।
विमानस्था शुभा भासि सहस्रगुणमोजसा ॥
न त्वमल्पेन तपसा दानेन नियमेन वा ।
इमं लोकमनुप्राप्ता त्वं हि तत्त्वं वदस्व मे ॥
इति पृष्टा सुमनया मधुरं चारुहासिनी ।
शाण्डिली निभृतं वाक्यं सुमनामिदमब्रवीत् ॥
नाहं काषायवसना नापि वल्कलधारिणी ।
न च मुण्डा च जटिला भूत्वा देवत्वमागता ॥
अहितानि च वाक्यानि सर्वाणि परुषाणि च ।
अप्रमत्ता च भर्तारं कदाचिन्नाहमब्रुवम् ॥
देवतानां पितॄणां च ब्राह्मणानां च पूजने ।
अप्रमत्ता सदा युक्ता श्वश्रूश्वशुरवर्तिनी ॥
पैशून्ये न प्रवर्तामि न ममैतन्मनोगतम् ।
अद्वारि न च तिष्ठामि चिरं न कथयामि च ॥
असद्वा हसितं किञ्चिदहितं वापि कर्मणा ।
रहस्यमरहस्यं वा न प्रवर्तामि सर्वथा ॥
कार्यार्थं निर्गतं चापि भर्तारं गृहमागतम् ।
आसनेनोपसंयोज्य पूजयामि समाहिता ॥
यदन्नं नाभिजानाति यद्भोज्यं नाभिनन्दति ।
भक्ष्यं वा यदि वा लेह्यं तत्सर्वं वर्जयाम्यहम् ॥
कुटुम्बार्थे समानीतं यत्किञ्चित्कार्यमेव तु ।
प्रातरुत्थाय तत्सर्वं कारयामि करोमि च ॥
प्रवासं यदि मे याति भर्ता कार्येण केनचित् ।
मङ्गलैर्बहुभिर्युक्ता भवामि नियता तदा ॥
अञ्जनं रोचनां चैव स्नानं माल्यानुलेपनम् ।
प्रसाधनं च निष्क्रान्ते नाभिनन्दामि भर्तरि ॥
नोत्थापयामि भर्तारं सुखसुप्तमहं सदा ।
आन्तरेष्वपि कार्येषु तेन तुष्यति मे मनः ॥
नायासयामि भर्तारं कुटुम्बार्थेऽपि सर्वदा ।
गुप्तगुह्या सदा चास्मि सुसंमृष्टनिवेशना ॥
इमं धर्मपथं नारी पालयन्ती समाहिता ।
अरुन्धतीव नारीणां स्वर्गलोके महीयते ॥
भीष्म उवाच—
एतदाख्याय सा देवी सुमनायै तपस्विनी ।
पतिधर्मं महाभागा जगामादर्शनं तदा ॥
यश्चेदं पाण्डवाख्यानं पठेत्पर्वणि पर्वणि ।
स देवलोकं संप्राप्य नन्दने स सुखी वसेत् ॥

ऋतुमत्या विवाहे दानम् । पत्नीधर्माः ।

उमोवाच—
भगवन्सर्वभूतेश श्रूयतां वचनं मम ।
ऋतुप्राप्ता सुशुद्धा या कन्या सेत्यभिधीयते ॥
तां तु कन्यां पिता माता भ्राता मातुल एव वा ।
पितृव्यश्चैव पञ्चैते दातुं प्रभवतां गताः ॥
विवाहाश्च तथा पञ्च तासां धर्मार्थकारणात् ।
कामतश्च मिथो दानमितरेतरकाम्यया ॥
दत्ता यस्य भवेद्भार्या एतेषां येन केन चित् ।

(१) भा.१३।१२३।१-२२.

(१) भा. (कुं) १३।२४९।५-१४.

दातारः सुविमृश्यैव दातुमर्हन्ति नान्यथा ॥
उत्तमानां तु वर्णानां मन्त्रवत्पाणिसंग्रहः ।
विवाहकरणं चाहुः शूद्राणां संप्रयोगतः ॥
यदा दत्ता भवेत्कन्या तस्माद्भार्यार्थिने स्वकैः ।
तदाप्रभृति सा नारी दशरात्रं विलज्जया ।
मनसा कर्मणा वाचा अनुकूला च सा भवेत् ॥
इति भर्तृव्रतं कुर्यात्पतिमुद्दिश्य शोभना ।
तदाप्रभृति सा नारी न कुर्यात्पत्युरप्रियम् ॥
यद्यदिच्छति वै भर्ता धर्मकामार्थकारणात् ।
तथैवानुव्रिया भूत्वा तथैवोपचरेत्पतिम् ।
पतिव्रतात्वं नारीणामेतदेव सनातनम् ॥
तादृशी सा भवेन्नित्यं यादृशस्तु भवेत्पतिः ।
शुभाशुभसमाचार एतद्वृत्तं समासतः ॥
दैवतं सततं साध्वी भर्तारं या तु पश्यति ।
दैवमेव भवेत्तस्याः पतिरित्यवगम्यते ॥

उमोवाच—

पतिमया दिवारात्रं वृत्तान्तं श्रूयतां शुभम् ।
पत्युः पूर्वं समुत्थाय प्रातःकर्म समाचरेत् ॥
पत्युर्भावं विदित्वा तु पश्चात्संबोधयेत्तु तम् ।
नित्यं पौर्वाह्णिकं कार्यं स्वयं कुर्याद्यथाविधि ॥
निवेद्य च तथाऽऽहारं यथा संपद्यतामिति ।
तथैव कुर्यात्तत्सर्वं यथा पत्युः प्रियं भवेत् ॥
यथा भर्ता तथा नारी गुरूणां प्रतिपद्यते ॥
शुश्रूषापोषणविधौ पतिप्रियचिकीर्षया ।
भर्तुर्निष्क्रमणे कार्यं संस्मरेदप्रमादतः ॥
आगतं तु पतिं दृष्ट्वा सहसा परिचारणम् ।
स्वयं कुर्वीत संप्रीत्या कायश्रमहरं परम् ॥
पाद्यासनाभ्यां शयनैर्वाक्यैश्च हृदयप्रियैः ।
अतिथीनामागमेन प्रीतियुक्ता सदा भवेत् ॥
कर्मणा वचनेनापि तोषयेदतिथीन्सदा ।
मङ्गलं गृहशौचं च सर्वोपकरणानि च ॥
सर्वकालमवेक्षेत कारयन्ती च कुर्वती ।
धर्मकार्ये तु संप्राप्ते तद्वद्धर्मपरा भवेत् ॥
अर्थैकार्ये पुनर्भर्तुः प्रमादालस्यवर्जिता ।
सा यत्नं परमं कुर्यात्तस्य साहाय्यकारणात् ॥
धुरंधरा भवेद्भर्तुः साध्वी धर्मार्थयोः सदा ।
विहारकाले वै भर्तुर्ज्ञात्वा भावं हृदि स्थितम् ॥
अलंकृत्य यथायोगं मन्दहाससमन्वितम् ।
वाक्यैर्मधुरसंयुक्तैः स्मयन्ती तोषयेत्पतिम् ॥
कठोराणि न वाच्यानि अन्यथा प्रमदान्तरे ।
यस्यां कामी भवेद्भर्ता तस्याः प्रीतिकरी भवेत् ॥
अप्रमादं पुरस्कृत्य मनसा तोषयेत्पतिम् ।
अनन्तरमथान्येषां भोजनावेक्षणं चरेत् ॥
दासीदासबलीवर्दाश्चण्डालं च शुनस्तथा ।
अनाथान्कृपणांश्चैव भिक्षुकांश्च तथैव च ।
पूजयेद्बलिभैक्षेण पत्युर्धर्मं विवर्धयेत् ॥
कुपितं वाऽर्थहीनं वा श्रान्तं वोपचरेत्पतिम् ।
यथा स तुष्टः स्वस्थश्च तथा संतोषयेत्पतिम् ॥
यथा कुटुम्बचिन्तायां विवादे वाऽर्थसंचये ।
आहूता तत्सहायार्थं तथा प्रियहितं वदेत् ॥
अप्रियं च हितं ब्रूयात्तस्य धर्मार्थकाङ्क्षया ।
एकान्तचर्याकथनं कलहं वर्जयेत्परैः ॥
बहिरालोकनं चैव मोहं व्रीडां च पैशुनम् ।
बह्वाशित्वं दिवास्वप्नमेवमादि विवर्जयेत् ॥
रहस्येकासनं साध्वी न कुर्यादात्मजैरपि ।
यद्यद्द्यान्नियत्येति न्यासवत्परिपालयेत् ॥
विस्मृतं वाऽपि यद्द्रव्यं प्रतिदद्यात्स्वशौचतः ।
यत्किञ्चित्पतिना दत्तं लब्ध्वा तत्सा सुखी भवेत् ॥
अतीवाज्ञामतीर्ष्यां च दूरतः परिवर्जयेत् ।
बालवद्वृद्धवद्भार्या सदैवानुचरेत्पतिम् ॥
भार्यायाः व्रतमित्येव कर्तव्यं सततं विभो ।
एतत्पतिव्रतावृत्तमुक्तं देव समासतः ॥
न च भोगे न चैश्वर्ये न सुखे न धने तथा ।
स्पृहा यस्यास्तथा भर्तुः सा नारीणां पतिव्रता ॥
पतिर्हि दैवतं स्त्रीणां पतिर्बन्धुः पतिर्गतिः ।
नान्यं गतिमहं पश्ये प्रमदाया यथा पतिः ॥
जातिष्वपि च वै स्त्रीत्वं विशिष्टं मे मतिः प्रभो ।
कायक्लेशेन महता पुरुषः प्राप्नुयात्फलम् ।
तत्सर्वं लभते नारी सुखेन पतिपूजया ॥

(१) भा. (कुं) १३।२५०।१-३२.

यथासुखं पतिमती सर्वं पत्यनुकूलतः ।
ईदृशं धर्मसाकल्यं पश्य त्वं प्रमदां प्रति ।
एतद्विसृज्य पच्यन्ते कुस्त्रियः पापमोहिताः ॥
तपश्चर्या च दानं च पतौ तस्याः समर्पितम् ।
रूपं कुलं यशस्तेजः सर्वं तस्मिन्प्रतिष्ठितम् ॥
एवं व्रतसमाचाराः स्ववृत्तेनैव शोभनाः ।
स्वभर्त्रा च समं गच्छेत्पुण्यलोकानुकर्मणा ॥
वृद्धो विरूपो बीभत्सो धनवान्निर्धनोऽपि वा ।
एवंभूतोऽपि वै भर्ता स्त्रीणां भूषणमुत्तमम् ॥
आढ्यं वा रूपयुक्तं वा विरूपं धनवर्जितम् ।
या पतिं तोषयेत्साध्वी सा पत्नीनां विशिष्यते ॥
दरिद्रांश्च विरूपांश्च प्रमूढान्कुष्ठसंयुतान् ।
पतीनुपचरेल्लोकानक्षयान्प्रतिपद्यते ॥

पत्युरनुगमनम् । विधवाधर्मो ।

एवं प्रवर्तमानायाः पतिः पूर्वं म्रियेत चेत् ।
तदाऽनुमरणं गच्छेत्पुनर्धर्मं चरेत वा ॥
आदिप्रभृति या साध्वी पत्युः प्रियपरायणा ।
ऊर्ध्वं गच्छति सा पूता भर्त्राऽनुमरणं गता ॥
एवं मृताया वै लोकानहं पश्यामि चक्षुषा ।
स्पृहणीयान्सुरगणैर्यान्गच्छन्ति पतिव्रताः ॥
अथवा भर्तरि मृते वैधव्यं धर्ममाश्रिताः ।
तूष्णीं भौमं जले नित्यमञ्जलिस्नानमुत्तमम् ।
व्रतं च पतिमुद्दिश्य कुर्युश्चैव विधिं ततः ॥
एवं गच्छति सा नारी पतिलोकमनुत्तमम् ।
रमणीयमनिर्देश्यं दुष्प्रापं देवमानुषैः ॥
प्राप्नुयात्तादृशं लोकं केवलं या पतिव्रता ।
इति ते कथितं देव स्त्रीणां धर्ममनुत्तमम् ॥

स्त्रीरक्षा । स्त्रीणां समानवर्णे व्यभिचारोऽदोषोऽन्यदोषो वा ।

नारद उवाच—
एकवर्णे विदोषं तु गमनं पूर्वकालिकम् ।
धाता च समनुज्ञातो विष्णुना तत्तथाऽकरोत् ॥
भगलिङ्गे महाप्राज्ञ पूर्वमेव प्रजापतिः ।
ससर्ज ताभ्यां संयोगमनुज्ञातश्चकार सः ॥
अथ विष्णुप्रसादेन भगो दक्षसरः किल ।
तेन चैव प्रसादेन सर्वांल्लोकानुपाश्नुते ॥
तस्मात्तु पुरुषे दोषो ह्यधिको नात्र संशयः ।
विना गर्भं सवर्णेषु न त्याज्या गमनात्स्त्रियः ॥
प्रायश्चित्तं यथान्यायं दण्डं कुर्यात्स पण्डितः ।
श्वभिर्वा दंशनं स्नानं सवनत्रितयं निशि ॥
भूमौ च भस्मशयनं दानं भोगविवर्जितम् ।
दोषगौरवतः कालो द्रव्यगौरवमेव च ।
मर्यादा स्थापिता पूर्वमिति तीर्थान्तरं गते ॥
तद्योषितां तु दीर्घायो नास्ति दोषो व्यतिक्रमे ।
भगतीर्थान्तरे शुद्धो विष्णोस्तु वचनादिह ॥
रक्ष्याश्चैवान्यसंवादैरन्यगेहाद्विचक्षणैः ।
आसां शुद्धौ विशेषेण कर्मणां फलमश्नुते ॥
नैता वाच्या न वै वध्या न क्लेश्याः शुभमिच्छता ।
विष्णुप्रसादादित्येव भगस्तीर्थान्तरं गतः ।
मासिमासि ऋतुस्तासां दुष्कृतान्यपकर्षति ॥
स्त्रियस्तोपकरा नृणां स्त्रियः पुष्टिप्रदाः सदा ।
पुत्रसेतुप्रतिष्ठाश्च स्त्रियो लोके महाद्युते ॥

बहुभार्यस्य समोगविधि

नारद उवाच —
बहुभार्यासु सक्तस्य नारीभोगेषु गेहिनः ।
ऋतौ विमुञ्चमानस्य सान्निध्ये भ्रूणहा स्मृतः ॥
वृद्धां वन्ध्यां सुव्रतां च मृतापत्यामपुष्पिणीम् ।
कन्यां च बहुपुत्रां च वर्जयन्मुच्यते भयात् ॥
व्याधितो बन्धनस्थो वा प्रवासेष्वथ पर्वसु ।
ऋतुकाले तु नारीणां भ्रूणहत्यां प्रमुञ्चति ॥

पत्नीपरित्याग.

मार्कण्डेय उवाच—
नराणां त्यजतां भार्यां कामक्रोधाद्गुणान्विताम् ।
अप्रसूतां प्रसूतां वा तेषां पृच्छामि निष्कृतिम् ॥
नारद उवाच —
अपापां त्यजमानस्य साध्वीं मत्वा यमादितः ।
आत्मवंशस्वधर्मो वा त्यजतो निष्कृतिर्न तु ॥

---

(१) भा. (कुं) १३।२५०।३१.
(२) भा. (कुं) १३।२५०।६०-९
(३) भा. (कुं) १३।५८।२-११.

(१) भा (कुं) १३।५९।२-४.
(२) भा. (कुं) १३।५९।९-२२.

यो नरस्त्यजते भार्यां पुष्पिणीमप्रसूतिकाम् ।
स नष्टवंशः पितृभिर्युक्तस्त्यज्येत दैवतैः ॥
भार्यामपत्यसंजातां प्रसूतां पुत्रपौत्रिणीम् ।
पुत्रदारपरित्यागी न स प्राप्नोति निष्कृतिम् ॥
एवं हि भार्यां त्यजतां नराणां नास्ति निष्कृतिः ।
नार्हन्ति प्रमदास्त्यक्तुं पुत्रपौत्रप्रतिष्ठिताः ॥
मार्कण्डेय उवाच—
कीदृशीं संत्यजन्भार्यां नरो दोषैर्न लिप्यते ।
एतदिच्छामि तत्त्वेन विज्ञातुमृषिसत्तम ॥
नारद उवाच —
मोक्षधर्मस्थितानां तु अन्योन्यमनुजानताम् ।
भार्यापतीनां मुक्तानामधर्मो न विधीयते ॥
अन्यसङ्गं गतापत्यां शूद्रगां परगामिनीम् ।
परीक्ष्य त्यजमानानां नराणां नास्ति पातकम् ॥
पातकेऽपि तु भर्तव्यौ द्वौ तु माता पिता तथा ॥
मार्कण्डेय उवाच—
भार्यायां व्यभिचारिण्यां नरस्य त्यजतो रुषा ।
कथं धर्मोऽप्यधर्मो वा भवतीह महामते ॥
नारद उवाच—
अनृतेऽपि हि सत्ये वा यो नारीं दूषितां त्यजेत् ।
अरक्षमाणः स्वां भार्यां नरो भवति भ्रूणहा ॥
अपत्यहेतोर्या नारी भर्तारमतिलङ्घयेत् ।
लोलेन्द्रियेति सा रक्ष्या न संत्याज्या कथंचन ॥
नद्यश्च नार्यश्च समस्वभावा
नैताः प्रमुञ्चन्ति नरावगाढाः ।
स्रोतांसि नद्यो वहते निपातं
नारी रजोभिः पुनरेति शौचम् ॥
एवं नार्यो न दुष्यन्ति व्यभिचारेऽपि भर्तृणाम् ।
मासिमासि भवेद्रागस्ततः शुद्धा भवन्त्युत ॥

स्त्रीरक्षा । स्त्रीदोषा. ।

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥
मदं च व्यभजद्राजन्पाने स्त्रीषु च वीर्यवान् ।
अक्षेषु मृगयायां च पूर्वसृष्टं पुनः पुनः ॥

(१) भा.१३।२०।२१. (२) भा.३।१२५।८,९.

नैं च त्वमभिजानीषे स्त्रीणां गुह्यमनुत्तमम् ।
पुत्रं वा किल पौत्रं वा भ्रातरं वा मनस्विनम् ॥
रहसीह नरं दृष्ट्वा नानागन्धविभूषितम् ।
योनिरुत्स्विद्यते स्त्रीणां सतीनामपि च श्रुतम् ॥
समुद्रेषु पृथिव्यां च वनस्पतिषु स्त्रीषु च ।
विभज्य ब्रह्महत्यां च तान्वरैरप्ययोजयत् ॥
वरदस्तु वरं दत्त्वा पृथिव्यै सागराय च ।
वनस्पतिभ्यः स्त्रीभ्यश्च ब्रह्महत्यां नुनोद ताम् ॥
नैं नर्मयुक्तमनृतं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले ।
प्राणात्यये सर्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥
मृदुत्वं च तनुत्वं च पराधीनत्वमेव च ।
स्त्रीगुणा ऋषिभिः प्रोक्ता धर्मतत्त्वार्थदर्शिभिः ॥
व्यायामः कर्कशत्वं च वीर्यं च पुरुषे गुणाः ॥
स्त्रियाः पुरुषसंयोगे प्रीतिरभ्यधिका सदा ।
एतस्मात्कारणाच्छक्र स्त्रीत्वमेव वृणोम्यहम् ॥
नानिलोऽग्निर्न वरुणो न चान्ये त्रिदशा द्विज ।
प्रियाः स्त्रीणां यथा कामो रतिशीला हि योषितः ॥
सहस्रे किल नारीणां प्राप्येतैका कदाचन ।
तथा शतसहस्रेषु यदि काचित्पतिव्रता ॥
नैता जानन्ति पितरं न कुलं न च मातरम् ।
न भ्रातॄन्न च भर्तारं न च पुत्रान्न देवरान् ॥
लीलायन्त्यः कुलं घ्नन्ति कुलानीव सरिद्वराः ।
दोषान्सर्वांश्च मत्वाऽऽशु प्रजापतिरभाषत ॥
अष्टावक्र उवाच—
नास्ति स्वतन्त्रता स्त्रीणामस्वतन्त्रा हि योषितः ।
प्रजापतिमतं ह्येतन्न स्त्री स्वातन्त्र्यमर्हति ॥
नास्ति त्रिलोके स्त्री काचिद्या वै स्वातन्त्र्यमर्हति ॥

(१) भा. (कुं) ४।१८।१८,१९.
(२) भा. (कुं) ५।९।५०,५१
(३) भा १२।१६५।३०. (४) भा.१३।१२।१४,१५.
(५) भा.१३।१२।५२. (६) भा.१३।१९।१९-९४.
(७) भा.१३।२०।१४. (८) भा.१३।२०।२०.

युधिष्ठिर उवाच —
स्त्रीणां स्वभावमिच्छामि श्रोतुं भरतसत्तम ।
स्त्रियो हि मूलं दोषाणां लघुचित्ता हि ताः स्मृताः ॥
भीष्म उवाच —
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादं पुञ्जस्थ्या पञ्चचूड्या ॥
कुलीना रूपवत्यश्च नाथवत्यश्च योषितः ।
मर्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद ॥
न स्त्रीभ्यः किञ्चिदन्यद्वै पापीयस्तरमस्ति वै ।
स्त्रियो हि मूलं दोषाणां तथा त्वमपि वेत्थ ह ॥
समाज्ञातानृद्धिमतः प्रतिरूपान्वशे स्थितान् ।
पतीनन्तरमासाद्य नालं नार्यः परीक्षितुम् ॥
असद्धर्मस्त्वयं स्त्रीणामस्माकं भवति प्रभो ।
पापीयसो नरान् यद्वै लज्जां त्यक्त्वा भजामहे ॥
स्त्रियं हि यः प्रार्थयते संनिकर्षं च गच्छति ।
ईषच्च कुरुते सेवा तमेवेच्छन्ति योषितः ॥
अनर्थित्वान्मनुष्याणां भयात्परिजनस्य च ।
मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु ॥
नासां कश्चिदगम्योऽस्ति नासां वयसि निश्चयः ।
विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते ॥
न भयान्नाप्यनुक्रोशान्नार्थहेतोः कथंचन ।
न ज्ञातिकुलसंबन्धात्स्त्रियस्तिष्ठन्ति भर्तृषु ॥
यौवने वर्तमानानां मृष्टाभरणवाससाम् ।
नारीणां स्वैरवृत्तीनां स्पृहयन्ति कुलस्त्रियः ॥
याश्च शश्वद्बहुमता रक्ष्यन्ते दयिताः स्त्रियः ।
अपि ताः सप्रसज्जन्ते कुब्जान्धजडवामनैः ॥
पङ्गुष्वथ च देवर्षे ये चान्ये कुत्सिता नराः ।
स्त्रीणामगम्यो लोकेऽस्मिन्नास्ति कश्चिन्महामुने ॥
यदि पुंसां गतिर्ब्रह्मन्कथंचिन्नोपपद्यते ।
अप्यन्योन्यं प्रवर्तन्ते न हि तिष्ठन्ति भर्तृषु ॥
दुष्टाचाराः पापरता असत्या मायया वृताः ।
अदृष्टबुद्धिबहुलाः प्रायेणेत्यवगम्यताम् ॥
अलाभात्पुरुषाणां हि भयात्परिजनस्य च ।
वधबन्धभयाच्चापि स्वयं गुप्ता भवन्ति ताः ॥
चलस्वभावा दुःसेव्या दुर्ग्राह्या भावतस्तथा ।
प्राज्ञस्य पुरुषस्येह यथा वाचस्तथा स्त्रियः ॥
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचनाः ॥
इदमन्यच्च देवर्षे रहस्यं सर्वयोषिताम् ।
दृष्ट्वैव पुरुषं ह्यद्यं योनिः प्रक्लिद्यते स्त्रियाः ॥
कामानामपि दातारं कर्तारं मनसां प्रियम् ।
रक्षितारं न मृष्यन्ति स्वभर्तारमसत्स्त्रियः ॥
न कामभोगान्विपुलान्नालंकारार्थसंचयान् ।
तथैव बहुमन्यन्ते यथा रत्यामनुग्रहम् ॥
अन्तकः पवनो मृत्युः पातालं वडवामुखम् ।
क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः ॥
यतश्च भूतानि महान्ति पञ्च यतश्च लोका विहिता विधात्रा । यतः पुमांसः प्रमदाश्च निर्मिताः ततश्च दोषाः प्रमदासु नारद ॥
भीष्म उवाच —
एता हि स्त्रीयमायाभिर्वञ्चयन्तीह मानवान् ।
न चासां मुच्यते कश्चित्पुरुषो हस्तमागतः ॥
गावो नवतृणानीव गृह्णन्त्येता नवनवम् ॥
शम्बरस्य च या माया माया या नमुचेरपि ।
बलेः कुम्भीनसेश्चैव सर्वास्ता योषितो विदुः ॥
हसन्तं प्रहसन्त्येता रुदन्तं प्ररुदन्ति च ।
अप्रियं प्रियवाक्यैश्च गृह्णते कालयोगतः ॥
यदि जिह्वासहस्रं स्याज्जीवेच्च शरदां शतम् ।
अनन्यकर्मा स्त्रीदोषाननुकृत्वा निधनं व्रजेत् ॥
उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।
स्त्रीबुध्या न विशिष्येत तास्तु रक्ष्याः कथं नरैः ॥
अनृतं सत्यमित्याहुः सत्यं चापि तथाऽनृतम् ।
इति यास्ताः कथं वीर संरक्ष्याः पुरुषैरिह ॥

(१) भा १३।३८।१,२.
(२) भा.१३।३८।१-२२.
(३) भा. (कुं) १३।७३।२३

(१) भा.१३।३८।२३-३०.
(२) भा.१३।३९।५-८.
(३) भा. (कुं) १३।७४।९
(४) भा.१३।३९।८-१०.

दोषास्पदेऽशुचौ देहे ह्यासां सक्तास्त्वहो नराः ॥
स्त्रीणां बुद्धयर्थनिष्कर्षादर्थशास्त्राणि शत्रुहन् ।
बृहस्पतिप्रभृतिभिर्मन्ये सद्भिः कृतानि वै ॥
संपूज्यमानाः पुरुषैर्विकुर्वन्ति मनो नृषु ।
अपास्ताश्च तथा राजन्विकुर्वन्ति मनः स्त्रियः ॥
इमाः प्रजा महाबाहो धार्मिक्य इति नः श्रुतम् ।
सत्कृतासत्कृताश्चापि विकुर्वन्ति मनः सदा ॥
कस्ताः शक्तो रक्षितुं स्यादिति मे संशयो महान् ।
तथा ब्रूहि महाभाग कुरूणां वंशवर्धन ॥
यदि शक्या कुरुश्रेष्ठ रक्षा तासां कदाचन ।
कर्तुं वा कृतपूर्वं वा तन्मे व्याख्यातुमर्हसि ॥
प्रमदाश्च यथा सृष्टा ब्रह्मणा भरतर्षभ ।
यदर्थं तच्च ते तात प्रवक्ष्यामि नराधिप ॥
न हि स्त्रीभ्यः परं पुत्र पापीयः किंचिदस्ति वै ।
अग्निर्हि प्रमदा दीप्तो मायाश्च मयजा विभो ।
क्षुरधारा विषं सर्पो मृत्युरित्येकतः स्त्रियः ॥
प्रजा इमा महाबाहो धार्मिक्य इति नः श्रुतम् ।
स्वयं गच्छन्ति देवत्वं ततो देवानियाद्वयम् ॥
अथाभ्यगच्छन् देवास्ते पितामहमरिन्दम ।
निवेद्य मानसं चापि तूष्णीमासन्नधोमुखाः ॥
तेषामन्तर्गतं ज्ञात्वा देवानां स पितामहः ।
मानवानां प्रमोहार्थं कृत्या नार्योऽसृजत्प्रभुः ॥
पूर्वसर्गे तु कौन्तेय साध्व्यो नार्य इहाभवन् ।
असाध्व्यस्तु समुत्पन्नाः कृत्याः सर्गात्प्रजापतेः ॥
ताभ्यः कामान्यथाकामं प्रादाद्धि स पितामहः ।
ताः कामलुब्धाः प्रमदाः प्रबाधन्ते नरान्सदा ॥
क्रोधं कामस्य देवेशः सहायं चासृजत्प्रभुः ।
असज्जन्त प्रजाः सर्वाः कामक्रोधवशं गताः ॥
द्विजानां च गुरूणां च महागुरुनृपादिनाम् ।
क्षणस्त्रीसङ्गकामोत्था यातनाहो निरन्तरा ॥
अरक्तमनसां नित्यं ब्रह्मचर्यामलात्मनाम् ।
तपोदमार्चनाध्यानयुक्तानां शुद्धिरुत्तमा ॥

(१) भा. (कुं) १३।७४।११.
(२) भा १३।३९।१०-१४.
(३) भा.१३।४०।३-११.
(४) भा. (कुं) १३।७५।११,१२.

न च स्त्रीणां क्रियाः काश्चिदिति धर्मो व्यवस्थितः । निरिन्द्रिया ह्यशास्त्राश्च स्त्रियोऽनृतमिति श्रुतिः ॥
शय्यासनमलङ्कारमन्नपानमनार्यताम् ।
दुर्वाग्भावं रतिं चैव ददौ स्त्रीभ्यः प्रजापतिः ॥
न तासां रक्षणं शक्य कर्तुं पुंसा कथंचन ।
अपि विश्वकृता तात कृतस्तु पुरुषैरिह ॥
वाचा च वधबन्धैर्वा क्लेशैर्वा विविधैस्तथा ।
न शक्या रक्षितुं नार्यस्ता हि नित्यमसंयताः ॥
तस्मादब्रवीमि पार्थ त्वां स्त्रियो रक्ष्याः सदैव च ।
उभयं दृश्यते तासु सततं साध्वसाधु च ॥
स्त्रियः साध्व्यो महाभागाः संमता लोकमातरः ।
धारयन्ति महीं राजन्निमां सवनकाननाम् ॥
असाध्व्यश्चापि दुर्वृत्ताः कुलघ्नाः पापनिश्चयाः ।
विज्ञेया लक्षणैर्दुष्टैः स्वगात्रसहजैर्नृप ॥
एवमेतासु रक्षा वै शक्या कर्तुं महात्मभिः ।
अन्यथा राजशार्दूल न शक्या रक्षितुं स्त्रियः ॥
एता हि मनुजव्याघ्र तीक्ष्णास्तीक्ष्णपराक्रमाः ।
नासामस्ति प्रियो नाम मैथुने संगमेऽपि यः ॥
एताः कृत्याश्च कार्याश्च कृतघ्ना भरतर्षभ ।
न चैकस्मिन्नमन्त्येताः पुरुषे पाण्डुनन्दन ॥
नासु स्नेहो नरैः कार्यस्तथैवेर्ष्या जनेश्वर ।
खेदमास्थाय भुञ्जीत धर्ममास्थाय चैव ह ।
निहन्यादन्यथा कुर्वन्नरः कौरवनन्दन ।
सर्वथा राजशार्दूल मुक्तिः सर्वत्र युज्यते ॥
तेनैकेन तु रक्षा वै विपुलेन कृता स्त्रियाः ।
नान्यः शक्तस्त्रिलोकेऽस्मिन्रक्षितुं नृप योषितः ॥

नियोग. पुनर्विवाहश्च

पाणिग्राहस्य तनय इति वेदेषु निश्चितम् ।
धर्मं मनसि संस्थाप्य ब्राह्मणास्ताः समभ्ययुः ।
लोकेऽप्याचरितो दृष्टः क्षत्रियाणां पुनर्भवः ॥
उत्तमादवराः पुंसः काङ्क्षन्तो पुत्रमापदि ।
अपत्यं धर्मफलदं श्रेष्ठादिच्छन्ति साधवः ॥

(१) भा १३।४०।११-१५.
(२) भा.१३।४३।१९-२८.
(३) भा.१।१०४.६,७. (४) भा.१।१२०।३५,३६.

कौटिलीयमर्थशास्त्रम्

विवाहधर्म

[1]विवाहसंयुक्तम् । विवाहपूर्वो व्यवहारः । कन्यादानं कन्यामलङ्कृत्य ब्राह्मो विवाहः । सहधर्मचर्या प्राजापत्यः । गोमिथुनादानादार्षः । अन्तर्वेद्यामृत्विजे दानाद् दैवः । मिथस्समवायाद् गान्धर्वः । शुल्कादानादासुरः । प्रसह्यादानाद राक्षसः । सुप्तादानात् पैशाचः । पितृप्रमाणाश्चत्वारः पूर्वे धर्म्याः मातापितृप्रमाणाः शेषाः । तौ हि शुल्कहरौ दुहितुः । अन्यतराभावेऽन्यतरो वा ।

विवाहसंयुक्तमिति सूत्रम् । विवाहा अष्टविधाः ब्राह्म-प्राजापत्यार्षदैवगान्धर्वासुरराक्षसपैशाचाख्याः तत्संयुक्त तत्सबद्ध स्त्रीधनकल्पादि, तदिहाभिधीयत इति सूत्रार्थः । व्यावहारिकाणामर्थानामनुष्ठानप्रकार उक्तः, व्यवहाराणा प्रतिपादनमधुना प्रस्तूयते । तेषु च ऋणादानादिषु कतमः पूर्वनिरूपणार्ह इति चिन्तायाम्, ऋणादानपूर्वो व्यवहार इति मनुः । वास्तुकपूर्वो व्यवहार इति भार्गवः । निक्षेपपूर्वो व्यवहार इति बृहस्पतिः । कौटल्यस्तु गृहस्थस्यैव व्यवहारेष्वधिकारात् गार्हस्थ्यं प्रति च विवाहस्यैव हेतुत्वाद् विवाहसयुक्तव्यवहार एव व्यवहारेषु मुख्य इति विवाहसयुक्तप्रकरणमेवादौ निरूपणीयं मन्यते । यदाहुः—'ऋणमादौ मनुर्ब्रूते वास्तुक भार्गवो मुनिः । बृहस्पतिस्तु निक्षेप विवाह कुटलान्वयः ॥' इति । इद प्रकरण त्रिभिरध्यायैर्विस्तन्यते । तत्रादिमे विवाहधर्मः स्त्रीधनकल्पः आधिवेदनिकमिति त्रिक प्रतिपाद्यते, द्वितीये शुश्रूषाधर्मपारुष्यद्वेषातिचारोपकारव्यवहारप्रतिषेधाः, तृतीये निष्पतनं पथ्यनुसरण ह्रस्वप्रवासो दीर्घप्रवासश्चेति ।

विवाहसंयुक्तस्य प्रथम निरूपणे हेतु निर्दिशति—विवाहपूर्वो व्यवहार इति । व्यवहार इति जातावेकवचन, सर्वे व्यवहाराः विवाहमूलाः । विवाहपूर्वत्वं चोपपादितम् । विवाहभेदास्तल्लक्षणप्रदर्शनपूर्वमाह—कन्यादानमिति । कन्यामलङ्कृत्य यत् तस्याः प्रदानं, स विवाहो ब्राह्म इत्युच्यते । सहधर्मचर्येति । 'सहधर्मश्चर्यतामि'त्येतावदुक्त्वा समन्त्रक यत् कन्या दीयते, स प्राजापत्याख्यः । गोमिथुनादानादिति । वरसकाशाद् गोद्वयं गृहीत्वा यत् कन्या दीयते, स आर्षः ।

अन्तर्वेद्यामिति । यज्ञवेदिमध्ये स्थिताय ऋत्विजे यद् दीयते, स दैवः । मिथस्समवायादिति । कन्यावरयोर्निजेच्छयान्योन्यसयोगाद् गान्धर्वो विवाहो भवति ।

शुल्कादानादिति । आत्मार्थे कन्यार्थे च वराच्छुल्कं गृहीत्वा यत् कन्यादानं, स आसुराख्यः । प्रसह्यादानादिति । बलात्कारेण कन्याहरणाद् राक्षसविवाहो भवति । सुप्तादानादिति । सुप्ताया हरणात् पैशाचाख्यो विवाहः । पितृप्रमाणा इति । एतेष्वष्टसु विवाहेषु पूर्वे ब्राह्मादयश्चत्वारः, पितृप्रमाणाः धर्म्याः पितृप्रमाणत्वाद् धर्मयुक्ताः । अन्ये त्वधर्म्या इत्यर्थसिद्धम् । मातापितृप्रमाणा इति । माता पिता चेत्युभौ प्रमाणभूतौ येषा ते तथाभूताः, शेषाः गान्धर्वादयः । कस्मान्मातापितृप्रमाणकत्वमित्याह तौ हीत्यादि । मातापितरौ हि, शुल्कहरौ दुहितुः कन्याशुल्क गृह्णीतः । अन्यतराभावे अन्यतरो वा माता पिता वा शुल्क हरति । एव विवाहधर्म उक्तः । श्रीमू.

आधिवेदनिकम्

[1]वर्षाण्यष्टावप्रजायमानामपुत्रां वन्ध्यां चाकाङ्क्षेत, दश विन्दुं, द्वादश कन्याप्रसविनीम् ।

ततः पुत्रार्थी द्वितीयां विन्देत । तस्यातिक्रमे शुल्कं स्त्रीधनमर्धं चाधिवेदनिकं दद्यात् । चतुर्विंशतिपणपरं च दण्डम् ।

शुल्कं स्त्रीधनमशुल्कस्त्रीधनायास्तत्प्रमाणमाधिवेदनिकमनुरूपां च वृत्ति दत्त्वा बह्वीरपि विन्देत । पुत्रार्था हि स्त्रियः ।

तीर्थसमवाये चासां यथाविवाहं पूर्वोढां जीवत्पुत्रां वा पूर्वं गच्छेत् ।

तीर्थगूहनागमने षण्णवतिर्दण्डः । पुत्रवतीं धर्मकामां वन्ध्यां विन्दुं नीरजस्कां वा नाकामामुपेयात्, न चाकामः पुरुषः । कुष्ठिनीमुन्मत्तां वा न गच्छेत् । स्त्री तु पुत्रार्थमेवंभूतं वोपगच्छेत् ।

नीचत्वं परदेशं वा प्रस्थितो राजकिल्बिषी ।
प्राणाभिहन्ता पतितस्त्याज्यः क्लीबोऽपि वा पतिः ॥

(१) कौ.३।२.

(१) कौ.३।२.

अथाधिवेदनिकमाह—वर्षाणीति। अप्रजायमानां सकृत् प्रसूय पुनर्गर्भमगृह्णतीम्, अपुत्रां व्याध्यादिवशात् पुत्ररहिता, वन्ध्या च गर्भधरणायोग्या च, अष्टौ वर्षाणि, आकाङ्क्षेत प्रतिपालयेत् पुत्र प्रसूते नवेति परीक्षार्थम्। दश बिन्दु दश वर्षाणि नश्यत्प्रसूति, प्रतिपालयेत्। द्वादश कन्याप्रसविनी स्त्यपत्यप्रसवशीला द्वादश वर्षाणि आकाङ्क्षेत। काङ्क्षतेरात्मनेपदमार्षम्।

तत इति। यथोक्तकालप्रतीक्षानन्तर पुत्रप्रसवाभावे, पुत्रार्थी पुत्रकामश्चेद्, द्वितीया विन्देत अन्यामुद्वहेत्। तस्येति। यथोक्तकालनियमस्य, अतिक्रमे अननुवर्तने, शुल्क, स्त्रीधन, अर्ध चाधिवेदनिक परिणीतायां उपरि अन्यस्याः परिणयनमधिवेदन तन्निमित्त यद् द्रव्य गत तस्यार्ध च, दद्याद् अधिविन्नाय। चतुर्विंशतिपणपरं च दण्डमिति। चतुर्विंशतिपणोत्तम नियमातिक्रमदण्ड च, राज्ञे दद्यात्।

नवं शुल्क स्त्रीधनं आधिवेदनिकतुल्यमान द्रव्य तत्तद्विवाहोचितशरीरयात्रोपायं च प्रतिपाद्य ब्रह्मीनामप्यधिवेदनं न दुष्यतीत्याह— शुल्कमित्यादि। तत्र हेतुवचन—पुत्रार्था हि स्त्रिय इति। अनेन पूर्वपरिणीतानां अपुत्रवतीना निष्फलजन्मत्वादुपेक्षण न्याय्यमिति दर्शयति।

ब्रह्मीना ऋतुयौगपद्येऽभिगमनविधिमाह—तीर्थसमवाये चासामिति। तीर्थ स्त्रीपुष्प तत्समवाये ब्रह्मीना पत्नीना युगपदतुप्राप्तौ, यथाविवाहं ब्राह्मादिविवाहक्रममनपहाय, पूर्व गच्छेत्। विवाहतुल्यतायामाह—पूर्वोढा पूर्वकालपरिणीता, जीवत्पुत्रा वा अपूर्वोढामपि, पूर्व गच्छेत्।

तीर्थेत्यादि। तीर्थगृहनागमने तीर्थस्याप्रकाशने भर्त्रनभिगमने च, षण्णवतिः षण्णवतिपणः, दण्डः। पुत्रवतीमिति। पुत्रवतीं, धर्मकामा वन्ध्या पुत्रार्थव्रतोपवासिनी वन्ध्या, बिन्दुं नश्यत्प्रसूति, नीरजस्का वा निवृत्तार्तवा वा, अकामा अनिच्छन्ती, नोपेयात् न गच्छेत्, अर्थात् पुरुषः सकामोऽपि। न चाकामः पुरुषः, उपेयात्, अर्थात् सकामामपि। कुष्ठिनीम्, उन्मत्ता वा, न गच्छेत्, पुरुषः। स्त्री तु, पुत्रार्थं पुत्रोत्पत्त्यर्थम्, एवभूतं वा कुष्ठिनमुन्मत्त वा उपगच्छेत्।

अध्यायप्रान्ते श्लोकमाह—नीचत्वमित्यादि। नीचत्वं परदेश वा प्रस्थितः नीचत्व गतो वा विदेश गतो वा, राजकिल्बिषी राजदुष्पुरोहितो राजदुष्प्रतिग्रही राजयक्ष्मवाश्च इति त्रिरूपः, प्राणाभिहन्ता नरमारकः, पतितः महापातकदूषितः, क्लीबोऽपि वा पण्डो वा, पतिः, त्याज्यः। श्रीमू.

शुश्रूषाधर्मपारुष्यद्वेषातिचारोपकारव्यवहारप्रतिषेधाश्च

द्वादशवर्षा स्त्री प्राप्तव्यवहारा भवति षोडशवर्षः पुमान्। अत ऊर्ध्वमशुश्रूषायां द्वादशपणः स्त्रिया दण्डः पुंसो द्विगुणः।

धर्मण्यायामनिर्दिष्टकालायां ग्रासाच्छादनं वार्षिकं यथापुरुषपरिवापं सविशेषं दद्यात्। निर्दिष्टकालायां तदेव सङ्ख्याय। बन्धं च दद्यात्। शुल्कस्त्रीधनार्धाधिवेदनिकानामनादाने च।

श्वशुरकुलप्रविष्टायां विभक्तायां वा नाभियोज्यः पतिः। इति धर्म।

नग्ने, विनग्ने, न्यङ्गे, अपितृके, अमातृके, इत्यनिर्देशेन विनयग्राहणम्। वेणुदलरज्जुहस्तानामन्यतमेन वा पृष्ठे त्रिराघातः। तस्यातिक्रमे वाग्दण्डपारुष्यदण्डाभ्यामर्धदण्डाः।

तदेव स्त्रिया भर्तरि प्रसिद्धमदोषाया ईर्ष्यायां वाह्यविहारेषु द्वारेषु। अत्ययो यथानिर्दिष्टः। इति पारुष्यम्।

भर्तारं द्विषती स्त्री सप्तार्तवान्यमण्डयमाना तदानीमेव स्थाप्याभरणं निधाय भर्तारं अन्यया सह शयानमनुशयीत।

पूर्वाध्याये विवाहधर्मादिकमुक्तम्। इह तु शुश्रूषादय उच्यन्ते। तत्र शुश्रूषा परिचरणं, भर्म कुटुम्बभरणनियोगः, पारुष्य वाक्पारुष्य दण्डपारुष्य च, द्वेषः अप्रीतिः, अतिचारः प्रतिषिद्धाचरणम्, उपकारव्यवहारप्रतिषेधः जनविशेषविषयोपकाराचरणनिषेधः।

द्वादशवर्षेति। अतिक्रान्तद्वादशवयस्का स्त्री, प्राप्तव्यवहारा व्यवहारयोग्या परिचरणकर्मनियोजनार्हा भवति। षोडशवर्षः पुमान्, प्राप्तव्यवहारः भवति। अत

(१) कौ.३।३.

ऊर्ध्वम्, अशुश्रूषायां अपरिचर्यायां, द्वादशपणः स्त्रियाः दण्डः, पुंसो द्विगुणः चतुर्विंशतिपणो दण्डः ।

भर्मण्यावामिति । गृहभरणनियुक्तायाम्, अनिर्दिष्टकालाया अत्रैतावद् गृहीतमेतावद् विनियुक्तमित्यकृतकालनिर्देशायां, ग्रासाच्छादन वाधिक ग्राममाच्छादन च पर्याप्तं किञ्चिदधिक वा, यथापुरुषपरिवाप गृहभरणीयजनोपकरणानतिक्रमणेन, सविशेष सातिशय दद्याद् असख्यायैव । निर्दिष्टकालाया, तदेव ग्रासाच्छादनमेव न तु ततोऽधिक, सख्याय एकस्याहोरात्रस्यैतावदितीयत्तामाकलय्य, दद्यादित्यनुपज्यते । बन्ध च दद्यात् विवदमानाया तस्या साध्यद्रव्यस्य पञ्चभाग दशभाग च दद्यात् । शुल्कादीनामनादाने च शुल्कस्त्रीधने प्रतीते आधिवेदनिकं अधिवेदननिमित्तं पत्या दत्त एतेषामग्रहणेऽपि, बन्ध दद्यात्, ग्रहणे तु का कथेत्यर्थः ।

श्वशुरेत्यादि । श्वशुरकुलप्रविष्टाया विभक्ताया वा श्वशुरगृहप्राप्ताया वा भर्तृकृतविभागाया वा स्त्रिया, नाभियोज्यः पतिः भर्ता तया अभियोक्तु न योग्यो ग्रासाच्छादनार्थे । इति भर्मेति । व्याख्यातमिति शेषः ।

पारुष्यमाह—नग्ने इत्यादि । नग्ने असंस्कृतबुद्धित्वात् कोट्टवीतुल्ये । विनग्ने विशेषेण नग्ने । नष्टे । विनष्टे इति पाठे स्फुट एवार्थः । न्यङ्गे निन्द्ये, अङ्गहीने वा, अपितृके, अमातृके, कुत्सितपितृके, कुत्सितमातृके, इत्यनिर्देशेन एवप्रकारेण साक्रोशसंबोधनेन, विनयग्राहण सदाचारस्योपदेशना कर्तव्या । अनिर्देशेन विनयासिद्धावाह—वेणुदलेत्यादि । वेणुदलादीना त्रयाणा अन्यतमेन वा, पृष्ठे, त्रिराघातः त्रीणि ताडनानि, कर्तव्यानि । तस्यातिक्रमे उक्तस्य द्विविधस्य पारुष्यस्य अतिक्रमे विहितविजातीयारुन्तुदाक्रोशकरणे अवेण्वादिना अपृष्ठे सकृदपि वाघाते वेण्वाद्यन्यतमेन पृष्ठ एव चतुराघाते चेत्यर्थः, वाग्दण्डपारुष्यदण्डाभ्यामर्धदण्डाः वाक्पारुष्यदण्डाद् दण्डपारुष्यदण्डाच्च वक्ष्यमाणादर्धदण्डाः, भवन्ति ।

गणिकाद्यासक्तिनिमित्तकैर्ष्यावशाद् भर्तरि विषये स्त्रियाः पतिव्रतायाः पारुष्यस्य प्रसक्तस्य मात्रामाह—तदेवेत्यादि । तदेव भर्तुर्यादृशमुक्त तादृशमेव । द्वारेषु पारुष्यप्रयोगस्थानेषु । अत्ययो यथानिर्दिष्ट इति, उक्तविध्यतिक्रमनिमित्तः स्त्रियाः दण्डः वाक्पारुष्यदण्डपारुष्योक्त एव न त्वर्धदण्डः पुस इव । इति पारुष्यं, व्याख्यातम् ।

द्वेषमाह—भर्तारमिति । भर्तार द्विषती अरोचयमाना, स्त्री, सप्तार्तवानि सप्त ऋतुकालान् अमण्डयमाना शयनार्थमनुपतिष्ठमाना प्रतीक्ष्येतेति शेषः । ततो मण्डयमाना कि कुर्यादित्याह—तदानीमेव सद्य एव, स्थाप्याभरण निधाय स्थाप्यशब्दो न्यासवाची स्वीय भूषणं अपुनर्द्वेषप्रत्ययार्थं भर्तुर्न्यासं कृत्वा, अन्यया सह शयानं भर्तार अनुशयीत सपश्चात्तापमुपतिष्ठेत । स्त्रियाः स एष भर्तृद्वेषदण्डो बोद्धव्यः । श्रीमू.

भिक्षुक्यन्वाधिज्ञातिकुलानामन्यतमे वा भर्ता द्विषन् स्त्रियमेकामनुशयीत ।

दृष्टलिङ्गे मैथुनापहारे सवर्णापसर्पोपगमे वा मिथ्यावादी द्वादशपणं दद्यात् ।

अमोक्ष्या भर्तुरकामस्य द्विषती भार्या भार्यायाश्च भर्ता । परस्परं द्वेषान्मोक्षः ।

स्त्रीविप्रकाराद् वा पुरुषश्चेन्मोक्षमिच्छेद् यथागृहीतमस्यै दद्यात् । पुरुषविप्रकाराद् वा स्त्री चेन्मोक्षमिच्छेत्, नास्यै यथागृहीतं दद्यात् । अमोक्षो धर्मविवाहानाम् । इति द्वेषः ।

प्रतिषिद्धा स्त्री दर्पमद्यक्रीडायां त्रिपणं दण्डं दद्यात् । दिवा स्त्रीप्रेक्षाविहारगमने षट्पणो दण्डः । पुरुषप्रेक्षाविहारगमने द्वादशपणः । रात्रौ द्विगुणः ।

सुप्तमत्तप्रव्रजने भर्तुरदाने च द्वारस्य द्वादशपणः । रात्रौ निष्कासने द्विगुणः ।

स्त्रीपुंसयोर्मैथुनार्थेऽनङ्गविचेष्टायां रहोश्लीलसंभाषायां वा चतुर्विंशतिपणः स्त्रिया दण्डः, पुंसो द्विगुणः । केशनीवीदन्तनखावलम्बनेषु पूर्वः साहसदण्डः, पुंसो द्विगुणः ।

शङ्कितस्थाने संभाषायां च पणस्थाने शिफादण्ड. । स्त्रीणां ग्राममध्ये चण्डालः पक्षान्तरे पञ्चशिफा दद्यात् । पणिकं वा प्रहारं मोक्षयेत् । इत्यतिचारः ।

प्रतिषिद्धयोः स्त्रीपुंसयोरन्योन्योपकारे क्षुद्रक-

द्रव्याणां द्वादशपणो दण्डः, स्थूलकद्रव्याणां चतुर्विंशतिपणः, हिरण्यसुवर्णयोश्चतुष्पञ्चाशत्पणः स्त्रियाः । दण्डः पुंसो द्विगुणः । त एवागम्ययोरर्धदण्डाः । तथा प्रतिषिद्धपुरुषव्यवहारेषु च । इति प्रतिषेधः ।

राजद्विष्टातिचाराभ्यामात्मापक्रमणेन च ।
स्त्रीधनानीतशुल्कानामस्वाम्यं जायते स्त्रियाः ॥

स्त्रियं द्विपतो भर्तुर्विधिमाह—भिक्षुकीत्यादि । भर्ता, द्विषन् स्त्रियं, भिक्षुक्यादिकुलाना भिक्षुकी शान्तशुद्धव्यवहारिणी श्रमणी अन्वाधिः स्त्रीधनाधिष्ठाता ज्ञातिर्बन्धुः एषा कुलानि गृहाणि तेषाम्, अन्यतमे न त्वन्यकुले वसन्तीमिति शेषः, एका पुरुषान्तरमस्पृशन्ती ताम्, अनुशयीत अनुतपन् स्वयमुपतिष्ठेत । एकामित्युक्त्या पुरुषान्तरसहशयने स्त्रियास्त्यागः सूचितः । पुरुषस्य तु अन्यसहशयनेऽप्यदोषः प्रागुक्तः ।

दृष्टेत्यादि । दृष्टलिङ्गे साक्षादुपलब्धेऽन्यस्त्रीमैथुनचिह्ने सति, मैथुनापहारे मैथुनस्यापलापे, द्वादशपण दण्ड, दद्यात्, अपलपिता । सवर्णापसर्पोपगमे वा मिथ्यावादी सवर्णा सखी तद्रूपापसर्पसंगमे सति या तदपलापकर्ता, द्वादशपण दद्यात् ।

दम्पत्योरन्यतरद्वेषात् तदन्यमोक्षो न भवति, किन्तु परस्पर द्वेषान्मोक्ष इत्याह—अमोक्ष्येति । अकामस्य मोक्षमनिच्छतः । भार्यायाश्च अकामाया इति लिङ्गविपरिणामेनात्र सबन्धः ।

स्त्रीविप्रकारादेति । स्त्रिया अपराधात्, पुरुषश्चेद्, मोक्षमिच्छेद्, यथागृहीत अस्यै दद्यात् स्त्रीसकाशाद् गृहीत सर्वविध द्रव्य स्त्रियै दत्त्वा मुच्येत । पुरुषविप्रकारादेति । पुरुषापराधात्, स्त्री चेन्मोक्षमिच्छेत्, नास्यै यथागृहीत दद्यात् अदत्त्वैव स्त्रियै स्त्रीधन तत्सकाशात् मुच्येत । स एष स्त्रीपुसान्योन्यमोक्षविधिरधर्म्यविवाहानामासुरादीनाम् । ब्राह्मादीना तु मोक्षण नास्तीत्याह—अमोक्षो धर्मविवाहानामिति । इति द्वेषो व्याख्यातः ।

अतिचारविधिमाह—प्रतिषिद्धेत्यादि । प्रतिषिद्धा भर्त्रा वारिता, स्त्री, दर्पमद्यक्रीडाया दर्पक्रीडाया मद्यक्रीडाया च प्रवर्तमानेति शेषः, त्रिपण दण्ड दद्यात् । दिवेति । अहि, स्त्रीप्रेक्षाविहारगमने स्त्रीप्रयुज्यमाननाट्यदर्शनार्थं उद्यानक्रीडार्थं च गमने, षट्पणो दण्डः, अर्थात् स्त्रियाः प्रतिषिद्धायाः । पुरुषप्रेक्षाविहारगमने पुरुषप्रयुज्यमानप्रेक्षाविहारगमने, द्वादशपणः । रात्रौ द्विगुणः स्त्रैणप्रेक्षाविषये द्वादशपणः पौंस्नप्रेक्षाविषये चतुर्विंशति पणः ।

सुतेत्यादि । सुतमत्तप्रव्रजने सुते मत्ते च भर्तरि स्वगृहं विहाय गमने, भर्तुरदाने च द्वारस्थ आगतस्य भर्तुर्गृहद्वारकवाटानुद्घाटने च, द्वादशपणः दण्डः । रात्रौ निष्कासने गृहाद् बहिर्भर्तुर्निरसने, द्विगुणः चतुर्विंशतिपणः ।

स्त्रीपुसयोरिति । तयोः, मैथुनार्थे अनङ्गविचेष्टाया मैथुनभावा गमिष्याव इत्याकूतसूचककामचेष्टितकरणे, रहोश्लीलसंभाषाया वा रहसि असभ्यवृत्तसंभाषणे च चतुर्विंशतिपणः स्त्रिया दण्डः, पुसः द्विगुणः अष्टाचत्वारिंशत्पणः ।

केशेत्यादि । केशग्रहणे नीवीग्रहणे दन्तक्षतकरणे नखक्षतकरणे च, पूर्वः प्रथमः, साहसदण्डः स्त्रियाः, पुसः द्विगुणः पञ्चशतपणात्मको मध्यमसाहसदण्डः ।

शङ्कितेत्यादि । शङ्कितस्थाने संभाषाया च शङ्कास्पदे प्रदेशे सभाषणमात्रेऽपि कृते, पणस्थाने शिफादण्डः एकैकस्य पणस्य स्थाने एकैकशिफाताडन दण्डः । स्त्रीणामिति । तासा, ग्राममध्ये पश्यत्सु ग्रामजनेषु, चण्डालः वधताडननियुक्तः पुरुषः, पञ्चान्तरे एकैकपार्श्वावकाशे, पञ्चशिफाः पञ्च शिफाप्रहारान्, दद्यात् । पणिक वा पणोऽस्य शुल्को दीयते पणिकः तथाभूतं वा प्रहार मोक्षयेत् एकैकस्य प्रहारस्यैकैक पणं निष्क्रयं दत्त्वा प्रहारदण्ड मोचयेदित्यर्थः । इत्यतिचारः, व्याख्यातः ।

अथ प्रतिषेधमाह—प्रतिषिद्धयोरिति । वारितपरस्परव्यवहारयोः, स्त्रीपुसयोः, अन्योन्योपकारे क्षुद्रकद्रव्याणा स्वकचन्दनाद्यल्पद्रव्याणा परस्परदानेनोपकारे, द्वादशपणो दण्डः, स्त्रियाः । स्थूलकद्रव्याणा वस्त्राभरणादीनाम्, अन्योन्योपकारे चतुर्विंशतिपणः । हिरण्यसुवर्णयोः, अन्योन्योपकारे चतुष्पञ्चाशत्पणः । पुसो विशेषमाह—दण्ड इति । उक्तो द्वादशपणादिः सर्वो दण्डः, पुंसो द्विगुणः । त एवेति । उक्ता एव दण्डाः, अगम्ययोः अर्धदण्डाः भ्रातृभगिन्यादिरूपयोः

स्त्रीपुंसयोर्विषये अर्धहीना भवन्ति। ननु च भ्रातृभगिन्यादीनामन्योन्योपकारो निसर्गसिद्धवात्सल्यप्रयुक्तो न त्वन्येषां स्त्रीपुंसानामिव संभावितदुरभिसंधिप्रयुक्तः इति कथमसौ दण्डार्ह इति चेत्, सत्य, किन्तु ऋजुबुद्ध्यारब्धोऽसावनुष्ठानप्रबन्धवशात् क्रमेण दुरभिसंधि जनयेदिति दण्डार्ह एवासौ।

य एते स्त्रीपुंसयोः प्रतिषिद्धव्यवहार्याः परस्परोपकारे दण्डास्त एव पुरुषयोरपि प्रतिषिद्धव्यवहारयोरित्याह—तथेत्यादि। इति प्रतिषेध इति। एव उपकारव्यवहारप्रतिषेधो व्याख्यातः।

राजद्विष्टातिचाराभ्यामिति। राजद्विष्टकथनेन दर्पमद्यक्रिडादिगमनेन च, आत्मापक्रमणेन च स्वय भर्तृसकाशान्निष्पतनेन च, स्त्रीधनानीतशुल्कानां अस्वाम्य स्त्रिया जायते स्त्रीधने पितृगृहोपाहृते शुल्के च स्त्रियाः स्वामित्वं हीयते।

निष्पतन, पथ्यनुसरण, ह्रस्वप्रवास· दीर्घप्रवासश्च

पतिकुलान्निष्पतितायाः स्त्रियाः षट्पणो दण्डोऽन्यत्र विप्रकारात्। प्रतिषिद्धायां द्वादशपणः। प्रतिवेशगृहातिगतायाः षट्पणः।

प्रातिवेशिकभिक्षुकवैदेहकानामवकाशभिक्षापण्यादाने द्वादशपणो दण्डः, प्रतिषिद्धानां पूर्वः साहसदण्डः। परगृहातिगतायाश्चतुर्विंशतिपणः।

परभार्यावकाशदाने शत्यो दण्डोऽन्यत्रापद्भ्यः। वारणाज्ञानयोर्निर्दोषः।

पतिविप्रकारात् पतिज्ञातिसुखावस्थग्रामिकान्वाधिभिक्षुकीज्ञातिकुलानामन्यतममपुरुषं गन्तुमदोष इत्याचार्याः।

सपुरुषं वा ज्ञातिकुलम्। कुतो हि साध्वीजनस्य छलं, सुखमेतदवबोद्धुं इति कौटल्यः।

प्रेतव्याधिव्यसनगर्भनिमित्तमप्रतिषिद्धमेव ज्ञातिकुलगमनम्।

तन्निमित्तं वारयतो द्वादशपणो दण्डः। तत्रापि गूहमाना स्त्रीधनं जीयेत, ज्ञातयो वा छादयन्तः शुल्कशेषम्। इति निष्पतनम्।

पतिकुलान्निष्पत्य ग्रामान्तरगमने द्वादशपणो दण्डः स्थाप्याभरणलोपश्च। गम्येन वा पुंसा सहप्रस्थाने चतुर्विंशतिपणः, सर्वधर्मलोपश्चान्यत्र भर्मदानतीर्थगमनाभ्याम्। पुंसः पूर्वः साहसदण्डः तुल्यश्रेयसः, पापीयसो मध्यमः। बन्धुरदण्ड्यः।

प्रतिषेधेऽर्धदण्डः।

पथि व्यन्तरे गूढदेशाभिगमने मैथुनार्थेन शङ्कितप्रतिषिद्धाभ्यां वा पथ्यनुसारेण संग्रहणं विद्यात्।

तालावचरचारणमत्स्यबन्धकलुब्धकगोपालकशौण्डिकानामन्येषां च प्रसृष्टस्त्रीकाणां पथ्यनुसरणमदोषः। प्रतिषिद्धे वा नयतः पुंसः स्त्रियां वा गच्छन्त्यास्त एवार्धदण्डाः। इति पथ्यनुसरणम्।

पूर्वाध्यायशेषोक्तमपक्रमण 'निवेशकालं हि दीर्घप्रवासे व्याख्यास्यामः' इत्युक्त निवेशकाल च वर्णयितुमयमध्याय आरभ्यते।

पतिकुलादिति। पतिगृहात्, निष्पतिताया निर्गतायाः, स्त्रियाः प्राप्तव्यवहारायाः, षट्पणो दण्डः, अन्यत्र विप्रकारात् पुरुषकृतापराधाभावे। प्रतिषिद्धाया 'मा कुरु निष्पतनमिति वारिताया सत्या तस्या निष्पतने, द्वादशपणः। प्रतिवेशगृहातिगतायाः इतीद वाक्य क्वचित्र पठ्यते।

प्रातिवेशिकभिक्षुकवैदेहकानामिति। प्रातिवेशिकः प्रतिगृही भिक्षुको वृत्तच्युतः पाषण्डादिः वैदेहकः कुवणिक् इत्येतेषाम्, अवकाशभिक्षापण्यादाने अवकाशभिक्षाशब्दौ तद्दानपरौ अवकाशदाने भिक्षादाने पण्यग्रहणे च, द्वादशपणो दण्डः। प्रतिषिद्धाना, पूर्वः प्रथमः, साहसदण्डः पञ्चाशदुत्तरद्विशतपणात्मकः। परगृहातिगतायाः भर्तृगृहसमनन्तरगृहमतिक्रम्य व्यवहित गृहं गतायाः, चतुर्विंशतिपणः दण्डः।

परेत्यादि। परभार्यावकाशदाने परभार्याया वासभूमिदाने, शत्यो दण्डः पणशतपरिमाणो दण्डः। अपवादमाह—अन्यत्रापद्भ्य इति। आपत्सु तु न दोषः। वारणाज्ञानयोर्निर्दोष इति, 'मा मम गृह प्रविशे'ति वार्यमाणापि वा अज्ञायमानेव वा यदि प्रविशेत्, तदा निरपराधः, कः, अर्थाद् गृहस्वामी।

(१) कौ.३।४.

पतिधिक्कारवशादन्यत्रापसरणस्यावश्यं प्राप्तौ साध्वीजनः कमाश्रयं गच्छेदित्याकाङ्क्षायामाह—पतिविप्रकारादिति । भर्तृकृतधिक्कारदोषात्, पतिज्ञात्यादिकुलाना पतिज्ञातिर्भर्तृबान्धवः सुखावस्थः विवाहस्थेयः ग्रामिको ग्रामहत्तरः अन्वाधिः स्त्रीधनस्थेयः भिक्षुकी तपस्विनी भैक्षजीविनी ज्ञातिः स्वबान्धवः एतत्सबन्धिना गृहाणा, अन्यतम, अपुरुषं अविद्यमानपुरुषं, गन्तुं गत्वाधिवस्तु, अदोषः दोषाभावः स्त्रियाः । इत्याचार्याः मन्यन्त इति शेषः ।

आचार्यमतमभ्युपगम्यैव ज्ञातिकुले विशेष स्वमतेनाह—सपुरुष वेति । विद्यमानपुरुषमपि वा, ज्ञातिकुल पतिबन्धुगृह स्वबन्धुगृहं च, गन्तुमदोष इति वर्तते । तत्र हेतुमाह—कुतो हि साध्वीजनस्य, छलं व्यभिचरणं, निष्कल्मषहृदयतया न कुतोऽपि भवतीत्यर्थः । प्रकाशभयाच्च छलं न जायत इत्याह—सुखमेतदवबोद्धुमिति । छल स्त्रीकृतं भर्तुरन्यस्य वा सद्यः सुज्ञानं न तु गोपयितुं शक्यमित्यर्थः ।

पतिकुलादन्यत्रगमन यत् सामान्यतः प्रतिषिद्धं तस्यापवादमाह—प्रेतव्याधीत्यादि । सुबोधम् ।

तन्निमित्तमिति । उक्तनिमित्तकं ज्ञातिकुलगमनं, वारयतः पुरुषस्य, द्वादशपणो दण्डः । तत्रापीति । ज्ञातिकुलेऽपि, गृहमाना केनापि छलेन गूढ वसन्ती, स्त्रीधन, जीयेत हाप्येत अर्थाद् भर्त्रा स्वय हरता । ज्ञातयो वा छादयन्तः स्त्रिय छलेन गूढ स्वगृहे वासयन्तः, शुल्कशेषं, जीयेरन्निति विपरिणतानुषङ्गः । इति निष्पतनमिति । व्याख्यातमिति शेषः ।

अथ पथ्यनुसरणमाह—पतिकुलादिति । पतिगृहात्, निष्पत्य पत्यननुज्ञया निर्गम्य, ग्रामान्तरगमने, द्वादशपणो दण्डः, स्थाप्याभरणलोपश्च अपुनर्गमनप्रत्ययार्थन्यस्तभूषणहानिश्च, भवति । गम्येन वा पुसा, सहप्रस्थाने प्रस्थाय ग्रामान्तरगमने, चतुर्विंशतिपणो दण्डः, सर्वधर्मलोपश्च भर्त्रनुष्ठीयमानयज्ञादिसर्वधर्मसहचरणहानिश्च । तत्रापवादः—अन्यत्र धर्मदानतीर्थगमनाभ्यामिति । धर्मदान गृहभरणं तदर्थं वा तीर्थगमनं ऋतुगमनं तदर्थं वा भर्त्रन्तिकगमने न दोष इत्यर्थः । पुंसो दण्डमाह—पुंस इति । स्त्रियं ग्रामान्तरं नेतुः पुरुषस्य, पूर्वः साहसदण्डः पञ्चाशदधिकद्विशतपणात्मकः, कीदृशस्य, तुल्यश्रेयसः स्त्रीसमानजातिश्रेष्ठयस्य । पापीयसो मध्यमः स्त्रीनिहीनजातीयस्य, मध्यमः साहसदण्डः पञ्चशतपणात्मकः । बन्धुरदण्ड्यः बन्धुर्नेता दण्डार्हो न भवति । प्रतिषेधेऽर्धदण्ड इति । बन्धोरपि भर्त्रा प्रतिषिद्धस्य नेतुरुक्तसमाशो दण्डः ।

पथीति । मार्गेऽपि, व्यन्तरे मार्गविदूरावकाशे, गूढदेशाभिगमने छन्नप्रदेशगमने च सति, मैथुनार्थेन विद्यात् मैथुनमभिसधाय तद् गमनमिति जानीयात् । शङ्कितप्रतिषिद्धाभ्या वेति । मैथुनार्थित्वशङ्काविषयीभूतेन, भर्तृप्रतिषिद्धेन चेत्याभ्या सह, पथ्यनुसारेण पथ्यनुगमनेन, संग्रहणं विद्यात् स्त्रीसंग्रहणोक्तो दण्डविधिः स्त्रीपुसयोर्वेदितव्य इत्यर्थः । स तूत्तराधिकरणे कन्याप्रकर्मणि वक्ष्यते ।

तालावचरेत्यादि । तालावचरो नटः चारणः कुशीलवः मत्स्यबन्धको बलिशजीवी लुब्धको व्याधः गोपालक आभीरः शौण्डिकः सुरासधानजीवी इत्येतेषा, अन्येषा च प्रसृष्टस्त्रीकाणा तदितरेषा चानुज्ञातस्त्रीकाणा ताम्बूलिकमालाकारादीना, पथ्यनुसरणं प्रकरणात् स्त्रियाः पथि पुरुषान्तरानुगमनं, अदोषः दोषो न भवति । तालावचरादिस्त्रियमपि भर्तृप्रतिषिद्धां पथि नयतः पुरुषस्य नीयमानायाश्च पूर्वोक्तदण्डार्धदण्डा भवन्तीत्याह—प्रतिषिद्धे वेत्यादि । इति पथ्यनुसरणं व्याख्यातम् ।

श्रीमू.

ह्रस्वप्रवासो दीर्घप्रवासश्च

ह्रस्वप्रवासिनां शूद्रवैश्यक्षत्रियब्राह्मणानां भार्याः संवत्सरोत्तरं कालमाकाङ्क्षेरन् अप्रजाताः संवत्सराधिकं प्रजाताः, प्रतिविहिताः द्विगुणं कालम् । अप्रतिविहिताः सुखावस्था विभृयुः, परे चत्वारि वर्षाण्यष्टौ वा ज्ञातयः । ततो यथादत्तमादाय प्रमुञ्चेयुः ।

ब्राह्मणमधीयानं दश वर्षाण्यप्रजाता, द्वादश प्रजाता । राजपुरुषं आ आयुःक्षयादाकाङ्क्षेत । सवर्णतश्च प्रजाता नापवादं लभेत । कुटुम्बर्द्धि-

(१) कौ.३।४.

लोपे वा सुखावस्थैर्विमुक्ता यथेष्टं विन्देत जीवितार्थमापद्गता वा ।

धर्मविवाहात् कुमारी परिग्रहीतारमनाख्याय प्रोषितमश्रूयमाणं सप्त तीर्थान्याकाङ्क्षेत, संवत्सरं श्रूयमाणम् । आख्याय प्रोषितमश्रूयमाणं पञ्च तीर्थान्याकाङ्क्षेत, दश श्रूयमाणम् । एकदेशदत्तशुल्कं त्रीणि तीर्थान्यश्रूयमाणं, श्रूयमाणं सप्त तीर्थान्याकाङ्क्षेत । दत्तशुल्कं पञ्च तीर्थान्यश्रूयमाणं,दश श्रूयमाणम् । ततः परं धर्मस्थैर्विसृष्टा यथेष्टं विन्देत । तीर्थापरोधो हि धर्मवध इति कौटल्यः ।

दीर्घप्रवासिनः प्रव्रजितस्य प्रेतस्य वा भार्या सप्त तीर्थान्याकाङ्क्षेत, संवत्सरं प्रजाता । ततः पतिसोदर्यं गच्छेत् । बहुषु प्रत्यासन्नं धार्मिकं भर्मसमर्थं कनिष्ठमभार्यं वा । तदभावेऽप्यसोदर्यं सपिण्डं कुल्यं वा । आसन्नमेतेषाम् । एष एव क्रमः ।

एतानुत्क्रम्य दायादान् वेदने जारकर्मणि ।
जारस्त्रीदातृवेत्तारः संप्राप्ताः संग्रहात्ययम् ॥

ह्रस्वप्रवासमाह—ह्रस्वप्रवासिनामिति । क्षिप्रं प्रत्यागमिष्यामीत्युक्त्वा देशान्तरं गताना, शूद्रवैश्यक्षत्रियब्राह्मणाना, भार्याः, संवत्सरोत्तरं काल आकाङ्क्षेरन् एक वत्सरं शूद्री द्वौ वैश्यी त्रीन् क्षत्रिया चतुरो ब्राह्मणीत्येवं क्रमेण प्रत्यागमनकाल अतिक्रान्तावधेर्भर्तुः प्रतीक्षेरन्, कथम्भूताः, अप्रजाताः अनुपजातप्रसवाः । संवत्सराधिकं प्रजाताः उपजातप्रसवाः अधिकमेकं संवत्सरं, आकाङ्क्षेरन् । प्रतिविहिताः भर्तृसुविहितवृत्तिव्यया: स्त्रियो, द्विगुण काल शूद्र्याद्युक्तक्रमेण द्विवर्षचतुर्षषड्वर्षाष्टवर्षात्मक, आकाङ्क्षेरन् । अप्रतिविहिताः स्त्रीः, सुखावस्था बिभ्रयुः । विवाहव्यवस्थास्थेयपुरुषाः पोषयेयुः । परं द्विगुणकालादूर्ध्वं, चत्वारि वर्षाणि, अष्टौ वा वर्षाणि, ज्ञातयः पतिबान्धवाः, बिभ्रयुः । ततः तदूर्ध्वं, भर्तुरनागमने, यथादत्त आदाय, प्रमुञ्चेयुः स्त्रीज्ञातिगृहं प्रति विसृजेयुः, तासामिच्छा चेदित्यार्थम् ।

ब्राह्मणमिति । ब्राह्मणं, अधीयान विद्याध्ययनार्थं देशान्तरं गतं, दश वर्षाणि, अप्रजाता अप्रसूतिः स्त्री, आकाङ्क्षेत । द्वादश वर्षाणि, प्रजाता प्रसूता, आकाङ्क्षेत । राजपुरुष प्रोषितं, आ आयुःक्षयाद् आकाङ्क्षेत । सवर्णत इति । यथोक्तप्रतीक्षाकालादूर्ध्वं समानवर्णात्, चकारात् स्वोत्कृष्टवर्णादपि प्रजाता प्राप्तगर्भा स्त्री, नापवाद लभेत दण्डनीया न भवेत् । कुटुम्बर्द्धिलोपे वेति । बन्धुकुटुम्बे दारिद्र्यादात्मभरणासमर्थे सति, सुखावस्थैर्विमुक्ता विवाहव्यवस्थास्थेयैर्यथोचितकाल भूत्वा विसृष्टा स्त्री, यथेष्ट विन्देत ईप्सितमन्य पुरुष वरयेत्, जीवितार्थं देहयात्रार्थम् । आपद्गता वा आपन्निवारणार्थं वा ।

धर्मविवाहादिति । ब्राह्मादि धर्मविवाहमधिगम्य स्थिता, कुमारी अक्षतयोनिः, परिग्रहीतारं, अनाख्याय प्रोषित अनापृच्छ्य देशान्तरगत, अश्रूयमाण अज्ञायमानवृत्तान्तं, सप्त तीर्थानि, आर्तवानि, आकाङ्क्षेत । श्रूयमाण तं, संवत्सर आकाङ्क्षेत । आख्याय प्रोषितमित्यादि । एकदेशदत्तशुल्क सावशेषार्पितशुल्कम् । दत्तशुल्क निरवशेषार्पितशुल्कम् । शेष सुबोधम् । ततः परमिति । यथोक्तकालादूर्ध्वं, धर्मस्थैः विसृष्टा पत्यन्तरवरणायाभ्यनुज्ञाता, यथेष्ट विन्देत यथाकामितं पति परिगृह्णीयात् । तत्र हेतुमाह—तीर्थापरोधो हीति । तीर्थस्य ऋतुकालस्य प्रजननयोग्यस्य उपरोधः पुरुषानभिगमनेन विफलीकरण, धर्मवधः धर्मस्य पुत्रोत्पत्तिलभ्यस्य सुकृतस्य वधो घातः, भवति । इति कौटल्यः मन्यत इति शेषः । यत् स्मर्यते—'पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते । अथ पुत्रस्य पौत्रेण नाकपृष्ठे महीयते ॥' इति ।

दीर्घप्रवासिन इति । महाप्रस्थानं गतस्य, प्रव्रजितस्य सन्यस्तस्य, प्रेतस्य वा, भार्या, सप्त तीर्थानि आकाङ्क्षेत, अप्रजाता । सवत्सरं प्रजाता सा, आकाङ्क्षेत । ततः, पतिसोदर्यं पत्युर्भ्रातरं, गच्छेद् उपतिष्ठेत पुत्रार्थम् । बहुषु अनेकेषु पतिसोदर्येषु सत्सु, प्रत्यासन्नं समनन्तरं, गच्छेत् । स यद्यधार्मिकः तदा धार्मिकं गच्छेत् । सर्वेषु धार्मिकेषु भर्मसमर्थं भरणशक्त गच्छेत् । सर्वेषु भरणसमर्थेषु कनिष्ठ गच्छेत्, अभार्यं वा गच्छेत् ।

तदभावेऽपीति । पतिसोदर्याभावेऽपि, असोदर्ये वैमात्रेयं गच्छेत् । तदभावे सपिण्डं गच्छेत् । कुल्य वा सपिण्डाभावे पतिकुलोत्पन्न, गच्छेत् । आसन्नमेतेषामिति । कुल्यानां बहूना मध्ये पुरुषगणनायामासन्नं गच्छेत् । एष एव क्रमः यथोक्त एव पुरुषपरिग्रहविषयो न्यायः ।

एतानिति । एतान् दायादान् पतिसोदर्यादीन्, उत्क्रम्य, वेदने पुरुषान्तरपरिणयने, जारकर्मणि जारपुरुषगमने वा, जारस्त्रीदातृवेत्तारः जारः स्त्रीभोक्ता स्त्री व्यभिचारिणी दाता स्त्रीदायकः स्त्रीधनस्थेयश्च वेत्ता स्त्रियं विन्दमानः इत्येते, सप्रहात्यय सप्राप्ताः स्त्रीसंग्रहणविहितेन दण्डेन दण्डनीयाः । श्रीमू.

मनुः

कन्यायाः पुनर्दाननिषेधः

[1]न दत्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः ।
दत्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ॥

(१) 'तेषा निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे' इति प्राग्विवाहान्मृते वरे दत्तायामपि पुनर्दानाशङ्काया प्रतिषेधोऽयम् । विशिष्टे तु पुनर्वचन, तथाविधा या पुनर्भूरुक्ता । नान्यस्मै दत्वा तस्मिन्मृतेऽन्यस्मै दद्यात्तथा कुर्वन्प्राप्नोति पुरुषानृत मनुष्यहरणे यत्पाप तस्य तत् भवति । *मेधा.

(२) नान्यस्मिन्नित्यायुपसंहरन् विपक्षे दोषमाह—न दत्वेति । वाग्दाने दान भाक्त, दत्वा ददत् प्राप्नोति पुरुषानृत 'सहस्र पुरुषानृत' इत्युक्तत्वात् । अत एव 'दत्तामपि हरेत्कन्या श्रेयाश्चेद्वर आव्रजेदि'त्यविधिना वाच्या दत्ता दानाशंका (?) । मच.

(३) अस्य देवरस्यैव दातव्यत्वे कारणमाह—न दत्वा कस्यचिदिति । नन्द.

प्रतिगृहीतकन्यात्यागः

[2]विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम् ।
व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम् ॥

(१) विधिः शास्त्र तदर्हतीति विधिवत् । यादृशः शास्त्रेण विधिरुक्तः 'अद्भिरेव द्विजाग्र्याणाम्' इति । स च कैश्चिदुदकाधिकारः कन्याविषये स्मर्यते । तेन प्रतिगृह्यापि त्यजेत्कन्या प्राग्विवाहाद्विगर्हितां दुर्लक्षणां विदुष्टां पूर्व प्रतिगृहीता मनोज्ञामपि, तथा निर्लज्जां बहुपुरुषभाषिणीं, व्याधिता क्षयव्याधिगृहीता, विप्रदुष्टा रोगिण्यादिशब्दितामन्यगतभावा च त्यजेत् । अन्ये क्षतयोनिं विप्रदुष्टा व्याचक्षते । न ते सम्यङ्मन्यन्ते यदि तावत्पुरुषानुपभुक्ता स्त्री कन्यैव अविकृता तदा नैव दुष्यति । अथ पुरुषसयुक्ता तदा कन्यैव न भवति । तत्र 'त्यजेत्कन्यामि'ति सामानाधिकरण्यानुपपत्तिः । उक्तश्च तस्यास्त्यागः । छद्मना चोपपादिता न्यूनाधिकाङ्गी या हेतुनियुक्ता । अकथितेषु स्वल्पेष्वपि दोषेषु कृतवरणाऽपि त्याज्यैव । मेधा.

(२) विप्रदुष्टा पुरुषान्तरदूषिताम् । पूर्वाध्याये दोषवत्कन्यादातुर्दोष उक्तोऽत्र तु त्यक्तुर्दोषाभावः । मवि.

(३) 'अद्भिरेव द्विजाग्र्याणामि'त्येवमादिविधिना प्रतिगृह्यापि कन्या वैधव्यलक्षणोपेता रोगिणीं क्षतयोनित्वाद्यभिशापवतीमधिकाङ्गादिगोपनच्छद्मोपपादिता सप्तपदीकरणात्प्राग्ज्ञाता त्यजेत् । ततश्च तत्त्यागे दोषाभाव इत्येतदर्थ न तु त्यागार्थम् । ममु.

(४) सप्तपदीगमनात्प्राक् त्यजेत्, ऊर्ध्वं न त्यागः किंतु वस्त्राच्छादनादिना भर्तव्या । +मच.

यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत् ।
तस्य तद्धितथं कुर्यात्कन्यादातुर्दुरात्मनः ॥

कन्यादोषा उक्तास्तानना‌ख्यायानुक्त्वा प्रयच्छति ददाति, तस्य तद्दान वितथ निष्फल कुर्यात्प्रत्यर्पणेन । उक्त एवायमर्थः पूर्वश्लोकेनातिस्पष्टीकृतः । मेधा.

कन्यादानकालः

[3]उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि ॥

(१) उत्कृष्टायाभिरूपायेति विशेषणविशेष्यभावः । उत्कृष्टायाभिरूपतराय इत्यर्थः । अथवोत्कृष्टाय जात्यादिभिः, अभिरूपायेति पृथग्विशेषणम् । रूपमाकृतिमाभि-

---

* मवि., ममु. मेधावत् ।

(१) **मस्मृ.**९।७१; **बाल.**२।१२७; **विभ.**३३.

(२) **मस्मृ.**९।७२; **समु.**११९ त्प्रति (त्संप्र).

१ तथाविधायाः पु.

+ शेष ममुवत् ।

(१) **मस्मृ.**९।७३. (२) **मस्मृ.**९।८८; **समु.**११८.

१ न्यादिविकृ.

मुख्येन प्राप्तोऽभिरूपः स्वभाववचनो वा सुस्वभावः विद्वानप्यभिरूप उच्यते। सदृशाय जात्यादिभिर्वरो वोढा जामाता। अप्राप्तामप्ययोग्यामपि कामावशत्वेन बालामप्राप्तां कौमारं वयः, स्मृत्यन्तरे नग्निकेत्युच्यते। कामपूर्वा यस्या नोत्पन्ना सा चाष्टवर्षा षड्वर्षा वा न त्वत्यन्तबालैव। तथाहि लिङ्गम् 'अष्टवर्षामि'ति । इदमेव लिङ्गं धर्मप्रयुक्तायामपि विवाहस्येति। अन्यथा रागस्यैव प्रयोजकत्वे कुतोऽप्राप्तायां विवाह इत्याहुस्तदयुक्तम्। धनार्थिनोऽपि बाला विवाहयन्ति। न शास्त्रीयैव सर्वा प्रयुक्तिस्तृतीये निरूपिता। *मेधा.

(२) अप्राप्तामष्टवर्षन्यूनवयसमपि। ×मवि.

[1]प्रयच्छेन्नग्निकां कन्यामृतुकालभयान्वितः।
ऋतुमत्यां हि तिष्ठन्त्यामेनो दातारमृच्छति॥
काममा मरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित्॥

(१) प्राग्तोः कन्याया दानं, ऋतुदर्शनेऽपि न दद्याद्यावद्गुणवान्वरो न प्राप्तः। गुणो विद्याशौर्यातिशयः शोभनाकृतिर्वयोमहत्वोपेतता लोकशास्त्रनिषिद्धपरिवर्जनं कन्यायामनुराग इत्यादिः। ÷मेधा.

(२) उक्तचतुष्टयविशेषणान्यतरहीनाय न देयेत्युत्कृष्टवरे तात्पर्यात्। अन्यथा 'अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतावि'ति याज्ञवल्क्यवचनविरोधः। मच.

कन्यास्वयंवरः

[3]त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम्॥

(१) रेतः ऋतुकालः तद्वत्यपि त्रीणि वर्षाणि तद्गृहे आसीत। अतः परमुत्कृष्टाभावे सदृशं समानजातीयं स्वयं वृणुयात्। *मेधा.

(२) उदीक्षेत प्रतीक्षेत न ततः प्राक्स्वयंवरणमस्तीत्यर्थः। उपासीतेति क्वचित्पाठः। विन्देत स्वप्रयत्नेनैव। सदृशमित्यधमव्यवच्छेदार्थम्। मवि.

(३) दातृणामेवाभावे तु स्वयंवरा स्यादित्याह —त्रीणीति। +मच.

[4]अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम्।
नैनः किंचिदवाप्नोति न च यं साऽधिगच्छति॥

(१) वर्षत्रयादूर्ध्वमदीयमाना य भर्तारं वृणुते तस्य दोषो न, कन्यायाः पूर्वेणैव दोषाभाव उक्ते म्रियमाणस्यादोषार्थमिदं, ऋतुदर्शन च द्वादशवर्षाणामिति स्मर्यते। मेधा.

(२) नैनः पाप पित्रननुमतिकृत यं साऽधिगच्छति सोऽपि नैनो रजस्वलापरिणयनादिकृत प्राप्नोतीत्यनुषङ्गः। मवि.

(३) अदीयमाना बन्धुहीना। भाच.

[5]अलङ्कारं नाददीत पित्र्यं कन्या स्वयंवरा।
मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत्॥

भ्रात्रादिभिर्यदादौ दत्तं स्वयंवरणाभिप्रायं तस्या अजानद्भिः, तदलङ्करणं तेषामेव प्रत्यर्पयेत्। यदि तु तथाविधाया एव ददाति तदा न त्यागः। तेनास्मै न वयमेनां दास्याम इत्येवमभिप्रायं यद्भूषणं न तस्मिन्नन्यथात्वमापन्ने युक्तम्। 'स्तेनः स्यादि'ति पुल्लिङ्गेन पाठान्तरं, वरस्य चौरत्वमाहुस्तस्मात्तेन पित्र्यानलङ्कारास्त्याजयितव्या। मेधा.

ऋतुमत्याः शुल्कं न देयम्

[3]पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन्।
स हि स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात्॥

(१) शुल्कदेयाया ऋतुमत्याः शुल्कनिरोधोऽयं स च स्वाम्यादतिक्रामेत्। 'बाल्ये पितुर्वशे तिष्ठेत्' इत्युक्तम्। वयोन्तरप्राप्तौ चाददतः पितुः स्वाम्य नास्ति। शुल्का-

---

* ममु. मेधावत्। × मच., भाच. मविवत्।
÷ मवि., ममु. मेधावत्।
(१) **मस्मृ.**९।८८ इत्यस्योपरिष्टात् प्रक्षिप्तश्लोकोऽयम्।
(२) **मस्मृ.**९।८९; **समु.**११८.
(३) **मस्मृ.**९।९०; **मवि.** उपासीतेति क्वचित्पाठः; **समु.११६.**

+ भाच. मचवत्।
(१) **मस्मृ.**९।९१.
(२) **मस्मृ.**९।९२; **मेधा.** 'स्तेनः' इति पाठान्तरम्; **मभा.** १८।२१ स्तेना (स्तेय); **गौमि.**१८।२० स्तेना (स्तेयं) तं हरेत् (किंचन); **समु.११९** मभावत्.
(३) **मस्मृ.**९।९३; **समु.११९.**

देयाया अपि हेतोः समानत्वात्पितुः स्वाम्यनिवृत्तिः । अपक्रमण निवृत्तिः । प्रतिरोधन प्रतिरोधोऽपत्योत्पत्तिकार्ये । केचिदाहुः अमानवोऽयं श्लोकः । मेधा.

(२) आर्षे गोमिथुन विहितमपि ऋतुमत्या निषेधति—पित्र इति । ऋतुपर्यन्त कन्यायाः कन्यात्वं पितुः स्वत्वं च । पित्राद्यनधीनत्वं 'बाल्ये पितुर्निदेशे तिष्ठेदि'त्युक्तेर्दशवर्षादिकालस्य स्वत्वनिवर्तकत्ववदृतुकालस्यापि स्वत्वनिवर्तकत्वात् । मच.

वधूवरयोर्विवाहकालः

[1]त्रिंशद्वर्षोद्वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥

(१) इयता कालेन यवीयसी कन्या वोढव्या न पुनरेतावद्वयस एव विवाह इत्युपदेशार्थः । अथापि न यथाश्रुतवर्षसंख्यैव । किं तर्हि । बहुना कालेन यवीयसी वोढव्या । न ह्येतद्विवाहप्रकरणे श्रुतम् । येन संस्कार्यविशेषणत्वेन तदङ्ग कालो दशादिवर्षा पञ्चविंशत्यादिवर्ष च निवर्तयेत् । ननु च वाक्यान्तरस्थस्याप्यङ्गविधिर्भवत्येव । सत्यं, इह प्रकरणोल्कर्षेण पाठादाचार्यस्याभिप्रायान्तरमनुमीयते । तथा शिष्टसमाचारः । सुतस्य च पुनर्दारक्रियाया नैष कालः संभवतीति 'पुनर्दारक्रिया कुर्यात्' इति नोपपद्यते । मेधा.

(२) त्रिंशद्वर्ष इत्येतद्ग्रहणान्तिकव्रतचरणपक्षे । धर्मे स्वकर्तव्ये गार्हस्थ्यधर्मे सीदति मन्दीभवतीति त्वराहेतुरुक्तः । मवि.

(३) त्रिंशद्वर्षः पुमान् द्वादशवर्षवयस्का मनोहारिणी कन्यामुद्वहेत् । चतुर्विंशतिवर्षो वाऽष्टवर्षा, गार्हस्थ्यधर्मेऽवसादं गच्छति त्वरावान् । एतच्च योग्यकालप्रदर्शनपरं न तु नियमार्थं, प्रायेणैतावता कालेन गृहीतवेदो भवति त्रिभागवयस्का च कन्या वोढुर्योग्येति गृहीतवेदश्चोपकुर्वाणको गृहस्थाश्रमं प्रति न विलम्बेतेति सत्वर इत्यस्यार्थः । ममु.

(४) ब्राह्मादिविवाहे वयःपरिमाणमनुक्त विकल्पेनाह—त्रिंशदिति । वहेदुद्वहेत् त्र्यष्टवर्षः उत्कटरागापेक्षया गार्हस्थ्यधर्मापेक्षया वा । अत एवाह धर्मे सीदतीति । उद्वहेत्सदृशीं भार्यामित्यस्य शेषोऽयं स्थानभ्रष्टः । 'जातपुत्रः कृष्णकेशोऽग्नीनादधीते'त्यादिश्रौताधानस्यापत्योत्तरकालीनत्वादधर्मोऽत्रावसथ्याख्याग्निसाध्यः । मच.

(५) त्र्यष्टवर्षश्चतुर्विंशतिवर्षः धर्मे सीदति सत्वरः अन्यकन्या वहेत् । ब्रह्मचर्यविप्लवसंभावनाया वयोवस्थानियमो नादरणीय इत्यस्यार्थः । नन्द.

(६) धर्मे सीदति सति रजोदर्शने समुपागते सति सत्वरो भवेत् । भाच.

कन्याया वैवाहिकशुल्कसबन्धी विधिः

[2]कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते ॥

(१) यस्याः पित्रादिभिर्गृहीत शुल्कं, न च दत्ता, केवलवचनेन देयत्वेन व्यवस्थिता, अत्रान्तरे स चेन्म्रियेत तदाऽन्यद्रव्यवद्देवरेषु प्राप्ता सर्वेषु वा युधिष्ठिरादिवत्, तदभावे सपिण्डेषु, अतो विशेषार्थमिदमुच्यते । देवराय प्रदातव्येति, न सर्वेभ्यो भर्तृभ्रातृभ्यो नापि सपिण्डेभ्यः । किं तर्ह्येकस्मै देवरायैव । तत्रापि कन्याया अनुमतौ सत्याम् । अथासत्या कन्यायाः शुल्कस्य च का प्रतिपत्तिः । यदि कन्यायै रोचते ब्रह्मचर्यं तदा शुल्क कन्यापितृपक्षाणामेव । अथ पत्यन्तरमर्थयते तदा प्रागृहीतं शुल्क त्यक्त्वाऽन्यस्मादादाय दीयते । मेधा.

(२) पुरुषार्थं यद्यनुमन्यते । अननुमते तु नान्यस्मै देया किन्तु कन्यैव तिष्ठेदिति फलिष्यति । मवि.

(३) 'यस्या म्रियेत' इति प्रागुक्तं नियोगरूपं, इदन्तु शुल्कग्रहणविषयम् । ममु.

(४) 'यस्या म्रियेत कन्याया' इत्यस्माद्विशेषं वक्तुमाह—कन्यायामिति । वाग्दानशुल्कग्रहणाभ्या वा भेदः । तथा च तस्याः स्वत्वनिवृत्तेरननुमतौ स्वयवरा स्यान्न तु बलाद्दातु शक्येत्याह—यदीति । मच.

(५) अनुमत्यभावेऽन्यस्मै देया 'सकृत्कन्या प्रदीयत' इत्यस्यायमपवादः । नन्द.

[3]आददीत न शूद्रोऽपि शुल्कं दुहितरं ददन् ।
शुल्कं हि गृह्णन्कुरुते छन्नं दुहितृविक्रयम् ॥

(१) मस्मृ.९।९४; दा.२२ षोंद्र (पौ व); व्यप्र.४३४ दावत्; समु.११९ दावत्.

(१) मस्मृ.९।९७; बाल.२।१२७; विभ.३४; समु.११९.

(२) मस्मृ.९।९८; विभ.३४; समु.११९.

(१) इच्छातः शुल्कग्रहणे पूर्वेण विधिरुक्तः, कस्यचित्तत एवाशङ्का स्याददोष शुल्कग्रहण, शास्त्रे गृहीतशुल्काया विशेष उक्तो यतः, अत इमामाशङ्कामपनेतुमाह। आददीत न शूद्रोऽपि शुल्कमिति। इच्छातः प्रवृत्तौ शास्त्रीयो नियमो न तु शास्त्रेण पदार्थस्यैव कर्तव्यतोक्ता। यथा मद्यपीतस्य प्रायश्चित्ते न मद्यपान शास्त्रेणानुज्ञातं भवति। शुल्कसज्ञेन यदेवोक्त 'गृह्णन्हि शुल्कं लोभेन' इति। येन तु विशेषेण पुनः पाठोऽसौ प्रदर्शित एव। मेधा.

(२) अत्र प्रसगादर्थान्तरमाह—आददीतेति। छद्मनापि शुल्कं प्रतिग्रहादिरूपेणापि छद्मना कन्याभिसंधिना शुल्क गृह्णन्दुहितृविक्रयं कुरुते। मवि.

(३) शास्त्रानभिज्ञः शूद्रोऽपि पुत्री ददच्छुल्कं न गृह्णीयात्किं पुनः शास्त्रविद्द्विजातिः। यस्माच्छुल्कं गृह्णन्सुतं दुहितृविक्रयं कुरुते। न कन्यायाः पितेत्येनेन निषिद्धमपि शुल्कग्रहण कन्यायामपि गृहीतशुल्काया शास्त्रीयनियमदर्शनाच्छुल्कग्रहणे शास्त्रीयत्वशङ्काया पुनस्तन्निषिध्यते। मसु.

एतत्तु न परे चक्रुर्नापरे जातु साधवः।
यदन्यस्य प्रतिज्ञाय पुनरन्यस्य दीयते॥

(१) यदुक्त गृहीते शुल्के कन्येच्छाया सत्या मृते तु शुल्कदेऽस्या अन्यत्र दानमिति तन्निषेधति। यदन्यस्य शुल्कदस्य प्रतिज्ञाय पुनरन्यस्मै दीयते पुनः शुल्क गृहीत्वेति। परं स्वयवरं तु कारयेत्कन्याम्। एष एवार्थः। ×मेधा.

(२) अतो देवरं प्रत्यननुमतायां कन्यायां नान्यस्मै सा देया। सोदरस्तु भ्रातात्मैवेति गृहीतस्य शुल्कस्य तद्धनत्वात्तस्मै दीयमानाया कन्याया दोषाभाव इति तात्पर्यम्। अभ्यनुज्ञाय शुल्कग्रहणेनान्यस्मै प्रतिपद्य। +मवि.

नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु।
शुल्कसंज्ञेन मूल्येन छन्नं दुहितृविक्रयम्॥

× मसु. मेधावत्। +मच. मविवत्।

(१) **मस्मृ.**९।९९; **मवि.** स्य प्रति (स्याभ्यनु) **विभ.**३४; **समु.**११९ मविवत्, उत्त. (२) **मस्मृ.**९।१००.

१ वर,

(१) न कुतश्चिदस्माभिः श्रुतं, पूर्वेषु जन्मसु कल्पान्तरेष्वित्यर्थः। मेधा.

(२) छन्नशुल्कग्रहेण दुहितृविक्रये प्रागुक्ते सदाचारविरोधं दर्शयति—नानुशुश्रुमेति। ÷मवि.

स्त्रीपुंधर्मप्रतिज्ञा

पुंसस्य स्त्रियाश्चैव धर्म्ये वर्त्मनि तिष्ठतोः।
संयोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान्॥

(१) स्त्रीसग्रहणानन्तरं विवादपदनिर्देशः 'स्त्रीपुंधर्मो विभागश्चे'ति तदिदानीमुच्यते। भर्त्रा कथंचिदपि बाध्यमानया तेन सह राजनि विवदितव्यमिति। पत्युरुपचर्योक्ता न भार्या प्रति प्रभुत्वं उपचारश्च भृत्यवच्छुश्रूषा पादसवाहनादि। स्त्रीपुरुषशब्दौ च यद्यपि लिङ्गविशेषावच्छिन्नमनुष्यजातिवचनौ तथापीह सबन्धिनि जायापत्यौ 'अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशमि'ति (मस्मृ.९।२) स्वग्रहणेन सबन्धिता लक्षयति। भर्तुः स्त्रियाश्च जायायाः सयोग एकत्र सबन्धिनिधाने तथा विप्रयोगे प्रवासप्रायणे। शाश्वतग्रहण स्तुतिः। धर्म्ये वर्त्मनि तिष्ठतोरनुवादोऽयम्। न्याय्यः धर्मशास्त्राचारनिरूढो मार्गः। मेधा.

(२) स्त्रीपुसयोर्दम्पत्योरन्योन्याव्यभिचारलक्षणे मार्गे वर्तमानयोः सयुक्तयोर्वियुक्तयोश्च नित्यान् धर्मान्वक्ष्यामि। जायापत्योरितरेतरविप्रतिपत्तौ कथंचित् राजनिवेदने सत्यनया व्यवस्थया राजा दण्डादिनापि मार्गस्थापन करणीयम्। अकरणाद्राज्ञो दोषः। इत्येतदर्थं व्यवहारमध्ये राजधर्मेषु स्त्रीपुसयोर्धर्मा उच्यन्ते। *गोरा.

स्त्रीणामस्वातन्त्र्यविधि, रक्षणविधिः, रक्षणप्रयोजनम्

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम्।
विषयेषु च सज्जन्त्यः संस्थाप्या ह्यात्मनो वशे॥

÷ मसु. मविवत्।

* मवि, मसु. मच., नन्द. गोरावत्।

(१) **मस्मृ.**९।१; **व्यक.**१२८; **स्मृच.**२३९; **विर.**४०९; **रत्न.**१३३; **स्मृचि.**२७ धर्म्ये (स्वे स्वे); **व्यप्र.**४०४; **व्यउ**१३९; **विता.**८२० धर्म्ये (धर्मे); **बाल.**२।२९५; **सेतु.**२८०धर्म्ये (धर्मे) संयो (सभो); **विभ.**२१वितावत्; **समु.**११९.

(२) **मस्मृ.**९।२ ह्या (आ); **मिता.**२।२९५; **व्यक.**१२८; **स्मृच.**२३९ षु च सज्जन्त्यः (सज्जमानाश्च); **विर.**

(१) स्वेच्छया स्त्रीणा धर्मार्थकामेषु व्यवहर्तुं न देयम् । यत्किंचन धनं धर्मादौ विनियुज्यते तत्र यथावयः स्वपुरुषाः पत्यादयोऽनुज्ञापनीयाः । स्वपुरुषा रक्षाधिकृताः 'पिता रक्षती'त्यादिनिर्दिष्टाः । विषयेषु हि गीतादिषु सज्जन्त्यः प्रसङ्गं कुर्वन्त्य आत्मनो वशे स्थाप्यास्ततो निवारणीयाः । यद्यप्यस्वतन्त्रा इत्यनेनैव सर्वक्रियाविषया स्वातन्त्र्यनिवृत्तिरुपदिष्टा भवति तथापि पुनर्विषयव्यावृत्तिवचनं यत्नतः परिहारार्थं, मा विज्ञायि यत्नेभ्य एव परपुरुषसंपर्कादिभ्यो निवारणीयाः, गृहावस्थितास्तु मद्यपानादिसक्ता न दुष्यन्ति । चशब्देन तावदयं धर्मः पुरुषाणामुक्तः । स्वातन्त्र्यं स्त्रीणा तावन्न देयम् । अर्थात्तु ताभिरपि स्वतन्त्राभिर्न भवितव्यमित्युक्तं भवति । एवं च 'पुरुषस्य स्त्रियाश्चैवे'ति चशब्देन इतरेतरविषययोर्यं स्त्रीपुंसयोर्धर्मास्त एवोच्यन्ते । न तु यागादय इति समन्वयो भवति । मेधा.

(२) भर्त्रादिभिः स्त्रियः सर्वदा परतन्त्राः कार्याः । अनिषिद्धेष्वपि च शब्दादिषु विषयेष्वतिसक्तिं भजमानास्ततोऽपास्यात्मवर्तिन्यः कार्याः । *गोरा.

(३) तत्रादौ स्त्रियाः स्वातन्त्र्यं निषेधति—अस्वतन्त्रा इति पञ्चभिः । दिवा गृह्यकृत्येषु रात्रौ तु स्वनिकटे शयनादौ । मच.

[1]पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥

* मनु. गोरावत् ।

४०९ मस्मृवत्; **पमा.**४७३, **स्मृचि.**२७ स्वैर्दि (च दि) शेष स्मृचवत्; **रत्न.**१३३ स्मृचवत्; **नृप्र.**३२ स्मृचवत्; **सवि** ३४२ स्वै (नै) पू.; **व्यप्र.**४०५; **व्यउ.**१३९स्मृचवत्; **विता.** ८२० स्मृचवत्; **सेतु.**२८०; **विभ.**२ ह्या (स्वा) शेष स्मृचवत्; **समु.**११९ स्मृचवत्.

(१) **मस्मृ.**९।३, **व्यक.**१२८; **गौमि.**२८।१ रक्षन्ति स्थविरे पुत्रा (पुत्रास्तु स्थविरीभावे); **उ.**२।१४।२ रक्ष. .त्रा (पुत्रस्तु स्थाविरीभावे); **स्मृच.**२४०; **विर.**४१० रक्ष त्रा (पुत्रास्तु स्थाविरे भावे); **स्मृचि.**२७; **व्यप्र.**४०६ रक्ष..... श्रा (पुत्रस्तु स्थविरे भावे); **बाल.**२।१३५(पृ.१९५), २।२९५; **सेतु.**२८१ रक्ष.. ...त्रा (पुत्रस्तु स्थाविरे भावे); **विभ.** २,५३ विरवत्; **समु.**१२०.

१ गणाः. २ वृत्ति + (रुपदिष्टा भवति).३ शब्द.

(१) रक्षा नामानर्थप्रतीघातः । अनर्थस्त्वनाचारवृत्तातिक्रमेणाप्रवृत्तिपरेण चान्यायतो धनहरणादिना परिभवस्तस्य प्रतीघातो निवारणं, तत्पित्रादिभिः कर्तव्यम् । रक्षतीति भवन्तिर्लिङर्थे छान्दसत्वात्ततो रक्षेदिति विधेयप्रत्ययः । वयोविभागश्रवणं चाऽधिकतरदोषार्थं, सर्व एव तु सर्वदा रक्षार्थमधिक्रियन्ते । कौमारग्रहणं दानात्पूर्वकालोपलक्षणार्थम् । एवं यौवनं जीवद्भर्तृकायाः प्रदर्शनं, अतश्च नित्यानुवाद एवायम् । यदा यदा यदधीना तदा तदा तेनावश्यं रक्षितव्या । तथा च जीवत्यपि भर्तरि पितुः पुत्रस्य चाधिकारस्तथा दर्शितं मानवे । सर्वं एते सर्वदा तत्संरक्षणं कुर्युः । कथ्यमानं तु ग्रन्थगौरवं करोति । ननु च 'बालया वा युवत्या वे'त्यनेनोक्तमेवैतत् । मैवम् । अन्यदेवास्वातन्त्र्यमन्या च रक्षा । तत्र चास्वातन्त्र्यमुपदिष्टम् । इह तु रक्षोच्यते । तेन सर्वक्रियाविषये अन्यतन्त्राया अपि शक्योऽनर्थः प्रतिहन्तुम् । ननु चेहापि पठ्यते 'न स्त्री स्वातन्त्र्यमर्हती'ति । उच्यते । नानेन सर्वक्रियाविषयमस्वातन्त्र्यं विधीयते । किन्तर्हि, नास्वतन्त्रान्यमनस्का स्वात्मसंरक्षणाय प्रभवति शक्तिविकलत्वात्स्वतः । पञ्चमे तु वचनमस्वातन्त्र्यार्थमर्थान्तरस्य तत्रोक्तत्वात् । मेधा.

(२) प्राग्विवाहात् पिता स्त्रियं रक्षति । तदनु भर्ता तदभावे पुत्राः । अत एभिर्न कदाचित्स्वतन्त्राः कार्याः । भर्तृपुत्रयौवनवार्धक्यग्रहणं न व्यवस्थार्थं अपि त्वौचित्यात्प्रामाणवादोऽयम् । +गोरा.

[1]कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः ।
मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता ॥

(१) दानकाले प्राप्ते यदि पिता न ददाति, यः कः पुनः कन्याया दानकालः 'अष्टमाद्वर्षात्प्रभृति प्रागृतोरि'ति स्मर्यते । इहापि लिङ्गमस्ति । अनुपगच्छन्नरमयन्भार्याभिर्निघ्नः, उपगमने कालश्चरितुं सद्व्रतस्य पर्ववर्ज्यमित्युक्तः (मस्मृ.३।४५) । मेधा.

+ मनु., मच., नन्द. गोरावत् ।

(१) **मस्मृ.**९।४; **मवि.** उच्य इति पाठ.; **विर.**४१२; **रत्न.**१३३; **स्मृचि.**२७; **व्यप्र.**४०५; **सेतु.**२८२; **विभ.** ४; **समु.**१२०.

१ क्षणमकुर्वतः. २ च. ३ क्य.

(२) 'प्रदान प्रागृतोरि'ति गौतमस्मरणात् अस्मिन्काले पिता कन्यामददन् गर्ह्यः । ऋतुकालेऽगच्छन् भर्ता निन्द्यः । पत्यौ पुनर्मृते मातरमरक्षन् पुत्रो गर्हणीयः । *गोरा.

(३) अदाता योग्याय । अनुपयन् वाग्दत्तामपि परिणयनेनासंस्तुवन् । वाच्यो गर्हया । उच्य इति पाठे देहीत्यादि राज्ञा नियोज्यः । मवि.

सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः ।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥

(१) प्रसङ्गः कुसंपर्को यया कदाचिदविज्ञानशीलया । गृहद्वारावस्थानादिनोज्वलवेषपुरुषदर्शनशीलयेत्येवमादय उच्यन्ते । नैते किल साक्षाद्दोषरूपाः । न हि साक्षात्स्त्री-संपर्कः । स्त्रियो दोषरूपाः । सूक्ष्मादित्युच्यते ततो रक्ष्याः निवारणीयाः । विशेषतः प्रयत्नेन । ततश्च तत्कुलीनैर्भ्रातृपितृव्यदेवरादैर्य रक्षितव्या इति सिद्ध भवति । मेधा.

(२) अल्पेभ्योऽपि दुःसंपर्केभ्यो दुःशीलत्वसपादकेभ्योऽतिशयेन रक्षणीयाः किमुत महद्भ्यः । यस्मादरक्षिता सद्योऽभिचारोत्पत्त्या पितृभर्तृकुलयोर्द्वयोरपि सताप कुर्युः । *गोरा.

(३) प्रसगेभ्यः परपुरुषभाषणादिभ्यः । मवि.

(४) अरक्षिताः स्त्रियो दुश्चरितेन द्वयोः कुलयोः भर्तृपितृकुलयोः शोकमावहेयुः कुर्युरित्यर्थः । अनेन कुलद्वयवृद्धैरपि रक्ष्या इति तत्क्लेशप्रदर्शनमुखेन दार्शितम् । स्मृच.२३९

[1]भार्यायां रक्ष्यमाणायां प्रजा भवति रक्षिता ।
प्रजायां रक्ष्यमाणायामात्मा भवति रक्षितः ॥
[2]इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम् ।
यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि ॥

(१) चातुर्वर्ण्यस्य एष उत्तमो धर्मः । पश्यन्तो जानानाः दुर्बला अपि भर्तारो भार्या रक्षितु यतेरन् प्रयत्नं कुर्युः । मेधा.

(२) यस्मात्सर्वेषा ब्राह्मणादिवर्णाना भार्यारक्षणं वक्ष्यमाणश्लोकनीत्या सर्वधर्मेभ्य उत्कृष्ट, अतो भर्तारो दुर्बला अपि भार्या रक्षितु यत्न कुर्युः । यतः स्त्रियो रक्ष्या इति पूर्वमेव । *गोरा.

स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च ।
स्वं च धर्मं प्रयत्नेन जायां रक्षन् हि रक्षति ॥

(१) न केवल शास्त्रोपदेशादेव स्त्रीरक्षा कर्तव्या । यावदिमानि बहूनि प्रयोजनानि । प्रसूतिरपत्य पुत्रदुहितृलक्षणं संकरो न भवतीत्यर्थः । चरित्र शिष्टसमाचारः । कुलं पूर्वोक्त, कस्यापि सत्कुलस्य भ्रष्टशीलाया भार्याया सर्वं कुलमुपतिष्ठतीति न साध्यः स्त्रिय एतेषामिति । अथवा पितृपितामहादीना संततिशुद्धयभावादौर्ध्वदैहिकस्या[1]निर्वृत्तेर्न रक्षा स्यात् । आत्मानम् । प्रसिद्धमात्मोपपतिनाऽवश्य हन्यते भार्ययैव वा विपादिना, स्व च धर्म, व्यभिचारिण्या धर्मानधिकारात् । अतो जायां रक्षिता सर्वमेतद्रक्षति । मेधा.

(२) भार्या यत्नतो रक्षन् स्वा संतति सकरानुत्पादनेन रक्षति । भार्यासरक्षणे च तिष्ठन् समाचारं च रक्षति । पितृपितामहाद्यन्वयमात्मान चासकीर्णापत्यौर्ध्वदैहिककरणेषु रक्षति । स्व धर्म विशुद्धभार्यस्याधानाद्यधिकाराद्रक्षति । *गोरा.

(३) स्वधर्म गार्हस्थ्यनियतम् । मवि.

---

* ममु. गोरावत् ।

(१) **मस्मृ.**९।५; **व्यक.**१२९; **स्मृच.**२३९; **विर.**४११ क्ष्या विशेष (क्ष्याः प्रयत्न); **पमा.**४७३; **रत्न.**१३३; **स्मृचि.**२७; **व्यप्र.**४०५; **व्यउ.**१४० युर (युर्न) उक्त.; **सेतु.**२८१ विरवत् ; **विभ.**३ विरवत् ; **समु.**११९,१२०.

(२) **मस्मृ.** ९।५ इत्यसोपरिष्टात् प्रक्षिप्तश्लोकोऽयम्।

(३) **मस्मृ.**९।६; **व्यक.**१२९; **स्मृच.**२३९बला (लैभा); **विर.**४११; **पमा.**४७३; **रत्न.**१३३; **स्मृचि.**२७; **नृप्र.**३३; **व्यप्र.**४०५ वर्णानां (धर्माणां); **सेतु.**२८१; **विभ.**३ पश्यन्तो (वशतः); **समु.**१२०.

(१) **मस्मृ.**९।७; **व्यक.**१२९; **मवि.** स्वधर्मं इति पाठः; **स्मृच.**२३९; **विर.**४११ स्वं च धर्मं (स्वधर्मं हि); **पमा.**४७३; **स्मृचि.**२७ स्वां (स्व) शेष विरवत् ; **नृप्र.**३३ प्रयत्नेन (प्रजाश्चैव); **व्यप्र.**४०५; **व्यउ.**१४० स्वां (स्त्री) स्व च धर्मं प्रयत्नेन (स्वधर्मं हि प्रयत्नाच्च); **सेतु.**२८१ चरित्रं (च वित्तं) शेषं विरवत्; **विभ.**३ विरवत्; **समु.**१२०.

१ निवृत्ते रक्षा. २ द्वात्मनोप.

जायापदनिरुक्तिः

पतिर्भार्यां संप्रविश्य गर्भो भूत्वेह जायते ।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥

(१) अर्थवादोऽयम् । न च पत्युः पत्न्या उदरे प्रवेशदर्शनं, अतः शरीरसारभूतशुक्रद्वारेण गुणवादतः प्रवेशोऽयमुच्यते । 'आत्मा वै पुत्रनामासी'ति । एतदेव जायाशब्दस्य भार्यावचनत्वे प्रवृत्तिनिमित्तम् । यतोऽस्या पतिर्जायते । अपत्यजन्मनिमित्ते जायाशब्दे जारस्यापि जायोच्येत । मेधा.

(२) एवं चासौ रक्षणीयेत्येतदर्थं नामनिर्वचनम् । ×गोरा.

(३) जायापदं व्युत्पादयस्तद्रक्षणेऽतीव यत्नमाविष्करोति—पतिरिति द्वाभ्याम् । मच.

यादृशं भजते हि स्त्री सुतं सूते तथाविधम् ।
तस्मात्प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत्प्रयत्नतः ॥

(१) 'स्वा प्रसूतिमि'ति (मस्मृ. ९।७) यदुक्तं तद्दर्शयति । न चैवं मन्तव्यं यादृश द्वितीय पुरुषं सेवेत सुत सूते पुत्र जनयति तथाविधजातीय,नापि गुणसादृश्यमभिप्रेत यतः शूद्रादिजातस्य चण्डालादिजातित्व, समानजातीयजातस्यापि नैव तज्जातीयत्वं 'पत्नीष्वक्षतयोनिष्वि'ति वचनात्, गुणसादृश्येऽपि विशीलदरिद्रपतिकाया उत्कृष्टपुरुषगमनमनुज्ञात स्यात् । यदा त्वयमर्थवादस्तदा यादृश तथाविधमित्यकुलानुरूपमिति नीयते । मेधा.

(२) यस्माद्यथाविधं पुरुषं यथाचोदित भर्तारं शास्त्रनिषिद्ध वा स्त्री सेवते तादृश शास्त्रोक्तमेव तथोत्कृष्ट निषिद्धसेवनेन च निकृष्टं पुत्रं जनयति । तस्मादपत्यशुद्ध्यर्थं भार्या यत्नतो रक्षेत् । ×गोरा.

(३) यादृशं पुरुषमार्तवकाले स्त्री मनसा भजते तत्समानशील पुत्रं जनयतीति पूर्वार्धस्यार्थः । ×स्मृच.२४१

जायारक्षणोपायाः

न कश्चियोषितः शक्तः प्रसह्य परिरक्षितुम् ।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम् ॥

वक्ष्यमाणोपायप्रशंसार्थः श्लोकः । प्रसह्य बलेन; बष्टभ्य शुद्धान्तावरोधादिना परपुरुषाधिक्यानादितो न शक्या रक्षितुम् । कित्वेतैरुपाययोगैः शक्याः । योगाः प्रयोगाः । उपायैः प्रयुज्यमानैरित्यर्थः । ÷मेधा.

अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य चेक्षणे ॥

(१) अर्थो धनम् । तस्य संग्रहः संख्यादिना परिच्छिद्य रक्षार्थं वेश्मनि निधान रज्ज्वायसबन्धादिना संयम्य स्थापन मुद्राङ्कमित्येवमादि । व्ययो विसर्गस्तस्यैव इदमेतावद्धनमित्यर्थमिदं च सुपार्थमेतावच्छाकार्थमिति । शौचं दर्विपिठरादिशुद्धिर्भूमिलेपनादिश्च । धर्म आचमनोदकतर्पणादि दानं स्त्रीवासगृहकादौ बलिकुसुमविकिरैर्देवार्चनम् । अन्नपक्तिः प्रसिद्धा । पारिणाह्य यत्स्यादासदीखट्वादि तत्प्रत्यवेक्षणे नियोक्तव्या । मेधा.

(२) एव च तद्व्यापृतमना श्रान्ता स्वपिति, संयोगं न स्मरति । गोरा.

× मनु. गोरावत् ।

(१) **मस्मृ.**९।८; **व्यक.**१३०; **विर** ४१७; **स्मृचि.**२७ भार्या (जायां) तद्धि (स्याद्धि); **विभ.**४; **समु.**१२० सप्रविश्य (प्रविश्य स्वा) त्वेह (त्वाभि).

(२) **मस्मृ.**९।९; **व्यक.**१२९; **स्मृच.**२४१; **विर.**४१४ स्त्रियं (स्त्रियो); **स्मृचि.**२७; **व्यप्र.**४०८ हि स्त्री (स्त्री हि); **विभ.**४; **समु.**१२०.

× व्यप्र., भाच. स्मृचवत् ।

÷ गोरा., मवि., ममु., मच., भाच. मेधावत् ।

(१) **मस्मृ.**९।१०; **व्यक.**१३०; **स्मृच.**२४० क्या (क्त), **विर.**४१६, **पमा.**४७३; **रत्न.**१३४ पू.; **नृप्र.**३३; **व्यप्र.**४०८; **व्यउ.**१४१; **विता.**८२१ पू.; **सेतु.**२८२ स्तु (श्च); **विभ.**८, **समु.**१२०.

(२) **मस्मृ** ९।११ घ. पुस्तके चेक्ष (वेक्ष), **व्यक.**१३०; **स्मृच.**२४१ णाह्य (णह्य); **विर.**४१६ शौचे धर्मेऽन्न (शौचधर्मे च); **पमा.**४७३; **रत्न.**१३४; **व्यप्र.**४०८ मेंऽन्न (में च); **व्यउ.**१४१ चैनां (वैतां) मेंऽन्न (में च); **विता.** ८२१ मेंऽन्न (में च) चेक्ष (रक्ष); **बाल.**३१४५ (२६२) (शौचे धर्मेऽन्नपक्त्यां च परिणाह्यस्य वाक्षणम्) उत्त.; **सेतु.**२८२ विरवत्; **विभ.**८ चेक्ष (रक्ष) शौचे (शौच) ह्यस्य (य्यस्य); **समु.**१२० स्मृचवत्.

१ नादिना.

स्त्रीणां स्वभावदोषा. दूषणानि च

[1]अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः ।
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ॥

(१) आप्तं प्राप्त, काले त कुर्वन्त्याप्तकारिणोऽवधानवन्त उच्यन्ते । शुद्धान्ताधिकारिणः कञ्चुकिनः, तैः स्वे गृहे रुद्धाश्चास्वतन्त्रीकृता यथेष्टविहारनिषेधेन रक्ष्यमाणा न रक्षिता भवन्ति । किंत्वात्मनाऽऽत्मान रक्षन्ति । ताः कथ रक्षन्ति । यथेतेषु कार्येषु नियुज्यन्ते । उक्तोपायप्रशंसा, नोपायान्तरनिषेधः । मेधा.

(२) ता अपि अरक्षिता एव मनोव्यभिचारसंभवात्, याः पुनरात्मनैवात्मानं संयमाश्रयेण रक्षन्त्येव सुप्रमनाचारेण संयमाधान आसा यत्नः कार्यः । इति प्रधानसरक्षणोपायोपदेशः । गोरा.

(३) आप्तकारिभिः यथार्थकारिभिः । मवि.

(४) आप्ताश्च ते आज्ञाकारिणश्च तैः पुरुषैर्गृहे रुद्धाऽप्यरक्षिता भवन्ति याः दुःशीलतया नात्मानं रक्षन्ति । यास्तु धर्मज्ञतयाऽऽत्मानमात्मना रक्षन्ति ता एव सुरक्षिता भवन्ति । अतो धर्माधर्मफलस्वर्गनरकप्राप्त्याद्युपदेशेनासां संयमः कार्य इति मुख्यरक्षणोपायकथनपरमिदम् । ममु.

[2]पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट् ॥

(१) अटनमापणभूमिषु शस्त्रशाकादिक्रयार्थं देवतायतनेषु च, ज्ञातिकुले बहूनि दिनान्यप्यवस्थान, अन्यगेहवासः । नारीसंदूषणानि स्त्रीणामेते चित्तसंक्षोभहेतवः । एते हि श्वशुरादिभयं जनापवादभयं च त्यजन्ति ।
मेधा.

(२) दूषणानि साधुप्रकृतेरपि नार्या व्यभिचाराख्यदोषजननानि । गोरा.

(३) पान मद्यादीनाम् । पत्या विरहो देशान्तरे पतिमृत्सृज्यावस्थानम् । अटनं विना पत्या तीर्थयात्रादिकरणम् । स्वप्नो यत्रकुत्रापि शयनम् । अन्यगृहे वासः परगृहे वसनम् । स्मृच.२४१

[3]नेता रूपं परीक्षन्ते नासां वयसि संस्थितिः ।
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥

नायमभिमानो वोढव्यः, सुभगः स्वाकृतिस्तरुणोऽहमा हित्वा कथमन्य कामयिष्यते । यतो नेता दर्शनीयोऽय शूराकृतिरयमित्येवं विचारयन्ति । पुमानयमित्येतावतैव भुञ्जते संयुज्यन्ते तेन । मेधा.

[4]पौंश्चल्याच्चलचित्ताच्च नैसर्ग्याच्च स्वभावतः ।
रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते ॥

(१) यस्मिन्कस्मिंश्च पुंसि दृष्टे धैर्याच्चलनं कथमनेन सप्रयुज्येयेति चेतसो विकारः स्त्रीणा तत्पौंश्चल्यं, अन्यत्रापि धर्मादौ कार्येऽस्थिरता चलचित्तत्वात् । य एव द्वेष्यः स एव स्पृह्यत इति भ्रातृपुत्रादिर्यो दृष्टस्तस्मा एव कामुकत्वेन स्पृहयन्ति । स्नेहो रागस्तृष्णा च भर्तरि पुत्रादौ मानविबद्धहृदया भवन्ति ! एतैर्दोषैर्योगाद्विकुर्वते विक्रिया भर्तृषु गच्छन्ति, तस्मात् । +मेधा.

(२) पुरुषान्तराभिलाषितया विकुर्वते मारणादिक्रिया कुर्वते । मच.

(३) पुसश्चलन्तीति पुंश्चल्यः तद्भावः पौंश्चल्य परिचितपुसः परित्यज्य नूतनान् भजन्त इति यावत् । नन्द.

+ गोरा., ममु. मेधावत् ।

(१) **मस्मृ**.९।१४; **व्यक**.१२९ सस्थितिः (निश्चयः); **स्मृच**.२४० सुरू (सरू); **विर**.४१२ सुरूप वा विरूप (विरूप रूपवन्त); **विचि**.१९० परी (प्रती) सु (अ) वा विरूपं (रूपवन्त), **स्मृचि**.२७ परी (प्रती); **व्यप्र**.४०७ स्मृचिवत्; **व्यउ**.१४० स्मृचिवत्; **विभ**.५ परी (प्रती) शेषं विरवत्; **समु**.१२० विरवत्; **विव्य**.५६ परी (प्रती) विरू (कुरू).

(२) **मस्मृ**.९।१५; **व्यक**.१२९; **स्मृच**.२४० त्ताच्च (त्तत्वात); **विर**.४१२ त्ताच्च (त्याच्च); **स्मृचि**.२८ चलचित्ता (द्वालचित्त्या) ह्या (हा); **व्यप्र**.४०६; **व्यउ**.१४१ स्मृचिवत्; **विभ**.५ विरवत्; **समु** १२९ चलचित्ता (चलालचित्त्या).

(१) **मस्मृ**.९।१२, **व्यक**.१३०, **स्मृच**.२४१:३२१ राप्त (राज्ञ); **विर**.४१३; **रत्न**.१३४; **व्यप्र**.४०९; **सेतु**.२८२ स्ताः सु (स्तासु); **विभ**.८; **समु** १२० श्लोकार्धौ व्यत्यासेन पठितौ.

(२) **मस्मृ**.९।११; **व्यक** १३४; **स्मृच**.२४१गेह (गेहे); **विर**.४३० गे (गृ) संदू (णां दू); **स्मृचि**.२७ गेह (गेहे) सदू (णां दृ); **सेतु**.२८७ संदू (णां दू); **विभ**.१८ विरवत्; **समु**.१२०,१२१ स्मृचवत्.

एवं स्वभावं ज्ञात्वाऽऽसां प्रजापतिनिसर्गजम् ।
परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति ॥

प्रजापतिर्हिरण्यगर्भस्तदीये निसर्ग उत्पत्तिकाले जातम् । शिष्ट स्पष्टम् । मेधा.

शय्यासनमलङ्कारं कामं क्रोधमनार्जवम् ।
द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत् ॥

(१) शय्या शयन स्वप्नशीलत्वम् । आसनमनभ्युत्थानशीलता । अलङ्कारः शरीरमण्डनम् । कामं पुरुषोपभोगस्पृहा । क्रोधो द्वेषः । अनार्यता स्निग्धेऽपि द्वेषो द्विष्टेऽपि स्नेहः आकारसंवरणं निर्धर्मता । द्रोग्धृभावो द्रोग्धृत्वं भर्तृपित्रादेः । पुरुषव्यसनीयतयाऽधर्मात्मकत्वं भर्त्रादीनाम् । द्रुहेः कर्तरि तृचा भावशब्देन समासः । कुचर्या नीचपुरुषसेवनम् । एष स्वभावः स्त्रीणां मनुना सर्गादौ कल्पितः । शय्यासनालङ्कारा द्रोहकुचर्यायोर्दृष्टान्तत्वेनोपादीयन्ते । यथैते पदार्थाः स्वभावभूता अविचालिता एव कुचर्यादयोऽपि । मेधा.

(२) तत आसां रक्षाकरणे यत्न आस्थेयः । गोरा.

(३) कुचर्यामसदाचारम् । मवि.

नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मे व्यवस्थितिः ।
निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः ॥

(१) केचिदेवं मन्यन्ते । सत्यपि प्रमदाव्यभिचारे वैदिकेन जपेन रहस्यप्रायश्चित्तादिना शुद्धिमाप्स्यन्ति ततो नास्ति दोष इति । तन्न । न हि स्त्रीणा मन्त्रैः क्रिया जपोऽप्यस्ति । येन वृत्तव्यतिक्रमेऽप्रख्यातौ स्वत एव वैदुष्याच्छुद्धिमाप्नुवन्ति । तस्माद्यत्नतो रक्ष्या इत्येतच्छेषमेवैतत् । अतो ये केचिदविहितमन्त्रे मन्त्रप्रतिषेधोऽयमिति वर्णयन्ति ततश्च, यत्र स्त्रियः कर्तृतया संबध्यन्ते, सायं बलिहरणादौ, तथा संस्कार्यतया चूडादिषु, संप्रदानतया श्राद्धादौ, तत्र सर्वत्र मन्त्रप्रतिषेधादमन्त्रक स्त्रीणा श्राद्धादि कार्यमिति तेऽयुक्तवादिनोऽन्यपरत्वादस्यार्थवादतया यदस्ति तदालम्बनन्यायेन विहितप्रतिषेधमन्त्रसंबन्धमन्त्रचूडासंस्कारापेक्षं व्याख्येयमेतत् । अध्ययनाभावाच्च प्रायश्चित्तमन्त्रजपाभावः प्रेक्षया । निरिन्द्रिया इन्द्रिय वीर्य धैर्यप्रज्ञाबलादि तासा नास्त्यतोऽनिच्छन्त्योऽपि कदाचित्पापाचारैर्बलेनाक्रम्यन्ते । ततो रक्षितुं युक्ताः । स्त्रियोऽनृतमिति शीलस्नेहयोरस्थिरत्वादनृतवचनेन निन्द्यते । मेधा.

(२) मन्त्रैर्जातकर्मादिसंस्कारक्रिया स्त्रीणा नास्तीति शास्त्रमर्यादा । एवं मन्त्रवज्जातकर्मादिसंस्काराभावात् स्वभावतश्च स्त्रियो निर्वीर्या अध्ययनाभावाच्चामन्त्राश्चामन्त्रत्वे सति धर्मज्ञत्वाभावादशौचेऽपि प्रवृत्तेरन् । तत्प्रवृत्तौ च भयाद्यभावत्वादशुभाः स्त्रिय इति शास्त्रमर्यादा । गोरा.

(३) क्रिया परिणयनप्राक्कालीनः संस्कारो गर्भाधानादिः । मन्त्रवत्संस्कारयोग्यतानिमित्तमन्त्रप्रकाशयपुस्छिङ्गरहिताः । अत एवामन्त्राः । स्थितिर्मर्यादा । मवि.

(४) जातकर्मादिक्रिया स्त्रीणा मन्त्रैर्नास्तीत्येषा शास्त्रमर्यादा व्यवस्थिता । ततश्च मन्त्रवत्संस्कारगणाभावान्न निष्पापान्तःकरणाः। इन्द्रिय प्रमाण, धर्मप्रमाणश्रुतिस्मृतिरहितत्वान्न धर्मज्ञाः । अमन्त्राः पापापनोदनमन्त्रजपरहितत्वात् जातेऽपि पापे तन्निर्णेजनाक्षमाः । अनृतवदशुभाः स्त्रिय इति शास्त्रमर्यादा । तस्माद्यत्नतो रक्षणीया इत्यत्र तात्पर्यम् । ममु.

(५) अनृतवदशुभाः नित्यमनृतवादिन्यो वा सूनृतवैदिकशब्दप्रयोक्तृत्वाभावात् । *मच.

---

(१) **मस्मृ.**९।१६; **व्यक.**१२९; **स्मृच.**२४०; **विर.** ४१३; **विचि.**१९०; **स्मृचि.**२८; **व्यप्र.**४०७; **समु.**१२०; **विव्य.**५६ उत्त.

(२) **मस्मृ** ९।१७; **मेधा.** जंवम् (र्यंताम्) द्रोह (द्रोग्धृ); **गोरा.** काम (काम) जंवम् (र्यंताम्); **व्यक.**१२९, **मवि.** जंवम् (र्यंताम्), **स्मृच.**२४० कुचर्या (अकार्य) शेष गोरावत्; **विर.**४१२; **विचि.**१९०, **स्मृचि.**२८ जंवम (र्यंताम्) कुचर्यां च (च कुलयोः), **व्यप्र.**४०७; **सेतु.**२८२, **विभ.**५; **समु** १२० गोरावत्.

(३) **मस्मृ.**९।१८ ग. पुस्तके, धर्मे व्यवस्थितिः (धर्मो व्यवस्थितः); **गौमि.**२८।१९ (निरिन्द्रिया अदायादाः स्त्रियो नित्यमिति स्थितिः) उत्त.; **उ.**२।१४।२ (अनिन्द्रिया अदायादाः स्त्रियो नित्यमिति श्रुतिः) उत्त.; **व्यक.**१२९ मस्मृवत्; **विर.** ४१२ मस्मृवत्; **व्यप्र.**४०७,५१६ (निरिन्द्रिया ह्यदायादाः स्त्रियो नित्यमिति स्थितिः) उत्त. : ५५४ (अनिन्द्रिया ह्यदायाश्च स्त्रियोऽनृतमिति स्थितिः) उत्त.; **विभ.**५.

१ शीलम्.

* शेष ममुवत् ।

तथा च श्रुतयो बह्वयो निगीता निगमेष्वपि ।
स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः ॥

(१) स्वभावतोऽशुद्धहृदयाः स्त्रिय इत्यस्मिन्नर्थे वैदिकानि मन्त्रार्थवादरूपाणि वाक्यानि साक्षित्वेनोपन्यस्यति । तथा च यथा मयोक्त 'स्त्रियोऽनृतम्' इति तथैव निगमेषु वेदेषु श्रुतयः सन्ति । निगमशब्दो वेद पर्यायः इष्टप्रयोगश्च 'बभूथाततन्थ' इत्यादिनिगमे । वेदार्थव्याख्यानाङ्गवचनोऽप्यस्ति । निगमनिरुक्तव्याकरणान्यङ्गानीति । निरुक्ते हि प्रयोगो निगमा इमे भवन्तीति । तस्येह श्रुतिग्रहणाद्वा वक्ष्यमाणोदाहरणाच्चासंभवोऽतो वेदवचनो निगमशब्द इह गृह्यते । समुदायावयवभेदाच्चाधाराधेयभावः । तेषु निगमेषु श्रुतय एकदेशभूता वाक्यानि निगीता अधीताः सशब्दिता पठ्यन्त इति यावत् । नित्यप्रवृत्ते च कालाविभागादि निरुक्तम् । पाठान्तरं निगदा इति । निगदा मन्त्रविशेषाः । श्रुतयो ब्राह्मणवाक्यानि । मन्त्रेषु ब्राह्मणेषु चायमर्थो दार्शितो यदनृताः स्त्रिय इति । बह्वयस्ताः सन्तीत्यस्मिन्पक्षेऽध्याहारस्तासां श्रुतीनां या या निष्कृतिरूपा व्यभिचारप्रायश्चित्तभूतास्ताः शृणुत । किमर्थमुदाह्रियन्त इति चेत्स्वालक्षण्यपरीक्षार्थम् । स्वलक्षण नित्यसनिहित स्वभावस्तत्प्रतिपादनार्थम् । अङ्गदकुण्डलादि यत् लक्षण तत्परिभूतमिद स्वलक्षणं स्वभाव इत्यर्थः । एतदासा स्वलक्षण यद्व्यभिचारात्मकम् । मेधा.

(२) निश्चितमेव व्यभिचारात्मकत्वे ज्ञापिका 'न चैतद्विद्मो ब्राह्मणाः स्मोऽब्राह्मणा वा' इत्येवमाद्या बह्वयः श्रुतयो वेदेष्वपि पठिताः । तासा च श्रुतीना मध्यात्प्रायश्चित्तरूपा श्रुति शृणुत । ×गोरा.

(३) श्रुतयः श्रुतिभागाः । निगमेषु वेदेषु । स्वालक्षण्यस्य स्त्रीणां पौंश्चल्यादिस्वभावस्य परीक्षार्थं निश्चयार्थम् । तथाहि । इन्द्राद्वरं प्रार्थयमाना अपि 'काममाविजनितोः संभवामें'त्याप्रसवं पुरुषसंसर्गमेव वृतवत्य इति श्रुतिः । यत्नेवं यत्नतो रक्षणेऽपि मनोव्यभिचारसंभवः तस्य तर्हि कथं निष्कृतिरत आह । तासां स्त्रीणां निष्कृति तद्दोषशान्त्युपायं शृणुत । मवि.

(४) यथैतदुक्त तथा च निगमेषु वेदेषु गदिताः श्रुतयो वाक्यानि स्वालक्षण्यपरीक्षार्थं, सुशब्दोऽत्रबहुलवचनः अलक्षणमलक्षणत्वं दुःस्वभावत्वं दोषबाहुल्यमिति यावत्, परीक्षार्थं परीक्षा कर्तुं तासा श्रुतीनामाकृति संनिवेशम् । शृणुत । नन्द.

यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता ।
तन्मे रेतः पिता वृक्तामित्यस्यैतन्निदर्शनम् ॥

(१) इतिकरणान्तेन पादत्रयेण मन्त्रैकदेशोऽनुकृतः । यन्मे माता अपतिव्रता पत्युरन्यपुरुषे न कामश्चेतसापीति यस्या व्रतं नियमः सा पतिव्रता । तद्विपरीताऽपतिव्रता विचरन्ती परगृहान्गच्छन्ती तत्रोज्वलवेष दृष्ट्वा प्रलुलुभे । लोभ सुहामन्यपुरुष प्रति कृतवती, तत्पार्थ, ममोत्पत्त्या मत्पितुः संबन्धि यद्रेतः शुक्रं तद्वृक्तामपनुदतु । तद्रेतसा स दोषोऽपमृज्यताम् । पितेति षष्ठीस्थाने प्रथमा व्यत्ययेन । अथवा रेत एव पितृत्वेन परिकल्प्यते । अपरित्यक्तस्वलिङ्ग एव रेतसा सामानाधिकरण्यमनुभवति । 'द्यौर्मे पितेति' (ऋसं. २।३।२०) यथा । अथवा मातृबीजमप्युच्यते । तद्रेतः पिता जनको वृक्ता शोधयताम् । पितृजबीजप्रभावेन मातृदोषोऽपनुद्यतामित्यर्थः । अस्य व्यभिचारात्मकस्यैतन्निदर्शनं दृष्टान्तः । सर्वे जपमाना एतं मन्त्रमुच्चारयन्ति । यदि च सर्वाः स्त्रियो दुष्टस्वभावास्ततो मन्त्रस्य नित्यवत्प्रयोगोपपत्तिरितरथा पाक्षिकः स्यात् चातुर्मास्येष्वय मन्त्रो विनियुक्तः पाद्यानुमन्त्रणे च श्राद्धे । *मेधा.

(२) पतिमननुव्रताचरन्ती मे माता अन्यस्मात्पुंसो यद्रेतः प्रलुलुभे आदृता दधार तद्रेतो मे पिता वृक्तां मातुः पाणिग्राहकः स्वीकरोतु मम पित्रेव तद्रेत आहितमस्त्वित्यर्थः । नन्द.

ध्यायत्यनिष्टं यत्किंचित्पाणिग्राहस्य चेतसा ।
तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते ॥

× मसु., मच., भाच. गोरावत् ।

* गोरा., मवि., मसु., मच. मेधावत् ।

(१) **मस्मृ.**९।१९; **मेधा.** 'निगदा' इति पाठान्तरम्, **व्यक.**१२९; **विर.**४१२ च (हि) तीः (तिम्); **व्यप्र.**४०७ स्वा (स्त्री); **विभ.**६; **नन्द.** निगीता (गदिता) निष्कृतीः (आकृतिम्).

(२) **मस्मृ.**९।२०ख.,ग.पुस्तकयोः वृक्ता (वृक्ता); **मेधा.** वृक्ता (वृंक्ता); **व्यक.**१२९; **विर.**४१३; **व्यप्र.**४०७.

(४) **मस्मृ.**९।२१; **व्यक.**१२९; **विर.**४१३ भिचा (वहा); **व्यप्र.**४०७.

(१) पाणिग्राहो भर्ता, तस्य चेतसा यदनिष्टमप्रिय परपुरुषसंपर्कादिक स्त्री चिन्तयति तस्य मानसस्य व्यभिचारस्य निह्नवः शुद्धिरनेन मन्त्रेण कर्मणि नियुक्तेनोच्यते । प्रसङ्गान्मन्त्रप्रयोजन दर्शितम् । यद्यपि कर्मगुणतैव कर्माङ्गमन्त्रप्रयोजनं तथापि जपादौ विनियोगा स्मानसव्यभिचारनिवृत्त्यर्थताऽप्युच्यते । मेधा.

(२) मातेति श्रवणात् पुत्रस्यैवेद प्रायश्चित्त न मातुः । ×गोरा.

उत्कृष्टभर्ता स्त्रीरक्षणयोग्यः

[3]यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि ।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा ॥

(१) भार्यासंरक्षणकामेन दौःशील्यादात्मा रक्षितव्यो, नान्येतयैव केवलया, पापतो दुःशीलस्य भार्याऽपि तथाविधैव भवति, गुणवतः शीलवती, यथा समुद्रेण निम्नगा नदी संयुज्यमाना क्षारोदका भवति मधुररसापि सती । मेधा.

(२) इत्यात्मसयमाख्य स्त्रीरक्षणोपायान्तरोपदेशार्थमिदम् । +गोरा.

(३) दुःशीलाय सुशीला न देया, सुशीलाय तु दुःशीलाऽपि देयेत्यत्र दृष्टार्थ सदृष्टान्तमाह—यादृगिति द्वाभ्याम् । मच.

[4]अक्षमाला वसिष्ठेन संयुक्ताऽधमयोनिजा ।
शार[5]ङ्गी मन्दपालेन जगामाभ्यर्हणीयताम् ॥

हीनजातीयाऽप्यक्षमाला वसिष्ठभार्या तत्सयोगादभ्यर्हणीयता प्राप्ता । शार्ङ्गी तिर्यग्जातिः चटका मन्दपालेन मुनिना सयुक्ता तथैव पूज्या । अतो हीनजातीयाः कनीयस्योऽपि भूयो भर्तृवत्पूज्याः । तथा चोक्त 'वयसि स्त्रिय' इति । मेधा.

[6]एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः ।
उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः ॥

(१) अवकृष्टा निकृष्टा प्रसूतिरुत्पत्तिर्यासां ता अवकृष्टप्रसूतयः । अन्याश्च गङ्गाकालीप्रभृतयः । द्वयोः प्रकृतत्वादेता इति बहुवचनं चशब्देन तृतीयामाक्षिप्य, द्विवचन वा एते च । मेधा.

(२) एता इति पूज्यताभिप्रायेण बहुवचनम् । अन्याः सत्यवत्याद्याः । अत्र च पञ्चमाध्यायस्त्रीधर्मोक्तस्य शब्दतोऽर्थतश्च पुनरुक्तिः पुरुषकार्यतया तत्रात्र तु स्त्रीकार्य तत्परिग्राह्यम् । मवि.

स्त्रीरक्षणविद्ध्युपसंहारः

[7]एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा ।
प्रेत्येह च सुखोदर्कान्प्रजाधर्मान्निबोधत ॥

(१) लोकयात्रा लोकवृत्तं लोकाचारो लोकसिद्धमेतत् । नान्यं विधिलक्षणोऽर्थो यदेवं शक्यते रक्षितु नान्यथेति । अपरिरक्षिताभिश्च ताभिः प्रसूत्यादिदोषो भवतीति । इदानीं प्रजाधर्मान्निबोधत । कस्य प्रजा बीजिनो वा क्षेत्रिणो वेति । उदर्क आगामी कालः स सुखो येषां, सर्वे हि वस्त्ववसाने विरमन्ते । ते तु नैवमिति प्रशंसा । मेधा.

(२) एष लोकाचारः सर्वो वः शुभो दम्पतीनिर्णय उक्तः । इदानीं सुखहेतून् किं क्षेत्रिणोऽपत्यमुत बीजिन उभयोर्वा इत्येवविधान् प्रजाधर्मान् शृणुत । गोरा.

(३) प्रजाधर्मान् प्रजोत्पादनार्थं धर्मान् । मवि.

दारमाहात्म्यम् । स्त्रीलालनम् ।

[8]प्रजनार्था महाभागाः पूजार्हा गृहदीप्तयः ।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥

(१) ननु च का सुखोदर्कता प्रजाधर्मस्य, या च

× शेषं मेधावत् । मसृ., मच गोरावत् ।

+ स्मृच., मसृ , व्यप्र. गोरावत् ।

(१) **मस्मृ.**९।२२; **व्यक.**१३०; **स्मृच.**२४१; **विर.** ४१६, **रत्न.**१३४, **व्यप्र.**४०९; **व्यउ.**१४१सयु (सपू), **विभ.८**; **समु.१२१.**

(२) **मस्मृ.**९।२३; **मेधा.** शारङ्गी (शार्ङ्गी); **गोरा.** शारङ्गी (शार्ङ्गी च), **व्यक.**१३०; **मवि.** शार (सार) शार्ङीति कचित् पाठः; **विर.**४१६; **रत्न.**१३४; **मच.** शार (सार); **व्यप्र.** ४०९ गोरावत्; **व्यउ.**१४१ शारङ्गी (शार्ङ्गी च); **विभ.९.**

(१) **मस्मृ.**९।२४ ख. पुस्तके, त्रप (त्रव); **मेधा.** 'एते च' इत्यन्यः पाठः; **गोरा** स्वै. स्वै (तैस्तै); **व्यक.**१३० मस्मृवत्; **विर.**४१६ गोरावत्; **विभ.९.**

(२) **मस्मृ.**९।२५, **विभ.९** सुखो (शुभो).

(३) **मस्मृ.**९।२६ र्था (र्थं); **व्यक.**१३०; **स्मृच.२४३** पू (प्र) न वि (वि) श्चन (यच्चेन); **विर.**४१७; **स्मृचि.** २८ प्रज (जन); **विभ.९**, **समु.१२१** न वि (वि) रित+(न).

प्रजाऽस्याधीना। स्त्रियश्च बहुभिर्दोषैरावृतत्वात्यागार्हाः। को हि 'गृहे सर्वान्निभृयात्' इत्येतन्निवृत्त्यर्थमाह—प्रजनार्थमिति। शक्यप्रतिविधानत्वादोषाणा पूजार्हाः। यदेत दोषप्रपञ्चनं तन्नावज्ञानार्थं परिवर्जनार्थं वाऽभिशस्तपतितादिवत्। किं तर्हि ? रक्षार्थं दोषेभ्यः। न हि भिक्षुकाः सन्तीति स्थाली नाधिश्रियते। न च मृगाः सन्तीति यवा नोप्यन्त इति। प्रजनं, गर्भग्रहणात्प्रभृत्यपत्यपरिपोषणपर्यन्तो व्यापारोऽभिप्रेतः। तथा च वक्ष्यति 'उत्पादनमपत्यस्य जातस्य परिपालनम्' इति। गृहे दीप्तय इव। न हि गृहे शोभा स्त्रीभिर्विना काचिदस्तीति सुप्रसिद्धमेतत्। सत्यपि श्रीविभवे भार्यायामसत्या सुहृत्स्वजनादिष्वागतेषु न गृहस्थाः प्रतिपुरुष भोजनादिभिरावर्जयितु समर्थाः। यथा दरिद्रे न भवति शक्तिरतः स्त्रियाः श्रियश्च न विशेषो गृहेष्विति। मेधा.

(२) इयं श्लोकत्रयेऽपि स्तुतिः। गोरा.

[1]उत्पादनमपत्यस्य जातस्य परिपालनम्।
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम्॥

स्त्रीनिबन्धननिमित्तमपत्योत्पादनादि प्रत्यक्षमेतत्। लोकयात्रा गृहागतानामन्नादिदानेनावर्जनमामन्त्रणादिमन्त्रणादि। अस्य प्रत्यर्थं सर्वस्मिन्नर्थे, स्त्रीनिबन्धनम्। प्रत्यहमिति पाठः। प्रत्यक्षशब्दोऽन्तरङ्गवचनः। अन्तरङ्गमित्यर्थः। मेधा.

[2]अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा।
दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह॥

(१) प्रागदर्शितार्थोऽय श्लोकः। मेधा.

(२) प्रजोत्पादनमग्निहोत्रसाधन, शरीरशुश्रूषा, रतिः क्रीडा, पितॄणामात्मनश्चापत्यजननादिना स्वर्ग इत्येतत् सदा भार्यायत्तम्। गोरा.

[3]पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः॥

न केवलं वरादादातव्यं कन्याबन्धुभिरपि तु तैरपि दातव्यम्। पितृभिः साहचर्यात्पितृशब्दः पितामहपितृव्यादिषु वर्तते। ततो बहुवचनं व्यक्त्यपेक्षं वा बहुवचनम्। एव पतिभिः श्वशुरादिभिर्व्यक्त्यपेक्षं वा। देवराः पत्युर्भ्रातरः। पूज्याः पुत्रजन्मायुत्सवेषु निमन्त्रणपूर्वकमानाय्य सबहुमानमादरेण भोजनादिना पूज्याः। भूषयितव्या वस्त्रावयवङ्कारेणाङ्गलेपनादिभिर्मण्डयितव्याः। अत्र फल बहुकल्याणमीप्सुभिः कल्याणं कमनीयं पुत्रधनादिसंपदरोगताऽपरिभव इत्यादिबहुशब्दात्सर्वमीप्सुभिराप्तुमिच्छुभिः प्राप्तुकामैः। फलार्थो विधिरयम्। मेधा.

[4]यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥

देवता रमन्ते तुष्यन्ति प्रसीदन्ति। प्रसन्नाश्च स्वामिन एवाभिप्रेतेन फलेन योजयन्ति। यत्र तु न पूज्यन्ते तत्र सर्वाः क्रियाः यागहोमदानाद्या देवताराधनबुद्धया चोपहारादयो याः क्रियन्तेऽफलास्ता इत्यर्थवादः। मेधा.

[5]शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्।
न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा॥

(१) यस्मिन्कुले नवोढादुहितृस्नुषाद्याः सशोका भवन्ति तत्कुलं क्षिप्रमेव विनश्यति। यत्र पुनरेताः शोकार्ता न भवन्ति तत्सर्वकाल वृद्धिमेति। गोरा.

(२) 'जामिः स्वसृकुलस्त्रियोः' इत्याभिधानिकाः। यस्मिन्कुले भगिनी गृहपतिसवर्धनीयसंनिहितसपिण्डस्त्रियश्च पत्नीदुहितृस्नुषाद्याः परितापादिना दुःखिन्यो भवन्ति तत्कुलं शीघ्र निर्धनीभवति दैवराजादिना च पीड्यते। यत्रैता न शोचन्ति तद्वनादिना नित्यं वृद्धिमेति। मेधातिथिगोविन्दराजौ तु 'नवोढादुहितृस्नुषाद्या जामयः' इत्याहतुः। ममु.

---

(१) **मस्मृ.**९।२७; **मेधा.** प्रत्यह (प्रत्यर्थं), **गोरा.** प्रत्यह (प्रीत्यर्थं) क्ष (ह); **व्यक.** १३०, **विर.**४१७; **विभ.**९

(२) **मस्मृ.**९।२८; **गोरा.** च ह (सदा); **व्यक.**१३०, **विर.**४१७; **स्मृचि.**२८; **विभ.**४३.

(३) **मस्मृ.**३।५५; **स्मृच.**२४३; **समु.**१२१.
१ च, २ सेवा.

(१) **मस्मृ.**३।५६; **व्यक.**१३०; **विर** ४१७ तु न (न प्र); **विभ.**१० विरवत्.

(२) **मस्मृ.**३।५७; **व्यक.**१३०; **विर.**४१७ जा (या) विन (प्रण); **विभ.**१०.

[1]जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः ।
तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥

(१) यानि गृहाणि नवोढादुहित्राद्याश्चापूजिताः सद्योऽभिशपन्ति तान्यभिचारविशेषहतानीव सर्वनाशं नश्यन्ति । गोरा.

(२) यामयः कुलस्त्रियः भगिनीस्नुषाद्याः ।
व्यक.१३१

[2]तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥

यस्मादेवं तस्मादेताः सदाभ्यर्च्या इति । भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च । तस्मात्कारणादेताः सत्कारेषु कौमुदीमहानवम्यादिषु उपनयनादिषु च सर्वकामैर्मनुष्यैराभरणवस्त्रभोजनैर्नित्यं अभिपूजनीयाः । गोरा.

[3]संतुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च ।
यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥

यस्मिन्कुले स्वभार्यया हेतुभूतया नित्य भर्ता नित्तृत्ताभिलाषो भार्याऽपि च यत्र नित्य स्वभर्त्रा हेतुभूतेनानुपजातनरान्तराभिलाषा तत्राविचलं मङ्गलं भवति । गोरा.

[4]यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् ।
अप्रमोदात्पुनः पुंसः प्रजनं न प्रवर्तते ॥

यदि स्त्री सुगन्धलेपनादिना कान्तिमती न भवेत्तदा भर्तारं न प्रहर्षयेत् । भर्तुरप्रहर्षाच्च गर्भग्रहणं न भवति । गोरा.

[5]स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् ।
तस्यामरोचमानायां सर्वमेव न रोचते ॥

स्त्रिया वेषादिना कान्तिमत्या भर्तृमनोहरतया परपुरुषसंपर्काभावात्तत्कुलमुज्वलं भवति । तस्या पुनररोचमानाया भर्तृद्विष्टतया नरान्तरसंकल्पतः सकलमेव कुलं मलिनीभवति । गोरा.

पतिव्रतास्तुतिः । व्यभिचारनिन्दा ।

पतिं या नाभिचरति मनोवाक्कायसंयता ।
सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते ॥

या मनोवाग्देहसंयता सती मनोवाग्देहैः पतिं न व्यभिचरति सा भर्त्रार्जितान् स्वर्गलोकान् प्राप्नोति । सा साध्वीति चोच्यते । गोरा.

[6]व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
सृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥

(१) पञ्चमे श्लोकाविमौ व्याख्यातौ (मस्मृ. ५।१६४,१६५) । मेधा.

(२) दुर्जनसंसर्गाल्लोके स्त्री गर्ह्यता जन्मान्तरे सृगालयोनिं चाप्नोति । अन्तःक्रूरैश्च कुटारै रोगादिभिः पीड्यते । महाप्रयोजनतया स्त्रीणामुत्सेकोत्पत्याशङ्काया तन्निवारणार्थमिह पुनरुक्तम् । गोरा.

(३) पञ्चमाध्याये स्त्रीधर्मे उक्तमप्येतत् श्लोकद्वय सदपत्यसपत्त्यर्थत्वेन महाप्रयोजनतया पुनः पठितम् । मनु.

अनेकभार्याभिर्वर्तनप्रकारः

[7]यदि स्वाश्चापराश्चैव विन्देरन्योषितो द्विजाः ।
तासां वर्णक्रमेण स्याज्ज्यैष्ठ्यं पूजा च वेश्म च ॥

---

(१) **मस्मृ.**३।५८; **व्यक.**१३०,१३१ जा (या); **विर.** ४१७ जा (या) शपन्त्यप्रति (संशपन्त्यप्र); **विभ** १० विरवत्.

(२) **मस्मृ.**३।५९; **गोरा.** सदा पूज्या (सदाभ्यर्च्या); **व्यक.**१३१ गोरावत् ; **विर.**४१८ सदा पूज्या (समभ्यर्च्या) पूत्सवेषु (णोत्सवेन); **विभ.**१० सदा पूज्या (सर्वभावात्) शेषं विरवत्.

(३) **मस्मृ.**३।६० त्रेतत् (त्रेव); **व्यक.**१३१; **स्मृच.** २४७; **विर.**४२१ मस्मृवत्; **रत्न.**१३५; **विता.**८२५ वै ध्रुवम् (वर्धते); **सेतु.**२८३ भर्त्रा (तेन); **विभ.**१०; **समु.**१२३.

(४) **मस्मृ.**३।६१; **व्यक.**१३१; **स्मृच.**२४७; **विर.** ४२१; **सेतु.**२८३; **समु.**१२३.

---

(१) **मस्मृ.**३।६२ स्यामरो (स्यां त्वरो); **व्यक.**१३१; **स्मृच.**२४७, **विर.**४२१; **सेतु.**२८३; **समु.**१२३.

(२) **मस्मृ** ९।२९ काय (ग्देह); **व्यक.**१३६; **स्मृच.** २४१ भि (ति); **विर.**४३६ काना (कमा); **स्मृचि.**२८ नाम्नो (न्प्राप्नो); **विभ.**२१ विरवत्; **समु.**१२० स्मृचवत्.

(३) **मस्मृ.**९।३० नि प्रा (नि चा); **व्यक.**१३६; **स्मृच.** २४२; **विर.**४३७ नि प्रा (निमा); **स्मृचि.**२८ के (क) न्यताम् (न्दितम्); **विभ.**२१ विरवत्; **समु.**१२१.

(४) **मस्मृ.**९।८५; **दा.**१६७ श्चा (श्च) ण स्याज् (णैव);

(१)कामतः प्रवृत्ता यदि समानजातीयाश्चासमानजातीयाश्च विन्देरन्विवाहयेयुस्तासा वर्णक्रमेण जात्यनुरूप ज्यैष्ठ्य, न वयस्तो, न च विवाहक्रमतः। फलादिदाननिमित्ते पूजा प्रथमं ब्राह्मण्यास्ततः क्षत्रियावैश्ययोरित्येष वर्णक्रमः। वेश्म प्रधानं गृह तद्ब्राह्मण्याः। सवर्णाना विवाहक्रमो निश्चायकः स्मृतः। मेधा.

(२) यदि द्विजातयः स्वजातीया विजातीयाश्चोद्वहेयुस्तदा तासा द्विजातिक्रमेण वाक्समानदायविभागोत्कर्षार्थं ज्येष्ठत्व पूजा च वस्त्रालङ्कारादिदानेन गृहं च प्रधानं स्यात्। ममु.

[1]भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम्।
स्वा चैव कुर्यात्सर्वेषां नास्वजातिः कथंचन॥

शरीरशुश्रूषा भर्तुरुपयोगिपाकादिलक्षणा दानभोजनप्रतिजागरण स्वा चैव कुर्यात्। पृष्ठपादसवाहननिर्णेजनादौ त्वनियमः। युगपत्सनिधौ तु शरीरावयवक्रमो वर्णक्रमेण। नैत्यक धर्मकार्य 'साय त्वन्नस्येत्यादि' अग्निशरणोपलेपनाचमनोदकतर्पणदानादि। अस्या निन्दार्थवादः। मेधा.

[2]यस्तु तत्कारयेन्मोहात्सजात्या स्थितयाऽन्यया।
यथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः॥

(१) यस्त्वेतत्कर्माऽन्ययाऽसमानजातीयया कारयेत्सजातीयाया स्थितायां, ब्राह्मण एव स चण्डालः पूर्वस्माद्दृष्टः। मेधा.

(२) दृष्टपूर्वः पुराणे श्रुतः। मवि.

(३) पूर्वैर्ऋषिभिर्दृष्ट इति पूर्वानुवादः। ममु.

[3]दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु।
नाश्नन्ति पितृदेवास्तन्न च स्वर्गं स गच्छति॥

सार्वकालिकोऽयं निषेधः। यदि कथंचिच्छूद्राऽपि व्युह्यते तदेतानि कर्माणि तत्प्रधानानि न कर्तव्यानि। न च तया सह त्रैवर्णिकस्त्रीवद्धर्मेऽधिकारोऽस्तीत्यर्थः। भार्यात्वादधिकारे प्राप्ते निषेधोऽयम्। अतः स्वधर्मे धन विनियुञ्जानस्य न तदीयानुज्ञोपयुज्यते यथा द्विजातिस्त्रीणाम्। अन्यत्र स्वर्थकामयोः साऽप्यनतिचरणीयैव प्रेष्यावत्तत्कर्मोपयोगो न निषिध्यते श्राद्धादावहननादिकार्ये तत्र न दोषः स्यात्। परिवेषणादि न कारयितव्या। तत्र दैवं कर्म दर्शपूर्णमासादि देवतोद्देशेन च ब्राह्मणभोजन व्रतवदित्यत्र यथा व्याख्यातम्। पित्र्य श्राद्धोदकतर्पणादि। आतिथेयमतिथेराराधन भोजनपाद्यादि। ननु च सजात्या स्थितयाऽन्यये नास्त्येव प्रतिषेधः। नैव स्थितयेति तत्र श्रूयते। ऋतुमत्या सवर्णाया कथंचिद्वाऽसंनिहिताया प्राप्नोति क्षत्रियावैश्यावत्। अपि च नासावधिकारे प्रतिषेधः। किं तर्हि आज्यावेक्षणादौ। पत्न्यावेक्षितमाज्य भवतीत्यङ्गत्वेनोपादीयते। पत्नीत्यत्र ऋत्वर्थेषु यया कयाचिदुपात्तया सिद्धिरनियमेन प्राप्ता। यथा बह्वीषु सवर्णासु यया कयाचित्सवर्णया क्रियते एवमसवर्णयाऽपि मा कारीत्येवमर्थोऽसौ प्रतिषेधः। प्राधान्यमधिकारित्वात्। नाश्नन्ति पितृदेवास्तदिति कर्मनैष्फल्यमाह। न च स्वर्ग स गच्छति यद्यप्यतिथिरश्नाति तत्फल स्वर्गादि न भवतीति स्वर्गग्रहणमतिथिपूजाफलोपलक्षणार्थम्। अनुवादश्च धन्य यशस्यमित्यादि। मेधा.

दम्पत्योः परस्पराव्यभिचारविधिः

[4]अन्योन्यस्याव्यभीचारो भवेदामरणान्तिकः।
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः॥

अविशेषेण वचनवित्या सर्वक्रियास्वव्यभिचारः। तथा चापस्तम्बः 'धर्मे चार्थे च कामे च नाभिचरितव्या' इति। एतावच्च श्रेयो धर्मोऽर्थः कामः। तथा

व्यक.१३१; विर.४१९ स्वाश्चाप (स्वा. स्वाव) ण स्यान्(णैव), दात.१९१ दावत्; व्यप्र.५०२ दावत्, विभ १०:३८ दावत्; समु.१२२ श्म च (श्मनि), विच.१२३ दावत.

(१) मस्मृ.९।८६ ग.पुस्तके, त्य (त्रि), दा.१६७ चै (स्वै) स्व (न्य); व्यक.१३१ दावत्, विर.४१९ त्य (ष्टि) शेष दावत्; व्यप्र.५०२ नास्व (नास), विभ.११ त्य (न्य), समु. १२२ त्य (त्रि) चै (स्वै) स्वजातिः (सवर्णा)

(२) मस्मृ.९।८७ ग. पुस्तके, त्सजा (त्स्वजा); दा.१६७ मस्मृवत्; व्यक.१३१ मस्मृवत्; मवि. पूर्वदृष्ट (दृष्टपूर्व); विर.४१९ मस्मृवत्; व्यप्र.५०३; समु.१२२.

१ श्लः स्मृ.

(१) मस्मृ.३।१८; व्यक.१३१; विर.४२१ व्या (त्र); विभ.१२ विरवत्.

(२) मस्मृ.९।१०१; व्यक.१३१; स्मृच.२४८ पू.; विर.४२१; रत्न.१३५; समु.१२३.

चोक्तम्। 'त्रिवर्ग इति तु स्थितिः' इति । यच्चाहुरपरित्यागोऽत्राव्यभिचार इतरथा स्त्रीवत्पुरुषस्यानेकभार्यापरिणयनं न स्यात्तदयुक्तम् । अस्ति पुरुषे वचन 'कामतस्तु प्रवृत्तानां' तथा 'वन्ध्याऽष्टमेऽधिवेत्तव्या' इति । न तु स्त्रियाः । तथा च लिङ्गान्तरं स्यात् 'एकस्य बह्व्यो जाया भवन्ति नैकस्यै बहवः सह पतय' इति (ऐब्रा.३।३)। आमरणान्ते भव आमरणान्तिकः। अन्यतरमरणेऽपि तस्यान्तोऽस्तीत्यर्थः । एष संक्षेपेण स्त्रीपुंसयोः प्रकृष्टो धर्मो वेदितव्यः। मेधा.

तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ ।
यथा नातिचरेतां तौ वियुक्तावितरेतरम् ॥

(१) यतेयाता प्रयत्नवन्तौ तथा स्याता यथेतरेतरं परस्परं नातिचरेताम्। अतिचारोऽतिक्रमः धर्मार्थकामेष्वसहभावः। कृतक्रियौ कृतविवाहादिसंस्कारौ। अवियुक्तौ ततः परम्। उपसंहारश्लोकोऽयं नानुक्तार्थोपदेशकः। मेधा.

(२) यतक्रियौ यतचित्तौ। मच.

(३) नियुक्तौ धर्मार्थकामनियुक्तौ। भाच.

भार्याभरण नित्यधर्मः

[1]देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः ।
तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन् ॥

(१) साध्वी भार्या प्रातिकूल्याप्रियवादादिदोषयुक्ताऽपि भर्त्रा न त्याज्येति श्लोकार्थः। अवशिष्टा प्रशंसा। यत्तु 'निरुन्ध्यादेकवेश्मनी'त्यसाध्व्या अपि विहित तत्सकृद्व्यभिचारे। अभ्यासे तु त्याग एव । नान्यथा तां साध्वीं बिभृयादित्यनेन किंचित्कृत स्यात्। यद्यपि 'हृताधिकारा मलिना पिण्डमात्रोपजीविनीम्। परिभूतामधःशय्यां वासयेद्यभिचारिणीम् ॥' (वासि.१।७०)। तच्च सत्यां शक्तौ, पत्युरिच्छा सा। अनिच्छायां तु त्याग एव। यच्चेदं 'पतितास्वपि वस्त्रान्नदान देय चे'त्यादि वक्ष्यति, तद्ब्रह्महत्यादिषु प्रायश्चित्तेषु भैक्ष्यभोजनारम्भे निर्वासप्राप्तौ प्रतिषेधवचनमिति वक्ष्यामः। सर्वथा तु पुनर्व्यभिचारिण्या भरण नास्ति। न चात्र त्यागः श्रुतो येन सभोगविषयतया कल्प्येत। 'सोमोऽददत्' इत्यादिमन्त्रार्थवादेभ्यो देवतानां दातृत्वं प्रतीयते। अथवा विवाहे देवताया भार्या भवत्यत उच्यते। देवदत्तामिति। विन्देत नात्मन इच्छया, यथाऽन्यद्रोहिरण्याद्यापणभूमौ लभ्यते, तथा नेय भार्या। अत उच्यते नेच्छयात्मन इति। देवेभ्यो हितं, त्यक्तायां भार्यायां वैश्वदेवादिक्रियानिमित्ते नास्ति देवहितम्। अतस्तां द्विषन्तीमपि बिभृयात्। पातित्ये तामधिकाराप्राप्तां पतिरधिविन्देत। मेधा.

(२) 'भगो अर्यमा सविता पुरन्धिर्मह्य त्वादुर्गार्हपत्याय देवाः' इत्यादिमन्त्रलिङ्गात् या देवैर्दत्ता भार्या तां पतिर्लभते न तु स्वेच्छया। ता सती देवाना प्रियं कुर्वन्नाच्छादनादिना सदा द्वेष्यायुत्पन्नामपि पोषयेत्। मसु.

सहधर्मचरणविधिः

प्रजनार्थं स्त्रियः सृष्टाः संतानार्थं च मानवाः ।
तस्मात्साधारणो धर्मः श्रुतौ पत्न्या सहोदितः ॥

प्रजन गर्भग्रहणम्। संतानो गर्भाधानम्। तस्माद्वेतोरपत्योत्पत्तेरुभयाधीनत्वाद्वेदे स्त्रीपुंसयोः साधारणो धर्मः पत्न्या सह पुंस उक्तः। अतः केवलस्याधिकाराभावात्, स्त्रियो द्वेष्या अपि न त्याज्याः। मेधा.

स्त्रीत्यागविचारः अधिवेदनविचारश्च

[2]संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः ।
ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ॥

(१) द्वेष्यः पतिर्यस्यास्ता द्विषाणाम्। एतेन तु न निष्कासन कुर्यात्। सपूर्वस्य वसेरेनामिति च द्वितीयानुपपत्तेर्वासयेदिति निर्भर्त्सयेत्। पातकेऽपि तस्या निष्कासन

(१) **मस्मृ.**९।१०२ क., ग., घ. पुस्तकेषु, नाति (नाभि), **मेधा.** विधु (नियु), **व्यक.**१३१; **स्मृच.**२४८ तु (च); **विर.**४२१ तु (च) नाति (नाभि) धु (मु); **मच.** कृत (यत); **समु.**१२२ स्मृचवत्; **भाच.** विधु (नियु).

(२) **मस्मृ.**९।९५; **मेधा.** देवानां प्रियमा (देवेभ्यो हितमा); **व्यक.**१३१; **स्मृच.**२४२; **विर.**४१८; **रत्न.**१३४; **व्यप्र.**४०९; **व्यउ.**१४१; **समु.**१२१.

१ नियुक्तौ। ततः पर.

(१) **मस्मृ.**९।९६; **व्यक.**१३१, **विर.**४१८; **सेतु.**२८३.

(२) **मस्मृ.**९।७७ ख. पुस्तके, पन्ती (पाणा); **मेधा.** पन्ती (पाणा)[1]; **व्यक.**१३२ प्रती (उदी); **स्मृच.**२४३ व्यकवत्, बृहस्पतिः; **विर.**४२३ प्रती (उदी) त्वेनां (देनां) दायं हृ (दयां कृ); **सेतु.**२८४ प्रती (उदी) दायं हृ (दयां कृ); **विभ.**१३ त्वेनां (च्चेनां); **समु.**१२१ व्यकवत्.

नास्ति 'निरुन्ध्यादेकवेश्मनि' इति वचनात् । प्रायश्चित्तेऽप्यस्मिन्निमित्ते, विनयाधानार्थोपहार इष्यते । न सर्वेण सर्वं आत्यन्तिक आच्छेदः । मेधा.

(२) उदीक्षेत प्रतीक्षेत । द्विषन्तीं संभोगार्थमनुपस्थायिनीम् । दायं स्त्रीधन स्वयं दत्तं संगृह्य गृहीत्वा न संवसेत् त्यजेत् । जीवनं तु देयमेव । मवि.

(३) द्वेषानुवृत्तिमत्यास्तु भार्याया द्वेषानुवृत्तेः प्राक् पूजनाय दत्तं वस्त्राभरणादिकं वत्सरादूर्ध्वं हृत्वा ता ऋतुकालेऽपि न सेवेतेत्याह स एव 'सवत्सरमि'ति । उदीक्षेत द्वेषानुवृत्ति प्रतीक्षेत । ऊर्ध्वं सवत्सराद्द्वेषानुवृत्तौ सत्यामिति शेषः । दाय पूजनाय दत्तम् । वृत्त्यर्थं तु कल्पितमनाहार्यम् । भार्याया द्वेषानुवृत्तिशालिन्या अपि भरणस्यावश्यकत्वात् । ×स्मृच.२४३

अतिक्रामेत्प्रमत्तं या मत्तं रोगार्तमेव वा ।
सा त्रीन्मासान्परित्याज्या विभूषणपरिच्छदा ॥

(१) अतिक्रमस्तदुपचर्याऽवज्ञानं पथ्यौषधादिष्वतत्परता न पुरुषान्तरसचारः । मासत्रय परित्यागश्च सभोगस्यैव, पूर्वस्मादेव हेतोः, हारकटकादिविभूषणैर्वियुक्ता कर्तव्या । परिच्छदा परिग्रहेण भाण्डकुण्डादिना दासीदासेन वा । मेधा.

(२) प्रमत्तं द्यूताद्याकृष्टमनसं, मद्येन मत्तम् । मवि.

उन्मत्तं पतितं क्लीबमवीजं पापरोगिणम् ।
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्तनम् ॥

(१) क्लीबावीजशब्दौ नपुंसकमाहतुः । भेदस्तु एको वातरेता अप्रवृत्तेन्द्रियोऽपरः, तादृश या द्वेष्टि तस्या नास्ति निग्रहः, पूर्वोक्तं अपवर्तनमपहारः, प्रोषितप्रतिषिद्धान्नादयः स्मृत्यन्तरनिषिद्धाः । मेधा.

(२) उन्मत्तं वातादिना, क्लीबं जन्मना, अवीजमन्तरानष्टबीजं, पापरोगी अपस्मारायास्तदाक्रान्तं पतिं द्विषन्त्या नार्या न त्यागोऽत्यन्तत्यागः न च दायापवर्तनं दायस्य स्त्रीधनस्यापहरणं नास्ति । तत्कालद्वेषिण्यपि सुस्थेन परिग्राह्येत्यर्थः । द्विषाणाया इति क्वचित्पाठः । मवि.

(३) क्लीबं निरुत्साहम् । अवीजं निर्वीर्यम् । एतदुक्तं भवति । दृष्टादृष्टवैकल्यनिबन्धनद्वेषानुवृत्तावप्ययुक्तकारित्वाभावादनुगमनत्यागादिरत्र नास्तीति ।

स्मृच.२४३

मद्यपाऽसाधुवृत्ता च प्रतिकूला च या भवेत् ।
व्याधिता वाऽधिवेत्तव्या हिंस्राऽर्थघ्नी च सर्वदा ॥

(१) मद्यपाऽसौ मद्यपानरता । पक्तिसस्कारगृहकार्यानुष्ठानासमर्था तत्परिजागरया, सा परिवेदनायामर्हति । या तु गुरुभिः प्रतिषिद्धमद्यपाना तस्या दण्डं वक्ष्यति 'प्रतिषिद्धा पिबेदि'ति । स्वय नियमस्य स्वन्यनियमव्यतिक्रमवत्प्रायश्चित्तेन प्रत्यापत्तियुक्ता पुनरधिवेदनं च । तथा च धर्मानुष्ठानप्रजोत्पत्तिगृहकार्योपघातनिमित्तान्यधिवेदननिमित्तानि पठ्यन्ते 'प्रतिकूला व्याधितार्थघ्नी'ति । ब्राह्मण्यास्तु शास्त्रेण प्रतिषिद्धमद्यायास्तत्पानप्रायश्चित्तमेव भूयः अप्रवृत्तौ, पातित्यं तु 'भ्रूणहनि हीनसेवाया स्त्री पतती'ति (गौध.२१।९) परिसंख्यानान्न मद्यपाने पातित्यमिति । तदेकादशे वक्ष्यामः । उक्त च पञ्चमे । असत्यवृत्ता असाध्वाचारा भृत्येष्वसत्यरुषवाक्, बलिकर्मणां प्रागेव भुङ्क्ते, दैवपित्र्ययोर्ब्राह्मणभोजनादौ न श्रद्धावती । अर्थघ्नी अतिव्ययशीला, भाण्डोपस्करण न परिरक्षति, अनल्पमूल्येन क्रीणाति । हिंस्रा नाकुलशङ्कया (१) भृत्याद्यतिताडनशीला । अन्वाहिकस्य व्ययस्यापहन्त्री । अधिवेदन तस्या उपर्यन्याविवाहः । मेधा.

(२) अधिवेदनमात्रयोग्या पातिव्रत्यरहिता मद्यपाऽत्र विवक्षिता । न पुनर्महापातकवशा । त्यागेऽपि योग्या सुरापी असभ्यवृत्ता व्यभिचाररता दुराचारा वा । प्रतिकूला नित्यमिष्टविपरीतकारिणी । व्याधिता दीर्घरोगा ।

× मनु., मच., नन्द स्मृचवत् ।

(१) **मस्मृ.**९।७८; **व्यक.**१३२; **विर.**४२३ या (वा); **विभ.**१३; **समु.**१२१.

(२) **मस्मृ.**९।७९; **व्यक.**१३२; **मवि.** द्विषाणाया इति क्वचित्पाठः **स्मृच.**२४३ त्यागोऽस्ति द्विषन्त्याश्च (विप्रद्विषन्त्यास्त्यागो) बृहस्पतिः; **विर.**४२० त्यागोऽस्ति द्विषन्त्याश्च (तं द्विषन्त्यास्त्यागोऽस्ति); **विभ.**१३ द्विषन्त्याश्च (विषण्णाया); **समु.**१२१ स्मृचवत्.

(१) **मस्मृ.**९।८०; **मेधा.** साधु (सत्य); **स्मृच.**२४४ साधु (सभ्य) (वा) चा; **विभ.**१५ स्मृचवत्; **समु.**१२१ स्मृचवत्.

१ स्यादेवाति.

हिंस्रा अतिक्रूरा । अर्थघ्नी स्वातन्त्र्येणार्थव्ययशीला । अधिवेत्तव्येति पञ्चस्वप्यनुषज्यते । अधिवेदन पूर्वस्थितभार्योपरि परिणयनम् । 'अर्थघ्नी चे'ति चशब्दोऽनुक्तसमुच्चयार्थः । स्मृच.२४४

वन्ध्याष्टमेऽधिवेद्याऽब्दे दशमे तु मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥

(१) अन्यासामप्यधिवेदनमाह । तत्र वन्ध्याऽष्टमेऽब्देऽधिवेद्या दशमे तु मृतप्रजा । नाधिवेदनेऽपत्योत्पत्यभावाद्धि वन्ध्याया अनुष्ठानपरिपातन स्यात् । अपत्योत्पत्तिविधिराधानविधिश्च । नापुत्रे ह्याधान श्रूयते । एवं मृतप्रजायाः स्त्रीजनन्याः । अप्रियवादिन्यास्तु दोषाभावेन नाधिवेदनं, न सत्या क्षमाया अयं नियमः । मेधा.

(२) वन्ध्याष्टम इत्यादि । योग्यतायामष्टवर्षोपरि गर्भग्रहणाभावे प्रायशो गर्भग्रहणं नास्तीत्यादिशास्त्रान्तरसिद्धस्वभावनियमापेक्षयोक्तम् । एवं द्वादशाब्दानन्तरमपि मृतप्रजात्वानुवृत्तौ । एकादशोर्ध्वं च स्त्रीजन्मानुवृत्तौ । मृतप्रजात्वं स्त्रीप्रसूतिश्च न निवर्तेत इति शास्त्रान्तरादेव सिद्धम् । सद्य इति तया गृहिण्या सद्य एव गृहकार्यासिद्धेः । मवि.

(३) अष्टमेऽब्दे गते इति शेषः । 'अप्रजां नवमे वर्ष' इति हारीतस्मरणात् । एवमेकादश इत्यत्रापि शेषोऽवगन्तव्यः । स्मृच.२४४

(४) प्रथमर्तुमारभ्याविद्यमानप्रसूताऽष्टमे वर्षेऽधिवेदनीया, मृतापत्या दशमे वर्षे, स्त्रीजनन्येकादशे, अप्रियवादिनी सद्य एव यद्यपुत्रा भवति । पुत्रवत्या तु तस्यां 'धर्मप्रजासंपन्ने दारे नान्या कुर्वीतान्यतरापाये तु कुर्वीते'त्यापस्तम्बनिषेधादधिवेदन न कार्यम् । ममु.

या रोगिणी स्यात्तु हिता संपन्ना चैव शीलतः ।
सांऽनुज्ञाप्याऽधिवेत्तव्या नावमान्या च कर्हिचित्॥

(१) भर्त्रे हिता परिचर्यापरा । अनुज्ञापनानवमानयोरिह विधानं, पूर्वासामेतद्भावात् । रोगिणीग्रहणं वन्ध्यास्त्रीजनन्यावपि लक्षयति, प्रकृतत्वाविशेषादवमाननिमित्ताभावाच्च, कर्हिचित्कदाचिदवमानन शिष्टयर्थं परिभाषणादि । मेधा.

(२) हिता भर्तृहिता । अनुज्ञाप्य यद्यप्यनुमन्यते अननुमतौ त्वननुज्ञाप्यैव । मवि.

(३) या पुनर्व्याधिता सती पत्युरनुकूला भवति शीलवती च स्यात्तामनुज्ञाप्यान्यो विवाहः कार्यः । कदाचित्तासौ नावमाननीया । ममु.

(४) या रोहिणी स्यात् 'अष्टवर्षा च रोहिणी' सा अनुज्ञाप्य अधिवेत्तव्या न अवमान्या । भाच.

अधिविन्ना तु या नारी निर्गच्छेद्दुषिता गृहात् ।
सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधौ॥

(१) क्रोधेनाधिवेदनहेतुना निर्गतायास्त्यागसंनिरोधौ विकल्पतो विधीयेते । न तु यथोपपन्नहेतुना भोजनाच्छादनादिना तत्र प्रीत्या क्रोधावमार्जनं, स्वश्रूभिः श्वशुरादिभिर्वा परिभाषणम् । संनिरोधो रक्षिपुरुषाधिष्ठानम् । त्यागो व्याख्यातः, असंभोगः सहशय्यावर्जनम् । कुल ज्ञातयः तत्पितृपक्षाः स्वपक्षाश्च । मेधा.

(२) निर्गच्छेत् गृहान्तरं गच्छेत् । संनिरोद्धव्या बन्धनेन । कुलस्य तत्पितृकुलस्य सनिधा । मवि.

(३) तत्कुलसंनिधौ त्यक्ताया अपि भरण पतिरेव संविधानकरणे न कुर्यात् । स्मृच.२४४

(४) जनसमूहः कुल ज्ञातिर्वा देशकालापेक्षया विकल्पः । मच.

ऋतुस्नाता तु या नारी भर्तारं नोपगच्छति ।
तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं तु विवासयेत्॥
भर्तुः प्रतिनिवेशेन या वृथा गमयेदृतून् ।
तां तु विख्याप्य बन्धूनां भ्रूणघ्नीं विनिवासयेत्॥

प्रतिनिवेशेन द्वेषेण । एवञ्चैतत्पूर्ववाक्ये द्वेषातिरिक्त-

---

(१) **मस्मृ.**९।८१; **स्मृच.**२४४; **विभ.**१५; **समु.**१२१.

(२) **मस्मृ.** ९।८२; **स्मृच.**२४४; **विभ.**१५; **समु.** १२१; **भाच.** रोगि (रोहि).

१ दनेन स. २ पनाव्.

(१) **मस्मृ.**९।८३; **मेधा.**८।१६३ त्याज्या वा (त्यजेद्वा) उत्त.; **स्मृच.**२४४; **विभ.**१६; **समु.**१२२.

(२) **व्यक.**१३२ नोप (नाप) यमः; **विर.**४२५; **सेतु.** २८५ तु वि (च वि); **विभ.**१४ तु वि (उप).

(३) **व्यक.**१३२ विनि (तु वि) यमः; **विर.**४२५; **विभ.**१४.

मसमञ्जसकारणं विवक्षितमित्यर्थभेदः । उत्तरवाक्यं बहुऋतुपरं वा । विर.४२५

स्वैरिणी[1]च्छन्दगा च या नारी तस्यास्त्यागो विधीयते ।
न चैवं स्त्रीवधं कुर्यान्न चैवाङ्गविकर्तनम् ॥
स्वैरिणी[2]च्छन्दव्यभिचारिण्या विवस्त्यांस्त्यागमब्रवीत् ।
न वधं न च वैरूप्यं बन्धं स्त्रीणां विवर्जयेत् ॥

न वध न च वैरूप्यमित्यघात्रघीदित्यनुषज्यते । विर.२४६

दुष्टस्त्रीणां दण्ड· प्रायश्चित्त च

प्रतिषिद्धा[3] पिबेद्या तु मद्यमभ्युदयेष्वपि ।
प्रेक्षासमाजं गच्छेद्वा सा दण्ड्या कृष्णलानि षट् ॥

(१) प्रतिषेधे गुरुसंबन्धिभिः । अयं दण्डः क्षत्रियादिस्त्रीणाम् । न शास्त्रीयो ब्राह्मणीनाम् । न हि तत्र दण्डमात्रया मोक्षः । किं तर्हि, महता । न च तत्राभ्युदयेषु पानाशङ्का । अप्रतिषिद्धमद्यानां तु नियमेनोत्सवसमागतानामादरवती प्रवृत्तिर्दृश्यते । यां सम्यङ्निषेधत्यभ्युदयेष्वपीति । दण्डश्चायं भर्त्रा दीयते । सत्यपि राजवृत्तित्वे 'स्त्रीणा भर्ता प्रभुः' इति विज्ञायते । अन्येषामपि परिग्रहवता भृत्यादिविषये क्रियति दण्डे स्वातन्त्र्यं, अभ्युदयः पुत्रजन्मविवाहादय उत्सवाः । प्रेक्षा नटादिदर्शनम् । समाजो नितान्तमभिजनसमूहः । तत्र कुतूहलिन्या अय दण्डः । मेधा.

(२) मद्य सुराव्यतिरिक्तम् । अभ्युदयेषूत्सवेषु क्षत्रियादयो मद्य पिबन्ति । प्रेक्षा नृत्यादिदर्शनस्थान, समाजः सभा । मवि.

(३) या पुनः क्षत्रियादिका स्त्री भर्त्रादिनिवारिता विवाहाद्युत्सवेष्वपि निषिद्धमद्य पिबेत् नृत्यादिस्थानजनसमूहौ वा गच्छेत् सा सुवर्णकृष्णलानि षट् व्यवहारप्रकरणाद्राज्ञा दण्डनीया । मसु.

(४) प्रतिषिद्धेति विशेषणादप्रतिषिद्धायां मद्यपाने ऽल्पदोषः । अपिशब्दग्रहणादभ्युदयेऽल्पतरः, अभ्युदय उत्सवः । अनभ्युदये प्रतिषिद्धाया भूयस्तरः । नन्द

(५) कृष्णलानि गुञ्जापट्वपरिमितं रजतम् । भाच.

[1]विप्रदुष्टां स्त्रियं भर्ता निरुन्ध्यादेकवेश्मनि ।
यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम्*॥

विशेषेण प्रदुष्टाम् । इच्छया व्यभिचारिणीमित्यर्थः भर्ता निरुन्ध्यात्पत्नीं कार्येभ्यो निवर्त्य निगडबद्धामिवैक गृहे धारयेत् । यच्च पुरुषस्य सजातीयपरदारागमने प्रायश्चित्त तदेवैनां कारयेत् । ततश्च 'स्त्रीणामर्थ प्रदातव्यम् इति यद्वसिष्ठादिभिरुक्त तदनिच्छया व्यभिचारे कर्तव्यम् । मसु.

सा[2] चेत्पुनः प्रदुष्येत्तु सदृशेनोपयन्त्रिता ।
कृच्छ्रं चान्द्रायणं चैव तदस्याः पावनं स्मृतम्*॥

सा स्त्री सजातीयगमने सकृद्दुष्टा कृतप्रायश्चित्ता यदि पुनः सजातीयेनाभ्यर्थिता सती तद्गमनं कुर्यात्तदास्याः प्रायश्चित प्राजापत्य कृच्छ्रचान्द्रायण च मन्वादिभिः स्मृतम् । मसु.

स्त्रीधर्माः पतिव्रतावृत्त च

बालया[3] वा युवत्या वा वृद्धया वाऽपि योषिता ।
न स्वातन्त्र्येण कर्तव्यं किंचित्कार्यं गृहेष्वपि ॥

स्वातन्त्र्य स्त्रीषु कस्याचिदवस्थाया नास्तीत्युपदेशार्थः । वयोविभागवचनं तु यत्रास्याः पारतन्त्र्यं तत्प्रदर्शनार्थमविवक्षितस्वरूपम् । तथा चोक्त 'तत्सपिण्डेषु वा सत्सु पितृपक्षः प्रभुः स्त्रियाः । पक्षद्वयावसाने तु राजा भर्ता स्त्रिया मतः ॥' मेधा.

---

(१) **व्यक** १३२ च या (तु या) यम.; **विर.**४२६; **सेतु.**२८५; **विभ.**१६. (२) **व्यक** १३३ यमः; **विर.** ४२६; **सेतु.**२८५; **विभ.**१६.

(३) **मस्मृ.**९।८४ पिबेद्या (पि चेद्या); **व्यक.**१३६; **विर.**४३७ माज (माजे); **मच.** माज (माजौ); **विभ.**२३; **समु.**१२३; **भाच.** विरवत्.

१ मात्रेण.

* अस्य श्लोकस्य व्याख्यानान्तराणि प्रायश्चित्तकाण्डे सग्रहीष्यन्ते ।

(१) **मस्मृ.**११।१७६; **उ.**२।२७।१३ उत्त., स्मरणम्; **स्मृच.**२४२ पू, ३२३ उत्त.; **विता.**८०७ (=) उत्त.; **समु.**१२१ पू.

(२) **मस्मृ.**११।१७७.

(३) **मस्मृ.**५।१४७; **मेधा.**८।१६४ (न स्वतन्त्रेण कर्तव्य कार्यं किंचिदिति स्थितिः); **व्यक.**१३३; **मभा.**१८।१ वृद्धया (स्थविर्या) किंचित्कार्यं (कार्य किंचित्); **गौमि.**१८।१ किंचित्कार्यं (कार्य किंचित्); **स्मृच.**२४९ त्कार्यं (त्कार्ये); **विर.** ४२७; **सेतु.**२८५; **विभ.**१७; **समु.**१२३.

बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने ।
पुत्राणां भर्तरि प्रेते न भजेत्स्त्री स्वतन्त्रताम् ॥
पित्रा भर्त्रा सुतैर्वाऽपि नेच्छेद्विरहमात्मनः ।
एषां हि विरहेण स्त्री गर्ह्यं कुर्यादुभे कुले ॥

'तत्सपिण्डेष्वि'त्यादिना चासति स्वामिनि कर्तव्यम् । अव्यवस्थानं वचनीयताहेतुः, कथितो गर्ह्यं कुर्यादिति । एषा हि विरहेण निवसन्ती गच्छन्ती वा ग्रामान्तरमित्यध्याहार्यम् । मेधा.

सदा प्रहृष्टया भाव्यं गृहकार्येषु दक्षया ।
सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ॥

अभीक्ष्णवचनः सदाशब्दो नित्यशब्दवत् । नित्यप्रहसितयेति सत्यप्यन्यत्र क्रोधशोकवेगे भर्तुर्दर्शने मुखप्रसादस्मितनर्मवचनादिना प्रहर्षो दर्शनीयः । कुमार्या भर्तृमत्याश्चायमुपदेशः । गृहकार्ये च दक्षया । अर्थसग्रहव्ययोः धर्मकार्ये स्नानादौ च 'अर्थस्य सग्रहे चैनाम्' इत्यादिना गृहकार्यमुक्तम् । तत्र दक्षया चतुरया भवितव्यम् । अन्नसस्कारादि शीघ्र निष्पाद्यम् । सुसस्कृतोपस्करया उपस्करं गृहोपयोगि भाण्ड कुण्डघटिकादि तत्सुसंस्कृतं सुसंमृष्ट शोभावत्कर्तव्यम् । व्यये च मित्रज्ञात्यातिथ्यभोजनार्थे धने अमुक्तहस्तया उदारया न भवितव्य, न बहुव्ययितव्यमित्यर्थः । सुसस्कृतान्युपस्कराणि इति बहुव्रीहिः । एव मुक्तो हस्तो यस्या इति विग्रहः । पश्चान्नञ्समासः । रूढ्या उदारवचनो मुक्तहस्तशब्दः । मेधा.

यस्मै दद्यात्पिता त्वेनां भ्राता वाऽनुमते पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत् ॥

भ्राता वाऽनुमते पितुः यथैव पित्राऽनुज्ञातस्य भ्रातुर्दातृत्वमेव पितुर्निरपेक्षस्यापि दातृत्वश्रुतौ भार्यायां अनुमते सति दानं बोद्धव्यम् । सर्वत्र सहाधिकारादुभयोश्च दुहितरि स्वाम्यात् । असति पितरि मात्राऽपि देयेति नवमे (अध्याये) दर्शितम् । मातापित्रोरपत्यं तन्निमित्त च स्वाम्यमिति युक्ता इतरेतरापेक्षा । शुश्रूषेत आराधयेत् । संस्थितं च मृतं च न लङ्घयेत् लङ्घनमतिक्रमणं न स्वातन्त्र्येणासीतेत्यर्थः । यथा जीवति भर्तरि तत्परवती एवं मृतेऽपि सदैव तत्परतन्त्रया भवितव्यम् । यत आह— 'प्रदान स्वाम्यकारकम्' । यदैव पित्रा दत्ता तदैव पितुः स्वाम्य निवर्तते । यस्मै दीयते तस्योत्पद्यते । अतश्च न विवाहकाल एव दानं प्रागपि विवाहाद्वरणकाले अस्ति दान किमर्थस्तर्हि विवाहः । मेधा.

मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः ।
प्रयुज्यते विवाहे तु प्रदानं स्वाम्यकारणम् ॥

अभिलषितार्थनिष्पत्तिर्मङ्गल तत्साधन तदर्थं प्रयुज्यते । तत्र 'प्रजापतेर्यज्ञ' इति क्रियाविशेषणत्वान्नपुसकम् । स्वस्ति ईयते प्राप्यते येन तत्स्वस्त्ययनम् । यदस्य प्रिय वस्तु विद्यते तत्र नश्यतीत्यर्थः । आसा स्त्रीणाम् । तेषु विवाहेषु । यज्ञः प्रजापतेर्देवतायाः क्रियते । 'प्रजापते न त्वदेतान्य' इति विवाहे आज्यहोमाः केषाचिदाम्नाताः । उपलक्षणं चैतदन्यासामपि देवताना पूषवरुणार्यम्णाम् । तथाहि । तत्र मन्त्रवर्णाः । 'पूषण नु देव वरुण नु देवम्' इत्यादयो देवतान्तरप्रकाशनपराः । प्रदानादेवासत्यपि विवाहे स्वाम्यमुत्पद्यत इत्येतदत्र ज्ञाप्यते । विवाहयज्ञस्तु मङ्गलार्थ इत्याद्यविवक्षितम् । दारकरण विवाह इति स्मर्यते । सत्यपि स्वाम्ये नैवान्तरेण विवाह भार्या भवतीति । मेधा.

अनृतावृतुकाले च मन्त्रसंस्कारकृत्पतिः ।
सुखस्य नित्यं दातेह परलोके च योषितः ॥

'सर्वत्र वा प्रतिषिद्धवर्जमि'ति अनृतावपि सुखस्य दाता । मन्त्रसंस्कारो विवाहविधिस्तस्य कर्ता मन्त्रसंस्कार-

(१) **मस्मृ.**५।१४८; **व्यक.**१३३; **मभा.**१८।१ उत्तरार्धे (पुत्रस्य स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति); **गोमि.**१८।१ मभावत्; **स्मृच.**२४९ त्राणा (त्रस्य) त्स्त्री (त); **विर.**४२७; **सेतु.**२८६; **विभ.**१७ तुर्व (तृव); **समु.**१२३ स्मृचवत्.

(२) **मस्मृ.**५।१४९; **व्यक.**१३३; **स्मृच.**२४९ भर्त्रा (भ्रात्रा); **विर.**४२७ दु (च्छु); **सेतु.**२८६ गर्ह्यं (गर्ह्य) दु (च्छु); **विभ.**१७ स्मृचवत्; **समु.**१२३ स्मृचवत्.

(३) **मस्मृ.**५।१५० ख. पुस्तके, पु (च); **मेधा.** पु (च); **व्यक.**१३३ संस्कृतो (सस्थितो); **विर.**४२७; **विभ.**१७.

(४) **मस्मृ.**५।१५१; **स्मृच.**२५१ सं (दुः); **रत्न.**१३५; **समु.**१२४ सं (दुः).

(१) **मस्मृ.**५।१५२; **मेधा.** हे तु (हेतु).

(२) **मस्मृ.**५।१५३; **व्यक.**१३५ ले च (ले तु); **स्मृच.**२५२; **रत्न.**१३५; **वित्ता.**८२४ त्यं (त्य); **विभ.**२१ वितावत्; **समु.**१२४.

कृत्। परलोके च पत्या सह धर्मेऽधिकाराच्च तत्फलावाप्तेः परलोकसुखस्य दातेत्युच्यते। मेधा.

[1]**विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः।**
उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः॥

द्यूतातिसक्तो विशीलः। कामप्रधानं वृत्तमस्येति कामवृत्तः। गुणैर्वा परिवर्जितः। श्रुतधनादिगुणविहीनः। उपचार्यः आराधनीयः। मेधा.

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम्।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते॥

भर्त्रा विना कृतानां यज्ञाधिकारो नास्तीत्येतदसकृत्प्रतिपादितं तेन व्रतोपवासावपि कुर्वती तदनुज्ञां गृह्णीयात्। व्रतं मद्यमांसादिनिवृत्तिसंकल्पः न तु कृच्छ्राणि। तत्र जपहोमयोरङ्गत्वात्तदभावाच्च स्त्रियाः। न च वक्तुं युक्तं जपहोमविकल कृच्छ्रानुष्ठानमस्या भविष्यति न हि स्वेच्छयाऽङ्गत्यागो युक्तः सर्वाङ्गकल्पयुक्तस्य कर्मणोऽभ्युदयसाधनत्वेनावगतत्वात्। न हि पुरुषशक्तिभेदापेक्षयाऽङ्गानामुपचयापचयौ भवतः। सन्ति च सर्वाङ्गोपसंहारेण सर्वार्णस्त्रैवर्णिकाः प्रयोगमनुष्ठातुम्। अतो न स्त्रीशूद्रस्याभ्युदयकामस्य कृच्छ्रेष्वधिकारः। प्रायश्चित्तेषु विशेषं वक्ष्यामः। उपोषितं उपवासः आहारवेच्छेद एकरात्रद्विरात्रादिषु। शुश्रूषते परिचरति। मेधा.

[2]**पाणिग्राह्यस्य साध्वी स्त्री जीवतो वा मृतस्य वा।**
पतिलोकमभीप्सन्ती नाचरेत्किंचिदप्रियम्॥

पत्युर्लोकः पत्या सह धर्मानुष्ठानेन योऽर्जितः स्वर्गादिः स पतिलोकस्तमभीप्सन्ती प्राप्तुकामा नाचरेत्किंचिदप्रियं परपुरुषसंसर्गादिशास्त्रप्रतिषिद्धम्। न हि मृतस्य किं प्रियमप्रियं चाशक्यमवसातुम्। न च जीवतो यत्प्रियं तदेव मृतस्य। भवान्तरोपपन्नानां तु प्रीतिभेदात्। तस्माद्यत्प्रतिषिद्धं स्वातन्त्र्य तदेवाप्रियं तन्नाचरेत्। मेधा.

[3]**दानात्प्रभृति या तु स्याद्यावदायुः पतिव्रता।**
सा भर्तृलोकमाप्नोति यथैवारुन्धती तथा॥

प्रोषितभर्तृकाविचारः

[4]**विधाय वृत्तिं भार्यायाः प्रवसेत्कार्यवान्नरः।**
अवृत्तिकर्शिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि॥

(१) यदा प्रवसेत्तदा भार्यायां वृत्तिं विधाय प्रवसेदिति विधिं विधायैवमर्थं द्रष्टव्यम्। 'प्रवसन्भार्यायां वृत्तिं विदधीते'ति तथा कुर्याद्यथाऽस्या यावत्प्रवासं वृत्तिर्भवति। शरीरस्थितिहेतुभोजनाच्छादनगन्धोपकरणादि। तां विधाय प्रवसेत्स्वदेशादेशान्तरं गच्छेत्। कार्यवान्कार्य पुरुषार्थो दृष्टोऽदृष्टश्च। अदृष्टो धर्मो दृष्टावर्थकामौ। तथा वक्ष्यति 'प्रोषितो धर्मकार्यार्थं' इत्यादिना। अन्तरेणैतानि निमित्तानि भार्यां हित्वा प्रवासो निषिध्यते। अवृत्तिकर्शिता हि, दृष्टदोषप्रदर्शनमर्थवादः। अवृत्त्या दरिद्रेण कर्शिता पीडिता प्रदुष्येत् पुरुषान्तरसंपर्कादिना। स्थितिमत्यपि, स्थितिः कुलाचारस्तत्संपन्ना क्षुधावसरे दीना दोषमवाप्नुयादन्यं भर्तारमाश्रित्य जीवतीति संभाव्यत एतत्। संभावनाया लिङ्। मेधा.

(२) कार्ये सति मनुष्यः पत्न्या ग्रासाच्छादनादि प्रकल्प्य देशान्तरं गच्छेत्। यस्मात् ग्रासाद्यभावपीडिता स्त्री शीलवत्यपि पुरुषान्तरसंपर्कं भजेत्। ममु.

(३) 'अस्य दग्धोदरस्यार्थे को न कुर्यादसाप्रतमि'ति न्यायात् स्थितिमती स्थिरा साऽपि प्रदुष्यतीति कैमुतिकम्। मच.

[5]**विधाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता।**
प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः॥

(१) नियमो यथा संनिहिते भर्तरि परगृहप्रयाणादिनिषेध एव प्रोषितेऽपि आस्थिता आश्रिता गृहीतवती।

---

(१) **मस्मृ.**५।१५४ ख पुस्तके, चर्यः (चार्यः); **मेधा.** र्यः (चार्यः); **मिता** २।२९० वि (दुः) उप (परि); **व्यक.** ३५; **स्मृच.**२५२; **रत्न.**१३५; **विता.**८२४; **विभ.**२१ वि (दुः); **समु.**१२४.

(२) **मस्मृ.**५।१५५ घ. पुस्तके, षितम् (षणम्); **व्यक.** ३५ य्यज्ञो (य्यागो) मनुविष्णू; **स्मृच.**२५२ तिं (तिः) षते य्यते); **विभ.**२१; **समु.**१२४ स्मृचवत्.

(३) **मस्मृ.**५।१५६; **व्यक.**१३६; **रत्न.**१३५; **विभ.** ११.

(१) **मस्मृ.**५।१५४ इत्यस्योपरिष्टात् प्रक्षिप्तश्लोकोऽयम्, दानात् (दान); **व्यक.**१३६; **विर.**४३६; **विभ.**२१.

(२) **मस्मृ.**९।७४; **विर.**४१८; **रत्न.**१३४; **विता.** ८२१ पू.; **सेतु.**२८३; **विभ.**१०.

(३) **मस्मृ.**९।७५; **व्यक.**१३६; **स्मृच.**२५३; **विर.** ४३८; **विभ.**२३; **समु.**१२५.

अकृत्वा तु वृत्तिं प्रोषिते शिल्पैर्जीवेतेति कर्तनजालिकाकरणादिना। अगर्हितानि वस्तूनि व्यजनादीनि। एष विधवादीनां निजश्रमजन्यो वृत्त्युपायः। मेधा.

(२) नियमं मनोवाक्कायनियमम्। शिल्पैः सूत्रकर्तनाद्यैः। अगर्हितैर्देशान्तरश्रमणाद्यसाध्यैः। मवि.

प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरः समाः।
विद्यार्थं षड्यशोऽर्थं वा कामार्थं त्रींस्तु वत्सरान्॥

(१) यदुक्तं कार्यवान्प्रवसेदिति तानि कार्याणि दर्शयति। तद्विशेषेण प्रतीक्षाकालभेदः। परतस्त्विदं तया कर्तव्यमिति नोक्तम्। तत्र केचिदाहुः। प्रकरणादगर्हितैर्जीविदिति। तदयुक्तम्। प्रागस्मात्कालादगर्हितैरिति, इयं किं म्रियता न ह्यस्या आत्मत्याग इष्यते। पुंस इव प्रतिषिद्धत्वात्। तस्मात्प्रागप्यस्मात्प्रतीक्षणविधेरगर्हितैः शिल्पैरजीवन्ती गर्हितैर्जीवित्। अन्ये व्यभिचारमिच्छन्ति। तथा च स्मृत्यन्तरे 'नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥' (नारद.१५।९७) अन्येऽप्याहुः। नास्या जातु ब्रह्मचर्यमपनेतुं शक्यते। स्त्रीधर्मेषु हि तदस्या विहितं मनुनाऽपि 'न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु' इति। मृते भर्तरि नास्ति व्यभिचारः। किमङ्ग प्रोषिते। पतिशब्दो हि पालनक्रियानिमित्तको ग्रामपतिः सेनायाः पतिरिति। अतश्चास्मादेवधेर्नैषा भर्तृपरतन्त्रा स्यात्। अपि त्वात्मनो जीवनार्थं सैरन्ध्रीकरणादिकर्मभिः पिण्डदमन्यमाश्रयेत। तच्च यदा षण्मासभृत्या संवत्सरभृत्या वा कस्मिंश्चिदाश्रिते भर्ता यद्यागच्छेत्तदानीं ता चेद्वशीकुर्याद्वशीकर्तुं शक्नुयात्त्यज त्वं भार्यामिति, यावद्भवति कालो न पूर्णः, प्राक् पत्युरेव सा, पञ्चमे (अध्याये) चर्वितमन्यत्।

अन्येऽप्यर्थमिममाहुः। पूर्णे तु पुनर्भूवृत्तमिच्छन्ति। या पत्या वा परित्यक्ता भवति यस्याः किल पतिरियन्तं कालं विहितवृत्तिको नागच्छति सा तेन त्यक्तैव भवति। ततश्च यदि सा पुनर्भूधर्मेणान्येनोढा भवेत्तदा भर्ताऽभ्यागतो न किंचिद्ब्रूयात्पुनर्भवस्येयं भार्येति। तदयुक्तम्। 'न निष्क्रयविसर्गाभ्यामि'ति। तस्य श्लोकस्यार्थवत्त्वं दर्शयिष्यामः।

धर्मश्च तत्कार्यं च धर्मकार्यम्। सोऽर्थः प्रयोजनं प्रवासस्येति धर्मकार्यार्थम्। कुतः? न गृहस्थस्य धर्मार्थो दीर्घकालः प्रवासः। अवश्य ह्यमयस्तेन परिचरणीयाः। पाञ्चयज्ञिकमनुष्ठेयम्। कुतो गन्तव्यं 'वसन्ते वसन्ते ज्योतिषा यष्टव्यमि'ति, तीर्थस्नानादीन्यपि स्मार्तानि च श्रौताविरोधीन्यनुष्ठेयानि, न च संविधाय प्रोषितस्य वा भवन्तीति येनोच्यते, 'सविधायापि प्रवास आपर्वणः' 'स्वयं पर्वणि जुहुयादित्विजामेकतरकालं' इति युक्तम्। अनाहिताग्नेस्तीर्थयात्राया पाञ्चयज्ञिकस्य तुल्यत्वेऽपि स्मार्तत्वे भार्यासहितस्योपपत्तेः न तत्त्यागे तीर्थगमन युक्तम्। उच्यते। गुरुवचनेन यं गुरवो धर्मार्जने राजोपसेवाया वा स्वकार्याय प्रेषयन्ति स धर्मार्थ प्रवासः। प्रायश्चित्तं वा तपोवनदेशभ्रमणेन। अथवाऽर्थार्जनार्थमेव धर्मकार्यार्थमभिप्रेत, दरिद्रोऽहं कुतश्चिद्धनमर्जयिष्ये। विद्यार्थम्। ननु स्नातस्य च भार्याधिगमः। कृतविद्यस्य च स्नानम्। तत्र कुतः कृतविवाहस्य विद्यार्थिता। दर्शितमेतत्। ईषदवगतवेदार्थो विवाहेऽधिक्रियते। निश्चिते स्नानादौ नैतद्युक्तम्। कृताया धर्मजिज्ञासायां स्नानं, जिज्ञासा च विचारपूर्वकसंशयच्छेदननिश्चितार्था। सत्यम्। नायं विधिर्विद्यार्थितायाः। तथा च सति धर्मकार्यार्थमित्यनेनैवावगता स्यात्। उत्पन्नेऽप्यधिकारोपयोगिन्यवगमेऽभ्यासातिशयार्थं, विशेषार्थं चान्यासु विद्यासु, क्षिप्र शौर्ययशःख्यापनार्थं, बहिः सविशेषविद्वत्वख्यापनार्थम्। देशान्तरप्रवसने यशोहेतुः प्रवासः। कामार्थं रूपाजीवानुगमोऽभिप्रेततरा भार्यामुद्वोढुम्। स्मृत्यन्तरे प्रसूताभेदेन च कालभेदः स्मर्यते। तथा च विष्णुः 'अष्टौ विप्रसुता षट् राजन्या चतुरो वैश्या द्विगुण प्रसूतेति। न शूद्रायाः कालनियमः स्यात्सवत्सरमित्येके' इति। मेधा.

(२) धर्मकार्यार्थं तीर्थयात्रादिधर्मप्रतिग्रहादिकार्यार्थम्। प्रतीक्ष्यस्तद्गृहावस्थानादिना। तदूर्ध्वं तु पत्युः संनिकर्षमेव गच्छेत् 'ऊर्ध्वं भर्तुः सकाशं गच्छेदि'ति वसिष्ठस्मरणात्। यशोर्थमुद्ग्राहादिना दिग्विजयार्थं

(१) मस्मृ.९।७६; विभ.३०.

१ गर्हितानि वस्तूनि विज. २ स्थाशाने म. ३ दवाधनैषा. ४ पूर्वं तु. ५ निहि.

१ वतीति. २ याज्ञि. ३ सुता: षट् राजन्याः च.

गतः । कामार्थं स्त्र्यन्तरप्राप्त्यर्थम् । ÷मवि.

(३) प्रतीक्ष्यो भार्ययेति शेषः । ऊर्ध्वं भर्त्रन्तरपरिग्रहे न दोषोऽस्तीत्यभिप्रायः । यत्तु मृतभर्तृकाणा ब्रह्मचर्यवचनं तत्फलातिशयकामाना नान्यासामित्यविरोधः ।

नन्द.

विधवाधर्माः नियोगनिषेधश्च

कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः ।
न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु ॥

(१) तदेव सविशेषं दर्शयति । पुंवत्स्त्रीणामपि प्रतिषिद्ध आत्मत्यागो, यदप्याङ्गिरसे 'पतिमनुम्रियेरन्' इत्युक्तं तदपि न नित्यवदवश्यं कर्तव्यम् । फलस्तुतिस्तत्रास्ति फलकामायाश्चाधिकारे श्येनतुल्यता । यथैव 'श्येनेन हिंस्याद्भूतानि' इत्यधिकारस्यातिप्रवृद्धतरद्वेषान्धतया सत्यामपि प्रवृत्तौ न धर्मत्वं, एवमिहाप्यतिप्रवृद्धफलाभिलाषायाः सत्यपि प्रतिषेधे तदतिक्रमेण मरणे प्रवृत्त्युपपत्तेर्न शास्त्रीयत्वमतोऽस्त्येव पतिमनुमरणेऽपि स्त्रियाः प्रतिषेधः । किंच 'तस्मादु ह न पुरायुषः प्रेयादि'ति प्रत्यक्षश्रुतिविरोधोऽयं, स्मृतिरप्येषा शक्यते कल्पयितुम् । यथा 'वेदमधीत्य स्नायात्' इत्यध्ययनानन्तरमकृतार्थावबोधस्य स्नानस्मरणं अतो मृतपतिकाया अनपत्याया असति भर्तृधनादौ दायिके च कर्तनादिना च केनचिदुपायेन जीवन्त्या जीवितस्यातिप्रियत्वात्तदुपेक्षणस्याशास्त्रत्वात्प्रतिषिद्धत्वादापदि सर्वव्यभिचाराणा 'विश्वामित्रः श्वजाघनीम्' इत्यादिनाऽनुज्ञातत्वाद्व्यभिचारेणोपजीविताप्राप्तविदमुच्यते । काममस्यामवस्थाया शरीरं क्षपयेत् क्षयं नयेत्पुष्पमूलफलैर्यथोपपाद वृत्तिं विदधीत । न तु नामापि गृह्णीयात्पतिर्मे त्वमेवाद्येत्यन्यस्य ।

यत्तु 'नष्टे मृते प्रव्रजिते क्लीबेऽथ पतिते पतौ । पञ्चस्वापत्सु नारीणा पतिरन्यो विधीयते ॥' इति । तत्र पालनात्पतिमन्यमाश्रयेत सैरन्ध्रकर्मादिनाऽऽत्मवृत्त्यर्थं, नवमे (अध्याये) च निपुणं निर्णेष्यते । प्रोषितभर्तृकायाश्च स विधिः । कामशब्दप्रयोगोऽरुचिसूचनार्थम् । देहक्षपणमप्यकार्यमिदं त्वन्यदकार्यतरं यदन्येन पुरुषेण संप्रयोगः ।

मेधा.

(२) पुष्पमूलफलैः पवित्रैर्वरं देहं क्षपयेत्, न वृत्त्यर्थं व्यभिचारबुद्ध्या परस्य नामापि उच्चरेत् ।

गोरा.

आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी ।
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥

(१) एष एवार्थो विस्पष्टीक्रियते । आ मरणाद्ब्रह्मचारिण्यासीत अस्यामापदि न व्यभिचारेणात्मानं जीवयेत् । क्षान्ता क्षुत्कृत दुःखमवधीरयन्ती न ब्रह्मचर्यं क्षुदुपसृष्ट येन चित्त कल्लोलेन खण्डयेत् । एकः पतिर्यासां ता एकस्य वा पत्न्य एकपत्न्यस्तासा सावित्रीप्रभृतीना यो धर्मो यस्य फल वरदानाभिशापादिषु शक्तता तं काङ्क्षन्ती कामयमाना ब्रह्मचर्य न जह्यात् । अस्यामवस्थाया मूलफलाशिन्या यदि भवति मरणं ततो न दोषः ।

मेधा.

(२) एकभर्तृकाणा यो धर्मस्त सर्वधर्मोत्कृष्टमभिलषन्ती आमरणात्क्षुद्दुःख सहमानाऽनन्यमनस्का पुंसः प्रयोग वर्जयेत् । न चापत्यार्थमपि प्रीतिमन्येनान्तरेण तिष्ठेत् ।

गोरा.

अनेकानि सहस्राणि कौमारब्रह्मचारिणाम् ।
दिवं गतानि विप्राणामकृत्वा कुलसंततिम् ॥

(१) पूर्वेणापदि जीविकार्थः परपुरुषसंसर्गो निषिद्धोऽनेन पुत्रार्था प्रवृत्तिर्निषिध्यते । एव किल श्रूयते 'नापुत्रस्य लोकोऽस्ति' इति । लिङ्ग च तत्राविवक्षितमस्तः पुत्रार्थे प्रसङ्ग इदमुच्यते । बहूनि सहस्राणि कुमारा एव ब्रह्मचारिणोऽकृतदारा नैष्ठिकास्तेषामनेकानि सहस्राणि दिव गतानि स्वर्गं प्राप्नुवन्ति । नियोगस्तु नवमे (मस्मृ.९।५९ इ.) च गुर्विच्छया विहितो नात्मतन्त्रतया पुत्रार्थिन्याः । अकृत्वा कुलसतति कुलवृद्ध्यर्था संततिस्तामकृत्वा पुत्रानजनयित्वेत्यर्थः । अनेकानीति

÷ मनु., मच. मविवत् ।

(१) मस्मृ.५।१५७; मिता.२।१२७,२।२९०; व्यक.१३८; विर.४४४; सवि.३८८ लैः शुभैः (लाशनैः), व्यप्र.४७३; सेतु.२८८ त्पत्यौ प्रेते (न्मृते पत्यौ); विभ.३८; समु.१३८.

(१) मस्मृ.५।१५८; मिता.२।१२७; व्यक.१३८; विर.४४४; व्यप्र.४७२; सेतु.२८८; विभ.२८; समु.१३८.

(२) मस्मृ.५।१५९ कां (कु); मिता.२।१२७; व्यक.१३८; स्मृच.२५४; विर.४४४; व्यप्र.४७२; विभ.२८; समु.१२५ मस्मृवत्.

नञ्समासस्योत्तरपदार्थप्राधान्येन बहुवचनं चिन्त्यम् । सत्यप्येकत्वप्रतिषेधे व्यादिसंख्यावचन दुर्लभम् । तथा ह्ययं स्वधर्मावेशेन परित्यक्तस्वगतिकत्वेनाच्छादित-तद्रूपोऽप्यतिदीर्घसंख्याविशेषानाचष्टे यथा मोदो ग्राम इति । उक्तं च चूर्णिकाकारेण 'अनेकस्मादिति सिध्य-तीति' । एकवचनप्रयोगशिष्टिसिद्धि दर्शितवान्, अ-सहायवचनो वाऽयमनेकशब्दः । असहायानि गतानि, भार्या सहायभूता एषा नासीदित्यर्थः । मेधा.

(२) बाल्यत एव ब्रह्मचारिणामकृतदाराणा बाल-खिल्यानां ब्राह्मणाना पुराणोपवर्णितानां बहुसहस्राण्यष्टा-शीति कुलवृद्धयर्थमपत्यान्यनुत्पाद्यैव स्वर्ग गतानि । गोरा.

मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता ।
स्वर्गं गच्छत्यपुत्राऽपि यथा ते ब्रह्मचारिणः ॥

(१) एष एवार्थो भूय उच्यते प्रतिपत्तिदार्ढ्यार्थम् । मेधा.

(२) साध्वी स्त्री मृते भर्तरि अकृतपुसप्रयोगा अपु-त्रापि सती स्वर्ग प्राप्नोति । यथा ते बालखिल्याद्या ब्रह्म-चारिणः प्राप्ताः दृष्टोपकारापेक्षया । गोरा.

अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते ।
सेह निन्दामवाप्नोति पतिलोकाच्च हीयते ॥

(१) पुत्रो मे जायतामित्यभिलाषः सोऽपत्यलोभस्ततो हेतोर्या भर्तारमतिक्रम्य वर्ततेऽन्येन संप्रयुज्येत सा इह लोके निन्दा गर्हा प्राप्नोति स्वर्गं न प्राप्नोति । मेधा.

(२) या स्त्री अपत्यलोभातिशया भर्तारमतिक्रम्य वर्तते व्यभिचरति सा इह लोके गर्हा प्राप्नोति भर्त्रा सहा-र्जितं स्वर्गादिलोकं न प्राप्नोति । किं चापत्यमपि तत्तस्या न भवति । गोरा.

(३) अत्रापि नियोगो वाग्दत्ताविषय एव । इतरस्य नियोगस्य मनुना निषिद्धत्वात् । 'देवराद्वा सपिण्डाद्वा' (मस्मृ.९।५९,६०) इत्येव नियोगमुपन्यस्य मनुः स्वयमेव निषेधति 'नान्यस्मिन्विधवा' (९।६४-६८) इत्यादि । न च विहितप्रतिषिद्धत्वाद्विकल्प इति मन्तव्यम् । नियोक्तृणा निन्दाश्रवणात् । स्त्रीधर्मेषु व्यभिचारस्य बहुदोषश्रवणात्, संयमस्य प्रशस्तत्वाच्च । यथाह मनुरेव 'काम तु क्षपयेदि'ति (५।१५७) जीवनार्थं पुरुषान्तराश्रयण प्रति षिध्य 'आसीतामरणादि'त्यादि (मस्मृ.५।१५८ १६१) पुत्रार्थमपि पुरुषान्तराश्रयण निषेधति । तस्माद्विहित-प्रतिषिद्धत्वाद्विकल्प इति न युक्तम् । एवं विवाह-संस्कृतानियोगे प्रतिषिद्धे कस्तर्हि धर्म्यो नियोग इत्यत आह 'यस्या म्रियेत कन्याया' (मस्मृ. ९।६९-७०) इत्यादि । यस्मै वाग्दत्ता कन्या स प्रतिग्रहमन्तरेणैव तस्याः पतिरित्यस्मादेव वचनादवगम्यते । तस्मि-न्प्रेते देवरस्तस्य ज्येष्ठः कनिष्ठो वा निजः सोदरो विन्देत परिणयेत् । यथाविधि यथाशास्त्रमधिगम्य परिणीय अनेन विधानेन घृताभ्यङ्गवाङ्नियमादिना शुक्लवस्त्रा शुचिव्रता मनोवाक्कायसंयता मिथो रहस्यागमग्रहणात्प्रत्यृतवेक-वारं गच्छेत् । अथ च विवाहो वाचनिको घृताभ्यङ्गादि-नियमवन्नियुक्ताभिगमनाङ्गमिति न देवरस्य भार्या-त्वमापादयति । अतस्तदुत्पन्नमपत्य क्षेत्रस्वामिन एव भवति न देवरस्य । संविदा तूभयोरपि ।

मिता.२।१२७

नान्योत्पन्ना प्रजाऽस्तीह न चान्यस्य परिग्रहे ।
न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते ॥

(१) अन्येन भर्त्रा या उत्पादिता प्रजा सा नैव तस्याः प्रजा । अन्यदारेषु च या पुंसोत्पादिता साऽपि तस्य न भवति । मेधा.

(२) भर्तृव्यतिरिक्तेन या उत्पादिता प्रजा सेह शास्त्रीया न, तस्मात्पौनर्भवसंस्कारादियोगेनापि न भर्त्रन्तरमाश्रयणीयम् । गोरा.

---

(१) **मस्मृ.**५।१६०; **मिता.**२।१२७; **व्यक.**१३८ चर्ये (चर्ये); **स्मृच.**२५४; **विर.**४४४; **नृप्र.**३९; **व्यप्र.**४७२; **विभ.**२८; **समु.**१२५.

(२) **मस्मृ.**५।१६१ ख. पुस्तके, पति (पर); **मेधा.** पति (पर); **मिता.**२।१२७ मेधावत्; **व्यक.**१३८ पति... हीयते (लोकाच्च परिहीयते); **स्मृच.**२५४; **विर.**४४४; **नृप्र.**३९ मेधावत्; **सवि.**३८९ मेधावत्; **व्यप्र.**४७२; **विभ.**२८; **समु.**१२५.

(१) **मस्मृ.**५।१६२ क., ग., घ. पुस्तकेषु, न्यस्य (प्यन्य); **मिता.**२।५१ उत्त.; **व्यक.**१३८ न द्वितीयश्च (द्वितीयस्तु न); **विर.**४४४ व्यकवत्; **पमा.**२७२ उत्त.; **विभ.**२८ व्यकवत्; **समु.**१३८ उत्त.

पतिं हित्वाऽपकृष्टं स्वमुत्कृष्टं या निषेवते ।
निन्द्यैव सा भवेल्लोके परपूर्वेति चोच्यते ॥
व्यभिचारे तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते* ॥

(१) न केवल निन्दामेव येन 'व्यभिचारात्तु' इत्यादि । अतो नातिचरेद्भर्तार इष्टादृष्टफललोभेन । मेधा.

(२) पतिमिति । या क्षत्रियादिका स्व पति परित्यज्य उत्कृष्ट ब्राह्मणादिकमाश्रयति सा उत्कृष्टसेवनेनापि गर्हणीयैव लोके भवति । परोऽन्यो भर्ता पूर्वो यस्याः सा परपूर्वेत्येव च लोके उच्यते । व्यभिचार इति । नरान्तरसंपर्कात्तु स्त्री इह लोके गर्ह्यता जन्मान्तरे च शृगालयोनि प्राप्नोति । अत्यन्तक्रूरैश्च कुष्ठादिरोगैः सपीड्यते । गोरा.

पतिं या नाभिचरति मनोवाग्देहसंयता ।
सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते* ॥

या मनोवाग्देहसयता सती तेषांऽमनोदेहैः पतिं न व्यभिचरति सा भर्त्रा सह अर्जितान् स्वर्गादिलोकान् प्राप्नोति । इह शिष्टैः साध्वीत्युच्यते । इति वाङ्मनसनिरासार्थमुक्त पुनर्वचनम् । गोरा.

अनेन नारीवृत्तेन मनोवाग्देहसंयता ।
इहाग्र्यां कीर्तिमाप्नोति पतिलोकं परत्र च ॥

(१) स्त्रीधर्मोपसहारश्लोका ऋजवश्च स्त्रीधर्मा इत्यतो मयाऽत्र व्याख्यानादरः कृतः, एतावत्तत्रोपदेशार्थः । यथा पुसोऽन्यया सह पुनःप्रवृत्तिकर्म, नेह 'संस्थितं च न लङ्घयेत्' इत्यनेन न्यायेन पुनः सहप्रवृत्तिरिति । तथा 'स्वर्गं गच्छत्यपुत्राऽपि' इत्यनेनापत्यजननमापदि प्रतिषिध्यते । नियोगस्मृत्या तु तत्पुनरभ्यनुज्ञास्यते । तदेतदपत्योत्पादनमुक्तप्रतिषिद्धत्वाद्विकल्प्यते । अनयोस्तु स्मृत्योः कतमा स्मृतिर्ज्यायसीति न शक्यं कर्तुमतिशयावधारणं येनैकत्रापत्यमन्यत्रास्याः सयमः । उभयोरपि वस्तु निर्वहति । मेधा.

(२) मनोवाक्कायसयता नार्यनेन पूर्वोक्तेनाचारेणेह लोके श्रेष्ठा कीर्तिं पतिलोक च परलोके प्राप्नोतीत्युपसहारार्थम् । गोरा.

नियोगविधिः

अतः परं प्रवक्ष्यामि योषितां धर्ममापदि ॥

आपज्जीवनस्थितिहेतुभूतभोजनाच्छादनाभावः सतानविच्छेदश्च । मेधा.

भ्रातुर्ज्यैष्ठ्यस्य भार्या या गुरुपत्न्यनुजस्य सा ।
यवीयसस्तु या भार्या स्नुषा ज्येष्ठस्य सा स्मृता ॥

(१) श्लोकद्वयेन प्राकृतव्यवस्थामनुवदत्यापदि नियोगविधातु, ज्येष्ठोऽग्रे जातः, अनुजः पश्चाज्जातः कनीयान्यवीयाननुज एव । मेधा.

(२) ज्येष्ठभ्रातृपत्नी अनुजस्य गुरुभार्यया तुल्या । कनीयसः पत्नी पुनर्ज्यैष्ठ्यस्य स्नुषा प्रचक्षते । गोरा.

(३) स्नुषा स्नुषावद्यवहर्तव्या । मवि.

(४) वक्ष्यमाण आपद्भोजनापदि न कर्तव्य इति श्लोकद्वयेनाह—भ्रातुर्ज्यैष्ठ्यस्येति । नन्द.

ज्यैष्ठो यवीयसो भार्यां यवीयान्वाऽप्रजस्त्रियम् ।
पतितौ भवतो गत्वा नियुक्तावप्यनापदि ॥

(१) इतरेतरभार्यागमने ज्येष्ठानुजयोः पातित्यमनापदि सत्यपि नियोगे । मेधा.

(२) ज्येष्ठः कनीयसः पत्नी कनीयान् ज्येष्ठभार्यायां वक्ष्यमाणनीत्या गुरुनियुक्तावपि सामान्य गत्वा पतितौ भवतः । गोरा.

---

* इदं श्लोकद्वयं (५।१६४,१६५) नवमे अध्याये पुनरुक्तम् । तत्र मेधातिथिना 'पञ्चमे श्लोकाविमौ व्याख्यातौ' इत्युक्तम् । म म. गंगानाथ झा महोदयैस्तु प्रकृतश्लोकद्वय पञ्चमेऽपि न व्याख्यातमिति प्रदर्शितम् । वस्तुतस्तु लेखकप्रमादात् 'पतिं हित्वे'त्यत्रैव श्लोकत्रयव्याख्यान लिखितमिति भाति । तच्च पूर्वश्लोकोद्धृतव्याख्यान अस्माभिः अर्थानुसधानेन विभज्य तत्र तत्र श्लोके पृथक्कृत्य दत्तम् ।

(१) **मस्मृ.**५।१६३ ख. पुस्तके, पङ्क (वङ्क); **विर** ४५२ सा भवेल्लोके (लोके भवति); **विभ.**३३ पङ्क (वङ्क) शेष विरवत्.

(२) **मस्मृ.**५।१६४; **मेधा.** चारे तु (चारात्तु). **स्मृच.** २४२; **विर.**४३७ प्राप्नो (आप्नो); **स्मृचि** २८ लोके (लोक) निन्द्यताम् (निन्दितम्); **समु.**१२१.

(३) **मस्मृ.**५।१६५; **स्मृच.**२४१ नाभि (नाति) वाग्देह (वाक्काय) लोकमा (लोकाना); **विर.**४३६ वाग्देह (वाक्काय); **स्मृचि.**२८; **समु.**१२०.

(४) **मस्मृ.**५।१६६; **व्यक.**१३६; **स्मृच.**२५२; **विर.** ४३६ इहाग्र्यां कीर्तिमा (इह कीर्तिमवा); **विभ.**२१ इहाग्र्यां कीर्तिमा (इहलोकमवा); **समु.**१२४. (१) **मस्मृ.**९।५६.

(२) **मस्मृ.**९।५७. (३) **मस्मृ.**९।५८; **बाल.**२।१२७.

[1]**देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया।**
प्रजेप्सिताऽधिगन्तव्या संतानस्य परिक्षये ॥

(१) सर्वविशेषेण विशिष्टोऽनेन नियोगो विधीयते। संतानस्य परिक्षये नियुक्तया देवरादिभ्यः सम्यक् प्रजोत्पादयितव्येति। यदुक्तं 'योषिता धर्ममापदि' इति सेयमापत् सतानस्य परिक्षयः। सतानशब्देन पुत्र उच्यते दुहिता च पुत्रिका। सा हि पितुरश सतनोति नान्या। तस्य परिक्षयोऽनुत्पत्तिरुत्पन्ननाशो वा पुत्रिकार्याश्राकरणम्। न हि स्त्रियाः केवलायाः पुत्रिकाया मन्यस्मिन्वा पुत्रप्रतिनिधावधिकार इति वक्ष्यामः। नियुक्तोत्पादयेदनुज्ञाता गुरुभिः। कुतः पुनः गुरुभिरिति। स्मृत्यन्तरनिदर्शनात्। अथवा नियोगशब्दादेव। नियोगो हि गुरुसबन्धी लोकेऽप्युच्यते। न हि शिष्येण नियुक्तोऽध्यापयतीत्युच्यते। आचार्येण नियुक्तः करोत्यनुवदति। गुरवश्च श्वश्रूश्वशुरदेवरादयो भर्तृसगोत्रा द्रष्टव्याः। न पित्रादयः। एतेनापत्येनापत्यवन्तस्ते उच्यन्ते। येषा चोपकारस्तत्कृत और्ध्वदेहिको भवति। यत्रैव, मातामहस्यापि दौहित्रोपकारोऽस्ति। ततः पित्रा दुहिता नियोक्तव्येत्यापन्नम्। उक्तम्। येनापत्यवन्त उच्यन्ते। देवरसपिण्डग्रहणेन तद्गोत्रा एव हृदयमागच्छन्ति। महाभारते च तत्र तत्र नियोक्तृभावो भर्तृपक्षिणामेव दर्शितः। अत एव भ्रातृपुत्रे सति न नियोगः कर्तव्यः। ये हि नियुक्तास्तेषामेव सतानोपकारः, पुत्रजनितस्नेहप्रीत्योपकारमर्थयमाना अधिक्रियन्ते। न मृतस्याधिकारोऽस्ति, कथं तर्हि तस्यापत्यमिति व्यपदिश्यते। कथंचित्पिण्डदाने स उपकरोति। वचनादिति च ब्रूमः। न ह्यपत्यमुत्पादयितव्यमित्येष विधिस्तेनानुष्ठित इति, तथापि तदीये क्षेत्रे नियोगविधिजातेन पिण्डदानादि कर्तव्यमिति शास्त्रार्थः। ततश्च तस्योपकारकत्वमवगतम्। यथा चैतत्तथा पुरस्तान्निपुण वक्ष्यामः।

देवरः पतिभ्राता। सपिण्डः पत्यन्वयः। स एव स्त्रियाः। स्मृत्यन्तरे जातिमात्राच्चेत्युक्त भवति। सम्यगिति घृताक्तादिनियम वक्ष्यमाणमनुवदति। प्रजेप्सिताऽधिगन्तव्या विधौ कृत्यः, ईप्सित शब्देन कार्यक्षमतामाह। ततो दुहितर्यन्यवधिरादौ च जाते पुनर्नियोगोऽनुज्ञेयः। मेधा.

(२) स्त्रिया भर्तुरभावे श्वशुरादिभिर्भर्त्रा वा व्याधितेन वा पुत्रोत्पादनविधियुक्तत्वात् नियुक्ततया भर्तृभ्रातुस्तदभावे तत्सपिण्डस्य वा सकाशादभीष्टाः पुत्रलक्षणप्रजाः पुत्राभावात्संपादनीयाः। गोरा.

[2]**विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।**
एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन ॥

(१) विधवाग्रहणमतन्त्रम्। क्लीबादिरूपे पत्यौ जीवत्यप्येष एव विधिः घृताक्त इति। यतो वक्ष्यति 'नियुक्तो यो विधि हित्वे'ति। एतदेव तस्य प्रयोजन, नियमोऽत्र विषयाणाम्। न नियमानाम्। अन्यथा विज्ञायेत अप्रकृतत्वाद्विधवाया एव स्युः। निशि, प्रदीपाद्यालोकनिवृत्त्यर्थमेतत्। वचनान्तरेण दिवोपगमनप्रतिषेधात्। अन्ये त्वाहुः पुरुषार्थोऽसौ प्रतिषेधः, कर्मार्थस्त्वय, तेनाह्नि गमन न, क्षेत्रजमेकमुत्पादयेत्पुत्र न द्वितीयम्। मेधा.

(२) विधवाया प्रजोत्पादनसमर्थपतिहीनाया प्रमीतस्य क्लीबस्य व्याधितस्य वेति स्मृतेः। न द्वितीयमिति केषाचिन्मतम्। मवि.

[3]**द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः।**
अनिवृत्तं नियोगार्थं पश्यन्तो धर्मतस्तयोः ॥

(१) अस्य (पूर्वश्लोकस्य) प्रतिप्रसवः। द्वितीयः पुत्र इत्येकेषा मतम्। तद्विदः क्षेत्रजोत्पत्तिविधिज्ञाः। अनिवृत्त नियोगार्थं पश्यन्तो नियुक्तया प्रजोत्पादयितव्येत्यस्य विधेरेकस्योत्पादनेनासपत्ति मन्यन्ते। कस्तेषामभिप्रायः। एकवचनमविवक्षित मन्यन्ते। द्रव्यप्रधानत्वात् कर्मणो गुणभावादविवक्षा ग्रहैकत्ववत्। ननु चानुपात्तोपदेशे,

(१) **मस्मृ.**९।५९; **मिता.**२।१२७; **व्यक.**१३८ प्सिता (प्सया); **विर.**४४५; **पमा.**५१९, **सुबो.**२।१२७ पू.; **नृप्र.** ३९; **सवि.**३८८ धि (भि): ३९० उत्त.; **व्यप्र.**४७१; **बाल** २।१३५ (पृ.२४१), **विभ.**२९; **समु.**१३८.

१ याश्वक. २ या.

(१) **मस्मृ.**९।६०, **मिता.**२।१२७, **पमा.**५१९; **नृप्र.** ३९; **सवि.**३८८; **व्यप्र.**४७१; **बाल.**२।१३५(पृ.२४१); **समु.**१३८.

(२) **मस्मृ.**९।६१ ख. पुस्तके, वृत्त (वृत्त); **मेधा.**मस्मृवत्; **मवि.**वृत्त (वृत्त); **मच.** मविवत्, **बाल.**२।१३५ (पृ.२४१) मविवत्; **समु.**१३८ मविवत्, **नन्द.** मविवत्.

१ (घृताक्त इति०) २ न स. ३ गुणभा.

सत्यपि द्वितीयया द्रव्यप्राधान्यावगमे, सख्यादिविशेषेण विवक्षा स्थितैव । 'उद्वहेत द्विजो भार्याम्' इति । लिङ्गादपत्यविधावेकत्वसख्यातिक्रमो 'दशास्या पुत्राना धेही'ति (ऋसं. १०।८५।४५) । यदेवं न द्वित्व एवावस्थानं, अस्यामेवाशङ्काया द्वितीयमिति वचनं अन्यनिवृत्त्यर्थमर्थवत् । मन्त्रस्याप्ययमभिप्रायः ? न । औरसे लिङ्ग विवाहप्रकरणे तु मन्त्रपाठात् । इह त्वेकत्वातिक्रमः । अपुत्र एकपुत्र इति शिष्टप्रवादात् । अथवाऽस्या एव स्मृतेर्द्वितीयपुत्रस्तुतिकल्पनात् । धर्मतः शिष्टाचारतः ।
मेधा.

(२) केचित्पुनराचार्याः पुत्रविधिज्ञा एकपुत्रोऽपुत्रतुल्य इत्येवमेकपुत्रोत्पादने सति धर्मेण तयोरनिष्पन्न नियोगप्रयोजनं मन्यमानाः स्त्रीषु द्वितीयपुत्रोत्पादन मन्यन्ते ।
गोरा.

[1]विधवायां नियोगार्थे निर्वृते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्तेयातां परस्परम् ॥

(१) इह तु नियोगविषयो यत्र नियुज्यते, स च संप्रयोगाभिमर्दपर्यवसान उपगमनलक्षणस्तस्मिन्निवृत्ते पूर्ववृत्तिर्गुरुवत्स्नुषावज्ज्येष्ठस्य भार्याया गुरुवद्यवीयसः स्नुषावत्परस्परग्रहणात् स्नुषावद्वर्तेत स्त्रीपुरुषे ज्येष्ठे देवरे गुरुवत् ।
मेधा.

(२) विधवादिकाया नियोगप्रयोजने गर्भधारणे यथाशास्त्रं सपन्ने सति ज्येष्ठो भ्राता कनिष्ठभ्रातृभार्या च परस्परं गुरुवत्स्नुषावच्च व्यवहरेताम् ।
मसु.

[2]नियुक्तौ यौ विधिं हित्वा वर्तेयातां तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषागगुरुतल्पगौ ॥

(१) विधि, 'घृताक्त' इत्यादिस्तदतिक्रमे पातित्यम् । नियुक्तो ज्येष्ठः स्नुषागः पुमान्गुरुतल्पगः कनीयान् । मेधा.

(२) पूर्व नियुक्तयोर्विधिमुक्त्वा कामतो गमनं निषेधति—नियुक्ताविति । गुरुतल्पगाविति अनियुक्तदशायां ज्येष्ठकनिष्ठयोः अतिपातकित्वमहापातकित्वख्यापन तदुचितप्रायश्चित्तप्रदर्शनार्थम् । यद्यप्यावश्यकत्वेनेतिकर्तव्यतापेक्षा तथाप्यत्र सैव विधेया तदकरणे रोधः पातित्यहेतुः पुत्रोत्पादनस्य रागावरोधात् । अत एव देवरपदं भ्रातृमात्रोपलक्षकं, तथा च ज्येष्ठस्यापि व्यासस्य विचित्रवीर्यभार्यागमन निदर्शनं संगच्छते । सपिण्डपदं तूत्कृष्टजातिपरं तेनेन्द्रादिभ्यः पाण्डवाद्युत्पत्तिः । 'अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया । सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥ आगर्भसभवाद्गच्छेदन्यथा पतितो भवेदि'ति सकलितो याज्ञवल्क्येन पञ्चश्लोकार्थः ।
मच.

नियोगनिषेधविचारः

[3]नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन्हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥

(१) पूर्वेण विहितस्य नियोगस्य प्रतिषेधोऽयम् । तत्र केचिद्विधवाग्रहणान्मृतभर्तृकायाः प्रतिषेधः क्लीबेन तु पत्या नियोक्तव्येति विधिप्रतिषेधौ विभक्तविषयाविति प्रतिपन्नाः । अन्ये तु विधिवाक्ये सतानविच्छेदस्य निमित्तश्रवणात्तस्य च क्लीबव्याधितयोरिव मृतस्याप्युपपत्तेर्भेदेन विधिवत्प्रतिषेधोऽप्यविशिष्ट एव । अपेतधवसंबन्धा विधवेत्युच्यते । तत्तुल्यमुभयत्रापि । अवश्य चैतदेव विज्ञेयं, इतरथा घृताभ्यक्तादिनियमोऽपि क्लीबेन नियुज्यमानाया न स्यात् । तत्रापि ह्यामनन्ति 'विधवाया नियुक्तश्च घृताक्त' इति । तस्माद्विहितस्याविशेषेण प्रतिषेधोऽप्यविशिष्टः । अतश्च विषयसमत्वे विधिनिषेधयोर्विकल्पः । अय च नित्योऽपत्योत्पादनविधिः विकल्प एव कल्पते ग्रहणाग्रहणवत् । यदा तु 'पुत्रेण लोकान् जयति' इत्येवमादिफलोत्पादनविधिस्तदाऽसत्यपत्ये तत्कार्यस्यौर्ध्वदेहिकस्योपकारस्याभावाद्विन्नफलयोः कुतो विकल्पः । समानविषयौ विधिनिषेधावेकार्थे विकल्पेते । षोडशीग्रहणाग्रहणयोरिति केचित् । उक्तमङ्गभूयस्त्वे फलभूयस्त्वम् । प्रधानकार्यसिद्धौ त्वविशेषः तस्मादस्मिन्पक्षे पुत्रोपकाराभावमाह । उपकारविशेषार्थेनास्य प्रवृत्तौ प्रति-

(१) मस्मृ.९।६२ ख. पुस्तके, वृत्ते (वृत्ते), घ. पुस्तके, वृत्ते वृत्ते); मेधा.वृत्ते (वृत्ते); विभ ३० वृत्ते (वृत्ते); समु.१३८ वेभवत्. (२) मस्मृ ९।६३; बाल.२।१२७; समु.१३८

१ वता, २ तस्याप्य, ३ औरसे न लि.

(१) मस्मृ.९।६४; गोरा. द्विजातिभिः (कदाचन); मिता. २।१२७,२।१३६; विर.४४८ द्विजातिभि. (खबन्धुभिः) हि (च); पमा ५१९; सुबो २।१२७; नृप्र ३९; सवि. ३८८ हि (वि); व्यप्र.४७१; व्यउ.१५२,१५३ हि (वि), बाल.२।१३५(पृ.१९३) (=) उत्त.; विभ.३१ विरवत; समु.१३८ ना ध (नो ध) न्यु· (न्यात).

१ तयोर्मृत, २ त्तिभेदः । न च विध्यभावप्रति.

षेधातिक्रमेण श्येनतुल्यता । इदं त्वत्र निरूप्यम् । योऽसौ नियुज्यते स किमिति प्रवर्तते । न हि तस्य विधिरस्ति 'नियुक्तेन गन्तव्यम्' इति । स्त्रियाः पुनर्विद्यते 'सम्यक् स्त्रिया नियुक्तये'ति । न च देवरादिषु प्रवर्तमानेषु स्त्रिया नियोगसिद्धिरित्यर्थः । तेषामपि प्रवृत्तिस्तद्विधिना क्षेत्रज ईप्सित इति वाच्यम् । यतो रागतः प्रवृत्तिरुपपद्यते । घृताक्तादिनियमविधानमनर्थकमिति चेन्नानर्थकम् । तथा-नियमैरुत्पन्ने क्षेत्रजव्यपदेशो नान्य इति । यदपि गुरु-वचनं कर्तव्यमिति केचित्प्रवृत्तिनिबन्धनमाहुः । एव सति सुरापानादिष्वपि गुर्विच्छया प्रवृत्तिः प्राप्नोति । न चासौ गुरुरकार्ये यः प्रवर्तयति ।

'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथ-प्रतिपन्नस्य परित्यागो विधीयते ॥' इति स्मरणात् । परित्यागश्च गुरुकार्यान्निवृत्तिः । एतेनैतदपि प्रत्युक्त, यन्नियमातिक्रमपातित्यवचनं नियमपूर्विका प्रवृत्तिमनु-जानाति 'तावुभौ पतितौ स्याताम्' इति, इतरथा सर्व-प्रकारं गच्छतः पातित्यमिति विशेषपातित्यमनुपपन्नम् । यतस्तन्न केवलस्य पुसः श्रूयते किं तर्हि, स्त्रिया इति, तस्याश्च पुत्रार्थिन्या नियोगो विहितस्तदपेक्ष्यं हि व्यति-क्रमे पतितवचनं 'तावुभौ पतितौ स्याताम्'इति । असति व्यतिक्रम एकः पतितः पुमानेवातिक्रमे तु द्वावपीत्येवमपि लिङ्गान्निर्गच्छत्येव । तस्माद्देवरादेर्विधिलक्षणा प्रवृत्तिः कथमिति वक्तव्यम् । उच्यते । व्यासादिदर्शनेनापत्य-पिण्डदान इव क्षेत्रजोत्पत्त्यर्थं सपिण्डाना गुरुनियोगा-पेक्षा तदा नापगमेन स्तुतिरस्तीत्यनुमन्तव्यम् । न हि महात्मना रागलक्षणा प्रवृत्तिरभ्युपगन्तु न्याय्या । यच्चोक्त नियमातिक्रमे पतितत्ववचनं लिङ्गमिति तदयुक्तम् । यतः पुंसः पतितत्वे पतितोत्पन्नस्याधिकाराभावादुत्पादन-मनर्थक तस्मादस्ति देवरादिविधेराभासोऽयम् । मेधा.

(२) विधवा नारी अन्यस्मिन्देवरादौ न नियो-जनीया । यस्मात्ते देवरादौ नियोजयन्तोऽनादिधर्ममेक-पत्नीव्रतं सपरिपेधं नाशयेयुः । *गोरा.

(३) नान्यस्मिन् पतिसोदरसपिण्डभ्रातृभ्याम् । मवि.

(४) ननु विधवाया नियुक्त इति लिङ्गाद्विधवायाः पुनर्विवाहोऽपि स्यात् भोग्यतासंपादकत्वस्य तुल्यन्याय-त्वात् तत्राह—नेति पञ्चभिः । नान्यस्मिन्नुक्तातिरिक्ते न नियोक्तव्या । कुतस्तत्राह अन्यस्मिन्निति । नियुञ्जानाः यथावत् पाणिग्रहमन्त्रविधिना तज्ज्ञेयं अन्यथा विधि-निषेधयोः परस्परविरोधः । धर्ममेकपतित्वम् (द्रौपदी त्वर्जुनस्यैव सती कायव्यूहेनान्यान्भोजयतीति भट्टोक्तम् ।) सनातनं वेदोक्त्यादौ । मन्त्र.

(५) योऽस्य नियोग उक्तः सोऽर्वाचीनैर्दुरनुष्ठानस्त-स्मात्स नानुष्ठेय इति श्लोकपञ्चकेनाह—नान्यस्मिन्विध-वेति । अन्यस्मिन् भर्तुरन्यस्मिन्, नियुञ्जाना द्विजातयः, सनातन वेदविहित अनन्यनियोगरूपं धर्मं हन्युः । नन्द.

(६) द्विजातिभिः विधवा नारी अन्यस्मिन्नियोगान-धिकारिणि (अ)सपिण्डादौ न नियोक्तव्या । भाच.

[1]नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं पुनः ॥

(१) उद्वाहः कर्म तत्र ये मन्त्राः प्रयुज्यन्ते 'अर्य-मण नु देव कन्या अग्निमयक्षत' इत्यादयस्तथान्येऽपि तत्सबन्धाः 'मया पत्या जरदष्टिः' इति, 'मया पत्या प्रजावती'ति, तत्र सर्वत्र वोढुर्वरयितुः स्वापत्य भवती-त्याहुः । न तत्र श्रूयते मया यत्र नियुज्यसे ततो जन-येति, मन्त्रग्रहणेनैतद्दर्शयति । मन्त्रार्थवादा अपि नैव-विधाः सन्ति । दूरत एव तद्दर्शयति । 'न विवाहविधा-वुक्त विधवावेदन पुनः' । आवेदन गमनमभिप्रेतमत्र । अथ विवाह एवेय वा सयुज्यते, विवाहविष्यति देवरो भ्रातृजाया, ततोऽय नियोगो विवाहविहित एव । न त्वत्र विवाहविधिरिति । पूर्वशेषोऽयमर्थवादः । मेधा.

(२) एवमेतत्सर्वमृष्यन्तरमतमुक्त्वा स्वमतमाह — नेति । न कीर्त्यते न मन्त्रलिङ्गाद्गम्यते । विवाहविधौ ब्राह्मणभागे । मवि.

(३) 'अर्यमण नु देवमि'त्येवमादिषु विवाहप्रयोजन-केषु मन्त्रेषु क्वचिदपि शाखाया न नियोगः कथ्यते न च विवाहविधायकशास्त्रेऽन्येन पुरुषेण सह पुनर्विवाह उक्तः । +ममु.

* ममु. गोरावत् ।

+ गोरा. ममुवत् । अशुद्धिग्रस्तत्वात् गोरा. नोद्धृता ।

(१) **मस्मृ.**९।६५; **मिता.**२।१२७; **विर.**४४८ नो (नौ); **पमा.**५१९; **नृप्र.**३९ पू.; **सवि.**३८८; **व्यप्र.**४७१ विरवत्; **विभ.**३१; **समु.**१३८ विरवत.

(४) विवाहविधौ ब्राह्मो दैव इत्यादौ। मच.

(५) विवाहविधौ विवाहप्रतिपादकब्राह्मणभागे। भाच.

अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति॥

(१) अयमप्यर्थवाद एव नियोगप्रतिषेधशेषः। येऽविद्वांसः सम्यक् शास्त्रं न जानते, तत्र व्यवहारिणो लिङ्गाद्यन्यपरत्वं च न जानते, तैरयं पशुधर्मः स चात्यन्तगर्हितो मनुष्याणामपि प्रोक्तः प्रवर्तितः। स चेदानीन्तनो नैनादिः, वेने राज्ञि प्रशासति राष्ट्रं पालयति।

ननु च लिङ्गानि नैव सन्तीत्युक्तम्। नैवमुद्वाहिकेषु मन्त्रेषु न सन्तीत्युक्तम्। अन्यत्र तु दृश्यते। 'को वा शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ' इत्यादि (ऋसं.१०।४०।२)। यथा विधवा स्त्री देवरपतिं मनुष्य कुरुते समान शयन एव, को वा मनस्विनौ कुरुते, येन नागच्छतः, को विशेषो विवाहमन्त्रेषु, स किं, अपत्योत्पत्तिविधयनुक्रमरूप इत्यभिप्रायः। अन्यैर्विद्वद्भिरिति पठितं, गर्हितो मनुष्याणा प्रोक्तः पशूनामेष धर्मो भ्रातृस्त्रीगमन नाम। स च प्रवृत्तो वेनस्य राज्ये। मेधा.

(२) अपि न विधवाया वेदन भर्तृलाभः पुनरित्युक्त तर्हि कथं देवरोपगमाचारस्मृती इत्यत आह अयमिति। द्विजैर्वेहुभिः गर्हितः पशुधर्मः पशूनामेव धर्मो गुरुस्त्रीस्नुषागमन मनुष्याणामपि धर्मेण कैश्चिन्मुनिभिः प्रोक्तो, वेने पृथोः पितरि पापकर्मप्रवर्तके राजनि। मवि.

(३) यस्मादयं पशुसंबन्धी मनुष्याणामपि व्यवहारो विद्वद्भिर्निन्दितः। योऽयमधार्मिके वेने राज्ञि राज्यं कुर्वाणे तेन कर्तव्यतया प्रोक्तः। अतो वेनादारभ्य प्रवृत्तोऽयमादिमानिति निन्द्यते। +ममु.

(४) वेने राज्य प्रशासतीत्यर्थवादमात्र 'एकमुत्पादयेत्पुत्रमि'ति विधिविरोधात्। मच.

+ गोरा. ममुवत्। अशुद्धिग्रस्तत्वात् गोरा. नोद्धृता।

(१) **मस्मृ**.९।६६; **मिता** २।१२७, **विर**.४४८; **पमा**. ५१९; **नृप्र**.३९ पू; **सवि**.३८८ वेने (वैने), **व्यप्र** ४७१; **विभ**.३१ अय (स्वय); **समु**.१३८ प्रोक्तो (प्राप्तो).

१ आदि वे.

स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा।
वर्णानां संकरं चक्रे कामोपहतचेतनः॥

(१) भुञ्जन्पालयन्। कथ पुनर्वर्णसकरं प्रवर्तयन् राजर्षीणा प्रवरः? उक्त महीमखिला भुनक्ति यः महाराजत्वात्। कामेन रागादिलक्षणेनोपहता नाशिता चेतना चित्तस्थैर्य यस्य सः। मेधा.

(२) स वेनः पूर्व समग्रा पृथिवीं पालयन्नत एव राजर्षिश्रेष्ठो न तु धार्मिकः ततो ब्राह्मणानुज्ञयैतद्भ्रातृभार्यागमनलक्षणं वर्णसंकरं प्रवर्तितवान्। गोरा.

ततःप्रभृति यो मोहात्प्रमीतपतिकां स्त्रियम्।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः॥

(१) स्पष्टार्थोऽर्थवादः। मेधा.

(२) एव चेदानींतनत्वादमुष्याचारस्य, तस्माद्येनकालात्प्रभृति यो मृतभर्तृका स्त्रिय नियोजयति स सम्यक्शास्त्रविगर्हितः एव च विहितप्रतिषेधत्वान्नियोगस्य कालसूत्र(?)नियोक्तृणा निन्दाश्रवण स्त्रीधर्मेषु। गोरा.

(३) येनकालात्प्रभृति यो मृतभर्तृकादिस्त्रिय शास्त्रार्थाज्ञानादपत्यनिमित्त देवरादौ नियोजयति त साधवो नियत गर्हयन्ते। अय च स्वोक्तनियोगनिषेधः कलियुगविषयः। तदाह बृहस्पतिः—'उक्तो नियोगो मुनिना निषिद्धः स्वयमेव तु। युगक्रमादशक्योऽय कर्तुमन्यैर्विधानतः॥ तपोज्ञानसमायुक्ताः कृतत्रेतायुगे नराः। द्वापरे च कलौ नृणा शक्तिहानिर्हि निर्मिता॥ अनेकधा कृताः पुत्रा ऋषिभिश्च पुरातनैः। न शक्यन्तेऽधुना कर्तुं शक्तिहीनैरिदतनैः॥' अतो यद्गोविन्दराजेन युगविशेषव्यवस्थामज्ञात्वा सर्वदैव सतानाभावे नियोगादनियोगपक्षः श्रेयानिति स्वमनीषया कल्पित तन्मुनिव्याख्या विरोधान्नाद्रियामहे। प्रायशो मनुवाक्येषु मुनिव्याख्यान-

(१) **मस्मृ**.९।६७; **मिता**.२।१२७; **विर**.४४९; **पमा**. ५२०, **सवि**.३८८; **व्यप्र**.४७१, **विभ**.३१; **समु**.१३८.

(२) **मस्मृ**.९।६८; **गोरा**. ततः (तदा); **मिता**.२।१२७ र्थं त विगर्हन्ति (र्थैं गर्हन्ते त हि); **विर**. गोरावत्, **पमा**. ५२०; **सवि**.३८८ मितावत्; **मच**. गोरावत्; **व्यप्र**.४७१ मितावत्; **विभ**. गोरावत्; **समु**.१३८; **नन्द**. गोरावत्; **भाच**. गोरावत्.

मेव हि । नापराध्योऽस्मि विदुषा क्राह सर्वविदः कुधीः ॥' +ममु.

(४) ततः किं तत्राह तदेति । प्रमीतपतिका प्रमीतो हिंसितः पतिर्यस्यास्ता पुत्रवतीमिति शेषः । यो नियोजयत्यपत्यार्थेऽपत्योत्पादनाय तं विगर्हयन्तीत्यन्वयः । अपत्यार्थे विद्यमानपुत्रे सतीति । एषु वेदनश्रुत्यनुरोधेन 'यस्या म्रियेत' इत्युत्तरस्वरसात् 'सकृत्प्रदीयते कन्या' इत्यादिवचनबलात्पुनर्विवाहो निषिद्धो न त्वपत्यार्थे नियोग इति । यत्तु बृहस्पतिः—'उक्तो नियोगो मनुना' इत्यादि । तदन्यथा सिद्ध, निषेधस्य पुनर्विवाहविषयत्वात् । पुत्रप्रयोजना भार्येति तात्पर्यम् । शास्त्रतात्पर्यादग्नीषोमीयपशोरिव क्वचिदननुष्ठानस्य शास्त्रासंकोचकत्वाद्धोलाकाद्यननुष्ठानवत् 'एकमुत्पादयेत् पुत्रमि'ति नियोगविधेः प्राधान्येनार्थवादस्य 'न हिंस्यात्सर्वभूतानी'तिवत् स्तनाद्युपमर्दरागनिवर्तनेनान्यथासिद्धेर्गोविन्दराजव्याख्या गरीयसी । अन्यथा सतानकृतेर्दोषापत्तिः । यत्तु 'अग्निहोत्र गवालम्भ सन्यास पलपैतृकम् । देवरेण सुतोत्पत्तिः कलौ पञ्च विवर्जयेदि'ति ॥ तदमूलम् । समूलत्वे वा लाभाख्यात्यादिरागिना निवृत्तितात्पर्यकम् । अन्यथा 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' । 'यावज्जीवमग्निहोत्र जुहोती'त्यादि श्रुतिविरोधश्चेति दिक् । अत एव मेधातिथिर्देवराद्वेत्यादि साधव इत्यन्ते ग्रन्थे षोडशिग्रहणादिवद्विकल्पः नियोगतदभावयोः, पित्राद्युद्धरण फलं, गन्तुश्च परमोपकारः, तदाप्रभृत्यय श्लोकोऽर्थवाद एवेति । मच.

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥

(१) नियोगरूपत्वात्कन्यागतोऽय धर्म उच्यते । वाचा सत्ये कृते वाग्दाने निवृत्त एकेन दत्ताऽपरेण प्रतिगृहीता । तामनेन वक्ष्यमाणेन विधानेन निजः सोदरो देवरो विन्देत विवाहयेत् । मेधा.

(२) सर्वदैव कथं पुनर्देवरोपगमस्मृतीनां व्यवस्थेत्यत आह—यस्या इति । वाग्दत्ताविषयमेव । परिणीतविषयतयैतद्भ्रान्तेर्गृहीतमित्यर्थः । वाचा सत्यवचनेन सत्य मया दातव्येयमिति सत्याङ्गीकार इत्यर्थः । अनेन विधानेन विवाहविधिना निजः पतिसोदरो देवरो विन्देत । मवि.

यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेतामप्रसवात्सकृत्सकृदृतावृतौ ॥

(१) यथाविधि यथाशास्त्रम् । अधिगम्यैना, यथा वैवाह्यो विधिस्तथा विवाह्य, वाचनिकोऽय विवाहः । पुनर्भूश्च तथोच्यते । न वा व्यूढाऽपि सती भार्या भवति । केवल परार्थोऽस्या वाचनिको विवाहः । तथा च दर्शयति 'न दत्वा कस्यचित्कन्या पुनरन्यस्य दीयत' (मस्मृ. ९।७१) इति । नासौ देवराय दीयत इत्यर्थः । अदत्ता चास्वभूता कथमिव भार्या भवेत्, शुक्लवस्त्रा, नियमो गमने, अन्यस्मिन्नपि नियोगे धर्मोऽयमिष्यते । +मेधा.

(२) स देवरो विवाहविधिना एता स्वीकृत्य शुक्लवस्त्रा वाक्कायसंयता रहस्यागर्भग्रहणात्प्रत्यृतु, वाचनिकत्वात् च संस्कारस्य नासौ देवरस्य भार्या भवतीति क्षेत्रस्वामिन एव तदपत्य भवतीति । गोरा.

बीजक्षेत्रिणोरपत्यस्वाम्यविचारः

पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च महर्षिभिः ।
विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत ॥

(१) उपन्यासो विचार्यवस्तुप्रक्षेपः विचारो वा । तं निबोधत । पुत्र प्रति पुत्रमधिकृत्योदितमुक्त सद्भिर्विद्वद्भिर्महर्षिभिश्च । विश्वजन्य सर्वेभ्यो जनेभ्यो हितम् । पुण्य कल्याणकरम् । स्त्रीस्तुत्या व्यवधानात् 'प्रजाधर्म निबोधत' इत्यस्यार्थस्यापि पुनरादरार्थमुपन्यासः । उपन्यास निबोधतेति । मेधा.

(२) पुनरधिकृत्य शिष्टैर्मन्वादिभिः पूर्वजातैश्चान्यैर्महर्षिभिः संवक्ष्यमाणं सर्वजनहितं कल्याणकरं परं शृणुत । गोरा.

+ नन्द. ममुवत् ।

(१) **मस्मृ.**९।६९; **मिता.**२।१२७; **पमा.**५२१; **सुबो.** २।१२७(=)उत्त.; **नृप्र.**३९; **सवि.**३९० याज्ञवल्क्यः; **व्यप्र.** ४७१; **समु.**१३८.

+ मवि., ममु., मच. मेधावत् ।

(१) **मस्मृ.**९।७०; **मिता.**२।१२७; **वा.**१४२ ध्यधि (ध्युप) ताप्र (दाप्र); **पमा.**५२१; **सवि.**३९० म्यै (त्यै) व्रता (स्निता) याज्ञवल्क्यः; **व्यप्र.**४७२; **विभ.**३३; **समु.**१३८.

(२) **मस्मृ.**९।३१.

१ (अधिगम्यैना, यथा०).

भर्तुः[1] पुत्रं विजानन्ति श्रुतिद्वैधं तु भर्तरि ।
आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः ॥

(१) भर्तोद्वोढा । विवाहसंस्कारेण संस्कृता येन या नारी तस्या यस्तस्मादेव जातस्तं पुत्रं तस्य विजानन्त्यभ्युपगच्छन्ति सर्व एव विद्वांसो नात्र विप्रतिपत्तिः । सिद्धान्तोऽयम् । श्रुतिद्वैधं तु कर्तरि । यः कर्तैव केवलमुत्पादयिताऽन्यदीयक्षेत्रे, न तूद्वोढा, तत्र श्रुतिद्वैध मतभेदस्त दर्शयति । आहुरुत्पादकमपत्यवन्त केचित् । अपरे क्षेत्रिण यस्य सा भार्या तस्यामनुत्पादकमपि । एवमाचार्यविप्रतिपत्तेः संशयमुपन्यस्य कारणकथनेन तमेव समर्थयते । +मेधा.

(२) भर्तुर्भार्यावतः पाणिग्राहस्य पुत्र सर्वे विजानन्ति । केचित्तु बीजिनः । श्रुतेर्द्वैध श्रुतौ बीजिनः पुत्र इति दर्शनात् श्रुतिकृतं द्वैधं संदेहः । तथाहि । 'न शेषोऽग्रे अन्यजातमस्ती'त्यादि श्रुतेः । शेषः पुत्रः अन्येन जनितः पुत्रो नास्तीत्यस्या अर्थः । एतेन न क्षेत्रिणः किन्तु जनकस्यैवेति गम्यते । अत एव दर्शनात्केचिदुत्पादकमाहुरन्ये तु न्यायबलात्क्षेत्रिणमिति । मवि.

(३) भर्तुः पुत्रो भवतीति मुनयो मन्यन्ते । भर्तरि द्विप्रकारा श्रुतिर्वर्तते, केचिदुत्पादकमवोढारमपि भर्तारं तेन पुत्रेण पुत्रिणमाहुः, अन्ये तु वोढार भर्त्तारमनुत्पादकमप्यन्यजनितेन पुत्रेण पुत्रिणमाहुः । ममु.

(४) तत्र भर्तृत्वं द्विविध श्रुतिद्वैविध्याद्वोढृत्वाऽवोढृत्वभेदात् । मच.

(५) भर्तृशब्दः स्वामिवचनः भर्तरि श्रुतिर्द्वैविध्य, कर्तरीति पाठेऽप्ययमेवार्थः । नन्द.

क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान्[2] ।
क्षेत्रबीजसमायोगात्संभवः सर्वदेहिनाम् ॥

क्षेत्रमिव क्षेत्रभूता नारी, व्रीह्यादेरुत्पत्तिस्थान भूमिभागः क्षेत्रं, तत्तुल्या नारी । यथा क्षेत्रे बीजमुप्त तत्र विक्रियमाणं जायते एवं नार्यामपि निषिक्त रेतो बीजभूत एव पुमान् । अत्रापि भूतशब्द उपमायाम् । तदीयं रेतो बीजं, न साक्षात्पुमान्, तदधिकरणत्वात्तु तथावद्यपदिश्यते । समायोगः संबन्ध आधाराधेयलक्षणः । ततः सभव उत्पत्तिः सर्वदेहिना शरीरिणा चतुर्विधस्य भूतग्रामस्य, स्वेदजानामप्याकाशः क्षेत्र बीज स्वेदोऽतो युक्तः सशयः । उभयमन्तरेण संभवानुपपत्तेः । अपत्योत्पत्तौ उभयोर्व्यापारः । विनिगमनाया हेत्वभावात्कस्य तदुभयोः अथान्यतरस्येति सदेहः । सर्वस्य च प्रकरणस्यायमर्थो, नानुमानपरिच्छेद्योऽपत्यापत्यबद्धावः । तथा च विभागश्लोके वक्ष्यामः । *मेधा.

विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव कुत्रचित्[3] ।
उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते ॥

बीजस्य वैशिष्ट्य व्यासऋष्यशृङ्गादीना महर्षीणा दृष्टम् । स्त्रीयोनिस्त्वेव क्षेत्रजादिपुत्रेषु धृतराष्ट्रादिषु, ब्राह्मणाज्जाता अपि मातृजातयः क्षत्रियास्ते । उभय तु सम एकस्वामिकमेकजातीयं सम, सा प्रसूतिः प्रशस्यते विप्रतिपत्त्यभावात् । तदुक्तमेव 'भर्तुः पुत्र विजानन्ती'ति । मेधा.

बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते[4] ।
सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता ॥

एवमुपादिते सशये बीजप्राधान्यपक्ष पूर्वं परिगृह्णाति । तत्प्राधान्याद्यस्य बीज तस्यापत्य तस्य च प्राधान्य, व्रीह्यादेर्द्रव्यस्य क्षित्याद्यनेककारणत्वेऽपि तद्धर्मानुविधानदर्शनात् । अतश्च स्फुटमदृष्टवीजानुविधानस्यापत्यस्य कार्यत्वाद्व्रीह्यादीनामिव तद्धर्मानुविधायित्व युक्तमभ्युपगन्तुम् । तथाहि सर्वत्र कार्य ऐकरूप्य न त्यक्त भवति । तथा च बीजे प्राधान्य तद्दर्शयति । सर्वभूतप्रसूतिर्हि सर्वेषां भूताना प्रसूतिरुत्पत्तिर्बीजलक्षणलक्षिता बीजस्य यल्लक्षण रूपवर्णसस्थानादि तेन लक्षिता चिह्निता तद्रूपानुविधायिनीति यावत् । मेधा.

यादृशं तूप्यते बीजं क्षेत्रे कालोपपादिते ।
तादृग्रोहति तत्तस्मिन्बीजं स्वैर्ज्याञ्जतं गुणैः ॥

+ गोरा. मेधावत् ।

(१) **मस्मृ.**९।३२ ख. पुस्तके, भर्त (कर्त); **नन्द.** 'कर्तरी'ति पाठान्तरम्. (२) **मस्मृ.**९।३३.

*गोरा , मवि., ममु. मच. मेधावत् ।

(१) **मस्मृ.**९।३४.

(२) **मस्मृ.**९।३५; **दा.**१८६ उत्त.; **विता.**४०३ जस्य चैव (जाच्चैव हि); **बाल.**२।१३५ (पृ.२२८) स्य चैव (स्यैव च); **विच.**१२६(=) उत्त. (३) **मस्मृ.**९।३६.

अनन्तरस्यैवार्थविस्तरत्वेन श्लोकोऽयं वक्रान्वयप्रदर्शनेन। यादृशशब्दस्यार्थं व्याख्यास्यति 'व्रीहयः शालय' इत्यादिना। कालोपपादिते, काले वर्षादौ वपनकाल उपपादिते कृष्टसमीकरणादिना संस्कृते, तादृग्रोहति जायते। स्वैर्गुणैर्वर्णसंस्थानरसवीर्यादिभिर्गुणैर्व्यञ्जित परिदृश्यरूपम्। मेधा.

[1]इयं भूमिर्हि भूतानां शाश्वती योनिरुच्यते।
न च योनिगुणान्कांश्चिद्बीजं पुष्यति पुष्टिषु॥

बीजगुणानुवृत्तिः पूर्वेणोक्ता। अनेन क्षेत्रगुणानामभावमाह। एषा भूमिर्भूताना स्थावराणामोषधीतृणगुल्मलतानां योनिः क्षेत्रमुच्यते। न च तद्गुणास्तेषु भूतेषु केचन दृश्यन्ते। न मृदः पासवो वा तत्रोपलभ्यन्ते। बीज पुष्यति पुष्टिषु। बीजशब्दोऽत्राङ्कुरनिर्गतव्रीह्यादिवचनो न मूलवचनस्तदपि हि पुनरुपभुक्तशेषमुप्यमानमपरस्मिन् वत्सरे भवत्येव। बीज तन्न पुष्यति नानुवर्तते। पुष्टयङ्गभूतायामनुवृत्तौ पुष्यतिर्वर्तमानः, सकर्मकत्वं द्वितीयानिमित्तम्। योनिगुणान्प्राप्नोति वा भजते। पुष्टिषु तदवयवेषु निमित्त न पुष्यति नानुवर्तते। यदि पुष्टयङ्गानुवृत्तिराख्यातेनोच्यते पुष्टिष्वित्यनर्थक, तस्मादनेकार्थत्वाद्धातूनामन्यवचनमात्र एवाख्यातेनानुव्याख्येयः। श्लोकपूरणार्थं वा पुष्टिष्विति कथञ्चित्पौनरुक्त्यं परिहार्यं, सामान्यविशेषभावेन वाऽन्वयो वक्तव्यः, स्वपोषं पुष्ट इति यथा। मेधा.

भूमावप्येककेदारे कालोप्तानि कृषीवलैः।
नानारूपाणि जायन्ते बीजानीह स्वभावतः॥

अनन्तरोक्तोऽर्थ उदाहरणाद्याक्रियते। एककेदारे अपिरत्र योजनीयः। एकस्मिन्नपि क्षेत्रे भूमेः, काले यस्य बीजस्य यो वैकः कालस्तस्मिन्नुप्तानि कर्षकैर्भिन्नरूपाणि जायन्ते बीजानि स्वभावानुविधानादित्यर्थः। यदि च क्षेत्रे प्राधान्यं स्यात्क्षेत्रस्यैकत्वात्सर्वाण्येकरूपाणि स्युः। मेधा.

[2]व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः।
यथाबीजं प्ररोहन्ति लशुनानीक्षवस्तथा॥

तानि नानारूपत्वेन बीजानि दर्शयति। यथाबीजं बीजस्वभावाभिपत्त्या। सर्वत्र जात्याख्याया बहुवचनम्। मेधा.

[3]अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते।
उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति॥

एष एवार्थः शब्दान्तरेण निगम्यते। मुद्गेप्तेषु व्रीहयो जायन्त इत्येतन्नास्ति। प्रतिषेधमुखेनोक्तस्य विधिमुखेन पुनः प्रतिपादनमुच्यते। यद्धि यद्बीजम्। मेधा.

तत्प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना।
आयुष्कामेन वप्तव्यं न जातु परयोषिति॥

एव पूर्वपक्षे सिद्धान्तमाह। क्षेत्रप्राधान्यमनेनोच्यते। ननु च नात्र क्षेत्रप्राधान्याभिधायकं किञ्चित्पदमस्ति, केवल परक्षेत्रोपगमननिषेधः श्रयते। 'वप्तव्यं न जातु परयोषिती'ति परदारेषु बीजनिषेको न कर्तव्य इत्यर्थः। न पुनर्यस्य क्षेत्र तस्यापत्यमित्यनेनोक्तं भवति। सत्यम्। 'तथा नश्यति वै क्षिप्त बीजं परपरिग्रहे' इत्यनेनैकवाक्यत्वात् दृष्टापत्यापहारलक्षणदोषनिमित्तोऽयं प्रतिषेधो नादृष्टार्थ उपगमनप्रतिषेधः। स हि चतुर्थे विहत एव। 'न हीदृशमनायुष्यम्' इत्यादिना। तस्मादन्यशेषतया प्रतिषेधश्रुतेरनन्तरेणैककवाक्यत्वादसति स्वातन्त्र्ये युक्ता क्षेत्रप्राधान्यप्रतिपादनपरता। प्राज्ञेन सहजया प्रज्ञया। विनीतेन पित्रादिभिरनुशिष्टेन। ज्ञानविज्ञानवेदिना करणसाधनौ ज्ञानविज्ञानशब्दौ। ज्ञान वेदाङ्गशास्त्राणि। विज्ञान तर्ककलादिविषयम्। एतदुक्त भवति। यस्य काचिद्बुद्धिर्विद्यते तेनैव न कर्तव्य यतः सर्वशास्त्रेष्वेषा स्थितिः। यस्तु मूर्खस्तिर्यक्प्रख्यः सोऽत्र नाधिकृत एवेत्यनुवादोऽयम्। आयुष्कामेनेति चातुर्थिकस्य (मस्मृ.४।१३४) प्रतिषेधस्य प्रत्यभिज्ञानार्थमेतत्ततश्च पृथक्प्रतिषेधशङ्का निरस्ता भवति। मेधा.

[4]अत्र गाथा वायुगीताः कीर्तयन्ति पुराविदः।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे॥

(१) मस्मृ.९।३७; मच. इय भूमि (सर्वभूति).
(२) मस्मृ.९।३८. (३) मस्मृ.९।३९.

(१) मस्मृ.९।४०.
(२) मस्मृ.९।४१; व्यक.१५८.
(३) मस्मृ.९।४२; विर.५७८ बीज न (न बीज).

(१) गाथाशब्दो वृत्तविशेषवचनः। यथोक्तं पिङ्गलेन 'अत्रासिद्धं गाथे'ति। अविगीताः परम्परागताः श्लोका अप्युच्यन्ते। तदेषापि विज्ञगाथा गीयत इत्युक्त्वा गाथाश्लोका उत्तरत्र वेदे पठ्यन्ते। 'यदस्य पूर्वमपरं तदस्ये'ति, वायुना गीताः पठिता वायुप्रोक्ताः, पुराविदः पुराणकल्पान्तरवेदिनः, परपरिग्रहे परक्षेत्रे।

मेधा.

(२) अस्मिन्नर्थे वायुप्रोक्ता गाथाश्छन्दोविशेषयुक्तानि वाक्यानि नीतिकालज्ञाः कथयन्ति। यथा परभार्यायां बीज मनुष्येण न वप्तव्य इति।

गोरा.

नश्यतीषुर्यथा विद्धः खे विद्धमनुविध्यतः।
तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे॥

ता इदानीं गाथा दर्शयति। इषुः शरः। स नश्यति खे छिद्रे अन्येनेष्वासेन विद्धं मृगमनुविध्यतः, पूर्वस्य वेधकस्यात्र स्वाम्यम्। अथवा आकाशे खे शरः क्षिप्तो लक्ष्यमन्तरेण नश्यति निष्फलो भवति विद्धं चानुविध्यतः। एव परस्त्रियं तेजो निक्षिप्त तस्य बीजिनः क्षेत्रस्वामिनोऽपत्य भवति।

मेधा.

पृथोरपीमां पृथिवीं भार्यां पूर्वविदो विदुः।
स्थाणुच्छेदस्य केदारमाहुः शल्यवतो मृगम्॥

ईदृशोऽयं पुराणकृतो जायापतिलक्षणसंबन्धो यद्विन्नावपि तावेकीकृताविव दर्शयति। तथाहि अनेकवर्षसहस्रातीतपृथुसबन्धा मही तेनैव व्यपदिश्यते पृथिवीति। तस्मादन्याऽपि स्त्री यस्य भार्या तस्य पुत्रोऽन्येनापि जातः, स्थाणुच्छेदस्य केदार स्वमाहुः संबन्धान्तरस्याभावात्। स्वस्वामिसबन्ध षष्ठी प्रतिपादयति। स्थाणुर्गुच्छगुल्मलतादिप्ररूढो यत्र भवति तच्छिनत्ति यः स स्थाणुच्छेदः तस्य तत्क्षेत्र येन प्ररूढगुल्मलतावीरुधः छित्त्वा भूमिः क्षेत्रीकृता तत्र कर्षणवपनजात फल तस्यैव। शल्यवतो मृगमाहुरित्यनुषज्यते। बहूना मृगमनुधावतामाखेटकार्य यस्यैव सबन्धि शरशल्यं मृगे दृश्यते तस्य तमाहुर्यत् प्रथमवेद्धुश्च स भवतीत्युक्तं 'नश्यतीषुः' इत्यत्र।

मेधा.

---

(१) **मस्मृ.**९।४३; **विर.**५७८ विद्धः (क्षिप्तः) क्षिप्रं (क्षिप्त).

(२) **मस्मृ.**९।४४.

एतावानेव पुरुषो यज्जायात्मा प्रजेति ह।
विप्राः प्राहुस्तथा चैतद्यो भर्ता सा स्मृताङ्गना॥

युक्त च यस्य भार्या तस्यापत्य यस्माद्भार्याया भर्तुश्चैकत्वमेव प्रजाऽप्यात्मभूतैव कथ वाऽन्यस्यात्मा सोऽन्यस्य भवेत्। एवं तावद्दृष्टमेतल्लोके, शास्त्रज्ञा अप्येवमेव विप्राः प्राहुरिति।

मेधा.

न निष्क्रयाद्विसर्गाभ्यां भर्तुर्भार्या विमुच्यते।
एवं धर्मं विजानीमः प्राक्प्रजापतिनिर्मितम्॥

अथ मन्येत धनादिदानेन क्रीत्वा स्वीयाः करिष्यन्ते परभार्याः, ततो विनिवृत्ते परस्वाम्ये तज्जातो जनयितुः पुत्रो भवतीत्येतन्न, यतो न शक्या भार्यात्वेन निष्कसहस्रैरप्यन्यदीयाः स्वत्वमानेतुम्। नापि भर्त्रा त्यक्ता प्रहीणद्रव्यतया प्रतिग्रहीतुः स्वत्वमापद्यते। यत 'उद्वहेतें'ति कर्त्रभिप्रायक्रियाफलविषयादात्मनेपदाल्लिङ्गान्नान्येन संस्कृताऽन्यस्य भार्या भवति। यथा नाहवनीयादय आधातुरन्यस्य क्रयादिनाऽऽहवनीयादिव्यपदेश्याः, निष्क्रयो विक्रयो विनिमयश्च, विसर्गस्त्यागस्ताभ्या न मुच्यते न भार्यात्वमस्या अपैति।

मेधा.

सकृदंशो निपतति सकृत्कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत्॥

(१) अयमनुशयविधावष्टमे व्याख्यातः। विभागकाले हि समविषमाशभाग्भिः समविषमाशभागेषु परिकल्प्य विभागः कर्तव्यः। तत्र कृते यो विप्रतिपद्येत तस्य प्रतिषेधार्थमिदम्। तत्रापि यद्ययमादावयथार्थता कस्यचिदंशस्य प्रज्ञापयेत्तदा स्यादेव पुनर्विभागः। अथ बहुना कालेनायथाकृतता ब्रूयाद्यावदितरैः स्वेषु स्वेषु भागे-

(१) **मस्मृ.**९।४५; **व्यक.**१५८; **विर.**५७८ ह (च).

(२) **मस्मृ.**९।४६; **गोरा.** नीम: (नीत); **व्यक.**१५८; **विर.**५७८ पू

(३) **मस्मृ.**९।४७ख. पुस्तके नी (मी); **मेधा.** नी (मी); **गोरा.** मेधावत्; **स्मृच.**३११ सतां (सकृत्); **पमा.**५७१ नी (मी) सतां (सकृत्); **दात.** १८९ मनुनारदकात्यायनबृहस्पतयः; **चन्द्र.**९० स्मृचवत्, मनुनारदकात्यायनाः; **दानि.**६ दाह (हानं) नी (ती) सतां (सकृत्); **व्यप्र.**५६४ स्मृचवत्; **विता.** ३३१ पू.: ४७५ दाह ददानीति (देव सतां नीतिः); **बाल.** २।१४९; **सेतु.८३** स्मृचवत्; **समु.**१४६ स्मृचवत्; **विच.** ९५ दाह (देव) सतां (सकृत्) मनुनारदकात्यायनबृहस्पतयः.

ष्वन्यनिवेशशीर्णप्रतिसंस्कारादि कृतं भवेद्वस्त्रहिरण्यादि चोपभुक्तं स्यात्तदा समतामात्रकरणे प्रभवति न पुनः सर्वं समवाप(य)विभागम्। अन्ये तु क्लीबादीनामनर्हितविभागकाना पश्चादभागहरत्वनिमित्तक्लीबत्वादिपरिज्ञानान्नास्ति भागापहार इति सकृन्निपातप्रयोजन वदन्ति। एव द्वित्रिचतुर्भागहराणा यदृच्छया ये समता प्रकल्पयेयुः पश्चादनुशयनात्प्राक्तनं व्यवस्थानमतिक्रम्यापहर्तुं न लभेरन्। पतितस्य तु लब्धभागस्याप्यपहारं वक्ष्यामि।

सकृत्कन्या प्रदीयते। यद्यपि चानेन वाग्दानोत्तरकालं प्रागपि विवाहाद्भर्तुः स्वतोच्यते। तथापि 'दत्तामपि हरेत्कन्या' 'तेषा तु निष्ठा विज्ञेया विद्वद्भिः सप्तमे पदे' इत्यादिपर्यालोचनया विशिष्टविषयतैव। सा च व्याख्याता। सकृदाह ददामीति, गवादयो हि येनैव रूपेणात्मनः स्व तेनैवान्यस्मा आपद्यन्ते। कन्या तु दुहितृत्वेन स्वं सती भार्यात्वेनानिवृत्तस्वसंबन्धा दीयत इति पृथगुपन्यासः।

ननु चानिवर्तमाने पितुः स्वसंबन्धे कथं कन्यादानं निर्वर्तते। एतद्धि दानस्य रूपं यदेकस्य स्वस्वो निवर्ततेऽन्यस्योपजायत इति। नैष दोषः। द्वावत्र संबन्धावपत्यापत्यवद्भावः स्वस्वामिसबन्धश्च। तत्रापत्यापत्यवद्भावो न निवर्तते। इतरस्तु निवर्तते। तथा च 'बाल्ये पितुर्वशे तिष्ठेत्' इति पितुश्चात्र स्वाम्यनिवृत्तिमाह 'पाणिग्राह्स्ये'ति भर्तुस्तदुत्पत्तिम्। मेधा.

(२) अंशो दायादाना विभक्तोऽर्थः सकृत्पतति सकृदेव नियम्यते, य एकदा नियतः स एवेति यथा, तथा सकृदेव कन्या प्रदीयते प्रकर्षेण हस्तोदकेन दीयते। किम्बहुना कन्या ददानीति वाङ्मात्रेणापि सकृदेवाह। वाग्दानमपि यत्रादौ कृतं तस्यैव भार्या न तु दोषाभावे स्वेच्छयाऽनन्तरं पित्राऽन्यस्मै प्रदाने तस्य भवतीत्यर्थः। केचित् 'सकृदाह ददानी'ति द्रव्यान्तरविषयमाहुः। मवि.

(३) पित्रादिधनविभागो भ्रातृणा धर्मतः कृतः सकृदेव भवति न पुनरन्यथा क्रियत इति। तथा कन्या पित्रादिना सकृदेकस्मै दत्ता न पुनरन्यस्मै दीयते। एवं चान्येन पूर्वमन्यस्मै दत्ताया पश्चात्पित्रादिभिः प्राप्तायामपि जनितमपत्यं न बीजिनो भवतीत्येतदर्थमस्योपन्यासः। तथा कन्यातोऽन्यस्मिन्नपि गवादिद्रव्ये सकृदेव ददानीत्याह न पुनस्तदन्यस्मै दीयत इति, त्रीण्येतानि साधूनां सकृद्ब्रुवन्ति। यद्यपि कन्यादानस्य सकृत्करणं प्रकृतोपयुक्त तथापि प्रसङ्गादशदानयोरपि सकृत्त्वाभिधानं सकृदाह ददानीत्यनेनैव कन्यादानस्यापि सकृत्करणसिद्धौ प्रकृतोपयोगित्वादेव पृथगभिधानम्। ममु.

(४) अत आह सकृदिति। अंशो विभागः स च भ्रातृणामेकवारमात्र विभागाद्यनुष्ठान न पुनरनुष्ठानं शास्त्रप्रमाणकमेव कन्यादानं प्रतिश्रुतं चोत्सर्गतः। अन्यथा संसृष्टविभागे वाग्दत्ताया देवरपरिग्रहे दानोद्देश्यमृतावतिप्रसङ्गः। मच.

यथा गोऽश्वोष्ट्रदासीषु महिष्यजाविकासु च।
नोत्पादकः प्रजाभागी तथैवान्याङ्गनास्वपि॥

यथा गवादिषु परकीयेष्वात्मवृषभादिक नियुज्य वत्सोत्पादको न तद्भागी तथा परकीयभार्यासवपि नोत्पादकः प्रजाभागी भवति। ममु.

[2]**येऽक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः।**
ते वै सस्यस्य जातस्य न लभन्ते फलं क्वचित्॥

प्रसिद्धमेवैतत्। अक्षेत्रिणो बीजवन्तो व्रीह्यादिबीजस्वामिनः सस्यस्य मुद्गमाषादेर्जातस्य न लभन्ते फल परक्षेत्रे चेदुत्पत्तिः। मेधा.

[3]**यदन्यगोषु वृषभो वत्सानां जनयेच्छतम्।**
गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम्॥

पूर्वेण स्थावरेषु धर्मः प्रसिद्धवदुदितो ज्ञापितो वा। अनेन तिर्यक्षु परिगृहीतेषु गवादिषु निदर्श्यते। अन्यदीयो वृषभो यद्यप्यन्यगवीषु वत्सान्बहूनपि जनयेन्न वृषभस्वाम्येकमपि वृषभं लभेत। सर्व एव ते वत्सा गोमिना

---

(१) **मस्मृ.**९।४८; **व्यक.**१५८ महि.....च (त्वजाविमहिषीषु च); **विर** ५७८ पूर्वार्धे (यथा गवोष्ट्रदासीषु अजाविमहिषीषु च); **बाल.**२।१३४ (गोऽश्वोष्ट्रदासदासीषु महिष्याजाविकासु च) स्वपि (सु च); **समु.**१०१ ष्य (षा) क्रमेण कात्यायनः.

(२) **मस्मृ.**९।४९; **विर.**५७९; **विचि.**१०२; **सेतु.**१९६; **समु.**११७ वै सस्यस्य (तु वै सस्य); **विव्य.**४८ त्रिणो (त्रिका).

(३) **मस्मृ.**९।५०; **गोरा.** गोमि (स्वामि); **मवि.** स्कन्दि (स्पन्दि); **व्यक.**१६८ स्कन्दि (स्यन्दि); **विर.**५७९ व्यकवत्.

गोस्वामिनां, आर्षभमृषभसंबन्धि स्कन्दितं वीजनिषेको, मोघं वृथा निष्फलम्। मेधा.

तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः।
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम्॥

पूर्वस्य निर्देशोऽयम्। यथा गवादिषु स्थावरेषु चैव मनुष्येष्वपि कुर्वन्ति। क्षेत्रस्वामिनामर्थं प्रयोजनं बीजकार्यं संपादयन्ति। मेधा.

फलं त्वनभिसंधाय क्षेत्रिणां बीजिनां तथा।
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसी॥

अविशेषेणोक्तं क्षेत्रिणां फलं न बीजिनस्तस्यावशिष्टविषयत्वमाह। अनभिसंधायेति। अभिसंधानं बीजिक्षेत्रिणोरितरेतरसंबिद्यवस्थापनं नष्टाश्वदग्धरथवत्। उभयोरावयोः फलमस्विति यत्र वचनव्यवस्था न भवति तत्र क्षेत्रिण एव प्रत्यक्षोऽर्थो निश्चितं फलम्। प्रत्यक्षशब्देन निःसंदिग्धतामाह। यतो बीजाद्योनिर्बलीयसी क्षेत्रमधिकृत्यम्। सस्या तु संविदि—क्रियेति। मेधा.

क्रियाभ्युपगमात्क्षेत्रं घोजार्थं यत्प्रदीयते।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च॥

अनभिसंधाय क्षेत्रिणः फलमुक्तं, अभिसंधाने किं बीजिन उभयोरिति संशयः, उभयोरित्याह। क्रियाया अभ्युपगमोऽङ्गीकरणं, एवमेवेतदिति संवि-

(१) **मस्मृ.**९।५१, **व्यक.**१५८ कुर्वन्ति (करोति) न बीजी (बीजी नो), **विर** ५७९ कुर्वन्ति (करोति), **बाल.**२।१२७ (=), **समु** १०१ उत्त, क्रमेण कात्यायनः.

(२) **मस्मृ.**९।५२ क,ग,घ पुस्तकेषु, बली (गरी); **मिता** २।१२७; **व्यक.**१५८ क्षेत्रिणा बीजिना (बीजिना क्षेत्रिणां) उत्तरार्धे (प्रत्यक्षक्षेत्रिणामर्थात् बीजाद्योनिर्गरीयसी), **मवि. मस्मृवत्, विर.**५७९ यो (यं) बली (गरी); **पमा.**५१८ णां (णा) नां (ना); **मच. मस्मृवत्, व्यप्र.**४७० क्षेत्रिणा बीजिनां (बीजिना क्षेत्रिणां); **विता.**३५९ क्षेत्रिणां बीजिनां तथा (बीजिने यत्प्रदीयते); **बाल.**२।१३५ (पृ.२१७); **समु.** १३८ ख (क्षः), **भाच** मस्मृवत्.

(३) **मस्मृ** ९।५१ क्षेत्र (क्षेत्रवत्); **मिता.**२।१२७; **विर.**५५७ क्षेत्र (यैन); **पमा.**५१८; **नृप्र.**३९ क्षेत्र (देव); **वीमि.**२।१३४ विरवत्, **व्यप्र.**४६९; **विता.**३५९ जार्थ (जिनं); **राकौ.**४५३ क्षेत्र (च्चैव); **बाल.**२।१३५ (पृ.२१७); **समु.**१३८.

लक्षणो यो निश्चयः सा क्रियाऽभिप्रेता, तामभ्युपगमस्य बीजार्थं बीजकार्यफलनिष्पत्त्यर्थं यत्प्रदीयते सामर्थ्याद्बीजमिति गम्यते। तस्येह द्वावपि भागिनौ। मेधा.

ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति।
क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम्॥

परक्षेत्रे वापुर्बीजनाशं उक्तस्तत्र मन्येत पुरुषापराधात्तस्य युक्तोऽपहारो नूनमसौ क्षेत्रं जिहीर्षति। नो चेत्किमिति परक्षेत्रे वपतीति, येन तु स्वक्षेत्रे व्युप्तमोघवाताभ्यामन्यत्रानीतं तस्य कोऽपराधो यदि स्वं द्रव्यं हारयति तदर्थमाह—ओघवाताहृतं बीजम्। ओघो जलनिषेकः, तेन वायुना चाहृतं नीतं यस्य क्षेत्रे प्ररोहति तस्यैव तद्भवति। एतेनैव सिद्धे विस्पष्टार्थं न बीजी लभते फलमिति सर्वत्र क्षेत्रप्राधान्यमित्यर्थः। मेधा.

एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च।
विहङ्गमहिषीणां च विज्ञेयः प्रसवं प्रति॥

अपत्याधिकारात्तद्विषयतैव मा विज्ञायीति गवाश्वादिग्रहणम्। यदि वा बीजफलव्यवहारः सस्यादिविषयतया प्रसिद्धतरस्तन्निवृत्त्यर्थमाह। द्विपदा चतुष्पदा पक्षिणा स्थावराणा च सर्वत्रैष धर्मः। एष इति द्वयं प्रत्यवमृश्यते। अनभिसंधाने यस्य क्षेत्रं तस्य फलमभिसंधाने चोभयोः, उदाहरणार्थत्वाच्च गवाश्वादिग्रहणस्य श्वमार्जारादिष्वप्ययमेव न्यायः। तर्हि किमर्थं 'यच्चान्यगोषु' इति। प्रायेण गावः पुरुषाणा भवन्ति। न तथा विहङ्गमादय इति प्रसिद्धेरनुवादोऽसौ। दास्यः समभिर्दासयोनिभिरुपगताः। प्रसवः कायजन्म। तं प्रति तत्रेत्यर्थः। मेधा.

(१) **मस्मृ.**९।५४ ख पुस्तके, वप्ता (बीजी); **मेधा.** मस्मृवत्; **व्यक.**१५८ न वप्ता (बीजी न); **विर.**५७९ उत्तरार्धे (तज्ज्ञेय क्षेत्रिकस्यैव न बीजी लभते फलम्); **विचि.** १०२ ह (ह) वप्ता (बीजी); **बाल.**२।१२७; **सेतु.**१९६ ओघ (अम्बु) वप्ता (बीजी). ३२१ ह (ह) रोहति (जायते) लभते फलम् (फलमर्हति), **समु.**११७ उत्तरार्धे (फलमुत्पियतं क्षेत्री न बीजी लभते फलम्); **विच.**१४८ रोहति (वर्तते) लभते फलम् (फलमर्हति); **विव्य.**४८ विचिवत्.

(२) **मस्मृ.**९।५५; **व्यक.**१५८; **विर.**५८०; **बाल.**२।१२७ षी (षा); **सेतु.**३२१ षीणां च (षादीनां); **समु.**११७; **विच.**१४८ ज्ञेयः (ज्ञेयं).

एतद्वः सारफल्गुत्वं बीजयोन्योः प्रकीर्तितम् ॥

सारं प्रधानं फल्गवसारम् । उपसंहारः पूर्वप्रकरणस्य । उत्तरार्धेन वक्ष्यमाणसूचनम् । मेधा.

पुनर्दारक्रिया

एवं वृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम् ।
दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ॥

(१) न्यायप्राप्तानुवादः श्लोकः । एव तस्याः साध्वीत्वायुक्त एवाग्निहोत्रिणः सस्कारः 'न वाऽग्नयो ह वा एते पत्न्या प्रमीतायां धार्यन्ते' इति । मेधा.

(२) धर्मज्ञो द्विजातिरुक्ताचारो समानजातीया पूर्वमृता स्त्रिय श्रौतस्मार्ताग्निभिः यज्ञपात्रैश्च स्रुक्स्रुवादिभिर्दाहयेत् । गोरा.

भार्यायै पूर्वमारिण्यै दत्वाऽग्नीनन्त्यकर्मणि ।
पुनर्दारक्रियां कुर्यात्पुनराधानमेव च ॥

(१) तदेतत्पुनरधिकारार्थमुदाह्रियते । इदमप्यनया सहाधिकारप्रतिप्रसवः । यदा त्वर्थे प्रयोजने धर्मकर्मानुष्ठाने वा तदाऽप्यसहायभावाद्वानप्रस्थे पारिव्राज्ये वा अधिकारस्यापि प्रतिषेधः । तथा च श्रुतिः 'जरसा ह वा एतस्माद्विमुच्यत' इति । अर्थलोपेन वा । अपरे त्वाहुः अत्र यदेति कल्पयिष्यते । एतेन यावजीवहोमीयश्रुतेरविरोधः सिद्धो भविष्यति । मेधा.

(२) पूर्वमृतायै भार्यायै अन्त्येष्टिदाहे अग्नीन् दत्वा गार्हस्थ्यैकाश्रमनिर्वाहेच्छया पुत्रभावाद्वा प्रातपर्यन्तत्वादिना वा केनचित्कारणेन वानप्रस्थाद्याश्रमान्तरानाश्रयेण पुनर्विवाहाग्निपरिग्रहौ कुर्यात् । गोरा.

(३) अन्त्यकर्मणि और्ध्वदेहिके कर्मणि । मवि.

अनेन विधिना नित्यं पञ्चयज्ञान् न हापयेत् ।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥

(१) उपसहारश्लोकः । पञ्चयज्ञग्रहणं सर्वसिद्ध्यर्थमिति । मेधा.

(२) तृतीयाद्यध्यायोक्तविधानेन पञ्चयज्ञाद्यजहन् द्वितीयमायुर्भागं कृतभार्यो गृहस्थाश्रममनुतिष्ठेत् । गोरा.

(३) गृहस्थधर्मत्वेऽपि पञ्चयज्ञाना प्रकृष्टधर्मज्ञापनार्थं पृथङ्निर्देशः । ममु.

(१) मस्मृ.९।५६. (२) मस्मृ.५।१६७.
(३) मस्मृ.५।१६८. (४) मस्मृ.५।१६९.

एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः ।
आपद्यपत्यप्राप्तिश्च ॥

वाल्मीकिरामायणम्

पतिव्रतावृत्तम्

भर्तुः किल परित्यागो नृशंसः केवलं स्त्रियाः ।
स भवत्या न कर्तव्यो मनसाऽपि विगर्हितः ॥
यावज्जीवति काकुत्स्थः पिता मे जगतीपतिः ।
शुश्रूषा क्रियतां तावत्स हि धर्मः सनातनः ॥
जीवन्त्या हि स्त्रिया भर्ता दैवतं प्रभुरेव च ॥
व्रतोपवासनिरता या नारी परमोत्तमा ।
भर्तारं नानुवर्तेत सा तु पापगतिर्भवेत् ॥
भर्तुः शुश्रूषया नारी लभते स्वर्गमुत्तमम् ।
अपि या निर्नमस्कारा निवृत्ता देवपूजनात् ॥
शुश्रूषामेव कुर्वीत भर्तुः प्रियहिते रता ।
एष धर्मः पुरा दृष्टो लोके वेदे श्रुतः स्मृतः ॥
एवमुक्ता तु वैदेही प्रियार्हा प्रियवादिनी ।
प्रणयादेव संक्रुद्धा भर्तारमिदमब्रवीत् ॥
किमिदं भाषसे राम वाक्यं लघुतया ध्रुवम् ।
त्वया यदपहास्यं मे श्रुत्वा नरवरात्मज ॥
वीराणां राजपुत्राणां शस्त्रास्त्रविदुषां नृप ।
अनर्हमयशस्यं च न श्रोतव्यं त्वयेरितम् ॥
आर्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा ।
स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते ॥
भर्तुर्भाग्यं तु भार्यैका प्राप्नोति पुरुषर्षभ ।
अतश्चैवाहमादिष्टा वने वस्तव्यमित्यपि ॥
न पिता नात्मजो नात्मा न माता न सखीजनः ।
इह प्रेत्य च नारीणां पतिरेको गतिः सदा ॥
यदि त्वं प्रस्थितो दुर्गं वनमद्यैव राघव ।
अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान् ॥
ईर्ष्यारोषौ वहिष्कृत्य भुक्तशेषमिवोदकम् ।
नय मां वीर विस्रब्धः पाप मयि न विद्यते ॥

(१) मस्मृ.९।१०३, दा.४, स्मृच २५५; विर.४५५; सवि.३४८ एष (एव) वो (यो) हितः (क्षितः); व्यप्र.४११; सेतु ४० हितः (क्षितः); ममु.१२६.
(२) वारा.२।२४।१२,१३. (३) वारा.२।२४।२१.
(४) वारा.२।२४।२५-२७. (५) वारा.२।२७।१-२४.

प्रासादमैर्विमानैर्वा वैहायसगतेन वा ।
सर्वावस्थागता भर्तुः पादच्छाया विशिष्यते ॥
अनुशिष्टाऽस्मि मात्रा च पित्रा च विविधाश्रयम् ।
नास्मि संप्रति वक्तव्या वर्तितव्यं यथा मया ॥
अहं दुर्गं गमिष्यामि वनं पुरुषवर्जितम् ।
नानामृगगणाकीर्णं शार्दूलवृकसेवितम् ॥
सुखं वने निवत्स्यामि यथैव भवने पितुः ।
अचिन्तयन्ती त्रींल्लोकान् चिन्तयन्ती पतिव्रतम् ॥
शुश्रूषमाणा ते नित्यं नियता ब्रह्मचारिणी ।
सह रंस्ये त्वया वीर वनेषु मधुगन्धिषु ॥
त्वं हि कर्तुं वने शक्तो राम संपरिपालनम् ।
अन्यस्यापि जनस्येह किं पुनर्मम मानद ॥
सह त्वया गमिष्यामि वनमद्य न संशयः ।
नाहं शक्या महाभाग निवर्तयितुमुद्यता ॥
फलमूलाशना नित्यं भविष्यामि न संशयः ।
न ते दुःखं करिष्यामि निवसन्ती सह त्वया ॥
अग्रतस्ते गमिष्यामि भोक्ष्ये भुक्तवति त्वयि ॥
इच्छामि सरितः शैलान्पल्वलानि वनानि च ।
द्रष्टुं सर्वत्र निर्भीता त्वया नाथेन धीमता ॥
हंसकारण्डवाकीर्णाः पद्मिनीः साधुपुष्पिताः ।
इच्छेयं सुखिनी द्रष्टुं त्वया वीरेण सङ्गता ॥
अभिषेकं करिष्यामि तासु नित्यं यतव्रता ।
सह त्वया विशालाक्ष रंस्ये परमनन्दिनी ॥
एवं वर्षसहस्राणां शतं वाऽहं त्वया सह ।
व्यतिक्रमं न वेत्स्यामि स्वर्गोऽपि न हि मे मतः ॥
स्वर्गेऽपि च विना वासो भविता यदि राघव ।
त्वया मम नरव्याघ्र नाहं तमपि रोचये ॥
अहं गमिष्यामि वनं सुदुर्गमं
मृगायुतं वानरवारणैर्युतम् ।
वने निवत्स्यामि यथा पितुर्गृहे
तवैव पादावुपगृह्य संयता ॥
अनन्यभावामनुरक्तचेतसं
त्वया वियुक्तां मरणाय निश्चिताम् ।
नयस्व मां साधु कुरुष्व याचनां
न ते मयाऽतो गुरुता भविष्यति ॥
तथा ब्रुवाणामपि धर्मवत्सलो
न च स्म सीतां नृवरो निनीषति ।
उवाच चैनां बहु संनिवर्तने
वने निवासस्य च दुःखितां प्रति ॥
पतिहीना तु या नारी न सा शक्ष्यति जीवितुम् ।
काममेवंविधं राम त्वया मम विदर्शितम् ॥
शुद्धात्मन् प्रेमभावाद्धि भविष्यामि विकल्मषा ।
भर्तारमनुगच्छन्ती भर्ता हि मम दैवतम् ॥
प्रेत्यभावेऽपि कल्याणः सगमो मे सह त्वया ॥
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रा रक्षन्ति वार्धक्ये न स्त्री स्वातन्त्र्यमर्हति ॥
श्रुतिर्हि श्रूयते पुण्या ब्राह्मणानां यशस्विनाम् ।
इह लोके च पितृभिर्या स्त्री यस्य महामते ।
अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेऽपि तस्य सा ॥
एवमस्मात्स्वकां नारीं सुवृत्तां हि पतिव्रताम् ।
नाभिरोचयसे नेतुं त्वं मां केनेह हेतुना ॥
भक्तां पतिव्रतां दीनां मां समां सुखदुःखयोः ।
नेतुमर्हसि काकुत्स्थ समानसुखदुःखिनीम् ॥
यदि मां दुःखितामेवं वनं नेतुं न चेच्छसि ।
विषमग्निं जलं वाहमास्थास्ये मृत्युकारणात् ॥

पतिव्रतावृत्तम्-स्त्रीदोषाः पतिनिष्ठा च

तां भुजाभ्यां परिष्वज्य श्वश्रूर्वचनमब्रवीत् ।
अनाचरन्तीं कृपणं मूर्ध्न्युपाघ्राय मैथिलीम् ॥
असत्यः सर्वलोकेऽस्मिन्सततं सत्कृताः प्रियैः ।
भर्तारं नानुमन्यन्ते विनिपातगतं स्त्रियः ॥
एष स्वभावो नारीणामनुभूय पुरा सुखम् ।
अल्पामप्यापदं प्राप्य दुष्यन्ति प्रजहत्यपि ॥
असत्यशीला विकृता दुर्मार्ग्यहृदयाः सदा ।
युवत्यः पापसंकल्पाः क्षणमात्राद्विरागिणः ॥
न कुलं न कृतं विद्यां न दत्तं नापि संग्रहम् ।
स्त्रीणां गृह्णाति हृदयमनित्यहृदया हि ताः ॥
साध्वीनां हि स्थितानां तु शीले सत्ये श्रुते शमे ।
स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते ॥
स त्वया नावमन्तव्यः पुत्रः प्रव्राजितो मम ।

(१) वारा. २।२९।७. (२) वारा.२।२९।१६-२२.
(३) वारा.२।३९।१९-३१.

तव दैवतमस्त्वेष निर्धनः सधनोऽपि वा ॥
विज्ञाय वचनं सीता तस्या धर्मार्थसंहितम् ।
कृताञ्जलिरुवाचेदं श्वश्रूमभिमुखे स्थिताम् ॥
करिष्ये सर्वमेवाहमार्या यदनुशास्ति माम् ।
अभिज्ञाऽस्मि यथा भर्तुर्वर्तितव्यं श्रुतं च मे ॥
न मामसज्जनेनार्या समानयितुमर्हति ।
धर्माद्विचलितुं नाहमलं चन्द्रादिव प्रभा ॥
नातन्त्री वाद्यते वीणा नाचक्रो वर्तते रथः ।
नापतिः सुखमेधेत या स्यादपि शतात्मजा ॥
मितं ददाति हि पिता मितं माता मितं सुतः ।
अमितस्य हि दातारं भर्तारं का न पूजयेत् ॥
साऽहमेवंगता श्रेष्ठा श्रुतधर्मपरावरा ।
आर्ये किमवमन्येऽहं स्त्रीणां भर्ता हि दैवतम् ॥
(अनसूया उवाच—)
ततः सीतां महाभागां दृष्ट्वा तां धर्मचारिणी ।
सान्त्वयन्त्यब्रवीद्धृष्टा दिष्टया धर्ममवेक्षसे ॥
त्यक्त्वा ज्ञातिजनं सीते मानमृद्धिं च भामिनि ।
अवरुद्धं बने रामं दिष्टया त्वमनुगच्छसि ॥
नगरस्थो वनस्थो वा पापो वा यदि वा शुभः ।
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥
दुःशीलः कामवृत्तो वा धनैर्वा परिवर्जितः ।
स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ॥
नातो विशिष्टं पश्यामि बान्धवं विमृशन्त्यहम् ।
सर्वत्र योग्यं वैदेहि तपःकृतमिवाव्ययम् ॥
न त्वेनमवगच्छन्ति गुणदोषमसत्स्त्रियः ।
कामवृत्तव्यहृदया भर्तृनाथाश्चरन्ति याः ॥
प्राप्नुवन्त्ययशश्चैव धर्मभ्रंशं च मैथिलि ।
अकार्यवशमापन्नाः स्त्रियो याः खलु तद्विधाः ॥
त्वद्विधास्तु गुणैर्युक्ता दृष्टलोकपरावराः ।
स्त्रियः स्वर्गे चरिष्यन्ति यथा धर्मकृतस्तथा ॥
तदेवमेनं त्वमनुव्रता सती
पतिव्रतानां समयानुवर्तिनी ।
भव स्वभर्तुः सहधर्मचारिणी
यशश्च धर्मं च ततः समाप्स्यसि ॥

(१) वारा.२।११७।२०-२८.

सा त्वेवमुक्ता वैदेही त्वनसूयाऽनसूयया ।
प्रतिपूज्य वचो मन्दं प्रवक्तुमुपचक्रमे ॥
नैतदाश्चर्यमार्याया यन्मां त्वमनुभाषसे ।
विदितं तु ममाप्येतद्यथा नार्याः पतिर्गुरुः ॥
यद्यप्येष भवेद्भर्ता ममार्ये वृत्तवर्जितः ।
अद्वैधमुपचर्तव्यस्तथाप्येष मया भवेत् ॥
किं पुनर्यो गुणश्लाघ्यः सानुक्रोशो जितेन्द्रियः ।
स्थिरानुरागो धर्मात्मा मातृवत्पितृवत्प्रियः ॥
यां वृत्तिं वर्तते रामः कौसल्यायां महाबलः ।
तामेव नृपनारीणामन्यासामपि वर्तते ॥
सकृद् दृष्टास्वपि स्त्रीषु नृपेण नृपवत्सलः ।
मातृवद्वर्तते वीरो मानमुत्सृज्य धर्मवित् ॥
आगच्छन्त्याश्च विजनं वनमेवं भयावहम् ।
समाहितं मे श्वश्वा च हृदये तद्धृतं महत् ॥
पाणिप्रदानकाले च यत्पुरा त्वग्निसंनिधौ ।
अनुशिष्टा जनन्याऽस्मि वाक्यं तदपि मे धृतम् ॥
नवीकृतं च तत्सर्वं वाक्यैस्ते धर्मचारिणि ।
पतिशुश्रूषणान्नार्यास्तपो नान्यद्विधीयते ॥
सावित्री पतिशुश्रूषां कृत्वा स्वर्गे महीयते ।
तथावृत्तिश्च याता त्वं पतिशुश्रूषया दिवम् ॥
वरिष्ठा सर्वनारीणामेषा च दिवि देवता ।
रोहिणी न विना चन्द्रं मुहूर्तमपि दृश्यते ॥
एवंविधाश्च प्रवराः स्त्रियो भर्तृदृढव्रताः ।
देवलोके महीयन्ते पुण्येन स्वेन कर्मणा ॥

याज्ञवल्क्यः

कन्यादातृक्रम. । कन्यास्वयंवरविधिः ।

[२]पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥

(१) कस्य पुनरयं कन्याप्रदानोपदेशः । यदि तावत् पितुः, तदभावे दुश्शिष्टतैव । अथ तदभावेऽप्यन्यस्य । स किमिति परकीयां दद्यात् । तेन कः कन्या दद्यादिति ।

(१) वारा.२।११८।१-१२.

(२) यास्मृ.१।६३; विश्व.१।६३ पितामहो (मातामहो) सकु (स्वकु); मिता.; अप.; गौमि.१८।२२; वीमि.; व्यप्र. ४५७-४५८; विभ.९२.

उच्यते—पितेति । स्वकुल्य इति भ्रातृविशेषण पितृव्यपुत्रादिव्यावृत्त्यर्थम् । पूर्वस्य पूर्वस्याभावे परः परः कन्याप्रदः । प्रकृतिस्थश्च स्वभावस्थः । उन्मादाद्यनभिभूत इत्यर्थः । कन्याप्रद इति वचनादक्षतायां एव नैयमिक दानम् । पिता त्वकन्यामपि दद्यादिति केचित् । छन्दोनुरोधाच्च मातामहस्य पूर्वपाठः । अर्थतस्तु भ्रातैव पूर्वः । सर्वेषा च स्वत्वसबन्धाच्चोदनातो वा प्रवृत्तेरविरोधः । पाठान्तरं वा—'पिता पितामहो भ्राता सकुल्यो जननी तथे'ति । तत्र पाठक्रमेणैव नियमः । सकुल्य इति च मातुलादिपरिग्रहार्थः । तथाऽन्येऽपि योनिसबद्धा इत्यध्याहारः । समानमन्यत् । विश्व.१।६३

(२) कन्यादातृक्रममाह—पितेति । एतेषा पित्रादीना पूर्वस्य पूर्वस्याभावे परः परः कन्याप्रदः, प्रकृतिस्थश्चेत् यद्युन्मादादिदोषवान् न भवति । मिता.

(३) अविप्लुतबुद्धिः प्रकृतिस्थः । अप्रकृतिस्थेन पित्रापि कृतं कन्याप्रदानमकृतमेव । अप.

अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ ।
गम्यं त्वभावे दातृणां कन्या कुर्यात्स्वयंवरम् ॥

(१) यत्तु परकीया किमिति दद्यादिति तत्राह । यस्मात्—अप्रयच्छन्निति । निन्दार्थवादोऽय प्रवृत्त्यर्थः । प्रत्यवायविधिर्वा । नन्वेतदप्युक्तम् । दात्रभावे गृहस्थाश्रमो दुश्लिष्ट एव । तत्र पुमास आश्रमान्तराश्रयणेनापि कृतिनः स्युः । स्त्रीणा तु का गतिरिति । उच्यते । स्यादय दोषः, यदि पराधीनतैव स्त्रीणामात्यन्तिकी स्यात् । दातृसद्भाव एव तु तासा पराधीनता । तदभावे तु किम् । उच्यते—गम्यमिति । गम्य गमनार्ह उक्तलक्षणम् । स्वयमेवर्तुमती वर्षत्रयादूर्ध्व वरं कुर्यात् दात्रभावे । विद्यमानोऽपि च दाता यदि न दद्यात् ततः अस्यामवस्थाया तदीयमलङ्कारमुत्सृज्य स्वयमेव वर वरयेत्, स्मृत्यन्तरात् । यदाऽप्युक्तलक्षणस्ता नेच्छेत् तदाऽपि सवर्णमात्राश्रयणमविरुद्धम् । यथाह बौधायनः—'त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् । ततश्चतुर्थे वर्षे तु विन्देत सदृश पतिम् ॥ अलभ्यमाने सदृशे गुणहीन समाश्रयेत् ॥' इति । गुणवचनाच्च जातिनियमः । सर्वथा भार्यायाः भर्तृप्राप्तिः, भर्तुश्च भार्याप्राप्तिः, इत्यनवद्यो गृहस्थाश्रमः । तथा च आम्नायः—'उत वै याचन्दातार लभत एव । अतो भर्ता भार्यामि'त्यादि । विश्व.१।६४

(२) अतो यस्याधिकारः सोऽप्रयच्छन् भ्रूणहत्यामृतावृतावाप्नोति । एतच्चोक्तलक्षणवरसंभवे वेदितव्यम् । यदा पुनर्दातृणामभावस्तदा कन्यैव गम्यं गमनार्हमुक्तलक्षण वरं स्वयमेव वरयेत् । मिता.

(३) कन्यायाः प्रदाता अधिकारी तामददद्भ्रूणहत्या प्रत्युत समाप्नोति सपूर्णा प्राप्नोति । दातृणा पित्रादीनामभावे स्वयमेव कन्या गम्य गमनार्ह सवर्णमुत्कृष्टवर्ण वा पातित्यादिदोषरहितं वरं भर्तारं कुर्यात् । एतच्च प्राग्रजोदर्शनात् । दृष्टे तु तस्मिन्पित्रादिषु सत्स्वपि स्वयमेव कन्या वरं कुर्यात् । न पित्रादिशासन अपेक्षेत । अप.

दत्तकन्याहरणविचार.

सकृत्प्रदीयते कन्या हरंस्तां चोरदण्डभाक् ।
दत्तामपि हरेत्पूर्वात् श्रेयांश्चेद्वर आव्रजेत् ॥

(१) कस्मात् पुनरद्भिर्वाचा कन्या दत्वा पूर्वदातरि प्रेते परः स्वातन्त्र्यादन्यस्मै न दद्यात् । यस्मात्—सकृदिति । तस्मादन्यस्मै न दद्यात् । तेनैव विवाहं कारयेत् । किमेष एवोत्सर्गः । नेत्याह—दत्तामपीति । पूर्ववचनादद्भिर्वाचा च दत्तामपि हरेत् । न तु श्रेयासमपि वर प्राप्य मन्त्रोपनीतामित्यभिप्रायः । विश्व.१।६५

(२) 'सकृदेव कन्या प्रदीयत' इति शास्त्रनियमः । अतस्ता दत्वा अपहरन् चोरवद्दण्ड्यः । एव सर्वत्र प्रतिषेधे प्राप्ते अपवादमाह—दत्तामिति । यदि पूर्वस्माद्वरात् श्रेयान् विद्याभिजनाद्यतिशययुक्तो वर आगच्छति पूर्वस्य च पातकयोगो दुर्वृत्तत्वं वा तदा दत्तामपि हरेत् । एतच्च सप्तमपदात् प्राक् द्रष्टव्यम् । *मिता.

(१) **यास्मृ.**१।६४; **विश्व.**१।६४, **मिता** ; **अप** , **गौमि.** १८।२२ पू.; **मच.**९।८९ पू.; **वीमि.**; **व्यप्र.**४५८ पू.; **विभ.**४ उत्त.

* अप. मितावद्भावः ।

(१) **यास्मृ.**१।६५; **विश्व.**१।६५ वांत (वैं); **मेधा.**८।२२७ त्पूर्वात् (त्कन्यां) श्रे (ज्या) उत्त.; **मिता.**१।६५: २।१४६ त्पूर्वात् (त्कन्यां) उत्त.; **अप.**; **विर.**५२१ मितावत्, उत्त.; **दवि.**१८६ मितावत्, उत्त.; **वीमि.**; **राकौ.**४५९ मितावत्, उत्त.; **समु.**११९ मितावत्, उत्त.

सदोषकन्यादाननिर्दोषकन्यात्यागदूषणविचारः

अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम् ।
अदुष्टां तु त्यजन्दण्ड्यो दूषयंस्तु मृषा शतम् ॥

(१) यः पुनर्दुष्टा कन्यामदुष्टेयमिति प्रयच्छेत्, तस्य का कथेति । उच्यते । स तादृशः—अनाख्यायेति । यद्वैवं योजना, पूर्ववरे स्पष्ट दोषमनाख्याय न्यायतोऽनुद्घाव्यान्यस्मै श्रेयानिति मत्वा यः प्रयच्छति, स दण्ड्यः । न केवल दाता, वरोऽपि च—अदुष्टामिति । यस्तु दोषरहिता त्यजेत् कन्या, सोऽप्येव दण्ड्यः । मृषैव तु दूषयन् कार्षापणशत दण्ड्यः । वाग्दूषणे च शतं दण्ड्यः, मृषेत्यभिधानात् । अदुष्टवचनाच्च दुष्टा त्यजतो न दोषः ।
विश्व.१।६६

(२) यः पुनश्चक्षुर्ग्राह्यं दोषमनाख्याय कन्या प्रयच्छति असावुत्तमसाहसं दण्ड्यः । उत्तमसाहसं च वक्ष्यते । अदुष्टा तु प्रतिगृह्य त्यजन्नुत्तमसाहसमेव दण्ड्यः । यः पुनर्विवाहात्प्रागेव द्वेषादिना असद्भिर्दोषैर्दौर्धरोगादिभिः कन्या दूषयति स पणाना वक्ष्यमाणलक्षणाना शत दण्ड्यः । *मिता.

दारसंग्रहफलम् । स्त्रीरक्षणविधि. ।

[1]लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः ।
यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः॥

(१) याश्चैव भर्तारमनन्यपरतयैवोपचरन्ति, ताः प्रयत्नतो भर्तृभिरपि—लोकानन्त्यदिवप्राप्तिरिति । स्त्रीतः । किञ्च, भर्तव्याश्चेति । लोकप्राप्तिरानन्त्यप्राप्तिर्दिवप्राप्तिश्च क्रमेण पुत्रपौत्रप्रपौत्रिका यस्मात्, तस्मात् स्त्रियः सेव्याः । तथाचाहुः—'पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते । अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥' इति । लोकः पृथिवी । आनन्त्य अन्तरिक्षम् । दिवः स्वर्गः । पाठान्तरं 'लोकानन्त्य दिवप्राप्तिरिति । तस्यार्थः—दिवप्राप्तिस्त्वग्निहोत्राद्यनुष्ठानात् । लोकानन्त्यं च तदभ्यासात् । तथाच चरकाः—'न स तस्माल्लोकात् प्रच्यवते, यस्त्रिरीजानः' इति । किञ्च पुत्रपौत्रप्रपौत्रिका च संततिरत एव । यस्माच्चैव तस्मात् स्त्रियः सेव्या इत्यादि समानम् । विश्व.१।७७

(२) शास्त्रीयदारसंग्रहस्य फलमाह—लोकानन्त्यमिति । लोकानन्त्य वशस्याविच्छेदः दिवः प्राप्तिश्च दारसंग्रहस्य प्रयोजनम् । कथमित्याह । पुत्रपौत्रप्रपौत्रकैः लोकानन्त्यं, अग्निहोत्रादिभिश्च स्वर्गप्राप्तिरित्यन्वयः । यस्मात्स्त्रीभ्य एतद्द्वयं भवति तस्मात् स्त्रियः सेव्या उपभोग्याः प्रजार्थम् । रक्षितव्याश्च धर्मार्थम् । तथा चापस्तम्बेन धर्मप्रजासंपत्तिः प्रयोजनं दारसंग्रहस्योक्तम् 'धर्मप्रजासंपन्नेषु दारेषु नान्या कुर्वीते'ति वदता । रतिफल तु लौकिकमेव । मिता.

(३) लोकाश्चाऽऽनन्त्यं च द्यौश्चेति समाहारे द्वन्द्वः । ततः षष्ठ्येकवचनम् । तच्च लोकप्राप्त्यानन्त्यप्राप्तिद्युप्राप्तयो यथासंख्य पुत्रपौत्रप्रपौत्रकैर्भवन्ति । यस्मादेव तस्मात्पुत्रादिहेतवः स्त्रियः सेव्या ऋतुकाले कर्तव्याश्च सुरक्षिताः । व्यभिचारपरिहाराय रक्षाविधानाच्च गम्यति व्यभिचारोत्पन्नैनैतत्फल जन्यत इति । तथा च श्रुतिः—'अप्रमत्ता रक्षथ तन्तुमेतमा वः क्षेत्रे परे बीजान्यवाप्सुः । जनयितुः पुत्रो भवति सापराये मोघ वेत्ता कुरुते तन्तुमेतम् ॥' इति । द्युशब्दश्चात्र सूर्यलोके वर्तते । तथा च मनुः—'पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते । अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥' ब्रध्नः सूर्यः । पितर प्रति विवाहितायाः पुत्रोत्पत्तेस्तत्पितृपितामहगामि फलमिदं श्राद्धस्येव पुत्रं प्रति विहितस्य पित्रादितृप्तिः । अप.

रक्षणविधौ स्त्रीगमनविधिः.

[1]षोडशर्तुर्निशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् ।
ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रस्तु वर्जयेत् ॥

* अप. मितावद्भावः ।

(१) **यास्मृ.**१।६६; **विश्व.**१।६६ तु त्यजन्दण्ड्यो (यस्त्यजेत्कन्यां); **मिता.**; **अप.** ष्टां तु (ष्टां च); **वीमि.**; **बाल.** २।२८९ दण्ड्य उ (दण्ड उ) शेषं अपवत्.

(२) **यास्मृ.**१।७८; **विश्व.**१।७७ नन्त्यं (नन्त्य) दिवः (दिव) त्रकैः (त्रिका) कर्तं (भर्तं); **मिता.**; **दा.**१६१ पू.; **अप.** नन्त्यं (नन्त्य); **विर.**५८५ उत्तरार्धं (तस्मात्पूज्याः स्त्रियः सेव्या भर्तव्यास्तु सुरक्षिताः); **वीमि.**; **व्यप्र.**५०६; **विता.**३८४(=) पू, ४५४(=) पू; **बाल.**२।१३७ पू.; **सेतु.**४१ पू.; **विभ.** १० उत्तरार्धं (तस्मात्पूज्याः स्त्रियः सेव्या भर्तव्याश्च सुरक्षिताः): ७२ पू.

(१) **यास्मृ.**१।७९; **विश्व.**१।७८ स्तस्तु (स्रश्च); **मिता.** र्तुनि (र्तुनि); **अप.**पर्वा (पर्व); **वीमि.**

(१) स्त्रियः सेव्या इत्युक्तम्। तत्रानियमप्राप्तावाह—षोडशर्तुर्निशा इति। रजोदर्शनादिः षोडश रात्रय ऋतुसंज्ञकः कालः। तत्र नार्यो गर्भग्रहणसमर्था भवन्तीति तासु युग्मासु रात्रिषूपगच्छेत्। किमेवं स्याद्, ब्रह्मचार्येव, एवं गच्छन्नित्यनेनोपरितनश्लोकेनास्य सबन्धः। ब्रह्मचर्यशब्दश्चाय विरोधात् तत्फले वर्तते। ब्रह्मचर्यफलं ब्रह्मलोकप्राप्तिरस्येत्यर्थः। तथाच वसिष्ठः—'ऋतौ च गच्छन् विधिवच्च जुह्वन् ब्राह्मणश्च्यवते ब्रह्मलोकाद्' इति। यद्वा कारणान्तराद् ब्रह्मचर्ये स्थितोऽपि गच्छेत्। यतो गच्छन्नपि ब्रह्मचार्येव, व्रताच्च हीयत इत्यर्थः। एव चातिप्रसक्तावाह—पर्वाण्यमावास्यादीनि। आद्याश्चर्तौ चतस्रो रात्रीर्वर्जयेदिति। विश्व.१।७८

(२) पुत्रोत्पत्त्यर्थं स्त्रियः सेव्या इत्युक्त तत्र विशेषमाह—षोडशर्तुनिशा इति। स्त्रीणा गर्भधारणयोग्यावस्थोपलक्षितः काल ऋतुः। स च रजोदर्शनदिवसादारभ्य षोडशाहोरात्रस्तस्मिन् ऋतौ युग्मासु समासु रात्रिषु। रात्रिग्रहणादिवसप्रतिषेधः। संविशेत् गच्छेत्पुत्रार्थम्। युग्मासु इति बहुवचन समुच्चयार्थम्। अत श्रैकस्मिन्नपि ऋतौ अप्रतिषिद्धासु युग्मासु सर्वासु रात्रिषु गच्छेत्। एवं गच्छन्ब्रह्मचार्येव भवति। अतो यत्र ब्रह्मचर्यं श्राद्धादौ चोदितं तत्र गच्छतोऽपि न ब्रह्मचर्यस्खलनदोषोऽस्ति। किं च पर्वाण्याद्याश्चतस्रस्तु वर्जयेत्। पर्वाणीति बहुवचनादाद्यार्थावगमादष्टमीचतुर्दश्योर्ग्रहणम्। यथाह मनुः—'अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम्। ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः॥' (अ. ४ श्लो. १२८) इति। अतोऽमावास्यादीनि रजोदर्शनादारभ्य चतस्रो रात्रीश्च वर्जयेत्। *मिता.

एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत्।
सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान्॥

(१) किंचान्यत्—एवमिति। क्षामा दुर्बला रोगिणी वा। बन्ध्येत्यन्ये, यथाह भृगुः—'अधिविन्ना तु यो भार्यामुपेयादप्यृतौ द्विजः। रक्षणार्थमकामश्चेत् प्राजापत्येन शुध्यति॥' इति। तत्पुनः पुत्रार्थत्वादधिगमनस्यात्राप्रक्तमेव। मघापौष्णं चेत्यन्ते पठन्ति। तथा च गणितज्ञाः —'प्रसवस्तु निषेकर्क्षात् दशमे योषितामुडौ। यस्मात् तं वर्जयेत् तस्माद् रेवतीषु मघासु च॥' इति। तत् पुनश्चशब्दादेव रेवत्यवाप्तेरकिञ्चित्। मूलमप्यश्विन्यादेर्गण्डान्तत्वाद् वर्जनीयमेव। उपलक्षणार्थत्वाच्च मूलश्रुतेरन्यदपीदृक् परिहरणीयं, प्रमाणान्तरमूलत्वाच्चास्य पुनर्वर्जनवचनस्य। किंच, सुस्थ इन्दौ सकृत् पुत्रं लक्षण्यं जनयेत् पुमान्। सकृदित्यस्य पूर्वश्लोकगतेन संबन्धः सविशेदित्यनेन। तथा चाह मनुः—'निन्द्यास्वष्टासु चान्यासु स्त्रियो रात्रिषु वर्जयेत्। ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन्॥' इति। षड् निन्द्याः आद्याश्चतस्रः एकादशी त्रयोदशी च। अष्टावन्या अनिन्द्याः। एव चतुर्दश वर्ज्याः। शिष्ट रात्रिद्वयम्। तत्रैका स्त्र्यर्थेति मन्वभिप्रायः। आचार्यस्तु पुत्रोत्पादनमेव नैयोगिक मन्यमानः सकृदित्याह। अत एव चतसश्चेत्ययमपि चकारो न राज्यन्तरार्थः। चतस्र इति प्रतिषेधोऽन्यदावर्जनार्थः। अस्तु वैवं राज्यन्तरग्रहणार्थश्चकारोऽपि, अर्थातिरेकात्। एवं गच्छन् लक्षण्यं जनयेत् पुमान् स्त्रीतोऽतिरिक्तशुक्रः। तथा चाह मनुः—'पुमान् पुसोऽधिके शुक्रे' इति। सर्वथा शास्त्रावाधेन भिषग्दैवज्ञाद्युपदेशानुसारात् तथाभिगमनक्रिया, यथा च लक्षण्यपुत्रोत्पादः स्यादिति श्लोकद्वयस्यार्थः। पुत्रमिति चोद्देश्यत्वादतन्त्रं सख्या। तथाच शङ्खः—'पुत्रपौत्रप्रतिष्ठस्य बहुपत्यस्य जीवतः' इति। मन्त्रवर्णश्च 'अशून्योपस्था जीवतामस्तु मातेति बहुपुत्रता दर्शयति, 'दशास्या पुत्रानाधेहि पतिमेकादश कृधी'ति च। युग्मरात्र्यादिवचन तु लिङ्गविवक्षयेत्यदोषः। पूर्वश्लोकादेव च पुत्रार्थं स्त्रियः सेव्या इत्यृतावेव गमनप्राप्तेः सकृद्गमननियमपरतयैतत् श्लोकद्वय ऋतुगतरात्र्यन्तरनिवृत्तिफलं द्रष्टव्यम्। मानवं तु 'ऋतुकालाभिगामी स्यादि'ति व्रतेऽर्थे स्मर्यमाणणिनिप्रत्ययान्तत्वान्नियमपरतयैव व्याख्येयम्। श्लोकान्तरानुसारात्तु पुत्रार्थिनः सकृद् गमननियम इति व्याख्यातम्। एतेनैव वासिष्ठं व्याख्यातम्। 'ऋतुकालाभिगामी स्यादि'ति फलश्रुतेश्च 'ऋतौ गच्छन्नि'ति स्मृत्यन्तरानुसाराच्च युग्मायां रात्रौ सकृदिति व्याख्येयम्। गौतमीयं त्वनृतुपरिसंख्यार्थम्। 'ऋतावनृतौ वार्थादेव गमनप्राप्तेः, सूत्रान्तरारम्भाच्च—'सर्वत्र वा प्रतिषिद्धवर्जमि'ति।

* अप. मितागतम्।

(१) याज्ञ्स्मृ.१।८०, विश्व.१।७९; मिता., अप.; वीमि.

तथा सूत्रद्वयमप्यनर्थकं स्याद्, अर्थादेव विकल्पप्राप्तेः। तस्मात् तदपि नियमार्थमेव व्याख्येयम्। उत्तरसूत्रं त्वर्थप्राप्तमेवानृतौ गमनविकल्पमनूद्य प्रतिषिद्धवर्जमित्येवमर्थम्। अय त्वत्र सप्रदायः—ऋतावजातपुत्रः सकृदगच्छन् प्रत्यवैति। जातपुत्रस्य त्वगमनेऽप्यदोषः। तथा चाहुः—'ज्येष्ठ एव तु पुत्रः स्यात् कामजानितरान् विदुः' इति। यावद्भार्य चैकैकपुत्रानुत्पादने प्रत्यवायः। तदपेक्षयैव पुत्रोत्पादनविधानात्। असवर्णासु तु जातपुत्रस्य याथाकाम्यं, स्मृत्यन्तरात्—'कृतदारोऽवरान् दारान् भिक्षित्वा योऽधिगच्छति। रतिमात्र फल तस्य द्रव्यदातुस्तु संततिः॥' इति। अवरशब्दोऽयमसवर्णाभिप्रायः, सवर्णयैव कृतदारत्वात्। यथा चैतदेव तथोक्त प्राक्। जातूकर्ण्यश्चाह—'सवर्णया कृतदारो नान्यामिच्छेत् सतानस्यान्यगामित्वादि'ति। नार्यृत्पादने तु विकल्पः, रात्रिद्वयस्य मनुनोक्तत्वात्। अत्र च सकृत् श्रुतेः। अनृतौ तु स्त्रीकामादेव गमन, 'सर्वत्र वे'ति सूत्रारम्भात्। ऋतावप्युक्तकालातिरेकेणानृतुतुल्यत्वात् स्वयनुरोधेनैव गमनमिति स्थितिः। नन्वृतावपि स्त्रीकामादेव गमन युक्त, कामात्मतानिषेधात्। मन्त्रवर्णाच्च—'उतो तस्मै तन्व विसस्रे जायेव पत्य उशती सुवासाः' इति। अप्येकस्मे वाग्विसृब्धमात्मानमर्पयति जायेव पत्ये उशती कामयमाना सुवासाः ऋतुकालेऽधिति स्त्रीकामादेव गमनप्रवृत्ति दर्शयति। नैवम्। उभयनियमद्योतनार्थोऽय मन्त्रवर्ण इति। विशेषेण पुत्रोत्पादनचोदना स्त्रीपुसयोर्यतः, तथाच द्वयोरप्यगमने प्रत्यवायाम्नानम्। तथा चाह बौधायनः—'ऋतुमतीं तु यो भार्यां सनिधौ नोपगच्छति। तस्या रजसि तं मास पितरस्तस्य शेरते॥' स्त्रियोऽपि, 'भर्तुः प्रतिनिवेशेन या भार्या स्कन्दयेद्दतुम्। ता ग्राममध्ये विख्याप्य भ्रूणहत्यां निर्धमेद् गृहात्॥' इति। तस्मादृतौ न स्त्रीकामादेव गमन युक्तम् इत्येषा दिक्।' विश्व.१।७९

(२) एवमुक्तेन प्रकारेण स्त्रिय गच्छन् क्षामा गच्छेत्। क्षामता च तस्मिन्काले रजस्वलाव्रतेनैव भवति। अथ चेन्न भवति तदा कर्तव्या क्षामता पुत्रोत्पत्त्यर्थं अल्पास्निधभोजनादिना। 'पुमान्पुसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियः' इति वचनात्। यदा युग्मायामपि रात्रौ शोणिताधिक्यं तदा स्त्र्येव भवति पुरुषाकृतिः। अयुग्मायामपि शुक्राधिक्ये पुमानेव भवति स्त्र्याकृतिः। कालस्य निमित्तत्वात्। शुक्रशोणितयोश्चोपादानकारणत्वेन प्राबल्यात्। तस्मात्क्षामा कर्तव्या। मघामूलनक्षत्रे वर्जयेत्। चन्द्रे चैकादशादिशुभस्थानगते चकारात्पुंनक्षत्रशुभयोगलग्नादिसपत्तौ सकृदेकस्या रात्रौ न द्विस्त्रिर्वा। ततो लक्षणैर्युक्तं पुत्र जनयति। पुमानप्रतिहतपुंस्त्वः। *मिता.

यथाकामी भवेद्वाऽपि स्त्रीणां वरमनुस्मरन्।
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः॥

(१) एव तावदृतौ गमनविधिमुक्त्वाऽधेदानीमर्थप्राप्तत्वाद् गमनस्यानियमे प्राप्त आह—याथाकामीति। अपिशब्दस्य क्रमभेदेन योजना—याथाकाम्यपि वा भवेत्। स्त्रीवत् कामो यस्य स याथाकामी, वचनाभावेऽपि यदृच्छया गमनस्य प्राप्तत्वात्। यद्वा याथाकाम्यपि वा याथाकाम्येव स्यादित्यवधारणार्थो वाशब्दः। कस्मात्। स्त्रीणा वरमनुस्मरन्। 'अपि नः श्वो विजनिष्यमाणाः पतिभिः, सह शयीरन्नि'त्यादिवाक्यं सूचयति। स्त्रीकामादनृतावपि गच्छेदिति श्लोकार्थः। किञ्च स्वदारनिरतश्चैव स्यात्। कुतः। स्त्रियो रक्ष्या यतः स्मृताः। उक्तमेतत्—भर्तव्याश्च सुरक्षिता इति। रक्षा च स्त्रीणां स्वदारनिरतत्वमेव परमार्थत्वेन। न तु ताडनादिका। तया तासामनर्थोऽपि संभाव्येत। तथाच लौकिकाः 'पाञ्चालस्त्रीषु मार्दवमि'ति पठन्ति। चकार एवकारश्च पादपूरणार्थौ। यद्वोत्कृष्य स्त्रियो रक्ष्या एव यतः स्मृता इति योज्यम्। रक्षणविधिनैव स्वदारनिरतत्वनियमान्न विध्यन्तरापेक्षेत्यभिप्रायः। तथा च वसिष्ठः—'या स्वादनतिचारेण रतिः सा धर्मसश्रिता' इति। मनुरप्याह—'स्वा प्रसूति चरित्र च कुलमात्मानमेव च। स्व च धर्म प्रयत्नेन जाया रक्षन् हि रक्षति॥' इति। 'प्रसूतिरक्षणमसंकरो धर्मः' इति च गौतमः। तेन रक्षणार्थं वरश्रुतेरनृतावपि स्त्रीकामादगच्छतो दोष इत्यनवद्यम्। विश्व.१।८०

(२) एवमृतौ नियममुक्त्वा इदानीमनृतौ नियममाह—

* अप. मितावद्भावः।

(१) **याज्ञ.**१।८१; **विश्व.**१।८० यथा (याथा); **मिता.**; **अप**; **वीमि.**

यथाकामीति। भार्याया इच्छानतिक्रमेण प्रवृत्तिरस्यास्तीति यथाकामी भवेत्। वाशब्दो नियमान्तरपरिग्रहार्थः। न पूर्वनियमनिवृत्त्यर्थः। स्त्रीणा वरमिन्द्रदत्तमनुस्मरन् 'भवतीनां कामविहन्ता पातकी स्यादि'ति। यथा 'ता अब्रुवन् वरं वृणीमहै, ऋत्वियात् प्रजां विन्दामहै, काममा विजनितोः सभवामेति। तस्मादृत्वियात् स्त्रियः प्रजा विन्दन्ते काममाविजनितोः सभवन्ति वारेकृतं तासामि'ति।

अपि च स्वदारेष्वेव निरतः नितरा रतस्तन्मनस्को भवेदित्यनुपजते। एवकारेण स्व्यन्तरगमन निवर्तयति, प्रायश्चित्तस्मरणात्। उभयत्रापि दृष्टप्रयोजनमाह— 'स्त्रियो रक्ष्या यतः स्मृता' इति। यस्मात्स्त्रियो रक्ष्याः स्मृता उक्ताः। 'कर्तव्याश्च सुरक्षिता' इति। तत्र सुरक्षितत्व यथाकामित्वेन स्व्यन्तरागमनेन च भवतीति, अत्राह 'तस्मिन्युग्मासु सविशेदि'ति। किमय विधिर्नियमः परिसंख्या वा। उच्यते। न तावद्विधिः प्राप्तार्थत्वात्। नापि परिसख्या दोषत्रयसमासक्तेः। अतो नियम प्रतिपेदिरे न्यायविदः। कः पुनरेषा भेदः? अत्यन्ताप्राप्तप्रापण विधिः। यथा 'अग्निहोत्र जुहुयात्' 'अष्टकाः कर्तव्या' इति। पक्षे प्राप्तस्याप्राप्तपक्षान्तरप्रापण नियमः। यथा 'समे देशे यजेते'ति। 'दर्शपूर्णमासाभ्या यजेते'ति यागः कर्तव्यतया विहितः। स च देशमन्तरेण कर्तुमशक्य इत्यर्थादेशः प्राप्तः। स च समो विषमश्चेति द्विविधः। यदा यजमानः समे वियक्ष्यते तदा समे यजेतेति वचनमुदास्ते, स्वार्थस्य प्राप्तत्वात्। यदा तु विषमे देशे वियक्ष्यते तदा समे यजेतेति स्वार्थं विधत्ते, स्वार्थस्य तदानीमप्राप्तत्वात्। विषमदेशनिवृत्तिस्त्वार्थिकी चोदितदेशेनैव यागनिष्पत्तेः, अचोदितदेशोपादानेन यथाशास्त्र यागो नानुष्ठितः स्यादिति। तथा 'प्राङ्मुखोऽन्नानि भुङ्क्ते'ति। इदमपि स्मार्तमुदाहरण पूर्वेण व्याख्यातम्।

एकस्यानेकत्र प्राप्तस्यान्यतो निवृत्त्यर्थमेकत्र पुनर्वचन परिसंख्या। तद्यथा। 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्ययं मन्त्रः स्वसामर्थ्यादश्वाभिधान्या गर्दभाभिधान्याश्च रशनाया ग्रहणे विनियुक्तः 'पुनरश्वाभिधानीमादत्ते' इत्यनेनाश्वाभिधान्या विनियुज्यमानो गर्दभाभिधान्या निवर्तते। यथा 'पञ्च पञ्चनखा भक्ष्या' इत्यत्र हि यदृच्छया श्वादिषु शशादिषु च भक्षणं प्राप्तं पुनः शशादिषु श्रूयमाण श्वादिभ्यो निवर्तत इति।

किं पुनरत्र युक्त, परिसंख्येत्याह। तथाहि कृतदारसंग्रहस्य स्वेच्छयैवर्तौ गमनं प्राप्तमिति न विधेरय विषयः नापि नियमस्य। गृह्यस्मृतिविरोधात्। एव हि स्मरन्ति गृह्यकाराः। 'दारसग्रहानन्तरं त्रिरात्र द्वादशरात्र सवत्सरं वा ब्रह्मचारी स्यादि'ति। तत्र द्वादशरात्रात्संवत्सराद्वा पूर्वमेव ऋतुसभवे ऋतौ गच्छेदेवेति नियमाद् ब्रह्मचर्यस्मरण बाध्येत। अपि च प्राप्ते भावार्थे वचन विशेषणपरं युक्त, प्राप्त चर्तौ भार्यागमनमिच्छथैवातो यदि गच्छेदृतावेवेति वचनव्यक्तिर्युक्ता। किं च नैयमिकात्पुत्रोत्पत्तिविधेरेव ऋतौ गमन नित्यप्राप्तमेवेति ऋतौ गच्छेदेवेति नियमोऽनर्थकः स्यात्।

नियमे चादृष्ट कल्पनीयम्। किं च। ऋतौ गच्छेत्स्त्रियमेवेति नियमे असनिहितस्य व्याध्यादिनाऽसमर्थस्यानिच्छोश्चाशक्योऽर्थ उपदिष्टः स्यात्। विध्यनुवादविरोधश्च नियमे। तथा 'हि एकः शब्दः सकृदुच्चरितस्तमेवार्थं पक्षे अनुवदति पक्षेऽनुविधत्ते चे'ति। तस्मादृतावेव गच्छेन्नान्यत्रेति परिसख्यैव युक्ता। तदिद भारुचिविश्वरूपादयो नानुमन्यन्ते। अतो नियम एव युक्तः। पक्षे स्वार्थविधिसभवात् अगमने दोषश्रवणाच्च। 'ऋतुस्नाता तु यो भार्या सनिधौ नोपगच्छति। घोराया भ्रूणहत्याया युज्यते नात्र संशयः'॥ इति।

न च विध्यनुवादविरोधः अनुवादाभावाद्विध्यर्थत्वाच्च वचनस्य। तत्र हि विध्यनुवादविरोधः यत्र विधेयावधितया तदेवानुवदितव्यम्, अप्राप्ततयाऽन्योद्देशेन विधातव्य च। यथा वाजपेयाधिकरणपूर्वपक्षे 'वाजपेयेन स्वाराज्यकामो यजेते'ति वाजपेयलक्षणगुणविधानावधित्वेन यागोऽनुवदितव्यः। स एव स्वाराज्यलक्षणफलोद्देशेन विधातव्यश्चेति।

न चानुवादेनेह कृत्यमस्ति। यत्तु नियमे दृष्टं कल्प्यमित्युक्त तत्परिसंख्यायामपि समानम्। अनृतौ गच्छतो दोषकल्पनात्।

यत्तु नैयमिकपुत्रोत्पादनविध्याक्षेपेणैव ऋतौ नित्यगमनप्राप्तेर्न नियम इति तदसत्। स एवायं नैयमिकपुत्रोत्पादनविधिः। स्यान्मतम्। 'एवं गच्छन्

स्त्रियं क्षामा लक्षण्यं पुत्रं जनयेदि'ति स्व्यभिगमनातिरिक्तः पुत्रोत्पादनविधिरिति । तत्र । गमनकरणिकाया भावनाया एव पुत्रोत्पत्तिकर्मता प्रदृश्यते । एव गच्छन् लक्षण्य पुत्र जनयेदित्यनेन यथा 'अग्निहोत्र जुह्वन् स्वर्ग भावयेदि'ति । न चासन्निहितादेरशक्यार्थविधिप्रसङ्गः । सन्निहितशक्तयोरेवोपदेशात् 'ऋतुस्नाता तु यो भार्या सन्निधौ नोपगच्छती'ति । 'यः स्वदारानृतुस्नातान्स्वस्थः सन्नोपगच्छती'ति विशेषोपादानात् । अनिच्छन्निवृत्तिस्तु नियमविधानादेव । न च विशेषणपरताऽपि । पक्षे भावार्थविधिसभवात् । नापि गृह्यस्मृतिविरोधः । सवत्सरात्पूर्वमेव ऋतुदर्शने सविशतो न ब्रह्मचर्यस्खलनदोषो यथा श्राद्धादिषु ।

तस्मात्स्वार्थहानिपरार्थकल्पनाप्राप्तबाधलक्षणदोषत्रयवती परिसख्या न युक्ता । एव 'पञ्च पञ्चनखा भक्ष्या' इत्यत्र यद्यपि शशादिषु भक्षणस्य पक्षे प्राप्तेर्नियमः शशादिषु, श्वादिषु च प्राप्तेः परिसख्येत्युभयसभवः । तथाऽपि नियमपक्षे शशाद्यभक्षणे दोषप्रसंगः, श्वादिभक्षणे चादोषप्रसगेन प्रायश्चित्तस्मृतिविरोध इति परिसंख्यैवाश्रिता । एतेन 'सायंप्रातर्द्विजातीनामशन स्मृतिनोदितमि'त्यत्रापि नियमो व्याख्यातः । 'नान्तरा भोजनं कुर्यादि'ति च पुनरुक्तं स्यात्परिसख्यायाम् । एव च नियमे सति ऋतावृताविति वीप्सा लभ्यते, 'निमित्तावृतौ नैमित्तिकमप्यावर्तते' इति न्यायात् । 'यथाकामी भवेदि'त्ययमपि नियम एव । अनृतावपि स्त्रीकामनाया सत्या स्त्रियमभिरमयेदेवेति । 'ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जमि'त्येतदपि गौतमीयं सूत्रद्वय नियमपरमेव । ऋतावुपेयादनृतावपि स्त्रीकामनाया सत्या प्रतिषिद्धवर्जमुपेयादेवेत्यलमतिप्रसगेन । *मिता.

रक्षणविधौ स्त्रीलालनविधिः

भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ।
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ॥

(१) यस्माच्च लोकानन्त्यदिवप्राप्तिः पुत्रपौत्रप्रपौत्रिका स्त्रीतः, स्त्रियः सेव्या इति च स्थितम् । तस्मादेव कारणात्—भर्तृभ्रात्रिति । सर्वोपकारकत्वात् सतानस्य स्त्रीणा च तत्कारणत्वात् सर्वैः पूज्या इति । न मूलान्तरापेक्षा । ज्ञातिशब्दो मातुलाद्यर्थः । चशब्दः संख्याद्यर्थः । विश्व.१।८१

(२) किं च । भर्तृप्रभृतिभिः पूर्वोक्ताः साध्व्यः स्त्रियो यथाशक्त्यलङ्कारवसनभोजनपुष्पादिभिः समाननीयाः । यस्मात्ताः पूजिताः धर्मार्थकामान्सवर्धयन्ति । मिता.

(३) अत्र भर्तृव्यतिरिक्तैः पूजनं तूत्सवविषये द्रष्टव्यम् । स्मृच.२४३

[1]**दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ।**
वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः॥॥

रक्षणविधौ स्त्रीणा गुर्वधीनत्वविधि

रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्धके ।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं कचित्स्त्रियाः ॥

(१) यदा पुनरेतान्यनियमात् स्त्रीस्वाभाव्यात् सर्वज्ञातिपूज्यत्वाद् वा स्वय नानुतिष्ठेत्, तदा क एनामनुष्ठापयेत् । यदा वा प्रोषितो भर्ता विपन्नोऽनुत्पन्नो वा, तदा कोऽस्याः पालक इत्यत आह—रक्षेदिति । काले कर्मणि वा । तथाचाह मनुः—'नास्ति स्त्रीणा पृथग्यज्ञो न व्रत नाप्युपोषितम् । पतिं शुश्रूषते येन तेन स्वर्गे महीयते ॥' इति कर्मण्यपि पारतन्त्र्यं दर्शयति । विश्व.१।८४

(२) किं च । पाणिग्रहणात्प्राक् पिता कन्यामकार्यकरणाद्रक्षेत् । तत ऊर्ध्वं भर्ता । तदभावे पुत्राः वृद्धभावे । तेषामुक्तानामभावे ज्ञातयः । ज्ञातीनामभावे राजा । 'पक्षद्वयावसाने तु राजा भर्ता प्रभुः स्त्रियाः' इति वच-

---

* अप मितागतम् ।

(१) **यास्मृ.**१।८२, **विश्व.**१।८१; **मिता.**; **अप.**, **व्यक**१३१; **स्मृच.**२४३; **वीर.**४१८; **वीमि.**; **विभ.**१० महाभारते इत्युक्तम्; **समु.**१२१.

× व्याख्यासग्रह प्रायश्चित्तकाण्डे संग्रहीष्यते ।

(१) **यास्मृ** ३।७९; **विश्व.**१।६९ दोह (दौह्); **मिता**; **अप.**३।७८; **व्यक** १३१; **वीर.**४१८; **रत्न** १३४, **वीमि**; **सेतु.**२८३ प्य मर (प्यकर) वापि (चापि); **विभ.**१०

(२) **यास्मृ.**१।८५, **विश्व.** त्रा (त्र) स्ते (स्त्वे) न स्वातन्त्र्य (स्वातन्त्र्यं न); **मिता.**; **अप.** त्रा (त्र); **व्यक.**१२८ न स्वातन्त्र्य (स्वातन्त्र्य न); **वीर.**४१०; **विचि.**१८९ स्तु (श्व); **वीमि.** व्यकवत्; **व्यप्र.**४०६ अपवत्; **व्यउ.**१४०; **व्यम.**५०; **सेतु.**२८१ अपवत्; **विभ.**२ अपवत्; **समु.**१२० अपवत्; **विव्य.**५६.

नात्। अतः क्वचिदपि स्त्रीणां नैव स्वातन्त्र्यम्। *मिता.

(३) विना विवाहिताम्। व्यक.१२८

[१]**पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः।**
हीना न स्याद्विना भर्त्रा गर्हणीयाऽन्यथा भवेत्॥

(१) नन्वेव सति स्त्रीणामदोषः, पित्रादीना रक्षणोपदेशात्। यद्वाऽन्यरक्षकासंनिधाने यद्युत्पन्नरक्षकविपत्तिः, तदा कामचारितापि स्त्रीणा प्रसज्येत। मन्द! मैव—पितृमात्रिति। भर्तृशब्दोऽयं रक्षकमात्रे वर्तते। मात्रादिवचनादन्यमपि स्त्रियं वृद्धा काञ्चिदुपासीत। न तु स्वतन्त्रा स्यात्। यत्र वा कश्चित् पालयिता, तत्र यायात्। गर्हणीयान्यथा भवेत्। अस्मिन् लोके। प्रेत्य च नरकपातः। अस्मादेव गर्हानुमानात्। विश्व.१।८५

(२) किं च। भर्त्रा विना भर्तृरहिता पित्रादिरहिता वा न स्यात्। यस्मात्तद्रहिता गर्हणीया निन्द्या भवेत्। एतच्च ब्रह्मचर्यपक्षे। 'भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणं वे'ति विष्णुस्मरणात्। अन्वारोहणे महानभ्युदयः। मिता.

(३) भर्तारं विना वर्तमाना पित्रादीनामन्यतमेन रहिता न स्यात्। यदि स्याच्छिष्टगर्हणीया भवेत्। पूर्वेण वाक्येन पित्रादिभिः स्त्रीरक्षा कार्येत्युक्तम्। अनेन भर्तुरसंनिधौ पित्रादिरहिता स्त्री न भवेदिति विधीयते। अप.

स्त्रीधर्माः। पतिव्रतावृत्तम्।

[२]स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः।
आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः॥

(१) भर्ता तु दोषवान्मध्ये त्याज्यः, तादृशस्यैव चाज्ञाऽनन्यपराभिरनुष्ठेया, यस्मात्—स्त्रीभिरिति। दोषवतोऽपि भर्तुः स्त्रीभिर्वचनमविकल्पमानाभिः कार्यम्। एष स्त्रीणा परो धर्मः। अवधारणार्थो वा परशब्दः। एष एव धर्मः। नान्यो धर्म इत्यर्थः। तथाच मनुः—

'विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः। उपचर्यः स्त्रिया साध्व्या सतत देववत् पतिः॥' इति। यदा पुनर्महापातकदोषाद्यवहारायोग्यो भर्ता स्यात्, तदा किम्। तदाप्या शुद्धेः सप्रतीक्ष्यः। अभिविधावाङ् द्रष्टव्यः। अपेक्षोत्कृष्य योजना। महापातकदूषितोऽपीत्यर्थः। ततश्च तत्समादौ प्रागपि शुद्धेर्न त्याज्यः। संशब्दाच्च ब्रह्मचारिण्या तत्परया च प्रतीक्षितव्यः। सर्वथा स्त्रीभिर्भर्ता जीवन् मृतो वा न त्याज्य इति प्रकरणार्थः। तथाच व्यासः—'भर्त्रेकदेवता नार्यः' इति। विश्व.१।७६

(२) स्त्रीधर्मानाह—स्त्रीभिरिति। स्त्रीभिः सदा भर्तृवचन कार्यम्। यस्मादयमेव पर उत्कृष्टो धर्मः स्त्रीणा स्वर्गहेतुत्वात्। यदा तु महापातकदूषितस्तदा आशुद्धेः संप्रतीक्ष्यः। न तत्पारतन्त्र्यम्। उत्तरकालं तु पूर्ववदेव तत्पारतन्त्र्यम्। मिता.

(३) भार्याभिर्भर्तृवचसोऽर्थः कार्यः। तत्करण दृष्टप्रयोजनायोपयोगता साधयति, स्वयं धर्मश्च भवति। न चान्यैः स्त्रीधर्मैस्तुल्योऽयम्। येन तैर्विकल्पेत। किं तु तत उत्कृष्टस्तेनैतदनुरोधेनैवान्यधर्मकरणम्। अत एव तद्विरोधिनोऽधर्मान्निषेधति मनुः—'नास्ति स्त्रीणा पृथग्यज्ञो न व्रत नाप्युपोषितम्। पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते॥' इति। भर्तृशुश्रूषणेनाविरुद्धं व्रतादि पत्यनुज्ञया कार्यम्। यदाह शङ्खः—'कामं भर्तुरनुज्ञया व्रतोपवासादीनामारम्भः' इति। एतदप्रोषितभर्तृकाविषयम्। यतः प्रोषितभर्तृका विष्णुधर्मेषु स्त्रियमधिकृत्य—'भर्तर्येव प्रवसिते त्यक्तव्या पतिना शुभा। कुर्वीताऽऽराधन नारी उपवासादिना हरेः॥' इति श्रुतादि दृश्यते। शुभाऽस्खलितचरित्रा। आ शुद्धेरिति। पतिश्चेन्महापातकी तदा प्रायश्चित्तापवर्गं यावत्प्रतीक्ष्यः। महापातकयुक्तो न शुश्रूष्य इत्यर्थः। एतच्च विवाहोत्तरकालं भर्तुः पातित्ये सति द्रष्टव्यम्। विवाहात्पूर्वं पतितेनोढाऽपि न भार्या शास्त्रीयोद्वाहाभावात्। अप.

(४) पतितस्य तु पातित्यापगमपर्यन्तं भार्ययाऽसौ पतिः शुश्रूषणार्थं प्रतीक्ष्यः इत्याह याज्ञवल्क्यः—आ शुद्धेरिति। पतितावस्थाया पतिर्न शुश्रूष्य इत्यार्थिकोऽर्थः प्रत्येतव्यः। दुःशीलादिस्तु पतिर्न दौशील्याद्यपगमपर्यन्तं प्रतीक्ष्यः। स्मृच.२५१

---

* अप. मितावद्भावः।

(१) **याज्ञ.**१।८६; **विश्व.**१।८५; **मिता.**; **अप.**; **स्मृच.** २४९; **व्यक.**१३३; **विर.**४२७, **वीमि.**; **विभ.**२४; **समु.**१२१.

(२) **याज्ञ.**१।७७; **विश्व** १।७६ हि (ऽपि); **मिता.**; **अप.**, **व्यक.**१३५ परः (परं); **स्मृच.**२५१ उत्त..२५२ तूर्व (तुर्वं) पू.; **रत्न.**१३५; **वीमि.**; **व्यम.**१०८; **विता.**८२३ उत्त.; **समु.**१२४ श्लोकार्धौ व्यत्यासेन पठितौ.

[1]संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी ।
कुर्याच्छ्वशुरयोः पादवन्दनं भर्तृतत्परा ॥

(१) एव सर्वैः परिपूज्यमाना न गर्विता व्ययशीला च स्यात् । किं तर्हि—संयतोपस्करेति । च स्यादिति शेषः । विश्व.१।८२

(२) तया पुनः समर्पितगृहव्यापारया किंभूतया भवितव्यमित्याह—संयतोपस्करेति । सयतः स्वस्थाननिवेशितः उपस्करो गृहोपकरणवर्गो यया सा तथोक्ता । यथोलूखलमुसलशूर्पादेः कण्डनस्थाने, दृषदुपलयोर्वियोगेन पेषणस्थान इत्यादि । दक्षा गृहव्यापारकुशला । हृष्टा सदैव प्रहसिताननना । व्ययपराङ्मुखी न व्ययशीला । स्यादिति सर्वत्र शेषः । किं च । श्वश्रूश्च श्वशुरश्च श्वशुरौ । 'श्वशुरः श्वश्रूवा' इत्येकशेषः । तयोः पादवन्दनं नित्य कुर्यात् । श्वशुरग्रहणं मान्यान्तरोपलक्षणार्थम् । भर्तृतत्परा भर्तृवशवर्तिनी सती पूर्वोक्त कुर्यात् । मिता.

[2]पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया ।
सेह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् ॥

(१) वृत्तवत्या अग्निहोत्रेण दाह इत्युक्तम् । किं पुनस्तल्लक्षणामित्यत आह—पतिप्रियहित इति । एतद् वृत्तवत्या लक्षणम् । प्रियहिते युक्ता न रामणीयकप्रधाना । साध्वाचारा कामाद्यनभिभूता च या, सैवेहास्मद्दर्शने कीर्तिं यज्ञाधिकारं प्राप्नोति प्राकाश्यात् कीर्तनाद् वा । प्रकरणानुग्रहाच्च कीर्तिरधिकारः, यज्ञो वा । प्रेत्य चानुत्तमा गतिमिति । नास्या उत्तमा अन्या गतिरस्तीत्यनुत्तमा ज्ञानकर्मसमुच्चयगम्या भर्तृसायुज्यलक्षणा, तां प्राप्नोतीति व्याख्येयम् । विश्व.१।८८

(२) किं च । प्रियमनवद्यत्वेन मनसोऽनुकूलम्, आयत्या यच्छ्रेयस्करं तद्धितम् । प्रिय च तद्धितं च प्रियहितम् । पत्युः प्रियहितं पतिप्रियहितं तस्मिन् युक्ता निरता । स्वाचारा शोभन आचारो यस्याः सा तथोक्ता । शोभनश्चाचारो दार्शतः शङ्खेन—नानुक्त्वेत्यादीना । विजितेन्द्रिया विजितानि संयमितानि इन्द्रियाणि श्रोत्रादीनि वागादीनि च मनःसहितानि यया सा । इह लोके कीर्तिं प्रख्यातिं परलोके चोत्तमा गतिं प्राप्नोति । अथ च सकल एव स्त्रीधर्मो विवाहादूर्ध्वं वेदितव्यः । 'प्रागुपनयनात्कामचारकामवादकामभक्षाः' इति स्मरणात् । 'वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः' इति च । मिता.

(३) प्रिय च हित च प्रियहिते । या पत्युः प्रियहितयोरुक्तोक्तस्त्रीधर्मचारिणी संयतेन्द्रिया च साऽत्र लोके कीर्तिमती भवति । प्रेत्य च सर्वोत्कृष्टा लोकगतिमवाप्नोति । समनन्तरसुखद कर्म प्रियम् । परिणतिसुखदं हितम् । अप.

[3]पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत् ।
इहैव सा शुनी गृध्री सूकरी चोपजायते* ॥

प्रोषितभर्तृकावृत्तम्

[4]क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् ।
हास्यं परगृहे यानं त्यजेत् प्रोषितभर्तृका ॥

(१) इद चान्यत्—क्रीडाशरीरेति । तथा चाह मनुः—'पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् । स्वप्नोऽन्यगेहवासश्च नारीसदूषणानि षट् ॥' इति । विश्व.१।८३

(२) भर्तृसनिधावुक्तम् । प्रोषिते भर्तरि तया कि कर्तव्यमित्यत आह—क्रीडामिति । देशान्तरगतभर्तृका, क्रीडा कन्दुकादिभिः, शरीरसस्कारमुद्वर्तनादिभिः, समाजो जनसमूहः उत्सवो विवाहादिः तयोर्दर्शनं, हास्य विजृम्भणं परगृहे गमनम् । त्यजेदिति प्रत्येक संबध्यते । +मिता.

---

(१) **यास्मृ.**१।८३; **विश्व.**१।८२; **मिता.**; **अप.**, **व्यक.**१३३; **विर.**४२७; **वीमि.**; **सेतु.**२८६ पराङ्मुखी (विवर्जिता); **विभ.**१७.

(२) **यास्मृ.**१।८७; **विश्व.**१।८८ विजि (संय); **मिता.**; **अप.** विजि (संय) से (इ); **विर.** ४३६ प्रियहि (प्रिया हि) से (इ ; **वीमि.**अपवद; **विभ.**१७; **समु.** १२४ से (इ).

* व्याख्यासंग्रहः प्रायश्चित्तकाण्डे सग्रहीष्यते ।

\+ अप. मितावद्भावः ।

(१) **यास्मृ.**३।२५६; **विश्व.**३।२५० चोप (वोप); **मिता.**; **अप.**; **व्यक.**१३६, **स्मृच.**२५०; **विर.**४३८ चोप (चैव); **वीमि.**; **विभ.**२३, **समु** १२४.

(२) **यास्मृ.**१।८४, **विश्व.**१।८३ डां (डा) स्कारं (स्कार) हास्यं (हास) गृहे (गृह), **मिता.**; **अप.**डां (डा); **व्यक.**१३६ पूर्वार्धः विश्ववत्, **विर** ४३८; **वीमि.**; **विभ.**२३.

स्त्रीत्यागविचारः, अधिवेदनविचारश्च

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥

(१) यदा पुनर्ब्राह्मण्यप्येव कुर्यात् तदा तां तद्रक्षणाधिकृतः—हृताधिकारामिति । एवं तावत् सतानपरिक्षयेऽपि नियोगानधिकारात् प्रवर्तमाना व्यभिचारिण्येव । तामेवमपनीतगृहाधिपत्यां कुचेलां वरोपनीतसस्काररहितां ग्रासमात्रभक्तां सर्वथा परिभूतां स्थण्डिलशायिनीं वासयेत् । एतदेव प्रायश्चित्तं न वक्ष्यमाण, शास्त्रव्यामोहात् प्रवृत्तेरल्पदोषता यतः । स्मृत्यन्तराच्चैतत् सवत्सरप्रायश्चित्तम् । विश्व.१।७०

(२) व्यभिचारिणीं प्रत्याह —हृताधिकारामिति । या व्यभिचरति तां हृताधिकारां भृत्यभरणाद्यधिकाररहिताम् । मलिनां अञ्जनाभ्यञ्जनशुभ्रवस्त्राभरणशून्याम् । पिण्डमात्रोपजीविनीं प्राणयात्रामात्रभोजनाम् । धिक्कारादिभिः परिभूतां भूतलशायिनीं स्ववेश्मन्येव वासयेत् । वैराग्यजननार्थं न पुनः शुद्ध्यर्थम् । 'यत्पुसः परदारेषु तच्चैना चारयेद्व्रतमि'ति पृथक्प्रायश्चित्तोपदेशात् । मिता.

(३) हृताधिकारा श्रौतस्मार्तादिकर्मणि निवृत्ताधिकाराम् । स्मृच.२४२

सोमः शौचं ददावासां गन्धर्वश्च शुभां गिरम् ।
पावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः ॥

(१) अथवा, यदि स्त्रियः स्वातन्त्र्यादन्यमाश्रयेयुस्ततो दोषभागिन्यः स्युः । यदा पुनर्धनलोभाद्यामोहाद् वा बन्धुभिर्नियुज्यन्ते, तदा तेषामेव दोषः प्रायश्चित्तं च । न तु स्त्रीणाम् । अतः स्त्रियो निर्दोषाः । किन्तु—सोम इति । वैशब्दोऽवधारणार्थः । यस्मात् सोमादिभिरासा शौचं मनोवाक्कायलक्षणं दत्तं, तस्मान्निर्दोषा एवैताः ।

(१) **यास्मृ.**१।७०; **विश्व** १।७०, **मेधा.**९।९५(=), **मिता.**, **अप.**१।७०:२।१३६ (=)प्रथमपाद ; **व्यक** १३३, **स्मृच.**२४२ रिभू (तिव्र), **वीर.**४२६, **वीमि.**; **व्यप्र.**५०३, **विभ.**१६, **समु.**१२१ ना (नी).

(२) **यास्मृ** १।७१; **विश्व.**१।७१ दावासा (दौ स्त्रीणा) **ह्यतः** (मताः); **मिता.**; **अप.** दावासां (दौ स्त्रीणा); **स्मृच.** २४३ अपवत्, **वीमि.** दावासा (दौ तासा) वैश्व (वांश्व), **विभ.**१७ दावासा (दौ तासां); **समु.**१२१ अपवत्.

पुंसामेव नियोगकर्तॄणां दोष इत्यभिप्रायः । अनेन नियोगकर्तॄणामपि प्रायश्चित्तमस्तीत्युक्तं, न तु स्त्रीणां निषिद्ध, पूर्वश्लोकानर्थक्यप्रसङ्गात् । स्वातन्त्र्याद् व्यभिचारे वा तद् द्रष्टव्यम् । नियोगे तु पारतन्त्र्यात् स्त्रियो निर्दोषाः । विश्व.१।७१

(२) तस्या अल्पप्रायश्चित्तार्थवादमाह— सोम इति । परिणयनात्पूर्वं सोमगन्धर्वबह्वयः स्त्रीर्भुक्त्वा यथाक्रमं तासा शौचमधुरवचनसर्वमेध्यत्वानि दत्तवन्तः । तस्मात्स्त्रियः सर्वत्र स्पर्शनालिङ्गनादिषु मेध्याः शुद्धाः स्मृताः । मिता.

(३) स्त्रीप्रशसामाह—सोम इति । अप.

(४) सर्वमेध्यत्व सर्वयज्ञार्हत्वमित्यर्थः । तदेतत्प्रशसामात्रम् । तेन विप्रदुष्टत्व हृताधिकारत्व च व्यभिचारिण्या उक्तमविरुद्धम् । स्मृच.२४३

व्यभिचाराद्ऋतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्तृवधादौ च तथा महति पातके ॥

(१) क्व पुनः स्त्रीणा दोषः । क्व वा त्यागः । उच्यते—व्यभिचार इति । स्त्रीणा दोषो व्यभिचाराद् भर्तुः । तत्र चोक्तं प्रायश्चित्त हृताधिकारामित्यादि । एवमृतावपि व्यभिचारे न चेद् गर्भसभवः शुद्धिरस्त्येवेत्यभिप्रायः । गर्भोत्पत्तौ त्याग एव । विधीयत इति विचिकित्सानिवृत्यर्थम् । तथा गर्भवधे भर्तृवधे महापातकसबद्धे च ब्रह्महत्यादौ । त्याग इत्यनुषङ्गः । गर्भवधश्च सौभाग्यदर्पादिना ऋतुस्कन्दनम् । तथाच बौधायनः—'भर्तुः प्रतिनिवेशेन या भार्या स्कन्दयेद्रेतुम् । ता ग्राममध्ये विख्याप्य भ्रूणघ्नी निर्घमेद गृहात् ॥' इति । भर्तृवधश्च वाचनिकः । अन्यत्र महापातकवचनादेव सिद्धत्वात् । तथा चाह गार्ग्यः—'पतिताः स्त्रियस्त्याज्याः भर्तृवधप्रतिज्ञाया चे'ति । क्षत्रियादिविषयो वाऽयं गर्भभर्तृवधो योज्यः । अतोऽन्यत्र महत्यपि दोषे न त्याज्याः । विश्व.१।७२

(१) **यास्मृ.**१।७२; **विश्व.**१।७२ रादृतौ (र ऋतौ) वधादौ च (वधे चासा), **मिता** ; **अप.**विश्ववत् ; **व्यक.**१३२ वधादौ च (वधे तासा); **स्मृच.**२४६ गर्भ.....च (गर्भे भर्तृवधे तासां) प्रथमपाद विना; **वीमि.**; **विभ.**१६; **समु.**१२२ व्यकवत्, प्रथमपादं विना.

(२) न च तस्यास्तर्हि दोषो नास्तीत्याशङ्कनीयमित्याह —व्यभिचारादिति। अप्रकाशितान्मनोव्यभिचारात् पुरुषान्तरसंभोगसकल्पात् यदपुण्यं तस्य ऋतौ रजोदर्शने शुद्धिः। शूद्रकृते तु गर्भे त्यागः। 'ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः। अप्रजाता विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः॥' इति स्मरणात्। तथा गर्भवधे भर्तृवधे महापातके च ब्रह्महत्यादौ, आदिग्रहणाच्छिष्यादिगमने च त्यागः। 'चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या। पतिघ्नी च विशेषेण जुङ्गितोपगता च या॥' इति व्यासस्मरणात्। जुङ्गितः प्रतिलोमजश्चर्मकारादिः। त्यागश्चोपभोगधर्मकार्ययोः न तु निष्कासनं गृहात्तस्याः। 'निरुन्ध्यादेकवेश्मनी'ति नियमात्। मिता.

(३) व्यभिचारे सत्यासा रजोदर्शने शुद्धिर्भवति। एतच्च मानसे व्यभिचारे। यदाह मनुः—'रजसा स्त्री मनोदुष्टा' इति। ततश्च रजोदर्शनात्प्रागसव्यवहार्या। संव्यवहाराय प्रायश्चित्तं कारयितव्या। तस्यास्त्यागकारणेषु महापातकेषु स्त्रीपुरुषसाधारणेषु(१), प्रातिस्विकेषु तु स्त्रियास्त्यागहेतुषु शिष्यगमनादिषु सर्वात्मना त्याग इति। अथवाऽयमर्थः—व्यभिचारे सति यदि रजोदर्शनात्मकमृतुप्रवृत्त्या गर्भाभावनिश्चये शुद्धिः, शुद्धिहेतुः प्रायश्चित्तक्रिया कार्या। गर्भे तु व्यभिचारनिमित्ते व्यभिचारिण्यास्त्याग एव न प्रायश्चित्तम्। न केवलं तस्मिन् गर्भे किं तु स्वकीयस्य यथाकथंचिदुपात्तस्य गर्भस्य स्वभर्तुश्च वधे त्यागोऽभिहितो न प्रायश्चित्तम्। महापातके तु त्यागोऽभिहितो विशेष इति। महापातकेषु स्त्रीपुरुषसाधारणेषु सत्सु संभोगसस्पर्शसभाषणसहाधिकारविषयस्त्यागः कार्यः, न पुनर्गृहान्निर्वासनरूपः। अप.

सुरापी व्याधिता धूर्ता वन्ध्याऽर्थघ्न्यप्रियंवदा।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा॥

(१) किं तर्हि—सुरापीति। एवमादिभिर्दोषैरधिवेत्तव्या। न त्याज्येत्यर्थः। सुराशब्देन चात्र गौडीमाध्व्योर्ग्रहणं, महापातके त्यागोपदेशात्। क्षत्रियादिभिरपि निषिद्धां पिबन्त्यस्त्याज्याः। व्याधिता असमाधेयकुष्ठादिरोगग्रस्ता। धूर्ता वञ्चनशीला। वन्ध्या प्रसिद्धा। अर्थशब्दस्तु धर्मकामयोरपि ग्राहकः। पुरुषार्थघ्नीत्यर्थः। अप्रियवदा प्रसिद्धैव। स्त्रीप्रसूः केवलस्त्रीप्रजननी। पुरुषद्वेषिणी रतिपराङ्मुखी। अधिवेदनमुपरिपरिणयनम्। तदासामनुभाष्य दोष कर्तव्य, स्मृत्यन्तरात्। 'दुष्टा भार्या जाया परिभाष्याधिवेदयेदि'ति। विश्व.१।७३

(२) द्वितीयपरिणयने हेतूनाह—सुरापीति। सुरा पिबतीति सुरापी शूद्राऽपि। 'पतत्यर्धं शरीरस्य यस्य भार्या सुरा पिबेदि'ति सामान्येन प्रतिषेधात्। व्याधिता दीर्घरोगग्रस्ता। धूर्ता विसवादिनी। वन्ध्या निष्फला। अर्थघ्नी अर्थनाशिनी। अप्रियवदा निष्ठुरभाषिणी। स्त्रीप्रसूः स्त्रीजननी। पुरुषद्वेषिणी सर्वत्राहितकारिणी। अधिवेत्तव्येति प्रत्येकमभिसबध्यते। अधिवेदन भार्यान्तरपरिग्रहः। मिता.

अधिविन्ना तु भर्तव्या महदेनोऽन्यथा भवेत्।
यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते॥

(१) नन्वधिवेदनमपि त्याग एव। अन्योपादाने तया कार्याभावात्। मैवम्—अधिविन्नेति। तुशब्दोऽपिशब्दार्थः। अधिविन्नापीत्यर्थः। यद्वोत्कृष्यावधारणार्थः। भर्तव्यैव नोपगन्तव्येत्यर्थः। दोषापरित्यागे च तत्। अन्यथा महदेनः स्यात्। महापातकमित्यर्थः। कस्मात् पुनरेवमधिवेदनाद्यनुपदेशः। यस्मात्—यत्रानुकूल्यमैकमत्य जायापत्योः। त्रिवर्गो धर्मार्थकामलक्षणस्तत्र वृद्धिमुपैति। अन्यथा तु विपर्ययः स्यात्। तस्मात् सूक्तमधिवेदनाद्यनुष्ठानम्। विश्व.१।७४

(२) किं च। साऽधिविन्ना पूर्ववदेव दानमानसत्कारैर्भर्तव्या। अन्यथाऽभरणे महदपुण्यं वक्ष्यमाणो दण्डश्च। न च भरणे सति केवलमपुण्यपरिहारः। यतः यत्र दम्पत्योरानुकूल्य चित्तैक्यं तत्र धर्मार्थकामानां प्रतिदिनमभिवृद्धिश्च। मिता.

(३) स्वगृहे पितृगृहे वा वसन्तीति शेषः। धर्मार्थं

(१) याज्ञ.१।७३; विश्व.१।७३ तौ (तौं); मिता.; अप.; बीमि.; विभ.१५.

(१) याज्ञ.१।७४; विश्व.१।७४; मिता.; अप.; स्मृच.२४४ पृ.; २४८ उत्त.; विर.४२२ उत्त.; बीमि.; क्रिया.८२३ उत्त.; विभ.१५ पृ.; समु.१२१ पृ.; १२२ उत्त.

कामास्त्रिवर्गः। स दम्पत्योरानुकूल्ये संप्रतिपत्तौ वर्धते, अतस्तदर्थं यतितव्यमिति तात्पर्यार्थः। मोक्षो ब्रह्मज्ञस्यैव गृहस्थस्य न सर्वस्येत्यभिप्रायेणोक्त– त्रिवर्ग इति। अप.

स्त्रीणामनन्यपरत्वविधिः

मृते जीवति वा पत्यौ या नान्यमुपगच्छति।
सेह कीर्तिमवाप्नोति मोदते चोमया सह॥

(१) कस्मात् पुनरधिविन्ना भर्तारं परित्यज्यान्य न समाश्रयेत्। यस्मात्–मृत इति। सहेत्युपमार्थे। अनुपगमे च स्तुतिदर्शनादुपगमे दोषानुमानम्। ऐहिकफल च कीर्तिः, आमुष्मिक स्वर्गावाप्तिः। अन्यथा तु द्वयविपर्ययः। तस्मादधिविन्नयापि न भर्ता त्याज्यः।

विश्व.१।७५

(२) स्त्रियं प्रत्याह–मृते जीवतीति। भर्तरि जीवति मृते वा या चापल्यादन्य पुरुष नैवोपगच्छति सेह लोके विपुलां कीर्तिमवाप्नोति। उमया च सह क्रीडति पुण्यप्रभावात्। मिता.

(३) वाशब्दः समुच्चये। अतिरोहितमन्यत्। नित्यस्यापि पत्यव्यभिचारस्याऽऽनुषङ्गिक फलमेतदुच्यते। पतिरिति भार्या न व्यभिचरेदिति मनुराह—'अन्योन्यस्याव्यभीचारो भवेदामरणान्तिकः। एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः॥' इति। उभयोरव्यभिचारविधिर्नित्यः। तदतिक्रमे प्रायश्चित्तस्मरणात्। अप.

अधिवेदनकारणाभावे अधिवेदने विधिः

आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीम्।
त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः॥

अधिवेदनकारणाभावे अधिवेत्तारं प्रत्याह—आज्ञासंपादिनीमिति। आज्ञासपादिनीमादेशकारिणीम्। दक्षा शीघ्रकारिणीम्। वीरसूं पुत्रवतीम्। प्रियवादिनीं मधुरभाषिणीं, यस्त्यजति अधिविन्दति स राज्ञा स्वधनस्य तृतीयाशं दाप्यः। निर्धनस्तु भरणं ग्रासाच्छादनादि दाप्यः। मिता.

पुनर्भूस्वैरिणीस्वरूपम्, नियोगविधिश्च

अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः।
स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत्॥

(१) कस्मात् पुनर्मृते भर्तरि न पाणिमात्रदूषितान्यस्मै पुनर्दीयते। यस्मात्–अक्षतेति। यथैव क्षतयोनिः पुनर्भर्तृसयोगात् पुनर्भूर्भवति। एवमक्षतयोनिरपि, अविशेषात्। कस्मात् पुनर्दानम्। स्मृत्यन्तरात्। यथाह मनुः—'सा चेदक्षतयोनिः स्यात्...पुनः संस्कारमर्हति' इति। तत् कामतः प्रवृत्तौ विशेषविधान, न कर्तव्यतयोपदेशः। तथा चाह मनुः—'न विवाहविधावुक्त विधवावेदन क्वचित्' इति। 'न द्वितीयश्च साध्वीना क्वचिद् भर्तोपदिश्यते' इति च। तस्मान्न पुनःसंस्कार इत्याचार्याभिप्रायः।

यदा पुनः स्वयमेवान्य सवर्णमुत्कृष्ट वा समाश्रयेत्, तदा को दोष इति। उच्यते –स्वैरिणीति। पुनर्भूः स्वैरिणीति च संज्ञा दौष्टयज्ञापनार्था। जीवन्त मृत वा या भर्तार त्यक्त्वा स्वातन्त्र्यात् सवर्णमुत्कृष्टवर्ण वा समाश्रयेत्, सापि स्वैरिणी। अतः स्वयमपि नान्य आश्रयितव्यः। यत् पुनः शङ्खेनोक्त—'तिस्रः पुनर्भवश्चतस्रः स्वैरिण्यः' इति। तदनयोर्दौष्टयप्रपञ्चनार्थ प्रायश्चित्तविवेकार्थ वेत्येतन्नातीवोपयुज्यते। एव वासिष्ठमपि पुनर्भूलक्षण द्रष्टव्यम्। सर्वथा भोग्ये अप्येते निर्णीतत्वादुपेक्षणीये इति श्लोकार्थः। तथा च वक्ष्यति --'मृते जीवति वा पत्यावि'ति। विश्व.१।६७

(२) 'अनन्यपूर्विकामि'त्यत्रानन्यपूर्वा परिणेयोक्ता तत्रान्यपूर्वा कीदृशीत्याह–अक्षतेति। अन्यपूर्वा द्विविधा पुनर्भूः स्वैरिणी चेति। पुनर्भूरपि द्विविधा क्षता चाक्षता च। तत्र क्षता संस्काराल्प्रागेव पुरुषसंबन्धदूषिता। अक्षता पुनःसस्कारदूषिता। या पुनः कौमारे पति त्यक्त्वा कामतः सवर्णमाश्रयति सा स्वैरिणीति। मिता.

(१) यास्मृ.१।७५; विश्व १।७५; मिता.; अप.; व्यक १३६; वीमि.

(२) यास्मृ.१।७६; मिता.; अप.; व्यक १३२; स्मृच. २४५; पमा.४७४; रत्न.१३४; नृप्र.३३ अद्रव्यो...स्त्रियाः (द्रव्यैश्चभरणैः स्त्रियाः); वीमि.; व्यप्र.४१०; व्यउ.१४२; व्यच.१०८; वित.८२३; विभ.१५; समु.१२२.

(१) यास्मृ.१।६७; विश्व १।६७ च (वा) चैव (वापि); मिता.; अप.; व्यक.१३९; विर.४५२; मच.९।१७६; वीमि.; विता.८०८(=).

(१) या कृतविवाहा सती क्षतयोनिरक्षतयोनिर्वा कौमारेण भर्त्रा भर्त्रन्तरेण वा यथाविधि पुनरुह्यते सा पुनर्भूः। यथाऽऽह मनुः—'सा चेदक्षतयोनिः स्याद्गतप्रत्यागताऽपि वा। पौनर्भवेन भर्त्राऽसौ पुनः संस्कारमर्हति॥' अस्यार्थः—क्लीवपतितोन्मत्तादिपरिणीतेषु जीवत्स्वदुष्टे वा भर्तरि मृते यमन्यं पतिं विन्दते स पौनर्भवो भर्ता। तेन पुनर्वैवाहिकविधिसंस्कृता पुनर्भूः। यद्वा क्लैब्यादिदोषरहितं पोषणादिसमर्थं कौमारं पतिमुत्सृज्यान्यैः सह सुरतमाचर्य पुनः पूर्वमेव पतिं परिगृह्णाति सा गतप्रत्यागता क्षतयोनिश्च। स च भर्ता पौनर्भवः। पुनर्भूद्वयस्य चास्य स्वरूपं वसिष्ठ आह—'पुनर्भूर्या कौमारं भर्तारमुत्सृज्यान्यैः सह चरित्वा पुनस्तस्यैव कुटुम्बमाविशति सा पूनर्भूर्भवति। या वा क्लीव पतितमुन्मत्त भर्तारमुत्सृज्यान्य पतिं विन्दते। मृते वा सा पुनर्भूर्भवति।' इति। तस्मात्पुनःसंस्कृतत्व पुनर्भूलक्षणम्। या पतिं परित्यज्य सवर्णमन्य रागतो विवाह विनैवोपभोगायाश्रयेत्सा स्वैरिणी। स्वैरिणीग्रहण तद्वैलक्षण्येन पुनर्भूज्ञानाय। तज्ज्ञापन च पौनर्भवस्य भर्तुः पुत्रस्य च ज्ञापनार्थम्। अप.

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋताविया॥
आ गर्भसंभवाद्व्युच्छेत्पतितस्त्वन्यथा भवेत्।
अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः॥

(१) नन्वेव सत्यपुत्रस्य मरणात् सतत्युच्छेदप्रसङ्गः। अस्तु। का नः पीडा। अथवा—अपुत्रामिति। घृताभ्यञ्जनवचन कामप्रवृत्तिनिरोधार्थम्। ततश्चालिङ्गनादि वैकारिकत्वाद् दूरापेतम्। ऋतुग्रहण त्वन्यदा दर्शनाद्यपि कथं न स्यादित्येवमर्थम्।

किं सकृदेव गमनम्। न, अदृष्टार्थत्वप्रसङ्गात्। अपत्यार्थं ह्येतद्गमनम्। अतस्तु—आ गर्भसंभवादिति। प्राग् गर्भसंभूतेः परित्यागात्। तुशब्दश्चैवकारार्थः। यद्वैवं योजना। नन्वयं नियोगपक्षो दुश्लिष्टः, पातकप्रसङ्गात्। न। अनेनेति। अनेन नियोगविधिना जातः क्षेत्रिणो भ्रात्रादेरौरसवत् पुत्रो भवतीत्ययं विधिः। नात्र विचिकित्सा कार्येत्यर्थः। न चैववृत्तः पतितो भवति। कथ तर्हि 'पतितस्त्वन्यथा भवेदि'ति। तदनियुक्तकर्विकाराद्वा गच्छन्नित्यभिप्रायः। अथ पुनः परोपकाराय प्रवृत्तेरभ्युदयभागित्यनवद्यो नियोगः। अत्र चोदयन्ति—नाय नियोगपक्षः श्रेयान्, स्मृत्याचारविरोधात्। तथा चाह मनुः—'नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः। अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम्॥' इति। पुराकल्पं चोपन्यस्योपसंहृतं—'तदाप्रभृति यो मोहात् प्रमीतपतिका स्त्रियम्। नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः॥' इति। अतो नास्ति नियोगः। तथा च शिष्टसमाचारः। नन्वियमपि स्मृतिरेव 'अपुत्रा गुर्वनुज्ञानादि'त्यादि। मानवेऽपि—'देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया' इत्यादि। न चेय लोभादिमूलेति शक्य वक्तुम्। सर्वथा विकारप्रतिषेधात्। तदुक्त—घृताभ्यक्त इति। मनुनापि च—'विधवाया नियुक्तस्तु घृताक्तो वाग्यतो निशि' इति। अतो नेयमपस्मृतिः। अथ श्वशुरधनादीच्छया लोभ आशङ्क्येत, तदपि 'प्रजेप्सिताऽधिगन्तव्या सतानस्य परिक्षये' इत्यनेनैव निरस्तम्। तथा चोक्त—'पतितौ भवतो गत्वा नियुक्तावप्यनापदि' इति। वसिष्ठेनापि—'धनलोभान्नास्ति नियोगः' इति। अतो निर्दोषः। शास्त्राविशेषात्तु प्रतिषेधो विकल्पाय भवति। अतो न विरोधः। अन्ये तु प्राग्विवाहादुपरते भर्तरि नियोगाधिकारं वर्णयन्ति। सामान्यविशेषोपसंहृतिन्यायात्। यथाह मनुः—'यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः। तामनेन विधानेन निजो विन्देत देवरः॥' इति। तत्तु 'विधवाया नियुक्तस्त्वि'त्यनेनैव निरस्तम्। ननु च सापि विधवेति शक्य वक्तुम्। न। स्मृत्यन्तरविरोधात्। यथाह वसिष्ठः—'प्रेतपत्नी षण्मासं व्रतचारिणी'त्युपक्रम्य 'पित्रा भ्रात्रा वा नियोगं कारयेदि'त्यादि। नन्वनू-

---

(१) **यास्मृ.**१।६८; **विश्व.**१।६८ तो (नाद्); **मिता.**; **अप.**; **व्यक.**१३८; **विर.**४४७; **मच.**९।५९; **व्यप्र.**४७०; **बाल.**२।१२७; **विभ.**२९.

(२) **यास्मृ** १।६९; **विश्व.**१।६९ त्रजोऽस्य (त्रिणः स); **मिता.**; **अप.**जोऽस्य (जः स); **व्यक.**१३८ जोऽस्य (जस्तु); **विर.**४४७ स्त्व (श्वा) जोऽस्य (जस्तु); **मच.**९।५९ पू.; **वीमि.** जोऽस्य (कन्य); **व्यप्र.**४७०; **बाल** २।१२७; **विभ.** २९.

द्वापि प्रेते पत्यौ प्रेतपत्न्येव । मैवम् । न हि प्राग्विवाहात् पत्नीशब्दप्रवृत्तिरिति । एवं हि भगवतः पाणिनेः स्मरण —'पत्युर्नो यज्ञसंयोगे' इति । अतोऽसत्कल्पनं, उपक्रमोपसंहारात् । कथं तर्हि 'यस्या म्रियेते'त्ययं श्लोकः । आसुरविवाहविषयतया व्याख्येयः । यस्याः कन्यायाः शुल्कं दत्वा शुल्कदो म्रियेत, सा यदीच्छेत्, ततो देवराय पूर्ववत् प्रदातव्या । न चेद्, नियोग देवरेणैव कारयेत् । यद्वा 'निजो विन्देते'ति निजग्रहणात् सोदर्यो देवरः अनेन विधिना नैयोगिकेन वैवाहिकेन वा विन्देतैव । सापत्नस्तु कन्यानुमतः । तथा चाह—'कन्याया दत्तशुल्काया म्रियेत यदि शुल्कदः । देवराय प्रदातव्या यदि कन्यानुमन्यते ॥' इति । यदा त्वदत्तशुल्क एव म्रियेत, तदा तस्मिन् प्रेते कुमार्यैव सतीच्छयान्यस्मै पित्रा विधिवदेया । यथाह वसिष्ठः—'अद्भिर्वाचा च दत्ता या म्रियेतादौ वरो यदि । न च मन्त्रोपनीता स्यात् कुमारी पितुरेव सा ॥' इति । आदाविति वचनाद्विवाहसंनिधौ वाग्दत्ताप्यकन्येकेति ज्ञायते । 'वलाचेत् प्रदुता कन्ये'त्यस्य पुनरयमर्थः—प्रदुता दूषिता, प्रशब्दसामर्थ्यात् । क्षात्राच्च विधेरन्यत्रैव द्रष्टव्य, तत्र दूषणासंभवात् । यदि मन्त्रैर्न संस्कृता ततोऽन्यस्मै विधिवत् प्रायश्चित्तं कारयित्वा देया । कृतप्रायश्चित्ता च यथा कन्या तथैव सेति मन्तव्यम् । इदं तु कल्पान्तर— 'पाणिग्राहे मृते कन्या केवलं मन्त्रसंस्कृता' इति । अस्यार्थः—ग्रामधर्मेण पूर्वमपि विवाहात् पाणिग्रहणम् । तस्मिन् पाणिग्राहे । मृते कन्याहुतेर्वा प्राक् पाणिग्रहणाद्, यद्यक्षतयोनिः । तथाप्यन्येन भर्त्रा पुनर्विवाहसंस्कारमर्हतीति । सर्वथा परिणीतायाः पुनः परिणयनाभावः । तदुक्तं—'न विवाहविधावुक्तं विधवावेदनं क्वचिद्' इति । तथाच बौधायनः—'निसृष्टायां हुते वापि यस्यै भर्ता म्रियेत सः' इति । अपि निसृष्टायां, अपि हुते, न परिणीतायामित्यर्थः । 'सा चेदक्षतयोनिः स्यादि'त्येतदेव स्पष्टीकरोति, यदुपवर्णितमस्माभिः । अतो न कन्याविषया नियोगस्मृतिः । कस्तर्हि विषयः । प्रेते पत्यौ सतानपरिक्षये च । प्रतिषेधसामर्थ्याच्च विकल्पः । तथा चाम्नायः—'तस्मादेकस्य बह्व्यो जाया भवन्ति, नैकस्यै बहवः सहपतयः' इति । सहप्रतिषेधाच्च क्रमेण भवन्तीति ज्ञायते । तथा 'यस्मै मा पिता दद्याद् नैवाहं तं जीवन्त हास्यामी'ति जीवन्नहानवचनाच्च मृते भर्तरि नियोगोऽस्तीति ज्ञायते । 'को वा शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ' इत्यस्मात् पुनर्मन्त्रवर्णात् स्पष्टतरो नियोगः । एव हीन्द्रेण चिराद् दृष्टावश्विनावुक्तौ दुर्दर्शौ युवा क्व पुनर्विधवेव योषा देवरं मर्यं मनुष्यभाव शयने हर्षस्थाने आपादयन्ती कच्चिदाकुरुते वामुपचरतीत्यर्थः । अनेन नियोगं स्पष्टीकरोति तथाच वसिष्ठः—'प्राजापत्ये मुहूर्ते पाणिग्राहवदुपचरेद्' इति । अतोऽनवद्यो नियोगः । अत्रोच्यते । नैव नियोगस्मृतिर्व्याख्येया, समाचारविरोधात् । विकल्पस्य चान्याय्यत्वात् । कथं तर्हि । शूद्राविषया नियोगस्मृतिः । कुत एतद्, मनुवचनात् । 'नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः' इति द्विजातिसंबद्धः प्रतिषेधः । सामान्यतः शूद्रसंबन्धितया विधिः । तस्मादविकल्पः । तथाचोक्त—'अथ द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः । मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥' इति मनुष्याणामपि शूद्राणामपीत्यर्थः । तथाच समाचारः यत्पुनर्व्यासेन विचित्रवीर्यभार्यासु पत्योत्पादनं, तद् द्रौपदीविवाहवदनादृत्यम् । अथवा क्षत्रियाणामप्यन्वयक्षये राज्यपरिपालनाय नियोगोऽभ्यनुज्ञायते । स च राज्ञामेव कार्यानुरोधाद्, व्यासवचनाच्च । राजा ब्राह्मणेनैव कारयितव्यम् । एव च सत्याम्नाया अपि क्षत्रियविषया एव 'नैवाहं तं जीवन्त हास्यामी'त्यादि । जीवन् समर्थो न हातव्य इत्याम्नायार्थः । 'नैकस्यै बहवः सहपतयः' इति तु पुनःसंस्कारविषयम् । तत्र मुख्यः पतिशब्दः । मन्त्रवर्णस्तु शूद्रविषय एव व्याख्येयः । एव देवरादिवाक्यान्यान्यान्यपि व्याख्येयानि । तथाच वृद्धमनुः—'शूद्राणामेव धर्मोऽयं पत्यौ प्रेतेऽन्यसंश्रयः । लोभान्मूढैरविद्वद्भिः क्षत्रियैरपि चर्यते ॥' इत्युक्त्वाह—'वायुप्रोक्ता तथा गाथा पठन्त्यत्र मनीषिणः । विप्राणां न नियोगोऽस्ति प्रेते पत्यौ न वेदनम् ॥' इय सा गाथा—'अकार्यमेतद् विप्राणां विधवा यन्नियुज्यते । उह्यते वा मृते पत्यौ देवरेण विशेषतः ॥' इति । कथमिदानीमेतद् वसिष्ठवचनं—'भ्रातर्यव्यपदेशेन नाध्येतव्यं कदाचन' इति । अनेन ह्यध्यापनसंबन्धाद् ब्राह्मणानामपि-

नियोगाधिकारोऽस्तीति गम्यते । उच्यते । नैतद् युक्त, उक्तत्वान्न्यायस्य । भूयसामनन्यपराणा चानर्थक्याद् वरमेकस्यान्यपरस्य च बाधकल्पना । क्षत्रियविषय चैतद् वाक्यम् । तेषा ह्यापदि नियोगाधिकारात् । स च ब्राह्मणे नैवेत्युक्तम् । तेनैवं योजना—भ्रातर्यध्यापयत्यपि नाध्येतव्यम् । केन । अव्यपदेशेन । न व्यपदिश्यतेऽनेनेत्यव्यपदेशः । अन्यजातीय इत्यर्थः । किमर्थम् । बोद्धव्य गुरुतल्पस्य निमित्तं, भ्रातुः शिष्यभार्यागमनात् । भर्ता ह्यापत्सु देवरः । भर्तेति भरणयोगाच्छ्रैष्ठ्याच्च ब्राह्मणः स यस्मादापत्सु देवरो भवति, नियोज्यत इत्यर्थः । तस्मात् ततो नाध्येतव्यम् । आपत्स्विति चैकस्यामेवापदि । बहुवचनं गौरवार्थम् । सतानपरिक्षयलक्षणेवापद् यथा स्यात् । नाध्यापयितव्य इति च वक्तव्ये नाध्येतव्यमित्युक्तं क्षेत्रिणः पुत्र इति ज्ञापनार्थम् । कथ चास्य ब्राह्मणविषयत्वोपपत्तिः । न हि सोदर्ययोर्नियोगसभवः । कथ कृत्वा । यदि तावन्नियोज्योऽप्यपुत्रः, तदात्मन एवोत्पादयेत् । अथ तस्य पुत्रोऽस्ति, तदा 'भ्रातॄणामेकजातानामेकः पुत्रवान् भवेत् । सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥' इति वचनादक्षीणत्वात् सतानस्य कुतो नियोगः । क्षत्रियविषयत्वे तु नैष विरोधः । अथ सापत्नविषयतोच्येत । तत् क्षत्रियेऽपि समानम् । यदा त्वेकजातानामित्यस्यैकवर्णजातानामित्यर्थः,तदा स्पष्टैव क्षत्रियविषयता । यत्तु ब्राह्मण्याः प्रोषिते भर्तरि कालप्रतीक्षणवचन, तद् भर्तुरन्तिकगमनार्थ न नियोगार्थमिति विविच्य वचनीयम् । तस्मात् सूक्ता नियोगवाक्याना विषयकल्पना । एव तावच्छ्रुत्या नियोगाधिकार उक्तः ।

विश्व.१।६८,६९

(२) एवं सर्वप्रकारेणान्यपूर्वापर्युदासे प्राप्ते विशेषमाह—अपुत्रामित्यादि । अपुत्रामलब्धपुत्रा पित्रादिभिः पुत्रार्थमनुज्ञातो देवरो भर्तुः कनीयान् भ्राता, सपिण्डो वा उक्तलक्षणः सगोत्रो वा । एतेषा पूर्वस्य पूर्वस्याभावे परः परः घृताभ्यक्तसर्वाङ्गः ऋतावेव वक्ष्यमाणलक्षणे इयाद्गच्छेत् आगभोत्पत्तेः । ऊर्ध्व पुनर्गच्छन् अन्येन वा प्रकारेण पतितो भवति । अनेन विधिनोत्पन्नः पूर्वपरिणेतुः क्षेत्रजः पुत्रो भवेत् । एतच्च वाग्दत्ताविषयमित्याचार्याः । 'यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः । तामनेन विधानेन निजो विन्देत देवर' इति मनुस्मरणात् ।

मिता.

(३) पुनर्भूप्रसङ्गात् क्षेत्रजपुत्रोत्पत्तिविधानमाह—अपुत्रामित्यादि । मृते जीवति पत्यौ वा गर्भाधानाक्षमे स्त्रियमनपत्या पुत्रकामा तदुत्पत्तियोग्या गुरुभिः प्रजोत्पत्त्यर्थमनुज्ञातो भर्तुर्ज्यैष्ठ्यः कनिष्ठो वा भ्राता वा तदलाभे तत्सपिण्डः सगोत्रो वा तामभ्यक्तसर्वाङ्ग ऋतुकाले गच्छेत् । गर्भे जाते निवर्तेत । उक्तप्रकारातिक्रमेण गच्छन् पतितो भवेत् । इत्थमुत्पन्नः पुत्रः क्षेत्रजसंज्ञो भवति ।

अप.

अनेकभार्यकर्तव्यम्

सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् ।
सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ॥

(१) नन्वेव सति भर्तृतन्त्रत्वात् स्त्रीणा तस्य च स्वतन्त्रत्वाद् यावत्यो जायास्ताः सर्वास्तुल्यवत् कर्मणि विनियुञ्जीत । नैव—सत्यामन्यामिति । सत्या सवर्णायामन्या धर्मकार्यं न कारयेदिति संबन्धः । सवर्णास्वपि ज्येष्ठया विना नेतरा कनिष्ठाम् । तासामपि यथाज्यैष्ठ्यम् । विधौ अग्निहोत्रादिकर्मणि । धर्म्ये आज्यावेक्षणादौ, कृत्वर्थ इति यावत् । कनीयसीमपि तु सवर्णामेव कारयेत् । असवर्णास्वप्येकान्तरत्वज्यैष्ठ्यादिक्रमेण व्याख्येयम् ।

विश्व.१।८६

(२) अनेकभार्य प्रत्याह—सत्यामन्यामिति । सवर्णाया सत्या अन्यामसवर्णा नैव धर्मकार्यं कारयेत् । सवर्णास्वपि बह्वीषु धर्म्ये विधौ धर्मानुष्ठाने ज्येष्ठया विना ज्येष्ठा मुक्त्वा इतरा मध्यमा कनिष्ठा वा न नियोक्तव्या ।

मिता.

पुनर्दारक्रिया

दाहयित्वाऽग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः ।
आहरेद्विधिवद्दारानग्नींश्चैवाविलम्बयन् ॥

(१) नन्वेव सति ज्येष्ठाया म्रियमाणाया यदि कनिष्ठा प्रमीयेत, तस्या अग्निहोत्राद्यर्थेनाग्निना दाहो

(१) **यास्मृ.१।८८; विश्व.१।८६; मिता; अप.; व्यक.१३१; विर.४१९; वीमि; विभ.११.**

(२) **यास्मृ.१।८९; विश्व.१।८७ लम्बयन् (लम्बितः); मिता.; अप.; वीमि.**

न प्राप्नोति । उच्यते—दाहयित्वाग्निहोत्रेणेति । क्रत्वर्थेषु हि ज्येष्ठाया नियमो न पुरुषार्थेषु । पुरुषार्थश्च दाहः, शरीरसंस्कारत्वात् । अतश्च वृत्तवती चेत्संस्कर्तव्यैव । वृत्तवत्यधिकारिणीति यावत् । ननु पुरुषार्थेष्वपि वरकर्तृकेषु ज्येष्ठेवाग्रे संस्कर्तव्या । तथा नामास्तु । को दोषः । द्वयोर्युगपन्मरणे कनिष्ठायाः संस्कारलोपः स्यात् । पात्राणामग्नीना च ज्येष्ठायामुपक्षीणत्वात् । प्रतिपाद्यत्वाच्च न पात्रान्तरोत्पत्तिः । अग्नीना त्वशक्यत्वैव । एकचितिकरणेऽपि यथोक्तायां दाहावृतोऽनुपपत्तिरेव । उच्यते । अयाज्ञिकत्वोद्यमेतत् । सतापजत्वादग्नीना अनेकस्मिन्नप्याहवनीयसतापजे तच्छब्दलाभात् । नन्वेकस्मिन् सतापेन रूढे शिष्टोऽग्निरनाहवनीय एव, लौकिकत्वात् । केनाख्यातमायुष्मतः । अपवृक्तकर्मा हि लौकिको भवति । दाहार्थं चोद्धृतो दाह्यानुसारेणैवापवृज्येतेति विशेषाग्रहणाच्चोद्धरणस्य सर्वदाह्यार्थत्वमविरुद्धम् । पात्रचयस्तु ज्येष्ठाया एव, मुख्यत्वात् । शरीरसंस्कारत्वेऽपि च पात्राणामप्रयोज्यत्व स्विष्टकृत्युत्तरार्धस्येव । तेनैव च कनीयसी निन्यते । यद्वा, अग्नीनामेव संस्कारकत्वम् । पात्रचयस्तु तत्प्रतिपत्तिः । तथाच पात्रेषु द्वितीयैव दृश्यते—'जुहू घृतेन पूर्णा दक्षिणे पाणौ सादयती'ति । 'अग्निभिरादीपयन्ती'त्यग्निषु तृतीयाप्रतिपाद्यत्व तु कर्मान्तरानुसारात् । 'या त्वग्निभिर्दहन्ती यज्ञपात्रैश्चे' ति तृतीया अर्थप्राप्तत्वादनुवादः । यज्ञायुधिवाक्य त्वर्थवादत्वादकिञ्चित् । तस्माद् यावत्यः पत्न्यः सर्वा एवाग्निहोत्राद्यर्थेनाग्निना दग्धव्या इति स्थितम् । केचित्त्वदाहमेव पत्न्या इच्छन्ति । तत्पुनः 'आहिताग्निमग्निभिर्दहन्ती'ति लिङ्गस्याविवक्षितत्वात् प्रातिपदिकार्थसंभवाच्च श्रुतिविरुद्धम् । तथाच काठके श्रुतौ 'शवाग्नयो वा एते भवन्ति, ये पत्न्या प्रमीताया धार्यन्त' इत्युपक्रम्य 'तस्मात् पत्नीमग्निभिर्दहेदि'ति विस्पष्टो विशेषविधिः । सूत्रकारादिवचनानि श्रुतिविरुद्धत्वादनादृत्यानि । एवमर्थवादायुन्नेया विधयः प्रत्याख्येया इत्यल प्रसङ्गेन । नन्वसवर्णाग्निहोत्रेण न दग्धव्या । यथाह मनुः—'एववृत्ता सवर्णा स्त्रीं द्विजातिः पूर्वमारिणीम् । दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ॥' इति । मैवम् । आहिताग्नित्वाविशेषात् । मानवं तु सवर्णाग्रहणमधिकारोपलक्षणार्थम् । यज्ञप्राप्त्या हि सर्वस्य ब्राह्मणत्वात् सावर्ण्यं यतः । तथा चाम्नायः—'ब्राह्मणो हि जायते यो यज्ञाज्जायत' इति । अपि च दाहयेदग्निहोत्रेण सवर्णा चेति वाक्यभेदः स्यात् । तस्मादविशेषेणैव दाहः । आहरेद् विधिवद् दारानग्नींश्चैवाविलम्बितः । शीघ्रम् । यद्वाऽविलम्बितशब्दः स्वहेतावपराभङ्गे विज्ञेयः । न चेत् पराभङ्गो गार्हस्थ्याद् दारानाहरेत् । भङ्गश्चेदाश्रमान्तरं प्रतिपद्येत । अविद्यमानदारस्य च दारक्रिया दृष्टार्थत्वात् । विधिवदित्यस्याप्ययमेवार्थः । न चेद्योग्या पत्न्यस्ति, अन्यामुद्यच्छेदिति । आहरणाधिकारश्चेदाहरेत् । धर्मप्रजासंपन्नेऽन्यानधिकारात् । यत्तु 'अन्यतरापाये दारान् कुर्वीते'ति । तस्याप्ययमेवावसरः समर्थः, कृताधानस्योद्वाहासंभवात् । तथाच स्मरन्ति—'यद्युद्वहेत् प्रागग्न्याधेयाद्' इति । न्यायविदश्च याज्ञिकाः 'सर्वार्थित्वात् पुत्रार्थं न प्रयोजयेदि'त्याहुः । यत् पुनः 'आहृतोदाया भार्याया पुनरादधीते'ति, तदावसथ्यविषयमित्यल प्रसङ्गेन विस्तरेण ।

विश्व.१।८७

(२) प्रमीतपतिकाया विधिमुक्त्वा इदानीं प्रमीतभार्यं प्रत्याह—दाहयित्वेति । पूर्वोक्तवृत्तवती आचारवतीं विपन्ना स्त्रियमग्निहोत्रेण श्रौतेनाग्निना तदभावे स्मार्तेन दाहयित्वा, पतिः भर्ता अनुत्पादितपुत्रोऽनिष्टयज्ञो वा आश्रमान्तरेष्वनधिकृतो वा स्वयन्तराभावे पुनर्दारान् अग्नीश्च विधिवदाहरेत् । अविलम्बयन् शीघ्रमेव । 'अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः' इति दक्षस्मरणात् । एतच्चाधानेन सहाधिकृताया एव नान्यस्याः । यत्तु 'द्वितीया चैव यो भार्या दहेद्वैतानिकाग्निभिः । जीवन्त्यां प्रथमायां तु सुरापानसमं हि तत् ॥' इति । तथा 'मृतायां तु द्वितीयायां योऽग्निहोत्रं समुत्सृजेत् । ब्रह्महा स त विज्ञानीयाच्च कामात्समुत्सृजेत् ॥' इत्येवमादि, तदाधानेन सहानधिकृताया अग्निदाने वेदितव्यम् । मिता.

नारदः

स्त्रीपुंधर्मविवादपदनिरुक्तिः

[1]**विवाहादिविधिः स्त्रीणां यत्र पुंसां च कीर्त्यते ।**
स्त्रीपुंसयोगसंज्ञं तत् विवादपदमुच्यते ॥

(१) नासं.१३।१ तत् (तु); नास्मृ.१५।१ संज्ञं (नामै);

(१) यद्यपि स्त्रीपुंसयोः परस्परमर्थिप्रत्यर्थितया नृपसमक्षं व्यवहारो निषिद्धस्तथापि प्रत्यक्षेण कर्णपरम्परया वा विदिते तयोः परस्परातिचारे दण्डादिना दम्पती निजधर्ममार्गे राज्ञा स्थापनीयौ। इतरथा दोषभाग् भवति। मिता.२।२९५

(२) विवाहविधिरस्माभिराचारविवेकोद्योते प्रपञ्चितः। आदिशब्देनात्र स्त्रीपुधर्मा गृह्यन्ते। अत एव व्यवहारपदोद्देशकाले 'स्त्रीपुधर्मो विभागश्चे'त्युद्दिश्य प्रतिज्ञापूर्वकं तन्निरूपित मनुना—'पुरुषस्य स्त्रियाश्चैव' इत्यादि। रत्न.१३३

(३) विवाहसंस्कारविवाह्याविवाह्यविवाहस्वरूपपरिगणनशुल्कादिविभागाः स्त्रीपुसा यस्मिन् कीर्त्यन्ते स्त्रीपुसयोग इत्येवसंज्ञकं तद् विवादपद द्वादश, वर्तिष्यिम इति शेषः। नाभा.

वरणपाणिग्रहणस्वरूपम्

[1]स्त्रीपुंसयोस्तु संबन्धाद् वरणं प्राग् विधीयते।
वरणाद् ग्रहणं पाणेः संस्कारोऽथ द्विलक्षणः॥

(१) 'सयोगाद् वरणं प्रागि'ति वा पाठः। परस्परसबन्धात् पूर्व वरण, तदनन्तर पाणिग्रहणम्। एष एव सस्कारो द्विविधो वरणपाणिग्रहणलक्षणः। नाभा.

(२) स्त्रीपुसयोः ससर्गात् प्राक् त्रितय क्रियते, वरण पाणिग्रहण सप्तपदीप्रक्रमश्चेति। तत्र वरण नाम वरस्य संप्रदानत्वाय कन्यादात्रा प्रार्थनम्। तदेव च वाग्दानम्। एव स्थिते तयोः पाणिग्रहणसप्तपदीप्रक्रमयोः पूर्वभावि यद्वरणं तदनियतमनियामकमित्यर्थः। तयोरेव भार्यात्वोत्पादकत्वादिति भावः। बाल.२।१२७

[2]तयोरनियतं प्रोक्तं वरणं दोषदर्शनाद्।
पाणिग्रहणमन्त्राभ्यां नियतं दारलक्षणम्॥

(१) 'पाणिग्राहणिका मन्त्रा नियता' इत्यन्यः पाठः। तयोर्लक्षणयोर्वरणमनियतं दारलक्षणं, न नियोगतस्तस्यैव दारा भवन्ति। दोषदर्शनाद्, अन्योन्यानिच्छया च निवर्तते। पाणिग्रहणेन च मन्त्रेण च यः सस्कारः, तन्नियत दारलक्षणम्। न तस्य (नि)वृत्तिरस्ति। पूर्वस्मिन्निच्छातो दोषेण वा निवृत्तौ नास्ति दण्डः। उत्तरस्मिन् आमरणान्नास्ति त्यागः। अकारणेन त्यजन् दण्ड्यः। नाभा.

(२) दोषेति। अस्यार्थः—वरणस्यानियामकत्वमपि पूर्ववरस्य दोषे सत्येवेति। बाल.२।१२७

विवाह्यजातिः

[3]ब्राह्मणक्षत्रियविशां शूद्राणां च परिग्रहे।
स्वजात्या श्रेयसी भार्या स्वजात्यश्च पतिः स्त्रियाः॥

ब्राह्मणादीना चतुर्णा दारपरिग्रहे स्वजातीया ब्राह्मणस्य ब्राह्मणी, क्षत्रियस्य क्षत्रियेत्यादि। प्रशस्यतरा। एष प्रथमः कल्प इति प्रकर्षप्रत्ययाद् गम्यते। अस्मादेवेतरा अपि भवन्तीति गम्यते। स्वजातीयश्च पतिः स्त्रियाः श्रेयानिति, स्वजात्यालाभे अन्यस्मै देयेति। नाभा.

ब्राह्मणस्यानुलोम्येन स्त्रियोऽन्यास्तिस्र एव तु।
शूद्रायाः प्रातिलोम्येन तथान्ये पतयस्त्रयः॥

ब्राह्मणस्यानुलोम्येनानुक्रमेणान्याः ब्राह्मणी(मन्तरा) क्षत्रिया वैश्या शूद्रा चेति तिस्रः स्त्रियः। अनुकल्पोऽयं प्रकर्षप्रत्ययात् पूर्वश्लोके, 'कामतस्तु प्रवृत्तानामि'ति संहितान्तरे वचनाच्च। तथा शूद्रायाः प्रातिलोम्येनानुक्रमेण शूद्राभावे वैश्यः, ततः क्षत्रियः, ततो ब्राह्मणो भवति। एव शूद्रादन्ये त्रयः पतयः संभवन्ति। शूद्रा ब्राह्मणश्च पतिदाराभ्या तु(त्यौ) ब्राह्मणस्य चतस्रः शूद्रायाश्चत्वार इति। नाभा.

[4]द्वे भार्ये क्षत्रियस्यान्ये वैश्यस्यैका प्रकीर्तिता।
वैश्याया द्वौ पती ज्ञेयावेकोऽन्यः क्षत्रियापतिः॥

अपु.२५३।२४ विवाहादि (वैवाहिको) तत्...च्यते (तु तद्विवादपद स्मृतम्); मिता.२।२९५; व्यक.१२८सश तत् (इत्येतत्); स्मृच.५; पमा.४७२; र न.१३३; नृप्र.३२ यत्र (यच्च); सवि.३४२ हादिवि (दादेर्वि), वीमि.२।२९५ यत्र पुसां (पुंसो यत्र); व्यप्र.४०४; व्यउ.१३९; समु.११८.

(१) नासं.१३।२; नास्मृ.१५।२ न्धाद् (न्धे); अप. १।६५; बाल.२।१२७ थ द्विलक्षणः (पि विचक्षणैः).

(२) नासं.१३।३; नास्मृ.१५।३ न्त्राभ्या (न्त्रश्च); अप. १।६५; बाल.२।१२७ पू.

(१) नासं.१३।४; नास्मृ.१५।४ स्वजात्या (सजातिः) स्वजात्यश्च (सजातिश्च); नृप्र.३३ परिग्रहे (विशेषतः) त्या (तिः) त्यश्च पतिः (नौ च वरः); समु.११८ नास्मृवत, स्मृत्यन्तरम्.

(२) नासं.१३।५; नास्मृ.१५।५.

(३) नासं.१३।६ ज्ञेयावे (अन्या प); नास्मृ.१५।६.

द्वे क्षत्रियस्यान्ये क्षत्रियायाः, वैश्या शूद्रा च । वैश्यस्यैकान्या वैश्यायाः, शूद्रा । क्षत्रियाया वक्तव्ये वैश्योक्ता चतुष्कादिक्रमादेक्यानुग्रहार्थम् । वैश्याया द्वावन्यौ वैश्यात्, क्षत्रियो ब्राह्मणश्च । क्षत्रियाया अन्यः क्षत्रियादेको ब्राह्मणः । क्षत्रियो वैश्या च तुल्यौ तिस्र स्त्रयश्च । वैश्यः क्षत्रिया च तुल्यौ पतिदाराभ्या द्वे द्वाविति । नाभा.

विवाहे सापिण्ड्यगोत्रादिविचारः

आ सप्तमात् पञ्चमाच्च बन्धुभ्यः पितृमातृतः ।
अविवाह्याः सगोत्रा स्युः समानप्रवरास्तथा ॥

आङ् मर्यादायामिति केचित् । अभिविधावित्यन्ये, 'ऊर्ध्वं सप्तमात् पितृबन्धुभ्य' इत्यन्यत्र दर्शनात् । 'प्राक् सप्तमादि'त्यप्रत्यक्षत्वात् । आ पञ्चमान्मातृबन्धुभ्य इति चाभिविधिरेव, न विवाहमर्हन्ति पितृष्वस्रादिसबद्धाः मातामहमातुलादिसबद्धाश्च । सगो(त्रा?त्रे)तुल्यास्ते समानप्रवराश्चेत्यन्ये । सगोत्रा असमानप्रवरा द्रष्टव्या अस्मिन् व्याख्याने । नाभा.

विवाह्यपुरुषलक्षणविचारः

परीक्ष्य पुरुषं पुंस्त्वे निजैरेवाङ्गलक्षणैः ।
पुमांश्चेदविकल्पेन स कन्यां लब्धुमर्हति ॥

विचार्य पुरुष पुस्त्वे, दुर्ज्ञानत्वात् पुस्त्वस्य । निजैरेवाङ्गलक्षणैर्वक्ष्यमाणैः । कुलाद्यभिमतश्चेत् पुस्त्वलक्षणयुक्तः कन्या लभेत । नाभा.

सुबद्धजत्रुजान्वस्थिसुबद्धांसशिरोधरः ।
स्थूलघाटातनूजत्वगविलम्बगतिस्वरः ॥
[4]विट् चास्य प्लवते नाप्सु रवि मूत्रं च फेनिलम् ।
पुमान् स्याल्लक्षणैरेतैर्विपरीतस्तु पण्डक. ॥

सुबद्ध सुदृढ जत्रु जान्वस्थि च । सुबद्धांसशिरोधरः । अधस्तादस्थि जानु जङ्घेति । अन्येषा सर्वास्थीनि च दृढानि । अंसौ बाहू ग्रीवा च । तथा विस्तीर्णा घाटा ललाटस्योपर्युभयतो रोमाणि, त्वक् च स्थूला । अविलम्बगतिस्वरः अविच्छिन्नाविलम्बितगतिस्वरः । पुरीषं चाप्सु न प्लवते । शब्दवत् फेनवच्च मूत्रम् । एतैर्लक्षणैर्युक्तः पुमान् । अतो विपरीतैर्नपुसकः । नपुसकाय दत्तामप्यददतो नास्ति दोषः । नाभा.

चतुर्दशनपुंसकादिविचारः

[1]चतुर्दशविधः शास्त्रे षण्ढो दृष्टो मनीषिभिः ।
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ॥

स तु षण्डकश्चतुर्दशप्रकार उक्तः शास्त्रे मेधाविभिर्दत्तात्रेयप्रभृतिभिः । इह चिकित्सार्हाश्चेत(राश्च ? रे च) तेषामुक्तो विधिः क्रमात्, त वक्ष्यामीति शेषः । वैद्यकेषाय चिकित्स्योऽयमचिकित्स्य इत्युक्तम् । नाभा.

[2]निसर्गषण्डो वध्रश्च पक्षषण्डस्तथैव च ।
अभिशापाद् गुरो रोगाद् देवक्रोधात् तथैव च ॥
[3]ईर्ष्यापण्डश्च सेव्यश्च वातरेता मुखेभगः ।
आक्षिप्तो मोघबीजश्च शालीनोऽन्यापतिस्तथा ॥

उत्पत्तित एव षण्डो निसर्गषण्डः । वध्रः शयितमुष्कः । पक्षषण्डः पक्षे समागमसमर्थः । गुरुशापादुपहतपुस्त्वः । तथा रोगाद् देवतापराधाच्च । ईर्ष्यापण्डः, परपुरुषेण संवध्यमाना दृष्ट्वा पुस्त्वमुपजायते । सेव्यः, पुरुषेण सेव्यमानस्योपजायते । वातरेताः, वातेनोह्यते योनौ न सिच्यते शुक्रम् । मुखेभगः, मुखग्रहण प्रदर्शनार्थम् । भगादन्यत्र भगकार्यं भवति । पुस्त्व न भग इति केचित् । केचिदन्यत्र क्षतयोन्या अपीति दुर्गम् । अन्ये परेण स्वमुखे क्रियमाणे पुस्त्वमुपजायते स मुखेभग इति । आक्षिप्तबीजः, रतिर्भवति संयोगाद्, रतिकाले शुक्रं, नास्ति । मोघबीजः, भवति तु शुक्रं, न भवत्यपत्यम् । चतुर्ष्वप्येतेष्वीर्ष्यापण्डाडिषु क्षतयोनित्वं यथा

(१) **नासं** १३।७, **नास्मृ.**१५।७ च्च (द्वा).

(२) **नासं.**१३।८, **नास्मृ.**१५।८ क्ष्य पुरुष (क्ष्यः पुरुषः).

(३) **नासं.**१३।९; **नास्मृ.**१५।९ स्थि (स्थि.) सशिरोधरः (शशिरोरुह.) टानतूजत्व (टस्तनूहत्व).

(४) **नासं.**१३।१०; **नास्मृ.**१५।१० विट् चास्य प्लु (रेतोऽस्योत्प्लु) रावि (ह्रादि) पण्ड (षण्ढ); **बाल.**२।१४० पूर्वार्धे (यस्याप्सु प्लवते वीर्यं ह्रादि मत्र च फेनिलम) पण्ड (षण्ढ).

(१) **नासं.**१३।११ षण्ढो (स तु); **नास्मृ.**१५।११; **बाल.**२।१४०.

(२) **नासं.**१३।१२; **नास्मृ.**१५।१२ वध्र (वध्रि); **बाल.** २।१४० वध्र (बन्ध); **समु.**११८ वध्र (बन्ध्य) पू., पुराणम्.

(३) **नास** १३।१३ सो (स) न्या (न्य), **नास्मृ.**१५।१३; **बाल.**२।१४० बीजश्च (बीजी च); **समु.**११८ सो (स) बीजश्च (बीजी च) पुराणम.

संभवति तथा व्याख्येयं, 'क्षतयोन्या अपी'ति वचनात्। शालीनोऽधृष्टः, स्त्रियं दृष्ट्वा लज्जया न प्रहृष्यति। अन्यपतिः, अन्यस्या भवति पुस्त्वं, न स्वभार्यायाम्। नाभा.

[1]तत्राद्यावप्रतीकारौ पक्षाख्यं मासमाचरेत्।
अनुक्रमत्रयस्यास्य कालः संवत्सरः स्मृतः॥

तत्रेति निर्धारणसप्तमी। आद्यौ निसर्गपण्डवध्रौ अप्रतीकारौ त्यक्तव्यावेव निर्वृत्तेऽपि पाणिग्रहणे। 'पाणिग्रहणमन्त्राभ्यां नियतं दारलक्षणमि'त्यस्यापवादोऽयम्। य एवविधोऽनाख्याय वरयति, पाणिं वा गृह्णाति, यश्च ज्ञात्वा ददाति स राज्ञा दण्ड्यः। पक्षपण्डस्तु मासमाचरेत्। ततो ज्ञात्वा पक्षादूर्ध्वमपुस्त्वे त्याज्यः। दण्ड्यस्त्वनाख्यानात्। अनुक्रमादनन्तरस्य त्रयस्य गुरुरोगदेवतानिमित्तपण्डस्य सवत्सर उदीक्ष्यः, ऊर्ध्वं तु त्यागः, नात्र दण्डः। एतावता कालेनाप्रतिविहितमप्रतिविधेयमेतद् भवति। नाभा.

[2]ईर्ष्यापण्डादयो येऽन्ये चत्वारः समुदाहृताः।
संत्यक्तव्याः पतितवत् क्षतयोन्या अपि स्त्रियाः॥

'स्त्रिये'ति वा पाठः। ईर्ष्यापण्डसेव्यवातरेतोमुखेभगाश्चत्वारः सम्यगनवे(क्ष्याः ? क्ष्य) त्याज्या एव पतितवत्। अकार्यकारित्वात् पतिता एव ते। क्षतयोन्या अपि, किमुताक्षतयोन्या वरणपाणिग्रहणमात्रेण। नाभा.

[3]आक्षिप्तमोघवीजौ च पत्यावप्रतिकर्मणि।
पतिरन्यः स्मृतो नार्या वत्सरं संप्रतीक्ष्य तु॥

'वत्सरार्धं परीक्ष्य तु' इत्यन्यः पाठः। आक्षिप्तवीजो मोघवीजश्च यौ, तौ संवत्सरं परीक्ष्य सर्वथा तथाभावे पत्यौ प्रतिक्रियामकुर्वति पतिरन्यो ग्राह्यः। प्रतिकर्मकरणे यावदेकान्तज्ञानं तावत् प्रतीक्ष्यः। नाभा.

[4]शालीनस्यापि धृष्टस्त्रीसंयोगाद् भज्यते ध्वजः।
तं हीनवेषमत्तस्त्रीबालान्धाभिरुपक्रमेत्॥

शालीनस्यापि प्रगल्भस्त्रीसन्निधौ नोत्तिष्ठति ध्वजः। उत्थितोऽपि भज्यते। तं हीनवेषाभिरनुज्वलाभिः। तत्र परिभवान्न लज्जा भवति। तथा मत्ताभिर्बालाभिरन्धाभिरपि अन्धकारादावुपक्रमः। तथापगतशालीनभावः स्वभार्याया रसज्ञः सम्प्रवर्तिष्यते। नाभा.

[5]अन्यस्यां यो मनुष्यः स्यादमनुष्यः स्वयोषिति।
लभेत सान्यं भर्तारमेतत् कार्यं प्रजापतेः॥

अन्यस्या स्त्रिया मनुष्यः स्वभार्याया पण्डः अन्यपतिरित्युक्तः, त परित्यज्य ततोऽन्य भर्तारं लभेत सा। राज्ञ एतत् कार्यम्। एष वादः सर्वशेषः। नाभा.

कन्यादानक्रमः। कन्यास्वयंवरविधिः।

[6]पिता दद्यात् स्वयं कन्यां भ्राता वाऽनुमते पितुः।
मातामहो मातुलश्च सकुल्या बान्धवास्तथा॥

पिता दद्यात् कन्या स्वयम्। स्वयंग्रहणमन्यनिरपेक्षप्रामाण्यार्थम्। पित्रा अनुज्ञातो भ्राता वा, पितुरभावे मात्रा वा। तदभावे मातामहः, ततो मातुलः, ततः सकुल्याः सपिण्डाः, ततो बान्धवाः सबन्धिनः। नाभा.

[7]मातृभावे तु सर्वेषां प्रकृतौ यदि वर्तते।
तस्यामप्रकृतिस्थायां दद्युः कन्यां सजातयः॥

यथोक्तसर्वाभावे माता दद्याद् यदि प्रकृतिस्था वृत्तस्था पतितल्पमुपास्ते चेत्। तस्यां चासत्यामवृत्तस्थाया च समानजातीया ब्राह्मणकन्यां ब्राह्मणः। एवमितरा अपीतरे। नाभा.

[8]यदा तु नैव कश्चित्स्यात् कन्या राजानमाव्रजेत्।
अनुज्ञया वरं तस्य प्रतीत्य वरयेत् स्वयम्॥

---

(१) नासं.१३।१४; नास्मृ.१५।१४ त्यं (त्यो) क्रमत्र (क्रमात्तु).

(२) नासं.१३।१५; नास्मृ.१५।१५ पण्डा (पण्ढा) सत्यक्तव्याः (त्यक्तव्यास्ते) स्त्रियाः (स्त्रिया).

(३) नासं.१३।१६; नास्मृ.१५।१६ जौ च पत्यावप्रति (जाभ्यां कृतेऽपि पति) वत्सरं सं (वत्सरार्धं).

(१) नासं.१३।१७, नास्मृ.१५।१७ धृष्ट (दृष्ट) भज्य (भ्रश्य) (त हीनवेषमन्यस्त्रीबालाधाभिरुपाचरेत्).

(२) नासं.१३।१८; नास्मृ.१५।१८.

(३) नासं.१३।२०; नास्मृ.१५।२० माता (पिता).

(४) नासं.१३।२१; नास्मृ.१५।२१ भावे तु (स्वभावे) जातयः (नाभयः).

(५) नासं.१३।२२; नास्मृ.१५।२२ व्रजेत् (श्रयेत्) वरं तस्य (तस्य वर).

यदा तु नैव कश्चित् स्याद् दातोक्तानां मध्ये, सा राजानमाव्रजेद् देहि मा कस्मैचिदिति । तदनुज्ञया अभीष्टमनुरूपमावेद्य राज्ञे स्वय प्रतीत्य वरं वरयेत् ।

नाभा.

सवर्णमनुरूपं च कुलरूपवयःश्रुतैः ।
सह धर्मं चरेत्तेन पुत्रांश्चोत्पादयेत् ततः ॥

सवर्णं समानजातीयम् । कुलादिभिर्युक्तम् । सवर्णमित्येव गते सवर्णं स्वयं वरयन्ती रूपादियुक्तमेव वरयति न विरूपादिकमित्येतत् प्रयोजनं, सवर्णमपि कुलादियुक्तम् । सर्वे कुलयुक्ता एव, प्रकर्षार्थमुक्तमिमे कुलजा इति । तेन सह धर्मं गृहस्थाना चरेत् । धर्मे चार्थे च कामे च नातिचरेत् । तत एव पुत्रानुत्पादयेत् । तत इत्यवक्तव्ये वचनप्रयोजन तस्यासामर्थ्यं तदनुज्ञया क्षेत्रजोत्पादनार्थम् । तद्धि तत एवोत्पन्नमपत्य भवति । नाभा.

प्रतिगृह्य च यः कन्यां वरो देशान्तरं व्रजेत् ।
त्रीनृतून् समतिक्रम्य कन्यान्यं वरयेद् वरम् ॥

(१) कन्याग्रहण प्राप्तवरार्थं, न वाला प्रतिगृह्येति वरणमात्रार्थं, न पाणिगृहीताम् । तथाभूता प्रतिगृह्यापरिणीय देशान्तर गच्छेत्, सा त्रीनृतूनतिक्रम्य देया । दातुरभावेऽदाने वा स्वय वरयेत् । न तत्र वाग्दोषः । नाभा.

(२) प्रतिगृह्य वाचा दत्ता स्वीकृत्य । बाल.२।१२७

कन्या नर्तुमुपेक्षेत बान्धवेभ्यो निवेदयेत् ।
ते चेन्न दद्युस्तां भर्त्रे ते स्युर्भ्रूणहभिः समाः ॥

ऋतु कन्या नोपेक्षेत न गूहेत्, स्वजनेभ्य आख्यापयेत् । उपेक्षाया तस्या एव दोषः । ते तु श्रुत्वा भर्त्रे न चेद् दद्युर्भ्रूणहभिस्तुल्याः, याप्या दण्ड्याश्च । नाभा.

यावन्तश्चर्तवस्तस्याः समतीता विना पतिम् ।
तावत्यो भ्रूणहत्याः स्युस्तस्य यो न ददाति ताम् ॥

(१) **नासं** १३।२३; **नास्मृ.**१५।२३ रूप (शील) पुत्रांश्चो (प्रजां चो).

(२) **नासं.**१३।२४ वरो (नरो); **नास्मृ.**१५।२४; **अप.** १।६५; **बाल.**२।१२७ च (तु) 'सवत्सरमती'ति पाठान्तरम्; **समु.**११८ च यः (तु या) मनुः.

(३) **नासं.**१३।२५; **नास्मृ.**१५।२५.

(४) **नासं.**१३।२६; **नास्मृ.**१५।२६ समतीता विना पतिम् (समतीयुः पतिं विना).

कन्यायां प्राप्तवरायामदीयमानाया न केवलं भ्रूणहभिः समाः, यावन्तश्चर्तवस्तस्या विना भर्त्राति(क्र ! क्रा)मेयुस्तावत्यो भ्रूणहत्या भवेयुः, यस्ता योग्याय न ददाति । तस्मादवश्य देयेत्येतत् प्रतिपाद्यतेऽदानस्य निन्दया। नाभा.

अतोऽप्रवृत्ते रजसि कन्यां दद्यात् पिता सकृत् ।
महदेनः स्पृशेदेनमन्यथैष विधिः सताम् ॥

अत एवाप्रवृत्ते रजसि ऋतावप्रवृत्ते एव प्रसङ्गावस्थायामेव नग्निका पिता सकृदेव दद्यात् । वाचा दाने प्रवृत्ते पुनरप्रसङ्गार्थ सकृदित्युक्तम् । अदाने प्राग्ऋतोर्महानधर्मः पितुर्भवेत् । अत एनो मा स्प्राक्षीदिति नग्निकामेव दद्यादित्येष विधिः साधूनाम् । एष साध्वाचार इति प्ररोचना । नाभा.

सकृदंशो निपतति सकृत् कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत् सकृत् ॥

सकृत्क्रियैवैतेषा, अन्यथा दण्ड इत्येवमर्थं उपदेशः । प्रसगेनान्यदाह । यथाशदाने सकृद् एव कन्यादानमपीति विभागः । सकृत्, (न) पुनः पुनः । कन्यादानस्य पृथगुक्तत्वात् नान्यविषयं दानम् । सकृदेव स्वत्वस्य निवृत्तत्वात् पुनः कि दास्यति । स्वत्वनिवृत्तिपरस्वत्वापादने हि दानम् । एव कन्यायाः । नाभा.

ब्राह्मादिषु विवाहेषु पञ्चस्वेष विधिः स्मृतः ।
गुणापेक्षं भवेद् दानमासुरादिषु च त्रिषु ॥

ब्राह्मप्राजापत्यार्षदैवगान्धर्वेषु पञ्चस्वेष विधिरनुक्रान्तः 'सकृत् कन्या प्रदीयत' इत्यादि, 'कन्या दद्यात् पिता सकृदि'ति । आसुरराक्षसपैशाचेषु त्रिषु गुणापेक्षम् । सकृद् दास्यामीत्युक्त्वापि गुणवत्तराय दाने न दोषः शुल्कभूयस्त्वे वा प्रमथ्य हृते वा, पैशाचेऽपि तथेति । 'पञ्चस्वपि विधिः स्मृतः', 'आसुरादिषु न त्रिष्वि'ति पाठे पञ्चस्वपि गुणापेक्षं दानं, नेतरेषु त्रिषु, तत्र

(१) **नासं.**१३।२७; **नास्मृ.**१५।२७ अतोऽ (अतः) षैष (षैवं).

(२) **नासं.**१३।२८; **नास्मृ.**१५।२८ सकृत् सकृत् (सतां सकृत्).

(३) **नासं.**१३।२९; **नास्मृ.**१५।२९.

धनाद्यपेक्षम्। गान्धर्वेऽपि अन्योन्येच्छामात्रेण यथोक्तगुणापेक्षमेव। नाभा.

दत्तकन्यापुनर्हरणसदोषकन्यादानसदोषप्रतिग्रहीत्रादिविचारः

[1]कन्यायां प्राप्तशुल्कायां ज्यायांश्चेद् वर आव्रजेत्।
धर्मार्थकामसंयुक्तं वाच्यं तत्रानृतं भवेत्॥

कन्यायां प्राप्तशुल्कायां शुल्कग्रहणकाले प्रशस्यतरः प्रार्थनीयो यद्यागच्छेत्, तत्र धर्मादियुक्त शीलवती कुलरूपवती चेत्याद्यनृतमपि प्रयोजनार्थं वक्तव्यम्। नात्रानृतवचने दोषः। अन्य आह—गृहीतशुल्काया प्रशस्यतरो यद्यन्य आगच्छेत् तत्र धर्मादियुक्तमविधेया अविनेया अतिविरूपा च तस्मात् तव न ददामीति शुल्कप्रदाने नास्त्यनृतदोष इति। नाभा.

[2]नादुष्टां दूषयेत् कन्यां नादुष्टं दूषयेद् वरम्।
दोषे तु सति नागः स्यादन्योन्यं त्यजतोस्तयोः॥

दत्ता प्रतिगृहीता वादुष्टा वरो न दूषयेद् न त्यजेद् दोषवतीति। न चादुष्ट पुरुष दोषरहित वरं दोषवानिति त्यजेत्। दोषे सति त्यजतोरन्योन्य नापराधः दृष्टे राजकुलादावदृष्टे च। नाभा.

[3]दत्त्वा न्यायेन यः कन्यां वराय न ददाति ताम्।
अदुष्टश्चेद् वरो राज्ञा स दण्ड्यस्तत्र चोरवत्॥

दत्त्वा शुल्कादिना न्यायेन साक्षिमध्ये यो न ददाति अदुष्टाय, स दण्ड्यश्चोरवद्राज्ञा। नाभा

यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति।
तस्य कुर्यान्नृपो दण्डं पूर्वसाहसचोदितम्॥

यो दोषवतीं, दोषा वक्ष्यमाणा 'दीर्घकुत्सितरोगार्ता' इत्याद्याः, तानाख्याय ददाति, आख्याय दाने न दोषः, तस्य पूर्वसाहसो दण्डः। नाभा.

[4]अकन्येति तु यः कन्यां ब्रूयाद् द्वेषेण मानवः।
स शतं प्राप्नुयाद् दण्डं तस्या दोषमदर्शयन्॥

पुरुषेण संबद्धेय, न कन्येति प्रतिगृह्य कन्याद्वेषेण यो ब्रवीति स शतं दण्ड्यः, यदि कन्यादोषं न दर्शयति। अथ विभावयति, न दण्ड्यस्त्यजन्नपि। नाभा.

[5]प्रतिगृह्य तु यः कन्यामदुष्टामुत्सृजेद् वरः।
विनेयः सोऽप्यकामोऽपि कन्यां तामेव चोद्वहेत्॥

अदुष्टामविभावितदोषा प्रतिगृह्य य उत्सृजेद्वरः, सोऽपि विनेयः। विनयस्यावचनात् सोऽपीत्यपिशब्दात् पूर्वोक्तशतमेवेति गम्यते। अनिच्छन्नपि तामेव कन्यामुद्वहेत् तामुद्वहेदेवेत्यर्थः अनियतदेशत्वाच्चादीयमाना, नान्योद्वाहप्रतिषेधः, तामुत्सृष्टुं न लभत इति। नाभा.

[6]दीर्घकुत्सितरोगार्ता व्यङ्गा संसृष्टमैथुना।
दुष्टाऽन्यगतभावा च कन्यादोषाः प्रकीर्तिताः।

'यस्तु दोषवतीं कन्याम्' 'अदर्शयन्नि'ति चोक्तम्। ते दोषा उच्यन्ते। दीर्घरोगाः शूलार्शआदियुक्ताः। कुत्सितरोगाः कुष्ठादियुक्ताः। आर्ता राजग्राहादिदारिद्र्यादियुक्ताः, एताभ्यां वाऽऽर्ताः। व्यङ्गा विकलाङ्गाः। संसृष्टमैथुना भुक्तपूर्वाः। धृष्टाश्चान्यगतभावाश्च धृष्टान्यगतभावाः। धृष्टा निर्लज्जाः कार्याकार्येषु प्रसह्य वर्तन्ते। अन्यगतभावा अन्यकामाः। यथा कन्यादोषाः, एते प्रदर्शनमात्रम्। अन्येऽपि प्रसिद्धा द्रष्टव्याः। दोषवतीरुक्त्वा एते दोषा इति ब्रवीति, तत्रार्थाद् यत्संबन्धाद् दोषवत्यस्तास्ते दोषा इत्युक्त भवति। धर्मिणा धर्माख्यान दृष्टम्। तद् यथा—गोत्वे किं लक्षणमिति पृष्टे विषाणी ककुद्मान् प्रान्तेवालधिः सास्नावानिति गोत्वे लिङ्गमिति, एवमिहापि दीर्घरोगादयो दोषा इत्युक्त भवति। नाभा.

---

(१) **नासं.**१३।३०; **नास्मृ.**१५।३० कृत वाच्य (कृतो वाक्यं), **समु.**११९ ज्या (श्रे) वाच्य (वाक्य) भवेत् (व्रजेत्) मनुः.

(२) **नासं.**१३।३१; **नास्मृ.**१५।३१ नागः (गाग.).

(३) **नासं.**१३।३२; **नास्मृ.**१५।३२; **बाल.**२।१२७ दत्त्वा (दत्तां).

(४) **नासं.**१३।३३; **नास्मृ.**१५।३३; **अप.**१।६६.

(१) **नासं.**१३।३४; **नास्मृ.**१५।३४; **बाल.**२।२८९ द्वेषे (दोषे) स शत (सतत).

(२) **नासं.**१३।३५; **नास्मृ.**१५।३५ वरः (नरः) विनेयः सोऽप्य (स विनेयस्त्व); **अप.**१।६६ सोऽप्य (सोऽन्य).

(३) **नासं.**१३।३६ ङ्गा (ङ्गाः) ना (नाः) सस्र (संस्र्) दु (धृ) वा चे (वाश्च); **नास्मृ.**१५।३६; **अप.**१।६६ संस्र (संस्र्) दू (धृ)ः २।२८९ दु (धृ).

उन्मत्तपतितक्लीबदुर्भगत्यक्तबान्धवाः ।
कन्यादोषौ च यौ पूर्वावेष दोषगणो वरे ॥

'नादुष्टं दूषयेद् वरम्' 'दुष्टश्चेन्न वर' इति चोक्तम् । दोषा उच्यन्ते उन्मत्तः 'पञ्चोन्मादाः समाख्याता वातपित्तकफोद्भवाः । चतुर्थो धननाशेन सन्निपातेन पञ्चमः ॥' इति । पतितः सुवर्णस्तेयादिमहापातकोपपातककृत् । क्लीबः उपहतपुरुषः । दुर्भगः सर्वद्वेष्यः । त्यक्तबान्धवो बान्धवैरत्यक्तः । पूर्वौ च कन्यादोषौ दीर्घरोगः कुत्सितरोगश्च । एष दोषगणो वरविषयः । धर्मिणा धर्मनिर्देशः पूर्ववत् । नाभा.

अष्टौ विवाहाः

***अष्टौ विवाहा वर्णानां संस्काराख्याः प्रकीर्तिताः ।**
ब्राह्मस्तु प्रथमस्तेषां प्राजापत्यस्तथैव च ॥
आर्षश्चैवाथ दैवश्च गान्धर्वोऽथासुरस्तथा ।
राक्षसोऽनन्तरस्तस्मात् पैशाचश्चाष्टमोऽधमः ॥

संख्याग्रहण परिगणनार्थ वर्णानां सम्भवतः । संस्काराख्याः उपनयनस्थानीयाः । शेषो गतार्थः । नाभा.

सत्कृत्याहूय कन्यां तु ब्राह्मो दद्यात् स्वलङ्कृताम् ।
सह धर्मं चरेत्युक्त्वा प्राजापत्यो विधीयते ॥

अष्टाना लक्षणमुच्यते । सत्कृत्य पूजयित्वा आहूय वरं तस्मै कन्या दद्यात्, एष ब्राह्मः । आहूय कन्यादानमात्रम् । यथाविभवमलङ्कृता । सह पत्या धर्मं चरेत्युक्त्वा दद्यादित्येवमेष प्राजापत्यः । नाभा.

वस्त्रगोमिथुने दत्त्वा विवाहस्त्वार्ष उच्यते ।
अन्तर्वेद्यां तु दैवः स्याद्ऋत्विजे कर्म कुर्वते ॥

वस्त्रयुगं च गोयुगं च दत्त्वा विवाहः । विवाहयेदिति त्वाप्रत्ययोपपत्तिः । एष आर्षः । अन्तर्वेद्या तु यज्ञमध्ये ऋत्विजे कर्म कुर्वते, अलङ्कृत्येत्यादि सर्वत्र तुल्यं, दद्यात् स दैवः । नाभा.

इच्छन्तीमिच्छते प्राहुर्गान्धर्वो नाम पञ्चमः ।
विवाहस्त्वासुरो ज्ञेयः शुल्कसंव्यवहारतः ॥

कामयमाना कामयमानाय दद्याद्, गान्धर्वो नाम सः । आसुरः शुल्कपणापणपरिच्छेदेन द्रव्यं गृहीत्वा दानमासुरः । दैवे तु गृहीत्वा द्रव्यं पिता तस्या एव दद्यात्, अपत्यविक्रयप्रतिषेधात् । इह तु विक्रय एव । नाभा.

प्रसह्य हरणादुक्तो विवाहो राक्षसः स्मृतः ।
सुप्रमत्तोपगमनात् पैशाचश्चाष्टमोऽधमः ॥

प्रसह्य प्रमथ्य हरणाद् राक्षसः । सुप्त मत्ता वोपगच्छति, स पैशाचः । अधमः पापः सर्वेभ्यः । नाभा.

एषां तु धर्म्याश्चत्वारो ब्राह्माद्याः समुदाहृताः ।
साधारणः स्याद् गान्धर्वस्त्रयोऽधर्म्यास्त्वतः परे ॥

एषामष्टाना मध्ये चत्वारो धर्म्याः ब्राह्मप्राजापत्यार्षदैवाः । साधारणो गान्धर्वः न धर्म्यो नाप्यधर्म्यः । अतःपरे त्रयोऽप्यधर्म्याः, क्रयादपहरणादज्ञातसगमाच्च । एषा विस्तरो दानापत्यफल च भृगुसहिताया व्याख्यातम् । विस्तरेण तत एवोपलब्धव्यम् । नाभा.

स्त्रीरक्षा

स्वातन्त्र्याद्विप्रणश्यन्ति कुले जाता अपि स्त्रियः ।
अस्वातन्त्र्यमतस्तासां प्रजापतिरकल्पयत् ॥

(१) अतोऽन्यैरपि स्वस्त्रीणा यथा भवत्यस्वातन्त्र्यं तथैव कल्पयितव्यमिति शेषः । दुष्प्रसंगादपि रक्षणं कर्तव्यम् । स्मृच.२३९

(२) कुले जाताः सत्कुले जाताः । विर.४१०

(१) **नासं**.१३।४२; **नास्मृ**.१५।४२ च्छते (च्छत.) र्वो (र्वं) मः (मम्).

(२) **नासं** १३।४३, **नास्मृ**.१५।४३ स्मृतः (तथा) मत्तोपगमनात् (प्रमत्तोपगमात्) श्राष्ट (स्वष्ट).

(३) **नासं** १३।४४; **नास्मृ**.१५।४४ स्वतः (स्ततः).

(४) **नासं**.१४।३०; **नास्मृ**.१६।३०; **व्यक**.१२८ द्वि (द्धि); **स्मृच**.२३९; **विर**.४१० व्यकवत्; **रत्न**.१३३ व्यकवत्; **व्यप्र** ४०५; **व्यउ**.१३९; **सेतु**.२८०; **विभ**.२; **समु**.११९.

* अन्यस्मृतिगतोऽयं विचारः संस्कारकाण्डे संग्रहीष्यते । अत्र तु नारदेन विवादपदे संगृहीतत्वात् संगृहीतः ।

(१) **नासं**.१३।३७; **नास्मृ**.१५।३७ पूर्वार्धे (उन्मत्तपतितः क्लीबो दुर्भगस्त्यक्तबान्धवः).

(२) **नासं**.१३।३८; **नास्मृ**.१५।३८ ख्याः (र्धं) थैव च (थाऽपरः); **दा**.९० ख्याः (र्धं); **बाल**.२।१४५ (पृ. २६४) दावत्.

(३) **नासं**.१३।३९; **नास्मृ**.१५।३९ श्चैवाथ (श्चैव हि) र्वोऽथा (र्वश्चा) (राक्षसोऽनवरस्तस्मात्पैशाचस्त्वष्टमः स्मृतः).

(४) **नासं**.१३।४०; **नास्मृ**.१५।४० ब्राह्मो दद्यात् स्व (दद्यात् ब्राह्मे त्व) विधीयते (विधि. स्मृतः).

(५) **नासं**.१३।४१; **नास्मृ**.१५।४१ मिथुने दत्त्वा (मिथुनाभ्यां तु).

[1]पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
रक्षन्ति वार्धके पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥

वार्धकग्रहणं विधवावस्थोपलक्षणार्थम्। शेष ऋज्वेव। नाभा.

स्त्रीत्यागविचारः

[2]अनुकूलामवाग्दुष्टां दक्षां साध्वीं प्रजावतीम् ।
त्यजन् भार्यामवस्थाप्यो राज्ञा दण्डेन भूयसा ॥

वश्या प्रियवदा, दक्षा कुशला, अव्यभिचारिणीं, पुत्रवतीं त्यजन्नन्यत्र सक्तो, राज्ञा बहुतरेणानुरूपेण दण्डेनानुशिष्य तस्यामेव व्यवस्थाप्यः। नाभा.

[3]अन्योन्यं त्यजतोरागः स्यादन्योन्यविरुद्धयोः।
स्त्रीपुंसयोर्निगूढाया व्यभिचारादृते स्त्रियाः ॥

(१) आगः पाप, निगूढा रक्षिता। व्यक. १३२

(२) विवाहसस्कारविहीनयोर्हीनजातीयस्त्रीपुंसयोरन्योन्यविरोधेनान्योन्य त्यजतोर्धर्मः स्याद्दोषो न स्यादित्यर्थः। ऊढा विवाहसस्कृता। तस्यास्तु व्यभिचाररूपनिमित्तमन्तरेण नास्ति त्यागः। अनेन व्यभिचारे सत्यूढाया अप्यस्त्येव त्याग इत्यर्थादुक्तम्। तच्च स्वच्छन्दव्यभिचारिणीविषयम्। 'स्वच्छन्दगा च या नारी तस्यास्त्यागो विधीयत' इति यमस्मरणात्।

स्मृच.२४५–२४६

(३) अन्योन्यविरुद्धयोः परस्परत्यागे न दोषः। न तूढाया इति वचनाद् अविवाहितविषयमेतत्। ऊढा विवाहपरिगृहीता, तस्या नास्ति त्यागः। अस्यापवादः—व्यभिचारे सापि त्याज्यैव। नाभा.

[4]व्यभिचारे स्त्रिया मौण्ड्यमधःशयनमेव च।
कदन्नं च कुवासश्च कर्म चावस्करोज्झनम् ॥

(१) स्त्रिया अत्यन्तव्यभिचारे जाते मौण्ड्यमधःशयन च साधयेत्। कदन्न कुवासश्च भरणार्थं दद्यात्। अमेध्यशोधनरूपं च कर्म कारयेदित्यर्थः। स्मृच.२४२

(२) अत्र च स्त्रीव्यभिचार एव त्यागादिक गुरुलघूक्त व्यभिचाराणामेव तत्तद्विशेषमाश्रित्य व्यवस्थापनीयम्। विर.४२६

(३) व्यभिचारे मौण्ड्य,भूमौ शयन, कदन्न सक्त्वादि, कुवासो जीर्णवसन, अवस्करोच्छन मूत्रपुरीषस्थानशोधन कर्म च। नाभा.

[5]स्त्रीधनभ्रष्टसर्वस्वां गर्भविस्रंसिनीं तथा।
भर्तुश्च वधमिच्छन्तीं स्त्रियं निर्वासयेद् गृहात् ॥

(१) स्त्रीधनभ्रष्टसर्वस्वा स्त्रीधनत्वेन भ्रशित सर्वस्व यया सा तथोक्ता, भ्रष्टमत्र न भर्त्रा इत्यर्थः। व्यक.१३२

(२) स्त्रीधनेन सह भ्रष्ट सर्वस्व यस्याः सा तथोक्ता। गर्भविस्रसिनी औषधादिसेवया सपादितगर्भस्रावा, भर्तुर्वधमिच्छन्ती विषप्रदानादिनेति शेषः। +स्मृच.२४७

[6]अनर्थशीलां सततं तथैवाप्रियवादिनीम् ।
पूर्वाशिनी च या भर्तुः तां स्त्रीं निर्वासयेद् गृहात् ॥

पानप्रेक्षणबाह्यस्त्रीसंसर्गशीला, तथाऽप्रियवादिनी, प्रथमभोजनशीला, भर्तुरित्युभयोः शेषः, निर्वासयेद् ग्रामात्। नाभा.

---

(१) **नास.**१४।३१; **नास्मृ.**१६।३१ रक्षन्ति वार्धके पुत्रा (पुत्रास्तु स्थविरे भावे)

(२) **नास.**१३।९७ कूला (रूपा); **नास्मृ.**१५।९५; **व्यक.**१३२; **स्मृच.**२४५; **विर.**४२३; **पना.**४७४, **नृप्र.**३३ जन् भार्या (जेन्नारी); **व्यप्र** ४१०; **व्यउ.**१४१; **व्यम** १०८ (=) प्रजावतीम् (पतिव्रताम्) भूयसा (वै पतिः); **विता.**८२३ भूयसा (ता प्रति); **सेतु.**२८४; **विभ** १३ राज्ञा द (राजद); **समु.**१२२.

(३) **नासं.**१३।९२ तोरागः (तोर्नागः) निंगू (नैतू); **नास्मृ.**१५।९०; **व्यक.**१३२; **स्मृच.**२४५ रागः (धर्मः) निंगू (नै चो); **विर.**४२४ न्य (न्य); **पमा.**४७४ निंगू (नै चो); **सेतु.**२८४ न्यवि (न्य नि); **विभ.**१४ रागः (दंण्डः) न्य (न्य); **समु.**१२२ स्मृचवत्.

+ विर., नाभा. स्मृचवत्।

(१) **नासं.**१३।९३ ऊज्झ (ज्झ), **नास्मृ** १५।९१ ज्झ च (ज्झ वा), **स्मृच.**२४२, **विर.**४२६, **रत्न.**१३४; **व्यप्र.**४१० स्क (क); **व्यउ** १४१; **विता.**८१४ कर्म (काम) रोज्झनम् (रादनम्), **विभ** १६, **समु** १२१ पू.

(२) **नास.**१३।९४ स्रसिनी (स्राविणी); **नास्मृ.**१५।९२ गृहात् (पुरात्); **व्यक.**१३२; **स्मृच.**२४७; **विर.**४२४ स्रसि (भ्रंशि); **पमा.**४७६ स्रसि (ध्वंसि) शेष नास्मृवत्; **सेतु.**२८४ विरवत्; **विभ.**१४ विरवत्; **समु.**१२२.

(३) **नासं.**१३।९५ ता स्त्री (स्त्रियम्) गृहात् (बुध.); **नास्मृ** १५।९३ शिनी (शिनी) ता स्त्री (क्षिप्र); **व्यक.**१३२; **स्मृच.**२४७ शीला (शीला) दिनीम् (दिनी); **विर.**४२४; **पमा.**४७६ नास्मृवत्; **नृप्र.**३१; **सेतु.**२८४ शीला.सततं

वन्ध्यां स्त्रीजननीं निन्द्यां प्रतिकूलां च सर्वदा ।
कामतो नाभिनन्देत कुर्वन्नेवं न दोषभाक् ॥

निन्द्या मरणशीलापत्या, सार्वकाल विपरीतकारिणी, सर्वदेति कदाचित् प्रमादकृतनिवृत्त्यर्थम् । तादृशी यदि नेच्छति नाभिनन्देत न रमेत तया सह । 'कामतो नाभिनन्देते'त्यपरः पाठः । स एवार्थः । एव कुर्वन् न प्रत्यवैति, न च दण्ड्यः । नाभा.

अज्ञानदोषादूढा या निर्गता नान्यमाश्रिता ।
बन्धुभिः सा नियोक्तव्या निर्बन्धुः स्वयमाश्रयेत् ॥

अज्ञातदोषा पत्युरपचारादल्पदोषाद् रोषान्निर्गता गृहाद्, निर्दोषा अन्यमनपाश्रिता बन्धुगृहे स्थिता, तस्मिन्नेव पत्यौ स्वजनैर्नियोज्या । निस्स्वजना स्वयमेव तं प्रत्याश्रयेत् । 'अज्ञातदोषादूढा या निर्दोषे'त्यस्मिन् पाठे त्यक्ता 'नष्टे मृत' इत्यादौ वा बन्धुभिरन्यस्मै देया । निर्बन्धुः स्वयमेवान्यमाश्रयेत् । नाभा

प्रोषितभर्तृकावृत्तम्, तदङ्गोऽन्यपतिविधिश्च

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

एतास्वापत्सु यद्यक्षतयोनिः नियोगतोऽन्यतरस्या. पुत्रेच्छायाः पत्यनि(च्छ ? च्छा)या वा । पतिलोकेच्छाया न नियमः । नाभा.

अष्टौ वर्षाण्युदीक्षेत ब्राह्मणी प्रोषितं पतिम् ।
अप्रसूता तु चत्वारि परतोऽन्यं समाश्रयेत् ॥

(जननी नित्य) दिनीम् (दिनी) शिनी (शनी); **विभ.**१४ शील. सतत (जननी नित्य); **समु.**१२२ स्मृतवत्.

(१) **नासं** १३।९६ कामतो (काम तां); **नास्मृ** १५।९८ न दो (स दो), **व्यक.**१३२; **स्मृच.**२४७ त कुर्वन्नेव (त्) कुर्वन्नेव); **विर.**४२४ निन्द्या (नित्य); **पमा** ४७६, **सेतु** २८४ निन्द्या (नित्य) न्नेव न (न्नेव स); **विभ.**१४ निन्द्या (नित्य); **समु.**१२२.

(२) **नासं.**१३।९८ नदोषादूढा (तदोषादुष्टा); **नास्मृ.** १५।९६ नदोषादूढा (तदोषेणोढा) गंता (र्दोषा) सा नि (साऽभि), **स्मृच.**२४५; **समु** १२२.

(३) **नासं.**१३।९९ पूर्वार्धे (पत्यौ प्रव्रजिते नष्टे क्लीबेऽथ पतिते मृते); **नास्मृ.**१५।९७; **मेधा.**९।७६ स्मृत्यन्तरम्.

(४) **नास.**१३।१०० णी (ण); **नास्मृ.**१५।९८; **व्यक.** १३९.

'नष्टेऽन्यो विधीयत' इत्युक्तम् । अप्रतिविधायाना ख्याय प्रोषितो नष्टः । स द्विविधः मृतोऽमृतश्च । मृत इति ज्ञाते उदीक्षणप्रयोजनं नास्ति । तत्र पूर्वोक्त एव विधिः । अमृतोऽपि द्विविधः अमुत्रेति श्रूयमाणोऽश्रयमाणश्च । अश्रूयमाणेऽयं विधिः । प्रतिविधायैकमत्येन प्रोषिते अन्याऽन्यमन्याश्रयणम् । गतार्थः श्लोकः । प्रसूतायाः सापत्याया निर्वृत्तप्रयोजनत्वाद् रतिहरणार्थत्वान्महान् कालः । इतरस्या अनिर्वृत्तप्रयोजनत्वात् प्रथमवयोवस्थत्वाद् दुर्धरत्वाच्च विषयस्याल्पः कालः । नाभा.

क्षत्रिया षट समास्तिष्ठेदप्रसूता समात्रयम् ।
वैश्या प्रसूता चत्वारि द्वे वर्षे त्वितरा वसेत् ॥

गतार्थोऽयं पूर्वेणैव । नाभा.

न शूद्रायाः स्मृतः कालो न च धर्मव्यतिक्रमः ।
विशेषतोऽप्रसूतायाः संवत्सरपरा स्थितिः ॥

शूद्रायाः प्रोषिते पत्यौ न कालनियमः । न चान्यगमनेऽस्यामवस्थाया धर्मलोपः । सर्वस्या अविशेषेण । प्रसूताया उदीक्षणप्रसङ्गे संवत्सरपरा स्थितिः । संवत्सरादूर्ध्वं नास्ति दोषः । उदीक्षणे पतिलोको धर्मवृद्धिश्च सर्वासा, नोदीक्षणप्रतिषेधः । एतावतोऽनुदीक्षणे दण्डः अधर्मश्च । उदीक्षणं तु न्याय्यमेव । नाभा.

अप्रवृत्तौ स्मृतो धर्म एष प्रोषितयोषिताम् ।
जीवति श्रूयमाणे तु स्यादेष द्विगुणो विधिः ॥

प्रोषितस्य योषिता भर्तर्यश्रूयमाणे प्रोषिते एष कालविधिः । जीवति तु श्रूयमाणे जीवत्यमुत्रेति श्रूयमाणे द्विगुणः कालो यथोक्तः । नाभा.

प्रजाप्रवृत्तौ भूतानां सृष्टिरेषा प्रजापतेः ।
अतोऽन्यथागमे स्त्रीणामेवं दोषो न विद्यते ॥

(१) **नासं.**१३।१०१ वर्षे त्वितरा (समे अप्रजा); **नास्मृ.** १५।९९; **व्यक.**१३९.

(२) **नासं.**१३।१०२; **नास्मृ.**१५।१०० न च धर्मव्यतिक्रमः (एष प्रोषितयोषिताम्) पू.; **व्यक.**१३९.

(३) **नासं.**१३।१०३; **नास्मृ.**१५।१०० उत्त.; **व्यक.** १३९.

(४) **नासं** १३।१०४; **नास्मृ.**१५।१०१ प्रजाप्रवृत्तौ (अप्रवृत्तौ तु) सृष्टि (इष्टि) थागमे (गमने) मेव (मेष); **व्यक.**१३९.

प्रजाप्रवृत्ताविति निमित्तसप्तमी । अपत्यार्थं यतः प्रजापतेः सृष्टिः सर्वभूतानां, अतोऽन्यगमने, यथोक्त न दोषः । दोषो न विद्यत इति ब्रुवन् नायं धर्मः, धर्मस्तु पतिव्रतात्वमेव, एवमपि दोषो नास्तीति ज्ञापयति । नाभा.

स्त्रीपुनर्विवाह.

[1]उद्वाहिताऽपि या कन्या न चेत्संप्राप्तमैथुना ।
पुनः संस्कारमर्हन्ती यथा कन्या तथैव सा ॥

नियोगविधिः

[2]अनुत्पन्नप्रजायास्तु पतिः प्रेयाद् यदि स्त्रियाः ।
नियुक्ता गुरुभिर्गच्छेद् देवरं पुत्रकाम्यया ॥

अनुत्पन्नप्रजा अप्रजा । उत्पन्नविनष्टप्रजाऽप्यप्रजैव । मृते भर्तरि 'पुत्रेण लोकान् जयती'त्यादिना पुत्रलोककामा, न पतिलोककामा, यदि स्याद् गुरुभिः श्वशुरादिभिर्नियुक्ता देवरं गच्छेत् पुत्रेच्छया, न रन्तुमिच्छया । तत्र व्यभिचारे न दोषो न दण्डः । नाभा.

[3]स च तां प्रतिपद्येत तथैवा पुत्रजन्मनः ।
पुत्रे जाते निवर्तेत विप्लवः स्यादतोऽन्यथा ॥

स च देवरस्तां तथैव धर्मार्थमेव, न रत्यर्थं, आ पुत्रोत्पत्तेः । उत्पन्ने पुत्रे निवर्तेत । गुरुवदेव पश्येत् । अन्यथा पुनरपि परिग्रहे विप्लवः सकरः स्यात् । तथा सति अधर्मो दण्डश्च स्यात् । नाभा.

[4]घृतेनाभ्यज्य गात्राणि तैलेनाविकृतेन वा ।
मुखान्मुखं परिहरन् गात्रैर्गात्राण्यसंस्पृशन् ॥

घृतेनापक्वेन वा तैलेन गात्राण्यभ्यज्य सुखार्थं भूयःप्रवृत्तिं परिहरन् । परस्परगात्रस्पर्शनं च प्रयोजनार्थमेव । नाभा.

[5]नीरजस्कामनिच्छन्तीं वन्ध्यां पुत्रवतीं स्त्रियम् ।
न गच्छेद् गर्भिणीं निन्द्यामनियुक्तां च बन्धुभिः ॥

'निन्दन्नियुक्तामपि बन्धुमिरि'त्यपरः पाठः । ऋतुर्यस्या नास्ति सा नीरजस्का तामनिच्छन्तीं चेत्यादि । निन्द्या कुत्सिता त्वग्दोषादिना । निन्द्या, अपत्यं म्रियते यस्याः । बन्धुभिश्चानियुक्तामिति अनियुक्तायां यदि गमने प्रसङ्गोऽस्ति देवरादेः, गतम् । अथवा यथोक्ता देवरादिर्नियुक्तामपि न गच्छेद् इति 'स च ता प्रतिपद्येते'त्यस्यापवादः । नाभा.

अनियुक्ता तु या नारी देवराज्जनयेत् सुतम् ।
जारजातमरिक्थीयं तमाहुर्धर्मवादिनः* ॥
[6]तथानियुक्तो यो भार्यां यवीयान् ज्यायसो व्रजेत् ।
यवीयसो वा यो ज्यायानुभौ तौ गुरुतल्पगौ ॥

तथा तेनैव प्रकारेणानियुक्तः कनीयान् ज्येष्ठभार्यां गच्छेद् गमनमात्रेण, कनीयसो वा भार्यां ज्येष्ठो व्रजेद्, एतावुभौ गुरुतल्पगौ । गुरुतल्पगमनप्रायश्चित्तमत्रापीति । नाभा.

[7]कुले तदवशेषे तु संतानार्थं न कामतः ।
नियुक्तो गुरुभिर्गच्छेद् भ्रातृभार्यां यवीयसः ॥
[8]ज्येष्ठभार्यां कनिष्ठो वा गच्छेद् गुरुनियोगतः ।
कुलसंतानरक्षा तु फलं समधिगच्छतः ॥

कुले तदवशेषेऽन्यमनुष्याभावे संतानार्थमेव, न कामतः, नियुक्तो ज्येष्ठो वा कनीयसः, कनीयान् वा ज्येष्ठस्य भार्यां गच्छेत् । ततः कुलरक्षणात् तन्निमित्तं फलमश्नुवाते । नाभा.

---

(१) **बाल.**२।१२७.

(२) **नासं.**१३।८०; **नास्मृ** १५।८०; **व्यक.**१३८ उत्त.; **विर.**४४५ उत्त; **नृप्र.**३४ उत्त.

(३) **नासं.**१३।८१; **नास्मृ.**१५।८१ नः (तः) विप्लवः (संकरः); **व्यक.**१३८; **विर.**४४५; **नृप्र.**३४ प्रतिपद्येत (अभिगच्छेत्तु); **विभ.**२९.

(४) **नासं.**१३।८२; **नास्मृ.**१५।८२; **व्यक.**१३८ भ्यज्य (भ्युक्ष्य) ण्यस (णि चा); **ममु.**९।१४७ उत्त.; **विर.**४४५-४४६ व्यकवत्; **नृप्र.**३४ भ्यज्य (भ्युक्ष्य) मुखान्मुखं (आस्येनास्य); **मच.**९।१४७ उत्त.; **विभ.**२९.

* व्याख्यासंग्रहः स्थलादिनिर्देशश्च दायभागे द्रष्टव्यः ।

(१) **नासं.**१३।८३; **नास्मृ.**१५।८३,८४ पूर्वार्धे (स्त्रिय पुत्रवतीं वन्ध्यां नीरजस्कामनिच्छन्तीम्); **नृप्र.**३४ नास्मृवत्.

(२) **नासं.**१३।८५ यो भार्यां (भार्यायां); **नास्मृ.**१५।८५,८६; **नृप्र.**३४ वा यो ज्यायानु (ऽथवा जायामु).

(३) **नासं.**१३।८६; **नास्मृ.**१५।८३ पू.; **व्यक.**१३८ तु (च); **ममु.**९।१४७ तु (च) पू.; **विर.**४४६ तु (च) भ्रातृ (भ्रातुः); **नृप्र.**३४; **मच.**९।१४७ तु (च) पू; **विभ.**२९ विरवत्.

(४) **नासं.**१३।८७; नारदस्मृतौ नास्त्ययं श्लोकः।

अविद्यमाने तु गुरौ राज्ञो वाच्यः कुलक्षयः ।
ततस्तद्वचनाद् गच्छेदनुशिष्य स्त्रियं च सः ॥

गुरौ नियोक्तर्यविद्यमाने राज्ञस्तत्कुलक्षयमुक्त्वा तेना नुज्ञातो देवरस्तदभावेऽन्यो वा गच्छेद् अनुशिष्य वक्ष्यमाणेन विधिना घृताभ्यक्तेन तया सह गात्रस्पर्शवर्जं ऋतौ गन्तव्य प्रजार्थमेवेति । नाभा.

पूर्वोक्तेन विधानेन स्नातां पुंसवने शुचिः ।
सकृदा गर्भाधानाद्वा वृत्ते गर्भे तथैव सा ॥

पूर्वोक्तेनैव विधिना घृताभ्यक्तो गात्रस्पर्शवर्जं व्रजेत्, ऋतुस्नाता पुमान् जायते यस्मिन् दिवसे तस्मिन्, 'युग्मासु पुत्रा जायन्त' इति वचनात् । ऋतावृतावसकृत् सकृद्वा यावद् वा गर्भो भवति तावद् युग्मास्वेकस्मिन्नृतौ। कृत उत्पन्ने गर्भे स्नुषैव सा कनीयसोऽपि गुरुरेव सा । नाभा.

अतोऽन्यथा वर्तमानः पुमान् स्त्री वाऽपि कामतः ।
विनेयौ सुभृशं राज्ञा विप्लवः स्यादतोऽन्यथा ॥

कामाद् वर्तमानावुत्तरकाल च सुष्ठु दण्ड्यौ राज्ञा । अदण्डने राजा प्रत्यवेयात् । नाभा.

दम्पत्योर्वादस्थाविषयः

ईर्ष्यासूयासमुत्थे तु संरम्भे रागहेतुके ।
दम्पती विवदेयातां न ज्ञातिषु न राजनि ॥

ईर्ष्यासमुत्थेऽन्यशङ्कानिमित्ते परस्परतः अमुका अशोभना असावशोभन इत्यादि, (ईर्ष्या ?) असूयासभवे च सङ्गानुमिते संरम्भे चित्तवैषम्ये दम्पती परस्परत एव चित्तविशुद्धिं कुर्याताम्, न स्वजने न राजनि वा विवादः कर्तव्यः । नाभा.

बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः

अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनः प्रजाः ।
क्षेत्रं बीजवते देय नाबीजी क्षेत्रमर्हति ॥

अपत्यार्थं स्त्रिय उत्पादिताः । तदुभयोरपतन करोति। बीजिनः क्षेत्रस्थानीया स्त्री । तत उभयसपत्तौ प्रजाः सस्यवदेव । तस्मात् क्षेत्र बीजवते देय, ततश्च सस्य निर्वृत्तिः । अबीजी क्षेत्रेण कि करिष्यति । तत्र क्षेत्रस्य समर्थस्यापि नागः । तस्मात् परीक्ष्य पुरुषाय देया । नाभा.

अपत्यमुत्पादयितुस्तासां या शुल्कतो हृता ।
अशुल्कोपनतायां तु क्षेत्रिकस्यैव तत् फलम् ॥

तासा सप्ताना या शुल्केन हृता तस्यामपत्यमुत्पाद यितुरेव भवति, क्रीतत्वात् तस्याः । पुनर्भूष्वेव तत् संभवति, न स्वैरिणीषु । अथ तत्रापि संभवति, तथा नामास्तु । (अ)शुल्कोपनताया यदपत्य क्षेत्रिण एव । क्षेत्रस्य तेन तत्संबद्धैर्वानुत्सृष्टत्वात् । नाभा.

क्षेत्रिकस्य यदज्ञानात् क्षेत्रे बीजं प्रकीर्यते ।
न तत्र बीजिनो भागः क्षेत्रिकस्यैव तद् भवेत् ॥

'अशुल्कोपनताया क्षेत्रिकस्येत्युक्तस्य दृष्टान्तात्मक उत्तरश्लोका इति केचित् । अन्ये सामान्येन प्रकृतानामेवेति । परक्षेत्रे बीज उप्ते तेनाज्ञात, पत्युरेवापत्य न जारस्य भागः पिण्डदानाशौचादिषु । यथा परक्षेत्रे बीजेऽन्येनाविदिते प्र(की ? का)रिते क्षेत्रिकस्यैव सस्यं, न बीजिन इति । नाभा.

ओघवाताहृतं बीजं क्षेत्रे यस्य प्ररोहति ।
फलभाग् यस्य तत् क्षेत्रं न बीजी फलभाग् भवेत् ॥

---

(१) **नासं.**१३।८८; **नास्मृ** १५।८६ (नियुक्तौ गुरुभिर्गच्छेदनुशिष्यात् स्त्रिय च सः) उत्त., **व्यक** १३८ शिष्य (शिष्यात्), **विर.**४४६ शो (शे) शिष्य (शिष्यात्), **नृप** ३४; **विभ.**२९ विरवत्.

(२) **नासं.**१३।८९ न विधानेन (नैव विधिना) वृत्ते (कृते) तथैव (स्नुषैव), **नास्मृ.**१५।८७ स्नाता (स्नुषा) वृत्ते (कृते), **व्यक.**१३८ द्वा (त्तु); **विर.**४४६ व्यकवत्, **विभ.**२९ स्नाता (स्नुषां) द्वा (त्तु).

(३) **नासं.**१३।९० विप्लु...न्यथा (किल्बिषी स्यादनिग्रहे); **नास्मृ.**१५।८८ विने (निने); **व्यक.**१३८, **विर.**४४६ सुभृश (स्वभग); **विभ.**२९ सुभृश (तावुभौ).

(४) **नासं.**१३।९१; **नास्मृ.**१३।८९ सूया (सूय) संरम्भे (सबन्धे).

(१) **नासं** १३।१९, **नास्मृ.**१५।१९ नः प्रजाः (नो नराः).

(२) **नासं.**१३।५४ फलम् (भवेत्); **नास्मृ.**१५।५४ नता (हृता); **विर.**५८८ या (याः) हृता (हृताः); **समु.**१०१ हृता (भृताः) क्रमेण कात्यायनः.

(३) **नासं.**१३।५५, **नास्मृ.**१५।५५ ज्ञानात् (ज्ञात) कीर्यते (दीयते) भवेत् (फलम्).

(४) **नास.**१३।५६; **नास्मृ.**१५।५६ फलभाग् यस्य यत् क्षेत्र (फलभुक्तस्य तत् क्षेत्री).

पूर्वश्लोके स्त्रीच्छापूर्वकत्वमुक्तम्। अस्मिंस्तूभयोरप्यनिच्छतोरनेन दैवात् कथञ्चिद् योजिते उच्यते। उत्तरस्मिन् पुरुषेच्छापूर्वके यथैव क्षेत्रिबीजिनोरविदिते ओघवाताद्धते बीजे क्षेत्रिणः सस्य, एव क्षेत्रपतेरेवापत्य न बीजिन इति। नाभा.

महोक्षो जनयेद् वत्सान् यस्य गोषु व्रजे चरन्।
तस्य ते यस्य ता गावो मोघं स्पन्दितमार्षभम्॥

महोक्ष ऋषभः, 'आर्षभमि'त्यन्ते वचनात्। कामाद यस्य स्वभूतासु गोषु व्रजे चरन्, कस्येत्यविशेषितत्वाद् यस्यकस्यचिद् व्रजे चरन्, यासु गोषु कस्यचिद् वत्सानुत्पादयेत्, यस्य ता गावः तस्य वत्साः। व्यर्थ ऋषभव्यापारः, नर्षभस्वामिनो वत्सा इत्यर्थः। एवमपत्यमपीति। नाभा.

[1]क्षेत्रिकानुमते बीजं यस्य क्षेत्रे प्रमुच्यते।
तदपत्यं द्वयोरेव बीजिक्षेत्रिकयोर्मतम्॥

परस्त्रियां पत्यनुमते जातमपत्यं द्वयोर्भवति। ततश्च द्वयोर्धनपिण्डादिना सबध्यते। नाभा.

न[2] स्यात्क्षेत्रं विना सस्यं न वा बीजं विनास्ति तत्।
अतोऽपत्यं द्वयोरिष्टं पितुर्मातुश्च धर्मतः॥

बीजक्षेत्राभावे सस्याभाववत् पित्रोरन्यतराभावेऽपत्याभावात्, तुष्टेः कारणत्वाच्च धर्मत उभयोरपत्यम्। पित्रोरन्यतरानिच्छायां दानविक्रयातिसर्गाभावः। उभयाधीनत्वादिति प्रयोजनम्। नाभा.

(१) **नासं.१३।५७; नास्मृ.१५।५७** स्पन्दित (स्कन्दित); **समु.१०१.**

(२) **नासं.१३।५८** मते (मत); **नास्मृ** १५।५८ प्रमुच्यते (समर्प्यते); **दा.४८** बीज...च्यते (क्षेत्रे बीज यस्य प्रकीर्यते); **अप.२।१२७** मुच्यते (सिध्यति) बीजि...र्मतम् (क्षेत्रिबीजिकयोः समम्); **विर.५५७** मुच्य (जाय) द्व (त); **दीक.४४** दावत्; **व्यप्र.४७३** मुच्य (सिच्य); **विभ.६४** दावत्; **विच.६७** दावत्.

(३) **नासं.१३।५९** न स्या...न वा (नतें क्षेत्र भवेत् सस्यं न च); **नास्मृ.१५।५९; विर.५८१** वा बीज (बीज च) रिष्ट (दृष्टं); **सबि.२९५** उत्त.; **समु.१०१** पूर्वार्धे (नतें क्षेत्राद् भवेत् सस्यं न च बीजाद्विनास्ति तत्) क्रमेण कात्यायनः.

पुनर्भूस्वैरिणीप्रकाराः

पंरपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम्।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता।
पूनर्भूः प्रथमा प्रोक्ता पुनः संस्कारकर्मणा॥
देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते।
उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्तिता॥
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्तिता॥
स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति।
कामात् समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा॥
कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता।
पुनः पत्युर्गृहं यायात् सा द्वितीया प्रकीर्तिता॥
मृते भर्तरि तु प्राप्तान् देवरादीनपास्य या।
उपगच्छेत् परं कामात् सा तृतीया प्रकीर्तिता॥
प्राप्ता देशाद् धनक्रीता क्षुत्पिपासातुरा च या।
तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता*॥

(१) उत्पन्नसाहसा उत्पन्नव्यभिचारा। मिता.२।५१

(२) उत्पन्नसाहसाऽक्षतयोनिः प्रौढेति यावत्। अन्यस्मै देवरायेत्यर्थः। देवराभिप्रायेणात्रान्यशब्दप्रयोगात्स चाभिप्रायोऽसत्सु देवरेष्विति उत्तरश्लोकेर्गम्यते। समाश्रयेत्सुतार्थमिति शेषः। एवं श्रितेत्यत्रापि शेषोऽध्यवसेयः। पुनः पत्युर्गृह यायान्निवासाद्यर्थमिति शेषः। एव च यः प्रथमेतरपुनर्भुवमुपगच्छति स नियुक्तमात्रो न योषिद्ग्राह इति पुनर्भूर्तृकृतर्णदानानधिकारीति मन्तव्यम्। एवं यः स्वैरिणी चतुर्थीव्यतिरिक्तामुपगच्छति सोऽपि जारमात्रो न योषिद्ग्राह इति स्वैरिणी-

* एषा अष्टश्लोकाना अवशिष्टस्थलादिनिर्देशः ऋणादानप्रकरणे (पृ. ७०२-७०३) द्रष्टव्यः।

(१) **व्यक.१३९** उत्पन्न...र्तिता (उत्पन्नसाहसान्यस्मै सा अन्त्या स्वैरिणी स्मृता) पत्यावेव तु (पत्यौ चैव च) प्रथमा स्वैरिणी (स्वैरिणी प्रथमा) द्व यायात् (द्वमियात्) तु प्राप्तान्...पास्य या (या तु स्त्री देवरादीनपास्य तु) उपगच्छे...तृतीया (कामतस्तु भजेदन्य द्वितीया सा) प्राप्ता...च या (देशापहृतविक्रीता क्षुत्तृष्णाव्यसनार्दिता) सा चतुर्थी (तृतीया सा) 'असत्सु देवरेषु' इत्यादिश्लोको नास्ति।

पतिकृतर्णानधिकारीति मन्तव्यम्। आद्यपुनर्भ्वास्तु यः पाणि गृह्णाति स योषिद्ग्राहो भवत्येव भार्यात्वेनैव स्वीकारात्। चतुर्थ्या अपि स्वैरिण्या भार्यात्वेनैव स्वीकार इति स्वीकर्ता योषिद्ग्राह एव। तेन ताभ्या पुनर्भ्वाः प्रथमायाः पत्या कृतमृणं स्वैरिण्याश्चतुर्थ्याः पत्या कृत च ऋण देयम्। स्मृच.१७३

(३) परपूर्वाः सप्त। पुनर्भस्त्रिप्रकारा। स्वैरिणी चतुष्प्रकारा। ताः क्रमेणोच्यन्ते—कन्यैवेति। कन्यैवासंबद्धा पुरुषेण पाणिग्रहणमात्रेण परभार्याव्यपदेशेन दूषिता पुनर्भूः प्रथमा सोक्ता पुनः सस्कारकर्मणा, पुनर्यस्मात् सस्क्रियते तस्मात् पुनर्भूरित्युच्यते। पुनर्विवाह्याऽन्येन सा। देशसंव्यवहारानवेक्ष्य, येषु देशेष्वय व्यवहारो दृश्यते, गुरुभिर्या प्रदीयतेऽन्यस्मै स्त्री भुक्ता, न कन्या, सा द्वितीया पुनर्भूः पत्यावसत्युत्पन्नसाहसा व्यभिचारिणी। पत्या त्यक्तेत्यन्ये। असत्सु देवरेषु, एतस्मादेव गम्यते द्वितीया गुरुभिर्देवराय दत्तेति, स्त्री मृतपतिका सवर्णायासपिण्डाय बान्धवैर्या प्रदीयते सा तृतीया स्त्री। स्त्री भुक्ता सापत्यानपत्या वा पत्यौ जीवत्येव कामादन्य पति समाश्रयेत् तमुत्सृज्य, सा प्रथमा स्वैरिणी। कौमार पतिमतिक्रम्यान्येन सह पुरुषेणोपित्वा तमप्युत्सृज्य प्रथमपतिगृहमेव यायात्, सा द्वितीया स्वैरिणी। भर्तरि मृते योग्यानपि देवरानपास्योपगच्छेद् ऊनमन्य, सा तृतीया स्वैरिणी। देशान्तरादागता धनेन क्रीता क्षुत्पिपासातुरा च तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता। नाभा.

पुनर्भुवां विधिरेष स्वैरिणीनां प्रकीर्तितः।
पूर्वा पूर्वाजघन्यासां श्रेयसी तूत्तरोत्तरा॥

एके यथापाठमेवेच्छन्ति। न तदुपपन्नम्। कथमक्षतयोनिरितराभ्या जघन्या स्यात्। तस्मात् क्रमेण पुनर्भुवा पूर्वा पूर्वा अजघन्या। आसामक्षतयोनिर्देवराय दत्ता (या सा? याः) प्रशस्या। सापि सवर्णाय सपिण्डाय दत्तायाः प्रशस्या द्वितीया। स्वैरिणीना तूत्तरोत्तरा पूर्वस्याः पूर्वस्याः श्रेयसी। जीवति पत्यावन्य समाश्रिताया पुनः पतिगृहं गता पश्चात्तापात् श्रेयसी। मृते भर्तर्यन्य समाश्रिता भर्तुरनतिक्रमाद् द्वितीयायाः श्रेयसी। देशान्तरादागता क्रीता प्राणसंशये चान्यमुपगता पूर्वस्याः श्रेयसी, अत्यन्तविरोधानाचरणात्। नाभा.

वर्णसकरासंकरौ

आनुलोम्येन वर्णानां यज्जन्म स विधिः स्मृतः।
प्रातिलोम्येन यज्जन्म स ज्ञेयो वर्णसंकरः॥

आनुलोम्येन ब्राह्मणस्य चतसृषु यदपत्यजन्म, क्षत्रियस्य तिसृषु, वैश्यस्य द्वयोः, शूद्रस्यैकस्या स विधिः विधीयते शास्त्रे धर्मः। प्रातिलोम्येन शूद्रस्य तिसृषु वैश्यादिस्त्रीषु, वैश्यस्य द्वयोः, क्षत्रियस्यैकस्या, एव वर्णसकरः प्रतिषिद्धः अधर्मः राज्ञः प्रमादादित्यर्थः। नाभा.

सकरजातिविचारः

***अनन्तरः स्मृतः पुत्रः पुत्र एकान्तरस्तथा।**
द्व्यन्तरश्चानुलोम्येन तथैव प्रतिलोमतः॥

आनुलोम्येन सवर्णानन्तरैकान्तरद्व्यन्तराश्चत्वारो ब्राह्मणस्य पुत्राः, एवं त्रयः क्षत्रियस्य सवर्णानन्तरैकान्तराः, तथा वैश्यस्य सवर्णानन्तरौ द्वौ, शूद्रस्य सवर्ण एव। प्रतिलोमतोऽपि शूद्रस्य त्रयो वैश्यादिपुत्राः, वैश्यस्य द्वौ क्षत्रियाब्राह्मणीपुत्रौ, क्षत्रियस्यैको ब्राह्मणीपुत्रः। नामत एषा विशेषं वक्ष्यति। रिक्थविभागविवक्षयोपन्यासः, स्त्रीपुससंयोगफलत्वात् तासा च विवाहस्योक्तत्वात्। नाभा.

उग्रः पारशवश्चैव निषादश्चानुलोमतः।
उत्तमेभ्यस्त्रयस्त्रिभ्यः शूद्रापुत्राः प्रकीर्तिताः॥

ब्राह्मणादिभ्यः क्रमेणोग्रपारशवनिषादास्त्रयस्त्रिभ्योऽनुलोमत इति केचित् अन्येनान्यत्र यथासंख्यमुक्तम्। 'उत्तमेभ्यस्त्रिभ्यस्त्रय' इत्येतावदुक्तम्। अतो ब्राह्मणात् पारशवः, निषादः क्षत्रियात्, उग्रो वैश्यादिति। नाभा.

---

(१) **नासं.**१३।५३ विधिस्त्वेष (एष विधिः) प्र (च); **नास्मृ.**१५।५३; **व्यक.**१३९ पुनर्भुवा (पुनर्भ्वा च); **विर.** ४५१ तृ (चो) शेष व्यकवत्; **विभ.**३२ विरवत्.

* अन्यस्मृतिगतोऽय सकरजातिविचारः सस्कारकाण्डे संग्रहीष्यते। अत्र तु नारदेन विवादपदे संगृहीतत्वात् सगृहीतः।

(१) **नासं.**१३।१०५; **नास्मृ.**१५।१०२.

(२) **नासं.**१३।१०६; **नास्मृ.**१५।१०३.

(३) **नासं.**१३।१०७; **नास्मृ.**१५।१०४ पू..

[1]ब्राह्मण्यामपि चण्डालसूतवैदेहका अपि ।
अपरेभ्यस्त्रयस्त्रिभ्यो विज्ञेयाः प्रतिलोमतः ॥

प्रतिलोमतोऽपि ब्राह्मण्या शूद्राच्चण्डालः, क्षत्रियात् सूतः, वैदेहको वैश्यात् । अपरेभ्य एवैते त्रयस्त्रिभ्यः । नाभा.

[2]अम्बष्ठो मागधश्चैव क्षत्ता च क्षत्रियासुताः ।
आनुलोम्येन तत्रैको द्वौ ज्ञेयौ प्रतिलोमतः ॥

अम्बष्ठ आनुलोम्येन क्षत्रियस्य वैश्याया (?) जातः । मागधो वैश्यात् क्षत्रियाया जातः । क्षत्ता शूद्रात् क्षत्रियाया जातः । एते क्षत्रियासुताः । नाभा.

[3]वैश्यापुत्रास्तु दौष्पन्तयवनायोगवा अपि ।
प्रातिलोम्येन तत्रैको द्वौ ज्ञेयावनुलोमजौ ॥

शूद्राब्राह्मणीक्षत्रियापुत्रा उक्ताः प्रतिलोमानुलोमतः । वैश्यापुत्रा अपि ब्राह्मणाद् दौष्पन्तः, क्षत्रियाद् यवनः अनुलोमौ । शूद्रात् प्रतिलोम आयोगव इति । नाभा.

[4]सूताद्याः प्रतिलोमास्तु ज्ञेयाव्रतिलोमजौ ।
ससंकराः श्वपाकाद्यास्तेषां त्रिस्सप्तको गणः ॥

सूतवैदेहकचण्डालाः प्रतिलोमजा ज्ञेयाः । अप्रतिलोमजौ सूताद् वैदेहकाया, वैदेहकाच्चण्डाल्याम् । एव प्रतिलोमजेषु अप्रतिलोमजा द्रष्टव्याः । तेषा ससंकराः श्वपाकाद्याः त्रिःसप्त एकविंशतिर्गणो ज्ञेयः । चण्डाल-श्वण्डालीवैदेहकसूतब्राह्मणादिकन्यासु सप्त बाह्यान् जनयति । तथा वैदेहकस्तथा सूतः । अतः संकराः श्वपाकाद्याः । 'उग्रात्तु जातः क्षत्तायां श्वपाक इति कीर्त्यते । वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेन उच्यते ॥' इति भार्गव्या संहितायां विस्तर उक्तस्तत एव द्रष्टव्यः । सज्ञास्तु तत्रान्यथैव । शूद्रप्रतिलोमस्य सप्त चतुर्षु चत्वारः । क्षत्रियावैश्याशूद्रापुत्रैः सप्त एवं वैश्यक्षत्रियप्रतिलोमयोरपीति त्रिस्सप्तको बाह्यो गणः । तद्भेदाः श्वपाकादयोऽनन्ताः । नाभा.

[5]सैवर्णो ब्राह्मणीपुत्रः क्षत्रियायामनन्तरः ।
अम्बष्ठोग्रौ तथा पुत्रावेवं क्षत्रियवैश्ययोः ॥

ब्राह्मणाद् ब्राह्मण्या सवर्णः । क्षत्रियाया ब्राह्मणादनन्तरो मूर्धाभिषिक्तः । क्षत्रियेण वैश्यायामनन्तरोऽम्बष्ठः । वैश्येन शूद्रायामनन्तर उग्रः । नाभा.

[6]एकान्तरस्तु दौष्पन्तो वैश्यायां ब्राह्मणात् सुतः ।
शूद्रायां क्षत्रियात्तद्वन्निषादो नाम जायते ॥

अनन्तरानुक्त्वा पूर्वमविभागेनोक्तानेकान्तरान् प्रतिपादयति । ब्राह्मणेन वैश्याया दौष्पन्तः । क्षत्रियेण शूद्राया निषादः । वैश्यस्यैकान्तरो नास्ति । एवमित्यनेन सवर्णासुतः सर्वेषा सवर्ण इत्येतत् प्रतिपाद्यते । नाभा.

[7]शूद्रा पारशवं सूते ब्राह्मणाद् व्यन्तरं सुतम् ।
आनुलोम्येन वर्णानां पुत्रा एते प्रकीर्तिताः ॥

व्यन्तरो ब्राह्मणस्यैव नान्यस्य । शूद्राया ब्राह्मणात् पारशवः । वर्णानामानुलोम्येन पुत्राः प्रकीर्तिताः । नाभा.

[8]सूतश्च मागधश्चोभौ पुत्रावायोगवस्तथा ।
प्रातिलोम्येन वर्णानां तद्वदेतेऽप्यनन्तराः ॥

प्रतिलोमानन्तराः क्षत्रियाद् ब्राह्मण्या सूतः । मागधो वैश्यात् क्षत्रियायाम् । आयोगवः शूद्राद् वैश्यायाम् । नाभा.

[9]अनन्तरः स्मृतः सूतो ब्राह्मण्यां क्षत्रियात्सुतः ।
मागधायोगवौ तद्वद्वौ पुत्रौ वैश्यशूद्रयोः ॥
[10]ब्राह्मण्येकान्तरं वैश्यात् सूते वैदेहकं सुतम् ।
क्षत्तारं क्षत्रिया शूद्रात् पुत्रमेकान्तरं तथा ॥

प्रतिलोमा एकान्तरा उच्यन्ते । ब्राह्मणी वैश्याद् वैदेहक सूते । क्षत्रिया शूद्रात् क्षत्तारम् । नाभा.

[11]व्यन्तरः प्रातिलोम्येन पापिष्ठः संकरे सति ।
चण्डालो जायते शूद्राद् ब्राह्मणी यत्र मुह्यति ॥

---

(१) **नासं.**१३।१०८.

(२) **नासं.**१३।१०९; **नास्मृ.**१५।१०४,१०५ सुताः (त्मजः).

(३) **नासं.**१३।११०

(४) **नासं.**१३।१११; **नास्मृ.**१५।१०५,१०६ (क्षत्राद्याः प्रतिलोमाः स्युरनुलोमास्त्विमे स्मृताः । संस्काराश्चरुपाकाद्याः तेषा त्रिः सप्त वै मताः ॥).

(१) **नासं** १३।११२, **नास्मृ** १५।१०६,१०७

(२) **नासं** १३।११३, **नास्मृ.**१५।१०७,१०८ दौष्पन्तो (चाम्बष्ठो). (३) **नासं** १३।११४, **नास्मृ** १५।१०८, १०९ व्यन्त (उग्र) एते (ह्येते).

(४) **नासं.**१३।११५, **नास्मृ** १५।१०९,११० श्रोभौ (श्चैव) तद्वदे...राः (क्षत्तृवैदेहकावपि).

(५) **नास्मृ.**१५।११०,१११.

(६) **नासं.**१३।११६; **नास्मृ.**१५।१११,११२.

(७) **नासं.**१३।११७; **नास्मृ** १५।११२,११३.

द्यन्तरं शूद्रस्यैव, नान्यस्य । स उच्यते—द्यन्तर इति। प्रातिलोम्येन द्यन्तरः शूद्राद् ब्राह्मण्या जातश्चण्डालः। ब्राह्मणी तत्राकुलीभवति। नाभा.

राज्ञा परीक्ष्यं न यथा जायते वर्णसंकरः ।
तस्माद् राज्ञा विशेषेण त्रयी रक्ष्या तु संकरात् ॥[1]

राज्ञा यथा वर्णसंकरो न भवति तथा परीक्ष्य व्यवस्थाप्यम्। तस्माद् राज्ञा विशेषेण सर्वे रक्ष्याः। विशेषेण तु त्रयी विद्या। सा संकरे सति विप्रवेत्, त्रयीजातः तत्र ब्राह्मणावस्थितत्वादिति (?)। नाभा.

बृहस्पतिः

स्त्रीपुंधर्मप्रतिज्ञा

एतत्संग्रहणस्योक्तं विधानं संग्रहस्तथा ।
स्त्रीपुंसवर्तनोपायः श्रूयतां गदतो मम ॥[2]

स्त्रीरक्षा

सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यो निवार्या स्त्री स्वबन्धुभिः।
श्वश्रूवादिभिर्गुरुस्त्रीभिः पालनीया दिवानिशम् ॥[3]
अप्रयच्छन् पिता काले पतिश्चानुपयन्नृतौ ।
पुत्रश्चाभक्तदो मातुर्गर्ह्या दण्डयाश्च धर्मतः ॥[4]

स्त्रीरक्षणोपायाः

आयव्ययेऽन्नसंस्कारे गृहोपस्कररक्षणे ।
शौचाग्निकार्ये संयोज्या स्त्रीणां शुद्धिरियं स्मृता ॥[5]

इयमुक्तोपायप्रभवा स्त्रीणां शुद्धिः साध्वीत्यर्थः । स्मृच.२४१

बालसंवर्धनं त्यक्त्वा बालापत्या न गच्छति ।
रजस्वलां सूतिकां च रक्षेद्भर्ता च गर्भिणीम् ॥
भर्त्रा पत्नी समभ्यर्च्या वस्त्रालङ्कारभोजनैः ।
उत्सवे तु पितृभ्रातृश्वश्रूराद्यैश्च बन्धुभिः ॥[6]
यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥
शोचन्ति योषितो यत्र विनश्यत्याशु तत्कुलम् ।
न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ॥

शोचन्ति भरणपूजनयोरभावेनेति शेषः। यत्र कुल इत्यर्थः। स्मृच.२४३

स्त्रीधर्माः

भर्त्रा पित्रा सुतैर्न स्त्री वियुक्ताऽन्यगृहे वसेत् ।
असत्सङ्गे विशेषेण गर्ह्यतामेति सा ध्रुवम् ॥
पूर्वोत्थानं गुरुष्वर्चा भोजनव्यञ्जनक्रिया ।
जघन्यासनशायित्वं कर्म स्त्रीणामुदाहृतम् ॥[7]

पूर्वोत्थानं भर्तुरुत्थानापेक्षया। एवं जघन्यासनादिविधावपि भर्त्रासनाद्यपेक्षया। जघन्यत्वं मान्येषु आदौ भोजनप्रदादिव्यापारः। स्मृच.२५१

स्त्रीदोषाः

पानाटनदिवास्वप्नमक्रिया दूषणं स्त्रियाः ॥[8]

(१) अक्रिया गृहकृत्यानानुष्ठानम्। व्यक.१३४

(२) अक्रिया अकरण निर्व्यापारतयाऽवस्थानम्। स्मृच.२४९

---

(१) **नासं.**१३।११८; **नास्मृ.**१५।११३ त्रयी रक्ष्या तु (स्त्रियो रक्ष्यास्तु) उक्त.

(२) **व्यक.**१२८ एत (यत्त); **विर.**४०९; **सेतु** २८०; **विभ.**२१ गद (गाय).

(३) **व्यक.**१२९; **स्मृच.**२३९ श्वश्रूवा (स्वस्रा), **विर.** ४११; **पमा.**४७४; **रत्न.**१३३, **व्यप्र.**४०५गुरुस्त्रीभिः पालनीया (पालनीया गुरुस्त्रीभि.); **व्यउ.**१४० व्यप्रवत्; **विता.** ८२० व्यप्रवत्; **विभ.**३ स्वबन्धुभिः (प्रयत्नतः); **समु** १२०.

(४) **व्यक.**१२९; **विर.**४१२; **विचि.**१८९ स्त्री दण्ड्या (स्त्रीं दण्ड्य); **सेतु.**२८२ गर्ह्या दण्ड्याश्च (कुर्याद्दण्ड च), **विभ.** ४३; **विव्य.**५६ नृतौ (नयन्).

(५) **व्यक.**१३० स्त्रीणां शुद्धिरि (रक्षा स्त्रीणामि); **स्मृच.** २४१ आय (आये) शौचा (शौचेऽ), **विर.**४१६व्यकवत्; **व्यप्र.** ४०९ ऽन्न (ऽर्थ); **व्यउ.**१४१ व्यप्रवत्; **सेतु.**२८२ व्यकवत्; **विभ.**८ ज्या (ज्ये) शेष व्यकवत्; **समु.**१२० शौचा (शौचेऽ).

(१) **विभ.**२६.

(२) **अर.**१।८२ भोजनैः (भूषणैः) उत्तरार्धे (उत्सवे पितृमातृभ्यां श्वश्रूश्वशूरबन्धुभिः); **स्मृच.**२४३; **रत्न.**१३४; **विता.**८२२ पू.; **समु.**१२१.

(३) **स्मृच.**२४३; **समु.**१२१.

(४) **व्यक.**१३३; **स्मृच.**२४९; **विर.**४२७ भर्त्रा पित्रा (पित्रा भर्त्रा); **समु.**१२३.

(५) **व्यक.**१३३; **स्मृच.**२५१ ष्वर्चा (ष्वर्वाक्); **विर.** ४२८; **विभ** १७; **समु.**१२४ स्मृचवत्.

(६) **व्यक.**१३४; **स्मृच.**२४९ स्वप्न (स्वाप); **विर.**४३१; **सेतु.**२८७ याः (याम्); **विभ.**१८; **समु.**१२३ स्मृचवत्.

पतिव्रतावृत्तम्

[1]आर्तार्ते मुदिता हृष्टे प्रोषिते मलिना कृशा ।
मृते म्रियेत या पत्यौ सा ज्ञेया स्त्री पतिव्रता ॥

(१) अयं सर्वासा स्त्रीणामगर्भिणीनामबालापत्यानाम् आचाण्डालाना साधारणो धर्मः । मिता.१।८६

(२) मृते मरणं तेन सह अग्निप्रवेशनेनैव ।
अप.१।८७

प्रोषितभर्तृकावृत्त, तद्भोऽन्यपतिविधिश्च

नष्टे मृते प्रव्रजिते क्लीबेऽथ पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥
[3]विधाय वृत्तिं भार्यायाः प्रवसेत्कार्यवान्नरः ।
अवृत्तिकर्शिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि ॥

प्रवत्स्यता तु प्रत्यागमनपर्यन्त भरणार्थसविधान विधातव्यम्। अन्यथा सन्मार्गस्थिताऽपि वर्धनराहित्याद्धैर्यच्युता वृत्त्यर्थ व्यभिचरेदित्याह स एव—विधायेति ।
स्मृच २४३

[4]प्रसाधनं नृत्यगीतसमाजोत्सवदर्शनम् ।
मांसमद्यादिभोगं च न कुर्यात्प्रोषिते प्रभौ ॥

विधवाधर्माः अन्वारोहणविचारश्च

[5]शरीरार्धं स्मृता जाया पुण्यापुण्यफले समा ।
अन्वारूढा जीववती साध्वी भर्तृहिताय सा ॥

(१) अन्वारोहणे महानभ्युदयः । तथा च व्यासः कपोतिकाख्यानव्याजेन दर्शितवान् 'पतिव्रता संप्रदीप्त प्रविवेश हुताशनम्। तत्र चित्राङ्गदधरं भर्तारं साऽन्वपद्यत ॥ ततः स्वर्ग गतः पक्षी भार्यया सह संगतः । कर्मणा पूजितस्तत्र रेमे च सह भार्यया॥' इति । तथा च शङ्खाङ्गिरसौ—'तिस्रः कोट्योऽर्धकोटी च यानि लोमानि मानुषे । तावत्काल वसेत्स्वर्गे भर्तारं याऽनुगच्छति॥' इति प्रतिपाद्य तयोरवियोग दर्शयतः । 'व्यालग्राही यथा सर्प बलादुद्धरते बिलात् । तद्वदुद्धृत्य सा नारी सह तेनैव मोदते ॥ तत्र सा भर्तृपरमा स्तूयमानाऽप्सरोगणैः । क्रीडते पतिना सार्ध यावदिन्द्राश्चतुर्दश ॥' इति । तथा 'ब्रह्मघ्नो वाऽथ मित्रघ्नः कृतघ्नो वा भवेत्पतिः । पुनात्यविधवा नारी तमादाय मृता तु या ॥ मृते भर्तरि या नारी समारोहेद्धुताशनम् । साऽरुन्धतीसमाचारा स्वर्गलोके महीयते ॥ यावच्चामौ मृते पत्यौ स्त्री नात्मान प्रदाहयेत् । तावन्न मुच्यते सा हि स्त्रीशरीरात्कथचन॥' इति । हारीतोऽपि 'मातृकं पैतृकं चापि यत्र चैव प्रदीयते । कुलत्रयं पुनात्येषा भर्तारं यानुगच्छति॥' इति । तथा 'आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा । मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥' इति । अय सर्वासा स्त्रीणामगर्भिणीनामबालापत्याना आचाण्डालाना साधारणो धर्मः । 'भर्तारं याऽनुगच्छती'त्यविशेषोपादानात् । यानि च ब्राह्मण्यनुगमननिषेधपराणि वाक्यानि—'मृतानुगमन नास्ति ब्राह्मण्या ब्रह्मशासनात् । इतरेषु तु वर्णेषु तपः परममुच्यते ॥ जीवन्ती तद्धितं कुर्यान्मरणादात्मघातिनी ॥ या स्त्री ब्राह्मणजातीया मृत पतिमनुव्रजेत् । सा स्वर्गमात्मघातेन नात्मान न पति नयेत् ॥'

इत्येवमादीनि तानि पृथक्चित्यधिरोहणविषयाणि । 'पृथक्चिति समारुह्य न विप्रा गन्तुमर्हती'ति विशेषस्मरणात् । अनेन क्षत्रियादिस्त्रीणा पृथक्चित्यभ्यनुज्ञा गम्यते ।

यत्तु केश्चिदुक्त पुरुषाणामिव स्त्रीणामप्यात्महननस्य प्रतिषिद्धत्वादतिप्रवृद्धस्वर्गाभिलाषायाः प्रतिषेधशास्त्रमतिक्रामन्त्या अयमनुगमनोपदेशः श्येनवत् । यथा 'श्येनेनाभिचरन् यजेते'ति तीव्रक्रोधाक्रान्तस्वान्तस्य प्रतिषेधशास्त्रमतिक्रामतः श्येनोपदेश इति । तदयुक्तम्। ये तावत् श्येनकरणिकाया भावनाया भाव्यभूतहिसाया विधिसस्पर्शाभावेन प्रतिषेधसस्पर्शात् फलद्वारेण श्येनस्यानर्थता वर्णयन्ति तेषा मते हिसाया एव स्वर्गार्थतया अनुगमनशास्त्रेण विधीयमानत्वात्प्रतिषेधसस्पर्शाभावादग्नीषोमीयवत्स्पष्टमेवानुगमनस्य श्येनवैषम्यम् ।

यत्तु मत हिसा नाम मरणानुकूलो व्यापारः । श्येनश्च परमरणानुकूलव्यापाररूपत्वाद्धिंसैव । कामाधिकारे च

---

(१) **मिता.**१।८६ दिता (दिते) ज्ञेया स्त्री (स्त्री ज्ञेया); **अप.**१।८७ मितावत् ; **व्यक.**१३६; **विर.**४३६; **विभ.**२१.

(२) **मभा.**१८।४.

(३) **स्मृच.**२४३; **समु.**१२१.

(४) **व्यक.**१३६; **स्मृच.**२५३; **विर.**४३९ मांसमद्यादिभोग (मांसं मद्याभियोग) प्रभौ (पतौ); **विभ.**२३; **समु.**१२१.

(५) **अप.**१।८७ जीववती (जीवन्ती च); **व्यक.**१३७; **विर.**४४२; **विभ.**२७.

करणाशे रागतः प्रवृत्तिसंभवेन विधेरप्रवर्तकत्वात् । राग-प्रयुक्तहिंसारूपत्वात् श्येनः प्रतिषिद्धः स्वरूपेणैवानर्थकर इति । तत्राप्यनुगमनशास्त्रेण मरणस्यैव स्वर्गसाधनतया विधानान्मरणे यद्यपि रागतः प्रवृत्तिस्तथापि मरणानुकूले व्यापारे अग्निप्रवेशादाविति कर्तव्यतारूप विधित एव प्रवृत्तिरिति न निषेधस्यावकाशः । 'वायव्यं श्वेतमालभेत भूतिकामः' इतिवत् । तस्मात्स्पष्टमेवानुगमनस्य श्येनवैषम्यम् ।

यत्तु 'तस्मादुह न पुरायुषः स्वःकामी प्रेयादि'ति श्रुतिविरोधादनुगमनमयुक्तमिति । तच्च न, स्वःकाम्या युषः प्राक् न प्रेयादिति स्वर्गफलोद्देशेनायुषः प्रागायुर्व्ययो न कर्तव्यो मोक्षार्थिना, यस्मादायुषः शेषे सति नित्य नैमित्तिककर्मानुष्ठानक्षपितान्तःकरणकलङ्कस्य श्रवणमननिदिध्यासनसपत्तौ सत्यामात्मज्ञानेन नित्यनिरति शयानन्दब्रह्मप्राप्तिलक्षणमोक्षसभवः । तस्मादनित्याल्प सुखरूपस्वर्गार्थमायुर्व्ययो न कर्तव्य इत्यर्थः । अतश्च मोक्षमनिच्छन्त्या अनित्याल्पसुखरूपस्वर्गार्थिन्या अनुगमन युक्त इतरकाम्यानुष्ठानवदिति सर्वमनवद्यम् ।

मिता.१।८६

(२) अन्वारोहणं च काम्यत्वादनित्यम् । अत एव विष्णुः—'मृते भर्तरि ब्रह्मचर्यं तदन्वारोहण वा' इति । न चान्वारोहणस्मृतीना 'तस्माद(दु)ह न पुरायुषः स्वःकामी प्रेयात्' इति श्रुतिविरोधो वाच्यः । भिन्न विषयत्वात् । सामान्येन श्रुतिः स्वेच्छया मरणं निषेधति । स्मृतिस्तु मृते भर्तरि वह्निप्रवेशमरणविशेष विधत्त । अतो भिन्नविषयत्वादविरोधः । 'स्वर्गकामो यजेत' 'याव जीवमग्निहोत्रं जुहुयात्' इत्येवमादिकया श्रुत्या सामान्य विषयया न विरोधः । तथाच ब्रह्मपुराण—'मृते भर्तरि सत्स्त्रीणा न चान्या विद्यते गतिः । नान्यद्भर्तृवियोगार्तिदाहप्रशमनं भवेत् ॥ देशान्तरमृते तस्मिन्साध्वी तत्पादुकाद्वयम् । निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥ ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी । व्यहाच्छौचे तु निर्वृत्ते श्राद्ध प्राप्नोति शाश्वतम् ॥' 'इमा नारीरविधवाः' इत्यादयो वेदश्रुतयः । तस्मादेताः स्मृतयः प्रमाणम् । न च 'न हिंस्यात्' इत्यनेनान्वारोहणं शक्य निषेद्धुम् । अनेन हि हन्तुः सकाशादन्यस्य हन्तव्यस्य हिंसा प्रतिषिध्यते, न तु स्ववधरूपा । सा तु 'तस्मादु ह न पुरायुषः' इत्यनेन निषिध्यते । इदं च सामान्यविषयत्वाद्विशेषविषयया ऽन्वारोहणस्मृत्या तद्व्यतिरिक्तस्ववधनिषेधकत्वेन सकोच्यत इत्युक्तम् । न च सामान्यविषयश्रुतिविरुद्धा स्मृतिरप्रमाणमिति वाच्यम् । सामान्यविशेषरूपविषयभेदेन विरोधाभावात् । विषयाभेद एव हि विरोधो न तु विशेषविषयभेदे । ततश्च विशेष विषयया स्मृत्या स्वमूलभूता श्रुतिर्विशेषविषयैवानुमीयते । सा च सामान्यविषयश्रुतेर्बलीयसी सती तस्याः सकोचहेतुर्भवति । ननु च ब्राह्मण्या अन्वारोहणप्रतिषेधं स्मरन्ति, यथा तावत्पैठीनसिः—'मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् । इतरेषा तु वर्णाना स्त्रीधर्मोऽयं परः स्मृतः ॥ उपकारं यथा भर्तुर्जीवन्ती न तथा मृता । करोति ब्राह्मणी श्रेयो भर्तुः शोकवती सती ॥' विराट्—'अनुवर्तेत जीवन्त न तु यायान्मृतं पतिम् । जीव (वे)द्भर्तुर्हित कुर्यान्मरणादात्मघातिनी ॥' अङ्गिराः—'या स्त्री ब्राह्मणजातीया मृत पतिमनुव्रजेत् । सा स्वर्गमात्मघातेन नात्मान न पति नयेत् ॥' व्याघ्रपात्—'न म्रियेत सम भर्त्रा ब्राह्मणी शोकमोहिता । प्रव्रज्यागतिमाप्नोति मरणादात्मघातिनी ॥' प्रव्रज्या मैथुनादिभोगत्यागः । सत्यमेव स्मरन्ति किंतु स्मरणान्तरेणैतेषा विषयो व्यवस्थाप्यते । यथाहोशना—'पृथक्चिति समारुह्य न विप्रा गन्तुमर्हति । अन्यासा चैव नारीणा स्त्रीधर्मोऽय परः स्मृतः ॥' इति । ततश्च ब्राह्मण्यनुगमननिषेधः पृथक्चितिसमारोहणविषयः । अत एव रामायणादौ ब्राह्मण्यादीना स्वभर्तृशरीरालिङ्गनपूर्वक स्वशरीरदहनमुपाख्यायते । अत एव कल्पसूत्रकारः प्रेतस्योत्तरतः पत्न्याः सवेशनमविशेषेण नित्यवद्विदधाति देवरादिना तूत्पादन तस्याः पुत्रकामनाया वा जीवलोककामनाया वा सत्यामाहुः । किंच न ब्राह्मणीत्वेन निमित्तेनानुगमननिषेधो भवति । किं त्वसौ ब्राह्मण्याः शोकनिमित्तकः । यत्तु वैराजमाङ्गिरस च वचन ब्राह्मण्या अनुगमनमात्रप्रतिषेधकमिव प्रतिभाति । तद्विशेषविषयैः प्रतिषेधैरुपसंह्रियते । तस्माद्विधितः प्रवर्तमानाया ब्राह्मण्या अनुगमनाद्दोषो न विद्यते, शोकादिप्रवृत्तायास्तु भवत्येवेति ।

अप.१।८७

व्रतोपवासनिरता ब्रह्मचर्ये व्यवस्थिता ।
दमदानरता नित्यमपुत्राऽपि दिवं व्रजेत् ॥

अदृष्टार्थदाने तदुपयोगिनोराधीकरणविक्रययोश्च तेनैवाधिकाराभिधानात्—व्रतोपवासनिरतेति । दिवं व्रजेदित्यनेन काम्येऽपि दानादौ तस्या अधिकारः प्रतीयते किमुत नित्ये नैमित्तिके च । व्यप्र.४९०

नियोगविधिनिषेध.

उक्तो नियोगो मनुना निषिद्धः स्वयमेव तु ।
युगह्रासादशक्योऽयं कर्तुमन्यैर्विधानतः ॥
तपोज्ञानसमायुक्ताः कृते त्रेतायुगे नराः ।
द्वापरे च कलौ नृणां शक्तिहानिर्हि निर्मिता ॥
अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः ।
तच्छक्यं नाधुना कर्तुं शक्तिहीनैरिदंतनैः*॥

कात्यायनः

कन्यायाः पुनर्दानादानपुनर्विवाहविचारः

वरयित्वा तु यः कश्चित् प्रणश्येत्पुरुषो यदा ।
रक्तागमांस्त्रीनतीत्य कन्यान्यं वरयेत्पतिम् ॥

वाग्दत्ताविषयमेतद्वाक्यम् । रक्तागमो रजोदर्शनम् । अप.१।६५

प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा ।
धार्या सा वर्षमेकं तु देयाऽन्यस्मै विधानतः ॥
अथ प्रवृत्तिरागच्छेत् प्रतीक्षेत समात्रयम् ।
अत ऊर्ध्वं प्रदातव्या कन्याऽन्यस्मै यथेच्छतः ॥

(१) एतदपि प्राग्विवाहाद् द्रष्टव्यम् । अप.१।६५

(२) शुल्कदातुर्देशान्तरगतौ तु कात्यायनः–प्रदायेति । अत्र धार्येत्यनेन धार्यत्वेन ततः पूर्वमपि देयेति सूचितम् । बाल.२।१२७

अनेकेभ्योऽपि दत्तायामनूढायां तु यत्र वै ।
पुरागतश्च सर्वेषां लभेताद्यो वरस्तु ताम् ॥
पश्चाद्वरेण यद्दत्तं तस्याः प्रतिलभेत सः ।
अथागच्छेत्समूढायां दत्तं पूर्ववरो हरेत् ॥

वरो विवाहार्थोपस्थितस्तेन यच्छुल्क दत्त तदेव लभेतेत्यर्थः । तत्र वै पुरागतश्च सर्वेषा लभते, तदिमा मुतामिति पाठान्तरम् । अन्यस्मै दत्ताया कन्याया पूर्ववरोऽप्यायाति तदाऽनूढा ता लभते, ऊढाया तु स्वदत्त द्रव्यमेव लभते, न तु कन्यामित्यपि सिद्धम् । बाल.२।१२७

पूर्वदत्ता तु या कन्या अन्येनोढा यदा भवेत् ।
संस्कृताऽपि प्रदेया स्याद् यस्मै पूर्वं प्रतिश्रुता ॥
चेद्गुणवत्तर इति शेषः । अप.१।६५

अनेकभार्यस्य कर्तव्य, स्त्रीधर्माश्च

अग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया ।
कारयेत्तद्धुत्वं चेज्ज्येष्ठया गर्हिता न चेत् ॥
या वा स्याद्वीरसूरासामाज्ञासंपादिनी च या ।
दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत् ॥
दिनक्रमेण वा कर्म यथाज्यैष्ठ्यं स्वशक्तितः ।
विभज्य सह वा कुर्युर्यथाज्ञानमशाठ्यवत् ॥
स्त्रीणां सौभाग्यतो ज्यैष्ठ्यं विद्ययेव द्विजन्मनाम् ।
न हि स्वल्पेन तपसा भर्ता तुष्यति योषिताम् ॥
भर्तुरादेशवर्तिन्या योषया बहुभिर्व्रतैः ।
अग्निः शुश्रूषितो यत्र सा स्त्री सौभाग्यमाप्नुयात् ॥

(१) बाल.२।१२७. (२) अप.१।६५.

(३) व्यक.१३१; विर.४२०; विभ.११.

(४) व्यक.१३१, विर.४२० रासा (रेषा) च या (प्रिया); विभ.११.

(५) व्यक.१३१, विर.४२०; विभ.११ स्वशक्तितः (प्रयत्नतः).

(६) व्यक.१३१; विर.४२०; विभ.११.

(७) व्यक.१३१; विर.४२०; विभ.११ योषया (यामया).

* व्याख्यासंग्रहः स्थलादिनिर्देशश्च दायभागे द्रष्टव्य ।

(१) व्यक.१३७; स्मृच.२५४:२९२ दम (धर्म); विर.४४३; व्यप्र.४९० कात्यायनः; व्यम.६१ कात्यायनः; सेतु २८८ निर (निय) यें (यं) नरता (नवर्ती); विभ.२८ यें (यं) दम (धर्म); समु.१४१ कात्यायन..

(२) अप.१।६९ उक्तो (उक्त्वा) अन्यै (सर्वे); व्यक.१३९, ममु ९।६८ मनु (मुनि) हासा (क्रमा); विर.४४९ अन्यै (मर्ल्यै); मच.९।६८; विभ.३२; नन्द.९।६८ उक्तो नियोगो (नियोगमुक्त्वा).

(३) अप.१।६९ निर्हि (निर्वि); व्यक.१३९; ममु.९।६८ ते त्रे (तत्रे); विर.४५० अपवत्; मच.९।६८ ममुवत्; विभ.३२ निर्मिता (जायते); नन्द.९।६८.

(४) अप.१।६५; बाल.२।१२७.

(५) अप.१।६५ शुल्कं गच्छेद्यः (गच्छेच्छुल्क यः:); बाल.२।१२७. (६) बाल.२।१२७.

तद्वहुत्वं चेदगर्हिता यदि ज्येष्ठा, तदा तया धर्मकार्यं कारयेत्। यदि तु ज्येष्ठा गर्हिता, तदाऽनेकासु सवर्णासु अनध्यवसाये या स्याद्वीरसूरित्यादिनाध्यवसायः कार्य इत्यर्थः। विर.४२०

[1]पत्या चाप्यवियोगिन्या शुश्रूष्योऽग्निर्विनीतया।
सौभाग्यवदवैधव्यकाम्यया भर्तृभक्तया॥

(१) पत्युरप्यभियोगिन्या पत्युरप्याधिक्येन सततमग्निना अभियुक्तया। व्यक.१३५

(२) अग्निर्गार्हपत्यादिरुपासनाख्यो वा सौभाग्यवद वैधव्यकाम्यया सौभाग्योपेतमवैधव्य कामयमानया। अनेन सौभाग्यवैधव्य चाग्निपरिचर्याफलमित्युक्तम्। श्लोकादावन्ते चोक्तलक्षणविशेषणवशाद्विनीतया पतिरपि सतत शुश्रूष्य इति गम्यते। स्मृच.२५१

[2]पतिशुश्रूषयैव स्त्री सर्वान् कामान् समश्नुते।
दिवः पुनरिहायाता सुखानां सा निधिर्भवेत्॥

दिवः सकाशादिह पुनरागता सुखाना निधिर्भवेदित्यर्थः। स्मृच.२५२

[3]पतिमुल्लङ्घ्य मोहात्स्त्री कं कं न नरकं व्रजेत्।
कृच्छ्रान्मानुषतां प्राप्य किं किं दुःखं न विन्दति॥

विधवाधर्माः

[4]अनेकदोषदृष्टेऽपि मृते भर्तरि वा सदा।
साध्वाचारेऽवतिष्ठेत गुरुशुश्रूषणे रता॥
[5]मृते भर्तरि या साध्वी ब्रह्मचर्ये व्यवस्थिता।
साऽरुन्धतीसमाचारा ब्रह्मलोके महीयते॥

(१) व्यक.१३५ पत्या . न्या (पत्युरप्यभियोगिन्या), स्मृच.२५१, रत्न.१३५ पूर्वार्धे (पत्यावप्यभियोगिन्या शुश्रूष्योऽग्निर्विधीयते); विता.८२४ पत्या चा (पत्यावप) नान्या (धीयते); समु.१२४.

(२) व्यक.१३६ सा निधि (सावधि); स्मृच.२५२ सा निधि (शेवधि) याज्ञवल्क्यः; विर.४३६; विभ.२१; समु.१२४ स्मृचवत्.

(३) व्यक.१३६; विर.४३७; विभ.२३ मोहात् (दोषात्).

(४) व्यक.१३८ चारेऽव (चाराच्च); विर.४४५ (=); विभ.२८.

(५) व्यक.१३८, स्मृच.२५४; विर.४४५(=) या साध्वी (साध्वी स्त्री); समु.१२५.

नियोगविधि, परपूर्वाविचारश्च

[1]नियोगात्पावनं कुर्याद्यथोक्तं तद्विशुद्धये।
द्विजस्य स्त्रीषु धर्मोऽयं शूद्रस्यैके तदाश्रयः॥
[2]सुखार्थं या प्रवृत्ता स्त्री न भर्तुः सुतकाम्यया।
पुत्रं तु जनयेदेव निन्द्या पापा च सा स्मृता॥
[3]भर्तृगोत्रं समुत्सृज्य नारी यद्यन्यमाश्रिता।
निन्द्यैव सा स्मृता लोके परपूर्वेति चोच्यते॥
[4]परपूर्वाश्रिता यत्र तत्र स्यान्नाशितः प्रभुः।
क्रमादृते तु धर्मोऽयं लब्धा वा स्वामिनो भवेत्॥
[5]निरोद्धव्या च ताडया च परपूर्वापराधतः।
अक्षमां चानवेक्षन्तीं ताडयन्दण्डमर्हति॥
[6]चौरहस्तान्नदीवेगाद्दुर्भिक्षादेशविप्लवात्।
निस्तार्य वाऽपि कान्तारात् लब्धा त्यक्ता क्रमागता॥

[7]आसां भोगे न दोषः स्यादिति शास्त्रविनिश्चयः।
स्वामिदत्तां तु गृह्णीयादेषा चेन्न ततोऽन्यथा॥
न दोषो दण्डप्रयोजकः। विर.४५३

[8]दीयमानमथात्मानं या नारी नानुमोदते।
न सा देया न च ग्राह्या विधिरेष स्मृतो गुरुः॥
[9]न चोत्तमां न चाकामां तथा पुत्रवतीं न च।
ईदृशीं त्वनुरूपेण निष्क्रयेण प्रमीलयेत्॥

(१) व्यक.१३९ स्य स्त्रीषु (स्त्रीषु च) के तदाश्रयः (क सदाश्रयेत्); विर.४४९.

(२) व्यक.१३९ च (तु), विर.४५३, विभ.३३ तु (च).

(३) व्यक.१४०; विर.४५३; विभ.३३ समुत्सृज्य (परित्यज्य).

(४) व्यक.१४० न्नाशितः (न्नानृतः); विर.४५३; विभ.३३ वा (या).

(५) व्यक.१४०; विर.४५३; विभ.३३.

(६) व्यक.१४०; विर.४५३; विभ.३३ वाऽपि (वास).

(७) व्यक.१४०; विर.४५३; विभ.३३ देषा (द्वयात्).

(८) व्यक.१४० गुरुः (भृगुः); विर.४५४; विभ.३३ गुरुः (गुणः).

(९) व्यक.१४०; विर.४५४; विभ.३३ तीं न च (तीमपि) निष्क्रयेण (विक्रमेण).

बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः

उप्ते बीजे परक्षेत्रे बीजी न लभते फलम् ॥

व्यासः

पतिव्रतावृत्तम्

पूर्वोत्थानपरा दक्षा जघन्यासनशायिनी ।
अवाग्दुष्टानुकूला स्त्री भवेद्वै पुण्यकर्मणः ॥

स्त्रीदोषाः

द्वारोपवेशनं नित्यं गवाक्षेण निरीक्षणम् ।
असत्प्रलापो हास्यं च दूषणं कुलयोषिताम् ॥

त्याज्यस्त्रीविचारः

चेतस्त्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥

जुङ्गितः प्रतिलोमजश्चर्मकारादिः । मिता.१।७२

अन्वारोढिणीप्रशंसा

पूर्वं मृता हरेदग्निमन्वारूढा हरेदधम् ।
भर्तुर्धनमभावे तु जीवन्ती सत्सु बन्धुषु ॥
ब्रह्मघ्ने वा कृतघ्ने वा मित्रघ्ने यच्च दुष्कृतम् ।
भर्तुः पुनाति सा नारी तमादाय मृता तु या ॥

आदाय आलिङ्ग्येत्यर्थः । अप.१।८७

दयितं याऽन्यदेशस्थं मृतं श्रुत्वा पतिव्रता ।
समारोहति शीर्षेऽग्नौ तस्याः शङ्कित निबोधत ॥

वृत्तं मृतमित्यर्थः । अप.१।८७

यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः ।
संप्राप्तो यातनास्थानं गृहीतो यमकिङ्करैः ।
तिष्ठते विवशो दीनो वेष्टयमानः स्वकर्मभिः ॥

व्यालग्राही यथा व्यालं बलाद्गृह्णात्यशङ्कितः ।
तद्वद्भर्तारमादाय दिवं याति तपोबलात् ॥
तत्र सा भर्तृपरमा स्तूयमानाप्सरोगणैः ।
क्रीडते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश ॥

मोदते पतिना सार्धमिति वचनात्सह पत्या स्वर्गोपभोगः पत्नीगाम्येव फलमिति तत्कृतस्याग्निप्रवेशस्य फलमकर्ता भर्ता भुङ्क्त इति विरोधः सुपरिहा(ह)रः । यस्तु भर्तरि सुखसमवायः, स भर्तृगतादेव धर्मात् । तत्प्रतिबन्धकं पापं पत्नीकृतो धर्म उद्धरति । न च प्रतिबन्धकोद्धारकः कार्यपरः । यस्तु पत्युः पापक्षयः पत्नीकृतस्य धर्मस्य फलमिति श्रूयते तस्यापि न मुख्योऽर्थः, किं तु गौणः, क्षय इव क्षयः पत्नीधर्मेण पतिपापस्यानन्तरं फलदानप्रतिबन्धरूपः । अप.१।८७

दिनैकागमदेशस्था साध्वी चेत्कुरुतेऽनिश्चया ।
न हि तृप्तिनं (?) तस्य यावदागमनं भवेत् ॥

विधवाधर्माः

मृते भर्तरि साध्वी स्त्री ब्रह्मचर्यव्रते स्थिता ।
स्नाता प्रतिदिनं दद्यात्स्वभर्त्रे सलिलाञ्जलीन् ॥
विष्णोराराधनं चैव कुर्यान्नित्यमुपोषिता ।
दानानि विप्रमुख्येभ्यो दद्यात्पुण्यविवृद्धये ॥
उपवासांश्च विविधान्कुर्याच्छास्त्रोदितान् शुभान् ।
लोकान्तरस्थं भर्तारमात्मानं च वरानने ।
तारयत्युभयं नारी नित्यं धर्मपरायणा ॥

देवलः

स्त्रीत्यागविचारः

स्वैदारांस्त्यजतो मोहान्नरस्यान्यायमोचिनः ।
धर्मवंशपरित्यक्तुर्निष्कृतिर्न विधीयते ॥

---

(१) समु.१०१.

(२) व्यक.१३२; स्मृच.२४९; विर.४२२मैण: (मिण:); सेतु.२८४; विभ.१३; समु.१२३.

(३) अप.१।८३ गवा...क्षणम् (गवाक्षावेक्षणं तथा); व्यक. १३४ वेशनं (सेवन); विर.४३०.

(४) मिता.१।७२. (५) अप.१।८७.

(६) अप.१।८७ मृतं (वृत्तं) शीर्षे (दीप्ते); व्यक.१३७ शीर्षेऽग्नौ (शीघ्रेऽग्नौ); विर.४४१; विभ.२५ शीर्षे (शीघ्रा).

(७) अप.१।८७ बद्धः (बद्ध); व्यक १३७; विर.४४१ बद्धः (बद्ध); विभ.२६ वेष्टय (वध्य).

(१) अप.१।८७ व्यालं (सर्पं) बला...तः (बिलाद् गृह्णात्यशङ्कितम्); व्यक.१३७; विर.४४२; विभ.२६.

(२) अप.१।८७ क्रीडते (मोदते); व्यक.१३७; विर. ४४२; विभ.२६.

(३) विभ.२७. (४) विता.३९३.

(५) व्यक.१३२; स्मृच.२४५; विर.४२३; रत्न. १३४ मोचिनः (पालिनः); विता.८२२ मोचिनः (शालिनः); विभ.१३ पू., १४ उत्त.; समु.१२२.

(१) शास्त्रोक्तत्यागहेतून् विनैव यो मोहादिना स्वयं त्यजति तस्यान्यायेन स्वदारमोचिनस्तन्मोचनद्वारेण तया सह विहितश्रौतस्मार्तादिधर्मस्य तस्यामुत्पाद्यमानसंतानस्य च त्यक्तुर्दुष्कृतनिष्कृतिर्नास्तीत्यर्थः। इह लोकेऽपि तस्य राज्ञा चोरवद्दण्डन कार्यम्। स्मृच.२४५

(२) अन्यायमोचिनोऽन्यायेन मोक्तुः। विर ४२४

(३) अदुष्टभार्यायाः परित्यागो न कर्तव्य इत्यभिप्रेत्याह देवलः—स्वदारानिति। रत्न.१३४

[1]व्याधितां स्त्रीप्रजां वन्ध्यां उन्मत्तां विगतार्तवाम्।
अदुष्टां लभते त्यक्तुं तीर्थान्न त्वेव कर्मणः॥

(१) व्याध्यादिना त्याज्यासु संभोगमात्रस्य त्यागो न सहाधिकारादीनामित्याह—व्याधितामिति। तीर्थात् संभोगत इत्यर्थः। *स्मृच.२४६-२४७

(२) तीर्थाद्योनितः। कर्मणः तदुचितनीचव्यापारात्। विर.४२४

स्त्रीधर्माः

[2]अस्वातन्त्र्यं, पतिशुश्रूषा, सहधर्मचर्या, तत्पूज्यपूजनम्, परवेश्यागमनं, तद्द्वेष्यमाणद्वेषणं, अदुष्टा भावना, नित्यानुकूल्यं, तत्कार्यपरत्वमिति स्त्रीधर्मः।

अधिवेदनविचारः

[3]एकामुत्कम्य कामार्थमन्यां लब्धुं यदीच्छति।
समर्थस्तोषयित्वाऽर्थैः पूर्वोढामपरां वहेत्॥

कामसिद्धेस्तु यया परिपूर्णं न भवति तामर्थैस्तोषयित्वा भार्यान्तरमुद्वहेदित्याह देवलः—एकामिति। स्मृच.२४४

[4]आकाङ्क्षेताष्टवर्षाणि भर्ताऽतिप्रसवां स्त्रियम्।
दश वन्ध्यां च निन्द्यां च द्वादश स्त्रीप्रसाविनीम्॥

अतिप्रसवा अतिक्रान्तप्रसवा। प्रतिगर्भं गर्भस्रावतीति यावत्। वन्ध्याऽनपत्या। निन्द्या मद्यपाऽसभ्यवृत्तादिका। दश वन्ध्येति प्रियतमवन्ध्याविषयम्। स्मृच.२४४

स्त्रीपुनर्विवाहः, पतित्यागविचारश्च

[5]नष्टः प्रव्रजितः क्लीबः पतितो राजकिल्बिषी।
लोकान्तरगतो वाऽपि परित्याज्यः पतिः स्त्रियाः॥

नष्टोऽशास्त्रीयव्यापारेण त्यक्तपरिकरसङ्गः। प्रव्रजितः अशास्त्रविषयप्रव्रज्याशाली वृथामौण्ड्यादिः। राजकिल्बिषी राजरोगाक्रान्तः। विर.४४७

[6]मृते भर्तरि जीवे वा स्त्री विन्देतापरं पतिम्।
संतत्यनाशार्थतया न स्वातन्त्र्यं तु योषितः॥

प्रोषितभर्तृकाधर्मः

[7]अष्टौ वर्षाण्युदीक्षेत ब्राह्मणी प्रोषितं पतिम्।
अप्रसूता च चत्वारि परतोऽन्यं समाश्रयेत्॥
[8]अष्टौ वर्षाण्युदीक्षेत ब्राह्मणी तु पतिं तथा।
क्षत्रिया षट्समास्तिष्ठेदप्रसूता समात्रयम्॥

क्षत्रिया षट्समा इत्यत्राप्यप्रसूतेति बोद्धव्यम्। विर.४४८

[9]वैश्या प्रसूता चत्वारि द्वे समे त्वप्रसूतिका।
न शूद्रायाः स्मृतः कालो न च धर्मव्यतिक्रमः॥
विशेषतोऽप्रसूतायाः संवत्सरपरा स्थितिः॥
[10]अप्रवृत्तौ स्मृतः काल एष प्रोषितयोषिताम्।
जीवति श्रूयमाणे च स्यादेष द्विगुणो विधिः॥

---

* पमा. स्मृचवत्।

(१) **अप.**१७३ तीर्थां...मैणः (तीर्थतो न तु धर्मतः), **व्यक.**१३२ व्याधिता स्त्रीप्रजा (कुष्ठिनीं पतितां) अदु (अनि), **स्मृच.**२४६; **विर.**४२३ (कुष्ठिनीं पतितां वन्ध्यामुन्मत्तां पतितातुराम्। अनिष्टां न लभेद्भार्यां तीर्थात्तत्स्त्रीचकर्मणः॥), **पमा.**४७५; **विभ.**१४ विरवत्; **समु.**१२२.

(२) **व्यक.**१३३ (परवेश्यागमन०) माणद्वे (माणे द्वे) अदुष्टा भावना (अदुष्टभावना); **स्मृच.**२५१ (पतिशुश्रूषा सहधर्मचर्या। तत्पूज्यमानपूजनम्। तद्द्वेषणम्); **विर.**४२८; **विभ.**१७ (परवेश्यागमनं०); **समु.**१२४ (पतिशुश्रूषा सहधर्मचर्या। तत्पूज्यमानपूजनम्। तद्द्वेष्यद्वेषम्).

(३) **स्मृच.**२४४; **समु.**१२१.

(१) **स्मृच** २४४; **समु.**१२१-१२२.

(२) **व्यक.**१३८; **विर.**४४७; **विभ.**३०.

(३) **व्यक.**१३८; **विर.**४४७, **विभ.**३० उत्तरार्धं (अपत्यलाभार्थतया न स्वातन्त्र्येण योषितः).

(४) **विर.**४४७-४४८; **विभ.**३० श्रयेत् (चरेत्).

(५) **विर.**४४८; **विभ.**३०.

(६) **विर.**४४८; **विभ.**३०.

(७) **विर.**४४८; **विभ.**३० षतोऽप्रसू (षतः प्रसू).

प्रजाप्रवृत्तौ नारीणां वृत्तिरेषा प्रजापतेः ।
अतोऽन्यगमने स्त्रीणामेष दोषो न विद्यते ॥

उशना

ब्राह्मण्या अन्वारोहणनिषेधः

[1]पृथक् चितिं समारुह्य न विप्रा गन्तुमर्हति ।
अन्यासां चैव नारीणां स्त्रीधर्मोऽयं परः स्मृतः ॥

नियोगविधिः

[3]नियुक्तां सर्वाङ्गघृताभ्यक्तां घृतेन सर्वाङ्गमात्मानमभ्यज्य गच्छेत् ।

यमः

पतित्व सप्तमे पदे

[4]नोदकेन न वाचा वा कन्यायाः पतिरिष्यते ।
पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे ॥

ब्राह्मण्या. सुरापाननिषेधः

[5]या ब्राह्मणी स्यादिह वै सुरापी न तां देवाः पतिलोकं नयन्ति ।
इहैव सा तिष्ठति हीनपुण्या शुनी भूत्वा गर्दभी सूकरी च ॥

स्त्रीत्यागविचारः

[6]स्वैच्छन्दगा तु या नारी तस्यास्त्यागो विधीयते ॥

संव्यवहार्यत्वापादकप्रायश्चित्ताभावो यद्गमने भवति तमपि या गच्छति सा स्वच्छन्दगा । स्मृच.२४२

स्वैच्छन्दव्यभिचारिण्याः विवस्वांस्त्यागमब्रवीत् ।
न वधं न च वैरूप्यं वधं स्त्रीणां विवर्जयेत् ॥
न चैव स्त्रीवधं कुर्यान्न चैवाङ्गविकर्तनम् ॥

स्त्रीणां महापराधे वधं कुर्वन् विसर्जनमेव तासां कुर्यादित्यर्थः । वैरूप्यं कर्णनासाद्यङ्गविकर्तन तदपि भर्त्रा न कदाचित् कार्यमित्यर्थः । 'न चैव स्त्रीवधं कुर्यात् न चैवाङ्गविकर्तनम्' इति तेनैवोक्तत्वात् । स्मृच.२४६

विधवाधर्माः

[7]यावज्जीवं सदासीत नियता ब्रह्मचारिणी ।
यो धर्म एकपत्नीनां तं धर्ममनुकाङ्क्षती ॥
[8]स्त्रियाः श्रुतौ वा शास्त्रे वा प्रव्रज्या न विधीयते ।
प्रजा हि तस्याः स्वो धर्मः सवर्णादिति धारणा ॥
[9]अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम् ।
दिवं गतानि विप्राणामकृत्वा कुलसंततिम् ॥
[10]तथैव कन्या व्यावृत्ता ब्रह्मचर्ये व्यवस्थिता ।
अपुत्रा प्राप्नुयात्स्वर्गं यथा ते ब्रह्मचारिणः ॥
[11]अपुत्रा जातपुत्रा वा कन्या पतिमनुव्रता ।
प्राप्नुयात्स्वर्गमेवेति मनुः स्वायम्भुवोऽब्रवीत् ॥

एकपत्नीना एकपतिकाना, कन्यात्र ऊढा ।

व्यक.१३८

नियोगविधिः

[12]ऋतौ स्नातायां तस्यां तु वाग्यतस्तामसे निशि ।
सुश्मश्रुनखलोमानां गन्धस्पर्शावविदयन् ॥
[13]एकवासा घृताक्ताङ्गो दुर्गन्धः शोकदुर्मनाः ।
मुखान्मुखं परिहरन् गात्रैर्गात्राणि चास्पृशन् ॥
[14]यतात्मा गर्भमादध्यात् हृते गर्भे त्वपव्रजेत् ।
जातापत्यां नाधिगच्छेत्पुत्रे जाते तथैव च ॥

---

(१) विर ४४८; विभ.३० नारीणा (यावच्च) प्रजापतेः (प्रजायते).

(२) मिता १।८६ पू, अप.१।८७; समु.१२५ स्मृत्यन्तरम्.

(३) मभा.१८।५; गौमि.१८।५ नियु...घृतेन (नियुक्ता सर्वाङ्ग घृताभ्यक्तम् । तेन).

(४) विभ.३४.

(५) व्यक.१३६ हीन (क्षीण); विर.४३८; विभ.२३.

(६) स्मृच.२४२,२४६ तु (च); पमा ४७५; समु. १२२ स्मृचवत्.

(७) स्मृच.२४६ वस्यां (वस्या) वर्जयेत् (सर्जनम्); पमा. ४७७; समु.१२२ वर्जयेत् (सर्जनम्) नारदः.

(१) व्यक १३८ मनु (मभि); विर.४४१; विभ.२८.

(२) व्यक.१३८; विर ४४४.

(३) व्यक.१३८, विर.४४४; विभ.२८ सततिम् (संतति.).

(४) व्यक.१३८; विर ४४४; विभ.२८.

(५) व्यक.१३८; विर.४४४; विभ.२८.

(६) व्यक.१३८ स्नातायां तस्या तु (तु तस्यां स्नातायां) लो (रो); विर.४४६; विभ.२९ ऋतौ स्नातायां तस्या तु (ऋतुस्नाता भ्रातृभार्या)

(७) व्यक.१३८; विर.४४६; विभ.२९ णि चा (ण्यर्स).

(८) व्यक.१३८ पुत्रे जाते (जाते पुत्रे); विर.४४६; विभ.२९ यतात्मा गर्भं (यथात्मा गति).

[1]सीमन्तोन्नयनादीनि सर्वकार्याणि कारयेत् ।
भ्रातुः संतानमिच्छद्भिः पितृणामौर्ध्वदेहिकम् ॥

दक्षः

स्त्रीरक्षा

[2]जलौकावत् स्त्रियः सर्वा भूषणाच्छादनाशनैः ।
सुहिताऽपि कृता नित्यं पुरुषं ह्यपकर्षति ॥
जलौका रक्तमादत्ते केवलं सा तपस्विनी ।
इतरा तु धनं चित्तं मांसं वीर्यं बलं सुखम् ॥
[3]सांशङ्का बालभावे तु यौवनेऽभिमुखी भवेत् ।
तृणवन्मन्यते नारी वृद्धभावे स्वकं पतिम् ॥
[4]स्वकाम्ये वर्तमाना सा स्नेहान्न च निवारिता ।
अपथ्या तु भवेत्पश्चाद्यथा व्याधिरुपेक्षितः ॥

(१) भूषणादिभिः सुभृता कृताऽपि स्त्री पुरुषं नित्यमपकर्षति । सततमवज्ञापात्र करोतीत्यर्थः । 'धन' इत्यादौ प्रतिपदं 'आदत्त' इत्यनुषज्यते । एव द्रोहभावमतिशयेन वदतो दक्षस्यायमभिप्रायः । भार्याया बहुधा बहुविधदौष्ट्यदर्शनेऽपि जातिस्वभावनिबन्धने किमत्र चित्रमिति उद्वेगमुत्सृज्य पालने यत्नानुवृत्तिः कार्येति भार्याया भरणेऽपि पुरुषेण यौवने यतितव्यम् । स्मृच.२४०

(१) व्यक.१३८ कार्या (कर्मा); विर.४४६; विभ.२९ व्यकवत्.

(२) व्यक.१२९ सुहिता (सुभृता); स्मृच.२४० जलौ (जलू) सुहिता (सुभृता); विर.४१३ कावत् (केव) उत्तरार्धं (संभृताश्चावृता नित्यमाकर्षन्ति हितं नरम्); रत्न.१३३; व्यप्र ४०६; व्यउ.१४०; विभ.६ जलौकावत् (जलूकेव) सुहिता (स्वभृता); समु १२० स्मृचवत्.

(३) व्यक.१२९ चित्तं (वित्त); स्मृच.२४० जलौ (जलू); विर.४१३ व्यकवत्; रत्न.१३३; व्यप्र.४०६; व्यउ.१४० व्यकवत्; विभ.६ स्मृचवत्; समु.१२० स्मृचवत्.

(४) व्यक.१२९ः स्मृच.२४० ऽभि (वि) स्वक (पुनः); विर ४१४ भिमुखी (तिसुखी); रत्न.१३३; विचि.१९०(=); व्यप्र.४०६; व्यउ.१४० खी (खा); विभ.६ विरवत्; समु.१२० स्मृचवत्; विव्य.५६ (=).

(५) व्यक.१२९ स्व (स्वा); विर.४१४ तु (ऽभि); रत्न. १३४; विचि.१९० स्नेहान्न च (स्नेहेन न); व्यप्र.४०६; क्षितः (क्षिता); व्यउ.१४०; विता.८२१ काम्ये (कामे) विभ.६ स्व (स्वा); समु.१२०; विव्य.५६(–).

(२) स्वकाम्ये स्वेच्छायाम् । अपथ्या अत्यन्ताहितहेतुः । विर.४१४

(३) सुहिता तृप्ता कृता इत्यन्वयः । रत्न.१३४

अधिवेदनविचारः

[1]प्रथमा धर्मपत्नी तु द्वितीया रतिवर्धिनी ।
दृष्टमेव फलं तत्र नादृष्टमुपपद्यते ॥
धर्मपत्नी समाख्याता निर्दोषा यदि सा भवेत् ।
दोषे सति न दोषः स्यादन्या कार्या गुणान्विता ॥

दम्पत्योर्धर्माः द्विदारदोषश्च

[2]स्वर्गेऽपि दुर्लभं ह्येतदनुरागः परस्परम् ।
रक्तमेकं विरक्तं वा ततः कष्टतरं नु किम् ॥

दम्पत्योः परस्परमनुराग इत्येतत्स्वर्गेऽपि दुर्लभम् । तथा तयोरेकतरस्वरूपमनुरक्तं विरक्तं वा स्यात् ततः कष्टतरं किं नु ? न किमपि । तदेव परमं कष्टतरमित्यर्थः । तेन मिथोऽनुरागो यथा भवति तथा स्त्रीपुंसौ यतेयातामिति शेषः । स्मृच.२४८

[3]गृहाश्रमात्परं नास्ति यदि भार्या वशानुगा ।
तया धर्मार्थकामात्मत्रिवर्गफलमश्नुते ॥

तया वशवर्तिन्या धर्मार्थकामात्मकं त्रिवर्गाख्यफलमश्नुते । गृहीत्यर्थः । वशानुगेति गुणान्तराणामुपलक्षणार्थम् । स्मृच.२४८

[4]गृहवासः सुखार्थो हि पत्नीमूलं च तत्सुखम् ।
सा पत्नी या विनीता तु चित्तज्ञा वशवर्तिनी ॥
[5]अनुकूला त्ववाग्दुष्टा दक्षा साध्वी प्रजावती ।
[6]एभिरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः ॥

पत्नी यज्ञाधिकारसंपद्युक्ता भार्या तद्विकला तु स्त्र्यैव, न पत्नी, साऽपि भार्या प्रागुक्तविनीतत्वादिगुणान्वितेत्याह

(१) अप.१।७३ तु (स्यात्); व्यक.१३१; विर.४२०, ४२१; विभ.१२ अपवत्.

(२) अप.१।८८; व्यक.१३१; विर.४२१; विभ.१२.

(३) स्मृच.२४८; समु.१२३.

(४) स्मृच.२४८; समु.१२३ मात्म (माख्य).

(५) व्यक १३२ विनीता तु (विजानाति); स्मृच. २४८ र्थो हि (र्थं च); विर.४२२; विभ.१३; समु.१२३.

(६) व्यक.१३२; स्मृच.२४८ श्रीरेव (भार्यैव); विर. ४२२; सेतु.२८३; विभ.१३; समु.१२३.

स एव–एभिरिति । एभिरेवेत्येवकारोऽत्रायोगव्यवच्छेदार्थो न पुनरन्ययोगव्यवच्छेदार्थो गुणान्तरयोगस्यापीष्टत्वात् । स्मृच.२४८

[1]प्रहृष्टमानसा नित्यं स्थानमानविचक्षणा ।
भर्तुः प्रीतिकरी या तु सा भार्या इतरा जरा ॥

इतरा गुणरहिता । जरा क्लेशकारिणीत्यर्थः । पत्न्यादावेव पत्न्यादिशब्दप्रयोगविनीतत्वादिगुणान्वितायामेव समग्रमपि पत्न्यादिनिर्वर्त्यं कार्यं भवति । नान्यस्यामिति प्रशंसार्थः । यथा 'पशवो गो अश्वा' इत्यादिश्रुतौ गोऽश्वपशुष्वेव पशुशब्दप्रयोगो गोऽश्वेष्वेव समग्रं पशुनिर्वर्त्यं कार्यम् । न पुनरजादिष्विति, प्रशंसार्थस्तद्वदत्रापि इति सर्वमनवद्यम् । स्मृच.२४८

[2]शिष्टभार्या शुचिर्भ्राता मित्रदासः समाः स्मृताः ।
यस्यैतानि विनीतानि तस्य लोकेऽपि गौरवम् ॥

मित्रदासः अनुकूलदासः । स्मृच.२४८

[3]अनुकूलकलत्रस्य स्वर्गस्तेन न संशयः ।
प्रतिकूलकलत्रस्य नरको नात्र संशयः ॥
[4]दुःखासिका कलिर्भेदश्छिद्रं पीडा परस्परम् ।
प्रतिकूलकलत्रस्य द्विदारस्य न संशयः ॥

दुःखासिका दुःखेन वसनम् । कलिः कलहः । भेदो विमतिः । छिद्रपीडा छिद्रान्वेषणनिबन्धनपीडा । परस्परं कलत्रयोर्मिथः इत्यर्थः । कथं तर्हि प्रतिकूलद्विकलत्रस्य कलहादिजन्यदुःखविशेषकथन, उच्यते । मिथः कलत्रयोरुत्पन्नः कलहादिः तद्भर्तृपर्यन्ततामायातीत्यभिसधायोक्त प्रतिकूलकलत्रस्य द्विदारस्येति । स्मृच.२४९

पैठीनसिः

विवाहे सापिण्ड्यविचारः

[5]मातृतस्तृतीयां पितृतः पञ्चमीम् ।

(१) व्यक.१३२; स्मृच.२४८ प्रहृष्ट (अदुष्ट) करी (करा); विर.४२२; विभ.१३; समु.१२३ इतरा (हीनरा) शेषं स्मृचवत्.

(२) स्मृच.२४८; समु १२३ शिष्ट (शिष्टा) ऽपि (ऽति).

(३) स्मृच.२४९; समु.१२३

(४) व्यक.१३२; स्मृच.२४९ दिछद्रं (दिछद्र); विर. ४२२ भेद (दोष); विभ.१३ भेद (द्वेष); समु.१२३ स्मृचवत्.

(५) समु.११८.

स्त्रीरक्षा

[1]तस्माद्रक्षेत् भार्यां सर्वतः । मा स्म संकरो भवत्वित्याह । अप्रमत्तो रक्ष तन्तुमेनं मा वः क्षेत्रे परबीजान्यवाप्सुः । भार्यां रक्षत कौमारीं बिभ्यन्तः पररेतसः ।

स्त्रीधर्माः

[2]स्त्रियो गृहदेवतास्तासां न शौचं न व्रतं नोपवासः । पतिशुश्रूषयैव स्त्रियो गच्छन्ति परमां गतिम् ।

ब्राह्मण्या अन्वारोहणनिषेधः

[3]मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् ।
इतरेषां तु वर्णानां स्त्रीधर्मोऽयं परः स्मृतः ॥
[4]उपकारं यथा भर्तुर्जीवन्ती न तथा मृता ।
करोति ब्राह्मणी श्रेयो भर्तुः शोकवती सती ॥

अङ्गिराः

अन्वारोहणविचार

[5]मृते भर्तरि या नारी समारोहेद्धुताशनम् ।
साऽरुन्धतीसमाचारा स्वर्गलोके महीयते ॥

तदेतद्ब्रह्मान्तरमपि ब्रह्मचर्यधर्माज्जघन्यम् । निकृष्टफलत्वात् । स्मृच.२५४

[6]तिस्रः कोट्योऽर्धकोटी च यानि लोमानि मानवे ।
तावन्त्यब्दानि सा स्वर्गे भर्तारं याऽनुगच्छति ॥

(१) व्यक.१२९; विर.४११ (तस्माद्रक्षेत् भार्यां मा स्म वर्णसंकराभिभवोऽस्त्विति । अप्रमत्तो रक्ष तन्तुमेन न वादधे क्षेत्रे परबीजानवाप्सुः भार्यां रक्षन्ति कौमारीं परचेतसः:); विभ. ३ सकरो (वर्णसकरो).

(२) व्यक.१३५; स्मृच.२५२; समु.१२४.

(३) मिता.१।८६(=) उत्तरार्धे (इतरेषु तु वर्णेषु तपः परममुच्यते); अप.१।८७.

(४) अप.१।८७.

(५) मिता.१।८६ शङ्खाङ्गिरसौ; व्यक १३७ स्वर्ग (स्वर्गे); स्मृच.२५४; विर.४४०; सेतु.२८७ नारदः; विभ.२४; समु.१२५.

(६) मिता.१।८६ मानवे (मानुषे) तावन्त्यब्दानि सा (तावत्काल वसेत्) शङ्खाङ्गिरसौ; व्यक.१३७ तिस्रः (त्रिशत्) वन्त्यब्दानि (वद्वर्षाणि); विर.४४०; सेतु.२८७ लोमानि (रोमाणि) नारदः; विभ.२४.

व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् ।
तद्वद्धर्तारमादाय तेनैव सह मोदते ॥
मातृकं पैतृकं चैव यत्र कन्या प्रदीयते ।
पुनाति त्रिकुलं नारी भर्तारं याऽनुगच्छति ॥
तत्र सा भर्तृपरमा परा परमलालसा ।
क्रीडते पतिना सार्धं यावदिन्द्राश्चतुर्दश ॥
ब्रह्महा वा कृतघ्नो वा मित्रघ्नो वाऽपि मानवः ।
तं वै पुनाति सा नारी इत्याङ्गिरसभाषितम् ॥
साध्वीनामेव नारीणामग्निप्रपतनादृते ।
नान्यो धर्मोऽस्ति विज्ञेयो मृते भर्तरि कर्हिचित्॥
यावन्नाग्नौ दहेद्देहं मृते पत्यौ पतिव्रता ।
तावन्न मुच्यते नारी स्त्रीशरीरात्कथंचन ॥
सद्वृत्तभावार्पितभर्तृकाणां
स्त्रीणां वियोगक्षतकातराणाम् ।
तासां प्रभावस्तमिते गते कं
नाग्निप्रवेशादपरोऽस्ति धर्मः ॥

(१) अस्तमिते प्रभौ भर्तरि, कं गते स्वर्गं गते मृते भर्तरि । अप.१।८७

(२) सद्वृत्तभावार्पितभर्तृकाणा, वृत्तमाचारः, भावोऽभिप्रायः, तौ शोभनार्पितौ याभिस्तास्तथा । वियोगक्षतकातरणां वियोग एव क्षतं प्ररोही व्रणः तेन कातराणाम् ।

*व्यक.१३७

या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् ।
सा स्वर्गमात्मघातेन आत्मानं न पतिं नयेत् ॥

शातातपः

स्त्रीपुनर्विवाहविचार.

उद्वाहिता तु या कन्या संप्राप्ता न च मैथुनम् ।
भर्तारं पुनरभ्येति यथा कन्या तथैव सा ॥
स च यद्यन्यजातीयः पतितः क्लीब एव वा ।
विकर्मस्थः सगोत्रो वा दीर्घतीव्रामयोऽपि वा ॥
क्षीवोऽन्यो यदि वा भर्ता विसृष्टः पुंस्त्वकारणैः ।
ऊढाऽपि देया साऽन्यस्मै सप्रावरणभूषणा ॥
कन्यां चेद्दर्शयित्वाऽन्यामन्या वोढ्रे प्रदीयते ।
स उभे एकशुल्केन वहेदित्यब्रवीन्मनुः ॥
गूहयित्वात्मनो दोषान् विन्दते कन्यकां यदि ।
वरस्य दत्तनाशः स्यात् कन्या चापि निवर्तते ॥

वृद्धमनुः

नियोगविचारः

वायुप्रोक्तां तथा गाथां पठन्त्यत्र मनीषिणः ।
विप्राणां न नियोगोऽस्ति प्रेते पत्यौ न वेदनम् ॥
अकार्यमेतद्विप्राणां विधवा यन्नियुज्यते ।
उह्यते वा मृते पत्यौ देवरेण विशेषतः ॥
शूद्राणामेव धर्मोऽयं पत्यौ प्रेतेऽन्यसंश्रयः ।
लोभान्मूढैरविद्वद्भिः क्षत्रियैरपि चर्यते ॥

---

(१) मिता.१।८६ व्याल..... बलात् (सर्प बलादुद्धरते बिलात्) उत्तरार्धे (तद्वदुधृत्य सा नारी सह तेनैव मोदते) शङ्खाङ्गिरसौ; व्यक.१३७ मोदते (गच्छति); विर.४४०; सेतु.२८७ बिला (बला) बलात् (बिलात्) नारदः; विभ.२४.

(२) मिता.१।८६ चैव (चापि) कन्या (चैव) पुना ..नारी (कुलत्रयं पुनात्येषा) हारीतः; अप.१।८७पुना...नारी (कुलत्रय पुनात्येषा) क्रमेण हारीतः; व्यक १३७; विर.४४०; विभ २४ चैव (चापि).

(३) मिता.१।८६ परा...लसा (स्तूयमानाप्सरोगणैः) शङ्खाङ्गिरसौ, व्यक.१३७; विर.४४०, सेतु.२८७ उत्त.; विभ.२५.

(४) मिता.१।८६ (ब्रह्मघ्नो वाऽथ मित्रघ्नः कृतघ्नो वा भवेत्पतिः। पुनात्यविधवा नारी तमादाय मृता तु या॥) शङ्खाङ्गिरसौ; व्यक.१३७ हा (घ्नो) मानवः (यो नरः); विर. ४४०-४४१; सेतु.२८७ हा (घ्नो); विभ.२५ सेतुवत्.

(५) अप.१।८७ साध्वीना (सर्वासा) ऽस्ति (हि); व्यक. १३७ ऽस्ति (ऽत्र); विर.४४१ अग्नि (नाग्नि) नान्यो (अन्यो); सेतु.२८७ प्रप (संप); विभ.२५; समु.१२५ ऽस्ति (हि).

(६) मिता.१।८६ पुर्वार्धे (यावच्चाग्नौ मृते पत्यौ स्त्री नात्मान प्रदाहयेत्) शङ्खाङ्गिरसौ; अप.१।८७; व्यक.१३७; विर.४४१; सेतु.२८७; विभ.२५; समु.१२५ देह (दङ्ग) नारी (सा तु).

(७) अप.१।८७ पित (श्रित) धर्मः (मार्ग), व्यक.१३७ धर्मः (मार्गः), विर.४४१.

* विर. व्यकवत् ।

(१) मिता.१।८६ आत्मान (नात्मानं); अप.१।८७; समु.१२५ स्त्री (वै) आत्मान ...येत् (स्वपति न नयेदपि).

(२) समु.११९.

(३) विश्व.१।६९.

ऋष्यशृङ्गः

स्त्रीधर्माः

गृहमेधा भवेन्नित्यं भूषणानि च पूजयेत् ।
नित्यं स्नानकृतां वेणीमर्चयेत्पुष्पमालया ॥
पूर्वमेव रहो गच्छेद्यावन्नान्यः प्रबुध्यते ।
देवताराधनं कुर्याद्धूपपुष्पाक्षतादिभिः ॥

(१) गृहमेधी गृहदेवः । पूजा जपः । स्नानकृता स्नानेन सस्कृता । रहो गच्छेद्रहसि सकाशाद्गच्छेत् ।
स्मृच.२५१

(२) गृहमेधा गृहकृत्यपरा । भूषणानि पूजयेत् मार्जनादिभिः सस्कुर्यात् । नित्यस्नानकृता नित्यस्नानानन्तरकृताम् । विर.४३०

(३) अन्यः पतिरित्यर्थः । देवताराधन द्वारदेवताराधनम् । रत्न.१३५

सुमन्तुः

स्त्रीत्यागविचारः

कन्या कुत्सिताऽन्यजातिकर्मशीला व्याध्युपहता परिणीता यद्यक्षतयोनिस्स्यात्परित्यक्तव्या ।

प्रचेताः

विधवाधर्माः

ताम्बूलाभ्यञ्जने चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥

पराशरः

स्त्रीत्यागपतित्यागस्त्रीपुनर्विवाहविचारः

अदुष्टापतितां भार्यां यौवने यः परित्यजेत् ।
सप्तजन्म भवेत्स्त्रीत्वं वैधव्यं च पुनः पुनः ॥

(१) व्यक.१३३ नित्यं स्ना (नित्यस्ना) पुष्पमालया (पुण्यवाससा); स्मृच.२५१ धा (धी); विर.४२९ नित्य स्ना (नित्यस्ना); रत्न.१३५ स्मृचवत्; विता.८२५ स्मृचवत्; विभ.१८ धा (धी) स्नान (स्नात्वा); समु.१२४ स्मृचवत्.

(२) व्यक.१३३ पुष्पाक्षतादिभिः (पुष्पबलि हरेत्); स्मृच.२५१ न्यः (यैः); विर.४३० रहो (बहिः) पुष्पाक्षतादिभि. (पुष्पबलि हरेत्); रत्न.१३५; विता.८२५ धूपपुष्पा (पुष्पधूपा); विभ.१८; समु.१२४ स्मृचवत्.

(३) अप.१६६. (४) विभ.२७.

(५) पस्मृ.४।१५,१६.

दरिद्रं व्याधितं मूर्खं भर्तारं या न मन्यते ।
सा मृता जायते व्याली वैधव्यं च पुनः पुनः ॥
नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ॥
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

वाग्दानानन्तरं पाणिग्रहणात् प्राक् पतौ संभावितोपपत्तिकपतित्वे पूर्वस्मिन् वरे नष्टे सति लक्षणया दूरदेशगमनेनापरिज्ञातवृत्तान्ते सतीत्यर्थः । एवं दुष्टे पूर्ववरे वाग्दत्ताऽपि वरान्तराय देयेत्यपि सिद्धम् । बाल.२।१२७

विधवाधर्माः । अन्वारोहणविचारः ।

मृते भर्तरि या नारी ब्रह्मचर्यं व्यवस्थिता ।
सा मृता लभते स्वर्गं यथा ते ब्रह्मचारिणः ॥
तिस्रः कोट्यर्धकोटी च यानि रोमाणि मानवे ।
तावत्कालं वसेत्स्वर्गे भर्तारं याऽनुगच्छति ॥
व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् ।
एवमुद्धृत्य भर्तारं तेनैव सह मोदते ॥

बीजिक्षेत्रिणोरपत्यस्वाम्यविचारः

ओघवाताहृतं बीजं यथा क्षेत्रे प्ररोहति ।
क्षेत्री तल्लभते बीजं न बीजी भागमर्हति ॥

विराट्

अन्वारोहणविचारः

अनुवर्तेत जीवन्तं न तु यायान्मृतं पतिम् ।
जीवेद्भर्तृहितं कुर्यान्मरणादात्मघातिनी ॥

व्याघ्रपात्

अन्वारोहणविचारः

न म्रियेत समं भर्त्रा ब्राह्मणी शोकमोहिता ।
प्रव्रज्यागतिमाप्नोति मरणादात्मघातिनी ॥

प्रव्रज्या मैथुनादिभोगत्यागः । अप.१।८७

गार्ग्यः

स्त्रीत्यागविचारः

पतिताः स्त्रियस्त्याज्याः भर्तृवधप्रतिज्ञायां च ।

(१) पस्मृ.४।२६; बाल.२।१२७.

(२) पस्मृ.४।२७-२९. (३) पस्मृ.४।१७.

(४) मिता.१।८६ (=) जीवेद्भर्तृहितं (जीवन्ती तद्धितं) उत्त.; अप.१।८७.

(५) अप.१।८७. (६) विश्व.१।७२.

स्मृत्यन्तरम्

विवाहे गोत्रसापिण्ड्यविचारः

[1]अन्यगोत्राय यो दत्तः स एव जनकस्य तु ।
गोत्रेण विवहेत्कन्यां तत्पुत्रादेर्न दोषभाक् ॥
दातृगोत्रसमुद्भूतां दत्तगोत्रसमुद्भवः ।
उद्वहेत्पञ्चमीं षष्ठीमित्युवाच बृहस्पतिः ॥

स्त्रीरक्षा

[2]जायायां रक्ष्यमाणायामात्मा भवति रक्षितः ॥
[3]पतिः सुतः पिता भ्राता पितृव्यो मातुलस्तथा ।
मातामहस्तथा स्त्रीणां सप्तैते प्रभवः स्मृताः ॥
यथेष्टं प्रभवः प्रोक्ताः स्त्रीणां बन्धुकुले सति ।
स्त्रीवन्मूर्खजडोन्मत्तबालवृद्धादिषु स्मृताः ॥

पत्नी न क्रेतव्या

[4]क्रयक्रीता तु या नारी न सा पत्नी विधीयते ।
न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः ॥

पत्नीत्वाभावे केवलं दृष्टोपकारकत्वमेव नाद्दृष्टोपकारकत्वं स्त्रिया इति दर्शयितुं दासीं विदुरित्युक्तम् ।
स्मृच.२९०

स्त्रीप्रशंसा

[5]नं गृहं गृहमित्याहुः गृहिणी गृहमुच्यते ।
तया हि सहितः सर्वान् पुरुषार्थान् समश्नुते ॥

अधिवेदनविचार.

[6]दुष्टां जायां परिभाष्याधिवेदयेत् ।

प्रोषितभर्तृकाविधिः

[7]उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव च ।
राजयक्ष्मामयावी च न न्याय्यः स्यात्प्रतीक्षितुम् ॥

विधवाधर्माः

[8]गन्धद्रव्यस्य संयोगो नैव कार्यस्त्रया पुनः ।
तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलोदकैः ॥

अनिर्दिष्टकर्तृकवचनानि

स्त्रीणां एकानेकपतिवरणविचारः । नियोगविधिः ।

[9]धर्म एकः पतिः स्त्रीणां पूर्वमेव तु कल्पितः ।
बहुपत्नीकृतः पुंसो धर्मश्च बहुभिः कृतः ॥
स्त्रीधर्मः पूर्वमेवायं निर्मितो मुनिभिः पुरा ।
सहधर्मचरी भर्तुरेका चैकस्य चोच्यते ॥
एको भर्ता हि नारीणां कौमार इति लौकिकः ।
आपत्सु च नियोगेन संतानार्थे परः स्मृतः ॥
गच्छेत या तृतीयं तु यास्यानि (तु तस्या नि) ष्कृतिरुच्यते ।
चतुर्थे पतिता धर्मात् पञ्चमे वर्धकी भवेत् ॥
[10]एवं गते धर्मपथे न वृणेद्वहुसंस्कृताम् ।
अलोकाचरितादस्मात्कथं मुच्येद्धि संकरात् ॥

ईश्वर उवाच—

अनावृताः पुरा नार्यो मासाच्छुध्यन्ति चार्तवे ।
सकृदुक्तं तु या नैव नाधर्मस्ते भविष्यति ॥
[11]पङ्गुस्तथा च देवर्षे ये चान्ये कुत्सिता नराः ।
स्त्रीणामगम्यो लोको हि नास्ति कश्चिन्महामुने ॥

मत्स्यपुराणम्

स्त्रीरक्षा

[12]तस्मात्साध्व्यः स्त्रियः पूज्याः सततं देववज्जनैः ।
तासां राज्ञा प्रसादेन धार्यतेऽपि वशे स्त्रियम्?॥

ब्रह्मपुराणम्

विधवाधर्माः । स्त्रीपुनर्विवाहनियोगान्वारोहणविचारः ।

[13]मृते भर्तरि या नारी त्यक्तवत्यथ तं स्वयम् ।
सवर्णाज्जनयेद्गर्भं भर्तुः पौनर्भवं सुतम् ॥
यदि सा बालविधवा बलात्त्यक्ताऽथवा क्वचित् ।
तदा भूयस्तु संस्कार्या गृहीता येनकेनचित् ॥
त्यक्ता भर्तृगृहं गच्छेद्यदि दोषं विना पुनः ।
भर्त्रा सा संस्कर्तव्या च प्रायश्चित्तादिभिः क्रमात् ॥
स्त्रीणां पुनर्विवाहस्तु देवरात्पुत्रसंततिः ।
स्वातन्त्र्यं च कलियुगे कर्तव्यं न कदाचन ॥
यतः पातकिनो लोके नराः सन्ति कलौ युगे ॥
मृते भर्तरि सत्स्त्रीणां न चान्या विद्यते गतिः ।
नान्यद्भर्तृवियोगाग्निदाहस्य शमनं भवेत् ॥

---

(१) समु.११८. (२) नृप ३३.
(३) समु.१२०. (४) स्मृच.२९०; दमी.७१.
(५) विभ ९ (६) विश्व.१।७३.
(७) मभा.१८।१९. (८) विभ.२७. (९) सवि.३४२.

(१) सवि.३४३. (२) विभ.७.
(३) विभ.२७. (४) अप.१।६९.
(५) अप.१।८७; व्यक.१३७; विर.४४२; विभ.२६ नान्यद्भर्तृ (नास्या भर्तृ).

[1]देशान्तरमृते तस्मिन् साध्वी तत्पादुकाद्वयम् ।
निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥
ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी ।
व्यहाशौचे तु निवृत्ते श्राद्धं प्राप्नोति शास्त्रवत् ॥

विष्णुधर्मे

[2]भर्तर्येवं प्रवसिते त्यक्तव्या(क्ता वा)पतिनाऽशुभा ।
कुर्वीताराधनं नारी उपवासादिना हरेः ॥

शुक्रनीतिः

पतिव्रतावृत्तम्

[3]जपं तपस्तीर्थसेवां प्रव्रज्यां मन्त्रसाधनम् ।
देवपूजां नैव कुर्यात् स्त्री शूद्रस्तु पतिं विना ।
न विद्यते पृथक् स्त्रीणां त्रिवर्गविधिसाधनम् ॥
पत्युः पूर्वं समुत्थाय देहशुद्धिं विधाय च ।
उत्थाप्य शयनीयानि कृत्वा वेश्मविशोधनम् ॥
मार्जनैर्लेपनैः प्राप्य सानलं यवसाङ्गणम् ।
शोधयेद् यज्ञपात्राणि स्निग्धान्युष्णेन वारिणा ॥
प्रोक्षणीयानि तान्येव यथास्थाने प्रकल्पयेत् ।
शोषयित्वा तु पात्राणि पूरयित्वा तु धारयेत् ॥
महानसस्थपात्राणि बहिः प्रक्षाल्य सर्वशः ।
मृद्भिस्तु शोधयेच्चुल्लीं तत्राग्निं सेन्धनं न्यसेत् ॥
स्मृत्वा नियोगपात्राणि रसान्नद्रविणानि च ।
कृतपूर्वाह्णकृत्येयं श्वशुरावभिवादयेत् ॥
ताभ्यां भर्त्रा पितृभ्यां वा भ्रातृमातुलबान्धवैः ।
वस्त्रालङ्काररत्नानि प्रदत्तान्येव धारयेत् ॥
मनोवाक्कर्मभिः शुद्धा पतिदेशानुवर्तिनी ।
छायेवानुगता स्वच्छा सखीव हितकर्मसु ॥
दासीव दिष्टकार्येषु भार्या भर्तुः सदा भवेत् ।
ततोऽन्नसाधनं कृत्वा पतये विनिवेद्य सा ।
वैश्वदेवोद्धृतैरन्नैर्भोजनीयांश्च भोजयेत् ॥
पतिं च तदनुज्ञाता शिष्टमन्नाद्यमात्मना ।
भुक्त्वा नयेदहःशेषं सदायव्ययचिन्तया ॥
पुनः सायं पुनः प्रातर्गृहशुद्धिं विधाय च ।
कृतान्नसाधना साध्वी सभृत्यं भोजयेत् पतिम् ॥
नातितृप्ता स्वयं भुक्त्वा गृहनीतिं विधाय च ।
आस्तृत्य साधु शयनं ततः परिचरेत् पतिम् ॥
सुप्ते पत्यौ तदध्यास्य स्वयं तद्गतमानसा ।
अनग्ना चाप्रमत्ता च निष्कामा च जितेन्द्रिया ॥
नोच्चैर्वदेन्न परुषं न बह्वाहुतिमप्रियम् ।
न केनचिच्च विवदेदप्रलापविवादिनी ॥
न चास्य व्ययशीला स्यान्न धर्मार्थविरोधिनी ।
प्रमादोन्मादरोषेर्ष्यावचनान्यतिनिन्दिताम् ॥
पैशुन्यहिंसाविषयमोहाहङ्कारदर्पताम् ।
नास्तिक्यसाहसस्तेयदम्भान् साध्वी विवर्जयेत्॥
एवं परिचरन्ती सा पतिं परमदैवतम् ।
यशस्यमिह यात्येव परत्रैषा सलोकताम् ॥
योषितो नित्यकर्मोक्तं नैमित्तिकमथोच्यते ।
रजसो दर्शनादेषा सर्वमेव परित्यजेत् ॥
सर्वैरलक्षिता शीघ्रं लज्जितान्तर्गृहे वसेत् ।
एकाम्बरा कृशा दीना स्नानालङ्कारवर्जिता ॥
स्वपेद्भूमावप्रमत्ता क्षपेदेवमहस्त्रयम् ।
स्नायीत सा त्रिरात्र्यन्ते सचेलाभ्युदिते रवौ॥
विलोक्य भर्तृवदनं शुद्धा भवति धर्मतः ।
कृतशौचा पुनः कर्म पूर्ववच्च समाचरेत् ॥
द्विजस्त्रीणामयं धर्मः प्रायोऽन्यासामपीष्यते ।
कृषिपण्यादिपुंकृत्ये भवेयुस्ताः प्रसाधिकाः ॥
सङ्गीतैर्मधुरालापैः स्वायत्तस्तु पतिर्यथा ।
भवेत्तथाऽऽचरेयुर्वै मायाभिः कामकेलिभिः ॥

विधवावृत्तम् । प्रोषितभर्तृकावृत्तम् ।

मृते भर्तरि संगच्छेद् भर्तुर्वा पालयेद् व्रतम् ।
परवेश्मरुचिर्न स्याद् ब्रह्मचर्ये स्थिता सती ॥
मण्डनं वर्जयेन्नित्यं तथा प्रोषितभर्तृका ।
देवताराधनपरा तिष्ठेद् भर्तृहिते रता ।
धारयेन्मङ्गलार्थानि किञ्चिदाभरणानि च ॥
नास्ति भर्तृसमो नाथो नास्ति भर्तृसमं सुखम् ।
विसृज्य धनसर्वस्वं भर्ता वै शरणं स्त्रियाः ॥
मितं ददाति हि पिता मितं भ्राता मितं सुतः ।
अमितस्य प्रदातारं भर्तारं का न पूजयेत् ॥

(१) अप.१।८७; व्यक.१३७, विर.४४२ तु निवृत्ते (निवृत्ते तु); विभ.२६. (२) अप.१।७७.

(३) शुनी.४।४।५-३१ जीवानन्दभट्टैर्मुद्रितपुस्तकादिमे श्लोका गृहीताः, अस्माभिर्गृहीतादर्शपुस्तके 'जपं तप' इत्यारभ्य 'कृतशौचा' इत्यन्ताः श्लोका गलिताः ।

दायभागः

दायभागपदार्थः

अर्थागमः सर्ववर्णसाधारणो वर्णविशेषनियतश्च। स्वाम्यस्वत्वविचार । दायपदार्थ. । विभागपदार्थः । विभागप्राशस्त्यम् ।

*वेदाः

रिक्थम्

[1]ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः ।

पितृवित्तस्य पित्रादिपरंपरया लब्धस्य रायो धनस्येशानासः स्वामिनः सूरयो विद्वांसो नोऽस्माक पुत्राः शतहिमाः शत संवत्सरान् जीवन्तः सन्तो व्यश्नुवुः । विशेषेण भुञ्जताम् । अस्मदीयाना पुत्राणामारोग्य दीर्घमायुश्च भवत्वित्यर्थः । ऋसा.

क्रयः

कं इमं दशभिर्ममेन्द्रं क्रीणाति धेनुभिः ।
यदा वृत्राणि जङ्घनदथैनं मे पुनर्ददत् ॥

मम मदीयमिम स्वभूतमिन्द्र धेनुभिः प्रीणयित्रीभिर्दशभिर्दशसंख्याकाभिः स्तुतिभिः कः क्रीणाति । क्रय करोति । तदानी हे क्रेतारो युष्माक मध्य एवमपि समयः क्रियते । यदायमिन्द्रो वृत्राणि त्वदीयान् शत्रून् जङ्घनत् हन्यात् अथानन्तरमेवैनमिन्द्र मे मह्य पुनर्ददत् । पुनर्दद्यात् । ऋसा.

सविभागः

प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते । असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥

हे इन्द्र पुष्टिं त्वया दत्तं पोषक धन स्वकीयाभ्यः प्रजाभ्यो विभजन्तोऽस्यैतावदस्यैतावदिति विभागं कुर्वन्तो गृहमेधिन आसते । स्वस्वगृहेषु निवसन्ति । तत्र दृष्टान्तः । आयते गृहं प्रत्यागच्छतेऽतिथये पृष्ठं धारकं प्रभवन्त बहुभरणसमर्थं रयिं धनं यथा विभज्य प्रयच्छन्ति तद्वत् । असिन्वन् सेतुबन्धादिकं कर्म कुर्वन् लोकः पितुः पालयित्र्या दिवः सकाशादागत भोजनमुदकं तत्कार्या ओषधीर्दंष्ट्रैर्दन्तैरत्ति । भक्षयति । यद्वा असिन्वन् अव्याप्रियमाणोऽग्निः पितुः पालकस्य यजमानस्य संबन्धि भोजन हविर्लक्षणमन्न दंष्ट्रैर्दन्तरूपैर्ज्वालैरत्ति । यस्ताकृणोरित्यादि सिद्धम् । ऋसा.

कर्मयोगः

[2]अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः । उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥

अयमगस्त्यो मद्गुरुः खनित्रैः फलस्योत्पादनसाधनैर्यज्ञस्तोत्रादिभिः खनमानः फलमभिमतमुत्पादयन् प्रजा प्रकर्षेण पुनः पुनर्जायमानमपत्य कुलस्यापतनसाधनं पुत्रादिक बल चेच्छमानः सन् । यद्वा । प्रजा भृत्यादिरूपा चेच्छन् । ऋषिरतीन्द्रियद्रष्टा महानुभाव उग्र उद्गूर्णः संसारे संचरन्नप्यपापः सन्नुभौ वर्णौ वर्णनीयावाकारौ कामं च तपश्च पुपोष । सत्या आशिषो देवेषु देवेभ्यो जगाम । प्राप्तवान् । यतोऽय महानुभावस्तस्मादस्मान्पातीत्यर्थः । ऋसा.

नानानं वा उ नो धियो वि व्रतानि जनानाम् ।
तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥

ऋषिरेतदादिभिस्त्रिभिः सूक्तैरपरिस्रवतः सोमस्याजामित्वाय मनसो विनोदनं कुर्वन्नाह । हे सोम नोऽस्माकं धियः कर्माणि नानानं नानाजातीयकानि बहूनि भवन्ति । वैशब्दः प्रसिद्धयर्थद्योतनार्थः । उ इति पूरणः । तथाऽन्येषामपि जनाना व्रतानि कर्माणि विविधानि भवन्ति । तक्षा त्वष्टा रिष्टं दारुतक्षणमिच्छति । तथा भिषग्वैद्यश्चि-

* वेदेषु धनागमलिङ्गानि वचनानि परःसहस्राणि वर्तन्ते दिग्दर्शनार्थमेवोधृतानि एतावन्ति ।

(१) ऋसं.१।७३।९. (२) ऋसं.४।२४।१०.
(३) ऋसं.२।१३।४.

(१) ऋसं.१।१७९।६. (२) ऋसं.९।११२।१.

कित्सको रुतं रोगमिच्छति। ब्रह्मा ब्राह्मणः सुन्वन्तं सोमाभिषव कुर्वन्तं यजमानमिच्छति। तथाह त्वत्परिस्रवणमिच्छामि। तस्माद्धे इन्दो सोमेन्द्रायेन्द्रार्थ परि स्रव। परितः क्षर। ऋसा.

[1]जरतीभिरोषधीभिः पर्णेभिः शकुनानाम्।
कार्मारो अश्मभिर्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दो परि स्रव॥

जरतीभिर्जीर्णाभिरोषधीभिरिषवः क्रियन्ते तथा शकुनाना पर्णेभिरिषणा पक्षभूतैः पर्णैश्च क्रियन्ते तथा युभिर्दीप्ताभिरिषणा तेजनार्थाभिरश्मभिः शिलाभिश्च क्रियन्ते। एतैः कार्मारोऽयस्कारो हिरण्यवन्तमाढय पुरुषमिच्छति। तथाह त्वत्परिस्रवणमिच्छामि। तस्मादिन्दो इन्द्राय परि स्रव। ऋसा.

[2]कारुरहं ततो भिषगुपलप्रक्षिणी ननना।
नानाधियो वसूयवोऽनु गा इव तस्थिमेन्द्रायेन्दो परि स्रव॥

ऋषिः प्रवृत्तसोमयागः सन् दशापवित्रात्सोमे क्षरति प्रतिबन्धकपापापनुत्तये पुरश्चरितानुकीर्तनपुरःसरमध्येषणा चकार। तावदहं कारुः स्तोमाना कर्ताऽस्मि। तत इति सतानना। तन्यतेऽस्मादिति ततः पिता। तन्यतेऽसाविति वा ततः पुत्रः। भिषग्भेषजकृत्। यज्ञस्य ब्रह्मेत्यर्थः। सर्व त्रय्या विद्यया भिषज्यतीति श्रुतेः। तथोपलप्रक्षिणी। उपलेषु वालुकासु प्रक्षिणोति यवान्हिनस्ति भृज्जतीति। यद्वा। दृषदादिपूपलेषु भृष्टान्यवान्हिनस्ति चूर्णयतीति। अथवा धानासक्तुकरम्भादीना कारिका वा। असौ ननना माता दुहिता वा। नमनक्रियायोग्यत्वात्। माता खल्वपत्य प्रति स्तनपानादिना नमनशीला भवति। दुहिता वा शुश्रूषार्थम्। एवं सर्वेषा परिचरणेन नानाधियो नानाकर्माणो वसूयवो धनकामा वयमनु तस्थिम। लोकमन्वास्थिताः स्मः। तत्र दृष्टान्तः। गा इव। गावो यथा गोष्ठमनुतिष्ठन्ति स्वपयःप्रदानेन परिचरन्ति वा एव वयमपि परिचरामः। एतज्ज्ञात्वा हे इन्दो सोम इन्द्राय परि स्रव। दशापवित्राक्षर। ऋसा.

(१) ऋसं.९।११२।२.
(२) ऋसं.९।११२।३.

[1]इमे ये नार्वाङ्न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः। त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः॥

अनया वेदार्थानभिज्ञा निन्द्यन्ते। इमे येऽविद्वांसोऽर्वागवाचीनमधोभावित्यस्मिँल्लोके ब्राह्मणैः सह न चरन्ति परः परस्तादेवैः सह न चरन्ति ते ब्राह्मणासो ब्राह्मणा वेदार्थतत्परा न भवन्ति। तथा सुतेकरासः। सोम सुतमभिषुतं कुर्वन्तीति सुतेकरा ऋत्विजः। तेऽपि न भवन्ति। अप्रजज्ञयः। अविद्वासस्त एते मनुष्या वाचं लौकिकीमभिपद्य प्राप्य तया पापया पापकारिण्या वाचा युक्तास्ते सिरीः। सीरिणो भूत्वा तन्त्रं कृषिलक्षणं तन्वते। विस्तारयन्ति। कुर्वन्तीत्यर्थः। ऋसा.

प्रतिग्रहः

[2]शतं राज्ञो नाधमानस्य निष्काञ्छतमश्वान्प्रयतान्त्सद्य आदम्। शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान॥

नाधमानस्य स्वीकर्तव्यमित्युन्वैर्याचमानस्यासुरस्य धनाना निरसितुर्दानशीलस्य राज्ञः स्वतेजसा दीप्यमानस्य स्वनयस्य निष्काना भरणविशेषान् इयत्ताविशेषविशिष्टानि वा सुवर्णानि शतसख्याकानि। शतं सहस्रमित्यपरिमितवचनः। अपरिमितान् सद्यः प्रार्थनानन्तरमेव कक्षीवानहमादम्। आत्तवानस्मि। स्वीकृतवानस्मीत्यर्थः। तथा प्रयतान् शुद्धान् लक्षणोपेतानश्वानश्वगमनसमर्थान्। हयानादम्। आत्तवान्। ऋसा.

परिग्रहः

[3]दिवस्पुत्रा अंगिरसो भवेमाद्रि रुजेम धनिनं शुचन्तः।

दिवो द्योतमानस्यादित्यस्य पुत्रा वयमगिरसो भवेम। भूतिमन्तः स्याम। शुचन्तो दीप्यमाना वय धनिनमुदकवन्तमद्रि मेघ रुजेम। वर्षार्थं भिन्द्याम। यद्वा। धनिनं पणिनामकासुरापहृतगोधनयुक्तमद्रि पर्वत रुजेम। ऋसा.

(१) ऋसं.१०।७१।९; बौध.२।६।११।३२.
(२) ऋसं.१।१२६।२.
(३) ऋसं.४।२।१५.

विजितम्

सनेम वाजं समिथेष्वर्यो भागं देवेषु श्रवसे दधानाः ।

वयं च समिथेषु संग्रामेष्वर्योऽरेः शत्रोः संबन्धिनं वाजमन्नं सनेम । त्वदनुग्रहात्संभजेमहि । तदनन्तरं **देवेषु** त्वत्प्रमुखेष्विन्द्रादिषु श्रवसे यशसे तदर्थं भाग हविर्भागं दधानाः स्थापयन्तो भूयास्मेति शेषः । ऋसा.

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम । धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥

धन्वना चापेन गाः शत्रूणा जयेम । वयं वशीकरवाम । धन्वनाजिं संग्राम च जयेम । धन्वना तीव्रा उद्धताः समदोऽत्यन्तं मदवतीः शत्रुसेनाश्च जयेम । तथा च यास्कः । समदः समदो वाऽत्तेः संमदो वा मदतेः (नि.९।१७) इति । धनुः शत्रोरपकामं कामस्यापाय कृणोति । करोतु । किं च धन्वना वयं सर्वाः प्रदिशः सर्वासु दिक्षु वर्तमानान् शत्रून् जयेम । प्रदिक्शब्दो लक्षणया तत्स्थेषु पुरुषेषु वर्तते मञ्चाः क्रोशन्तीतिवत् । धन्वञ्शब्दस्य जयतेश्चावृत्तिरादरार्था । ऋसा.

राजा संग्रामं जित्वोदाजमुदजयते ।

राज्ञः प्रजायाश्च सभूय भूमिस्वाम्य नैकस्य पुरुषस्य कस्यचित्

अदाद्यमोऽवसानं पृथिव्या इति । यमो ह वा अस्या अवसानस्येष्टे स एवास्माऽअस्यामवसानं ददाति । अक्रन्निमं पितरो लोकमस्माऽइति । क्षत्रं वै यमो विशः पितरो यस्माऽउ वै क्षत्रियो विशा संविदानोऽस्यामवसानं ददाति तत्सुदत्तं तथो हास्मै क्षत्रं यमो विशा पितृभिः संविदानोऽस्यामवसानं ददाति ।

गौतमः

अर्थागमः सर्ववर्णसाधारणः । स्वत्वोत्पत्तिनिमित्तम् ।

स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ।

(१) ब्राह्मणस्य प्रतिग्रहादय उपायाः, क्षत्रियस्य विजितादयः, वैश्यस्य कृष्यादयः, शूद्रस्य शुश्रूषादयः इत्यदृष्टार्था नियमाः । रिक्थादयस्तु सर्वसाधारणाः—स्वामीत्याद्युक्ताः । तत्राप्रतिबन्धो दायो रिक्थम् । क्रयः प्रसिद्धः । संविभागः सप्रतिबन्धो दायः । परिग्रहोऽनन्यपूर्वस्य जलतृणकाष्ठादेः स्वीकारः । अधिगमो निध्यादेः प्राप्तिः । एतेषु निमित्तेषु सत्सु स्वामी भवति ।

+मिता.२।११४

(२) तत्सविभागस्य व्यवस्थितस्य स्वामिभावजनकत्वपरम् । अप.२।१२१

(३) रिक्थ पित्रादीनामभावे प्राप्तम् । क्रयो मूल्येन स्वीकारः । सविभागो भ्रात्रादीना साधारणस्य परस्परविभागः । परिग्रहो वन्येष्वस्वामिकेषु वृक्षादिषु पूर्वस्वीकारः । अधिगमः प्रनष्टस्याज्ञातस्वामिकस्य निध्यादेः स्वीकारः । एतेषु कारणेषु द्रव्यस्वीकर्ता स्वामी भवति । तेन प्रनष्टेऽधिगते राज्ञोऽधिगन्तुश्च स्वाम्यमुपपन्नमिति प्रकरणसगतिः । क्षेत्रेपूत्पन्नानि सस्यादीनि क्षेत्रवदेव क्षेत्रवतः स्वानि । एतेनाऽऽकरेपूत्पन्नं लवणादि व्याख्यातम् । एतानि सर्ववर्णसाधारणानि स्वाम्यकारणानि । गौमि.

(४) एतेषु कारणेषु प्रतिपादितेषु ज्ञायमानेषु स स्वामी भवेदिति । रिक्थ पितुः सकाशात्प्राप्तं, क्रयो मूल्येन विक्रीतं(?), संविभाग उत्सन्नं(?) यद्दायादि स्वरूपेण प्राप्त । परिग्रहः स्वीधनम् । अनन्यपूर्वस्य स्वीकरण, यथा नद्यादिषु वृक्षादिरित्येके । तत्राधिगमेन पुनरुक्तमस्ति उत नास्तीति विचारणीयम् । अधिगमः आकरादिभ्यो लब्ध रत्नादि । एतानि तावत्सर्ववर्णाना साधारणानि । मभा.

(५) अनिदंप्रथमलोकधीगोचरतया व्यवस्थितार्जनाना स्वग्रन्थे निबन्धनार्था स्मृतिः । 'स्वामी'त्यादिका गौतमादिप्रणीता धर्मस्मृतिः साधुशब्दनिबन्धनार्थव्याकरणस्मृतिवत् कृतेत्यर्थः । ऋक्थं ऋक्था-

(१) **ऋसं.**१।७३।५; **मैस.**४।१४।१५.

(२) **ऋसं.**६।७५।२; **शुमा.**२९।३९; **तैसं.**४।६।६।१; **मैसं.**३।१६।३; **कासं.**६।१; **नि.**९।१७.

(३) **मैसं.**१।१०।१६. (४) **शब्रा.**७।१।१।३,४.

(५) **गौध.**१०।३८; **मिता.**२।२४,२।११४, २।१६६;

+ पमा. मितागतम् । सवि. मितागतं स्मृत्यगत च ।

अप.२।१२१; **मभा.**; **गौमि.**१०।३९; **स्मृच.**२५८; **पमा.** ४८०,४८२, **सुबो.**२।२२; **दवि.**२९० (सं०), **सवि.**२४३, ४०२; **व्यप्र.**४१५; **व्यउ.**१४२; **व्यम.**३९; **विता.**१४४; **राकौ.**४४२; **बाल.**२।१४३; **समु.**१२६; **कृभ.**९०१.

र्जनं, पित्रादिधने स्वामित्वापादकं पुत्रादिजन्मेति यावत्। तथा च पैतृकधनलाभहेतुत्वेनोक्त गौतमेन 'उत्पत्त्यैवार्थ स्वामित्वात् लभत इत्याचार्याः' इति। उत्पत्त्यैव मातृगर्भशरीरोत्पत्त्यैवेत्यर्थः। क्रयः प्रसिद्धः। सविभागः पित्रादिधने विशेषनिष्ठस्वामित्वसंपादको विभागः। परिग्रहः काननाधिगतजलतृणकाष्ठादेरन्येनास्वीकृतस्य स्वीकारः। अधिगमो निध्यादेरुपलब्धिः। एतेषु निमित्तेषु सत्सु पुत्रादिः क्रेता सविभक्ता परिग्रहीता अधिगन्ता च यथाक्रमेण पित्रादिधनस्य क्रीतस्य संविभक्ताशस्य परिगृहीतस्य अधिगतस्य च स्वामी भवति।

स्मृच.२५७–२५८

(६) रिक्थ दायः। +व्यप्र.४१५

वर्णविशेषेणार्थागमविशेषः। स्वत्वोत्पत्तिनिमित्तम्।

ब्राह्मणस्याधिकं लब्धम्। क्षत्रियस्य विजितम्। निर्विष्टं वैश्यशूद्रयोः।

(१) ब्राह्मणस्य प्रतिग्रहादिना यल्लब्ध तदधिकमसाधारणम्। 'क्षत्रियस्य विजितम्' इत्यात्राधिकमित्यनुवर्तते। क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम्। 'निर्विष्ट वैश्यशूद्रयोः' इत्यात्राप्यधिकमित्यनुवर्तते। वैश्यस्य कृषिगोरक्षादिलब्ध निर्विष्टं तदसाधारणम्। शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं तदसाधारणम्। एवमनुलोमजाना प्रतिलोमजाना च लोकप्रसिद्धेषु स्वत्वहेतुषु यद्यदसाधारणमुक्त 'सूतानामश्वसारथ्यम्' इत्यादि तत्तत्सर्व निर्विष्टशब्देनोच्यते। सर्वस्यापि भृतिरूपत्वात्। 'निर्वेशो भृतिभोगयोः' इति त्रिकाण्डीस्मरणात्। तत्तदसाधारण वेदितव्यम्।

*मिता.२।११४

(२) निर्विष्ट कर्मणोपात्तम्। कृष्यादिना वैश्यस्य शुश्रूषादिना शूद्रस्य तदधिकमनयोः। ×गौमि.

(३) लब्धं प्रतिग्रहोपात्तं, तद्धर्मत्वात्। एतदुक्त भवति—याजनाध्यापनोपात्तमपि द्रष्टव्यमिति। +मभा.

(४) प्रकृतमुच्यते। ब्राह्मणस्याधिकं लब्धमिति। प्रतिग्रहलब्धं विप्रस्याधिक फलजनकमिति केचित्। रिक्थाद्यपेक्षया विप्रस्यैवायमधिक उपायः। एवं क्षत्रियादेर्जयादिरिति तु युक्तम्। जयेऽपि जितस्य यत्र गृहक्षेत्रद्रव्यादौ स्वत्वमासीत् तत्रैव जेतुरप्युत्पद्यते जितस्य करग्राहिताया तु जेतुरपि सैव न स्वत्वम्। अत एव सार्वभौमेन संपूर्णा पृथ्वी माण्डलिकेन च मण्डल न देयमित्युक्त षष्ठे। संपूर्णपृथिवीमण्डलस्य तत्तद्ग्रामक्षेत्रादौ स्वत्व तु तत्तद्भौमिकादीनामेव। राज्ञा तु करग्रहणमात्रम्। अत एव इदानींतनपारिभाषिकक्षेत्रदानादौ न भूदानसिद्धिः। किं तु वृत्तिकल्पनमात्रमेव। भौमिकेभ्यः क्रीते तु गृहक्षेत्रादौ स्वत्वमप्यस्त्येव। तेन तत्र भूदानस्यापि फलं भवति।

निर्विष्ट कुसीदकृषिवाणिज्यपशुपालनलब्ध सेवालब्ध च 'निर्वेशो भृतिभोगयोः' इत्यभिधानात्। भृतिः सेवा। भोगः कुसीदादिः। तत्राद्यं वैश्यस्य द्वितीयं शूद्रस्य। अतो लोकसिद्धैव क्रयादीना कारणता। एवं च स्वीयगवादिजातवत्सादौ स्वत्वव्यवहारः सगच्छते। उपायाना शास्त्रगम्यत्वे तु न स्यात्। स्वीयगवादिजननरूपोपायस्य शास्त्रेणाबोधनात्।

ननु स्वीयगवादिजननेनैव स्वभार्यायामुत्पत्त्या कन्यापुत्रादावपि स्वत्वं स्यात्। इष्टापत्तौ, विश्वजिति सर्वस्व ददातीति विहिते सर्वस्वदाने कन्यापुत्रादिदानापत्या कन्यापुत्रादि न देयमिति षाष्टसिद्धान्तविरोध इति चेन्न। गवादाविव भार्याया स्वत्वाभावेन तस्यामुत्पन्नेऽप्यपत्येऽपि तदभावात्। लोके च स्वत्वास्पदीभूतोत्पत्तेरेव स्वत्वकारणत्वं क्लृप्तम्। भार्यायामपि प्रतिग्रहेण स्वत्वं स्यादेवेति चेन्न। क्षत्रियादीना प्रतिग्रहाभावेन तद्भार्यासु स्वत्वाभावात्तदपत्येष्वपि तदभावः। तेन 'सजातीयेष्वय प्रोक्तस्तनयेषु मया विधिः' इति (यास्मृ. २।१३२) सजातीयस्यैव दत्तकस्य ग्राह्यत्वात्। क्षत्रियादीन्प्रति तावद्दत्तकप्रतिग्रहो गौण एव। न च विप्रान्प्रति स

+ शेषपदार्थः स्मृचगतः।

* स्मृच. मितागतम्। × शेष मितागतम्।

(१) **गौध.**१०।३९-४१; **मिता.**२।२४ विजि (विनिर्जि): २।११४; **मभा.**; **गौमि.**१०।४०-४२; **स्मृच.**२५६, २५८; **पमा.**४८०; **सवि** ४०२; **व्यप्र.**४१५; **व्यम.**३९; **राकौ.**४४२; **बाल.**२।१४३; **समु.**१२६; **कृभ.**९०१ क्षत्रियस्य विजित (विजितं क्षत्रियस्य).

+ शेष मितागतम्।

मुख्यः संभवति तद्विधौ युगपद्वृत्तिद्वयविरोधात्। न च पुत्रप्रतिग्रहविधिर्विप्राधिकारिक एव, न क्षत्रियाद्यधिकारिक इति वाच्यम्। 'दौहित्रो भागिनेयश्च शूद्रस्यापि च दीयते' इत्यादिशौनकादिवचोभिस्तदधिकारिकत्वस्यापि अवगमात्। एव ब्राह्मविधिना क्षत्रियादिकन्यया सह विप्रस्योद्वाहे दानप्रतिग्रहयोर्गौणत्वमङ्गीकार्यम्। अन्यत्र मुख्यत्वमिति वृत्तिद्वयविरोधः। क्षत्रियान्प्रति ब्राह्मादिविवाहप्रवृत्तिस्तु सर्वेषामविप्रतिपन्नैव। अत एव पुत्रादीनां दानं गौणमिति तन्त्ररत्ने मिश्राः। न च स्वा भार्यापुत्रकन्या इति शाब्दव्यवहारास्वत्वकल्पना। तस्य स्वः पिता स्वा मातेत्यादाविव ज्ञातिवाचकत्वेनाप्युपपत्तेः। अस्ति च ज्ञातावपि स्वशब्दस्य शक्तिः। 'स्वो ज्ञातावात्मनि स्व त्रिष्वात्मीये स्वोऽस्त्रिया धने' इति कोशात्। यत्तु पष्ठे गर्भदासदानमुक्त तच्चिन्त्यम्। तन्मातरि मुख्यदानप्रतिग्रहक्रयविक्रयाद्यभावेन स्वत्वाभावे तदुत्पन्ने गर्भदासे मुतरा तदयोगात्। इत्यस्तु प्रासगिकम्। व्यम.४०-४१

[1]**वैश्यस्याधिकं कृषिवणिक्पाशुपाल्यकुसीदम्।**

एव राज्ञोऽधिक स्वत्वमूलमुक्तम्। साप्रत वैश्यस्याह—वैश्यस्याधिकमिति। कृषिः प्रसिद्धा। वणिगिति वाणिज्यम्। पशुपालस्य कर्म पाशुपाल्यम्। कुसीद वृद्ध्यर्थो धनप्रयोगः। कृष्यादिभिर्यल्लब्ध तदधिकं स्वं वैश्यस्य। +गौमि.

पैतृके स्वत्वोत्पत्तिः

[2]**उत्पत्त्यैवार्थस्वामित्वं लभत इत्याचार्याः।**

(१) उत्पत्त्यैव मातृगर्भशरीरोत्पत्त्यैवेत्यर्थः। *स्मृच.२५८

(२) पितृस्वत्वोपरमेऽङ्गजत्वहेतुनोत्पत्तिमात्रसंबन्धेनान्यसंबन्धाधिकेन जनकधने पुत्राणां स्वामित्वाद्धनं पुत्रो लभेत नान्यसंबन्धीत्याचार्या मन्यन्ते। न च पितृस्वत्वे विद्यमानेऽपि जन्मना तद्धने पुत्रस्वत्वमिति वाच्यम्। देवलवचनविरोधात्। तस्मात् देवलवचने पितरि विद्यमाने तद्धने पुत्राणामस्वाम्यश्रुतेः 'उत्पत्त्यैवार्थं स्वामित्वाल्लभेत इत्याचार्याः' इति गौतमवचनं पितृस्वत्वोपरमानन्तरमेव जन्मना पुत्रस्वत्वसंपादनात् स्वामित्वेन तद्धने पुत्रो लभेतेत्येतत्परम्। न तु पितृस्वत्वकाले जन्मानन्तरम्। दात.१६२

(३) वस्तुतस्तु लौकिकमेव स्वत्व, लोके च जातमात्राणामेव पुत्रादीना पित्रादिधने स्वाम्यव्यवहारोऽन्येषामपीति (?) साधयिष्यामः।

यच्च पित्रादीनामनुमत्ययोग्यपुत्रादिसाधारणस्वत्वे कथमनुमतिमन्तरेणाधानादिक स्यादित्युक्तम्, तत् अनुमतियोग्येष्वपि पुत्रादिषु स्वातन्त्र्यात्पित्रादीना न तदनुमत्यपेक्षा किमुतानुमत्ययोग्येष्विति परिहृतप्रायमेव। तद्विधिबलादेवाधिकारोऽवगम्यत इति तु विज्ञानेश्वराचार्यः। अतश्च 'उत्पत्त्यैवार्थस्वामित्वम्' इति गौतमवचनस्य यज्ञीमूतवाहनरघुनन्दनाभ्या पारम्परिकोत्पत्तिस्वत्वहेतुत्वेन व्याख्यानं कृत तदपि व्यर्थमेव। व्यप्र.४१८

विभागप्राशस्त्यम्

[3]**विभागे तु धर्मवृद्धिः।**

(१) तन्मातुरुपरमे वेदितव्यम्। दा.६२

(२) तुशब्दः पक्ष व्यावर्तयति, नैतदेव ज्येष्ठ एव विभृयादिति। यदुक्त, विभाग एव ज्यायान् यतस्तत्र धर्मवृद्धिः। गौमि.

(३) तुशब्दो हेत्वर्थः। यस्मात्प्रत्येकमतिथिदानादिकर्मानुष्ठानेन धर्मवृद्धिस्तस्माद्विभाग एव युक्ततर इति। अर्भकावस्थायामपि भिन्नबुद्धित्वे सति विभागः कर्तव्य इत्येवमर्थ उपदेशः। वृद्धिवचनाच्चाशप्रदातुरपि धर्मोऽस्त्येवेति ज्ञापयति। मभा.

(४) केषाचिदत्यन्तनिस्स्वाना द्रव्याभावात् धर्म-

+ मभा. गौमिगतम्। * सवि. स्मृचगतम्।

(१) **गौध.**१०।४८; **मभा.**; **गौमि.**१०।५०.

(२) **मिता.**२।११४ भत (भेत); **स्मृच.**२५८ थ (र्थ) त्वं (त्वात्); **पमा.**४८४ थ (र्थ) त्वं लभ (त्वाल्लभे); **दात.**१६२ पमावत्; **सवि.**४०२ थ (र्य); **व्यप्र.**४१४ मितावत्; **व्यम.**३९; **विता.**२७८; **विभ.**४४ मितावत्; **समु.**१२६ मितावत्; **विच.**२५ त्वं (त्वात्) भत (भेत).

(१) **गौध.**२८।४; **दा.**६२; **मभा.**; **गौमि.**२८।४; **स्मृच.**२५९; **सवि.**३४७,३५१ (तु०); **समु.**१२६.

विभागः कर्तव्यः 'विभागे धर्मवृद्धिः स्यादि'ति गौतमस्मृतेः। सवि.३४७

विष्णुः

पैतृके स्वत्वोत्पत्तिः

[1]जन्मना स्वत्वमापद्यते।
पुत्रस्यैव न तु पुत्रिकाया इति भारुचिः।
सवि.४०२

पैतृकधनस्वरूप तद्विभागस्वरूपं च

[2]पैतृकधनं द्विविधं भोक्तव्यमनुष्ठातव्यं च।
[3]द्विविधो विभागः कर्ममूलो दायमूलश्च।
धर्ममात्रं वा विभजेत्।

(१) दायो नाम पितापुत्रसमुदायद्रव्यम्। 'पितृद्रव्यं विभक्तव्यं दायमाहुर्मनीषिणः' इति स्मृतेः। विभक्तव्य विभागार्हम्। बृहस्पतिरपि—'ददाति दीयते पित्रा पुत्रेभ्यः स्वस्य यद्धनम्। तदाय.....॥' इति। पिता पुत्रेभ्यो यद्धन ददातीति कर्त्रन्तपितृशब्दोऽध्याहर्तव्यः। एव दायशब्दः कर्मण्येव व्युत्पन्न इति। अनेन पितापुत्रसमुदायविषयक द्रव्य दायमिति सामान्यलक्षणम्। संग्रहकारोऽपि—पितृद्वाराऽऽगत द्रव्य मातृद्वाराऽऽगत च यत्। कथित दायशब्देन तद्विभागोऽधुनोच्यते॥' इति। भारुच्यपरार्कादीना लक्षण— विभागार्ह पितृद्रव्य दायमिति। तदेव सम्यक्। धर्मविभागो द्रव्यविभागेऽप्यनुगतः। न च वाच्यं, धर्माणामग्निहोत्रवैश्वदेवादीना पितृद्रव्यत्वाभावाद्विभक्तव्यं पितृद्रव्यमिति लक्षणस्य तत्रानुगतिर्नास्तीति। 'पैतृकधनं द्विविध, भोक्तव्यमनुष्ठातव्य च' इति विष्णुवचनेन भोक्तव्यं क्षेत्रगवादिकं अनुष्ठातव्यमग्निहोत्रादिकमिति अनुष्ठातव्यस्याग्निहोत्रादेः पैतृकत्वस्य प्रतिपादनात्। अत एव याज्ञवल्क्यः—'कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालाहृते वाऽपि श्रौतं वैतानिकाग्निषु॥' विवाहसंबन्धादूर्ध्वमप्ययमग्निर्वैवाहिको भवत्येवेत्याह कार्किः। दायकालाहृते वाऽपीत्यनेन अग्निहोत्रादेर्विभाग उक्तः। तच्चाग्निहोत्रादि पैतृकमेवाङ्गीकर्तव्यम्। अन्यथा 'कर्म स्मार्तं विवाहाग्नावि'ति व्याहन्येतेति। अत्राह कार्किः—अभ्रातृकस्य वैवाहिको भ्रातृणा दायकालाहृत एवेति व्यवस्थेति। अतश्च दायकाले दायविभागकाले दायत्वेनाहृते स्वीकृत इति। भारुचिः—अजीवद्विभागे श्रोत्रियागारात् ज्येष्ठेनानीतमग्नि भ्रातरो विभजेयुः। अत्र पैतृकत्वमग्नेरुपचरितम्। जीवद्विभागे पित्रानीतमग्निं विभजेयुः। पित्रानीतः पैतृक इति मुख्य पैतृकत्वमग्नेः। अस्मिन्पक्षे तथाविधस्यैवाऽग्नेः पित्रा स्वभ्रातृभ्य आनीतत्वादिति। अत्र केचिदाहुः—दायकालाहृत इत्यस्य अग्निहोत्रस्वीकरणस्य कालान्तरमुक्तमिति। तन्न सहन्ते भारुचिप्रभृतयः। तथा सत्यसस्कृत्यास्वीकारप्रसगादिति। केचित्तु—'दायाद्यकाल एकेषाम्' इति स्मृतेः अग्न्याहरणस्य कालान्तरमुक्तमिति।अत्रेद तत्वम्। वैवाहिकोऽग्निर्लौकिकोऽलौकिकश्चेति मतद्वयम्। लौकिकत्वपक्षे प्राकरणिकस्य मन्त्राम्नानस्य वैधदानसिद्धयर्थत्वात् कर्तृसंस्कारकत्वमेव। नाग्निसंस्कारकत्वम्। आहरणमात्रस्य मथनमात्रस्य वा संस्कारकत्व वक्तुमयुक्तं 'मथितेनाग्निना श्रोत्रियागारादाहृतेन वा स्फटिकोत्पन्नेन वा दावानलेन वा विवाहः कार्यः' इति कर्कभाष्ये आहृतत्वमथितत्वयोः स्फटिकोत्पन्नत्वदावानलत्वाभ्या तुल्ययोगक्षेमतया प्रतिपादनात्। न च स्फटिकोत्पन्नस्य स्फटिकोत्पत्तिरेव दावानलस्य वा दावानलत्वमेव संस्कार इति वक्तुं युक्तं; अतो लौकिक एव वैवाहिकाग्निरिति। अत एवापस्तम्बेन—'अग्निनाशे श्रोत्रियागारान्मथनाद्वाऽग्निमाहृत्य उपोष्यायाश्चेति प्रायश्चित्त कृत्वा पूर्ववज्जुहुयात्' इत्युक्तम्। अनुगतो मन्थ्यः श्रोत्रियागारादाहृतो वाऽग्नाश्चेति हुत्वा जुहुयादिति। अग्निनाशेऽप्ययमेव विधिरिति वृत्तिकारः। अत एव संसृष्टाना पृथगग्निहोत्रकरण च निषिद्धमिति यद्वचनं जातं तदुपपन्नं भवति। अयमर्थः—विभागकाले आहृतस्याग्नेः पुत्राणां परस्परविभागः। वैवाहिकाग्नेरलौकिकत्वपक्षे 'भूर्भुवस्स्वरोमि'त्यग्निं प्रतिष्ठापयेदिति विधेः श्रौतातिदेशेन अलौकिकत्वमग्नेः। अत एवाविभागदशायामपि पृथगग्निहोत्रकरणपृथग्वैश्वदेवादिकरणविधय उपपन्ना भवन्तीति। पक्षद्वयप्रति-

(१) सवि.४०२. (२) सवि.३४५.
(३) सवि.३४८. (४) सवि.३४७.

पादको वाशब्द इत्याहुः। अत एवाश्वलायनेन अग्निनाशे युगलोजान्तर्संस्कारकलापं कृत्वा पुनर्जुहुयादित्युक्तम्। 'श्रौतं वैतानिकाग्निषु' इति पृथगुक्तिः सर्वथा वैतानिकाग्नीना विभागो नास्तीति ज्ञापनार्था। अत्राहुः—वैवाहिकाग्नेरलौकिकत्वपक्षे परस्परं पृथगनुष्ठानमेव विभागः। लौकिकत्वपक्षे परस्परमग्निस्वीकरणमेव विभाग इति लक्ष्मीधरप्रभृतयः। एतच्च विभागसदेहनिर्णये प्रपञ्च्यते। असहायविज्ञानयोगिप्रभृतीना तु यत् स्वामिसंबन्धादेव निमित्तादन्यस्य स्वं भवति तद्दायशब्देनोच्यते इति; तन्न सहन्ते भारुच्यपरार्कप्रभृतयः—स्वत्वहेतूना क्रयादीना तल्लक्षणसंभवात्। न च वाच्यमेवकारेण क्रयादयो व्युदस्यन्ते, क्रेतरि दायादो दायं गृह्णातीति लौकिकप्रयोगाभावादिति। तर्हि स्त्रीणा दायानर्हत्वात् 'तस्मात्स्त्रियो निरिन्द्रिया अदायादाः' इति श्रुतेः स्त्रीधन दायशब्दवाच्य न भवतीति तदुत्तरत्र स्फोर्यते। विभागो नाम द्रव्यधर्मयोरन्यतरस्य पृथक्करणमित्याह भारुचिः। विज्ञानयोगी तु विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्याना तदेकदेशेषु व्यवस्थानमित्याह। तन्न सहते भारुचिः—धर्मविभागे तदभावात्। धर्मविभागो नाम धर्ममात्रविभागः पृथग्वैश्वदेवपञ्चमहायज्ञानुष्ठानपैतृकादिकरणम्। तच्च केषाचिदत्यन्तनिस्स्वाना द्रव्याभावात् धर्मविभागः कर्तव्यः 'विभागे धर्मवृद्धिः स्यादि'ति गौतमस्मृतेः। धर्मवृद्धिकामाना धर्ममात्रविभागो वा कर्तव्यः। अत एव विष्णुः—'धर्ममात्र वा विभजेत्' इति। अत्यन्तनिस्स्वानामिति शेषः। अनेन ज्ञायते परिभाषा विना सकल्पमात्रेणापि विभागसिद्धिः। यथा, पुत्रिकाकरणं परिभाषा विना संकल्पमात्रात्सिध्यतीति। द्रव्यवता तु धनविभागानन्तरमेव धर्मविभागः। 'विभक्ता भ्रातरः कुर्युर्नाविभक्ताः कथचन' इति। विभक्तकर्तव्यतया धर्मान् वैश्वदेवादिकानधिकृत्योक्तत्वात्। अतश्च निस्स्वानामितरानुमत्या तदन्तरेणापि धर्मानुष्ठानमेव धर्मविभागः। धनिकाना धनविभागः। एवं विभागस्य द्वैविध्यम्। अत एवोक्तं विष्णुना—द्विविधो विभागः कर्ममूलो दायमूलश्चेति। अत्र दायशब्दस्य सामान्यवाचित्वेऽपि विशेषपर्यवसानाद्द्रव्यवाचित्वम्। अत्र धर्मशब्देन तत्साधनभूतमग्निहोत्रादिकमुच्यते। धर्मविभागो मनुयाज्ञवल्क्यादिस्मृतिकाराणा तत्स्मृतिव्याख्यातृणामसहायमेधातिथिविज्ञानयोगीश्वरापरार्काणां निबन्धृणा चन्द्रिकाकारादीनां च संमत एव।

सवि.३४४-३४८

वासिष्ठः

सर्ववर्णसाधारणोऽसाधारणश्चार्थागमः

पैतृकं क्रीतमाधेयमन्वाधेयं प्रतिग्रहम्।
यज्ञादुपगमो वेणिस्तथा धूमशिखाष्टमी॥
तत्र भुक्तानुभुक्तदशवर्षम्*।

मनुः

सर्ववर्णसाधारणोऽसाधारणश्चार्थागमः

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च॥

(१) दायोऽन्वयागत धनम्। लाभो निध्यादेः पित्र्यार्जिताद्वा निबन्धात्संविभागः। यद्यपि तत्पित्रादिक्रमायात तथापि न तद्दायशब्देन शक्यमभिधातु बहुसाधारण्यात्। तथा च 'निबन्धो द्रव्यमि'ति स्मृत्यन्तरे पठितम्। अथवा मित्राच्छ्वशुरगृहाद्वा यल्लब्धं प्रीत्या स लाभः। क्रयः प्रसिद्धः। जयः संग्रामे। प्रयोगकर्मयोगौ कुसीदकृषिवाणिज्यान्यतश्च वर्णभेदेनैतेषा धर्म्यत्वम्। तत्राद्यास्त्रयः सर्वसाधारणाः। जयः क्षत्रियस्य। प्रयोगकर्मयोगौ वैश्यस्य। सत्प्रतिग्रहो ब्राह्मणस्य। विशेषाश्रवणेऽपि प्राग्दर्शनन्यायो विभागः। केचित्क्रये विवदन्ते तन्न युक्त सर्वव्यवहारोच्छेदप्रसङ्गात्। जयं यानबन्धेनापि केचिदिच्छन्ति सर्वविषयं तदयुक्तम्। द्यूतधनस्य स्मृत्यन्तरे स्वशुद्धित्ववचनात् पार्श्वकद्यूतेत्यत्र(?)। तथापरे प्रयोगमन्यापारमाहुः। तथा हि प्रयोगो दृश्यते 'ज्ञानपूर्वप्रयोग' इति। तत्र शब्दस्य प्रयोग इति गम्यते।

* स्थलादिनिर्देशः व्यवहारमातृकाया भुक्तिप्रकरणे (पृ.३८२) द्रष्टव्यः।

(१) **मस्मृ.**१०।११५; **मिता.**२।११४; **व्यक.**१४५; **विर.**१३०; **पमा.**४८३; **रत्न.**१३८; **विचि.**५८; **सवि.** ४०४ स्मरणम्; **चन्द्र.**४३; **व्यप्र.**४२३; **विता.**२८२; **सेतु.**१५०; **समु.**१२६; **विच.**१८; **विम्य.**३७.

तथा कर्मप्रयोगः कर्मप्रचार आवर्जनः (?)। मेधा.

(२) सप्त धनागमा दायादयो धर्म्यादनपेतास्तत्र दायोऽन्वयागतं धनम्। लाभो निध्यादेः प्रीतितो वा कुतश्चित्। क्रयः प्रसिद्धः। एते त्रयश्चतुर्णामपि वर्णाना धर्म्याः। जयो युद्धेन क्षत्रियस्य, धर्म्यो वृद्ध्यर्थं धनप्रयोगः, कर्मयोगश्च कृषिवाणिज्ये इत्येतौ वैश्यस्य धर्म्यौ। सत्प्रतिग्रहो ब्राह्मणस्य धर्म्यः। इत्येव च सति एषु धर्म्यत्ववचनादेतदभावेऽन्येष्वनापच्चोदितेषु वृत्तिकर्मसु प्रवर्तितव्यं, तदभावे चापद्युदितेषु प्रकृतेष्वित्येतदर्थमिहोच्यते। +गोरा.

(३) धर्म्या धर्मादनपेताः। दायः पित्रादिधनस्य विभागादिना लभ्यस्य प्राप्तिः। लाभो निध्यादेरकस्माल्लाभः। क्रयो धनेन प्राक्स्थितेन भूम्यादेः परिग्रहः। जयो युद्धोद्योगात्प्राप्तिः। प्रयोगः कलावाणिज्यादिना वर्धनम्। कर्मयोगः शिल्पादिकर्म कृत्वा भृतिग्रहः। सत्प्रतिग्रहः शुद्धाच्छुद्धस्य द्रव्यस्य तिलादिव्यतिरिक्तस्य प्रतिग्रहः। अत्राद्याश्चत्रयः सर्वेषा वर्णाना ततः परे त्रयः क्षत्रविट्शूद्राणामेवं क्रमादन्त्यो विप्रस्यैवेति। *मवि.

(४) अथ ब्राह्मणस्यानापद्विषयास्तावदाह—सप्त वित्तागमा इति। धर्म्या धर्मयुक्ता अनापद्विषया इत्यर्थः। दायः प्रसिद्धः। लाभो निध्यागमादिः। क्रयः क्षेत्रादिक्रयः। जयो वादिषु प्रतिवादिनिग्रहः। प्रयोगः अध्यापनं कर्मयोगो याजन सत्प्रतिग्रहो विशुद्धद्विजातिप्रतिग्रहः। नन्द.

[5]**विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः।**
धृतिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः÷॥

(१) सर्वपुरुषाणामापदि वृत्तिरियमनुज्ञायते। तत्र विद्या वेदविद्याव्यतिरेकेण वैद्यकतर्कभूतविषाशनविद्या सर्वेषा जीवनार्था न दुष्यति। शिल्पं व्याख्यातम्। भृतिः प्रेष्यकत्वम्। सेवा परवृत्तानुवृत्तित्वम्। धृतिः संतोषः। दृष्टान्तार्थं चैतत्। अतो यथाविहितवृत्त्यभावेनैते जीवनोपायाः संकीर्यन्ते। पुरुषमात्रविषयत्वात्। मेधा.

(२) आपत्प्रकरणाज्जीवनहेतव इति च निर्देशात्तेषां मध्ये येन यस्यानापदि जीवनं निषिद्धं तेन तस्यापद्यभ्यनुज्ञायते। यथा ब्राह्मणस्य भूतकाध्यापकत्वेन तदनेनापद्यभ्यनुज्ञायते। एवं शिल्पादिष्वपि विज्ञेयम्। शिल्पं गन्धयुक्त्यादिकर्मकरणं, भृतिः प्रेष्यत्वं, सेवा चित्तानुवर्तनं, गोरक्षा पाशुपाल्यं, विपणिर्वणिज्या, कृषिः स्वयंकृता, धृतिः संतोषः तस्मिन् हि सति स्वल्पकेनापि जीव्यते, भैक्ष्यं स्वातकस्यापि, कुसीदं वृद्ध्या धनप्रयोगः स्वयंकृतोऽपीत्येभिर्दशभिरापदि जीवनम्। +गोरा.

(३) विद्यादयो दश जीवनहेतवः प्राणधारणहेतवः धर्माधर्मसाधारणाः। विद्या विद्यातिशयस्तेन प्रसादादिना धनलाभः। शिल्पं चित्रादिकौशलम्। भृतिः परप्रेषण कृत्वा मासादिनियतभृतिः। सेवा चाटुकारेण नियतं धनप्राप्तिः। गोरक्षं पशुपालनं कृत्वा यथोक्तपशुभागग्रहणम्। वाणिज्यं कृषिः कर्षणम्। धृतिः प्राप्तेनाल्पेनापि संतोषः। भैक्ष्यं याच्ञालब्धम्। कुसीदं वृद्ध्या धान्यादिदानम्। सर्वमेतदापदि यथायोगं वर्णाना, तत्र विप्रस्य 'सेवा श्ववृत्तिरि'त्यादिना सेवा निन्दिता। मवि.

(४) गिरिः पर्वतप्ररूढफलमूलविक्रयः। नन्द.

(५) भृतिः भृतकाध्यापनम्। भाच.

स्थाणुच्छेदस्य केदारमाहुः शल्यवतो मृगम्*॥

दायभागप्रतिज्ञा। व्याख्यासु दायभागपदार्थः।

एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः।
आपत्यपत्यप्राप्तिश्च दायभागं निबोधत॥

(१) पूर्वोत्तरप्रकरणयोः सबन्धश्लोकोऽयं, उक्तेषु स्त्रीपुंसयोर्धर्मेषु अपत्योत्पत्तौ च दायधर्मस्य विभागस्यावसरः। मेधा.

+ ममु., मच. गोरावत्। * भाच. मवित्। ÷ चातुर्वर्ण्यस्यानापदापद्वृत्त्युपायविचारोऽत्र न संगृहीतः, वर्णाश्रमधर्मकाण्डे संग्रहीष्यते।

(१) **मस्मृ.**१०।११६; **नन्द.** भृतिः (गिरिः).

म्य. क्र. १४२

+ ममु., मच. गोरावत्।

*व्याख्यासंग्रहः स्थलादिनिर्देशश्च स्त्रीपुंधर्मे (पृ. १०७२) द्रष्टव्यः।

(१) **मस्मृ.**९।१०३; **दा.**३; **मवि.**भागं (धर्मान्); **स्मृच.** २५५ भागं (धर्मं); **विर.**४५४; **सवि.**३४८ एष (एवं) वो (वो) हितः (हितः) भागं (धर्मं); **व्यप्र.**४११ स्मृचवत्; **सेतु.** ४० हितः (हितः); **समु.**१२६ स्मृचवत्; **नन्द.**स्मृचवत्; **भाच.** स्मृचवत्.

(२) 'एष' इत्युपक्रम्य यावत् सबंन्धिधनविभागमुक्तवान्। +दा.३

(३) रतिसंहितः रतिसंबन्धी रतेरपि न विरोधी। दायधर्मान् दायमधिकृत्य विभागादिधर्मान्। मवि.

(४) दायाख्यद्रव्यविभागविषय धर्म मयोच्यमानं यूयं निबोधतेत्यर्थः। किं पुनर्दायाख्यं द्रव्यमित्यपेक्षिते निघण्टुकारेणोक्तम्, 'विभक्तव्यं पितृद्रव्य दायमाहुर्मनीषिणः' इति। विभागार्हं पित्रादिद्वारागते द्रव्ये वृद्धा दायशब्दमाहुरित्यर्थः। अत एव धारेश्वरेणोक्त 'दायशब्देन पितृद्वारागतं मातृद्वारागत च द्रव्यमेवोच्यते' इति। चशब्दः सबन्ध्यन्तरद्वारागतमपि द्रव्य दायशब्देनोच्यते इति सूचनार्थः। एवशब्दश्चापन्नस्वत्वरूपमिति ज्ञापनार्थः। स चायुक्तः। आपन्नस्वत्वरूपस्यैव द्रव्यस्य पितृद्वारा पुत्रपौत्रेष्वागतत्वात्। एव चान्यसंबन्धिनि धने विभागार्हं दायशब्दो वर्तत इति निघण्टुकारेणोक्तमिति मन्तव्यम्। स्मृच.२५५

(५) एष भार्यापत्योरन्योन्यानुरागयुक्तो धर्मो युष्माकमुक्तः। संतानाभावे चापत्यप्रातिरुक्ता। इदानीं दीयत इति दायः पित्रादिधन तस्य विभागव्यवस्था शृणुत। ÷ममु.

(६) अत्र भारुचिः—दायधर्मशब्देन दायविभागो धर्मविभागो लक्ष्यत इत्याह। दायविभागं धर्मविभाग मयोच्यमान निबोधतेति वचनार्थः। यद्यपि दायशब्देन विभागार्हद्रव्यवाचिना धर्मस्याप्युपसंग्रहः, तथापि विस्पष्टार्थमुक्त दायधर्ममिति। सवि.३४८

विभागप्राशस्त्यम्

एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया।
पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया×॥

(१) स्वेच्छाविनियोज्यत्वाभावाग्निरपैक्ष्यस्वद्रव्यसाध्येषु ज्योतिष्टोमादिष्वसंभवात्तत्सिद्ध्यर्थोऽयं न्यायप्राप्तो विभाग उच्यते। पृथग्वा धर्मकाम्ययेति। न पुनरविभागाद्धर्मो, विभाग एव वाग्निहोत्रादिवद्धर्मः। ननु च धर्मानुष्ठानप्रतिबन्धहेतुत्वाद्धर्मतैवाविभागस्य। नैष दोषः। अधिकृतस्याननुष्ठाने प्रत्यवायः। न चाविभक्तधनस्याधिकारोऽग्निमत्वाभावात्। विभागकाल एवाग्निपरिग्रहस्य विहितत्वात्। यस्तु जीवत्येव पितरि कृतविवाहस्तदैव च परिगृहीताग्निस्तस्याधिकृतत्वान्नैवाविभागः। सोऽपि यदि विच्युतः परिग्रहादन्यतो वा विहितानुष्ठानपर्याप्तधनस्तदा नैव सह वसन्प्रत्यवेयात्। न हि विभागाविभागयोर्धर्माधर्मत्वं स्वरूपेणास्तीत्युक्तम्। ननु च 'भ्रातृणामविभक्तधनानामेको धर्मः प्रवर्तते' इति वचनाद्भ्रत्योरिव सहानुष्ठाने प्राग्विभागादस्त्येव धर्मव्यक्तिः, साधारण्याद्द्रव्यस्य, सर्वैः सभूय कर्तव्यमिति। नैतदग्निहोत्रादौ। आहवनीयादिषु ह्यग्निहोत्रादयः, संस्कारनिमित्ताश्चाहवनीयादय आत्मनेपददर्शनादन्यतरस्य सबन्धिता न प्रतिपद्यन्ते। परकीये चाऽग्नौ जुह्वतः प्रतिषेधदर्शनमस्ति। नान्यस्याग्निषु यजेतेति। न स्मार्ते ह्यपि गृह्येऽग्नौ विधानम्। गृह्यशब्दस्य विशिष्टोपादानादग्निवचनत्वात्, एष एव न्यायः अतिथ्यादिभोजनदाने, महायज्ञमध्यपाठात्। 'वैवाहिकेऽग्नौ कुर्वीत गृह्य कर्म यथाविधि। पञ्चयज्ञविधान च' इति गृह्यत एवाधिकारः। तेनैतद्वचनमेको धर्म इति श्राद्धपूर्तान्नादिमात्रं विज्ञेयम्। मेधा.

(२) सह पृथग्वेति पदाभ्या काम्ययेति चेच्छाया विकल्पकत्व दर्शयति। +दा.२१

(३) अधीतवेदेष्वधिगतवेदार्थेषु चाग्निहोत्राद्यनुष्ठानसमर्थेषु च विभाग एव श्रेयान्। यदाह मनुः—एवं सहेति। *अप२।११४

(४) एवमविभक्ता भ्रातरः सह संवसेयुः। यदि वा धर्मकामनया कृतविभागाः पृथग्वसेयुः यस्मात्पृथगव-

---

+ सेतु. दागतम्। ÷ मच. ममुगतम्।

× 'ज्येष्ठ एव तु गृह्णीयात्' इत्यादिश्लोकैरस्य संगतिर्द्रष्टव्या।

(१) **मस्मृ** ९।१११; **दा.**१६ पू.,२१; **अप.**२।११४ काम्य (काङ्क्ष) र्म्या (र्म्याः) क्रिया (क्रियाः):२।११७ काम्य(काङ्क्ष); **व्यक.**१४०; **विर.**४५९; **स्मृसा.**५४; **पमा.**४८८ प्रजापतिः; **रत्न.**१३९; **विचि.**१९५; **व्यनि.**प्रजापतिः; **स्मृचि.**

+ चन्द्र. दागतम्।

* मवि. अपगतम्। मच. अपगतं ममुगतं च।

२१ र्म्या (र्मः) **बृहस्पति.**; **नृप्र.**३४; **चन्द्र.**६९(=) विव (त्वा), **व्यप्र.**४१७ पू.:४३७ मनुप्रजापती; **वित्ता.**२९९ मनुप्रजापतिविष्णवः; **विभ.**७८), **समु.**२६ काम्य (काङ्क्ष),

स्यानै सति पृथक् पृथक् पञ्चमहायज्ञाद्यनुष्ठानधर्मस्तेषां वर्धते, तस्माद्विभागक्रिया धर्मार्था। तथा च बृहस्पतिः—'एकपाकेन वसता पितृदैवद्विजार्चनम्। एकं भवेद्विभक्तानां तदेव स्याद् गृहे गृहे ॥' मनु.

(५) मध्यगधनस्य स्वेच्छया अविनियोज्यत्वात् निरपेक्षस्वत्वास्पदद्रव्यसाध्ययागाद्यनुष्ठानाभावात्तत्सिध्यर्थोऽयं न्यायप्राप्तो विभाग उच्यते। पृथग्वा धर्मकाम्येति न पुनरविभागादधर्मः कलञ्जभक्षणादिवत्, विभागाच्च धर्मो ज्योतिष्टोमादिवदिति। +विर.४५९

(६) धर्मश्च देवाद्यर्चनरूपस्तस्यैव सहवासेऽपृथक्त्वश्रवणात्। तथा च बृहस्पतिः—'एकपाकेन वसता पितृदेवद्विजार्चनम्। एकं भवेद्विभक्तानां तदेव स्याद् गृहे गृहे ॥' इति। यत्तु सग्रहकारेणाग्निहोत्रादिधर्मवृद्धिरपि धर्मवृद्धिशब्देन गृह्यत इत्युक्तम्। यदाह 'क्रियते स्व विभागेन पुत्राणां पैतृकं धनम्। स्वत्वे सति प्रवर्तन्ते तस्माद्धर्म्याः पृथक्क्रियाः॥' इति। प्रवर्तन्ते स्वत्वायत्ता अग्निहोत्रादिक्रिया इति शेष इति। तत्तु जन्मनैव पुत्राणां पितृधने स्वत्वाद्विभागात्प्रागपि श्रौतस्मार्तकर्माधिकारं प्रतिपादयद्भिरस्माभिः प्रागेव प्रत्यासि। तस्मात्पञ्चमहायज्ञादिधर्म एव धर्मशब्देनात्र ग्राह्यः। व्यप्र.४३७-४३८

(७) पितुर्मरणोत्तरं विभागो मुख्यः पक्षः। अविभागे तु विकल्पः। विता.२९९

नारदः

षड्विधोऽर्थागमः

लब्धं दानक्रयप्राप्तं शौर्यं वैवाहिकं तथा।
बान्धवादप्रजाज्जातं षड्विधस्तु धनागमः ॥

लब्धं जन्मना लब्धं पैतृकादि। अथवा दर्शनेन लब्ध निध्यादि। स्मृच.७०

अर्थार्जनविधिः

धनमूलाः क्रियाः सर्वा यत्नस्तत्साधने मतः।
वर्धनं रक्षणं भोग इति तस्य विधिः क्रमात् ॥

(१) धर्मार्थकामक्रियाः सर्वा अपि धनमूलाः। यतस्तत्साधन उद्यमः कर्तव्यः। तत्साधनोपायश्च त्रिविध उक्तः। प्रथमं रक्षणं द्विपदचतुष्पदादिभ्यः। ततश्च वर्धनं कृषिकलान्तरवाणिज्यादिभिः। तदनन्तरं भोगः। ऐहिकामुष्मिकसुखार्थमेनेति। धनभेदाधिकारः श्लोकसबन्धः। अभा.४३

(२) धनाश्रयत्वाद् विवादस्य धनार्जनविधिमेव तावत् प्रस्तौति, धनगुण धनगति च, धनमूलाः धनाश्रयाः सर्वाः क्रियाः दृष्टादृष्टसुखदुःखोपभोगादिक्रियाः। तस्मात् पुरुषस्य यत्नः सर्वा प्रवृत्तिः तस्य धनस्य साधने। निमित्तसप्तमी। तत्सिद्धिनिमित्ता। 'केशेषु चमरी हन्ती'ति यथा। तस्य च त्रिविधा गतिः, वर्धनमुपचयः। रक्षणं पालनम्। भोग उपभोगः। इतिशब्दः परिच्छेदार्थः। विधिर्विधीयत इति। त्रिप्रकारं कर्तव्यम्। क्रमात् पूर्वं वर्धन, वृद्धस्य नाशो मा भूदिति रक्षण, रक्षितस्य फलमुपभोग इति। नाभा.२।३९

त्रिविध धन शुक्लशबलकृष्णरूपम्

तत् पुनस्त्रिविधं ज्ञेयं शुक्लं शबलमेव च।
कृष्णं च तस्य विज्ञेयः प्रभेदः सप्तधा पुनः ॥

(१) तच्च धनमेकं शुक्लमुच्यते। द्वितीय शबलं तृतीय कृष्णमित्येव तावत्त्रिविधमिदम्। पुनश्च पृथगिति। एकैक सप्तसप्तभेदभिन्नं भवतीति। अभा.४३

(२) तत् पुनर्धनं त्रिविध शुक्ल शबलं कृष्णमिति। तस्य त्रिविधस्यैकैकस्य प्रभेदः सप्तधा। नाभा.२।४०

श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतम्।
धनं सप्तविधं शुक्लमुदयोऽप्यस्य तद्विधः ॥

(१) तत्र श्रुतागत विद्वत्ताप्राप्तम्। शौर्यागतं पुरुषकारप्राप्तम्। तपसागत यमनियमकाम्याकाम्यकर्मयथोक्तविध्यनुष्ठानपात्रताप्राप्तम्। कन्यागत कन्याविवाहनिमित्तप्राप्तम्। तथा याज्यप्राप्तम्। तथान्वयागत पूर्वजकुलक्रमप्राप्तम्। एव सप्तस्थानागत धनं शुक्लमित्युच्यते। उदयोऽप्यस्य तद्विध इति। विनियोगफलप्राप्तिरपि तस्य श्रेयस्कारिणी शुद्धैव द्रष्टव्या। अभा.४४

+ मेधावदेव भावः, सरलत्वादुद्धृतम्।

(१) स्मृच.७०,२१४; नृप्र.२८.

(२) नासं.२।३९; नास्मृ.४।४३ वर्धन रक्षण (रक्षण वर्धनं); अभा.४३ नास्मृवत्.

(१) नासं२।४०; नास्मृ.४।४४ पुनः (पृथक्); अभा.४३ नास्मृवत्. (२) नासं.२।४१; नास्मृ.४।४५ मुदयोऽप्यस्य (मुद्योगस्तस्य); अभा.४३.

(२) शुक्लादिप्रभेदांश्च विशिनष्टि—श्रुतशौर्यतप इति। शुक्लं तद्भेदाश्चोच्यन्ते। श्रुतेनोपात्तमध्ययनादिना। शौर्येण युद्धादिना। तपसा जपहोमदेवताराधनादिना। कन्यया शुल्कनिमित्तम्। शिष्येभ्य आगतं गुरुदक्षिणा। याज्याद्युपागतमार्त्विज्येन। अन्वयागतं क्रमागतं, यस्य यद् विहितं तस्य तथा प्राप्तमेव। तच्छुक्लमित्युक्तं सप्तप्रकारम्। उदयः फलं, तस्य धनस्य, तथाविधं शुक्लमेव, शुद्धं धर्मत एवेत्यर्थः। नाभा.२।४१

[1]कुसीदकृषिवाणिज्यशुल्कशिल्पानुवृत्तिभिः।
कृतोपकारादाप्तं च शबलं समुदाहृतम्॥

(१) तत्र कुसीदं वृद्धिप्रायः। कृषिः कर्षणम्। वाणिज्यं भाण्डकविक्रयः। शुल्क कन्यासप्रदाने धर्म्यं चाधर्म्यं च। शिल्पमालेख्यादिविज्ञानम्। अनुवृत्तिः सेवाराधनम्। कृतोपकारः प्रत्युपकारः। तैः सप्तभिः प्रकारैर्ब्राह्मणस्य धनं यद्भवति तच्छबलमित्युच्यते। मध्यममित्यर्थः। अभा.४४

(२) संप्रति शबलं तद्भेदाश्चोच्यन्ते। कुसीदमन्यायोद्वृत्तमर्थप्रयोगः, अल्पं दत्त्वा भूयसो ग्रहणादधर्मानुपक्तम्। कृषिरपि 'भूमिं भूमिशयाश्चैव हन्ति काष्ठमयोमुखम्।' इत्यधर्मानुषक्तत्वात्, 'ऋतामृताभ्यां जीवेत' इत्यादिना विहितत्वाच्च शबलम्। वाणिज्यमप्यतिसंधानपरत्वात् 'सत्यानृताभ्यामि'ति विधानाच्च शबलम्। शुल्कमारभटगुल्मादिषु भूताभूतग्रहणाच्छबलम्। शिल्पं कारुकवृत्तिः स्वश्रमफलत्वाद् अतिसंधानसंबन्धपरत्वाच्च शबलम्। अनुवृत्तिः सेवा, सापि शिल्पवत्। कृत उपकारो यस्य तत एव चोपकारकरणात् तस्य च विक्रयत्वाच्छबलम्। नाभा.२।४२

[2]पार्श्वकद्यूतदूतार्तप्रतिरूपकसाहसैः।
व्याजेनोपार्जितं यच्च तत् कृष्णं समुदाहृतम्॥

(१) तत्रोत्कोचो लञ्चोपचारः। द्यूतमक्षादिक्रीडा। दौत्य दूतकर्म। आर्तः कश्चिद्रोगार्तो व्यसनी। तथा प्रतिरूपकं सुवर्णरजतादीना कूटप्रतिकृतिकरणम्। साहसं चौर्यादि। व्याजं छलम्। एतैः सप्तभिः प्रकारैर्धनं यदुपार्जितं भवति तत्कृष्णमित्युच्यते। अधममित्यर्थः। एवं शुक्लशबलकृष्णसंज्ञाभिस्त्रिविध धनमेकैकशश्च सप्तप्रकारमप्यभिहितम्। अभा.४४

(२) संप्रत्यशुद्धमुच्यते—पार्श्वकद्यूतमित्युत्कोचादिनोपात्तम्। द्यूतेनोपात्तं सत्यानृताभ्याम्। दूतं दौत्येनोपात्तम्। आर्तादागतम्। प्रतिरूपक कूटादिनोपात्तम्। सहसोपात्त चौर्यादिना। व्याजेन चानृतेन सत्याभासेनात्र सर्वत्र प्रतिषिद्धत्वादसत्यातिसधानसंबन्धाच्च कृष्णमेव। नाभा.२।४३

धनसाध्यानि

[3]तेन क्रयो विक्रयश्च दानं ग्रहणमेव च।
विविधाश्च प्रयुज्यन्ते क्रियाः संभोग एव च॥

(१) अत्र जगत्यपि क्वचित्कीदृशेनापि तेन त्रिविधेन एकविंशतिभेदभिन्नेन क्रयो विक्रयश्च दानं ग्रहणं च विविधाश्च कर्मक्रियाः प्रवर्तन्ते। विविधसंभोगाश्चेति। अभा.४४

(२) त्रिप्रकारेणैव धनेन क्रयविक्रयदानग्रहणोपभोगा धनानुरूपाः क्रियन्ते, विविधाश्च क्रियाः। नाभा.२।४४

[4]यथाविधेन द्रव्येण यत्किञ्चित् कुरुते नरः।
तथाविधमवाप्नोति स फलं प्रेत्य चेह च॥

(१) एते शुक्लशबलकृष्णा भेदा धनस्यैतदर्थं दर्शिताः। येनैतेषा विनियोग इहलोकपरलोकफलाना त्रयाणामपि वर्णाना यच्छुभं तत्सर्ववर्णसाधारण त्रिविध भवति। अभा.४४

(२) यथाविधेन द्रव्येण शुक्लेन शबलेन कृष्णेन वा यत्किञ्चित् कुरुते यजनयाजनादि, तथाविध तत्प्रकारं धनानुरूपमित्यर्थः। शुक्लेन शुद्धमेव दुःखरहितम्। शबलेन मिश्रं, कृष्णेन दुःखोदय, इहापि तथैव। नाभा.२।४५

सर्ववर्णसाधारणो वर्णविशेषनियतश्चार्थागमः

[5]तत् पुनर्द्वादशविधं प्रतिवर्णाश्रयं स्मृतम्।
साधारणं स्यात् त्रिविधं शेषं नवविधं स्मृतम्॥

(१) नासं.२।४२; नास्मृ.४।४६; अभा.४४.

(२) नासं.२।४३; नास्मृ.४।४७ पार्श्वक (उत्कोच) दूता (दौत्या) तत् कृष्णं समु (कृष्णं हि तदु); अभा.४४ नास्मृवत्.

(१) नासं २।४४; नास्मृ.४।४८ प्रयुज्यन्ते (प्रवर्तन्ते); अभा.४४ नास्मृवत्.

(२) नासं.२।४५; नास्मृ.४।४९; अभा.४४.

(३) नासं.२।४६; नास्मृ.४।५० श्रयं (श्रयात्) धं स्मृतम् (धं विदुः).

(१) वर्णे वर्णे विशेषशुभत्रिविधधनत्वाच्चाशेषं नवविधं भवति। एवमेव द्वादशविधमपि शुद्धधन निगमव्याख्यातैः श्लोकैरिदानीमुच्यते। अभा.४४

(२) एष धर्म्य इष्यते वचनात्। तत् पुनर्धर्म्यं धनं द्वादशविधम्। वर्ण प्रत्याश्रयात् सर्वेषामेव वर्णाना साधारणवैशेषिकभावेन स्मृतम्। तत्र साधारणं स्यात् त्रिविधं चतुर्णामपि वर्णानाम्। शेष नवविधं प्रतिवर्णं विभज्यते। नाभा.२।४६

[1]क्रमागतं प्रीतिदायं प्राप्तं च सह भार्यया।
अविशेषेण सर्वेषां वर्णानां त्रिविधं धनम्॥

(१) एतत्सर्ववर्णसामान्यं त्रिविधं शुद्धधनम्। अभा.४४

(२) तत्र साधारणं विशेष्यते—क्रमागतमिति। क्रमागतं पितृपितामहप्राप्तं ग्रामक्षेत्रगृहादि। प्रीतिदायं प्रीतिपूर्वकमागतम्। भार्यया च सह लब्ध अविशेषेण साधारणं सर्वेषा वर्णाना त्रिविधमित्युक्तम्। नाभा.२।४७

[2]वैशेषिकं धनं ज्ञेयं ब्राह्मणस्य त्रिलक्षणम्।
प्रतिग्रहेण लब्धं च याज्यतः शिष्यतस्तथा॥

यत् प्रतिवर्णं त्रिधा विभक्त नवविधं, तदुच्यते क्रमेण—वैशेषिकमिति। ब्राह्मणस्य प्रतिग्रहाध्यापनयाजनलब्धं वैशेषिकं त्रिविधं प्रत्यात्मिकं धन साधारणेन सह षड्विधम्। नाभा.२।४८

[3]त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनम्।
युद्धोपलब्धं कारश्च दण्डश्च व्यवहारतः॥

क्षत्रियस्यापि त्रिविधं वैशेषिकं धनं युद्धजितं जनपदनिबद्धः कारः व्यवहारतो दण्डः पूर्वेण सह तथैव षड्विधम्। नाभा.२।४९

[1]वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणम्।
कृषिगोरक्ष्यवाणिज्यं शूद्रस्यैभ्यस्त्वनुग्रहात्॥

(१) एव ब्राह्मणादीना त्रयाणामपि वर्णाना त्रिविधं धन दर्शितम्। शूद्रस्तु सर्वाशी सर्वविक्रयी। तस्यापि शुभप्रकारमेकप्रकारमेव दर्शितम्। एषा ब्राह्मणादीना प्रेषणपरितोषणसप्रातानुग्रहादिभिः। अभा.४४–४५

(२) वैश्यस्यापि तथैव कृषिगोरक्षवाणिज्यसमुत्थम्। एवमेतस्यापि साधारणेन सह षड्विधम्। शूद्रस्यैभ्यस्त्रिभ्यस्त्वनुग्रहात्। अनुग्रहलब्धं प्रीतिदाय एवेति नास्य वैशेषिक धनमस्ति। तस्माद् द्वादशविधमित्युक्तम्। नाभा.२।५०

[2]सर्वेषामेव वर्णानामेष धर्म्यो धनागमः।
विपर्ययादधर्म्यः स्यान्न चेदापद् गरीयसी+॥

(१) निजनिजवर्णवृत्तिविहितो धनागमो धर्म्यो भवति। विपर्ययात्त्वन्योन्यवर्णवृत्तिसमाचरणादधर्म्यः स्यात्। इति ऋणादाने बहुप्रकारधनभेदस्तृतीयः। इदानीमापद्ब्राह्मणवृत्तिरुच्यते। अभा.४५

(२) सर्वग्रहण शूद्रोपसंग्रहार्थम्। सर्ववर्णाना धर्मादनपेतो यथोक्तो धनागमः। विपर्ययादतोऽन्यः। एतेषा संकरेण सेवाचौर्यबलादिना अप्रतिग्राह्यायाज्यशिष्येभ्यश्च, कूटयुद्धानिबद्धकरदुर्दृष्टव्यवहारादिना, अयथोक्तकृषिसम्यग्ग्रहणानुचितभागहरणाविक्रेयविक्रयादिना, शूद्रस्यैषा व्याजपरिचरणाननुज्ञातग्रहणादिना अधर्म्यो धनागम इत्यपेक्ष्यते। यद्यापद् गरीयसी न स्यात्। आपदि तु यथाकथञ्चिज्जीवितव्यम्। आपदित्येव वक्तव्ये गरीयोग्रहणान्नात्ममात्रे अजीवनावस्थायामिति। नाभा.२।५१

खातखातस्य केदारमाहुः शल्यवतो मृगम्।
इषवस्तस्य नश्यन्ति यो विद्धमनुविध्यति*॥

---

(१) **नासं.**२।४७; **नास्मृ.**४।५१ दाय (दायः) सर्वेषां वर्णानां (वर्णानां सर्वेषां) धनम् (शुभम्); **अभा.**४४ त्रिविधं (त्रिधेनं) शेषं नास्मृवत्.

(२) **नासं.**२।४८; **नास्मृ.**४।५२ त्रिलक्षणम् (शुभं त्रिधा) लब्धं च (यल्लब्धं); **अभा.**४४ नास्मृवत्.

(३) **नासं.**२।४९; **नास्मृ.**४।५३ प्राहुः (शुद्धं) उत्तरार्धं (करादुद्धोपलब्धं च दण्डाश्च व्यवहारतः:); **अभा.**४४ नास्मृवत्.

+ एतत् श्लोकानन्तर 'आपत्स्वनन्तरा वृत्तिरि'त्याद्यादेयश्लोका वर्तन्ते ते प्रकीर्णके द्रष्टव्याः।

* व्याख्यानं स्थलादिनिर्देशश्च सीमाविवादे (पृ. ९४८) द्रष्टव्यः।

(१) **नासं.**२।५०; **नास्मृ.**४।५४ त्रिलक्षणम् (त्रिधा शुभम्) णिज्यं (णिज्यैः) भ्यस्त्वनु (षामनु); **अभा.**४४ नास्मृवत्.

(२) **नासं.**२।५१; **नास्मृ.**४।५५; **अभा.**४५.

दायभागप्रतिज्ञा, व्याख्यासु दायभागपदार्थः, स्वत्वोत्पत्तिनिरूपणं, विभागस्वत्वयोः सबन्धः, स्वत्वकालविभागकाल विचारश्च ।

'विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं व्यवहारपदं बुधैः ॥

(१) तत्र दायशब्देन यद्धनं स्वामिसंबन्धादेव निमित्तादन्यस्य स्व भवति तदुच्यते । स च द्विविधः अप्रतिबन्धः सप्रतिबन्धश्च । तत्र पुत्राणा पौत्राणा च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं च स्वं भवतीत्यप्रतिबन्धो दायः। पितृव्यभ्रात्रादीना तु पुत्राभावे स्वाम्यभावे च स्वं भवतीति सप्रतिबन्धो दायः । एव तत्पुत्रादिष्वप्यूहनीयः । विभागो नाम द्रव्यसमुदाय विषयाणामनेकस्वाम्याना तदेकदेशेषु व्यवस्थापनम् । एतदेवाभिप्रेत्योक्तं नारदेन—विभागोऽर्थस्येति । पित्र्य स्येति स्वत्वनिमित्तसंबन्धोपलक्षणम् । तनयैरित्यपि प्रत्यासन्नोपलक्षणम् । इदमिह निरूपणीयम् । कस्मिन्काले कस्य कथं कैश्च विभागः कर्तव्य इति । तत्र कस्मिन् काले कथं कैश्चेति तत्र तत्र श्लोकव्याख्याने एव वक्ष्यते । कस्य विभाग इत्येतावदिह चिन्त्यते । किं विभागात्स्वत्व-मुत स्वस्य सतो विभाग इति । तत्र स्वत्वमेव तावन्निरूप्यते । किं शास्त्रैकसमधिगम्य स्वत्वमुत प्रमाणान्तरसमधिगम्यमिति । तत्र शास्त्रैकसमधिगम्यमिति तावद्युक्त, गौतमवचनात् 'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु, ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोः ॥' इति । प्रमाणान्तरगम्ये स्वत्वे नेदं वचनमर्थवत्स्यात् । तथा स्तेनातिदेशे मनुः—'योऽदत्तादायिनो हस्तालिप्सेत ब्राह्मणो धनम् । याजनाध्यापनेनापि यथा स्तेनस्तथैव सः ॥' इति । अदत्तादायिनः सकाशाद्याजनादिद्वारेणापि द्रव्यमर्जयता दण्डविधानमनुपपन्नं स्यात्स्वत्वस्य लौकिकत्वे । अपिच । लौकिकं चेत्स्वत्वं मम स्वमनेनापहृतमिति न ब्रूयादपहर्तुरेव स्वत्वात् । अन्यथान्यस्य स्व तेनापहृतमिति नापहर्तुः स्वम् । एवं तर्हि सुवर्णरजतादिस्वरूपवदस्य वा स्व मन्यस्य वा स्वमिति संशयो न स्यात् । तस्माच्छास्त्रैकसमधिगम्यं स्वत्वमिति । अत्रोच्यते—लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात् व्रीह्यादिवत् । आहवनीयादीना हि शास्त्रगम्यानां न लौकिकक्रियासाधनत्वमस्ति । नन्वाहवनीयादीनामपि पाकादिसाधनत्वमस्त्येव। नैतत् । न हि तत्राहवनीयादिरूपेण पाकादिसाधनत्वम् । किं तर्हि प्रत्यक्षादिपरिदृश्यमानाग्न्यादिरूपेण । इह तु सुवर्णादिरूपेण न क्रयादिसाधनत्वमपि तु स्वत्वेनैव। न हि यस्य यत्स्वं न भवति तत्तस्य क्रयाद्यर्थक्रिया साधयति । अपिच । प्रत्यन्तवासिनामप्यदृष्टशास्त्रव्यवहाराणा स्वत्वव्यवहारो दृश्यते । क्रयविक्रयादिदर्शनात् । किंच । नियतोपायकं स्वत्वं लोकसिद्धमेवेति न्यायविदो मन्यन्ते । तथाहि—लिप्सासूत्रे तृतीये वर्णके द्रव्यार्जननियमाना क्रत्वर्थत्वे स्वत्वमेव न स्यात् स्वत्वस्यालौकिकत्वादिति पूर्वपक्षासंभवमाशंक्य द्रव्यार्जनस्य प्रतिग्रहादिना स्वत्वसाधनत्वं लोकसिद्धमिति पूर्वपक्षः समर्थितो गुरुणा —'ननु च द्रव्यार्जनस्य क्रत्वर्थत्वे स्वत्वमेव न भवती'ति याग एव न संवर्तेत, प्रलपितमिदं केनापि 'अर्जन स्वत्व नापादयतीति विप्रतिपिद्धम्' इति वदता। तथा सिद्धान्तेऽपि स्वत्वस्य लौकिकत्वमङ्गीकृत्यैव विचारप्रयोजनमुक्त 'अतो नियमातिक्रमः पुरुषस्य न क्रतोः' इति । अस्य चार्थ एव विवृतः—यदा द्रव्यार्जननियमाना क्रत्वर्थत्वं तदा नियमार्जितेनैव द्रव्येण क्रतुसिद्धिर्न नियमातिक्रमार्जितेन द्रव्येणेति न पुरुषस्य नियमातिक्रमदोषः पूर्वपक्षे । राद्धान्ते त्वर्जननियमस्य पुरुषार्थत्वात्तदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धिर्भवति, पुरुषस्यैव नियमाति-

(१) **नास.**१४।१; **नास्मृ.**१६।१ व्यवहार (तद्विवाद); **अपु.**२५३।२५ पि (पै) यत्र (यंस्तु); **भिता.**२।११४ पुत्रैर्यत्र प्र (तनयैर्यत्र), **दा.**२ नास्मृवत्; **अप.**२।११४ नास्मृवत्; **व्यक.**१४० नास्मृवत्; **स्मृच.**५ व्यस्य (व्यादेः); **विर.**४५४ नास्मृवत्; **पमा.**४७७ पि (पै); **रत्न.**१३५; **मपा.**६४५ प्रकल्प्य (निरूप्य) क्तं (क्तः) शेष नास्मृवत्; **व्यनि.**यैर्यत्र प्र (यैर्यत्र परिः); **स्मृचि.**२८ पि (पै) पुत्रैर्यत्र (तनयैर्यत्) दाय...क्तं (तद्विभाग इति प्रोक्तो); **दात.**१६१ नास्मृवत्; **दानि.**१ नास्मृवत्; **वीमि.**२।११४ पि (पै) पुत्रै (तनयै) प्रकल्प्य (कॢप्य) ग इति (गमिति); **व्यप्र**४११ नास्मृवत्; **व्यउ.**१४२ पि (पै) शेष नास्मृवत्; **व्यम.**४१ नास्मृवत्; **विता.**२७७; **राकौ.**४४२ पि (पै) शेष मितावत्; **सेतु.**४० नास्मृवत्; **समु.**१२५-१२६ स्मृचवत्; **विच.**२४ नास्मृवत्.

क्रमदोष इति नियमातिक्रमार्जितस्यापि स्वत्वमङ्गीकृतम्। अन्यथा क्रतुसिद्ध्यभावात्। न चैतावता चौर्यादिप्राप्तस्यापि स्वत्वं स्यादिति मन्तव्यम्। लोके तत्र स्वत्वप्रसिद्ध्यभावात् व्यवहारविसंवादाच्च। एवं प्रतिग्रहाद्युपायके स्वत्वे लौकिके स्थिते—'ब्राह्मणस्य प्रतिग्रहादय उपायाः, क्षत्रियस्य विजितादयः, वैश्यस्य कृष्यादयः, शूद्रस्य शुश्रूषादयः' इत्यदृष्टार्था नियमाः। रिक्थादयस्तु सर्वसाधारणा.— 'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु' इत्युक्ताः। तत्राप्रतिबन्धो दायो रिक्थम्। क्रयः प्रसिद्धः। संविभागः सप्रतिबन्धो दायः। परिग्रहोऽनन्यपूर्वस्य जलतृणकाष्ठादेः स्वीकारः। अधिगमो निध्यादेः प्राप्तिः। एतेषु निमित्तेषु सत्सु स्वामी भवति। ज्ञातेषु ज्ञायते स्वामी। 'ब्राह्मणस्याधिकं लब्धम्' इति ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधिकमसाधारणम्। 'क्षत्रियस्य विजितम्' इत्यत्राधिकमित्यनुवर्तते। क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम्। 'निर्विष्टं वैश्यशूद्रयोः' इत्यत्राप्यधिकमित्यनुवर्तते। वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तदसाधारणम्। शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं तदसाधारणम्। एवमनुलोमजानां प्रतिलोमजानां च लोकप्रसिद्धेषु स्वत्वहेतुषु यद्यदसाधारणमुक्तं 'सूतानामश्वसारथ्यम्' इत्यादि तत्तत्सर्वं निर्विष्टशब्देनोच्यते। सर्वस्यापि भृतिरूपत्वात्। 'निर्वेशो भृतिभोगयोः' इति त्रिकाण्डीस्मरणात्। तत्तदसाधारणं वेदितव्यम्। यदपि 'पत्नी दुहितरश्चैव' इत्यादि स्मरणं तत्रापि स्वामिसंबन्धितया बहुषु दायविभागितया प्राप्तेषु लोकप्रसिद्धेऽपि स्वत्वे व्यामोहनिवृत्त्यर्थं स्मरणमिति सर्वमनवद्यम्। यदपि मम स्वमनेनापहृतमिति न ब्रूयात्स्वत्वस्य लौकिकत्व इति तदप्यसत्—स्वत्वहेतुभूतक्रयादिसंदेहात्स्वत्वसंदेहोपपत्तेः। विचारप्रयोजनं तु—'यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम्। तस्योत्सर्गेण शुद्ध्यन्ति जप्येन तपसैव च॥' इति। शास्त्रैकसमधिगम्ये स्वत्वे गर्हितेनासत्प्रतिग्रहवाणिज्यादिना लब्धस्य स्वत्वमेव नास्तीति तत्पुत्राणां तदविभाज्यमेव। यदा तु लौकिकं स्वत्वं तदाऽसत्प्रतिग्रहादिलब्धस्यापि स्वत्वात्तत्पुत्राणा तद्विभाज्यमेव। 'तस्योत्सर्गेण शुद्ध्यन्ति' इति प्रायश्चित्तमर्जयितुरेव, तत्पुत्रादीना तु दायत्वेन स्वत्वमिति न तेषां दोषसंबन्धः। 'सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च॥' इति (१०।११५) मनुस्मरणात्। इदानीमिदं संदिह्यते—किं विभागात्स्वत्वमुत स्वस्य सतो विभाग इति। तत्र विभागात्स्वत्वमिति तावद्युक्तम्। जातपुत्रस्याधानविधानात्। यदि जन्मनैव स्वत्वं स्यात्तदोत्पन्नस्य पुत्रस्यापि तत्स्वं साधारणमिति द्रव्यसाध्येष्वाधानादिषु पितुरनधिकारः स्यात्। तथा विभागात् प्राक् पितृप्रसादलब्धस्य विभागप्रतिषेधो नोपपद्यते। सर्वानुमत्या दत्तत्वाद्विभागप्राप्त्यभावात्। यथाह—'शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत्। त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः॥' इति। तथा—'भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्। सा यथाकाममश्नीयाद्व्याद्वा स्थावराहते॥' इति प्रीतिदानवचनं च नोपपद्यते जन्मनैव स्वत्वे। न च स्थावराहते यद्दत्तमिति संबन्धो युक्तो व्यवहितयोजनाप्रसङ्गात्। यदपि—'मणिमुक्ताप्रवालाना सर्वस्यैव पिता प्रभुः। स्थावरस्य तु सर्वस्य न पिता न पितामहः॥' तथा—'पितृप्रसादाद्भुज्यन्ते वस्त्राण्याभरणानि च। स्थावरं तु न भुञ्जीत प्रसादे सति पैतृके॥' इति स्थावरस्य प्रसाददाने प्रतिषेधवचनं तत्पितामहोपात्तस्थावरविषयम्। अतीते पितामहे तद्धन पितापुत्रयोः साधारणमपि मणिमुक्तादि पितुरेव। स्थावर तु साधारणमित्यस्मादेव वचनादवगम्यते। तस्मान्न जन्मना स्वत्वं किंतु स्वामिनाशाद्विभागाद्वा स्वत्वम्। अत एव पितुरूर्ध्वं विभागात्प्राग्द्रव्यस्वत्वस्य प्रहीणत्वादन्येन गृह्यमाण न निवार्यत इति चोद्यस्यानवकाशः। तथैकपुत्रस्यापि पितृप्रयाणादेव पुत्रस्य स्वमिति न विभागमपेक्षत इति। अत्रोच्यते—लोकप्रसिद्धमेव स्वत्वमित्युक्तम्। लोके च पुत्रादीना जन्मनैव स्वत्व प्रसिद्धतर नापह्नवमर्हति। विभागशब्दश्च बहुस्वामिकधनविषयो लोकप्रसिद्धो नान्यदीयविषयो न प्रहीणविषयः। तथा 'उत्पत्त्यैवार्थस्वामित्व लभेतेत्याचार्याः' इति गौतमवचनाच्च। 'मणिमुक्ताप्रवालाना' इत्यादि वचनं च जन्मना स्वत्वपक्ष एवोपपद्यते। न च पितामहोपात्तस्थावरविषयमिति युक्तम्। 'न पिता न पितामहः' इति वचनात्। पितामहस्य हि स्वार्जितमपि पुत्रे पौत्रे च सत्यदेयमिति वचनं जन्मना स्वत्वं

गमयति । यथा परमते मणिमुक्ताप्रवालवस्त्राभरणादीनां पैतामहानामपि पितुरेव स्वत्वं वचनात्, एवमस्मन्मतेऽपि पित्रार्जितानामप्येतेषां पितुर्दानाधिकारो वचनादित्यविशेषः । यत्तु 'भर्त्रा प्रीतेन' इत्यादिविष्णुवचनं स्थावरस्य प्रीतिदानज्ञापनं तत्स्त्रोपार्जितस्यापि पुत्राद्यभ्यनुज्ञयैवेति व्याख्येयम् । पूर्वोक्तैर्मणिमुक्तादिवचनैः स्थावरव्यतिरिक्तस्यैव प्रीतिदानयोग्यत्वनिश्चयात् । यदप्यर्थसाध्येषु वैदिकेषु कर्मस्वनधिकार इति, तत्र तद्विधानबलादेवाधिकारो गम्यते । तस्मात्पैतृके पैतामहे च द्रव्ये जन्मनैव स्वत्वम्, तथापि पितुरावश्यकेषु धर्मकृत्येषु वाचनिकेषु प्रसाददानकुटुम्बभरणापद्विमोक्षादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातन्त्र्यमिति स्थितम् । स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतन्त्र्यमेव । 'स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम् । असंभूय सुतान्सर्वान्न दानं न च विक्रयः ॥ ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः । वृत्तिं च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः ॥' इत्यादिस्मरणात् । अस्यापवादः—'एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम् । आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः ॥' इति । अस्यार्थः—अप्राप्तव्यवहारेषु पुत्रेषु पौत्रेषु वाऽनुज्ञानादावसमर्थेषु भ्रातृषु वा तथाविधेष्वविभक्तेष्वपि सकलकुटुम्बव्यापिन्यामापदि तत्पोषणे वावश्यकर्तव्येषु च पितृश्राद्धादिषु स्थावरस्य दानाधमनविक्रयमेकोऽपि समर्थः कुर्यादिति । यत्तु वचनम्—'अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः । एकोऽनीशः सर्वत्र दानाधमनविक्रये ॥' इति, तदप्यविभक्तेषु द्रव्यस्य मध्यस्थत्वादेकस्यानीश्वरत्वात् सर्वाभ्यनुज्ञावश्यं कार्या । विभक्तेषु तूत्तरकालं विभक्ताविभक्तसंशयव्युदासेन व्यवहारसौकर्याय सर्वाभ्यनुज्ञा न पुनरेकस्यानीश्वरत्वेन । अतो विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिद्धयत्येवेति व्याख्येयम् । यदपि—'स्वग्रामज्ञाति सामन्तदायादानुमतेन च । हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी ॥' इति । तत्रापि ग्रामानुमतिः । 'प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः' इति स्मरणात् व्यवहारप्रकाशनार्थमेवापेक्षते न पुनर्ग्रामानुमत्या विना व्यवहारासिद्धिः । सामन्तानुमतिस्तु सीमाविप्रतिपत्तिनिरासाय । ज्ञातिदायादानुमतेस्तु प्रयोजनमुक्तमेव । 'हिरण्योदकदानेन' इति । 'स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञया' इति स्थावरस्य विक्रयप्रतिषेधात् । 'भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति । उभौ तौ पुण्यकर्माणौ नियतौ स्वर्गगामिनौ ॥' इति दानप्रशंसादर्शनाच्च । विक्रयेऽपि कर्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण स्थावरविक्रयं कुर्यादित्यर्थः । पैतृके पैतामहे च धने जन्मनैव स्वत्वेऽपि विशेषं 'भूर्या पितामहोपात्ता' इत्यत्र वक्ष्यामः । +मिता.२।११४

(२) पितृत आगतं पित्र्यं तच्च पितृमरणोपजातस्वत्वमुच्यते । पित्र्यस्येति पुत्रैरिति च द्वयमपि संबन्धिमात्रोपलक्षणम् । संबन्धिमात्रेण संबन्धिमात्रधनविभागेऽपि दायभागपदप्रयोगात् । अत एव दायभागं विवादपदमुपक्रम्य नारदोऽपि मात्रादिधनविभागमप्युपदर्शितवान् । दीयत इति व्युत्पत्त्या दायशब्दो ददातिप्रयोगश्च गौणः मृतप्रव्रजितादिस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिफलसाम्यात्, न तु मृतादीना तत्र त्यागोऽस्ति । ततश्च पूर्वस्वामिसंबन्धाधीनं तत्स्वाम्योपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दः । ननु किं दायस्य विभागो विभक्तावयवत्वं, यद्वा दायेन सह विभागोऽसंयुक्तत्वं, न तावत् पूर्वः, दायविनाशापत्तेः । नापि द्वितीयः, संयुक्तेऽपि न ममेद विभक्तं स्वं भ्रातुरिदमिति प्रयोगात् । न च संबन्धाविशेषात् सर्वेषां सर्वधनोत्पन्नस्य स्वत्वस्य द्रव्यविशेषे व्यवस्थापनं विभाग इति वाच्यं संबन्ध्यन्तरसद्भावप्रतिपक्षस्य सबन्धस्यावयवेष्वेव विभागव्यङ्ग्यस्वत्वापादकत्वात् कृत्स्नपितृधनगतस्वत्वोत्पादविनाशकल्पनागौरवात् यथेष्टविनियोगफलाभावेनानुपयोगाच्च । उच्यते, एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जनं विभागः । विशेषेण भजनं स्वत्वज्ञापनं वा विभागः । यत्रापि चैक दासीगवादिकं बहुसाधारणं तत्रापि तत्तत्कालविशेषवहनदोहनफलेन स्वत्वं व्यज्यते । तदाह बृहस्पतिः—'एकां स्त्रीं कारयेत् कर्म यथांशेन गृहे गृहे । उद्धृत्य

+ अप. पित्र्यपुत्रपदार्थौ मिताक्षरातौ । प्रमा. मितागतम्

कूपवाप्यम्भस्त्वनुसारेण गृह्यते ॥ युक्त्या विभजनीयं तदन्यथानर्थक भवेत् ॥' इदं श्लोकार्द्धत्रयं नानास्थानस्थ न तु क्रमिकम् । ननु 'पितर्यूर्ध्व गते पुत्रा विभजेयुर्धनं पितुरि'ति नारदवचनात् पितुर्धनं विभजेयुरित्यन्वयात् विभागात् पूर्व न तत्र पुत्राणा स्वत्वं न च विभागस्य स्वत्वकारणता असंबन्धिधनेऽप्यतिप्रसंगात् ।

उच्यते, पित्रादिनिधनानन्तरमेवास्मदीय धनमिति प्रयोगात् एकपुत्रे च विभागं विनैव स्वत्वस्वीकाराच्च संबन्धिधनमेव स्वत्वकारणमतो नातिप्रसगः ।

नन्वर्जयितुर्व्यापारोऽर्जन, अर्जनाधीनस्वामिभाव-श्चार्जयिता, तेन पुत्रव्यापारो जन्मैवार्जनं युक्तं, अतो जीवत्येव पितरि पुत्राणा तत्र स्वत्वं, न तु तन्निधनात्, अत एवोक्त क्वचिज्जन्मनैव, यथा पित्र्ये धने । नैतत्, मन्वादिविरोधात् । यथा मनुः 'ऊर्ध्व पितुश्च मातुश्च समेत्य भ्रातरः समम् । भजेरन् पैतृक रिक्थमनीशास्ते हि जीवतोः ॥' जीवतोरपि पित्रोः पुत्राणां कुतो न विभाग इत्याशङ्कायामिदमुत्तरं, तदानीमस्वामित्वादिति । न च भार्या पुत्रश्चेत्यादिवत् अस्वातन्त्र्याभिप्रायमिति वाच्यं; तदानीं स्वत्वे प्रमाणाभावात्, भार्यादिषु तु यत्ते समधिगच्छन्ति अर्जयन्तीति स्वत्वे सिद्धे युक्तमस्वातन्त्र्यवर्णनम् । कि च स्वोपात्तेऽपि तेषामस्वामित्वे स्वधनसाध्यवैदिककर्मोच्छेदात् श्रुतिविरोधः स्यात् । देवलश्च पितृधने अस्वाम्यमेव स्पष्टयति । तथा 'पितर्युपरते पुत्रा विभजेयुर्धनं पितुः । अस्वाम्यं हि भवेदेषा निर्दोषे पितरि स्थिते ॥' किंच जीवत्यपि पितरि पितृधने पुत्राणां स्वामित्वे पितुरनिच्छयापि विभागः स्यात्, जन्मनैव स्वत्वमित्यत्र प्रमाणाभावाच्च, अर्जनरूपतया जन्मनः स्मृतावनधिगमात् । क्वचिज्जन्मैवेति च जन्मनिबन्धनत्वात् पितापुत्रसंबन्धस्य पितृमरणस्य च स्वत्वकारणत्वात् परम्परया वर्णनम् । अन्यव्यापारेणान्यस्य स्वत्वमविरुद्ध शास्त्रमूलत्वादस्य । दृष्टं च लोकेऽपि दाने हि चेतनोद्देशविशिष्टत्यागादेव दातृव्यापारात्, संप्रदानस्य द्रव्ये स्वामित्वम् ।

न च स्वीकरणात् स्वत्वं, स्वीकर्तुरेव दातृत्वापत्तेः, परस्वत्वापत्तिफलेन हि दानरूपता, तच्च फलं संप्रदानाधीनं, यथा देवतोद्देशेन द्रव्यत्यागं कुर्वन्नपि यजमानो न होता, किन्तु तस्यैव त्यागस्य होमाभिधाननिमित्तं प्रक्षेप कुर्वन् ऋत्विगेव होतेत्युच्यते, तद्वदत्रापि स्यात् । किंच मनसा पात्रमुद्दिश्येत्यादिशास्त्रे स्वीकारात् प्रागेव दानपद दृष्टम् ।

ननु ग्रहणं स्वीकारः, अभूततद्भावे च्विप्रयोगात्, अस्वं स्वं कुर्वन् व्यापारः स्वीकारो भवति, कथं तत् प्रागेव स्वत्वम् ।

उच्यते, उत्पन्नमपि स्वत्वं संप्रदानव्यापारेण ममेदमिति ज्ञानेन यथेष्टव्यवहाराई क्रियत इति स्वीकार-शब्दार्थः । याजनाध्यापनसाहचर्याच्च प्रतिग्रहस्य स्वत्वमजनयतोऽपि अर्जनरूपता न विरुद्धा, याजनादौ दक्षिणादानादेव च स्वत्वात् ।

पितृनिधनकालीन वा जीवनमेव पुत्रस्यार्जनं भविष्यति । किच भ्रात्रादिधने तन्मरणात् तन्मरणकालीन-जीवनाद्वा भ्रात्रन्तरादेः स्वत्वमकामेनापि वाच्यम् ।

अत 'ऊर्ध्व पितु'श्चेत्यादि (मस्मृ.९।१०४) तत्कालीनस्वत्वज्ञापनार्थं तदानीमेव चेच्छाप्राप्तं विभाग-मनुवदति प्राप्तत्वात् विधानानुपपत्तेः ।

न च नियमः सभवति, 'एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यये'ति (मस्मृ. ९।१११) मनुविरोधात्, दृष्टार्थ-त्वाच्च विभागस्य, न तन्नियमः कालनियमो वा संभवति ।

किंच पितुर्यूपरत इत्यनन्तरकाल एव विभागः स्यात्, न तु परस्तादपि, जातेष्टिवत् जातप्राणवियोगापत्ति-समानस्यात्र विरोधस्याभावात्, पित्रुपरमानन्तरस्य च यावज्जीवपर्यन्तस्य स्वेच्छात एव प्राप्तत्वात् ।

अतो जीवति पितरि सत्यपि पुत्राणां स्वाम्ये विभागनिषेधार्थं मनुवचनं वाच्यं तच्चान्याय्यं अस्वार्थपरत्वापत्तेः ।

अतो जीवतोः पित्रोर्धने पुत्राणां स्वाम्यं नास्ति किन्तूपरतयोरिति ज्ञापनार्थं मन्वादिवचनं एकः शाब्दोऽपरश्चार्थः ।

न चोपरममात्रमेव विवक्षितं किन्तु पतितप्रव्रजितत्वाद्युपलक्षयति स्वत्वविनाशहेतुतासाम्यात् ।

*दा. ३–१८

* सेतु. दागतम् ।

(३) न च दायशब्देन 'यद्धन स्वामिसबन्धादेव निमित्तादन्यस्य स्व भवति तदुच्यत' इति दायादिशब्दनिरूपणार्थं मिताक्षरायामुक्तं युक्तम्। एवं हि पत्युः स्व पतिसबन्धादेव निमित्तात्पत्नीस्व भवतीति तस्यापि दायत्वापत्तिः। ततश्च 'अदायाः स्त्रियः' इति श्रुतिविरोधो दुर्वारः स्यात्।

अस्मन्मते तु विभागार्ह स्व स्वामिसबन्धादेव निमित्तादन्यस्य स्वं भूत दायशब्दार्थ इति, विभागानर्ह पत्नीस्वं, न दायः। तथाहि पतिद्वारागत स्त्रीधनं नित्यं विभागानर्हमेव। लोके दम्पत्योर्धने विभागादर्शनात् 'जायापत्योर्न विभागो विद्यते' इति हारीतस्मरणात्। तेनात्र न मातुः स्वत्वव्यवस्थापको दायविभागः। किंतु यावदर्थमेवार्थहरणमिति मन्तव्यम्। अत एव स्मृत्यन्तरे निर्धनमातृविषयमेवाशहरण न मातृमात्रविषयमिदमिति ज्ञायते। 'जनन्यस्वधना पुत्रैर्विभागेऽश सम हरेत्' इति स्मरणात्। +स्मृच.२६७-२६८

(४) यत्र यस्मिन्व्यवहारपदे, प्रकल्प्यते क्रियते। विर.४५४

(५) [जीमूतवाहनोक्त 'विभाग'व्याख्यानं खण्डयति] यत्र यस्य स्वत्व तत्रैव गुटिकापात इति कथं वचनाभावान्निश्चेतव्यम्। यत्र वा पितुर्निधनानन्तरं तदीयाश्वयोरेकतरमादाय भ्रात्रा यदर्जित तत्रार्जकस्य द्वावंशावपरस्यैकः सर्वसंमतः तत्र यदि प्राचीनधन विभागे गुटिकापातादर्जकेन स एवाश्वः पश्चाल्लब्धः तदा प्रादेशिकस्वत्ववादिमते प्रागर्जकस्यैव सोऽश्व इति तेनार्जितधने कथं भ्रात्रन्तरस्य भागः। यदि चार्जकेतरेण सोऽश्वो लब्धः तदा तेनार्जितधनस्य समभागो युक्तः। एकस्य स्वायासेन अपरस्य अश्वायासेनार्जितत्वात्। वस्तुतस्तु पूर्वस्वामिस्वत्वोपरमे संबन्धाविशेषात् संबन्धिनां सर्वधनप्रसूतस्वत्वस्य गुटिकापातादिना प्रादेशिकस्वत्वव्यवस्थापनं विभागः। एवं कृत्स्नधनगतस्वत्वोत्पादविनाशावपि कल्प्येते, संसृष्टताया प्रादेशिकस्वत्वनाशकृत्स्नधनगतस्वत्वोत्पादाविव। एतच्च 'विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः। पितृव्येणाथवा प्रीत्या स तु संसृष्ट उच्यते॥' इति बृहस्पतिवचने येषामेव हि पितृभ्रातृपितृव्यादीना पितृपितामहोपार्जितद्रव्येण अविभक्तत्वमुत्पत्तितः सभवति, त एव विभक्ताः सन्तः परस्परप्रीत्या पूर्वकृतविभागध्वसेन यत्तव धनं तन्मम यन्मम धनं तत्तवापि इत्येकस्मिन् कार्ये एकगृहिरूपतया स्थिताः संसृष्टाः। न तु अनैवंरूपाणा धनसंसर्गमात्रेण संभूयकारिणा वणिजामपि संसर्गित्व नापि विभक्ताना धनससर्गमात्रेण प्रीतिपूर्वकाभिसंधानं विना इत्यभिदधता दायभागकृतापि स्वहस्तितम्। साधारणस्वत्वादेव हि 'बन्धूनामविभक्तानां भागं नैव प्रदापयेत्' इति कात्यायनवचनं यथाश्रुतं संगच्छते, द्रव्यमात्रे स्वत्वस्यापि संभवात्, अत एव अत्र चौर्य न भवतीति वक्ष्यते। एव च 'साक्षित्वं प्रातिभाव्यं च दानग्रहणमेव च। विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम्॥' इति नारदवचनेन अविभक्तपरस्परदानादिनिषेधोऽपि न्यायादेव संगच्छते। दानात् पूर्वमपि तद्धने प्रतिग्रहीतृस्वत्वसभवात् दानग्रहणयोरसंभवः। एवं साक्षित्वप्रातिभाव्ययोर्ज्ञेयम्। स्वत्वाविशेषादेवाविभक्तद्रव्येण यत् कृत तत्र दृष्टादृष्टे कर्मणि सर्वेषा फलभागित्वम्। तथाच नारदः 'भ्रातृणामविभक्तानामेको धर्मः प्रवर्तते। विभागे सति धर्मोऽपि भवेत्तेषा पृथक् पृथक्॥' व्यासः— 'स्थावरस्य समस्तस्य गोत्रसाधारणस्य च। नैकः कुर्यात् क्रयं दान परस्परमत विना॥' अतः समस्तस्येतिविशेषेण कृत्स्नधनविषयकमेव प्रत्येकस्वत्व प्रतीयते। तस्मात्तुल्यसबन्ध्यन्तरस्वत्वे संबन्धिसकाशात् संक्रान्तधनं तस्यापि ममापीति संबन्धिना प्रतीयते। तद्विमतौ स्वार्थं दानादिकं प्रतिषिद्धम्। अतो न त्वेकदेशगतस्वत्वमिति सिद्धम्। *दात.१६३-१६४

(६) पैत्र्यतनयपदाभ्या स्वत्वीजेन सबद्धस्य प्रत्यासन्नमात्रस्योपलक्षणम्। विभागः साधारणस्वत्वाश्रयस्य व्यवस्थाविशेषादिभिः तदपगमे प्रतिनियतस्वत्वाधानम्। दायो धन स्वामिसंबन्धवशाल्लब्धधनं तस्य भागो विभागः। ×वीमि.२।११४

+ शेषं व्याख्यानं 'एष स्त्रीपुंसयोरुक्तो' इति मनुवचने 'पितर्युपरते' इति देवलवचने च द्रष्टव्यम्।

* शेषं दागतम्। × मिताक्षरावः।

(७) [जीमूतवाहनोक्तदायपदनिरुक्तिं खण्डयति] तन्न सुन्दरम्। निरूढत्वाङ्गीकारे दायददातिशब्दयोर्गौणत्वोपन्यासानर्थक्यात्। सर्वथाऽवयवार्थराहित्ये हि निरूढत्वम्। न च योगरूढत्वम्। अवयवार्थबाधस्य स्वयमेवोपन्यासात्। गौणमवयवार्थं परिकल्प्य तदङ्गीकारस्य निष्प्रयोजनत्वमन्योन्याश्रयत्वमनुभवविरोधो व्याघातश्च। तत्स्वाम्योपरम इति च जन्मनापि स्वत्वस्योपपादयिष्यमाणत्वादव्यापकम्। व्यप्र.४१२

[जीमूतवाहनोक्तं 'पितृस्वत्वापगमनिमित्तं स्वत्वं' इति पक्षं खण्डयति] अत्रोच्यते। यदि पित्रादिस्वत्वापगम एव पुत्रादीना तद्धने स्वत्व, तर्हि निर्दोषे पित्रादौ जीवति तेषा धनसाध्यवैदिककर्मस्वनधिकारप्रसङ्गे 'जातपुत्रः कृष्णकेशोऽग्नीनादधीत' इत्यादिश्रुतिविरोधस्तुल्यः। न च स्वकपोलकल्पितहेत्वाभाससमर्थितस्मृत्यर्थानुरोधेन श्रुतिसंकोचो युक्तः। आहिताग्नाविष्टप्रथमयज्ञे पित्रादौ जीवत्यपि पुत्रादीन् प्रति तत्प्रवृत्त्यविरोधात्। सकलयाज्ञिकशिष्टाना तदनुष्ठानदर्शनाच्च। जातपुत्रकृष्णकेशपदाभ्या वयोऽर्धानतिक्रमस्यैव विवक्षा, न तु तयोरव्यवस्थितयोः स्वरूपेणेति, विरोधाधिकरणे भाष्यवार्तिकादौ स्थितत्वात्। न च यथा पुत्रानुमत्या पितुर्भवन्मते तदधिकारस्तथा मन्मतेऽपि पुत्रादीनामपि पित्राद्यनुमत्येति वाच्यम्। यतो द्वयोरपि मते पितुः स्वत्वस्य धने विद्यमानत्वात् स्वत्यागरूपप्रधाननिष्पत्तिरविहता। भवन्मते तु पुत्रादीना स्वत्वस्यैवाभावादनुमतेश्च स्वत्वाजनकत्वाद्यागादिप्रधाननिष्पत्तिरेव कथम्। वस्तुतस्तु पितुः पुत्रानुमतिरपि नापेक्षिता, स्वातन्त्र्यात्। पित्राद्यनुमतिस्तु पुत्रादेरपेक्षिता पारतन्त्र्यादित्येतावान् विशेषः। यथा स्त्रियाः स्वधनेनापीष्टापूर्त्तादित्रतादौ भर्त्राद्यनुमतिस्तत्पारतन्त्र्यवचनात्। अननुमतौ तु स्वतन्त्रः प्रत्यवायो वैगुण्य वा कर्मणि, न तु प्रधानस्वरूपानिष्पत्तिः। पित्राद्यनुमतेः स्वत्वोत्पादकत्वं चैतदनुरोधात्कल्प्यमानमलौकिकमशास्त्रीयं च। तस्माच्छास्त्रैकसमधिगम्येऽपि स्वत्वे कथंचिज्जन्मनोऽपि रिक्थादिवचनादावधिगमादिपदेन संग्रहः आवश्यकः। श्रुतिस्मृतिपुराणशिष्टाचारसिद्धस्य निर्दोषे जीवत्यपि पित्रादौ पुत्रादियज्ञाद्यनुष्ठानाधिकारस्यानुरोधात्।

वस्तुतस्तु लौकिकमेव स्वत्वं, लोके च जातमात्राणामेव पुत्रादीनां पित्रादिधने स्वाम्यव्यवहारोऽन्येषामपीति (?) साधयिष्यामः। व्यप्र.४१७–४१८

यदप्युक्तं प्रीतिदत्तस्याविभाज्यत्ववचनानि जन्मना स्वत्वाभ्युपगमेऽनुपपन्नानीति। तदपि न। अनुमत्यभिप्रायेण स्थावरप्रीतिदानाभावस्थिरीकरणार्थतयोपपत्तेः। स्वातन्त्र्याद्वा पितुरनुमतिमन्तरेणापि तेन दत्ते स्थावरव्यतिरिक्ते पुत्राणामविभाज्यत्वमुच्यते। अत एव स्थावरे विशेषवचनम्–'स्थावरं द्विपद चैव यद्यपि स्वयमर्जितम्। असभूय सुतान् सर्वान्न दानं न च विक्रयः॥' इति। 'मणिमुक्ताप्रवालानाम्' इत्यादिवचन तु जन्मना स्वत्वपक्ष एवोपपन्नतरम्। न च पितामहोपात्तस्थावरमात्रविषयत्वमुक्त युक्तम्। 'न पिता न पितामह' इति द्वयग्रहणात्। पितामहस्य हि स्वार्जितमपि पुत्रे पौत्रे च सत्यपि न देयमिति वचन जन्मना स्वत्वं गमयति। यथा परमते मणिमुक्ताप्रवालादीना पैतामहानामपि पितुरेव स्वत्व, तत्स्मरणात्। तथास्मन्मतेऽपि पुत्रादीना तत्र जन्मना स्वत्वे साधारणेऽपि पितुर्दानाधिकार इत्यविशेषः। तस्मात्पैतृके पैतामहे च द्रव्ये पुत्रादीना यद्यपि जन्मनैव स्वत्व तथापि पितुरावश्यकेषु धर्मकृत्येषु वाचनिकेषु च प्रसाददानकुटुम्बभरणापद्विमोक्षादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातन्त्र्यमिति ध्येयम्। स्थावरादौ तु स्वार्जिते पित्रादिपरम्पराप्राप्ते च पुत्रादिपारतन्त्र्यं तुल्यमेव। व्यप्र.४१८-४१९

स्वत्वमपि सर्वानुगत लौकिकमेव। न ह्यस्वेन क्रयनिर्वाहो लोके। न चैव 'स्वामी रिक्थ' इत्यादिस्मृतीना लोकसिद्धार्थानुवादकत्वेनानर्थक्यापत्तिरिति वाच्यम्। धर्माधर्मोपयोगितया व्याकरणस्मृतावनादिवाचकत्वतदभावरूपसाधुत्वासाधुत्वविवेकस्येव तस्योपपत्तेः। साधुशब्दाधिकरणे (पूमी. १।३।९) ह्येतदवस्थितम्—यत्संकीर्णव्यवहारिणा लोकानामविविक्तं लौकिकमेव साधुत्व शास्त्रेण विविच्यते। न त्वलौकिकसाधुत्व, साधुभिर्भाषेतेत्यादिविधावन्योन्याश्रयप्रसंगादित्यादि। एवमत्रापि। तथा च नयविवेके भवनाथः 'लोकसिद्धं चार्जनं जन्मादि अत एवानिदंप्रथमलोकधीविषयव्यवस्थितम्। तन्निबन्धनार्था स्मृतिर्व्याकरणादि-

स्मृतिवत्' इति । जन्मादीत्यादिपदेन क्रयादिग्रहणम् । व्याकरणादीत्यादिपदेन संगीतरत्नपरीक्षासामुद्रिकाणा ग्रहणम् । रागादीनामपि हि लोकसिद्धानामेवानभियुक्तान् प्रति विवेकार्थमेव तल्लक्षणकथनमित्युक्त स्मृत्यधिकरणे आचार्यचरणैः (पूमी.१।३।१)। 'स्वामी रिक्थं' इत्यादिवचनं तु प्रागेव व्याख्यातम् । रिक्थशब्दस्तु निष्प्रतिबन्धदायपरः संविभागशब्दश्च सप्रतिबन्धदायपर इति मिताक्षराकृता व्याख्यातम् । स्मृतिचन्द्रिकाकृता तु रिक्थं पित्रादिधने पुत्रादीना स्वामित्वापादकं जन्मनैवेति व्याख्याय संविभागः पित्रादिधने विशेषनिष्ठस्वामित्वसंपादको विभाग इति संविभागशब्दो व्याख्यातः । तन्न । स्वस्य सतो विभागात्स्वत्वहेतुत्वेन तत्प्रतिपादनानौचित्यात् । एकदेशव्यवस्थापनमात्र हि स्वत्वस्य विभागेन क्रियते । मुख्यामुख्यहेतुत्वग्रहणे स्वामिपदे वैरूप्यापत्तेः। व्यप्र.४२०

कुमारिलस्वामिनोऽप्यत्रभवतः स्वत्वं लौकिकमित्येवाभिमतमिति तत्रत्यवार्तिकतन्त्ररत्नाभियोगभाजां मुलभमेव । व्यप्र.४२१

अत्र मिताक्षरायां स्वत्वलौकिकालौकिकत्वविचारप्रयोजनमुक्तम्। व्यप्र.४२२

अत्र मदनरत्नकारो दूषणमाह—स्वत्वस्य शास्त्रैकसमधिगम्यत्वेऽप्यसत्प्रतिग्रहादिनिषेधो न स्वत्वानुत्पादकतां तेषा वदति। किंतु प्रत्यवायमात्रहेतुताम् । इतरथा—'आपद्गतः संप्रगृह्णन् भुञ्जानो वा यतस्ततः । न लिप्यते नैनसा विप्रो ज्वलनार्कसमो हि सः ॥ कुसीदं कृषिवाणिज्यं प्रकुर्वीतास्वयंकृतम्। आपत्काले स्वयं कुर्यान्नैनसा युज्यते द्विजः ॥' इति वचनेनैनसा न युज्यत इत्यभिधानेनापदि प्रत्यवायाभावावगमेऽनापदि प्रत्यवायस्यैवावगमात्। प्रतिषेधप्रतिप्रसवयोः समानविषयत्वौचित्यात् । अत एवानापदि तद्द्रव्यपरित्यागपूर्वक जपतपोरूपं प्रायश्चित्तमेव विदधाति न चौर्यादिवद्राजदण्डमपि किंचिद्वचनमसत्प्रतिग्रहादौ । तेनासत्प्रतिग्रहादेः पूर्वपक्षसिद्धान्तयोर्द्वयोरपि तेषा स्वत्वोत्पादकत्वाविशेषात्तदर्जितस्य पुत्रादिविभाज्यत्वमपि तुल्यमिति नैतत्प्रयोजनं विचारस्यास्य युक्तमिति ।

अत्र वदामः । शास्त्रैकसमधिगम्यस्वत्ववादिनो मते यथा चौर्यादिनिषेधस्य स्वत्वानुत्पादकत्वदण्डप्रयोजकत्वप्रायश्चित्तार्हताप्रयोजकत्वपरता तथाऽसत्प्रतिग्रहादिनिषेधस्याप्यस्ति । यथा चापदुपाधिना—'तथैव सप्तमे भक्ते भक्तानि षडनश्नता । अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ॥ खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते । आख्यातव्य च तत्तस्मै पृच्छते यदि पृच्छति ॥' (मस्मृ. ११।१६-१७) इत्यादिप्रतिप्रसवबलाच्चौर्ये तत्त्रितयाभावस्तथाऽसत्प्रतिग्रहादेरप्यस्तु । अन्यथोभयत्रापि ततः पञ्चमहायज्ञाद्यनिष्पत्तिप्रसंगः । शास्त्रीयत्वे स्वत्वस्याप्रसक्तचौर्यापायकत्वनिषेधः कथमिति चेत्, न । अधिगमान्तर्भावेन कथंचित्तत्प्रसक्तेस्तेनावश्यवक्तव्यत्वात् । अपरथा प्रतिषेधानुपपत्तेः । शास्त्रप्राप्तप्रतिषेधे च विकल्पापत्तिभिया 'दीक्षितो न जुहोति' इत्यादिवद्भाष्यकारमतेन पर्युदासत्वं, सामान्यविशेषभावेन विशेषनिषेधसामान्यविध्योर्बाध्यबाधकभावोऽपि वा मतान्तरेणेत्यपि स्वीकार्यमेवागत्या प्रतिग्रहादेस्तु प्रसक्तिर्ब्राह्मणादेरस्त्येवेत्यापत्तदभावोपाधिकौ प्रतिप्रसवप्रतिषेधावप्युपपन्नतरौ तर्ह्यसत्प्रतिग्रहस्वयकृतवाणिज्यादावनापदि ब्राह्मणस्य राजदण्डोऽपि स्यादिति चेत्, न । इष्टापत्तेः । न हि स्वधर्मत्यागिनो राजदण्डाभावः कस्यापि संमतः । स च क्वचित् सामान्यरूपेणोक्त एव गृह्यते क्वचिद्विशेषाम्नात इत्यन्यदेतत् । अत एवालौकिकस्वत्ववादिन इदमप्यपरं दूषणम् । चौर्यादिनिषेधस्य त्रितयप्रयोजकतागौरवं पर्युदासत्वादिस्वीकारगौरवं च। लौकिकस्वत्ववादिनस्तु दण्डप्रत्यवायमात्रपरत्वम् । तेषा स्वत्वानुपायत्वस्य लोकसिद्धत्वादिति रागप्राप्तनिषेधे पर्युदासादिस्वीकारानापत्तिश्रेति लाघवमिति ।

तस्माच्छास्त्रैकसमधिगम्ये स्वत्वेऽसत्प्रतिग्रहादेस्तदनुपायत्वात्तदर्जिते पितुः स्वत्वाभावः स्यादेवेत्याद्य चौर्यार्जितपितृधनविभागवदसत्प्रतिग्रहार्जितस्याप्यविभाज्यत्वम् । लौकिके तु तस्मिन् लोके तेषामपि तदुपायत्वसिद्धं तद्विभाज्यत्वमिति मिताक्षरोक्तं साध्वेव प्रयोजनम् । इदं चोपलक्षणम् । पूर्वपक्षे चौर्यार्जितपितृधनस्वीकारे यथा पुत्रादीनामपि दण्डः प्रायश्चितं भवत्येव तथाऽसत्प्रतिग्रहार्जिततद्ग्रहणेऽपीत्यपि प्रयो-

जनमवसेयम्। पितुरेव प्रायश्चित्तमित्यभिधानेन सूचितत्वात्। व्यप्र.४२३।४२४

[जीमूतवाहनं पुनर्निराकरोति] यदपि दृष्टश्च लोकेऽपीत्यादि तदप्यापातसुन्दरम्। न हि प्रतिग्रहीतर्यस्वीकुर्वत्यपि तस्य स्वत्वमुत्पद्यते। पात्रविशेषोद्देशेन त्यागे तेनास्वीकृतेऽपि तत्स्वत्वोत्पत्तौ परस्मै तस्य प्रतिपादनासंभवप्रसङ्गात्।

यदपि स्वीकर्तुरेव दातृत्वापत्तेरिति तदप्ययुक्तम्। परस्वत्वापत्तिफलकव्यापारस्य दानत्वात्सप्रदानस्वीकारानुकूलानुमानादिव्यापारस्य दानपदार्थत्वात्तत्फलोपहितता तु तस्य संप्रदानस्वीकारमन्तरेण न संभवतीति संप्रदानव्यापारस्तद्घटकः। न तु स एव दानशब्दार्थः।

यदपि यथा हीत्यादि, तदपि न। यजमानकर्तृकाग्निहोत्रहोमादौ तदविरोधात्। यत्रापि दर्शपूर्णमासादौ त्यागमात्रं यजमानेन क्रियते चतुरवत्तस्य प्रक्षेपोऽध्वर्यादिभिस्तत्रापि विविक्तकर्तृकत्वाद्यथास्व तद्व्यवहाराविरोधात्। अत्यक्तस्य प्रक्षेपे परं होमशब्दवाच्यता नास्ति। स तु त्यागः स्वकर्तृकोऽन्यकर्तृको वाऽवच्छेदकोऽस्तु। न तावता कश्चिद्दोषः। अत एव यागस्य न प्रक्षेपापेक्ष आत्मलाभो होमस्य तु तदपेक्ष एव। दानस्य न प्रतिग्रहीतृव्यापारसापेक्षतैव। तदभावे दानपदार्थानिष्पत्तेः।

यच्च किञ्चेत्यादि, तदपि यत्किञ्चित्। उत्सर्गस्यैव तत्र विधानात् न तु दानस्य। अत एव 'दाता तत्फलमाप्नोति' इत्युक्तम्। अन्यथा तस्यानुवादत्वापत्तेः। दानत्वे हि तस्य तत्फलाभावाप्रसक्तेस्तत्फलमाप्नोतीति व्यर्थमेव स्यात्। अतस्तत्र जलप्रक्षेपरूपः पात्रोद्देश्यक उत्सर्ग एव ददातिना विवक्षितो दानत्वनिष्पत्तिस्तु तस्य संप्रदानकर्तृकस्वीकारे सत्येवेति परमार्थः। अत एवोत्सृष्टे इत्येव तत्र संकल्पवाक्य शिष्टाना न तु दास्ये इति संप्रदद इति वा। अतः प्रतिग्रहादेव दानस्थलेऽपि संप्रदानस्य स्वत्वमिति प्रतिग्रहस्यार्जनरूपत्वमविरुद्धम्। स्वत्वजनको हि व्यापारोऽर्जनशब्दार्थः। अत एवाह प्रभाकरः—'प्रलपितमिदं केनापि अर्जन स्वत्वं नापादयति इति विप्रतिषिद्धम्' इति। अयं ग्रन्थः प्रागेव विवृतः।

किञ्च। प्रतिग्रहस्य ममेदमिति ज्ञानरूपस्य दातृव्यापारमात्रोत्पन्नस्वत्वव्यवहारार्थतामात्रसंपादकतायामर्जनशब्दस्य तत्र गौणता स्यात्। अन्यस्मै तत्प्रतिपादनानुपपत्तिश्च पूर्वमुक्ता। तदस्वीकारे प्रागुत्पन्नतत्स्वत्वनाशश्च कल्प्यः स्यात्। न च दातृव्यापारात् तत्स्वत्वनाशात्साधारणसंप्रदानस्वत्वोत्पत्तिरवश्याभ्युपेया त्वयापि, अपरथैतत्स्वत्वनाशेऽन्यस्य च स्वत्वानुत्पत्तेर्मध्यकस्य तस्य परिग्रहादिनाऽन्यस्य यस्य कस्यापि वनगतास्वामिकतृणकाष्ठादाविव तत्र स्वत्वं स्यात्परिपालनाप्रसक्तिश्च। तथा मन्मतेऽपि पात्रविशेषोद्देश्यकत्यागे पात्रविशेषस्योत्पन्नमपि स्वत्वं तदस्वीकारे नश्यत्यन्यस्य स्वीकारात्तस्योत्पद्यत इति न कोऽपि विरोधः साधारणस्वत्वविनाशात् साधारणास्वत्वोत्पत्तिवदिति वाच्यम्। यतस्तत्र साधारणस्वत्वव्यवहाराभावेन तदुत्पत्तिरप्रामाणिकी नैव स्वीक्रियते। गौरवाच्च। किन्तु दातुरेव यथेष्टविनियोगार्हस्वत्वापगमेऽपि परस्वत्वापत्तिफलाभावे दानशब्दार्थानिष्पत्तेर्विधिशिरस्कफलार्थिनः प्रतिपादनावधिपरिपालनीयत्वरूपं स्वत्वमस्त्येव। यथा हुते हविषि भस्मसाद्भावावधि अस्पृश्यस्पर्शादिनिषेधाश्रयण निमित्तदोषश्रवणानुरोधेन। तथा चान्यस्वत्वानुत्पत्तावपि न मध्यकत्वपरिग्रहाद्यनिवारणादिदोषः। शिष्टाचारोऽप्युभयत्र परिपालनरूपस्तन्मूलक एव। न चोत्सर्गमात्रस्य तत्र त्वया विध्यभ्युपगमात्परस्वत्वापाद एव न स्यादिति वाच्यम्। तादृशोत्सर्गस्यैव विधितात्पर्यविषयत्वात्। होमस्थलेऽप्यन्यथा भस्मसाद्भावानादरापत्तेः।

यच्च याजनाध्यापनसाहचर्यात्प्रतिग्रहस्यापि स्वत्वार्जनकत्वेऽपि गौणमेवार्जनत्वमिति। तदप्यबोधात्। तत्र हि ये ये द्विजप्रभृतीना भागास्तेषा तेषां तेभ्यो भृतिरूपेणैव दक्षिणाकाले प्रतिपादनम्। परिक्रयव्यवहारोऽप्यत एव 'स्वामी कर्मपरिक्रय' इति जैमिनिसूत्रादौ विस्तरेण निर्णीत एव। विस्तरस्तु तत्रैव द्रष्टव्यः। कर्मकरानतिजनिका भृतिरेव हि परिक्रयः। एवमध्यापनेऽपि शिष्योऽध्यापकायाध्यापनभृतिमेव तत्संतोषजननीमध्ययनान्तेऽर्पयति। नियतभृतिकरणे तु भृतकाध्यापनमुपपातकम्। अत एव याजनाध्यापनयोः

प्रतिग्रहादृभृतिशब्दवाच्यनिवेशाच्च पृथगभिधानमुभयमिश्रत्वात्। तेन तयोरपि मुख्यमेवार्जनत्वम्। दक्षिणात्वव्यवहारोऽप्यत एव ऋत्विगध्यापकदेये।

यदपि 'भ्रात्रादिधने भ्रात्रन्तरादिस्वत्वोत्पादकत्वं तन्निधनस्य तत्कालीनभ्रात्रन्तरादिजीवनस्य वा क्लृप्तमिति पुत्रादावपि पित्रादिनिधन तत्कालीनं जीवनं वा स्वत्वोत्पादकमस्तु न त्वक्लृप्त पुत्रादि जन्मनैवेत्युक्तम्। तदपि जन्मनोऽपि स्वत्वोत्पादकत्वस्यावश्यकत्वोपपादनादेव परिहृतम्।

यच्चोक्तम्—'ऊर्ध्वं पितुश्च' इत्यादिमनुवचनमपि जन्मनः स्वत्वापादकत्वे न घटते। प्राग्विभागनिषेधार्थत्वे तस्यास्वार्थपरत्वापत्तेः। विभागस्य दृष्टार्थत्वेन तद्विधानकालविधानयोरसंभवात्। विभागस्य पक्षप्राप्तस्य नियमार्थत्वसहवासविधिविरोधाद्यापत्तेः। तस्मात्पितरि सति मातरि च सत्या तद्धनस्वाम्याभावः। उपरतयोरेव तयोः पुत्रादेस्तद्धनस्वाम्यमिति प्रतिपादनार्थमेव तद्वाच्यमिति।

तदत्युक्तानाभिधानम्। अस्वार्थविधानापत्तेस्तुल्यत्वात्। प्रागस्वातन्त्र्येण कालविधिपरत्वे बाधकाभावात्। इच्छाप्राप्तकालानुवादेऽपि व्यवहारशास्त्रत्वेनाविरोधात्। एतेन जातेष्टेवच्छेपिविरोधादिनिमित्तानन्तर्यबाधकाभावात्पित्रुपरमानन्तरक्षण एव विभागः प्रसज्येतेत्यप्यपास्तम्। कालविधानेन पित्रुपरमस्य निमित्तत्वाबोधनाच्च। अन्यथा निमित्ते सति नैमित्तिकस्यावश्यकत्वात्पित्रोरूर्ध्वं विभागकरणे प्रत्यवायोऽपि प्रसज्येत। पतितत्वपारिव्राज्ययोः पितृस्वत्वनाशोऽप्यधिकः। जन्मना स्वत्वं तुल्यमेव। पातित्ये तु प्रायश्चित्तानाचरण एव स्वत्वनाशो विभागानर्हता च। अन्यथा द्रव्यसाध्यं प्रायश्चित्तमपि पित्रोः स्वद्रव्येण न स्यात्। अत एव 'मातुर्निवृत्ते रजसि' इत्याद्यपि कालविधिपरमेव। न तु पातित्यादिवत्तत्र स्वत्वाभावः। स तु लोकत एव विभागनिषेधाच्च भ्रात्रादाविवेत्यादि वक्ष्यते। किञ्च। तदेव पितृस्वत्वापगम एकः कालः अपरश्चानपगत एव पितृस्वाम्ये पितुरिच्छयेति कालद्वयमित्युक्त्वा मध्ये मिताक्षरोक्तं विभागकालत्रयं दूषयित्वा तस्मात्पतितत्वनिस्पृहत्वोपरमैः पितृस्वत्वापगम एकः कालः अपरश्च सति स्वत्वे तदिच्छात इति कालद्वयमेव युक्तमित्युपसंहरता जीमूतवाहनेनैव पितृस्वत्वानपगमेऽपि पुत्राणां विभागोऽङ्गीकृतस्तत्र पुत्राणा पितृधने स्वत्वोत्पादः कथम्। कथञ्च जीवतोः पित्रोरस्वाम्यप्रतिपादकवचनैः सह न विरोधः। अस्वस्य विभागासंभवात्कथं तर्हि विभागः। पितृस्वत्वापगम एवोर्ध्वं पितुश्चेत्यनेन विवक्षितोऽत एव मृतपदं परित्यज्योर्ध्वमित्युक्तम्। पितृस्वत्वापगमोर्ध्वमित्यर्थः। पितृस्वत्वापगमश्च तन्निधनादिवत्तस्य पतितत्वनिस्पृहत्वाभ्यामपीत्यादि स्वग्रन्थे पूर्वापरविरोधश्च न कथम्। अत्राप्युपरतस्पृहत्वादिना पुत्राणा स्वत्व पितृधने भवतीति ज्ञापनादयमेकः काल इति च यदुक्तम्। तत्रापुपरतस्पृहत्वादिनेत्यनेन पितृस्वत्वापगम एव यदि विवक्षितस्तर्ह्यनपगते पितृस्वत्वे तदिच्छाऽपरः काल इत्यभिधानविरुद्धम्। पितृस्वत्वापगमकालीनपुत्रादिजीवनस्यैवार्जनस्य तदीयस्य स्वीकारात्पितृस्वत्वे सति पुत्राणा तद्धने स्वत्वस्वीकारः कथम्। न ह्यनाश्रमित्वमातृरजोनिवृत्तिमात्रेण पितुः स्वत्वापगमः। पूर्वद्रव्यस्वामिसंबन्धाधीन तत्स्वाम्योपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्द इति स्वोक्तदायशब्दार्थाभावात्पितृस्वत्वानपगमे यत्र विभागस्तत्र दायशब्दप्रयोगोऽपि दुःस्थ इत्यादि बहुव्याकुली स्यात्। जन्मना स्वत्वस्वीकारे तु सर्वमनाकुलमित्यादि सुधीभिरुन्नेयम्। अत एव मिताक्षरादौ पूर्वस्वामिसंबन्धाधीन यद्धने स्वत्वमन्यस्य तदेव दायशब्दवाच्यमित्युक्त न तु पूर्वस्वामिस्वाम्योपरमोऽपि तत्र प्रवेशितः। तत्सिद्ध द्विविधो दाय इति।

*व्यप्र.४२६–४२९

(८) तत्र स्वस्य पृथक्करण विभागः न च पुत्रस्य पितुर्द्रव्ये स्वत्वाभावात् पुत्रविभागे अव्याप्तिः पुत्रपौत्रादीनामुत्पत्यैव पित्रादिद्रव्ये स्वत्वोत्पत्या तत्सत्वात् लोके तथैव व्यवहारात्। एवं च स्थावरस्यैव सर्वस्य न पिता न पितामह इति पौत्रसत्वेऽपि पितृपितामहयोः स्वातन्त्र्यनिषेध उपपद्यत इति मिताक्षराकारः। अन्ये तु स्वत्वोत्पत्तिजनकपृथक्करणं विभागः। पित्रादिद्रव्ये पुत्रस्य विभागात्पूर्वं स्वत्वाभावेन विभागादेव तदुत्पत्तेः स्वत्वो-

* मितावद्भावः।

त्पत्तिजनकत्वेन 'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेष्वि'त्यादिस्मृतिषु स्वत्वजनकत्वेनाश्रवणात्।

व्यउ.१४२

(९) अथ दायः। असंसृष्ट विभजनीय धनं दायः। लाभाद्यर्थसंसृष्टधनव्यावृत्तयेऽसंसृष्टमिति, वणिग्भिरेकीकृत्य विभज्यमाने दायभागशब्दाप्रयोगात्। एवं वक्ष्यमाणपारिभाषिकसंसर्गवतोऽपि निवृत्तिः। अय दायो द्वेधा। सप्रतिबन्धोऽप्रतिबन्धश्च। यत्र धनस्वामिनस्तत्पुत्रादेश्च जीवन प्रतिबन्धकं स सप्रतिबन्धः। यथा पितृव्यादिधनम्। यत्र स्वामिसंबन्धादेव पुत्रादेर्धनार्जनोपायान्तरनिरपेक्षत्वात्स्वत्वं भवति सोऽप्रतिबन्धो यथा पितृधनम्। मदनस्तु पित्र्यादेरित्येव पपाठ। इदं च दायभागस्वरूपमुक्तम्। द्रव्यसामान्याभावेऽपि 'त्वत्तोऽहं विभक्त' इति व्यवस्थामात्रेणापि भवत्येव विभागः। बुद्धिविशेषमात्रमेव हि विभागः। तस्यैवाभिव्यक्तिकेय व्यवस्था। ×व्यम.४१

(१०) पित्रोरिदं पित्र्यम्। इद स्वत्वनिमित्तसबन्धिपरम्। पुत्रपद पौत्रभ्रातृतत्पुत्रादिपरम्। दायो विभागार्हद्रव्यम्। अन्यदीयं द्रव्यं स्वामिसंबन्धिगामीत्यर्थः।

विता.२७७

बृहस्पतिः

स्थावररूपार्थागमः

विद्यया क्रयबन्धेन शौर्यभार्यान्वयान्वितम्।
सपिण्डस्याप्रजस्यांशः स्थावरं सप्रधाऽऽप्यते*॥

बन्धः आधिः। सोऽपि क्वचित्स्वत्वनिमित्तं भवतीति वक्ष्यामः।

स्मृच.७०

दायपदार्थः

दैदाति दीयते पित्रा पुत्रेभ्यः स्वस्य यद्धनम्।
तद्दायं.....॥

पिता पुत्रेभ्यो यद्धनं ददातीति कर्त्रन्तपितृशब्दोऽध्याहर्तव्यः। एव दायशब्दः कर्मण्येव व्युत्पन्न इति। अनेन पितापुत्रसमुदायविषयकं द्रव्यं दायमिति सामान्यलक्षणम्।

सवि.३४४

विभागप्राशस्त्यम्

एकपाकेन वसतां पितृदेवद्विजार्चनम्।
एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे॥

(१) यदा त्वप्रगल्भतया ज्येष्ठेन सहाविभक्तधनाः कनीयासो भवन्ति, तदा तेषामावश्यक वैश्वदेवाद्यपि न विभज्यते।

अप.२।११४

(२) नन्वग्निहोत्रादिजन्योऽपि धर्मो विभक्तानां वर्धते, नाविभक्तानां स्वत्वाभावेन, विभक्तानां स्वसाध्याग्निहोत्रादिधर्मोऽपि विभागपक्षोत्कृष्टत्वे हेतुतया वक्तव्यः। उक्त च तथैव संग्रहकारेण 'क्रियते स्वं विभागेन पुत्राणा पैतृकं धनम्। स्वत्वे सति प्रवर्तन्ते तस्माद्धर्म्याः पृथक् क्रियाः॥' प्रवर्तन्ते स्वसाध्याग्निहोत्रादय इति शेषः। अत्रोच्यते। पैतृक धनं विभागेन पुत्राणा स्व क्रियत इत्येतदनुपपन्नं, जननेनैव स्वं क्रियत इति प्रागेव प्रतिपादितत्वात्। ततश्चाविभक्तानां स्वत्वमस्तीति स्वसाध्याग्निहोत्रादिजन्यो धर्मः सपद्यत एवेति न कश्चिद्विभागपक्षस्याविभागपक्षाद्विशेष इति पूर्वोक्तप्रकारेणैव विभागपक्षे धर्मवृद्धिर्गौतमादिभिरुक्तेति दिक्।

*स्मृच.२५९

(३) एकपाकेनेत्यत्राविभागे सतीति विवक्षितम्।

विर.४५९

(४) स्वासाधारणीभूतेन विभक्तधनेन भाग्यन्तरनैरपेक्ष्यस्वमात्रेच्छया इज्याऽनुष्ठानविभागे धर्मवृद्धिः। ['एवं सह वसेयुरि'ति मनुवचनस्य मेधातिथिर्द्रष्टव्यः। पृ. ११२८]

विचि.१९५

× मितावद्भावः।

* व्याख्यानान्तराणि स्थलादिनिर्देशश्च व्यवहारमातृकायां मुक्तिप्रकरणे (पृ.४११) द्रष्टव्यः।

* सवि. स्मृचगतम्। शेषं (सवि. ४४२) 'विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः।' इत्यादियाज्ञवल्क्यवचने द्रष्टव्यम्। व्यप्र. स्मृचगतम्।

(१) **अप.२।११४; व्यक.१४०; गौमि.२८।४; स्मृच.२५९ : ३१०; मसु.९।१११; विर.४५९; रत्न.१३९; स्मृसा.५४; पमा.४४८; विचि.१९५; व्यनि.; स्मृचि.२९; नृप्र.३४; सवि.३५२,४४२; मच.९।१११; चन्द्र.६९(=); व्यप्र.४१७,५६१; विता.३११ पाकेन (पाके नि); समु.१२७; विच.३८,१२.**

व्यासः

विभागप्राशस्त्यम्

भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते ।
तदभावे विभक्तानां धर्मस्तेषां विवर्धते*॥

देवलः

विभागप्राशस्त्यम्

[1]एकपाकेन वसतामेकं देवार्चनं गृहे ।
वैश्वदेवं तथैवैकं विभक्तानां गृहे गृहे ॥

निघण्टुकारः

दायपदार्थ

[2]विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिणः ॥

(१) विभागार्हं पित्रादिद्वारागते द्रव्ये वृद्धा दायशब्दमाहुरित्यर्थः । स्मृच.२५५

(२) अत्रापि पितृपद सबन्धिमात्रोपलक्षणमन्यत्रापि दायशब्दप्रयोगात् । विभक्तव्यं विभागार्हमित्यर्थः । अन्यथैकपुत्रादिस्वामिके विभागाभावाद्दायशब्दवाच्यता न स्यात् । व्यप्र.४११

स्मृत्यन्तरम्

भूमिरूपार्थागमः

स्वग्रामज्ञातिसामन्तदायादानुमतेन च ।
हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी×॥

संग्रहकारः (स्मृतिसंग्रहः)

दायपदार्थः । वर्णविशेषानुसारेण अर्थागमः । स्वाम्यस्वत्वनिरूपणम् । विभागस्वत्वयोः सबन्धः । विभागप्राशस्त्यम् ।

[3]पितृद्वारागतं द्रव्यं मातृद्वारागतं च यत् ।
कथितं दायशब्देन तद्विभागोऽधुनोच्यते÷॥
[4]यस्मिन्काले यया भङ्ग्या यैरेव क्रियतेऽपि च ।
यादृशस्य च दायस्य यथाशास्त्रं प्रदर्श्यते×॥
[5]वर्तते यस्य यद्धस्ते तस्य स्वामी स एव न ।
अन्यस्वमन्यहस्तेषु चौर्याद्यैः किं न दृश्यते ॥
[6]तस्माच्छास्त्रत एव स्यात्स्वाम्यं नानुभवादपि+॥
[7]अस्यापहृतमेतेन न युक्तं वक्तुमन्यथा ॥
[8]विहितोऽर्थागमः शास्त्रे यथावर्णं पृथक् पृथक् ।
प्रतिग्रहाजिवाणिज्यशुश्रूषाद्या यथाक्रमम्=॥
[9]न च स्वमुच्यते तद् यत् स्वेच्छया विनियुज्यते ।
विनियोगोऽत्र सर्वस्य शास्त्रेणैव नियम्यते=॥
[10]क्रियते स्वं विभागेन पुत्राणां पैतृकं धनम् ।
स्वत्वे सति प्रवर्तन्ते तस्माद्धर्म्याः पृथक् क्रियाः*॥

---

* व्याख्यासंग्रहः स्थलादिनिर्देशश्च अस्मिन्नेव प्रकरणे भ्रातॄणां सहवासविधिविषयेऽग्रे द्रष्टव्यः ।

× व्याख्यासंग्रहः स्थलादिनिर्देशश्च क्रयविक्रयानुशये (पृ.९०१) द्रष्टव्यः ।

(१) **समु.**१४५ मयूखे शाकलः.

(२) **स्मृच.**२५५; **सवि.**३४४ विभक्तव्य पितृद्रव्य (पितृद्रव्य विभक्तव्य) स्मृतिः; **दानि.**१ स्मृत्यन्तरम्; **व्यप्र.**४११; **विता.**२७७ विभक्तव्यं (विभागार्ह).

(३) **स्मृच.**२५५; **पमा.**४७८; **रत्न.**१३५; **सवि.**३४४,३६३,३८७; **दानि.**१; **व्यम.**४१; **विता.**२७७ मदनरत्ने, स्मृतिसंग्रहेऽपि; **समु.**१२६ मनुः.

÷ स्मृच.व्याख्यान 'एष स्त्रीपुंसयोरुक्तः' इति मनुवचने (पृ.११२८) द्रष्टव्यम् । सवि.व्याख्यानं 'स्त्रीधनं दुहितॄणां' इति गौतमवचने द्रष्टव्यम् ।

× स्मृच. व्याख्यानं 'ऊर्ध्वं पितुश्च मातुश्च' इति मनुवचने द्रष्टव्यम् । सवि. स्मृचगतम् ।

+ स्मृच. व्याख्यानं 'पितर्युपरते पुत्रा' इति देवलवचने द्रष्टव्यम् । पमा , सवि., व्यप्र. स्मृचवद्भावः ।

= स्मृच. व्याख्यान 'पितर्युपरते पुत्रा' इति देवलवचने द्रष्टव्यम् ।

* स्मृच. व्याख्यान 'एकपाकेन वसतां' इति बृहस्पतिवचने (पृ.११४१) द्रष्टव्यम् । व्यप्र. स्मृचवद्भावः ।

(१) **स्मृच.**२५५; **सवि.**३४९ (=) च दाय (यदा य) प्रदर्श्यं (प्रदृश्य); **समु.**१२६.

(२) **स्मृच.**२५६ स्तेषु (स्ते तु); **पमा.**४८१ एव न (एव तु) दृश्य (वर्त); **रत्न.**१३६; **सवि.**४०४ वैः (वेः) दृश्य (वर्त); **व्यप्र.**४१६; **समु.**१२६ दृश्य (वर्त).

(३) **स्मृच.**२५६; **सवि.**४०४; **व्यप्र.**४१६; **समु.**१२६.

(४) **स्मृच.**२५७; **रत्न.**१३६; **व्यप्र.**४१६; **समु.**१२६ प्रथमपादः.

(५) **स्मृच.**२५७; **रत्न.**१३६ हितो (दितो) पू.; **व्यप्र.**४१६ हितो (दितो) यथावर्णं (तथाऽवर्णी) पू.

(६) **स्मृच.**२५७; **रत्न.**१३६ ऽत्र (ऽस्य); **व्यप्र.**४१६ रत्नवत्; **समु.**१२६ ऽत्र (ऽपि) प्रथमपाद विना.

(७) **स्मृच.**२५९; **व्यप्र.**४३७; **समु.**१२७ र्म्याः (र्म्या) याः (या).

शास्त्रे 'स्वामी रिक्थक्रये'त्यादौ साधारणासाधारणरूपोऽर्थागमः स्वत्वोपायः पृथक् पृथग्वर्णितस्तथा विदितो, लौकिकत्वे तच्छास्त्रानर्थक्य स्यादिति विदित इत्यर्थः। अन्यत् स्पष्टम्। यथावर्णमिति स्मृतिचन्द्रिकाया पाठः। पूर्वपाठस्तु मदनरत्नलिखितः।

व्यप्र.४१६

पैतृकद्रव्यविभागस्तत्कालश्च

पुत्रकर्तृकपैतृकद्रव्यविभागकालाः। जीवति पितरि पुत्राणां स्वाम्यास्वाम्यस्वातन्त्र्यास्वातन्त्र्यविचारः।

वेदाः

भ्रातरो भागहराः

[1]किमु श्रेष्ठः किं यविष्ठो न आजगन्किमीयते दूत्यं कद्यदूचिम। न निन्दिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद् भूतिमूदिम॥

(१) भ्राता भरतेर्हरतिकर्मणो, हरते भागं, भर्तव्यो भवतीति वा। नि.४।२६

(२) ऋभवो नाम सुधन्वनस्त्रयः पुत्रा ऋभुर्विभ्वा वाज इति। ते च मनुष्याः सन्तः सुकर्मणा देवत्वं प्राप्य कदाचित् कर्मकाले सोमपानाय प्रवृत्ताः। तान् प्रति देवैः प्रेरितोऽग्निः परस्परसमानरूपान् दृष्ट्वा स्वयमपि तदाकारं धृत्वा तेषु मध्ये स्वयं चतुर्थः सन् पातु प्रवृत्तः। ते च ऋभवः आगत त समानरूपमवलोक्य विवेक्तुमसमर्थाः परस्परमेवं संदिहते। अयं किमु श्रेष्ठः कि नु खलु अस्मत्तोऽय प्रशस्यतमो वयसा श्रेष्ठः सोऽस्मान् आजगन्। आगमत् प्राप्तः। कि यविष्ठः कि वा अस्माक युवतमोऽस्मत्तः कनीयान् आजगन् प्राप्तः। किं वा दूत्य दूतकर्म देवसंबन्धि ईयते गच्छति। देवैः प्रेरितः दूतोऽस्मानागतो वा। 'दूतस्य भागकर्मणी' इति यत्। यदूचिम यदेतत् ब्रूमः तत् कत्। कथ निश्चेतव्यमित्यर्थः। वयं तावत् त्रय एव इदानीं चत्वारः समानरूपा वर्तामहे तस्मादयमधिकः किमु श्रेष्ठ इति विचिकित्सा। एवं संदिह्य कथचित् स्वतोऽन्य निश्चित्य त प्रति आपरोक्ष्येण ब्रुवते। हे अग्ने भ्रातः भ्रातृवद्भागार्ह। भ्राता यथा बलात् स्वकीयभागं स्वीकरोति तद्वत् समानरूपमाश्रित्य बलात् चमसपानाय प्रवृत्त इति भ्रातरित्युक्तम्। हे तादृशाग्ने चमसं न निन्दिम। अधिकः समागत इति पानमकृत्वा चमसं न दूषयामः। अदूष्यत्वे कारणमाह। यः चमसः महाकुलः महाकुलोत्पन्नः त्वष्ट्रा निर्मितत्वात्। वक्ष्यति च 'त्वष्टा ग्नास्वन्तर्न्यानजे' (ऋस.१।१६१।४) इति। अतः कारणात् द्रुणः। दारुविकारचमसस्य भूति प्राप्तिं ऊदिम। ब्रूमः। ऋसा.

दायादा अनेके भवन्ति

[2]वरुणं देवा अब्रुवन् त्वयाऽऽशभुवा सोमꣳ राजानꣳ हनामेति। राज्ञा राजानमꣳशभुवा घ्नन्ति वैश्येन वैश्यꣳ शूद्रेण शूद्रम्॥

अश द्रव्यभागं भजते प्राप्नोति इति अंशभूर्दायादः। तद्यथा रामो विभीषणेनाशभुवा (रावणदायादेन) सहितो रावण जघान। तैसा.

[3]न ब्राह्मणो हिंसितव्योऽग्निः प्रियतनोरिव। सोमो ह्यस्य दायाद इन्द्रो अस्याभिशस्तिपाः॥ अग्निर्वै नः पदवायः सोमो दायाद उच्यते। हन्ताभिशस्तेरिन्द्रस्तथा तद् वेधसो विदुः॥ अनागसस्त्वा वयम्। इन्द्रेण प्रेषिता उप। वायुष्टे अस्त्वꣳशभूः। मित्रस्ते अस्त्वꣳशभूः। वरुणस्ते अस्त्वꣳशभूः।

भ्रातॄणां भूमिविभागः

[4]देवाश्च वाऽअसुराश्च। उभये प्राजापत्याः पस्पृधिरे ततो देवा अनुव्यमिवासुरथह्यासुरा मेनिरेऽस्माकमेवेदं खलु भुवनमिति। ते होचुः हन्तेमां पृथिवीं विभजामहै तां विभज्योपजीवा-

(१) ऋसं.१।१६१।१; ऐब्रा.५।१३।११; कौब्रा.१९।९, २१।४,२३।८,२५।९; शाश्रौ.१८।२२।६; आश्रौ.८।८।८.

(१) तैसं.६।४।८।२,३. (२) असं.५।१८।६,१४.
(३) तैब्रा.३।७।९।१; आपश्रौ.१२।१०।२.
(४) शब्रा.१।२।३।१-४.

मेति तामौक्ष्णैश्चर्मभिः पश्चात्प्राञ्चो विभजमाना अभीयुः । तद्वै देवाः शुश्रुवुः । विभजन्ते ह वाऽइमामसुराः पृथिवीं प्रेत तदेष्यामो यत्रेमामसुरा विभजन्ते के ततः स्याम यदस्यै न भजेमहीति ते यज्ञमेव विष्णुं पुरस्कृत्येयुः । ते होचुः । अनु नोऽस्यां पृथिव्यामा भजता स्त्वेव नोऽप्यस्यां भाग इति ते ह्यासुरा असूयन्त इवोचुर्यावदेवैष विष्णुरभिशेते तावद्वो दद्म इति ।

[1]तं छन्दोभिरभितः परिगृह्य । अग्निं पुरस्तात् समाधाय तेनार्चन्तः श्राम्यन्तश्चेरुस्तेनेमाꣳ सर्वां पृथिवीꣳ समविन्दन्त तद्यदेनेनेमाꣳ सर्वाꣳ समविन्दन्त तस्माद्वेदिर्नाम तस्मादाहुर्यावती वेदिस्तावती पृथिवीत्येतया हीमाꣳ सर्वाꣳ समविन्दन्तैवꣳ ह वाऽइमाꣳ सर्वाꣳ सपत्नानाꣳ संवृङ्क्ते निर्भजत्यस्यै सपत्नान्य एवमेतद्वेद ।

भ्रातृणां पैतृकदायहरत्वम्

[2]देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुरेतावेवार्धमासौ य एवापूर्यते तं देवा उपायन्योऽपक्षीयते तमसुराः ।

[3]देवाश्च वाऽअसुराश्चोभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुर्मन एव देवा उपायन्वाचमसुरा यज्ञमेव तद्देवा उपायन्वाचमसुरा अमूमेव देवा उपायन्निमामसुराः ।

[4]देवाश्चासुराश्चोभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुर्वाचमेव सत्यानृते सत्यं चैवानृतं च तऽउभयऽएव सत्यमवदन्नुभयेऽनृतं ते ह सदृशं वदन्तः सदृशा एवासुः ।

[5]देवाश्च च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरऽएतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माकमयं भविष्यत्यस्माकमयं भविष्यतीति । ततो देवाः । सर्वं यज्ञꣳ संवृज्याथ यत्पापिष्ठं यज्ञस्य भागधेयमासीत्तेनैनान्निरभजन्नस्ना पशोः फलीकरणैर्हविर्यज्ञात्सुनिर्भक्ता असन्नित्येष वै सुनिर्भक्तो यं भागिनं निर्भजन्त्यथ यमभागं निर्भजन्त्यैव स तावच्छंसतऽउत हि वशे लब्ध्वाह किं मा बभक्थेति ।

यावद्वै भागिनं स्वेन भागधेयेन न निर्भजन्त्यनिर्भक्तो वै स तावन्मन्यतेऽथ यदैव तं स्वेन भागधेयेन निर्भजन्त्यथैव स निर्भक्तो मन्यते ।

जीवति पितरि पुत्राणा रिक्थविभागकालः

तदु होवाचाभिप्रतारणो जीर्णः शयानः । पुत्रा ह्यस्य दायं विभेजिरे । स ह घोष आस । को घोष इति । तस्मै होवाच । पुत्रास्ते भगवो दायं विभजन्त इति । स होवाच । शुश्राव वा अहं तत् पृष्ठानां ब्राह्मणे जीवतोऽस्य पुत्रा दायमुपयन्तीति । शुश्राव वा अहं तदिति ।

गौतमः

पितुरूर्ध्वं रिक्थविभागकालः

[1]ऊर्ध्वं पितुः पुत्रा रिक्थं विभजेरन् ।

(१) अथ दायविभागः—ऊर्ध्वमिति । ऊर्ध्वं पितुः पितरि मृते तदीय रिक्थं स्वगृहक्षेत्रदासगवाश्वस्वर्णादिकं पुत्रा भजेरन्पुत्रास्तत्र भागिनः । पुत्राणा तत्स्वामित्वमित्युक्त भवति । ऊर्ध्वं पितुरिति वचनाजीवति तस्मिन्न तत्र पुत्राणा स्वाम्यम् । तथा च मनुः 'ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः सह । भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥' इति । पितृशब्दस्य संबन्धिशब्दत्वादेव सिद्धे पुत्रग्रहणं नियमार्थम् । तेन पितुरूर्ध्वं विभजता माताऽप्यंश समं हरेदित्यादिवचनजातमाचार्यस्याभिमतं न भवति । पुत्रा एवं सर्वं धनादिकं गृहीत्वा मातर यथावद्रक्षेयुरिति मन्यते । श्रूयते च तस्मात्स्त्रियो निरिन्द्रिया अदायादा इति । मनुरप्याह 'पिता रक्षति कौमारे भर्ता रक्षति यौवने । पुत्रास्तु

(१) शब्रा.१।२।३।७. (२) शब्रा.१।७।२।२२.
(३) शब्रा.३।२।१।१८. (४) शब्रा.९।५।१।१२.
(५) शब्रा.१।९।२।३४,३५.

(१) शब्रा.११।७।४।२. (२) जैब्रा.३।१५६.
(३) गौध.२८।१; मिता.२।११४; दा.२६ रत्न (युः); मभा.(वि०); गौमि.२८।१ मभावत्; विर.४६३; व्यनि.; स्मृचि.२८; दात.१६८ दावत्; व्यप्र.४३३,४३५ दावत्; व्यम.४२; विता.२९२; सेतु.७३ मभावत्; विभ.६५, ६६; समु.१२६ मभावत्; विच.३६.

स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति ॥' इति । गौमि.

(२) ननु कस्मादितरवत् प्रायश्चित्तात् प्रागनभिधानं ? तत्रैक आहुः—यदि पुत्राः पितरं बलाद्विभागाय प्रवर्तयन्ति, पिता वा पुत्राणा कर्माधिकारे सति यथाप्राप्तं विभाग न करोति, ततोऽनयोः प्रायश्चित्त नास्तीत्येवमर्थमिति । न पुनरेतद्विचारणीयं येन न क्वचिदपि व्यतिक्रमे प्रायश्चित्ताभाव इष्यते । अतः प्रायश्चित्तगौरवार्थमेवममिधानम् । सूत्रमिदानी विवियते—ऊर्ध्वं जीवनात् पितुः प्रेते तस्मिन्नित्यर्थः । एकशेषश्च द्रष्टव्यः, 'पिता मात्रा' इति । तथाऽऽह मनुः—'ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः सह । भजेरन् पैतृक रिक्थ मनीशास्ते हि जीवतोः ॥' इति । पितृशब्दस्य संबन्धिशब्दत्वात् पुत्रग्रहण गम्यमानमपि क्रियते पुरुषाणामेव विभाग इत्येवमर्थम् । तथा च स्त्रीणा तावत्तैत्तिरीयकश्रुतौ श्रूयते 'तस्मात् स्त्रियो निरिन्द्रिया अदायादीः' इति । तथा नपुंसकाना वसिष्ठ आह—'अनशास्त्वाश्रमान्तरगताः क्लीवोन्मत्तपतिताश्च' इति । 'जीवति वेच्छति' इति वचनादूर्ध्वमिति प्रतिपादनार्थम् । रिक्थ पैतृक द्रव्य कृष्यादिलब्धं रूढ्या । विभजेरन् । अत्र विचार्यते स्वत्वे सति विभागः ? उत विभागे सति स्वत्वम् ? अत्र केचिदाहुः विभागे सतीति । तदयुक्त, सर्वेषा विभागप्राप्तेः । वचनात् पुत्राणामेव नियम्यत इति चेत्—'अनीशास्ते हि जीवतोः' इति लिङ्गात् । कुतः ? ऊर्ध्वं पितुश्च मातुश्चेति नियमादेव प्रागविभागे सिद्धे पुनरीशत्वमात्रप्रतिषेधात् स्वत्वास्तित्व ज्ञापयति । इतरथा अनर्थकः प्रतिषेधः प्राप्त्यभावात् । तस्मात् स्वत्वे सत्येव विभागः । एवं तर्हि जातपुत्रस्य पुत्रसंक्रमितत्वात् परस्वादानं प्राप्नोतीति चेत् जातिवदुभयत्र वर्तत इत्यदोषः । ईशत्वप्रतिषेधात्तु पुत्राणा दानाभावोऽर्थसिद्धः । मभा.

जीवति पितरि रिक्थविभागकालः

[5]**निवृत्ते रजसि मातुर्जीवति चेच्छति ।**

(१) 'निवृत्ते चापि रजसि' इति द्वितीयः कालो दर्शितः । जीवति चेच्छतीति तृतीयः कालः । तथा सरजस्कायामपि मातर्यनिच्छत्यपि पितर्यधर्मवर्तिनि दीर्घरोगग्रस्ते च पुत्राणामिच्छया भवति विभागः ।

मिता.२।११४

(२) पितामहादिधनस्यापि पित्रोरभाव इत्येको विभागकालः तथा मातुर्निवृत्ते रजसि पितुरिच्छात इत्यपरः । न तु पितुरिच्छामन्तरेण तस्य विभागः ।

*दा. २८

(३) अथ वा जीवत्यपि पितरि पुत्रा रिक्थ भजेरन्निति । इच्छति सति तदनुज्ञयेत्यर्थः । तस्य कालः—निवृत्ते रजसि मातुः । उपरतरजस्काया निवृत्तप्रसवायामित्युक्त भवति । गौमि.

(४) इच्छा च पितुः न पुत्राणां, जीवतीति सामानाधिकरण्यात् । सोऽय विभागः पुत्राणा कर्माधिकारापेक्षया द्रष्टव्यः । ×मभा.

(५) [जीमूतवाहनमतं खण्डयति] तदप्यनभियुक्तप्रमोदनम् । वृत्तिलोपापत्तेः पितृधनेऽपि तुल्यत्वात् ऊर्ध्वं विभागादित्यस्य निर्विषयत्वापत्तेरपि पितामहादिधनेऽपि तुल्यत्वात् । सस्पृहे पितरि पातित्यादिदुष्टे पितामहधनेऽपि पुत्रेच्छया विभागस्य सकलसमतत्वादवश्यवाच्यत्वाच्च । वस्तुतस्तु पितामहधने 'भूर्या पितामहोपात्ता' इत्यादिना सदृशस्य पितापुत्रस्वाम्यस्य वक्ष्यमाणत्वात् पुत्रेच्छयापि तस्य विभाग उचित एव । यत्त्वत्र व्याख्यानान्तरमनीशत्वस्य तद्धनगोचरत्वादिकल्पनं तत्सर्वं तद्वचनविवेचने निराकरिष्यामः ।

व्यप्र.४३५

(६) तत्र जीवति पितरि पुत्राणा विभागो मृते वेति द्वौ कालौ । आद्यो द्वेधा । पितुरिच्छयाऽनिच्छया च । इच्छयापि द्वेधा विषमः समश्च । पितुरनिच्छाया च यः कालो मातू रजोनाशे पितरि सुरताक्षमे धननिस्पृहे सदोषे वेति, तदाह गौतमः—ऊर्ध्वमिति । विता.२९२

(१) **गौध.**२८।२; **मिता.**२।११४; **दा.**२६, **मभा.** चे (वे); **गौमि.**२८।२; **विर.**४६३ वति+(पितरि); **व्यनि.**; **स्मृचि.**२८; **दात.**१६८; **व्यप्र.**४३३ त्ते+(चापि):४३५; **व्यम.**४२ वति+(पितरि) चे (वे); **विता.**२९२ त्ते+(चापि)

* दात. दावद्भावः । × शेष गौमिगतम्।

(मातुः०); **सेतु.**७३ नि...तुः (मातुर्निवृत्ते रजसि); **विभ.** ६५; **समु.**१२६ मातुः (मातरि) वति+(पितरि) चे (वे); **विच.**३६.

(७) इच्छतीत्यनेन रजोनिवृत्तिं विनाऽपि पितुरिच्छया विभाग उक्तः। व्यम.४२

हारीतः

अनापदि जीवति पितरि अर्थास्वातन्त्र्यं पुत्राणाम्। पित्रोरापदि ज्येष्ठः प्रभवति।

[1]**जीवति पितरि पुत्राणामर्थादानविसर्गाक्षेपेष्वस्वातन्त्र्यम्। कामं दीने प्रोषिते आर्ति गते वा ज्येष्ठ एव अर्थाञ्चिन्तयेत्***।

(१) अर्थादानमर्थोपभोगः। विसर्गो व्ययः। आक्षेपो दासादिपरिजनस्यापराधेषु शिक्षार्थमाक्षेपः। अस्वातन्त्र्य पितुरनुज्ञामन्तरेण स्वेच्छयाऽर्थादानादावप्रवृत्तिः। धर्मास्वातन्त्र्यमप्येवं पृथगिष्टापूर्तादावप्रवृत्तिः। एव च पित्रानुज्ञातेन पुत्रेण धर्मकर्माग्निहोत्रादि कार्यं नानानुज्ञातेनेति मन्तव्यम्। स्मृच.२५६

'दीने' इत्यादौ जीवति पितरीति पदद्वयमनुषज्यते। तस्य पूर्ववाक्ये श्रवणादिहाकाङ्क्षितत्वाच्च। काममिति वदन् पितृपरतन्त्रत्वं तदानीमपगतमिति दर्शयति। गते च पितृपरतन्त्रत्वे पुत्राणा पितृधनविभागकर्तृत्वार्हता जातेति पितृधनविभागोऽपि तदानीं पुत्राणामेवेच्छया भवितुमर्हति। +स्मृच.२५८

(२) अर्थादान पितृनैरपेक्षेण साधारणधनग्रहण, अर्थार्जनमिति पारिजातः। विसर्गो दान, आक्षेपः ऋणिकहस्तात्तद्धनग्रहणम्। कामदाने काममात्रादेवार्थदातरि। प्रकाशकारेण तु 'कामं दीने' इति पठित्वा काममिति सनिहितचित्रनुज्ञामाहेति, दीने विचित्ते इति विवृतम्। विर.४५९-४६०

(३) आक्षेपोऽपराधेषु दास्यादीनां भर्त्सनादिकम्। रत्न.१३६

(४) अग्निहोत्रादिक्रियास्वननुज्ञातस्यापि पुत्रस्याधिकारोऽस्तीति अपरार्कः। आचाराद्यवस्था। व्यवस्थिताचारद्वयस्य पूर्वमेवोक्तत्वान्नोक्तम्। *सवि.३५०

(५) आदानविसर्गपदेन व्यवसायो लक्ष्यते। व्यम.३९

पितर्यसमर्थे ज्येष्ठपुत्रानुमत्या विभागमाह हारीतः—काममिति। व्यम.४२

बौधायनः

जीवति पितरि रिक्थविभागकालः

[2]**पितुरनुमत्या दायविभागः सति पितरि।**

(१) पितुरपि कर्तृत्वमनुमतिद्वारेणाह—पितुरिति। स्मृच.२५९

(२) तदनिच्छया विभागे दोषो भवति। बौवि.

[3]**'मनुः पुत्रेभ्यो दायं व्यभजदि'ति श्रुतिः। समोंऽशः सर्वेषामविशेषात्।**

[4]**वरं वा रूपमुद्धरेज्ज्येष्ठः। तस्माज्ज्येष्ठं पुत्रं धनेन निरवसायन्तीति श्रुतिः।**

[5]**दशानां वैकमुद्धरेज्ज्येष्ठः। सममितरे विभजेरन्।**

(१) ज्येष्ठभ्रातुर्भागाधिक्येन विभागान्तरतो धर्म्य

---

* दा. व्याख्यान 'पितर्यशक्ते' इति शङ्खलिखितवचने द्रष्टव्यम्। दात. दावत्।

+ पमा. स्मृचवत्।

(१) **दा.**२३ श्व (पु न) (एव०); **व्यक.**१४० श्व (पु न) कामं दीने (कामदाने) आर्ति (आर्ति) ज्येष्ठ...येत् (जेष्ठोंऽशान् नयेत्); **स्मृच.**२५६ (काम...न्तयेत्०) : २५८ (जीवति...तन्त्र्यम्०) (एव०), **विर.**४५९ श्व (पु न) काम दीने (कामदाने) आर्तिं (चार्तिं); **पमा.**४८० (काम...येत्०); **रत्न.** १३६ पमावत्; **व्यनि.** पमावत्; **दात.**१७८ दावत्; **सवि.** ३४९ पमावत्; **दानि २** वसिष्ठः; **व्यप्र.**४३५-४३६ श्व (पु न) काम दीने (कामे दाने) वा ज्येष्ठ एव (ज्येष्ठो वा); **व्यम.**३९ सर्गा (सर्गविभागा) (काम...येत्०):४२ (एव०); **विता.**२८४ श्व (तु न) काम दीने (कामदाने) (एव०); **समु.** १२६ (एव०); **विच.**२७ श्व (पु न) (काम...येत्०).

* स्मृतिचन्द्रिकैव समुद्धृता।

(१) **बौध.**२।२।८; **दा.**२८ (सति पितरि०); **स्मृच.** २५९ दावत्; **विर.**४६३ दावत्; **चन्द्र.**७० दावत्; **समु.** १२६ दावत्; **विच.**३३.

(२) **बौध.**२।२।२,३ समोंऽशः (समशः); **स्मृच.**२६० (इति श्रुतिः०), **विर.**४६७ (मनुः०) व्यभज (विभजे) मोंऽशः (मः); **रत्न.**१३९ (श्रुतिः०); **व्यप्र.**४३९ रत्नवत्; **विभ.** ४४ (मनुः...श्रुतिः०) मोंऽशः (मः).

(३) **बौध.**२।२।४,५; **स्मृच.**२६० वरं...मुद्ध (धनमेकमेकमुद्ध०); **विर.**४६७; **रत्न.**१३९ वर...मुद्ध (धनमेक वा उद्ध०). (४) **बौध.**२।२।६,७; **व्यक.**१४१; **विर.**४६७; **स्मृसा.**५५; **विचि.**२०० वै (चै).

विभागं वक्तु बौधायनेनोक्तं–पुत्रेभ्य इति। जीवद्विभागाभिधायके ब्राह्मणे भागविशेषानभिधानात् 'सम स्याद्श्रुतत्वादि'ति न्यायबलेनास्मादेव शास्त्रात् सर्वेषा पितापुत्राणा समत्वाशोऽवगम्यत इत्यर्थः। ज्येष्ठत्वादाधिक्ये श्रुत्यन्तरमित्याह स एव–धनमिति। धनमेकमेकमिति वदन् धनेनेत्येकवचन श्रुतिवाक्यगत विवक्षितमिति दर्शयति। निरवसायन्ति तोषयतीत्यर्थः। ×स्मृच.२६०

(२) प्रजाना जीवन कथ भवतीति दायविभाग प्रकरणमारभ्यते। तत्र परकृतिरूपा श्रुतिमुदाहरति–मनुरिति। पुत्रग्रहणात् पुस एव विभजेत्, न दुहितुः। तथा च श्रुतिः 'तस्मात्स्त्रियो निरिन्द्रिया अदायादीः' इति। स्मृतिरपि––'विभाग चेत्पिता कुर्यादिच्छया विभजेत्सुतान्।' इति। तत्र दायो दातव्य द्रव्यं, तस्य विभागो दायविभागः, इदानी कर्तव्य इति विधिकल्पना। तत्राय प्रकारः–समश इति। न विशेषः कश्चित् श्रूयते–विषमो विभाग इति। अय तु समो विभागः सवर्णापुत्राणामौरसाना समानगुणाना च। न त्वसवर्णापुत्राणामनौरसानामसमानगुणानाम्। अस्मिन्नेव विषये उद्धारयुक्त विभागमाह––वरमिति। वरमुत्कृष्टरूप द्रव्यमुद्धरेत् गृह्णीयात्। कि तत्र प्रमाण––तस्माज्ज्येष्ठमिति। निरवसायन पृथक्करणम्। धनेनोपतोष्य पृथक्कुर्वन्तीत्यर्थः। अनया श्रुत्याऽविशेषादिति हेतुरपसारितो भवति। सर्व धनजात दशधा विभज्य ज्येष्ठस्यैको भाग उद्धारः कार्यः। दशसख्याधिकेषु सत्स्वेष विभागो लाभाय भवति, न तु दशसंख्यान्यूनेषु। एतावुद्धारौ गुणवज्ज्येष्ठविषयौ वेदितव्यौ। सर्व धनजात दशधा विभज्य ज्येष्ठस्यैको भाग उद्धारः कार्यः। अवशिष्टनवभागानितरे पुत्राः सम विभजेरन्। बौधा.

पितृषु मृतेषु विभागकालः

[1]**रिक्थं दिवं गतेषु सुतगामि।**
शंखः शंखलिखितौ च

अनापदि जीवति पितरि जीवन्त्या मातरि वा अर्थास्वातन्त्र्यं पुत्राणाम्। पित्रोरापदि ज्येष्ठः प्रभवति।

[2]**पितर्यशक्ते कुटुम्बव्यवहारान् ज्येष्ठः प्रतिकुर्यादनन्तरो वा कार्यज्ञस्तदनुमतः, न त्वकामे पितरि रिक्थविभागः, वृद्धे विपरीतचेतसि दीर्घरोगिणि वा ज्येष्ठ एव पितृवदर्थान्पालयेदितरेषाम्। रिक्थमूलं हि कुटुम्बं, अस्वतन्त्राः पितृमन्तः, मातरि अप्येवमवस्थितायाम्।**

(१) यच्च कार्याक्षमे पितरि पुत्राणां विभागे स्वातन्त्र्यमुक्त तद्वचनानभिज्ञत्वेन। सुव्यक्तमाहतुः शंखलिखितौ–पितर्यशक्त इति। कार्याक्षमे दीर्घरोगिणि च पितरि विभागं निषिध्य ज्येष्ठ एव गृहं चिन्तयेत् तदनुजो वा कार्यज्ञ इत्याह। अतो न त्वकामे पितरीत्येतदेव। कार्याक्षमे पितरि रिक्थविभाग इति भ्रान्तलिखितम्। दा.२३

मातुरपि सकाशादस्वतन्त्रा विभागानधिकारिणः। दा.६०

(२) मातरि त्वम्रियमाणायामस्वतन्त्रा एव पुत्राः। यदाह शङ्खः–ज्येष्ठ इति। मातुः कुटुम्बभरणसामर्थ्ये सत्येतत्। ज्येष्ठस्य यदनुजैः सहाविभक्तधनत्वमुच्यते, तत्तेषा मध्ये कैश्चिदध्येतव्ये वेदे सति द्रष्टव्यम्। अप.२।११४

(३) तदनुमतेन तदानीं तस्यैव स्वातन्त्र्यात्। तदनन्तरग्रहणमनुजोपलक्षणार्थं कार्यज्ञस्यैवात्र विवक्षितत्वात्। अशक्तग्रहण च दीनादेरुपलक्षणार्थम्। स्मृच.२५८

(४) अनन्तरोऽनुजः, तदनुमतेन ज्येष्ठानुज्ञया।

× व्यप्र स्मृचगतम्।

(१) **बाल.**२।१४५ (पृ.२६२).

(२) **दा** २३ (कुटुम्ब०) मातरि (मातुः) याम् (याः):५९ (पितर्य...रेषाम्०) मातरि (मातुः) याम् (याः), **अप.**२।११४ (पितर्य ..रोगिणि वा०) रेषाम्+(तु) हि (एव) (अपि०) शखः; **व्यक.**१४० रान् (रं) मत (मते); **स्मृच.**२५८ स्वव्य (स्वस्य व्य) मतः (मतेन) (न त्वकामे.....तायाम्०); **विर.**४६० स्वव्य (स्वस्य व्य) रान् (र) (प्रति०) मतः (मतेन); **रत्न** १३८ स्मृचवत्, **विचि** १९३ (पितर्य ..कुटुम्बं०) शंखः; **दात.** १७० दा (पृ ५९) वत्: १७८ मातरि (मातुः) याम् (याः); **सवि** ३५० शक्ते+(तु) स्वव्य (स्वस्य व्य) (प्रति०) मतः (मत्या) (न त्वकामे...तायाम्०); **व्यप्र.**४३६ न त्व (न वि) मातरि (मातुः) याम् (याः); **व्यम.**४२ दनन्त (चदनन्त) (न त्वकामे ..तायाम्०) शेषं विरवत्; **विता.**३१० स्वव्य (स्वस्य व्य) रान् (रं) (प्रति०) (तदनुमतः ..तायाम्०); **बाल.**२।११७ (अस्वतन्त्राः पितृमन्तो मातर्यप्येवमेव) शखः; **विभ.**७९ दा (पृ.५९) वत्, शंखः; **समु.**१२६ स्वव्य (स्वस्य व्य) (प्रति०) मतः (मतेन) (न त्वकामे...तायाम्०) शखः; **विच.**३५,६७ विचिवत्, शखः.

विपरीतचेतसि वातादिदोषेण भ्रान्तचेतसि, ऋक्थमूलं धनमूलं कुटुम्ब कुटुम्बभरणम्। अस्वतन्त्रा दानाद्यनधिकारिणः। मातर्येव गुणवत्या जीवन्त्यामस्वतन्त्राः पुत्रा इत्यन्वयः। विर.४६०

(५) मातरि जीवन्त्या सोदराणा विभागो न धर्म्यः। अनुमतिस्त्वप्रतिषेधादपि भवति। 'स्व द्रव्यं दीयमान च यः स्वामी न निवारयेत्। ऋत्विग्भिर्वा परैर्वापि दत्तं तेनैव तद्भृगुः॥' इति प्रायश्चित्तविवेकधृतकात्यायनवचनात्। अत एव परमतमप्रतिषिद्धमनुमतं भवतीति न्यायविदः एव दत्तानिवारणत्वात् सिद्धिरिति। दात.१७०,१७८

(६) अनेनाशक्तग्रहणेन वार्धकादिना पितर्यस्वतन्त्रतामापन्ने तदनिच्छया तद्धनविभागः पुत्राणामिच्छयैव भवतीति ज्ञायते। *सवि.३५०

(७) कुटुम्बभरणादिच्छया समर्थे विभागः। सर्वेषा तथात्वे त्वनियम इति निष्कर्षः। व्यम.४२

[1]अकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि रोगिणि च।

(१) तथा सरजस्कायामपि मातर्यनिच्छत्यपि पितर्यधर्मवर्तिनि दीर्घरोगग्रस्ते च पुत्राणामिच्छया भवति विभागः। +मिता.२।११४

(२) पित्रर्जितेऽपि धने पुत्राणा विभागे स्वातन्त्र्य पितुरकामत्वादौ निमित्ते भवति। अप.२।११४

(३) दीर्घरोगग्रहण दीर्घकोपादेरप्युपलक्षणार्थम्। ×स्मृच.२५८

(४) विपरीतचेतसि निर्विण्णान्तःकरणे। क्षमे तु तस्मिन् जीवति तदिच्छयैव विभजनीयमिति वक्ष्यते। विचि.१९४

जीवति पितरि तदनुमत्या रिक्थविभागकालः

[1]जीवति पितरि रिक्थविभागोऽनुमतः, प्रकाशं वा मिथो वा धर्मतः।

(१) तदेवमादिमनुनारदगौतमबौधायनशंखलिखितादिभिरविशेषेण जीवति पितरि पुत्राणा यावद्धन गोचरास्वामित्वस्य पितुरिच्छाधीनविभागस्य च प्रतिपादनात् पैतामहधनविभागकालस्य च पृथगेभिरनभिधानात् पैतामहधनगोचरत्वमप्यनीशत्वपित्रनुमतिवचनानाम्। दा.२९

(२) यो जीवद्विभागपक्षोऽनुमतः स तावत्प्रकाशं बन्ध्वादिसमक्ष यथा भवति तथा मिथो वा रहसि वा धर्मतो धर्मादनपेतेन प्रकारेण कार्य इत्यर्थः। स्मृच.२६०

(३) अनुमतः पित्रनुमतः, प्रकाशं मध्यस्थसमक्षं, मिथस्तदसमक्षम्। विर.४६३

पितुरूर्ध्वं रिक्थविभागकालः

[1]अत ऊर्ध्वं रिक्थविभागो, न जीवति पितरि पुत्रा रिक्थं विभजेरन्। यद्यपि स्यात्पश्चादधिगतं तैरनर्हा एव पुत्राः। अर्थधर्मयोरस्वातन्त्र्यात्।

(१) यद्यपि तैः पुत्रैः स्वकीयजन्मनः पश्चादनन्तरमेव पितृधने स्वाम्यमधिगतं प्राप्त तथापि जीवति पितरि पितृधनं न विभजेरन्। यतोऽर्थधर्मयोरस्वातन्त्र्याद्विभागकर्तृतायामनर्हाः पुत्रा इत्यर्थः। अर्थास्वातन्त्र्यं अर्थादानप्रदानयोरस्वातन्त्र्यम्। *स्मृच.२५६

---

* शेष स्मृचगतम्।

+ मपा., व्यप्र., विता. मितागतम्। पमा. मितागत स्मृचगतं च। × शेषं मितागतम्।

(१) **मिता.**२।११४; **अप.**२।११४ सि+(दीर्घ) च (वा); **स्मृच.**२५८ सि+(दीर्घ); **पमा.**४८७ स्मृचवत्; **रत्न.**१३८ स्मृचवत्; **मपा.**६४७; **विचि.**१९४ च (वा); **व्यनि.**अपवत्; **स्मृचि.**२८; **दानि.**२ विपरीतचेतसि रो (विपरीते दीर्घरो); **व्यप्र.**४३३; **व्यउ.**१४३ स्मृचवत्; **व्यम.**४२ विभागो (भागो) सि+(दीर्घ) हारीतः; **विता.**२९९; **राकौ.**४४६ (रोगिणि च०); **विभ.**७९ हारीतः; **समु.**१२६ स्मृचवत्; सर्वग्रन्थेषु शंखस्येदं वचनम्।

* पमा., व्यम. स्मृचगतम्।

(१) **दा** २९ तः (तेः) (प्रका...र्मतः०); **व्यक.**१४१ वति+(वा); **स्मृच.**२६०; **विर.**४६३ वति+(वा) विभा (भा), **विता.**२९२ वति+(वा) (प्रका...र्मतः०) शंखः; **समु.** १२७ शंखः; **विच.**३३ (प्रका...र्मतः०).

(२) **अप.**२।११४ तै (एतै); **व्यक.**१४०; **स्मृच.**२५६ (अत ..भागो०) विभ (भ) स्यात् (स्वाम्यं) शंखः; **विर.**४५६ विभा (भा); **पमा.**४७९ (अत...भागो०) विभ (भ) शंखः; **व्यप्र.**४१४ स्मृचवत्; **व्यम.**३९ (अत...भागो०) योर (परेऽ) शंखः; **विता.**२८४ विभ (भ) तै (एतै); **समु.**१२६ पमावत्, शंखः.

(२) पितरि निर्दोषे पश्चादधिगत पितृनिरपेक्षैः पुत्रैः समर्थैर्विद्यादिभिर्मिलित्वा अर्जितम् ।

विर.४५६-४५७

(३) तदपि न । मन्वादिवचनाना बहूनामस्वाम्यप्रतिपादकानामनुरोधेनास्यान्यथावर्णनीयत्वात् । वर्णित च कल्पतरौ—यद्यपि पश्चादधिगत पितृधन व्यापारनिरपेक्षैः पुत्रैर्विद्यादिभिरुपात्ते धने स्वाम्य तथापि तत्राप्यस्वाम्य जीवति पितरि किमुत पितृधने, अर्थधर्मयोस्तेषा पितरि जीवत्यस्वातन्त्र्यादिति । व्यप्र.४१५

यत्तु शंखवचन तस्यापि स्मृतिचन्द्रिकोक्तव्याख्यैव साधीयसी । कल्पतरूक्तव्याख्याया तु विद्याद्युपात्ताध्याहारेऽनुपस्थितभूयःपदाध्याहारः प्रसज्येत । जन्मपदाध्याहारस्तु पुत्रत्वाद्याक्षेपोपस्थितेरल्पाध्याहाराच्च नायुक्तः । तेन श्रुत्युपष्टब्धस्मृत्यनुरोधान्मनुनारददेवलादिवचनानामेवास्वातन्त्र्यपरत्ववर्णनमुचिततरम् । व्यप्र.४१८

कौटिलीयमर्थशास्त्रम्

जीवतोः पित्रोरननुमतौ न रिक्थविभागः । पित्रोरूर्ध्वं रिक्थविभागकालः ।

दायविभागः । अनीश्वराः पितृमन्तः स्थितपितृमातृकाः पुत्राः । तेषां ऊर्ध्वं पितृतो दायविभागः पितृद्रव्याणाम् ।

पितृभ्रातृपुत्राणां पूर्वं विद्यमाने नापरमवलम्बन्ते, ज्येष्ठे च कनिष्ठमर्थग्राहिणः ।

जीवद्विभागे पिता नैकं विशेषयेत् । न चैकमकारणान्निर्विभजेत ।

दायविभाग इति सूत्रम् । दायः कुलसाधारणं द्रव्य तस्य विभाग उच्यत इति सूत्रार्थः । पूर्वाध्यायान्ते 'एतानुत्क्रम्य दायादान्' इत्यासूत्रितो दायः कैः कथ विभाज्य इत्येतदस्मिन् प्रकरणेऽभिधीयते । त्रिभिश्चाध्यायैरिदं वितन्यते । तत्र प्रथमे दायक्रमः । द्वितीयेंऽशविभागः । तृतीये पुत्रविभाग इति । अनीश्वरा इति । पितृमन्तः प्रशस्तमातापितृकाः स्थितपितृमातृकाः जीवन्मातापितृकाः, पुत्राः, अनीश्वराः कुलधने स्वामिनो न भवन्ति । तेषा पुत्राणा, ऊर्ध्वं पितृतः पित्रोरनन्तरं, दायविभागः, पितृद्रव्याणा पित्रुपार्जितद्रव्याणा, कर्तव्यः ।

श्रीमू.

पितरि तत्पुत्रेषु च सहजीविषु पुत्रान्यतमो बहुपुत्रः कुटुम्बार्थे यदि ऋणं कृत्वा म्रियेत तदा ऋणदातृणा प्रतिपत्तिमाह—पितृभ्रातृपुत्राणामित्यादि । अयमर्थः—अर्थग्राहिणः ऋणकर्तुः पितृभ्रातृपुत्राणा मध्ये पितरि विद्यमाने भ्रात्रादीन् ऋणदातारो नाभियुञ्जीरन्, किन्तु पितरमेवाभियुञ्जीरन्, पित्रभावे भ्रातॄन् । भ्रातृषु विद्यमानेषु पुत्रं नाभियुञ्जीरन् किन्तु भ्रातॄनेवाभियुञ्जीरन् भ्रात्रभावे पुत्रम् । पुत्रे च ज्येष्ठे विद्यमाने न कनिष्ठमभियुञ्जीरन् किन्तु ज्येष्ठमिति । इहार्थग्राहिणमित्यपपाठः प्रतिभाति । 'तेषामूर्ध्वं पितृतो दायविभाग' इत्युक्तम् । जीवति पितरि दायविभागमाह जीवद्विभाग इति । जीवद्विभागविषये, पिता, नैक विशेषयेत् पुत्रेष्वेकतमम-धिकाशेन वा न्यूनाशेन वा न योजयेत्, किन्तु समेनैवाशेन सर्वान् योजयेत् । एकं पुत्रं, अकारणात् विना निमित्त, न निर्विभजेत निरंशं न कुर्यात् । श्रीमू.

मनुः

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम् ।
भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः*॥

(१) भजेरन्निति प्राप्तकालतायां लिङ् । तथा पञ्चमे प्रपञ्चितम् । अथवा यस्मिन् समये संक्रामितमिति ।

मेधा.९।१०४

'ननु तत्स्मृतावपि विधिः श्रूयते । 'दायादा एवं

---

(१) कौ.३।५.

* बालम्भट्टीव्याख्यानं 'विभजेरन् सुता' इति याज्ञवल्क्यवचनव्याख्याने द्रष्टव्यम् ।

(१) **मस्मृ.**९।१०४; **दा.**११:१६ **प्रथमपादः; अप.** २।११४; **व्यक.**१४०; **मभा.**२८।१ समम् (सह); **गौमि.** २८।१ मभावत्; **स्मृच.**२५५; **विर.**४५५ **हलायुधपारिजाताभ्यां** तु 'सममि'ति स्थाने 'सहे'ति पठितम्; **पमा.**४७८; **रत्न.**१३६; **विचि.**१९३; **व्यनि.**मभावत; **स्मृचि.**२८ **हि** (ऽपि); **सवि.**३४९ मभावत; **चन्द्र.**६८; **दानि.**१,२; **व्यप्र.**४१४,४३२; **व्यम.**४१; **विता.**२८४; **बाल.**२।११४; **विभ.**५४ **प्रथमपादः; समु.**१२६; **विच.**२६ **चतुर्थपादः**; ३३:७२ पू.

१ शयने संक्रामति ।

विभजेरन्' 'चतुरोऽशान् हरेज्ज्येष्ठः' (मस्मृ.९।१५३), 'ज्येष्ठ एव तु गृह्णीयादि'ति (मस्मृ.९।१०५)। किं विध्यर्थ एव लिङन्तरे प्रैषादौ स्मर्यते। पदार्था विधिरूपाः, विधिशेषाः प्रैषादयः सर्वत्र प्रवर्तनाप्रतिपत्तेरिति' चेत्। हेतुहेतुमतोराशिषि प्राप्तकालादिषु का प्रवर्तना। न च ग्रहण विधेय, आर्थतया प्राप्तत्वात्। 'स्वपराशयोरविशिष्टायामर्थिताया नियमार्थो विधिरिति'चेत्। अदृष्टकल्पेन विहिताशातिरेकेण विधिनियमानुपपत्तेः। 'प्रतिषेधाख्या परिसंख्येति'चेत्। युक्तमेतत्। किन्तु विभागकाल एव यः कश्चिदधिकमंश भ्रातृभिरनुज्ञातमादद्यात स प्रत्यवेयात्तत्यामप्यनुज्ञाया न चैकवस्त्वंशे स्वत्व ज्ञाप्येत। ग्रहणविधौ हि स्वत्वापत्तिरुपात्ता। तस्य यदन्यत्तदस्वमिति विज्ञायते प्रतिषेधः। पुनस्तदतिक्रमेणापि परिग्रहे स्यादेव स्वाम्यम्। अतश्च चौर्यादिनाऽपीष्यते। न तदा इदमस्य स्वमिदं नेति परिग्रहादृते निश्चीयते। तस्माद्विधिनियमपरिसख्यानामसंभवादियत्यशेऽस्य स्वामीयत्यंशेऽयमिति एतावान्विभागार्थः। अतोऽयमर्थान्तरे लिङ् विभजेरन्निति प्राप्तकालतायाम्। हरेयुरित्यादिषु लौकिकप्रवृत्त्यनुवादः, यथा 'क्षुधितो भुञ्जीत' 'योगक्षेमार्थमीश्वरमभिगच्छेदि'ति। गौतमश्च स्पष्टमेवाह 'रिक्थक्रय' इत्यादि। मेधा.५।११०

(२) जीवतोरपि पित्रोः पुत्राणां कुतो न विभाग इत्याशङ्कायामिदमुत्तर तदानीमस्वामित्वादिति। दा.१२

'ऊर्ध्वं पितुश्चे'त्यादि (मस्मृ.९।१०४) तत्कालीनस्वत्व ज्ञापनार्थं तदानीमेव चेच्छाप्राप्तं विभागमनुवदति, प्राप्तत्वात् विधानानुपपत्तेः। न च नियमः संभवति 'एव सह वसेयुर्वा पृथग्वा धर्मकाम्यये'ति (मस्मृ.९।१११) मनुविरोधात् दृष्टार्थत्वाच्च विभागस्य न तन्नियमः कालनियमो वा संभवति। दा.१६

जीवतोः पित्रोर्धने पुत्राणा स्वाम्य नास्ति किन्तु परतयोरिति ज्ञापनार्थं मन्वादिवचन एकः शाब्दोऽपरश्चार्थः। न चोपरममात्रमेव विवक्षित किन्तु पतितप्रव्रजितत्वाद्युपलक्षयति स्वत्वविनाशहेतुतासाम्यात्। दा.१८

एकस्यापि स्वधने स्वाम्यादेकेच्छयापि विभागप्राप्तेः समेत्येति (मस्मृ.९।१०४) सहितत्वं पक्षप्राप्तमनूद्यते। अन्यथा साहित्यवत् बहुत्वस्याप्यवगतेर्द्वयोर्विभागो न स्यादेव द्वयोर्विभागप्रतिपादकशास्त्राभावात्। *दा.१९

(३) पिता माता च पितरौ तयोः रिक्थ पैतृकम्। ऊर्ध्वं मरणात्। पितुर्मरणादूर्ध्वं पितुर्धनं विभजनीय मातुरूर्ध्वं मातृकमिति विभज्य योज्यं स्मृत्यन्तरदर्शनात्। तत्र च मातृधनं दुहित्रभाव एव पुत्रैर्ग्राह्यम्। समेत्यैकत्र स्थित्वा। समं न तु मातृपितृधनयोर्विभागे अन्योन्य विशेषः। अनीशाः विभागेऽस्वतन्त्राः तेन पित्रोरनुमत्या जीवतोरपि तयोर्विभाग इति लभ्यते। +मवि.

(४) अस्यापि तात्पर्यमाह सग्रहकारः–'यस्मिन् काले यया भङ्ग्या यैरेव क्रियतेऽपि च। यादृशस्य च दायस्य यथाशास्त्रं प्रदर्श्यते॥' इति। अस्यार्थः—यादृशस्य दायस्य पैतृकमातृकादेर्यस्मिन्काले यया समविषमादिभङ्ग्या प्रकारेण, यैः पितृभ्रातृभगिन्यादिकर्तृभिर्विभागो वक्तव्यस्तदेतत्सर्वं बृद्धमन्वादिशास्त्रानतिक्रमेण ऊर्ध्वं पितुश्च इत्यादिना प्रदर्श्यत इति। अत्र ऊर्ध्वं पितुश्चेति पितृधनविभागकाल उक्तः। मातुश्चेति मातृधनविभागकालः। तेन मातरि जीवन्यामपि पितृधनविभागः कार्यः। तथा मातुरूर्ध्वं पितरि जीवत्यपि मातृधनविभागः कार्य एव। अन्यतरधनविभागे उभयोरूर्ध्वकालप्रतीक्षणानुपपत्तेः। तथा च संग्रहकारः 'पितृद्रव्यविभागः स्याज्जीवन्त्यामपि मातरि। न स्वतन्त्रतया स्वाम्य यस्मान्मातुः पति विना॥ मातृद्रव्यविभागोऽपि तथा पितरि जीवति। सत्स्वपत्येषु यस्मान्न स्त्रीधनस्य पतिः पतिः॥' इति। पितृभार्यायाः पति विना पतिमरणेऽपि यस्मात्पत्युर्धने न स्वतन्त्रत्वं न स्वामित्वम्। यस्मादपत्येषु विद्यमानेषु स्त्रीधनस्य भार्याधनस्य भार्यामरणेऽपि पतिर्भर्ता न पतिर्न स्वामी, तस्मात्तयोर्मध्ये जीवत्यन्यतरस्मिन्नन्यतरधनविभागो युक्त इत्यर्थः। अनेन पितरि जीवति तद्द्रव्यविभागो मातरि जीवन्त्या तद्द्रव्यविभागः पुत्रैर्न कार्य इत्यर्थादुक्तं भवति। उक्तश्चान्त्यपादेन मानवे (९।१०४) 'अनीशास्ते हि जीवतोः' इति।

* गौमि. अनीशपद दागतम्। विच. दागतम्।
+ नन्द. वाक्यार्थो मविवत्।

अनीशा अस्वतन्त्रा इत्यर्थः। ×स्मृच.२५५-२५६

(५) समभागोऽयं ज्येष्ठभ्रातर्युद्धारमनिच्छति बोद्धव्यम्। =ममु.

(६) समं तुल्यं नात्र विशोद्धारादीति यावत्। ननु प्रमीतपितृकविभाग एव मनुना विंशोद्धारादीना कथनात्कथं सममिति, न तस्य गुणवज्ज्येष्ठादिविषयत्वात्। उदयकरस्तु सममिति कृतोद्धारधनाभिप्रायमिति व्याख्यातवान्। हलायुधपारिजाताभ्या तु सममिति स्थाने सहेति पठितं, व्याख्यातं च पारिजातेन, सह परस्परम्। पैतृकमित्यत्रैकशेषं कृत्वा तद्धितप्रत्ययः तेन मातृधनस्यापि ग्रहणमिति हलायुधः। पैतृकमित्युपादानेऽपि पैतामहादिधनमपि विवक्षितम्। द्रव्ये पितामहोपात्ते इत्यादिवाक्येन तत्रापि भागस्य बोधनादित्यपरे। द्वयमपि चेद विवक्षित, परन्तु भूतपूर्वगत्या, मातृधने तु दुहितृतदन्वयाभावे पुत्रभागान्वय इति बोद्धव्यम्।

—विर.४५५

(७) एव च पितुः स्वातन्त्र्यविषयो, धन पितरि प्रमीते विभजनीय सति तु तस्मिन्नक्षमे। *विचि.११४

(८) तयोर्मरण स्वत्वस्योत्पादक व्यञ्जक चोभयथापि ऊर्ध्वपदमुपलक्षणं पातित्यप्रव्रज्यादेः। स्वत्वध्वसकत्व साम्यात्। समं समभाग कुर्युरित्यपि पितुरिच्छापक्षे। 'विभाग चेत्पिता कुर्यादिच्छया विभजेत्सुतान्। ज्येष्ठ वा श्रेष्ठभागेन सर्वे वा स्युः समाशिनः॥' इति याज्ञवल्क्योक्तेस्तदिच्छैव कारण न ज्येष्ठयादिकम्।

+मच.

(९) 'अनीशास्ते हि जीवतोः' इत्यपि तत्तद्धने व्यवस्थयाऽस्वातन्त्र्यप्रतिपादक न त्वस्वत्वप्रतिपादक जन्मना स्वत्वस्य पुत्राणा पितृधने व्यवस्थापनात्।

[]व्यप्र.४३२

(१०) चशब्दोपादानेऽपि मरणसमुच्चयो न विवक्षितः। व्यम.४१

याज्ञवल्क्यः

पित्रोरूर्ध्वं ऋणरिक्थविभागकालः पुत्राणाम्

[†]विभजेरन् सुताः पित्रोरूर्ध्वं रिक्थमृणं समम्॥

(१) स्वातन्त्र्येण तु—विभजेयुरित्यादि। ऋणमपनीयावशिष्ट विभजेयुः पुत्राः पित्रोरूर्ध्वं रिक्थम्। सुतग्रहणमौरसप्रतिपत्त्यर्थम्। माता च पिता च पितरौ। तयोः पित्रोरूर्ध्वं मृतयोरित्यर्थः। पितुरूर्ध्वं च पैतृकं मातुरूर्ध्वं च मातृकम्। रिक्थाभावेऽप्यृणमशाशतो दद्युः। ऋणदाने च साम्यवचनाद् विभागेऽपि साम्यमित्यवगम्यते।

+विश्व.२।१२१

(२) इदानीं विभागस्य कालान्तरं कर्त्रन्तरं प्रकारनियम चाह—विभजेरन्निति। पित्रोर्मातापित्रोरूर्ध्वं प्रायणादिति कालो दर्शितः। सुताः कर्तारो दर्शिताः। सममिति प्रकारनियमः। सममेवेति रिक्थमृणं च विभजेरन्।

*मिता.

(३) पूर्वार्धे पित्रोरिति पितृधनविषयमेव अन्यथा पुनरुक्तत्वापत्तेः। मातापित्रोरुपरमे भ्रातरो विभजेरन्निति वदता याज्ञवल्क्येन उभयोरुपरमानन्तरकालस्य विभागार्थतया विधानात् साहित्य विवक्षितम्। दा.५९

अतः सोद्धारानुद्धारभागयोर्विकल्पः न च केवलसमविभागस्यापि शास्त्रीयत्वान्नित्यवत्तस्यैवानुष्ठान स्यादिति वाच्य, भक्त्यतिशयेन भ्रातृणामुद्धारानुमतेरपि संभवाद्विभागाविभागवद्विकल्पः। अत एवाद्यतनाना भक्त्यति-

× पमा., सवि. स्मृचगतम्। व्यनि., विता. अनीशपद स्मृचगतम्।

= शेषवाक्यार्थो मविवत्। अनीशपद दागतम्।

÷ चन्द्र. विरगतं विचिगत च।

* शेष मविगतं, ममुगतं, विरगतं, विवादरत्नाकरोद्धृतहलायुधमतगतं च।

+ अनीशपदं दागतम्। [] सर्वं स्मृचगतम्।

+ विषमविभागव्यवस्था 'ज्येष्ठस्य विश उद्धार' इति मनुव्याख्याने द्रष्टव्या।

* विषमविभागव्यवस्था 'ज्येष्ठस्य विश उद्धार' इति मनुव्याख्याने द्रष्टव्या। पमा., मपा., वीमि. मितागतम्।

(१) **यास्मृ.**२।११७; **अपु.**२५६।४ रन् (युः); **विश्व.** २।१२१ रन् (युः); **मिता.**; **दा.**५८,६५; **अप.**; **व्यक.** १४३; **स्मृच.**२६४,२८६; **विर.**४८१; **स्मृसा.**५६; **पमा.** ४८९ विश्ववत् :५५१; **रत्न.**१४० विश्ववत्; **मपा.**६४७; **स्मृचि.**२९; **नृप्र.**३४ विश्ववत्; **सवि.**३५६; **मच.**९।२१८; **चन्द्र.**५०; **वीमि.**; **व्यप्र.**४४२,४५२; **व्यउ.**१४३; **व्यम.**४४,७१; **विता.**३०० विश्ववत् :३३९; **राकौ.**४४६; **सेतु.**७७; **विभ.**७९; **समु.**१२८; **विच.**७१.

शयाभावात् समभाग एव लोके दृश्यते, उद्धारार्हज्येष्ठाभावाच्च। दा.६५ ६६

(४) ततश्च यो यावन्तं धनस्य विभागं भजते तावन्तमृणस्यापि भजते। एवं च सति 'यश्चतुस्त्रिद्व्येकभागाः स्युरि'ति तथा येन चैषां स्वयमुत्पादित स्यादित्यादिषु विषमविभागविधिषु ऋणस्यापि धनानुसारेण विभागविधिरवसेयः। 'विभजेरन्सुताः पित्रोरूर्ध्वमि'त्यस्यायमर्थः—यदि पित्रोर्मरणादूर्ध्वं विभजेरंस्तदा रिक्थादि सम विभजेरन्निति। एतद्भ्रातृकर्तृकविभागपरं, तेन जीवत्यपि पितरि भ्रातरः सममेव विभजेरन्। पितुस्तु विभज्यमानस्य नायं नियम इत्यर्थाद्गम्यते। न च पित्रोरूर्ध्वं विभजेरन्नेवेति व्याख्येयम्। अप.

(५) ऋणमत्र पैतृकमेव विवक्षितम्। अपैतृकस्य तदैवापाकरणनियमात्। +स्मृच.२६४

दौहित्राणामप्यभावे तु 'विभजेरन् सुताः' इत्यादि याज्ञवल्क्यस्मरणात् मातुरूर्ध्वं मातरिक्थं मातृकृतं चर्णं सम सुता विभजेरन्नित्यवगमात् सुतानां मातृऋणधनविभक्तृत्वम्। अन्यथा 'विभजेरन् सुताः पित्रोः' इत्येकशेषोक्तिरपार्थिका स्यात्। सुतानामप्यभावे पौत्राणा पितामहीऋणधनविभक्तृत्वम्। 'पुत्रपौत्रैर्ऋणं देयमि'ति पौत्राणामपि पितामहीकृतर्णापाकरणाधिकारात् 'ऋक्थभाज ऋणमपाकुर्युरि'ति स्मरणाच्च। भिन्नपितृकाणा तु विषमसंख्याना पौत्राणा समवाये पितामहीपितामहर्णधनविभागेऽपि मातामहधनविभागवत् पितृतो भागकल्पना। एवमेव भिन्नमातृकाणां दौहित्राणा च विषमसंख्याना मातृतो भागकल्पना। 'प्रतिमातृ वा स्वे वर्गे भागविशेष' इति गौतमस्मरणात्। स्मृच.२८६

नारदः

पित्रोरूर्ध्वं पैतृकरिक्थविभागः

अत ऊर्ध्वं पितुः पुत्रा विभजेयुर्धनं समम्*।।

(इति मिताक्षरापाठः)

+ सवि., विता. स्मृचगतम्।

* दा. व्याख्यान 'विभागोऽर्थस्य पित्र्यस्य' इति नारदवचने (पृ. ११३५) द्रष्टव्यम्।

(१) **नासं.**१४।२ (पितर्युपरते पुत्रा विभजेयुर्धन पितुः);

पितर्यूर्ध्वं गते पुत्रा विभजेयुर्धनं पितुः×।।

(इति विवादरत्नाकरपाठः)

पितर्यूर्ध्वं गत इत्येतावतैव विभागे सिद्धे पुत्रग्रहणं क्षेत्रजादीनामप्यवबोधार्थं, ततश्च द्वादशपुत्राणामन्यतरस्मिन्नपि विद्यमाने नान्यस्य धनभाक्त्व, पितुरिति वचनं भ्रातृणा मध्ये यद्येकस्य विद्याधनादि भवेत्, तदा तस्य विभागो नास्तीति बोधनार्थम्। विर.४५६

जीवति पितरि रिक्थविभाग.। व्याख्यासु विभागकालाः।

मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च।
निवृत्ते वाऽपि रमणे पितर्युपरतस्पृहे*।।

(१) 'विभाग चेत्पिता कुर्यादि'ति यदा पितुर्विभागेच्छा स तावदेकः कालः। अपरोऽपि कालो जीवत्यपि

× अयं 'अत ऊर्ध्वं' इत्यस्यैव पाठभेद इत्यनुमीयते।

* वीमि.व्याख्यानं 'विभक्तेषु सुतो जातः' इति याज्ञवल्क्यवचने द्रष्टव्यम्।

नास्मृ.१६।२ (पितर्यूर्ध्वं गते पुत्रा विभजेरन् धन क्रमात्); **मिता.**२।११४, **दा.**११ (पितर्यूर्ध्वं गते पुत्रा विभजेयुर्धन पितुः), **अप** २।११४ युः (रन्), **स्मृच.**२५९ अपवत्; **विर** ४५६ दावत्; **पमा** ४८६, **रत्न.**१३८; **विचि** १९४ दावत्, **स्मृचि.**२८, **सवि.**३५१ युर्धनं समम् (रन् सम धनम्); **व्यप्र.**४१४दावत्, पू.:४३३, **व्यउ.**१४३:१४५याज्ञवल्क्यः; **व्यम** ४२; **विता.**२९७,३००; **राकौ.**४४६; **बाल.**२।११४ दावत्, **समु.**१२६ अपवत्.

(१) **नासं.**१४।३ उत्तरार्धे (निरिष्टे वाप्यमरणे पितर्युपरतेऽस्पृहे); **नास्मृ.**१६।३; **मिता.**२।११४ वा (चा); **दा.**१८ प्र (द) निवृत्ते वापि रमणे (विनष्टे वाप्यशरणे) 'निवृत्ते वापि मरणात्' इति पाठः; **अप.**२।११४ मितावत्; **उ.**२।१४।१ वाऽपि रमणे (चाऽपि मरणात्); **व्यक.**१४१ मितावत्; **स्मृच.** २५९ मितावत्, **विर.**४६२; **पमा.**४८६; **मपा.**६४७ णे (णात्), **दीक.**४२ प्र (द) वाऽपि रमणे (चाऽपि रमणात्); **रत्न.** १३८ मितावत्; **विचि.**१९५ वाऽपि रमणे (रमणे वाऽपि); **व्यनि.** वाऽपि रमणे (चाऽपि रमणात्); **स्मृचि.**२८; **दात.**१६२ निवृत्ते वापि रमणे (विनष्टे वाप्यशरणे) उत्त.; **सवि.**३४९ प्रथमपादः :३५१ मितावत्; **चन्द्र.**७० मितावत्; **वीमि.**२।१२२ पू.; **व्यप्र.**४३३ व्यनिवत्; **व्यउ.**१४३ मितावत्; **व्यम.**४२ मितावत्; **विता.**२९७; **सेतु.**३१८ (=) हे (हा) शेष दातवत्, उत्त.; **विभ.**६६; **समु.**१२६ मितावत्; **विच.**२८,३३ दावत्.

पितरि द्रव्यनिस्पृहे निवृत्तरमणे मातरि च। निवृत्तरजस्कायां पितुरनिच्छयापि पुत्रेच्छयैव विभागो भवति। यथोक्तं नारदेन 'अत ऊर्ध्वं पितुः पुत्रा विभजेयुर्धनं समम्'इति पित्रोरूर्ध्वं विभागं प्रतिपाद्य—'मातुर्निवृत्ते' इति दर्शितः। अत्र पुत्रा धनं समं विभजेयुरित्यनुपज्यते। गौतमेनापि—'ऊर्ध्वं पितुः पुत्रा रिक्थं विभजेरन्नि'त्युक्त्वा 'निवृत्ते चापि रजसी'ति द्वितीयः कालो दर्शितः। 'जीवति चेच्छती'ति तृतीयः कालो दर्शितः। तथा सरजस्कायामपि मातर्यनिच्छत्यपि पितर्यधर्मवार्तानि दीर्घरोगग्रस्ते च पुत्राणामिच्छया भवति विभागः। यथाह शङ्खः—'अकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि रोगिणि चे'ति। मिता.२।११४

(२) विनष्टे पतिते, अशरणे गृहस्थाश्रमरहिते। यदा निवृत्ते वापि मरणादिति पाठः तदा मरणान्निवृत्ते जीवति निस्पृह इति। पाठान्तरमनाकरम्। अत्राप्युपरतस्पृहत्वादिना पुत्राणां स्वत्वं पितृधने भवतीति ज्ञापनादयमेकः कालो विभागस्येच्छाप्राप्तोऽनूद्यते प्राप्त्यनुसारित्वाच्चानुवादस्य स्वामित्वाच्च प्राप्तेः।

दा.१८-१९

तदेव पितृस्वत्वापगम एकः कालोऽपरश्चानपगत एव पितुः स्वाम्ये पितुरिच्छयेति कालद्वयम्। न पुनः पित र्युपरत इत्येकः कालः पितर्युपरतस्पृहे मातुश्च निवृत्ते रजसीत्यपरः, अनिवृत्तेऽपि मातृरजसि पितरि सस्पृहे तदिच्छयेति कालत्रयमादरणीयम्। मातृरजोनिवृत्तेः पित्रुपरतस्पृहत्वविशेषणत्वे, 'त्रिंशद्वर्षो वहेत् कन्या हृद्या द्वादशवार्षिकीम्। व्यष्टवर्षोऽष्टवर्षा वा धर्मे सीदति सत्वरः॥' इति मनुना (९।९४) विवाहकालविधानात्, वनं पञ्चाशतो व्रजेदित्याश्रमान्तरगमनकालविधानात् तदा च रजोनिवृत्तेर्मातुरसंभवे पितरि चोपरतस्पृहे वानप्रस्थे तत्पुत्राणामिच्छतामप्यविभागप्रसगात्। निर्विशेषणमुपरतस्पृहत्वमेव पितृधनविभागकाल इति चेन्न, अनुपरतस्पृहे पितरि पतितेऽप्यविभागप्रसगात्। अयमप्यपरः काल इत्यभिधाने कालचतुष्टयापत्तिः पितुरुपरमः, पतितत्वं, निस्पृहत्वं, इच्छा चेति।

दा.२१-२२

तस्मात् पतितत्वनिस्पृहत्वोपरमैः स्वत्वापगम इत्येकः कालोऽपरश्च सति स्वत्वे तदिच्छात इति कालद्वयमेव युक्तम्। 'मातुर्निवृत्ते रजसी'ति तु पितामहादिधनाभिप्राय, निवृत्ते रजसि पुत्रान्तरसंभावनाभावात्, तदानीमपि पितुरिच्छयैव पुत्राणां विभागः, अनिवृत्ते रजसि क्रमागतधनविभागे पश्चाज्जाताना वृत्तिलोपापत्तेः न चासौ युक्तः। 'ये जाता येऽप्यजाता वा ये च गर्भे व्यवस्थिताः। वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपो विगर्हितः॥' इति मनुवचनात्। यत एव पितृधने कालद्वयं अत एव मनुगौतमादिभिर्मृतपदं परित्यज्य ऊर्ध्वमित्युक्तं 'ऊर्ध्वं पितुरि'ति (मस्मृ.९।१०४, गौध.२८।१) पितुस्तदा स्वत्वापगमात् तदर्थमेवोर्ध्वमित्युक्तं, अतोऽयमेको विभागकालः। 'ऊर्ध्वं विभागाज्जातस्त्वं'त्यनेन (मस्मृ.९।२१६, नास्मृ.१६।४४) च सस्पृहे पितरि तदिच्छया विभागकालोऽपरो दर्शितः। 'दत्तासु भगिनीषु चे'ति न कालार्थं किन्तु तासामवश्यं दानार्थम्। तथा 'यच्छिष्टं पितृदायेभ्यो दत्त्वर्णं पैतृकं ततः। भ्रातृभिस्तद्विभक्तव्यमृणी न स्याद्यथा पिता॥' इद नारदवचन पित्रर्णशोधनावश्यम्भावार्थं न विभागकालार्थम्। अस्माच्च नारदवचनादयमर्थः सिध्यति यद्विभागकर्तृभिरुत्तमर्णानुमत्यैव पित्रादि ऋणं विभजनीय परिशोध्य वा शोधनावशिष्टधनविभागप्रतिपादनस्यैतत्प्रयोजनत्वात्। अत एव मातृधनस्यापि ऋणावशिष्टस्य विभागमाह याज्ञवल्क्यः—'मातुर्दुहितरः शेषमृणात् ताभ्य ऋतेऽन्वयः' (यास्मृ.२।११७) एतच्च विस्तरेण ऋणादाने वक्ष्यते। यद्वा दत्तासु भगिनीषु मातृधन पुत्रैरेव विभजनीय अदत्तासु ताभिः सह साधारण, एतच्चावसरे वाच्यम्। एव तावत् पितृधनविभागस्य कालद्वयमप्युक्तम्। दा.२४-२५

एव च पितामहधनस्यापि पितुरिच्छयैव विभागः कार्यः किंतु मातुर्निवृत्ते रजसीति विशेषः, स्वोपात्ते तु रजोनिवृत्तिमन्तरेणापि, पितुरूर्ध्वमिति तु उभयत्राप्यविशिष्टम्। तेन पैतामहधनेऽपि कालद्वयम्। +दा.३६

(३) निर्दोषे पितरि स्थितेऽपि क्वचिद्विषये पुत्रकर्तृकविभागमाह स एव—अत ऊर्ध्वमिति। यद्यपि अत

+ चन्द्र. दावद्भावः।

ऊर्ध्वमित्यादि समभित्यन्तमार्धं वाक्यमजीवद्विभागकालादिबोधनार्थं तथाऽप्युत्तरवाक्यपूरणोपयोगार्थं पठितम् । पित्रोरपत्योत्पत्तिसामग्र्यभावनिश्चये स्वयपत्यविवाहकृत्ये च कृते पितुर्धनास्पृहाया पुत्रा एव विभजेरन्निति । स्मृच.२५९

(४) अथ पुत्रा विभजेरन्नित्यधिकारे नारदः —मातुरिति । प्रत्तासु विवाहितासु, निवृत्ते रमणे रतिसामर्थ्ये निवृत्ते, उपरतस्पृहे विषयस्पृहाविच्छेदवति, प्रकाशे तु निरपेक्षे च रमणे, निरस्ते चापि रमणे इति पाठद्वयं वाक्यभेदपुरस्कारेण लिखितं, तदपि तदीयार्थव्याख्यानेन फलतोऽविरुद्धम् । हलायुधस्तु रमणादिति पठितवान् तत्रापि फलाविशेष एव । विर.४६२

(५) रमण स्त्रीसंभोगः । तदिच्छानिवृत्तौ सत्यामित्यर्थः, स्पृहा द्रव्यविषया । मपा.६४७

चत्वारः काला विभागस्य जीवत्येव पितरि पितुर्यदा विभागेच्छा स तावदेकः। निवृत्तरजस्कायां मातरि स्त्रीसुखानभिलाषिणि द्रव्यनिस्पृहे च पितरि पित्रनिच्छायामपि यदा पुत्रेच्छा सोऽन्यः। सरजस्कायामपि मातरि अनिच्छत्यपि पितरि तस्मिन् वृद्धे अधर्मवर्तिनि अचिकित्सितरोगग्रस्ते सति यदि पुत्रेच्छा सोऽन्यतरः । पितृमरणानन्तरमपर इति । मपा.६४५

(६) उपरतस्पृह इत्यनेन मातुर्निवृत्ते रजसीत्यनेन च पितुः पत्न्यन्तरस्वीकारेच्छायां विभागो नास्तीति गम्यते। अतश्च 'ऊर्ध्वं पितुरि'त्यनेन एको विभागकालः। स चाजीवद्विभागः । 'मातुर्निवृत्ते रजसि' इत्यनेन जीवद्विभागकालः । एवं विभागस्य कालद्वयमुक्तम् । पितुरिच्छायास्तु जीवद्विभागानतिरेकान्न पृथक्कालभेदः ।

सवि.३५१

(७) जीमूतवाहनेन तु 'विनष्टे चाप्यशरण' इति पाठो लिखितः । विनष्टे पतिते, अशरणे गृहस्थाश्रमरहित इति व्याख्यातं च । निवृत्ते चापि रमणादिति पाठान्तरमनाकरमित्यप्युक्तम् । तदयुक्तम् । मिताक्षरादिबहुनिबन्धलिखितत्वात् । पुत्रा धन समं विभजेयुरित्यनुषङ्गः । व्यप्र. ४३३

[जीमूतवाहनकृतं मिताक्षराया दूषण निरासयति]

तन्मिताक्षराकृदाशयापरिज्ञानात् । न हि तेन कालत्रयनियमोऽभिहितः। तथेत्यादिग्रन्थेन कालान्तरस्यानुपदमेव प्रतिपादनात्। नियमस्य निर्बीजत्वात् । पितृस्वत्वापगम एकः कालोऽपरश्चानपगत एव पितृस्वाम्ये तदिच्छात इति कालद्वयमित्यप्यशुद्धम् । निवृत्तरजस्कायां मातरि स्वनन्वयापत्तेः। न हि मातृनिवृत्तरजस्कतामात्रेण पितृस्वत्वापगमः । जन्मना स्वत्वावस्थापनात्पितृस्वत्वापगमस्य कालोपलक्षणत्वासंभवाच्च । एव दीर्घरोगग्रस्तत्वेऽपि न स्वत्वापगम इति कालद्वयनियमस्तवापि दुःसमाधः । इष्टापत्तौ तद्वचनविरोधः । व्यप्र.४३४

तदप्यनभियुक्तप्रमोदनम् । वृत्तिलोपापत्तेः पितृधनेऽपि तुल्यत्वात् ऊर्ध्वं विभागादित्यस्य निर्विषयत्वापत्तेरपि पितामहादिधनेऽपि तुल्यत्वात् । सस्पृहे पितरि पातित्यादिदुष्टे पितामहधनेऽपि पुत्रेच्छया विभागस्य सकलसमतत्वादवश्यवाच्यत्वाच्च । वस्तुतस्तु पितामहधने 'भूर्या पितामहोपात्ता' इत्यादिना सदृशस्य पितापुत्रस्वाम्यस्य वक्ष्यमाणत्वात् पुत्रेच्छयापि तस्य विभाग उचित एव । यत्तत्र व्याख्यानान्तरमनीशत्वस्य तद्धनगोचरत्वादिकल्पन तत्सर्व तद्वचनविवेचने निराकरिष्यामः ।

वय तु स्वातन्त्र्यार्हे पितरि जीवति तदिच्छैव विभागनिमित्तम् । पातित्यपारिव्रज्यादिभिस्त्वदनर्हे पुत्रेच्छापि । तदुपरमे तु स्वेच्छाया निमित्तत्वमर्थसिद्धमिति कालत्रयमेवानेन प्रकारेण । अन्यथा बहूनामुपरतस्पृहत्वादीनाविकल्पसमुच्चयादिकल्पनानुपपत्तौ विशेषगविशेष्यभावाव्यवस्थापत्तौ बहुव्याकुलीभावः । अत एव क्वचिद्वचने केषांचिदेवोपादानमनुपादानं च केषांचित् संगच्छते । एकमूलकल्पनालाघवेनोपरतस्पृहत्वादिभिः पितुः स्वातन्त्र्याभावस्यैकस्य सर्वैरुपलक्षणात् । 'अनीशास्ते हि जीवतोः ' 'निर्दोषे पितरि स्थिते जीवतोरपि शस्यत' इत्यादिवचनस्वरसोऽप्येवमेव । व्यप्र.४३५

(८) 'प्रत्तासु भगिनीषु चे'ति काकाक्षिवद्गुजोरमणनिवृत्योर्विशेषणम् । व्यम.४२

(९) तेन 'मातुर्निवृत्ते रजसी'ति पैतामहादिधनपरं पश्चाज्जातस्य वृत्तिलोपापत्तेरिति प्राच्यमतमपास्तम् । विता.२९६

विभागानधिकारी पिता

व्याधितः कुपितश्चैव विषयासक्तमानसः ।
अन्यथाशास्त्रकारी च न विभागे पिता प्रभुः ॥

(१) अपि तु तत्पुत्र एव प्रभवतीति शेषः । अन्यथाशास्त्रकारी स्मृत्याचारव्यपेतमार्गवर्ती । स्मृच.२५८

(२) अधर्मस्थे पितरि सर्वापवादेन पुत्रेच्छया विभागमाह । विता.२९९

बृहस्पतिः

पित्रोरूर्ध्वं रिक्थविभागकालः । जीवति पितरि रिक्थविभागकालः ।

[1]पित्रोरभावे भ्रातृणां विभागः संप्रदर्शितः ।
मातुर्निवृत्ते रजसि जीवतोरपि शस्यते ॥

(१) नास्य वचनस्य पितृधनगोचरत्वं, 'ऊर्ध्वं विभागाज्जातस्तु'इत्यस्य (मस्मृ.९।२१६,नास्मृ.१६।४४) निर्विषयत्वापत्तेः निवृत्ते रजसि पुत्रोत्पत्तेरभावात्, मातृधनविषयत्वं चास्य नाशकनीयम्। एवं मातुरेव निर्धनत्वापत्तेः । अतो निवृत्ते रजसीति पितामहादिधनविषयम् । न चेच्छामनपेक्ष्य रजोनिवृत्तेर्विभागनिमित्तत्व सभवति अनिच्छया विभागाभावात् ।

सत्यामिच्छाया कस्येच्छयेत्यपेक्षाया 'ऊर्ध्वं पितुः पुत्रा रिक्थ विभजेयुः निवृत्ते रजसि मातुर्जीवति चेच्छती'ति (गौध.२८।१,२) गौतमवचनात् पितुरेवेच्छात इति निर्णीयते। अतः पित्रोरभाव इत्येकः कालः । पित्रोरिति द्विवचननिर्देशात् सोदर्भ्रातृणा पितृधनविभागोऽपि मातुरभाव एव कार्यः । न तु मातृधनविभागार्थं मातुरभावस्योपादान जीवतोरपीत्यस्य मातृधनगोचरत्वानुपपत्तेः अन्यधनगोचरत्वमवश्यं वाच्यं तेन यत्रैव विभागे पित्रोरभावो निमित्तं तत्रैव जीवतोरपीत्यपिशब्देन जीवनस्यापि शस्तत्वकीर्त्तनात् न मातुरभावो मातृधने व्याख्येयः । एतच्च विस्तरेण वाच्यम् । तस्मात् पितामहादिधनस्यापि पित्रोरभाव इत्येको विभागकालः तथा मातुर्निवृत्ते रजसि पितुरिच्छात इत्यपरः । न तु पितुरिच्छामन्तरेण तस्य विभागः । दा.२६-२८

निवृत्तरजस्काया मातरि जीवन्त्या विभागस्य मातृधनगोचरत्वानुपपत्तेः उभयाभावोक्तविभागस्यैव जीवतोरपीत्यपिकारेण शस्तत्वकीर्तनात् उभयोरभावे भ्रातृविभागः पितृधनगोचर एवावधार्यते । दा.६०

(२) अत्रापि निवृत्ते चापीति विवक्षितम् । विर.४६२

(३) अत्र मातृपद विमातृपरमपि पुत्रान्तरोत्पत्तिसंभावनातौल्यात् । *दात १६७

(४) [जीमूतवाहनमतमुपन्यस्य खण्डयति] तदसंबद्धम् । 'पितुश्च मातुश्च' इति मनुवचने पृथङ्निर्देशादन्यथापि द्विवचनस्य विभागसंबन्धविवक्षामात्रेण व्याख्यानं युक्तम् । इतरथैकतरधनेऽन्यतराभावस्यादृष्टार्थत्वापत्तेः । यच्चोक्त जीवतोरित्यादेर्मातृधनगोचरत्वानुपपत्तेरित्यादि तस्यापि कोऽभिप्रायः । मातुः पितरि जीवत्यस्वातन्त्र्यान्न तद्धनगोचरत्वमिति यदि तर्हि सत्स्वपत्येषु भार्याधनेऽपि पितुः स्वाम्यं तदभावस्यापि तत्रानुपयोगादन्यविषयत्वापत्तिः । अभिप्रायान्तरं त्वसंभवदुक्तिकमेवेति वक्ष्यामः । तस्मादृष्टार्थत्वात्तद्धनविषयक एव तदभावः संग्रहकारायुक्तो युक्तः । +व्यप्र.४३६

---

(१) **नास्मृ** १६।१६; **मिता** २।११६; **दा.**५६ मानसः (चेतनः) न्य (य), **अप.**२।११४, **स्मृच.**२५८, **पमा.**४८७, **रत्न.**१३८; **मपा.**६४७ उत्त.; **व्यनि.**न्य (य) न विभागे (विभागे न); **स्मृचि.**२९; **नृप्र.**३४; **दात.**१६५ दावत्, **सवि.**३५१; **दानि.**२, **व्यप्र.**४३३ न्य (य):४३९(=) पू.; **व्यउ.**१४३; **व्यम.**४२; **विता.**२९६ न्य (य) उत्त., याज्ञवल्क्यः : २९९ पूर्वार्धे (व्याधितः कुपितो वापि व्यसनाभिप्लुतोऽपि वा) न्य (य) : ४३२ पूर्वार्धे (व्यसनासक्तचित्तो वा व्याधितः कुपितस्तथा) न्य (य), **सेतु.**७२ च न (तु न); **विभ.** ४४ प्रथमपादः, **समु.**१२६; **विच.**५५ दावत्.

(२) **दा.**२६:६० भ्रातृ (पुत्रा); **व्यक.**१४१; **विर.**४६२; **रत्न.**१३८; **व्यनि.**; **दात.**१६७; **व्यप्र.**४३३; **व्यम.**४२, **विता.**२९२; **विभ.**६६ शस्य (कथ्य):७९ पू.; **समु.**१२६; **विच.**३५.

---

* दावद्भावः ।

+ व्यम. व्यप्रवद्भावः । विता. व्यप्रवद्भावः, विशे०. 'ऊर्ध्वं पितुः' इति गौतमवचने (पृ.११४५) द्रष्टव्यः ।

देवलः

पितुरूर्ध्वं रिक्थविभागकालः। जीवति पितरि सदोषे विभागकालः, जीवति पितरि स्वाम्यविचारश्च।

[1]**पितर्युपरते पुत्रा विभजेयुर्धनं पितुः।**
अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते॥

(१) देवलश्च पितृधने अस्वाम्यमेव स्पष्टयति—पितर्युपरत इति। ×दा.१३

(२) अस्वाम्यमस्वातन्त्र्यम्। अप.२।११४

(३) अत्रास्वाम्यवचनमस्वातन्त्र्यप्रतिपादनार्थमिति मन्तव्यम्। निर्दोषे पितरि स्थिते पितृधने पुत्राणां जन्मना स्वाम्यस्य लोकसिद्धत्वात्। नन्वलौकिक स्वाम्यं न पुत्राणा लोकसिद्धमिति वृथैव 'अस्वाम्य हि भवेदि'ति वचनान्तरस्य भङ्गः क्रियते। न च वाच्य प्रतिज्ञामात्र लौकिकस्वाम्यमिति, यतो न्यायमाह संग्रहकारः—'वर्तते यस्य यद्धस्ते तस्य स्वामी स एव न। अन्यस्वमन्यहस्ते तु चौर्याद्यैः किं न दृश्यते॥ तस्माच्छास्त्रत एव स्यात्स्वाम्यं नानुभवादपि॥' इति। यस्माच्चस्यान्तिके यद्धनं वर्तमान दृष्टं तस्य स एव स्वामीत्यवधारयितुं न शक्यते, परकीयस्यापि चौर्यादिना अन्यान्तिकस्थस्य दर्शनेन तस्यैव स्वामित्वापत्तेः। तस्मात् शास्त्रैकसमधिगम्यं स्वाम्यं न प्रमाणान्तरसमधिगम्यमपीत्यर्थः। किं च यदि यस्यान्तिके यद्दृष्टं तस्य स एव स्वामी, तर्ह्यस्य स्वमन्येनापहृतमिति न ब्रूयात्। यस्यैवान्तिके दृष्ट तस्य च स्वामित्वात्। अपि च प्रमाणान्तरगम्ये स्वाम्ये 'ब्राह्मणस्याधिक लब्धम्। क्षत्रियस्य विजितम्।

× दात. दावत्, विरचच। चन्द्र. दावत्।

(१) दा.१३:२८ उत्त.; अप.२।११४ युर्धन पितु. (रन् पितुर्धनम्); व्यक.१५२ (Wai, Ms.), १४० अपवत्, स्मृच.२५६ अपवत्; विर.१५० हि (तु):४५६; पमा.४८० देषां(त्तेषां) शेष अपवत्; दीक.४२ युर्ध (रन् ध); रत्न.१३६ अपवत्; विचि.७०; व्यनि.पमावत्; दात.१६२:१६८ उत्त.:१६९ पू; सवि. ३५० हि (तु) शेष पमावत्, चन्द्र. ५० युर्धनं पितुः (युः पितुर्धनम्) देषा (त्तेषां); व्यप्र ४१४:४३३(=) उत्त.; व्यम.३९; विता.२७८ अपवत्:२८५ उत्त., नारदः; बाल.२।११३:२।११७ अपवत्; विभ.४६ अस्वा (न स्वा) उत्त.; समु.१२६ अपवत्; विच.२५,३३:६७ पू.

निर्विष्टं वैश्यशूद्रयोरि'ति (गौध.१०।३९-४१) गौतमप्रणीते धर्मशास्त्रे यथाक्रमं वर्णानतिक्रमणे पृथक् पृथक् विभिन्नप्रकारेण विहितोऽर्थागमो व्यर्थः स्यात्। मानान्तरस्यैव नियामकत्वात्।

एतद्बाधकद्वयमेवाह स एव—'अस्यापहृतमेतेन न युक्तं वक्तुमन्यथा। विहितोऽर्थागमः शास्त्रे यथावर्ण पृथक् पृथक्॥ प्रतिग्रहाजिवाणिज्यशुश्रूषाख्या यथाक्रमम्॥' इति। अस्येत्यादिना वक्तुमित्यन्तेनात्र प्रथम बाधकमुक्तम्। अवशिष्टेन व्यर्थः स्यादित्यध्याहारसापेक्षेण द्वितीयमिति मन्तव्यम्। एवं च स्वत्वमपि स्वाम्यवदेव शास्त्रैकसमधिगम्य विज्ञेयम्। यस्मात् स्वाम्यस्वत्वयोस्तुल्ययोगक्षेमयोरेकतरमधिकृत्य साधितेऽपि शास्त्रैकसमधिगम्यत्वे द्वयोरेव साधितत्व भवति। अत एव संप्रति स्वत्वमधिकृत्यापि शास्त्रैकसमधिगम्यत्व द्वयोरेव साधयितुमाह स एव 'न च स्वमुच्यते तद् यत् स्वेच्छया विनियुज्यते। विनियोगोऽत्र सर्वस्य शास्त्रेणैव नियम्यते॥' इति। अस्यायमर्थः। न च ब्रमोऽन्तिके वर्तमानतया परिदृष्ट स्वमिति। किन्तु यद्वस्तु येन यथेष्ट विनियुज्यते तत्तस्य स्वमित्युचितम्। ततश्च नातिप्रसंगादिदूषणम्। अपहृतादेरयथेष्टविनियोज्यस्य स्वव्यवहाराप्रसंगादिति न च वाच्यम्। यतः सर्वस्य स्वव्यवहारविषयस्यापि धनस्य विनियोगः शास्त्रेणैव गुरुभृत्यादेर्भरणादौ नियम्यत इति। यथेष्टविनियोज्यं किमपि नास्ति। प्रपञ्चितं चैतद्धारेश्वरसूरिणा। तस्मात् 'अस्वाम्य हि भवेदेषा निर्दोषे पितरि स्थित' इति धर्मशास्त्रादस्वाम्ये सिद्धे यद्यपि 'पश्चादधिगत तैः' इति शंखवचनस्यैवान्यथा व्याख्या न्याय्या। अत्रोच्यते। न ब्रूमो यथेष्टविनियोज्यं स्वमिति। किन्तु यथेष्टविनियोगार्ह स्वत्वमिति ब्रूमहे।

ननु शास्त्रेण गुरुभृत्यादेर्भरणादौ विनियोगनियमात् यथा यथेष्टविनियोज्यत्वं दुर्निरूप तथा यथेष्टविनियोगार्हत्वमपि यथेष्टविनियोगाभावादेव दुर्निरूपम्। मैवम्। यथेष्टविनियोगाभावेऽपि यत्नेनार्जितं तत्तस्य यथेष्टविनियोगार्हमित्येवं निरूप्यते। तथा च नयविवेके भवनाथेनैव निरूपितं तच्च तस्य तदर्हं यत्नेनार्जितमिति ग्रन्थेन, तस्यायमर्थः। यद्वस्तु येन पुरुषेणार्जितं तद्वस्तु

तस्य पुरुषस्य तदर्ह यथेष्टविनियोगार्हमिति स्वत्वनिरूपणवद्यथेष्टविनियोगार्हत्वनिरूपण च अस्मन्मते सुशक्यमिति शब्दार्थः ।

नन्वेव चोरस्य चौर्यार्जित यथेष्टविनियोगार्ह स्यादित्याशङ्क्याह स एव । लौकिकमिद चार्जनं जन्मादीति । जन्मक्षयसंविभागपरिग्रहाधिगमाद्येव अनिदंप्रथमलोकसिद्धमर्जनमेव स्वत्वापादक न पुनः चौर्यादिकमित्यर्थः । अतिप्रसंगपरिहारोऽपि सुशक्य इति चशब्दार्थः ।

नन्विदमर्जनमनिदंप्रथमलोकसिद्धमिद नेत्यत्र कि नियामकमित्याशक्याह स एव । अत एवानिदंप्रथमलोकविषय इत्यवस्थितनिबन्धनार्था स्मृतिः । व्याकरणादिस्मृतिवदिति । यत एवानिदंप्रथमलोकसिद्धार्जनमेव स्वत्वापादक ततश्च तदेव लौकिकवैदिकस्वव्यवहारसिद्ध्यर्थमवश्य ज्ञेयम् । अत एवानिदंप्रथमलोकधीगोचरतया व्यवस्थितार्जनाना स्वग्रन्थे निबन्धनार्था स्मृतिः 'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु । ब्राह्मणस्याधिक लब्धम् । क्षत्रियस्य विजितम् । निर्विष्टं वैश्यशूद्रयोः' इत्यादिका गौतमादिप्रणीता धर्मस्मृतिः (१०।३९–४२) साधुशब्दनिबन्धनार्थव्याकरणस्मृतिवत् कृतेत्यर्थः । स्मृच.२५६–२५८

एव च यत्संग्रहकारेणोक्त 'वर्तते यस्य यद्धस्ते' इत्यादिना यच्च धारेश्वरसूरिणा प्रपञ्चितं तत्सर्वमपास्तं वेदितव्यम् । ततश्च 'अस्वाम्य हि भवेदेषा निर्दोषे पितरि स्थित' इति वचनस्येव शंखवचनविरोधपरिहारो युक्त एवेत्यलमतिबहुना ।

प्रकृतमुच्यते । निर्दोषग्रहणात्पितरि सदोषे स्थितेऽपि सति पुत्राणा न तत्पारतन्त्र्यमिति दर्शयति । तेन पितरि स्थिते व्यासक्तत्वादिदोषे सत्यर्थादानविसर्गादौ ज्येष्ठस्य स्वातन्त्र्यादनुज्ञाना च ज्येष्ठाधीनस्वत्वमवगन्तव्यम् ।

*स्मृच.२५८

(४) निर्दोषे पातित्यादिदोषरहिते । विर.४५६

(५) एवामादीन्यस्वातन्त्र्यपराणि न स्वत्वाभावपराणीति । पूर्वमेव स्वत्वपक्षे सर्वासु स्मृतिषु विभजेयुरिति युज्यते । अन्यथा विभागात्पूर्वं स्वत्वाभावे पुत्रेभ्यो दद्यादिति वक्तव्यम् । व्यनि.

(६) तत्पित्रर्जिते स्वातन्त्र्यप्रतिषेधार्थ न पैतामहे । पूर्वत्रापि द्यूतादिनिषेधार्थमेव न तु धर्मव्यय इति वक्ष्यामः । पितृव्यभ्रात्रादिधने तु स्वामितत्पुत्राभावे स्वत्व न तत्सत्त्वे इति सप्रतिबन्धो दायः । तत्र स्वत्वं पदार्थान्तरमेवेति शिरोमणिभट्टाचार्याः । स्वमिति व्यवहारविषयत्वं शक्तिविशेषो वेत्यन्ये । ×विना.२७८-२७९

(७) इदं चास्वातन्त्र्य विभागकाम्यधर्मव्यवसायादिविषयम् । ×व्यम.३९

संग्रहकारः (स्मृतिसंग्रहः)

पितृद्रव्यमातृद्रव्यविभागकाल. । पितुरूर्ध्वं विभागकालः ।

[1]पितृद्रव्यविभागः स्याज्जीवन्त्यामपि मातरि ।
न स्वतन्त्रतया स्वाम्यं यस्मान्मातुः पतिं विना ॥
[2]मातृद्रव्यविभागोऽपि तथा पितरि जीवति ।
सत्स्वपत्येषु यस्मान्न स्त्रीधनस्य पतिः पतिः*॥
[3]पितुरूर्ध्वं विभागो य एकोद्दिष्टादनन्तरम् ॥

वद्भावः, विशेषः 'विभागोऽर्थस्य पित्र्यस्य' इति नारदवचने (पृ.११३७) द्रष्टव्यः ।

× स्मृचवद्भावः ।

* स्मृच. व्याख्यान 'ऊर्ध्वं पितुश्च' इति मनुवचने (पृ. ११५०) द्रष्टव्यम् । पमा., सवि., व्यप्र. स्मृचवत् ।

(१) **स्मृच.**२५५; **पमा.**४७९ गः स्याज्जी (गस्य जी) न स्व (अ स्व) स्वा (ऽस्वा); **रत्न.**१३६ यस्मा (तस्मा); **सवि.** ३४९ रत्नवत्; **व्यप्र.**४३२; **व्यम.**४१; **समु.**१२६.

(२) **स्मृच.**२५६; **पमा.**४७९; **रत्न.**१३६; **सवि.**३४९; **व्यप्र.**४३२; **व्यम.**४१; **समु.**१२६.

(३) **स्मृच.**२६४; **समु.**१२६ रम् (रः).

पितृकर्तृको विभागः

जावत पितर पुत्राणां स्वाम्यास्वाम्यस्वातन्त्र्यास्वातन्त्र्यविचारः । पितुर्दर्यशित्वादिविचार. पुत्राणां चांशाः ।

वेदाः

पिता प्रजाभ्यो धन विभजति

[1]**विभक्तारं हवामहे वसोश्चित्रस्य राधसः ।**
सवितारं नृचक्षसम् ॥

वसोः निवासहेतोः चित्रस्य सुवर्णरजतादिरूपेण बहुविधस्य राधसः धनस्य विभक्तारं अस्य यजमानस्य एतावद्धनदानं उचितमिति विभागकारिणं नृचक्षस मनुष्याणा प्रकाशकारिणं सवितारं हवामहे । कौषीतकिन एतस्या ऋचो व्याख्यानरूपे ब्राह्मणे सवितुर्विभागहेतुत्वं एव समामनन्ति—'यदेतद्वसोश्चित्रं राधस्तदेष सविता विभक्ताभ्यः प्रजाभ्यो विभजति' इति । ऋसा.

[2]**आ हि ष्मा सूनवे पितापिर्यजत्यापये ।**
सखा सख्ये वरेण्यः ॥

हे अग्ने वरेण्यः वरणीयः पितापिः पितृस्थानीयः त्वं सूनवे पुत्रस्थानीयाय मह्यं अभीष्ट देहीति शेषः । हि ष्मा इति निपातद्वय सर्वथेत्यमुमर्थमाचष्टे । अभीष्टदाने दृष्टान्तद्वयमुच्यते । यथा आपिः बन्धुः आपये बन्धवे आ यजति हि स्म । सर्वथा ददातीति शेषः । सखा प्रियः सख्ये प्रियाय अभीष्ट सर्वथा ददाति तथा त्वमपि देहि । ऋसा.

वृद्धपितुः सकाशात् पुत्रा धन हरन्ति

[3]**वि त्वा नरः पुरुत्रा सपर्यन्पितुर्न जित्रेर्वि वेदो भरन्त ।**

हे अग्ने त्वा त्वा नरः मनुष्याः पुरुत्रा बहुषु देवयजनदेशेषु वि सपर्यन् । विविध पूजयन्ति । पूजयित्वा च वेदः धनं वि भरन्त । त्वत्तो विशेषेण हरन्ति । गृह्णन्ती-त्यर्थः । तत्र दृष्टान्तः । जित्रेः जीर्णात् वृद्धात् पितुर्न पितुरिव । यथा पुत्रा वृद्धात् पितुः सकाशाद्धनं हरन्ति तद्वत् । ऋसा.

पितृधने पुत्रस्वाम्यम्

[4]**रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न शासुः ।**

पितृवित्तः पितुः सकाशाल्लब्धः रयिः धनमिव यः अग्निः वयोधाः अन्नस्य दाता । यथा पैतृक धन विश्रम्भेण व्यवह्रियमाण सत् अन्नप्रद भवति तद्वदग्निरपि सर्वेषु यज्ञेषु विश्रम्भेण व्यवहृतः सन् अन्नप्रदो भवतीत्यर्थः । चिकितुषो न विदुषो धर्मशास्त्राभिज्ञस्य शासुः शासनमिव सुप्रणीतिः सुखेन प्रणेतव्यः । यथा विद्वच्छासनं सर्वेष्वनुष्ठेयेषु तत्तत्प्रशयनिर्णयाय नीयते तद्वदग्निरपि सर्वेषु यज्ञेषु प्रणीयते । ऋसा.

अर्वद्भिरग्ने अर्वतो नृभिर्नृन्वीरैर्वीरान्वनुयामा त्वोताः । ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः*॥

हे अग्ने त्वोताः त्वया रक्षिताः सन्तो वय अर्वद्भिः अस्मदीयैरश्वैः अर्वतः शत्रुसबन्धिनः अश्वान् नृभिः अस्मदीयैर्भटैः नन् शत्रोर्भटान् । वीर्याजायन्ते इति वीराः । तैः वीरान् शत्रुपुत्राश्च वनुयाम हन्याम । 'वनुष्यतिर्हन्तिकर्मानवगतसस्कारो भवति' (नि.५।२) इति यास्कः । ऋसा.

पुत्रा पित्रे धन ददति

[5]**हवामहे त्वा वयं प्रयस्वन्तः सुते सचा ।**
पुत्रासो न पितरं वाजसातये ॥

किच प्रयस्वन्तो हविर्लक्षणान्नवन्तो वय यजमानास्त्वा त्वा हवामहे । आह्वयामः । किमर्थ सुतेऽभिषुते सोमे निमित्तभूते सति । कीदृशा वयम् । सचा ऋत्विग्भिः सहिताः । आह्वाने दृष्टान्तः । पुत्रासः पुत्राः पितरं न

---

* 'ईशानासः पितृवित्तस्य' इत्यस्य व्याख्यान (पृ. ११२०) इत्यत्र द्रष्टव्यम् ।

(१) ऋसं.१।२२।७; शुभा.३०।४; शब्रा.१०।२।६।६.

(२) ऋसं.१।७३।१. (३) ऋसं.१।७३।१०.

(४) ऋसं.१।७३।९.

(५) ऋसं.१।१३०।१; सासं.१।४५९ (हवामहे त्वा प्रयस्वन्तः सतेष्वग्ने न पितर वाजसातये)

पालकं जनकमिव तं यथा वाजसातयेऽन्नस्य सभजनायाह्वयन्ति तथा वयमपि त्वा तदर्थमाह्वयामः। ऋसा.

पितृधने पुत्रस्वाम्यम्

प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते। असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः*॥

माता पुत्र प्रति भागदायिनी

ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा।

मातोपाः सवित्रान्विषित प्रेषितमस्य केत प्रज्ञापकमग्नेर्ज्येष्ठ प्रथममग्निहोत्राख्य भाग सूनवेऽग्नय आधात्। आदधाति। ऋसा.

पिता प्राप्तव्यवहाराय पुत्राय भागं ददाति

आ नस्तुजं रयिं भरांशं न प्रतिजानते।

हे इन्द्र नोऽस्माक तुज शत्रूणा बाधक रयि धनेनोपलक्षित पुत्रमा भर। सपादय। तत्र दृष्टान्तः। अंश न। यथा पिता प्रतिजानते व्यवहारज्ञाय पुत्राय स्वकीयस्य धनस्य भाग ददाति तद्वत्। ऋसा.

ज्यायान् कनीयसे भाग ददाति

यदिन्द्र पूर्वो अपराय शिक्षन्नयज्ज्यायान् कनीयसो देष्णम्। अमृत इत्पर्यासीत दूरमा चित्र चित्र्यं भरा रयि नः॥

हे चित्र चायनीयेन्द्र यद्धन पूर्वः पिता ज्येष्ठो भ्राता वापराय पुत्राय कनीयसे वा शिक्षन् प्रयच्छन्। शिक्षतिर्दानकर्मा प्रीणाति शिक्षतीति दानकर्मसु पाठात्। भवतीति शेषः। यच्च देष्णं देयं धन ज्यायान् ज्येष्ठः कनीयसोऽयत् प्राप्नुयात् यच्चापि धनं पितृतो लब्ध्वा पुत्रोऽमृत इत् अमृत एव सन् पितृगृह विहाय दूरं पर्यासीत आस्ते तत् त्रिविधं चित्र्यं चायनीयं रयिं धन नोऽस्मभ्यमा भर। आहर। ऋसा.

पिता पुत्रेभ्यो धनं ददाति

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि॥

हे इन्द्र नोऽस्मभ्यं क्रतुं कर्म प्रज्ञानं वा भर। आहर। अपि च यथा पिता पुत्रेभ्यो धनं प्रयच्छति तथा नोऽस्मभ्य शिक्ष। धन देहि। हे पुरुहूत बहुभिराहूत यामनि यज्ञे जीवा वय ज्योतिः सूर्यमशीमहि। प्रतिदिन प्राप्नुयाम। ऋसा.

यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव।

यो बृहस्पतिः परावतो दूरदेशाद्धनान्याहृत्य पुत्रेभ्यः पितेव नोऽस्मभ्य दाता भवति तस्मै मीळ्हुषे सेक्त्रे बृहस्पतयेऽनागा अनागस अनपराधा यथा वयं भवेम हे सखायः तथा यूय परिचरतेति शेषः। ऋसा.

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः।

इषिरेणेच्छावता मनसा सुतस्य ते सुतममिषुत त्वा भक्षीमहि। पित्र्यस्य पितृसंबन्धिनो धनस्येव धन मिव। पित्र्य धन यथेषणेन मनसोपभुञ्जते तद्वत्। ऋसा.

पुत्रः पितृभ्या धन ददाति

आ हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततन्थ।

हे अग्ने त्वमुभे द्यावापृथिवी द्यावापृथिव्यौ सदा सर्वदा ततन्थ। आतेनिथ। स्वतेजोभिर्विस्तारयसि खलु। बभूथा ततन्थेति थलि निपातितः। तत्र दृष्टान्तः। पुत्रो न यथा पुत्रो मातरा मातापितरौ क्षीणौ धनैस्तनोति तद्वत्। ऋसा.

पितरः पुत्रेभ्यो भाग ददति

पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात।

---

* व्याख्यान (पृ ११२०) इत्यत्र द्रष्टव्यम्।

(१) ऋसं.२।३८।५. (२) ऋसं.३।४५।४.

(३) ऋसं.७।२०।७

(४) ऋसं.७।३२।२६; तैसं.७।५।७।४; कासं.३३।७; असं.१८।३।६७,२०।७९।१; सासं.१।२५९,२।८०६; ऐब्रा.४।१०।२, ताब्रा.४।७।२।८; आश्रौ.६।५।१८,७।४।३; वैसू.२७।१२:३३।६,१०:३९।१४:४०।१३; शाश्रौ.९।२०।२४,१२।९।१६; कौसू.८६।१७.

(१) ऋसं.७।९७।२.

(२) ऋसं.८।४८।७; कासं.१७।१९; नि.४।७.

(३) ऋसं.१०।१।७.

(४) ऋसं.१०।१५।७; शुमा.१९।६३; असं.१८।३।४३.

(१) पुत्रेभ्यश्च हे पितरः, यजमानार्थं पुत्रवचनम्। सर्वे हि पितॄणा पुत्रा यजमानाः। तस्य यजमानस्य वस्वः प्रयच्छत दत्त। यदभिप्रेत वसुनो धनस्य च इह अस्मदीये ऊर्जं दधात स्थापयत। शुउ.१९।६३

(२) हे पितरः, पुत्रेभ्यो यजमानेभ्यः तस्य वस्वः वसुनो धनस्य प्रयच्छत दत्त। कर्मणि षष्ठी। यदभीष्ट धन तद् दत्त। पितॄणा पुत्रा एव यजमानाः। ते यूयमिहास्मदीये यज्ञे ऊर्जं रस दधात स्थापयत। शुम.१९।६३

(३) हे पितरः यूय तस्य यजमानस्य पुत्रेभ्यो वस्वो वसु धन प्र यच्छत। ते तादृशा यूयमिहास्मिन्नस्मदीये कर्मण्यूर्जं धन दधात। निधत्त। ऋसा.

तदिन्मे छत्सद्वपुषो वपुष्टरं पुत्रो यज्जानं पित्रोरधीयति।

वपुषः। वपू रूपम्। तद्वाङ्निष्यते। वपुष्मतोऽपि वपुष्टर रूपवत्तरमत्यन्त सुरूप तद्यज्ञकर्म मे मह्य छत्सत्। इन्द्रः कामयताम्। यद्यदा पुत्रो जान जन्मात्मन उत्पत्ति पित्रोर्मातापित्रोः सकाशादधीयति सकीर्तन द्वारेणाधिगच्छति। सुब्रह्मण्याह्वानकालेऽमुकशर्मणः पुत्रो यजत इत्यात्मनो जन्म सकीर्तयति। यद्वा। यजननादागत धन पित्रोः सकाशात्पुत्रोऽधिगच्छति तदेव मह्यमिच्छतु। ऋसा.

अहं पितेव वेतसूरभिष्टये तुभं कुत्साय स्मदिभं च रन्धयम्।

अहमिन्द्रः पितेव पिता पुत्रायेव स यथा तस्मै निर्वाहार्थमभिमत प्रदेश प्रसाधयति तद्वद्वेतसूनेतन्नामकान् जनपदानभिष्टयेऽभीच्छते कुत्साय महर्षये तुभ स्मदिभ च रन्धयम्। वशमनयम्। ऋसा.

[3]**द्विधा सूनवोऽसुरं स्वर्विदमास्थापयन्त तृतीयेन कर्मणा। स्वां प्रजां पितरः पित्र्यं सह आवरेष्वधुस्तन्तुमाततम्॥**

सूनव आदित्यस्य पुत्रा देवा अंगिरसः। देवाना ह्येतत्परमं जनित्र यत्सूर्य इति प्रदर्शितत्वादादित्यस्य सूनव इति गम्यते। असुर बलवन्त स्वर्विद सर्वज्ञ स्वर्गस्य लम्भक वादित्य तृतीयेन कर्मणा प्रजोत्पत्त्याख्येन। ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः। (तैस. ६।३।१०।५) इति श्रुतेः प्रजोत्पादनस्य तृतीयकर्मत्व तेनादित्य द्विधास्थापयन्त। द्विप्रकारमास्थापयन्ति। उदित चास्तमितं च कुर्वन्ति। किंच पितरो मदीया अंगिरसः स्वा प्रजाम्। उत्पादयेति शेषः। पित्र्य सहः पितुरादित्यस्य सबन्धिनमपराभिभवक्षम बलमवरेष्वादधुः। निकृष्टेषु स्वप्रजाभूतेषु मनुष्येषु स्थापितवन्तः। यथा पित्र्य धन सम्यक् परिरक्ष्य स्वपुत्रेभ्यः प्रयच्छन्ति तद्वत्पितुरादित्यस्य प्रकाशादिबल मनुष्येषु न्यदधुरित्यर्थः। किंच तन्तु प्रजामातत वितत कृतवन्त इति शेषः। पुत्रपौत्रादिरूपेणानवच्छिन्ना प्रजामित्यर्थः। अथ ह्याततत्तन्तुर्यत्प्रजेति ब्राह्मणम्। प्रजातन्तु मा व्यवच्छेत्सीः। (तैआ.७।११।१) इति च। तन्तु तन्वन्। (ऋस.१०।५३।६) इत्यस्य ब्राह्मण प्रजा वै तन्तुः। (ऐब्रा. ३।३८) इति। ऋसा.

सर्वेषा भ्रातॄणा भागाहत्वम्

क्राणा यदस्य पितरा मंहनेष्ठाः पर्षत्पक्थे अहन्ना सप्त होतॄन्।

यत्स्तोत्र क्राणा भाग कुर्वाणा भाग कुर्वाणावस्य पितरौ पितरावन्ये च महनेष्ठा भागप्रदाने वर्तमाना भ्रातरश्च गोलाभसाधनत्वेनाकल्पयन्निति शेषः। तन नाभानेदिष्ठः पक्थे पक्तव्येऽहन्नहनि। पठेऽहनीत्यर्थः। सप्तहोतॄन् होतृप्रशास्तृब्राह्मणाच्छस्यादिकाना पर्षत् सर्वतोऽपूरयत्। इदामित्थेति सूक्ताभ्या यज्ञपार प्रापयामास इत्यर्थः। ऋसा.

पितर्जित धन पितापुत्रसाधारणम्

[4]**पिता वै प्रयाजाः प्रजाऽनूयाजा यत्प्रयाजानिष्ट्वा हवीरूष्यभिघारयति पितैव तत्पुत्रेण साधारणं कुरुते।**

तस्मादाहुर्यश्चैवं वेद यश्च न कथा पुत्रस्य केवलं कथा साधारणं पितुरिति।

प्रथमभावित्वात्प्रयाजाना पितृत्व, पश्चाद्भावित्वादनू-

(१) ऋसं.१०।३२।३. (२) ऋसं.१०।४९।४.
(३) ऋसं.१०।५६।६
(१) ऋस.१०।६१।१; कौब्रा.२३।८
(२) तैसं २।६।१।६

याजाना पुत्रत्वम्। अनूयाजार्थं च हविरुपभृति गृहीतमस्ति। पुरोडाशादिहविरभिधारणवेलायामौपभृतमपि हविः प्रयाजशेषेणाभिधारयति। तथा सति पितृस्थानीय प्रयाजाना सबन्धि यदवशिष्टमाज्यद्रव्य तत्पुत्रस्थानीयानामनूयाजानामपि साधारण कृत भवति। इममेवार्थं लौकिकोदाहरणेन विस्पष्टयति—तस्मादाहुरिति। लोके हि बालेन यदुपार्जित तद्द्रव्य स पुत्र उत्तरकाले स्वजीवनार्थमसाधारणत्वेन सगृह्य गुप्त करोति न तु पित्रे प्रयच्छति न तु भ्रातृभ्यः। पित्रा तु यदुपार्ज्यते तत्पितुर्बालपुत्रस्य तद्भ्रातृणा च साधारण भवति। तेन हि द्रव्येण सवऽपि जीवन्ति। तथा सति लौकिकः कश्चित्पुरुषो वेदमधीत्य प्रयाजानूयाजवृत्तान्त जानाति। अन्यस्त्वध्ययनरहितो न जानाति। तादृशानामुभयविधाना सभायामुपविष्टा अनभिज्ञाः पप्रच्छुः केन हेतुना पुत्रस्य द्रव्य केवलमसाधारण सपन्नम्। पितृद्रव्य तु केन हेतुना साधारण सपन्नमिति। तस्य च प्रश्नस्याभिज्ञाः प्रयाजानूयाजवृत्तान्तेनोत्तर ददुरिति शेषः। तैसा.

पितृधन पुत्रधन च उभयसाधारणम्

[1]पिता वा एष यदाग्रयणः पुत्रः कलशो यदाग्रयण उपदस्येत्कलशादृगृह्णीयाद्यथा पिता पुत्रं क्षित उपधावति तादृगेव तद्यत्कलश उपदस्येदाग्रयणादृगृह्णीयाद्यथा पुत्रः पितरं क्षित उपधावति तादृगेव तदात्मा वा एष यज्ञस्य यदाग्रयणो यद् ग्रहो वा कलशो वोपदस्येदाग्रयणाद्गृह्णीयात्।

पिता पुत्रेभ्यो दाय विभजति

मनुः पुत्रेभ्यो दायं व्यभजत्स नाभानेदिष्ठं ब्रह्मचर्यं वसन्तं निरभजत्स आऽगच्छत्सोऽब्रवीत्कथा मा निरभागिति न त्वा निरभाक्षमित्यब्रवीत्।

मनोर्वैवस्वः पुत्रास्तेषु कनिष्ठो नाभानेदिष्ठनामको बालो वेदाध्ययन करोति। तदानीं पिता प्रबुद्धेभ्यः पुत्रेभ्यः स्वकीयं धन विभज्य दत्तवान्। अध्ययनपरं बाल भागरहितमकरोत्। स च बाल आगत्य केन हेतुना मां भागरहितमकार्षीरिति पितरमब्रवीत्। स च पिता त्वा भागरहितं न कृतवानस्मीत्यब्रवीदुक्त्वा च तत्प्राप्त्युपायं पुत्रायोपदिदेश। तैसा.

[2]अङ्गिरस इमे सत्रमासते ते सुवर्गं लोकं न प्र जानन्ति तेभ्य इदं ब्राह्मणं ब्रूही ते सुवर्गं लोकं यन्तो य एषां पशवस्ताꣳस्ते दास्यन्तीति तदेभ्योऽब्रवीत्ते सुवर्गं लोकं यन्तो य एषां पशव आसन् तानस्मा अददुः।

अनन्तर च पुत्रस्तेनोपायेन भाग प्राप्तवानित्येतदर्शयति—अङ्गिरोनामका इमे महर्षयः सत्रमनुतिष्ठन्ति। ते तु स्वर्गप्राप्तिसाधनाना नाभानेदिष्ठनामकशस्त्रादीनामपरिज्ञानात्स्वर्गं न जानन्त्यतस्तेभ्य इद त्वयाऽधीतं शस्त्रादिप्रतिपादकं ब्राह्मण ब्रूहि। तेऽपि सत्र परिसमाप्य स्वर्गं गच्छन्तो यागोपयुक्तेभ्योऽवशिष्टान्स्वकीयान्पशून् सर्वास्तुभ्य दास्यन्ति। सोऽयं भागप्राप्त्युपायः। इत्येवं प्रोक्तः पुत्र इद ब्राह्मण तेभ्योऽभिदधे। ततस्तदीयानवशिष्टान्सर्वान्पशूल्लब्धवान्। तैसा.

[1]तं पशुभिश्चरन्तं यज्ञवास्तौ रुद्र आऽगच्छत्सोऽब्रवीन्मम वा इमे पशव इत्यदुर्वै मह्यमिमानित्यब्रवीन्न वै तस्य त ईशत इत्यब्रवीद्यज्ञवास्तौ हीयते मम वै तदिति तस्माद्यज्ञवास्तु नाभ्यवेत्यꣳ सोऽब्रवीद्यज्ञे माऽऽभजाथ ते पशून्नाभि मꣳस्य इति तस्मा एत मन्थिनः सꣳस्रावमजुहोत्ततो वै तस्य रुद्रः पशून्नाभ्यमन्यत।

अथ नाभानेदिष्ठस्य रुद्रेण सह संवाद दर्शयति—अङ्गिरोभिर्दत्तान्पशून्स्वगृहे नेतु तदीये (याया) यज्ञभुवि यज्ञशेषैः पशुभिः सचरन्त नाभानेदिष्ठ रुद्र आगत्य मदीया एते पशव इत्यब्रवीत्। ततः स नाभानेदिष्ठो मह्यमङ्गिरस इमान्पशून्दत्तवन्त इत्यब्रवीत्। ततः स रुद्रस्तस्य यज्ञशेषस्य द्रव्यस्य तेऽङ्गिरसो न स्वामिनस्तस्मात्तैर्दत्त पशुद्रव्यमस्वामिदत्तत्वात्तव न योग्यमित्यब्रवीत्। कस्तर्हि स्वामीति चेच्छृणु यद्द्रव्य यज्ञभूमौ हीयते यज्ञसमाप्तेरूर्ध्वमवशिष्यते तत्सर्व ममैव स्वम्। तस्मान्ममानुज्ञामन्तरेण यज्ञभूमिः केनापि न प्रवेष्टव्या।

(१) तैसं ६.५।१०।१,२. (२) तैसं.३।१।९।४.

(१) तैसं.३।१।९।४,५. (२) तैसं.३।१।९।५,६,

यदि तव शिष्टपश्वपेक्षाऽस्ति तर्हि मा यज्ञे भागिन कुरु ततस्तुभ्यं दत्तानेतान्पशून्न मारयिष्यामीति रुद्रोऽब्रवीत्। ततो नाभानेदिष्टस्तस्मै रुद्रायैतं मन्थिनः सस्रावमजुहोत्। मन्थिग्रह हुत्वा तत्पात्रस्थ द्रव्यशेष परिधेर्यहिस्थापितेऽङ्गारे हुतवान्। ततस्तुष्टो रुद्रस्तस्य नाभानेदिष्टस्य पशूनेव हिंसितवान्। तैसा.

यैत्रैतमेवं विद्वान्मन्थिनः सꣳस्रावं जुहोति न तत्र रुद्रः पशूनभि मन्यते।

आख्यानं परिसमाप्य विधत्ते—ऐन्द्रवायवादिपूर्वस्थान्तेषु ग्रहेषु गृहीतेषु ऋतुपात्रयोः सोमग्रहणात्प्रागैन्द्रवायवमन्थिग्रहप्रचारस्य काल(र्य)त्वान्मधुश्च माधवश्चेत्येतस्मादनुवाकात्प्रागेवाश्वरो यज्ञ इत्याधारमन्त्र एष ते रुद्र भाग इति सस्रावमन्त्रश्च द्रष्टव्यः। तैसा.

[2]**ये त आसन् दश जाता देवा देवेभ्यः पुरा।**
पुत्रेभ्यो लोकं दत्वा कस्मिंस्ते लोक आसते॥

देवेभ्यः अधिष्ठातृभ्यः अग्न्यादिदेवताभ्यः पुरा पूर्वं ये ते देवाः प्रागुक्ताः प्राणापानाद्या दशसम्याका जाता आसन् ते पुत्रेभ्यः आत्मजेभ्यो लोक स्वकीय स्थान दत्वा कस्मिन् लोके स्थाने आसते उपविशन्ति। यथा लौकिका जनाः पुत्रान् उत्पाद्य तेषा स्वकीय स्थान दत्वा स्थानान्तरं स्वनिवासार्थं आश्रयन्ति एवं एषा सृष्टाना इन्द्रियाणां तदधिष्ठातृणा च देवानां निवासाश्रयः क इति प्रश्नार्थः। अस्य प्रश्नस्य 'देवाः पुरुष आविशन्' इति प्रतिवचन अग्रे भविष्यति। असा.

ज्येष्ठपुत्रः द्विभागधनभागी पिता वा

[3]**द्विभागधनमादाय प्र क्षिणात्यवर्त्या।**
अग्निः पुत्रस्य ज्येष्ठस्य यः कव्यादनिराहितः॥

जीवति पितरि पुत्रकृतपैतृकधनविभागः

[4]नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो निरभजन्सोऽब्रवीदेत्य कि मह्यमभाक्तेत्येतमेव निष्ठावमववदितारमित्यब्रुवंस्तस्माद्वाप्येतर्हि पितरं पुत्रा निष्ठावोऽववदितेत्येवाऽऽचक्षते।

स पितरमेत्याब्रवीत्त्वां ह वाव मह्यं त (ता) ताभाक्षुरिति तं पिताऽब्रवीन्मा पुत्रक तदादृथा अङ्गिरसो वा इमे स्वर्गाय लोकाय सत्रमासते ते षष्ठं षष्ठमेवाहरागत्य मुह्यन्ति तानेते सूक्ते षष्ठेऽहनि शंसय, तेषां यत्सहस्रं सत्रपरिवेषणं तत्ते स्वर्यन्तो दास्यन्तीति तथेति।

मनोः पुत्रो नाभानेदिष्ठो नाम बालको गुरुगृहे ब्रह्मचर्यं वसत्युपनीतः सन्वेदमध्येतुं तत्र तिष्ठति। तदानीं तस्य ज्येष्ठभ्रातरो मनोः पितुर्धन स्वार्थं विभजन्तस्तं बालक निरभजन्भागरहितमकुर्वन्। बालोऽयं ब्रह्मचारी वेदमेवाभ्यस्यतु कि तस्य धनेनेति मत्वा भाग न दत्तवन्तः। तदानी स नाभानेदिष्ठ एत्य वेदाभ्यास कृत्वा समागत्य भ्रातृनिदमब्रवीत्। हे भ्रातरो मह्य किमभाक्त, कि नाम वस्तुभागत्वेन यूय पृथक्त्वेन कृतवन्त इति। ते च भ्रातर एतमेव मनु पितर हस्तेन प्रदर्श्य हे नाभानेदिष्ठ वय नो जानीमस्तमेव पृच्छेत्यब्रुवन्। कीदृश मनुम्। निष्ठावम्। धनविभागादेर्धर्मरहस्यं (स्यस्य) निःशेषेण स्थितिर्निर्णयो निष्ठा सा यस्मिन्नस्ति स निष्ठावः। तादृश धर्मरहस्यनिर्णेतारमित्यर्थः। अववदितारम्। ज्येष्ठपुत्रस्यैतावत् द्वितीयस्यैतावत्, अन्यस्यैतावत्, इत्यवच्छिद्य वे (व) दितु समर्थोऽववदिता तादृशम्। अयमर्थः। अय मनुर्धर्मशास्त्रकर्तृत्वाद्धर्मरहस्यनिर्णयवान्पितृत्वेन तवैतावदित्यवच्छिद्य वक्तु समर्थश्च। तस्मान्मदीयो भागः क इति मनुमेव पृच्छेत्यब्रुवन्। यस्मादस्य भ्रातर एवमुक्तवन्तस्तस्मादिदानीमपि पितरं पुत्रा इत्यनेन प्रकारेणाऽऽचक्षते। केन प्रकारेणेति सोऽभिधीयते। अय पिता निष्ठावो निर्णयवानस्यैतावदित्यवच्छिद्य वदिता चेति। तत ऊर्ध्वं नाभानेदिष्ठस्य कृत्य दर्शयति—स पितरमेति इति। स नाभानेदिष्ठो भ्रातृभिस्तथोक्तः सन्पितरं प्रत्यागत्येदमब्रवीत्। हे पितर्मह्य त्वा (त्वा) ह वाव त्वामेव भ्रातरः सर्वेऽप्यभाक्षुर्भागमकार्षुरतो मदीयो भागस्त्वय्यस्ति त मे देहीत्यभिप्रायः। ततस्त नाभानेदिष्ठ पिता मनुरेवमब्रवीत्। हे पुत्रक बालक भ्रातृणा वचनं माऽऽदृथास्तस्मिन्वचन आदरं मा कार्षीः। नास्त्येव मद्धस्ते त्वदीयो भागः सर्वमपि धनं त्वद्भ्रातृभिर्गृहीतम्। तव तु धनप्राप्त्यर्थमेकमुपायं

(१) तैसं.३।१।९।६. (२) असं.११।१०।१०.
(३) असं.१२।२।३५. (४) ऐब्रा.२२।९.

कथयिष्यामि । अङ्गिरोनामका महर्षय इमे समीपदेश वर्तिनः स्वर्गार्थं सत्रमनुतिष्ठन्ति, ते पुनः पुनः सत्रमुपक्रम्य तदा तदा प्राप्तं तत्तत्षष्ठमेवाहरागत्य तत्र तत्र मन्त्रवाहुल्ये मुह्यन्ति भ्रान्ताः सन्तः सत्रसमाप्तिमप्राप्य सर्वदा क्लिश्यन्ति । तान्महर्षीन् षष्ठेऽहनि त्वं गत्वेदमित्थेति ये यज्ञेनेति चैते उभे सूक्ते शंसय । ततस्तेषामृषीणा यत्सहस्रसंख्याक धनं सत्रपरिवेषण सत्रार्थ परितः संपादितमस्ति तत्सर्वमनुष्ठानादूर्ध्वमवशिष्ट धन ते तुभ्यमङ्गिरसो महर्षयः स्वर्ग प्राप्नुवन्तो दास्यन्तीति । तथाऽस्त्विति तत्पितृवचनं नाभानेदिष्ठोऽङ्गीचकार ।

ऐत्रासा.

पिता धनं पुत्रेभ्यो विभजति

[1]उद्यन्नद्य वि नो भज । पिता पुत्रेभ्यो यथा ।

हे सूर्याद्यास्मिन्नेवाहन्युद्यस्त्व नोऽस्मभ्य विभज धनादिक पृथक्पृथग् देहि । तत्र दृष्टान्तः—यथा लोके पिता पुत्रेभ्यो विभज्य ददाति तद्वत् । तैत्रासा.

पितापुत्रयोर्द्रव्य साधारणम्

[2]यत्र ह क च पुत्रस्य तत्पितुर्यत्र वा पितुस्तद्वा पुत्रस्येत्येतत्तदुक्तं भवति ।

लोके पुत्रस्य वस्तु यत्र ह क च यस्मिन्कस्मिन्नपि ग्रामान्तरे विद्यमानं तत्सर्व पितुः स्व भवति । पिता हि तदानीयानुभवति । अथवा पितुः सबन्धि यद्वस्तु ग्रामान्तरे विद्यते तद्वा तदपि पुत्रस्य स्वं भवत्येव । पुत्रोऽपि तदानीयानुभवति । परस्परद्रव्यानुभवेन यदैक्यमस्ति ।

ऐआसा.

[3]तस्मात्पूर्वे वयसि पुत्राः पितरमुपजीवन्ति । तस्मादुत्तमे वयसि पुत्रान् पितोपजीवति ।

हारीतः

पितृकृतविभागविधि.

[4]जीवन्नेव वा पुत्रान् प्रविभज्य वनमाश्रयेत् । वृद्धाश्रमं वा गच्छेत् । स्वल्पेन वा विभज्य भूयिष्ठमादाय वसेत् । यद्युपदश्येत् पुनस्तेभ्यो गृह्णीयात् । क्षीणांश्च विभजेत् ।

[5]अथाप्यत्र ग्रहोपादानोपाधिकश्रुतिमुदाहरन्ति । [6]पिताग्रेणः पुत्रा इतरे ग्रहाः यद्याग्रेणः स्कन्धादुपवादश्येत् इतरेभ्यो गृह्णीयात् । यदीतरे ग्रहाः स्कन्देयुरुपदश्येयुर्वा इति व्याख्यातम् ।

(१) अनेन स्वल्पस्य विभागो भूयिष्ठद्रव्यस्य ग्रहण च पितुरभिहितम् । वृद्धाश्रमः प्रव्रज्या । दा.४७

(२) स्वल्पेन भागेनात्मीयभागार्थप्रमाणकेन पिता पुत्रान्विभज्य द्वैगुण्येन भूयिष्ठभाग स्वयमादाय गृह एव वसेत् । एव वसन् यदि कथञ्चिदुपदश्येत् अशनाद्यभावेन क्षीणः स्यात् पिता तदा तेभ्यः पुत्रेभ्यः स्वदत्तभागवशात् उपचितद्रव्येभ्यः सकाशात् स्वकुटुम्बभरणपर्याप्त धन पुनर्गृह्णीयात् । अथ पुत्रा एव अशनाद्यभावेन क्षीणास्तदा तान्पुनः पूर्ववद् विभजेदित्यर्थः । वनमाश्रयेत् वानप्रस्थः स्यात् । वृद्धाश्रमः चतुर्थाश्रमः । वृद्धाश्रममिति वदन् गलितवयस्कविषयमिति दर्शयति। एव चापरवयसि पुत्राश्रयार्थित्वात् यथा 'पिता पुत्र क्षित उपधावति तादृगेव तत्' इति श्रुतिविषयत्व पितुर्युक्तं स्वल्पभागग्रहणात् । यथा 'पुत्रः

---

(१) तैब्रा.३।७।६।२२. (२) ऐआ.२।१।८.
(३) गोब्रा ४।१७
(४) दा.४७ (क्षीणाश्च विभजेत्०); व्यक.१४१; स्मृच.

२६१ (पुत्रान् प्र०) विभज्य (सविभज्य); विर.४६३ स्मृचवत्, स्मृसा ५४ (जीवन्नेव .गच्छेत्०) विभज्य (सविभज्य) शेष दावत्, विचि.१९८ (जीवन्नेव...गच्छेत्०) वसेत् (तिष्ठेत्) शेष दावत्; व्यनि.(पुत्रान्०) प्रविभज्य+(एव)विभज्य (सविभज्य), दात.१६५ (पुत्रान्०) विभज्य (सविभज्य) शेष दावत्; वीमि.२।१।१६ (जीवन्नेव ..गच्छेत्०) विभज्य (सविभज्य) शेष दावत्, व्यप्र ४३८ (पुत्रान् प्र०) स्वल्पेन (स्वल्पं) विभज्य (सविभज्य) शेष दावत् : ५४० स्मृचवत्, आपस्तम्बहारीतौ, विता.२९३ (जीवतैव वा प्रविभज्य वनमातिष्ठद्भ्यिष्ठमादाय वाप्युपशमे पुनस्तेभ्योऽपि गृह्णीयात्):४२३ (पुत्रान् प्र०) स्वल्पेन (स्वल्प) यद्युपदश्येत् पुन (यद्यपदश्यो न्यून), सेतु.७१ (पुत्रान्०) विभज्य (सविभज्य) शेष दावत्; विभ.४४,६५ (जीवन्नेव...गच्छेत्०) विभज्य (सविभज्य) शेष दावत्; समु.१२७ स्मृचवत्; विच.५४ नेव+(अर्थ) (वा पुत्रान् प्र०) विभज्य (संविभज्य) शेष दावत्:६५ विभवत्.

(१) स्मृच.२६२.

(२) उ.२।१४।१ ग्रेणः (ह्याग्रयणः) ग्रेणः...श्येत् (ग्रयणः स्कन्देदुपदश्येद्वा) (यदीतरे...तम्०); स्मृच.२६२; व्यनि.; समु.१२७.

पितरं क्षित उपधावति तादृगेव तत्' इति श्रुतिविषयत्वं पुत्रस्य युक्तमित्यभिसंधायैव यद्युपदश्येदित्यादिना यथा पिता पुत्रं तथा पुत्रः पितरमित्यादिश्रुतिद्वयार्थं उक्त इति मन्तव्यम्। अत एव पुनः 'तेभ्यो गृह्णीयात् क्षीणाश्च विभजेत्' इति स्वकीयस्मृत्योरेवंविधश्रुतिमूलत्व दर्शयितुं एतत्समानार्थं श्रुतिद्वय प्रतीकेन तेनैव दर्शितम्। 'अथाप्यत्र ग्रहोपादानोपाधिकश्रुतिमुदाहरन्ति, पिताग्रेणः पुत्रा इतरे ग्रहाः, यद्याग्रेणः स्कन्धादुपवादश्येत् इतरेभ्यो गृह्णीयात् यदीतरे ग्रहाः स्कन्देयुरुपदश्ययुर्वा इति व्याख्यातमिति। ग्रहोपादानोपाधिकीं सोमग्रहविशेषसमाधाक्रिया, आग्रेणः सोमग्रहविशेषः, इतरे त्वाग्रेणव्यतिरिक्ता ग्रहा ऐन्द्रवायव्यादयः। उपवादश्येत् उपदश्येद्वा। शुष्येतेति यावत्। स्कन्देयुरिति। इतिकारोऽत्रावशिष्टश्रुतिभागप्रतीकार्थः। 'व्याख्यातमिति प्रतीकेन प्रदर्शितश्रुतिभागस्य व्याख्या कृताऽस्माभिः। 'यद्युपदश्येत् पुनस्तेभ्यो गृह्णीयात्, क्षीणाश्च विभजेत्' इति वाक्यद्वयेन कृतेत्यर्थः। स्मृच.२६२

(३) वनमाश्रयेदाश्रमान्तर परिगृह्णीयात्। वेदसन्यासित्वेन पुत्रैष्वर्ये वासो वृद्धाश्रम इति प्रकाशकारः। वृद्धाश्रमश्चतुर्थाश्रमः इति हलायुधपारिजातौ, तन्मते वनमाश्रयेदित्यनेन वानप्रस्थाश्रममाश्रयेदिति विवक्षितम्। वस्तुतस्तु वाकारोऽनास्थाया, तेन वनगमनवृद्धाश्रमगमनत्वाभिमतादन्योऽपि स्थितिप्रकारो लभ्यते। तत्र वा वसेद्वस्तुतो वेदसन्यासी गृहस्थाश्रममेव स्वातन्त्र्येण वाञ्छति, त प्रति स्वल्पेनेत्यादि बोद्धव्यम्। उपदश्येदुपक्षीयेत। विर.४६३

(४) उपदश्येत् निर्धनो भवेदित्यर्थः। स्मृसा.५५

(५) इदमपि स्वार्जितपरम्। विचि.१९८

(६) इति हारीतोक्तेर्विभक्तस्यापि ग्राहित्वमविरुद्धम्। विता.४२३

आपस्तम्बः

पितृकृतविभागविधि

एकधनेन ज्येष्ठं तोषयित्वा।

जीवन् पुत्रेभ्यो दायं विभजेत् समं क्लीबमुन्मत्तं पतितं च परिहाप्य।

(१) **आध.**२।१३।१२,२।१४।१; **हिध.**२।७, **मिता.** (१) 'जीवन्पुत्रेभ्यो दायं विभजेत्समम्' इति समतामुक्त्वा—'ज्येष्ठो दायाद इत्येके' इति कृत्स्नधनग्रहणं ज्येष्ठस्यैकीयमतेनोपन्यस्य 'देशविशेषेण सुवर्णं कृष्णा गावः कृष्णभौमः ज्येष्ठस्य रथः पितुः परीभाण्ड च गृहेऽलङ्कारो भार्याया जातिधन चेत्येके' इत्येकीयमतेनैवोद्धार विभाग दर्शयित्वा 'तच्छास्त्रविप्रतिषिद्धमि'ति निराकृतवान्। त च शास्त्रविप्रतिषेध स्वयमेव दर्शयतिस्म 'मनुः पुत्रेभ्यो दाय विभजेदित्यविशेषेण श्रूयते' इति। तस्माद्विषमो विभागः शास्त्रदृष्टोऽपि लोकविरोधात् श्रुतिविरोधाच्च नानुष्ठेय इति सममेव विभजेरन्निति नियम्यते। ×मिता.२।११७

(२) एकेन प्रधानेन केनचिद्धनेन गवादिना ज्येष्ठ पुत्र तोषयित्वा तृप्त कृत्वा जीवन्नेव पुत्रेभ्यो दाय विभजेत्। सममात्मना परस्पर च तेषाम्। सामान्याभिधानात् क्रमागत स्वयमार्जित च क्लीबादीन् वर्जयित्वा। क्लीबादिग्रहण जात्यन्धादीनामप्युपलक्षणम्। यथाह मनुः—'अनशौ क्लीबपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥' तथा। अन्धादीना पुत्रसद्भावे तेऽप्यशहराः। एवमुन्मत्तपतितौ निवृत्ते निमित्ते क्लीबादयस्तु न भर्तव्याः। अत्र विभागकालः स्मृत्यन्तरवशाद्ग्राह्यः। तत्र नारदः—'मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च। निवृत्ते चापि मरणात्पितर्युपरतस्पृहे॥' इति। यदा पुत्राणां पृथक्पृथक् धर्मानुष्ठाने शक्तिश्रद्धे भवतः सोऽपि कालः। 'तस्माद्धर्म्या पृथक् क्रिये'ति दर्शनादिति। 'जीवन्नि'ति वचन जीव-

× पमा., सवि., विता. मितावत्। व्यप्र मितागत स्मृचगत च। २।११७ (जीवन् पुत्रेभ्यो दाय विभजेत्समम्) एतावदेव, **व्यक.**१४१, **स्मृच.**२६० (क्लीब.. हाप्य०)·२७० (एक . त्वा०) हाप्य (हरेत्).३०० (एक . त्वा०) (सम हाप्य०); **विर.**४६७ (दाय०) (च०), **स्मृसा** ५५ वन् (वत्) (दाय०) (क्लीब...हाप्य०), **पमा.**४९३ मितावत्; **रत्न.**१३९ (क्लीब. हाप्य०), **विचि.**१९९ स्मृसावत्, **नृप्र.**३५ मितावत्, **सवि.** ३५५ मितावत्: ३६५ (एक त्वा०); **चन्द्र.**७० स्मृसावत्; **वीमि.**२।११६ स्मृसावत्; **व्यप्र.**४४३ मितावत् ५२९ (जीवन् पुत्रेभ्य. पिता दाय विभजेत्) एतावदेव; **विता** ३०१ (एक . त्वा०) वन् (वत्) विभ (भ) (क्लीब...हाप्य०);**समु.** १२० (क्लीब.. हाप्य०):१३० (एक...त्वा०).

न्नेवाऽवश्य पुत्रान् विभजेत् एष धर्म इति प्रतिपादनाय। अन्यथा तदनर्थकम्। अजीवतोऽप्रसंगात्। स्मृत्यन्तरेषु स्वयमार्जिते पितुरिच्छया विषमविभागो दर्शितः। न स धर्म्य इत्याचार्यस्य पक्षः। भार्याया अप्यंशो न दर्शितः। आत्मन एवांशस्तस्या अपीति मन्यते। वक्ष्यति च 'जायापत्योर्न विभागो विद्यते' इति। केचिन् पितुर्द्रव्यांशाविति हुः। 'द्व्यंशौ प्रतिपद्येत विभजन्नात्मनः पिते'ति दर्शनात्। अयमप्याचार्यस्य पक्षो न भवति। यथा पुत्राणामेकैक एवांशः सभार्याणां तथा पितुरपीति। यद्वा पुत्राणामेवांशसाम्य आत्मनस्त्वाधिक्येऽपि न दोषः। तत्र हारीतः—'पिता ह्यग्रयणः पुत्रा इतरे ग्रहाः यद्याग्रयणः स्कन्देदुपदस्येद्वा इतरेभ्यो गृह्णीयादि'ति विभागादूर्ध्वं पित्रोर्जीवनाभावे पुत्रभागेभ्यो ग्राह्यमित्युक्तं भवति। इति जीवद्विभागः। उ.

(३) जीवन्पिता ज्येष्ठेनैकेन धनेन मध्यगद्व्यादुत्कृष्टतरेण ज्येष्ठ प्रथमपुत्र तोषयित्वाऽवशिष्टमात्मसहितज्येष्ठादिपुत्रेभ्यः समत्वेनैव विभजेदित्यर्थः। एव च प्रथमोत्पन्नतया तदर्थमेवोद्धारः। स चैकस्यैव सर्वधर्मज्येष्ठस्य उद्धृतावशिष्टस्य समत्वेनैव विभाग इति विधानान्तरमुक्तमित्यवगन्तव्यम्। स्मृच.२६०

इत्यापस्तम्बसूत्रव्याचक्षाणेन तद्भाष्यकारेण पुत्रेभ्य एव दाय विभजन् न स्त्रीभ्यो दुहितृभ्य इत्युक्तम्। यद्यपि 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' (व्यास.१।२।६८) इति शाब्दस्मृत्या पुत्रेभ्य इत्यत्र विरूपैकशेषं कृत्वा दुहितृणामनुप्रवेशोऽत्र कर्तु शक्यते तथापि पुमासो दायादा न स्त्रियः 'तस्मात् स्त्रियो निरिन्द्रिया अदायादीरि'ति श्रुतेरिति एतेनेद निरस्तम्। स्मृच.३००

(४) जीवन्नेवेति, जीवन्नेव यः प्रजोत्पत्तावसमर्थ इत्यर्थः। एकधनेन उत्कृष्टाश्वादिना। क्लीबमित्यादिना विभागानधिकारिणः सर्व एवाभिमताः। ज्येष्ठे वित्तात्पत्वभूयस्त्वापेक्षया गुणाधिक्ये सति मन्तव्यमिति व्यवस्था। विर.४६७

(५) जीवत्पदान्मृतस्य पत्न्या भागो नास्ति। पुत्रस्य तु स एव। 'आत्मा वै जायते पुत्र' इत्यभिधानात्। वाक्यान्तरात्पत्न्या अप्यस्तु मा वाऽस्तु। पुत्रोऽत्र ज्येष्ठोऽर्जनयोग्यः। अन्यथा तु सममेव गृह्णीयात्। स्मृसा.५५

(६) जीवन्निति तु रत्नाकरे पाठः। स न युक्तो विभागकर्तृतयैव जीवनस्य प्राप्तत्वे निरर्थकत्वात्। +विचि.१९९

ज्येष्ठस्य दायहरत्व ज्येष्ठपुत्रपितृभार्याणामुद्धारश्च साध्यते बाध्यते च

ज्येष्ठो दायाद इत्येके*।

एके मन्यन्ते ज्येष्ठ एव पुत्रो दायहरः। इतरे तु तमुपजीवेयुः। सोऽपि तान् पितेव परिपालयेदिति। तथा च गौतमः—'सर्व वा पूर्वजस्येतरान् विभृयात्पितृवदि'ति। ×उ.

देशविशेषे सुवर्णं कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य। रथः पितुः परिभाण्डं च गृहे।

(१) क्वचिद्देशे सुवर्णादि ज्येष्ठस्य भाग इत्याहुः। भूमौ जात भौम धान्य कृष्ण माषादि कृष्णायसमित्यन्ये। रथः पितुरशः गृहे च यत् परिभाण्डमुपकरण पीठादि तदपि। उ.

(२) अस्यार्थः। क्वचन देशे सुवर्ण कृष्णाः गावः कृष्ण भौम, भूमौ जात, माषादि धान्यम्। कृष्ण भौम कृष्णायस इत्येके। एतज्ज्येष्ठस्य पुत्रस्य, पितू रथः परीभाण्ड च गृहे। यद्गृहे परीभाण्डमुपकरणं पीठादिक भार्याया धृतोऽलङ्कारः तथा ज्ञातिभ्यः पित्रादिभ्यश्च प्रलब्ध धन तत् ज्येष्ठपुत्रपितृभार्याणा यथाक्रमेणांशो भवति इति स्वयमेव दर्शयति स्मेति स्वयमापस्तम्ब इत्यर्थः। सुबो.२।११७

+ शेष स्मृसावत्।

* मिता.व्याख्यान 'जीवन्पुत्रेभ्यो' इति पूर्ववचने द्रष्टव्यम्। सवि., व्यप्र., विता मितागतम्।

× स्मृच. उवत्।

(१) **आध.**२।१४।६, **हिध.**२।७; **मिता.**२।११७; **स्मृच** २६४, **पमा.**४९३, **सवि.**३५५; **व्यप्र.**४४३; **विता.** ३०१, **समु.**१२९.

(२) **आध.**२।१४।७,८; **हिध.**२।७; **मिता.**२।११५ (परिभाण्ड च गृहे)एतावदेव:२।११७ षे (षेण); **व्यक.**१४२; **विर.** ४७२ रथः (मिथः)(गृहे०); **पमा.**४९३, **मपा.**६६३ (परिभाण्ड च गृहे) एतावदेव; **सवि.**३५५, **व्यप्र.**४४० मपावत्; **व्यउ.**१४४ च गृहे (वा):१४५ मपावत्; **विता.**३०१ ष्णा (ष्ण) ष्ण (ष्ण) गृहे (गृहम्); **विभ.**५१ मपावत्; **समु.**१२९.

तच्छास्त्रैर्विप्रतिषिद्धम्*।

ज्येष्ठो दायाद इति यदुक्त तच्छास्त्रैर्विरुद्धम्। उ.

मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते।

पुत्रेभ्य इति बहुवचननिर्देशादविशेषेण श्रवणम्। उ.

अथापि तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययन्तीत्येकवत् श्रूयते।

अथापि ननु चेत्यर्थः। ज्येष्ठ पुत्र धनेन निरवसाययन्ति पृथक्कुर्वन्तीत्येकवदपि श्रूयते। यथा एक एव ज्येष्ठो दायादः तदनुरूपमपि श्रूयते इति। उ.

अथापि नित्यानुवादमविधिमाहुर्न्यायविदो यथा तस्मादजावयः पशूनां सहचरन्तीति। तस्मात् स्नातकस्य मुखं रेफायतीव। तस्मात् वस्तश्च श्रोत्रियश्च स्त्रीकामतमाविति।

अथापीति परिहारोपक्रमे। पशूना मध्ये अजाश्च अवयश्च जातिभेदेऽपि सहचरन्ति। रेफा शोभा। इह तु तद्वत्यभेदोपचारः। ततः क्यप्। स्नातकस्य मुख कुण्डलादिना शोभते। इवशब्दो वाक्यालङ्कारे। श्रोत्रियस्य स्त्रीकामतमत्वमाचार्यकुले चिरकाल ब्रह्मचारिवासात्। यथैतानि वाक्यानि दृष्टान्तमात्रमनुवदन्ति न किंचिद्विदधति तस्मात् 'ज्येष्ठ पुत्रमि'त्यादिकमप्यविधिरिति न्यायविद आहुः। न केवलमयमेवानुवादः, किं तर्हि 'मनुः पुत्रेभ्य' इत्ययमप्यनुवाद एव। उ.

शंखः शंखलिखितौ च

पितृकृतसमविषमविभागविधिः

स यद्येकपुत्रः स्यात् द्वौ भागौ आत्मनः कुर्यात् द्विपदचतुष्पदेषु रूपमधिकम्। वृषभो ज्येष्ठाय गृहं यवीयसे अन्यत्र पितुरवस्थानात्।

(१) अस्यायमर्थः—एकस्य पुत्रः एकपुत्रः न पुनरेक एव पुत्रो यस्येति बहुव्रीहिः तस्यान्यपदार्थप्रधानत्वेन षष्ठीतत्पुरुषाद्दुर्बलत्वात् एकपुत्रश्चौरसः तथाविधस्य पितुर्भागद्वय न तु क्षेत्रजस्य पितृत्वेऽपि। 'तत्र स्यात् सदृश स्वाम्यमि'ति वचन क्षेत्रजपित्रभिप्रायमेव वर्णनीयम्। क्षेत्रजो हि द्विपितृकः। तदाह बौधायनः—'मृतस्य च प्रसूतो यः क्लीबस्य व्याधितस्य वा। अन्येनानुमतो वा स्यात् स्वे क्षेत्रे क्षेत्रजः स्मृतः॥' स एव द्विपितृको द्विगोत्रश्च द्वयोरपि स्वधाकरो रिक्थभाग् भवति। अस्यार्थः—क्लीबादेः स्वे क्षेत्रे तदनुमतोऽन्येन प्रसूतः क्षेत्रजः। तथा नारदः—'क्षेत्रिकानुमते क्षेत्रे बीज यस्य प्रकीर्यते। तदपत्य द्वयोरेव बीजक्षेत्रिकयोर्मतम्॥' अतश्चैकपुत्र आत्मनो भागद्वय कुर्यादिति विधौ एकपुत्रत्वस्य कर्तृविशेषणतया विवक्षार्हत्वात् उद्देश्यविशेषणत्वेनाविवक्षितत्वमित्यपि परास्त भवति। किं च परमप्रेक्षावन्मनुगौतमदक्षादिप्रयुक्तपदाना प्रतिक्षणमविवक्षामाचक्षाणः स्वस्यैव साक्षादविवक्षितत्व ख्यापयति। तथा पुत्रार्जितेऽपि धने पितुरंशद्वय द्वावशाविति गृहीताशद्वयमिति चाविशेषश्रुतेः। दा.४८-४९

(२) स इति प्रकृतः पिता प्रत्यवमृश्यते। 'एकपुत्रः

---

* मिता.व्याख्यान 'जीवन्पुत्रेभ्यो' इति पूर्ववचने द्रष्टव्यम्। पमा., सवि., व्यप्र, विता. मितागतम्।

(१) **आध.**२।१४।१०; **हिध.**२।७ स्त्रैः (स्त्रै); **मिता.** २।११७ (तत्र०) स्त्रैः (स्त्र), **स्मृच.**२६४ स्त्रैः (स्त्र); **पमा.** ४९३ स्मृचवत्; **सवि.**३५५; **व्यउ.**१४४ हिधवत्; **व्यप्र.** ४४३ मितावत्; **विता** ३०१ हिधवत्; **समु.**१२९.

(२) **आध.**२।१४।११; **हिध.**२।७; **मिता.**२।११७; **स्मृच.**२६४; **पमा.**४९३; **राकौ.**४४७; **व्यप्र.**४४३; **समु.**१२९.

(३) **आध.**२।१४।१२; **हिध.**२।७.

(४) **आध.**२।१४।१३; **हिध.**२।७ अथा (तथा).

(१) **दा.**४७-४८ (द्विपद ..स्थानात्०), **अप.**२।११४ (स०) स्यात्+(तदा) गौ+(वा) (द्विप...स्थानात्०) शेषः; **व्यक.**१४१; **स्मृच.**२६१ दावत्; **विर.**४६५-४६६.४७५ (स...अधिकम्०) वृषभः+(अधिकः) (अन्यत्र...स्थानात्०), **स्मृसा.**५५ भागौ (अशौ) यवी (कनी); **दीकि.**४३ भागौ (अशौ) शेष दावत्; **रत्न.**१३९ (द्विपद...स्थानात्०); **विचि.** १९८ भागौ (अशौ); **सवि.**३५५ कुर्यात् (गृह्णीयात्) (द्विपद...स्थानात्०); **चन्द्र.७१** भागौ (अशौ) शेषं दावत्; **व्यप्र.**४४४ दावत्; **व्यम.**४३ दावत्; **विता.**३१३ दावत्; **विभ.**३७,६०; **समु.**१२७ (वृषभो...स्थानात्०) शेषः; **विच.**६५ (स०) भागौ (अंशौ).

स्यादि'ति अतिक्रान्तपुत्रलाभकालः स्याद् गलितवयस्कः स्यादिति यावत्। अत एव बहुपुत्रसद्भावविषयेऽपि गलितवयस्कस्य इष्टभागग्रहणेन पितापुत्राणा भागवैषम्यमाह हारीतः—जीवन्नेवेति। स्मृच.२६१

(३) रूपमधिकमिति वस्तुस्वरूपमधिक गृहीत्वाशद्वयं गृह्णीयादित्यर्थः। नानापुत्रवत्त्वे ज्येष्ठाय वृषभो दातव्यः, गृह कनिष्ठाय, पितुरनिच्छयापि, अन्यथा नियमानर्थक्यापत्तेः। यत्तु याज्ञवल्क्येन 'सर्वे वा स्युः समाशिन' इत्युक्त तत्सर्वेषा तुल्यरूपत्वे पितुरिच्छया समाशित्व न्यूनाधिकाशित्वं चेत्यविरोधः। पारिजातस्तु एकपुत्रः ज्येष्ठपुत्र इत्याह। भाष्यकारस्तु पुत्रशब्द न पठितवान्, यद्येकाकी स्यादिति पठितवान्, यद्येकाकी पत्नीविरहितोऽपि स्यात्तदाप्यंशद्वयं गृह्णीयात्, सपत्नीकश्चेत्तामप्यपरेणाशेन तोषयेत्। रूपमधिक द्विपदचतुष्पदमध्ये एकमंशद्वयाधिकं गृह्णीयात्, ज्येष्ठयवीयसोर्गुणवत्त्वे चासावधिकविधिः पितुरनिच्छयापि, अन्यथा नियमानर्थक्यापत्तेः, याज्ञवल्क्योक्तसमाशित्व च सर्वेषा गुणवत्त्वेन। उत्कर्षाभावे पितुरिच्छया समाशित्व न्यूनाधिकाशित्व चेत्यविरोध इत्याह। अन्यत्रेति पितृवासगृहवर्जमित्यर्थः। विर.४६६

अत्रापि ज्येष्ठो मन्वनुसारात्कनीयसीपुत्र एव द्रष्टव्यः। विर.४७५

(४) स्वार्जितद्रव्ये शंखलिखितौ— स यद्येकपुत्र इति। स्मृसा.५५

(५) पितुरंशद्वयग्रहण एकपुत्रविषयमाहतुः शंखलिखितौ—स यद्येकपुत्र इति। एकशब्दोऽत्र श्रेष्ठवाचीति पारिजातकारः। पुत्रो यदि गुणवत्तया धनार्जनसमर्थः तदाऽनेन सह विभागे पिताशद्वय गृह्णीयादिति तन्मतेऽस्य वाक्यस्यार्थः। कात्यायनस्तु पित्रा सर्वेभ्योऽपि पुत्रेभ्यः सम एवाशो देयो न तु ज्येष्ठायैकमुत्कृष्ट वस्तु, स्वेनापि सम एवाशो ग्राह्यो न त्वंशद्वयमिति अभिप्रेत्याह—'सकल द्रव्यजात यद्भागैर्गृह्णन्ति तत्समैः। पितरौ भ्रातरश्चैव विभागो धर्म्य उच्यते॥' इति। रत्न.१३९

(६) इदं च पितुरंशद्वयमेकपुत्रत्वे वचनयोरेकमूलकल्पनालाघवात्। पितुरस्वार्जितधनविषयमेतत्। स्वार्जिते तु स्वेच्छाविभजनीये एकपुत्रस्याप्रयोजकत्वात्। एकपदं चेह श्रेष्ठवाचि न तु संख्यावाचि। अन्यथा 'ज्येष्ठाय यवीयसे' इति विरुध्येत। तस्मात्सगुणो ज्येष्ठकनिष्ठौ उक्तोद्धारभाजौ कार्यावन्ये तु पुत्रा धने समाशाः। पिता तु तोद्धारद्वयशभागिति सक्षेपः। *विचि.१९८-१९९

(७) एतच्च धनविभाग एव न धर्मविभागे। धर्मविभागे अंशद्वयस्य प्रयोजनाभावात्। सवि.३५५

(८) व्यवहारपारिजातकार इद वचनमेवं व्याचष्टे। एकशब्दोऽत्र श्रेष्ठवाची। तथा च यदि पुत्रो गुणवत्तया धनार्जनशक्तस्तदा तेन सह विभागे पित्राशद्वयं ग्राह्यमिति। [जीमूतवाहनं खण्डयति] तदसत्। तथा सति पितामहधनगोचरताऽस्य स्यात्तत्र च सहशस्वाम्यं पितापुत्रयोरित्यौरसस्याऽपि पितुः पुत्रसमाशताया व्यवस्थापयिष्यमाणत्वात्। तथा चागत्या बहुव्रीहिरेवास्थेयः। मिताक्षराकृता त्विद वचनमनादृतमेव। व्यप्र.४४४

(९) एकः श्रेष्ठोऽर्जनशक्तः पुत्रश्चेत्तदा पितांशद्वयभागीति पारिजाते मदनरत्ने च। एकपुत्र इत्येक पदम्। एकस्य पितुः पुत्रो न द्यामुष्यायणः। स तु द्वयो. पितामहयोरेकैकमशं लभते। सर्वथा पितुर्द्वावंशौ सर्वत्रेति जीमूतवाहनः। तच्चाशद्वय पित्रार्जित एव न पैतामहे इति विज्ञानेश्वरः। पैतामहेऽपि धने पितृत्वादेवांशद्वयं ग्राह्यमिति जीमूतवाहनः। अत एव पुत्रार्जितेऽपि धने पितुरशद्वयम्। 'द्व्यशहरोऽर्धहरो वा पुत्रवित्तार्जनात्पिता।' 'मातापि पितरि प्रेते पुत्रतुल्याशभागिनी॥' इति कात्यायनोक्तेः। द्व्यशस्यार्धमेकोंऽशो वित्तस्य चार्धम्। इदं हीनजातिपुत्रपरम्। तेन नेद युक्तमिति वक्ष्यामः। वसिष्ठस्त्वजैकमात्रस्य द्वावशावाह 'येन चेयान्स्वयमर्जितं स्यात्स द्वावशौ लभेते'ति। तेन भ्रातृष्वप्यजैकस्य द्वावशाविति्येके। तातचरणास्त्वजैकत्वादेव पितुरप्यंशद्वयसिद्धेर्विशेषतः पितुरजैकस्याशद्वयविधिवैयर्थ्यात्सामान्यस्य चतुर्धाकरणस्येवाग्रे पितर्युपसंहारान्न भ्रात्रादेरजैकस्य पैत्रादौ भागद्वयमित्याहुः। मदनरत्नेऽपरार्के कल्पतरौ च कात्यायनस्तु पितुर्भ्रातृणा च समाशमेव धर्म्यमाह—'सकल द्रव्यजात यद्भागैर्गृह्णन्ति तत्समैः। पितरौ भ्रातरश्चैव विभागो धर्म्य उच्यते॥' विता.३१३-३१४

* चन्द्र. विचिगतम्। व्यम. विचिगतं व्यग्रगतं च।

*याज्ञवल्क्यः

पितृकृतसमविषमविभागविधि.

[1]विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान्। ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः॥

(१) एव प्रागुक्तानेकप्रकारार्जितस्य द्रव्यस्य—विभाग चेत्पिता कुर्यात् इच्छया विभजेदित्यादि। यदा त्वाश्रमान्तरं प्रपित्सुः, पुत्राणा वा गुणवता धर्मप्रवृत्तिसिद्ध्यर्थं, कौतूहलाद्वा स्वद्रव्येण पुत्रान् विभजेत् संयोजयेदित्यर्थः। तदेच्छया यावद् यस्मै रोचते दातुं, तावदेव तस्मै दद्यात्, न पुत्रेच्छया। न पुत्रैः पिता विभाग विशेषनियमं वा कारयितव्य इत्यर्थः। अत एव च ज्येष्ठ वा श्रेष्ठभागेनौचित्याद् योजयेद ऊनाभ्यधिक वा। अथवा सर्वान् समाशिनः कुर्यात्। तत्र तथैव स्याद्, यथैव पितुरिच्छेति पुत्राश्रयो विधिरनवद्यः।

विश्व.२।११८

(२) इदानीं यत्र काले येन च यथा विभागः कर्तव्यस्तद्दर्शयन्नाह—विभागमिति। यदा विभाग पिता चिकीर्षति, तदा इच्छया विभजेत् पुत्रानात्मनः सकाशात् पुत्र पुत्रौ पुत्रान्। इच्छाया निरङ्कुशत्वाद् नियमप्राप्तौ नियमार्थमाह—ज्येष्ठं वा श्रेष्ठभागेनेति। ज्येष्ठ श्रेष्ठभागेन, मध्यम मध्यभागेन, कनिष्ठ कनिष्ठभागेन, विभजेदित्यनुवर्तते। श्रेष्ठादिविभागश्च मनुनोक्तः 'ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्। ततोऽर्धं मध्यमस्य स्यात्तुरीय तु यवीयसः॥' (९।११२) इति। वाशब्दो वक्ष्यमाणपक्षापेक्षः। 'सर्वे वा स्युः समाशिन' इति। सर्वे वा ज्येष्ठादयः समांशभाजः कर्तव्याः। अय च विषमो विभागः स्वार्जितद्रव्यविषयः। पितृक्रमायाते तु समस्वाम्यस्य वक्ष्यमाणत्वान्नेच्छया विषमो विभागो युक्तः। +मिता.

(३) अस्मन्मते तु इच्छया विभजेदिति स्वोपात्तधनविषय श्रेष्ठाशतासमानाशतयोस्तु पैतामहधनगोचरत्वमिति न किमप्यनर्थकम्। *दा.५४

(४) पित्रादिधनस्य पुत्रादीनुद्दिश्य विविच्य भागकरण विभागः। तत्र पितृधन पिता विभजेदित्युत्सर्गः। हेतुविशेषे तु पुत्रा अपि विभजन्ते, तदुपरिष्टाद्वक्ष्यते। तत्र यदि पिता विभजेत्तदिच्छया न्यूनाधिकविभागविषयान्सुतानुद्दिश्य धन विभजेत्। अस्मद्धनस्यायमशस्तवायमशस्तवेति व्यवस्थापयेदिति यावत्। शखः—'यत्रैकपुत्रः स्यात्तदा द्वौ भागौ वाऽऽत्मनः कुर्यात्'। नन्विच्छयेति न वक्तव्य, विभागकर्तृत्वादेव तत्प्राप्तेः। न हि चेतनोऽनिच्छन्क्रियासु स्वतन्त्रो भवति, स्वतन्त्र एव कर्तोच्यते। सत्यम्। विभागकर्तृत्वादेव विभागविषयेच्छा प्राप्ता। अत एवासाविच्छया विभजेदित्यनेन (न) विधीयते कि त्वन्यैव। तस्याश्च कस्यचित्पुत्रस्य न्यूनो धनाशः कस्यचिदधिक इत्येव विषमो भागो विषयः। ततश्चेच्छया न्यूनाधिकविभागः सुतान्विभजेदित्यर्थः। यद्यपि विभजेदित्यस्माद्विभाग एव प्रतीयते, न वैषम्यविशिष्टस्तथाऽपि 'ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्। ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः॥' इत्यादिभिरुद्धारशास्त्रैर्यावन्त उद्धारप्रकारा विहितास्ते सर्वेऽत्रोपलक्षिता भवन्ति। ततश्च पारिशेष्याद्विभागकर्तुरिच्छया विभागवैषम्य 'इच्छया विभजेत्सुतान्' इत्यत्र विधीयत इति सिद्धम्। अत्र नारदः—'पित्रैव तु विभक्ता ये समन्यूनाधिकैर्धनैः। तेषा स एव धर्मः स्यात्सर्वस्य हि पिता प्रभुः॥' इति। न चैतदुद्धारवाक्यार्थविषयमिति वाच्य, पिता प्रभुरिति वचनात्। न ह्युद्धारे पितुः प्रभुत्व किंतु शास्त्रस्य। बृह-

---

* कौटिलीयपितृकृतविभागवचन (पृ.११४९) इत्यत्र द्रष्टव्यम्।

(१) **यास्मृ.**२।११४, **अपु** २५६।१; **विश्व.**२।११८, **मिता.**; **दा.**५४; **अप.**२।११४:२।१२१ पू.; **व्यक.**१४१, **स्मृच.**२६०; **ममु.**९।१०४ पू., **विर.**४६४ इच्छ (स्वेच्छ):४८५ उत्त., **स्मृसा** ५४(=) (पिता चेद्विभजन् स्वं स्व इच्छया विभजेत्सुतान्); **पमा.**४८५, **रत्न.**१३९; **मपा.**६४५; **विचि.**१९६-१९७ विरवत्, **व्यनि.**, **स्मृचि.**२९ वा श्रेष्ठ (च ज्येष्ठ); **नृप्र.**३४ उत्त.; **दात.**१६८; **सवि.** ३७१ पू; **मयू.**९।१०४.९।२०९ पू.; **दानि.**१; **वीमि.**; **व्यप्र.**४३२-४३३:४३८ उत्त.; **व्यउ** १४३ उत्त.; **व्यम.** ४२; **मिता.**१९४; **राको.**४४५; **बाल** २।११६ पू.; **विभ.** ४४ पू.:५१चतुर्थपादः:७४उत्त.; **समु.**१२७; **विच.**५९,६२.

+ विश्वरूपमतमत्र व्याख्यातम्। मपा.व्याख्याने मितागतं 'एकाधिकं हरेज्ज्येष्ठ' इति मनुवचनस्थमितागतं च। विर., पमा., व्यनि. मितागतम्। *दात. दागतम्।

स्तिः—'समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः। तथैव ते पालनीया विनेयास्ते स्युरन्यथा॥' अथ चेच्छया विभजेत्सुतानित्यनेन विभागकर्तृतयैव पितुरिच्छया विभागप्रयोजकत्व प्राप्तमुच्यत इति वाक्यार्थानर्थक्यप्रसंगपरिहारार्थं पुत्रेच्छा विभाग न प्रयुङ्क्त इति परिसख्यायत इत्याश्रीयते। अप.

(५) कात्यायनबौधायनोक्तपक्षयोर्मध्ये य पक्ष पिता कर्तुमिच्छति तमेव पक्ष कुर्यात्। पितृकर्तृकविभागे तस्यैव प्रभुत्वेन तदिच्छाया एव पक्षविशेषपरिग्रहकारणत्वात्। तदेतत्सर्व सक्षिप्य याज्ञवल्क्येनोक्त—विभागं चेदित्यादिना। स्मृच.२६०

(६) 'विभाग चेत्पिता कुर्यादि'त्यनेन जीवत्येव पितरि पितुरिच्छया विभाग इति, यस्मिन्काले विभाग इत्यस्योपसग्रहः। पितेत्यनेन येन इत्यस्योपसंग्रहः। 'ज्येष्ठ वा श्रेष्ठभागेने'त्यादिना यथा विभाग इत्यस्योपसग्रह इति द्रष्टव्यम्। सुबो.

(७) पिता चेद्विभाग स्वार्जितस्वाभ्युद्धृतस्वत्वधनस्य कुर्यात्तदा इच्छया स्वेच्छानुसारेण न्यूनाधिकमपि द्रव्य दत्वा सुतान् विभजेत्। तदाह विष्णुः—'पिता यत्पुत्रान्विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे'। मनुश्च—'पतृकं तु पिता द्रव्यमनवाप्य यदाप्नुयात्। न तत्पुत्रैर्भजेत्सार्द्धमकामः स्वयमर्जितम्॥' पित्रार्जितं तदुद्धृत च विहाय द्रव्यान्तरे पित्रा विभज्यमाने सर्वे सुताः समाशभागिनः स्युः। ज्येष्ठस्य ज्येष्ठभागेन दशार्शाविशाशादिसहितेनाशेन विभजेत्। पुत्राणा च स्वस्व समाशकरणम्। वीमि.

(८) ऐच्छिकविभाग एव विवृत उत्तरार्धेन। इच्छायाः सभवति उक्तपक्षद्वयावलम्बनत्वे स्वातन्त्र्यायोगात्। वाक्यभेदापत्तेः। एकस्मै लक्ष कस्मैचित्कपर्दिकमन्यस्मै न किमपीत्यव्यवस्थापत्तेश्च। व्यम.४३

शक्तस्यानीहमानस्य किंचिद्दत्त्वा पृथक् क्रिया॥

(१) पितृद्रव्यानपेक्षस्यैव स्वकुटुम्बभरणादौ धर्मकार्ये च—शक्तस्येति। अनीहमानस्यापि कालान्तराविरोधाय यत्किंचित् संमानमात्रं कृत्वा पृथक्करणं कार्यम्। नन्वेवमपि यद्यसौ ब्रूयाद्—न मया कृत्स्नो भागः समालब्धः, स मे दीयतामिति। अतोऽस्त्येव विरोधः। नास्तीति ब्रूमः। कस्माद्, यस्माद् ऊनाधिकविभक्ताना पित्रा पुत्राणामिति शेषः। धर्मः पितृकृतः स्मृत इति। विभागधर्मः पित्रा यः कृतः, स एव स्मृतो विहित इत्यर्थः। तस्मादविरोधः। विश्व.२।१२०

(२) 'ज्येष्ठ वा श्रेष्ठभागेन सर्वे वा स्युः समाशिनः' इति पक्षद्वयेऽप्यपवादमाह—शक्तस्येति। स्वयमेव द्रव्यार्जनसमर्थस्य पितृद्रव्यमनीहमानस्यानिच्छतोऽपि यत्किंचिदसारमपि दत्वा पृथक् क्रिया विभागः कार्यः पित्रा। तत्पुत्रादीना दायजिघृक्षा माभूदिति। ×मिता.

(३) विभागवैषम्ये कारणान्तरमाह—शक्तस्येति। यः पुत्रो धनार्जनसमर्थतया पितृधन नेच्छति, यो वा धनार्जनसमर्थोऽपि शठतया धनस्यार्जनरक्षणानुकूलां चेष्टा न कुरुते, तस्मै किंचिदसारमल्पक धनं दत्त्वा पित्रा पृथक् क्रिया कार्या। अन्यथा तेन तत्सतत्या वा विवादः स्यात्। पुत्रैः संभूयार्जित धन एतत्। पित्रादिधने तु सममश लभत एव। अप.

न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः+॥

(१) तत्रैतामहेऽपि स्वल्पया मात्रयेच्छन्ति, यत्र न परिपूर्ण भागद्वय गृहीतम्। स्वयमर्जितविषये त्वपवाद एव स्यात्। मेधा.९।२०९

(१) **याज्ञ्स्मृ.**२।११६, **अपु.**२५६।३, **विश्व** २।१२०, **मिता**, **दा.**६६, **अप.**, **स्मृच.**२६२, **विर** ४८५, **पमा.** ४९४, **रत्न.**१४०, **मपा** ६५५, **व्यनि**, **स्मृचि.**२९, **नृप्र** ३४, **सवि.**३५५, **वीमि**, **व्यप्र.**४४८, **व्यउ** १४५, **व्यम.** ४४, **विता** ३०४, **राकौ.**४४६, **विभ.**७४, **समु.**१२७.

× विर., पमा., मपा., सवि., वीमि., व्यउ., व्यम., विता. मितागतम्।

+ अत्रत्य विश्व व्याख्यान पूर्वार्धे द्रष्टव्यम्। वीमि विश्वगतम्।

(१) **याज्ञ्स्मृ.**२।११६, **अपु** २५६।३ पितृकृतः स्मृतः (च पितृतः कृतः), **विश्व.**२।१२० न्यू (ऊ) धर्म्यः (धर्मः); **मेधा.** ९।२०९, ९।२१५; **मिता.**, **दा.**५३, **अप.**धर्म्यः (धर्मः); **स्मृच.**२६०, **रत्न** १३९; **मपा.**६४६; **व्यनि.** अपवत; **स्मृचि.**२९ धर्म्य. . स्मृत (धर्मः पित्रा प्रकल्पित.); **नृप्र.** ३४; **मच.**९।१७९ विभक्ता (विभागा):९।२१५; **वीमि.** अपवत; **व्यप्र.**४३९, **व्यउ** १४४ कृतः (कृते); **व्यम.**४३; **विता.**२९६, **राकौ.**४४६, **विभ.**४६,६४; **समु.**१२७; **विव** ५७.

(२) ज्येष्ठं वा श्रेष्ठभागेनेति न्यूनाधिको विभागो दर्शितः । तत्र शास्त्रोक्तोद्धारादिविषमविभागव्यतिरेकेणान्यथाविषमविभागनिषेधार्थमाह—न्यूनाधिकेति । न्यूनाधिकविभागेन विभक्ताना पुत्राणामसौ न्यूनाधिकविभागो यदि धर्म्यः शास्त्रोक्तो भवति तदासौ पितृकृतः कृत एव न निवर्तत इति मन्वादिभिः स्मृतः । अन्यथा तु पितृकृतोऽपि निवर्तत इत्यभिप्रायः । यथाह नारदः—'व्याधितः कुपितश्चैव विषयासक्तमानसः । अन्यथाशास्त्रकारी च न विभागे पिता प्रभुः ॥' इति ।

*मिता.

(३) पुत्राणा तु पितामहधनात् विशोद्धारं दत्वाऽदत्वैव वा विभजेत्, स्वोपार्जितधनात् पुनर्गुणवत्त्वेन समानार्थं, बहुकुटुम्बेन वा भरणार्थं, अयोग्यत्वेन वा कृपया, भक्तत्वेन वा प्रसन्नतया, अधिकदानेच्छुर्न्यूनाधिकविभागं कुर्वन् धर्मकारी पिता । तदाह याज्ञवल्क्यः—'न्यूनाधिकविभक्ताना धर्म्यः पितृकृतः स्मृतः ।' तथा बृहस्पतिः—'समन्यूनाधिका भागाः पित्रा येषा प्रकल्पिताः । तथैव ते पालनीया विनेयास्ते स्युरन्यथा ॥' नारदश्च—'पित्रैव तु विभक्ता ये समन्यूनाधिकैर्धनैः । तेषा स एव धर्म्यः स्यात् सर्वस्य हि पिता प्रभुः ॥' सर्वधनप्रभुत्वस्य हेतुत्वात् पैतामहे च तदसंभवात् न्यूनाधिकविभागः पितृकृतः पितृधनविषय एवाय धर्म्यः । तथाच विष्णुः—'पिता चेत् पुत्रान् विभजेत् तस्य स्वेच्छा स्वयमुपात्तेऽर्थे पैतामहे तु पितापुत्रयोस्तुल्य स्वामित्वम् ।' ननु 'विभाग चेत् पिता कुर्यादिच्छया विभजेत् सुतान् । ज्येष्ठ वा श्रेष्ठभागेन सर्वे वा स्यु. समाशिनः ॥' इति (यास्मृ. २।११४) याज्ञवल्क्यवचनात् उद्धाररूपश्रेष्ठभागावगतेः कथं ततो न्यूनाधिकत्वमभिधीयते । उच्यते । उपरते पितरि भ्रातृभिरपि विभागे क्रियमाणे विशोद्धाररूपश्रेष्ठाशास्य सिद्धत्वाद्वचनानर्थक्यात् न तदर्थत्वम् । अथ विनाप्युद्धारं समाशतायाः पितृकृताया धर्म्यत्वार्थं वचनमुच्यते, तत्र, न्यूनत्वमेव तर्हि पितृकृत धर्म्य स्यादित्यधिकपदमनर्थक स्यात् । किंच उद्धाराभिप्रायेण समन्यूनाधिकत्ववर्णने इच्छया विभजेदित्यनर्थक पद, एतदितरपदत्रयेणैव वक्तव्यस्यामिहितत्वात् । अस्मन्मते तु इच्छया विभजेदिति स्वोपात्तधनविषयं, श्रेष्ठाशतासमानांशतयोस्तु पैतामहधनगोचरत्वमिति न किमप्यनर्थकम् । दा.५२–५४

(४) उक्तो विषमविभागः स धर्मत्वादनतिक्रमणीय इत्याह—न्यूनाधिकेति । पुत्रैर्वाऽर्जितधनस्य न्यूनाधिकां शदानेन पुत्राणा विभक्तधनानां स एव धर्मो यः पित्रा कृतोऽतोऽसौ नातिक्रमणीयः । अप.

(५) एवं चात्मेच्छया यः पक्षः पित्रा परिगृहीतः स सुतैरनपेक्षितोऽप्यनुमन्तव्य एव । तथा च स एव—'न्यूनाधिकविभक्ताना धर्म्यः पितृकृतः स्मृतः' इति । न्यूनतया ये विभक्ता अज्येष्ठास्तेषा श्रेष्ठभागाभावादधिकतया विभक्तो ज्येष्ठस्तेषा पितुरिच्छया स्वीकृतो यद्युद्धारपूर्वको विभागस्तदा सोऽपि शास्त्रमूलत्वेन धर्म्यतया प्राक् स्मृत इति तैरप्यनुमन्तव्य इत्यर्थः ।

स्मृच.२६०

नारदः

पितृकृतसमविषमविभागविधिः

[1]पितैव वा स्वयं पुत्रान्विभजेद्वयसि स्थितः ।
ज्येष्ठं वा श्रेष्ठभागेन यथा वास्य मतिर्भवेत् ॥

(१) ज्येष्ठस्य श्रेष्ठभागमभिधाय पुनर्यथा वास्य मतिर्भवेदित्यनेन यादृशे न्यूनाधिकविभागे पितुः पूर्वोक्तकारणात् कर्तव्यतामतिर्भवेदिति पृथगभिधानात् श्रेष्ठभागादन्य एवायं न्यूनाधिकविभागः प्रतीयते । दा.५६

(२) कथं तर्हि पितृकर्तृको विभाग इत्यपेक्षिते नारदः—पितैवेति । वयसि स्थित इति वदन्नप्रतिहतस्वातन्त्र्ययुक्तपितृविषय एवायं नियम इति दर्शयति । एवकारेण पितृकर्तृकत्वनियमलाभेऽपि स्वयं ग्रहणादस्मिन्विषये पुत्राणामनुमतिकर्तृत्वमपि निरस्तम् । वाशब्दः सहवासेन विकल्पार्थो न पुनः पुत्रादिकर्त्रन्त-

* मपा., व्यप्र., व्यम., विता. मितागतम् ।

(१) नास.१४।४ वा श्रेष्ठ (श्रेष्ठवि) वास्य (वा स्व), **नास्मृ.** १६।४; **दा.**५५; **स्मृच.**२५९ पू.; **विर.**४६४ तै (ते); **पमा.**४९१ वा श्रेष्ठ (श्रेष्ठवि); **व्यनि.**पू., **नृप्र.**३४ नासंवत्; **सवि.**३५१ पू.; **व्यप्र.**४३८; **बाल.**२।११६ तैव वा (ता चैव) उत्तरार्धे (ज्येष्ठ श्रेष्ठविभागेन यथा वा स्वमतेन तु); **समु.**१२७ पमावत्.

रेण । सहवासस्यैवात्र पक्षान्तरत्वात्। तथा च व्यासः 'भ्रातृणा जीवतोः पित्रोः सहवासो विधीयते ।' इति । स्मृच.२५९

(३) वाशब्दो विकल्पार्थः। पिता वा पुत्रा वा विभजेयुः । वयसि स्थितः पूर्वविशेषेण हीनतया असमर्थ इत्यर्थः । अत एव गौतमः—'विभक्तजः पित्र्यमेवे'ति विभागोत्तरकाल पुत्रोत्पत्तौ विभागमाह । श्रेष्ठः प्रशस्ततमोऽधिक इत्यर्थः । यथा वाऽस्य पितुर्मेति भवति समाधिकभागेषु तथा विभजेत् । विर.४६४

(४) पितैव वेत्येवकारवाशब्दाभ्या व्याधितत्वादिदोषराहित्ये पितुरेव विभागकरणेऽधिकारः । अन्यथा पुत्राणामित्यर्थः । सवि.३५१

(५) स्वयमेव स्वयमिच्छति चेत्, न बलादित्येवमर्थं स्वयग्रहणम्। यथा वेच्छेत् तथा, ज्येष्ठविभागविषयमिति केचित्। अन्ये सर्वविषयमून वाधिक वात्मेच्छानुरूप विभजेदिति । नाभा.१४।४

द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता+॥

(१) इत्येतदपि स्वार्जितविषयम् । ×मिता.२।१२१

(२) तत्र यदा पितैवेच्छातः पुत्रान् विभजति तदा पैतामहधनात् भागद्वयं स्वयं गृह्णीयात्। 'जीवद्विभागे तु पिता गृह्णीताशद्वय स्वयमि'ति बृहस्पतिना 'द्वावशौ प्रतिपद्येत विभजन्नात्मनः पिते'ति नारदेन चाविशेषेण प्रतिपादनात्। किंच इतोऽपि पितमहाधनात् पितुर्भागद्वयम्। दा.३६-३७

वसिष्ठेन ज्येष्ठस्यांशद्वयममिधाय उपार्जकस्याप्यंशद्वयं पृथगभिहितम् । दा.४२

तदेवमुक्तप्रबन्धेन यत्र ज्येष्ठभ्रातुरेव पितृधने भागद्वयं कथ तत्र जनकस्य दानविक्रयपरित्यागक्षमस्य पितामहधनसबन्धमूलस्यातिगुरोः पितुरेव स्वपितृधने भागद्वय न संभवति ? जन्मविद्यागुणज्येष्ठ इति वाक्येन च पितृसमत्वेन भागद्वयं ज्येष्ठस्यातिदिशन् पितुर्भागद्वय ज्ञापयति बृहस्पतिः—'जीवद्विभागे तु पिता गृह्णीताशद्वय स्वयमि'ति सामान्येनाशद्वयाभिधानोपदेशो बृहस्पतिना दर्शितः। तथा नारदः—'द्वावशौ प्रतिपद्येत' इति । द्रव्य विभजन् पिता द्वावशावात्मनो गृह्णीयात् न पुनरात्मनो द्रव्य विभजन्निति संबन्धः, पूर्वोक्तविरोधात्। किंच पैतामहधने पितापुत्रयोः समभागित्वे यावद्धन पितुस्तावदेव पुत्रस्यापीति वाच्यं न तु यावदेव यदेव धन तावदेव तदेव पुत्रस्यापीति, मध्यगत्वापत्तेः, जायापत्योरिव विभागाभावप्रसगात् । एव च सति भ्रातृणा विभागे यदा ज्येष्ठस्य ज्येष्ठतया भागद्वयकल्पन तदा तत्पुत्रस्यापि भागद्वयकल्पने पुत्रेण सह ज्येष्ठस्य चत्वारोंऽशाः भ्रात्रन्तरस्यैकोंऽशः स्यात् बहुपुत्रत्वे च ज्येष्ठस्य तत्पुत्राणा पितृसमभागकल्पने कनिष्ठभ्रातुर्यत्किंचिदेव स्यादिति महाजनविरोधः। यच्च बृहस्पतिवचनं—'द्रव्ये पितामहोपात्ते स्थावरे जगमे तथा। सममंशित्वमाख्यातं पितुः पुत्रस्य चैव हि ॥' अंशित्व सम समानं न च स्वेच्छया स्वोपात्तधनवत् न्यूनाधिकविभागं दातुमर्हति न पुनरंशः सम इति तस्यार्थः। द्विपितृकपित्रभिप्रायं वा समभागवचनम्। 'तत्र स्यात् सदृशं स्वाम्यमि'ति वचन तु प्रागेव व्याख्यातम्। किंच यद्यसौ पिता स्वपितुः पुत्रामनरकनिवर्तको ज्येष्ठस्तदा तस्य स्वभ्रातृनेवापेक्ष्य यत्र पितृसमत्वेन भागद्वयं सुतरा तस्य पुत्रापेक्षया भागद्वय युक्तं पुत्राणा क्रमागतधनसंबन्धस्य पित्रधीनत्वात् । अथ यः पितुर्न ज्येष्ठः पुत्रस्तस्य स्वपुत्रैः सह समाशतोच्यते । तत्र, मध्यमादिपुत्राणामप्यध्यर्धादिविधानात् पितृतया भागद्वयस्यैव सुतरा युक्तत्वात् । सामान्येन च पितापुत्रयोः समांशाभिधानस्य भवतो मुनीना चानुचितत्वात्। किंच पितुरंशद्वयाभिधानं स्वोपात्तद्रव्यगोचरमित्यप्यनुपपन्नं, तदिच्छानुरोधित्वात्

+ विता. व्याख्यान 'स यद्येकपुत्रः' इति शखलिखितवचने (पृ. ११६७) द्रष्टव्यम् ।

× स्मृसा., मपा., व्यनि., नाभा., व्यप्र., व्यउ. मितावद्भावः ।

(१) **नासं.**१४।१२; **नास्मृ.**१६।१२; **मिता.**२।१२१ (=); **दा.**३६:४४, **उ.**२।१४।१; **व्यक.**१४१; **स्मृच.** २६१; **विर.**४६५; **स्मृसा.**५५; **पमा.**४९१:४९७; **रत्न.** १३९; **मपा.**६४७; **सुबो.**२।१२१(=); **दीक.**४३ प्रतिपद्येत (आत्मनः कुर्यात्); **व्यनि.**; **नृप्र.**३४; **दात.**१६७; **सवि.**३५५:३७३(=); **वीमि.**२।११६; **व्यप्र.**४४४; **व्यउ.** १४४; **व्यम.**४३; **विता.**३१३; **राकौ.**४५१; **विभ.**६०: ६३; **समु.**१२७; **विच.**५५,६५.

विभागस्य, इच्छातश्च भागद्वयत्रयन्यूनाधिकानामपि प्रातेर्विफलो विधिः, नियमार्थत्व च वचनस्य न वर्णनीयं, विष्णुविरोधात्। दा.४४-४७

तथा पुत्रार्जितेऽपि धने पितुरंशद्वय द्वावंशाविति गृह्णीताशद्वयमिति चाविशेषश्रुतेः। ×दा.४९

(३) विभजन्निति वदन्पितृकर्तृके जीवद्विभागे भागद्वयमात्मनो न पुनः पुत्रकर्तृके जीवद्विभाग इति दर्शयति। पितृकर्तृके विभागेऽप्यात्मनो भागद्वयग्रहणे विशेषमाहतुः शङ्खलिखितौ 'स यद्येकपुत्रः स्यात् द्वौ भागावात्मनः कुर्यात् 'इति। स्मृच.२६१

(४) एतच्च शंखपर्यालोचनया एकपुत्रत्वे द्रष्टव्यम्। विर.४६५

(५) एवमादिकं युगान्तरे विषमविभागप्रतिपादनतया स्थापितम्। स्वार्जितद्रव्यविषय वा। पैतामहधनविषये तु न क्वापि विषमविभागः। इति। +पमा.४९७

(६) इद त्वेकपुत्रपरम्। +व्यम.४३

[1]**पित्रैव तु विभक्ता ये समन्यूनाधिकैर्धनैः।**
तेषां स एव धर्मः स्यात्सर्वस्व हि पिता प्रभुः*॥

(१) सर्वधनप्रभुत्वस्य हेतुत्वात् पैतामहे च तदसम्भवात् न्यूनाधिकविभागः पितृकृतः पितृधनविषय एवायं धर्म्यः। दा.५३

(२) समधनैः कृतो यो विभागप्रकारस्तत्र पित्रा मध्यमेकमधिक श्रेष्ठ धन न दत्तमिति ज्येष्ठेनानुशयो न कार्यः। तथा यः पित्रा कृतो न्यूनाधिकधनैर्विभागस्तत्र पित्राऽस्मभ्य न्यून दत्त ज्येष्ठायाधिकमिति अनुजैरनुशयो न कार्यः। पितुरिच्छया प्राप्तस्यैवात्र धर्म्यत्वात्। कुतस्तस्यैव धर्म्यत्वमित्यपेक्षिते इत्युक्त 'सर्वस्य हि पिता प्रभुः' इति। सर्वविधस्य पितृकर्तृकविभागस्य यतः पितैव प्रभुरित्यर्थः। *स्मृच २६१

(३) पूर्व (भ्रातृणामविभक्ताना' इति मनुश्लोके) सभूयोत्थाने भ्रातृणा मिलित्वा धनार्जने विषमभागनिषेधनमिद तु पितुरर्जिते विषमविभागविधानमित्यविरोधः। विर.४६८

(४) तस्माद्विषमविभागः शास्त्रसिद्धोऽपि लोकविरोधाच्छ्रुतिविरोधाच्च नानुष्ठेयः। इति सममेव विभजेरन्निति नियमो घटते। पमा.४९४

(५) इति तद्युगान्तरपरम्। व्यम.४४

बृहस्पतिः

पितृकृतसमविषमविभागविधिः

[2]**जीवद्विभागे तु पिता गृह्णीतांशद्वयं स्वयम्॥**

(१) तत्र यदा पितेवेच्छातः पुत्रान् विभजते तदा पैतामहधनात् भागद्वय स्वय गृह्णीयात्। दा.३६

सामान्येनाशद्वयाभिधानोपदेशो बृहस्पतिना दर्शितः। दा.४४

स्वार्जितधनात्तु यावदेव ग्रहीतुमिच्छति तावदेव गृह्णीयात्। ×दा.५२

(२) एतच्च शंखपर्यालोचनया एकपुत्रत्वे द्रष्टव्यम्। +विर.४६५

× दात. दावद्भावः। वीमि. दावद्भावः, तच्च 'यदि कुर्यात्समानंशान्' इति याज्ञवल्क्यवचने द्रष्टव्यम।

+ मिताक्षद्भावः।

* अप.व्याख्यान 'विभागं चेत्पिता' इति याज्ञवल्क्यवचने (पृ. ११६८) द्रष्टव्यम्। बाल. 'शक्तस्यानीहमानस्य' इति याज्ञवल्क्यवचनस्य मिताक्षद्भावः (पृ.११६९)।

(१) **नार्स.**१४।१५ समन्यूनाधिकै (हीनाधिकसमै) धर्मः (भागः); **नास्मृ.**१६।१५ समन्यूनाधिकै (हीनाधिकसमै); **दा.** ५३ धर्मः (धर्म्यः); **अप.**२।११४, **व्यक.**१४१; **स्मृच.**२६१ दावत्; **विर** ४६८ धर्मः (भाग) स्य हि (स्यैव); **पमा.** ४९१; **रत्न.**१३९; **दीक.**४२ दावत्; **व्यनि.**; **नृप्र.**३४ दावत्; **व्यप्र.**४३९ दावत्; **व्यम.**४४, **विता.**२९५ दावत्; **बाल.**२।११६ कैर्धनैः (कन च) धर्मः (धर्म्यः); **सेतु** ७१; **विभ.**६४; **समु.**१२७ दावत्, **विच.**२७(=) त्रैव तु (त्रा सह) : ५७ तु (च).

*शेषं 'शक्तस्यानीहमानस्य' इति याज्ञवल्क्यवचने (पृ ११६९) द्रष्टव्यम्। व्यप्र. स्मृचगतम्, 'शक्तस्यानीहमानस्य' इति याज्ञवल्क्यवचनस्य मिताक्षद्भावश्च। × सेतु. दागतम्।

+ चन्द्र., व्यप्र., विता. विरगतम्।

(१) **दा** ३६,४४, **स्मृच.**२६१ वृद्धबृहस्पतिः, **विर.** ४६५ स्वयम् (स्वकम्), **रत्न.**१३९, **व्यनि.**; **चन्द्र.**७१ भागे (भागस्य) ता .स्व (यादशकद्व); **व्यप्र.**४४४; **विता.** ३१३; **सेतु.**७३; **विभ.**६०,६३ तां... स्व (यादशकद्व); **समु.**१२७, **विच.**५५.

[1]समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः ।
तथैव ते पालनीया विनेयास्ते स्युरन्यथा×॥

(१) पित्रा शास्त्रावगतप्रकारेणेति शेषः । प्रकारान्तरेण कल्पितानां अधर्म्यत्वेनापालनीयत्वात् । न हि स्वेच्छयैव स्वार्जितधनेऽपि कस्यचित्पुत्रस्य निष्कसहस्रेण कस्यचित्पुत्रस्य कपर्दिकामात्रेण विभागः कृतो धर्म्यो भवितुमर्हति । अनिदंप्रथमविभागस्यैव स्वस्य व्यवस्थापकत्वात् । न च इच्छया विषमविभागोऽनिदंप्रथम एव 'इच्छया विभजेत् सुतानि'ति निबद्धत्वादिति वाच्यम् । अस्याः स्मृतेस्तथाविधविभागानिबन्धकत्वात् । तथा हि स्वतस्तावदयुक्तत्वेऽपि यदपरार्के णास्याः स्मृतेः परिशेषात् तथैव विभागप्रतिपादनपरत्वमापादित तत्प्राक्प्रतिपादितसम्यगर्थसद्भावे सति अपास्तमिति स्वेच्छामात्रेण पित्रा स्वार्जितधनेऽपि कृतो विषमविभागः पुत्रैरनुशये सत्यपालनीय इति सिद्धम् ।

स्मृच.२६१

(२) पितुरर्जिते विषमविभागविधानम् ।

*विर.४६८

(३) तस्माज्जीवद्विभागे अर्जीवद्विभागे च विषमविभागोऽस्तीति कथ सुताः सममेव विभजेरन्निति नियम्यते । मैवम् । सत्य शास्त्रतो विषमविभागोऽस्ति तथापि लोकविद्विष्टत्वादनुबन्ध्यादिवत् नानुष्ठीयते ।

+पमा.४९२

× दा व्याख्यानं 'न्यूनाधिकविभक्ताना' इति याज्ञवल्क्यवचने (पृ. ११६९) द्रष्टव्यम् । अप.व्याख्यान 'न्यूनाधिकविभक्ताना' इति याज्ञवल्क्यवचने गतम् । व्यप्र., बाल 'न्यूनाधिकविभक्ताना' इति याज्ञवल्क्यवचनस्य मिताक्षरावः ।

* विचि. विरगतम् ।

+ व्यनि. पमागतम् ।

(१) **दा.५३**; **अप.**२।११४,२।११६; **व्यक.**१४१; **स्मृच** २६१; **विर.**४६८ स्ते स्युर (स्युरतोऽ) नारदबृहस्पतियाज्ञवल्क्याः; **स्मृसा.**५५; **पमा.**४९२; **विचि.**२०१ विनेयाः (पतिताः); **व्यनि.**भागाः (भावात्); **नृप्र.**३४ येषा प्र (ये वै वि) शेष विरवत्, क्रमेण नारद.; **चन्द्र.**७१ विरवत्; **व्यप्र** ४३९, **बाल.**२।११६ ते पा (तै. पा); **विभ.**६४; **समु.**१२७; **विच.**५७; **विव्य.**२८(=).

कात्यायनः

मातृपितृपुत्राणा समविभागविधि.

[2]सकलं द्रव्यजातं यद्भागैर्गृह्णन्ति तत्समैः ।
पितरौ भ्रातरश्चैव विभागो धर्म्य उच्यते ॥

(१) यन्मध्यग द्रव्यजात तत्सकल पित्रादयो यत्र विभागे समैरेव भागैर्गृह्णन्ति स विभागः शास्त्रावगतत्वात् धर्मादनपेत इत्युच्यत इत्यर्थः । **स्मृच.**२६०

(२) धर्म्यो धर्मादनपेतः । 'मनुः पुत्रेभ्यो दाय व्यभजत्' इत्यविशेषेण समविभागश्रुतेः । विषमविभागश्च शास्त्रदृष्टोऽपि लोकविरोधात् श्रुत्यन्तरविरोधाच्च नानुष्ठेय इति समैर्भागैर्मध्यकद्रव्य गृह्णन्तीति नियम्यते । अतश्चास्मिन् कलियुगे अननुष्ठेयत्वात् ज्येष्ठाद्युद्धारपक्षा न प्रतिपादिताः । **सवि.**३५४

(३) मदनरत्नधृतकात्यायनवचनात्तु सर्वेषा भ्रातृणा पितापुत्राणा च समाशग्रहणमेव मुख्यमिति प्रतीयते । **व्यप्र.**४४८

[3]पैतामहं समानं स्यात्पितुः पुत्रस्य चोभयोः ।
स्वयं तूपार्जिते पित्रा न पुत्रः स्वाम्यमर्हति ॥

एतत्पितामहधनानुपजीवनेन पितर्युपार्जिते द्रष्टव्यम् । **अप.**२।१२१

[4]जीवद्विभागे तु पिता नैकं पुत्रं विशेषयेत् ।
निर्भाजयेन्न चैवैकमकस्मात्कारणं विना ॥

(१) नैकमधिकदानेन विशेषयेत् न च निर्भाजयेत् विभागशून्य न कुर्यात् । कारण विना, उद्धारादिविशेषो हि बहूनामेव नैकस्य एकस्यापि च पुत्रस्य कारणं विना विशेषो न कार्यः । कारणवशात्तु कार्य एव एकस्यापीत्यवगतेर्नोद्धारापेक्षो विशेषः किन्तु पितुरिच्छाकृत एवेति यथोक्त एवार्थः । ÷दा.५६-५७

÷ सेतु. दागतम् ।

(१) **स्मृच** २६०; **रत्न.**१३९; **सवि.**३५४ तरौ (तरो); **व्यप्र.**४४८; **व्यम.**४३ सविवत्; **विता.**३१४ धर्म्य (धर्म); **समु.**१२७ सविवत् .

(२) **अप.**२।१२१, **स्मृच.**२७९ पू., २८० तू (चो) उत्त.; **व्यनि.**; **समु.**१३४ स्मृचवत्.

(३) **दा.**५६; **दात.**१६५; **व्यप्र.**४३९; **बाल.**२।११६, २।११७ भोज (भोग); **सेतु.७२; विभ.४४; विच.५५.**

(२) न विशेषयेत् शास्त्रीयज्येष्ठभागाद्यतिरिक्तैच्छिकविशेषवन्त न कुर्यात्। कारण च शास्त्रोक्त पातित्यादिकं विनाऽकस्मात् क्रोधात् सुभगापुत्रस्नेहादिना वा न निर्भाजयेत् भागरहितं न कुर्यादित्यर्थः। व्यप्र.४३९

स्वार्जिते पितुरधिकांशहरत्वम्

[1]द्व्यंशहरोऽर्धहरो वा पुत्रवित्तार्जनात्पिता+॥

(१) पुत्रस्य वित्तार्जनात् पितुर्द्व्यंशहरत्व अर्धहरत्व वेत्यस्यार्थः। न च पुत्रश्च वित्त चेति पुत्रवित्ते तयोरर्जनात् पिता द्व्यशहरः पुत्रानर्जनात्तु सर्वहर इति वाच्य अनर्जितपुत्रस्यापि भ्रातृभिर्विभागे वित्तार्जकतया अशद्वयस्येष्टत्वात् कथ सर्वहरत्व अतो विभागार्हसबन्धिनि विद्यमाने अर्जकस्य द्व्यशित्व असति तु सर्वहरत्व वाच्य तथात्र पितापुत्रयोः प्रमत्तगीतता स्यात्। किंचार्जन स्वत्वहेतुभूतव्यापारः अर्जन स्वत्व नापादयति इति विप्रतिषिद्धमित्यभिधानात् न च पुत्रेषु स्वत्वमस्तीति सर्वस्वदाने प्रदर्शित अतस्तत्र गौणमर्जनपद वित्ते च मुख्य न चैतत् सकृत् श्रुतस्य सभवति। न च पुत्रणार्जितत्वात् पुत्रस्य द्व्यशप्राप्तेः पितुश्च भागद्वयस्यास्माद्वचनादृतेऽपि प्राप्तेः समभागत्वापातात् विधानमनर्थकमिति वाच्य एतद्वचनमन्तरेण पुत्रधने पितुर्भागद्वयस्याप्राप्तेर्वचनस्यार्थवत्वात्। किंच पुत्रवित्तार्जनादित्यस्य पितृधनविषयत्वे पितुरिच्छातो द्व्यशहरत्व अर्धहरत्व वेत्यनुपपन्न इच्छानुरोधित्वात् ग्रहणस्य इच्छायाश्चानियतत्वात् सार्द्धसपादपादोनाशग्रहणस्यापि संभवात् कथ पक्षद्वयमात्रकीर्तन नियमार्थत्व च पितृधनगोचर न सभवतीत्युक्त प्राक्। अत्र च पुत्रार्जितवित्तस्य यथा द्व्यशहरत्व तथा तस्यैव वित्तस्यार्धहरत्वमिति युक्तम्। न पुनर्द्व्यशस्यार्धमेकोऽशस्तद्ग्रहणार्थ वचन अर्धस्य द्व्यंशस्य चैकदेशत्वेन एकदेशिन आकाङ्क्षितत्वात् पुरुषविशेषणतया हरणकर्मत्वेन च द्वयोः समत्वात् परस्परसंबन्धानुपपत्तेः। वित्तार्जनादिति पञ्चम्यन्तेन द्व्यशरूपैकदेशान्वयार्थोपादानस्याविवादात् अर्धपदेनापि तस्यान्वयो युक्तः वित्तार्जनार्धपदयोश्चाव्यवधानात् वित्तस्यैवार्ध प्रतीयते न पुनर्द्व्यशस्यार्धमेकोऽशः प्रतीयते स्वायत्ते चैकाशपदे प्रयोक्तव्येऽवाचकपदप्रयोगस्यान्याय्यत्वात् वित्तस्यैवार्ध युक्तम्। तत्र पितृद्रव्योपघातेन पुत्रार्जितवित्तस्यार्ध पितुः अर्जकस्य पुत्रस्याशद्वय इतरेषा एकैकाशिता अनुपघाते तु पितुरंशद्वय अर्जकस्यापि तावदेव इतरेषामनशित्वम्। यद्वा विद्यादिगुणसंपन्नस्य पितुरर्धहरत्व विद्यादिनाऽपि ज्येष्ठस्यैवाधिकाशदर्शनात् विद्यादिशून्यस्य जनकतामात्रेण द्व्यशित्वम्। तेन क्रमागतधनाद्वा पुत्रार्जितधनाद्वा भागद्वय पिता स्वय गृह्णीयात्, अतोऽधिकमिच्छन्नपि नार्हतीति वचनार्थः। स्वार्जितधनात्तु यावदेव ग्रहीतुमिच्छति तावदेव गृह्णीयात्। +दा.४९–५२

(२) [जीमूतवाहन खण्डयति] तन्न। द्वन्द्वापेक्षया पञ्चम्यर्थलक्षणावतो भवदुक्तसमासस्यायुक्तत्वात्। यच्चानर्जितपुत्रस्येत्यादिद्वन्द्वदूषण तदत्यसंबन्धम्। भ्रातृभागाद्यविषयकत्वादस्य। पितृधनप्रस्तावात्। न चैव पुत्रपदं व्यर्थ वित्तार्जनस्यैव द्व्यशहरत्वे हेतुत्वोपपत्तेरिति वाच्यम्। अस्यातन्त्र्यार्थत्वात्। यतः पुत्रोऽपि वित्तवत्तेनैवार्जितस्तेन परतन्त्रः। स्वार्जितधने पितुरशद्वयग्रहणावग्रहो न भवतीत्यत्र तात्पर्यम्। यच्चार्जनपदवैरूप्य तदप्यसत्। पुत्रेऽपि पितृस्वत्वस्येष्टत्वात्। न च सर्वस्वदाननयविरोधः। पित्राद्यस्वत्वे तस्य तात्पर्यात्। पुत्राद्यदानस्य तन्नयसिद्धान्तस्य भाष्यप्रदर्शितचोदकविरोधयुक्तिसिद्धत्वात्। अत एव पुत्रकन्यादानादिविधयो मुख्यार्था एव न पुत्रादिपरतन्त्रीकरणरूपगौणदानार्थाः। इद च पितुरंशद्वयोपादानं स्वार्जितविषय न पित्रार्जितविषयम्। व्यप्र.४४५

+ विता. व्याख्यान 'स यथैकपुत्रः स्यात्' इति शङ्खवचने (पृ. ११६७) द्रष्टव्यम्।

(१) दा.४९; दात.१७४, व्यप्र.४४४, विता.३१३; सेतु.६८; विभ ६५,६७; विच.८६.

+ दात. दावद्भावः। सेतु. दागतम्।

पैतामहद्रव्यस्वाम्यविचारः

पैतामहे द्रव्ये पितापुत्रयोः स्वाम्य तद्विभागश्च

विष्णुः

[1]पिता चेत् पुत्रान् विभजेत् तस्य स्वेच्छा स्वयमुपात्तेऽर्थे ।

[2]पैतामहे त्वर्थे पितापुत्रयोस्तुल्यं स्वामित्वम् ।

(१) इद मुव्यक्त यदि पिता पुत्रान् विभजति तदा स्वोपात्तेऽर्थे न्यूनाधिकविभाग स्वेच्छया पुत्रेभ्यो दद्यात् पैतामहे तु नैतत् यस्मात् तत्र तुल्य स्वामित्व न पुनः पितुः स्वच्छन्दवृत्तिता । दा.३१

पितामहधनात् पितुर्भागद्वयम् । दा.३७

अस्यार्थः । स्वोपात्ते यावदेव ग्रहीतुमिच्छति अर्ध भागद्वय त्रय वा तत् सर्व तस्य शास्त्रानुमत न तु पैतामहेऽपि । दा.४७

(२) पितृद्रव्यानुपश्लेषार्जितधनविषयमेतत् ।

विर.४६४

(३) स्वार्जितेऽपि स्वेच्छया न्यूनाधिकविभागो भक्तत्वबहुपोष्यत्वाक्षमत्वादिसत्त्वामत्वकारणात् ।

दात.१६५

(१) **विस्मृ.**१७।१, **दा.**३१,४७,५३, **अप.**२।११४ पात्ते (पार्जिते); **विर.**४६४, **दीक.**४२ स्य स्वेच्छा (दा स्वेच्छया), **स्मृसा.**५४ (=) तस्य स्वेच्छा (स्वेच्छया); **विचि.** १९६; **व्यनि.** स्वेच्छा (स्वेच्छातः), **दात.**१६५.१६७ (पिता...जेत्०); **वीमि** २।११६ चेत् (यत्) स्वेच्छा (स्वेच्छया); **व्यप्र.**४४६, **विता.**२९३; **बाल.**२।११६ अपवत्; **सेतु.**७१; **विभ.**४४, **समु.**१२७, **विच.**३९,६३.

(२) **विस्मृ.**१७।२ पिता (पितृ), **दा.**३१,५३ त्वर्थे (तु) ४७ त्वर्थे (तु) मित्वम् (म्यम्); **स्मृच.**२७९ (अर्थे पैतामहेऽपि पितापुत्रयोस्तुल्यं स्वाम्यम्); **दीक.**४२ त्वर्थे (तु); **व्यनि.** (अर्थे पैतामहे पितृपुत्रयोः स्वाम्यं तुल्यम्); **दात.**१६५-१६६ दीकवत्, **व्यप्र.**४४६ दा. (पृ.४७)वत्; **सेतु.**७१ (त्वर्थे०) मित्वम् (म्यम्); **विभ.**६० दीकवत्; **समु.**१३४ (अर्थे पैतामहे पितापुत्रयोस्तुल्य स्वाम्यम्); **विच.**२७,३८,३९,६३ दीकवत्.

याज्ञवल्क्यः

भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा ।
तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः+॥

(१) अथ कि विभागात् स्वत्व, उत स्वत्वे सति विभाग इति । विभागात् स्वत्वमित्याहुः । अन्यथा जातपुत्रस्याधानादिश्रुतिद्रव्यसाधारण्यात् स्वत्यागासंभवाद् विरुध्यते, इच्छया वा विभागस्मृतिर्न स्यात् । न च तदनुज्ञानादनुष्ठानमिति युक्त, जातमात्रस्यानुज्ञानाशक्तेः । इत्याद्याशकामपाकर्तुमाह—भूर्या पितामहोपात्तेति । भूर्या पितामहोपात्ता निबन्धो वा अक्षयनिधिः अन्यदेव वा द्रव्य, तत्र पितापुत्रयोस्तुल्य प्रभुत्व स्यात् प्रत्येतव्य निर्विचिकित्समेवेत्यर्थः । उभयोरित्यविभक्तस्यैव स्वत्वज्ञापनार्थम् । भूम्यादेः पृथगुपादानमविभाज्यत्वात् स्थायित्वाद्वा द्रष्टव्यम् । यत्त्वनुष्ठानविरोधादि चोद्य, तत् स्वयमार्जितेनापि तत्सिद्धेर्न किंचित् । तदानीमेव वा विभज्यानुष्ठानमस्तु । या त्विच्छया विभागस्मृतिः सा स्वयमुपात्तद्रव्यवतो द्रष्टव्या । अतः स्वत्वे सति विभाग इति सिद्धम् । विश्व.२।१२४

(२) अधुना विभक्ते पितर्यविद्यमानभ्रातृके वा पौत्रस्य पतामहे द्रव्ये विभागो नास्ति । अध्रियमाणे

+ मेधा व्याख्यान 'पैतृक तु पिता' इति मनुवचने द्रष्टव्यम् ।

(१) **यास्मृ.**२।१२१, **अपु.**२५६।७, **विश्व.**२।१२४; **मेधा.**९।२०९, **मिता.** चोभयो. (चेव हि), **दा** २९; **अप.**; **व्यक.**१४०; **स्मृच.**२७९:२९५ उत्त., स्मृत्यन्तरम्; **विर.** ४६१, **पमा.**४९६, **रत्न.**१४१, **मपा.**६६०, **सुबो.**(=)२।३२ वा (च) शप मितावत्, **व्यनि.**; **स्मृचि.**२८ वा (च); **नृप्र.**३५, **दात.**१६६, **सवि.**३७३मितावत्; ४१३ उत्त., स्मृत्यन्तरम्, **वीमि.**; **व्यप्र.**४४५ मितावत् : ५१८ उत्त.; **व्यउ.**२१; **व्यम.**३९ वा (च):४३; **विता.**३१८ मितावत्; **राकौ.**४५० सुबोवत्; **बाल.**२।३२,२।१३५ (पृ.२१८) मितावत्; **सेतु.**७४ वा (च); **विभ.**५९:६४ उत्त., **समु.** १३४; **विच.**२७,३९.

पितरि 'पितृतो भागकल्पना' इत्युक्तत्वात्। भवतु वा स्वार्जितवत्पितुरिच्छयैवेत्याशङ्कित आह—भूर्या पितामहोपात्तेति। भूः शालिक्षेत्रादिका। निवन्ध एकस्य पर्णभरकस्येयन्ति पर्णानि, तथा एकस्य क्रमुकफलभरस्येयन्ति क्रमुकफलानीत्याद्युक्तलक्षणः। द्रव्य सुवर्णरजतादि यत्पितामहेन प्रतिग्रहविजयादिना लब्धं तत्र पितुः पुत्रस्य च स्वाम्यं लोकप्रसिद्धमिति कृत्वा विभागोऽस्ति। हि यस्मात्तत्सदृशं समानं तस्मान्न पितुरिच्छयैव विभागो नापि पितुर्भागद्वयम्। अतश्च पितृतो भागकल्पनेत्येतत्स्वाम्ये समेऽपि वाचनिकम्। 'विभाग चेत्पिता कुर्यात्' इत्येतत्स्वार्जितविषयम्। तथा 'द्वावशौ प्रतिपद्येत विभजन्नात्मनः पिता' इत्येतदपि स्वार्जितविषयम्। 'जीवतोरस्वतन्त्रः स्याज्जरयापि समन्वितः' इत्येतदपि पारतन्त्र्यं मातापित्रर्जितद्रव्यविषयम्। तथा—'अनीशास्ते हि जीवतोः' इत्येतदपि। तथा सरजस्काया मातरि सस्पृहे च पितरि विभागमनिच्छत्यपि पुत्रेच्छया पैतामहद्रव्यविभागो भवति। तथाऽविभक्तेन पित्रा पैतामहे द्रव्ये दीयमाने विक्रीयमाणे वा पौत्रस्य निषेधेऽप्यधिकारः। पित्रर्जिते न तु निषेधाधिकारः। तत्परतन्त्रत्वात्। अनुमतिस्तु कर्तव्या। तथाहि—पैतृके पैतामहे च स्वाम्य यद्यपि जन्मनैव, तथापि पैतृके पितृपरतन्त्रत्वात् पितुश्चार्जकत्वेन प्राधान्यात् पित्रा विनियुज्यमाने स्वार्जिते द्रव्ये पुत्रेणानुमतिः कर्तव्या। पैतामहे तु द्वयोः स्वाम्यमविशिष्टमिति निषेधाधिकारोऽस्तीति विशेषः। मनुरपि—'पैतृक तु पिता द्रव्यमनवाप्त यदाप्नुयात्। न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम्॥' इति (मस्मृ. ९।२०९)। यत्पितामहार्जित केनाप्यपहृत पितामहेनाऽनुद्धृत यदि पितोद्धरति तत्स्वार्जितमिव पुत्रैः सार्धमकामः स्वय न विभजेदिति वदन् पितामहार्जितमकामोऽपि पुत्रेच्छया पुत्रैः सह विभजेदिति दर्शयति।

+मिता.

(३) तस्य निरवद्यविद्योद्योतेन द्योतितस्तत्वतोऽयमर्थः। यत्र द्वयोर्भ्रात्रोर्जीवत्पितृकयोरप्राप्तभागयोरेकः पुत्रमुत्पाद्य विनष्टोऽन्यो जीवति, अनन्तरं पिता मृतः, तत्र पुत्र एव तद्धनं प्राप्नोत्वतिसंनिकर्षात्, तदर्थं सदृशं स्वाम्यमिति वचनम्। यथा पैतामहधने पितुः स्वाम्यं तथैव तस्मिन्मृते तत्पुत्राणामपि, न तत्र संनिकर्षविप्रकर्षाभ्या कोऽपि विशेषः पार्वणविधिना पिण्डदानेन द्वयोरपि तदुपकारकत्वाविशेषादित्यभिप्रायः। अत एव मृतपितृपितामहकः प्रपौत्रोऽपि पुत्रपौत्राभ्या सह तुल्याधिकारी भवति पिण्डदत्वाविशेषात्।

जीवति तु पितरि पुत्राणा पितामहधनस्वामित्वे सपुत्रापुत्रभ्रातृद्वयविभागे तत्पुत्राणामपि भागः स्यात् स्वामित्वाविशेषात्। तथा चाप्रक्रान्तत्वेनातदर्थत्व वचनस्य अनेकपितृकाणामेव प्रक्रमात्। निवन्धः कार्तिक्यामिद दास्यामीति यन्निबद्धम्। द्रव्य भूसाहचर्यात् द्विपदमभिहितम्।

अय वा धारेश्वरपुरस्कृतो वचनार्थः। इच्छया विभागदानप्रवृत्तस्य पितुः पैतामहधने सदृश स्वाम्यं पुत्रैः सह न तत्र स्वोपार्जितधन इव न्यूनाधिकविभागमिच्छातः कर्तुमर्हतीति। यथा विष्णुः—'पिता चेत् पुत्रान् विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे पैतामहे तु पितापुत्रयोस्तुल्य स्वामित्वम्।' इदं सुव्यक्त यदि पिता पुत्रान् विभजति तदा स्वोपात्तेऽर्थे न्यूनाधिकविभाग स्वेच्छया पुत्रेभ्यो दद्यात् पैतामहे तु नैतत् यस्मात् तत्र तुल्य स्वामित्व न पुनः पितुः स्वच्छन्दवृत्तिता। अतः पितापुत्रयोः पैतामहधने समविभागार्थ सदृश स्वाम्यमिति वचन, पुत्राणा वा विभागस्वातन्त्र्यार्थमिति मतद्वयमपि हेयम्। एवमेवापरमपि वचन व्याख्येयम्। अतः पैतामहादिधने पितुर्भागद्वय, पितुरिच्छात एव विभागो न पुत्रेच्छयेति सिद्धम्। दा.२९-३२

(४) समश्च विभागो न स्वार्जितधनवद्विषमः कार्यः। निवन्धो नामास्मिन्भागे प्रतिक्षेत्र प्रतिगृह चैतावद्धनममुष्मै देयमिति। +अप.

(५) निवन्धः क्लृप्ततया याचकादिभिः पण्यादिषु गृह्यमाणोंऽशः। सदृशं स्वाम्य स्यादित्यनया वचोभङ्ग्या समानाशित्वमेवोक्तमिति मन्तव्यम्। अन्यथा पूर्वोक्तवचनसमानार्थता स्वरसतो युक्ता न स्यात्। एवं च

+ पमा., व्यनि., व्यम., विता. मितावद्भावः।

+ मितावद्भावः। अग्न्याधानश्रुतिविरोधपरिहारो विश्ववत्।

जीवद्विभागेऽपि पितामहादिधनविषये विषमविभागो न कदाचिदपीति मन्तव्यम्। स्वार्जितधनविषये तु विषमविभागोऽपि युगान्तरे कदाचिदस्तीति जीवद्विभागप्रकरणेऽभिहितम्। +स्मृच.२७९

(६) निबद्धयते इति निबन्धः आकरादौ नियत लभ्यम्। *विर ४६१

(७) ननु 'अनेकपितृकाणा तु पितृतो भागकल्पना' इत्यनेन पैतामहधनस्य पितृद्वारा भागकल्पनिर्न स्वरूपत इत्युक्त 'भूर्या पितामहोपात्ता' इत्यनेन तु पितापुत्रयोः पैतामहधने सममेव स्वाम्यमित्युच्यते अतः पूर्वापरविरोध इति चेन्मैव 'अनेकपितृकाणामि'त्येतत्पितरि मृते पुत्राणा पैतामहधनविभागविषयम्। एतच्च 'पितृतो भागकल्पने'त्यनेन पदेन द्योत्यते, पितृद्वारा पौत्राणामेवाशसंबन्धोऽवगम्यते। एतत्तु पितरि विद्यमाने न घटत इति तस्यापि जन्मनैव स्वत्वात् पितरि मृते तु मरणादेव तस्य तु स्वत्वनिवृत्तेः पौत्राणामेवाशसंबन्धो घटत इति पितृमरणानन्तरं पौत्रादीना पैतामहधनविभागप्रकारः 'अनेकपितृकाणामि'त्यनेन वचनेन नियम्यते। 'भूर्या पितामहोपात्ते'त्येतत्तु पितापुत्रयोः विद्यमानयोः पौत्रापेक्षया पैतामहधनविषयम्। एतच्च 'पितुः पुत्रस्य चैव ही'त्यनेनाशेन द्योत्यते। मृतस्य स्वाम्याभावादन्यतरमृतावपि 'तत्र स्यात्सदृश स्वाम्य पितुः पुत्रस्य चैव ही'त्यनुपपन्न स्यात्। यदा त्रयो भ्रातरस्तत्रैकस्यैकः पुत्रः अन्यस्य द्वौ अपरस्य त्रयः तथा च सर्वेषु पितापुत्रेषु विद्यमानेषु पूर्वोक्तैव व्यवस्था, यदा त्वेकपुत्रसंततौ पुत्राः पौत्राश्च जीवन्ति पुत्रान्तरसततौ तु न पुत्रः किन्तु पौत्रा एव तदा जीवतः पितुः पुत्राः 'भूर्या पितामहोपात्ते'त्यनेन न्यायेन पैतामहधनं लभन्ते। यदग्रे पुत्रा मृताः पौत्रा एव वर्तन्ते तदा अग्रे पौत्रा एव स्वाशान् लभन्ते। 'अनेकपितृकाणा तु पितृतो भागकल्पने'त्यनेन न्यायेन 'भूर्या पितामहोपात्ते'त्यनेन न्यायेन तेषा प्रमीतपितृकत्वादयं च विभागक्रमः। पितामहे मृत एवास्मिन्विद्यमाने पितामहेच्छया पुत्रेच्छया विभागो भवति न पौत्रेच्छया। पितरि विद्यमाने पित्रिच्छया वा क्वचन पुत्रेच्छया वा विभागो भवति इति विभागकालकथनप्रस्तावेऽभिहितत्वात्। मपा.६६०–६६२

(८) निबन्धः नैगमादिपण्यस्थले एकैकस्मिन्पण्ये प्रतिदिन प्रतिमासं वा इयत्पण्यमेतस्य जीवनार्थ दातव्यमिति राजामात्यप्रधानपुरुषाधिकृतो निबन्ध इत्युच्यते। *सवि.३७३

(९) पैतामहे धने पित्रा सह विभागे पितुरिच्छया नाशकल्पना किन्तु पितुर्द्विगुणः पुत्राणा च समोंऽशः स्यादित्याह— भूर्या पितामहोपात्तेति। भूर्हिरण्यादिद्रव्यं वा निबन्धो राजव्यवस्थापित तरिकग्राह्यादिपणादिक यत्पितामहेनार्जित तत्र पितुः पुत्रस्य चोभयोः सदृशं स्वाम्य स्यान्न पितुरिच्छयैव विभाग इत्यर्थः। न तु 'द्रव्ये पितामहोपात्ते स्थावरे जगमे तथा। सममश समाख्यातं पितुः पुत्रस्य चैव हि॥' इति बृहस्पतिवचनात्सम एवाशः पूर्वोक्तनारदवचनविरोधात्। बृहस्पतिवचने त्वशभागित्व तुल्यमित्येवार्थः, न त्वशस्य तुल्यत्वमपि। एवकारः सदृशमित्यत्रान्वेति। चकारात् प्रपितामहोपार्जिते प्रपौत्रस्यापि स्व भवतीति समुच्चिनोति। वीमि.

(१०) [जीमूतवाहन खण्डयति] तदनादेयम्। सदर्मविरोधात्। तथाहि अनेकपितृकाणा पितृद्वारकभागकल्पनामभिधायानन्तरं 'भूर्या पितामहोपात्ता' इत्युक्तं तत्रास्वाम्यमेव पौत्राणा पैतामहे धने, पितरि जीवति विभागाभावो वा, तदिच्छयैव वा स्वार्जितवद्विभाग इति शङ्कात्रयमेवोत्तिष्ठति। यन्मिताक्षरायामुक्त, तन्निराकरणार्थमेवेदं वचन तद्व्याख्यानरीत्या सगच्छते। प्रमीतपितृकपौत्रविषयकत्वेन सकोचोऽस्य कृतः। न च धारेश्वरावधारितरीत्या पौत्रमात्रविषयकतायामपि न्यूनाधिकभागमात्रस्य पित्रिच्छाकृतनिरासापेद न पित्रिच्छाकालतदीयभागद्वयस्याविशेषप्रवृत्तस्येति वाच्यम्। विनिगमनाविरहात्। किच। पित्रिच्छाया हेतुत्व 'इच्छया विभजेत्' इति तृतीयानिर्देशाच्छान्दमार्थिक तु तस्या विभागकालोपलक्षणत्वम्। तत्र शाब्दं हेतु बाधमानेनानेनार्थिक कालोपलक्षणत्व न बाध्यत इति चित्रम्।

+ शेषं मितागतम्। * मितावद्भावः।

* मितावद्भावः।

सति च स्वाम्यसाम्ये पुत्रेच्छाया निमित्तत्व तत्कृतं च तस्याः कालोपलक्षणत्व गलेपातिकमापतद् दुर्वारम्। ननु पितुरंशद्वयं पितृत्वप्रयुक्त न स्वाम्याधिक्यप्रयुक्त नार्ष्यर्जकत्वप्रयुक्तम्। तस्य 'येन चैषा स्वयमुपार्जिता स्यात्स ह्यशमेव लभेत' इति वासिष्ठसाधारणवचनादेव सिद्धेः 'द्वावंशौ प्रतिपद्येत' इति विशेषवचनानर्थक्यप्रसगात्। तस्मात्पित्रार्जितेऽपि ज्येष्ठपुत्रत्वप्रयुक्त यथा तस्यांशद्वय विशेषवचनात्तथा पैतामहे पितुरपि। अत एवास्मन्मते पुत्रार्जितेऽपि पितुरंशद्वयमिति चेत्, सत्यम्। परं तु निःसकोचप्रवृत्तस्वाम्यसाम्यवचनेन तद्बाध्यते। पुत्रार्जिते तु पितुरंशद्वयाभावो भवदुदाहृतः—'पुत्रवित्तार्जनात्' इति वचनस्य भवदुक्तार्थदूषणात्प्रागेव व्यवस्थापितः। न च तद्वचनादंशद्वयाभावेऽपि सामान्यवचनादेव पुत्रार्जितेऽपि पितुरंशद्वयमायातिति वाच्यम्। वित्तार्जनस्य तत्र हेतुत्वोपन्यासवैयर्थ्यप्रसगात्। न च तदर्थवादमात्रमन्यथार्जकत्वप्रयुक्तभागद्वयस्य वसिष्ठवचनादेव सिद्धेर्विशेषवचनानर्थक्यापत्तिरिति वाच्यम्। यतस्तथार्जकत्वप्रयुक्तपुत्राशद्वयस्यावारणात् पितृत्वप्रयुक्तपित्रशद्वयेऽपि भागसाम्य एव पर्यवसान भवेन्न तु भवदभिमतपुत्रापेक्षया पितुरंशाधिक्य तथाहत्यवचनाभावात्। यच्च किंचेत्यादिनानौचित्यमुक्त तन्न किंचित्। वाचनिकसाम्येऽनौचित्याप्रसक्तेः। ज्येष्ठस्य ज्येष्ठत्वप्रयुक्तमंशद्वय पितृत्वप्रयुक्तं च पितुरिति ज्येष्ठपुत्रसाम्यापत्तेस्त्वयाप्यनौचित्यस्य दुर्वारत्वात्। मदनरत्नधृतकात्यायनवचनात्तु सर्वेषा भ्रातृणा पितापुत्राणा च समाश ग्रहणमेव मुख्यमिति प्रतीयते। 'सकल द्रव्यजात यद्भागैर्गृह्णन्ति तत्समैः। पितरौ भ्रातरश्चैव विभागो धर्म्य उच्यते॥' इति। अत एव योगीश्वरोऽपि—'सर्वे वा स्युः समांशिनः' इति सर्वपद प्रायुङ्क्त। अन्यथा समाशिनो वा कुर्वीत सुतानिति वदेत्। व्यप्र.४४७-४४८

अयमत्र निर्गलितोऽर्थः। यद्यपि जन्मनैव पैतृके पैतामहे च धने पुत्रपौत्राणा स्वाम्य तथापि पूर्वोक्तवचनैः पैतृके पुत्राणा पितृपरतन्त्रतया पितुश्चार्जकतया प्राधान्यात्पित्रा स्वार्जिते विनियुज्यमाने 'स्थावरं द्विपदं चैव' इत्यादिप्राक्प्रदर्शितवचनात्तद्व्यतिरिक्ते पुत्रैरनुमतिरवश्यं कार्या। पैतामहे तु निषेधाधिकारोऽप्यस्ति तदनुद्धृते पित्रोद्धृते तु तदिच्छावशवर्तितैव पैता महेऽपीति। मणिमुक्तादौ तु पैतामहेऽपि पितुरेव स्वातन्त्र्यं 'मणिमुक्ताप्रवालाना' इत्यादिप्रागिखितवचनेभ्यः। अत्र पित्रुपरमानन्तरं यो भ्रातृणा विभागः स पित्रोरिति द्विवचनादुभयोपरम एव पितृधनेऽपि न तु मातुरुपरमो मातृधनगोचर इति संग्रहकाराद्युक्तमादर्तव्यम्। पैतृकमित्यत्र पित्रोरिदमित्येकशेषकल्पनाया प्रमाणाभावात्, 'जनन्या संस्थितायां तु सम सर्वे सहोदराः।' इत्यादिना मातृधनविभागस्याग्रे वक्ष्यमाणत्वाच्च अत्र मातृधनविभागविधौ पौनरुक्त्यापत्तेश्च। याज्ञवल्क्येनापि 'मातुर्दुहितर' इत्यादिना मातृधनविभागस्य 'विभजेरन् सुताः पित्रो रिक्थ' इति संबन्धो नाभिमतः किन्तु पित्रोरूर्ध्वमित्येव। पितुर्ऋक्थमृणमिति तु सबन्धोऽर्थात् मातृऋक्थऋणविभागस्योत्तरार्धेनोक्तेः। अत एव प्रागुक्तशखलिखितवचने 'रिक्थमूल हि कुटुम्बम्' इत्यादौ 'मातुरप्येवमवस्थितायां' इत्यनेन मातुरपेक्षयापत्यस्वातन्त्र्य विभागानधिकारः सोदराणा तस्यामपि जीवन्त्यामित्येतदर्थमेवोक्तम्। अतश्च—'भ्रातृणा जीवतोः पित्रोः सहवासो विधीयते। तदभावे विभक्ताना धर्मस्तेषा विवर्धते॥' इति व्यासवचने सहवासविधानमुखेन पृथग्भावनिषेधाज्जीवतोरिति साहित्यमविवक्षितम्। अत एव एकस्मिन्नपि जीवति विभागो न धर्म्यः किन्तूभयोपरमे। 'पित्रोरभाव' इत्यादिबृहस्पतिवचनेऽपि निवृत्तरजस्कायां मातरि जीवन्त्या विभागस्य मातृधनगोचरत्वानुपपत्तेरुभयाभावोक्तविभागस्यैव जीवतोरपीत्यपिशब्देन निर्दिष्टस्य शास्त्रत्वकीर्तनादुभयाभावे भ्रातृविभागः पितृधनगोचर एवेत्यवधार्यते। अत एव व्यासो मातरि जीवन्त्या यो विभागस्तस्य मातृप्रधानकत्व दर्शयति। यथाह—'समानजातिसख्या ये जातास्त्वेकेन सूनवः। विभिन्नमातृकास्तेषा मातृभागः प्रशस्यते॥' बृहस्पतिरपि—'यद्येकजाता बहवः समाना जातिसंख्यया। सापत्नास्तैर्विभक्तव्य मातृभागेन धर्मतः॥' इति। अत्र जातिसख्यया साम्ये सापत्नानामपि भागविशेषः स्वरूपकृतो नास्तीति मातृभागत्वविधानं मातृप्राधान्यपरमेवेति नायं पुत्राणा विभागः किन्तु तन्मातृणामित्युद्दिश्य विभागः कर्तव्य इत्यत्र तात्पर्यम्। तेनै-

तन्मातृधन इवात्रापि मातृजीवने पुत्राणा न परस्परं विभागो धर्म्यः। अतो गौतमायुक्तविभागे धर्मवृद्धिरपि मात्रुपरम एव वेदितव्येति जीमूतवाहन आह। तत् पितृधने मात्रभावापेक्षया अदृष्टार्थत्वापत्तेः प्रागेव निरस्तम्। यच्च पैतृकमित्येकशेषस्याप्रमाणकत्वात् पौनरुक्त्यापत्तेश्च नास्य मातृधनपरत्वमित्युक्तम्। तदप्यदृष्टार्थतापत्तिभयादेकशेषस्य स्वीकर्तव्यत्वादयुक्तम्। पौनरुक्त्यं त्वयुक्तम्। पूर्वोक्तस्यापि मातृधनविभागस्य विशेषविधानायानुवादोपपत्तेः। याज्ञवल्क्यवाक्ये तु मिताक्षराकृता च 'मातापित्रोर्धन सुता विभजेरन्नित्युक्तम्। तत्र मातृधनेऽपवादमाह' इत्युत्तरार्धमवतारयता पौनरुक्त्यं परिहृतम्। 'ताभ्य ऋतेऽन्वय' इति च दुहित्रभावेऽन्वयः पुत्रादिर्मातृधनमृणावशिष्ट गृह्णीयात् इति व्याख्याय इदं च— 'विभजेरन् सुताः पित्रोरूर्ध्वमृक्थमृण समम्' इत्यनेनैव सिद्धमपि स्पष्टार्थमुक्त इत्युक्तम्। न चात्र पित्रोरूर्ध्वमित्येवास्तु सबन्धः। मातृधनविभागस्योत्तरार्धेऽभिधानात्पितुर्ऋक्थमृणमिति पर्यवस्यति। तथा च 'ताभ्य' इत्यादेर्नैरर्थक्यानुवादत्वमपि न प्रसज्यतीति वाच्यम्। ऋक्थऋणपदयोः सबन्धिकार्थत्वात्तदाकाङ्क्षाया स्ववाक्योपात्तपित्रोरितिपदानुषङ्गस्यैव परिशेषावगतार्थिकपितुः पदान्वयापेक्षयाभ्यर्हितत्वात्। तद्वशेन तु ताभ्य इत्यस्यानुवादत्वस्याप्यभ्युपगमौचित्यात्।

ये त्वन्वयपद दुहित्रन्वयदौहित्रादिपरत्वेन व्याचक्षते। तन्मते तु वैयर्थ्यशकैव नास्ति। तदेतद्विस्तरेण स्त्रीधनविभागप्रस्तावे प्रपञ्चयिष्यामः। शखलिखितोक्त मातरि जीवन्त्यामस्वातन्त्र्य तु मानववत्तद्धनगोचरमपि संगच्छत एव। 'भ्रातृणामि'त्यादिव्यासवचनमपि सहवासप्राशस्त्यमात्रमुभयजीवन आहेति जीवतोरिति साहित्यविवक्षायामपि न दोषः। वस्तुतस्तु पित्रोरूर्ध्वमपि 'ज्येष्ठ एव तु गृह्णीयात्' इति सहवासस्य मुख्यत्वाद्विभागस्य च धर्मवृद्ध्यर्थत्वान्मातरि जीवन्त्यामपि धर्मस्य पञ्चमहायज्ञादेरावश्यकत्वात्तदवृद्ध्यर्थ विभाग उचित एव। यत्तु पित्रोरभाव इति बृहस्पतिवचने निवृत्त रजस्काया मातरि जीवन्त्यामित्यायुक्तं, तत्रोच्यते। उभयजीवने सहवासः प्रशस्तस्तदभावे विभाग इति पूर्वार्धेनाभिहिते मातर्यनिवृत्तरजस्काया संतानसभवात् तद्वृत्तिलोपस्य च 'ये जाता येऽप्यजाताश्च' इत्यादिवचनेन गर्हितत्वान्निवृत्तरजस्काया तु तस्या तदप्रसक्तेरुपरतस्पृहे पितरीव विभागः प्रशस्त इति तस्यार्थः। तथा सति निवृत्तरजस्काया तस्या तदीयऋक्थाधिकारिकन्यासतानस्यासभवात्सुतरा तदिच्छया तद्धनविभागोऽपि पुत्राणामुचित इति मातृधनगोचरताऽप्यस्य वचनस्य सभवतीति न किंचिदेतत्। यदपि व्यासबृहस्पतिवचनसोर्मातृप्राधान्य सापत्नविभागस्योक्त तन्ममाप्यविरुद्धम्। यथा हि — 'जीवतोरस्वतन्त्रः स्याज्जरयापि समन्वितः' इत्यादिवचनवशाद्विभागोत्तरमपि पुत्रस्य पितृमातृपारतन्त्र्य तथा तद्वचनवशान्मातृभाग एवायमिति बुद्धया तदाज्ञावशवदतया तज्जीवनावधि स्थेयमित्येतावता पितृधनविभागेऽपि तस्या जीवन्त्यामनधिकारः कुतस्त्य इत्यलमधिकेन।

व्यप्र.४५०–४५३

बृहस्पतिः

द्रव्ये पितामहोपात्ते स्थावरे जङ्गमे तथा।
सममंशित्वमाख्यातं पितुः पुत्रस्य चैव हि*॥

(१) अंशित्व सम समान न च स्वेच्छया स्वोपात्तधनवत् न्यूनाधिकविभाग दातुमर्हति न पुनरशः सम इति तस्यार्थः। द्विपितृकपित्रभिप्राय वा समभागवचनम्। दा.४६

* वीमि व्याख्यान, व्यवहारप्रकाशकारेण कृत जीमूतवाहनखण्डन च 'भूर्या पितामहोपात्ता' इति याज्ञवल्क्यवचने द्रष्टव्यम्।

(१) **दा.**४५-४६, **अप** २।१२१ तथा (डपि वा); **व्यक.** १४१, **स्मृच.**२७९ स्था. .था (जङ्गमे स्थावरेऽपि वा) व्यामः, **विर** ४६१, **पमा.**४९६ स्मृचवत्, **रत्न.**१४१; **दीक** ४३ अपवत्, **व्यनि** स्थावरे जङ्गमे (जङ्गमे स्थावरे) सममंशि (सम स्वामि) चैव हि (चोभयोः), **स्मृचि.**२८ समम (ससमा) चैव हि (चोभयोः), **नृप्र** ३५ स्मृचवत्, **सवि.**३७४ स्मृचवत्, **चन्द्र.**६९(=) पुत्रस्य चैव हि (पौत्रस्य चोभयोः), **वीमि.**२।१२१ शित्वमा (श समा), **व्यप्र.**४४६, **व्यम.**४३, **विता.** ३१८ शि (श) चैव हि (चेच्छया); **बाल.**२।११७ तथा (डपि वा) मशि (मांश):२।१२१ स्मृचवत्; **विभ.**५९ द्रव्ये (द्रव्य), **सवि.**१३४ स्मृचवत्; **विच.**६६.

(२) जीवत्पितृकस्य पुनः पित्रा सह कथं पैतामहधनविभाग इत्याकाङ्क्षायामाह बृहस्पतिः—द्रव्य इति। पमा.४९६

तस्मान्न पितुरिच्छयैव विभागो नापि पितुर्भागद्वयम्। पमा.४९७

(३) पौत्रस्य पैतामहधने पित्रा सह कथं विभाग इत्यपेक्षायामाह बृहस्पतिः—द्रव्य इति। पित्रा समएवांशो ग्राह्यो न तु स्वार्जितवदत्र विषमविभागपक्षाश्रयणेनार्थद्वयमित्यर्थः। रत्न.१४१

(४) पैतामहे धने पुत्रपौत्रयोः समांश पौत्रेच्छया च विभागमाह—द्रव्य इति। यत्तु [जीमूतवाहनव्याख्यान] तन्मिताक्षराप्रद्वेषजान्ध्यकृतम्। पूर्ववचोविरोधात् 'अनेकपितृकाणां तु पितृतो भागकल्पने'त्यनेन सर्वसिद्धेश्च तेन तत्र पितुरपि समं एव। विता.३१७ ३१८

(५) पितामहार्जिते त्वेकपुत्रेणापि सह समांशित्वमाह बृहस्पतिः—द्रव्य इति। व्यम.४३

जाता जनिष्या गर्भस्थाः पितृस्था ये च मानवाः।
सर्वे काङ्क्षन्ति तां वृत्तिमनाच्छेद्या ततस्तु सा॥

जनिष्यमाणानां विशेषेण गर्भस्था इति। तिलमाष-

(१) व्यक १५२, व्यनि सर्वे (सर्वेऽपि) अना (न वि); समु.९४.

रूपेण जाता अनुशयतस्तत्पक्षपुरुषसंबन्धाः पितृस्था इत्युच्यन्ते। किंचित्कालं श्लेष्मरूपेण रेतोरूपेण परिणतानां स्त्रीसंबन्धेन तस्यां प्रविष्टा गर्भस्था इत्युच्यन्ते। एवं पितृमातृसंबन्धप्रभृति तद्धनेषु तथा स्वामित्वमस्तीति ततः स्वत्वं ततो विभागोऽपि। न विभागात्स्वत्वमिति। व्यनि.

व्यासः

क्रमागते गृहे क्षेत्रे पितापुत्राः समांशिनः।
पैतृके न विभागार्हाः सुताः पितुरनिच्छतः॥

(१) पितर्यनिच्छत्यपि पैतामहधनविभागो भवतीत्याह व्यासः—क्रमागत इति। रत्न.१४१

(२) अर्थात्पितामहाद्यर्जिते तदनिच्छयाऽपि विभागार्हा इत्यर्थः। व्यम.४२

(१) अप.२।१२१ पिता (पितृ) के न (केण) सुताः (पुत्राः); स्मृच.२८० सुताः (पुत्राः) च्छतः (च्छवः) उत्त.; विर.४६१ गृहे (गृह); रत्न.१४१ विरवत्; व्यनि.गृहे (गृह) पिता (पितृ); सवि.३७५ (क्रमायाते गृहक्षेत्रे पुत्रपौत्राः समांशिनः) पू; व्यम.४२ गृहे (गृह) च्छत (च्छया) बृहस्पतिः; विता.३१८; बाल.२।११७ गौतमः :२।११९ पितापुत्राः (पितृपौत्राः).२।१२१ च्छत. (च्छया); विभ ५९ च्छतः (च्छया), समु.१३४ गते गृहे (याते गृहे) पिता (पित्रा) सुताः (पुत्राः).

पुत्राणां सोद्धारसमविषमविभागाः

वेदाः

ज्येष्ठो भ्राता द्विभागहारी

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः। इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम्॥

(१) हे इन्द्राविष्णू उभौभौ युवा जिग्यथुः। शत्रूनजैष्टम्। न परा जयेथे। एनोरेनयोर्युवयोर्मध्ये कतरश्चनैकतरोऽपि न परा जिग्ये। न पराजैष्ट। हे विष्णो इन्द्रश्च त्वं च युवा यद्यद्वस्तु प्रत्यपस्पृधेथा असुरैः सहास्पृधेथा त्रेधा लोकवेदवागात्मना त्रिधा स्थितं सहस्रममितं च वि तदैरयेथा व्यक्रमेथामित्यर्थः। ऋसा.

(२) हे विष्णो त्वमिन्द्रश्चोभौ यदपस्पृधेथां यदा परस्परं स्पर्धितवन्तौ तत्तदा गोसहस्रं त्रेधा विभज्यैरयेथामिन्द्रस्य द्वौ भागौ विष्णोरेको भाग इत्येवं प्राप्तवन्तौ। तैसा.

(१) ऋसं.६।६९।८; तैसं ३।२।११।२, ७।१।६।७; कासं.१२।१४; मैसं.२।४।४; असं.७।४४।१; ऐब्रा.६।१५।६; शब्रा.३।३।१।१३; गोब्रा.२।४।१७.

[1]तस्यामकल्पेतां द्विभाग इन्द्रस्तृतीये विष्णुस्तद्वा एषाऽभ्यनूच्यत उभा जिग्यथुरिति ।

ततस्तावुभौ तस्या गव्यकल्पेता व्यवस्था कृतवन्तौ । इन्द्रो द्विभागे व्यवस्थितः । विष्णुस्तृतीये भागे व्यवस्थितः । तदेनमर्थमभिलक्ष्य काचिद्ऋग्वेदेऽप्यृगनूच्यते । सा च भागत्रयप्रतिपादिका । तस्याश्च प्रतीकम् 'उभा जिग्यथुः' इत्येतत् । तैसा.

गुणवान् भ्राता उद्धारभाक्

[2]इन्द्रो वै वृत्रमहन्त्सोऽन्यान्देवानत्यमन्यत । स महेन्द्रोऽभवत् स एतमुद्धारमुदहरद्वृत्रꣳ हत्वा । तदुद्धार एवास्यैष भाग एव ।

[3]सोमो ओषधीनामधिराजस्तस्य वा एष भागो यदकृष्टपच्यं तदुद्धार एवास्यैष भाग एव ।

[4]अतिथेरातिथ्यमसि विष्णवे त्वेति । सोऽस्योद्धारो यथा श्रेष्ठस्योद्धार एवमस्यैषऽऋते छन्दोभ्यः ।

[5]तदिन्द्रमेवान्वादित्यानाभजतीन्द्राय त्वाभिमातिघ्नऽइति सपत्नो वाऽअभिमातिरिन्द्राय त्वा सपत्नघ्नऽइत्येवैतदाह सोस्योद्धारो यथा श्रेष्ठस्योद्धारः एवमस्यैषऽऋते देवेभ्यः ।

पितुरिष्टो भ्राता उद्धारभाक्

[6]सोऽकामयतेन्द्रो मे प्रजायां श्रेष्ठः स्यादिति तामस्मै स्रजं प्रत्यमुञ्चत्ततो वा इन्द्राय प्रजाः श्रैष्ठ्यायातिष्ठन्त तच्छिल्पं पश्यन्त्यो यत्पितर्यपश्यन् । तस्माद्यः पुत्राणां दायं धनतममिवोपैति तं मन्यन्तेऽयमेवेदं भविष्यतीति ।

प्रजायामिति जातावेकवचन मे मदीयासु प्रजासु मध्ये इन्द्रः श्रेष्ठः प्रशस्यतमः अधिकः स्यादिति सः प्रजापतिः कामितवान् कामयित्वा च तामात्मीया स्रज अस्येन्द्रस्य प्रत्यमुञ्चत । गले बद्धवान् ततोऽस्येन्द्रस्य श्रैष्ठ्यार्थ प्रजा अन्वजानन् यत्पितरि श्रैष्ठ्यकारण शिल्पमपश्यत् तच्छिल्पमाश्चर्यं सुरूपमिन्द्रे पश्यन्त्यः विलोकयन्त्यः लक्षणहेत्वोः क्रियाया इति हेतोर्हेतौ शतृप्रत्ययः ।

(१) तैस.७।१।५।४ (२) मैसं.४।३।१.
(३) मैसं.४।३।२. (४) शब्रा.३।४।१।११.
(५) शब्रा.३।९।४।९. (६) ताब्रा.१६।४।४।३,४.

यस्मात्पितुः प्रजापतेः सकाशात् स्रजोलाभेन श्रेष्ठोऽभूत् तस्माल्लोके पुत्राणां मध्ये यः पुत्रो धनतममिव अतिशयितमेव धनदायमुपैति पितुः सकाशात् दायत्वेनोपगच्छति तं पुत्र मन्यन्ते । लौकिका जानन्ति अयमेव पुत्र इदं सर्वं पुत्रसंबन्धि ग्रामादिक भविष्यति सर्वस्याधिपतिः भविष्यति । ताब्रासा.

पुत्राणां ज्येष्ठादितारतम्यानुसारेण विषमविभाग. । विभागो जीवति पितरि पित्रधीनः ।

[7]तदिमं साम सृष्टमद उत्क्रम्य लेलायदतिष्ठत्, तस्य सर्वे देवा ममत्विन् आसन् मम ममेति, तेऽब्रुवन् विदं भजामहा इति । तस्य विभागे न समपादयन्, तान् प्रजापतिरब्रवीदपेत मम वा एतत्, अहमेव वो विभक्ष्यामीति । सोऽग्निमब्रवीत्, त्वं वै मे ज्येष्ठः पुत्राणामसि, त्वं, प्रथमो वृणीष्वेति...अथेन्द्रमब्रवीत् त्वमनुवृणीष्वेति । अथ सोममब्रवीत् त्वमनुवृणीष्वेति ।

गौतमः

पुत्राणामुद्धारविचार

[8]विंशतिभागो ज्येष्ठस्य मिथुनमुभयतोदद्युक्तो रथो गोवृषः ।

(१) मिथुनमजादीना उभयतोदत् अश्वादि तद्युक्तो रथः गोयुक्तो वृषः । दा.३८

(२) अधुना पितुरूर्ध्वं जीवति च तस्मिन्विभागप्रकारमाह– विंशतिभाग इति । सर्वस्मात्पितृधनाद्विंशतितमो भागः, मिथुन गवादिषु स्त्रीपुसयोर्युग्मम् । उभयतोदन्ता अश्वाश्वतरगर्दभास्तेषामन्यतमाभ्या युक्तो रथः, गोवृषः पुगवः । अयमुद्धारो ज्येष्ठस्य । *गौमि.

(३) अयमुद्धारः सति संभवे ज्येष्ठस्य । +मभा.

[9]कौणखोरकूटवण्डा मध्यमस्यानेकाश्चेत् ।

* विर., पमा. गौमिगतम् । + शेषं गौमिगतम् ।

(१) जैउब्रा.१।५१.

(२) गौध.२८।५; दा.३८; व्यक.१४१; मभा.; गौमि.२८।५; विर.४७०; पमा.४८९; समु.१२८.

(३) गौध.२८।६; दा.३८; व्यक.१४१; मभा.ण्डा (ण्टा); गौमि.२८।६ वण्डा (वणेटा); विर.४७०; पमा.

(१) खोरो वृद्धः, कूटो वामनाकृतिः, वण्डो विकृतलाङ्गूलः, एते मध्यमस्य यदि बहवो भवन्ति पशवः। दा.३८

(२) काण एकनेत्रो विकलाङ्ग इति यावत्। खोरो वृद्धः। खोट इति पाठे विकलपादः। कूटः शृङ्गहीनः। वण्टो विकलवालधिः। गवाश्वादिषु य एवरूपः स मध्यमस्योद्धारः स च काणादिर्यद्यनेको भवति। इतरेषामप्यस्ति चेदिति। —गौमि.

अविर्धान्यायसी गृहमनोयुक्तं चतुष्पदां चैकैकं यवीयसः।

(१) अविरूर्णायुः। ज्ञातावेकवचनं यावन्तोऽवयः। एकस्य चतुष्पदा चैकैकमित्येव सिद्धत्वात्। अपर आह—यद्यपि पितुरेक एवाविस्तथाऽपि स यवीयसः। चतुष्पदा चैकैकमिति तु बहुविषयमिति। धान्य व्रीह्यादि। अय आयस दात्रादि। धान्यमयश्चेति धान्यायसी। एतदुभय यावत्किंचिद्गृहे। गृह यत्र आस्यते। अनः शकट युक्त वाह्याभ्याम्। चतुष्पदा च गवादीनामेकमिष्ट गृह्णीयात्। अय कनीयसः उद्धारः। अय च सर्वकनीयसः। इतरेषामुद्धारो यो मध्यमस्य। गौमि.

(२) अविः प्रसिद्धः। एकवचनादेक, धान्य व्रीह्यादि। अयो लोह आनुरूप्येण धान्यायसोः कल्पनार्थ द्विवचनम्। एव च न सर्व गृह्णीयात्। गृहमेक शकट युक्त चतुष्पदा च गवादीनामेकैक पृथक्पृथगानुरूप्येण यवीयसः कनीष्ठा गृह्णीयुः। अय कनिष्ठोद्धारः। +मभा.

(३) एवमन्यत्रापि यत्र उद्धारे गुरुलघुभावस्तत्र भ्रातृणा ज्येष्ठमध्यमकनिष्ठाना गुणवत्त्वाद्यपेक्षया व्यवस्था द्रष्टव्या। लोके तु ज्येष्ठमात्रपुरस्कारेण च मध्यमकनिष्ठोद्धारं चानादायैव ज्येष्ठस्य विशोद्धारो दृश्यते। ×विर.४७१

÷ मभा., विर गौमिगतम्।

+ पमा. मभागतम्। × शेष मभागतम्।

४९० (काणः खोड· कूट वण्डो मध्यमस्यानेकश्चेत्); **समु.** १२८.

(१) **गौध.**२८।७, **दा** ३८, **व्यक.**१४१; **मभा.**; **गौमि.**२८।७; **विर.**४७०; **पमा.**४९०; **समु.**१२८.

उद्धृतावशिष्टस्य समविभाग इति प्रथमः कल्पः

समधेतरत्सर्वम्।

(१) इतरदुद्धृतशिष्ट सर्वे समधा गृह्णीयुः सममित्यर्थः। द्विधा बहुषेत्यादौ दृष्टो धाप्रत्ययः प्रयुक्तः। गौमि.

(२) एवमुद्धृतोद्धारशिष्ट सम विभक्तव्यम्। ननु च विभागे समधैव सर्वस्मिन् प्राप्ते वचनादुद्धार उक्ते शेष समधैव प्राप्नोतीति नार्थोऽनेन सूत्रेण। नैष दोषः, यदि हि पिता विभाग करोति तदोद्धारप्रतिषेधार्थमिदमिति। अन्ये तु पितुरुद्धारप्रतिषेधार्थमिदमिति ब्रुवते। अय च प्रकारो ज्येष्ठ कनिष्ठ च गुणवति द्रष्टव्यः। मभा.

ज्येष्ठस्य वैशिष्ट्य इतरेषां समाश इति द्वितीय कल्पः

द्व्यंशी वा पूर्वजः स्यात्।

(१) द्वावंशौ द्व्यश, तदस्य विद्यत इति द्व्यंशी, भाग द्वय ज्येष्ठस्योद्धार इत्यर्थः। मभा.

(२) पूर्वजो विद्यादिना ज्येष्ठ इत्यर्थः। स्मृच.२६६

(३) इद च ज्येष्ठस्यैव गुणातिशययुक्तत्वे अन्येषा निर्गुणत्वे। विर.४७८

एकैकमितरेषाम्।

अय विभागो यदि ज्येष्ठ एव गुणवान् अन्ये निर्गुणाः तदा द्रष्टव्यः। मभा.

ज्येष्ठादितारतम्येन विभागतारतम्य इति तृतीय. कल्प.

एकैकं वा धनरूपं काम्यं पूर्वः पूर्वो लभेत।

(१) कल्पान्तरेषु बहुषु क्षेत्रादिष्वेकैक धनरूप ज्येष्ठानुपूर्व्याद् गृह्णीयुः। काम्य यस्य यदिष्ट स तद्गृह्णीयादिति

(१) **गौध.**२८।८, **दा.**३८ मधे (मभि), **व्यक** १४१; **मभा.**, **गौमि** २८।८ धेत (धा चेत), **विर** ४७० धेत (मेवेत); **पमा.**४९० मधे (म चे); **समु.**१२८.

(२) **गौध.**२८।९, **दा.**३८, **व्यक.**१४२, **मभा** जः स्यात् (जस्य), **स्मृच** २६६ शी (श); **विर.**४७८; **व्यप्र.** ४४०; **विभ.**४०,४२ (स्यात्०); **समु.**१२८; **विच.७३** गोभिलः.

(३) **गौध.**२८।१०; **दा.**३८; **व्यक.**१४२; **मभा.**; **व्यप्र.**४४०.

(४) **गौध** २८।११; **व्यक.**१४२; **मभा.**; **गौमि.**२८।९ भेत (भते); **विर.**४७९ धन (धन) पं (पवत्) वैः (वैतः); **विभ.**४० का (यत्का).

सर्वेष्विष्टं ज्येष्ठस्तद्रहितेष्विष्टमनन्तर इति । अयमुद्धारः **सर्वेषाम्** । गौमि.

(२) एकैक वाऽर्थजातमभिप्रेत्य ज्येष्ठानुक्रमेण **गृह्णीयुः** । तत्राभिप्रेतार्थविशेषग्रहणमेवोद्धारः । अयमपि सर्वे गुणवन्तश्चेद्द्रष्टव्यः । मभा.

[1]दशकं पशूनाम् ।

(१) अत्रैव पशुषु विशेषः—दशकमिति । दशावयवा अस्य दशकः । पशूना गवादीना मध्ये दशक दशक पूर्वो लभते न त्वेकमिति । गौमि.

(२) धनरूपमित्यनेन काम्यस्यैकस्य पशोर्ग्रहणे प्राप्ते सख्यानियमेन ग्रहणार्थमिद पशूना दश ग्राह्या इति । मभा.

(३) समानजातीयान्दशतो दश दश पशून् पूर्वः पूर्वो लभेतेत्यर्थः । विर.४७९

[2]नैकशफद्विपदानाम् ।

(१) अस्यापवादः—नैकेति । एकशफानामश्वादीना द्विपदा दास्यादीना च दशक न गृह्णीयुः । किंतु पूर्वोक्तमेकैकमेवेति । द्विपदानामिति पाठे पादशब्देन समानार्थः पदशब्दः । एवमेकमातृकाणा सोद्धारो विभाग उक्तः । गौमि.

(२) यदि सर्वे निर्गुणास्तदानीं सममेव विभागो द्रष्टव्यः । अत्र विशेषानुपादानात् स्मृत्यन्तरे च द्विरुक्तेः पूर्वस्य तत्प्रयोजनत्वात् । यथाऽऽह वसिष्ठः 'अथ भ्रातृणा दायविभागः' इति । यदा केचित् गुणवन्तः केचिन्निर्गुणास्तदा ज्येष्ठो दशममुद्धार गृहीत्वा अन्यत्सम विभजेत् । यथाऽऽहोशना—'ज्येष्ठस्य दशमोद्धारः कनिष्ठस्याभिप्रेतो भागः' इति । अस्मिन्देशे अयमेव विभागो द्रष्टव्यः, समाचारात् । समानजातीयानामेकमातृकाणा विभाग उक्तः । मभा.

(३) एतच्च सर्वेषा समत्वे धनबहुत्वे च मन्तव्यम् । विर.४७९

हारीतः

पुत्राणामुद्धारविचारः

[3]विभजिष्यमाणे गवां समूहे वृषभमेकधनं वरिष्ठं वा ज्येष्ठाय दद्युर्दैवतागृहं च, इतरे निष्क्रम्य कुर्युः एकस्मिन्नेव दक्षिणं ज्येष्ठायानुपूर्व्यमितरेषाम् ।

एकधनमुत्कृष्टधनम् । देवता विष्ण्वादिप्रतिमा गृह पैतृकम् । निष्क्रम्य कुर्युर्गृहान्तराणीति शेषः । यदा गृहान्निष्क्रम्य गृहान्तरकरणासंभवः, तदा दक्षिणं श्रेष्ठ ज्येष्ठाय भवेदिति शेषः । आनुपूर्व्यमनुपूर्वता, तेन मध्यमाय मध्यम, कनिष्ठाय ततोऽपि हीनमित्यर्थः । हरिहरस्तु देवतागृहपदेन दुर्गादिपूजामण्डप व्याख्याय तज्ज्येष्ठाय दत्त्वा अन्ये मण्डपान्तरं कुर्युरित्याह । विर.४७१

[4]समानो मृते रिक्थविभागः ।

(१) उद्धारमन्तरेणापि समविभागमाह पितरीत्यनुवृत्तौ हारीतः—समानत इति । दा.६५

(२) मृते पितरि भ्रातृभिः क्रियमाणऋक्थविभागः समभागेनैव कार्य इत्यर्थः । स्मृच.२६३

*बौधायनः

ज्येष्ठोद्धारः

[5]चतुर्णां वर्णानां गोऽश्वाजावयो ज्येष्ठांश. ।

अंशनियमेनोद्धारः । मृते जीवति वा पितरि सत्सु गोश्वाजाविष्वेतत् । इतरे सम विभजेरन् । गवा-

---

(१) **गौध.**२८।१२ क (त); **मेधा.**९।११४ क (तः); **व्यक.**१४२; **मभा.**; **गौमि.**२८।१०, **मवि.**९।११४ क (तश्च); **ममु** ९।११४ मेधावत्; **विर.**४७९ मेधावत्; **मच.** ९।११४ मेधावत्; **विभ.**४० मेधावत्.

(२) **गौध.**२८।१३; **मेधा.**९।११४ नै (ए); **मभा.**; **गौमि.**२८।११ दानाम् (दाम्); **विर** ४७९; **विभ.**४१.

* आपस्तम्बमतं पितृकर्तृकविभागे (पृ. ११६४) द्रष्टव्यम् ।

(१) **व्यक.**१४१, **विर** ४७१.

(२) **दा.**६५ नो (ननो); **स्मृच.**२६३; **रत्न.**१४० मृते+(पितरि); **सवि.**३५६ रिक्थ (पितरि); **व्यप्र.**४४२ रत्नवत्, **व्यम.**४४ रत्नवत्; **सेतु.**७७ दावत्; **समु.**१२७ (सममेव मृते पितरि रिक्थविभागः); **विच.**७१ नो (ननो) विभागः (भागिनः).

(३) **बौध.**२।२।९; **व्यक.**१४२ चतुर्णा (असति पितरि चतुर्णा) **विर.**४७२ शः+(यथासख्येन) शेषं व्यकवत्.

दीनां ज्येष्ठभागद्वयावशिष्टस्याऽप्याधिक्ये सति विज्ञेयम्। चौवि.

वसिष्ठः

ज्येष्ठस्य द्व्यंशित्वम्। पुत्राणामुद्धारविचारः।

[1]**अथ भ्रातॄणां दायविभागः। द्व्यंशं ज्येष्ठो हरेत्, गवाश्वस्य चानुदशमम्। अजावयो गृहं च कनिष्ठस्य। कार्ष्णायसं गृहोपकरणानि च मध्यमस्य।**

द्व्यंशमिति, द्वावंशौ ज्येष्ठो हरेद्गवाश्वस्येति दशसु गोषु अश्वेषु चैकैक श्रेष्ठ गृह्णीयात्। इद च वसिष्ठवचन ज्येष्ठस्य सातिशयगुणवत्त्वे इतरयोश्च गुणवत्त्वे। विर.४७९

विष्णुः

पुत्राणा समविभाग ज्येष्ठोद्धारश्च

[2]**सवर्णाः पुत्राः समानंशानादद्युः। ज्येष्ठाय श्रेष्ठमुद्धारं दद्युः।**

(१) एतच्च पुत्राणा भिन्नसंख्यकत्वे। विर.४७६

(२) एव विजातीयपुत्रसमवायेऽपि विभागमुक्त्वा इदानीं सजातीयसमवाये तमाह—समानवर्णा इति। यदि चतुर्णामपि वर्णाना सजातीया एव पुत्रा भवेयुस्तदा ते समानेवाशानादद्युः। इद चैकमातृकाणा, भिन्नमातृकाणा तु समसंख्याना मातृत एव विभागः। समाशत्वस्य ज्येष्ठेऽपवादमाह—ज्येष्ठायेति। सर्वस्मिन् पितृधने यत् श्रेष्ठ गोमिथुनाद्युद्धार विशादिवज्ज्येष्ठाय सर्वापेक्षया कनीयासो दद्युः। वै.

[3]**यद्येकः प्रमीतः द्वौ वा प्रमीतौ एको वा स्थितो द्वौ वा स्थितौ तत्पुत्रा विषमसमाः तत्रापि पितृतो भागकल्पना।**

अत्रापि नष्टानामपि पुत्राः पित्र्यानेवांशान् लभन्त इति वाचनिकी व्यवस्थेति विज्ञानेशः। अपरार्कभारुच्यादयस्तु प्रमीतपितृकाणा पितृद्वारागतद्रव्यदायस्य यथेष्टविनियोगार्हस्वत्वसंभवात् पितृस्वत्वस्यैव विभाग इति पितृतो भागकल्पनेति न्यायसिद्धार्थानुवादः। अत एवाह कात्यायनः—'स एवाशस्तु सर्वेषा भ्रातृणा न्यायतो भवेत्' इत्याहुः। सवि.३७३

महाभारतम्

पुत्राणा समविभाग। ज्येष्ठस्याधिकभाक्त्वम्।

[4]**जातानां समवर्णायाः पुत्राणामविशेषतः।**
सर्वेषामेव वर्णानां समभागो धनात्स्मृतः॥
ज्येष्ठस्य भागो ज्येष्ठः स्यादेकांशो यः प्रधानतः।
एष दायविधिः पार्थ पूर्वमुक्तः स्वयंभुवा॥

सवर्णानेकभार्यापुत्राणा विषमविभागः

[5]**समवर्णासु जातानां विशेषोऽस्त्यपरो नृप।**
विवाहवैशिष्ट्यकृतः पूर्वपूर्वो विशिष्यते॥
हरेज्ज्येष्ठः प्रधानांशमेकं तुल्यासु तेष्वपि।
मध्यमो मध्यमं चैव कनीयांस्तु कनीयसम्॥
एवं जातिषु सर्वासु सवर्णः श्रेष्ठतां गतः।
महर्षिरपि चैतद्वै मारीचः काश्यपोऽब्रवीत्॥
[6]**सवर्णासु तु जातानां समान् भागान् प्रकल्पयेत्॥**

कौटिलीयमर्थशास्त्रम्

पुत्राणामुद्धारविचारः

[7]**एकस्त्रीपुत्राणां ज्येष्ठांशः ब्राह्मणानामजाः क्षत्रियाणामश्वा., वैश्यानां गावः, शूद्राणामवयः। काणलिङ्गास्तेषां मध्यमांशः, भिन्नवर्णाः कनिष्ठांशः। चतुष्पदाभावे रत्नवर्जानां दशानां भागं द्रव्याणामेकं ज्येष्ठो हरेत्। प्रतिमुक्तस्वधापाशो हि भवति इत्यौशनसो विभागः। पितुः परिवापाद् यानमाभरणं च ज्येष्ठांशः, शयनासनं भुक्तकांस्यं च मध्यमांशः, कृष्णधान्यायसं गृहपरिवापो गोशकटं च कनिष्ठांशः शेषद्रव्याणामेकद्रव्यस्य वा समो विभागः।**

---

(१) **वस्मृ.**१७।३९-४२ (ख) दशमम् (सदृशम्) कार्ष्णायसं (काष्ठ गां यवस); **दा** ४२ (गवा ..मध्यमस्य०), **व्यक.** १४२-१४३; **मभा.**२८।१३ (द्व्यश.. .मस्य०), **विर.**४७९ दाय...वयो (दायभागो द्व्यशं हरेज्ज्येष्ठो गवाश्वस्य चैकं दशमम्अजादयो) नि च (नि); **व्यप्र.**४४० दाय...चानु (दायभागो द्व्यंशं हरेज्ज्येष्ठो गवाश्वस्य चात्र).

(२) **विस्मृ.**१८।३६-३७ सव (समव); **विर.**४७६ न (नानं) रं+(च); **विभ.**३९,९४.

(३) **सवि.**३७३.

(१) भा.१३।४७।५७,५८. (२) भा.१३।४७।५९-६१. (३) भा.१३।४७।१६. (४) कौ.३।६.

मानुषहीनो ज्येष्ठस्तृतीयमंशं ज्येष्ठांशाल्लभेत। चतुर्थमन्यायवृत्तिर्निवृत्तधर्मकार्यो वा। कामाचारः सर्वं जीयेत। तेन मध्यमकनिष्ठौ व्याख्यातौ। तयोर्मानुषोपेतो ज्येष्ठांशादर्धं लभेत।

ज्येष्ठाशमाह। एकस्त्रीपुत्राणामिति—एकस्याः स्त्रियाः पुत्राणा बहूना मध्ये, ब्राह्मणाना, अजाः ज्येष्ठाशः ज्येष्ठाशत्वेन कल्पनीया भवन्ति, यज्ञार्थत्वेनोत्कृष्टत्वात्। क्षत्रियाणा अश्वाः ज्येष्ठाशः युद्धार्थत्वेन तथात्वात्। वैश्याना गावः ज्येष्ठाशः वाणिज्यार्थत्वेन तत्त्वात्। शूद्राणा अवयो मेषाः ज्येष्ठाशः कृष्याद्यर्थत्वेन तथात्वात्। काणलिङ्गा इति। काण एकदृक् तल्लिङ्गास्तज्जातीयाः पङ्ग्वादयः अजा अश्वा गावोऽवयश्च, तेषा ब्राह्मणादीना चतुर्णा यथाक्रमं, मध्यमाशः। भिन्नवर्णा अनेकवर्णा अजादयः, तेषा कनिष्ठाशः। चतुष्पदेत्यादि। चतुष्पदाभावे, रत्नवर्जाना, द्रव्याणा, एक दशाना भाग दशभागमेक, ज्येष्ठो हरेत्। कुतो ज्येष्ठोऽधिकमश हरेदित्याह—प्रतिमुक्तस्वधापाशो हि भवतीति। यस्माद् ज्येष्ठः कण्ठनिवेशितपितृकर्मपाशो भवति तस्मादित्यर्थः। इति औशनसो विभाग इति। यथोक्तप्रकारो विभाग उशनसा विहितः। अप्रतिषेधाच्चाय कौटल्यस्याभिमतो द्रष्टव्यः। प्रकारान्तरमाह—पितुरिति। पितुः परिवापात् परिच्छदात्, यानं आभरण च ज्येष्ठाशः। शयनासन, भुक्तकास्यं भोजनस्थाल च, मध्यमाशः। कृष्णधान्यायसं कृष्णधान्य तिलवरकादि आयसं अयोविकारश्च, गृहपरिवापो मुसलादिर्गृहपरिच्छदः, गोशकटं च गोयुक्त शकट च, कनिष्ठाशः। शेषद्रव्याणा उक्तातिरिक्तद्रव्याणा, एकद्रव्यस्य वा द्रव्यस्यैकस्यापि वा, समः सर्वपुत्रसाधारणो विभागः।

मानुषहीन इति। मानुषशब्देन मनुष्यसामान्यस्यापेक्षितः पुरुषकारगुणो गृह्यते तद्रहितो, ज्येष्ठः ज्येष्ठांशात् तृतीयमश लभेत, न तु कृत्स्न ज्येष्ठाशम्। अन्यायवृत्तिः, निवृत्तधर्मकार्यो वा, चतुर्थं ज्येष्ठाशचतुर्भाग लभेत। कामाचारः इत्वरः, सर्वं जीयेत ज्येष्ठाशमखिल हाप्येत। तेन मध्यमकनिष्ठौ व्याख्याताविति। तयोरप्येष न्यायः संचारयितव्य इत्यर्थः। तयोः मध्यमकनिष्ठयोः, मानुषोपेतः पुरुषकारयुक्तो मध्यमः कनिष्ठो वा, ज्येष्ठाशाद लभेत यथाप्राप्तस्वाशानपहानेन। इत्थमेकस्त्रीपुत्रविभागोऽभिहितः। श्रीमू.

अन्तरालवर्णाना समो विभागः

शूद्रादायोगवक्षत्तचण्डालाः। वैश्यान्मागधवैदेहकौ। क्षत्रियात्सूतः। पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद्विशेषतः। त एते प्रतिलोमाः स्वधर्मातिक्रमाद् राज्ञः संभवन्ति। उग्रान्नैषाद्यां कुक्कुटकः, विपर्यये पुल्कसः। वैदेहिकायामम्बष्ठाद् वैणः, विपर्यये कुशीलवः। क्षत्तायामुग्राच्छ्वपाकः। इत्येतेऽन्ये चान्तरालाः। कर्मणा वैण्यो रथकारः। तेषां स्वयोनौ विवाहः। पूर्वापरगामित्वं वृत्तानुवृत्तं च स्वधर्मान् स्थापयेत्। शूद्रसधर्माणो वा अन्यत्र चण्डालेभ्यः। केवलमेवं वर्तमानः स्वर्गमाप्नोति राजा नरकमन्यथा। सर्वेषामन्तरालानां समो विभागः।

देशस्य जात्याः संघस्य धर्मो ग्रामस्य वापि यः। उचितस्तस्य तेनैव दायधर्मं प्रकल्पयेत्॥

प्रतिलोमानाह—शूद्रादित्यादि। शूद्राद्वैश्यायामुत्पन्न आयोगवो नाम, क्षत्रियाया क्षत्तः, ब्राह्मण्या चण्डालः। क्षत्तशब्द इहाकारान्तः प्रयुक्तः, अत एव स्त्रिया आकारान्तोऽनुपद प्रयोक्ष्यते। वैश्यान् मागधवैदेहकाविति। वैश्यात् क्षत्रियाया जातो मागधः, ब्राह्मण्या वैदेहकः। क्षत्रियात्सूत इति। क्षत्रियाद् ब्राह्मण्या जातः सूतः। पृथुचक्रवर्तियज्ञभूम्युत्पन्नस्य पौराणिकस्य सूताख्यस्य मागधाख्यस्य च पृथुस्तोत्रविधायिनः प्रतिलोमजत्वशङ्कापार्ति मनसि कुर्वस्ता परिहरति— पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद् विशेषतः इति। अस्यार्थः—पुराणप्रवक्ता रोमहर्षणापरनामा यः सूतः सः, अन्यः उक्तात् प्रतिलोमजसूताद्भिन्नः, यस्तत्सह पठितः पुराणेषु मागधो नाम स च प्रतिलोमजमागधाद्भिन्नः। ब्रह्मक्षत्राद् विशेषतः विशेषेण युक्तः सूतो ब्राह्मणाद् विशिष्ट उत्कृष्टः मागधः क्षत्रियाद् विशिष्ट इति। एतच्च तथ्यम्। यतः 'हस्ते तु दक्षिणे तस्य दृष्ट्वा चक्रं पितामहः। विष्णोरंश पृथुं मत्वा परितोष परं ययौ॥ तस्यैव जातमात्रस्य यज्ञे

(१) कौ.३।७.

पैतामहे शुभे । सूतः सूत्या (यज्ञाभिषवभूमौ) समुत्पन्नः सौत्येऽहनि महामतिः ॥ तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥' इति विष्णुपुराणप्रथमांशतृतीयाध्याये । 'ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति । पृथदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः ॥ वक्ता वेदादिशास्त्राणा त्रिकालामलधर्मवित् ॥' इत्यग्निपुराणप्रथमाध्याये, 'त्वया सूत महाबुद्धे भगवान् ब्रह्मवित्तमः । इतिहासपुराणार्थं व्यासः सम्यगुपासितः ॥ त्व हि स्वायम्भुवे यज्ञे सुत्याहे विततेऽसति । संभूतः संहिता वक्तु स्वाशेन पुरुषोत्तमः ॥' इति कौर्मपुराणप्रथमाध्याये च व्यासशिष्यपौराणिकसूतस्यायोनित एवोत्पत्तिः प्रतिलोमसूतविलक्षणा कथ्यते, तथा द्विजत्व विष्ण्वशसभूतत्व च । तथैव मागधस्यापि तत्सहपठितस्यायोनिजत्वम् ।

त एते इति । त एते पूर्वोक्ता आयोगवादयः, प्रतिलोमाः, राज्ञः स्वधर्मातिक्रमात् संभवन्ति स्वधर्मा वर्णाश्रमरक्षा तस्यातिक्रमाद् यथावदकरणदोषात् जायन्ते । अथान्तरालानाह —उग्रादिति । उग्रात् क्षत्रियशूद्रापुत्रात्, नैषाद्या ब्राह्मणशूद्रापुत्र्या, जातः, कुक्कुटकः तदाख्यः । विपर्यये पुल्कस इति । निषादादुग्रकन्याया जातः पुल्कसाख्यः । वैदेहिकाया वैदेहकन्याया, अम्बष्ठात्, जातः, वैणः तदाख्यः । विपर्यये कुशीलवः अम्बष्ठया वैदेहकाज्जातः कुशीलवाख्यः । क्षत्ताया उग्राद् जातः श्वपाकः तदाख्यः । इति एते उक्ताः, अन्ये च एवजातीयाः सकरजाश्च, अन्तरालाः वर्णजात्यन्तरालभवाः विज्ञेयाः । कर्मणेति । वैण्यः वेणजातिरेव, कर्मणा लङ्घनप्लवनादिस्ववृत्तित्यागपूर्वकवास्तुवृत्तिस्वीकारेण, रथकारः तदाख्ययोच्यते, न तु रथकारो नामान्तरालोऽन्य इत्यर्थः । तेषामिति । तेषां अन्तरालाना, स्वयोनौ विवाहः अम्बष्ठस्याम्बष्ठीविवाहो निषादस्य निषादीविवाह इत्येव समानजातीयविवाहः कार्यः । पूर्वावरगामित्व पूर्वस्याम्बष्ठादेरुत्कृष्टस्य अवरगामित्व अपकृष्टनिषाद्यादिगामित्वं न तु निषादादेरम्बष्ठयादिगामित्व, वृत्तानुवृत्त च पूर्वाचारानुवृत्तिं च, स्वधर्मान् स्थापयेत् स्वधर्मतया कल्पयेत् । शूद्रसधर्माणो वेति । नेषामित्यनुवर्त्य प्रथमान्ततया विपरिणमयितव्य, अन्तरालाः शूद्रधर्मेण वा धर्मवन्तः कर्तव्याः । ते च न सर्वे किन्तु चण्डालवर्जा इत्याह—अन्यत्र चण्डालेभ्य इति । केवलमिति । केवलमेवं वर्तमानः उक्तप्रकाराव्यभिचारेण व्याप्रियमाणः, राजा स्वर्गं आप्नोति । अन्यथा उक्तप्रकारव्यभिचारेण वर्तमानः, नरकं आप्नोति । सर्वेषामिति । अन्तरालाना, समो ज्येष्ठाशरहितः विभागः । स च सर्वेषा स्त्रीणा पुरुषाणा चाविशेषेण भवति ।

प्रान्ते श्लोकमाह—देशस्येति । देशस्य जनपदादेः, जात्याः ब्राह्मणादेः, सघस्य समुदायस्य, ग्रामस्यापि वा, यो धर्मः उचितः पारम्पर्यसिद्धः, तस्य ग्रामादेः तेनैव तद्धर्मानुसारेणैव, दायधर्मं दायभाग, प्रकल्पयेत् ।

श्रीमू.

मनुः

पुत्राणामुद्धारविचारः

ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः ॥

(१) यत्तु स्मृत्यन्तरे 'ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद् वरम्' इत्यादिविभागवैषम्यमवगम्यते । तद् भ्रातृणा परस्परानुमत्या विज्ञेयम् । अन्ये तु गुणापेक्ष विभागवैषम्यवाक्याना विषय वर्णयन्ति कर्मार्थता च तस्य मन्यमानाः । तत्तु पुरुषार्थत्वाद् द्रव्यस्यायुक्तमेवेति गम्यते । यानि त्वग्निहोत्राद्यकरणे द्रव्यापहरणादिवचनानि, तान्यन्यायवर्तिपुरुषप्रशासनार्थानि । न तु द्रव्यस्य क्रत्वर्थतापतिपादकानि । अतो भ्रातृणामेवेच्छया विभागवैषम्यम् । यत्त्वन्यायवर्तिना निरशत्वं गौतमे-

(१) **मस्मृ** ९।११२; **विश्व.**२।१२१ पू., स्मृत्यन्तरम्; **मेधा** ततोऽर्धं (तदर्धं) द्रव्येष्वपि पर वरम् इति पाठः; **मिता.** २।११४,११७; **दा.**३७; **अप.**२।११४(=); **व्यक.**१४१; **स्मृच.**२६५,**विर.**४६८;**पमा.**४८६,४८९;**रत्न.**१४०;**मपा.** ६४५.६७८ पू.; **सुधो.**२।१३२ (=) पू; **विचि.**२०० सर्वं (पितृ); **व्यनि.**; **स्मृचि.**२९ मस्य...यसः (मस्यैव स्यात्तुरीय कनीयस । नारद., **नृप्र** ३४-३५, **दात.**१९३, **चन्द्र.** ७१ विचिवत्; **दानि.**१ स्मृत्यन्तरम्; **व्यप्र.**४३९, **व्यउ.** १४३(=) ततो...मस्य (मध्यमे तु तदर्धं) यवी (कनी); **व्यम.** ४३ (तदर्धं मध्यमस्य स्यात्तदर्धं तु कनीयस.); **विता.**२९५; **राकौ.**४६ ततोऽ (तद) र्धं तु (यं च); **समु.**१२८ तु (च); **भाच.**यद्वरम् (यत्परम्).

नोक्तं, तदप्येकेषामिति वचनात् परमतत्वेनैवानुशासनमात्रप्रयोजनतया व्याख्येयमित्येषा दिक्। विश्व.२।१२१

(२) इयमुद्धारनियोगस्मृतिरतिक्रान्तकालविषया न त्वद्यत्वेऽनुष्ठेया नियतकालत्वात्स्मृतीनामिति केचित्। अनुष्ठेयत्वव्यपदेशो दीर्घसत्रवज्ज्ञानादभ्युदयो यथा स्यादिति। न हि दीर्घसत्रमद्यत्वे केचिदाहरमाणा दृश्यन्ते। अधीयते तु तदुपदेश ब्राह्मणाः। तथाच 'अन्ये कृतयुगे धर्मा' इत्युक्तं, तेन देशनियमवत्कालनियमोऽपि धर्माणा द्रष्टव्यः। न ह्युपदिष्टो धर्मः सर्वत्र देशेऽनुष्ठीयते। तथाहि देशधर्मा नियतदेशव्यवस्थिता उच्यन्ते। अन्यथा सर्वानुष्ठाने न देशव्यपदेश्यता धर्माणाम्। तथाच पठति 'अयं द्विजैर्हि विद्वद्भिः' (मस्मृ.९।६६) इत्यादि। तस्मादुद्धारनियोगगोवधस्मृतय उपदिष्टा नानुष्ठेयास्तेदेतदपेशलम्। न ह्येवविधः कालनियमः क्वचिदपि श्रूयते सायंप्रातः पर्वादिनियमादन्यत्र। यच्च 'अन्ये कृतयुगे धर्मा' इति तत्प्रथम एव व्याख्यातम्। न हीद युगभेदेन धर्मव्यवस्थाहेतुः देशनियमोऽपि प्राचीनप्रवणादिव्यतिरेकेण मध्यदेशपूर्वदेशकृतो नैवास्तीत्युक्त 'जातिजानपदान् धर्मान्' 'सद्भिराचरितम्' (मस्मृ.८।४१,४६) इत्यत्र। दीर्घसत्रेष्वद्यत्वेऽप्यनुष्ठानसंभवः। सवत्सरशब्दस्त्वहःसु प्रथम एव दर्शितः। यत्तु नाद्यत्वे केचिदनुतिष्ठन्तो दृश्यन्त इति उपदिष्टार्थस्य नित्यवदाम्नातस्यापि बहुभिः प्रकारैरनुष्ठानसाधनाशक्त्या फलानिच्छया वा नास्तिकतया वा। यत्तु 'वेने राज्यं प्रशासति' तदाप्रभृतिक महापौर्वकालिकमनुष्ठानं दर्शयतीत्यर्थवादोऽसौ न कालोपदेशः। ज्येष्ठस्य विंशः ज्येष्ठस्य सर्वद्रव्यात् विंशतितमो भाग उद्धृत्य दातव्य एव। मध्यमस्य तदर्ध चत्वारिंशत्तमो भागः। एव कनिष्ठस्य तुरीयो ज्येष्ठापेक्षयाऽशीतितमो भागः। एवमुद्धृते परिशिष्टं त्रिधा कर्तव्यम्। तत्र सर्वेभ्यो द्रव्येभ्यो यद्वर श्रेष्ठ तज्ज्येष्ठस्यैव। अथवा 'द्रव्येष्वपि पर वरम्' इति पाठः। उत्तमाधममध्यमानि यानि द्रव्यादीनि सन्ति ततस्तस्माद्यदेक श्रेष्ठ तत्तस्यैव तदुक्त भवति। यत्र गावोऽश्वा वा सन्ति एकः श्रेष्ठो ज्येष्ठस्य दातव्यो न द्रव्यान्तरेण मूल्येन वा स्वीकर्तव्यः। त्रयाणा सर्वेषा गुणिनामयमुद्धारविधिः। गुणवतामुद्धारदर्शनात्। मेधा.

(३) सर्वस्माद्द्रव्यसमुदायाद्विंशतितमो भागः सर्वद्रव्येभ्यश्च यच्छ्रेष्ठं तज्ज्येष्ठाय दातव्यम्। तदर्ध चत्वारिंशत्तमो भागो मध्यमं च द्रव्यं मध्यमाय दातव्यम्। तुरीयमशीतितमो भागो हीन द्रव्यं च कनिष्ठाय दातव्यमिति। सर्वस्मिन्नपि काले विषमो विभागोऽस्तीति कथ सममेव विभजेरन्निति नियम्यते। अत्रोच्यते। सत्यम्। अय विषमो विभागः शास्त्रदृष्टस्तथापि लोकविद्विष्टत्वान्नानुष्ठेयः। 'अस्वर्ग्य लोकविद्विष्ट धर्म्यमप्याचरेन्न तु' इति निषेधात्। यथा 'महोक्ष वा महाज वा श्रोत्रियायोपकल्पयेत्' इति विधानेऽपि लोकविद्विष्टत्वादननुष्ठानम्। यथा वा 'मैत्रावरुणीं गा वशामनुबन्ध्यामालभेत' इति गवालम्भनविधानेऽपि लोकविद्विष्टत्वादननुष्ठानम्। उक्त च 'यथा नियोगधर्मो नो नानुबन्ध्यावधोऽपि वा। तथोद्धारविभागोऽपि नैव सम्प्रति वर्तते॥' इति। (नियोगमनतिक्रम्य यथानियोग, नियोगाधीनो यो धर्मो 'देवराच्च सुतोत्पत्तिरि'त्यादिः स नो भवति) आपस्तम्बोऽपि 'जीवन्पुत्रेभ्यो दाय विभजेत्सम्म' इति समतामुक्त्वा 'ज्येष्ठो दायाद इत्येके' इति कृत्स्नधनग्रहण ज्येष्ठस्यैकीयमतेनोपन्यस्य 'देशविशेषेण सुवर्ण कृष्णा गावः कृष्णभौमः ज्येष्ठस्य रथः पितुः परीभाण्ड च गृहेऽलङ्कारो भार्याया ज्ञातिधन चेत्येके' इत्येकीयमतेनैवोद्धारविभाग दर्शयित्वा 'तच्छास्त्रविप्रतिषिद्धमिति निराकृतवान्। त च शास्त्रविप्रतिषेध स्वयमेव दर्शयतिस्म। 'मनुः पुत्रेभ्यो दाय व्यभजेदित्यविशेषेण श्रूयते इति'। तस्माद्विषमो विभागः शास्त्रदृष्टोऽपि लोकविरोधाच्छ्रुतिविरोधाच्च नानुष्ठेय इति सममेव विभजेरन्निति नियम्यते। +मिता.२।११७

(४) सोदरासोदरविभागगोचरश्च ज्येष्ठस्य विंश उद्धारः। *दा.४२

(५) विभागकर्तुरिच्छया विभागवैषम्यम्। अप.२।११४

(६) ज्येष्ठस्येति मध्यकाद्धनाद्विंशतितमं भागं कृत्वो-

+ पमा., मपा. मितागतम्।

* विषमविभागशास्त्रचर्चा 'एकाधिक हरेज्ज्येष्ठः' इति मनुवचने द्रष्टव्या।

द्धृत्योद्धारावशिष्टमध्योत्तम किंचिदेव द्रव्यसहितं ज्येष्ठाय्याद्यमुद्धारमन्यौ तु द्वौ तदनन्तरजाभ्या क्रमाद्दत्वा शेषं समं कृत्वा विभाज्यमित्यर्थः । एतत्समगुणत्वे सर्वेषा भातृणा च त्रित्वे । मवि.

(७) ज्येष्ठस्याग्रजस्य विद्यादिवशादुत्तमस्य विभाज्य-द्रव्यराशेर्विंशतितमो भागः तस्मिन्नेव राशौ श्रेष्ठमेक च द्रव्य उद्धारः । ततोऽर्ध तस्मिन्नेव राशौ चत्वारिंश-त्तमो भागो मध्यममेक द्रव्य जन्मतो मध्यमस्य विद्या-दिवशतश्च मध्यमस्य उद्धारः । तुरीयस्तस्मिन्नेव राशौ अशीतितमो भागः कनिष्ठमेकं द्रव्य जन्मना विद्यादि-वशाच्च यवीयस उद्धारः स्यादित्यर्थः । स्मृच.२६५

अय चासमविभागप्रकारः कलियुगे तु न वर्तत इत्याह सग्रहकारः 'यथा नियोगधर्मोऽद्य नानुबन्ध्यावधो-ऽपि वा । तथोद्धारविभागोऽपि नैव सप्रति वर्तते ॥' अद्य-सप्रतिशब्दौ कलियुगमभिसधायोक्तौ । अत एव पुरा-णम्—'ऊढायाः पुनरुद्वाहं ज्येष्ठाश गोवधं तथा । कलौ पञ्च न कुर्वीत भ्रातृजाया कमण्डलुम् ॥' इति । ज्येष्ठाशं जन्मविद्यादिश्रेष्ठनिबन्धनाश गोवध अनुबन्ध्यादि-कर्माङ्ग, कमण्डलु गृहिणः कमण्डलुधारणम् । एतदेव धारेश्वरेणोक्तम् 'ज्येष्ठस्य विश उद्धारः' इत्येवमादीनि वाक्यानि न विचार्यन्ते । लोकेनात्यन्तपरित्यक्तत्वात् । कलाविति शेषः । द्वापरादावनुष्ठेयत्वेनात्यन्तपरित्यागा भावात् । यत्तु पुनर्विश्वरूपेणोक्त यथा. 'महोक्ष वा महाज वा श्रोत्रियायोपकल्पयेत्' इत्यस्य शिष्टाचारेण बाधित-त्वात् अकरणं एवमुद्धारस्यापीति तदयुक्त स्मृतिशिष्टा-चारयोर्विरोधे शिष्टाचारस्यैव दुर्बलस्य बाध्यत्वात् । दुर्बलत्वं च 'श्रुतिस्मृतिविहितो धर्मस्तदलाभे शिष्टाचारः प्रमाणम्' इति (१।४–५) वसिष्ठस्मरणादवगम्यते । किंच महोक्षादेरनुपकल्पन शिष्टाचाराभाव एव न पुनः शिष्टाचार इति शिष्टाचारेण बाधितत्वादित्ययुक्तमुक्त 'शिष्टाचाराभावादकरणम्' इति श्रीकरोक्तिवद्वक्तव्यम् । न च तथोक्तम् । यत्तु पुनर्विज्ञानेश्वरेणोक्त 'सत्यं अय विषमो विभागः शास्त्रदृष्टस्तथापि लोकविद्वि-ष्टत्वान्नानुष्ठेयः' इति । एतदपि वाङ्मात्रेणैतद्दुद्धार-विषमविभागादौ लोकविद्वेषोऽस्ति प्रत्युत विद्यागुण-पुण्यकर्मसंपन्नज्येष्ठादौ भागाधिक्ये लोकानुरागो दृश्यत इति यत्किञ्चिदेतत् । ये पुनः स्मृतिसमुच्चयकाराः शम्भुश्रीकरदेवस्वाम्यादयः सप्रत्युद्धारविषमविभागयोः शिष्टाचारं क्वापि मन्यमाना उद्धारादिविषयाणि स्मृतिवाक्यानि विचारयितु ग्रन्थविस्तारं चक्रिरे तेषा धर्मज्ञसमयपुराणवचनाभ्या कलौ सर्वत्र शिष्टाचारा भावस्य निश्चितत्वात् वृथैव प्रयासो ग्रन्थविस्तारश्च जायत इत्यस्माभिरुद्धारादिविषये दिङ्मात्रमेव प्रद-र्शितम् । स्मृच.२६६

(८) उद्धियत इत्युद्धारः ज्येष्ठस्याविभक्तसाधारण-धनादुद्धृत्य विंशतितमो भागः सर्वद्रव्येभ्यश्च यच्छ्रेष्ठ तद्दातव्यम् । मध्यमस्य चत्वारिंशत्तमो भागो देयः । कनिष्ठस्य पुनरशीतितमो भागो दातव्यः । अवशिष्ट धन सम कृत्वा विभजनीयम् । ×ममु.

(९) यदा बहवः पुत्रा एकमातृका गुणवन्तः किंतु यथाक्रम गुणह्रासः । *विर.४६९

(१०) अय च ज्येष्ठस्य गुणवत्तरत्वे । विंशाशस्तु गुणवत्त्वे । समगुणत्वे तु किंचित्पारितोषिकमानतिकर-मिति वर्तुलार्थः । विचि.२००

(११) 'ज्येष्ठस्य विंश उद्धारः' इत्यादिना विषम-विभागोऽप्युक्तस्तत्कथ समनियम इति चेत् उच्यते । यद्यप्यय विषमविभागो जीवत्यजीवति च पितरि शास्त्र-दृष्टस्तथापि वचनान्तरानुरोधात्कलौ सम एवेति नियमः । 'अस्वर्ग्य लोकविद्विष्ट धर्म्यमप्याचरेन्न तु ।' (यास्मृ. १।१५६) इति योगीश्वरवचनात् । अत्र लोकपदेन युगमुच्यते । युगान्तरे धर्म्यमपि युगान्तरे यद्विद्विष्ट प्रतिषिद्ध तन्नाचरेदित्यर्थः । अन्यथा धर्म्यत्वास्वर्ग्यत्वयो-र्व्याघातः । शास्त्रविहिते तदभिज्ञविद्वेषो बाधित एव । तदनभिज्ञपामरजनविद्वेषस्तु नास्वर्ग्यत्वापादकोऽग्नीषो-मीयादिहिंसादावतिप्रसङ्गादित्यादिदूषण स्यात् । अत एव मिताक्षराया मधुपर्कपशुवधगवालम्भादि कलि-वर्ज्यमेव लोकविद्विष्टत्वेनोदाहृतम् । कलिवर्ज्येषु च पुन-रुद्वाहादिकमक्षतादीना यत्रोक्तं तत्र ज्येष्ठाशाद्युद्धारादि-

× मच., नन्द., भाच. ममुगतम् ।

* शेष स्मृचगतम् ।

कमपि । तथा च आदिपुराणे—'ऊढायाः पुनरुद्वाहो ज्येष्ठांशो गोवधस्तथा । कलौ पञ्च न कुर्वीत भ्रातृजाया कमण्डलुः ॥' स्मृतिसंग्रहेऽपि–'यथा नियोगधर्मो नो नानूबन्ध्यावधोऽपि वा । तथोद्धारविभागोऽपि नैव संप्रति वर्तते ॥' नियोगधर्मो भ्रातृभार्यायां वाग्दत्तायां मृतपतिकायां गुर्वादिनियोगेन विधिना गमनम् । 'मैत्रावरुणीं गामनूबन्ध्यां वशामालभेत' इति विहितो गोवधः । संप्रति कलौ । अत एवापस्तम्बः—'जीवन् पुत्रेभ्यो दायं विभजेत्सममू' इति स्वमतमुक्त्वा 'ज्येष्ठो दाभाद इत्येके' इति कृत्स्नधनग्रहण ज्येष्ठस्येत्येकीयमतमुपन्यस्य 'देशविशेषे सुवर्ण कृष्णा गावः कृष्ण भौम ज्येष्ठस्य रथः पितुः परीभाण्ड गृहालङ्कारो भार्याया ज्ञातिधन चेत्येके' इत्येकीयमतत्वेनैवोद्धारविभाग दर्शयित्वा 'त शास्त्रविप्रतिषिद्धमि'ति निराकृतवान् । शास्त्रविप्रतिषेध च स्वयमेव विवृतवान् 'मनुः पुत्रेभ्यो दाय व्यभजत् इत्यविशेषण श्रूयते' इति, तस्मान्न विषमविभागः शास्त्रदृष्टोऽपि कलावनुष्ठेयः । यत्तु मिताक्षराकृता श्रुतिविरोधादित्युक्त तद्विचार्यम् । श्रुतिविरोधे हि सति युगान्तरेऽपि तस्यानुष्ठाने तद्बोधकवचनाना सर्वथाऽप्रामाण्यमेव स्यादिति कलिवर्ज्यतयोपन्यासो विरुद्धः । न चात्यन्त श्रुतिविरोधोऽपि अविशेषश्रवणे सति 'सम स्यादश्रुतत्वात्' (पूर्मी. १०।३।१३।५३) इति न्यायलभ्यत्वात्समत्वस्य । स्मृतिचन्द्रिकाया तु बौधायनोदाहृत विषमविभागप्रतिपादकमपि श्रुत्यन्तरं लिखितम् । ज्येष्ठत्वादाधिक्येऽपि श्रुत्यन्तरमित्याह स एव—'धनमेकमेकमुद्धरेज्ज्येष्ठः तस्मात् ज्येष्ठं पुत्रं धनेन निरवसाययतीति श्रुतेरिति । धनमेकमेकमिति वदन् श्रुतिवाक्यगत धनेनेत्येकवचन विवक्षितमिति सूचयति, निरवसाययति तोषयतीत्यर्थ इति ग्रन्थेन ।

जीमूतवाहनादयस्तु यदा भक्त्यतिशयादिना भ्रातृणामनुमतिस्तदोद्धारादिर्विषमभागोऽत एवाद्यतनाना भक्त्याद्यभावादुद्धाराद्यर्हज्येष्ठाभावाच्च समभाग एव लोके दृश्यते इत्यादिना ग्रन्थेनानुमत्यननुमतिभ्या विषमसमभागयोर्व्यवस्थामाहुः । तत्तु तथा सति पुत्रेच्छाया एव प्रयोजकत्वापत्तेः पूर्वार्धविरोधादनादेयम् । पित्रिच्छायाः स्वतन्त्रपक्षान्तरपरत्वं तु प्रागेव निरासि ।

*व्यप्र.४४२–४४४

(१२) पैतामहे तु समस्वाम्यात्सम एव भागः । अय च विषमो भागः पित्रार्जितधनपरः । ×विता.२९५

ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम् ।
येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम् ॥

त्रिभ्योऽधिकपुत्रस्य ज्येष्ठकनिष्ठयोर्गुणवतोर्यथोक्तमुद्धृत्य बहूनामपि मध्यमाना गुणवतो मध्यमस्य यश्चत्वारिंशत्तमो भाग उक्तोऽनन्तरश्लोके बहुभिरपि मध्यमैः सविभजनीयः । समगुणाना तु मध्यमाना सर्वेषामेकैकस्य पूर्ववचनाच्चत्वारिंशत्तमो भाग उक्त उद्धार्यः । तेषा स्यान्मध्यम धनमिति उभयथा वचनं व्यज्यते । मध्यमधनं यदनन्तरश्लोके निर्दिष्ट तत्सर्वेषा समवायेन दातव्यम् । यदि वा प्रत्येकमेव ज्येष्ठकनिष्ठतामपेक्ष्य तत्र प्रथमपक्षो निर्गुणेषु युक्तस्तेन बहुधनार्हो द्वितीयो गुणवत्स्वेव । +मेधा.

सर्वेषां धनजातानामाददीताग्र्यमग्रजः ।
यच्च सातिशयं किंचिद्दशतश्चाप्रयाद्वरम् ॥

(१) आद्येनार्धश्लोकेन 'सर्वद्रव्याच्च यद्वरम्' इत्युक्तमनुवदति । जातशब्दो जातिपर्यायः प्रकारवचनो वा । अग्रजो ज्येष्ठः । अग्र्य श्रेष्ठम् । यच्च सातिशयमेकमपि वस्त्रमलङ्कारं वा दशतो दशावयवाद्वा वरमेकमाददीत । यदि दशगावोऽश्वा वा सन्ति तदा एकं श्रेष्ठमाददीत । अर्वाग्दशावयवाद्वा न लभते । वर्गे दशशब्दः । अन्ये

* प्रायः मितागतम् । व्यवहारोद्योते अस्य वचनस्य युगान्तरत्वादिपरत्व व्यप्रवत् । व्यम. कलिवर्ज्यता व्यप्रवत् ।

× (पृ.३०१)मितागतम् । (पृ.३०४) कलिवर्ज्यता व्यप्रवत् ।

+ मवि., ममु., मच., नन्द. मेधातिथेर्द्वितीयपक्षवत् । विर. मेधातिथेरुभयपक्षवत् ।

(१) **मस्मृ.**९।११३; **व्यक.**१४१; **विर.**४६९; **समु.** १२८.

(२) **मस्मृ.**९।११४; **मेधा.**'वरान्' इति पठन्ति; **व्यक.** १४१; **ममु.**९।११५ चाप्नु (प्राप्नु); **विर.**४६९ ममुवत्; **स्मृसा.**५५; **विचि.**२००; **स्मृचि.**२९ धन (अर्थ) नारदः; **चन्द्र.**७१ धन (अर्थ) दशतः (दंशस्य) वर (धनम्); **समु.**१२८.

तु स्वार्थे तसिं चाचक्षते, दशैव दशतो 'वरान्' इति बहुवचन पठन्ति। दश वरानाददीत, अन्यस्तद्विशिष्टान् स्मरति 'दशतः पशूनामेकशफद्विपदानाम्' इति। मेधा.

(२) विभक्तेषु भागेषु मध्ये यः श्रेष्ठतमः सर्वेषामग्र्योऽभिरुचितो भागस्त ज्येष्ठो गृह्णीयात्। तथा सर्वेषु विभागेषु यत्किंचिदेकं सातिशय तद्गृह्णीयात्। तथा दशसु पशुषु विभजनीयेषु मध्ये य एक उत्कृष्टः पशुः स्वभागाद्बहिर्ग्राह्यः 'दशतश्च पशूनामि'ति गौतमस्मृतेः। एतच्चातिबहुगुणज्येष्ठातिहीनगुणकनिष्ठविषयम्। मवि.

(३) इदं च यदि ज्येष्ठो गुणवान्, इतरे निर्गुणास्तद्विषयम्। +ममु.

(४) दशतो दशसु दशसु एकम्। *विर.४६९

(५) सातिशयमुत्कर्षयुक्त यत्किञ्चिद्विभागानर्ह देवतादीना प्रतिमादि। नन्द.

समगुणपुत्राणा उद्धारनिषेधः

उद्धारो न दशस्वस्ति संपन्नानां स्वकर्मसु।
यत्किंचिदेव देयं स्यात् ज्यायसे मानवर्धनम्॥

(१) दशसु पशुषु यः पूर्वत्रोद्धार उक्तः स नास्ति ये भ्रातरः स्वकर्मसु श्रुताध्ययनादिषु संपन्ना विशेषवन्तो दशस्विति चोपलक्षण व्याख्यानयन्ति। दशसु योऽत्र श्लोक उद्धार उक्तः स सर्व एव नास्ति। कर्मसंबन्धात्। किंतु तैरपि यत्किंचिदेवाधिक उपायनविध मानवर्धन पूजाकरं ज्येष्ठाय देयम्। ×मेधा.

(२) उद्धारोऽपि दशसु गवादिषु न कार्यः। दा.

(३) अल्पगुणत्वे ज्येष्ठस्य कनिष्ठाना च स्वस्वाचारादिकर्मसंपत्त्या समगुणत्वे आह—उद्धार इति। पूर्वश्लोकोक्त दशवरोद्धारसहितं उद्धारत्रयं दशस्वित्यनेनोपलक्षयति। स्वकर्मसंपन्नाना मध्यमाना दायविभागे यत्किंचिदेयं किंचिदधिकं वस्त्वाकृष्य देयं संमानायेत्यर्थः। मवि.

(४) एव च समगुणेषूद्धारप्रतिषेधदर्शनात्पूर्वत्र गुणोत्कर्षविशेषापेक्षयोद्धारवैषम्य बोधव्यम्। +ममु.

(५) ज्येष्ठादेरर्पणार्थं विभाज्यद्रव्यराशेः सकाशाद् योऽर्थ उद्धियते स उद्धारः। दशसु कतिपयेषु जीवनमात्रपर्याप्तधनेष्विति यावत्। स्वकर्मसु स्वस्वाधिकारतोऽनुष्ठेयकर्मसु सपन्नाना कर्तृत्वमापन्नानामशेषभ्रातृणा द्रव्यबाहुल्ये सत्यपि कर्मनिष्ठत्वसाम्यादुद्धारो मानवर्धनार्थदान च नास्ति। किन्तु स्वल्पधनशालिषु विद्यादितोऽपि सदृशेषु जीवनमात्रपर्याप्तधनत्वेनानुद्धारेऽपि समानार्थ ज्यायसे किंचिद्वस्तुमात्र देयमित्यर्थः। एवं च येषा भ्रातृणा प्रभूतधनं विद्यते, विद्यादौ च तारतम्यमस्ति, तेषामेव विभागे उद्धार इति मन्तव्यम्। ×स्मृच.२६५

(६) अस्यार्थः अध्ययनादितुल्येषु 'दशतश्चाप्युद्धरं' इत्युद्धारो न कर्तव्यः। एतच्चोपलक्षणं, सर्वेषामेवोद्धाराणामिह प्रतिषेधः, यत्किंचिदेवेति वचनात्, किन्तु जन्ममात्रनिबन्धनज्येष्ठनिमित्तक किंचिन्मानवर्धन दातव्यम्। विर.४७६

(७) ज्यायसे अतिगुणज्येष्ठे भ्रातरि। भाच.

उद्धारव्यतिरेकेण समाशाः

एवं समुद्धृतोद्धारे समानंशान्प्रकल्पयेत्।
उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना॥

(१) समुद्धृते पृथक्कृत उद्धारेऽधिके भागेऽवशिष्टे धने समानशान्प्रकल्पयेत्। अनुद्धृते वक्ष्यमाणा भागकल्पना। *मेधा.

(२) उद्धारेऽनुद्धृते कथंचित् पित्रादेरनिच्छया अनपेक्षया वक्ष्यमाणा। +मवि.

+ वाक्यार्थो मेधावत्। मच. ममुगतम्।
* शेषं मेधागतं, ममुगत च।
× मच. मेधागत ममुगत च।

(१) **मस्मृ.**९।११५ स्यात् (तु); **दा.**४३; **व्यक.**१४२; **स्मृच.**२६५; **विर.**४७६; **चन्द्र.**७३(=) सपन्ना (समाना); **विभ.**३९; **समु.**१२८.

+ शेष मेधागतम्। × चन्द्र स्मृचवद्भाव.।
* ममु., स्मृच., मच. मेधागतम्।

(१) **मस्मृ.**९।११६; **मिता.**२।११७ उत्त.; **दा.**३७; **व्यक** १४२; **स्मृच.**२६५ मानं (माना); **विर.**४७८; **पमा.** ४८९ त्वे (ते) उत्त.; **रत्न.**१४० उत्त.; **नृप्र** ३५ उत्त.; **व्यप्र.**४४०; **व्यउ.**१४३(=) उत्त.; **व्यम.**४३ उत्त.; **विता.**३०१ उत्त.; **राकौ.**४४७ उत्त.; **समु.**१२८; **भाच.** त्वे (ते).

(३) उद्धारेऽनुद्धृत इति वचनादुद्धारस्यानित्यता सूचिता। नन्द.

ज्येष्ठादितारतम्येन विभागतारतम्यम्

ऐकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽनुजः।
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः॥

(१) एकेनाशेनाधिकं स्वाश हरेत्स्वीकुर्यात् द्वावशौ प्रतिपद्येतेत्यर्थः। ततोऽनुजस्तदनन्तरमध्यर्धमर्धद्वितीय यवीयासस्तस्मादवर्गजाताः सर्वे सममशं नाधिक किंचिन्नाल्पमित्यर्थः। +मेधा.

(२) इत्युद्धारव्यतिरेकेणापि विषमो विभागो दर्शितः पित्रोरूर्ध्वं विभजताम्। ×मिता.२।११७

(३) एकाशाधिकार्धांशाधिकचतुर्थभागाधिकभागाः प्रतिपादिताः। दा.३८

न चोपार्जकत्वेन ज्येष्ठस्याशद्वयमिति वाच्य, उद्धारेऽनुद्धृते भागद्वयस्य विधानात् अर्जकत्वे चोद्धारस्यासंभवात् मध्यमकनीयसोश्चोपार्जकतया ज्येष्ठेनाप्यविशेषात् तयोरध्यर्धादिविधानानुपपत्तेः ज्येष्ठादिपदानर्थक्याच्च। अत एव पुत्रिकौरसयोः पितृधनविभागे मनुरपि—'पुत्रिकाया कृताया तु यदि पुत्रोऽनुजायते। समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः॥' (मस्मृ.९।१३४) इति स्त्रीत्वेन ज्येष्ठत्वाभावात् समभागता प्रतिपादयन् पुरुषस्य भागद्वयं प्रतिपादयति।

यदुक्तं होलाकाधिकरणे प्राच्यकर्तृकहोलाकानुष्ठानोपपत्तये होलाका कर्तव्येति श्रुतिः कल्पिता तावतैव तदुपपत्तेः न तु प्राच्यादिपदवती कल्पनागौरवात् तद्वदत्राप्यर्जकोंऽशद्वयं गृह्णीयादिति श्रुतिः कल्पनीया न पुनः पित्रादिपदवतीति। तदयुक्तम्। तत्र प्राच्यक कहोलाकानुष्ठानस्यावश्यकल्पनीयसामान्यश्रुत्यैवोपपत्तेः न चाप्राच्यानामननुष्ठानार्थं प्राच्यपदवती कल्प तामिति वाच्य, तेषामननुष्ठानस्यानाचाररूपर श्रुतिकल्पनानिमित्तत्वानुपपत्तेः। इह तु मन्वादी ज्येष्ठपदप्रयोगात् तदुपपत्तये ज्येष्ठपदवत्या एव श्रु कल्पनार्हत्वात् अर्जकपदवत्या एव अवश्यकल्पनीयत्व भावात् ज्येष्ठपदवत्या अर्जकपदवत्याश्च कल्पना विशेषप्रमाणाभावात्, न चान्यत्रार्जकस्य भागद्वया श्रुतेरवश्यं कल्पनीयत्वादत्रापि सैव मूलमस्तु ला वात् ज्येष्ठपद चार्जकपरमस्त्विति वाच्य वैपरीत्यस्या सभवात् अत्रैव ज्येष्ठपदयुक्तश्रुतिकल्पनायामर्जकप स्यापि ज्येष्ठपरत्वकल्पनासभवात् विनिगमनाप्रमाण भावात्। किञ्चैवं लाघवादिना यत् किंचित् त्रिचतुरा पदवतीमेका श्रुतिमनुमाय सकलस्मृतिवादाना गौण्य लक्षणया वा वृत्त्या तत्परत्वमपि वाच्यमित्यतीवात्मन स्मृतिनिपुणता निरूपिता। तस्माद् यस्मादेवाचारा स्मृतिवाक्याद्वा या श्रुतिरवश्य कल्पनीया तयैव तद्वतस्य चाराशस्य स्मृतिपदस्य च उपपत्तेर्न तत्राधिककल्पनो होलाकाधिकरणस्यार्थः। अत एव वसिष्ठेन ज्येष्ठस्य शद्वयमभिधाय उपार्जकस्याप्यशद्वय पृथगभिहितम् यथा—'अथ भ्रातृणा दायविभागः। द्व्यशं ज्येष्ठो हरेत् (वस्मृ. १७।३९,४०) ततोऽनतिदूरे पुनराह—ये चैषा समुत्पादित स्यात् सोऽपि द्व्यशमेव हरेत्।' (वस्मृ १७।४५) अनेनार्जकतया भागद्वये दर्शिते ज्येष्ठस्याश द्वयाभिधानमनर्थक स्यात्। द्व्यंशहरत्वमपि न ज्येष्ठत मात्रेण। यदाह बृहस्पतिः—'जन्मविद्यागुणज्ये द्व्यश दायादवाप्नुयात्। समाशभागिनस्त्वन्ये ते पितृसमस्तु सः॥' उपार्जकत्वेन भागद्वये जन्मविद्य दिकीर्त्तनमनुपयोगि। एतच्च भागद्वयं सोदरमात्रभ्रात विभागविषयम्। दा.३९-४

(४) इतरे समाशा इति गुणसाम्ये शेषाणाम् गुणाधिक्ये त्वेतदपेक्षयोन्नेयम्। +मि

(५) एकाधिकमंशं द्व्यंशमिति यावत् 'द्व्यंशं व

+ मच. मेधागतम्।

× समविषमविभागचर्चा 'ज्येष्ठस्य विंश उद्धार' इति श्लोके (पृ.११८७) द्रष्टव्या। शेषं मेधागतम्। विवादताण्डवे 'ज्येष्ठस्य विंश उद्धार' इति श्लोकोद्धृतमितावद्भावः।

(१) **मस्मृ.**९।११७; **मिता.**२।११७; **दा.**३७-३८, **व्यक.**१४२; **स्मृच.**२६५; **विर.**४७८; **पमा.**४८९; **रत्न.**१४०; **स्मृचि.**२९; **नृप्र.**३५; **व्यप्र.**४४०; **व्यउ.** १४४(=) ध्यर्धं (ध्यर्धे); **व्यम.**४३ नुजः (परः); **विता.** ३०१ यांस (यांस); **राकौ.**४४७; **समु.**१२८; **विच.** ७३ प्रथमपादः.

+ शेष मेधागतम्।

पूर्वजः स्याद्' इति गौतमस्मरणात्। पूर्वजो विद्यादिना ज्येष्ठ इत्यर्थः। अत एव बृहस्पतिः—'जन्मविद्यागुण-ज्येष्ठो द्यंश दायादवाप्नुयात्' इति। एव च न जन्मतः प्राथम्यादिमात्रमुद्धारे विषमविभागे वा कारणं किन्तु विद्यादिनिबन्धनश्रेष्ठत्वाद्युपेत प्राथम्यादिकमिति मन्तव्यम्। स्मृच.२६६

(६) इदं तु ज्येष्ठतदनुजयोर्विद्यादिगुणवत्त्वापेक्षया कनिष्ठाना च निर्गुणत्वे बोद्धव्य ज्येष्ठतदनुजयोरधिकदानदर्शनात्। *ममु.

(७) एतच्च यदा ज्येष्ठतदनुजौ गुणविद्यातिशयसंपन्नौ अन्ये तु निर्गुणास्तदा मन्तव्यम्। 'जन्मविद्यागुण-ज्येष्ठो द्यंशं दायादवाप्नुयादि' ति ज्येष्ठमधिकृत्य बृहस्पतिवचनात्, तदनुजे च न्यायसाम्यात्। विशोद्धारादि च, यदा सर्वे गुणाचारादियुक्ताः, परस्पर गुणाचारादौ च किंचिद्वैषम्यं तदा बोद्धव्यम्। —विर.४७८

(८) ज्येष्ठस्य द्यंशित्वमुक्तं तत् सोदरमात्रभ्रातृविभाग एव पर्यवस्यति। सामान्यविशेषन्यायात्। विच.७३

याज्ञवल्क्यः

संभूयार्जितस्य समो विभाग.

सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः॥

(१) मैत्रादेव्यतिरेकेण तु—सामान्येति। सामान्येनार्थेन समुत्थानमार्जनं प्रातिर्यस्य द्रव्यस्य तत् तथोक्त तस्मिन् सामान्यार्थसमुत्थाने द्रव्ये। विभागस्त्विति। अवधारणार्थस्तुशब्दः। अस्त्येव विभाग इत्यर्थः। स चैकस्य शरीरादिक्लेशातिशये सत्यपि सम एव स्मृतः विहित इत्यर्थः। विश्व.२।१२३

(२) अस्यापवादमाह—सामान्येति। अविभक्तानां भ्रातृणा सामान्यस्यार्थस्य कृषिवाणिज्यादिना संभूय समुत्थाने सम्यग्वर्धने केनचित्कृते सम एव विभागो नार्जयितुरशद्वयम्। *मिता.

(३) अर्थसमुत्थानमर्थार्जनम्। सर्वेषा परस्परसापेक्षाणामर्थार्जने सति समो विभागः कार्यः। एतस्मिन्विषये पिताऽपि सममेव विभजेत्। अप.

(४) इद त्वन्येषामप्येवरूपत्वेऽन्यथा वसिष्ठविरोधः स्यादिति द्रष्टव्यम्। विचि.२०२

(५) सर्वेषा भ्रातृणा साधारणेऽर्थार्जनव्यापारे कृषिवाणिज्यादिरूपे तु समः सर्वेषा विभागः। तुशब्देन पितृद्रव्यानुपक्लेपार्जितत्वनिबन्धनमविभाज्यत्वमुक्तं व्यवच्छिनत्ति। वीमि.

(६) अस्य वसिष्ठोक्तभागद्वयस्य। बाल.

नारदः

ज्येष्ठादितारतम्येन विभागतारतम्यम्

ज्येष्ठायांशोऽधिको ज्ञेयः कनिष्ठायावरः स्मृतः।
समांशभाजः शेषाः स्युरप्रत्ता भगिनी तथा।
क्षेत्रजेष्वपि पुत्रेषु तद्वज्जातेषु धर्मतः॥

(१) प्रकाशकारेण तु वाक्यमिद कनिष्ठायावर इति स्थाने 'श्रेष्ठाय तु वर' इति पठितं व्याख्यात चाग्रे प्रथमोत्पन्नस्याशद्वयम्। श्रेष्ठः कुटुम्बकर्मण्युपयुक्तः, तस्य वरं श्रेष्ठ किंचिद्द्रव्यमिति। अप्रत्ता कुमारी भगिनी, तथा अंशभागिनीत्यर्थः। भागश्चेत्थमौरसे क्षेत्रजे च इत्यग्रे व्यक्तीभविष्यति। औरसेषु पुत्रेषु तदुक्तं, क्षेत्रजेष्वाह क्षेत्रजेषु पुत्रेषु तद्वज्जातेषु धर्मतः तद्वद्विभागो यथौरसेषूक्तः, किम्भूतेषु जातेषु धर्मतः, स्वं क्षेत्र क्लीवादिभिर्यदान्यस्मै सकुल्याय सवर्णाय वा दीयते, तदा च ततो जातो धर्मतो जात इत्युच्यते, तेषु अप्यधिको ज्येष्ठाशो देय इति। कथं पुनरेकस्य

---

* शेषं मेधागतम्। नन्द. ममुगतम्।

÷ वाक्यार्थो मेधावत्।

(१) **यास्मृ.**२।१२०; **अपु.**२५६।६; **विश्व.**२।१२३, **मिता.**; **अप.**; **विर.**४८१; **स्मृसा.**५६ स्मृतः (मतः); **पमा.**५६०(=); **मपा.**६८८ तु समः स्मृतः (विषमः स्मृतः); **विचि.**२०२; **नृप्र.**३५; **दानि.**२(=) गस्तु (गोऽपि); **वीमि.**; **व्यप्र.**४४१; **विभ.**४२; **समु.**१३३.

* विर., मपा. मितागतम्।

(१) **नासं.**१४।१३,१४ ज्ञेयः कनिष्ठाया (देयो ज्येष्ठाय तु); **नास्मृ.**१६।१३,१४; **व्यक.**१४२ ज्ञेयः (देयः) भाजः (भागाः) ष्वपि (षु च); **विर.**४७९ व्यकवत्; **व्यप्र.**४४० प्रथमार्धं (ज्येष्ठस्याशोऽधिको देयः कनिष्ठस्य वरः स्मृतः) तृतीयार्धं विभा; **विभ.**४१ व्यकवत्.

क्षेत्रजातानामनेकेषां संभवः, उच्यते यमजोत्पन्नविषयमेतत्। विर.४८०

(२) ज्येष्ठाय भागोऽधिको देयः। वरश्च सर्वार्थेषु पूर्वोक्त एव। वरं दत्त्वा शेषस्य भागोऽधिको देयः। अन्ये आहुः—ज्येष्ठायाधिको भागो देयः। ततः समभागेषु श्रेष्ठ इष्टः तस्य पूर्वं (वरं) दत्त्वा शेषाः समभागा इति। भगिन्या अपि ऊढाया नास्त्यंश इत्यस्मादेव गम्यते। क्षेत्रजेष्वपि तथैव समाशता। धर्मेण यथोक्तजातास्ते। अयथोक्तजा अभागार्हा इत्यस्मादेव गम्यते।

नाभा.१४।१३,१४

बृहस्पतिः

ज्येष्ठस्य द्व्यंशित्वम्

[5]जन्मविद्यागुणज्येष्ठो द्व्यंशं दायादवाप्नुयात्।
समांशभागिनस्त्वन्ये तेषां पितृसमस्तु सः+॥

(१) द्व्यंशहरत्वमपि न ज्येष्ठतामात्रेण। यदाह बृहस्पतिः—जन्मविद्येति। उपार्जकत्वेन भागद्वये जन्मविद्यादिकीर्तनमनुपयोगि। एतच्च भागद्वयं सोदरमात्रभ्रातृविभागविषयम्। ×दा.४२

(२) ज्येष्ठता च यस्य पिता प्रथम मुखं पश्यति तस्यैव ग्राह्या। वर्णभेदे तु वर्णक्रमेण पितुरूर्ध्वं जन्मज्यैष्ठ्यं विद्याज्यैष्ठ्यं वा पुरस्कृत्य स्थित द्व्यशमेवाह बृहस्पतिः—जन्मविद्येति। स्मृसा.५५

(३) इदं गुणवत्तमपितृवत्परिपालकज्येष्ठविषयम्। विचि.२०१

+ ममु.व्याख्यानं 'सदृशस्त्रीषु जातानां' इति मनुवचने द्रष्टव्यम्। विता.व्याख्यानस्य 'समन्यूनाधिका भागाः' इति बृहस्पतिवचनस्यपमावद्भावः (पृ. ११७३)।

× स्मृच. दागतम्। विशेषः 'एकाधिकं हरेज्ज्येष्ठः' इति मनुवचने (पृ. ११९१) द्रष्टव्यः।

(१) **दा.४२**; **व्यक.१४२**; **स्मृच.**२६६ पू.; **ममु.** ९।१२५ द्व (द्व्यं) पू.; **विर.**४८०; **स्मृसा** ५६ याद (यम) मस्तु (मो हि); **पमा.**४९० गुण (गुणै.) दवा (दमा)पू.; **विचि.**२०१; **स्मृचि.**२९(=) याद (यम) गिनस्त्वन्ये (जस्त्वन्ये च); **नृप्र.**३५ याद (यम) पू., कात्यायन; **चन्द्र.** ७४ मस्तु (मो हि) शेष स्मृचिवत्; **दानि.**२ दवा (दमा) पू., स्मृत्यन्तरम्; **व्यप्र.**४४६-४४७ दानिवत्; **विता.**३०१ याद (यम); **विभ.**३६ पू.; ४२,६५, **समु.**१२८ ज्ये (श्रे) पू.

पुत्राणां समांशित्वम्। गुणिने उद्धारः।

[9]पितृरिक्थहराः पुत्राः सर्व एव समांशिनः।
विद्याकर्मयुतस्तेषामधिकं लब्धुमर्हति॥

ऋक्थे ऋणे च समांशिन इत्यर्थः। स्मृच.२६४

ये पतितादिव्यतिरिक्ताः पितृरिक्थहरा विद्यादेरसत्तया सत्तया वा सदृशास्ते समाशिन एव स्युः। ये पुनर्विद्यादेरसत्तया च विसदृशास्तेषा मध्ये यो विद्याद्युपेतः स एवोद्धारेण वा विषमविभागेनाधिकं धनं लब्धुमर्हतीत्यर्थः। स्मृच.२६५

[2]विद्याविज्ञानशौर्यार्थे ज्ञानदानक्रियासु च।
यस्येह प्रथिता कीर्तिः पितरस्तेन पुत्रिणः॥

सभूयार्जितस्य समो विभागः

समवेतैस्तु यत्प्राप्तं सर्वे तत्र समांशिनः।
तत्पुत्रा विषमसमाः पितृभागहराः स्मृताः+॥

देवलः

पुत्राणामुद्धारविचारः

[3]पुत्राणां मध्यमो दायः समानानामपीष्यते।
ज्येष्ठस्य दशमं भागं न्यायवृत्तस्य निर्दिशेत्॥

मध्यमो दायो मध्यमं धनं विंशोंऽशः; एतच्च ज्येष्ठे वेदसमन्विते, अन्येषु निर्गुणेषु मन्तव्यमिति हलायुधपारिजातौ। अन्ये तु यदा ज्येष्ठोऽग्निवेदसंपन्नोऽन्येऽपि गुणवन्तस्तदा ज्येष्ठस्य दशमो भागः, अन्येषा पुत्राणां मध्यमो भागो मध्यमं धन विंशो भागः प्रत्येकमिति प्रथमखण्डार्थः। यदाग्निवेदवान् ज्येष्ठोऽन्येऽपि

+ व्याख्यासंग्रहः 'पुरुषपरंपराया विभागविधि'विषये द्रष्टव्यः।

(१) **व्यक.१४३**; **स्मृच.**२६४ पू.:२६५,३०८; **विर.** ४८४समांशिनः (यथांशतः); **स्मृसा.**५५:५६ शिनः (शतः); **विचि.**२०० शिनः (शतः) २०१ विरवत्; **स्मृचि.**२९ कर्म (धर्म)·३१ विरवत्; **दात** १६४ शिनः (शतः) कर्म (धर्म) स्तेषा (स्वेषा); **चन्द्र.**७३ स्तेषा (स्वेषां); **विभ.४०**, ८० विरवत्; **समु.**१२८.

(२) **व्यक.१४३**; **विर.**४८४; **दात.**१६४ यार्थे (र्थार्थे) क्रियासु (क्रयेषु); **विभ.८०.**

(३) **व्यक.१४२**; **विर.**४७२, **विचि.**२०० उत्त.

निर्गुणाः, तदा जेष्ठस्य दशमो भागो निर्गुणभ्रातृणा तु पूर्ववच्चत्वारिंशत्तमो भाग एव विभज्य दातव्य इति द्वितीयखण्डार्थः। ×विर.४७२

ज्येष्ठलक्षणम्

[1]बहिर्वर्णेषु चारिभ्याद्यमयोः पूर्वजन्मनः।
यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम्।
संतानः पितरश्चैव तस्मिन् ज्यैष्ठ्यं प्रतिष्ठितम्॥

यस्य सवर्णाजातस्य मुख प्रथमं पश्यति तस्मिन् संतानः प्रतिष्ठितः पितरः प्रतिष्ठिताः ज्यैष्ठ्य च प्रतिष्ठतमित्यर्थः। तेन पितुः प्रथमापत्य पुमान् ज्येष्ठः पतिसवर्णाया तु पश्चात्तदुत्पन्नोऽपि ज्येष्ठः। तदुक्तं मनुना— 'सदृशस्त्रीषु जाताना पुत्राणामविशेषतः। न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते॥' विचि.१९९

उशना

ज्येष्ठोद्धार.

[2]ज्येष्ठस्य दशमोद्धारः कनिष्ठस्याभिप्रेतो भागः*।

पैठीनसिः

पुत्राणां समो विभागः

[1]पैतृके विभज्यमाने दायाद्ये भ्रातृणां समो विभागः।

दायाद्ये दायधने इत्यर्थः। स्मृच.२६३

अनिर्दिष्टकर्तृकवचने

ज्येष्ठादितारतम्येन विभागतारतम्यम्

[2]एकस्यां बहवः पुत्रा एकस्यामेक एव वा।
द्रव्यस्य कल्पना कार्या पञ्चभागमिता नृभिः॥
एकस्य चैव भागौ द्वौ अन्येषां च त्रिभागकम्।
तथैव ते पालनीया विनश्येयुरतोऽन्यथा॥

संग्रहकारः (स्मृतिसंग्रहः)

उद्धारनिषेधः

[3]यथा नियोगधर्मो नो नानुबन्ध्यावधोऽपि वा।
तथोद्धारविभागोऽपि नैव संप्रति वर्तते॥

× विचि. विरगतम्।

* व्याख्यान 'नैकशफद्विपदानाम्' इति गौतमवचने (पृ. ११८३) द्रष्टव्यम्।

(१) **बिर.**४७७-४७८ न्मन· (न्मत.); **विचि.**१९९ यमयो. प (समये प); **व्यम.**४३ (बहि...न्मन. ०) मनुः, **विभ.**४०; **समु.**१२८-१२९ (बहि.. न्मन.०) तान. (जाताः) स्मृत्यन्तरम्.

(२) **मभा.**२८।१३.

(१) **दा.**६५ (भ्रातृणा०), **स्मृच.**२६३; **रत्न.**१४०; **सवि.**३५६; **व्यप्र.**४४२, **समु.**१२७.

(२) **स्मृचि.**२९ क्रमेण याज्ञवल्क्यः.

(३) **मिता.**२।११७(=), **स्मृच.**२६६ नो (ऽध); **पमा.**४९२ नो (ऽय), **रत्न.**१४०नो (वा); **मपा.**६४६(=) र्मो नो (र्मिण्यो) न्धा (न्धा) ऽपि नैव (हि नैव); **व्यनि.**यथा (यद्या) नो (ऽपि) वधोऽपि वा (गवादिका) प्रजापतिः; **स्मृचि.**२९ (=); **नृप्र.**३५ नो (ऽय) गोऽपि (गो हि); **सवि** ३५५(=) नो (ऽपि), **व्यप्र.**४४३; **व्यउ.**१४४ नो (वा), **विता** ३०१(=) वा (च); **राकौ.**४४७(=); **समु** १२९ नो नानु (ऽध नात्म).

भ्रातृणां सहवासविधिः

वेदाः

ज्येष्ठ एव पुत्रो दायादः

ब्रह्मवादिनो वदन्ति किंदेवत्यं पौर्णमासमिति प्राजापत्यमिति ब्रूयात्तेनेन्द्रं ज्येष्ठं पुत्रं निरवासाययदिति तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययन्ति।

नात्र प्रजापतेर्हविर्भोक्तृत्वेन पौर्णमासदेवतात्वं किं तु तत्कर्मस्रष्टृत्वेन। तच्च पूर्वकाण्ड उदाहृतम्—'प्रजापतिर्यज्ञानसृजताग्निहोत्र चाग्निष्टोम च पौर्णमासी चोक्थ्य च' इत्यादि। स च प्रजापतिस्तेन पौर्णमासकर्मणा स्वकीयं ज्येष्ठं पुत्रमिन्द्रं निरवासाययन्निःशेषवित्तदानेन स्थिरनिवासमकरोत्। एतदपि पूर्वकाण्ड एव स्पष्टमुदाहृतम्—'तेनेन्द्रं निरवासाययत्तेनेन्द्रः परमा काष्ठामगच्छत्' इति। यथा प्रजापतिर्यज्ञान् ससर्ज तथेन्द्रोऽप्यग्नीषोमौ वृत्रान्निःसार्य ताभ्यामिमं पुरोडाशं दत्त्वानिति अस्ति प्रजापतेरिवेन्द्रस्यापि संबन्धः। यस्मात्प्रजापतिरिन्द्र निरवासाययत्तस्माज्ज्योकेऽपि ज्येष्ठ पुत्र धनेन निरवसाययन्ति निःशेषमायुषोऽवसान धनेन युक्तो यथा प्राप्नोति तथा कुर्वन्तीत्यर्थः। तैसं.

गौतमः

विकल्पेन ज्येष्ठ एव दायादः, इतरेषा भरणमात्रम्

सर्वं वा पूर्वजस्येतरान् बिभृयात्पितृवत्।

(१) वाशब्दात् पृथग्वा भवेयुः सह वा वसेयुः। सहवासश्च सर्वेषामिच्छात एव। दा.६२

(२) ज्येष्ठ एव सर्व धन स्वीकृत्य गृहीत्वेतरान्कनिष्ठान्बिभृयात्। तेऽपि तस्मिन्पुत्रवद्भजेरन्। गौमि.

(३) अयमपि यवीयसा कर्मानुष्ठानसामर्थ्याभावे ज्येष्ठवृत्तित्वे सति द्रष्टव्यः। मभा.

(१) तैसं.२।५।२।७.

(२) गौध.२८।३; दा.६२ सर्वं (सर्वस्वं) जस्ये (जस्य स इ); मभा; गौमि.२८।३; उ.२।१४।६; स्मृच.२६३ जस्ये (जस्य स इ); बाल.२।११७ (सर्वं वा पूर्वस्य स चेतरान् बिभृयात्); समु.१२८.

हारीतः

सर्वेषामध्ययनसमाप्तिपूर्वं सहवासविधिः

यैश्चसमाप्तवेदाः कनीयांसस्तदा सह वसेयुः। अनेडमूका जात्यन्धा विकलाङ्गाश्च कन्यकाः। संस्कार्याः पैतृकाद्रिक्थाद्भ्रातृभिर्मनुरब्रवीत्॥

अनेडमूकाः वक्तु श्रोतुमसमर्थाः। विकलाङ्गाः न्यूनाङ्गा अधिकाङ्गाश्च। पैतृकाद्रिक्थादिति सामान्यनिर्देशात्सर्वं वा रिक्थ भ्रातृभिः वराय दत्वा संस्कर्तव्या इति वचनार्थः। केचिदनेडमूकत्वादिदोषदुष्टाना विवाहसस्कारो नेति वदन्ति, तदपास्तमिति वेदितव्यम्।

सवि.३६४

शंखः शंखलिखितौ च

जीवति पितरि सहवासविधिः। वृद्धयर्थं सहवासविधिः।

भ्रातणां जीवतोः पित्रोः सह भावो विधीयते। तदूर्ध्वमपि तेषां च वृद्धयर्थं च सह त्रिभिः॥ कामं सह वसेयुरेकमताः संहता वृद्धिमापद्येरन्।

(१) पृथक् पृथक् व्ययाभावादिति भावः।

स्मृच.२५९

(२) सहता अन्योन्यालम्बनतया वृद्धिमाचक्षीरन् वृद्धिं स्फुटा कुर्वीरन्, वृद्धियुक्ता भवन्तीति यावत्।

विर.४५९

कौटिलीयमर्थशास्त्रम्

सहवासविधिः

पितुरसत्यर्थे ज्येष्ठाः कनिष्ठाननुगृह्णीयुः, अन्यत्र मिथ्यावृत्तेभ्यः।

(१) अप.२।११७.

(२) सवि.३६३-३६४. (३) सवि.३५१.

(४) व्यक.१४०; स्मृच.२५९; विर.४५८ (सह०) मताः (तः) पथे (चक्षी); रत्न.१३९ मताः (तः); सवि.३५१ (सह०) मताः (त्र); व्यप्र.४३६ रत्नवत्; समु.१२६ रत्नवत्, शंखः. (५) कौ.३।५.

पितुरसत्यर्थे पितृधनाभावे, ज्येष्ठाः पुत्राः, कनिष्ठान्, अनुगृह्णीयुः विभृयुः, अन्यत्र मिथ्यावृत्तेभ्यः कनिष्ठाश्चेन्मिथ्यावृत्ता न भवन्ति। श्रीमू.

मनुः

विकल्पेन ज्येष्ठ एव दायादः, इतरेषा भरणमात्रम्

ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः।
शेषास्तमुपजीवेयुर्यथैव पितरं तथा॥

(१) ननु उपरते पितरि ज्येष्ठ एव धनाधिकारी नेतरे। ज्येष्ठोऽत्र पुन्नामनरकव्यावर्तकोऽभिप्रेतो न तु जीवदपेक्षः। नैतत् सर्वेच्छाधीनज्येष्ठाधिकारश्रुतेः। यथा नारदः—'विभृयाद्वेच्छतः सर्वान्' इत्यादि। ×दा.२०

(२) ज्येष्ठ एव त्विति। एतज्ज्येष्ठस्य गुणवत्त्वे अन्येषां च हीनवत्त्वे। मवि.

(३) इति, तदसमाप्तवेदाध्ययनेषु कनिष्ठेषून्मत्तत्वादिना निरंशेष्वप्राप्तव्यवहारेषु वा वेदितव्यम्। अप.२।११७

(४) नन्वधिकारिसवर्णानेकभ्रातृविषयेऽपि दायो न विभज्यते। यदाह मनुः—ज्येष्ठ इति। न चैतद्वचनं सहवासपक्षशिक्षार्थमिति वाच्यम्। यतस्तदर्थमन्यदेव वचनं 'सह वसेयुर्वे'ति तेनैव प्रणीतमास्ते। सत्यमास्ते। तथापि प्रगल्भभ्रातृषु सहवासपक्षशिक्षार्थमेव 'सह वसेयुर्वे'त्यादेशः। अप्रगल्भानुजेषु तु तत्प्रागल्भ्यपर्यन्तसहवास एव कार्योऽनेन प्रकारेणेति दर्शयितुं 'ज्येष्ठ एव तु गृह्णीयात्' इत्याद्युपदेश इति नानेन वचनेन वचोभङ्ग्या सवर्णानेकभ्रातृषु दायविभागः प्रतिषिध्यत इति न कश्चिद्विरोधः। स्मृच.२६३

(५) यदा पुनर्ज्येष्ठो धार्मिको भवति तदा—ज्येष्ठ इति। +ममु.

(६) ज्येष्ठ एव तु गृह्णीयादिति। सकलज्येष्ठगुणवान् ज्येष्ठो विभाज्यधने पितृवत्स्वतन्त्रः स्यादित्यर्थः। तमुपजीवेयुस्तत्कृतवृत्त्या वर्त्तेरन्। विर.४५७

(७) मृते पितरि ज्येष्ठं पुरस्कृत्य वसेयुः। यो वा शक्तस्तं पुरस्कुर्युः। धर्मार्थं वा विभजेरन्। *विचि.१९४-१९५

ज्येष्ठप्रशंसा

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः।
पितृणामनृणश्चैव स तस्मात्सर्वमर्हति॥

(१) तस्मादिति हेतूपन्यासात् दायभागप्रकरणे च पुत्रादीना नानाविधपित्राद्युपकारकत्वकीर्तनस्य अनन्यप्रयोजनकत्वात् उपकारकत्वादेव धनसबन्धो मनोरनुमत इति गम्यते। अत एव पुत्रपदं प्रपौत्रपर्यन्तपरं तत्पर्यन्तानामेव पार्वणविधिना पिण्डदानोपकारकत्वस्याविशेषात्। अन्यथा पुत्रपदस्य स्वार्थत्यागानुपपत्तेः पौत्राधिकारज्ञापक वचन कथञ्चित यदि लभ्येतापि, प्रपौत्रस्य तु न पृथक् वचनमस्ति। तस्मादुपकारकत्वादेव प्रपौत्रस्याप्यधिकार इति पुत्रपदमुपलक्षणम्। दा.१६२

स चायमर्थः दायभागप्रकरणे पुत्रादीनामुपकारकत्वातिशयाभिधानस्य अनन्यप्रयोजनकत्वात् 'पितृणामनृणश्चैव स तस्माल्लब्धुमर्हती'त्यानृण्यकरणस्य धनलाभहेतुत्वेन कीर्तनात् 'दौहित्रोऽपि ह्यमुत्रैन सतारयति पौत्रवत्' (मस्मृ.९।१३९) इत्यनेनापि संतारणस्य धनसंबन्धहेतुत्वेन निर्देशात् पुत्रादीना च त्रयाणा संतारणादन्यस्य तुल्यबद्धनसंबन्धकारणस्याभावात् त्रयाणामुदकमित्यादेश्चानर्थक्यापत्तेः क्लीवपतितजात्यन्धादीनाञ्चानुपकारकत्वादेवानशित्वाभिधानस्योपपत्तेः प्रतिसंबन्धिना चाधि-

---

× विच. दागतम्।

(१) **मस्मृ.**९।१०५; **मिता.**२।११७; **दा.**२०,६२, **अप.**२।११७; **व्यक.**१४०; **स्मृच** २६३, **विर.**४५७; **पमा.** ४८९; **विचि.**१९४-१९५; **स्मृचि.**२८; **नृप्र.**३५ धन (अश); **दात.**१७०; **चन्द्र.**६९(=) तर (तरः); **दानि.**२ याज्ञवल्क्यः; **व्यप्र** ४३७,४४२; **व्यउ.**१४३(=); **विता.** ३००-३०१ (=):३१०, **राकौ.**४४८ तु गृह्णीयात् (प्रतिगृहीत); **विभ.**८० ज्ये (श्रे); **समु.**१२७; **विच.**६९.

+ मच. ममुगतम्। * चन्द्र. विचिगतम्।

(१) **मस्मृ.**९।१०६; **मिता.**२।११८ पू.; **दा.**२०,१६२ त्सर्व (लब्धु) : २१५ त्सर्व (लब्धु) उत्त.; **व्यक.**१४०; **विर** ४५७; **स्मृचि** २८; **सवि** ३९१(=) पू.; **व्यप्र.**४३८: ४७८(=) पू.:५०५ दावत्; **व्यम.**४८; **विता.**३०१(=) स तस्मात् (तस्मात्तत्); **बाल.**२।१३५ (पृ.२१९); **मेतु.**४१ दावत्; **समु.**९५; **कृभ.**८६७; **दृच.**३ त्सर्व (लब्धु).

कारार्थ वचनकल्पनागौरवात् तदर्जितधनस्य च तदुपकारतारतम्येन तादर्थ्यसंपादनस्य न्याय्यत्वात् उपकारकत्वेनैव धनसबन्धो न्यायप्राप्तो मन्वादीनामभिमत इति मन्यते । इति निरवद्यविद्याद्योतेन द्योतितोऽयमर्थो विद्वद्भिरादरणीयः । अथात्रापरितोषो विदुषा वाचनिक एवायमर्थः तथापि यथोक्त एव वचनयोरर्थो ग्राह्य इत्यस्तु किं विस्तरेण । ×दा.२१५–२१६

(२) पितृणामनृणस्तेनैव तदृणापगमात् । अय पूर्वस्यार्थवादः । मवि.

(३) उत्पन्नमात्रेण ज्येष्ठेन संस्काररहितेनापि मनुष्यः पुत्रवान्भवति । ततश्च 'नापुत्रस्य लोकोऽस्ति' इति श्रुतेः पुण्यलोकाभावपरिहारो भवति । तथा 'प्रजया पितृभ्य' इति श्रुतेः । 'पुत्रेण जातमात्रेण पितृणामनृणश्च सः' इति । अतो ज्येष्ठ एव सर्वधनमर्हति पूर्वस्य । अनुजास्तेन साम्ना वर्तेरन् । *ममु.

(४) पुत्री भवति कृतापत्योत्पत्तिशास्त्रार्थो भवतीत्यर्थः। मात्रग्रहणान्न संस्कारापेक्षा । अनृणः त्रिभिर्ऋणैर्ऋणवान् जायते इति श्रुत्या यदृणत्रय बोधितं तत्रैकस्मादुत्तीर्णो भवतीत्यर्थः । विर.४५७–४५८

यस्मिन्नृणं संनयति येन चानन्त्यमश्नुते ।
स एव धर्मजः पुत्रः कामजानितरान्विदुः ॥

(१) इतरानित्यर्थवादोऽयम्, यथाश्रुततात्पर्यग्रहणाद्धि कनीयसा अभागार्हतैव स्यात् । ततश्च वक्ष्यमाणविरोधः। मेधा.

(२) आनन्त्यममृतत्वं उत्पादितपुत्रस्यैव मोक्षाश्रमाधिकारात् । धर्मजो धर्मार्थमुत्पादितः । कामजान् एकेनैव धर्मस्य सिद्धेः । मवि.

(३) यस्मिन् जाते ऋणं शोधयति स एव पितुर्धर्मेण हेतुना जातः पुत्रो भवति तेनैकेनैव ऋणापनयनाद्युपकारस्य कृतत्वात् । इतरास्तु कामजान्मुनयो जानन्ति । +ममु.

(४) सनयति सगमयति । आनन्त्य सुखाना तेनानन्त सुखमित्यर्थः, अश्नुते प्राप्नोति ऋणमुक्तः सन्नित्यर्थः । कामजानित्यर्थवादमात्रम् । कनीयसा भागबोधनेन भागाभावाबोधकत्वात् । विर.४५८

(५) यस्मिन् प्रथमजे । धर्मजो धर्मार्थं जात इति । *मच.

(६) क्वचित्कुले ज्येष्ठो गुणहीनः कनिष्ठो गुणवाश्च दृश्यते तत्र कि प्रवर्तितव्यमित्यपेक्षायामाह—यस्मिन्नृणमिति । ऋण पितृभ्यः प्रदेय पिण्डादिक सनयति निक्षिपति येन यशस्विना सतानकरेणानन्त्य मरणराहित्यमश्नुते स एव पुत्रो धर्मजः धर्मार्थ जातः ज्येष्ठ इत्यर्थः । इतरान्निर्गुणान् । नन्द.

(७) सनयति समाप्ति नयति । भाच.

[1]पितेव पालयेत्पुत्रान् ज्येष्ठो भ्रातॄन्यवीयसः ।
पुत्रवच्चापि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः ॥

(१) पुत्रवत्पालनीया न तु बाला इति धनादिना गर्हणीयाः । तैरप्यय पितेति भावनीय तदाह पुत्रवच्चापि वर्तेरन्निति । मेधा.

(२) धर्मतो धर्मापेक्षया । मवि.

(३) पुत्रा इव ज्येष्ठे भ्रातरि धर्माय वर्तेरन् । ममु.

(४) पालयेत् धर्मतो ज्येष्ठो ज्येष्ठधर्मेण । कनिष्ठधर्मेण च ते ज्येष्ठे वर्तेरन् यवीयास इति शेषः । मच.

[2]ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः ।
ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः ॥

(१) अपरा प्रशंसा । य एवगुणो ज्येष्ठः स वर्धयति कुलम् । अयमेव निर्गुणस्तत्कुलं विनाशयति । शीलवति ज्येष्ठे कनीयासोऽपि तथा वर्तन्ते । तेऽपि गुणहीना विवदन्ति । मेधा.

× व्यप्र., सेतु. दागतम् ।

* मच. ममुगतम् । + शेष मेधागतम् ।

(१) **मस्मृ.**९।१०७; **दा.**२०; **व्यक.**१४०; **विर.**४५७; **स्मृचि.**२८; **व्यप्र.**४३७; **बाल.**२।१३५ (पृ. २१९) येन (तिन); **समु.**९५ नन्त्य (मृत).

* शेष मेधागतम् ।

(१) **मस्मृ.**९।१०८; **दा.**१२१ चापि (चानु); **व्यक.**१४०, **विर.**४५७ ज्येष्ठे (ज्येष्ठ); **स्मृचि.**२९ येतु (यन्तु) तृन्य (ता य); **व्यप्र.**४३७ ज्येष्ठो (ज्येष्ठ) तृन्य (ता य); **विता.**३५० चापि (त्तेऽपि); **बाल** २।१२६,२।१३५ (पृ.२१९,२३६).

(२) **मस्मृ.**९।१०९; **व्यक.**१४०; **विर.**४५७; **स्मृचि.**२९; **व्यप्र.**४३७; **बाल.**२।१३५(पृ.२१९).

(२) ज्येष्ठ इति तस्मिन् सम्यग्वृत्तावितरेषामन्यथात्वेऽपि कुल वर्धत एवेत्यर्थः। पूज्यतमः कनिष्ठैः। सद्भिः शिष्टैः कनिष्ठैरगर्हितो न गर्हणीयः। मवि.

(३) अकृतविभागो ज्येष्ठो यदि धार्मिको भवति तदाऽनुजानामपि तदनुयायित्वेन धार्मिकत्वाज्ज्येष्ठः कुल वृद्धिं नयति। यद्यधार्मिको भवति तदानुजानामपि तदनुयायित्वाज्ज्येष्ठः कुलं नाशयति। तथा गुणवान् ज्येष्ठो लोके पूज्यतमः साधुभिश्चागर्हितो भवति। +ममु.

(४) कुलं वर्धयति सम्यग्व्यापारेण कनिष्ठपरिपालनेन कुलवृद्धिः। विनाशयतीति योग्यतामात्रम्। विर.४५८

ज्येष्ठे इतरेषां वृत्तिः

[1]**यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः।**
अज्येष्ठवृत्तिर्यस्तु स्यात्स संपूज्यस्तु बन्धुवत्॥

ज्येष्ठस्य वृत्तिः पुत्र इव स्नेहः। पालनं, शरीरधनेषु तदीयेषु स्ववदनुपेक्षाऽकार्येभ्यो निवर्तनम्। यस्त्वन्यथा वर्तते तत्र बन्धुवत्प्रत्युत्थानाभिवादनैः मातुलपितृव्यवत्संपूजा कर्तव्या अन्यकरणविधेयतानिवृत्तिः। *मेधा.

नारदः

सर्वानुमत्या सहवासविधिः

[2]**बिभृयाद् वेच्छतः सर्वान् ज्येष्ठो भ्राता यथा पिता।**
भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षा कुले स्थितिः॥

+ मच. ममुगतम्।

* मवि., ममु., मच., नन्द. मेधागतम्।

(१) **मस्मृ.**९।११०; **व्यक** १४० स पि (च पि); **विर.** ४५७ स्तु स्यात् (स्तत्र); **स्मृचि.**२९ पू.; **व्यप्र.**४३७ व्यकवत्; **बाल.**२।१२६:२।१३५(पृ.२३६ पू.)

(२) **नासं.**१४।५ क्षा (क्ष) स्थितिः (क्रिया); **नास्मृ.** १६।५ क्षा (क्षाः) स्थितिः (श्रियः); **दा.**२०:६२; **अप.** २।११७; **व्यक.**१४०; **स्मृच.**२७३ ले (ल); **विर.**४५८; **रत्न.**१३९; **स्मृसा** ५४ उत्त.; **विचि.**१९५; **दात.**१७०; **व्यप्र.**४३७ वेच्छ (वैक) ले (ल); **विता.**३११ द्वेच्छ (त्वेक) पू.; **बाल.**२।११७ स्मृचवत्; **विभ.८०; समु.१२७-१२८; विच.६९ स्मृचवत्.**

(१) सर्वेच्छया कनिष्ठोऽपि शक्तः सन् बिभृयादिति। दा.२१

शक्तः सन् कनिष्ठोऽपि सर्वान् बिभृयात्, मध्यमोऽत्र दण्डापूपन्यायात् सिद्धः। दा.६२

(२) तदशक्तखिलानुजविषयम्। स्मृच.२६३

(३) सामर्थ्यमेव कारणं भरणस्येति दर्शयति— शक्त्यपेक्षः कुले व्यापारः, न ज्येष्ठापेक्षः, दृष्टार्थत्वात्। अशक्तः किं करिष्यति, नाशयेदेव। नाभा.१४।५

[3]**सर्वेच्छया कनिष्ठोऽपि शक्तः सन् बिभृयात् परान्+॥**

[4]**कुटुम्बार्थेषु चोद्युक्तस्तत्कार्यं कुरुते तु यः।**
स भ्रातृभिर्वर्हणीयो ग्रासाच्छादनवाहनैः*॥

(१) भ्रातृविशेषस्य कर्मभूयस्त्वात्फलभूयस्त्वमिति न्यायेन समभागादभ्यधिकेन धान्यादिना विवर्धनमितरैर्भ्रातृभिः कार्यमित्याह नारदः— कुटुम्बेति। ×स्मृच.२६४

(२) अत्र हलायुधेन तु यः स्वयोग्यतया भागं न गृह्णाति, तस्यापि किंचिद्दत्वा तत्पुत्राणा विवादनिवृत्त्यर्थ विभागः कर्तव्य इत्यस्यार्थ व्याख्याय तदेतदाहेति कृत्वा, 'भ्रातृणा यस्तु नेहेत धन शक्तः स्वकर्मणा। स निर्भाज्यः स्वकादंशात्किंचिद्दत्वोपजीवनम्॥' इति मनुवाक्यमवतारितम्। विर.४८४-४८५

(३) अविभक्तावस्थाया विभक्ताना वा साधारणप्रयोजनतत्परः साधारणकार्य चेत् कुरुते, स इतरैर्भ्रातृभिर्वर्धनीयो ग्रासादिभिः, येन निराकुलः सर्वैः कर्तव्य करोति। नाभा.१४।३५

+ इद न वचन, परन्तु बालम्भट्टीकारेण भ्रान्त्या 'दायभाग'व्याख्यानं वचनत्वेनोल्लिखितम्।

* व्यप्र.व्याख्यान 'अनन्तरः सपिण्डाद्यः' इति मनुवचने द्रष्टव्यम्। × विचि. स्मृचगतम्।

(१) **बाल.**२।११७.

(२) **नासं.**१४।३५ तु (च) वाह (भोज); **नास्मृ.**१६।३५ चोद्यु (यश्चो) तु (च) स भ्रातृभिर्वर्हणीयो (भ्रातृभिर्भरणीयो ऽसौ); **अप.**२।११६ चो (चे) तु (च); **व्यक.**१४३; **स्मृच.** २६४; **विर.**४८४; **स्मृसा.**५६ द्यु चोद्यु (चोपयु); **विचि.** २०२ चो (य); **दात.**१७०; **व्यप्र.**४४८; **विभ.७५; समु.१२८; विच.६९-७०.**

व्यासः

जीवति पितरि सहवासविधिरितरथा विभागः

[1]भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते ।
तदभावे विभक्तानां धर्मस्तेषां विवर्धते ॥

(१) सहवासविधानमुखेन पृथग्भावनिषेधात् पितृमातृजीवनवतश्च विभागनिषेधात् जीवतोरिति साहित्यमविवक्षितम् । अत एकस्मिन्नपि जीवति विभागो न धर्म्यः किन्तु उभयोरभावे । दा.६०

(२) विभक्ताना स्वमात्रधने वैदिककर्मकरणात्तन्मात्रत्वेन तद्वृद्धिरित्यर्थः । दात.१७०

(३) पित्रोर्जीवतोर्भ्रातॄणा सहवासो मुख्यस्तदनुमत्यादिना ज्येष्ठस्य कार्यक्षमस्यान्यस्य वा पुत्रस्य स्वातन्त्र्यमन्येषा तदनुरोधवृत्तित्वमिति च पक्षद्वयमुक्तवन्तो व्यासादयः । *व्यप्र.४३५

(१) दा.६०; अप.२।११४, स्मृच.२५९ पू.; रत्न. १३९ पू.; व्यनि.; दात.१७०; व्यप्र.४३५ पू.:४५१, विता.३११ पू.; विभ.७८; समु.१२६; विच.६७.

संग्रहकारः (स्मृतिसंग्रहः)

इतरेषामनधिकारनिमित्त अन्यतरस्यैव दायहरत्वम्

[2]सर्वमेव हरेज्ज्येष्ठोऽनुजेष्वनधिकारिषु ।
मध्यमो वा कनिष्ठो वा ज्यायस्यनधिकारिणि ॥

* शेष 'भूया पितामहोपात्ता' इति याज्ञवल्क्यवचने (पृ.११७८) द्रष्टव्यम्।

(१) स्मृच.२६३; समु.१२७.

पुरुषपरम्परायां विभागविधिः

कौटिलीयमर्थशास्त्रम्

आ चतुर्थात् पितृतो भागकल्पना अग्रे समभाग.

[1]पितृद्रव्यादविभक्तोपगतानां पुत्राः पौत्रा वा आ चतुर्थादित्यंशभाजः । तावदविच्छिन्नः पिण्डो भवति । विच्छिन्नपिण्डाः सर्वे समं विभजेरन् ।

पितृद्रव्यादविभक्तोपगतानामिति । अविभज्य पितृद्रव्यमुपरताना, पुत्राः पौत्रा वा, आ चतुर्थादिति अनेन प्रकारेण आ चतुर्थपुरुषावधेः, अंशभाजः पितृक्रमप्रकृतविषमाशभाजो भवन्ति । तत्र हेतुः—तावत् चतुर्थपुरुषान्तरं यावत्, अविच्छिन्नः पिण्डो भवति । विच्छिन्नपिण्डाः सर्वे चतुर्थपुरुषात् परतो ये तत्कालजीविनस्ते सर्वे, समं विभजेरन् । श्रीमू.

अपितृका बहवोऽपि च भ्रातरो भ्रातृपुत्राश्च पितुरेकमंशं हरेयुः ।

अपितृका इति । अपितृकाः प्रमीतपितृकाः, ते च बहवः, तेऽपि च भ्रातरः सोदर्यभ्रातरोऽसोदर्यभ्रातरश्च, सर्वे ते भ्रातृपुत्राश्च भ्रातॄणा पुत्राश्च, एवम्भूताः, पितुरेकमंशं हरेयुः । अयमर्थः—त्रयो भ्रातरः प्रमीता अविभक्ताः । तेषु ज्येष्ठस्य त्रयः पुत्राः मध्यमस्य द्वौ पुत्रौ कनिष्ठस्यैकः पुत्रः इत्याहृत्य षण्णा सोदर्यासोदर्यभ्रातॄणा विभागे करणीये पिण्डधनस्य न षोढा विभागः किन्तु तत्तत्पितृतस्त्रेधा विभागं कृत्वा एकं त्रिभाग ज्येष्ठस्य पुत्रास्त्रयो गृह्णीयुः, द्वितीयं त्रिभागं मध्यमस्य द्वौ पुत्रौ गृह्णीयाता, तृतीयं त्रिभागं कनिष्ठस्य य एकः पुत्रः स गृह्णीयादिति । अथवा भ्रातर इत्येतदन्तस्यैव खण्डस्य यथोक्तोऽर्थ उदाहरण च । भ्रातृपुत्राश्चेति त्वन्यविषय— भ्रातृपुत्राश्च पितुरेकमश हरेयुरिति । तद्यथा—द्वयोर्भ्रात्रोरविभक्तयोरन्यतरस्य मृतस्य पुत्रास्त्रयोऽवशिष्टश्चैको भ्रातेति चतुर्णा विभागप्रसगे पिण्डधन द्वयशीकृत्यैकं द्वय भ्राता गृह्णीयादपरं द्वय भ्रातृपुत्रा विभज्य गृह्णीयुरिति । श्रीमू.

प्राप्तव्यवहाराप्राप्तव्यवहारादिविभागविचारः

[2]प्राप्तव्यवहाराणां विभागः । अप्राप्तव्यवहाराणां देयविशुद्धं मातृबन्धुषु ग्रामवृद्धेषु वा स्थापयेयुर्व्य-

(१) कौ.३।५.

(१) कौ.३।५.

वहारप्रापणात्। प्रोषितस्य वा। संनिविष्टसमम्-संनिविष्टेभ्यो नैवेशनिकं दद्युः। कन्याभ्यश्च प्रादानिकम्।

प्राप्तव्यवहाराणा विभाग इति। अतीतषोडशवर्षाः स्वय विभाग भजन्ते। अप्राप्तव्यवहाराणा देयविशुद्ध ऋणादिदेयव्ययविशोधित भाग, मातृबन्धुषु मातुलादिषु, ग्रामवृद्धेषु वा, स्थापयेयुः न्यसेयुः। आ कुतः, व्यवहार-प्रापणात् व्यवहारप्रापक षोडश वर्षोऽभिव्याप्य। प्रोषितस्य वेति। देशान्तरगतस्य च भाग मातृबन्धुषु ग्राम-वृद्धेषु वा स्थापयेयुरिति वर्तते। सनिविष्टेत्यादि। असनिविष्टेभ्यः अनुरूपस्त्रीपरिणयेन प्राप्तगार्हस्थ्याः सनिविष्टाः अतथाभूता असनिविष्टा अविवाहिताः तेभ्यः, नैवेशनिक निवेशनं परिणयन तत्प्रयोजनक द्रव्य, सनिविष्टसम सनिविष्टभ्रात्रर्थे यावद् व्ययित विवाहार्थ तत्तुल्यप्रमाण, दद्युः। कन्याभ्यश्च, प्रादानिक प्रदानं विवाहः तत्पर्याप्त द्रव्य दद्युः। श्रीमू.

याज्ञवल्क्यः

पितृतो भागकल्पना

अनेकपितृकाणां तु पितृतो भागकल्पना॥

(१) किं सर्वदायादाना सम एव विभाग.। न। भ्रातृणामेव समः स्यात्। अनेकपितृकाणा तु पितृव्य-पुत्रादीना पितृतः पितृविभागाद् भागकल्पना। अर्थात् भ्रातृणा पूर्वं समो विभागः। कृते विभागेऽन्य-तमस्य पुत्रास्तद्भागमंशाशतो विभजेयुरित्यर्थः। पितृ-द्वारं हि पौत्राणा पैतामहद्रव्यभाक्त्व न पितृवत् स्वत एवेत्यभिप्रायः। विश्व.२।१२३

(२) पित्र्ये द्रव्ये पुत्राणा विभागो दर्शितः। इदानीं पैतामहे पौत्राणा विभागे विशेषमाह—अनेकपितृका णामिति। यद्यपि पैतामहे द्रव्ये पौत्राणा जन्मना स्वत्व पुत्रैरविशिष्ट तथापि तेषा पितृद्वारेणैव पैतामहद्रव्य-विभागकल्पना न स्वरूपापेक्षया। एतदुक्त भवति। यदाऽविभक्ता भातरः पुत्रानुत्पाद्य दिष्ट गतास्तदैकस्य द्वौ पुत्रावन्यस्य त्रयोऽपरस्य चत्वार इति पुत्राणा वैषम्ये तत्र द्वावेक स्वपित्र्यमश लभेते, अन्ये त्रयोऽप्येकमश पित्र्य चत्वारोऽप्येकमेवाश पित्र्य लभन्त इति। तथा केषुचित्पुत्रेषु म्रियमाणेषु केषुचित्पुत्रानुत्पाद्य विनष्टे-ष्वप्ययमेव न्यायो म्रियमाणाः स्वानशानेव लभन्ते, नष्टानामपि पुत्राः पित्र्यानेवाशान् लभन्त इति वाचनिकी व्यवस्था। +मिता.

(३) अनेकपितृकाणामेकस्या योषिति बहुभिः संजा-तानाम्। विर. ५४३

(४) तुशब्देन पौत्रसंख्याया भागसंख्या व्यवच्छि-नत्ति। *वीमि.

बृहस्पतिः

स्वार्जिते समभागः, रिक्थे तु पितृतो भागकल्पना

समवेतैस्तु यत्प्राप्तं सर्वे तत्र समांशिनः।
तत्पुत्रा विषमसमाः पितृभागहराः स्मृताः॥

(१) पितृतो भागकल्पनाया को विशेष इत्यपेक्षिते बृहस्पतिः— तत्पुत्रा इति। तत्पुत्राः प्रमीतपितृकाणा एकैकस्य पुत्रा विषमसमाः न्यूनाधिकसंख्याकाः स्वं स्वं पैतृक भागमेव लभन्त इत्यर्थः। एतदुक्तं भवति। कस्यचित्प्रमीतस्य एक एव पुत्रः, कस्यचिद्द्वौ, कस्य-चिद्बहवः। तत्र यथैकः पितृभागहरस्तथैव द्वावपि स्वपितृभागहरौ। तथैव बहवोऽपि स्वपितृभागमात्रहराः स्मृता एवेति। यद्यपि पितृभागमात्रहरत्वेन 'अनेक-

---

(१) **याज्ञ्स्मृ.**२।१२०; **अपु.**२५६।६ काणा तु (कार्याणा), **विश्व.**२।१२३; **मिता.**; **दा** ६४; **अप.**२।५१ अनेक (प्रमीत: २।१२०; **स्मृच.**२७८ अनेक (प्रमीत); **विर.**४८१,५४३ (=); **स्मृसा.**५६; **पमा.**४९५; **मपा.**६५९; **रत्न.**१४२; **सुबो.**२।१२०; **विचि.**२०२; **व्यनि.**भाग (दाय), **नृप्र.** ३५; **दात.**१९६; **सवि** ३७२ स्मृचवत्; **चन्द्र.**७२:९१ विष्णुः; **वीमि**; **व्यप्र.**४४९,५३३ स्मृचवत्; **व्यउ.**१५१, **व्यम.**४४,६३,७१, **विता.**३१६; **राकौ.**४५०; **बाल.** २।१३५(पृ.२१८); **विभ.**४६,८१ व्यनिवत्; **समु.**१३४ स्मृचवत्.

+ विश्ववद्भावः। दा., अप., स्मृच., विर., पमा., मपा, व्यनि., विता. मितावद्भाव.।

* मितावद्भावः।

(१) **मिता.**२।११९ (=)पू., **अप.**२।१२०; **व्यक.**१४३; **स्मृच.**२७८ उत्त.; **विर** ४८१.४८२, **पमा.**४९५ उत्त.; **व्यनि.**; **नृप्र.**३५ षम (षमाः) उत्त.; **सवि.**३७०(=) पू.; **दानि.**३(=) पू.; **विता.**३३९ पू, मनुः; **समु.**१३४.

पितृकाणां पितृतो भागकल्पना[1] स्वस्याननुरूपा तथापि वाचनिकत्वादनुमन्तव्या । +स्मृच.२७८

(२) अविभक्तपितृकाः विषमसमाः पुत्राः । विर.४८२

(३) समवेतैरविभक्तैर्यल्लब्धं कृष्यादिना तदेकेन लब्धमपि सर्वेषा समानम् । तत्पुत्रास्तेषा पुत्राः विषमसमाः पितुरेव भागहराः । व्यनि.

कात्यायनः

प्राप्तव्यवहाराप्राप्तव्यवहारादिविभागविचारः.

[2]संप्राप्तव्यवहाराणां विभागश्च विधीयते ।
पुंसां च षोडशे वर्षे जायते व्यवहारिता ॥

अप्राप्तव्यवहारत्वं च प्रदर्शनार्थम् । अगृहीतवेदत्वमपि ह्यविभागे कारणम् । अप.२।११७

[3]अप्राप्तव्यवहाराणां धनं व्ययविवर्जितम् ।
न्यसेयुर्बन्धुमित्रेषु प्रोषितानां तथैव च ॥

(१) विभागस्त्वेकस्यापीच्छया भवतीत्युक्तं प्राक् । अत एव विभाग प्रक्रम्याह कात्यायनः—अप्राप्तेति । दा.६२

(२) अत्र च पुत्रेच्छया यो जीवद्विभागो यश्चाजीवद्विभागः स एकेच्छयापि भवत्यविशेषात् । अत एव विभाग प्रक्रम्य यत्कात्यायनेनोक्तं—अप्राप्तव्यवहाराणामिति । तदपि सगतम् । अन्यथा तदनुमतिमन्तरेण विभागाभावे तद्धनस्य बन्धुमित्रेषु न्यासविधानमनुपपन्नं स्यात् । व्यप्र.४६०

[4]प्रोषितस्य तु यो भागो रक्षेयुः सर्व एव तम् ।
बालपुत्रे मृते रिक्थं रक्षणीयं तु बन्धुभिः ।
पौगण्डाः परतस्तं तु विभजेरन् यथांशतः ॥

+ पमा. स्मृचगतम् ।

(१) **अप**.२।११७, **चन्द्र**.७३ श्च (स्तु).

(२) **दा**.६२, **दात**.१७१; **व्यप्र**.४६०, **विच**.७० नारदः.

(३) **व्यक**.१६१ तु यो (हि यो) रिक्थं रक्षणीय तु (रक्ष्यमृक्थं तत्तन्तु), **विर**.५९९ रक्षणीय तु (रक्ष्य तत्तन्तु), **स्मृसा**.७४ (=) ण्डाः (ण्डात्) जेरन् (जेत) अन्त्यार्धद्वयम् १३७ तु यो (हि यो) रिक्थ रक्षणीय तु (रक्ष्यमृक्थ तत्स्वैश्च) प्रथमार्धद्वयम्:१३८ ण्डाः (ण्डात्) तृतीयार्धम् :१४४ तु यो (हि यो) रक्षणीय तु (रक्ष्य तत्सैश्च) ण्डाः (ण्डात्).

बालपुत्रे बालः पुत्रो यस्य तस्मिन्, पौगण्डोऽतिबालो व्यवहारानभिज्ञः । ×विर.५९९

बान्धुक्षेत्रादिविभागः । पितृतो भागकल्पना आ चतुर्थात् ।

[5]क्षेत्रारामगृहादीनां विभागे समुपस्थिते ।
ज्येष्ठस्य दक्षिणो भागः प्रतीची वा तथा भवेत् ॥
[6]अविभक्ते निजे प्रेते तत्सुतं रिक्थभागिनम् ।
कुर्वीत जीवनं येन लब्धं नैव पितामहात् ॥
[7]लभेतांशं स पित्र्यं तु पितृव्यात्तस्य वा सुतात् ।
स एवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेत् ।
लभेत तत्सुतो वाऽपि निवृत्तिः परतो भवेत् ॥

(१) अविभक्तधने भ्रातरि मृते तत्पुत्रः पितामहादनवाप्तविभागः पितृव्यात्तत्पुत्राद्वा निजपितृभागं गृह्णीयात् । एवं च तत्पुत्रस्तत्पौत्रस्तु न लभेतेत्यर्थः । अप.२।१२०

(२) यदा सुतयोरविभक्तयोर्भ्रात्रोर्मध्ये कश्चिद्भ्राता

× स्मृसा. विरगतम् ।

(१) **समु**.१३२

(२) **अप**.२।१२० लब्धं नैव (न लब्धं वै); **व्यक**.१४३; **स्मृच**.२७८ निजे (ऽनुजे); **विर**.४८२ निजे प्रेते (मृते पुत्रे); **स्मृसा**.५६; **पमा**.४९५ स्मृचवत्; **विचि**.२०३; **व्यनि**.; **नृप्र**.३५ स्मृचवत्; **दात**.१६७,१९० विरवत्; **सवि**.३७३ स्मृचवत्; **चन्द्र**.७१ विरवत्; **व्यप्र**.४४९:५०५ विरवत्; **व्यम**.४४ स्मृचवत्, **विता**.३१६ स्मृचवत्; **बाल**.२।१२० निजे (सुते); **विभ**.४६,८१ विरवत्; **समु**.१३४ स्मृचवत्; **विच**.७०.

(३) **अप**.२।१२० लभेताश स (लभतेऽश हि) लभेत त (लभते त); **व्यक**.१४३; **स्मृच**.२७८; **विर**.४८२; **रत्न**.१४१, **स्मृसा**.५६ त्तस्य वा (द्वापि तत्); **पमा**.४९६; **विचि**.२०३ श स (श च); **व्यनि**. श स (शं तु) त्तस्य (स्तस्य), **नृप्र**.३५ लभे व्य तु (लभेत स पित्र्यमश तु); **दात**.१६७ पित्र्य तु (पित्र्यं च) प्रथमार्धः : १९० व्य तु (त्रं तु); **सवि**.३७२,३७३ द्वितीयार्धम्; **चन्द्र**.७२ स्मृसावत्; **व्यप्र**.४४९ त्तस्य वा (द्वापि तत्) लभेत त (लभते त):५०५ सर्वे (पूर्वे); **व्यम**.४४ लभेत त (लभते त); **विता**.३१६ स पित्र्य (स्वपित्र्यं); **बाल**.२।१२० स पित्र्य (स्वपित्र्य) तो वा (ताद्वा); **विभ**.४६,८१ प्रथमार्धद्वयम्; **समु** १३४; **विच**.७० व्या (का).

मृतः । तत्सुतस्तु पितामहादप्राप्ताशकः पितामहोऽपि नासीत्तदा कात्यायन आह—अविभक्तेऽनुजे प्रेते इत्यादि । जीवनं दायधनम् । अनुजग्रहण भ्रातुरुपलक्षणार्थम् । अस्मिन्नेव विषये यदा प्रमीतस्य सुता वहवस्तदाप्याह स एव—स एवाशास्त्विति । सम स्यादश्रुतत्वाादिति न्यायेन मिथः समभागतया भवेदित्यर्थः । यदपरं स एवाह—'लभेत तत्सुतो वाऽपि निवृत्तिः परतो भवेत्' इति तस्यायमर्थः । तस्य विभाज्यधनस्वामिपौत्रस्य सुतोऽपि वा स्वपितुरभावे तद्भाग लभेत । अथ तस्याप्यभावः किंतु तत्सुतादेरेव विद्यमानता तदा तु मृतभ्रातृसंततौ वृद्धप्रपितामहधनभागग्रहणनिवृत्तिरिति । ननु प्रपौत्रस्यापि प्रपितामहधनभागग्रहणमपि कथ सघटते । जन्मनाऽपि पितृपितामहयोरेव धने पुत्रपौत्रयोरेव स्वत्वसिद्धिनियमात् । सत्यम् । तथापि यथा पुत्रादेर्मातृधने पिण्डं दत्त्वैव मातुरूर्ध्वं स्वत्वसिद्धिर्भवतीति वक्ष्यते तथा प्रपितामहधने प्रपौत्रस्यापि स्वत्वसिद्धिरिति युक्तमुक्त 'लभेत तत्सुतो वाऽपी'ति । एव च यो यस्य धनस्वामिनः प्रमीतस्य पितृत्वेन पितामहत्वेन प्रपितामहत्वेन वा पिण्डदाता तस्य तद्धनभागित्व धनस्वामिनः सतत्यन्तरशालित्वेऽपि विद्यत इत्यवगन्तव्यम् ।

×स्मृच.२७८–२७९

(३) एतद्बलेन मृतस्य पुत्रे भागो न पत्न्या एतद्बलादपि जीवत्पितृकस्य विभागे तस्याभागः । स्मृसा.५६

(४) सति तु पितरि पार्वणानधिकारात् पुत्राणा नाशिता । एव धनिनः पौत्रस्वत्वोपरमे तदशमात्रे प्रपौत्राणामशिता । सति पौत्रे तु नाशिता इति पुत्रेभ्यः स्वधनविभागदाने स्वाच्छन्द्यात् यथा न्यूनाधिकदान तथात्र नास्तीत्येतत्परं न तु पितापुत्रयोस्तुल्याशित्वम् ।

*दात १६७

(५) पितृव्यसुताद्विभागेऽपि स एवाशो भवेद्यो भ्रातृणा न्यायतो भवेत् । एतदुक्त भवति विषमसमाः भ्रातृपुत्राः स्वपितृविभागहरा इति । +व्यनि.

(६) निजे भ्रातरि । तत्सुतं भ्रातृपुत्रम् । जीवनं भागः । स कीदृश भाग लभत इत्यपेक्षिते आह—पित्र्यमंशमिति । तत्सुतो यस्य धन विभज्यते तस्य प्रपौत्रः । पौत्रस्य प्रस्तुतत्वात् । परतः तत्सुतात् निवृत्तिर्भागनिवृत्तिर्भवेत्प्रपौत्रपुत्रो भाग न लभेतेत्यर्थः । व्यप्र.४४९

प्रपौत्रानन्तरमुक्तो यः प्रणप्तृप्रभृत्यनधिकारः स सपिण्डत्वेन ध्येयः । सकुल्यत्वेन त्वस्त्येव यथा प्रत्यासत्तिः । व्यप्र.५०५

(७) चतुर्थस्याशनिषेधो वृद्धप्रपितामहधनवृत्त्यभावे एकदेशे च ज्ञेयः । विता.३१६

(८) प्रपौत्रपुत्रादिः पितृपितामहप्रपितामहेषु मृतेषु अनन्तरं वृद्धप्रपितामहे मृतेऽन्यस्मिश्च तत्पुत्रादिके जीवति तद्धन न लभते । पुत्रपौत्रप्रपौत्रसामान्याभावे सोऽपि लभत एवेत्यर्थः । इदं च नाविभक्तपरं किन्तु संसृष्टपरम् । व्यम.४४

ऋणं प्रीतिप्रदानं तु दत्त्वा शेषं विभाजयेत् ।
आ चतुर्थात्तु तद्ग्राह्यं ऋमेणैव तु तत्सुतैः ॥

(१) यच्चान्यदिति चकारः स्वयमित्यनेन संबध्यते स्वय चार्जितमिति चकारादन्यस्यापि तदर्जन साधारणधनद्वारेणेत्यर्थः । ×दा.१०५

(२) स्वयमर्जित पित्राद्यविभक्तद्रव्योपयोगेन । तदनुपयोगेन स्वयमर्जितस्याविभाज्यत्वात् । एतत् त्रिविध धन सर्व विभज्यते । यदि नास्ति पितामहादिकृतमृणादिकमिति शेषः । अस्ति चेन्न सर्वमपि तु ऋणादिक दत्त्वाऽवशिष्ट विभज्यते । तथा च स एव 'ऋण प्रीतिप्रदान तु दत्त्वा शेष विभाजयेत्' इति । प्रीतिप्रदानं प्रीत्या दत्त शेषं विभाजयेदिति वदन् विभाज्यबाहुल्यविषयमेतदिति दर्शयति । तदबाहुल्यविषये तु ऋक्थवद्ग्रहणमपि विभाज्यमित्यजीवद्विभागप्रकरणे दार्शितम् ।

स्मृच. २७३

× पमा., सवि. दावद्भावः । सेतु. दागतम् ।

(१) व्यक.१४५ दान (दत्त); स्मृच.२७३ पू.; विर. ४९६ ऋण (ऋक्थ) दान (दत्त); पमा.५५७ तु (च) पू.; रत्न.१४५; व्यनि.ऋण प्रीति (रिक्थ प्रति) भाज (भाव); व्यम.५४ व्यकवत्, पू; विता.३३८ व्यकवत्, पू.; समु. १२८ व्यकवत्.

× पमा., स्मृचगतम् । विचि. स्मृचवत् स्मृसावच्च भावः । सवि. स्मृचगतम् ।

* दात. (पृ.१९०) स्मृचगतम् ।

+ शेष स्मृचगतम् ।

(३) ऋक्थं प्रीतिप्रदत्तं चेति, पित्रा यदृक्थं कस्मैचित् प्रीत्या दातुं प्रतिश्रुत, तत्प्रीतिप्रदत्त, तद्दत्त्वाऽवशिष्ट विभजनीयम्। आ चतुर्थादिति, 'त्रयाणामुदक कार्य त्रिषु पिण्डः प्रवर्तते' इति वचनाद्यो यस्य पिण्डदानेनोपकरोति, स तस्य विभज्य धनं गृह्णीयादित्यर्थः। हलायुधस्तु यस्मै प्रतिश्रुत तमारभ्य चतुर्थत्व विवक्षितमित्याह। *विर.४९६

(४) आ चतुर्थात्परतो दायनिवृत्तिमाह 'रिक्थ प्रतिप्रदान तु दत्त्वा शेषं विभाजयेत्। आ चतुर्थात्तु तद्ग्राह्य क्रमेणैव तु तत्सुतैः॥' प्रतिप्रदानशब्देन ऋणमुच्यते। पूर्वोक्तचतुर्थपुरुषपर्यन्त सापिण्डय पितृपितामहप्रपितामहेषु मृतेषु द्रष्टव्यम्। तेषु जीवत्सु पूर्वेषा त्रयाणा सापिण्डयात् सप्तपुरुषावधि सापिण्डय भवति। एतदभिप्रायेण 'तृतीयः पञ्चमो वाऽपि सप्तमो वाऽपि यो भवेत्। तदन्वयस्यागतस्य दातव्या गोत्रजैर्महो॥' *व्यनि.

(५) प्रदत्त प्रतिश्रुतम्। व्यम.५४

देवलः

अविभक्तानां पितृतो भागकल्पना आ चतुर्थात, अग्रे समभागः

[1]अविभक्तविभक्तानां कुल्यानां वसतां सह।
भूयो दायविभागः स्यादा चतुर्थादिति स्थितिः॥
तावत्कुल्याः सपिण्डाः स्युः पिण्डभेदस्ततः परम्।
सममिच्छन्ति पिण्डानां दायार्थस्य विभाजनम्॥

(१) आ चतुर्थाद्दायादार्थस्य विभागः पिण्डदातृत्व च मन्वादय इच्छन्तीत्यर्थः। तथा च स एव—अविभक्तेति। अविभक्तविभक्तानां अविभक्तधनानां विभिन्नसततिजातानां कूटस्थकुल्यानां भूयश्चिरं सहवसतां आ चतुर्थात् कूटस्थप्रपौत्रपर्यन्त दायधनविभागः स्यादित्यनेकसततिकदायविभागमर्यादेयमित्यर्थः। स्मृच.२७९

(२) अयमर्थः। अविभक्तानामेव वा विभक्तानां सहवसतां समृष्टानां वा पुनर्विभागो भ्रातृतत्सुततत्सुतपर्यन्तमेव, तत्सुताच्चतुर्थान्निवर्तते इति। एतच्च यदा स्वविषयो विभागार्थिना अभुज्यमानोऽपरेण तु तद्देशस्थितेन भुज्यमानस्तदा। +विर.४८२–४८३

(३) बीजिचतुर्थमभिव्याप्य दायविभागः।
×विचि.२०४

(४) असकुल्या असपिण्डाः, सापिण्डये सत्येव दायविभागः। तेन पञ्चमस्य सापिण्डयाभावाद्दायविभागो नास्ति। व्यनि.

(५) 'पित्र्यमशमिति कात्यायनोक्तेः पितृद्वारको भाग इति सूचितम्। व्यप्र.४४९

(६) अविभक्तविभक्तानां वृद्धप्रपितामहतत्पुत्राणा च समृष्टानामित्यर्थः। इद च समदेशस्थितपरम्। देशान्तरस्थस्तु पञ्चमादिरपि लभत एव। व्यम.४५

सवर्णापुत्राणां समो विभागः

[1]विधिरेष सवर्णानां बहूनां समुदाहृतः।
एक एव सवर्णः स्यात् दायोऽत्र न विभज्यते॥

(१) मध्यगद्रव्यस्वामिनः एकस्यैव दायविभागो देवलेन प्रतिषिध्यते—एक एवेति। सवर्णासवर्णभ्रातृविषये क्वचिद्देशे दायो न विभज्यते इति दर्शयितु सवर्णः स्यादित्युक्तम्। स्मृच.२६३

(२) उक्तो विधिः सवर्णासु जातानामेव। न भिन्नजातीयस्त्रीजातानां भ्रातृणा सवर्णासु जातानामेकजातीयाना न तत्र दायवैषम्यमिति। व्यनि.

* शेष दागतम्।

(१) **अप.**२।१२०, **व्यक.**१४३, **स्मृच.**२७९; **विर.**४८२; **स्मृसा**५६; **पमा.**४९६, **रत्न.**१४१, **विचि**२०४, **व्यनि.**क्वचि (क्वं वि), **दात.**१९०, **चन्द्र.**७४, **व्यप्र.**४४९; **व्यम.**४५; **विता.**३१६; **बाल.**२।१३५ (पृ.१८७); **सेतु.**८२; **विभ**४८ सह (सदा). ८१, **समु**१३४; **विच.**९४ स्थितिः (स्मृतिः)

(२) **अप**२।१२०; **व्यक**१४३; **स्मृच.**२७९; **विर.**४८२ स्तनः परम् (स्वनन्तरम्); **पमा.**४९६ पू.; **व्यनि.**तावत्कु (नासकु) स्ततः (स्वतः) यार्थ (यादार्थ), **विभ.**४८ विरवत्; **समु.**१३४.

+ स्मृसा. पारिजातमते प्रथमार्धव्याख्यान विरगतम्। विता. विरगतम्। × शेष विरगतम्। बाल. विचिगतम्।

(१) **अप.**२।१२०; **व्यक.**१४३; **स्मृच.**२६३ उत्त.; **व्यनि.**; **समु.**१२७.

विभाज्याविभाज्यविवेकः

गौतमः

विद्याधनविभागविचारः

स्वयमर्जितं अवैद्येभ्यो वैद्यः कामं न दद्यात् ।

(१) असाधारणधनशरीरव्यापारार्जितं स्वयमर्जितं अविद्वद्भ्यो दातुमनिच्छन् न दद्यात् विद्वद्भ्यः पुनर्दद्यादेव । एतच्च विद्याधनमात्रविषयम् । ×दा.१०८

(२) विद्यामधीत इति वैद्यः, स्वयमर्जित विद्यारहितेभ्यो भ्रातृभ्यः काम न दद्यात् । अदानेऽपि न प्रत्यवायो दाने त्वभ्युदय इति । गौमि.

(३) यत्तु पितुर्द्रव्यमनुपन्नता स्वयमुपात्त भवति, वैद्यग्रहणाद्वा प्रतिग्रहादिना, तदितरेभ्यः काममिच्छातो न दद्यात् । मभा.

(४) गौतमस्त्वविभाज्यविद्याधनेष्वशदानमर्जकेच्छया क्वचिदाह—स्वयमार्जनमिति । *स्मृच.२७५

(५) विद्याशब्देन विद्यास्थान गृह्यते । विद्या वेत्तीति वैद्यः । रत्न.१४७

अविद्यार्जितधनविभागविचारः

अवैद्याः समं विभजेरन् ।

(१) यदा तु सर्वे भ्रातरो मूर्खाः कृष्यादिनोपार्जयेयुस्तदा सम विभजेरन् । वैद्येनापि कृष्यादिना यदर्जितं न विद्यया लब्ध यदि पितृद्रव्याविरोधि तत्र साम्यमेव । तत्र सूत्रद्वयमपि चैतद्भ्रातृविषयमेव । पितरि तु जीवति विदुषाऽविदुषा वाऽविभक्तेनार्जितं पितुरेव । 'भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥' इति मनुः । गौमि.

(२) अर्थसिद्धमपि चैतदुच्यते नियमार्थम् । ×मभा.

(३) अविद्यास्तद्धनासाधारण्यप्रयोजकविद्याशून्याः । विर.५०८

अविभाज्यद्रव्यविशेषाः

उदकयोगक्षेमकृतान्नेष्वविभागः ।

(१) उदकं कूपादि । योगक्षेमाविष्टापूर्ते । तथा च लौगाक्षिः 'योगः पूर्त क्षेम इष्टा इत्याहुस्तत्त्वदर्शिनः । अविभाज्ये तु ते प्रोक्ते शयन चान्नमेव च ॥' इति । कृतान्ने तूत्सवादिषु कल्पिते प्रभूतेऽपि । एतेषु विभागो न कर्तव्यः । यथावस्थितेष्वेव सोदर्यानुरूपेण भोगः । गौमि.

(२) कृतग्रहणात्तण्डुलादौ न दोषः । एतेषु विभागो नास्ति । तत्र शयनवत् तण्डुलादीन्येकस्यैव दातव्यानीति केचित् । जेष्ठस्य कनिष्ठस्य वेच्छन्ति । अन्यानि समुदाय एव स्थाप्यानीति द्रष्टव्यम् । ×मभा.

स्त्रियोऽविभाज्याः.

स्त्रीषु च संयुक्तासु ।

× शेष गौमिगतम्

(१) **गौध.**२८।४७; **अप.**२।११९, **मभा.**, **गौमि.** २८।४४.

(२) **गौध.**२८।४८; **मिता.**२।११९ सु + (अविभागः); **अप.**२।११९; **मभा.**; **गौमि.**२८।४५, **विर.**५०४ (अविभाग. स्त्रीषु सयुक्तासु), **पमा.**५६३ (च०) शेष मितावत्; **मपा.**६८७ पमावत्; **व्यप्र.**५५७ (स्त्रीष्ववरुद्धासु न विभागः); **व्यम.**५७ सयुक्तासु (ससक्तास्वविभागः); **विता.**३५२ मितावत्; **समु.**१३३ मितावत्.

× विता. दागतम् । * पमा. स्मृचगतम् ।

(१) **गौध.**२८।३१; **विश्व.**२।१४४ म (मा); **दा.**१०८, **व्यक.**१४५, **मभा.**विश्ववत्, **गौमि.**२८।२८; **स्मृच.**२७५ (स्वयमार्जनं वैद्यो वैद्येभ्यः काम दद्यात्), **विर.**५०० वैद्येभ्यो (द्याय) काम न (नाकामो), **पमा.**५६० अवै (चैव वै) (न०); **रत्न.**१४७ अवैद्येभ्यो वैद्यः (वैद्यो वैद्येभ्य.) (न०); **दानि.** ३ रत्नवत्; **व्यम.**५६ रत्नवत्, **विता.**३४१; **बाल.** २।११९, **समु.**१३२ म (मा) अवै (वै) (न०)

(२) **गौध.**२८।३२; **विश्व.**२।१४४; **मभा.**; **गौमि.** २८।२९; **विर.**५०८ वै (वि); **विचि.**२१४ वै (वि) विभ (भ); **विभ.**९३ (अविभाज्य सम भजेयु.).

(१) अवरुद्धास्तु पित्रा स्वैरिण्याद्याः समा अपि पुत्रैर्न विभाज्याः। *मिता. २।११९

(२) याश्च स्त्रियो दास्यो भ्रात्रादिषु केनचित्सयुक्ता उपभोगपरिगृहीतास्तास्तस्यैव। यद्यन्याः सन्त्यन्यत्रान्येषा भागः। यदि न सन्ति तदा द्रव्येण साम्यमापादनीयम्। यदा पुनरेकैव दास्यसयुक्ता च तदा पर्यायेण कर्म करोतु। गौमि.

(३) ननु च दोषाभावः कस्मान्न गृह्यत इति चेत्—'प्रतिलोमे वधः पुसाम्' इत्यनेन प्रायश्चित्तश्रवणात्। तासु च पुत्रैर्न विभागः। तासां वृद्धानामशनाच्छादन दातव्य, अन्याभिर्गन्तव्यमित्यभिप्रायः। मभा.

वसिष्ठः

स्वार्जिते ब्रह्मशित्वम्

[1]येन चैषां स्वयमुत्पादितं स्यात् स ब्रह्मशमेव हरेत्÷।

(१) पितृद्रव्यविरोधेन यदर्जित तद्विभजनीयमिति स्थित तत्रार्जकस्य भागद्वयम्। +मिता.२।११९

(२) विभाज्यविद्याधनेऽपि भागाधिक्यमर्जकस्यास्ति—येनेति। स्मृच.२७५

(३) यदा बहूना मध्ये साधारणधनमाश्रित्य एक एव कृष्यादिनार्जयति, तदा तस्य द्वावशौ, शेषाणामेकैकः। +विर.५०८

(४) एषा दायार्हपितृभ्रात्रादीनाम्। मपा. ६४७

(५) इति वसिष्ठवचनात्पिता भजते। इद च विद्यादिष्वपि योज्यम्। व्यप्र.४५०

विष्णुः

पितृदत्तमविभाज्यम्

[2]मातापितृभ्यां यद् दत्तं तत्तस्यैव धनम्।

न विभक्तजस्तत्रेष्ट इति विभक्तजस्य स्वं न भवतीत्यर्थः। पित्रा यद्दत्त तत्तस्यैवेति न्यायप्रतिपादनात् विभागात्प्राक् यद्दत्त तत्तस्यैवेति सिद्धम्। सवि.३७७

पैतामह नष्टमुद्धृत स्वार्जित च पिता न विभजेत्

[3]अनुपन्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत्।
स्वयमीहितलब्धं तन्नाकामो दातुमर्हति॥
[4]पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात्।
न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम्॥

भ्रातृविभागशेषमाह—अनुपन्नन्निति। पितृद्रव्य अनुपन्नन् पितृधनमनुपयुज्य यच्छ्रमेण कृषिसेवादिक्लेशेनार्जयेत्, यच्च स्वयमीहित वाञ्छित सन्मित्रादिभ्यो लब्ध तदकामोऽनिच्छन् भ्रात्रादिभ्यो दातु नार्हति। तदाह योगीश्वरः—पितृद्रव्याविरोधेनेत्यादि। व्यासोऽपि—'विद्याप्राप्त शौर्यधन यच्च सौदायिक भवेत्। विभागकाले तत्तस्य नान्वेष्टव्य सनाभिभिः॥' इति। अनुपन्नन्निति शत्रा यदुपार्जने पितृद्रव्यानुपयोगस्तस्याविभाज्यत्वमुक्त, न तु द्रव्यापरिपुष्टेनार्जितस्य इति व्याख्यानमयुक्तम्। 'परभक्तोपयोगेने'ति वक्ष्यमाण-

---

* पमा., मपा., व्यम., विता. मितागतम्।

÷ दा. यथाश्रुतं व्याख्यानम्।

+ पमा., व्यम. मितागतम्।

(१) **वस्मृ.**१७।४५ (स०); **मिता.**२।११९ त्पादि (पार्जि) हरेत् (लभेत); **दा.**४२ स्वय (स) स (सोऽपि); **स्मृच.**२७५ त्पादि (पार्जि); **व्यक.**१४७; **विर.**५०८; **स्मृसा.**५६ (येन चैषां यत्स्वयमर्जित तद् ब्रह्मशाहरेत्): ६२ स्मृचवत्; **पमा.**५६० स्वयमुत्पादि (यदुपार्जि) (स०) हरेत् (लभेत); **मपा.**६४७ मितावत्; **विचि.**२०२ (येन तेषा यत्स्वयमुपार्जित स तद् ब्रह्मशाहरेत्):२१४ ब्रह्मशमेव (तद् ब्रह्मशा); **दानि.**३,४ चैषा (येषा) शेष स्मृचवत्; **व्यप्र.**४५० मितावत्; **व्यउ.**१४४ चै (वै) शेष मितावत्; **व्यम.**५६ स्मृचवत्; **विभ.**४२:९३ त्पादि (पार्जि) ब्रह्मशमेव (तद् ब्रह्मशमा); **समु.**१२२ मुत्पादि (मार्जि).

+ विचि. विरगतम्।

(१) **सवि.**३७७.

(२) **विस्मृ.**१८।४२; **दा.**१०५,११३ मनुविष्णू; **विर.**५०१-५०२ जैयेत् (जितम्) मनुविष्णू, **विचि.**२१९ तन्ना (च ना) शेष विरवत्, मनुविष्णू, **व्यनि.**तन्ना (तु ना) मनुविष्णू; **विता.**३४१ यदु (य उ) मनुविष्णुनारदाः.

(३) **विस्मृ.**१८।४३ पिता (यदा); **दा.**३२ मनुविष्णू; **विर**४६१ वाप्त (वाप्य) मनुविष्णू, **दात.**१६५ मनुविष्णू; **रत्न.**१४१ वाप्त (वाप्य) त्पुत्रै (त्सुतै); **व्यम.**४२ मनुविष्णू; **विता.**३२० विरवत्, मनुविष्णू; **सेतु.७२** मनुविष्णू; **विच.३९** मनुविष्णू.

विद्याप्राप्तलक्षणविरोधात्तस्य चाविभाज्यमात्रोपलक्षणत्वात् अन्यथैकस्मिन् व्यासवाक्ये समभिव्याहारानुपपत्तेः। स्वस्मात् पितृद्रव्यापरिपुष्टेनार्जितस्यैवाविभाज्यत्व युक्तम्। पितृद्रव्य च साधारणधनमात्रोपलक्षण, तेन भ्रातृणामपि तथाविधेनार्जितस्यैवाविभाज्यत्वमित्यलम्।

पितृविभागशेषमाह — पैतृकमिति। यत्पैतृक पितृधनसबन्धि धन नष्ट प्रयुक्त वा पित्रा चासामर्थ्यानानुद्धृत पुत्रः स्वसामर्थ्यात् उद्धरेत्। यच्च स्वय विद्याशौर्यादिनार्जित तदकामः स्वपुत्रैः सह न विभजेत्। अकाम इति वचनात् कामनया तु दद्यादेव। अत एवोक्त 'तस्य स्वेच्छा स्वयमुपार्जितेऽर्थे' इति। एव भ्रातृविभागेष्वविभाज्यमुक्तम्। वै.

अविभाज्यद्रव्यविशेषा

वस्त्र पत्रमलङ्कारः कृतान्नमुदकं स्त्रियः।
योगक्षेमप्रचारं च न विभाज्यं प्रचक्षते॥

इदानी सर्वविभागेष्वविभाज्यमाह— वस्त्रमिति। वस्त्र यद्येन परिहित, पत्र वाहन यद्येनारूढ ऋणादिपत्र वा, अलङ्कारः कुण्डलमुद्रिकादिर्यो येन धृतः, कृतान्न मोदकापूपादि, उदक तदाधारः कूपादिः, स्त्रियो दास्योऽवरुद्धाश्च, योगक्षेम इष्टापूर्ते राजादयो वा, प्रचारो गृहप्रवेशादिमार्गः, पुस्तक प्रसिद्धं एतत्सर्वमविभाज्यम्। चकारात् धर्मार्थं उद्धृत च धन 'धन पत्रनिविष्ट तु धर्मार्थं यन्निरूपितम्। उदक चैव दाराश्च निबन्धो यः क्रमागतः॥' इति कात्यायनीयात्। पत्रनिविष्ट धर्मार्थत्वेन लिखितम्। अयमभिसधिः। वस्त्र समानजातीय सर्वेषा चेद्यथावस्थमेव स्थाप्यान्यतरनिबन्धेन विपरिवर्तनीयम्। विषमधृतं बहुमूल्यादिकल्पनया विभाज्यम्। एव वाहनालङ्कारावपि द्रष्टव्यौ। ऋणादिपत्र तु सम चेत् द्रव्यसाम्येन विभाज्यम्। विषम तु द्रव्यद्वारैव विभाज्य न स्वरूपतः कार्यासक्षमत्वात्। कृतान्न तु यावदुपयोग भोक्तव्यमेव न सममपि स्वरूपतो विभाज्यम्। कूपादिः समश्चेत् स्वरूपेण विभाज्यो विषमस्तु पर्यायेण जलोद्धारणादिनोपभोक्तव्यः। स्त्रियोऽपि समाश्चेद्विभाज्याः, विषमाः पर्यायेण कर्म कारयितव्याः। अवरुद्धास्तु समा अपि न विभाज्याः। 'स्त्रीषु च संयुक्तास्विति गौतमस्मरणात्। सयुक्ताना विभागनिषेधाद्विवाहितानामर्थसिद्ध एवासौ। इष्टापूर्ते अविभक्तदशाया येन कृते तस्यैव नान्येन तन्मूल्य पाव (दाप) नीयम्। यथाह लौगाक्षिः— 'क्षेम पूर्त योगमिष्टमित्याहुस्तत्त्वदर्शिनः। अविभाज्ये च ते प्रोक्ते शयनासनमेव च॥' राजादयस्तस्य रूपेणाविभाज्याः। किं तु तदुत्पन्नो लाभ एव विभाज्यः सोऽपि विषमश्चेत् 'योगक्षेमवतो लाभः समत्वेन विभज्यते' इति बृहस्पतिस्मरणात्। प्रचारोऽपि सति संभवेऽन्य एव कार्यो, न तु स एव भित्यादिना छेत्तव्यः किं तु सर्वैस्तूपभोग्यः। पुस्तकमपि सम विभाज्यम्। विषम पर्यायेणाध्येतव्यम्। न तु द्वेधा कार्य स्वरूपनाशापत्तेः। वै.

स्त्र्यलङ्कारोऽविभाज्य.

पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत्।
न तं भजेरन् दायादा भजमानाः पतन्ति ते॥

गृहपतिना स्वपत्न्यै स्नुषाभ्यो वा विवाहकाले योऽलङ्कारो दत्तः ताभिर्धृतः परिहितो भवेन्न तथैव स्थापितः त विभागकाले दायादाः पुत्रभ्रात्रादयो जीवति पत्यौ न भजेरन् किंतु यस्याः सोऽलङ्कारः तत्पतिभाग एव त दद्युः। यथा सैव त परिदध्यात्। न तु पत्यौ जीवति यो धृतः स मृतेऽप्यविभाज्य इत्यदृष्टार्थतापत्तेः। एतेन सर्वथाऽसावविभाज्य इत्यपि निरस्तम्। अथालङ्कार सौन्दर्यलोभेन भजन्ते तदा पतिता भवन्ति। जीवतीति विशेषणात् मृते तस्मिन्नन्येनापि ग्रहणे न दोषः। वै.

---

(१) **विस्मृ.**१८।४४ उत्तरार्धे (योगक्षेम प्रचारश्च न विभाज्य च पुस्तकम्); **दा.**१२६ क्वारः (क्वारं) मनुविष्णुः **विर.**५०४ दावत्, मनुविष्णुः; **त्र्यनि.**पत्र (छत्र) क्वारः (क्वारं) मनुविष्णुः; **विच.**८९ प्रचार (प्रचारः) मनुविष्णु.

(१) **विस्मृ.**१७।२२, **विर.**५०९ मनुविष्णुः; **स्मृसा.** ६२ मनुविष्णुः; **विचि.**२१७ स्त्रीभिर (कश्चिद) मनुविष्णुः; **विता.**४४६ न्ति ते (न्त्यधः) मनुविष्णुः; **विच.**१०८ विचिवत्, मनुविष्णु.

शंखः शंखलिखितौ च

अविभाज्यद्रव्यविशेषाः

न वास्तुविभागो नोदकपात्रालङ्कारोपयुक्तस्त्रीवाससाम् ।
अपां प्रचाररथ्यानां विभागश्चेति प्रजापतिः ।

(१) पितरि जीवति यस्मिन् वास्तौ येन गृहोद्यानादिकं कृत तत्तस्याविभाज्यं पितुरप्रतिषेधेनानुमतत्वात् । *दा.१२८

(२) वास्तु गृह, उदपात्रं लौहवारिभाजन, अलङ्कारोऽङ्गन्यस्त एव, अनुयुक्तमुपभुक्तं, तेनैकोपभोगविषयस्त्रीवासस न विभाग इति प्राप्यते । अपा प्रचारवर्त्मना जलप्रचरणमार्गाणाम् । विर.५०४

(३) वास्तु गृहम् । अत्र क्षेत्रगृहयोरविभाज्यत्वाभिधानमत्यल्पे बहुभिर्विभज्य ग्रहीतुमयोग्ये एकस्मिन् गृहक्षेत्रादौ वेदितव्यम् । तत्तु परिवर्तनादिद्वारा एकस्मै सर्वेदातव्यम् । अथवा प्रतिग्रहलब्धक्षेत्रादिक ब्राह्मणीपुत्रेण क्षत्रियापुत्रादिभिः सह न विभाज्य इत्येवम्परोऽय क्षेत्रादेर्विभाज्यत्वनिषेधः । 'न प्रतिग्रहभूर्देया' इत्यादिवचनात् । रत्न.१४९

पूर्वनष्टभूम्युद्धारकर्तुश्चतुर्थभागोऽधिकः

पूर्वनष्टां तु यो भूमिमेकश्चेदुद्धरेच्छ्रमात् ।
यथाभागं भजन्त्यन्ये दत्त्वांशं तु तुरीयकम् ॥

(१) तत्र क्षेत्रे तुरीयाशमुद्धर्ता लभते शेषं तु सर्वेषा सममेव । *मिता.२।११९

(२) यद्यपि असाधारणधनशरीरव्यापारमेवकारेण दर्शयति तथापि उद्धर्त्तुर्नासाधारण्यं किंतु प्रतिकृतभूमेश्चतुर्थांशोऽधिकस्तस्मै दातव्यः भूमिपदसामर्थ्यात् तदविवक्षाकारणाभावात् । दा.१२९

(३) क्रमादभ्यागतानां पुत्रपौत्रादीना मध्ये यः पूर्वनष्टां परापहृता भूमिं स्वशक्त्याऽभ्युद्धरेत्तस्मै तच्चतुर्थांशं दत्त्वा शेषमुद्धारकेण सहान्ये विभजेरन्नित्यर्थः । केचिदभ्युद्धृत त्वमेव गृहाणेत्यन्यानुमतिमन्तरेणाभ्युद्धृतभूम्यादिसर्वद्रव्यविषयमेतद्वचन, याज्ञवल्क्यवचन ('क्रमादभ्यागतमिति) तु अन्यानुमत्याऽभ्युद्धृतभूम्यादिसर्वविषयमिति वदन्ति । यदत्र युक्त तद्ग्राह्यम् । स्मृच.२७६

(४) एतद्वचन स्मृतिमहार्णवकामधेनुपारिजातप्रभृतिषु अलिखनादयुक्तमेवेति रत्नाकरः । तन्न दायभागमिताक्षराप्रभृतिधृतत्वात् । ×दात.१७७

कौटिलीयमर्थशास्त्रम्

साधारणद्रव्यानधीनस्वार्जितमविभाज्यम् । अविभाज्यद्रव्यविशेषाः । ऋणरिक्थविभागः समः ।

स्वयमार्जितमविभाज्यं अन्यत्र पितृद्रव्यादुत्थितेभ्यः ।

उदपात्राण्यपि निष्किञ्चना विभजेरन् इत्याचार्याः । छलमेतदिति कौटल्यः । सतोऽर्थस्य विभागो नासतः ।

ऋणरिक्थयोः समो विभागः ।

स्वयमार्जित, अविभाज्यं भ्रातृविभागानर्हं भवति ।

---

* दात. दागतम् ।

(१) **दा.१२७** रोप (रानुप); **अप.२।११९** वास्तु (चास्ति) नोदक (अन्नद) रोप (रसं) अपां प्रचाररथ्याना (उपचाराथ्यानां); **व्यक.१४६**; **विर.५०३** नोदक (नोद) रोप (रानु) रथ्या (वर्त्म); **रत्न.१४८** नोदक (नोद) (स्त्री०); **दात.१७५**; **व्यम.५७** नोदक (नोद) (स्त्री०) (अपा...पतिः०); **विता.३५३** नोदक (नोद) स्त्रीवाससाम् (वाससी) (अपां...पतिः०) शंख:; **विच.९१** रथ्या (वर्त्म) (प्रजापतिः०).

(२) **मिता.२।११९** पूर्व (पूर्व) च्छ (क्त) भजन्त्यन्ये (लभन्तेऽन्ये); **दा १२९** कश्चेदु (क एवो) दत्वाश तु (दत्वा भाग); **अप.२।११९** श्चेदुद्धरेच्छ्र (श्चाभ्युद्धरेत्क) थाभाग (थांश तु) भजन्त्यन्ये (लभन्तेऽन्ये) ऋष्यशृङ्गः; **स्मृच.२७६** श्चेदुद्धरेच्छ्र (श्चाभ्युद्धरेत्क) भजन्त्यन्ये (लभन्तेऽन्ये); **पमा.५५८** मिमेकश्चे (मिं यः कश्चि) भज (लभ); **मपा.६८४ भजन्त्यन्ये (लभन्तेऽन्ये);**

* पमा., मपा., व्यप्र., व्यम. मितागतम् ।

× शेष मितागतम् ।

रत्न.१४६ च्छ्र (त्क) भजन्त्यन्ये (लभन्तेऽन्ये); **नृप्र.३७** मितावत्; **दात.१६६** तु (च):१७७ कश्चेदु (क एवो); **सवि.३६७** रत्नवत्; **व्यप्र.५५७** रत्नवत्; **व्यम.५५** नष्टां (निष्ठा) च्छ्र (त्क) भज (लभ); **विता.३४१** भज (लभ); **राकौ.४४९** च्छ्र (त्क); **सेतु.७१** तु यो (च यो) श्चेदु (दा वो); **समु.११३** रत्नवत्; **विच.५९,८९** तु यो (च यो). सर्वग्रन्थेषु शास्त्रस्येद वचनम्.

(१) **कौ.३।५.**

तत्रापवादः—अन्यत्र पितृद्रव्यादुत्थितेभ्य इति । पितृद्रव्योपाश्रयार्जितद्रव्यव्यतिरेकेण । पितृद्रव्योत्थितानि तु पितृद्रव्यवद् विभाज्यान्येव ।

उदपात्राण्यपीति । जलाहरणार्थानि पात्राण्यपि, निष्किञ्चनाः अर्थहीनाः विभजेरन् । इत्याचार्या आहुरिति शेषः । इदमाचार्यवचन छलदुष्टमित्याह—छलमेतदिति कौटल्य इति । तदुपपादयति—सतोऽर्थस्य विभागो नासत इति । यदुदपात्ररूपैरर्थैर्विभागयोग्यैरुपेताः न तर्हि ते निष्किञ्चनव्यपदेशमर्हन्ति, यदि निष्किञ्चनास्तदा न सोदपात्रा भवितुमर्हन्ति । निष्किञ्चनाश्च सोदपात्राश्चेति व्याहतमित्यर्थः । एव च वदतः आचार्यकौटल्यस्यायमभिप्रायः—सारस्य फल्गुनो वार्थमात्रस्य विभागे न्यायप्राप्ते उदपात्राणामविभाज्यत्वशङ्कैव कुतस्येति व्यर्थस्तद्विभागोपदेशः, प्रत्युत महाधनान् प्रति तद्विभागस्य तदिच्छया प्राप्नुवतोऽशक्यप्रतिषेधस्य प्रतिषेधोऽपि ततः प्रतीयत इत्यनिष्ट चेति ।

ऋणरिक्थयोः समो विभाग इति । ऋण 'सवृद्धिक प्रत्यर्पयामी'ति परिभाष्योत्तमर्णाद् गृहीत रिक्थ अधमर्णाय वृद्ध्यर्थ प्रयुक्तं तयोरुभयोः पितृकृतयोस्तुल्यो विभागः कार्यः । श्रीमू.

मनुः

अविभाज्यद्रव्यविशेषाः । स्त्र्यलङ्कारश्चाविभाज्यः ।

अँजाविकं सैकशफं न जातु विषमं भजेत् ।
अजाविकं तु विषमं ज्येष्ठस्यैव विधीयते ॥

(१) एकशफमश्वाश्वतरगर्दभादयः । विभागकाले समसख्यया यद्विभक्तुमजाविकं न शक्यते ज्येष्ठस्यैव स्यात्र तदन्यद्रव्याशापातेन समता नयेद्विक्रीत वा ततस्तन्मूल्य दापयेत् । अजाविकमिति । पशुद्वन्द्वविभापैकशब्दावः) *मेधा.

(२) विषम भ्रातृसंख्यापेक्षयाऽन्यसख्यम् । अप.२।११७

(३) पशुषु गुणवज्ज्येष्ठस्यैव विषम भाग विदधत्तदन्येषा तदभावमाह—अजाविकमिति । मच.

(४) अल्पमूल्यं विषम ज्येष्ठस्य । विता.३५२

(५) 'एकाधिक हरेज्ज्येष्ठ' इत्यादिनोक्तस्य विषम विभागस्य क्वचिद्विषयेऽपवाद श्लोकद्वयेनाह—अजाविकमिति । एकशफमभिन्नखुरमश्वादिक न विषम भजेत् विभजेत्किन्तु सममेव विभजेत्, विषमसख्यया विभक्तुमशक्यं, यथा त्रयाणा भ्रातृणामेक द्वे चत्वारीत्यादि सख्या या ज्येष्ठस्यैव विधीयते । कालतो विभज्य भोगेन वा विक्रीय मूल्य विभज्य वाश स्वीकुर्यादित्यर्थः । नन्द.

पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत् ।
न तं भजेरन् दायादा भजमानाः पतन्ति ते ॥

(१) अलङ्कारो धृतो भवेदिति विशेषणोपादानादधृताना विभाज्यत्वं गम्यते । ×मिता.२।११९

(२) सततधृतालङ्कारविषयमेतत् । अप. २।१४३

(३) धृतः स्वातन्त्र्येणेति शेषः । स्वातन्त्र्येण धृतो योगोपधिराहित्येन स्त्रीधनत्वनिश्चयो भवति । पूर्वार्धस्य च निश्चितामिश्रितस्त्रीधनकथनार्थत्वात् स्वातन्त्र्येणेति विशेषेण भाव्यमिति गम्यते । दायादा दौहित्रादयः । स्मृच. २८४

(४) पत्यौ जीवति धृतः पत्या तासा भूषणमात्रार्थ दत्तो वाऽदत्तस्तमपि तस्या जीवन्त्या न पुत्रा भजेरन् मृतायां तु भजेरन्नेव । मवि.

---

* मवि., ममु., विर. मेधागतम् ।

× मवि. मितागतम् ।

(१) **मस्मृ.**९।११९; **मिता.**२।११९ तु विषम (सैकशफ), **अप.**२।११७ सैक (त्वेक); **व्यक.**१४५; **विर.**४९८ सैक (सैक) अजाविकं तु (अजाविक च); **मपा.**६८६ मितावत्; **रत्न.**१४८ मितावत्, उक्त.; **दानि.**४ मितावत्; **व्यम.**५७ मितावत्; **विता.**३५२ मितावत्; **राकौ.**४५० मितावत्; **विभ.**४१ भजे (चरे) शेष **विरवत्; समु.**१३३ मितावत्.

(१) **मस्मृ.**९।२००, **मिता.**२।११९,१४७; **अप.** २।१४३; **उ** २।१४।२ याज्ञवल्क्यः; **व्यक.**१४७ मनुविष्णू; **स्मृच.**२८४; **विर.**४०९ मनुविष्णू; **स्मृसा.**६२ मनुविष्णू; **पमा** ५६२(=) यः (यत्), **मपा.**६८६; **रत्न.**१६२; **विचि.** २१७ स्त्रीभिर (कश्चिद्) मनुविष्णू; **व्यनि.**पमावत्; **स्मृचि.** ३० बृहस्पतिः; **नृप्र.**३७; **दात.**१८४ विचिवत्, मनुविष्णू; **सवि** ३७२ स्मृतिः; **चन्द्र.**८०; **दानि.**४ भजे (विभजे); **व्यप्र.**५५८; **व्यम.**७०; **विता.**४४६ तन्ति ते (तन्त्यधः) मनुविष्णू; **राकौ.**४५० त (तद्); **विभ.**६० पू; **समु.**१३६ पमावत्; **विच.**१०८ विचिवत्, **मनुविष्णू.**

(५) भर्तरि जीवति तत्संमताभियोऽलङ्कारः स्त्रीभिर्धृतस्तस्मिन्मृते विभागकाले त पुत्रादयो न भजेरन् भजमानाः पापिनो भवन्ति । *ममु.

(६) पत्युरनुज्ञातेनाप्यदत्तोऽप्यलङ्कारो यो मण्डनार्थं धृतः, सोऽपि दायादैर्न हर्तव्यः इति मेधातिथिरिति प्रकाशः । ÷विर.५०९

(७) अत्र धृतत्वं नाम प्रीतिदानादिना प्रातिस्विकस्वत्वोत्पन्नत्वम् । मपा.६८६

(८) धृतः उत्सवादावेव धार्य इत्यायुपधिमन्तरेण दायादवञ्चनादिहेतु विना धृत इत्यर्थः । रत्न.१६२

(९) अलङ्कारस्यादत्तत्वेन अस्त्रीधनत्वाद्भर्तृधनत्वेन मृते भर्तरि पुत्राणा विभागे प्राप्ते तदपवादोऽनेन क्रियते । ×व्यनि.

(१०) धृत इत्यनेनाधृतस्य विभाज्यत्वमेव । पत्यौ जीवतीत्यनेन पतिजीवनचिह्नतया यत्र देशे यो धार्यते स न विभाज्य इति सूचितम् । व्यप्र. ५५८

(११) धृतो भर्त्रादीना तस्यै दत्तः स तया धृत इत्यर्थः । व्यम.७०

वस्त्रं पत्रमलङ्कारं कृतान्नमुदकं स्त्रियः ।
योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते ॥

(१) वस्त्रपत्रालङ्कारकृतान्नोदकानामेकत्व विवक्षितम्। पत्रं वाहन गन्त्रीशकटादि । अलङ्कारोऽङ्गुलीयकादि । वस्त्र सममूल्य न तु महार्घम् । उदक कूपवाप्यादि। स्त्रियो दास्यः । योगक्षेम यतो योगे क्षेमो भवति, मन्त्रिपुरोहितामात्यवृद्धाः वास्तु च चोरादिभ्यस्ततो रक्षा भवति । स्मृत्यन्तरे च पठ्यते 'वास्तुनि विभागो न विद्यते'। प्रचारं यत्र गावश्चरन्ति। प्रचक्षते इत्याह तेन यत्रैतत्केनोक्तं न ह्यत्र धर्मातिक्रमः कश्चिदस्तीति तदनुपपन्न दर्शयति, अदृष्टासु हि ते प्रतिषेधास्तदतिक्रमादधर्मो न स्यात् (?) । +मेधा.

(२) धृतानामेव वस्त्राणामविभाज्यत्व, यद्येन धृत तत्तस्यैव । पितृधृतवस्त्राणि तु पितुरूर्ध्वं विभजता श्राद्धभोक्त्रे दातव्यानि । अभिनवानि तु वस्त्राणि विभाज्यान्येव । पत्रं वाहनमश्वशिबिकादि, तदपि यद्येनारूढं तत्तस्यैव । पित्र्य तु वस्त्रवदेव । अश्वादीना बहुत्वे तु तद्धिक्रयोपजीविना विभाज्यत्वमेव। अलङ्कारोऽपि यो येन धृतः स तस्यैव । अधृतः साधारणो विभाज्य एव । कृतान्न तण्डुलमोदकादि तदप्यविभाज्य यथासंभवं भोक्तव्यम् । उदक उदकाधारः कूपादिः, तच्च विषम मूल्यद्वारेण न विभाज्य, पर्यायेणोपभोक्तव्यम्। स्त्रियश्च दास्यो विषमाः न मूल्यद्वारेण विभाज्याः पर्यायेण कर्म कारयितव्याः । अवरुद्धास्तु पित्रा स्वैरिण्याद्याः समा अपि पुत्रैर्न विभाज्याः । योगश्च क्षेम च योगक्षेमम् । योगशब्देनालब्धलाभकारणं श्रौतस्मार्ताग्निसाध्यं इष्ट कर्म लक्ष्यते । क्षेमशब्देन लब्धपरिरक्षणहेतुभूतं बहिर्वेदिदानतडागारामनिर्माणादि पूर्त कर्म लक्ष्यते । तदुभयं पैतृकमपि पितृद्रव्यविरोधार्जितमप्यविभाज्यम् । योगक्षेमशब्देन योगक्षेमकारिणो राजमन्त्रिपुरोहितादय उच्यन्ते इति केचित् । छत्रचामरशस्त्रोपानत्प्रभृतय इत्यन्ये । प्रचारो गृहारामादिषु प्रवेशनिर्गममार्गः सोऽप्यविभाज्यः । *मिता.२।११९

(३) वस्त्रमङ्गयोजित षड्क्तिपरिच्छदार्थं च । स्त्रियो दासीव्यतिरिक्ताः। योगक्षेमप्रचारं शय्यासनभोजनाचमनाद्युपयुक्तभाजनादीनि । दा.१२७

(४) अत्र पत्रशब्देन यानमुच्यत इति केषाञ्चिद्व्याख्यान तत्कात्यायनवचनविरुद्धम् । यच्च वस्त्रादीनामविभाज्यत्वमुक्तं तत्स्वरूपतः, मूल्यतस्तु विभजनीयमेव । अप.२।११९

---

* मच. ममुगतम् ।

÷ विचि., दात. विरगतम् । × नन्द. व्यनिगतम् ।

(१) **मस्मृ.**९।२१९; **मिता.**२।११९, **दा.**१२६ क्षेमं (क्षेम); **अप.**२।११९ न विभाज्य (विभाज्य न); **व्यक** १४६ दावत्, मनुविष्णू; **मभा.**२८।४८; **स्मृच.**२७७ दावत्; **विर.**५०४ दावत् ; **पमा.**५६२; **मपा.**६८५ दावत्, **रत्न.** १४८ दावत्; **व्यनि.**पत्र (छत्र) क्षेम (क्षेम); **स्मृचि** ३० म प्रवा (मप्रका); **नृप्र.**३७; **सवि.**३७१ पत्र (पुष्प) क्षेम (क्षेम), **दानि.**४ पत्र (पात्र) क्षेम (क्षेम), **व्यप्र.**५५७; **व्यम.**५७, **विता.**३५१-३५२ दावत्; **राकौ.**४४९ क्षार (क्षारः); **सेतु.** ६९ रं (रः) क्षेमं (क्षेम); **समु.**१४३; **विच.**८९ सेतुवत्; **नन्द.पत्र (पात्र).**

+ ममु., मच. मेधागत मितागत च ।

* पमा., मपा., सवि., व्यप्र., व्यम., विता. मितागतम्।

(५) स्त्रियो भार्या एकस्यैका अन्यस्य द्वे एवं वैपम्येऽपि। योगक्षेमं योगो राजादिलब्धो निबन्धादिः स्वयमुपात्तः, क्षेमः रक्षोपायः प्राकारेष्टकादिः। प्रचारो वर्त्म। यत्तु 'कृतान्न चाकृतान्नेन परिवर्त्य विभज्यत' इत्याद्युक्तं बृहस्पतिना तदतिप्रचुरकृतान्नादेरपि तन्मात्रधनैर्विभागः कार्य इत्येतत्। मवि.

(६) वस्त्रमविभक्तप्राप्तृतम्। 'वस्त्रं यज्ञाङ्गयोजित' इति कात्यायनस्मरणात्। पत्र पत्रारूढमृण 'धन पत्रनिविष्टम्' इति तेनैव व्यक्तमुक्तत्वात्। स्त्रियो दास्यः। उदकं स्वनिवेशस्थकूपवाप्याद्यम्भः। योगक्षेमशब्दौ लौगाक्षिणा व्याख्यातौ। 'क्षेम पूर्त योगमिष्टमित्याहुस्तत्त्वदर्शिनः। अविभाज्ये च ते प्रोक्ते ॥' इति।

अथवा योगक्षेमार्थमुपासितेश्वरसकाशात् यो रिक्थानां लाभः स एवात्र योगक्षेमशब्देनोच्यते। प्रचारशब्देन गोप्रचार उच्यते। कात्यायनेन 'गोप्रचारश्चेति' विशेषितत्वात्। अथवा प्रचारशब्देनाङ्गनादिकमुच्यते। अविभाज्य प्रचक्षते। विचारहीनाः केचनस्मृतिकारा इति शेषः। स्मृच. २७७

(७) हलायुधस्तु योगो योगहेतुर्नौकादिः, क्षेमः क्षेमहेतुर्दुर्गादीत्याह। +विर.५०४

(८) पात्र उदपात्रम्। योगक्षेम इति अप्राप्तप्रापणं योगः प्राप्तस्य रक्षण क्षेमः, अत्र योगक्षेमशब्देन योगक्षेमहेतवो विवक्षिताः, योगहेतवो याज्याः शिष्यादयः, क्षेमहेतवो द्वारग्रामपालादयः, उभयहेतवो ग्रामपत्तनाधिपादयस्तेऽपि पूर्ववदेव। स्थापनीया न विभाज्याः। प्रचारः क्षेत्रारामादिप्रवेशयोग्यो मार्गः सोऽपि सर्वैः प्रचरितव्योऽनुभावयितव्यो न विभाज्यः। ÷नन्द

विद्याधनविभागविचारः

यत्किंचित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति।
भागो यवीयसां तत्र यदि विद्यानुपालिनः×॥

(१) पितृक्रमागतान्मित्राद्राजामात्यपुरोहितादेर्वा क्षेत्राद्वा कयाचिद्युक्त्याऽधिकोत्पत्तिं जनयेत्तत्सर्वेषां साधारणम्। नैव मन्तव्य ममैतद्बुद्ध्या पित्रा प्रागनुपार्जितं मयैतल्लब्ध ममैवैतदिति। विद्यानुपालिन इति वचनात् विद्याजीविनां शिल्पिकारुकप्रभृतीनामेष विधिर्वैद्यनटगायनादीनाम्। मेधा.

(२) तस्यायमर्थः–'पितेव पालयेत् पुत्रान् ज्येष्ठो भ्रातॄन् यवीयसः। पुत्रवच्चानुवर्त्तेरन् ज्येष्ठे भ्रातरि धर्मतः॥' एतस्माद्वचनात् पितापुत्रवदवस्थानात् पित्रर्जित इवानुपघातार्जितेऽपि ज्येष्ठधने कनिष्ठानामधिकारः, एतावान् पर विशेषः, पित्रर्जितेऽविदुषामप्यधिकारो, ज्येष्ठार्जिते पुनर्विदुषामेव। एतच्च पितरि प्रेत इति ज्येष्ठ इति यवीयसामिति विद्यानुपालिन इति पदप्रयोगस्यानर्थक्यात् सिध्यति। तस्मादविभक्तार्जितत्वमात्रेणाविभक्तभ्रात्रन्तरस्य भवतीत्यसगत वचनम्। दा.१२१-१२२

(३) ज्येष्ठोऽविभक्तः, स्वय विद्याप्रकर्षेणापि लब्धे धने ज्येष्ठो भाग दद्यात्। विद्यानुपालिनस्तद्विद्यानुकूलकुटुम्बवच्चर्याकारिणः (?)। ज्येष्ठ इतिवचनात् कनिष्ठार्जितेष्वेवंभूतेषु न ज्येष्ठस्याधिकार इति दर्शितम्। ÷मवि.

(४) पितरि मृते सति भ्रातृभिः सहाविभक्तो ज्येष्ठः किंचित्स्वेन पौरुषेण धन लभते ततो धनाद्विद्याभ्यासवता कनिष्ठभ्रातॄणा भागो भवति नेतरेषाम्। ×ममु.

(५) यत्किंचित्पितरि प्रेते असाधारणविद्यादिना ज्येष्ठो धनमर्जयति, तत्र ज्येष्ठार्जिते ज्येष्ठस्याशद्वय एकैकस्तु भागः कनिष्ठाना, यदि ते विद्याभ्यासरता इत्यर्थः। विर.५०७

(६) साधारणधनानुपश्लेषविषयमिदम्। स्मृसा.६२

(७) यया विद्यया ज्येष्ठः पितृपरोक्षे धनमर्जयति,

+ शेष मितागतम्। ÷ शेष मेधागतम्।

× मिता.व्याख्यानं 'पितृद्रव्याविरोधेन' इति याज्ञवल्क्यवचने द्रष्टव्यम्।

÷ नन्द. मविगतम्। × मच., विता. ममुगतम्।

(१) **मस्मृ.**९।२०४ क,ख.,घ.पुस्तकेषु, लिनः (लितः); **मिता.**२।११९; **दा.**१२१; **अप.**२।११९ नारदः; **व्यक.** १४७; **विर.**५०७; **स्मृसा.**६२; **सुबो.**२।११८ (=) पू.; **रत्न.**१४८; **व्यनि.**; **नृप्र.**३७; **चन्द्र.**८१ यवी (कनी) लिनः (लकाः); **मच.**'विद्यानुपालिनां' इति कचित्पाठः; **दानि.**३ लिनः (लितः) कात्यायनः; **विता.**३५० लिनः (लितम्); **समु.**१३२; **भाच.** मस्मृवत्.

तां विद्या चेत् कनीयासोऽप्यनुपालयन्ति, तदा ज्येष्ठस्य भागद्वयमपरत्र कनीयसामपि तत्र भागः। चन्द्र.८१

(८) [उक्तजीमूतवाहनमतं खण्डयति—] प्राच्योक्तमपास्तम्। यत्किंचिदित्यस्य वैयर्थ्यापत्तेः। बाल.२।११९

अविद्यार्जितधनविभागविचारः

अविद्यानां तु सर्वेषामीहातश्चेद्धनं भवेत्।
समस्तत्र विभागः स्यादपित्र्य इति धारणा॥

(१) अविद्या कृषिवाणिज्याराजोपसेवादि। तत्र ईषन्न्यूनाधिकभावो न गणयितव्यः। तत्रापि यदि केनचिदपि बहुर्जितं तदाऽस्त्येवाविभागता। ज्येष्ठस्य तु ज्येष्ठांशनिषेधार्थं वचनम्। ईषदाधिक्ये तु सर्वेषां समांश कल्पना। अपित्र्य इति हेतुवचनादनपत्यधनस्याप्येष एव विधिः। *मेधा.

(२) यदि सर्व एव निर्विद्याः ईहातः इतस्ततो गमनेन पितृधनक्षतिं विना धनमर्जितवन्तः—अविद्यानामिति। ×मवि.

(३) सर्वेषां भ्रातॄणां कृषिवाणिज्यादिचेष्टया यदि धनं स्यात्तदा पित्र्यवर्जिते तस्मिन्धने स्वार्जिते समो विभागः स्यान्न तूद्धारः अपित्र्य इति निश्चयः। +ममु.

(४) अपित्र्येऽपि धने इत्यर्थः। स्मृसा.६२

(५) ईहातः सर्वेऽपि भ्रातरः कृष्यादिना यदि धनमर्जयन्ति तत्र सर्वेषां समो भागः। बहुल्पधना यदि धनमर्जयन्ति तत्र सर्वेषामर्जनपर्यालोचनया विषमो भागः कल्प्यते। अपित्र्ये पितृद्रव्याश्रयणाभावेऽपि। रत्न. १४८

(६) तेन विद्याभ्यासिनामनीहमानानां च न तादृग्धने भाग इति भावः। ×मच.

(७) अत्र ईहार्जितस्य धनस्य समविभागवचनात्पूर्वस्मिन् श्लोके यवीयसा विद्याधनेषु समन्वयमात्रमभिहितं न स्वाम्यमित्यवगन्तव्यम्। नन्द.

विद्याधनमैत्रौद्वाहिकमाधुपर्किकान्यविभाज्यानि

[1]विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत्।
मैत्रमौद्वाहिकं चैव माधुपर्किकमेव च॥

(१) विद्यया अध्यापनादिना शिल्पकौशलेन वा, तथा मित्रादर्जितमौद्वाहिक सांतानिकतया लब्ध चैव, माधुपर्किकमार्त्विज्येन। यद्यप्येतदपि विद्याधनं भवति तथापि याजनेन निमित्तेनोपादीयमानत्वाद्भेदेन व्यपदिश्यते। श्वशुरगृहलब्धमौद्वाहिकमपरे, उद्वाहनिमित्तेन यतस्तल्लभ्यते। मेधा.

(२) किंचाविभक्तार्जित सर्वं विभजेयुरिति न तावत् सामान्येन वचन कल्पनीय, शौर्यादिधने पर्युदासदर्शनात्। तथा मनुः—विद्याधनमिति। दा.११२

(३) विद्याधन विद्यया धन, एतच्च भ्रातृणा विद्यानुपालिनः तद्विद्यानुकूलपालित्वेऽपि ज्येष्ठस्य कनिष्ठेन विद्यया लब्धे। मैत्र मित्रात्प्राप्तम्। औद्वाहिकं भार्याबन्धुभ्यो लब्धम्। माधुपर्किक स्नातकत्वादिनार्हणार्थं दत्तान्मधुपर्कालब्धम्। मवि.

(४) विद्यामैत्रीविवाहार्जित माधुपर्किक मधुपर्कदानकाले पूज्यतया यल्लब्ध तस्यैव तत्स्यात्। यत्किंचित्पितरि इत्युक्त्वाऽयमपवादः। विद्याधन च व्याहृतं कात्यायनेन—'परभक्तप्रदानेन प्राप्ता विद्या यदाऽन्यतः। तया प्राप्त च विधिना विद्याप्राप्त तदुच्यते॥ उपन्यस्ते च यल्लब्ध विद्यया पणपूर्वकम्। विद्याधनं तु तद्विद्याद्विभागे न विभज्यते॥ शिष्यादार्त्विज्यतः प्रश्नात्संदिग्धप्रश्ननिर्णयात्। स्वज्ञानशसनाद्वादालब्धं प्राध्ययनाच्च यत्॥ विद्याधन तु तत्प्राहुर्विभागे न विभज्यते॥' अतो यन्मेधातिथिगोविन्दराजाभ्या माधुपर्किकमार्त्विज्यधन व्याख्यात तदयुक्त, विद्याधनत्वात्। +ममु.

* विर., विचि. मेधावद्भावः। चन्द्र. मेधागतम्।

× मेधावद्भावः। + शेष मेधागतम्।

(१) **मस्मृ.**९।२०५; **अप.**२।१२०; **व्यक.**१४७; **मभा.** २८।३२ अवि (अवै); **विर.**५०७ तश्चे (तो य); **स्मृसा.** ६२; **दीक.**४३ तु (च); **रत्न.**१४८; **विचि.**२१४; **व्यनि.** पू.; **चन्द्र.**८०; **दानि.**३-४; **व्यम.**५७; **विता.**३५०; **विभ.**४२,९३; **समु.**१३३.

+ मच. ममुगतम।

(१) **मस्मृ.**९।२०६ मैत्र (मैत्र्य), **दा.**१०६,११२; **अप.**२।११९; **व्यक.**१४५, **मभा.**२८।३१ पू.; **स्मृच.** २७६ उत्त, **विर.** ४९९, **स्मृसा.**६१ उत्त.; **रत्न.**१४६; **विचि.**२१०; **व्यनि.**; **स्मृचि.**३० माधु (मधु); **दानि.**२; **व्यम** ५५ पर्कि (पार्कि); **विता** ३४३; **बाल** २।११९ (=); **समु.**१३३, **विच.**८८.

अनीहमानस्य न विभागः

भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्मणा ।
स निर्भाज्यः स्वकादंशात्किंचिद्दत्वोपजीवनम् ॥

(१) ये भ्रातरः सह वसन्ति विद्यमानपितृधनाश्च कृष्यादिना व्यवहरन्ति तेषां यत्रैको न व्यवहरेत्तस्येयं निर्भाज्यता पठ्यते । स निर्भाज्यः स्वकादंशादिति । भागान्नेतव्योऽपसारयितव्यः । स्वकादंशाद्यावदधिकं तदीयाद्धनाद्व्यवहारेणोत्पन्नं तत्तस्य न दातव्यं न तु मूलस्य पैतृकस्य निषेधः । तत्रापि न सर्वेण सर्वं निर्भाज्यं, किंचिद्दत्त्वोपजीवनं क्लेशफलमात्मनो गृहीत्वा शिष्टमस्मै दातव्यम् । अथवा निर्भाज्यः पृथक्कार्यः सह वस्तु न देयम् । कदाचिदुत्तरकालशक्तिसाधारण्येन धनेनार्जितत्वात्समांशता (?) । तत्र भागकल्पना नारदेन दर्शिता । तत्र वचनेनोद्धृतस्य निर्गतस्य भूयान्भागो गृह्यतेऽनुक्तस्य स्वल्प इति (?) । मेधा.

(२) यस्तु स्वयोग्यतामात्रपराभर्षात् पितृपितामहादिधनविभागे निस्पृहः, स किंचिदेव तण्डुलप्रस्थमपि दत्त्वा तत्पुत्रादेः कालान्तरीयदुरन्ततानिरासार्थं विभजनीयः । ×दा.६६

(३) स्वकादंशाद् भ्रातृभिः स्वयमर्जितादित्यर्थः । अप. २।११६

(४) यः कर्मणा स्वव्यवसायेन जीवितुं शक्तः साधारणं धनं न विभज्य गृह्णीयात् किंतु स भ्रातृभिर्गृहीतभागैः स्वस्वभागाद्धनमाकृष्य पूरणीय इत्यर्थः । पूर्वनारदवाक्यस्यात्पयमेवार्थ इति हलायुधः । +विचि.२०३

(५) निर्वास्यो निःसंबन्धीकरणीयः । किंचिद्दत्त्वेति विभागचिह्नत्वेन किंचिदसारमपि दत्त्वेत्यर्थः । तत्पुत्राणां दायजिघृक्षानिवृत्त्यर्थं चेदम् । हलायुधस्तु 'कुटुम्बार्थेषु चोद्युक्तस्तत्कार्ये कुरुते तु यः । स भ्रातृभिर्वृहणीयो ग्रासाच्छादनवाहनैः ॥' इति नारदवचनैकवाक्यतालाभेन मनुवचने स निर्वास्य इति पाठं प्रकल्प्य स भ्रातृभिर्गृहीतभागैः स्वस्वभागाद्धनमाकृष्य पूरणीय इत्यर्थ इति व्याख्यातवान् । तत्तु नेहेतेत्यादिपदवैयर्थ्यापत्तेरुपेक्ष्यम् । मेधातिथिप्रमुखाचार्यानादृततया पाठकल्पनानौचित्याच्च । पृथक्क्रियेति स्पष्टवचनसंवादाच्च ।

प्रकाशकारस्तु यो भागिषु धनार्थं व्यापृतेषु प्रमादालस्यादिना नेहेत न व्यापियेत साहाय्यं न कुर्यात् । स्वकर्मणा स्वव्यापारेण शक्तः साहाय्यकर्मणि क्षमोऽपि सन् स स्वकादंशात् स्वव्यापारजनिताद्धनाद्बहिः कार्यः किंचिदुपजीवनं दत्त्वा मूलधनमात्रभागी करणीय इतीदं मनुवचनं निर्वास्य इत्याकरपाठं अङ्गीकृत्यैव व्याचष्टे । तदपि न युक्तम् । अपिशब्दाद्यध्याहारप्रसंगात् । योगीश्वरवचनसंवादिनोऽर्थस्य स्पष्टतरप्रतीतिकत्वाच्च । भवदुक्तार्थस्य वचनान्तरवशत्वाच्च ।

व्यप्र.४४८–४४९

स्वार्जितमविभाज्यम्

अनुपन्नन्पितृद्रव्यं श्रमेण यदुपार्जयेत् ।
स्वयमीहितलब्धं तन्नाकामो दातुमर्हति ॥

(१) विद्यानिमित्तस्य स्वयमर्जितस्यादानमुक्तम् । अनेन व्यतिरिक्तस्य कृष्यादिलब्धस्यादातव्यतोच्यते ।

× मवि., स्मृच., ममु , दात , मच., भाच. दावद्भाव. । विवादरत्नाकरे हलायुधमत दावत्, प्रकाशमत मेधावत् ।

+ प्रकाशमत मेधावत् ।

(१) **मस्मृ.**९।२०७; **दा.**६६, **अप** २।११५ निर्भा (विभा); **व्यक.**१४३; **स्मृच.**२६४ यस्तु (यस्य), **विर.** ४८५; **त्रिचि.**२०३, **व्यनि.**वनम् (विनाम्), **दात.**१७१; **व्यप्र.**४४८ भाज्यः (वांस्य), 'निर्वास्य' इति हलायुधधृतताठः; **सेतु.**७७; **विभ.**७४; **समु.**१२८; **विच.**७६.

(१) **मस्मृ.**९।२०८ क.,ख., घ.पुस्तकेषु जेयेत् (जितम्); **मिता.**२।११९ उत्तरार्धे (दायादेभ्यो न तद्दद्याद्धिया लब्धमेव च); **दा.**१०६,११३ मनुविष्णू; **अप.**२।११८ तन्ना (च ना), **व्यक.**१४६ जेयेत् (श्रयेत्) तन्ना (च ना) मनुविष्णू; **मभा.**२८।३१ तुद्र (तुर्द); **उ.**२।१४।२ मीहित (महति); **स्मृच.**२७६ पू.; **विर.**५०१-५०२ जेयेत् (जितम्) मनुविष्णू; **स्मृसा.**६० तन्ना (च ना) शेष विरवत् ; **पमा.**५५८; **मपा.**६८५ पूर्वार्ध विरवत्, उत्तरार्ध मितावत्; **रत्न.**१४६ मितावत्; **विचि.**२११ स्मृसावत्, मनुविष्णू; **व्यनि.**तन्ना (तु ना); **स्मृचि.**३० तुद्र (तुर्द) शेष विरवत्; **नृप्र.**३७ मितावत्; **सवि.**३४९ प्रथमपादः :३६८ पू.; **व्यप्र.**५५७ मितावत्; **व्यम.**५५ मितावत्; **विता.**३४१ यदु (य उ) मनुविष्णुनारदाः; **सेतु.**६९ विरवत्; **समु.**१३३; **विच.**८८ स्मृसावत्.

ननु चायमेव श्लोको वक्तव्यः । स्वयमीहितेन स्वयं चेष्टया यल्लब्धं तन्नाकामो दातुमर्हतीति । किं विद्याधनादिश्लोकेन । उच्यते, मित्रविवाहादौ न सर्वस्य स्वयमीहोपपत्तिरिति मेधेन व्यपदेशः । ×मेधा.

(२) श्रमेण सेवायुद्धादिना । मिता. २।११८

(३) पितृद्रव्योपघाताभावेन द्रव्यद्वारेण नेतरेषा व्यापारः, स्वचेष्टालब्धत्वेन शारीरोऽपि व्यापारो नेतरेषामिति अर्जकस्यैव तदसाधारण, स्वयमीहितलब्ध तदिति हेतुत्वेनोपन्यासात् । दा.१०५

अनुपघ्नन्निति विद्याधिनेऽपि संबध्यते, सत्युपघाते विभागवचनदर्शनात् । दा.११३

(४) श्रमो युद्धकृष्यादिः, ईहाऽत्र श्रमरहिता चेष्टा । अप.२।११८

(५) श्रमेणातिश्रमजन्यकर्मणा स्वयमीहितेन स्वमात्रोद्यमेन लब्धं नाकामो दातुमर्हति, यावदिच्छति तावत्किंचिद्द्यान्न तु समभागनियमः, श्रमेणेत्युक्तत्वात् । अश्रमार्जिते प्रागुक्तः समभागः । मवि.

(६) पितृग्रहण अविभक्तोपलक्षणार्थम् । अनुपघ्नन्नपीडयन् । +स्मृच.२७६

(७) साधारणानुपश्लेषेणार्जितमर्जकस्यासाधारणं भवतीत्यर्थः । *विचि.२११

(८) अनुपघ्नन्निति । अनुपयुञ्जन्नित्यर्थः । अत्र पूर्वार्धार्थः स्पष्टः । अनुपघ्नन्नित्यत्र विभक्तिविपरिणामेन तदनुपघ्नता यत् विद्यया लब्धं तत् पूर्वं चोभयमपि दायादेभ्यो न देयमित्यर्थेन पितृद्रव्यविनाशरूपविरोधाभावेन यद्विद्यालब्धं श्रमलब्धं च तदविभाज्यमिति सिद्धया मैत्रादिगणान्तर्गतविद्याधनस्य तथात्वात्तस्योपलक्षणत्वेन मैत्रादीनामपि तथात्वमाविष्कृतमिति भावः । मानवे—'स्वयमीहितलब्धं च नाकामो दातुमर्हति' इत्युत्तरार्धपाठः, यच्च स्वयमीहित वाञ्छितं सत् मित्रादिभ्यो लब्धं तदकामोऽनिच्छन् भ्रात्रादिभ्यो न दातुमर्हतीत्यर्थको मेधातिथिकल्पतर्वादिधृतो न युक्तः । अनेकस्मृतिव्याकोपापत्तेः । 'लब्धं तन्न' इति अर्वाचीनपाठस्त्वयुक्ततर एव । यद्वा । तदा तत् पैतामहविषयकमस्तु । एवं च भ्रातृभागशेषमाह अनुपघ्नन्नितीत्यपि तदुक्तं तथेति ज्ञेयम् । बाल.२।११९

पैतामह नष्टमुद्धृत स्वार्जित च पिताऽकामो न विभजेत्

[1]पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात् ।
न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम् ॥

(१) [2]चेत् स्वय विद्याशौर्यादिना स्वयमर्जित तदकामो न विभजनीयोऽधिकारप्राप्तैरपि पुत्रैः । कः पुनर्जीवति पितरि पुत्राणा विभागकालः । उच्यते—यदा तावत्स्वय पिता पुत्रान्विभजते तदोक्त—मातुर्निवृत्ते रजसि इति, जीवति वेच्छतीति, तथा, पितर्यपगतस्पृहे, निवृत्ते वापि रमणे, इति । अन्यथा तु यदैव प्राप्ताः पुत्रा भवन्ति, यदैव ते पितामहधनस्येशते । तथा चोक्त 'भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा । तत्र स्यात्सदृश स्वाम्य पितुः पुत्रस्य चोभयोः ॥' इति ।

सत्यपि च पुत्रस्य स्वाम्ये, यावदप्राप्तास्तावत् नास्ति । सर्वथा विशेषाभावात्सर्वे पितामहधनभाजः । स्वत्वपूर्वकत्वाद्विभागस्य । बन्धक्रयादिक्रियासु पितृधन जातपुत्रेण न नियोक्तव्यम् । योगकुटुम्बभरणादौ तु विनियोगो दर्शितः । आचारे चास्यामवस्थाया पुत्राणा स्वाम्ये पित्रा चाऽकामेन विभक्तानिति निन्दादर्शना-

(१) **मस्मृ** ९।२०९; **मेधा.** (I. O.) मनवाप्त (मनुपघ्नन्) त्सार्धमकामः (त्सार्ध कामतः), **मिता.**२।१२१; **दा.**३२ मनुविष्णू : १२८ अनवाप्यमिति अनवाप्येति पाठावनाकारौ; **व्यक.**१४० वाप्त (वाप्य) मनुविष्णू, **स्मृसा.**५४ विरवत्; **पमा.**४९८; **विचि.**१९६ व्यकवत्; **स्मृचि.**३० तत्पुत्रैर्भे (पुत्रैर्विभे), **नृप्र.**३६; **दात.** १६५ मनुविष्णू; **सवि** ३७४ पैतृक तु (स पैतृक) मर्जि (मार्जि); **वीमि.**२।११४ विरवत्; **व्यप्र.**४५०; **व्यम.**४२; **विता.**३२० विरवत्, मनुविष्णू; **बाल.**२।११७ उत्त.,गौतमः : २।१३५(पृ.२१८); **सेतु.**७०,७२ मनुविष्णू; **विभ.**६४ मर्जि (मार्जि) उत्त.; **समु.**१३४ प्रुयात् (प्रवान्); **विच.**३९ मनुविष्णू, ६३.

१ ग्रहणादन्यदर्थयन्पित्रा स्व. २ तदाका.

× ममु. मेधागतम् ।

+ पमा., सवि. स्मृचगतम् । भाच. स्मृचगतं विचिगत च ।

* मच. विचिगतम् ।

द्वलाद्विभाजयन्तः पापा इत्यनुमीयते । यथाऽसत्प्रतिग्रहेण भवति स्वाम्य, दोषस्तु पुरुषस्य, तेनान्वयागतमितीदृशमशुद्धमेव । अतः सभवत्युपायान्तरे न पिता अर्थनीयः। अधर्मो हि तथा स्यात्। स्वयमर्जितमपि धनमधिकारप्राप्तान्गुणवतः पुत्रान् ज्ञात्वा विभक्तव्यमेव । उक्त च -'वयसि स्थितः पिता पुत्रान्विभजेत् । ज्येष्ठं श्रेष्ठाशेनेतरान्समैरंशैः' इति । न चैतत्पितामहधनविषयम् । न हि तत्र पिता ज्येष्ठस्याधिकाशदानाय प्रभवति। तुल्यत्वादुभयोः स्वाम्यस्य । यत्त्विद 'न्यूनाधिकविभक्ताना धर्म्यः पितृकृतः स्मृतः' (यास्मृ.२।११६) इति तत्पितामहेऽपि स्वल्पया मात्रयेच्छन्ति । यत्र न परिपूर्ण भागद्वय गृहीतम् । स्वयमर्जितविषये ह्यपवाद एव स्यात् । मेधा.

(२) यत्पितामहार्जित केनाप्यपहृत पितामहेनानुद्धृतं यदि पितोद्धरति तत्स्वार्जितमिव पुत्रैः सार्धमकामः स्वय न विभजेदिति वदन् पितामहार्जितमकामोऽपि पुत्रेच्छया पुत्रैः सह विभजेदिति दर्शयति । *मिता.२।१२१

(३) (मनुविष्णू) स्वार्जितत्वेन हेतुना नाकामो विभजेदिति वदन्तौ स्वयमनर्जिते पैतामहधने पितुरनिच्छयापि पुत्राणा विभाग दर्शयतस्तत्रापि विभागदानप्रवृत्तः पिता पितामहधन स्वार्जित नाकामो विभजेत् अन्यत् पुनरकामोऽपि विभजेदित्यस्वेच्छात एवेत्यर्थः । न पुनः पुत्रेच्छया विभाग ज्ञापयतः । दा.३२

पैतामहमपि द्रव्यं यच्चिरं नष्ट अक्षमत्वात् अथवा प्रतीकारपराङ्मुखतया इतरैरप्रतिकृत पित्रा स्वधनव्ययशरीरायासाभ्या प्रतिकृतं तत् पितुरेव न साधारणम्। +दा.१२८

(४) पैतृक स्वपितृसबन्धि, अनवाप्त स्वोद्यमेनापि स्वपित्रा, प्राप्नुयात् महता यत्नेन, अकामो न विभजेन्न विभजेत । एव च स्वयमतिप्रयत्नाऽनुपार्जितं पितृद्रव्य पुत्राणामिच्छयापि विभजेदित्युक्तम् । ततः परं च 'तत्र स्यात् सदृश स्वाम्यमि'ति याज्ञवल्क्यवचनम् । मवि.

(५) यत्पुनः पितृसबन्धि धन तेनासामर्थ्येनोपेक्षित-

* पमा. मितागतम् । + विर., दात. दागतम् ।

त्वादनवाप्तं पुत्रः स्वशक्त्या प्राप्नुयात्तत्स्वयमर्जितमनिच्छन्पुत्रैः सह न विभजेत् । ममु.

(६) पितृद्रव्यमपि परग्रस्तं यत्पित्राऽभ्युद्धृतं यच्च स्वयमर्जित तत्रोभयत्रापि पितुरिच्छयैव विभागो न त्वनिच्छयेत्यर्थः । विचि.१९६

(७) एतत्पुत्राणा समुत्थानकृतविभागे । स्वयंकृतविभागे तु 'विभाग चेत्पिता कुर्यादिच्छया विभजेत्सुतानि'ति । +मच.

(८) स्वयमर्जितमिवेतीवशब्दाध्याहारेण योज्यम् । यद्वा तत् पितामहार्द्धतमनेनैवोद्धृतमतः स्वार्जितमेव जात यत इति हेतुतया योज्यम् । व्यप्र.४५०

(९) स्वयमर्जितमित्यस्यान्वयासंभवात्, यथाश्रुते चशब्दाभावेन वाक्यभेदासंभवाच्च दृष्टान्ततेत्याह । स्वार्जितमिवेति । अकामः विभागानिच्छुः । एतेन 'चेत्स्वय विद्याशौर्यादिना स्वयमर्जितम्' इति व्याख्यान मेधातिथ्यादेरपास्तम् । बाल.२।१२१

समभूयार्जित पित्रा सम विभाज्यम्

भ्रातृणामविभक्तानां यद्युत्थानं भवेत्सह ।
न तत्र भागं विषमं पिता दद्यात्कथंचन ॥

(१) यदुक्तं 'न्यूनाधिकविभक्ताना धर्म्यः पितृकृतः स्मृतः' इति, तस्यास्मिन् विषये प्रतिषेधः । सहोत्थान, सर्व एव धनमर्जयन्तीत्यर्थः । कश्चित् कृष्यादिना कश्चित्प्रतिग्रहेण कश्चित्सेवया कश्चिद्यथाहृत परिरक्षति यथोपयोगमसनिहितेषु विनियुङ्क्ते, तत्सर्वमेकीकृत्य सम विभजनीयम् । न स्नेहादिना कस्मैचित्पित्राऽधिकं देयम् । ×मेधा.

(२) यदि पुनः पितरि जीवति पुत्रा एव विभागमर्थयन्ते तदा विषमविभागः पित्रा न दातव्यः । तदाह मनुः—भ्रातृणामिति । उद्धारस्तु तदा पित्रा दातव्य

+ शेष ममुगतम् । × ममु. मेधागतम् ।

(१) **मस्मृ.**९।२१५ तत्र (पुत्र); **दा.**५७; **अप.**२।११४, १२०; **व्यक.**१४१ भागं विषमं (विषम भाग); **विर.**४६८ व्यकवत्; **स्मृसा.**५५ व्यकवत् ; **विचि.**२०१ दद्या (कुर्या) शेष व्यकवत् ; **दात.**१६५; **चन्द्र.**७० भवेत्सह (सम भवेत्); **व्यप्र.**४४१ व्यकवत्; **सेतु.**७२; **विभ.**४६ पू.:८१; **समु.** १२७; **विच.**५५.

एव तस्य विषमविभागरूपत्वाभावात् न्यूनाधिकविभागस्यैव निषेधात्। दा.५७

(३) पितृकर्तृके विभागे पुत्राणा विषमोऽपि विभागो भवतीति तस्य विशेषापवादमाह मनुः—भ्रातृणामिति। अप.२।११४

(४) पिता अधिकायासादिक कस्यचिदेकस्य दृष्ट्वाऽधिकं न दद्यात्। मवि.

(५) इति मनुना सर्वेषा भ्रातृणा द्रव्यार्जने यदि सह समानमेव उत्थानमुद्योगो भवेत्तदा पितुर्विषमविभागदानप्रतिषेधः कृतः। 'भ्रातृणामविभक्तानाम्' इत्यादि मनुवाक्य सहोत्थान सर्वेषा विभागप्रार्थना यदि भवतीति जीमूतवाहनेन तदनुयायिना दायतत्त्वकृता च व्याख्यातम्, 'यदि पुनः पितरि जीवति पुत्रा एव विभागमर्थयन्ते तदा विषमविभागः पित्रा न दातव्य' इति वदता। तत्र सहशब्दवैयर्थ्य, उत्थानशब्दस्य चोद्योगवाचिनोऽपि भागप्रार्थनापरत्वमन्याय्यमित्यस्माभिराख्यानमेवादर्त्तव्यम्। व्यप्र.४४१

याज्ञवल्क्यः

अविभाज्यविचारः

[1]पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितम्।
मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत्॥
क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च॥

(१) सहस्थितानां चैकेन—पितृद्रव्येति। पितृधनानुपघातेन यदन्यदार्जितं, तथा मैत्रमौद्वाहिक च, तदार्जयितुरेव, न दायादान्तराणामपि स्यात्। मित्रादाप्तं मैत्रम्। विवाहे लब्धमौद्वाहिकम्। पितृद्रव्योपघातेनापि मैत्राद्यविभाज्यमेव, आरम्भसामर्थ्यात्। अन्ये तु मैत्रादिकमेव पितृधनानुपघातार्जितमविभाज्यमिच्छन्ति, सामान्यविशेषोपसहृतिन्यायात्। तत्तु सामान्यद्रव्यसाध्यत्वाद् विवाहस्यायुक्तमेव। विश्व.२।१२२

पित्रादिक्रमागत द्रव्य विभागकाले विच्छिन्नभोगं विभक्तः सन्नितरदायादानुमतः स्वशक्त्या यदभ्युद्धरेत् स्वीकुर्यात्, स तद् विभक्तजदायादेभ्यः पुनर्विभागकाले न दद्यात्। विद्यया च यल्लब्धम्। चशब्दान्मैत्रादिकं च। आयव्ययविशोधितादिति चोक्तमेव। विश्व.२।१२६

(२) अविभाज्यमाह—पितृद्रव्येति। मातापित्रोर्द्रव्याविनाशेन यत्स्वयमर्जितं, मैत्र मित्रसकाशाद्यल्लब्ध, औद्वाहिकं विवाहाद्यल्लब्धं, दायादाना भ्रातृणा तन्न भवेत्। क्रमात्पितृक्रमादायात यत्किंचिद्द्रव्यं अन्यैर्हृतमसामर्थ्यादिना पित्रादिभिरनुद्धृत यः पुत्राणा मध्ये इतराभ्यनुज्ञयोद्धरति तद्दायादेभ्यो भ्रात्रादिभ्यो न दद्यादुद्धर्तैव गृह्णीयात्। तत्र क्षेत्रे तुरीयाशमुद्धर्ता लभते शेष तु सर्वेषा सममेव। यथाह शंखः—'पूर्व नष्टा तु यो भूमिमेकश्चेद्दुद्धरेत्क्रमात्। यथाभागं लभन्तेऽन्ये दत्त्वाशं तु तुरीयकम्॥' इति। क्रमादभ्यागतमिति शेषः। तथा विद्यया वेदाध्ययनेनाध्यापनेन वेदार्थव्याख्यानेन वा यल्लब्धं तदपि दायादेभ्यो न दद्यात्। अर्जक एव गृह्णीयात्। अत्र च 'पितृद्रव्याविरोधेन यत्किंचित्स्वयमर्जितम्' इति सर्वशेषः। अतश्च पितृद्रव्याविरोधेन यन्मैत्रमर्जितं, पितृद्रव्याविरोधेन यदौद्वाहिकं, पितृद्रव्याविरोधेन यत्क्रमायातमुद्धृतं, पितृद्रव्याविरोधेन विद्यया यल्लब्धमिति प्रत्येकमभिसंबध्यते। तथा च पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितं, तदपि दायादेभ्यो न दद्यात्। अर्जक एव गृह्णीयात्। तथा च पितृद्रव्याविरोधेन यत्किंचित्स्वयमर्जितम्' इति सर्वशेषः। अतश्च पितृद्रव्याविरोधेन यन्मैत्रमर्जितं, पितृद्रव्याविरोधेन यदौद्वाहिकं, पितृद्रव्याविरोधेन यत्क्रमायातमुद्धृतं, पितृद्रव्याविरोधेन विद्यया यल्लब्धमिति प्रत्येकमभिसंबध्यते। तथा च पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितं, तदपि दायादेभ्यो न दद्यात्। अर्जक एव गृह्णीयात्। अत्र च '

न प्रत्युपकारेण यन्मैत्रं, आसुरादिविवाहेषु यल्लब्ध, या पितृद्रव्यव्ययेन यत्कर्मायातमुद्भूत, तथा पितृद्रव्ययेन लब्धया विद्यया यल्लब्ध, तत्सर्वं सर्वैर्भ्रातृभिः त्रा च विभजनीयम्। तथा पितृद्रव्याविरोधेनेत्यस्य र्वशेषत्वादेव पितृद्रव्यविरोधेन प्रतिग्रहलब्धमपि विभ-जनीयम्। अस्य च सर्वशेषत्वाभावे मैत्रमौद्वाहिकमि-यादि नारब्धव्यम्। अथ पितृद्रव्यविरोधेनापि यन्मैत्रादि-ब्ध तस्याविभाज्यत्वाय मैत्रादिवचनमर्थवदित्युच्यते। तथा सति समाचारविरोधः। विद्यालब्धे नारदवचन वरोधश्च। 'कुटुम्ब बिभृयाद् भ्रातुर्यो विद्यामधि गच्छतः। भाग विद्याधनात्तस्मात्स लभेताशुतोऽपि षन्॥' इति। तथा विद्याधनस्याविभाज्यस्य लक्षणमुक्त कात्यायनेन—'परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या। तया लब्ध धन यत्तु विद्याप्राप्तं तदुच्यते॥' इति। तथा पितृद्रव्याविरोधेनेत्यस्य भिन्नवाक्यत्वे प्रतिग्रहलब्धस्या-विभाज्यत्वमाचारविरुद्धमापद्येत। एतदेव स्पष्टीकृत मनुना—'अनुपघ्नन्पितृद्रव्य श्रमेण यदुपार्जितम्। दाया-देभ्यो न तद्दद्याद्विद्यया लब्धमेव च॥' (मस्मृ.९।२०८) इति श्रमेण सेवायुद्धादिना। ननु पितृद्रव्याविरोधेन यन्मैत्रादिलब्ध द्रव्य तदविभाज्यमिति न वक्तव्यम्। विभागप्राप्त्यभावात्। यद्येन लब्धं तत्तस्यैव नान्यस्येति प्रसिद्धतरम्। प्राप्तिपूर्वकश्च प्रतिषेधः। अत्र कश्चिदित्थ प्राप्तिमाह—'यत्किंचित्पितरि प्रेते धन ज्येष्ठोऽधिगच्छति। भागो यवीयसा तत्र यदि विद्यानुपालिनः॥' इति। ज्येष्ठो वा कनिष्ठो वा मध्यमो वा पितरि प्रेते अप्रेते वा यवीयसा वर्षीयसा चेति व्याख्यानेन पितरि सत्यसति च मैत्रादीना विभाज्यत्व प्राप्त प्रतिषिध्यत इति। तदसत्। न ह्यत्र प्राप्तस्य प्रतिषेधः किंतु सिद्धस्यैवानुवादोऽयम्। लोकसिद्धस्यैवानुवादकान्येव प्रायेणास्मिन्प्रकरणे वच-नानि। अथवा 'समवेतैस्तु यत्प्राप्त सर्वं तत्र समा-शिनः' इति प्राप्तस्यापवाद इति सतुष्यतु भवान्। अतश्च 'यत्किंचित्पितरि प्रेते' इत्यस्मिन्वचने ज्येष्ठादि-यदाविवक्षया प्राप्तिरिति व्यामोहमात्रम्। अतो मैत्रादि-वचनैः पितुः प्रागूर्ध्वं वाऽविभाज्यत्वेनोक्तस्य 'यत्किंचि-त्पितरि प्रेते' इत्यपवाद इति व्याख्येयम्।

यत्तूशनसा क्षेत्रस्याविभाज्यत्वमुक्तम्—'अविभाज्य सगोत्राणामासहस्रकुलादपि। याज्यं क्षेत्रं च पत्रं च कृतान्नमुदक स्त्रियः॥' इति, तद्ब्राह्मणोत्पन्नक्षत्रियादि-पुत्रविषयम्। 'न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै। यद्यप्येषा पिता दद्यान्मृते विप्रासुतो हरेत्॥' इति स्मरणात्। याज्य याजनकर्मलब्धम्। पितृप्रसादलब्ध-स्याविभाज्यत्व वक्ष्यते। नियमातिक्रमस्याविभाज्यत्वम-नन्तरमेव निगसि। पितृद्रव्यविरोधेन यदर्जितं तद्विभज-नीयमिति स्थित तत्रार्जकस्य भागद्वय, वसिष्ठवचनात् 'येन चैषा स्वयमुपार्जित स्यात्स द्व्यशमेव लभेते'ति।

मिता

(३) तदेवमादिवचनैर्विद्यागौर्यादिधनेष्वपि साधा-रणधनोपघातानुपघाताभ्या विभागाविभागयोरवगमात् तस्यैव प्रयोजकत्वात् तत्पदवत्येव श्रुतिः कल्पनीया, उपघातार्जित विभजेदिति, न पुनः शौर्यादिपदवत्यपि, अवश्यकल्पनीयसामान्यश्रुतिकल्पनयैवोपपत्तेः। होलाका-धिकरणन्यायस्यायमेव विषयः। यद्वा न्यायप्राप्त एवायमर्थः, यद् येनार्जित तत्तस्मिन् जीवति तस्यैव, असति विशेषवचने, यत्र पुनः साधारणधनमात्रेणैकस्य व्यापारोऽपरस्य धनशरीराभ्या तत्रैकस्यैको भागोऽपरस्य भागद्वय न्यायावगतमेव निबद्धम्। एतेन चैतदपि सिध्यति, यत् साधारणधनोपघाते सति यस्य यावतोऽ-शस्य स्वल्पस्य महतो वोपघातः, तस्य तदनुसारेण भागकल्पना कार्या। किंच कात्यायनवचनं 'विभक्ताः पितृवित्ताच्चैकत्र प्रतिवासिनः। विभजेयुः पुनर्न्याश स लभेतोदयो यतः॥' इद ससृष्टस्य साधारणधनोपघाते-नार्जकस्य भागद्वय इतरेषामेकैको भाग इति श्रीकरेण व्याख्यातम्। तेनानुपघातार्जितमर्जकस्यैव धन ससृष्टत्वेऽपि न पुनस्तद्धन साधारणमित्यभिप्रायो मुने-र्व्याख्यातुश्च लक्ष्यते, अनुपघातार्जिते भागविशेषान-भिधानात्। एव चेत् ससृष्टवदविभक्तस्यापि तथात्वमेव युक्त, विभागप्रागभावे तत्प्रध्वसेऽपि, एकत्र प्रतिवासस्य हेतोरविशेषात् साधारणधनोपघातार्जितेऽर्जकस्य भागद्वय-मिति ज्ञापनार्थत्वेन वचनस्याप्युपपत्तेः, न केवलं ससृष्ट-

* पमा., मपा., स्मृसा., सवि, व्यप्र., व्यम., विता. मितावद्भावः। स्मृतिचन्द्रिकाया 'क्रमादभ्यागत' इति श्लोक-वाक्यार्थो मितावत् अपवच्च व्याख्यातः।

विषयत्वं युक्तं, होलाकाधिकरणस्यात्रैव जागरूकत्वात्।

किंचोपघातार्जिते अर्जकस्य भागद्वयमिति तावन्निर्विवादं; 'साधारण समाश्रित्य यत्किंचिद्वाहनायुधम्। शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः॥ तस्य भागद्वय देयं शेषास्तु समभागिनः॥' इत्यनेनोपघात एव भागद्वयस्य विधानात्, असाधारणधनशरीरव्यापारार्जिते तु न भागद्वयं न्याय्यं, किन्त्वधिकं, सर्वमेव वा किंचिदून वा, तत्र किंचिदूनस्य मुनिभिर्निबन्धृभिश्चानुक्तत्वात्। साधारणधनव्यापारेण भ्रात्रन्तरस्य भागदर्शनात् तदभावे भागाभाव एव युक्तः। द्विरर्जयितुरित्येतस्य च न्यायमूलत्वमेव युक्तं, अन्यथा श्रुतिकल्पने अर्जकत्वानुप्रवेशो वा पृथग्बाधिकारी कल्पनीयः स्यात्। तस्मादनुपघातार्जितमर्जकस्यैव नेतरेषामिति सिद्धम्।

दा.१०९–११२

तदेवमादिवचनैर्यावद्वर्णेवर्णान्तरालाना, संकीर्णजाताना, सकलविद्यानिमित्तस्य, सौदायिकस्य च स्वजनदत्तस्य च, तथा मित्रविवाहमधुपर्कप्राप्तस्य, शौर्येण च युद्धादिना प्राप्तस्य, कृषिसेवावाणिज्यादिना च श्रमेणोपार्जितस्य, अनुपघातेन च स्वशक्तिमात्रार्जितस्य, पर्युदासात्, सर्वमेव पर्युदस्तमिति तदितराभावात् निर्विषयो विधिः। अथ यथाकथचिदेको द्विको वा विषयो लभ्यते, तदा तदेव स्वपदेन निर्दिदिक्षुचित मुनीना, अविभक्तार्जितममुकधन विभजेदिति, लाघवात् स्वपदात् शीघ्रप्रतीतेश्च, न तु शौर्यादिधनेतरतया, बहुतरपदप्रयोगापत्त्या गौरवात्, पर्युदासत्वे च सर्वमुनिभिरेव सकलपर्युदसनीयपदानुकीर्तन कर्तव्यं, तद्विना तदितरज्ञानानुपपत्तेः, मुनीना पर्युदासवचनं बालप्रलपितमिव स्यात्, प्रदर्शनार्थत्वे तु अनास्थया केनचित् किंचित् कीर्तित, केनचिच किंचिदिति, युक्त सर्वस्याकीर्तनम्।

तस्मात् साधारणधनोपघातार्जित धन विभजेदिति विधिः, शौर्यादिपदं च वाक्येषु प्रदर्शनार्थम्। अतोऽविभक्तार्जितत्वमात्रेण धनस्य साधारणत्वाभिधानमप्रामाणिकम्। किंच 'क्रमादभ्यागत द्रव्यं हृतमभ्युद्धरेत्तु यः। दायादेभ्यो न तद्दद्यात् विद्यया लब्धमेव च॥' अत्र याज्ञवल्क्यवचनेऽपि, पितृपितामहादिधनमपि केनचिदपहृतं योऽभ्युद्धरेत् तस्यैव तन्नान्येषामिति भवतोऽपि संमतं, तेन पूर्वसंबन्धलेशे सत्यपि, अविभक्तानामप्यभ्युद्धारकत्वेन, तत्र संबन्धं निराकुर्वन् अपूर्वत्वेन स्वार्जिते सुदूरमेवान्येषां संबन्धं निरस्यति।

यच्चोक्त श्रीकरेण, यदि पितृद्रव्यानुपघातार्जितमर्जकस्यैव तदा प्रतिग्रहोपात्तं धनं न कदाचित् भ्रात्रन्तरस्य भवेत्। न हि प्रतिग्रहः पितृद्रव्यविनाशेन संभवति, द्रव्यं हि दातुरानमनमुखेन प्रतिग्रहे उपयुज्यते एकहायन्यादिकमिव सोमक्रये, कर्तृशरीरधारणेन वा पयोव्रतादिकमिव ज्योतिष्टोमे, तत्र तावदहष्टार्थे दाने द्रव्यान्तरग्रहणेन न दातुरानतिरपेक्षितेति न दात्रानत्या द्रव्यमुपयुज्यते प्रतिग्रहस्य चाल्पकालीनत्वात् न तत्कर्तुर्भोजनमपेक्षित दीर्घकालीनज्योतिष्टोमेनेव स्वर्गकर्तुरिति। तन्मन्द दापकानत्यर्थमुपहारप्रदानादिना धनोपघातस्य लोके बहुलमुपलम्भात्, कलौ च प्रतिग्रहधनस्य सेवाधनसमानत्वात् अत एव कलौ त्वनुगमान्वित इति स्मरन्ति।

यच्च चिरावस्थितेर्व्यभिचारात् न प्रतिग्रहकारणत्वमानतेरत आनतिद्वारा न प्रतिग्रहार्थत्वं द्रव्यस्येत्युक्तं तन्मन्दतर, आनतिद्वारेण चिराश्रयणादीना प्रतिग्रहकारणत्वात् पुरुषस्याशयवैचित्र्येण कस्यचिद्धनदानेन कस्यचिच्चिराश्रयणादिना कस्यचित्तत्तद्गुणानुसधानमात्रेण दर्शनात्, सहकार्यभावेन कार्यानुत्पत्तेर्नाकारणता। अत एवोक्तं आनतेरनियतोपायपरिणामत्वादिति।

यदप्युक्तं अथ तत्संनिधिमन्तरेण प्रतिग्रहस्यासभवात् भोजनमन्तरेण च तदयोगात् तस्या स्थितौ व्याप्रियमाण धनं प्रणाल्या प्रतिग्रह निष्पादयतीति, तदा ज्योतिष्टोमादिकर्मणः प्राचीनमपि भोजन शरीरस्थितौ व्याप्रियमाणं प्राचीनशरीरस्थितिमन्तरेण ज्योतिष्टोमाद्यनिष्पत्तेः प्रणाल्या ज्योतिष्टोमार्थमिति सर्वमेव भोजनं क्रत्वर्थं स्यात् न पुरुषार्थं, तथा च तत्साधनमपि द्रव्यं क्रत्वर्थं स्यात् तदर्जनोपायोऽपि क्रत्वर्थः स्यादिति पुरुषार्थत्व द्रव्यार्जनस्य द्रव्यस्य भोजनस्य च हीयेतेति।

तन्मन्दतमं, प्रणाल्या ज्योतिष्टोमोपकारकत्वेऽपि भोजनस्य साक्षात् तृप्त्यर्थत्वात् पुरुषार्थस्यैव सतः क्रतूपकारकत्वात् तत्रेदमर्थं प्रमाणाभावात् उपकारकत्वस्य तादर्थ्यव्यभिचारात्, अतः कथ द्रव्यार्जनस्य द्रव्यस्य

भोजनस्य च ऋत्वर्थत्वमापद्यत इति। अत एवास्यापि पर्यनुयोगस्थानवकाशः, यदि द्रव्यस्य प्राचीनभोजनद्वारा प्रतिग्रहोपकारकत्वमिष्यते तदा जन्मत आरभ्य भोजनं विना शरीरावस्थितेरभावात् नार्जन सभवतीति सर्व एव धनोपायः पितृद्रव्यविनाशेन स्यात्, अतोऽनुपघ्नन् पितृद्रव्यमिति विशेषण न स्यादिति। यतो विशेषणानर्थक्यादेव भक्षणाद्युपभोगोपयुक्तधनोपघातादन्यस्यैवोपघातादिरूपस्य वचनार्थत्वात्।

किंच भक्षणाद्युपभोगार्थधनोपघातस्य गृहगतेनाप्यवश्यं कर्तव्यत्वात् न धनार्जनार्थत्वमुपघातस्य तादर्थ्यमेव च तत्प्रयोजकमिति नातिप्रसक्तिः। अत एवोक्त विश्वरूपेण, पितृद्रव्यं दत्त्वा यदि नोपार्जित धन तदा तस्यैवासाधारणं वैवाहिकवदेवोक्त न तु भक्षणाद्युपभोगमात्रेण तस्य स्तन्यपानादितुल्यत्वादित्यन्तेन।

अत एव पुत्रोपनयनविवाहयोः सोत्सुकस्व्ययपितृकृतबहुतरधनव्ययेऽपि न व्रतभिक्षादिलब्धस्य वैवाहिकस्य वा साधारण्य धनप्रेप्सया धनव्ययस्याकृतत्वात्। तस्माद्धनोद्देशेनैव साधारणधनोपघातेनार्जित साधारण नान्यदिति सिद्धम्।

जितेन्द्रियेणापि बहुप्रकारं विमृष्योक्त तदस्य यावदुक्तप्रपञ्चस्य संक्षेपेणायमर्थः प्रत्येतव्यः, यत्किंचिद्धनमसाधारणोपायार्जित तदसाधारण विस्पष्टार्थ तु 'विद्याधन तु यद् यस्ये'त्यादिना (मस्मृ.९।२०६) उदाहरणप्रपञ्चेनोपन्यस्तं असाधारणत्वादेवाविभाज्यमेवविधमेव धन साधारणमपि साधारणहेतुसमुत्थमेवविधमेव तदपि सुखावबोधार्थं क्वचिदर्थसाधारण्येन क्वचिच्च व्यापारतथात्वेन सबन्धसाधारण्येन च प्रदर्शितमित्यन्तेन।

बालकेनाप्युक्त, न ह्येकेन भ्रात्रा विद्यादिना लब्धेऽपरेषामधिकारसभवः प्रमाणाभावादित्यन्तेन।

यश्चानुपघातप्रतिग्रहार्जितधनस्य विभागः शिष्टानां दृश्यते स भ्रातृस्नेहेन पौरुषबुध्या वा नानुपपन्नः। यद्वा प्रतिग्रहधनस्य विद्याधनत्वात्, विद्याधने च साधारणधनानुपघातार्जितेऽपि समविद्याधिकविद्याना विभागस्य वाचनिकत्वात्, तद्विभाग पश्यन्तो विद्याधनस्य विद्याविशेषकृतोऽयं विभाग इत्यजानन्तोऽविभक्तार्जितत्वेनाय विभाग इति भ्रान्ताः स्वयमपि तथैव व्यवहृतवन्तः, तन्मूलश्चापरापरव्यवहार इति न किंचिदनुचितम्। +दा.११४–१२१

(४) यत्पूर्वपुरुषक्रमायात क्षेत्रारामादिक द्रव्य कथमपि परेणापहृत, यो दायादानुमत्याऽभ्युद्धरेत्तदसौ दायादेभ्यो न दद्यात्। यत्पुनर्दायादानुमतिमन्तरेणोद्धृत तस्य चतुर्थमशमुद्धर्ता गृह्णीयात्। शेषमुद्धारकेण सह सर्वे विभजेरन्। यदाह ऋष्यशृङ्गः—'पूर्वनष्टा तु यो भूमिमेकश्चाभ्युद्धरेत्क्रमात्। यथाशं तु लभन्तेऽन्ये दत्त्वाश तु तुरीयकम्॥' ×अप.

(५) अन्यन्मैत्रादिव्यतिरिक्तमपि। विर.५०१

यच्च सहिताया हारीतः—'पूर्वनष्टा तु यो भूमिमेक एवोद्धरेच्छ्रमात्। यथाभाग लभन्तेऽन्ये दत्त्वाश तु तुरीयकमि'ति वाक्य लिखति स्म, तच्च स्मृतिमहार्णवकामधेनुकल्पतरुपारिजातप्रभृत्यलिखनादयुक्तमेव।

विर.४९९

(६) तथा सतीति। नन्वेतदनुपपन्न वचनापेक्षया आचारस्य दुर्बलत्वात्। अथ मतम्। आचारोऽपि वचन कल्पयन्नेव प्रमाण न स्वत एवेति। अस्मिन् मतेऽपि वचनमेवेति। एवमप्याचारपरिकल्पिततया स्मृत्या यावता स्वार्थः प्रत्येष्यते तावता मैत्रमौद्वाहिकमित्यादिस्मृत्या तदर्थप्रतीतेः विलम्बितत्वाविलम्बितत्वप्रतीतिभ्यामाचार एव दुर्बल इति चेत्। मैवम्। अगतिका हीय गतिः योऽय बाधः, न हि दुर्बल दुर्बल इत्येव बाध्यते अपि तु विरोधे। विरोधश्चैकस्मिन् विषये परस्परविपरीताभिधानेन। तथा सत्यबाधेनोपपत्तौ बाधो न न्याय्यः, इति न्यायेन 'मैत्रमौद्वाहिकमि'त्यस्य वचनस्यास्मदुक्तरीत्या शिष्टाचाराविरोधेनैव वाक्यार्थप्रमित्युपपत्तेरर्थान्तरकल्पनया विरोधोऽनुपपन्न इति सूक्तम्। सुबो.२।११८

(७) अत्रापि लाभे पितृद्रव्यानुपश्लेषोऽविभाज्यत्वे बीजमिति प्रकाशः, तदयुक्तं, वृथगुपादाने वैयर्थ्यापत्तेः। इद तु विद्यार्जनकाले कुटुम्बस्य दायादैर्भरणाभावेऽविभाज्य नो चेद्विभाज्यमेव। 'कुटुम्ब विभृयाद् भ्रातुर्यो विद्यामधिगच्छतः। भाग विद्याधनात्तस्मात्स लभेता-

+ मितावद्भावः।

× पितृद्रव्याविरोधविषये मितावद्भावः

ऽश्रुतोऽपि सन्॥' इति कात्यायनवचनात्। आद्येन चकारेण मधुपर्ककाले पूज्यतया लब्धस्य मनूक्तस्य, द्वितीयेन तु—'पितामहेन यद्दत्तं पित्रा वा प्रीतिपूर्वकम्। तस्य तन्नापहर्तव्यं मात्रा दत्तं च यद्भवेत्॥' इति व्यासोक्तस्य स्वयमग्रे वक्ष्यमाणस्य च समुच्चयः। एवकाराभ्यामुभयत्र पितृद्रव्यानुपश्लेषापेक्षया व्यवच्छेदः। उशब्देनान्यदायादसाहित्यमुद्धरणे व्यवच्छिन्नम्।

वीमि.

पितृप्रसादलब्धमविभाज्यम्

[1]**पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्॥**

(१) जीवता विभक्तानां विभक्तजविभागे तावदयं विधिः। विश्व.२।१२७

(२) विभक्तजः पित्र्यं मातृकं च सर्वं धनं गृह्णातीत्युक्तं तत्र यदि विभक्तः पिता माता वा विभक्ताय पुत्राय स्नेहवशादाभरणादिकं प्रयच्छति तदा विभक्तजेन दानप्रतिषेधो न कर्तव्यो नापि दत्तं प्रत्याहर्तव्यमित्याह—पितृभ्यामिति। मातापितृभ्यां विभक्ताभ्यां पूर्वं विभक्तस्य पुत्रस्य यद्दत्तमलङ्कारादि तत्तस्यैव न विभक्तजस्य स्व भवति। न्यायसाम्याद्विभागात्प्रागपि यस्य यद्दत्तं तत्तस्यैव। तथा, असति विभक्तजे विभक्तयोः पित्रोरश तद्दूर्ध्वं विभजता यस्य यद्दत्तं तत्तस्यैव नान्यस्येति वेदितव्यम्। मिता.

(३) 'विद्यया लब्धमेव चे' ति प्रागुक्तचकारसमुच्चय दर्शयन्नेव विभक्तस्य सौदायिकभ्रातृधनाप्राप्तिमाह—पितृभ्यामिति। पितृभ्यामिति पितामहादेरप्युपलक्षणम्। वीमि.

(४) पितृप्रसाददानप्रीतिदाने अर्थौचित्यानुरोधेनैव ज्ञेये। न तु यथाकामम्। महाजनाचारविरोधात्।

व्यप्र.५५८

नारदः

मणिमुक्तादयोऽविभाज्याः, स्थावरं विभाज्यम्

[2]**मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः।**
स्थावरस्य तु सर्वस्य न पिता न पितामहः॥
[3]**पितृप्रसादाद् भुञ्जन्ते वस्त्राण्याभरणानि च।**
स्थावरं तु न भुञ्जेत प्रसादे सति पैतृके+॥

मणिमुक्तादौ तु पुनः पैतामहे पित्रर्जितेऽपि स्वार्जित इव पितुरेव स्वाम्यं न्यूनाधिकविभागदानार्हत्वम्। दा.३२

पितामहश्रुतेस्तद्धनविषयक वचनम्। मणिमुक्तायुपादाय पुनः सर्वस्येत्युपादानात् सर्वेषां भूम्यादिव्यतिरिक्तानां दानादिषु पितुः प्रभुत्वं न स्थावरनिबन्धद्रव्याणाम्। तत्रापि सर्वस्येत्युपादानात् सर्वस्य कुटुम्बवर्त्तनहेतोर्दानादिनिषेधः कुटुम्बस्यावश्यभरणीयत्वात्। यथा मनुः—'भरण पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्। नरक पीडने चास्य तस्माद्यत्नेन तं भरेत्॥' अल्पस्य तु कुटुम्बवर्तनाविरोधिनो न दानादिनिषेधः सर्वस्येत्यानर्थक्यापत्तेः। स्थावरग्रहणात् निबन्धद्रिपदयोर्दण्डापपन्यायात् दानादिनिषेधसिद्धिः।

यदि पुनः सर्वस्थावरादिविक्रयमन्तरेण कुटुम्बवर्तनमेव न भवति तदा सर्वस्यापि विक्रयणादिकमर्थात् सिध्यति। सर्वत एवात्मान गोपायीतेति वचनात्।

दा.३३

---

(१) **यास्मृ.**२।१२३; **अपु.**२५६।१०; **विश्व** २।१२७, **मिता.**, **अप.**; **पमा** ५०१, **मपा.**६५७; **रत्न.**१४०,१४५; **व्यनि.**; **नृप्र.**३६; **दात.**१७५ यस्य (चैव), **वीमि.**; **व्यप्र.** ५५८ स्मरणात्; **व्यउ.**१५१; **विता.**३२६; **राकौ.**४५२; **बाल.**२।१४४; **समु.**१३२ कात्यायनः :१४४; **विच.**९२ दातवत्.

+ मिता व्याख्यान 'विभागोऽर्थस्य पित्र्यस्य' इति नारदवचने (पृ.११३२) द्रष्टव्यम्। व्यप्र. मितागतम्।

(१) **मिता.**२।११४ (=); **दा** ३३ याज्ञवल्क्यः; **अप.** २।१२३ स्यैव (स्य हि); **पमा.**४८४(=), **व्यनि.मनुः**; **स्मृचि.** ५९ तु (च) शेष अपवत्, कात्यायनः; **दात.**१६६ याज्ञवल्क्यः; **व्यप्र.**४१३(=), **व्यउ.**१४२(=) स्य तु (स्यैव); **व्यम.** ३९(=), **विता.**२८८ विष्णुः; **राकौ.**४४४(=); **सेतु.७४** याज्ञवल्क्य, **विभ.**४४(=)पू. : ५९(=); **समु.**१३३ प्रजापति, **विच.**४० याज्ञवल्क्यः.

(२) **मिता.**२।११४(=), **अप.**२।१२३ सति पैतृके (पैतृके सति); **पमा.**४८४(=), **स्मृचि.**५९ तु (च) कात्यायनः; **दात.**१६७(=) पितु (पितुः), **व्यप्र.**४१३(=): ५५८(=) पू; **विता.**२८८ विष्णुः; **राकौ.**४४४ (=); **विभ.**५९(=) दातवत्; **विच.**५६(=) दातवत्.

शौर्यभार्याविद्याधनपैतृकप्रसादाना विभाज्याविभाज्यविचारः

शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत् ।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः ॥

(१) भार्याप्राप्तिकाले लब्ध भार्याधन औद्वाहिकमित्यर्थः । एतानि वर्जयित्वा अन्यद्विभजेदित्यनुवर्तते वाक्यान्तरीयम् । दा.१०७

(२) भार्याधन सौदायिकम् । स्मृसा.६०

(३) युद्धादौ जित्वा लब्ध, विद्यया (लब्ध), भार्याधनं स्त्रीधन, त्रीण्यविभाज्यानि अनिच्छता तेषाम् । अथेच्छेयुः, विभज्यत एव । पित्रा तुष्टेन यद्दत्तमन्यतमस्य, तदप्यविभाज्यम् । नाभा.१४।६

मात्रा च स्वधनं दत्तं यस्मै स्यात्प्रीतिपूर्वकम् ।
तस्याप्येष विधिर्दृष्टो माताऽपीष्टे यथा पिता ॥

(१) स्वधन इति शेषः । एष विधिः पितृदत्तोक्तविषयो विधिः । ×स्मृच.२७६

(२) स्वधनपदोपादानात्स्त्रीधनविषयमिदम् ।
*विर.५०१

वैद्योऽवैद्याय नाकामो दद्यादंशं स्वतो धनात् ।
पितृद्रव्यं तदाश्रित्य न चेत् तेन तदाहृतम् ॥

(१) पित्र्यपदं साधारणधनपरं तदनाश्रित्यार्जितं वैद्योऽविद्याय अनिच्छन्न दद्यात्, वैद्याय विदुषे पुनः साधारणमन्तरेणाप्यर्जित दद्यादेव । दा.१०८

(२) पूर्वार्धे स्वकाद्धनादिति सामान्येनोक्त तदविद्याधनविषयमिति उत्तरार्धेनावगन्तव्यम् । अवैद्याय सकामिकोऽपि न दद्यात् । स्मृच.२७५

(३) अत्र चेदमभिप्रेत, यदा साधारणधनेनैव ग्रासाच्छादनाद्युपयोग कृत्वा समधिगतविद्यः साधारणधनानाश्रयेण विद्यया धन प्राप्नोति, तदाऽविद्याय न देय, साधारणधनाश्रयेण तु विद्ययार्जितमविद्यायापि देयम् । यदा तु विद्यार्जनकाले साधारणधनोपयोगो नास्ति तदा अर्जनकाले साधारणधनोपयोगेऽपि विदुषा न कस्यचिद्देय, किन्तु विदुष एव तद्धन, पितृद्रव्यानुपश्लेषार्जितस्याविभाज्यत्वमुक्त्वा पृथग्विद्यालब्धस्यापि व्यासेनाविभाज्यत्वप्रतिपादनात् । अत एव पुनरग्रे विद्याधनस्य यदविभाज्यत्व वक्ष्यते, तदसाधारणधनोपश्लेषेणैव उपात्तविद्यया धनार्जनकालेऽपि साधारणधनोपयोगे द्रष्टव्यमिति । हलायुधनिबन्धोऽप्येवमेव । प्रकाशकारादयस्तु विद्याधनादीना बोधकवचनानि पितृधनोपश्लेषविरहपराण्येवेत्याहुः, तच्च न उभयोपादानानुपपत्तेः । ×विर.५००–५०१

(४) अवैद्यायेति पदाद्यदा अपरोऽपि वैद्यः तेनापि विद्ययोपात्त तच्चैकत्र प्रविष्ट तदा दद्यादेव । एवं दृष्टार्थता भवति । वैद्येनापि यदा किञ्चिन्नार्जित तदा तस्यापि न देयम् । स्मृसा.६०

(५) अथ च निषेधो विद्यारहितानां धनसद्भावे ज्ञातव्यः । धनराहित्ये तु तेभ्योऽपीच्छया विद्यावता दातव्यम् । रत्न.१४७

× सवि. स्मृचगतम् । * स्मृसा. विरगतम् ।

(१) **नासं.**१४।६ चोभे (हित्वा), **नास्मृ.**१६।६; **मिता.** २।११४(८), **दा.**१०७,११३ नासमवत्, **अप** २।१२३, **व्यक** १४६. **विर** ५०१ ने चोभे (न हित्वा) त्रीण्येतान्यविभाज्यानि (न विभाज्यानि तान्याहुः); **स्मृसा** ६० नासमवत्, **रत्न.**१४७, **व्यनि.**नासमवत्, **स्मृचि** ३० नासमवत्; **दात.** १७५, **चन्द्र** ७८ नासमवत्; **दानि.**३ पैतृक (वै पितुः), **व्यम** ५६ दानिवत्; **विता** २८७:३४२ नासमवत्, **राकौ.** ४४३; **सेतु** ६९; **समु** १३२-१३३; **विच** ८६ नासमवत.

(२) **नासं** १४।७; **नास्मृ.**१६।७ पीष्टे (पि हि), **अप.** २।१२३, **व्यक.**१४६, **स्मृच.**२७६, **विर** ५०१, **स्मृसा** ६१; **रत्न.**१४७; **व्यनि.**; **स्मृचि.**३१ दत्त (यत्र), **सवि.** ३७० स्यात् (तु) यथा पिता (पिता यथा), **समु.**१३३.

(३) **नासं.**१४।११; **नास्मृ** १६।११ पितृ (पित्र्य) तदाश्रि (समाश्रि); **दा.**१०८ वैद्या (विद्या) दाह (दर्जि) शेष नास्मृवत्; **अप.**२।११९ऽवैद्या (वैद्या) शेष नास्मृवत्, **व्यक.** १४६; **स्मृच.**२७५ स्वतो (स्वकात्) तदाश्रि (समाश्रि), **विर.**५०० पूर्वार्धे (वैद्योऽविद्याय नांश तु प्रदद्याद्धे स्वतो धनात्)

× विचि. विरगतम् ।

पितृ (पैत्र्य) तदाश्रि (समाश्रि), **स्मृसा.**६० हृ (कृ) शेष नास्मृवत्; **पमा** ५६०-५६१ऽवैद्या (वैद्या) तदाश्रि (समाश्रि); **रत्न.**१४७, **विचि.**२११ वैद्या (विद्या) हृ (कृ) शेषं नास्मृवत्; **व्यनि.**ऽवैद्या (वैद्या) तदाह (समाह); **चन्द्र** ८१ऽवैद्याय ना (न विद्यया) पू., **व्यम.**५६ पमावत्, **विता.**३४१(=)ऽवैद्याय ना (विद्याधनात्) तदाश्रि (समाश्रि), **बाल.**२।११९ स्वतो (ततो) शेष नास्मृवत्; **समु.**१३२ व्यमवत.

कुटुम्बं बिभृयाद् भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात्स लभेताश्रुतोऽपि सन् ॥

(१) बिभृयादित्येकवचननिर्देशात् यदि विद्याम-भ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां सवर्धयति तदा तद्विद्योपार्जितधने तस्याप्यधिकारः । यत्पदोपात्तस्य कुटुम्बभर्तुः कर्तृत्वात् तद्विशेषणस्य एकत्वस्य विवक्षितत्वेन वित्तार्जकधनव्यावृत्त्या स्वीयासाधारणधनलाभः साधारणधनेन न लाभः साधारणधनेन भवने तु वित्तार्जकधनस्यैव तदुपयोगे स्वधनस्यैव वित्तार्जनोपयोग इति भावः । ÷दा.१०८

(२) अविभक्तधनोपयोगेन प्राप्तविद्याधनस्य विभाज्यत्वदर्शनार्थमेतत् । अश्रुतोऽप्यविद्योऽपीत्यर्थः ।

*स्मृच.२७४

(३) तदयं संक्षेपः । परपिण्डोपजीवनेन परतोऽधीतेन शस्त्रेण शास्त्रेण वा विद्योपार्जनकाले दायादैरपुष्यमाणकुटुम्बकेन साधारणधनमाश्रित्यापि यदर्जितं तद्विद्यार्जितमविभाज्यम् । विचि.२१३

(४) विद्याधनमविभाज्यमित्युक्तं तस्यायमपवादः ।

नाभा.१४।१०

(५) 'अश्रुतो अविद्य' इति मदनरत्ने । 'भाग दास्यामीत्यप्रतिश्रुत' इति तु युक्तम् । व्यम.५६

ऋणापाकरणावशिष्टमेव किंचिद् विभाज्यम् ।

यच्छिष्टं पितृदायेभ्यो दत्त्वर्णं पैतृकं च यत् ।
भ्रातृभिस्तद्विभक्तव्यमृणी न स्याद्यथा पिता ॥

(१) इदं च नारदवचनं पित्र्यर्णशोधनावश्यम्भावार्थं न विभागकालार्थम् । अस्माच्च नारदवचनादयमर्थः सिध्यति यद्विभागकर्तृभिरुक्तमर्णानुमत्यैव पित्रादि ऋणं विभजनीयं परिशोध्य वा शोधनावशिष्टधनविभागप्रतिपादनस्यैतत् प्रयोजनत्वात् । +दा.२५

(२) एवं च पैतृकधनं नवश्राद्धपैतृकर्णापाकरणार्थधनादभ्यधिकं चेन्नारदेनोक्तमेव कार्यम् । नो चेद्याज्ञवल्क्योक्तमेवेत्यवगन्तव्यम् । स्मृच.२६४

(३) पितृदायोऽत्र पित्रान्यस्मै प्रतिश्रुत धनम् । प्रकाशकारस्तु पितृदानेभ्य इति पाठं पुरस्कृतवान्, अर्थोऽत्रापि स एव । *विर.४९६

(४) पितृदायः पितृणं दत्त पित्रा दातुमङ्गीकृतम् । एवं च पितृण परिशोध्य पश्चाच्छेष वण्टनीयमित्यर्थः । विचि.२१०

(५) ऋणी न स्यादित्यनेनाशक्तौ शोधनीयमित्युक्तमर्णस्थाने स्वीकर्तव्यम् । दात.१६९

बृहस्पतिः

पैतामहं नष्टमृद्धृत स्वार्जितं च नाकामः पिता दद्यात् ।
पितुरूर्ध्वं समो विभाग ।

'पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितम् ।
विद्याशौर्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम् ॥

+ व्यप्र. दायभागस्य प्रथमकल्पवत् ।

* व्यम. विरगतम् ।

१६।३२, **दा.**२५ च यत् (तत.), **अप.**२।११७ न स्याद्य (स्यादन्य), **उ.**२।१४।२ पितृ (प्रीति) शेष अपवत्; **व्यक.** १४५; **स्मृच** २६४; **विर.**४९६ च (तु); **रत्न.**१४५; **विचि.**२१० दत्त्वर्ण (यद्दत्त) शेष अपवत्; **व्यनि.**; **दात.** १६९ विरवत्, **व्यप्र.**४३८ दावत्; **व्यम.**५४ अपवत्; **विता.**३३० अपवत्, **सेतु.**७७-७८ दावत्, **विभ** ७६,८४ दावत्, **समु.**१२८ अपवत्, **विच** ७१ दावत्.

(१) **दा.**१२८, **अप.**२।१२१ प्रा (ऽवा); **व्यक.**१४१; **स्मृच.**२८० प्रा (ऽऽवा), **विर.**४६१ प्राप्त (प्र च); **स्मृसा.** ५४(=); **पमा.**४९८; **रत्न.**१४१, **विचि.**१९६(=); **व्यनि.** पैतामहं हृत पित्रा (पितामहे स्मृत पित्र्य), **नृप्र.**३६, **चन्द्र.** ६९ पूर्वार्धे (पैतामहमनासाद्य स्वशक्त्या च यदर्जितम्) :७० हृत (कृत):७१ हृत पित्रा (अनासाद्य), **व्यप्र.**४५० स्मृत्यन्तरम्; **व्यम.**४२ प्राप्त (वाऽऽप्त), **विता.**३२० अपवत्;

+ मिता.व्याख्यान 'क्रमादभ्यागत' इति याज्ञवल्क्यवचने (पृ. १२१५) द्रष्टव्यम् । सवि., व्यप्र. मितागतम् ।

÷ दात. दागतम् ।

* विर. स्मृचगतम् । पमा. स्मृचवद्भावः ।

(१) **नासं.**१४।१० च्छतः (च्छति); **नास्मृ.**१६।१०, **मिता.**२।११९; **दा.**१०८, **अप.**२।११९; **व्यक.**१४७, **स्मृच.**२७४; **विर.**५०७; **स्मृसा.**६१; **पमा.**५६०, **मपा** ६८५; **रत्न.**१४७; **विचि.**२१३ कात्यायनः; **व्यनि** क्रमेण मनुविष्णू; **नृप्र.**३७; **दात.**१७४, **सवि.**३६९; **चन्द्र.**७९, **दानि.**३, **वीमि.**२।११९ कात्यायनः; **व्यप्र.**५५६; **व्यम.** ५६; **विता.**३४४; **सेतु.**६७; **समु.**१३५; **विच.८३.**

(२) **नासं.**१४।३२ यथा पिता (त्पिता यथा); **नास्मृ.**

प्रदानं स्वेच्छया कुर्याद् भोगं चैव ततो धनात् ।
तदभावे तु तनयाः समांशाः परिकीर्तिताः ॥

(१) स्वशक्त्येत्यसाधारणधनशरीरव्यापार दर्शयति । वचनद्वयेऽपि पितृपदमुपलक्षण स्वयमर्जितमिति हेतोरभिधानात् । एव च स्वार्जिताक्रमागतद्रव्यवदेव क्रमागतेऽप्येवरूपे भूमिव्यतिरिक्ते व्यवस्था बोद्धव्या । दा.१२९

(२) सुतानुमतिमन्तरेणापि पितुः स्वातन्त्र्यबलाद्दानादिक जीवद्विभागोक्तविषयविशेषे विषमविभागकल्पन च युज्यत इति तात्पर्यार्थः । स्मृच.२८०

(३) हृत परैरपहृत यदशक्त्या पितामहेन नोद्धृत स्वशक्त्या च पित्रोद्धृत तद्विद्याशौर्यादिनाप्त च कुर्यादित्यर्थः । विर.४६२

(४) एवविध एव धने ज्येष्ठस्याधिकदाने स्वभागद्वयकरणे च पितुरिच्छा । स्मृसा.५४

(५) तथा च प्राचीनधनाऽनुपक्लृप्तेन शौर्येण प्रकारान्तरेण वार्जिते तथा तदनुपक्लृप्तेनाभ्युद्धृते च धने पितुरिच्छयैव दानविभागादि । +विचि.१९७

सभूयार्जित सम विभाज्यम्

समवेतैस्तु यत्प्राप्तं सर्वं तत्र समांशिनः ।
तत्पुत्रा विषमसमाः पितृभागहराः स्मृताः×॥

+ शेष विरगतं स्मृसागत च ।

× व्याख्यासग्रहः स्थलादिनिर्देशश्च पुरुषपरम्परार्विभागविधौ (पृ.१२००) द्रष्टव्यः ।

बाल.२।११७ दिना प्राप्त (त्वया च):२।१२१, **विभ.**५८ विरवत्; **समु.**१३४ हृत (भृत) प्रा (वा), **विच.**६३ हृतं (कृत).

(१) **दा.**१२९; **अप.**२।१२१, **व्यक.**१४१, **स्मृच.** २८० चैव (कुर्यात्); **विर.**४६१ भो (भा) परि (सप्र), **स्मृसा.**५४ भो (भा) पू, **रत्न.**१४१, **विंच.**१९७(=) स्मृसावत्, **व्यनि.**खे (चे) भो (भा) तनया (ये पुत्रा.), **चन्द्र.** ७१ प्रदान (दान वा भो (भा) चैव (वापि) पू.; **व्यप्र** ४५० स्मृसावत्, स्मृत्यन्तरम्, **व्यम.**४२ पू, **विता.**३२० स्मृसावत्; **बाल.**२।११६ स्मृसावत्, पू :२।११७; **विभ.**५८ भो (भा) समांशाः परि (समानांशा. प्र); **समु.**१३४ **स्मृचवत्; विच.**६४ स्मृसावत्

विभाज्यद्रव्यविशेषाः । मनुकृताविभाज्यविचारपरीक्षा ।

गृहोपस्करवाह्यादिदोह्यालङ्कारकर्मिणः ।
दृश्यमाना विभज्यन्ते गूढे कोशो विधीयते ॥

न च कोशग्रहण यथाप्राप्तदिव्योपलक्षणार्थमिति वाच्य 'शङ्काविश्वाससधाने विभागे ऋक्थिना यदा । क्रियासमूहकर्तृत्वे कोशमेव प्रदापयेत् ॥' इति कात्यायनीये विभागविषये विहितेऽपि कोशे पुनरिह कोशाभिधानस्य नियमार्थत्वात् । तेन बार्हस्पत्येऽपि कोशग्रहण नियमार्थमेव । स्मृच.२७३

वस्त्रादयोऽविभाज्या यैरुक्तं तैर्न विचारितम् ।
धनं भवेत्समृद्धानां वस्त्रालङ्कारसंश्रितम् ॥
मध्यस्थितमनाजीव्यं दातुं नैकस्य शक्यते ।
युक्त्या विभजनीयं तदन्यथानर्थकं भवेत् ॥
विक्रीय वस्त्राभरणमृणमुद्ग्राह्य लेखितम् ।
कृतान्नं चाकृतान्नेन परिवर्त्य विभज्यते ॥
उद्धृत्य कूपवाप्यम्भस्त्वनुसारेण गृह्यते ।
यथाभागानुसारेण सेतुः क्षेत्रं विभज्यते ॥

(१) **स्मृच** २७३, **समु.**१३३ लङ्कार (भरण).

(२) **अप.**२।११९; **व्यक.**१४६, **स्मृच** २७७ यैरु (यैरप्यु), **विर.**५०५ वस्त्राल (पत्राल); **पमा** ५६४; **रत्न.** १४९, **व्यम.**५७, **विता.**३५३; **समु.**१३३.

(३) दा ९ उत्त., **अप.**२।११९; **व्यक.**१४६, **स्मृच.** २७७ उत्त, **विर.**५०५; **पमा.**५६४, **मपा** ६८६ उत्त., **रत्न.**१४९, **व्यप्र.**४१२ उत्त ; **व्यम.**५८; **विता.**३५३; **समु.**१३३ जीव्य (याच्य).

(४) **अप.**२।११९ णमृण (ण धन), **मवि.**९।२१९ उत्त.; व्यक.१४६, **स्मृच.**२७७, **ममु** ९।२१९ द्वितीयपाद विना, **विर.**५०५, **पमा** ५६४ चा (वा); **मपा.**६८६ ग्राह्य (वाह्य) विभ (विभा), **रत्न.**१४९; **मच.**९।२१९ प्रथमपादः, **व्यम.** ५८; **विता.**३५३ चा (वा), **बाल.**२।११९ भज्यते (वर्तयेत्), **समु.**१३३.

(५) **दा.**९ पू.; **अप.**२।११९ यथा (तथा); **व्यक** १४७; **स्मृच.**२७७ अनुसारेण (पर्याप्तमेव) पू.; **विर.**५०६; **पमा.** ५६४ पू.; **रत्न.**१४९; **व्यप्र.**४१२ पू.; **व्यम.**५८ स्ववनु (स्वबानु) गृह्य (भुज्य); **विता.**३५३ व्यमवत्; **सेतु.**७० पू, मनुः, **समु.**१३३ **क्षेत्रं** (एव); **विच.**९० पू.

एकां स्त्रीं कारयेत्कर्म यथांशेन गृहे गृहे ।
बह्वयः समांशतो देया दासानामप्ययं विधिः ॥
योगक्षेमवतो लाभः समत्वेन विभज्यते ।
प्रचारश्च यथांशेन कर्तव्य ऋक्थिभिः सदा ॥

(१) यच्च वस्त्रादीनामविभाज्यत्वमुक्तं तत्स्वरूपतः, मूल्यतस्तु विभजनीयमेव । यदाह बृहस्पतिः—वस्त्रादयोऽविभाज्या इति । एका स्त्रीमित्यनुपभुक्तदासीविषयम् । उपभुक्तायां गौतम आह—'उदकयोगक्षेमकृतान्नेष्वविभागः, स्त्रीषु च सयुक्तासु' इति । योगक्षेमवतो लाभमिति योगक्षेमवान्राजादिरीश्वरो यः पित्रादिभिः स्वकुटुम्बनिर्वाहकत्वेनोपार्जितस्ततो यो लाभो लब्धं धनं तत्समं विभाज्यमित्यर्थः । प्रचारः प्रवेशनिर्गमभूः ।

अप.२।११९

(२) यत्रापि चैकं दासीगवादिकं बहुसाधारणं तत्रापि तत्तत्कालविशेषवहनदोहनफलेन स्वत्वं व्यज्यते । तदाह बृहस्पतिः—एका स्त्री कारयेदिति । दा.९

(३) यद्यपि वस्त्रादावेकस्मिन् विदारणेन विभागे क्रियमाणे वस्तुनाशः । ऋणलेख्ये तु तत्प्रामाण्यनाशः, कृताने प्रभूते विभज्यमाने स्वल्पाशनभोक्तृभागे तन्नाशः, कूपादौ तु दुष्करो विभाग इति अविभाज्यत्वमेव प्रतिभाति, तथापि यथा वस्तुनाशाद्यनवतारः तथैव युक्त्या विभजनीयम् । अन्यथा साधारणतया अवस्थिते सति असूयया परस्परोपयोगप्रतिबन्धे कस्यचिदप्युपकाराभावात् अनर्थक भवेदित्यर्थः । युक्त्या विभजनप्रकारोऽपि तेनैव प्रपञ्चितः—विक्रीयेति । ऋणमुद्ग्राह्य अधमर्णसकाशादादाय तदनुसारेण स्वभागानुसारेणेत्यर्थः ।

स्मृच.२७७

(४) मध्यस्थितमनाजीव्यं मध्यग सदनुपयुक्तं दातुं नैकस्य शक्यते, एकस्मै दातुमशक्यं, योगक्षेमवतो विभागयोगक्षेमवतो मन्त्रिपुरोहितादेः । अत्र वस्त्रादीना बहुमूल्याना स्वरूपतो विभाज्यत्वमुक्तं, अतो मन्वादीनामविभाज्यत्ववचनमल्पमूल्यवस्त्रादौ स्वरूपत एव निषेधक, बहुमूल्येषु उक्तैतद्विभागप्रकारव्यतिरिक्तप्रकारेण विभागनिषेधकं द्रष्टव्यमित्यविरोधः । प्रकाशकारस्त्वल्पमूल्यमङ्गसंयुक्त यत्, तन्न विभजनीयं, समृद्धं तु धनं पत्रालङ्कारहरस्त्र्यादिसश्रित यत्तद्विभजनीयमेव, तस्य विभागप्रकार उक्तो 'मध्यस्थितमनाजीव्यमि'त्यादिनेत्याह ।

विर.५०६

(५) तेन वस्त्रादीनामविभाज्यत्वप्रतिपादकं मनुवचनमशनोवचनं चानादरणीयम् । तदनुपपन्नम् । विरोधे हि वचनाना विषयव्यवस्थाश्रयणं युक्तं न चान्यथाकरणम् । बृहस्पतिवचनाना तु अधृतवस्त्रादिविषयत्वम् । मन्वादिवचनस्य तु धृतवस्त्रादिविषयत्वं पूर्वमेवोक्तमिति विषयव्यवस्था घटते ।

पमा.५६५

वस्त्रालङ्कारशय्यादि पितुर्यद्वाहनादिकम् ।
गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत् ॥

पितृधृतवस्त्राणि तु पितुरूर्ध्वं विभजता श्राद्धभोक्त्रे दातव्यानि ।

मिता.२।११९

पितृदत्तविद्याशौर्यभार्याधनान्यविभाज्यानि

[1]पितामहपितृभ्यां च दत्तं मात्राऽपि यद्भवेत् ।
तस्य तत्रापहर्तव्यं शौर्यभार्याधने यथा ॥
[2]विद्याप्रतिज्ञया लब्धं शिष्यादात्तं च यद्भवेत् ।
ऋत्विङ्न्यायेन यल्लब्धं एतद्विद्याधनं भृगुः ॥

---

(१) दा.९ पू.; अप.२।११९; व्यक.१४७; स्मृच.२७७ बह्वयः (बाह्यः); विर.५०६; पमा.५६३,५६५; रत्न.१४९, नृप्र.३८; दात.१६४ पू.; व्यप्र.४१२ पू.; व्यम.५८; सेतु.३१८(=) पू.; समु.१३३.

(२) अप.२।११९; व्यक.१४७; स्मृच.२७७; विर.५०६; पमा.५६५ सदा (सह); रत्न.१४९ उत्त.; व्यम.५८ उत्त.; विता.३५३ उत्त.; बाल.२।११९ पू.; समु.१३३.

(१) मिता.२।११९ तद (सम); पमा.५६२; रत्न.१४८; स्मृचि.३०, नृप्र.३७, सवि.३७१; दानि.४; व्यप्र.५५७; व्यम.५७; विता.३५२; राकौ.४४९ पितुर्यं (यदन्य); समु.१३३.

(२) स्मृच.२७६ च (तु) ऽपि (च) ने (न); स्मृसा.६१ च (तु) ऽपि (च) ने य (न त); पमा.५६१ ऽपि (च) ने य (न त); रत्न.१४७ यथा (तथा); व्यनि.पमावत्; स्मृचि.३० शौर्यं (शौर्यं) यथा (तथा) शेष स्मृचवत्; व्यम.५६ रत्नवत्; विता.३४९ रत्नवत्; समु.१३२ ऽपि (च) यथा (तथा).

(३) स्मृचि.३१ ऋत्विङ् (ऋक्थ) भृगुः (विदुः); दानि.३.

स्थावरादि धनं स्त्रीभ्यो यद्दत्तं श्वशुरेण तु ।
न तच्छक्यमपाहर्तुं दायादैरिह कर्हिचित् ॥

श्वशुरग्रहण भरणकारिण उपलक्षणार्थम् । स्थावर ग्रहण धनस्योपलक्षणार्थम् । तेन धनादपि जीवनाद्यर्थ स्त्रीभ्यो दत्तमपाकर्तुमशक्यमित्यवगन्तव्यम् । स्मृच.२९३

मैदूर्द्ध्वमिति यद्दत्तं न तत्स्वत्वावहं भवेत् ।
तेनेदानीमदत्तत्वान्मृते रिक्थिनमापयेत् ॥

समविषमविभागविकल्प.

द्विप्रकारो विभागस्तु दायादानां प्रकीर्तितः ।
वयोज्येष्ठक्रमेणैकः समा परांशकल्पना ॥

(१) पितर्युपरतेऽपि द्विप्रकारो विभागो बृहस्पतिनोक्तः । यथा—द्विप्रकार इति । ज्येष्ठक्रमेणेत्युद्धार दर्शयति तथा समाशता परेति भ्रातृणामपि परस्परविभागस्य द्विप्रकारत्वात् पितृकृतस्य विशेषो न स्यात् । *दा.५५

(२) सोद्धारानुद्धाराभ्या द्विप्रकारविभागमाह बृहस्पतिः —द्विप्रकार इति । वयोज्येष्ठक्रमेणेत्युद्धाराभिप्रायेण । शूद्रे तु उद्धाराभावो वक्ष्यते । समभागस्य शास्त्रीयत्वेऽपि उद्धारपक्षो भक्त्यतिशयादविरुद्धः । विभागाविभाग विकल्पवत् । दात.१७०

कात्यायनः

पैतामह नष्टमुद्धृत स्वार्जित च पिता नाकामो विभजेत्

स्वैशक्त्यापहृतं नष्टं स्वयमार्जं च यद्भवेत् ।
एतत्सर्वं पिता पुत्रैर्विभागे नैव दाप्यते ॥

(१) यत्परैरपहृत क्रमायात स्वशक्त्या उद्धृतं यच्च नष्टं वा क्रमायात स्वेनैव लब्ध यच्च शौर्यादिना स्वयमर्जित एतत्सर्वं पिता विभागे पुत्रैर्न दाप्य इत्यन्वयः । ×स्मृच.२८०

(२) इद भूमिन्नविषयमिति प्रागुक्तमेवेति बोध्यम् । बाल.२।१२१

विद्याशौर्यादिधनाना विभाज्याविभाज्यत्वविचारः तल्लक्षणानि च

परभक्तोपयोगेन विद्या प्राप्ताऽन्यतस्तु या ।
तया लब्धं धनं यत्तु विद्याप्राप्तं तदुच्यते+॥

(१) भक्तमन्नम् । अन्यतः पितुरन्यत इत्यर्थः । अप.२।११९

(२) परशब्दोऽविभक्तापेक्षया यद्भक्तयन्तरं तत्र प्रयुज्यते । भक्तशब्दोऽत्र द्रव्यमात्रोपलक्षणतया प्रयुक्तः । उक्तलक्षणया विद्यया धनप्राप्तिनिमित्तत्वमनेकविध-

---

* सेतु. दागतम् ।

(१) **स्मृच.**२९३ दि धन (ज्जीवन) (न तच्छक्यमपाकर्तुमितरैः श्वशुरे मृते); **सवि.**४१० स्मृचवत्, कात्यायनः, **व्यप्र.**५१६; **बाल.**२।११३,२।१४४ दायादैरिह (पुत्रैरपि हि); **समु.**१४१ दि धन (ज्जीवन) दाया...चित् (इतरै श्वशुरे मृते).

(२) **समु.**९७.

(३) **दा.**५५; **दात.**१७०:१९३ कीर्तितः (दर्शितः) समा परां (परा समां); **सेतु.**७९ समा परा (परा समा); **विभ.** ८० सेतुवत्; **विच** ७१ मनुः.

(४) **अप.**२।१२१; **स्मृच.**२८०, **पमा.**४९८ नष्ट (द्रव्य) भागे (भाग); **नृप्र.**३६; **दानि.**३ नष्ट (द्रव्य) पू.; **बाल.** २।१२१ पद्धत (**ध्दृत**); **समु.**१३४.

× पमा. स्मृचगतम् ।

+ वीमि. व्याख्यान 'क्रमादभ्यागतं' इति याज्ञवल्क्यवचने (पृ.१२१८) द्रष्टव्यम् ।

(१) **मिता.**२।११९; **अप.**२।११९ लब्ध (प्राप्तं); **उ** २।१४।२ पर...यत्तु (परभक्तप्रदानेन प्राप्तविद्यो यदाऽन्यतः । तया प्राप्त तु विधिना); **व्यक.**१४६ पूर्वार्धे (परभक्तप्रदानेन प्राप्तविद्यो यदन्यत.), **स्मृच.**२७४ लब्ध....यत्त (प्राप्त तु यद्वित्त); **ममु.**९।२०६ पर...यत्तु (परभक्तप्रदानेन प्राप्ता विद्या यदान्यत । तया प्राप्त च विधिना); **विर.**५०२ पूर्वार्धे (परभक्तप्रदानेन प्राप्तविद्यो यदन्यतः) शेष स्मृचवत्; **स्मृसा.** ६१ पूर्वार्ध विरवत्, उत्तरार्ध ममुवत्; **पमा.**५५९ विद्या प्राप्ता (प्राप्ता विद्या) लब्ध (प्राप्तं); **मपा.**६८५; **दीक.**४३ पर.. यत्त (परभक्तप्रदानेन प्राप्तविद्यो यदा भवेत्। तदा प्राप्त च विधिना); **रत्न.**१४६, **विचि.**२१२ विरवत्; **व्यनि.**उक्त; **स्मृचि.**३१ पर...यत्तु (प्रतिभक्ताप्रदानेन प्राप्तविद्यो यदान्यतः । तया प्राप्त तु विधिना), **नृप्र.**३७, **दात.**१७४ प्राप्त (लब्ध); **सवि.**३६९; **चन्द्र.**७८ पर...यत्तु (परभक्तप्रदानेन प्राप्तविद्यो यदन्यतः । तया प्राप्त च यद् द्रव्य); **वीमि.**२।११९ पर...यत्तु (परभक्तप्रदानेन प्राप्ता विद्या यदन्यतः । तया प्राप्त तु यद् द्रव्य); **व्यप्र.**५५६ योगे (भोगे) शेष अपवत्, **व्यम.**५५; **चिता.** ३४३; **सेतु.**६८ दातवत्, **समु.**१३२ अपवत्; **विच.**८५ दातवत्.

मिति निमित्तभावमेदेन तत्प्राप्तं धनमप्यनेकविध तत्सर्वमविभाज्यमिति सक्षेपतो विद्याप्राप्तशब्देनैव व्यासेनाभिहितम्। *स्मृच.२७४

(३) परभक्तप्रदानेऽपि यदा पित्रादिभ्य एव प्राप्तविद्यस्तदपि विभाज्यमेव। अन्यत इति पदाद्विद्याप्रदानद्वारा पितुस्तत्र व्यापारात्। स्मृसा.६१

(४) अत्र परान्यशब्दावविभक्तापेक्षया प्रयुक्तौ। रत्न.१४६

(५) विद्या शस्त्रशास्त्रयोः। तेन पित्रादितः स्वदायाच्छस्त्र शास्त्र वाऽधीत्य तेन यदर्जयति तत्र भ्रात्रन्तराणामपि भाग इत्यर्थः। +विचि.२१२

(६) अन्यतः पितृमातृकुलव्यतिरिक्तात्। दात.१७४

(७) पितृद्रव्याविरोधेनेति सर्वशेषः। कात्यायनस्त्वविभाज्यविद्याधनलक्षणमुखेनैतदेव द्रढयति यथाह—परभक्तोपयोगेनेति। व्यप्र.५५६

(८) परः पित्रसबन्धी। विता.३४३

[1]उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्वकम्।
विद्याधनं तु तद्विद्यात् विभागे न विभज्यते॥
[2]शिष्यादार्त्विज्यतः प्रश्नात् संदिग्धप्रश्ननिर्णयात्।
स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत्॥

* पमा., चन्द्र. स्मृचवद्भावः। सवि. स्मृचगतम्।
+ शेषं स्मृचगतम्।

(१) दा.१२२ विभज्यते (नियोज्यते); अप.२।११९ न्यस्ते तु यल्लब्ध (न्यस्तेन लब्ध यत्) विभ (नियु); व्यक १४६ (उपन्यस्ते च यल्लब्धं लब्धं प्राध्ययनाच्च यत्। विद्याधन तु तत्प्राहुः सामान्य यदतोऽन्यथा॥); स्मृच.२७४ विभ (नियु); ममु.९।२०६ स्ते तु (स्ते च), विर.५०२ ममुवत्; स्मृसा. ६१ स्ते तु (स्तेषु) विभ (नियो); पमा.५५९ स्मृसावत्; विचि.२१२; व्यनि.द्विधा...ते (द्विधादविभागो नियोज्यते); स्मृचि.३१ तु (च); नृप्र.३७ स्मृसावत्, दात.१७३ दावत्; सवि.३६८ न्यस्ते (न्यस्य) विभ (नियु); चन्द्र.७८ स्ते तु (स्तेषु); व्यम.५५; विता.३४३; सेतु.६७ विभागे...ते (तद्विभागेन युज्यते); समु.१३२; विच ८४ विभ (प्रयु) उक्त.

(२) दा.१२२-१२३; अप.२।११९; स्मृच.२७४; ममु. ९।२०६; विर.५०२, स्मृसा.६१ प्रश्न (स्थ च); पमा. ५५९ शस (शास) ध्यय (ध्याप), रत्न.१४६, विचि.२१२ च (तु); व्यनि.स्व (प्र); स्मृचि.३१; नृप्र.३७ प्रश्न (प्रति) शस (शास), दात.१७३ विचिवत्; सवि ३६८ स्व (सु); मच.९।२०६ स्वज्ञान (अज्ञात); चन्द्र.७८ स्मृसावत्; दानि. ३ त्विज्यतः (चार्यतः); व्यम.५५ दानिवत्; विता.३४३; सेतु.६७ लब्ध प्रा (लब्धम); समु.१३२; विच ८४.

(१) दा.१२३ विभ (नियु); अप.२।११९; स्मृच. २७४ दावत्; विर.५०२; स्मृसा.६१ पू.; पमा.५५९ शिल्पे (शिल्पि) मूल्या (स्वस्था) उक्त.; रत्न १४६; विचि. २१२; व्यनि.भज्यते (भाव्यते); नृप्र.३७ भज्य (भाज्य) शिल्पे (शिल्पि), दात.१७३ विभज्यते (प्रयोजयेत्); सवि.३६८ दावत्, पू., चन्द्र.८० च्चाधि (दधि) उक्त.; दानि.३; व्यम.५५ शिल्पे (शिल्पि); विता.३४३ ल्या (ला) शेषं व्यमवत्, उक्त., सेतु.६७ न विभ (तत्र यु) हि (च); समु. १३२ व्यमवत्, विच.८४ विभ (प्रयु) हि (च).

(२) दा.१२३ पण (द्यूत); अप.२।११९ धया पण (द्यातो द्यूत); व्यक.१४६, स्मृच.२७४, विर.५०२; रत्न.१४६ उक्त.; पमा.५५९ धया पण (द्यातोऽद्भुत); नृप्र.३७ अपवत्; दात.१७३ दावत्; सवि.३६८ अपवत्; व्यम.५५, विता. ३४४ द्यूतपूर्वकमिति गौडपाठः; सेतु.६७; समु.१३२ अपवत्; विच.८४ दावत.

(३) अप.२।११९; व्यक.१४६, स्मृच.२७४; विर. ५०२, रत्न.१४६; विचि.२१२ (विद्याप्रतिज्ञया लब्धमेतद्विद्याधन भृगुः) एतावदेव, सवि.३६८ त्विङ्न्यायन (त्विजा येन); व्यम.५५; विता.३४४; समु.१३२.

(४) अप.२।११९ बलकृत चैव (पणकृतावेव); स्मृच. २७४; विर.५०२ बल (पण); पमा ५५९; व्यनि.विरवत्, नृप्र ३७; व्यम.५५ बल (लब्ध), विता.३४३-३४४; समु.१३२.

[1] विद्याधनं तु तत्प्राहुर्विभागे न विभज्यते।
शिल्पेष्वपि हि धर्मोऽयं मूल्याद्यधिकं भवेत्॥
परं निरस्य यल्लब्धं विद्यया पणपूर्वकम्।
विद्याधनं तु तद्विद्यान्न विभाज्यं बृहस्पतिः॥
[3] विद्याप्रतिज्ञया लब्धं शिष्यादाप्तं च यद्भवेत्।
ऋत्विङ्न्यायेन यल्लब्धमेतद्विद्याधनं भृगुः॥
[4] विद्याबलकृतं चैव याज्यतः शिष्यतस्तथा।
एतद्विद्याधनं प्राहुः सामान्यं यदतोऽन्यथा॥

(१) यदि भवान् भद्रकमुपन्यस्यति तदा भवते मया एतावद्देयमिति पणितं तत्रोपन्यास निस्तीर्य लभते तन्न विभाज्यम् । शिष्यादध्यापितात् । आर्त्विज्यतः यजमानात् दक्षिणादिना लब्धम् । दक्षिणा च न प्रतिग्रहो वेतनरूपत्वात् तस्याः । तथा यत्किंचित् विद्यायाः प्रश्ने निस्तीर्णे अपणितमपि यदि कश्चित्परितोषात् ददाति । तथा यो ह्यस्मिन् शास्त्रार्थे मम सशयमपनयति तस्मै सुवर्णमिद ददानीत्युपस्थितस्य संशयमपनीय यल्लब्ध, वादिनोर्वा सदेहे न्यायकरणार्थमागतयोः सम्यङ्निरूपणेन यल्लब्ध षष्ठाशादिकम् । तथा शास्त्रादिषु स्वप्रकृष्टज्ञानं विभाव्य यत् प्रतिग्रहादिना लब्धम् । तथा द्वयोः शास्त्रविज्ञानविवादेऽन्यत्रापि यत्र कुत्रचिदन्योन्यज्ञानविवादे निर्जित्य यल्लब्धम् । तथैकस्मिन् देये बहूनामुपस्थिते येन प्रकृष्टमधीत्य यल्लब्धम् । तथा शिल्पादिविद्यया चित्रकरसुवर्णकारादिभिर्लब्धम् । द्यूतेनापि परं निर्जित्य यल्लब्ध तत् सर्वमविभाज्यमितरैः । तदयमर्थो यया कयाचिद्विद्यया यल्लब्धमर्जकस्यैव तत् नेतरेषा, प्रदर्शनार्थ तु कात्यायनेन विस्तरेणोक्त श्रीकरादिभ्रमनिरासार्थम् । अतः स्वज्ञानख्यापनादिना यत् प्रतिग्रहलब्धं तदपि विद्याधनमेव विद्ययैव विदुषे प्रतिग्रहदानात् । तथा यमः —'विद्याशीलो धर्मयुक्तः प्रशान्तः क्षान्तो दान्तः सत्यवादी कृतज्ञः । वृत्तिग्लानो गोहितो गोशरण्यो दाता यज्वा ब्राह्मणः पात्रमाहुः ॥ अव्रतानाममन्त्राणा जातिमात्रोपजीविनाम् । नैषा प्रतिग्रहो देयो न शिला तारयेज्जलाम् ॥' विद्वत्तयैव पात्रत्वात्। अविदुषा चापात्रत्वात् । अतो यत् केनचिदुक्त विद्याधन तु विद्याध्यापननिमित्त यत् तदुच्यते इति तदुक्तवचनादर्शनेनेति हेयमेव, विद्याशब्दस्य विद् ज्ञाने इत्यस्माद्धातोर्निष्पत्तेर्ज्ञानवचनात् ।

यच्च प्रतिग्रहधनस्यापि विद्याधनत्वेन याजनाध्यापनप्रतिग्रहाणा सकीर्णत्वमापादित श्रीकरेण तदतिमन्द, विद्याधनत्वसामान्यस्य याजनाध्यापनप्रतिग्रहादिनानाव्यक्तिसबन्धेऽपि व्यक्तीनामसकीर्णत्वात् तदापि याजनाध्यापनस्याप्रतिग्रहत्वात् गोत्वसमवायेऽपि नीलकपिलकापोतिकादिव्यक्तीनामसंकीर्णत्वस्याविवादात् । अत एष शिष्यादार्विज्यतः प्राप्तयोर्विद्याधनत्वं स्मरन् मुनिर्याजनाध्यापनयोः संकरात् कथं न बिभेति । अतः पक्षग्रहणमात्रेण तदभिधानमिति हेयम् ।

*दा.१२३-१२५

(२) उपन्यस्ते वर्णत्यागादिवैचित्र्येणोपन्यस्ते । शिष्यादध्यापनादौ । आर्त्विज्यत आर्त्विज्यकरणात् । प्रश्नात् उपपातक्यादिकृतप्रायश्चितार्थप्रश्नात् । सदिग्धप्रश्ननिर्णयात् अर्थ्यादिकृतप्रश्नप्रतिप्रश्नयोर्निर्णयात् । स्वज्ञानशसनादग्रपूजादौ स्वज्ञानख्यापनात् । वादात् जल्पवितण्डादिभेदात् । प्राध्ययनात् घटिकाध्ययनात् । विद्यातोऽक्षहृदयज्ञानादिना विद्याप्रतिज्ञया बहुविद्याढ्यत्वप्रतिज्ञया । शिष्यादात गुरुपूजार्थ, ऋत्विङ्न्यायेन लब्ध उपदेष्टृत्वादिना लब्धम् । शिल्पेष्वपि हि शिल्पविद्योपार्जनविषयेष्वपि अयं विद्याधनविभागरूपो धर्मोऽस्ति । मूल्याद्धृतेर्यद्धनमधिक भृतकाध्ययनादौ भवेत् । तथा विद्याबलकृतविद्याधिक्यकृतं यद्विशिष्टपूजादौ भवेत् । तथा 'यद् याज्यतः शिष्यतः सस्कारादौ भवेत् । तदेतद्विद्याधनं प्रातिस्विक प्राहुः । अतो विद्याधनादन्यथाभूत अविभक्तपित्रादिद्रव्योपयोगेन प्राप्त तदविभक्तानां सामान्य साधारणं विभाज्यमिति यावत् । शेष व्यक्तार्थम् । +स्मृच.२७४

(३) प्राध्ययनात्प्रकृष्टाध्ययनात् । मूल्याद्यच्चाधिक भवेदिति उचितमूल्यात्पुरुषवृद्धया यदधिक लभ्यते, तदपि तस्यासाधारणमेवेत्यर्थः । विद्यापणकृतमिति, अत्राध्याये अत्र वादस्थाने वाऽप्रमादिना इद वक्तव्यमित्यनेन रूपेण यल्लब्ध, तदप्यसाधारणमित्यर्थः । विद्याप्रतिज्ञयेति अहमेवेमा विद्यामधीये इति प्रतिज्ञा तया लब्धम् । विर.५०३

(४) उपन्यस्ते क्रमजटादिरूपेण सकल्प्य पठिते, पणपूर्वकमुपन्यस्ते इत्यन्वयः । शिष्यात् शिष्याध्यापनात्, आर्त्विज्यतः हौत्रादिकरणात्, प्रश्नात् दुर्बोधार्थप्रश्नात्, संदिग्धप्रश्ननिर्णयात् कठिनप्रश्नोत्तराभिधानात्, स्वज्ञानशंसनात् सभाया स्वज्ञानप्रख्यापनात्, वादात् जल्पवितण्डादिरूपात्, प्राध्ययनात् प्रकृष्टाध्ययनात्, शिल्पिष्वपीति शिल्पविद्योपजीविष्वपि अयं विद्याधना-

* दात, दावत् । + पमा, स्मृचबद्भावः ।

विभजनरूपो धर्मोऽस्ति। उचितमूल्याद्यधिकं पुरुषप्रतिष्ठया लभ्यते। विद्याबलकृतं सभापूजादौ यद्विद्याधिकवशाल्लब्ध, याज्यतः दक्षिणाव्यतिरेकेण(करेण) सत्काररूपेण लब्धम्। विद्याप्रतिज्ञया लब्धं बहुविद्योऽहमस्मीति प्रतिज्ञया लब्धम्। शिष्यादात गुरुदक्षिणारूपेण। ऋत्विङ्न्यायेन उपद्रष्टृत्वादिना। रत्न.१४६–१४७

(५) अल्पमूल्येनैव यद्द्रव्य विक्रेत्रा क्रेतरि पुरुषे दत्त तत्राधिकभागः क्रेतुरसाधारणः।

×विचि.२१२–२१३

(६) प्राध्ययनं घटिकाशतकादिनिर्माणम्। धन विनाध्ययनं (अन्नदानाध्ययनं) वा। अत्र च पितृद्रव्याविरोधेन यत्किंचित्स्वयं आर्जितमिति सर्वशेषः।

सवि.३६८–३६९

(७) उपन्यासः क्रमजटादीना सकलितानां पाठः इति मदनरत्ने। सभाया गूढप्रमेयविवृतिरिति केचित्। पणपूर्वकमुपन्यस्त इत्यन्वयः। अत्र सर्वत्रापि विद्याधिगमे तया द्रव्यार्जने च पितृद्रव्याविरोधे सत्येवाविभाज्यत्व विरोधे तु विभाज्यमेव। *व्यम.५५-५६

[1]आरुह्य संशयं यत्र प्रसभं कर्म कुर्वते।
तस्मिन्कर्मणि तुष्टेन प्रसादः स्वामिना कृतः॥
[2]तत्र लब्धं तु यत्किंचित् धनं शौर्येण तद्भवेत्।
[3]ध्वजाहृतं भवेद्यत्तु विभाज्यं नैव तत्स्मृतम्॥

× शेष पूर्वव्याख्यासु गतम्। * शेष रत्नगतम्।

(१) दा.१२६; अप.२।११९; व्यक.१४६; स्मृच.२७५ तु (ह्व); विर.५०३; स्मृसा.६१; पमा.५६१; रत्न.१४७; विचि.२१३; स्मृचि.३१ बृहस्पतिः, नृप्र.३८, चन्द्र.७९, व्यम.५६, विता.३४४; समु.१३२; विच.८६ यत्र (जेतुः).

(२) दा.१२६; अप.२।११९ तद्भ (यद्भ) त्स्मृतम् (द्भवेत्); व्यक.१४६; स्मृच.२७५; विर.५०३; स्मृसा.६१ लब्धं (प्राप्त), पमा.५६१; रत्न.१४७, विचि.२१३ तु य (च य) भाज्यं (भज्य); स्मृचि.३१ तु य (च य) तद्भ (यद्भ) बृहस्पतिः; नृप्र.३८ पू.; चन्द्र.७९ विभा...तम् (न विभाज्य कदाचन); दानि.३ उत्त.; व्यम.५६; विता.३४४-३४५; समु.१३२; विच.८६ तु य (च य).

[4]संग्रामादाहृतं यत्तु विद्राव्य द्विषतां बलम्।
स्वाम्यर्थे जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते॥

अत्रापि विद्याप्राप्तवदविभाज्यत्वे पित्राद्यविभक्तधनानुपयोगेनार्जन प्रयोजकमित्यवगन्तव्यम्। स्मृच.२७५

[5]शौर्यप्राप्तं विद्यया च स्त्रीधनं चैव यत्स्मृतम्।
एतत्सर्वं विभागे तु विभाज्यं नैव रिक्थिभिः॥
[6]कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा।
शौर्यप्राप्तं तु यद्वित्तं विभाज्य तद् बृहस्पतिः॥

अविभक्तस्वकुले पितृव्यादेः पितृतोऽपि वा शिक्षितविद्याना यद्वित्त शौर्यप्राप्त विद्यैव प्राप्त तद्विद्याधन विभाज्य बृहस्पतिरब्रवीदित्यर्थः। *स्मृच.२७५

[7]नाविद्यानां तु वैद्येन देयं विद्याधनात्कचित्।
समविद्याधिकानां तु देयं वैद्येन तद्धनम्॥

* विर., पमा., दात. स्मृचवत्।

(१) दा.१२६ द्राव्य (जित्य); अप.२।११९, व्यक.१४६, स्मृच.२७५; विर ५०३, स्मृसा.६२; पमा.५६१, रत्न.१४७; विचि.२१३; स्मृचि.३१ बृहस्पतिः, चन्द्र.७९; दानि.३ त्तु (च्च) बलम् (बले), व्यम.५६ तु (च्च), विता.३४५ ता (तो) जाहृत (जाहृत); समु.१३२; विच.८६.

(२) स्मृच.२७६ विभाज्य नैव (न विभाज्य तु), पमा.५६१, रत्न.१४७, नृप्र.३७, विता.३४४, समु.१३२ विभाज्य नैव (न च वै भाज्य).

(३) व्यक.१४६, स्मृच.२७५ तद् (तु), विर.५०७; पमा.५६०; स्मृसा.६२ कुले (काले) तृणा (तृतः) तु (च), रत्न.१४७, विचि.२१२ तृणा (तृत.) तोऽपि वा (तस्तथा) विभाज्य तद् (तद्विभाज्य), व्यनि शौर्य (विद्या) बृहस्पति.; दात.१७४, चन्द्र.७९ तृणा (तृतः), व्यम.५६, विता.३४४, मेतु.६६ उत्तरार्धे (शौर्यप्राप्त च तद्वित्त तद्विभाज्य बृहस्पतिः); समु १३२ र्यप्रा (र्याद्या); विच.८३ तु (च) विभाज्य तद् (तद्विभाज्य).

(४) दा.१०८ नात्कि (न क), अप.२।११९ दावत्; उ.२।१४।२ समविद्याधिका (सम विद्याधना), व्यक.१४६; स्मृच.२७५ दावत्; विर.५००; पमा.५६१ दावत्; रत्न.१४७; व्यनि.; स्मृचि.३१ दावत्, दात.१७४, दानि.३ तद्धनम् (तद्भवेत्) शेष दावत्, व्यम.५६ नावि (नावै) शेष दानिवत्, विता.३४१; बाल.२।११९; सेतु.६६ दावत्; समु.१३२; विच.८३ दावत्.

(१) तन्त्रोच्चरितविद्यापद उभाभ्या समाधिकपदाभ्या संबध्यते तेन समविद्याधिकविद्याना दातव्य न्यूनविद्याविद्ययोः पुनरनधिकारः। ×दा.१०९

(२) अवैद्याना न क्वचित् देयम्। सकामेनापि न देयमित्यर्थ। —स्मृच.२७५

(३) अय च निषेधो विद्यारहिताना धनसद्भावे ज्ञातव्यः। धनराहित्ये तु तेभ्योऽपीच्छया विद्यावता दातव्यम्। रत्न.१४७

(४) तदपीच्छया न तु नियमः। विता.३४१

(५) वैद्यो विद्यावान्। अय च सिद्धान्तेऽविभाज्यत्वेन प्राप्तस्यापवादः। एतेन नारदीय कातीयापवाद इति मन्दोक्तमपास्तम्। कातीयेन अविभाज्यस्यैव तस्य लक्षणकरणात्। प्रकरणात्। तथैव च व्याख्यात्रोक्तम्। अन्यथा तद्विशेषणासगतिरेव स्यात्। एव च विद्याधनमन्यदपीति नारदादिविरोधो व्याख्यातुरिति बोध्यम्। बाल.२।११९ (पृ.१४५)

यल्लब्धं दानकाले तु स्वजात्या कन्यया सह।
कन्यागतं तु तद्वित्तं शुद्धं वृद्धिकरं स्मृतम्॥
वैवाहिकं तु तद्विद्याद्भार्यया यत्सहागतम्।
धनमेवंविधं सर्वं विज्ञेयं धर्मसाधकम्॥

(१) भार्याप्राप्तिकाले लब्धमित्यर्थः। दा.१२६

(२) कन्यागतवैवाहिकयोः स्वरूपमाह कात्यायनः—यल्लब्ध दानकाले त्वित्यादि। कन्यागत कन्यया सहागतम्। स्मृच.२७५

(३) अथ यादृशमौद्वाहिक साधारण तदाह—यल्लब्धमिति। विर.५०३

× दात., सेतु. दाव्त्। ÷ पमा. स्मृचवत्।

(१) **अप.**२।११८ दान (लाभ) स्व (स) वृद्धि (वृत्ति), **व्यक.**१४६ दान (लाभ); **स्मृच.**२७५ स्व (स) शुद्ध (एतत्); **विर.**५०३ दान (लाभ) स्व (स) शुद्ध (शुल्क); **रत्न.**१४८ व्यकवत्; **विचि.**२१३ दान (लाभ) वृद्धि (वृत्ति); **चन्द्र.**७९ (=) व्यकवत्; **व्यम.**५७ दान (लग्न); **विता.**३५० व्यकवत्; **समु.**१३२ स्व (स), **विच.**८६ विचिवत्.

(२) **दा.**१२६ पू.; **अप.**२।११८; **व्यक.**१४६; **स्मृच.**२७५ त्सहा (त्समा); **विर.**५०३ धम (कर्म); **रत्न.**१४८ यत (तत्); **विचि.**२१३ रत्नवत्; **व्यनि** त्सहाग (त्समाह); **चन्द्र.**८०(=) स्मृचवत्, पू., **व्यम.**५७, **विता.**३५० पू.; **समु.**१३२; **विच.**८७.

(४) औद्वाहिकवत् कन्यागतस्यापि अविभाज्यत्वमभिसधाय तयोः स्वरूपमाह कात्यायनः—यल्लब्धमित्यादि। अनयोरपि साधारणद्रव्याश्रयणेनार्जने पूर्वोदाहृतवचनाद्विभाज्यत्वम्। अर्जकस्य चाशद्वय ज्ञातव्यम्। रत्न.१४७–१४८

(५) अत्रापि विद्याधनवदेव पितृद्रव्याविरोधश्चेत् अविभाज्यत्वम्। विद्यादिव्यतिरिक्तप्रकारेण तु लब्ध विभाज्यमेव। व्यम.५७

मनुकृतविभाज्यविचारपरीक्षा

धनं पत्रनिविष्टं तु धर्मार्थं च निरूपितम्।
उदकं चैव दाराश्च निबन्धो यः क्रमागतः॥
धृतं वस्त्रमलङ्कारो नानुरूपं तु यद्भवेत्।
यथाकालोपयोग्यानि तथा योज्यानि बन्धुभिः॥
गोप्रचारश्च रक्षा च वस्त्रं यच्चाङ्गयोजितम्।
प्रयोज्यं न विभज्येत धर्मार्थं च बृहस्पतिः+॥

(१) प्रायोज्य यद् यस्य प्रयोजनार्ह यथा श्रुतादौ

+ स्मृच व्याख्यान 'वस्त्र पत्रमलङ्कार' इति मनुवचने (पृ.१२१०) द्रष्टव्यम्।

(१) **अप.**२।११९; **व्यक.**१४६; **स्मृच.**२७७ (धन पत्रनिविष्टम्) एतावदेव; **विर.**५०४ च नि (यन्नि); **मपा.**६८५ स्मृचवत्; **रत्न.**१४९ विरवत्; **चन्द्र.**८० चतुर्थपादः; **दानि.**५ च नि (यन्नि) दारा (दास), **व्यम.**५८ दानिवत्, **विता.**३५४ पत्र (यत्र) शेष दानिवत्, **बाल.**२।११९ विरवत्; **समु.**१३३ दानिवत्.

(२) **अप** २।११९ धृ (घृ), **व्यक.**१४६; **विर.**५०५ तु (च) योग्या (युक्ता); **रत्न.**१४९; **चन्द्र.**८० नानु (नार्थ) यद्भ (तद्भ) पू., **दानि.**५ तथा (यथा) योग्या (युक्ता); **व्यम.**५८ योग्या (युक्ता); **विता.**३५४ धृ (घृ) योग्या (युक्ता) योज्या (योग्या), **समु.**१३३.

(३) **दा.**१२७ रक्षा (रथ्या) उत्तरार्धे (प्रायोज्य न विभाज्य तु शिल्पार्थं तु बृहस्पतिः); **अप.**२।११९; **व्यक.**१४६; **स्मृच.**२७७ पू.; **विर.**५०५ रक्षा (रथ्या) धर्मा (शिल्पा); **रत्न.**१४९ विरवत्; **दात.**१७४ रक्षा (रथ्या) प्रयो (प्रायो) धर्मार्थं च (शिल्पार्थं तु); **विता.**३५४ रक्षा (रथ्या) उत्तरार्धे (प्रायोर्थं न विभज्येत शिल्पार्थं शास्त्रमेव च); **सेतु.**६९ प्रयो (प्रायो) शेष विरवत्, **विच.**९० सेतुवत्.

पुस्तकादि तत् मूर्खेभ्यो विभजनीयं, शिल्पोपयुक्तं च शिल्पिनामेव नातद्विदाम्। ×दा.१२७

(२) नानुरूप विभागानुरूप विभक्तृभिः सह विषमसंख्याक तद्यथाकाल विभक्तृसंख्यानुरूपेण कालोपयुक्त कार्यम्। अप.२।११९

(३) धर्मार्थ यन्निरूपित सर्वसाधारणधर्मार्थ यद्व्यवस्थापित देवाराधनाय घण्टादि। निबन्धः पूर्व व्याख्यातः। धृत वस्त्र बहुमूल्य, अङ्गयोजितमबहुमूल्यं विवक्षितम्। नानुरूप च यद्भवेद्यत्र साक्षाद्विभागो न संभवी। प्रयोज्य प्रयुक्तमृणमिति हलायुधः। प्रयोज्य प्रयोगार्ह पुस्तकादि, तन्न विभज्येत मूर्खादिभिरिति पारिजातः। शिल्पार्थ तूलिकादि। विर.५०५

(४) अत्रायमभिप्रायः यावत्पत्रनिविष्ट ऋणं नोद्धियते तावदविभाज्यमिति। मपा.६८५

(५) निबन्धः अत्रैतावदस्मै देयमित्यादिरूपेण राजादिभिर्व्यवस्थापित द्रव्यम्। रत्न.१४९

(६) धनमिति। धर्मोद्देशेनोत्सृज्य पत्रे लिखितमित्यर्थः। उदक कूपादिगतम्। निबन्धो वृत्तिः। नानुरूप विभागायोग्यम्। व्यम.५८

(७) प्रामोद्य हर्षहेतु पुस्तकादि। अल्पमूल्य तु मूर्खेभ्यो ग्राह्यम्। बहुमूल्य तु मूल्यद्वारा विभाज्यम्। विता.३५४

देशजातिसंघग्रामाणा भिन्नो दायभागधर्मो भवति

[1]**देशस्य जातेः संघस्य धर्मो ग्रामस्य यो भृगुः।**
उदितः स्यात् स तेनैव दायभागं प्रकल्पयेत्॥

(१) विभागो देशधर्माद्यनुसारेण कर्तव्य इत्याह स एव—देशस्येति। रत्न.१४९

(२) भृगुराहेति शेषः। दात.१६५

पैतृकधनेन ऋणशुद्धयुत्तर दायविभागः

[2]**भ्रात्रा पितृव्यमातृभ्यां कुटुम्बार्थमृणं कृतम्।**
विभागकाले देयं तद्विंशथिंशः सर्वमेव तु॥

[3]**तद्दृणं धनिने देयं नान्यथैव प्रदापयेत्।**
भावितं चेत्प्रमाणेन विरोधात्परतो यदा॥

(१) विरोधात् विवादात् परत ऊर्ध्वम्।
अप.२।११७

(२) तद्दृणमित्यादि। यद्दृण भ्रात्रादिभिः कृत विरोधाद्विवादात्सदिग्धीभूत तदेव धनिने देय यदि विवादात्परतो धनिना प्रमाणेन साधित भवेन्नान्यथेत्यर्थः। विर.४९७

[4]**पित्र्यं पित्र्यर्णसंबद्धमात्मीयं चात्मना कृतम्।**
ऋणमेवंविधं शोध्यं विभागे बन्धुभिः सह॥
[5]**धर्मार्थं प्रीतिदत्तं च यद्दृणं स्वनियोजितम्।**
तद् दृश्यमानं विभजेन्न दानं पैतृकाद्धनात्॥

(१) अस्यार्थः— धर्मार्थं यत्सकल्पितं यच्च प्रीतेन वाचा दत्त च यद्दृण तदा स्वस्मिन्पुत्रे त्वर्थेतदपाकरणीयमृणमिति पित्रा नियोजित, तद्दृश्यमानमुपलभ्यमान विभजेत्, न तु पैतृकाद्धनात्तदपाकृत्य धनविभागः कार्य इति। *अप.२।११७

(२) विभागकाले यद्दृण प्रतिदेय तस्याकूटत्वनिश्चयार्थ बन्धुभिः सह ऋक्थग्राहिभिस्तद्विशोध्यमित्याह स एव—ऋणमेवविधमिति। +स्मृच.२७३

(३) पित्र्य पित्रा कृत, पितृसबद्ध पितृऋणं दातुमात्मना कृत, आत्मीय कुटुम्बार्थं पूर्ववाक्योक्तभ्रात्रादिव्यतिरिक्तविषय, आत्मनाकृत कुटुम्बार्थमेव। तथा धर्मार्थ प्रीतिदत्तं चेति। यतः स्वयमसाधारण्येन

× दात. दावत्।

(१) व्यक.१४६; विर.५०५; रत्न.१४९; दात.१६५, सेतु.८६.

(२) रत्न.१४५; व्यनि.भ्रात्रा (भ्रातृ) देय (भाग) द्रिविध (द्रधि); व्यम.५४; विता.३३८; समु.१२८.

* सवि. अपवत्।

+ 'धर्मार्थं' इत्यादिवचनव्याख्यान अपवत्।

(१) अप.२।११७; व्यक.१४५; विर.४९७.

(२) अप.२।११७ बद्ध (शुद्ध); व्यक.१४५; स्मृच. २७३ उत्त; विर.४९७ ण्यर्ण (तृण); स्मृसा.६३ ण्यर्ण (ण्य तृ); पमा.५५७ उत्त.; रत्न.१४५ विध (कृत); व्यम. ५४ चा (वा) विध (कृत); विता.३३९(=) पित्र्य (पित्र) विधं (कृत), समु.१२८ पित्र्य (पित्र).

(३) अप.२।११७; व्यक.१४५; स्मृच.२६४; विर. ४९७; स्मृसा.६३; रत्न.१४५ स्वनियो (स्वेन यो); सवि. ३५६; व्यम.५४ रत्नवत्; विता.३३९ रत्नवत्; समु.१२८ नारदः.

साधारणधनं धर्मार्थं दत्त प्रीत्या च यद्दत्तमृण च यत्स्वयमुत्तमर्णत्वेनान्यस्मै दत्त तज्ज्ञायमान विभक्तव्य यतः पैतृकाद्धनादसाधारण्येन दान नोचितमिति कल्पतरुः। प्रकाशपारिजातौ तु यद्दणमेकेन साधारणमसाधारणधर्मार्थं कृत यद्दण कृत्वाऽन्यस्मै प्रीत्या दत्त यच्च स्वनियोजित स्वभोगार्थं कृत तत्त्रयमपि तथा निश्चीयमानमपि विभजेत्पृथक्कुर्यात्तेन कृत तेनैव तद्देय न पैतृकाद्धनात् सर्वैर्देयमित्यर्थ इत्याहतुः। वस्तुतस्तु सर्वमेतद्विवक्षितमिति सर्वार्थपरतयैव वाक्यमिद व्याख्यातुमुचितमिति। ×विर.४९७–४९८

(४) पित्र्यर्णसबद्ध पित्र्यर्णापाकरणार्थं कृतम्। आत्मीय स्वकुटुम्बपोषणाद्यावश्यककार्यार्थं परेण कृतम्। आत्मना कृत स्वकुटुम्बपोषणाद्यर्थमेवेति शेषः। अविभक्तेऽपि केनचित्सर्वानुमतिन्तरेण साधारणात्पैतृकाद्धनाद्धर्मार्थं प्रीत्या वा ऋणत्वेन वा दत्त तत्सर्वैर्ज्ञात दातुः सकाशाद्विभज्य ग्राह्यम्। न हि तस्य साधारणे पित्र्यधने असाधारण्येन दान युक्तमित्याह–धर्मार्थमिति। रत्न.१४५

(५) धर्मार्थं प्रीत्या च यद्दत्त दातु प्रतिश्रुतं पित्रा स्वेन योजित स्वयकृतम्। तद्दण दृश्यमान च द्रव्य विभजेत्। एतद्दणातिरिक्तस्य पैतृकाद्धनादान नास्तीत्यर्थः। व्यम.५४

विभाज्यो दायः

[1]पैतामहं च पित्र्यं च यच्चान्यत्स्वयमर्जितम्।
दायादानां विभागे तु सर्वमेतद्विभज्यते॥
दृश्यमानं विभज्येत गृहं क्षेत्रं चतुष्पदम्।
गूढद्रव्याभिशङ्कायां प्रत्ययस्तत्र कीर्तितः॥

× स्मृसा. विवादरत्नाकरोद्धृतप्रकाशपारिजातमतवत्।

(१) **दा.**१०५; **व्यक.**१४५; **स्मृच.**२७३ चान्य (किञ्चि); **विर.**४९६ स्मृचवत्; **पमा.**५५६ मेतद्वि (मेव वि); **रत्न.**१४५; **विचि.**२१० स्मृचवत्; **व्यनि.**मर्जि (मार्जि); **सवि.**३६७ तु (ऽपि) शेष व्यनिवत्; **विता.**३३८ तु (पु); **सेतु.**६५ स्मृचवत्, **समु.**१३१ व्यनिवत्; **विच.**८१.

[1](१) **अप.**२।११७ विभज्येत गृह (विभाज्य तु गृह); **व्यक**१४५: **स्मृच.**२७३ व्यामि (व्यावि) उत्त.:२७७ पू.;

गृहोपस्करवाह्याश्च दोह्याभरणकर्मिणः।
दृश्यमाना विभज्यन्ते कोशं गूढेऽब्रवीद्भृगुः॥

(१) प्रत्ययो दिव्यम्। कोशग्रहण दिव्यमात्रोपलक्षणार्थम्। अप.२।११७

(२) अवज्ञनाथ ऋक्थमपि विशोध्यमित्याह स एव–दृश्यमानमिति। कर्मिणः कर्मकरा दासादयः। गूढद्रव्यवज्ञनाशङ्काया कोशाख्य दिव्य भृगुरब्रवीदित्यर्थः। तथा च स एव 'गूढद्रव्ये'ति। प्रत्ययो दिव्यम्। तदपि कोशाख्यमेवेत्युक्त प्राक्। +स्मृच.२७३

(३) गृहोपस्करः उलूखलादिः। विर.४९८

व्यासः

स्वार्जितविद्याशौर्यसमुदायपितृप्रसादलब्धवैवाहिकादिधनम-विभाज्यम्

अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद्धनम्।
दायोदेभ्यो न तद्दद्याद्विद्यालब्धं च यद्भवेत्॥

(१) स्वशक्तिमात्रेण यत् प्राप्तमिति सामान्येनाभिधानात् सर्वमेवविधं स्वीयमसाधारण द्रव्यम्। स्वीय स्वधनश्रममात्रार्जितं असाधारण भ्रात्रन्तरैरविभाज्यम्। स्वशक्तिप्राप्तस्यापि विद्याधनस्य समाधिकविद्यैः

+ पमा., व्यम. दिव्यविषये स्मृचवत्।

विर.४९८, **रत्न.**१४६; **व्यनि.**प्रचेताः, **दात.**१७१ गृहं क्षेत्र (गृहक्षेत्र) व्याभि (व्यादि), **व्यम.**५५ गृह (गृह); **बाल.** २।११९ पू., **सेतु.**८५; **विभ.**८५; **समु.**१३१ व्यमवत्; **विच.**७६ व्यमवत

(१) **अप** २।११७ कर्मि (कर्म) दृश्य...न्ते (दृश्यमान विभाज्य तु); **व्यक.**१४५; **स्मृच.**२७३; **विर.**४९८ श्च (स्तु); **पमा.**५५७ गूढऽ (गूढम), **रत्न.**१४६; **व्यनि.**ब्याश्च (ब्यादि) कर्मि (कर्म) कोश गूढ (गूढ कोशो) बृहस्पतिः; **दात** १७१ विरवत्; **व्यम.**५५ ब्रुवुः (न्मनुः); **सेतु.**८५ ब्याश्च (ब्याना) र्मिणः (र्मिणाम्) ना विभज्यन्ते (नं विभज्येत) शेष व्यमवत्; **विभ.**८५ बृहस्पतिः; **समु.**१३२; **विच.**७६ व्यमवत्.

(२) **दा.**१०६ च (तु):११३; **व्यक.**१४६; **स्मृच.** २७६ चतुर्थपाद विना, **विर.**५०२; **स्मृसा.**६१ तूद्र (तुद्र); **रत्न.**१४६ द्भवेत् (द्धनम्); **विचि.**२११ द्विधा .....त् (द्विधया लब्धमेव च); **दात.**१७३; **सवि.**३६८ स्मृचवत्; **व्यम.**५५ रत्नवत्; **विता.**३४२; **समु.**१३१ रत्नवत्; **विच.**८८ मनुः.

साधारणत्वात् न्यूनविद्याविद्यनिराकरणार्थं विद्यालब्ध-पदम् । +दा.१०६

(२) अनाश्रित्य अर्जनसिद्धयर्थमिति शेषः । पितृ-ग्रहणमविभक्तोपलक्षणार्थमत्रापि । स्मृच.२७६

(३) अनुपश्लेषार्जित च विद्यालब्ध च द्वयमविभाज्य-मित्यर्थः । विद्ययापि साधारणधनानुपश्लेषेण यदर्जित तदेवाविभाज्यमिति तु प्रकाशः । तन्न । उभयोपादा-नानर्थक्यापत्तेः । रत्नाकरादयोऽप्येवम् । *विचि.२११

[1]**विद्याप्राप्तं शौर्यधनं यच्च सौदायिकं भवेत् ।**
विभागकाले तत्तस्य नान्वेष्टव्यं स्वरिक्थिभिः ॥

(१) पितृपितृव्यादिभ्यः सुदायसंबन्धिभ्यः प्रसादा-दिना लब्ध सौदायिकम् । दा.१०६

(२) विद्याप्राप्तशब्देनात्र न विद्यामात्रप्राप्तमुच्यते, किन्तु विशेषेण प्राप्तम् । तथा च कात्यायनः— 'पर-भक्तोपयोगेन विद्या प्राप्ताऽन्यतस्तु या । तया प्राप्त तु यद्वित्तं विद्याप्राप्त तदुच्यते ॥' स्मृच.२७४

(३) शौर्यधन युद्धादिलब्ध, सौदायिक 'ऊढया कन्यया वे'त्यादिना कात्यायनेनाग्रे वक्ष्यते । विर.५००

(४) एतच्च पितृद्रव्याविरोधेनार्जित ज्ञेयम् । व्यम.५५

[2]**पितामहेन यद्दत्तं पित्रा वा प्रीतिपूर्वकम् ।**
तस्य तन्नापहर्तव्यं मात्रा दत्तं च यद्भवेत् ॥
[3]**पितामहपितृभ्यां च दत्तं मात्रा च यद्भवेत् ।**
तस्य तन्नापहर्तव्यं शौर्यहार्यं तथैव च ॥

+ व्यम., दावद्भावः ।

* शेष 'वैद्योऽविषाय' इति नारदवचनोद्धृत-विरवत् (पृ.१२२०) ।

(१) दा.१०६,११३; अप.२।११९; व्यक.१४५, स्मृच.२७४; विर.४९९; स्मृसा.६० स्वरि (तृ); पमा. ५५९ स्व (च); रत्न.१४६, स्मृचि.३० स्व (तु); नृप्र.३७ काले तत्तस्य (लेख्यत्वमस्य); दानि. २(=); व्यम.५५; विता ३४२; समु.१३२.

(२) दा.११३; अप.२।१२३; व्यक.१४६; विर.५०१; विचि.२११; स्मृचि.३१; वीमि.२।११९; विता.३४२ तस्य तन्ना (तत्तस्य ना) मात्रा (मातृ); बाल.२।१२२ (=); विच.५७,९२.

(३) उ.२।१४।२.

[1]**विवाहकाले यत्किञ्चित् वरायोद्दिश्य दीयते ।**
कन्यायास्तद्धनं सर्वमविभाज्यं च बन्धुभिः ॥

(१) उद्दिश्येति कन्याया इद भवत्वित्युद्दिश्य वराय यद्दान न पुनरेतदभिसंधि विनापीत्यर्थः । अत एव विवाहकाल इति प्रदर्शनार्थ न पुनरेतदेव प्रयोजक दात्रभिसंधिनिमित्तत्वात् स्वत्वस्य । तथा च प्रामाणिकं वचनम् —'यद्दत्त दुहितुः पत्ये स्त्रियमेव तदन्वियात् । मृते जीवति वा पत्यौ तदपत्यमृते स्त्रियाः ॥' विवाह-काल इति न विशिनष्टि । अभिसंधिस्तु दुहित्रन्वयाभि-धानादेव लब्धत्वान्नोक्तः । दा.७६

(२) स्त्रीधनस्य सर्वधनस्याप्यविभाज्यत्वमाह स एव—विवाहकाल इति । स्मृच.२७६

अविभाज्यद्रव्यविशेषाः

अविभाज्यं सगोत्राणामासहस्रकुलादपि ।
याज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः*॥

(१) याज्य यागस्थान देवता वा न तु याजनलब्ध धन, तस्य विद्याधनत्वेनैव गतार्थत्वात् । दा १२७

(२) क्षेत्र वास्तुक्षेत्र, पत्र वाहनमिति प्रकाशकारः । विर.५०४

(३) इति तद्ब्राह्मणजातेः क्षत्रियादिपुत्रविषयम् । मपा.६८७

साधारणं समाश्रित्य यत्किञ्चिद्वाहनायुधम् ।
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ।
तस्य भागद्वयं देयं शेषास्तु समभागिनः ॥

* व्यम., विता व्याख्यान 'न वास्तुविभागो' इति शंखवचनोद्धृत-रत्नगतम् (पृ.१२०७) ।

(१) दा.७५, अप.२।१४३ (=); स्मृच.२७६ कात्या-यनः; विता.४४१ च (तु); सेतु.५२; विच.१०५-१०६.

(२) दा.१२७, व्यक.१४६; विर.५०४; मपा.६८७ (=); रत्न.१४८ व्यासोशनसौ; व्यम.५७ भाज्य (भागः); विता.३५२ कुला (कृता) व्यासोशनसौ; सेतु.७० स्त्र (स्त्र); विच.९० सहस्र (सप्तम).

(३) दा १०७,१११; अप.२।११९; उ.२।१४।२; व्यक.१४७; स्मृच.२७५; विर.५०८ देय (कार्य), स्मृसा. ५६ युधम् (दिकम्) शौर्या...धन (धन शौर्यादिना प्राप्त): ६२; पमा.५६२; मपा.६८८ युधम् (दिकम्) प्रथमार्धद्वयम्;

(१) इत्यनेनोपघात एव भागद्वयस्य विधानात्, असाधारणधनशरीरव्यापारार्जिते तु न भागद्वय न्याय्य, किन्त्वधिक, सर्वमेव वा किञ्चिदूनं वा, तत्र किञ्चिदूनस्य मुनिभिर्निबन्धभूमिश्चानुक्तत्वात् । साधारणधनव्यापारेण भ्रात्रन्तरस्य भागदर्शनात् तदभावे भागाभाव एव युक्तः । ×दा.१११

(२) साधारणमविभक्ताना धनम् । भ्रातृग्रहणमविभक्तोपलक्षणार्थम् । तस्य साधारणधनाश्रयणादर्जकस्येत्यर्थः । शौर्यादिनेति वदन्नन्यत्रापि धने कन्यागतवैवाहिकादौ साधारण समाश्रित्य विवाहेन प्राप्ते विभाज्यत्व दर्शयति । *स्मृच.२७५

(३) एतत् परिभाषितविद्याशौर्यादिधनव्यतिरिक्तविद्याशौर्यादिधनाभिप्रायेण द्रष्टव्यमिति । विर.५०८

(४) शौर्यविद्याधनयोरेवार्जकस्य भ्रातुर्द्वावशौ न मैत्र्यादौ विशेषवचनात् । विता.३४३

उशना

अविभाज्यद्रव्यविशेषा.

[1]अविभाज्यं सगोत्राणामासहस्रकुलादपि ।
याज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः ॥

(१) यत्तूशनसा क्षेत्रस्याविभाज्यत्वमुक्तम् —अविभाज्यमिति । तद्ब्राह्मणोत्पन्नक्षत्रियादिपुत्रविषयम् । 'न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै । यद्यप्येषा पिता दद्यान्मृते विप्रासुतो हरेत् ॥' इति स्मरणात् । याज्य याजनकर्मलब्धम् । *मिता.२।११९

(२) एतदप्यनादृत्य युक्त्या याज्य क्षेत्र च विभजनीयम् । तथा हि याज्यसकाशादुत्पन्नलाभो विभजनीयः । क्षेत्रं चाखिलदायादानुमत्या विभजनीयम् । 'दायादैर्नाभ्यनुज्ञात यत्किञ्चित्स्थावरे कृतम् । तत्सर्वमकृत ज्ञेय यद्येकोऽपि न मन्यते ॥' इति प्रजापतिस्मरणात् । +स्मृच.२७७

प्रजापतिः

विद्याशौर्यादिधनान्यविभाज्यानि

[2]विद्याशौर्यश्रमैर्लब्धं स्त्रीधनं माधुपर्किकम् ।
मैत्रमौद्वाहिकं भ्रातुर्भ्रातृभिर्न विभाज्यते ॥

(१) श्रमः कृष्यादिः । स्मृच.२७६

(२) विद्यया वेदाध्ययनेन अध्यापनेन वा वेदार्थव्याख्यानेन वा यल्लब्ध तदपि दायादेभ्यो न दद्यात् । आर्जक एव गृह्णीयात् । सवि.३६८

[3]गृहक्षेत्राणि याज्याश्च प्रसादो यश्च पैतृकः ।
मातृकश्च प्रसादो यस्तद्विभागो न विद्यते ॥

तत्र तद्विभागनिषेधमनादृत्यैव युक्त्या पूर्वोक्तप्रकारेण गृहादिक विभजनीयम् । तथा च कात्यायनः— 'दृश्यमान विभज्येत गृह क्षेत्र चतुष्पदम्' इति गृहादेरपि विभागमाह । स्मृच.२७७

स्थावरविभागविचार.

[4]दायादैर्नाभ्यनुज्ञातं यत्किञ्चित्स्थावरे कृतम् ।
तत्सर्वमकृतं ज्ञेयं यद्येकोऽपि न मन्यते ॥

क्षेत्र चाखिल दायादानुमत्या विभजनीयम् । स्मृच.२७७

× अप. दावद्भावः ।

* पमा., मपा. स्मृचवद्भावः

रत्न.१४७ युधम् (दिकम्); **विचि.**२०१ युधम् (दिकम्) शौर्या...धन (धन शौर्यादिनाऽऽप्त) देय (कार्य) :२१४ **विरत्न**त; **नृप्र.**३८; **दात.**१७६; **चन्द्र.**७४ युधम् (दिकम्) देय (दत्वा); **दानि.**२(=) मपावत्, प्रथमार्धद्वयम्; **व्यन.**५६ मपावत्; **विता.**३४२; **सेतु.**६५ देय (प्रोक्त); **विभ.**७०: ७६,९३ प्रथमार्धद्वयम्; **समु.**१३३; **विच.**८२.

(१) **मिता.**२।११९; **स्मृच.**२७७; **पमा.**५६४; **मपा.** ६८७ (=); **रत्न.**१४८ व्यासोशनसौ; **नृप्र.**३८; **सवि.** ३७०; **विता.**३५२ कुला (कृता) व्यासोशनसौ; **राकौ.**४५०; **समु.**१३३.

* पमा., मपा., व्यप्र. मितागतम् । सरस्वतीविलासे तु 'विज्ञानेश्वरासहायमेधातिथीनामिय व्याख्या' इत्युक्तम् (पृ. ३७१)।

+ सरस्वतीविलासे तु 'भारुच्यपरार्कचन्द्रिकाकारादीनां मतम्' इत्युक्तम् (पृ.३७१)। विता.व्याख्यान 'न वास्तु.विभागो' इति शखवचनोद्धृत-रत्नगतम् (पृ.१२०७)।

(१) **स्मृच.**२७६; **सवि.**३६८ भ्रातुः (चैव) विभा (विभ); **समु.**१३३ विभा (विभ).

(२) **स्मृच.**२७७; **समु.**१३३.

(३) **स्मृच.**२७७; **सवि.**३७१; **समु.**९४.

[1]न वास्तुनि विभागो विद्यते ।

लौगाक्षिः

योगक्षेमावविभाज्यौ

[2]क्षेमं पूर्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः ।
अविभाज्ये च ते प्रोक्ते शयनासनमेव च ॥

(१) योगक्षेमशब्देन योगक्षेमकारिणो राजमन्त्रिपुरोहितादय उच्यन्ते इति केचित् । छत्रचामरशस्त्रोपानत्प्रभृतय इत्यन्ये । *मिता.२।११९

(२) अथवा योगक्षेमार्थमुपासितेश्वरसकाशात् यो रिक्थाना लाभः स एवात्र योगक्षेमशब्देनोच्यते । स्मृच.२७७

* पमा., मपा., व्यप्र. मितावत् ।

(१) **मेधा.**९।२१९ न वास्तुनि विभागो (वास्तुनि विभागो न) स्मृत्यन्तरम्; **बाल.**२।११९ (पृ.१४९).

(२) **मिता.**२।११९; **मभा.**२८।४७ च ते (तु ते) नासन (न स्वत्र); **गौमि.**२८।४४ क्षेमं (योगः) योगमिष्टमि (क्षेम इष्टा इ) च ते (तु ते) नासन (न चात्र); **स्मृच.**२७७ चतुर्थपादं विना; **पमा.**५६३ योग (याग); **मपा** ६८७; **रत्न.** १४८ च ते (तु ते); **स्मृचि.**३०(८) रत्नवत्; **सवि.**३७०; **दानि.**४ क्षेम पूर्त (क्षेमपूर्त) शेषं रत्नवत्; **व्यप्र.**५५७; **व्यम.** ५७ रत्नवत्; **विता.**३५२; **राकौ.**४४९; **समु.**१३३.

(३) तदयमर्थः— योगशब्देन अलब्धलाभकारणं श्रौतस्मार्ताग्न्यादिसाध्यमिष्टं कर्म लक्ष्यते । क्षेमशब्देन लब्धपरिपालनहेतुभूत तटाकारामनिर्माणादि पूर्त कर्म लक्ष्यते । तदुभयं पैतृकमपि पितृद्रव्यविरोधार्जितमप्यविभाज्यमिति । सवि.३७०

(४) तत्र पूर्तं तडागारामादि, इष्टं यागविप्रभोजनादि, तदर्थमविभागदशायां सर्वानुमत्या यद्द्रव्यं येनोत्सृज्य पृथक् स्थापितं तेन द्रव्येण स धर्मस्तेनैव कार्यो नान्येन न वा संभूय सर्वैरित्यर्थः । व्यम.५७

वृद्धयाज्ञवल्क्यः

स्थावरातिरिक्तं पितृप्रसादलब्धमविभाज्यम्

[1]पितृप्रसादात्सिध्यन्ति वस्त्राण्याभरणानि च ।
स्थावराणि न सिध्यन्ति प्रसादे पैतृके सति ॥

स्मृत्यन्तरम्

गृहविभागः

गृहविभागे दक्षिणतो ज्येष्ठस्य । तदनन्तरमनन्तरजस्य । तथेतरेषाम् ।

(१) **स्मृच.**२७८; **समु.**१५४.

(२) **व्यनि.**

सवर्णसापत्नभ्रातृविभागः

गौतमः

ज्येष्ठस्योद्धारः ज्यैष्ठिनेयस्य च

[1]ऋषभोऽधिको ज्येष्ठस्य ।

(१) अथानेकमातृकाणामाह— ऋषभ इति । उत्तरसूत्रे ज्यैष्ठिनेयस्येति वचनादय ज्येष्ठः कानिष्ठिनेयः । यदि कनीयस्याः पुत्रो भवति तदा तस्य ऋषभ उद्धारः सममन्यत् । गौमि.

(२) अधुना समानजातीयत्वेऽप्यनेकमातृकाणा वक्तुमाह — ऋषभ इति । +मभा.

(३) ज्येष्ठः मन्वनुसारात्कनीयकसीपुत्रः प्रथम जातोऽपेक्षितः । विर.४७५

[2]ऋषभषोडशा ज्यैष्ठिनेयस्य ।

ज्येष्ठस्येति वर्तते ज्येष्ठायाः पुत्रश्च भवति यो ज्येष्ठश्च भवति तस्य पञ्चदश गाव ऋषभश्चैक उद्धारः । सममन्यत् । +गौमि.

जन्मज्येष्ठमातृज्येष्ठाना समो विभागः

[1]समधा वाऽज्यैष्ठिनेयेन यवीयसः ।

(१) अथ ऋषभोऽधिको ज्येष्ठस्येत्यस्यापवादः— समधा वेति । ज्येष्ठस्येति वर्तते । तच्चाज्यैष्ठिनेयेनेत्यनेन

\+ शेषं गौमिगतम् ।

(१) **गौध.**२८।१४; **मभा.**; **गौमि.**२८।१२; **व्यक.** १४२; **विर.**४७४ ऋ (वृ).

\+ मभा गौमिगतम् ।

(१) **गौध.**२८।१५; **मभा.**; **गौमि.**२८।१३, **विर.** ४७४ ऋषभ (वृष).

(२) **गौध** २८।१६; **मभा.**; **गौमि.**२८।१४ स. (साम्); **व्यक.**१४२; **विर.**४७४ सः (सा).

सामानाधिकरण्यात्तृतीयान्त सपद्यते । अज्यैष्ठिनेयेन कनिष्ठाया जातेन ज्येष्ठेन सह यवीयसा ज्यैष्ठिनेयाना समो वा विभागः । एकस्य जन्मतो ज्यैष्ठ्यमन्येषा मातृत इति । गौमि.

(२) अयमपि गुणवद्विषयो द्रष्टव्यः । +मभा.

(३) सर्वेषा तुल्यरूपत्वे द्रष्टव्यम् । विर.४७५

पुत्राणा दौहित्राणा वा मातृतो भागकल्पना

प्रतिमातृ वा स्ववर्गे भागविशेषः ।

(१) तासा (दौहित्रीणा) भिन्नमातृकाणा विषमाणा समवाये मातृद्वारेण भागकल्पना । ×मिता.२।१४५

(२) विंशतिभागो ज्येष्ठस्येत्यादिर्य उक्तो भागविशेषः स प्रतिमातृ वा स्वे स्वे वर्गे विशेषः कर्तव्यः । एतदुक्त भवति —यावत्यो मातरः पुत्रवत्यस्तावता विभक्ते धने एकस्या यावन्तः पुत्रास्तेषा भागानेकीकृत्य तत्र तत्र वर्गे यो यो ज्येष्ठस्तस्य विंशतिभागो ज्येष्ठस्येत्यादिर्भाग-विशेष इति । एव पुत्रवतो विभाग उक्तः । गौमि.

(३) यदा तु बह्व्यः समानजातीयाः असमानाः पत्न्याश्च जाया भवन्ति, तदा पुत्राश्रयस्य विभागस्य दुष्करत्वान्मातृत एव विभज्यते । स्वे स्वे वर्गे भाग-विशेषोऽपि द्रष्टव्यः । स उक्तो 'विंशतिभागो ज्येष्ठस्य' इत्यादिना । *मभा.

(४) भिन्नमातृकाणा दौहित्राणा विषमसख्याना मातृद्वारेण भागकल्पना । स्मृच.२८६

(५) स्वभावः स्वत्वम् । प्रतिमातृ मातरं मातर मातृस्वत्वानुसारि तासा स्वत्वमित्यर्थः । सवि.३८३

+ शेष गौमिगतम् । × व्यप्र., विता. मितागतम् ।

* विर. मभागतम् ।

(१) **गौध.**२८।१७; **मिता.**२।१४५ तृ+(तो) गै+(ण); **व्यक.**१४२ वा स्व (बान्धव), **गौमि.**२८।१५ वा+(प्र), **स्मृच.**२८६ स्व (स्वे), **विर.**४७५ व्यकवत्; **पमा.**५५० (पितृमातृष्वस्वर्गे भागविशेषः); **मपा.**६६६ पमावत्; **सवि.** ३८३ (प्रतिमातृ स्वभावः); **व्यप्र.**५५२ गविशेषः (ग.); **विता.**४५३; **विभ.**३७,९४ व्यकवत्; **समु.**१३६.

महाभारतम्

मातृतो ज्येष्ठत्वादितारतम्येन विभागः

समवर्णासु जातानां विशेषोऽस्त्यपरो नृप ।
विवाहवैशिष्ट्यकृतः पूर्वपूर्वो विशिष्यते ॥
हरेज्ज्येष्ठः प्रधानांशमेकभार्यासुतेष्वपि ।
मध्यमो मध्यमं चैव कनीयांस्तु कनीयसम् ॥

कौटिलीयमर्थशास्त्रम्

नानास्त्रीपुत्राणा ज्येष्ठत्वनिमित्तानि, ज्येष्ठत्वाधीनो विभागः । सूतमागधादीनां विशेषः ।

नानास्त्रीपुत्राणां तु संस्कृतासंस्कृतयोः कन्या-कृतक्रिययोरभावे च, एकस्याः पुत्रयोर्यमयोर्वा पूर्वजन्मना ज्येष्ठभावः ।

सूतमागधव्रात्यरथकाराणामैश्वर्यतो विभागः शेषास्तमुपजीवेयुः । अनीश्वराः समविभागा इति ।

नानास्त्रीपुत्राणामिति । एकस्य पुरुषस्य बह्व्यो याः स्त्रियः तासा पुत्राणा, पूर्वजन्मना ज्येष्ठभावः, व्यवस्थाप्य इति शेषः, कदा, सस्कृतासस्कृतयोरभावे सस्कृता ब्राह्मादिविधिपरिगृहीता असंस्कृता गान्धर्वादि विवाहपरिगृहीता तयोरभावे तथाभूतमातृभेदाभावे, कन्याकृतक्रिययोरभावे च कन्या विवाहात् पूर्व अक्षत-योनिः कृतक्रिया विवाहात् पूर्व क्षतयोनिः तयोरभावे च तथाभूतमातृभेदाभावे च । उक्तविधयोर्मातृभेदयोः सत्वे पूर्वजन्मना न ज्येष्ठभावः किन्तु मातृवशादेव व्यवस्थाप्यः । तद्यथा—संस्कृतापुत्र उत्तरकालजातो-ऽप्यसस्कृतपुत्रापेक्षया ज्येष्ठः, कन्यापुत्रश्च तथाविधः क्षतयोनिपुत्रापेक्षया ज्येष्ठ इति । एकस्याः पुत्रयोर्यम-योर्वा युग्मजातयोर्वा पूर्वजन्मना ज्येष्ठभावः ।

सूतमागधव्रात्यरथकाराणामिति । सूतो ब्राह्मण्यां क्षत्रियादुत्पन्नः, मागधः क्षत्रियाया वैश्यादुत्पन्नः, व्रात्यो-ऽनुपनीतविवाहिताद् ब्राह्मणात् सवर्णाया जातः, रथकारो वास्तुवृत्तिरिज्याधानोपनीतिमान् वैण्यभेदः एतेषा, नानास्त्रीपुत्राणामिति वर्तते, नानास्त्रीषु जातानां पुत्राणा, ऐश्वर्यतो विभागः प्रभविष्णुत्वानुसारेण विभागः

(१) भा. १३।४७।५९,६०.

(२) कौ.३।६.

तेष्वेक एव चेदैश्वर्यवान् स एव कृत्स्नं पितृधन हरेत्। शेषाः पुत्राः, त ईश्वरं उपजीवेयुः। अनीश्वराः समविभागाः तेष्वेकश्चेदीश्वरो न भवेत् सर्वे सम विभजेरन्। इतिशब्दः प्रकारार्थः। अनेन प्रकारेण सकरजातीयस्यान्यस्यापि नानास्त्रीपुत्राणा यथोचित विभाग उन्नेय इत्यर्थः। श्रीमू.

मनुः

मातृज्येष्ठजन्मज्येष्ठादीना विभागव्यवस्था

पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः।
कथं तत्र विभागः स्यादिति चेत्संशयो भवेत्॥

(१) ज्येष्ठा प्रथमोढा। पश्चादढा कनिष्ठा। तयोर्जाताना किं मातुरुद्वाहक्रमेण ज्येष्ठ्य स्यात्स्वजन्मक्रमेणेति सशयमुपन्यस्योत्तरत्र निर्णेष्यते सप्रतिपत्तम्। मेधा.

(२) कनिष्ठोऽल्पवयाः। मवि.

(३) यदि प्रथमोढाया कनीयान्पुत्रो जातः पश्चादढाया च ज्येष्ठस्तदा तत्र कथ विभागो भवेदिति, सशयो यदि स्यात्कि मातुरुद्वाहक्रमेण पुत्रस्य ज्येष्ठत्वमुत स्वजन्मक्रमेणेति तदाह—पुत्र इति। +ममु.

(४) पूर्वजसजातीयमातृप्रभवनानापुत्रविषय एवाय सशयः। नानावर्णाना दायविभागस्याग्रे वक्ष्यमाणत्वात्, पूर्वजशब्देन पूर्वोढाया जातः कनीयानेवोच्यते, 'ततोऽपरेज्येष्ठवृषास्तदनाना स्वमातृत' इत्यग्रिमखण्डात्। विर.४७३

(५) ज्येष्ठाया स्त्रिया कनिष्ठः पुत्रः च पुनः कनिष्ठाया स्त्रिया पूर्वजः ज्येष्ठः पुत्रो भवेत्। यद्वा ब्राह्मणस्य द्वे भार्ये ब्राह्मणी क्षत्रिया चेति। ज्येष्ठाया ब्राह्मण्या कनिष्ठः पुत्रः कनिष्ठाया क्षत्रियाया च पूर्वजः ज्येष्ठो भवेत्। ततो वैश्याया क्षत्रियादिपुत्राणा स्वजातितः त्रिद्येकभागाः स्युः इति योगीश्वरः। भाच.

एकं वृषभमुद्धारं संहरेत स पूर्वजः।
ततोऽपरेऽज्येष्ठवृषास्तदूनानां स्वमातृतः॥

(१) पूर्वस्या जातः पूर्वजः कनीयान् वृषभस्योक्तो भागवान्। ततो वृषादन्ये ये वृषभा अज्येष्ठास्ते बहूनामेकशः कृत्वा देयाः। अतश्च ज्येष्ठिनेयस्यैतावदुत्कमधिक यच्छ्रेष्ठो वृषो गुणमात्रेणाधिक्य, न सख्यया। तदनाना तस्मात्पूर्वजादनानाम्। कियतामित्याह—स्वमातृतः, पुनर्मुख्यत्वोद्दत्वात्तेनात्र मातृज्येष्ठ्यमाश्रितं भवति न जन्मतः। मेधा.

(२) एक श्रेष्ठ उद्धारमधिक स पूर्वजः कनिष्ठः पुत्रः। ततोऽन्ये ये ज्येष्ठवृषा ज्येष्ठग्राह्यवृषास्ते तदूनाना कानिष्ठिनेयाद्धीनवयसाम्। स्वमातृतः स्वमातृज्येष्ठत्वानुरूपेण। यस्य माता ज्येष्ठा तस्याप्येको वृष उद्धारः किं तु पूर्ववृषाद्धीनः। एव तद्धीनोऽन्येषा तन्मातृकनिष्ठासुतानामिति क्रमेणोद्धृत्य शेष समश विभाज्यमित्यर्थः। मवि.

(३) पूर्वस्या जातः पूर्वजः 'ङ्याप्पोः सज्ञाछन्दसोर्बहुलमि ति ह्रस्वत्वम्। स कनिष्ठोऽप्येक वृषभमुद्धार गृह्णीयात्, ततः श्रेष्ठवृषभादन्ये ये सन्त्यग्र्याः श्रेष्ठवृषभास्ते तस्माज्ज्यैष्ठिनेयान्मातृत ऊनाना कनिष्ठेयाना प्रत्येकमेकैकशो भवन्तीति मातृद्वाहक्रमेण ज्यैष्ठ्यम्। ममु.

(४) ततो ज्येष्ठवृषादपरे अज्येष्ठवृषाः अश्रेष्ठवृषास्तदनाना ज्येष्ठपुत्राल्कनीयसः ऊनाना तन्मातृकनिष्ठमातृकाणामित्यर्थः। विर.४७३

हलायुधस्तु अस्यार्थः, यदा ज्येष्ठाया कनिष्ठः, कनिष्ठाया च ज्येष्ठो भवति, तदा योऽसौ कनिष्ठाया पूर्वजातः, स एक श्रेष्ठवृषमुद्धार गृह्णीयात्। तस्माद्वृषाद्येऽन्येऽश्रेष्ठवृषाः, ते तदूनाना पूर्वजातकनिष्ठाना स्वमातृतः स्वमातृक्रमेण यथापकर्ष प्रत्येकमेकैकशो दातव्याः, परिशिष्ट सम विभजनीयम्। विर.४७४

(५) अपरे ये पुत्रास्ते ज्येष्ठवृषान्न्यूना ये वृषास्ते भागत्वेन येषा सन्ति तेऽज्येष्ठवृषाः एकैकशः। तत्र हेतुः तदुत्पन्नाना स्वस्वमातुरुत्तरकालोद्वाहेन तेषा न्यूनत्वात्कनिष्ठत्वमिति। मच.

(६) पूर्वजः कनिष्ठाया प्रथमं जातः, स हरेल्लमेत न परे तस्माद्वृषभादन्ये ये ज्येष्ठवृषास्ते ज्येष्ठस्य ज्यैष्ठिनेयस्य

+ मेधागतम्।

(१) **मस्मृ.**९।१२२; **व्यक.**१४२; **विर.**४७३; **व्यम.** ४३; **बाल.**२।११७; **समु.**१२८.

(२) **मस्मृ.**९।१२३; **व्यक.**१४२; **विर.**४७३ रेत स (रेत्स तु); **मवि.**ऽपरेऽज्ये (ऽन्ये ये ज्ये); **बाल.**२।११७; **समु.**१२८; **नन्द.**ऽपरेऽज्ये (परे ज्ये).

(३) [जीमूतवाहन खण्डयति] तत् पितृधने मात्रभावापेक्षया अदृष्टार्थत्वापत्तेः प्रागेव निरस्तम् । व्यप्र.४५२

(४) सवर्णाना सापत्नपुत्राणा सख्यासाम्ये मातृसख्यया भागो न पुत्रसख्ययेत्याह मदनरत्ने बृहस्पतिः । विता.३१०

व्यासः

सापत्नभ्रातृणा मातृतो विभागः

समानजातिसंख्या ये जातास्त्वेकेन सूनवः ।
विभिन्नमातृकास्तेषां मातृभागः प्रशस्यते ॥

(१) अत एव जीवन्त्या मातरि मातृप्रधानक विभाग निर्दिशति व्यासः—समानेति । दा.६०

(२) अत्र जातिसंख्यया साम्ये सापत्नानामपि भागविशेषः स्वरूपकृतो नास्तीति मातृभागत्वविधान मातृप्राधान्यपरमेवेति नाथ पुत्राणा विभागः किन्तु तन्मातृणा-

(१) **दा.६०, पमा.५०३, रत्न.१४०, नृप्र.३६, व्यप्र.४५१; व्यम.४५; विता.३१०, बाल.२।११७** भागः प्रशस्यते (तो भागकल्पना), **समु.१३४.**

मित्युद्दिश्य विभागः कर्त्तव्य इत्यत्र तात्पर्यम् । +व्यप्र.४५२

उशना

सादरसापत्नभ्रातृणा समो विभागः

वर्णानामनुलोमानां विभागोऽयं प्रदर्शितः ।
समत्वेनैकजातानां विभागस्तु विधीयते ॥

(१) इदानीं सवर्णभ्रातृणा विभागो विशोद्धारादिपूर्वको वा सम एव वेति विकल्पः । उद्धारमन्तरेणापि समविभागमाह पितरीत्यनुवृत्तौ हारीतः—समानतो मृते रिक्थविभागः । तथोशना— वर्णानामिति । दा.६५

(२) सर्वेषा पुत्राणा निर्गुणत्वेन तुल्याना, तथा कस्यचिद्गुणवत्त्वेऽपि सर्वे चेन्नानाविधधनार्जकाः, तदा सम एव भाग इत्यर्थः । विर.४८१

+ शेष 'भूयो पितामहोपात्ता' इति याज्ञवल्क्यवचनेन (पृ ११७७) द्रष्टव्यम् । विता. व्यप्रगतम् ।

(१) **दा.६५** मनुलोमा (मानुलोम्या); **व्यक.१४२; विर.४८१; विभ.४२** दर्शि (र्शी).

असवर्णभ्रातृविभागः

नानावर्णबहुपुत्रविभागविचारः, असवर्णैकपुत्रानेकपुत्रविभागविचारः, हीनवर्णज्येष्ठाशविचारश्च

गौतमः

जातिज्येष्ठगुणवयोज्येष्ठयोः समभागविधिः उद्धारव्यतिरिक्तविभागविधिश्च

ब्राह्मणस्य राजन्यापुत्रो ज्येष्ठो गुणसंपन्नस्तुल्यभाक् ।

उक्तः सवर्णपुत्राणा विभागः । अथ क्रमविवाहेष्वसवर्णापुत्रेषु विशेषमाह— ब्राह्मणस्येति । ब्राह्मणस्य राजन्याया जातः पुत्रो यदि गुणसपन्नो ज्येष्ठश्च भवति तदा ब्राह्मणीपुत्रेण यवीयसा तुल्यभाक् । एकस्य वयसा ज्येष्ठत्वमपरस्य जात्येति । *गौमि.

* मभा. गौमिगतम् ।

(१) **गौध.२८।३६; व्यक.१५१, गौमि.२८।३३; विर.५३३** ज्येष्ठा गुणसंपन्न (गुणसपन्नो ज्येष्ठ).

ज्येष्ठांशहीनमन्यत् ।

(१) विंशतिभागो ज्येष्ठस्येत्यादिर्य उद्धारः पूर्वमुक्तस्तद्व्यतिरिक्तमन्यद्विभजेतेति प्रकरणाद्गम्यते । गुणहीने ज्येष्ठे च राजन्यापुत्रे च मानवम् । *गौमि.

(२) गुणहीनः नासौ तुल्यभाक् । तत्र मनूक्तं द्रष्टव्यं—चतुरोऽशान् हरेद्विप्रस्त्रीनंशान् क्षत्रियासुतः । वैश्यापुत्रो हरेदद्व्यशमशं शूद्रासुतो हरेत् ॥' इति । शूद्रापुत्रस्य प्रतिषेध उक्त इति चेत् उच्यते, क्षतयोन्यामुत्पन्नस्य प्रतिषेधः । अक्षतयोन्यामुत्पन्नस्य अंशभाक्त्वमिति । पौनर्भवादिद्वारेण क्षतयोन्यामपि सभवत्येवेति । येषामौरसाद्यभाव इति शेषः, ते औरसाद्य-

* विर. गौमिगतम् ।

(१) **गौध.२८।३७; मभा.; गौमि.२८।३४; विर ५३३.**

भावे तुल्यभाक्त्वमस्य व्याचक्षते । तेषु सत्सु स्मृत्यन्तरोक्तं द्रष्टव्यम् । तथाऽऽह वसिष्ठः—'त्र्यंश ब्राह्मण्याः पुत्रो हरेत् द्व्यंशं राजन्यायाः पुत्रः सममितरे भजेरन्' इति । वृत्तापेक्षया विषयविकल्पो द्रष्टव्यः । +मभा.

राजन्यावैश्यापुत्रसमवाये यथा स ब्राह्मणीपुत्रेण ।

(१) यदा ब्राह्मणीपुत्रस्तु न आस्ते तदा राजन्यापुत्रो ब्राह्मणीपुत्रेण समवाये यथा तुल्यभाक्, एव क्षत्रियापुत्रेण वैश्यापुत्रस्तुल्यभाक् । *गौमि.

(२) एव च क्षत्रियापुत्रस्य ज्येष्ठस्य अस्मिन्विषये ज्येष्ठाशोऽस्तीति ज्ञापित भवति । ×मभा.

क्षत्रियाच्चेत् ।

(१) चेच्छब्दश्चशब्दस्यार्थे । क्षत्रियाच्चोत्पन्नयोः पुत्रयोः समवाये वैश्यापुत्रो ज्येष्ठो गुणसंपन्नः क्षत्रियापुत्रेण यवीयसा तुल्यभाक् । एव वैश्यादुत्पन्नस्य शूद्रापुत्रस्याप्येके मन्यन्ते द्रष्टव्यमिति । नेत्यन्येऽनुक्तत्वात् । गौमि.

(२) एवं वैश्याच्छूद्रापुत्रस्य द्रष्टव्यमित्येके, तदयुक्त मनुनोक्तत्वात् । ×मभा.

(३) तथा वैश्यस्याऽपि वैश्याशूद्रापुत्रयोरेवमेव । एव बौधायनस्यैवविधे विषये ज्येष्ठाशहारित्वाभिधान सवर्णपुत्रे निर्गुणे कनीयसि । सगुणे तु कनीयसि तुल्याशत्वमित्यविरोधः । विर.५३३

बौधायनः

जातिज्येष्ठगुणवयोज्येष्ठयोः समभागविधिः

सवर्णापुत्रानन्तरापुत्रयोरनन्तरापुत्रश्चेद् गुणवान् स ज्येष्ठांशं हरेत् । गुणवान् हि शेषाणां भर्ता भवति ।

(१) अनेनैव शूद्रस्याप्येवंविधस्य वैश्येन सह समाशिता दर्शिता । दा.१३८

(२) एतद्वचनेऽनन्तरोत्पन्नमात्रस्य गुणवत्त्वज्येष्ठताप्रयुक्तोत्कृष्टपुत्रसमाशभाक्त्वोक्तैर्वैश्यजशूद्रापुत्रस्याप्येवविधस्य वैश्यापुत्रसमाशिता द्रष्टव्या बृहस्पत्यनुक्तापि । ज्येष्ठाश हरेदित्यस्योत्कृष्टसमाशहरणमेवार्थो बृहस्पतिसंवादात् उत्तमजातीयापेक्षयाधिकाशानौचित्याच्च ।

व्यप्र.४६५

(३) गुणवत्ता हि श्रुतशीलादिः । गुणवत्पुत्रस्य ज्येष्ठाशहरणे कारणमाह—गुणवानिति । आहारदानादिगुणवत्त्वे समर्थ एव । अतो ज्यैष्ठ्यं गुणवयःकृतम् । बौवि.

नानावर्णस्त्रीपुत्राणा विभागविधिः

नानावर्णस्त्रीपुत्रसमवाये दायं दशांशान् कृत्वा चतुरस्त्रीन् द्वावेकमिति यथाक्रमं विभजेरन् ।

नानावर्णस्त्रियो ब्राह्मणादिस्त्रियः । तत्पुत्रसमवाये सति सर्वं दशधा विभज्य चतुरोऽशान् ब्राह्मणीपुत्रो हरेत् । इतरेषु षट्सु त्रीनशान् क्षत्रियासुतः । तत्परिशिष्टेषु त्रिषु द्वौ वैश्यासुतः । तस्यैतदवशिष्टाशं शूद्रासुतः । एवं क्षत्रियोऽपि सुतस्य वर्णक्रमात् षोढा कृताना त्रीन् द्वावेकमिति यथाक्रम प्रकल्पयेत् । तथा वैश्योऽपि स्वपुत्रयोः द्वावेकमिति विभजेत् । बौवि.

औरसे तूत्पन्नेऽसवर्णास्तृतीयांशहराः ।

अयमौरसविषयविभागः—औरस इति । औरसं सवर्णापुत्र वक्ष्यति—'सवर्णाया संस्कृतायाम्' इति । तस्मिन्नुत्पन्नेऽसवर्णास्तृतीयाशहरा भवेयुः । सर्वं धनजातं त्रेधा विभज्य तेषामेक षोढा सपाद्य त्रीन् द्वावेकमिति कल्पयेत् । बौवि.

वसिष्ठः

ब्राह्मणस्य त्रैवर्णिकपुत्रविभागविधिः

यदि ब्राह्मणस्य ब्राह्मणीक्षत्रियावैश्यासु पुत्राः स्युः त्र्यंशं ब्राह्मण्याः पुत्रो हरेद्द्व्यंशं राजन्यायाः पुत्रः सममितरे विभजेरन् ।

+ वाक्यार्थो गौमिवत् ।

* विर. गौमिगतम् । × वाक्यार्थो गौमिवत् ।

(१) **गौध.**२८।३८; **मभा.**; **गौमि.**२८।३५; **विर.**५३३ यथा स (यथांश).

(२) **गौध.**२८।३९; **मभा.**; **गौमि.**२८।३६; **विर.** ५३३ चे (चे).

(३) **बौध.**२।२।१२,१३; **दा.**१३८ स ज्येष्ठांशं हरेत् (ज्येष्ठभागं गृह्णीयात्); **व्यक.**१५१ शं ह (शमाह) भवति (भविष्यति); **विर.**५३२ हि शे (अशे); **व्यप्र.**४६५.

(१) **बौध.**२।२।१०. (२) **बौध.**२।२।११.

(३) **वस्मृ.**१७।४४; **व्यक.**१५१ स्युः (तदा); **मभा.** २८।३७ (यदि...पुत्राः स्युः०) विभजे (भजे); **विर.**५३२ ब्राह्मणी...श्यासु (ब्राह्मणक्षत्रियवैश्याः).

इतरे वैश्यापुत्राः । अत्र च विष्णुवसिष्ठौ विषमविभागवादिनौ भागिगुणोत्कर्षापकर्षाभ्यामविरोधितया व्यवस्थाप्यौ । विर.५३२

विष्णुः

नानावर्णस्त्रीपुत्राणां विभागविधिः, असवर्णैकपुत्रानेकपुत्रविभागविधि , शूद्रापुत्रस्यैकस्यैवांशः इतरेषामभावे शेषाशविनियोगश्च

ब्राह्मणस्य चतुर्षु वर्णेषु चेत् पुत्रा भवेयुस्ते पैतृकमृक्थं दशधा विभजेयुः। तत्र ब्राह्मणीपुत्रश्चतुरोंऽशानादद्यात् । क्षत्रियापुत्रस्त्रीन् । द्वावंशौ वैश्यापुत्रः । शूद्रापुत्रस्त्वेकम् । अथ चेच्छूद्रापुत्रवर्जं ब्राह्मणस्य पुत्रत्रयं भवेत् तदा तद्धनं नवधा विभजेयुः । वर्णानुक्रमेण चतुस्त्रिद्विभागीकृतानंशानादद्युः । वैश्यवर्जमष्टधाकृतं चतुरस्त्रीनेकं चादद्युः।क्षत्रियवर्जं सप्तधाकृतं चतुरो द्वावेकं च। ब्राह्मणवर्जं षड्धाकृतं त्रीन् द्वावेकं च।क्षत्रियस्य क्षत्रियावैश्याशूद्रापुत्रेष्वयमेव विभागः । अथ ब्राह्मणस्य ब्राह्मणक्षत्रियौ पुत्रौ स्यातां तदा सप्तधा कृताद्धनाद् ब्राह्मणश्चतुरोंऽशानादद्यात् । त्रीन् राजन्यः। अथ ब्राह्मणस्य ब्राह्मणवैश्यौ तदा षड्धा विभक्तस्य चतुरोंऽशान् ब्राह्मण आदद्यात्। द्वावंशौ वैश्यः । अथ ब्राह्मणस्य ब्राह्मणशूद्रौ पुत्रौ स्यातां तद्धनं पञ्चधा विभजेयाताम् । चतुरोंऽशान् ब्राह्मणस्त्वादद्यात् । एकं शूद्रः । अथ ब्राह्मणस्य क्षत्रियस्य वा क्षत्रियवैश्यौ स्यातां तदा तद्धनं पञ्चधा विभजेयाताम् । त्रीनंशान् क्षत्रियस्त्वादद्यात् । द्वावंशौ वैश्यः । अथ ब्राह्मणस्य क्षत्रियस्य वा क्षत्रियशूद्रौ पुत्रौ स्यातां तदा तद्धनं चतुर्धा विभजेयाताम् । त्रीनंशान् क्षत्रियस्त्वादद्यात् । एकं शूद्रः । अथ ब्राह्मणस्य क्षत्रियस्य वैश्यस्य वा वैश्यशूद्रौ पुत्रौ स्यातां तदा तद्धनं त्रिधा विभजेयाताम् । द्वावंशौ वैश्यस्त्वादद्यात् । एकं शूद्रः । अथैकपुत्रा ब्राह्मणस्य ब्राह्मणक्षत्रियवैश्याः सर्वहराः । क्षत्रियस्य राजन्यवैश्यौ । वैश्यस्य वैश्यः । शूद्रः शूद्रस्य ।

द्विजातीनां शूद्रस्त्वेकः पुत्रोऽर्धहरः । अपुत्रकर्थस्य या गतिः सात्रार्धस्य द्वितीयस्य ।

(१) **विस्मृ.**१८।१-३१; **दा.**१३७, **व्यक.**१५०-१५१ (ब्राह्मणस्य च चतुर्षु वर्णेषु पुत्रा भवेयुस्ते पैतृकं रिक्थं दशधा विभजेयुः। तत्र ब्राह्मणीसुतश्चतुरोंऽशानादद्यात् क्षत्रियापुत्रस्त्रीन् द्वावंशौ वैश्यासुतः शूद्रापुत्रस्त्वेकम् । अथ चेच्छूद्रापुत्रवर्जं ब्राह्मणस्य पुत्रत्रय भवेत्तदा नवधा धन विभजेयुः वर्णक्रमेण चतुस्त्रिद्विभागकृतानादद्युः, वैश्यावर्जमष्टधा कृत्वा चतुरस्त्रीनेकं च समादद्युः । क्षत्रियवर्जं सप्तधा कृत्वा चतुरो द्वावेकं च, ब्राह्मणवर्जं षड्धा कृत्वा त्रीन्द्वावेकं च, क्षत्रियस्य क्षत्रियवैश्यशूद्रपुत्रेष्वयमेव विभागः । अथ ब्राह्मणस्य ब्राह्मणक्षत्रियौ स्याता पुत्रौ तदा सप्तधा कृत्वा तस्माद्ब्राह्मण चतुरोंऽशानादद्यात् त्रीन्राजन्यः । ब्राह्मणस्य ब्राह्मणवैश्यौ चेत्पुत्रौ स्याता तदा तद्धनात् षड्धा विभक्तात् चतुरोंऽशान् ब्राह्मणस्त्वादद्यात् द्वौ वैश्यापुत्रः । अथ ब्राह्मणस्य ब्राह्मणशूद्रौ पुत्रौ स्याता तदा तद्धन पञ्चधा विभजेयाता, चतुरोंऽशान् ब्राह्मणस्त्वादद्यात् एक शूद्रः । अथवा ब्राह्मणस्य क्षत्रियवैश्यौ पुत्रौ स्याता तदा तद्धन पञ्चधा विभजेयाता त्रीनशान् क्षत्रियस्त्वादद्यात् द्वावंशौ वैश्यः। अथ ब्राह्मणस्य क्षत्रियस्य वा क्षत्रियशूद्रौ पुत्रौ स्याता तदा चतुर्धा विभजेयातां त्रीनशान् क्षत्रियस्त्वादद्यात् स्वाश शूद्रः । अथ ब्राह्मणस्य क्षत्रियवैश्ययोर्वा वैश्यशूद्रौ स्याता तदा तद्धन त्रिधा विभजेयाता द्वावंशौ वैश्य आदद्यात् एक शूद्रः । अथैकपुत्रा ब्राह्मणस्य ब्राह्मणक्षत्रियवैश्या. सर्वहराः । क्षत्रियवैश्यौ राजन्यस्य । वैश्यस्य वैश्य. । शूद्रस्य शूद्रः ।); **विर.**५३०-५३१ तुपु व (तुवे) चेत् (ये) तद्धन नवधा (नवधा धन) वर्णानु (वर्णे) मेण+(च) ष्टधाकृत (ष्टधा कृत्वा) क चा (क च समा) सधाकृत (सधा कृत्वा) तं त्री (त्वा त्री) क्षत्रिय...भागः (क्षत्रियवैश्यशूद्रेष्वयमेव विभागः) न्यः । अथ (न्यः ।) तदा षड्धा विभक्तस्य (चेत्पुत्रौ तदा तद्धनात् षड्धा विभक्तात्) द्वावंशौ वैश्य (द्वौ वैश्यासुतः) ता त (ता तदा त) श्यौ स्या (श्यौ पुत्रौ स्या) क्षत्रियस्य वैश्यस्य वा (क्षत्रियवैश्ययोर्वा) श्यस्त्वा (श्य आ) क्षत्रियस्य राजन्यवैश्यौ (क्षत्रियवैश्यौ वा राजन्यस्य); **स्मृसा.**६५ (अथ चेच्छूद्रापुत्रवर्जं ब्राह्मणस्य पुत्रत्रय भवेत् तदा नवधा धन विभजेयुः वर्णक्रमेण चतुस्त्रिद्विभागिनः) एतावदेव; **विचि.**२२५ (अथ चेच्छूद्रापुत्रवर्जं ब्राह्मणस्य पुत्रास्तदा नवधा धनं विभजेयुः क्षत्रियादावप्येवम्।) एतावदेव; **स्मृचि.**३४, **विभ.**९८.

(१) **विस्मृ.**१८।३२,३३; **दा.**१४१ कः पु (कपु) सात्रार्ध (साध); **व्यक.**१५२ क. पु(कपु); **विर.**५३५ कः पु (कपु) त्रक्थं (त्रस्य ऋक्थ), **पमा** ५०८ शू (शौ) त्रक्थं(त्रस्य ऋक्थ)सात्रार्धस्य

यदि द्वौ ब्राह्मणीपुत्रौ स्यातामेकः शूद्रापुत्रस्तदा नवधा विभक्तस्यार्थस्य ब्राह्मणीपुत्रावष्टौ भागानाददातामेकं शूद्रापुत्रः। अथ शूद्रापुत्रावुभौ स्यातामेको ब्राह्मणीपुत्रस्तदा षड्धा विभक्तस्यार्थस्य चतुरोंऽशान् ब्राह्मणस्त्वादद्याद् द्वावंशौ शूद्रापुत्रौ। अनेन क्रमेणान्यत्राप्यंशकल्पना भवति।

(१) अथैकपुत्रा इति। यदा ब्राह्मणस्य ब्राह्मण्यादिभार्यासु तिसृषु मध्ये एक एव पुत्रो ब्राह्मणः क्षत्रियो वैश्यो वा, तदा सर्वहरः स एव। एवं यदि क्षत्रियस्याऽपि भार्याद्वये क्षत्रिय एव वैश्य एव वा, तदा स एव सर्वहरः। एवं वैश्यस्याप्येको वैश्यः सर्वहरः, शूद्रस्यैकः शूद्रः सर्वहरः। क्षत्रियवैश्ययोस्तृतीया द्वितीया भार्या अवैदिकतया नात्रोक्ताः, अवैधयोस्तु क्षत्रियवैश्यतृतीयद्वितीयपरिणययोरेवमेव नेयम्। विर.५३१–५३२

(२) पूर्वाध्यायान्ते पितृतोऽशकल्पनिरुक्ता तत्र यज्जातीयस्य यावानशस्तं अष्टादशेनाभिधातु प्रक्रमते। तत्र ब्राह्मणपुत्राणा तावदाह—ब्राह्मणस्येति। यदि विप्रस्य चातुर्वर्णिकस्त्रीषु उक्तसंज्ञाः पुत्रा भवेयुः तदा ते पितृधनस्य दशभागान् कुर्युः। चेदित्यनेनासवर्णपुत्राणा अनित्यतोक्ता। ते इत्यनेन पुत्रकर्तृकविभागे एवाशकल्पना नियता न पितृकर्तृके, तत्र पित्रिच्छाया एव नियामकत्वात्, पैतृकमिति पैतामहमपि तस्यापि पितृतो भागकल्पनात्, पैतृकमिति सामान्योपादानेऽपि प्रतिग्रहलब्धभूम्यतिरिक्त ज्ञेयम्। यथाह बृहस्पतिः— 'न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै। यद्यप्येषा पिता दद्यान्मृते विप्रासुतो हरेत्॥' इति। प्रतिग्रहशब्दात् क्रयादिलब्धा देयैव। साऽपि न शूद्राय। 'शूद्रया द्वितीयस्य (सा भागार्धस्य); **व्यनि.** व्यकवत्, **नृप्र.**३६ (क्षत्रियेण वैश्येन वा शूद्यामुत्पादित एकः पुत्रोऽर्धमेव हरेत्); **व्यप्र.** ४४६ दावत्; **विता.**३७६ सात्रार्धं (सार्धं); **समु.**१३० दावत्, बृहद्विष्णुः; **विच.**९९ हरः+(भवेत्) तत्कर्थं (तस्य ऋक्थं) शेषं मितावत्.

(१) **विस्मृ.**१८।३८-४०; **दा.**१३७; **व्यक.**१५१ णान्य ..ना (णांशकल्पनान्यत्रापि); **विर.**५३१ द्वौ ब्राह्मणीपुत्रौ (ब्राह्मणीपुत्रौ द्वौ) (नवधा विभक्तस्यार्थस्य०) विभक्तस्यार्थस्य (विभज्य) णस्त्वा (ण आ) णान्यत्राप्यशकल्पना (णांशकल्पना अन्यत्रापि); **स्मृसा.**६५.

द्विजातिभिर्जातो न भूमेर्भागमर्हतीति स्मरणात्। भूमिः स्वयमर्जित क्षेत्र न क्रमागतं गृह वा, 'ब्रह्मदायागता भूमिमि'त्यादि बृहन्मनुस्मरणात्। ब्रह्मदायः प्रतिग्रहः। दशाना विनियोगमाह—तत्रेति। तत्र चातुर्वर्णिकेषु पुत्रेषु दशसु भागेषु विप्रस्य विप्रापुत्रः चतुरोंऽशान् प्रतिगृह्णीयात्। किच क्षत्रियेति। विप्रात् क्षत्रियोत्पन्नस्त्रीनशानादद्यात्। किच द्वावंशाविति। विप्राद्वैश्योत्पन्नो द्वावंशौ गृह्णीयात्। अशानुवृत्तावपि अशोपादानं विकृतस्यानुपङ्गाभावबोधनाय। 'सं ते वायुर्वातेन गच्छता सं यजत्रैरङ्गानी'तिवत् (मैसं.१।२।१५) तेनोत्तरत्रैकवचनान्तस्याध्याहारः। मनुस्तु वैश्यातोऽप्यर्धमेवाशमित्याह—किच शूद्रेति। विप्रात् शूद्रोत्पन्नस्त्वेकमशं गृह्णीयात्। यत्तु 'ब्राह्मणक्षत्रियविशा शूद्रापुत्रो न रिक्थभाग्। यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत्॥' इति मानवं तदनूढशूद्रापुत्रविषयं, 'ब्राह्मणस्यानुपूर्वेण चतस्रस्तु यदा स्त्रियः' इत्युपक्रम्य 'अश शूद्रासुतो हरेत्' इति तेनैव अभिधानात्। अत्र शङ्खलिखितौ विशेषमाहतुः—'असवर्णास्त्रीजातानादायादार्धार्धहानिर्वर्णक्रमेण' इति। अयमर्थः ब्राह्मणीपुत्रात् क्षत्रियादिपुत्राणा अर्धार्धहान्याशो देय इति। यथा अष्टावशा ब्राह्मणीपुत्रस्य चत्वारः क्षत्रियापुत्रस्य द्वौ वैश्यापुत्रस्य एकः शूद्रापुत्रस्य इति सोऽय अशभेदो गुणागुणाभ्या व्यवस्थाप्यः। अनयैव रीत्या क्षत्रियादिष्वपि कल्प्यः, एव चातुर्वर्णिकपुत्रचतुष्टयसमवायेऽशभागमुक्त्वेदानी त्रित्रिसमवाये तमाह - अथ चेत् शूद्रापुत्रवर्जमिति। यदा पुनर्विप्रस्य शूद्रापुत्रवर्जं विप्रक्षत्रियवैश्याः त्रय एव पुत्रा भवेयुस्तदा पितृधन नवधा कुर्युः। तद्विनियोगमाह—वर्णानुक्रमेणेति। विप्रक्षत्रियवैश्याः क्रमेण चतुरस्त्रीन्द्वौ च भागान् गृह्णीयुः। किच वैश्यवर्जमिति। यदा विप्रस्य वैश्यापुत्रवर्जं विप्रक्षत्रियशूद्रा एव पुत्रा भवेयुस्तदा ते पितृधनमष्टधा कृत्वा क्रमेण चतुरस्त्रीन् एक गृह्णीयुः। किच—क्षत्रियवर्जमिति। यदा विप्रस्य क्षत्रियवर्जं विप्रवैश्यशूद्रा एव पुत्रा भवेयुस्तदा ते पितृधन सप्तधा विभज्य क्रमेण चतुरो द्वावेक चाशं गृह्णीयुः। किच ब्राह्मणवर्जमिति। यदा विप्रस्य क्षत्रियवैश्यशूद्रा एव पुत्रा भवेयुस्तदा ते पितृ-

धनं पोढा विभज्य क्रमेण त्रीन् द्वावेक अंश गृह्णीयुः। उक्तमर्थं क्षत्रियस्य त्रैवर्णिकपुत्रसमवायेऽप्यतिदिशति—क्षत्रियस्येति। विप्रस्य विप्रपुत्रवर्जं त्रैवर्णिकपुत्रेषु यो विभागः स एव क्षत्रियस्याऽपि त्रैवर्णिकपुत्रेषु तस्याऽपि विप्रपुत्राभावात्। अयमर्थः—तेऽपि पोढा पितृधनं विभज्य त्रीन् द्वावेक चाशमादद्युः। अत्र विशेषो भारते। भीष्म उवाच—'क्षत्रियस्याऽपि भार्ये द्वे विहिते कुरुनन्दन। तृतीया च भवेत् शूद्रा न तु दृष्टान्ततः क्वचित्॥ अष्टधा तु भवेत्कार्यं क्षत्रियस्य युधिष्ठिर। क्षत्रियाया हरेत्पुत्रश्चतुरोऽशान्पितुर्धनात्॥ युद्धोपचारिकं यच्च पितुरासीत् हरेच्च तत्। वैश्यापुत्रस्तु भागान्त्रीन् शूद्रापुत्रस्तथाऽष्टमम्॥ सोऽपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति॥' इति। एवं त्रिसमवाये विभागमुक्त्वेदानीं द्विद्विसमवाये तमाह—अथ ब्राह्मणस्येति। यदा विप्रस्य विप्रक्षत्रियावेव पुत्रौ स्याता तदा पितृधनं सप्तधा कृत्वा तेषु विप्रश्चतुरोऽशानादद्यात्। किंच—त्रीन्राजन्य इति। सप्तस्ववशिष्टान् क्षत्रिय आदद्यात्। किंच—अथ ब्राह्मणस्येति। यदा विप्रस्य विप्रवैश्यावेव पुत्रौ स्याता तदा पितृधनं पोढा विभज्य तत्र चतुरोऽशान् विप्रः प्रथमं आदद्यात्। किंच—द्वावशाविति। षड्धावशिष्टौ द्वावंशौ वैश्यो गृह्णीयात्। किंच—अथ ब्राह्मणस्येति। यदा विप्रशूद्रावेव पुत्रौ स्याता तदा पितृधनं पञ्चधा विभजेयाताम्। तद्विनियोगमाह—चतुरोऽशानिति। पञ्चसु चतुरोंऽशान् विप्रो गृह्णीयात्। किंच—एकं शूद्र इति। पञ्चस्ववशिष्टमशमेकं शूद्रो गृह्णीयात्। एवं विप्रविषये विभागमुक्त्वेदानीं विप्रक्षत्रिययोर्द्विद्विसमवाये तमाह—अथ ब्राह्मणस्येति। यदा विप्रक्षत्रिययोः क्षत्रियवैश्यावेव पुत्रौ स्याता तदा पितृधनं पञ्चधा विभजेयाताम्। तद्विनियोगमाह—त्रीनंशानिति। पञ्चसु त्रीनंशान् क्षत्रियो गृह्णीयात्। किंच—द्वावशाविति। पञ्चस्ववशिष्टौ द्वावंशौ वैश्यो गृह्णीयात्। किंच—अथ ब्राह्मणस्येति। यदा विप्रक्षत्रिययोः क्षत्रियशूद्रावेव पुत्रौ स्याता तदा तौ पितृधनं चतुर्धा विभजेयाताम्। तद्विनियोगानाह—त्रीनंशानिति। चतुर्ष्वशेषु त्रीनशान् क्षत्रियः प्रथममादद्यात्। किंच—एकमिति। चतुर्थावशिष्टमेकमशं शूद्रो गृह्णीयात। एवं विप्रक्षत्रियविषये विभागमुक्त्वेदानीं विप्रक्षत्रियविशां द्विद्विसमवाये तमाह—अथ ब्राह्मणस्येति। यदा विप्रक्षत्रियविशा वैश्यशूद्रावेव पुत्रौ स्याता तदा तौ पितृधन त्रिधा विभजेयाताम्। तद्विनियोगमाह—द्वावंशाविति। त्रिष्वशेषु द्वावंशौ वैश्यः प्रथममादद्यात्। किंच—एकं शूद्र इति। त्रिष्वंशशिष्टमेकमशं शूद्रो गृह्णीयात्। अत्राऽपि वैश्यविषये विशेषो महाभारते— 'एकेव हि भवेद्भार्या वैश्यस्य कुरुनन्दन। द्वितीयाऽपि भवेत् शूद्रा न तु दृष्टान्ततः क्वचित्॥ पञ्चधा तु भवेत्कार्यं वैश्यस्य भरतर्षभ। वैश्यापुत्रस्तु गृह्णीयात् चतुरोऽशान्पितुर्धनात्॥ पञ्चमस्तु भवेद्भागः शूद्रापुत्राय भारत। सोऽपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति॥' इति। एवं चातुर्वर्णिकपुत्राणां द्वित्रिचतुस्समवायेऽशकल्पनामुक्त्वेदानीं एकाकिना तदपवादमाह—अथैकपुत्रा इति। यदा विप्रस्य विप्रक्षत्रियविश एकपुत्राः एकश्चासौ पुत्रश्च एकपुत्रः, एकपुत्रश्चैकपुत्रश्चैकपुत्रश्च इत्येकपुत्राः, विप्रक्षत्रियविशा अन्यतम एकाक्येव पुत्र इति यावत् तदा ते सर्वहराः। यदा एक एव पुत्रः तदा स एव सर्वं पैतृकधनं गृह्णीयादित्यर्थः। यद्यप्येतत् स्वामिनाशादेव तत्स्वत्वोत्पत्तेर्न वक्तव्यं तथापि मातृस्वत्वाविशेषात्तद्विभागापवादायेति नानर्थक्यं तेन चैकपुत्राया मातुर्यावज्जीवं भरणमेव नाशभाक्त्वमिति वक्ष्यते। किंच—क्षत्रियस्येति। यदा क्षत्रियस्य क्षत्रियवैश्यौ वा एक एव पुत्रस्तदासौ सर्वमेव हरेत्। किंच—वैश्यस्य वैश्येति। वैश्यस्य वैश्य एव एकपुत्रश्चेत्तदासौ सर्वमेव हरेत्। किंच—शूद्रः शूद्रस्येति। शूद्रस्यैवैकपुत्रश्चेत्तदाऽसौ सर्वमेव हरेत्। द्विजपुत्रा द्विजा एव सर्वहराश्चेत् शूद्रस्य का गतिरित्यत आह—द्विजातीनामिति। द्विजातीना विप्रक्षत्रियविशा शूद्र एव चेदेकः पुत्रस्तदाऽसौ न सर्वहरः। किंत्वर्धमेव हरेत्। इदं च गुणवत् शूद्रपरम्। निर्गुणे तु 'निषाद एकपुत्रस्तु विप्रस्य स तृतीयभाग्। द्वौ सपिण्डः सकुल्यो वा स्वधादाताऽथवा हरेत्॥' इति देवलोक्तस्तृतीयांशो ज्ञेयः। अत्यन्तनिर्गुणे तु 'यद्यपि स्यात्तु सत्पुत्रोऽपुत्रोऽथवा भवेत्। नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मवित्॥' इति मानवं द्रष्टव्यम्। यद्वा दद्यादित्यन्यकर्तृकनिर्देशात् पित्रादिकर्तृकेऽपि भागेऽस्य दशमांशभागित्वं स्वकर्तृके त्वर्धादिहरत्व-

मिति विवेकः। यत्तु 'ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्। यदेवास्य पिता दद्यात्तदेवास्य धन भवेत्॥' इति मानव तदनूढशूद्रापुत्रविषय इत्युक्तम्। पितृप्रसादलब्धविषयं वा ज्ञेयम्। शूद्रस्य दासीपुत्रे विशेषमाह योगीश्वरः—'जातोऽपि दास्या शूद्रेण कामतोऽशहरो भवेत्। मृते पितरि कुर्युस्त भ्रातरस्त्वर्धभागिकम्॥ अभ्रातृको हरेत्सर्व दुहितृणा सुताहृते॥' इति। अर्धान्तरस्य विनियोगमाह—अपुत्ररिक्थस्य या गतिरिति। 'अपुत्रधन पत्न्यभिगामि' इत्यादिना ये पुत्रधर्माधिकारिणोऽभिहितास्ते तेनैव क्रमेण इदमर्ध गृह्णीयुः। इदानीं विषमसंख्यतत्समवाये तमाह—यदीति। यदा विप्रस्य द्वौ विप्रौ एकश्च शूद्र इत्येव त्रयः पुत्राः स्युस्तदा ते पितृधन नवधा विभज्य चतुरो भागान् एकैको विप्रः शूद्रश्चैक भाग गृह्णीयात्। किंच—अथ शूद्रेति। यदा द्वौ शूद्रौ एको विप्रश्चेत्येव त्रयः पुत्राः स्युस्तदा ते पोढाऽर्थ विभज्य चतुरोऽशान् विप्रो गृह्णीयात् एकैक शूद्रौ गृह्णीयाताम्। एव प्रतिवर्ण पुत्रसख्याभेदेन समवायानन्त्याद्वक्तुमशक्तेरूहप्रकारमाह—अनेनेति। योऽयं विप्रस्य विषमसख्यविप्रशूद्रसमवाये विप्रविट्समवाये चाशकल्पना भवतीति ज्ञेयम्। वै.

एका माता द्वयोर्यत्र पितरौ द्वौ च कुत्रचित्।
तयोर्यद्यस्य पैत्र्यं स्यात्स तद्गृह्णीत नेतरः॥

शंखः शंखलिखितौ च

नानावर्णस्त्रीपुत्राणा विभागविधिः

अन्यवर्णस्त्रीषु जातानां दायादर्धार्धहानिर्वर्णक्रमेण।

महाभारतम्

नानावर्णस्त्रीपुत्राणा विभागविधि, शूद्रापुत्रविभागविचारः, असवर्णपुत्रविभागे वैषम्यनिमित्तविचारश्च

युधिष्ठिर उवाच—

सर्वशास्त्रविधानज्ञ राजधर्मविदुत्तम।
अतीवसंशयच्छेत्ता भवान्वै प्रथितः क्षितौ॥
कश्चित्तु संशयो मेऽस्ति तन्मे ब्रूहि पितामह।
जातेऽस्मिन्संशये राजन्नान्यं पृच्छेम कञ्चन॥
यथा नरेण कर्तव्यं धर्ममार्गानुवर्तिना।
एतत्सर्वं महाबाहो भवान् व्याख्यातुमर्हति॥
चतस्रो विहिता भार्या ब्राह्मणस्य पितामह।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा च रतिमिच्छतः॥
तत्र जातेषु पुत्रेषु सर्वासां कुरुसत्तम।
आनुपूर्व्येण कस्तेषां पित्र्यं दायादमर्हति॥
केन वा किं ततो हार्य पितृवित्तात्पितामह।
एतदिच्छामि कथितं विभागस्तेषु यः स्मृतः॥

भीष्म उवाच—

ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः।
एतेषु विहितो धर्मो ब्राह्मणस्य युधिष्ठिर॥
वैषम्यादथवा लोभात्कामाद्वाऽपि परंतप।
ब्राह्मणस्य भवेच्छूद्रा न तु दृष्टान्ततः स्मृता॥
शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम्।
प्रायश्चित्तीयते चापि विधिदृष्टेन कर्मणा॥
तत्र जातेष्वपत्येषु द्विगुणं स्याद्युधिष्ठिर।
अतस्ते नियमं वित्ते संप्रवक्ष्यामि भारत॥
लक्षण्यं गोवृषो यानं यत्प्रधानतमं भवेत्।
ब्राह्मण्यास्तद्धरेत्पुत्र एकांशं वै पितुर्धनात्॥
शेषं तु दशधा कार्यं ब्राह्मणस्वं युधिष्ठिर।
तत्र तेनैव हर्तव्याश्चत्वारोंऽशाः पितुर्धनात्॥
क्षत्रियायास्तु यः पुत्रो ब्राह्मणः सोऽप्यसंशयः।
स तु मातृविशेषेण त्रीनंशान् हर्तुमर्हति॥
वर्णे तृतीये जातस्तु वैश्यायां ब्राह्मणादपि।
द्विरंशस्तेन हर्तव्यो ब्राह्मणस्वाद्युधिष्ठिर॥
शूद्रायां ब्राह्मणाज्जातो नित्यादेयधनः स्मृतः।
अल्पं चापि प्रदातव्यं शूद्रापुत्राय भारत॥
दशधा प्रविभक्तस्य धनस्यैष भवेत्क्रमः।
सवर्णासु तु जातानां समान्भागान्प्रकल्पयेत्॥
अब्राह्मणं तु मन्यन्ते शूद्रापुत्रमनैपुणात्।
त्रिषु वर्णेषु जातो हि ब्राह्मणाद् ब्राह्मणो भवेत्॥
स्मृताश्च वर्णाश्चत्वारः पञ्चमो नाधिगम्यते।
हरेच्च दशमं भागं शूद्रापुत्रः पितुर्धनात्॥
तत्तु दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति।
अवश्यं हि धनं देयं शूद्रापुत्राय भारत॥

(१) सेतु.८२.
(२) व्यक.१५१ स्त्रीषु (स्त्री); विर.५३१.
(३) भा. १३।४७।१-२२.

आनृशंस्यं परो धर्म इति तस्मै प्रदीयते ।
यत्रतत्र समुत्पन्नं गुणायैवोपपद्यते ॥
यद्यप्येष सपुत्रः स्यादपुत्रो यदि वा भवेत् ।
नाधिकं दशमाद्द्याच्छ्रद्धापुत्राय भारत ॥
त्रैवार्षिकाद्यदा भक्तादधिकं स्याद् द्विजस्य तु ।
यजेत तेन द्रव्येण न वृथा साधयेद्धनम् ॥

युधिष्ठिर उवाच—

शूद्रायां ब्राह्मणाज्जातो यद्यदेयधनः स्मृतः ।
केन प्रतिविशेषेण दशमोऽप्यस्य दीयते ॥
ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः ।
क्षत्रियायां तथैव स्याद्वैश्यायामपि चैव हि ॥
कस्मात्तु विषमं भागं भजेरन्नृपसत्तम ।
यदा सर्वे त्रयो वर्णास्त्वयोक्ता ब्राह्मणा इति ॥

भीष्म उवाच—

दारा इत्युच्यते लोके नाम्नैकेन परंतप ।
प्रोक्तेन चैव नाम्नाऽयं विशेषः सुमहान्भवेत् ॥
तिस्रः कृत्वा पुरो भार्याः पश्चाद्विन्देत ब्राह्मणीम् ।
सा ज्येष्ठा सा च पूज्या स्यात्सा च ताभ्यो गरीयसी॥
स्नानं प्रसाधनं भर्तुर्दन्तधावनमञ्जनम् ।
हव्यं कव्यं च यच्चान्यद्धर्मयुक्तं गृहे भवेत् ॥
न तस्यां जातु तिष्ठन्त्यामन्या तत्कर्तुमर्हति ।
ब्राह्मणी त्वेव कुर्याद्वा ब्राह्मणस्य युधिष्ठिर ॥
अन्नं पानं च माल्यं च वासांस्याभरणानि च ।
ब्राह्मण्यैतानि देयानि भर्तुः सा हि गरीयसी ॥
मनुनाऽभिहितं शास्त्रं यच्चापि कुरुनन्दन ।
तत्राप्येष महाराज दृष्टो धर्मः सनातनः ॥
अथ चेदन्यथा कुर्याद्यदि कामाद्युधिष्ठिर ।
यथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः ॥
ब्राह्मण्याः सदृशः पुत्रः क्षत्रियायाश्च यो भवेत् ।
राजन्विशेषो यस्त्वत्र वर्णयोरुभयोरपि ॥
न तु जात्या समा लोके ब्राह्मण्याः क्षत्रिया भवेत् ।
ब्राह्मण्याः प्रथमः पुत्रो भूयान्स्याद्राजसत्तम ॥
भूयो भूयोऽपि संहार्यः पितृवित्ताद्युधिष्ठिर ।
यथा न सदृशी जातु ब्राह्मण्याः क्षत्रिया भवेत् ॥
क्षत्रियायास्तथा वैश्या न जातु सदृशी भवेत् ।
श्रीश्च राज्यं च कोशश्च क्षत्रियाणां युधिष्ठिर ॥
विहितं दृश्यते राजन्सागरान्तां च मेदिनीम् ।
क्षत्रियो हि स्वधर्मेण श्रियं प्राप्नोति भूयसीम् ।
राजा दण्डधरो राजन् रक्षा नान्यत्र क्षत्रियात् ॥
ब्राह्मणा हि महाभागा देवानामपि देवताः ।
तेषु राजा प्रवर्तेत पूजया विधिपूर्वकम् ॥
प्रणीतमृषिभिर्ज्ञात्वा धर्मं शाश्वतमव्ययम् ।
लुप्यमानं स्वधर्मेण क्षत्रियो रक्षति प्रजाः ॥
दस्युभिर्ह्रियमाणं च धन दारांश्च सर्वशः ।
सर्वेषामेव वर्णानां त्राता भवति पार्थिवः ॥
भूयान्स्यात्क्षत्रियापुत्रो वैश्यापुत्रान्न संशयः ।
भूयस्तेनापि हर्तव्यं पितृवित्ताद्युधिष्ठिर ॥

युधिष्ठिर उवाच—

उक्तं ते विधिवद्राजन्ब्राह्मणस्य पितामह ।
इतरेषां तु वर्णानां कथं वै नियमो भवेत् ॥

भीष्म उवाच—

क्षत्रियस्यापि भार्ये द्वे विहिते कुरुनन्दन ।
तृतीया च भवेच्छूद्रा न तु दृष्टान्ततः स्मृता ॥
एष एव क्रमो हि स्यात्क्षत्रियाणां युधिष्ठिर ।
अष्टधा तु भवेत्कार्यं क्षत्रियस्वं जनाधिप ॥
क्षत्रियाया हरेत्पुत्रश्चतुरोंऽशान् पितुर्धनात् ।
युद्धावहारिकं यच्च पितुः स्यात्स हरेत्तु तत् ॥
वैश्यापुत्रस्तु भागांस्त्रीन् शूद्रापुत्रस्तथाऽष्टमम् ।
सोऽपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ॥
एकैव हि भवेद्भार्या वैश्यस्य कुरुनन्दन ।
द्वितीया तु भवेच्छूद्रा न तु दृष्टान्ततः स्मृता ॥
वैश्यस्य वर्तमानस्य वैश्यायां भरतर्षभ ।
शूद्रायां चापि कौन्तेय तयोर्विनियमः स्मृतः ॥
पञ्चधा तु भवेत्कार्यं वैश्यस्वं भरतर्षभ ।
तयोरपत्ये वक्ष्यामि विभागं च जनाधिप ॥
वैश्यापुत्रेण हर्तव्याश्चत्वारोंऽशाः पितुर्धनात् ।
पञ्चमस्तु स्मृतो भागः शूद्रापुत्राय भारत ॥
सोऽपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ।
त्रिभिर्वर्णैः सदा जातः शूद्रोऽदेयधनो भवेत् ॥
शूद्रस्य स्यात्सवर्णैव भार्या नान्या कथञ्चन ।
समभागाश्च पुत्राः स्युर्यदि पुत्रशतं भवेत् ॥

(१) भा १३।४७।२७-५६.

एवं जातिषु सर्वासु सवर्णः श्रेष्ठतां गतः ।
महर्षिरपि चैतद्वै मारीचः काश्यपोऽब्रवीत् ॥

कौटिलीयमर्थशास्त्रम्

नानावर्णस्त्रीपुत्राणा विभागविधि., सवर्णासवर्णैकपुत्र-विभागविधिः, शूद्रापुत्रस्यैकस्यैव सत्वे तृतीयाश. शेषांशविनियोगश्च

चातुर्वर्ण्यपुत्राणां ब्राह्मणीपुत्रश्चतुरोंऽशान् हरेत्, क्षत्रियापुत्रस्त्रीनंशान्, वैश्यापुत्रो द्वावंशौ, एकं शूद्रापुत्रः । तेन त्रिवर्णद्विवर्णपुत्रविभागः क्षत्रियवैश्ययोर्व्याख्यातः । ब्राह्मणस्यानन्तरापुत्र स्तुल्यांशः । क्षत्रियवैश्ययोरर्धांशः । तुल्यांशो वा मानुपोपेतः । तुल्यातुल्ययोरेकपुत्रः सर्वं हरेद् बन्धूंश्च बिभृयात् । ब्राह्मणानां तु पारशवस्तृतीयमंशं लभेत । द्वावंशौ सपिण्डः कुल्यो वासन्नस्वधादानहेतोः । तदभावे पितुराचार्योऽन्तेवासी वा ।

चातुर्वर्ण्यपुत्राणामित्यादि । अयमर्थः—ब्राह्मणस्य चतुर्ष्वपि वर्णेषु यदि पुत्राः स्युः, तदा पितृधनं ज्येष्ठाशवर्जं शिष्ट दशधा विभज्य तेषा मध्ये ब्राह्मणीपुत्रः चतुरोऽशान् हरेत्, क्षत्रियापुत्रः त्रीन् अंशान्, वैश्यापुत्रो द्वावंशौ, शूद्रापुत्र एकमंशमिति । तेनेति । तेन ब्राह्मणविषयोक्तचतुर्वर्णपुत्रविभागविधिना, त्रिवर्णद्विवर्णपुत्रविभागः क्षत्रियवैश्ययोः, व्याख्यातः उक्तप्रायः । तद् यथा—क्षत्रियस्य क्षत्रियावैश्याशूद्रापुत्रेषु त्रिषु विद्यमानेषु ज्येष्ठाशवर्जे पितृधन पोढा विभज्य त्रीनशान् क्षत्रियापुत्रो हरेत्, द्वावपरौ वैश्यापुत्रः, एकमश शूद्रापुत्रः । तथा वैश्यस्य वैश्याशूद्रापुत्रयोर्विद्यमानयोर्ज्येष्ठाशवर्जे पितृधन त्रेधा विभज्य द्वावशौ वैश्यापुत्रो हरेद्, एकमंश शूद्रापुत्र इति ।

ब्राह्मणस्यानन्तरापुत्रस्तुल्याश इत्यादि । अयमर्थः—ब्राह्मणस्य सवर्णाया क्षत्रियाया चैकैकः पुत्रोऽस्ति वैश्याशूद्रयोस्तु पुत्राभावः, तदा क्षत्रियापुत्रो ज्येष्ठाशवर्जं ब्राह्मणीपुत्रतुल्यं भाग भजेत । क्षत्रियस्य सवर्णाया वैश्याया चैकैकः पुत्रः शूद्राया पुत्राभावः, तदा वैश्यापुत्रो ज्येष्ठाशवर्जं क्षत्रियापुत्रभागस्यार्धं भजेत । तथा वैश्यस्य सवर्णायामेकः पुत्रः शूद्रायामेकः पुत्रः तदा शूद्रापुत्रो ज्येष्ठाशवर्जं वैश्यापुत्रभागस्यार्धं भजेत । यदुक्तं क्षत्रियवैश्ययोरर्धांश इति, तस्यापवादमाह—तुल्याशो वा मानुपोपेत इति । वैश्यापुत्रः पुरुषगुणोपेतः क्षत्रियापुत्रतुल्यभागः स्यात् । शूद्रापुत्रः पुरुषगुणोपेतो वैश्यापुत्रतुल्यभागः स्यादित्यर्थः । तुल्यातुल्ययोरिति । सवर्णासवर्णयोः स्त्रियोः, एकपुत्रः एक एव अद्वितीय एव यः पुत्रः सः, सर्वं पितृधन हरेत् । बन्धूंश्च पितृभरणीयान्, बिभृयात् ।

असवर्णापुत्रस्यैकाकिनो यत् सर्वधनभाक्त्वमुक्तं, तस्यापवादमाह—ब्राह्मणाना त्विति । विप्राणा, पारशवः शूद्रायामुत्पन्नः पुत्रस्तु, तृतीयमश लभेत एकाकी सन्नपि, न तु सर्वं पितृधनम् । अवशिष्टयोस्तृतीयाशयोः क्व विनियोगस्तत्राह—द्वावशाविति । अवशिष्टौ त्र्यंशौ, सपिण्डः पितृसपिण्डः, तदभावे कुल्यो वा पितृकुलोत्पन्नः समानोदको वा, आसन्नः अन्तरङ्गः, लभेत । कुतः, स्वधादानहेतोः सपिण्डकुल्यौ हि पितृनिवापकरणसमर्थौ, न तु शूद्रापुत्र इति कृत्वा । तदभाव इति । सपिण्डकुल्ययोरभावे, पितुराचार्यः, लभेत, तौ द्वावशौ । पितुः, अन्तेवासी वा शिष्यो वा लभेत । श्रीमू.

मनुः

नानावर्णस्त्रीपुत्राणा विभागविधि । शूद्रापुत्रस्य दशमाशः ।

एतद्विधानं विज्ञेयं विभागस्यैकयोनिषु ।
बह्वीषु चैकजातानां नानास्त्रीषु निबोधत* ॥

(१) एकयोनिषु एकजातीयजाना सर्वहरत्वमेव । नानास्त्रीषु नानाजातीयास्विदानीं व्याचक्षते । बह्वीष्वित्यनुवादः । अन्ये तु विवक्षित मन्यन्तेऽनेन नानाजातीयाया जाताना वक्ष्यमाणा 'चतुरंशान् हरेदि'त्यादि भागव्यवस्था । एकस्या तु विजातीयाया जाताना सर्वहरत्वमेव । मेधा.

(२) एकयोनिषु सवर्णस्त्रीमात्रजनितेषु, एकजाताना एकेन जनिताना, नानास्त्रीषु भर्तृभिन्नवर्णस्त्रीषु जाता-

(१) भा.१३।४७।६१. (२) कौ. ३।६.

* मनु यथाश्रुत व्याख्यानम् ।

(१) मस्मृ ९।१४८; व्यक.१५०; विर.५२७; स्मृचि. ३३; विभ.९४.

नाम्। वह्वीष्वित्युपलक्षणं द्वयोरपि, यथा ब्राह्मणस्य ब्राह्मणीक्षत्रियययोः पुत्रेष्विति। ×मवि.

(३) एकयोनिषु सवर्णेषु, एकजातानामेकेनोत्पादितानाम्। वह्वीषु नानास्त्रीषु अनेकवर्णजातासु भार्यासु एकजातानामित्यन्वयः। विर.५२८

ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदि स्त्रियः।
तासां पुत्रेषु जातेषु विभागेऽयं विधिः स्मृतः॥

(१) अनुपूर्वग्रहणं तृतीये दर्शितस्य क्रमस्यानुवादः। अयमपि वक्ष्यमाणसक्षेपप्रतिज्ञानार्थः। *मेधा.

(२) आनुपूर्व्येण वर्णक्रमेण। मवि.

(३) शूद्रायामनुमतिं सूचयति– यदीति। मच.

कीनाशो गोवृषो यानमलङ्कारश्च वेश्म च।
विप्रस्यौद्धारिकं देयमेकांशश्च प्रधानतः॥

(१) 'कीनाशः कर्षकः। कदर्येऽपि प्रयुज्यते। तस्येहासंवादग्रहणम्। तथा च मन्त्रः 'इन्द्र आसीत्सीरपतिः कीनाशा आसन्मरुतः' (अस.६।३०।१)। गोवृषो वाहः, यथा 'शुन कीनाशा अभियन्तु वाहैरिति (ऋस.४।५७।८)। यान गन्त्र्यादिः। अलङ्कारः पितृधृताद्गुलीयकादिः। वेश्म प्रधानम्। एकांशश्च यावन्तोऽशास्तत एकः प्रधानभूतस्तस्य दातव्यः। एतन्मध्यकादुद्धृत्य ज्येष्ठस्य शिष्ट वक्ष्यमाणकल्पनया विभजनीयम्। ÷मेधा.

(२) कीनाशः कर्षकः। गोवृषो गोषु रेतःसेकयोग्य उक्तः। यानमेक किंचिद्रथादि। अलङ्कारः पितुस्तस्यैव। वेश्म च। विप्रस्य विप्रपुत्रस्य। औद्धारिकमुद्धारः। तथा एकांशो यावानस्य विभज्यभागस्य त्र्यंश इत्यादिना वक्ष्यमाणस्य तृतीयांशस्यावानेक उद्धारभागः। प्रधानतो मुख्यधनादुत्कृष्टादित्यर्थः। +मवि.

(३) तदंशत्रये एकः प्रधानतः सारतश्च कर्तव्य इत्यर्थः, गोवृषादीनि च सति संभवे। *विर.५२८

(४) प्रधानतस्तस्यैव सर्वधर्मेषु प्राधान्यात्। मच.

(५) एकांशश्च प्रधानद्रव्याणां सख्या समं विभज्य तेष्वेकांशश्च। नन्द.

त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः।
वैश्याजः सार्धमेवांशमंशं शूद्रासुतो हरेत्॥

(१) सत्यप्येकत्वश्रवणे द्विबहुष्वपि समांशेष्वेवैव कल्पना दर्शिता। विषमसख्ये तु कल्पना। मेधा.

(२) किंचिद्गुणवत्त्वेन विभागप्रकारद्वयम्। दा.१३७

(३) इतरत्सर्वं सार्धसप्तभागान्कृत्वाऽनया व्यवस्थया विभाज्यमित्यर्थः। अध्यर्धमेकमर्धाधिकम्। एतच्च यत्रैक एव ब्राह्मण्यादिपु पुत्रस्तदा। मवि.

(४) त्रीनशान्ब्राह्मणो धनाद्गृह्णीयात्,द्वौ क्षत्रियापुत्रः, सार्धं वैश्यापुत्रः, अंशं शूद्रासुतः। एवं च यत्र ब्राह्मणीक्षत्रियापुत्रौ द्वावेव विद्येते तत्र पञ्चधा कृते धने त्रयो भागा ब्राह्मणस्य द्वौ क्षत्रियापुत्रस्य। अनयैव दिशा ब्राह्मणीवैश्यापुत्रादौ द्विबहुपुत्रादौ च कल्पना कार्या। मसु.

(५) एतच्च प्रतिग्रहप्राप्तभूम्यतिरिक्तविषयम्। पमा.५०५

(६) दायाद्विभजनीयद्रव्यात्। मच.

(७) यत्तु मनुना चातुर्वर्ण्यपुत्रविभागे प्रकारद्वयमुक्तं त्र्यंश इत्यादिना। तत्रोत्तरप्रकारो योगीश्वरसंवादी। तद्गुणवदगुणवत्क्षत्रियादिपुत्रविषयतया व्यवस्थापनीयम्। व्यप्र.४६५

सर्वं वा रिक्थजातं तद्दशधा परिकल्प्य च।
धर्म्यं विभागं कुर्वीत विधिनाऽनेन धर्मवित्॥

× मच., नन्द., भाच. मविगतम्।
* मसु. मेधागत मविगत च।
– मसु. वाक्यार्थो मेधावत्, पदार्थो मविवत्।
+ भाच. पदार्थो मविवत्। * शेष मविगतम्।

(१) **मस्मृ.**९।१४९; **व्यक.**१५०; **विर.**५२७ दि (दा) गेऽय विधि. स्मृत. (गोऽय प्रकीर्तितः), **स्मृसा.**६४ दि (दा); **पमा.**५०४; **स्मृचि.**३३, **नृप्र.**३६, **विभ.**३८,९४, **समु.**१२९.

(२) **मस्मृ.**९।१५०, **व्यक.**१५१ रश्च (राश्च); **विर.** ५२७ विप्रस्यौ (प्रविश्यौ); **स्मृसा.**६४; **स्मृचि.**३३; **विभ** ३८,९४; **समु** १२९ धान (यत्न).

१ (कीनाशः कर्षकः०). २ (गोवृषो वाहः०)

(१) **मस्मृ.**९।१५१; **दा.**१३६ जः सार्धमेवां (जोऽध्यर्धमेकां); **व्यक** १५० सार्ध (अध्यर्ध); **मवि.** व्यकवत्; **विर.** ५२८ व्यकवत्; **स्मृसा** ६४ याद्ध (यं ह) शेषं व्यकवत्; **पमा.** ५०५; **स्मृचि.**३४ त्र्यं (अं) शेष व्यकवत्; **मच.**व्यकवत्; **व्यप्र.**४६५ दावत्; **विभ.**३८,९५ व्यकवत्; **समु.**१२९ दावत्; **विच.**९७ दावत्.

(२) **मस्मृ.**९।१५२ ग.पुस्तके तद् (तु द); **दा.**१३६

(१) ऋक्थजातं धनरूपं धर्मप्रवचनाद्धर्म्यं पूर्वोक्तं नानुमन्यते । वक्ष्यमाणप्रतिज्ञाश्लोकात् । मेधा.

(२) गुणहीने ज्येष्ठे च राजन्यापुत्रे मानवं—सर्वं वेति । गौमि.२८।३४

(३) यदा तु सर्वासामनेके सुतास्तदाह—सर्वं वेति । अत्र पक्षे नोद्धारः । एतच्च समानेकपुत्रतायाम् । मवि.

(४) यद्वा सर्वं रिक्थप्रकारमनुद्धृतोद्धारं दशधा कृत्वा, विभागधर्मज्ञो धर्मादनपेत विभागमनेन वक्ष्यमाणविधिना कुर्वीत । +ममु.

(५) धर्मविदिति विशेषणेनास्य पक्षस्य मुख्यता सूचिता । नन्द.

चतुरोंऽशान् हरेद्विप्रस्त्रीनंशान् क्षत्रियासुतः ।
वैश्यापुत्रो हरेद् व्यंशमंशं शूद्रासुतो हरेत् ॥

(१) इहाविशेषेणापि क्षत्रियादिपुत्राणा भागश्रवणे स्मृत्यन्तरे विशिष्टयोरागमयोरन्यो भागविशेषः श्रूयते—'न प्रतिग्रहभूर्दैया क्षत्रियायाः सुताय वै । यद्यप्येषा पिता दद्यान्मृते विप्रासुतो हरेत् ॥' इति । प्रतिग्रहोपात्ता प्रतिग्रहभूः । क्रयाद्युपात्ताया न निषेधः । तथा अन्यत्र पठ्यते । 'शूद्रायां तु द्विजातो न भूमेर्भागमर्हति' इति भूमिमात्रस्य शूद्रापुत्रे निषेधः । एतच्च यत्रान्यद्धनमस्ति तद्विषय द्रष्टव्यम् । अन्यथा दशमांशवचनमुपतिष्ठेत । धनान्तराभावे च जीविकैव न स्यात् । अह तु ब्रवे भागदान तु निषिध्यते । प्रजीवनार्थत्वं चोपकल्पनमनिवारितमेव । को विशेष इति चेत्, भागपक्षे सर्वेण सर्वत्र स्वरिक्थोत्पत्तौ दानविक्रयादिष्वपि युज्यते । इतरत्र तूपजीवन तदुत्पन्नस्य व्रीह्योदनं च, प्रजीवन ब्राह्मणीपुत्रादेव शूद्रो लभते । किं भूमिभागकल्पनया । तथा चोक्तं 'लभते तद्वृत्तिमूलमन्तेवासिविधिने'ति । सत्यम् । पितृधननिमित्त तु तस्य प्रजीवनं कल्पयितव्यम् । भागकाले च यदि न कल्पेत तदा द्विजातयो भ्रातरः कदाचिदसद्वृत्तयो निमित्तान्तरतो वा दानविक्रयादिनाऽपहरेयुः । उच्छिद्येत तदाऽस्य जीवनम् । विकल्पिते तु तदीयामनुज्ञामन्तरेण न लभतेऽन्यत्र नियोक्तुम् । मेधा.

(२) यस्य तु ब्राह्मणी वन्ध्या मृता वा तत्र क्षत्रियादिसुतास्त्रिद्व्येकभागाः । यस्य त्वेकस्यामेव पुत्रः स सर्वं हरेत् शूद्रापुत्रवर्जम् । उ.२।१४।२

(३) चतसृणा विषमानेकपुत्रत्वे विप्रापुत्रलभ्यभागात्पादहीनः प्रत्येकः क्षत्रियासुतानामेव वैश्यासुतानामर्धं शूद्रासुताना पाद इति यथाविधि भागः पतति तथा विभजनीयमित्यर्थाल्लभ्यते । यदा तु ब्राह्मणीक्षत्रिययोरेवापत्यानि तदा सप्ताशता कृत्वा चतुरोंऽशानित्यादि । यदा तु ब्रह्मविजातीयभार्यात्रयपुत्रास्तदा नवांशान्कल्पयित्वा । एवं ब्राह्मणीवैश्याशूद्रापुत्रेषु सत्सु सप्ताशान् । विप्राशूद्रापुत्रेषु सत्सु पञ्चेत्यायूह्यम् । एवं क्षत्रियस्य क्षत्रविट्शूद्रजातिभार्यात्रयपुत्रेषु सत्सु त्रयो द्वावेकाश इति षडशा इत्यादिष्ववस्थोहनीया । *मवि.

(४) विप्र इत्येकत्वस्याविवक्षितत्वादनेकेषु विप्रेष्वियमेव व्यवस्थेति । विर.५२८

(५)एवं चतुर्णा विभागे जाते तत्र यस्य सजातीया बहवो द्वित्रा वा भ्रातरः स तेभ्यः समतया विभजेदिति भावः । मच.

+ विर. ममुगतम् ।

तद् (तु द) च(तत्); **व्यक.**१५० परिकल्प्य च(प्रविभज्य तु), **गौमि.**२८।३४ परिकल्प्य च (ऽत्र विभज्य तु) धिनाऽनेन (धानेन तु); **उ.**२।१४।२ व्यकवत्; **विर.**५२८ तद् (तु द) परिकल्प्य च (प्रविभज्यते), **स्मृसा.**६४ पूर्वार्धे (तथा सर्वं ऋक्थजात दशधाश विभज्य च); **पमा.**५०५ व्यकवत्, **व्यनि** तद् (तु द) परिकल्प्य च (प्रविभज्य तत्) नानेन (ना तेन), **स्मृचि.**३४ तद्दशधा (तु दशार्धं) शेष व्यकवत्; **नृप्र.**३६ तद् (तु द) शेष व्यकवत्; **मच.**वा (च); **व्यप्र.**४६५ दावत्; **विभ.**९५ विरवत्, **समु.**१३० व्यकवत्, **विच.**९७ तद् (तु द).

(१) **मस्मृ.**९।१५३; **दा.**१३६, **व्यक.**१५०; **मभा.**२८।३७; **गौमि.**२८।३४ मशं (मेक); **उ.**२।१४।२; **विर**५२८; **स्मृसा.**६४ पुत्रो हरेद् व्यश (जो व्यशमेवांश); **पमा.**५०५ गौमिवत्; **विचि.**२२४ पुत्रो हरेद् व्यश (सुतो व्यशमेक); **व्यनि.**; **स्मृचि.**३४; **नृप्र.**३६; **सवि.**३६१(=) रोंऽ(र) प्रथमपादः; **व्यप्र.**४६५; **विभ.**९५; **समु.**१३० गौमिवत्; **विच.**७३ (चतुरशान् ब्राह्मणेषु तत्र्यश क्षत्रियासुतः) पुत्रो (जातो): ९७.

* ममु. मविगतम् ।

यद्यपि स्यात्तु सत्पुत्रो यद्यपुत्रोऽपि वा भवेत्।
नाधिकं दशमाद्द्याच्छूद्रापुत्राय धर्मतः॥

(१) सत्पुत्रो विद्यमानपुत्रः ब्राह्मणीपुत्र एव वा। विद्यमानो विवक्षितो न द्विजातिपुत्रमात्रमतश्चासति ब्राह्मणपुत्रे क्षत्रियवैश्ययोः सतोरप्यष्टमाश लभते। केवले च वैश्यपुत्रे तृतीयम्। अन्ये त्वविशेषेण द्विजातिपुत्राभावो पुत्रपदेनोक्त इत्याहुः। अस्मिन्पक्षे सपिण्डगामि दशमाशशेषधनम्। इय त्वदृष्या व्यवस्था यदा बहुधन योगक्षेमे तदा दशमाश हरेच्छौद्रः। अथ कतिपयजनजीवनपर्याप्त तदा शूद्रापुत्रस्यैव। क्षत्रियादीना समानासमानजातीयस्त्रीजाताना स्मृत्यन्तरे विधिर्दर्शितः। 'क्षत्रजास्त्रिद्येकभागा विड्जाः स्युर्द्व्येकभागिनः।' क्षत्रियजाताश्च स्वजातीयविजातीयाः शूद्रपर्यन्ताः वर्णक्रमेण व्यादिभागहराः। तदा तेन स्वधन क्षत्रियस्य, शूद्राः षष्ठमश लभन्ते। विशश्च तृतीयम्। अन्ये त्वस्य श्लोकस्य सामर्थ्यमाहुः। शूद्रापुत्राय यदा ददाति तदाऽनेन धन संकलय्य दशमोऽशो दातव्यो न तदधिकः। सत्यपि स्वातन्त्र्ये। यथा वक्ष्यति 'यदेवास्य पिता दद्यात्' इति। अस्मिन्पक्षे सत्पुत्रो दद्यादिति समानाधिकरणे पदे उपपन्नतरे। इतरथा यस्य सदसत्पुत्रः पिता स दद्यादिति संबन्धो दुश्लिष्टः स्यात्। सत्पुत्रपदेनास्य पुत्रादेरभिधानम्। दद्यादिति जीवतः पुत्रसपिण्डादेः। ततश्च यदि क्षत्रियावैश्यापुत्रौ न स्तः केवलौ ब्राह्मणशूद्रौ तदा न शूद्रस्य दशम एवाशः किं तर्ह्यल्प नाधिकतरं धन लभते। यत्र दश गावः सन्ति तत्र चतस्रो ब्राह्मणस्यैका शूद्रस्य पञ्च क्षत्रियवैश्ययोः। यदा तौ न स्तः तदा पञ्चगावस्तयैव कल्पनया ब्राह्मणशूद्राभ्या विभजनीयाः। यदि सर्वा ब्राह्मण आदद्यान्न चाशहरः स्यान्न चतुरशहरस्तस्माच्चतुरांऽशान् हरेदिति चतुर्षु भ्रातृषु सत्सु कल्पना। शूद्रस्यापि दशमाशहरत्वं चतुर्ष्वेव। द्वयोस्त्रिषु चतुर्षूभयोर्भागाधिक्यम्। मेधा.

(२) शूद्रापुत्रस्त्वौरसोऽपि कृत्स्न भागमन्याभावेऽपि न लभते। यथाह मनुः— यद्यपीति। यदि सत्पुत्रो विद्यमानद्विजातिपुत्रो यद्यपुत्रोऽविद्यमानद्विजातिपुत्रो वा स्यात्तस्मिन्मृते क्षेत्रजादिर्वान्यो वा सपिण्डः शूद्रापुत्राय तद्धनाद्दशमाशादधिक न दद्यादित्यस्मादेव क्षत्रियावैश्यापुत्रयोः सवर्णापुत्राभावे सकलधनग्रहण गम्यते। *मिता.२।१३३

(३) अपुत्रस्य दशमादंशादधिक पत्न्यादयो गृह्णन्तीत्यर्थसिद्धम्। अप.२।१३३

(४) तदशुश्रूषुशूद्रापुत्रविषयम्। पमा.५०७

(५) मिताटीका—नन्वेतदनुपपन्न 'चतुस्त्रिद्येकभागाः स्युर्वर्णाश' इति। शूद्रापुत्रस्यैकाशहरत्वाभिधानादत्र च दशाशहरत्वाभिधानात्। मैवम्। ब्राह्मणीपुत्रस्य चत्वारोऽशाः क्षत्रियापुत्रस्य त्रय इति सप्त, वैश्यापुत्रस्य द्वाविति नव, शूद्रापुत्रस्यैक इति मिलित्वा दश। एव च 'चतुस्त्रिद्येक' इत्यत्रापि दशमाशहारित्वस्योक्तत्वान्न विरोध इति सर्वमनवद्यम्। +सुबो.२।१३३

(६) पितुरिच्छया विभागेऽपि शूद्रापत्याय दशमो भागो देय इति नियमयति— यद्यपीति। सत्पुत्रः विद्यमानपुत्रः ब्राह्मण्यादिचतसृष्वपि यस्य स सत्पुत्रः। तास्वेवाविद्यमानः पुत्रो यस्य सोऽपुत्र इति। धर्ममनुरुध्य दशमाशादधिक न दद्यादिति नियमः। मच.

(७) यदि सत्पुत्रो विद्यमानसवर्णापुत्रो यदि वाऽपुत्रोऽविद्यमानसवर्णापुत्रो भवेत्। यत्तु प्राक् चतुस्त्रिद्येकभागभागित्व योगीश्वरादिभिरुक्तम्। तदतिसद्वृत्तशूद्रापुत्रविषय वेदितव्यमन्यथा मानवविरोधात्। ×व्यप्र.४८७

(८) दुर्वृत्ते तु दशमाश एव। ×विता.३७६

(९) सत्पुत्रः विद्यमानपुत्रः। नन्द.

(१) **मस्मृ** ९।१५४ यद्यपु (ऽप्यसत्पु), **मिता.**२।१३३; **दा.**१४१; **अप.**२।१३१,१३२; **व्यक.**१५२; **विर.**५३५ त्तु सत्पु...त्रोऽपि (त्सपुत्रो वा यद्यपुत्रोऽथ); **स्मृसा.**६४ त्तु (त्र); **पमा.**५०७; **विचि.**२२६; **व्यनि.**; **नृप्र.**३६; **सवि.**३९५; **व्यप्र.**४८७; **विता.**३७६ त्तु सत्पुत्रो (त्सपुत्रो); **बाल.**२।१३५ (पृ. २३५) ऽपि वा (ऽथ वा); **समु.**१३०; **विच.९९ बालवत्**; **नन्द.**सपुत्रस्त्विति सम्यक् पाठः.

* मवि. मितागत, अपगतं च। ममु., विर., विचि., सवि. मितागतम्।

+ बाल. सुबोगतम्।

× शेषं मितागतम्।

(१०) सत्पुत्रः विद्यमानब्राह्मणपुत्रः । भाच.

असवर्णसमानां शूद्रेतराणा समसर्वांशहरत्वम्

सवर्णासु ये जाताः सर्वे पुत्रा द्विजन्मनाम् ।
उद्धारं ज्यायसे दत्वा भजेरन्नितरे समम् ॥

(१) वाशब्दो द्वितीय विकल्पमन्तरेणानुपपद्यमानः प्रकृतमपेक्ष्य निराकाङ्क्षो भवति । समवर्णास्वसमवर्णासु वा । शूद्रस्यैव सर्वधनहरत्वनिषेधाद्द्विजातिविषयमेव विज्ञायते । तेन ब्राह्मणस्यासति ब्राह्मणीपुत्रे क्षत्रियादिजाताः सर्वधनहरा भवन्तीत्युक्तं भवति । एव क्षत्रियस्य वैश्यापुत्रः । न त्वयमर्थः उद्धार ज्यायसे दत्वा सर्वेऽसवर्णाजाताः सम सवर्णापुत्रैर्भजेरन् प्रागुक्तैकाशा पत्त्वयविरोधात् । यद्यप्युक्त निर्गुणेषु सवर्णापुत्रेषु गुणवत्स्वितरेषु युक्तमेव साम्यम् । तथा चोक्त 'सवर्णापुत्रो अन्यायवृत्तो न लभेतैकेषामि'ति तदेतदसत् । जातेरत्यन्तमान्यत्वात् 'उत्पत्त्यैवार्थस्वाम्यमित्याचार्यो' इति । तेनेयमत्र व्याख्या । असत्सु सवर्णेष्वसवर्णास्वपि जातास्तेऽपि ज्यायोऽशसमुद्धारेण सवर्णवद्विभजेरन् । मेधा.

(२) समेति समवर्णमात्रपुत्रत्वे उद्धारोद्धरण 'ज्येष्ठस्य विंश उद्धार' इत्यादि नान्यथेत्यर्थः । मवि.

(३) द्विजातीना समानजातिभार्यासु ये पुत्रा जातास्ते सर्वे ज्येष्ठायोद्धार दत्वाऽवशिष्ट समभागं कृत्वा ज्येष्ठेन सहान्ये विभजेरन् । ममु.

(४) यत्र द्विजन्मना समवर्णासु नानास्त्रीषु बहवः पुत्राः, तथा वाशब्दादसवर्णास्वपि नानास्त्रीषु बहवः पुत्रास्तदा ज्यायसे किंचिदुद्धारं दत्त्वा सममितरे विभजेरन् । विर.५३२

(५) अयं त्वगुणवद्विषय इत्याह— समेति । उद्धारं किंचिच्छ्रेष्ठद्रव्यम् । मच.

(६) अथ पितृतोऽसवर्णाना मातृसवर्णाना विभागमाह — समवर्णास्विति । नन्द.

(७) द्विजन्मना ब्राह्मणक्षत्रियविशा सर्वद्रव्यात् वर ज्यायसे वर्णश्रेष्ठाय उद्धारमुद्धृत्य दत्वा पश्चादितरे भ्रातरः समं भजेरन् । भाच.

शूद्रपुत्राणां समांशहरत्वम्

शूद्रस्य तु सवर्णैव नान्या भार्या विधीयते ।
तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत् ॥

(१) प्रतिलोमविवाहः शूद्रस्य नेष्यते । उक्तानुवादोऽयम् । तस्या जाताः समाशाः स्युरिति । पञ्चमस्य जात्यन्तरस्याभावादेवमुक्त सवर्णैव तस्य भार्या नान्या अस्तीति । मेधा.

(२) समाशाः स्युर्नोद्धार इत्यर्थः । मवि.

(३) समानजातीयैव भार्योपदिश्यते नोत्कृष्टाऽपकृष्टा वा । *ममु.

याज्ञवल्क्यः

नानावर्णस्त्रीपुत्राणा विभागविधिः

चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः ।
क्षत्रजास्त्रिद्व्येकभागाः विड्जास्तु द्व्येकभागिनः ॥

(१) एवं सवर्णाना समो विभागः । नानावर्णास्तु— चतुस्त्रिद्व्येकभागीना इति । ब्राह्मणस्य चतसृषु ब्राह्मण्यादिषु यदा पुत्राः स्युः, तदा द्रव्य दशधा षोढा त्रेधा च विभज्य ब्राह्मणादिक्रमेण चतुस्त्रिद्व्येकभाक्त्वं स्यात् । चत्वारो ब्राह्मणस्याशाः, क्षत्रियस्य त्रयः, वैश्यस्य द्वौ, एकः शूद्रापुत्रस्य । एव क्षत्रियजातानाम् । त्रयः क्षत्रियस्य, वैश्यस्य द्वौ, एकः शूद्रस्य । एवं वैश्यजातस्य ।

---

* शेषं मविगतम् ।

(१) **मस्मृ.**९।१५७, **व्यक.**१५१ तस्यां (तत्र), **विर.**५३२ र्यां विधीय (र्योपदिश्य); **व्यनि** ; **दात.**१९३ विरवत् ; **विभ.** ४० मांशाः (मानाः) : ८१ विरवत् ; **समु.**१३०; **विच.** ७४ विरवत् ; **दच.**३७ विरवत्.

(२) **यास्मृ.**२।१२५; **अपु** २५६।१२; **विश्व.**२।१२९ गाः स्यु. (गीना) (क्षत्रजास्त्रिद्व्येकभागीना वैश्यजौ द्व्येकभागिनौ); **मेधा.**९।१५४ स्तु (स्युः) उक्त.; **मिता.**; **अप.**ड्जास्तु (ड्जौ तु) गिनः (गिनो), **विर.**५२९ (क्षत्रजातास्त्रिद्विकैकान् विशस्तु द्व्येकभागिनः), **पमा.**५०३, **मपा.**६५७ विड्जा (स्युर्विड्जा); **रत्न.**१४१; **नृप्र.**३८, **सवि.**३६६.४१७ प्रथमपादः; **मच.** ९।१५४ मेधावत् ; **वीमि.**; **व्यप्र.**४६३; **व्यउ.**१४५; **व्यम.**४५ स्युर्वर्ण (स्युः क्रम); **विता.**३२६ गाः विड्जा (जो विड्जा); **राकौ.**४५३; **बाल.**२।१३५ (पृ. २३५); **बिभ.** ९६ विरवत् ; **समु.**१३०.

(१) **मस्मृ.**९।१५६; **मेधा.**ये (वा); **व्यक.**१५१; **विर.** ५३२ मेधावत्; **दात.**१९३; **विभ.**९३; **समु.**१२८; **विच.७३** मेधावत्.

१ वर्णादि.

वैश्यस्य द्वौ, एकः शूद्रापुत्रस्येति व्यवस्था। ननु च द्विजातीना शूद्रापुत्रो नास्त्येव, तद्विवाहप्रतिषेधात्। सत्यम्। स्मृत्यर्थभ्रान्त्या तु प्रवृत्तावयं विभागधर्म इत्यभिप्रायः। ×विश्व.२।१२९

(२) एवं 'विभाग चेत्पिता कुर्यादि'त्यादिना प्रयत्नेन समानजातीयाना भ्रातृणा परस्पर पित्रा सह विभागकल्पसिरुक्ता। अधुना भिन्नजातीयाना विभागमाह — चतुस्त्रिद्व्येकभागा इति। 'तिस्रो वर्णानुपूर्व्येण' इति ब्राह्मणस्य चतस्रः क्षत्रियस्य तिस्रो वैश्यस्य द्वे शूद्रस्यैकेति भार्या दर्शिताः। तत्र ब्राह्मणात्मजा ब्राह्मणोत्पन्ना वर्णशः, वर्णशब्देन ब्राह्मणादिवर्णाः स्त्रिय उच्यन्ते। 'संख्यैकवचनाच्च वीप्सायाम्' इत्यधिकरणकारकादेकवचनाद्वीप्साया शस्। अतश्च वर्णं वर्णं ब्राह्मणोत्पन्नाः यथाक्रम चतुस्त्रिद्व्येकभागाः स्युर्भवेयुः। एतदुक्तं भवति। ब्राह्मणेन ब्राह्मण्यामुत्पन्ना एकैकशश्चतुरश्चतुरो भागान् लभन्ते। तेनैव क्षत्रियायामुत्पन्नाः प्रत्येकं त्रीस्त्रीन् वैश्याया द्वौ द्वौ शूद्रायामेकमेकमिति। क्षत्रजाः क्षत्रियेणोत्पन्नाः, वर्णशः इत्यनुवर्तते, यथाक्रम त्रिद्व्येकभागाः। क्षत्रियेण क्षत्रियायामुत्पन्नाः प्रत्येकं त्रीस्त्रीन्, वैश्याया द्वौ द्वौ शूद्रायामेकमेकम्। विट्जाः वैश्येनोत्पन्नाः। अत्रापि वर्णश इत्यनुवर्तते, यथाक्रमं द्व्येकभागिनः। वैश्येन वैश्यायामुत्पन्नाः प्रत्येक द्वौ द्वौ भागौ लभन्ते। शूद्रायामेकमेकम्। शूद्रस्यैकैव भार्येति भिन्नजातीयपुत्राभावात्तत्पुत्राणा पूर्वोक्त एव विभागः। यद्यपि चतुस्त्रिद्व्येकभागा इत्यविशेषेणोक्तं तथापि प्रतिग्रहप्राप्तभूव्यतिरिक्तविषयमिद द्रष्टव्यम्। यतः स्मरन्ति--'न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै। यद्यप्येषा पिता दद्यान्मृते विप्रासुतो हरेत्॥' इति। प्रतिग्रहग्रहणात्क्रयादिना लब्धा भूः क्षत्रियादिसुतानामपि भवत्येव। शूद्रापुत्रस्य विशेषप्रतिषेधाच्च। 'शूद्या द्विजातिभिर्जातो न भूमेर्भागमर्हति' इति। यदि क्रयादिप्राप्ता भूः क्षत्रियादिसुताना न भवेत्तदा शूद्रापुत्रस्य विशेषप्रतिषेधो नोपपद्यते। यत्पुनः 'ब्राह्मणक्षत्रियविशा शूद्रापुत्रो न रिक्थभाक्। यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत्॥' (मस्मृ.९।१५५) इति, तदपि जीवता पित्रा यदि शूद्रापुत्राय किमपि प्रदत्तं स्यात्तद्विषयम्। यदा तु प्रसाददानं नास्ति तदैकाशभागित्यविरुद्धम्। *मिता.

(३) अत्र च यत्र क्षत्रियवैश्यावधिकगुणौ, तत्र महाभारतोक्ता विभागव्यवस्था। मन्दगुणयोस्तु याज्ञवल्क्योक्ता व्यवस्थेत्यविरोधः। विर.५२९

(४) अत्र बहुवचन पुत्रबहुत्वापेक्षया न तु भार्यागतपतिबहुत्वापेक्षया ब्राह्मणस्य ब्राह्मण्या स्वभार्यायामुत्पन्नपुत्रापेक्षयाशद्वयस्य न्यूनत्वाद्वैश्यायामुत्पन्नस्य द्वावंशौ शूद्रायामुत्पन्नस्यैकोंऽशः। अनेनैव प्रकारेण पुत्रगतसंख्यासाम्ये वैषम्ये च योजनीयम्। +मपा.६५८

(५) मिताटीका– शूद्या द्विजातिर्भिजात इति। अत्र शूद्यामिति न शूद्रभार्याया अपि तु स्वस्त्रिया शूद्रायामित्यर्थः। शूद्रभार्यात्वे तस्या जातस्य कुण्डगोलकयोरन्यतरत्वेन भागानर्हत्वात्। अतः 'शूद्यामि'ति छान्दसः। सुबो.

(६) यद्यपि शूद्रापरिणयने द्विजातेर्भूयान् दोषः, पुत्रार्थं विवाहस्तु सर्वथा शूद्राया निषिद्ध एव। तथापि रतिधर्मार्थविवाहयोरनुकल्पत्वेन परिणीताया शूद्रायामनुपङ्क्त्याजातस्य विभागाभिधानमुपपन्नमेव। शूद्या जातो निषादः पारशवो वेति जातिकथनमिव। आचारमितीक्षरायामेवमेव व्यवस्थापितम्। +व्यप्र.४६४

नारदः

नानावर्णस्त्रीपुत्राणा विभागविधिः

वर्णावरेष्वंशहानिरूढाजातेष्वनुक्रमात्॥

(१) वर्णावरा विप्रस्य क्षत्रियादयः। ऊढा परिणीता, अंशहानिः क्षत्रियाया जातस्य त्र्यंऽशा इत्यादि। वर्णान्तरेष्विति क्वापि पाठः। तत्राप्ययमेवार्थः। विर.५२८

(२) वर्णावरेषु क्षत्रियावैश्याशूद्रापुत्रेष्वंशहानिः सर्वं दशधा कृत्वा चतुरो भागान् ब्राह्मणीपुत्रो हरेत्, त्रीन् क्षत्रियासुतः, द्वौ वैश्यासुतः, एक शूद्रासुतः। केचिदाहुः —पुत्रबहुत्वेऽप्येवमेवेति। अन्ये यथा ब्राह्मणीपुत्राशा-

× अप., सवि. विश्वगत मितागत च।

* पमा., वीमि, व्यम., विता. मितागतम्।

+ शैष मितागतम्।

(१) **नारसं.**१४।१४ रूढा (गूढ); **नारस्मृ.**१६।१४; **व्यक.** १५०; **विर.**५२८ वर्णान्तरेषु इति क्वापि पाठः; **विभ.**९५.

चतुर्भागोनः क्षत्रियासुतस्य, ततस्त्रिभागोनो वैश्यासुतस्य, तदर्धं शूद्रासुतस्य तथा विभागः । क्षत्रियस्य (सप्त? षड्) भागान् कृत्वा त्रीन् क्षत्रियः, द्वौ वैश्यासुतः, एक शूद्रासुतः । वैश्यस्यापि त्रीन् कृत्वा द्वौ वैश्यः, एकमितरः । एकपुत्रास्वेवम् । यदा ब्राह्मण्या एकः, क्षत्रियाया बहवः, वैश्याया वा, तदापि मातृत एव यथोक्तः । इतरोक्तः क्षेत्रज उत्पन्ने यद्यौरसः स्यात्, समांश इत्युक्तः । पुत्रिकासुतस्तत्पितुरेव भवति औरस उत्पन्ने । एवमवाप्य दत्ता (?) । स च मातामहस्य समांश एव । गूढजाताः कानीनसहोढगूढोत्पन्नाः । तेष्वशहानिः औरसस्यार्धं कानीनस्य, तदर्धं सहोढस्य तदर्धं गूढोत्पन्नस्य । बन्धुदायादा हि ते । तेषां भागहरत्वं वक्ष्यति । तेषामयं विभागः औरसे सति ।

नाभा.१४।१४

बृहस्पतिः

नानावर्णस्त्रीपुत्राणां विभागविधिः । जातिज्येष्ठगुणवयोज्येष्ठयोः समाशविधिः । क्षत्रियापुत्रस्य प्रतिग्रहभूनिषेधः, शूद्रापुत्रस्य भूनिषेधश्च । शूद्रापुत्रस्य चैकस्य तृतीयाशहरत्वम्, शेषविनियोगश्च ।

[1]ब्रह्मक्षत्रियविट्शूद्रा विप्रोत्पन्नास्त्वनुक्रमात् ।
चतुस्त्रिद्व्येकभागेन भजेयुस्ते यथाक्रमम् ।
क्षत्रजास्त्रिद्व्येकभागा विड्जौ तु द्व्येकभागिनौ ॥

ब्राह्मणीपुत्रश्चतुरोऽशानानुलोम्येन जातः क्षत्रियापुत्रस्त्रीनंशानानुलोम्येन जातो वैश्यापुत्रो द्वावंशौ शूद्रस्य एकमंश, क्षत्रियस्य.. तथा वैश्यस्य वैश्यापुत्रो द्वावंशौ वैश्यस्य शूद्रापुत्र एकमंशम् । व्यनि.

[2]विप्रेण क्षत्रियाजातो जन्मज्येष्ठो गुणान्वितः ।
भवेत्समांशो विप्रेण वैश्याजातस्तथैव च ॥
[3]न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै ।
यद्यप्येषां पिता दद्यात् मृते विप्रासुतो हरेत्×॥

प्रतिग्रहग्रहणादुपायान्तरप्राप्ता तु देयैव साऽपि न शूद्रापुत्राय । ×अप.२।१२५

[1]शूद्र्यां द्विजातिभिर्जातो न भूमेर्भागमर्हति ।
सजातावाप्नुयात् सर्वमिति धर्मो व्यवस्थितः ॥

भूमिमात्रोपादानात् क्रयप्रसादादिनापि द्विजातिलब्धभूमौ शूद्रस्यानधिकारः सिद्ध्यति । दा.१४०

[2]निषाद एकपुत्रस्तु विप्रस्य स तृतीयभाक् ।
द्वौ सकुल्याः सपिण्डा वा स्वधादाताऽथ संहरेत् ॥
[3]कुल्याभावे स्वधादाता आचार्यः शिष्य एव वा ।
सर्वास्वापत्सु तान्वर्णान्तथैव प्रतिपादयेत् ॥

निषादः शूद्र्या ब्राह्मणाज्जातः । तेन तृतीयो भागः शूद्रस्य, द्वौ सपिण्डस्य, तदभावे सकुल्यस्य भवेत् । सकुल्याभावे तु आचार्यः शिष्यो वा हरेत् । सर्वास्वापत्सु सर्वेषां सपिण्डसकुल्यादीनामभावे सगोत्रान्तान्वर्णान्निषादपितृगोत्रान् प्रतिपादयेदित्यर्थः । सगुणनिषादविषयमेतदिति पारिजातः । विर.५३५

पितृ. पिण्डोदककर्मक्रियाधिकारक्रमः

[4]पितुः पुत्रेण कर्तव्या पिण्डदानोदककिया ।
पुत्राभावे तु पत्नी स्यात्तदभावे सहोदरः ॥

× पमा., मपा., व्यप्र., व्यम., विता. अपगत मितागत च ।

दा १३९ त्येषा (त्यस्य), अप.२।१२५, व्यक.१५१ दावत्; उ.२।१४।२ दावत्; विर.५३४ दावत्, स्मृस।.६५ दावत्; पमा.५०५:५६४ वै (च) पू., स्मरणम्, मपा.६५८.६८७ पू, रत्न.१४१, विचि २२५ दावत्, व्यनि.यादि (याय) त्येषा (स्य स्व); स्मृचि.३४ दावत्; नृप्र.३६,३९; सवि. ३७१ स्मरणम्, वीमि.२।१२५ यादि (यस्य) स्मरणम्; व्यप्र ४६६; व्यउ.१४६ स्मृतिः, व्यम.४५ यादि (यायाः); विता.३२६, राको.४५० स्मरणम्; समु.१३०; विच. ९८ दावत्.

(१) दा.१४०; व्यक.१५१ स्मृतिः, उ.२।१४।२; विर. ५३४, पमा.५०६ (=) पू.; मपा.६५८ पू; व्यनि.सजा (स्वजा); नृप्र.३६,३९ पू.; समु.१३० शूद्यां (गूढां) देवलः; विच.९९ पू.

(२) विर.५३५; नृप्र.३६.

(३) व्यक.१५१ तथैव (सगोत्रान्); विर.५३५.

(४) अप.२।१३५.

× मेधा.व्याख्यान 'चतुरोऽशान् हरेत्' इति मनुवचने (पृ.१२४७)द्रष्टव्यम्। मिता.व्याख्यान 'चतुस्त्रिद्व्येकभागाः स्यु.' इति याज्ञवल्क्यवचने (पृ.१२५०) द्रष्टव्यम् ।

(१) उ.२।१४।२; व्यनि.भजे (भवे) क्रमम् (क्रमात्) विड्जौ तु (विड्जाता); समु.१३० भजे (भवे)

(२) दा.१३८ शो विप्रे (शः क्षत्रे); व्यक.१५१ दावत्; विर.५३३; व्यप्र.४६५, विच.९८.

(३) मेधा.९।१५३; मिता.२।११९,२।१२५ स्मरणम्,

प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्नतः ।
ज्ञातिबन्धुसुहृच्छिष्यैर्ऋत्विग्भृत्यपुरोहितैः ॥

देवलः

असवर्णैकपुत्रः सर्वांशहर , एकः शूद्रापुत्रस्तृतीयांशहरः इतरेषामभावे । शूद्रापुत्रस्य भूमिनिषेधः ।

आनुलोम्येकपुत्रस्तु पितुः सर्वस्वभाग्भवेत् ॥
निषाद एकपुत्रस्तु विप्रस्वस्य तृतीयभाक् ।
द्वौ सपिण्डः सकुल्यो वा स्वधादातथवा हरेत् ॥

(१) ब्राह्मणेन शूद्राया जातो निषाद उच्यते । दा.१४०

(२) आनुलोम्येन जातस्यैकपुत्रस्य ऋक्थग्रहणप्रकारमाह देवलः— आनुलोम्येकपुत्रस्तु इति । एतच्च निषादव्यतिरिक्तविषयम् । पमा.५०७

(३) अर्थग्रहण चात्यन्तशुश्रूषुशूद्रस्येति द्रष्टव्यम् । व्यनि.

(४) यदा तु शूद्राज एवैकः पुत्रो ब्राह्मणस्य तदा स तद्धनतृतीयांशहारी, भागद्वय सपिण्डाना तदभावे सकुल्याना तेषामप्यभावे श्राद्धकर्तुः । यदाह देवलः— निषाद एकपुत्रस्त्विति । ब्राह्मणाच्छूद्रायां विन्नायां जातो निषादः स एकश्चासौ पुत्रश्चेत्यर्थः । क्षत्रियवैश्ययोस्तु स धनार्द्धहरोऽपरमर्द्धमपुत्रधनग्रहणाधिकारिणरतदुक्तक्रमेण गृह्णीयुः । तथा च विष्णुः—'द्विजातीना शूद्रस्त्वेकपुत्रोऽर्धहरोऽपुत्रऋक्थस्य या गतिः साऽर्धस्य द्वितीयस्ये'ति । द्विजातिपदेनात्र क्षत्रियवैश्यमात्रग्रहणम् । देवलेन ब्राह्मणे विशेषाभिधानात् । एकपुत्र इति कर्मधारयः । इदमपि सद्वृत्तातिगुणवच्छूद्रापुत्रविषयम् । 'यद्यपि स्यात्तु सत्पुत्र' इत्यादिना 'ब्राह्मणक्षत्रियविशा' इत्यादिना च वक्ष्यमाणमनुवचनेन विरोधापत्तेः । ×व्यप्र.४६५-४६६

शूद्र्यां द्विजातिभिर्जातो न भूमेर्भागमर्हति ।
सजातावाप्नुयात्सर्वमिति धर्मो व्यवस्थितः ॥

(१) भूमेः क्रयादिप्राप्तायां अपि । द्रव्यस्य तु लभत एव । व्यम.४५

(२) भूमेरित्युक्तेरन्यधने पितुरिच्छया तुर्यांश तदभावे जीवन लभेतेत्यर्थः । विता.३२७

बृहन्मनुः

प्रतिग्रहभूब्राह्मणीसुतानामेव । स्थावर त्रैवर्णिकासुतानाम् ।

ब्रह्मदायागतं भूमिं हरेयुर्ब्राह्मणीसुताः ।
गृहं द्विजातयः सर्वे तथा क्षेत्रं क्रमागतम् ॥

(१) या तु प्रतिग्रहेण पित्रार्जिता भूमिः सा ब्राह्मणीपुत्रस्यैव, न क्षत्रियादेः, गृहं क्रमागत क्षेत्रं च द्विजातिपुत्राणामेव, न शूद्रस्य । तदाह बृहन्मनुः—ब्रह्मदायागतामिति । क्रमादागतयोः पितामहप्रपितामहादिगृहीतयोः सकलद्विजातिसंबन्धः, क्रमागतमित्यविशेषेणाभिधानात् । प्रतिग्रहभूमौ च क्षत्रियादिसुतानामेवाधिकारनिषेधेन तन्नप्त्रादीनामप्यननुज्ञानम् । दा.१३८

(२) ब्रह्मदायागता प्रतिग्रहयाजनादिलब्धा, द्विजातयस्त्रैवर्णिकाः । प्रतिग्रहलब्धामित्यत्र पारिजातः । विर.५३४

---

(१) **बाल.**२।१३५ (पृ. २४३).

(२) **उ.**२।१४।२; **पमा.**५०७; **व्यनि.**म्येक (म्येन); **समु.**१३०.

(३) **दा.**१४० एकपु (एकः पु) स्वस्य (स्य स); **व्यक.**१५१ थवा (थ स); **उ** २।१४।२ स्वस्य (त्वस्य) थवा (तु त); **पमा.** ५०७ थवा (तु स्व), **व्यनि.** थवा (नुस), **व्यप्र.**४६६ स्वस्य (त्वर्थस्य); **विता.**३७६ स्वस्य (स्य स्यात्) सकु (स्वकु) ताथ (तापि); **समु** १३० स्वस्य (स्य स) थवा (तु स), **विच.**९९ भाक् (कम्).

× विता., विच. व्यप्रवत् ।

(१) **मेधा.**९।१५३ शूद्रा द्विजातिभिर्जा (शूद्राया तु द्विजाज्जा) पू.; **मिता.**२।१२५ (=) पू.; **अप.**२।१२५ द्या (द्रो) पू., स्मृत्यन्तरम्; **पमा.**५०६ (=) पू.; **रत्न.**१४१; **व्यप्र.** ४६६; **व्यम.**४५; **विता.**३२७ मौ (मं) तः (तिः).

(२) **दा.**१३८; **व्यक.**१५१; **विर.**५३४ युर्भा (धो भा) ताः (तः); **विचि.**२२५; **व्यनि.**तथा क्षेत्र क्रमागतम् (तथैव क्षेत्रकर्मम्), **बाल** २।११९ (पृ.१४९) दाया (दाय) शेष विरवत्, बृहस्पतिः; **समु.**१३० मनुः, **विच.**९८

पुत्रप्रकाराः, तेषां दायहरत्वविचारश्च

मुख्यगौणपुत्रविचार., पुत्रप्रतिनिधिविधिः, पुत्राणां दायहरत्वविचारश्च

*वेदाः

पुत्रमहिमा

प्रजाभिरग्ने अमृतत्वमश्याम् ।

प्रजाभिस्त्वदुत्ताभिर्हे अग्नेऽमृतत्व संतत्यविच्छेदलक्षणमश्याम् । प्राप्नुयाम् । ऋसं.

औरस एव पुत्रो युक्तः । जनकस्यैव प्रजा । औरसपुत्र एव दायहरः न दुहिता । दुहिता सस्कारार्हा ।

परिषद्य ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम । न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः ॥

(१) अपत्यं कस्मात् ? अपतत भवति । नानेन पततीति वा । तद्यथा जनयितुः प्रजैवमर्थीये ऋचा उदाहरिष्यामः-परिपद्यमिति । परिहर्तव्य हि नोपसर्तव्यम् । 'अरणस्य रेक्णः' अरणोपाणां भवति । रेक्ण इति धननाम । रिच्यते प्रयतः । 'नित्यस्य रायः पतयः स्याम' । पित्र्यस्येव धनस्य । 'न शेषो अग्ने अन्यजातमस्ति'—शेष इत्यपत्यनाम । शिष्यते प्रयतः । अचेतयमानस्य तत्प्रमत्तस्य भवति । मा नः पथो विदूदुष इति । नि.३।२

[दुर्गाचार्यभाष्यम्— वसिष्ठाग्निसंवादे वसिष्ठेन हतपुत्रेण अग्निरभ्यर्थितः—पुत्रं मे देहीति । तेन किलासौ प्रत्युक्तः क्रीतककृत्रिमदत्तकादीना पुत्राणामन्यतम कुरुष्व पुत्रमिति । स एवमुक्त एताभ्यामृग्भ्यामन्यजान् पुत्रान् निन्दन्नौरसं पुत्रं ययाचे । 'परिपद्य...वि दुक्षः ।' 'परिपद्यं' 'परिहर्तव्यं' परिहरणीयं परित्याज्यमित्यर्थः । किं पुनस्तत् ? 'अरणस्य रेक्णः' अरणस्य अपगतार्णस्य अपगतोदकसंबन्धस्य परकुलजातस्य रेक्णः यदपत्याख्य धनं, तत् परिहर्तव्य, न पुत्रत्वेन परिकल्पयितव्यमित्यर्थः । न हि तत् पुत्रत्वेन कल्प्यमानमपि पुत्रकार्येष्ववतिष्ठते, परकीयत्वात् । यत एवमतो ब्रूमः 'नित्यस्य रायः पतयः स्याम' पित्र्यस्येव धनस्य । यथा हि यदेव पित्र्यं धनं पुत्रत्वे भवति । तस्यैव ह्युपरि अगौण स्वामित्व भवति । एव यदेव स्वय जातमपत्य भवति, तदेव मुख्य भवति, नेतरत् क्षेत्रज वा क्रीतक वा । यत एवमतो ब्रूमः, यदेव नित्यमात्मीयमगौण स्वयमुत्पादित पुत्राख्यं रायो धनं, तस्यैव वय पतयः पालयितारः स्याम, मा परकीयस्येत्यभिप्रायः । कस्मात्पुनरेवं ब्रूमहे ? यतः,—यस्मात् 'न शेषो अग्ने अन्यजातमस्ति' न अस्ति शेषः, नास्त्यपत्यमन्येन जात हे अग्ने ! य एव जनयति तस्यैव हि तत् भवति, नेतरस्येत्यभिप्रायः । 'अचेतानस्य' य एव हि अचेतयमानो भवति, अविद्वान् प्रमादी, तस्यैव 'अचेतनस्य' 'प्रमत्तस्य' अश्रुतवतो धर्मात् परितोषमात्र 'भवति'—ममेदमपत्यमिति, न अपत्यकार्येऽवतिष्ठते । यत एवमतो ब्रूमः—'मा पथो वि दुक्षः' मास्मानेतस्मात् पितृपितामहप्रपितामहानुमततात् पथः मार्गात्, येन केनचित् प्रत्याख्यानद्वारेण 'विदूदुषः' । त्व, देहि नः पुत्रमौरसमित्यभिप्रायः । 'रेक्ण इति धननाम' तद्धि 'रिच्यते' अतिरिच्यते इतो लोकादमु लोक 'प्रयतः' म्रियमाणस्येत्यर्थः । 'शेष इत्यपत्यनाम' तद्धि 'शिष्यते' इहैव लोकेऽवतिष्ठते पितुरमु लोक 'प्रयतः' गच्छत इत्यर्थः । एवमस्यामृचि 'न शेषो अग्ने अन्यजातमस्ति' इत्यनेन विशेषलिङ्गेन उपपन्नमेतद् भवति, जनयितुरेव प्रजा भवति, न क्षेत्रिणो, नापि क्रेतुरन्यस्य वा कस्यचिदिति । एव चैष शब्दार्थ उपपद्यते, यस्मादेवापेत्य तत भवति, तस्यैवापत्यमिति ।]

(२) अरणस्यानृणस्य रेक्णो धन परिपद्यं पर्याप्त भवति हि । अतो नित्यस्यापुनर्देयस्य रायो धनस्य पतयः स्याम । ऋसा.

नँ हि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ । अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः ॥

* वेदेषु पुत्रप्रशसावचनानि परःशतानि समुपलभ्यन्ते, विस्तरभयात् कतिचिदेवोध्दृतानि ।

(१) ऋस.५।४।१०; तैसं.१।४।४६।१.

(२) ऋसं.७।४।७; नि.३।२.

(१) ऋसं. ७।४।८; नि.३।३.

(१) तस्योत्तरा भूयसे निर्वचनाय–'न हि ग्रभायारणः' इति। न हि ग्रहीतव्यो अरणः सुसुखतमोऽप्यन्योदर्यो मनसापि न मन्तव्यो 'ममाय पुत्र' इति। अथ स ओकः पुनरेव तदेति यत आगतो भवति। ओक इति निवास नामोच्यते। ऐतु नो वाजी वेजनवान्। अभिपहमाणः सपत्नान्। नवजातः स एव पुत्र इति। नि.३।३

[दुर्गाचार्यभाष्यम्– स 'मनसापि न मन्तव्यो ममायमि'ति किं पुनः पुत्रत्वेन परिकल्पयितव्य इति। किं कारण मनसापि न मन्तव्य इति? 'अधा चिदोकः पुनरित्स एति'। अधशब्दोऽथशब्दस्यार्थे वर्तते, स च हेत्वर्थः। यस्मात् ओकः स्व निवासस्थान स्व वश बहुनापि कालेन स एति तद्वश्य एव भवति, तस्मादपुत्र एवासौ। यत एवमतो ब्रवीमि–'आ नो वाज्यभीपाळेतु नव्यः' 'ऐतु' आगच्छतु, 'नो वाजी वेजनवान्' परेभ्यो भयदाता। अभीपाट् 'अभिपहमाणः' अभिभवन् 'सपत्नान्' 'नव्यः' नवजातः शिशुरित्यर्थः।'स एव पुत्रः'आगच्छतु, कि नः परकीयैः पुत्रैः सकल्पितैरित्यभिप्रायः।]

(२) अरणोऽरममाणोऽन्योदर्यः सुशेवः सुखतमः सन् ग्रभाय पुत्रत्वेन ग्रहणाय मनसा मन्तवा उ मनसापि मन्तव्यो न भवति हि। अध चिदपि च सोऽन्योदर्य ओक इत् संस्थानमेव पुनरेति। प्राप्नोति। अतो वाज्यन्नवानभीपाट् शत्रूणामभिभविता नव्यो नवजातः पुत्रो नोऽस्मानैतु। आगच्छतु। ऋसा.

नै जामये तान्वो रिक्थमारैक्चकार गर्भ सनितुर्निधानम्। यदी मातरो जनयन्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन्॥

(१) अथैता जाम्या रिक्थप्रतिषेध उदाहरन्ति। ज्येष्ठ पुत्रिकाया इत्येके। न जामये भगिन्यै। जामिरन्येऽस्या जनयन्ति जामपत्यम्। जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया भवति। तान्व आत्मजः पुत्रो रिक्थ प्रारिचत् प्रादात्। चकारैना गर्भनिधानी सनितुर्हस्तग्राहस्य। 'यदी मातरोऽजनयन्त वह्निम्।' पुत्रम्। अवह्नि च स्त्रियम्। अन्यतरः सतानकर्ता भवति पुमान् दायादः। अन्यतरोऽर्द्धयित्वा जामिः प्रदीयते परस्मै। नि.३।६

[दुर्गाचार्यभाष्यम्— 'ज्येष्ठ पुत्रिकाया इत्येके'। ज्येष्ठमपत्य यत्पुत्रिकायास्तदेव मातामहस्य नेतराणि। इतराणि जनयितुरेवेत्येवमेके मन्यन्ते। अथवा ज्येष्ठ पुत्रिकाया इत्येक इति। यदा उत्सृष्टाया पुत्रिकाया पुत्रिकापितुरन्ये पुत्रा जायेरन्, तदा विभागकाले ज्येष्ठ धनभाग पुत्रिकायै एव दद्यात्, यथाभागमितरान् पुत्रान् विभजेत्, अभागा एव त्वितरा दुहितर इति। एवमस्यामृचि 'न जामये तान्वो रिक्थमारैक्' इति न दुहितरो रिक्थभागिन्यो भवन्ति, नैताः सतानकर्मणि पितुरुपतिष्ठन्ते, वर्धयित्वा ह्येताः परस्मै दीयन्ते, तस्मादभागा एता इति।]

(२) भ्रातृमत्यास्तस्या रिक्थभाक्त्व नास्तीति ब्रूते। तान्वस्तनूज औरसः पुत्रो जामये भगिन्यै रिक्थ पित्र्य धन नारैक्। न प्ररेचयति। न प्रददाति। कि तर्हि। सनितुरेना सभजमानस्य भर्तुर्गर्भम्। पष्ठ्यर्थे द्वितीया। गर्भस्य निधान रेतःसेकनिधानीमेना चकार। पाणिग्रहणेन सस्कृतामेना करोति। न तु तस्यै रिक्थ ददातीत्यभिप्रायः। 'असस्कृतास्तु सस्कार्या भ्रातृभिः पूर्वसस्कृतैः। भगिन्यश्च निजादंशाद्दत्त्वांश तु तुरीयकम्॥' इति याज्ञवल्क्यस्मरणात् (२।१२४)। स्त्रीपुंसलक्षणस्यापत्यस्यैकोत्पाद्यत्वाविशेषात्पुमपत्यस्य को विशेष इत्याशङ्क्य विशेष दर्शयति। यदि यद्यपि मातरो मातापितरौ वह्निम्। अवह्निः स्त्री वह्निः पुमान् स्वभार्याया वोढृत्वात्। अवह्निश्च वह्निः। तादृशं स्त्रीपुसलक्षणमपत्य जनयन्त। तथापि तयोर्मध्येऽन्यः पुंलक्षणः सुकृतोः शोभनस्य पिण्डदानादेः कर्मणः कर्ता भवति। अन्यः स्त्रीलक्षण ऋन्धन् वस्त्रालङ्कारादिना ऋध्यमान एव भवति। पिण्डदानादिकर्तृत्वात्पुत्रो दायार्हः दुहिता तथा नेति न दायार्हा सा तु केवल परस्मै दीयते। ऋसा.

दुहिता पुत्रिका सतानपिण्डदानार्था। दुहितुर्दायाद्यत्वविचारः।

अंभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम्। जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः *॥

(१) ऋसं.३।३१।२; नि.३।६; बृदे.२।११३,४।१११.

* सायणाचार्यभाष्य सभाप्रकरणे (पृ.२०) द्रष्टव्यम्।

(१) ऋसं.१।१२४।७; नि.३।५.

अभ्रातृकेव पुंसः पितृनेत्यभिमुखी सतानकर्मणे पिण्डदानाय न पतिम्। गर्तारोहिणीव धनलाभाय दाक्षिणाजी। गर्तः सभास्थाणुर्गृणातेः। सत्यसंगरो भवति। त तत्र यापुत्रा यापतिका सारोहति। ता तत्राक्षैराघ्नन्ति सा रिक्थ लभते।

'नाभ्रात्रीमुपयच्छेत तोक ह्यस्य तद्भवति' इत्यभ्रातृकाया उपयमनप्रतिषेधः प्रत्यक्षः पितुश्च पुत्रभावः। नि.३।५

[दुर्गाचार्यभाष्यम्—'अभ्रातेव पुसः' 'यथा अभ्रातृका कन्या दत्तापि सती पित्रा, ऊढापि भर्त्रा पुनः 'प्रतीची' पुसः 'पितृन्' एव पितृवंशमेव 'अभिमुखी एति' 'सतानकर्मणे पिण्डदानाय न पति' पतिवंशमित्यर्थः। सा हि पितृवंश पुत्रैः पौत्रैश्च वर्धयति, न भर्तृवंशमिति। तस्मादभ्रातृका पैतृकं दायाद्यमर्हतीत्युपपद्यते। 'गर्तारुगिव सनये धनानाम्' 'गर्तारोहिणी इव' काचित् 'दाक्षिणाजी' दाक्षिणात्या स्त्री, सा यथा 'गर्तः सभास्थाणुः' तमारोहति। अक्षनिवपनपीठ निविशतीत्यर्थः। तत्र गता सती अपुत्रा रिक्थं लभते। कितवा दापयन्ति रिक्थमिति दाक्षिणात्येषु देशरीतिः। 'सनये' लब्धये 'धनानाम्'। एवं 'उषाः' अपरकाले रात्र्या नभ आरोहति। किञ्च, 'जायेव पत्य उशती सुवासाः' यथा जाया पत्ये भर्त्रे सुवासा भूत्वा ऋतुकालेषु आत्मानं दर्शयति एवमुषा आत्मान दर्शयति जनानाम्। किच, 'उषा हस्रेव निरिणीते अप्सः'। यथा हसनस्वभावा स्त्री हसनस्वभावाद्न्तान् आत्मनो दर्शयति, एवमुषा अपि आत्मनोऽन्तर्भूतानि सर्वद्रव्याणा रूपाणि विवृणुते,शार्वरेण तमसा दिग्धानि सर्वद्रव्याणि स्वेन प्रकाशोदकेन धौतानीव करोति। तस्मादवर्धयितृत्वाद् भर्तृवशस्य,वर्धयितृत्वाच्च पितृवशस्य अभ्रातृका पितृदायाद्यमर्हतीत्युपपद्यते। 'स हि सत्यसगरो भवति' सगीर्यते हि तत्र सत्यमिदमत्र पतितमिदमत्र न पतितमित्येवम्। प्रायेण कितवास्तत्रानृतं ब्रुवते। त एवलक्षण गर्तमारोहति या स्त्री, सा 'गर्तारुक्' इत्युच्यते।]

शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन्। पिता यत्र दुहितुः सेकमृञ्जन्त्संगम्येन मनसा दधन्वे॥

(१) ऋसं.३।३१।१; ऐब्रा.६।१८।२,६।१९।४; गोब्रा. व्य. का. १५८

अथैता दुहितृदायाद्य उदाहरन्ति। पुत्रदायाद्य इत्येके। प्रशास्ति वोढा संतानकर्मणे दुहितुः पुत्रभावम्। दुहिता दुर्हिता दूरे हिता। दोग्धेर्वा। नप्तारमुपागमद् दौहित्रं पौत्रमिति। विद्वान् प्रजननयज्ञस्य, रेतसो वा अङ्गादङ्गात् सभूतस्य हृदयादधिजातस्य मातरि प्रत्युतस्य। विधानं पूजयन्नविशेषेण मिथुनाः पुत्रा दायादा इति। तदेतदृक्श्लोकाभ्यामभ्युक्तम्—'अङ्गादङ्गात्संभवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतम्॥' इति। 'अविशेषेण पुत्राणा दायो भवति धर्मतः। मिथुनाना विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत्॥' न दुहितर इत्येके। तस्मात् पुमान् दायादोऽदायादा स्त्रीति विज्ञायते। तस्मात् स्त्रियं जाता परास्यन्ति न पुमासमिति च। स्त्रीणा दानविक्रयातिसर्गा विद्यन्ते न पुंसः। पुंसोऽपीत्येके, शौनःशेपे दर्शनात्। अभ्रातृमतीवाद इत्यपरम्। नि.३।४

पिता यत्र दुहितुरप्रत्तायाः रेतःसेकं प्रार्जयति संदधात्यात्मान सगमेन मनसेति। नि.३।५

[दुर्गाचार्यभाष्यम्—एनामृचं 'शासद्वह्निः' इत्यादि या वक्ष्यमाणा ता दुहितृदायाद्य अर्थे उदाहरन्ति धर्मविदः। अस्यामृचि वक्ष्यमाणाया दुहितुरपि दायाद्यत्वमस्तीति दृश्यते।

'शासद् वह्निः' 'प्रशास्ति' प्रख्यापयति। प्रज्ञापयतीत्यर्थः। कः पुनरसौ प्रशास्ति? किं वा प्रशास्ति? इति। 'वोढा' य उद्वोढा स्त्रिया भवति सः, तस्यां वा जायते दुहिता, तस्याः पुत्रभाव प्रशास्ति, 'संतानकर्मणे' अर्थाय। 'दुहिता, दुर्हिता' सा हि यत्रैव दीयते, तत्रैव दुर्हिता भवति, 'दूरे' सती सा पितुः 'हिता' पथ्या भवतीति दुहितेत्युच्यते। 'दोग्धेर्वा' सा हि नित्यमेव पितुः सकाशात् द्रव्य दोग्धि प्रार्थनापरत्वात्। आह—कथं पुनर्गम्यते प्रशास्ति वोढा सतानकर्मणे दुहितुः पुत्रभावम्? इति। उच्यते, इतः यस्मात् 'नप्त्यङ्गात्' 'नप्तारमुपागमत्' उपागच्छति चेतसा। 'दौहित्रम्' दुहितृपुत्रम्।'पौत्रमिति' पौत्रो ममायमिति एवमुपागच्छति। न चापुत्रस्य पौत्रः स्यात्, उपागच्छति च दुहितुः पिता पौत्रो ममायमिति

२।५।१५; नि.३।४; आश्रौ.७।४।८; शाश्रौ.१२।५।१६; बृदे.४।१११.

दौहित्रम्। तस्माद् दुहितापि पुत्र एव, यस्याः पुत्रः पौत्रो ममायमित्येवं चेतसा उपगम्यते। 'विद्वाँ ऋतस्य दीधिति सपर्यन्'। 'विद्वान्'। कस्य ? 'ऋतस्य' 'प्रजननयज्ञस्य'। ऋत इत्येतदपठित यज्ञनाम।'दीधिति' विधानमित्यर्थः। प्रजननयज्ञविधानमविशेषेण 'सपर्यन्' पूजयन्नित्यर्थः। यथैव हि पुत्रजनने प्रजननयज्ञस्तन्यते तथैव हि दुहितृजननेऽपि। यैरेव हि मन्त्रैर्यैनैव च विधानेन पुत्रगर्भ आधीयते, तैरेव मन्त्रैस्तेनैव च विधानेन दुहितृगर्भोऽपि। अथ वा ऋतशब्देन रेत उच्यते। तत् 'अङ्गादङ्गाद्' यत् सभूतं तत् सर्वगात्रेभ्यः हृदयानुस्मरणनिमित्तेन गर्भजनने 'मातरि प्रत्यृत' प्रवृत्तं भवति रेतः, तस्य 'रेतसः' 'विधान अविशेषेण पूजयन्' स वोढा दौहित्र पौत्रो ममायमित्येवमुपागच्छति चेतसा। येनैव हि विधानेन पुत्रजनने रेत उत्सृज्यते, तेनैव हि दुहितृजननेऽपि, तत्रैव सति रेतउत्सर्गविध्यविशेषात् प्रजननयज्ञाविशेषाद्वा 'अविशेषेण''मिथुनाः' पुरुषाः स्त्रियश्च उभयेऽपि दायादा इत्येवमेके धर्मविदो मन्यन्ते। एवमेताभ्यामप्यृक्श्लोकाभ्यामुक्तमविशेषेण पुत्रस्य दुहितुश्च दायादत्वम्।

'परास्यन्ति परस्मै प्रयच्छन्ति न पुमासम्'। तस्मात् पुमानेव पैतृकस्य वित्तस्येष्टे, न दुहिता। किंच। स्त्रीणा दानविक्रयातिसर्गा विद्यन्ते न पुसः। प्रदीयते हि परस्मै स्त्री, विक्रीयते च वैवाहिकेन शुल्केन। 'विक्रय चाप्यपत्यस्य मतिमान् कोऽनुमस्यते। स्वल्पो वाथ बहुर्वापि विक्रयस्तावदेव सः॥' इति भगवता वासुदेवेनोक्त सुभद्राहरणे। तथा च ब्राह्मणमपि दर्शयति चातुर्मास्येषु 'अनृत वा एषा करोति, या पत्युः क्रीता सती अन्यथान्यैश्चरति' इति, तस्माच्छुल्केन प्रदानं विक्रयः कन्याया इत्युपपद्यते। अतिसर्गः परित्यागः। परित्यज्यते हि कन्या स्वबन्धुभिः स्वयंवरे, यो बलिष्ठः स गृह्णातु यो वा तुभ्य रोचते तं वृणीष्वेति। स एष क्षत्रियाणामेव स्वयवरधर्मो नेतरेषा वर्णानामिति। स पुनरयमितरेषामपि वर्णानामदायार्हत्वे कन्याया लिङ्गं भवति। तस्मान्न दायाद्यमर्हति कन्येति। यदुक्तं दानविक्रयातिसर्गैर्हेतुभिरदायादत्वं स्त्रिया इति, अनैकान्त एषः। पुसोऽपि दानविक्रयातिसर्गा विद्यन्त एव। पुरुषोऽपि हि परस्मै दीयते। एवं ह्युक्तम्–'दत्तक्रीतकृत्रिमक्षेत्रजौरसाः पुत्राः' इति। तथा च 'शौनःशेपे दर्शनात्'। शौनःशेपआख्याने बहृचानाम्, भारते च शुनःशेपस्य विक्रयो दृष्टः 'विक्रीत मध्यगं मन्ये' इत्येवमादि। तथा च परित्यागोऽपि दृष्टः—यथा विश्वामित्रेण मधुच्छन्दआदीनाम्। (ऐब्रा.३३।६) तस्मादनैकान्तिकत्वादेतेषा हेतूनामुभयोरपि दायाद्यत्वमित्येके मन्यन्ते।

'अभ्रातृमतीवाद इत्यपरम्' 'आचार्यमतम्' इति वाक्यशेषः। यैवाभ्रातृका भवति कन्या, सैव पित्र्य धनमर्हति, नेतरा सभ्रातृका। पुरुषेषु हि पितुः पिण्डदातृषु तिष्ठत्सु न स्त्री धनमर्हति। सा हि परकीयं वश वर्धयति, न स्वम्। तस्मादसौ नार्थभागिनी।

'पिता यत्र' यस्मिन् काले 'दुहितुः अप्रत्तायाः' प्राक् प्रदानादित्यर्थः। 'रेतःसेक' रेतसः सेक्तारं यो दुहितरि रेतः सिञ्चति त जामातरं 'प्रार्जयति' प्रसाधयति, प्रकल्पयति। उपावर्तयतीत्यर्थः। तदा तस्मै ता दुहितरं ददत् किं करोति ? सशग्म्येन मनसा दधन्वे 'सदधाति' अभिसंदधाति 'आत्मान' यदत्रापत्यमुत्पत्स्यते तन्ममेति। कथ पुनरभिसदधात्यात्मानमिति 'सशग्म्येन मनसा' सगमेन मनसा विगतापुत्रत्वसंतापेन चेतसा, नाहमपुत्रः इयमेव पुत्रिका मम पुत्रः, यो ह्यस्यामुत्पत्स्यते, स पौत्रो मम भविष्यति, इत्येव सुखेन मनसा संदधात्यात्मानं तस्या पुत्रिकायाम्।]

द्यामुष्यायणपुत्रलिङ्गानि

[1]तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति।

एकः प्रधानभूतः असहायो वा पुत्रस्थानीय. आदित्यः संवत्सराख्यः कालो वा तिस्रो मातॄः सस्यवृष्ट्याद्युत्पादयित्रीः। क्षित्यादिलोकत्रयमित्यर्थः। तथा त्रीन् पितॄन् जगता पालयितॄन् लोकत्रयाभिमानिनः अग्निवायुसूर्याख्यान् बिभ्रत् सन् ऊर्ध्वस्तस्थौ। उन्नतः अत्यन्तदीर्घस्तिष्ठति भूतभविष्यदाद्यात्मना। सूर्यपक्षे सर्वेभ्य उन्नतः। ईम् एनं न अव ग्लपयन्ति। ग्लानि नैव कुर्वन्ति। न हि काल आदित्यो वा अन्येन पराभूयते। **ऋसा.**

(१) ऋसं.१।१६४।१०; असं.९।९।१०.

[1]**अन्यस्या गर्भमन्य ऊ जनन्त सो अन्येभिः सचते जेन्यो वृषा ।**

अन्ये ऋत्विजोऽन्यस्याः पृथिव्या वेदात्मिकाया वाचो वा गर्भं सन्तं सोम यज्ञं वा जनन्त । अजनयन्त । उ प्रसिध्यर्थः । वृषाभिमतफलवर्षको जेन्यो जयसमर्थः स यज्ञः सोमो वान्येभिरन्यैरिन्द्रादिभिर्देवैः सचते । संगच्छते । सच समवाये । ऋसा.

[2]**पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पीप्यानाः ।**

अयमग्निः पितुश्चान्तरिक्षस्य गर्भं वृष्टिद्वारा गर्भभूतं जनितुः सर्वस्य लोकस्य जनयितुश्च ब्रह्मणश्च लोकमोषध्यादिकं बभ्रे । बिभर्ति । एक एवाग्निः पूर्वीर्बह्वीः पीप्यानाः प्यायमाना वृद्धिं प्राप्ता ओषधीरधयत् । धयति । भक्षयति । ऋसा.

[3]**कियत्स्विदिन्द्रो अध्येति मातुः कियत्पितुर्जनितुर्यो जजान ।**

य इन्द्रो मातुर्जनन्याः सकाशात्कियत्स्विद्यावद्बलमध्येति । अधिगच्छति । पितुः सकाशात्कियद्यावद्बलमधिगच्छति । य इन्द्रो जनितुर्जनयितुर्यस्मात्प्रजापतेः सकाशादिद दृश्यमानं जगज्जजान । अजनयत् । ऋसा.

[4]**ते हिन्विरे अरुणं जेन्यं वस्वेकं पुत्रं तिसृणाम् । ते धामान्यमृता मर्त्यानामदब्धा अभि चक्षते ॥**

अरुणमरुणवर्णं जेन्यं जयसाधनं वसु वासक तिसृणा पृथिव्यादीनामेक पुत्रं ते देवा हिन्विरे । प्रेरयन्ति त्रैलोक्यस्य तमोनिवारणाय । किंचादब्धाः केनाप्यहिंसिता अमृता मरणरहितास्ते देवा मर्त्याना मनुष्याणा धामानि स्थानान्यभि चक्षते । अभिपश्यन्ति । ऋसा.

क्षेत्रजपुत्रलिङ्ग नियोगविधिलिङ्ग च

[5]**उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि । हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥**

(१) देवरादिकः प्रेतपत्नीमुदीर्ष्व नारीत्यनया भर्तृसकाशादुत्थापयेत् । सूत्रित च । 'तामुत्थापयेद्देवरः पतिस्थानीयोऽन्तेवासी जरद्दासो वोदीर्ष्व नार्यभि जीवलोकम्' । (आगृ. ४।२।१८) इति । हे नारि मृतस्य पत्नी जीवलोकं जीवाना पुत्रपौत्रादीना लोकं स्थानं गृहमभिलक्ष्योदीर्ष्व । अस्मात्स्थानादुत्तिष्ठ । ईर गतौ आदादिकः । गतासुमपक्रान्तप्राणमेतं पतिमुप शेषे । तस्य समीपे स्वपिषि । तस्मात्त्वमेहि । आगच्छ । यस्मात्त्वं हस्तग्राभस्य पाणिग्राह कुर्वतो दिधिषोर्गर्भस्य निधातुस्तवास्य पत्युः संबन्धादागतमिदं जनित्व जायात्वमभिलक्ष्य सं बभूथ सभूतासि अनुमरणनिश्चयमकार्षीः तस्मादागच्छ । ऋसा.

(२) कल्पः—'ता प्रति गतः सव्ये पाणावभिपाद्योत्थापयति' । हे नारि त्वमितासु गतप्राणमेतं पतिमुपशेष उपेत्य शयनं करोषि । उदीर्ष्वास्मात्पतिसमीपादुत्तिष्ठ । जीवलोकमभि जीवन्तं प्राणिसमूहमभिलक्ष्य एहि आगच्छ । त्व हस्तग्राभस्य पाणिग्राहवतो दिधिषोः पुनर्विवाहेच्छोः पत्युरेतज्जनित्वं जायात्वमभिसंबभूवाऽऽभिमुख्येन सम्यक्प्राप्नुहि । तैआसा.६।१।३

[6]**कुह स्विदोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः । को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ ॥**

(१) क्व स्विद्रात्रौ भवथः, क्व दिवा, क्वाभिप्राप्ति कुरुथः, क्व वसथः, को वा शयने 'विधवेव देवरं' । देवरः कस्माद् द्वितीयो वर उच्यते । विधवा विधातृका भवति । विधवनाद्वा । विधावनाद्वेति चर्मशिराः । अपि वा धव इति मनुष्यनाम, तद्वियोगाद्विधवा । देवरो दीव्यतिकर्मा । मर्यो मनुष्यो मरणधर्मा । योषा यौतेः । आकुरुते सहस्थाने । नि.३।१५

[दुर्गाचार्यभाष्यम्—हे अश्विनौ । 'कुह स्वित् दोषा' 'क्व' नु युवा'रात्रौ भवथः'? 'कुह वस्तोः' 'क्व' वा 'दिवा' भवथः युवाम्? येन नापि रात्रौ अस्माकं दर्शनमुपगच्छथः नापि दिवा । स्विदिति परिदेवनाया, ईर्ष्याया वा । 'कुह'

(१) ऋसं.२।१८।२. (२) ऋसं.३।१।१०.
(३) ऋसं.४।१७।१२. (४) ऋसं.८।१०।१६.
(५) ऋसं.१०।१८।८; असं.१८।३।२; तैआ.६।१।३; आगृ.४।२।१८; शाश्रौ.१६।१३।१३; वैसू.३८।३; कौसू.८०।४५; ऋविं.३।८।४.
(१) ऋसं.१०।४०।२; नि.३।१५.

'क्व' च 'अभिपित्वम्' 'अभिप्राप्तिं' स्नानभोजनाद्यर्थं 'कुरुथः'? 'कुह' क्व वा 'ऊषतुः' 'वसथः'? सर्वथा न विज्ञायते वामागमनप्रवृत्तिः। किंच, 'को वा शयुत्रा' कतमो युवा यजमानः शयुत्रा 'शयने'? किं 'विधवा' इव 'देवरम्' यथा विधवा मृतभर्तृका कान्चित् स्त्री शयने रहस्यतितरा यत्नवती देवरमुपचरति। स हि परकीयत्वात् नार्या दुरारा भ्यतरो भवतीति यत्नेनोपचर्यते न तथा निजो भर्ता। तस्मात् तेनोपमीयेते अश्विनौ। तथा 'मर्यं' मनुष्यं देवरं, सैव मृतभर्तृका 'योषा' 'आ' 'कृणुत' आभिमुख्येन कुरुते। को वा एव आभिमुख्येन 'सधस्थे' 'सहस्थाने' समाने सहयोगिनावात्मना कृत्वा परिचचार? येनेह नोपगतवन्तौ स्थोऽस्मदर्शनमिति। एवमस्यामृचि देवरेण कनीयसा ज्यायासावश्विनावुपमीयेते, विधवया च यजमानः।]

(२) वा युवा को यजमानः सधस्थे सहस्थाने वेद्याख्य आ कृणुते। आ कुरुते। परिचरणार्थमात्माभिमुखी करोति। तत्र दृष्टान्तौ दर्शयति। शयुत्रा शयने विधवेव यथा मृतभर्तृका नारी देवरं भर्तृभ्रातरमभिमुखी करोति। मर्य न यथा च सर्वं मनुष्यं योषा सर्वा नारी सभोगकाले अभिमुखीकरोति तद्वदित्यर्थः। ऋसा.

दत्तपुत्रलिङ्गम्

ईयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे। या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति॥

इयं सरस्वती रभसं वेगवन्तमृणच्युत वैदिकस्य देवर्षिपितृसबन्धिनो लौकिकस्य च ऋणस्य च्यावयितारं दिवोदासमेतत्संज्ञं पुत्र दाशुषे हवींषि दत्तवते वध्र्यश्वायैतत्संज्ञाय ऋषयेऽददात्। दत्तवती। या सरस्वती शश्वन्तं बहुल पणिं पणनशील वणिजमदातृजनमवसं केवलं स्वात्मन एव तर्पकमाचखाद आजघान सेयमददादित्यन्वयः। अथ प्रत्यक्षीकृत्य स्तौति। हे सरस्वति देवि ता तानि पुत्रदानादीनि ते त्वदीयानि दात्राणि दानानि तविषा तविषाणि महान्ति भवन्ति। ऋसा.

(१) ऋसं.६।६१।१; कास.४।१६; ऐब्रा.५।१२।५; आश्रौ.८।१।१२; शाश्रौ.१०।५।४; ऋग्वि.२।२३।३; बृदे. ५।११९.

गूढजपुत्रलिङ्गम्

धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः।

हे धृतव्रता धृतकर्माण आदित्या अदितेः पुत्रा इषिरा गमनशीलाः सर्वैरभ्येषणीयाः प्रार्थनीया वा हे विश्वे देवा मदारे मत्तो दूरदेशे आगो विहितानुष्ठानादिजनित पाप कर्त। कुरुत। तत्र दृष्टान्तः। रहसूरिव। रहस्यन्यैरज्ञाते प्रदेशे सूयत इति रहसूर्ध्वभिचारिणी। ऋसा.

पुत्रप्रयोजनम्

जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी।

स्यान्नः सूनुस्तनयो विजावाऽग्ने सा ते सुमतिर्भूत्वस्मे।

त्वत्प्रसादान्नोऽस्माकं सूनुः स्यात्पुत्रोऽस्तु। कीदृशः, तनयः, औरस इत्यर्थः। पुत्रसामान्यस्य सूनुशब्देनोक्तत्वादत्तपुत्रादिव्यावृत्तये विशेषविवक्षया तनयशब्दः प्रयुज्यते। विजावा विविधानां जनयिता। हेऽग्ने ते तव सा सुमतिस्तथाविधानुग्रहबुद्धिरस्मे भूत्वस्मासु भवतु। तैसा.

पुत्रमहिमा। दुहितुर्देयता।

पैरा स्थालीरस्यन्त्युद्वायव्यानि हरन्ति तस्मात्स्त्रियं जातां परास्यन्त्युत्पुमाꣳसꣳ हरन्ति।

पुत्रदानम्। दत्तकलिङ्गम्।

अत्रिरददादौर्वाय प्रजां पुत्रकामाय, स रिरिचानोऽमन्यत निर्वीर्यः शिथिलो यातयामा स एतं चतूरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै तस्य चत्वारो वीरा आऽजायन्त सुहोता सूद्गाता स्वध्वर्युः सुसभेयो य एवं विद्वाꣳश्चतूरात्रेण यजत आऽस्य चत्वारो वीरा जायन्ते सुहोता सूद्गाता स्वध्वर्युः सुसभेयः।

(१) ऋसं.२।२९।१; बृदे.४।८।८४.

(२) तैसं.६।३।१०।५. (३) तैसं.४।२।४।३; ऋसं. ३।१।२३; कासं.१६।११; मैसं.२।७।११; शुमा.१२।५१; सासं.१।७६; शब्रा.७।१।१।२७.

(४) तैसं.६।५।१०।३. (५) तैसं.७।१।८।१.

उर्वस्य पुत्रः और्वः । स च पुत्रकामोऽत्रिं याचितवान् । तस्मै सोऽत्रिः स्वकीया प्रजा ददौ । ततः प्रजाराहित्येन रिक्तः सन्मनस्येवममन्यत—अहं निर्वीर्यः प्रजोत्पादनसामर्थ्यरहितः, शिथिलः कार्येष्वक्षमः, यातयामा गतसारश्चास्मीति विचार्य प्रजोत्पादनसाधनं चतुरात्रं निश्चित्य तत्सामग्रीमाहृत्य तेनायजत । तस्य मुहोत्रादयश्चत्वारः पुत्रा उत्पन्नाः । ते च हौत्र औद्गात्र आध्वर्यवे यज्ञप्रयोगोपदेशे च कुशलाः । अतोऽन्येऽपि चतूरात्रेणेष्ट्वा तादृशान्पुत्रॉल्लभन्ते । तैसा.

पुत्रमहिमा

[1]वीरं विदेय तव देवि संदृशि ।

हे देवि गौः तव संदृशि संदर्शने सति वीरं पुत्रं विदेय लभेय । शुम.

[2]आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथेह पुरुषोऽसत् ।

हे पितरः, आधत्त गर्भम् । कुमारं पुष्करस्रजम् । स्रक्शब्देन मुण्डमालोच्यते । पुष्करशब्देन पद्मानि । आश्विनौ पुष्करस्रजौ अश्विभ्यां पुत्रोपमानं क्रियते । किंच यथा येन प्रकारेण इह अस्मिन्नेव ऋतौ पुरुषः पूरयिता देवपितृमनुष्याणाम् । असत् भूयात् तथा आधत्तेति सबन्धः । शुउ.

[3]पुमान् पुत्रो जायते विन्दते वसु ।

पुमान् पुत्रो जायते । दुहितापि पुत्रशब्देनोच्यते इत्यतः पुमानिति विशेष्यते । किंच विन्दते वसु लभते धनम् । शुउ.

पुत्रिकालिङ्गम्

[4]अमूर्या यन्ति योषितो हिरा लोहितवाससः । अभ्रातर इव जामयस्तिष्ठन्तु हतवर्चसः ॥

(१) अभ्रातृका इव योषास्तिष्ठन्ति संतानकर्मणे पिण्डदानाय हतवर्त्मान इत्यभ्रातृकाया अनिर्वाह औपमिकः । नि.३।४

[दुर्गाचार्यभाष्यम्—'अभ्रातृका इव योषास्तिष्ठन्ति सतानकर्मणे पिण्डदानाय हतवर्त्मान इति' । अस्यामृचि 'अभ्रातृकायाः' कन्यायाः 'अनिर्वाहः' अनिर्वहण विवाहनिषेध इत्यर्थः ; 'औपमिकः' उपमया दर्शितः—'अभ्रातर इव' इति ।]

(२) योषितः स्त्रियाः संबन्धिन्यः अमूः एताः पुरतो दृश्यमानाः लोहितवाससः लोहितवर्णवस्त्राः । लोहितवर्णा इत्यर्थः । यद्वा लोहितस्य रुधिरस्य निवासभूताः । वस आच्छादने । वस निवासे । ईदृश्यो या हिराः सिराः रजोवहननाड्यः यन्ति गच्छन्ति । व्याधिवशात् सर्वदा प्रवहन्तीत्यर्थः । ताः सिराः क्रियमाणेन अनेन भैषज्यकर्मणा हतवर्चसः हततेजस्काः प्रनष्टरोगवीर्याः सत्यः तिष्ठन्तु स्थेयासुः । मा प्रयाक्षुरित्यर्थः । तत्र दृष्टान्तः । अभ्रातर इव । न विद्यन्ते भ्रातरो यासां ता अभ्रातरः । यथा अभ्रातृका जामयः भगिन्यः । आह च यास्कः । न जामये भगिन्यै जामिरन्येऽस्या जनयन्ति जाम् अपत्य इति [नि.३।६] । ता यत उत्पन्नास्तत्रैव पितृकुले सतानकर्मणे पिण्डदानाय च तिष्ठन्ति तद्वद् इत्यर्थः । असा.

पुनर्विवाहलिङ्गम्

[5]ब्राह्या गृहाः सं सृज्यन्ते स्त्रिया यन्म्रियते पतिः । ब्रह्मैव विद्वानेष्यो यः कव्यादं निरादधत् ॥

पुत्रमहिमा

[6]ऋणमस्मिन्संनयत्यमृतत्वं च गच्छति । पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥

स्वकीयमृणं लौकिकं वैदिकं च सनयति । सम्यगवस्थापयति । लौकिकस्यावस्थापनात्पुत्रपौत्रादिभिर्ऋणं प्रत्यर्पणीयमिति स्मृतिकारा आहुः । वैदिकं तु 'त्रिभिर्ऋणवा जायते' इत्यादिश्रुत्युक्तं पूर्वमेवोदाहृतम् । ऐब्रासा.

[7]यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि । यावन्तो अप्सु प्राणिनां भूयान्पुत्रे पितुस्ततः ॥

(१) शुमा.४।२३, तैसं.१।२।५।२ (देवि०), कासं.२।५ तैसंवत्; शब्रा.३।३।१।१२; तैआ.४।७।६ तैसवत्.

(२) शुमा.२।३३, आश्रौ.२।७।१४; शाश्रौ.४।५।८; आपश्रौ.१।१०।११, माश्रौ.१।१।२।३१; कौसू.८९।६; सामब्रा.२।३।१६; गोगृ.४।३।२७.

(३) शुमा.८।५; तैस.३।२।८।४.

(४) असं.१।१७।१; नि.३।४ योषितो (जामयो); कौसू. २६।९.

(१) अस.१२।२।३९

(२) ऐब्रा ३३।१, शाश्रौ.१५।१७.

(३) ऐब्रा.३३।१; शाश्रौ.१५।१७.

[1]शश्वत्पुत्रेण पितरोऽत्यायन्बहुलं तमः ।
आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी॥

तस्मात्स पुत्र इरावत्यन्नयुक्ताऽतितारिणी नदीसमुद्रादेरतितरणहेतुर्नौरिति शेषः । ऐब्रासा.

[2]किं नु मलं किमजिनं किमु श्मश्रूणि किं तपः ।
पुत्रं ब्रह्माण इच्छध्वं स वै लोकोऽवदावदः ॥

अत्र मलाजिनश्मश्रुतपःशब्दैराश्रमचतुष्टय विवक्षितम् । मलरूपाभ्या शुक्र(क्र)शोणिताभ्या सयोगान्मलशब्देन गार्हस्थ्य विवक्षितम् । कृष्णाजिनसयोगादजिनशब्देन ब्रह्मचर्य विवक्षितम् । क्षौरकर्मराहित्यात् श्मश्रुशब्देन वानप्रस्थ्य विवक्षितम्। इन्द्रियनियमसद्भावात्तपःशब्देन पारिव्राज्यं विवक्षितम् । मल गार्हस्थ्य कि नु कि नाम सुखं करिष्यति न किञ्चिदित्यर्थः । एवमुत्तरत्रापि योज्यम् । हे ब्रह्माणो विप्रा विप्रक्षत्रियाद्याः सर्वे यूय सुखहेतुत्वात्पुत्रमिच्छध्वम् । स वै स एव पुत्रोऽवदावदो लोकः । वदितुमयोग्यानि निन्दावाक्यान्यवदास्तैर्वाक्यैर्नोंयते न कथ्यत इत्यवदावदः । (एवं प्रपदेन तेन कथ्यत इति ।) अवद्रावदो दोषराहित्यान्निन्दानर्ह इत्यर्थः । ऐब्रासा.

[3]अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः । सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः परमे व्योमन् ॥

दुहिता ह पुत्रीति कृपण केवलदुःखकारित्वादैन्यहेतुः । पुत्रो ह पुत्रस्तु ज्योतिःस्वरूप तमोनिवारकत्वेन स हि पितरं परमे व्योमन्नुत्कृष्ट आकाशे परब्रह्मस्वरूपेऽवस्थापयति । ऐब्रासा.

[4]नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः । तस्मात्तु पुत्रो मातरं स्वसारं चाधिरोहति ॥

[5]एष पन्था उरुगायः सुशेवो यं पुत्रिण आक्रमन्ते विशोकाः । तं पश्यन्ति पशवो वयांसि च तस्मात्ते मात्रापि मिथुनीभवन्ति ॥

पन्थाः पुत्रसुखानुभवरूपो मार्ग उरुगाय उरुभिर्महद्भिः शास्त्रैश्च राजामात्यादिभिश्च गीयते । तथा सुशेवः सुष्ठु सेवितु योग्यः । ऐब्रासा.

औरसस्वयदत्तद्व्यामुष्यायणकृतपुत्रलिङ्गानि । ज्येष्ठत्व पुत्रत्व च पितुरिच्छाधीनम् । पुत्राणा विक्रेयता । पितुरधीन दायादत्वम् ।

[6]सोऽजीगर्तं सौयवसिमृषिमशनया परीतमरण्य उपेयाय । तस्य ह त्रयः पुत्रा आसुः, शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति, तं होवाच ऋषेऽहं ते शतं ददाम्यहमेषामेकेनाऽऽत्मानं निष्क्रीणा इति, स ज्येष्ठं पुत्रं निगृह्यान उवाच, न त्विममिति, नो एवेमभिति कनिष्ठं, माता तौ ह मध्यमे संपादयांचक्रतुः शुनःशेपे तस्य ह शतं दत्वा स तमादाय सोऽरण्याद् ग्राममेयाय ।

स ह रोहितः कचिदृषिं तस्मिन्नरण्य उपेयाय प्राप्तवान्। कीदृशमृषिमजीगर्तनामकं सूयवसस्य पुत्रमशनया परीतमन्नालाभेन क्षुत्पीडितम् । अथाजीगर्तरोहितयोः संवादं दर्शयति । तस्य ह त्रय इति । तस्याजीगर्तस्य शुनःपुच्छादिनामकास्त्रयः पुत्रा आसुः । पुत्रवन्तमृषिं रोहित उवाच । हे ऋषे ते तुभ्यमह गवा शत ददामि । ज्येष्ठपुत्र शुनःपुच्छनामक हस्तेन निगृह्णानः स्वसमीपे समाकर्षन्रोहित प्रत्येवमुवाच । तुभ्यमेकः पुत्रो दीयत इम तु शुनःपुच्छं तु न ददामि मम प्रियत्वादिति । ततो माता कनिष्ठ हस्तेन गृहीत्वैवमुवाच । इम शुनोलाङ्गूलं तु मम प्रिय नो एव सर्वथा न दादामीति । ततस्तावुभौ मातापितरौ मध्यमे पुत्रे शुनःशेपे दान संपादयाचक्रतुरङ्गीकृतवन्तौ । ततस्तस्याजीगर्तस्य स रोहितो गवा शतं दत्वा त शुनःशेपमादायावस्थितः । ततः स रोहितस्तेन शुनःशेपेन सहारण्यात्स्वकीय ग्रामं प्रत्याजगाम । ऐब्रासा.

[7]अथ ह शुनःशेपो विश्वामित्रस्याङ्कमाससाद स होवाचाजीगर्तः सौयवसिर्ऋषे पुनर्मे पुत्रं देहीति नेति होवाच विश्वामित्रो देवा वा इमं मह्यमरासतेति स ह देवरातो वैश्वामित्र आस तस्यैते कापिलेयबाभ्रवाः ।

[8]यथैवाङ्गिरसः सन्नुपेयां तव पुत्रतामिति स होवाच विश्वामित्रो,ज्येष्ठो मे त्वं पुत्राणां स्यास्तव

(१) ऐब्रा.३३।१; शाश्रौ.१५।१७.
(२) ऐब्रा.३३।१; शाश्रौ.१५।१७.
(३) ऐब्रा.३३।१; शाश्रौ.१५।१७.
(४) ऐब्रा.३३।२; शाश्रौ.१५।१७.
(५) ऐब्रा.३३।२; शाश्रौ.१५।१७.

(१) ऐब्रा.३३।३. (२) ऐब्रा.३३।५.
(३) ऐब्रा.३३।५.

श्रेष्ठा प्रजा स्यात्। उपेया दैवं मे दायं तेन वै त्वोपमन्त्रय इति।

स होवाच मधुच्छन्दाः पञ्चाशता सार्धं यन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयम्। पुरस्त्वा सर्वे कुर्महे त्वामन्वञ्चो वयं स्मसीति।

कनिष्ठपुत्राणा पञ्चाशता सह मधुच्छन्दो नामकः स मध्यमः पुत्रः शुनःशेप प्रत्येवमुवाच। हे शुनःशेप नोऽस्माकं पिता विश्वामित्रो यत्कार्यं त्वदीयज्येष्ठपुत्रत्वरूपं संजानीते सम्यग्जानात्यङ्गीकरोति तस्मिन्कार्ये वयं तिष्ठामहे तत्कार्यमङ्गीकुर्मः। सर्वे वयं त्वा शुनःशेपनामान त्वा पुरस्कुर्महे, पुरस्कृत्य ज्येष्ठं कृत्वा वर्तामहे। त्वामन्वञ्चः शुनःशेपमनुगच्छन्तः स्मसि भवाम इत्युक्तवान्। ऐब्रासा.

अथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव।

प्रतीतस्तेषु प्रत्यय मदनुकूला इति विश्वास प्राप्तः। ऐब्रासा.

ते वै पुत्राः पशुमन्तो वीरन्वतो भविष्यथ।
ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त मा॥

मे मानं मदीय मतमनुगृह्णन्त आनुकूल्येन स्वीकुर्वन्तो मा विश्वामित्रं वीरवन्तं स्वधर्मशूरपुत्रयुक्तमकर्त कृतवन्तः। ऐब्रासा.

एष वः कुशिका वीरो देवरातस्तमन्वित। युष्मांश्च दायं म उपेता विद्यां यामु च विद्मसि॥

त देवरात यूयमन्वितानुगता भवत। मे मदीय दायं धन युष्माश्चोपेता प्राप्स्यति। चकारादेवरातं च। यामु च यामपि काचिद्वेदशास्त्रादिरूपा विद्या विद्मसि वय जानीमः साऽपि युष्मानुपेता प्रात्स्यति। ऐब्रासा.

ते सम्यञ्चो वैश्वामित्राः सर्वे साकं सरातयः। देवरातय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिनाः॥

हे वैश्वामित्रा विश्वामित्रस्य मम पुत्रा ये गाथिना गाथिपौत्रास्ते यूयं सर्वेऽपि सम्यञ्चः समीचीनबुद्धयो ये साकं देवरातेन सार्धं सरातयो रातिर्धनसपत्तिस्तया युक्ताः सन्तो देवरातय मदीयश्रेष्ठपुत्रस्य देवरातस्य धृत्यै धारणं युष्मत्पोषणं श्रैष्ठ्याय युष्माकं मध्ये श्रेष्ठत्व च तस्थिरेऽङ्गीकृतवन्तः। ऐब्रासा.

अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः।
जह्नूनां चाऽऽधिपत्ये दैवे वेदे च गाथिनाम्॥

इक् स्मरण इति धातुः। अधीयत स्मृतिकारैर्महर्षिभिः स्मर्यते। कथमिति तदुच्यते। अय देवरातो द्यामुष्यायणत्वादुभयोरजीगर्तविश्वामित्रयोः सबन्धिनी ये रिक्थे धने तयोर्ऋषिर्द्रष्टा तदुभयमर्हतीत्यर्थः। अजीगर्तस्य कूटस्थ ऋषिर्जह्नुसंज्ञकस्तस्य वशे जाताः सर्वे जह्नवस्तेषां चाऽऽधिपत्ये स्वामित्वे देवरातो योग्यः। तथा दैवे देवसबन्धिनि यागादिकर्मणि वेदे च मन्त्ररूपे समर्थः। गाथिनामस्मत्पितृवशोत्पन्नाना च सर्वेषामाधिपत्ये योग्यः। ऐब्रासा.

पुत्रमहिमा

पुत्रः पित्रे लोककृज्जातवेदः।

हे जातवेदः सर्वत्र पुत्रः पित्रे लोककृत्स्थानसपादको भवति, अतो यथा मया तव स्थानं सपादितं तथा त्वयाऽपि मम पुण्यलोकः संपादनीयः। तैब्रासा.

यस्य हि प्रजा भवत्येक आत्मना भवत्यथोत दशधा, प्रजया हविष्किर्यते, तस्मात्प्रजा भूयो हविष्करणम्।

शौचेयो ज्ञप्रः। प्रक्ष्यामि त्वेव भगवन्तमिति पृच्छैव प्राचीनयोग्येति स होवाच यत्र तऽएतस्मिन्नेव काले सर्वेऽम्रयोऽनुगच्छेयुर्वेत्थ तद्भयं यदत्र जुह्वतो भवतीति वेदेति होवाच पुरा चिरादस्मादायादं कुलं स्याद्यस्यैतदविदितं स्याद्विद्याभिस्त्वेवाहमतारिषमिति।

ऋणं ह वै जायते योऽस्ति। स जायमान एव

(१) ऐब्रा.३३।६.
(२) ऐब्रा.३३।६.
(३) ऐब्रा.३३।६; शाश्रौ.१५।२७.
(४) ऐब्रा.३३।६; शाश्रौ.१५।२७.
(५) ऐब्रा.३३।६; शाश्रौ.१५।२७.

(१) ऐब्रा.३३।६; शाश्रौ.१५।२७ धीयत (धीते).
(२) तैब्रा.३।७।७।१०.
(३) शब्रा.१।८।१।३४.
(४) शब्रा.११।५।३।११.
(५) शब्रा.१।७।२।१.

देवेभ्य ऋषिभ्यः पितृभ्यो मनुष्येभ्यः ।

अथ यदेव प्रजामिच्छेत । तेन पितृभ्य ऋणं जायते । तद्धि एभ्य एतत्करोति यदेषां संततान्व्यवच्छिन्ना प्रजा भवति ।

अथ त्रयो वाव लोकाः । मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा, कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानां श्रेष्ठस्तस्माद्विद्यां प्रशंसन्ति । अथातः संप्रत्तिः । यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्व ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं ब्रह्माऽहं यज्ञोऽहं लोक इति । यद्वै किं चानूक्तम् । तस्य सर्वस्य ब्रह्मेत्येकता ये वै के च यज्ञास्तेषां सर्वेषां यज्ञ इत्येकता ये वै के च लोकास्तेषां सर्वेषां लोक इत्येकतैतावद्वाऽइदं सर्वमेतन्मा सर्वं संनयमिता भुनजदिति तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति स यदैवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति स यत्रयेनेन किंचिदक्ष्णया कृतं भवति तस्मादेनं सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिंल्लोके प्रतितिष्ठत्यथैनमेते दैवाः प्राणा अमृता आविशन्ति ।

अङ्गादङ्गात्संभवसि हृदयादधि जायसे स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादयेति ।

यश्च पुत्रः पुन्नामनरकमनेकशततारं तस्मात् त्राति पुत्रस्तत् पुत्रस्य पुत्रत्वम् ।

दुहिता पुत्रकल्पा च पौत्रा दौहित्रकाः स्मृताः ॥

न चैषा पुत्रिकाकरणविषयेति शङ्कनीयम् । कल्पप्रत्ययानन्वयात् । पुत्रिकाकरणे पुत्रिकैव पुत्र इति न पुत्रकल्पता पुत्रिकायाः । अत एवेषत्कल्पपुत्रः पुत्रिका ईषत्कल्पपौत्रो दौहित्र एवेति सिद्धम् । सवि.४३०

(१) शब्रा.१।७।२।४

(२) शब्रा.१४।४।३।२४-२६.

(३) शब्रा.१४।९।४।८.

(४) गोब्रा.१।१।२.

(५) सवि.४३०.

गौतमः

पुत्रिका

[1]पितोत्सृजेत् पुत्रिकामनपत्योऽग्निं प्रजापतिं चेष्ट्वाऽस्मदर्थमपत्यमिति संवाद्य ।

(१) पिता नाम तामुत्सृजेद्दद्यात् । भाविसंज्ञानिर्देशोऽयम् । यथा यूपं छिनत्तीति । पुत्रिका भविष्यन्ती दुहितरमनपत्योऽपुत्रोऽग्निं प्रजापतिं चेष्ट्वाऽग्नये स्वाहा प्रजापतये स्वाहेत्याज्यभागानन्तरमौपासन आज्येन हुत्वाऽस्मदर्थमपत्यमिति संवाद्य यस्मै ददाति तेन सवाद कारयित्वा । एव दत्ता सा पुत्रिका तस्या जातो मातामहस्यैव पुत्रो नोत्पादयितुः । एव सर्वे गर्भाः, पुत्रिका अप्येषा पितुः पुत्रप्रतिनिधिः । इवे प्रतिकृतौ सज्ञाया कन्निति । सैव च रिक्थग्राहिणी । गोत्रमपि तस्याः पितुरेव गोत्रम् । भर्तुस्तु केवल धर्मेषु सहचारिणी रतिफला च । पुत्रार्थं तु विवाहानन्तर कर्तव्यं स्वकुलसंतानार्थमन्यथा दोषः । गौमि.

(२) पिता न तु माताऽपि । उत्सृजेत् अर्पयेत् न तु दद्यात् शास्त्रेण पुत्रत्वात्, 'पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः' इति चोक्तत्वात् । पुत्रिका दुहितरम् । अनपत्यः अविद्यमानपुत्रः । आग्नेयीं प्राजापत्या चेष्टिं कृत्वा अनाहिताग्निश्चेत् स्थालीपाकविधानेन आहुतिद्वय हुत्वेति द्रष्टव्यम् । मभा.

(३) अग्निं प्रजापतिं चेष्ट्वेति, आग्नेयीं प्राजापत्या चेष्टिं कृत्वा एकाग्निमपि स्मार्त यागमावसथ्ये, तदभावे पूजामात्रमपीति हरिहरः । संवाद्य परिभाष्य ।

विर.५६२

अभिसंधिमात्रात्पुत्रिकेत्येकेषाम् ।

(१) एके मन्यन्ते प्रदानसमये पितुर्योऽभिसधिरिय मे पुत्रिकाऽस्त्विति तावन्मात्रादेव दुहिता पुत्रिका भवति न होमसवादनाद्यपेक्षेति । गौमि.

(१) गौध.२८।१८; मेधा.९।१२७; अप.२।१३१; व्यक.१५५; मभा.; गौमि.२८।१६; ड.२।१४।२; विर. ५६२; व्यप्र.४६९ (अग्निं प्रजापतिं चेष्ट्वा०)ऽस्मद (मद).

(२) गौध.२८।१९; मेधा.९।१२७; अप.२।१२८; मभा.; गौमि.२८।१७; ममु.९।१३६ केत्ये (कामे); विर. ५६२; व्यप्र.४६९; समु.१३८ (षाम्०) स्मृत्यन्तरम्.

(२) यदा तु पूर्वस्य विधेः करणासंभवः दानात्पूर्वं वरणादिना संकल्पमेव करोति—यदस्यामपत्य भविष्यति तन्ममेति। अनेनैव पुत्रत्व भवतीत्येके मन्यन्ते। सभवापेक्षो विकल्पो द्रष्टव्यः। मभा.

(३) अभिसधिमात्रात्—एतच्च पूर्वविध्यनुवादता। विर.५६२

प्रसगादभ्रातृकोपयमनिषेधः

तत्संशयान्नोपयच्छेदभ्रातृकाम्।

(१) तत्सशयादभिसंधिसंशयात्पुत्रिकासशयाद्वा। गौमि.

(२) तदाशङ्कया न गृह्णीयात् कस्यचिदपि अनपत्यस्य सर्वा दुहितरः। कुतः? तामिति वक्तव्ये अभ्रातृकामित्यारम्भात्। मभा.

क्षेत्रज

नातिद्वितीयं जनयितुरपत्यम्। समयादन्यस्य। जीवतश्च क्षेत्रे। परस्मात्तस्य। द्वयोर्वा। रक्षणात्तु भर्तुरेव।

(१) प्रथममपत्यमतीत्य द्वितीय न जनयेदिति। अथैवमुत्पादितमपत्यं क्षेत्रिणो वीजिनो वेति विषये निर्णयमाह—जनयितुरिति। जनयितुस्तदपत्य भवति न क्षेत्रिणः। आपस्तम्बोऽपि—'उत्पादयितुः पुत्र इति हि ब्राह्मणमि'त्यादि। यदि ज्ञातयः समय कृत्वा नियुञ्जते क्षेत्रिणोऽपत्यमस्त्विति, यथा विचित्रवीर्यस्य क्षेत्र सत्यवती तस्या व्यासेनोत्पादितमपत्यमिति। यदा च जीवन्नेव क्षेत्री वन्ध्यो रुग्णो वा प्रार्थयते मम क्षेत्रे पुत्रमुत्पादयेति। तदा क्षेत्रिण एवापत्य न वीजिनः। परस्माद्देवरादिव्यतिरिक्तात्तदनियुक्तायामप्यपत्यवत्यामनपत्यायां चोत्पन्नः पुनस्तस्यैव वीजिनो भवति न क्षेत्रिणः। एवमुत्पादितमपत्य द्वयोर्वा भवति वीजिक्षेत्रिणोः। इद नियुक्ताविषयम्। तथा च याज्ञवल्क्यः—'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥' इति। यदि भर्ता क्षेत्रेयव रक्षण भरण पोषण सस्कारादि करोति न वीजी तदा भर्तुरेव तदपत्यमिति। एवं मृते। गौमि.

(२) द्वितीयमतीत्य तृतीय नोत्पादयेत्। एवं च द्वितीयमनुज्ञात भवति, यदि तृतीयमुत्पादयति जनयितुर्देवरादेर्भवति न क्षेत्रिणः, ततश्च तदयोग्य भवतीत्येतावदत्र विवक्षितम्। समयः तव रतिर्ममापत्यमित्येवंरूपः समयः कृतश्चेदन्यस्य क्षेत्रिणो भवति तृतीयमपि। अत स्तदद्युष्टमित्यभिप्रायः। अन्यस्येत्यनुकर्षणार्थश्चकारः। जीवतः प्रजननासमर्थस्य पत्युः क्षेत्रे भार्याया यदपत्यमुत्पद्यते तत् क्षेत्रिण एव भवति विनाऽपि समयेन द्वितीयादधिकमपीत्यभिप्रायः। परस्मात् देवरादिव्यतिरिक्तात् व्यतिक्रमाद्वा यदि जीवतोऽप्यपत्यमुत्पद्यते तत् द्वितीयाददधिकमपि तस्यैव जनयितुरेव भवति न क्षेत्रिणः। एवमुत्पन्नमपत्य वीजिक्षेत्रिणोर्वा भवति। द्वयामुष्यायणो भवतीत्यर्थः। रक्षणे भरणपोषणसस्कारादौ क्रियमाणे भर्तुः, परस्मात् छिद्रेण यदपत्यमुत्पद्यते तद्भर्तुरेव भवति। तुशब्दो विशेषार्थः। प्रव्रजितनष्टपतितादेः अरक्षितोऽपि भवति। य एव रक्षणसमर्थः तस्य विशेषेण भवतीति। मभा.

रिक्थभाजः षडविधपुत्राः

पुत्रा औरसक्षेत्रजदत्तकृत्रिमगूढोत्पन्नापविद्धा रिक्थभाजः।

आचार्येण पुत्रा रिक्थं भजेरन्नित्युक्तं तत्र औरसा एव पुत्रा इति संप्रत्ययो मा भूदित्याह—पुत्रा इति। +गौमि.

गोत्रमात्रभाजः षड्विधपुत्राः

कानीनसहोढपौनर्भवपुत्रिकापुत्रस्वयंदत्तक्रीताः गोत्रभाजः।

(१) एते तु गोत्रभाजो, गोत्रमेव केवलं भजन्ते न रिक्थम्। पूर्वे तु रिक्थभाजो गोत्रभाजश्चौरसेन सहाभिधानात्। सर्वे चैते सजातीयाः। गौमि.

(१) गौध.२८।२०; अप.२।२२८ दभ्रा (ताभ्रा); मभा.; गौमि.२८।१८.

(२) गौध.१८।९-१४; व्यक.१५८ द्वयो रेव (रक्षणात् भर्तुरेव द्वयोर्वा); मभा.; गौमि.१८।८-१४; विर.५८० न्यस्य (न्यत्र) शेष व्यकवत्.

+ मभा. गौमिगतम्।

(१) गौध.२८।३३; व्यक.१५३; मभा.; गौमि २८।३०; विर.५४८ कृत्रि...द्धा (अपविद्धकृत्रिमगूढोत्पन्ना); बाल. २।१३२ (पृ. १७५).

(२) गौध.२८।३४; मभा.; गौमि.२८।३१; विर. ५४८; बाल.२।१३२ (पृ.१७५).

(२) पुत्रत्वादेव गोत्रभाक्त्वे प्राप्ते तद्वचनमिह रिक्थभाक्त्वप्रतिषेधार्थम्। औरसादिसद्भावे च तेषा रिक्थभाक्त्वप्रतिषेधादौरसादिसद्भावे चैते ग्रासाच्छादनमात्रमर्हन्ति पुत्रत्वादेतेषाम्। तदभावे तु भवत्येव रिक्थभाक्त्वं, पुत्रप्रतिनिधित्वात्। प्रतिनिधिश्च मुख्यद्रव्याभावे समग्रफल एव भवति, सोमाभावे पूतिकावत्। पुत्रिकापुत्रस्येहाभिधान गोत्रभाक्त्वप्रापणार्थम्। रिक्थभाक्त्वं त्वौरससद्भावेऽपि भवत्येव। शूद्रापुत्रस्येहानभिधानमनौरसत्वादरिक्थभाक्त्वाद्वा। मभा.

पुत्राणा गोत्रभाजां रिक्थभाक्त्वं कदाचित्

चतुर्थांशिनो वौरसाद्यभावे।

(१) अथ वा नैते कानीनादयो न रिक्थभाजः किन्तु चतुर्थांशिनः, पितृधनस्य चतुर्थमश भजेरन्। पूर्वोक्ताना षण्णामौरसादीनामभावे। भावे तु त एव भजेरन्। चतुर्थांशव्यतिरिक्त च सपिण्डा गृह्णीयुः। यदत्र पुत्रिकापुत्रस्यौरसाद्यभावेऽपि चतुर्थांशभाक्त्व मुक्त तदपकृष्टपुत्रिकापुत्रविषयम्। यो हीनवर्णाया भार्याया दुहितरं पुत्रिका करोति तत्राप्यभिसंधिमात्रेण तत्पुत्रविषयमित्यर्थः। गौमि.

(२) षण्णामौरसाद्यानाममावे कानीनादयश्चतुर्थांशभाजः समस्तभाजो वा, वाशब्दात्। तथाऽऽह शंखः—'उपार्जितं ज्येष्ठाय तदभावे क्षेत्रजपुत्रिकापुत्रयोस्तयो रप्यभावे त्रयाणामितरेषा तेषामप्यभावे षड्भ्यः' इति। गुणापेक्षश्चायं विकल्पः, शेषं सपिण्डादिसबन्धिभ्य इति। अन्ये तु 'औरसाद्यभावे' इत्येतदुत्तरसूत्रार्थमाहुः ततश्च कानीनादयश्चतुर्भागाहा जीवनमात्रसंबन्धिनो वेति। मभा.

(३) चतुर्थांशिन औरसाद्यभावे पितरि सति, असति तु पितरि औरसाद्यभावक्रमेण सर्वक्रक्थग्राहका एव। एतच्चतुर्थांशभागित्वमेषा गुणवत्त्वे ब्रह्मपुराणश्चामीषा मन्दगुणत्वे इत्यविरोधः। शखलिखितवाक्ये पौनर्भवकानीनयोरंशहारित्वाभिधानं गौतमीयं च तन्निषेधन सवर्णासवर्णविषयत्वेन व्यवस्थाप्यम्। असवर्णास्तु ग्रासाच्छादनभागिन इति कात्यायनवाक्यात्। एव शंखलिखितयोरपि अपविद्धे दत्ते चादायादत्वाभिधानं गौतमस्य तत्रैव दायादत्वाभिधानमप्येवं विषयव्यवस्थयैव विबोधनीयम्। विर.५४८-५४९

(४) तत्र गुणवदगुणवदित्युक्तरीत्याऽऽद्यवर्गोक्ताः क्रमेण तद्धराः, द्वितीयवर्गमध्ये आद्यत्रयाणा तुर्यांशभागित्वोक्तिरौरसाभावे पुत्रिकादिसत्त्वे च ज्ञेया। अन्यथोक्तस्मृतिविरोधो दुष्परिहर एव। पुत्रिकापुत्रस्य विषयो व्याख्यात्रैव वक्ष्यते। स्वयंदत्तक्रीतयोस्तत्वं तु औरसे सति उक्तरीत्या वासिष्ठाद्येकवाक्यतयैव। एवं गूढोत्पन्नस्य रिक्थभाक्त्वोक्तिरपि औरसाद्यभावे ज्ञेयेति न कश्चिद्विरोधः। बाल.२।१३२

हारीतः

पुत्रमहिमा। बहुभ्रातृणा तत्पत्नीना च भ्रातृपुत्रेण चरितार्थता।

पुंनाम्ना निरयः प्रोक्तश्छिन्नतन्तुश्च नैरयः।
तत्र वै त्रायते यस्मात्तस्मात्पुत्र इति स्मृतः॥
पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति पिष्टपम्॥
बहूनामेकजातानां यद्येकः पुत्रवान् भवेत्।
सर्वे ते तेन पुत्रेण पुत्रवन्तो न संशयः॥
बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत्।
सर्वास्तास्तेन पुत्रेण लभन्ते पुत्रिणां गतिम्॥
यस्य पुत्रः शुचिर्दक्षः पूर्वे वयसि धार्मिकः।
नियन्ता चात्मदोषाणां स तारयति पूर्वजान्॥

क्षेत्रजः

जीवति क्षेत्रजमाहुरस्वातन्त्र्यात् मृते व्यामुष्यायणमनुप्रवीजत्वात् नाबीजं क्षेत्रं फलति नाक्षेत्रं बीजं प्ररोहति इत्युभयदर्शनादुभयोरपत्यं इत्येके।

(१) **दा.**१६१; **व्यक.**१५९; **विर.**५८३, **बाल.**२।१३५ (पृ.२२०) तन्तुश्च नैरयः (तन्तोश्च तत्र वै) तत्र वै (पितर). (पृ.२४३) तत्र वै (तत्रैव).

(२) **दा.**१६१; **विर.**५८५; **व्यप्र.**५०६ पिष्ट (विष्ट); **विता.**३८४ ब्रध्न (वृद्ध) पिष्ट (विष्ट); **बाल.**२।१३७ उत्तरार्धं (अथ पौत्रस्य पुत्रेण ब्रध्नस्याप्नोति विष्टपम्).

(३) **समु.**९५.

(४) **व्यक.**१५९; **विर.**५८४; **बाल.**२।१३५ (पृ. २२०) स ता (सता).

(५) **अप.**२।१२७ मृते (ऋते) प्ररोहति इत्युभय (रोहति

(१) **गौध.**२८।३५; **मभा.**; **गौमि.**२८।३२ नो वौ (न औ); **विर.**५४८ गौमिवत्; **बाल.**२।१३२ (पृ.१७५) शिनः (शभागिनः) (वौर...वे०).

तेषामुत्पादयितुः प्रथमपिण्डो भवति, द्वौ पिण्डौ निर्वपेन्निर्वापेऽथवैकपिण्डे द्वावनुकीर्तयेत्। द्वितीये पुत्रं तृतीये पौत्रं लेपिनश्च त्रीन्वाचक्षाण आसप्तमादित्येके।

(१) अनुप्तबीजत्वादिति क्षेत्रिकानुप्तबीजत्वादित्यर्थः। अप.२।१२७

(२) जीवति क्षेत्रजमन्यजमपि भर्तुरेव, कुतः अस्वातन्त्र्यात्स्त्रिया इति शेषः। मृते च भर्तरि 'अपुत्रा शयन भर्तुरि'त्यादिदर्शनाच्चाप्यस्वातन्त्र्य स्त्रिया अविशिष्टं, तथापि द्वामुष्यायणं द्वयोरपत्यमित्याहुः, कुतः अनुप्तबीजत्वात् (अनुप्तबीजत्वात्क्षेत्रिणा स्वस्यैव प्रयोजनार्थं अनु पश्चाद्बीजवपने अनुमतत्वादिति भावः।) क्षेत्रस्येति शेषः। जीवति हि बीजवत्तास्तीति न परस्परफलयोगोऽपत्यस्य कारणमित्याह (जीवत्यपि भर्त्तरि उभयोः पुत्राभिसधाने द्वामुष्यायणत्वमिति भावः।) नाबीजमिति उभयोर्बीजिक्षेत्रिणोः। निरूप्यते अस्मिन्निति निर्वापः पितृयज्ञः। एकपिण्डे द्वाविति एकैकस्मिन् पिण्डे द्वाविति वीप्सा मन्तव्या। यदि द्विपिता स्योदकस्मिन् पिण्डे द्वौ द्वावुपलक्षयेदित्यापस्तम्बानुसारात्। द्वितीये पुत्रमित्यादि, द्वितीये (द्वितीये पितामहपिण्डे पुत्रं पितामहस्येति भावः, तेन पितरमित्यर्थः। एवं तृतीये प्रपितामहपिण्डे पौत्रं तस्येति भावः, तेन पितरमारभ्येत्यर्थ इति निष्कर्षः।) पुत्रमारभ्येत्यर्थः। लेपिनश्च त्रीनाचक्षाणो द्वौ द्वावनुकीर्तयेत्। ×विर.५५८

× व्यप्र. विरवत्। ( ) एतच्चिह्नान्तर्गतोऽशो विवादरत्नाकरे पादटिप्पण्यां लिखितोऽत्र संगृहीतः।

उभय) (इत्येके...मादित्येके०); **व्यक.**१५९ बीज प्ररो (बीर्य रो) इत्येके (इत्यपरे) द्वितीये.. मादित्येके (द्वितीये पुत्रस्तृतीये पौत्रः लेपिनश्च त्रीनन्वाचक्षाण आसप्तमादित्यपरे); **विर.**५५७; **व्यप्र.**४७३ प्ररोहति इत्युभय (रोहत्युभय) पत्यमित्येके (पत्यमित्यपरे) प्रथमपिण्डो (प्रथमः प्ररो) द्वौ पिण्डौ...मादित्येके (द्वौ पिण्डौ निर्वापे दद्युरेकपिण्डे वा द्वावनुकीर्तयेत्। द्वितीये पुत्रस्तृतीये पौत्रो लेपिनश्च त्रीनन्वाचक्षाण आसप्तमादित्येके); **दच.**१९ (जीवति क्षेत्रजमाहुरस्वातन्त्र्यान्मृते द्वामुष्यायणमनुप्तबीजत्वात्) एतावदेव.

बन्धुदायादाः षट्, अबन्धुदायादाश्च षट् पुत्राः

षड्बन्धुदायादाः षडबन्धुदायादाः साध्व्यां स्वयमुत्पादितः क्षेत्रजः पौनर्भवः कानीनः पुत्रिकापुत्रो गूढोत्पन्नश्चेति बन्धुदायादाः। दत्तः क्रीतोऽपविद्धः सहोढः स्वयमुपागतः सहसादृष्टश्चेत्यबन्धुदायादाः।

(१) साध्व्यां स्वयमुत्पादित औरस इत्यर्थः। सहसादृष्टो यो मातापित्राद्यहीनोऽकस्माद्दृष्टः केनचित् परितोषेण मम त्व पुत्र इत्युक्त तथेति प्रतिपद्यते। बन्धुदायानाददते इति बन्धुदायादाः। व्यक.१५४

(२) गोत्रभाक्त्वेन बन्धुत्वं दायादत्वं च। लक्ष्मीधरस्तु बन्धुदायानाददते इति बन्धुदायादा इत्याह। तात्पर्य च पूर्वषट्कोत्तरषट्कयोः प्राधान्याप्राधान्ययोः समानम्। विर.५४९

(३) तत्र मनुविरोधः स्पष्टः। तेन कानीनपौनर्भवयोरबन्धुदायादमध्ये परिगणनात्। हारीतेन बन्धुदायादमध्ये। दत्तक्रत्रिमापविद्धेषु च व्यत्ययात्। तस्मादेवं सवर्णादिभेदेन देशाचारभेदेन वा विरोधः परिहरणीयः। व्यप्र.४८५

षड्विधपुत्राणां दायपरिमाणम्

[२]विभजिष्यमाण एकविंशं कानीनाय दद्यात्, विंशं पौनर्भवाय, एकोनविंशं द्वामुष्यायणाय, अष्टादशं क्षेत्रजाय, सप्तदशं पुत्रिकापुत्राय, इतरानौरसाय दद्युः।

(१) **व्यक.**१५४ पुत्रो+(गृहे); **विर.**५४९ (षडबन्धुदायादाः०); **व्यप्र.**४८५ (षड्बन्धुदायादाः षडबन्धुदायादाः०) न्नश्चेति (नः गृह इति) मुपागतः (मुपगतः); **व्यउ.**१४८ (षड्...श्चेति बन्धुदायादाः०); **बाल.**२।१३५ (पृ.२३४) स्वयमुत्पादितः+ (औरसः) गूढोत्पन्नश्चेति (गृहे गूढोत्पन्न इति) क्रीतो (क्रीतको); **दच.**३० (षड्बन्धुदायादा षडबन्धुदायादाः साध्व्या०).

(२) **व्यक.**१५३ नौरसाय+(पुत्राय); **गौमि.**२८।३२ (दद्युः०); **उ.**२।१४।२ गौमिवत्; **विर.**५४५ द्वामु (आमु); **पमा.**५१७ अष्टादश (अष्टादशांश च) सप्तदश (सप्तदशांश) इतरानौरसाय दद्युः (इतरदौरसाय पुत्राय दद्यात्); **नृप्र.**४० सप्त... दद्युः (सप्तदशांश पुत्रिकापुत्राय, इतरत् पारशवाय पुत्राय दद्यात्); **व्यप्र.**४४८ व्यकवत्; **व्यउ.**१४८ व्यकवत्;

(१) आमुष्यायणो गूढोत्पन्नः । इतरान् षोडशभागान् । विर.५४५

(२) एतदसवर्णनिर्गुणपुत्रविषयम् । पमा.५१७

काण्डपृष्ठसंज्ञकाः पुत्राः

शूद्रापुत्राः स्वयंदत्ता ये चैते क्रीतकास्तथा ।
सर्वे ते गोत्रिणः प्रोक्ताः काण्डपृष्ठा न संशयः ॥
आपद्गतोऽभ्युपगतो यश्च स्याद्वैष्णवीसुतः ।
सर्वे ते मनुना प्रोक्ताः काण्डपृष्ठास्त्रयः सुताः ॥
कुलं काण्डमिति ख्यातं यस्मात्पूर्वेऽपि ते विदुः ।
तत्र ज्येष्ठतरो यः स्यात्तं वै काण्डेति निर्दिशेत् ॥
स्वकुलं पृष्ठतः कृत्वा यो वै परकुलं व्रजेत् ।
तेन दुश्चरितेनासौ काण्डपृष्ठो न संशयः ॥

वैष्णवी अत्र शूद्रा । विर.५५३

आपस्तम्बः

औरसपुत्रः

सवर्णापूर्वशास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिः संबन्धः ।

(१) सवर्णा चासावपूर्वा च शास्त्रविहिता चेति कर्मधारयः । सवर्णा सजातीया, ब्राह्मणस्य ब्राह्मणीत्यादि । अपूर्वा । अनन्यपूर्वा अन्यस्मा अदत्ता, न विद्यते पूर्वः पतिरस्या इति । शास्त्रविहिता शास्त्रोक्तेन विवाहसंस्कारेण संस्कृता 'सगोत्राय दुहितरं न प्रयच्छेदि'त्यादिशास्त्रानुगुणा वा । एवभूतायां भार्यायां यथर्तु गृह्योक्तेन ऋतुगमनकल्पेन गच्छतो ये पुत्रा जायन्ते तेषा 'स्वकर्म ब्राह्मणस्ये'त्यादिना पूर्वमुक्तैः कर्मभिः संबन्धो भवति । (गच्छथ इति थकारोऽपपाठः) । उ.

(२) अपूर्वा न पूर्वः पतिर्यस्याः, वाग्दत्तापि या न भवतीत्यर्थ इति प्रकाशकारः । शास्त्रविहिता शास्त्रेण पाणिग्रहणकर्मणा विहिता संस्कृता, कर्मभिरग्निहोत्रादिभिः । ×विर. ५५४

दायेन चाऽव्यतिक्रमश्चोभयोः ।

(१) उभयोर्मातापित्रोर्दायेन च तेषा सबन्धो भवति अव्यतिक्रमश्च । च इति चेदर्थे । अव्यतिक्रमश्चेत्, यदि ते मातर पितरं च न व्यतिक्रमेयुः । व्यतिक्रमे तु दायहानिरिति । अपर आह--'उभयोरपि दायेन तेषा व्यतिक्रमो न कर्तव्यः । अवश्यं देयो दायस्तेभ्य इति' । उ.

(२) दायेनाव्यतिक्रमः सपूर्णदायेनाव्यतिक्रमस्तेषामेव कर्तव्य इत्यर्थः । विर.५५४

अनौरसपुत्रोत्पादनदोषः

पूर्ववत्यामसंस्कृतायां वर्णान्तरे च मैथुने दोषः ।

अन्येन पाणिग्रहणेन तद्वती पूर्ववती । असस्कृता विवाहसस्काररहिता । वर्णान्तर ब्राह्मणादेः क्षत्रियादिः । तेषु पूर्ववत्यादिषु मैथुने सति दोषो भवति । कस्य ? तयोरेव मिथुनीभवतोः । उ.

तत्राऽपि दोषवान् पुत्र एव ।

तत्रेति सप्तम्यास्त्रल् 'इतरा•योऽपि दृश्यन्त' इति । ताभ्यामुभा•याभ्यामपि पुत्र एवातिशयेन दोषवान् । तत्र पूर्ववत्यामुत्पन्नौ कुण्डगोलकौ 'पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलक' इति । असस्कृतायामुत्पन्नस्य नामान्तरं नास्ति । किंतु दुष्टत्वमेव । वर्णान्तरे तु जात्यन्तरम् । तत्र गौतमः 'अनुलोमाः पुनरनन्तरैकान्तरद्व्यन्तरासु जाताः सवर्णाम्बष्ठोग्रनिषाददौष्यन्तपारशवाः । प्रतिलोमास्तु सूतमागधायोगवक्षत्तृचण्डालाः' । इति । एवकारो दुहितृनिवृत्त्यर्थः । तथा च वसिष्ठः--'पतितेनोत्पादितः पतितो भवत्यन्यत्र स्त्रियाः सा हि परगामिनी तामरि-

---

समु.१३९ अष्टादश (अष्टादशाश) सप्तदश (सप्तदशाश) इतरानौरसाय दद्युः (इतरदौरसाय दद्यात्).

(१) **व्यक.**१५५ चैते (च ते), **विर.**५५२ गोत्रिणः प्रोक्ताः (शौद्रिकाः पुत्राः); **व्यप्र.**४८६ स्तया (स्तुताः).

(२) **व्यक.**१५५ यश्च (यस्तु) सुताः (तथा); **विर.**५५३.

(३) **व्यक.**१५५.

(४) **व्यक.**१५५ न संशयः (इति स्मृति); **विर.**५५२; **व्यप्र.**४८६.

(५) **आध.**२।१३।१; **हिध.**२।७; **व्यक.**१५५; उ.२।१४।२ (सव...तः०); **विर.**५५४ र्णापूर्व (र्णामपूर्वा) तायां (तां); **व्यप्र.**४६८ र्णापूर्व (र्णा) तायां (तां) कर्म (धर्म); **बाल.**२।१३५ (पृ.२३५) र्णां (र्णा) तायां (ता).

× व्यप्र विरुगतम् ।

(१) **आध.**२।१३।२, **हिध.**२।७; उ.२।१४।१ न चा (ना); **विर.**५५४ न चा (ना) (उभयो.०), **व्यप्र.**४६८ न चा (ना) यो.+(मातापित्रोः); **बाल.**२।१३५ (पृ.२३५) न चा (ना.).

(२) **आध.**२।१३।३; **हिध.**२।७.

(३) **आध** २।१३।४; **हिध.**२।७.

क्थामुपेयादि'ति। 'स्त्रीरत्नं दुष्कुलादपी'ति मनुः। उ.

क्षेत्रजः, तत्करणनिषेधश्च

उत्पादयितुः पुत्र इति हि ब्राह्मणम्।

पुत्रेभ्यो दायभाग वक्ष्यन् अन्यस्य भार्यायामन्येनोत्पादितः किमुत्पादयितुः? आहोस्वित् क्षेत्रिण इति विचारे निर्णयमाह—उत्पादयितुरिति। उ.

अथाप्युदाहरन्ति—

इदानीमेवाहं जनकः स्त्रीणामीर्ष्यामि नो पुरा।
यदा यमस्य सादने जनयितुः पुत्रमब्रुवन्।
रेतोधाः पुत्रं नयति परेत्य यमसादने।
तस्माद्भार्यां रक्षन्ति बिभ्यन्तः पररेतसः।
अप्रमत्ता रक्षथ तन्तुमेतं मा वः क्षेत्रे परबीजानि वाप्सुः। जनयितुः पुत्रो भवति साम्पराये। मोघं वेत्ता कुरुते तन्तुमेतमिति।

(१) न केवल ब्राह्मणमेव। वैदिकगाथा अप्यत्रोदाहरन्तीत्याह—अथाप्युदाहरन्तीति। जनयितुः पुत्रः क्षेत्रिणो वेति विवादे पराजितस्य क्षेत्रिणो वचनं एतावन्त कालमह जनको मन्यमानः इदानीमेव स्त्रीणामीर्ष्यामि परपुरुषसंसर्गं न सहे। कदा इदानीम्। यदा यमस्य सादने पितृलोके जनयितुः पुत्रो भवति पुत्रकृत्यं परलोकगतस्य जनयितुरेव न क्षेत्रिण इत्यब्रुवन् धर्मज्ञाः। उक्त एवार्थः किंचिद्विशेषेणोच्यते—रेतोधाः बीजप्रदः पुत्रं नयति पुत्रदत्तं पिण्डादिकमात्मानं नयति प्रापयति। परेत्य मृत्वा। यमसादने यमलोके। तस्मात्कारणात् भार्या रक्षन्ति पररेतसो बिभ्यन्तः। बिभ्यतः छान्दसो नुम्। अतो यूयमप्यप्रमत्ता अवहिता भूत्वा एतं तन्तुं प्रजासंतानं रक्षथ। लोडर्थे लट्। रक्षतेत्यर्थः। किमर्थम्? वः युष्माकं क्षेत्रे परबीजानि पररेतासि मा वाप्सुः। व्यत्ययेनाऽऽय कर्मणि कर्तृप्रत्ययः। मा वाप्सत उप्तानि मा भूवन्। मोप्येरन्। कथमिति? (अपर आह—परशब्दाज्जसो लुक। परे पुरुषाः वः क्षेत्रे बीजानि मा वाप्सुरिति।) यस्मात् साम्पराये परलोके जनयितुरेव पुत्रफलं भवति, वेत्ता परिणेता क्षेत्री तु एतं तन्तुं मोघं निष्प्रयोजनं कुरुते आत्मसात्करोति। इतिशब्दो गाथासमाप्तौ। एतच्च क्षेत्रिणोऽनुज्ञामन्तरेण पुत्रोत्पादनविषयम्। यदा तु क्षेत्री वन्ध्यो रुग्णो वा प्रार्थयते मम क्षेत्रे पुत्रमुत्पादयेति, यदा वा संतानक्षये विधवा नियुङ्क्ते यथा विचित्रवीर्यस्य क्षेत्रे सत्यवतीं व्यासेन। तदुत्पन्नः पुत्र उभयोरपि पुत्रो भवति—बीजिनः क्षेत्रिणश्च। द्व्यामुष्यायणश्च स भवति। तथा चाचार्य एवाह—'यदि द्विपिता स्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षयेदि'ति। याज्ञवल्क्योऽप्याह—'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥' इति। नारदोऽपि—'द्व्यामुष्यायणको दद्यादुद्वाभ्यां पिण्डोदके पृथक्। रिक्थादर्धं समादद्याद् बीजक्षेत्रवतोस्तथा॥' इति। उ.

(२) तन्तुं पुत्रपौत्रादिपरम्पराम्। विर.५७७

[1]दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषाम्।

यदि पूर्वेषामादिषु मैथुने दोषः कथ तर्हि उतथ्यभारद्वाजौ व्यत्ययस्य भार्ये जग्मतुः वसिष्ठश्चण्डालीमक्षमालाम्। प्रजापतिश्च स्वा दुहितरम्। तत्राह — दृष्ट इति। सत्र दृष्टोऽयमाचारः पूर्वेषाम्। स तु धर्मव्यतिक्रमः, न धर्मः, गृह्यमाणकारणत्वात्। न चैतावदेव, साहस च पूर्वेषा दृष्टम्। यथा जामदग्न्येन रामेण पितृवचनादविचारेण मातुः शिरश्छिन्नम्। उ.

[2]तेषां तेजोविशेषेण प्रत्यवायो न विद्यते।

किमिदानी तेषामपि दोषः? नेत्याह—तेषामिति। तादृश हि तेषा तेजः यदेवविधैरपि पाप्मभिर्न प्रत्यवयन्ति। 'तद्यथेषीकातूलमग्नौ प्रोत प्रदूयेत एवेहाऽस्य पाप्मानः प्रदूयन्ते' इति श्रुतेः (छाउ.५।२४)। उ.

तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरः।

न चैतावताऽर्वाचीनानामपि तथा प्रसग इत्याह—तदन्वीक्ष्येति। तदिति नपुंसकमनपुंसकेनेत्येकशेष एकवद्भावश्च। त व्यतिक्रम तच्च साहसमन्वीक्ष्य दृष्ट्वा स्वयमपि तथा प्रयुञ्जानोऽवर इदानीन्तनः

(१) आध.२।१३।५, हिध.२।७; गौमि.१८।९.

(२) आध.२।१३।६; हिध.२।७ जनकः स्त्रीणामीर्ष्यामि (ईर्ष्यामि स्त्रीणां जनकः) वेत्ता (वप्ता); व्यक.१५७-१५८ (अथा...रेतसः०) रक्षथ (रक्ष) तन्तुमेत (तन्तु); विर.५७७ (अथा...रेतसः०) रक्षथ (रक्ष) वः (च) वेत्ता (वप्ता).

(१) आध.२।१३।७, हिध.२।७.

(२) आध.२।१३।८; हिध.२।७.

(३) आध.२।१३।९; हिध.२।७.

सीदति प्रत्यवैति । न ह्यग्निः सर्वं दहतीत्यस्माकमपि तथा शक्तिरिति । उ.

अपत्यदानक्रयनिषेधः

दानं क्रयधर्मश्चापत्यस्य न विद्यते ।

पुत्रप्रसंगेनाह—दानमिति । दानग्रहणेन विक्रयोऽपि गृह्यते, त्यागसामान्यात् । क्रयधर्म इति च प्रतिग्रहस्याऽपि ग्रहणम् । धर्मग्रहणात् स्वीकारसामान्याच्च । अपत्यस्य दानप्रतिग्रहक्रयविक्रया न कर्तव्याः । द्वादशविधेषु पुत्रेषु दत्तक्रीतयोरपि पुत्रयोर्मन्वादिभिः पठितत्वान्नाऽयं सामान्येन प्रतिषेधः । किं तर्हि ? ज्येष्ठपुत्रविषयः, एकपुत्रविषयः, स्त्रीविषयो वा । तथा च वसिष्ठः— 'न ज्येष्ठं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा । न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सतानाय पूर्वेषाम् । न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्राऽनुज्ञानाद्भर्तुः । पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राज्ञे निवेद्य निवेशनस्य मध्ये अग्निमुपसमाधाय संपरिस्तीर्य व्याहृतिभिर्हुत्वा अदूरबान्धव सनिकृष्टमेव प्रतिगृह्णीयादि'ति । विश्वजिति च सर्वस्वदाने गवादिवदपत्यं न देयमिति । विक्रयस्तु सर्वत्र निषिद्धः । तत्र उपपातकेषु याज्ञवल्क्य आह— 'नास्तिक्यं व्रतलोपश्च सुताना चैव विक्रयः' । इति । बह्वृचब्राह्मणेऽपि शुनश्शेपाख्याने दृश्यते— 'स ज्येष्ठं पुत्र निगृह्यान उवाचे'त्यादि । पुत्रप्रकरणे अपत्यशब्दोपादानमपि ज्येष्ठपुत्रविषयत्वस्य लिङ्गम् । न पतन्त्यनेनेत्यपत्यमिति । 'ऋणमस्मिन् संनयत्यमृतत्व च गच्छति । पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥' इति । उ.

बौधायनः

औरसादित्रयोदशपुत्रविधिः तल्लक्षणानि च, तत्र औरसः

सवर्णायां संस्कृतायां स्वयमुत्पादितमौरसं पुत्रं विद्यात् ।

(१) सवर्णा द्विजस्य द्विजा, शूद्रस्य शूद्रा, न तु ब्राह्मणस्य ब्राह्मणी क्षत्रियस्य क्षत्रिया, अन्यथा ब्राह्मणपरिणीतक्षत्रियापुत्रादेर्द्वादशपुत्रान्तर्भावो न स्यादिति पारिजातः । ×विर.५५४

(२) 'औरसे तूत्पन्ने' इत्युक्तम्, तत्र सर्वस्यौरसनिमित्तग्रहणे प्राप्ते परिभाषते—सवर्णायामिति । पाणिग्रहणेन शास्त्रलक्षणेन तस्या स्वयमुत्पादित औरसो न क्षेत्रजादिः । वौवि.

अथाप्युदाहरन्ति —

अङ्गादङ्गात्संभवसि हृदयादभिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदः शतमिति ॥

दौहित्रः

अभ्युपगम्य दुहितरि जातं पुत्रिकापुत्रमन्यं दौहित्रम् ।

(१) स्मृतिषु दौहित्रपद अपुत्रिकाजातपर नियतम्। यथा बौधायनः—अभ्युपगम्येति । अन्य दौहित्रम् ।

दा.१८१

(२) विज्ञानेश्वरस्तु बौधायनः—अभ्युपगम्येति । अभ्युपगम्य सविदमस्या यो जायते पुत्रः स मे पुत्र इत्याकारा कृत्वा, दौहित्र दुहितुरपत्य पुत्रिकापुत्रसज्ञकं पुत्र विद्यात् । अन्यमिति औरसापेक्षया । विर.५६०

(३) एतत्प्रसगात् पुत्रप्रतिनिधीनाह—अभ्युपगम्येति । अन्यत्वमौरसापेक्षया । तस्यास्य गौणत्वप्रदर्शनार्थम् । अन्य दौहित्रमित्यस्यापरा व्याख्या—अन्यः असवादपूर्वक दत्तायां जातः त दौहित्रमेव विद्यात् । *वौवि.

अथाप्युदाहरन्ति —

आदिशेत्प्रथमे पिण्डे मातरं पुत्रिकासुतः ।
द्वितीये पितरं तस्यास्तृतीये च पितामहमिति ॥

पुत्रिकापुत्रेत्येवंलक्षणः पुत्रो मातामहस्यैवेत्येतत्प्रकटयति—अथाप्युदाहरन्तीति । पिण्डपितृयज्ञे क्रियमाणे प्रथम पिण्ड मातरमुद्दिश्य दद्यात् । स्त्रियाः

---

(१) आध.२।१३।१०; हिध.२।७.

(२) बौध.२।२।१४; ममु.९।१६६ (स्वय०) रस (रस); व्यक १५५; विर.५५४ (पुत्र०), दीक ४४ विरवत्; स्मृसा.६८ विद्यात् (जानीयात्); मच.९।१६६ (पुत्र०) शेष स्मृसावत्; चन्द्र.१७४ स्मृसावत्; व्यप्र.४६८; बाल. २।१३८, २।१३५ (प २३५)

× व्यप्र. विरगतम् । * शेष विरवत् ।

(१) बौध.२।२।१५,१६ दभि (दधि); व्यक.१५५ स(सं); विर.५५४ वसि (वति) स (स); व्यप्र.४६८ जीव (जीवेत).

(२) बौध.२।२।१७; दा.१८१; व्यक.१५६ मन्यं (मस्यां); विर.५६०.

(३) बौध.२।२।१८,१९.

पिण्डदानं वचनप्रामाण्याद्भवति । पितृस्थानीया हि सा । द्वितीये मातुः पितरमात्मनो मातामहम् । तृतीये तस्याः पितामहमात्मनो मातामहपितरम् । यद्वा मातर परिहाप्यैव पिण्डदानम् । कुत एतत् ? कर्मान्ते प्रदर्शनात् । तत्र ह्युक्तम्—कथं खलु पुत्रिकापुत्रस्य पिण्डदानं भवतीति पृष्ट्वा एतत्तेऽमुष्यै तत मम पितामह, ये च त्वामनु एतत्तेऽमुष्यै पितामह मम प्रपितामह, ये च त्वामनु एतत्तेऽमुष्यै प्रपितामह मम प्रप्रपितामह ये च त्वामन्विति अमुष्यै अमुष्या इति स्वमातरं निर्दिशति । बौवि.

क्षेत्रजः

मृतस्य प्रसूतो यः क्लीबव्याधितयोर्वाऽन्येनानुमते स्वे क्षेत्रे स क्षेत्रजः । स एष द्विपिता द्विगोत्रश्च द्वयोरपि स्वधारिक्थभाग्भवति ।

(१) अस्यार्थः । क्लीवादेः स्वे क्षेत्रे तदनुमतोऽन्येन प्रसूतः क्षेत्रजः । दा.४८

(२) अन्येनापुत्रेण देवरादिना प्रसूतो य इत्यन्वयः । द्विपितेति कपोऽभावः समासान्तविधेरनित्यत्वात् स द्विगोत्रो द्वयोरपि गोत्रभाक् । स्वधा पितृकर्म । विर.५५६

(३) एतच्चापुत्रबीजिविषयम् । स्मृसा. ६८

(४) मृतस्य स्वे क्षेत्रे प्रसूत इति संबन्धः । स्वक्षेत्रे स्वपाणिग्रहणादिना संस्कृते । कार्यानभिज्ञः क्लीवः तृतीया प्रकृतिः । व्याधितस्तीव्ररोगेण प्रजोत्पादनासमर्थो गृह्यते । एषा त्रयाणा भार्यायामन्येन भ्रात्रा पित्रा वाऽनुमतेन देवरेणोत्पादितः क्षेत्रजो भवति । स एष क्षेत्रजः द्विपिता द्वौ पितरौ यो जनकः क्षेत्रवाश्च । द्विगोत्रत्वमप्यस्य तद्गोत्राभ्यामेव । गोत्रभेदे सत्यस्य प्रयोजनम्—स्वधा पिण्डोदकादि । रिक्थ मृतस्य यदतिरिच्यते द्रव्यम् । बौवि.

अथाप्युदाहरन्ति—

द्विपितुः पिण्डदानं स्यात्पिण्डे पिण्डे च नामनी ।
त्रयश्च पिण्डाष्षण्णां स्युरेवं कुर्वन्न मुह्यतीति ॥

(१) न मुह्यति न दुष्यतीत्यर्थः । विर.५५९

(२) शुश्रूषाविवाहपिण्डदानदायग्रहणस्योपयोगमाह—अथाप्युदाहरन्तीति । नामनी उत्पादयितुः क्षेत्रिणश्च । तयोः सह पिण्डदाने सति त्रय एव पिण्डाः षण्णा दद्युः । 'पित्रे पितामहाय' इति च वचनात् । बौवि.

दत्तः

मातापितृभ्यां दत्तोऽन्यतरेण वा योऽपत्यार्थे परिगृह्यते स दत्तः ।

यो मातापितृभ्या मात्रा पित्रा वा दत्तः । बौवि.

कृत्रिमः

सदृशं यं सकामं स्वयं कुर्यात्स कृत्रिमः ।

सादृश्य जात्यादिना । सकाम अस्याहं पुत्रो भविष्यामि यदि मा ग्रहीष्यतीति यो मन्यते, पुत्रार्थी च स्वयमेव पूजापूर्वक यदि गृह्णाति । एवं गृहीतः कृत्रिम उच्यते । बौवि.

गूढजः

गृहे गूढोत्पन्नोऽन्ते ज्ञातो गूढजः ।

गृहे अतिगुप्तायामपि स्त्रियाममुनोत्पादितोऽयमिति पूर्वमज्ञातः । पश्चात्कालान्तरे येन केनचित् व्यभिचारादिना कारणेनास्यामुत्पादितोऽय पुत्र इति विज्ञायते तथापि गूढजः इत्यभिप्रायः । अत्र गृहग्रहण प्रव्रजितायां गूढोत्पन्नस्य गूढ इति संज्ञा मा भूदित्येतदर्थम् । बौवि.

---

(१) **बौध.**२।२।२०,२१; **दा.**४८ (मृतस्य च प्रसूतो यः क्लीबस्य व्याधितस्य वा । अन्येनानुमतो वा स्यात् स्वे क्षेत्रे क्षेत्रजः स्मृतः ॥ स एव द्विपितृको द्विगोत्रश्च द्वयोरपि स्वधाकरो रिक्थभाग्भवति ।); **व्यक.**१५५ (मृतस्य प्रसूतो य. क्लीबस्य व्याधितस्य च अन्येनानुमतस्य क्षेत्रे स क्षेत्रजः स एव द्विपिता द्विगोत्रश्च द्वयोः ऋक्थभाग् भवति ।); **विर.**५५६ मृत...योर्वा (मृतस्य च प्रसूतो यः क्लीबस्य व्याधितस्य वा) स्वे (स्व) एष (एव); **स्मृसा.**६८(=)(मृतस्य...क्षेत्रजः०) एष (एव), **चन्द्र.**१७४ (मृतस्य...त्रजः०) एष (एव) पिता (पितृको) (रिक्थ०); **व्यप्र.**४७४ मृतस्य...क्षेत्रजः (मृतस्य प्रसूतो यः क्लीबस्य व्याधितस्य वा तेनानुमतस्य क्षेत्रजः) एष (च); **विच.**६६ दावत्.

(१) **बौध.**२।२।२२, २३; **व्यक.**१५६; **विर.**५५९; **व्यप्र.**४७४ च ना (स्वना) मुह्य (दुष्य).

(२) **बौध.**२।२।२४.

(३) **बौध.**२।२।२५; **विर.**५७२ य सकाम (सकाम य) (स्वयं०).

(४) **बौध.**२।२।२६.

अपविद्धः

मातापितृभ्यामुत्सृष्टोऽन्यतरेण वा योऽपत्यार्थे परिगृह्यते सोऽपविद्धः ।

अत्राऽपि सदृश इत्यनुवर्तते । उत्सृष्टस्त्यक्तः ।

बौवि.

कानीनः

असंस्कृतामनतिसृष्टां यामुपयच्छेत्तस्यां यो जातः स कानीनः* ।

(१) अनतिसृष्टा अदत्ता । विर.५६५

(२) अनेन ज्ञायते गूढजः संस्कृताया जात इति । अनूढासंस्कृताम्राहुः । अनतिसृष्टा अनभ्युपगता गुरुभिः अतिसृष्टायामप्यसंस्कृताया संस्कृतायामप्यनतिसृष्टाया स एव । सोऽय सदृश्यामुत्पादितो मातामहस्य पुत्रः । बौवि.

सहोढः

या गर्भिणी संस्क्रियते विज्ञाता वाऽविज्ञाता वा तस्यां यो जातः स सहोढः ।

या गूढगर्भिणी सती परिणीयते तस्या यो जातः स सहोढो नाम । वोढुश्चाय पुत्रः । विज्ञाताया तु सस्कार एनोऽस्ति । बौवि.

क्रीतः

मातापित्रोर्हस्तात्क्रीतोऽन्यतरस्य वा योऽपत्यार्थं परिगृह्यते स क्रीतः ।

स्वद्रव्य प्रदायेति शेषः । बौवि.

पौनर्भवः

क्लीबं त्यक्त्वा पतितं वा याऽन्यं पतिं विन्देत्तस्यां पुनर्भूर्वा यो जातः स पौनर्भवः ।

मृतोऽप्यत्राऽभ्यनुज्ञातः । तथा च वसिष्ठः—'मृते वा सा पुनर्भूर्भवति' इति । बौवि.

स्वयंदत्तः

मातापितृविहीनो यः स्वयमात्मानं दद्यात् स स्वयंदत्तः ।

स्वस्वत्वनिवृत्तिः परस्वत्वापादन च दानम् । अत्रापि शरीरेन्द्रियाणामात्मीयत्वाद्दानव्यवहारः । बौवि.

निषादपारशवौ

द्विजातिप्रवराच्छूद्रायां जातो निषादः । कामात्पारशव इति पुत्राः ।

द्विजातिप्रवरो ब्राह्मणः । द्विजातिप्रवरादेव पूर्वः क्रमोढायाः पुत्रः । अय तु कामादूढायाः । अनन्तरप्रभवप्रकरणे तयोरपि पुनर्ग्रहणमनयोः पुत्रकार्येष्वपि प्रापणार्थम् । बौवि.

सप्त रिक्थभाजः षडगोत्रमात्रभाजश्च पुत्राः

अथाऽप्युदाहरन्ति—

औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तकृत्रिमौ ।
गूढजं चापविद्धं च रिक्थभाजः प्रचक्षते ॥

अथैतान् पुत्रान्विविधान्विविनक्ति—अथाप्युदाहरन्ति—औरसमिति । औरसादयः गोत्रभाजश्च रिक्थभाजश्च । रिक्थं द्रव्यम् । कानीनादयश्च तद्गोत्रभाजः । पारशवः अभाग एव विष्ठावत् । अस्मात्सूत्रादिदमप्यवगम्यते—निषादकन्याऽपि सुसमीक्ष्याऽसगोत्रादेव वोढव्या । अन्यथा सगोत्रागमनप्रसगादिति । एते पुत्रिकापुत्रादयः काशकुशस्थानीयाः पुत्रप्रतिनिधयो मन्तव्याः । अवश्यकरणीयत्वात् पुत्रोत्पत्तेः । उक्त च 'पुत्राश्चोत्पाद्य धर्मतः' इति । योषिताऽपि पुत्रवत्या भवितव्य 'अवीरायाश्च योषितः' इत्यभोज्यान्नप्रकरणे दर्शनात् । बौवि.

कानीनं च सहोढं च क्रीतं पौनर्भवं तथा ।

---

* व्यप्र.व्याख्यान 'पितृवेश्मनि कन्या' इति मनुवचने द्रष्टव्यम् ।

(१) बौध.२।२।२७.

(२) बौध.२।२।२८; विर.५६५ यच्छे (गच्छे), व्यप्र. ४७५ विरवत्. (३) बौध.२।२।२९.

(४) बौध २।२।३० रस्य (रेण); व्यक.१५७ (परि०) क्रीतः (क्रीतकः); विर. त्क्रीतोऽन्य (दन्य) र्थे परिगृ (र्थं गृ); व्यप्र.४७८ व्यकवत्.

(५) बौध.२।२।३१.

(१) बौध २।२।३२.

(२) बौध.२।२।३३,३४, व्यक.१५८ कामा (लाभा), विर.५७४ (निषादः०) (पुत्रा.०), स्मृसा.७० विरवत्; चन्द्र. १७६ विरवत्; व्यप्र ४८० विरवत्, बाल.२।१३५(पृ.२३५) विरवत्.

(३) बौध.२।२।३५,३६; व्यक.१५४ (अथा...न्ति०); विर.५५० (अथा...न्ति०) ढज चा (ढ चैवा); विचि.२३१ विरवत्; व्यनि. व्यकवत्; व्यप्र.४८५ चाप (वाप) शेष व्यकवत्; दच.३१ विरवत्.

(४) बौध.२।२।३७; व्यक.१५४; मसु.९।१५८;

स्वयंदत्तं निषादं च गोत्रभाजः प्रचक्षते* ॥

औपजङ्घनिमते औरसेतरपुत्रनिषेधः

[1]तेषां प्रथम एवेत्याहौपजङ्घनिः ।

तदेतत्परमतेनोपन्यस्यति स्म तेषामिति । औपजङ्घनिराचार्यो मन्यते स्म । प्रथमः औरस एव पुत्रो न पुत्रिकापुत्रादय इति । वौवि.

[2]इदानीमहमीर्ष्यामि स्त्रीणां जनक नो पुरा ।
यतो यमस्य सदने जनयितुः पुत्रमब्रुवन् ॥

स हि जनकं राजानं प्रकृत्यैवमुवाच—यमः कृतयुगे मन्दिरे ऋषीनाहूय पप्रच्छ—परदारेषूत्पादितः पुत्रः किं जनयितुरिति ? उताहो क्षेत्रिण इति । एवं पृष्टे ते प्रजा जनयितुरेवेति निश्चित्य अब्रुवन् । तदिदमाह—पुरा यमस्य सदने जनयितुः पुत्रमब्रुवन् । इदानीमहमित्यादि । सम्प्रति अहमीर्ष्यामीति न सहे । स्त्रीणामिति द्वितीयार्थे षष्ठी । अथवा स्वार्थ एव । स्त्रीणा चरन्त पुरुष नेर्ष्यामीत्यर्थः । हे जनक पुरा यस्माद्यमस्य धर्मराजस्य सदने स्थाने वेश्मनि जनयितुरेव पुत्रमब्रुवन्नृषयो, न क्षेत्रिण इति । न हि यमराजसकाशे निश्चितोऽर्थो मिथ्या भवितुमर्हतीत्यौपजङ्घनेर्मुनेर्मतम् । वौवि.

[3]रेतोधाः पुत्रं नयति परेत्य यमसादने ।
तस्माद्भार्यां रक्षन्ति बिभ्यन्तः पररेतसः ॥

रेतो दधातीति रेतोधाः बीजं पुत्र प्रकृतं नयति भुङ्क्ते पुत्रफलं लभते । परेत्य मृत्वा यमसादने पुण्यपापफलोपभोगस्थाने । नैव क्षेत्री । यस्मादेवं तस्मात्पररेतसो बिभ्यन्तो भार्या रक्षन्ति । वौवि.

[4]अप्रमत्ता रक्षथ तन्तुमेतं मा वः क्षेत्रे पर-
बीजानि वाप्सुः । जनयितुः पुत्रो भवति साम्पराये
मोघं वेत्ता कुरुते तन्तुमेतमिति ॥

एव जनकादिः अन्यशिष्यान्प्रत्याह—अप्रमत्तेति । अन्ये बीजवपन मा कार्षुः । तत्र को दोषः ? जनयितुः पुत्रो भवति साम्पराये परलोकेऽपि यदनेन पिण्डोदकदानादि जनयितुरेव भवेत्, न क्षेत्रिण इति । ननु भार्यायाः पुत्रस्य च रक्षणपोषणचिकित्सादि सर्व क्षेत्रिणैव क्रियते, तत्कथमस्मिन् पक्षे इति ? उच्यते—मोघ वेत्ता कुरुते तन्तुमेतमिति । वेत्ता लब्धा क्षेत्रस्य कुरुते एत तन्तु मोघ कुरुते निष्फलोऽस्य प्रयासः इत्यभिप्रायः । इतिशब्द औपजङ्घनेर्मतोपसंहारार्थः । वौवि.

वसिष्ठः

पुत्रमद्विमा । बहुभ्रातृणा तत्पत्नीना च भ्रातृपुत्रेण चरितार्थता ।

[5]ऋणमस्मिन्संनयति अमृतत्वं च गच्छति ।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥
[6]अनन्ताः पुत्रिणो लोकाः, नापुत्रस्य लोकोऽस्तीति श्रूयते ।
[7]प्रजाः सन्त्वपुत्रिण इत्यभिशापः ।
[8]अप्रजाः सन्त्वदनाः ।

अप्रजा अपुत्राः सन्तु भवन्तु अदनाः अदनशीलाः राक्षसाः । नूनमय महानपकारो येन राक्षसो नाम गम्यत इति तात्पर्यम् । शत्रूणामपुत्रत्वं हि महान् विनाशः, तेनासाविष्यते । विर.५८५

[9]प्रजाभिरग्ने अमृतत्वमश्यामित्यपि निगमो भवति ।

पूर्वोऽभिशापः शत्रुविषयः, उत्तरस्त्वाशीःस्वरूपः, आत्मविषय इति प्रकाशकारः । विर.५८५–५८६

[10]पुत्रेण लोकान् जयति पौत्रेणाऽऽनन्त्यमश्नुते ।

---

* व्याख्यान पूर्वस्मिन्नेव श्लोके द्रष्टव्यम् ।

विर.५५० निषाद च (च शौद्र च); **विचि.**२३१; **व्यनि.**; **मच.**९।१५९; **व्यप्र.**४८५; **दच.**३१.

(१) **बौध.**२।२।३८. (२) **बौध.**२।२।३९.
(३) **बौध.**२।२।४०. (४) **बौध.**२।२।४१.

(१) **वस्मृ.**१७।१ (ख) च्चेज्जी (च्च जी); **व्यक.**१५९ गच्छ (विन्द); **विर.**५८४ व्यकवत्, मनुवसिष्ठौ; **व्यप्र.**५०६ (=) च (स); **बाल.**२।१३५ (पृ.२१९).

(२) **वस्मृ.**१७।२ णो (णा); **व्यक.**१५९; **विर.**५८५; **बाल.**२।१३५ (पृ.२२०).

(३) **वस्मृ.**१७।३ (ख) त्यभि (त्यपि); **बाल.**२।१३५ (पृ.२२०) (अप्रजा. सन्तु पुत्रिण इत्यभिप्रायः).

(४) **विर.**५८५.

(५) **वस्मृ.**१७।४ (ख) म्रे+(तु), **व्यक.**१५९; **विर.**५८५; **बाल.**२।१३५ (पृ.२२०).

(६) **वस्मृ.**१७।५ (ख) विष्ट (पिष्ट); **दा.**१६१ विष्ट (पिष्ट); **विर.**५८५ दावत्; **व्यप्र.**५०६; **विता.**३८४; **बाल.**२।१३७

अथ पुत्रस्य पौत्रेण ब्रध्नस्याऽऽप्नोति विष्टपम् ॥
इति ।

बहूनामेकजातानामेकश्चेत्पुत्रवान्नरः ।
सर्वे ते तेन पुत्रेण पुत्रवन्त इति श्रुतिः ॥
बह्वीनामेकपत्नीनामेका पुत्रवती यदि ।
सर्वास्तास्तेन पुत्रेण पुत्रवत्य इति श्रुतिः ॥

औरसादिमुख्यगौणपुत्राणां विधि., तल्लक्षणानि च । औरसादि-षट्दायादपुत्रविचारः । औरसः ।

द्वादश त्वेव पुत्राः पुराणदृष्टाः । स्वयमुत्पादितः स्वक्षेत्रे संस्कृतायां प्रथमः ।

प्रथमो मुख्यः । तेन स एव पुत्रशब्दस्य मुख्योऽर्थः । क्षेत्रजादिस्तु गौणः । अप.२।१२८

क्षेत्रजः

तदलाभे नियुक्तायां क्षेत्रजो द्वितीयः ।

नियुक्ताया पत्न्या वा गुरुभिर्वा, द्वितीयः औरसादीपन्न्यूनः । विर.५५५

क्षेत्रिणः पुत्रो जनयितुः पुत्र इति विवदन्ते । तत्रोभयथाऽप्युदाहरन्ति । यद्यन्यो गोषु वृषभो वत्सानां जनयेच्छतम् । गोमिनामेव ते वत्सा मोघं स्यन्दितमार्षभम् ॥

अनियुक्तायामुत्पन्न उत्पादयितुः पुत्रो भवतीत्याहुः ।

स्याच्चेन्नियोगिनो रिक्थम् । रिक्थलोभान्नास्ति नियोगः* । प्रायश्चित्तं वाऽप्युपदिश्य नियुञ्जयादित्येके ।

पुत्रिका

तृतीयः पुत्रिका विज्ञायते । अभ्रातृका पुंसः पितृनभ्येति प्रतीचीनं गच्छति पुत्रत्वम् +।

(१) द्वितीयः पुत्रः पुत्रिकैवेत्यर्थः । ×मिता.२।१२८

(२) तृतीयः पुत्रः पुत्रिका औरसपुत्रतुल्या तत्कार्यकारित्वात्प्रतीचीनं गच्छति प्रत्यावृत्त पुत्रत्व पितृवशाभिमुख गच्छतीत्यर्थः । विर.५५९

(३) मिताटीका—वसिष्ठेन तृतीयत्वेन पुत्रिका गणिता न याज्ञवल्क्येन । सुबो.२।१३२

तत्र श्लोकः ।

---

* मिता.व्याख्यान 'पत्नीं दुहितरश्चैव' इति याज्ञवल्क्यवचने द्रष्टव्यम् । अप., व्यप्र., व्यउ मितागतम् ।

+ विश्व.व्याख्यान 'षष्ठ तु क्षेत्रजस्याश' इति मनुवचनेन द्रष्टव्यम् ।

× सवि., वीमि., व्यप्र. मितागतम् ।

(१) **वस्मृ.**१७।५६-५८ (रिक्थ०): (ख) रिक्थम् (दृष्ट्वा) (रिक्थ०); **मिता.**२।१३६ (स्याच्चे ..क्थम्०) (प्राय...त्येके०); **अप.**२।१३६ मितावत्; **विर.**४४९ स्याच्चे...क्थम् (सा चेन्नियोगमिच्छेद् वृत्त) (रिक्थ०) लोभा (लाभा) वाऽप्यु (चाऽप्य); **व्यप्र.**४९६ मितावत्; **व्यउ.**१५२ मितावत्; **समु.**१३८ मितावत्.

(२) **वस्मृ.**१७।१५,१६; **विश्व.**२।१३६ पुत्रिका + (पुत्रः) (विज्ञा...त्वम्०); **मिता.**२।१२८ (द्वितीयः पुत्रिकैव) एतावदेव, **अप.**२।१३६ (अभ्रा...त्वम्०), **व्यक.**१५६; **स्मृच.**२९५ तृतीयः + (पुत्रः) शेष अपवत्; **विर.**५५९ तृका + (हि), **सुबो.**२।१२८ (तृतीयः पुत्रिकैव) एतावदेव : २।१३२ (तृतीयः पुत्र पुत्रिकैव) एतावदेव, **सवि.**३९१ सुबो. (२।१२८) वत्, गौतमः; **वीमि.**२।१३६ (तृतीया पुत्रिका) एतावदेव, **व्यप्र.**४६९ (द्वितीयः पुत्र. पुत्रिकैव) एतावदेव : ५१९ स्मृचवत्; **व्यम.**४७ सवित्; **विता.**३५९ (तृतीयः पुत्रिकैव वा पुत्रः) एतावदेव; **बाल.**२।१३२, २।१३५ (पृ. २३४) अपवत् : २।१३५ (पृ.२२३) सवित्; **समु.**१३८ स्मृचवत् .

(३) **वस्मृ.**१७।१७ (ख) (वस्त०)

पुत्रस्य पौत्रेण (पौत्रस्य पुंत्रेण), **सेतु.**४१, **विभ.**७२ (=).

(१) **वस्मृ.**१७।१०,११.

(२) **वस्मृ.**१७।१२,१३ त्वेव (इत्येव) (ख) द्वादश त्वेव (ब्रह्मना द्वादश ह्येव), **अप** २।१३१ (द्वाद...दृष्टाः०), **व्यक.** १५५ त्वेव (एव) प्रथम. (औरसः); **विर.**५५३ स्व (स्वे) ताया (ते औरसः), **स्मृसा.**६८ (द्वाद दृष्टा.०) स्व...मः (सस्कृताया स्वे क्षेत्रे चौरसः) गौतमः; **चन्द्र.**१७८ (द्वाद दृष्टाः०) स्व...म. (सुसस्कृताया स्वक्षेत्रे औरसः) गौतमः, **व्यप्र.**४६७ श त्वे (शे) तः (ता.) या + (औरसः), **बाल.** २।१३५ (पृ.२३४) श त्वे (शे) या + (औरसः).

(३) **वस्मृ.**१७।१४; **व्यक.**१५५, **विर.**५५५ लाभे (भावे), **स्मृसा.**६८ विरवत्, बृहस्पति., **बाल.**२।१३२:२।१३५ (पृ.२३४).

(४) **वस्मृ.**१७।६; **व्यक.**१५८; **विर** ५७७.

(५) **वस्मृ.**१७।७,८ (ख) वत्सा...तम् (वत्सान् जनयते सुतान्) स्यन्दि...म् (स्यन्दनमोक्षणम्).

(६) **वस्मृ.**१७।५९; **सुबो.**२।१३२

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् । अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति *॥

पुत्रिकापुत्रस्यैव पुत्रत्व वदति तेन पुत्रिकाया-स्तत्पुत्रस्य च पुत्रत्वं तत्र मनुविरोधात् पिण्डदान-मात्रयोगात् पुत्रत्वमस्य गौणं तद्द्वारेणैव पुत्रिकायाः पिण्डदातृत्वात् एकस्य स्वतोऽन्यस्य तद्योगात् । दा.१४५

पौनर्भवः

पौनर्भवश्चतुर्थः ।

या कौमारं भर्तारमुत्सृज्यान्यैः सह चरित्वा तस्यैव कुटुम्बमाश्रयति सा पुनर्भूर्भवति । या च क्लीबं पतितमुन्मत्तं वा भर्तारमुत्सृज्यान्यं पति विन्दते मृते वा सा पुनर्भूर्भवति ।

कानीनः

कानीनः पञ्चमः । या पितृगृहेऽसंस्कृता कामा-दुत्पादयेत्, मातामहस्य पुत्रो भवतीत्याहुः । अथा-प्युदाहरन्ति ।

अप्रत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः ।

* गौमि.व्याख्यान 'समधा चेतरदि'त्यादि गौतमवचने द्रष्टव्यम् ।

(१) **वस्मृ.**१७।१८; **मस्मृ.**९।१२७ इत्यस्योपरिष्टात् प्रक्षिप्तश्लोकोऽयम्; **मिता.**२।१२८; **दा.**१४५; **अप.**२।१३१; **गौमि.**२८।१६ यो जायते (जनिष्यते); **विर.**५६२; **रत्न.** १४२ भवेदिति (भविष्यति); **व्यनि.**; **स्मृचि.**३१; **सवि.** ३९१:४२७(८) भवेदिति (भविष्यति) उक्त.; **वीमि.**२।१३४ भवेदिति (भविष्यति)उक्त.; **व्यप्र.**४६८: ४८१ उक्त.; **व्यम.** ४७ वीमिवत् ; **विता.**३५९; **राकौ.**४५४ भवेदिति (भवि-ष्यति) उक्त.; **बाल.**२।१३५ (पृ.२२२); **समु.**१३७.

(२) **वस्मृ.**१७।१९; **व्यक.**१५७; **व्यप्र.**४७६; **बाल.** २।१३२,२।१३५ (पृ.२३४).

(३) **वस्मृ.**१७।२०,२१ (ख) या कौमार (पुनर्भूः कौमार).

(४) **वस्मृ.**१७।२२-२४; **व्यक.**१५७; **विर.**५६४-५६५ या (य) गृहे+(स्वय) मातामहस्य पुत्रो (स कानीनो मातामहसुतो) अथा (अत्रा); **व्यप्र.**४७५ या (यं) माता...हुः (स कानीनो मातामहस्य पुत्रो भवतीत्याह); **बाल.**२।१२९ (आहुः०) शेषं व्यप्रवत् : २।१३५ (पृ.२३४).

(५) **वस्मृ.**१७।२५ (ख) न्देत (न्दति); **अप.**२।१३१; **व्यक.**१५७ पुत्रं (सुतं) तुल्यतः (तल्पतः) पुत्री (पौत्री); **गौमि.** २८।३१ पुत्री (पौत्री); **उ.**२।१४।२ गौमिवत् ; **विर.**५६५ त्ता दुहिता (दत्ता सुता); **स्मृसा.**६८ प्रत्ता (पुत्रा) पुत्री (पौत्री) विष्णुः; **वीमि.**२।१३४ उक्त., विष्णुः; **व्यप्र.**४७५; **बाल.**२।१२९ तुल्यतः (तल्पजा).

(१) **वस्मृ** १७।२६,२७; **अप** २।५१ (दायादबान्धवाः) एतावदेव.

(२) **वस्मृ.**१७।२८,२९ (ख) दबन्धूना (दास्तत्र); **व्यउ.** १४८ (अथादायादबन्धूनां सहोढः प्रथमः) एतावदेव.

(३) **वस्मृ.**१७।२९.

(४) **वस्मृ.**१५।१-८ (ख) व्याहृतिभि (व्याहृती) बन्धु-सनिकृष्ट (सनिकृष्ट) (प्रतिगृह्णीयात्०) बहुस्रायत (बहु जायत); **विश्व.**२।१३४ (न तु स्त्री पुत्र दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्रानु-ज्ञानाद्भर्तुः) एतावदेव; **मेधा.**९।१६८ (न स्त्री पुत्र दद्यात् प्रति-गृह्णीयाच्च) एतावदेव; **मिता.**२।१३० (शोणित प्रभवनः०) (स हि...भर्तुः०) शनस्य (शन)इदूरे (ऽदूर) मेव (एव) (सदेहे...इति०); **अप.**२।१३१ त्यागेषु (परित्यागेषु) न त्वेकं पुत्र दद्यात् प्रतिगृह्णीयाद्वा (न त्वेक पुत्र दद्यात्) न स्त्री (न तु

पुत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् ॥ इति ।

अभिसधिमात्रात् —एतच्च पूर्वविध्यनुवादता ।

विर.५६२

गूढजः

गूढे च गूढोत्पन्नः षष्ठः । इत्येते दायादा बान्धवास्त्रातारो महतो भयादित्याहुः ।

सहोढादयः षडदायादाः । सहोढः ।

अथादायादबन्धूनां सहोढ एव प्रथमो, या गर्भिणी संस्क्रियते तस्यां जातः सहोढः पुत्रो भवति ।

दत्तकः

दत्तको द्वितीयो, यं मातापितरौ दद्याताम् ।

शोणितशुक्रसंभवः पुरुषो मातापितृनिमित्त-कः । तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभ-वतः । न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा । स हि संतानाय पूर्वेषाम् । न स्त्री पुत्रं दद्यात्प्रति-गृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्तुः । पुत्रं प्रतिग्रही-ष्यन्बन्धूनाहूय राजनि चाऽऽवेद्य निवेशनस्य म-ध्ये व्याहृतिभिर्हुत्वाऽदूरेबान्धवं बन्धुसंनिकृष्टमेव प्रतिगृह्णीयात् । संदेहे चोत्पन्ने दूरेबान्धवं शूद्रमिव स्थापयेत् । विज्ञायते ह्येकेन बहूंस्त्रायत इति ।

(१) 'अदूरबान्धवमि'त्यत्यन्तदेशभाषाविप्रकृष्टस्य प्रतिषेधः । एवं क्रीतस्वयदत्तकृत्रिमेष्वपि योजनीयम् । समानन्यायत्वात् । *मिता.२।१३०

* मपा. मितागतम् ।

स्त्री) बन्धुसनिकृष्ट (असनिकृष्ट); **व्यक.**१४४-१४५ (Wai) त्यागेषु (परित्यागेषु) (पुत्र प्रतिग्रहीष्यन्...इति०) : १५७ (Bikaner) त्यागेषु (परित्यागेषु) त्वेक (स्वक) न स्त्री (न तु स्त्री) चावेद्य (वेद्य) व्याहृतिभि (व्याहृती)ऽदूरे (ऽदूर); **गौमि.** २८।३० (शोणित...प्रभवतः०) त्वेक (ज्येष्ठ) बान्धव बन्धु (बान्धव) (संदेहे ..इति०); **उ.**२।१३।१० (शोणित... प्रभवतः०) न त्वेक (न ज्येष्ठं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा । न त्वेक) राजनि चाऽऽ (राज्ञे नि) मध्ये + (अग्निमुपसमाधाय सपरिस्तीर्य) ऽदूरे (ऽदूर) (बन्धु०) (संदेहे...इति०); **स्मृच.** १९१,१९२ शोणितशुक्र (शुक्रशोणित) त्यागेषु (परित्यागेषु) बन्धुसनिकृष्टमेव प्रति (असंनिकृष्टमेव) (संदेहे...इति०); **ममु.** ८।१६८ शोणितशुक्र (शुक्रशोणित) त्यागेषु (परित्यागेषु) (न त्वेक...इति०); **विर.**१२९ शोणितशुक्र (शुक्रशोणित) पुरुषो (पुत्रो) तस्य प्रदान (तस्य दान) न स्त्री (न तु स्त्री) (पुत्र प्रतिग्रहीष्यन् ..इति०) : ५६८-५६९ शोणितशुक्र (शुक्र-शोणित) पुरुषो (पुत्रो) प्रदान (दान) न स्त्री पुत्र (न तु स्त्री) ऽदूरेबान्धवं बन्धु (ऽदूरबान्धवम) दूरेबान्धव (दूरबान्धव), **स्मृसा.**६९ (शोणित...प्रभवत.०) चाऽऽवेद्य (निवेद्य) बान्धव बन्धु (बान्धव) (विज्ञायते.. इति०); **पमा.**३१५,३१६ (शोणित...प्रभवतः०) (न स्त्री...भर्तुः०) चाऽऽवेद्य (च निवेद्य) ऽदूरे...यात् (ऽदूरबान्धवमसनिकृष्टमेव गृह्णीयात्) (संदेहे .. इति०); **मपा.**६५२ (शोणित...प्रभवतः०) त्वेकं (त्वेवैक) (स हि...भर्तुः०) ऽदूरे (ऽदूर) (संदेहे...इति०); **दीक.**४८ (न त्वेक पुत्रं दद्यात्) एतावदेव; **विचि.**५६ शोणितशुक्र (शुक्र-शोणित) प्रदानविक्रय (दानविक्रयपरि) (पुत्र प्रतिग्रहीष्यन्... इति०); **स्मृचि.**१९ (शोणित...प्रभवतः०) (न स्त्री...इति०); **नृप्र.**२७ (न त्वेकं पुत्र दद्यात् प्रतिगृह्णीयाद्वा) एतावदेव; **सवि.** ३९१,३९२ (शोणित...प्रभवनः०) (स हि...भर्तुः०) निवेश-नस्य (निवेशन)ऽदूरे ... यात् (ऽदूरबान्धवमसंनिकृष्ट गृह्णीयात्) (संदेहे...इति०); **चन्द्र.**१७५,१७६ (शोणित...प्रभवतः०) न त्वेकं (नैकं) पूर्वे (सर्वे) (पुत्रं प्रतिग्रहीष्यन्...इति०); **वीमि.** २।१७६ (शोणित ..प्रभवतः०) (पुत्र प्रतिग्रहीष्यन्...इति०); **दमी.७,१०** (न स्त्री पुत्रं...ऋतुः) एतावदेव : २८ (अदूर-बान्धवं बन्धु...स्थापयेत्) एतावदेव : ३६ (पुत्र प्रतिग्रही... गृह्णीयात्) एतावदेव : ५४ (शोणित...प्रभवतः०) त्वेक (त्वेवैक)

(२) न त्वेक पुत्रं दद्यादिति ददातिः प्रदर्शनार्थः । तेन विक्रि(क्र)यादावप्ययं निषेधो भवति । तथा पुत्र प्रतिग्रहीष्यन्नित्यस्यापि प्रदर्शनार्थत्वाद्बन्धूनाहूयेत्यादि धर्मजातं क्रयादावपि कार्यं न्यायसाम्यात् । अदूरेबान्धवा यस्य सोऽदूरेबान्धवः । बान्धवानामदूरदेशत्वेन तस्य कुलीनता शक्या ज्ञातुम् । तेनादूरेबान्धवं विदिताभिजनं पुत्र प्रतिगृह्णीयादित्यर्थः । न पुनर्बन्धुसनिधौ गृह्णीयादिति, बन्धूनाहूयेत्यनेनैव तत्सिद्धेः । असंनिकृष्टमसंबन्धिनमेव प्रतिगृह्णीयात् । जातिसदेहे चोत्पन्ने दूरेबान्धव व्यवहित-देशवर्तिबान्धवं शूद्रमिव स्थापयेदा निश्चयात् । महता यत्नेन निश्चयं कुर्यादिति तात्पर्यार्थः । अत्र हेतुत्वेन श्रुतिमुपन्यस्यति—विज्ञायते ह्येकेन बहवोऽयात इति । एकेन पुत्रेण बहून्पूर्वजांस्त्रायत इति । तस्माज्जाताभि-जनमेव गृह्णीयान्नेतरमिति तात्पर्यार्थः । अप.२।१३०

(न स्त्री पुत्र...त्रायत इति०): ५६-५७ शोणितशुक्र (शुक्र-शोणित) पुरुषो (पुत्रो) (न त्वेक ..त्रायत इति०):७६ शोणित-शुक्र (शुक्रशोणित) पुरुषो (पुत्रो) त्वेक (त्वेवैक) ऽदूरे (अदूर) दूरे (दूर), **संप्र.**२०६ (न स्त्री पुत्रं...ऋतुः) एतावदेवः२०९ (अदूरबान्धव बन्धु .त्रायत इति) एतावदेव.२११ (शोणित-शुक्र ..प्रभवतः०) त्वेक (त्वेवैक) (न स्त्री पुत्र...त्रायत इति०) २२४ प्रदान (दान) (न त्वेक पुत्र...त्रायत इति०).२३०, २३१ शोणित .पुरुषो (शुक्रशोणितसभवः पुत्रो) तस्य प्रदान (ततस्तस्य दान) न स्त्री (न तु स्त्री); **व्यप्र.**३०६,३०७, ३०९,४७७,४७८ शोणितशुक्र (शुक्रशोणित) त्यागेषु (परि-त्यागेषु) न स्त्री (न तु स्त्री) ऽदूरे (ऽदूर) कृष्टमेव (कृष्ट एव) दूरेबान्धवं (दूरे) बहूस्त्रा (च बहूस्ततस्त्रा) केषुचित् पृष्ठेषु विष्णु.; **व्यउ.**८४ (न स्त्री...इति०) शेष व्यप्रवत्, विष्णु·, **व्यम.** ५० शोणितशुक्र (शुक्रशोणित) त्यागेषु (परित्यागेषु) संतानाय पूर्वेषाम् (त्रायते पुरुष) न स्त्री (न तु स्त्री)ऽदूरेबान्धव बन्धु (दूरेबान्धव) त्रायत (स्तारयेत्), **विता.**३६२,६०० शोणित ...त्यागेषु (शुक्रशोणितसभवो मातृपितृनिमित्तकः पुरुषस्तस्य प्रदानप्रतिग्रहक्रयेषु) न त्वेक (न त्वेवैक) ज्ञानाऋतुः + (न ज्येष्ठ पुत्र दद्यात्) चाऽऽवेद्य (निवेद्य) ऽदूरेबान्धव (दूरबान्धव) (बन्धुसनिकृष्टमेव०) (संदेहे ..इति०); **सिन्धु.**८६८ (शोणि-तशुक्र. .प्रभवतः०) त्वेक (त्वेवैक) (स हि...पूर्वेषाम्०) (पुत्रं प्रति ..त्रायत इति०); **बाल.**२।१३०,२।१३५ (पृ.१७१, १७२,२३८); **सेतु.**१४९ शोणितशुक्र (शुक्रशोणित) प्रदान-विक्रय (दानविक्रयपरि) (पुत्र प्रति...इति०) : ३०० (=)

(३) इति उत्पादनमात्रेण पितृभ्यामार्जितत्वाद्यथेष्टविनियोगार्हत्वं पुत्रस्याप्यस्तीति मत्वा प्रभवत इत्युक्तम्। तेन पुत्रोऽपि देयभूतो भवतीत्यभिप्रायः। यत्तु स्मृत्यन्तरम्—'सुतस्य सुतदाराणा वशित्वं त्वनुशासने। विक्रये चैव दाने च वशित्वं न सुते पितुः॥' इति। यच्च याज्ञवल्क्येनोक्तम् (२।१७५) 'स्वं कुटुम्बाविरोधेन देयं दारसुतादृते' इति तद्वचोद्वयमनेकसुतशून्यविषयम्। तत्र हि पुत्रदाने कृते सतानविच्छेदापत्तेः। अत आह वसिष्ठः—न त्वेकमिति। अनेकपुत्रेष्वपि मातापितृवियोगसहनक्षम एव देयः 'विक्रय चैव दानं च न नेयाः स्युरनिच्छवः। दाराः पुत्राश्च' इति कात्यायनस्मरणात्।

ननु मातुः प्रभुत्वेऽपि पुत्रदानमयुक्त अस्वतन्त्रत्वात्। सत्यम्। स्वतन्त्रपुरुषानुज्ञया तु युक्तमेव। अत एव वसिष्ठः—न स्त्री पुत्रमिति। स्मृच.१९१

अदूरेबान्धवं सनिहितमातुलादिबान्धवमसनिकृष्टं सनिकृष्टभ्रातृपुत्रादिभ्यतिरिक्तमेव गृह्णीयादित्यर्थः।

*स्मृच.१९२

(४) दानवद्विक्रयपरित्यागावपि न कार्यौ। विक्रय आपदि भरणासामर्थ्ये त्यागः। सतानोच्छेदे हि पिण्डोदककियानिवृत्तिर्महान्दोष इति प्रकाशः। पितृमातृश्च द्वयोरपि प्रत्येकमपि दानेऽधिकारः। इयास्तु विशेषः, यत्सति पितरि, तदनुज्ञानान्मातुर्दातृत्वमसति तदभावेऽपि। बन्धूनाहूय दत्तकस्याशप्राप्त्यर्थं स्वदायादान् सनिधाप्य। अदूरबान्धव सनिहितात्मीयमातुलादिकं, एतन्नामजात्यादिज्ञापनार्थं तस्य बान्धवस्याभावे तदसनिकृष्टमपि प्रमाणान्तरेण दृढेन नामगोत्रज्ञापनात्प्रतिगृह्णीयात्। असनिकृष्टमेवेत्येवकारोऽप्यर्थः। सदेहे चोत्पन्ने इति, अथ कथचिद्दूरस्थबान्धव गृहीतवतो ब्राह्मण्यादौ संशयः स्यात्, तदा शौद्रपुत्रमिव भरणमात्रोपयुक्त कृत्वा स्थापयेत्। एकेन बहूस्त्रायते, यतः कथचिदेकेन पुत्रेण बहून् पूर्वजास्त्रायते। तस्मादसदिग्धजात्यादिकमेव परिगृह्णीयादित्यर्थः। विर.५६९

(५) शूद्रमिवेति। शूद्रोऽपि हि पुत्रो भवतीत्यभिप्रायः। +स्मृसा.६९

(६) असनिकृष्टमित्यनेन ज्ञातिनिषेधः। ×सवि.३९२

(७) अथ च दत्तकादिर्न शूद्रस्य, 'महाव्याहृतिभिर्गत्वा' इति वचनात्। चन्द्र.१७६

(८) अत एव वसिष्ठः— न स्त्री पुत्रमिति। अनेन विधवायाः, भर्त्रनुज्ञानासंभवात्, अनधिकारो गम्यते। न च सधवाया एव भर्त्रनुज्ञानापेक्षा पारतन्त्र्यात्, न विधवायाः इति वाच्यम्; स्त्रीसामान्योपादानेन पारतन्त्र्यस्याप्रयोजकत्वात्, 'अभावे ज्ञातयस्तेषाम्' इति ज्ञातिपारतन्त्र्यस्य सद्भावाच्च। तर्हि ज्ञात्यनुज्ञयैव तस्याः पुत्रीकरणमस्तु, इति चेन्न। भर्तृपदस्योपलक्षणतापत्तेः, प्रयोजनासिद्धेश्च। प्रयोजन तु भर्त्रनुज्ञानस्य स्वीकृतपरिग्रहेणापि भर्तृपुत्रत्वसिद्धिः। अत एव 'अथोढक्षेत्रजकृत्रिमपुत्रिकापुत्रस्त्रीद्वारजअसुराद्यूढजदक्षिणाजाना पित्रोश्च' इति सत्यापाढसूत्रे स्त्रीद्वारजस्य गोत्रद्वयसबन्धोऽभिहितः, 'मातुरुत्तर पितुः प्रथमम्'—इति सूत्रेणापि। पितृगोत्रसबन्धश्च पितुः पुत्रत्वेन। पुत्रत्व च पित्रनुज्ञानेनैव, न परिग्रहेण, तस्य तत्र स्त्रीकर्तृकत्वात्। 'ऊढः सहोढः, स्त्रीद्वारजः स्त्रीयाचितः, यज्ञेन दक्षिणात्वेन प्राप्ताया कन्याया जातः दक्षिणाजः, अन्ये प्रसिद्धाः' इति शवरस्वामिनः। अत्र च स्त्रिया द्वारताभिधानेन द्वारी पुरुषो लभ्यते। अन्यथा स्त्रीपरिगृहीतस्य तन्मात्रपुत्रत्वेन तद्भर्तृगोत्रसबन्धाभावात् तद्भर्तृक्रियायामनधिकारापातात्, तद्विवाहादौ च पित्रभावेन पितृगोत्राद्यनुल्लेखप्रसगाच्च। यद्येव, तर्हि भर्तुरपि स्वयनुज्ञापेक्षा स्यात्, प्रयोजनतौल्यात्, इति चेत्, न। भर्तृप्राधान्यात् तत्परिग्रहेणैव स्त्रिया अपि तस्मिन् पुत्रत्वसिद्धेः, भर्तृपरिगृहीतवस्त्वन्तरस्वत्ववत्। किच 'व्याहृ-

* पमा. 'अदूर' इत्यादेर्व्याख्यान स्मृचगतम्।

शोणितशुक्र (शुक्रशोणित) पुरुषो (पुत्रो) प्रदान (दान) चाऽऽवेद्य (निवेद्य) ऽदूरे...कृष्टमेव०) (सदेहे...इति०); **समु.** ९४,९५; **विच.**१४,१५ (पुत्र प्रति...इति०); **विव्य.**३६ (नैक पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सतानहेतुः) एतावदेव, विष्णुः; **दच.**३,१० (न स्त्री पुत्रं...ह्यर्तुः) एतावदेव : ९ (न त्वेकं ...पूर्वेषाम्) एतावदेव : १२ (शोणितशुक्र...भर्तुः०) चाऽऽवेद्य (निवेद्य) ऽदूरे (अदूर) प्रतिगृह्णी (गृह्णी) दूरेबा (दरबा); **कृभ.** ८६३ (पुत्र प्रतिग्रही...निवेद्य) एतावदेव : ८६८ शोणित... पुरुषो (शुक्रशोणितसंभवः पुत्रो) (न त्वेकं...स्मायते इति०): ८७८ (शोणितशुक्र ..भर्तुः०) ऽदूरे (अदूर) दूरेबान्धव (दूरे).

+ शेष विरगतम्। × शेष मिताग्तम्।

तिभिर्हुत्वा अदूरबान्धव बन्धुसनिकृष्टमेव प्रतिगृह्णीयात्' इति समानकर्तृकतावोधकक्त्वाप्रत्ययश्रवणात्, होमकर्तुरेव प्रतिग्रहसिद्धेः, स्त्रीणा होमानधिकारित्वात्, परिग्रहानधिकारः इति वाचस्पतिः। न च शौनकीये आचारवरणान्नानात् तद्द्वारा होमसिद्धिरिति वाच्यम्। होमसिद्धावपि प्रतिग्रहमन्त्रानधिकारेण प्रतिग्रहासिद्धेः। तदाह शौनकः—'देवस्य त्वेति मन्त्रेण हस्ताभ्या परिगृह्य च। अङ्गादङ्गेत्यृच जप्त्वा, आघ्राय शिशुमूर्धनि॥' इति। न चैवं शूद्राणामनधिकारप्रसङ्गः, 'शूद्राणा शूद्रजातिषु' इति व्यवस्थापकलिङ्गेन तदधिकारकल्पनात्। एतेन 'शूद्राणा होमप्रतिग्रहमन्त्रानधिकारेण पुत्रप्रतिग्रहानधिकारः' इति वदन् वाचस्पतिः परास्तः। विधवाना स्त्रीणान्तु यथाविनियोगमधिकारसमर्थनान्न पुत्रप्रतिग्रहाधिकारः इति सिद्धम्। न चैव सधवानामप्यनधिकारापत्तिः, होममन्त्राद्यनधिकारात्, इति वाच्यम्। 'अन्यत्रानुज्ञानाद्भर्तुः' इति प्रतिप्रसवेन प्रधानाधिकारसिद्धौ, अधिकृताधिकाराद्धोममन्त्रादिप्राप्तौ 'स्त्रीशूद्राणाममन्त्रकम्' इति मन्त्रपर्युदाससिद्धेः, अमन्त्रकप्रतिग्रहसिद्धिः, वस्त्वन्तरप्रतिग्रहवत्। किंच 'न स्त्री पुत्र दद्यात्प्रतिगृह्णीयाद् वा' इति औत्सर्गिकनिषेधस्य 'अन्यत्रानुज्ञानाद्भर्तुरि'त्यपवादकः प्रसवः। तत्र च निमित्तं भर्त्रनुज्ञानम्। ततश्च विधवाया भर्त्रभावेनानुज्ञानासभवात्, निर्निमित्तकप्रतिप्रसवाप्रवृत्त्या प्राप्तकान्तराभावाच्च, अनधिकार इति सर्ववादिसप्रतिपन्नमेव। न चैवमलोकतापरिहारोऽस्या न स्यादिति वाच्यम्। 'मृते भर्तरि साध्वी स्त्री ब्रह्मचर्यव्रते स्थिता। स्वर्ग गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥' इति मनुना ब्रह्मचर्येणैव तत्परिहाराभिधानादिति सकलमकलङ्कम्। दमी.७–११

तदेवाह वसिष्ठः—अदूरबान्धवमिति। अस्यार्थः—अदूरश्चासौ बान्धवश्चेत्यदूरबान्धवः, सनिहितः सपिण्डः, इत्यर्थः। सानिध्यं च द्विधा, सगोत्रतया, स्वल्पपुरुषान्तरेण च, भवति। तत्र सगोत्रः स्वल्पपुरुषान्तरः सपिण्डो मुख्यः। तदभावे बहुपुरुषान्तरोऽपि सगोत्रः सपिण्डः। तदभावेऽसमानगोत्रः सपिण्डः, तस्याप्यभावे बन्धुसनिकृष्टः सपिण्डः, स्वस्यासपिण्डः सोदक इत्यर्थः पर्यवस्यति। तत्रापि संनिकर्षो द्विविधः, सगोत्रतया स्वल्पपुरुषान्तरेण च। स्वस्यासपिण्डोऽपि स्वसमानगोत्रः स्वल्पपुरुषान्तरः सपिण्डाना सपिण्डो मुख्यः। तदभावे बहुपुरुषान्तरोऽपि सगोत्रः सपिण्डसपिण्डः सोदक इति यावत्। 'सपिण्डसोदकासभवे समानगोत्रः एकविशाद् ग्राह्यः। तदभावेऽसमानगोत्रोऽसपिण्डोऽपि ग्राह्यः। तदभावेऽसपिण्डोऽपि' इति शौनकीयात्।

'संदेहे चोत्पन्ने दूरबान्धवं शूद्रमिव स्थापयेत्' इति वसिष्ठलिङ्गाच्च। दूरे बान्धवा यस्य असौ दूरबान्धवः। गोत्रसापिण्ड्याभ्यामसंनिहितमित्यर्थः। सदेहोऽत्र कुलशीलादिविषयः। स च असपिण्डेऽसगोत्रे च भवति इति सोऽप्यनुज्ञायते, 'अन्यत्र तु न कारयेत्' इति। यद्यपि सपिण्डासपिण्डेभ्योऽन्यो न सभवति, तथापि 'सर्वेषामपि वर्णाना जातिष्वेव न चान्यतः' इति वाक्यशेषेण सपिण्डासपिण्डाना सजातीयत्वेन विशेषणात्, असमानजातीयाः सपिण्डा असपिण्डाश्च व्यावर्त्यन्ते, अप्रतिषिद्धमनुमत भवति इति न्यायेन, अनुकल्पतया तत्प्राप्तिसभवात्। अत एव वृद्धगौतमः 'यदि स्यादन्यजातीयो गृहीतो वा सुतः क्वचित्। अंशभाजं न तं कुर्याच्छौनकस्य मत हि तत्॥' इति असमानजातीयस्य अंशभाक्त्व निषेधति, तस्मादसमानजातीयो न पुत्रीकार्य इति सिद्धम्। दमी.२७–२९

बन्धूनात्मपितृमातृबन्धून्, राजनि ग्रामाधीशे, निवेशन गृह, व्याहृतिभिर्व्यस्ताभिः समस्ताभिश्चाज्यभागान्त आहुतिचतुष्टय हुत्वा, इत्यर्थः। अदूरबान्धवमिति व्याख्यातम्। सदेहे चोत्पन्ने इति, दूरे बान्धवा यस्यासौ दूरबान्धवोऽत्यन्तदेशभाषाविप्रकृष्टः, तादृशस्य परिग्रहे कुलशीलादिविषये सदेहो भवत्येव, तस्मिन् सति, तं शूद्रमिव स्थापयेत्, यावन्निर्णय न व्यवहरेदित्यर्थः। तत्र हेतुतया श्रुतिमाह– 'विज्ञायते' इति। एकेन पुत्रेण बहवः पित्रादयस्त्रातव्या इत्येतदर्थं पुत्रपरिग्रहो, न त्वेकेन बहवः पातनीयाः, संदेहे च पक्षे पातनस्यापि संभवात्। तस्मात्त न व्यवहरेत्याक्षिकस्यापि दोषस्य परिहार्यत्वात्। कल्पतरुस्तु 'असनिकृष्टमेव प्रतिगृह्णीयात्' इति पाठमभिप्रेत्याह—असनिकृष्टमेवाज्ञातगुणदोषमपि, अप्यर्थ एवकारः। सदेह इति, बान्धवानामसनिधानात्तु

जातिसंदेहे शूद्रत्वेनाध्यवस्य, संस्कारहीनमेव स्थापयेत्। शूद्रोऽपि हि किल पुत्रो भवतीत्यभिप्राय इति, तदेतदभिप्रायविवरणमसगत, विजातीयपरिग्रहनिषेधात्। तस्माद्यथाश्रुतमेव साधु। दत्तपरिग्रहानन्तरमौरसोत्पत्तौ विभागे विशेषमाह—तस्मिन्निति। तस्मिन् दत्तके प्रतिगृहीते यद्यौरस उत्पद्येत, तदा दत्तकश्चतुर्थांश लभते, न समाशमित्यर्थः। अयमेव विधिः क्रीतादिष्वनुसंधेयः। तस्य प्रदानविक्रयपरित्यागेष्वित्युपक्रमभेदेन वा व्यवस्थेति ध्येयम्। दमी.७६-७७

(९) अन्यत्राऽनुज्ञानादिति दानमात्रेऽन्वित, प्रतिग्रहे विद्यमानत्वेनाऽननुज्ञाने सत्यप्यभ्यधिकारात्।
वीमि.२।१७५

(१०) कल्पतरौ त्वदूरबान्धवमसंनिकृष्टमेवेति पाठं लिखित्वाऽदूरबान्धवं सनिहितमातुलादिकम्। असनिकृष्टमेव अविज्ञातगुणदोषमपि। अप्यर्थं एवकार इति व्याख्यातम्। 'सदेहे चोत्पन्ने दूरे शूद्रमिव स्थापयेद्विज्ञायते ह्येकेन च बहूस्तत्रायते इति' इति च वसिष्ठवचनमधिक लिखित्वैव विवृतम्। सदेहे बान्धवानामसंनिधानाज्ज्ञातिसदेह उत्पन्ने शूद्रमिव सस्कारहीनमेव दूरे स्थापयेत्। शूद्रोऽपि हि कृतपुत्रो भवतीत्यभिप्राय इति। *व्यप्र.४७८

(११) अस्यार्थः। अदूरे चासौ बान्धवश्चेत्यदूरबान्धवः, सनिहितः सपिण्ड इत्यर्थः। अनेनात्यन्तदेशभाषाविप्रकृष्टस्य प्रतिषेधो गम्यते। सांनिध्य च सगोत्रतयाऽल्पपुरुषान्तरेण च भवति। तत्र सगोत्रः स्वल्पपुरुषान्तरः सपिण्डो मुख्यस्तदभावे बहुपुरुषान्तरोऽपि सगोत्रः सपिण्डः। तदभावेऽन्योऽसमानगोत्रः सपिण्डः। तस्याप्यभावे बन्धुसनिकृष्टः। बन्धूना सपिण्डाना सनिकृष्टः सपिण्डः स्वस्यासपिण्ड इत्यर्थात्पर्यवस्यति। सनिकर्षश्च पूर्ववदेवात्रापि वेदितव्यः। अत्यन्तदेशभाषाविप्रकृष्टस्य प्रतिषेधे कारणमाह स एव—'सदेहे चोत्पन्ने दूरेबान्धव शूद्रमिव स्थापयेदि'ति। संदेहोऽत्र कुलवृत्तादिविषयः। शूद्रमिवाव्यवहार्यमित्यर्थः। तत्र श्रुतिमुपन्यस्यति। 'विज्ञायते ह्येकेन बहूस्त्रायत'इति। एकेन कुलवृत्तादिसंपन्नेन पुत्रीकृतेन बहूनिपित्रादींस्त्रायते तत्कृतपिण्डदानादिना तर्पयति। तद्वैपरीत्ये बहून्पातयतीत्यर्थादाक्षिप्यति। अस्मादेव वचनात्कुलवृत्तादिसदेहाभावेऽत्यन्तविप्रकृष्टोऽपि पुत्रीकार्य इति गम्यते। संप्र.२०९-२१०

(१२) भर्त्रनुज्ञा तु सधवाया एव दृष्टार्थत्वात्। विधवायास्तु तं विनाऽपि पितुः। तदभावे ज्ञातीनामाज्ञया भवति। अत एव 'रक्षेत्कन्या पिता विन्ना पतिः पुत्रास्तु वार्धके। अभावे ज्ञातयस्तेषा न स्वातन्त्र्यं क्वचित्स्त्रियाः॥' इति (यास्मृ.१।८५) याज्ञवल्क्येनावस्थाविशेष एव भर्तुः पारतन्त्र्यमुक्तम्। तदभावे वार्धकादिना तस्याक्षमताया वा पुत्रादीनामपि कात्यायनेनापि 'नारी खल्वननुज्ञाता पित्रा भर्त्रा सुतेन वा। विफल तद्भवेत्तस्या यत्करोत्यौर्ध्वदेहिकम्॥' इति अवस्थाविशेष एव पितृभर्त्राद्यनुज्ञोक्ता। और्ध्वदेहिक पारलौकिकम्। अतो यस्यामवस्थाया भर्तुरनुज्ञा प्राप्ता सैवात्रानूद्यते। न त्वपूर्वा विधीयते। अतो विधवाया भर्तुराज्ञा विनाऽप्यधिकारः। अदूरे बान्धवो यथायथ संनिहितः सपिण्डः। सनिहितेष्वपि भ्रातृपुत्रो मुख्यः। 'भ्रातृणामेकजातानामेकश्चेत्पुत्रवान् भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥' इति। मनूक्तेरिति (मस्मृ.९।१८२) मिताक्षरायाम् (यास्मृ.२।१३२)। इदमेव चैतद्वचसः प्रयोजनं युक्तमन्यासंभवात्। दूरे बान्धव विजातीयम्।
व्यम.५०-५१

तस्मिंश्चेत्प्रतिगृहीत औरसः पुत्र उत्पद्येत, चतुर्थभागभागी स्याद्दत्तकः*।

* अप.व्याख्यानं 'उत्सृष्टो गृह्यते' इति याज्ञवल्क्यवचने (२।१३२) द्रष्टव्यम्।

(१) **वस्मृ.**१५।९ (ख) (दत्तकः०); **मिता.**२।१३२ (पुत्र०); **अप.**२।१३२ श्वेत (श्वते) (दत्तकः०); **व्यक.**१५३ अपवत्; **गौमि** २८।३२ तस्मि (यस्मि) शेष अपवत्; **उ.**२।१४।२ (पुत्र०) श्वेत (श्वते) भागी (भाग्) (स्याद्दत्तकः०); **स्मृच.** २८९ (तस्मिन् प्रतिगृहीते चेदौरसो जायते सुतः। ऋक्थे चतुर्थभागी स्यात्।); **विर.**५४४ श्वेत (श्वते स) (दत्तकः०); **पमा.** ५१५ मितावत्; **रत्न.**१४२ श्वेत+(स); **विचि.**२३४ (पुत्र०) भागी+(यदि) शेष विरवत्; **व्यनि.** उवत्; **नृप्र.**३९ (पुत्र०) र्थभाग (र्थांश); **सवि.**३९३ तस्मिञ्चे (कस्मिञ्चि) (पुत्र०) र्थभाग

* व्यवहारकल्पतरौ अशुद्धिबाहुल्यात् व्यवहारप्रकाश एवात्र संगृहीतः। स्वव्याख्यानं मितागतम्। 'अदूरबान्धवं' इत्यादि (पृ.३०९) स्मृचवत् व्याख्यातम्।

(१) तथा अन्येषामपि पूर्वस्मिन् सत्यप्युत्तरेषा पुत्राणा चतुर्थांशभागित्वमुक्त वसिष्ठेन। दत्तकग्रहण क्रीतकृत्रिमादीना प्रदर्शनार्थम्। पुत्रीकरणाविशेषात्।

+मिता.२।१३२

(२) ['यदि नाभ्युदयिकेषु प्रयुक्त स्यात्' इति वचन वसिष्ठस्मृतौ दत्तकवचनाव्यवहितपतितघटस्फोटप्रकरणै-कदेशभूतं विवादरत्नाकरकृता प्रकृतवचनशेषतया व्याख्यातम्]—तस्मिन्नौरसे पुत्रे स प्रतिगृहीतः पुत्रः। यदि स्यात्प्रभूत धनमिति शेषः। यदि नाभ्युदयिकेषु प्रयुक्त स्याद्यदि धन नाभ्युदयिकेषु यज्ञादिषु प्रयुक्त विनियुक्त स्यादित्यर्थः। ×विर.५४४

(३) अत्र मन्वादिभिः सर्वैरेव पुत्रान्तरसत्वेऽप्यौरसस्यैव सकलपितृधनग्राहित्वमुक्तम्। तैरेव तेषामपि ततोंऽशभागित्वमुक्तम्। अथ च विरोध औरसस्य सगुणत्वे। तेनैव सकलमुक्त्थ ग्राह्यम्। तस्य निर्गुणत्वेऽन्येषा सगुणत्वे यथोक्तभागेन तद्ग्राह्यमिति समाधेयः। एवं दत्तकस्य क्षेत्रजस्य वा न्यूनाधिकाशग्रहणमपि नानामुन्युक्तं तस्यैवैकस्य सगुणत्वनिर्गुणत्वाभ्या समाधेयम्। यस्तु श्राद्धेऽपि क्रमेणाधिकारविधायकयोर्विष्णुयाज्ञवल्क्ययोर्विरोधः सोऽपि सगुणत्वनिर्गुणत्वाभ्या विकल्पेन वा समाधेय इति। *विचि.२३४–२३५

(४) अत्र प्रतिगृहीत इति पुत्रिकापुत्रसत्वस्याप्युपलक्षणम्। तेन पुत्रिकापुत्रादिसत्वे यद्यौरस उत्पद्यते, तदा पुत्रिकापुत्रादीनामपि चतुर्थांशभागित्व, वसिष्ठेन तु कलौ दत्तकस्यैव सत्वात्तमादायैव प्रदर्शितम्।

व्यउ.१४९

दत्तस्य जनकापत्तौ मृतेऽथ जनकेऽपि च।
संस्काराद्यखिलं कृत्वा दत्तो रिक्थमवाप्नुयात्॥

+ सवि., व्यप्र., विता. मितागतम्।

× चन्द्र. विरगतम्। * शेष विरगतम्।

(अंश); **चन्द्र.**९१ प्रति (परि) (पुत्र०) शेष विरवत्; **दमी** ७६,१२४ मितावत्; **व्यप्र.**४८२,४८३ मितावत्; **संप्र.** २३०-२३१ मितावत्; **व्यउ.**१४९ मितावत्; **व्यम.**५० (पुत्र०) (दत्तकः०); **विता.**३६६ मितावत्; **समु.**१४० (पुत्र०) चेत+(स) (दत्तक०); **दच.**३१ (पुत्र०) (स्याद्दत्तकः०).

(१) **समु.१४०.**

अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः।
स्वगोत्रेण स्वशाखोक्तविधिना स्वस्वशाखभाक्॥

क्रीतः

क्रीतस्तृतीयस्तच्छुनःशेपेन व्याख्यातम्। हरिश्चन्द्रो ह वै राजा सोऽजीगर्तस्य सौयवसेः पुत्रं चिक्राय।

स्वयमुपागतः

स्वयमुपागतश्चतुर्थः, तच्छुनःशेपेन व्याख्यातम्। शुनःशेपो वै यूपेन नियुक्तो देवतास्तुष्टाव, तस्येह देवताः पाशं विमुमुचुः, तमृत्विज ऊचुर्मैवायं पुत्रोऽस्त्विति, तान् ह न संपेदे, ते संपादयामासुरेष एव यं कामयेत तस्य पुत्रोऽस्त्विति, तस्य ह विश्वामित्रो होताऽऽसीत्तस्य पुत्रत्वमियाय।

अपविद्धः

अपविद्धः पञ्चमोऽयं मातापितृभ्यामपास्तं प्रतिगृह्णीयात्।

शूद्रापुत्रः। एतेषामदायादाना कदाचिद्दायादत्वम्।

शूद्रापुत्र एव षष्ठो भवतीत्याहुः। इत्येतेऽदायादा बान्धवाः। अथाप्युदाहरन्ति।
यस्य पूर्वेषां षण्णां न कश्चिद्दायादः स्यादेते तस्य दायं हरेरन्निति।

(१) **दमी.**५९,१०२, **संप्र.**२२५; **समु.**९६; **कृभ.** ८९२.८९६ शास्त्रोक्त (गृह्योक्त): **दच.**१५,१७.

(२) **वस्मृ.**१७।३०,३१ (ख) सौयवसेः (सोपवस्तैः) चिक्राय (विक्राय्य स्वय क्रीतवान्).

(३) **वस्मृ.**१७।३२,३३ वै यूपेन (ह वै यूपे) तान् ह (तानाह) तस्य ह (तस्येह).

(४) **वस्मृ.**१७।३४, **व्यक.**१५७; **विर.**५७२ मपास्तं .. यात् (न्तु त्यक्तं गृह्णीयात्पुत्रत्वेन); **स्मृसा.**६९ (यं मातापितृभ्यामपास्तं गृह्णीयात्सोऽपविद्धः); **व्यप्र.**४७९ (प्रति०).

(५) **वस्मृ.**१७।३५-३७; **विर.**५७४ (इत्येते...न्ति०); **बाल.**२।१३५ (पृ.२३५) विरवत्.

(६) **वस्मृ.**१७।३८ (ख) षण्णा (वर्णानां) तस्य...ति (तस्यापहरान्ति); **अप.**२।५१ यादः (यहरः) हरेरन्निति (हरन्तु); **व्यक.**१५४ षण्णां (वर्णानां) रेरन्निति (रेयुः); **गौमि.**२८।३२ पूर्वेषां षण्णां (तु पूर्वेषां च) रन्निति (युरिति); **विर.**५४९ यस्य+(तु) षण्णां (वर्णाणां) दायं हरेरन्निति (भाग हरेयुः).

(१) (ऋणं) रिक्थग्राहः पुत्रादिर्दाप्यस्तदभावे योपिद्-ग्राहस्तस्याप्यभावे दायानर्हः पुत्र इति । अप.२।५१

(२) सहोढदत्तकक्रीतस्वयमुपागतापविद्धक्षेत्रजौरसान् पुत्रानभिधाय औरसादीन् परामृश्य पुनर्वसिष्ठः—यस्येति । वीर.५४९

विष्णुः

पुत्रमहिमा। सर्वभ्रातॄणां तत्पत्नीनां च भ्रातृपुत्रेण पुत्रवत्त्वम्।

पुन्नाम्नो नरकाद् यस्मात् पितरं त्रायते सुतः।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा॥
ऋणमस्मिन् संनयति अमृतत्वं च गच्छति।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्॥
पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति पिष्टपम्॥
पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते।
दौहित्रोऽपि ह्यपुत्रं तं संतारयति पौत्रवत्॥
एकोदानामप्येकस्याः पुत्रः सर्वासां पुत्र एव।
भ्रातॄणामेकजातानां च।

औरसादिद्वादशपुत्राणां विधि. लक्षणानि च । औरसः। क्षेत्रजः। पुत्रिकापत्र॰। पौनर्भवः। कानीन॰। गूढज । सहोढः। दत्तकः । क्रीतः । स्वयमुपागतः । अपविद्ध । कृत्रिमः ।

अथ द्वादश पुत्रा भवन्ति। स्वे क्षेत्रे संस्कृतायां उत्पादितः स्वयमौरसः प्रथमः।

नियुक्तायां सपिण्डेनोक्तमवर्णेन वोत्पादितः क्षेत्रजो द्वितीयः।

पुत्रिकापुत्रस्तृतीयः।

(१) **विस्मृ.**१५।४३, **दा.**१६१; **विर.**५८३; **व्यप्र.** ५०६; **बाल.**२।१३५(पृ.२२०) पितर त्रायते (त्रायेत पितर). २।१३७. (२) **विस्मृ.**१५।४४; **बाल.**२।१३५ (पृ.२१९).

(३) **विस्मृ.**१५।४५; **दा.**१६१; **विर.**५८५.

(४) **विस्मृ.**१५।४६. (५) **विस्मृ.**१५।४०,४१.

(६) **विस्मृ.**१५।१,२; **व्यक** १५५; **विर.**५५३ सस्कृ ..रसः (स्वय उत्पादित.), **व्यप्र.**४६७ स्वे (स्व); **बाल.** २।१२८ (अथ...भवन्ति०) स्वे (स्व) तायां+(स्वय) (स्वयमौरसः०) : २।१३५ (पृ.२३५) स्वे (स्व).

(७) **विस्मृ.**१५।३; **व्यक** १५५ (सपिण्डे...दित.०); **विर.** ५५५; **स्मृसा.**६८ पिण्डे (वर्णे) वोत्पा (चोत्पा) (द्वितीयः०).

(८) **विस्मृ.**१५।४.

व्य. का. १६१

यस्तस्याः पुत्रः स मे पुत्रो भवेदिति या पित्रा दत्ता सा पुत्रिका।

पुत्रिकाविधिनाऽप्रतिवादितापि भ्रातृविहीना पुत्रिकैव।

पौनर्भवश्चतुर्थः।

अक्षता भूयः संस्कृता पुनर्भूः। भूयस्त्वसंस्कृताऽपि परपूर्वा।

कानीनः पञ्चमः। पितृगृहेऽसंस्कृतयैवोत्पादितः। स च पाणिग्राह्यः।

गूढे च गूढोत्पन्नः षष्ठः। यस्य तत्पजस्तस्यासौ।

सहोढः सप्तमः। गर्भिणी या संस्क्रियते तस्याः पुत्रः। स च पाणिग्राह्यः।

दत्तकश्चाष्टमः। स च मातापितृभ्यां यस्य दत्तः।

क्रीतश्च नवमः।

स च येन क्रीतः।

स्वयमुपगतो दशमः। स च यस्योपगतः।

अपविद्धस्त्वेकादशः। पित्रा मात्रा च परित्यक्तः। स च येन गृहीतः।

यत्र क्वचनोत्पादितश्च द्वादशः।

(१) **विस्मृ.**१५।५; **विर.**५६२ स्त (स्व) (सा पुत्रिका०).

(२) **विस्मृ.**१५।६; **विर.**५६२ऽप्रति...हीना (प्रतिपादिता पितृभ्रातृहीना).

(३) **विस्मृ.**१५।७; **विर** ५६३ (चतुर्थः पौनर्भवः); **व्यप्र.**४७६.

(४) **विस्मृ.**१५।८,९ (५) **विस्मृ.**१५।१०-१२.

(६) **विस्मृ.**१५।१३,१४, **विर.**५६६ (गूहे च०).

(७) **विस्मृ.**१५।१५-१७, **विर** ५६६ च (तु); **स्मृसा.** ६९ विरवत्; **व्यप्र.**४७९ विरवत्.

(८) **विस्मृ.**१५।१८,१९; **विर.**५६७ दत्तक (दत्त) मातापितृभ्यां (मात्रा पित्रा वा).

(९) **विस्मृ.**१५।२०; **विर.**५७०.

(१०) **विस्मृ.**१५।२१.

(११) **विस्मृ.**१५।२२,२३; **विर.**५७० मुप (ओपा).

(१२) **विस्मृ.**१५।२४-२६; **व्यक.**१५७; **विर.**५७१ पित्रा मात्रा च (स मात्रा पित्रा वा) (स च०); **व्यप्र.**४७९ स च (स).

(१३) **विस्मृ.**१५।२७; **व्यक.**१५७; **ड.**२।१४।२

सदृशं यं प्रकुर्यातां गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥

(१) सहोढ इति । तत्र प्रकाशकृता गर्भिण्याः कन्यात्व पुरस्कृत्य 'पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिता' इति सस्कार आक्षिप्तः । आथर्वणीयकेन विधिना पुनः सस्कारविधिः श्रुतावस्तीत्यन्ये इति सिद्धान्तदृशा लिखितम् । वस्तुतस्तु पाणिग्रहणिकमन्त्रजसस्कृतातिरिक्तहोमादिकर्मसस्काराभिप्राय सस्क्रियते पदमिति । विर.५६६–५६७

यत्र क्वचनेति । यत्र क्वचन ऊढायामनूढायां वा शूद्रायाम् । विर.५७३

(२) स्वक्षेत्र इति । स्वक्षेत्रे संस्कृतायामिति व्याख्यानव्याख्येयभावोऽन्यथा पौनरुक्त्यापत्तेः । व्यप्र.४६७

द्वादशपुत्राणा क्रमेण दायहरत्वम्

एतेषां पूर्वः पूर्वः श्रेयान् । स एव दायहरः । स चान्यान्बिभृयात् ।
अनेकपितृकाणां तु पितृतो भागकल्पना ।
यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः ॥*

(१) अनेकपितृकाणा एकस्या योपिति बहुभिः सगतायां जातानाम् । +व्यक.१५३

(२) पैतामहद्रव्यविभागशेषमाह–अनेकपितृकाणामिति । अनेके पितरो येषा पौत्राणा ते समा विषमा यदा पैतामह धनं विभजेयुस्तदा तेषा पितृसख्यया वैषाशकल्पना भवति न स्वसख्यया, प्रशब्दाच्च समुच्चयार्थः । यदैकत्र ये पुत्रास्तेषा कस्यचिदेकः कस्यचिद्द्वौ कस्यचित् त्रयः तदा ते त्रीनेव समान् भागान् कुर्युः, न तु षट्, समानजातीयाश्चेत् पितरः । विजातीयाना तु पितृणा यस्य यावानंशोऽग्रे वक्ष्यते तमेवाश तत्पुत्रो लभते न न्यूनाधिक्यमधमोत्तमसाम्येन । यथा बृहस्पतिः 'समवेतैस्तु यत्प्राप्तं सर्वं तत्र समाशिनः । तत्पुत्रा विषमसमाः पितृभागहराः स्मृताः ॥' इति । यद्यप्यस्य पैतामहद्रव्यविषयत्वमाहत्य न प्रतीयते तथापि पितृतोऽशकल्पनानुपपत्त्या यस्मिन् द्रव्ये पौत्राणा पितृद्वारक स्वत्व तद्विषयत्वं पर्यवस्यति । अत्रैव पुत्रपौत्रसमवाये विशेषमाह कात्यायनः—'अविभक्ते सुते प्रेते तत्सुत रिक्थभागिनम् । कुर्वीत जीवनं येन लब्ध नैव पिता महात् ॥ लभेताश तु पित्र्य तु पितृव्यात्तस्य वा सुतात् । स एवाशस्तु सर्वेषा भ्रातृणा न्यायतो भवेत् ॥ लभेत तत्सुताद्वापि निवृत्तिः परितो भवेत् ॥' इति । अविभक्ते पितरि प्रेते पुत्रः पितामहादप्राप्ताशः पितृव्यात्तत्पुत्रात्तत्पौत्राद्वा स्वपित्रंश गृह्णीयात्तमेवाश भ्रातृभ्यो विभजेदेव पुत्रस्तत्पौत्रोऽपि पञ्चमः पञ्चममात्रं लभत इत्युक्त प्राक् । यदा त्वविभक्तेषु भ्रातृषु केनचिदपुत्रमातामहाद्यदृक्थ लब्ध तदा तदपि सर्वैर्विभाज्यमिति प्राप्तावाह–यस्य पित्रा यन्मातामहाद्यदृक्थ लब्ध स एव तद्गृह्णीयान्नेतरभ्रातृपुत्र इति । अनेनाविभक्ताऽर्जितस्यापि तादृशस्याविभाज्यत्वमुक्तं, ऋक्थपदग्रहणात्प्रतिग्रहाद्यर्जित विभाज्यमेव परन्त्वर्जकस्य भागद्वयं कल्प्य 'येन चैषा स्वयमुपार्जित स्यात् स द्व्यंशमेव लभेते'ति स्मरणात्, सभूयोत्थाने तु समाशतैव । एवं प्रपितामहीयधनविभागोऽपि पितामहसख्यया द्रष्टव्यः । यद्वा एकस्यामेव योषिति यदा बहुभिः पुत्रा जन्यन्ते तदा तेषा कथ विभाग इत्यत आह–अनेकपितृकाणामिति । यो येन जनितः स तस्यैव ऋक्थभागित्यर्थः । यथाह बृहस्पतिः–'अथैकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ । यस्य यत्पैतृकं रिक्थ स तद्गृह्णाति नेतरः ॥' इति । नान्यः पारिभाषिकः क्षेत्रजः तस्य पूर्व विभागान्तरामानात् । किन्तु क्षेत्रमात्रोत्पन्न इति ध्येयम् । 'द्वौ तु यौ विवदेयाता द्वाभ्या जातौ स्त्रिया धने । तयोर्यद्यस्य पित्र्यं स्यात्तत्संगृह्णीत

---

* वस्तुतस्तु अय श्लोकः 'पुरुषपरम्पराया विभागविधि'प्रकरणे सगच्छते, परन्तु कल्पतरुकृतव्याख्यानानुसारेणात्र संगृहीत ।

+ स्मृसा., विचि. व्यकगतम् ।

तश्च (तस्तु); **विर.**५७३ उक्त; **स्मृसा.**७० उक्त; **चन्द्र.**१७६ उक्त; **बाल.**२।१३५ (पृ.२३५).

(१) **व्यप्र.**४७९ मनुविष्णू.

(२) **विस्मृ.**१५।२८-३०; **व्यक.**१५४ पूर्व. पूर्वः (य. पूर्वः): **मसु.**९।१८४ एते (ते); **विर.**५५१; **विचि.**२३१; **दमी.**१११ (स एव...बिभृयात्०), **व्यउ.**१४८ (एते... हरः०); **बाल.**२।१३२ ममुवत्: २।१३५ (पृ.२३४) पूर्वः पूर्वः (यः पूर्वः स); **दच.**३० ममुवत्.

(३) **विस्मृ.**१७।२३ तु (च); **व्यक.**१५३ तो भाग (तोंऽशवि); **स्मृसा.**६६-६७; **विचि.**२३५; **बाल.**२।१३० व्यकवत्; **समु.**१४० तो भाग (तोंऽशप्र) यस्य यत् (यद्यस्य).

नेतरत् ॥' इति मानवात् । वै.

दायहरणपिण्डदानसम्बन्धः

[1]यश्चार्थहरः स पिण्डदायी स्मृतः ।

[2]यो यत आददीत स तस्मै श्राद्धं कुर्यात्, पिण्डं च त्रिपुरुषं दद्यात् ।

[3]पुत्रः पितृवित्तालाभेऽपि पिण्डं दद्यात् ।

[4]दौहित्रस्य मातामहश्राद्धं निष्कारणम् ।

[5]सति कर्तर्यन्यस्य कर्तृत्वं समनन्तरकर्तर्यनन्तरकर्तृत्वं न स्मृतम् ।

[6]उद्धृतद्रव्यादेकेनैव शक्तेन श्राद्धषोडशकं कार्यम् *।

(१) अत्र श्राद्धशब्देन प्रोपितैकोद्दिष्टान्युच्यन्ते इति प्रकाशकारः । विर.६००

(२) श्राद्ध सपिण्डीकरणान्तम् । स्मृसा.७४

(३) मृतस्य रिक्थग्राहिणा येन केनापि राजपर्यन्तेनौर्ध्वदेहिकं दशाहान्तं कार्यम् । तथा च विष्णुः— यश्चार्थहर इति । निरूपितं चेद श्राद्धमयूखेऽधिकारिनिर्णये मया । व्यम.६५

---

* सवि.व्याख्यान 'अकृता वा कृता वापि' इति मनुवचने द्रष्टव्यम् ।

(१) **विस्मृ.**१५।३९ (स्मृतः०); **व्यक.**१६१; **विर.** ५९९ श्वार्थ (श्वाश) (स्मृतः०); **स्मृसा.**७४,१३८, १४४, **व्यनि.** दायी (दः); **स्मृचि.**३३ विस्मृवत्; **चन्द्र.**९३; **व्यम.**६५; **विता.**४११ विस्मृवत्, **बाल.**२।१३५ (पृ.२१७, २२४, २२९) विस्मृवत्; **समु.**१४३; **कृभ.**८८१.

(२) **अप.**२।१३६ स्मृतिः; **व्यक.**१६१ यत (धन) (कुर्यात्०); **विर.**५९९ यत (धन) स्मृति.; **स्मृसा.**७४ यत (धन) स्मै (स्य) : १३८ यत (यस्य) तस्मै (तत्): १४४ (यो यस्यार्थमाददीत स तस्य श्राद्धं कुर्वीत); **व्यनि.**; **सवि.**४२८ (पिण्ड...द्यात्०); **चन्द्र.**९३ यत (यस्यार्थं) तस्मै (तस्य) (पिण्ड ...द्यात्०); **बाल.**२।१३५ (पृ २०६) यत (धन) वृद्धशाततपः.

(३) **विस्मृ.**१५।४२; **अप.**२।१३६ पुत्रः (अतः); **विर.** ६०० **वसिष्ठः**; **स्मृसा.**७४ वित्ता (द्रव्या). १३८ वित्ता (धना): १४४ ऽपि+(तत्); **बाल.**२।१३५ (पृ.२१७) लाभे ऽपि (भावे).

(४) **सवि.**४२७. (५) **सवि.**४२९. (६) **सवि.**४२८.

[7]दौत्रिमोऽपि स्वजनयितुः स्वधां कुर्यात् ।

तत्तु दत्त्रिमजनकस्य सतत्यभावे वेदितव्यम् ।

सवि.३९४

[8]एकच्छायाश्रितानां तु यः शिष्येत् स दद्यात् ।

शंखः शंखलिखितौ च

औरस । पुत्रमहिमा ।

[9]ब्राह्मणस्तु सवर्णायाः पाणिं गृह्णीयात्, तस्यां पितामहानां तमवोऽनुसूयन्ते, पुत्रोपचारेणात्मानं संमन्त्रयेत् । एवं ह्याह—अङ्गादङ्गात्संभवसि हृदयादधिजायसे ।

आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषस्यात्मा तथा त्वमभिजायसे ॥
आत्मा पुत्र इति प्रोक्तः पितुर्मातुरनुग्रहात् ।
पुन्नाम्नस्त्रायते यस्मात्पुत्रस्तेनासि संज्ञितः ॥
[10]अग्निहोत्रं त्रयो वेदा यज्ञाश्च शतदक्षिणाः ।
ज्येष्ठपुत्रप्रसूतस्य कलां नार्हन्ति षोडशीम् ॥
[11]पुत्रपौत्रप्रतिष्ठस्य बहुपुत्रस्य जीवतः ।
अक्षुण्णवेदयज्ञस्य हस्तप्राप्तं त्रिविष्टपम् ॥
[12]पिता पितामहश्चैव तथैव प्रपितामहः ।
जातं पुत्रं प्रशंसन्ति पिप्पलं शकुना इव ॥
मधुमांसेन खण्डेन पयसा पायसेन वा ।
एष दास्यति नस्तृप्तिं वर्षासु च मघासु च ॥
[13]पितृणामनृणो जीवन् दृष्ट्वा पुत्रमुखं पिता ।
स्वर्गी स तेन जातेन तस्मिन् संन्यस्य तद्दृणम् ॥

---

(१) **सवि.**३९४. (२) **विव्य.**२९.

(३) **व्यक.**१५५; **विर.**५५४; **व्यप्र.**४६८ गर्भं (गर्भे) मभि (मिह्) यते (यसे) बौधायनः; **बाल.**२।१३५ (पृ २३५-२३६) (ब्राह्मण...दित्यादि०) तथा त्वमभिजा (तस्मात्त्वमिह जा) पुन्नाम्न (सर्वत्र) यते (यसे).

(४) **दा.**१६१; **व्यक.**१५९; **विर.**५८४; **व्यप्र.**५०६ श्च शत (श्चैव स); **बाल.**२।१३५ (पृ.२२०) शत (सह) प्रसूतस्य (स्य पौत्रस्य).

(५) **व्यक.**१५९ क्षुण्ण (स्कन्न); **विर** ५८५; **बाल.**२। १३५ (पृ.२२०) क्षुण्ण (स्कन्न) प्राप्त (मात्र).

(६) **दा.**६३ शखलिखितयमा.; **व्यप्र.**४६१ खण्डे (खड्गे) वा (च) शखलिखितगौतमाः.

(७) **दा.**१६१; **व्यप्र.**५०६; **बाल.**२।१३७ जीवन् (जायेत्) तद् (ते ऋ).

पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥
यत्र क्वचन जातेन पिता पुत्रेण नन्दति।
तेन चानृणतां याति पितॄणां पिण्डदेन वै ॥

[पिता पितामहश्चेति] प्रपितामहग्रहणात् पुत्रपद प्रपौत्रपर्यन्तपरम्। तदनेन प्रपौत्रपर्यन्तस्य श्राद्धदानेन प्रपितामहपर्यन्तोपकारकत्वात् तुल्यो दायाधिकारः।

दा.६३

तदेव पुत्रादिभिर्जन्मतः प्रभृति पितुः परलोकोचित-महोपकारनिष्पादनात् मृतस्य तस्य च पार्वणविधिना पिण्डदानात् पुत्रायर्थं तद्धन मृतमेवोपकरोतीति न्यायप्राप्त पुत्रादीना स्वामित्व श्रुतम्। दा.१६२

क्षेत्रजः

मन्त्रसंस्कारकर्तुरपत्यमित्याङ्गिरसो बीजिक्षेत्रिकयोरनुमते यद्बीजं प्रकीर्यते तत् द्विधा शस्यं इत्युशना।

मन्त्रसंस्कारकर्तुः पाणिग्राहकस्य। तद्द्विधा द्वयोरपि, शस्यं क्षेत्रफलम्। विर.५५७

क्षेत्रिकस्याविज्ञानेन यद्बीजं प्रकीर्यते तत्क्षेत्रिकस्यैव।

नियतं क्षेत्रिणामपत्यमिति च वेदवादो मातुरपत्यमित्येके ऋषयो वदन्ति व्यामुष्यायणमनुमन्त्रयत इति। वसिष्ठकश्यपयोर्जलगतयोरुदवासादुत्तीर्य एकः प्रजामुत्पादयत्यविज्ञातो लोकानाम्। एवं तयोर्द्विधा संतानः। यस्मात्कुलधर्मपरिग्रहरिक्थपिण्डोदकानि चैकतः कृत्वा परक्षेत्रोत्पन्ना अपि प्रयच्छन्ति।

व्यामुष्यायणो द्विपितृकमपत्य अनुमन्त्रयते द्वावपि पितरौ एकत्र पिण्डे अनुकीर्तयति। उदवासाज्जलवासादेकः अन्यतरः अन्यतरस्य क्षेत्रे उत्पादयति। यतः कुलधर्माणा परिग्रहो ग्रहणमनुष्ठानमृक्थस्य ग्रहणम्। पिण्डोदकानि च एकत एकस्मै क्षेत्रिकाय दत्त्वा परक्षेत्रेऽपि उत्पन्ना बीजिनेऽपि पिण्डोदक प्रयच्छन्ति।

विर.५८१-५८२

पुत्रिका पुत्रिकापुत्रश्च

पुत्रिका पुत्रवदिति प्रचेतसः। तस्यापत्यं पुत्रिकासुतो मातामहपितामहाभ्यां पिण्डदः।
पुत्रदौहित्रयोर्लोके न विशेषोऽस्त्यनुग्रहे।
तस्मात्तु संशयान्नेहोपेयादभ्रातृकां स्त्रियम् ॥

(१) अनुग्रहे पुत्रामनरकोद्धारे। संशयादिय पुत्रत्वेन परिगृहीता न वेत्याकारात्। विर.५६०

(२) अभ्रातृकाऽपि या पुत्रिकात्वेन दीयते,नान्या। स्मृसा.६८

औरसादयः षट् दायादाः. पुत्रास्तेषा दायहरत्वतारतम्यम्। पूर्वेषामभावे अदायादपर्णा दायादत्वक्रमः।

षट्सु दायादेषु विकल्पः। औरसः क्षेत्रजः पुत्रिकापुत्रः पौनर्भवः कानीनो गूढोत्पन्नश्चेति षट्पुत्रा बन्धुदायादाः पितृपितामहानामेकगोत्राः रिक्थपिण्डौ सापिण्ड्यं च। तेषामर्थं दशधा कुर्यात् द्वौ भागौ पितुर्द्वावौरसस्य त्रीन् क्षेत्रजपुत्रिकापुत्रयोरेकैकमितरेषाम्।

विकल्पोऽशव्यवस्था। बन्धुदायादाः गोत्रपिण्डो-

(१) **व्यक.**१५६; **विर.**५५९-५६०, **स्मृसा.**६८ पुत्रिका + (हि) प्रचे (प्राचे) तस्या (अस्याम) हाभ्या (हाना) (लोके०) तु स (स्स) नेहो (न्नो) का (का) (स्त्रियम्०).

(२) **विश्व.**२।१३६ (षट्सु. .कुर्यात्०) द्वावौ (द्वौवेवौ) त्रीन् (त्रय.) शस्यः; **व्यक.**१५३ पुत्रिकापुत्रः (पुत्रिकासुतः) (बन्धु०) पिण्डौ...ण्डश्च (पिण्डोदकसामान्याः) तेषामर्थं (अथ तेषामर्थं) दशधा (दशभागान्) वौरसस्य (वौरसमपत्य); **विर.**५४७, **व्यउ.**१४८ (षट्सु...विकल्पः०) (पितृपिता.., रेषाम्०).

(१) **दा.**१६१ विष्ट (पिष्ट) मनुशखलिखितविष्णुवसिष्ठहारीता.; **व्यक.**१५९ शखलिखितविष्णुवसिष्ठहारीता.; **विर.** ५८५ दावत्, शखलिखितविष्णुवसिष्ठहारीता ; **व्यप्र.**५०६ मनुलिखितवसिष्ठहारीताः; **विता.**३८४ ब्रध्न(वृद्ध) शखलिखितविष्णुवसिष्ठहारीताः, **बाल.**२।१३७ पुत्रस्य पौत्रेण (पौत्रस्य पुत्रेण) मनुशखलिखितवसिष्ठहारीताः.

(२) **व्यक.**१५९ शंखलिखितपैठीनसयः; **विर.**५८४ चानृ (चाक्र) शंखलिखितपैठीनसयः; **बाल.**२।१३५ (पृ.२२०) शंखलिखितपैठीनसयश्च.

(३) **विर.**५५७, **व्यप्र.**४७३ शस्यं (स्वं स्यात्)

(४) **व्यक.**१५८ (क्षेत्रियस्याबि...न यद्बीज प्रकीर्यते। न तत्र बीजी भागमर्हति); **विर** ५८०.

(५) **व्यक.**१५९; **विर.**५८१-५८२.

दकभाज ऋक्थभाजश्च । एतदेव विवृत पितृमातामहानामित्यादिना । अनेन दशधा कृते साधारणेऽर्थे द्वौ भागौ पितुः द्वावौरसस्य, सार्धः सार्धो भागः क्षेत्रजस्य पुत्रिकापुत्रस्य चोक्तः । एक एको भागः पौनर्भवकानीन गूढजेभ्यो देयः । एतेभ्यः प्रजीवनमेतच्च दायादेषु पुत्रेषु षट्सु सत्सु । विर.५४७-५४८

रासभोऽधिको ज्येष्ठस्य तस्याभावे क्षेत्रजपुत्रिकासुतयोस्तयोरप्यभावे त्रयाणामितरेषां, तेषामभावे सवर्णानामदायादानां सर्वऋक्थग्रहणम् ।

अत्र अदायादानामपि पूर्वपूर्वाभावे ऋक्थग्रहण बोद्धव्यम् । विर.५४७

अपविद्धः सहोढो दत्तः क्रीतः शूद्रापुत्र उपनतश्च स्वयमित्यदायादाः षडेव पुत्राः । तेषां सारानुसारतः अर्थमपेक्ष्य देयमेतेभ्यः प्रजीवनमिति ।

अत्र महर्षीणां परस्परविरुद्धभागग्रहणवादो निर्गुणत्वगुणवत्त्वतदधिकगुणवत्त्वैरविरोधनीय इति । विर.५४७

श्रेयसः श्रेयसोऽभावे पापीयान् रिक्थमर्हति ।
बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः ॥

(१) श्रेयसः श्रेयसः औरसादेरभावे पापीयान्न्यूनः क्षेत्रजादिरिति तात्पर्यार्थः । विर.५५२

(२) तदय निर्गलितोऽर्थः । तत्रादौ दायग्रहणक्रमः । औरसपुत्रस्तत्पुत्रस्तत्पुत्रः । तत एकादश पुत्रिकापुत्रादयः पूर्वपूर्वाभावे क्रमेण । एव तत्पुत्रादयोऽपि । अत एव– श्रेयस इति । बाल २।१३५ (पृ.२३६)

महाभारतम्

पुत्रमहिमा

एकपुत्रो ह्यपुत्रो मे मतः कौरवनन्दन ।
एकं चक्षुर्यथा चक्षुर्नाशे तस्यान्ध्यमेव हि ॥
अनपत्यतैकपुत्रत्वमित्याहुर्धर्मवादिनः ॥
चक्षुरेकं च पुत्रश्च अस्ति नास्ति च भारत ।
चक्षुर्नाशे तनोर्नाशः पुत्रनाशे कुलक्षयः ॥
अग्निहोत्रं त्रयी विद्या यज्ञाश्च सहदक्षिणाः ।
सर्वाण्येतान्यपत्यस्य कलां नार्हन्ति षोडशीम् ॥
एवमेतन्मनुष्येषु तच्च सर्वं प्रजास्विति ।
यदपत्यं महाप्राज्ञ तत्र मे नास्ति संशयः ॥
अपत्येनानृणो लोके पितृणां नास्ति संशयः ॥
एषा त्रयी पुराणानां देवतानां च शाश्वती ॥
अपत्यं कर्म विद्या च तीणि ज्योतींषि भारत ॥
ममेयं परमा तुष्टिर्दुहिता मे भवेदयदि ॥
एका शताधिका बाला भविष्यति कनीयसी ।
ततो दौहित्रजालोकादवाप्योऽसौ पतिर्मम ॥
अधिका किल नारीणां प्रीतिर्जामातृजा भवेत् ।
यदि नाम ममापि स्याद्दुहितैका शताधिका ॥
कृतकृत्या भवेयं वै पुत्रदौहित्रसंवृता ।
यदि सत्यं तपस्तप्तं दत्तं वाऽप्यथवा हुतम् ॥
गुरवस्तोषिता वापि तथाऽस्तु दुहिता मम ॥

पुत्रमहिमा, पुत्रप्रकाराः, क्षेत्रजपुत्रविधिविशेषतश्च

पाण्डुरुवाच—

अग्रजस्य महाभागा न द्वारं परिचक्षते ।
स्वर्गे तेनाभितप्तोऽहमप्रजस्तु ब्रवीमि वः ॥
पित्र्यादृणादनिर्मुक्तस्तेन तप्ये तपोधनाः ।
देहनाशे ध्रुवो नाशः पितृणामेष निश्चयः ॥
ऋणैश्चतुर्भिः संयुक्ता जायन्ते मानवा भुवि ।
पितृदेवर्षिमनुजैर्देयं तेभ्यश्च धर्मतः ॥
एतानि तु यथाकालं यो न बुध्यति मानवः ।
न तस्य लोकाः सन्तीति धर्मविद्भिः प्रतिष्ठितम् ॥

---

(१) **व्यक.**१५३ रासभो (ऋषभो) (त्रयाणाम्०) तेषामभा ....नाम (तेषामप्यभावे षण्णाम) (सर्वऋक्थग्रहणम्०), **मभा.** २८।३५ रासभोऽधिको (उपार्जित) ष्टस्य (ष्ठाय) तस्या (तद) सुत (पुत्र) मभावे (मप्यभावे षड्भ्यः) (सवर्णा . .णम्०) शखः; **विर.**५४७.

(२) **व्यक.**१५३ दत्तः क्रीतः (दत्तकः क्रीतकः) नतश्च (नतः); **विर.**५४७ (अर्थ...नमिति०).

(३) **व्यक.**१५५ भावे(लाभे)पू.; **विर.**५५२ पू.; **व्यनि.**; **बाल.**२।१३५ (पृ.२३६) भावे (लाभे) मनुशंखलिखिताः.

(४) **दमी.**५५.

(१) **भा.**१।१००।६७. (२) **भा.**(कुम्भ.) १।१०७।६९.

(३) **भा.**१।१००।६७-६९.

(४) **भा.** (कुम्भ.)१।१०७।७२.

(५) **भा** १।१००।६९. (६) **भा.**(कुम्भ) १।१०७।७३.

(७) **भा.**१।११६।१०.

(८) **भा.**१।११६।११; **दमी.**१०९.

(९) **भा.**१।११६।१२-१४.

(१०) **भा.**१।१२०।१५-४१.

यज्ञैस्तु देवान् प्रीणाति स्वाध्यायतपसा मुनीन् ।
पुत्रैः श्राद्धैः पितॄंश्चापि आनृशंस्येन मानवान् ॥
ऋषिदेवमनुष्याणां परिमुक्तोऽस्मि धर्मतः ॥
त्रयाणामितरेषां तु नाश आत्मनि नश्यति ।
पित्र्यादृणादनिर्मुक्त इदानीमस्मि तापसाः ॥
इह तस्मात्प्रजाहेतोः प्रजायन्ते नरोत्तमाः ।
यथैवाहं पितुः क्षेत्रे जातस्तेन महर्षिणा ॥
तथैवास्मिन् मम क्षेत्रे कथं वै संभवेत्प्रजा ।

ऋषय ऊचुः—

अस्ति वै तव धर्मात्मन् विद्म देवोपमं शुभम्॥
अपत्यमनघं राजन् वयं दिव्येन चक्षुषा ।
दैवोदिष्टं नरव्याघ्र कर्मणेहोपपादय ॥
अक्लिष्टं फलमव्यग्रो विन्दते बुद्धिमान्नरः ।
तस्मिन् दृष्टे फले राजन् प्रयत्नं कर्तुमर्हसि ॥
अपत्यं गुणसंपन्नं लब्ध्वा प्रीतिमवाप्स्यसि ।

वैशंपायन उवाच—

तच्छ्रुत्वा तापसवचः पाण्डुश्चिन्तापरोऽभवत् ॥
आत्मनो मृगशापेन जानन्नुपहतां क्रियाम् ।
सोऽब्रवीद्विजने कुन्तीं धर्मपत्नीं यशस्विनीम् ।
अपत्योत्पादने यत्नमापदि त्वं समर्थय ॥
अपत्यं नाम लोकेषु प्रतिष्ठा धर्मसंहिता ।
इति कुन्ति विदुर्धीराः शाश्वतं धर्मवादिनः ॥
इष्टं दत्तं तपस्तप्तं नियमश्च स्वनुष्ठितः ।
सर्वमेवानपत्यस्य न पावनमिहोच्यते ॥
सोऽहमेवं विदित्वैतत्प्रपश्यामि शुचिस्मिते ।
अनपत्यः शुभान् लोकान्न प्राप्स्यामीति चिन्तयन्॥
मृगाभिशापान्नष्टं मे जननं ह्यकृतात्मनः ।
नृशंसकारिणो भीरु यथैवोपहतं पुरा ॥
इमे वै बन्धुदायादाः षट् पुत्रा धर्मदर्शने ।
षडेवाबन्धुदायादाः पुत्रास्तान्शृणु मे पृथे ॥
स्वयंजातः प्रणीतश्च परिक्रीतश्च यः सुतः ।
पौनर्भवश्च कानीनः स्वैरिण्यां यश्च जायते ॥
दत्तः क्रीतः कृत्रिमश्च उपगच्छेत् स्वयं च यः ।
सहोढो ज्ञातिरेताश्च हीनयोनिधृतश्च यः ॥
पूर्वपूर्वतमाभावं मत्वा लिप्सेत वै सुतम् ।
उत्तमादवरः पुंसः काङ्क्षन्ते पुत्रमापदि ॥
अपत्यं धर्मफलदं श्रेष्ठां विन्दन्ति मानवाः ।
आत्मशुक्रादपि पृथे मनुः स्वायम्भुवोऽब्रवीत् ॥
तस्मात्प्रहेष्याम्यद्य त्वां हीनः प्रजननात् स्वयम् ।
सदृशाल्लेयसो वा त्व विद्धयपत्यं यशस्विनि ॥
शृणु कुन्ति कथामेतां शारदण्डायिनीं प्रति ।
सा वीरपत्नी गुरुणा नियुक्ता पुत्रजन्मनि ॥
पुष्पेण प्रयता स्नाता निशि कुन्ति चतुष्पथे ।
वरयित्वा द्विजं सिद्धं हुत्वा पुंसवनेऽनलम् ॥
कर्मण्यवसिते तस्मिन् सा तेनैव सहावसत् ।
तत्र त्रीञ्जनयामास दुर्जयादीन् महारथान् ॥
तथा त्वमपि कल्याणि ब्राह्मणात्तपसाधिकात् ।
मन्नियोगाद्व्रत क्षिप्रमपत्योत्पादनं प्रति ॥

श्वेतकेतुपूर्वः श्वेतकेतूत्तरश्च क्षेत्रजविधिः

पाण्डुरुवाच—

अथ त्विदं प्रवक्ष्यामि धर्मतत्वं निबोध मे ।
पुराणमृषिभिर्दृष्टं धर्मविद्भिर्महात्मभिः ॥
अनावृताः किल पुरा स्त्रिय आसन्वरानने ।
कामचारविहारिण्यः स्वतन्त्राश्चारुहासिनि ॥
तासां व्युच्चरमाणानां कौमारात्सुभगे पतीन् ।
नाधर्मोऽभूद्वरारोहे स हि धर्मः पुराऽभवत् ॥
तं चैव धर्मं पौराणं तिर्यग्योनिगताः प्रजाः ।
अद्याप्यनुविधीयन्ते कामक्रोधविवर्जिताः ॥
प्रमाणदृष्टो धर्मोऽयं पूज्यते च महर्षिभिः ।
उत्तरेषु च रम्भोरु कुरुष्वद्यापि पूज्यते ॥
स्त्रीणामनुग्रहकरः स हि धर्मः सनातनः ।
अस्मिंस्तु लोके न चिरान्मर्यादेयं शुचिस्मिते ।
स्थापिता येन यस्माच्च तन्मे विस्तरतः शृणु ॥
बभूवोद्दालको नाम महर्षिरिति नः श्रुतम् ।
श्वेतकेतुरिति ख्यातः पुत्रस्तस्याभवन्मुनिः ।
मर्यादेयं कृता तेन धर्म्या वै श्वेतकेतुना ॥
कोपात्कमलपत्राक्षि यदर्थं तन्निबोध मे ।
श्वेतकेतोः पिता देवि तप उग्रं समास्थितः ॥
अभ्यागच्छद्द्विजः कश्चिद्वलीपलितसंततः ॥

(१) भा १।१२२।३-११ (२) भा. (कुम्भ) १।१२८।१५. (३) भा. (कुम्भ.) १।१२८।१७.

ब्राह्मण उवाच—
अपुत्री भार्यया चार्थी वृद्धोऽहं मन्दचाक्षुषः ।
पित्र्यादृणादनिर्मुक्तः पूर्वमेवाकृतस्त्रियः ॥
प्रजारणिस्तु पत्नी ते कुलशीलसमन्विता ।
सदृशी मम गोत्रेण वहाम्येनां क्षमस्व मे ॥
पाण्डुरुवाच—
श्वेतकेतोः किल पुरा समक्षं मातरं पितुः ।
जग्राह ब्राह्मणः पाणौ गच्छाव इति चाब्रवीत् ॥
ऋषिपुत्रस्ततः कोपं चकारामर्षचोदितः ।
मातरं तां तथा दृष्ट्वा नीयमानां बलादिव ॥
दुर्ब्राह्मण विमुञ्च त्वं मातरं मे पतिव्रताम् ।
ब्राह्मण उवाच—
अपत्यार्थी श्वेतकेतो वृद्धोऽहं मन्दचाक्षुषः ।
पिता ते ऋणनिर्मुक्तस्त्वया पुत्रेण काश्यप ॥
ऋणादहमनिर्मुक्तो वृद्धोऽहं विगतस्पृहः ।
मम को दास्यति सुतां कन्यां संप्राप्तयौवनाम् ॥
प्रजारणिमिमां पत्नीं विमुञ्च त्वं महातपः ।
एकया प्रजया प्रीतो मातरं ते ददाम्यहम् ॥
एवमुक्तः श्वेतकेतुर्लज्जया क्रोधमेयिवान् ॥
क्रुद्धं तं तु पिता दृष्ट्वा श्वेतकेतुमुवाच ह ॥
मा तात कोपं कार्षीस्त्वमेष धर्मः सनातनः ।
अनावृता हि सर्वेषां वर्णानामङ्गना भुवि ॥
यथा गावः स्थितास्तात स्वे स्वे वर्णे तथा प्रजाः ।
ऋषिपुत्रोऽथ तं धर्मं श्वेतकेतुर्न चक्षमे ॥
चकार चैव मर्यादामिमां स्त्रीपुंसयोर्भुवि ।
मानुषेषु महाभागे न त्वेवाऽन्येषु जन्तुषु ॥
तदाप्रभृति मर्यादा स्थितेयमिति नः श्रुतम् ।
व्युच्चरन्त्याः पतिं नार्या अद्यप्रभृति पातकम् ॥
भ्रूणहत्यासमं घोरं भविष्यत्यसुखावहम् ॥
अद्याप्यनुविधीयन्ते कामक्रोधविवर्जिताः ।
उत्तरेषु महाभागे कुरुष्वेवं यशस्विनि ॥
पुराणदृष्टो धर्मोऽयं पूज्यते च महर्षिभिः ॥

(१) भा. (कुम्भ.)१।१२८।२५,२६.
(२) भा.१।१२२।११,१३.
(३) भा. (कुम्भ.) १।१२८।३१,३६-३९. (४) भा.१।१२२।१३-१८. (५) भा. (कुम्भ.) १।१२८।४५,४६.

भार्यां तथा व्युच्चरतः कौमारब्रह्मचारिणीम् ।
पतिव्रतामेतदेव भविता पातकं भुवि ॥
पत्या नियुक्ता या चैव पत्नी पुत्रार्थमेव च ॥
न करिष्यति तस्याश्च भविष्यति तदेव हि ।
इति तेन पुरा भीरु मर्यादा स्थापिता बलात् ॥
उद्दालकस्य पुत्रेण धर्म्या वै श्वेतुकेतुना ।
सौदासेन च रम्भोरु नियुक्ता पुत्रजन्मनि ॥
मदयन्ती जगामर्षिं वसिष्ठमिति नः श्रुतम् ।
तस्माल्लेभे च सा पुत्रमश्मकं नाम भामिनी ॥
एवं कृतवती साऽपि भर्तुः प्रियचिकीर्षया ।
अस्माकमपि ते जन्म विदितं कमलेक्षणे ॥
कृष्णद्वैपायनाद्वीरु कुरूणां वंशवृद्धये ।
अत एतानि सर्वाणि कारणानि समीक्ष्य वै ॥
ममैतद्वचनं धर्म्यं कर्तुमर्हस्यनिन्दिते ।
ऋतावृतौ राजपुत्रि स्त्रिया भर्ता पतिव्रते ॥
नातिवर्तव्य इत्येवं धर्मं धर्मविदो विदुः ।
शेषेष्वन्येषु कालेषु स्वातन्त्र्यं स्त्री किलार्हति ॥
धर्ममेवं जनाः सन्तः पुराणं परिचक्षते ।
भर्ता भार्यां राजपुत्रि धर्म्यं वाऽधर्म्यमेव वा ॥
यद्ब्रूयात्तत्तथा कार्यमिति वेदविदो विदुः ।
विशेषतः पुत्रगृद्धी हीनः प्रजननात्स्वयम् ॥
यथाहमनवद्याङ्गि पुत्रदर्शनलालसः ।
तथा रक्ताङ्गुलिनिभः पद्मपत्रनिभः शुभे ॥
प्रसादार्थं मया तेऽयं शिरस्यभ्युद्यतोऽञ्जलिः ।
मन्नियोगात्सुकेशान्ते द्विजातेस्तपसाधिकात् ॥
पुत्रान्गुणसमायुक्तानुत्पादयितुमर्हसि ।
त्वत्कृतेऽहं पृथुश्रोणि गच्छेयं पुत्रिणां गतिम् ॥
वैशंपायन उवाच—
एवमुक्ता ततः कुन्ती पाण्डुं परपुरंजयम् ।
प्रत्युवाच वरारोहा भर्तुः प्रियहिते रता ॥
पितृवेश्मन्यहं बाला नियुक्ताऽतिथिपूजने ।
उग्रं पर्यचरं तत्र ब्राह्मणं संशितव्रतम् ॥
निगूढनिश्चयं धर्मं यं तं दुर्वाससं विदुः ।
तमहं संशितात्मानं सर्वयत्नैरतोषयम् ॥
समेऽभिचारसंयुक्तमाचष्ट भगवान्वरम् ।

(१) भा.१।१२२।१८-४४.

मन्त्रं त्विमं च मे प्रादादब्रवीच्चैव मामिदम् ॥
यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि ।
अकामो वा सकामो वा वशं ते समुपैष्यति ॥
तस्य तस्य प्रसादात्ते राज्ञि पुत्रो भविष्यति ।
इत्युक्ताहं तदानेन पितृवेश्मनि भारत ॥
ब्राह्मणस्य वचस्तथ्यं तस्य कालोऽयमागतः ।
अनुज्ञाता त्वया देवमाह्वयेयमहं नृप ॥
तेन मन्त्रेण राजर्षे यथा स्यान्नौ प्रजा हिता ।
आवाहयामि कं देवं ब्रूहि सत्यवतां वर ।
त्वत्तोऽनुज्ञाप्रतीक्षां मां विद्धयस्मिन्कर्मणि स्थिताम् ॥

पाण्डुरुवाच—

अद्यैव त्वं वरारोहे प्रयतस्व यथाविधि ।
धर्ममावाहय शुभे स हि लोकेषु पुण्यभाक् ॥
अधर्मेण न नो धर्मः संयुज्यति कथंचन ।
लोकश्चायं वरारोहे धर्मोऽयमिति मन्यते ॥
धार्मिकश्च कुरूणां स भविष्यति न संशयः ।
धर्मेण चाऽपि दत्तस्य नाधर्मे रंस्यते मनः ॥
तस्माद्धर्मं पुरस्कृत्य नियता त्वं शुचिस्मिते ।
उपचाराभिचाराभ्यां धर्ममावाहयस्व वै ॥

वैशंपायन उवाच—

सा तथोक्ता तथेत्युक्त्वा तेन भर्त्रा वराङ्गना ।
अभिवाद्याऽभ्यनुज्ञाता प्रदक्षिणमवर्तत ॥

दुहिता दौहित्रश्च दायहरः । पुत्रदौहित्रसाम्यम् ।

युधिष्ठिर उवाच—

अथ केन प्रमाणेन पुंसामादीयते धनम् ।
पुत्रवद्धि पितुस्तस्य कन्या भवितुमर्हति ॥

भीष्म उवाच—

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ॥
अन्यत्र जामया सार्धं प्रजानां पुत्र ईहते ।
दुहिताऽन्यत्र जातेन पुत्रेणापि विशिष्यते ॥
दौहित्र एव तद्रिक्थमपुत्रस्य पितुर्हरेत् ।
ददाति हि स पिण्डान्वै पितुर्मातामहस्य च ।
पुत्रदौहित्रयोरेव विशेषो नास्ति धर्मतः ॥
दौहित्रकेण धर्मेण तत्र पश्यामि कारणम् ॥

विक्रीतकन्यापुत्रः कन्यापितुरेव । कन्यापुत्रविक्रयनिषेधः । आर्षविवाहनिषेधः ।

[1]विक्रीतासु हि ये पुत्रा भवन्ति पितुरेव ते ॥
असूयवस्त्वधर्मिष्ठाः परस्वादायिनः शठाः ।
आसुरादधिसंभूता धर्माद्विषमवृत्तयः ॥
अत्र गाथा यमोद्गीताः कीर्तयन्ति पुराविदः ।
धर्मज्ञा धर्मशास्त्रेषु निबद्धा धर्मसेतुषु ॥
यो मनुष्यः स्वकं पुत्रं विक्रीय धनमिच्छति ।
कन्यां वा जीवितार्थाय यः शुल्केन प्रयच्छति ॥
सप्तावरे महाघोरे निरये कालसाह्वये ।
स्वेदं मूत्रं पुरीषं च तस्मिन्मूढः समश्नुते ॥
आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् ।
अल्पो वा बहु वा राजन विक्रयस्तावदेव सः ॥
यद्यप्याचरितः कैश्चिन्नैष धर्मः सनातनः ।
अन्येषामपि दृश्यन्ते लोभतः सप्रवृत्तयः ॥
वरयां कुमारीं बलतो ये तां समुपभुञ्जते ।
एते पापस्य कर्तारस्तमस्यन्धे च शेरते ॥
अन्योऽप्यथ न विक्रेयो मनुष्यः किं पुनः प्रजाः ।
अधर्ममूलैर्हि धनैस्तैर्न धर्मोऽथ कश्चन ।

औरसानन्तरजनिरुक्तजपतितजदत्तकृताध्यूढापध्वसजापसदाख्याः पुत्राः

युधिष्ठिर उवाच—

ब्रूहि तात कुरुश्रेष्ठ वर्णानां त्वं पृथक् पृथक् ।
कीदृश्यां कीदृशाश्चापि पुत्राः कस्य च के च ते ॥
विप्रवादाः सुबहवः श्रूयन्ते पुत्रकारिणाम् ।
अत्र नो मुह्यतां राजन् संशयं छेत्तुमर्हसि ॥

भीष्म उवाच—

आत्मा पुत्रश्च विज्ञेयस्तस्यानन्तरजश्च यः ।
निरुक्तजश्च विज्ञेयः सुतः प्रसृतजस्तथा ॥
पतितस्य तु भार्याया भर्त्रा सुसमवेतया ।
तथा दत्तकृतौ पुत्रावध्यूढश्च तथाऽपरः ॥
षडपध्वंसजाश्चापि कानीनापसदास्तथा ।

(१) भा.१३।४५।१०,११,१४.
(२) भा.१३।४५।१२,१३,१५.

(१) भा.१३।४५।१५-२३.
(२) भा.१३।४९।१-२८.

इत्येते वै समाख्यातास्तान्विजानीहि भारत ॥

युधिष्ठिर उवाच —

षडपध्वंसजाः के स्युः के वाऽप्यपसदास्तथा ।
एतत्सर्वं यथातत्त्वं व्याख्यातुं मे त्वमर्हसि ॥

भीष्म उवाच—

त्रिषु वर्णेषु ये पुत्रा ब्राह्मणस्य युधिष्ठिर ।
वर्णयोश्च द्वयोः स्यातां यौ राजन्यस्य भारत ॥
एको विड्वर्ण एवाथ तथाऽत्रैवोपलक्षितः ।
षडपध्वंसजास्ते हि तथैवापसदान् शृणु ॥
चाण्डालो व्रात्यवैद्यौ च ब्राह्मण्यां क्षत्रियासु च ।
वैश्यायां चैव शूद्रस्य लक्ष्यन्तेऽपसदास्त्रयः ॥
मागधो वामकश्चैव द्वौ वैश्यस्योपलक्षितौ ।
ब्राह्मण्यां क्षत्रियायां च क्षत्रियस्यैक एव तु ॥
ब्राह्मण्यां लक्ष्यते सूत इत्येतेऽपसदाः स्मृताः ।
पुत्रा ह्येते न शक्नुवन्ते मिथ्या कर्तुं नराधिप ॥

रेतजः क्षेत्रजः कृतकश्च

युधिष्ठिर उवाच—

क्षेत्रजं केचिदेवाहुः सुतं केचित्तु शुक्रजम् ।
तुल्यावेतौ सुतौ कस्य तन्मे ब्रूहि पितामह ॥

भीष्म उवाच—

रेतजो वा भवेत्पुत्रः पुत्रो वा क्षेत्रजो भवेत् ।
अध्यूढः समयं भित्त्वेत्येतदेव निबोध मे ॥

युधिष्ठिर उवाच—

रेतजं विद्म वै पुत्रं क्षेत्रजस्यागमः कथम् ।
अध्यूढं विद्म वै पुत्रं भित्त्वा तु समयं कथम् ॥

भीष्म उवाच—

आत्मजं पुत्रमुत्पाद्य यस्त्यजेत्कारणान्तरे ।
न तत्र कारणं रेतः स क्षेत्रस्वामिनो भवेत् ॥
पुत्रकामो हि पुत्रार्थं यां वृणीते विशांपते ।
तत्र क्षेत्रं प्रमाणं स्यान्न वै तत्रात्मजः सुतः ॥
अन्यत्र क्षेत्रजः पुत्रो लक्ष्यते भरतर्षभ ।
न ह्यात्मा शक्यते हन्तुं दृष्टान्तोपगतो ह्यसौ ॥
क्वचिच्च कृतकः पुत्रः संग्रहादेव लक्ष्यते ।
न तत्र रेतः क्षेत्रं वा प्रमाणं स्याद्युधिष्ठिर ॥

कृत्रिमकानीनाध्यूढक्षेत्रजापसदानां संस्काराः

युधिष्ठिर उवाच—

कीदृशः कृतकः पुत्रः संग्रहादेव लक्ष्यते ।
शुक्रं क्षेत्रं प्रमाणं वा यत्र लक्ष्यं न भारत ॥

भीष्म उवाच—

मातापितृभ्यां यस्त्यक्तः पथि यस्तं प्रकल्पयेत् ।
न चास्य मातापितरौ ज्ञायेतां स हि कृत्रिमः ॥
अस्वामिकस्य स्वामित्वं यस्मिन्संप्रति लक्ष्यते ।
यो वर्णः पोषयेत्तं च तद्वर्णस्तस्य जायते ॥

युधिष्ठिर उवाच–

कथमस्य प्रयोक्तव्यः संस्कारः कस्य वा कथम् ।
देया कन्या कथं चेति तन्मे ब्रूहि पितामह ॥

भीष्म उवाच–

आत्मवत्तस्य कुर्वीत संस्कारं स्वामिवत्तथा ।
त्यक्तो मातापितृभ्यां यः सवर्णं प्रतिपद्यते ॥
तद्गोत्रबन्धुजं तस्य कुर्यात्संस्कारमच्युत ।
अथ देया तु कन्या स्यात्तद्वर्णस्य युधिष्ठिर ॥
संस्कर्तुं वर्णगोत्रं च मातृवर्णविनिश्चये ।
कानीनाध्यूढजौ वाऽपि विज्ञेयौ पुत्रकिल्बिषौ ॥
तावपि स्वाविव सुतौ संस्कार्याविति निश्चयः ।
क्षेत्रजो वाऽप्यपसदो येऽध्यूढास्तेषु चाप्युत ॥
आत्मवद्वै प्रयुञ्जीरन् संस्कारान्ब्राह्मणादयः ।
धर्मशास्त्रेषु वर्णानां निश्चयोऽयं प्रदृश्यते ।
एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ॥

कृत्रिमा दुहिता

जनयामास स मुनिर्मेनकायां शकुन्तलाम् ।
प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम् ॥
जातमुत्सृज्य तं गर्भं मेनका मालिनीमनु ।
कृतकार्या ततस्तूर्णमगच्छच्छक्रसंसदम् ॥
तं वने विजने गर्भं सिंहव्याघ्रसमाकुले ।
दृष्ट्वा शयानं शकुनाः समन्तात्पर्यवारयन् ॥
नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृद्धिनः ।
पर्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम् ॥
उपस्प्रष्टुं गताश्चाहमपश्यं शयितामिमाम् ।
निर्जने विपिने रम्ये शकुन्तैः परिवारिताम् ॥

(१) भा.१।७२।९-१९; दमी.११६–११७.

आनयित्वा ततश्चैनां दुहितृत्वे न्यवेशयम् ॥
शरीरकृत्प्राणदाता यस्य चान्नानि भुञ्जते ।
क्रमेणैते त्रयोऽप्युक्ताः पितरो धर्मशासने ॥
निर्जने तु वने यस्माच्छकुन्तैः परिवारिता ।
शकुन्तलेति नामास्याः कृतं चापि ततो मया ॥
एवं दुहितरं विद्धि मम विप्र शकुन्तलाम् ।
शकुन्तला च पितरं मन्यते मामनिन्दिता ॥
शकुन्तलोवाच —
एतदाचष्ट पृष्टः सन् मम जन्म महर्षये ।
सुतां कण्वस्य मामेवं विद्धि त्वं मनुजाधिप ॥
कण्वं हि पितरं मन्ये पितरं स्वमजानती ॥

जनयितु पुत्रः

तत्रेमौ श्लोकौ भवतः—
भर्त्ता माता पितुः पुत्रो येन जातः स एव सः ।
भरस्व पुत्रं दुष्यन्त मावमंस्थाः शकुन्तलाम् ॥
[२]रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात् ।
त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥

कौटिलीयमर्थशास्त्रम्

औरसादिमुख्यगौणपुत्राणा विधि तल्लक्षणानि च । तेषां सवर्णानामनुलोमानामनेकपितृकाणा च दायहरत्वम् ।

[३]क्षेत्रे वा जनयेदस्य नियुक्तः क्षेत्रजं सुतम् ।
मातृबन्धुः सगोत्रो वा तस्मै तत्प्रदिशेद् धनम्॥

सर्वस्याप्यभावे आह—क्षेत्रे वेति । अस्य क्षेत्रे वा पितुः सवर्णक्षेत्रे वा, नियुक्तः नियोगविधिना प्रयुक्तः, मातृबन्धुः सगोत्रो वा, क्षेत्रज सुत जनयेत् । तस्मै क्षेत्रजाय, तद् धन, प्रदिशेत् । श्रीमू.

[४]परपरिग्रहे बीजमुत्सृष्टं क्षेत्रिण इत्याचार्याः । माता भस्त्रा यस्य रेतस्तस्यापत्यं इत्यपरे । विद्यमानमुभयं इति कौटल्यः । स्वयंजातः कृतक्रियायामौरसः । तेन तुल्यः पुत्रिकापुत्रः । सगोत्रेणान्यगोत्रेण वा नियुक्तेन क्षेत्रजातः क्षेत्रजः पुत्रः । जनयितुरसत्यन्यस्मिन् पुत्रे स एव द्विपितृको द्विगोत्रो वा द्वयोरपि स्वधारिक्थभाग् भवति । तत्सधर्मा बन्धूनां गृहे गूढजातस्तु गूढजः । बन्धुनोत्सृष्टोऽपविद्धः संस्कर्तुः पुत्रः । कन्यागर्भः कानीनः । सगर्भोढायाः सहोढः । पुनर्भूतायाः पौनर्भवः । स्वयंजातः पितृबन्धूनां च दायादः । परजातः संस्कर्तुरेव न बन्धूनाम् । तत्सधर्मा मातापितृभ्यामद्भिर्दत्तो दत्तः । स्वयं बन्धुभिर्वा पुत्रभावोपगत उपगतः । पुत्रत्वेऽधिकृतः कृतकः । परिक्रीतः क्रीत इति । औरसे तूत्पन्ने सवर्णास्तृतीयांशहराः । असवर्णा ग्रासाच्छादनभागिनः । ब्राह्मणक्षत्रिययोरनन्तरापुत्राः सवर्णाः, एकान्तरा असवर्णाः । ब्राह्मणस्य वैश्यायामम्बष्ठः, शूद्रायां निषादः पारशवो वा । क्षत्रियस्य शूद्रायामुग्रः । शूद्र एव वैश्यस्य । सवर्णासु चैषामचरितव्रतेभ्यो जाता व्रात्याः । इत्यनुलोमाः ।

दायस्याशक्रम उक्तः । दायादविशेषपरिज्ञानार्थं पुत्रभेदोऽभिधीयते । अथवा पूर्वाध्यायान्ते 'क्षेत्रे वा जनयेदस्य नियुक्तः क्षेत्रजं सुतमि'ति क्षेत्रजः पुत्रः प्रस्तुतः । तत्प्रसङ्गात् पुत्राणा भेदास्तेषु मुख्यामुख्यभावश्चास्मिन्नध्याये प्रतिपाद्यन्ते । परपरिग्रह इति । अन्यस्य स्त्रिया, बीजमुत्सृष्ट अन्येन रेत उत्सृज्योत्पादितः पुत्रः, क्षेत्रिणः तस्या भर्तुरेव पुत्रः न तु बीजोत्सृष्टुः । इत्याचार्या आहुः । माता चर्मप्रसेविकावद् बीजाधारमात्रमप्रधानमिति तत्संबन्धस्याकिञ्चित्करत्वाद् बीजोत्पन्नो न तत्परिणेतुरपत्य भवितुमर्हति, किन्तु बीजिन एवेत्यन्येषा मतमित्याह— माता भस्त्रेत्यादि । बीज क्षेत्र चोभय समवेत विद्यमान कार्यायेति क्षेत्रजो बीजिक्षेत्रिणोरुभयोरपि पुत्र इत्यात्मनो मतमित्याह—विद्यमानमित्यादि । पुत्रभेदानाह—स्वयजातः कृतक्रियायामित्यादि । परिणीतायां स्वयमुत्पादितः पुत्रः औरसाख्यः । तेन औरसेन तुल्यः पुत्रिकापुत्रः 'अस्या यो जायते गर्भः स मे पुत्रो भविष्यति' इति परिभाष्य वराय दत्ता कन्या पुत्रिका तस्याः पुत्रः । सगोत्रेणेत्यादि । सुबोधम् । जनयितुरिति । रेतस्सेक्तुः, असत्यन्यस्मिन्पुत्रे, अविद्यमाने औरसपुत्रे, स एव क्षेत्रज एव, द्विपितृकः बीजिक्षेत्रिभ्युभयपितृकः,

---

(१) भा.१।९५।३०; दमी.५६ भस्त्रा माता (माता भस्त्रा) सः (हि) पू.; बाल.२।१३५ (पृ.२२८) भस्त्रा माता (माता भस्त्रा) भरस्व पुत्रं (तस्माद्भरस्व).

(२) भा.१।९५।३१.

(३) कौ.३।६. (४) कौ.३।७.

द्विगोत्रो वा बीजिक्षेत्र्युभयगोत्रकश्च भवन्, द्वयोरपि स्वधारिक्थभाक् स्वधादायी दायहरश्च, भवति । तथा चाहुः—'क्षेत्रीयानुमतं बीजं यस्य क्षेत्रे प्ररोहति । तदपत्यं तयोरेव बीजिक्षेत्रीययोर्मतम् ॥' इति । तत्सधर्मेति । बन्धूना गृहे, गूढजातस्तु भर्तृनियोग विनैव गूढमन्यस्योत्पन्नः, गूढजः । सः, तत्स धर्मा क्षेत्रजतुल्यः । बन्धुनेति । बन्धुनोत्सृष्टः माता-पितृभ्या परित्यक्तः, अपविद्धः तदाख्यः, सस्कर्तुः पुत्रः येन स संस्कृतस्तस्य पुत्रः । कन्यागर्भ इति । कन्याभावे प्रसूतः, कानीनः । सगर्भोढाया इति । गर्भेण सहितैव या व्यूढा सा सगर्भोढा तस्याः पुत्रः, सहोढः तदाख्यः । पुनर्भूतायाः पौनर्भव इति । पुनर्विवाहिताया दिधिषूशब्दितायाः पुत्रः पौनर्भवाख्यः । स च त्रिविधो मातृत्रैविध्याद्—या ह्यक्षतयोनिरेव सती भर्तुमरणादन्यस्मै ससंस्कारं दत्ता सैका पुनर्भूः, स्वभर्तारमुपेक्ष्यैवान्यमाश्रिता द्वितीया, मृते भर्तरि भर्तृबन्धुभावात् सपिण्डाय सवर्णाय वा दत्ता तृतीयेति । स्वयञ्जातः पितृबन्धूनामिति । स्वयञ्जात औरसः पुत्रः, स पितृबन्धूना च दायादः पितुः संस्कर्तुस्तद्बन्धूना च दायहारी भवेत् । परजातः क्षेत्रजातादिः परोत्पन्नः, सस्कर्तुरेव दायादः, न बन्धूना न पितृबन्धूना दायादः । तत्सधर्मेति । स्वयञ्जात-तुल्यः, मातापितृभ्या अद्भिर्दत्तः समन्त्रकोदकपूर्वं दत्तः, दत्तः तत्सज्ञः । 'अयमहं युवयोः पुत्र' इति यः स्वय मात्मानं पुत्रत्वेनार्पयति स एक उपगताख्यः । बन्धु-भिर्वा 'युवयोरयं पुत्र' इति दत्तोऽपर उपगताख्य इत्याह—स्वयं बन्धुभिर्वेत्यादि । पुत्रत्वेऽधिकृतः कृतकः परिक्रीतः क्रीत इति । त्वमावयोः पुत्र इति पुत्रत्वे कल्पितः कृतकाख्यः । मूल्य दत्वा मातापितृसकाशात् पुत्रत्वेन गृहीतः क्रीताख्यः। इतिशब्दः पुत्रविभागसमाप्तौ । उक्तविधेषु पुत्रेषु विद्यमानेषु पश्चादौरसस्योत्पत्तौ तेषा का प्रतिपत्तिरित्याकाङ्क्षाया पितृधन त्रेधा विभज्य तत एकं त्रिभागं सवर्णाः गृह्णीयुः अन्यौ द्वौ त्रिभागावौरसो गृह्णीयात्, असवर्णास्तु ग्रासाच्छादनमात्र लभेरन्नित्याह —औरसे तूत्पन्न इत्यादि । सवर्णासवर्णविषयमाह—ब्राह्मणक्षत्रिययोरनन्तरापुत्राः सवर्णा इति । ब्राह्मणस्य क्षत्रियापुत्राः सवर्णाः, क्षत्रियस्य वैश्यापुत्राः सवर्णाः । एकान्तरा असवर्णा इति । ब्राह्मणस्य वैश्यापुत्रा असवर्णाः, क्षत्रियस्य शूद्रापुत्रा असवर्णाः । अनुलोमानाह—ब्राह्मणस्य वैश्यायामित्यादि । मुयोधम् । शूद्र एव वैश्य-स्येति । वैश्यस्य शूद्रायामुत्पन्नः शूद्र एव, न जात्यन्तरम् । सवर्णासु चेति । एषा ब्राह्मणक्षत्रियवैश्याना, अचरित-व्रतेभ्यः अनुपनीय कृतविवाहेभ्यः सवर्णासु जाताः, व्रात्याः व्रात्यसंज्ञाः । इत्यनुलोमाः जातयो व्याख्याता इति शेषः । श्रीमू.

[1]सोदर्याणामनेकपितृकाणां पितृतो दायविभागः ।

यदि समानोदरा भ्रातरो बहवः तेषा पितरस्तु भिन्नाः, तदा कीदृशी दायव्यवस्था इत्यपेक्षायामाह—सोदर्याणा-मित्यादि । पितृतो दायविभागः तत्तत्पुत्राः स्वस्वपितृधन गृह्णीयुः । श्रीमू.

मनुः

पुत्रमहिमा

पुंत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम्+ ॥

(१) पुत्रेण जातेन तत्कृतेनोपकारेण लोकान्स्वर्गा-दीन् दश विशोकान् जयति प्राप्नोति । तत्रोत्पद्यत इति यावत् । एवं पौत्रेणानन्त्यं तेष्वेव चिरन्तनकालमव-स्थानं लभते । पौत्रस्य पुत्रेण ब्रध्नस्य विष्टपमादित्यलोकं प्राप्नोति । प्राकाश्यमश्नुते न केनचित्तमसा ब्रियते । ×मेधा.

(२) तदेवं पुत्रादिभिर्जन्मतः प्रभृति पितुः परलोको-चितमहोपकारनिष्पादनात् मृतस्य तस्य च पार्वण-विधिना पिण्डदानात् पुत्रार्थं तद्धन मृतमेवोपकरोतीति न्यायप्राप्त पुत्रादीना स्वामित्व श्रुतम् । दा.१६२

+ दमी.व्याख्यान 'अपुत्रेणैव कर्तव्य.' इत्यत्रिवचने द्रष्टव्यम् ।

× मवि. मेधागतम् ।

(१) **कौ.**३।५.

(२) **मस्मृ.**९।१३७; **दा.**१६१ विष्ट (पिष्ट) मनुशख-लिखितविष्णुवसिष्ठहारीताः, **नाभा.**२।१९० पुत्रस्य पौत्रेण (पौत्रस्य पुत्रेण) स्मृतिः; **दमी.**६; **व्यप्र.**५०६ मनुलिखित-वसिष्ठहारीताः; **संप्र.**२०७; **बाल.**२।१३५ (पृ.२१९): २।१३७ नाभावत्, मनुशखलिखितवसिष्ठहारीताः; **समु.**९५ नाभावत्.

(३) अस्य च दायभागप्रकरणेऽभिधान पितुर्धने पत्न्यादिसद्भावेऽपि पुत्रस्य तदभावे पौत्रस्येत्येव पुत्रसंतानाधिकारबोधनार्थम्। *ममु.

(४) पुत्रादीना त्रयाणा जन्ममात्रतः फलभेदमाह— पुत्रेणेति। *मच.

पुंनाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा॥

(१) अपत्योत्पादनविधिशेषोऽयमर्थवादः। पुन्नाम-नरक चतुर्विधभूतोत्पत्तिः पृथिव्या व्यपदिश्यते। ततस्त्रायते पुत्रो जातः देवयोनौ जायत इत्यर्थः। तस्माद्धेतोः पुत्र इति व्यपदिश्यते। मेधा.

(२) युक्त तदीयपुसंतानस्य दायभागित्वमिति पूर्वदाढर्यार्थमिदम्। —ममु.

(३) स च कार्यविशेषः पुत्रस्यैव प्रोक्तः स्वयम्भुवेति तद्वचनमेवात्र प्रमाणमिति भावः। मच.

(४) नरको दुःखं तस्य पुदिति नाम्नस्तस्मात्पितरं त्रायत इति पुत्र इति। नन्द.

बहुभ्रातृणा तत्पत्नीना च एकेन भ्रातृपुत्रेण पुत्रवत्त्वम्

भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत्।
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ×॥

* शेषं मेधागतम्। — शेषं यथाश्रुतम्।

×दमी. व्याख्यान 'ब्राह्मणाना सपिण्डेषु' इति शौनकवचने द्रष्टव्यम्।

(१) **मस्मृ.**९।१३८; **दा.**१०१ (=) पू.: १६१ त्रायते पितर (पितरं त्रायते) मनुविष्णु; **व्यक.**१५९ दावत्, मनुविष्णु; **विर.**५८३ दावत्, मनुविष्णु; **व्यप्र** ५०६ दावत्, मनुविष्णु: ५६१दावत्, स्मृतिः; **बाल.**२।१३५(पृ २२०)मनुविष्णु: २।१३७ दावत्, मनुविष्णु; **मेतु.**४१; **समु.**९५दावत्.

(२) **मस्मृ.**९।१८२; **मिता.**२।१३२ सर्वांस्तांस्ते (सर्वे ते ते); **व्यक.**१५९ मितावत्; **उ.**२।१४।२ मितावत्; **स्मृच.** २८९ एकश्चेत् (यद्येकः); **विर.**५८२ मितावत्; **दीक.**४५ मितावत्; **रत्न.**१४१ मितावत्; **व्यनि.**मितावत्; **सवि.** ३९४-३९५ (=); **दमी.**३० मितावत्; **व्यप्र.**२७१,४७७; **संप्र.**२११ मितावत्; **व्यम.**५० मितावत्; **विता.**३७०; **राकौ.**४५५; **बाल.**२।१३५ [२२५,२२६ सर्वांस्तांस्तेन (सर्वे तेनैव); **समु.**९५ मितावत्; **कृभ.**८७९ भातृणामेकजाताना (बहूनामेकपुत्राणा): ८८१ प्रथमपादः; **दच.**६ भ्रातृणा (सर्वेषा) शेषं मितावत्.

(१) तदपि भातृपुत्रस्य पुत्रीकरणसंभवेऽन्येषा पुत्रीकरणनिषेधार्थं, न पुनः पुत्रत्वप्रतिपादनाय। 'तत्सुता गोत्रजा बन्धुः' इत्यनेन विरोधात्। मिता.२।१३२

(२) एकजातानामिति एकेन जनिताना सापत्नानामपि। एव च यदि भ्रातुरपत्योत्पादनशक्तिरस्ति तदा तत्पुत्रेणैवेतरस्य पुत्रवत्त्वादेवरगमनेन क्षेत्रजपुत्रकरणमयुक्तमनापदीति निषेधार्थक भवति। मवि.

(३) तत्र परमार्थतो भ्रात्रन्तरस्यापि तेनैव पुत्रवत्त्वमाचष्टे। भ्रातृपुत्रसद्भावेऽपि भ्रात्रन्तरस्यापुत्रत्वावगमात्। अत एव याज्ञवल्क्येन 'पत्नी दुहितर' इत्यादिना भ्रातृपुत्रसद्भावेऽपि 'स्वर्यातस्य ह्यपुत्रस्य' इत्युक्तम्। भ्रातृपुत्रस्य च पत्नीदुहितृपितृभ्रात्रभावे सति अपुत्रधनभागित्व च अत एव तत्रोक्तम्।

एव तर्हि मनुवचनस्य का गतिः? उक्त अस्माभिः श्राद्धाधिकारनिरूपणप्रकरणे। भ्रात्रन्तराणा पुत्रवत्त्वोक्तिः ग्रामस्य तात इतिवत् औरसप्रशसार्थेति। यत्तु सग्रहकारेणोक्तम्—'यद्येकजाता बहवो भ्रातरस्तु सहोदराः। एकस्यापि सुते जाते सर्वे ते पुत्रिणः स्मृताः॥ बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः। एका चेत्पुत्रिणी तासा पिण्डदस्तु स इष्यते॥' इति। तस्य पूर्वोक्तेन सहाविरोधाय देवस्वामिना तात्पर्यार्थ उक्तः। 'उभयत्रापि नान्यः प्रतिनिधिः कार्य' इति ग्रन्थेन। उभयत्रापि 'यद्येकजाता' इत्यादिवचनद्वयेऽपि भ्रातृसुते सपत्नीसुते च पुत्रप्रतिनिधितया कथचित्कर्तुं शक्ये सति तदन्यः प्रतिनिधिर्न कार्य इति तात्पर्यार्थो बोद्धव्य इत्यर्थः। स्मृच.२८९

(४) भ्रातृणामेकमातापितृकाणा मध्ये यद्येकः पुत्रवान्स्यादन्ये च पुत्ररहितास्तदा तेनैकपुत्रेण सर्वान्भ्रातॄन् सपुत्रान्मनुराह। ततश्च तस्मिन्सत्यन्ये पुत्रप्रतिनिधयो न कर्तव्याः। स एव पिण्डदोऽशहरश्च भवतीत्यनेनोक्तम्। एतच्च 'पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुता' इति याज्ञवल्क्यवचनाद्भातृपर्यन्ताभावे बोद्धव्यम्। +ममु.

(५) अत्रासहायेनोक्त पुसा सति भ्रातृजे, स्त्रीणा सपत्नीपुत्रे क्षेत्रजादयः प्रतिनिधयो न कर्तव्या इति।

+मच, ममुगतम्।

पारिजातोऽप्येवमाह । मनुटीकायामुदयकरोऽप्येवम् ।

*विर.५८३

(६) इति मनुवचन तद्भ्रातुः पुत्रेषु सत्सु श्राद्धादिकरणे नान्यः प्रतिनिधिः कार्य इत्येतदर्थम् ।

रत्न.१४३-१४४

(७) पुत्रातिदेशवाक्यानां 'एभिरेवौर्ध्वदेहिक कर्तव्यमित्यर्थ' इति वृद्धाः । व्यनि.

(८) धारेश्वरदेवस्वामिनौ तु विज्ञानयोगिमतानुवर्तिनावेव । यथोक्त देवस्वामिना—'उभयत्रापि नान्यः प्रतिनिधिः कार्यः' इति । अस्यार्थः—उभयत्रापि 'यत्रैकपुत्रा बहवः' 'भ्रातृणामेकजातानामि'ति वचनद्वये भ्रातृसुते पुत्रप्रतिनिधितया कथञ्चित्कर्तृ शक्ये सति तदन्यो न प्रतिनिधिः । अनुलोमजाना तु मूर्धावसिक्तादीना औरसेऽप्यन्तर्भावात्तेषामप्यभावे क्षेत्रजादीना दायहरत्व बोद्धव्यम् । शूद्रापुत्रस्त्वौरसोऽपि कृत्स्न भागमन्याभावेऽपि न लभते । सवि.३९५

(९) (पुत्रप्रतिग्रहविषये) सनिहितेष्वपि भ्रातृपुत्रो मुख्यः । भ्रातृणामिति मनूक्तेरिति मिताक्षरायाम् । इदमेव चैतद्वचसः प्रयोजन युक्तमन्यासभवात् ।

व्यम.५०-५१

(१०) तदपुत्रपितृव्यश्राद्धावश्यकत्वार्थ न पुत्रत्वपरम् । 'स्वर्यातस्य ह्यपुत्रस्ये'ति अपुत्रत्वविरोधापत्तेः । भ्रातृपुत्रस्य दत्तकत्वस्तुत्यर्थमिति विज्ञानेश्वरः । विता.३७०

(११) मिताटीका—एतेषा यथाश्रुतार्थत्वे त्रयोदशपुत्रत्वापत्त्या 'पुत्रान् द्वादश यानाहे'ति मन्वाद्युक्तद्वादशसंख्याविरोधापत्तिः । अपुत्रदायाधिकारिक्रमबोधकोक्तमूलवाक्ये भ्रातृसुताना नवमस्थानस्थितिविरोधापत्तिः । पिण्डाद्यधिकारक्रमबोधकवाक्येऽपि पत्नी भ्राता च तज्ज्ञश्रेत्यादौ तृतीयस्थानस्थितिविरोधापत्तिश्च । तेषा तद्भ्रातृपुत्रत्वे पत्न्याः पूर्वमेव निवेशौचित्यादिति चेन्न । तेषा किंचित्कार्यवत्त्वातिदेशपरत्वेन तेन तेषा वंशाविच्छित्तेः परलोकस्य पितृऋणदोषापाकरणस्य च करणेन तदर्थ सर्वपुत्राभावे पत्न्यादिसत्त्वे दत्तकपरिग्रहो नेति तात्पर्यात् । अत एवैकजातानामिति हेतुगर्भ विशेषणमप्यर्थवत् । तत्र च पुमान् स्त्रियेत्येकशेषः । सहोदरा इति बृहस्पत्येकवाक्यत्वात् । अत एव एकमातापितृकाणामिति व्याख्यातं मेधातिथिना । अनेन तेषामेव तथा नियमो न भिन्नपितृकाणा भिन्नमातृकाणा चेति सूचितम् । अत एवाभियुक्ताः 'अत्रैकजातग्रहण भिन्नोदराणामेकपितृकाणामपि सपिण्डान्तरलाभदशाया भ्रातृसुतनियमो नेति ज्ञापनार्थ न तु भ्रातृसुतस्याग्राह्यत्वज्ञापनार्थम् । 'ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्' इति वृद्धगौतमवदत्र निषेधस्मृतेरनुपलम्भात् । पुत्रवानिति मनुपा न त्वेवैकमिति निषेधस्याप्यत्रानवकाश इति । अत एव च सपत्नीविषये वचनान्तरारम्भः । भ्रातृणामिति निर्धारणे षष्ठी । अत एव मध्ये इति तेन व्याख्यातम् । तेन ह्येकीयावयवान्वयेनैकमातापितृकत्वेनैकत्व यथा तेषा तथैकावयवान्वयेन सर्वावयवान्वयसत्त्वेनैकपुत्रत्व सर्वेषामिति सूचित द्रौपदीवत् द्रव्यामुष्यायणवच्च । अत एव तेनैकपुत्रेण सर्वान् भ्रातॄन् सपुत्रान्मनुराहेति तेन व्याख्यातम् । एतेन प्रागुक्त पाठान्तर निरस्तम् । अत एव च सर्वे ते इत्युक्तिसंगतिः । अन्यथाऽन्ये ते इत्यादि ब्रूयात् । भ्रातृपदं स्फुटतया भगिनीनिराससूचनद्वारा विषयप्रदर्शनार्थम् । यद्यपि भ्रातृपुत्राविद्येकशेषस्यापि संभवस्तथापि—'ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्' इति वृद्धगौतमोक्तेर्नेति पुमपत्यानामेव ग्रहणम् । एकः एकोऽपि । एकस्यापि सुते जाते इति तदेकवाक्यत्वात् । अनेन द्व्यादेस्तत्त्वे सुतरा तथेति सूचितम् । पुत्रवानित्यत्र पुत्रपदमौरसपरम् । तत्रैव तस्य मुख्यत्वात् । जाते इति तदेकवाक्यत्वाच्च । अनेनान्यत्रायं नियमो नेति सूचितम् । अत्र पुत्रत्वेनैकानेकपुत्रप्रतीत्या सर्वविषयमिदम् । अग्रे तेनेत्याद्युक्तिस्तु एकत्र तथात्वेऽनेकत्र तथात्व निर्विवादमित्येवपरा । चेदित्यनेन जनकस्यैवानत्त्वे सर्वेषा तत्त्व दुरापास्तमिति सूचितम् । अत एव भवेदिति संभावने लिङ् । अत्र सर्व वाक्यमिति न्यायेनैकस्यैव द्वयोरेव त्रयाणामेव वेत्यादिक्रमेण बोध्यम् । अत एवान्ये च पुत्ररहिता इति तेन व्याख्यातम् ।

किं च भ्रातृणामित्यनेन तत्र पुत्रत्वातिदेशः । तथा हि सति पुत्रिण इति पुत्रवतीरिति च पदद्वयमधिक स्यात् । तेन पुत्रेणेत्येकेनैव पुत्रत्वातिदेशसिद्धेः ।

* विर. मनुवद्भावः ।

पुत्रित्वातिदेशस्तेनेति चेत्, लाघवात्तदेवास्तु, कृत पुत्रत्वातिदेशेन । सोऽपि परिशेषात्कार्यातिदेशः । 'पुत्रिणः पुत्रवतीरि' ति श्रवणात् तत्र तद्धर्मातिदेशः । तत्फल तूक्त वक्ष्यमाण चेति दिक् । उक्त चैतत्स्मृतिपादे शिष्टाचारप्रामाण्यप्रतिपादके 'अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्' (जैमू.१।३।७) इति सूत्रे भट्टाचार्यैः, 'रामभीष्मयोस्तु स्नेहपितृभक्तिवशाद्विद्यमानधर्ममात्रार्थदारयोरेव साक्षाद्व्यवहितापत्यकृतपित्रानृण्ययोर्याग सिद्धिः । हिरण्मयीसीताकरण च लोकापवादभीत्या त्यक्तसीतागतानृशस्याभावाशकानिवृत्त्यर्थम् । भीष्मश्च —'भ्रातृणामेकजातानामेकश्चेत्पुत्रवान्भवेत् । सर्वे तेनैव पुत्रेण पुत्रिणो मनुरब्रवीत् ॥' इत्येव विचित्रवीर्यक्षेत्रजपुत्रलब्धपित्रनृण्यवः । केवल यज्ञार्थपत्नीसबन्ध आसीदित्यर्थापत्त्याऽनुक्तमपि गम्यते । 'यो वा पिण्ड पितृपाणौ विज्ञातेऽपि न दत्तवान् । शास्त्रार्थातिक्रमाद्भीतो यजेतैकाक्ष्यसौ कथम् ॥' इति । व्याख्यात च न्यायसुधाया भट्टसोमेश्वरशर्मभिः,—'रामभीष्मयोर्यथा न विरुद्धाचरणकर्तृत्व तथा विब्रूणोति रामेति । रतिपुत्रार्थत्वनिरासाय मात्रशब्दः । नन्वेवं सति 'ऋतुस्नाता तु यो भार्या संनिधौ नोपगच्छति । तस्या रजसि त मासं पितरस्तस्य शेरते ॥' इति विहितातिक्रमात्प्रत्यवायः स्यादित्याशङ्क्य स्नेहपितृभक्तिवशादित्युक्तम् । रामेण सीतास्नेहाद्भार्यान्तरागमनव्रतग्रहणात् भीष्मेण च शन्तनवे सत्यवती तत्पितर याचिता त्वयि महाबले राज्याभिलाषुके तिष्ठति एतस्याः पुत्राणा राज्यालाभान्नेमा ददामीति तत्पित्रा प्रत्याख्याते तेन राज्य नाह करिष्यामीति प्रतिज्ञाते त्वय्यनिच्छत्यपि त्वत्सततिभयान्नैतस्याः सतती राज्यभागिनी स्यादिति तत्पित्रा पुनः प्रत्याख्याते—'नापत्यहेतोरपि च करिष्ये तद्विनिश्चयम् । अद्यप्रभृति मे दाश ब्रह्मचर्य भविष्यति ॥' इति पितृभक्त्या ब्रह्मचर्यव्रतग्रहणात् नैमित्तिकेन च व्रतेन नित्यस्य ऋतुकालगमनस्य बाधात् धर्ममात्रार्थमह भार्या परिणेष्यामीति उक्त्या परिणीताया अगमनेऽप्यदोष इत्याशयः । एवमप्यनपत्यत्वेन पित्रर्णानपाकरणात्प्रत्यवायः स्यादित्याशङ्क्य साक्षादित्युक्तम् । साक्षादपत्याभ्या कुशलवाभ्या कृतपित्रानृण्यो रामः, व्यवहितैर्विचित्रवीर्यस्यापत्यैर्धृतराष्ट्रादिभिः कृतपित्रानृण्यो भीष्मः । ननु रामस्य धर्मार्थ दारान्तरसद्भावे—'यज्ञे यज्ञे प्रकुरुते सीता पत्नीं हिरण्मयीम् ।' इति हिरण्मयीसीताकरणमपार्थकं स्यादित्याशङ्क्याह हिरण्मयीति । अपवादभीत्या त्यक्ता या सीता तद्गत तद्विषय यदानृशस्यमनैष्ठुर्य तदभावाशकानिवृत्त्यर्थम् । रावणापहारदूषिता सीता रामो भजते इति लोकापवादभयमात्रेणासौ त्यक्ता, न सीताया दुष्टत्वात्, नापि रामस्य सीताया नैष्ठुर्यमिति द्योतयितुम् । लोकापवादभीति प्रति त्यागस्य नित्यसापेक्षत्वात्तत्प्रदर्शनाय त्यक्ताशब्दस्य सीतापदेन सह सापेक्षसमासः कृतः । कथं व्यवहितापत्यकृतपित्रानृण्यता भीष्मस्येत्यपेक्षायामाह । भीष्मश्चेति । ननु तयोर्धर्ममात्रार्थ दारसद्भावः क्वचिदपि पुराणेतिहासयोरनुक्तः केन प्रमाणेनावगम्यते इत्याशङ्क्याह । केवलमिति । अपिशब्देनापत्यहेतोः अद्यप्रभृतीति च विशेषणसामर्थ्यादेवमवगम्यते इति सूचितम् । ननु मोहादप्यनुष्ठानोपपत्तेः नैकान्ततोऽर्थापत्तिः संभवतीत्याशङ्क्य—'श्राद्धकाले मम पितुर्मया पिण्डः समुद्यतः । तं पिता मम हस्तेन भित्त्वा भूमिमयाचत ॥ नैष कल्पे विधिर्दृष्ट इति निश्चित्य चाप्यहम् । कुशेष्वेव तदा पिण्ड दत्तवानविचारयन् ॥' इति भीष्मस्यात्यन्तनैपुण्यान्मोहासंभव दर्शयितुमाह —'यो वेति' इति । अत्र नैमित्तिकेन नित्यस्य बाध इत्यशो धर्मार्थ दारान्तरसद्भाव इत्यशश्च न युक्त इति प्रतिपादित गुरुचरणैर्मञ्जूषायां तत् तत एव बोध्यम् ।

न चैव द्वादशविधपुत्रप्रतिपादनानन्तरं 'यत्तु भ्रातृणामेकजातानामित्यादि, तदपि भ्रातुःपुत्रस्य पुत्रीकरणसंभवे अन्येषा पुत्रीकरणनिषेधार्थ न पुनः पुत्रत्वप्रतिपादनाय 'तत्सुता गोत्रजा बन्धुरि'त्यनेन विरोधात्' इति व्याख्याकृदुक्त विरुध्येतेति वाच्यम् । आशयानवबोधात् । तथा हि । किं तन्निषेधः शाब्दोऽर्थ उत तात्पर्यार्थः । नाद्यः । अक्षरमर्यादया तदप्रतीतेः । नान्त्यः । संभावितशाब्दत्यागेन तदङ्गीकारे निर्बीजत्वात् । तस्मान्नेद युक्तम् ।

नन्वस्तु यथाश्रुतसंभवोऽत आह । न पुनरिति । पश्चादित्यर्थः । द्वादशविधपुत्राभावे पत्न्यादिसत्त्वे इत्यर्थः । अत एवाह । तत्सुता इति । तथा सति इतरपुत्रवत्पत्न्याः पूर्वमेव निवेशौचित्येन तथोक्तिविरोधः स्पष्ट एव ।

तथा सति त्रयोदशपुत्रत्वापत्या 'पुत्रान् द्वादश यानाह' इति द्वादशसङ्ख्याविरोधापत्तिश्चेत्यपि बोध्यम्। तथा च न तस्य तदर्थप्रतिपादने तात्पर्यं किं त्वेतदर्थखण्डने इति बोध्यम्। अत एव वा तत्रैव हेतूपन्यासो न तु तत्रेति भावः।

नन्वेवं कस्तर्हि वचनार्थ इति चेत् प्रागुक्त एव वार्तिकसमत इति बोध्यम्। तदनुक्तिस्तु अन्यत्र तस्योक्तत्वेन स्पष्टत्वात्। एतदुक्तिस्तु एकदेश्युक्तार्थान्तरनिराससूचनपूर्वकविरोधखण्डनमात्रतात्पर्येणेति। तथा च तत्र नाग्रहोऽपि त्वत्रेति बोध्यम्।

एतेन आशौचनिर्णयस्था गुरुचरणोक्तिरपि व्याख्याता। तथा च वार्त्तिकैकवाक्यता सिद्धा। तथा च द्वादशपुत्रभिन्नेन भ्रातृसुतेन तादृशपितृव्यस्य प्रागुक्तकार्यसिद्ध्या तदर्थं पत्न्यादिसत्त्वे पुत्रान्तरपरिग्रहो न कर्तव्य इति तत्त्वम्।

एतेन 'भ्रातॄणामिति सोदरभ्रात्रभावविषयमविभक्तविषयं चेति न पुत्रत्वातिदेशोऽयम्। अतस्तत्र सति एकादशपुत्राः प्रतिनिधयो न कार्याः स एव भ्रातॄणा पिण्डदोंऽशहरश्च' इति वाचस्पतिमेधातिथिकल्पतरुरत्नाकरायुक्तं परास्तम्। उक्तयुक्तेः द्वादशपुत्राभावे पत्नीत्यादिमूलोक्तेश्च। अत एव 'तस्माद्दत्तकपुत्रप्रशंसेयमिति विज्ञानेश्वर इति' इति निर्णयसिन्धूक्त दिनकरोद्योतोक्त, 'भ्रातॄणामित्यादि पुत्रित्वातिदेशपरं तत्फल तु पुन्नामनरकाप्राप्तिः पुंसः स्त्रियाः सपिण्डानार्हत्वमुभयोः कृत्रिमाद्यकरणं च' इति मिश्रादिभिरुक्तं चापास्तम्।

नन्वेवमपि मन्वादिवाक्यस्योक्तार्थकत्वे न भीष्मविषये प्रवृत्तिः, भीष्मविचित्रवीर्यौ भिन्नमातृकावेकपितृकौ, व्यासविचित्रवीर्यावेकमातृकौ भिन्नपितृकौ यथा। किं च। तस्य धृतराष्ट्रादिः क्षेत्रजो नौरसः। एव च कथ वार्तिकादिसगतिरिति चेन्न। तत्र तदविषयत्वेन तदशेऽपि तस्यायुक्तत्वेऽपि मनुवाक्यस्य तदर्थकत्वे दोषाभावेन प्रकृतेष्टार्थसिद्धेरप्रत्यूहत्वात्। अत एव पितृभक्त्यैव तस्य पित्रर्णापाकरणम्। अग्निहोत्रादिना देवर्णमुक्तिः। किंच 'त्रिभिर्ऋणवान्' इत्यादिश्रुतिर्न नैष्ठिकब्रह्मचारिविषया, तदृणापाकरणस्य ब्रह्मचर्येणाग्निकार्यादिना च सिद्धेः स्मृतिपूक्तत्वात्, इति गुरुचरणैरुक्त तत्र। यदि तु वार्तिकोक्तिरपि तदंशे योजनीयेत्याग्रहस्तर्हि इत्थ योज्या। एकजातानामित्यत्रैकशब्दः प्रधानपरः। 'माता भस्त्रा पितुः पुत्रो येन जातः स एव सः। तस्माद्भरस्व दुष्यन्त माऽवमंस्थाः शकुन्तलाम्॥' इति भारतोक्तेः (भा.१।९५।३०)। 'बीजस्यैव च योन्याश्च बीजमुत्कृष्टमुच्यते। सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता॥' इति मनूक्तेश्च(मस्मृ.९।३५)। क्षेत्रजे तु वैपरीत्य वाचनिकम्। तथा चैकपितृकत्वमात्र विवक्षितम्। बृहस्पतिवाक्ये सहोदरत्वमपि पित्रुदरमादायैव। अत एव सोदरा इत्यनुक्तिः। बहव इति तु तत्र स्पष्टार्थम्। बहवोऽपीति तदर्थः। यद्वा भूयासोऽपीत्यर्थः। कपिञ्जलाधिकरणन्यायेन बहुत्वस्य बहुवचनबोधितस्य त्रित्वे पर्यवसानमिति व्यवच्छेदाय हि बहव इत्युक्तम्। अथवा तुशब्दस्य चार्थत्वेन व्युत्क्रमेण च सहोदराश्चेति वाक्यान्तरम्। तथा चोभयोरपि तत्प्रतिपादनम्। तदेकवाक्यतया मनुवाक्यस्यापि प्रागुक्तरीत्या अर्थद्वय बोध्यम्। अत एवैकयोनिप्रसूतानामिति स्मृतिसारसमुच्चयोक्तपाठः संगच्छते। अत एव पुत्रवानित्यत्र पुत्रपद मातापित्रन्यतरजन्यपरम्। तत्र जाते इत्युक्तिस्वारस्याच। एव च तद्विषयता तत्र स्पष्टैवेति।

बाल.२।१३५ (पृ.२२५-२२९)

सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत्।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः* ॥

(१) एवमेकस्या सपत्न्या पुत्रवत्यामन्यस्यामनपत्यायामपि नियोगो न कार्य इत्याह—सर्वासामिति। मवि.

(२) एकपतिकाना सर्वासा स्त्रीणा मध्ये यद्येका पुत्रवती स्यात्तदा तेन पुत्रेण सर्वास्ताः पुत्रयुक्ता मनुराह। ततश्च सपत्नीपुत्रे सति स्त्रिया न दत्तकादिपुत्राः कर्तव्या इत्येतदर्थमिदम्। ममु.

* विर., बाल.व्याख्यान 'भ्रातॄणामेकजातानाम्' इति मनुवचने (पृ.१२९०,१२९१) द्रष्टव्यम्। दमी.व्याख्यानं 'ब्राह्मणाना सपिण्डेषु' इति शौनकवचने द्रष्टव्यम्।

(१) **मस्मृ.**९।१८३; **दा.**९६; **व्यक.**१५९; **विर.** ५८२; **दीक.**४५; **व्यनि.** प्राह पुत्रवतीमेनुः (लभन्ते पुत्रिणा गतिम्); **दात.**१८७; **दमी.**४१ प्राह...मेनुः (पुत्रिण्यो मनुरब्रवीत्); **व्यप्र.**४७७,५५४; **संप्र.**२१४; **विता.**४६५; **बाल.**२।१३५ सर्वासा (बहूना) (पृ.२२५,२२६पू.); **समु.** ९५, **वच.**८.

(३) पुत्रवती पुत्रकार्यवती । ×मच.

(४) पुत्रिणी औरसपुत्रिणी पुत्रत्वातिदेशस्य प्रयोजन सत्स्वपि सोदरादिषु पूर्वोपदिष्टेरेव पुत्रैः सकलपुत्रकार्यलाभः । नन्द.

पुत्रिका, पुत्रिकापुत्रः, दौहित्रश्च । तेषा श्राद्धकर्तृत्वदायहरत्वविचारः ।

अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् ।
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम् *॥
अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् ।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति ॥

(१) यदपत्यमस्या जायेत तन्मे मह्य स्वधाकरमौर्ध्व देहिकस्य श्राद्धादिपुत्रकार्यस्योपलक्षणार्थः स्वधाशब्दः । न त्वयमेवोच्चार्यः। तथा च गौतमः–'पितोत्सृजेत् पुत्रिकामनपत्योऽग्नि प्रजापति चेष्ट्वाऽस्मदर्थमपत्यमिति सवाद्य अभिसंधिमात्रात्पुत्रिकेत्येकेषाम्' इति यागेन विनाऽपि भवति पुत्रिका। न तु सवादाभावेन । यद्यप्यभिसंधिः हृदयात्कृतमुच्यते स तु वचनेन यावन्न ज्ञापितस्तावज्जामाता विप्रतिपद्येत । कुर्वीत पुत्रिकामेष तस्या व्यपदेशः। मेधा.

(२) अनेन वक्ष्यमाणेन । यदपत्यमित्यादि अभिधाय दद्यादिति शेषः । मवि.

(३) अविद्यमानपुत्रो यदस्यामपत्य जायेत तन्मम श्राद्धाद्यौर्ध्वदेहिककर स्यादिति कन्यादानकाले जामात्रा सह संप्रतिपत्तिरूपेण विधानेन दुहितर पुत्रिका कुर्यात् । ममु.

(४) अत्रापि पुत्रद्वय पुत्रिकैव पुत्र इत्येकः पुत्रिकायामपरः पुत्रः । व्यनि.

(५) पुत्रिकापुत्रस्य भाग विधास्यन् तत्प्रकारमाह–

× ममुवद्भावः ।

* दर्शी.व्याख्यान 'अपुत्रेणैव कर्तव्यः' इति अत्रिवचने द्रष्टव्यम् ।

(१) **मस्मृ.**९।१२७; **दा.**१४४, **व्यक.**१५६; **विर.**५६१; **दीक.**४४, **स्मृसा.**६८; **व्यनि.**; **नृप्र.**३९; **चन्द्र.**१७५ दस्या (त्तस्या); **दर्शी.**५ पू.; **व्यप्र.**४६८; **बाल.**२।१३५ (पृ.२१७, २२३); **समु.**१३७; **विच.**७२; **दच.**५पू.

(२) **मस्मृ.**९।१२७ **इत्य**स्योपरिष्टात् प्रक्षिप्तश्लोकोऽयम् ।

अपुत्रोऽनेनेति । पुत्रिकापुत्रस्य त्वष्टकाश्राद्धे विशेषो यतो मातामहस्य मातामहादिश्राद्ध नास्ति दौहित्रस्यास्तीति । मच.

(६) अत्र परिभाष्य दत्तायामुत्पन्नः पुत्रिकापुत्रो मातामहस्येत्युक्तम् । अपरिभाषितदत्तायामपि संभवतीति भ्रातृमतीमिति विशेषणं पुत्रिकाकरणशङ्कानिवृत्त्यर्थम् । अनेन चापरिभाषितापि पुत्रिका भवतीत्याचारमिताक्षराया निरूपितम् । व्यप्र.४६९

(७) पुत्रिकामिवार्थे कन्प्रत्ययः पुत्रानुकारिणीमित्यर्थः । नन्द.

अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः ।
विवृद्धयर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः ॥

(१) प्रजोत्पादनविधिज्ञः प्रजापतिर्दक्षः स एवोदाहियते । अर्थवादोऽय परकृतिर्नाम । मेधा.

(२) स्ववशस्य स्वसपिण्डधारायाः । मवि.

(३) कृत्स्ना दुहितरः पूर्व पुत्रिकाः स्वयं कृतवान् । कात्स्न्येंऽथशब्दः । ममु.

ददौ स दश धर्माय कश्यपाय त्रयोदश ।
सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम् ॥

(१) सत्कृत्येति । एतदत्र विधीयते । दशेत्यादिलिङ्गादनेकपुत्रिकाकरणमपीच्छन्ति । मेधा.

(२) दश पुत्रिकाः । प्रीतात्मा पुत्रजन्मतुष्टिमान् । मवि.

(३) सत्कारवचनमन्येषामपि पुत्रिकाकरणे लिङ्गम् । *ममु.

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ॥

* शेष मेधागत मविगत च ।

(१) **मस्मृ.**९।१२८, **व्यक.**१५६; **व्यनि.** पुरा (सुत) का. (काम्) विवृद्धयर्थं (स्थित्यर्थं तु); **व्यप्र.**४६८ काः (काम्); **बाल.**२।१३५ (पृ.२१८)ऽथ (स्व) काः (काम्) दक्षः (दक्ष); **समु.**१३७ऽथ (हि) काः (काम्) विवृद्धयर्थं (वृध्यर्थं तु).

(२) **मस्मृ.**९।१२९; **व्यक.**१५६; **व्यप्र.**४६८; **बाल.**२।१३५ (पृ.२१८).

(३) **मस्मृ.**९।१३०; **विश्व.**२।१४०; **दा.**१७५ तिष्ठ (जीव) धन हरेत् (हरेद्धनम्); **स्मृच.**२९५; **विर.**५९१

(१) स्वायम्भुव पुत्रिकाभिप्रायेणैवाह—यथैवात्मेति। विश्व.२।१४०

(२) 'यदपत्यं भवेदस्या तन्मम स्यात्' इत्युक्तम्। अपत्यं च ऋक्थभाक्। अतः पितरि मृते पुत्रिकाया अनुत्पन्नपुत्राया धनहरत्वमप्राप्तं विधीयतेऽर्थवादेन। तस्यामात्मनि पुत्रनिमित्तं तिष्ठन्त्यामेव धनं, न पुत्रोत्पत्तिस्तदीर्यात्र युज्यते। अथवा तस्यामात्मभूताया पितृरूपायामिति। 'पुत्रेण दुहिता समे'ति सामान्यवचनो दुहितृशब्दः प्रकरणात्पुत्रिकाविषयो विज्ञेयः। *मेधा.

(३) पत्न्यभावे दुहितुरधिकारः। तत्र मनुनारदौ —यथैवात्मेति। +दा.१७५

(४) आत्मनि आत्मतुल्यपुत्रसमायामित्यर्थः। ÷स्मृच.२९५

(५) आत्मस्थानीयः पुत्रः 'आत्मा वै पुत्रनामासी'ति मन्त्रलिङ्गात्तत्समा च दुहिता तस्या अप्यङ्गेभ्य उत्पादनात्। अतस्तस्या पुत्रिकाया पितुरात्मस्वरूपाया विद्यमानायामपुत्रस्य मृतस्य पितुर्धन पुत्रिकाव्यतिरिक्तः कथमन्यो हरेत्। ममु.

(६) [हलायुधमते] इद पत्न्यभावे वेदितव्यम्। स्मृसा.१४१

(७) पुत्रग्रहणं पत्न्या अप्युपलक्षणम्। केचिदाहुः दुहितृरिक्थभाक्त्वबोधकानि एतानि वचनानि पुत्रिकाविषयाणीति, तदसत्। 'तृतीयः पुत्रः पुत्रिका विज्ञायते' इति वसिष्ठवचनात् पुत्रकोटिनिविष्टायाः पुत्रिकाया औरसपुत्रवत् सत्यामपि पत्न्या पितृरिक्थहरत्वम्। पत्न्यभावे रिक्थग्राहितावोधकेषु 'पत्नी दुहितरश्चे'त्यादिवचनेषु दुहितृशब्देन ग्रहीतुमुपयुक्तत्वात्। रत्न.१५४

(८) पत्न्यभावे दुहितरोऽपुत्राविभक्तासंसृष्टिधनभाजः। तथा च मनुः—यथैवात्मेति। तिष्ठन्त्यामित्यनादरे सप्तमी, तामनादृत्येत्यर्थः। =व्यप्र.५१७

[1]दौहित्र एव च हरेदपुत्रस्याखिलं धनम्॥

(१) दौहित्र एव च हरेदपुत्रस्यानौरसपुत्रस्याखिलं धन हरेत्। सति त्वौरसे यावानशस्तं वक्ष्यति। अत्रापि पुत्रिकापुत्र एव दौहित्रो न सर्वत्र, पूर्ववत्प्रकरणत्यागस्य यौतकविषयत्व एव प्रमाणसंभवात्। मेधा.

(२) पुत्रिकाया त्वकृतायामपुत्रस्य धन पत्न्यभाव एव दुहितृदौहित्रगामि। मवि.

[2]दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत्।
स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च॥

(१) अपुत्रमातामहप्रमातामहाय, पूर्वेणैव पौत्रिकेयदौहित्रस्याखिल रिक्थहरत्वमुक्तमतोऽय श्लोकस्तदनुवादेन पिण्डदानविधानार्थ इति कैश्चिद्व्याख्यातम्। हरेद्यदीति च ते पठन्ति। यस्मिन्पक्षे सर्व हरेत्तस्मिन्नेव पक्षे दद्यात्। यदा तु 'समस्तत्र विभागः स्यात्' इति पक्षस्तदा न दद्यात्, अन्यथा 'यो यत आदर्दात स तस्मै दद्यात्' इत्यनेनैव पिण्डदाने सिद्धे पुनर्वचनमनर्थकम्। अखिलरिक्थग्रहणानुवादश्चानर्थक एव। तदयुक्तम्। 'अपुत्रस्य पितुर्हरेत्' इत्ययमेवार्थोऽविगीतश्चिरन्तनपाठः। पितृशब्दश्च जनके प्रसिद्धतरो न मातामहे। अतश्च पुत्रिकाया भर्ता यादे तदन्यभार्यायामपुत्रः पुत्रिका च पुत्रवती तदाऽनेनैव पुत्रेण जातेन पिता मातामहश्चोभावपि पुत्रवन्तौ वेदितव्यौ। यदा तु बीजीतरासु जातपुत्रस्तदा पुत्रिका-

(१) मस्मृ.९।१३१, विर.५६० च (तु); व्यनि.; स्मृचि.२९ (=) च (तु); बाल.२।१३५ (पृ.२०७).

(२) मस्मृ.९।१३२; मेधा. पितुर्हरेत् (हरेद्यदि): ९।१४० द्वौ पिण्डौ (पिण्ड च); दा.१८०; विर.५६० पू.; स्मृसा. १३० द्वौ पिण्डौ (तत्पिण्ड); विचि.२३९; व्यप्र.५२१; विता.४०२ पितुर्हं (धनं ह); बाल.२।१३५ (पृ.२०७, २२३); विच.१२५.

---

* मवि. मेधावत्।

+ विचि., व्यनि., मवि., व्यप्र., व्यम., विता., बाल., सेतु. दावत्।

÷ शेष 'भर्तुर्धनहरा' इति बृहस्पतिवचनव्याख्याने द्रष्टव्यम्।

दावत्; स्मृसा. ७२, १२९,१३४-१३५, १४१; रत्न. १५४; विचि.२३८ निष्ठ (जीव); व्यनि.; स्मृचि.३२ यथै... पुत्रः (यथा पुत्रः स्मृतौ ह्यात्मा) नारदः; मवि.४१३ (=) त्रेण (त्रवत्): ४१४ उत्त., क्रमेण विष्णुः; नाभा.१४। ४७ (=) उत्त.; व्यप्र.५१७; व्यम.६२; विता.४००; बाल.२।१३५ (पृ.२०४,२२३,२३६पू.); सेतु.४३ विचिवत्; समु.१४१.

१ याय यु.

व्य. का. १६३

= शेष व्याख्यान 'भर्तुर्धनहरा' इति बृहस्पतिवचनोद्धृतस्मृतिचन्द्रिकावत्।

पुत्रः समानजातीयायामूढाया जातोऽपि नैव बीजिनो रिक्थं हरेन्नापि पिण्ड दद्यात् । अन्यो हि जन्यजनकभावोऽन्यश्चापत्यापत्यवत्संबन्धः । अजनका अपि क्षेत्रजादिभिरपत्यवन्तो, जनकाश्च विक्रीतापविद्धादिपितरो नैवाजीगर्तादयः पुत्रवन्तस्तथा चौरसलक्षणे 'स्वक्षेत्रे' इति स्वग्रहणं, क्षेत्रं च पुत्रिका पितुरेव, भर्ता हि तस्य चानुविधेयवर इति मातृकुलेऽस्वामी । तस्मादेव तद्वक्तव्यम् । यस्मिन्पक्षेऽविद्यमानान्यपुत्रः पुत्रिकाभर्ता पुत्रिकापुत्रश्चाखिलद्रव्यहारी तस्मिन्पक्षे । येन कार्यमतः पिण्डदान, यदा तु बीजी सपुत्रः सपद्यते तदा स पुत्रिकापुत्रो नैव बीजिने पिण्ड दद्यात् । ननु दौहित्र इत्युच्यते । पौत्रिकेय इत्यर्थः । यथा मातामहपक्षे पितुरपि यो हरेत्तस्यापि स दद्यादिति श्रूयते । न पुनः पक्षान्तरेऽपि निषेधमनुमापयति । पित्रे मातामहाय चेत्युभयोरप्राप्तत्वात् द्योतन परिसख्येति अनूद्यमाने द्योतनमन्यस्मा एव दद्यात्तयुगपदुभाभ्यामनेनायमनुवादः । तथैव पित्रे मातामहाय च एव पितामहाय प्रपितामहाय च । तथैव च ततः पराभ्या द्वाभ्याम् । मेधा.

(२) मातामहदेहात् दुहितुः सभव दौहित्रस्य धनाधिकारे हेतुत्वेन निर्दिशति न तु पुत्रिकाकरण इतरथा तदेव निर्दिशेत् । तथा व्यक्तमाह स एव–'अकृते'ति । अकृताजातस्यापि दौहित्रस्याधिकारमभिदधाति । किञ्च स्मृतिषु दौहित्रपदमपुत्रिकाजातपरं नियतम् । यथा बौधायनः–'अभ्युपगम्य दुहितरि जात पुत्रिकापुत्रम्' । अन्य दौहित्रम् । धिग्दादित्थनुवर्तते । अत एव भोजदेवेनापि कृताकृतदुहित्राधिकारे बृहस्पतिरित्यभिधाय 'यथा पितृधने स्वाम्यम्' इति वचन लिखितम् ।

*दा.१८०–१८१

(३) न केवल मातामहस्य धन हरेदपि तु पितुः बीजिनः स्वमातृभर्तृरप्यपुत्रस्य पुत्रान्तरशून्यस्य दौहित्रः पुत्रिकापुत्रो धन हरेत्, तद्बीजप्रभवत्वादस्य ज्ञात्यन्तरापेक्षयाऽन्तरङ्गत्वात् । पुत्रिकापुत्रनियमे च स मे पुत्र इत्यभिधानस्य न ममैव पुत्र इतीतरपुत्रत्वव्यवच्छेदने तात्पर्य, किं तु स्वपुत्रतायाम् । यदासावृक्थहरस्तदा स एव मातामहाय यथैकोद्दिष्टं तत्पितृपितामहौ चादाय पार्वणं यथा करोति तथा स्वबीजिनेऽपि कुर्यात् । पिण्डद्वयदानविधिः श्राद्धद्वयविधिपरः । द्यामुष्यायणस्य श्राद्धविधानं श्रुतौ श्रुतम् । ×मवि.

(४) पौत्रिकेयत्वेन जनकधनग्रहणपिण्डदानव्यामोहनिरासार्थं वचनम् । +ममु.

(५) (बालरूपमते) इदं पि(पु)त्राद्यभावे एव, 'पत्नी दुहितर' इति क्रमाविरोधात्, दुहित्रभावे च पितुः । स्मृसा.१३०

(६) एतत्तु द्वय पुत्राद्यभावे, 'पत्नी दुहितर' इत्यादिक्रमानुरोधात् । विचि.२३९

(७) पुत्राभावे पौत्रैरेव कार्य,तदभावे दौहित्रैः कर्तव्यम् । व्यनि.

(८) तत्रैव कैमुतिकन्यायमाह—दौहित्र इति । अपुत्रस्य पुत्रान्तररहितस्य स्वपितुर्मातामहस्य वा । अत आह—स इति । नास्य पितृमातामहपक्षे पिण्डदातृत्व मातामहमातृपक्षे तु पिण्डदातृत्वमिति भावः । पितुः पुत्रान्तरासत्वे स्वपितुर्धनस्य न्यायसिद्धत्वात्पिण्डदातृत्वं विधेयम् । पिण्डदान श्राद्धाद्युपलक्षणार्थम् । मच.

(९) दौहित्रमात्रस्यैव मातामहधनाधिकारं दर्शयति–दौहित्रो ह्यखिलमिति । पितुरिति मातुः पितुरिति व्याख्येयम् । अत एवाग्रे मातामहाय चेत्याह । अथवा यथा स स्वपितुरखिल रिक्थ गृह्णाति तथाऽपुत्रस्य मातामहस्यापि । स्वयमेव तत्पुत्रकार्यकारित्वात् । तदेवाह –स एवेति । स्वपित्रे मातामहाय चेत्यर्थः । केचित् 'अपुत्रपौत्र' इति यथाश्रुतविष्णुवचनात्पत्नीदुहितृतः प्राग्दौहित्रस्य धनाधिकारमाहुः । तत् योगीश्वरविरोधात् 'तथैव तत्सुतोऽपि' इति बृहस्पतिवचनेऽपि दुहितृतत्सुतस्य जघन्यभावावगतेर्हेयम् । व्यप्र.५२१–५२२

(१०) दुहित्रभावे दौहित्रो धनहारी । विता.४०१

(११) मिताटीका– यद्यपीद सर्व ('मातुस्तु यौतक' इत्यादिश्लोकचतुष्टयं, (मस्मृ.९।१३१,१३२,१३३,१३९) पुत्रिकापुत्रविषय प्रकरणात्, व्याख्यातं च मेधातिथिना तथैव, तथापि न्यायसाम्यादत्र समतित्वेन लिखितम् ।

* शेष 'यथा पितृधने स्वाम्य' इति बृहस्पतिवचनव्याख्याने द्रष्टव्यम् ।

× नन्द. मविगतम् । + शेष मेधागत मविगतं च ।

अत एव विज्ञानेश्वर एतत्सर्वं विहायैतत्प्रकरणस्थमपि 'अकृता वे'त्युक्त्या साधारण मनुवाक्यमात्र सम्मतित्वेनाह। यद्यपि मानवे पुंस्त्वैकवचनाभ्यां दौहित्रस्यैव धनभाक्त्वमायातीति तावदेव विज्ञानेश्वरेण चशब्दसमुच्चेयमुक्तं तथापि दौहित्राभावे दौहित्र्यास्तत्त्वमपि च समुच्चेयम्। 'अप्रजःस्त्रीधनं भर्तुरि'ति वक्ष्यमाणेनाप्रजःस्त्रीधनोद्देशेन भर्तृदुहितृदौहित्र्यादेश्च संबन्धविज्ञानेनोद्देश्यविशेषणत्वेन स्त्रीत्वादेरविवक्षितत्वेन 'दुहितृणा प्रसूता चेदि'त्यस्य पितृधनेऽपि तुल्यत्वात्। एवरीत्या 'मातुर्दुहितर' इति नारदस्याप्यत्रानुकूलत्वात्। युक्त चैतत्। यथा मातृधनग्रहणे दुहितृदौहित्रपुत्रपौत्रादिक्रमस्तथा पितृधने पुत्रपौत्रप्रपौत्रपत्नीदुहितृदौहित्र्यादिक्रमस्य प्रत्यासत्तितारतम्येन न्यायप्राप्तत्वात्। 'स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठितानां चे'ति गौतमवचनस्य (गौध.२८।२२) पितृधनेऽपि समानत्वादित्यनुपदमेवोक्तवता विज्ञानेश्वरेण सूचितत्वात्तत्संमतमपीदम्। अन्यथा दौहित्र्याः पूर्वत्र वक्ष्यमाणेषु च स्वतो नोक्तत्वादनन्तर्भावाच्च पितृधन विषये तस्या अनधिकारस्यैवापत्तिरिति महान् दोषः। अग्रे यथाकथंचिदन्तर्भावे तु प्रथम धनग्रहणे प्रत्यासत्तेर्नियामकत्वबोधकमन्वादिविरोधः स्पष्ट एव। अत एवाग्रे भ्रात्रनन्तरमेव तत्सुतोक्तिरितीति।

बाल.२।१३५(पृ.२०७)

(१२) दुहितृपर्यन्ताभावोपलक्षणम्। अन्यथा 'पत्नी दुहितरश्चै'वेत्यादियाज्ञवल्क्यप्रभृतिविरोधः स्यात्। एतेन उक्तवचनात् पुत्राभाव एव दुहितृसत्वेऽपि दौहित्राधिकार इति गोविंदराजमत निरस्तम्। मैथिलास्तु 'पत्नी दुहितरश्चे'ति वचनबोध्याधिकारिणा सर्वेषा पश्चात् दौहित्राधिकारमाहुस्तदतीव मन्दम्। 'पौत्रदौहित्रयोर्लोके' इत्यादि पूर्वोक्तमनुवचने दौहित्रस्य पौत्रतुल्यत्वाभिधानेन यथा पुत्राभावे पौत्रस्य, तथा दुहित्रभावे दौहित्रस्य युक्तत्वात् पुरुषत्रयपिण्डदातृत्वेन तस्याधिकोपकारत्वाच्च 'यथा पितृधने स्वाम्य तस्याः सत्स्वपि बन्धुषु। तेनैव तत्सुतोऽपीष्टे मातृमातामहे धने॥' इति वचनाच्च।

विच.१२५

[1]पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः।
तयोर्हि मातापितरौ संभूतौ तस्य देहतः*॥

(१) पूर्वशेषोऽयमर्थवादः। कथमविशेषस्तयोर्हि मातापितराविति। मेधा.

(२) यदि पुत्रिकाया कृताया पुत्रो जायते मातामहस्य तदा दुहित्रपेक्षया पुत्रस्याभ्यर्हितत्वादधिकभागतास्थित्याशङ्का निवारयति—पौत्रेति। मातापितरौ पिता च माता चेत्यर्थः। अत्र च दुहितुः पुत्रस्थानीयत्वात्तस्याश्च स्त्रीत्वेन बहिरङ्गत्वात्साम्योक्त्यसंभवात्पौत्रदौहित्रोपादानम्। तेन पुत्रतुल्यत्वात्पौत्रस्य तुल्यत्वाच्च दौहित्रस्य पुत्रेण साम्यमित्युक्तम्। मवि.

(३) पौत्रपौत्रिकेययोर्लोके धर्मकृत्ये न कश्चिद्विशेषोऽस्ति। ममु.

(४) पौत्रतुल्यत्वाभिधानेन यथा पुत्राभावे पौत्रः तथा दुहित्रभावे दौहित्रः। ×दात.१९१

(५) समाधिकारितेति भावः। मच.

(६) मातापितराविति च न यथाक्रममन्वयः। किन्तु पौत्रस्य पिता दौहित्रस्य माता तस्य धनस्वामिनो देहतः संभूतौ इति यथायोग्यम्। व्यप्र.५२२

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते।
समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः॥

(१) समस्तत्र तुल्यो विभागो जातेन पुत्रेण। ज्येष्ठाशनिषेधः ज्येष्ठता नास्ति हि स्त्रियाः, रिक्थभाग एव ज्येष्ठता निषिध्यते न त्वस्या गुरुवृत्तौ। +मेधा.

---

* बाल.व्याख्यान 'दौहित्रो ह्यखिल रिक्थ' इति मनुवचने (पृ १२९६) द्रष्टव्यम्।

× विच. दातवत्।

+ विच., भाच. मेधागतं, मविगतं च।

नास्ति); व्यनि. पौत्र (पुत्र); दात.१९१ दावत्; व्यप्र.५२१; विता.४०२ दावत्; बाल.२।१३५ (पृ.२०७ दावत्, २२३): २।१४५ (पृ.२६२); समु.१४१ लोके (कार्ये) शेष दावत्, विच.१२४.

(१) मस्मृ.९।१३४; मिता.२।१३२; दा.३९,१४४; अप.२।१३२; व्यक.१५२; भमा.२८।३४; गौमि.२८।१६,३२; उ.२।१४।२; विर.५४१; पमा.५१४; मपा.६५४; स्मृसा.६६; रत्न.१४२; विचि.२३४; व्यनि. ज्येष्ठ (च्छिष्ठ); स्मृचि.३३; नृप्र.३९; सवि.३९२; चन्द्र.९०; व्यप्र.४८१; व्यउ.१४८; विता.३६५; बाल.२।१३५ (पृ.२१६); समु.१३८; विच.७२.

(१) मस्मृ.९।१३३; दा.१८० न विशेषोऽस्ति (विशेषो

(२) औरसपौत्रिकेयसमवाये औरसस्यैव धनग्रहणे प्राप्ते मनुरपवादमाह–पुत्रिकायामिति । ×मिता.२।१३२

(३) तत्र पुत्रिकौरसयोस्तुल्याशित्व न पुनः पुत्रिकाया ज्येष्ठत्वेन विंशोद्धारार्हता, तदाह मनुः–पुत्रिकायामिति । स्वतो ज्येष्ठपुत्रकार्याकरणात् स्वपुत्रद्वारेण पुत्रिकायाः पिण्डदातृत्वात् । न च पुत्रिकायामेव प्रथम पुत्रे जाते तदनन्तरमौरसपुत्रोत्पत्तौ पुत्रिकापुत्रस्य ज्येष्ठाशता भवेदिति वाच्यं तस्य पौत्रत्वात् । तदाह मनुः—'अकृता वा कृता वापि य विन्देत् सदृशात् सुतम् । पौत्री मातामहस्तेन दद्यात्पिण्ड हरेद्धनम् ॥' पुत्रिका हि पुत्रस्तस्याः पुत्रः पौत्र एव भवति तद्वाश्च पौत्री भवति न च ज्येष्ठत्वेन पौत्रस्याशातिरेकः श्रुतोऽस्ति । यत्तु वसिष्ठवचनं 'अभ्रातृका प्रदास्यामि तुभ्य कन्यामलङ्कृताम् । अस्या यो जायते पुत्रः स मे पुत्रो भवेदिति ॥' (वस्मृ.१७।१८) पुत्रिकापुत्रस्यैव पुत्रत्वं वदति तेन पुत्रिकायास्तत्पुत्रस्य च पुत्रत्व, तन्न, मनुविरोधात् पिण्डदानमात्रयोगात् पुत्रत्वमस्य गौण तद्द्वारेणैव पुत्रिकायाः पिण्डदातृत्वादेकस्य स्वतोऽन्यस्य तद्योगात् । पुत्रिकौरसयोस्तु सवर्णत्वे सति पूर्वोक्तविभागो बोद्धव्यः, असवर्णत्वे तु तयोरसवर्णौरसपुत्रवदेव विभागः पुत्रिकौरसयोः समानत्वात् । यदि च कृतापि पुत्रिका पुत्रमनुत्पाद्यैव विधवा भूता बन्ध्यात्वेन हि बावधृता तदा तस्याः पितृधनेऽनधिकारः, स्वधाकरपुत्रार्थ पुत्रिकायाः कृतत्वात् तदभावे दुहितन्तरतुल्यत्वात् । *दा.१४४-१४६

(४) यद्येवं ज्येष्ठत्वात्पुत्रिकापुत्रस्य ज्येष्ठस्य ज्येष्ठभागो देय इत्यत आह–पुत्रिकायामिति । पुत्रो जायते मातामहस्य । ज्येष्ठता गुणविशेषकृता विद्यादिगुणाभावान्नास्ति तद्द्वारा तु पुत्रिकापुत्रस्यापि न ज्येष्ठताऽस्तीत्यर्थः । +मवि.

(५) कृताया पुत्रिकाया यदि तत्कर्तुः पुत्रोऽनन्तरं जायते तदा तयोर्विभागकाले समो विभागो भवेत् । नोद्धारः पुत्रिकायै देयः । यस्माज्ज्येष्ठाया अपि तस्या उद्धारविषये ज्येष्ठता नादरणीया । +ममु.

(६) अनु पुत्रिकाकरणात् । स्त्रियाः पुत्रिकात्मिकायाः । विर.५४१

(७) मिताटीका— औरसपौत्रिकेयसमवाय इति । औरसपुत्रस्य पुत्रिकायाश्च सद्भाव इत्यर्थः । *सुबो.२।१३२

(८) अनुजायते पुत्रिकाकरणात्पश्चाज्जायते स्त्रीग्रहणात्तदपत्यस्याप्युपलक्षणम् । नन्द.

अपुत्रायां मृतायां तु पुत्रिकायां कथंचन ।
धनं तत्पुत्रिकाभर्ता हरेतैवाविचारयन् ॥

(१) अस्वामित्वात्तु पुत्रिकाया भर्तुरप्राप्तधनसबन्ध उच्यते । अथ किं पुत्रिका विवाहेन सस्क्रियते उताहो न, किंचन यदि सस्क्रियते भार्यैवासौ भवति । भार्याकरणो हि विवाहः । ततश्च तद्धन ... (पुत्रिकाभर्ता हरेतैवाविचारयन् । यदि) न सस्क्रियते कन्यागमन प्राप्नोति 'स्वदारनिरतः सदा' इति नियमातिक्रमश्च, यथेच्छसि तथास्तु । .. . ननु चास्मिन्पक्षे श्लोकोऽयमनर्थकः । नैष दोषः । परिपूर्णत्वायार्थवादस्य यथैतदीयमपत्य न भर्तुस्तथा धन न वेत्याशङ्कानिवृत्त्यर्थो युक्त एव श्लोकारम्भः । बहवश्चार्थवादिनो मानवाः श्लोकाः । अथवा पुनरस्तु न संस्क्रियत इति । ननु चास्मिन्पक्षे कन्यागमन प्राप्नोति । किं कृत तथाविधाया जातो मातामहस्य पुत्र इति सिद्धे गन्तुर्विध्यर्थातिक्रमनिरूपणेन प्राकरणिकम् (?) । न च तानीमानि न पतनीयानि । ..... किं पुनर्भवान् कन्याशब्दार्थ मत्वा चोदयति कन्याग्रहण प्राप्नोतीति । त्रिधा हि कन्या एका तावदप्रवृत्तपुप्रयोगा । तथा ..... संस्कारहीना, प्रथमे वयसि वर्तमाना च, तत्र यदि तावत्पुसाऽसंप्रयुक्ता 'अङ्गसा अय प्रयुङ्क्ते'इति ऊढाया अपि प्राथमिकात्सं-

× पमा., विचि., सवि., विता. मितागतम् ।

* मभा. दागतम् । चन्द्र. दायभागोद्धृतावतरणवत् । व्यवहारप्रकाशे सर्वं दायभागव्याख्यान शब्दभेदेनोद्धृतम् ।

+ मच. मविगतम् ।

+ मेधागत, दायभागस्यावतरणिकागतं च ।

* शेष दायभागस्यावतरणिकावत् ।

(१) **मस्मृ.**९।१३५; **दा.**१७९; **अप.**२।१४५ अपुत्रा (अप्रजा) तै (दे); **व्यक.**१४९; **विर.**५२०; **पमा.**५५५ तै (च्चै), **स्मृसा.**६४; **रत्न.**१६४; **चन्द्र.**८८ धनं तत् (तद्धनं); **बाल.**२।१४५ (पृ.२५६,२६७); **समु.**१३८.

प्रयोगादनपगतमेवानुपजयेत । प्रायेण ह्यत्र शास्त्रे कन्याशब्दः पुंसाऽसप्रयोगमाचष्टे । अथ संस्कारहीनेति । तदपि न । यतः प्रथममेव वचनमेव स्मरणाभिप्रायेण तत्र संभविप्रमाणान्तरवशाल्लक्षणया हिता इत्यत्र प्रतीयते (?) । यथोक्त—

'पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः । नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः ॥' इति । अत्र धर्मलोपवचनलिङ्गात्पुरुषोपभुक्ताऽकन्येत्युच्यते । तद्विपर्ययेणानुपभुक्ता कन्येति सर्वत्रैव मुख्यार्थमनुरुध्य क्रियमाणा धर्मा लक्ष्यन्ते । ते च न सर्वे । किं तर्हि । यावता प्रमाणमस्ति । तथा हि कानीन इति पितुः स्वता संस्काराभावश्च प्रतीयते । केवले हि संस्काराभावे अनूढास्वैरिणीपुत्राः कानीनाः, केवलाया च पितृस्वतालक्षणाया पुत्रिकापुत्रोऽपि कानीन इति व्यपदिश्यते । तथोक्ते स्वदारस्तु नियमातिक्रमः प्राप्नोतीति । न ह्यस्यायमर्थः स्वदारेभ्योऽन्या गन्तव्येति । परस्त्रिय च कामयते न चापरान् दारास्तथा सत्यनेनैव गतत्वात्परदारप्रतिषेधोऽनर्थकः स्यात्किंतर्हि स्वदारेषु रतिर्धारयितव्या रतिभावनयाऽभ्यासात्प्रीत्यशयोत्पत्तेः । स्त्रियं च न कामयते न चापरान् दारास्तथा सति धर्मेभ्यो न हीयत इत्यनुवादोऽयम् । अथवा स्वदारनिरतोऽपि पर्ववर्जमेना व्रजेत् असौ सुपुष्पैवमन्यशेष एव परदारा प्रतिषेधोऽपि नास्ति (?) । अनूढत्वात्केनचिद्दारव्यपदेशाभावात् । किं पुनरत्र युक्तमविवाह्येति अष्टौ हि विवाहास्ते च स्वीकारभेदेन ब्राह्मादिव्यपदेशभेद प्रतिपद्यन्ते । न चास्याः स्वकरणं भर्तुरस्ति । पितुरेव स्वत्वानिवृत्तेः । अभ्रातृकाया च विवाहप्रतिषेधे पुत्रिकामविवाह्या दर्शयति । यथा, 'नाभ्रातृकामुपयच्छेत तोक ह्यस्य तद्भवती'ति, प्राकरणिकश्चाय प्रतिषेधस्तत्प्रतिषेधोपलभ्यमानमूलत्वात्प्रकरणाधीनोऽपि न संस्कारत्वमपनुदति। तथा च शिष्टा दर्शनीयकन्याभावे कपिलादिरूपामुपयच्छन्ति । तया च स्वधर्मानुष्ठानमाचरन्ति । क्षतयोन्यन्यपूर्वाभावोऽत्र, समानप्रवरादिकयोढयापि कथंचिन्न पत्नीकार्यं कुर्वन्ति । एतदर्थमेव कैश्चिन्नोद्वहेत्कपिलामित्यत्र दृष्टदोषोपवर्णन प्राकरणिकत्वेऽपि सपिण्डादिप्रतिषेधस्य चैकरूप्यं मा विज्ञायीति। कथ पुनः स्पष्टप्रतिषेधो 'नाभ्रातृकामुपयच्छेत' तस्मिन्नोद्वाहशङ्का। उच्यते। अस्य प्रतिषेधस्य वाक्यशेषः श्रूयतेऽपत्य ह्यस्य तद्भवतीति अनेन ततश्चापत्योत्पत्तावेव पुत्रिका न भार्या धर्मार्थम् । अर्थकामयोस्त्वस्त्येव सहाधिकार इति भवति। परिहारस्तु संस्काराभावादविवाहः। ननु तस्मिन्पक्षे कानीन एव पुत्रिकापुत्रः स्यात् । न ह्यसौ पितुः स्वः स्यादसंस्कृतयोश्चापत्यमिति। संस्कारपक्षे तु पितृस्वता संस्कारभावेन धर्मलक्षणप्रत्ययान्यतरधर्माभावे कानीनाद्विद्यत इति युक्तम् । अत्रोच्यते । न । वयं पुत्रिकापुत्रस्य कानीनस्य लक्षण तदस्य नास्तीति ब्रूमः । इद हि तस्य लक्षणं— 'पितृवेश्मनि कन्या तु य पुत्र जनयेद्रहः । त कानीन वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥' इति । अस्य चार्थः । य एवंलक्षणः स इह शास्त्रे कानीनग्रहणेषु ग्रहीतव्यः । स च कस्यापत्यमित्यपेक्षाया 'वोढुः कन्यासमुद्भवम्' इति द्वितीय वाक्यम् । अथवा नेह पदार्थो लक्ष्यते । किं तर्हि ? सबन्धिता नियम्यते । य एवविधः कानीनस्त वोढुः संबन्धिन वदेदित्येकवाक्यतैव । सबन्धिता च पदार्थाभेदेऽप्युपाधिभेदाद्विद्यत एव रहःप्रकाशभेदेन । एवच मातामहस्य । अन्ये चाहुर्यदि पदार्थः स एव तदा कानीनशब्दस्य शब्दार्थसबंधोऽबाधित एवावगन्तव्यः । ते चेदपत्यमात्रे कानीन स्मरन्ति, भवतु पैतृके कानीने व्यवहारः । अन्ये तु स्मृतिमेव विशेषनिष्ठामाहुः । न हि कन्यापत्यमात्रे सर्वत्र कानीनशब्दः प्रयुज्यते । किं तर्हि, मानवस्मृतेर्लक्ष्यते, एतदप्यनुमन्यामहे निश्रिते प्रयोगाभावेऽवशेषस्मरणेऽपि पुत्रसिद्ध्यादितद्विशेषावगतिः प्रयोगतो न्याय्यैव (?)। मेधा.

(२) तदविपर्यस्तपुत्राया उत्पन्नमृतपुत्रायाः पुत्रिकाया मरणे वेदितव्यम् । दा.१७९

(३) 'अस्या यो जायते पुत्रः स मे पुत्र' इत्येव कृताया पुत्रिकायामेतत् । या पुनरियं मे पुत्र इति क्रियते तद्विषयमाहतुः शङ्खलिखितौ – 'प्रेतायाः पुत्रिकाया न भर्ता धनमर्हत्यपुत्रायाः ।' अप.२।१४५

(४) धनं तया जीवतो मृतस्य वा स्वपितुः प्रातम् । मवि.

(५) अपुत्राया पुत्रिकाया कथंचन मृताया तदीयधनं तद्भर्तैवाविचारयन्गृह्णीयात् , पुत्रिकायाः पुत्रसमत्वेनान

पत्यस्य पत्नीरहितस्य मृतपुत्रस्य पितुर्धनग्रहणप्रसक्तौ तन्निवारणार्थमिद वचनम्। ममु.

(६) एतच्च यदा अपुत्रायास्तस्याः कुमारी न भवति भगिनी वा, तदा बोद्धव्यम्। विर.५२०

(७) इति, तत्पश्चादुत्पन्नभ्रात्रभावे वेदितव्यम्। पमा.५५५

(८) अजातपुत्रा पुत्रिका म्रियेत चेद्धन तद्भर्तुरेवेत्याह--अपुत्रायामिति। अविचारयन् पुत्रिकापुत्रस्य मातामहसंबन्धित्वबुद्धन तस्येत्यनभिशङ्कः। पुत्रस्यैवान्यार्थत्व न तु पत्न्याः अतोऽस्य तद्धनस्वत्वमिति भावः। मच.

(९) अपुत्रिक भर्तैवाहरेन्न पुत्रिकापितृव्यादयः। नन्द.

अकृता वा कृता वाऽपि यं विन्देत्सदृशात्सुतम्। पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् *॥

(१) अधस्तनोपरितनवाक्यपर्यालोचनया पुत्रिकापुत्रविषय एवायमतिशयोक्त्या प्रतीयते। अकृताया अपि दुहितुः पुत्रो मातामहधनभागित्युक्तं किं पुनः कृताया इत्येवमन्यशेषत्वात्पुत्रिकाया विधिष्वानर्थक्यप्रसङ्गान्न दौहित्रस्य रिक्थप्राप्त्यर्थः। ननु च स्मृत्यन्तरे दौहित्रमात्रस्य पिण्डदानाधिकारः श्रूयते 'मातामहानामप्येवमि'ति। इहापि प्रकरण हित्वा श्रुतिवाक्यसामर्थ्येन दौहित्रमात्रविषयतैव प्रतिपत्तु न्याय्या। 'दद्यात्पिण्ड हरेद्धन' इति। तथापरमुक्त 'दौहित्रो ह्यखिल रिक्थम्' इत्यादि। अत्रोच्यते यदुक्तं मातामहानामिति तद्बहुवचन किं व्यक्त्यपेक्ष्यमुत लक्षणया प्रमातामहाद्यभिप्रायेण, व्यक्तिपक्षे एकस्यैव मातामहस्य पिण्डदान प्राप्नोति श्राद्धादिवत्। तच्च सपिण्डीकरणे कृते विरुद्धम्। एवं ह्याहुः 'अत ऊर्ध्व त्रिभ्यो दद्यात्' इति। अथापि पितुरन्यस्य सपिण्डीकरणमेव न करिष्यत इत्युच्यते तदपि न निषेधाभावात् लक्षणायाः संनिकर्षो विशेषाभावाल्लक्षणविशेषापरिज्ञानेऽनवगमत्वमेव स्मृत्यादिवलेन च प्रकरणत्यागस्येति विरोधप्रसगस्तद्विशेषो हि पदार्थः प्रकरणादुत्कृष्यते द्वादशोपसदो हीनस्येतिवत्। अकृता वेत्यस्य चान्यपरत्वमुक्तम्। तस्मात्पौत्रिकेयविषयमेतत्। मेधा.

(२) अकृताजातस्यापि दौहित्रस्याधिकारमभिदधाति। दा.१८१

(३) अकृता पुत्रिकात्वेनापरिभाषिता। सदृशात् नोत्तमादधमाद्वा। कृतापुत्रो दद्यात्प्रथमं पिण्डं सर्वदा, स एव धन हरेत्सदैव। अकृतापुत्रस्तु पुत्रपत्नीदुहित्रभाव एव। मवि.

(४) अकृता वा कृता वेति पुत्रिकाया एव द्वैविध्य, तत्र 'यदपत्य भवेदस्या तन्मम स्यात्स्वधाकरमि'त्यभिधाय कन्यादानकाले वरानुमत्या या क्रियते सा कृताऽभिसधिमात्रकृता वाग्व्यवहारेण न कृता। तथा गौतमः--'अभिसंधिमात्रात्पुत्रिकामेकेपामि'ति। अत एव 'पुत्रिकाधर्मशङ्कये'ति प्रागविवाह्यत्वमुक्तम्। पुत्रिकैव कृताऽकृता वा पुत्र समानजातीयाद्बोढुरुत्पादयेत्तेन दौहित्रेण पौत्रकार्यकारणात्पौत्रिकेयवान्मातामहः पौत्री। तथा चासौ तस्मै पिण्ड दद्यात्। गोविन्दराजस्त्वकृता वेत्यपुत्रिकैव दुहिता तत्पुत्रोऽपि मातामहधने पौत्रिकेय इव मातामह्यादिसत्त्वेऽप्यधिकारीत्याह। तन्न, पुत्रिकायाः पुत्रतुल्यत्वाद्पुत्रिकातत्पुत्रयोरतुल्यत्वेन तत्पुत्रयोस्तुल्यत्वायोग्यत्वादिति। ममु.

(५) अत्राकृता वेति दृष्टान्तार्थम्। कृतायाः पुत्रिकायाः सुतस्य पुत्रत्वेन अर्धांशभागित्वादप्रतिबन्धदायार्हत्वस्योक्तेः। यथा कृतायाः पुत्रेण मातामहः पौत्री तथाऽकृताया अपि पुत्रेणेति। अनेन 'कुर्यान्मातामहश्राद्ध नियमात्पुत्रिकासुतः' इत्यपि परास्तम्। पुत्रिकासुतस्य पुत्रमध्ये पाठा(त्पत्नी)त्पौत्र एव पुत्रिकासुतशब्दवाच्य इति। अनयोर्मानवैष्णवयोः वचनयोः तात्पर्यवर्णने विवदन्ते वृद्धाः। दौहित्रस्य मातामहश्राद्ध सकारणमेव पितृश्राद्धवन्निष्कारणं न भवतीति। तथाहि-- 'यो यत आददीत स तस्मै श्राद्ध कुर्यादि'ति विष्णुस्मरणात्। 'श्राद्धं मातामहाना तु अवश्य धनहारिणा। दौहित्रेणार्थ-

* मिता., पमा., व्यनि., व्यप्र, विता एषु ग्रन्थेषु इद वचनं दौहित्रसामान्यपरतया संगृहीत, न पौत्रिकेयपरतया।

(१) **मस्मृ** ९।१३६; **मिता** २।१३५; **दा.**१४४-१४५, १८०; **पमा.**५२५; **व्यनि.**शात्सु (श सु); **सवि** ४१५-४१६, ४२५ शात्सु (श सु) हरेद्धनम् (धन हरेत्): ४२७ शात्सु (श सु); **व्यप्र.**४८१,५२१; **व्यउ.**१५४ अकृ...कृता (अक्षता वा क्षता); **विता.**४०२ (अकृतो वा कृतो वापि यो विन्देत् सदृशं सुतम्।) पौ (पु); **बाल.**२।१३५ (पृ.२२३); **समु.**१४१ हरेद्धनम् (धनं हरेत्), **दच.**७ (=).

निष्कृत्यै कर्तव्यं विधिवत्सदा ॥' इति व्यासस्मरणात् धनग्रहणनिबन्धन दौहित्रस्य मातामहश्राद्धकरणमिति । यत्तु पुलस्त्येनोक्त–'मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः । तेषा तु पितृवच्छ्राद्ध कुर्युर्दुहितृसूनवः ॥' इति, तत्तु पितृश्राद्धेनानुशिष्टमातामहश्राद्धविषयमित्यवगन्तव्यम् । यथोक्त पितामहेन—'पितरो यत्र पूज्यन्ते तत्र मातामहा अपि । अविशेषेण कर्तव्य विशेषान्नरक व्रजेत् ॥' इति । व्यासोऽपि—'पितुर्मातामहाश्चैव द्विजः श्राद्धेन तर्पयेत् । अनृणः स्यात्पितृणा तु यज्वना लोकमृच्छति ॥' इति । स्कान्दे पुराणेऽपि–'कृत्वा तु पैतृक श्राद्ध पितृप्रभृतिषु त्रिषु । कुर्यान्मातामहाना च तथैवानृण्यकारणात् ॥' इति । यत्तूक्तं—'कुर्यान्मातामहाना तु नियमात्पुत्रिकासुतः । उभयोरथ संबन्धात्कुर्यात्स उभयोः क्रियाः ॥' अत्र केचित्—द्विविधो हि पुत्रिकापुत्रः एको मातामहसबन्धः अपरः पितृमातामहसबन्धः । मातामहसंबन्धेन मातामहश्राद्ध कर्तव्यम्। उभयसबन्धेनोभयोः क्रियाः कार्या इति । अयमाशयः—पुत्रिकायाः सुत इति षष्ठीसमासाश्रयणात् तस्य मातामहशब्दवाच्यत्वात् । ...पुत्रिकासुत इति कर्मधारयसमासाश्रयणे तु 'अस्या यो जायते पुत्रः स मे पुत्रो भविष्यति' । इति परिभाषावशात् पुत्रिकापुत्रस्य (?) मातामहसबन्धः। इतरस्य तूभयसंबन्धित्वमिति । अत्रोच्यते—दौहित्रस्य मातामहश्राद्धे पुत्रवदधिकार इत्याह विष्णुः–'दौहित्रस्य मातामहश्राद्ध निष्कारणमि'ति । कारण रिक्थग्रहणात्मकम् । दौहित्रस्य मातामहश्राद्धे नित्यवदधिकार इत्यर्थः । अत्र भारुचिः—निष्कारणमिति वदता विष्णुना भङ्ग्यन्तरेण समनन्तरकर्तृणा पुत्रादीना विद्यमानत्वे दौहित्रस्य कर्तृत्वसंक्रान्तिः । अत्रादिशब्देन पत्नी विवक्षिता, यद्यग्नि विद्यासाध्यकर्मसु स्त्रीणामधिकारस्तत्रापि, 'पत्न्येव दद्यात्तत्पिण्ड कृत्स्नमश लभेत च' । इत्येवमादिवचनबलात्तत्र तासामधिकारः । तथा च गौतमः -'नित्यवदधिकारो दौहित्राणा मातामहश्राद्धे' इति । नित्यवदिति स्वार्थे वतिः । अतश्च—'अकृता वा कृता वाऽपि य विन्देत्सदृश सुतम् । पौत्री मातामहस्तेन दद्यात्पिण्ड हरेद्धनम् ॥' इति पत्नीशब्दवाच्यभार्यापुत्रिकासुतविषय पुत्रिकाकरणपुत्रिकासुतविषय च वेदितव्यम् । नन्वेवं 'अकृता वा कृता वे'त्यादि वचन पुत्रिकाकरणविषय कृतेतिपदेन, अकृतेति पदेन तु गान्धर्वादिविवाहोढापुत्रिकाविषयम्। 'पौत्री मातामहस्तेने'ति वचनसामर्थ्यात् पौत्रत्वमुभयोरेव पुत्रिकायाः पुत्रत्वात् तत्पुत्रस्य दौहित्रत्वात् । गान्धर्वविवाहे मातामहसापिण्ड्यसगोत्रत्वयोरनिवृत्तेः तत्र पौत्रत्वमिति तयोरेव मातामहश्राद्धे नित्यवदधिकारः न दौहित्रमात्रस्येति चेन्मैवम्। 'दद्यात्पिण्डं हरेद्धनमि'ति धनहरणस्य पत्नीमूलकत्वात्पत्नीपदेन यज्ञसयोगप्रतिपादकेन गान्धर्वादिविवाहोढापर्युदासात् तत्पौत्राणा दूरत एव पत्नीमूलकधनग्रहणमिति । किं च पौत्रीति सामर्थ्यात् गान्धर्वादिविवाहोढापुत्रिकापुत्रेऽपि नास्ति दौहित्रत्वात्तस्य किन्तूपचार एव । अतः पूर्वोक्तमेव सम्यक्। नन्वेव 'यो यत आददीत स तस्मै श्राद्ध कुर्यादि'ति वैष्णववचन 'दौहित्रस्य मातामहश्राद्ध निष्कारणमि'ति च वैष्णवमेव, उभयोर्विरोध इति चेन्मैवम् । अत्र भगवतो भारुचेर्मतमवतिष्ठते—यः श्राद्धाधिकारी यतो यस्मात्सकाशाद्धनमादद्यात्तेन मिलितेन द्रव्येण तस्मै तदर्थ तत्प्रतिनिधिर्भूत्वा कुर्यादिति । अयमाशयः—बहुपुत्रस्थले बहुदौहित्रस्थले पितुर्मातामहस्य वा और्ध्वदेहिककियाणा मध्ये नवश्राद्धषोडशश्राद्धाना निष्पादने न बहूनामधिकारः किन्त्वेकस्यैवेति प्रकरणसामर्थ्यादुक्त भारुचिनेति ध्येयम् । सोमेश्वरस्तु—वचनस्याभिधानशक्त्या प्रकरण बाधित्वा 'यो यत आददीत स तस्मै श्राद्ध कुर्यादि'ति वचन पुत्रदौहित्रव्यतिरिक्तरिक्थग्राहविषयमित्याह । एतच्च समनन्तरमेवोक्त विष्णुना—'उद्धृतद्रव्यादेकेनैव शक्तेन श्राद्धषोडशक कार्यमि'ति । षोडशश्राद्धग्रहण नवश्राद्धानामुपलक्षकम् । तथा च गौतमः—'समुदितद्रव्येण नवश्राद्ध षोडशश्राद्धं च कुर्यादि'ति । चकारः पन्थापरिव्ययण समुच्चिनोति । समुदितशब्देन ज्ञायते–एकस्यैवाधिकारो नान्येषामिति । विष्णुवचने शक्तपद सामर्थ्यमधिकार च गमयति । तथा चायमर्थः–एकशब्दो मुख्यवाची मुख्यो ज्यैष्ठोऽधिकृतश्चेत्स एव अधिकारी । अन्यथा समनन्तरन्यायसिद्धार्थः । शक्तो दृढाङ्गः । एकः दौहित्राणां मध्ये स एवाधिकारीति । अस्मिन् प्रकरणे पठितत्वात् 'यो यत

आददीते'ति वचनमेतदनुरोधेन व्याख्यातं भारुचिना। न्यायनिष्ठेन भगवता सोमेश्वरेण न्यायतः प्रकरणमुल्लङ्घितमिति ध्येयम्। अतश्च यानि रिक्थग्राहकर्तृकपराणि—'श्राद्ध मातामहाना तु अवश्य धनहारिणा।' इत्यादीनि तानि षोडशश्राद्धविषयाणीति ध्येयम्।

सवि.४२५–४२९

(६) दौहित्रस्य धनहरणादौ पुत्रिकाकरणमुपलक्षणमित्याह—अकृतेति। मच.

(७) मिताटीका— मनुरपीति। पुत्रिकात्वेनाऽकृता वा कृता दुहिता सदृशात्सवर्णात् य सुत पुत्र विन्देत लभेत तेन तत्सुतेन मातामहः पौत्री पुत्रवानेव। अत एव स सुतः उक्तहेतोः पाठक्रमादार्थक्रमस्य बलीयस्त्वात्तस्य धन हरेत् गृह्णीयात्पिण्ड दद्याच्चेत्यर्थः। मेधातिथिना त्वयमपि श्लोकः कैमुतिकन्यायेन पौत्रिकेयपरतयैव सिद्धान्तितः। बाल.२।१३५ (पृ.२०७)

[1]पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते।
दौहित्रोऽपि ह्यमुत्रैनं संतारयति पौत्रवत् ×॥

(१) अत्रापि दौहित्रः पुत्रिकापुत्र एव विज्ञेयः। 'दौहित्रोऽपि ह्यमुत्रैनं सतारयति पौत्रवत्'। अयमप्यर्थवाद एव विहितत्वादर्थस्य एतयोर्विशेषो नास्ति। एकस्य माताऽन्यकुलीनाऽपरस्य पिता तस्मादौहित्रोऽप्यमुत्र लोक एन प्रेत सन्त सतत संतारयति नरकात्पूर्वस्मात्। मेधा.

(२) एतच्च पौत्रिकेयस्य पौत्रेण साम्यप्रतिपादनार्थं पुत्रिकाकरणानन्तरजातपुत्रेण सह धने तुल्यभागबोधनार्थम्। *ममु.

(३) पौत्रेण पितामहान्तेभ्यो दीयते पिण्डादि तथाऽयमपि ददातीति भावः। मच.

(४) यत एवमतोऽस्य मातामहरिक्थहारित्वमुपपन्नमिति प्रासगिकम्। नन्द.

मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः।
द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुः॥

(१) 'स एव दद्यात्पिण्ड च पित्रे मातामहाय च' इत्यत्र पुत्रिकापुत्रपिण्डदान मातामहप्रक्रममुक्तम्। तस्मादयमपरः क्रमः पुत्रिकापुत्रपिण्डदानस्य, मातुः प्रथमतः पिण्ड निर्वपेदित्येवमादि। द्वितीय तु पुनः पितुः। तस्या एव पितुरित्यनुमन्तव्यम्। ये तु पठन्ति 'पितुस्तस्ये'ति तत्प्रथम पुत्रिकायै निरुप्य जनकाय निर्वपन्ति। तत्पितुः पितुरिति च जनकस्यैव पित्रे तृतीयम्। अस्मिंस्तु पक्षे मातामहाय पिण्डदान नोक्त स्यात्। +मेधा.

(२) तत्र श्राद्धक्रममाह—मातुरिति। मातुः प्रथमपिण्डस्ततो मातुः पितुस्ततो मातुः पितामहस्येति। एवं कृते यदि पितुरपि पुत्रान्तरं नास्ति तदा पितृपितामहतत्पितृणा दद्यादिति प्रागेवोक्तम्। *मवि.

(३) पुत्रिकाकरणपक्षे मातामहस्य मातामहादित्रिभ्यो दद्यादन्वष्टकायामपि तथैवेति विशेषः। ×मच.

(४) पुत्रिका चासौ सुतश्च पुत्रिकासुत इति पुत्रिकैव पुत्रस्थानीयेत्यर्थः। व्यप्र.४६९

औरसादिद्वादशगौणमुख्यपुत्रविधिः तल्लक्षणानि च। औरसः।

स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यम्।
तमौरसं विजानीयात्पुत्रं प्रथमकल्पितम्÷॥

+ ममु. मेधागतं मविगत च। * नन्द मविगतम्। × शेष मविगतम्।

÷ दर्भी.व्याख्यान 'अपुत्रेणैव कर्तव्यः' इति अत्रिवचने द्रष्टव्यम्।

(१) **मस्मृ.**९।१४० क.,ग,घ. पुस्तकेषु तृतीयं तु (तृतीयं तत्) इति पाठ., **मेधा.**पितुस्तस्य इति पाठः; **व्यक.**१५७ स्तस्या (स्तस्य); **गौमि.**२८।१६, **विर.**५६३, **वीमि.**२।१२८, **व्यप्र.**४६९.

(२) **मस्मृ.**९।१६६; **मेधा.** प्रथमकल्पितम् (प्राथमकल्पिकम्), **व्यक.**१५५ प्रथम (प्राथम्य); **मभा.**२८।३३ द्धि (त्तु); **मवि.**मेधावत्; **विर.**५५३ स्वक्षे...तु (संस्कृतायां तु भार्यायां) द्धि (त्तु); **सुबो.**२।१३२ दयेद्धि यम् (दितश्च यः); **व्यनि.**

× दर्भी व्याख्यान 'क्षेत्रजादीन् सुतानेतान्' इति मनुवचने द्रष्टव्यम्। बाल.व्याख्यानं 'दौहित्रो ह्यखिलं रिक्थ' इति मनुवचने (१.१२९६) द्रष्टव्यम्।

* शेषं मेधागतम्।

(१) **मस्मृ.**९।१३९; **गोरा.** पौत्रवत् (पूर्वजान्); **दा.**८१,२०९,२१५ उत्त.; **व्यनि.**; **दात**१८५ उत्त.; **नाभा.**१४।४७ (=) दौहित्रोऽपि ह्य ([स] दौहित्रोऽप्य) उत्त.; **दर्भी.**१०९; **विता.**४५४ उत्त.; **बाल.**२।१३५ [पृ.२०२ (=) पृ., २०७,२३३]; **सेतु** ५७ उत्त.; **समु.**१४१ स्मृत्यन्तरम्; **विच.**११६ उत्त.; **नन्द.** पौत्रवत् (पुत्रवत्).

(१) आत्मीयवचनः स्वशब्दो न समानजातीयतामाह। एतेन स्वय सस्कृताया जात औरस इतरथाऽसस्कृताया निवृत्तिपरः सस्कृतशब्दः सभाव्यते। ततश्चान्येन संस्कृतायामपि औरसः स्यात्। उक्तार्थे च स्वशब्दे क्षत्रियादिपुत्रा अप्यौरसा भवन्ति। न हि तेषामन्यत्पुत्रलक्षणमस्ति। अन्ये तु प्राथमकल्पिकमौरसविशेषण मन्वानाः क्षत्रियापुत्रानौरसानसपूर्णलक्षणान्मन्यन्ते। एव तु व्याख्याने यथा स्वक्षेत्रे सस्कृतायामसंपूर्णलक्षण औरसस्तथा स्वेऽसंस्कृताया प्राप्नोति, कि पुनः क्षत्रियादीनामौरसत्वेन, पुत्रास्तावद्भवन्ति परिमिताशभाजश्च। अथोच्यते। असत्यौरसक्षेत्रजादिलक्षणे द्वादशसख्यानियमात्कथ पुत्रत्वमिति। अत्रोच्यते। किमु लक्षणेन, लोकतो व्यवहारप्रसिद्धेः। तथाहि यो यतो जातः स तस्य पुत्र इति लौकिका व्यवहरन्ति। तथा चाजनके कश्चित्पितृव्यवहार कुर्वन्नन्येनेति बोध्यते—नैष ते पिता न हि त्वमनेन जात इति। अन्वयव्यतिरेकाभ्या जनकः पिता जन्यश्च पुत्र इत्येतदवगम्यते। विशेष व्यपदेशार्थस्तु लक्षणारम्भः। यत्तु क्षेत्रजादेरजनके वा पुत्रत्वमिति तत्कार्यनिबन्धनमपुत्रस्यापि कार्यविधानात्पुत्रत्व पुत्रत्वस्य तन्निषेधार्थ जातत्वमिति। तथा चैते प्रतिनिधय उच्यन्ते तैः। अत्राय जन्मनिबन्धे हि पुत्रत्वे औरसपुनर्भवनियुक्तासुतानां विशेषो न स्याज्जन्मनस्तुल्यत्वात्। किच पुत्रकार्यकारणान्नैव कश्चिदपुत्रः स्यात्। यस्तु लौकिको व्यवहारः असौ जनकेऽपि पितृव्यवहारदर्शनाद्व्यभिचारी। तेन सत्यपि प्रयोग इन्द्रादिशब्दवल्लोकतोऽर्थातिशयाच्छास्त्रे चोत्पत्तिविधानाद्व्यर्थादिव्यवहारवत् पुत्रव्यवहारोऽवगन्तव्यः। तत्र च यदौरसस्य प्राथमकल्पिकत्ववचन तत्र व्यवहारोऽवगन्तव्यः। न व्यवहारे, कि तर्ह्युपकारेऽपि, पितुरुपकारेण **मभावत्, स्मृचि.**३१ (स्वे क्षेत्रे च कृतायां तु स्वयमुत्पादयेत्सुतम्); **नृप्र.**३९ द्वि यम् (त्सुतान्) कल्पितम् (कल्पजम्); **मच.**मेधावत्; **चन्द्र.**१७७ स्वक्षे ..तु (सुसस्कृतायां भार्यायां) द्वि (त्तु); **दमी २४** कल्पितम् (कल्पिकम्); **व्यप्र.**४६७ स्वक्षे...तु (सस्कृताया स्वभार्यायां) द्वि (त्तु) तमौरस (औरस त) शेष मेधावत्; **बाल.**२।१२८ तु (हि) द्वि (त्तु): २।१३२ (पृ.१७८) दयेद्वि यम् (दितश्च यः) शेष मेधावत् :२।१३५ (पृ.२३६) मेधावत्, **समु.**१३७ द्वि (त्तु) प्रथ (प्राथ).

व्य. कां. १६४

दृष्ट, यथौरसो भूयसा शक्नोत्युपकर्तुं न तथेतरे इति ज्ञापयति। उपकारापचयाभिप्रायाच्च प्रतिनिधिव्यवहारः। न ह्येषा प्रतिनिधिता संभवति। प्रारब्धस्य कर्मणोऽङ्गापचारे प्रतिनिधिर्न च पुत्रकर्माङ्गमपत्योत्पादनकर्मणोऽगुणकर्मत्वात्। तेन सत्येव क्षेत्रजादीना पुत्रत्वे प्रतिनिधित्ववचनमौरसप्रशंसार्थम्। यथाऽपशवो वाऽन्ये गोऽश्वेभ्यः पशवो गोऽश्वा इति पशूनामपशुत्ववचन गवाश्वान् प्रशसितुम्। यथा च यो यदीयाद्वीजाजातः स तस्य न पुत्र इति, तथा च दर्शित महाभारते—द्वैपायनाजाताः पाण्डुधृतराष्ट्रविदुरादयो नैते व्यासपुत्रा इति व्यपदिश्यन्ते। यथा च सप्रयोजन क्षत्रियादिपुत्राणामौरसत्व तथोपपादितम्। अथ क्षेत्रजादिषु पुत्रिकापुत्रेण द्वादशसंख्यातिरेक आप्नोति। भवतु को दोषः। त्रयोदशोऽय पुत्रोऽस्तु। औरसेन तुल्यफलत्वात् तदग्रहणमिति। तत्साम्याच्च। तथा च **स्मृत्यन्तरे** 'तत्समः पुत्रिकासुतः' (यास्मृ.२।१२८) इति।

मेधा.

(२) उक्तपुत्राणा लक्षणान्याह—स्वक्षेत्र इति। स्वक्षेत्रे स्वसवर्णक्षेत्रे सस्कृताया स्वय परिणीतायाम्। प्राथमकल्पिकं मुख्यम्। **मवि.**

(३) स्वभार्याया कन्यावस्थायामेव कृतविवाहसस्काराया य स्वयमुत्पादयेत्त पुत्रमौरस मुख्य विद्यात्। 'सवर्णाया सस्कृतायामुत्पादितमौरसपुत्रं विद्यादि'ति बौधायनदर्शनात्सजातीयायामेव स्वयमुत्पादित औरसो ज्ञेयः। **ममु.**

(४) स्वयमुद्वाहितायामुरःसंश्लेषण जातत्वादौरसः। क्षेत्रजे तदभावो नारदेनोक्तो 'गात्रैर्गात्राण्यसंस्पृशन्नि'त्यादिना। 'सवर्णाया संस्कृताया स्वयमुत्पादितमौरसं जानीयादि'ति बौधायनदर्शनात् सजातीयोत्पन्नः औरसः। अत्र सवर्णापद द्विजत्वादिजातिपरं अन्यथा क्षत्रियावैश्यासूद्रासु जातानां विप्रादित्रयपितृकाणामौरसत्वाभावेनापुत्रत्वापत्तिरिति। तत्र परं सजातीये मुख्यमौरसत्वमन्येषां गौणमिति भावः। स्वक्षेत्र इति क्षेत्रशब्दस्याजहल्लिङ्गता। प्राथमकल्पिक उत्सर्गतः सर्वत्राधिकारिणम्। **+मच.**

(५) प्रथमकल्पित प्रधानत्वेन कल्पितम्। **नन्द.**

+ भाच. मचवद्भावः।

क्षेत्रजः

यस्तत्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा ।
स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः ॥

(१) व्याधितस्याप्रतीकारराजयक्ष्मादिव्याधितस्य । अवशिष्टं स्पष्टम् । मेधा.

(२) तत्प भार्या तस्या सवर्णाद्वा देवराद्वा सपिण्डाद्वा जातः । स्वधर्मेण क्षेत्रजोत्पत्तिधर्मेण घृताभ्यङ्गादिना स्वपुत्रः क्षेत्रजः । मवि.

(३) यो मृतस्य नपुंसकस्य प्रसवविरोधिव्याध्युपेतस्य वा भार्यायां घृताक्तत्वादिनियोगधर्मेण गुरुनियुक्तायां जातः स क्षेत्रजः पुत्रो मन्वादिभिः स्मृतः । ममु.

(४) क्षेत्रजं लक्षयति—य इति । प्रमीतस्येति पतितादयुपलक्षणम् । क्लीबस्येत्यपत्यजनकत्वाभावपरं तेन पाण्डवाः संगताः । अत्र तु प्रयाजादिवत्पाठक्रमो विवक्षितस्तेन पूर्वपूर्वाभावे उत्तरोत्तरस्यैवाधिकारिता । क्षेत्रजः क्षेत्रमत्र पत्नी तत्र जातः । मच.

(५) अत्र सर्वत्र जीवति क्षेत्रिणि व्याध्यादिप्रतिरुद्धे पुत्रोत्पादने, यथायोग गुरूणा भर्तुरपि नियोगः सविच्च । मृते तु गुरूणामेव । तथा च क्षेत्रजो द्विविधो द्विपितृकः क्षेत्रिकपितृकश्च । व्यप्र.४७४

दत्तकः

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः *॥

* दर्मी.व्याख्यान 'नैकपुत्रेण कर्तव्यं' इति शौनकवचने द्रष्टव्यम् ।

(१) **मस्मृ.**९।१६७, **व्यक**.१५५; **मभा.**२८।३३; **स्मृच.**२८८; **विर.**५५५ पुत्रः (ज्ञेयः) स्मृतः (सुत.); **सुबो.**२।१३२ स्वत्पजः (स्वप्रज) व्याधि (पति) वा (च); **व्यनि.; स्मृचि.३१** वा (च); **नृप्र.३९** स्वधर्मेण (धर्मेण वि); **व्यप्र.४७४; बाल.**२।१२९ वा (च) शेष विरवत् : २।१३२; **समु.१३७** व्याधि(पति).

(२) **मस्मृ.**९।१६८; **मेधा.** पिता वा (पिता च); **मिता.** २।१२८, **अप.**२।१२८ क्त (क्तौ); **व्यक.**१५७ दत्त्रिमः (दत्तकः), **मभा.** २८।३३, **स्मृच.**२८८, **विर.**५६७ अपवत्, **स्मृसा.**६९ पिता वा (पितरौ) दत्त्रिमः (दत्तकः), **मपा.**६५२; **सुबो.**२।१३२, **दीक.**४४ अपवत्; **व्यनि., नृप्र.** ३९; **सवि.३९१** (=) सयुक्त (युक्त च) दत्त्रिमः (दत्तकः);

(१) चशब्दः पठितु युक्तो 'माता पिता चे'ति न वाशब्दः । न ह्युभयोरपत्यमन्यतरानिच्छाया दातु युक्तम् । अथापि वाशब्दः पठ्यते । तथा चोक्तम्—'माता पिता वा दद्याता', 'तयोरपि पिता श्रेयान्' इति कार्यान्तरविनियोगविषयमेतत् । ननु स्वत्त्वापत्तौ मातुः स्वमिति पितरि पुत्र प्रति दातृत्व नास्ति । सत्य, पितृत इति वचने 'अभावे बीजिनो मातें'ति विनियोगविशेषविषयत्वात् । आह च वसिष्ठः (वस्मृ.१५।५) 'न स्त्री पुत्र दद्यात्प्रतिगृह्णीयाच्च' इति । सदृशमित्युक्त, सदृश न जातितः । कि तर्हि, कुलानुरूपैर्गुणैः । क्षत्रियादिरपि ब्राह्मणस्य दत्तको युज्यते । प्रीतिग्रहण लोभादिना प्रतिषेधार्थम् । मेधा.

(२) आपद्ग्रहणादन्यापदि न देयः । दातुरय प्रतिषेधः । *मिता.२।१३०

(३) तत्र यो मातापितृभ्या पित्रा वा मात्रा वा भर्त्रनुमत्या यस्मै दत्तः स तस्य दत्तको नाम पुत्रो भवति । 'माता पिता वे'ति । अद्भिरिति सकलदानधर्मोपलक्षणार्थम् । आपदि दुर्भिक्षादौ । अथवा ग्रहीतुरापदि सुताभावे । सदृश दातुर्ग्रहीतुश्च सवर्णम् । प्रीतिसयुक्तौ न भयादिसंयुक्तावित्यर्थः । +अप.२।१२८

(४) माता पितर्यसति । आपदि स्वतः तस्य रक्षणाशक्तौ । मवि.

(५) अद्भिरिति पुत्रदानविधानस्योपलक्षणार्थम् । प्रीतिसयुक्त न तु लोभादिसयुक्तम् । —स्मृच.२८८

(६) माता पिता वा परस्परानुज्ञया य पुत्र परिग्रहीतुः समानजातीय तस्यैव पुत्राभावनिमित्तायामापदि प्रीतियुक्त न तु भयादिना उदकपूर्व दद्यात् स दत्त्रिमाख्यः पुत्रो विज्ञेयः । —ममु.

(७) सदृशं सवर्ण भर्तरि प्रोषिते मृते वा आपदि केवल मातुरधिकारो दाने तथा मातरि मृतायामुन्मादादियुक्तायां वा आपदि केवल पितुरधिकारः । अन्यथोभयोरपि सहैव । आपदीत्यापच्छब्दोपादानादनापदि न

*सवि. मितागतम् । +विर. अपगतम् । —शेष अपगतम् ।

चन्द्र.१७५ पिता वा (पितरौ) क्त (क्तौ); **दर्मी.**४ पू., २९उत्त..५७, **व्यप्र.**४७६; **संप्र.**२११ उत्त.: २२४ पू.; **व्यम.**४७; **सिन्धु** ८६५; **बाल.**२।१३२,२।१३५(पृ २३७); **समु** ९४,१३७, **दच.**५.

देय इति गम्यते। अनापदि दत्ते दातुर्दोषो न प्रतिग्रहीतुः। मपा.६५२

(८) प्रीतिसयुक्त न बलोपधिकृतम्। —मच.

(९) मातापितरौ प्रत्येक मिलितौ वा। अद्भिरिति दानप्रतिग्रहप्रकारोपलक्षणम्। सदृश सवर्णम्। प्रीतिसयुक्तमिति क्रियाविशेषणम्। व्यप्र.४७७

(१०) वाशब्दान्मात्रभावे पितैव दद्यात्। पित्रभावे मातैवोभयसत्त्वे तु उभावपीति मदनः। आपद्ग्रहणादनापदि न देयः। अय निषेधो दातुरेव पुरुषार्थो न कृत्वर्थ इति विज्ञानेश्वरः (यास्मृ.२।१३०) तन्न। अस्य वाक्याददृष्टार्थत्वया कृत्वर्थत्वावगमात्कथचिद्दृष्टार्थत्वेऽपि वा नियमादृष्टस्य आवश्यकत्वान्न तदतिक्रमे कार्यविशेषप्रयोजकादृष्टसिद्धिः। केचित्त्वापच्छब्दस्य स्वार्थत्यागादापत्तेरनापत्परिसख्यापकत्वाभावेन न निषेधार्थकत्वम्। किं त्वापदो निमित्तमात्रबोधकत्वमेव। न च नैमित्तिकत्वे आपदि पुत्रादाने प्रत्यवायापत्तिः। एतद्वाक्यस्य सज्ञासज्ञिसबन्धमात्रबोधकत्वात्। आपदि निमित्ते दानविधायकत्वाभावात्। यदपि विवाहप्रकरणे तेनैवोक्त रोगिण्यादिनिषेधातिक्रमे दृष्टविरोध एव भार्यात्व तत्यजत एवेति तदप्यनेनैवापास्तम्। सदृश कुलगुणादिभिर्न जात्या। अतः क्षत्रियादिरपि विप्रादेर्दत्तको भवतीति मेधातिथिः। सदृश जात्येति कुल्लूकभट्टः। युक्त चेदम्। याज्ञवल्क्येन 'औरसो धर्मपत्नीज' इति द्वादशानपि पुत्रानुक्रम्य 'सजातीयेष्वय प्रोक्तस्तनयेषु मया विधिरि'त्युपसहारात्। स्पष्टीकरिष्यते चेद वक्ष्यमाणगौतमवचोभ्याम्। विज्ञानेश्वरोऽप्येवम्। 'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः' इति ज्येष्ठस्यैव पुत्रकार्यकरणे मुख्यत्वात्स न देय इत्यय मपि निषेधो दातुरेव न प्रतिग्रहीतुरित्यपि सः। स्यादय प्रतिषेधो दातुरेव यद्येतस्य ज्येष्ठदाननिषेधकता स्यान्न तु साऽस्ति। मानाभावात्। 'पुत्रीभवती' त्यनेन पुत्रित्वमात्रोक्त्या ऋणापाकरणोक्तिमात्रपरत्वाच्च। अत एव 'पितॄणामनृणश्चैव स तस्मात्सर्वमर्हती'त्युत्तरार्ध सगच्छते। सर्व द्रव्यम्। दत्तकश्च पुमानेव भवति न कन्या। 'स ज्ञेयो दत्रिमः सुत' इति सज्ञासज्ञिसबन्धबोधकवाक्यगतेन स इति सर्वनाम्ना मातापितृकर्तृकप्रीतिजलकरगुणकापन्निमित्तकदानकर्मीभूतसजातीयपुंस एव 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीते'ति तच्छब्देनाष्टवर्षब्राह्मण्यपुस्त्वोपयनादिसस्कृतस्यैव परामर्शात्। एतेन 'त्रेधर्मम् नित्यम्' इति मवन्तो दत्रिमशब्दो दाननिवृत्तकर्मत्वाविशेषाद्धरायान्यस्मै वा दत्ता कन्यामाश्रयभिधत्त इति केषाचिदुक्तिः परास्ता। व्यम.४७-४८

(११) सदृशं सवर्ण आपदीति विशेषणादनापदि दत्तस्य न्यूनत्व, प्रीतिसयुक्तमिति विशेषणाद्भयादिना दत्तस्य न्यूनता ग्राह्या आपदत्र सतानपरिक्षयः प्रतिग्रहीतुः। नन्द.

(१२) मिताटीका —अत एव कात्यायनः—'आपत्काले तु कर्तव्य दानं विक्रय एव वा। अन्यथा न प्रकर्तव्यमिति शास्त्रविनिश्चयः॥'इति।

*बाल.२।१३५(पृ.२३८)

अपुत्रो ब्राह्मणः कुर्यात् पुमान् पुत्रप्रतिग्रहम्।
सपत्नीकः क्रियार्थं च न कान्ता केवला क्वचित्॥

कृत्रिमः

सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम्।
पुत्रं पुत्रगुणैर्युक्त स विज्ञेयस्तु कृत्रिमः॥

(१) अत्रापि सदृशो गुणत एव विज्ञेयः। ये तु सदृश सवर्ण व्याचक्षते, तेषा सजातीयमिति एष पाठो युक्तो यद्ययमर्थोऽभिप्रेतः। न तु जात्या सादृश्यमिति तूक्तमेव। गुणदोषविचक्षणम्। केचिदाहुस्तावन्न क्रियते यावन्न प्राप्तव्यवहारः। न ह्यसौ गुणदोषान् जानाति।

÷ शेष अपगतम्।

* सदृशपदार्थो व्यमवत्।

(१) कृभ.८७६.

(२) मस्मृ.९।१६९ स्तु (श्च); मेधा.'सजातीय' इति एष पाठः; अप.२।१२८; व्यक.१५७ तु प्र (य प्र); मभा.२८।३३ चक्षणम् (वर्जितम्), गौमि.२८।३१ मभावत्; उ.२।१४।२ च (ता) शेष मभावत्; मवि. 'विचक्षण' इति कचित्पाठः; स्मृच.२८८; विर.५७२ तु प्रकुर्याच्च (य प्रकुर्वीत); स्मृसा.६९ तु (य) च (ता) स विज्ञेयस्तु कृत्रिमः (तमाहुः कृत्रिमं सुतम्); सुबो.२।१३२ र्याच्च (र्वाण); दीक.४४; व्यनि.तु प्र (प्रति) णक्षम् (क्षणः); नृप्र.३९; चन्द्र.१७६ तु प्रकुर्याच्च (य प्रकुर्वीत) विज्ञेयस्तु कृत्रिमः (ज्ञेयः कृत्रिमः सुतः); व्यप्र.४७९ तु प्रकुर्याच्च (य प्रकुर्यात्ता); बाल.२।१३१ विरवत : २।१३२ मस्मृवत्; समु.१३७ च (चो) क्षणम् (क्षणः); कृभ.८९१ दोष (दोषे) विज्ञेयस्तु कृत्रिमः(ज्ञेयः कृत्रिमः सुतः).

तदा त्वेवं जानाति येनाह जातो येन च संप्रति पुत्रतया भरणं मे क्रियते तस्याप्यहं पुत्र इति अभ्युपगतपुत्रभावात् तथैव ग्रहीतव्यः। अपि त्वन्यतरत्वे विशेषो नास्ति। मेधा.

(२) अत्र सदृशग्रहणं जात्यपेक्षम्। अप.२।१३१

(३) सर्व एते समानजातीयाः 'सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः।' इति याज्ञवल्क्यवचनात्। उ.२।१४।२

(४) सदृशं सवर्णं गुणदोषविचक्षणं न तु बालं कुर्यात् त्वं मम पुत्र इति नियम्य। पुत्रगुणैर्वयोलिप्त्वादिभिः। गुणदोषविचक्षण इति क्वचित्पाठः तत्र कर्तुर्गुणदोषज्ञानोक्त्या पतितादित्वेन ज्ञात्वा यदि पुत्रं कुरुते तदा नासौ पुत्र इति विवक्षितम्। +यवि.

(५) यं पुनः समानजातीय पित्रोः पारलौकिकश्राद्धादिकरणाकरणाभ्यां गुणदोषौ भवत इत्येवमादिज्ञं पुत्रं गुणैश्च मातापित्रोराराधनादियुक्तं पुत्रं कुर्यात्स कृत्रिमाख्यः पुत्रो वाच्यः। *ममु.

(६) प्रकुर्याता मातापितरौ मिलितौ प्रत्येकं वा। व्यप्र.४७९

गूढज:

[1]उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः।
स गृहे गूढ उत्पन्नस्तस्य स्यान्नस्य तत्पजः॥

(१) न च ज्ञायेत माता यद्युद्भ्रान्ता बहुशो गता वा तदा न ज्ञायते का पुनस्तस्य जातिर्यतः पूर्वोक्तं 'अविज्ञातबीजिनो मातृतः'। एतच्च यत्र हीनजातीयपुरुषशङ्का नास्ति। तदाशङ्कायां हि प्रतिलोमसंभवः। प्रतिलोमत्वान्न क्वचित्पुत्रकार्याधिकारी सः। ×मेधा.

(२) गृहे पाणिग्राहस्य सवर्णेरनेकैर्ऋतुकाले संसर्गो निश्चितोऽपि व्यक्तिविशेषानिश्चयात्कस्याय गर्भ इत्यनिश्चयः। न त्वधमवर्णगमनसंदेहेऽपि। यस्य तत्पजो भार्याभा जातः। *मवि.

(३) गृहे भार्यायाम्। स्मृच.२८८

अपविद्धः

[2]मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते॥

(१) बहुप्रजतया भरणासमर्थेनात्यन्तदुर्गत्या, केनचिद्वा दोषयोगेन मातापितृभक्तिहीनत्वादिना, न पुनः पातित्येन। तस्य न क्वचिदपि पुत्रकार्येऽधिकार इति दर्शितम्। अयमप्यन्यतरेणोत्सर्गः, परिग्रहः पुत्रबुध्या न तु तज्जीवितेच्छया। +मेधा.

(२) उत्सृष्टः दुष्टमुहूर्तादिहेतुतः न पातित्यतः। स्मृच.२८८

(३) उत्सृष्टमन्यस्मा अदत्वा त्वरादिना परित्यक्तं तत्काले च तस्यापरिग्रहे रक्षण न संभवत्येवेति निश्चित्य गृह्णीयात्। अयमपि सवर्ण एव। मवि.

कानीनः

[3]पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम्॥

× विर. मेधावत्, मविवच्च भावः।
* ममु., बाल. मविवद्भावः। व्यप्र. मविवत्।
+ अप., विर., चन्द्र., बाल. मेधागतम्।
— अस्य श्लोकस्य मेधा.व्याख्यान 'अपुत्रायां सृतायां' इति मनुवचने (पृ.१२९९) द्रष्टव्यम्।

(१) **मस्मृ.**९।१७१; **अप.**२।१२८ परि (प्रति); **मभा.** २८।३३ अपवत्, **गौमि.**२८।३० परि (प्रति) स उच्यते (तु स स्मृत.); **उ.**२।१४।२ अपवत्; **स्मृच.**२८८ स उच्यते (तु स स्मृत·), **विर.**५७१ स्मृचवत्; **भुबो.**२।१३२; **व्यनि.**; **नृप्र.**३९, **चन्द्र.**१७६ ष्ट (ष्टः) शेष स्मृचवत्; **बाल.**२।१३२ (पृ.१७३ गौमिवत्,१७८); **समु.**१३७ स्मृचवत्; **दच.**१०पू.

(२) **मस्मृ.**९।१७२; **मिता.**२।१२९, **अप.**२।१२९; **मभा.**२८।३४ त कानीन (कानीन तं); **गौमि.**२८।३१ द्रहः (दिह), **उ.**२।१४।२ द्रुवम् (द्रुवः); **स्मृच.**२८८; **मपा.** ६५२ मभावत; **सुबो.**२।१३२; **दीक.**४४ वदेन्नाम्ना (विजा-

१ त्पुरुषकार्याधिकारिणः. २ प्रत्यक्षत्वेन. ३ क्वचिदेव पु.

+ चन्द्र. मविगतम्। * विर. ममुगतम्।

(१) **मस्मृ.**९।१७०; **भभा.**२८।३३ च (वि); **गौमि** २८।३० स्य सः (स्यचित्); **उ.**२।१४।२ गौमिवत्, **स्मृच.** २८८ यस्य...सः (यस्तु न विज्ञायेत कस्य वा), **विर.**५६६; **स्मृसा.**६९; **सुबो.**२।१३२ उत्पन्नस्तस्य स्यात्तस्य (सुत्पन्नो यस्य स्यात्तस्य); **व्यनि.** (उत्पद्यते गृहे यस्तु ज्ञायते न च कस्य च) स गृहे गूढ उ (स्वगृहे गूढमु); **नृप्र.**३९ च (वि); **चन्द्र.** १७५; **वीमि.**२।१२८ गौमिवत्; **व्यप्र.**४७४; **बाल.** २।१२९,२।१३२; **समु.**१३७ यस्य न च (यस्त न वि) शेष गौमिवत्; **नन्द.** गौमिवत्.

१ पुत्राभा.

(१) अयं श्लोकः प्राग् व्याख्यातः । स्वयदत्तकृत्रिमापविद्धेषु अस्य च भागकल्पना प्राङ् निरूपिता । (प्रतिग्रहभूमिनिषेधश्च सत्यन्यस्मिन् धने तावत्) । मेधा.

(२) वोढुः विवाहयितुः पुत्र, तथा मातामहस्याप्यसौ सुतान्तराभावे ऋक्थहरः 'मातामहसुतो मत' इति याज्ञवल्क्यवचनात् । एतदपि सवर्णोत्तमवर्णजनितस्य ज्ञाने। मवि.

(३) तत्र वोढुरित्युपादानाद्विवाहिता चेत्तदा वोढुर्नो चेन्मातामहस्येत्येतदवगम्यते । मपा.६५२

(४) एतैर्वाक्यैरपरिणीताया पितृगृहावस्थिताया सवर्णजारजः कानीनः । स च मातामहसुत इत्युक्त, तद्विरुद्ध ब्रह्मपुराणीय कल्पतरुलिखितं वाक्यम्—'अदत्ताया तु यो जातः सवर्णेन पितुर्गृहे । स कानीनः सुतस्तस्य यस्मै सा दीयते पुनः ॥' नारदवाक्यमपि तत्रैव—(नास्मृ. १६।१७) 'कानीनश्च सहोढश्च गूढाया यश्च जायते । तेषा वोढा पिता ज्ञेयस्ते च भागहराः स्मृताः ॥' इति । अत्रादत्ताया सवर्णात् पितृगृहे जातस्य कानीनत्वमविरुद्धम् । यस्मै सा पुनर्दीयते तस्यासौ सुत इति तु विरुद्धम् । नारदवचनेऽपि गूढोत्पन्नसहोढकानीनानामपि वोढैव पितेति प्रतिपादितम् । मनुनापि वोढुरित्युक्त न मातामहस्येति । या तु मिताक्षराकृता यद्यनूढायामुत्पन्नस्तर्हि मातामहसुतोऽथोढाया तदा वोढुरेवेति व्यवस्था कृता । सापि मनसि न चमत्कारमादधाति । तथा सति हि कन्याशब्दवाच्यायामपरिणीतायामजातत्वात् तस्य कानीनत्व दुर्वचम् । न च कन्याशब्दः स्त्र्यपत्यमात्रपरो विशेषण वैयर्थ्यात् । गूढजादीनामपि तत्रोत्पन्नत्वेनाव्यावर्त्तकत्वात् । सर्वा हि कस्यचित्कन्यैव । ब्रह्मपुराणवचनविरोधश्च दुष्परिहरस्तत्रादत्तायामित्युक्तत्वात् । अत एव मानवविरोधोऽपि दुःसमाध एव । कल्पतरुकारेणापि परस्परविरुद्धवचनानि लिखितवता हृदयशून्यवद्व्यवस्थानभिधानाद्विरोध एव न प्रतिसंहितः । तेन हि मातामहसुतत्व कानीनस्य बोधयन्ति बहूनि वचनान्युपन्यस्य तद्विरुद्धे ब्रह्मपुराणनारदवचने तदनुपदमेव लिखिते । तत्र वसिष्ठस्य वचः—'कानीनः पञ्चमो य पितृगृहेऽसस्कृता कामादुत्पादयेत्स कानीनो मातामहस्य पुत्रो भवतीत्याह । अथाप्युदाहरन्ति—अप्रत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः । पुत्री मातामहस्तेन दद्यात्पिण्ड हरेद्धनम् ॥' इति । नारदस्यैवम्— (नास्मृ.१६।१८) 'अज्ञातपितृको यस्तु कानीनोऽनूढमातृकः । मातामहस्य दद्यात्स पिण्ड रिक्थं हरेत्ततः ॥' बौधायनस्यापि—'असस्कृतामनतिसृष्टा यामुपगच्छत्तस्या यो जातः स कानीन' इति । अत्र प्रतिविदध्मः । मातामहसुतत्व कानीनस्य प्रतिपादयता वचनाना सर्वथा या न दत्ता तस्या सवर्णजातविषयत्वम् । वोढुः सुतत्व प्रतिपादयता तु सकल्पिताया सप्तपदीपर्यन्त विवाहभावनाभाव्यभार्यात्वमप्राप्ताया यः सवर्णादुत्पन्नस्तद्विषयत्वम् । अदत्तायामिति ब्रह्मपुराणवचने बौधायनवचने चानतिसृष्टामिति पदाभ्यामसमाप्तविवाहभावनोच्यते । न तु सर्वथाऽदत्ता । युक्त चैतत् । सकल्पेन पितृस्वत्वापगमपरिणेतृस्वत्वोत्पत्त्योरुपक्रमात् । पितुः सर्वथा स्वत्वापगमाभावाच्च कानीनत्वव्यपदेशस्य परिणेतृस्वत्वोपक्रमेण तदीयत्वस्य च सभवात् । पूर्णपितृस्वत्वे तु तदुत्पन्नस्य मातामहसुतत्वोपपत्तेः । मनुवचनस्याप्ययमर्थः । या सकल्पिताऽसमाप्तविवाहभावना अत एव कन्या । परिणेतृभार्यात्वस्यानिष्पत्तेः । तादृशकन्यासमुद्भव कानीनसामान्य वोढुर्येन विवाह्यते तस्य वदेदिति । अत एव 'पितृवेश्मनी'त्यपि सगतमनुवादतया । विवाहानन्तरमेव भर्तृगृहप्रवेशात् । मिताक्षराग्रन्थस्याप्ययमर्थः । अनूढाया वोढुमनुपक्रान्तायाम् । ऊढाया वोढुमुपक्रान्तायामिति । आदिकर्मणि क्तो न तु भूते । समाप्तविवाहभावनायां तु सवर्णजारजातो गूढजः । अत एव गृहे प्रच्छन्न उत्पन्नो भर्तृगृहे तेनाज्ञातो जात इत्युक्तम् । व्यप्र.४७५-४७६

(५) वोढुस्त पुत्र विदुः न कन्यापितुः । नन्द.

सहोढ.

यो गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती ।

( ) एतच्चिह्नाङ्कित वाक्य अत्र न सगच्छते । किन्तु 'चतुर्ऽऽशान्' इति (मस्मृ.९।१५३) श्लोकव्याख्याने सगच्छते । नीयात्); व्यनि.; नृप्र.३९; व्यप्र ४७५; विता.३६०; बाल.२।१३२ (पृ.१७८); समु.१३७ कन्या...द्रहः (य पुत्र जनयेत्कन्यका रहः),

(१) मस्मृ.९।१७३; अप.२।१२८, मभा.२८।३४

वोढुः स गर्भो भवति सहोढ इति चोच्यते *॥

(१) ज्ञाता गर्भिणीत्वेन । इदमपि पूर्ववत् । मवि.

(२) या गर्भवती अज्ञातगर्भा ज्ञातगर्भा वा परिणीयते, स गर्भस्तस्या ज्ञातः परिणेतुः पुत्रो भवति, सहोढ इति व्यपदिश्यते । ममु.

(३) ज्ञाताऽज्ञाता वा गर्भिणीत्वेन संस्क्रियते पाणिग्रहणमन्त्रैः । अतः संस्क्रियमाणया कन्यया सहोढः प्राप्त इति सहोढः । मच.

(४) मिताटीका—पुरुषसंबन्धमात्रान्न कन्यात्वहानिः किंतु मन्त्रवत्संस्कारपूर्वकक्षतयोनित्वे एव, तदभाव एव हि कन्याशब्दप्रवृत्तिनिमित्तमिति स्पष्टं 'कन्यायाः कनीन चे'ति सूत्रे (४।१।११६) महाभाष्ये । एवं च तस्या अपि विवाहसंभव इति न दोषः । अत एव प्रागुक्तद्विविधकानीनसंगतिरिति बोध्यम् । बाल.२।१३१

क्रीतकः

क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ×॥

(१) इति, तत् गुणैः सदृशोऽसदृशो वेति व्याख्येयं न ज्ञात्या । 'सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः' इत्युपसंहारात् । +मिता.२।१३१

(२) सदृशोऽसदृशः सवर्णोऽधमवर्णो वेत्यर्थः । मवि.

(३) यः पुत्रार्थं मातापित्रोः सकाशाद्य क्रीणीयात्स क्रीतकस्तस्य पुत्रो भवति । क्रेतुर्गुणैस्तुल्यो हीनो भवेन्न तत्र ज्ञातितः सादृश्यवैसादृश्ये । 'सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिरि'ति याज्ञवल्क्येन सर्वेषामेव पुत्राणां सजातीयत्वाभिधानत्वेन मानवेऽपि क्रीतव्यतिरिक्ताः सर्वे पुत्राः सजातीया बोद्धव्याः । ममु.

(४) सदृशः सवर्णः, तदभावे असदृशः असवर्ण इति पारिजातः । प्रकाशकारस्तु सत्यामप्यसदृशस्मृतौ न हीनजातीयेनोत्तमजातीयः पुत्रत्वेन ग्राह्यः, उत्तमेन न हीनोऽपि पुत्रत्वेन ग्राह्यः । सदृशासदृशोक्तिस्तु गुणापेक्षया सजातीयेष्वेवेति मेधातिथिरित्याह । विर.५७०

पौनर्भवः

या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥

(१) पौनर्भवो व्यभिचारिणीपुत्रः । यस्तां पुनः संस्कृत्य तस्या पुत्रमुत्पादयति, तस्यासौ भवति । मभा.२८।३४

(२) पुनर्भूत्वा अन्यस्य भार्या भूत्वा । मवि.

(३) या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छया अन्यस्य पुनर्भार्या भूत्वा यमुत्पादयेत्स उत्पादकस्य पौनर्भवः पुत्र उच्यते । ममु.

(४) स्वेच्छया पुनरन्यस्य भार्या भूत्वा पुनर्वोढुर्भूत्वा विधवा भूत्वा य पुत्रमुत्पादयेत्स पौनर्भवः उत्पादकस्येति शेषः । मच.

(५) पुनर्भूत्वा अन्यस्य सवर्णस्य भार्या भूत्वा । भाच.

---

* उ. व्याख्यान 'सदृश तु प्रकुर्याद्य' इति मनुवचने (पृ.१३०६) द्रष्टव्यम् ।

× दमी.व्याख्यान 'ब्राह्मणानां सपिण्डेषु' इति शौनकवचने द्रष्टव्यम् ।

+ अप., गौमि., उ., स्मृच., सवि., मच., व्यप्र., विता. मितावद्भावः ।

सहोढ इति चो (स सहोढ इहो), **गौमि** २८।३१, **उ.** २।१४।२; **स्मृच.**२८८; **विर.**५६७, **सुबो.**२।१३२ सहोढ इति चो (सहोढज इहो); **दीक.**४५; **व्यनि** गर्भि (पुत्रि) वसिष्ठः; **नृप्र.**३९; **वीमि.**२।१२८ पि वा (थवा), **व्यप्र.**४७९; **बाल.** २।१३१,२।१३२(पृ १७८); **समु.१३७.**

(१) **मस्मृ.**९।१७४; **मिता.**२।१३१; **अप.**२।१२९ थं (थें); **व्यक.**१५७ अपवत्; **मभा.**२८।३४; **गौमि.**२८।३१; **उ.**२।१४।२ अपवत्; **स्मृच.**२८८; **विर.**५७० स्व (स्व) थं (थें) क्रीतकः (तु क्रीतः); **मपा.**६५३ कः (स्तु) पि वा (थवा) उत्त.; **सुबो.**२।१३२ कः (स्तु), **व्यनि.**; **नृप्र.**३९; **सवि.**

(१) ज्ञाता गर्भिणीत्वेन । इदमपि पूर्ववत् । मवि.

(२) या गर्भवती अज्ञातगर्भा ज्ञातगर्भा वा परिणीयते, स गर्भस्तस्या ज्ञातः परिणेतुः पुत्रो भवति, सहोढ इति व्यपदिश्यते । ममु.

(३) ज्ञाताऽज्ञाता वा गर्भिणीत्वेन संस्क्रियते पाणिग्रहणमन्त्रैः । अतः संस्क्रियमाणया कन्यया सहोढः प्राप्त इति सहोढः । मच.

(४) मिताटीका—पुरुषसंबन्धमात्रान्न कन्यात्वहानिः किंतु मन्त्रवत्संस्कारपूर्वकक्षतयोनित्वे एव, तदभाव एव हि कन्याशब्दप्रवृत्तिनिमित्तमिति स्पष्टं 'कन्यायाः कनीन चे'ति सूत्रे (४।१।११६) महाभाष्ये । एवं च तस्या अपि विवाहसंभव इति न दोषः । अत एव प्रागुक्तद्विविधकानीनसंगतिरिति बोध्यम् । बाल.२।१३१

क्रीतकः

क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ×॥

(१) इति, तत् गुणैः सदृशोऽसदृशो वेति व्याख्येयं न ज्ञात्या । 'सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः' इत्युपसंहारात् । +मिता.२।१३१

(२) सदृशोऽसदृशः सवर्णोऽधमवर्णो वेत्यर्थः । मवि.

(३) यः पुत्रार्थं मातापित्रोः सकाशाद्य क्रीणीयात्स क्रीतकस्तस्य पुत्रो भवति । क्रेतुर्गुणैस्तुल्यो हीनो भवेन्न तत्र ज्ञातितः सादृश्यवैसादृश्ये । 'सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिरि'ति याज्ञवल्क्येन सर्वेषामेव पुत्राणां सजातीयत्वाभिधानत्वेन मानवेऽपि क्रीतव्यतिरिक्ताः सर्वे पुत्राः सजातीया बोद्धव्याः । ममु.

(४) सदृशः सवर्णः, तदभावे असदृशः असवर्ण इति पारिजातः । प्रकाशकारस्तु सत्यामप्यसदृशस्मृतौ न हीनजातीयेनोत्तमजातीयः पुत्रत्वेन ग्राह्यः, उत्तमेन न हीनोऽपि पुत्रत्वेन ग्राह्यः । सदृशासदृशोक्तिस्तु गुणापेक्षया सजातीयेष्वेवेति मेधातिथिरित्याह । विर.५७०

पौनर्भवः

या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥

(१) पौनर्भवो व्यभिचारिणीपुत्रः । यस्तां पुनः संस्कृत्य तस्या पुत्रमुत्पादयति, तस्यासौ भवति । मभा.२८।३४

(२) पुनर्भूत्वा अन्यस्य भार्या भूत्वा । मवि.

(३) या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छया अन्यस्य पुनर्भार्या भूत्वा यमुत्पादयेत्स उत्पादकस्य पौनर्भवः पुत्र उच्यते । ममु.

(४) स्वेच्छया पुनरन्यस्य भार्या भूत्वा पुनर्वोढुर्भूत्वा विधवा भूत्वा य पुत्रमुत्पादयेत्स पौनर्भवः उत्पादकस्येति शेषः । मच.

(५) पुनर्भूत्वा अन्यस्य सवर्णस्य भार्या भूत्वा । भाच.

---

* उ. व्याख्यान 'सदृश तु प्रकुर्याद्य' इति मनुवचने (पृ.१३०६) द्रष्टव्यम् ।

× दमी.व्याख्यान 'ब्राह्मणानां सपिण्डेषु' इति शौनकवचने द्रष्टव्यम् ।

+ अप., गौमि., उ., स्मृच., सवि., मच., व्यप्र., विता. मितावद्भावः ।

सहोढ इति चो (स सहोढ इहो), **गौमि** २८।३१, **उ.** २।१४।२; **स्मृच.**२८८; **विर.**५६७, **सुबो.**२।१३२ सहोढ इति चो (सहोढज इहो); **दीक.**४५; **व्यनि** गर्भि (पुत्रि) वसिष्ठः; **नृप्र.**३९; **वीमि.**२।१२८ पि वा (थवा), **व्यप्र.**४७९; **बाल.** २।१३१,२।१३२(पृ १७८); **समु.१३७.**

(१) **मस्मृ.**९।१७४; **मिता.**२।१३१; **अप.**२।१२९ थं (थें); **व्यक.**१५७ अपवत्; **मभा.**२८।३४; **गौमि.**२८।३१; **उ.**२।१४।२ अपवत्; **स्मृच.**२८८; **विर.**५७० स्व (स्व) थं (थें) क्रीतकः (तु क्रीतः); **मपा.**६५३ कः (स्तु) पि वा (थवा) उत्त.; **सुबो.**२।१३२ कः (स्तु), **व्यनि.**; **नृप्र.**३९; **सवि.**

(१) **मस्मृ.**९।१७५; **व्यक.**१५७ पत्या वा (तु पत्या) स्वयेच्छया (स्वेच्छया पुन.) उच्यते (शस्यते); **मभा.**२८।३४ वा परि (सपरि) वा स्वयेच्छया (स्वेच्छयापि वा); **गौमि.**२८।३१; **स्मृच.**२८८ वा स्वयेच्छया (स्वेच्छयाऽऽत्मनः); **विर.**५६३ पत्या वा (तु पत्या); **सुबो.**२।१३२ वा स्वयेच्छया (चेच्छयाऽऽत्मनः), **व्यनि.** सुबोवत्, वसिष्ठः; **व्यप्र.**४७६ विरवत्; **बाल.**२।१३० पत्या वा (तु पत्या) वा स्वयेच्छया (स्वेच्छयाऽथवा) विष्णुः : २।१३२(पृ.१७८) पत्या वा (तु पत्या) स्वये (यथे); **समु.१३७** स्वयेच्छया (इच्छयात्मनः).

प्रसगात् पुनर्भूसंस्कारः

सा चेदक्षतयोनिः स्याद्गतप्रत्यागताऽपि वा ।
पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति ॥

(१) पुनर्भूसस्कारमाह – सा चेदिति । अक्षतयोनिः पत्या सस्कारमात्र कृत्वा परित्यक्ता प्राप्तवैधव्या वा । गतप्रत्यागता तु पित्राऽन्यस्मा अङ्गीकृता स्वेच्छया परिणयार्थमन्य प्रति गत्वा तेन परिणीता पुनः पित्रभिमत वरं प्रत्यागता अक्षतयोनिरेव । पौनर्भवेन य गत्वा विश्रान्ता तेन पुनर्विवाहहोमादिसस्कारं सार्हति । एतेन या क्षतयोनिः पुनर्भूर्न सस्कारार्हेत्युक्तम् । पुनर्भूत्व तु उभयथापि । एतासूत्पन्नः पौनर्भवो बीजिनः सुतः । मवि.

(२) सा स्त्री यद्यक्षतयोनिः सत्यन्यमाश्रयेत्तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्य सस्कारमर्हति । यद्वा कौमार पतिमुत्सृज्यान्यमाश्रित्य पुनस्तमेव प्रत्यागता भवति तदा तेन कौमारेण भर्त्रा पुनर्विवाहाख्य सस्कारमर्हति । ममु.

(३) वाशब्दात्क्षतयोनिरपि क्षता क्षतजयुक्ता योनिर्यस्याः । ऋतुमती । 'अक्षता च क्षता चैव पुनर्भूः सस्कृता पुनः । स्वैरिणी या पति हित्वा सवर्ण कामतः श्रयेत् ॥' इति याज्ञवल्क्योक्तेः । ज्ञातिधनगर्वात्स्वपतित्यागे श्वभक्षण न तु कामतस्त्यागे, कामस्य स्वाभाविकत्वादनेन पूर्वापराविरोधः । *मच.

(४) पौनर्भवेन पुनर्भूपुत्रेण केनचिद्वरेण । नन्द.

स्वयदत्त

मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः ×॥

* शेष ममुगतम् ।

× उ.व्याख्यान 'सदृश तु प्रकुर्याद्ध' इति मनुवचने (पृ. १३०६) द्रष्टव्यम् ।

(१) **मस्मृ.**९।१७६; **मभा.**२८।३४; **नृप्र.**३९.

(२) **मस्मृ.**९।१७७; **अप.**२।११०, **व्यक.**१५७; **मभा.** २८।३४; **गौमि.**२८।३१; **उ.**२।१४।२ स्मै (स्य); **स्मृच.** २८८; **विर.**५७१ स्मै (स्तु); **स्मृसा.**६९ स्पर्श (दर्श) स्तु स स्मृतः (स्स्मृतस्तु सः); **सुबो.**२।१३२ णात् (णे) स्मै (स्तु); **दीक.**४४ विरवत् ; **व्यनि.** त्तस्तु स (त्त इति); **नृप्र.**३९ स स्मृतः (तस्य सः); **चन्द्र.**१७६ स्पर्श (दर्श) यस्मै (त्तस्मै); **व्यप्र.** ४७९; **बाल.**२।१३१,२।१३२(पृ.१७८); **समु.**१३७.

(१) त्यागकारण पातित्यम् । स्पर्शयेत् दद्यात् । अप.२।११२

(२) अकारणात्पातित्यादित्यागकारणेषु असत्सु । स्पर्शयेद्दद्यात् तच्चोदकपूर्वमत्र । कृत्रिमे तु तेन परिग्रहमात्रमस्य सातत्येनेति विशेषः । मवि.

(३) यो मृतमातापितृकस्त्यागोचितकारण विना द्वेषादिना ताभ्या त्यक्तो वात्मान यस्मै ददाति स स्वयदत्ताख्यस्तस्य पुत्रो मन्वादिभिः स्मृतः । ममु.

पारशवः

[1]यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम् ।
स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः ॥

(१) कामादित्यनुवादः 'कामतस्तु प्रवृत्तानां' इत्यस्य । पारयन् पिण्डदानादिना उपकुर्वन्नपि शवतुल्यः । अनुपकारकः । असंपूर्णोपकारकत्वात् । ×मेधा.

(२) तदपरिणीतशूद्रासुताभिप्रायम्, परिणीतायाः सकृद्दतावुपगमनस्य वैधत्वात् । तत्रैव च गर्भस्थितेः, न च द्वितीयादिसपर्केष्वपि । यथा याज्ञवल्क्यः –'अपुत्रे भ्रातरि मृते तान्तु गच्छेद्दतौ सकृत्' । तथा मनुः –'यथाविध्युपगम्यैना शुक्लवस्त्रा शुचिव्रताम् । मिथो भजेदाप्रसवात् सकृत् सकृद्दतावृतौ ॥' (मस्मृ.९।१७०) । प्रथमोपगमनमात्रस्य गर्भहेतुत्वे सकृद्वचन दृष्टार्थ स्यात्, अन्यथाऽदृष्टार्थत्वमस्य कल्पनीय, अत एव लोकेऽपि प्रथमसंपर्कदिवसमादाय मङ्गलाचारार्थं नियतमासविहितपुसवनसीमन्तोन्नयनाद्यर्थं मासगणना दृश्यते । अतः 'कामादुत्पादयेत् सुतमि'त्यनेनाशूद्राभिप्रायमेव ।

दा.१४२

(३)कामादिति शूद्राभिगमस्य काममात्रपरत्वादुक्तम् । ब्राह्मण इति क्षत्रियस्याप्युपलक्षणम् । वैश्यस्य शूद्रापुत्रोऽपि ब्राह्मणस्येव क्षत्रियापुत्रः स्ववर्णसदृश एव । पारयन्नेव कर्मणि शक्त एव सन् शवोऽनधिकारी । एतेन ज्ञात्यन्तरा-

× विर. मेधागतम् ।

(१) **मस्मृ** ९।१७८; **दा.**१४१, **व्यक.**१५७; **स्मृच.** २८८,**विर.**५७४ स्तस्मात्पा (स्तेन पा);**सुबो.**२।१३२; **व्यनि.** कामादु (काममु) वसिष्ठः; **नृप्र.**३९; **व्यप्र.**४८०; **विता.** ३७८; **बाल.**२।१३२ (पृ.१७६, १७८), २।१३५ (पृ.२३५), **विभ.**९९; **समु.**१३७.

सत्वेऽपि तस्य न पित्र्यधनहारित्व किंतु सबन्धिनोऽपि ब्राह्मणस्थैवेत्युक्तम्। मवि.

(४)पारयन्नेव शवः जीवन्नेव शवः। स्मृच.२८८

(५) 'विन्नास्वेष विधिः स्मृत' इति याज्ञवल्क्यदर्शनात्परिणीतायामेव शूद्राया ब्राह्मणः कामार्थं पुत्र जनयेत्स जीवन्नेव शवतुल्य इति पारशवः स्मृतः। +ममु.

(६) मिताटीका—वद्यप्यस्य शूद्रापुत्रस्य विवाहिताजन्यत्वेनानुलोमजत्वेन च मूर्द्धावसिक्तादिवदौरसत्वमविशिष्टं तथाप्युक्तरीत्या अप्रशस्तत्वेन ततो भेदेन तत्रागणन, एतेषु सत्सु तस्य सकलधनहरत्वाभावादत्र प्रकरणेऽन्ते परिगणन इति बोध्यम्। +बाल.२।१३२ (पृ.१७९)

यः शूद्रस्य दासीसुतः तस्याशः

दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत्।
सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः॥

(१) शूद्रस्यानूढायामनियुक्तायामपि जातः सुत एव। एव यद्यपि दासस्य दासीत्यर्थस्तथापि वचनात्तस्या जातो न दासस्य अपि तु दासस्वामिनः। सोऽनुज्ञातः पित्रा सममशमौरसेन हरेज्जीवितभागे क्रियमाणे, अन्यथा वा, यदि ब्रूयादेष वः समाश इति। यदा तु पिता नानुजानाति, तत्स्मृत्यन्तरे पठित— (यास्मृ. २।१३३) 'जातोऽपि दास्या शूद्रेण कामतोऽशहरो भवेत्'। कामतो यावन्तमश पिताऽनुजानाति। 'मृते पितरि कुर्युस्त भ्रातरस्त्वर्धभागिकम्'। त कुर्युः। स्वाशापेक्षया आत्मना द्वौ द्वौ परिगृह्णीयुर्भागौ तस्यैक दद्युः। 'अभ्रातृको हरेत्सर्वं'। असत्स्वौरसेषु सर्व रिक्थ स एव हरेद्यदि दौहित्रो न स्यात्। सति तस्मिन्नौरसवत्कल्पना। दौहित्रोऽन्यस्याश्रुतत्वात्तस्य च प्रकृतत्वेन बुद्धौ सनिवेशात्। ब्राह्मणादीना तु दासीसुताः प्रजीवनमात्रभाजो न रिक्थभाज इति स्थितिः। *मेधा

(२) दासदासी परिचारकदासी। व्यक.१५२

(३) अननुज्ञातस्तु जीवनमात्र हरेत्। मवि.

(४) ध्वजाहृताद्युक्तलक्षणाया दास्याम्। +ममु.

पुत्रप्रतिनिधिविधिः

क्षेत्रजादीन्सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः॥

(१) मुख्याभावे प्रतिनिधिः। अतोऽसत्यौरस एते कर्तव्या इत्युक्त भवति। एतेषा स्मृत्यन्तरेऽन्यादृशः क्रम उक्तः। यथा गूढोत्पन्नः कैश्चित्पञ्चमोऽपरैः षष्ठ इति। तत्र पाठक्रमो नात्राङ्गमत एवानियमपाठात्। प्रयोजनं चोत्तरत्रानङ्गत्वे दर्शयिष्यामः। क्रियालोपाच्चेतोः, क्रियते इति क्रिया अपत्यमुत्पादयितव्यमिति विधिस्तस्य लोपो मा भूदिति। नित्यो ह्यय विधिः। स यथाकथचिद् गृहस्थेन सपाद्यः। तत्र मुख्यः कल्प औरसः तदसपत्तावेते कल्पा आश्रयितव्याः। ÷मेधा.

(२)यद्यपि शौद्रेयः प्रतिनिधिस्तथाऽप्यौरसेषु सत्स्वपि तस्य दायभागोऽस्तीति पूर्वमेव तद्विभाग उक्तम्। अत एव योगीश्वरः प्रतिनिधिषु त नोक्तवान्। न च वक्तव्यं कथ तर्हयदायादः शूद्रापुत्र इति, पित्रा प्रसाददत्तेऽस्य धने सति दायविभागरहितत्वमुक्त मनुनैव 'ब्राह्मणक्षत्रियविशा शूद्रापुत्रो न रिक्थभाक्' इति। अथवा पितृधनस्य दशमादशादधिक दाय न लभत इत्येवंपरं तस्यादायादत्ववचनम्। अप.२।१२८

* दा., विचि., मच. मेधावद्भावः।

+ मेधावद्भावः।

× दमी.व्याख्यान 'अपुत्रेणैव कर्तव्याः' इत्यत्रिवचने, 'अविधाय विधान' इति बृद्धगौतमवचने तथा 'ब्राह्मणाना सपिण्डेषु' इति शौनकवचने च दृष्टव्यम्।

÷ मन्वर्थमुक्तावल्यां 'क्रिया'पद मेधावत् मविवच्च। चन्द्र. मेधागतम्।

(१) **मस्मृ.**९।१८०; **अप.**२।१२८ दीन् (दि); **व्यक.** १५८; **मभा.**२८।३४; **स्मृच.**२८८; **विर.**५७४; **स्मृसा.** ७० अपवत्; **व्यनि.** दितान् (चितान्) वसिष्ठः; **चन्द्र.**१७६-१७७, **दमी.**११: २० उत्त.: ८१,९४; **व्यप्र.**४८०; **संप्र.**२०७, **बाल.**२।१३२ (पृ.१७६): २।१३५ (पृ.२१७, २३२) नाहुः (न्प्राहुः); **समु.**१३७; **कृभ.**८६६; **दच.**४.

+ शेष मेधागतम्।

(१) **मस्मृ.**९।१७९; **दा.**१४३; **व्यक.**१५२, **विर.**५३७, **स्मृसा.**६५, **विचि.**२२६-२२७, **व्यनि., स्मृचि** ३४-३५, **नृप्र.**३९ वा (च) धर्मो (पत्र) स्थित. (स्थानिः), **विता.**३७९; **बाल.**२।१३४; **विभ.**९९, **समु.**१३०, **दच.**३५.

१ त्यर्थेऽपि वच. २ (अपि तु०). ३ वस्यान्य.

(३) पुत्रप्रतिनिधीन्गौणपुत्रान् । क्रियालोपादौरसाभावे तत्कर्तृकक्रियालोपाद्विभ्यतो मनीषिण आहुरिति सम्बन्धः । एव निरूपितगौणपुत्राणा सर्वेषा युगान्तरे पुत्रत्वेन परिग्रहः । कलौ तु दत्तकस्यैकस्य 'दत्तौरसेतरेषा तु पुत्रत्वेन परिग्रह' इति । कलेरादौ धर्मगुप्त्यर्थं महात्मभिर्दत्तकौरसेतरेषा पुत्रत्वेन परिग्रहनिवारणात् । पुत्रिकाकरणमप्यस्मादेव वाक्यात्कलौ निवारितम् । दत्तौरसेतरत्वात्पुत्रिकायाः । एव च कलावौरसपुत्रपौत्रयोरभावे दत्तक एव गौणपुत्रो भवति नान्य इत्यनुसधेयम् । मुख्योऽपि पुत्रः कलावसवर्णभार्याभवो नास्ति असवर्णकन्याविवाहनिषेधात् । तथा च धर्मवाक्यम् 'कन्यानामसवर्णाना विवाहश्च द्विजन्मभिः' इति । अत्रापि कलेरादौ धर्मगुप्त्यर्थं महात्मभिर्निवारित इति वाक्यशेषो द्रष्टव्यः । अत एवास्माभिरसवर्णपुत्राणा दत्तकेतरेषा गौणपुत्राणा पुत्रिकायास्तत्सुतस्य च भागविधयो न निबध्यन्ते सप्रत्यनुष्ठीयमानत्वात् वृथा च ग्रन्थविस्तारापत्तेः । एव च गौणपितृद्वारा धनागमन कलौ दत्ताख्य पुत्र प्रत्येव ।
स्मृच.२८८ २८९

(४) क्षेत्रजादीन्न तु पुत्रिकापुत्रमपि । क्रियालोपादौर्ध्वदैहिकक्रियालोपो मा भूदिति बुद्धयेत्यर्थः । मवि.

(५) पुत्रप्रतिनिधीनौरसपुत्रिकापुत्रप्रतिनिधीनेतदभावे तत्कार्यकारिण आहुः । + विर.५७४

(६) खलेवाल्यन्यायेनौरसातिरिक्तपुत्राणा प्रतिनिधित्वमाह —क्षेत्रजादीनिति । 'पुसि मेढ्रः खलेवाली न्यस्त यत्पशुबन्धन' इति, स यथा अष्टाश्रीकरणरहितः पशुबन्धने नियुज्यते एव पारशवादीना पुत्रकार्यनियोगेऽपि नोपनयनादिरिति न्यायार्थः । मच.

(७) औरसपुत्रस्यैवौरसपुत्र्या अपचारे क्षेत्रजाद्याः पुत्र्यः प्रतिनिधयो भवन्ति । 'मुख्यापचारे प्रतिनिधिरि'ति न्यायात् । मुख्यत्व चास्या दानादिविधौ साधनत्वेन, साधनत्व च ऋतुगमनविधिना साधितायाः, द्रव्यार्जनविधिनार्जितस्य व्रीह्यादेः क्रतुसाधनत्ववत् । तथाहि रात्रिसत्रन्यायेन 'ऋत्वियात् प्रजा विन्दामहे; ऋत्वियात्प्र जा विन्दते;' इत्याद्यर्थवादोन्नीते, ऋतावुपेयात्तस्मिन् संविशेदित्यादौ, नित्ये ऋतुगमनविधौ, स्त्रीपुससाधारण्याः श्रुतिसिद्धायाः प्रजाया एव भाव्यत्वमवगम्यते । प्रजनयति इति प्रजा, इति व्युत्पत्त्या प्रजननशक्तिमतः स्त्रीपुंस एव प्रजाशब्दवाच्यत्वात् न नपुसकस्य तस्य शुक्रशोणितसाम्यजन्यत्वेन नान्तरीयकत्वात् । अत एव 'अननधीत्य द्विजो वेदमनुत्पाद्य च संततिम् । अनिष्ट्वा विविधैर्यज्ञैर्मोक्षमिच्छन् पतत्यधः ॥' इति तादृश्या एव संततेरनुत्पादे अधःपातः स्मर्यते । संतनोत्यन्वयमिति संततिः प्रजापर्याय एव । 'प्रजा स्यात् संततौ जने' इति कोशात् । एव 'अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्र बीजिनो नराः । क्षेत्र बीजवते देय नाबीजी क्षेत्रमर्हति ॥' इति अत्र अपत्यशब्दो व्याख्यातः । 'अपत्य कस्माद्, अपततं भवति नानेन पततीति वेंति यास्कस्मरणात् । 'आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियस्त्वमी । आहुर्दुहितरं सर्वेऽपत्य तोकं तयोः समे ॥' इति कोशाच्च । यत्र पुमान् पुरुषना भवति पुसतेर्वेति यास्कोक्त्या पुपद बहुज्ञपरं तदा पुसतेर्वेति तदुक्त्यैव प्रसवकर्तृमिथुनपरमेव व्याख्यायताम् । अत एव यास्कः—"मिथुनाः पुत्रदायादा इति । तदेतदृक्श्लोकाभ्यामभ्युक्तम् । 'अङ्गादङ्गात्संभवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥' इति । 'अविशेषेण पुत्राणा दायो भवति धर्मतः । मिथुनाना विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत् ॥" इत्यत्र पुत्रपदं मिथुनपरं दर्शितवान् । न चात्र मिथुनपद पुत्रस्नुषापरमिति वाच्यम् । 'अङ्गादङ्गात् संभवसि' इत्यस्यासंगतेः । 'न दुहितर इत्येके, पुमान् दायादोऽदायादा स्त्रीति विज्ञायते' इत्येकीयमते दुहितृनिराकरणासगतेश्च । यच्च नापुत्रस्य लोकोऽस्तीत्यादौ पुत्रपद तदप्युभयपरमेव । 'भ्रातृपुत्रौ स्वसृदुहितृभ्यामि'ति पाणिनिना पुत्रदुहितृपदयोरेकशेषस्मरणात् । एतेन 'अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिः सदा' इत्यादावपि पुत्रपदं व्याख्यातं तत्साधनञ्च पुत्रिकाकरणलिङ्गमग्रे वक्ष्यते । अत एवोक्त 'तत्समः पुत्रिकासुतः' इति, 'अङ्गादङ्गात्संभवति पुत्रवद्दुहिता नृणाम्' इति च । यदि चाद्दष्टवैकल्येन कन्यानुत्पादः तदा कृष्णप्रतिपच्छ्राद्धादिना तत्संपादनं कार्यं, कृष्णचतुर्थीश्राद्धादिना पुत्राद्दष्टस्येव । यत्तु गमनकरणिकायामेव भावनाया 'एवं गच्छन् पुत्रं जनयेदि'ति पुत्रस्यैव भाव्यत्व प्रतीयते

+ शेष मेधागतम् ।

तत्प्रजापदोपात्तयोः स्त्रीपुंसयोर्मध्ये पुत्रस्य तद्वाक्यविहितगुणफलतया अवधृत्यानुवादः पुत्रार्थिप्रवृत्त्यर्थः। गुणाश्च युग्मनिशाशुक्राधिक्यस्त्रीक्षामतेन्दुसौकथ्यपुंसवनापूर्वादयो योगिमन्वादिभिरेव 'एवमि'त्यादिना स्पष्टीकृताः। आश्वलायनेनापि पाणिग्रहणे पुत्रपुष्योर्गुणफलत्व प्रकटितम्। "गृभ्णामिते सौभगत्वाय हस्तमि' त्यङ्गुष्ठमेव गृह्णीयात्, यदि कामयेत 'पुमास एव मे पुत्रा जायेरन्नि'त्यङ्गुलीरेव, स्त्रीकामो रोमान्ते, हस्तं साङ्गुष्ठमुभयकाम इति"। एतेन 'स्त्रियो युग्मासु रात्रिषु' इत्यपि व्याख्यातम्। तस्मात्पुत्रस्यैव श्राद्धकर्तृत्वेन परलोकसाधनतया पुत्र्या अपि दानश्राद्धादिविधिसाधनत्वेन सिद्धे मुख्यत्वे तदपचारे प्रतिनिधिर्युक्त एव। 'दुहिता दुर्हिता दूरे हिता दोग्धेर्वा' इति निरुक्त्या दुहितुर्दौहित्रद्वारापि पितृपकारकत्व दर्शयति यास्कः। मनुरपि— 'पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते। दौहित्रोऽपि ह्यमुत्रैनं संतारयति पौत्रवत् ॥' इति। महाभारते गान्धार्युक्तिश्च 'एका शताधिका बाला भविष्यति गरीयसी। तेन दौहित्रजालोकान् प्राप्नुयामिति मे मतिः ॥' अन्यत्रापि 'दुहितर एव मातापितृभ्यां किमौरसाः पुत्राः। निपतन् दिवो ययातिर्दौहित्रैरुद्धृतः पूर्वम्॥' इति। दौहित्रैरष्टकादिभिः कानीनैर्मागधीपुत्रैः। एवञ्चौरसदुहित्रभावे दौहित्रकृतलोकप्राप्त्यर्थं क्षेत्रजादिदुहितृणामपि प्रतिनिधित्वेनोपादान सिद्धमेव। न च व्रीहिप्रतिनिधित्वे इव वचनमस्ति। यत्रैव तर्हि भर्तृपचारे देवरस्येव भार्यापचारे श्यालिकायाः प्रतिनिधित्वं स्यात्। श्वशुरशरीरावयवान्वयेन सौसादृश्यादिति चेत्, मैवम्। न हि श्वशुरशरीरावयवान्वयेन भार्योपादानं किन्तु तस्याः संस्कृतस्त्रीत्वेन, न च तत् श्यालिकायामस्ति, यत्र च कनिष्ठादौ तदस्ति तत्र भवत्येव तस्याः ज्येष्ठाप्रतिनिधित्वम्। यथाह व्यतिरेकमुखेन योगीश्वरः— 'सत्यामन्या सवर्णायां धर्मकार्यं न कारयेत्। सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ॥' इति। तस्मात् सिद्धमासा न्यायत एव प्रतिनिधित्वम्। तत्र क्षेत्रजगूढजकानीनसहोढपौनर्भवाना पञ्चाना मध्ये क्षेत्रजोत्पादनं मनुरेवाह —'देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया। प्रजेप्सिताधिगन्तव्या संतानस्य परिक्षये ॥' इत्यनेन सतानस्योभयविधस्य परिक्षये उभयविधायाः प्रजाया इष्टत्वेन यथायथ प्रतिनिधित्वमित्यर्थः। इतरासु चतसृषु नोत्पादनविध्यपेक्षा लोकस्वभावसिद्धत्वात्, तासा च नामानि पुत्रवत् तान्येव, प्रवृत्तिनिमित्तस्योभयत्रापि तुल्यत्वात्, तासा चौरसप्रतिनिधित्व विकलावयवारब्धत्वेन न्यायत एव सिद्धं, व्रीह्यपचारे नीवाराणामिव। अवयववैकल्य च स्त्यवयवमात्रान्वयेन भर्तृवयवान्वयाभावात्। अस्त्येव क्षेत्रजादीनां दुहितृणा औरसदुहितृप्रतिनिधित्व न्यायबलात्, दत्तकक्रीतकृत्रिमदत्तात्मापविद्धाना सौसादृश्यन्यायाभावे कथमस्तु प्रतिनिधित्वम्। मैवम्। तत्रापि 'सजातीयेष्वय प्रोक्तस्तनयेषु मया विधिः' इति योगिप्रतिपादितसजातीयत्वादिसौसादृश्यसद्भावात् अस्त्येव न्यायप्रसरः। उपपादितं चैतदधस्तात् पुत्रप्रतिनिधिविचारे।

ननु क्षेत्रजादीना पञ्चाना मात्रवयवान्वयेन दत्तकादीना पञ्चाना सजातीयत्वेनास्तु प्रतिनिधित्व 'पूर्वाभावे परः पर' इति क्रमविधान तु कथ सादृश्याविशेषादिति चेत्, मैवम्। पूर्वपूर्वश्रेयस्त्वेनेति ब्रूमः। तदाह विष्णुः—'एतेषा पूर्वः पूर्वः श्रेयान्' इति। श्रेयो दृष्टादृष्टविशेषः, दृष्टं अवयवप्रत्यासत्यादि अदृष्टं शुद्धयादि, वचन तु नियमार्थं, यदि सोम न विन्देत् पूतिकामभिषुणुयादित्यादिवत् विशेषान्तरं अस्मत्कृताया विष्णुस्मृतिटीकाया केशववैजयन्त्यामवधेयम्।

दुहितृप्रतिनिधौ पुराणेषु लिङ्गदर्शनानि उपलभ्यन्ते। तत्र दत्तकाया रामायणे बालकाण्डे दशरथं प्रति सुमन्त्रस्य सनत्कुमारोक्तभविष्यानुवादो लिङ्गम्— 'इक्ष्वाकूणा कुले जातो भविष्यति सुधार्मिकः। नाम्ना दशरथो वीरः श्रीमान् सत्यपराक्रमः॥ सख्यं तस्याङ्गराजेन भविष्यति महात्मना। कन्या चास्य महाभागा शान्ता नाम भविष्यति ॥ अपुत्रस्त्वङ्गराजो वै लोमपाद इति श्रुतः। स राजान दशरथं प्रार्थयिष्यति भूमिपः॥ अनपत्योऽस्मि धर्मज्ञ कन्येयं मम दीयताम्। शान्ता धर्मेण मनसा पुत्रार्थं वरवर्णिनी ॥ ततो राजा दशरथो मनसाऽभिविचिन्त्य च। दास्यते ता तदा कन्या शान्तामङ्गाधिपाय सः॥ प्रतिगृह्य तु ता कन्या स राजा विगतज्वरः। नगरं यास्यति क्षिप्रं प्रहृष्टेनान्तरात्मना ॥ कन्या ता ऋष्यशृङ्गाय प्रदास्यति स वीर्यवान्॥'

इत्यादि । तत्रैव लोमपादं प्रति दशरथवाक्यम्—'शान्ता तव सुता वीर सह भर्त्रा विशाम्पते । मदीयं नगरं यातु कार्यं हि महदुद्यतम् ॥' इति । तत्रैव ऋष्यशृङ्गं प्रति लोमपादवाक्यम्—'अयं राजा दशरथः सखा मे दयितः सुहृत् । अपत्यार्थं ममानेन दत्तेयं वरवर्णिनी ॥ याचमानस्य मे ब्रह्मन् शान्ता प्रियतरा मम । सोऽयं ते श्वशुरो धीर यथैवाह तथा नृप ॥' इत्यादि । अत्र दीयता—दास्यते— प्रतिगृह्य— दत्ताशब्दैर्दानविधिः स्पष्ट एव । तथा अपुत्रः इत्युपक्रम्य पुत्रार्थ इत्युपसंहारात् औरसपुत्रीवद्दत्तपुत्र्यपि पुत्रप्रतिनिधिर्भवतीति गम्यते ।

क्रीताया हेमाद्रौ स्कन्दपुराणे—'आत्मीकृत्य सुवर्णेन परकीया तु कन्यकाम् । धर्म्येण विधिना दातुमसगोत्रापि युज्यते ॥' लैङ्गेऽपि—'कन्या लक्षणसंपन्ना सर्वदोषविवर्जिताम् । मातापित्रोस्तु संवाद कृत्वा दत्वा धन महत् ॥ आत्मीकृत्य तु संस्थाप्य वस्त्र दत्वा शुभ नवम् । भूषणैर्भूषयित्वा तु गन्धमाल्यैरथार्चयेत् ॥ निमित्तानि समीक्ष्याथ गोत्रनक्षत्रकादिकम् । उभयोश्चित्तमालोक्य उभौ संपूज्य यत्नतः ॥ दातव्या श्रोत्रियायैव ब्राह्मणाय तपस्विने । साक्षादधीतवेदाय विधिना ब्रह्मचारिणे ॥' इति । अत्र सुवर्णेनात्मीकृत्य— धन दत्वा— इत्यादिशब्दैः क्रयविधिः स्पष्ट एव ।

कृत्रिमायाः हरिवंशे शूरापत्यगणनाया —'महिष्या जज्ञिरे शूराद्भोजायां पुरुषा दश । वसुदेवो महाबाहुः पूर्वमानकदुन्दुभिः ॥' इत्युपक्रम्य, 'देवभागस्ततो जज्ञे तथा देवश्रवाः पुनः । अनावृष्टिः कनवको वत्सवानथ गृञ्जिमः ॥ श्यामः शमीको गण्डूषः पञ्च चास्य वराङ्गनाः ॥' इति मध्येऽभिधाय 'पृथुकीर्तिः पृथा चैव श्रुतदेवा श्रुतश्रवाः । राजाधिदेवो च तथा पञ्चैता वीरमातरः ॥' इति पञ्चापि विगण्य, 'पृथा दुहितरं चक्रे कुन्तिस्तां पाण्डुरावहत् । यस्या स धर्मविद्राजा धर्मात्मजज्ञे युधिष्ठिरः ॥' इत्यादि । अत्र चक्रे इति कर्तुरेव व्यापारश्रवणात्, अस्याः कृत्रिमत्त्वम् । पाद्मे भौमव्रते च—'आसीत् सुनन्दिकः पूर्वं ब्राह्मणो वेदपारगः । तस्य सुनन्दिका भार्या वन्ध्या तु बहुलोभिनी ॥ तस्यापत्यं न सजातं वृद्धत्वं वन्ध्यभावतः । तेनान्यस्य सुता जाता सुशीला रूपसंयुता ॥ ब्राह्मणस्य कुले जाता गृहीत्वा पोषिता स्वयम् । ता च पुत्रीं गृहे तस्य ब्राह्मणी सा ह्यपालयत् ॥ विवाहार्थं तु विप्रस्य दत्ता सोमेश्वरस्य च । वेदोक्तविधिना तत्र विवाहमकरोत्तदा ॥' इत्यादि । अत्रापि स्वयगृहीत्वेति श्रवण कृत्रिमत्वे लिङ्गम् । न च स्वयपोषिता इत्यन्वयः साधुः । ग्रहणपोषणयोः क्त्वाप्रत्ययाभिहितसमानकर्तृकत्वेनैव स्वयपोषणस्य सिद्धत्वात् ।

दत्तात्मिकायाः पुराणान्तरेषु मृग्यम् ।

अपविद्धाया महाभारते आदिपर्वणि शाकुन्तले दुष्यन्तशकुन्तलासंवादानुवादकमेव वाक्यम् — 'जनयामास स मुनिर्मेनकायां शकुन्तलाम् । प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम् ॥ जातमुत्सृज्य तं गर्भ मेनका मालिनीमनु । कृतकार्या ततस्तूर्णमगच्छच्छक्रसंसदम् ॥ तं वने विजने गर्भ सिंहव्याघ्रसमाकुले । दृष्ट्वा शयान शकुनाः समन्तात्पर्यवारयन् ॥ नेमा हिंस्युर्वने बाला क्रव्यादा मांसगृद्धिनः । पर्यरक्षंस्तदा तत्र शकुन्ता मेनकात्मजाम् ॥ उपस्प्रष्टुं गताश्चाहमपश्यं शयितामिमाम् । निर्जनेऽपि वने रम्ये शकुनैः परिवारिताम् ॥ आनयित्वा ततश्चैना दुहितृत्वे न्यवेशयम् । शरीरकृत्प्राणदाता यस्य चान्नानि भुञ्जते । क्रमेण ते त्रयोऽप्युक्ताः पितरो धर्मशासने ॥ निर्जने तु वने यस्माच्छकुन्तैः परिपालिता । शकुन्तलेति नामास्याः कृत चापि ततो मया ॥ एव दुहितरं विद्धि मम विप्र शकुन्तलाम् ॥' शकुन्तलोवाच— 'एतदाचष्ट पृष्टः सन् मम जन्म महर्षये । सुता कण्वस्य मामेव विद्धि त्व मनुजाधिप ॥ कण्वं हि पितरं मन्ये पितरं स्वमजानती ॥' इति । अत्रोत्सृष्टग्रहणादपविद्धाविधिः स्पष्ट एव । तदेवं तत्तद्विध्यविनाभूतलिङ्गदर्शनैस्तत्तद्विधिसिद्धिः सुकरैव, इत्यल पल्लवितेन । दमी.१०४–११७

(८) क्रियालोपात् परिणयादिक्रियालोपादित्यर्थः । क्रियालोपादिति प्रतिनिधित्वे हेतुः । स्मृतिचन्द्रिकाया तु औरसाभावे तत्कर्तृकश्राद्धादिक्रियालोपादुविभ्यतो मनीषिण ऋषय एकादश पुत्रप्रतिनिधीन् कर्तव्यत्वेनाहुरिति व्याख्यातम् । व्यप्र.४८०

(९) अथौरसस्य श्रेष्ठ्य श्लोकद्वयेनाह—क्षेत्रजादीन्सुतानिति । पुत्रप्रतिनिधीनाहुर्न मुख्यान्, क्रियालोपादुत्पादकक्रियाया अभावात् । नन्द.

(१०) मिताटीका— क्रिया पिण्डादिकरणं तल्लोपो व्यतिरेके हेतुः। तल्लोपं वीक्ष्येत्यर्थो वा। अकारप्रश्लेषो वा। प्रतिनिधित्व चावयवान्वयेन न्यायसिद्ध वाचनिकं यथायथ बोध्यम्। अत एव तेन यथाक्रममेव पिण्डदः श्राद्धदः अंशहरः धनहरो वेदितव्य इति व्याख्यातम्।

*बाल.२।१३५ (पृ.२१७)

पुत्रप्रतिनिधीन् औरसपुत्रिकाप्रतिनिधीन्।

बाल.२।१३५ (पृ.२१२)

पुत्रप्रतिनिधिनिषेधः

ये एतेऽभिहिताः पुत्राः प्रसंगादन्यबीजजाः। यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु ×॥

(१) पूर्वोक्तस्याभावे विधिप्रतिषेधोऽयमिति व्याचक्षते। य एते औरसाभावे प्रतिनिधयः कर्तव्यतया उक्तास्ते न कर्तव्याः। यतस्तेऽन्यबीजजातास्तस्यैव ते पुत्रा नेतरस्य। येन क्रियन्ते तस्य ते न भवन्तीत्यर्थः। अतश्च पूर्वेण विधिरनेन प्रतिषेध इति विकल्पः। स च व्यवस्थितो रिक्थग्रहणे। कानीनसहोढपुनर्भवगूढोत्पन्ना न रिक्थभाजः। दत्तकादयस्तु रिक्थभाजः असत्यौरसे। कानीनादयश्च असत्यप्यौरसे न पितृधनहराः। ग्रासाच्छादनभाजः केवल सत्यसति चौरसे। यत उक्त (मस्मृ. ९।२०२) 'सर्वेषामपि च न्याय्य दातु शक्त्या मनीषिणा। ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत्॥' मेधा.

(२) एते क्षेत्रजादयः प्रसगादौरसपुत्रप्रसगादुक्ताः यस्य बीजतो जातास्तस्य ते न भवन्ति। किन्वितरस्य, यस्य क्षेत्र येन वा क्रयणादिकृत तस्यैव भवन्तीत्यर्थः। केचित्तु य एते दत्त्रिमादय उक्तास्ते यदि दात्रादीना क्षेत्रे तेभ्योऽन्यस्माज्जातास्तदा दात्रादिभिर्दत्ता अपि न प्रतिग्रहीत्रादीना पुत्राः, किंतु बीजिन एवेत्यस्यार्थ इत्याहुः। मवि.

(३) य एते क्षेत्रजादयोऽन्यबीजोत्पन्नाः पुत्रा औरसपुत्रप्रसंगेनोक्तास्ते यद्बीजोत्पन्नास्तस्यैव पुत्रा भवन्ति न क्षेत्रिकादेरिति। सत्यौरसे पुत्रे पुत्रिकाया च सत्या न ते कर्तव्या इत्येवपरमिदम्। अन्यबीजजा इत्येकादशपुत्रोपलक्षणार्थम्। स्वबीजजातावपि पौनर्भवशौद्रौ न कर्तव्यौ। अत एव बृद्धबृहस्पतिः— 'आज्यं विना यथा तैल सद्भिः प्रतिनिधिः स्मृतः। तथैकादशपुत्रास्तु पुत्रिकौरसयोर्विना॥' ममु.

(४) ननु तेऽपि पुत्रा इति कथं प्रतिनिधित्वं तत्राह— य इति। अशास्त्रीयस्य प्रतिनिधित्वाभाव द्योतयितुं तेषा पुत्रोक्तिर्न तु ते वस्तुतः पुत्रा भवन्ति। कार्यातिदेशं विनाऽन्यस्यान्यभावानुपपत्तेरिति भावः। अत एवाह यस्य त इत्यनेन जनकाना पुत्राभावे त एव श्राद्धादिकर्तारः। पौनर्भवश्राद्रापत्ययोः स्वजातत्वेऽपि न मुख्यत्वम्। मच.

सर्वेषां पुत्रप्रतिनिधीनां दायहरत्वम्

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः॥

(१) इति सर्वपुत्राणा रिक्थहरत्व उक्तम्। मेधा.९।१४१

(२) इति औरसव्यतिरिक्ताना पुत्रप्रतिनिधीना सर्वेषा रिक्थहारित्वप्रतिपादनपरत्वम्। + मिता.२।१३२

(३) पुत्रा औरसादयो द्विजातिजनितशूद्रापुत्रादन्ये। मवि.

(४) ननु 'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः' इति तेनैवोक्तत्वात् (मस्मृ.९।१६३) पितृरिक्थे भ्रात्रादीनामसक्तिरिति कथ तत्प्रतिषेधोऽवकल्प्यते। न च प्रनष्टपुत्रविषयेऽवकल्प्यत इति वाच्यम्। 'पुत्रा ऋक्थहरा' इति विधानानवकल्पनात्। उच्यते। 'पुत्रा ऋक्थहराः पितुः' इत्यत्र पुत्रपितृशब्दौ गौणौ। एव चायमर्थः। क्षेत्रजादिपुत्राः क्षेत्रस्वाम्यादिपितृरिक्थहरा न तद्भ्रात्रादय इति। *स्मृच.२८८

* बाल. [२।१३२ (पृ. १७६) मेधागतम्, २।१३५ (पृ. २१७) मविगतम्।]

× दमी. व्याख्यान 'दत्तक्रीतादिपुत्राणा' इति बृहन्मनुवचने द्रष्टव्यम्

+ पराशरमाधवे मिताक्षरैवोद्धृता।

* मितावद्धाः। ममु. स्मृचगतम्।

(१) **मस्मृ.**९।१८१; **व्यक.**१५८ ऽभिहि (विहि); **विर.** ५७४य एते (यत्र ते) यस्य ते (यस्यैते); **स्मृसा.**७० जाः (काः) स्तस्य ते (स्तस्यैते) शेष विरवत्; **दमी.**८५-८६; **समु.**१३७. (१) **मस्मृ.**९।१८५पू., **मेधा.**९।१४१; **मिता.**२।५१, २।१३२, **दा.**१६४, **अप.**२।५१ त्रा (ग्रः) राः (रः); **व्यक.** १५५पू.; **स्मृच.**२८८,२९५; **विर.**५५२ पितुः (स्मृताः); **पमा.**२७२, ५१८; **व्यनि.**; **नृप्र** ४०; **व्यप्र.**२६७,४८५, ५११,५१९; **विना.**४२३ पितरः (सुहृदः) नारदः; **बाल.** २।१३५ (पृ.२१६), **समु.**१३७; **दच.**३०.

(५) मिताटीका—अत्र दायहरण सर्वेषामविशेषेण प्रतिपादितं, प्रतिनिधीना क्रमेण तत्तदभावे ।

बाल.२।१३५(पृ.२१६)

उदकपिण्डदानसबन्धः

त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते ।
चतुर्थः संप्रदातैषां पञ्चमो नोपपद्यते ॥।

(१) 'पुत्रा रिक्थहराः पितुः' इत्यभिधाय कुत इत्यपेक्षाया त्रयाणामुदक कार्यमिति । दा.१६४

अनेन पञ्चमो निषिद्धः। दा.२०८

दायभागप्रकरणे 'त्रयाणामुदक कार्य त्रिषु पिण्डः प्रवर्त्तते। चतुर्थः संप्रदातैषा पञ्चमो नोपपद्यते ॥' इत्युक्त्वा 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धन भवेदि'ति (मस्मृ.९।१८७) लिखित, पञ्चमस्यैकपिण्डसबन्धहीनस्य पितृमातृकुलजातैकपिण्डसंबन्धिसद्भावे अनधिकारार्थम् । अन्यथा 'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते' (मस्म. ५।६०)इति सपिण्डत्वस्योक्तत्वात् 'अनन्तरः सपिण्डाद्यः' इत्यनेन चानन्तर्यस्य धनग्रहणकारणत्वेनाभिहितत्वात् त्रयाणामिति अनर्थक स्यात् । न च त्रैपुरुषिकश्राद्धविधानार्थमिदमिति वाच्य दायभागसदशमन्यपाठात् श्राद्धस्य च वचनान्तरविहितत्वात् । तथा च मनुः—'स्वाध्यायेनार्चयेदृषीन् होमैर्देवान् यथाविधि । पितॄन् श्राद्धेन नृनन्नैर्भूतानि बलिकर्मणा ॥ '(मस्मृ.३।८१)

न च जननक्रमेणानन्तर्यग्रहणार्थं वचन न तु प्रदातृत्वेनानन्तर्यार्थमिति वाच्य जननक्रमस्य वचनादनवगतेः। किन्तु उदकवत् त्रिभ्यः पिण्डदान चतुर्थोऽधस्तनः पिण्डदाता पञ्चमस्तु पूर्वतनो न संप्रदान नाप्यधस्तनः पञ्चमः पिण्डदातेत्यभिधाय आनन्तर्यमभिदधानो मनुः प्रदातृत्वातिशयेनैवानन्तर्य ज्ञापयति । तस्मात् यो यस्तत्कुलोत्पन्नोऽतद्गोत्रोऽपि स्वदौहित्रपितृदौहित्रादितत्कुलोत्पन्नो वा मातुलादिर्धनिनो मृतस्य पितृमातृकुलगतत्रैपुरुषिकपिण्डदातृतया एकपिण्डसंबन्धेन सपिण्डः तस्य तस्याप्यधिकारार्थ त्रयाणामिति वचन आनन्तर्येण च विशेषार्थ अनन्तर इति वचन वर्णनीयम् । तेन मृतभोग्यमृतदेयपित्रादित्रयपिण्डदातुः पितृदौहित्रादेरभावे मृतदेयमातामहादिपिण्डदातृणा मातुलादीनामानन्तर्यक्रमेणाधिकारो बोद्धव्यः । एतत्पर्यन्ताभावे तु सकुल्यः ।

दा.२११–२१३

(२) तत्र प्रत्यासन्नः पूर्व धनभाक् । यदाह मनुः— 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धन भवेत्' इति । अनन्तरता च तेनैवोक्ता— त्रयाणामिति । सप्रदानकारकीभूताना पित्रादीना त्रयाणा चोदकादिदाता, यश्च तत्सततिजोऽन्योऽपि तेषामेवोदकादिदाता स तस्य प्रत्यासन्नः सपिण्डः । तदत्र तु सोदरो भ्राताऽतिशयेन प्रत्यासन्नः, समानसप्रदानोदकादिदातृत्वात् । तत्पुत्रः पुनरीपद्व्यवहितः पितृपिण्डे सप्रदानत्वात् । तत्पौत्रस्तु ततोऽपि व्यवहितः पितृपितामहपिण्डयोर्भिन्नसप्रदानकत्वात् । तत्पौत्रस्त्वत्यन्तव्यवहितः पिण्डत्रयेऽपि सप्रदानभेदात् । एव भ्राता तत्पुत्रस्तत्पौत्र इति पितृसततौ त्रयः प्रत्यासन्नाः सपिण्डाः । एव पितामहसततौ प्रपितामहसततौ च । एषामभावे पित्रादित्रयस्य ये प्रपौत्रास्तेषा पुत्रादित्रय सापिण्ड्याद्धनग्राहकम् । अप.२।१३५

(३) त्रयाणामिति पितृतत्पितृतत्पितृणा उदक कार्य नियमेन तथा पिण्डः पिण्डदानम् । पञ्चमो नोपपद्यत इत्यवश्यमुदक पिण्ड च दाप्यम् । मवि.

(४) इदानी क्षेत्रजानामप्यपुत्रपितामहादिधनेऽप्यधिकार दर्शयितुमाह—त्रयाणामिति । त्रयाणा पित्रादीनामुदकदान कार्य, त्रिभ्य एव च तेभ्यः पिण्डो देयः । चतुर्थश्च पिण्डोदकयोर्दाता पञ्चमस्यात्र सबन्धो नास्ति। तस्माद्युक्तोऽपुत्रपितामहादिधने गौणपौत्राणामधिकारः । औरसपुत्रपौत्रयोश्च 'पुत्रेण लोकान् जयती'त्यनेनैवात्र पितामहादिधनभागित्वमुक्तम् । मम.

(५) श्रीकरनिबन्धे तु पिता हरेदिति । त्रयाणामिति। तत्राय नियमः। त्रयाणा पिण्डोदकदानप्रतियोगित्वेन तदूर्ध्वत्रयाणा लेपभागित्वेन पिण्डदातृत्वेन सपिण्डत्वम् । समाना सपिण्डत्वेनासपिण्डव्यावृत्तत्वेनोपस्थितौ नियमे सत्यपि तद्रूपापन्नानामतद्रूपापन्नानामपि एतत्त्वात्कस्येत्य-

* व्यप्र. व्याख्यानं 'प्रपितामहः पितामहः' इति बौधायनवचने द्रष्टव्यम्।

(१) **मस्मृ.**९।१८६; **दा.**९७ पू., १६४, २०८, २११, **अप.**२।१३५ दानै (दत्ते); **व्यक.**१६०; **विर.**५९२; **स्मृसा.** १३५, १४१, १४७; **स्मृचि.**३२; **दात.** १८७,१९५; **व्यप्र.**५०४; **विता.**३८४पू., ४६८पू.; **बाल.**२।१३५ (पृ.२१९); **सेतु.**४८पू.; **वि च.**११८पू., १ ३२.

नियमप्रसक्तौ तत्राप्यानन्तर्येण नियमं विदधाति। तत्रायमानन्तर्यक्रमः। मृतसंतानाभावे तत्पितृसततेस्तद्धनम्। तदभावे च तत्पितामहसततेः। तदभावे तत्प्रपितामहसंततेः, इति 'त्रयाणामुदक कार्यं' इत्यादिना दर्शितम्। एतदूर्ध्वं त्रयाणामपि जन्यजनकक्रमेणैव पूर्ववत्संनिधानादर्थग्राहिता इति सपिण्डाभावे सकुल्याना धनभागितेति। 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धन भवेदि'त्यादिना दर्शितम्। स्मृसा.१४७

(६) इति दायभागप्रकरणीयमनुस्मृतेः 'पिण्डदोऽशहरः' इति याज्ञवल्कीयात् 'मातृतुल्याः प्रकीर्तिताः' इत्यनेन स्वस्त्रीयादीना पुत्रत्वज्ञापनेन पिण्डदत्वसूचनस्य दायभागप्रकरणे उपकारतारतम्येन धनाधिकारक्रमज्ञापनेनैकप्रयोजनकत्वात्। दात.१८७-१८८

(७) अनेन पितामहप्रपितामहयोरपि धनहारित्व गौणपुत्राणामभावे इत्यूचि। ×मच.

(८) न केवलमसति पुत्रे भ्रात्रादीना रिक्थहरत्व. किन्तु असतोश्च पौत्रप्रपौत्रयोः पुत्रतुल्यकर्मकर्तव्यत्वात्तयो रित्यभिप्रायेणाह—त्रयाणामुदकमिति। प्रेतस्य धनिनः पुत्रः पौत्रप्रपौत्रज्ञात्यन्तरेष्वप्युपकारकतमः तेन तेष्वसत्स्वेव भ्रात्रादयो रिक्थहरा न तु सत्सु। नन्द.

आपदि पुत्रकरणविधिः

अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः।
पिण्डोदककियाहेतोर्नामसंकीर्तनाय च * ॥

कुपुत्राणां निन्दा

यादृशं फलमाप्नोति कुपुत्रैः संतरञ्जलम्।
तादृशं फलमाप्नोति कुपुत्रैः संतरंस्तमः ॥

(१) क्षेत्रजादीनामौरसेन सहोपदेशात्तुल्यत्वाशका। तन्निषेधार्थमिदम्। न तुल्यमौरसेनोपकारं कर्तुं शक्ताः कुपुत्राः क्षेत्रजादयः। असत्यपि विशेषश्रवणे प्रकृतत्वादेव व्याख्यानयन्ति। अन्ये तु कुपुत्राननियुक्तासुसान्मन्यन्ते। एतदुक्तं भवति। नैतेषु सत्सु पुत्रवानहमिति कृतिनमात्मान मन्येत। किं तर्ह्यौरसोत्पादने पुनरपि यत्नवता भवितव्यम्। तमः पारलौकिक दुष्कृतकर्मज दुःखमृणानपाकरणनिमित्तं 'प्रजया पितृभ्य' इति। मेधा.

(२) कुपुत्रैर्दूरप्लवनासमर्थैः प्लवैः, गुणं पारगमनरूप क्लेशेनाप्नोति। कुपुत्रैरमुख्यपुत्रैः तमो नरक संतरन्। एतेन नात्यन्तफला एवेत्युक्तम्। मवि.

(३) तृणादिनिर्मितकुत्सितोडुपादिभिरुदक तरन्यथाविध फलं प्राप्नोति तथाविधमेव कुपुत्रैः क्षेत्रजादिभिः पारलौकिकं दुःख दुरुत्तरं प्राप्नोति। अनेन क्षेत्रजादीना मुख्यौरसपुत्रवत्संपूर्णकार्यकरणक्षमत्व न भवतीति दर्शितम्। *ममु.

(४) सत्पुत्रेष्वेव यतितव्यमित्यर्थवादेन द्रढयति—यादृशमिति। तमः पिण्डोदकाद्यदानकृतनरकम्। कुपुत्रैर्दत्त मुख्य न भवतीति भावः। मच.

(५) कुपुत्रैर्निर्गुणैरनियुक्तापुत्रादिभिश्च, तमो नरकम्। नन्द.

(६) कुप्लवैः कुत्सितप्लवैर्जल सतरन्यादृश गुणं दुःखमाप्नोति। कुपुत्रैः तमः नरकं सतरन् तादृशं गुणं दुःख आप्नोति। भाच.

क्षेत्रजस्य दायहरत्वविचारः

यवीयान् ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि।
समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः ॥

(१)ज्येष्ठस्य नियोगधर्मेण पितृवत्सोद्धाराऽतिदेशे प्राप्ते तन्निवृत्त्यर्थमुच्यते। समस्तत्र विभागः स्यात्। 'न चोद्धारं', 'न चैकाधिक हरेज्ज्येष्ठ' इति। नापि 'यत्किंचिदेव देयमि'ति। समः स्यात्केनोत्पादकेन पितृव्यकेण कनीयसा। अनियुक्तासुतत्व त्वभागार्हतैव वक्ष्यते। इदं च लिङ्गं, 'भ्रातरः समेत्य' इति सत्यपि भ्रातृशब्दे भ्रातृपुत्रेणाप्यसति भ्रातरि सह विभागः कर्तव्यः।+मेधा.

* शेष ममुगतम्। + चन्द्र. मेधागतम्।

× शेष ममुगतम्।

* दर्मी. व्याख्यान 'अपुत्रेणैव कर्तव्यः' इत्यत्रिवचने द्रष्टव्यम्।

(१) **दर्मी.५**; **बाल.२**।१३५ (पृ.२१९) मनुयमव्यासाः; **दच.२**; **कृभ.८७४** उत्त.

(२) **मस्मृ.९**।१६१; **मवि.** फल (गुण), **बाल.२**।१३५ (पृ.२४१); **भाच.** मविवत्.

(१) **मस्मृ.९**।१२०; **मिता.२**।१३५ यवी (कनी); **व्यक.१५३**; **विर.५४२**; **स्मृसा.६६**; **पमा.५३२** मितावत्; **स्मृचि.३३** यवी (जवी); **नृप.४१**; **चन्द्र.९०** (=) मितावत्; **व्यप्र. ४८३, ४९५** मितावत्; **विभ.४३**; **समु.१२८** ज्येष्ठ (श्रेष्ठ); **नन्द.** पुत्रावाति पाठः.

१ मन्यन्ते. २ सप्रज. ३ दरेऽति. ४ भ्रातरि सहिते सत्य.

(२) समस्तत्र पितृद्वारा । तस्मान्नापि देवरजाय समो भागो देयो न तु पितृव्यैः सह तस्य विभागे तस्य पितृज्यैष्ठ्यात् ज्येष्ठोद्धारः । एतेन यवीयसो भार्यायां ज्येष्ठेनापत्योत्पादने भागान्यूनतेत्यर्थादुक्तम् । मवि.

(३) यद्यपि 'समेत्य भ्रातरः सममि'त्युक्तं तथाप्यस्मादेव लिङ्गात्पौत्रस्यापि मृतपितृकस्य पैतामहे धने पितृव्यद्विभागोऽस्तीति गम्यते । *ममु.

(४) ज्येष्ठस्याविभक्तस्यापुत्रस्य भार्यायाम् ।
*विर.५४२

(५) यद्यप्यौरसप्रक्रमात्समभागभागित्वं क्षेत्रजस्य तन्निरूपितमेवोक्तमित्याभाति । तथापि वाक्यविरोधे प्रक्रमस्य बाध्यत्वाद्वीजिसमभागित्वपरं तदिति द्रष्टव्यम् । अत एवोत्तरवचने पितुर्वीजिनः प्राधान्यमुपन्यस्यति । 'सोऽपत्य भ्रातुरुत्पाद्य' इत्यनेनापि यस्य क्षेत्रजस्तदीयधन तस्मै दद्यादिति भ्रातृस्थानीयत्वात्तस्य स्वसमभागिता प्रतिपादयति । एवमन्यान्यप्युच्चावचभागान् क्षेत्रजादीना प्रतिपादयन्ति बृहस्पत्यादिवचनानि कथञ्चिद्व्यवस्थापनीयानि । व्यप्र.४८३-४८४

(६) पुत्रमिति जातावेकवचन, पुत्राविति पाठः । गुरुनियोगादुत्पादयेदिति व्याख्येयम् । इतरोऽनन्न इति वक्ष्यमाणत्वात् । नन्द.

उपसर्जनं प्रधानस्य धर्मतो नोपपद्यते ।
पिता प्रधानं प्रजने तस्माद्धर्मेण तं भजेत् ॥

(१) उपसर्जनमप्रधान क्षेत्रजः स प्रधानस्यौरसस्य तुल्य इत्येतदध्याहृत्य तद्धर्मतः शास्त्रतो न युज्यते । औरसः किल पितृवज्ज्येष्ठांश कृत्स्न लभते । अय तु क्षेत्रजोऽप्रधान तस्माद्धर्मेण त भजेत् । धर्मः पूर्वोक्ता भागकल्पना । ननु चायमपि ज्येष्ठः पुत्रो भवति किमित्यौरसवन्न लभतेऽत आह पिता प्रधान प्रजने । पिता जनकोऽत्राभिप्रेतः । स प्रधानमपत्योत्पादने । अय चाप्रधानः कनीयसा जनितः । उपसर्जन प्रधानस्य सममित्येवाध्याहृत्य श्लोको गम्यते । अर्थवादोऽय, पूर्वस्य ज्येष्ठांशनिषेधस्यार्थवादत्वाच्च प्रधानोपसर्जनशब्दयोर्यत्किंचिदालम्बनमाश्रित्य व्याख्या कर्तव्या । अन्ये पठन्ति 'तस्माद्धर्मेण तं त्यजेत्' इति, तदयुक्त सर्वत्र समभागस्योक्तत्वात् । अर्थवादत्वाच्चास्य न विकल्पाशका कार्या । मेधा.

(२) प्रधानस्य भ्रातृमध्ये ज्येष्ठस्य पितुः स्थाने उपसर्जनममुख्यः पुत्रो नोपपद्यते न युज्यते, अतो न ज्येष्ठोद्धारः । न चैव भागो न देयो यस्मात् प्रजने संताने तत्र तत्पितैव ज्येष्ठतया प्रधानम् । तथा च तस्यानुकल्पिकः पुत्रः संततिमध्ये साम्यसहायेऽतस्तमपि धर्मेण युक्तेन क्रमेण समभागेन भजेन्न न्यूनेन । तेन यत्र पितुरप्राधान्य तत्र न्यूनतापीति पूर्वोक्तशेषः । मवि.

(३) ज्येष्ठभ्रातुः क्षेत्रजः पुत्रोऽपि पितेव सोद्धारविभागी युक्त इतीमा शङ्का निराकृत्य पूर्वोक्तमेव द्रढयति—उपसर्जनमिति । अप्रधान क्षेत्रजः पुत्रः प्रधानस्य क्षेत्रिणः पितृधर्मेण सोद्धारविभागग्रहणरूपेण न संबध्यते । क्षेत्र्यपि पिता तद्द्वारेणापत्योत्पादने प्रधानम् । तस्मात्पूर्वोक्तेनैव धर्मेण विभागव्यवस्थारूपेण पितृव्येन सह त क्षेत्रज विभजेदिति पूर्वस्यैव शेषः । ममु.

(४) पिता (?) उपसर्जनमप्रधान क्षेत्रजः स प्रधानस्यौरसस्य तुल्य इति धर्मतो नोपपद्यते, यतस्तत्र पिता जनकः पितृव्य एव प्रधानमिति प्रकाशकारः । लक्ष्मीधरस्तु उपसर्जनत्वमत्रोपसर्जनमित्याह, फलतश्चात्र न विशेष. । धर्मेण शास्त्रोदितेन । विर.५४२

(५) तत्र हेतुरुपेत्यादि । अयमर्थः । प्रधानस्य ज्येष्ठभ्रातुः । यद्यप्युद्धारे नोपसर्जनता तस्मा अवश्यमुद्धारो देयस्तथापि तस्त्र मरणादौ तत्क्षेत्रे कनिष्ठस्य यस्मादुपसर्जनत्वमेव, पितुरेव जनने प्राधान्यात् तस्य चात्र कनिष्ठत्वात् अत एव नोद्धारभागः पितुः, समभागः पितृव्यैः सहेति । त क्षेत्रज धर्मेणोत्पादकपित्रनुरूपेण न तु मात्रनुरूपेण, 'ज्येष्ठता नास्ति हि स्त्रिया' इति वक्ष्यमाणो हेतुरिति भावः । मच.

(६) अत्र कारणमाह—उपसर्जनमिति । कनिष्ठप्रभवत्वादुपसर्जन अप्रधान, स पुत्रः प्रधानधर्मभाजन न भवतीत्यर्थः । पिता प्रधान प्रजने न माता तेन मातुः ज्येष्ठतया तस्य ज्यैष्ठ्यं नायाति । तस्मात्पितुः प्राधान्यात्

---

* शेष मेधागतम् ।

(१) **मस्मृ.**९।१२१; **मेधा.** 'त त्यजेत' इति पाठान्तरम्; **व्यक.**१५३; **विर**५४२ प्रजने (जनने); **व्यप्र**४८३; **विभ.**४३.

धर्मेण पूर्वश्लोकोक्तेन विधिना सम विभाग कनिष्ठप्रभवो भजेन्न ज्येष्ठधन मातुरिक्थम्। नन्द.

हरेत्तत्र नियुक्तायां जातः पुत्रो यथौरसः।
क्षेत्रिकस्य तु तद्बीजं धर्मतः प्रसवश्च सः॥

(१) यथौरस इत्येतदत्र विधीयते ज्येष्ठाशप्राप्त्यर्थमन्यदा[1]नोच्येत। अनेन विधानेन ज्येष्ठाश उद्धारः क्षेत्रजस्य प्राप्यते ज्येष्ठभार्याजातस्य। अतश्च यत्पुत्रसमाशभाक्त्व 'उपसर्जन प्रधानस्ये'त्यनेन, तस्यायमपवादः। उभयस्य च प्रामाण्यात्। विकल्पितस्य च गुणापेक्षया व्यवस्थान, न ह्यन्यस्य श्लोकस्य प्रयोजनमस्ति। प्रागुक्तत्वात्। सर्वस्य क्षेत्रिकस्य क्षेत्रस्वामिनस्तद्बीज, तत्कार्य करत्वात् प्रशसयैवमुच्यते। अत एवाह धर्मतः धर्मेण, शास्त्रीयया व्यवस्थया। तत्र प्रमाणान्तर दृश्येत रूपेण(?)। प्रसवः अपत्यम्। अर्थवादः श्लोकः। *मेधा.

(२) यदा तु यथोक्तविधिना जनितः क्षेत्रजस्तदाह। हरेद्धनम्। यथौरस इति समभागसिद्धयर्थम्। तच्च क्षेत्रिकस्यैव यतो भ्रातृबीजमपि तस्यैव तद्बीज विनियोगादत एव तस्यैव प्रसवोऽपीत्यर्थः। मवि.

धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव च।
सोऽपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम्॥

(१) विभक्तधनस्य भ्रातुरभावे विधिरयमुच्यते। पूर्वस्तु सह वसतः। एतावान्पूर्वोत्तरयोर्विध्योर्विशेषः। सोऽपत्यं भ्रातुरुत्पाद्य नियोगधर्मेणेति व्याख्येयम्। दद्यात्तस्यैव न पुनस्तदीयायै च मात्रे। अनेनैव च दर्शनेन स्त्रियो भरणार्हाः। न तु पतिधनेश्वर्य इति। अन्यथैव वक्ष्यमाणत्वात्। तस्य तद्धनम्। तस्य विभक्तधनस्य धन दद्यादिति। ×मेधा.

* मसु. मेधावद्भावः।

× अप, मच मेधागतम्। विवादरत्नाकरे विभक्तविषयता मेधावत् मविवच्च।

(१) **मस्मृ.**९।१४५; **मवि.** कस्य तु (कस्यैव); **समु.**१३१.

(२) **मस्मृ.**९।१४६, **मिता** २।१३५ च (वा), **अप.**२।१३५ मितावत्; **व्यक.**१५३; **विर.**५४२; **स्मृसा.**६६; **पमा.**५३२ मितावत्, **सुबो.**२।१३६ च (वा) सोऽ (अ); **स्मृचि.**३१ यो (तु); **नृप्र.**४१ मितावत्; **व्यप्र.**४८३,४९५ मितावत्; **व्यउ.**१५२ मितावत्; **समु.**१३८ मितावत.

१ नोच्यते. २ स्थाने ख.

(२) अनेनैतद्दर्शयति विभक्तधनेऽपि भ्रातर्युपरतेऽपत्य द्वारेणैव पत्न्या धनसंबन्धो नान्यथेति। यथाऽविभक्त धनेऽपि 'कनीयान् ज्येष्ठभार्याया पुत्रमुत्पादयेद्यदि। समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः॥' (मस्मृ.९।१२०) इति। *मिता.२।१३५

(३) दद्यात्तस्यैव न तु स्वयमप्यशहरः। मवि.

(४) यो मृतस्य भ्रातुः स्थावरजङ्गमं धनं पत्न्या रक्षणाक्षमया समर्पित रक्षेत्ता च पुष्णीयात् स नियोगधर्मेण तस्यामुत्पादितस्य भ्रातुरपत्यस्य दद्यात्। —ममु.

(५) धारेश्वरस्तु अनपत्यधन पत्नी गृह्णातीत्येवमादिवचनजातस्य प्रकारान्तरेण विषयव्यवस्थामाह। नियोगार्थिनी पत्नी अनपत्यस्य विभक्तस्य पत्युर्धन गृह्णाति। तथा च मनुः— धनमिति। विभक्तधने भ्रातरि मृते अपत्यद्वारेणैव पत्न्या धनसंबन्धः, नान्यथा। अविभक्तधनेऽपि तथैत्यभिप्रायः। +पमा.

(६) मिताटीका— विभक्तेऽपि भ्रातरि नियोग द्वारैव तत्पत्न्या धनग्रहणप्रतिपादक पूर्वपक्षदशायामुक्त तत्र मनुनैव नियोगस्य निन्दितत्वात्तत्परिहारः सुकर इति व्याख्यातृबुद्धिपरीक्षार्थ च सिद्धान्तार्थमदर्शयित्वैव वचनान्तराणि स्वाभिप्रेतार्थपरत्वेन दर्शितानि इति मन्तव्यम्। परिहारस्त्वेवम्। 'अन्यस्मिन् हि नियुञ्जाना धर्म हन्युः सनातनमि'त्यादिभिर्विधवाया नियोगस्य निन्दितत्वादवश्य नियोगेन विभक्तधनविधवाया भातृजायाया पुत्रमुत्पाद्य तद्धन तस्यैव दातव्यमिति न नियम्यते तेन वचनेन, अपि तु 'न स्त्री स्वातन्त्र्यमर्हती'ति स्त्रीणामेकाकितयाऽवस्थान निषिद्धमिति। देवरगृहेऽवस्थाने कृते स्त्रीणामप्रगल्भत्वेन तद्धनरक्षणे देवरेण च क्रियमाणे संततिलोभात् सा स्त्री शास्त्रसिद्धत्वाद्गर्हितमपि नियोग यद्यनुमनुते तदाऽपत्य उत्पन्ने देवरेण धनलोभो न कर्तव्यस्तस्यैव तद्धनं समर्पयेदित्येवमर्थपर व्याख्येय अनेकवचनविरोधादिति। अत एव 'धनं यो बिभृयादि'ति धारणपोषण-

* एष न सिद्धान्त·, मतान्तरमिदम्। व्यप्र. (पृ.४९५) मितागतम्।

÷ विभक्तविषयता मेधावत्।

+ स्वमत 'पिण्डगोत्रर्षिसंबन्धा' इति गौतमवचनव्याख्याने द्रष्टव्यम्।

वाचिनो भुज उपादानं मनुना कृतम् ।

सुबो.२।१३५ (पृ.६४)

[1]संस्थितस्यानपत्यस्य सगोत्रात्पुत्रमाहरेत् ।
तत्र यद्दत्थजातं स्यात्तत्तस्मिन्प्रतिपादयेत् ॥

(१) तस्मै तन्तवेऽपत्यायेत्यर्थः । तच्च नियोगार्थित्व रिक्थग्राहित्वे विरुद्धत्वात् कथमिव हेतुः । अप.२।१३५

(२) तन्तुमाहरेत् । सगोत्रात्पुरुषात् सतानमुत्पादयेत् इत्यर्थः । व्यक.१५९

(३) सगोत्रात्यदि तन्तुं संतानमाहरेदनियुक्तापि स्त्री तदा गोलकत्वेऽपि तस्य ज्ञात्यन्तराभावे क्षेत्रपतिधनहारित्वमित्यर्थः । एतच्च शूद्रा प्रत्येवोच्यत इति केचित् । अत एव तन्मते गूढजकानीनसहोढजा अपि शूद्रस्यैव पुत्रा भवन्ति न तु विप्रादीनामिति । मवि.

(४) अनपत्यस्य मृतस्य भार्या समानगोत्रान्पुरुषो गुरुनियुक्ता सती नियोगधर्मेण पुत्रमुत्पादयेत् तस्मिन्मृतविषये यद्धनजात भवेत्तत्तस्मिन्पुत्रे समर्पयेत् । 'देवराद्वा सपिण्डाद्वा' इत्युक्तत्वात् । सगोत्रान्नियोगप्राप्त्यर्थं तज्जस्य च रिक्थभागित्वार्थमिदम् । +ममु.

(५) अस्मै मृतस्वामिस्वत्वोपलक्षितमृक्थजात दद्यान्न स्वयमाददीतेति पारिजातः । प्रकाशकारस्तु राजैव सगोत्रद्वारा तमाहृय तस्मै दद्याच्चेत्याह । फलतोऽत्र न कश्चिद्विशेषः । *विर.५८९

(६) (हलायुधमते) एतेन नियुक्तायाः पुत्रमुत्पादयितुमिच्छन्त्याः पत्न्याः न भर्तृधनभागितेति प्रतिपादितम् । ×स्मृसा.१४०

(७) तत्र अनपत्ये पतौ 'धन यो विभृयादि'त्यस्यैवानुवादोऽयं न्यायस्य तुल्यत्वात् । तत्र जनको दद्यादत्र जननी दद्यादिति वा भेदः । ×मच.

(८) मिताटीका—इति तन्मरणोत्तरमपि वाग्दत्तादिविषये, नियोगविधिना सगोत्रात् सुतस्य उत्पादितस्य धनाधिकारित्वमनेन विधीयते ।

बाल.२।१४५ (पृ.२६४)

बन्धुदायादा अबन्धुदायादाश्च

पुत्रान्द्वादश यानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड्बन्धुदायादाः षडदायादबान्धवाः ॥

(१) वक्ष्यमाणसूत्रस्थानमेतत् । बन्धुशब्दो बान्धवपर्यायः । गोत्रहरा दायहराश्च षडितरे विपरीताः । यद्यत्र तत्र तदुपरिष्टान्निदर्शयिष्यते । मेधा.

(२) बन्धुदायादाः बन्धूना पितृव्यादीना पुत्रपत्नीदुहित्राद्यभावे दायस्य तद्धनस्य आदातारः । उत्तरे तु न दायादा दायग्राहकाः पितृव्यादीना, किंतु पुत्रपत्न्यादिविरहेऽपि तेषा गोत्रजादय एव धनहराः, अमी बन्धवः स्तूदकदानाद्यधिकारिणो भवन्ति । अदायादा, अबान्धवा एवेत्यस्यार्थः । मवि.

(३) यान्द्वादश पुत्रान् हैरण्यगर्भो मनुराह तेषा मध्यादाद्याः षड् बान्धवाः गोत्रदायादाश्च, तस्माद्बान्धवत्वेन सपिण्डसमानोदकाना पिण्डोदकदानादि कुर्वन्त्यनन्तराभावे च गोत्रदाय गृह्णन्ति । पितृरिक्थभाक्त्वस्य 'पुत्ररिक्थहराः पितुः' इति द्वादशविधपुत्राणामेव वक्ष्यमाणत्वात् । उत्तरे षट् न गोत्रधनहरा भवन्ति । बान्धवास्तु भवन्ति । ततश्च बन्धुकार्यमुदककियादि कुर्वन्ति । मेधातिथिस्तु षडदायादबान्धवाः इत्यायुत्तरषट्कस्यादायत्वमबान्धवत्व चाह । तन्न । औधायनेन बन्धुत्वस्याभिहितत्वात् । तदाह— 'कानीन च सहोढ च क्रीतं पौनर्भवं तथा । स्वयदत्त निषाद च गोत्रभाजः प्रचक्षते ॥' *ममु.

+ नन्द ममुगतम् । * शेष ममुगतम् ।

× स्मृसा. (पृ.७०) ममुगतम्, (पृ.१३४) विरगतम् ।

(१) **मस्मृ.**९।१९०; **अप.**२।१३५ सगोत्रात्पुत्र (गोत्रात्तन्तुं स) यद्दत्थजात (यो रिक्थभागः) तत्तस्मिन् (त्त तस्मै); **व्यक.**१५९ त्पुत्र (त्तन्तु) तत्र (यत्र) त्तस्मिन् (त्तस्मै); **मवि.** त्पुत्र (त्तन्तु); **विर.**५८९ त्पुत्र (त्तन्तु) त्तस्मिन् (त्तस्मै); **स्मृसा.** ७० त्पुत्र (त्तन्तु) त्तत्तस्मिन् (त्तस्मै तत्): १३४ विरवत्: १४० पाद (दाप) शेष विरवत्; **स्मृचि.**३२ त्पुत्रमा (त्त समा) त्तत्त ... येत् (त्स तद्गृहीत नेतरः); **बाल.**२।१४५ (पृ.२६४) त्पुत्रं (त्सुत); **समु.**१३८ तत्र (तस्य) शेष मविवत्; **भाच.** त्तस्मिन् (त्तस्मै).

× शेषं ममुगतम् ।

* मच, बाल.२।१३५ (पृ.२२४) ममवद्भावः ।

(१) **मस्मृ.**९।१५८; **अप.**२।१२८; **व्यक.**१५४ पूर्णा... मनुः (मनुः स्वायम्भुवो नृणाम्); **विर.**५४९; **विचि.**२३०; **व्यनि.** वसिष्ठः; **दमी.**३६; **बाल.**२।१३२ (पृ.१७५), २।१३५ [पृ.२२४ याना (धाना), पृ.२३४]; **समु.**१३९; **कृभ.**८८२ याना (धाना); **दच.**३०.

(४) एवमौरसाना सवर्णानां समवाये विभाग उक्तः, इदानीमौरसानां क्षेत्रजादीना च समवाये विभाग विवक्षन्पुत्राणां द्वैविध्य तावदाह—पुत्रान् द्वादश यानिति। अदायादबान्धवा इत्यत्र दायादत्व बन्धुत्व च निषिध्यते। *नन्द.

[1]औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्॥
[2]कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः॥

(१) अस्य कोऽर्थः। क्षेत्रजादयः पञ्च सत्यौरसेऽर्थंशभाजः। कानीनादयस्तु पूर्वाभाव एव। एतेन वासिष्ठ व्याख्यातम्। विश्व. २।१३६

(२) श्लोकद्वयेन संख्यानिर्देशो वर्गद्वयप्रदर्शनार्थः। मेधा.

(३) तदपि स्वपितृसपिण्डसमानोदकाना संनिहितरिक्थहरान्तराभावे पूर्वषट्कस्य तद्रिक्थहरत्वमुत्तरषट्कस्य तु तन्नास्ति। बान्धवत्वं पुनः समानगोत्रत्वेन सपिण्डत्वेन चोदकप्रदानादिकार्यकरत्व वर्गद्वयस्यापि सममेवेति व्याख्येयम्। पितृधनहारित्व तु पूर्वस्य पर्वस्याभावे सर्वेषामविशिष्टम्। +मिता.२।१३२

(४) बान्धवा गोत्रभाज इत्यर्थः। मभा.२८।३४

(५) अत्र पुत्रिकापुत्रस्यौरसतुल्यतयाऽपृथगभिधानम्। मवि.

(६) पुत्राणां द्वादशत्वं विभजन्दायादानाह— औरस इति द्वाभ्याम्। एषा लक्षणानि वक्ष्यमाणानि। अत्रापि पूर्वषट्काभावे उत्तरोत्तरो गोत्ररिक्थभाक्। तथा च बौधायनः— 'कानीनं च सहोढं च क्रीतं पौनर्भव तथा। स्वयदत्त निषाद च गोत्रभाजः प्रचक्षते॥' इति। अत्र गोत्रपदं रिक्थाद्युपलक्षण गोत्ररिक्थहराः पितुरित्येकवाक्यनिर्दिष्टत्वात्। मच.

(७) पितृरिक्थहरत्व तु सर्वेषामपि पूर्वपूर्वाभावे समानमेवेति तद्दायादादायादत्वविभागो नोपपद्यते। 'पूर्वाभावे परः पर' इति वचनात्। 'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः।' (मस्मृ.९।१६३) इत्युक्त्वा— 'न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः।' (मस्मृ. ९।१८५) इति वचनस्य गौणपुत्राणामेव सर्वेषां पितृरिक्थहारित्वप्रतिपादनपरत्वाच्च। दायादशब्दस्य 'दायादानपि दापयेत्' इत्यादौ पुत्रव्यतिरिक्तहारिष्वेव प्रचुरप्रयोगाच्च। +व्यप्र.४८५

(८) मिताटीका — अत्र कैश्चित्पुत्रिकापुत्र विहाय शौद्रमूरीकृत्य द्वादशत्वमुक्त कैश्चिद्विपरीतमुक्तं, कैश्चित् कृत्रिम विहाय तमङ्गीकृत्य तदुक्तम्। न च शौद्रस्यौरसत्वेनैव संग्रहात्पृथगुक्तिर्व्यर्था। अत एव कैश्चित्तस्य गणन न कृतम्। अत एव— 'चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः। क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः॥' (यास्मृ.२।१२५) इति भिन्नजातीयाना विभाग उक्तः। अत एव च सजातीयेष्वयमित्यत्र कानीनाद्यनुरोधेन सजातीयत्वमूरीकृत्य मूर्धावसिक्तादीनामौरसेऽन्तर्भाव स्वीकृत्य 'शूद्रापुत्रस्त्वौरसोऽपि कृत्स्नभागमन्याभावेऽपि न लभते' इति विज्ञानेश्वरेण व्याख्यातमिति वाच्यम्। तस्य तल्लक्षणानाक्रान्तत्वात्। तथाहि। द्विविधस्तावत् शूद्रापुत्रः। तत्र— 'विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम्। अम्बष्ठः शूद्र्या निषादो जातः पारशवोऽपि वा॥ वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ। वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः॥' (यास्मृ.१।९१,९२) इति मूलेन प्रतिपादित एकः। विष्णुनाऽपि, 'यत्र क्वचनोत्पादितश्च द्वादश' इति। वासिष्ठेनापि, 'शूद्रापुत्र एव षष्ठो भवती-

---

* शेष ममुगतम्।

+ पमा., सवि., विता. मितावद्भावः।

(१) **मस्मृ.**९।१५९; **विश्व.**२।१३६; **मिता** २।१३२; **अप.**२।१२८; **व्यक.**१५४; **मभा.**२८।३४; **विर.**५४९ **वास्त्र (वास्तु)**; **पमा.**५१७; **सुबो.**२।१३२; **विचि.**२३०; **नृप्र.**४०; **सवि.**३९४ दत्तः कृत्रिम (पुत्री दत्तिम); **व्यप्र.** ४८४; **विता.**३४७; **बाल.**२।१३५ (पृ.२२४,२३५); **समु.**१३९; **दृच.**३० विरवत्.

(२) **मस्मृ** ९।१६०; **विश्व.**२।१३६; **मिता.**२।१३२; **अप.**२।१२८; **व्यक.**१५४; **विर.**५५०; **पमा.**५१७; **सुबो.** २।१३२; **विचि.**२३०; **नृप्र.**४०; **सवि.**३९४; **दमी.**३० उत्त.; **संप्र.**२११ उत्त.; **व्यप्र.**४८४; **विता.**३७४; **बाल.** २।१३५ (पृ.२२४,२३५); **समु.**१३९; **दृच.**३०.

+ शेषं मितागतम्।

त्याहुरिति।' (वस्मृ.१७।३५) बौधायनेनापि, 'द्विजातिप्रवरात् शूद्रायां जातः कामात्पारशव' इति। (बौध.२।२।३३–३४) मनुनाऽपि, 'य ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम्। स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः॥' (मस्मृ.९।१७८) इति। द्वितीयस्तु द्विजातेर्दास्यामुत्पन्नः। तत्राद्यस्य न तदभावे कृत्स्नधनहारित्वम्। 'यद्यपि स्यात्तु सत्पुत्रो यद्यपुत्रोऽथवा भवेत्। नाधिकं दशमाद्द्याच्छूद्रापुत्राय धर्मतः॥' इति मनूक्तेः (मस्मृ.९।१५४)। अत एव क्षत्रियावैश्यापुत्रयोः सवर्णापुत्राभावे सर्वधनग्रहणं सिद्धम्। द्वितीयस्तु 'जातोऽपि दास्या शूद्रेणे'त्यत्र शूद्रग्रहणात्पितुरिच्छयाऽपि नाश भजते नाप्यर्द्धं दूरत एव कृत्स्नम्। किं तु 'अनुकूलश्चेज्जीवनमात्र लभते' इति। औरसलक्षण तु मूले 'औरसो धर्मपत्नीज' इति वसिष्ठोऽप्युक्तः। विष्णुरपि, 'अथ द्वादश पुत्रा भवन्ति। स्वक्षेत्रे सस्कृतायामुत्पादितः स्वयमौरसः प्रथम' इति। देवलोऽपि 'संस्कृताया च भार्याया स्वयमुत्पादितो हि यः। औरसो नाम पुत्रः स' इति। आपस्तम्बोऽपि 'सवर्णा पूर्वशास्त्रविहितां यथर्तु गच्छतः पुत्रास्तेषा कर्मभिः संबन्धः। दायेनाव्यतिक्रमश्चोभयोरिति।' (आध.२।१३।१)बौधायनोऽपि, 'सवर्णाया संस्कृतायां स्वयमुत्पादितमौरस पुत्रं विद्यादिति'। (बौध.२।२।१४) श्रुतिश्च 'अङ्गादङ्गादिति' 'आधत्त पितरो गर्भं कुमारं पुष्करस्रजम्। यथेह पुरुषस्यात्मा तस्मात्त्वमिह जायसे॥' 'आत्मा पुत्र इति प्रोक्तः पितुर्मातुरनुग्रहात्। सर्वान् नस्त्रायसे यस्मात्पुत्रस्तेनासि संज्ञितः॥' इति च। 'सवर्णा धर्मविवाहोढा धर्मपत्नी तस्या जात औरसः पुत्रो मुख्यः' इत्यत एव विज्ञानेश्वरेण व्याख्यातम्। मनुनाऽपि—'स्वक्षेत्रे सस्कृताया तु स्वयमुत्पादयेद्धि यम्। तमौरस विजानीयात्पुत्र प्राथमकल्पिकम्॥' (मस्मृ.९।१६६) इति।

एवं च शूद्रापुत्रस्य द्विविधस्यापि तल्लक्षणानाक्रान्तत्वात्पृथगुक्तिः। अत एव मूर्धावसिक्तादीनामौरसेष्वन्तर्भाव इति विज्ञानेश्वरेणोक्तम्। शूद्रापुत्रस्त्वौरसोऽपीत्यत्र तु स यौगिको न तु रूढः, केषाचित् गणनाकरणे बीज तु कृत्स्नधनहारित्वाभावादेव। मूलेन तु चतुरित्यादिना क्षत्रियापुत्रादिवत्तस्य कथनं प्राक् कृतमेव। मनुनाऽपि पूर्वं पुत्रिकापुत्रस्य 'दौहित्र एव च हरेदि'त्यादिना कथनात्तत्रानुक्तिरिति न न्यूनता। सर्वथा ततः पुत्राधिक्यलाभान्न द्वादशत्वं नियतम्। अत एव 'ननु क्षेत्रजाद्यपेक्षया पुत्रिकापुत्रस्य पुत्रत्वेनाधिक्ये द्वादशसंख्या तिरेक आप्नोति। भवतु को दोषः त्रयोदशोऽयं पुत्रोऽस्तु' इति मेधातिथिना व्याख्यातम्। अत एव विज्ञानेश्वरेण 'भ्रातॄणामि'त्यस्य तथा व्याख्याने संख्याविरोधरूपदोषोद्भावनं न कृतम्। अत एव च बृहस्पतिः—'पुत्रास्त्रयोदश प्रोक्ता मनुना येऽनुपूर्वशः। संतानकारणात्तेषामौरसः पुत्रिका तथा॥ आज्य विना यथा तैल सद्भिः प्रतिनिधिः स्मृतम्। तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना॥' इति। एवं च तत्र तत्र द्वादशोक्तिः। तत्र तत्र परिगणितानां स्फुटतया सख्यासोधनद्वारा न्यूनत्वव्यवच्छेदनार्था, नाधिक्यव्यवच्छेदार्था। तत्रान्येषा यथासभवमन्तर्भावमभिप्रेत्य वेति न दोषः। अन्यथा तेन तत्र तस्य गणनात्तस्यान्यत्रागणनान्मिथो विरोधः स्पष्ट एव। एवमेवकारोऽपि वासिष्ठो योज्यः। तस्मात्तदाधिक्ये न दोषः।

बाल.२।१३५ (पृ.२३५-२३६)

(९) पुत्रिकापुत्रस्य पौत्रतुल्यतया पुत्रेष्वनुपादानं क्षेत्रजशब्देन संगृहीतत्वाच्चेति। नन्द.

मुख्यगौणपुत्राणा दायहरत्वक्रमः

[1]श्रेयसः श्रेयसोऽलाभे पापीयान् रिक्थमर्हति।
बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः॥

(१) श्रेयानुत्तमः। पापीयानपकृत्तमः। तन्निषेधश्च औरसपुत्रिकाजक्षेत्रजगूढजकानीनपौनर्भवदत्तकक्रीतकृत्रिमस्वयदत्तसहोढजापविद्धानुक्रमेण परिगणय्य याज्ञवल्क्येन 'पिण्डदांऽशहरश्चैषा पूर्वाभावे परः परः' इति विशेषतो विधानात्तद्वचनानुसारेण कर्तव्यः। अत्र तु क्रमपाठो न पूर्वपूर्वोत्कर्ष इति आपादनार्थः। क्रमपाठोऽत्र स्वबन्धुदायादबान्धवविवेकपरत्वादिति। सदृशा औरसा एव दत्रिम एव त्वित्यादि (?)। मवि.

(१) मस्मृ.९।१८४ ग.पुस्तके, लाभे (भावे); व्यक.१५५; गौमि.२८।३२ लाभे पापी (भावे यवौ) पू.; उ.२।१४।२ लाभे (भावे) पू.; विर.५५२ उक्त; स्मृसा.६७ उक्त, पू.; व्यप्र.४८६ उक्त; व्यउ.१४८ पू.; बाल.२।१३१, (पृ.१७७), २।१३५ (पृ.२३६, मनुशखलिखिताः, २४०); समु.१२८ उत्त., ११७ उक्त, पू.; दच.३० गौमिवत्.

(२)औरसादीना सर्वेषा पुत्राणा प्रकृतत्वादौरसादीनुपक्रम्य 'तेषा पूर्वः पूर्वः श्रेयान्स एव दायहरः स चान्याग्निभृयादि'ति विष्णुवचनात्। औरसादीना पुत्राणा पूर्वपूर्वाभावे परः परः रिक्थमर्हति। पूर्वसद्भावे परस्यवर्धनं स एव कुर्यात्। एव च सिद्धे, शूद्रापुत्रस्य द्वादशपुत्रमध्ये पाठः क्षेत्रजादिसद्भावे धनानर्हत्वज्ञापनार्थत्वेन सार्थकः। अन्यथा तु क्षत्रियावैश्यापुत्रयोरौरसत्वात्क्षेत्रजादिसद्भावेऽपि धनं लभेत्, पूर्वस्य परस्यवर्धनमात्र चापवादेतरविषये द्रष्टव्यम्। क्षेत्रजगुणवदत्तकपुत्रयोः पञ्चम पष्ठ वा भागमौरसो दद्यादिति विहितत्वात्। यदि तु समानरूपाः सौमर्भवादयो बहवः पुत्रास्तदा सर्व एव विभज्य रिक्थं गृह्णीयुः। *ममु.

(३) सदृशा गुणवत्तया तदुपाधिना वा। विर.५५२

(४) औरसमारभ्य सहोढान्ताना अवयवानुवृत्या श्रेयस्त्वम्। तत्राप्यौरसपुत्रिकापुत्रयोः स्वात्मरूपपत्न्युभयानुवृत्त्याऽतिश्रेयस्त्वम्। क्षेत्रजादिपञ्चाना तु स्ववयवानुवृत्त्यभावेन तदपेक्षया जघन्यत्वम्। दत्तकादिपञ्चाना तु अवयवसंबन्धाभावेनातिजघन्यत्वम्। श्रेयानौरसादिः सप्तविधः। पापीयान् दत्तकादिः। व्यउ.१४७-१४८

(५) मिताक्षरा—दायग्रहणक्रमः। औरसपुत्रस्तत्पुत्रस्तत्पुत्रः। तत एकादश पुत्रिकापुत्रादयः पूर्वपूर्वाभावे क्रमेण। एवं तत्पुत्रादयोऽपि।

बाल.२।१३५ (पृ.२३६)

तदभावे पत्नी। ततो दुहिता। ततो दौहित्रः। ततो दौहित्री। ततः पिता। ततो माता। ततो भ्राता। ततो भगिनी। ततस्तयोः क्रमेण सुतः सुता च। ततो गोत्रजादय इति। बाल.२।१३५ (पृ.२३७)

इद च नौरसपरम्। 'एक एवौरसः पुत्रः' 'ऊर्ध्वं पितुश्च मातुश्च' इत्यादिनैव तद्विभागोक्तेः। किं तु गौणानेकपरम्। अनेन च दत्तकवत् कृत्रिमस्यापि सिद्धिरर्थभेदेन। न च—'दत्तौरसेतरेषा तु पुत्रत्वेन परिग्रहः।' इति द्वैतनेन पुत्रान्तरस्य कलौ निषेधात् कथ कृत्रिमसिद्धिरिति वाच्यम्। दत्तपदेन तस्याप्युपलक्षणत्वात्। 'औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः।' इति कलिधर्मप्रस्तावे पराशरस्मरणात्। न चैवं क्षेत्रजस्यापि तदापत्तिः। नियोगनिषेधेनैव तन्निषेधात्। तत्र क्षेत्रज इति तु औरसविशेषणम्। यदि तु तत्र क्षेत्रजवत् कृत्रिमक इति दत्तस्य विशेषणममुख्यद्वारा प्रतिनिधित्वसूचक तदा माऽस्तु सः, दत्तकाशे तु न विवाद इति दिक्।

बाल.२।१३५(पृ.२४०)

अनेकविधपुत्राणां औरसक्षेत्रजादीनां समवाये दायहरत्वविचारः

यैर्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ।
यस्यस्य पैतृकं रिक्थं स तद्गृह्णीत नेतरः ×॥

(१) क्लीवस्य प्रागुपात्ते क्षेत्रजे 'यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य वे'ति, पश्चादौर्ध्वदेहिकेन कथचित् क्लीवत्वनिवृत्तौ, सभवति क्षेत्रजौरसयोर्युगपद्भावः। किन्तु 'तयोर्यस्य पिण्डमि'ति नोपपद्यते; क्षेत्रिक एव तस्य पिता, तदीयमेवासौ रिक्थ लभेतेति। जनयितुर्यदि नाम पितृव्यपदेशः स्यादपि जननहेतुकः, तस्मादपि पुत्रः सुतोऽयमुपचारात्क्षेत्रज इत्युक्तः। तत्रौरसे बाले मातरि धने गृहीते कथचिदपचारिणा पुमपत्यमुत्पादित भवतीति। तेन च तदायत्तमेव प्रीत्यादिना धन कृत, न चास्य सपिण्डाः सन्ति। अस्यामवस्थाया यस्यस्य पिण्डमुपपद्यते। एतदेव लिङ्गमनियुक्तासुतादयोऽसत्सु सपिण्डेषु जनयितृ रिक्थहरा भवन्तीति। अन्ये तु व्याचक्षते। सति दायादे समुत्पन्नः क्षेत्रजः स जनयितुर्लभते रिक्थं न क्षेत्रिकात्। सत्यौरसे, उक्तश्च तस्य सत्यौरसे भागः 'औरसक्षेत्रजौ पुत्रौ पितृ रिक्थस्य भागिनौ' इति। तथा 'षष्ठ तु क्षेत्रजस्याशम्' इति। एकरिक्थिनौ एकहस्तस्थधनौ यथा च

---

* स्मृसा. ममुगतम्। मच ममुवद्भावः।

× व्यप्र. व्याख्यान 'यवीयान् ज्येष्ठभार्यायां' इति मनुवचने (पृ.१३१७) द्रष्टव्यम्।

(१) **मस्मृ.**९।१६२ यस्य (यस्य यत्); **दा.**१४८; **अप.** २।१३२ स तद् (तस्य); **व्यक.**१५३; **विर.**५४३; **स्मृसा.** ६६; **स्मृचि.**३३; **दात.**१६९; **चन्द्र.**९० तरः (तरत्) :९१ तरः (तरत्) उत्त., विष्णुः; **व्यप्र.**४८३ मस्मृवत्; **व्यउ.**१४९; **विता.**३८० अपवत्; **बाल.** २।१२० मस्मृवत्, बृहस्पतिः : २।१४५ (पृ.२६४) प्रथमः पादः; **समु.** १३८; **विच.**६२.

१ पथे क. २ (क्षेत्र...तस्य पिता०). ३ तृध.
४ चारिणः. ५ न च,

तौ भवतस्तथा दर्शितम्। *मेधा.

(२) अनियोगोत्पन्नक्षेत्रजस्य औरसेन सह विभागमाह मनुः—यद्येकेति। यस्य बीजाद् यो जातः स तस्य धन गृह्णीयात् इतरोऽन्यबीजजो न गृह्णीयादित्यर्थः। अत एव नारदः—'द्वौ सुतौ विवदेयाता द्वाभ्यां जातौ स्त्रिया धने। तयोर्यद् यस्य पित्र्यं स्यात् स तद् गृह्णीत नेतरः॥' (मस्मृ.९।१९१)। यत्पितृदत्त यद्धन स्त्रियास्तत्पुत्रस्तद्बीजजस्तद्धनं गृह्णीयात् नान्य इत्यस्तु किं विस्तरेण। ×दा.१४८-१४९

(३) एतत्क्षेत्रजस्य द्व्यामुष्यायणस्य बीजिधनेऽधिकारित्वं विधत्ते। अप.२।१३२

(४) अविभक्ते भ्रातरि मृते तद्धन गृहीत्वा तत्पत्न्या देवरेण पुत्र उत्पादिते तस्यापि सपुत्रत्वे पश्चात्तस्मिन्मृते विभागे क्रियमाणे क्षेत्रजस्य क्षेत्राधिपस्य पितुर्भागमात्र न तु बीजिधनादपि भागोऽस्तीत्यर्थः। मवि.

(५) 'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥' इति याज्ञवल्क्योक्तविषये, यदा क्षेत्रिकस्य पितुः क्षेत्रजानन्तरमौरसः पुत्रो भवति तदा तावौरसक्षेत्रजावेकरिक्थिनौ एकस्य पितुर्व्यापि रिक्थार्हौ भवतस्तथापि यद्यस्य जनकसबन्धि तदेव स गृह्णीयान्न क्षेत्रजः क्षेत्रिकपितुः। यच्च वक्ष्यति। 'षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्। औरसो विभजन्दाय' इति तत्पुत्रबहुत्वस्य। यच्च याज्ञवल्क्येनोभयसंबन्धि रिक्थहरत्वमुक्त तत्क्षेत्रिकपितुरौरसपुत्राभावे बोद्धव्यम्। मेधातिथिगोविन्दराजौ तु औरसमनियुक्तापुत्र च विषयीकृत्येम श्लोकं व्याचक्षाते। तन्न। अनियुक्तापुत्रस्याक्षेत्रजत्वात्। 'अनियुक्तासुतश्च' इत्यनेन तस्य रिक्थग्रहणनिषेधात् 'यद्येकरिक्थिनावि'त्यनन्यायाच्च। +ममु.

(६) क्षेत्रजोऽत्रानियुक्तादुत्पन्नः। पैतृकमृक्थं पित्रा तन्मात्रे पुत्रप्रतिसधानार्थं समर्पितम्। अन्ये तु यो यस्य पिता, तद्धनं स गृह्णीयादिति ऋज्वेव वदन्ति। ×विर.५४३

(७) एकत्रस्थितभ्रातृद्वयविषयमेतत्। स्मृसा. ६६

(८) एकऋक्थिनौ एकस्या जातौ ऋक्थिनौ। +दात.१६९

(९) उत्पादककनिष्ठस्य तु परोक्षे तदौरसेन ज्येष्ठक्षेत्रजस्य विभागेष्वपि स्वपितृभागग्राहिता द्वयोरपि। चन्द्र.९०

(१०) द्व्यामुष्यायणसत्वे औरसोत्पत्तौ मनुः—यद्येकेति। अस्य क्षेत्रजस्य, सः औरसः। तेन क्षेत्रजदत्तकादिसत्वे औरसोत्पत्तौ क्षेत्रजदत्तकादीना विभाग एव नास्तीति केचित्। वस्तुतस्तु याज्ञवल्क्यीय गुणिपरं मानवीयं त्वगुणिपरमिति। व्यउ.१४९

(११) जारजस्यौरसेन सह विभागे मनुराह—यद्येकेति। स्वस्वबीजिनोर्धनं गृह्णीत नान्यस्येत्यर्थः। विता.३८०

(१२) एकरिक्थिनावविभक्तधनौ यत्र कुले भ्रात्रोरेकस्यौरसः पुत्रोऽपरस्य क्षेत्रजस्तौ च भ्रातरौ विभक्तधनौ मृतौ विभक्तधनयोरपि मृतयोः पश्चात्पितामहो मृतस्तद्विषयमेतद्वचनम्। नन्द.

[1]द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने।
तयोर्यद्यस्य पित्र्यं स्यात् स तद् गृह्णीत नेतरः॥

(१) एकः स्वभर्तृजोऽन्यो गोलकः पौनर्भवो वा, उभयोश्च पत्योर्धन मातरि स्थित तदा स्वबीजिधनव्यवस्थया ग्राह्यमित्यर्थः। स्त्रिया जातौ धने पित्र्ये विवदेयातामित्यर्थः। नेतरत् स्वमातृपत्यन्तरधनम्। मवि.

(२) 'यद्येकरिक्थिनौ स्यातामि'त्यौरसक्षेत्रजयोरुक्त,

* अत्र भाष्ये 'यद्येकरिक्थिनौ स्याता' 'द्वौ तु यौ विवदेयाता' इति श्लोकद्वयव्याख्यानपरः प्रतीयते।

× विच. दावद्भावः।

+ मच. ममुवद्भावः, मतान्तरपरामर्शस्तु अशुद्धिसंदेहान्नोद्धृतः।

१ दर्शयति.

× दावद्भावः। + शेष दागतम्।

÷ बाल. व्याख्यान 'अप्रजस्त्रीधन' इति याज्ञवल्क्यवचनोद्धृतमन्वर्थमुक्तावल्या गतम्।

(१) मस्मृ.९।१९१ स्यात् स तद् (स्यात्तत्स); व्यक.१५९ स्यात्स तद् गृ (स्यात्तत्सगृ); मवि. नेतरः (नेतरत्); विर. ५८८; स्मृसा.७०; व्यनि. भरद्वाजः; बाल.२।१२० स्त्रिया (स्त्रियां): २।१४५ (पृ.२६४) मस्मृवत्; समु.१३६ भरद्वाजः.

इदं त्वौरसपौनर्भवविषयम्। यदोत्पन्नौरसभर्तृर्मृतत्वात् बालापत्यतया स्वामिधन स्वीकृत्य पौनर्भवभर्तुः सकाशात्पुत्रान्तरं जनयेत् तस्यापि च पौनर्भवस्य भर्तृर्मृतत्वाद्रिक्थहरान्तराभावाद्धन गृहीतवती, पश्चात्तौ द्वाभ्या जातौ यदि विवदेयाता स्त्रीहस्तगतधने तदा तयोर्यस्य यजनकस्य धन स तदेव गृह्णीयान्न त्वन्यपितृजोऽन्यजनकस्य। *ममु.

(३) अत्र स्त्री वेश्यापुनर्भूस्वैरिणीतरेति पारिजातः। विर.५८८

(४) द्वावौरसपौनर्भवौ विवदेयाता धनमावाभ्या ग्राह्य पोषण ते कार्यमिति। नेतरः अन्यपितृकमन्यो न गृह्णीयादिति भावः। अथवा अध्यावहनिकादिस्त्रीधनमात्रविषय, अत एव स्त्रिया धनमिति समाख्या सगच्छते। मच.

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः।
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्॥

(१) औरसवचन सर्वक्षेत्रजाद्युपलक्षणार्थम्। य एवैकः पुत्रत्वाद् रिक्थभाक्, स एव कृत्स्न पितृधन गृह्णीयात्। इतरेषामानृशस्यार्थं प्रजीवनमात्रं कुर्यादित्यर्थः। विश्व.२।१३६

(२) सत्यौरसे क्षेत्रजादन्ये सर्वेऽदायादाः प्रजीवनमौरसाल्लभेरन्। आनृशस्यमपाप, अददत्यापमाप्नोति। मेधा.

(३) तदपि दत्तकादीनामौरसप्रतिकूलत्वे निर्गुणत्वे च वेदितव्यम्। ×मिता.२।१३२

(४) ये तु पितुरौरसाच्च भ्रातुर्हीनवर्णास्ते ग्रासाच्छादनमात्राधिकारिणः। तदाह मनुः—एक एवेति। दा.१४८

(५) व्याध्यादिना प्रथमौरसपुत्राभावे क्षेत्रजादिषु कृतेषु पश्चादौषधादिना विगतव्याधेरौरसे उत्पन्ने सतीदमुच्यते। ममु.

(६) शेषाणा, ये तत्र तत्राशभागित्वेन निषिद्धास्तेषामानृशस्य दया, प्रजीवनं भरणम्। विर.५४२

(७) तदौरसप्रशसापरमेव न चतुर्थांशभागनिषेधपरम्। अन्यथा चतुर्थांशभाक्त्वप्रतिपादकवसिष्ठकात्यायनवचनयोरानर्थक्यप्रसङ्गात्। पमा.५१६

(८) तदपि दत्तकादीना औरसप्रतिकूलत्वे निर्गुणत्वे च वेदितव्यमिति विज्ञानेशः। सोमेश्वरस्तु—दत्तादिव्यतिरिक्ताना कानीनगूढोत्पन्नसहोढपौनर्भवानामेव जीवनदानमिति शेषशब्दार्थ इत्याह। भारुचिस्तु 'एक एवौरसः पुत्रः' इत्यादिवचनात् एकपुत्रविषये दत्तादिस्वीकारोऽस्ति, तथा च दत्तपुत्रादिस्वीकारात्पूर्व स्थितस्य पुत्रस्य दत्तादीना प्रजीवनप्रदान नान्येषामित्याह। अयमेव पक्षः श्रेयान्। सवि.३९३-३९४

(९) तदपि दत्तकादीनामौरसप्रतिकूलत्वेऽत्यन्तनिर्गुणत्वे च चतुर्थांशादिनिषेधपर कानीनादिपरं च। +व्यप्र.४८२

(१०) तत्र सवर्णोत्तमजारजा औरसे सति क्षेत्रजसमत्वाच्चतुर्थांशहराः। असवर्णास्तु जीवनोपयुक्तभाजः। ×विता.३७५

षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्।
औरसो विभजन्दायं पित्र्यं पञ्चममेव वा॥

(१) अत्र ('औरसक्षेत्रजौ' इत्यत्र च) क्षेत्रजः पुत्रिकापुत्र एवाभिप्रेतः। नन्वसावौरसतुल्य एव। सत्यम्। तेनैव चोक्तं 'पितृरिक्थस्य भागिनाविं'ति। कथ तर्हि 'षष्ठ पञ्चममेव वें'ति। जनकपितृधनाभिप्रायमेवैतत्।

---

* नन्द. ममुगतम्। × वीमि. मितावद्भावः।

(१) **मस्मृ.**९।१६३; **विश्व.**२।१३६; **मेधा.**९।१४१; **मिता.**२।१३२; **दा.**१४८; **व्यक.**१५३; **स्मृच.**२८८ पू.; **विर.**५४२; **स्मृसा.**६७ पू.; **पमा.**५१५; **रत्न.** १४२; **विचि.**२३३-२३४; **व्यनि.** (=); **नृप्र.**४०; **सवि.** ३९३ र्थं (त्तु); **चन्द्र.**९१ सुनः (स्तुनः) पू.; **वीमि.**२।१२८; **व्यप्र.**४८२:४८५ पू.; **विता.३७०** सुनः (स्तुनः) त्तु प्र (त्तूप):३७५; **राकौ.**४५४ **पू.**; **बाल.**२।१३५ (पृ.२१६); **समु.१३९; दच.२९** बृहस्पतिः.

+ मितावद्भावः। × (पृ. ३७०) मितावद्भावः।

(१) **मस्मृ.**९।१६४; **विश्व.**२।१३६; **मिता.**२।१३२; **दा.** १४७; **अप.**२।१२७; **व्यक.**१५३ त्रैपैतृका (त्रैपित्रिका); **गौमि.** २८।३२; **उ.**२।१४।२; **विर.**५४३; **स्मृसा.**६७ तु (च) प्रदद्यात् (दद्याद्वै) वा (च); **पमा.**५१६; **व्यनि.**जन् (जेत्); **नृप्र.**४० वा (च); **सवि.**३९४; **चन्द्र.**९१; **व्यप्र.**४८२; **व्यउ.**१४८ वा (च), **विता.**३७३ **वा** (च); **राकौ.**४५४ जन् (जेत्) वा (च), **बाल.**२।१३५ (पृ.२३९) प्रथमपादः; **समु.१३९.**

मातामहस्य त्र्यसावौरसतुल्यत्वात् कृत्स्नाशार्हः। पितुः पुनः परार्थेनोत्पादितत्वान्नष्टः (षष्ठाशः)। तदभिप्रायमेव च वासिष्ठं 'तृतीयः पुत्रिकापुत्र' इति। पित्रा क्षेत्रत्वेनैवापत्योत्पादनायान्यस्मै दीयते, ततस्तस्यासौ क्षेत्रज इति शक्यते वक्तुम्। जनयितुरपि परार्थमुत्पादकत्वात् संस्कृतत्वेन क्षेत्रमात्रतया स्त्रीसम्बन्ध इति क्षेत्रजव्यपदेशः। तत्रौरसाविशिष्ट पितृरिक्थभाक्त्व मातामहाभिप्रायम्। भागवैषम्य तु जनकाभिप्रायमित्यविरोधः। पञ्चमषष्ठाशयोस्त्वौरसस्येच्छया विकल्पः। अन्यत्राप्येवमेव भागवैषम्यकल्पना। विश्व.२।१३६

(२) क्रीतादिपुत्रवत्प्रजीवनमात्रे प्राप्ते क्षेत्रजस्य भागविकल्पोऽयमुच्यते। स च गुणापेक्षः। मेधा.

(३) प्रतिकूलत्वनिर्गुणत्वसमुच्चये षष्ठमंश, एकतरसद्भावे पञ्चममिति विवेक्तव्यम्। *मिता.२।१३२

(४) ये तु पितुर्हीनवर्णा औरसपुत्राच्चोत्तमवर्णास्ते औरसस्य पञ्चमं षष्ठ वांश गुणवदगुणतया गृह्णीयुः। देवलवचनेन सर्वेषा क्षेत्रजतुल्यत्वाभिधानात् मनुवचने क्षेत्रजपदमुपलक्षणम्। दा.१४७

(५) यदा त्वेकस्या भार्यायामज्ञातगर्भाया भर्ता मृतः अन्या च पत्नी पुत्रार्थ देवरे नियुक्ता पुत्रमलभत पूर्वस्या चौरसः पुत्रो जातस्तदा विभागमाह—षष्ठ त्विति। षष्ठमनिर्गुणत्वे गुणवत्वे तु पञ्चममिति। मवि.

(६) औरसः पुत्रः पितृसंबन्धि दाय विभजन्, क्षेत्रजस्य षष्ठमंशं पञ्चम वा दद्यात्। निर्गुणसगुणापेक्षश्चाय विकल्पः। ×मम.

(७) यदा व्याधिपरिचर्यया व्याधिचिकित्सापरिचयाद्वा विधिना क्षेत्रज उत्पादिते औषधादिसेवया व्याध्यपगमे औरस उत्पन्नः, तदा किं क्षेत्रजस्य प्रतिसंधानमात्र वा भागो वा, विभागपक्षे कीदृशस्तस्य भाग इत्यत्र मनुः—षष्ठ तु क्षेत्रजस्याशमिति। +विर.५४३

(८) तत्रेयं व्यवस्था। अत्यन्तगुणवत्त्वे चतुर्थाशभागित्वं प्रतिकूलत्वनिर्गुणत्वयोः षष्ठांशभागित्व प्रतिकूलत्वमात्रे निर्गुणत्वमात्रे च पञ्चमाशभागित्वमिति। ÷पमा.५१६

(९) एतदनियुक्तायां सवर्णजातविषयम्। स्मृसा.६७

(१०) एतत्तु बीजिधनाप्रासौ, तत्प्राप्तौ तु नाशभागित्युक्तं 'यद्यस्य पैतृकमि'त्यत्र। =मच.

(११) यदि प्रथममौरस एवानन्तरमनियुक्तायां सवर्णातः क्षेत्रजः तदा गुणवतः क्षेत्रजस्य पञ्चमो भागः निर्गुणस्य षष्ठः। यत्तु 'एक एवौरसः पुत्रः पित्र्यस्य वस्तुनः प्रभु'रिति तत् प्रथमजातौरसविषयम्। अन्यथा 'षष्ठ त्वि'त्यादिवचनविरोधात्। नियुक्तायामौरसे तु क्षेत्रियः तृतीय भागमाप्नोति। 'उत्पन्ने त्वौरसे पुत्रे तृतीयाशहराः स्मृताः। सवर्णा असवर्णास्तु ग्रासाच्छादनभागिनः॥' इति वचनात्। औरसे जाते सवर्णा दत्तकाद्यास्तृतीयाश लभन्ते।

चन्द्र.९१

(१२) क्षेत्रजो जारजः उत्तमः पञ्चम, असवर्णः षष्ठमिति जीमूतवाहनः। विता.३७४

[1]**औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ।**
दशापरे तु क्रमशो गोत्ररिक्थांशभागिनः *॥

(१) आद्योऽर्धश्लोकः पूर्वोक्तविध्यनुवाद एव, न पुनर्विध्यन्तरम्, औरसेन साम्य क्षेत्रजस्य नेष्यते। गोत्रभागिनो रिक्थाशभागिनश्च। रिक्थाशः प्रजीवनसंमित इत्युक्तः। दत्तके च क्षेत्रजवत् स्मृत्यन्तरमुदाहरन्ति। क्रमशः औरसक्षेत्रजौ युगपद्गाहरावन्येषा तु पूर्वाभाव उत्तरस्य भागहरत्वम्। यद्येषा षट् दायादा षडदायादा इति, वर्गद्वयप्रतिभानेन दायादादायादयोरनयोः रिक्थवचनमनुपपन्नम्। सत्यौरसेऽदायादा इति। आद्याः षट् महोपकारा इतरे षट् न्यूना इति। आद्या औरसादन्ये समानफला एवमुत्तरे षट् ततो न्यूना, अवान्तरापेक्षया तुल्या एव। न पूर्वोत्तरपठितानां भेदोऽस्ति।

×मेधा.

= शेष ममुवत्।

* विश्व.व्याख्यान 'षष्ठ तु क्षेत्रजस्यांश' इति पूर्वश्लोके द्रष्टव्यम्। × व्यनि., नन्द. रिक्थांशपदार्थो मेधावत्।

(१) **मस्मृ.**९।१६५; **विश्व.**२।१३६, **अप.**२।१२७; **व्यक.**१५३; **गौमि.**२८।३२; **विर.**५४४; **स्मृसा.**६७ पू.; **सुबो.**२।१३२; **व्यनि.** परे (वरे); **दात.**१६९ तु (च); **दमी.**३९; **बाल.**२।१३२ (पृ.१७६,१७८),२।१३५ (पृ.२१७); **समु.**१३९; **विच.**६१ तु (च), **दच.**३० पितुरि (पितुर्ऋ) गोत्र (पितृ).

* अप. मितावद्भावः। व्यप्र. मितागतम्।
× मेधावद्भावः। + शेषं मेधागतम्।
÷ मितावद्भावः।

(२) तदौरसस्य निर्गुणत्वे क्षेत्रजस्य सादृगुण्ये वेदितव्यम्। सम विभागाभिधानात्। औरसक्षेत्रजपुत्रिकापुत्रव्यतिरिक्तेषु दशसु पुत्रेषु जातेष्वौरसोत्पत्तिर्यदि स्यात्तदौरसस्यैव सकल रिक्थमितरेषा तदशहरत्वमेव। गोत्रं तु तेषामौरसस्य च समानम्। अप.२।१२७

(३) पितृऋक्थस्य पित्रार्जितधनस्य। अत्रौरसत्वेन पुत्रिकापुत्रोऽपि गृहीतः। दशापर इति गोत्ररिक्थ पितामहाद्युपात्त ततोऽशभागिनः, न तु पित्रा स्वयमर्जितादंशादशहारिणः। केचित्तु पितृऋक्थस्य कृत्स्नस्य, गोत्रभागिनः पितृगोत्रऋक्थाशभागिनः स्वजीवमात्रोचितपितृऋक्थाशभागिन इत्यर्थमाहुः। मवि.

(४) औरसक्षेत्रजौ पुत्रावुक्तप्रकारेण पितृधनहरौ स्याताम्। अन्ये पुनर्दश दत्तकादयः पुत्रा गोत्रभाजो भवन्ति, 'पूर्वाभावे परः पर' इत्येवक्रमेण धनाशहराश्च। +मम.

(५) अत्राद्यमर्ध पूर्वोक्तविध्यनुवादः। दश दत्तकादयः क्रमशः पूर्वपूर्वाभावे गोत्रभागिनो ज्ञातिकार्यकारिण इत्यसहायाचार्यः। ऋक्थाशभागिनः पितृऋक्थाशभागिनः। एतच्चौरसपुत्रिकाक्षेत्रजानामभावे। विर.५४४

(६) पुत्रिकामप्यौरससमत्वेनौरस एवान्तर्भावयित्वा इतरे दश पुत्रा दर्शिताः। मुवो.२।१३२

(७) संततिकारकत्वेन धनिदेयपिण्डदातृत्वेन च प्रथमं पुत्रिकापुत्रस्य तदनन्तरं दत्तकस्य गोत्ररिक्थयोर्भागित्वम्। *दात.१६९

(८) मिताटीका– इत्यत्र पुत्रिकामप्यौरससमत्वेनौरसे एवान्तर्भावयित्वा, तस्याः पूर्वं स्वातन्त्र्येणोक्तत्वात्तद्भिन्ना एवात्र विवक्षिता वेत्याशयेन एतावुक्त्वा इतरे दशेत्युक्त्वा तथैव क्रमेणोक्तानि तल्लक्षणानि।

×बाल.२।१३२(पृ.१७८)

उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्त्रिमः।
स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः॥

(१) 'न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः' इति सर्वपुत्राणा रिक्थहरत्वमुक्तम्। सति त्वौरसे प्रजीवनमात्रभाक्त्व क्षेत्रजादीनाम्। 'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः। शेषाणामानृशस्यार्थं प्रदद्यात्तु प्रजीवनम्॥' इति (मस्मृ.९।१६३)। अतोऽस्य सिद्धमेव दत्त्रिमस्य रिक्थहरत्वम्। इद तु वचनं सत्येवौरसे प्राप्त्यर्थमन्यथा न किंचिदनेन क्रियते। कियांस्तु तस्य भाग इति विशेषनिर्देशाभावात्सम औरसेनेति केचित्। तदयुक्तम्। साम्ये ह्यभिधीयमाने यथैव पुत्रिकाप्रकरणे पठितमेवमत्राप्यपठिष्यत् 'समस्तत्र विभागः स्यात्' इति। तस्मात्क्षेत्रजवत्षष्ठाष्टमादिभागकल्पना कार्येत्युच्यते। अत्राप्यस्ति वक्तव्यम्। यथैव भागविशेष उक्तः क्षेत्रजस्य 'षष्ठ तु क्षेत्रजस्याशम्' इति तथैव दत्त्रिमेऽवक्ष्यत्। तस्मात्पुनर्वचने प्रयोजन चिन्त्यम्। उपाध्यायस्त्वाह पुनर्वचनाद्विशेषनिर्देशाभावाच्च क्षेत्रजान्यूना कल्पना युक्ता, न त्वभागता नापि समभागता न क्षेत्रजतुल्येति। मेधा.

(२) दत्त्रिमो मातापितृदत्तः यदि सर्वपुत्रगुणयुक्तस्तदा गोत्रान्तरे तद्दक्थ पितृधनभागमन्यथा सर्वमृक्थ गृह्णीयात्। तेनामुख्यपुत्रोऽप्यतिशयितगुणवत्तायां मुख्यपुत्रवत् भागहर इत्युक्तम्। मवि.

(३) अपिशब्दादसगोत्रतः संप्राप्तोऽपि। अत्र तृतीयपादार्थो देवस्वामिना विवृतः 'तदीय सर्वमृक्थं गोत्र चैव हरेत वा' इति। एव च पुत्रत्वापादनक्रियायैव दत्त्रिमस्य पुत्रस्य ग्रहीतुर्धने स्वामित्वं तत्सगोत्रत्व च भवतीति मन्तव्यम्। स्मृच.२८९

(४) 'पुत्रा रिक्थहराः पितुरे'वेति द्वादशपुत्राणामेव ऋक्थहरत्व वक्ष्यति 'दशापरे तु क्रमश' इति औरसक्षेत्रजाभावे दत्तस्य पितृ रिक्थहरत्वं प्राप्तमेव। अतः सत्यप्यौरसपुत्रे दत्तकस्य सर्वगुणोपपन्नस्य पितृरिक्थभागप्राप्त्यर्थमिद वचनम्। यस्य दत्तकः पुत्रोऽध्ययनादिसर्वगुणोपपन्नो भवति सोऽन्यगोत्रादागतोऽपि सत्यप्यौरसे पितृरिक्थभाग

+ मच., भाच. ममुगतम्।

* विच. दातगतम्। × बाल. (पृ.१७६) मेधागतम्।

(१) **मस्मृ.**९।१४१; **व्यक.**१५७; **स्मृच.**२७९ स (आ); **विर.**५६८ तैव (च्चैव); **रत्न.**१४२; **दमी.**७९; **व्यप्र.**४८३; **संप्र.**७६९, **विता.**३६७ दत्त्रि (क्त्रि) तैव (च्चैव); **समु.**१३९ व्रतः (व्रजः); **नन्द.**प्यन्यगोत्रतः (स्य न पुत्रकः); **दच.**३२ तु (हि).

१ ऽस्ति सि. २ विशदंशाभा. ३ क्त्रि. ४ ह्रापु.

गृह्णीयात्। अत्र 'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुरि'त्यौरसस्य सर्वोत्कर्षाभिधानात्तेन नास्य समभागित्वं किन्तु क्षेत्रजोक्तषष्ठभागित्वमेवास्य न्याय्यम्। गोविन्दराजस्त्वौरसक्षेत्रजाभावे सर्वगुणोपपन्नस्यैव दत्तकस्य पितृरिक्थभागित्वार्थमिद वचनमित्यवोचत्। तन्न। कृत्रिमादीना निर्गुणाना पितृरिक्थभागित्व दत्तकस्य तु तत्पूर्वपठितस्यापि सर्वगुणोपपन्नस्यैवेत्यन्याय्यत्वात्। ममु.

(५) गुणैर्जातिविद्याचारैः। पुत्रत्वादेव ऋक्थहरत्वे प्राप्ते उपपन्नो गुणैरिति वचनं पश्चाज्जाते चौरसे सगुणस्य दत्रिमस्याशप्राप्त्यर्थ, निर्गुणस्य भरणमात्रप्राप्त्यर्थं च। विर.५६८

(६) 'पुत्रा रिक्थहराः पितुरि'ति द्वादशसुताना वक्ष्यमाणानामेव रिक्थहरत्वमनुवदन् दत्रिमस्य तदाह—उपपन्न इति। अप्यन्यगोत्रत इत्यत्रापिशब्दात्स्वगोत्रतश्च। गुणैः विद्याविनयपितृश्रद्धादिपुत्रगुणैः वक्ष्यमाणो दत्रिमश्चौरसक्षेत्रजाभावे रिक्थ सहरेत्। मच.

(७) स्वगोत्रतः सप्राप्तः किमुतेति किमुत्याथोऽपिशब्दः। ×व्यप्र.४८३

(८) उपपन्न इति श्लोकद्वयस्य तात्पर्यम्। यस्मै दत्तो येन दत्तस्तयोरपि गोत्ररिक्थे हरेत्पुत्रोऽन्यगोत्रजोऽपि, जनयितुः गोत्ररिक्थानपहारित्वे अन्यगोत्रऋक्थानुगः पिण्डो जनयितुर्ददतः स्वधा व्यपैति उभयपितुः श्राद्ध दूरीकरोति। उभावेकस्मिन्पित्रभेद इति साख्यायनसूत्रेण प्रतिग्रहीतृजनयित्रोः पिण्डयोर्विधानात् ततश्चोभयोर्गोत्ररिक्थहरणपूर्वक पिण्डद्वय देयमित्यर्थः। भाच.

दत्तकस्य न जनकगोत्ररिक्थभाक्त्वम्

गोत्ररिक्थे जनयितुर्न हरेद्दत्रिमः सुतः।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा*॥

(१) इतश्च भागहरत्वं दत्रिमस्य तूक्तम्। यतो जनयितुः सकाशाद्गोत्र धनं च न हरति। वशादपेतत्वात्। गोत्ररिक्थग्रहणाभावे च पिण्डमपि जनयित्रे न ददाति। गोत्ररिक्थानुगो हि पिण्डो गोत्ररिक्थेऽनुगच्छति। यदीये गोत्ररिक्थे गृह्यते तस्मै पिण्डोदकदानाद्यौर्ध्वदेहिक क्रियते। व्यपैति तस्मान्निवर्तते स्वधा स्वधाकारसाधन पिण्डश्राद्धादि लक्ष्यते। तदेतद् ददतः योऽन्यस्मै स्वपुत्र ददाति तस्मान्निवर्तते। न तस्य कर्तव्यमित्यर्थः। एष एव न्यायः कृत्रिमादीना सहोढापविद्धानाम्। द्यामुष्यायणानामुभयोपकारकत्वम्। अन्ये तु न हरेन्न हारयेदित्यन्तर्भावितण्यर्थं व्याचक्षते। तेनोभयस्यापि द्यामुष्यायणवदुपकर्तव्यमित्याहुः। उत्तरस्तूपकारोपक्रमः, तमेव गमयन्ति, यदि गोत्ररिक्थे न हरेत्पुत्रस्तदा तु, इति व्याख्येय, न चैतद्युक्त, तेन ह्यर्थान्तरभावे प्रमाण वक्तव्यम्। ×मेधा.

(२) इत्यत्र दत्रिमग्रहणस्य पुत्रप्रतिनिधिप्रदर्शनार्थत्वम्। मिता.२।१३२

(३) अत्र दत्रिमस्य बीजिधनसंबन्धो न कथचिदित्याह—गोत्रेति। अत एव नासौ द्यामुष्यायणः प्रतिग्रहीतृगोत्रत्वात्। किं तु देवरजपुत्रिकासुतावेव द्विपितृकत्वात्। मवि.

(४) दातुर्धने तु दानादेव पुत्रत्वनिवृत्तिद्वारा दत्रिमस्य स्वत्वनिवृत्तिः दातृगोत्रनिवृत्तिश्च भवतीति मन्तव्यम्। अनेनाभिप्रायेणोक्त—गोत्ररिक्थ इति। स्मृच.२८९

(५) ददतः जनकस्य स्वधा पिण्डश्राद्धादि तत्पुत्रकर्तृक निवर्त्तते। +ममु.

(६) दत्रिमग्रहण क्रीतोपलक्षणार्थम्। दत्तव्यतिरिक्ता-

×शेषं मचगतम्। *भाच.व्याख्यान पूर्वश्लोके द्रष्टव्यम्।

(१) **मस्मृ.**९।१४२ सुतः (क्वचित्); **मिता.**२।१३२ हरे (भजे); **अप.**२।१२८; **व्यक.**१५७; **स्मृच.**२८९ पू.; **विर.** ५६८; **स्मृसा.**६९ गोत्ररिक्थे (ऋक्थगोत्रे) शेष मस्मृवत्, पू.; **पमा.**५२२ मितावत्; **रत्न.**१४२; **व्यनि.** उत्त.; **सवि.** ३९४ धा (धां) शेष मितावत्; **चन्द्र.**१७६ गोत्ररिक्थे (ऋक्थगोत्रे) पू.; **दमी.**२६ मितावत्, पू.:८४:११७ मितावत्;

× अप., स्मृच., विर., चन्द्र., दमी. मेधावद्भावः।

वीमि.२।१२८ गोत्ररिक्था (रिक्थगोत्रा) धा (धा) शेष चन्द्रवत्; **व्यप्र.**४८३ मितावत्; **संप्र.**२०८ मितावत्, पू.; **व्यम.**५१ मितावत्; **विता.**३६७ हरेद् (भजेत्कु) व्यपै (ह्यपै); **राकौ.**४५४ मितावत्, **समु.**१३९ मितावत्; **क्रभ.** ८८६ मितावत्, पू.: ८९३ मितावत्; **दच.**१३,२६.

१ (स्वधा०). २ (ददतः०). ३ द्धव्या. ४ (इति०). ५ दुक्तं. ६ न ह्य.

ना गौणपुत्राणा ऋक्थभाक्त्वप्रतिपादकानि वाक्यानि युगान्तरविषयाणि। कलौ युगे तेषा पुत्रत्वेन परिग्रहणस्य स्मृत्यन्तरे निषिद्धत्वात्–'दत्तौरसेतरेषा तु पुत्रत्वेन परिग्रहः। देवरेण सुतोत्पत्तिः वानप्रस्थाश्रमग्रहः॥ कलौ युगे त्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः॥' इति।

*पमा.५२२

(७) इति, मनुवचनादत्रिमस्य स्वजनकगोत्रसापिण्ड्ययोः निवृत्तौ कथ 'दत्रिमोऽपि स्वजनयितुः स्वधा कुर्यादि'ति विष्णुवचनमिति चेदुच्यते, तत्तु दत्रिमजनकस्य संतत्यभावे वेदितव्यम्। +सवि.३९४

(८) ददतः स्वसबन्धी पिण्डस्ततो व्यपैति। स्वधा पितृतृप्तिहेतुरिति पिण्डविशेषणम्। गोत्ररिक्थानुग इति हेतुगर्भम्। *व्यप्र.४८३

(९) गोत्ररिक्थे अनुगच्छतीति गोत्ररिक्थानुगः। प्रायस्तत्समनियत इति यावत्। दत्रिमः केवलः, द्व्यामुष्यायणे गोत्राद्यनुवृत्तेर्वक्ष्यमाणत्वात्। पिण्डः श्राद्धमौर्ध्वदेहिकादीति मेधातिथिकुल्लूकभट्टादयः। पिण्डः सापिण्ड्यम्। स्वधौर्ध्वदेहिकश्राद्धादीत्यपरे। वस्तुतस्तु यथा 'जातपुत्रः कृष्णकेशोऽग्निमादधीत' इत्यत्र वयोवस्थाविशेषो यथा वा 'अर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदि' इत्यनेन देशविशेषो लक्ष्यते तथात्र गोत्ररिक्थपिण्डस्वधापदैर्जनकादीना पिण्डसंबन्धप्रयुक्त कार्यमात्र लक्षयित्वा तन्निवृत्तिरुच्यते। तेन सोदरपितृव्यादिसबन्धनिवृत्तिरपि सिद्धा भवति। अत एव केवलदत्तकजन्यः पुत्रोऽपि पितुः सपिण्डीकरणपार्वणश्राद्धादि प्रतिग्रहीत्रैव सह कुर्यात्। एवं तत्पुत्रोऽपि। व्यम.५१

(१०) मिताटीका— गोत्रेति। दत्रिमः दत्तकः सुतः पुत्रः जनयितुर्निषेक्तुर्जनकस्य गोत्ररिक्थे गोत्रधने न भजेत् न प्राप्नुयात्। जनयितुरिति पञ्चमीति मेधातिथिः। तथा च तन्मरणनिमित्ताशौचादिकमपि न प्राप्नोति विवाह विना। तत्र तद्दोत्रस्यापि परिहार्यत्वात्। अनेनान्यगोत्रस्यापि पुत्रीकरणमनुज्ञातं भवति। अपि तु यस्मै दत्तस्तस्य गोत्रं धनमाशौचादिक च दत्तकः प्राप्नोति। तथा यतो गोत्ररिक्थानुगः 'सगोत्रेण' इति 'यो रिक्थहर' इति च स्मृतेः पिण्डः तद्दानं श्राद्धमिति यावत् गोत्ररिक्थेऽनुगच्छति सः, यदीयगोत्ररिक्थे गृह्यते तस्मै एव पिण्डोदकदानाद्यौर्ध्वदेहिकक्रिया, अतो ददतस्तद्दातुर्जनकस्य दत्तपुत्रकर्तृकस्वधा श्राद्ध व्यपैति। अर्थात्ततो निवर्तते। दत्तकस्य जनकश्राद्धे नाधिकारः। तस्य तत् तेन न कर्तव्यमिति यावत्। ददत इति पञ्चमी व्यपैतीत्यत्रान्वय इति वा। वस्तुतः पिण्डशब्दः सापिण्ड्यपरः। श्राद्धपरत्वे ददतः स्वधेत्यनेन पौनरुक्त्यापत्तेः। अत एव शिष्टाः प्रतिग्रहीतृगोत्रेणैव तस्य सर्वक्रियानुष्ठान कुर्वन्ति। प्रतिग्रहीतृसपिण्डा एव च तन्मरणादौ दशाहाशौचमनुतिष्ठन्ति। प्रतिग्रहीतृकुले एव तत्सपिण्डीकरणाद्याचरन्ति। अत एवास्मादेव वचनादत्तकस्य जनकसापिण्ड्यनिवृत्तिरित्यभियुक्तैर्व्याख्यातमिति बोध्यम्। एतच्च दातुः पुत्रान्तरादिसद्भावे। तदभावे तु तस्याप्यसावेव रिक्थश्राद्धाद्यधिकारी। 'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥' इति (यास्मृ. २।१२७) न्यायसाम्यात्, 'दत्तः पुत्रः पितुः कुर्याज्जनकस्य मृतेऽहनि। गयाया च ततोऽन्यत्र न पुत्रान्तरसंनिधौ॥' इति शातातपस्मरणाच्च। इदमपि दानानन्तर जनकस्यापुत्रत्वे। दानकाले त्वेकस्य दाननिषेधात्। एवमेव द्व्यामुष्यायणदत्तकस्यापि उभयोपकारकत्व बोध्यम्। अत एव दत्रिमः क्वचिदिति पाठेन सहैकवाक्यताऽपि। अस्य सापिण्ड्य परिवेदनदोषाभावश्चान्यत्र स्पष्टः। एष एव न्यायः प्राग्वत् पुत्रीकरणाविशेषात् कृत्रिमादीनामपि बोध्यः।

बाल.२।१३२ (पृ.१७६-१७७)

स्वगोत्रे दत्तगोत्रेऽपि श्रौतस्मार्तक्रिये यदि।
दत्तस्य तूभयत्रापि संबन्धं मनुरब्रवीत्॥

वाल्मीकिरामायणम्

पुत्रमहिमा। औरसपुत्रप्रतिनिधिनारतम्यम्। ज्येष्ठविचारः। औरसक्षेत्रजक्रीतदत्तपुत्रविचारः।

पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः।
तस्मात्पुत्र इति प्रोक्तः पितॄन्यः पाति सर्वतः॥
ऐष्ट्वा बहवः पुत्रा गुणवन्तो बहुश्रुताः।

(१) समु.१४०. (२) बारा.२।१०७।१२.
(३) बारा.२।१०७।१३; बाल.२।१३५ (पृ.२४०).

* मेधाद्वारावः। + विता. सविद्वारावः।

तेषां वै समवेतानामपि कश्चिद् गयां व्रजेत् ॥
औरसानपि पुत्रान् हि त्यजन्त्यहितकारिणः ।
समर्थान् संप्रगृह्णन्ति जनानपि नराधिपाः ॥
तत्रैव वंशे सगरो ज्येष्ठपुत्रमुपारुधत् ।
असमञ्ज इति ख्यातं तथाऽयं गन्तुमर्हति ॥
उवाच नरशार्दूलमम्बरीषमिदं वचः ।
अविक्रेयं सुतं ज्येष्ठं भगवानाह भार्गवः ॥
ममापि दयितं विद्धि कनिष्ठं शुनकं प्रभो ।
तस्मात्कनीयसं पुत्रं न दास्ये तव पार्थिव ॥
प्रायेण हि नरश्रेष्ठ ज्येष्ठाः पितृषु वल्लभाः ।
मातॄणां च कनीयांसः तस्माद्रक्ष्ये कनीयसम् ॥
उक्तवाक्ये मुनौ तस्मिन् मुनिपत्न्यां तथैव च ।
शुनःशेपः स्वयं राम मध्यमो वाक्यमब्रवीत् ॥
पिता ज्येष्ठं अविक्रेयं माता चाह कनीयसम् ।
विक्रेयं मध्यमं मन्ये राजपुत्र नयस्व माम्* ॥
सॅ त्वं केसरिणः पुत्रः क्षेत्रजो भीमविक्रमः ।
मारुतस्यौरसः पुत्रस्तेजसा चापि तत्समः ॥
तस्याहं हरिणः क्षेत्रे जातो वातेन मैथिलि ।
हनूमानिति विख्यातो लोके स्वेनैव कर्मणा ॥

दत्तकसुता

इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः ।
नाम्ना दशरथो वीरः श्रीमान् सत्यपराक्रमः ॥
सख्यं तस्याङ्गराजेन भविष्यति महात्मना ।
कन्या चास्य महाभागा शान्ता नाम भविष्यति ॥
अपुत्रस्त्वङ्गराजो वै लोमपाद इति श्रुतः ।
स राजानं दशरथं प्रार्थयिष्यति भूमिपः ॥
अनपत्योऽस्मि धर्मज्ञ कन्येयं मम दीयताम् ।
शान्ता शान्तेन मनसा पुत्रार्थं वरवर्णिनी ॥
ततो राजा दशरथो मनसाऽभिविचिन्त्य च ।
दास्यते तां तदा कन्यां शान्तामङ्गाधिपाय सः॥
प्रतिगृह्य तु तां कन्यां स राजा विगतज्वरः ।
नगरं यास्यति क्षिप्रं प्रहृष्टेनान्तरात्मना ॥
कन्यां तां ऋष्यशृंगाय प्रदास्यति स वीर्यवान्॥

इत्यादि । तत्रैव लोमपाद प्रति दशरथवाक्यम्—

शान्ता तव सुता वीर सह भर्त्रा विशांपते ।
मदीयं नगरं यातु कार्यं हि महदुद्यतम् ॥

इति । तत्रैव ऋष्यशृङ्ग प्रति लोमपादवाक्यम्—

अयं राजा दशरथः सखा मे दयितः सुहृत् ।
अपत्यार्थं ममानेन दत्तेयं वरवर्णिनी ॥
याचमानस्य मे ब्रह्मन् शान्ता प्रियतरा मम ।
सोऽयं ते श्वशुरो धीर यथैवाहं तथा नृपः+ ॥

दुहितृप्रतिनिधौ पुराणेषु लिङ्गदर्शनानि उपलभ्यन्ते। तत्र दत्तकाया रामायणे बालकाण्डे दशरथ प्रति सुमन्त्रस्य सनत्कुमारोक्तभविष्यानुवादो लिङ्गम्—इक्ष्वाकूणामित्यादि । अत्र दीयता—दास्यते—प्रतिगृह्य—दत्ता—शब्दैर्दानविधिः स्पष्ट एव । तथा अपुत्रः इत्युपक्रम्य पुत्रार्थं इत्युपसंहारात्, औरसपुत्रीवद्दत्तपुत्र्यपि पुत्रप्रतिनिधिर्भवतीति गम्यते । दमी.११२-११३

*ऐतरेयब्राह्मणस्य शुन.शेपकथाया. रूपान्तरेणानुवादरूपाणि इमानि वचनानि । इयमेव कथा महाभारते १३।३।६; भागवते ९।६; हरिवंशे १।२७; देवीभागवते ७।१६ च समुपलभ्यते ।

(१) वारा.२।२६।३६; बाल.२।१३५ (पृ.२४०) जना (परा).
(२) वारा.२।३६।१६; बाल.२।१३५ (पृ.२४०).
(३) वारा.१।६१।१७-२१.
(४) वारा.४।६६।२९,३०.
(५) वारा.५।३५।८२. (६) दमी.११२-११३.

+ अस्माभिः सप्रत्युपलभ्यमानमुद्रितवाल्मीकिरामायणपुस्तकद्वयेऽस्य श्लोकसग्रहोऽन्विष्टोऽपि नोपलब्धः । सत्रोपलभ्यमानश्लोकास्तु एतादृशाः समुपलभ्यन्ते—

इक्ष्वाकूणा कुले जातो भविष्यति सुधार्मिकः । राजा दशरथो नाम श्रीमान् सत्यप्रतिश्रवः ॥ अङ्गराजेन सख्य च तस्य राज्ञो भविष्यति । कन्या चास्य महाभागा शान्ता नाम भविष्यति॥ पुत्रस्त्वङ्गस्य राज्ञस्तु रोमपाद इति श्रुतः । अङ्गराज दशरथो गमिष्यति महायशाः ॥ अनपत्योऽस्मि धर्मात्मन् शान्ताभर्ता मम क्रतुम् । आहरेत त्वयाज्ञप्तः सतानार्थं कुलस्य च ॥ श्रुत्वा राज्ञोऽथ तद्वाक्यं मनसा स विचिन्त्य च । प्रदास्यते पुत्रवन्तं शान्ताभर्तारमात्मवान् ॥ प्रतिगृह्य च त विप्र स राजा विगतज्वर । आहरिष्यति त यज्ञं प्रहृष्टेनान्तरात्मना ॥ त च राजा दशरथो यष्टुकामः कृताञ्जलिः । ऋष्यशृङ्गं द्विजश्रेष्ठ वरयिष्यति धर्मवित् ॥ (वारा.१।११।२-८)

(वाल्मीकिरामायणीयशिरोमणिटीकायां तु पौराणिकी गाथेयमुद्धृता— अनेन मेऽनपत्याय दत्तेय वरवर्णिनी । याचते

याज्ञवल्क्यः

औरसपुत्रिकासुतक्षेत्रजगूढजकानीनपौनर्भवदत्तकक्रीतकृत्रिम-स्वयंदत्तसहोढजापविद्धाः, तेषां विधिः लक्षणानि च

[१]**औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ।**
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥

(१) क्लिलक्षण औरसः पुत्रः । उच्यते—औरस इति । सवर्णा ब्राह्मादिविवाहसस्कृता धर्मपत्नी । तस्या स्वयमुत्पादितः पुत्र औरसः । तत्समत्ववचन क्षेत्रजादिभ्योऽधिकत्वज्ञापनार्थम् । पुत्रिकास्वरूप स्मृत्यन्तरादवगन्तव्यम् । क्षेत्रजस्तु क्षेत्रपत्न्या सगोत्रेणान्येन वा नियोगोत्पादितः ।

विश्व.२।१३२

(२) समानासमानजातीयाना पुत्राणा विभागकल्पितरुक्ता । अधुना मुख्यगौणपुत्राणा दायग्रहणव्यवस्था दर्शयिष्यस्तेषा स्वरूप तावदाह—औरस इति । उरसो जात औरसः पुत्रः स च धर्मपत्नीजः, सवर्णा धर्मविवाहोढा धर्मपत्नी तस्या जातः औरसः पुत्रो मुख्यः । तत्सम औरससमः पुत्रिकायाः सुतः पुत्रिकासुतः । अत एवौरससमः । यथाह वसिष्ठः—'अभ्रातृका प्रदास्यामि तुभ्य कन्यामलङ्कृताम् । अस्या यो जायते पुत्रः स मे पुत्रो भवेदिति ॥' इति । अथवा पुत्रिकैव सुतः पुत्रिकासुतः सोऽप्यौरससम एव पित्रवयवानामल्पत्वात् मात्रवयवाना बाहुल्याच्च । यथाह वसिष्ठः—'द्वितीयः पुत्रिकैव' । द्वितीयः पुत्रः पुत्रिकैवेत्यर्थः । द्व्यामुष्यायणस्तु जनकस्यौरसादपकृष्टोऽन्यक्षेत्रोत्पन्नत्वात् । क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा । इतरेण सपिण्डेन देवरेण वोत्पन्नः पुत्रः क्षेत्रजः । *मिता.

(३) यो धर्मपत्नीजः स औरसो ज्ञेयः । यया सह धर्मश्चर्यते सा धर्मपत्नी । यद्यपि पत्नीशब्देनैव सहधर्मचारिणी कथ्यते, तथाऽपि धर्मशब्दोपादानादत्र पत्नीशब्दो भार्यामात्रपरः । धर्मपत्नीशब्देन च शूद्रा व्यावर्त्यते, तस्याः सहधर्मचारित्वाभावात् । यदाह वसिष्ठः—'कृष्णवर्णा वै रामा रमणायैव न धर्माय' इति । एवं च तत्पुत्रो नौरसः । अत एव पुत्रप्रतिनिधिषु च तमाह मनुः—पुत्रान् द्वादश यानाहेत्यादिना । यथाशास्त्र परिणीताया द्विजातिस्त्रियामुत्पन्न औरसः पुत्रः । अन्वर्थसज्ञा चैषा, तेनोरसि भव औरसः । तेन स्वोत्पादितत्वमौरसस्य लक्षणम् । अत एवाह वसिष्ठः—'स्वयमुत्पादितः स्वक्षेत्रे सस्कृताया प्रथमः' प्रथमो मुख्यः । तेन स एव पुत्रशब्दस्य मुख्योऽर्थः । क्षेत्रजादिस्तु गौणः । ततः परिपूर्णमिदमौरसस्य लक्षणम् । 'औरसो धर्मपत्नीज' इति पदद्वयेनोक्तम् । अप.

(४) सगोत्रेण स्वकुलोद्भवेन, इतरेण उत्कृष्टवर्णेन ।

+विर.५५६

(५) सवर्णा धर्मविवाहोढा धर्मपत्नी तस्या जातः पुत्रः औरसः स च मुख्यः, तथा आसुरादिविवाहोढासवर्णापुत्रेऽपि तथा अनुलोमविवाहितक्षत्रियादिस्त्रीषु ब्राह्मणादुत्पन्नो मूर्धावसिक्तोऽम्बष्ठो निषादपरपर्यायपारशवश्च वैश्यादिस्त्रिया राजत उत्पन्नो माहिष्योग्रौ च शूद्रायां वैश्यादुत्पन्नः करणश्चेत्येते औरसा एव । मपा.६५१

(६) अत्र सावर्ण्य द्विजातित्वेन ब्राह्मण्यादित्रयस्य विवक्षितम् । अन्यथा ब्राह्मणविवाहितयोः क्षत्रियावैश्ययोः तेनोत्पन्नः पुत्रो न द्वादशविधपुत्रान्तर्भूतः स्यादिति पारिजातः । वीमि.

(७) सवर्णा धर्मविवाहोढा धर्मपत्नी तस्या जात औरसः पुत्र इति मिताक्षरा । वस्तुतस्तु नेदमेव बोद्धव्यम् । अनुलोमजाना मूर्धावसिक्तादीनां औरसेष्वन्तर्भावादिति स्ववचनविरोधात् । न हि ते सवर्णायामुत्पन्नाः । ब्राह्मणादिषु येषा येन धर्मविवाहस्तदूढोत्पन्नानामनौरसत्वप्रसङ्गे तेषु सत्स्वप्यन्येषा दायग्रहणप्रसङ्गाच्च । तस्मादुत्कर्षाभिप्राय सवर्णाग्रहणम् । धर्मपत्नीजत्वमात्रं वाक्योपात्त क्षेत्रजादिव्यावर्तकं लक्षणम् । व्यप्र.४६७

सगोत्रेण देवरसपिण्डादिना । इतरेण असगो-

---

* विचि., विता. मितागतम् ।

पुत्रतुल्यैषा शान्ता प्रियतरात्मजा । सोऽय ते श्वशुरो ब्रह्मन् यथैवाहं तथा नृपः ॥).

+ औरसपद अपवद् ।

(१) **यास्मृ.**२।१२८; **अपु.**२५६।१५; **विश्व.**२।१३२; **मिता.**; **अप.**; **व्यक.**१५५ प्रथमः पादः, १५६ पू.; **विर.** ५५४ प्रथमः पादः; ५५६ उत्त.; ५६० द्वितीयः पादः; **पमा.** ५१२; **मपा.**६५०; **विचि.**२३२; **स्मृचि.**३१ सगो (स्वगो) वा (च):३३; **नृप्र.**३९, **सवि.**३९०; **वीमि.**; **व्यप्र.**४६७: ४७० उत्त.:५१९ पू.; **व्यम.**४७; **विता.**३५८; **राकौ.** ४५३; **बाल.**२।१३५ (पृ.२१६); **समु.**१३७.

त्रेणेत्यनुकल्पः । व्यप्र.४७०

(८) मिताटीका—धर्मेति । धर्मेत्यनेन यस्य यो न धर्मविवाहस्तदूढानिरासः । तथा च धर्मपत्नी द्विजाना द्विजैव, शूद्रस्य तु मुख्यपत्न्यभावेऽपि तत्तुल्या परिणीता । ÷बाल.

गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः* ॥

(१) नियोगाभावेऽपि—गृह इति । इमौ तु मातृजातीयौ जनकापरिज्ञानाद् विज्ञेयौ । विश्व.२।१३३

(२) गूढजः पुत्रो भर्तृगृहे प्रच्छन्न उत्पन्नो हीनाधिकजातीयपुरुषजत्वपरिहारेण पुरुषविशेषजत्वनिश्चयाभावेऽपि सवर्णजत्वनिश्चये सति बोद्धव्यः । कानीनस्तु कन्यकायामुत्पन्नः पूर्ववत्सवर्णासु मातामहस्य पुत्रः । यद्यनूढा सा भवेत्तथा पितृगृह एव सस्थिता । अथोढा तदा बोढुरेव पुत्रः । यथाह मनुः—'पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः । त कानीन वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥' इति (मस्मृ.९।१७२) । *मिता.

(३) यस्य गृहे भार्याया प्रच्छन्नोऽप्रज्ञायमानजनकविशेष उत्पन्नः स तज्जननीस्वामिनो गूढोत्पन्ननामा पुत्रो भवति । अयं च स्वभार्यायामन्योत्पादितत्वेन क्षेत्रजतुल्य इति तदनन्तरमुक्तः । यस्तु कन्यायामनूढाया जातः स कानीनसंज्ञको मातामहपुत्रो मन्वादिसमतः । अयमपि कथंचित्स्वसंबन्धिनि दुहितृरूपे क्षेत्रे जात इति गूढोत्पन्नसादृश्यात्तदनन्तरमुक्तः । अप.

(४) यद्गूलाद्रहसि पुरुषान्तरसभोगात् सापि वर्णविशेष न जानाति । तत्र गूढजनाममात्रधारी न पूर्वोक्तगूढजवत् प्रशस्तः । +मपा.६५१

(५) कानीनः पञ्चमः । स च मातामहस्याऽपुत्रत्वे मातामहस्य, मातृबोढुरपुत्रत्वे तस्य सुतः । ×विचि.२३३

अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः÷ ॥

(१) मृते भर्तर्यक्षतयोन्यामन्यसंस्कृताया जातः पौनर्भवः क्षतयोन्या वा । यथोक्त—'अन्यैश्चरित्वा तस्यैव कुटुम्बमाविशती'ति । विश्व.२।१३४

(२) पौनर्भवस्तु पुत्रोऽक्षताया क्षताया या पुनर्भ्वा सवर्णादुत्पन्नः । *मिता.

(३) अक्षताया क्लीबादिभार्याया विधवायामविधवाया वा भार्याया तु क्षताया परैरुपभुक्ताया पुनः परिगृह्य संस्कृताया यो जातः स पौनर्भवसंज्ञकः । पुनर्भूः प्रथमेऽध्याये कथिता । एते च स्वसबन्धिक्षेत्रोत्पन्नत्वात्प्रत्यासन्नतया पूर्वमुक्ताः । क्षेत्रतोऽपि नास्ति येषा संबन्धस्ते जघन्या इति पश्चादुच्यन्ते । =अप.

(४) अक्षताया पूर्वबोढ्राऽभुक्तायाम् । क्षताया तेन भुक्ताया वा बोढ्रन्तरेणोत्पन्नः पौनर्भवः । अत्र दत्तकमिन्ना गौणाः पुत्राः कलौ वर्ज्याः । 'दत्तौरसेतरेषा तु पुत्रत्वेन परिग्रहः' इति तन्निषेधेषु पाठात् । व्यम.४७

(५) मिताटीका—अक्षतायामिति । पत्या अभुक्तायाः,

÷ शेष मपागतम् ।

* दमी.व्याख्यान 'ब्राह्मणानां सपिण्डेषु' इति शौनकवचने द्रष्टव्यम् । व्यप्र.व्याख्यानं 'पितृवेश्मनि' इति मनुवचने (पृ. १३०७) द्रष्टव्यम् ।

* सवि., विता. मितागतम् ।

(१) **याज्ञ्स्मृ.**२।१२९; **अपु.**२५६।१६; **विश्व.**२।१३३ सुतः स्मृतः (सुतो मतः); **मिता.**; **अप.** सुतः स्मृतः (ततः स्मृतः); **गौमि.**२८।३१ उत्त.; **मवि.**९।१७२ चतुर्थः पादः; **पमा.**५१२; **मपा.**६५०; **विचि.**२३२ मतः (स्मृतः); **व्यनि.** उत्त.; **स्मृचि.**३१:३३ ढजस्तु (ढो यस्तु); **नृप्र.**३९; **सवि.** ३९० जस्तु (जः स); **मच.**९।१७२ उत्त.; **दमी.**३६; **वीमि.** विश्ववत् ; **व्यप्र.**४६७ ; **व्यम.**४७; **विता.**३५८; **राकौ.** ४५३; **बाल.**२।१३५ (पृ.२१६); **समु.**१३७; **भाच.** ९।१७२ तृतीयः पादः.

+ शेष मितागतम् । × वीमि. विचिगतम् ।

÷ दमी.व्याख्यान 'दत्ताद्या अपि तनया' इति कालिकापुराणवचने द्रष्टव्यम् ।

* मपा. मितागतम् । = वीमि., व्यप्र. अपगतम् ।

(१) **याज्ञ्स्मृ.**२।१३०; **अपु.**२५६।१७; **विश्व.**२।१३४; **मिता.**; **अप.** सुतः (स्मृतः); **विर.**५६४; **स्मृसा.**६८ अक्षतायां (क्षतायाम); **पमा.**५१३ अपवत् ; **मपा.**६५० अपवत् ; **विचि.**२३२; **स्मृचि.**३१,३३, **नृप्र.**३९; **सवि.**३६१; **दमी.**६६; **वीमि.** जातः (ज्ञातः) शेष अपवत् ; **व्यप्र.**४६७; **व्यम.**४७ अपवत् ; **विता.**३५८ सुतः (तथा); **राकौ.**४५४ अपवत् ; **बाल.**२।१३५ (पृ.२१६); **समु.**१३७; **भाच.** ९।१७५.

भुक्तायां वा, जीवता पत्या त्यक्तायां, विधवायां वेत्यर्थः। बाल.

दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्॥

(१) पितृभ्यां पित्रा मात्रा वा तदनुज्ञया दत्तो दत्तकः। तथा च वसिष्ठः—'न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद् वा, अन्यत्रानुज्ञानाद् भर्तुरि'ति। धर्मेण मातापितृभ्यां दत्तो दत्तकः। +विश्व.२।१३४

(२) मात्रा भर्त्रनुज्ञया प्रोषिते प्रेते वा भर्तरि, पित्रा वोभाभ्यां वा सवर्णाय यस्मै दीयते स तस्य दत्तकः पुत्रः। यथाह मनुः—'माता पिता वा दद्याता यमद्भिः पुत्रमापदि। सदृश प्रीतिसंयुक्त स ज्ञेयो दत्रिमः सुतः॥' इति (मस्मृ.९।१६८)। आपद्ग्रहणादनापदि न देयः। दातुरय प्रतिषेधः। तथा एकपुत्रो न देयः। 'न त्वेवैक पुत्र दद्यात्प्रतिगृह्णीयाद्वा' इति वसिष्ठस्मरणात्। तथाऽनेकपुत्रसद्भावेऽपि ज्येष्ठो न देयः—'ज्येष्ठेन जातमात्रेण पुत्रीभवति मानवः' (मस्मृ. ९।१०६) इति। तस्यैव पुत्रकार्यकरणे मुख्यत्वात्। पुत्रप्रतिग्रहप्रकारश्च 'पुत्रं प्रतिग्रहीष्यन्बन्धूनाहूय राजनि चावेद्य निवेशनमध्ये व्याहृतिभिर्हुत्वा अदूरबान्धव बन्धुसंनिकृष्ट एव प्रतिगृह्णीयात्' इति वसिष्ठेनोक्तः। अदूरबान्धवमिति अत्यन्तदेशभाषाविप्रकृष्टस्य प्रतिषेधः। एव क्रीतस्वयदत्तकृत्रिमेष्वपि योजनीयम्। समानन्यायत्वात्। *मिता.

(३) पिता तदभावे तदनुज्ञाया वा माता य पुत्रं प्रीत्याऽद्भिरन्यस्मै दद्यात् स प्रतिग्रहीतुर्दत्तकः पुत्रो भवति। वीमि.

(४) माता भर्त्रनुज्ञया, पिता वा यमन्यस्मै दद्यात्स तस्य दत्तकः पुत्रः। तथा च मनुः— 'माता पिता वा दद्याता यमद्भिः पुत्रमापदि। सदृश प्रीतिसयुक्त स ज्ञेयो दत्रिमः सुतः॥' (मस्मृ.९।१६८) आपदीत्युक्तेरनापदि दातुः प्रत्यवायः। मातापितरौ प्रत्येकं मिलितौ वा। अद्भिरिति दानप्रतिग्रहप्रकारोपलक्षणम्। सदृश सवर्णम्। प्रीतिसयुक्तमिति क्रियाविशेषणम्। एकः पुत्रश्च न देयो न प्रतिग्राह्यः। तथा च वसिष्ठः—'शुक्रशोणितसंभव' इत्यादि। अत्र भर्त्रनुज्ञा विना स्त्रियाः पुत्रप्रतिग्रहनिषेधादत्तानुज्ञे भर्तरि मृते विधवया कृतः पुत्रो दत्तको न भवतीत्याहुः। तन्न। अपुत्रस्य गत्यभावात्पुत्रीकरणस्यावश्यकत्वश्रवणाच्छास्त्रमूलकतदनुज्ञायास्तत्राप्यपेक्षितेः। न चैवमनुज्ञानादन्यत्रेति व्यर्थम्। व्यावर्त्याभावाच्छास्त्रीयानुमतेः सर्वत्रावश्यकत्वादिति वाच्यम्। मुमुक्षोः पत्यन्तरे पुत्रवतो वाऽनुज्ञाया असंभवाद्भार्या यदि स्वपुत्रार्थमेव त प्रतिगृह्णीयात्तदर्थत्वात् प्रतिषेधस्य। 'सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत्। सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः॥' इति (मस्मृ.९।१८३)। इति पुत्रकार्यश्राद्धादेः सपत्नीपुत्रेण सिद्धेर्भर्त्रनुज्ञा विना तादृश्या पुत्रो न कार्यः। उभयोरपि तत्र कार्यस्य तेन निष्पत्तेः। भर्तुर्हि स औरस एव मुख्यः, तस्या अपि दत्तकवद्गौण इति तादृश्या भर्त्रनुमतिमन्तरेणेतरो न प्रतिग्राह्य इति तात्पर्यार्थः। वस्तुतस्तु—'भ्रातृणामेकजातानामेकश्चेत् पुत्रवान् भवेत्। सर्वास्तास्तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥' (मस्मृ.९।१८२) इति वचनवदेतस्यापि भ्रातृपुत्रस्य गौणदत्तकपुत्रत्वादिसभवेऽन्यः पुत्रप्रतिनिधिर्न कार्य इत्यर्थकतया मिताक्षरास्मृतिचन्द्रिकादौ व्याख्यातत्वाद्भर्तरि जीवति भार्यया स्वातन्त्र्येण तदननुमतौ न पुत्रीकरणीय इति भर्तुरनुज्ञानादन्यत्रेत्यस्यार्थः। मृते तु तस्मिन् यत्पारतन्त्र्य तदनुमतिरेवापेक्षिता। एवं सति दृष्टार्थता भवति प्रतिषेधस्य। तस्माददत्तानुज्ञे मृतेऽपि भर्तरि भार्याया दत्तकादिकरणमविरुद्धम्। मनुवचनद्वयस्य पूर्वोक्तार्थकत्वे उपपत्तिरपि मिताक्षरादावेवोक्ता। यदपुत्रस्त्रिकथग्रहणाधिकारिक्रमपरे 'पत्नी दुहितर' इत्यत्र 'अप्रजः-स्त्रीधन' इत्यत्र च भ्रातृपुत्रसपत्नीपुत्रयोः पन्यादिभर्त्राद्यभावेऽधिकारप्रतिपादनविरोधापत्तिरिति। तच्च तत्रैव प्रपञ्चयिष्यते। व्यप्र.४७६-४७७

(५) मिताटीका—मौलक्रमेणैवाह। मात्रेति। अस्याः

+ अप. विश्वगतम्। * सवि. मितागतम्।

(१) **यास्मृ.**२।१३०; **अपु.**२५६।१७; **विश्व.**२।१३४; **मिता.**; **अप.** भवेत् (स्मृतः); **स्मृसा.**६९ वा य (वापि) शेष अपवत्, उक्त, गौतमः; **पमा.**५१३; **मपा.**६५०; **विचि.**२३२; **स्मृचि.**३३, **नृप्र.**३९; **सवि.**३६१, **वीमि.**; **व्यप्र.**४६७ अपवत्; **व्यम.**४७; **विता.**३५९; **सिन्धु.**८६८ दत्तको भवेत् (दत्रिमः स्मृतः) वत्सव्यासः; **राकौ.**४५४; **बाल.**२।१३५(पृ.२१६) वा य (य वा); **समु** १३७; **दच.**१०.

पत्यसंनिध्ये दानेऽधिकारः। तच्च द्विविधम्। तत्राद्ये आह। भर्त्रनुज्ञया प्रोषिते इति। तयैवेत्यर्थः। सन्निहितेऽनधिकारिणि वेत्यपि बोध्यम्। द्वितीये आह। प्रेते वा भर्तरीति। तथा चात्र स्वातन्त्र्यम्। तथा च वसिष्ठः (वस्मृ. १५।१,२) 'शुक्रशोणितसभव. पुत्रो मातापितृनिमित्तकस्तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः' इति। मौलं पक्षान्तरमाह। पित्रा वेति। अनयोश्चाय विशेषः। उभयोर्जीवने अस्यापि पत्न्यनुमत्यैव दातृत्वम्। अत्यन्तापदि तु कथंचिदपि तदनुमत्यलाभे स्वातन्त्र्यमपि। यद्यपि मूले एतावदेवोक्त तथापि दद्यातामिति मन्वनुरोधेन कैमुतिकन्यायेन च लब्धमर्थमाह। उभाभ्या वेति। पुत्रस्य सवर्णत्वे प्रतिग्रहीतुरपि तत्त्वमर्थसिद्धमेवेत्याह। सवर्णायेति। सवर्णां य इति पाठान्तरम्। यस्मा इति। योऽत्यन्तदुर्गत्या भरणासामर्थ्येन। विधिपूर्वक इति शेषः। सः, प्रतिग्रहीतृसवर्णः। तस्येति। प्रतिग्रहीतुरेवेत्यर्थः। अयमद्यामुष्यायणः। द्यामुष्यायणोऽप्ययमस्तीत्यन्यत्र स्पष्टम्। तत्र मान मनुमाह। यथाहेति। अत्र वाशब्दद्विवचनयोः स्वारस्याद्ध्याहारेणार्थत्रयलाभः। तथा च भर्तरि प्रोषितादौ तदनुमत्यैव मृते वाऽऽपदि केवलमातुरधिकारो दाने, तथा मातरि मृतायामुन्मादादिदोषयुक्तायां वा तदननुमत्या, पितृगृहस्थितायां वा तदनुमत्यैवापदि केवलं पितुरधिकारस्तत्र। अन्यथोभयोरपि सहैवेति बोध्यम्। तथा च वसिष्ठः (वस्मृ.१५।५) 'न स्त्री पुत्र दद्यात्प्रतिगृह्णीयाद्वाऽन्यत्र भर्तुरनुज्ञानादिति' । स्त्रीग्रहणात्पत्युः पूर्वोक्ते एव विषये स्वातन्त्र्य द्योत्यते, न तु सर्वदा। उपक्रमविरोधात्। विशेषणे निषेधसंक्रमाद्दाने इव प्रतिग्रहेऽपि स्त्रिया अधिकारः। होमस्तु न भवति। शौनकोऽपि, 'वन्ध्या वा मृतपुत्रा वा पुत्रार्थं समुपोष्य च।' इति। इदं च सधवाविधवोभयसाधारणं इति स्पष्टमेव। एतेनात्र चशब्दः पठितुं युक्तो न वाशब्द इत्यादि मेधातिथ्युक्तमपास्तम्। 'अद्भिरिति वसिष्ठोक्तविध्युपलक्षणम्। सदृश प्रतिग्रहीतृसवर्णम्। एतेन तत्त्वं 'न जातितः, किं तु कुलानुरूपैर्गुणैः। तथा च क्षत्रियादिरपि ब्राह्मणस्य दत्तको युज्यते' इति मेधातिथ्युक्तमपास्तम्। सवर्णसदृशपठितस्यापि तत्त्वस्यैवौचित्यात्।'सजातीयेष्वि'ति मूलोक्तेश्च। प्रीतीति, लोभभयद्वेषादिनिरासार्थम्। इद च देयपुत्रविशेषणम्। 'विक्रयं चैव दान च न नेयाः स्युरनिच्छवः।' इत्युक्तेः। दत्रिम इति। 'त्रेर्मम् नित्यम्'(व्यासू.४।४।२०) इति साधुः। आपदीत्यस्य दुर्भिक्षादावित्यर्थः। यत्तु तस्य प्रतिग्रहीतुरपुत्रत्वे इत्यर्थः। तथा च सपुत्रत्वे तस्यैव दोषः। 'अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा। पिण्डोदककियाहेतोर्यस्मात्तस्मात्प्रयत्नतः॥' इत्यन्यादिस्मरणादिति। तन्न। तथा सत्त्वेऽपि तदापत्तेर्ग्रहणस्यात्रोपस्थापकाभावात्। तदेतत् ध्वनयन् तल्लब्धमर्थमाह। आपदिति। न देय इति। इति गम्यते इति शेषः। तत एवाह। दातुरिति। अनापदीत्यादिः। न प्रतिग्रहीतुरित्यर्थः। तथा च तत्र दाने तस्यैव दोषो न त्वस्येति भावः। इत एव सगतेर्विशेषमाह। तथेति। न देय इति। नापि प्रतिग्राह्य इति शेषः। तथाच तथाकरणे उभयोर्दोष इति भावः। वाशब्दः चार्थे। स हि सतानाय पूर्वेषामिति तच्छेषः। शौनकोऽपि, 'नैकपुत्रेण कर्तव्य पुत्रदान कदाचन। बहुपुत्रेण कर्तव्य पुत्रदान प्रयत्नतः॥' इति। अत्र नैकेति निषेधविधिः। ततोऽर्थलब्धार्थानुवादकमुत्तरार्ध, न तु सोऽपि विधिः। तथा सति आपद्यपि यथाकथञ्चित्स्ववन्निर्बाहेण तददाने दोषापत्तेः। प्रयत्नत इत्युक्त्याऽस्यावश्यकत्वलाभेन नित्यविधित्वे निमित्तफलयोरनपेक्षया आपदाद्यनपेक्षत्वेन तत्रापि पदकरणे दोषापत्तेश्च। एतेन नैकेत्येव सिद्धे बहुपुत्रेणेत्यायुक्त्या द्विपुत्रस्य तद्दाने नाधिकार इति लब्धमित्यपास्तम्। उक्तयुक्तेः। एकपुत्रस्य तददाने वसिष्ठोक्तस्य हेतोः सहित्यादेस्तत्राभावाच्च। तस्मात्तदेकवाक्यतयाऽपि तथैव। अत एव बहुशब्दोऽनेकपर एव। प्रयत्नत इत्यपि वसिष्ठोक्तविधिपरमेवेति बोध्यम्। तदेतत् ध्वनयन् विशेषान्तरमाह। तथाऽनेकपुत्रेति। अन्यथा बहुपुत्रेत्युक्त स्यात्। तथा च वासिष्ठे एकं पुत्रमित्युपलक्षणम्।

मनुमाह। ज्येष्ठेनेति। अस्य यथाश्रुतार्थो न विवक्षितोऽन्यविरोधापत्तेः, अत आह। इति तस्यैवेति। अनेनेत्यर्थः। मुख्यत्वात्, मुख्यत्वप्रतिपादनात्। तथा च परलोकहानिरेवेति भावः। अत एव स्मृत्यन्तरमपि, 'न ज्येष्ठ पुत्र दद्यादि'ति। अद्भिरित्यनेन सूचितमाह।

पुत्रप्रतीति । निवेशनस्य, गृहस्य । 'सदेहे चोत्पन्ने दूरे शूद्रमिव स्थापयेत् । विज्ञायते ह्येकेन बहून् ततस्त्रायते' इति तच्छेषः । (वस्मृ. १५।७-८) । सति संभवे बन्धुसनिकृष्ट, भ्रातृपुत्रादिकम् । तदभावे अदूरबान्धवं, सनिहितदेशवृत्तिपित्रादिक ज्ञातकुलशील अन्यमपि । परीक्षितस्यापि कथञ्चित् ब्राह्मण्यादिसदेहे उत्पन्ने यावत्तन्निवृत्ति दूरे स्थापयेत् तेन न व्यवहरेत् । अपुत्रस्य पुत्रीकरणावश्यकत्वद्योतनाय श्रुत्याकर्षः । विज्ञायते इति । श्रूयते इत्यर्थः । हि यत एकेनानौरसेनापि पुत्रेण बहून् पित्रादीन् ततः नरकात् त्रायते इत्यर्थः । किञ्चिद्दूरस्थसग्रहायाह । अदूरमिति । अनेनेत्यर्थः । दत्तके उक्तपुत्रीकरणविधिं क्रीतादिष्वप्यतिदिशति । एवं क्रीतेति । प्रागुक्त होमभिन्न सर्वमपि ग्रहणापादानग्रहीतृविषयक नियमनमित्यर्थः । यथायोग्य दृष्टार्थत्वात् वसिष्ठेन विक्रयत्यागोपादानाच्च । स्वयंदत्ते तु होमोऽपि । तत्रापि प्रतिग्रहसत्त्वात् । एवमपविद्धेऽपि यथासभव बोध्यमिति भावः । अतिदेशवचनाभावेऽपि युक्तिरेव नियामिकेत्याह । समानेति । बाल.

क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः ।
दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः सहोढजः ॥

(१) क्रीतस्तु ताभ्यामधिकृताभ्या मातापितृभ्या मूल्येन विक्रीतः क्रेतुः क्रीताख्यः पुत्रः । तुशब्दो दत्तकन्यायानुकर्षणेन मातुरस्वातन्त्र्यप्रतिपत्त्यर्थः । स्वयमेव तु मातापितृविहीनः पुत्रत्वेनाङ्गीकृतः कृत्रिमः । दत्तात्मा त्वेवलक्षण एव स्वयदत्तः । स्वयमेव दत्त आत्मा येन स तथोक्तः । एते च दत्तकादयः स्मृत्यन्तरानुसारात् सदृशा विज्ञेयाः । सहोढजस्तु गर्भे विन्नः, गर्भस्थे यस्मिन् मातुरुद्वाहः । स च वोढुः पुत्रो मातृजातीयः प्रत्येतव्यः । विश्व.२।१३५

(२) क्रीतस्तु पुत्रस्ताभ्या मातापितृभ्या मात्रा पित्रा वा विक्रीतः पूर्ववत् तथैकं पुत्रं ज्येष्ठं च वर्जयित्वा आपदि सवर्ण इत्येव । यत्तु मनुनोक्तं–'क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् । स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा॥' (मस्मृ.९।१७४) इति, तद्गुणैः सदृशोऽसदृशो वेति व्याख्येय न जात्या । 'सजातीयेष्वयं प्रोक्तस्तनयेषु' इत्युपसंहारात् । कृत्रिमः स्यात्स्वयकृतः । कृत्रिमस्तु पुत्रः स्वय पुत्रार्थिना धनक्षेत्रप्रदर्शनादिप्रलोभैनैव पुत्रीकृतो मातापितृविहीनः तत्सद्भावे तत्परतन्त्रत्वात् । दत्तात्मा तु पुत्रो यो मातापितृविहीनस्ताभ्या त्यक्तो वा तवाहं पुत्रो भवामीति स्वयदत्तत्वमुपगतः । सहोढजस्तु गर्भे स्थितो गर्भिण्या परिणीताया यः परिणीतः स वोढुः पुत्रः । ×मिता.

(३) कृत्रिमसंज्ञकस्तु पुत्रो भवति, यः स्वयमेव त्वं मे पुत्रो भवेति पुत्रः क्रियते । *अप.

(४) मिताटीका– अन्ये तु गर्भे स्थितः गर्भिण्या परिणीताया स्वीकृतः गर्भेण सह योढा पश्चात्तस्या जात इत्यर्थः । बाल.

उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः ॥

(१) मातापितृभ्यामेव कथञ्चित्—उत्सृष्ट इति । अपविद्धसंज्ञक इत्यर्थः । विश्व.२।१३६

(२) अपविद्धो मातापितृभ्यामुत्सृष्टो यो गृह्यते स ग्रहीतुः पुत्रः सर्वत्र सवर्ण इत्येव । मिता.

(३) मातापितृभ्यामुत्सृष्टः पातित्यादिकारणमन्तरेण त्यक्तो येन गृह्यते, स तस्यापविद्धसंज्ञकः पुत्रो भवति । अप.

(४) अपविद्धो द्वादशः । स च मातापितृभ्या तयोरेकतरेण वा दारिद्र्यादिना त्यक्तो येन पुत्रत्वे वृतस्तस्य

---

(१) **यास्मृ.**२।१३१; **अपु.**२५६।१८; **विश्व.**२।१३५ श्च (स्तु); **मिता.**; **अप.** स्यात् (च); **विर.**५७३ द्वितीयपादः; **पमा.**५१३; **मपा.**६५० स्यात्स्वयकृतः (च कृतः स्वयम्); **विचि.**२३२; **स्मृचि.**३१उत्त.:३३; **नृप्र.**३९; **सवि.**३९१; **वीमि.**; **व्यप्र.**४६७; **व्यम.**४७; **वितं.**३५९; **सिन्धु.** ९०१ प्रथमपादः तृतीयपादश्च; **राकौ.**४५४ दत्ता (दत्वा); **बाल.**२।१३५(पृ.२१६); **समु.**१३७; **भाच.**९।१७० द्वितीयपादः :९।१७३ चतुर्थपादः :९।१७४ प्रथमपादः.

× मपा., वीमि., व्यप्र. मितागतम् ।

* शेषं मितागतम् ।

(१) **यास्मृ.**२।१३२; **अपु.**२५६।१९; **विश्व.**२।१३६; **मिता.**; **अप.** भवेत्सुतः (सुतो भवेत्); **पमा.**५१३; **मपा.** ६५०; **विचि.**२३२; **स्मृचि.**३१,३३; **नृप्र.**३९; **सवि.**३९१; **वीमि.**; **व्यप्र.**४६७; **व्यम.**४७; **वितं.**३५९; **राकौ.**४५४; **बाल.**२।१३५ (पृ.२१६); **समु.**१३७; **भाच.**९।१७१.

पुत्रः । *विचि.२३३

औरसादीना द्वादशविधपुत्राणा पिण्डदत्वदायादत्वविचार·

[1]पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ॥

(१) एतेषा क्रमोपदिष्टानामौरसादीना पुत्राणा पूर्वाभावे परः परः पिण्डदोऽशहरश्च प्रत्येतव्यः । पूर्वसद्भावे तु परस्यानृशस्यार्थं वृत्तिमात्रकल्पनम् । तथाच स्वायम्भुवं—एक एवौरस इत्यादि (पृ.१३२४) । तथा च शंखः—द्वौ भागौ पितुरित्यादि (पृ.१२८२) । त्रयः क्षेत्रज पुत्रिकापुत्रयोरित्येकैकस्याध्यर्धभाक्त्वम् । पितृविभागवचनाच्च जीवत्येव पितर्यंते सत्यौरसेऽशभाजः । ऊर्ध्व त्वाचार्यवचनात् पूर्वाभाव एवोत्तराधिकार इति व्यवस्था । यत्तु क्रमान्यत्ववचन तत् पितुरेवेच्छाविकल्पतया द्रष्टव्यम् । तदभावे त्वाचार्योक्त एव क्रम इति । अनया दिशान्यान्यप्येवज्ञातीयकानि विभागवाक्यानि व्याख्येयानि । विश्व.२।१३६

(२) एव मुख्यामुख्यपुत्राननुक्रम्यैतेषा दायग्रहणे क्रममाह—पिण्डदोऽशहरश्चैषामिति । एतेषा पूर्वोक्ताना पूर्वस्य पूर्वस्याभावे उत्तर उत्तरः श्राद्धदोऽशहरो धनहरो वेदितव्यः । औरसपौत्रिकेयसभवाये औरसस्यैव धनग्रहणे प्राप्ते मनुरपवादमाह—'पुत्रिकाया कृताया तु यदि पुत्रोऽनुजायते । समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः ॥' (मस्मृ.९।१३४) इति । तथा अन्येषामपि पूर्वस्मिन् पूर्वस्मिन्सत्यप्युत्तरेषा पुत्राणा चतुर्थांशभागित्वमुक्तं वसिष्ठेन—'तस्मिश्चेत्प्रतिगृहीते औरस उत्पद्येत चतुर्थभागभागी स्याद्दत्तक' इति । दत्तकग्रहण क्रीतकृत्रिमादीना प्रदर्शनार्थम् । पुत्रीकरणाविशेषात् । तथा च कात्यायनः— 'उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः । सवर्णा असवर्णास्तु ग्रासाच्छादनभाजनाः ॥' इति । सवर्णा दत्तकक्षेत्रजादयस्ते सत्यौरसे चतुर्थांशहराः । असवर्णाः कानीनगूढोत्पन्नसहोढजपौनर्भवास्ते त्वौरसे सति न चतुर्थांशहराः किन्तु ग्रासाच्छादनभाजनाः । यदपि विष्णुवचन—'अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः । पौनर्भवश्च नैवैते पिण्डरिक्थांशभागिनः ॥' इति । तदप्यौरसे सति चतुर्थांशनिषेधपरमेव । औरसाद्यभावे तु कानीनादीनामपि सकलपित्र्यधनग्रहणमस्त्येव । 'पूर्वाभावे परः परः' इति वचनात् । यदपि मनुवचन—'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः । शेषाणामानृशस्यार्थं प्रदद्यात्तु प्रजीवनम् ॥' (मस्मृ. ९।१६३) इति, तदपि दत्तकादीनामौरसप्रतिकूलत्वे निर्गुणत्वे च वेदितव्यम् । तत्र क्षेत्रजस्य विशेषो दर्शितस्तेनैव—'षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् । औरसो विभजन्दायं पित्र्यं पञ्चममेव वा ॥' (मस्मृ. ९।१६४) इति । प्रतिकूलत्वनिर्गुणत्वसमुच्चये षष्ठमंश, एकतरसद्भावे पञ्चममिति विवेक्तव्यम् । यदपि मनुना पुत्राणा षट्कद्वयमुपन्यस्य पूर्वषट्कस्य दायादवान्धवत्व, उत्तरषट्कस्यादायादवान्धवत्वमुक्त — 'औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥ कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ॥' (मस्मृ.९।१५९,१६०) इति, तदपि स्वपितृसपिण्डसमानोदकाना संनिहितरिक्थहरान्तराभावे पूर्वषट्कस्य तद्रिक्थहरत्वमुत्तरषट्कस्य तु तन्नास्ति । बान्धवत्व पुनः समानगोत्रत्वेन सपिण्डत्वेन चोदकप्रदानादिकार्यकरत्व वर्गद्वयस्यापि सममेवेति व्याख्येयम् । 'गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः । गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधाम् ॥' (मस्मृ. ९।१४२) इत्यत्र दत्त्रिमग्रहणस्य पुत्रप्रतिनिधिप्रदर्शनार्थत्वात् । पितृधनहारित्व तु पूर्वस्य पूर्वस्याभावे सर्वेषामविशिष्टम् । 'न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः ।' (मस्मृ.९।१८५) इत्यौरसव्यतिरिक्ताना पुत्रप्रतिनिधीना सर्वेषा रिक्थहारित्वप्रतिपादनपरत्वात् । औरसस्य तु 'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः ।' (मस्मृ. ९।१६३) इत्यनेनैव रिक्थभाक्त्वस्योक्तत्वात् । दायादशब्दस्य 'दायादानपि दापयेत्' इत्यादौ पुत्रव्यतिरिक्तरिक्थभाग्विषयत्वेन प्रसिद्धत्वाच्च । वासिष्ठा-

* वीमि विचिगतम् ।

(१) **यास्मृ.**२।१३२; **अपु.**२५६।१९; **विश्व** २।१३६; **मिता.**; **अप** ; **व्यक.**१५४, **गौमि.**२८।३२, **उ** २।१४।२, **विर.**५५१, **स्मृसा.**६७, **पना.**५१३; **मपा.**६५१; **विचि** २३२; **व्रात.** १८७ प्रथमपादः, **स्मृचि.**३३; **नृप्र.**३९, **सवि** ३९२,४०८(=), **मच.**९।१८१, **वीमि.**, **व्यप्र.**४८१; **विता.**३६४; **राको.**४५४; **बाल.**२।१३५ (पृ.२१६); **समु.** १३७; **कृभ.**८८२; **दच.**३०.

दिषु वर्गद्वयेऽपि कस्यचिद्व्यत्ययेन पाठो गुणवदगुणवद्विषयो वेदितव्यः। गौतमीये तु पौत्रिकेयस्य दशमत्वेन पाठो विजातीयविषयः। तस्मात्स्थितमेतत्पूर्वपूर्वाभावे परः परांऽशभागिति। यत्तु 'भ्रातॄणामेकजातानामेक श्चेत्पुत्रवान्भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥' (मस्मृ.९।१८२) इति। तदपि भ्रातृपुत्रस्य पुत्रीकरण संभवेऽन्येषा पुत्रीकरणनिषेधार्थं, न पुनः पुत्रत्वप्रतिपादनाय। 'तत्सुता गोत्रजा बन्धुः' इत्यनेन विरोधात्। *मिता.

(३) पुत्रप्रतिनिधीना मध्ये दत्तक एव कलियुगे ग्राह्यः। अत एव कलौ निवर्तन्त इत्यनुवृत्तौ शौनकेनोक्तम्– 'दत्तौरसेतरेषा तु पुत्रत्वेन परिग्रहः' इति। यदा तु पुत्रिकाया कृतायामौरसो जायते तदाऽऽह मनुः–'पुत्रिकाया कृताया तु यदि पुत्रोऽनुजायते। समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः॥' क्षेत्रज प्रति विशेषमाह मनुरेव -'यद्येकरिक्थिनौ स्याता मौरसक्षेत्रजौ सुतौ। यस्य यस्य पितृक रिक्थ तत्स गृह्णीत नेतरः॥' एतत्क्षेत्रजस्य द्व्यामुष्यायणस्य बीजिधनेऽधिकारित्व विधत्ते। वसिष्ठस्तु दत्तके पुत्रे सत्यौरसोत्पत्तौ विशेषमाह–'तस्मिन्क्षेत्रप्रतिगृहीत औरसः पुत्र उत्पद्येत चतुर्थभागभागी स्यात्' इति। सर्वे च न्यूनाधिकभागविकल्पाः सगुणनिर्गुणापेक्षया व्यवस्थापनीयाः। सर्वेषा च पुत्रप्रतिनिधीना पूर्वाभावे परेषा दायहरत्वे सत्यपि केचिद्दायादाः केचिच्च नेति यदुच्यते मन्वादिभिस्तन्नायमभिप्रायः—पितृसपिण्डस्यापुत्रदायहारिणस्त एव पुत्रप्रतिनिधयो भवन्ति, ये दायादत्वेन निर्दिष्टा नेतर इति। +अप.

(४) अत्र चैकस्यैव केनचिद्बन्धुदायादत्वमुक्त केनचिदबन्धुदायादत्व यदुक्त तत्सगुणनिर्गुणत्वे अपेक्ष्याविरोधनीयम्। यापि यथा पूर्वंश्रेष्ठत्वज्ञापनार्थ द्वादशानामुपक्रमणे पौर्वापर्यवैकल्पिकोक्तिः सा पूर्वोक्तस्य सगुणत्वे पश्चादुक्तस्य निर्गुणत्वे ज्ञेया। एवमन्यत्रापनयैव दिशा अविरोध ऊहनीयः। विर.५५१-५५२

(५) मिताटीका– ननु याज्ञवल्क्येन 'औरसो धर्मपत्नीज' इत्यादिना द्वादशविधपुत्राः प्रदर्शिताः। 'पूर्वाभावे परः पर' इति रिक्थग्रहणक्रमोऽपि दर्शितो वाक्यशेषे स्मृत्यन्तरेष्वन्यथा दर्शितः।

अतः कथं 'पूर्वाभावे परः पर' इत्युक्तिरित्याशङ्क्याह। वासिष्ठादिषु वर्गद्वयेऽपीति। अथमत्र परिहाराभिप्रायः। मनुना तु 'औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्॥ कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयदत्तश्च शौद्रश्च षडदायादबान्धवाः॥' इति (मस्मृ.९।१५९, १६०) स्वसपिण्डसमानोदकाना सनिहितरिक्थहरान्तराभावे प्रथमषट्कस्य तद्रिक्थहरत्वं द्वितीयषट्कस्य तदभाव च प्रतिपाद्य तत्प्रसगादेव पश्चादौरसादिपुत्रस्वरूपप्रतिपादनात्। उपक्रमानुसारेण तत्वतः 'एष एव क्रम' इति ज्ञायते। अत एव तत्र क्रमश इत्युक्तिरपि सर्वात्मनाऽनुमेव क्रम न नियच्छति। अपि तु कस्मिंश्चिद्विशेषे इत्येव। स च विशेषो गुणवदगुणवद्रूप एवेति। एव स्मृत्यन्तरपाठस्यापि गतिरिति युक्तियुक्त चैतत् याज्ञवल्क्योक्तम्। तथाहि औरसपुत्रिकयोस्त्वौरसत्वात्समत्वादेव, क्षेत्रजगूढजकानीनपौनर्भवाना तु स्वबीजस्वक्षेत्रोत्पन्नत्वादेव दत्ताद्यपेक्षया प्रावल्यम्। सहोढजस्य स्वकीयत्वेन परिगृहीतक्षेत्रोत्पन्नत्वेऽप्युत्तरे षट्के पाठो वाचनिक एवेति सर्वमनवद्यम्। एतच्च सर्व युगान्तरविषयम्। कलौ त्वौरसदत्तकावेव औरससमत्वात्पुत्रिका च। 'दत्तौरसेतरेषा तु पुत्रत्वेन परिग्रह' इति स्मरणात्। अत्र वाक्यशेषे 'कलौ युगे त्विमान्धर्मान् वर्ज्यानाहुर्मनीषिण' इति वाक्यशेषः। शिष्टाचारोऽपि तथैव दृश्यते कलौ। सुबो.

(६) अंशपद पुत्रिकाक्षेत्रजस्थले समग्राशपरं, लिखितब्रह्मपुराणवचनाच्च। 'उत्पन्ने त्वौरसे पुत्रे तृतीयाशहराः सुताः। सवर्णा असवर्णास्तु ग्रासाच्छादनभाजनाः॥' इति कात्यायनवचनाच्च। सवर्णदत्तकृत्रिमगूढोत्पन्नाऽपविद्धपुत्रानुरोधेनापि समग्राशपरमशपदम्। 'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः। शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्॥' इति मनुवचन त्वौरसस्य सगुणत्वेऽन्येषा निर्गुणत्वे चेत्यवधेयम्। सोऽयं चकारः समुच्चयार्थः। वीमि.

* पमः., सवि. मितागतम्।

+ विचि. अपगतम्।

(७) अन्येषामपि गुणतारतम्येन देशाचारानुसारेण वा यथायथ व्यवस्था द्रष्टव्या। व्यप्र.४८४

सवर्णादिभेदेन देशाचारभेदेन वा विरोधः परिहरणीयः। *व्यप्र.४८५

(८) मिताटीका—[कलौ पुत्रत्व केषा इत्यत्र केचिन्मतम्]— यद्यप्यत्र प्रकरणादंशहर इत्येवोचितमिति पिण्डद इत्यसवद्धं, अथ श्राद्धप्रकरणेऽनुक्तत्वात्प्रकरणान्तरे संगत्यभावादत्रैव पुत्रप्रसंगेन तदप्युक्तं लाघवादिति चेत्, एवमपि अन्ते वाच्यमागन्तूनामिति न्यायात् नादाविति तथोक्तासंगतिरेव, तथापि पुत्राणा पिण्डदत्वमावश्यकमदाने प्रत्यवायश्रवणात् धनहरत्व तु आनुषङ्गिकमन्वाचयशिष्ट न तु मुख्यमिति, नापि तेषामशहरत्वप्रयुक्त पिण्डदत्वमिति अंशहरत्वप्रयुक्तपिण्डदत्वस्यान्यत्र क्वचित्समनियतस्य शास्त्रीयत्वेऽपि पिण्डदत्वप्रयुक्ताशहरत्वस्य तथा न शास्त्रीयत्वमिति अनयोर्मिथो न व्याप्यव्यापकभावो नापि सार्वत्रिक समनैयत्य इति च सूचनार्थं भगवता योगीश्वरेण 'पिण्डदांऽशहरश्चेत्युक्तम्। अनेनैवाशयेनावतरणे प्रकरणसंगतये तथोक्तमप्यत्र व्याख्याने मौलक्रमेणैव व्याख्यात व्याख्यातेति बोध्यम्। बाल.२।१३२(पृ.१७४)

केचित्तु औरसेन पुत्रिकासग्रहवत् दत्तपदेन तत्समकक्षक्रीतस्वयदत्तकृत्रिमाणामपि ग्रहणम्। अत एव 'श्रेयसः श्रेयस' इति मनूक्तिः, 'स्वगोत्रेण कृता ये स्युर्दत्तक्रीतादयः सुताः। विधिना गोत्रता यान्ति न सापिण्ड्यं विधीयते॥' इति बृद्धगौतमोक्तिः। 'दत्तक्रीतादिपुत्राणा बीजवप्तुः सपिण्डता। सप्तमी पञ्चमीं चैव गोत्र तत्पालकस्य च॥' इति बृहन्मनुः। 'औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः।' इति कलिधर्मप्रस्तावे पराशरश्च संगच्छते। औरसादीना सर्वेषा पुत्राणा प्रकृतत्वादौरसादीनुपक्रम्य 'तेषा पूर्वः पूर्वः श्रेयान्स एव दायहरः स चान्यान्बिभृयादिति' वैष्णवम्। औरसादीना पुत्राणा पूर्वपूर्वाभावे परः परो रिक्थमर्हति पूर्वस्सद्भावे परसंवर्धन स एव कुर्यादिति, तदप्यपवादेतरविषयम्। यदि तु समानरूपा बहवः पुत्रास्तदा सर्वे एव विभज्य धनं गृह्णीयुरिति मनुव्याख्यातारः। यद्यपि मन्वादिकं युगान्तरपरतयाऽपि सुयोज तथापि अन्त्यमन्यथा दुर्योजमेवेत्याहुः। वस्तुतो नियोगनिषेधेनैव क्षेत्रजनिषेधे तत्र क्षेत्रज इत्यौरसविशेषणमावश्यक यथा तथा कृत्रिमक इत्यपि दत्तस्यैव विशेषणमिति बोध्यम्। बाल.२।१३२(पृ.१८०)

* शेष मितागतम्।

अत्र द्वादशविधाः पुत्राः सजातीया एव ग्राह्याः

सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः॥

(१) सर्वे चैते दत्तकादयः सजातीया इत्येतत् प्रदर्शयितुमाह—सजातीयेष्वयमिति। अथ मया विधिरुक्त इति वदन् स्मृत्यन्तरोक्ताना विषयान्तरेऽर्थवत्ता दर्शयति। तच्च व्याख्यातमेव पितर्युपरत एवेय द्रव्यसबन्धयौर्वापर्यकल्पनेति, जीवति तु स्मृत्यन्तरोक्तया विभागव्यवस्थयेति। विश्व.२।१३७

(२) इदानीमुक्तोपसहारव्याजेन तत्रैव नियममाह—सजातीयेष्वयमिति। समानजातीयेष्वेव पुत्रेषु अयं 'पूर्वाभावे परः पर' इत्युक्तो विधिः न भिन्नजातीयेषु। तत्र च कानीनगूढोत्पन्नसहोढजपौनर्भवाना सवर्णत्व जनकद्वारेण न स्वरूपेण। तेषा वर्णजातिलक्षणाभावस्योक्तत्वात्। तथाऽनुलोमजाना मूर्धावसिक्तादीनामौरसेष्वन्तर्भावात्तेषामप्यभावे क्षेत्रजादीना दायहरत्व बोद्धव्यम्। शूद्रापुत्रस्त्वौरसोऽपि कृत्स्न भागमन्याभावेऽपि न लभते। *मिता.

(३) गूढोत्पन्नादय आत्मनः सजातीया एव सवर्णा एव पुत्रत्वेन ग्राह्या नेतर इति तात्पर्यार्थः। शूद्रापुत्रः स्वे क्षेत्रे स्वयमुत्पादितश्चेति न प्रतिनिधिः किं त्वौरसः, तथाऽपि प्रतिनिधिषु मनुना पठितः। तत्रायमभिप्रायः—अन्येष्वनुलोमजेष्वौरसेषु सत्सु न प्रतिनिधिरस्ति, शूद्रापुत्रस्यौरसत्वे सत्यपि पुत्रप्रतिनिधिः कार्य एवेति। अप.

(४) मिताटीका—तेषा वर्णजातिलक्षणाभावस्योक्त-

* विवादरत्नाकरस्थ प्रकाशमत मितागतम्।

(१) **यास्मृ** २।१३३; **अपु.**२५६।२०; **विश्व.**२।१३७; **मिता.**; **अप.**; **गौमि.**२८।३१, **उ.**२।१४।२; **मनु.**९।१७४; **विर.**५७३; **स्मृचा.**६७; **मया.**६५१ मया विधिः (यथाविधि); **मच.**९।१७४ मया विधिः (विधिमया), **दमी** २९,५४; **वीमि**; **व्यप्र.**४७४,४८०,४८७, **संप्र.**२११, **व्यम** ४०, ४७; **विता.**३६४; **बाल.**२।१३५ (पृ.२१६), **समु.**१३७; **कुभ.**८६५.

त्वादिति । कुण्डगोलकयोरन्यतरत्वेन वर्णाद्यभाव आचाराध्यायेऽभिहित इत्यर्थः । सुबो.

(५) अथ त्रिविधः पूर्वाभावे पर इत्येवंरूपः सजातीयेषु सवर्णेषु त्रैवर्णिकेषु पुत्रेषु मयोक्तः। असवर्णेषु पुत्रिकापुत्रे सत्यपि क्षेत्रजः सवर्णोऽशभागित्यादिव्यवस्था द्रष्टव्या । वीमि.

(६) सजातीयेषूत्पादकसजातीयेष्वेव क्षेत्रजादिषु ज्ञेयो न विजातीयेषु । *व्यप्र ४८७

शूद्रदासीपुत्रस्याशहरत्वविचारः

जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ।
मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिनम् ।
अभ्रातृको हरेत्सर्वं दुहितॄणां सुताद्दते ॥

(१) एतदेव स्पष्टयति —मृते पितरि विभागव्यवस्थेयमस्माभिर्दुर्निरूपत्वान्निरूपिता। जीवति तु जातोऽपि दास्या शूद्रेण पितुरिच्छयाशहरो भवेदित्यनादरं विशेषनिरूपणस्य दर्शयति । इच्छयैव च—मृते इत्यादि । अर्धवचनं च न्यूनाशप्रतिपत्त्यर्थम् । तथा च बृहस्पतिः 'कामतश्च शूद्रावरोधजस्य भ्रातुरंश समानमात्रे प्रेते पितरि दद्युः शुश्रूषुश्चेदि'ति । अत्रापि च शास्त्रातिलङ्घनेन प्रवृत्तस्याय विधिः द्विजातीनामिव शूद्रापुत्रः, न तु दास्यामवरोधविध्यनुमानमित्यनवद्यम् । अभ्रातृकस्तु दुहितृतत्सुताभावे सर्वभाक् स्याद् राजानुज्ञया बृहस्पतिवचनादेव 'अनन्वयिनः सर्वं राजा हरेत् तदनुज्ञया वावरोधज इत्येके' इति । अस्मादेव च दौहित्राभाववचनाद् द्विजातीनामपि पुत्राभावे दौहित्रा धनभाज इति । अत एव च मातामहश्राद्धनियमोपपत्तिः । विश्व.२।१३७,१३८

(२) अधुना शूद्रधनविभागे विशेषमाह—जातोऽपीति। शूद्रेण दास्यामुत्पन्नः पुत्रः कामतः पितुरिच्छया भाग लभते । पितुरूर्ध्वं तु यदि परिणीतापुत्राः सन्ति तदा ते भ्रातरस्त दासीपुत्र अर्धभागिन कुर्युः । स्वभागादर्धं दद्युरित्यर्थः । अथ परिणीतापुत्रा न सन्ति तदा कृत्स्न धन दासीपुत्रो गृह्णीयात् यदि परिणीतादुहितरस्तत्पुत्रा वा न सन्ति । तत्सद्भावे स्वर्धभागिक एव दासीपुत्रः । अत्र च शूद्रग्रहणाद्द्विजातिना दास्यामुत्पन्नः पितुरिच्छयाप्यंश न लभते नाप्यर्धं, दूरत एव कृत्स्नम् । किंत्वनुकूलश्चेज्जीवनमात्र लभते । *मिता.

(३) पितुः अनुमतिमन्तरेण त्वर्धांशहरः । तदाह याज्ञवल्क्यः—जातोऽपीति । सति तु दौहित्रे समं विभज्य गृह्णीयात् विशेषाश्रवणात् । तथाह्यपरिणीताजातत्वेऽप्यस्य पुत्रत्वात्, अपरस्य तु परिणीतासंतानत्वेऽपि दौहित्रत्वात् तुल्यांशस्यैव युक्तत्वात् । दा.१४३-१४४

(४) एकस्य यावान्भागो भवति तदर्धं तस्मै दद्युः । ×अप.

(५) मिताटीका— स्वभागादर्धं दद्युरिति । स्वाशापेक्षया अर्धं समुदितद्रव्याद्दद्युरित्यर्थः । सुबो.

(६) अत एव शूद्रस्य द्वे भार्ये ऊढाऽनूढा चेति चोच्यते । +स्मृसा ६६

(७) अंशहरः पुत्रान्तरतुल्याशहरः । दात.१६९

(८) मिताटीका—अत एव वक्ष्यमाणसङ्गतिमेवाह अधुनेति । पूर्वोक्तोपसंहारस्य सविशेषस्य कथनानन्तरमित्यर्थः । तत्प्रसङ्गेन, तत्प्रकरणेन । तद्वक्तव्यत्वस्याप्यावश्यकत्वात् । उत्पन्नः, सोऽपि । कामत इत्यस्य व्याख्या पितुरिति । एवं पूर्वार्द्धेन जीवत्पितृकविभाग उक्तः । मनुरपि 'दास्या वा दासदास्यां वा यः शूद्रस्य सुतो भवेत्।

---

* शेष मितागतम् ।

(१) **यास्मृ.**२।१३३,१३४, **अपु** २५६।२०,२१ द्रेण (द्रव्य) गिनम् (गिकम्); **विश्व** २।१३७,१३८; **मेधा** ९।१७९; **मिता.**गिनम् (गिकम्), **दा.**१४३, **अप.** मितावत् ; **व्यक.** १५२; **उ.**२।१४।२ तोऽपि (तो हि) प्रथमार्धद्वयम् , **विर.** ५३७; **स्मृसा.**६५,१५०; **पमा.**५२२ मितावत्; **मपा.**६५९ मितावत् ; **रत्न.**१४३ प्रथमार्धद्वयम्; **विचि.**२२७; **व्यनि.** तृतीयार्ध.; **स्मृचि.**३५ पितरि (भर्तरि) शेष मितावत् , **नृप** ४०; **दात.**१६९; **सवि.**३९५; **दमी.**३०, **वीमि.**, **व्यप्र.** ४८७मितावत्; **व्यम.**४६ मितावत् , प्रथमार्धद्वयम् , **विता.** ३२८ प्रथमार्धद्वयम् : ३७९ काम (दास), **बाल.**२।१३३-१३४ स्त (स्ते) शेष मितावत् , **विभ.**९८-९९; **समु.**१३०; **विच.**६१-६२; **दच.**३५-३६.

* मेधा. व्याख्यान ' दास्या वा दासदास्याम् ' इति मनुवचने (पृ.१३१०) द्रष्टव्यम् । तत्र च मितावद्भावः । विर., पमा., मपा., रत्न., विचि., सवि., व्यम., विता. मितागतम्। वीमि. मितागतं, दातगतं च । व्यप्र. मितागतं अपगत च ।

× शेष मितागतम् ।

+ स्मृसा. (पृ.१५०) पारिजातव्याख्यानं मितागतम् ।

सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः ॥' (मस्मृ. ९।१७९) इति । उत्तरार्द्ध द्वितीयविभागपर स्पष्टमेवेत्याह । पितुरूर्ध्वमिति । मरणादिति शेषः । परिणीतापुत्राः विवाहितापुत्राः । तदा ते भ्रातर इति पाठः । अर्धभागिक, कर्मधारयान्मत्वर्थीयष्ठन् । अर्धभागिनमिति पाठे इनिर्बोध्यः । अर्द्धत्वस्य सापेक्षत्वादाह । स्वभागादिति । तेषा प्रत्येक यो भागोऽशस्तत्रैकाशापेक्षयाऽर्द्ध समुदितद्रव्यात् दद्यरित्यर्थः । तृतीयार्द्धार्थमाह । अथेति । हरेदित्यनेन जन्मना पुत्रवत्तस्यापि स्वत्व सूचितम् । दुहितृणामित्याद्यर्थमाह । यदीति । दुहितृसुतापेक्षया दुहितुः प्राथम्यस्य मले वक्ष्यमाणत्वेन तत्सुतसत्त्वेऽपि कृत्स्नग्रहणे किमु वक्तव्य साक्षादुहितृसत्त्वे इति कैमुतिकन्यायसिद्धमर्थमाह । परिणीतादुहितर इति । एवमेवाह । तत्पुत्रा इति । केचित्तु—दुहितृणामित्यत्राभावे इति शेषः । सुतादित्यत्रापि प्रत्यासत्त्या तत्सबन्धः । 'गामश्व' इतिवत्समुच्चय इत्याशयोऽस्येत्याहुः । प्रत्यासत्तेरेवैतत्तात्पर्यार्थमाकाङ्क्षितमाह । तत्सद्भावे इति । अन्यतरसद्भावे इत्यर्थः । युक्त्यन्तरस्य वक्ष्यमाणत्वेनैतद्युक्तमिति तत्त्वम् । अन्यस्याश्रुतत्वात्तस्य च प्रकृतत्वेन बुद्धिस्थत्वमित्यत्रापि तथैवेति भावः ।

अत्र गृहजातप्रसङ्गात् दासविषये किञ्चिदनुक्तमुच्यते । तत्र तावदासाः पञ्चदश । 'गृहजातस्तथा क्रीतो लब्धो दायादुपागतः । अनाकालभृतस्तद्वदाहितः स्वामिना च यः ॥ मोक्षितो महतश्चार्णाद्युद्धप्राप्तः पणे जितः । तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥ भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः । विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥' इति—नारदः (८। २६-२८) । तत्र गृहजातादौ विशेषमाहतुः—मनुयाज्ञवल्क्यौ, 'दास्या वा दासदास्या वा यः शूद्रस्य सुतो भवेत् । सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः ॥' इति (मस्मृ.९।१७९) । 'जातोऽपि दास्या शूद्रेण कामतोऽशहरो भवेत् । मृते पितरि कुर्युस्ते भ्रातरस्त्वर्द्धभागिकम् ॥ अभ्रातृको हरेत्सर्व दुहितृणा सुताद्दते ॥' इति च (यास्मृ.२।१३३,१३४) । तत्र दास्या कस्याचित् ध्वजाहृतायुक्तलक्षणाया तादृशस्य दासस्य कस्यचित्सवन्धिन्या वा यः शूद्रस्य सुतो भवेत् स पित्रा 'परिणीतापुत्रैः समाशभागो भवान्भवतु' इत्यनुज्ञातः सममशमौरसेन हरेदिति शास्त्रव्यवस्था नियतेत्याद्यर्थ इति कुल्लूकभट्टः । शूद्रस्यानूढायामनियुक्तायामपि जातः सुत एव । एवं यद्यपि दासस्य दासी तथापि वचनात्तस्या जातो न दासस्य दासः सुतो वाऽपि तु स्वामिन एव सुतोऽनुज्ञातस्तेन सममशमौरसेन हरेदिति मेधातिथिः । जीवत्पितृकविभागेऽयं द्वितीयार्थो मिताक्षरायां स्पष्टः । तत्र द्वितीयेऽपिना क्रीतादयोऽपि समुच्चीयन्ते । यथा पाणिनीये (३।३।२) 'भूतेऽपी'त्यपिनाऽन्यकालसमुच्चयः । यथा वा, 'बलादासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते ।' इत्यत्रापिनाऽऽहितदत्तयोरन्यपठितयोः समुच्चयो विज्ञानेश्वरकृतः । न च अपिः पूर्वसमुच्चायक एवेति वाच्यम् । त विनाऽपि मनुवत्तत्समुच्चयसभवात् । औरसान्यसमुच्चयस्यौरसेन सममिति वदतो मेधातिथ्यादेः परिणीतापुत्राः सन्तीत्यादि वदतो विज्ञानेश्वरस्य चानभिमतत्वात् । दत्तान्येषा कलिवर्ज्यत्वेन शूद्राणामविद्यत्वेन होमादिकरणासंभवान्न पुत्रस्य दाने प्रतिग्रहे वाऽधिकार इति तदसंभव इति तत्तात्पर्यात् । अत एव—'तस्माच्छूद्र समासाद्य सदा धर्मपथे स्थितम् । प्रायश्चित्त प्रदातव्य जपहोमविवर्जितम् ॥' इत्याङ्गिरसं, 'तूष्णीमेताः क्रियाः स्त्रीणा विवाहस्तु समन्त्रकः ।' इति मल च सफल अन्यथा तयोस्तत्रानाधिकाराद्भवदुक्तरीत्यैव वचनान्तरविहितकर्मणा तयोरपि तद्वर्जनेन सिद्धौ तदानर्थक्य स्पष्टमेव । तस्माद्यत्र तद्रहित कार्यमिति वचनमस्ति तदेव तद्रहितं तत्र भवति नान्यत् । न चेह तथा वचनमस्ति । न च—'ब्राह्मणाना सपिण्डेषु शूद्राणा शूद्रजातिषु । सर्वेषा चैव वर्णाना ज्ञातिष्वेव न चान्यतः ॥ दौहित्र भागिनेय वा शूद्राणा चापि दीयते । शूद्रः सर्वस्वमेवापि अशक्तश्चेद्यथाबलम् ॥' इति शौनकीयमस्त्येवेति वाच्यम् । तस्य कालिकापुराणैकवाक्यतया दत्ताख्यदासप्रतिपादने एव तात्पर्यात् । अत एव—'ध्वजाहृतो भक्तदासो गृहजः क्रीतकृत्रिमौ । पैतृको दण्डदासश्च सप्तैते दासयोनयः ॥' (मस्मृ.८।४१५) इति मन्वाद्युक्तदत्त्रिमस्य सावकाशत्वम् । अन्यथा दत्त्रिमयोः पुत्रदासयोर्विवेक्तत्व न स्यात् ।

मन्त्रादिरहितविधिना पुत्रत्वमन्यथा दासत्वमिति तु न । पूर्वोक्तहेतोः । अत एव कालिकापुराणे अदासतेति छेद इति केषाञ्चित्कल्पनाऽपि निरस्ता । अत एव तेषा दासत्वप्रतिपादनार्थं न तु परिसख्यार्थमित्येवं मानवं व्याख्यातं व्याख्यात्रा । स्पष्ट चेद वाचस्पतिगोविन्दार्णवादिनिबन्धेषु । 'ब्राह्मणादित्रये नास्ती'त्यादि तु दत्ताख्यदासत्वस्यैव बोधकम् । न च तत्र सुतपदान्न तथेति वाच्यम् । मानवेऽप्यत्र सुतपदसत्त्वात् । किं च मनूक्तद्वितीयसमुच्चयानापत्तेः । एतेनोक्तसमुच्चायकत्वं तस्य नानुक्तसमुच्चायकत्वमित्यप्यपास्तम् । प्रागुक्तसमुच्चायकत्वे मनूक्तद्वितीयसमुच्चयानापत्तेः । बलाद्दासीत्यत्रापि तेन तयोः समुच्चयानापत्तेश्च । स्मृत्यन्तरीयेषु मानवस्यैव समुच्चयो न नारदीयस्येत्यत्रात एव मानाभावाच्च । एतेन जात इत्यनेनैव मनूक्तोभयसग्रह इति स व्यर्थ एवेत्यप्यपास्तम् । फले सभवति तत्त्वकल्पनाया अन्याय्यत्वात् । एतदर्थमपि नारदीय परिगणनम् । अन्यथा अपिवैयर्थ्य स्पष्टमेव । पादपूरकत्वकल्पनापेक्षयोक्तमेवोचितम् । अत एव मनुना दासदास्या वेत्यप्युक्तम् । विज्ञानेश्वरस्त्वत्राप्यंशे उदासीनः । एव चान्येषामपि दासाना शूद्रस्वामिकधनाशहरणमुक्तरीत्या सिद्धम् । एव सति 'शूद्राणा तु सधर्माणः सर्वेऽपध्वसजाः स्मृताः ।' (मस्मृ.१०।४१) इति मनोरन्यत्राप्यवर्णेषु तादृशेषु तथा बोध्यम् । न च मनुविष्ण्वादिभिः 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धन हरेत्' । (मस्मृ.९।१८७) इत्यादिना प्रत्यासत्तेरेवाशहरत्वे नियामकत्वस्योक्तत्वेन गृहजातस्य तत्सत्त्वेऽपि क्रीतादिदासेषु तदभावात्कथ तेषा तद्धरत्वमिति वाच्यम् । दत्तक्रीतादिपुत्रवदत्रापि उपाधिना तत्सभवात् । 'भ्रातरस्त्वर्धभागिनमि'ति, 'अभ्रातृको हरेदि'ति च तस्य भ्रातृत्वातिदेशाच्च । मानवेन सुतत्वातिदेशाच्च । अन्यथा 'मृते स्वामिन्यात्मीयमि'ति विष्णूक्त दासाना स्वामिमरणे सजातीयाशौचमपि न स्यात् । अत एव दासीगमनेऽन्यस्य दण्डोऽप्युक्तः, 'अवरुद्धासु दासीषु भुजिष्यासु तथैव च । गम्यास्वपि पुमान्दाप्यः पञ्चाशत्पणिक दमम् ॥ प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः ॥' (यास्मृ.२।२९०,२९१) इत्यादि । अत एव च भक्तदासस्य स्वामिना सह विवाद उक्तः । अत एव च तेषा प्रव्रज्यावसितभिन्नाना दासत्वान्मुक्तौ कारणानि, मोक्षक्रमश्चोक्तः—'बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते । स्वामिप्राणप्रदो भक्त्यागात्तन्निष्क्रयादपि ॥' इति मूले (यास्मृ.२।१८२) 'यो वैषा स्वामिनं कश्चिन्मोक्षयेत्प्राणसशयात् । दासत्वात्स विमुच्येत पुत्रभाग लभेत च ॥ अनाकालभृतो दास्यान्मुच्यते गोयुग ददत् । संमक्षित यद्दुर्भिक्षे न तच्छुध्येत कर्मणा ॥ भक्तस्योत्क्षेपणात्सद्यो भक्तदासः प्रमुच्यते । आहितोऽपि धन दत्वा स्वामी यत्नेनमुद्धरेत् ॥ ऋण तु सोदय दत्त्वा ऋणी दास्यात्प्रमुच्यते । कृतकालव्यपगमात्कृतकोऽपि विमुच्यते ॥ तवाहमित्युपगतो युद्धप्राप्तः पणे जितः । प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यकर्मणा ॥ निग्रहाद्वडवायास्तु मुच्यते वडवाहृतः ॥' इति नारदश्च । (नास्मृ.८।३०–३६) । विनतायाः कद्रदास्यान्मुक्तिरपि वैनतेयकृता महाभारते स्पष्टा । 'स्व दासमिच्छेद्यः कर्तुमदास प्रीतमानसः । स्कन्धादादाय तस्यासौ भिन्द्यात्कुम्भं सहाम्भसा ॥ साक्षतामिः सपुष्पाभिर्मूर्द्धन्यद्भिरवाकिरेत् । अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेत् ॥' (नास्मृ ८।४२,४३) इत्यन्तेऽन्यः । तस्मात्प्रत्यासत्तेः सत्त्वात् युक्त तस्यापि तद्धरत्वम् । किं च पुत्रत्वादिप्रत्यासत्त्यपेक्षया दासत्वप्रत्यासत्तिरुत्तमोत्तमा । अत एवोक्त 'तेषा दासस्य दासोऽहमि'ति । अत एव च दास्य नवविधभक्तिमध्ये गणित, 'श्रवण कीर्तन' इत्यादि । तत्र तत्र मुख्याधिकारिणश्चोक्ताः, श्रीविष्णोः स्मरणे परीक्षिदित्यादि । दासविषये आशौचमपि ऋषिभिः प्रतिपादितम् । अत एव—'छाया स्वो दासवर्गस्तु दुहिता कृपण परम् ।' इति मनूक्तिः (मस्मृ. ४।१८५) । सा चाचारे प्रपञ्चिता । अत एव श्राद्धे दासाना तृप्त्यर्थं भूमावुच्छिष्टान्नदानमुक्तम् । अत एव दासीना 'वस्त्र पत्त्रमि'त्यादिना मनुना विभाज्यत्वनिषेधः कृतः । न चैव—'भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥' (मस्मृ ८।४१६) इति मनुविरोध इति वाच्यम् । एते त्रयोऽर्जितधना अपि अधना धनास्वामिनः, भर्त्रादेरेव हि तत्र स्वामित्व, ते यद्धन अधिगच्छन्ति अर्जयन्ति

तत्र स्वस्वामिस्वामिकत्वात् इत्यर्थेनाशग्रहणे भार्यादिवदविरोधात् । पारतन्त्र्यप्रतिपादनपरतया मेधातिथिविज्ञानेश्वरादिभिर्व्याख्यातत्वेन स्वस्वकर्मणस्तदनुज्ञया तत्सत्वे करणेऽपि तद्वत्तस्यापि तदनन्तरं स्वातन्त्र्यस्य निर्विघ्नत्वाच्च । नञोऽल्पार्थत्वेनास्योपपत्तिर्वोध्या । अत्र भार्यादिसाहचर्यमपि तेषा तत्वे लिङ्गम् । 'पुत्रः शिष्यस्तथा भार्या दासी दासस्तु पञ्चमः । प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥ अधस्तात्तु प्रहर्तव्य नोत्तमाङ्गे कदाचन । अतोऽन्यथा तु प्रहरन् चौरस्याप्नोति किल्बिषम् ॥' (मस्मृ.८।२९९,३००) । इति मानवोक्तसाहचर्यमप्येवम् । यथा शिष्यस्य सर्वाभावे तद्धारित्वमेव वर्णत्रये दासस्यापीत्यपि मनुतो लब्धम् । अत एव 'शुश्रूषकः पञ्चविधः शास्त्रे दृष्टो मनीषिभिः । चतुर्विधः कर्मकरस्तेषा दासास्त्रिपञ्चकाः ॥ शिष्यान्तेवासिमृतकाश्चतुर्थस्त्वधिकर्मकृत् । एते कर्मकरा ज्ञेया दासास्तु गृहजादयः ॥ सामान्यमस्वतन्त्रत्वमेषामाहुर्मनीषिणः ॥' (नास्मृ.८।२–४) इति नारदः सगच्छते । अत एव तुल्यदण्डोक्तिरपि सङ्गता । 'दासत्वात्स विमुच्येत पुत्रभाग लभेत च ।' (नास्मृ.८।३०) इति प्रागुक्तनारदीयमप्यत्र लिङ्गम् । दायादुपागत इति पैतृक इति च तत्र गणनमपि गृहजाताभिन्नाना तत्त्वे साधकम् । सबन्धसत्त्वे एव हि तथा । अन्यथाऽसबद्धत्व स्पष्टमेव । मनुनाऽपि गृहजस्य मध्यपाठेन सर्वेषा समत्वं बोधितम् । अत एव नारदीये पञ्चदशत्वमपि तथैव बोध्यम् । किं चौरससत्त्वे दासस्य तत्र सति समाशभागित्वं तदिच्छया तदभावेऽपि चार्धभागित्वं, दत्तकस्य तु औरससत्वे चतुर्थांशभागित्वमिति ततस्तस्य दुर्बलत्वमेव । किं च पत्न्यादिभ्योऽप्यय प्रबलः । पत्नीत्यादितः प्राक् पुत्रानन्तरं तद्विषये जातोऽपीति योगिनोक्तत्वात् । पुत्रकरणे एव 'औरसः क्षेत्रजश्चैवे'त्यादिना 'पारशवः स्मृत' इत्यन्तेन प्रागुक्तक्रमेणोक्त्वा 'दास्या वे'त्युक्त्वा 'क्षेत्रजादीनि'ति 'य एतेऽभिहिता' इति च 'भ्रातृणामि'त्यतः प्राक् मनूक्तेश्च । अत एवाधुना शूद्रधनविभागे विशेषमाहेति व्याख्यात्राऽवतारितम् । विशेषपदेन पूर्वस्य त्रैवर्णिकमात्रविषयत्वमिति अत्र तन्निरासः सूचितः । न चैव दुहितृदौहित्रयोरत्र ग्रहणं कथमिति वाच्यम् । प्रागुक्तपुत्रिकासुत इत्यस्य व्याख्याद्वयाभिप्रायेण तथोक्तिरित्याशयात् । तेन प्रागुक्तप्रतिनिधिमध्येऽत्र युगेऽयमेव पुत्रिकापुत्रः शूद्रादौ प्रतिनिधिर्न दत्तक इति सूचितम् । 'दत्तौरसेतरेषा त्वि'ति तु त्रैवर्णिकपरम् । परिग्रहपदस्वारस्यात् । अत एव 'तत्समः पुत्रिकासुतः' इत्युक्तम् । 'पत्नी दुहितर' इति वक्ष्यमाणाशयेन तु नात्र तद्ग्रहणम् । प्रथमोपात्तपत्नीत्यागस्य निर्मूलत्वापत्तेः । दौहित्रस्य साक्षात्तत्रानुपादानाच्च । अत एवात्र दौहित्र्या न ग्रहणम् । तथा च यथौरसो मुख्योऽन्ये प्रतिनिधयः एवमत्र गृहजातो मुख्योऽन्ये प्रतिनिधय इति सिद्धम् । एतदर्थमेव तदनन्तरमेतदुक्तिः । तथा चात्र दत्तको नैवेति साम्प्रतम् । तथा सन्नपि दास एव । अत एव व्याख्यात्रादिना 'परिणीतापुत्राः सन्तीत्याद्युक्तमि'त्युक्तम् । अत एव—'दत्ताद्या अपि तनया निजगोत्रेण संस्कृताः । आयान्ति पुत्रता सम्यगन्यबीजसमुद्भवाः ॥ पितुर्गोत्रेण यः पुत्रः सस्कृतः पृथिवीपते । आचूडान्त न पुत्रः स पुत्रता याति चान्यतः ॥ चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः । दत्ताद्यास्तनयास्ते स्युरन्यथा दासतोच्यते ॥' इति कालिकापुराण सङ्गच्छते । ब्राह्मणादित्रयेऽप्यङ्गवैकल्ये दासत्व प्रतिपादयता तेन कैमुतिकन्यायेनान्यत्र तथा सति सुतरा तथेति सूचितमिति दिक् ।

एवं च ब्राह्मणादिस्थलेऽपि शिष्याद्यभावे दासः सर्वापहारी । तदभावे श्रोत्रियादिः । अत एव 'सर्वाभावे' इति तत्रोक्तम् । मानव नारदीय च साहचर्यमप्यत्र गमकमिति बोध्यम् । न चैवमपि यथा—'गोऽश्वोष्ट्रदासदासीषु महिष्याजाविकासु च । नोत्पादकः प्रजाभागी तथैवान्याङ्गनासु च ॥' इति । 'एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च । विहङ्गमहिषीणा च विज्ञेयः प्रसव प्रति ॥' (मस्मृ.९।४८,५५) इति च मनुविरोध इति वाच्य, तत्रोत्पादकस्य स्वाम्यादभिन्नस्यैव स्पष्टत्वात् । अत एव दासदास्यामित्यत्र वचनात्तथेति मेधातिथिनोक्तम् । किं च द्विजात्युत्पन्नस्यैव निरंशस्य भरणमुक्तं व्याख्यात्रा । याज्ञवल्क्यादिनाऽपि 'भर्तव्याः स्युर्निरंशकाः' इत्यादिना तेषा भरणमुक्तम् । स्त्रीस्थलेऽपि प्रतिबन्धकवशान्निरंशत्वे भरणमुक्तं 'भरणचास्ये'ति नारदेन 'अपुत्रा योषित'इति मूलेन च ।

तद्दृष्टान्तेनैव 'अनुकूलश्चेदि'ति वक्ष्यति व्याख्याकृत् । तथा च यत्र कथमपि निरशत्वप्राप्तिः तत्रैव भरण, अन्यत्राशहरत्वमेव यथासम्भवम् । अत एव—'सर्वेषामपि तु न्याय्य दातुं शक्त्या मनीषिणा । ग्रासाच्छादनमत्यन्त पतितो ह्यददद्भवेत् ॥' (मस्मृ.९।२०२) इति मनुना 'अनशौ क्लीबपतितौ' इत्यग्रिमेणाभरणे पातित्यमुक्तम् । 'अत्यन्तमित्यस्य' यावज्जीवमित्यर्थः । तथा च शूद्रादिस्थले परिणीतापुत्रपुत्रीदौहित्रसत्त्वे मृतपितृकविभागेऽर्ध भागित्व दासस्य, असत्त्वे तु सर्वहारित्वम् । अत एव 'दुहितॄणा सुताद्दते' इति दौहित्रमात्रपरतया मेधातिथिना व्याख्यातमपि व्याख्यात्रोपेक्ष्य भेदेन व्याख्यातम् । दुहितृसत्त्वेऽपि सर्वहारित्वम् । 'यावद्वचन वाचनिकमि'ति सिद्धान्तात् ।

तदय निर्गलितोऽर्थः । आद्यदासस्यौरसकल्पत्व परिणयनाभावात् । अन्येषा दत्तककल्पत्व, तत्र मन्त्रहोमयोरभावात् । तथा च तेषामन्यतमसत्त्वे मुख्यपुत्रादिसत्त्वे जीवत्पितृकविभागे तदिच्छया तत्समाशभागित्वम् । मृतपितृकविभागे तूक्तमेव । एव दुहितृदौहित्रसत्त्वेऽपि । एव पत्नीसत्त्वेऽपि पुत्रपौत्रदुहितृदौहित्राणामभावे सर्वग्राहित्व, तदभावे तु पत्नीसत्त्वेऽपि ससृष्टिनोऽविभक्तस्य भ्रातुः सर्वहारित्व, तदभावे तु पत्न्याः सर्वांशभागित्वमित्यादीति दिगिति । तदेतत्सर्व हृदि निधायोक्त ध्वनयन्नेव व्यङ्ग्यार्थमाह । अत्र चेति । मूले इत्यर्थः । लभते इत्यस्य इति गम्यते इति शेषः । 'ब्राह्मणादीना तु दासीसुताः प्रजीवनभाजो न रिक्थहरा' इति मेधातिथिरपि । बाल.२।१३३-१३४

क्षेत्रजो द्व्यामुष्यायणः, तस्य पिण्डदत्वदायहरत्वविशेषश्च

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥

(१) औरसानामय विभागधर्मः । तदभावे तु—

अपुत्रेणेति । ननु च ब्राह्मणस्य नियोगप्रतिषेधादनारभ्योऽयम् । क्षत्रियाद्यर्थस्तर्हि भविष्यति । न च ब्राह्मणस्य नियोगप्रतिषेधः, किं तर्हि, ब्राह्मण्याः । तेनान्योत्पादितो ब्राह्मणस्य न स्यात् । न तु क्षत्रियादिकाया ब्राह्मणस्यानुत्पादकत्वम् । अतोऽविरुद्ध एवायमौरसाभावे कल्पः । विश्व.२।१३१

(२) द्व्यामुष्यायणस्य भागविशेष दर्शयस्तस्य स्वरूपमाह—अपुत्रेणेति । 'अपुत्रा गुर्वनुज्ञात' इत्याद्युक्तविधिना अपुत्रेण देवरादिना परक्षेत्रे परभार्याया गुरुनियोगेनोत्पादितः पुत्र उभयोर्बीजिक्षेत्रिणोरसौ रिक्थी रिक्थहारी पिण्डदाता च धर्मत इति । अस्यार्थः । यदासौ नियुक्तो देवरादिः स्वयमप्यपुत्रोऽपुत्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवृत्तो य जनयति स द्विपितृको द्व्यामुष्यायणो द्वयोरपि रिक्थहारी पिण्डदाता च । यदा तु नियुक्तः पुत्रवान् केवलं क्षेत्रिणः पुत्रार्थं प्रयतते तदा तदुत्पन्नः क्षेत्रिण एव पुत्रो भवति न बीजिनः । स च न नियमेन बीजिनो रिक्थहारी पिण्डदो वेति । यथोक्त मनुना—'क्रियाभ्युपगमात्क्षेत्र बीजार्थं यत्प्रदीयते । तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥' (मस्मृ.९।५३) इति । क्रियाभ्युपगमादिति अत्रोत्पन्नमपत्यमावयोरुभयोरपि भवत्विति सविदङ्गीकरणाद्यत्क्षेत्र क्षेत्रस्वामिना बीजावपनार्थं बीजिने दीयते तत्र तस्मिन्क्षेत्रे उत्पन्नस्यापत्यस्य बीजिक्षेत्रिणौ भागिनौ स्वामिनौ दृष्टौ महर्षिभिः । तथा—'फलं त्वनभिसधाय क्षेत्रिणा बीजिना तथा । प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसी ॥' (मस्मृ.९।५२) इति । फलं त्वनभिसधायेति अत्रोत्पन्नमपत्यमावयोरुभयोरस्त्वित्येवमनभिसधाय परक्षेत्रे यदपत्यमुत्पाद्यते तदपत्य क्षेत्रिण एव । यतो 'बीजाद्योनिर्बलीयसी' । गवाश्वादिषु तथा दर्शनात् । अत्रापि नियोगो वाग्दत्ताविषय एव । इतरस्य नियोगस्य मनुना निषिद्धत्वात् – 'देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया । प्रजेप्सिताऽधिगन्तव्या सतानस्य परिक्षये ॥ विधवाया नियुक्तस्तु घृताक्तो वाग्यतो निशि । एकमुत्पादयेत्पुत्र न द्वितीयं कथंचन ॥' (मस्मृ.९।५९,६०) इत्येव नियोगमुपन्यस्य मनुः स्वयमेव निषेधति— 'नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः । अन्यस्मिन्हि नियुञ्जाना धर्म हन्युः सनातनम् ॥ नोद्वा-

(१) **याज्ञ्स्मृ.**२।१२७, **अप** २५६।१४; **विश्व.**२।१३१, **मिता.**; **अप.**; **व्यक.**१५५, **गामि.**१८।१३:२८।३१, **उ** २।१३।६,२।१४।२, **ममु.**९।१६२, **विर.**५५६ च धर्मतः (प्रकीर्तितः), **स्मृसा** ६८ प्यसौ (प्यय); **पमा.**५१८; **मपा.** ६५५; **व्यनि., नृप्र.**३९; **सवि.**३८७; **मच.**९।१६२, **वीमि.; व्यप्र.**४६९; **व्यउ.**१४९, **राकौ** ४५३; **बाल.**२।१३२(पृ.१७७),२।१३५(पृ.२१७); **समु** १३८, **दच.**२०.

र्हिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित्। न विवाहविधावुक्तं विधावावेदनं पुनः॥ अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः। मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति॥ स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा। वर्णानां संकरं चक्रे कामोपहतचेतनः॥ ततः प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियम्। नियोजयत्यपत्यार्थे गर्हन्ते त हि साधवः॥' इति (मस्मृ.९।६४ ६८)। न च विहितप्रतिषिद्धत्वाद्विकल्प इति मन्तव्यम्। नियोक्तृणां निन्दाश्रवणात्। स्त्रीधर्मेषु व्यभिचारस्य बहुदोषश्रवणात्, संयमस्य प्रशस्तत्वाच्च। यथाह मनुरेव—'कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः। न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु॥' (मस्मृ.५।१५७) इति जीवनार्थं पुरुषान्तराश्रयण प्रतिषिध्य — 'आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी। यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्॥ अनेकानि सहस्राणि कौमारब्रह्मचारिणाम्। दिवं गतानि विप्राणामकृत्वा कुलसंततिम्॥ मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता। स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥ अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते। सेह निन्दामवाप्नोति परलोकाच्च हीयते॥' (मस्मृ.५।१५८-१६१) इति पुत्रार्थमपि पुरुषान्तराश्रयण निषेधति। तस्माद्विहितप्रतिषिद्धत्वाद्विकल्प इति न युक्तम्। एवं विवाहसंस्कृतानियोगे प्रतिषिद्धे कस्तर्हि धर्म्यो नियोग इत्यत आह— 'यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः। तामनेन विधानेन निजो विन्देत देवरः॥ यथाविध्यधिगम्यैना शुक्लवस्त्रा शुचिव्रताम्। मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ॥' (मस्मृ.९।६९, ७०) इति। यस्मै वाग्दत्ता कन्या स प्रतिग्रहमन्तरेणैव तस्याः पतिरित्यस्मादेव वचनादवगम्यते। तस्मिन्प्रेते देवरस्तस्य ज्येष्ठः कनिष्ठो वा निजः सोदरो विन्देत परिणयेत्। यथाविधि यथाशास्त्रमधिगम्य परिणीय अनेन विधानेन घृताभ्यङ्गवाङ्नियमादिना शुक्लवस्त्रा शुचिव्रतां मनोवाक्कायसंयतां मिथो रहस्यागर्भग्रहणात्प्रत्यृतुवेकवार गच्छेत्। अथ च विवाहो वाचनिको घृताभ्यङ्गादिनियमवन्नियुक्ताभिगमनाङ्गमिति न देवरस्य भार्यात्वमापादयति। अतस्तदुत्पन्नमपत्यं क्षेत्रस्वामिन एव भवति न देवरस्य। संविदा तूभयोरपि। +मिता.

(३) प्रथमेऽध्याये प्रतिपादितो नियोगोत्पादितः सुतो गुर्वनुज्ञात इत्यत्रत्येन नियोगविधिना योऽपुत्रेण देवरादिना परस्यापुत्रस्य क्षेत्रे भार्यायामुत्पादितः स्वार्थं परार्थं च द्व्यामुष्यायणसंज्ञकः स उभयोर्बीजिक्षेत्रिणोः पित्रोर्दायहरः पिण्डदश्च धर्मशास्त्रतो वेदितव्यः। *अप.

(४) यदा तु स्वयं पुत्रवान् देवरादिः क्षेत्रिपुत्रार्थं प्रवृत्तः तदा क्षेत्रिणः पुत्रो न बीजिनः। यत्र तु सपुत्रोऽपि आवयोरपत्यमिह समानं भविष्यतीति सविद्रप क्रियाभ्युपगममाश्रित्योत्पादयति तत्र द्वयोरप्यसौ पुत्रो भवतीति। विर.५५६

(५) मिताटीका —(अथ च विवाहो वाचनिक इत्यादि)। अयमभिसंधिः। नियुक्ताभिगमने यथा घृताभ्यङ्गादिकमङ्गत्वेन विधीयते तथाऽयं विवाहोऽपि नियुक्ताभिगमनेऽङ्गं न स्वतन्त्रतया प्रधानकर्म येन दाम्पत्यप्रसंग.। अत एव नोभयोरौरसः पुत्रः अपि तु क्षेत्रज एव क्षेत्रस्वामिनः 'अत्रोत्पन्नमपत्यमावयोरि'ति प्रतिज्ञाया अभावे। सत्यां तु प्रतिज्ञायामुभयोरपि पुत्र इति। सुबो.

(६) [विज्ञानेश्वरमतमुपन्यस्योच्यते]—भारुच्यादयस्तु न सहन्ते 'अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते' इति वचनं जीवद्भर्तृकाविषयं—'नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः।' इति सार्थवादकवचनं देवरादिव्यतिरिक्तान्यपरम्। नियोक्तुर्निन्दाश्रवणं देवरादिव्यतिरिक्तेषु ये नियोक्तारस्तद्विषयम्। स्त्रीणां व्यभिचारस्य बहुदोषश्रवणं नियोगव्यतिरिक्तव्यभिचारविषयम्। अतश्च—'अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः' इति पशुधर्मदृष्टान्तोत्कर्षेच्छको व्यभिचारो देवरादिव्यतिरिक्तनियोगश्च निषिध्यते। देवरादिव्यतिरिक्तनियोगः पशुधर्मतुल्यः। अतश्च न शय्यापरिपालनपुत्रोत्पादनयोर्विकल्पः। किंतु पुत्रवत्या शय्यापरिपालनं दुहितृमत्या वा। तदभावे नियोगादपत्योत्पादनमावश्यकम्। 'प्रजेप्सिताऽधिगन्तव्या सतानस्य परिक्षये।' इति वचनात्। शय्यापरिपालनात्सतानिर्वाह एव श्रेयानित्यपरार्कभारुचिसोमेश्वरादीनां मतम्। एतन्नियोजन कलियुगे निषिद्धमपि

+ पमा., मपा. मितागतम्।

* उ., स्मृसा., व्यनि. अपगतम्।

युगान्तराभिप्रायेणोक्तम्।

एतद्वाग्दत्ताविषयकनियोजन विज्ञानयोगिमतानुसारेणोक्तम्। भारुच्यादीना तु मते विधवानियोजनमप्यस्ति वाग्दत्तानियोजनमप्यस्तीति ध्येयम्। सवि.३८९-३९०

(७) अपुत्रेण देवरादिना विगोत्रेण वा। *वीमि.

(८) नियोगश्च वाग्दत्ताविषय एवेत्याचार्याः।

व्यप्र.४७०

अत्र वाग्दत्ताशब्देन 'तुभ्यमह सप्रदद' इत्यादिसंकल्पवाक्येन कन्यादात्रा दत्ता गृह्यते। विधवाशब्देन तु सप्तपदीपर्यन्त विवाहोढा पश्चान्मृतपतिका। न तु विवाहात्प्रागनियतकालप्रतिश्रवणरूपवागुदानदत्ता। या —'अग्न्यङ्गेऽपतितेऽक्लीबे दशदोषविवर्जिते। इमा कन्या प्रदास्यामि देवाग्निगुरुसनिधौ॥' इति वाक्येन प्रतिज्ञायते। अत एव पतिरिति मनुनोक्तम्। प्रागभाविप्रतिश्रवणस्य विवाहप्रयोगबहिर्भावेन प्रतिश्राव्यस्य पतित्व 'अग्निगुरुसनिधावि'ति वाक्येन प्रतिज्ञायते। यद्यपि संकल्पिताया अपि न स पतिर्जातः। भार्यात्ववत्पतित्वस्याप्यलौकिकसस्कारात्मकत्वेन विवाहभावनाभाव्यस्य ततः प्रागनुत्पत्तेः। तथापि प्रयोगोपक्रमे तत्कलीभूततद्व्यवहारसभवः। यजमानेष्टितः प्रागप्याहवनीयव्यवहारवत्। प्रतिश्रवणमात्रे तु न तदुपक्रमोऽपीति सर्वथा पतित्वव्यपदेशोऽनुपपन्नः। अत एव प्रतीच्योदीच्यादीना विवाहादर्दत्तीयः प्राक्काले वाग्दत्तायास्तदुद्देश्ये मृतेऽपि पुनर विगीतशिष्टैरन्येन सह विवाहः क्रियते। अन्यथा कलौ नियोगविधेरपि निषिद्धतया पुनरक्षताविवाहस्य दुरापास्ततया स दुराचार एव स्यात्। तथा चायमर्थः। वाचा सत्ये कृते सकल्पवाक्येन दाने कृते सति यस्याः पतिः पतित्वभाव्यकविवाहभावनाविषयीभूतः पुरुषो म्रियेतेति। न च विहितप्रतिषिद्धत्वाद्विकल्प एव विधवानियोगस्यास्त्विति वाच्यम्। वस्तुनि विकल्पासभवात्। न हि विधवाया नियोगाप्रवृत्तस्य प्रत्यवायो भवति न भवति वेति सभवति। नियोगविधेः 'यस्या म्रियेत' इत्यादिवचनेन वाग्दत्तादिपयत्वे नियन्त्रिते विधवाविषये प्रवृत्त्यभावाच्च। नियोजयितृणा निन्दाश्रवणात् स्त्रीधर्मेषु व्यभिचारस्य बहुदोषजनकत्वश्रवणात् सयमस्यातिप्रशंसनाच्च तुल्यबलत्वस्यापि विधिप्रतिषेधयोरभावात्। तथा च मनुरेव—'काम त क्षपयेद्देह पुष्पमूलफलैः शुभैः। न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु॥' (मस्मृ.५।१५७) इति जीवनार्थ पुरुषान्तराश्रयण निषिध्य, 'आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी। यो धर्म एकपत्नीना काङ्क्षन्ती तमनुत्तमम्॥ अनेकानि सहस्राणि कौमारब्रह्मचारिणाम्। दिव गतानि विप्राणामकृत्वा कुलसततिम्॥ मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता। स्वर्ग गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥ अपत्यलोभाद्या तु स्त्री भर्त्तारमतिवर्त्तते। सेह निन्दामवाप्नोति पतिलोकाच्च हीयते॥' (मस्मृ.५।१५८-१६१) इति पुत्रार्थमपि पुरुषान्तराश्रयणं निन्दातिशयपुरःसरं प्रतिषिद्धवान्। पश्चात् स्वयमेव 'यस्या म्रियेत' इत्यनेन वागुदत्ताविषयनियोगस्य च धर्मत्वमुक्तवान्। 'अनेन विधानेन' इत्युक्त्वा — 'यथाविध्यधिगम्यैना शुक्लवस्त्रा शुचिव्रताम्। मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ॥' (मस्मृ.९।७०) इति विधानमपि दर्शितवान्। घृताभ्यङ्गपुर्वनुज्ञादिः पूर्वोक्तः स्मृत्यन्तरोक्तश्च यो विधिः सोऽप्यनेनेति सर्वनाम्ना परामृश्यते। देवरग्रहण सपिण्डादेरुपलक्षणम्। वचनान्तरानुसारात्। पतिपद 'वाचा सत्ये' इति च व्याख्यातमेव। 'यस्मै वाग्दत्ता कन्या स प्रतिग्रहमन्तरेणैव तस्याः पतिरित्यस्मादेवावगम्यते' इति मिताक्षरान्थोऽप्यस्मदुक्ताथाभिप्रायकतयैव नेयः। यथाश्रुते दोषस्योक्तत्वात्। व्यप्र.४७१-४७३

(९) मिताटीका — इत्थमाचार्यमत प्रतिपादितं, 'अत्रापीत्यादिनोभयोरपि इत्यन्तेन'। यद्यप्यत्र तत्वेन नोक्त किंतु सामान्येन तथाप्याचाराध्याये स्वयं स्पष्टं तथैवोक्तमिति तथैव बोध्यम्। वस्तुतस्तु नेदं युक्तम्। 'अद्भिश्च वाचा दत्ताया म्रियेतादौ वरो यदि। न च तौ दम्पती स्याता कुमारी पितुरेव सा॥' इति वसिष्ठविरोधापत्तेः। 'न च मन्त्रोपनीता स्यात्' इति तृतीयपादे पाठान्तरं, 'कुमारी पुनरेव सा' इति चतुर्थपादे। किं च वाग्दानोत्तरं वरे देशान्तरं गतेऽपि हि विशेषो नारदेनोक्तः स विरुध्येत। 'प्रतिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत्। त्रीन् ऋतून् समतिक्रम्य कन्याऽन्यं वरयेद्वरम्॥ स्त्रीपुंसयोस्तु सबन्धाद्वरणं प्राग्विधीयते।

* शेष मितागतम्।

वरणादग्रहणं पाणेः संस्कारोऽपि विचक्षणैः ॥ तयोरनियतं प्रोक्त वरण दोषदर्शनात् ॥' इति (नारद १५।२४, २३)। प्रतिगृह्य वाचा दत्ता स्वीकृत्य। संवत्सरमतिक्रम्येति पाठान्तरम्। स्त्रीपुसयोः संसर्गात् प्राक् वितथ क्रियते, वरण पाणिग्रहण सप्तपदीप्रक्रमश्चेति। तत्र वरण नाम वरस्य सप्रदानत्वाय कन्यादात्रा प्रार्थनम्। तदेव च वाग्दानम्। एवस्थिते तयोः पाणिग्रहणसप्त पदीप्रक्रमयोः पूर्वभावि यद्वरण तदनियतमनियामक मित्यर्थः। तयोरेव भार्यात्वोत्पादकत्वादिति भावः। अत्र मनुरनुपदमेव स्फुटीभविष्यति। दोषेति। अस्यार्थः वरणस्यानियामकत्वमपि पूर्ववरस्य दोष सत्येवेतीति। इद च माधवीये स्पष्टम्। एतदेकवाक्यतयैव माधवेन —'वरयित्वा तु यः कश्चित्प्रणश्येत्पुरुषो यदा। रक्तागमास्त्रीनतीत्य कन्याऽन्यं वरयेत् पतिम्॥' इति काश्यायनोक्तम्। प्रणश्येद्देशान्तर गच्छेत् अन्यथा प्रतीक्षावैयर्थ्यापत्तेरित्येव व्याख्यातम्। वरमिति पाठान्तरम्। मन्त्रोपनीता पाणिग्रहणमन्त्रजन्यसंस्कारवती। इत्थ एतदेकवाक्यतयोक्तनारदीये ऋतुपदेन रजोदर्शनमेव न तु कालः। एव च संवत्सरमतिक्रम्येति पाठान्तरमयुक्तमेवेति बोध्यम्। तथा च पाणिग्रहणादिक विना वाचा दानमिवाद्भिरपि दानं न भार्यात्वोत्पादकमित्यर्थः। कुमारी पितुः अन्यस्मै यादृशसंबन्धेन पित्रा विवाह्यते तादृक् पितृसबन्धवती। तथा च न तस्या वैधव्यम्। एतत्परमेव यमवाक्यं पूर्वाध्याये उक्त तादृशम्। तथा च पराशरोऽपि—'नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ। पञ्चस्वापत्सु नारीणा पतिरन्यो विधीयते॥' इति। वाग्दानानन्तर पाणिग्रहणात्प्राक् पतौ सभावितोत्पत्तिकपतित्वे पूर्वस्मिन्वरे नष्टे सति लक्षणया दूरदेशगमनेना परिज्ञातवृत्तान्ते सतीत्यर्थः। एवं दुष्टे पूर्ववरे वाग्दत्ताऽपि वरान्तराय देयेत्यपि सिद्धम्। एवं च 'वाग्दत्ता, मनोदत्ता, अग्निं परिगता, सप्तमं पदं नीता, भुक्ता, गृहीतगर्भा, प्रसूता चेति सप्तविधा पुनर्भूः ता गृहीत्वा न प्रजां न धर्मं विन्देदि'ति बोधायनोक्तो वाग्दत्तामनोदत्तयोर्निषेधः पूर्ववरस्य निर्दोषत्वे सति बोध्यः। अत एव नारदः— 'दत्ता न्यायेन यः कन्या वराय न ददाति ताम्। अदुष्टश्चेद्वरो राज्ञा स दण्ड्यस्तत्र चोरवत्॥' (नारद.१५।३२) इति तत्रैव दण्डं विधत्ते। प्रदान स्वामित्वहेतुर्न तु वाग्दानम्। तथा च मनुः— 'मङ्गलार्थं स्वस्त्ययन यज्ञश्चासा प्रजापतेः। प्रयुज्यते विवाहेषु प्रदान स्वाम्यकारकम्॥ पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्। तेषा निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥' (मनु.५।१५२,८।२२७) इति स्वस्त्ययन कुशलेन कालातिवाहनहेतुः करणसाधनत्वात् कनकधारणादि स्वस्ति भवन्तो ब्रुवन्त्वित्यादि च यत्, यश्च प्रजापतिदेवताको वैवाहिको होमस्तत्सर्व मङ्गलार्थम्। अभिमतार्थसिद्धिर्मङ्गल तदर्थम्। निष्ठा भार्यात्वसमाप्तिरूपा। प्रतिगृह्य वाग्दानेन गते वरे ऋतुत्रयप्रतीक्षणादिक मुख्यप्रागुक्तकालादूर्ध्वमपि दात्रा अदीयमानत्वविषयमेव। 'गम्यत्वभावे दातृणामि'त्यायेकवाक्यत्वात्। तस्माद्वाग्दानस्थले उक्त एव प्रकारभेदः। 'अपुत्रा गुर्वनुज्ञात' इति 'अपुत्रेण परक्षेत्रे' इति च मूल विवाहितविषयमेव। तथैव च व्याख्यात व्याख्यात्रा। मनूक्तनियोगोऽप्येतद्विषय एव। अत एव तत्र विधवापदोक्तिस्वारस्यम्। 'नान्यस्मिन्नि'ति निषेधस्तु देवरसपिण्डसगोत्रान्यविषयकः। क्रमोक्त्या स्वरसतस्तथैव प्रतीतेः। एतस्यैव पोषक 'नोद्वाहिकेष्वि'ति प्रागुक्तनियोगान्यसामान्यनियोगाद्यभावबोधकम्। एक पुत्रमित्यायुक्तपोषकमेव। अयमिति। अत एव पशुधर्म इत्युक्तम्। स च वारंवार नियोजनादिरूपः। तदेव द्रढयति। तत इति। सामान्येनोक्तनियमानादरेण पुनः पुनस्तदर्थं नियोजयतीत्यर्थः। अत एव व्यभिचारदोषश्रवणस्य सयमप्राशस्त्यस्य चोपपत्तिरिति न तद्विरोधः। 'यस्या म्रियेते'ति तु देवरसत्वेऽन्यस्मै न देया किंतु तस्या एव देयेत्येवपरम्। अत एव 'यथाविधी'ति पद्यं सर्वं सफलम्। पुनरुपनयने विशेषवदत्र पुनर्विवाहे न विशेष इति यथाविधीत्युक्तम्। अधिगम्येत्यनेन दाम्पत्यमुक्तम्। शुक्लेत्यादिना तस्यामदुष्टत्वं, भजेतेत्यनेन यावज्जीवं रमणाद्युक्तम्। अत एव आप्रसवादित्युक्तिर्वीप्साद्यर्थं च। अन्यथा तस्य सामान्यसिद्धत्वादेव वीप्सानर्थक्यं स्पष्टमेव। एव च प्रधान एवायं विवाहो नाङ्गम्। अत एवानेन विधानेन विन्देतेत्युक्तम्। देवर इति पतिरिति च सूत्रशाटकवत् भाविसंज्ञया।

प्रागुक्तकात्यायनीये पतिमितिवत्। एवं च कुल्लूकभट्टोक्तमेव युक्तम्। एव शुल्कदमरणे मनुः—'कन्याया दत्तशुल्काया म्रियेत यदि शुल्कदः। देवराय प्रदातव्या यदि कन्यानुमन्यते॥' (मस्मृ.९।९७) इति। अनेन च तस्मै दान स्पष्टमेवोक्तम्। यदि कन्येत्यनेन तथा तदनुमतौ देवराय देया, तदन्यानुमतौ तदन्यस्मै देया, विवाहमात्राननुमतौ तु कस्मा अपि न देयेति, तया नैष्ठिकव्रतमेव कर्तव्यमिति सूचितम्। शुल्कदातुर्देशान्तरगतौ तु कात्यायनः—'प्रदाय शुल्क गच्छेद्यः कन्यायाः स्वीधन तथा। धार्या सा वर्षमेक तु देयाऽन्यस्मै विधानतः॥ अथ प्रवृत्तिरागच्छेत् प्रतीक्षेत समात्रयम्। अत ऊर्ध्व प्रदातव्या कन्याऽन्यस्मै यथेच्छतः॥' इति। अत्र धार्येत्यनेन धार्यत्वेन ततः पूर्वमपि देयेति सूचितम्। बहुभिर्निर्देशपूर्वं रणे कृते विशेषमाह स एव—'अनेकेऽप्योऽपि दत्तायामनूढाया तु यत्र वै। पुराऽऽगतश्च सर्वेषा लभेताद्यो वरस्तु ताम्॥ पश्चाद्वरेण यद्दत्त तस्याः प्रतिलभेत सः। अथागच्छेत्समूढाया दत्त पूर्ववरो हरेत्॥' इति। वरो विवाहार्थोपस्थितस्तेन यच्छुल्क दत्त तदेव लभेतेत्यर्थः। तत्र वै 'पुरागतश्च सर्वेषा लभते तदिमा सुतामि'ति पाठान्तरम्। अन्यस्मै दत्ताया कन्याया पूर्ववरोऽप्यायाति तदाऽनूढा ता लभते, ऊढाया तु स्वदत्त द्रव्यमेव लभते, न तु कन्यामित्यपि सिद्धम्। अत एव तस्माद्विज्ञानेश्वरीयमूलार्थप्रतिपादनमेव युक्तम्। अत एव न स्वपूर्वविरोधः। अत्रापि प्राग्वत्तथात्वाच्चैव तदनुक्तिः प्राक् तथोक्तत्वात्। उक्तनिष्कर्षकथनबीज त्वस्य 'देवराच्च सुतोत्पत्तिरि'ति कलिवर्ज्येषु गणनात् अनास्थारूपमेव।

बाल.२।१२७(पृ.१६६–१६८)

नारदः

औरसक्षेत्रजादयो द्वादश पुत्राः, तेषा दायपिण्डदातृत्वविचारः। द्व्यामुष्यायण-शुल्कदत्तापुत्र-अनियुक्तापुत्र-धर्मपुत्राणा दायपिण्डदत्वविचारश्च।

[1]**औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च।**
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च॥

[2]**पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा।**
स्वयं चोपगतः पुत्रा द्वादशैते प्रकीर्तिताः॥
[3]**एषां पड्बन्धुदायादाः षडदायादबान्धवाः।**
पूर्वः पूर्वः स्मृतः श्रेष्ठो जघन्यो यो य उत्तरः॥
[4]**क्रमादेते प्रवर्तन्ते मृते पितरि तद्धने।**
ज्यायसो ज्यायसोऽभावे जघन्यस्तदवाप्नुयात्*॥

(१) पूर्वपूर्वाभावे उत्तरोत्तरेषा द्रविणार्हत्वमित्यर्थः। विचि.२३०

(२) तेषामय विशेषः — ये आद्या षडौरसादयो गूढोत्पन्नान्ताः सततिश्च दायादाश्चेति केचित्। बन्धूना च दायं पितृस्वमपि लभन्त इत्यर्थः। इतरे पट् पितुरेव दाय लभन्ते न सपिण्डानाम्। पूर्वः पूर्वः श्रेयान् उत्तर उत्तर ऊनः रिक्थभागादौ। पूर्व उत्तरं विभृयात् 'अंशाना चौदन दद्यात् तदशा इतरे' इति। नाभा.१४।४५

द्व्यामुष्यायणका दद्युर्द्वाभ्यां पिण्डोदके पृथक्।

*विर.व्याख्यानं 'पिण्डदाऽऽशहरश्चैषा' इति याज्ञवल्क्यवचने (पृ.१३३६) द्रष्टव्यम्।

(१) **नासं.**१४।४४ दत्तः (लब्धः) कृतस्तथा (तथा कृतः) पुत्रा (पुत्रो) प्रकीर्ति (उदाहृ), **नास्मृ.**१६।४६ दत्तः (लब्धः) प्रकीर्ति (उदाहृ), **व्यक.**१५४, **विर.**५५१ चोप (चोपा); **विचि.**२३०, **व्यप्र.**४८६, **बाल.**२।१३२ (पृ.१७९), २।१३५ (पृ.२३४), **दच.**२९ विरवत्.

(२) **नासं.**१४।४५ एषा (तेपु), **नास्मृ.**१६।४७ छो (धान्), **व्यक.**१५४ श्रे (ज्ये), **विर.**५५१ एषा (तेषा) श्रे (ज्ये), **विचि.**२३० श्रे (ज्ये), **व्यप्र.**४८६; **बाल.**२।१३५(पृ.२३४), **दच.**२९ विरवत्.

(३) **नासं.**१४।४६ वर्तन्ते (पवेरन्) द्धने (द्धनम्); **नास्मृ.**१६।४९ (क्रमाद्धनेते प्रपवेरन् मृते पितरि वा धनम्। ज्यायसो ज्यायसोऽलाभे कनीयान् रिक्थमर्हति॥); **व्यक.**१५५; **गौभि.**२८।३२; **उ.**२।१४।२, **विर.**५५१ न्यस्तदवा (न्यो यो य आ); **विचि.**२३० विरवत्; **व्यप्र.**४८६ देते (त्ते ते); **बाल.**२।१३५ (पृ.२३४) ज्यायसो ज्या (श्रेयसः श्रे); **दच.**२९-३० विरवत्.

(४) **नासं.**१४।४२ द्व्यामुष्यायणका (द्विरामुष्यायणा) र्धं स (र्धांश); **नास्मृ.**१६।४३ पूर्वार्धं नासवत्; **अप.**२।१२७ का दद्युर्द्वा (को दद्याद्द्वा) उत्तरार्धं (रिक्थादर्धांशग्राही स्याद्वीजिक्षेत्रिकयोरपि), **व्यक.**१५६, **उ.**२।१३।६ का दद्युर्द्वा (को दद्याद्द्वा) (रिक्थादर्धं समादद्यात् बीजक्षेत्रवतोस्तथा); **विर.**

(१) **नासं.**१४।४३, **नास्मृ.**१६।४५; **व्यक.**१५४, **विर.**५५१; **विचि.**२३०; **व्यप्र.**४८६; **बाल.**२।१३२ (पृ.१७९),२।१३५ (पृ.२३४); **दच.**२९.

ऋक्थादर्धं समादद्युर्बीजिक्षेत्रिकयोस्तथा ॥

(१) इति, तत्क्षेत्रजे जाते पश्चाच्चौरसोत्पत्तौ सत्यां वेदितव्यम् । अप.२।१२७

(२) यत्र बीजिन औरसोऽस्ति क्षेत्रिणोऽपि कथञ्चित्पश्चादौरसो जातस्तद्विषयमिदम् । अपुत्रयोस्तु द्वयोरपि कृत्स्नमर्थं गृह्णीयात् । विर.५५९

(३) तव च मम चेत्युत्पादिताः क्षेत्रजाः पुत्रिकासुताश्च, ते द्वयोर्बीजिक्षेत्रिकयोः पिण्डोदके दद्युः, उभयोरनपत्यत्वे सर्वे हरेयुः, सापत्यत्वे उभयतोऽर्धांशम् । एवमौरसैस्तुल्याशा भवन्ति । नाभा.१४।२२

(४) अर्धांशमिति यथोचितभागोपलक्षणम् ।
व्यप्र.४७४

कानीनश्च सहोढश्च गूढायां यश्च जायते ।
तेषां वोढा पिता ज्ञेयस्ते च भागहराः स्मृताः ॥

सहोढो गर्भजातः । अत्रापुत्रो यदि मातामहस्तदा तस्य पुत्रः कानीनः सहोढश्च । सपुत्रश्चेत्तदा वोढुः, उभयोरपुत्रत्वे चोभयोरिति पारिजातः । विर.५६५

अज्ञातपितृको यस्तु कानीनोऽनूढमातृकः ।
मातामहाय दद्यात्स पिण्डं रिक्थं हरेत च ॥

कानीनो वोढुः पुत्र इत्युक्त अतिप्रसगाद् विशेष्यते । कन्यायामदत्तायां यो जातश्चौर्येण, सोऽज्ञातपितृकः । दत्तायामगूढायां चौर्येण, क्षेत्रिणो निर्जातत्वात् ज्ञातपितृक एव सः । उभयत्र गूढायां जातत्वेऽपि स वोढुरित्युक्तः । क्षेत्रजादावपि वैलक्षण्यान्न क्षेत्रजः । इतरस्तु मातामहाय पिण्ड दद्यात्, पुत्र इत्यर्थः । रिक्थ च तस्य लभते स देवरजादिष्वनुरूपम् । नाभा.१४।१७

जाता ये त्वनियुक्तायामेकेन बहुभिस्तथा ।
अरिक्थभाजस्ते सर्वे बीजिनामेव ते सुताः ॥
दद्युस्ते बीजिने पिण्डं माता चेच्छुल्कतो हृता ।
अशुल्कोपनतायां च पिण्डदा वोढुरेव ते* ॥

(१) अनियुक्तायां स्वरिण्याम् । अरिक्थभाजः क्षेत्रिऋक्थ न लभन्ते, मातृक्षेत्रिकमातामहाना न ऋक्थ भजन्ते इति तु प्रकाशकारः । किमविशेषेण पिण्डदानमित्याह— 'दद्युस्ते बीजिने पिण्ड माता चेच्छुल्कतो हृता' इति । यदि क्षेत्रिणः शुल्क मूल्य दत्त्वा बीजिना माता हृता । अशुल्कोपनतायामित्यादि युक्तम् ।
विर.५८७-५८८

(२) यदि माता शुल्केन नीता स्याद्, बीजिनः पिण्डदाः । विना शुल्केन स्वयमागताया जातो वोढुरेव क्षेत्रिण एवेत्यस्मिन् नियोगवचनमनर्थक स्यात् । अन्य आह—अशुल्कोपनताया वोढुः पिण्डदा इति वचनान्न रिक्थभाज इति । अत्रापि यतो रिक्थ ततः पिण्डमिति दुरुपपादम् । तस्मात् पणेन विना नियुक्तानियुक्ता वा पत्युरेवापत्यार्थ न्यायेनोपनता चेद् वोढुरेवेति समाश इत्युक्त एव विशेषित इति । नाभा.१४।१९

द्वौ सुतौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने ।
तयोर्यद् यस्य पित्र्यं स्यात् स तद्गृह्णीत नेतरः+॥
धर्मार्थं वर्धिताः पुत्रास्तत्तद्गोत्रेण पुत्रवत् ।
अंशपिण्डविभागित्वं तेषु केवलमिष्यते ॥

(बृद्धगौतमः—'स्वगोत्रेण कृता' इत्यादि, यच्च बृहन्मनुः—'दत्तक्रीतादिपुत्राणां' इत्यादि, यदपि नारदः 'धर्मार्थं वर्धिताः' इत्यादि) तान्यनाकराणि । व्यम.५३

५५८; व्यप्र. ४७४ र्धं स (र्धांश); दच. ३८ व्यप्रवत्.

(१) नास.१४।१६, नास्मृ.१६।१७; व्यक.१५७; उ.२।१४।२ स्मृताः (पितु), विर.५६५, व्यनि. उक्त; व्यप्र.४७५, समु.१३७ उक्त्.

(२) नासं.१४।१७ऽनूढ (गूढ) त्स (च्च); नास्मृ.१६।१८ सु (श्च); व्यनि. त च (त्तः); व्यप्र.४७५ हाय (हस्य) त च (त्तः); समु.१३७ऽनूढमातृक (गूढमातृजः) त च (त्तः).

(३) नासं.१४।१८ सुता. (स्मृता); नास्मृ.१६।१९ स्ते सर्वे (स्सर्वे स्युः), मेधा.९।१४३, व्यक.१५९, विर ५८७; स्मृसा.७०; चन्द्र.१७७ जाता ये त्व (ये जातास्तु) अरि (अनृ).

* मेधा.व्याख्यान 'अनियुक्तासुतश्चैव' इति मनुवचने द्रष्टव्यम् ।

+व्याख्यासग्रह· 'द्वौ तु यौ विवदेयाता' इति मनुवचने (पृ. १३२३) द्रष्टव्यः ।

(१) नासं.१४।१९ जिने (जिनः) च (तु); नास्मृ.१६।२० नतायां च (गताया तु); मेधा.९।१४३ च (तु); व्यक. १५९ नासवत्; विर.५८७; ५८८ पू, स्मृसा.७० नासंवत्.

(२) दा.१४८-१४९; व्यनि. सुतौ (तु यौ) यैद् यस्य (यैद्यपि) भरद्वाज., दात.१६९, विता.३८० स तद् (तत् स) देवल., सेतु.८२ पि (पै), विच.६२.

(३) व्यम.५३.

बृहस्पतिः

पुत्रमहिमा । भ्रातृणा एकपत्नीना वा एकस्य एकस्या वा पुत्रेण पुत्रवत्त्वम् ।

[1]पुन्नाम्नो नरकात्पुत्रः पितरं त्रायते यतः ।
मुखसंदर्शनेनापि तदुत्पत्तौ यतेत सः ॥
[2]यद्येकजाता बहवो भ्रातरस्तु सहोदराः ।
एकस्यापि सुते जाते सर्वे ते पुत्रिणः स्मृताः ×॥
बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः ।
एका चेत्पुत्रिणी तासां सर्वासां पिण्डदस्तु सः ॥

औरसपुत्रिकयोस्त्रयोदशेषु सुतेषु वरिष्ठत्व, सर्वेषा दायहरत्वपिण्डदत्वादिविचारश्च

[3]पुत्रास्त्रयोदश प्रोक्ता मनुना येऽनुपूर्वशः ।
संतानकारणं तेषामौरसः पुत्रिका तथा ॥
[4]आज्यं विना यथा तैलं सद्भिः प्रतिनिधीकृतम् ।
तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना ॥
[5]अग्निं प्रजापतिं चेष्ट्वा क्रियते गौतमोऽवदत् ।
अन्ये त्वाहुरपुत्रस्य चिन्तिता पुत्रिका भवेत् ॥

[6]एक एवौरसः पित्र्ये धने स्वामी प्रकीर्त्तितः ।
तत्तुल्या पुत्रिका प्रोक्ता भर्त्तव्यास्त्वपरे स्मृताः ॥

यानि पुत्रिकापुत्रस्य न्यूनभागप्रतिपादकानि 'समग्रधनभोक्ता स्यादौरसोऽपि जघन्यजः । त्रिभागं क्षेत्रजो भुङ्क्ते चतुर्थं पुत्रिकासुतः ॥' इत्यादीनि ब्रह्मपुराणादिवचनानि तानि औरसस्यात्यन्तसगुणत्वे पुत्रिकापुत्रस्यासवर्णत्वेऽत्यन्तनिर्गुणत्वे वा द्रष्टव्यानि ।

रत्न.१४२

[7]पौत्रोऽथ पुत्रिकापुत्र. स्वर्गप्राप्तिकरावुभौ ।
ऋक्थपिण्डप्रदानेन समौ संपरिकीर्त्तितौ ॥
[8]क्षेत्रजाद्याः सुताश्चान्ये पञ्चषट्सप्तभागिनः ॥

क्षेत्रजाद्याः क्षेत्रजकानीनपौनर्भवाः यथासख्यं पञ्चषट्सप्तभागिन इत्यर्थः । विर.५४५

[9]दत्तोऽपविद्धः क्रीतश्च कृतः शौद्रस्तथैव च ।
जातिशुद्धाः कर्मशुद्धा मध्यमास्ते सुताः स्मृताः ॥

पुत्रकरणविधि. तत्प्रयोजन च । इदानीमकर्तव्यपुत्रप्रकाराः ।

[10]अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः ।
पिण्डोदककियाहेतोर्नामसंकीर्तनाय च ॥

× दर्मी व्याख्यान 'ब्राह्मणानां सपिण्डेषु' इति शौनकवचने द्रष्टव्यम् ।

(१) व्यक.१५९, विर.५८४; बाल.२।१३५(पृ.२२०).

(२) व्यक.१५९ रस्तु (रस्ते), विर ५८३; व्यनि. तासा (त्वासां); दर्मी.४२ रस्तु (रश्च), संप्र.२१४; बाल.२।१३५ (पृ २२५), समु.९५, कृभ.८७९ यथे (येऽप्ये) स्मृता. (मताः); दच. ७ प्रथमश्लोकः, ८ द्वितीयश्लोकः.

(३) अप.२।१२८ येऽनु (येन); व्यक.१५८; विर. ५७५, स्मृसा.७०, व्यनि. अपवत्, चन्द्र.१७७ अपवत्, दर्मी.३९; व्यप्र.४८०; बाल.२।१३५ [पृ.२३२ उत्त.: पृ.२३६ रण (रणात्)]; समु.१३९; दच.४.

(४) अप.२।१२८ धीकृतम् (धिः स्मृतम्); व्यक.१५८ धी कृतम् (धि. स्मृतः), ममु.९।१८१ वृद्धवृहस्पतिः; विर. ५७५; स्मृसा.७० व्यकवत्; व्यनि. द्भिः (द्यः) शेष व्यकवत्; मच.९।१८१ पुत्रास्तु (पुत्राः स्युः); चन्द्र.१७७; व्यप्र.४८० व्यकवत्; बाल.२।१३५ [पृ.२३२ पुत्रास्तु (पुत्राः स्युः) शेष व्यकवत् : पृ.२३६ अपवत्]; समु.१३९ विना (रस्मृता.) शेष व्यकवत्; दच.४.

(५) विर.५६२; व्यनि.चेष्ट्वा (दृष्ट्वा), समु.१३८ऽवदत् (क्तवत्).

(१) व्यक.१५३; गौमि २८।३२ ल्या (ल्यः) प्रोक्ता (पुत्रो); उ.२।१४।२; विर.५४१ स्मृताः (सुताः); स्मृसा. ६६ पित्र्ये (पुत्रो); रत्न.१४२ विरवत्; विचि.२३३ पित्र्ये (पुत्रो); व्यनि.; स्मृचि.३३ पित्र्ये धने (पुत्रो धन) चन्द्र.९० पित्र्ये (पुत्रो); व्यप्र ४८१; व्यउ.१४८-१४९ तत्तु (यत्तु) भर्तव्यास्त्वपरे (द्वावेतावुत्तमा); समु.१३९.

(२) व्यक.१५९, उ.२।१४।२ पौ (पु) ऋक्थपिण्डप्रदानेन (रिक्थे पिण्डाम्बुदाने च); विर.५८४:५८६ (=) स्वर्ग (श्रेय.) पिण्डप्रदानेन (पिण्डाम्बुदाने च) कीर्ति (कल्पि); स्मृसा. ६४ ण्डप्र (ण्डार्ध); चन्द्र.८८त्रोऽय (त्रश्च) नेन (नेपु), बाल. २।१३५(पृ.२२०) उत्तरार्धे (रिक्थे पिण्डाम्बुदाने च सुतौ सुपरिकल्पितौ).

(३) गौमि.२८।३२ श्चा (स्त्व); उ.२।१४।२ गौमिवत्; विर.५४५; व्यप्र.४८४ म (म); व्यउ.१४८(=).

(४) व्यक.१५५, विर.५५२ स्मृताः (मताः); व्यप्र. ४८६; विता.३६५.

(५) व्यक.१५९; विर.५८६(=); बाल.२।१३५ [पृ.२१९ नामसंकीर्तनाय च (धर्मसंकीर्तनस्य च) मनुयमव्यासबृहस्पतयः].

[1]काङ्क्षन्ति पितरः पुत्रान् नरकापातभीरवः ।
गयां यास्यति यः कश्चित्सोऽस्मान्संतारयिष्यति ॥
[2]करिष्यति वृषोत्सर्गं इष्टापूर्तं तथैव च ।
पालयिष्यति वार्धक्ये श्राद्धं दास्यति चान्वहम् ॥
[3]अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः ।
तच्छक्यं नाधुना कर्तुं शक्तिहीनैरिदन्तनैः ॥
[4]क्षेत्रजो गर्हितः सद्भिस्तथा पौनर्भवः सुतः ।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ॥

कात्यायनः

औरसक्षेत्रजादीना सवर्णासवर्णानां दायहरत्व-
पिण्डदत्वादिविचारः

[5]उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः ।
सवर्णा असवर्णास्तु ग्रासाच्छादनभाजनाः *॥

* दा.न्यारूयान 'तेषा सवर्णा ये पुत्राः' इत्यादिदेवलवचने द्रष्टव्यम्। व्यनि. दावद्भावः। सेतु. दागतम्।

(१) व्यक.१५९ पू; विर.५८६ (=); बाल.२।१३५ (पृ.२१९).

(२) बाल.२।१३५ (पृ.२१९).

(३) अप.१।६९ उत्तरार्धे (न शक्यास्तेऽधुना कर्तुं शक्तिहीतनया नरैः); समु ९।६८ यैं (श्च) तच्छक्य ना (न शक्यन्तेऽ); विर ४५०; मच.९।६८ रिदं (श्चिर) शेष मसुवत्; दमी.२३ अपवत्; विता.३६५ उत्तरार्धे (न शक्यन्तेऽधुना कर्तुं शक्तिहीनैर्न तत्क्षमम्); विभ.३२, समु.१३९ अपवत्; नन्द. ९।६८ मसुवत्; दच.४ तच्छक्य ना (न शक्यन्तेऽ).

(४) व्यक.१५५; विर.५५२; व्यप्र.४८६; व्यउ. १४९; विता.३६५.

(५) मिता.२।१३२, दा.१४८ चतुर्थांशहरा. सुताः (तृतीयांशहराः स्मृताः) जनाः (गिनः), अप.२।१२७ त्वौ (चौ): व्यक.१५६ चतुर्थांश (तृतीयांश) र्णा अस (र्णास्त्वस); गौमि.२८।३२ चतुर्थांश (तृतीयांश) जनाः (गिनः); विर. ५४४ र्णा अस (र्णास्त्वस) शेष दावत्; स्मृसा ६६ र्णा अस (र्णास्त्वस) जनाः (गिनः) उत्त., मनुः ।६७ चतुर्थांश (तृतीयाश) पू.; पमा.५१५ र्णास्तु (र्णा वा); मपा.६५४ त्वौ (चौ) र्णास्तु (र्णास्ते); रत्न.१४२; विचि.२३४ र्णा अस (र्णास्त्वस) शेष दावत्; व्यनि. गौमिवत्; नृप्र.३९ जनाः (गिनः); सवि.३९३ सवर्णा...स्तु (असवर्णाः सवर्णासु); चन्द्र.९१ (=) दावत्; वीमि.२।१३४ चतुर्थांश (तृतीयाश),

(१) सवर्णा दत्तकक्षेत्रजादयस्ते सत्यौरसे चतुर्थांशहराः । असवर्णाः कानीनगूढोत्पन्नसहोढजपौनर्भवास्ते त्वौरसे सति न चतुर्थांशहराः किंतु ग्रासाच्छादनभाजनाः । ×मिता.२।१३२

(२) औरसे पुत्रे जाते दत्तकादयस्तृतीयाशभागिनः सवर्णा इत्यर्थः । अत्र पूर्वं परिगृहीतपुत्रे चतुर्थांश उक्तः अनेन तु तृतीयाशभागित्वम् । तदिदमगुणवत्त्वगुणवत्त्वाभ्या व्यवस्थाप्यम् । एतद्वाक्याच्च 'शेषाणामानृशस्यार्थं प्रदद्यात्तु प्रजीवनमि'ति मनुवाक्येऽपि असवर्णानामेव पुत्राणा भरणमात्रविधानम् । ÷विर.५४५

(३) इद तु तृतीयाशहरत्व क्षेत्रजस्य । समग्रधनभोक्तेत्यादिब्रह्मपुराणैकमूलकत्वात् । अत्युत्कृष्टगुणवत्तरविषयमित्यन्ये । विचि.२३४

(४) चतुर्थांशो नाम चतुर्थस्य योऽशः समत्वेन परिकल्प्यते तत्तुल्योऽशः—पञ्चमाश इत्यर्थः । 'पञ्चमाशहरा दत्तकृत्रिमादिसुताः पुनः ।' इति स्मृतेः । पुनरिति पश्चादुत्पन्ने औरस इत्यर्थः । असवर्णाः कानीनगूढोत्पन्नसहोढपौनर्भवाः । तेषा यद्यपि सवर्णत्वादि निश्चये कानीनत्वादिव्यपदेशः, तथाऽपि सदिग्धेऽपि सवर्णत्वेऽसवर्णत्वव्यपदेशः । सवि.३९३

(५) तत्र तृतीयाशहरा इति कल्पतरुलिखितः पाठो यदि साकरस्तर्हि दत्तकादीनामोरसापेक्षया सगुणत्व तृतीयाशहरत्वमिति व्याख्येयः । +व्यप्र.४८३

[6]क्षेत्रिकस्य मतेनापि फलमुत्पादयेत्तु यः ।

× पमा , मपा., विता.(पृ.३६७) मितावत्। व्यम. मितावत्। विता. (पृ.३७५) व्याख्यान 'एक एवौरसः' इति मनुवचने (पृ.१३२४) द्रष्टव्यम्।

÷ चद्र. विरगतम्।

+ मुख्यार्थो मितावत्।

व्यप्र ४८२; व्यउ.१४०. व्यम ५२; विता.३६७,३७५-३७६; राकौ.४५४ नृप्रवत्; सेतु.८४ दावत्; समु.१३८-१३९; कृभ.८८४; दच.३१ दावत.

(१) व्यक.१५५ कन्य (यस्य) यमः; विर.५५७ (क्षेत्रिकानुमते बीज यस्य क्षेत्रे प्रजायते । तदपत्य तयोरेव बीजिक्षेत्रिकयोर्मतम् ॥) नारदकात्यायनौ ; व्यप्र.४७३; समु. १०१ (क्षेत्रिकानुमतं बीज यस्य क्षेत्रे समुप्यते । तदपत्य द्वयोरेव बीजिक्षेत्रिकयोर्मतम् ॥).

तस्येह भागिनौ तौ तु न फलं हि विनैकतः ॥
क्लीबं विहाय पतितं या पुनर्लभते पतिम् ।
तस्यां पौनर्भवो जातो व्यक्तमुत्पादकस्य सः ॥
न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति ।
मेढ्रश्चोन्मादशुक्राभ्यां हीनः क्लीबः स उच्यते ॥
दत्तानूढा च कन्या च पतित्वं सप्तमे पदे ।
तथैव दत्तपुत्रस्य पुत्रत्वं जातकादिभिः ॥
अक्रमोढासुतस्त्वृक्थी सवर्णश्च यदा पितुः ।
असवर्णप्रसूतश्च क्रमोढायां च यो भवेत् ॥

अक्रमोढायामपि सवर्णेन परिणेत्रा उत्पादितः पुत्रो धनाधिकारी क्रमोढायामसवर्णजातोऽपि ।

*दा.१०३

विदध्यादौरसः पुत्रो जनन्या और्ध्वदेहिकम् ।
तदभावे सपत्नीजः क्षेत्रजाद्यास्तथा सुताः ॥

प्रजापतिः

विधवायाः पुत्रदानप्रतिग्रहाधिकारः

अप्रजा विधवा नारी पितृभ्रात्राद्यनुज्ञया ।
दद्याद्वा प्रतिगृह्णीयादन्यथा नरकं व्रजेत् ॥

देवलः

पुत्रमहिमा । औरसक्षेत्रजादयो द्वादश पुत्राः, तेषां सवर्णा-सवर्णानां दायहरत्वपिण्डदत्वविचारश्च ।

जीवतो वाक्यकरणात्प्रत्यब्दं भूरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
उपासते सुतं जातं शकुन्ता इव पिप्पलम् ॥
मधुमांसैश्च शाकैश्च पयसा पायसेन च ।
एष नो दास्यति श्राद्धं वर्षासु च मघासु च ॥
संस्कृतायां तु भार्यायां स्वयमुत्पादितो हि यः ।
औरसो नाम पुत्रः स प्रधानं पितृवंशधृक् ॥
तत्तुल्यः पुत्रिकापुत्रो दायादः सोऽथवा भवेत् ।
पितुर्मातामहस्यापि निरपत्यस्य पुत्रवत् ।
स एव दद्यात्पिण्डं तु पित्रे मातामहाय च ॥
पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः ।
तयोर्हि मातापितरौ संभूतौ तस्य देहतः ॥
अकृता वा कृता वापि यं विन्देत्सदृशात्सुतम् ।
पुत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् ॥

दौहित्रोऽत्र कृताकृतपुत्रिकासुतः । विर.५६१

एते द्वादश पुत्रास्तु संतत्यर्थमुदाहृताः ।
आत्मजाः परजाश्चैव लब्धा यादृच्छिकास्तथा ॥
तेषां षड्बन्धुदायादाः पूर्वेऽन्ये पितुरेव षट् ।
विशेषश्चापि पुत्राणामानुपूर्व्याद्विशिष्यते ॥

---

* विर., व्यप्र., व्यम., विता., सेतु दावत् ।

(१) व्यक.१५७; उ.१।१४।२, विर.५६४; दीक.४४; स्मृसा.६८, वीमि. २।१३४ उक्त., व्यप्र.४७६.

(२) दा.१०२; बाल.२।१४० मेढ्रश्चो (मेढ्रो) हीन. (हीन), सेतु ६४ बालवत्, विच.७८. (३) समु.९६.

(४) दा.१०३; व्यक.१४४ च यो म (न यद्भ); विर. ४९१, विचि.२०९ पू.; व्यप्र.५६० सुतश्च (सुतस्तु); व्यम. ७३ तस्त्वृक्थी (तो रिक्थी) असवर्ण (असवर्णा); विता.३२७-३२८ तस्त्वृक्थी (तो रिक्थी) पितुः (शुभः) च यो (तु यो): ४३२ तस्त्वृक्थी (तो रिक्थी) क्रमोढाया च (सवर्णायाश्च); सेतु.६४ असवर्ण (असवर्णः) या च (यास्तु); समु.१३० तस्त्वृक्थी (तो रिक्थी) वर्णश्च यदा (वर्णः स्याद्यथा) वर्णप्र (वर्णात्प्र) या च (यां तु); विच.८० पू.

(५) विता.४६७; कुभ.८८० था सु (या वृ).

(६) समु.९५. (७) बाल.२।१३५ (पृ.२१८).

(१) दा.६३; व्यप्र.४६०-४६१; विभ.४७.

(२) व्यक.१५५ न (नः), विर.५५४; स्मृचि.३१ तु (च) दितो हि (दयेत्तु) न (न.), व्यप्र.४६७-४६८ तु (स्व) न (नः), बाल.२।१३५ (पृ.२३५) तु (च) (प्रधा...धृक्०).

(३) व्यक.१५६ द्वितीयार्धं विना; विर.५६० (तत्तुल्यः पुत्रिकापुत्रो दायादः सोऽथवा भवेत् । पितुर्मातामहस्यापि निरपत्यस्य पुत्रवत् ॥). ५६१ (तत्तुल्य. पुत्रिकापुत्रो दायादः सोऽथवा भवेत् । स एव दद्यात्पिण्ड तु पित्रे मातामहाय च ॥).

(४) व्यक.१५६ शात्सु (श सु), विर.५६१ पुत्रा (पौत्रा).

(५) दा.१४७; व्यक.१५४; गौमि.२८।३२; विर. ५५०, विचि.२३१, व्यप्र.४८५, विता.३७६ लब्धा यादृच्छि (नवका ऐच्छि), बाल.२।१३२(पृ.१७७), २।१३५ (पृ.२३४), दच.३१.

(६) दा.१४७ व्याद्वि (व्यो वि); व्यक.१५४; गौमि.२८।३२ वेऽन्ये (र्वं ये), विर.५५०, विचि.२३१; चन्द्र.९२ श्रापि (श्चैव) द्विशिष्यंत (विधीयते) उक्त., व्यप्र.४८५; व्यउ. १४९ (=) उक्त.: विता.३७६ श्रापि (श्चैव); बाल.२।१३२ [पृ.१७७तेषा(एषां):२।१३५(पृ.२३४ पू.)]; दच.३१दावत्.

सर्वे ह्यौरसस्यैते पुत्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्यैष्ठ्यं न विद्यते ॥
तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः ।
हीनास्तमुपजीवेयुर्ग्रासाच्छादनसंभृताः* ॥

औरसेन तु क्षेत्रजादीना विभागे ये पितृसवर्णा औरसपुत्राच्चोत्तमसमवर्णाः पुत्रिकापुत्रक्षेत्रजकानीनगूढजापविद्धसहोढजपौनर्भवदत्तकस्वयमुपागतकृतककक्रीताः पुत्राः ते औरसपुत्रभागस्य तृतीयाशभागिनः। तदाह द्वादशपुत्रानभिधाय देवलः— एते द्वादशपुत्रास्त्वित्यादि । औरसादयः षट् न केवल पितृदायहराः किन्तु बन्धूनामपि सपिण्डादीना दायहराः, अन्ये परभूताः पितुरेव परं दायहराः न सपिण्डादीनाम् । औरसपुत्रशून्यस्य पितुः सर्वहराः, औरसे सति ये पितृसवर्णास्ते तृतीयाशहराः। पुत्रिकाया अपि औरसतुल्यत्वादयमेव भागक्रमः। ये तु पितुर्हीनवर्णा औरसपुत्राच्चोत्तमवर्णास्ते औरसस्य पञ्चमं षष्ठं वाश गुणवदगुणतया गृह्णीयुः। यथा मनुः— 'षष्ठं तु क्षेत्रजस्याशमि'ति । देवलवचनेन सर्वेषा क्षेत्रजतुल्यत्वाभिधानात् मनुवचने क्षेत्रजपदमुपलक्षणम् । ये तु पितुरौरसाच्च भ्रातुर्हीनवर्णास्ते ग्रासाच्छादनमात्राधिकारिणः । तदाह मनुः— 'एक एवौरस' इत्यादि । तथा कात्यायनः— 'उत्पन्ने त्वौरसे' इति । मनुवचने शेषपदं कात्यायनवचने चासवर्णपद हीनवर्णपरं देवलेनैकवाक्यत्वात् । *दा.१४६-१४८

यमः

पुत्रमहिमा । औरसादिद्वादशपुत्राणां द्व्यामुष्यायणत्वदायहरत्वपिण्डदत्वविचारः ।

पिता पितामहश्चैव तथैव प्रपितामहः ।
जातं पुत्रं प्रशंसन्ति पिप्पलं शकुना इव ॥
मधुमांसेन खण्डेन पयसा पायसेन वा ।
एष दास्यति नस्तृप्तिं वर्षासु च मघासु च×॥
पुत्रास्तु द्वादश प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ।
तेषां षड्बन्धुदायादाः षडदायादबान्धवाः ॥
स्वयमुत्पादितस्त्वेको द्वितीयः क्षेत्रजः स्मृतः ।
तृतीयः पुत्रिकापुत्र इति धर्मविदो विदुः ॥
पौनर्भवश्चतुर्थस्तु कानीनश्चैव पञ्चमः ।
गृहे च गूढ उत्पन्नः षडेते पिण्डदाः स्मृताः॥
अपविद्धः सहोढश्च दत्तः कृत्रिम एव च ।
पञ्चमः क्रीतकः पुत्रो यश्चोपनयते स्वयम् ।
इत्येते संकरोत्पन्नाः षडदायादबान्धवाः॥
कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासुतः ।

* विर. व्याख्यान 'पिण्डदोऽशहरश्चैषा' इति याज्ञवल्क्यवचने (पृ.१३३६) द्रष्टव्यम् । चन्द्र. विरवद्भावः ।

(१) **दा.**१४७; **व्यक** १५४ विद्यते (निष्ठति), **गौमि.** २८।३२ **श्च** (ऽप्य) विद्यते (गच्छति); **उ.**२।१४।२ व्यकवत्; **विर.**५५०**श्च** (चा) ष्ठव (ष्ठ); **स्मृसा.**६७ पू., **विचि.**२३१ सस्यै (साश्चै) तेषु... विद्यते (ज्यैष्ठ्य तेषां निवर्तते); **व्यनि.** (=)ज्यैष्ठ्य न विद्यते (ज्येष्ठ न तिष्ठति); **दात.**१६८ ष्ठव (ष्ठ), **चन्द्र.**९२ **श्च** (चा) तेषु...द्यते (ज्यैष्ठ्य तेषु निवर्तते); **व्यप्र** ४८५-४८६ **श्च** (चा); **विता.**३७६, **बाल.**२।१३२ (पृ.१७७) व्यकवत्; **सेतु.**८४; **समु.**१३८ व्यकवत्, बृहस्पतिः; **विच.**६१: ७५ सस्यै (साश्चै) षु (षां) ष्ठव (ष्ठ); **दच.**२२ उत्त.: ३१.

(२) **दा.**१४७; **व्यक.**१५४; **गौमि.**२८।३२ स्तमु (स्समु); **उ.**२।१४।२ हीना (शेषा); **विर.**५५०; **विचि.** २३१ स्ते तृतीयांश (स्तृतीयांशस्य); **व्यनि.**(=) सवर्णा (सर्वे च); **दात.**१६८ सभृ (सवृ); **चन्द्र.**९२ तेषां (येषां) स्ते तृतीयांश (स्तृतीयांशस्य) स्तमु (स्समु); **व्यप्र.**४८६, **व्यव.**१४९ (=) संभृताः (भाजनाः); **विता.**३७६; **बाल.** २।१३२ (पृ.१७७); **सेतु.**८४; **समु.**१३८ बृहस्पतिः, **विच.**६१ पू: ७५ सभृ (द्वहि); **दच.**३१.

* गौमि.दागतम् । दात. सवर्णपद दावत् ।

× दा.व्याख्यान शखलिखितवचनयोरुपरि (पृ.१२८२) द्रष्टव्यम् ।

(१) **दा** ६३ शखलिखितयमाः.

(२) **व्यक.**१५४ स्वैको (श्चैको) च गूढ (तु गूढ) स्मृताः (सुता.); **स्मृसा.**६७; **विचि.**२२९; **बाल.**२।१३५(पृ.२३४) च गूढ (तु गूढ); **दच** २९ पुत्र इति (पुत्रो जाति) नश्चैव पञ्चमः (नः पञ्चमः स्मृतः) पिण्डदाः स्मृताः (पिण्डदायिनः).

(३) **व्यक** १५४ क्रीतकः (पुत्रिका), **स्मृसा.**६७ एव च (एव वा) क्रीतकः (पुत्रिका); **विचि.**२३०, **बाल** २।१३५ (पृ.२३४) पन (पान) सकरोत्पन्नाः (मुनिभिः प्रोक्ताः); **दच.** २९ पञ्चमः क्रीतकः (क्रीतश्च पञ्चमः).

(४) **सवि.**४२५,४३०(=) पू.:४२६(=)ह्याद्ध (हानां तु) उत्तरार्धे (उभयोरथ सबन्धात्कुर्यात्स उभयोः क्रियाः); **बाल.**२।१२८.

उभयोरर्थसंबद्धः स कुर्यादुभयोरपि*॥

तथा चायमपि द्यामुष्यायणः। संविदशे तत्त्वं तु अरोगिणीं भ्रातृमतीमित्यत्रोक्तम्। बाल.२।१२८

पुत्रीकरणविधिः

[1]अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः।
पिण्डोदकक्रियाहेतोर्नामसंकीर्तनाय च॥

काण्डपृष्ठसज्ञाः पुत्राः

[2]आपद्दत्तो ह्युपगतो यश्च स्याद्वैष्णवीसुतः।
सर्वे ते मनुना प्रोक्ताः काण्डपृष्ठास्त्रयस्तथा॥
कुलं काण्डमिति ख्यातं यस्मात् पूर्वाणि ते जहुः।
तत्र ज्येष्ठतरो यः स्यात्तं वै काण्डं विनिर्दिशेत्॥
स्वकुलं पृष्ठतः कृत्वा यो वै परकुलं व्रजेत्।
तेन दुश्चरितेनासौ काण्डपृष्ठ इति स्मृतः॥

मरीचिः

गोत्रान्तरगताना दायाशौचज्ञातिविचारः

[3]गोत्रान्तरप्रविष्टानां दायमाशौचमेव च।
ज्ञातित्वं च निवर्त्तन्ते तत्कुले सर्वमिष्यते॥

दक्षः

अग्रजदाननिषेधः

[4]आपद्यपि च कष्टायां न दद्यादग्रजं सुतम्।
भर्तृहीना च पत्नी च दद्याच्चेन्नरकं व्रजेत्॥

शातातपः

दत्तपुत्रस्यौर्ध्वदेहिकाधिकारः

दत्तः पुत्रः पितुः कुर्याज्जनकस्य मृतेऽहनि।
गयायां च ततोऽन्यत्र न पुत्रान्तरसंनिधौ॥

पराशरः

कलौ चत्वारः पुत्राः

[5]औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः+।
दद्यान्माता पिता वाऽपि स पुत्रो दत्तको भवेत्॥

अत्रिः

पुत्रमहिमा पुत्रीकरणविधिश्च

[6]जातमात्रेण पुत्रेण पितॄणामनृणी पिता॥
[7]एकेष्ट्वा बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत्॥
[8]अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिः सदा।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात्प्रयत्नतः॥

(१) अपुत्रोऽजातपुत्रो मृतपुत्रो वा। 'अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च' इति शौनकीयात्। 'वन्ध्यो मृतप्रजो वापि' इति पाठान्तरम्। अपुत्रेण इति अपुत्रताया निमित्तताश्रवणात् पुत्राकरणे प्रत्यवायोऽवगम्यते। पुत्रोत्पादनविधेर्नित्यतया तल्लोपस्य प्रत्यवायनिमित्ततात्पर्यावसानात्। 'नापुत्रस्य लोकोऽस्ती'ति पुत्रसामान्याभाव एवालोकताश्रवणात्। 'जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यः, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः, एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी' इत्यत्रापि पुत्रसामान्यस्यानृण्यहेतुताश्रवणाच्च। अपुत्रेणैव इति एवकारेण पुत्रवतो नाधिकारो बोधितः। अनेन 'माता पिता वा दद्यातां यमद्विः पुत्रमापदि' इति आपत्यदमपि मानवीय व्याख्यातम्। व्याख्यातं च अपराकेणापि तथा 'आपदि प्रतिग्रहीतुरपुत्रत्वे' इति। यद्वा, 'आपदि दुर्भिक्षादौ, आपद्ग्रहणादनापदि न देयः, दातुरयं प्रतिषेधः' इति मिताक्षरा। तथा च कात्यायनः 'आपत्काले तु कर्तव्य दान विक्रय एव वा। अन्यथा न प्रकर्तव्यमिति शास्त्रविनिश्चयः॥' इति। मनुरपि—'अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः। पिण्डोदकक्रियाहेतोर्नामसंकीर्तनाय च॥ अपुत्रोऽनेन विधिना सुता कुर्वीत पुत्रिकाम्॥' इति। यत्तु विश्वामित्रादीना

* सवि.व्याख्यान 'अकृता वा कृता वापि' इति मनुवचने (पृ.१३००) द्रष्टव्यम्।

+ दर्मी.व्याख्यान 'अपुत्रेणैव कर्तव्यः' इत्यत्रिवचने द्रष्टव्यम्।

(१) बाल.२।१३५ (पृ.२१९) मनुयमव्यासाः.

(२) व्यप्र. ४८६-४८७. व्यवहारकल्पतरौ क्रमेण बृहस्पतिः, विवादरत्नाकरे तु हारीतः। (३) समु.१३९.

(४) समु.९५. (५) बाल.२।१३२ (पृ. १७७).

(६) पस्मृ.४।१९, दर्मी.२३ पू.; बाल.२।१३५ (पृ. २४०) पू.; समु.१३९ पू.

(१) बाल.२।१३५ (पृ. २१९).

(२) बाल.२।१३५ (पृ. २४०).

(३) दर्मी.३: ३६ पू, १४०; संप्र.२०५, बाल.२।१३१, २।१३५ (पृ.२१९); समु.९५ व्यः (व्य) तो (तु); कृभ.८७९ पू., बौधायन.; दच.२.

पुत्रवतामपि देवरातादिपुत्रपरिग्रहलिङ्गदर्शनं, तत् 'अपुत्रेणैव' इत्यादिश्रुतिविरोधात् श्वजाघनीभक्षणादिवत् न श्रुत्यनुमापकमिति ध्येयम्। न च स्मार्ता श्रुतिः श्रौतस्य लिङ्गस्य न बाधिका इति वाच्यम्। 'नापुत्रस्य लोकोऽस्ति' इत्यादिप्रत्यक्षश्रुत्युपष्टम्भेन तस्या एव बलवत्त्वात्। अथापि स्मार्तश्रुतितः श्रौतलिङ्गबलवत्त्व एव श्रीमतामाग्रहातिशयश्चेत्, तर्हि पुत्रानुज्ञया पुत्रवतोऽप्यस्तु पुत्रान्तरपरिग्रहाधिकारः। 'यन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयम्। पुरस्तात् सर्वे कुर्महे त्वामन्वञ्चो वयं स्म हि॥' इति श्रौतलिङ्गात्। न च इद ज्येष्ठीकरणे लिङ्गं न पुत्रीकरणे इति वाच्यम्। तस्य तदभावेनैवासिद्धेः, इत्यल पल्लवितेन।

अपुत्रेण इति पुत्रपद पौत्रप्रपौत्रयोरप्युपलक्षकम्। 'पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते। अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम्॥' इति पौत्रादिना विशिष्टलोकप्रतिपादनेन 'नापुत्रस्य लोकोऽस्ति' इत्याद्यलोकतापरिहारात्। न च पिण्डोदकदानार्थ तत्करणमिति वाच्यम्। 'पुत्रः पौत्रः प्रपौत्रश्च तद्वद्वा भ्रातृसततिः' इत्यनेन तयोरेव तदधिकारावगमात्। अपुत्रेण इति पुंस्त्वश्रवणात् न स्त्रिया अधिकार इति गम्यते। अत एव वसिष्ठः—'न स्त्री पुत्र दद्यात्प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुः' इति। दमी.३-७

अपुत्रेणेति एकत्वश्रवणाच्च न द्वाभ्या त्रिभिर्वा एकः पुत्रः कर्तव्य इति गम्यते। नन्वेव दत्तकादीना द्व्यामुष्यायणत्वस्मरण विरुध्येत। तथा च प्रयोगपारिजाते स्मृत्यन्तरम्—'द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः। गोत्रद्वयेऽप्यनुद्वाहः शौङ्कशैशिरयोर्यथा॥' इति। मैवम्। द्व्यामुष्यायणत्वस्य जनकपरिग्रहीतृद्वयाभिप्रायकत्वात्। निषेधश्च परिग्रहीतृद्वयमभिप्रेत्य इति न विरोधः। प्रतिनिधिश्च क्षेत्रजादिरेकादशविधः। 'क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान् मनीषिणः॥' इति मानवात्। तत्र च येषु दम्पत्योरन्यतरावयवसबन्धस्तेषा न्यायादेव प्रतिनिधित्वम्। वचनं तु नियमार्थं, येषु पुनरवयवसंबन्धाभावस्तेषां वाचनिकं प्रतिनिधित्वम्। यथा क्षेत्रजपौत्रिकेयपुत्रिकाकानीनपौनर्भवसहोढजगूढजाना

क्वचिन्मातृमात्रसबन्धात्, क्वचिच्च विकलोभयसबन्धाद्विकलावयवत्वेन मुख्य प्रतिनिधित्व, दत्तकक्रीतकृत्रिमदत्तात्मापविद्धाना वाचनिक प्रतिनिधित्व इति प्रतिनिधिशब्दश्च उभयत्रापि भूम्ना सृष्टीरुपदधातीतिवत्। यत्तु मेधातिथिना 'न ह्येषा प्रतिनिधिता संभवति, प्रारब्धस्य कर्मणोऽङ्गापचारे प्रतिनिधिः। न च पुत्रकर्माङ्गमपत्योत्पादनकर्मणोऽगुणकर्मत्वात्तेन सत्येव क्षेत्रजादीना पुत्रशब्दे प्रतिनिधित्ववचनमौरसप्रशंसार्थम्। उपकारापचयाभिप्रायत्वात् प्रतिनिधिव्यवहारस्य, यथा औरसो भूयासमुपकार कर्तु शक्नोति, न तथेतरः' इत्युक्त तच्चिन्त्यम्। दत्तकादीना प्रतिनिधित्वाभावे साध्ये पुत्रोत्पादनकर्मणोऽनङ्गत्वस्य हेतोरपक्षधर्मत्वात्, तेषा सिद्धत्वेनोत्पादनायोग्यत्वात्। अथ पुत्रोत्पादनविधौ पुत्रस्य भाव्यत्वेनानङ्गत्वम्। सत्यमनङ्गत्व, किन्तु उत्पादनविधावेव न तु विध्यन्तरे। 'एष वाऽनृणो यः पुत्री' इत्यादिवाक्येषु पुत्रेणानृण्य भावयेदिति विधिपर्यवसानेन पुत्रस्यानृण्यकरणतया अङ्गतासिद्धेः। उक्त च साक्षादेव मनुना पुत्रस्य करणत्व— 'पुत्रेण लोकान् जयति' इत्यादिना। यदि एव तर्हि पौत्रप्रपौत्रयोरपि आनन्त्यब्रध्नविष्टपप्राप्त्यर्थं पुत्रप्रतिनिधिः स्यात्, आस्ता नाम, किं नश्छिन्नम्। न च उभयैकवाक्यतया एकविधित्वमभवः। ऋणगमनपुत्रयोः करणयोः पुत्रानृण्ययोर्भाव्ययोश्चैकविधौ अनन्वयात्, अन्वये च विरुद्धत्रिकद्वयापत्तेः। तस्मादानृण्यभाव्यिकाया भावनाया पुत्रस्य करणतया तदपचारे दत्तकादीना प्रतिनिधित्वमविरुद्धं, सोमापचारे पूतिकानामिव। एतदेव स्पष्टीकृतं मनुना 'क्रियालोपान्मनीषिणः' इति। क्रिया पिण्डोदकादिक्रिया, औरसाभावे प्रतिनिध्यकरणे तल्लोपापत्तेः। तथा अत्रिणापि 'पिण्डोदकक्रियाहेतोः' इति सर्वमनवद्यम्। यदपि—'न स्वामित्वस्य भार्यायाः पुत्रस्य देशस्य कालस्याग्नेर्देवतायाः कर्मणः शब्दस्य च प्रतिनिधिः' इति सत्याषाढवचनेन पुत्रप्रतिनिधिनिराकरण तत् 'तन्तवे ज्योतिष्मतीं तामाशिषमाशासते' इत्यादौ अपुत्रस्य पुत्रप्रतिनिधिं कृत्वा, आशीराशसननिवृत्त्यर्थम्। अत एव श्रुतिः 'यस्य पुत्रोऽजातः स्यात् तन्तवे ज्योतिष्मतीमिति ब्रूयात्' इति। तथा पिता पुत्रीये सामनि अमुकस्य पिता यजते,

इत्यादावपुत्रस्य पुत्रप्रतिनिधि कृत्वा तत्प्रवचननिराकरणार्थं, न पुनः सर्वथैव पुत्रप्रतिनिधिनिराकरणार्थं, 'पुत्रप्रतिनिधिः कर्तव्यः' 'पुत्रप्रतिनिधीनाहुः' इत्यादिस्मृतिविरोधात् ।

अथेदं चिन्त्यते । योऽयं प्रतिनिधिर्विधीयते, स किं पुत्रोत्पादनविधौ उत पिण्डोदकादिविधौ इति । उभयथा श्रवणात् । यथा, 'अपुत्रेणैव कर्तव्यः' इत्यनेन पुत्रोत्पादनविधौ 'पिण्डोदकक्रियाहेतोः' इत्यनेन च पिण्डोदकादिविधौ इति । तत्र नाद्यः, पुत्रोत्पादनविधौ पुत्रस्य भाव्यत्वेन अनङ्गतया प्रतिनिध्ययोग्यत्वात् । न द्वितीयः, विरोधात् । अपुत्र प्रति पुत्रप्रतिनिधिः श्रूयते, न तत्कृता पिण्डोदककिया, पुत्रकर्तृका च पिण्डोदकादिक्रिया, न त प्रति प्रतिनिधिविधिरिति । किञ्च पिण्डोदकादिविधिः पुत्रकर्तृको न च कर्तुः प्रतिनिधिः । अथापि क्रियाकर्तृत्वाशे प्रतिनिधिः, न फलभोगाशे । यथा सत्रे सप्तदशानामन्यतमस्य मृतस्य क्रियाकर्तृत्वाशे प्रतिनिधिः तथात्रापीति वाच्यम् । तदपि न, वैषम्यात् । सत्रे ह्यारब्धक्रियस्य प्रतिनिधिः, प्रकृते तु अत्यन्ताऽसतः क्रियारम्भस्यैवासम्भवात् कथ प्रतिनिधिसम्भवः । न च प्रतिनिधिना क्रियारम्भो न्यायवित्समतः । अथापुत्रस्य जीवच्छ्राद्धे स्वकर्तृक एव पिण्डादिविधिरिति तत्रैव प्रतिनिधिरिति वाच्यम् । तदपि न । पुत्रप्रतिनिधिसम्भवे जीवच्छ्राद्धविधेरेव अप्रवृत्तेः । किञ्च, जीवच्छ्राद्धस्य स्वकर्तृकत्वेन स्वस्यैव प्रतिनिधिः स्यात् न पुत्रस्य, पुत्रकर्तृत्वाभावात् । तस्मान्नोक्तविधिद्वयेऽपि पुत्रप्रतिनिधिसम्भवः । किञ्च 'पिण्डोदककियाहेतोरि'ति हेतुवचनमप्ययुक्तमेव, अपक्षधर्मत्वात् । न हि अपुत्रस्य पिण्डोदककियाप्रातिरस्ति इत्युक्तमेव । अत्रोच्यते । 'नापुत्रस्य लोकोऽस्ति' इत्यादयर्थवादानुगृहीते 'पुत्रेण लोकान् जयति' इत्यादिविधौ पुत्रापचारे क्षेत्रजाद्येकादशविधः प्रतिनिधिर्विधीयते । तत्र च लोकपुत्रयोः साध्यसाधनभावनिर्वाहकावान्तरव्यापारभूतक्रियापेक्षाया पिण्डोदककियाहेतोरिति उच्यते सदा इति । 'वन्ध्याष्टमेऽधिवेत्तव्या' इत्यादिवदत्रापि अवधिप्रतीक्षाभावं बोधयति । पिण्डः श्राद्ध, उदकमञ्जलिदानादि, क्रियौर्ध्वदेहिकदाहादि, अत एव हेतुः पुत्रीकरणे निमित्तम् । हेतुरिति एकत्वनिर्देशात् मिलितानामेषां निमित्तत्वं न प्रत्येकमिति गमयति । तेन च एकैकार्थ न पृथक्पुत्रीकरणं, किन्तु सर्वार्थमेकमेव पुत्रीकरणमित्यर्थः, पुत्राभावे पिण्डादिलोपप्रसङ्गात् । अत एव मनुः— 'पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः' इति । क्रियालोपादिति व्यतिरेके हेतुः । पुत्रप्रतिनिध्यभावे क्रियालोपादित्यर्थः । यद्वा अलोपादिति पदच्छेदः । अलोपादिति ल्यब्लोपे पञ्चमी, अलोपार्थमित्यर्थः । यद्यपि 'पुत्राभावे तु पत्नी स्यात्' इत्यादिना पुत्राभावे पत्न्यादीनामपि क्रियाधिकारः श्रूयते, तथापि 'नापुत्रस्य लोकोऽस्ति' इत्यादिश्रवणात् पुत्रकृतक्रियाजन्या लोकाः न स्त्र्यादिकृतक्रियया जन्यन्त इत्यवश्यं वाच्यम् । अन्यथा पुत्रपत्न्यादीना तुल्यफलकक्रियाधिकारे तुल्यतया विकल्पापत्त्या अभावविधानानुपपत्तेः । तस्मात् पुत्रकृतक्रियाजन्यलोकविशेषसिद्धये पुत्रप्रतिनिधिरावश्यक इति । उक्तं च मेधातिथिना 'यदौरसस्य प्रथमकल्पिकत्ववचन तन्न व्यवहारोपयोगि, किन्तु उपकारातिशयाय । यथौरसो भूयासं शक्रोत्युपकारं कर्तु, न तथेतरः इति । उपकारापचयाभिप्रायश्च प्रतिनिधिव्यवहार' इति । यत्तु तेनैव 'क्रियालोपादित्यत्र क्रियते इति क्रिया, अपत्यमुत्पादयितव्यमिति विधिः, तस्य लोपो मा भूदिति नित्यो ह्यय विधिः, स यथाकथचिद् गृहस्थेन सपाद्यः, तत्र मुख्यः कल्प औरसः, तदसंपत्तौ एते कल्पा आश्रयितव्याः' इति व्याख्यात तच्चिन्त्यम् । किं पुत्रोत्पादनविधेर्दत्तकादिविधिः प्रतिनिधिरित्युच्यते, आहोस्विदौरसस्य दत्तकादिरिति । नाद्यः । 'न देवताभिशब्दक्रियमि'त्यस्मिन्नधिकरणे क्रियायाः प्रतिनिधिनिराकरणात् । न द्वितीयः 'न ह्येषा प्रतिनिधिता संभवति' इत्यादिपूर्वग्रन्थविरोधात् । तत्र पुत्रोत्पादनविधौ पुत्रस्य भाव्यत्वेन अनङ्गतया प्रतिनिध्यसंभवाभिधानात् । तस्मान्न क्रियाशब्देन पुत्रोत्पादनविधिः, किन्तु पिण्डोदककियैव वाच्या, 'पिण्डोदककियाहेतोः' इति अत्रिवाक्यैकवाक्यत्वात्, इत्यलम् ।

प्रयत्नत इति पञ्चम्यास्तसिल्, यस्मात्तस्मादिति सामानाधिकरण्यात् । ततश्च येन केनापि प्रयत्नेन पुत्रप्रतिनिधिः कार्य इत्यर्थः । तत्र च प्रयत्नसामान्यश्रुतावपि एकादशपुत्रश्रवणादेकादशैव प्रयत्ना अभ्यनुज्ञायन्ते ।

तत्रापि कलौ, 'अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः। न शक्यास्तेऽधुना कर्तुं शक्तिहीनतया नरैः॥' इति बृहस्पतिस्मरणात्, 'दत्तौरसेतरेषा तु पुत्रत्वेन परिग्रहः' इति च शौनकेन पुत्रान्तरनिषेधाद् दत्तौरसावेव अभ्यनुज्ञायेते। दत्तपदं कृत्रिमस्याप्युपलक्षणम्। 'औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः' इति कलिधर्मप्रस्तावे पराशरस्मरणात्। न चैव क्षेत्रजोऽपि पुत्रः कलौ स्यादिति वाच्यम्, तत्र नियोगनिषेधेनैव तन्निषेधात्। अस्तु तर्हि विहितप्रतिषिद्धत्वाद्विकल्प इति चेत् न, दोषाद्वयकापत्तेः। कथं तर्ह्यत्र क्षेत्रजग्रहणमिति चेत्, औरसविशेषणत्वेनेति ब्रूमः। तथा च मनुः 'स्वक्षेत्रे संस्कृताया तु स्वयमुत्पादयेद्धि यम्। तमौरसं विजानीयात्पुत्रं प्रथमकल्पिकम्॥' इति। दमी.११–२४

(२) एव च विधेयविशेषणमप्येकत्व पुत्रप्रतिनिधित्यत्राविवक्षितम्। 'श्रेयास न प्रबोधयेदि'त्यादौ तन्मर्यादाया उल्लङ्घितत्वाच्च। एतेन 'पुरोहित वृणीतेऽध्वर्यु वृणीत' इत्यादाविव पुत्रप्रतिग्रहविधावपि प्रतिगृहीतस्य पुत्रकार्ये उपादेयतया तद्गतपुस्त्वैकत्वयोर्विवक्षा तेनैक एव पुमानेव च ग्राह्यः' इति मतमपास्तम्।

बाल.२।१३५(पृ.२४०)

बृद्धयाज्ञवल्क्यः

सजातीयविजातीयदत्तकरिक्थहरत्वपिण्डदत्वविचार

सजातीयः सुतो ग्राह्यः पिण्डदाता स रिक्थभाक्।
तदभावे विजातीयो वंशमात्रकरः स्मृतः ।
ग्रासाच्छादनमात्रं तु स लभेत तदर्कथिनः॥

बृहद्यमः

पुत्रीकरणविधिः। नव पुत्रस्वार्हाः, तेषा दायहरत्वविचारः।

अपुत्रस्य च पुत्राः स्युः कर्तारः सांपरायणाः।
सफलं जायते सर्वमिति शातातपोऽब्रवीत्॥
न च दत्तोऽप्यहीनोऽतिस्नेहेन च तथापरः।
बलाद्गृहीतो बद्धश्च बन्धुभिर्दत्त एव च॥
भ्रातुः पुत्रो मित्रपुत्रः शिष्यश्चैव तथौरसः।
अपुत्रस्य च विज्ञेया दायादा नात्र संशयः।
नवैते पुत्रवत्पाल्याः परलोकप्रदा ह्यमी॥

औरसेन समा ज्ञेया वचसोदालकस्य च।
इदानीं भागनिर्णयमृषिः शातातपोऽब्रवीत्॥
ज्येष्ठेन वा कनिष्ठेन विभागस्य विनिर्णयः।
समभागप्रदाता च अपुत्रेभ्यो न संशयः॥

बृद्धहारीतः

सप्त पुत्राः। पिण्डदाः।

औरसो दत्तकश्चैव क्रीतः कृत्रिम एव च।
क्षेत्रजः कानिकश्चैव दौहित्रः सप्तमः स्मृतः।
पिण्डज(द)श्च परश्चैषां पूर्वाभावे परः परः॥
पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव च।
पुत्री च भ्रातरश्चैव पिण्डदाः स्युर्यथाक्रमात्॥

लघुहारीतः

पुत्रिका

पुत्रिका तु हरेद्वित्तमपुत्रा सर्वमर्हति॥

सुमन्तुः

पुत्रमहिमा

पुत्रश्चोत्पत्तिमात्रेण संस्कुर्यादृणमोचनात्।
पितरं नाब्दिकाच्चौलात्पैतृमेधेन कर्मणा॥

शाकलः

दत्तकपुत्रः कीदृशो ग्राह्यः

सपिण्डापत्यकं चैव सगोत्रजमथापि वा।
अपुत्रको द्विजो यस्मात्पुत्रत्वे परिकल्पयेत्॥
समानगोत्रजाभावे पालयेदन्यगोत्रजम्।
दौहित्रं भागिनेयं च मातृष्वसृसुतं विना॥
दौहित्रं भागिनेयं च शूद्राणां च पतिर्यदि॥

अत्र च पूर्वपूर्वस्य प्रत्यासत्त्यतिशयेन निर्देश इति।

संप्र.२०९

(१) दच.५-६. (२) बृयस्मृ.५।१६-२१.

(१) बृहास्मृ ७।२६५-२६६. (२) लहास्मृ.६४.

(३) बाल.२।१३५ (पृ.२१९)

(४) दमी.२७, ५३; संप्र.२०९, २१९; समु.९५ स्मात्पुत्रत्वे (त्नात्पुत्र सं); दच.५.

(५) दमी.२७ पू.: ५३; संप्र.२०९ पू.: २१९; समु. ९५ पू; कृभ.८८१ पूर्वार्धे (स्वगोत्रजसुतालाभे कारयेदन्यगोत्रजम्) पू.: ८८८ पूर्वार्धः (पृ.८८१)वत्, च (वा); दच.५.

(६) कृभ.८८८. इद वचनं शाकलस्यास्ति न वेति संदेहः,

जाबालिः

पुत्रिका दत्तकश्च

पुत्रिकायाः प्रदाने तु स्थालीपाकेन धर्मवित् ।
अग्निं प्रजापतिं चेष्ट्वा पुत्रदाने तथैव च ॥
पुत्रस्वीकारमात्रेण पितरं त्रायते सुतः ।
दत्तः पुत्रत्वमाप्नोति ग्रहीता मुच्यते ऋणात् ॥

पारस्करः

दत्तस्य द्व्यामुष्यायणत्वम्

दत्तोऽपि न त्यजेत्पित्र्यं धनं गोत्रं च सर्वदा ॥

पैठीनसिः

पुत्रमहिमा । द्व्यामुष्यायणाः ।

यत्र क्वचन जातेन पिता पुत्रेण नन्दति ।
तेन चाऋणतां याति पितॄणां पिण्डदेन वै ॥

अथ दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेण द्व्यार्षेयेण जातास्ते असंगतकुलीना द्व्यामुष्यायणा भवन्ति ।

कातीयलौगाक्षिसूत्रम्

द्व्यामुष्यायणाना दायहरत्वपिण्डदत्वविचारः

अथ ये दत्तक्रीतकृत्रिमपुत्राः परपरिग्रहेणानार्षेया जातास्ते द्व्यामुष्यायणा भवन्ति । यथैते शौङ्गशैशिराणाम् । यानि चान्यान्येवं समुत्पत्तीनि कुलानि भवन्ति तेषामेकमितरतो द्वावितरतो द्वौ वैकतस्त्रीनितरतः ।

अथ यद्येषां स्वासु भार्यासु अपत्यं न स्याद्रि-

(१) अप.२।१३१.

(२) समु.९५. (३) समु.१४०.

(४) विर.५८४ शखलिखितपैठीनसय.; बाल.२।१३५ (पृ २२०) ऋ (नृ) शंखलिखितपैठीनसयः.

(५) उ.२।१४।२; दमी ८२ द्व्यार्षेयेण (आर्षेण येऽत्र), दच.२१ दत्त (दत्तक) शेष दमीवत्.

(६) व्यम.५१ ये दत्तक्रीतकृत्रिम (चेद्दत्तकक्रीतपुत्रिका) (जाताः०) (यथैते शौं...नितरतः०) कात्यायनः, विता.३६९ चैभ्यस्त्रि (चैतत्रि) (अथ यद्यु पात्०) कातीयलौगाक्षिसूत्रे, सिन्धु.१३९५-१३९६ कृत्रिम+(पुत्रिका) यथैते (यथा) (तेषामे .. नितरतः०) दद्युः अथ (दद्यु.) भार्या+(एव) द्विश्य + (एक-पिण्डे) प्रति (परि), समु १४० नार्षेया (र्षेयेण) जातास्ते + (र्संगतगोत्रा) (यथैते शौ...नितरत.०) कात्यायनः.

कथं हरेयुः पिण्डं चैभ्यस्त्रिपुरुषं दद्युः अथ यद्युभयोर्न स्यादुभाभ्यां दद्युरेकस्मिन् श्राद्धे पृथगुद्दिश्य द्वावनुकीर्तयेत् । प्रतिग्रहीतारं चोत्पादयितारं चातृतीयात्पुरुषात् ।

(१) तत् द्व्यामुष्यायणपरम् । द्व्यामुष्यायणा भवन्तीत्युपक्रमात् । तेन द्व्यामुष्यायणो जनकस्य प्रतिग्रहीतुर्वा पुत्रान्तरासत्त्वे तस्मै पिण्ड दद्यात् रिक्थ च गृह्णीयात् । न तत्सत्त्वे । यदा तूभयोरप्यौरसाः पुत्राः सन्ति तदा कस्मा अपि न दद्यात् । प्रतिग्रहीत्रौरसाशस्य चतुर्थ भाग च हरेत् । व्यम.५१

(२) यत्तु आवयोरयमिति परिभाषया दत्तः स एव द्व्यामुष्यायणः न तु संविद विना दत्तोऽपीति मूर्खवचनं तत्पुत्रान्तरसत्त्वे संविद्वैयर्थ्यात् । असत्त्वे च 'न त्वेवैकं पुत्र दद्यादि'ति निषेधाच्च । परिभाषायोगान्मनुविरोधस्य च 'यद्येषा स्वासु भार्यास्वि'ति वचनेन निरासादुपेक्ष्यम् । गोत्रनिवृत्तिश्च 'व्यपैति ददतः स्वधे'ति विशेषोक्तेः श्राद्धे एव । न तु विवाह इति । 'स्वगोत्रे तु कृता ये स्युर्दत्तक्रीतादयः सुताः । गोत्रदा येऽप्यनुद्वाह्याः शौङ्गशैशिरयोर्यथा॥' इति वचनात् । अत एव शौङ्गशैशिरग्रहणस्य प्रदर्शनत्वात्सर्वत्र दत्तकादौ द्विगोत्रत्वमुक्त नारायणवृत्तिकृत्प्रवरमञ्जरीकाराद्यैः । क्षेत्रजे च श्रुता सविदृते योऽयते इति महान् बुद्धिगर्वः । विता.३६९

काण्णाजिनिः

द्व्यामुष्यायणाना दत्तकादीना पैतृककर्मस्वरूपम्

यावन्तः पितृवर्गाः स्युस्तावद्भिर्दत्तकादयः ।
प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह ॥
द्वाभ्यां सहाथ तत्पुत्राः पौत्रास्त्वेकेन तत्समम् ।
चतुर्थपुरुषे छन्दस्तस्मादेषा त्रिपौरुषी ॥
साधारणेषु कालेषु विशेषो नास्ति वर्गिणाम् ।
मृताहे त्वेकमुद्दिश्य कुर्युः श्राद्धं यथाविधि ॥

(१) दमी.९५; संप्र.५९३; व्यम.५२; विता.३७२ वर्गाः (वर्ग्याः) प्रेता (पिण्डा); सिन्धु.१३९६ वर्गाः (वर्ग्याः); दच.२५.

(२) दमी.९५ छन्द (छेद); संप्र.६९३ छन्दस्त (छेदं त); व्यम.५२ देषा (देषा); विता.३७२ त्रिषा (त्रिपू); सिन्धु. १३९६ वितावत्; दच. २५ सप्रवत्.

(३) व्यम.५२; विता.३७२ पू.; सिन्धु.१३९६ पू.

(१) अस्यार्थः । दत्तकादयः पुत्राः प्रेतानां प्रतिग्रहीत्रादीनां पितॄणां औरसत्वे शुद्धदत्तकत्वे द्व्यामुष्यायणत्वे वा यावन्तः पितृवर्गाः त्रयः षड्वा तत्राद्ये पितृपितामहप्रपितामहास्त्रयः, द्वितीये प्रतिग्रहीतृपितामहप्रपितामहास्त्रयः, तृतीये प्रतिग्रहीत्रादयस्त्रयः जनकादयश्च त्रय इति षट् तावद्भिस्त्रिभिस्त्रिभिः षड्भिर्वा सह प्रतिग्रहीत्रादीना योजन कुर्युः, प्रतिग्रहीतुः पितुर्ये यावन्तः पितृवर्गाः त्रयः षड्वा तेषा सर्वेषा स्वपुत्रकर्तृके दत्तकसपिण्डीकरणे देवतात्वबोधनाय स्वकीयत्वविशेषणोपादानम्। ततश्च प्रतिग्रहीतृपितॄणा मध्ये त्रयाणा षण्णा वा दत्तकसपिण्डीकरणे देवतात्वप्राप्तौ विशेषमाह द्वाभ्यामिति । त्रिषु पितृषु द्वाभ्या षट्सु चतुर्भिः। एव दत्तकपौत्राः स्वपितृसपिण्डीकरणं स्वपितामहप्रतिग्रहीतुः त्रयाणा पितॄणा मध्ये एकेन प्रतिग्रहीतुः पित्रा द्व्यामुष्यायणत्वे द्वाभ्या पितामहप्रपितामहाभ्या च सह कुर्युः । अमुमेव न्यायं दत्तकतत्पुत्रयोरप्यतिदिशति तत् समभिति । तत्सपिण्डीकरणं दत्तकतत्पुत्रयोरपि द्व्यामुष्यायणत्वे सम पितृवर्गद्वयेन कार्यम्। नन्वेवं दत्तकपौत्रेण स्वपितुः दत्तकपौत्रस्य सपिण्डीकरणे दत्तकपुत्रदत्तकतत्प्रतिग्रहीतृभिः त्रिभिः सह क्रियमाणे प्रतिग्रहीतृपितॄणा त्रयाणामन्यतमस्याप्यनुप्रवेशाभावेन सापिण्डय न स्यादित्यत आह चतुर्थपुरुषे छेद इति । यो यदा स्वपितुः सपिण्डीकरण करोति स तत्पित्रादिभिस्त्रिभिरेव कुर्यात् न चतुर्थेनेत्यर्थः । नन्वेव औरसस्यलेऽपि सपिण्डीकरणं त्रिभिरेव शास्त्रे सिद्ध तेनैव सिद्धौ वचनान्तरारम्भक्लेशः किमर्थ इत्यत आह तस्मादिति । दत्तकानामेषा पिण्डान्वयरूपा आशौचाविवाह्यत्वादिप्रयोजिका त्रिपुरुष्येव सपिण्डता न 'लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः । पिण्डदः सप्तमस्तेषा सापिण्डय सप्तपौरुषम् ॥' इति मात्स्याभिहिता सप्तपौरुषी तस्याः सामान्यरूपतया विशेषेणापवादात् । एतदेवाभिप्रेत्योक्त संग्रहकारेण—'दत्तकाना तु पुत्राणा सापिण्डय स्यात् त्रिपौरुषम्। जनकस्य कुले तद्वत् ग्रहीतुरिति धारणा ॥' इति। यदिदमुभयत्र त्रिपुरुषसापिण्डयाभिधान तत् द्व्यामुष्यायणाभिप्रायेण तस्य त्रिकद्वयेन सह सपिण्डीकरणाभिधानात्, शुद्धदत्तकस्य तु प्रतिग्रहीतृकुले त्रिपुरुषं पिण्डान्वयरूप सापिण्डय जनककुले सप्तपौरुषमवयवान्वयरूपमेवेति अलं प्रपञ्चेन । दमी.९५-९९

(२) तदपि कात्यायनीयसमानार्थमेव । अयमर्थः । द्व्यामुष्यायणदत्तकादयो जनकप्रतिग्रहीत्रोः कुले मृताना स्ववर्गैस्तत्पित्रादिभिः सह सपिण्डीकरणं कुर्युः । दत्तकादिपुत्रास्तु तेषा जनकप्रतिग्रहीतृभ्या सह कुर्युः । तत्पौत्रा अपि स्वपितर दत्तकेन पितामहेन तज्जनकेन प्रपितामहेन, चतुर्थे पुरुषे तत्पौत्रे छन्दः इच्छा । प्रतिग्रहीतारमुच्चारयेन्न वेति । जनक तूच्चारयेदेव । साधारणेष्वमावास्यादिकालेषु जनकप्रतिग्रहीतृवर्गिणा श्राद्ध कार्यम् । मृताहे त्वेकमेवोद्दिश्यैकोद्दिष्ट श्राद्ध कुर्यादिति । केचित्तु केवलदत्तकस्याविधानात्स नास्त्येव । 'आवयोरसौ' इति संविदश्च विधानाभावात्ता विना गृहीतोऽपि द्व्यामुष्यायण एव तेनैव च जनकप्रतिग्रहीत्रोरुद्देशेनामावास्यादिषु श्राद्धद्वयमेक वा श्राद्ध कार्यम् । तत्पुत्रेण तु दत्तकस्य तज्जनकप्रतिग्रहीतृभ्या द्वाभ्यामपि सह सपिण्डीपार्वणकरणश्राद्धादि कार्यम्। एव तत्पुत्रादिभिरपीत्याहुः । तच्चिन्त्यम् । यद्यपि केवलदत्तकः क्वापि शब्दतो नोक्तस्तथापि पूर्वोक्तमनुवचनेन जनकादीना संबन्धमात्रनिवृत्तेरुक्तत्वात् द्व्यामुष्यायणे तदभावादर्थात्सिध्यत्येव । किंच । 'ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात्' इति (गौध.४।३–५) गौतमीयेन बीजिकुले सप्तपुरुष यावद्विवाहो निषिद्धः स द्व्यामुष्यायणे व्यर्थः स्यात् । तस्मिन् सापिण्डयसत्वात् । अतोऽवश्यमेतत्सार्थक्यार्थं केवलदत्तको वाच्यः । तत्र सापिण्डयनिवृत्तेरुक्तत्वात्। अपि च प्रवराध्याये—'द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः। गोत्रद्वयेऽप्यनुद्वाहः शौङ्गशैशिरयोर्यथा ॥' इति । एतेन गोत्रद्वयमपि द्व्यामुष्यायणस्योक्तम् । मानवीयेन च जनकगोत्रनिवृत्तिरुक्तेति विरोधः केवलद्व्यामुष्यायणभेदेनैव परिहरणीयस्तेन सिध्यत्येव केवलोऽपि दत्तकः । अत एव शूरेण कुन्तिभोजाय दत्त्रिमत्वेन दत्तायाः कुन्त्याः सुतस्यार्जुनस्य शूरपुत्रत्वसुदेवदुहितुः सुभद्रायाः सापिण्ड्यनिवृत्तिं मनुवचनेनोक्त्वाऽस्य गौतमीयस्य बीजसतानजाया अपि निषेधमात्रपरत्वमेव चोक्त्वा अर्जुनेन सुभद्रा परिणेयेत्याशङ्क्य वार्तिकोक्तं सबन्धव्यवधानकल्पनास्थं समाधानमाह भट्टसोमेश्वरः । यत्तु कश्चित्सोमेश्वरेण गौतमवचना-

त्कुन्याः शूरकुलेऽपि साप्तपौरुषं सापिण्ड्यमुक्तमित्याह तद्ग्रन्थानध्ययननिबन्धनम्। तेन हि सापिण्ड्यनिवृत्तिं पूर्वमुक्त्वा गौतमीयस्य जनककुले निषेधपरत्वमुक्त न तु सापिण्ड्यबोधकत्वम्। एव सिद्धे केवले द्वयामुष्यायणे च 'आवयोरसौ' इति सविदपि सिध्यति। प्रतिग्रहीतुर्द्व्यामुष्यायणज्ञानार्थत्वेन दृष्टार्थत्वात्। अत्र च केवलदत्तकस्य पालकपितृकुले साप्तपौरुष मातृकुले च पाञ्चपौरुषं सापिण्ड्यम्। व्यम.५२-५३

(३) अस्यार्थमाह हेमाद्रिः—दत्तकादयः जनकपालकयोः कुले प्रेताना स्वस्ववर्गीयैः सपिण्डन कुर्युः। दत्तकाना पुत्रास्तु पितुर्दत्तकस्य पितृभ्या जनकपालकाभ्या स्वपितामहाभ्या सपिण्डन कुर्युः। तेषा पौत्राः स्वपितरं दत्तकेन पितामहेन तज्जनकेन च सपिण्डयेयुः। चतुर्थोऽपि तत्कुलस्थ एव। तेषा प्रपौत्रस्तु दत्तकस्य प्रपितामहस्य पालककुलस्थ चतुर्थ योजयेन्न वा। छन्द इच्छा। दर्शमहालयादौ तु द्वयोः पित्रोः पितामहयोः प्रपितामहयोर्वा श्राद्ध देयम्। तत्र द्वयोः पित्राद्योः पृथक् पिण्डदान द्वयोरुद्देशेनैको वेति। अत्र केचित् आवयोरयमिति परिभाष्य यो दत्तस्तस्येद द्वयोः पित्रोः श्राद्धम्। यस्त्वपरिभाष्य दत्तः स ग्रहीतुरेव सपालकायैव दद्यादित्याहुः। अत्र मूल त एव प्रष्टव्याः। वस्तुतस्तु जनकस्य पुत्रपत्न्याद्यभावे दत्तको द्वयोर्दद्यादन्यथा पालकायैव प्रागुक्तकात्यायनवचनात्। मानवीयमप्येतद्विषयमेव। गोत्र तु श्राद्धे पालकस्यैव विवाहादौ तूभयोरित्यादि मत्कृतप्रवरदर्पणे ज्ञेयम्।

सिन्धु.१३९७-१३९८

बृहन्मनुः

दत्तकीतादीनां सपिण्डत्वगोत्रवत्वादिविचारः

दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिण्डता।
पञ्चमी सप्तमी चैव गोत्रित्वं पालकस्य च*॥

(१) ननु मनु('गोत्ररिक्थ'इत्यादि)वचनाज्जनकगोत्रनिवृत्तावपि प्रतिग्रहीतृगोत्रप्राप्तौ किं मानमित्यत आह बृहन्मनुः — 'दत्तक्रीतादिपुत्राणा बीजवप्तुः सपिण्डता। पञ्चमी सप्तमी तद्वद्गोत्रं तत्पालकस्य च॥' इति। दत्तक्रीतादिपुत्राणा बीजवप्तुर्जनकस्य सपिण्डताऽस्त्येव, दानादिनापि सा न निवर्तते, तस्या अवयवान्वयरूपतया यावच्छरीरं दुरपनेयत्वात्। अनेन अवयवान्वय एव सापिण्ड्य, न पिण्डान्वय इत्युक्त भवति, पिण्डान्वयस्य 'व्यपैति ददतः स्वधा' इत्यपगमावगमात्। सा च सपिण्डता कियतीत्यपेक्षायामाह, 'पञ्चमी सप्तमी'ति। पञ्चाना पूरणी पञ्चमी पञ्चपुरुषव्याप्ता इत्यर्थः, एव सप्तमी। गौतमोऽपि 'ऊर्ध्व सप्तमात् पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात्' इति। अत्र बीजिग्रहण दत्तकाद्युत्पादकाना सर्वेषामपि संग्रहार्थ, न केवल क्षेत्रजोत्पादकस्यैव, 'य एतेऽभिहिताः पुत्राः प्रसङ्गादन्यबीजजाः। यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु॥' इति मनुस्मरणात्। तस्य ते पुत्रा इति पुत्रत्वप्रतिपादनं सापिण्ड्यप्रतिपादनार्थ न तु पुत्रत्वोत्पादनार्थ, 'पुत्रान् द्वादश यानाह' इत्यादिप्रतिगृहीतृपुत्रत्वप्रतिपादनविरोधात्, नेतरस्य प्रतिग्रहीतुरित्यर्थः। नन्वेव कन्यावदुभयत्रापि सापिण्ड्यमास्ता, प्रतिग्रहेण गोत्रवत्सापिण्ड्यस्याप्युत्पत्तेरिति चेत्, मैवम्। 'स्वगोत्रेषु कृता येस्युर्दत्तक्रीतादयः सुताः। विधिना गोत्रता यान्ति न सापिण्ड्यं विधीयते॥' इति बृद्धगौतमस्मरणविरोधात्। ये दत्तादयः सुताः सगोत्रेषु सगोत्रमध्ये कृतास्ते विधिना गोत्रता सततित्व यान्ति परन्तु तैः सह विधिना सापिण्ड्य न विधीयते, नोत्पद्यत इत्यर्थः। सगोत्रेष्वपि सापिण्ड्यानुत्पत्तौ परगोत्रे सुतरा सापिण्ड्यानुत्पत्तिरुक्ता। युक्त चैतत्। पित्रारब्धत्वेन भर्त्रा सहैकशरीरारम्भकत्वेन च यथोभयत्रापि सापिण्ड्य सिध्यति, न तथा दत्तके पित्रारब्धत्वेऽपि प्रतिग्रहीत्रा सहैकशरीरारम्भकत्वाभावात्। अत एव देवलः—'धर्मार्थं वर्धिताः पुत्रास्तत्तद्गोत्रेण पुत्रवत्। अंशपिण्डविभागित्व तेषु केवलमीरितम्॥' इति केवलशब्देन सापिण्ड्यमेव निरस्तवान् गोत्राशपिण्डानविधानात्। नन्वेतत्प्रकृतार्थानुपयोगि, धर्मपुत्रविषयत्वात्। तथाहि, तत्तद्गोत्रेण तस्य तस्यैव गोत्रेण ये पुत्रवत् धर्मार्थं वर्धितास्तेषु पुत्रेषु केवलमशपिण्डविभागित्व-

*दमी. व्याख्यान 'ब्राह्मणानां सपिण्डेषु' इति शौनकवचनेऽपि द्रष्टव्यम्।

(१) दमी.२६,८५ चैव (तद्वत्)त्रित्व (त्र तत्); व्यम. ५३; बाल.२।१३२ (पृ.१८०) पञ्चमी सप्तमी (सप्तमी पञ्चमी) त्रित्व (त्रं तत्).

मेव, न वर्धकसापिण्ड्यमित्यर्थः । तेनैतत्पुत्रस्यैव वर्धकसापिण्ड्याभाव बोधयति न दत्तकस्येति चेन्मैवं 'पुत्रान् द्वादश यानाह नृणा स्वायम्भुवो मनुरि'ति परिसंख्याविरोधेन धर्मपुत्रानभ्युपगमात् । अभ्युपगमेऽपि वा पत्न्यादिष्वगणनेनाशभागित्वासंभवादप्रसक्त्या सापिण्ड्यनिषेधासङ्गतेश्च । तस्माद्दत्तपुत्रविषयमेवैतत्, अंशभागित्वप्रदर्शनात् । तत्र चायमर्थः, धर्मार्थं स्वस्यालोकतापरिहारकधर्मसंपत्यर्थं तत्तद्गोत्रेण जनकापेक्षया भिन्नगोत्रेणापि परिग्रहीत्रा पुत्रवत् पुत्रप्रतिनिधितया परिगृह्य ये पुत्रा वर्धितास्तेषु केवलं परिग्रहीत्रंशपिण्डविभागित्वमेव न सापिण्ड्यमिति । तस्मादत्र दत्तके न परिग्रहीतृसापिण्ड्यं, किन्तु जनककुले एव सप्तपौरुषिकं सापिण्ड्यमिति सिद्धम् । ननु तच्छब्देन सनिधानाद् वीप्सापेक्षितश्रुतबहुत्वाना पुत्राणामेव परामर्शो गम्यते, न वर्धकानां पुत्रिणा, व्यवहितत्वात् सदिग्धबहुत्वाना वीप्सान्वययायोग्यत्वात्, आत्मनि परोक्षवन्निर्देशकतच्छब्दान्वयानुपपत्तेरपरोक्षनिर्देशकस्वशब्दस्यैवौचित्याच्च इति चेत्, मैव वादीः । 'सर्वनाम्ना बुद्धिस्थे शक्तिरि'ति न्यायेन, बुद्धिस्थितायाः प्राधान्यायत्तत्वात्, प्राधान्यस्य च सस्कार्यत्वेन फलान्वयेन वा सभवात् । 'पितुः पुत्रेण कर्तव्या पिण्डदानोदकक्रिया' इत्यादिवचनपर्यालोचनया पुत्रकर्तृकपिण्डदानादिक्रियया पितुः सस्कार्यत्वावगमात् । 'पुत्रेण लोकान् जयति' इत्यादिवचनबलात् पितुरेव पुत्रकरणकभावनाभाव्यलोकरूपफलयोगितया प्राधान्यात्तच्छब्देन परामर्शो युज्यते । यथा 'तमे पयसि दध्यानयति सा वैश्वदेव्यामिक्षे'त्यत्रामिक्षायाः सस्कृद्दधिपयोरूपत्वेन, साक्षाय्यविकारत्वे स्थिते पूर्वपक्षिणा सप्तमीनिर्दिष्टस्य पयसो गुणत्वेन, द्वितीयानिर्दिष्टस्य दध्नः प्रधानत्वात्तस्यैव तच्छब्देन परामृष्टस्य देवतासंबन्धात् सायदोहविकारत्वमित्युक्ते सिद्धान्तिना कर्मीभूतेनापि दध्ना पयसो व्याप्यमानत्वेन दध्ना पयः संस्कुर्यादिति वाक्यार्थस्य पर्यवसानत्वेन पयस एव प्रधानत्व तस्यैव तच्छब्देन परामृष्टस्य देवतासंबन्ध इति प्रातर्दोहविकारत्व साधित, तद्वत् प्रकृतेऽपि पितुः संस्कार्यत्वेन प्रधानत्वात् तच्छब्दादेव तस्यैव परामर्श इति युक्तम् ।

नन्वेवं दत्तकस्य प्रतिग्रहीतृकुले सापिण्ड्याभावे कथं विवाहो न स्यादिति चेत् सत्यं, सगोत्रत्वादिति ब्रूमः । तर्हि तद्भगिन्यादिसंततौ विवाहोऽस्तु सगोत्रत्वसपिण्डत्वयोरभावात्, न त्वाहत्य निषेधकं वचनमुपलभामहे, प्रत्युत 'सावित्रीं यस्य यो दद्यात् तत्कन्यां न विवाहयेत् । तद्गोत्रे तत्कुले वापि विवाहो नैव दोषकृत् ॥' इत्याद्यनुकूलमेव वचनमस्ति । न चेष्टापत्तिः । अविच्छिन्नाविगीतसकलदेशीयशिष्टाचारविरोधात् । तस्मात् किं तत्राविवाहनिमित्तामिति ? अत्र कैश्चिदुच्यते— 'असपिण्डा च या मातुरसगोत्रा च या पितुः । सा प्रशस्ता द्विजातीना दारकर्मणि मैथुने ॥' इत्यत्र मनुवाक्ये स्वस्यासपिण्डेऽपि वक्तव्ये यत्पितुरसपिण्डावचनं तद्दत्तकस्य प्रतिग्रहीतृसपिण्डाया विवाहो मा प्रसाङ्क्षीदित्येवमर्थं, अन्यथा पितृद्वारके सापिण्डये मूलपुरुषादष्टमस्य वरस्य, मातृद्वारके सापिण्डये मूलपुरुषात् षष्ठ्याः कन्याया विवाहो न स्यात्, पितुः सपिण्डत्वेनासपिण्डताभावात् । न चेष्टापत्तिः । 'पञ्चमात् सप्तमादूर्ध्वं मातृतः पितृतस्तथा' इत्यादिसकलस्मृतिनिबन्धशिष्टाचारविरोधात् । न चेद दूषण दत्तकेऽपि समानं अष्टमस्य तस्य षष्ठ्याः कन्यायाः पितुः सपिण्डत्वेनाविवाह्यत्वप्रसङ्गादिति वाच्यम् । 'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते' इति वक्ष्यमाणवाक्येन सप्तमस्य दत्तकपितुर्मूलपुरुषासपिण्डत्वेन षष्ठ्याः कन्यायास्तदसापिण्ड्येन षष्ठ्याः सप्तमस्य च पितुः सपिण्डत्वाभावादित्युक्तमेव । तस्माद्दत्तकसापिण्ड्यनिर्णायकमिदमेव वचनमिति काऽनुपपत्तिः ।

तदतिभ्रान्तप्रलपित विकल्पासहत्वात् । तथाहि— किमिद दत्तकस्यैव सापिण्ड्यनिर्णायक, उत दत्तकौरसयोरुभयोरिति ? नाद्यः । द्वेधा ह्यस्य वचनस्य दत्तकविषयता संभवेत् । दत्तकप्रक्रमाद्वा दत्तकसापिण्ड्यनिर्णायकविशेषवचनैकवाक्यत्वाद्वा । न चेह उभयमप्यस्ति अनुपलम्भात् । किं चास्य दत्तकपरत्वेऽत्रत्य पितृपद गौण्या प्रतिग्रहीतृपितृपरं स्यात् तच्चानिष्टं, 'न विधौ परः शब्दार्थः' इति न्यायविरोधात् । नाप्यन्त्यः, पितृपदे युगपद् वृत्तिद्वयनिषेधात् । न च गङ्गाया मीनघोषावित्यत्रेव वृत्त्यन्तरतात्पर्यग्राहकं प्रमाणमस्ति । तस्मादौरसविषयमेव इद वचन गर्भाधानादिप्रक्रमात्, 'पञ्चमात्सप्त-

मादूर्ध्वम्' इति वचनान्तरैकवाक्यत्वाच्च । न चास्यौरसपरत्वे कूटस्थादष्टमस्य वरस्य षष्ठ्याः कन्यायाश्चानुद्वाह्यत्वप्रसगः, पितुरसपिण्डत्वाभावादित्युक्तमेव दूषणमिति वाच्य, तस्य पितुरिति पञ्चम्या षष्ठीभ्रमनिबन्धनत्वेनादूषणत्वात् । अत एव योगीश्वरेण 'मातृतः पितृतस्तथा' इत्यत्र पञ्चमीत्वनिर्णायकस्तसिल्प्रयोगः आदत्तः तस्यापि सार्वविभक्तिकत्वशङ्कायां, 'ऊर्ध्वं सप्तमात् पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात्' इति गौतमवाक्ये पञ्चम्या निर्णय इति न किंचित्समाधानमिति समाधानान्तरं वक्तव्यम् । तदपरे आहुः । 'क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् । पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥' इत्यत्र वाक्ये क्षेत्रजादीना पुत्रप्रतिनिधित्वाभिधानात् 'प्रतिनिधिस्तद्धर्मा स्यात्' इति न्यायेन सकलौरसधर्मप्राप्त्या प्रतिग्रहीत्रादिपितृसापिण्डयवर्जनं सेत्स्यतीति, तन्न, 'न सापिण्डय विधीयत' इत्यनेन निषिद्धस्य सापिण्डयस्यातिदेशासभवेनाप्राप्त्या तद्वर्जनासभवात् । एतेन पुत्रनाम्ना औरसधर्मातिदेशात् प्रतिग्रहीत्रादिपितृसपिण्डावर्जनसिद्धिरित्यपास्तं, 'न तौ पशौ करोती'तिवन्निषिद्धस्य सापिण्डयस्यातिदेशासभवेन वर्जनासभवात् तस्मादनन्यगत्या वाचनिकमेव प्रतिग्रहीतृकुले सापिण्डयमभ्युपगन्तव्यमिति । तदुच्यते । द्विविधं हि सापिण्डयम् अवयवान्वयेन पिण्डान्वयेन चेति । तत्रावयवान्वयसापिण्डयस्य दत्तके प्रत्यक्षबाधितत्वेन हेमाद्रिः पिण्डान्वयमेवोपादाय दत्तकादीना प्रतिगृहीतृकुले त्रिपुरुषमेव सापिण्डय व्यवातिष्ठिपत् । तथा च कार्ष्णाजिनिः—'यावन्तः पितृवर्गाः स्युस्तावद्भिर्दत्तकादयः । प्रेताना योजन कुर्युः स्वकीयैः पितृभिः सह ॥ द्राभ्या सहाथ तत्पुत्राः पौत्रास्त्वेकेन तत्समम् । चतुर्थपुरुषे छेदस्तस्मादेषा त्रिपौरुषी ॥' इति । दमी.८५-९५

तद्वद्गोत्रमिति । तद्वत् सपिण्डतावत्, गोत्रमपि बीजवप्तुर्जनकस्य, न केवलं जनकस्य अपि तु तत्पालकस्य च, दत्तकादेर्यः पालकः तस्य च गोत्र दत्तकादीना भवतीति । अनेन सपिण्डतावैलक्षण्यं गोत्रेऽभिहितम् । यथा सपिण्डता जनकस्यैव न तथा गोत्रं, किन्तूभयोरपि तदिति । न चेदमपि दत्तकमात्रे किन्तु द्यामुष्यायणे दत्तकविशेषे । तथाहि द्विविधा दत्तकादयो नित्यवद्द्यामुष्यायणा अनित्यवद्द्यामुष्यायणाश्चेति । तत्र नित्यवद्द्यामुष्यायणा नाम ये जनकप्रतिग्रहीतृभ्यामावयोरयं पुत्र इति संप्रतिपन्नाः, अनित्यवद्द्यामुष्यायणास्तु ये चूडान्तैः संस्कारैर्जनकेन संस्कृताः उपनयनादिभिश्च प्रतिग्रहीत्रा, तेषा गोत्रद्वयेनापि संस्कृतत्वात्, द्यामुष्यायणत्व परन्त्वनित्यम् । जातमात्रस्यैव परिग्रहे गोत्रद्वये नसंस्काराभावात् तस्य प्रतिग्रहीतृगोत्रमेव । तदिद सर्वमभिप्रेत्याह सत्याषाढः 'नित्याना द्यामुष्यायणाना द्वयोः' इति सूत्रेण नित्यद्यामुष्यायणाना गोत्रद्वये प्रवरसबन्धमुक्त्वा तमेवानित्येष्वप्यतिदिशति 'दत्तकादीना तु द्यामुष्यायणवदि'ति सूत्रेण । व्याख्यात चैतत् शबरस्वामिभिः । द्यामुष्यायणप्रसगेनानित्यानाह—दत्तक इति । तावदेव नोत्तरसततौ,प्रथमेनैव सस्काराः, परिग्रहीत्रा चेत् तदा उत्तरस्य, पूर्वत्वात्तेनैव उत्तरत्र । तथा पितृव्येण भ्रातृव्येण चैकार्षेण ये जातास्ते परिग्रहीतुरेवेति । अस्य भाष्यस्यायमर्थः । यो गोत्रद्वयेन संस्कृतस्तस्यैव गोत्रद्वयसंबन्धः, नोत्तरसंततेः । जनकगोत्रसबन्धे कि कारणमित्यत आह—प्रथमेनेति । प्रथमो जनकस्तेनैव सस्कृतत्वात्, सस्काराश्च चौलान्ताः । 'पितुर्गोत्रेण यः पुत्रः सस्कृतः पृथिवीपते । आचूडान्त न पुत्रः स पुत्रता याति चान्यतः ॥' इति कालिकापुराणात् । व्याख्यात चैतत्प्रागेवान्यस्यासाधारणी पुत्रता न याति, किन्तु द्यामुष्यायणो भवतीति । प्रथमेनासंस्कारे कथमित्यत आह—परिग्रहीत्रा चेदिति । परिग्रहीत्रैव जातकर्मादिसर्वसंस्कारकरणे चौलादिसंस्कारकरणेऽपि वा, उत्तरस्य परिग्रहीतुरेव गोत्रम् । तत्र हेतुः पूर्वत्वात् सस्कारकरणे प्रथमत्वात् । द्यामुष्यायणसततौ दत्तकसततौ चापेक्षित गोत्रमाह—तेनैवेति । परिग्रहीतृगोत्रेणैवोत्तरसततेर्गोत्रमुभयत्रापि । सगोत्रपरिग्रहमाह—तथेति । जनकपरिग्रहीत्रोरेकगोत्रत्वेऽपि परिग्रहीत्रैव व्यपदेशः,परिग्रहसंस्कारकरणादिति । यत्तु 'गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः' इति तत्परिग्रहीत्रैव जातकर्मादिसर्वसस्कारकरणपक्षे वेदितव्यम् । ये तु नित्यवद्द्यामुष्यायणा दत्तकादयस्तेषा गोत्रद्वय 'द्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः । गोत्रद्वयेऽप्यनुद्वाह्याः शौङ्गशैशिरयोर्यथा ॥' इति पारिजातस्मरणात् । गोत्रद्वये जनकगोत्रे परिग्रहीतृगोत्रे च दत्तकादीना च द्यामुष्यायणत्वे इदं वचनं 'नित्याना

ह्यामुष्यायणानामि'ति सत्यापाढवचनं च प्रमाणम्। प्रवरमञ्जर्यामपि अनेनैवाभिप्रायेणोक्त, 'दत्तकक्रीतकृत्रिमपुत्रिकापुत्रादीनां यथासंभव गोत्रद्वय सप्रवरमस्तीत्येतावता द्विगोत्राणा गोत्रद्वय सप्रवरं विवाहे वर्ज्यमिति।

शाखाऽपि प्रतिग्रहितुरेव इत्याह वसिष्ठः 'अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः। स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभाक् ॥' इति। स्वस्य प्रतिग्रहीतुः शाखा यस्मिन् कर्मणि तत् स्वशाखं कर्म, तद्भजतीति स्वशाखभाक् इति प्रतिग्रहितृशाखीयमेव कर्म तेन कर्तव्यमित्यर्थः। दत्तकादीना मातामहा अपि प्रतिग्रहीत्री या माता तत्पितर एव, पितृन्यायस्य मातामहेष्वपि समानत्वात्। यत्तु मातामहश्राद्धविधेर्मुख्यमातामहविषयत्वमेव, इति हेमाद्र्यभिहितं, तन्न 'व्यपैति ददतः स्वधा'इति वचनविरोधात्। न च मातामहाना दातृत्वाभावः, 'बन्धूनाहूय' इत्यनेन दानसमतिकरणेन तेषामपि दातृत्वात्। किं च श्राद्धे 'गोत्ररिक्थानुगः पिण्डो व्यपैति' इत्यनेन गोत्ररिक्थमोर्निमित्तताप्रतिपादनाद्दत्तकस्य च पितृरिक्थस्येव मातामहरिक्थस्याप्यपेतत्वात् न पूर्वमातामहश्राद्धाधिकार इति युक्तम्। अत एवास्वरसात् गौणमातामहादीनामपि गौणपितृवत् श्राद्ध कर्तव्यमिति हेमाद्रिरेव पक्षान्तरमुपन्यस्तवान्। युक्तं चैतदेव, दत्तकस्यौरसप्रतिनिधितया औरसकार्यकर्तृत्वेन औरसकर्तृकश्राद्धदेवतोद्देश्यकश्राद्धकर्तृत्वमेव सिद्धयति, प्रतिगृहीतृपितृगोत्रशाखाकुलदेवताकुलधर्मान्वयवत्, प्रतिग्रहीतृपित्राद्यन्वयाविशेषात्। 'वाञ्छन्ति पितरः पुत्रान्' 'गया यास्यति यः पुत्रः' इत्यादौ पुत्रपदाविशेषात्। किं च प्रतिग्रहीच्या मातुः आसुरादिविवाहोढात्वे 'पिता पितामहे योज्या सपूर्णे वत्सरे सुतैः। माता मातामहे योज्या इत्याह भगवान् यमः ॥' इत्यादिविहितसपिण्डीकरणे पालकमातृपितुरेव मातामहत्वेन अन्यत्रापि श्राद्धे तद्देवतात्वौचित्यात्। तथा दत्तकादीनां परिवेत्रादिदोषोऽपि न, 'भिन्नोदरे च दत्ते च पितृव्यतनये तथा। दाराग्निहोत्रसंयोगे न दोषः परिवेदने ॥' इति गौतमस्मरणात्। भिन्नोदर इति। सापत्न्यभ्रात्रोरन्यतरस्य विवाहादौ न परिवेत्रादिदोष इत्येतदर्थम्। दत्ते चेति। जनककुले ज्येष्ठभ्रातृसत्त्वेऽपि न दत्तस्य विवाहादौ परिवेत्तृत्वं नापि कनिष्ठविवाहादौ ज्येष्ठस्य परिवित्तित्वमित्येतदर्थम्। पितृव्यतनय इति। देवरेणोत्पादितस्य भ्रातुः क्षेत्रजपुत्रस्य विवाहादौ, देवरपुत्रस्य न परिवित्तिपरिवेतृत्वादिदोषो, देवरपुत्रविवाहादौ वा क्षेत्रजस्य इत्येतदर्थम्। न यथाश्रुतपितृव्यपुत्राभिप्रायं, परिगृहीतस्य दत्तपदेनैवोपादानादपरिगृहीतस्य च प्रसक्त्यभावेन निषेधाप्रवृत्त्या प्रतिप्रसवासंभवात्। न चैतस्मादेव ज्ञापकादपरिगृहीतस्यापि भ्रातृपुत्रस्य पुत्रत्वमिति शङ्कनीयं, दशाना भ्रातृणा मध्ये पञ्चानामपुत्रत्वे, पञ्चाना च प्रत्येक दशपुत्रत्वे, भ्रातृणा प्रत्येक पञ्चाशत्पुत्रतापत्तेः, पञ्चाशता च भ्रातृपुत्राणा प्रत्येक दशपितृकतापत्तेश्च इत्यायुक्तदूषणगणग्रासात्, तस्मात्यथाव्याख्यातमेव साधु।

एव प्रतिग्रहीतृकुलश्राद्धीयद्रव्यं दत्तकाय प्रतिग्रहीतृजनककुलश्राद्धीयद्रव्य च द्यामुष्यायणाय न दातव्य 'सपिण्डाय सगोत्राय श्राद्धीयं नैव दापयेत्। न भोजयेत् पितृश्राद्धे समानप्रवरं तथा ॥' इति हेमाद्रिपारिजातधृतवचनात्। श्राद्धीय श्राद्धे दत्तद्रव्यम्।

दमी.९९–१०४

(२)अत्र च केवलदत्तकस्य पालकपितृकुले सातपौरुष मातृकुले च पाञ्चपौरुष सापिण्डयम्। यत्तु बृद्धगौतमः 'स्वगोत्रेण कृता ये स्युर्दत्तक्रीतादयः सुताः। .विधिना गोत्रमायान्ति न सापिण्डय विधीयते ॥' यच्च बृहन्मनुः 'दत्तक्रीतादि' इत्यादि। यदपि नारदः—'धर्मार्थं वर्धिताः पुत्रास्तत्तद्गोत्रेण पुत्रवत्। अशपिण्डविभागित्व तेषु केवलमिष्यते ॥' इति, तान्यनाकराणि। साकरत्वेऽपि द्व्यामुष्यायणस्य प्रतिग्रहीतृकुले सातपौरुषसापिण्ड्याभावप्रदर्शनार्थम्। केवलदत्तके पूर्वोक्तगौतमीयेन पालककुले सातपौरुषसापिण्डयस्योक्तत्वात्। मानवीयेन च जनककुले सापिण्डयनिवृत्तेरुक्तत्वात्। यस्तु सापिण्डयनिर्णये केषाचिन्मान्याना लेखः—जनकगोत्रेणोपनयनादिसरकृतस्य तु जनककुले पितृतो मातृतश्च पाञ्चपौरुषं सातपौरुषं च सापिण्डयम्। प्रतिग्रहीतुः कुले तु त्रिपुरुषं प्रतिग्रहीतरि मुख्यपितृत्वप्रयोजकस्योत्पादकस्योपनेतृत्वस्य चाभावात् प्रतिग्रहीतृगोत्रेण संस्कृतस्य तु प्रतिग्रहीत्रादिभिरेव सातपौरुष पाञ्चपौरुषं चेति, तस्य मूलं न विद्मः। किं च। यदि प्रतिग्रहीतर्युत्पादकत्वोपनेतृत्वाद्यभावान्न पितृत्व कथं तर्हि त्रिपुरुषं

सापिण्ड्यं प्रतिग्रहीत्रादिश्राद्धादिकर्तृत्वं वा दत्तकस्य ? न च पितृत्व व्याप्यं सापिण्ड्यं समनियत येन तदभावात्सापिण्ड्याभावः स्यात् । वस्तुतस्तु 'ऊर्ध्वं सप्तमात्पितृबन्धुभ्य' इति गौतमादिवचनैः प्रतिग्रहीत्रादिभिः सह सापिण्ड्य पूर्वमुक्तमेवेति दिक् । व्यम.५३

परिग्रहविधिरहितस्यानधिकारः

अविधाय विधानं यः परिगृह्णाति पुत्रकम् ।
विवाहविधिभागं तं न कुर्याद्धनभाजनम्× ॥

परिग्रहविधिं विना परिगृहीतस्य विवाहमात्रं कार्यं न धनदानं, किन्तु तत्र पत्न्यादय एव धनभाजः पिण्डदाश्च । विधि विना तस्य पुत्रत्वानुत्पादात् ।

बाल.२।१३५ (पृ.२३७)

बृहत्पराशरः

भ्रातॄणां एकपत्नीनां एकस्य एकस्या वा पुत्रेण पुत्रवत्वम्

अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत् ।
स एव तस्य कुर्वीत श्राद्धपिण्डोदकक्रियाम्* ॥
बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः ।
एका चेत्पुत्रिणी तासां सर्वासां पिण्डदस्तु सः ॥

अपुत्रस्य पितृव्यस्य भ्रातृजस्तत्पुत्रो भवेदित्यन्वयः । अपुत्रपितृव्यत्वावच्छिन्नस्य भ्रातुः सुतः तस्यापि पितृव्यत्वावच्छिन्नस्यापि पुत्रो भवेदित्यर्थः । तदेकवाक्यत्वात् । 'सर्वं वाक्यमि'ति न्यायेन व्याख्याने तूक्तविरोधः शास्त्रान्तरविरोधश्च स्पष्ट एव । भ्रातृज एकोऽपि । अत एव तदेकवाक्यता । अपुत्रस्येत्यनेन पुत्रसत्वे न तथेति सूचितम् । अत एव पूर्वं तथा व्याख्यातम् । तद्व्याख्यानानुरोधेन पितृपत्न्यः सर्वा मातरः स्मृता इतिवत् प्रागुक्तरूपं पुत्रकार्यकारित्वं विधीयते । तेन तदेकवाक्यता इष्टसिद्धिर्दोषाभावश्चेति सिद्धम् । नन्वेवमप्युत्तरार्धस्य का गतिरिति चेत्, अत्रोच्यते । पूर्वार्धेन केषाञ्चित् पुत्रकार्याणा सिद्ध्या तदर्थं तत्परिग्रह प्रतिपाद्य प्रसंगाद्विषयविशेषे पिण्डादिरूपकार्यसिद्धिरपि अत एवेत्याह । स एवेति । बुद्धिस्थो विलक्षणभ्रातृपुत्र एवेत्यर्थः । तस्य, तस्यापि पितृव्यत्वावच्छिन्नस्यापि । कुर्वीतेत्यनेन स्वफलार्थं तस्यावश्यकत्वेन तस्य स्वधर्मत्व सूचितम् । श्राद्धमेकोद्दिष्टादि । पिण्डपदेन दशसु दिनेषु दीयमानाः । उदकमक्षलिदानादि । क्रियापदेनाग्निसंस्कारादि । यद्वा क्रियापदेन कर्मधारयः । अत एव 'क्रियालोपादि'त्येव मनुनोक्तम् । तथा चोत्तरार्धं प्रागुक्तक्रमेणौरसादिभ्रात्रन्तराभावविषयम् । एवेन गोत्रजादिव्यवच्छेदः । यद्वा भ्रातुः सुताना बहूना सत्वेऽपुत्रपितृव्येण कनिष्ठस्य तस्यैव दत्तकत्वेन पुत्रीकरणे तद्विषयम् । एवेन पत्न्यादिव्यवच्छेदः । यद्वा अविभक्तभ्रातृसुतविषयम् । यद्वा विभक्तसंसृष्टभ्रातृसुतविषयम् । अत्र पक्षद्वये यथा पत्नीसत्वेऽपि दायहरत्वं भ्रातुस्तथा पत्न्यादिसत्त्वे भ्रात्रभावे तस्य धनहारित्वम् । भ्रातृसत्त्वे तस्य धनहारित्वेऽपि पिण्डदानादौ तस्यैवाधिकारो नाशहरणप्रयुक्तोऽन्यस्य । तत्र भ्रातृसत्वे जीवत्पितृकनिषेधबाधकमिदं, विशेषविहितत्वात् । अत्र पक्षे यथा तस्य भ्रातृसुतश्राद्धे इत्यादिना न विरोधस्तथोक्तं प्राक् । यद्वा । इदं तादृशगतपितृकविषयकमेवास्तु । सर्वथा पत्न्यादिः एव व्यवच्छेद्यः ।

वस्तुतस्तु द्वादशविधपुत्राभावे पत्न्यादिसत्त्वे तेषां यथाक्रममुक्तरीत्या दायहरत्वेऽपि श्राद्धादिकमपि वंशाविच्छित्त्यादिवत् भ्रातृसुतेनैव कार्यमिति तदर्थमपि दत्तकपरिग्रहो नेत्यनेन प्रतिपाद्यते इति न पूर्वतो वैरूप्यम् । न च 'यश्चार्थहरः स पिण्डदायी' इति विष्णुस्मृतिविरोधः । तद्बाधनार्थमेवास्य प्रवृत्तेः । तथा च तत्र 'पुत्रः पितृवित्ताभावेऽपि' इत्यत्र पुत्रपदेनैकादशप्रतिनिधिवदेतस्यापि ग्रहणेनोक्तनियमस्य तदन्यविषयत्ववदेतदन्यविषयत्वमपीति न तद्विरोधः । तत्र पितृवित्ताभावेऽपीत्यस्य तस्य निर्धनत्वेन तदसत्त्वेऽपीतिवदुक्तक्रमेण स्वस्याधिकारेऽपि तत्सन्वेऽनधिकारेण तदप्राप्तावपीत्यर्थः ।

बाल.२।१३५(पृ.२२९)

× व्याख्यानान्तरं स्थलादिनिर्देशश्च अस्मिन्नेव वृद्धगौतमवचने द्रष्टव्यः ।

*दमी.व्याख्यानं 'ब्राह्मणानां सपिण्डेषु' इति शौनकवचने द्रष्टव्यम् ।

(१) **दमी.**३६; **संप्र.**२१३; **बाल.**२।१३५ (पृ.२२९) द्व (द्वं); **समु.**९५ याम् (याः); **कृभ.**८७९ समुक्तवत्; **दच.७.**

(२) **बाल.**२।१३५ (पृ.२२९).

शौनकः

पुत्रसंग्रहप्रयोगविधिः । तत्प्रसगात् टीकाया पुत्रग्रहणे सापिण्डयदौहित्रभागिनेयत्वादेर्विचारः ।

शौनकोऽहं प्रवक्ष्यामि पुत्रसंग्रहमुत्तमम् ।
अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च ।
वन्ध्या वा मृतपुत्रा वा पुत्रार्थं समुपोष्य च ॥

(१) सग्रहं संग्रहणविधि, उपोष्य सग्रहदिनात् पूर्वेद्युः । दमी.७१

(२) 'न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा, न स्त्री पुत्र दद्यात् प्रतिगृह्णीयाद्वा, अन्यत्रानुज्ञानाद्भर्तुः' इति । इदं च भर्तृसत्त्वे । अन्यथा—'दद्यान्माता पिता वा यं स पुत्रो दत्त्रिमः स्मृतः' इति वत्सव्यास-वचोविरोधः स्यात् । दानं प्रतिग्रहोपलक्षणम् । यत्तु समन्त्रकहोमस्य पुत्रप्रतिग्रहाङ्गत्वात् व्याहृत्यादिमन्त्र-पाठे च स्त्रीशूद्रयोरनधिकारात् तयोर्दत्तकः पुत्रो न भवत्येवेति शुद्धिविवेके रुद्रधरेणोक्तम् । वाचस्पतिश्चैव-मेवाह । तन्न । भर्तुरनुज्ञया स्त्रिया अपि प्रतिग्रहोक्तेः । यद्यपि मेधातिथिना भार्यात्ववददृष्टरूप दत्तकत्व होम-साध्यमुक्तम् । स्त्रियाश्च होमासंभवस्तथापि व्रतादि-वद्विप्रद्वारा होमादि कारयेदिति हरिनाथादयः । सबन्ध-तत्त्वेऽप्येवम् । एव शूद्रस्यापि । 'स्त्रीशूद्राश्च सधर्माणः' इति स्मृतेः । अत एव शूद्रकर्तृकहोमो विप्रद्वारैव पराशरेणोक्तः । 'दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहु-याद्धविः । ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत्॥' अत्र माधवाचार्यः—'यो विप्रः शूद्रदक्षिणामादाय तदीयं हविः शान्तिपुष्टयादिसिद्धये वैदिकैर्मन्त्रैर्जुहोति तस्य विप्रस्यैव दोषः शूद्रस्तु होमफलं लभेतैव' इति व्याच-चक्षे । सिन्धु.८६७–८७२

(३) इदं च सधवाविधवोभयसाधारणमिति स्पष्ट-मेव । बाल.२।१३०

वाससी कुण्डले दत्त्वा उष्णीषं चाङ्गुलीयकम् ।
आचार्यं धर्मसंयुक्तं वैष्णवं वेदपारगम् ।
मधुपर्केण संपूज्य राजानं च द्विजान् शुचीन् ॥

(१) राजाऽत्र ग्रामवासी । 'बन्धूनाहूय सर्वास्तु ग्राम-स्वामिनमेव चे'ति बृहद्गौतमस्मरणात् । यदपि तत्रैवाग्रे 'मधुपर्कं ततो दद्यात् पृथिवीशाय शासिने' इति पृथिवीश-पद तदपि ग्रामस्वामिपरमेव तस्योपक्रमस्थत्वेन बलव-त्त्वात् । द्विजान् त्रीन् याचनार्थतया मधुपर्कादिना सपू ज्येत्यर्थः । दमी.७२

(२) राजाऽत्र ग्रामस्वामी सनिहितत्वात् । संप्र.२२९

बर्हिः कुशमयं चैव पालाशं चेध्ममेव च ।
एतानाहृत्य बन्धूंश्च ज्ञातीनाहूय यत्नतः ॥

'बन्धून्' आत्मपितृमातृबन्धून् । 'ज्ञातीन्' सपि-ण्डान् । बान्धवाद्याह्वान दृष्टार्थं राजाह्वानवत् । बध्नन्ति स्नेहेनेति बन्धवः । जानन्त्यात्मीयतया परिगृहीतं नरमिति ज्ञातय इत्यर्थः शब्दद्वयसामर्थ्यात् । दमी.७२

बन्धूनन्नेन संभोज्य ब्राह्मणांश्च विशेषतः ।
अग्न्याधानादिकं तन्त्रं कृत्वाऽऽज्योत्पवनान्त-कम् ॥

बन्धूनाहूतान् ब्राह्मणान् पूर्ववृतान्, चकारादाहूतान् ज्ञातींश्च संभोज्येत्यर्थः । दमी.७३

दातुः समक्षं गत्वा तु पुत्रं देहीति याचयेत् ।
दाने समर्थो दातास्मै ये यज्ञेनेति पञ्चभिः ॥

याचनं कारयेत् पूर्ववृतैर्ब्राह्मणैरित्यर्थः । दानसामर्थ्यं बहुपुत्रत्वं पत्न्यनुमतिश्चेत्यादि पञ्चभिर्दर्शादितिशेषः, 'प्रतिगृह्णीत मानवं सुमेधसः' (ऋसं.१०।६२।१) इति मन्त्रलिङ्गात् । दमी.७३

---

(१) **दमी.३** द्वितीयार्धम्, 'बन्ध्यो मृतप्रजो वाऽपी'ति पाठान्तरम् : ७१ प्रथमार्धद्वयम् ; **संप्र.**२०६ द्वितीयार्धम् : २२९ प्रथमार्धम्; **व्यम.**४८ प्रथमार्धद्वयम्; **सिन्धु.**८६२ द्वितीयार्धम्; **बाल.**२।१३० तृतीयार्धम्: २।१३५ (पृ.२३७,२३८) तृती-यार्धम्; **कृभ.**८७५ (=) अपुत्रो...वा (अपुत्रा मृतपुत्रा वा) द्वितीयार्धम्; **दच.**२ द्वितीयार्धम्: १० प्रथमार्धद्वयम्.

(२) **दमी.७२**; **संप्र.**२२९ पाला (पला); **व्यम.**४८ यत्नतः (सत्तमः); **दच.**११.

(३) **दमी.७२**पू.,७३ तन्त्रं (तत्र) उक्त.; **संप्र.२२९**; **व्यम.** ४८ अग्न्या (अन्वा) कं तन्त्रं (यत्तन्त्रं) नान्त (नादि); **सिन्धु.** ८६३ अग्न्या (अन्वा) कं तन्त्रं (यत्तन्त्रं); **दच.११** दमीवत्.

(४) **दमी.३६** पू.: ७३ ये (यो); **संप्र.**२०६ पू.: २२९; **व्यम.**४८; **सिन्धु.**८६३; **दच.११** ये (यो).

'देवस्य त्वेति मन्त्रेण हस्ताभ्यां परिगृह्य च ।
अङ्गादङ्गेत्यृचं जप्त्वा आघ्राय शिशुमूर्धनि+ ॥
वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम् ।
नृत्यगीतैश्च वाद्यैश्च स्वस्तिशब्दैश्च संयुतम्*॥

(१) पुत्रच्छाया पुत्रसादृश्य, तच्च नियोगादिना स्वयमुत्पादनयोग्यत्वम् । यथा भ्रातृसपिण्डसगोत्रादिपुत्रस्य । न चासबन्धिनि नियोगासभवः । 'बीजार्थं ब्राह्मणः कश्चिद्धनेनोपनिमन्त्र्यताम्' इति स्मरणेन निमन्त्रणसभवात् । ततश्च भ्रातृपितृव्यमातुलदौहित्र भागिनेयादीना निरासः पुत्रसादृश्याभावात् । एतदेवाभिप्रेत्योक्तमग्रे तेनैव --'दौहित्रो भागिनेयश्च शूद्राणा विहितः सुतः । ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित् ॥' इति । अत्रापि भागिनेयपद पुत्रासदृशाना सर्वेषामुपलक्षण, विरुद्धसबन्धस्य समानत्वात् । विरुद्धसबन्धश्च नियोगादिना स्वयमुत्पादनायोग्यत्वम् । यथा विरुद्धसबन्धो विवाहगृह्यपरिशिष्टे च वर्जितः । 'दम्पत्योर्मिथः पितृमातृसाम्ये विवाहो विरुद्धसबन्धो, यथा भार्यास्वसुर्दुहिता पितृव्यपत्नीस्वसा चे'ति । अस्यार्थः—यत्र दम्पत्योर्वधूवरयोः पितृमातृसाम्य, वध्वा वरः पितृस्थानीयो भवति, वरस्य वा वधूर्मातृस्थानीया भवति, तादृशो विवाहो विरुद्धसबन्धः । तत्र यथाक्रममुदाहरणद्वयम् । 'भार्यास्वसुर्दुहिता' श्यालिकापुत्री, 'पितृव्यपत्नीस्वसा' पितृव्यपत्न्याः भगिनी चेति । तथा प्रकृते विरुद्धसंबन्धपुत्रो वर्जनीय इति, यतो रतियोगः सभवति तादृशः कार्य इति यावत् । ×दमी.७३–७५

(२) छायावहं सदृशम् । 'दौहित्रो भागिनेयश्चे'ति यथाभूतभाव्युपयोगित्वेन, दण्डस्य 'मैत्रावरुणाय दण्ड प्रयच्छती'त्यत्र सभवत्यपि भाव्यत्वे चतुर्थ्या 'दण्डी प्रैषानन्वाहे'ति प्रैषानुवचनकर्तृत्वेन भाव्युपयोगिनो मैत्रावरुणस्यैव भाव्यत्वमुक्तम् । तथेहाप्यनपाकृतर्णत्वेन चतुर्थ्यर्थपक्षया शूद्रस्यैव दौहित्रभागिनेयावपि प्रति शेषितया भाव्यत्वम् । अतस्तयोरेव विधेयत्वेन दौहित्रभागिनेयावेव शूद्रस्येति नियमविधिविषयताऽप्युक्ता । शूद्रस्य त्वविधेयत्वेन तद्विषयत्वायोगात्तौ शूद्रस्यैवेति वचनव्यक्तौ विप्रादिशेष्यन्तरपरिसंख्यापत्तेः । तस्माद्दौहित्रभागिनेयावेव शूद्रस्य मुख्यौ । तदभावे त्वन्योऽपि सजातीयः । 'शूद्राणा शूद्रजातिषु' इति तेनैवोक्तेः । न चेद जातिपद दौहित्रभागिनेययोरेवोपसंहियते । यथा 'पुरोडाशं चतुर्धा करोति' इद सामान्यवाक्य 'आग्नेय चतुर्धा करोति' इद प्रधानवाक्य, अग्निदेवताकत्वात् । अत एतस्य चतुर्धाकरणे पुरोडाशमिति सामान्यवाक्यस्योपसंहारो जायते, तथेति । दौहित्रत्वभागिनेयत्वयोः सजातीयत्वस्य च परस्परव्यभिचारित्वात् एकस्मृतौ सामान्यवाक्यवैयर्थ्यापत्तेश्च । विवृत चैतद्द्वैतनिर्णये तात्चरणैः । व्यम.४८-४९

गृहमध्ये तमादाय चरुं हुत्वा विधानतः ।
यस्त्वा हृदेत्यृचा चैव तुभ्यमग्र ऋचैकया ॥
'सोमो दददित्येताभिः प्रत्यृचं पञ्चभिस्तथा ।
स्विष्टकृदादिहोमं च कृत्वा शेषं समापयेत् ॥

एव सप्तभिर्मन्त्रैः सप्त चर्वाहुतीर्हुत्वेत्यर्थः । दमी.७५

दक्षिणां गुरवे दद्यात् यथाशक्ति द्विजोत्तमः ।
नृपो राज्यार्धमेवापि वैश्यो वित्तशतत्रयम् ।
शूद्रः सर्वस्वमेवापि अशक्तश्चेद्यथाबलम् ॥

'राज्यार्ध' अर्धराज्योत्पन्नमेकवर्षीय द्रव्यं, 'प्रदद्यादर्धराज्योत्थमेकवर्षाहृत धनमि'ति वृद्धगौतमस्मरणात् ।

+ दमी.व्याख्यान 'अपुत्रेणैव कर्तव्य.' इत्यत्रिवचने (पृ.१३५२) द्रष्टव्यम् ।

* बाल. व्याख्यान 'जातोऽपि दास्या शूद्रेण' इति याज्ञवल्क्यवचने (पृ.१३३८) द्रष्टव्यम् । × संप्र. दमीवत् ।

(१) **दमी.**१०,७३; **संप्र.**२३०; **व्यम** ४८ परि (प्रति) आघ्रा (चाघ्रा); **सिन्धु.**८६४; **कृभ.**८७४ आघ्राय (आजिघ्रेत्) 'प्रगृह्य' इत्यपि पाठान्तरम्; **दच.**११.

(२) **दमी.**७३ पू., ७५ उत्त.; **संप्र.**२३०; **व्यम.**४८; **कृभ.**८८३; **दच.**११.

(१) **दमी.**७५ दाय (धाय) चा चैव (चैनैव) य ऋ (ग्रेत्यृ); **संप्र.**२३० दाय (धाय); **व्यम.**४८; **सिन्धु.**८६४; **दच.** ११ हुत्वा (कृत्वा) य ऋ (ग्रेत्यृ).

(२) **दमी.**७५ पू.; **संप्र.**२३० पू.; **व्यम.**४८; **सिन्धु.** ८६४; **दच.**११ पू.

(३) **दमी.**७५ वापि (वाथ) प्रथमार्धद्वयम्, वृद्धगौतमः, ७६ तृतीयार्धम्, वृद्धगौतमः, **सप्र.**२४० वृद्धगौतमः; **व्यम.** ४८ दद्यात् (दत्वा) राज्या (राष्ट्रा); **कृभ.**८८५ राज्या (राष्ट्रा); **दच.**१२ वापि (वाथ).

इदं च महाराजाभिप्रायेण। वित्तानां नाणकानां शतत्रयम्। तच्च सौवर्णराजतताम्राणामुत्तममध्यमाधमकल्पनया ज्ञेयं, 'शतत्रयं नाणकानां सौवर्णमथ राजतम्। प्रदद्यात् ताम्रमथवा उत्तमादिव्यवस्थया ॥' इति बृद्धगौतमस्मरणात्। 'शूद्रः सर्वस्वमेवापि अशक्तश्चेद्यथाबलम्।' सर्वस्वमेकवर्षीयभृतिलब्धं द्रव्यम्। एकवर्षाहृतमिति स्मरणस्याविरोधात् 'सर्वस्व चान्वये सती'ति निषेधाच्च। दमी.७५-७६

पुत्रग्रहणे सापिण्ड्यगोत्रजातिदौहित्रभागिनेयत्वादिविचारः

*ब्राह्मणानां सपिण्डेषु कर्तव्यः पुत्रसंग्रहः।
तदभावेऽसपिण्डे वा अन्यत्र तु न कारयेत् ॥
क्षत्रियाणां स्वजातौ वा गुरुगोत्रसमेऽपि वा।
वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु ॥
सर्वेषां चैव वर्णानां जातिष्वेष न चान्यतः ॥
यदि स्यादन्यजातीयो गृहीतो वा सुतः क्वचित्।
अंशभाजं न तं कुर्याच्छौनकस्य मतं हि तत् ॥
दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः।
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित् ॥

सपिण्डेषु सप्तमपुरुषावधिकेषु, सपिण्डेषु इति सामान्यश्रवणात् समानासमानगोत्रेष्विति गम्यते। तत्र समानगोत्रतायाम्। 'स्वगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः। विधिना गोत्रता यान्ति न सापिण्ड्य विधीयते ॥' इति बृद्धगौतमीय वचन प्रमाणम्। गोत्रता संततित्वम्। 'दत्ताद्या अपि तनया निजगोत्रेण संस्कृताः। आयान्ति पुत्रता सम्यगन्यबीजसमुद्भवाः ॥' इति कालिकापुराणात्। 'संततिर्गोत्रजननकुलान्यभिजनान्वयाविं'ति त्रिकाण्डीस्मरणाच्च। न तु गोत्रतापदेन गोत्रसबन्धो विधीयते सगोत्रेष्वेव पुत्रीकरणेन तस्य साहजिकतया विधानायोगात्। 'न सापिण्ड्य विधीयते' इति असपिण्डस्य पुत्रीकरणे सापिण्ड्यं च प्रतिग्रहीतुः पाञ्चपौरुषं सप्तपौरुषं च निषिध्यते, असमानगोत्रस्य पुत्रीकरणे 'गोत्ररिक्थे जनयितुर्न भजेद् दत्त्रिमः सुतः' इति मानवम्। 'दत्तक्रीतादिपुत्राणा बीजवप्तुः सपिण्डता। पञ्चमी सप्तमी तद्वद् गोत्र तत्पालकस्य च ॥' इति बृहन्मानव वचः प्रमाणम्। सोऽय मुख्यः कल्पः। तदसभवेऽनुकल्पमाह—'तदभावेऽसपिण्डेषु' इति। तेषा सपिण्डानामभावेऽसपिण्डोऽपि पुत्रीकार्यः। असपिण्डाः सप्तमपुरुषबहिर्भूताः असबन्धिनश्च। तेऽपि द्विविधाः समानगोत्राः असमानगोत्राश्चेति। तत्रापि पूर्वोदाहृतमेव वचन प्रमाणम्। तदय निर्गलितोऽर्थः। समानगोत्रः सपिण्डो मुख्यः, तदभावेऽसमानगोत्रः सपिण्डः। यद्यपि असमानगोत्रः सपिण्डः, समानगोत्रोऽसपिण्डश्च इत्युभौ अपि तुल्यकक्षौ एकैकविशेषणराहित्यादुभयोः, तथापि गोत्रप्रवर्तकपुरुषात् सापिण्ड्यप्रवर्तकपुरुषस्य सनिहितत्वेन अभ्यर्हितत्वम्। तेन च असमानगोत्रोऽपि सपिण्ड एव ग्राह्यः मातामहकुलीनः सर्वथा सपिण्डाभावेऽसपिण्डः तत्रापि सोदकः आचतुर्दशात्। समानगोत्रः प्रत्यासन्नः, तस्याभावेऽसमानोदकः सगोत्र

* बाल. व्याख्यान 'जातोऽपि दास्या शूद्रेण' इति याज्ञवल्क्यवचने (पृ.१३३८) द्रष्टव्यम्।

(१) **दमी.**२४, **संप्र.**२०८ पिण्डे वा (पिण्डो वा), **व्यम.** ४८ सप्रवत्, **सिन्धु.**८६५ सप्रवत्, **बाल.**२।१३५ (पृ.२३९) पिण्डे वा (पिण्डेषु), **समु.**९५; **कृभ.**८८५ सप्रवत्, **दच** ४.

(२) **दमी** ४३ स्वजातौ वा (सजातौ वै); **संप्र.**२१५, **व्यम.**४८ समे (समो), **बाल.**२।१३४ (ब्राह्मणाना सपिण्डेषु शूद्राणां शूद्रजातिषु) इति पाठो लिखितः, **समु.**९५ व्यमवत्; **कृभ.**८७० स्वजातौ वा (क्षत्रजातौ) पर्वार्धः ८८५ समे (समो) जातेषु (जातौ वा); **दच.**६ स्वजातौ वा (सजातौ च).

(३) **दमी.**२८ षा चैव (षामपि): ४३ न चा (च ना); **संप्र.**२१० दमी.(पृ.२८)वत्: २१५, **व्यम.**४८ जाति (ज्ञाति) न चा (च ना); **बाल.**२।१३४ जाति (ज्ञाति); **समु.** ९५; **कृभ.**८८५; **दच.**६ षा चैव (षामेव).

(४) **दमी.**२९ बृद्धगौतमः. ४३ वा (ऽपि); **सप्र.**२१० **बृद्धगौतमः;** **समु.**९६ वा (वै) बृद्धगौतम.; **कृभ.**८७१ वा सुतः क्वचित् (ऽपि च नन्दनः) तं...कस्य (कुर्वीत मन्वादीनां); **दच.**५, ४० वा (ऽपि).

(५) **दमी.**३१ उत्त., बृद्धगौतमः : ४३:५१ नेयश्च (नेयो वा) द्रैस्तु क्रियते (द्राणां विहितः) पू. **संप्र.**२१५; **व्यम.**४०, ४८ शूद्रै. तः (शूद्रस्यापि च दीयते) पू.; **बाल.**२।१३४ पर्वार्धे (दौहित्र भागिनेय वा शूद्राणा चापि दीयते) पू. . २।१३५ (पृ.२२६) **उत्त., बृद्धगौतमः** : (पृ.२३९) शूद्रैस्तु क्रियते सुतः (शूद्राणा वाऽपि दाप्यते); **समु.**९५ बृद्धगौतमः; **कृभ.**८८५, ८८७ शूद्रै...तः (शूद्रस्यापि च दीयते) पू: ८८७ शूद्रैस्तु क्रियते (शूद्राणां विहितः): ८८८ बृद्धगौतमः; **दच.**६.

एकविंशात्। तस्याप्यभावेऽसमानगोत्रोऽसपिण्डश्चेति। तदाह शाकलः 'सपिण्डापत्यकं चैव सगोत्रजमथापि वा। अपुत्रको द्विजो यस्मात्पुत्रत्वे परिकल्पयेत्॥ समानगोत्रजाभावे पालयेदन्यगोत्रजम्॥' इति। सगोत्र इत्यनेन सोदकसगोत्रौ गृह्येते। अत्र च पूर्वपूर्वस्य प्रत्यासत्त्यतिशयेन निर्देश इति। तदेवाह वसिष्ठोऽपि—'अदूरबान्धवं बन्धुसंनिकृष्टमेव प्रतिगृह्णीयात्' इति।

अत एव बृद्धगौतमः—'यदि स्यादन्यजातीयो गृहीतो वा सुतः क्वचित्। अंशभाज न त कुर्याच्छौनकस्य मत हि तत्॥' इति असमानजातीयस्य अंशभाक्त्व निषेधति, तस्मादसमानजातीयो न पुत्रीकार्यः इति सिद्धम्। अत एव मनुः—'सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः' इति। सदृशं सजातीयम्। 'सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः' इति योगीश्वरस्मरणात्। यत्तु मनुनैव— 'क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्। स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा॥' इत्युक्त तत्र गुणैः सदृशोऽसदृशो वेति व्याख्येयं न जात्येति। यत्तु 'सदृश न जातितः किन्तर्हि कुलानुरूपैर्गुणैः, तेन क्षत्रियादिरपि ब्राह्मणस्य पुत्रो युज्यते' इति मेधातिथिना व्याख्यात, यच्च 'शूद्रोऽपि किल पुत्रो भवतीत्यभिप्रायः' इति कल्पतरुव्याख्यान, तदुभयमपि 'सजातीयेष्वय प्रोक्तस्तनयेषु मया विधिः' इत्युदाहृतयोगीश्वरवचनविरोधात् 'जातिष्वेव न चान्यतः' इति शौनकवचनविरोधाच्च उपेक्ष्यम्। यत्तु मनुना 'स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः' इत्यत्र शौद्रस्य पुत्रप्रतिनिधित्वेन परिगणन कृत तच्छूद्रेण दास्यामुत्पादितस्य अनूढोत्पन्नस्य मुख्यपुत्रत्वाभावात् पुत्रप्रतिनिधित्वमभिप्रेत्य इति व्याख्येयम्। 'जातोऽपि दास्या शूद्रेण कामतोऽशहरो भवेत्। मृते पितरि कुर्युस्त भ्रातरस्त्वर्धभागिनम्। अभ्रातृको हरेत्सर्व दुहितृणा सुताहते॥' इति योगीश्वरस्मरणात्। तस्मात् सदृश दातुः प्रतिग्रहीतुश्च सवर्णमित्यपरार्कव्याख्यैव अत्र साधीयसी। याज्ञवल्क्योऽपि 'सजातीयेष्वय प्रोक्तस्तनयेषु मया विधिः' इति। सनिहितसगोत्रसपिण्डेषु च भ्रातृपुत्र एव पुत्रीकार्य इति। अभ्युपगत चैतद्विज्ञानेश्वराचार्यैरपि 'भ्रातृपुत्र एव पुत्रीकार्यः' इति। अत्र सोदरभ्रातृपुत्र एव पुत्रीकार्यः इत्याह मनुः—'भ्रातृणामेकजातानामेकश्चेत् पुत्रवान् भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥' इति। अत्र भ्रातृणा प्रतिग्रहीतृत्वप्रतिपादनात् ग्राह्यत्वाभावोऽवगम्यते। एकजातानामित्यनेन एकेन पित्रा एकस्यां मातरि जातानामेव ग्रहीतृत्वं न भिन्नोदराणा भिन्नपितृकाणां वा इति गम्यते। भ्रातृणामिति पुस्त्वनिर्देशात् पदद्वयोपादानसामर्थ्याच्च सोदराणा भ्रातृभगिनीनामपि परस्परपुत्रग्रहीतृत्वाभावोऽवगम्यते। तदाह बृद्धगौतमः— 'ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्' इति भागिनेयपदं भ्रातृपुत्रस्याप्युपलक्षणम्। तेन भगिन्या भ्रातृपुत्रो न ग्राह्य इत्यर्थः सिध्यति, भ्रातृणामेव ग्रहीतृत्वप्रतिपादनात्। यद्यपि 'भ्रातृपुत्रौ स्वसृदुहितृभ्यामि'त्यनेन एकशेषोऽवगम्यते ततश्च भ्रातृभगिनीपुत्रयोः भ्रातृभगिनीभ्या परस्परं पुत्रीकरणमवगम्यते, तथापि एकजातानामिति भ्रातृविशेषणेन एक जात जातिर्येषा ते एकजाताः, 'जातिर्जातं तु सामान्यम्' इति कोशात् तेषा समानजातीयत्वप्रतिपादनात् भ्रातृणा पुसा भ्रातृपुत्रस्य भगिनीना च स्त्रीणा भगिनीपुत्रस्य पुत्रीकरण सिध्यति। न भ्रातृपुत्रस्य भगिन्या भगिनीपुत्रस्य भ्रात्रा वा पुत्रीकरणं सभवति स्त्रीपुस्त्वजातिभेदात्। ननु सकृदुच्चरितस्य एकजातानामित्येकस्य पदस्य सोदरत्व समानजातीयत्व च इत्यर्थद्वय न सभवति 'सकृदुच्चरितः शब्दः सकृदेवार्थ गमयति' इति न्यायविरोधात् इति चेत्, न। 'असंसृष्टयपि चादद्यात् संसृष्टो नान्यमातृजः' इत्यत्र संसृष्टपदस्य सोदरपरत्वेन संसृष्टपरत्वेन च विज्ञानेश्वराचार्यैर्व्याख्यातत्वादिहापि तथैव इति न दोष इत्यलम्।

बहुवचन द्वित्वस्याप्युपलक्षणं, बहुषु द्वयोः संभवात्। यदि हि द्विपिता स्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षयेत् इति द्विपितृकत्वसंभवाच्च। एक एकोऽपि चेत् इत्यनेन द्वयोर्बहूना वा पुत्रवत्त्वे सुतरा सुकरं पुत्रग्रहणमन्येषामपुत्राणा गमयति, न एकीयैकपुत्रग्रहणं व्यावर्त्तयति एकपदोपादानसामर्थ्यात्, तेन इत्येकत्वनिर्देशाच्च। पुत्रः पुत्रौ पुत्रा वा विद्यन्ते यस्य इति मतुप्। तेन चैकस्यापि पुत्रस्य दानाभ्यनुज्ञाने 'न त्वेवैकं पुत्र दद्यात्' इति निषेधस्यानवकाशः। 'स हि संतानाय पूर्वेषाम्' इति हेतुवचनप्रतिपादितपित्रादिपूर्वसंतानस्य

पितृद्वयसाधारण्येनापि पुत्रेण निर्वाहात् उक्तनिषेधस्य भ्रातृतिरिक्तविषयतासिद्धेः। किं च दानस्य स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनरूपत्वात् तस्य चानेन निषेधात्, प्रकृते चैकस्योभयसाधारणीकरणेन स्वत्वनिवृत्त्यभावात् कन्यादान इव दानपदार्थस्य गौणत्वात् पुत्रपदस्य औरसे मुख्यत्वात् औरसत्वमेव पुत्राणा सिद्ध्यति। तेन च भ्रातृकृतपुत्रप्रतिनिधीना परिग्रहणाभावोऽवगम्यते । 'भवेद्' इत्यनेन पुत्रवत्तायाः सत्ताप्रतिपादनात् भूतपुत्रत्व भविष्यत्पुत्रत्व च व्यावर्तयति । तेन चातीतेन भ्रातृपुत्रेणान्यस्य भ्रातुर्न 'पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखमि'त्यादि फलसंबन्धः, न च अनागतपुत्रप्रतीक्षाया पुत्रान्तरपरिग्रह इति । 'तत्' शब्देन अपुत्राणामेव भ्रातृणा परामर्शाजनकस्य स्वपुत्रसंबन्धाभावव्यावर्तनाय सर्व इति। 'ते' इत्यत्र स च, तौ च, ते च इत्येकशेषादेकस्य द्वयोर्बहूनां वा पुत्रेच्छया तत्पुत्रीकरणं भवति । 'तेन' इति येन जनकस्य पुत्रत्व तेनैव सर्वेषामपीति । पुत्रेण इति एकत्वनिर्देशादेकस्याप्यनेकपुत्रत्वाभिधानेन 'न त्वेवैकं पुत्र दद्यात् प्रतिगृह्णीयाद्वा' इत्येतन्निषेधस्यात्रानवकाश इत्युक्तमेव ।

तथा च कालिकापुराणे वेतालभैरवयोः शकरात्मजयोरेकेन पुत्रेणोभयोः पुत्रवत्त्व लिङ्ग दृश्यते । ऋषय ऊचुः 'अपुत्रस्य गतिर्नास्ती'त्यादि । ननु इदमेकस्यानेकपुत्रत्व किं युगपदुत्पत्स्यतेऽथवा क्रमेण ? नाद्यः, युगपत्प्रतिगृह्णीयुरिति विध्यभावात्। नापरः, पूर्वसस्कारविरुद्ध तत्सजातीयसस्कारान्तरानुपपत्तेः इति चेत् । न । 'सप्तदशावराश्चतुर्विंशतिपरमाः सत्रमासीरन्' इतिवत्, तत्सर्वशब्दयोर्द्वन्द्वैकशेषेण प्रतिग्रहीतृभ्रातृसाहित्यस्यात्र विवक्षितत्वात्। तेन दानमपि सहितेभ्य एव सिध्यति, यथा तुलापुरुषे सहितानामेव ऋत्विजा सप्रदानत्व प्रतिग्रहीतृत्व चेति । तदाहुः 'इत्यावाह्य सुरान् दद्याद्दत्विग्भ्यो हेमभूषणम् ।' इत्यत्र ऋत्विग्भ्य इति बहुवचनान्मिलितानामेव संप्रदानत्वम्। तेन च 'सर्वेषामुपरि गुरुहस्तं कृत्वा तदधः-क्रमेण ऋग्वेद्यादीनामृत्विजा हस्तानाधाय भूषणानि देयानि' इति वाचस्पतिमिश्राः। न च युगपदनेकपुत्रत्वानुपपत्तिरपि युगपत्प्रतिग्रहेण द्रौपदीभार्यात्ववदस्य विलक्षणस्यैवानेकपुत्रत्वस्य प्रसिद्धत्वान्मुष्यायणत्ववत्स्वीकारात्। पुत्रिण इत्यत्र, पुत्र एषामस्तीति भवनार्थकेन अस्तिना पुत्रभवनप्रतिपादनादभावितस्य च भवनायोगात् प्रतिग्रहीतृव्यापार आक्षिप्यते । तथा च अत्रिः 'अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिः सदा' इति । वसिष्ठोऽपि 'पुत्र प्रतिग्रहीष्यन् बन्धूनाहूय राजनि चावेद्य, निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसनिकृष्टमेव प्रतिगृह्णीयात्' इति । शौनकोऽपि 'दातुः समक्षं गत्वा तु पुत्र देहीति याचयेत् ।' याचयेदिति प्रयोजके णिच्, तेन याचनार्थवृतब्राह्मणद्वारा याचयेदिति । एतेन अकृतस्यैव भ्रातृपुत्रस्य पितृव्यपुत्रत्व, 'अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत् । स एव तस्य कुर्वीत श्राद्धपिण्डोदककियाम् ॥' इति बृहत्पराशरस्मरणादिति चोद्य निरस्तम् । प्रतिग्रहीतृव्यापारं विना तत्पुत्रत्वानुपपत्तेः । न च गूढोत्पन्नदत्तात्मनोः कर्तृव्यापाराभावः, 'गृहे प्रच्छन्न उत्पन्नो गूढजस्तुः सुतः स्मृतः । दत्तात्मा तु स्वयदत्त' इति कर्तृव्यापाराश्रवणात् इति वाच्यम् । तत्रापि फलस्य क्रियासामानाधिकरण्यान्यथानुपपत्त्या तत्कल्पनात् । तस्माद् 'भ्रातृणामेकजातानामि'ति 'अपुत्रस्य पितृव्यस्ये'ति वचन न यथाश्रुतमेवार्थवत् त्रयोदशपुत्रापत्तेः । न चेष्टापत्तिः । 'पुत्रान्द्वादश यानाह नृणा स्वायंभुवो मनुः । तेषा षड्बन्धुदायादाः षडदायादबान्धवाः ॥' इति द्वादशसंख्याविरोधात् । नन्वस्त्येव संख्याविरोधः । 'औरसः पुत्रिका बीजक्षेत्रजौ पुत्रिकासुतः । पौनर्भवश्च कानीनः सहोढो गूढसंभवः ॥ दत्तः क्रीतः स्वयदत्तः कृत्रिमश्चापविद्धकः । यत्र क्व चोत्पादितश्च स्वपुत्रा दश पञ्च च ॥' इति स्मृत्यन्तरस्मरणात् । 'पुत्रास्त्रयोदश प्रोक्ता मनुना येऽनुपूर्वशः । सतानकारण तेषामौरसः पुत्रिका तथा ॥' इति बृहस्पतिस्मरणात् । 'क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् । पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥' इति स्मरणात् । 'औरसक्षेत्रजौ पुत्रौ पितुरिक्थस्य भागिनौ । दशापरे तु क्रमशो गोत्ररिक्थांशभागिनः ॥' इति मनुस्मरणाच्चेति चेत् । सत्यम् । केषाञ्चित् क्वचिदन्तर्भावात् क्वचिद्बहिर्भावाच्च तत्तत्सङ्ख्योपपत्तेर्न द्वादशसङ्ख्याविरोध इति स्थितम् ।

किं च अपुत्रदायाधिकारे, 'पत्नी दुहितरश्चैव पितरौ

भ्रातरस्तथा । तत्सुताः ।' इति पञ्चमस्थानस्थितिविरोधश्च । अयमभिसंधिः । भ्रातृव्यस्याकृतस्यापि पुत्रत्वेऽपुत्रत्वाभावादपुत्रधनाधिकारे पञ्चमस्थाने भ्रातृव्यपरिगणनं विरुद्धम् । एव 'पुत्रः पौत्रः प्रपौत्रश्च तद्वद्वा भ्रातृसंततिः । सपिण्डसंततिर्वापि क्रियार्हा नृप जायते ॥' इत्यादि पिण्डाधिकारे ज्ञेयम् । नन्विदमप्रयोजकं यत्पिण्डरिक्थाभावादपुत्रत्वमिति, 'अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः । पौनर्भवश्च नैवैते पिण्डरिक्थांशभागिनः ॥' इति विष्णुना कानीनादीना पुत्रत्वेऽपि पिण्डरिक्थाभावदर्शनात् । तथा पिण्डरिक्थाभावेऽप्यकृतस्यैव भ्रातृव्यस्य अस्तु पुत्रत्व, का क्षतिः, इति चेत्, मैवम् । 'पिण्डदोंऽशहरश्चैषाम्' इत्यनेन पिण्डरिक्थभागित्व हि पुत्रत्वस्य प्रयोजकमुक्तम् । तदभावे क्लीवादेरिव पुत्रत्वस्वरूपसत्तामात्रस्याप्रयोजकत्वात् । 'अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिः सदा' इति विधिप्रत्ययश्रवणेनाकृतस्य पुत्रत्वायोगाच्च । न च भ्रातृव्येतरविषयोऽयं विधिरिति वाच्यं, संकोचे प्रमाणाभावात् । प्रत्युत 'एकमेव करिष्यावः' इत्युपक्रम्य 'तमेव चक्रे तनयं वेतालोऽपि स्वक सुतम्' इति वैतालीयभैरवपुत्रपुत्रीकरणलिङ्गविरोधाच्च । किं च यत्र दशाना सोदराणा मध्ये, पञ्च प्रत्येक दशपुत्राः, पञ्च चात्यन्तमपुत्राः, तत्र पञ्चानामपुत्राणा प्रत्येकं पञ्चाशत्पुत्रत्वापत्तिः, पञ्चाशतश्च पुत्राणा प्रत्येक दशपितृकतापत्तिरित्याद्यनेकोपप्लवः । न चेष्टापत्तिः । 'पुत्रप्रतिनिधिः कार्यः' इत्युपादेयगतैकत्वविवक्षणात् । 'एकश्चेत्पुत्रवान् भवेत्, सर्वे ते तेन पुत्रेण' इत्यत्र पुत्रपुत्रवतोरुभयोरपि प्रत्येक श्रुतैकत्वविरोधाच्च । न च 'स्वपुत्रैर्भ्रातृपुत्रैश्च पुत्रवन्तो हि स्वर्गताः' इत्यत्र भ्रातृपुत्राणा बहुत्वश्रवणात् बहवोऽपि भ्रातृपुत्रा अकृता एवैकस्य पुत्रा भवेयुरिति वाच्यम् । तस्य लौकिकसिद्धबहुत्वानुवादकार्थवादगतत्वेनाविवक्षितत्वात् । अस्मत्पक्षे तु एकेनैव प्रकृतनित्यविधिसिद्धौ अनेकोपादानस्य वैयर्थ्यादशास्त्रीयत्वाच्च । तस्मात् संनिहितसगोत्रसपिण्डेषु भ्रातृपुत्र एव पुत्रीकार्य इति स्थितम् । ततश्च 'कृतत्वेन प्रथमं धनपिण्डभागित्वमकृतत्वेन च स्वस्वस्थान' इति विष्णुवचनं तु पूर्वपूर्वपरिगणितपुत्रसद्भावविषयमिति न कोऽपि विरोधः । नन्वेवं, 'सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत् । सर्वास्तास्तेन पुत्रेण पुत्रिण्यो मनुरब्रवीत् ॥' इत्यत्रापि अकृतस्य पुत्रत्वं न स्यात् । न चेष्टापत्तिः, आचारविरोधात् । 'पितृपत्न्यः सर्वा मातरः' इति पितृपत्नीत्वमात्रनिमित्तकमातृत्वव्यपदेशविरोधाच्च इति चेत्, मैवम् । सपत्नीपुत्रस्य साक्षाद्भर्तृवयवारब्धतया अकृतस्यापि पुत्रत्वसभवात् । वचन तु नियमार्थमित्युक्तमेव । भ्रातृव्ये तु दम्पत्योरन्यतरस्याप्यवयवसबन्धाभावान्नाकृतस्य पुत्रत्वमिति ।

यत्तु बृहस्पतिना 'यद्येकजाता बहवो भ्रातरस्तु सहोदराः । एकस्यापि सुते जाते सर्वे ते पुत्रिणः स्मृताः ॥ बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः । एका चेत्पुत्रिणी तासा सर्वासा पिण्डदस्तु सः ॥' इति भ्रातृव्यधर्मातिदेशः सापत्न्येऽभिहितः, सोऽपि प्रतिनिधित्वाभिप्रायेण न पुत्रीकरणाभिप्रायेण, भर्तृवयवारब्धत्वेन पुत्रत्वस्य सिद्धत्वात् । विकलावयवारब्धत्वेन प्रतिनिधित्वेऽपि सिद्धे वचन नियमार्थमित्युक्तमेव । तदेतत्सपत्नीकृतं देवस्वामिना । 'उभयत्रापि नान्यः प्रतिनिधिः कार्यः' इत्यनेन ग्रन्थेन । विवृत चैतच्चन्द्रिकायाम् । उभयत्रापि 'यद्येकजाता' इत्येव वचनद्वयेऽपि भ्रातृसुते सपत्नीसुते च पुत्रप्रतिनिधितया कथंचित्सभवत्यन्यो न प्रतिनिधिः कार्य इति । विज्ञानेश्वरोऽपि मानव वचो व्याचष्टे भ्रातृपुत्रस्य पुत्रीकरणसंभवेऽन्येषा पुत्रीकरणनिषेधार्थं, न पुनः पुत्रत्वप्रतिपादनाय, 'तत्सुतो गोत्रजो बन्धुः' इत्यनेन विरोधादिति । भ्रातृव्याभावेऽन्योप्युक्तरीत्या प्रत्यासन्नः । तथा च शौनकः 'क्षत्रियाणा सजातौ वै गुरुगोत्रसमेऽपि वा । वैश्याना वैश्यजातेषु शूद्राणा शूद्रजातिषु ॥ सर्वेषा चैव वर्णाना जातिष्वेव च नान्यतः ॥ दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः । ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित् ॥' इति । सजातौ क्षत्रियजातौ । जातिसामान्योपादानेऽपि प्रत्यासत्तिः पूर्ववदत्रापि नियामिका, 'अदूरबान्धवमि'त्यादिवसिष्ठस्मरणात् । सपिण्डाभावे 'गुरुगोत्रसमेऽपि वा' क्षत्रियाणां प्रातिस्विकगोत्राभावाद् गुरुगोत्रनिर्देशः । अत एव व्यवधानात् सपिण्डाभावे सगोत्रविधानम् । तत्रापि जातावित्येव 'सर्वेषां चैव वर्णाना जातिष्वेव च नान्यतः' इति वाक्यशेषात् तेन च भिन्नजातीयसपिण्डसगोत्रव्यावृत्तिः । वैश्यजातेषु वैश्यजा-

तिष्वित्यर्थः 'जातिर्जातं तु सामान्यम्' इति त्रिकाण्डीयस्मरणात् । अत्रापि सामान्योपादानेऽपि प्रत्यासत्तिः पूर्ववन्नियामिका । 'गुरुगोत्रसमेऽपि वा' इत्यत्रापि प्रवर्तते, पौरोहित्याद् राजन्यविशामिति स्मरणात् । 'स्वगोत्रेषु कृता ये स्युः' इत्युपक्रमस्य त्रैवर्णिकसाधारण्याच्च । सपिण्डाभावे गुरुगोत्रसम इत्यत्रापि तुल्यं प्रत्यासत्तेर्नियामकत्वात् । शूद्रजातिष्विति । अत्रापि प्रत्यासत्तिः पूर्ववदेव । गुरुगोत्राश्रवणाच्च 'गुरुगोत्रसमेऽपि वा' इत्यस्यात्राप्रवृत्तिः । तेन शूद्रजातिमात्र इति सिद्ध्यति ।

तदाह ब्रह्मपुराण 'शूद्राणा दासवृत्तीना परपिण्डोपजीविनाम् । परायत्तशरीराणा न क्वचित्पुत्र इत्यपि ॥ तस्माद्दासस्य दास्याश्च जायते दास एव हि ॥' इति । त्रैवर्णिकाना त्रैवर्णिकानुलोमजाना चोत्कृष्टत्वात् प्रतिलोमजानां चापकृष्टत्वात् न क्वचित्पुत्रः कर्तु शक्यते, इति शूद्र एव पुत्रीकार्यो दासदास्युत्पन्नत्वादिति ।

ननु क्षत्रियादिवाक्यत्रय नारम्भणीय, न्यायसाम्येन पूर्ववाक्यादेव तदर्थसिद्धेः, आरम्भे वापि 'सर्वेषा चैव वर्णानाम्' इत्यनेन पौनरुक्त्याच्चेति चेत्, मैवम् । क्षत्रियादिपदैः क्षत्रियादिसमानधर्मकमूर्धावसिक्तादीनामपि प्राप्त्यर्थत्वात् । 'ब्राह्मणेन क्षत्रियायामुत्पादितः क्षत्रिय एव भवति, क्षत्रियेण वैश्याया वैश्य एव, वैश्येन शूद्राया शूद्र एव भवति' इति शङ्खस्मरणात् । 'सजातौ' इति क्षत्रियादिसमानधर्मत्वेऽपि मूर्धावसिक्तादीना क्षत्रियादिपुत्रत्वाभावबोधनायेति । 'तिस्रो वर्णानुपूर्व्येण' इत्यानुपूर्व्यलिङ्गात् । न च 'सर्वेषा' इत्यनेन पौनरुक्त्य, तस्य वर्णानामनुलोमाना च स्वजातिनियमानुवादेन प्रतिलोमाना तदभावबोधनार्थत्वात् । तदेवाह—सर्वेषामिति । वर्णपदोपादानसामर्थ्याद्वर्णानामेव सजातिनियमः स्यात् नानुलोमजानामिति तत्प्राप्त्यर्थ सर्वपदोपादानं, प्राप्तिश्च वर्णसमानधर्मत्वात् । न च वर्णविशेषणं तत्, चकारानुपपत्तेः । ततश्च वर्णानामनुलोमजाना च 'जातिष्वेव' इति नियमः, नान्यतो, नान्येषु प्रतिलोमेष्वित्यर्थः ।

ननु इदं पूर्ववाक्यप्राप्तप्रत्यासत्त्यपवादकतयैव कुतो नेष्यते 'अदूरवान्धव' इति वसिष्ठवाक्यविरोधादिति चेत्, न, तस्य ब्राह्मणवाक्यैकवाक्यतयोपसंहारादिति चेत्, मैवम् । अपवादलौकिकवैदिकप्रत्यासत्तिनियामकवृद्धव्यवहाररूपन्यायविरोधात् प्रयोजनाभावादतिप्रसगात् । अनेनैव प्रत्यासत्तिसामान्यापवादे 'दौहित्रो भागिनेयश्च' इति प्रत्यासत्तिविशेषापवादासङ्गतेश्च । तस्माद्यथोक्तव्याख्यैव प्रयोजनवतीति । प्रत्यासत्तिसामान्यात् प्राप्तयोर्दौहित्रभागिनेययोस्त्रैवर्णिकेष्वपवादमाह—दौहित्र इति । तुशब्दस्य चावधारणार्थतया शूद्रैरेवेति नियमात् त्रैवर्णिकव्यावृत्तिः । तत्र हेतुमाह—'ब्राह्मणादित्रय' इति । क्वचिदपि शास्त्रे भागिनेयस्य त्रैवर्णिकसुतत्वादर्शनाच्छूद्रविषयत्वमेवेति समुदायार्थः, भागिनेय इत्यविवक्षितं, हेतौ व्यर्थविशेषणतापत्तेः, विवक्षाया भागासिद्धेश्च । दौहित्रभागिनेयौ शूद्रविषयौ शास्त्रान्तरे त्रैवर्णिकविषयत्वाभावात्, यथा सुरापानादाविति प्रयोगात्, तेनोभययोस्त्रैवर्णिकविषयत्वासिद्धिः ।

अथेदं वाक्यद्वयं शब्दविधयैव स्वस्वविषये प्रमाणं नानुमानविधया, तेन भागिनेयमात्रस्यैव त्रैवर्णिकविषयत्वाभावो न दौहित्रस्येति वाच्यं, तदपि न, वाक्यभेदापत्तेः, दौहित्रस्य त्रैवर्णिकेषु विकल्पापत्तेश्च । अदूरवान्धवत्वेन प्राप्तत्वाच्छूद्राणामेवेति नियमेन निषिद्धत्वात् । यद्वा शूद्राणामेवेति नियमेन दौहित्रस्य त्रैवर्णिकेषु निषेधः सिद्ध्यति । त्रैवर्णिकानां भागिनेय एव न भवति इति नियमेन दौहित्रस्य प्राप्तिश्च सिद्ध्यतीति विकल्पः । किं च शब्दविधया प्रामाण्ये पूर्ववाक्ये किं नियमः परिसंख्या वा स्यात् । कथं नियमः कथ च परिसंख्या । दौहित्रभागिनेयावेव शूद्राणामिति नियमः । पक्षे दौहित्रादेः पक्षे च भ्रातृव्यादेः प्राप्तत्वात् । शूद्राणामेव दौहित्रभागिनेयौ इति च परिसंख्या दौहित्रादेश्चतुर्ष्वपि वर्णेषु युगपत्प्राप्तत्वात् । तत्राद्ये भ्रातृव्यादिविधायकसामान्यशास्त्रस्य बाधः, 'सर्वेषामेव वर्णाना जातिष्वेव न चान्यतः' इत्यत्र जातिपदस्य दौहित्रादिपरतया संकोचः, दौहित्रभागिनेययोरभावे पुत्रीकरणाभावप्रसंगश्चेति । परिसंख्यापक्षे तु शूद्राणामेवेत्यनेनैव त्रैवर्णिकेषु तन्निषेधसिद्धौ 'ब्राह्मणादित्रये नास्ति' इत्यादि पुनस्तन्निषेधकवाक्यवैय्यर्थ्यापत्तिरिति । तस्मादनुमानविधैव वाक्यद्वयव्याख्या साधीयसीति । किं च न्यायमूलिकाया अनुमानविधायाः श्रुतिमूलिकायाः

शब्दविधाया गुरुत्वात्, श्रुतिकल्पने श्रुतिद्वयकल्पनाच्च। न्यायमूलकत्वे च नास्तीति वर्तमानोपदेशो लिङ्गम्।

यदा तु 'दौहित्रो भागिनेयो वा शूद्राणा विहितः सुतः' इति पाठस्तदापि शूद्राणामेव शूद्राणामपीति वा इत्यन्वयसंशयव्युदासाय नियमपरतामेव स्पष्टीकर्तुं 'ब्राह्मणादित्रय' इत्यस्य प्रवृत्तेरेकवाक्यतैव नियमपरता चेयम्। दौहित्रभागिनेयकर्मकपुत्रीकरणभावनायामनियमेन चतुर्णामपि वर्णाना कर्तृत्वेन प्राप्तौ शूद्रनियमेन शूद्राणामेवेत्यन्वयः सिद्धयति, तथा च भागिनेयपद दौहित्रस्याप्युपलक्षणमेव, अन्यथा दौहित्रभागिनेययोः शूद्रविषयत्वनियमासिद्धेः। सिद्धौ वा दौहित्रस्य त्रैवर्णिकविषये विकल्पापत्तिरित्युक्तमेव। यद्येव तर्हि भागिनेयस्य त्रैवर्णिकविषयत्वाभाव एव दौहित्रभागिनेययोः शूद्रविषयत्वेन साध्यतामिति चेत्, न। शूद्रविषयत्वादित्यनेनैव सिद्धौ दौहित्रभागिनेयपदोपादानवैयर्थ्यात्। अविवक्षायामुभयाविवक्षातो भागिनेयमात्राविवक्षाया लघुत्वात्। तस्माद्यथोक्तमेव साधीय इति। तदेतत्स्पष्टमाचष्टे शाकलः—'सपिण्डापत्यक चैव सगोत्रजमथापि वा। अपुत्रको द्विजो यस्मात्पुत्रत्वे परिकल्पयेत्॥ समानगोत्रजाभावे पालयेदन्यगोत्रजम्। दौहित्र भागिनेय च मातृष्वसृसुतं विना॥' इति। एतेन भागिनेयपद दौहित्रमातृष्वस्रेययोरुपलक्षणमिति स्पष्टमेव सिद्धम्। युक्त चैतत् विरुद्धसबन्धस्य त्रिष्वपि समानत्वादित्यलं बहुना। नान्यजातीयः पुत्रीकार्य इत्युक्त तदतिक्रमे कथमित्यत आह शौनकः—'यदि स्यादन्यजातीयो गृहीतोऽपि सुतः क्वचित्। अंशभाज न त कुर्याच्छौनकस्य मत हि तत्॥' इति। अन्या ग्रहीत्रपेक्षयोत्कृष्टापकृष्टा वा जातिर्यस्यासौ गृहीतो विधिनापीत्यर्थः। अंशो धनस्य। अंशपदसामर्थ्यात्कृत्स्नधनव्युदासोऽर्थसिद्ध एव, 'असवर्णास्तु ग्रासाच्छादनभाजनाः' इति कात्यायनस्मरणात्। 'पिण्डदोऽशहरश्चैषाम्' इत्युपक्रम्य, 'सजातीयेष्वय प्रोक्तस्तनयेषु मया विधिः' इति योगीश्वरस्मरणाच्च। दमी.२४-५४

पुत्रदातुरेकानेकपुत्रत्वादिविचारः

[1]नैकपुत्रेण कर्तव्यं पुत्रदानं कदाचन।
बहुपुत्रेण कर्तव्यं पुत्रदानं प्रयत्नतः॥

इदानीं कीदृशः पुत्रीकार्यः इत्यत आह शौनकः—नैकपुत्रेण इति। एक एव पुत्रो यस्येति एकपुत्रः, तेन तत्पुत्रदानं न कार्यं 'न त्वेवैक पुत्रं दद्यात् प्रतिगृह्णीयादि'ति वसिष्ठस्मरणात्। अत्र स्वस्त्वनिवृत्तिपूर्वकपरस्वत्वापादनस्य दानपदार्थत्वात्, परस्वत्वापादनस्य च परप्रतिग्रह विनानुपपत्तेस्तमप्याक्षिपति, तेन प्रतिग्रहनिषेधोऽप्यनेनैव सिद्धयति। अत एव वसिष्ठः 'न त्वेवैक पुत्र दद्यात्प्रतिगृह्णीयाद्वा' इति। तत्र हेतुमाह—'स हि सतानाय पूर्वेषाम्' इति। संतानार्थत्वाभिधानेनैकस्य दाने सतानविच्छित्तिप्रत्यवायो बोधितः। स च दातृप्रतिग्रहीत्रोरुभयोरप्युभयशेषत्वात्। यत्तु स्मृत्यन्तर, 'सुतस्यापि च दाराणा वशित्वमनुशासने। विक्रये चैव दाने च वशित्व न सुते पितुः॥' यच्च योगीश्वरस्मरण, 'देय दारसुताद्दते' इति, तदेकपुत्रविषयम्। 'कदाचन' आपदि। तथा च नारदः— 'निक्षेपः पुत्रदार च सर्वस्व चान्वये सति। आपत्स्वपि हि कष्टासु वर्तमानेन देहिना॥ अदेयान्याहुराचार्या यद्यत्साधारणं धनम्।' इति। इदमप्येकपुत्रविषयमेव वसिष्ठशौनकैकवाक्यत्वात्। तर्हि केन पुत्रो देय इत्यत आह—बहुपुत्रेणेति। बहवः पुत्रा यस्येति बहुपुत्रः। नैकपुत्रेणेति निषेधात् द्विपुत्रस्यैव दानप्राप्तौ यद्बहुपुत्रेणेत्युच्यते तद्द्विपुत्रस्यापि, तत्प्रतिषेधाय 'एकपुत्रो ह्यपुत्रो मे मतः कौरवनन्दन। एक चक्षुर्यथाऽचक्षुर्नाशे तस्यान्ध एव हि॥' इत्यादि भीष्म प्रति शन्तनूक्तेः। बहुपुत्रेण इति पुस्त्वश्रवणात्, स्त्रियाः पुत्रदानप्रतिषेधः। 'न स्त्री पुत्र दद्यादि'ति नैरपेक्ष्यश्रवणाच्चेति भावः। भर्त्रनुज्ञाने तस्या अप्यधिकारः। तथा च वसिष्ठः 'अन्यत्रानुज्ञानाद्भर्तुः' इति। यत्तु 'दद्यान्माता पिता य वे'ति यच्च 'माता पिता वा दद्यातामि'ति मातुः पितृसमकक्षतयाऽभिधानं तदपि भर्त्रनुज्ञानविषयमेव। न चैव विधवाया आपद्यपि पुत्रदानं न स्यात् भर्त्रनुज्ञानासंभवात् परिग्रहवदिति वाच्यम्। मानवीयलिङ्गदर्शनेन तथाकल्पनात्, नैरपेक्ष्यैकत्वश्रवणाच्च। स्त्रीनिरपेक्षस्यैकस्यापि भर्तुर्दानाधिकारः। 'दद्यान्माता पिता यं वा' 'माता पिता वा दद्यातामि' इति मातृनिरपेक्षैकपितृनिर्देशाद्वीजस्य प्राधान्यात्, 'अयो-

(१) दमी.५४; संप्र.२१९; व्यम.४८; बाल.२।१३०, २।१३५ (पृ.२३९); समु.९४; कुभ.८८५; दच.९,

निजा अपि पुत्रा दृश्यन्ते' इति बौधायनीयहेतुदर्शनाच्च । भारतेऽपि 'माता भस्त्रा पितुः पुत्रो येन जातः स एव हि' इति । श्रुतिरपि 'आत्मा वै जायते पुत्रः' इति । मानवे दद्यातामित्युभयकर्तृकताश्रवणाच्चोभयाधिकारो मुख्यः । अत एव वसिष्ठः—'शुक्रशोणितसंभवः पुत्रो मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः' इति । बौधायनोऽपि, 'मातापित्रोरेव संसर्गसाम्यात्' इति । अत एव 'माता पिता वा दद्याताम्' इति मनुना मातुर्भर्तृनुज्ञानसापेक्षत्वाज्जघन्यत्व, स्यनुज्ञाननैरपेक्ष्यात् पितुर्मध्यमत्वं, जनकतासाम्यादुभयोर्मुख्यत्वमभिप्रेत्य, पूर्वपूर्वास्वरसादुत्तरोत्तरमभिहितम् । न चेदमेकमेव वाक्यं द्विवचनान्तैकक्रियाश्रवणादिति वाच्यं, मध्ये विकल्पासंगतेः, तस्माद्विकल्पत्रयमेव । अत एव योगीश्वरो 'दद्यान्माता पिता यं वा,' इति प्रत्येकमेकवचनान्तमेव क्रियापदमुदाजहार । तत्रापि निमित्तमाह—प्रयत्नत इति । प्रकृष्टो यत्नो यस्मिन्कालेऽसौ प्रयत्नः आपत्कालस्तेन चापत्काल एव पुत्रदान, नान्यथेत्यर्थः । यथाह कात्यायनः—'आपत्काले तु कर्तव्य दान विक्रय एव वा । अन्यथा न प्रवर्तेत इति शास्त्रविनिश्चयः ॥' इति । प्रक्रमात्पुत्रदाराणाम् । मनुरपि 'माता पिता वा दद्याता यमद्भिः पुत्रमापदि' इति । आपदि दुर्भिक्षादौ । अनापदि दाने दातुर्दोषः, 'अन्यथा न प्रवर्तेत' इति निषेधात् । यद्वा, प्रयत्नत इति प्रतिग्रहीतुः प्रयत्नादापद्यपुत्रत्व इति, 'अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिः सदा' इत्यत्रिस्मरणात् । व्याख्यात चैवमेवापरार्कचन्द्रिकाभ्यामापदि ग्रहीतुरपुत्रत्व इति ।

दमी.५४-५८

कलौ दत्तौरसावेव पुत्रौ

दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः *॥

पुत्रप्रतिनिधीना मध्ये दत्तक एव कलौ युगे ग्राह्यः । अत एव 'कलौ निवर्तन्ते' इत्यनुवृत्तौ शौनकेनोक्तं—'दत्ते'त्यादि । अप.२।१३२

वृद्धगौतमः

संस्काररूपः परिग्रहविधिः पुत्रत्वोत्पादकः

अविधाय विधानं यः परिगृह्णाति पुत्रकम् ।
विवाहविधिभाजं तं न कुर्याद्धनभाजनम् ×॥

परिग्रहविधि विना परिगृहीतस्य विवाहमात्रं कार्य न धनदानमित्यर्थः । किन्तु तत्र पत्न्यादय एव धनभाजः, विधि विना तस्य पुत्रत्वानुत्पादात् । अत एव वृद्धगौतमः— 'स्वगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः । विधिना गोत्रता यान्ति न सापिण्डय विधीयते ॥' इति विधिनैव गोत्रता यान्ति इति नियमः दानादिविधीनां दत्तकादिलक्षणान्तर्गतत्वेन स्वरूपनिर्वाहकत्वात् यथोक्तं 'यमद्भिः पुत्रमापदि' । अपूर्वग्रहण सकलदानविधेरुपलक्षणं, तेन च प्रतिग्रहविधिरप्याक्षिप्तो भवति । 'सप्राप्तोऽप्यन्यगोत्रत' इति मानवात् सम्यग्विधिना प्राप्त इत्यर्थः । 'क्रीतादयः' इति आदिशब्देन कृत्रिमापविद्धस्वयदत्ताना ग्रहणम् । 'क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् । पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥' इति मनुना यथोदितानित्यनेन तत्तल्लक्षणसूचितविधिविशिष्टानामेव पुत्रप्रतिनिधित्वाभिधानात् । अत एव कृत्रिमलक्षणे 'सदृश तु प्रकुर्याद्यम्' इति प्रशब्देन अपविद्धलक्षणे 'यं पुत्र परिगृह्णीयात्' इति परिशब्देन स्वयदत्तलक्षणे च 'आत्मान स्पर्शयेद्यः' इति दानापरपर्यायस्पर्शशब्देन च विधिपरिग्रह एव कृतस्तदभिप्रेत्यैव, वसिष्ठेनापि 'तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः' इत्युपक्रम्य परिग्रहविधिरभिहितः । 'पुत्रं परिग्रहीष्यन्' इति परिग्रहवचनेन च कृत्रिमस्वयदत्तपरिग्रहेऽप्येष विधिरनुसर्तव्यः । मनुना तत्तदुपसर्गेण सूचनात् । तस्मादेषा पञ्चाना पुत्राणा शौनकवसिष्ठान्यतमविधिपरिग्रहेणैव पुत्रत्व नान्यथा । यथा क्षेत्रजे उप-

* दमी. व्याख्यान 'अपुत्रेणैव कर्तव्य' इत्यत्रिवचनव्याख्यानै (पृ.१३५२) द्रष्टव्यम् ।

× बाल. वाक्यार्थो दमीवत् ।

(१) **अप.**२।१३२; **स्मृच.**२८८(=); **पमा.**५२२; **सुबो.**२।१३२; **दमी**२१; **संप्र.**२०७(=); **व्यम.**४७(=); **विता.**३६४ हेमाद्रावादिपुराणे; **सिन्धु.**९०१; **बाल.**२।१३२ (पृ.१७९) माधवः, २।१३५ (पृ.२४०); **दच.**४(=).

(१) **दमी.**८० न कुर्याद्ध (कुर्यान्न ध) क्रमेण **मनुः**; **बाल.**२।१३५ (पृ.२३७) भाजं (भागं) बृहन्मनुः; **समु.**९६ परि (प्रति); **कुभ.**८७१ यः परिगृह्णाति (यं परिपुष्णाति): ८८४ पूर्वार्धे (अविधानं विधान वा यदि प्राप्नोति नन्दनः) तं (तु); **दच.**४० मनुः; **संर.**७६९ दमीवत्.

पादितं मनुयाज्ञवल्क्याभ्याम्— "नियुक्तायामपुत्राया पुत्रो जातोऽविधानतः। नैवार्हः पैतृक रिक्थं पतितोत्पादितो हि सः॥ नियुक्तौ यौ विधिं हित्वा वर्तेयाता तु कामतः। तावुभौ पतितौ' इत्यादिविध्यन्वयव्यतिरेकानुसरणात्। यत्तु मिताक्षराटीकायां सुबोधिन्या तच्च स्वत्व पुत्रत्वादिवलौकिक मन्यन्ते वृद्धाः इत्यभिहित तदुक्तवचनविरोधात्, 'अथ दत्त–क्रीत–कृत्रिम–पुत्रिकापुत्राः परपरिग्रहेणार्षेण येऽत्र जातास्तेऽसगतकुलीनाऽद्यामुष्यायणा भवन्ति',इति पैठीनसिना आर्षेण ऋष्युक्तेनैव परपरिग्रहेण पुत्रत्वाभिधानाच्च विरुद्धमित्युपेक्षणीयम्। न संज्ञताः कुलिना जनककुलीना येषा ते, ते च ते अद्यामुष्यायणाश्चेति ये आर्षेण विधिना परिगृहीतास्ते जनककुलीनासवद्धाः, अत एव अद्यामुष्यायणा भवन्तीत्यर्थः। यद्वा जनकपरिग्रहीत्रोर्द्वयोरपि संस्कारकत्त्वे द्यामुष्यायणत्वमित्यग्रे वक्ष्यमाणत्वात् 'द्यामुष्यायणा' इत्येव पाठोऽस्तु। मेधातिथिरपि दत्तकादिषु संस्कारनिमित्तमेव पुत्रत्वमाह 'सत्यपि प्रयोगे इन्द्रादिशब्दवल्लोकतोऽर्थातिशयात्, शास्त्रे चोत्पत्तिविधानात्, भार्यादिव्यवहारवत् पुत्रत्वव्यवहारोऽवगन्तव्यः' इत्यादिग्रन्थसदर्भेण। तस्मादत्तकादिषु संस्कारनिमित्तमेव पुत्रत्वमिति सिद्धम्। दानप्रतिग्रहहोमाद्यन्यतमाभावे तु पुत्रत्वाभाव एव इति।

दमी.८०-८३

सगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः।
विधिना गोत्रतां यान्ति न सापिण्डयं विधीयते*॥

गोत्रता सततित्वम्। दमी.२५

औरसादिपुत्रान्तरसद्भावे दत्तस्य दायहरत्वविचार

जातेष्वन्येषु पुत्रेषु दत्तपुत्रपरिग्रहात्।
पिता चेद्विभजेद्वित्तं नैव ज्येष्ठांशभाग्भवेत्॥

दत्तपरिग्रहानन्तरमौरसोत्पत्तावपि न दत्तो ज्येष्ठांशभागित्यर्थः। दमी.८४

दत्तपुत्रे यथाजाते कदाचित्त्वौरसो भवेत्।
पितुर्वित्तस्य सर्वस्य भवेतां समभागिनौ॥

तदस्य गुणसत्वे औरसस्य च निर्गुणत्वे वेदितव्यम्। यथाजात इति विशेषणात्। यथा गुणाना जातं समूहो यस्मिन्निति यथाजातो गुणसमूहवानित्यर्थः यथाशब्दस्य गुणयोगे सादृश्ये च शक्तत्वात्। अत एव मनुः–'उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्रिमः। स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः॥' इति औरसाभावे सर्वरिक्थग्रहणमुक्तवान् तद्युक्तमेवौरसे सत्यर्धांशहरत्वम्।

दमी.७९

संस्काराकरणे दत्तस्यादायादत्वम्

तस्मिन् जाते सुते दत्ते न कृते च विधानके।
तत्स्वं तस्यैव वित्तस्य यः स्वामी पितुरञ्जसा॥

इदानीमौरसदत्तकयोर्दत्तकाकृतविद्धयोश्च समवाये धनग्रहणमाह स एव—तस्मिन् जात इति। तस्मिन्नौरसे सति यः सुतो जायते परिग्रहादिना, तयोर्मध्ये तस्यैव तत् स्व पितुर्वित्तस्याञ्जसा स्वभावेन यः स्वामी भवति नान्यस्य सत्यौरसे परिगृहीतस्य न धनभाक्त्वमित्यर्थः। पुत्रोत्पत्तावौरसाभावस्यापि विशेषणत्वात्। तथा दत्ते यथाविधि परिगृहीते सति योऽकृतविधानकः पुत्रस्त्योश्च दत्त एव धनभाक् नाकृतविधानक इत्यर्थः, विधानस्यैव पुत्रोत्पादकत्वात्। दमी.८३-८४

संस्काररूपः प्रतिग्रहविधिः

बन्धूनाहूय सर्वांस्तु ग्रामवासिनमेव च।

---

* व्यम., व्याख्यानं 'दत्तक्रीतादिपुत्राणा' इति बृहन्मनुवचने (पृ.१३६१) द्रष्टव्यम्। दमी. व्याख्यानं 'श्राद्धानानां सपिण्डेषु' इति शौनकवचने (पृ.१३६५), 'अविभाय विधान' इति वृद्धगौतमवचने, 'दत्तक्रीतादिपुत्राणा' इति बृहन्मनुवचने च (पृ.१३५८) द्रष्टव्यम्।

(१) **दमी.**२४-२५, ८०-८१,८६; **संप्र.**२०८ सगो (स्वगो); **व्यम.**५३ सगोत्रेषु (स्वगोत्रेण) तां यान्ति (मायान्ति); **बाल.**२।१३२ (पृ.१८०) सप्रवत्; २।१३५ (पृ.२३७) सप्रवत्; **समु.**१४० व्यमवत्; **कृभ.**८७१ सगोत्रेषु (स्वगोत्रेषु) क्रीतादयः सुताः (कक्रीतकादयः): ८८५ संप्रवत्; **दच.**२४-२५.

(२) **दमी.**७९; **समु.**१४० यथा (यदा); **कृभ.**८८४, ८९५ समुवत्; **दच.**३७; **संर.**७६८.

(३) **दमी.**८४ कौस्तुभे इत्युक्तम्; **समु.**१४० मनुरित्याह; **कृभ.**८८४ तत्स्वं...यः (तत्सर्वस्यैव वित्तस्य स); **दच.**३९.

(४) **दमी.**७२.

मधुपर्कं ततो दद्यात् पृथिवीशाय शासिने *॥
पायसं तत्र साज्यं च शतसंख्यं तु हावयेत् ।
प्रजापते न त्वदेता इत्युद्दिश्य प्रजापतिम् ॥
प्रदद्यादर्धराज्योत्थमेकवर्षाहृतं धनम् ॥
शतत्रयं नाणकानां सौवर्णमथ राजतम् ।
प्रदद्यात्तास्रमथवा उत्तमादिव्यवस्थया ॥

स्मृत्यन्तरम्

औरसादीनां पञ्चदशपुत्राणां दायहरत्वपिण्डदत्वविचारः

[1]औरसः पुत्रिका बीजक्षेत्रजौ पुत्रिकासुतः ।
पौनर्भवश्च कानीनः सहोढो गूढसंभवः ×॥
[2]दत्तक्रीतस्वयंदत्ताः कृत्रिमश्चापविद्धकः ।
यत्र क चोत्पादितश्च पुत्राख्या दश पञ्च च ×॥
[3]अनेनैव क्रमेणैषां पूर्वाभावे परः परः ।
पिण्डदोंऽशहरश्चेति युक्ता गुणवशा स्थितिः ॥

अत्र संख्याव्यत्ययः सुपरिहरः । पुत्रिकापुत्रिकासुतौ द्वावप्येका कोटिः । तथा बीजक्षेत्रजौ यत्र क चोत्पादितोऽप्येष्वेवान्यतम इति पुत्रिकात्रयाणामन्तर्भावे द्वादशैवेति । +सुबो.२।१३२

[4]पञ्चमांशहरा दत्तकृत्रिमादिसुताः पुनः ÷॥
स्त्री प्रसूताऽप्रसूता वा मृतप्रोषितभर्तृका ।
आनृण्यार्थं हि भर्तुस्तु पुत्रमुत्पादयेत्समात् ॥

कलौ क्षेत्रजोत्पादननिषेधः

[5]देवरेण सुतोत्पत्तिः वानप्रस्थाश्रमग्रहः ।
कलौ युगे त्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः*॥

तत्र यद्यपि—'दत्तौरसेतरेषा तु पुत्रत्वेन परिग्रहः' इति हेमाद्रावादिपुराणे कलावन्ये पुत्रा निषिद्धास्तथापि 'तत्समः पुत्रिकासुत' इत्युक्तेः क्रीतस्वयंदत्तकृत्रिमाणा दत्तकत्वसाम्याच्च कलौ ते भवन्त्येव । विता.३६४

पुत्रग्रहणे अवस्थानियमः

[6]त्रिवर्षात्प्रागुत्तमः स्यादुपनीतश्च मध्यमः ।
स्वीकारे कृतभार्यस्तु ग्रहीतुर्न कदाचन ॥

दत्तकः कदा, कः, कीदृशः, कथ च ग्राह्यः

उत्तमं द्वादशाहेषु दत्तस्य ग्रहणं शिशोः ।
आचौलान्मध्यमं हीनमूर्ध्वमामौञ्जिबन्धनात् ।
कृतोद्वाहस्य पुत्रत्वं कुलक्षयकरं भवेत् ॥
किंचापद्यनुजं दद्याद् ब्रह्मचर्याश्रमं सुतम् ।
द्वादशाब्दं धर्मपत्नी शुनश्शेपं यथा तथा ॥
भ्रातृपुत्रश्च दौहित्रः सपत्नीसुत एव वा ।
पुत्रप्रतिनिधिः कार्यस्तदभावे तु बन्धुजः ॥
ज्ञातयः कुलजाताश्च ह्युत्तमाः परिकीर्तिताः ।
मध्यमा मातृकुलजा अधमाः परगोत्रजाः ॥
दद्यातां पितरौ पुत्रं दारापत्यसुतादिषु ।
तद्विधानविधिं कृत्वा गृह्णीयातां च बन्धुभिः ॥

---

* दमी. व्याख्यान 'वाससी कुण्डले' इति शौनकवचने (पृ.१३६३) द्रष्टव्यम् ।

×दमी. व्याख्यान 'ब्राह्मणानां सपिण्डेषु' इति शौनकवचनव्याख्याने (पृ.१३६५) द्रष्टव्यम् । + बाल. सुबोवत् ।

(१) **दमी.७५; संप्र.२३०; दच.१२** हाव (होम).

(२) **दमी.७५; कृभ.८८६; दच.१२**

(३) **दमी.७६; कृभ.८८६; दच.१२.**

(४) **उ.२।१४।२** (=) पौ (पु); **गौमि.२८।३३** (=); क्षेत्रजौ (जिक्षेत्रिणौ); **सुबो.२।१३२** आपस्तम्बधर्मवृत्तौ स्मृत्यन्तरसंग्रहः; **दमी.३७-३९; बाल.२।१३२** (पृ.१७८) आपस्तम्बधर्मसूत्रविवृत्तौ स्मृत्यन्तरसंग्रहः.

(५) **उ.२।१४।२**(=) दत्त ...त्ताः (दत्तः क्रीतः स्वयदत्तः); **गौमि.२८।३३** (=); **सुबो.२।१३२.** पुत्राख्या (स्वपुत्रा) शेष ऽवत्, आपस्तम्बधर्मवृत्तौ स्मृत्यन्तरसंग्रहः; **दमी.३९** सुबोवत्; **बाल.२।१३२** (पृ.१७८) सुबोवत्, आपस्तम्बधर्मसूत्रविवृत्तौ स्मृत्यन्तरसंग्रहः.

(६) **उ.२।१४।२** (=) युक्ता गुणवशा स्थितिः (प्रायेण स्मृतिषु स्थिताः); **गौमि.२८।३३**(=).

÷ सवि. व्याख्यान 'उत्पन्ने त्वौरसे' इति कात्यायनवचने (पृ.१३४९) द्रष्टव्यम् ।

* अप., सुबो. व्याख्यान 'पिण्डदोंऽशहरश्चैषां' इति याज्ञवल्क्यवचने (पृ.१३३६) द्रष्टव्यम् । पमा.व्याख्यानं 'गोत्ररिक्थे जनयितुः' इति मनुवचने (पृ.१३२७) द्रष्टव्यम् । श्रेयम. व्याख्यान 'अक्षुताया क्षताया वा' इति याज्ञवल्क्यवचने (पृ.१३३१) द्रष्टव्यम् । बाल. व्याख्यान 'श्रेयसः श्रेयसोऽलाभे' इति मनुवचने (१३२२) द्रष्टव्यम् ।

(१) **सवि.३९३.** (२) **समु.१३८.**

(३) **पमा.५२२; सुबो.२।१३२** पू. (४) **समु.९६.**

(५) **समु.९६.** (६) **समु.९५.**

दद्यातां पितरौ पुत्रं गृह्णीयातां च दम्पती ॥
भर्तुरूर्ध्वं तु या नारी पुत्रं दातुं न सार्हति ।
ग्रहीतुं वा न पत्नी स्यात् बौधायनवचो यथा ॥
यः प्रदत्तोऽपि पुत्रार्थं जातकर्मादिवर्जितः ।
नासौ गच्छति पुत्रत्वं कथं वा रिक्थभाग्भवेत् ॥

अनिर्दिष्टकर्तृकवचनानि

कलौ क्षेत्रजवर्जनम्

अग्निहोत्रं गवालम्भं संन्यासं पलपैतृकम् ।
देवरेण सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

पुत्रपरिग्रह. । दुहितृमहिमा ।

अपुत्रो ब्राह्मणः कुर्यात् पुमान् पुत्रप्रतिग्रहम् ।
सपत्नीकक्रियार्थं च न कान्ता केवला क्वचित् ॥
गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत् ॥
शिखा अपि च कर्तव्याः कुमारस्यर्षिसंख्यया ॥
दुहितर एव मातापित्रोः किमौरसाः पुत्राः ।
निपतन् दिवो ययातिर्दौहित्रः स धृतः पूर्वम् ॥

ब्रह्मपुराणम्

औरसादयो द्वादश पुत्राः, तेषां गोत्रपिण्डदत्वदायहरत्वा-
शौचादिविचारः । वर्णभेदेन पुत्रीकरणविचारः ।

अपुत्रेण तु या कन्या मनसा पुत्रवत्कृता ।
राजाग्निबान्धवेभ्यश्च समक्षं वाऽथ कुत्रचित् ॥
प्राग्गर्भमथवा शुल्कमुक्त्वा दत्ता वराय या ।
मृते पितरि वा दत्ता सा विज्ञेया तु पुत्रिका ।
पित्र्यादंशात्समं भागं लभते तादृशी सुता ॥
अदत्तायां तु यो जातः सवर्णेन पितुर्गृहे ।
स कानीनः सुतस्तस्य यस्मै सा दीयते पुनः *॥

दत्तकश्च स्वयंदत्तः कृत्रिमः क्रीत एव च ।
अपविद्धश्च ये पुत्रा भरणीयाः सदैव हि ॥
भिन्नगोत्राः पृथक्पिण्डाः पृथग्वंशकरास्तथा ।
सूतके मृतके चापि व्यहाशौचस्य भागिनः ॥
अपि वस्त्रान्नदातॄणां क्षेत्रबीजवतां तथा ।
शूद्रो दासः पारशवो विप्राणां विद्यते क्वचित् ॥
राज्ञां तु शापदग्धानां नित्यं क्षयवतां तथा ।
अथ संग्रामशीलानां कदाचिद्वा भवन्ति ते ॥
औरसो यदि वा पुत्रस्त्वथवा पुत्रिकासुतः ।
विद्यते न हि तेषां तु विज्ञेयाः क्षेत्रजादयः ॥
एकादश पृथग्गोत्रा वंशमात्रकरास्तु ते ।
श्राद्धादि दासवत्सर्वे तेषां कुर्वन्ति नित्यशः ॥
गूढोत्पन्नश्च कानीनः सहोढः क्षेत्रजस्तथा ।
पौनर्भवश्च वैश्यानां राजदण्डभयादपि ।
वर्जिताः पञ्च धनिनां शेषाः सर्वे भवन्त्यपि ॥
शूद्राणां दासवृत्तीनां परपिण्डोपजीविनाम् ।
परायत्तशरीराणां न क्वचित्पुत्र इत्यपि ।

---

* व्यप्र व्याख्यान 'पितृवेश्मनि कन्या तु' इति मनुवचने (पृ.१३०७) द्रष्टव्यम् ।

(१) समु.९४. (२) समु.९५. (३) समु ९६.
(४) मच.९।६८.
(५) कुभ.८७६ मानवे इत्युक्तम्. (६) संप्र.२२८.
(७) दमी.६०; संप्र.२२६. (८) दमी.१०९.
(९) व्यक.१५७; विर.५६३; व्यप्र.४६९.
(१०) व्यक.१५७ मुक्त्वा ..य या (युक्ता पित्रा वराय वै); विर.५६३; व्यप्र.४६९ मुक्त्वा...य या (युक्ता पित्रा वराय वा) दंशा (इत्था) भते (भेत).
(११) व्यक.१५७; विर.५६५; स्मृसा.६९; चन्द्र.१७५; वीमि.२।१२८ अदत्ता (आदृता); व्यप्र.४७५.

(१) अप.२।१३१; व्यक १५८ क्रीत (कृत); विर.५७५; स्मृसा.७० पद्मपुराणम्; व्यप्र.४८० व्यकवत्; दच २७ हि (ते).

(२) अप.२।१३१, व्यक.१५८ चा (वा); विर.५७५ पृथग्व (भिन्नव) स्तथा (स्मृताः) चा (वा); स्मृसा.७० पृथग्वश (भिन्नगोत्र) चापि (चैव) पद्मपुराणम्; व्यप्र.४८० व्यकवत्; दच.२७ तथा (स्मृताः) सूतके...चापि (जनने मरणे चैव).

(३) अप.२।१३१ अपि (अथ) क्षेत्रबीज (बीजक्षेत्र); व्यक.१५८; विर.५७५; व्यप्र.४८०.

(४) अप.२।१३१ कदाचिद्वा (न कदाचित्); व्यक.१५८; विर.५७५ अथ (अर्थ); व्यप्र.४८१.

(५) अप.२।१३१; व्यक.१५८ न हि तेषां तु (तत्र तेषां ते); विर.५७६ न हि (तत्र); व्यप्र.४८१ विद्यते न हि तेषां तु (न विद्यते तत्र तेषां).

(६) अप.२।१३१ ; व्यक.१५८ त्सवें (त्सर्वे); विर.५७६; व्यप्र.४८१ ग्गोत्रा (ग्भावा).

(७) अप.२।१३१ धनिनां (बलिनः) न्त्यपि (न्ति हि); व्यक.१५८; विर.५७६; व्यप्र.४८१.

(८) अप.२।१३१ त्यपि (ष्यते); व्यक.१५८;

तस्माद्दासस्य दास्याश्च जायते दास एव हि *॥

एतेनैषा प्रसंगात्व्यहाशौचभागित्वमुक्तम् । तथा 'अपि वस्त्रान्नदातॄणामि'त्यादि । एतेनैषा पुत्राणामसंभवशङ्का निराक्रियते । तथा 'औरसो यदि वा' इत्यादि । पुत्रिका चासौ सुतश्चेति पुत्रिकासुतः । क्षेत्रजादय इत्यनेन औरसपुत्रिकाभ्यामन्ये पुत्रा उच्यन्ते । औरसो यदि पुत्रो यदि वा पुत्रिका, तदा क्षेत्रजादयो दश मात्रकरा इत्यन्वयः । दासवद्दासेतिकर्त्तव्यतया । तथा 'गूढोत्पन्नश्च कानीन' इत्यादि । अनेनाप्यमुख्यसुताना वैश्यसंभव उक्तः । तदेव ब्राह्मणे राजनि वैश्ये चामुख्यपुत्रत्वं संभवत उक्तम् । अथ शूद्रे प्रभुपरतन्त्रे स्वय पुत्रोत्पादन दुर्लभमित्याह---'शूद्राणा दासवृत्तीनामि'ति । तत्कि दासात्पुत्र एव नोत्पद्यते तत्राह —'तस्माद्दासाच्च' इति । दास एव प्रभुपरतन्त्रपुत्रो जायते, न तु पुत्रार्थक्रियाया क्वचित्स्वतन्त्र इत्यर्थः ।

विर.५७५–५७७

औरसे सति इतरेषा पुत्राणां अंशभाक्त्वविचारः —

सर्वमग्रधनभोक्ता स्यादौरसोऽपि जघन्यजः ।
त्रिभागं क्षेत्रजो भुङ्क्ते चतुर्थं पुत्रिकासुतः ॥
कृत्रिमः पञ्चभागं तु षड्भागं गूढसंभवः ।
सप्तांशकञ्चापविद्धः कानीनश्चाष्टमांशकम् ॥
नवभागं सहोढस्तु क्रीतो दशममश्नुते ।
पौनर्भवस्तु परतो द्वादशं स्वयमागतः ।
त्रयोदशं स्वभागं तु शूद्रो भुङ्क्ते पितुर्धनात् ॥

*दर्शी. व्याख्यान 'ब्राह्मणाना सपिण्डेषु' इति शौनकवचनव्याख्याने (पृ १३६५) द्रष्टव्यम् ।

विर.५७६-५७७ सस्य (साच्च), **दर्शी.**४४; **व्यप्र.**४८१; **संप्र.**२१५-२१६.

(१) **व्यक.**१५३; **विर.**५४५; **स्मृसा.**६७; **रत्न.**१४२; **विचि.**२३४; **स्मृचि.**३३; **वीमि.**२।१२७ उत्त., **व्यप्र.** ४८२-४८३,४८४; **व्यउ.**१४८; **दच.**३२.

(२) **व्यक.**१५३; **विर.**५४५; **स्मृचि.**३३ शकञ्चापविद्धः (शं चापविद्धश्च) माशकम् (माशभाक); **व्यप्र.**४८४ भाग तु (म भागं) कञ्चापविद्धः (श्चापविद्धस्तु) माशकम् (माशकः); **व्यउ.**१४८ मांशकम् (मांशभाक्) शेष व्यप्रवत्.

(३) **व्यक.**१५३ दस्तु (दश्च); **विर.**५४६; **स्मृचि.**३३ पूर्वार्धे (नवभागं सहोढश्च क्रीतको दशमांशभाक्) शं स्वभा

तद्वोत्रजो वा धर्मिष्ठो ब्रह्मचार्यथवा पुनः ॥

(१) बृहस्पतेः कानीने षडंशवादो, हारितस्य तत्रैव विंशभागवादः, ब्रह्मपुराणस्य तत्रैवाष्टमभागवादः, अतिगुणवत्त्वनिर्गुणत्वमध्यमगुणवत्त्वैर्नैवाविरोधनीयः । पौनर्भवे बृहस्पतेः सप्तमांशवादः, ब्रह्मपुराणीयः पौनर्भवे एकादशभागवादः, तत्रैव हारीतोक्तविंशभागवादः अतिगुणवत्त्वगुणवत्त्वनिर्गुणत्वैरविरोधनीयः । तथा क्षेत्रजोऽपि न गूढोत्पन्नानामित्युक्तम् । अत्र च त्रयोदशसु पुत्रेष्वन्यतम उत्पन्नः पितुः किं लभते इत्याकाङ्क्षाया ब्रह्मपुराणम् । 'विभजिष्यमाण' इत्यादि हारीतवाक्यं, 'षट्सु दायादेषु विकल्पः' इत्यादि शंखलिखितवचन च, मृते पितरि पृथग् सवर्णाना दायादाना विभागबोधकम् । तत्र प्रथममौरसापेक्षया पञ्चाना मन्दगुणत्वे, द्वितीयं तु औरसेन सह समानगुणवत्त्वे । विर.५४६

(२) पश्चात्कृतपुत्रिकाविषयमिदम् । स्मृसा.६७

(३) इत्यादिब्रह्मपुराणादिवचनैः समभागार्हतया मन्वादिभिरुक्तस्य पुत्रिकापुत्रस्य चतुर्थांश उक्तः, पञ्चमषष्ठांशार्हतयोक्तस्य क्षेत्रजस्य तृतीयांशश्चोक्तः, स पुत्रिकापुत्रस्यात्यन्तनिर्गुणत्वेऽसवर्णत्वे च क्षेत्रजस्य चात्यन्तसगुणत्वानुकूल्ययोर्व्यवस्थापनीयः । पृ.४८३

अत्रौरसे सतीति सर्वत्र ज्ञेयम् । 'पूर्वाभावे परः पर' इति वचनात् । ब्रह्मपुराणीयस्य समग्रेत्यादिप्रथमश्लोकस्य पूर्वमेव विषयव्यवस्थोक्ता । अन्येषामपि गुणतारतम्येन देशाचारानुसारेण वा यथायथ व्यवस्था द्रष्टव्या । षड्भाग षष्ठ भागम् । नवभाग नवम भागमित्यर्थः । अन्यथार्थासंगतेः प्रक्रमभङ्गप्रसंगाच्च । परतो दशमात्परमेकादशम् । त्रयोदशममित्यर्थम् । शौद्रः शूद्रापुत्रः । व्यप्र.४८४

स्कन्दपुराणम्

क्रीतदुहिता

आत्मीकृत्य सुवर्णेन परकीयां तु कन्यकाम् ।
धर्म्येण विधिना दातुमसगोत्राऽपि युज्यते ॥

(शमभा); **व्यप्र.**४८४ दस्तु (दश्च) श स्वभा (शमभा) शू (शौ); **व्यउ.**१४८ भागं सहोढस्तु (मांश सहोढश्च) स्तु परतो (स्त्वेकादश) श स्वभा (शमभा).

(१) **व्यप्र.**४८४. (२) **दर्शी.**११४.

अत्र 'सुवर्णेनात्मीकृत्य' इति शब्देन क्रयविधिः स्पष्ट एव। दमी.११४

पद्मपुराणम्

कृत्रिमदुहिता

आसीत् सुनन्दिकः पूर्वं ब्राह्मणो वेदपारगः।
तस्य सुनन्दिका भार्या वन्ध्या तु बहुलोभिनी॥
तस्यापत्यं न संजातं वृद्धत्ववन्ध्यभावतः।
तेनान्यस्य सुता जाता सुशीला रूपसंयुता॥
ब्राह्मणस्य कुले जाता गृहीत्वा पोषिता स्वयम्।
तां च पुत्रीं गृहे तस्य ब्राह्मणी सा ह्यपालयत्॥
विवाहार्थं तु विप्रस्य दत्ता सोमेश्वरस्य च।
वेदोक्तविधिना तत्र विवाहमकरोत्तदा॥

अत्रापि स्वयंगृहीत्वेति श्रवणं कृत्रिमत्वे लिङ्गम्। न च स्वयंपोषितेत्यन्वयः साधुः। ग्रहणपोषणयोः क्त्वाप्रत्ययाभिहितसमानकर्तृकत्वेनैव स्वयंपोषणस्य सिद्धत्वात्। दमी.११५–११६

लिङ्गपुराणम्

क्रीतदुहिता

कन्यां लक्षणसंपन्नां सर्वदोषविवर्जिताम्।
मातापित्रोस्तु संवादं कृत्वा दत्वा धनं महत्॥
आत्मीकृत्य तु संस्थाप्य वस्त्रं दत्वा शुभं नवम्।
भूषणैर्भूषयित्वा तु गन्धमाल्यैरथार्चयेत्॥
निमित्तानि समीक्ष्याथ गोत्रनक्षत्रकादिकम्।
उभयोश्चित्तमालोड्य उभौ संपूज्य यत्नतः॥
दातव्या श्रोत्रियायैव ब्राह्मणाय तपस्विने।
साक्षादधीतवेदाय विधिना ब्रह्मचारिणे॥

अत्र 'धन दत्वा' इति शब्देन क्रयविधिः स्पष्ट एव। दमी.११४

हरिवंशः

दत्तकपुत्रः दत्तकदुहिता च

[1]विश्वामित्रं तु दायादं गाधिः कुशिकनन्दनः।
जनयामास पुत्रं तु तपोविद्याशमात्मकम्॥
[2]वत्सावते त्वपुत्राय वसुदेवः प्रतापवान्।
अद्भिर्ददौ सुतं वीरं शौरिः कौशिकमौरसम्।
कण्डूषाय त्वपुत्राय विष्वक्सेनो ददौ सुताम्॥

कृत्रिमदुहिता

[3]महिष्यां जज्ञिरे शूराद्भोजायां पुरुषा दश।
वसुदेवो महाबाहुः पूर्वमानकदुन्दुभिः॥
देवभागस्ततो जज्ञे तथा देवश्रवाः पुनः।
अनावृष्टिः कनवको वत्सवानथ गृञ्जिमः॥
श्यामः शमीको गण्डूषः पञ्च चास्य वराङ्गनाः।
पृथुकीर्तिः पृथा चैव श्रुतदेवाः श्रुतश्रवाः।
राजाधिदेवी च तथा पञ्चैता वीरमातरः॥
पृथां दुहितरं चक्रे कुन्तिस्तां पाण्डुरावहत्।
यस्यां स धर्मविद्राजा धर्मात् जज्ञे युधिष्ठिरः॥

अत्र 'चक्रे' इति कर्तुरेव व्यापारश्रवणादस्याः कृत्रिमत्वम्। दमी.११५

गरुडपुराणम्

पुत्रप्रतिनिधिविधिः

[4]अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च।
येन केनाप्युपायेन पुत्रं संपादयेत् खग॥

कालिकापुराणम्

औरसादयो द्वादश पुत्राः, तेषां राज्याभिषेकदायहरत्वादिविचारः। दत्तादीनां संस्कारपुत्रीकरणश्राद्धकृत्त्वादिविवेकः।

द्यामुष्यायणः।

[5]न क्षेत्रजादितनयं राजा राज्येऽभिषेचयेत्।
पित्रृर्णशोधने नित्यमौरसे तनये सति॥
[6]औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।
गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।
स्वयंदत्तश्च दासश्च षडिमे पुत्रपांसनाः॥

---

(१) दमी.११४-११५. (२) बाल.२।१३५ (पृ.२२०).
(३) दमी.५९ दितनय (दौस्तनयान्) ऋणशोधने (तृणां साधयेत्); समु.१३९ ऋणशोधने (तृणां शोधयेत्) शेष दमीवत्; कृभ.८८९.
(४) दमी.५९; समु.१३९; कृभ.८८९; दच.३३.
(५) दमी.५९; समु.१३९; कृभ.८८९ डिमे (डेते); दच.३३ पांसनाः (पांशुलाः).

(१) दमी.११५. (२) दमी.११४.
(३) बाल.२।१३५ (पृ.२२४)
(४) बाल.२।१३५ (पृ.२४०).

(1)अलाभे पूर्वपूर्वेषां परान् समभियोजयेत् ।
पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत् ॥
दत्ताद्या अपि तनया निजगोत्रेण संस्कृताः ।
आयान्ति पुत्रतां सम्यगन्यबीजसमुद्भवाः ॥
(3)पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते ।
आचूडान्तं न पुत्रः स पुत्रतां याति चान्यतः ॥
(4)चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥
(5)ऊर्ध्वं तु पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप ।
गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत् ॥
(6)पौनर्भवं तु तनयं जातमात्रं समानयेत् ।
कृत्वा पौनर्भवस्तोमं जातमात्रं तु तस्य वै ॥
(7)सर्वांस्तु कुर्यात्संस्कारान् जातकर्मादिकान्नरः ।
कृते पौनर्भवस्तोमे सुतः पौनर्भवस्ततः ॥
(8)एकोद्दिष्टं पितुः कुर्यान्न श्राद्धं पार्वणादिकम् ॥
(9)क्रीता या रमिता मूल्यैः सा दासीति निगद्यते ।
तस्यां यो जायते पुत्रो दासपुत्रस्तु स स्मृतः ॥
न राज्ञो राज्यभाक् स स्याद्विप्राणां श्राद्धकृन्न च ।
अधमः सर्वपुत्रेभ्यस्तं तस्मात्परिवर्जयेत् ॥
(10)अपुत्रस्य गतिर्नास्ति श्रूयते लोकवेदयोः ।
वेतालभैरवौ यातौ पुरा वै तपसे गिरिम् ॥
पूर्वं त्वकृतदारौ तौ तयोः पुत्रा न च श्रुताः ।
तेषां तु सम्यगिच्छामः श्रोतुं संस्थानमुत्तमम् ॥

मार्कण्डेय उवाच—

(11)अपुत्रस्य गतिर्नास्ति प्रेत्य चेह च सत्तमाः ।
स्वपुत्रैर्भ्रातृपुत्रैश्च पुत्रवन्तो हि स्वर्गताः ॥
सम्यक् सिद्धिमवाप्येह यदा वेतालभैरवौ ।
हरस्य मन्दिरं यातौ कैलासं प्रति हर्षितौ ॥
तदा हरस्य वचनान्नन्दी तौ रहसि द्विजाः ।
प्राहेदं वचनं तथ्यं सान्त्वयन्नेव बोधकृत् ॥

नन्द्युवाच—

अपुत्रौ पुत्रजनने भवन्तौ शङ्करात्मजौ ।
यतेतां जातपुत्रस्य सर्वत्र सुलभा गतिः ॥

मार्कण्डेय उवाच—

तस्येदं वचनं श्रुत्वा नन्दिनः प्रीतमानसौ ।
एकमेव करिष्यामो नन्दिनं चेत्यभाषताम् ॥
(12)ततः कदाचिदुर्वश्यां भैरवो मैथुनं गतः ।
तस्यां स जनयामास सुवेशं नाम पुत्रकम् ॥
(13)तमेव चक्रे तनयं वेतालोऽपि स्वकं सुतम् ।
ततस्तौ तेन पुत्रेण स्वर्ग्यां गतिमवापतुः ॥

(1) दत्तेति । अन्यबीजसमुद्भवा अपि दत्ताद्यास्तनया निजगोत्रेण प्रतिग्रहीत्रा स्वगोत्रेण सम्यक् स्वसूत्रोक्त विधिना जातकर्मादिभिः संस्कृताश्चेत् तदैव प्रतिग्रहीतुः पुत्रता प्राप्नुवन्ति, नान्यथा इत्यर्थः । तदाह वसिष्ठः— 'अन्यशास्त्रोद्भवो दत्तः पुत्रश्चैवोपनायितः । स्वगोत्रेण

---

(१) दमी.५९ लाभे (भावे) मभियोजयेत् (मभिषेचयेत्); समु.१३९ दमीवत्; कृभ.८९०.

(२) दमी.२५,५८; संप्र २२५; बाल.२।१३४; समु.९६ शौनकः; कृभ.८८६, ८९०.

(३) दमी.५८, १००; संप्र २२५, व्यम.५१; विता. ३७३, सिन्धु.८८९, बाल.२।१३४, समु.९६ शौनकः; कृभ.८९०; दच.१५

(४) दमी.५८; संप्र.२२५ स उ (सतो), व्यम ५१ चूडाद्या यदि (चूडोपनयन); विता.३७३ चूडाद्या यदि (चूडोपायन); सिन्धु.८८९ वितावत्; बाल.२।१३४ सप्रवत्; सेतु.३०० (=); समु.९६ व्यमवत्, शौनकः, कृभ.८९० सप्रवत्; दच.१५-१६.

(५) दमी.५८: ६६ पू.; सप्र.२२५; व्यम ५१; विता.३७३ पू.; सिन्धु.८८९; सेतु ३०० (=) तु (च); समु.९६ शौनकः; कृभ.८९०.

(६) दमी.५८; संप्र २२५, समु.९६; कृभ.८९०.

(७) दमी.५८ सुतः (ततः) स्तत. (स्सुत.): ६५ पू.; संप्र. २२५; समु.९६ स्ततः (स्स्मृत.); कृभ ८९० न्नरः (नथ).

(८) दमी.७० द्ध (द्धे); समु.९६ दमीवत्; कृभ.८९०.

(९) दमी.७१; समु.१३९; कृभ.८९० मू (मौ) पू.

(१) दमी.७१, समु.१३९.

(२) दमी.३४; संप्र.२१२; कृभ.८८० प्रथमार्धम्.

(३) दमी.३४ : ४०-४१ उत्त.; संप्र.२१२ माः (मा) स्वर्गताः (सगताः); कृभ.८८० स्वर्गताः (समता.).

(४) दमी.३४; संप्र.२१२-२१३.

(५) दमी.३४; संप्र.२१३; कृभ.८८३ स जन (सजन); दच.९.

(६) दमी.३४; संप्र.२१३; कृभ.८८३ पू.; दच.९.

स्वशास्त्रोक्तविधिना स स्वशास्त्रभाक्॥' इति। दत्ताद्या इत्यादिपदेन कृत्रिमादीना ग्रहणम्। 'औरसः क्षेत्रज' इत्यादिपूर्वोपक्रमात्, योऽय पौनर्भवादीना राज्यनियोजनाभावः स औरसव्यतिरिक्ताभाव एव, 'अभावे पूर्वपूर्वेषा' इत्यस्यैवानेनापवादात्। सत्यौरसे तु राज्याभावस्य 'न क्षेत्रजादींस्तनयान्' इत्यनेन प्रागेवाभिधानात्। सत्यौरसे क्षेत्रजादीन् राज्ये नैवाभिषेचयेत्, पितृणा नित्यं श्राद्धादि चैव न साधयेन्न कारयेदित्यर्थः। गोत्रेण इति। यद्यपि जातकर्मादीना साक्षाद् गोत्रस्य करणता न श्रूयते तथापि तदङ्गभूते वृद्धिश्राद्धे तत्सबन्धावश्यम्भावात् प्रधानेऽपि तत्सबन्ध इति। चूडादिषु साक्षादेव तत्सबन्धः, 'शिखा अपि च कर्तव्या कुमारस्यार्षसख्यया' इति स्मरणात्। संस्कारैः पुत्रत्वमित्युक्त तानेवान्वयव्यतिरेकाभ्यामाह —पितुर्गोत्रेण इति। यः पुत्र आचूडान्त चूडान्तैः संस्कारैः पितुर्जनकस्य गोत्रेण सस्कृतः, सोऽन्यतोऽन्यस्य पुत्रता न याति। अयमत्राभिसंधिः। कृतचूडस्य परिग्रहीतृपुत्रताभावप्रतिपादनमसाधारणपुत्रता विपर्ययीकरोति इत्यवश्य वाच्यम्। अन्यथा 'गृहीत्वा पञ्चवर्षीयमि'त्यनेन कृतचूडस्यापि परिग्रहीतृपुत्रताप्रतिपादनविरोधात्, गृहीत्वेत्यस्य च कृत चूडविषयत्वावश्यभावः स्पष्टमिष्यते। ततश्च चूडान्तसंस्कारसंस्कृतस्य परिग्रहे द्व्यामुष्यायणता भवति, गोत्रद्वयेन सस्कृतत्वात्। तस्य च फल गोत्रद्वयसंबन्ध इत्यग्रे वक्ष्यते। अनेन जातकर्मादीना चूडान्ताना सस्काराणा पुत्रताहेतुत्वमुक्तम्। आचूडमिति वक्तव्ये, यदन्तग्रहण तदकृतार्षसमसख्यशिखस्य पुत्रीकरणाभ्यनुज्ञानार्थ, प्रधानानिष्पत्या पुत्रतार्हत्वात्, चूडाया इति वक्ष्यमाणत्वाच्च। अकृतजातकर्माद्यसभवे कथमित्यत आह—'चूडाद्या यदि' इति। यदि चूडाद्याः सस्कारा निजगोत्रेण प्रतिगृहीतृगोत्रेण कृताः, वैशब्दोऽवधारणे, तदैव दत्ताद्यास्तनयाः स्युरन्यथा ते दासा उच्यन्ते इति। चूडा आद्या येषा ते तथेति न तु चूडाया आद्या इति, पूर्वेण पौनरुक्त्यापातात्। अनेन जातकर्माद्यन्नप्राशनान्ताना जनकगोत्रेणानुष्ठानेऽपि न विरोधः। तथा चाकृतजातकर्मादिर्मुख्योऽकृतचूडोऽनुकल्प इति सिध्यति। दत्ताद्या इत्यादिपदेन कृत्रिमादिग्रहणमित्युक्तमेव तेषामपि सस्कारैरेव पुत्रत्वं, न परिग्रहमात्रेण, 'अन्यथा दास उच्यते' इति विपक्षबाधकात्। अन्यथा चूडाद्यकरणे कृतचूडादिपरिग्रहे वा दासता भवति, न तु पुत्रत्वमित्यर्थः। अस्य पुत्रत्वस्य यूपत्वादिवत्सस्कारजन्यत्वात्, असंस्कृतः पुत्रीकार्य इति स्थितम्। तत्रावध्यपेक्षायामाह— ऊर्ध्वमिति। असस्कृतोऽपि पञ्चमादूर्ध्वं न ग्राह्यः कालाभावेन पुत्रत्वानुपपत्तेः। अनेन पञ्चैव वर्षाणि पुत्रपरिग्रहकाल इत्युक्त भवति। तद्व्यतिरेकेणाभिधान तु पञ्चमानन्तरं गौणोऽपि कालो नास्तीति प्रतिपादनाय, अन्यथा 'स्वकालादुत्तरः कालो गौणः सर्वः प्रकीर्तितः' इति न्यायेन पञ्चमानन्तरस्य गौणकालत्वापत्तिः। ततश्च जननमारभ्यातृतीयवर्षं, तत्रापि तृतीयवर्षस्य मुख्यकालतया 'ऊर्ध्वं तु पञ्चमाद्वर्षात्' इत्युपसहारे वर्षश्रवणाच्च, अत्रापि चूडाशब्दस्य तृतीयवर्षपरतैवाभिप्रेतेति गम्यते। अन्यथा उपनीतसहभावपक्षेऽष्टमवर्षमकृतचूडस्य परिग्रहापत्तिः। न चेष्टापत्तिः, 'ऊर्ध्वं तु पञ्चमाद्वर्षात्' इत्यनेन विरोधात्। तस्मादाचूडान्तमित्यत्र चूडाशब्दस्तृतीयवर्षपर एव युक्तः, तृतीयानन्तरमापञ्चम गौणः, ऊर्ध्वं तु गौणोऽपि नेति स्थितम्। सुता इत्यनेन पुत्रत्वानुपपत्तावपि चूडादिसस्कारा उत्पद्यन्त एव तत्तत्कालसद्भावादित्युक्त, तथापि दासतैव पुत्रत्वाभावात्। इद च तृतीय दासतानिमित्तम्।

यत्तु कात्यायनस्मरण 'विक्रय चैव दान च न नेयाः स्युरनिच्छवः। दाराः पुत्राश्च', इत्यनिच्छना दानादि निषेधः, सोऽपि पञ्चवार्षिकस्यैव नाधिकस्येति व्याख्येयम्। यच्च 'सदृश तु प्रकुर्याच्च' इति वाक्ये गुणदोषविचक्षणमिति पाठमभिप्रेत्य, विचक्षण न तु बालमिति सर्वज्ञेन व्याख्यातं, तदपि पञ्चवार्षिकमेव। विचक्षणं चातुर्यविशेषेण, न तु बाल, 'बाल आषोडशाद्वर्षादि'ति लक्षणविशिष्ट न कुर्यादित्यर्थ इति व्याख्येयम्। तर्ह्यसस्कृताभावे कथमित्यत आह— गृहीत्वा इति। पञ्चवर्षीयं चूडान्तसस्कारसस्कृतमित्यर्थः। ननु कथ तस्य ग्रहणं दासताभिधानात्, इत्यत आह—पुत्रेष्टिमिति। अयमत्राभिसधिः। 'अग्नये पुत्रवते पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय पुत्रिणे पुरोडाशमेकादशकपाल प्रजाकामः, अग्निरेवास्मै प्रजा प्रजनयति वृद्धामिन्द्रः प्रयच्छती'ति वाक्ये

प्रजाफलकत्वमिष्टेः श्रूयते तत्रत्रानुत्पन्ना प्रजा तत्र तदुत्पत्तिरेव भाव्या, यत्र तूत्पन्ना परिगृह्यते तत्रोत्पत्तेरभावात्तस्याः प्रजात्वमेव भाव्यमिति कल्प्यते, प्रकृतविधानान्यथानुपपत्तेः। तच्च दासत्वापनोदनमृते न संभवतीति तदपनोदोऽप्यवश्यमभ्युपेयः। अन्यथा प्रजात्वमात्रस्योपादकत्वे पुत्रपरिग्रहमात्रे स्यात्। यदि च संस्कारैरेव तत्र पुत्रत्वोत्पत्तेर्न तदपेक्षेति, तर्हि प्रकृतेऽपि तुल्य, प्रथमपदेनात्र तत्सूचनात्, 'सर्वास्तु कुर्यात् संस्कारान् जातकर्मादिकान्नरः' इत्यन्तेऽभिधानाच्च। तस्मात्पुत्रेष्ट्या पूर्वं संस्कारप्रयुक्तदासत्वापनोदपूर्वकप्रजात्वसंपादनात् संस्कृतोऽपि परिग्राह्य इति स्थितम्। यद्येवं तर्हि संस्कृतमित्येव वाच्यं, किं पञ्चवर्षीयपदोपादानेनेति चेत्, सैवम्। पञ्चवर्षीयस्यैवेति नियमार्थत्वात्। नियमश्च अक्षताग्रहणपूर्वकब्रह्मवर्चसफलकोपनयनप्राप्त्यर्थः। न चायं नियमः पूर्ववाक्येनैव सिद्ध इति वाच्यं, तस्याकृतसंस्कारावधिसमर्पकत्वेन प्रकृतत्वाभावे परिगृहीतत्वात्। प्रथममिति। संस्कारेभ्यः प्रागित्यर्थः। ननु परिग्रहहोमादेव प्रागिति कुतो नेष्यते, गृहीत्वा इति साङ्गाया ग्रहणभावनायाः क्त्वाप्रत्ययेन पूर्वकालतावगमात्। पुत्रेष्ट्या पूर्वसंस्कारापनोदेन संस्कारान्तरावश्यापेक्षणाच्चेति। यदुक्तं 'ऊर्ध्वं तु पञ्चमाद्वर्षान्न दत्ताद्याः सुताः' इति तस्यापवादमाह—पौनर्भवं तु इति। 'अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः' इति, अनेन सप्तविधायामपि पुनर्भ्वां जातः संगृहीतः। 'जातमात्रं' उत्पन्नमात्रं, तेनोत्पत्तिकाल एव न कालान्तर इत्यर्थः। 'समानयेत्' परिग्रहविधिना परिगृह्णीयात्। ननु जातमात्रस्य जातकर्मैवोचित, 'कुमारं जात पुरान्धेरालभ्यात्' इति सूत्रात्, तत्कथमुच्यते जातमात्रं समानयेदिति। सत्यम्। अपरिगृहीतस्य स्वसुतत्वाभावे संस्कारानुपपत्तेः 'संस्कुर्यात् स्वसुतान् पिता' इति स्मरणात्। न च बीजसंबन्धादेव स्वत्व, 'बीजाद्योनिर्बलीयसी' इत्यपवादात्, 'समयादन्यस्य' इति गौतमस्मरणाच्च। अन्यस्य जनयितुः पुत्रः समयादेव इत्यर्थः। तस्मादत्र जातकर्मणः प्राक् परिग्रह इति। परिग्रहानन्तरं संस्कारप्राप्तौ अपवादमाह—कृत्वा इति। जातमात्रस्य परिग्रहानन्तरं पौनर्भवष्टोमं विधाय पश्चाज्जातकर्मादिसंस्कारान् कुर्यादित्यर्थः। नन्विदमनुपपन्नं जातेष्टिन्यायविरोधात्। तथाहि यथा जातेष्टिर्विधीयते तथात्र पौनर्भवष्टोमो विहितः। स च जातकर्मणः प्राक् क्रियमाणः प्रधानं विरुणद्धयेव, पञ्चाहसाध्यत्वात्तस्य इति चेत्, उच्यते। नात्र पौनर्भवष्टोमो जातेष्टिवदपूर्वो विधीयते, किं तु अन्यत्रोत्पन्नस्य तस्य जातकर्मादीना च क्रममात्रं, यथा 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति, तेन न कोऽपि विरोधः। वैशब्दोऽवधारणे, जातमात्रस्यैव न कालान्तर इत्यर्थः। नेनास्य जातेष्टिवदेव पूर्वकालतादिनियमोऽपि न सिध्यतीति। सर्वपदेनैव सिद्धौ, जातकर्मादीनामुपादान तत्पूर्वभाविना गर्भसंस्काराणा निवृत्त्यर्थम्। जातकर्मण्युपादानेऽपि यत् सर्वपदोपादान तत्रस्य यावन्तः संस्कारास्तस्य तावत्प्राप्त्यर्थम्। ततश्च शूद्रादीनामुपनयनाद्यभावेऽपि चौडादिभिरेव पुत्रत्वं भवतीति कल्प्यम्। नर इति सामान्योपादानेऽपि पौनर्भवष्टोमे त्रैवर्णिकस्यैवाधिकारादन्येषा तु संस्कारमात्रेणैव पुत्रत्वमिति। पौनर्भवष्टोमसंस्कार्योर्मिलितयोः पुत्रत्वहेतुतामुपसहरति, कृते इति। पौनर्भवष्टोमे कृते ततस्तैः संस्कारैः पौनर्भवः सुतो भवतीत्यर्थः।

प्रासंगिकान् पौनर्भवधर्मानाह—'एकोद्दिष्ट पितुः कुर्यान्न श्राद्धे पार्वणादिकम्।' पौनर्भवः पुत्रः पितुः क्षयाहे एकोद्दिष्टमेव कुर्यान्न पार्वणादिकम्। 'आदि'शब्दात्पार्वणविकृतीनामपि निषेधः। 'प्रत्यब्द पार्वणेनैव विधिना क्षेत्र जौरसौ। कुर्यातामितरे कुर्युरेकोद्दिष्ट सुता दश ॥' इति जातूकर्ण्यस्मरणात्। 'पितुर्गतस्य देवत्वमौरसस्य त्रिपौरुषम्। सर्वत्रानेकगोत्राणामेकोद्दिष्ट क्षयेऽहनि ॥' इति पराशरस्मरणाच्च। पुत्रोद्देशे 'स्वयंदत्तश्च दासश्च' इत्युक्तं, तत्र दासलक्षणमाह—'क्रीता या रमिता मूल्यैः सा दासीति निगद्यते। तस्या यो जायते पुत्रो दासपुत्रस्तु स स्मृतः ॥' या सवर्णापि मूल्यैः क्रीता सती रमितोपभुक्ता सा दासीत्युच्यते पूर्वैः। 'क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते। न सा दैवे न सा पैत्र्ये दासी ता कवयो विदुः ॥' इति स्मरणात्। तस्या जातो दासपुत्रः, दास्याः पुत्रः दासपुत्रः, छान्दसः पुवद्भावः। यद्वा दासश्चासौ पुत्रश्चेति, यद्वा दासाभिधः पुत्र इति। तद्धर्मानाह—'न राज्ञो राज्यभाक् स स्याद्विप्राणा श्राद्ध-

कृत्र च। अधमः सर्वपुत्रेभ्यस्त तस्मात्परिवर्जयेत्॥' स राज्ञो राज्यभाङ् न विप्राणा श्राद्धकृच्च न स्याच्च-स्मात् सर्वपुत्रेभ्योऽधम इत्यर्थः। *दमी.५८-७१

(२) दत्तकस्तु परिणीत उत्पन्नपुत्रोऽपि च भवतीति तातचरणाः। युक्त चेद् बाधकाभावात्। यत्तु कालिका पुराणे– 'पितुर्गोत्रेणे'ति, 'चूडोपनयने'ति, 'ऊर्ध्व तु पञ्च मादि'ति श्लोकत्रय तदसगोत्रपरम्। आचूडान्तमिति आङभिव्याप्त्यर्थः, मर्यादार्थत्वे चूडोपनयनसंस्कारा इत्यनेन विरोधापत्तेः। इद तु वचो न तथा विश्रम्भणीयम्। द्वित्रिकालिकापुराणपुस्तकेष्वदर्शनात्। व्यम.५१

(३) तस्य जनकपालकयोः कुले पाञ्चपौरुष पित्रोः कुले सप्तपौरुषमेव सापिण्डयम्। 'ऊर्ध्व सप्तमात्पितृ-बन्धुभ्यो बीजिनश्चे'ति गौतमोक्तेरिति भट्टसोमेश्वरः। अत एव कुन्त्याः कुन्तिभोजस्य दत्तिमकन्यात्वेऽपि बीजिनः शूरसेनस्यापि कुले सप्तपौरुषसापिण्डयाद्वसु देवसुतासुभद्रापरिणयनमर्जुनस्यानाचार उक्तो वार्तिके शौनके च। विता.३७३

(४) पितुर्गोत्रेणेति। आचूडान्त संस्कृत इत्यन्वयः। अभिविधावाङ्। स पुत्रोऽन्यतोऽन्यस्य ब्राह्मणादेः पुत्रता न यातीति निषिध्यते। अत्र प्रतिग्रहीतुरेव जात-कर्मादिविधानाज्जातमात्रप्रतिग्रहो मुख्यः, इहाऽपि 'आ-चूडान्त' इत्युक्तेश्च। पञ्चवर्षान्त गौणः 'ऊर्ध्व तु पञ्चमाद्वर्षात्' इत्युक्तेः। गृहीत्वेति। पुत्रेष्टिसस्य दास भावापनायिका। एतच्च विप्रादेरपि, 'ऊर्ध्वन्तु पञ्चमा द्वर्षान्न दत्ताद्याः सुता नृप।' इति सामान्यतो निषेधादिति यथाश्रुतानुरोधिनः। तदसत्। उक्तकालिकापुराणस्य राज्यार्हपुत्रपरत्वात्। तस्यैव च प्रतिगृहीतृकर्तृकसंस्कार आवश्यकः।

एव हि कालिकापुराण— ('न क्षेत्रजादितनयमि'-त्यादयः एकादश श्लोकाः)। अस्यार्थः—दत्ताद्या इति। पुत्राः प्रतिग्रहीतृकर्तृकजातकर्मादिसकलसस्कारसस्कृता एव राज्यार्हाः, नाऽन्ये, सम्यक् पुत्रता राज्यार्हता-मित्यर्थात्। अन्यथा 'पुत्रमायान्ति' इत्येव ब्रूयात्, न तु सम्यगित्यपि। 'अन्यथा दास उच्यते' इत्यत्रापि अन्यथा (प्रति)ग्रहीतृकर्तृकचूडान्तसस्काराभावे दासः तद्वद्रा-ज्यभागानर्हः अन्यत्रान्यशब्दप्रयोगस्य 'मासमग्निहोत्र जुहोति' इतिवत्तद्वर्मातिदेशार्थत्वात्। एवमेव 'दासं राज्ये न योजयेत्' इत्यभिधाय दत्तकराज्याधिकारं प्रकृत्य 'अन्यथा दासतोच्यते' इत्येतस्य सगतेरिति। पौनर्भवस्तोमः सोमयागप्रभेदः, तस्य सुतसस्कारार्थत्वम्। अनाहिताग्नीना तु तादृशयागासभवेऽपि तदेवताकचरु-र्द्रष्टव्यः। ब्राह्मणादेस्तु न जन्मतः प्रतिग्रहेऽधिकारः, 'सदृश तु प्रकुर्याच्च गुणदोषविचक्षणम्। पुत्र पुत्रगुणैर्युक्त स ज्ञेयः कृत्रिमः सुतः॥' इति मनूक्त-कृत्रिमपुत्रलक्षणे गुणदोषविचक्षण प्राप्तव्यवहारं न तु बालमिति मेधातिथिविरोधात्, श्राद्धाकरणे दोषः, तत्करणे गुण इति गुणदोषावधारणकुशलमिति सर्वज्ञ-नारायणविरोधात्। सदृश तुल्य, 'इमं पुत्र करोमि' इति एकस्य पुत्रचिकीर्षावदन्यस्य 'अहमस्य पुत्रो भवामि' इति तद्बुभूषया प्रतिग्रहीतृसादृश्यवन्तम्। 'सकाम य कुर्यात्' इति बौधायनसवादात्, 'अहमस्य पुत्रो भवामि' इति मतिश्च न जातमात्रादाविति रत्ना-करविरोधाच्च। तस्मात्पञ्चाधिकवर्ष एव प्रतिग्रहार्ह इत्येके। अन्ये तु एतत्सर्वमसगोत्रदत्तकपरमित्याहुः। परे तु असगोत्रोऽपि उपनयनान्तसंस्कारोत्तरमपि परि-णीतोऽपि उत्पन्नपुत्रोऽपि च दत्तको भवति बाधका-भावात्, 'शुनःशेपो विश्वामित्रपुत्रः स्वयमेवाभवत्' इति बहवृचब्राह्मणसवादाच्च। शुनःशेपश्चोपनीतः। अनु-पनीतस्य वेदाध्ययनासभवेन वैदिकमन्त्रैः प्रजापत्यादि-स्तुतौ इन्द्रदत्तहिरण्मयरथप्रतिग्रहे च प्रवृत्त्यनुपपत्तेः। न च स स्वयदत्त इति वाच्य 'दत्ताद्यास्तनयाः' इत्यत्राद्यपदेन कृत्रिमादीनामपि ग्रहणेन भवन्मते तस्यापि निषेधात्। न च श्रुतिवशाज्जातोपनयनः स्वयं-दत्त एव स्वीकार्य इति वाच्य, तर्हि जातोपनयनस्य दत्तकस्यापि दुर्वारत्वात्, श्रुत्या दत्ताद्या इत्यस्याप्रामा-ण्योन्नयनात्, 'पितुर्गोत्रेण' इत्यादेश्च प्रायशः कालिका-पुराणादावदर्शनाच्च। अथवाऽस्तु 'दत्ताद्याः' इत्यस्य प्रामाण्यं, परन्तु 'अन्यबीजसमुद्भवाः' इति यथाश्रुतं व्यर्थं, दत्तादेरन्योत्पन्नत्वनैयत्यात्। अतस्तेनान्यकृत-गर्भाधानादिउपनयनान्तसंस्कारयुक्तत्वं बोध्यते, बीजिनः पितुरुपनयनेऽधिकारात्। अन्यकृतोपनयनान्तसंस्कारा अपि दत्ताद्यास्तनयाः संस्कृताः कृतदत्तिमादिविधानाः

* संप्र. दमीवत्।

निजगोत्रेणैव पुत्रता सम्यक् यान्ति प्राप्नुवन्ति, दत्त्रिमसंस्कारवशेन पितृगोत्रत्यागस्य मनुनोक्तेः। एव 'पितुर्गोत्रेण' इत्याद्यप्यस्तु, परन्तु 'न पुत्रः स पुत्रता याति चान्यत' इत्यस्य अन्यस्य पितृभिन्नस्य प्रतिग्रहीतुः पितृगोत्रेण पुत्रता न याति किंतु पितृगोत्र विहायैव पुत्रता यातीत्यर्थः। चूडेति। 'अन्यथा दास उच्यते' इति चतुर्थपादवशात् निजगोत्रेण प्रतिग्रहीतृगोत्रेण अन्यथा दातृगोत्रेण वा चूडादिसंस्काराः कृताश्चेत्तदा ते तनया दत्ताद्या भवन्ति, तेषामदासता दासभिन्नता उच्यते इत्यर्थः। ऊर्ध्व त्विति। एतच्च यथाश्रुतमलग्रक 'गृहीत्वा पञ्चवर्षीय' इत्यनेन विरोधात्, किन्तु न हि निन्दान्यायेन पञ्चवर्षप्रतिग्रहस्तावक, तत्र प्रथम पुत्रेष्टिः कार्या। तत्र दातृगोत्रेणोपनयनपरिणयान्तसंस्काराणा संजातत्वात् पुत्रपूतत्वार्था पुत्रेष्टिः पालकेन विहितकर्मान्तरानुष्ठानात्प्रथम कार्या इत्यर्थः। यच्च— 'अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः। स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभाक् ॥' इति वाक्य तत्प्रतिवेदमुपनयनपरमिति। केचित्तु 'दत्ताद्याः' इत्यादिपञ्चवचनानि द्व्यामुष्यायणपराणि। तथाहि—दत्ताद्या इति। अन्यबीजसमुद्भवा अपि दत्ताद्यास्तनयाः प्रतिग्रहीत्रा स्वगोत्रेण संस्कृता एव कृतजातकर्मादिसंस्कारा एव प्रतिग्रहीतुः सम्यक् पुत्रता प्राप्नुवन्तीत्यर्थः। द्व्यामुष्यायण एकगोत्रः स इति भावः। पितुर्गोत्रेणेति। आचूडान्त जनकगोत्रेण यः संस्कृतः सोऽन्यस्यैव पुत्रता न याति, किन्तु द्व्यामुष्यायणो द्विगोत्र इत्यर्थः। चूडेति। चूडान्ताः प्राक्तनाः संस्कारश्चेत् पितृगोत्रेण जातास्तदा चूडाप्रभृति निजगोत्रेण कृता एव चेत्तदा दत्ताद्यास्तनया भवन्ति द्व्यामुष्यायणा अप्येकगोत्रा इति भावः, चूडाया निजगोत्रानुष्ठानस्यैकगोत्रत्वप्रापकत्वात्। चूडाया तत्तद्गोत्रिणा प्रत्यार्षेयशिखाकरणोक्तेः। अन्यथाऽदासता दासवैलक्षण्यमात्रमुच्यते, एतस्य रिक्थग्राहित्वात्, न तु पुत्रत्वमित्यर्थः। ऊर्ध्व त्विति स्तावकं, संस्कारेभ्यः प्रथम पुत्रेष्टिः कार्येत्यर्थः। यथा च प्रतिग्रहीतृगोत्रेण चूडाकर्म समानगोत्रत्वप्रापक, तथा तद्गोत्रे एतच्छाखोक्तविधिनोपनयन तत्समानशाखीयत्वप्रापकमित्याह 'अन्यशाखोद्भवो दत्त' इतीत्याहुः। परन्तु एतेषा द्व्यामुष्यायणपरत्वेऽपि न केवलदत्तके विरोध इति शिवम्।

वस्तुतस्तु दत्तको द्विविधः केवलो द्व्यामुष्यायणश्च। तत्र सविद विना दत्त आद्यः। आवयोरसाविति संविदा दत्तोऽन्यः। तत्र दत्तकत्वस्य होमसाध्यादृष्टविशेषरूपताया उपपादितत्वात् तादृशादृष्टवशादेव प्रतिग्रहीतृकुले पुत्रपित्रादिसंबन्धविशेषप्रयुक्तानि कार्याणि भवन्ति। 'गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सुतः। गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥' इति मनुना दत्तकस्य जनकगोत्ररिक्थे निराकृत्य पुत्र ददतो जनकस्य गोत्ररिक्थे अनुगच्छतीति गोत्ररिक्थानुगः पिण्डः सापिण्डय स्वधा श्राद्धौर्ध्वदेहिकादि च व्यपैतीति गोत्रादिसत्वे श्राद्धादिसत्वं तदसत्वे च श्राद्धाद्यभाव इत्यन्वयव्यतिरेकाभ्या जनकश्राद्धादावधिकारनिराकरणात्। वस्तुतस्तु यथा 'जातपुत्रः कृष्णकेशोऽग्नीनादधीत' इत्यादौ वयोऽवस्थाविशेषः, यथा वा 'अर्धमन्तर्वेदि मिनोति, अर्ध बहिर्वेदि मिनोति' इत्यादौ सविदेशो लक्ष्यते, तद्वत् गोत्ररिक्थपिण्डस्वधाशब्दैः जनकादिसबन्धप्रयुक्तं कार्य लक्ष्यते। व्यपैतीत्यनेन च तन्निवृत्तेरभिधानात्सोदरपितृव्यादिसबन्धनिवृत्तिरपि सिध्यति। तथा च केवलदत्तकस्य प्रतिग्रहीतुरेवौर्ध्वदेहिकश्राद्धादावधिकारः। तत्पुत्रस्य पितुः सपिण्डीकरणपार्वणश्राद्धादि प्रतिग्रहीत्रैव सह कुर्यात्, एव तत्पुत्रोऽपि। उभयोः पुत्राभावे त्वनायत्या सपिण्डान्तरवत् पूर्वपितुरपि और्ध्वदेहिकादि कार्यम्। यत्तु केवलदत्तके मानाभावः तदविधानादिति, तन्न, केवलदत्तकस्य कस्यचिदपि क्वचिदपि व्यवहाराभावेऽपि प्रोक्तमनुना जनकादिसबन्धनिवृत्तेरभिधानात्, द्व्यामुष्यायणे च तदबाधादेव दुर्वारत्वात् 'ऊर्ध्वं सप्तमात् पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात्' इति गौतमकृतो बीजिकुले सप्तपुरुष विवाहनिषेधो द्व्यामुष्यायणे सापिण्डयसद्भावेन व्यर्थ इति तत्सिद्धेश्च, तस्य जनकसापिण्डयासत्वेन विवाहप्राप्तेस्तत्सार्थक्यात्। किञ्च— 'द्व्यामुष्यायणका ये स्युर्दत्तक्रीतादयः सुताः। गोत्रद्वयेऽप्यनुद्वाहः शौङ्गशैशिरयोर्यथा ॥' इति वचनेन द्व्यामुष्यायणस्य गोत्रद्वय मनुना च पितृगोत्रनिवृत्तिरिति विरोधस्य परिहारार्थं सोऽपि स्वीकार्यः। एवमेव शूरेण कुन्तिभोजाय केवलदत्त्रिमत्वेन दत्तायाः कुन्त्याः पुत्रस्यार्जुनस्य

शूरपुत्रवसुदेवदुहित्रा सुभद्रया सापिण्ड्यनिवृत्तिरुक्ता भट्टसोमेश्वरेण, सापि च केवलदत्तकास्वीकारे कथ सगच्छेदिति । अस्य च केवलदत्तकस्य पालकपितृकुले एव सप्तपौरुष, पालयितृमातृकुले एव च पञ्चपौरुष सापिण्ड्य दर्शितगौतमवचनात्, मनुना जनककुले तन्निवृत्तेरुक्तत्वाच्च । यत्तु जनकगोत्रेणोपनयनादिसस्कृतस्य जनककुले पितृतः सप्तपौरुषं मातृतश्च पञ्चपौरुष सापिण्ड्य, प्रतिग्रहीतृकुले तु त्रिपुरुष प्रतिग्रहीतरि गौणपितृत्वप्रयोजकस्योत्पादकत्वस्योपनेतृत्वस्य चाभावात्, जनकगोत्रेणासकृतस्य तु प्रतिग्रहीत्रादिभिरेव सप्तपौरुष पञ्चपौरुष च सापिण्ड्यमिति सापिण्ड्यमीमासामत, तद्ग्रन्थकार एवाग्रे दूषयिष्यति । द्व्यामुष्यायणस्य श्राद्धेऽधिकारो ग्रन्थ एव व्यक्तीभविष्यति ।

अन्ये तु दत्तको द्विविधः केवलो द्व्यामुष्यायणश्च । तत्र केवलः प्रतिग्रहीतुरेव पुत्रः सपादितप्रतिग्रहीतृगोत्रसापिण्ड्यादिः सनिवृत्तजनकगोत्रसापिण्ड्यादिः । व्याप्यपुत्रत्वविधायकवचनैरेव व्यापकगोत्रसापिण्ड्यादिसिद्धेः 'गोत्ररिक्थे जनयितुः' इति वाक्याच्च । अत्र पिण्डः सापिण्ड्य न तु श्राद्ध 'ददतः स्वधा' इत्यनेन पौनरुक्त्यापत्तेः । न च प्रतिग्रहीतृसस्कारेण तद्गोत्रादिसबन्धसिद्धावपि जनकगोत्रस्य तज्जन्यसस्कारस्य च सत्वात्कथ तन्निवृत्तिरिति वाच्य, निरुपाधिकदानादेव तन्निवृत्तेर्मनोरभिप्रेतत्वात् । अत एव तस्य प्रतिग्रहीतृगोत्रेणैव सर्वक्रियानुष्ठानं, प्रतिग्रहीतृसपिण्डा एव तज्जननादौ दशाहाद्याशौच प्रतिग्रहीतृकुल एव च तत्सपिण्डीकरणादि कुर्वन्ति । न चास्य जनकगोत्रसापिण्ड्याद्यभावे जनकसगोत्रासपिण्डाविवाहप्रसङ्ग इति वाच्य, 'असगोत्रा च या पितुः' इति निषेधात् । चकारेणासपिण्डा गृह्यते । 'ये द्व्यामुष्यायणा ये च दत्तकक्रीतकादयः । गोत्रद्वयेऽप्यनुद्वाह्याः शौङ्गशैशिरयोर्यथा ॥' इति सग्रहाच्च । न चैव तत्पुत्रस्य दत्तककन्यया विवाहः स्यादिति वाच्य, तस्याः पितृष्वसृत्वात्, 'पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि । मातुः सपत्नी भगिनीमाचार्यतनया तथा ॥ आचार्यपत्नी स्वसुता गच्छस्तु गुरुतल्पगः ॥' इति याज्ञवल्क्योक्तेः । तत्पौत्रस्य च जनकपौत्र्या विवाहो भवत्येव बाधकाभावात् ।

दत्तकानन्तरमौरसे जाते तु समरिक्थं गृह्णीयात्, 'दत्तपुत्रे यदा जाते कदाचित्स्वौरसो भवेत् । पितुर्वित्तस्य सर्वस्य भवेता समभागिनौ ॥' इति वचनात् । आवयोरयमिति सविदा दत्तस्तु द्व्यामुष्यायणः, 'एकपिण्डे द्वावनुकीर्त्येयेत् प्रतिग्रहीतारं चोत्पादयितारं च' इति वचनात् । न च सविदि मानाभावः, 'तथैवा क्षेत्रिणो बीज परक्षेत्रे प्रवापिणः । कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥ क्रियाभ्युपगमात्त्वेतद् बीजार्थं यत्प्रदीयते । तस्येह भागिनौ दृष्टौ बीजी क्षेत्री तथैव च ॥' इति मनुवाक्यस्यैव सविदि प्रमाणत्वात् । यदत्रापत्य भावि तदावयोरिति सविदा यत्क्षेत्र क्षेत्रस्वामिना बीजवापार्थं दीयते तत्रोत्पन्नस्यापत्यस्य द्वावपि पितरौ भागिनावित्यर्थात् । न चास्त्वय क्षेत्रजादौ द्व्यामुष्यायणत्वप्रयोजकोऽभिसधिः, दत्तके तु तत्सत्वे मानाभाव इति वाच्य, एकवस्तुनि लोके एवाभिसधिनोभयस्वामिकत्वसिद्धेः । न च दातुः पुत्रान्तरसत्वे संवादो व्यर्थः, एकपुत्रस्य तु, 'न त्वेवैक पुत्र दद्यात्' इति वसिष्ठेन निषेध एवेति वाच्य, प्रीत्यतिशयेनानेकपुत्रस्यैव सवादसभवात् । एव यः कृतोपनयनो दत्तः प्रतिग्रहीत्रा कृतविवाहादिः तत्र प्रतिग्रहीतृगोत्रसबन्धे जातेऽपि न जनकगोत्रसंबन्धनिवृत्तिः, 'अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः । स्वगोत्रेण स्वगृह्योक्तविधिना स स्वशाखभाक् ॥' इति वसिष्ठेनोपनयनोत्तरगृहीतस्य शाखाद्वयभागित्वोक्तेर्गोत्रद्वयभागित्वस्याप्यौचित्यात्, स्वगोत्रेणेति सहार्थतृतीयासत्वाच्च । अयमपि द्व्यामुष्यायणः । द्व्यामुष्यायणत्व हि तत्तच्छाखाद्वयगोत्रभागित्वम् । एतेन चूडाप्राक्तनसस्कारानन्तरं दत्ते प्रतिग्रहीत्रा चूडाया कृताया द्व्यामुष्यायणत्व प्रत्युक्त वसिष्ठेन शाखाद्वयभागित्वोक्तेस्तस्य जनककृतोपनयन एव भावात् । यत्तु 'दत्ताद्या अपि तनयाः' इति कालिकापुराण, तत् 'अभावे पूर्वपूर्वेषा परान् समभिषेचयेत्' इति पूर्वोपक्रमादनेकदत्तकसमवाये राज्याधिकारयोग्यतातारतम्यबोधकम् । अन्यथा 'गृहीत्वा पञ्चवर्षीय' इति कृतचूडस्यापि परिग्रहार्थकवाक्यविरोधात् । एव यः सोपाधिकदानेन दत्तः प्रतिग्रहीत्रा जातकर्मादिभिः संस्कृतः सोऽपि द्व्यामुष्यायणः, निरुपाधिकदानाभावेन स्वगोत्रनिवृत्त्यभावात् ।

एवञ्च केवलदत्तकस्य जनककुले सापिण्ड्याभावेऽपि द्व्यामुष्यायणस्य सर्वस्यापि तत्सततेश्च गोत्रद्वयेऽप्यविवाहः, गोत्रद्वयसंबन्धात्, कुलद्वयेऽपि त्रिपुरुषसापिण्ड्याच्च। द्वे श्राद्धे कुर्यात्, एकश्राद्धं वा, 'पितृनुद्दिश्य एकपिण्डे द्वावनुकीर्तयेत् प्रतिग्रहीतारं चोत्पादयितारं चातृतीयात्' इति वचनात्, 'दत्तकाना तु पुत्राणा सापिण्डयं स्यात्त्रिपूरुषम्। जनकस्य कुले तद्वद् ग्रहीतुरिति धारणा ॥' इति एतद्विषयकसंग्रहोक्तेश्च। एतन्मते शुद्धदत्तपुत्रस्य जनकगोत्रे विवाहो न कार्यः। न च 'गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः।' इत्यनेन जनकगोत्रनिवृत्तिरुक्तेवेति वाच्य, 'असपिण्डा च या मातुरसगोत्रा च या पितुः।' इति तदुद्वाहनिषेधादिति स्मृतिचन्द्रिकाप्यनुकूलैव, यत्तु इदमपेशलमेव। 'संविदा तूभयोः' इति द्व्यामुष्यायणदत्तकोऽपि गौतमादिसंमतः तत्र जनकगोत्रानिवृत्तेर्गोत्र द्वयेऽप्यविवाहः, न च केवलदत्तकपुत्रस्य, 'असपिण्डा च या मातुरसगोत्रा च या पितुः।' इति मनूक्तेः। तथा वरस्य पितुर्मातुर्वाऽसपिण्डा असगोत्रा चेति न तदर्थः, मातृपितृद्वारकसापिण्ड्यशून्या वरस्यासगोत्रा चेति 'असमानार्षगोत्रजाम्' इति याज्ञवल्क्यैकवाक्यत्वात् एकमूलकल्पनालाघवात्। तथा च केवलदत्तकस्य जनकगोत्रेण विवाहे बाधकाभाव इति, तदशुद्धतरं, मनुना 'असगोत्रा च याऽऽत्मनः' इति विहाय 'असगोत्रा च या पितुः' इत्यभिधानविरोधात्, असपिण्डा च या मातुः पितुश्च वरस्यासगोत्रेत्यन्वयासंभवाच्च। 'अभोज्या च महाश्वस्य अभेद्या च द्विपस्य च।' इत्यादौ अश्वगजयोरभोज्या बालस्याभेद्या चेत्यन्वये सिद्धान्तविरोधादित्याहुः।

अय तु विशेषः, एतन्मते पूर्वसिद्धान्तसवादः प्रायशोऽस्त्येव। परन्तु शुद्धदत्तकस्योभयकुले सप्तपौरुषं सापिण्ड्यमिति कौस्तुभकृता ग्रन्थकृता च स्वरसः। शङ्करभट्टप्रभृतीना तु ग्रहीतुः कुले सप्तपौरुष सापिण्ड्यं जनककुले च तदभावेऽपि सप्तपौरुष अविवाह इति विशेषः। प्राञ्चस्तु भट्टसोमेश्वरादिभिरनेकैर्दत्रिमा पुत्री मन्यते। अङ्गराजाय लोमपादाय दशरथेन शान्ता नाम्नी कन्या दत्ता। 'अय राजा दशरथः सखा मे दयितः सुहृत्। अपत्यार्थे ममानेन दत्तेयं वरवर्णिनी ॥ याचमानस्य मे ब्रह्मन् शान्ता प्रियतरा मम। सोऽयं ते श्वशुरो वीर यथैवाह तथा नृपः॥' इत्यादि रामायणे ऋष्यशृङ्गं प्रति लोमपादवाक्यात्। क्रीता च स्कान्दे—'आत्मीकृत्य सुवर्णेन परकीया तु कन्यकाम्। धर्म्येण विधिना दानमसगोत्रेऽपि युज्यते॥' कृत्रिमा च हरिवशे—'पृथा दुहितरं चक्रे कुन्तिस्ता पाण्डुरावहत्।' इति। अत्र वसुदेवभगिनीं पृथा कुन्तिर्दुहितरं चक्रे इति चक्रेपदोक्तेः तस्याः कृत्रिमत्वम्। अपविद्धा चादिपर्वणि शकुन्तलोपाख्याने—'जनयामास स मुनिर्मेनकाया शकुन्तलाम्। प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम् ॥ जातमुत्सृज्य तं गर्भ मेनका मालिनीमनु। कृतकार्या ततस्तूर्णमगच्छच्छक्रसंसदम् ॥' इत्याद्युक्त्वा—'उपस्पृश्य गतश्चाहमपश्य शवितामिमाम्। निर्जने विपिने रम्ये शकुन्तेः परिवारिताम्। आनयित्वा ततश्चैना दुहितृत्वे न्यवेशयम्॥' इत्यभिधानादित्याहुः। ग्रन्थकृतोऽप्येतत्सर्वं संमतमेव। अत्र 'स ज्ञेयो दत्रिमः सुतः' इत्यत्र सुतपदोपादानात्कन्या न दत्रिमा भवितुमर्हति। न च तत्र सुतशब्दस्य नपुसकेतरापत्यमर्थः लक्षणापत्तेः। नापि कन्यायास्तथात्व वदता मतेऽपि पत्नीतः प्राक् पिण्डदानरिक्थादानयोरधिकारः। तस्मादोपाख्यानिकरीत्यनुरोधेन कन्यासु विधिप्रवृत्त्यङ्गीकारे मानाभावः। उपाख्यानोक्तास्वेव कन्यासु शौनकवसिष्ठाद्यन्यतरोक्तविधिर्जात इत्यत्रापि मानाभावादिति भट्टानामभिप्रायः। कृभ.८८९–८९९

मत्स्यपुराणम्

सापिण्डयम्

[1]लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्डयं सप्तपौरुषम् ॥

आदिपुराणम्

(कलिवर्ज्यप्रकरणम्)

कलौ दत्तौरसेतरपुत्रनिषेधः

दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः× ॥

× व्याख्यान स्थलादिनिर्देशश्च अस्मिन्नेव वचने शौनके (पृ.१३७१) द्रष्टव्यः।

(१) उ.२।१४।२ पिण्डदः सप्तमस्ते (सप्तमः पिण्डदस्ते) पौरु (पूरु), दमी.९८; दच.२६.

[1]कन्यानामसवर्णानां विवाहश्च द्विजन्मभिः ॥
[2]विधवायां प्रजोत्पत्तौ देवरस्य नियोजनम् ।
बालिकाक्षतयोन्याश्च वरेणान्येन संस्कृतिः ॥
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः ॥
ऊढायाः पुनरुद्वाहो ज्येष्ठांशो गोवधस्तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥

प्रवराध्यायः

द्व्यामुष्यायणः

[3]द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः ।
गोत्रद्वयेऽप्यनुद्वाहः शौङ्गशैशिरयोर्यथा ॥
[4]पितृव्येण चैककार्यजातास्ते परिग्रहीतुरेव भवन्ति । अथ यद्येषां भार्यास्वपत्यं न स्यात् तदा रिक्थं हरेयुः । पिण्डं तेभ्यः त्रैपुरुषिकं दद्युः, यद्यपि स्यादुभाभ्यामेव दद्युः ।

संग्रहकारः (स्मृतिसंग्रहः)

सोदरभ्रातृणा सपत्नीनां च एकस्य एकस्या वा पुत्रेण पुत्रवत्त्वम् ।

दत्तकः । काण्डपृष्ठः । दत्तकसापिण्ड्यविचारः ।

*[5]यद्येकजाता बहवो भ्रातरस्तु सहोदराः ।
एकस्यापि सुते जाते सर्वे ते पुत्रिणः स्मृताः ॥

* स्मृच.व्याख्यान 'भ्रातृणामेकजातानां' इति मनुवचने (पृ.१२९०) द्रष्टव्यम् ।

(१) **स्मृच.**२८९; **विता.**३५५ (द्विजानामसवर्णासु कन्यासूपयमस्तथा); **समु.**१३९ संग्रहकारः.

(२) **समु.**१३९.

(३) **बाल.**२।१३२ (पृ.१८०), **समु.**१३९ कर्माणि (सर्वाणि) संग्रहकार..

(४) **स्मृच.**२६६ हो (ह) शो (श) धस्त (ध त); **रत्न** १४० शो (श); **व्यप्र.**४४२ जाया (जाया) लुप् (लुः), **व्यउ.**१४४; **विता.**३०३ स्मृचवत्, **राकौ.**४४७ स्मृचवत्; **बाल.**२।११७ स्मृचवत्, माधवीये ब्रह्मपुराणम्, **समु.**१२९ स्मृचवत्, पुराणम्.

(५) **दमी.**११ शौ (शु); **संप्र.**२०६ शौ (शु) प्रयोगपारिजाते स्मृत्यन्तरम्; **व्यम.**५२; **कुभ.**८९४ दत्तकक्रीतकादयः दत्तक्रीतादयः सुता) प्रयोगपारिजाते स्मृत्यन्तरम्; **दच.**२१ शौ (शु).

(६) **स्मृच.**२८९.

(७) **दच.**२३ : ३८ (यद्येषा भार्या...हरेयुः) एतावदेव.

वह्वीनामेकपत्नीनामेष एव विधिः स्मृतः ।
एका चेत्पुत्रिणी तासां पिण्डदस्तु स इष्यते ॥
[1]वंशजानामभावे तु प्रशस्ता मातृवंशजाः ।
तदभावे सुतो दत्तो विहितो विधिनेतरः ॥
[2]साश्रमं नैव दद्यात्तु दद्यादापद्यनाश्रमम् ।
आपद्यपि च दद्यात्तं द्वितीयं ब्रह्मचारिणम् ॥
गोत्रान्तरप्रविष्टास्तु संस्कार्यास्तत्कुलेन तु ।
जननेनैव पितरो दानेनैव निवर्तिताः ॥
पुत्रं संस्कृत्य ..वयोवस्थान्वितं पिता ।
नामगोत्रादि तत्सर्वं कुर्यादौरसवत्तदा ॥
स्वकुलं पृष्ठतः कृत्वा यो वै परकुलं व्रजेत् ।
तेन दुश्चरितेनासौ काण्डपृष्ठ इति स्मृतः ॥
दत्तकानां तु पुत्राणां सापिण्ड्यं स्यात्त्रिपौरुषम्
जनकस्य कुले तद्वत् ग्रहीतुरिति धारणा ॥

बौधायनगृह्यशेषसूत्रम्

पुत्रप्रतिग्रहकल्पः

[3]अथातः पुत्रप्रतिग्रहकल्पं व्याख्यास्यामः—शोणितशुक्रसंभवो मातापितृनिमित्तकस्तस्य प्रदानपरित्यागविक्रयेषु मातापितरौ कर्तारौ भवतः न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि संतानाय पूर्वेषाम् । न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्तुः । पुत्रं प्रतिग्रहीष्यन्नुपकल्पयते—द्वे वाससी द्वे कुण्डले अङ्गुलीयकं चाचार्यं च वेदपारगं कुशमयं बर्हिः पर्णमयमिध्ममिति ।

अथ बन्धूनां मध्ये राजनि चावेद्य परिषदि वाऽगारमध्ये ब्राह्मणानन्नेन परिविष्य 'पुण्याहं स्वस्त्यृद्धिम्' इति वाचयित्वाऽथ देवयजनोल्लेखनप्रभृत्या प्रणीताभ्यः कृत्वा दातुः समीपं गत्वा 'पुत्रं मे देहि' इति भिक्षेत । 'ददामि' इतीतर आह । तं पुत्रं प्रतिगृह्णाति—'धर्माय त्वा गृह्णामि संतत्यै त्वा गृह्णामि' इति ।

(१) **समु.**९५. (२) **समु.**९६.

(३) **दमी.**९८, **कुभ.**८९७ पौ (पृ); **दच.**२६.

(४) **बौगृ.**२।६।१-१० (पृ.२२७—२२८); **दमी.** ७८-७९; **कुभ.**८६४, **दच.**१३; **संर.**७६८.

अथैनं वस्त्रकुण्डलाभ्यामङ्गुलीयकेन चालङ्कृत्य परिधानप्रभृत्या अग्निमुखात्कृत्वा पकाज्जुहोति—'यस्त्वा हृदा कीरिणा मन्यमानः' इति पुरोनुवाक्यामनूच्य 'यस्मै त्वं सुकृते जातवेदः' इति याज्यया जुहोति। अथ व्याहृतिभिर्हुत्वा स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानात्। अथ दक्षिणां ददात्येते एव वाससी एते एव कुण्डले एतच्चाङ्गुलीयकम्। यद्येवं कृते औरसः पुत्र उत्पद्यते तुरीयभागेष भवतीति ह स्माह भगवान् बौधायनः।

---

*दायानर्हाः

वेदाः

स्त्रियो दायानर्हाः

पत्नीवतो गृह्यते सुवर्गस्य लोकस्य प्रज्ञात्यै स सोमो नातिष्ठत स्त्रीभ्यो गृह्यमाणस्तं घृतं वज्रं कृत्वाऽन्नन्तं निरिन्द्रियं भूतमगृह्णन्तस्मात्स्त्रियो निरिन्द्रिया अदायादीरपि पापात्पुंस उपस्तितरं वदन्ति।

नातिष्ठत स्त्रीदेवताकत्वमसहमानः स्वात्मान न प्रकाशितवान्। अन्नन्नताऽयन्। निरिन्द्रियं भूतं निर्वीर्यं जातम्। यस्मात्स्त्रीदेवताभ्यो गृह्यमाणः सोमो निःसामर्थ्यस्तस्माल्लोके स्त्रियः सामर्थ्यरहिता अपत्येषु दायभाजो न भवन्ति। पापात्पतितादपि पुंसोऽप्युपस्तितरं क्षीणतरं स्त्रीस्वरूपं वदन्ति। तैसा.१।४।२७।१

शूद्रा आर्यदासी धनानर्हा

शूद्रा यदर्यजारा न पोषाय धनायति।

यद्यदा शूद्रा कदाचिदासी कदाचिदर्यः स्वकीयः स्वामी जारो यस्याः सेयमर्यजारा भवति, तदानीं सा दासी स्वामिस्वीकारमात्रेणात्यन्त हृष्यति, न तु स्वकीयकुटुम्बपोषाय धनायति धनमात्मन इच्छति। न हि स्वामिस्वीकाराद्धनमधिकं मन्यते। तैसा.

* शूद्रापुत्रस्य दायानर्हत्वविचारः असवर्णपुत्रविभागे पुत्रप्रकारप्रकरणे च द्रष्टव्यः।

(१) तैसं.६।५।८।२.

(२) तैस.७।४।१९।३; कासं.४।८; मैसं.३।१३।१; शुमा.२३।३०; तैब्रा.३।९।७।३; शब्रा.१३।२।९।८; शाश्रौ.१६।४।४.

प्रजायां अशार्हानर्हभेदः

भगिनीर्वा अन्याः प्रजा अभागा अन्याः।

यत्स्थालीः रिञ्चन्ति न दारुमयं तस्मात्पुमान्दायादः स्त्र्यदायादथ यत्स्थालीं परास्यन्ति न दारुमयं तस्मात्स्त्रियं जातां परास्यन्ति न पुमाꣳसमथ स्त्रिय एवातिरिच्यन्ते।

पत्नी दायानर्हा

एतेन वै देवा वज्रेणाज्येनान्नन्नेव पत्नीर्निरक्षणुवंस्ता हता निरष्टा नात्मनश्चनैशत न दायस्य चनैशत तथोऽएवैष एतेन वज्रेणाज्येन हन्त्येव पत्नीर्निरक्षणोति ता हता निरष्टा नात्मनश्चनेशते न दायस्य चनेशते।

दुहितृणां स्त्रीणां च दायानर्हत्वम्

अविशेषेण पुत्राणां दायो भवति धर्मतः। मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत्॥ न दुहितर इत्येके। तस्मात् पुमान् दायादोऽदायादा स्त्रीति विज्ञायते। तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसमिति च स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते न पुंसः *।

गौतमः

शूद्रापुत्र. प्रतिलोमश्च जीवनमात्र लभते न पूर्णदायम्

शूद्रापुत्रोऽप्यनपत्यस्य शुश्रूषुश्चेत् लभेत वृत्ति-

*पूर्वोत्तरसदर्भः व्याख्यान च (पृ १२५५) इत्यत्र द्रष्टव्यम्।

(१) मैसं.२।५।१. (२) मैसं.४।६।४.

(३) शब्रा.४।४।२।१३. (४) नि.३।४.

(५) गौध.२८।४०; मेधा.९।१५३ (शूद्रा...चेत्०) भेत

मूलमन्तेवासिविधिना ।

(१) ब्राह्मणस्येति वर्तते । अनपत्यस्याविद्यमानद्विजातिपुत्रस्य ब्राह्मणस्य शूद्रापुत्रोऽपि वृत्तिमूल लभेत । यावता कुष्यादिकर्मसमर्थो भवति तावल्लभेत स यत्यन्तेवासिविधिना शुश्रूषुर्भवति यथा शिष्य आचार्य शुश्रूषते तथा शुश्रूषुश्चेदिति । एव क्षत्रियवैश्ययोरपि शूद्रापुत्रो वृत्तिमूल लभेत । गौमि.

(२) चतुर्थभागे तदपत्ये वृत्तीत्यादि कुतः ? क्षतयोन्या ग्रहणादिति चेत् गर्हार्थापिशब्दहेतोरस्याशभाकत्व च । *मभा.

(३) अनूढशूद्रापुत्रोऽपि वर्णत्रयस्य अविद्यमानान्यद्विजातिपुत्रस्य वृत्तिमूल कृष्यादिरूप जीवनमूल किंचिल्लभेत । विर.५३६

शूद्रापुत्रवत्प्रतिलोमासु ।

(१) प्रातिलोम्येन जाताना सूतादीनामपि गुणोत्कृष्टाना शूद्रापुत्रवद् वृत्तिमूलं दातव्यमिति । +गौमि.

(२) प्रतिलोमासु स्त्रीषु जातानामपि शुश्रूषूणा शूद्रापुत्रवद् वृत्तिमूलं दातव्यमित्यर्थः । तत्र चण्डालादीना शुश्रूषाऽसंभवात् हीनतरं देयमिति द्रष्टव्यम् । एवं प्रतिलोमानामप्ययमेव धर्म इति द्रष्टव्यम् । मभा.

(३) भागानर्हा इति । स्मृसा.५९

(४) प्रतिलोमासु उत्कृष्टवर्णस्त्रीषु हीनवर्णोत्पादितः अपरिणीतशूद्रापुत्रवत् वृत्तिमूलमात्रभाग् इत्यर्थः । रत्न.१४२

(५) शूद्रादिना वैश्यादिषु स्त्रीषु जनितः शूद्रापुत्रवत् जीविकामूल हलफालादि किंचिल्लभत इत्यर्थः । विचि.२२७

अन्यायवृत्तः सवर्णापुत्रोऽपि दायानर्हः

सवर्णापुत्रोऽप्यन्यायवृत्तो न लभेत एकेषाम् ।

(१) यस्त्वन्याय्यवृत्तोऽधर्मेण द्रव्याणि प्रतिपादयति वेश्यादिभ्यः प्रयच्छति, सवर्णापुत्रोऽप्यपिशब्दाज्ज्येष्ठोऽपि दायं न लभेतेत्येकेषा मतम् । तथा चाऽऽपस्तम्बः— 'यस्त्वधर्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोऽपि तमभाग कुर्वीते'ति । गौमि.

(२) लभेतेत्याचार्यः । शक्यविनेयत्वापेक्षया विकल्पः । *मभा.

जडक्लीबादयो दायानर्हा भर्तव्याः

जडक्लीबौ भर्तव्यौ ।

(१) जडो नष्टचित्तः, क्लीबस्तृतीयाप्रकृतिः । एतावशनाच्छादनदानेन भर्तव्यौ । गौमि.

(२) मूकादीनामप्युपलक्षणमिदम् । मभा.

जडादीनामपत्यानि दायार्हाणि

अपत्यं जडस्य भागार्हम् ।

(१) यदि तु जडस्यापत्यं भवति तदा तद्भागार्हं भवति तस्मै स भागो देयस्त्वितुः । गौमि.

(२) अर्हग्रहणाद्यदि योग्य भवति, न तु जडापत्यतयैव । जडापत्यमिति वक्तव्ये विसमासः क्लीबादीना क्षेत्रजापत्यप्रापणार्थः । तथाह मनुः— यद्यर्थितेति । अस्मादेव लिङ्गात्तेषा यथासभव संस्कारानुमानं, अन्यथा सावित्रीपतितत्वे सति तदपत्यस्यात्ययोग्यत्वमेवेति । कृतप्रायश्चित्तस्य वा द्रष्टव्यम् । एवं च यत्पूर्वमपि पतितस्याप्यनुज्ञात तदपि कृतप्रायश्चित्तस्य द्रष्टव्यम् । एवं ब्रुवन्नेतत् ज्ञापयति— विभागोत्तरकालमपि तदपत्यस्य भागो दातव्य इति । मभा.

---

* वाक्यार्थो गौमिवत् ।

+ विर. गौमिगत मभागत च ।

वृ (भते तद्वृ): शूद्रा....भेत (अपरिगृहीतास्वपि शुश्रूषा चेल्लभते), **व्यक.**१४४:१५२ भेत (भते); **मभा.**; **गौमि.**२८।३७; **विर.**५३६; **रत्न.**१४२; **व्यम.**४५ भेत (भते) (अन्तेवासिविधिना०); **विता.**३२७ व्यमवत्; **समु.**१३० (अन्तेवासिविधिना०).

(१) **गौध.**२८।४६; **व्यक.**१४४,१५२; **मभा.**; **गौमि.** २८।४३ सु (स्तु); **विर.**४९१,५३७; **स्मृसा.**५९ गौमिवत्; **रत्न.**१४२; **विचि.**२२७; **व्यनि.**; **व्यम.**४५; **विता.**३२७ गौमिवत्; **समु.**१३०.

* शेष गौमिगतम् ।

(१) **गौध.**२८।४१; **मिता.**२।५१ त्तो न (त्तिनै); **अप.** २।५१ त्तो (त्तौ): २।११६ त ए (तेये); **व्यक.**१४३; **मभा.**; **गौमि.**२८।३८ न्याय (न्याय्य); **विर.**४८६ वृ (प्रवृ); **स्मृसा.**५८ (एकेषाम्०); **पमा.**२७३; **व्यनि.**; **व्यप्र.**२६८; **विता.**५१७ मितावत्; **समु.**१३१.

(२) **गौध.**२८।४४; **व्यक.**१४४; **मभा.**; **गौमि.** २८।४१; **विर.**४९१ वौ + (वु); **व्यनि.**; **समु.**१३१.

(३) **गौध.**२८।४५; **व्यक.**१४४; **मभा.**; **गौमि.** २८।४२; **विर.**४९१; **व्यनि.**; **समु.**१३१.

देवरातिरिक्तजोऽनियोगजो दायानर्हः

[1]**देवरवत्यामन्यजातमभागम् +।**

देवरे विद्यमाने यद्यन्यतो बीज लिप्सेत । ततस्तस्या जातमपत्यमभाग भागरहितं न तस्य धनग्रहणमस्ति । असति तु देवरेऽन्यतो जातमप्यपत्य सभागमेव ।

गौमि.

[2]**क्षेत्रियः पारदारिको न विभागमर्हति ।**

[3]**क्लीणां दायविभागो नास्ति निरिन्द्रियत्वात् ।**

हारीतः

व्यभिचारिणी भर्तव्या

भार्याया व्यभिचारिण्याः परित्यागो न विद्यते । दद्यात्पिण्डं कुचेलं च अधःशय्यां च शाययेत्*॥

आपस्तम्बः

क्लीबोन्मत्तपतिताः दायानर्हाः

जीवन्पुत्रेभ्यो दायं विभजेत् समं क्लीबमुन्मत्तं पतितं च परिहाप्य ×।

अधर्मविनियोगिनः पुत्रा दायानर्हाः

[4]**सर्वे हि धर्मयुक्ता भागिनः । यस्त्वधर्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोऽपि तमभागं कुर्वीत ।**

(१) सम्प्रति विभागानधिकारिणः कथ्यन्ते तत्पर्युदासेनाधिकारिज्ञापनार्थम् । तत्र आपस्तम्बः— सर्वे हीति । इद बालेनाकुलीकृत्य पठित 'यस्तु धर्मेण द्रव्याणि प्रातिपादयति ज्येष्ठस्तं पितृसमभाग कुर्वीते'ति । तदनाकरम् । दा.१००

(२) अधर्मेण द्यूतादिना, द्रव्याणि सुवर्णगोवस्त्रादीनि, प्रतिपादयति विनाशयति अन्यत्र नयति वा । अप.२।११६

(३) हिशब्दो हेतौ । यस्मादेवाऽनुवादौ न कस्यचिद्विधायकौ तस्माद्ये धर्मयुक्ताः पुत्राः सर्वे एते भागिनः । यस्तु ज्येष्ठोऽप्यधर्मेण द्रव्याणि प्रतिपादयति विनियुङ्क्ते तमभाग कुर्वीत जीवद्विभागे पिता भागं न दद्यात् । ऊर्ध्वं विभागे पितुर्भ्रातरः । अपिशब्दात् किमुतान्यमिति ज्येष्ठस्य प्राधान्य ख्याप्यते । उ.

(४) अधर्मेण द्यूतादिना, एतच्चाश्रमविरोधिव्ययाभिप्रायम् । अभाग व्ययिताशभागहीन, भागहीनमिति केचित् । विर.४८६

बौधायनः

अप्राप्तव्यवहाराः, अन्धादयः, अकर्मिणश्च दायानर्हा भर्तव्याः । मातृभिन्नाः पतिता न भर्तव्याः ।

[5]**अतीतव्यवहारान् प्रासाच्छादनैर्बिभृयुः । अन्धजडक्लीबव्यसनिव्याधितादींश्च । अकर्मिणः । पतिततज्जातवर्जम् ।**

(१) अकर्म कृष्यादिक जीविकात्मक येषा न विद्यते त इति । अप.२।१४०

(२) अतीतव्यवहारा मूकादयः । अकर्मिणो धर्मार्थवृद्ध्यर्थकर्मसु अक्षमाः । स्मृच.२७२

(३) अतीतव्यवहारानप्राप्तव्यवहारान् । (अधर्मकर्मणा यागादिष्वनधिकारिण इति ।) विर.४९०

(४) आश्रमान्तरगताश्च न भरणीयाः । रत्न.१५१

(५) पतितः प्रायश्चित्तानिच्छुः क्लीबश्चाचिकित्स्यरोगः । व्यउ.१४९

+ मभा. यथाश्रुत व्याख्यानम् ।

* व्याख्यान स्थलादिनिर्देशश्च (पृ.१०१६) इत्यत्र द्रष्टव्यः ।

× व्याख्यासंग्रहः स्थलादिनिर्देशश्च (पृ.११६४) इत्यत्र द्रष्टव्यः ।

(१) **गौध.**२८।२४; **व्यक.**१५९; **मभा.**; **गौमि.** २८।२१; **विर.**५८७; **स्मृसा.**७०.

(२) **व्यक.**१५८; **विर.**५८०. (३) **सवि.**३६३.

(४) **आध.**२।१४।१४,१५; **हिध.**२।७ हि (ऽपि) यति (येत्); **दा.**१०० गिनः +(द्रव्यमर्हन्ति); **अप.**२।११६ यु (संयु); **व्यक.**१४३; **गौमि.**२८।३८ (सर्वे...गिनः०); **स्मृच.** २६४ (यस्त्व...र्वीत०); **विर.**४८६ (हि०) र्वीत (र्यात्); **स्मृसा.**५८ गौमिवत्; **व्यनि.** हि (ऽपि); **दात.**१७२ दावत्; **चन्द्र.**७६ (सर्वे...गिनः०) (ज्येष्ठोऽपि०) र्वीत (र्युः); **सेतु.** ६३ गिनः +(भवन्ति) व्याणि (व्य); **समु.**१३१; **विच.**८० दावत्.

( ) एतच्चिह्नाङ्कितो ग्रन्थः टिप्पण्यां द्रष्टव्यः ।

(१) **बौध.**२।२।४३-४६; **दा.**१०२; **अप.**२।१४०; **स्मृच.**२७२; **विर.**४९० तादीश्च (तांश्च); **पमा.**५४५ (पतिततज्जवर्ज्यं बिभृयुः); **रत्न.**१५१ तादींश्च (तांश्च) तज्जात (तज्ज); **व्यउ.**१४९'अन्ध...र्मिणः' अयमशो गलित इति भाति; **व्यम.** ७४ रत्नवत् ; **विता.**४३६ (अतीतव्यवहारान् बिभृयुः पतिततज्जवर्जम्) एतावदेव; **बाल.**२।१४०; **समु.**१३१; **विच.**८१.

(६) सन्यासच्युततत्पुत्रावपि न भरणीयाविति मदनादयः । व्यम.७४

(७) कन्या तु पतितजापि भर्तव्या । विता.४३६

(८) बिभृयादित्यनुवर्तते । अन्धः प्रसिद्धः । अकिञ्चित्करो जडः । क्लीबः षण्ढनामा तृतीयाप्रकृतिः । व्यसनी द्यूतादिषु प्रसक्तमनाः । अचिकित्स्यरोगी व्याधितः । आदिग्रहणात्परत्र पङ्गुकुब्जादयो गृह्यन्ते । अकर्मणः समर्था अपि सन्तो निरुत्साहाः । पतितस्तत्सुतश्च पतिततज्जातौ । तथा च वसिष्ठः—'पतितोत्पन्नः पतितो भवतीत्याहुरन्यत्र स्त्रियाः' इति । बौवि.

न पतितैः संव्यवहारो विद्यते ।

औरसैरप्राप्तव्यवहारैरपि । भरण तु तेषा कर्तव्यमित्युक्तम् । बौवि.

पतितामपि तु मातरं बिभृयादनभिभाषमाणः ।

यद्यपि माता भाषेत च । तथा च गौतमः— 'न कर्हिचिन्मातापित्रोरवृत्तिः' इति (गौध.२१।१५) । अवृत्तिरशुश्रूषा अरक्षण वा । बौवि.

स्त्री स्वातन्त्र्य दाय च नार्हति

न स्त्रीस्वातन्त्र्यं विद्यते ।

दायलब्धे तु तस्याः स्वातन्त्र्य भवेत् । कृतकृत्यताभिमानेनेत्यभिप्रायः । बौवि.

अथाऽप्युदाहरन्ति—

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हतीति ॥

तस्या तस्यामवस्थायामरक्षतामेतेषा दोषः । बौवि.

न दायं, निरिन्द्रिया ह्यदायाश्च स्त्रियो मता इति श्रुतिः *।

(१) न दायमर्हति स्त्रीत्यन्वयः, पत्न्यादीना त्वधिकारो विशेषवचनादविरुद्धः । ×दा.२०९

(२) हिशब्दोऽत्र यस्मादर्थे । एव चायमर्थः । यस्मान्निरिन्द्रिया व्याध्यादिनाऽपगतेन्द्रियाः स्त्रियश्च अदाया मता इति श्रुतिः तस्मान्न स्त्री दायं विभक्तव्यान्यद्वारागत द्रव्यमर्हतीति । निरिन्द्रिया ह्यदायाश्च स्त्रियो मता इत्यनेन । तस्मात्स्त्रियो निरिन्द्रिया अदाया इति तैत्तिरीयकश्रुतिरर्थतः प्रदर्शितेति मन्तव्यम् । यद्यदायाः स्त्रियः कथ तर्हि याज्ञवल्क्येनोक्तं 'पितुरूर्ध्वं विभजता माताप्यश समं हरेत्' इति । कथ च व्यासेन 'असुतास्तु पितुः पत्न्याः समाशाः परिकीर्तिताः । पितामह्यश्च सर्वास्ता मातृतुल्याः प्रकीर्तिताः ॥' इति । कथ विष्णुना 'मातरः पुत्रभागानुसारिभागहारिण्यः । अनूढाश्च दुहितरः' इति । न हि स्त्रीणा दायानर्हत्वे मात्रादीना दुहित्रन्तानां अंशहारित्वोक्तिः प्रयुज्यते । बाढ युज्यते । दायानर्हाणा हि दायहरत्वोक्तिर्विरुध्यते । न पुनरंशहरत्वोक्तिः । अंशशब्दो हि भागवचनो न दायवचनः । 'गणद्रव्यादावप्यशो देय' इति प्रयोगदर्शनात् । तेन मात्रादीना दायद्रव्याभावेनाविभागेऽपि विभाज्यराशौ स्वाम्यस्य पत्न्यधिकरणसिद्धस्य विद्यमानत्वात् । तत्र यावदर्थमर्थग्रहण स्वकीयस्वाम्यव्यवस्थापकं मात्रादिभिरंशतः कार्यमिति याज्ञवल्क्यादिभिरुक्तमिति मन्तव्यम् । स्मृच. २६७

(३) विद्यारण्यश्रीचरणोक्तप्रालिखित— 'तस्मान्निरिन्द्रिया' इत्यादिश्रुतिव्याख्याने तु, स्त्रीणा दायग्रहणप्रतिषेधकत्वमेवास्याः श्रुतेर्नास्तीति न वा शका न चोत्तरम् । पर तु बौधायनमुनिवचनविरोधे तद्व्याख्यान कथमुपपद्यताम् । अस्तु वा इन्द्रियपदस्य वाक्यशेषात्सोमपरता तथापि दायादत्वाभावाभिधानावलम्बनस्यान्यस्यासत्त्वान्निरालम्बनश्रुतेश्चासंभवात्सिद्धवत्कीर्तनानुपपत्तिप्रसूतप्रतिषेधकल्पनावश्यम्भावात् । तस्माद्वर्भेणावज्ञातेन हतेन ब्रह्महेत्यत्रेवेति ध्येयम् । *व्यप्र.५२९-५३०

---

* अप. व्याख्यान 'असस्कृतास्तु संस्कार्या' इति याज्ञवल्क्यवचने द्रष्टव्यम् ।

(१) बौध.२।२।४७. (२) बौध.२।२।४८.
(३) बौध.२।२।५०. (४) बौध २।२।५२.
(५) बौध २।२।५३ (न दाय०); दा.२०९ ह्य (श); अप २।१२४ या ह्यदायाश्च (याणां ता ह्यदाया.); स्मृच.२६७, विर.४९५ ह्यदायाश्च (अदाया हि); स्मृसा.६०; चन्द्र.७७ (इति श्रुतिः०) शेष विरवत्; वीमि.२।१३६ (निरिन्द्रियाया अदायः स्त्रियः) एतावदेव; व्यप्र.५२९ दावत्; विता.३३४ (च स्त्रियो मताः०); समु.१२९.

× विर. दागतम् ।

* विद्यारण्यव्याख्यानं 'पत्नी दुहितरश्चैव' इति याज्ञवल्क्यवचने द्रष्टव्यम् ।

(४) 'न स्त्री स्वातन्त्र्यमर्हति' इत्यनेन सिद्धो दायप्रतिषेधः पुनरनूद्यते निन्दाशेषतया । निरिन्द्रियाः निर्गतरसाः । तदेतदवश्यागन्तव्यानृततापप्रदर्शनार्थम् । बौवि.

वसिष्ठः

मुन्याश्रमगताः क्लीबोन्मत्तपतितादयश्च दायानर्हाः । पतितमुन्याश्रमातिरिक्ता भर्तव्याः ।

अनंशास्त्वाश्रमान्तरगताः । क्लीबोन्मत्तपतिताश्च । भरणं क्लीबोन्मत्तानाम् *।

(१) गृहस्थाश्रमापेक्षया आश्रमान्तरत्वम् । अप.२।१४०

(२) न चैवमुपकुर्वाणस्य ब्रह्मचारिविशेषस्याप्यशशून्यत्वमिति वाच्यम् । गृहस्थाश्रमानर्हकार्याश्रमान्तरस्यात्र विवक्षितत्वात् । स्मृच.२७०

अत्र विशेषग्रहणं विशेषप्रतिषेधार्थमिति न्यायेन पतिताश्रमान्तरगतविषयस्य भरणस्य प्रतिषेधो गम्यते । आश्रमान्तरगतिमन्तरेण प्रव्रज्यावसितत्वाभावात् प्रव्रज्यावसितभरणस्यापि प्रतिषेधोऽत्रावगम्यते । एव च पतिततज्ञाताश्रमान्तरगतप्रव्रज्यावसितवर्ज्यानां निरंशकाना भरणमावश्यकमिति मन्तव्यम् । ×स्मृच.२७२

(३) आश्रमान्तराणि नैष्ठिकब्रह्मचारिवानप्रस्थभिक्षूणामाश्रमाः । मपा.६८२

* पमा. व्याख्यान 'वानप्रस्थयति' इति याज्ञवल्क्यवचने द्रष्टव्यम् ।

× व्यम. स्मृचगतम् ।

(१) **वस्मृ.**१७।४६-४८ (ख) अनशास्त्वा (अन्येषां त्वा) न्मत्तानाम् (न्मत्तान्यम्), **मिता.**२।१३७, २।१४० (क्लीबो . नाम्०); **अप.**२।५१ (भरण...नाम्०): २।१४० मितावत्; **मभा.**२८।१,२८।४१ (भरण ..नाम्०), **स्मृच.**२७० मितावत् : २७२; **विर.**४९१ स्त्वा (श्वा) शेष मितावत्, **स्मृसा.** १३८ मितावत् ; **पमा.**५४३ मितावत् : ५४५; **मपा.**६८२ मितावत्; **रत्न.**१५१ मितावत्; **विचि.**२०८, २४४ स्त्वा (आ) शेष मितावत्; **व्यनि.** पतिताश्च (पतिताना च) विष्णुः; **सवि.** ३६५ गता. (गाः) शेष मितावत् : ४२१ मितावत्; **व्यप्र.** ५३२, ५५८ मितावत्; **व्यम.**७३ मितावत् : ७४; **विता.** ४१३ मितावत् : ४३६; **समु.**१३१; **विच.**७९.

विष्णुः

पतिततदुत्पन्नाः क्लीबादयः प्रतिलोमस्त्रीजाताश्च भागानर्हाः । ते सर्वे दायादैः भर्तव्याः । पतितप्रतिलोमातिरिक्तानामौरसा दायार्हाः ।

पतितक्लीबाचिकित्स्यरोगविकलास्त्वभागहारिणः । ऋक्थग्राहिभिस्ते भर्त्तव्याः । तेषां चौरसाः पुत्रा भागहारिणः ।

न तु पतितस्य । पतनीये कर्मणि कृते त्वनन्तरोत्पन्नाः ।

प्रतिलोमासु स्त्रीषु उत्पन्नाश्चाभागिनस्तत्पुत्राः पैतामहेऽप्यर्थे ।

अंशग्राहिभिस्ते भरणीयाः ।

विकलः इन्द्रियविकलः । अचिकित्स्यरोग इति वदन् चिकित्स्यक्लैब्यवैकल्यादिशालिनो भागार्हा इति दर्शयति। तेन विभागकालस्थिताचिकित्स्यव्याधिशालिनामपि अभागहरत्व न पुनः सहजवाधिर्यक्लैब्यादिशालिनामेवेति मन्तव्यम् । स्मृच.२७०

पतितस्य पुत्रवत्प्रतिलोमायाः स्त्रियाः पुत्रस्य पुत्रोऽपि पैतामहधनानर्हः । अंशग्रहणविरोधिदोषसद्भावात् । अनन्तरोत्पन्नाः पश्चादुत्पन्नाः । आनन्तर्यस्याविवक्षितत्वात् । ते तु न भागहारिणः । एव प्रव्रज्यावसितादिपुत्रेषु यत्र यत्राशग्रहणविरोधिदोषसद्भावस्तत्र तत्र पैतामहधनाभागित्वं विज्ञेयम् । स्मृच.२७२

(१) **विस्मृ.**१५।३२-३४; **व्यक.**१४४ हारिणः (हराः) हिभि (हिण) चौ (औ); **स्मृच** २७० हारिणः (हराः) (ऋक्थ... रिणः०) : २७२ (पतित ..र्तव्याः०) चौ (एवौ); **विर.**४९० हिभि (हिण) (पुत्रा भागहारिणः०); **रत्न.**१५१ (पतित .. र्तव्याः०) चौ (एवौ); **समु.**१३० हारिणः (हराः) (ऋक्थ... हारिणः०) : १३१ (पतित...हारिणः०) चौ (एवौ).

(२) **विस्मृ.**१५।३५; **स्मृच** २७२ कर्मणि कृते त्व (कृते कर्मण्य); **विर.**४९० त्व (अ), **रत्न.**१५१ विरवत्; **व्यम** ७४ विरवत; **समु** १३१ स्मृचवत्

(३) **विस्मृ.**१५।३६,३७ उत्प (चोत्प); **स्मृच.**२७२; **विर.**४९० श्राभा (श्रांशाभा); **रत्न.**१५१; **व्यम.**७४; **समु.** १३१

(४) **विस्मृ.**१५।३८.

कानीनादयश्चत्वारः पुत्रा दायानर्हाः

अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः ।
पौनर्भवश्च नैवैते पिण्डरिक्थांशभागिनः ॥

तदप्यौरसे सति चतुर्थांशनिषेधपरमेव । औरसाद्यभावे तु कानीनादीनामपि सकलपित्र्यधनग्रहणमस्त्येव । 'पूर्वाभावे परः पर' इति वचनात् । ×मिता.२।१३२

शंखः शंखलिखितौ च

पतितो दायानर्हः

अपपात्रितस्य रिक्थपिण्डोदकानि निवर्तन्ते ।

(१) अपपात्रितो भिन्नोदकीकृतः । दा.१००

(२) पतितत्वात् ज्ञातिभिर्बहिष्कृतोऽपपात्रितः । रिक्थ पितृधनम् । पुत्रस्थानीयस्य ज्ञातिधनमपि । अप.२।११६

(३) अपपात्रितस्य नृपहिंसादिदोषाद्वान्धवैः कृतघटापवर्जनस्य । +विर.४८७

शूद्रापुत्रो दायानर्होऽपि प्रजीवनं लभते

न शूद्रापुत्रोऽर्थभागी, यदेवास्य पिता दद्यात्स एवास्य भागः । तस्य गोमिथुनं चापरं दद्यात्कृष्णायसं कृष्णधान्यं तिलवर्जम् ।

विभागकाले भ्रातर इति शेषः । मेधा.९।१५५

अपुत्रस्त्रीणां प्रजीवनमात्रम्

भ्रातृभार्याणां च स्नुषाणां च न्यायतः प्रवृत्तानामनपत्यानां पिण्डमात्रं गुरुर्दद्याज्जीर्णानि वासांस्यविकृतानि ×।

अविभागे तु शखः—भ्रातृभार्याणामिति । विचि.२३७

यज्ञानर्हा दायानर्हाः

यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये ।
अरिक्थभाजस्ते सर्वे ग्रासाच्छादनभाजनाः ॥

व्यभिचारिणी भर्तव्या

कामचारिणीं मलिनां कुचेलां पिण्डमात्रोपजीविनीं निवृत्ताधिकारामधःशय्यां निरुद्धां निवासयेदत्यर्थव्यभिचारिणीम् * ।

महाभारतम्

शापात्स्त्रीणां अदायादत्वम्

दीर्घतमा उवाच—

अद्यप्रभृति मर्यादा मया लोके प्रतिष्ठिता ।
एक एव पतिर्नार्या यावज्जीवं परायणम् ॥
मृते जीवति वा तस्मिन्नापरं प्राप्नुयान्नरम् ।
अभिगम्य परं नारी पतिष्यति न संशयः ।
अपतीनां तु नारीणामद्यप्रभृति पातकम् ॥
यद्यस्ति चेद्धनं सर्वं वृथाभोगा भवन्तु ताः ।
अकीर्तिः परिवादाश्च नित्यं तासां भवन्तु वै ॥

अन्धो राज्यानधिकारी

तस्य तद्वचनं श्रुत्वा माता पुत्रमथाब्रवीत् ।
नान्धः कुरूणां नृपतिरनुरूपस्तपोधन ॥

---

* दमी. व्याख्यानं 'ब्राह्मणाना सपिण्डेषु' इति शौनकवचने (पृ.१३६५) द्रष्टव्यम् ।

× पमा., मपा., व्यप्र., विता. मितागतम् ।

+ विचि. विरगतम् ।

(१) **मिता.२।१३२; पमा.५१५** नैवैते (ते नैव), **मपा.६५४** श्च नैवैते पिण्ड (स्तु नैवेति पितृ); **नृप्र.४०; दमी.४०; संप्र.२१४; व्यप्र.४८२, विता.३६७; बाल.२।१३५** (पृ.२१७), **समु.१३९** पिण्ड (पितृ) भागिनः(हारिण.).

(२) **दा.१००** (=), **अप.२।११६; व्यक.१४४** निव (व्याव); **स्मृच.२७०** अपपात्रितस्य (आवपातिकस्य), **विर ४८६; स्मृसा.५८** पात्रि (याति) शखः; **विचि.२०६** शखः, **व्यनि.** त्रित (त्रीकृत) निव (व्याव); **चन्द्र.७६** कानि (कादि) तन्ते (तंते) शखः; **व्यप्र.५६०** आपस्तम्बः, **व्यम.७३** पात्रितस्य (यात्रिते) कानि (कादि) निव (व्याव); **विता.४३२** पात्रितस्य (यात्रिते) निव (व्याव); **समु.१३०** निव (व्याव) शखः; **विच.७९** शखः.

(३) **मेधा ९।१५५** वास्य भा (व तस्य भा) (तस्य०) चाप (त्वप) द्यात् (द्युः) (कृष्णा...वर्जम्०) शखः; **व्यक.१५२** त्स ए (त्तदे) वर्जम् (वर्जितम्); **विर.५३६; विचि.२२६** (न०) एवास्य (एव) शखः; **स्मृचि.३४** त्स एवास्य भागः (त्तदेवास्य विभागकः) (चापर०).

× स्मृतिसारोद्धृत बालरूपमत 'भ्रातृणामप्रजाः' इति नारदवचने द्रष्टव्यम् ।

* व्याख्यान स्थलादिनिर्देशश्च (पृ.१०२४) इत्यत्र द्रष्टव्यः ।

(१) **स्मृसा.१२८** र्यांणां च स्नु (र्यांस्नु) न्यायतः (न्याय) शंखः; **विचि.२३७** शखः

(२) **मिता.२।१३६** (=), **पमा.५३४** (=); **व्यनि.** (=) तास्तु ये (ताः स्त्रियः) स्ते सर्वे (स्ताः सर्वाः); **व्यप्र.४९६** स्मृतिः; **विता.३९०** (=); **समु.१३१** शखः.

(३) **भा.१।१०४।३४-३७.** (४) **भा.१।१०६।१०-११.**

पितुरनिष्टो ज्येष्ठोऽपि दायानधिकारी राज्यानधिकारी च

अभिषेक्तुकामं नृपतिं पूरुं पुत्रं कनीयसम् ।
ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् ॥
कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो ।
ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रदास्यसि ॥
यदुर्ज्येष्ठस्तव सुतो जातस्तमनु तुर्वसुः ।
शर्मिष्ठायाः सुतो द्रुह्युस्ततोऽनुः पूरुरेव च ॥
कथं ज्येष्ठानतिक्रम्य कनीयान् राज्यमर्हति ।
एतत्संबोधयामस्त्वां धर्मं त्वमनुपालय ॥

ययातिरुवाच—

ब्राह्मणप्रमुखा वर्णाः सर्वे शृण्वन्तु मे वचः ।
ज्येष्ठं प्रति यथा राज्यं न देयं मे कथंचन ॥
मम ज्येष्ठेन यदुना नियोगो नानुपालितः ।
प्रतिकूलः पितुर्यश्च न स पुत्रः सतां मतः ॥
मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः ।
स पुत्रः पुत्रवच्चश्च वर्तते पितृमातृषु ॥
यदुनाहमवज्ञातस्तथा तुर्वसुनापि च ।
द्रुह्युना चानुना चैव मय्यवज्ञा कृता भृशम् ॥
पूरुणा मे कृतं वाक्यं मानितं च विशेषतः ।
कनीयान्मम दायादो धृता येन जरा मम ॥
मम कामः स च कृतः पूरुणा पुत्ररूपिणा ।
शुक्रेण च वरो दत्तः काव्येनोशनसा स्वयम् ॥
पुत्रो यस्त्वानुवर्तेत स राजा पृथिवीपतिः ।
भवतोऽनुनयाम्येवं पूरुं राज्येऽभिषिच्यताम् ॥

प्रकृतय ऊचुः—

यः पुत्रो गुणसंपन्नो मातापित्रोर्हितः सदा ।
सर्वमर्हति कल्याणं कनीयानपि स प्रभो ॥
अर्हः पूरुरिदं राज्य यः सुतः प्रियकृत्तव ।
वरदानेन शक्रस्य न शक्यं वक्तुमुत्तरम् ॥

जीवति पितरि पत्यौ स्वामिनि च सुतः भार्या दासश्च धनानधिकारी

त्रय एवाधना राजन् भार्या दासस्तथा सुतः ।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥

त्रयः किलेमे ह्यधना भवन्ति दासः पुत्रश्चास्वतन्त्रा च नारी ।
दासस्य पत्नी त्वधनस्य भद्रे हीनेश्वरा दासधनं च सर्वम् ॥

पतितौ पितरौ भर्तव्यौ

पातकेऽपि तु भर्तव्यौ द्वौ तु माता पिता तथा ॥

कौटिलीयमर्थशास्त्रम्

पतिततज्जाताः जडोन्मत्तान्धादयश्च दायानर्हाः । पतितातिरिक्ता भर्तव्याः । जडोन्मत्तादीनामप्यानि निर्दोषाणि दायार्हाणि ।

दायानर्हा भगिन्य , ता भर्तव्याः ।

पतितः पतिताज्जातः क्लीबश्चानंशाः । जडोन्मत्तान्धकुष्ठिनश्च । सति भार्यार्थे तेषामपत्यमतद्विधं भागं हरेत् । ग्रासाच्छादनमितरे पतितवर्जाः ।
तेषां च कृतदाराणां लुप्ते प्रजनने सति ।
सृजेयुर्बान्धवाः पुत्रांस्तेषामंशान् प्रकल्पयेत् ॥

निरशानाह —पतित इत्यादि । सुबोधम् । सतीति । तेषा जडादीना, भार्यार्थे विवाहे सति, अतद्विध अजडमनुन्मत्तमनन्धमकुष्टि च, अपत्यं, भागं हरेत् । इतरे अजडापत्याद्यतिरिक्ताः, पतितवर्जाः, ग्रासाच्छादन, हरेयुरिति विपरिणतानुषङ्गः । अध्यायप्रान्ते श्लोकमाह—तेषा चेति । जडोन्मत्तादीना, कृतदाराणा, प्रजनने लुप्ते बीजशक्तिविरहे, बान्धवाः पुत्रान् सृजेयुः अर्थाज्जडादीना क्षेत्रेषु । तेषा पुत्राणा, अंशान् प्रकल्पयेत् ।

श्रीमू.

अदायादा भगिन्यः । मातुः परिवापाद् भुक्तकांस्याभरणभागिन्यः ।

भगिन्यो दायहीनाः, किन्तु मातृपरिच्छदेभ्यो भुक्तकास्याभरणानि हरेयुरित्याह —अदायादा इत्यादि ।

श्रीमू.

सदोषो ज्येष्ठोऽपि दायानर्हः

मानुषहीनो ज्येष्ठस्तृतीयमंशं ज्येष्ठांशाल्लभेत ।
चतुर्थमन्यायवृत्तिर्निवृत्तधर्मकार्यो वा । कामाचारः सर्वं जीयेत *॥

---

(१) भा.१।८५।१९-३१.
(२) भा.१।८२।२२, ५।३३।६४.

* व्याख्यान स्थलनिर्देशश्च (पृ.११८५) इत्यत्र द्रष्टव्यः ।
(१) भा.२।७१।१. (२) भा. (कुं.) १३।५९।१७.
(३) कौ.३।५. (४) कौ.३।६.

स्त्रीणां धनस्वाम्यनिमित्तानि

राजद्विष्टातिचाराभ्यामात्मापक्रमणेन च ।
स्त्रीधनानीतशुल्कानामस्वाम्यं जायते स्त्रियाः*॥

मनुः

पतितक्लीबजात्यन्धादयो दायानर्हाः

[1]अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥

(१) निरिन्द्रियो निर्गतमिन्द्रिय यस्माद्व्याध्यादिना स निरिन्द्रियः । एते क्लीबादयोऽनशाः रिक्थभाजो न भवन्ति । केवलमशनाच्छादनदानेन पोषणीया भवेयुः ।
×मिता.२।१४०

(२) अन्धादीना पुत्रसद्भावे तेऽप्यशहराः । एवमुन्मत्तपतितौ, निवृत्ते निमित्ते क्लीबादयस्तु न भर्तव्याः ।
उ.२।१४।१

(३) अचिकित्स्यः क्लीवः । पतितो महापातकी प्रायश्चित्तात्पूर्वम् । बधिरोऽपि जात्या । उन्मत्तादयोऽचिकित्स्याः । जडोऽस्ववशकर्मेन्द्रियः । निरिन्द्रियाः स्पर्शग्रहणादिरहिताः कुणिप्रभृतयश्च ।
मवि.

(४) जात्यन्धेत्यत्र जातिग्रहणेनान्धत्वस्याप्रतिसमाधेयतामाह न औत्पत्तिकत्वम् । जडः आत्मपरविवेकशून्यः । निरिन्द्रियग्रहणेन पङ्ग्वादयः श्रोतस्मार्त्तक्रियानधिकारिणो गृह्यन्ते ।
+विर.४८८

(५) अस्यार्थः—अनंशौ क्लीवपतिताविति द्वित्वोक्त्या दायार्हभ्रातृभिः रिक्थग्राहैर्वा योषिद्ग्राहैर्वा पोष्यौ, जात्यन्धबधिराविति द्वित्वोक्त्या तयोरंशोऽस्त्येव, किन्त्वशयुक्तावपि पोष्यौ विवाहसंस्कारसद्भावात् । तथाशब्दप्रयोगेण पङ्ग्वादयः विवाहसंस्कारार्हाश्चेदंशहराः पोष्याश्चेति रहस्यम् । उन्मत्तजडमूकाश्चेति समुच्चयोक्त्या तेऽपि भर्तव्या एव नाशहराः । विवाहार्हा न चेदिति शेषः । 'ये च केचिन्निरिन्द्रिया' इति स्त्रीणामप्युपलक्षणं, निरिन्द्रियाणा स्त्रीणा सपत्नीदुहितृभगिनीप्रभृतीना पुंसा च भ्रातृतत्सुतभ्रातृव्यादीना मातुलादीना च संरक्षण कार्यमिति ।
सवि.३६४

(६) अनशाविति अभाज्यानाह । अनशौ अंशानामनर्हौ जात्यन्धबधिरौ । उन्मत्तः वातपित्तश्लेष्मसन्निपातकैर्ग्रहावेशलक्षणैः कम्पाद्यैरभिभूतः । जडः विकलान्तःकरणो हितावधारणाक्षमः । च पुनः ये केचिन्निरिन्द्रियाः व्याध्यादिना निर्गत इन्द्रिय येषा ते ।
भाच.

पतिता दायानर्हाः । पतितस्त्रियो भर्तव्याः ।

[2]पतितस्योदकं कार्यं सपिण्डैर्बान्धवैर्बहिः ।
निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसंनिधौ*॥
दासीघटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा ।
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह *॥
निवर्तेरंश्च तस्मात्तु संभाषणसहासने ।
दायाद्यस्य प्रदानं च यात्रा चैव हि लौकिकी ॥

कृतोदके यथा वर्तितव्य तथेदानीमुच्यते । सभाषणमितरेतरमुक्तिप्रत्युक्तिरूपो व्यवहारः । दायाद्य धन, तदपि तस्मै न दातव्यम् । लौकिकी यात्रा संगतयोः कुशलप्रश्नादिका विवाहादौ [1]निमित्ते गृहानयन भोजन चेत्येवमादि । [2]नै च सभाषणप्रतिषेधादेवैषु निवृत्तिः [3]सिद्धैव । अभ्युत्थानासनत्यागस्यापि निवृत्तिरूपस्य संभवात् । संभाषण तु शब्दात्मकमेव ।
×मेधा.

[3]ज्येष्ठता च निवर्तेत ज्येष्ठावाप्यं च यद्वसु ।
ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान्गुणतोऽधिकः ॥

---

* व्याख्यान स्थलनिर्देशश्च (पृ.१०३७) इत्रत्र द्रष्टव्यः ।
× मनु. मितागत मविगत च । पमा., मपा., व्यप्र. मितागतम् । + विचि. विरगतम् ।

(१) **मस्मृ.**९।२०१; **मिता.**२।१४०; **दा.**१०१; **अप.** २।१४० तथा (अपि) त्त (त्ता); **व्यक.**१४४ श्च (स्तु); **मभा.**२८।४४; **गौमि.**२८।४१; **उ.**२।१४।१; **स्मृच.**२७०; **विर.**४८७; **स्मृसा.**५८; **पमा.**२७३, ५४४; **मपा.**६८२; **रत्न.**१५०; **विचि.**२०६-२०७; **व्यनि.** बधिरौ (पतितौ); **स्मृचि.**३१ (=); **सवि.**३६४; **चन्द्र.**७६ त्रिरि (दनि); **वीमि.**२।१४०; **व्यप्र.**२६८,५५८; **व्यम.**७३, **विता.** ४३१; ५१७ (=) जात्यन्धबधिरौ तथा (षड्गुरुन्मत्तको जडः) पू., **राकौ.**४५८; **सेतु.**६३; **समु.**१३०; **विच.**७७.

* अनयोर्व्याख्यासंग्रहः प्रायश्चित्तकाण्डे द्रष्टव्यः ।
× अवशिष्टव्याख्यासग्रहः प्रायश्चित्तकाण्डे द्रष्टव्यः ।
(१) **मस्मृ.**११।१८२-१८४.
(२) **मस्मृ.**११।१८५.
१ नैमि. २ ननु च. ३ सिद्धे वा ।.

ज्येष्ठावाप्यं च यद्वसु। अत्रापि चोच्यते। दायाद्यदाननिषेधाज्ज्येष्ठप्राप्यवसुनो धनस्य सिद्ध एव निषेधः। केचिदाहुर्गुणतोऽधिकस्य यवीयसस्तदंशप्राप्त्यर्थमनूद्यते। अन्ये तु मन्यन्ते। दायाद्यशब्देन धनपात्रमुच्यते। नान्वयागतमेव। तथा चाभिधानकोशे 'दायाद्यं धनमिष्यते' इति स्मर्यते। अतो यत्तस्मात्केनचिद्दण्डत्वेन गृहीतं तेनापि तत्र दातव्यम्। किं तर्हि कर्तव्यम्? पुत्रभ्रात्रादिरिक्थहारिणामर्पणीयम्। अन्ये तु मन्यन्ते। अविभक्तधनानां दायाद्यधननिषेधः, कृते तु विभागे उद्धारस्यैव ज्येष्ठांशस्यैवोच्छेदः। सत्स्वपि पुत्रेष्वुद्धारं वर्जयित्वाऽन्यस्य पुत्रा एवेशते। +मेधा.

प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नवम्।
तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये *॥
स त्वप्सु तं घटं प्रास्य प्रविश्य भवनं स्वकम्।
सर्वाणि ज्ञातिकार्याणि यथापूर्वं समाचरेत् *॥
एतमेव विधिं कुर्याद्योषित्सु पतितास्वपि।
वस्त्रान्नपानं देयं तु वसेयुश्च गृहान्तिके॥

योषित्सु स्त्रीष्वपि पतितास्वेष एव विधिः। पतितास्वकृतप्रायश्चित्तासु च। ताभ्यस्तु कृतोदकाभ्योऽपि वस्त्रान्न दातव्य दानग्रहणात्। वस्त्रान्ने शरीरस्थितिमात्रसंपादिनी दातव्ये न भोगादयः। पानमौचित्यादुदकम्। तच्च प्राचुर्यादद्यत्तमपि लभ्यते। वचन तु परानुरोधादपि स्वातन्त्र्येण वा सुपान न देयम्। यादृशं च पानं तादृशे एव वस्त्रान्नेऽतो निकृष्ट वस्त्र चान्नं दातव्यम्। तथोक्त 'हृताधिकारा मलिना पिण्डमात्रोपजीविनीम्। परिभूतामधःशय्या वासयेद्यभिचारिणीम्॥' (यास्मृ.१।७०)। पातित्यहेतवश्च स्त्रीणा य एव मनुष्यस्य, यत्तु भ्रूणहनि हीनवर्णसेवायां, न च स्त्रीणामधिकं भ्रूणहनीति, तत्तुल्यतार्थ न तु परिसंख्यार्थम्। तथा च याज्ञवल्क्यः— 'नीचाभिगमनं गर्भपातनं भर्तृहिंसनम्। विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवम्॥' (यास्मृ.३।२९८)। वसेयुः स्वगृहान्तिके प्रधानगृहान्निष्कास्य कुटीगृहे वासयितव्येत्यन्तिकग्रहणम्। केचिदाहुः 'प्रायश्चित्तं तु कुर्वतीनामेतदेय न त्वन्यथा' तदयुक्तम्। वस्त्रान्नदानव्यवहारस्य तत्र [1]योग्यत्वात्। प्रायश्चित्ते भिक्षाहारता पयोव्रत चान्द्रायणविधिश्चेत्यादि। न च भैक्षाहारता चानेन निवर्तयितु शक्या। वृत्तिविधानेन चरितार्थत्वात्। तस्माद्यस्याः प्रायश्चित्तेष्वनधिकारोऽशक्ततयाऽतिपुष्टतया वा, तस्या अपि वस्त्रादिदानं कर्तव्यमिति श्लोकार्थः। ÷मेधा.

स्त्रीणां साध्वीनां दायार्हत्व नासाध्वीनाम्

***संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः।**
ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत्॥
अतिक्रामेत्प्रमत्तं या मत्तं रोगार्तमेव वा।
सा त्रीन् मासान् परित्याज्या विभूषणपरिच्छदा॥
उन्मन्तं पतितं क्लीबमबीजं पापरोगिणम्।
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्तनम्॥

जीवति पितरि, पत्यौ, स्वामिनि च सुतः, भार्या, दासश्च धनानधिकारी

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ×॥

सर्वे दायानर्हा भर्तव्याः

सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा।
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत् +॥

+ अवशिष्टव्याख्यासंग्रहः प्रायश्चित्तकाण्डे द्रष्टव्यः।

* अनयोर्व्याख्यासंग्रहः प्रायश्चित्तकाण्डे द्रष्टव्यः।

(१) **मस्मृ** ११।१८६,१८७.

(२) **मस्मृ.**११।१८८; **मेधा.**८।३८९ उत्तरार्धे (वस्त्रान्नमात्र देयं च वसेयुः स्वगृहान्तिके) प्रथमपादं विना; **स्मृच.** २४६ एत (एव) पान (मासां) : २९३ पान (मासा); **सवि.** ४११ एत (एव) पानं (मासां); **व्यप्र.**५०३(=) सविवत्; **व्यम.**६२ पान (मासां); **विता.**३९९ सविवत्.

१ वानुमासं न.

÷ अवशिष्टव्याख्यासंग्रहः प्रायश्चित्तकाण्डे द्रष्टव्यः

* 'संवत्सर प्रतीक्षेत' इत्यादिश्लोकत्रयव्याख्यासंग्रहः स्थलादिनिर्देशश्च (पृ.१०५५-१०५६) इत्यत्र द्रष्टव्यः।

×व्याख्यासंग्रहः स्थलादिनिर्देशश्च (पृ.८२२) इत्यत्र द्रष्टव्यः।

+ व्यप्र. व्याख्यान 'क्लीबोऽथ पतितस्तज्जः' इति याज्ञवल्क्यवचने मितागतम्।

(१) **मस्मृ.**९।२०२; **मिता.**२।१४०; **व्यक.**१४४ तु (तत्); **मभा.**२८।३४; **स्मृच.** २७१; **विर.**४८७ तु (तत्) तो ह्यददद्भवेत् (ताः स्युरदित्सवः:); **स्मृसा.**५८ तु (तत्)

१ योगत्वात्. २ कारः शक्त.

(१) सर्वेषामपि क्लीवादीना च प्रकृतत्वेन दर्शितमिति। अत्यन्तं यावज्जीवमित्यर्थः। शरीरधारणार्थत्वाद्ग्रासाच्छादनस्य भृत्यादेस्तदुपयोगिनः परिचारकस्याऽपि वेतनदानं विज्ञेयम्। न ह्यन्धादेः परिचारकमन्तरेण जीवनसंभवः। येषा दारकरण मत तेषा सभार्याणा भरणं दातव्य, शक्त्या, धनानुरूपेण, भोजनवस्त्रादि देय, पतित इत्यर्थवादः। मेधा.

(२) अत्यन्त यावज्जीवमित्यर्थः। मिता.२।१४०

(३) अत्यन्तमददत्सर्वथा अददत्पतितो भवेदित्यन्वयः। मवि.

(४) तदेवाह सर्वेषामिति। सर्वेषामेषा क्लीवादीना शास्त्रेण ऋक्थहारिणा यावज्जीव स्वशक्त्या ग्रासाच्छादनं देयम्। अददत्पापी स्यात्। मसु.

(५) सर्वेषामशानर्हाणा अत्यन्त यावज्जीव एतेषामनर्हित्वं विभागात् पूर्वमप्रत्याख्येयदोषप्राप्तौ सत्या, न तु विभक्तो यदि विभागकाले दोषदुष्टो विभागोत्तरकालमौषधादिना विनिर्दुष्टः कृतप्रायश्चित्तो वा तदा 'विभक्तेषु सुतो जातः सवर्णाया विभागभागि'त्यनेन न्यायेन अंशप्राप्तिरस्त्येव। पतितादिषु पुंलिङ्गमविवक्षितमुद्देश्यगतत्वात्। अतो मातृपत्नीदुहित्रादयोऽपि दुष्टा अनंशा एव। क्लीवादय एवानंशा न तत् पुत्रादयो दोषरहिताः। *मपा.६८२

(६) पतितातिरिक्तानामभरणे मनुराह—सर्वेषामपीति। व्यउ.१५०

(७) आश्रमान्तरगतपतिततत्पुत्रास्तु न भर्तव्याः। व्यम.७३

वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः।
अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्॥

दायानर्हाणां निर्दोषाण्यपत्यानि दायार्हाणि

यैर्यर्थिता तु दारैः स्यात्क्लीवादीनां कथंचन।
तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति॥

(१) अर्थिता संप्रयोगेच्छा रतिनिमित्त तस्या सत्या विवहेत्। तत्रोत्पन्नसतानानामपत्य पुत्रो दुहिता वा दाय रिक्थविभागमर्हति। दुहितुर्यावान्भागः प्रागुक्तः। वातरेतास्तु यः क्लीवस्तस्य भवत्येव मैथुनेच्छा। कुतः पुनस्तस्य तन्तूत्पत्तिः। उक्त च 'यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य' इति। रागप्रयुक्तता चाऽनेन श्लोकेन विवाहस्य दर्शिता। धर्मप्रयुक्तत्वे ह्यनधिकृताना कर्मसु कुतो विवाहः। उपनेयता च जात्यन्धषड्गूना वातरेतसः क्लीवस्य दर्शिता। उन्मत्तादयस्त्वनुपनेयाः। कुतस्तेषा विवाहः। आदिग्रहणं चोक्तविषये चरितार्थम्। यदि हि आदिग्रहणसामर्थ्यात्सर्व एव गृह्येरन्पतितोऽपि गृह्येत। तच्च स्मृतिविरोधान्नेष्टम्। अथवा कृताध्ययनाना कृतविवाहानामुन्मत्तादिरूपे समुपजाते विधिरेष विज्ञेयः। ननु च कृतविवाहाना 'यद्यर्थिता तु दारैरि'ति नोपपद्यते। नैतदेव कृतविवाहाना जायार्थितायाः सभवात्। पूर्वैस्तु धर्म्येऽपि विवाहेऽस्य प्रयोजनं दृष्टम्। ततश्च क्लीवस्य स्मार्तेष्वधिकारात्तदर्थो विवाहोऽस्त्यामर्थ्यार्थितायां युक्त एव। श्रौतेषु तु जातपुत्रस्याधानात्क्लीवस्य नाधिकारः। यस्य च प्रयोजकत्व युक्त तद्दर्शितम्। मेधा.

(२) तन्तुरपत्यम्। न चापुस्त्वात् क्लीवस्य जननासामर्थ्यात् अध्ययनाभावात् मूकादेरुपनयनाभावेन पतितत्वात् कथ दारसबन्ध इति वाच्य, क्लीवस्य पत्न्यामन्येन पुत्रोत्पादसभवात् उपनयनानर्हस्यानुपनीतत्वे शूद्रवदपतितत्वात्। तेनैतेषा यथासभवमौरसक्षेत्रजाः क्लीत्वादिशून्याः स्वपित्रनुसारेण भागहारिणः। *दा.१७४

---

* 'क्लीबोऽथ पतितस्तज्जः' इति याज्ञवल्क्यवचने मितागतम्। कत्या (क्य) मत्यन्त (मुत्पन्नं); **पमा.**५४५; **मपा.**६८२; **विचि.**२०७ स्मृसावत्; **व्यनि.**मत्यन्त (मभ्यङ्ग), **स्मृचि.**३१ (=); **व्यप्र.**५५१ तु न्याय्य दातु शक्त्या (चैतेषा दातुं न्याय्य); **व्यउ.**१५०; **व्यम.**७३ कत्या (क्या) णा (भिः); **विता.** ४३५-४३६ मपि (मेव) णा (भिः); **राकौ.**४५८ कत्या (क्य) णा (भिः) तो...वेत् (ताः स्युरदित्सवः); **बाल.**२।१३२ (पृ.१७५), २।१३४; **समु.**१३१.

(१) **मस्मृ.**११।१० इत्यस्योपरिष्टात् प्रक्षिप्तश्लोकोऽयम्;

* व्यप्र. दागतम्।

मिता.२।१७५; **राकौ.**४७०; **समु.**९३-९४.

(१) **मस्मृ.**९।२०३; **दा.**१०४; **अप.**२।१४०; **व्यक.** १४४; **मवि.** तन्तू (जन्तू), **मभा.**२८।४५; **गौमि.**२८।४२; **विर.**४८८; **स्मृसा.**५८; **विचि.**२०७; **व्यनि.** मुत्पन्नतन्तूनामपत्य (मुत्पत्तितोऽन्तेऽपि चापत्यं); **स्मृचि.३१; मच**

(३) अर्थितेच्छा तेन दारसबन्ध लक्षयति। क्लीबादीनामित्यतद्गुणसंविज्ञानो बहुव्रीहिः। तत्र पतितस्यापि दारकर्मणामनर्हत्वादग्रहण, तेन जात्यन्धादीना ग्रहणम्। तेषामुत्पन्नजन्तूना उत्पन्नापत्यानाम्। तेन पूर्वविभक्तैरपि भ्रातृभिः स्वभागादाकृष्य तत्पितृभागो देयः। क्लीबपतितयोः पूर्वपरिगृहीतदारत्वे तत्र च क्षेत्रजपुत्रोत्पत्तौ तस्य विभागप्रातिरिति तु प्रागेव सिद्धम्। मवि.

(४) कथचनेत्यभिधानात्क्लीबादयो विवाहानर्हा इति सूचितम्। यदि कथचिदेषा विवाहेच्छा भवेत्तदा क्लीबस्य क्षेत्रज उत्पन्नेऽन्येषामुत्पन्नापत्यानामपत्य धनभाग् भवति। ×ममु.

(५) क्लीबादीनामित्यतद्गुणसंविज्ञानो बहुव्रीहिः, क्लीबस्यापत्योत्पादनायोग्यत्वात्। प्रकाशकारस्तु क्लीबत्वमग्रेऽपनेयदोषप्रयुक्तमपत्योत्पादनाशक्तत्व विवक्षितम्। अतो नातद्गुणसंविज्ञान मन्यते। तन्तुरपत्यम्।

*विर.४८८

अनियोगजोऽधिकोऽविधिज कामजो वा क्षेत्रजो दायानर्हः

अनियुक्तासुतश्चैव पुत्रिण्यामश्च देवरात्।
उभौ तौ नार्हतो भागं जारजातककामजौ +॥

(१) अपुत्रे भर्तरि मृते पुत्रोत्पादने स्त्रिया गुरुनियोगोऽपेक्षितव्य इत्युक्तम्। तस्यैवायमनुवादः। या गुरुभिरनियुक्ता पुत्रार्थिनी पुत्रमुत्पादयेत्, क्षेत्र किलाह भर्तुः क्षेत्रजश्च पुत्रस्तदर्थहर इत्यनया भ्रान्त्या, स तस्या समुत्पन्नो न रिक्थहरः। यतः क्षेत्रजादिविशिष्टेन विधिनोत्पन्नस्य शास्त्रे क्षेत्रजव्यपदेशात् तेनैव चास्य क्षेत्रजस्य रिक्थहरत्वमत्र वार्यते, पिण्डदान तु न निषिध्यते, यद्यपि पतितोत्पन्नो भवति। नारदस्तु विशेष स्मरति—'जाता ये त्वनियुक्तायामेकेन बहुभिस्तथा। अरिक्थभाजस्ते सर्वे बीजिनामेव ते सुताः॥ दद्युस्ते बीजिने पिण्ड माता चेच्छुल्कतो हृता। अशुल्कोपनतायां तु पिण्डदा बोढुरेव ते॥' (नारद.१६।१९,२०) इति। सुतवचनात्क्षत्रियादिवदुत्पत्तिविधिभावात्पुत्रमध्ये चापरिगणितत्वात् त्रैवर्णिकाना च बीजजाः प्रजीवनमात्रभागा न रिक्थहराः। यतोऽविशेषेण सर्वपुत्राणा भर्तरि प्रेते स्मर्यते। ऊर्ध्वमपि पितुः पुत्रोपकर्तव्यशिष्टस्य धनस्य विभाज्यत्वाल्लभेरन्नेव प्रजीवनम्। एवमेवौरसादिपुत्रस्य सपिण्डबीजकाः प्रजीवनमात्रभागाः कर्तव्याः। रिक्थहरत्व तु नास्ति परिगणितपुत्रविशेषोद्देशेन श्रवणात्। उक्त चैतत्। उक्ताना 'यद्येकरिक्थिनौ स्यातामि'ति। अत्रानेन च दर्शनेनानियुक्तासुतादय इतरत्रानशत्वाद्वीजिनो रिक्थ लभेरन्निति रिक्थं प्रजीवनपर्याप्तमेतद्विज्ञेयम्। उक्तत्वादस्या भागार्थ एव दासीव भण्यते। या 'सर्वेता दासयोनयः' इति निरूपिताः, यासा प्रयोगार्थमवगन्तव्य क्रियते। तस्या जातो न दासः, सुतव्यपदेशाभावः, शूद्रस्यापि तज्जा ब्राह्मणादिवत्प्रजीवनभाजः।

अन्यस्त्वाह। नियतकर्मकरा अपि दासा भवन्ति। यथा स्नापकः प्रसाधकः पाचकः पावक इति। एवं कामतोऽप्यवरुद्धा भक्ताच्छादनेन पोष्यमाणा दास्यो भवन्ति। एव पुत्रिण्या विद्यमाने पुत्रे आप्तो देवरान्नियुक्तयाऽपि। कथ पुनः पुत्रवत्या नियोगः। देवर एव कामार्थ नियुक्तः पुत्रोत्पादनव्यपदेशेनेत्यभिप्रायः। जारजातकत्वमुभयोः कामजत्व तु पुत्रवत्या जातस्य आद्यार्थाया पुत्रार्थेव प्रवृत्तिर्न कामतोऽन्येन। मेधा.

(२) नियोगापदोर्मिश्रितस्य देवरजस्य पुत्रत्वे निमित्तमाह—अनियुक्तेति। असत्यपि पुत्रे नियोगादेव गुर्वादीना प्रवर्तितव्यम्। एव नियोगे सत्यपि स्वभर्तृजे सुतेऽसत्येव सैव चापदित्युच्यते। जारजातककामजौ इत्युभयत्र। कामजः काममात्रोत्पादितः। मवि.

(३) अनियुक्तायां परस्त्रिया अपरिणेतुः सकाशादुत्पन्नः सुतो जारजातकः। स्वार्थे कप्रत्ययः। परिणेतोत्पन्नपुत्रवत्या देवरादुत्पन्नः कामजः। तावुभौ भागं नार्हत इत्यर्थः। एतदुक्त भवति। जारजातो नियोगविध्यतिक्रमेण जातश्च क्षेत्रिणो भाग नार्हतीति। स्मृच.२७१

(४) एतच्च पिण्डदानादेरप्युपलक्षणम्। शुल्कान्वाहृतक्षेत्रोत्पन्नविषयमेतत्। अग्रिमनारदवचनानुसारात्। विर.५८७

× मच., नन्द. ममुगतम्। * भाच. विरगतम्।

+ ममु., मच. यथाश्रुत व्याख्यानम्।

'उत्पन्नजन्तूनामिति पाठः'; **चन्द्र.७६** तन्तू (जन्तू) उत्त.; **व्यप्र.५६०**; **समु.१३१.**

(१) **मस्मृ.९।१४३**; **ब्यक्र १५९**; **स्मृच.२७१**, **विर.५८६**; **पमा.५४६**; **स्मृचा ७०** जातक (जातौ च); **समु.१३०**; **कृभ.८७०** जारजातककामजौ (कामजातकतस्करौ).

[1]**नियुक्तायामपि पुमान्नार्यां जातोऽविधानतः ।**
नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः ॥

(१) अविधानतः शुक्लवस्त्रादिनियमत्यागो विधाना भावः । स नार्हति रिक्थ नासौ क्षेत्रज इत्यर्थः । नियमत्यागेन देवरभ्रातृजाययोः पुत्रोत्पादने प्रवर्तमानयोर्युक्त पतितत्वम् । शास्त्रेण नियमितयोर्गमनानुज्ञानात् । मेधा.

(२) पैतृक क्षेत्रिणो बीजिनो वा धनम् । मवि.

(३) नियुक्तायामपि स्त्रिया घृताभ्यक्तत्वादिनियोगेति कर्तव्यता विना पुत्रो जातः स क्षेत्रिकस्य पितुर्धन लब्धुं नार्हति । ममु.

यो नियुक्ताऽन्यतः पुत्रं देवराद्वाऽप्यवाप्नुयात् ।
तं कामजमरिक्थीयं वृथोत्पन्नं प्रचक्षते ॥

(१) अनियुक्तेति च प्रश्लेषो द्रष्टव्यः । पूर्वोक्तेन च विरोधो यतस्तथा सत्यनर्थक इति चेदुक्तः पौनरुक्त्यपरिहारस्तत्र तत्र, पूर्वं तु न तमिच्छन्ति । ततश्चेय व्याख्या । नियुक्तायामपि जातः पैतृक रिक्थं नार्हति । कामजमिति । यत्तु उत्तर उच्यते, यद्यपि नियोगात्प्रवर्तते न कामात्तथापि तत्र कामोऽवश्यम्भावी अत उच्यते । त कामजमिति । मिथ्योत्पन्नं, यदर्थमुत्पादितस्तत्कार्यानर्हत्वादेवमुच्यते । एव च पूर्वोक्तस्य भागार्हत्वस्य प्रतिषेधोऽयमतश्च विकल्पितं अनियुक्तेति पाठे । पुनः पाठान्न समञ्जतेतरामित्युपाध्यायः । मेधा.

(२) या अनियुक्तेति विभाव्य भावोपलक्षणम् । यथाऽन्यतो जातो जारजस्तथा देवरादपि जात इति विशेषाभिधानार्थं पुनर्वचनम् । तेन देवरजन्यत्वमात्रेण विशेषो न शङ्कनीय इति तात्पर्यम् । मिथ्योत्पन्न व्यर्थ जातं धर्मानधिकारिणमित्यर्थः । मवि.

(३) या स्त्री गुर्वादिभिरनुज्ञाता देवराद्वाऽन्यतो वा सपिण्डात्पुत्रमुत्पादयेत्स यदि कामजो भवति तदा तम रिक्थभाज मन्वादयो वदन्ति । अकामज एव रिक्थभागी । स च व्याहृतो नारदेन – 'मुखान्मुख परिहरन् गात्रैर्गात्राण्यसंस्पृशन् । कुले तदवशेषे च संतानार्थे न कामतः ॥' इति । *ममु.

(४) **अनियुक्तामुत** इत्यत्रोक्तदोषोऽयं – येति । अनियुक्तेति छेदः । अरिक्थीय रिक्थिसबन्धिभिन्नम् । ×मच.

(५) गुरुभिर्नियुक्ता देवरादन्यतोऽदेवराद्वा हरेत् तन्त्विति । तन्त्वरिक्थ नियुक्ताया देवरे सपिण्डे वा(?)। नन्द.

आर्याणा शूद्रापुत्रो दायानर्हः

[2]**ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक् ।**
यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत् ॥+॥

(१) न रिक्थभाक् द्विजातीना शूद्रापुत्रः । किं सदा नेत्याह । यदेवास्य पिता दद्यात्तत् अस्य, पित्रा दशमाशकल्पना कृता तदेव तत्तस्य, तदधिक पैत्रिकं नान्यल्लभते । तत्रापि शखेनोक्त 'न शूद्रापुत्रोऽर्थभागी । यदेवास्य पिता दद्यात्स एव तस्य भागो, गोमिथुनं त्वपरं दद्युः ।' विभागकाले भ्रातर इति वाक्यशेषः, अन्ये त्वनूढायाः शूद्रायाः पुत्रस्येम विधिमिच्छन्ति, न ह्यत्र विवाहलिङ्ग किंचिदस्तीति वदन्तः । जातिविशेषवचनः शूद्राशब्दोऽतो यदेवास्य पिता दद्यात् अतो यदस्य प्रजीवनं पित्रा दत्तं तदेव दातव्यम् । अथ तेन कांचित् विभागकल्पना कृता यावज्जीव जीवनाय तदा तदेवास्य धनं न भ्रातृभिः किंचिदातव्यम् । यथा गौतमः शूद्रापुत्रप्रकरण एवाह–'अपरिग्रहीतास्वपि शुश्रूषुश्चेल्लभते वृत्तिमूलमन्तेवासिविधिना' इति । तेषा मते क्षत्रियवैश्ययोरनूढयोर्जाता रिक्थहराः प्राप्नुवन्ति । तत्र च कियानंश इति न ज्ञायते । यावानश ऊढयोरिति चेत्तत्रापि नोढाग्रहणं न लिङ्ग वचनं वास्ति । कथ नास्ति 'एक एवौरसः पुत्र' इति

---

(१) **मस्मृ.**९।१४४; **व्यक.**१५९ पैतृकं रिक्थ (पैतृके ऋक्थे); **विर.**५८७ सः (यः) शेष व्यकवत्; **स्मृसा.**७० व्यकवत्; **दमी.**८२ मपि पुमान्नार्यां (मपुत्राया पुत्रो); **समु** १३१ व्यकवत्; **कृभ.**८७० व्यकवत्.

(२) **मस्मृ.**९।१४७.

* भाच. ममुवत् पदार्थः । × शेष ममुवत् ।

+ व्यउ. व्याख्यानं अशुद्धिसंदेहान्नोद्धृतम् ।

(१) **मस्मृ.**९।१५५; **मिता.**२।१२५; **दा.**१४१; **अप.** २।१२५ (=) : २।१२८ पू.; **व्यक.**१५२ भवेत् (स्मृतम्); **मभा.**२८।३४; **स्मृच.**२६३ पू.; **विर.**५३५; **पमा.**५०६; **मपा.**६५८ वास्य (व हि); **रत्न.**१४१; **विचि.**२२६; **व्यनि.**; **नृप्र.**३९; **मच.** रिक्थ (दाय); **वीमि.**२।१२५; **व्यप्र.**४६६ भवेत् (स्मृतम्); **व्यउ.**१४६ ब्राह्मणक्षत्रिय (क्षत्रियब्राह्मण); **व्य त.**४५; **विता.**३२७,३७७; **समु.**१३०; **विच.**९९; **भाच.** रिक्थ (अश)

धर्मपत्नीष्वौरसो न चानूढयोर्जातानामौरसलक्षणमस्ति । उक्तं च 'अनियुक्तासुतश्चैवे'त्यादि। अभ्रातृजायाविषयमेतत् । तत्र किल नियोगे विहितेऽनियुक्तासुत इति प्रतिषेधेऽपि तद्विषया बुद्धिरुपजायते । अत्राप्यस्ति तर्हि जातमात्रेष्विति। तस्मात्परस्त्रीषु नियोगेन विनाऽनियुक्तासुताः सर्वेषा च तेषा प्रजीवनमुक्तम्। मेधा.

(२) तदपि जीवता पित्रा यदि शूद्रापुत्राय किमपि प्रदत्त स्यात्तद्विषयम्। मिता.२।१२५

(३) अनेन रिक्थभागित्वमेव निषिद्ध तत् पितृप्रसादलब्धधनदशमाशत्वे सतीति विज्ञेयम्। +दा.१४१

(४) इति, तत्पितृप्रसादलब्धे धने सति विभाग प्रति निषेधति । अन्यथा शूद्रापुत्र प्रति विभागविधिरनर्थकः स्यात्। अप.२।१२५

(५) यदा पिता प्रसन्नः शूद्राय पुत्राय ददाति तदा दशममंश दद्यादित्यर्थः। व्यक.१५२

(६) एतदुक्त भवति शूद्राशूद्रभ्रात्रोरनेकत्वेऽपि विवाहशून्यशूद्रापुत्र ऋक्थ नार्हति । अशूद्र एव सर्व गृह्णीयादिति । ×स्मृच.२६३

(७) पितृदत्त त्वधिकमपि लभ्यत एवेत्याह— ब्राह्मणेति । न रिक्थभाक् दशमाशाधिकरिक्थभाक्। तदेव धनमधिक लभ्यम्। मवि.

(८) एव च पूर्वोक्तविभागनिषेधाद्विकल्पः स च गुणवदगुणापेक्षः। अथवाऽनूढशूद्रापुत्रविषयोऽय दशमभागनिषेधः। *ममु.

(९) अत्र लक्ष्मीधरः। यदा पिता प्रसन्नः शूद्रापुत्राय ददाति, तदा दशमाशमेव दद्यादिति। तेन तन्मते शूद्रापुत्रो न ऋक्थभाक् न पित्रा दत्तऋक्थभागिति नेयम्। हलायुधपारिजाताभ्या च प्रथम वाक्यमत्यन्त निर्गुणोढशूद्रापुत्रपरतया, द्वितीयं च निर्गुणानूढशूद्रापुत्रपरतया, भागनिषेधकमेव वर्णितम्। विर.५३६

(१०) इति, तत्प्रीतिदत्तधनसद्भावविषयं इत्यविरुद्धम्। पमा.५०७

(११) तदपि जीवता पित्रा यदि शूद्रापुत्राय किमपि दत्त तदा विभागकाले भ्रातृभिर्न दातव्योंऽश इत्येतत्परं पित्रा न दत्तेऽशभाक्त्वमस्त्येव। मपा.६५८-६५९

(१२) एतत् अशुश्रूषुविषयम्। व्यनि.

(१३) अत्यन्तनिर्गुणऊढशूद्रापुत्रोऽपि न पितृऋक्थभागभागिति पारिजातः। विचि.२२६

(१४) पुत्रकर्तृकविभागे तु गुणहीनः शूद्रापुत्रो न दायभागित्याह— ब्राह्मणेति। पितृतः प्राप्तधनस्य तस्य नाशोऽन्यथैकाश इत्युक्तम्। मच.

(१५) इति मनुवचन, तत् पितृप्रीतिदत्तधनसद्भावविषयमिति दाक्षिणात्याः। निर्गुणापरिणीतशूद्रापुत्रविषयमिति तु पौरस्त्याः। तन्मन्दम्। 'यदेवास्य' इत्यादिवाक्यशेषोपात्तव्यवस्थामपहायानुपात्तसगुणनिर्गुणव्यवस्थायाः कल्पयितुमनर्हत्वात् । अपरिणीतशूद्रापुत्रभागस्य च दासप्रस्तावेऽभिधास्यमानत्वात्प्राच्येव व्यवस्था सुस्था। व्यप्र.४६६

(१६) किमय दशमोऽशः शूद्रापुत्राय देयः? नेत्याह— ब्राह्मणक्षत्रियविशामिति। नन्द.

ज्येष्ठोऽपि भ्राता भ्रातृवर्गको दायानर्हो दण्डार्हश्च

यो ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीयसः। सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः*॥

(१) विनिकारो राजपूजादिष्वव्रज्ञा, परधनवज्ञनम्। अज्येष्ठो बन्धुवत्पूज्य इत्युक्तम्। न सर्वेण सर्वज्येष्ठवृत्तिनिषेधोऽभागत्वं च ज्येष्ठाशानर्हत्व, नियन्तव्यैः अविशेषोपदेशात् वाग्दण्डधिग्दण्डाभ्याम् । धनदण्डश्चार्थानुरूपेऽपराधे । ×मेधा.

(२) ननु मनुना ज्येष्ठस्यैव समुदायद्रव्यापहारे दोषो दर्शितो न कनीयसा 'यो ज्येष्ठ' इति वचनात्।

+ विच. दागतम्।

× व्यम., विता. (पृ.३७७) स्मृचवद्भावः।

* शेषं यथाश्रुतम्।

* सवि.व्याख्यान 'अन्योन्यापहृत द्रव्य' इति याज्ञवल्क्यवचने द्रष्टव्यम्।

× भाच. मेधागतम्।

(१) **मस्मृ.**९।२१३; **मिता.**२।१२६ भ्रातॄन् (बन्धून्) सोऽ(स); **व्यक.**१४२; **विर.**४७८; **स्मृसा.**५५ पृ.; **पमा.** ५६७; **विचि.**२००; **सवि.**४३८ वि (द्वि) सोऽ(स); **व्यप्र.** ४३७, ५५५ ज्येष्ठो (लोभात्) लोभाद् (ज्येष्ठो); **व्यम.**५८ व्यप्रवत्; **विता.**३३१-३३२; **समु.**१४५

१ परे धनेन वज्ञ. २ सर्वे ज्ये.

३ व्यमवि. ४ धनं चार्था.

नैतत् । यतः संभावितस्वातन्त्र्यस्य पितृस्थानीयस्य ज्येष्ठस्यापि दोष वदता ज्येष्ठपरतन्त्राणा कनीयसा पुत्रस्थानीयाना दण्डापूपिकनीत्या सुतरा दोषो दर्शित एव । +मिता.२।१२६

(३) विनिकुर्वीत लुप्तभागानल्पभागान्वा कर्तु यतेत। अज्येष्ठो ज्येष्ठोचितामिवादनाद्यनर्हः । एव च ज्येष्ठ इत्यभिधानान्न कनिष्ठाना लुब्धत्वकरणेऽभागत्वमिति ग्राह्यम् । ×मवि.

(४) यो ज्येष्ठो भ्राता लोभात्कनीयसो भ्रातॄन् वञ्चयेत्स ज्येष्ठभ्रातृपूजाशून्यः सोद्धारभागरहितश्च राजदण्डयश्च स्यात् । ममु.

विकर्मस्था भ्रातरो दायानर्हाः। कनिष्ठेभ्योऽदत्ते यौतकनिषेधः ।

सर्व एव विकर्मस्था नार्हन्ति भ्रातरो धनम् ।
न चादत्वा कनिष्ठेभ्यो ज्येष्ठः कुर्वीत यौतकम् ॥

(१) विकर्मस्थाः प्रतिषिद्धाचरणाः अनादेशकृता अकृतदारा दासीभार्याः । पतितस्य पृथक् प्रतिषेधात् अभ्यासे वर्तमानानामेषा प्रतिषेधः । न चादत्वा उपयुक्त एषा धनादानीयमङ्गीकृत्य यदि यौतक या वृद्धि नयेत् । कुटुम्बार्थे चानुतिष्ठमानाना तेषामन्येषा भ्रातॄणा सबन्ध्युपविष्ट स्थापयेद्यदा ते वक्ष्यन्ते कुतस्तद्धनमिति तदा मूल दर्शयिष्यामीति तादृश वृद्धिसहितमपि सर्वेषामपि दापयेत् । यदि तु तस्मिन्नेव काले भ्रातृणा दर्शयेदिदमधिक दृश्यते तद्यथाश गृह्णीताहमपि स्वतस्तत्पृथक्कृत्य वृद्धि नेष्यामीति तदा नास्ति तेषा भागस्तस्यैव तद्यौतकम् । मेधा.

(२) विकर्मस्थाः ब्राह्मणाः सन्तो गोरक्षणशूद्रसेवादिकुवृत्तिपराः । न चेति । यौतक पित्रर्थादन्यत्कृत पृथग्भूत स्वार्थव्ययं पितृधनात्कनिष्ठेभ्यस्तावददत्वा न कुर्वीत । ज्येष्ठ इति तत्कुटुम्बव्ययचिन्ताकारिपरम् ।
*मवि.

(३) अपतिता अपि ये भ्रातरो द्यूतवेश्यासेवादिविकर्मासक्तास्ते ऋक्थ नार्हन्ति । न च कनिष्ठेभ्योऽननुकल्प्य ज्येष्ठः साधारणधनादात्मार्थमसाधारणधन कुर्यात् । ममु.

(४) यौतक तेभ्यः पृथक्कृत्य कल्पित द्रव्यं, युमिश्रणे युधातुपाठात् । हलायुधस्तु यौतक भार्यालङ्कारादीत्याह । विर.४५८

(५) श्रौतस्मार्तकर्मानधिकारिणो विकर्मासक्ताश्च भागानर्हा इति भावः । व्यप्र.५६१

(६) गुणवत्पुत्रान्तरसत्वे दुर्वृत्तस्याशानर्हतामाह मनुः—सर्व इति । व्यम.७३

(७) कनिष्ठेभ्यो भाग अदत्वा ज्येष्ठः स्वदुहितुः स्त्रीधन न कुर्वीत । नन्द.

याज्ञवल्क्यः

पतितक्लीवजात्यन्धादयो दायानर्हा भर्तव्या.

क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः ।
अन्धोऽचिकित्स्यरोगाद्या भर्तव्याः स्युर्निरंशकाः ॥

(१) य एव तु धनभाक् स्यात्, तेनैव भ्रातरस्तत्सुताश्चैवरूपाः — पतितः तत्सुतः क्लीवः पङ्गुरुन्मत्तको जडः। अन्धोऽचिकित्स्यरोगी च भर्तव्यास्तु निरंशकाः।

+ पमा., विता. मितागतम् । × मच. मविगतम् ।

(१) **मस्मृ.**९।२१४; **दा.**१०१ पू.; **अप.**२।११६ पू.; २।१४० उत्तरार्धे (दीर्घनीव्रामयग्रस्ता जडोन्मत्तान्धपङ्गवः); **व्यक.**१४३ पू., १४० उत्त., **स्मृच** २७१ प.; **विर.**४८५ पू., ४५७ उत्त.; **स्मृसा.**५८ पू.; **रत्न.**१५१ पू.; **विचि.** २०६ पू.; **व्यनि.** पू.; **चन्द्र.**७७ विक (विध) पू.; **व्यप्र.** ५६१ पू.; **व्यम.७३** पू.; **विता.**४३३ पू.; **सेतु.** ६३ पू., **याज्ञवल्क्यः**; **समु.**१३१ पू.: १२८ उत्त.; **विच.७८** पू., **याज्ञवल्क्यः**.

१ (अना.....नयेत्०).

* भाच. मविगतम् ।

(१) **यास्मृ.**२।१४०; **अपु** २५६।२७ क्लीबो...ज्जः (पतितः तत्सुतः क्लीवः) स्युर्नि (तु नि), **विश्व.**२।१४४ गाद्या (गी च) शेष अपुवत्; **मिता.**; **दा.**१०२ पूर्वार्ध अपुवत्, द्या (र्तौ) स्युर्नि (ते नि); **अप.**स्युर्नि (तु नि), **व्यक.**१४४ अपुवत्; **स्मृच.**२७१ त्स्य (त्स) शेष अपुवत्; **विर** ४८८ त्स्य (त्स) शेष अपुवत्; **पमा.**५४४; **मपा.**६८१ गाद्या (गश्च); **रत्न.**१५०; **विचि.** २०७ स्मृसावत्; **व्यनि.** क्लीबो . ज्जः (पतितः कुत्सितः क्लीवः) गाद्या (गी च) स्युर्नि (तु नि), **स्मृचि.**३१ क्लीबो...ज्जः (पतितस्तत्सुतक्लीब) त्स्य (त्स) स्युर्नि (तु नि); **नृप्र.**२० चतुर्थपादः; **सवि.**३९६; **मच.**९।२०२ द्या (र्तौ) स्युर्नि (च नि); **चन्द्र.७६** स्मृसावत्; **वीमि.** स्युर्नि (ते नि); **व्यप्र.२६८** चतुर्थपादः : ५५८; **व्यम.७३** मपावत्; **विता.**४३१ तत्तज्जः (तः खञ्जः) त्स्य (त्स) द्या (र्तौ); **सेतु.६३** दावत्, **मनुः**; **समु.१३१** अपवत्; **विच.७८-७९** दावत्, **मनुः**.

तत्सुतः पतितोत्पन्न एव। उन्मत्तो ग्रहगृहीतः। जडः सर्वदा प्रज्ञाहीनः। कुष्ठाद्यसमाधेयपापरोगग्रस्तोऽचिकित्स्यरोगी। चशब्दः स्मृत्यन्तरोक्तबधिरादिप्राप्त्यर्थः। स्पष्टमन्यत्। षड्ग्वादिवचनान्यग्निहोत्राद्यनधिकृतानां सर्वेषामुपलक्षणार्थानीति केचित्। तदसत्। पुरुषार्थत्वाद्द्रव्यस्य। अवैद्यस्य चानधिकृतस्यैव द्रव्यार्हत्वदर्शनात्। यथाह गौतमः— 'स्वयमार्जितमवैद्येभ्यो वैद्यः काम न दद्यादिति। 'अवैद्याः सम विभजेरन्निति च। अतः प्रतिपथादेर्वैषामनशत्व, न त्वनधिकृतत्वात्। जन्मान्तरीयमहापातकलिङ्गयोगाद्वा निरंशत्वम्। पितामहद्रव्यसंबन्धस्त्वपतितानामन्धादीनामस्त्येवेति सप्रदायः। सामर्थ्येनैव तु भरणमात्रातिरिक्तद्रव्यविनियोगाशक्तेरौचित्यानुवादोऽयमित्यवसेयम्। तथा च स्वायम्भुव —'येषां ज्येष्ठः कनिष्ठो वा हीयेताशप्रदानतः। म्रियेतान्यतरो वापि तस्य भागो न लुप्यते॥' इति। अनेन प्राप्तस्याशस्य विनियोगाशक्तावौचित्यप्राप्तमपहारं दर्शयति। अत एव च 'तस्य भागो न लुप्यते' इति। एव च स्वयमेवैते निरंशकाः। विश्व.२।१४४

(२) पुत्रपत्न्यादिसंसृष्टिना यदायग्रहणमुक्त तस्यापवादमाह —क्लीवोऽथ इति। क्लीवस्तृतीयाप्रकृतिः। पतितो ब्रह्महादिः। तजः पतितोत्पन्नः। पङ्गुः पादविकलः। उन्मत्तकः वातिकपैत्तिकश्लैष्मिकसानिपातिकग्रहावेशलक्षणैरुन्मादैरभिभूतः। जडो विकलान्तःकरणः। हिताहितावधारणाऽक्षम इति यावत्। अन्धो नेत्रेन्द्रियविकलः। अचिकित्स्यरोगोऽप्रतिसमाधेययक्ष्मादिरोगग्रस्तः। आद्यशब्देनाश्रमान्तरगतपितृद्वेष्युपपातकिबधिरमूकनिरिन्द्रियाणा ग्रहणम्। एते क्लीवादयोऽनशाः रिक्थभाजो न भवन्ति। केवलमशनाच्छादनदानेन पोषणीया भवेयुः। एतेषा विभागात्प्रागेव दोषप्राप्तावनशत्वमुपपन्न न पुनर्विभक्तस्य। विभागोत्तरकालमप्यौषधादिना दोषनिर्हरणे भागप्राप्तिरस्त्येव ! 'विभक्तेषु सुतो जातः सवर्णाया विभागभाक्' इत्यस्य समानन्यायत्वात्। पतितादिषु तु पुंलिङ्गत्वमविवक्षितम्। अतश्च पत्नीदुहितृमात्रादीनामप्युक्तदोषदुष्टानामनशित्व वेदितव्यम्। *मिता.

(३) तजः पतितोत्पन्नः। तस्य यद्यपि पतितग्रहणेनैव ग्रहणं सिद्धम्। उक्तं वसिष्ठेन 'पतितोत्पन्नः पतितो भवतीत्याहुः' इति। तथाऽपि तस्य पृथग्ग्रहण कार्यम्। अन्यथा 'औरसक्षेत्रजास्तेषाम्' इति वाक्यबलाद्भागार्हता स्यात्। एतेषा च वाचनिकमशानार्हत्व, न पुनर्धर्मानधिकारित्वहेतुक, धर्मानधिकारिताया हेत्वभावात्। यद्यपि पतितस्य धर्मानधिकारस्तथाऽपि नान्धपङ्ग्वादीना, तेषा ह्याज्यावेक्षणाद्यङ्गत्वेव धर्मविशेषेऽनधिकारो न सामान्यतो धर्ममात्रे। अस्ति हि तेषामग्निष्टे धर्मे गृह्याद्युक्तोऽधिकारः। कृतदारा हि ते। तथा हि मनुः—'यद्यर्थिता तु दारैः स्याःक्लीवादीना कथचन। तेषामुत्पन्नतन्तूनामपत्य दायमर्हति॥ अतः क्लीवादीना दारवत्त्ववचनात्तेषामुपनयनमस्तीति गम्यते। न च वाच्य दारपरिग्रहे सति पश्चादन्धत्वादिदोषोदये विषये यद्यर्थितेति वचनमिति। तथा सति पूर्ववाक्ये जात्यन्धग्रहण न क्रियेत। भवतु वा जात्यन्धादीनामुपनयनदारपरिग्रहाभावादिष्टे धर्मे तेषामनधिकारः, पूर्वे तु शूद्रादिवदस्त्येव। तस्मान्न धर्मानधिकारित्वहेतुकं तेषामनशत्वं, किं तु वाचनिकमेव। अप.

(४) भर्तव्या दायहरैरिति शेषः। 'ऋक्थग्राहिभिस्ते भर्तव्या' इति विष्णुस्मरणात्। स्मृच.२७१

(५) तत्सुतः पातित्याद्यनन्तरोत्पन्नः। विर.४८८

दायानर्हाणामपत्यानि निर्दोषाणि दायार्हाणि, तेषां दुहितरो भर्तव्याः

[3]औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः।

(१) **यास्मृ.**२।१४१; **अपु.**२५६।२८, **विश्व.**२।१४५ साः (स); **मिता.**; **दा.**१०४ साः (स) द्वै (त्र); **अप.**; **व्यक.** १४४, **स्मृच** २७२ स्त्वेषां (श्चैषां) पृ; **विर.**४८८-४८९ स्त्वेषा (स्तेषा) श्चैषा (स्त्वेषां) द्वै (त्र); **स्मृसा.**५८-५९ साः (सः) जास्त्वे (जस्ते): **१३० उत्त.**; **पमा.**५४६ स्त्वेषां (स्तेषा) प्र (च); **मपा.**६८३ स्त्वेषां (स्तेषा); **रत्न.**१५१; **विचि.**२०७ साः (स) स्त्वेषा (स्तेषां) श्चैषा (स्त्वेषां); **व्यनि.** साः (स) जास्त्वेषा (जादीनां) कात्यायनः, **सवि.**३६५ स्मृचवत्, पृ.; **वीमि.** स्त्वेषां (स्तेषां); **व्यप्र.**५५९ पृ., ५६० द्वै (न्तो) उत्त; **व्यउ.**१५० मपावत्; **व्यम.**७४ मपावत्; **विता.**४३-१ विश्ववत्; **राकौ.**४५९; **सेतु.**६५ द्वै (त्र) उत्त.; **समु.**१३१ विश्ववत्; **विच.**८१ स्त्वेषां (स्तेषां) द्वै (न्तो); **दच.**३९ (८) द्वै (त्र).

* पमा., मपा. मितागतम्।

सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः ॥

(१) औरसक्षेत्रजादयस्तु पुत्राः षड्ग्वादीनामपि निर्दोषाः सन्तो भागहारिण एव । क्लीबस्यापि क्षेत्रजादयो भवन्त्येव । सुताश्चैषा प्रभर्तव्याः दुहितरश्च पुत्रिकाः षड्ग्वादीना तद्रिक्थग्राहिभिः प्रकर्षेण ग्रासाच्छादनादिना भर्त्तव्याः, यावदुचितभर्तृभिः सयोजिताः, तैश्च गृहाधिपत्येन सत्कृताः । विश्व.२।१४५

(२) क्लीबादीनामनशित्वात्तत्पुत्राणामप्यनशित्वे प्राप्ते इदमाह—औरसा इति । एतेषा क्लीबादीनामौरसाः क्षेत्रजा वा पुत्रा निर्दोषा अंशग्रहणविरोधिक्लैब्यादिदोषरहिता भागहारिणोऽशग्राहिणो भवन्ति । तत्र क्लीबस्य क्षेत्रजः पुत्रः संभवत्यन्येषामौरसा अपि । औरसक्षेत्रजयोर्ग्रहणमितरपुत्रव्युदासार्थम् । क्लीबादिदुहितॄणा विशेषमाह — सुताश्चैषामिति । एषा क्लीबादीना सुता दुहितरो यावद्विवाहसस्कृता भवन्ति तावद्भरणीयाः चशब्दात्सस्कार्याश्च । *मिता.

(३) तत् द्वापरादिविषय मन्तव्यम् । कलौ क्षेत्रजपुत्रनिषेधात् । सुताः कन्यकाः । एषा निरशकानाम् । भर्तव्या निरशकपुत्रद्रव्यग्राहिभिः निरशकभरणप्रकारेण यावज्जीवमिति । अस्यापवादो 'यावद्वै भर्तृसात्कृताः' इति । यावद्विवाहसस्कृता भवन्ति तावदेवेत्यपवादभावस्यार्थः । ×स्मृच.२७२–२७३

(४) पतितौरसाः पूर्वोत्पन्ना एव । अन्यौरसा उत्तरजा अपि । विचि.२०७

दायानर्हाणां साध्व्यो भार्या भर्तव्या नेतराः

अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः ।
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥

(१) अव्यभिचारिण्योऽपि स्त्रीधनाद्यवष्टम्भेन प्रतिकूलाः स्वातन्त्र्यवृत्तयस्तथैव निर्वास्याः । चशब्दात् स्त्रीधनोचिता एवेत्यभिप्रायः । विश्व.२।१४६

(२) क्लीबादिपत्नीना विशेषमाह—अपुत्रा इति । एषा क्लीबादीनामपुत्राः पत्न्यः साधुवृत्तयः सदाचाराश्चेद्भर्तव्या भरणीयाः । व्यभिचारिण्यस्तु निर्वास्याः । प्रतिकूलास्तथैव च निर्वास्या भवन्ति । भरणीयाश्चाव्यभिचारिण्यश्चेत्, न पुनः प्रातिकूल्यमात्रेण भरणमपि न कर्तव्यम् । +मिता.

(३) कन्यकास्तु पतितोत्पन्ना अपि पोष्या विवाहयितव्याश्च । यदाह वसिष्ठः —'पतितोत्पन्नः पतितो भवतीत्याहुरन्यत्र स्त्रियाः सा हि परगामिनी' इति । अप.

(४) एषा निरंशकाना अपुत्रा योषितः परिणीताः स्त्रियः सदाचारा निरशकपितृद्रव्यग्राहिभिरेव निरशकभरणप्रकारेणैव भर्तव्याः । व्यभिचारिण्यो भर्तृप्रतिकूलाश्च गृहाद्बहिष्कार्याः । अत्रासाधुवृत्तयो निर्वासिता न भर्तव्याः । प्रतिकूलास्तु निर्वासिता भर्तव्याः । स्मृच.२७३

(५) प्रतिकूला इत्यत्र प्रातिकूल्य विपप्रयोगादिकारित्व विवक्षितं, न तु कलहमात्रकारित्वम् । विर.४८९

(६) क्षतवृत्तास्तु गृहाद्बहिर्निष्कासनीयाः । न च भरणीयाः । पोषकप्रातिकूल्यमात्रे तु निष्कासनीया एव, पोषण तु कर्तव्यमेवेति वृद्धाः । एवमपुत्रक्रमेणाग्रहित्वेन वक्ष्यमाणाना पत्न्यादीना सप्तृष्ठादीना च दायानर्हतापादकधर्मयोगित्वे तद्रिक्थभाक्त्व नेति ज्ञातव्यम् । याज्ञवल्क्येन 'पत्नी दुहितरश्चे'त्यादिकमभिधाय तदपवादेन 'क्लीबोऽथ पतितस्तज्जः' इत्यभिधानात् । रत्न.१५२

(७) द्वितीयेन (चकारेण) सुरापानादिकारिण्य इति समुचीयते । एवकारेण भर्तव्यत्व व्यवच्छिनत्ति । वीमि.

व्यभिचारिणी भर्तव्या, साध्व्यास्त्वागे तस्यास्तृतीयभागहरत्वम्

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् *॥
आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीम् ।
त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः *॥

---

* अप., पमा., मपा., वीमि., व्यप्र. मितागतम् ।
× स्मृच. स्मृचगतम् ।

(१) **यास्मृ.**२।१४२, **अपु.**२५६।२९, **विश्व.**२।१४६; **मिता.**; **दा.**१०४; **अप.**; **व्यक.**१४४; **स्मृच.**२७२; **विर.**४८९; **स्मृसा.**५९ श्चैषां (श्चैव); **पमा.**५४६; **मपा.** ६८३; **रत्न.**१५२; **विचि.**२०७ स्मृसावत्; **व्यनि. मनुः**; **चन्द्र.**७७; **वीमि.**; **व्यप्र.**४९६,५६०; **व्यउ.**१५०; **व्यम.** ७४; **विता.**४३१: ४५० पृ.; **बाल.**२।१३५ (पृ.२३९); **सेतु.**६५; **समु.**१३१; **विच.**८१; **दच.**३९ (=) पृ.

+ मपा., व्यम. मितागतम् ।

* व्याख्यानं स्खलादिनिर्देशश्च (पृ.१०८६,१०८७) इत्यत्र द्रष्टव्यः ।

नारदः

पितृद्विट्पतितषण्ढादयो दायानर्हाः

[1]**पितृद्विट् पतितः षण्ढो यश्च स्यादौपपातिकः ।**
औरसा अपि नैतेंऽशं लभेरन् क्षेत्रजाः कुतः ॥

(१) पितृद्विट् पितृद्वेषी । उपपातकमुपपातः, तद्युक्त औपपातिकः । अप.२।१४०

(२) अपपात्रितः राजवधादिना दोषेण बान्धवैरस्य घटापवर्जन कृतम् । ×व्यक.१४४

(३) आवपातिकः अवपातितः 'आवपातिकस्य ऋक्थपिण्डोदकानि निवर्तन्ते' इति शङ्खलिखितस्मरणात् । अवपातितस्य महापराधेन बन्धुबहिष्कृतस्येत्यर्थः । स्मृच.२७०

(४) पितर यो द्वेष्टि स पितृद्विट्, द्वेषश्च पितरि जीवति मारणादिफलः, मृते तु तदुद्देशेनोदकाद्यदानरूपः । अपपात्रितः राजवधादिदोषेण कृतघटापवर्जनः, प्रकाशकृता तु औपपातकीति पठित्वा उपपातकैर्युक्त इति विवृतम् । विर.४८९

(५) पितृद्विट् पितरि जीवति तत्ताडनादिकृत्, मृते तु तच्छ्राद्धादिविमुखः । औपपातिकः उपपातकैः ससृष्टः । दात.१७२

(६) पितृद्वेषो नामासौ मम पिता नेत्येवंरूपः, अन्यथा पितुः पक्षपाते पुत्राणा द्वेषसभवे तत्र भागस्य विहितत्वात् । सवि.३६४

(७) औपपातिको विनाशकः अनिष्टश्चाभियुक्तश्च । नाभा.१४।२०

(८) अपपात्रितः राजद्रोहाद्यपराधेन बन्धुभिर्घटस्फोटादिना बहिष्कृत इति मदनः । व्यवसायार्थं नावादिना समुद्रमध्ये द्वीपान्तरं गत इति तु युक्तम् । 'द्विजस्याब्धौ तु नौयातुः शोधितस्याप्यसंग्रहः' इति तस्य कलौ संसर्गनिषेधात् । राजद्रोहादौ घटस्फोटबहिष्कारयोरविधानाच्च । व्यम.७३

(९) औपधाद्दोषनाशे भागोऽस्त्येव पितृद्विषेऽपि पैतामहे भाग एव । स्वाम्यसाम्यात् । यः पुत्रान्तरे स्नेहकामादिना पितैव पुत्र द्वेष्टि तत्पुत्रो लभेतैव भागम् । विता.४३२

महारोगिजडोन्मत्तादयो दायानर्हा भर्तव्याः । दायानर्हाणामपत्यानि निर्दोषाणि दायार्हाणि ।

[1]**दीर्घतीव्रामयग्रस्ता जडोन्मत्तान्धपङ्गवः ।**
भर्तव्याः स्युः कुलस्यैते तत्पुत्रास्त्वंशभागिनः ॥

दीर्घे राजयक्ष्मादि, तीव्रे कुष्ठादि, भर्त्तव्याः पोषणीयाः । कुलस्य भ्रात्रादेः । विर.४८९

या: पत्न्यो विधवाः साऽन्यो ज्येष्ठेन श्वशुरेण वा ।
गोत्रजेनापि धान्येन भर्तव्याश्छादनाशनैः ॥

(१) रक्षणादिसमर्थेषु श्वशुरादिषु अविभक्तधनग्राहिषु सत्सु तैरेव गृहीतधनैर्भरण कार्यम् । धनग्राहिणेति सर्वत्र ज्येष्ठादौ शेषो द्रष्टव्यः । धनग्रहणनिमित्तत्वाद्भरणस्य । स्मृच.२९२

(२) अविभागे तु नारदः— यावत्य इति । एवं ससृष्टा अपीति विज्ञानेश्वरादयः । न त्वपरार्कगौडादयः । विता.३९८

× रत्न. व्यकवत् ।

(१) **नासं.**१४।२० षण्ढो(षण्डो); **नास्मृ.**१६।२१; **मिता.** २।१४०; **दा.**१०३ नासवत्; **अप.**२।१४०; **व्यक.**१४४, **स्मृच.**२७० दौप (दव); **विर.**४८९ षण्ढो (षण्डो) दौपपातिक. (दपपात्रितः); **पमा.**५५४; **मपा.**६८२; **रत्न.**१५०; **विचि.** २०७-२०८ विरवत्; **दात.**१७२ नासवत्, **सवि.**३६४ षण्ढो (षण्डो) दौपपातिकः (दवपातितः) नैतेंऽशं(नैवांश); **चन्द्र.** ७७ षण्ढो (षण्डो) दौपपातिकः (दपपातितः); **वीमि.**२।१४०; **व्यप्र.**५५८; **व्यउ.**१४९; **व्यम.**७३ दौपपातिकः (दपयात्रितः); **विता.**४३१-४३२ नैतेंऽश (नैवैते) शेष व्यमवत; **बाल.**२।१३५ (पृ.२२१,२३९); **सेतु** ६३ नासवत्; **समु.** १३० षण्ढो (षण्डो) दौपपातिकः (दपपात्रितः) लभे (भजे); **विच.७८.**

(१) **नासं.**१४।२१ लर्यै (टुम्ब्या.); **नास्मृ.**१६।२२ लर्यै (ले चै), **अभा.**४८ स्ता...गवः (स्तमृकान्धबधिरोऽपि वा) पृ ; **विर.**४८९; **रत्न.**१५० जडोन्मत्तान्ध (ये जडोन्मत्त); **विचि.**२०८; **चन्द्र.**७७ त्पुत्रा (त्सुता); **व्यम.**७३ रत्नवत ; **विता.**४३२ (=) र्घे (र्घं) त्पुत्रास्त्वंशभागिनः (त्सुता भागहारिणः) शेषं रत्नवत्; **समु.**१३१ रत्नवत्, **विच.८०** न्ध (दि).

(२) **स्मृच.**२९२; **रत्न.**१५३ याः...ब्व्यो (यावत्यो विधवा नार्यो) वा (च) धा (वा); **व्यप्र.**५१६ याः पत्न्यो (यावत्यो) धा (वा); **विता.**३९८ याः...ब्व्यो (यावत्यो विधवा नार्यो) पि धा (थ वा); **समु.**१४१ व्यप्रवत्.

आढकांस्तु चतुस्त्रिंशत्सत्वारिंशत्पणांस्तथा ।
प्रतिसंवत्सरं साध्वी लभेत मृतभर्तृका ॥

जीवनमात्रसाधनधनधान्यस्य स्वल्पत्वे इयत्तामाह नारदः—आढकानिति । आढको नामाष्टोनद्विशतप्रस्थपरिमितो धान्यसंचयः । पणः कार्षापणः । स च व्यावहारिकाशीतिभागस्य स्थाने क्वचिद्देशे प्रवर्तते । तेन यत्र देशे पणो न प्रवर्तते तत्र व्यावहारिकनिष्काशीतिभाग लभते । स्मृच.२९३

अनियोगजः क्षेत्रजो दायानर्हः

अनियुक्ता तु या नारी देवराज्जनयेत्सुतम् ।
जारजातमरिक्थीयं तमाहुर्ब्रह्मवादिनः ॥

अनियुक्तायाः स्वेच्छया देवराज्जातो जारजातः न रिक्थभाक् । नापत्य तयोः पित्रोः, प्रत्यवायो दण्डश्च । अन्यजातो दूरत एव । नासं.१३।८४

व्यभिचारिणी भर्तव्या

व्यभिचारे स्त्रिया मौण्ड्यमधःशयनमेव च ।
कदन्नं च कुवासश्च कर्म चावस्करोज्झनम् *॥

जीवति पितरि, पत्यौ, स्वामिनि च सुत., भार्या, दासश्च धनानधिकारी

अधनास्त्रय एवैते भार्या दासस्तथा सुतः ।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् —॥

बृहस्पतिः

सवर्णाजा अपि सदोषा अधार्मिकाः पुत्रा दायानर्हा.

सवर्णाजोऽप्यगुणवान्नार्हः स्यात्पैतृके धने ।
तत्पिण्डदाः श्रोत्रिया ये तेषां तदभिधीयते ॥
उत्तमर्णाधमर्णेभ्यः पितरं त्रायते सुतः ।
अतस्तद्विपरीतेन नास्ति तेन प्रयोजनम् ॥
तया गवा किं क्रियते या न धेनुर्न गर्भिणी ।
कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ॥
शास्त्रशौर्यार्थरहितस्तपोज्ञानविवर्जितः ।
आचारहीनः पुत्रस्तु मूत्रोच्चारसमस्तु सः ॥

(१) अगुणवान् पितुर्दृष्टादृष्टकार्योपयोगिगुणरहितः । तथा चानन्तरमुक्त तेनैव 'उत्तमर्णाधमर्णाभ्या' इत्यादि । उत्तममृणं ऋषिदेवपितृणामृणं, अधममृण धनिकहस्तादृगृहीतमृण, यथा मूत्रपुरीषे स्वकीयोदरान्निर्गतेऽप्यत्यन्तहेयभूते तथैव विद्यादिरहितः सूनुरौरसोऽपि हेयभूत इति मूत्रपुरीषोच्चारसम इत्युक्तम् । स्मृच.२७१

(२) अगुणवान् अग्निमवाक्यखण्डे व्यक्तः । तत्पिण्डदाः अगुणवद्ग्रासाच्छादनदातारः । विर.४८७

(३) तत्पिण्डदाः धनिपिण्डदाः । अत एव श्रोत्रिया इत्युक्तम् । अगुणवान् गुणविरुद्धदोषवान् अगुणवद्ग्रासाच्छादनदातार इति रत्नाकरः । एतन्मतेऽपि सुतरा धनिपिण्डदातृत्व प्रतीयते । दात.१७२

(४) अयमर्थः । पित्रादेर्गौर्ध्वदैहिककर्मणः कर्ता सुतोऽसत्कृतोऽपि वरः श्रेष्ठो, वेदपारगोऽप्यपरो न वर इति । व्यप्र.५६१

---

* व्याख्यान स्थलादिनिर्देशश्च (पृ.१०९९) इत्यत्र द्रष्टव्यः ।

— व्याख्यान स्थलादिनिर्देशश्च (पृ.८३४) इत्यत्र द्रष्टव्यः ।

(१) **स्मृच.**२९३ कास्तु (कास्तु) स्त्रिश्च (र्विंशच) पणा (पणा) भेत (भते); **सवि.**४१०; **समु.**१४१.

(२) **नासं.**१३।८४ ब्रह्म (धर्म); **नास्मृ.**१५।८४,८५; **नृप्र.**३४.

(३) **दा.**१००; **व्यक.**१४४ र्णा (र्ण) श्रो (क्षे) पां तद (षामन्व), **स्मृच.**२७१ पृ; **विर** ४८७, **रत्न.**१५१ तदभि (तत्तु वि), **विचि** २०६ त्विण्डदाः (त्पिण्डदाः) तेषा तदभि (धन तेषा वि); **व्यनि.** र्णा (र्ण); **दात.**१७२; **व्यप्र.**५६०; **व्यम.**७३ र्णा (र्ण) तदभि (तत्तु वि); **विता.**४३३ रत्नवत्; **समु.**१३१ रत्नवत्; **विच.**८०.

(१) **दा.**१००-१०१; **व्यक.**१४४ स्तद्वि (स्तु वि); **स्मृच.**२७१ र्णेभ्यः (र्णाभ्या) स्तद्वि (स्तु वि), **विर.**४८७; **रत्न.**१५१ स्तद्वि (स्तु वि) नास्ति तेन (तेन नास्ति), **व्यनि.**; **व्यप्र.**५६१; **व्यम.**७३ रत्नवत्; **बाल** २।१३५ (पृ २१९) व्यकवत्; **समु.**१३१ स्मृचवत्.

(२) **दा.**१०१, **व्यक.**१४४ धेनुः (दोग्ध्री); **स्मृच २७१** व्यकवत्, **विर.**४८७ पुत्रेण जातेन (तेन तु पुत्रेण); **रत्न.**१५१; **व्यनि.** न धेनुर्न (धेनुर्न च); **व्यप्र.**५६१; **विता.**४३३ उक्त.; **समु.**१३१ व्यकवत्.

(३) **दा.**१०१ ज्ञानवि (विज्ञान); **व्यक.**१४४ र्थं (दि) स्तु सः (स्स्मृतः); **स्मृच.**२७१ स्तु सः (स्स्मृतः) शेष दावत्; **विर.**४८७; **रत्न.**१५१ स्मृचवत्; **व्यनि.** शौ (का) शेष स्मृचवत्; **दात.**१७२ र्थं (दि) शा (दा) कात्यायनः; **व्यप्र.**५६१ स्तु सः (स्स्मृतः); **विता.**४३३ व्यप्रवत्; **सेतु.**६३ दातवत्, कात्यायनः; **समु.**१३१ स्मृचवत्; **विच.**८० दातवत्, कात्यायनः.

आर्याणां शूद्रापुत्रो भर्तव्यः न दायार्हः । अनन्वयिनो धनं राजगामि ।

कामतश्च शूद्रावरोधजस्य भ्रातुरंशं संमानमात्रं प्रेते पितरि दद्युः शुश्रूषुश्चेत् ।

अनन्वयिनः सर्वं राजा हरेत्, तदनुज्ञया वावरोधज इत्येके ।

अभ्रातृकस्तु दुहितृतत्सुताभावे सर्वभाक् स्याद् राजानुज्ञया, बृहस्पतिवचनादेव । विश्व.२।१३८

अनपत्यस्य शुश्रूषुर्गुणवान् शूद्रयोनिजः ।
लभेताजीवनं शेषं सपिण्डाः समवाप्नुयुः ॥

(१) वर्तनोचितकृष्याद्यर्थं किंचिद्दातव्यमित्यर्थः । निर्गुणस्य अन्तेवासिविधिना वृत्तिमूल भक्तादिक पादशुश्रूषया देयम् । दा.१४१

(२) अपरिगृहीतासु इत्यधिकारादनूढापुत्रविषयमेतत् । *विर.५३६

(३) अनपत्यस्य पितुस्त्रैवर्णिकपुत्रशून्यस्य । ×विचि.२२६

कात्यायनः

अक्रमोढजसगोत्रजप्रव्रज्यावसितप्रतिलोमजा दायानर्हाः. पितृद्रव्यात् भर्तव्याः । अबन्धुद्रव्य राजगामि ।

अक्रमोढासुतश्चैव सगोत्राद्यस्तु जायते ।
प्रव्रज्यावसितश्चैव न रिक्थं तेषु चार्हति ॥

(१) हीनवर्णस्त्रीपरिणयनानन्तर उत्तमवर्णस्त्रीपरिणयने द्वयोरप्यक्रमोढात्वं तयोः सगोत्रात् नियुक्तादुत्पन्नः क्षेत्रजः पुत्रो नार्हति धनम् । +दा.१०३

(२) अक्रमेण वर्णक्रमजन्यक्रमातिक्रमेण योढा तस्याः सुतोऽक्रमोढासुतः । सगोत्रात्स्वपेक्षया समानगोत्रात्परिणेतुर्यो जायते । ÷अप.२।१४०

(३) तथा प्रव्रज्यावसितः स्वीकृतचतुर्थाश्रमत्यागी यो भवेत् । तेषु अक्रमोढासुतादिषु । ऋक्थं प्राप्तुं नार्हति, न ऋक्थानर्हा इत्यर्थः । स्मृच.२७१

(४) अक्रमोढासुतोऽत्र नानावर्णाना कन्याना विवाहे यः क्रमः शास्त्रीयः, तदुल्लङ्घनेन विवाहितायामसवर्णायामुत्पन्नः । विर.४९२

प्रतिलोमप्रसूता या तस्याः पुत्रो न रिक्थभाक् ।
ग्रासाच्छादनमत्यन्तं देयं तद्बन्धुभिर्मतम् ॥
बन्धूनामप्यभावे तु पितृद्रव्यं तदाप्नुयात् ।
अपित्र्यं द्रविणं प्राप्तं दापनीया न बान्धवाः ॥

(१) तद्बन्धुभिर्निरंशकबन्धुभिस्तत्पितृद्रव्यग्राहिभिर्ग्रासाच्छादन देयमिति मन्वादीना समतमित्यर्थः । अपित्र्यमित्यादेरयमर्थः । निरंशकपितृद्रव्य तद्बन्धुभिरनाप्त राज्ञा तद्बन्धवो भरणाय न दापनीया इति । एतदुक्तं भवति । निरंशक पित्र्यधन ग्राहकबान्धवानामनावश्यक निरंशकभरणमिति । स्मृच.२७१-२७२

---

* स्मृसा., विता. विरगतम् । × शेष विरगतम् ।

(१) विश्व.२।१३८.

(२) दा.१४१; अप.२।१२८; व्यक.१५२; विर.५३६, स्मृसा.६५ ता (त); रत्न १४२; विचि.२२६; व्यनि.; स्मृचि ३४; व्यम.४५ ता (त) मवा (ममा), विता.३२७ योनिज. (जो यदि); समु.१३० ता (त); विच.१००.

(३) दा.१०३; अप.२।१४० यस्तु (यश्च); व्यक.१४४ यस्तु (यश्च) चार्हति (क्वचित्); स्मृच.२७०; विर.४९१ श्चैव स (श्चैव स) यस्तु (यश्च); स्मृसा.५९ चार्हति (क्वचित्); पमा.५४६ अपवत्; विचि.२०८ यस्तु (याश्च) शेष स्मृसावत्; चन्द्र.७७ यस्तु (यश्च) शेष स्मृसावत्; व्यप्र.५६० अपवत्; व्यउ.१५० अपवत्; विता.३२७,४३२ चन्द्रवत्; सेतु.६३-६४ चन्द्रवत्; समु.१४० स्मृसावत्; विच.७९ स्मृसावत्.

+ व्यप्र. दागतम् । ÷ विचि. अपगत स्मृचगत च ।

(१) दा.१०३ सूता या (सूतो यः) मत्यन्त (मात्र तु) तद्व (यद्व); व्यक.१४४ ता या (तायाः) भिर्म (भि. स्मृ); स्मृच. २७१ उक्त; विर.४९१ त्यन्त (त्यर्थः); रत्न.१५१ ता या (तायाः), व्यप्र.५६० ता या (तायाः) मत्यन्त (मात्र तु) र्मनम् (र्मितम्), व्यउ.१५० रिक्थ (दाय); व्यम.७३ रत्नवत्; विता ३२८ मत्यन्तं (पर्यन्त) शेष रत्नवत्: ४३२ रत्नवत्; सेतु.६४ पू., रत्नवत्; समु.१३० पू, १३१ उक्त.

(२) दा १०३-१०४ पितृ (पित्र्यं) अपित्र्य द्रविणं (स्वपित्र्यं तद्धनं), व्यक.१४४ भावे (लाभे) पितृ (पित्र्य) द्रविण (तद्धन); स्मृच.२७१ द्रव्य तदा (द्रव्यमवा) प्राप्त (प्राप्ता); विर.४९१ पितृ (पित्र्य) द्रविण (तद्धन); व्यप्र.५६० दावत्; व्यउ १५० द्रव्य तदा (धनमवा) शेष विरवत्; विता ३२८ भावे (लाभे) पितृद्रव्य तदा (पित्र्यं द्रव्यमवा) द्रविण (तद्धनं); समु.१३१ द्रव्यं तदा (द्रव्यमवा) अपित्र्य द्रविण (न पित्र्यं तद्धन) द्रविणं (तद्धन) बान्धवाः (बन्धवः).

(२) प्रतिलोमप्रसूता या इति अपकृष्टवर्णेनोत्कृष्टवर्णा या परिणीता तत्पुत्रो न ऋक्थभाक्, ग्रासाच्छादनमिति तस्यैव यदि बान्धवाः सन्ति तदा तैर्ग्रासाच्छादनमत्यर्थं देयं, बन्धूनामभावे तु स्वयमेव तद्धन गृह्णीयात्। यदा तु बान्धवैरपि अपित्र्यमेव धन प्राप्तं, तदा ग्रासाच्छादनमपि न ते तस्य दापयितव्या इति। विर.४९२

देवलः

अधर्म्यपुत्राः, क्लीबकुष्ठ्यादयः, पतिततज्जा., मुन्याश्रमिणश्च दायानर्हाः। पतितातिरिक्ता भर्तव्याः। तत्पुत्रा दायिनः।

[1]धर्मार्थं वर्जिताः पुत्रास्तत्तद्दोत्रेण पुत्रवत्।
अंशपिण्डविभागित्वं तेषु केवलमीरितम्॥
[2]मृते पितरि न क्लीबकुष्ठ्युन्मत्तजडान्धकाः।
पतितः पतितापत्यं लिङ्गी दायांशभागिनः॥
[3]तेषां पतितवर्जेभ्यो भक्तवस्त्रं प्रदीयते।
तत्पुत्राः पितृदायांशं लभेरन् दोषवर्जिताः॥

(१) लिङ्गी प्रव्रजितादिः। पतितपदेन तत्सुतस्याप्युपादान पतितोत्पन्नत्वेन पतितत्वात्। दा.१०२

(२) मृते पितरीति। मृते पितरि क्लीबादयो नाशभागिन इति संबन्धः। व्यक.१४४

(३) मृते पितरि क्लीबादयो दायविभागिनो न भवन्ति। लिङ्गी नैष्ठिकवानप्रस्थादिक्षपणकपाशुपतादिश्चात्र विवक्षितः। मृते पितरीति विभागकालप्रदर्शनार्थं-

(१) **दर्म.**८७; **व्यम.**५३, **समु.**१४०.

(२) **दा.**१०२; **व्यक.**१४४ पितरि न (न पितरि) यांश (यादृ); **स्मृच.**२७० पितरि न (न पितरि), **विर.**४८९-४९०; **रत्न.**१५१ तः पतितापत्य (तस्तदपत्य च); **विचि.**२०८, **व्यनि.**, **दात.**१७२; **सवि.**३६५ पूर्वार्धे (मृते न पितरि क्लीबकुष्ठोन्मत्तजडादय), **व्यप्र.**५५९; **व्यम.**७४ रत्नवत्; **विता.**४३६ रत्नवत्, **बाल.**२।१४०, **सेतु.**६३; **समु.**१३० स्मृचवत्; **विच.**७९.

(३) **दा.**१०२ तत्पुत्राः (त्सुताः); **व्यक.**१४४; **स्मृच.**२७२; **विर.**४९०; **स्मृसा.** ५९ पृ.; **पमा.** ५४५ क्त (क्त); **रत्न.**१५१; **विचि.**२०८ जैभ्यो (र्जाना); **व्यनि.** क्तवस्वस प्र (क्त तु प्रति); **दात.**१७२ दावत्; **सवि.**३६६ उत्त.; **चन्द्र.**७७ (=) विचिवत्, **व्यप्र.** ५५९ क्त (क्त) प्र (च) त्पुत्राः (त्सुता.); **व्यम.**७४ पृ.; **विता.**४३६ पमावत्; **बाल.**२।१४० क्त (क्त) त्पुत्राः (त्सुताः); **सेतु.**६३ तेषां (एषां) त्पुत्राः (त्सुताः) श (शा); **समु.**१३१; **विच.**७९ बालवत्.

मुक्तम्। तेन पितरि जीवत्यपि जीवद्विभागे क्लीबादयो दायविभागिनो न भवन्ति। स्मृच.२७०

एवमशेषनिरंशकाना भरणे प्राप्ते कस्यचित्पर्युदासं कुर्वन्नाह देवलः 'तेषा पतितवर्ज्येभ्यो भक्तवस्त्र प्रदीयते' इति। पतितोत्पन्नस्यापि पतितत्वात्सोऽपि वर्ज्यः। निरंशकपुत्राणामंशग्रहणविरोधिक्लैब्याद्यभावेऽपि निरंशकपुत्रत्वेनैव पैतामहधनानार्हत्वे प्राप्ते तदपवादमाह देवलः 'तत्पुत्राः पितृदायांश लभेरन् दोषवर्जिताः' इति। तत्पुत्रा निरंशकपुत्राः अंशग्रहणविरोधिक्लैब्यादिदोषवर्जिताः पितृदायांश पैतामहधनांश लभेरन्नित्यर्थः। न चेदं वचनं पतितापत्यस्यापि पैतामहधनग्राहित्वं प्रापयति। तत्पुत्रा इति सामान्येनाभिधानादिति शङ्कनीयम्। दोषवर्जिताः इत्यनेन व्युदासत्वात्। पतितस्य पुमपत्य पतितमेव भवति। तथा च वसिष्ठः 'पतितोत्पन्नः पतितो भवति इत्याहुरन्यत्र स्त्रियाः। सा हि परगामिनी'। (वस्मृ. १३।५१,५२) इति। *स्मृच.२७२

(४) मृते मृतेऽपीत्यर्थः। लिङ्गी अतिशयेन कपटव्रतचारी। विर.४९०

(५) निरंशकाना पुत्रा औरसाः क्षेत्रजाश्च क्लैब्यादिदोषवर्जिता भागहारिणो न दत्तकादयः। पमा.५४५

(६) लिङ्गी अतिशयेन कपटवेशधारी। दोषो भागानर्हताप्रयोजकः। विचि.२०८

(७) पतितापत्यमिति पातित्यदशायामुत्पन्नः पुत्रः। +सवि.३६५

बृद्धहारीतः

साध्यो भर्तव्याः नासाध्यः। मुन्याश्रमिणः पाषण्डादयश्च भागानर्हा.।

[1]अपुत्रा योषितश्चैव भर्तव्याः साधुवृत्तयः।
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च॥
नैव भागं वनस्थानां यतीनां ब्रह्मचारिणाम्।
पाषण्डपतितानां च न चावैदिककर्मणाम्॥

लघुहारीतः

नवयुवती विधवा भर्तव्या

[2]विधवा यौवनस्था वा नारी भवति कर्कशा।
आयुषः क्षपणार्थं तु दातव्यं जीवनं तदा॥

* व्यप्र. स्मृचवद्भावः। + शेष स्मृचवत्।

(१) **बृहास्मृ.**७।२५८, २५९. (२) **लहास्मृ.**६७.

पैतृकद्रव्ये पत्नीनां मातृणां च भागः

वेदाः

पत्नी गृहभाण्डस्वामिनी

[1]पत्नी हि पारिणाह्यस्येशे ।

पत्नी दायार्हा । पत्युरिच्छया विभागार्हा ।

[2]मैत्रेयीति होवाच याज्ञवल्क्यः । उद्यास्यन्वाऽ अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति ।

[3]अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः । मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादेनी बभूव स्त्रीप्रज्ञैव कात्यायनी सोऽन्यद्वृत्तमुपाकरिष्यमाणः । याज्ञवल्क्यो मैत्रेयीति होवाच । मन्नवजिष्यन्वाऽअरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति ।

आपस्तम्बः

पत्नी कौटुम्बिकधनस्वामिनी । दम्पत्योर्न विभागः ।

[4]जायापत्योर्न विभागो विद्यते । पाणिग्रहणाद्धि सहत्वं कर्मसु । तथा पुण्यफलेषु । द्रव्यपरिग्रहेषु च । न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ति *।

---

* बाल. व्याख्यानं 'यदि कुर्यात्समानंशान्' इति याज्ञवल्क्यवचने द्रष्टव्यम् ।

(१) **तैस.**६।२।१।१; **कासं.**२४।८ हि (वै) णाह्य (णह्य); **क्रसं** ३८।१ कासंवत्; **मैसं.**३।७।९ हि पारिणाह्य (वै पारेणह्य).

(२) **शब्रा.**१४।५।४।१.

(३) **शब्रा.**१४।७।३।१-२.

(४) **आध.**२।१४।१६-२०; **हिध.**२।८ फलेषु (क्रियासु) र्नुर्वि (नृवि) वासे+(स्त्रिया) स्तिके (स्तिक) यमु (यमित्यु); **मिता.** २।५२ लेषु+(च), **अप.**२।५२ (न हि ..शन्ति०):२।१३६ न सर्व पठितम्; **उ.**२।१४।१ (पाणि...दिशन्ति०): २।२२।३ जाया...षु च०); **स्मृच.**२६२, २६८ (पाणि...दिशन्ति०) हारीतः; **विर.**६०७ न विभागो (विभागो न) (पाणि .. देशन्ति०); **स्मृसा.**८१,१५१स्मृचवत्; **सुबो.**२।५२: **विचि.**

(१) ननु दम्पत्योर्विभागात्प्राक्प्रातिभाव्यादिप्रतिषेधो न युज्यते । तयोर्विभागाभावेन विशेषणानर्थक्यात् । विभागाभावश्चापस्तम्बेन दर्शितः—'जायापत्योर्न विभागो विद्यते ।' इति । सत्यम् । श्रौतस्मार्ताग्निसाध्येषु कर्मसु तत्फलेषु च विभागाभावो न पुनः सर्वकर्मसु द्रव्येषु वा । तथाहि—'जायापत्योर्न विभागो विद्यते' इत्युक्त्वा किमिति न विद्यते इत्यपेक्षाया हेतुमुक्तवान्—पाणिग्रहणाद्धीति । हि यस्मात्पाणिग्रहणादारभ्य कर्मसु सहत्व श्रूयते 'जायापती अग्निमादधीयाताम्' इति । तस्मादाधाने सहाधिकारादाधानसिद्धाग्निसाध्येषु कर्मसु सहाधिकारः । तथा 'कर्म स्मार्तं विवाहाग्नौ' इत्यादिस्मरणाद्विवाहसिद्धाग्निसाध्येष्वपि कर्मसु सहाधिकार एव । अतश्चोभयविधाग्निनिरपेक्षेषु कर्मसु पूर्तेषु जायापत्योः पृथगेवाधिकारः संपद्यते । तथा पुण्यानां फलेषु स्वर्गादिषु जायापत्योः सहत्व श्रूयते—'दिवि ज्योतिरजरमारभेताम्' इत्यादि । येषु पुण्यकर्मसु सहाधिकारस्तेषां फलेषु सहत्वमिति बोद्धव्य, न पुनः पूर्तानां भर्त्रनुज्ञयाऽनुष्ठितानां फलेष्वपि । ननु द्रव्यस्वामित्वेऽपि सहत्वमुक्तम्—'द्रव्यपरिग्रहेषु च न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ति' इति । सत्यम् । द्रव्यस्वामित्व पत्न्या दर्शितमनेन न पुनर्विभागाभावः । यस्माद्द्रव्यपरिग्रहेषु चेत्युक्त्वा तत्र कारणमुक्तम्—'भर्तुर्विप्रवासे नैमित्तिकेऽवश्यकर्तव्ये दानेऽतिथिभोजनभिक्षाप्रदानादौ हि यस्मान्न स्तेयमुपदिशन्ति मन्वादयस्तस्माद्भार्याया अपि द्रव्यस्वामित्वमस्ति अन्यथा स्तेय स्यात्' इति । तस्माद्भर्तुरिच्छया भार्याया अपि द्रव्यविभागो भवत्येव न स्वेच्छया । यथा वक्ष्यति—

---

२५४ स्मृचवत्; **दात.**१७९, १८० न विभागो (विभागो न) (पाणि...र्मसु०) (द्रव्य...शन्ति०), **सवि.**३४४, ३५२ स्मृचवत् : ३५३; **व्यप्र.**२५५, २५६ लेषु+ (च): ४४१ विरवत्, **हारीतः** : ५१० तथा...लेषु (तत्फलेषु) (न हि.... दिशन्ति०) गौतमः; **बाल.**२।११५: २।१२२ (पाणि... दिशन्ति०) हारीतः; **विभ.५६** स्मृचवत्; **समु.**१२७.

'यदि कुर्यात्समानशान्पत्न्यः कार्याः समाशिकाः' इति । +मिता.२।५२

(२) न हि तयोर्धनविभागोऽस्ति, पतिधने हि जाया स्वामिनी जायात्वादेव । अतो दम्पत्योः साधारण धनमशक्य विभक्तुम् । अत एवाऽऽपस्तम्बः— जायापत्योरिति । अप.२।५२

'पाणिग्रहणाद्धि सहत्वम्' इत्यादिनाऽऽपस्तम्ब वाक्येन भर्तृधने स्त्रीणा स्वामित्व पाणिग्रहणमेव साधयतीति विधीयते । अप.२।१३५

(३) 'जीवन् पुत्रेभ्यः' इत्यनेन दम्पत्योः सहभावो दर्शितः । तत्र कारणमाह —जायापत्योरिति । स्पष्टम् । कस्मात् ? पाणीति । कर्मार्थं द्रव्यम् । जायाश्च न पृथक् कर्मस्वधिकारः । किं तर्हि ? सहभावेन—'यस्त्वया धर्मश्च कर्तव्यः सोऽनया सह' इति वचनात् । तत्र कि पृथक् द्रव्येणेति । पुण्यफलेषु स्वर्गादिष्वपि तथा सहत्वमेव । 'दिवि ज्योतिरजरमारभेतामि'त्यादिभ्यो मन्त्रलिङ्गेभ्यः । द्रव्यपरिग्रहेषु च द्रव्यार्जनेष्वपि तथा सहत्वमेव । तत्र पतिरर्जयति, जाया गृहे निर्वहतीति योगक्षेमावुभयायत्तावितिद्रव्यपरिग्रहेऽपि सहत्वम् । एतदेवोपपादयति—न हि भर्तुर्विप्रवास इति । हि यस्मात् भर्तुर्विप्रवासे सति नैमित्तिके 'छिन्दत्पाणि दद्यादि'त्यादिके दाने कृते भार्याया न स्तेयमुपदिशन्ति धर्मज्ञाः । यदि भर्तुरेव द्रव्य स्यात् स्यादेव स्तेयम् । नैमित्तिके दान इति वचनात् व्यत्यान्तरे स्तेयं भवत्येव । एतदेव द्रव्यसाधारण्येऽपि दम्पत्योर्वैषम्य—यत् पतिर्यथेष्टं विनियुङ्क्ते जाया त्वेतावदेवेति। न च पत्युः स्वयमर्जितस्य विनियोगे जायाया अनुमत्यपेक्षा, स्वतन्त्रत्वात् । स्वतन्त्रो ह्यसौ गृहे, यथा राजा राष्ट्रे । अत एव भार्यायाः स्तेयशङ्का, न भर्तुः । उ.

(४) मिताटीका—'द्रव्यपरिग्रहेषु चे'त्यादिवचनस्य सिद्धान्तसंमतोऽर्थः । द्रव्यार्जनेष्वपि सहत्व दम्पत्योः। एतच्च सहत्वमौपचारिक न मुख्यम् । तथा हि । यथा आधानादिषु पतिपत्न्योरन्यतराभावे आधानादिस्वरूपासिद्धिः एवं द्रव्यार्जने न, अपि तु पतिरर्जयिता पत्नी चार्जित रक्षयतीति योगक्षेमावुभाभ्या क्रियेते इति उभयानुसंधानसिद्धत्वेन सहत्वमिव । एव च यत्राधानादिषु सहत्व तत्र स्वत्वमस्तीत्यत्रापि द्रव्यपरिग्रहेषु सहत्व प्रतीतेः स्वत्वमस्तीति । तदेतद्गूढाभिसधिराह । यस्माद्द्रव्यपरिग्रहेषु चेत्युक्तेति । अयमभिप्रायः । न सहत्व विधत्ते । अपि तु लोकसिद्धमेव । सहितयोरेव स्वाम्यात् । अथैव ब्रूषे विवाहात्प्रागर्जिते द्रव्ये पुरुषस्यैव स्वत्वम् । तत ऊर्ध्वमर्जिते तु पतिपत्न्योरिति । तदपि तु । तथा सति पुत्रस्यापि स्वजन्मतः प्राक् पित्रार्जितधने स्वत्वमेव न स्यादित्यलमतिप्रपञ्चेन । अन्यथा स्तेयं स्यादिति । सुबो.२।५२

(५) पत्न्यधिकरणे पत्न्या अपि पतिधने स्वत्वमुक्तमिति । तस्या अपि तर्हि पत्या सह विभागो भवेद्यदि शाब्दस्तु निषेधो न स्यादिति चेत् । न । 'अधनास्तस्य एवैते भार्या दासस्तथा सुतः ।' इत्यादिना तस्या अधनोक्तेरित्यवेहि । पत्न्यधिकरण त्विज्यामात्रे सहत्वेनाऽधिकारसिद्धयै न त्वधिकरणेन योषिदधनत्ववचनबाधः । तस्य न्यायत्वेन वचनाबाधकत्वात् । विभागस्तु दम्पत्योः 'पत्न्यः कार्याः समाशिकाः' इति वचनादिति रत्नाकरः । +विचि.२५४-२५५

(६) अनेन ['यदि कुर्यात्' इति (यास्मृ.२।११५) वचनेन] 'जायापत्योर्न विभागो विद्यते' इति आपस्तम्बवचन यत्र सहत्वचोदना तत्रैवेति मन्तव्यमिति भारुचिराह । +सवि.३५२

(७) यत्तु 'भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः ।' इत्यत्र अधनत्वश्रुतेरापस्तम्बीयविभागाभिधान वैदिककर्ममात्रे सहकारित्वेनाधिकारार्थमिति । तन्न तद्वचनोत्तरार्धे 'यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्' इत्यनेन स्वार्जितस्यैव पत्न्यादीना पत्याद्यनुमतिमन्तरेण अस्वातन्त्र्यप्रतिपादनात् । आपस्तम्बवचने तथा 'पुण्यापुण्यफलेषु च' इति पृथगुपादानाच्च तस्मात् 'विभागो न विद्यत' इति निषेधस्य प्रवृत्तिपूर्वकत्वादेकस्मिन् धने उभयोः स्वत्वं ज्ञाप्यते । अन्यथोभयोः स्वत्वाभावेन विभागप्रसक्त्यनुपपत्तेर्निषेधविधिर्न स्यात् । 'एकत्वं सा गता यस्माच्चरुमन्त्राहुतिव्रतैः' इति लघुहारीतोक्तैकत्वस्यैतदपि फलम् । दात.१८०

+ विर., स्मृसा. मितागतम् । व्यप्र मितागतम्, शेषं 'पत्नी दुहितरश्चैव' इति याज्ञवल्क्यवचने द्रष्टव्यम् ।

+ शेष मितागतम् ।

कुटुम्बिनौ धनस्येशाते ।
तयोरनुमतेऽन्येऽपि तद्धितेषु वर्तेरन् ।

कुटुम्बिनौ दम्पती । तौ धनस्य परिग्रहे विनियोगे च ईशाते । यद्यप्येवं, तथापि भर्तुरनुज्ञया विना स्त्री न विनियोक्तुं प्रभवति । भर्ता तु प्रभवति । तदेतेन वेदितव्यं 'न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ती'ति । तयोर्दम्पत्योरनुमतेऽनुमतौ सत्यामन्येऽपि पुत्रादयः तयोरैहिकेष्वामुष्मिकेषु च हितेषु वर्तेरन् द्रव्यविनियोगेनापि । उ.

वसिष्ठः

भ्रातृस्त्रीणा दायार्हत्वम्

अथ भ्रातृणां दायविभागः । याश्चानपत्या स्त्रियस्तासां चापुत्रलाभात् +॥

विष्णुः

मातृणां पुत्रसमदायार्हत्वम् । अनूढदुहितरोऽशहारिण्यः ।

मातरः पुत्रभागानुसारेण भागहारिण्यः, अनूढाश्च दुहितरः *।

(१) पुत्रभागानुसारेण यथा वर्णक्रमेण पुत्राणा चतुस्त्रिद्येकभागिता तथा पत्नीनामपीति । अनूढाना दुहितृणा पुत्रभागमनुसृत्य तच्चतुर्थांशः । ×दा.६८-६९

(२) मातर इति बहुवचननिर्देशात्प्रत्येकमेव जननीत्वादेकत्वविवक्षाया च मानाभावाद्बहूना जननीनाम धिकारोऽन्यथा मातरः पुत्रभागानुसारभागहारिण्य इति वर्णक्रमभागहासपरम् । एकमातृपरत्वे सर्व भज्यते इति ग्रहैश्वरोऽपि । विर.४८३

(३) पुत्राशकल्पनाया मातृष्वतिदेशमाह—मातर इति । यज्जातीयस्य पुत्रस्य यो भाग उक्तस्तदनुसारेणैव तज्जातीया माताऽप्यंश हरेत् । ब्राह्मणी चतुरोंऽशानादत्ते, क्षत्रिया त्रीन्, वैश्या द्वौ, शूद्रैकमिति समविषमसख्याना विभागः पूर्ववदूहनीयः । मातृशब्दसामर्थ्यात् पुत्रकर्तृकविभागे तासा नियतमशभाक्त्व न पतिकर्तृक इत्युक्त भवति । अत एव 'यदि कुर्यात्समानशान् पत्न्यः कार्याः समाशकाः । न दत्त स्त्रीधन यासा भर्त्रा वा श्वशुरेण वा ॥' इति योगिना पाक्षिक एव तासा विभाग उपन्यस्तः । यद्यप्यत्र समाशित्वे यद्यपबन्धोनाशकल्पनायामि(?)त्यंशकल्पनाया न पाक्षिकत्व गम्यते तथापि इच्छयेत्यनुवर्तनात्पत्नीना समाशकरणस्यैच्छिकत्वेन पाक्षिकत्वसिद्धेर्न दोषः । एतदेवाभिप्रेत्याह विज्ञानेश्वरः 'भर्तुरिच्छया भार्याया अपि द्रव्यविभागो भवती'ति । हरदत्तोऽपि 'जायापत्योर्न विभागो विद्यते' इति आपस्तम्बीय सूत्र आत्मन एवाशात्तस्या अपीति मन्यते इति व्याचक्षाण मात्रंशकल्पनेः पाक्षिकत्व गमयति । पुत्रभागानुसरणेन चैकपुत्राया मातुः पुत्रस्यैव सर्वहरतया विभागाभावेन तदनुसरणायोगादंशकल्पना नास्त्येव । किंतु यावज्जीव भरणमात्रमेव । तथा च देवलः— 'एक एव सवर्णः स्याद्यद्योऽत्र न विभज्यत' इति । सवर्ण इत्यसवर्णोऽपि शूद्रव्यतिरिक्तः मातुरेव चायं विभागनिषेधः पर्यवस्यति । तस्या एव तत्र स्वत्वसद्भावात् नान्येषा एकपुत्रत्वात्तस्याः, अत एवानेकपुत्राणा विभाग एव मातुरंशकल्पनामाह योगीश्वरः —'पितुरूर्ध्वं विभजतां माताऽप्यश सम हरेत्' इति । अनेकासा प्रत्येकमेकपुत्रत्वे भवत्येव तासामप्यशकल्पनिः । विभाजकाना मातृणा बहुत्वात् मातर इति बहुवचनात् बहूनामप्येकपुत्राणा न विभागः किंतु भरणमेव । मातर इति च पितामहीनामप्युपलक्षणे तेन पैतामहधनविभागे तासामप्यंशो देयः । यथाह व्यासः—'असुतास्तु पितुः पत्न्यः समानाशाः प्रकीर्तिताः । पितामह्यश्च ताः सर्वा मातृतुल्याः प्रकीर्तिताः ॥' इति । मातृतुल्या मातृवदशभाजः । स चाशः स्त्रीधमे दत्तेऽर्द्धः, अदत्ते पूर्णः 'दत्ते त्वर्ध प्रकीर्तितमि'ति योगिस्मरणात् । अर्धमित्युपलक्षणं यावताशसाम्यं भवति तावदित्यर्थः । भागसामान्योपादानेऽपि स्थावरं विनेति द्रष्टव्यम् । 'वृत्तस्यापि कृतेऽप्यंशं न स्त्री स्थावरमर्हती'ति बृहस्पति-

+व्याख्यासंग्रहः स्थलादिनिर्देशश्च मृतापुत्रधनविभागे द्रष्टव्यः।

* सवि.व्याख्यानं 'यदि कुर्यात् समानंशान्' इति याज्ञवल्क्य वचने द्रष्टव्यम् । × व्यप्र. दागतम् ।

(१) **आध.**२।२९।३,४; **हिध.**२।८१.

(२) **विस्मृ.**१८।३४,३५; **दा.६८ आश्च दुहितरः (आ दुहितरश्च)**; **उ.**२।१४।२ रेण (रतौ) (अनू...तरः०); **व्यक.**१४३; **स्मृच.**२६७ रेण भा (रिभा); **विर.**४८३ रेणं भा (रभा); **स्मृसा.**५७ विरवत्; **रत्न.**१४० स्मृचवत्, **व्यनि.** रेण भा (रभा) (अनू...तरः०); **सवि.**३५७; **व्यप्र.**४५६; **व्यम.**४४ रेण भा (रिभा) (अनू...तरः०); **बाल.**२।११५, २।१२३ व्यमवत्: २।११७ स्मृचवत्, गौतमः; **विभ.**५०, ८५; **समु.**१२९ स्मृचवत्.

स्मरणात् ।

अतिदेशान्तरमाह—अनूढा इति । यज्जातीयाः पुत्रा यमंशं लभन्ते तज्जातीया अविवाहिता दुहितरोऽपि तमंशं लभेरन् । योगीश्वरस्तु तत्तज्जातीयपुत्राशचतुर्थांश तत्तज्जातीयकन्याया आह– 'असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः । भगिन्यश्च निजादंशाद्दत्त्वांश तु तुरीयकम् ॥' इति । अनयोश्च पक्षयोर्विवरणमाह कात्यायनः—'कन्यकाना त्वदत्ताना चतुर्थो भाग इष्यते । पुत्राणा च त्रयो भागाः स्वाम्य त्वल्पधने स्मृतम् ॥' इति । अयमर्थः । यदा ब्राह्मणस्य सजातीयः एकः पुत्रः कन्या चैका तदा पितृधन द्वेधा विभज्य तत्र एक भागं चतुर्धा कृत्वा चतुर्थांऽश कन्यायै दत्त्वा स्वांश अवशिष्टं चांशत्रय पुत्रो गृह्णीयात् । एव सजातीयाविजातीयकन्यापुत्रयोः साम्यवैषम्ये चोहनीयम् । तदेतद्बहुधने । अल्पधने तु समांऽश इति । यत्त्वंशाविवक्षया विवाहोपयुक्तद्रव्यमात्रं लभेत, 'कन्याभ्यश्च पितृद्रव्यं देय वैवाहिक वसु' इति देवलवचनादिति चन्द्रिकाचमत्कृतम् । तत्र 'विभज्यमाने दायाद्ये कन्यालङ्कारं वैवाहिक स्त्रीधन च लभेते'-ति शङ्खस्मरणविरोधात् । अलङ्कारं स्वभूतं, वैवाहिक विवाहोपयुक्तं स्त्रीधन पैतृकमूक्थं चतुर्थांऽशादिः । वै.

मनुः

मातॄणां दायार्हत्वम्

अमुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः ।
पितामह्यश्च ताः सर्वा मातृकल्पाः प्रकीर्तिताः×॥

याज्ञवल्क्यः

जीवति पितरि पत्नीना पुत्रसमधनार्हत्वम्

यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः ।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥

(१) स्नेहगुणाद्यनपेक्षं माध्यस्थ्येनैव– यदीत्यादि । समांशदानपक्षे प्रमीतभर्तृकाः पुत्रपौत्रपत्न्यः **स्वपत्न्यश्च** भर्तृभागार्हाः कार्याः, यासा भर्त्रा श्वशुरेण वा स्वयं वा स्त्रीधन न दत्तम् । यद्वा यासा स्त्रीधनं न दत्त ताः स्त्रीधनसमांशिकाः कार्याः । 'द्विसहस्रपरो दायः स्त्रियाः' इति स्मृत्यन्तरात् तावन्मात्र प्रभूतधनत्वेऽपि देयम् । स्वल्पेऽपि समांशत्वेनैव । अन्ये त्वनपत्यानां नियोगाभिमुखत्वेन समांशतामाहुः । तत्तु नियोगासभवादयुक्तम् । सभवन्नियोगाना तु नियोगांशत्वमेव युक्तम् ।

विश्व.२।११९

(२) पितुरिच्छया विभागो द्विधा दार्शितः समो विषमश्चेति, तत्र समविभागे विशेषमाह– यदीत्यादि । यदा स्वेच्छया पिता सर्वानेव सुतान्समविभागिनः करोति तदा पत्न्यश्च पुत्रसमांशभाजः कर्तव्याः यासा पत्नीना भर्त्रा श्वशुरेण वा स्त्रीधनं न दत्तम् । दत्ते तु स्त्रीधने अर्धांश वक्ष्यति–'दत्ते स्वर्धं प्रकल्पयेत्' इति । यदा तु श्रेष्ठभागादिना ज्येष्ठादीन् विभजति तदा पत्न्यः श्रेष्ठादिभागान्न लभन्ते किन्तूद्धृतोद्धारात्समुदायात्समानेवांशान् लभन्ते स्वोद्धारं च । यथाहापस्तम्बः—'परीभाण्ड च गृहेऽलङ्कारो भार्यायाः' इति । ×मिता.

(३) पुत्रहीनाश्च पितुः पत्न्यः समानांशा न पुत्रवत्यः । +दा.६७

(४) एकस्य पुत्रस्य यावानंशस्तावदंशामेकैका पत्नीं कुर्यादित्यर्थः । अप.

(५) यदि वार्धक्येऽप्यात्मना सह समविभागपक्षमिच्छया पिता कुर्यात् तदाऽऽत्मभागेन सह तत्समानभाग पत्नीं गृह्णीयादित्यर्थः । एव च 'जायापत्योर्न

× व्यासस्य श्लोकोऽय निबन्धकाराणां मते । तत्रैवास्य व्याख्यासग्रहः स्थलादिनिर्देशश्च द्रष्टव्यः ।

(१) **मस्मृ.**९।१८६ इत्यस्योपरिष्टात् प्रक्षिप्तश्लोकोऽयम् ।

(२) **यास्मृ.**२।११५; **अपु.**२५६।२ कुर्या (दद्या) पत्न्यः कार्याः (कार्याः पत्न्यः); **विश्व.**२।११९ अपुवत्; **मिता.** २।११५:२।१३५ पू.; **दा.**६७ मान (मानां); **अप.; व्यक.** १४१; **स्मृच.**२६२ दावत्; **विर.**४६४-४६५; **स्मृसा.**५४ दावत्; १५१ पू.; **पमा.**४८७; **मपा.**६६२ दावत्:६६४ पू.; **विवि.**१९७; **स्मृचि.**२९ कुर्या (दद्या) स्त्री (वा); **दात.** १६६: १७९ दावत्, पू.; **नृप्र.**३४ शिकाः (शकाः); **सवि.** ३५२ कार्याः (कुर्यात) शिकाः (शकाः): ३५७ शिकाः (शकाः) पू.: ३५८; **चन्द्र.**७१ दावत्; **वीमि.; व्यप्र.**२५६ पू.: ४४०: ४९९ पू.; **व्यउ.**१४५: १५३ पू.; **व्यम.**४४; **विता.**३०४; **राकौ.**४४६; **बाल.**२।१४३ नृप्रवत्; **विभ.** ४८, ८९; **स्मसु.**१२७ दावत्; **विच.**६० दावत्.

विभागो विद्यत' इति हारीतवचनविरोधशङ्काऽपि परिहृतेति सर्वमनवद्यम्। स्मृच.२६२

(६) एव च पुत्राणा विषमाशपक्षे पत्न्योऽपि विषमांशा बोद्धव्याः, न तु पुत्रादिपत्न्यः पितुर्विभाजकत्वात् तत्प्रतियोगिकपत्नीत्वस्यैवावगमात्। यदि तु कस्याश्चित् पत्न्याः भर्त्रा श्वशुरेण वा धनं न दत्तं, तदा ता अपि तावद्धनवत्यः कार्या इत्यर्थः। अत्र पत्नीनामपुत्राणामपीति हलायुधः। *विर.४६५

(७) समशब्दो न्यूनाधिकभावरहिताशपरः। अथवा समशब्दोऽत्र 'चतुस्त्रिद्येकभागाः स्युरि'त्यत्र समानाशपरः शास्त्रोक्तसमत्वात् समव्यपदेशः। एव स्थिते यदा पिता स्वेच्छया पुत्रान् सर्वान् समाशभाजः करोति तदा पत्न्योऽपि समाशिकाः कार्याः यदि ब्राह्मण्यादुत्पन्नपुत्राणा सदृशा एवाशास्तदा तन्मातॄणामपि सदृशा एव। यदा तु मूर्द्धावसिक्तादिपुत्राणा यथाक्रमेण त्रिद्येकांशास्तदा तन्मातॄणामपि स्वस्वपुत्रसमाशाः। एवं प्रातिपादः न दत्तमित्यादि स्त्रीधनमलङ्कारादि यदि स्त्रीधनं दत्तं तदा 'दत्ते त्वर्द्ध प्रकीर्त्तितमि'त्यधिवेदनप्रकरणोक्तप्रकारो विज्ञेयः। स च प्रकारः 'दत्ते त्वर्द्ध प्रकीर्त्तितमि'ति अर्द्धशब्दोऽशमात्रपरो न तु समविभक्ताशपरः। यावता धनेन स्वपुत्रांशान्यून भवति स्त्रीधन तावद्धन दत्त्वा पत्न्यंशोऽपि पुत्राशसमः कर्त्तव्य इति। नन्वेव सति प्रकारान्तरेण स्त्रीधनमपि विभज्यतामित्युक्त स्यात्तथा च स्त्रीधनस्याविभाज्यत्वप्रतिपादकवचनविरोध इति चेत्, मैवम्। यत्र अपवादकं वचनमस्ति तत्र अपवादकबलात्सामान्येन स्त्रीधनस्याविभाज्यत्वप्रतिपादकवचनाना बाधः, यत्रापवादो नास्ति तत्र न बाधः। अत्र च 'न दत्तं स्त्रीधनं यासामि'ति 'दत्ते त्वर्द्ध प्रकल्पयेदि'त्यनयोरार्थिकैकवाक्यत्वेनापवादकत्वम्। यदा तु पिता 'ज्येष्ठ वा श्रेष्ठभागेने'त्यायुक्तप्रकारेण विषमभागं करोति तदा पत्नीना श्रेष्ठादिभागा न सन्ति किन्तु श्रेष्ठादिभागोद्धारे कृते यदवशिष्टं समुदितद्रव्य तस्मात्समानाशान् पत्न्यो लभन्ते तथा स्वकीयोद्धारं च। मया.६६२-६६३

(८) अपरार्कमतं तु— स्त्रीणा दायविभागो नास्त्येव 'तस्मात्स्त्रियो निरिन्द्रिया अदायादीरि'ति श्रुतेः। अतश्च पत्युरिच्छानुसारेण पत्नीनामपि धनं दातव्यम्। समशब्दस्तु पत्युर्भागान्न्यून न कार्य सममंशमधिकांशं वा दातव्यम्। 'यदि कुर्यात्' इति यदिशब्देन इच्छानुसारप्रतिपादनादैच्छिकत्वादंशदानस्येत्यवगन्तव्यमिति। अत्रेद तत्त्वं—भारुचिमते पत्नीना बहुत्वसद्भावेता सामेव विभागः। विज्ञानयोगिप्रभृतीना मते पत्न्येकनियतो विभागो नास्ति। किं तु पुत्रैः समविभागः पत्नीनाम्। अपरार्कादीनां तु मते पत्नीविभागः पुत्रसमविभागश्च नास्ति। किं तु पतीच्छया देयमिति। अत्र पक्षत्रये वर्णतो व्यवस्थामाहुर्भोज्यकाराः—'ब्राह्मणीना पत्नीना स्वपुत्रैः समविभागः। क्षत्रियाणा तु पत्नीविभागो नास्ति। न पुत्रसमविभागः किंतु पतीच्छया यत्किंचिद्देयमिति। वैश्यशूद्रयोः पत्नीविभागः। एतद्व्यवस्थायामाचार एव मूलमि'त्याहुः। सवि.३५३-३५४

ननु कथं—'यदि कुर्यात् समानशान् पत्न्यः कार्याः समाशिकाः' इत्यत्र स्त्रीणां दायानर्हत्वादंशशब्दोऽन्यथा व्याकृतः। कथ तर्हि याज्ञवल्क्येनोक्तम्—'पितुरूर्ध्व विभजता माताऽप्यंश समं हरेत्।' इति। कथं च व्यासेन—'असुतास्तु पितुः पत्न्यः समानाशाः प्रकीर्तिताः। पितामह्यश्च सर्वास्ताः मातृतुल्याः प्रकीर्तिताः॥' इति। कथं च विष्णुना—'मातरः पुत्रभागानुसारेण(रि)भागहारिण्यः अनूढाश्च दुहितरः' इति। तर्हि स्त्रीणा दायानर्हत्वे मात्रादीना दुहितृन्तानामशहारित्वोक्तिर्न युज्यते। मैवम्। अत्र अंशशब्दो न दायभागवचनः। अपि तु द्रव्यसमुदायप्रतीकमात्रवचनः। अतश्च नोक्तदोष इति केचित्। अत्र मात्रादिशब्दाना गुरुरूपस्त्रीविशेषपरत्वादजीवद्विभागे माताऽप्यंशं दायभागं हरेदित्यन्ये। मेधातिथिमतं तु वर्णव्यवस्थया पूर्वमेवोक्तम्। 'अथ भ्रातॄणा दायविभागो याश्चानपत्याः स्त्रियः तासामापुत्रलाभात्' इति वसिष्ठः। अस्यार्थः—याः पितुः स्त्रियः अनपत्याः गर्भस्थापत्याः तासामापुत्रलाभात् आप्रसवात् सहवासेन स्थितानां भ्रातॄणा प्रसूतापत्यलिङ्गज्ञानानन्तरं दायविभाग इति। नन्वत्र भ्रातॄणामनपत्यस्त्रीणा च दायविभागो भवतीति ऋज्वर्थः, किमिति परित्यज्यते, उच्यते, अनपत्यस्त्रीणामापुत्रलाभादिति विरुद्धार्थप्रतीतेः स्त्रीणा दायानर्हाणां दायविभागासंभवाच्च परित्यज्यते। अत एव स्मृत्यन्तरं—'जनन्यस्वधना पुत्रैः विभागेऽशं समं

* शेषं मितागतम्। स्मृसा., विचि. विरगतम्।

हरेत्' इति। [अस्वधना प्रातिस्विकस्त्रीधनशून्या जननी पुत्रैरेवाजीवद्विभागे क्रियमाणे पुत्राशसममंश हरेदित्यर्थः। अत्र जननीग्रहण तत्सपत्न्यादेरुपलक्षणार्थम्। 'मातरः पुत्रभागानुसारिभागहारिण्य' इति। अस्वधनेति विशेषणोपादानात् स्वधने विद्यमाने तेनैव जीवनस्य स्वानुष्ठेयस्य च धनसाध्यस्य कर्मणः सिद्धिसंभवे नाशग्रहणमिति प्रतीयते। स्वधनमात्राज्जीवनधनसाध्यकर्मणोः सिध्यसंभवे स्वधनानामपि न समभागहरणम्। किं तु यथोपयोग न्यूनभागस्यैव हरणमिति गम्यते। तथा विभाज्यराशेरतिबहुत्वे निर्धनानामपि जनन्यादीना न समाशग्रहणम्। किन्तु यथास्वोपयोग समाशन्यूनस्यैवाशस्य हरणमित्यवगम्यते। अस्वधनेति विशेषणस्यायोगवशादंशग्रहण पत्न्याः, न पुनर्भ्रातृवद्दायभागित्ववशादिति ज्ञापनार्थत्वात्। सममिति विशेषणस्योपयोगादसमाशस्य हरणेऽप्यवैयर्थ्यम्।] अजीवद्विभागस्थले पतीच्छया पत्नीनामधिकांशस्यापि दातुमर्हत्वादित्युक्तं प्राक्। अस्मिन्नजीवद्विभागस्थले भ्रातृणा इच्छानुसारेण मातुरंशो दातव्यः समो वा अधिको वा। यदीच्छा नास्ति अल्पविभाज्यराशेरधिकस्य प्राप्तस्य निवृत्त्यर्थत्वात् सममिति पदमित्यनुसंधेयम्। अत एतत्सर्वमनुसंधायैव याज्ञवल्क्येन 'यदि कुर्यात्समानशान् पत्न्यः कार्याः समाशिकाः' इत्यभिधाय 'न दत्तं स्त्रीधन यासां भर्त्रा वा श्वशुरेण वा' इत्यभिहितम्। स्त्रीधन दत्त चेत्तासा पत्नीना नाशहरत्वमिति वचनार्थः। अत एवोक्त चन्द्रिकाकारेण तेनात्र न मातुः स्वत्वव्यवस्थापको दायविभागः, किं तु यावदर्थमेवार्थहरणमिति मन्तव्यमिति। विज्ञानयोगिना 'भ्रातृणामथ दम्पत्योः' इति वचनव्याख्याने तस्माद्भ्रायाया अपि द्रव्यस्वामित्वमस्ति अन्यथा स्तेय स्यादिति, तत्तु दायहरत्वप्रतिपादक न भवति कि त्वतिथिभोजनभिक्षाप्रदानादिस्वाम्यमात्रमित्यनुसंधेयम्। अपरार्केण तु 'यदि कुर्यात्समानंशान्' इत्यत्र अंशशब्दो विभाज्यद्रव्यैकदेशपरः। अतश्च पत्नीनामशहरत्व नास्तीति पत्युरिच्छया यत्किंचिद्देयमित्येवपरमिति। अतो मृतत्वेऽपि न दायभाक्त्वं स्त्रीणा, अपि त्वंशहरत्वम्। तच्च स्त्रीधनसद्भावतारतम्यनिबन्धन प्रागुक्तमनुसंधेयम्।

भाष्यकारमते तु शूद्रपत्नीना विभागो लोकाचारसिद्ध इति मन्तव्यम्। सवि.३५७-३५९

(९) विपक्षे तु पितुर्विभागकर्तुः पत्नीना यासा भर्त्रा श्वशुरेण वा न स्त्रीधन दत्तं ताः पत्न्योऽगृहीतस्त्रीधनाः पत्न्यः समधनाः संविभक्तव्यधनाः कार्याः। यदि तु—'द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता' इति तु नारदवचनानुसारेण 'स्वल्पेन वा संविभज्य भूयिष्ठमादाय तिष्ठेदि'ति हारीतवचनानुसारेण द्विगुणं प्रचुरतरं वा धनं स्वय गृह्णाति तदा स्वभागादेव समाशिकाः कार्याः। वीमि.

(१०) भर्त्रादिग्रहणमुपलक्षणम्। वक्ष्यमाणस्त्रीधनशून्या इत्यर्थः। तासा पत्नीना पुत्रसमाशभाक्त्वमत्र नियम्यते। न च पक्षद्वयेऽप्येतावता पुत्रसमाशित्वं पत्नीना विज्ञानेश्वरेणोक्तम्। तर्हि 'यदि कुर्यात् समानंशान्' इति समाशानुवादो व्यर्थः। पत्न्यो ज्येष्ठांशादि न लभन्ते इत्येतावन्मात्रमेव वाच्यमिति युक्तम्। यतः 'एव समुद्धृतोद्धारे समानशान् प्रकल्पयेत्। उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना॥ एकाधिक हरेज्ज्येष्ठः पुत्रोऽध्यर्ध ततोऽनुजः। अंशमंश यवीयास इति धर्मो व्यवस्थितः॥' (मस्मृ.९।११५,११६) । इति मनुना। 'द्व्यंशी वा पूर्वजः स्यादेकैकमितरेषाम्।' इति गौतमेन। 'अथ भ्रातृणा दायभागो द्व्यंश हरेज्ज्येष्ठो गवाश्वस्य चात्र दशममजावयो गृह च कनिष्ठस्य काण्डायसं गृहोपकरणानि च मध्यमस्य।' इति वसिष्ठेन। 'ज्येष्ठस्याशोऽधिको देयः कनिष्ठस्य वरः स्मृतः। समाशभाजः शेषाः स्युरप्रत्ता भगिनी तथा॥' इति नारदेन चोद्धारमृते विषमभागमात्रमुक्त तद्यदाऽऽद्रियते तदा पत्नीनामशाभावप्रतिपादनार्थ 'यदि कुर्यात् समानशान्' इत्युक्तमिति न दोषः। अत एव 'भ्रातृणामविभक्ताना यद्युत्थानं भवेत्सह। न तत्र विषम भाग पिता दद्यात्कथचन॥' इति मनुना सर्वेषा भ्रातृणा द्रव्यार्जने यदि सह समानमेव उत्थानमुद्योगो भवेत्तदा पितुर्विषमविभागदानप्रतिषेधः कृतः। अत एव चोक्तमनुवचनव्याख्याने जीमूतवाहनेनोक्तम्— 'उद्धारस्तु पित्रा दातव्य एव। तस्य विभागरूपत्वाभावात्। न्यूनाधिकविभागस्यैव निषेधात्' इति। तस्मात् 'ज्येष्ठं वा श्रेष्ठभागेन' इति याज्ञ-

[1] एतच्चिद्वद्वान्तनिबन्धान स्मृतिचन्द्रिकायाः पृ. २६८ स्त्यस्यानुवादः।

वल्क्याद्युक्त उद्धारेऽपि समांशभागिता पुत्राणामस्त्येवेति तत्रापीदं वचनं प्रवर्त्तत एव । द्व्यंशादिपक्षे परं न प्रवर्त्तत इति विज्ञानयोगिनामाशयः । दत्ते तु स्त्रीधने 'दत्ते त्वर्द्धं प्रकल्पयेत्' इत्यत्रार्द्धदानं वक्ष्यते । यद्यपि तदाधिवेदनिके भर्त्रा दीयमाने वक्ष्यते तथाप्याकाङ्क्षाया सत्या समानन्यायत्वादत्रापि योज्यम् । अत एवाह बौधायनः— 'बहूनामेकवर्णानामेकस्यापि यदुच्यते । सर्वेषामेव तत् कुर्यादेकरूपा हि ते स्मृताः ॥' इति । 'भ्रातृणामविभक्तानां' इत्यादि मनुवाक्यं सहोत्थान सर्वेषां विभागप्रार्थना यदि भवतीति जीमूतवाहनेन तदनुयायिना दायतत्त्वकृता च व्याख्यातम् । 'यदि पुनः पितरि जीवति पुत्रा एव विभागमर्थयन्ते तदा विषमविभागः पित्रा न दातव्य' इति वदता । तत्र सहशब्दवैयर्थ्यम् । उत्थानशब्दस्य चोद्योगवाचिनोऽपि भागप्रार्थनापरत्वमन्याभ्यमित्यस्माभ्याख्यानमेवादर्त्तव्यम् । तथा च 'सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः ।' इति योगीश्वरवचःसंवादोऽपि लभ्यते । तस्मात्स्वभिमतार्थतयैवोपपत्तेः । 'दत्ते त्वर्द्धम्' इत्यत्रापार्द्धशब्दः समप्रविभागवचनो न भवति । अतश्च यावता पूर्वदत्तमिदानीं दीयमानं च सम भवति तावदेयमिति मिताक्षरायामुक्तम् । तत्रायमाशयः । यद्यपि नपुंसकस्यार्द्धशब्दस्य 'पुंस्यर्धोऽर्द्धं समेऽशके' इति कोषात् समांशवाचित्वमस्ति । तथापि कदाचित्तासां पुत्राधिकधनत्व कदाचित्तदूनधनत्वमव्यवस्थितमर्द्धनियमस्य चादृष्टार्थत्व मा प्रसाङ्क्षीदिति पुत्रसमांशितायामेव तात्पर्यमिति । अत्र मदनरत्नकार आह— पत्न्य इति बहुवचनात्प्रतिपत्नि समानशान् पिता गृह्णीयान्न तु ताभ्यः पृथक्कृत्यांशो दातव्यः । 'जायापत्योर्विभागो न विद्यते' इति हारीतवचनविरोधापत्तेरिति । तत्र । नात्र जायापत्योर्विभाग उच्यते येन हारीतवचनविरोधः स्यात् । किन्तु पत्येव पुत्रविभागसमये ताभ्यस्तत्समांशदानं प्रीतिदानवत् । अत एव स्त्रीधने दत्ते त्वर्द्धमित्युक्तमिति न कोऽपि दोषः । व्यप्र.४४०-४४२

(११) स्वस्य पुत्राणा च समांशपक्षे पत्न्या अप्यंशमाह याज्ञवल्क्यः— यदीति । दत्ते त्वर्द्धं देयम् । 'दत्ते त्वर्द्धं प्रकल्पयेदि'ति वचनात् । अर्द्धं पूर्वदत्तं स्त्रीधनं यावता पुत्रांशसमं भवति तावदित्यर्थः । अंशाधिकधनायास्तु नांशः । व्यम.४४

(१२) जीवति मृते वा पितरि विभागे तत्पत्नीना पुत्रसमांशित्वमाह स एव—यदीति । × विता.३०४

(१३) मिताटीका—अत्र यदि कुर्यादित्यनेन पितुरिच्छया विभाग उक्तो न पत्नीच्छया, सोऽपि पुत्राशपृथक्करणपर्यन्तो न स्वतः । 'जायापत्योर्न विभागो विद्यते' इत्यादिप्रागुक्तापस्तम्बादिना तत्र सहत्वोक्त्या तस्यासंभवात् । 'अर्धो वा एष आत्मनो यः पत्नी'ति श्रुतेश्च । अयमेवाशयः 'अनीशास्ते हि जीवतोरि'ति मानवस्य । पुत्रतस्तस्या अन्तरङ्गत्वात् । किन्तु बहुवचनादनेकत्वे पत्नीना प्रतिपत्नि पुत्राशतुल्याशान् संगृह्य स्वांशेन सह स्थाप्याः । एव च ताभ्यः पृथक्कृत्याशो देय इति न । अत एव समांशका इत्येवाब्रोक्तं, न तु तद्वत् पत्नीश्च विभजेत् सममिति । अत एव धनविभागाभावे नापस्तम्बादितात्पर्य, किन्तूक्ते इति प्राक्प्रतिपादितं प्रतिभूप्रकरणे व्याख्यात्रा । मदनरत्नेऽप्येवम् । एव च यथा जीवत्पितृकविभागे आद्यपक्षे एवमन्यपक्षद्वये 'दत्ते त्वि'ति न्यायेन निर्वाहवत् पुत्रेच्छयैव पितृवन्निर्वाहो बोध्यः । बाल.

अजीवत्पितृकविभागे माता पुत्रसमदायार्हा

पितुरूर्ध्वं विभजतां मातापंशं समं हरेत् ÷ ॥

(१) अविद्यमानस्त्रीधना मातापि विभाग पुत्रसमामाप्नुयात् । मातृशब्दश्चाय पितृसबन्धाविशेषात् तद्भार्यामात्रवचनो द्रष्टव्यः । +विश्व.२।१२७

× शेष मितागतम् ।

÷ स्मृच.व्याख्यान 'याश्चानपत्या' इति वसिष्ठवचने द्रष्टव्यम् । सवि.व्याख्यान 'यदि कुर्यात्समानशान्' इति याज्ञवल्क्यवचने द्रष्टव्यम् ।

+ वीमि. विश्वगतम् ।

(१) **यास्मृ.**२।१२३; **अपु.**२५६।१०; **विश्व** २।१२७ समं हरेत् (समाप्नुयात्); **मिता.**२।१२३, २।१३५; **अप.**; **व्यक.** १४३; **गोमि.**२८।१८ (=), **उ.**२।१४।२, **स्मृच.**२६७; **विर.**४८३; **स्मृसा.**५७ हरे (लभे); **पमा.**५०१; **मपा.**६६३, ६६४; **रत्न.**१४०; **विचि.**२०५; **नृप.**३६; **सवि.**३५७; **दानि.**२; **वीमि.**; **व्यप्र.**४५२, ४९९; **व्यउ.**१४५, १५३; **व्यम.**४४; **विता.**१०५; **राकौ.**४५२; **बाल.**२।१४३; **विभ.**४९; **समु.**१२९.

(२) जीवद्विभागे स्वपुत्रसमांशित्वं पत्नीनामुक्तं 'यदि कुर्यात्समानशान्' इत्यादिना । पितुरूर्ध्वं विभागेऽपि पत्नीना स्वपुत्रसमांशित्व दर्शयितुमाह—पितुरूर्ध्वमिति । पितुरूर्ध्वं, पितुः प्रायणादूर्ध्वं विभजता मातापि स्वपुत्राशसममश हरेत् यदि स्त्रीधनं न दत्तम् । दत्ते त्वर्धांशहारिणीति वक्ष्यते । *मिता.

(३) बहुवचनमविवक्षितम् । तेनैकस्य सुतस्य यावान्भागस्तावानेव मातुर्भवतीत्यर्थः । ×अप.

(४) तदत्र नोक्त पुत्रैरेव सह वृत्तिरस्या इति । =उ.२।१४।२

(५) यदि पितामहपत्न्यपुत्रा तर्हि स्वालङ्कारं प्रीति दत्त लभते नाशम् । तथा पैतामहधनविभागे माताश न लभते किन्तु स्वाभरणादिकमेव । 'यदि कुर्यात्समानशान् पत्न्यः कार्याः समाशिकाः ।' तथा 'पितुरूर्ध्वं विभजता माताप्यश सम हरेत् ।' इति, अनयोः केवलपितृप्रधानकस्वाम्योपेतधनविषयकत्वात् पितृप्रधानकत्व स्वाम्योपेतत्व चैव ज्ञेयम् । मपा.६६४

(६) यदि स्त्रीधन दत्त न भवति । दत्ते त्वर्धांशहारिणी कार्येति । 'समाशहारिणी माता' इति वचनात् । अत्राप्यर्द्धशब्दो न समप्रविभागवचनः । किन्तु यावता पुत्रसमाशिता भवति तावदेव विवक्षितम् । अत्र मातृपदस्य जननीवाचकत्वान्नापुत्रसापत्नमातृपरत्वमपि । सकृच्छ्रुतस्य मातृपदस्य मुख्यगौणोभयार्थत्वानुपपत्तेः । यत्तु 'असुताश्च पितुः पत्न्यः समानाशाः प्रकल्पिताः । पिता मह्यश्च सर्वास्ता मातृतुल्याः प्रकीर्तिताः ॥' इति व्यासवचनात् योगीश्वरवचने पत्नीग्रहणाच्च जीवत्पितृकविभागे पत्नीमात्रस्य पुत्रसमाशवत्वम् । पुत्रपत्नीपदयोः पितृप्रतियोगिकसबन्धार्थकतया गौणमुख्यार्थकत्वानापत्तेः । पित्रोरूर्ध्वं विभागे तु पुत्रकर्तृकतया तत्सबन्धिमात्र प्रतीतेर्वैरूप्यादुभयपरत्वासंभवात् पुत्रवतीनामेव स्वपुत्र समाशित्वम् । अपुत्राणा तु ग्रासाच्छादनमात्रभाक्त्वमविभक्तसंसृष्टपत्नीनामिव । युक्त चैतत् । जीवद्विभागे पितुः स्वातन्त्र्यात्, अजीवद्विभागे पुत्राणा स्वातन्त्र्यात्, मातृपदपत्नीपदस्वरसाच्च । युक्त च अपुत्राणा ग्रासाच्छादनमात्रभाजनत्वमिति बहुतरनिबन्धस्वरसः । मिताक्षराकृतस्तु 'जीवद्विभागे पुत्रसमाशित्वं पत्नीनामुक्तम् । इदानीं पितुरूर्ध्वं विभजतामपि पुत्रसमभागित्वं पत्नीनामाह' इत्यवतारणिकं 'पितुरूर्ध्वं विभजताम्' इत्यस्य योगीश्वरवचसः प्रयच्छतोऽत्रापि सपुत्रापुत्रसकलपितृपत्नीना पुत्रसमाशित्वमभिप्रेतमिति प्रतीयते । मदनरत्नकृताऽप्यत एवोक्त "जननीग्रहणमपुत्राणामपि मातृसपत्नीनामुपलक्षण पितामहीना च । 'असुताश्च पितुः पत्न्यः' इत्यादिव्यासवचनात्" इति । युक्तं चैतत् । पितुः पत्न्य इति पुत्रप्रतियोगिकपितृग्रहणस्यान्यथा वैयर्थ्यात् । पुत्रसमाशित्वस्य पितृकृतविभागविषये 'पत्न्यः कार्याः समांशिकाः' इति वदतापि मातर इत्येव वदेत् । तस्मात्पितृपत्नीत्वप्रयुक्तमेव जीवदजीवद्विभागसाधारणपुत्रसमांशभाक्त्वमिति मिताक्षरामदनरत्नकृतोरभिप्रायः । पितुरिति कर्तरि षष्ठी । तेन पितृकर्तृके विभागे पत्न्यः समानाशा इत्युक्तेऽर्थात्तत्प्रतियोगिकस्यैव पत्नीत्वस्य लाभाज्जीवद्विभागविषयतैवास्योचिता । तत्र तु मातृपदे मुख्यामुख्यमातृपरत्वानौचित्यात्प्रतिसंबन्धितया च पुत्राणामेव स्वबचनोपात्तानामुपस्थितेर्जननीपरत्वमेव मातृपदस्य मुख्यार्थलाभायोचितम् । शिष्टाचारोऽप्येवम् । यदत्र युक्तं तद्ग्राह्यमित्यलमधिकेन । ×व्यप्र.४५३-४५४

(७) सम स्वसमजातीयपुत्रविभागसममित्यर्थः । व्यउ.१४५

(८) समोकेर्मातुर्जीवनमात्रोपयुक्तधनदानम् । तेन स्वार्जितस्य पितृकर्तृके विभागे सपुत्राणामपुत्राणा च पुत्रसमाऽशः । ऊर्ध्वं तु सपुत्राणामेवाऽशो नापुत्राणामिति जीमूतवाहनशूलपाणिगौतमादयः । छत्रिवन्मातृशब्द उभयपर इति विज्ञानेश्वरः । अत्र तु गौणमातृपर एव । अपरार्के कल्पतरौ च बृहस्पतिः—'तदभावे तु जननी तनयाशसमाशिनी' तथा 'समाशा मातरस्तेषा तुरीयाशा च कन्यका ।' तदभावे पितुरभावे । कन्यकाऽनूढा । तुरीयपदं 'दत्वाश तु तुरीयकमि'तिवत्पुत्राशतुर्याशपरम् । स्मृतिचन्द्रिकाया तु बहुधने जीवनमात्रमल्पे धने पुत्रसमोंऽश उक्तः । मातृपदस्यावृत्तिं विना गौणमुख्यत्वायोगाज्जननीपरत्वमेव।

* पमा. मितावद्भावः ।

× शेषं विश्वगत मितागत च । = शेष मितागतम् ।

× व्यम. व्यप्रगतम् । बाल. व्यवहारप्रकाशकृतमिताक्षराभाववद्व्याख्यानम् ।

अन्यथा वृत्तिद्वयविरोधात् । तेन सापत्नमातुर्जीवनमात्रमिति जीमूतवाहनविवादचिन्तामणिशूलपाणिस्मार्तगौडादयः। छत्रिन्यायेनोभयपरत्वे असुताया एव विभागोक्तेर्जनन्या तदयोगात् समाशा मातर इति बहुत्वबाधाच्च । तेन वचनात्तत्त्वयथार्थमैन्द्री स्यात् इति न्यायेन गौणपर एवेत्यन्ये। इदं चापुत्राया भर्तृदत्तस्त्रीधनहीनायाश्च। सपुत्रायास्तु पुत्राश एव भागः। धनयुतायास्त्वर्धांऽशः । 'जनन्यस्वधना पुत्रैर्विभागेऽश सम हरेदि'ति स्मृत्यन्तरात्। एव पुत्रपौत्रहीनाः पितामह्योऽपि पौत्रसमाशाः। 'असुताश्च पितुः पत्न्यः समानाशाः प्रकीर्तिताः । पितामह्यश्च ताः सर्वा मातृतुल्याः प्रकीर्तिताः॥' इति व्यासोक्तेरिति अपरार्ककल्पतरुमदनरत्नप्राच्यादयः । तेन 'पत्न्यः कार्याः समाशकाः' 'माताप्यशं समं हरेदि'ति विज्ञानेश्वरोक्तिश्च(?) सामान्यरूपा पुत्रहीनगौणमातृपरैव । तेन सापत्नमातरः पितामह्यश्चानंशा एव सधनास्त्वर्धाशाः। 'दत्ते स्वर्धं प्रकल्पयेदि'ति धनमात्रेऽपवादोक्तेः। अत्रेदं तत्त्वम्। चकारादधनाः ससुताश्च पुत्रसमाशाः, ससुताः सधनाश्च न समानाशाः । 'या तु सप्रधनैव स्त्री सापत्न्याच्चान्यमाश्रयेत् । ऋणं पतिकृत दद्याद्विसृजेद्वा तथैव ताम्॥' इति नारदेन धनापत्ययोस्तुल्यत्वोक्तेरपत्यस्यापि धनसाम्यात् तेनोभयहीनास्तु पुत्रसमाशाः । मातृजननीशब्दौ तु छत्रिन्यायेन पितृपत्नीमातृपरौ, एव पितामहीशब्दोऽपीति वय प्रतीमः । विता.३०५-३०९

नारदः

अजीवत्पितृकविभागे माता पुत्रसमदायार्हा

समांशहारिणी माता पुत्राणां स्यात् मृते पतौ ॥

मृते पत्यौ माता पुत्रैः समभागा । मृते धव इति वचनात् जीवति न तस्या भाग इति गम्यते ।

ना भा.१४।१२

(१) **नासं.१४।१२** हारिणी (भागिनी) पतौ (धवे); **नास्मृ.१६।१२** हारिणी (भागिनी); **दा.४४**; **दात.१६७**; **सेतु.७८**; **विभ.४९ (=)**; **समु.१२९** नासंवत्; **विच.५६, ६८.**

बृहस्पतिः

अजीवत्पितृकविभागे माता पुत्रसमदायार्हा ।

कन्या चतुर्थभागहरा ।

तदभावे तु जननी तनयांशसमांशिनी ।
समांशा मातरस्तेषां तुरीयांशा च कन्यका ॥

(१) पुत्रस्य भागत्रय कन्यकाया एको भागः । दा.६९

(२) **पितेत्यनुवृत्तौ** बृहस्पतिः— तदभाव इति । तुरीयाशा सजातीयस्य भ्रातुर्यावानशस्तदपेक्षत्वाच्चतुर्थो भागः संस्कारार्थं पितृधने कल्पनीयः । यत्तु विष्णुवचन — 'मातरः पुत्रभागानुसारेण भागहारिण्योऽनूढाश्च दुहितरः' इति, तदप्येतद्वचनानुसारात् दुहितृणा चतुर्थभागपरम् । व्यक.१४३

(३) जनन्यत्र पुत्रवती, मातरः पितृपत्न्योऽपुत्राः । *विर.४८४

(४) एवामेव सनिधानादेवामेव कन्यकेत्यर्थः । तेनैकस्याभावे तत्पुत्रस्य समोंऽशः । कन्यकायाश्चतुर्थांशः । कन्यापदमनूढापर विभक्तकन्यायास्तु पत्नी दुहितर इति वाच्यम् । स्मृसा.५७

कात्यायनः

जीवत्पतौ वा पितरि माता समाशहारिणी

सकलं द्रव्यजातं यद्भागैर्गृह्णन्ति तत्समैः ।
पितरौ भ्रातरश्चैव विभागो धर्म्य उच्यते +॥
मातापि पितरि प्रेते पुत्रतुल्यांशभागिनी ॥

* शेषं व्यकवत् ।

+ व्याख्यासंग्रहः स्थलादिनिर्देशश्च (पृ.११७३) इत्यत्र द्रष्टव्यः ।

(१) **दा.६९** स्तेषां (स्वेषां) शा च कन्यका (शाश्च कन्यकाः) उत्त.; **विर.४८४** याश (यानां), **स्मृसा.५७** स्तेषां (स्वेषा) उत्त.; **दीक.४४**, **विचि.२०४**; **वीमि.२।११७** स्मृसावत्; **व्यप्र.४५४** विरवत्, पृ:४५६ स्तेषां...का (स्वेषां चतुर्थांशाश्च कन्यकाः) उत्त.; **विता.३०६**; **बाल.२।११७** स्मृसावत्, अङ्गिराव्यासौ; **सेतु.७९** च कन्यका (स्तु कन्यकाः); **विभ.४९,८५**; **समु.१२९** यांश (यानां) च (तु) उत्तरार्ध तु कात्यायनस्य; **विच.६९** सेतुवत्.

(२) **दा.४९**; **दात.१७०** भागिनी (हारिणी); **व्यप्र.४४४**; **विता.३१३**; **विभ.५०** तापि (ता च) : **६८** तापि (ता च) शेषं दातवत्.

व्यासः

मातरः पुत्रसमदायार्हाः

असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः।
पितामह्यश्च सर्वास्ता मातृतुल्याः प्रकीर्तिताः* ॥

(१) पुत्रहीनाश्च पितुः पत्न्यः समानाशा न पुत्रवत्यः। दा.६७

(२) तुशब्दोऽप्यर्थे। विर.४८४

(३) समाशता चात्र विधीयते। एकमूलत्वानुसारात्। तथा च साहित्य बहुवचन चात्र विवक्षितम्। मातेत्येकवचनमपि (?) सत्रा तु दशायेतिवद्विभाजक मातृमात्रप्रतीत्यैवाकाङ्क्षाशान्तेर्नाविवक्षितम्। यदा मातरि स्थितायामन्यस्या च पितृपत्न्यामनूढाया च कन्यकाया दैवाद्विभागस्तदेदम्। मुख्यकालस्तु मातरि मृतायां, भगिनीषु प्रत्तासु, पितरि चोपरतस्पृहे वा, मातर इति बहुवचनात्। प्रत्येकमेव जननीत्वे साहित्यविवक्षाया मानाभावात्। बह्वीनामपि जननीनामधिकारः असुतास्त्विति वचनादन्यासा, अन्यथा 'मातरः पुत्रभागानुसारभागहारिण्यः' इति वर्णक्रमभागग्रासपरं एकमातृपरत्वे सर्वं भजेत्। स्मृसा.५७

(४) सर्वा इत्यनेन पितामहीसपत्न्योऽपि गृह्यन्ते। व्यम.४४

* स्मृच. व्याख्यान 'न दाय निरिन्द्रियाः' इति बौधायनवचने (पृ.१३८८) द्रष्टव्यम्। पमा. व्याख्यान 'जनन्यस्वधना' इति देवलवचने द्रष्टव्यम्। सवि. व्याख्यानं 'यदि कुर्यात् समानशान्' इति याज्ञवल्क्यवचने (पृ.१४०९) द्रष्टव्यम्। विता. व्याख्यानं 'पितुरूर्ध्वं विभाजतां' इति याज्ञवल्क्यवचने (पृ. १४१२) द्रष्टव्यम्।

(१) **दा.६७**; **अप.**२।१२३, **व्यक.**१४३ तुल्याः (कल्पा.), **स्मृच.**२६७ समानाशा. प्र (समाशा परि); **विर.**४८४ सर्वास्ता (ताः सर्वा); **स्मृसा.**५७ विरवत्, **पमा.**५०२; **दीक.**४४; **रत्न.**१४०; **विचि.**२०५; **नृप्र.**३६ अश्च सर्वास्ता (आदयः सर्वा); **दात.**१६६ सुतास्तु (पुत्राश्च), **सवि.**३५७; **वीमि.** २।११७ स्मृचवत्, पू.; **व्यप्र.**४५३ स्तु (श्च) शाः प्रकीर्ति (शाः प्रकल्पि); **व्यम.**४४ स्तु (श्च) शेष विरवत्; **विता.**३०७ व्यमवत्; **बाल.**२।११७ विरवत्, अङ्गिराव्यासौ : २।१२३ तास्तु (ताः स्व) शेष विरवत्; **सेतु.**७९ उत्त.; **विभ.**४८; **समु.**१२९ स्मृचवत्; **विच.**५९ स्मृचवत्.

देवलः

माता पुत्रसमदायार्हा

जनन्यस्वधना पुत्रैर्विभागेऽशं समं हरेत् *॥

(१) यत्तु कैश्चिदुक्त 'माताप्यंश सम हरेदि'ति जीवनोपयुक्तमेव धन माता स्वीकरोति इति। तन्न। अंशसमशब्दयोरानर्थक्यप्रसंगात्। अथोच्येत बहुधने जीवनोपयुक्तं गृह्णाति स्वल्पधने पुत्रसमाशमिति। तदपि न। विधिवैषम्यप्रसंगात्। पमा.५०२

(२) स्त्रीधनसहितायास्तु जीवद्विभागे अजीवद्विभागे वा द्व्यंशभागित्वमिति विज्ञानेश्वराचार्यः। जननीग्रहण अपुत्राणामपि मातृसपत्नीना पितामहीना चोपलक्षणम्। अत एव व्यासः—'असुतास्तु पितुः पत्न्यः समानाशाः प्रकीर्तिताः। पितामह्यश्च ताः सर्वा मातृतुल्याः प्रकीर्तिताः॥' पितुरूर्ध्वं विभागे मातुः स्वपुत्रसमाशभागित्वमाह याज्ञवल्क्यः—पितुरूर्ध्वमिति। यद्यपि कैश्चिन्मात्रादीना जीवनमात्रोपयुक्तधनभागित्वमुक्त कथ तन्मते समशब्दो नानुपपन्न इति विद्वद्भिर्विचारणीयम्। यत्पुनः स्मृतिचन्द्रिकाया समशब्दस्य सार्थकत्वमुक्तं विभाज्यधनस्य स्वल्पत्वे जीवनमात्रोपयोगिधनग्रहण अनल्पत्वे (स्वल्पत्वे) तु समाशहरणमेव न तु जीवनोपयोगवशादधिकहरणमित्येवमर्थः समशब्द इति तदसुन्दरम्। कदाचित् जीवनमात्रोपयोगिधनग्रहणविधान कदाचित्समाशग्रहणविधानमिति वाक्यभेदापादकविधिवैरूप्यप्रसंगात्। न च विभाज्यधनस्याल्पत्वविषय एवास्य विधेः प्रवृत्तिरिति वाच्यम्। स्वेच्छया विधिसंकोचस्याश्रयितुमयुक्तत्वात्। रत्न.१४०

* विता. व्याख्यान 'पितुरूर्ध्वं विभजतां' इति याज्ञवल्क्यवचने (पृ.१४१२) द्रष्टव्यम्। स्मृच. व्याख्यान 'यदि कुर्यात्समानशानि'ति याज्ञवल्क्यवचनस्य सवि.व्याख्याने (पृ.१४१०) इत्यत्र द्रष्टव्यम्। व्यम.'पितृभ्यां यस्य' इति याज्ञवल्क्यवचनस्य मिताक्षरावः स्मृचवद्भावश्च।

(१) **स्मृच.**२६८ स्मृतिः; **पमा.**५०२ स्मृत्यन्तरम्; **रत्न.**१४०; **सवि.**३५८ स्मृत्यन्तरम्; **व्यम.**४४ न्य स्व (नी त्व) स्मृत्यन्तरम्; **विता.**३०७ स्मृत्यन्तरम्; **बाल.**२।१२३ स्मृत्यन्तरम्; **समु.**१२९.

पैतृकद्रव्ये भगिनीनां भागः

वेदाः

अनूढदुहिता पैत्र्यभागहारिणी

अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम्। कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो येन मामहः॥

हे इन्द्र अमाजूर्यावजीव गृह एव जीर्यन्ती पित्रोः सचा मातापितृभ्या सह भवन्ती तयोः शुश्रूषणपरा पतिमलभमाना सती दुहिता समानादात्मनः पित्रोश्च साधारणात्सदसो गृहात्। गृह उपस्थायैव यथा भाग याचति तथा स्तोताऽह भगं भजनीयं धन त्वामिये। त्वा याचे। तत्र देय धनं प्रकेत प्रकर्षेण ज्ञातव्यं विश्वजनीयं कृधि। कुरु। तत्रोपमासि। एतावदिद धनमिति कुरु। आभर। तत्र धन संपादय। भागं भजनीय धनं तन्वः शरीराय मह्यमिति यावत् दद्धि। देहि। येन धनेन ममहः। स्तोतॄनिमान्पूजयसि। ऋसा.

भगिन्या अंशो भ्रातृभागे (१)

एष ते रुद्र भागः सह स्वस्राऽम्बिकया त जुषस्व।

हे रुद्र, एषोऽवत्तः पुरोडाशानामशस्तवावदीयमानो भागः, त भाग, स्वस्रा भगिनीवद्धितकारिण्याऽम्बिकया पार्वत्या सहाश जुषस्व सेवस्व। तैसा.

उभयोर्भ्रातृभगिन्योर्दायार्हत्वविचारः

अविशेषेण मिथुनाः पुत्रा दायादा इति तदेतदृक्श्लोकाभ्यामभ्युक्तम्—

अङ्गादङ्गात्संभवसि हृदयादधिजायसे॥

आत्मा वै पुत्रनामासि स जीव शरदः शतम्। इति।

अविशेषेण पुत्राणां दायो भवति धर्मतः।
मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत्॥
न दुहितर इत्येके। तस्मात् पुमान् दायादोऽदाया स्त्रीति विज्ञायते। तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसमिति च।

आपस्तम्बः

पैतृकधनविभागे भार्याया भागः

परिभाण्डं च गृहे —।

अलङ्कारो भार्यायाः ज्ञातिधनं चेत्येके।

(१) यदा तु श्रेष्ठभागादिना ज्येष्ठादीन् विभजति तदा पत्न्यः श्रेष्ठादिभागान्न लभन्ते किन्तूद्धृतोद्धारात्समुदायात्समानेवांशान् लभन्ते स्वोद्धारं च। यथाह

— व्याख्यासग्रहः रथलादिनिर्देशश्च (पृ.११६५) इत्यत्र द्रष्टव्यः।

आगृ.१।१५।९; गोगृ २।८।३१; पागृ.१।१८।२; आपगृ.६।१५।१,१२; हिगृ २।३।२, मागृ.१।१८।६; नि.३।४; भा.१।७४।६३.

(१) शब्रा.१४।९।४।२६, सामब्रा.१।५।१७ आत्मा (वेदो): १।५।१८ आत्मा वै पुत्र नामासि (आत्मासि पुत्र मा मृथा), शाआ.४।११, अयमेव मन्त्र. 'वेदो वै' इति पाठभेदन पुन. पठितः, बृउ.६।४।२६; कौब्राउ.२।११ आत्मा (तेजो); आगृ.१।१५।३ आत्मा (वेदो): १।१५।९; पागृ. १।१६।१८, हिगृ.२।३।२, अयमेव मन्त्रः 'वेदो वै' इति पाठभेदेन पुनः पठितः; मागृ.१।१७।५ आत्मा (वेदो): १।१८।६; नि.३।४; भा.१।७४।६३. (२) नि.३।४.

(३) आध २।१४।९; हिध.२।७, मिता.२।११५ (ज्ञाति ...त्येके०): २।११७; व्यक १४७; विर.५०९; पमा. ४९३; मपा.६६३ मितावत्, विचि.२१७, व्यनि.; स्मवि. ३५५; व्यप्र.४४० मितावत्; व्यउ.१४४,१४५ मितावत्; विता.३०१,४४६; विभ.५१ मितावत्; समु.१२९ (इत्येके०).

(१) ऋसं.२।१७।७.

(२) तैसं.१।८।६।१,२: ३।१।९।४; कासं.९।७,३६।१४; मैसं.१।१०।४, १।१०।२०; शुमा.३।५७; तैब्रा.१।६।१०।४,५; शब्रा.२।६।२।९,१०; लाश्रौ.५।३।१२; माश्रौ. १।७।५।५; आपश्रौ.८।१८।१,८: १२।२३।११.

(३) नि.३।४.

(४) शब्रा.१४।९।४।८; सामब्रा.१।५।१६,१७ संभवसि (संभवसि); शाआ.४।११; बृउ.६।४।८; कौब्राउ.२।११;

आपस्तम्बः—'परीभाण्डं च गृहेऽलङ्कारो भार्यायाः' इति । *मिता.२।११५

(२) भार्यायास्तु धृतोऽलङ्कारोऽशः। ज्ञातिभ्यः पित्रादिभ्यश्च यल्लब्धं धनं तच्चेत्येवमेके मन्यन्ते । +उ.

(३) दृषदुदूखलमुसलशूर्पादि परीभाण्डमित्युच्यते । मपा.६६३

(४) ज्ञातिधन विवाहादौ लब्धं पितृकुलात्पतिकुलाद्वा । विचि.२१७

(५) अलङ्कारः पूर्वमुक्तः। सोऽप्यल्पमूल्यः। बहुमूल्यस्तु वैषम्ये मूल्यद्वाराऽश्ववद्विभाज्यः। साम्ये तु न। विता.४४६

(६) मिताटीका— आपस्तम्बश्च 'स्त्रियो भर्तुर्मातुः पुत्रेभ्यश्च भागं नेच्छन्ति' इत्यादिक तु साप्रतव्यवहारविरुद्धम् । बाल.२।११७(पृ.१४२)

वसिष्ठः

भगिनीना पैतृकद्रव्यभागः प्रसवोत्तरम्

भगिन्या आप्रसवान्नैव विभागोऽस्ति×।

विष्णुः

विशेषणविशिष्टभगिनीनामेवांशभाक्त्वम्

[1]अनूढानामप्रतिष्ठितानामेवांशो दातव्यः।

इति विष्णुवचने अनूढात्वाप्रतिष्ठितत्वविशेषणविशेषितानामेव भगिनीनामंशदान प्रतीयते। तच्च प्रतिष्ठोपयोगि विवाहोपयोगि वा प्रतीयते । सवि.३६१-३६२

मातरः पुत्रभागानुसारेण भागहारिण्यः अनूढाश्च दुहितरः÷।

अनूढेति विशेषणोपादानात् स्वविवाहार्थं पुत्रभागानुसारिभागग्रहण यथाशक्ति, न पुनः मातृणामिव जीवनार्थमंशहरत्वमिति गम्यते । सवि.३५९

* व्यप्र. मितागतम् । +'परिभाण्ड च गृहे' इत्ययमशः पूर्वसूत्रे 'पितुः' इति पदेनान्वेति इति उज्वलाकारमतमतः 'अलङ्कारो' इत्यारभ्यैव पृथक् सूत्र तेन धृतम् ।

× व्याख्यासंग्रहः स्थलादिनिर्देशश्च 'स्त्रीधन, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च' इत्यस्मिन् प्रकरणे द्रष्टव्यः ।

÷ अवशिष्टव्याख्यासग्रहः स्थलादिनिर्देशश्च (पृ.१४०७) इत्यत्र द्रष्टव्यः ।

(१) सवि.३६१.

भगिनीसंस्कारकर्तव्यता

[2]अनूढानां तु कन्यानां वित्तानुसारेण संस्कारं कुर्यात्÷।

(१) यत्पुनर्विष्णुनोक्तं 'अनूढानामि'ति तदेकपुत्रतया दायविभागाभावविषयम्। यद्वा भ्रातृणा सहवासविषयम् । कन्याग्रहणमसंस्कृताना पितुरपत्यानां उपलक्षणार्थम्। स्मृच.२६९

(२) एव 'अनूढा दुहितरः' इत्यपि भागवचनं अन्यथा विवाहाभावे । स्मृसा.६०

शंखः शंखलिखितौ च

पैतृकद्रव्ये कन्याभागः । भ्रातृद्रव्य भगिनी हरति ।

विभज्यमाने दायाद्ये कन्यालङ्कारं वैवाहिकं स्त्रीधनं च कन्या लभेत *।

तदपत्यस्य च द्रव्यं कन्याभाग एव *।

कौटिलीयमर्थशास्त्रम्

भगिन्यो भागहारिण्यः । कन्यासंस्कारकर्तव्यता ।

[3]रिक्थं पुत्रवतः पुत्रा दुहितरो वा धर्मिष्ठेषु विवाहेषु जाताः ।

रिक्थ दाय, पुत्रवतः प्रमीतस्य, पुत्राः हरेयुरिति वर्तते । दुहितरो वा, धर्मिष्ठेषु ब्राह्मादिषु चतुर्षु विवाहेषु जाताः, हरेयुः पुत्राभावे । श्रीमू.

÷ विर. तथा व्यप्र.व्याख्यानं 'स्वेभ्योऽशेभ्यस्तु' इति मनुवचने द्रष्टव्यम् । विचि., दात. विरगतम् । वीमि.व्याख्यानं 'असंस्कृतास्तु संस्कार्या' इति याज्ञवल्क्यवचने द्रष्टव्यम् ।

* व्याख्यासग्रहः स्थलादिनिर्देशश्च 'स्त्रीधन, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च' इत्यस्मिन् प्रकरणे द्रष्टव्यः ।

(१) **विस्मृ.**१५।३१ तु कन्यानां (स्व) सारे (रूपे); **व्यक.**१४५; **स्मृच.**२६९ वित्ता (स्ववित्ता); **विर.**४९३ तु (च) सारे (रूपे); **स्मृसा.**६० (तु०) शेषं स्मृचवत् ; **दीक.**४४ स्मृचवत् ; **विचि.**२१०; **स्मृचि.**३५ वित्तानुसारे (स्ववित्तानुरूपे); **दात.**१७१ वित्ता (स वृत्ता); **सवि.**३६२ तु (च) शेषं स्मृचवत्, बृहद्विष्णुः; **चन्द्र.**७५ स्मृचिवत् ; **वीमि.** २।१२४ (तु०) सारे (रूपे) यात् (युः); **व्यप्र.**४५५ सारे (रूपे); **समु.**१२९ तु कन्यानां (च कन्यकानां अंशवान् स्व); **विच.**७७ स्मृचवत्.

(२) **कौ.**३।५.

[1]**संनिविष्टसममसंनिविष्टेभ्यो नैवेशनिकं दद्युः। कन्याभ्यश्च प्रादानिकम्।**

असंनिविष्टेभ्यः अनुरूपस्त्रीपरिणयेन प्राप्तगार्हस्थ्याः संनिविष्टाः अतथाभूता असंनिविष्टा अविवाहिताः तेभ्यः, नैवेशनिकं निवेशनं परिणयनं तत्प्रयोजनक द्रव्यं, संनिविष्टसम संनिविष्टभ्रात्रर्थे यावद् व्ययितं विवाहार्थं तत्तुल्यप्रमाण दद्युः। कन्याभ्यश्च, प्रादानिकं प्रदान विवाहः तत्पर्यायं द्रव्यं, दद्युः। श्रीमू.

मनुः

भगिन्यश्चतुर्थभागहारिण्यः

[2]**स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्।**
स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः॥

(१) कन्याशब्दः प्रायोऽनूढासु प्रयुज्यते। कानीनपुत्रः। स्मृत्यन्तरे चाप्रत्तानामिति पठ्यते। अतोऽनूढानामयं भाग उच्यते। स्वाभ्यः स्वजात्यपेक्षया स्वाभ्यो, भ्रातरः कन्याभ्यश्चतुर्थभागमंश दद्युः स्वादंशात्। यत्र बह्व्यः कन्याः सन्ति तत्र समानजातीयभ्रात्रपेक्षया चतुर्थांशे कल्पना कर्तव्या। तथा चायमर्थः। त्रीनंशान् पुत्र आददीत चतुर्थं कन्येति। यदपि कैश्चिदुक्त महान् उपकारः पितृमरण कन्यानामदत्तानां, येन जीवति पितरि तदिच्छया मूल्येनापि धनेन संस्क्रियन्ते मृते त्वंशहरा इति। तत्पुत्रेऽपि तुल्य, वाचनिके चार्थे केय नोदना। अथाभिप्रायः। समाचार उद्वाहमात्रप्रयोजनं दानमिति। आचारो दुर्बलः स्मृतेरिति। न वैकान्तिकः, अनैकान्तिकत्वे च स्मृतितोऽयं नियमो युक्तः। यदपीद केनचिदुक्तमुद्वाहमात्रप्रयोजनं देयं न चतुर्थो भागो यथाश्रुतमिति। स इदं वाच्यतो नोद्वाहे परिमितधनदानमस्ति, तस्य द्वादशशतं दक्षिणेतिवत्। केवलमाच्छाद्यालङ्कृता विवाहयेत्। सौदायिक चाऽस्या दद्यादिति श्रूयते। अलङ्कारस्तु सुवर्णमणिमुक्ताप्रवालादिरनेकधा भिन्न इति। तत्र न ज्ञायते कियद्दातव्यं धनं कीदृशो वाऽलङ्कार इत्यतश्च परिमाणार्थमेवेद युक्तं स्वादशाच्चतुर्भागमिति। न चास्मिन्नर्थे शास्त्रविरोधो वा। स्मृत्यन्तराण्येवमेव पक्षमुपोद्बलयन्ति। 'असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः। भगिन्यश्च निजादंशाद्दत्वाऽश तु तुरीयकम्॥' (यास्मृ.२।१२४) इति। तथा 'आ संस्काराद्धरेद्भागं परतो बिभृयात्पतिः' इति। अस्यायमर्थः। यत्र स्वल्पं धनमस्ति, भ्रातुर्भगिन्याश्च न चतुर्भागे कन्याया भरणं भवति, तत्र समभागं कन्या हरेदा संस्कारात्। परतस्तु स्मृत्यन्तराच्चतुर्भाग गृह्णीयात्स्वल्पमपि। कथ तर्हि भरणमात्रं कुर्यादत उक्त 'परतो बिभृयात्पतिः' इति। भ्रातृग्रहणं सोदर्यार्थं व्याचक्षते। कोऽभिप्रायः। भ्रातृशब्दो निरुपपदः सोदर्य एव मुख्यया वृत्त्या वर्तते। पृथग्वचन च लिङ्गम्। यस्यास्तु हि सोदर्यो नास्ति तस्या दायः सौदायिकं वा न प्राप्नोति। वैमात्रेयो दास्यतीति चेन्नासति वचनान्तरे ददात्ययम्। भ्रातृशब्दा एकपितृकानेकमातृकाश्च गृह्यन्ते। पैतृष्वस्रेयादिषु तूपचाराद्वर्तन्त इति युक्तम्। एवमेकशब्दस्यानेकार्थत्वं नाभ्युपगतं भवति। स्मृत्यन्तरसमाचारश्चेतः श्रेयान्। तत्र हि पठ्यते 'यच्छिष्टं पितृदायेभ्यः दत्वर्णं पैतृकं च यत्। भ्रातृभिस्तद्विभक्तव्यम्।' (व्यवहारकाण्डम् पृ.१२२१) यत् पित्राऽवश्य दातव्यं तद्दत्थादुद्धृत्य शेषं विभजेरन्नित्यर्थः। यथा च ऋणापाकरणादि व्याहियते, तद्वत्कन्यादानम्। अवश्यकर्तव्यत्वात्। 'कन्याभ्यश्च प्रादानिकम्' (कौ.३।५) इति। नात्र भगिनीशब्दो भ्रातृशब्दो वा श्रूयते। यत इयमाशङ्का स्यात्। यत्तु पृथगिति तदेकैकस्यैव समूहभागः सर्वाभ्य इत्येवमपि युज्यते। यदप्युच्यते अददता प्रत्यवायो, न तु हठाद्दाप्यन्ते। यत उच्यते– पतिताः स्युरदित्सव इति। यो हि यत्र यावत्यंशे स्वामी स हरेदित्युच्यते। न पुनरनेनास्मै दातव्यमिति। तत्रोच्यते। भ्राता भ्रात्रे दद्यादिति चोच्यते, न पुनरस्वामिभ्यः। मेधा.

(२) अस्यार्थः। ब्राह्मणादयो भ्रातरो ब्राह्मणीप्रभृतिभ्यो भगिनीभ्यः स्वेभ्यः स्वजातिविहितेभ्योंऽशेभ्यः 'चतुरोंऽशान् हरेद्विप्रः' इत्यादिवक्ष्यमाणेभ्यः स्वात्स्वा-

(१) **कौ.**३।५.

(२) **मस्मृ.**९।११८; **मिता.**२।१२४; **दा.**६९; **अप.** २।१२४; **व्यक.**१४५ भ्योंऽशे (भ्यः स्वे); **स्मृच.**२६९ स्तु (श्च); **विर.**४९४ भ्योंऽशे (भ्यः स्वे); **स्मृसा.**५९; **पमा.** ५०९ प्रद (स्वं द); **रत्न.**१४३; **विचि.**२०९-२१० विरवत्; **स्मृचि.**३५ स्युरदित्सवः (पुरदत्तकाः); **नृप्र.**३७ न्याभ्यः (न्यायाः); **सवि.**३६० (=) पमावत्; **व्यप्र.**४५५; **विता.** ३३४; **विभ.**८६; **समु.**१२९.

दंशादात्मीयादात्मीयाद्भागाच्चतुर्थं चतुर्थं भाग दद्युः। न चात्रात्मीयभागादुद्धृत्य चतुर्थांशो देय इत्युच्यते किंतु स्वजातिविहितादेकस्मादेकस्मादंशात् पृथक्पृथगेकैकस्यै कन्यायै चतुर्थांशो देय इति जातिवैषम्ये संख्यावैषम्ये च विभागकृतिरुक्तैव। 'पतिताः स्युरदित्सवः' इत्यकरणे प्रत्यवायश्रवणादवश्यदातव्यता प्रतीयते। अत्रापि चतुर्थभागवचनमविवक्षित संस्कारमात्रोपयोगिद्रव्यदानमेव विवक्षितमिति चेन्न। स्मृतिद्वयेऽपि चतुर्थांशदानाविवक्षाया प्रमाणाभावाददाने प्रत्यवायश्रवणाच्चेति। यदपि कैश्चिदुच्यते। अंशदानविवक्षाया बहुभ्रातृकायाः बहुधनत्व बहुभगिनीकस्य च निर्धनता प्राप्नोतीति तदुक्तरीत्या परिहृतमेव। न ह्यत्रात्मीयाद्भागादुद्धृत्य चतुर्थांशस्य दानमुच्यते येन तथा स्यात्। अतोऽसहायमेधातिथिप्रभृतीना व्याख्यानमेव चतुरस्रं न भारुचेः। +मिता.२।१२४

(३) प्रदद्युरिति प्रदानश्रुतेरदाने च पतितत्वश्रुतेर्न कन्याभिरधिकारिणिद्धृत्या ग्रहीतव्यं न ह्यधिकारिणे भ्रात्रेऽपरो भ्राता स्वादंशाद्ददाति। दा.६९

(४) अत्रापि स्वेभ्योऽशेभ्य इति पदद्वय पुत्राशमात्रविवक्षया। बहुवचन कन्याबहुत्वाभिप्रायम्। स्वात्स्वादिति वीप्साऽनेकजातीयकन्याभिप्राया। एतदुक्त भवति—यदा ब्राह्मणस्य सर्ववर्णा भार्या भवन्ति, तासा च प्रत्येक कन्यकाः सन्ति, तत्र ब्राह्मणी या कन्यका सा ब्राह्मणस्य पुत्रस्य यावानशो भवति ततश्चतुर्थांश लभते। एव ब्राह्मणस्यैव पितुः क्षत्रियादिकन्यकाः क्षत्रियादिसुताश्चतुर्थभागग्राहिण्य इति। न त्वायं दायः। ततश्चार्हति स्त्रीत्यनुवृत्तौ यदुक्त बौधायनेन— 'न दाय निरिन्द्रियाणा (?)ता ह्यदायाः स्त्रियो मता इति श्रुतिः' इति, तेन सहास्याविरोधः। अप.२।१२४

(५) अत्र च कन्यावहुत्वेऽपि तदेव विभजनीयम्। बहुत्वे तु भ्रातृणा कन्याया एवंकत्वे एकस्य भ्रातुर्भागाच्चतुर्थो भागो यावास्तावद्धन स्वस्वांशेभ्य आकृष्य देयम्। मवि.

(६) यद्यप्यस्मात्स्वात्स्वादिति वीप्साया यावन्तो भ्रातृणामंशास्तावन्त एव चतुर्थांशाः कन्याभ्यः भ्रातृभिः प्रदेया इति ऋज्वर्थः प्रतिभाति तथाप्यधिकसंख्याककन्याविषयत्वात् न प्राचीनस्मृति ('कन्यकाना' इति कात्यायनस्मृति) विरोधः। न चात्रैकैकस्याः स्वात्स्वात् चतुर्थांशदान येन प्राचीनस्मृतिविरोधः स्यात्। किन्तु समुदायस्येति सुतरामविरोधः। दत्तं च कन्याभिः समत्वेन विभज्य ग्राह्यम्। स्मृच.२६९

(७) ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो भ्रातरः स्वजात्यपेक्षया स्वेभ्यः 'चतुरोऽशान् हरेद्विप्रः' इत्यादिना वक्ष्यमाणेभ्यो भागेभ्य आत्मीयादात्मीयाद्भागाच्चतुर्थभागं पृथक् कन्याभ्योऽनूढाभ्यो भगिनीभ्यः या यस्य सोदर्या भगिनी स तस्या एव संस्कारार्थमिति एवं दद्युः। सोदर्याभावे विमातृजैरुत्कृष्टैरपकृष्टैरपि संस्कार्यैव। तथा च याज्ञवल्क्यः—'असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः। भगिन्यश्च निजादंशाद्दत्वाश तु तुरीयकम्॥' यदि भगिनीसंस्कारार्थं चतुर्भागं दातुं नेच्छन्ति तदा पतिता भवेयुः। एतेनैकजातीयवैमात्रेयबहुपुत्रभगिनीसद्भावेऽपि सोदर्यभगिनीभ्यश्चतुर्थभागदानमवगन्तव्यम्। ममु.

(८) अत्र चानेकवाक्यगतचतुर्थांशदर्शनात् चतुर्थांशस्यैव दान, प्रयोजन तु संस्कारः। चतुर्थांशदानविधिर्विष्णोरपि तयैव दिशा नेतव्यः। कल्पतरुप्रकाशमिताक्षरा अप्येवम्। विष्णुवाक्यदर्शनाच्चतुर्थांशदानमुपलक्षण, यावता संस्कारो भवति तावत्येव तात्पर्यमिति हलायुधादिमतम्। युक्त चैतत्कर्तव्यसंस्कारस्यौचित्यात्। +विर.४९४

(९) एव जातिवैषम्ये भ्रातृणा भगिनीना च, संख्यया वैषम्ये च सर्वत्राय नियम इति मेधातिथेर्व्याख्यानम्। एतदेव विज्ञानेश्वरयोगिनोऽप्यभिप्रेतम्। भारुचिस्तु—चतुर्भागपदेन विवाहसंस्कारमात्रोपयोगि द्रव्यं विवक्षितम्। अतो दायभाक्त्वमसंस्कृतकन्यानां नास्तीति मन्यते। एतदेव चन्द्रिकाकारस्याप्यभिप्रेतं तदाह—"यत एव न दायभागार्थमंशहरणं किन्तु विवाहसंस्कारार्थम्। अत एव देवलेनोक्त 'कन्याभ्यश्च पितृद्रव्यं देयं वैवाहिकं वसु' इति।" अत्र यदुक्तियुक्त तदग्राह्यम्।

+ विता., नन्द. मितावत्।

+ वाक्यार्थो मितावत्।

जीवद्विभागे तु यत्किञ्चित्पिता ददाति तदेव लभते कन्या विशेषाश्रवणात् । ×पमा.५१०–५११

(१०) एतन्मतं (असहायमेधातिथिविज्ञानयोगिप्रदीपकारादीनां मतम्) भारुच्यपरार्कप्रभृतयो न मन्यन्ते । पितुरूर्ध्वं जीवति वा पितरि कन्या नांशभागिनी, जीवति पितरि पित्रा स्वेच्छया पुत्रिकाणा यत्किंचिद्दातव्यम् । पितर्युपरते भ्रातृभिरप्यनूढाना संस्कारोपयोगि अप्रतिष्ठिताना प्रतिष्ठोपयोगि द्रव्य दातव्यम् । न तु ताश्चतुर्थांशहरा इति । चतुर्थांशप्रतिपादकवचनानि तु संस्कारोपयोगिद्रव्यप्रतिपादनपराणि प्रतिष्ठोपयोगिद्रव्यप्रतिपादनपराणि । 'अनूढानामप्रतिष्ठितानामेवांशो दातव्यः' इति । विष्णुवचने, अनूढात्वाप्रतिष्ठितत्वविशेषणविशेषितानामेव भगिनीनामंशदान प्रतीयते । तच्च प्रतिष्ठोपयोगि विवाहोपयोगि वा प्रतीयते । 'पतिताः स्युरदित्सवः' इत्यदाने प्रत्यवायस्मरण तु प्रतिष्ठोपयोगिद्रव्यदानेन प्रतिष्ठाया अकरणे संस्कारोपयोगिद्रव्यदानेन संस्काराकरणे प्रत्यवाय इत्यर्थकमवगन्तव्यम् । जीवति पितरि दुहितृणा यत्किंचिद्दानमेवमजीवति पितरि । दृष्टार्थत्वे सिद्धे अदृष्टकल्पना अन्याय्या, एतासा स्मृतीना न्यायमूलत्वादिति भारुच्यपरार्कयज्ञपत्यादीना मतम् ।

सवि.३६१-३६२

(११) इद त्वनेकमातृकाणा वक्ष्यमाणानाम् । तददाने दण्डमाह – पतिता इति । *मच.

(१२) (संस्कारोपयोगिधनमात्र देयमिति पक्ष खण्डयति ।) तदयुक्त अंशदानाविवक्षायाः स्मृतिद्वये– (मनुयाज्ञवल्क्यस्मृतिद्वये) अप्यन्याय्यत्वात् । संस्काराकरणप्रत्यवायात्पृथगदानप्रत्यवायश्रवणाच्च । अन्यथा 'पतिताः स्युरदित्सवः' इत्यदानप्रत्यवायवचनमप्यसंस्कारप्रत्यवायपरं स्यात् । अतो मेधातिथिमिताक्षराकारादिभिर्व्याख्यातमेवम् । 'निजादशात्' 'स्वात्स्वादशादि ति नापादाने पञ्चम्यपि तु त्यब्लोपे । तथा च तमपेक्ष्येति यावत् । +व्यप्र.४५५

(१३) भगिनीग्रहणात् भ्रातृणा कस्यचिदपत्ये सस्कृतेऽपि नान्यभ्रात्रपत्यस्य संस्कार्यत्वं प्रीतिदायकत्वात् पित्र्यधनार्हत्वाच्च । विता.३३५

(१४) पतिता भ्रातरः अदित्सवः अभागार्हाः ।

भाच.

याज्ञवल्क्यः

भगिन्यः चतुर्थभागहारिण्यः । असस्कृतसंस्कारकर्तव्यता ।

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ।
भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकम् *॥

(१) सस्कारः परिणयनम् । तत् पूर्वसस्कृतैरसंस्कृताना भ्रातृणा कार्यम् । तादर्थ्येन वा द्रव्यमपनीयावशिष्ट विभजनीयम् । अस्मादेव च ज्ञायते—साधारणद्रव्याद् विवाहनिवृत्तिः । सोपक्षयमौद्वाहिकमार्जयितृणामेव द्रव्यमिति । अतः साधारणादेव भ्रातरः सस्कार्या भगिन्यश्च । यदि त्वल्प द्रव्यं वा न स्यात्, ततो निजादंशाच्चतुर्थमंशं भगिन्यर्थमपनीयान्यत् समं विभजनीयम् । विश्व.२।१२८

(२) पितरि प्रेते यद्यसस्कृता भ्रातरः सन्ति तदा तत्संस्कारे कोऽधिक्रियत इत्यत आह—असस्कृतास्त्विति । पितुरूर्ध्वं विभजद्भिर्भ्रातृभिरसंस्कृता भ्रातरः समुदायद्रव्येण सस्कर्तव्याः । असंस्कृतासु भगिनीषु विशेषमाह– भगिन्य इति । अस्यार्थः । भगिन्यश्चासंस्कृताः संस्कर्तव्या भ्रातृभिः । किं कृत्वा । निजादशाच्चतुर्थमश दत्वा । अनेन दुहितरोऽपि पितुरूर्ध्वमंशभागिन्य इति गम्यते । तत्र निजादशादिति प्रत्येकं परिकल्पितादशादुद्धृत्य चतुर्थांशो दातव्य इत्ययमर्थो न भवति, किंतु यज्जातीया कन्या तज्जातीयपुत्र-

× शेषं 'असंस्कृतास्तु संस्कार्या' इति याज्ञवल्क्यवचने मितागतम् ।

* शेषं मनुगतम् । + शेष मितागतम् ।

* मेधा., मनु., विर., सवि., व्यप्र. एषा व्याख्यानं 'स्वेभ्योऽशेभ्यस्तु' इति मनुवचने द्रष्टव्यम् ।

(१) **यास्मृ.**२।१२४; **अपु.**२५६।११; **विश्व.**२।१२८; **मेधा.**९।११८; **मिता.**; **दा.**६९; **अप.** तासु (**ताश्च**); **व्यक.**१४५ दत्वांश तु (दश कृत्वा); **स्मृच.**२६८ उत्त.; **मनु.**९।११८; **विर.**४९३; **पमा.**५०९ दत्वांश तु (दत्वा त्वश); **मपा.**६४८; **रत्न.**१४३; **विचि.**२०९; **व्यनि.**; **स्मृचि.**३५; **नृप्र.**३६; **सवि.**३५९ उत्त.; **मच.**९।११८ अपवत्; **वीमि.**; **व्यप्र.**४५४ पू. : ४५५ उत्त.; **व्यउ.**१४५; **व्यम.**४६; **विता.**२९७, ३३४; **राको.**४५२ क्रमेण मनुः; **विभ.८८**; **समु.**१२९.

भागाच्चतुर्थांशभागिनी सा कर्तव्या। एतदुक्तं भवति। यदि ब्राह्मणी सा कन्या तदा ब्राह्मणीपुत्रस्य यावानंशो भवति तस्य चतुर्थोऽशस्तस्या भवति। तद्यथा। यदि कस्यचिद्ब्राह्मणस्यैका पत्नी पुत्रश्चैकः कन्या चैका तत्र पित्र्यं सर्वमेव द्रव्यं द्विधा विभज्य तत्रैक भागं चतुर्धा विभज्य तुरीयमंशं कन्यायै दत्वा शेषं पुत्रो गृह्णीयात्। यदा तु द्वौ पुत्रौ एका च कन्या तदा पितृधनं सर्वं त्रिधा विभज्य एक भाग चतुर्धा विभज्य तुरीयमंशं कन्यायै दत्वा शेषं द्वौ पुत्रौ विभज्य गृह्णीतः। अथ त्वेकः पुत्रो द्वे कन्ये तदा पित्र्यं धन त्रिधा विभज्य एक भाग चतुर्धा विभज्य तत्र द्वौ भागौ द्वाभ्यां कन्याभ्यां दत्वाऽवशिष्टं सर्वं पुत्रो गृह्णातीत्येवं समानजातीयेषु समविषमेषु भ्रातृषु भगिनीषु च योजनीयम्। यदा तु ब्राह्मणीपुत्र एकः क्षत्रियकन्या चैका तत्र पितृधन सप्तधा विभज्य क्षत्रियापुत्रभागास्त्रींश्चतुर्धा विभज्य तुरीयांश क्षत्रियाकन्यायै दत्वा शेषं ब्राह्मणीपुत्रो गृह्णाति। यत्र तु द्वौ ब्राह्मणीपुत्रौ क्षत्रियाकन्या चैका तत्र पित्र्यं धनमेकादशधा विभज्य तेषु त्रीनंशान् क्षत्रियापुत्रभागाश्चतुर्धा विभज्य चतुर्थमंश क्षत्रियाकन्यायै दत्वा शेषं सर्वं ब्राह्मणीपुत्रौ विभज्य गृह्णीतः। एवं जातिवैषम्ये भ्रातृणां भगिनीना च संख्यायाः साम्ये वैषम्ये च सर्वत्रोहनीयम्। न च 'निजादंशादत्त्वांशं तु तुरीयकमि'ति तुरीयाशाविवक्षया संस्कारमात्रोपयोगि द्रव्य दत्त्वेति व्याख्यानं युक्तम्। मनुवचनविरोधात् 'स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्। स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः॥' (मनु.९।११८) इति। तस्मात्पितुरूर्ध्वं कन्याप्यंशभागिनी पूर्वं चेद्यत्किंचित्पिता ददाति तदेव लभते विशेषवचनाभावादिति सर्वमनवद्यम्। +मिता.

(३) भगिनीना संस्कार्यतामाह नाधिकारिताम्। एवं च बहुतरधने विद्वद्भोचितधनं दातव्यं न चतुर्थांशनियम इति सिध्यति। एतच्च कन्यापुत्रयोः समसख्यत्वे ज्ञातव्यं विषमसंख्यत्वे च कन्याया एव बहुतरधनं वा स्यात् पुत्रस्य वा निर्धनता स्यात्, न चैतदुचितं पुत्रस्य प्राधान्यात्। दा.६९–७०

(४) एकस्य पुत्रस्य यावान्निजाशस्तच्चतुर्थांशं प्रतिभगिनि प्रदाय भ्रातृभिर्भगिन्यः संस्कार्या विवाहयितव्या इत्यर्थः। अनल्पविभाज्यद्रव्यविषयमेतत्।

स्मृच.२६८

(५) असंस्कृताना विवाहान्तसंस्कारैरसंस्कृतानां भ्रातृणा भगिनीना च विवाहान्तसस्कारं कृत्वा पश्चाद्विभागः कर्तव्य इत्यर्थः। भगिन्यश्चेत्यादेरय तात्पर्यार्थः। भगिनीनामसस्कृताना विवाहं कृत्वा ताभ्यश्चतुर्थमंशं दद्यात्।

मपा.६४८

केचन एवं मन्यन्ते। पूर्वोक्तरीत्या चतुर्थमंशं कन्यकायै दत्वा तेनैव विवाहः कर्तव्यः न तु समुदितद्रव्येण विवाहं कृत्वा पुनरपि चतुर्थांशदानमिति तन्मेधातिथिमिताक्षराकारादीनामनभिमतत्वादुपेक्षणीयं अथवा देशाचारतो व्यवस्था। मपा.६५०

(६) मिताटीका––केचन 'निजादंशादि'ति पदं एवं व्याचक्षते। तद्यथा। यावन्तो भ्रातरः तावन्तः अंशान् विधाय स्वात्स्वादंशाच्चतुर्थश्चतुर्थो भागो दातव्यो भगिन्यै। तथा भगिनीद्वित्वे बहुत्वे चैकैकस्यै प्रत्येकं चतुर्थश्चतुर्थो तावन्तः अंशात् दातव्य इति। अपरे तु भ्रातृभिः स्वात्स्वादंशाच्चतुर्थमंशं उद्धृत्य भगिन्यै दातव्यम्। यदा द्वे भगिन्यौ बहवो वा तदाऽप्युद्धृतमेवैनं भागं ते ताश्च गृह्णीयुर्न पृथगुद्धार इति व्याचक्षते। तदुभयमनुपपन्नम्। तथाहि। आद्ये यदैको भ्राता भगिन्यश्च सप्ताष्टास्तदा प्रतिभगिनि चतुर्थैऽशे दीयमाने भ्रातुरकिंचनता स्यात्। अथैका भगिनी बहवो भ्रातरः। तदा भ्रातृभिश्चतुर्थे चतुर्थेऽशे दीयमाने भ्रातुरधिकाशता भगिन्याः स्यात्। तथा पुत्रापेक्षया पुत्र्या न्यूनांशकप्रापकवचनविरोधः। द्वितीये तु व्याख्याने भगिन्या एकत्वे भ्रातृणां च बहुत्वे पूर्वोक्त एव दोषः। भ्रातुरेकत्वे भगिनीनां च सप्ताष्टत्वे भ्रातृभागस्यैकनिष्ठत्वे तच्चतुर्थभागस्य स्वल्पत्वेन तत्राप्यंशकल्पनायामतितुच्छता स्यात्तदंशस्येति। 'दत्वाऽशं तु तुरीयकमि'त्यस्याविषयः। भवतु वा तथापि तद्वचनविरोधः। अस्मदुच्यमानरीत्या तु प्रत्येकं भगिनीनामपि चतुर्थैऽशे सिद्धे तुरीयकमित्येतत्पदं न विरुध्यते, त्वन्मते तु तदभावाद्विरुध्येतेत्यनेनाभिप्रायेणैक-

+ शेष 'स्वेभ्योंऽशेभ्यस्तु' इति मनुवचने (पृ.१४१७) द्रष्टव्यम्। अप., रत्न., व्यउ., व्यम., विता., मितागतम्। पमा. मितागतम्, अधिक 'स्वेभ्योंऽशेभ्यस्तु' इति मनुवचने द्रष्टव्यम्।

देशिमतं निराकुर्वन् स्वमतमाह । तत्र निजांदशादित्यादिना शेषं ब्राह्मणीपुत्रो विभज्य गृह्णीत इत्यन्तेन । एवं जातिवैषम्ये भ्रातॄणां भगिनीनां चेत्यादि । तत्र जातिवैषम्ये भ्रातृणां भगिनीना संख्यायाः साम्ये एव द्रष्टव्यम् । तद्यथा । ब्राह्मणीपुत्रः कन्या च क्षत्रियापुत्रः कन्या च तथा वैश्यायाः शूद्रायाश्च एवमष्टावपत्यानि, चत्वार्यपत्यानि स्त्रियः चत्वारि पुमांसः । 'चतुस्त्रिद्येकभागाः स्युरि'ति वचनेन ब्राह्मण्यपत्ययोरष्टावंशाः क्षत्रियापत्ययोः षट् वैश्यापत्ययोश्चत्वारः शूद्रापत्ययोः द्वौ । एवं विंशतिभागान् कृत्वा ब्राह्मणीकन्यकायै स्वजातिविहितादंशचतुष्टयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात् । क्षत्रियाकन्यकायै स्वजातिविहितादंशत्रयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात् । वैश्याकन्यकायै स्वजातिविहितादंशद्वयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात् । शूद्राकन्यकायै स्वजातिविहितादेकांशरूपादेव निजाद्भागाच्चतुर्थमंशं दत्वा तत्तद्भागादवशिष्टद्रव्यमेकीकृत्य ब्राह्मणादिपुत्राः क्रमाच्चतुस्त्रिद्येकभागान् गृह्णीयुः । वैषम्ये तु भ्रातृणा भगिनीना यावन्त्यो व्यक्तयो भ्रात्रादीना तावतोऽशान् चतुस्त्रिद्येकभागादिक्रमेण कल्पयित्वा कन्यकाना स्वस्वजातिविहिताद्भागाच्चतुर्थमंशं दत्वाऽवशिष्टं तत् भागद्रव्य पुनश्चतुस्त्र्यादिक्रमेण विभज्य गृह्णीयुरित्येवं योजनीयम् । सुबो.

(७) अत्र निजादशादिति नापादाने पञ्चमी । किं तर्हि व्यत्ययो लोपे निजमंशमपेक्ष्य परिकल्पितं चतुर्थमंशमिति । अयमर्थः—यज्जातीया कन्या तज्जातीयस्य यो भागस्तच्चतुर्थांशसमानमंश मध्यकद्रव्यादुद्धृत्य प्रतिभगिनि दत्वा ताः संस्कर्तव्या इति । अनेन दुहितृणामपि पितुरूर्ध्वं विभागेऽशभाक्त्वमित्यवगम्यते । *रत्न.१४३

(८) आद्येन तुशब्देन संस्कारे द्रव्यसंख्यानियमस्य, द्वितीयेन तदभावस्य व्यवच्छेदः । तुरीयाशस्य भगिनीविवाहानिर्वाहकत्वे यावता विवाहो निर्वहति तावद्धनं वित्तानुरूपेण सर्वैर्देयम् । 'अनूढानां कन्याना वित्तानुरूपेण संस्कारं कुर्युरि'ति विष्णुवचनात् । तदिदं ग्रन्थकृता समुचितम् । वीमि.

(९) मिताठीका—केचिदुक्तरीत्यैव तुरीयमंशं कन्यायै दत्त्वा तेनैव विवाहः कार्यो न तु समुदितद्रव्येण विवाहोऽशदानं च पृथगित्याहुः । तन्मतं खण्डयति । न चेति । एतेन देशाचारात् व्यवस्थेति मदनपारिजातायुक्तमपास्तम् । +बाल.

नारदः

विशेषणविशिष्टा भगिनी समभागहारिणी

ज्येष्ठायांशोऽधिको ज्ञेयः कनिष्ठायावरः स्मृतः ।
समांशभाजः शेषाः स्युरप्रत्ता भगिनी तथा ×॥

कात्यायनः

विशेषणविशिष्टाः कन्याश्चतुर्थभागहारिण्यः

कैन्यकानां त्वदत्तानां चतुर्थो भाग इष्यते ।
पुत्राणां च त्रयो भागाः साम्यं स्वल्पधने स्मृतम् ॥

(१) अल्पधने पुत्रैः स्वात् स्वादंशादाकृष्य कन्याभ्यश्चतुर्थोंऽशो दातव्यः । दा.६९

(२) कन्यकाना प्रत्येकमिति शेषः । एवं पुत्राणामित्यत्रापि शेषो द्रष्टव्यः । अल्पे विभाज्यधने पुत्रे भागस्वाम्यं त्वेकैकस्य कन्याभागस्य विष्ण्वादिना स्मृतमिति तुर्यपादार्थः । 'स्वाम्यं स्वल्पधने स्मृतम्' इत्येतत् 'मातरः पुत्रभागानुसारिभागहारिण्यः' इत्यत्रापि द्रष्टव्यं न्यायसाम्यात् । एवं चानल्पे विभाज्यधने चतुर्थो भाग इति पारिशेष्यादवगम्यते । 'पुत्राणा तु त्रयो भागा' इत्येतत्समसंख्याकभ्रातृभगिनीविषयम् । यत्र तु भगिन्यो न्यूनसंख्याकास्तत्र पुत्राणां न त्रयो भागाः किन्तु किंचिदभ्यधिकाः । स्मृच.२६९

(३) स्वाम्यं स्वल्पधने स्मृतमिति यदा चतुर्थभागरूपे धनेऽल्पता, संस्कारस्त्वधिकधननिर्वाह्यः, तदा यावता धनेन संस्कारो भवति, तावति धने कन्यकानां स्वाम्यं प्रभुत्वम् । तेन तावद्धनमेव स्वाशादाकृष्यापि भ्रात्रा संस्कारार्थं देयमिति । विर.४९४-४९५

(४) साम्यमित्यादेस्त्वयमर्थः । यदि संस्कारपर्याप्तमपि पितृधनं नास्ति तदा पुत्रसमभागितैव दुहितृणामिति ।

* विता. रत्नवत् ।

+ शेष सुबोगतम् ।

× व्याख्यासंग्रहः स्थलादिनिर्देशश्च (पृ.११९२) इत्यत्र द्रष्टव्यः ।

(१) दा.६९ साम्यं (स्वाम्य); व्यक.१४५ दावत्; स्मृच. २६८ णां च (णां तु) शेषं दावत्; विर.४९४ दावत्; व्यप्र. ४५६ स्वल्प (त्वल्प); विता.३३४ स्मृ (स्वि); विभ.८८ दावत्; प्रका.१११ णां च (णां तु) शेषं व्याख्यात.

'अनूढाना त्वि'त्यादि वि'णुवचनमपि मेधातिथ्यादीनां न प्रतिकूलम्। वित्तानुसारेण सस्कारमनूढाना पितुः कन्याना स्वभगिनीना कुर्यादित्यनेन संस्कारावश्यकतामात्रमत्रोच्यते न तु भागदानादाने। व्यप्र.४५६

व्यासः

असस्कृतकन्यादिसस्कारकर्तव्यता

असंस्कृतास्तु ये तत्र पैतृकादेव ते धनात्।
संस्कार्या भ्रातृभिर्ज्येष्ठैः कन्यकाश्च यथाविधि॥

कन्यासस्कारः परिणयरूपः। विर.४९३

देवलः

कन्या सस्कारार्थद्रव्यहारिण्यः

कन्याभ्यश्च पितृद्रव्यं देयं वैवाहिकं वसु *॥

(१) वैवाहिक वसु विवाहप्रयोजकधनमित्यर्थः। स्मृच.२६८

(२) स्मृतिचन्द्रिकाकारस्तु—कन्याभ्यश्चेति देवल वचनानुसारेण संस्कारमात्रोपयोगिद्रव्यदानमेव मन्यते। वैवाहिक वसु देयमिति वैवाहिकविशेषणस्यान्यथा वैयर्थ्यापत्तेरिति तदाशयः। अत्र वदामः। कन्याभ्यः पितृद्रव्य देयमिति पृथग्विधिः। तच्च मन्वाद्यनुरोधाच्चतुर्थांशरूपमेव। वैवाहिक वसु च देयमित्यपि पृथगेव विधिः। 'विभज्यमाने दायाद्ये कन्यालङ्कारं वैवाहिक च स्त्रीधन लभेत' इति शङ्खवचनसमानार्थतया। व्याख्यात चेद शङ्खवचनं विद्यारण्यश्रीचरणैः पराशरस्मृतिटीकायाम्—पैतृकद्रव्यविभागकाले स्वधृतालङ्कारादिकमपि कन्या प्राप्नोतीत्याह शङ्ख इति। यदि तु वैवाहिक विवाहोपयोगि पितृद्रव्य कन्याभ्यो देयमित्यर्थः स्याद्वसुपद पुनरुक्त स्यादिति पृथग्विधिद्वयमेवात्र युक्तम्। दायतत्वकृता तु 'कन्याभ्यश्च पितृद्रव्याद्देय वैवाहिक वसु।' इति पठितम्। तत्रापि शङ्खेन समानार्थकतालाभायास्मदुक्तमेव व्याख्यानमादर्तुमर्ह न तु विवाहोपयुक्तद्रव्यपरतेत्यवसेयम्।

व्यप्र.४५६-४५७

पैठीनसिः

पैत्र्यधनविभागे कन्याभागः

कन्या वैवाहिकं स्त्रीधनं च लभते +।

स्मृत्यन्तरम्

भगिनी चतुर्थभागहारिणी

भ्रातृभ्योंऽशं चतुर्थांशं तत्र कन्या हरेद्धनम्॥

भ्रातृभ्यः सकाशाच्चतुर्थांश धन तत्राजीवद्विभागे एकैका कन्या हरेदित्यर्थः। अनल्पविभाज्यद्रव्यविषयमेतत्। स्मृच.२६८

अनुजानां संस्कारकर्म पूर्वजेन कर्तव्यम्

अष्टौ संस्कारकर्माणि गर्भाधानमिव स्वयम्।
पिता कुर्यात्तदन्यो वा तस्याभावे तु तत्क्रमात्॥

---

* पमा.व्याख्यान 'स्वेभ्योऽशेभ्यस्तु' इति मनुवचने (पृ.१४१८) द्रष्टव्यम्। स्मृसा. 'यदिकुर्यात्' इति याज्ञवल्क्यवचनस्य सवि. व्याख्यानोद्धृतस्मृचवद्भावः (पृ १४१०)।

(१) **अप.**२।१२४; **उ.**२।१४।२; **स्मृच.**२६९ (असस्कृतास्तु ये तत्र **भ्रातरः** पूर्वसस्कृतैः। सस्कार्या भ्रातृभिः काले **पैतृकादेव वै धनात्॥**); **विर.**४९३ ते (तत्); **पमा.**५०८; **रत्न.**१४३ विरवत्; **विचि.**२०९ विरवत्; **व्यनि.** विरवत्; **नृप्र.३६** तत्र (केचित्) ते (तत्); **व्यप्र.**४५४ विरवत्; **व्यम.** ४६ ये (याः) ते (ता) **बृहस्पतिः**; **विता.३३३** विरवत्; **विभ.** ८८ पैतृका...नात् (भ्रातरः पूर्वसस्कृतैः); **समु.**१२९.

(२) **दा.**१७५ व्य (व्यात्); **व्यक.**१४५; **स्मृच.**२६८, **विर.**४९३; **स्मृसा.**५९ श्च (स्तु); **पमा.**५१०; **दीक.**४४ दावत्; **व्यनि.** तृ (तुः), **स्मृचि.**३५; **नृप्र.**३७, **दात.**१७१ दावत्; **सवि.**३५९ व्यनिवत्; **चन्द्र.**७५ (=) श्च (स्तु) व्य (व्यात्); **व्यप्र.**४५६ : ४५७ दावत्; **विता.**३३४; **बाल.** २।१३५ (पृ.२०५), **विभ.**८८ दावत्; **समु.**१२९; **विच.** ७७ दावत्.

+ व्याख्यासग्रहः 'स्त्रीधन, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च' इत्यस्मिन् प्रकरणे द्रष्टव्यः।

(१) **व्यनि.**; **समु.**१२९.

(२) **स्मृच.**२६८; **समु.**१२९.

(३) **दात.**१७१; **विभ.**९१; **विच.**७७.

स्त्रीधनं, स्त्रीधनकृत्यं, स्त्रीधनविभागश्च

वेदाः

वैवाहिकं स्त्रीधनं भर्तुरपि भोग्यम्

जाया पतिं वहति वग्नुना सुमत्पुंस इद्भद्रो वहतुः परिष्कृतः ।

जाया पत्नी पतिं यजमान सुमत्कल्याणेन वग्नु-ना वाग्रूपेण शब्देन वहति । आत्मसमीप प्रापयति । भद्रो भजनीयः परिष्कृतः सुसंस्कृतः पुस इत् । पत्युरेवे त्यर्थः । वहतुर्जायायै प्रदातव्यः । तदुक्तम् । 'सुभद्रमर्य भोजनं बिभर्षि' (ऋसं.८।१।३४) इति । यद्वा । पुंसोऽति शूरस्येन्द्रस्यार्थाय भद्रो भजनीयो वहतुर्वहनशीलो देवा-न्प्रति स सोमः परिष्कृतः संस्कृतो भवति । तदेन्द्रः काम यतामित्यर्थः । ऋसा.

विवाहे कन्यायै पित्रा देयं धनम्

सूर्यायै वहतुः प्रागात्सविता यमवासृजत् ।

सोमाय प्रदित्सितायाः सूर्यायै वहतुः । कन्या प्रियार्थं दातव्यो गवादिपदार्थो वहतुः । स च प्रागात् । तस्या अपि पूर्वमगच्छत् । य वहतुं सविताऽस्याः पिता-ऽवासृजत् अवसृष्टवान् । प्रादादित्यर्थः । ऋसा.

कन्या तद्भोग्यधनेन सह देया

तुभ्यमग्रे पर्यवहन् सूर्यां वहतुना सह ।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥

गन्धर्वा हे अग्ने तुभ्यमग्रे पर्यवहन् । प्रायच्छन्नित्यर्थः । कां सूर्याम् । केन सह वहतुना सह । त्वं च तां सूर्यां वहतुना सह सोमाय प्रायच्छः । तद्वदिदानीमपि हे अग्ने पुनः पतिभ्यः अस्मभ्यं जायां प्रजया सह दाः देहि । ऋसा.

विवाहे पिता कन्यायै धनं ददाति

त्वष्टा दुहित्रे वहतुं युनक्तीतीदं विश्वं भुवनं वि याति +।

त्वष्टा देवो दुहित्रे विवाहकाले स्वदुहितृप्रीत्यर्थं वह-तुम् । पुरुषैरुह्यते जामातृगृहं प्राप्यत इति वहतुः । दुहित्रा सह प्रीत्या प्रस्थापनीयं वस्त्रालङ्कारादि द्रव्यं वहतुशब्देन विवक्षितम् । 'मा हिंसिषुर्वहतुं उह्यमानम्' (असं.१४।२।९) इत्यादिमन्त्रान्तरप्रसिद्धम् । तद् युनक्ति प्रस्थापयति इति बुद्ध्या तस्य अवकाशं दातुं, इदं विश्वं भुवन पृथिव्यन्तरिक्षादिरूप वि याति परस्परं विगतं भवति । असा.

विधवा धनस्वामिनी

ईयं नारी पतिलोकं वृणाना नि पद्यत उप त्वा मर्त्य प्रेतम् । धर्मं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि ॥

इय पुरोवर्तिनी नारी स्त्री । पतिलोक पत्युर्लोकः पतिलोकः पत्या अनुष्ठिताना यागदानहोमादीनां फलभूतं स्वर्गादिस्थान त पतिलोकं वृणाना सहधर्मचारिणीत्वेन संभजमाना । एवंभूता स्त्री हे मर्त्य मरणधर्मन् मनुष्य प्रेतं प्रकर्षेण गत अस्माद्भूलोकाद्विनिर्गतं त्वा त्वां उप नि पद्यते समीपे नितरा गच्छति । अनुमरणार्थं प्राप्नोती-त्यर्थः । कस्माद्धेतोरित्याह । पुराणं पुरातनं अनादिशिष्टा-चारसिद्धं स्मृतिपुराणादिप्रसिद्धं वा । धर्मं सुकृतं अनु-पालयन्ती । आनुपूर्व्येण संप्रदायाविच्छेदेन परिपालनं अनुपालनम् । तत्कुर्वती । स्मृतिपुराणादिप्रसिद्धधर्मस्य अनुमरणजन्यस्य अनुपालनाद्धेतोरित्यर्थः । स्मर्यते हि —'भर्तारमुद्धरेन्नारी प्रविष्टा सह पावकम् । व्यालग्राही यथा सर्पं बलादुद्धरते बिलात् ॥' इति । तस्यै तथाविधायै अनुमरणं कृतवत्यै स्त्रियै इह अस्मिन् भूलोके जन्मा-

---

(१) ऋसं.१०।३२।३.

(२) ऋसं.१०।८५।१३; असं.१४।१।१३.

(३) ऋसं.१०।८५।३८; असं.१४।२।२१; पागृ.१।७।३; आपगृ.२।५।७,९,१०; मागृ.१।११।१२ मग्रे (मग्रे): कौसू.७८।१०.

(४) असं.३।३१।५ : १८।१।५३ युनक्तीतीदं (कृणोति

+ यद्यप्ययं मन्त्रो ऋग्वेदे पठ्यते, तथापि तत्र सायणेन वहतुशब्दस्य अर्थान्तरं वर्णितम् । तेनेदं) वि याति (समेति); ऋसं.१०।१७।१ युनक्ती (कृणोती) वि याति (समेति); नि.१२।११ भुव (भव) शेषं ऋसंवत् .

(१) असं.१८।३।१; तैआ.६।३।१ धर्मं (विश्वं); कौसू. ८०।४४.

न्तरे लोकान्तरेऽपि प्रजाम्। प्रजायते इति प्रजा। ता पुत्रपौत्रादिरूपा द्रविण धन च धेहि प्रयच्छ। अनुमरणप्रभावाज्जन्मान्तरेऽपि स एव तस्याः पतिर्भवतीत्यर्थः।

असा.

पत्नी पतिधनदायभागार्हा

[1]मैत्रेयीति होवाच याज्ञवल्क्यः। उद्यास्यन्वाऽअरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति।

[2]अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः। मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव कात्यायनी सोऽन्यद्वृत्तमुपाकरिष्यमाणः। याज्ञवल्क्यो मैत्रेयीति होवाच। प्रव्रजिष्यन्वाऽअरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति।

स्त्रीधन पुरुषो गृह्णाति प्रतिदत्ते च

[3]ते प्रजापतिमब्रुवन्। हनामेमामेदमस्या ददामहाऽइति स होवाच स्त्री वाऽएषा यच्छ्रीर्न वै स्त्रियं घ्नन्त्युत त्वाऽअस्या जीवन्त्याऽएवाददतऽइति।

सा प्रजापतिमब्रवीत्। आ वै मऽइदमदिषतेति स होवाच यद्वैनेनान्पुनर्याचस्वेति। सैतां दशहविषमिष्टिमपश्यत्।

जैमिनीयसूत्रम्

स्त्रीणां धनस्वाम्यविचारः

[4]द्रव्यवत्त्वात्तु पुंसां स्याद्द्रव्यसंयुक्तं, क्रयविक्रयाभ्यामद्रव्यत्वं स्त्रीणां, द्रव्यैः समानयोगित्वात्।

पुसा तु स्यादधिकारः। द्रव्यवत्त्वात्। द्रव्यवन्तो हि पुमांसो न स्त्रियः। द्रव्यसंयुक्त चैतत्कर्म। 'व्रीहिभिर्यजेत' 'यवैर्यजेत' इत्येवमादि। कथमद्रव्यत्व स्त्रीणाम्। क्रयविक्रयाभ्याम्। क्रयविक्रयसंयुक्ता हि स्त्रियः। पित्रा विक्रीयन्ते। भर्त्रा क्रीयन्ते। विक्रीतत्वाच्च पितृधनानामनीशिन्यः। क्रीतत्वाच्च भर्तृधनानाम्। विक्रयो हि श्रूयते। 'शतमतिरथं दुहितृमते दद्यात्, आर्षे गोमिथुनमि'ति। न चैतद् दृष्टार्थं सति, आगमनेऽदृष्टार्थं भवितुमर्हति। एव द्रव्यैः समानयोगित्वं स्त्रीणाम्।

शाभा.

[5]तथा चान्यार्थदर्शनम्।

'या पत्या क्रीता सत्यथान्यैश्चरति' इति क्रीतता दर्शयति।

शाभा.

[6]तदर्थ्यात्कर्मतादर्थ्यम्।

आह। यदनया भक्तोत्सर्पणेन वा कर्तनेन वा धनमुपार्जित, तेन यक्ष्यत इति। उच्यते। तदप्यस्या न स्वम्। यदा हि साऽन्यस्य स्वभूता, तदा यत्तदीयं तदपि तस्यैव। अपि च, स्वामिनस्तया कर्म कर्तव्यम्। न तत्परित्यज्य स्वकर्माहति कर्तुम्। यत्तयाऽन्येन प्रकारेणोपार्ज्यते, तत्पत्युरेव स्व भवितुमर्हतीति। एवं स्मरति—'भार्या दासश्च पुत्रश्च निर्धनाः सर्व एव ते। यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्॥' इति।

शाभा.

[7]फलोत्साहाविशेषात्तु।

तुशब्दः पक्ष व्यावर्तयति। न चैतदस्ति। निर्धना स्त्रीति। द्रव्यवती हि सा। फलोत्साहाविशेषात्। स्मृतिप्रामाण्यादस्वया तया भवितव्य, फलार्थिन्याऽपि। श्रुतिविशेषात्, फलार्थिन्या यष्टव्यम्। यदि स्मृतिमनुरुध्यमाना परवशा निर्धना च स्यात्, यजेतेत्युक्ते सति न यजेत। तत्र स्मृत्या श्रुतिर्बाध्येत। न चैतन्न्याय्यम्। तस्मात्फलार्थिनी सती स्मृतिमप्रमाणीकृत्य द्रव्य परिगृह्णीयाद्यजेत चेति।

शाभा.

[8]अर्थेन च समवेतत्वात्।

अर्थेन चास्याः समवेतत्व भवति। एव दानकाले संवादः क्रियते—'धर्मे चार्थे च कामे च नातिचरितव्या' इति। यत्तूच्यते भार्यादयो निर्धना इति। स्मर्यमाणमपि निर्धनत्वमन्याय्यमेव। श्रुतिविरोधात्। तस्मादस्वातन्त्र्यमनेन प्रकारेणोच्यते, संव्यवहारप्रसिद्ध्यर्थम्।

शाभा.

[9]क्रयस्य धर्ममात्रत्वम्।

यत्तु क्रयः श्रूयते। धर्ममात्रं तु तत्। नासौ क्रय

(१) शब्रा.१४।५।४।१. (२) शब्रा.१४।७।३।१,२.
(३) शब्रा.११।४।३।२.
(४) शब्रा.११।४।३।४. (५) जैसू.६।१।१०.

(१) जैसू.६।१।११. (२) जैसू.६।१।१२
(३) जैसू.६।१।१३. (४) जैसू.६।१।१४
(५) जैसू.६।१।१५.

इति । क्रयो हि उच्चनीचपण्यपणो भवति । नियतं त्विदं दानम् । शतमतिरयं शोभनामशोभना च कन्यां प्रति । स्मार्तं च श्रुतिविरुद्धं विक्रयं नानुमन्यन्ते । तस्मादविक्रयोऽयमिति । शाभा.

स्ववत्तामपि दर्शयति ।

'पत्नी वै पारिणय्यस्येष्टे पत्यैव गतमनुमतं क्रियते' । तथा, 'जाघन्या पत्नीः संयाजयन्ति । भसद्वीर्या हि पत्नयः । भसदा वा एताः परगृहाणामैश्वर्यमवरुन्धते' इति । शाभा.

गौतमः

मातृधनविभागः

स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठितानां च ।

(१) तत्राऽप्रतिष्ठिता या ऊढा अनपत्या निर्धना भर्तृगृहे याभिः प्रतिष्ठा न लब्धा । मेधा.९।१३१

(२) अस्यार्थः—प्रत्ताऽप्रत्तसमवायेऽप्रत्तानामेव स्त्रीधनम् । प्रत्तासु चाप्रतिष्ठिताप्रतिष्ठितासमवायेऽप्रतिष्ठितानामेवेति । अप्रतिष्ठिता निर्धनाः [इदं मातृधनविभागे(मिता. २।११७)] । तथा प्रतिष्ठिताऽप्रतिष्ठिताना समवाये अप्रतिष्ठितैव, तदभावे प्रतिष्ठिता । स्त्रीधनमित्यादिगौतमवचनस्य पितृधनेऽपि समानत्वात् । [इद अपुत्रधनविभागे (मिता.२।१३५)] तत्र चशब्दात् प्रतिष्ठिताना च । अप्रतिष्ठिता अनपत्या निर्धना वा । एतच्च शुल्कव्यतिरेकेण । [इदं स्त्रीधनविभागे (मिता.२।१४५)] ×मिता.

(३) ततश्च परिणयनलब्धस्त्रीधन दुहितुरेव न पुत्राणां तत्रैव च क्रमार्थं गौतमवचनं, 'स्त्रीधन दुहितृणामप्रत्तानामप्रतिष्ठिताना च' । प्रथममप्रत्ताना, तदभावे प्रत्ताना, तदभावे च समूढाना स्त्रीधनं दुहितृणामिति सामान्यतः प्राप्तत्वात्, अप्रत्तानामित्यादेस्तु क्रमार्थत्वेनोपसंहारार्थत्वात् । +दा.८५

(४) गौतमस्तु प्रत्तानामपि दुहितृणामप्रतिष्ठिताना मातृधनग्राहित्वमाह—स्त्रीधनमिति । अप्रतिष्ठिता अनपत्या निर्धना दुर्भगा वा। अप.२।११७

(५) [मिताक्षरावत् (मिता.२।११७) व्याख्यान उपन्यस्योक्तम्] यदा प्रसूतादिधन तदा सर्वासा भवति। एषा मातुरूर्ध्वं जीवन्त्या पितृकुललब्धस्य स्त्रीधनस्य गतिः। यत्तु शंखलिखिताभ्यामुक्तम्—'सम सर्वे सोदर्या मातृकं द्रव्यमहाः स्त्रीकुमार्यश्चे'ति । तद्भर्तृकुललब्धेः प्रत्तासु दुहितृषु । तत्र प्रत्ताविषये प्रभूततमे मानवम्—जनन्या सहितायामित्यादि (मस्मृ.९।१९२,१९३) । तत्रैवाल्पे धने बार्हस्पत्यम्—स्त्रीधन तदपत्यानामित्यादि । ÷ गौमि.

(६) स्त्रीधनं षट्प्रकारं यथाह मनुः— अध्यग्न्यध्यावाहनिकमित्यादि । यच्चान्यत्तया कर्मणोपात्तं तत्तस्या मृतायां तस्या एव दुहितृणा अदत्तानामनपत्याना च भवति । अन्य आहुः अप्रतिष्ठिताना पुत्राणा अकृतविवाहाना इति । अपरे निस्स्वानामिति । चशब्दात् भर्तुश्च । अत्र अदत्ताना दुहितृणामभावे पुत्रा निस्स्वा गृह्णीयुः, तदभावे अकृतविवाहाः, तदभावे अनपत्याः स्त्रियः, सर्वेषाममावे भर्तेति क्रमो द्रष्टव्यः । मभा.

(७) एममुक्तत्रि (?) विधातिरिक्त (यौतकान्वाधेयप्रीतिदत्तातिरिक्त) मातृकं ऋक्थं कुमारीणामप्यप्रतिष्ठितानामेव । न पुनः सर्वासा दुहितृणामित्याह गौतमः—स्त्रीधनमिति। अध्यग्न्यध्यावाहनादिस्त्रीधनं कुमारीणामप्रतिष्ठितानां च दुहितृणा स्वं भवतीत्यर्थः । ततश्च

× पमा., मपा., व्यउ. मितागतम् । स्मृसा. व्याख्यान अपुत्रधनविभागे मितावत् । मातृधने विरवत् । व्यप्र. स्वमतं मितागतं, तथा मिताक्षरादायभागापरार्कस्मृतिचन्द्रिकामतानामुद्धारश्च तत्र तत्र गतार्थः ।

(१) जैसू.६।१।१६.

(२) **गौध.**२८।२५; **मेधा.**९।१३१ धन+(तदपत्यानां); **मिता.**२।११७, २।१३५, २।१४५; **दा.**८२,८५; **अप.**२।११७; **व्यक.**१४८; **मभा.**; **गौमि.**२८।२२; **स्मृच.**२८५; **मसु.**९।१३१ प्रत्ता (दत्ता); **विर.**५१६; **स्मृसा.**६३, ७१; **पमा.**४९५, ५२५, ५५०; **मपा.**६६५, ६७२; **दीक.**४३; **रत्न.**१५४; **विचि.**२२२; **व्यनि.**; **स्मृचि.**२९; **नृप्र.**३५, ३८; **दात.**१८५; **सवि.**३६३,३८१,४१२; **मच.**९।१३१ (स्त्रीधनं तदपत्यानाम्) एतावदेव; **चन्द्र.**८५ प्रत्ता (प्रदत्ता); **वीमि.**२।११७; **व्यप्र.**५२०,५४८; **व्यउ.**१५४, १६०;

+ दात. दावद्भावः । विता. दागतम् ।

÷ वाक्यार्थो मितागतम् ।

व्यम.६२, ७१; **विता.**४०१,४५२; **राकौ.**४४८; **बाल.**२।१३५ (पृ.१८७); **सेतु.**५८; **समु.**१३६ प्रत्ता (प्रमत्ता); **विच.**११२.

तद्धनं ता एव दुहितरो विभजेरन् इत्यभिप्रायः। अप्रतिष्ठिता अनपत्या निर्धना दुर्भगा विधवा वा एवमपरार्कानुसारात् गौतमवचनं व्याख्यातम्। अस्य विज्ञानेश्वरकृता व्याख्या हेया, स्वबुद्धिमात्रेणाध्याहारादिकरणात्। स्मृच.२८५

(८) एतन्न पुत्राशस्य व्यावृत्त्यर्थं किन्तु दुहित्रंशप्रतिपादनार्थम्। +विर.५१६

(९) एतद्विज्ञानेश्वरमतं भारुच्यपरार्कचन्द्रिकाकारादयो न मन्यन्ते। विज्ञानेश्वरेण स्वमतिमात्रपरिकल्पितत्वात्। अनेकाध्याहारपरिकल्पितत्वाच्च। सवि.३८३

(१०) अन्वाधेयभर्तृप्रीतिदत्तमिन्ने पूर्वोक्ते पारिभाषिके स्त्रीधने तु विशेषमाह गौतमः—स्त्रीधनमिति। *व्यम.७१

भगिनीशुल्कविभागः

भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुः।

(१) शुल्कं तु सोदर्याणामेव। ×मिता.२।१४५

(२) अस्यार्थः—प्रथमं सोदर्याणां तेषा पुनरभावे मातुः तदभावे पितुः। दा.९५

(३) आसुरविवाहकन्याशुल्कभाक्त्वं सोदरभ्रातृणा, तदभावे मातुः। अप.२।१४५

(४) भगिनीशुल्कं आसुरादिविवाहोढाया भगिन्या धनं तदूर्ध्वं मातुः। व्यक.१४९

(५) भगिनीप्रदाननिमित्तं पित्रा यद्गृहीतं द्रव्यमासुरार्षविवाहयोस्तस्मिन्मृते तस्या भगिन्या एव सोदर्या भ्रातरस्तेषां भवति। तच्च मातुरूर्ध्वं जीवन्त्यां मातरि तस्या एव न तु मृतस्य पितुरेतत्स्वमिति तत्र ये मागिनो भिन्नोदरा भ्रातरो मातृसपत्नी चेति। ते सर्वेऽशं न गृह्णीयुरिति। यत्र विवाहसमये भर्त्रादिकुलेन भगिन्यायै दत्तमाभरणक्षेत्रादिकं तत्तस्या एव। मृतायां च तस्यामप्रजसि याज्ञवल्क्येनोक्तं—'बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च। अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः॥' येन यद्दत्तं स तदवाप्नुयादिति। सत्यां तु प्रजाया सैव गृह्णीयादिति। +गौमि.

(६) शुल्काख्यस्त्रीधनं पूर्वप्रकरणे निरूपितम्। तद्दातारो वरादयस्तेषा दातृत्वेऽपि तद्धनं न भवति किं तु धनस्वामित्वं सोदरभ्रातृणा तेषामभावे मातुर्भवतीत्यर्थः। स्मृच.२८७

(७) भर्त्रादिभिर्दत्तमपि शुल्काख्यं स्त्रीधनं सोदरा एव गृह्णन्ति। तथा च गौतमः—'भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुः' इति। सोदर्याणामभावे मातुर्भवतीत्यर्थः। ÷पमा.५५४

(८) आसुरादिविवाहत्रयलब्धविषयमेतत्। विचि.२२३

(९) शुल्क मातुर्विवाहे पित्रा गृहीतम्। *विता.४५३

(१०) मिताटीका—शुल्क तु तद्रूप स्त्रीधनं तु। तद्दाने तद्ग्रहणस्य निमित्तत्वात्तस्य स्त्रीधनत्वम्। भगिनीशुल्कमिति। व्याख्यातम्। ऊर्ध्वमिति। मातुर्मरणादनन्तरमित्यर्थः। कल्पतरुरप्येवम्। अस्य वाक्यशेषोऽपि प्रागुक्तः। माता चात्र भगिन्येव। तथा च तद्रूपमातुरभावे दुहित्रादिषु पौत्रपर्यन्तेषु सत्स्वपि भगिनीशुल्कं सोदरा एव गृह्णीयुरित्यर्थः। एवेन दुहित्रादिव्यवच्छेदः। तथा च तदभावे तेषाम्। बाल.२।१४५ (पृ.२५७)

पूर्वं चैके।

(१) पूर्वं चैक इति परमतम्। दा.९५

+ विचि., चन्द्र. विरगतम्।

* अपुत्रधनविभागो मितावत्।

× विश्वरूपमिताक्षरादायभागव्याख्यान 'अप्रजस्त्रीधन' इति याज्ञवल्क्यवचने द्रष्टव्यम्। मपा. मितागतम्।

(१) **गौध.**२८।२६; **विध.**२।१४८; **मिता.**२।१४५; **दा.**९५ तुः +(पितुश्च); **अप** २।१४५ क्त (क्तः); **व्यक.** १४९; **मभा.**; **गौमि.**२८।२३ अपवत्; **स्मृच.**२८७; **विर.** ५२०; **पमा.**५५४; **मपा.**६६८; **दीक.**४६; **विचि.**२२३; **व्यनि.**; सवि.३८३: ३८४, ३८५ र्या (रा); **व्यप्र.** ५५३; **व्यम.**७२; **विता.**४५३,४६३; **बाल.**२।१४४; **समु.**१३६ अपवत्; **विच.**११४ तुः +(पितुस्ततः) कात्यायनः.

+ मभा. गौमिवद्भावः। ÷ व्यप्र. पमागतम्।

* मिताक्षरामत, दायभागमत चोपन्यस्तम्।

(१) **गौध.**२८।२७; **दा.**९५; **व्यक.**१४९; **मभा.**; **गौमि.** २८।२४; **विर.**५२०; **दीक.**४६; **विचि.**२२३ चैके (चेत्येके); **व्यनि.**; **व्यप्र.**५५३; **बाल.**२।१४४ चै (वै); **समु.** १३६; **विच.**१४४ कात्यायनः.

(२) प्रागपि मातुर्मरणाद्भगिनीशुल्कं सोदर्याणां भवतीत्येके मन्यन्ते। तस्या वृत्तापेक्षो विकल्पः। गौमि.

(३) [हरदत्तवद्व्याख्यानमुक्त्वाह] अथवा पूर्वमेव यदुक्तं 'स्त्रीधनं दुहितॄणाम्' इति, तच्चोर्ध्वमेव मातुर्न जीवन्त्यामित्येके मन्यन्ते। उक्तो विषयः। मभा.

बौधायनः

मातृधनविभागः

मातुरलङ्कारं दुहितरः सांप्रदायिकं लभेरन्नन्यद्वा।

(१) सांप्रदायिक मातृपरंपरायातम्। अन्यत्तदितरद्वा मातृवृत्तमलङ्कारं मातृके विभज्यमाने दुहितरः कुमार्यो भजेरन्नित्यर्थः। *स्मृच.२७०

(२) मातुरलङ्कारं वैवाहिक कन्या लभते, यदि चालङ्कारादन्यदपि वैवाहिकं मातुर्भवति तदा तदपि कन्या लभते इत्यर्थः। विर.४९५

कन्याधनविभागक्रमः

स्त्रीधनं मातृगामि तदभावे सोदरभ्रातृगामि।

स्त्रीधनं कन्याशुल्कम्। अतश्च कन्याशुल्कविषयसोदरासोदरविभागेऽसोदराणामपि किंचिद्देयमित्यसहायव्याख्यानमसहायम्। 'भगिनीशुल्क सोदराणा ऊर्ध्वं मातुः' इत्यादिषु स्मृतिषु भगिनीशुल्करूपे सर्वस्मिन् धने सोदराणामेव स्वाम्यप्रतिपादनात्। सवि.३८४

ऋकथं मृतायाः कन्यायाः गृह्णीयुः सोदराः स्वयम्।

* सवि. स्मृचगतम्।

(१) **बोध.**२।२।४९; **स्मृच.**२७०; **विर.**४९५; **स्मृसा.** ६०; **व्यनि.**; **सवि.**३६२, **विता.**३३४ र (रान) (साप्र ...द्वा०); **विभ.**९०; **समु.**१२९.

(२) **सवि.**३८४.

(३) **मिता** २।१४६ (स्वयम्०) (भवेत्०); **दा.**९०-९१; **अप.**२।१४५ भवेत् पितुः (पितुर्भवेत्); **व्यक.**१४९ अपवत्; **स्मृच.**२८७ याः (यां) भवेन्मा (तु तन्मा) शेषं अपवत्; **विर.** ५२१ अपवत्; **पमा.**५५४ कन्यायाः गृह्णीयुः (गृह्णीयुः कन्यायाः) स्वयम् (समम्) शेष अपवत्; **मपा.**६६९ स्वयम् (सदा); **रत्न.**१६४ स्वयम् (समम्) शेषं अपवत्; **विचि.** २२३-२२४; **व्यनि.** याः (यां) तुस्तदभावे भवेत् पितुः (तुः पितुर्भ्रातुश्च तत्क्रमात्); **दात.**१८६-१८७; **व्यप्र.** ५५२; **व्यउ.**१६३ मितावत्; **व्यम.**७२ स्वयम् (समम्) उत्तरार्धं स्मृचवत्; **विता.**४५३ (तदभावे भवेत् पितुः०)

तदभावे भवेन्मातुस्तदभावे भवेत् पितुः *॥

(१) तदनेन कन्याधनं व्याख्यातम्। दा.९१

(२) कन्याधनाधिकारे क्रममाह—रिक्थमिति। दात.१८६

वसिष्ठः

पैतृकद्रव्यभागः भगिनीनां प्रसवोत्तरम्। मातृधनविभागः।

भगिन्या आप्रसवान्नैव विभागोऽस्ति।

मातुः पारिणाय्यं स्त्रियो विभजेरन्।

(१) पारिणाय्य परिणयनलब्ध धनम्। दा.८२

(२) परीणाह्य अलङ्कारादि। अप.२।११७

(३) पारिणाह्य परिच्छदादर्शकङ्कणादि विभजेरन्। ×व्यक.१४८

(४) पारिणाह्य उपस्करः। आदर्शकङ्कणताम्बूलकरण्डकादि इति कल्पतरुः। परिणेयमिति पाठाद्यौतुकमित्यन्ये। तन्मानवे द्वन्द्वार्थचकारेण साहित्योक्तेः पूर्वोक्तयुक्तिवचोविरोधाद्यौतुके कन्याधिकारविशेषवाक्यवैयर्थ्यान्न्यायत एव समत्वसिद्धौ तद्वैयर्थ्यात्ताभ्या ऋते इत्यस्य स्त्र्यवयवाधिक्यस्य च यौतुकपरत्वाच्च सर्वमातृधनपरत्वं नित्यम्। विता.४५१

(५) =वासिष्ठे 'मातुः परिणाह्य स्त्रियो विभजेरन्नि'ति पाठस्य सत्त्वेन भवदुक्तपाठस्यैव खपुष्पायमाणत्वेन तथाऽर्थस्य दूरोत्सारितत्वेन 'अत एव वसिष्ठः' इत्याद्यपि चिन्त्यम्। परिणाय्यमिति प्रयोगस्यासाधुत्वाच्च।

* मिता. व्याख्यान 'दत्वा कन्या' इति याज्ञवल्क्यवचने द्रष्टव्यम्। अप., स्मृच., विर., पमा., मपा. मितागतम्।

× विर. व्यकवत्। = उक्तदामत खण्डयति।

शेष मितावत्: ४५५; **बाल.**२।१४५ (पृ.२६५); **सेतु** ५५ नारदः; **समु.**१३६ रत्नवत्; **विच.**१२० नारदः.

(१) **मेधा.**९।२१६; **राकौ.**४५२ (गृहीतगर्भाणामाप्रसवात् प्रतीक्षणम्।).

(२) **वस्मृ.**१७।४३ णाय्य (णेयं); **दा.**८२; **अप.**२।११७ पारिणाय्य (परीणाह्य); **व्यक.**१४८ य्य (र्य्यं); **गौमि.**२८।२२ वस्मृवत्; **विर.**५१७; **विचि.**२२२ पारि (परि); **दात.**१८५; **चन्द्र.**८६ पारिणाय्यं (परिणय); **व्यप्र.**५४८ णाय्य (णय्यं); **विता.**४५१ व्यकवत्: ४५२ वस्मृवत्; **बाल.**२।१४५ [(पृ.२६१) पारि (परि) विभजे (भजे): (पृ.२६२) पारिणाय्यं (परिणाह्य)]; **सेतु.**५८; **समु.**१३६; **विच.**१११.

अत एव 'आनाय्योऽनित्ये' (व्यासू.३।१।१२७) 'पाय्यसानाय्य' (व्यासू.३।१।१२९) 'प्रणाय्योऽसंमतौ' (व्यासू.३।१।१२८) इति निपातन पाणिनीय सगच्छते। अत एव कल्पतर्वादिभिरपि तथा पाठ धृत्वा 'परिणाह्य परिच्छद आदर्शकङ्कणादिरि'ति व्याख्यातम्। अत एव स्त्रीपुरुषधर्मप्रकरणे–'शौचे धर्मेऽन्नपक्त्या च परिणाह्यस्य वीक्षणम्' इति मन्वेकवाक्यताऽपि सिद्धा। तत्रापि कल्पतरुणा तथैव व्याख्यातम्। बाल.२।१४५ (पृ.२६२)

विष्णुः

स्त्रीणां वृत्तिरूपो दायः

[1]प्रतिसंवत्सरं चत्वारिंशत्पणाश्चतुर्विंशदाढकाः। अथवा यावज्जीवं शतं कार्षापणास्तदर्धं वा। निर्मर्यादानां कल्प्रांशहरणं कार्यम्।

निर्मर्यादाः व्यभिचारिण्यः। सवि.४११

षड्विध स्त्रीधनम्

[2]पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकं बन्धुदत्तं शुल्कमन्वाधेयकमिति स्त्रीधनम्॥

(१) विष्णुवचने च बन्धुपदं मातुलाद्यभिप्रायं पित्रादीना स्वपदेनैव निर्दिष्टत्वात्। दा.७२

(२) आधिवेदनिक अधिवेदननिमित्त बन्धुदत्तमित्यत्र बन्धुशब्दः पूर्वोक्तपित्रादिव्यतिरिक्तबन्धुषु गोवलीवर्दन्यायात् वर्तते। स्मृच.२८०

स्त्रीणा सौदायिकधने स्वातन्त्र्यम्

[3]सौदायिकं स्त्री यथाकाममाप्नुयात्।

सौदायिक भर्तृदत्तोपलक्षणकम्। तथा च व्यासः–

'यच्च भर्त्रा धनं दत्तं सा यथाकाममाप्नुयात्' इति। सौदायिकं नाम–'ऊढया कन्यया वाऽपि पत्युः पितृगृहेऽपि वा। भर्तुः सकाशात्पित्रोर्वा लब्धं सौदायिक स्मृतम्॥' इति। लब्धं धनमिति शेषः। तथा च व्यासः—'यत्कन्यया विवाहे च विवाहात्परतश्च यत्। पितृभर्तृगृहात्प्राप्तं धन सौदायिक स्मृतम्॥' ननु सौदायिकशब्दः स्वार्थे तद्धितान्तः। सुदाय एव सौदायिक विनयादित्वात् ठक्। न त्वेतदनुपपन्नं—स्वार्थिकतद्धितान्तत्वेन स्त्रीणा दायानर्हत्वात् इति चेत्, मैवम्। स्त्रीणा भर्तृदायार्हत्वात्। स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्त इति न्यायात्सौदायिकशब्दस्य नियतनपुसकलिङ्गता।

सवि.३७७-३७८

धर्मविवाहोढान्यविवाहोढाऽप्रजस्त्रीधनविभागः।

भगिनीशुल्कविभागः। मातृधनविभागः।

[4]ब्राह्मादिषु चतुर्षु विवाहेष्वप्रजायामतीतायां तद्भर्तुः। शेषेषु च पिता हरेत्।

[5]सर्वेष्वेव प्रसूतायां यद्धनं तद्दुहितृगामि।

विवाहेष्वित्यनुवृत्तौ विष्णुः—सर्वेष्विति।

व्यक.१४८

[6]भगिनीशुल्कं मातुः सोदराणामेव।

अयमर्थः–भगिनीशुल्कात्मक स्त्रीधनं मातुरेव। मातुरभावे सोदराणामेव न भिन्नोदराणामित्यर्थः।

सवि.३८४

[7]यौतकं मातुः कुमारीदाय एव।

न सहोदराणामिति शेषः। यौतकमन्योन्यान्वितयोः वधूवरयोर्दैयं यत्तद्धनम्। युतयोरिति व्युत्पत्त्या यौतकम्।

सवि.३८२

शंखः शंखलिखितौ च

पैतृकद्रव्ये कन्याभागः। मातृधनविभागः।

[8]विभज्यमाने दायाद्ये कन्यालङ्कारं, वैवाहिकं,

(१) सवि.४११.

(२) विस्मृ.१७।१८; दा.७१ ल्कम (ल्का); व्यक.१४९ दावत्, स्मृच.२८० दावत्; विर.५२३ सुत (सुहृद्) (बन्धुदत्त०) स्त्रीधनम् (स्त्रीधनलक्षणम्); रत्न.१६१ शुल्क...धनम् (शुल्कान्वाधेयमिति); विचि.२१६ सुत (सुहृद्) (बन्धुदत्त०) कमिति स्त्रीधनम् (मिति स्थितिः); व्यनि. कमिति (मिति); चन्द्र.८७ सुत (स्वसृ) पाग (पाद्द) (बन्धुदत्त०) मिति स्त्रीधनम् (मुच्यते); व्यप्र.५४२; व्यम.६८ ल्कम (ल्का) (स्त्रीधनम्०); बाल.२।१४४ व्यमवत्; सेतु.५० व्यमवत्; समु.१३५; विच.१०५ दावत्.

(३) स्मवि.३७७.

(१) विस्मृ.१७।१९,२०.

(२) विस्मृ.१७।२१; व्यक.१४८ यद्धन तद्दु (तद्धन दु); विर.५१७ यां य (नां त) तद्दु (दु); चिंता.४५३ श्चैव (च) यां यद्धनं तद्दु (यास्तद्धनं दु); बाल.२।१४५ (पृ.२५७).

(३) स्मवि.३८४. (४) सवि.३८२.

(५) व्यक.१५६ (विभ ...हिकं०); स्मृच.२६९ शंखः; विर.४९५ याद्ये कन्या (येभ्यः स्वकन्या) भेत (भते); स्मृसा.

स्त्रीधनं च कन्या लभेत ×।

(१) विभागकालेऽन्यदपि धनं कन्यका स्वधृताल-ङ्कारादिकं लभत इत्याह शंखः– विभज्यमाने इति। दायाद्ये दायधने, भ्रातृभिर्विभज्यमाने कन्या स्वधृतम-लङ्कारं वैवाहिक तुरीयाशादिधनं स्त्रीधनं च पित्रादिदत्तं लभेतेत्यर्थः। *स्मृच.२६९-२७०

(२) मातुश्च वैवाहिकं स्त्रीधन जीवन्त्यामपि मातरि। स्वकन्यालङ्कारं स्वकीयनूपुरादि कन्या लभते। विर.४९५

(३) कन्याधन मातृधनम्। सवि.३६२

भ्रातृद्रव्य भगिनी हरति

[1]तदपत्यस्य च द्रव्यं कन्याभाग एव।

तदपत्यस्य, तच्छब्देन पुत्रिकामातुः परिग्रहः। तत्सुतस्योत्तरकालजातपुत्रकस्यातीतस्य धनं कन्याभाग **एव**। तस्याः सोदरभ्रातृरूपत्वादित्यभिप्रायः। +व्यक.१५६

मातृधनविभागः

[2]समं सर्वे सोदर्या मातृकं रिक्थमर्हन्ति कुमार्यश्च÷।

(१) सर्वत्रैव प्रथम पुत्रोपादानात् सर्वावस्थस्य पुत्र-स्य मातृधनेऽधिकारः चकारश्रुतिश्च सर्वत्रानुगता समु-

×व्यप्र.व्याख्यान 'कन्याभ्यश्च' इति देवलवचने (पृ.१४२२) द्रष्टव्यम्। * पमा. स्मृचगतम्। + विर. व्यकवद्भावः।

÷गौमि., पमा., बाल.व्याख्यान 'जनन्यां सरितायां' इति मनुवचने द्रष्टव्यम्।

६० याद्ये (यादे) (च कन्या०) शंखः; **पमा.**५११ याद्ये (ये) कार+ (एव हि) (कन्या०) शंखः; **व्यनि.** कार (कारिक); **स्मृचि.**३५ शंखः; **नृप्र.** ३७ दायाद्ये (द्रव्ये दाय) (च कन्या०) शंखः; **सवि.**३६२ शंखः; **व्यप्र.**४५६ स्त्रीधन च (च स्त्रीधन) शंखः; **विता.**३३४ दायाद्ये... लभेत (दायादे वैवाहिक स्त्रीधनं कन्यका लभते); **विभ.**९०; **समु.**१२९ शंखः.

(१) **व्यक.**१५६ द्रव्यं (धनं); **विर.**५३१.

(२) **दा.**७९ मातृकं रिक्थ (द्रव्य); **गौमि.**२८।२२ रिक्थ-मर्हन्ति (द्रव्यमर्हाः) कुमा (स्त्रीकुमा); **पमा.**५५१ सोदर्या (सहोदराः); **व्यनि.** पमावत्; **विता.**४५२ दावत्; **बाल.** २।१४५ (पृ.२५९); **समु.**१३५ पमावत्, शंखः.

क्षयवाचिका। दा.७९

(२) इदं यौतुकपरं इदमेव युक्तम्। जीमूतवाहनेऽ-प्येवम्। कन्याप्यनूढादौ तदभावे ऊढा। विता.४५२

स्त्रीशुल्कं पत्युः

[3]स्वं च शुल्कं वोढा।

यत्पुनरर्हतीत्यनुवृत्तौ शखेनोक्त 'स्व स्त्रीशुल्क वोढा' इति। तदपरिसमाप्ते विवाहे सति मृताया वध्वा द्रष्ट-व्यम्। 'मृताया दत्तमादद्यात्' इति याज्ञवल्क्य-स्मरणात्। *स्मृच.२८७

पुत्रिकाधन न भर्तुः

[4]प्रेतायाः पुत्रिकायास्तु न भर्ता द्रव्यमर्हति अपुत्रायाः।

महाभारतम्

स्त्रीधने कुटुम्बधने च स्वातन्त्र्यविचारः। स्त्रीणां वृत्तिरूपो दायः। मातृधनविभागः। सापत्नासवर्णमातृधनविभागः।

[5]त्रिसहस्रपरो दायः स्त्रियै देयो धनस्य वै।
भर्त्रा तच्च धनं दत्तं यथार्हं भोक्तुमर्हति॥
स्त्रीणां तु पतिदायाद्यमुपभोगफलं स्मृतम्।
नापहारं स्त्रियः कुर्युः पितृवित्तात्कथञ्चन॥
मातुश्च यौतकं यत्स्यात्कुमारीभाग एव सः॥
स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं युधिष्ठिर।
ब्राह्मण्यास्तद्धरेत्कन्या यथा पुत्रस्तथाऽस्य सा॥
सा हि पुत्रसमा राजन् विहिता कुरुनन्दन।
एवमेव समुद्दिष्टो धर्मो वै भरतर्षभ।
एवं धर्ममनुस्मृत्य न वृथा साधयेद्धनम्॥

* पमा., सवि., व्यम., बाल. स्मृचगतम्।

(१) **व्यक.**१४९; **स्मृच.**२८७ च (स्त्री) शंखः; **विर.** ५२१ स्व च (स्वय) शंखः; **पमा.**५५४ वोढा+(अर्हति) गौतमः; **सवि.**३८५ शंखः; **बाल.**२।१४७ पमावत्, गौतमः; **समु.**११९ पमावत्, शंखः.

(२) **दा.**१७८ 'अपुत्रायाः' इति मूल व्याख्यान वेति सदेहः; **अप.**२।१४५ यास्तु (याः) द्रव्य (धन).

(३) **भा.**१३।४७।२३,२४. (४) **भा.**१३।४५।१२.

(५) **भा.**१३।४७।२५,२६.

कौटिलीयमर्थशास्त्रम्

स्त्रीणां धनागमाः । स्त्रीणां वृत्तिरूपो दायः । स्त्रीधने भर्तुरधिकारमर्यादा । मृते भर्तरि पुनर्विवाहे नियोगे वा कृतेऽकृते वा स्त्रीधनकल्पम् । स्त्रीधनविभागः ।

[1]पितृप्रमाणाश्चत्वारः पूर्वे धर्म्याः मातापितृप्रमाणाः शेषाः । तौ हि शुल्कहरौ दुहितुः । अन्यतराभावेऽन्यतरो वा । द्वितीयं शुल्कं स्त्री हरेत । सर्वेषां प्रीत्यारोपणमप्रतिषिद्धम् । वृत्तिराबन्ध्यं वा स्त्रीधनम् । परद्विसाहस्रा स्थाप्या वृत्तिः । आबन्ध्यानियमः ।

तदात्मपुत्रस्नुषाभर्मणि प्रवासाप्रतिविधाने च भार्याया भोक्तुमदोषः । प्रतिरोधकव्याधिदुर्भिक्षभयप्रतीकारे धर्मकार्ये च पत्युः । संभूय वा दम्पत्योर्मिथुनं प्रजातयोस्त्रिवर्षोपभुक्तं च धर्मिष्ठेषु विवाहेषु नानुयुञ्जीत । गान्धर्वासुरोपभुक्तं सवृद्धिकमुभयं दाप्येत । राक्षसपैशाचोपभुक्तं स्तेयं दद्यात् । इति विवाहधर्मः ।

मृते भर्तरि धर्मकामा तदानीमेवास्थाप्याभरणं शुल्कशेषं च लभेत । लब्ध्वा वा विन्दमाना सवृद्धिकमुभयं दाप्येत । कटुम्बकामा तु श्वशुरपतिदत्तं निवेशकाले लभेत । निवेशकालं हि दीर्घप्रवासे व्याख्यास्यामः । श्वशुरप्रातिलोम्येन वा निविष्टा श्वशुरपतिदत्तं जीयेत । ज्ञातिहस्तादभिमृष्टाया ज्ञातयो यथागृहीतं दद्युः । न्यायोपगतायाः प्रतिपत्ता स्त्रीधनं गोपायेत् । पतिदायं विन्दमाना जीयेत । धर्मकामा भुञ्जीत । पुत्रवती विन्दमाना स्त्रीधनं जीयेत । तत्तु स्त्रीधनं पुत्रा हरेयुः । पुत्रभरणार्थं वा विन्दमाना पुत्रार्थं स्फातीकुर्यात् । बहुपुरुषप्रजानां पुत्राणां यथापितृदत्तं स्त्रीधनमवस्थापयेत् । कामकारणीयमपि स्त्रीधनं विन्दमाना पुत्रसंस्थं कुर्यात् । अपुत्रा पतिशयनं पालयन्ती गुरुसमीपे स्त्रीधनं आ आयुःक्षयाद् भुञ्जीत, आपदर्थं हि स्त्रीधनम् । ऊर्ध्वं दायादं गच्छेत् । जीवति भर्तरि मृतायाः पुत्रा दुहितरश्च स्त्रीधनं विभजेरन् । अपुत्रायाः दुहितरः । तदभावे भर्ता । शुल्कमन्वाधेयमन्यद् वा बन्धुभिर्दत्तं बान्धवा हरेयुः । इति स्त्रीधनकल्पः ।

पितृप्रमाणा इति । एतेष्वष्टसु विवाहेषु पूर्वे ब्राह्मादयश्चत्वारः, पितृप्रमाणाः धर्म्याः पितृप्रमाणत्वाद् धर्मयुक्ताः । अन्ये त्वधर्म्या इत्यर्थसिद्धम् । मातापितृप्रमाणा इति । माता पिता चेत्युभौ प्रमाणभूतौ येषा ते तथाभूताः, शेषाः गान्धर्वादयः । कस्मान्मातापितृप्रमाणकत्वमित्याह—तौ हीत्यादि । मातापितरौ हि, शुल्कहरौ दुहितुः कन्याशुल्कं गृह्णीतः । अन्यतराभावे अन्यतरो वा माता पिता वा शुल्कं हरति । एवं विवाहधर्म उक्तः ।

स्त्रीधनं प्रस्तौति—द्वितीयमिति । द्वितीयं शुल्क वरसकाशग्राह्यपरिभाषितशुल्कव्यतिरिक्तं शुल्कं प्रीतिवशाद् दत्त, स्त्री कन्यैव हरेत, न तु पितरौ । सर्वेषा प्रीत्यारोपणमप्रतिषिद्धमिति । वरेण न केवलं वरबन्ध्वादिभिः सर्वैरपि कन्याया देहे भूषणादिनिवेशनं अप्रतिषिद्धं अनिवारितम् । अर्थात् तदपि कन्यैव हरेत । तदिद कन्याहरणीय स्त्रीधनशब्दित द्विरूपमित्याह—वृत्तिराबन्ध्यं वा स्त्रीधनमिति । वृत्तिर्भूमिहिरण्यादिर्जीविकार्था, आबन्ध्यं भूषणादि । परद्विसाहस्रा कार्षापणसहस्रद्वयपरमावधिः, वृत्तिः, स्थाप्या कल्पयितुमर्हा । आबन्ध्यानियमः आभरणस्य सङ्ख्यानियमाभावः । तदिति । तत् स्त्रीधनं, आत्मपुत्रस्नुषाभर्मणि स्वस्य पुत्राणा तद्भार्यायाश्च पोषणे, प्रवासाप्रतिविधाने च भर्तृविदेशगमननिमित्ते जीविकोपायविरहसंकटे च, भार्यायाः, भोक्तुं, अदोषः दोषाभावः । प्रतिरोधकेत्यादि । 'साप्रतमेवादत्त्वा मा याही'त्येव रोधेन हरण प्रतिरोधक तत्प्रतीकारे व्याधिप्रतीकारे दुर्भिक्षप्रतीकारे भयप्रतीकारे च, धर्मकार्ये च विषये, पत्युः स्त्रीधनव्ययकारिणः, अदोष इत्यनुवर्तते । इतोऽपि स्त्रीधनस्य व्ययाद् भर्तुरदोष इत्याह—संभूय वेति । दम्पत्योः, मिथुनं प्रजातयोः अपत्यद्वयं यद्वा पुमपत्यमेकं स्त्र्यपत्यं चैकं जनितवतोः, संभूय मिलित्वा, त्रिवर्षोपभुक्तं च स्त्रीधनं, धर्मिष्ठेषु विवाहेषु ब्राह्मादिषु चतुर्षु, नानुयुञ्जीत नार्थयेत प्रत्यर्पयेदिति । गान्धर्वेत्यादि । गान्धर्वासुरोपभुक्तं, उभयं धर्मकार्यादिविनियुक्तं संभूय त्रिवर्षोपभुक्तं च समनन्तरोक्तं द्विरूपं स्त्रीधनं, सवृद्धिकं, दाप्येत निर्यात्येत । राक्षसेत्यादि । राक्षसपैशाचोपभुक्तं

(१) कौ.३।२.

स्त्रीधनं, स्तेयं दद्यात् स्तेय चौर्ये चोरितद्रव्य तदिव दद्यात् चोरदण्डयुक्तं दद्यादित्यर्थः। इति विवाहधर्म इति। व्याख्यात इति शेषः।

स्त्रीधनकल्पमाह—मृत इति। मृते भर्तरि, धर्मकामा भर्तुरात्मनश्च परलोकहितं धर्म कामयमाना, तदानीमेव सद्य एव, आस्थाप्याभरणं देहधृतं भूषणमवतार्य, शुल्कशेष च सहभुक्तावशिष्ट शुल्कं चकारादाभरण च, लभेत। लब्ध्वा वेति। आभरणं शुल्कशेष चाधिगम्य, विन्दमाना भर्त्रन्तरं परिगृह्णती, सवृद्धिक, उभयं दाप्येत। कुटुम्बकामा तु संतानकामनया देवरं भजमाना तु, श्वशुरपतिदत्तं स्त्रीधनं, निवेशकाले लभेत। कोऽसौ निवेशकालः, तत्राह—निवेशकालं हीत्यादि। दीर्घप्रवासे उत्तरतराध्यायव्युत्पादिते। श्वशुरप्रातिलोम्येन वेति। श्वशुरशासनातिक्रमेण, निविष्टा भर्त्रन्तरं गता, श्वशुरपतिदत्त जीयेत श्वशुरेण पत्या च दत्त दाप्येत। ज्ञातिहस्तादभिमृष्टाया इति। विद्यमान एव पत्यौ पत्यन्तरपरिगृहीतायाः, ज्ञातयः नवपतयः, यथागृहीतं गृहीतान्यून श्वशुरपतिदत्त, दद्युः अर्थाच्छ्वशुराय पत्ये च। न्यायोपगताया इति। न्यायेन देवरादिमुपगतायाः, प्रतिपत्ता परिग्रहीता, स्त्रीधन गोपायेत् रक्षेत् न तु स्वयमुपयुञ्जीत। पतिदायमिति। पत्या दत्त वस्त्राभरणादिक, विन्दमाना भर्त्रन्तरपरिग्राहिणी, जीयेत दाप्येत, श्वशुरकुलाय। धर्मकामा भुञ्जीतेति। अविन्दमाना संयता चेत् पतिदाय भुञ्जीत। पुत्रवतीति। पुत्रयुक्ता, भर्त्रन्तरगामिनी, जीयेत दाप्येत स्त्रीधनं न स्वय भुञ्जीतेत्यर्थः। के तद्भोक्तारः, तत्राह—तत्तु स्त्रीधनमित्यादि। पुत्रभरणार्थं वेति। पुत्रपोषणार्थं, विन्दमाना, पुत्रार्थं पुत्रनिमित्ते, स्फातीकुर्यात् वर्धयेत् स्त्रीधनम्। बहुपुरुषप्रजानामित्यादि। यासा बहवो भर्तारः पुत्राश्च तासा, स्त्रीधनं, यथापितृदत्तं पुत्राणामवस्थापयेत् तत्तद्भर्तृदत्तं तत्तद्भर्तृजनितपुत्रार्थे दद्यात्। कामकारणीयमपीति। यथेच्छविनियोज्यमपि, स्त्रीधन, विन्दमाना भर्त्रन्तरगामिनी, पुत्रसंस्थं कुर्यात् पुत्राय दद्यात्। अपुत्रेति। पुत्रहीना, पतिशयनं पालयन्ती पतिव्रता, गुरुसमीपे, स्त्रीधनं, आ आयुःक्षयाद् यावज्जीवं, भुञ्जीत मूलमविमाशयन्ती वृध्यादिकं संजातमात्रमुपयुञ्जीतेत्यर्थः। कुतः, आपदर्थं हि स्त्रीधनं, वृत्तिकृच्छ्रपरिहारमात्रविनियोज्यं हि स्त्रीधनं नाम, न पुनः कामचारव्ययार्थम्। ऊर्ध्वं दायादं गच्छेदिति। तया तथा रक्षितं स्त्रीधनं तस्यामुपरतायां भर्तृसपिण्डं गच्छेत्। म्रियमाणे पत्यौ प्रमीतायाः स्त्रीधनं पुत्रा दुहितरश्चाविशेषाद् विभजेयुः, पुत्राभावे दुहितरः तदुभयाभावे तु पतिर्गृह्णीयादित्याह—जीवतीत्यादि। आसुराद्यधर्म्यविवाहविषये तु स्त्रीधनं न भर्तृगामि, किन्तु स्त्रीबन्धुगामीत्याह—शुल्कमित्यादि। शुल्कं प्रतीत, अन्वाधेय पितृगृहानीतं, अन्यद् वा, बन्धुभिर्भ्रात्रादिभिः दत्त स्त्रीधन, बान्धवाः पित्रादयः, हरेयुः। इति स्त्रीधनकल्प इति। अनेन प्रकारेण स्त्रीधनविनियोगविधिर्व्याख्यातः। श्रीमू.

आधिवेदनिक धनम्

वर्षाण्यष्टावप्रजायमानामपुत्रां वन्ध्यां चाकाङ्क्षेत, दश विन्दुं, द्वादश कन्याप्रसवीनीम्। ततः पुत्रार्थी द्वितीयां विन्देत। तस्यातिक्रमे शुल्कं स्त्रीधनमर्धं चाधिवेदनिकं दद्यात्। चतुर्विंशतिपणपरं च दण्डम्। शुल्कं स्त्रीधनमशुल्कस्त्रीधनायास्तत्प्रमाणमाधिवेदनिकमनुरूपां च वृत्तिं दत्त्वा बह्वीरपि विन्देत। पुत्रार्था हि स्त्रियः *।

स्त्रीणा धनस्वाम्यहानिनिमित्तानि

राजद्विष्टातिचाराभ्यामात्मापक्रमणेन च।
स्त्रीधनानीतशुल्कानामस्वाम्यं जायते स्त्रियाः॥

राजद्विष्टातिचाराभ्यामिति। राजद्विष्टकथनेन दर्पमद्यक्रीडादिगमनेन च, आत्मापक्रमणेन च स्वयं भर्तृसकाशान्निष्पतनेन च, स्त्रीधनानीतशुल्काना अस्वाम्यं स्त्रिया जायते स्त्रीधने पितृगृहोपाहृते शुल्के च स्त्रियाः स्वामित्वं हीयते। श्रीमू.

मनुः

षड्विधं स्त्रीधनम्

अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्॥

---

* व्याख्यानं स्त्रीपुधर्मप्रकरणे (पृ.१३३५) द्रष्टव्यम्।

(१) कौ. ३।२. (२) कौ. ३।३.

(३) मस्मृ.९।१९४; मिता.२।१३५ वाह (वह)ः २।१४३; दा.७२ कर्मणि (तः स्त्रियै) मनुकात्यायनौ;

(१) इति स्त्रीधनस्य षड्विधत्वं तन्न्यूनसंख्याव्यवच्छेदार्थं नाधिकसंख्याव्यवच्छेदाय । *मिता.२।१४३

(२) अध्यग्नि होमविवाहकाले लब्धं यतः कुतश्चित् । तथा व्यावहारिकं पतिगृहनयनसमये लब्धम् । प्रीतिकर्मणि रतिकाले पत्या दत्तम् । तत् स्त्रीधनमित्युक्तम् । भ्रात्रादिभिस्तु यदाकदापि दत्तं स्त्रीधनम् । मवि.

(३) भ्रातृमातृपितृप्राप्तं यदाकदा वा जीवनार्थमिति शेषः । ×स्मृच.२८०

(४) अध्यग्नीति 'अव्ययं विभक्तिसमीप' (व्यासू.२।१।६) इत्यादिसूत्रेण समीपार्थेऽव्ययीभावः । +ममु.

(५) अध्यावाहनिकं पतिगृहं नीयमानायाः पृष्ठतो यन्नीयते तत्, भर्तृगृहाद्यदा पितृगृहं वाह्यते तदा श्वशुरादिभिर्दत्तमध्यावाहनिकमिति मेधातिथिः, तदपि ग्राह्यं न्यायसाम्यात् । दत्तं च प्रीतितः शीलधर्मनैपुण्यादिषु उत्पन्नप्रीतिना श्वशुरादिना दत्तं च । ×विर.५२२

(६) स्त्रीधनं च पारिभाषिकमेव न सर्वं, कार्यकाले एव सज्ञापरिभाषयोरुपयोगोऽन्यथा तद्वैयर्थ्यात्, विनिगमनाविरहेण च सर्वत्र तयोरविशेषात् । ×चन्द्र.८६

कुटुम्बधने स्त्रीधने च स्वातन्त्र्यविचारः

नैं निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात् ।
स्वकादपि च वित्ताद्धि स्वस्य भर्तुरनाज्ञया ॥

(१) निर्हारं स्वयमाकृष्य व्ययम् । कुटुम्बात् कुटुम्बपोषणार्थात् । बहुमध्यात् बहुसाधारणधनात् । स्वकात् स्वस्यासाधारणधनादपि स्त्रीधनव्यतिरिक्तात् पत्यनुमतिं विना न कुर्युः । मवि.

(२) स्वतन्त्रानुज्ञया परतन्त्राः स्त्रियः स्त्रीपुंससाधारणवित्तादात्मीयवित्ताद्वा त्यागभोगादिकं न कुर्युरित्यर्थः । स्मृच.२८१

(३) भ्रात्रादिबहुसाधारणात्कुटुम्बधनाद्भार्यादिभिः स्त्रीभी रत्नालङ्काराद्यर्थं धनसचय न कर्तव्यम् । नापि च भर्तुराज्ञा विना भर्तृधनादपि कार्यम् । ततश्च नेदं स्त्रीधनम् । *ममु.

(४) कुटुम्बशब्देनात्र कुटुम्बधन साहचर्यादभिमतम् । निर्हारो धनस्य निष्कृष्य हरणम् । +विर.५०९

(५) स्त्रीधनेऽपि भर्त्रनुमतिमन्तरेण स्त्रीणा न स्वातन्त्र्यमित्याह—न निर्हारमिति । व्यप्र.५४४

(६) पूर्वार्धोपन्यासो दृष्टान्तार्थः । बहुमध्यगाद्बहुजनभोग्यात्कुटुम्बात्, कुटुम्बशब्देन कुटुम्बार्थं भर्तृधनमभिप्रेतं, निर्हारं व्यय यथा भर्तुरनाज्ञयाऽऽज्ञया विना न कुर्युः । तथा स्वकादपि च वित्तादिति । नन्द.

मातृधनविभागः

जनन्यां संस्थितायां तु समं सर्वे सहोदराः ।
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः ॥

(१) मातृकं रिक्थ सर्वे सहोदराः सम भजेरन् सनाभयो भगिन्यश्च सम भजेरन्निति संबन्धः । न पुनः सहोदरा भगिन्यश्च सभूय भजेरन्निति । इतरेतरयोगस्य द्वन्द्वैकशेषाभावादप्रतीतेः । विभागकर्तृत्वान्वयेनापि चशब्दोपपत्तेः । यथा देवदत्तः कृषिं कुर्याद्यज्ञदत्तश्चेति । समग्रहणमुद्धारविभागनिवृत्त्यर्थम् । सोदरग्रहणं भिन्नोदरनिवृत्त्यर्थम् । +मिता.२।१४५

---

* पमा., रत्न., विचि., सवि., व्यप्र., व्यम., विता. मितागतम्। × शेष मितागतम्। + शेष मविगतम्।

व्यक.१४९ मितावत्, मनुकात्यायनौ; **मभा.**२८।२५ भ्रातृमातृ (मातृभ्रातृ), **स्मृच.**२८० कर्मणि (पूर्वकम्), **विर.**५२२ कर्मणि (तः स्त्रिय) शेष मभावत्, मनुकात्यायनौ; **स्मृसा.**६३ (=) मितावत्; **पमा.**५४७; **रत्न.**१६१; **विचि.**२१५ प्राप्त (प्रत्त) शेष विरवत्, मनुकात्यायनौ; **व्यनि.** (=) वाह (वह) भ्रातृ (भ्रातुः); **स्मृचि.**३० मितावत्; **नृप्र.**३८; **सवि.**३७८ वाह (हव) शेष स्मृचवत्; **चन्द्र.**८७ कर्मणि (पूर्वकम्) शेष मभावत्; **व्यप्र.**५४१ मितावत्; **व्यउ.**१५९ मितावत्; **व्यम.**६८ मितावत्; **विता.**४३७-४३८ मितावत्, मनुकात्यायनौ; **सेतु.**५० च (तु) शेष विरवत्, मनुकात्यायनौ; **समु.**१३४ मितावत्.

(१) **मस्मृ.**९।१९९; **व्यक.**१४७ ना (नृ); **स्मृच.**२८१ द्वि (द्वा) ना (नृ); **विर.**५०९; **व्यप्र.**५४४; **व्यम.**६९; **समु.**१३५; **भाच.** स्वस्य (स्वस्व) नाज्ञया (ननुज्ञया).

(१) **मस्मृ.**९।१९२; **मिता.**२।१४५; **दा.**५८,७९; **अप.**२।११७; **व्यक.**१४८; **गौमि.**२८।१२; **ज.**२।१४।१; **स्मृच.**२८४; **विर.**५१५; **स्मृसा.**६४ उत्त.; **पमा.**५५१;

(२) द्वन्द्वाश्रवणेऽपि तत्तुल्यार्थकचकारेण भ्रातृभगिन्योरितरेतरयुक्तयोर्विभागप्रतिपादनात् भगिन्यः सहोदराश्च विभजेरन्नित्ययमेवास्य वचनस्यार्थः। बृहस्पतिरपि चकारात् समुच्चयमाह—'स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी। अप्रत्ता चेत् समूढा तु न लभेन्मातृक धनम् ॥' अपत्यपदं पुत्रपरम्। तेषामप्रत्ताभिर्दुहितृभिः सह मातृधनविभागः। तथा च शंखलिखितौ—'समं सर्वे सोदर्या द्रव्यमर्हन्ति कुमार्यश्च।' सर्वत्रैव प्रथम पुत्रोपादानात् सर्वावस्थस्य पुत्रस्य मातृधनेऽधिकारः चकारश्रुतिश्च सर्वत्रानुगता समुच्चयवाचिका। एतावताप्युद्ग्राहमल्लस्य देवलवचनं गलहस्तः। यथा—'सामान्य पुत्रकन्याना मृतायां स्त्रीधनं स्त्रियाम्। अप्रजाया हरेद्भर्त्ता माता भ्राता पितापि वा ॥' इह पुत्रकन्ययोः साधारणं मातृधनमिति सुव्यक्तं, केवलकुमार्याः सकलमातृधनाधिकारित्वे यौतकधने विशेषवचनं मन्वादीनामनर्थकं स्यात् सर्वत्राधिकाराविशेषात्। यः पुनरेव समाधानं ब्रूते भ्रातृभगिन्योस्तुल्यवज्जननीधनाधिकारित्वे समभागविधान युक्तं, केवलभगिनीना तदभावे च केवलभ्रातृणां धनसंबन्धे 'समं स्यादश्रुतत्वाद्विशेषस्ये'ति न्यायत एव समत्वप्राप्तेरनर्थक सममिति। स एव वाच्यः भ्रातृभगिन्योरप्यधिकारे सम स्यादिति न्यायात् समत्वप्राप्तेरविशेषादानर्थक्यस्य तदवस्थत्वात्। किंच केवलभ्रात्रधिकारपक्षेऽपि पितृधन इव, मातृधनेऽपि विशोद्धारादिप्रसक्तिनिवर्तकतया समपदस्य सार्थकत्वात् कथमनर्थकता। अतो वचनन्यायानभिज्ञः सर्वैः प्राज्ञैरवज्ञेय एव किञ्चिज्ज्ञ इति। किन्तूक्तादेव हेतोः पुत्र कुमारीदुहित्रोस्तुल्यवदधिकारः। एतयोश्चान्यतराभावेऽन्यतरस्य तद्धनं द्वयोरप्येतयोरभावे तु ऊढाया दुहितुः पुत्रवत्याः संभावितपुत्रायाश्च तुल्योऽधिकारः स्वपुत्रद्वारेण पार्वणपिण्डदानसंभवात्। अत एव पूर्वोक्तदुहित्रभावे दौहित्रस्यैव धनाधिकारः। 'दौहित्रोऽपि ह्यमुत्रैन संतारयति पौत्रवत्।' (मस्मृ.९।१३९) इति मनुवचनात् न तु वन्ध्याविधवादुहित्रोः, स्वसत्तया स्वजन्यसत्तया च पार्वणपिण्डदानाभावात्। अत एव नारदः—'पुत्राभावे च दुहिता तुल्यसंतानदर्शनात्।' (नास्मृ.१६।५०)। पौत्रदौहित्रयोस्तु सद्भावे पौत्रस्यैवाधिकारः, पुत्रेण परिणीतदुहितुर्बाधात् बाधकपुत्रेण बाध्यदुहितृपुत्रबाधस्य न्याय्यत्वात्। उक्तानां तु सर्वेषां दौहित्रपर्यन्तानामभावे वन्ध्याविधवयोरपि मातृधनाधिकारिता, तयोरपि तत्प्रजात्वात् प्रजाभावे चान्येषामधिकारात्।

यत्तु दुहितृमात्राधिकारार्थं गौतमवचन 'स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठिताना च' (गौध.२८।२२)। यच्च नारदस्य 'मातुर्दुहितरोऽभावे दुहितृणा तदन्वयः।' (नास्मृ.१६।२)। यच्च कात्यायनस्य 'दुहितृणामभावे तु रिक्थं पुत्रेषु तद्भवेत्।' यच्च याज्ञवल्क्यस्य 'मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः' (यास्मृ.२।११८)। तानि पूर्वोक्तदेवलादिवचनविरोधेन यौतकद्रव्यविषयाणि। अत एव मनुः—'मातुश्च यौतक यत् स्यात् कुमारीभाग एव सः।' (मस्मृ ९।१३१)। यौतकं परिणयनलब्धं, युमिश्रण इति धातोर्युत इति पदं मिश्रतावचन, मिश्रता च स्त्रीपुरुषयोरेकशरीरता विवाहाच्च तद्भवति 'अस्थिभिरस्थीनि मासैर्मासानि त्वचा त्वचमि'ति श्रुतेः, अतो विवाहकाले लब्ध यौतकम्। अत एव वसिष्ठः—'मातुः पारिणाय्यं स्त्रियो विभजेरन्।' (वस्मृ.१७।४०)। पारिणाय्यं परिणयनलब्ध धनम्। यत्तु मनुवचन—'स्त्रियास्तु यद्भवेद्वित्त पित्रा दत्तं कथंचन। ब्राह्मणी तद्धरेत् कन्या तदपत्यस्य वा भवेत् ॥' (मस्मृ.९।१९८)। अत्र पित्रा दत्तमिति विशेषणात् विवाहसमयादन्यत्रापि यत् पितृदत्तं तत् कन्याया एवेत्येतदर्थं, ब्राह्मणीपद चानुवादः। यद्वा ब्राह्मणीपदस्य चानर्थक्यभयात् क्षत्रियादिस्त्रीणामनपत्यानां पितृदत्त धन सपत्नीदुहिता ब्राह्मणीकन्या हरेत् न पुनरप्रजःस्त्रीधनं भर्तुरिति वचनावकाश इति वचनार्थः। अन्यथा सकलवचनानामसामञ्जस्यं स्यात्। न च वाच्य नारदादिभिर्दुहितुरभावे दुहितुः पुत्राणामेव धनाधिकारो दर्शितः प्रत्यासन्नदुहितृपदेनैवान्वयपदस्यान्वयादिति यतो दुहितृपदस्य जन्यविशेषपरत्वेन जनकाकाङ्क्षितत्वात्। न जन्यान्तरेणान्वयपदोपात्तेन पुत्रेणा-

---

मपा.६६७; रत्न.१६३ जनन्यां (मृतायां); विचि.१९४, २२१; व्यनि.; सवि.३८३; चन्द्र.८५; वीमि.२।११७; व्यप्र.४५१ पू, ५४६; व्यउ.१६०; व्यम.७०; विता. ४५० समं (समाः); राकौ ४५९; बाल.२।१४५ (पृ.२६०) प्रथमपादः; सेतु.५६, ११८; समु.१३६.

न्वयः संभवति समत्वात् । न चाधिष्ठानलक्षणयाऽन्वयो वाच्यः मात्रन्वयेनैव सर्वेषा मुख्यत्वसंभवात् मातृपदान्वये च दुहितृपदस्य मुख्यत्वस्वीकारात् । न च तदन्वय इति तच्छब्दोपात्ताया दुहितुरन्वययोग्यता वाच्या तच्छब्दस्यापि प्रकृतवाचितया दुहितृत्वरूपेणैवोपपादकत्वात् । किं च याज्ञवल्क्यवचने दुहितर इति पद प्रथमान्त ताभ्य इति पद च पञ्चम्यन्त अन्वयपदेन षष्ठ्यन्तान्वययोग्येन नान्वीयते, किन्तु व्यवहितमपि मातुरित्येव पदमन्वयि । तदत्र मातुरन्वये निश्चिते नारदकात्यायनवाक्येऽपि मातुरेवान्वयो न्याय्यः अविरोधात् ।

किं च 'सत्स्वङ्गजेषु तद्गामी ह्यर्थो भवती'ति बौधायनवचनानुसारेणानन्तर्याच्च । अङ्गजस्य पुत्रस्याधिकारो न्याय्यो नानङ्गजस्य व्यवहितदौहित्रस्याधिकारः । ततश्च परिणयनलब्धस्त्रीधन दुहितुरेव न पुत्राणा तत्रैव च क्रमार्थ गौतमवचन 'स्त्रीधन दुहितृणामप्रत्तानामप्रतिष्ठिताना च ।' प्रथममप्रत्तानां, तदभावे प्रत्तानां, तदभावे च समूढानां, स्त्रीधन दुहितृणामिति सामान्यतः प्राप्तत्वात् अप्रत्तानामित्यादेस्तु क्रमार्थत्वेनोपसहारार्थत्वात् । तथा च याज्ञवल्क्यः— 'अप्रजःस्त्रीधन भर्तुर्ब्राह्मादिषु चतुर्ष्वपि । दुहितृणा प्रसूता चेच्छेषेषु पितृगामि तत् ॥' (यास्मृ.२।१४५) । ब्राह्मादिषु विवाहेषु यल्लब्ध अध्यग्निधन स्त्रियाः तत्तस्या मृताया प्रथम दुहितृणामेव तत्रापि प्रथम कन्यायास्तदभावे प्रत्तायास्तदभावे परिणीतायाः, सर्वदुहितृभावे च पुत्रस्याधिकारः, अप्रजःस्त्रीधने भर्तुरधिकारात् । बृहस्पतिना तु अप्रत्तापदेन अप्रत्ताद्यभावे समूढाया अप्यधिकारः सूचितः । न च यौतकमात्रधनाभिप्रायेण नेद वचन किन्तु ब्राह्मादिविवाहेन विवाहिताया यद् यावद्धन यौतकमयौतक वा तदभिप्रायेणेति वाच्य 'बन्धुदत्तमि'ति वचनस्य (यास्मृ.२।१४४) निर्विषयतापत्तेः मनुविरोधाच्च । यदाह—'ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्धनम् । अप्रजायामतीतायां भर्तुरेव तदिष्यते ॥ यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु । अतीतायामप्रजाया मातापित्रोस्तदिष्यते ॥' (मस्मृ.९।१९६,१९७) । अस्याः स्याद्दत्तमिति पराचीनं पूर्ववानुषज्यते, तेन विवाहेषु यद्धनं दत्तमिति सबन्धात् वैवाहिकधनमात्रप्रतीतेर्न यावद्धनविषयम् । तथा यमः—'आसुरादिषु यद्द्रव्यं विप्राहेषु प्रदीयते ।' विवाहक्रियाया पूर्वापरीभूताया यद्द्रव्य प्रदीयत इति यौतकधनमात्रगोचरत्वमेव प्रतीयते । न च विवाहात् पूर्व परतो वा स्त्रिया लब्धस्याप्रजःस्त्रीधनस्य गतेरश्रूयमाणत्वात् ब्राह्मादिपद स्त्रीपरमिति वाच्य पूर्वापरलब्धस्य विस्तरेण गतेर्वक्ष्यमाणत्वात् । *दा.७९–८८

(३) दुहितृणा तदन्वयस्य वाऽ(चा) भावे पुत्रा एव मातृधनं विभजेरन् । अत्र चशब्दो विकल्पार्थो न समुच्चयार्थः । विकल्पे च दुहितरः कुमार्यः पूर्वमधिक्रियन्ते । एव च सति प्रत्तासु प्रतिष्ठितासु दुहितृषु पुत्राणामपि मातृधनेऽधिकारो भवति । अप.२।११७

(४) सम न ज्येष्ठोद्धारेण । मातृक मातुः स्त्रीधनव्यतिरिक्तधनम् । भगिन्योऽप्रत्ताः । सनाभयः सोदराः । केचित्तु स्त्रीधनेऽपि भ्रातृविभागमिच्छन्ति । 'स्त्रीधनं स्यादपत्याना दुहिता च तदंशिनी । अप्रत्ता चेत्समूढा तु लभते मानमात्रकम् ॥' इति बृहस्पतिवचनात् । एवं चाप्रत्ताया भ्रातृभिः सह तुल्यविभागः । इतरस्यास्तु संमानमात्र देयमिति । एतत्परमेव च स्त्रीधनं दुहितृगामीत्यादि । मवि.

(५) तत्स्वोक्तान्वाधेयादि (प्रीतिदत्त) द्विविधस्त्रीकथविषयमिति मन्तव्यम् । अस्मिन्नेव विषये विशेषमाह बृहस्पतिः—'स्त्रीधन स्यादपत्याना दुहिता च तदंशिनी । अप्रत्ता चेत्समूढा तु लभते मानमात्रकम् ॥' अपत्यानां पुमपत्यानाम् । वचनद्वयेऽपीतरेतरयोगे चशब्दस्तेनात्रेतरेतरयुक्ताना विभागकर्तृत्व विज्ञेयम् । +स्मृच.२८४-२८५

(६) मातरि मृताया सोदर्यभ्रातरो भगिन्यश्च सोदर्या अनूढा मातृधन सम कृत्वा गृह्णीयुः । ऊढास्तु धनानुरूप समान लभन्ते । तदाह बृहस्पतिः—'स्त्रीधनं स्यादपत्याना दुहिता च तदंशिनी । अपुत्रा चेत्समूढा तु लभते मानमात्रकम् ॥' ततश्चानूढाना पितृधने इवोढानां मातृधने भ्रात्रा स्वादशाच्चतुर्थभागो देयः । मसु.

(७) भगिन्योऽत्राप्रत्ता अप्रतिष्ठिताश्च विवक्षिताः अग्रिमबृहस्पतिवाक्यानुसारात् । विर.५१५

* विचि. दागतम् ।

+ व्यनि., विता. स्मृचचद्धावः ।

(८) एतत् पुत्राणां दुहितॄणां च संभूय मातृऋक्थग्राहित्वपरं न भवति। किंतु तेषां धनसबन्धे प्राप्ते समविभागप्राप्त्यर्थं समशब्दश्रवणात्। यदपि शङ्खलिखिताभ्यामुक्तम्—'सम सर्वे सहोदरा मातृक ऋक्थमर्हन्ति कुमार्यश्च' इति। तदपि मनुवचनेन समानार्थम्। अथवा एतद्वचनद्वय भर्तुः कुललब्धस्त्रीधनविषयम्। अस्मिन्नेव विषये बृहस्पतिः— 'स्त्रीधन तदपत्यानां दुहिता च तदंशिनी। अप्रत्ता चेत्समूढा तु लभते सा न मातृकम्॥' इति। अपत्यानां पुमपत्यानाम्।

पमा.५५१-५५२

(९) या भगिन्यः साक्षात्स्वमातृदुहितरः तदभावे तद्दौहित्रपर्यन्ताः, तदभावे सहोदराः मृतायाः साक्षात्पुत्राः न सपत्नीपुत्राः, तदभावे पौत्रा इत्यस्य वचनस्य तात्पर्यार्थः। सम सर्वे सहोदरा इत्यत्र सहोदरग्रहण भिन्नोदरनिवृत्त्यर्थम्। स्वपुत्राभावे सपत्नीपुत्रादयः।

+मपा.६६७

(१०) एतच्च अन्वाधेयभर्तृप्रीतिदत्तधनविषयम्।

रत्न.१६३

(११) [विज्ञानेश्वरजीमूतवाहनमतमुपन्यस्योक्तम्।] अत्रेद प्रतिभाति। अन्वाधेयादिग्रहणस्योपलक्षणत्वे प्रमाणाभावात्तदुभयव्यतिरिक्तसर्वमातृधने दुहित्रधिकारः प्रथमं, तदनु पुत्राधिकारः। यौतके विशेषवचन तु प्रत्तादिनिवृत्त्यर्थम्। अन्यत्रापि सा समैवेति चेत्, सत्यम्। किन्तु, न नियता, यौतके तु नियता। तेन यौतक कुमार्यभावे विवाहभेदेन स्त्रीधन भर्त्रादीनामेव भवति न प्रत्तादीनामिति स्मृतिचन्द्रिकाकारादीनामाशयः। विज्ञानेश्वराचार्याणा त्वयमभिप्रायः। सामान्यतः स्त्रीधनमात्रस्य दुहितृग्राह्यताबोधकानामनन्यथासिद्धवचनानुरोधेन सकोचः कर्तव्यो, न च मन्वादिवचनमनन्यथासिद्धपुत्रकन्याना सहाधिकारप्रतिपादकम्। पुत्राधिकारमात्रप्रतिपादनपरत्वात्। न च चशब्दद्वन्द्वाभ्या सहाधिकारः। विभागकर्तृत्वान्वयेनापि तदुपपत्तेः। अन्यथा 'पितरौ' इत्यादौ 'मातापित्रोस्तदिष्यते' इत्यादौ च द्वन्द्वैकशेषश्रवणे सकलनिबन्धसंमतः क्रमो मातापित्रोर्न स्यात्। विष्णुवचनाद्यनुरोधात्तत्र शब्दान्वयसाहित्यमात्रेण तदुपपत्तिरर्थक्रमस्त्वन्यथाप्यविरुद्ध इत्युच्यते। तर्ह्यत्रापि 'ताभ्य ऋतेऽन्वयः', 'दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेत्' इत्यादियोगीश्वरकात्यायनवचनावगतार्थक्रमान्यथाभावे द्वन्द्वचशब्दादीना शाब्दान्वयसाहित्यमात्रेणोपपत्तिरस्तु न तु तदनुरोधेन तेषामेवान्यविषयत्वम्। सिद्धे सहाधिकारे तेषा सकोचस्तत्सकोचे चैषा सहाधिकारपरत्वनिश्चय इतीतरेतराश्रयत्व चेति। अन्वाधेयादौ विशेषवचनमनर्थकमिति चेत्। न। यौतके चन्द्रिकाकारादिमतवदेव सार्थकत्वात्। अन्वाधेयग्रहणस्योपलक्षणतया प्रजामात्राधिकारे तेन प्रतिपादिते 'जनन्या सस्थितायां तु' इत्यादिवचनैः साम्यादिविधानमित्येव सर्वेषा सार्थकत्वात्। तस्मात्सर्व सुस्थमिति। श्रीविद्यारण्यश्रीचरणैस्तु स्मृतिचन्द्रिकामिताक्षरयोर्द्वयोरप्यनुस्मरेण द्वयमपि लिखित न तु विवित्तम्। पुत्रादिभ्यः प्राक् दुहितृदुहितुस्तदनु दौहित्राणामधिकार इति तु मिताक्षराचन्द्रिकामदनरत्नकाराणा विद्यारण्यश्रीचरणाना चाविसवादेन समतः।

['जीमूतवाहनदायतत्त्वकारौ तु' इत्यादिना 'न च वाच्य नारदादिभिः' इत्याद्युपर्यु्द्धृतदायभागसदर्भार्थमुद्धृत्योक्तम्—] तन्मन्दम्। जन्यवाचकस्य जन्यान्तरेणानन्वये 'अस्य पुत्रपुत्र' इत्यादावप्यन्वयो न स्यात्। तज्जन्य प्रति सबन्धितयाऽविरोधस्त्वत्रापि तुल्यः। अन्यथा दुहितुः पुत्र इत्यत्राप्यन्वयो न स्यात्। तस्माच्छाब्दव्युत्पत्त्यज्ञानमेवेदम्। याज्ञवल्क्यवचने च यद्यपि मातुरन्वयः पुत्रादिरेवोक्तस्तथापि 'विभजेरन् सुताः पित्रोः' इत्यनेन प्राप्ताधिकाराणामेव ऋणदानदुहित्रभावोपाधिकत्वज्ञापनार्थोऽनुवादः। स च दौहित्रानन्तरमप्यविरुद्धः। 'सत्स्वङ्गजेषु' इति बौधायनवचनं तु मातृसाधारण्येन पुत्राणा धनाधिकारमात्रमङ्गजपदस्य चापत्यमात्रवाचकत्वात्, पुत्रदुहितृसाधारणमधिकारं प्रतिपादयद्वचनान्तराविरुद्धं प्रत्यासत्त्यैव व्याख्यातु युक्तमिति न किंचिदेतत्।

व्यप्र.५५०–५५१

(१२) मातृकं रिक्थं मातामहीधन, भगिन्यो दौहित्रीरूपा भगिन्यः, तदभावे सोदरा दौहित्ररूपाः प्रामुवन्ति।

व्यउ.१६०

(१३) स्त्रीमरणोत्तरमन्वाधेयाख्यतद्धनग्रहणे अधि-

+ इदं 'अप्रजस्त्रीधनं' इति याज्ञवल्क्यवचनस्य मिताक्षरागतम्।

कारित्यवस्थामाह मनुः—'अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत्। पत्यौ जीवति वृत्तायाः प्रजायास्तद्धन भवेत्॥' (मस्मृ.९।१९५)। प्रजा विशिनष्टि स एव— जनन्यामिति (मस्मृ.९।१९२)। यत्र दुहित्राद्यभावेन पुत्राणामेव साहित्येनाधिकारः प्राप्तस्तत्र तत्साहित्यम्। यत्र तु कन्यानामेवाधिकारः प्राप्तस्तत्र तत्साहित्यमनूद्यते। न तु कन्यापुत्रयोः परस्परमप्राप्तं साहित्य विधियत इति मिताक्षराशयः। परे तु अन्वाधेयभर्तृप्रीतिदत्तविषये कन्यापुत्रयोरपूर्वं साहित्य विधियत इत्याहुः।

+व्यम.७०

(१४) मिताटीका—[उद्धृतजीमूतवाहनमत खण्डयति] तन्न। मुनीना आशयानभिज्ञानात्। तथा हि चार्थसमुच्चयस्य सहाधिकार विनाऽप्याख्यातोपपत्तिस्तत्र तावत्कृतैव। युक्ता च सैवेत्युक्त च। किञ्च। उपादानमात्रेण तस्य तत्राधिकारलाभे प्रथमोपादानस्य न तत्र हेतुत्वं प्रत्युत ततः तस्य तस्याः प्रथममेवाधिकारापत्तिरिति न भवदिष्टसिद्धिः। किं च तदपि न, गौतमादिवाक्ये तासामेवोपादानात् प्रथममेव, प्रत्युत नारदादिभिस्त्रिभिः क्रमस्य स्पष्टतया सामान्येन प्रतिपादनात्, 'मातुर्दुहितर' इत्यत्र युक्तं चैतदित्यादिनोक्तप्रकारेण प्रत्यासत्यतिशयस्य तस्यामेव सत्त्वेन तस्यैव धनग्रहणाधिकारितावच्छेदकत्वस्य मन्वाद्युक्तत्वेन च तथैवौचित्याच्च। किं च। सहाधिकारित्वे उभयसत्त्वे एवाधिकारो नान्यतरसत्त्वे इति तत्रानधिकारापत्तेः। तथा सति तयोरित्याद्यग्रिमग्रन्थासगतेः। न हि दम्पत्योः सह विहितमाधानादिकमन्यतराधिकारिक कस्यापि समतम्। लोकेऽपि सहाधिकारिक कर्मान्यतरेण न क्रियते। किञ्च अनूढेत्यस्य कुतो लाभः। न हि तेषु सर्वेषु तदुपादानमस्ति। गौतमीय तु अन्यविषयतया योजित भवद्भिरेव। अत एव च तद्विरोधोऽपि दुष्परिहरः। कन्याशब्दस्य चाक्षतयोन्या शक्तिः, कुमारीशब्दस्य च प्रथमवयोविशिष्टाया शक्तिः। अन्यैकवाक्यतया तु दुहितृसामान्यपरत्वमेव। अन्यथा न्यूनतापत्तेः। बृहस्पतिवाक्य गौतमीयसमानार्थम्।

किं च। तत्र 'अप्रत्ता चेत्' इत्युत्तरान्वयि न पूर्वान्वयि। अन्यथा समूढायाः कदाऽपि तदभावे गौतमीयस्य चासंगतिः, स्मृत्यन्तरविरोधापत्तिश्च भवति। लिखितवचनातिरिक्तं नापि तथाबोधकं वचनमत्रास्ति। किं च। तत्र मनोर्गतेरुक्तत्वेन शखलिखितवाक्यस्य स्पष्टमेव तत्समानार्थत्वेन चादोषः। बृहस्पतिवाक्यस्यापि तत्समानार्थतया, विवक्षितया स्यात्पदघटितनिर्देशेन भवदभिमतार्थस्याक्षरमर्यादयाऽलाभेन चशब्दस्य एवार्थकत्वेन च आदौ दुहितैव तदशिनी तदभावेऽपत्यानां पुत्राणा स्त्रीधन स्यात् सभावनलिङा तत्सत्ता संभवेत् इत्यर्थस्यैवानया लाभाच्च अदोषः। देवलवाक्यं तु मातृधन पुत्रमात्रसत्त्वे तेनैव ग्राह्यं, कन्यामात्रस्य सत्त्वे तयैव ग्राह्यं इत्येव समानत्वमात्रबोधक न क्रमबोधकं, नापि सहाधिकारबोधकमिति न दोषः। किञ्च। नारदादित्रयानुरोधेन मन्वादिचतुष्टयस्य तथा तत्परत्वमेव युक्त, न तु मातुस्त्वित्येव मन्वनुरोधेन तत्परत्वम्। तदनुरोधे तु तेषा सामान्याना विशेषपरत्व कृत्वा तेषा तत्परत्वे युक्तो 'बहूनामनुरोधः' इति न्यायविरुद्धत्वात्। किञ्च। चतुर्णी वचनाना सहाधिकारितावबोधकत्वेन तदन्यचतुर्णा मन्वेकवाक्यतया यौतकविषयकत्वस्योक्तत्वेन तयोरन्यतरस्याभावे इत्याद्यर्थस्य भवदुक्तस्य निर्मूलत्वापत्तिः। तेषामपि तत्त्वे त्वविरोधोऽस्मन्मते प्रवेशश्च। किं च। तस्य न भवदुक्तोऽर्थः कि त्वन्य एवेत्यनुपदमेव स्फुटीभविष्यति।

किं च। स्वपुत्रेत्यादिहेतुरप्ययुक्तः। 'यश्चार्थहरः स पिण्डदायी' इत्यौत्सर्गिकनियमसत्त्वेऽपि यस्य पिण्डदत्वं तस्यैव तद्धरत्वमिति नियमे मानाभावस्य प्रागेव प्रपञ्चितत्वात्। अत एव— 'पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः।' इति पूर्वार्धोक्ते 'तयोर्हि मातापितरौ समूतौ तस्य देहतः।' इत्युत्तरार्धेन हेतुरुक्तो मनुना (मस्मृ.९।१३३)। दुहित्रभावे दौहित्रस्यैवेत्यपि न युक्तम्। प्रत्यासत्त्यतिशयस्य तु दौहित्र्यामेव सत्त्वाद्दौहित्रोऽपीति मनोः प्रकरणात्पुत्रिकापुत्रविषयत्वाच्च। व्याख्यातं तथैव च मेधातिथिप्रभृतिभिः। उक्तहेतोरेव न तु बन्ध्येत्याद्यग्रिममपि न युक्तम्। भवदुक्तनारदस्य पितृधनविषयत्वस्य स्पष्टत्वाच्च। अत एव च पौत्रेत्यादि अधिकारादित्यन्तमपि प्रत्युक्तम्। वासिष्ठे 'मातुः परिणाह्यं स्त्रियो विभजेरन्नि'ति पाठस्य सत्त्वेन भवदुक्तपाठस्यैव खपुष्पायमा-

+ स्वमते स्मृत्यवबोधः।

णत्वेन तथाऽर्थस्य दूरोत्सारितत्वेन 'अत एव वसिष्ठः' इत्याद्यपि चिन्त्यम्। परिणाय्यमिति प्रयोगस्यासाधुत्वाच्च। अत एव 'आनाय्योऽनित्ये' (व्यासू.३।१।१२७) 'पाय्यसानाय्य' (व्यासू.३।१।१२९) 'प्रणाय्योऽसंमतौ' (व्यासू.३।१।१२८) इति निपातन पाणिनीय सगच्छते। अत एव कल्पतर्वादिभिरपि तथा पाठ धृत्वा 'परिणाह्य परिच्छद आदर्शकङ्कणादिरि'ति व्याख्यातम्। अत एव स्त्रीपुरुषधर्मप्रकरणे 'शौचे धर्मेऽन्नपक्त्या च परिणाह्यस्य वीक्षणम्' इति मन्वेकवाक्यतयाऽपि सिद्धा। तत्रापि कल्पतरुणा तथैव व्याख्यातम्। णिजन्तात् 'अचो यति' (व्यासू.३।१।९७) तु अर्थासंगतिः। निवृत्तप्रेषणादिति तु तस्य सत्त्वेऽगतिकगतिः। यदपि प्रत्यासन्नदुहितृपदेनैवान्वयपदस्यान्वयाद्दुहित्रभावे दौहित्रीणामेव स इति नारदार्थो न युक्तः। दुहितृपदस्य जन्यविशेषवचनत्वेन जनकाकाङ्क्षित्वेन तस्य नात्यन्तरेणान्वयपदोपनेयपुत्रेणान्वयस्यासमत्वेनासंभवात्। न चाधिष्ठानलक्षणयाऽन्वयः। मात्रन्वयमात्रेणैव सर्वेषा मुख्यत्वसभवात्। मातृपदान्वये च दुहितृपदमुख्यत्वस्य स्वीकारात्। न च तदन्वय इति तच्छब्दोपात्तदुहितुरन्वययोग्यता। तच्छब्दस्यापि प्रकृतवाचितया दुहितृत्वरूपेणैवोपपादकत्वात्। किं च। मूलवाक्ये दुहितर इति प्रथमान्तं ताभ्य इति पञ्चम्यन्त च षष्ठ्यन्तान्वययोग्यान्वयपदेन नान्वेति, किं तु व्यवहितमपि मातुरित्येव। तत्र तथा निश्चये नारदीयादावपि तथैवाविरोधात् इति। तदपि न। प्रागुक्तस्य नारदार्थस्याज्ञानात्। मातृपत्र्यासत्तेः प्रागुक्तत्वेन त्वदिष्टप्रत्यासत्तेरभावेन दोषस्याज्ञानविलसितत्वात्। मूलसमानार्थत्वे तदन्यतरस्य तत्पदस्य चानर्थक्यापत्तेः। अत एव दुहितृपदेनास्माकनान्वयपदान्वय एवेति सर्वथा दुहितृपदस्य इत्याद्युक्तेरयुक्तत्वात् तच्छब्दस्य प्रकृतपरामर्शकत्वेऽपि बुद्धिस्थत्वेनैव तद्बोधकतया दुहितृत्वरूपेण तदभावेनान्वययोग्यतायाः षष्ठ्यन्ततया सत्त्वेनात्र जनकाकाङ्क्षाया अभावेन प्रत्युत संबन्ध्याकाङ्क्षाया एव सत्त्वेन लक्षणायाश्चाभावेन प्रागुक्तं 'न च' इत्याद्युक्तेश्चासंगतत्वात्। तस्माद्विज्ञानेश्वरोक्तमेव युक्तमिति दिक्।

बाल.२।१४५(पृ.२६१-२६२)

यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः।
मातामह्या धनात्किंचित्प्रदेयं प्रीतिपूर्वकम्॥

(१) दुहितृदौहित्रीणा समवाये दौहित्रीणा किंचिदेव दातव्यम्। ×मिता.२।१४५

(२) यथार्हतः द्रव्यात्पत्वबहुत्वादियोग्यतान्यनुसारेण। व्यक.१४८

(३) प्रत्तासु तु मृतासु ताभ्यः संमानार्थ यद्देयं तत्तद्दुहितृभ्यः स्वेच्छया मातुलैर्देयमित्याह—यास्तासामिति। प्रीतिपूर्वक स्वेच्छया। मवि.

(४) यथार्हतः शीलोपयोगदारिद्र्याद्यपेक्षयेत्यर्थः। ननु दुहितृदुहितॄणा भ्रातृभगिनीसद्भावे मातामहीधने स्वामित्वाभावात् किमिति किंचित्प्रदीयते। उच्यते। यथा पैतृके धने कन्याना दायार्हत्वाभावेऽपि वचनबलात् ताभ्यस्तुरीयाशो भ्रातृभिर्दीयते तथाऽत्र स्वामित्वाभावेऽपि भ्रातृभगिनीभिर्वचनबलात्किंचिद्दीयते। इयांस्तु भेदः। तत्र दायानर्हत्वेऽपि जन्मनः स्वाम्यमस्तीत्यभिसंधाय 'पतिताः स्युरदित्सवः' इति दोषकीर्तनादवश्य दातव्यम्। इह तु स्वामित्वमपि नास्तीत्यभिसंधाय 'प्रीतिपूर्वकमि'ति वचनात्प्रीतौ सत्या देयमसत्यामदेयमिति। *स्मृच.२८५

(५) तासा दुहितॄणा या अनूढा दुहितरस्ताभ्योऽपि मातामहीधनाद्यथा तासा पूजा भवति तथा प्रीत्या किंचिद्दातव्यम्। ममु.

(६) तासा भगिनीना यथाशतो धनबहुत्वाल्पत्वानुसारेण। विर.५१६

(७) किंचिदिति तुर्याशः। अपिना समवायोक्तेः। कन्याभावे सर्वग्रहणं सिद्धम्। विता.४५३

मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः॥

× पमा., मपा., व्यम. मितावद्भावः।

* सवि., व्यप्र. स्मृचवद्भावः।

(१) **मस्मृ.**९।१९३, **मिता.**२।१४५; **अप.**२।११७; **व्यक.**१४८; **गौमि.**२८।२२ स्तासा (स्तवासां); **स्मृच.**२८५; **विर.**५१६ यार्हतः (र्थांशतः), **पमा.**५५१; **मपा.**६६६; **रत्न.**१६३ यास्तासां (यास्तवस्याः); **विचि.**२२१ विरवत्; **व्यनि**; **सवि.**३८१; **वीमि.**२।११७ विरवत्, पू.; **व्यप्र.**५४७; **व्यउ.**१६० यास्तासां स्युः (याः स्युस्तासां) ईतः (र्थतः), **व्यम.**७१; **विता.**४५३; **समु.**१३६.

(२) **मस्मृ.**९।१३१; **दा.**८२ स्तु **(ब)**; **अप.**२।११७;

(१) यौतकशब्दः पृथग्भावेन च स्त्रीधने। तत्र हि तस्या एव केवलायाः स्वाम्यम्। अन्ये तु सौदायिकमेव न संबन्धस्त्रीधनम्। तत्र हि तस्याः स्वातन्त्र्यम्। 'सौदायिकं धनं प्राप्य स्त्रीणा स्वातन्त्र्यमिष्यते।' इतरे तु भक्तभूषाद्युपयोगिनः आन्वाहिकाद्धर्तृदत्ताद्धनादुपयुक्तशेषमेव। युवत्या स्वीकृतं यौतकमाहुः। कुमारीग्रहणाद् या नास्ति कुमारी तस्या नास्ति। एवकारस्य च प्रसिद्धानुवादकत्वात्प्रकरणबाधकत्वम्। अतश्च पुत्रिकाविषयमपि यौतकम्। एव च गौतमः–'स्त्रीधनं तदपत्यानाम्' इत्युक्त्वाऽऽह 'दुहितृणामप्रत्तानामप्रतिष्ठितानाचे'ति। तत्राप्रतिष्ठिता या ऊढा अनपत्या निर्धना भर्तृगृहे याभिः प्रतिष्ठा न लब्धा। मेधा.

(२) यौतक परिणयनलब्ध, यु मिश्रण इति धातोर्युत इति पद मिश्रतावचन, मिश्रता च स्त्रीपुरुषयोरेकशरीरता विवाहाच्च तद्भवति 'अस्थिभिरस्थीनि मासैर्मांसानि त्वचा त्वचमि'ति श्रुतेः, अतो विवाहकाले लब्धं यौतकम्। दा.८२

(३) यौतकं पृथग्धनम्। अप.२।११७

(४) यौतक विवाहकाले पित्रादिभिः स्त्रियै यद्दत्तं धनम्। व्यक.१४८

(५) यौतक स्त्रीधनम्। कुमारीभागोऽपुत्रकन्याभागः सत्यपि पुत्रे सत्यामपि पुत्रिकाया तत्पुत्रे च। दौहित्र इति दौहित्रः पुत्रिकापुत्रः। अपुत्रस्य मातामहस्य अखिलम्। स तु ततः कुमारीभागकर्म। एतेन पुत्रिकाविषयादन्यत्रापि मातुः स्त्रीधन कुमारीणामेव, तस्मिन् संगृहीते पितृवित्तात् स्वस्वाशचतुर्थभागदान तासा न कर्तव्यम्। याज्ञवल्क्यस्मृतौ चतुर्थांशदानस्य भगिनीसंस्कारत्वेन श्रवणात् तस्य च मातृयौतकेनैव सिद्धेरिति ग्राह्यम्। मवि.

(६) पितृकुललब्धं चाऽप्रत्ता एव दुहितरः। उ.२।१४।२

(७) अन्यत्किञ्चिन्मातृकं ऋक्थं अप्रत्तानामेव न पुनः सर्वासा सहोदरप्रजाना भवतीत्याह स एव–'मातुस्तु' इति। यौतकं समानोपवेशनप्रत्यासन्नयोर्वधूवरयोर्विवाहादौ येनकेनचित्समर्पितं तद्वधूवरयोर्देयम्। 'युतयोर्यौतकं मतम्' इति निघण्टुकारैरुक्तत्वात्। अन्योन्यार्चितयोर्वधूवरयोर्यद्देय तद्धन युतयोरिति यौतकमिति व्युत्पत्त्या यौतकधनमित्यर्थः। देवस्वामी तु पितृगृहाल्लब्ध भर्तृगृहाल्लब्धापेक्षया पृथग्धनतया यौतकं मातृधनं नेत्याह। तच्चिन्त्यम्। पक्षद्वयस्यापि कल्पनामात्रत्वात्। कुमारीणामनेकत्वे 'सम स्यादश्रुतत्वादि'ति न्यायेन यौतकविभागः कार्यः। भागविशेषास्मृतेः। स्मृच.२८५

(८) हलायुधस्तु यौतक शाकसूपार्थ स्त्रियै दत्तं तया स्वकौशलेन विशेषित, तत्र न भ्रातृणामूढाना च भागः, अनपत्याना दुर्भगाणामूढानाञ्च सम एवाश इति। विर.५१७

(९) यौतकाख्यं मातृधनमनूढानामभावे च दुहितृणा अप्रत्ताभिरेव दुहितृभिर्ग्राह्यं न पुत्रैः न च प्रत्ताभिः। तथा च स एव–मातुस्तु यौतकमिति। रत्न.१६३

(१०) यौतकपद यु मिश्रणे इत्यस्मात् सिद्धं, मिश्रता च स्त्रीपुसयोर्विवाहाद्भवति। 'यदेतत् हृदयं तव तदस्तु हृदय मम, यदिदं हृदयं मम तदस्तु हृदय तवे'ति मन्त्रलिङ्गात्। दात.१८६

(११) यौतकं तु कुमारीणामेव मातृधनम्। न पुत्राणा नापि प्रत्तदुहितृणामित्याह मनुरेव–मातुस्त्विति। भर्तृगृहलब्धात्पृथग्धनतया पितृगृहलब्धं मातृधनं यौतकम्। यौतकशब्दस्यामिश्रणमप्यर्थः। यु मिश्रणामिश्रणयोरिति धातुपाठात्, युतसिद्धाविति प्रयोगाच्चेति देवस्वाम्याह। तदसत्। व्यप्र.५४८

अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत्।
पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत्*॥

व्यक.१४८; गौमि.२८।२०, उ.२।१४।२, स्मृच.२८५; विर.५१७; पमा.५५२, स्मृसा.६३ तक (तुकं); रत्न.१६३; विचि.२२२ स्तु (श्व) तक (तुकं); व्यनि.; स्मृचि.२९ (=) स्मृसावत्; दात.१८६ विचिवत्; चन्द्र.८५; वीमि.२।११७ दावत्; व्यप्र.५४८; व्यम.७१ यत्स्यात् (यस्मात्); विता.४५१ स्मृसावत्: ४५२ विचिवत्; बाल.२।१३५ (पृ. २०७), २।१४५ (पृ.२६१); सेतु.५८ विचिवत्; संग्रु.१३६; विच.११२ विचिवत्.

* व्यम. व्याख्यानं 'जनन्यां संस्थितायां' इति मनुवचने (पृ.१४३५-६) द्रष्टव्यम्।

(१) मस्मृ.९।१९५; व्यक.१४८; मवि. त्तायाः (त्ताया); स्मृच.२८४ दत्त (दित्त); विर.५१६; रत्न.१६३;

(१) अन्वाधेयं विवाहादुपरि भर्तृबन्धुभिर्दत्तं, पत्या प्रीतेन रतिकालादन्यदा तदुभय स्त्रीधनत्वाभावेऽपि पत्यौ जीवति मृताया अपत्यस्यैव। विशेषस्तु स्त्रीधनास्त्रीधनयोः स्त्रीधने दानादिस्वाम्यं स्त्रिया न त्वन्यत्रेति। मवि.

(२) अन्वाधेयं विवाहादूर्ध्वं स्त्रिया भर्तृकुलात् पितृकुलाच्च लब्धम्। यदन्वाधेय, यच्च प्रीतेन पत्यैव दत्तं, तद्द्विविधं स्त्रीधन धनस्वामिन्या मृताया अनन्तरक्षणवर्तिन्याः स्त्रीपुसप्रजायाः स्व भवेदित्यर्थः। एतदुक्त भवति। सप्रजःस्त्रीधन स्वामिमरणानन्तरक्षणजीवनशालित्वेऽपि न पत्युर्भवति, किं तु तच्छालिन्याः प्रजाया इति। एव चास्मादिदमवगम्यते। धनस्वामिन ऊर्ध्वं धनागमे धनस्वामिमरणानन्तरक्षणजीवनक्रियैव धनग्रहणाधिकारितया धर्मशास्त्रप्रतिपादितधनस्य स्वत्वापत्तिकारणमिति। तेन यत्र यत्र धनस्वामिन ऊर्ध्वमेव धनागमनं अपुत्रस्वर्यातधनागमादौ तत्र तत्र ऋक्थग्राहिणः स्वत्वापत्तौ इदमेव कारण कल्प्यम्। प्रजाया इति सामान्येनाभिधानात्। तत्र स्त्रीपुसप्रजाया उक्तद्विविधऋक्थग्रहणाधिकारः समसमये जायते इति स्वत्वापत्तिरपि तदैव, न पुनः पूर्वं भगिनीना तदभावे भ्रातृणा च भवतीति मन्तव्यम्। विभागोऽत्र भ्रातृभगिनीकर्तृको विज्ञेयः। × स्मृच.२८४

(३) विवाहादूर्ध्वं भर्तृकुले पितृकुले वा यत्स्त्रिया लब्धं भर्त्रा च प्रीतेन दत्त, यदध्यग्न्यादि पूर्वश्लोक उक्तं तद्भर्तरि जीवति मृतायाः स्त्रियाः सर्वधनं तदपत्याना भवति। ममु.

(४) एतच्च वचन वृत्ताया जीवत्यपि पत्यौ एवविधधनद्वये पतिसंबन्धनिराकरणार्थमारब्धमिति हलायुधः। विर.५१६

(५) तर्हि स्त्रीधनापहारोऽपत्याना प्राप्त इति चेन्न। अपत्याना स्त्रीधनस्य वाचनिकत्वादित्याह—अन्वाधेयमिति। मच.

(६) प्रजायाः दुहितृणाम्। भाच.

(७) मिताटीका—आद्यचेनोक्तषड्विधसंग्रहो द्वितीयचेन तदन्यसर्वसग्रहोऽन्यथा न्यूनतापत्तेः। बाल.२।१४५ (पृ.२६३)

धर्मविवाहोढाऽप्रजस्त्रीधनविभागः

ब्राह्मादैवार्षगान्धर्वप्राजापत्येषु यद्धनम्।
अप्रजायामतीतायां भर्तुरेव तदिष्यते॥

(१) अस्याः स्याद्दत्तमिति पराचीन पूर्वत्रानुषज्यते तेन विवाहेषु यद्धनं दत्तमिति संबन्धात् वैवाहिकधनमात्रप्रतीतेर्न यावद्धनविषयम्। *दा. ८८

(२) तत्र गान्धर्वविवाहोढाया धनस्य भर्तृगामितया विकल्प इति मन्तव्यम्। यतः स एवाऽऽह—'यत्तस्यै स्याद्धनं दत्त विवाहेष्वासुरादिषु। अतीतायामप्रजसि मातापित्रोस्तदिष्यते॥' अप.२।१४५

(३) ब्राह्मादिनोढाया यद्धनं स्त्रीधनास्त्रीधनरूपं अप्रजायामनपत्याया वृत्ताया भर्तुरेव, प्रजाया तु सत्यां प्रजाया एव। मवि.

(४) उक्तपञ्चविधविवाहेषु सस्कृताया भार्याया यद्धनं तत्तस्या दुहित्रादिपौत्रान्तधनहारिसततेरभावे सति अतीताया भर्तुरेवेष्यते न पुनर्भ्रात्रादीना बन्धूनामित्यर्थः। × स्मृच.२८६

(५) ब्राह्मादिषु पञ्चसु विवाहेषूक्तलक्षणेषु यत्स्त्रियाः षड्विध धन तदनपत्याया मृताया भर्तुरेव मन्वादिभिरिष्यते। + ममु.

× व्यप्र., नन्द. स्मृचगतम्।

व्यनि. धेय (देय) चैव यत् (चैव तत्); **मच.** मवित्; **व्यप्र.५४७; व्यम.७०; विता.४५०** अन्वाधेय (श्वश्वादिभिः); **बाल.२।१४५** [पृ.२६३, २६५ . २६८ च (तु) चैव यत् (वा पुनः)पू.]; **समु.१३६** स्मृचवत्; **नन्द.** मवित्.

* विर., दात., नन्द., भाच. दागतम्।

× सवि. स्मृचगतम्। + **मच.** ममुगतम्।

(१) **मस्मृ.**९।१९६ द्धनम् (द्रसु); **दा.८७; अप.** २।१४५ द्धनम् (द्धवत्) अप्रजायामतीतायां (अतीतायामप्रजसि); **व्यक.१४९** अप्रजायामतीतायां (अतीतायामप्रजसि); **स्मृच.** २८६ व्यकवत्; **विर.**५१९ व्यकवत्; **स्मृसा.**६४ व्यकवत्; **पमा.**५५३; **रत्न.**१६३ द्धनम् (द्रसु) शेष व्यकवत्; **विचि.** २२३ व्यकवत्; **व्यनि.; दात.**१८६; **सवि.**३८५ व्यकवत्; **चन्द्र.८६** व्यकवत्; **वीमि.**२।१४५ व्यकवत्, उत्त.; **व्यप्र.५५२; व्यउ.१५१** भर्तुरेव तदिष्यते (बान्धवास्तदवामुयुः); **व्यम.७२** व्यकवत्; **विता.४६२; बाल.** २।१४५ (पृ.२५३,२६३) मस्मृवत्; **सेतु.५९; समु.१३६** व्यकवत्; **विच.११४** व्यकवत्.

(६) भर्तृगामि न पुनर्मात्रादिगामीत्यर्थः । ×पमा.५५३

(७) इति मनुवचनाद्गान्धर्वविवाहे भर्तृपित्रोः समो भाग इति ध्येयम् । वीमि.२।१४५

(८) ब्राह्मादिविवाहोढाया धनमनपत्याया भर्तुर्भवति । तदभावे भर्तुः प्रत्यासन्नानाम् । स्वामिप्रत्यासत्तेर्भर्त्रैवान्तराये भर्तृप्रत्यासत्तेरेव पुरस्करणीयत्वात् । *व्यप्र.५५२

(९) यस्य तु क्षत्रियादेर्गान्धर्वोऽपि धर्म्यस्तस्य तदूढाधनमपि भर्तुरेव । तथा च मनुः—अन्वाधेयमिति (मस्मृ.९।१९५–१९६) । व्यम.७२

(१०) भर्त्रभावे भर्तुः सबन्धिभिः प्रत्यासन्नैः पत्नीदुहितरश्चेत्यादिभिराप्यते । भर्तुः पत्नी सपत्नी दुहिता सपत्नीकन्येति विज्ञानेश्वरः । भर्तुरिति तृतीयार्थे षष्ठीति माधवः । = विता.४६२

आसुरादिविवाहोढाऽप्रजस्त्रीधनविभागः

यत्स्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु ।
अतीतायामप्रजसि मातापित्रोस्तदिष्यते ॥

(१) मातापित्रोर्न भर्तुः । मवि.

(२) यत्पुनः आसुरराक्षसपैशाचेपूक्तलक्षणेषु विवाहेषु यस्त्रियाः षड्विध धनमपि तदनपत्याया मृताया मातापित्रोरिष्यते । +ममु.

(३) द्वन्द्वे मातृशब्दस्य पूर्वनिपातेन मातुः प्राथम्यमवगमितम् । कन्याधने च मातुरभावे पितुरधिकारश्रवणा दत्रापि तथैवौचित्यात् । व्यप्र.५५२

× शेष स्मृचगतम् । * व्यउ. व्यप्रगतम् ।
= एतत्पराशरमाधवे नोपलभ्यते । शेष पूर्ववीकासु गतम् ।
+ पमा ममुगतम् ।

(१) **मस्मृ.**९।१९७ अतीतायामप्रजसि (अप्रजायामतीतायां); **दा.**८७-८८ प्रजसि (प्रजाया); **अप.**२।१४५ स्वस्याः (स्वस्यै); **व्यक.**१४९; **विर.**५१९; **स्मृसा.**६४, **पमा.**५५३ मस्मृवत्; **दीक.**४६ यत्त्व (यत्त); **रत्न.**१६४ स्वस्याः (स्वस्यै); **विचि.**२२३ दत्त (किञ्चित्); **स्मृचि.३०** बृहस्पतिः; **दात.**१८६ यत्त्व (यत्त) शेषं दावत्; **चन्द्र.८६**; **व्यप्र.५५२**; **व्यउ.१६२** यत्त्वस्याः (यत्पैत्र्यं) शेष दावत्; **व्यम.७२** रत्नवत्; **विता.**४६२ अपवत्; **बाल.**२।१४५ (पृ २६३) मस्मृवत्; **सेतु.६०** यत्त्व (यत्त); **समु.१३६** स्वस्याः (स्वस्यै); **विच.११५** दावत्.

अप्रजसापत्नमातृधनविभागः

[1]स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन ।
ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत् ॥

(१) तदभावे तदपत्यम् । यथाह मनुः—स्त्रियास्त्विति । ब्राह्मणीग्रहणमुत्तमजात्युपलक्षणम् । अतश्चानपत्यवैश्याधनं क्षत्रिया कन्या गृह्णाति । *मिता.२।१४५

(२) अत्र पित्रा दत्तमिति विशेषणात् विवाहसमयादन्यत्रापि यत् पितृदत्तं तत् कन्याया एवेत्येतदर्थं, ब्राह्मणीपद चानुवादः । यद्वा ब्राह्मणीपदस्य चानर्थक्यभयात् क्षत्रियादिस्त्रीणामनपत्याना पितृदत्तं धन सपत्नी दुहिता ब्राह्मणीकन्या हरेत् न पुनरप्रजःस्त्रीधन भर्तुरिति वचनावकाश इति वचनार्थः । +दा.८३

(३) पित्रेत्युपलक्षणम् । कन्या सापत्नी, ब्राह्मणीति विशेषणोपरोधात् । अप.२।११७

(४) पित्रा दत्त, स्त्रियाः पित्रा, तद्ब्राह्मणीकन्या हरेत्, न तु भ्रातृणा विभागः । तदभावे, तस्याः स्त्रिया अपत्यस्य । कन्येति दुहितृमात्रपरम् । एव च ब्राह्मणपरिणीतक्षत्रियाधनमपि तत्पितृदत्तं ब्राह्मणकन्याया एवेत्युक्त भवति । मवि.

(५) क्वचित्तु भर्तृपितृभ्रात्रादिसद्भावेऽपि सपत्नीनासतानविशेषस्य उपमातृधनभागित्वमाह मनुः—स्त्रियास्त्विति । पित्रा दत्तमिति वदन् पूर्वोक्तधनहर्तृभर्तृपितृप्रभृतिषु सत्स्वपीति दर्शयति । भर्तृविजातीयस्त्रीधन तत्सतानाभावे सति भर्तृसजातीयस्त्र्यन्तरतत्कन्या तत्सततिर्वा हरेदित्यर्थः । एव च भर्तृसजातीयानेकस्त्रीषु सतानशून्याया मृताया धन स्त्र्यन्तरकन्या तत्सततिर्वा न हरेत् किं तु ब्राह्मादिषु भर्तैव । शेषेषु धनदातैवेत्यनुसधेयम् । स्मृच.२८७

* पमा , सवि., व्यप्र., व्यउ. मितागतम् ।
+ दात. दागतम् ।

(१) **मस्मृ.**९।१९८ क., ग., घ पुस्तकेषु, यास्तु (या तु); **मिता.**२।१४५; **दा.८३**; **अप.**२।११७,१४४; **व्यक.**१४८; **स्मृच** २८७, **विर.**५१८; **पमा.**५५२; **रत्न.**१६३; **मपा.**६६७-६६८ यास्तु (याश्च); **दात.**१८६; **सवि.१८३**; **व्यप्र.**५४९; **व्यउ.१६३** (=) यास्तु (याश्च) पित्रा (मात्रा); **व्यम.७१**; **विता.**४५३, ४६४; **सेतु.५७**; **समु.१३७**; **विच.११७.**

(६) ब्राह्मणस्य नानाजातीयासु स्त्रीषु क्षत्रियादिस्त्रियामनपत्यपतिकाया मृतायां, तस्याः पितृदत्त धन सजातिविजातिसापत्न्यकन्यापुत्रसद्भावेऽपि ब्राह्मणी सापत्नेयी कन्या गृह्णीयात् । तदभावे तदपत्यस्य तद्धन भवेत् । ममु.

(७) यदा भर्ता स्वापत्यानि च न सन्ति, सपत्नाश्च नानाजातीयाः तद्दुहितरश्च सन्ति, तदा ब्राह्मणीकन्या पितृदत्तं मातृसपत्नीधनमर्हति, तदभावे तदपत्यं वेत्यर्थः। पित्रा दत्तमिति स्त्रीधनमात्रोपलक्षणमित्यसहायमेधातिथिरिति प्रकाशकारः। विर.५१८

(८) ब्राह्मणीकन्या तु सपत्नीमातुरपि धन गृह्णीयादित्याह मनुः— स्त्रियास्त्विति । वाकारश्चार्थे । तेन विभज्येति लभ्यते । ब्राह्मणीपदं समोत्तमजातिकन्योपलक्षकमिति केचित् । मान तु तत्र चिन्त्यम् । व्यम.७१

(९) तदपत्य पुत्रः। कन्यापत्यमित्यन्ये। विता.४५३

(१०) सापत्नपुत्रः हीनजातिस्त प्रत्याह । स्त्रियाः क्षत्रियादिस्त्रियाः यद्वित्त कथचन विवाहे पित्रा दत्त तद्धनं ब्राह्मणकन्या या पूर्व ब्राह्मणी विवाहिता हरेत् गृह्णीयात् । वा पक्षान्तरम् । तस्या अपत्यस्य तद्धनं भवेत् । भाच.

याज्ञवल्क्यः

मातृधनविभागः

मातुर्दुहितरः शेषमृणात् ताभ्य ऋतेऽन्वयः ॥

(१) यथा च पितुः पुत्राः समाशतो धनभागिनः, तथैव मातुर्दुहितरः । किन्तु शेषमृणाद् विभजेरन् । न स्वधनाया अप्यृण दद्युः। पुत्राणा तु मातृसंबन्धः किं नास्त्येव । न, नास्ति । किन्तु ताभ्यो दुहितृभ्य ऋते अभावे । अन्वयः पुत्रा इत्यर्थः । अन्ये तु ताभ्यो दुहितृभ्य ऋते तदीय एवान्वय इति वर्णयन्ति । तत्त्वयुक्तम् । 'न जामये तान्वो रिक्थमारैक' इति मन्त्रवर्णात् । पितृधनाभिप्राय तदिति चेत् । न । 'यदी मातरो जनयन्त वह्निम्' इति मातृसम्बन्धवचनात् । यदि मातरः स्त्रिय पुत्र च जनयन्ति । वह्निर्वहनयोग्यः पुत्रः । तत्र पुत्र एव दायादो न स्त्र्यपीत्यर्थः । अस्मादेव च वह्निवचनादुद्वाहासमर्थस्य क्लीवादेर्द्रव्याभावसिद्धिः । दुहितृसद्भावेऽपि तर्हि पुत्राणामेवास्तु । न । 'मातुर्दुहितर' इति स्मृतेः, स्मृत्यन्तरान्मन्त्रवर्णानुसाराच्च दुहितृस्वरूपार्थतैवेत्यतस्तदभावे पुत्रगाम्येवेति स्थितम् ।

विश्व.२।१२१

(२) मातापित्रोर्धन सुता विभजेरन्नित्युक्त तत्र मातृधनेऽपवादमाह—मातुरिति । मातृधन दुहितरो विभजेरन् । ऋणाच्छेष मातृकृतर्णापाकरणावशिष्ट अतश्चर्णसम न्यून वा मातृधन सुता विभजेरन्नित्यस्य विषयः । एतदुक्त भवति—मातृकृतमृण पुत्रैरेवापाकरणीयं न दुहितृभिः । ऋणावशिष्ट तु धन दुहितरो गृह्णीयुरिति । युक्त चैतत् । 'पुमान्पुसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः' इति स्त्र्यवयवाना दुहितृषु बाहुल्यात् स्त्रीधन दुहितृगामि । पितृधनं पुत्रगामि पित्रवयवाना पुत्रेषु बाहुल्यादिति । तत्र च गौतमेन विशेषो दर्शितः—'स्त्रीधन दुहितृणामप्रत्तानामप्रतिष्ठिताना च' इति । अस्यार्थः—प्रत्ताऽप्रत्तासमवायेऽप्रत्तानामेव स्त्रीधनम् । प्रत्तासु चाप्रतिष्ठिताप्रतिष्ठितासमवायेऽप्रतिष्ठितानामेवेति । अप्रतिष्ठिता निर्धनाः । दुहित्रभावे मातृधनमृणावशिष्टं को गृह्णीयादित्यत आह—ताभ्य इति । ताभ्यो दुहितृभ्यो विना दुहितृणामभावे अन्वयः पुत्रादिर्गृह्णीयात् । एतच्च—'विभजेरन्सुताः पित्रोरूर्ध्वम्' इत्यनेनैव सिद्ध स्पष्टार्थमुक्तम् । × मिता.

(३) दुहितर इति पदं प्रथमान्त ताभ्य इति पदं च पञ्चम्यन्तम् । अन्वयपदेन षष्ठ्यन्तान्वययोग्येन नान्वीयते, किन्तु व्यवहितमपि मातुरित्येव पदमन्वयि । +दा.८४

(१) **यास्मृ.**२।११७; **अपु** २५६।४ न्वयः (र्पयेत्); **विश्व.**२।१२१; **मिता.**२।११७, २।१४५; **दा** २५,५८,८२; **अप.**; **व्यक.**१४८ णात् ताभ्य (णादिभ्य); **स्मृच.**२८५; **विर.**५१७; **पमा.**४९४ : ४९९ द्वितीयपादः : ५५०; **मपा.** ६६५; **विचि.**२२२; **व्यनि.** ताभ्य (ताभ्या)ऽन्वयः(स्वयम्); **स्मृचि.**२९; **नृप्र** ३६, **सवि.**३६२, **चन्द्र.**८६; **मच.** ९।२१८; **वीमि.**२।११७,१४३; **व्यप्र.**५४८; **व्यउ.** १६०; **व्यम.७१**; **विता.**४४९; **राकौ.**४४८; **सेतु.**५९; **समु.**१३६; **विच.**११३.

× पमा., व्यनि., विता. मितागतम् । व्यवहारप्रकाशे मिता.व्याख्यान, स्मृच.व्याख्यान चाविरोधेनोपन्यस्तम् । व्यउ. प्रथमपादव्याख्यान मितागतम् ।

+ एतद्वचनं (दा.८२) यौतकद्रव्यविषयमित्युक्तम् ।

(४) मातुस्तु धनमृणापाकरणे कृते यदवशिष्टं तत्तस्या दुहितरो विभजेरस्ताभ्य ऋते दुहितॄणामभावे तदन्वयो दुहित्रन्वयः । दुहितॄणा तदन्वयस्य वाऽ(चा)-भावे पुत्रा एव मातृधन विभजेरन् । गौतमस्तु(स्व?)-प्रत्तानामपि दुहितॄणामप्रतिष्ठिताना मातृधनग्राहित्वमाह—'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठिताना च' इति । एव च सति प्रत्तासु प्रतिष्ठितासु दुहितृषु पुत्राणामपि मातृ-धनेऽधिकारो भवति । +अप.

(५) अन्वयस्तत्पुत्रपौत्रादिः । व्यक.१४८

(६) मातृकृतर्णापाकरणावशिष्टं मातृक ऋक्थं मातु-रूर्ध्वमप्रत्ता अप्रतिष्ठिता दुहितरो विभजेरन्नित्यर्थः । एवं-भूतदुहित्रभावेऽप्याह स एव—'ताभ्य ऋतेऽन्वयः' इति । एतदेव नारदः स्पष्टयति—'अभावे दुहितॄणा तु तद्भर्त्र-न्वय एव च' इति । अप्रत्तदुहित्रन्वयासभवात् प्रत्त-दुहित्रन्वय इति पारिशेष्यादवगम्यते । स्त्रीगामिधनत्वा-त्स्त्रीरूपान्वय इति च गम्यते । प्रत्तदुहितॄणा स्त्रीरूपा-न्वयाभावे दौहित्राणा यथा स्यादिति सामान्येन तद-न्वय इत्युक्तम् । —स्मृच.२८५-२८६

(७) ब्राह्मादिविवाहविषयमेतत् । × विर.५१७

(८) अत्रादौ गृह्णीयादुहिता ततस्तत्संततिरित्यय-मर्थः । * मपा.६६५

(९) एतच्च 'मातुर्दुहितरः शेषमि'ति वचनमन्यथा व्याकुर्वन्ति भारुचिप्रभृतयः—पुत्राभावे मातृधन दुहितरो विभजेरन् । तदभावे स्वान्वयः पितृव्यादिः गृह्णीयात्, 'दायादा ऊर्ध्वमाप्नुयुरि'ति स्मृतेः । ऊर्ध्व धनस्वामिनः पुत्रिकादेरभाव इत्यर्थः । दायादाः धनस्वामिपुत्रिकापितृव्यादयः । अत एवोक्त संग्रहकारेण 'पितृद्वाराऽऽगत द्रव्यं मातृद्वाराऽऽगतं च यत् । कथितं दायशब्देन तद्विभागोऽधुनोच्यते ॥' इति । मातृद्वाराऽऽ-गतद्रव्यस्य दायशब्दवाच्यत्वात् दायार्हत्वं पुत्राणामेव । न तु स्त्रीणा, 'तस्मात्स्त्रियो निरिन्द्रिया अदाया(दीः) दाः' इति श्रुतेः । 'स्त्रीणा दायविभागो नास्ति निरिन्द्रि-यत्वादि'ति गौतमस्मृतेश्च । भ्रातृसद्भावे दुहितॄणा मातुर-लङ्कारादिक भ्रातृणामिच्छया यत्किंचित् देयं तदेव ग्रहीतव्यं नान्यदिति प्रतिपादयन्तः । *सवि.३६३

(१०) मातुर्धनं तद्दुहितरोऽपि भ्रातृभिः समं मात्र-र्णनिस्तरावशिष्टं चेत्तदा गृह्णीयुः, ऋण पुत्रा एव दद्युः । दुहितृभ्य ऋते दुहितॄणामभावेऽन्वयो दुहितृपुत्रौ निज-मातृलभ्यमश लभेयाताम् । वीमि.

स्त्रीणां आधिवेदनिक धनम्

अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम् ।
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकीर्तितम् ॥

(१) यस्या उपरि परिणीतं, तस्यै यत् परिणयने द्रव्य गत तत्सम देय, यदि पूर्व स्त्रीधन न दत्तम् । अथ तु दत्त, ततोऽर्ध देयम् । एतच्चाधिवेदननिमित्तम-न्तरेणाधिविन्नाया द्रष्टव्यम् । विश्व.२।१५२

(२) आधिवेदनिकं स्त्रीधनमुक्तं तदाह—अधिविन्न-स्त्रियै इति । यस्या उपरि विवाहः साऽधिविन्ना, सा चासौ स्त्री चेत्यधिविन्नस्त्री तस्यै अधिविन्नस्त्रियै आधिवेदनिक-मधिवेदननिमित्त धन सम यावदधिवेदनार्थं व्ययीकृतं तावद्दद्यात् । यस्यै भर्त्रा श्वशुरेण वा स्त्रीधन न दत्तम् । दत्ते पुनः स्त्रीधने आधिवेदनिकद्रव्यस्यार्ध दद्यात् । अर्धशब्दश्चात्र समविभागवचनो न भवति । अतश्च यावता तत्पूर्वदत्तमाधिवेदनिकसमं भवति तावदेय-मित्यर्थः । +मिता.

+ विश्वरूपोपन्यस्तान्यपक्षगतम् । विचि. अपगत, विरगत च । चन्द्र. स्वमतमपगतम्, बालरूपमत मितागतम् ।

÷ अपवद्भावः । × शेष अपगतम् ।

* शेषं मितागतम् ।

* स्वमत मितागतम् ।

+ मपा., व्यनि., सवि., व्यम. मितागतम् । स्मृच. मिता-गतं अपगतं च ।

(१) **यास्मृ.**२।१४८; **अपु.**२५६।३५; **विश्व.**२।१५२ यस्यै (यस्या); **मिता.**; **दा.**६७ दद्यादा (देयमा) यस्यै (यासां) कीर्तितम् (कल्पयेत्); **अप.** दद्यादा (देयमा); **स्मृच.**२४५, **विर.** ५२३ अपवत्; **पमा.**४८७ (दत्ते त्वर्धं प्रकल्पयेत्) एतावदेव : ५०२ चतुर्थपादः, स्मरणम्; **मपा.**६७० कीर्तितम् (कल्पयेत्); **रत्न.**१६१; **विचि.**२१६; **व्यनि.** त्वर्धं प्रकीर्तितम् (त्वर्ध प्रकल्पयेत्); **नृप्र.**३६ (दत्ते स्वर्धाशहारिणी) एतावदेव; **दात.** १६६ अपवत्; **सवि.**३७९ प्रथमपादः :३८६; **वीमि.**२।१४८ दत्ते (दत्त): २।१४३ प्रथमपादः; **व्यप्र.**५४३-५४४ उत्तरार्ध दावत्; **व्यउ.**१'५९; **व्यम.**४४ पमावत्: ६९व्यप्रवत्; **विता.** ३०५ निक (निके) शेष व्यप्रवत् : ४४० यस्यै (यस्या);

(३) तच्च समं, केनेत्यपेक्षिते प्रकृतत्वादधुना परिणीतायै यद्दत्तं तेनेति गम्यते । +अप.

विविध स्त्रीधनम्

[1]**पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम् ।**
आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितम् ॥

(१) किं पुनः स्त्रीधनम् । उच्यते—पितृमातृसुतेति । अध्यग्न्युपागत विवाहकाले लब्धम् । आधिवेदनिक अधिविन्नायै पत्न्यै प्रत्तम् । अधिवेदनार्थं वा । चशब्दात् स्मृत्यन्तरोक्तमलङ्कारादि । एतत् स्त्रीधनमित्यवसेयम् । विश्व.२।१४७

(२) विभजेरन् सुताः पित्रोरित्यत्र स्त्रीपुंधनविभागं संक्षेपेणाभिधाय पुरुषधनविभागो विस्तरेणाभिहितः । इदानीं स्त्रीधनविभागं विस्तरेणाभिधास्यंस्तत्स्वरूपं तावदाह—पितृमातृपतीति । पित्रा मात्रा पत्या भ्रात्रा च यद्दत्तं, यच्च विवाहकालेऽग्नावधिकृत्य मातुलादिभिर्दत्तं, आधिवेदनिक अधिवेदननिमित्त 'अधिविन्नस्त्रियै दद्यात्' इति वक्ष्यमाणम् । आद्यशब्देन रिक्थक्रयसविभागपरिग्रहाधिगमप्राप्त एतत्स्त्रीधन मन्वादिभिरुक्तम् । स्त्रीधनशब्दश्च यौगिको न पारिभाषिकः । योगसंभवे परिभाषाया अयुक्तत्वात् । *मिता.

(३) यच्च द्वितीयस्त्रीविवाहार्थिना पूर्वस्त्रियै पारितोषिक धन दत्त तदाधिवेदनिक अधिकस्त्रीलाभार्थत्वात्तस्य । दा.७५

(४) चशब्द आद्यर्थः । तेन च स्त्रीधनान्तरपरिग्रहः । तद्यथा—'कार्याः पत्न्यः समांशिकाः' । 'माताऽप्यश सम हरेत्' । 'स्वस्रादंशाच्चतुर्भागम्' । 'मातुः परिणाह्य स्त्रियो विभजेरन्' । *अप.

(५) मिताटीका—षड्विध स्त्रीधन स्मृतमिति मनुवचनबलान्मनुपरिगणितेष्वेव षट्सु अश्वकर्णादिवत्स्त्रीधनशब्दो अयौगिक इति केचन वर्णयन्ति । तदसाधु । वचनान्तरविरोधात् शिष्टाचारविरोधादलब्धात्मिकाया रुढेर्योगस्य प्राबल्याच्च यौगिक एवेत्यनेनाभिप्रायेणाह । स्त्रीधनशब्दश्च यौगिक इति । सुबो.

(६) स्त्रीधनं च पारिभाषिकमेव न सर्व, कार्यकाले एव सज्ञापरिभाषयोरुपयोगोऽन्यथा तद्वैयर्थ्यात्, विनिगमनाविरहेण च सर्वत्र तयोरविशेषात् । *चन्द्र.८६

(७) एतत्सर्वं स्त्रीधनं सौदायिक परिकीर्तितम् । आद्यपदेन भर्तृमरणात्सक्रान्तस्य धनस्य संग्रहः । चकारेण तत्परिगृहीतवसनालङ्कारादिसमुच्चयः । एवकारेण भर्त्रसाधारणस्वत्वस्य धनस्य व्यवच्छेदः । *वीमि.

(८) स्त्रीधनशब्दश्चायं यौगिकः स्त्रीस्वामिक धनमिति । ननु च क्वचित् स्त्रीधनत्वनिषेधोऽनुपपन्न एव सति स्यात् । न हि स्त्रीस्वामिकत्वं तत्र निषेद्धुं शक्यते । बाधात् । यथाह कात्यायनः— 'तत्र सोपधि यद्दत्त यच्च योगवशेन वा । पित्रा भ्रात्राऽथवा पत्या न तत्स्त्रीधनमुच्यते ॥' इति । उपधिरुत्सवादावेवेदमस्य दत्तं त्वया धार्यमलङ्कारादि नान्यदेति नियमस्तत्पूर्वक दत्तं सोपधि । योगो वचनं दायादाना, कन्यायै दत्तमिदं तद्धन कथ विभाज्यमिति । शिल्पप्राप्त सख्यादिभ्यः प्रीत्या प्राप्त तदपि न स्त्रीधनमित्याह स एव— 'प्राप्त शिल्पैस्तु यत्किंचित्प्रीत्या चैव यदन्यतः । भर्तुः स्वाम्य सदा तत्र शेष तु स्त्रीधनं स्मृतम् ॥' इति । पारिभाषिकत्वे भ्रात्रादिदत्तत्वेन प्राप्त स्त्रीधनत्व प्रतिषिध्यते । तेनैतस्माद्भिन्नमेव पित्रादिदत्त शिल्पादिप्राप्तमभिन्न वा स्त्रीधनमिति परिभाष्यते इति चेत्, उच्यते । नात्र स्त्रीधनत्वनिषेधः । किन्तु तत्कार्यविभागादिनिषेधः । अत एवोत्तरश्लोके तत्र भर्तुः स्वाम्यमित्युक्तम् । भर्तुस्तद्विनियोगे स्वातन्त्र्य न स्त्रिया इत्यर्थः । प्रथमश्लोके तु स्त्रीस्वत्वनिषेधोऽपि सभवति उपधियोगपदयोरुपा-

---

+ शेष मितागतम् । वीमि. अपगतम् ।

* स्मृच., पमा., सवि., व्यउ. मितागतम् ।

सेतु.७८-७९ अपवत्; **विभ.**५१ दावत्; **समु.**१२२ मपावत्; **विच.**५० यस्यै (यासाम्) शेष अपवत्.

(१) **याज्ञ्स्मृ.**२।१४३; **अपु.**२५६।३६ काद्य च (कं चैव); **विश्व.**२।१४७ पति (सुत) शेष अपुवत्; **मिता.**; **दा.**७५ अपुवत्; **अप.** विश्ववत्; **गौमि.**२८।२२ पति (सुत); **स्मृच.**२८० प्रथमपादत्रयम्, **विर.**५२३ काद्य च (क चापि); **पमा.** ५४६; **मपा.**६७०; **रत्न.**१६१ प्रथमपादत्रयम्; **व्यनि.** अपुवत्; **नृप्र.**३८; **सवि.**३७९; **चन्द्र.**८७ विरवत्; **वीमि.**; **व्यप्र.**५४१; **व्यउ.**१५९; **व्यम.**६८; **विता.**४४०; **राकौ.** ४५६ मातृपति (पतिसुत); **सेतु.**५१-५२ अपुवत्; **समु.**१३४; **विच.**१०७ काद्य च (क नाम).

* शेष मितागतम् ।

दानात्। तादृशदाने च स्वत्वाभावस्य प्रसिद्धत्वात्। 'योगाधमनविक्रीत योगदानप्रतिग्रहम्। यत्र चाप्युपधिं पश्येत्तत्सर्वं विनिवर्त्तयेत्॥' (मस्मृ.८।१६५) इति मनुवचनात्। 'भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्॥' (मस्मृ.८।४१६) इत्यपि वचनं भार्याविषये शिल्पादिप्राप्तपरमेव। एकमूलकल्पनालाघवात्। *व्यप्र.५४२-५४३

(९) मिताटीका—अग्नावधिकृत्येति। अग्निसनिधावित्यर्थः। एतेन विवाहकाले कन्यादानकालेऽग्निसनिधौ होमकाले चेति कातीयव्याख्यान कस्यचिदपास्तम्। किं चास्य तथात्वे पुरुषधनशब्दे स्त्रीपुरुषधनशब्दे मातृधनशब्दे पितृधनशब्देऽपि तथा वक्तव्यत्वापत्तेः। तद्वदत्रापि निर्वाहाच्च। सौदायिक धन प्राप्येत्यनेन योगस्यैव बोधनाच्च। न चैव पुरुषधनादिवदेतस्याप्यकथनमेवोचितमिति वाच्यम्। तस्या अस्वातन्त्र्येणार्जवाद्यनधिकाराद्धनाभावेन मातृधन दुहितृगामीत्यस्यासगतिनिरासाय मनूक्तस्त्रीधनषट्त्वस्य न्यूनतानिरासे तात्पर्यमिति सूचयितुं मूलकृतादिभिर्बहुभिर्मुनिभिर्बहूनि तान्युक्तानीति दिक्। बाल.

अप्रजस्त्रीधनविभागः

बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च।
अप्रजायामतीतायां बान्धवास्तद्वाप्नुयुः॥

(१) अत्र प्रविभागः—बन्धुदत्तमिति। पित्रादिदत्त बन्धुदत्तम्। आधिवेदनिकादि शुल्कम्। अन्वाधेयमन्वयभोग्यतया दत्तम्। एतच्चानपत्यायां मृतायां बान्धवाः सोदर्यभ्रातरो गृह्णीयुः। तथा च गौतमः—'भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुरि'ति। अस्माच्चोर्ध्वमेव मातुरयमाचार्योक्तकल्पः। विश्व.२।१२९

(२) किं च। बन्धुभिः कन्यायां मातृबन्धुभिः पितृबन्धुभिश्च यद्दत्त शुल्क यद्गृहीत्वा कन्या दीयते। अन्वाधेयक परिणयनादनु पश्चादाहित दत्तम्। उक्त च कात्यायनेन—'विवाहात्परतो यच्च लब्ध भर्तृकुलात्स्त्रिया। अन्वाधेय तु तद्द्रव्य लब्ध पितृकुलात्तथा॥' इति। स्त्रीधनं परिकीर्तितमिति गतेन सबन्धः। एव स्त्रीधनमुक्त तद्विभागमाह—अतीतायां इति। तत्पूर्वोक्त स्त्रीधनमप्रजसि अनपत्यायां दुहितृदौहित्रीदौहित्रपुत्रपौत्ररहितायां स्त्रियामतीतायां बान्धवा भर्त्रादयो वक्ष्यमाणा गृह्णन्ति।

*मिता.

(३) यत् पुनः परिणयानन्तरं पितृमातृभर्तृकुलात् स्त्रिया लब्ध धन तद्भ्रातृणामेव। तदाह याज्ञवल्क्यः—बन्धुदत्तमिति। बन्धुदत्तमिति मातापितृभ्यां यद्दत्त, अत एव तत्पुत्राश्च भ्रातरो बान्धवाः। तदाह वृद्धकात्यायनः— 'पितृभ्यां चैव यद्दत्त दुहितुः स्यावरं धनम्। अप्रजायामतीतायां भ्रातृगामि तु सर्वदा॥' अप्रजस्त्वमात्रनिमित्तत्वेन भ्रातुरधिकारावगतेः। सर्वदापदेन ब्राह्मादिपैशाचान्तविवाहितायां अप्रजसो धनं भ्रातृगाम्येव भवतीति विश्वरूपोक्तमादरणीयम्। स्थावरपदादण्डापूपन्यायादेवापरस्य धनस्य सिद्धिः। बन्धुदत्तपदेन कन्यादशाया यत् पितृभ्यां दत्त तदुच्यते। विवाहात् परतो लब्धधनस्यान्वाधेयपदेनोपात्तत्वात् विवाहकालीने च भर्तुः पित्रोर्वाधिकारात्। अन्वाधेयमाह कात्यायनः—'विवाहात्परतो यत्तु लब्ध भर्तृकुलात् स्त्रिया। अन्वाधेय तदुक्त तु लब्ध बन्धुकुलात्तथा॥' भर्तृकुलात् श्वशुरादेः, बन्धुकुलात् पितृमातृकुलात्। तथापरमाह—'ऊर्ध्वं लब्धं तु यत् किंचित् संस्कारात् प्रीतितः स्त्रिया। भर्तुः सकाशात् पित्रोर्वा अन्वाधेयं तु तद्भृगुः॥' शुल्कमाह—'गृहोपस्करवाह्याना दोह्याभरण-

---

* शेषं मिताग्रतम्। अस्य व्याख्यानस्य 'यत्र सोपधिक' इति कात्यायनवचनस्थस्मृतिवद्भावः।

(१) **याज्ञ.**२।१४४; **अपु.**२५६।३१; **विश्व.**२।१४८; **मिता.** अप्रजायामतीतायां (अतीतायामप्रजसि); **दा.**९२; **अप.**; **व्यक.**१४९; **गौमि.**२८।२३; **विर.**५२०; **पमा.** ५४७; **रत्न.**१६४ मितावत्, उत्त.; **मपा.**६७० पू.. ६६५ (अतीतायामप्रजसि बान्धवस्तदवाप्नुयात्) उत्त., **व्यनि.** तथा (तदा) धे (दे); **नृप्र.**३८; **सवि.**३७९ पू.. ३८४ मितावत्, उत्त.; **चन्द्र.**८६ वास्त...युः (वस्तदवाप्नुयात्); **वीमि.**; **व्यप्र.**५५१ मितावत्, पू.; **व्यउ.**१५९ पू.:१६१ मितावत्, उत्त.; **व्यम.**७२ मितावत्, उत्त.; **विता.**४४० पू.: ४५४ मितावत्, उत्त.; **सेतु.**६० अप्रजायामतीतायां (अतीतायामप्रजायां); **समु.**१३५ पू.:१३६ मितावत्, उत्त.; **विच.**११४.

* पमा, मपा., सवि., व्यप्र., व्यउ., व्यम. मितावद्भावः। अपरार्के वाक्यार्थो मितावत्, वाक्यार्थगतं अनपत्यपदं न व्याख्यातम् विवादताण्डवे मितामतं दामतं च संगृहीतम्।

कर्मिणाम्। मूल्यं लब्धन्तु यत् किंचित् शुल्कं तत् परिकीर्त्तितम् ॥' गृहादिकर्मभिः शिल्पिभिस्तत्कर्मकरणाय पत्न्यादिप्रेरणार्थं स्त्रियै यदुत्कोचदानं तत् शुल्क तदेव मूल्य प्रवृत्त्यर्थत्वात्। व्यासोक्तं वा यथा—'यदा तेतु भर्तृगृहे शुल्क तत् परिकीर्तितम् ॥' भर्तृगृहगमनार्थमुत्कोचादि यद्दत्तं तच्च ब्राह्मादिष्वविशिष्टं तदेवादिकमप्रजःस्त्रीधनं भ्रातरो गृह्णीयुः। न पुनरासुरादिषु वेवाहेषु यत् कन्याभ्यः शुल्कदान तदभिप्रायं आसुरात्रगोचरत्वात् तच्छुल्कस्य। यथोक्त याज्ञवल्क्येन आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः। राक्षसो युद्धहरणात् पैशाचः कन्यकाछलात् ॥' (यास्मृ. १।६१)। अतो राक्षसादौ शुल्काभावात् शुल्कसाहचर्येणासुरादिष्वेवं यद्धनं तन्मात्रस्य भ्रातृगामित्वाभिधानं हेयम्। तथा तस्य स्त्रीधनत्वाभावाच्च पित्रादिगृहीतधनस्य च शुल्कत्वेन कीर्त्तनात्। तथा मनुः—'न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि। गृह्णन् हि शुल्क लोभेन स्यान्नरोऽपत्यविक्रयी ॥' पितेत्युपलक्षण, तेन भ्रात्रादिरपि धनं गृह्णन् शुल्कग्राही तेन पित्रादिगृहीतमेव परं शुल्क भवतीत्युक्तम्। अतो यदुक्तं आसुर एव शुल्करूपस्त्रीधनसभवात् तदेकवाक्योपात्तयोरन्धुदत्तान्वाधेययोरप्यासुरविवाहगोचरयोरेव भ्रातुरधिकार इति निरस्तम्। किन्तूक्तशुल्करूपस्त्रीधनस्य सर्वेवाहेष्वेव सभवात् सर्वत्रैव भ्रात्रधिकारो वाक्यात् वेशेषानवगमात्। तथा गौतमवचनमपि कात्यायनवचनसमानार्थम्। *दा.९२-९५

(४) येन यद्दत्तं स तदवाप्नुयादिति। सत्या तु प्रजाया सैव गृह्णीयादिति। गौमि.२८।२३

(५) शुल्कं, यद्गृहीत्वा कन्या दीयते तदिह विवक्षितम्। अन्वाधेयकं स्त्रीधनलक्षणम्। बान्धवाः सोदराः। इदमप्यासुरादिविवाहविषयम्। +विर.५२०

(६) अप्रजाया विद्यमानदुहितृपुत्रान्यतरकभिन्नाया(?)मतीतायाम्। ×वीमि.

(७) मिताटीका—मात्रिति। स्वसमानत्वादात्मबन्धूनामग्रहणम्। यदिति। तथा चार्षासुरादिविवाहविषयमिदम्। दुहित्रिति। एतत्पञ्चकरहितायामित्यर्थः। बाल. स्त्रीधनविभागः। धर्मविवाहोढाऽन्यविवाहोढाऽप्रजस्त्रीधनविभागः।

अप्रजस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि।
दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत् *॥

(१) शुल्कादिव्यतिरेकेण तु—अप्रजस्त्रीधनमिति। ब्राह्मादिविवाहचतुष्टये यत् स्त्रीधन तदप्रसूताया भर्तुः। प्रसूता चेद्दुहितॄणामेव। विश्व.२।१४९

(२) सामान्येन बान्धवा धनग्रहणाधिकारिणो दर्शिताः। इदानी विवाहभेदेनाधिकारिभेदमाह—अप्रजस्त्रीधनमिति। अप्रजस्त्रियाः पूर्वोक्तायाः ब्राह्मादैवार्षप्राजापत्येषु चतुर्षु विवाहेषु भार्यात्व प्राप्ताया अतीतायाः पूर्वोक्त धन प्रथम भर्तुर्भवति। तदभावे तत्प्रत्यासन्नाना सपिण्डाना भवति। शेषेष्वासुरगान्धर्वराक्षसपैशाचेषु विवाहेषु तदप्रजस्त्रीधन पितृगामि। माता च पिता च पितरौ तौ गच्छतीति पितृगामि। एकशेषनिर्दिष्टाया अपि मातुः प्रथम धनग्रहण पूर्वमेवोक्तम्। तदभावे तत्प्रत्यासन्नानां धनग्रहणम्। सर्वेष्वेव विवाहेषु प्रसूतापत्यवती चेद्दुहितृणा तद्धन भवति। अत्र दुहितृशब्देन दुहितृदुहितर उच्यन्ते। साक्षाद्दुहितृणा 'मातुर्दुहितरः शेषम्' इत्यत्रोक्तत्वात्। अतश्च मातृधन मातरि वृत्ताया प्रथम दुहितरो गृह्णन्ति। तत्र चोढानूढासमवायेऽनूढैव गृह्णाति। तदभावे च परिणीता। तत्रापि प्रतिष्ठिताऽप्रतिष्ठितासमवायेऽप्रतिष्ठिता गृह्णाति। तदभावे प्रतिष्ठिता। यथाह गौतमः—'स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठितानां च' इति। तत्र चशब्दात्प्रतिष्ठितानां

* दा.,बाल. व्याख्यान 'जनन्यां सस्थितायां' इति मनुवचने (पृ १४३५-६) द्रष्टव्यम्। दात. दागतम्। व्यनि. दावद्वाक्यार्थः।

(१) **यास्मृ.**२।१४५; **अपु.**२५६।३२ ह्मा (ह्म्या); **विश्व.**२।१४९; **मिता.**; **दा** ८६ प्रज (प्रजा) : ८९ प्रज (प्रजा) पू.; **अप.**; **स्मृच.**२८६ प्रज (प्रजः) पू; **पमा.** ५५० तृतीयपादः; **मपा.**६६५; **रत्न.**१६४; **दात.**१८६ प्रथमपादः; **सवि.**३८२; **वीमि.**; **व्यप्र.**५५२ **स्मृचवत्**; व्यउ.१६१, व्यम.७२ स्मृचवत्, **विता.**४६२ भर्तुः (भर्ता); **सेतु.**५७ पू., **मनुः**, **समु.**१३६.

* विश्वद्वावः। व्यनि. दायभागवद्वाक्यार्थः।
+ दावद्वावः। चन्द्र. विरवद्भावः।
× मितावद्भावः।

च। अप्रतिष्ठिता अनपत्या निर्धना वा। एतच्च शुल्कव्यतिरेकेण। शुल्क तु सोदर्याणामेव। 'भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुः' इति गौतमवचनात्। सर्वासा दुहितृणामभावे दुहितृदुहितरो गृह्णन्ति। 'दुहितृणा प्रसूता चेत्' इत्यस्माद्वचनात्। तासा भिन्नमातृकाणा विषमाणा समवाये मातृद्वारेण भागकल्पना। 'प्रतिमातृतो वा स्ववर्गेण भागविशेषः' इति गौतमस्मरणात्। दुहितृदौहित्रीणा समवाये दौहित्रीणा किंचिदेव दातव्यम्। दौहित्रीणामप्यभावे दौहित्रा धनहारिणः। दौहित्राणामभावे पुत्रा गृह्णन्ति। 'ताभ्य ऋतेऽन्वय' इत्युक्तत्वात्। अनपत्यहीनजातिस्त्रीधन तु भिन्नोदराप्युत्तमजातीयसपत्नीदुहिता गृह्णाति। तदभावे तदपत्यम्। पुत्राणामभावे पौत्राः पितामहीधनहारिणः। 'रिक्थभाज ऋण प्रतिकुर्युः' इति गौतमस्मरणात्। 'पुत्रपौत्रैर्ऋण देयम्' इति पौत्राणामपि पितामह्यृणापाकरणेऽधिकारात्। पौत्राणामप्यभावे पूर्वोक्ता भर्त्रादयो बान्धवा धनहारिणः। ×मिता.

(३) प्रसूताऽपत्यवती चेद्दुहितृणामेव। एतच्च सर्वविवाहविषयम्। पुत्रसद्भावेऽपि दुहितृगामि मातृधनमित्येतदर्थमिदमिति। अतो मातुर्दुहितर इत्यनेन गतार्थम्। न हि तत्राधिकारक्रम उक्तः। +अप.

(४) अपिशब्दाद्गान्धर्वेऽपि। स्मृच.२८६

(५) पुत्राणामभावे पौत्राः पितामहीधनहारिण इति वचोभङ्ग्याऽऽह गौतमः–'ऋणप्रदातारश्च रिक्थभाजः ऋण प्रतिकुर्युः' इति। 'पुत्रपौत्रैः ऋण देयमि'ति पौत्राणामपि पितामह्यृणापाकरणे अधिकारात्। नन्वेव 'मातामह्या वृत्ताया तदौर्ध्वदेहिके दौहित्रस्यैवाधिकारात् पुत्रपौत्रद्रव्यसमुदायेनैव और्ध्वदेहिकक्रिया कुर्युः' इति विष्णुवचनविरोधः स्यादिति चेन्नैवम्। षोडशश्राद्धेष्वेव पुत्रपौत्रधनससर्गः, तत्प्रेतत्वनिवृत्तेरुभयाकाङ्क्षितत्वादिति भारुचिना विषयव्यवस्थायाः कृतत्वात्। पौत्राणामप्य

× मपा. मितागतम्। पमा. मितावद्भावः, 'ब्राह्मदैवार्षगान्धर्व' 'यस्वस्याः स्याद्धन' इति मनुवचनयोरपि व्याख्यान मिताक्षरानुसारि। विता. दायभागमतमुपन्यस्त, व्याख्यानं मितागतम्।

+ मितावद्भावः।

भावे विमागक्रममाह याज्ञवल्क्यः–'अतीतायामप्रजसि बान्धवाः तदवाप्नुयुः' इति। सवि.३८४

अत्र स्त्रीधनस्य दुहित्रादिसंबन्धः प्रत्यासत्तितारतम्यन्यायनिबन्धनो न वाचनिकः, प्रत्यासत्तितारतम्य च 'पुमान् पुंसोऽधिके शुक्ले स्त्री भवत्यधिके स्त्रियाः' इति विज्ञानेश्वरेण प्रतिपादितमित्युक्तं प्राक्। अत्र विवदन्ते वृद्धाः स्त्रीधन दायशब्दवाच्य न वेति। 'तस्मात्स्त्रियो निरिन्द्रियाः अदायादीः' इति श्रुतेः स्त्रीणा दायानर्हत्वात्। स्त्रीधनविभागः न दायधनविभागः किन्तु तद्धनविभाग इति व्यवहारः। यत्तूक्त सग्रहकारेण—'पितृद्वाराऽऽगतं द्रव्यं मातृद्वाराऽऽगत च यत्। कथित दायशब्देन तद्विभागोऽधुनोच्यते॥' इति। तत्तु यथा पितृद्वाराऽऽगत द्रव्य दायशब्देन कथित दायशब्दवाच्य तद्वन्मातृद्वाराऽऽगतमपि दायशब्दवाच्यम्। अतश्चैकशब्दस्यार्थद्वयाङ्गीकारे शक्तिगौरव स्यादिति अन्यत्र वृत्त्यन्तरं स्वीकार्यम्। अतः स्वमातृद्वाराऽऽगत द्रव्य दीयते ददातीति वा व्युत्पत्त्या गौणवृत्त्या दायशब्दार्थ इत्याहुः भारुच्यपरार्कसोमेश्वराचार्यप्रभृतयः। विज्ञानेश्वरासहायमेधातिथिप्रभृतयस्तु 'तस्मात्स्त्रियो निरिन्द्रिया' इति श्रुतेर्निरिन्द्रियश्रवणभत्यन्तनिरिन्द्रियविषय न भवति। अपि त्वल्पेन्द्रियपरम्। 'पुमान् पुंसोऽधिके शुक्ले स्त्री भवत्यधिके स्त्रियाः' इत्यत्र अधिकताल्पत्वप्रतीतेः। न केवलमत्यन्तनिरिन्द्रियत्व स्त्रीणामिति दायार्हत्व स्त्रीणामप्यस्ति। किं तु पितृपुत्रविभागे पुत्राणा प्राधान्यात्तत्रैव स्त्रीणा दायानर्हत्वाद्यत्किंचित्प्रीतिदानार्हत्व स्त्रीणामप्यस्तीत्येवपरा श्रुतिः। अत एव संग्रहकारवचन—'पितृद्वाराऽऽगत द्रव्य मातृद्वाराऽऽगत चे'त्युभय दायशब्दवाच्यमिति स्वरसोऽर्थः सपद्यत इति। गतमपि स्पष्टार्थ पुनरुक्तम्। ×सवि.३८६-३८७

(६) अपिशब्दाद्विवाहाभावेऽपि तद्धन पितृगामि। यदि तु प्रत्ता भवति पुत्रदुहितृविहीना च तदा दुहितृणा च तद्धनं स्वं भवति। तदभावे च दौहित्रः प्राग्नयपदेनाभिहितो धनभाक्। प्राग्लिखितमनुवचनेन दुहितृसत्त्वेऽपि दौहित्राणा किंचिदशबोधनात्। +वीमि.

× वाक्यार्थः विवरण च मितागतम्।

+ शेष मितागतम्।

(७) चतुर्षु ब्राह्मदैवार्षप्राजापत्येषु । अपिशब्दात् गान्धर्वपरिग्रहः । यद्वा अतद्गुणसंविज्ञानबहुव्रीहिणा ब्राह्माभिन्नदैवार्षप्राजापत्यगान्धर्वाश्चेत्वारः । व्यप्र.५५२

तदपेशलम् । पूर्ववचने अप्रजःस्त्रीधन बान्धवा गृह्णीयुरिति सामान्यत उक्ते कीदृश्या अप्रजसः के बान्धवा गृह्णीयुरित्येवाकाङ्क्षोदयाद् ब्राह्मादिपदाना तद्विशेषणत्व स्यौचित्यात् । यच्च वर्तमानभूतसबन्धकृत विनिगमकमुक्तं तदपि तुच्छम् । विभागकालेऽतीतत्वस्योभयत्राविशेषात् । धनलाभकाले वर्तमानत्वस्य चाप्रयोजकत्वात् । विवाहजन्यभार्यात्वसबन्धस्यान्तरङ्गत्वाच्च । व्यप्र.५५३

(८) भर्तुरभावे तत्कुले तस्याः प्रत्यासन्नो लभते । पित्रभावे च पितृकुले तस्याः प्रत्यासन्नः । 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धन भवेदि'ति (मस्मृ.९।१८७) । मनुना मृतनिरूपिताया एव प्रत्यासत्तेर्धनाधिकारितावच्छेदकत्वेनाभिधानात् । यत्तु मिताक्षरायां (मिता.२।१४५) 'भर्त्रभावे तत्प्रत्यासन्नाना सपिण्डाना पित्रभावे च तत्प्रत्यासन्नाना सपिण्डानामि'ति तत्रापि तेनास्याः प्रत्यासन्नास्तत्प्रत्यासन्नास्तद्द्वारा तत्कुले प्रत्यासन्ना इतियावदित्येव व्याख्येयम् । ब्राह्मादिषु चतुर्ष्वपीति विप्रपरम् । तेषामेव त प्रति धर्म्यत्वात् । यस्य तु क्षात्त्रियादेर्गान्धर्वोऽपि धर्म्यस्तस्य तदुद्वाहधनमपि भर्तुरेव । व्यम.७२

शुल्कपूर्वकवाग्दत्ताविषये धनवादः

दत्त्वा कन्यां हरन्दण्ड्यो व्ययं दद्याच्च सोदयम् ।
मृतायां दत्तमादद्यात्परिशोध्योभयव्ययम् ॥

(१) आसुरादिविवाहप्रसङ्गादिदमुच्यते । भर्तृतो धनमादाय ततः—दत्त्वा इति । कन्या दत्त्वा हरन् राज्ञा दण्ड्यः । भर्त्रे च सवृद्धिक व्यय दाप्यः । मृतायां तु भर्त्रा यद्दत्त, तत् प्रत्यादद्यात् । आत्मनिमित्त पितृकृत चोपक्षय परिशोध्य । विश्व.२।१५०

(२) स्त्रीधनप्रसङ्गेन वाग्दत्ताविषय किंचिदाह—दत्त्वा इति । कन्या वाचा दत्त्वाऽपहरन्द्रव्यानुबन्धायनुसारेण राज्ञा दण्डनीयः । एतच्चापहारकारणाभावे । सति तु कारणे 'दत्तामपि हरेत्कन्या श्रेयाश्चेद्वर आव्रजेत्' इत्यपहाराभ्यनुज्ञानान्न दण्ड्यः । यच्च वाग्दाननिमित्त वरेण स्वसंबन्धिना कन्यासबन्धिना वोपचारार्थं धन व्ययीकृत तत्सर्वं सोदयं सवृद्धिक कन्यादाता वराय दद्यात् । अथ कथंचिद्वाग्दत्ता सस्कारात्प्राङ् म्रियते तदा किं कर्तव्यमित्यत आह—मृतायामिति । यदि वाग्दत्ता मृता यत्पूर्वमङ्गुलीयकादि शुल्क वरेण दत्त तद्वर आददीत । परिशोध्योभयव्ययम् । उभयोरात्मनः कन्यादातुश्च यो व्ययस्तं परिशोध्य विगणय्यावशिष्टमादद्यात् । यत्तु कन्यायै मातामहादिभिर्दत्त शिरोभूषणादिक वा क्रमायातं तत्सहोदरा भ्रातरो गृह्णीयुः । 'रिक्थं मृतायाः कन्याया गृह्णीयुः सोदरास्तदभावे मातुस्तदभावे पितुः' इति बौधायनस्मरणात् । +मिता.

(३) वाचा वराय क्लैब्यादिदोषरहिताय कन्या दत्त्वा अन्यस्य श्रेयसो वरस्य लाभे यस्तस्माद्धरति न ददाति, स राज्ञा दण्ड्यः । यावतो धनस्य वरेण व्ययः कृतस्तावत्सवृद्धिक धनं वराय च दद्यात् । राज्ञा दाप्य इत्यर्थः । तथा प्राग्विवाहात्कन्याया मृतायां च धन विवाहनिमित्त कन्यापित्रे वरेण दत्त तेन कन्यापितु र्वरस्य च विवाहनिमित्त धनव्यय परिशोध्य शेष वर आददीत । अप.

आपदि गृहीत स्त्रीधन भर्ता न प्रतिदद्यात्

दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके ।
गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति ॥

(१) यास्मृ.२।१४६; अपु.२५६।३३; विश्व.२।१५० दद्याच्च (दाप्यश्च); मिता., अप. च्च सो (त्सहो); व्यक.१४५ न्दण्ड्यो (न्दाप्यो) च (तु) दत्त (सर्वं); स्मृच.२८७ तृतीयपादः; विर.५२१ दत्त (सर्वं); पमा.५५४ उत्त.; मपा.६६८; रत्न.१६४ उत्त.; दवि.१८६ पू.; सवि.३८५ तृतीयपादः; वीमि.; व्यउ.१६३ उत्त.; व्यम.७२ उत्त.; विता.४६४ व्ययम् (द्वयम्) उत्त.; राकौ.४५९ पू.; समु.११९.

+ विर. मितागत अपगत च । पमा., मपा., सवि. मितागतम् ।

(१) यास्मृ.२।१४७; अपु.२५६।३४, विश्व.२।१५१; मिता.२।३२ धर्म (व्याधि) न स्त्रियै (नाकामो) : २।१४७; दा.७७; अप.; व्यक.१४८; स्मृच.२८३, विर.५१३; पमा.५५५, मपा.६६९-६७०; रत्न.१६२; विचि.२२० भर्ता (भर्त्रा); व्यनि. स्त्रियै (कामो); स्मृचि.३० च (तु); नृप्र.३८, दात.१८५ च (वा) न स्त्रियै (नाकामो), सवि.३८१; चन्द्र.८४ विचिवत्, वीमि.; व्यप्र.३४, ५४६

(१) एव प्रासङ्गिकमुक्त्वा प्रकृतमेवाह—दुर्भिक्षे इति। भर्तृवचनादन्यो भ्रात्रादिर्दुर्भिक्षादिगृहीतमपि न दद्यादिति गम्यते। सप्रत्येवादत्त्वा मा यास्यसीत्येव रोधाद्धरणं सप्रतिरोधकम्। नगरोपरोध इत्यन्ये। स्पष्टमन्यत्। विश्व.२।१५१

(२) मृताप्रजस्त्रीधन भर्तृगामीत्युक्तम्। इदानीं जीवन्त्याः सप्रजाया अपि स्त्रियाः धनग्रहणे क्वचिद्भर्तुरभ्यनुज्ञामाह—दुर्भिक्ष इति। दुर्भिक्षे कुटुम्बभरणार्थं, धर्मकार्ये अवश्यकर्तव्ये, व्याधौ च, संप्रतिरोधके बन्दिग्रहणनिग्रहादौ द्रव्यान्तररहितः स्त्रीधन गृह्णन्भर्ता न पुनर्दातुमर्हति। प्रकारान्तरेणापहरन् दद्यात्। भर्तुव्यतिरेकेण जीवन्त्याः स्त्रिया धन केनापि दायादेन न ग्रहीतव्यम्। 'जीवन्तीना तु तासा ये तद्धरेयुः स्ववान्धवाः। ताञ्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः॥' (मस्मृ. ८।२९) इति दण्डविधानात्। तथा —'पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत्। न त भजेरन्दायादा भजमानाः पतन्ति ते॥' (मस्मृ.९।२००) इति दोषश्रवणाच्च। +मिता.

(३) दुर्भिक्षमन्नाभावः। धर्मकार्यं यदावश्यक न तु काम्यम्। व्याधिस्तीव्रो दीर्घश्च तत्प्रतिक्रियार्थम्। सप्रतिरोधो निगडादिबन्धः। एतेषु निमित्तेषु स्वकीयधनाभावे स्त्रीधन गृहीत्वैता आपदस्तरेत्। प्रतिदानसमर्थधनाभावे च तत्तस्यै न दद्यात्। ऋणाद्यल्लाभरूपापद्विषयमेतत्। अप.

(४) धर्मकार्यं नित्ये नैमित्तिके वा काम्येऽपि क्वचित् शान्तिके ग्रहयज्ञादौ। सप्रतिरोधके धनदान विना निवारयितुमशक्ये धनिकाद्यासेधादौ, गृहीत स्त्रीधन गत्यन्तराभावेनेति शेषः। ×स्मृच.२८३

(५) प्रतिरोधके इति व्याधिविशेषणम्। कर्मानुष्ठानबाधके इत्यर्थः। तत्राऽकामेन देयमित्यर्थः। विचि.२२०

(६) संप्रतिरोधके बन्दीकरणादौ। चकारेण भर्तुर्धनाभावे सतीति सर्वत्रान्वित विशेषण समुच्चिनोति। शेष सुगमम्। वीमि.

(७) नाकामो दातुमर्हतीत्यपि दारिद्र्यादिकृतदानासामर्थ्ये बोध्यम्। सति तु सामर्थ्ये दुर्भिक्षादिगृहीतमप्यवश्य देयम्। एतावतैव वचनोपपत्तौ सामर्थ्येऽप्यदानमिच्छयेत्यस्य कल्पयितुमनर्हत्वात्। पतिग्रहणादापद्यपि पत्युरेव पत्नीधनग्रहणाधिकारः। प्रतिदान चेच्छया नान्यथेति ज्ञेयम्। ×व्यप्र.५४६

नारदः

भर्तृदत्तस्थावरादिरिक्ते धने स्त्रीणा सदा स्वातन्त्र्यम्

भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्।
सा यथाकाममश्नीयाद्दद्याद्वा स्थावराद्ऋते॥

(१) अत्र यत्किमपि भर्त्रा परितुष्टेन दत्तम्। तच्च द्रव्य यथाकाममश्नीयाद्दद्याद्वा गृहक्षेत्रादिस्थावरवर्जितमिति। अभा.४१

(२) भर्तृदत्तविशेषणात् भर्तृदत्तस्थावराद्ऋते अन्यत् स्थावर देयमेव भवति। अन्यथा यथेष्ट स्थावरेऽपीति विरुध्येत। *दा.७७

(३) भर्तरि मृतेऽपि न तद्दत्तस्थावरे स्वातन्त्र्यमित्यर्थः। यथाकाममित्यनेन स्वातन्त्र्यमुक्तम्। एव च सौदायिके स्थावरेतरपतिदत्ते च स्त्रीणा स्वातन्त्र्यम्। अन्यत्र स्त्रीधनेऽप्यस्वातन्त्र्यमिति मन्तव्यम्। —स्मृच.२८२

× शेष स्मृचगतम्।

* दात., विता., सेतु. दागतम्।

— विचि., सवि. स्मृचगतम्।

(१) **नास्मं**.२।२४, **नास्मृ** ४।२८; **अभा**.४१; **मिता.** २।११४ (=); **दा.७७, अप** २।१४३; **व्यक**.१४७; **स्मृच.**२८२; **विर**.५१०, **स्मृसा** ६२; **पमा**.४८३ **मनुः**: ५४९, **रत्न** १६२; **विचि** २१८; **व्यनि.** तत् (यत्), **नृप्र.** ३८; **दात.**१८४; **सवि.**३७८; **चन्द्र.८१**; **व्यप्र**.४१३ (=): ५४४; **व्यम**.६९; **विता.**२८७ **भर्त्रा (भ्रात्रा)**: ४४४; **राकौ.** ४४३; **बाल.**२।१३५ (पृ.२३९) प्रथमपादः; **सेतु.**५४; **समु.** १३५; **विच.११०; कृभ**.८७४ **स्त्रियै** तस्मिन् मृतेऽपि तत् (मृते तस्मिन् स्त्रियोऽपि तत्).

+ दा., विर, पमा., मपा., रत्न., व्यम मितागतम्। सवि.मितागत स्मृचगत च। × शेष अपगतम्। न स्त्रियै (नाकामो), **व्यउ**.२१(=), **व्यम**.७० व्यप्रवत्; **विता.**४४४ विचिवत्; **राकौ.**४५९; **सेतु.**५४ च (वा); **विभ**.१ व्यप्रवत्, स्मरणम्; **समु.**१३५; **विच.११०.**

(४) भर्तृदत्तस्थावरोपभोगमात्रमेव स्त्रीभिर्मृतावविभक्तपतिकाभिः कर्तव्यम्। न तु दानादिकमित्यर्थः। कात्यायनोऽपि—'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। भुञ्जीतामरणात्क्षान्ता दायादा ऊर्ध्वमाप्नुयुः॥' पुरुषाणां कस्मिन्नपि स्त्रीधने न स्वातन्त्र्यं तत्स्वाम्याभावात्।
रत्न.१६२

स्त्रीणां धनविनियोगेऽस्वातन्त्र्यम्

[1]नाधिकारो भवेत्स्त्रीणां दानविक्रयकर्मसु।
यावत्संजीवमाना स्यात्तावद्भोगस्य सा प्रभुः॥

षड्विध स्त्रीधनम्

अध्यग्न्यध्यावाहनिकं भर्तृदायस्तथैव च।
भ्रातृदत्तं पितृभ्यां च षड्विधं स्त्रीधनं स्मृतम्॥

(१) पितृकादित्येकशेषेण पितृमातृकुलात् यल्लभते धनं भर्तृगृहं नीयमाना तदध्यावाहनिकम्। भर्तृदायो भर्तृदत्तं धनं भर्तृदायमनभिधाय मन्वादिभिर्भर्तृदत्तस्याभिधानात् नारदेनापि भर्तृदत्तमनभिधाय भर्तृदायस्याभिधानात्। तथा अन्यत्रापि भर्तृदत्ते भर्तृदायप्रयोगो दृष्टः।
×दा.७३

(२) अत्रापि नाधिकव्यवच्छेदे तात्पर्यम्। विर.५२४

(३) विवाहकाले दत्तं, भर्त्रादिभिर्नीतायां ज्ञातिकुलं पुनरानयनकाले दत्तमिति केचित्। अन्ये स्वगृहानयनकाले दत्तमिति। भर्त्रा तुष्टेनोत्तरकालं च यद्दत्तं, भ्रात्रापि दत्तं मात्रा पित्रा च, षट्प्रकारं स्त्रीधनमिति यत्रोच्यते तत्रैतद् ग्राह्यम्।
नाभा.१४।८

मातृधनविभागः

[2]मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः *॥

(१) मातुर्धनं दुहितरो विभजेरन्, दुहितॄणामभावे तदन्वयो दुहित्रन्वयो विभजेदित्यर्थः।

दुहितुः सामिन्याश्चात्मदेन तस्या एव परामर्शौचित्यात्। लक्ष्मीधरस्वरसोऽप्येवम्। प्रकाशपारिजातौ तु तदन्वयो दुहित्रन्वयः पुत्रपौत्रादिरित्याहतुः।
विर ४५६

(२) दुहितृदुहितॄणामभावे तदन्वयो दौहित्रो गृह्णातीत्यर्थः।
×पमा.५५१

(३) मातुर्धनं दुहितर आप्नुयुः तदभावे दुहितॄणां दौहित्रीणां, तदभावे तदन्वये ये जाता दौहित्रास्तेषामित्यर्थः। तदन्वय इति प्रथमाविभक्त्यन्तोऽपि पाठः। तथापि दौहित्रा एव गृह्यन्ते न दौहित्रीसम्बन्धिस्तस्या दौहित्रापेक्षया विप्रकृष्टत्वात्। दौहित्राणामप्यभावे 'मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः' इत्यन्वयशब्दोपात्ताः पुत्रपौत्रादयः क्रमेण धनभाजः।
*मपा.६६७

(४) इति नारदवचनेन मातृधने दुहितॄणां तदभावे दौहित्राणामेव ग्रहणाधिकारयोधनान्न पुत्रस्य तद्ग्रहणाधिकार इति चेत्। न। तस्यान्ययोगव्यवच्छेदपरत्वाभावात्।
विचि.१९४

(५) समाशभागित्व कुमारीणामेव।
*वीमि.२।११७

(६) दुहितॄणामभावे दुहितृसततिः।
व्यम.७१

(७) तदन्वयः पुत्र. न कन्यापत्यम्।
विता.४५२

स्त्रीधनविभागः। धर्मविवाहोढाऽन्यविवाहोढाऽपज-

स्त्रीधनविभागः।

[3]स्त्रीधनं तदपत्यानां भर्तृगाम्यप्रजासु तु।

× सेतु. दागतम्।

* मिता.व्याख्यान 'अप्रजस्त्रीधन' इति याज्ञवल्क्यवचने (पृ.१४४५-६) द्रष्टव्यम्। व्यउ. मितागतम्। दा. व्याख्यान

(१) Vulg. **नास्मृ.**४।२६ इत्यस्योपरिष्टादयं श्लोकः।

(२) **नास.**१४।८ वाह (हव) भ्रातृ (भ्रात्रा), **नास्मृ.**१६।८ वाह (वह) दत्तं पितृभ्या च (मातृपितृप्राप्त), **दा.८२; व्यक.**१४९ वाह (वह) दाय (दाया); **विर.**५२३; **व्यनि.** वाहनिक भर्तृदायः (वहनिक भ्रातृदाय); **व्यप्र.**५४२ वाह (वह); **सेतु.५०-५१, बाल** २।१४३ व्यप्रवत्; **समु.१३४** वाह (वह) भ्रातृ (भ्रात्रा); **विच.१०५.**

(३) **नासं.**१४।२; **नास्मृ.**१६।२; **मिता.**२।१४५; **दा.८२; स्मृच.२८५** (अभावे दुहितॄणां तु तद्भर्त्रन्वय एव च); **विर.४५६; पमा.५५१; मपा.६६७** तदन्वये इति पाठः व्याख्यानात् प्रतीयते; **विचि.१९४, व्यनि.; नृप्र.३८; वीमि.** २।११७; **व्यप्र.५४८; व्यउ १६०, व्यम.७१; विता.** ४५२, ४५३; **बाल.२।१३५** (पृ.२०६); **समु.१३६.**

(१) **नासं.**१४।९ तु (च) च (तु); **नास्मृ.१६।९; विर.**

ब्राह्मादिषु चतुर्ष्वाहुः पितृगामीतरेषु च ॥

(१) चतुर्ष्विति न पञ्चमव्यवच्छेदार्थ, तेन ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु अप्रजाया धन तदपगमे भर्तृगामि, इतरेषु राक्षसासुरपैशाचेषु पितृगामि । विवाहकाललब्धस्त्रीधनविषयमिदम् । विर.५१९

(२) स्त्रीधन तदपत्यानाम्, न सापत्नाना, जीवत्यपि भर्तरि 'भर्तृगाम्यप्रजास्वि'ति वचनात् । भर्तृगामीति विशेष उच्यते—न सर्व, ब्राह्मादिषु चतुर्ष्वप्रजायाः । इतरेषु तु गान्धर्वादिषु तस्याः पितृभ्रातृव्यप्रजाया जीवत्यपि भर्तरि । नाभा.१४।९

शुल्कपूर्वकदत्तादिविषये धनवादः

अथागच्छेत् समूढायां दत्तं पूर्ववरो हरेत् ।
मृतायां पुनरादद्यात् परिशोध्योभयव्ययम् ॥

बृहस्पतिः

मातृधनविभागः

स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी ।
अप्रत्ता चेत्समूढा तु लभते मानमात्रकम् *॥

(१) मानमात्रकं अल्पमित्यर्थः । अप.२।११७

(२) अपत्यानां पुत्राणां तदंशिनी पुत्राशसमाशिनी । अप्रत्ता अनूढा । तेनैतद्वाक्यबलान्मनुवाक्येऽपि अनूढानामेव भ्रातृभिः सह समाशित्वमिति बोद्धव्यम् । ऊढानां तु मानानुसारेण किंचिद्देयम् । *विर.५१६

(३) अप्रत्ताभावे सधवाना भ्रातृसमोंऽशः । व्यम.७१

मातृतुल्यानां मातृष्वस्रादीनां धनस्य विभागक्रम

मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः ॥
यदासामौरसो न स्यात्सुतो दौहित्र एव वा ।
तत्सुतो वा धनं तासां स्त्रीयाद्याः समाप्नुयुः ॥

(१) भर्तृपर्यन्ताभावे पुनरिदमुच्यते । यदाह बृहस्पतिः—मातुः स्वसा इत्यादि । औरसपदेन पुत्रकन्ययोरुपादन तयोः सर्वापवादकत्वात् सुतपदेन च सपत्नीपुत्रस्य । 'सर्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् । सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः॥' इति स्मृतेः । न तु सुतपदमौरसविशेषण वैयर्थ्यात् । सपत्नीपुत्रसद्भावेऽपि स्वस्त्रीयाद्यधिकारापत्तेश्च । औरसपुत्रकन्ययोः सपत्नी पुत्रस्य चाभावे दौहित्रस्याधिकारिता । तत्सुत इति तच्छब्देन स्वपुत्रसपत्नीपुत्रयोरुपादान तेन तत्पुत्रयोरधिकारे न तु दौहित्रपुत्रस्यापि तस्य पिण्डदाने बहिर्भावात् । तदेषा पुत्रादीना भ्रात्रादिभर्तृपर्यन्ताना चाभावे सत्स्वपि श्वशुरभ्रातृश्वशुरादिषु सपिण्डेषु,

* रत्न., विचि., व्यप्र. विरगतम् ।

---

* दा., स्मृच., पमा.व्याख्यान 'जनन्या सहितायां' इति मनुवचने (पृ.१४३३-३५) द्रष्टव्यम् ।

५१९ तद (स्याद) तु (च)

(१) **सेतु.५५**; **विचि.१२१** पुनरा (दत्तमा).

(२) **दा.७९** स्या (त) लभते मानमात्रकम् (न लभेन्मातृकं धनम्); **अप.२।११७**; **व्यक.१४८**; **गौमि.२८।२२** स्या (त) ता च तद (तृणा तदा) तु कम् (सा लभेत तु समातृकम्); **उ.२।१४।२** स्या (त); **मवि.९।१९२** लभते (लाभस); **स्मृच.२८५**; **ममु.९।१९२** प्रत्ता (पुत्रा); **विर.५१६**; **स्मृसा.६३**; **पमा.५५२** स्या (त) मानमात्रकम् (सा न मातृकम्); **रत्न.१६३**; **विचि.२२१-२२**; **व्यनि.** प्रत्ता (पुत्रा) शेष पमावत्; **स्मृचि.२९** (=) स्या (त) च (sपि); **चन्द्र.८५** तु (च); **मच.९।१९२**; **वीमि.२।११७**; **व्यप्र.५४७**; **व्यम.७१** मनुः; **विता.४५१** प्रत्ता (प्रजा) शेष दावत्; **बाल.२।१४५** (पृ.२५९) मूढा (मृढा); **सेतु.५६**; **समु.१३६ मानमात्रकम्** (सा न मातृकम्).

(१) **दा.९६** मातृष्व (मातुः स्व) ष्व (स्व); **अप.२।१४५** मातृष्व (मातुः स्व), **व्यक १४९**; **स्मृच.२८७** अपवत्; **विर.५२२** पितृष्व (पितुः स्व), **स्मृसा.६४**; **पमा.५५५**; **दीक.४६**; **रत्न.१६४**; **व्यनि**; **स्मृचि.२९-३०**; **दात.१८७** दावत्; **सवि.३८६**; **चन्द्र.८९** व्यस्त्री (व्यानी); **व्यप्र.५५३-५५४**, **व्यउ.१६१**; **व्यम.७२**; **विता.४६५** श्रः (श्र) वृद्धबृहस्पतिः; **बाल २।१४५** (पृ.२६९); **सेतु.५९** मातृष्व (मातुः स्व) पितृष्व (पितु. स्व) : ६१ दावत्; **समु.१३६**, **विच.११३**, ११७ दावत्.

(२) **दा.९६**; **अप.२।१४५** स्यात्सुतो (स्यात्पुत्रो); **व्यक.१४९** वा (च); **स्मृच.२८७** दा (था); **विर.५९२**; **स्मृसा.६४** स्मृचवत्; **पमा.५५५**; **दीक ४६** समा (तदा); **रत्न.१६४** वा धन (बान्धवः); **व्यनि.** स्मृचवत्; **स्मृचि.३०** स्मृचवत्; **दात.१८७**; **सवि.३८६**; **चन्द्र.८९** स्मृचवत; **व्यप्र.५५४**; **व्यउ १६१**; **व्यम ७२**; **विता ४६५** तत्सुतो (तत्सुता) वृद्धबृहस्पतिः; **बाल २।१४५** (पृ.२६९) रत्नवत्; **सेतु.५९**: ६१ यदा (एता) समा (अवा); **समु.१३६** स्मृचवत्; **विच.११३**, ११७.

भगिनीपुत्रादीनामधिकारिता, अनन्यगतेर्वचनात्,स्त्रीणा मातृतुल्यत्वप्रतिपादनेनामीषा पुत्रतुल्यत्वज्ञापनेन पिण्ड-दातृत्वसूचनस्य दायभागप्रकरणे धनाधिकारज्ञापनैक-प्रयोजनकत्वात् । तत्र स्वस्त्रीयाद्या इति वचनात् भ-गिनीसुतस्वभर्तृभागिनेयदेवरपुत्रभ्रातृश्वशुरपुत्रभ्रातृसुत-जामातृदेवराणा पूर्वपूर्वस्याभावे परपरस्याधिकारे देवर-स्यैव सर्वशेषेऽधिकारापत्तेर्महाजनविरोध इति वस्तुबल मालम्ब्य वचन वर्ण्यते । तत्र मनुना 'त्रयाणामुदक कार्य त्रिषु पिण्डः प्रवर्तते' इति (मस्मृ.९।१८६) दाय-भागप्रकरणे कीर्त्तनात्, याज्ञवल्क्येनापि 'पिण्डदोऽशहर श्चैषामि'ति (यास्मृ.२।१३३) पिण्डदानेनाधिकारदर्श-नात् पुत्रस्यापि सातिशयपिण्डदानेन नरकत्राणकारण तया मुख्यभावेनाधिकारावगतेः । 'मातुलो भागिनेयस्य स्वस्त्रीयो मातुलस्य च । श्वशुरस्य गुरोश्चैव सखुर्माता महस्य च ॥ एतेषा चैव भार्याभ्यः स्वसुर्मातु· पितुस्तथा । श्राद्धदानं तु कर्तव्यमिति वेदविदा स्थितिः ॥' इति बृद्धशातातपवचनात् । अमीषा पिण्डदत्वप्रतिपादनात् । अथ पिण्डदानविशेषादधिकारक्रमः । तत्र प्रथम देवरः तत्पिण्डतद्भर्तृपिण्डतद्भर्तृदेयपूर्वपुरुषत्रयपिण्डदातृत्वात् सपिण्डत्वाच्च तद्धनेऽधिक्रियेत । तदभावे भ्रातृश्वशुर-देवरयोः सुतः, तत्पिण्डतद्भर्तृपिण्डतद्भर्तृदेयपूर्वपुरुषद्वय पिण्डदातृत्वात् सपिण्डत्वाच्च पितृव्यस्त्रीधनेऽधिकारी । तदभावे त्वसपिण्डोऽपि भगिनीपुत्रः तत्पिण्डतत्पुत्र-देयतत्पित्रादिपिण्डत्रयदानात् मातृस्वसृधनेऽधिकारी । तदभावे स्वभर्तृभागिनेयः, पुत्रात् भर्तुर्दुर्बलत्वात् तत्स्थानपातिनोरपि तथैव बलाबलस्य न्याय्यत्वात् । तद्भर्तृदेयपूर्वपुरुषत्रयपिण्डदानात् तत्पिण्डदानात् तद्भर्तृ-पिण्डदानाच्च मातुलानीधनेऽधिकारी । तदभावे भ्रातृसुतः तत्पितृपितामहयोस्तस्याश्च पिण्डदानात् पितृष्वसृधनेऽ-धिकारी । तस्याप्यभावे श्वशुरयोः पिण्डदानात् जामाता श्वश्रूधनेऽधिकारीति । अथ क्रमो ग्राह्यः । स्वस्त्रीयाद्या इति तु न क्रमार्थ किन्त्वधिकारिमात्रज्ञापनार्थपरम् । पण्णा पुनरेतेषामभावे श्वशुरभ्रातृश्वशुरादेः सपिण्डानन्तर्यकृतो धनाधिकारो बोद्धव्यः । न च सपिण्डाभावे सतीद वचन-मिति वाच्यम् । अस्यामधिकारिशृङ्खलाया देवरदेवर-सुतयोः भ्रातृश्वशुरसुतस्य चाधिकारज्ञापनात् आसन्नतर-श्वशुरादेः परित्यागात् । अतो वचनार्थापरिज्ञानकृतो व्यवहारः प्रमाणपरतन्त्रैरतन्त्रीकर्तव्यः । इत्यतिगहन-मुक्तमप्रजःस्त्रीधनम् । *दा.९६-९

(२) पूर्वजस्य ज्येष्ठस्य पत्नी पूर्वजपत्नी ।
अप.२।१४५

(३) गौणमातृपरिगणनपूर्वक तद्धनहारित्वमाह बृह-स्पतिः— मातुः स्वसा इत्यादि । स्त्रीयो धनस्वामिन्या भागिनेयः स्वमातृष्वसृधनमवाप्नुयात् । एवमाद्यशब्देन परिगृहीता यथाक्रमेण स्वकीयमातृतुल्याया धन समा-नुयुः । एवमेव सपत्नीसंतानोऽपि उपमातृधन तत्संतान-तद्भर्त्राद्यभावे समाप्नुयात् । +स्मृच.२८७

(४) औरसादीनामभावे मातृष्वस्रादीना स्वधन स्वस्त्रीयाद्या आप्नुयुरित्यर्थः । विर.५२२

(५) अस्यायमर्थः । ब्राह्मादिविवाहेषु भर्तुरभावे आसुरादिषु मातापित्रोरभावे मातृष्वस्रादीना धनं यथा-क्रम मातृष्वस्त्रीयाद्या गृह्णीयुः । ×पमा.५५५

(६) चतुर्थपर्यन्त सपिण्डेषु सत्सु इद वचन न प्रवर्तते । पञ्चमप्रभृतिसपिण्डेषु सत्सु इद वचन प्रवर्तत इति व्याख्यातृभिरुक्तम् । अन्यैरेव व्यवस्था कृता मातृ-धस्रप्रभृतीना पण्णा प्रतिबन्धेषु सत्सु प्राप्तेषु यत्र प्रजास्त्रीधनविषये भर्तुः प्राप्ते तत्र तदभावे भर्तृद्वारेण सपिण्डेषु त्रिषु सक्तिः । तदभावे मृताया: स्वस्त्रीयोऽर्हति । तदभावे तस्याः भ्रातुः पुत्रोऽर्हति स्वस्त्रीयाद्या इत्यपत्य-प्रत्ययेनापत्यमात्रप्रतीतेः स्त्रीणा पुरुषाणा च दायसबन्धो युक्त इति । अन्ये तु स्त्रीपुंससाधारणः निर्देशोऽपि पुंस्येव प्रथम प्रतिपत्त्युदयात् । 'तस्मात्स्त्रियो निरिन्द्रिया अदा-यादीरित्यर्थवादददर्शनाच्च पुरुषाणामेव दायसबन्धो न स्त्रीणा इति मन्यन्ते । व्यनि.

(७) अत्रौरसपदेन पुत्रपुत्र्योरुपादानं तयोः सर्वोप-वादकत्वात् । अपवादक्रमश्च प्रागुक्त एव । सुतपदेन च सपत्नीपुत्रस्य । 'सर्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् । सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥' (मस्मृ.९।१८३) इति मनुवचनात् । न तु सुतपद-मौरसविशेषणमानर्थक्यात्, सपत्नीपुत्रसद्भावेऽपि स्वस्त्री-

* दात., सेतु. दावद्भावः । + सवि. स्मृचगतम् ।
× व्यम. पमागतम् ।

याद्यधिकारापत्तावनादिव्यवहारविरोधाच्च । तथा च दौहित्राभावे औरसपुत्रादिस्तदभावे सपत्नीपुत्रः । तत्सुत इति तच्छब्देन व्यवहितयोरौरससपत्नीपुत्रयोरुपादानं नानन्तरस्यापि दौहित्रस्यादौहित्रपुत्रस्य पिण्डदाने बहिर्भावात् । तथा च दौहित्रपर्यन्ताभावे प्रथममौरसस्तदनु तत्पुत्रपौत्रौ । 'पुत्रपौत्रैर्ऋणं देयं' इति ऋणापाकरणाधिकारिणा पिण्डदानाधिकारिणा च तेषामेव रिक्थग्रहणौचित्यात् । तदभावे सपत्नीपुत्रतत्पुत्राणाम् । तेषामेव तदा पिण्डदातृत्वाद्दणापाकर्तृत्वाच्च । प्रागुक्तमनुवचनाच्च । तदेषामभावे सत्स्वपि श्वशुरादिषु सपिण्डेष्वनन्यगतिकैतद्वचनबलाद्भगिनीपुत्रादीनामेव मातृष्वस्रादिधने प्रस्यासत्तितारतम्येनाधिकारः । स्नुषादीनां तु ग्रासाच्छादनमात्रभाक्त्वम् । वचनविरोधे सपिण्डवत्प्रत्यासत्तेरप्रयोजकत्वात् । 'तस्मात्स्त्रियो निरिन्द्रिया अदायाद' इति श्रुतेः । 'अनिन्द्रिया ह्यदायाश्च स्त्रियोऽनृतमिति स्थितिः' इति तन्मूलकमनुवचनाच्च । (मस्मृ.९।१८)। शृङ्गग्राहिकया यत्र कण्ठोक्तः 'पत्नी दुहितर' इत्यादौ यासां स्त्रीणां धनाधिकारस्तासामेव । अन्यासां तु श्रुतिमनुवचनाभ्यां दायग्रहणनिषेध एवेति स्मृतिचन्द्रिकाकारहरदत्तादीनां दाक्षिणात्यनिबन्धृणां जीमूतवाहनादिपौरस्त्यसर्वनिबन्धृणां सिद्धान्ताच्च । व्यप्र.५५४

(८) पुत्रपौत्रसपत्नीपुत्रदौहित्राभावे तु माधवीयेऽपरार्के च बृद्धबृहस्पतिः—मातृष्वसा इत्यादि । औरसपद पुत्रकन्यापरम् । सुतपद सपत्नीकन्यापुत्रपरमिति जीमूतवाहनः । 'सर्वासामेकपत्नीनामि'त्यादि मनूक्तेः । पुत्रशब्दोऽपत्यमात्रपरः । स्त्रीधने कन्याप्राथम्यात्सपत्नीकन्यादौहित्रीदौहित्रसपत्नीपुत्राभावे भगिनीकन्यादयो धनभाजः । अत एव—'स्त्रियास्तु यद्धवेद्वित्तं पित्रा दत्तं कथंचन । ब्राह्मणी तद्धरेत् कन्या तदपत्यस्य वा भवेत् ॥' इति मानवे सवर्णोत्तमवर्णसपत्नीकन्यातत्पुत्रपरमुक्तं मदनरत्ने । 'पितृपत्न्यः सर्वा मातर' इति सुमन्तूक्तेः । 'विदध्यादौरसः पुत्रो जनन्या और्ध्वदेहिकम् । तदभावे सपत्नीजः क्षेत्रजाद्यास्तथा सुताः ॥' इति मदनरत्ने कात्यायनेन क्षेत्रजात्सापत्नपुत्रस्यान्तरङ्गत्वोक्तेश्च । तत्सुतः सपत्नीसुतपुत्रः तदभावे भर्ता तद्भ्रातृतत्पुत्राभावे भगिन्याः कन्यापुत्रो वा भगिन्यभावे मातृष्वसुर्धनं गृह्णाति, ननान्दाया अपत्यं मातुलान्याः देवरापत्य पितृव्यस्त्रियाः भ्रातृपुत्रः पितृष्वसुः जामाता श्वश्वाः देवरो ज्येष्ठभ्रातृपत्न्याः धन क्रमाद्गृह्णीयुरित्यर्थः । इद भगिन्याद्यभावे तत्सत्त्वे तुल्यो विभागः सपत्नीतत्पुत्राभावे देवरादयः सत्त्वे तु तेषामेव धनम् । समो विभाग इति केचित् । तत्र प्रत्यासत्तेः 'मातापित्रोस्तद्दिष्यते' इति मानवे तत्संबन्धिना विधानान्माता तदभावे पिता तदभावे 'पत्नी दुहितरश्चे'ति क्रमेण सपत्नमातृतत्कन्यापितामहीपितृव्यतत्पुत्रसपिण्डा धनभाजः । माधवस्तु मातापितृसंबन्धिनः मातृष्वसा पितृष्वसा तत्पुत्रादयो बृहस्पत्युक्ता ग्राह्याः । तदभावे जामातृसपत्नमात्रादयः । सपत्नीपुत्रस्य स्नुषायाश्च 'पत्नी दुहितर' इत्यत्रानुवादोक्तेर्नैव भाग इत्याह । विता.४६५–७

कात्यायनः

षड्विध स्त्रीधनम् । अध्यग्न्यध्यावाहनिकप्रीतिदत्तसौदायिकान्वाधेयशुल्कानां निरुक्तिः ।

अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतितः स्त्रियै ।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्*॥
विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ ।
तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितम् ॥
यत्पुनर्लभते नारी नीयमाना पितुर्गृहात् ।
अध्यावाहनिकं नाम स्त्रीधनं तदुदाहृतम् ॥

* व्याख्यासंग्रहः अस्मिन्नेव मनुवचने (पृ.१४३२) द्रष्टव्यः ।

(१) दा.७२ मनुकात्यायनौ, व्यक १४९ वाह (वह) मनुकात्यायनौ, विर.५२२ भ्रातृमात (मातृभ्रातृ) मनुकात्यायनौ, विचि २१५ भ्रा...म (मातृभ्रातृपितृप्रत्त) मनुकात्यायनौ, सेतु.५० च (तु) भ्रातृमात (मातृभ्रातृ) मनुकात्यायनौ.

(२) मिता.२।१४३; दा.७३; अप.२।१४३; व्यक.१४९; स्मृच.२८०; ममु.९।१९४; विर.५२४; पमा.५४७; मपा.६७१; रत्न.१६१; विचि.२१५; व्यनि.; स्मृचि.३०; नृप्र.३४,३८; सवि.३७९; मच.९।१९४; व्यप्र.५४३; व्यउ.१५९ यत्स्त्रीभ्यो (स्त्रीभ्यो यत्); व्यम.६९; विता.४३८; सेतु.५१ परि (तु प्र); समु.१३४; विच.१०५; नन्द ९।१९४ सद्भिः (सम्यक्).

(३) मिता.२।१४३; दा.७३ पितुर्गृहात् (हि पैतृकात्) नाम + (तत्) तदु (उ); अप.२।१४३ वाह (वह) तदुदाहृतम् (परिकीर्तितम्); व्यक.१४९ वाह (वह) शेषं दावत्; स्मृच.

[1]प्रीत्या दत्तं तु यत्किञ्चित् श्वश्वा वा श्वशुरेण वा।
पादवन्दनिकं चैव प्रीतिदत्तं तदुच्यते॥
ऊढया कन्यया वापि पत्युः पितृगृहेऽपि वा।
भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतम्॥

२८० नाम (चैव); **ममु.**९।१९४ पितुर्गृहात् (तु पैतृकात्) स्त्रीधन तदु (तत्स्त्रीधनमु), **विर.**५२४ पितुर्गृहात् (हि पैतृकात्) तदु (समु); **पमा.**५४७-८; **मपा.**६७१ निक नाम (निकाद्यञ्), **सुबो.**२।१३६ वाह (वह), **दीक.**४६ विरवत्; **रत्न.**१६१ वाह (वह); **विचि.**२१५ विरवत्; **व्यनि.** वाह (वस्रा) तदु (समु); **स्मृचि.**३० ह्यात् (हे) वाह (वह); **नृप्र.**३८; **सवि.**३७९ लभते (लँयते) वाह (हव) तदुदाहृतम् (परिकीर्तितम्); **मच.**९।१९४ पितुर्गृहात् (हि पैतृकात्) तदुदाहृतम् (परिकीर्तितम्); **व्यप्र.**५४३ रत्नवत्, **व्यउ.**१५९, **व्यम.**६८ रत्नवत्; **विता.**४३८ रत्नवत्; **बाल.**२।१३५ (पृ.१९२) रत्नवत्, **सेतु.**५१ दावत्; **समु.**१३४ रत्नवत्; **विच.**१०६ मचवत्, **नन्द.**९।१९४ पितुर्गृहात् (ऽपि पैतृकात्) उत्तरार्धे (तन्नाम्नाध्याहावनिक स्त्रीधनं समुदाहृतम्).

(१) **मिता.**२।१४३; **अप.**२।१४३ उत्तरार्धे (पादवन्दनिक तत्तु लावण्यार्जितमुच्यते); **व्यक.**१४९ दत्त तु (प्रदत्त) चैव प्रीतिदत्त तदु (यत्तल्लावण्यार्जितमु), **स्मृच.**२८० तु (च); **विर.**५२४ व्यकवत्; **पमा.**५४८, **मपा.**६७१ तु (च), **रत्न.**१६१, **विचि.**२१५ उत्तरार्धं व्यकवत्; **व्यनि.** व्यकवत्; **स्मृचि.**३० मपावत्; **नृप्र.**३८ पाद. .चैव (दायादेभ्यो न तद्धरात्); **सवि.**३७९ तु (च), **चन्द्र.**८८ दत्त तु (प्रदत्त) उत्तरार्धे (पादवन्दनिक तच्च लावण्यार्जितमुच्यते); **व्यप्र.**५४३; **व्यउ.**१५९, **व्यम.**६८; **विता.**४३८; **समु.**१३४; **नन्द.**९।१९४ त्या दत्त तु (तिदत्त हि) उत्तरार्धं व्यकवत्.

(२) **शुनी** ४।७९३-४ हेऽपि वा (हाच्च यत्) उत्तरार्धे (मातृपित्रादिभिर्दत्त धन सौदायिक स्मृतम्); **मिता.**२।१४३; **दा.**७६ पि वा (थवा) भ्रातुः (भर्तुः); **अप.**२।१४३ उत्तरार्धे (ऊढायाः कन्यकाया वा पत्युः पितृगृहेऽपि वा), **व्यक.**१४७; **स्मृच.**२८२ दावत्; **विर.**५१० पि वा (थवा), **स्मृसा.**६०; **पमा.**५४९ पत्युः (भर्तुः) बृहस्पतिः, **मपा.**६७१; **रत्न.**१४६ गृहेऽपि वा (गृहादपि); **विचि.**२१७ पि वा (थवा) भ्रातुः (प्राप्तं), **व्यनि.** पत्युः (भर्तुः) शात् (शे) स्मृतम् (धनम्); **स्मृचि.**३० स्मृतम् (भवेत्) नारदः; **नृप्र.**३८, **दात.**१८४ दावत्; **सवि.**३७८ (=) भ्रातुः (भर्तुः); **चन्द्र.**८१ वापि (सार्थं) पि वा (थवा) स्मृ (म); **व्यप्र.**

(१) पत्युर्गृह इति संबन्धः, भ्रातुः पित्रोर्वेत्युपलक्षणं, तेनान्येभ्योऽपि स्वमातापितृकुलेभ्यो यल्लब्धं तत्सौदायिकम्। ×व्यक.१४७

(२) द्विरागमनकाले यत्कुतोऽपि प्राप्तं तदध्यावाहनिकमित्यर्थः। लावण्य शीलनैपुण्यादि। तथा च पादप्रणतायै शीलादिमत्यै वा स्त्रियै श्वशुरादिना यद्दत्तम्।
विचि.२१५

(३) सुदायेभ्यः पितृमातृभर्तृकुलसबन्धिभ्यो लब्धं सौदायिकम्। दात.१८४

[1]विवाहात्परतो यत्तु लब्धं भर्तृकुलात्स्त्रिया।
अन्वाधेयं तदुक्तं तु लब्धं बन्धुकुलात्तथा॥
ऊर्ध्वं लब्धं तु यत्किञ्चित् संस्कारात्प्रीतितः स्त्रिया।
भर्तुः पित्रोः सकाशाद्वा अन्वाधेयं तु तद्भृगुः॥

× विर. व्यकवत्.

५४३ भर्तुः सकाशादिति कल्पतर्वादौ पाठः; **व्यउ.**१५९; **व्यम.**५६ रत्नवत्, व्यासः: ६९ वापि (सार्धम्) पि वा (थवा); **विता.**३४२ भ्रातुः (मातुः): ४३८ भ्रातुः (भर्तुः) ४४३ (सुदायश्च स्वबन्धुभ्यो लब्ध सौदायिक मतम्) उक्त.; **बाल.**२।१४४ पितृ (पति) स्मृतम् (भवेत्); **सेतु.**५३ पत्युः (भर्तुः) स्मृतम् (धन) शेष दावत्, **समु.**१३२; **विच.**१०९ दावत्.

(१) **मिता.**२।१४३ यत्तु (यच्च) तदुक्त तु (तु तदद्रव्य) बन्धु (पितृ), **दा.**७१,९३; **अप.**२।१४३ पू; **व्यक.**१४९ बन्धु (यत्स्व), **स्मृच.**२८१ पू. २८४ तदुक्त तु (तु तदद्रव्य) बन्धु (पितृ); **ममु.**९।१९५ लात्स्त्रि (ले स्त्रि) लब्ध बन्धुकुलात् (सर्वबन्धुकुले), **विर.**५२४ उत्तरार्धे (अन्वाधेय तु तत्प्रोक्त यल्लब्ध स्वकुलात्तथा); **पमा.**५४८ तुं (तुः) उत्तरार्धे (अन्वाधेय तु तदद्रव्य लब्ध पितृकुलात्तथा); **मपा.**६७१ यत्तु (यच्च) लात्स्त्रि (ले स्त्रि) उत्तरार्धं पमावत्; **रत्न.**१६१ विरवत्; **दीक.**४६ तदुक्त तु (तु तत्प्रोक्त); **विचि.**२१६ विरवत्; **व्यनि.** यत्तु (यच्च); **सवि.**३८० मितावत्; **मच.**९।१९५ लब्ध बन्धुकुलात् (सर्व बन्धुकुले) शेषं ममुवत्; **चन्द्र.**८७; **वीमि.**२।१४३ यत्तु (यच्च) उत्तरार्धं पमावत्; **व्यप्र.**५४३ विरवत्; **व्यउ.**१५९ यत्तु (यच्च) उत्तरार्धे (अन्वाधेय तु यद्द्रव्यं लब्ध पितृकुलात्स्त्रिया); **व्यम.**६८ विरवत्; **विता.**४३८ यत्तु (यच्च) उत्तरार्धं पमावत्; **सेतु.**५० यत्तु (यच्च) क्त तु (क्त च); **समु.**१३५ उत्तरार्धं पमावत्; **विच १०७** व्यनिवत्; **नन्द.**९।१९५.

(२) **दा.७१:९३** पित्रोः सकाशाद्वा (सकाशात् पित्रोर्वा);

गृहोपस्करवाह्यानां दोह्याभरणकर्मणाम् ।
मूल्यं लब्धं तु यत्किञ्चिच्छुल्कं तत्परिकीर्तितम्+॥

(१) बन्धुपदेन मातापित्रोरुपादान, तेनायमर्थः मातापितृद्वारेण संबन्धिना पित्रोश्च सकाशात् यत्तु विवाहात् परतो लब्ध तथा भर्तुः सकाशात् भर्तृकुलाच्च श्वशुरादितो यल्लब्ध धन तदन्वाधेयम्। दा.७२

गृहादिकर्मभिः शिल्पिभिस्तत्कर्मकरणाय भर्त्रादिप्रेरणार्थं स्त्रियै यदुत्कोचदान तत् शुल्क तदेव मूल्य प्रवृत्त्यर्थत्वात्। दा.९३

(२) 'विवाहात्परत' इत्यनेनान्वाधेयपदस्थानुशब्दार्थो विवृतः। लब्धमित्यनेन तत्रस्थान्वाधेयशब्दार्थोऽभिहित इति मन्तव्यम्। स्मृच.२८४

मूल्य गृहोपस्करादीना मूल्य लब्ध कन्याधनत्वेन वरादिसकाशात्कन्यार्पणोपाधितयेति शेषः। ×स्मृच.२८१

(३) एतदेव स्त्रीणा सौदायिकम्। गृहोपस्करादि करणोपाधिना स्त्रिया गृहे पतितो यल्लब्ध तच्छुल्कमित्यर्थः। विचि.२१६

(४) गृहोपस्कराद्यलाभे तन्मूल्य कन्यादानकाले कन्यार्थं दत्त तच्छुल्क इत्यर्थः। व्यम.६९

(५) मिताटीका— गृहादिकर्तृणा शिल्पिना तत्तत्कर्मकरणाय भर्त्रादिप्रेरणार्थ तस्मै यद्दान तच्छुल्कम्। तदेव मूल्य प्रवृत्त्यर्थत्वात् इत्यर्थः। गृह प्रसिद्धम्। उपस्कर उलूखलादिः। वाह्यो वृषादिः। दोह्यो गवादिः। आभरण प्रसिद्धम्। कर्मणामिति पाठे ते दासाद्याः, तदा एतेषा मूल्य यल्लब्ध तच्छुल्कमित्यर्थः। बाल.२।१४४

स्त्रीणा वृत्तिरूपो दायः

[1]पितृमातृपतिभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै ।
यथाशक्त्या द्विसाहस्रादातव्यं स्थावरादृते ॥

पितृमात्रादिभिर्जीवनार्थं स्त्रियै दाने विशेषमाह स एव— पितृमातृपतिभ्रातृज्ञातिभ्य इति। यथाशक्ति स्थावरव्यतिरिक्त द्विसाहस्र द्विसाहस्रकार्षापणपर्यन्तं दातव्यमित्यर्थः। *स्मृच.२८१

स्त्रीधनत्वापवादः

तत्र सोपधि यद्दत्तं यच्च योगवशेन वा ।
पित्रा मात्राऽथवा पत्या न तत्स्त्रीधनमिष्यते ॥

(१) यत्तु उत्सवादावेव भार्यामित्येवमाद्युपाधिना अलङ्कारादि दत्त यच्च दायादादिवच्चनार्थं दत्त तत्स्त्रीधन न भवतीत्याह कात्यायनः— यच्च सोपाधिकमिति। योगवशेन वञ्चनाद्युपाधितयेत्यर्थः। ननूपाधिवञ्चनयोरभावेऽपि पित्रादिना दत्त न तत्स्त्रीधन भवितुमर्हति। 'भार्या पुत्रश्च दासश्च निर्धनाः सर्व एव ते। यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्॥' इति स्मरणात्। मैवम्। पुत्रादिसाहचर्यान्नानेन परमार्थतो निर्धनत्व भार्याया गम्यते। किन्तु धनव्ययादावस्वातन्त्र्यमात्रम्। तेन यस्यैते तस्यानुज्ञया स्वधनस्याऽपि विनियोग कुर्युरिति स्मृतिवाक्यस्य तात्पर्यमवसेयम्। अत एवोक्तं मनुना 'न निर्हार स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात्। स्वकादपि च वित्ताद्धि स्वस्य भर्तुरनुज्ञया॥' (मस्मृ.९।१९९)। स्वतन्त्रानुज्ञया परतन्त्राः स्त्रियः स्त्रीपुंससाधारणवित्तादात्मीय-

+ 'गृहोपस्कर' इत्यादिवचनस्य विर., चन्द्र.व्याख्यान दावत्।

× रत्न., सवि. स्मृचवत्।

* अवशिष्टव्याख्यान 'द्विसहस्रपरो दाय.' इति व्यासवचने द्रष्टव्यम्। पमा., व्यप्र., व्यम., बाल. स्मृचवत्।

अप २।१४३ उत्त., **व्यक.**१४९ स्त्रिया (स्त्रियाः), **स्मृच.** २८१ अन्वा (ह्यन्वा) उत्त., **विर.**५२४, **विता.**४३८ तद्भृगु. (तज्जगु.), **बाल.**२।१४४ तद्भृगुः (तद्भवेत्), **सेतु.** ५० व्य तु (व्यत्र), **विच.**१०७

(१) **दा.**९३ मं (मिं); **अप.**२।१४३ मं (मिं) त्य (त्य), **व्यक.**१४९ दावत्; **स्मृच.**२८१ दावत्, **विर** ५२५ मं (मिं) तु (च); **पमा.**५४८ दावत्; **रत्न.**१६१; **दीक.**४६; **विचि.**२१६ च्छुल्क तत् (त्तच्छुल्क), **व्यनि.** विचिवत्, **नृप्र.**३८ दावत्, **सवि.**३७९ (=) तु (च); **चन्द्र.**८८; **व्यप्र.**५४३ विचिवत्; **व्यम.**६९; **विता.**४३८ त्य (त्य); **बाल.**२।१४४, **सेतु.**५२ विरवत्; **समु.**१३५ दावत्, **विच.** १०८ विरवत्.

[1] स्त्रीणा वृत्तिरूपो दायः

पितृमातृपतिभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै ।
यथाशक्त्या द्विसाहस्रादातव्यं स्थावरादृते ॥

पितृमात्रादिभिर्जीवनार्थं स्त्रियै दाने विशेषमाह स एव— पितृमातृपतिभ्रातृज्ञातिभ्य इति। यथाशक्ति स्थावरव्यतिरिक्त द्विसाहस्र द्विसाहस्रकार्षापणपर्यन्तं दातव्यमित्यर्थः। *स्मृच.२८१

स्त्रीधनत्वापवादः

तत्र सोपधि यद्दत्तं यच्च योगवशेन वा ।
पित्रा मात्राऽथवा पत्या न तत्स्त्रीधनमिष्यते ॥

(१) यत्तु उत्सवादावेव भार्यामित्येवमाद्युपाधिना अलङ्कारादि दत्त यच्च दायादादिवच्चनार्थं दत्त तत्स्त्रीधन न भवतीत्याह कात्यायनः— यच्च सोपाधिकमिति। योगवशेन वञ्चनाद्युपाधितयेत्यर्थः। ननूपाधिवञ्चनयोरभावेऽपि पित्रादिना दत्त न तत्स्त्रीधन भवितुमर्हति। 'भार्या पुत्रश्च दासश्च निर्धनाः सर्व एव ते। यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्॥' इति स्मरणात्। मैवम्। पुत्रादिसाहचर्यान्नानेन परमार्थतो निर्धनत्व भार्याया गम्यते। किन्तु धनव्ययादावस्वातन्त्र्यमात्रम्। तेन यस्यैते तस्यानुज्ञया स्वधनस्याऽपि विनियोग कुर्युरिति स्मृतिवाक्यस्य तात्पर्यमवसेयम्। अत एवोक्तं मनुना 'न निर्हार स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात्। स्वकादपि च वित्ताद्धि स्वस्य भर्तुरनुज्ञया॥' (मस्मृ.९।१९९)। स्वतन्त्रानुज्ञया परतन्त्राः स्त्रियः स्त्रीपुंससाधारणवित्तादात्मीय-

* अवशिष्टव्याख्यान 'द्विसहस्रपरो दाय.' इति व्यासवचने द्रष्टव्यम्। पमा., व्यप्र., व्यम., बाल. स्मृचवत्।

(१) **स्मृच.**२८१ भिः (भ्यः) त्या (क्ति) स्त्रादा (स्त्र दा); **पमा.**५४८, **रत्न.**१६१; **नृप्र.**३८; **व्यप्र.**५४४; **व्यम.** ६९, **बाल.**२।१४३ ज्ञा (जा), **समु** १३५.

(२) **स्मृच.**२८१ तत्र (यच्च) पधि यद् (पाधिक); **पमा.** ५४९ पधि (पाधि); **रत्न.**१६१; **व्यप्र.**५४२ मिष्य (मुच्य); **व्यम.**६९ वा पत्या (पत्या वा); **विता** ४४६-७ त्र सो (त्र्यो) शेष व्यमवत्; **बाल.**२।१४४; **समु.**१३५ तत्र (यत्तु) पधि यद् (पाधिक).

वित्ताद्वा त्यागभोगादिकं न कुर्युरित्यर्थः। अथवा निर्धनत्वाभिधायकस्मृतिवाक्यस्य शिल्पादिप्राप्तधनविषयत्वं ज्ञेयम्। यदाह कात्यायनः—प्राप्तं शिल्पैस्तु इत्यादि।
*स्मृच.२८१

(२) उपधिरुत्सवादावेवेदमस्य दत्तं त्वया धार्यमलङ्कारादि नान्यदेति नियमस्तत्पूर्वकं दत्तं सोपधि। योगो वचन दायादाना कन्यायै दत्तमिदं तद्धनं कथ विभाज्यमिति। +व्यप्र.५४२

(३) सोपधि कार्यार्थदत्त योगवशेन भूषणार्थम्। विता.४४७

(४) उत्सवादौ शोभा उपधिः। संभोगार्थं छल योगः। बाल.२।१४४

प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः।
भर्तुः स्वाम्यं तदा तत्र शेषं तु स्त्रीधनं स्मृतम्×॥

(१) तदेवमव्यवस्थितसख्यास्त्रीधनकीर्तनात् न षट्सख्या विवक्षिता किन्तु स्त्रीधनकीर्तनमात्रपराणि वचनानि। तदेव च स्त्रीधनं यत्र भर्तृतः स्वातन्त्र्येण दानविक्रयभोगान् कर्तुमधिकरोति। तदिद किंचित् सक्षिप्याह कात्यायनः— प्राप्त शिल्पैस्तु यद्वित्त इत्यादि। अन्यत इति पितृमातृभर्तृकुलव्यतिरिक्तात् यल्लब्ध शिल्पेन वा यदर्जित तत्र भर्तुः स्वाम्यं स्वातन्त्र्य, अनापद्यपि भर्त्ता ग्रहीतुमर्हति, तेन स्त्रिया अपि धनं न स्त्रीधनमस्वातन्त्र्यात्। एतद्द्वयातिरिक्तधन तु स्त्रिया एव दानविक्रयाद्यधिकारात्। =दा.७६

(२) अन्यतः सख्यादितः प्राप्तस्य स्त्रीधनत्वेन विशेषकारित्वात्। स्मृच.२८१

(३) उक्तप्रकारातिरिक्त यत्स्त्रीधनं स्त्रियाऽर्जितं, तत्र भर्तुरेव स्वाम्यमित्यर्थः। विर.५२४

(४) यत्तु मनुः 'भार्या पुत्रश्चे'त्यादि तदपि शिल्पाद्यर्जितधनपरम्। आधिवेदनिकादिष्वप्यस्वातन्त्र्यपरमिति तु युक्तम्। अत एव मनुः— 'न निर्हार स्त्रियः' इति (मस्मृ.९।१९९)। निर्हारो व्ययः। व्यम.६९

(५) मिताक्षरा—इति कात्यायनीयं तु महानिबन्धेषु मिताक्षरादिष्वदर्शनान्निर्मूलम्। समूलत्वेऽपि वा तदेत्युक्तिसाफल्याय च भर्तरि जीवति उभयविषयमात्रे तस्य स्वाम्यस्य विद्यमानत्वान्न तस्याः स्वाम्यम्। अन्यत्सर्वं तस्या एव। उभयमपि भर्तृरभावे तस्या एवेत्यर्थं पूर्वैकवाक्यतैव। यद्वा। भर्तरि जीवत्यपि वक्ष्यमाणदुर्भिक्षाद्याशयकम्। तदा दुर्भिक्षादौ। शेष दुर्भिक्षाद्यभाववदित्यर्थात्। अत एव सौदायिके सदा स्त्रीणामित्यत्र सदेत्युक्तम्। तत्रापि सदेति पाठे तु भर्तृरित्यस्य मध्यमणिन्यायेनान्वयात् भर्तुः शिल्पैः तन्तुवायादिस्त्रीभिर्यद्वस्त्रवयनादिना प्राप्तं भर्तुः प्रीत्या च यदन्यैर्दत्त तत्र भर्तुः स्वामित्वमित्यर्थः। युक्तं चैतत्। अन्यथा स्वार्जनस्य स्वत्वानापादकत्वापत्तेरिति।
बाल.२।१४४

स्त्रीणा सौदायिके स्थावरादावपि स्वातन्त्र्यम्

सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते।
यस्मात्तदानृशंस्यार्थं तैर्दत्तमुपजीवनम्॥
सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्तितम्।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि॥

(१) शुनी.४।७९२ पू.; मेधा.९।१३१ पू.; दा.७६ त्तमुप (त्त तत्र), अप.२।१४३; व्यक.१४७ प्राप्य स्त्रीणां (स्त्रीणा प्राप्य) शेष दावत्; स्मृच.२८२; विर.५१० दावत्; स्मृसा.६२ दावत्, क्रमेण नारदः; पमा.५४९ बृहस्पतिः; रत्न.१६१; विचि.२१७ दावत्; व्यनि. त्तमुप (त्त तत्र); नृप्र.३८ पू.; दात.१८४ दावत्; चन्द्र.८१ दावत्; व्यप्र. ५४४; व्यम.६९; विता.४४३ दावत्; बाल.२।१४४ दावत्; सेतु.५३ दावत्; समु.१३५; विच.१०९ दावत्.

(२) शुनी.४।७९३ उत्त.; दा.७६; अप.२।१४३; व्यक.१४७; स्मृच.२८२; विर.५१०; स्मृसा.६२ ष्वपि (पु च); पमा.५४९ उत्त., क्रमेण बृहस्पतिः; रत्न.१६१;

* पमा., व्यम. स्मृचगतम्। + स्मृचवद्भावः।

× व्यप्र.व्याख्यानं 'पितृमातृपतिभ्रातृ' इति याज्ञवल्क्यवचने (पृ.१४४३) द्रष्टव्यम्।

= दात. वचनव्याख्यान दावत्।

(१) दा.७६ तदा (भवेत्); व्यक.१४९ तदा (सदा) स्मृतम् (भवेत्); स्मृच.२८१; विर.५२४ व्यकवत्; पमा. ५५० यद्वित्तं (यद्दत्तम्); रत्न.१६१ यद्वित्तं (यत्किञ्चित्); व्यनि. तदा (धने); दात.१८४ दावत्; चन्द्र.८८ खु यद्वित्त (श्च यच्चान्यैः) न्यतः (र्जितम्) स्मृतम् (भवेत्); व्यप्र. ५४२ तदा (सदा) शेष रत्नवत्; व्यम.६९ रत्नवत्; विता. ४४७ तदा तत्र (तु तत्र स्यात्) शेष रत्नवत्; बाल.२। १४४ यद (तद); सेतु.५३ प्राप्त शिल्पैः (शिल्पैर्लब्ध) तदा (भवेत्); समु.१३५; विच.१०९ दावत्.

(१) सुदायसबन्धिभ्यो लब्धं सौदायिकम्। दा.७६

(२) तत्र (सौदायिके) च स्थावरे स्त्रिया दानादिषु स्वातन्त्र्यं, भर्तृदत्तेषु तु स्थावरातिरिक्तेष्वेव यथेष्ट दानादिष्वधिकारः। ÷व्यक.१४७

(३) द्वितीयश्लोकेन सौदायिकाख्यस्त्रीधने पत्यौ विद्यमानेऽपि स्वातन्त्र्यमुक्तं सदेत्यभिधानात्।

स्मृच.२८२

(४) आनृशस्यमदारुणता, तेन यस्मादियं वित्ता भावाद्दारुणा न भवत्येतदर्थं तैः पित्रादिभिर्दत्त तत्र जीवनमिति लभ्यते। *विर.५११

(५) 'सदे'त्यस्य भर्तरि जीवत्यजीवति वेत्यर्थः।

बाल.२।१४४

भर्तृदाये स्त्रीणा स्वातन्त्र्यादिविचारः

भर्तृदायं मृते पत्यौ विन्यसेत्स्त्री यथेष्टतः।
विद्यमाने तु संरक्षेत् क्षपयेत्तत्कुलेऽन्यथा ×॥
अपुत्रा शयनं भर्तुः पालयन्ती गुरौ स्थिता।
भुञ्जीतामरणात्क्षान्ता दायादा ऊर्ध्वमाप्नुयुः +॥

(१) भर्तृदायो भर्तृदत्तं धनं भर्तृदायमनभिधाय मन्वादिभिर्भर्तृदत्तस्याभिधानात् नारदेनापि भर्तृदत्तमनभिधाय भर्तृदायस्याभिधानात्। तथा अन्यत्रापि भर्तृदत्ते भर्तृदायप्रयोगो दृष्टः। =दा.७३

(२) भर्तृदायो भर्तृदत्तम्। तन्मध्ये तु तदनन्तरोक्त-

÷ विचि. व्यकगतम्। * शेष व्यकवत्।

× विर., विचि.व्याख्यान 'अपुत्रा शयन' इति कात्यायन-वचने मृतापुत्रधनाधिकारक्रमप्रकरणे द्रष्टव्यम्। दात. विर-वद्भावः।

+ व्याख्यान स्थलादिनिर्देशश्च मृतापुत्रधनाधिकारक्रम-प्रकरणे द्रष्टव्यः। = सेतु. दागतम्।

विचि.२१७; **व्यनि.** यथेष्ट (तदेष्ट); **दात.**१८४; **व्यप्र.**५४४; **व्यम.**६९; **विता.**४४३ यिकें (यिकं); **बाल.**२।११७, २। १३५ (पृ.२३८) नारदः, २।१४४; **सेतु.**५३; **समु.**१३५; **विच.**१०९.

(१) **दा.**७३; **व्यक.**१४७; **स्मृच.**२८२; **विर.**५११, **स्मृसा.**६२ क्रमेण नारदः :७१ ष्टतः (च्छतः) पू., नारदः; **विचि.**२१८; **दात.**१९०; **चन्द्र.**८२ ष्टतः (च्छिा) पू.; **विता.**४४३ त्तत्कु (द्वा कु); **बाल.**२।११७ त्तत्कु (त्त कु): २। १४३ ने तु (नेषु); **सेतु.**५१; **समु.**१३५; **विच.**१०६.

पादत्रयेणाविद्यमाने पत्यौ स्वातन्त्र्यमुक्तम्। 'विद्यमाने तु संरक्षेत्' इत्यभिधानात्। सरक्षेद्भर्तृदत्त भर्त्राज्ञया विना न विन्यसेदित्यर्थः। स्मृच.२८२

(३) भर्तृदायमिति व्यपदेशो विभागानन्तरमिति। तदुत्तरतास्य वाच्यस्य तत्पूर्वमुत्तरमपि वा। द्रव्याभावे तत्कुल एव काल नयेदित्यर्थः। एतच्च स्थावर विना बोद्धव्यम्। सामान्येन तदधिकारस्याभावात्। तत्रापि दानादिवर्ज्य भोगस्तु स्यात्। स्मृसा.६२-३

(४) पत्युर्धन पतिमरणात्स्वसंक्रान्त स्त्री यथाकाम विनियुञ्जीत। विन्यसेत् विनियुञ्जीत अक्षान्ता भोग कुर्यात् इति यथेष्टभोगमात्र न तूत्पथव्यय कुर्यादिति फलितम्। 'स्त्रीणा स्वपतिदायस्तु उपभोगफलः स्मृतः' इति भारतवचनाच्च। विद्यमाने च भर्तरि तद्धन रक्षेन्न यथाकाम विन्यसेत्। 'नापहारं स्त्रियः कुर्युः पतिवित्तात्कथचन। विद्यमाने तु सरक्षेत्॥' इति मनुवचनात्। सम्यक्प्रकारेण संरक्षेदित्यर्थः। भर्तृदायाभावे तु भर्तृकुले तिष्ठेत् 'क्षपयेत्तत्कुलेऽन्यथा' इति मनुवचनात्। न नाभिगृहं गच्छेदित्यर्थः। चन्द्र.८२

(५) स्वातन्त्र्यापवादमाह–विद्यमानेष्विति। दुहित्रादिदायादेषु तत्सरक्षेन्न स्वेच्छया व्ययीकुर्यात्। अन्यथा दुहित्राद्यभावे। अत्र मृते स्वातन्त्र्योक्त्या जीवति तन्नेति गम्यते। यथेष्टविनियोगाभावे तत्कुले भर्तृकुले क्षपयेत् विनियोजयेदित्यर्थः। *बाल.२।१४३

स्त्रीभिर्हार्य धनम्। स्त्रीधने पत्युरधिकारमर्यादा। स्त्रीणा स्वधने स्वातन्त्र्यम्। धनानधिकारिणी।

अथ चेत्स द्विभार्यः स्यान्न च तां भजते पुनः।
प्रीत्या निसृष्टमपि चेत्प्रतिदाप्यः स तद्धनात्॥

* शेष स्मृचवद्भावः।

(१) **दा.**७८ निसृ (विस); **अप.**२।१४७(=)न्न च (न्नैव); **व्यक.**१४८ अथ चेत्सद्वि (यदि चेद्वि); **स्मृच.**२८३; **विर.** ५१४ द्धनात् (द्धनम्); **स्मृसा.**६३ अथ (यदा) च ता (चैतां); **रत्न.**१६२ चेत्प्रतिदाप्यः स (च पतिर्दाप्यश्च); **विचि.**२२० चेत्प्र (यत्प्र); **व्यनि.** भजते (भजतां); **चन्द्र.** ८४ च तां (चैतां) चेत्प्र (तत्प्र); **व्यप्र.**५४५ निसृ (सस्), **व्यम** ७० रत्नवत्, देवलः; **विता.**४४७; **बाल.**२।१४४ दावत्; **सेतु.**५४ निसृ (ऽभिसृ); **समु.**१३५ चेत्प्र (च प्र); **विच.**११० निसृ (विस्) चेत्प्र (तत्प्र).

ग्रासाच्छादनवासानामाच्छेदो यत्र योषितः ।
तत्र स्वमाददीत स्त्री विभागं रिक्थिनां तथा ॥
[1]लिखितस्येति धर्मोऽयं प्राप्ते भर्तृकुले वसेत् ।
व्याधिता प्रेतकाले तु गच्छेद्बन्धुकुलं ततः ॥

(१) स्त्रिया धन गृहीत्वा यद्यपरभार्यया सह वसति या चावजानीते तदा गृहीतधन राज्ञा बलाद्ग्राह्यः, भक्ताच्छादनादिक यदि भर्ता न ददाति तदा तदपि स्त्रिया आकृष्य ग्राह्यम् । दा.७८

(२) लिखितस्य महर्षेर्मतोऽयं धर्मः । यद्वा भर्तुरियस्य स्त्रीधनस्य पत्रनिविष्टस्याय धर्मः । प्राप्ते च धने स्त्री भर्तृकुले वसेन्नान्यत्र । अप.२।१४७

(३) यदा प्रीत्या यया भार्यया धन दत्तं ता पतिर्न यजते ऋतुकालादावपि, तथा ग्रासाच्छादनवासानामाच्छेदो वा भवति, तदा व्याध्याद्युपहतं पतिमालोक्य बधन दत्तमपि तया बलाद्ग्राह्यं, तच्चाश्रमे तस्याऽबध भवति, तदापि पत्यादिसकाशाद्ग्राह्यमित्यय शास्त्रधर्मः । प्राप्ते च तत्र धने सा भर्तुः कुले एव वसेत् । बलवति व्याधौ तद्बन्धुकुल गच्छेदिति बन्धुकुलं तत इत्यस्यार्थः । *विर.५१५

(४) लिखितस्य शास्त्रोक्तस्य ऋक्थिनो दायिनः सकाशाद् भाग स्वमाददीत इत्यय धर्म इत्यर्थः । चन्द्र.८५

(५) स्त्रिया धनं गृहीत्वा यद्यपरभार्यया सह वसत्येनावजानीते तदा गृहीत तद्धन राज्ञा बलाद्ग्राह्यः । भक्ताच्छादननिवासान् यदि भर्ता न ददाति तदा तेऽपि स्त्रिया बलाद्ग्राह्यास्तत्पर्याप्त धन वा ग्राह्यमिति श्लोकद्वयस्य 'अथ चेत्' इत्यस्यार्थः । इदमपि तस्या दोषराहित्ये बोध्यम् । ×व्यप्र.५४५

(६) सवृद्धिक बलाद्राज्ञा दाप्य इत्यर्थः । विता.४४७

[2]व्याधितं व्यसनस्थं च धनिकैर्वापपीडितम् ।
ज्ञात्वा निसृष्टं यत्प्रीत्या दद्यादात्मेच्छया तु सः ॥

(१) यत्स्त्रिया भर्तार व्याध्यादिव्यसनेभ्यो मोचयितु धन निसृष्ट दत्त तदात्मेच्छया तस्यै दद्यात् । अप.२।१४७

(२) ज्ञात्वा स्त्रियेति शेषः । विसृष्ट अनुज्ञातम् । यद्यपीदं वचनं 'न भर्ता नैव च सुतः' इत्यादिवचनानानन्तर्यतो भर्त्रादिविषयमिति प्रतिभाति, तथापि 'अथ चेत्स द्विभार्यः स्यात्' 'ग्रासाच्छादन' इत्युपरितनवचनपर्यालोचनया भर्त्रेकविषयमिति मन्तव्यम् । स्मृच.२८३

(३) तत्स्वेच्छया स्वामिप्रभृतिर्दद्यादित्यनन्तरवाक्यार्थः । +विर.५१३

[3]अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिका ।
व्यभिचाररता या च स्त्रीधनं न च सार्हति ॥
[4]यज्ञार्थं द्रव्यमुत्पन्नं तस्माद्द्रव्यं नियोजयेत् ।

* विधि. विरगतम् ।

(१) **दा** ७८ माच्छे (मुच्छे); **अप.**२।१४७ (=) ददी (दधी); **व्यक.**१४८; **स्मृच.**२८३ (विभा ..तथा०) दावत्, **वेर.**५१४ नां त (नस्त); **रत्न.**१६२ विरवत्; **विचि.**२२० वेरवत्; **व्यनि** ; **चन्द्र** ८४ पितः(पिताम्) नां त (नस्त); **व्यप्र.**५४५ दावत्; **व्यम.**७० नां तथा (नस्तदा) देवलः; **विता.** ४४७ पूर्वार्धे (अन्नाच्छादनवस्त्राणां छेदो यत्र स्त्रियोऽधिकः), **शाल.**२।१४४ दावत्; **सेतु** ५४, **समु.**१३५ नां तथा (नस्तदा); **विच.**११० चन्द्रवत् .

(२) **अप.**२।१४७ (=) काले तु (कार्ये च); **व्यक.**१४८; **वेर.**५१४; **विचि.**२२०-१ कुले (कुल) कुलं (जन); **व्यनि** द्वन्द्वं (द्वन्द्वं); **चन्द्र.**८४ भर्तृ (पति) तु (च); **विता.** ४४७ प्रेत (मृत्यु)उक्त.; **समु.**१३५ भर्तृ (पितृ) द्वन्धु (द्वन्द्वं).

× व्यम. व्यप्रवद्भावः । + विचि. विरगतम् ।

(१) **अप.**२।१४७ वोंप (वोंपि); **व्यक.**१४८ वोंप (श्रोप) डितम् (डिते) तु (च); **स्मृच.**२८३ निसृ(विसृ); **वेर.** ५१३ ज्ञात्वा (दृष्ट्वा) तु (हि); **रत्न.**१६२ ज्ञात्वा (जात्वा) यत्(तत्) तु सः (ऽपि सा); **विचि.**२२० वोंप (श्रोप) यत्(स) तु (हि); **व्यनि** , **विता.** ४४७ वोंप (श्र प्र); **समु.**१३५.

(२) **अप.**२।१४७ (=) न च सा (सा च ना), **व्यक.** १४८; **स्मृच.**२८३:२९३ चार्थ (वार्थ); **वेर.**५१४ चार्थ (ऽर्थवि) या च (स्त्री तु); **स्मृसा.**६३ अपवत्; **पमा.**५३२ पका (पचा) चार्थ (वार्थ) न च सा (सा न चा); **रत्न.**१५४: १६२ निर्लज्जा चार्थ (निर्मर्यादार्थ); **विचि.**२२१ न च (न तु); **व्यनि.**; **नृप्र.**४१ क्रिया (परा) या च (स्त्री तु); **दात.** १८४ शिका (शिनी); **चन्द्र.**८४ दातवत्; **व्यप्र.**५१६: ५४५ विचिवत्; **व्यम.**६२ दातवत् : ७० रत्नवत्, देवलः; **विता.**३९८ न च सा (नैवम) : ४४७-८ चार्थ (वार्थ) न च (नैव); **सेतु.**५५ शिका (शिनी) स्त्रीधन न च सा (न च स्त्रीधनम); **समु** १३५ रत्नवत्; **विच.**१११ दातवत् .

(३) **मिता.**२।१३५ (=) द्रव्यमुत्पन्न (विहितं वित्तं) द्रव्यं

स्थानेषु धर्मयुक्तेषु न स्त्रीमूर्खविधर्मिषु ॥
न भर्ता नैव च सुतो न पिता भ्रातरो न च ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥
यदि ह्येकतरोऽप्येषां स्त्रीधनं भक्षयेद्बलात् ।
सवृद्धिं प्रतिदाप्यः स्याद्दण्डं चैव समाप्नुयात् ॥
तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकम् ।
मूलमेव स दाप्यः स्याद्यदा स धनवान्भवेत् ॥

(१) पुरुषाणा तु भर्त्रादीना स्त्रीधने सर्वत्रास्वातन्त्र्यमेव । यथाह कात्यायनः–'न भर्ता नैव च सुतः' इत्यादि । धनवान् यदि भवेदित्यभिधानान्मूल्यमात्रमपि निर्धनो न दाप्य इत्यर्थाद् गम्यते । अनुज्ञाप्य भक्षणेऽपि मूल्यदानाभिधानाद्भर्त्रादीनामस्वामित्वमवगम्यते । न पुनः पारतन्त्र्यमात्रम् । एव च विवाहेन भार्याया भर्तृधने नित्यपरतन्त्रस्वामित्व सपाद्यते । न पुनर्भर्तुर्भार्याधने तादृशमपीत्यवगन्तव्यम् । +स्मृच.२८२

(२) दण्ड गृहीततुल्यमन्यत्र तथादर्शनात् ।
दवि.३२०

जीवन्त्याः पतिपुत्रास्तु देवराः पितृबान्धवाः ।
अनीशाः स्त्रीधनस्योक्ता दण्डयास्त्वपहरन्ति ये ॥
भर्त्रा प्रतिश्रुतं देयमृणवत्स्त्रीधनं सुतैः ।
तिष्ठेद्भर्तृकुले या तु न सा पितृकुले वसेत् ॥

(१) भर्त्रा प्रतिश्रुत त्वगृहीतमपि देयम् । 'भर्त्रा प्रतिश्रुत देयमृणवत्स्त्रीधन सुतैः' इति तेनैवोक्तत्वात् । सुतग्रहण पौत्रस्याप्युपलक्षणार्थं ऋणवदित्यभिधानात् । अनेनापि स्त्रीधने सुतादीना नास्ति स्वाम्यमिति गम्यते ।

(त्तद्वि) युक्ते (जुष्टे), **अप** २।१४७ (=) युक्ते (निष्ठे) मिषु (भेंसु); **व्यक** १४८ युक्तेत (जुष्टे); **विर.**५१४; **पमा** ५३४ मितावत्; **रत्न** १६२, **दात** १७२ धर्मयुक्तेषु (द्रव्ययोगेषु), **व्यप्र.**४९६ पूर्वार्धं मितावत्, स्मृत्यन्तरम् : ४९९ (=) व्यकवत्, द्वितीयपाद विना; **व्यम.**७० क्रमेण देवल; **विता.**३९० (=) द्रव्यमुत्पन्न (विहित द्रव्य) शेष मितावत्; **समु.**९८ तस्मादद्रव्य (तत्तस्मिन्वि).

(१) **व्यमा.**२८६, **दा.**७८, **अप.**२।१४३ (=) सुतो न पिता (पिता न सुतो) : २।१४७, **व्यक** १४८ ने वा (ने च), **स्मृच** २८२; **विर.**५१३; **स्मृसा** ६३; **पमा.**५५६, **रत्न.**१६२; **व्यनि.**; **दवि.**३२०; **दात.**१८५; **सवि.**३७८; **चन्द्र.**८३ न च (ऽपि वा); **व्यप्र.**५४५; **व्यम.**७० विसर्गे (ऽपि सर्गे) क्रमेण नारदः; **विता.**४४७, **बाल.**२।१४४; **सेतु.**५४; **समु.**१३५; **विच.**११०.

(२) **व्यमा.**२८६ ऽप्येषा...क्षयेद्व (ह्येषा भक्षयेत् स्त्रीधनं व), **दा.**७८ रोऽप्ये (रस्त्वे); **अप.**२।१४३(=), २।१४७; **व्यक.**१४८ ह्ये (त्वे) ऽप्ये (ह्ये); **स्मृच.**२८२ ऽप्ये (ह्ये) द्धि प्रति (द्धिक स); **विर.**५१३ रोऽप्ये (रस्ते) भक्षयेद्व (हरते व); **पमा** ५५६ ह्ये (त्वे) द्धि प्रति (द्धिक प्र); **रत्न.**१६२ ह्ये (त्वे) शेष स्मृचवत्; **विचि.**१० दि ह्ये (ष्यै) प्ये (मी) दण्ड चैव (विनय च) क्रमेण सवर्तः; **व्यनि.** ह्येक (ह्यन्य); **दवि.**३२० ह्ये (त्वे) प्ये (मी); **सवि** ३८० ऽप्ये (ह्ये) द्धि प्रति (द्धिक प्र); **चन्द्र.**४ ऽप्ये (ह्ये) (स्त्री०) येद्व (यते व) प्रति (तस्य) दण्ड चैव (विनय च); **व्यप्र.**५४५ ह्ये (त्वे) द्धि प्रति (द्धिक स), **व्यम.**७० रत्नवत्; **विता.**४४७ दि ह्ये (त्वयै) प्ये (मी); **बाल.**२।१४४ ऽप्ये (ह्ये); **सेतु.**१४ प्ये (मी) दण्डं चैव (विनयं च) क्रमेण सवर्तः : ५४ प्ये (मी); **समु.**१३५ द्धि प्रति (द्धिक स); **विच.**११० प्येषां...क्षयेद्व (मीषा भक्षयेत् स्त्रीधन व); **विव्य.**२४ ऽप्ये (ह्ये) दण्डे चैव (विनय च) संवर्तः.

(३) **दा.**७८ स दाप्यः स्याद्य (तदा दाप्यो य); **अप.**२।१४७ स दा (प्रदा) दा स (दाऽसौ); **व्यक.**१४८ मूल...दा स (ल भवेत्तदा दाप्य. स यदा), **स्मृच.**२८२ स दा (प्रदा) दा स (धसौ); **विर.**५१३; **पमा.**५५६ दा स (धसौ); **रत्न.**१६२; **विचि.**१०-१ वान्भ (भाग्भ) क्रमेण सवर्तः : २२० वान्भ (भाग्भ) क्रमेण देवलः; **व्यनि.** दा स (दाऽसौ); **सवि.**३८० स दाप्यः स्याद्यदा स (प्रदाप्य स्याद्यधसौ) संवर्तः; **चन्द्र** ४ सवर्तः, **व्यप्र.**५४५ दावत्; **व्यम.**७० क्रमेण नारदः; **विता.** ४४७ दावत्, **सेतु.**१४ क्रमेण सवर्तः. ५४; **समु.**१३५ स्मृचवत्; **विच.**११० स दा (तु दा); **विव्य.**२४ सवर्तः.

(१) **अप.**२।१४३; **विता.**४४६ न्याः (न्या) त्रास्तु (त्राद्या).

(२) **अप.**२।१४७ न सा (तथा); **व्यक.**१४८ णवत् (णं च) कुले या (गृहे या); **स्मृच.**२८३ पू.; **विर.**५१४ या तु न सा (जातु न या); **स्मृसा.**६३ णवत्(णं तु) कुले व (गृहे व); **रत्न.**१६२ पू.; **विचि.**२२१ या (सा); **व्यनि.**; **चन्द्र.**८४ णवत् (णं च) द्भर्तृ (र्तृति) तु न सा (च न च); **व्यप्र.**५४६ पू.; **व्यम.**६९ पू., देवलः; **विता.**४४८ णवत् (ण च) कुले या तु न सा (गृहे सा चेन्न या); **समु.**१३५-६ या तु न सा (या वा या वा).

+ सवि. स्मृचवत्. व्यप्र., व्यम. स्मृचवद्भावः.

ततश्च स्त्रीधने जीवद्विभागे भागो नास्त्येव स्त्र्येकस्वामिकत्वात्। स्मृच.२८३-४

(२) अनेन स्त्रीधने जीवन्त्या तस्या सुताना जन्मना स्वत्वेऽपि नास्ति विभाग इति गम्यते। व्यप्र.५४६

स्त्रीधनविभागः

दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेत्।
बन्धुदत्तं तु बन्धूनामभावे भर्तृगामि तत्॥
भगिन्यो बान्धवैः सार्धं विभजेरन्नभर्तृकाः।
स्त्रीधनस्येति धर्म्योऽयं विभागस्तु प्रकल्पितः*॥

(१) तानि यौतकद्रव्यविषयाणि। विवाहकाले लब्ध यौतकम्। ×दा.८२

प्रथम सोदराणा तदभावे मातुः मातुरभावे पितुः एषा पुनरभावे तद्धन भर्तुः। यथा कात्यायनः—बन्धु दत्तमिति। बन्धूनामभाव इत्यनेन भ्रातुरभाव इत्यपि सूचित भ्रातुरभावे पित्रोरधिकारात् दण्डापूपन्यायात् तत्सिद्धेः। दा.९५-६

(२) उत्तरार्धमासुरादिविवाहचतुष्टयोढाविषयम्। अप.२।१४५

(३) यत्तु कात्यायनेनोक्तं 'बन्धुदत्त बन्धूनामभावे भर्तृगामि तत्' इति तदुक्तपञ्चविधेतरविवाहसंस्कृतस्त्रीधनविषयम्। +स्मृच.२८६

बान्धवैः सहोदरैर्भ्रातृभिरित्यर्थः। सभर्तृका इति विशेषण विधवानिवृत्त्यर्थम्। न पुनः कन्यानिवृत्त्यर्थम्। पूर्वोक्तवचनविरोधात्। स्मृच.२८५

उक्तार्थोपसंहारस्तु कात्यायनेन कृतः—'स्त्रीधनस्य विभागोऽय सधर्मः परिकल्पितः' इति। इत्येवं निरूपितो धर्मोऽय, कल्पितो विभागः स्त्रीधनस्य अध्यवसेय इत्यर्थः। स्मृच.२८७

(४) पारिणाय्य यौतक पितृदत्त च धन दुहितॄणामभावे पुत्रगामि। तदतिरिक्तस्त्रीधने पूर्वोक्ताः। अभावे पूर्वोक्ताना भर्तृगाम्येव धनमिति। विर.५१८

(५) दुहितॄणामिति। परिणाय्य ब्राह्मादिविवाहकाले पितृदत्त यौतुक च यन्मातुर्धन तत्तस्याः पुत्र्यभावे पुत्रगामि भवतीत्यर्थः। एतदतिरिक्त तु स्त्रिया धन तस्या अभावे पुत्रीपुत्रोभयगामीत्युक्तमेव प्राक्। बन्धुदत्तमिति पित्रतिरिक्तेन दत्त यत्तद्भ्रातृभगिन्योः, कि तु कन्या तत्र समाशा, विवाहिता तु किंचिद्भागभागिति भगिन्य इत्यादेरर्थः। अभावे पुत्रीपुत्राद्यभावे, स्त्रिया धनं पतिगामीत्यर्थः। *विचि.२२३

(६) दुहितॄणामभाव इत्यष्टविधविवाहविषयम्। पुत्राणामभावे बन्धुभिः भ्रात्रादिभिर्दत्त तेष्वेव बन्धूनामभावे तैर्दत्त भर्तृगामि। पक्षान्तरमाह—भगिन्य इति। बन्धुषु सत्सु बन्धुदत्त वा भर्तृगामि भगिन्यो बान्धवैः सह विभजेरन्निति। व्यनि.

(७) तत्र मातुरेव पुत्रो न दुहितुः। ताभ्या ऋते अन्वयः इति अन्वयपदे मातुरेवान्वयात्ताभ्या इति पञ्चम्यन्तस्य संबन्धाभावात्तदविरोधान्नारदादेस्तद्यौतुकपरम्। विता.४५२

आसुरादिषु यल्लब्धं स्त्रीधनं पैतृकं स्त्रिया।
अभावे तदपत्यानां मातापित्रोस्तदिष्यते॥

---

* बाल.व्याख्यानस्य 'मातुर्दुहितरः' इति याज्ञवल्क्य-(२।११७) वचनस्थमिनावद्भावः (पृ.१४४१)।

× शेष 'जनन्यां सस्थितायां' इति मनुवचने (पृ.१४३३) द्रष्टव्यम्। दात. दावद्भावः। सेतु. दागतम्।

(१) **दा.८२ पू.**, ९५ उत्त., **अप.**२।११७, २।१४५; **व्यक.**१४८; **स्मृच.**२८६ (बन्धुदत्त तु०) उत्त.; **विर.** ५१८; **स्मृसा.**६४; **पमा.**५५३ उत्त.; **विचि.**२२२-३; **व्यनि.**; **स्मृचि.**२९; **दात.**१८६ पू.; **सवि.**३८५ नामभा (नां ख्रभा) उत्त.; **व्यप्र.**५४८ त्रेषु (त्रस्य) पू.:५५३ उत्त; **व्यम.७१** द्भवेत् (द्धनम्): ७२ उत्त.; **विता.**४५१ व्यप्रवत्, पू.:४५२ व्यप्रवत्: ४१४,४६५ उत्त.; **बाल.**२।१३५ (पृ.२०६)व्यमवत्, पू.:२।१४५ [(पृ.२५८) व्यप्रवत्, पू: (पृ.२६५) उत्त.]; **सेतु.**६१ त्तं तु (त्तं च) उत्त.; **समु.१३६.**

(२) **अप.**२।११७ म्यों (मों); **व्यक.**१४८ स्येति (स्य तु) म्यों (मों); **स्मृच.**२८५ पू.:२८७ (स्त्रीधनस्य विभागोऽयं सधर्मः परिकल्पितः) उत्त.; **विर.**५१८ रन् (युः); **स्मृसा.** ६४ रन् (यु.) पू.; **विचि.**२२३ रन् (युः) म्यों (मों); **व्यनि.** गस्तु (गे तु) शेष विचिवत्; **स्मृचि** २९ पू.; **व्यप्र.**५४७ पू.; **व्यम.७१** पू.; **विता.**४५२; **बाल.**२।१४५ (पृ.२६८) सभर्तृकाः (समं ततः) म्यों (मों) प्रकल्पितः (समः स्मृतः); **समु.**

+ सवि. स्मृचगतम्। * विरवद्भावः।

१३६ म्यों (मों) गस्तु (गेषु).

(१) **स्मृच.**२८६; **पमा.**५५४; **व्यनि.** स्त्रीधनं पैतृकं (पैतृक स्त्रीधनं) तदिष्यते (तथैव च); **बाल.**२।१४५(पृ.२५७); **समु.१३६.**

पैतृकं मातापितृसकाशादानेनागतम्। तदपत्यानाम भावे आसुरादिषु सस्कृताया उत्पन्नापत्यानामभावे। अपत्यग्रहण पूर्वोक्तदुहित्रादिपौत्रान्ताना स्त्रीधनहारिणा मुपलक्षणार्थम्। स्मृच.२८६

शुल्कपूर्वकदत्ताविषये धनवाद.

पश्चाद्वरेण यदत्तं तस्याः प्रतिलभेत सः।
अथागच्छेत् समूढायां दत्तं पूर्ववरो हरेत् ×॥

व्यासः

सौदायिक शुल्क च

यत्कन्याया विवाहे च विवाहात्परतश्च यत्।
पितृभर्तृगृहात्प्राप्तं धन सौदायिकं स्मृतम् *॥

['ऊढया कन्यया' इति कात्यायनवचन एतद्वचनं चोपन्यस्योक्तम्] एतद्वचनद्वयेनैतदुक्त भवति। वाग्दान-प्रभृतिपतिगृहप्रवेशरूपोत्सवसमाप्तिपर्यन्त पितृगृहे पति-गृहे वा पितृपक्षत एव स्त्रिया लब्ध यौतकादिधनं सौदायिकशब्दाभिधेयमिति। ननु 'सौदायिक तु यदेयं सुदायो भरण च तत्' इति निघण्टुपाठात् कथं सौदा-यिकशब्दोऽत्र प्रयुक्तः। स्वार्थे तद्धितान्ततयेत्यनवद्यम्। स्मृच.२८२

यदानीनं भर्तृगृहे शुल्कं तत्परिकीर्तितम्॥

भर्तृगृहगमनार्थमुत्कोचादि यदत्तम्। +दा.९३

स्त्रीणा वृत्तिरूपो दाय.

[1]द्विसहस्रपरो दायः स्त्रियै देयो धनस्य तु।
यच्च भर्त्रा धनं दत्तं सा यथाकाममाप्नुयात्॥

× बाल.व्याख्यानं 'अपुत्रेण परक्षेत्रे' इति याज्ञवल्क्यवचने (पृ.१३४६) द्रष्टव्यम्।

* सवि.व्याख्यान 'सौदायिक स्त्री' इति विष्णुवचने (पृ.१४२८) द्रष्टव्यम्।

+ व्यप्र., बाल. दावत्।

(१) **बाल.**२।१३७.

(२) **अप.**२।१४३ भर्तृ (भ्रातृ) धनं (तत्तु) वृद्धव्यासः, **स्मृच.**२८२; **सवि.**३७८; **विता.**४४० (=) अपवत्; **समु.**१३५.

(३) **दा.**९३ नीतं (नेतु); **व्यप्र.**५४३ दावत्; **बाल.** २।१४४.

(४) **दा.**७४ माप्नु (मश्नु); **अप.**२।१४३ सहस्र (साहस्रः) तु (च); **व्यक.**१४७ सा यथा...त् (यथाकाममवाप्नुयात्);

(१) द्विसहस्रपर्यन्तः स्त्रियै देयो नाधिकः केनेत्या-काङ्क्षाया भर्त्रेति श्रुतमन्वेति न पुनरश्रुतकल्पना, तथा च देय इति ददातिर्मुख्यः स्यात् मृतपतिधने तु तावति पत्न्या एव स्वामित्वात् गौणः स चान्याय्यः। यच्च भर्तृदत्त धन तद्यथाकाममश्नीयात्। अतोऽपुत्रस्य मृतस्य पत्युर्धने द्विसहस्रपर्यन्त एव पत्न्या अधिकारो न सर्वत्रेति यदुक्त तद्विद्वद्भिरनादेयम्। दा.७४

(२) प्रत्यब्द कार्षापणसहस्रद्वयपरिमितो धनस्यैक-देशः परो दायः स्त्रियै देयः। परः परमः। दीयत इति दायः। तमिम दाय भर्तृदत्त वाऽनिषिद्धेन मार्गेण यथा-काम देवरादेरनुमतिमन्तरेणाप्याप्नुयात्। अतोऽधिके तु देवराद्यनुमतिरपेक्षणीयेत्यर्थाद्गम्यते। *अप.२।१४३

(३) एष परो दायः स्त्रिया नाधिक इति। एतत् प्रभूते धने, ज्ञातयश्च न रक्षेयुरिति शङ्कायाम्। उ.२।१४।२

(४) दीयते इति दायः। परः परमः। एव च द्विसाहस्रकार्षापणाधिकमूल्यो धनस्य भागो जीवनार्थ न समुद्धानामपि देय इत्यवगम्यते। स्त्रियै देय इत्यत्र प्रत्यब्दमिति विधेयसख्या योग्यतावलादवगम्यते। ततश्च प्रत्यब्दमसकृदर्पणनियमोऽयम्। अनेकाब्देषूप-जीवनार्थ सकृदेव दाने तु नायमवधिनियमो नाऽपि स्थावरपर्युदासः। ×स्मृच.२८१

(५) यावद्धर्त्रा दत्त धन स्त्रीस्वातन्त्र्यविषय तावद्दर्शयति व्यासः—द्विसहस्रेति। द्वे सहस्रे पणाना परिमाणमस्येति द्विसहस्रपण इति वचनात् अल्पे धने अल्पदानमेवेति स्वेच्छादेय स्वयं प्राप्तमिति वचनात् साधारणधनाभिप्रायमेतदिति वदन्ति। प्रकाशस्तु या अयोग्यभर्तृका भर्त्रव्यवेन श्रुताः पृथक्क्रियन्ते, ताभ्यः

* विता. अपगतम्। × व्यम., बाल. स्मृचगतम्। **गौमि.**२८।१९ रो (णो) स्त्रियै (पत्न्यै); **उ.**२।१४।२ सहस्र (साहस्रः); **स्मृच.**२८१ सहस्र (साहस्र) तु (च) पू.;२८२ उत्त.; **विर.**५१० रो (णो), **रत्न.**१६१ सहस्र (साहस्रः) पू.; **व्यनि.** स्र (स्रात्) शेष व्यकवत्; **सवि.**३७७ उत्त.; **व्यप्र.** ५४४ रत्नवत्, पू.; **व्यम.**६९ यै (या) शेष अपवत्, पू.; **विता.**४३९-४० रो (णो) सा यथा (तथा); **बाल.**२।१४३ रो (णो) यथाकामम (यथावदवा); **समु.**१३५ माप्नु (मश्नु) शेष अपवत्,

पणसहस्राधिकमदेयमिति। विर.५१०

(६) अपुत्रस्य स्वर्यातस्य विभक्तस्यासंसृष्टिनो धन परिणीता यज्ञसंयुक्ता सकलमेव गृह्णाति। बहवश्चेत्सजातीया विजातीयाश्च यदा सविभज्य धन गृह्णन्ति, द्विसहस्रपणात्परमपि भर्तृदत्त यथाकाममेवाप्नुयात्। अदत्ते तु द्विसाहस्रमेव पण पत्न्या ग्राह्यम्। व्यनि.

(७) आद्विसाहस्रादिति कात्यायनेन पर इति च व्यासेनोक्तेरितोऽधिकमतिधनिनापि न स्त्रीभ्यो देयमिति दर्शितम्। अय च नियमः प्रतिवत्सरमसकृद्दर्शने जेयस्तेनानेकवत्सरेषु जीवनार्थ दीयमानमितोऽधिकमपि भवति चेत् न दोषः। जीवनाद्यर्थत्वाद्दानस्य। यावज्जीव च द्विसाहस्रमात्रेण तन्निर्वाहासभवात्। +व्यप्र.५४४

देवलः

स्त्रीधनम्। तत्र स्त्रीणा स्वातन्त्र्यम्। पत्युः स्त्रीधनेऽधिकारमर्यादा।

वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत्।
भोक्त्री च स्वयमेवेदं पतिर्नार्हत्यनापदि॥
वृथा मोक्षे च भोगे च स्त्रियै दद्यात्सवृद्धिकम्।
पुत्रार्त्तिहरणे वापि स्त्रीधनं भोक्तुमर्हति॥

(१) द्यूतगीतादिप्रयोजनो धनव्ययो वृथा मोक्षः। भोगस्तु स्व्यन्नपानाद्युपयोगः। पुत्रार्तिहरणे स्त्रीधनमुपभोग्य ग्राह्यमित्यर्थः। अप.२।१४७

(२) वृत्तिर्वर्तनार्थ पित्रादिना दत्तम्। लभ्यत इति लाभः। एतदुक्तं भवति। पार्वत्यादिप्रीत्यर्थ व्रतादौ यत्स्त्रिया लभ्यते तदपि स्त्रीधनमिति। स्वयमेवेत्येवकारः स्वापत्याना व्युदासार्थः। पत्युर्व्युदासस्य पतिर्नार्हतीत्यनेन सिद्धत्वात्। पत्युर्व्युदासेन ततो बहिरङ्गभ्रात्रादिव्युदासस्य च दण्डापूपन्यायसिद्धत्वात्। वृथा आपद विनेत्यर्थः। मोक्षस्त्यागः। स्त्रियाऽननुज्ञातबलात्काररहितत्यागभोगविषयमेतत्। सवृद्धिकप्रदानस्य दण्डसहितस्यानभिधानात्। 'पतिर्नार्हत्यनापदी'ति वदन् आपदि तु पतिरेवार्हति स्त्रीधनं भोक्तु नान्य इति दर्शयति। अत एव 'पुत्रार्तिहरणे वाऽपि स्त्रीधन भोक्तुमर्हति' इत्यनन्तरवचने भोक्तुमर्हतीत्यत्र पतिरिति शेषो द्रष्टव्यः। पुत्रग्रहण कुटुम्बोपलक्षणार्थम्। आर्तिर्धनालाभनिमित्ततो दुरपनोदाऽत्र विवक्षिता। तस्या हरणे परिहरणे वा शब्दादन्यत्रापि धनालाभनिमित्ततो दुष्परिहारमहासकटे स्त्रीधनमननुज्ञातमपि पतिर्भोक्तु त्यक्तु वाऽर्हतीत्युक्तम्। ननु परधनत्यागे भोगे च परस्य स्वाम्यनुज्ञया विना कथमर्हता। उच्यते। स्वाम्यनुज्ञाभावेऽपि पूर्वोक्तविषये स्वाधीनजनस्वामिके तु स्त्रीधने यथेष्टविनियोगार्हेऽप्यापदपनोदकत्यागभोगादावर्हताऽस्तीत्यस्मादेव वचनात्कल्प्यत इत्यदोषः। *स्मृच.२८३

(३) वृत्तिर्वृत्त्यर्थ दत्तधन, लाभो बन्धुभ्यो लब्धं, शुल्क विवाहार्थितया कन्यायै दत्त धनम्। +विर.५१२

(४) शुल्कमेवात्र लाभः। स्मृसा.६३

(५) वृत्तिर्जीवनार्थ पित्रादिभिः दत्त धनम्। लाभः शौर्यादिना प्रीत्या वा कुतश्चिल्लब्धम्। मोक्षस्त्यागो दानमितियावत्। अत्र पतिर्नार्हत्यनापदीति पत्युरेवापदि स्त्रीधनभोगार्हता नान्येषामिति सूचितम्। =रत्न.१६२

(६) यद्वा लाभो वृद्धिः पूर्वोक्तस्त्रीधन परिकल्पितवृद्धिमूलत्वेन व्यवह्रियते। सा च वृद्धिर्लाभशब्देनोच्यते। यद्यपि प्रयुक्तधनस्वामिन एव कल्पिता वृद्धिः, तथाऽपि धनप्रयोगे स्त्रीणामनधिकारात् पत्युरेव तदधिकारात् तथा शङ्का मा भूदित्युपदिष्टम्। सवि.३८१

(७) वृद्धिर्वर्धनार्थ पित्रादिना दत्तमिति स्मृतिचन्द्रिकायाम्। ×व्यप्र.५४५

+ रत्न. व्यप्रवद्भावः

(१) **दा.**७५ च स्व (तत्स्व); **अप.**२।१४७ दावत्; **व्यक.** १४८:१४९ पू., **स्मृच** २८३ भश्च (भ च) क्त्वा च (क्तु तत्), **विर** ५१२ ५२४ पू., **स्मृसा.**६३, **पमा.**५५६ दावत्; **रत्न.**१६२; **विचि.**२१९, **व्यनि.** भश्च (भ च) शेष दावत्; **सवि.**३८०-८१ क्त्वा च (क्त्येतत्), **चन्द्र** ८३; **व्यप्र.**५४५ वृत्ति (वृद्धि) क्त्वा च (क्त्येतत्); **व्यम.**७०; **विता** ४४२ लक (लक) भवेत् (स्मृतम्) क्त्वा च (क्त्वा तत्) द पतिः (य भर्ता); **बाल.**२।१४३ दावत्; **सेतु.**५२ दावत्; **समु.**१३५ दावत्; **विच** १०८ भवेत् (स्मृतम्).

(२) **अप.**२।१४७; **व्यक.**१४८ वा (चा); **स्मृच.**२८३ पू.; **विर.** ५१२; **पमा.**५५६ पू, **रत्न.**१६२; **विचि.**२१९ मोक्षे (दाने) वा (चा); **व्यनि.** यै (यो) पुत्रार्तिहरणे वापि (अत्रात्मभरणेऽपि); **सवि.**३८१ पू.; **चन्द्र.**८३ मोक्षे (क्षेपे); **व्यप्र.**५४५ पू. :५४६ व्यकवत्, उत्त.; **व्यम.**७०, **विता.** ४४२ मोक्षे (दाने) पू.; **समु.**१३५.

* व्यम. स्मृचगतम्।
+ शेष स्मृचगतम्। विचि., चन्द्र. विरगतम्।
= शेष स्मृचगतम्। × शेषं स्मृचगत रत्नगत च।

मातृधनविभागः। अप्रजस्त्रीधनविभागः। मृतकन्याधनविभागक्रमः।

सामान्यं पुत्रकन्यानां मृतायां स्त्रीधनं स्त्रियाम्।
अप्रजायां हरेद्भर्त्ता माता भ्राता पितापि वा॥

(१) इह पुत्रकन्ययोः साधारणं मातृधनमिति मुख्यक्त, केवलकुमार्याः सकलमातृधनाधिकारित्वे यौतकधने विशेषवचनं मन्वादीनामनर्थकं स्यात् सर्वत्राधिकारा-विशेषात्। *दा.७९

(२) हरेद्भर्त्ता ब्राह्मादिषु, मातेत्यासुरादिषु, एव च मनुनारदयोरपि देवलोक्तमादायात्र तात्पर्यमिति मन्त व्यम्। विर.५१९ २०

(३) अत्र द्वन्द्वनिर्देशात् पुत्रकन्ययोस्तुल्याधिकारः, अ-न्यतराभावेऽन्यतरस्य तद्धन, एतयोरभावे ऊढाया दुहितुः पुत्रवत्याः सभवितपुत्रायाश्च तुल्याधिकारः। दात.१८५

(४) पूर्वार्धेन मातरि मृतायामष्टविधविवाहेषु स्त्रीधने पुत्रकन्याना समग्रहणमुच्यते। उत्तरार्धेनासुरादिषु तत्त द्धन प्रदातृभिरेवाऽऽदेयमित्युच्यते। भ्रातृपद भर्ता हरेत्, मातृभिर्दत्तं तैरेवादेयमिति। व्यनि.

(५) अत्र तु द्वन्द्वस्यैव श्रवणात्पुत्राणा कन्याना च सहाधिकारः प्रतीयते। इद चान्वाधेयपतिप्रीतिदत्त-द्विविधस्त्रीधनविषयम्। व्यप्र.५४७

(६) मिताटीका—देवलवाक्य तु मातृधन पुत्रमात्र-सत्वे तेनैव ग्राह्य, कन्यामात्रस्य सत्त्वे तयैव ग्राह्य इत्येव समानत्वमात्रबोधक न क्रमबोधक, नापि सहाधिकार-बोधकमिति न दोषः। बाल.२।१४५ (पृ.२६१)

[१]रिक्थं मृतायां कन्यायां गृह्णीयुः सोदराः समम्।
तदभावे भवेन्मातुः पितुर्मातुश्च तत्क्रमात्॥

उशना

मातृधनविभागः

दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेत्॥

तदप्रत्तदुहितृविषय तत्रर्तुकालभर्तुरसभवेनान्वयासभ-वात्। स्मृच.२८६

*विता. दावद्भावः।

(१) दा.७९; व्यक १४९ वा (च); विर.५१९; व्यनि.; दात.१८५,१८७ स्त्रियाम् (विदुः); व्यप्र.५४७; विता. ४५१ मनुदेवलौ; बाल.२।१४५ (पृ.२६०); सेतु.५६ नं (ने); समु.१३६; विच.११५.

(२) समु.१३६. (३) स्मृच.२८६.

यमः

आसुरादिषु अप्रजस्त्रीधनविभागः

[२]आसुरादिषु यद्द्रव्यं विवाहेषु प्रदीयते।
अप्रजायामतीतायां पितैव तु धनं हरेत्॥

(१) विवाहक्रियाया पूर्वापरीभूताया यद्द्रव्यं प्रदी-यते इति यौतकधनमात्रगोचरत्वमेव प्रतीयते। दा.८८

(२) अत्र प्रदीयते पित्रेति शेषो द्रष्टव्यः। ततश्च न पूर्वोक्तवचनविरोधः। एवं पितृव्यमातुलादिबन्धुदत्तं स्त्रीधनं सति संभवेऽपि पितृव्यादिबन्धूना अन्यथा भर्तु-रेवेति आसुरादिष्वव गन्तव्यम्। स्मृच.२८६-७

वृद्धहारीतः

भगिनी चतुर्थभागहारिणी। स्त्रीधनमविभाज्यम्।

[३]भगिन्यश्च तुरीयांशं पैतृकादाहरेद्धनात्।
न स्त्रीधनं तु दायादा विभजेयुरनापदि॥

विविध स्त्रीधनम्

[४]पितृमातृसुता (१)भ्रातृपत्यपत्यानुपागतम्।
आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितम्॥

बृहद्यमः

पुत्रवती पत्नी भागहारिणी

[५]समभागो ग्रहीतव्यः पुत्रमत्या सदैव हि।
पितृभ्यो भ्रातृपुत्रेभ्यो दायादेभ्यो यथाक्रमात्॥
अधिकस्य च भागौ द्वौ इतरेभ्यः समासतः॥

कण्वः

स्त्रीधने स्त्रीणां स्वातन्त्र्यम्। भर्तुरधिकारमर्यादा।

[६]स्त्रीधनस्येशिनी स्त्री स्याद्भर्ता च तदनुज्ञया।
भोक्तुं रक्षयितुं योग्यो भर्तुं नाशयितुं न च॥

कण्ववचनेऽपि दानाधमनविक्रय वर्जयित्वैव स्वाम्य द्रष्टव्यम्। मभा.१८।१

पारस्करः

मातृधनविभागः

[७]अप्रत्तायास्तु दुहितुः स्त्रीधनं परिकीर्त्तितम्।

(१) दा.८८पू.;स्मृच.२८६; व्यनि. पितैव ... हरेत् (बान्ध-वास्तु तदामुयुः); बाल.२।१४५ (पृ.२६४) पू.; समु.१३६.

(२) बृहास्मृ.७।२५६. (३) बृहास्मृ.७।२५७.

(४) बृयस्मृ.५।२२,२३. (५) मभा.१८।१.

(६) पमा.५५२; व्यनि. प्रत्ता (पुत्रा) प्रत्तायां (पुत्रायां); बाल.२।१४५ (पृ.२६८)(=); समु.१३६.

पुत्रस्तु नैव लभते प्रत्तायां तु समांशभाक् ॥
तदप्रतिष्ठितोढदुहितृविषयम्। पमा.५५२

पैठीनसिः

पैत्र्यधनविभागे कन्याभागः। स्त्रीशुल्कं पत्युः। मृतपुत्रिकाधन न पत्युः। मृतकन्याधनविभागः।

[1]कन्या वैवाहिकं स्त्रीधनं च लभते।
[2]स्वं च शुल्कं वरो गृह्णीयात्।
[3]प्रेतायां पुत्रिकायां न भर्ता द्रव्यमर्हत्यपुत्रायां कुमार्यां मात्रा स्वस्रा वा तत् ग्राह्यम्।

(१) ततः कुमार्या स्वस्रा अन्यया वा पुत्रवत्या संभवितपुत्रया स्वस्रा तद्धन ग्राह्य, अतः स्त्र्यधिकारे व्यावृत्तिरन्याधिकारस्य। दा.१७९

(२) अत्र कुमार्या अभावे स्वस्रा ग्राह्यम्। विर.५२१

(३) पुत्रिकाया पितुः पश्चादौरससद्भावे स एव गृह्णीयान्न भर्ता। पमा.५५५

(४) मिताटीका—'प्रेतायां पुत्रिकायामि'त्यादिपैठीनसिस्तु निर्मूलः। समूलत्वे वा आर्षत्वाविशेषाद्विकल्पोऽस्तु। परन्तु तत्रापि मनोः (मस्मृ.९।१३५) प्रामाण्यातिशयात्तदेवानुष्ठेय न तदित्यननुष्ठानलक्षणमप्रामाण्यमेव तस्येति दिगिति बोध्यम्। बाल.२।१४५(पृ.२६८)

लौगाक्षिः

पतिभने स्त्रीणा स्वाम्य न स्वातन्त्र्यम्

[4]ईशाना स्त्री धनस्योक्ता नाधिदानक्रयेषु च।
आध्यादि तत्कृतं तस्मान्न सिध्यति कदाचन ॥

(१) व्यनि.; समु.१२९.

(२) सेतु.५५; विच.१२१.

(३) दा.१७८–९ कायां+ (तु) यां...ग्राह्यम् (यां वा स्वस्रा ग्राह्यं तदन्यथा); अप.२।१४५ द्रव्य (धन) त्रायां (त्रायाः) (कुमार्याः०) स्वस्रा (श्वश्रवा); व्यक.१४९ तायां (तायाः तु) न (च) पुत्रायां...मात्रा (पुत्रिकायां कुमार्यां); विर.५२१ भर्ता+(तत्) यां मात्रा (यां); पमा.५५५ कायां+(तु) मात्रा...ग्राह्यम् (च भ्रात्रा तद्ग्राह्यमित्यपि); बाल.२।१४५ (पृ.२६८); समु.१३६ न भर्ता द्रव्य (तु तद्भर्ता दाय) मात्रा...ग्राह्यम् (तु भ्रात्रा तद्ग्राह्यमिष्यते).

(४) मभा.१८।१.

वृद्धकात्यायनः

अप्रजस्त्रीधनविभागः

[1]पितृभ्यां चैव यद्दत्तं दुहितुः स्थावरं धनम्।
अप्रजायामतीतायां भ्रातृगामि तु सर्वदा ॥

सूतः

जामात्रे दत्त दुहितुः दौहित्रीणा वा भवति

[2]यद्दत्तं दुहितुः पत्ये स्त्रियमेव तदन्वियात्।
मृते जीवति वा पत्यौ तदपत्यमृते स्त्रियाः ॥

स्मृत्यन्तरम्

अप्रजदुहितृधनविभाग.

[3]अपुत्रायाश्च दुहितुः पितृरिक्थं हरन्ति ते।
पितृभ्रातृसुताद्याश्च गोत्रजा नैव बान्धवाः ॥
बान्धवा मातुलादयः पैतृष्वसेयादयश्च। सवि.४२४

अनिर्दिष्टकर्तृकवचनानि

अध्यग्निकाध्यावाहनिकप्रीतिदत्तपादवन्दनिकाना निरुक्तिः

[4]पुण्येऽनुकूलनक्षत्रे विवाहः संस्मृतो बुधैः।
तत्र यल्लभते कन्या तदध्यग्निकमुच्यते ॥
अध्यावाहनिकं तत् स्यान्नीयमाना यदाप्नुयात्।
यद्दत्तं स्याद् भ्रातृगृहे श्वशुरार्थैर्धनं स्त्रियै ॥
प्रीतिदत्तं तु तत् प्रोक्तं पादवन्दनिकं तथा ॥

संग्रहकारः (स्मृतिसंग्रहः)

ब्राह्मणीकन्याया दायभागः

[5]ब्राह्मणी तु भवेत्कन्या हरेत् रिक्थं तु मातृकम्।
पितुः सापत्नमातुश्च भ्रातुश्चापि हरेद्धनम् ॥

÷ अस्य व्याख्यान 'बन्धुदत्त तथा' इत्यादियाज्ञवल्क्यवचने (पृ.१४४४) द्रष्टव्यम्।

(१) दा.९२; दात.१८५; व्यप्र.५५३ अप्रजायामतीतायां (अतीतायामप्रजसि) कात्यायनः; विता.४५४; बाल.२।१४५ (पृ.२६३,२६५); सेतु.६० कात्यायनः; विच.११४ कात्यायनः.

(२) दा.७५(=); विता.४४२ याः (यः) क्रमेण देवलः; सेतु.५२.

(३) सवि.४२४.

(४) चन्द्र.८७.

(५) बाल.२।१४५ (पृ.२६०).

मृतापुत्रधनाधिकारक्रमः

वेदाः

ब्राह्मणधन न राजगामि

[1]नेतां ते देवा अददुस्तुभ्यं नृपते अत्तवे ।
मा ब्राह्मणस्य राजन्य गां जिघत्सो अनाद्याम् ॥
अक्षदुग्धो राजन्यः पाप आत्मपराजितः ।
स ब्राह्मणस्य गामद्यादद्य जीवानि मा श्वः ॥
आविष्टिताघविषा पृदाकूरिव चर्मणा ।
सा ब्राह्मणस्य राजन्य तृष्टैषा गौरनाद्या ॥
निर्वै क्षत्रं नयति हन्ति वर्चोग्निरिवारब्धो वि दुनोति सर्वम् ।
यो ब्राह्मणं मन्यते अन्नमेव स विषस्य पिबति तैमातस्य ॥
य एनं हन्ति मृदुं मन्यमानो देवपीयुर्धनकामो न चित्तात् ।
सं तस्येन्द्रो हृदयेग्निमिन्ध उभे एनं द्विष्टो नभसी चरन्तम् ॥
न ब्राह्मणो हिंसितव्योऽग्निः प्रियतनोरिव ।
सोमो ह्यस्य दायाद इन्द्रो अस्याभिशस्तिपाः ॥
शतापाष्ठां नि गिरति तां न शक्नोति निःखिदन् ।
अन्नं यो ब्रह्मणां मल्वः स्वाद्वदीति मन्यते ॥
जिह्वा ज्या भवति कुल्मलं वाङ्नाडीका दन्तास्तपसाभिदिग्धाः ।
तेभिर्ब्रह्मा विध्यति देवपीयून् हृद्बलैर्धनुर्भिर्देवजूतैः ॥
तीक्ष्णेषवो ब्राह्मणा हेतिमन्तो यामस्यन्ति शरव्यां न सा मृषा ।
अनुहाय तपसा मन्युना चोत दूरादव भिन्दन्त्येनम् ॥
ये सहस्रमराजन्नासन् दशशता उत ।
ते ब्राह्मणस्य गां जग्ध्वा वैतहव्याः पराभवन् ॥
गौरेव तान् हन्यमाना वैतहव्यॉ अवातिरत् ।
ये केसरप्रावन्धायाश्चरमाजामपेचिरन् ॥
उग्रो राजा मन्यमानो ब्राह्मणं यो जिघत्सति ।
परा तत् सिच्यते राष्ट्रं ब्राह्मणो यत्र जीयते ॥
तं वृक्षा अप सेधन्ति छायां नो मोपगा इति ।
यो ब्राह्मणस्य सद्धनमभि नारद मन्यते ॥
विषमेतद् देवकृतं राजा वरुणोऽब्रवीत् ।
न ब्राह्मणस्य गां जग्ध्वा राष्ट्रे जागार कश्चन ॥
तदस्माऽइदं सर्वमाद्यं करोति ब्राह्मणमेवापोद्धरति तस्माद्ब्राह्मणोऽनाद्यः सोमराजा हि भवति ।

(१) असं.५।१८।१-११.

गौतमः

प्रत्यासन्नाः सपिण्डसगोत्रसप्रवराः क्रमेण अपुत्रमृतधनभाजः । नियुक्ता पत्नी वा ।

[3]पिण्डगोत्रर्षिसंबन्धा रिक्थं भजेरन् । स्त्री चानपत्यस्य, बीजं वा लिप्सेत ।

(१) 'स्त्री चानपत्यस्य' इत्युक्त्वाह—'बीजं वा लिप्सेत' इति । अनेन स्त्रीवचन गर्भिण्यर्थमिति ज्ञापयति ।

विश्व.२।१३९

(२) अस्यार्थः । पिण्डगोत्रर्षिसंबन्धा अनपत्यस्य रिक्थ भजेरन् स्त्री वा रिक्थ भजेत् यदि बीज लिप्सेतेति । (पृ.२१७)

गौतमवचनान्नियुक्तायां धनसंबन्ध इति । तदप्यसत् । न हि यदि बीजं लिप्सेत तदानपत्यस्य स्त्री धन गृह्णीयादित्ययमर्थोऽस्मात्प्रतीयते । किं त्वनपत्यस्य धनं पिण्डगोत्रर्षिसंबन्धा भजेरन्स्त्री वा । सा स्त्री बीज वा

(१) असं.५।१९।६,९,१०. (२) शब्रा.५।२।७।१.

(३) गौध.२८।२१-३; विश्व.२।१३९ (पिण्ड... रन्०); मिता.२।१३५ चा (वा) (वा०); दा.२१३ (स्त्री... प्सेत०); अप.२।१३५ ऋषि (ऋर्थ) चा (वा); मभा.; गौमि.२८।१९,२० चा (वा); उ.२।१४।२ (बीजं वा लिप्सेत०); स्मृच.३०१ दावत्; पमा.५३३; नृप्र.४१; व्यप्र. ४९५ गौमिवत्; व्यउ.१५२ गौमिवत्; समु.१४२ गौमिवत्; विच.१३४ भजेरन् (हरेयुः) (स्त्री...प्सेत०).

लिप्सेत संयता वा भवेदिति तस्या धर्मान्तरोपदेशः। वाशब्दस्य पक्षान्तरवचनत्वेन यद्यर्थाप्रतीतेः।

*मिता.२।१३५ (पृ.२१८)

(३) यस्य पुत्रिकारूपमप्यपत्यं नास्ति सोऽनपत्यः तस्य रिक्थं पिण्डादिसबन्धाः भजेरन् स्त्री वा। पिण्डसबन्धाः सपिण्डा गोत्रसबन्धाः सगोत्रा हारीतस्य हारीत इतिवत्। ऋषिसंबन्धाः समानप्रवरा हरितकुत्सपिशंगशखदर्भहेमगवाः परस्परम्। एवमन्यत्रापि। तत्र सपिण्डाद्याः प्रत्यासत्तिक्रमेण गृह्णीयुः। तथा चाऽऽपस्तम्बः—'पुत्राभावे यः प्रत्यासन्नः सपिण्डः' इति। तद्यथा पिता माता च सोदर्यस्तत्पुत्रा भिन्नोदरा भ्रातरस्तत्पुत्राः पितृव्य इत्यादि। सपिण्डाभावे सगोत्रास्तदभावे समानप्रवराः, स्त्री तु सर्वैः सगोत्रादिभिः समुच्चीयते। यदा सपिण्डाद्यो गृह्णन्ति, तदा तैः सह पत्न्यप्येकमंश हरेत्। तथा—'पितुरूर्ध्वं विभजता माताऽप्यंशं समं हरेत्' इति। अत एव स्त्री पृथङ्निर्दिष्टा। सपिण्डादयः समानेन। पत्नीदायस्त्वाचार्यस्य पक्षे न भवति।

मनुरपि—'निरिन्द्रिया अदायादा स्त्रियो नित्यमिति स्थितिः' इति। अत्र सपिण्डाद्यभावे बृहस्पतिः—अन्यत्रेत्यादि। तदेवं मनुबृहस्पतिभ्यां पत्नीदायस्यात्यन्ताभाव उक्तः। याज्ञवल्क्येन तु पत्नीदायः स उक्तः— 'पत्नी दुहितरश्चे'त्यादि। अत्र व्यासः—'द्विसहस्रपण' इति। आचार्येण तु सपिण्डादिसमाशग्रहणमुक्तम्। तत्र सर्वमेव धन सपिण्डाद्या गृहीत्वा स्त्रियो यावज्जीव रक्षेयुरिति मुख्यः कल्पः। तदसभवेऽशनवसनयोः पर्याप्त धनक्षेत्रादिकमशत्वेन व्यपोह्य शेष गृह्णीयुः। तथा च बृहस्पतिना पत्नीदाय प्रतिषिध्य अन्ते उक्तं—'वसनस्याशनस्यैवे'त्यादि।

अथवा स्त्री सपिण्डादिभ्यो बीज लिप्सेत, अपत्यमुत्पादयेदित्युक्त भवति। अस्मिन् पक्षे तु न सपिण्डाद्या धन गृह्णीयुरेष्यतोऽपत्यस्यार्थाय रक्षेयुः। +गौमि.

(४) चशब्दादाचार्यः शिष्यश्च, सामर्थ्यात् सर्वाभावे। तदाह वसिष्ठः 'तदभावे ऋत्विगाचार्यौ' इति। इच्छातो विकल्पः नियोगतो वा। *मभा.

* अप., पमा., व्यप्र., व्यउ. मितागतम्। + उ. गौमिगतम्। * शेषं गौमिगतम्।

सर्वेषामभावे ब्राह्मणानामनपत्यानां धनं श्रोत्रियगाम्येव। इतरेषां राजगामि।

[३]श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्।

(१) अपत्यग्रहणं पिण्डगोत्रर्षिसंबन्धादेरुपलक्षणम्। अनपत्यस्याविद्यमानधनभाजो ब्राह्मणस्य श्रोत्रिया हि रिक्थं भजेरन्। गौमि.

(२) श्रोत्रियाः त्रैविद्यवृद्धाः, न तु छन्दोमात्राध्यायिनः। तथाऽऽह मनुः—'त्रैविद्याः शुचयो दान्ताः' इत्यादि। अनपत्यस्य अविद्यमानपुत्रस्य धनभाजः इत्यर्थः। राज्ञाऽनुज्ञाता रिक्थं भजेरन्, उत्तरस्य राजग्रहणात्। मभा.

(३) एकशाखाध्यायी श्रोत्रियः। मपा.६७५

(४) सब्रह्मचारिणामप्यभावे ब्राह्मणधनं श्रोत्रियो गृह्णीयात् क्षत्रियादिधनं तु राजा गृह्णीयात्। रत्न.१५६

[४]राजेतरेषाम्।

इतरेषां क्षत्रियादीनां रिक्थमनपत्याना राजा भजेत्। ×गौमि.

विभक्तानपत्यधनभाक् ज्येष्ठ एव

[५]असंसृष्टिविभागः प्रेतानां ज्येष्ठस्य।

(१) अत्र ज्येष्ठः पितैवोच्यते। तस्य सोदर्यभ्रात्रन्तराभावे प्रेताना पुत्राणा भ्रात्रन्तरासंसृष्टाना च धनभाक्त्वम्। तदुक्त—'पिता हरेदपुत्रस्ये'ति। अन्ये तु ज्येष्ठशब्द भ्रातर्याहुः तत्पुनर्विचार्यम्। विश्व.२।१४२

(२) असंसृष्टिनो विभक्तभ्रातरः। विभक्तव्यो विभागः। असंसृष्टिना विभागोऽसंसृष्टिविभागः। प्रेतानामित्येतदुपसर्जनीभूतानामप्यसंसृष्टिना विशेषणम्। अनपत्यस्य चेति वर्तते। असंसृष्टिना विभक्तानामनपत्याना

× मभा. गौमिगतम्।

(१) **गौध.**२८।४२; **मिता.**२।१३५ (पृ.२२३); **मभा.**; **गौमि.**२८।३९; **पमा.**५२९; **मपा.**६७५; **रत्न** १५६; **नृप्र.** ४१; **सवि.**४१९; **व्यप्र.**५३१; **व्यम.**६४; **विता.**४१० ॥ (वो) भजेरन् (हरेत्); **बाल.**२।१३५ (पृ.२०४,२२४); **स्मु.**१४२.

(२) **गौध.**२८।४३; **मभा.**; **गौमि.**२८।४०.

(३) **गौध.**२८।२८; **विश्व.**२।१४२ असं (अथ सं); **व्यक.**१६०; **मभा.**; **गौनि** २८।२५; **विर.**५९२ ष्टि (ष्ट); **स्मृसा** १३५; **विचि.**२४० (प्रेतानां धनं ज्येष्ठस्य) एतावदेव.

भ्रातॄणां प्रेतानां यो विभागो विभक्तव्यो धनादिः स ज्येष्ठस्य भ्रातुर्भवति नेतरेषा भ्रातॄणा नापि पत्न्या न च पित्रोरित्याचार्यस्य पक्षः । तथा च शंखलिखितपैठीनसयः—'अपुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यं तदभावे मातापितरौ हरेता पत्नी वा ज्येष्ठा सगोत्रशिष्यसब्रह्मचारिणश्चे'ति । मनुस्तु—'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव च' । देवलश्च—'ततो दायमपुत्रस्य विभजेरन् सहोदराः । सकुल्या दुहिता वाऽपि म्रियमाणः पितापि च ॥' इति । गौमि.

(३) असंसृष्टिनो विभक्ताः सन्तः पृथक् पृथक् यदा भ्रातरो व्यवहरन्ति तेषा यः प्रैति तस्य अनपत्यस्य । कुतः ? अनपत्याधिकारात् । यो भागः स स्वस्वज्येष्ठस्यैव भवति न सर्वेषा, स पितृसम इति । द्वैमातृकाणा समानजातीयाना असमानजातीयानाममिन्नमातृकाणा च यो भागः स स्वस्ववर्गज्येष्ठस्यैव भवति । मभा.

(४) एतदपि पत्नीमातापित्रसत्वे बोद्धव्यम् ।

×विर.५९२

हारीतः

अपुत्रमृतपत्नी यौवनादिदोषवती प्रजीवनमात्रभाक्

[1]विधवा यौवनस्था चेन्नारी भवति कर्कशा ।
आयुषः क्षपणार्थं तु दातव्यं जीवनं तदा ॥

(१) तदपि शङ्कितव्यभिचारायाः सकलधनग्रहणनिषेधपरम् । अस्मादेव वचनादनाशङ्कितव्यभिचारायाः सकलधनग्रहण गम्यते । *मिता.२।१३५

(२) (बालरूपमते) अथवाऽत्यन्तयुवत्यपुत्राभिप्रायं नारदवचन भरणमात्रविधायकम् । अन्यत्र सकलार्थहारिण्येव । तथा च शंखः—'भ्रातृभार्यास्नुषाणा च न्यायप्रवृत्तानामनपत्याना पिण्डमात्रं गुरुर्दद्याज्जीर्णानि वासांस्यविकृतानी'ति । हारीतः—'विधवा यौवनस्था' इत्यादि । अथवा संसृष्टयभिप्रायं 'भ्रातॄणामप्रजः' इति नारदवचनम् । स्मृसा.१२८

(३) संसृष्टिभार्यापरमिदमिति बालरूपः ।

×विचि.२३७

आपस्तम्बः

अपुत्रमृतधनभाजः क्रमेण प्रत्यासन्नाः सपिण्डाः, आचार्यान्तेवासिनौ दुहिता वा । सर्वाभावे राजा ।

[2]पुत्राभावे यः प्रत्यासन्नः सपिण्डः ।
[3]तदभावे आचार्यस्तदभावेऽन्तेवासी । हृत्वा तदर्थेषु धर्मकृत्येषु वोपयोजयेत् ।
[4]दुहिता वा ।

× विवादचिन्तामणिकारेण 'विधवा यौवनस्था' इति वचन 'संसृष्टिभार्यापरमिदमिति बालरूपः' इति भ्रान्त्या समुल्लिखितम् ।

(१) **आध.**२।१४।२; **हिध.**२।७ (पुत्राभावे सपिण्डो यः प्रत्यासन्नः); **मिता.**२।१३५ (पृ.२२३); **गौमि.**२८।१९; **विर.**५९६ (यः०); **स्मृसा.**७३,१३६; **पमा.**६७४ न्नः(न्न); **रत्न.**१५६ यः. पिण्डः (प्रत्यासन्नपिण्डः); **विचि.**२४० (आसन्नः सपिण्डः) एतावदेव; **व्यनि.**; **सवि.**४१९ प्रत्या...ण्डः(सपिण्डः प्रत्यासन्नः); **व्यप्र.**५३१ विरवत्; **व्यम.**६४ विरवत्; **विता.**४१० (यः प्रत्यासन्नः०); **बाल.**२।१३५ (पृ.२०४,२२२) विरवत्; **समु.**१४२.

(२) **आध.**२।१४।३ यैस्तद (यै आचार्यो); **हिध.**२।७ आधवत्, **मिता.**२।१३५ (पृ.२२३) (हृत्वा...येत्०) शेष आधवत्; **दा.**२१० (अन्तेवासी वाऽर्थास्तदर्थेषु धर्मकृत्येषु प्रयोजयेत्); **विर.**५९६ हृत्वा ..वो (कृत्वा तदर्थे **चो**); **स्मृसा.**१३६हृत्वा...वो (कृत्विग्वा तदर्थेषु चो):१४२वासी+(कृत्विग्वा) वोप (प्र); **पमा.**५२९ (सपिण्डाभावे आचार्यः, आचार्याभावेऽन्तेवासी) (हृत्वा ...येत्०); **मपा.**६७४ (हृत्वा...येत्०); **रत्न.**१५६ तदभावे अन्तेवासी (आचार्याभावे शिष्यो धनभाक् तदभावे सहाध्यायी) (हृत्वा...येत्०); **विचि.**२४० तदभावे आचार्यः (तदभावेऽव्यवहितस्तदभावे आचार्यः) (हृत्वा...येत्०); **दात.**१९६ (अन्तेवासी वार्थास्तदर्थेषु धर्मकृत्येषु योजयेत्); **सवि.**४१९ मपावत्; **वीमि.**२।१३५ (आचार्याभावेऽन्तेवासी) एतावदेव; **व्यप्र.**५३१ (तदभावेऽन्तेवासी) एतावदेव; **व्यम.**६४ मपावत्; **विता.**४१० मपावत्; **बाल.**२।१३५ (पृ.२२४) (हृत्वा...येत्०); **समु.**१४२ मपावत्.

(३) **आध.**२।१४।४; **हिध.**२।७; **दा.**२१०; **विर.**५९६

× वाक्यार्थो गौमिगतः । स्मृसा. विरगतम् ।

* स्मृच., पमा., रत्न., व्यम. मितावद्भावः । व्यप्र. मितावत् ।

(१) **मिता.**२।१३५; **स्मृच.**२९३; **स्मृसा.**१२८ चेत् (च) तु (च) तदा (सदा); **पमा.**५३५ नारी (पत्नी) क्षपणा (रक्षणा); **रत्न.**१५४ चेन्नारी (चेत्पत्नी) जीवन तदा (जीवित बुधैः); **विचि.**२३७ चेत् (च) तु (हि) जीवन तदा (स्त्रीधन सदा); **व्यनि.** क्षपणा (रक्षणा) तदा (तथा) बृहस्पतिः; **व्यप्र.**५०२; **व्यम.**६१,६२; **विता.**३८९ षः (ष्य); **समु.**१४१.

सर्वाभावे राजा दायं हरेत्।

(१) मासिकादिना तद्भोगार्थं धर्मकृत्येष्विति अदृष्टार्थत्वे हेतुः। दा.२१०

(२) अथ मृते कुटुम्बिनि तद्धनस्य गतिमाह—पुत्राभावे इति। 'पुत्राभावे' इति वचनात् सत्सु पुत्रेषु ते एव गृह्णीयुरविशेषात्समम्। अथ याज्ञवल्क्यः—'पितुरूर्ध्वं विभजता माताऽप्यंशं सम हरेत्' इति। तदत्र नोक्त पुत्रैरेव सह वृत्तिरस्या इति। एवं मातुरप्यभावे तद्धन भर्तृकुललब्धं स्वयमार्जितं च तत्पुत्रा अप्रत्ताश्च दुहितरः सम गृह्णीयुः। पितृकुललब्धं चाऽप्रत्ता एव दुहितरः। यस्य तु ब्राह्मणी वन्ध्या मृता वा तत्र क्षत्रियादिसुतास्त्रिद्येकभागाः। यस्य त्वेकस्यामेव पुत्रस्स सर्वं हरेत् शूद्रापुत्रवर्जम्।

एवमेतेषु शास्त्रेषु (पुत्रप्रतिनिधिपरेषु) विद्यमानेषु यदाचार्येण पूर्वमुक्तं 'तेषां कर्मभिः संबन्धो दायेनाऽव्यतिक्रमश्चोभयो'रिति तद्धर्मपत्नीजे पुत्रे सति क्षेत्रजादीना समाशहरत्वप्रतिषेधपरं वेदितव्यम्। तदभावे तु मृतस्य यः प्रत्यासन्नः सपिण्डः स किम्? 'दायं हरेदि'ति वक्ष्यमाणेन संबन्धः। 'लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः। सप्तमः पिण्डदातैषा सापिण्ड्य सप्तपूरुषम॥' इति सपिण्डलक्षणम्। तेषु यो यः प्रत्यासन्नः स स गृह्णीयादिति। भार्या तु रिक्थग्राहिणस्सपिण्डाद्या रक्षेयुः, न तु दायग्रहणमित्याचार्यस्य पक्षः। श्रूयते हि— 'तस्मात् स्त्रियो निरिन्द्रिया अदायादीः' इति। व्यासः—'द्विपाहस्रः परो दायः स्त्रियै देयो धनस्य तु। यच्च भर्त्रा धनं दत्त सा यथाकाममाप्नुयात्॥' इति। पणाना द्वे सहस्रे परिमाणमस्य द्विपाहस्रः। एष परो दायः स्त्रिया नाधिक इति। एतत् प्रभूते धने, ज्ञातयश्च न रक्षेयुरिति शङ्कायाम्। एव 'पत्नी दुहितरश्चे'त्यादीनि यानि पत्न्या दायप्राप्तिपराणि तान्येवमेव द्रष्टव्यानि। गौतमस्तु पुत्राभावे पत्न्याः सपिण्डादिभिः समाशमाह। (वयमप्येतमेव पक्ष रोचयामहे)। अत्र पितरि भ्रातरि सोदर्ये च जीवति सोदर्यो भ्राता गृह्णीयादित्येके मन्यन्ते।

तथा च शङ्खः—अपुत्रस्य स्वर्यातस्य द्रव्यं भ्रातृगामीत्यादि। देवलः—'ततो दायमपुत्रस्य विभजेरन् सहोदराः' इत्यादि। याज्ञवल्क्यः—'संसृष्टिनस्तु संसृष्टी सोदर्यस्य तु सोदरः। दद्याच्चापहरेच्चाशं जातस्य च मृतस्य च॥ अन्योदर्यस्तु संसृष्टी नान्योदर्यधन हरेत्। असंसृष्टयपि चादद्यात्सोदर्यो नान्यमातृजः॥' इति। अत्र सोदर्य इति विशेषवचनात् 'पत्नी दुहितरश्चे'त्यत्र भ्रातृग्रहण भिन्नोदरविषयमिति। प्रत्यासत्यतिशयात् पितैवेत्याचार्यस्य पक्षः। तदभावे सोदर्यः, तदभावे तत्पुत्रः, तदभावे भिन्नोदराः, तदभावे पितृव्य इत्यादि द्रष्टव्यम्। मात्रादयोऽपि स्त्रियो जीवनमात्रं लभेरन्निति।

तदभावे इति। सपिण्डाभावे आचार्यो दायं हरेत्। तस्याऽप्यभावे अन्तेवासी हरेत्। हृत्वा तदर्थेषु धर्मकृत्येषु तडाकखननादिपूपयोजयेत्। वाशब्दात् स्वयं वा उपयुञ्जीत। दुहितेति। दुहिता वा दाय हरेत्। पुत्राभाव इत्येके। अनन्तरोक्ते विषय इत्यन्ये। सर्वाभावे इति। सर्वग्रहणात् बन्धूना सगोत्राणा चाऽप्यभावे। *उ.

(३) एव च यस्य मृतस्य धन देशान्तरस्थतद्धनाधिकारिसत्वे तद्धनविनाशसंभावनाया तदौर्ध्वदेहिककार्यार्थं तत् पुण्यार्थं च येन केनापि दातुं युक्तम्।

दात.१९७

(४) अनेनास्मिन्वचने पुत्राभावे प्रत्यासन्न इत्यनेन योनिसबन्धो धनभाक्त्वे हेतुः, तदभावे आचार्य इत्यादिना विद्यासबन्धो धनभाक्त्वे निमित्तमिति। सवि.४१९

(५) मिताटीका— यः प्रत्यासन्नः सपिण्ड इति। अनेन पत्न्यादिबान्धवान्ताना सग्रहः।

बाल.२।१३५(पृ.२१५)

बौधायनः

सपिण्डसकुल्यनिरुक्तिः। अनपत्यमृतधनभाजः प्रत्यासन्नाः सपिण्डाः सकुल्याः आचार्यान्तेवासिऋत्विजः राजा च क्रमेण। श्रोत्रस्व न राज्ञः किंतु श्रोत्रियस्य।

प्रपितामहः पितामहः पिता स्वयं सोदर्या भ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्र एतानविभक्तदायादान्

द्र (तद्द्र); स्मृसा.१४२; दात.१९६.

(१) आध.२।१४।५; हिध.२।७.

* व्याख्याने समुद्धृतानि सर्वाणि अन्यमुनिवचनानि नात्र उद्धृतानि।

(१) बौध.१।५।११३-४ प्रपिता (अपि च प्रपिता)

सपिण्डानाचक्षते । विभक्तदायादान् सकुल्यानाचक्षते ।

असत्स्वङ्गजेषु तद्गामी ह्यर्थो भवति ।

सपिण्डाभावे सकुल्यस्तदभावेऽप्याचार्योऽन्तेवासी ऋत्विग्वा हरेत् । तदभावे राजा ।

सत्स्वं त्रैविद्यवृद्धेभ्यः संप्रयच्छेत् । न त्वेव कदाचित्स्वयं राजा ब्राह्मणस्वमाददीत ।

(१) अस्यार्थः— पित्रादिपिण्डत्रये सपिण्डनेन भोक्तृत्वात् पुत्रादिभिश्च त्रिभिः तत्पिण्डस्यैव दानात् यश्च जीवन् यत्पिण्डदाता स मृतः सन् सपिण्डनात् तत्पिण्डभोक्ता । एवं च सति मध्यस्थितः पुरुषः पूर्वेषां जीवन् पिण्डदाता स मृतः तत्पिण्डभोक्ता च परेषां जीवता पिण्डसंप्रदानभूत आसीत् । मृतैश्च तैः सह दौहित्रादिदेयपिण्डभोक्ता । अतो येषामयं पिण्डदाता ये वास्य पिण्डदातारः ते अविभक्तपिण्डरूपं दायमदन्तीत्यविभक्तदायादाः सपिण्डाः, पञ्चमस्य तु पूर्वस्य मध्यमः पञ्चमो न पिण्डदाता न च तत्पिण्डभोक्ता, एवमधस्तनोऽपि पञ्चमो न मध्यमस्य पिण्डदाता नापि तत्पिण्डभोक्ता । एतेन वृद्धप्रपितामहप्रभृतयस्त्रयः पूर्वपुरुषाः प्रतिप्रणप्तुश्च प्रभृत्यधस्तनास्त्रयः पुरुषाः एकपिण्डभोक्तृत्वाभावात् विभक्तदायादाः सकुल्या इत्याचक्षते ।

इदं च सपिण्डत्वं सकुल्यत्वं च दायग्रहणार्थमुक्तम् । अत एव मनुनापि । 'न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुरि'त्यभिधाय कुत इत्यपेक्षायां 'त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते । चतुर्थः सप्रदातैषां पञ्चमो नोपपद्यते ॥' अशौचाद्यर्थन्तु पिण्डलेपभुजामपि तद्दत्तपिण्डलेपभोक्तृत्वेन सपिण्डत्व मार्कण्डेयपुराणे निर्दिष्टम् । यथा— 'पिण्डलेपभुजश्चान्ये पितामहपितामहात् । प्रभृत्युक्तास्त्रयस्तेषां यजमानश्च सप्तमः ॥ इत्येव मुनिभिः प्रोक्तः संबन्धः सप्तपौरुषः ।' अशौचकर इत्यर्थः । अत एव मनुनाप्युक्तमशौचप्रकरणे । 'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । समानोदकभावस्तु जन्मनाम्नोरवेदने ॥' (मस्मृ. ५।६०) । अन्यथा त्रयाणामित्यनेन विरोधः स्यात् ।

*दा.१६३-४

(२) इय च परिभाषा दायविषया न त्वशौचादिविषया । तत्र समानपिण्डाः सपिण्डाः, तेन विभक्तदायादा अपि सपिण्डाः । ते च विभक्तदायादा अत्रासपिण्डाः । अङ्गजेष्वौरसादिषु, तद्गामी सपिण्डादिगामी ।

विर.५९६

(३) तान् उक्तान्, तत्पुत्रवर्जं प्रपौत्रपुत्र वर्जयित्वा । पिताऽत्र पितृतुल्यः । अन्यथा सपिण्डत्वादेव सिद्धेस्तदुपादानमकलं स्यात् । न च सकुल्याभावे पितुरधिकारः अन्तरङ्गपिण्डत्वात् । धनस्वामिनः सतानविरहितस्य धन पितुस्तत्सतानस्य च । पितृतत्सतानविरहे पितामहस्य तत्सतानस्य च । पितामहतत्सतानाभावे प्रपितामहस्य तत्सतानस्य च । क्रमशोऽधिकारः । एवं सप्तमपर्यन्तं आसप्तमादकथाविच्छित्तिरिति वचनात् । +स्मृसा.७४

(४) द्रव्यसाध्यत्वात् पिण्डदानादेर्मृतस्य रिक्थ लब्ध्वा पिण्डदानादिक कुर्यादिति विवेक्तुं सपिण्डसकुल्यविवेककम तावदाह—अपि चेति । सापिण्ड्य एव किंचिद्वक्तव्यमस्तीति मत्वाऽत्रापि चेत्याह । उक्तस्यैव

एतानविभक्तदायादान् (तत्पुत्रवर्जं तेषा च पुत्रपौत्रमविभक्तदाय) दान् सकु (दानपि सकु); दा.१६३; व्यक.१६१ भ्रातरः (भ्रातरश्च) प्रपौत्र (प्रपौत्रश्च) यादान् सकु (यान् सकु), विर. ५९६; स्मृसा.७३-४ (=) प्रपौत्र एतान (तत्पुत्रवर्जं तान): १३६ यौ (यं) एतान (तत्पुत्रवर्जं तान); व्यनि., दात.१८९; व्यप्र.५०४ दान् सकु (दांश्च सकु); व्यउ.१५६, बाल. २।१३५ (पृ.१८७).

(१) बौध.१।५।११५ त्वङ्गजेषु (त्वन्येषु), दा.८५, १६३ अस (सु); व्यक.१६१; विर.५९६; स्मृसा.७४ पु+(तु), व्यनि. दावत्, दात.१६२, १८९ दावत; व्यप्र.५०४, ५५१ दावत; व्यउ.१५६ दावत, बाल.२।१३५ (पृ.१८७) असत्स्वङ्गजेषु (सत्स्वन्येषु); सेतु.४१ दावत; विभ.४५ दावत; विच.२५,१२१ दावत.

(२) बौध.१।५।११६-८ ऽप्याचा (पिताचा), दा. १६३ऽप्याचा (चाचा), व्यक.१६१, विर.५९६; स्मृसा. ७४ऽप्याचा (पिताचा) स्वा+(धन) राजा (ब्राह्मणधनवर्जं राजा); विचि.२४२ऽप्या (आ); व्यनि.; बाल.२।१३५ (पृ.२१५) (अन्तेवासी ऋत्विग् व्याहरेत्) एतावदेव, शखः.

(३) बौध.१।५।११८-९.

* दात., व्यप्र. दागतम् ।

+ शेष विरगतम् । पृ.१३६ विरगतम् ।

वेस्तारोऽयं प्रपितामह इत्यादि। परिभाषा चैषा द्रष्टव्या। वेभक्तेति । एतदुक्तं भवति—विभक्ताविभक्तशब्दौ व्यत्यस्तौ कार्यौ। सबन्धविशेषज्ञाने सति सपिण्डा उच्यन्ते। संबन्धमात्रज्ञाने सकुल्याः। अतश्च सकुल्या अपि सपिण्डा एव, द्रव्यपरिग्रहे तु विशेषोऽस्ति। तदाह—अस्वन्येष्विति। अन्येष्वौरसादिषु पुत्रेषु। तदभाव इति। वाशब्दो विकल्पार्थः। स च व्यवस्थया। सा च पूर्वपूर्वाभावे उत्तरोत्तर इति। पिता पितृस्थानीयः। अनेन पुत्रस्थानीयोऽपि लक्ष्यते। स च दाहादिसंस्कारकर्ता, कथम्? तथाऽऽह वसिष्ठः—'सपिण्डाः पुत्रस्थानीया वा तस्य धनं विभजेरन्' इति। इतरथा सकुल्याभावे पिता गृह्णीयादित्युक्ते पूर्वापरविरोधः स्यात्। तस्मात् पितृशब्देन पितृस्थानीयः पुत्रस्थानीयो ग्रहीतव्यः। तदभाव इति। सदिति ब्राह्मणं प्रति निर्दिशति। इतरवर्णस्वं तु सर्वाभावे राजैवाऽऽददीत। बौवि.

अथाऽप्युदाहरन्ति--

ब्रह्मस्वं पुत्रपौत्रघ्नं विषमेकाकिनं हरेत्।
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते॥
तस्माद्राजा ब्राह्मणस्वं नाऽऽददीत कथंचन।
परमं ह्येतद्विषं यद्ब्राह्मणस्वमिति॥

अस्मिन्पक्षे परकीयमतेन दोषमाह—अथाऽप्युदाहरन्तीति। राजग्रहणमुपलक्षणार्थं, अन्यो वा ब्राह्मणस्व नाऽऽददीत। 'न विष विषमित्याहुर्ब्रह्मस्वं विषमुच्यते'। इयांस्तु विशेषः। ब्रह्मस्व पुत्रपौत्रघ्न विषमेकाकिन हरेत्। बौवि.

वसिष्ठः

अविभक्तानपत्यमृतधनभाक् पत्नी

अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियः तासां चापुत्रलाभात् +।

(१) इति गर्भिण्यो रिक्थार्हा इति दर्शयति। पुत्रशब्दश्चाय अनपत्या इति वचनाद् गर्भोपलक्षणमेव। उत्पन्न वा स्त्यपि, पुत्रिका यथा स्यात्। विश्व.२।१४०

(२) गृहीतगर्भाणामाप्रसवात्प्रतीक्षणमिति योजनीयम्। *मिता.२।१४०

(३) याः पितृस्त्रियोऽनपत्या गर्भस्थापत्यास्तासामा पुत्रलाभादा प्रसवात् सहवासेन स्थितानां भ्रातृणा अनपत्यस्त्रीणा च प्रसूतापत्यलिङ्गज्ञानानन्तरं दायविभागो न पुनरेवविधविषये नवश्राद्धानन्तर दायविभाग इत्यर्थः। नन्वस्य वचनस्य नवश्राद्धानन्तरं भ्रातृणामनपत्यस्त्रीणा च दायविभागो भवतीति ऋजुर्थः कथ परित्यज्यते। उच्यते। अनपत्यस्त्रीणामा पुत्रलाभादिति विरुद्धार्थावगतेस्तत्परिहाराय परित्यज्यते स्त्रीणामदायाना दायविभागासंभवाच्च परित्यज्यते। ×स्मृच.२६७

(४) स्त्रियोऽत्र भ्रातृजायास्ता यदि शङ्कितपुत्रास्तदा तासामपि भागो दातव्यः। पुत्रानुत्पत्तौ भागो भ्रातृणामेव, तासा च भरणमात्रं कार्यमित्यर्थः। ÷विर.४८३

(५) जीवद्विभागेऽजीवद्विभागे वा कस्याश्चित्पितृ-

---

(१) बौध.१।५।१२०-१; व्यक.१३१(अथा...हरन्ति०) विष...हरेत् (हन्यादेकाकिनं विषम्) पू.; विर.५९७ व्यकवत्; स्मृसा.७४ (अथा...न्ति०) पूर्वार्धे (विषमेकाकिन हन्ति ब्रह्मस्व पुत्रपौत्रकम्) श्लोकार्धौ व्यत्यासेन पठितौ :१३७, १४३ व्यकवत्; विचि.२४३ व्यकवत्.

(२) बौध.१।५।१२२ (कर्थचन०); व्यक.१६१ परम (परं), विर.५९७; विचि.२४३ पू.

(३) वस्मृ.१७।३९ [आनन्दाश्रममुद्रित'स्मृतीनां समु-

+ सवि.व्याख्यान 'यदि कुर्यात् समानशान्' इति याज्ञवल्क्यवचने (पृ.१४०९) द्रष्टव्यम्।

* शेष 'विभक्तेषु सुतो' इति याज्ञवल्क्यवचने द्रष्टव्यम्। पमा., मपा., व्यउ, व्यम., विता. मितागतम्।

× सवि. स्मृचगतम्।

÷ स्मृसा. विरवद्भावः। विचि., वीमि. विरगतम्। च्चये' 'याश्चानपत्या' इत्यादिसूत्र 'अथ...भागः' इत्यस्यानन्तर टिप्पण्या समुल्लिखितम्।]; विश्व.२।१४० स्त्रियः + (स्युः), मिता.२।१२२ सां चा (सामा), अप.२।१२० स्त्रियः (स्युः) लाभात् + (विभागो भ्रातृणा स्त्रियो भार्याः) विष्णुः; स्मृच.२६७ मितावत्, विर.४८३; स्मृसा.५६ विभागो (भागो); पमा.५०१ मितावत्; मपा.६५६ अथ (अत्र) शेष मितावत्; विचि.२०४ स्मृसावत्: २३७ (अथ०) विभागो (भागो); नृप्र.३६; सवि.३५७,३७६ मितावत्; वीमि.२।११७ चापुत्र (च पुत्र); व्यप्र.४६१ मितावत्; व्यउ.१५१ मितावत्; व्यम.४६ मितावत्; विता.३२५ मितावत्; राको.४५२ मितावत्; विभ.८३ मितावत्; समु.१२९ मितावत्.

पत्न्यां भ्रातृपत्न्यां वा स्पष्टगर्भायामाप्रसवं प्रतीक्ष्य विभागः कार्यः। आपुत्रलाभादिति वचनात् स्पष्टगर्भासु प्रतीक्षाऽस्पष्टगर्भासु तु नेत्यवगम्यते। व्यप्र.४६१-२

अपुत्रमृतधनभाजः क्रमेण सपिण्डाः आचार्यान्तेवासिनौ राजा च। ब्रह्मस्व श्रोत्रियाणामेव न राज्ञः।

यस्य पूर्वेषां षण्णां न कश्चिद्दायादः स्यात्सपिण्डः पुत्रस्थानीया वा तस्य धनं विभजेरन्। तेषामलाभ आचार्यान्तेवासिनौ हरेयाताम्। तयोरभावे राजा हरेत्। न तु ब्राह्मणस्य राजा हरेत्। ब्रह्मस्वं तु विषं घोरम्।

[1]न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम्॥

[2]त्रैविद्यसाधुभ्यः संप्रयच्छेत्।

विष्णुः

अपुत्रमृतधनभाजः क्रमेण पत्नीदुहितृपितृमातृभ्रातृतत्पुत्रबन्धुसकुल्यसहाध्यायिराजानः। ब्रह्मस्व ब्राह्मणानामेव न राज्ञः।

[3]बीजग्रहणानुविधायिनं अंशं गृह्णीयात्।

[4]दौहित्रान्तानामपाये मातापितरौ हरेयाताम्।

[5]अपुत्रस्य धनं पत्न्यभिगामि। तदभावे दुहितृगामि। तदभावे पितृगामि। तदभावे मातृगामि। तदभावे भ्रातृगामि। तदभावे भ्रातृपुत्रगामि। तदभावे बन्धुगामि। तदभावे सकुल्यगामि। तदभावे सहाध्यायिगामि। तदभावे ब्राह्मणधनवर्जं राजगामि।

(१) **वस्मृ.**१७।७२-६; **मभा.**२८।२२ (तदभावे ऋत्विगाचार्यौ) एतावदेव.

(२) **वस्मृ.**१७।७७. (३) **वस्मृ.**१७।७८.

(४) **सवि.**४२२. (५) **सवि.**४२३.

(६) **विस्मृ.**१७।४-१३; **मिता.**२।१३६ त्रस्य (त्र) (तदभावे भ्रातृ...राजगामि०) बृहद्विष्णुः; **दा.**१५१ (तदभावे सकुल्यगामि, तदभावे बन्धुगामि, तदभावे शिष्यगामि, तदभावे सहाध्यायिगामि इति क्रमः); **अप.**२।१३४; **स्मृच.** २८४ 'दुहितृगामि' इत्यन्तम् : २९८ 'मातृगामि' इत्यन्तम्, बृहद्विष्णुः; **व्यक.**१६० 'भ्रातृगामि' इत्यन्तम्; **ममु.**९।२१७ 'पितृगामि' इत्यन्तम्; **विर.**५९५ तदभावे मातृगामि, तदभावे पितृगामि इति क्रमः; **स्मृसा.**७२ सहाध्यायि (शिष्य): १३० 'मातृगामि' इत्यन्तम्, बृहद्विष्णुः :१३६:१४१,१४२;

ब्राह्मणार्थो ब्राह्मणानाम् *।

(१) विष्णुना च 'अपुत्रस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामि' इत्येकशेषस्यैव कृतत्वात् मातापितरौ विभज्य गृह्णीयाताम्। मातरि मृतायां पत्नीपितृभ्रातृभ्रातृजाभावे पितुर्माता धन गृह्णीयात्।

ममु.९।२१७

(२) बन्धुरत्र सपिण्डः, सकुल्यः, सगोत्र इति मिश्राः।

विर.५९५

(३) अत्र अपुत्रपद पुत्रपौत्रप्रपौत्राभावपरं तेषां पार्वणपिण्डदातृत्वाविशेषात्, अत एव बौधायनवचने

* अत्रानुद्धृतदायभागादिनिबन्धाना व्याख्यानानि 'पत्नी दुहितरः' इति याज्ञवल्क्यवचने द्रष्टव्यानि।

पमा.५२६ त्रस्य (त्र) 'मातृगामि' इत्यन्तम्, बृहद्विष्णुः :५२७ (अनपत्यस्य स्वर्यातस्य धन पत्न्यभिगामि, तदभावे मातृगामि, तदभावे भ्रातृपुत्रगामि, तदभावे सकुल्यगामि, तदभावे बन्धुगामि सहाध्यायिगामि तदभावे ब्राह्मणधनवर्जं राजगामि), **रत्न.**१५४-५ अपुत्रस्य (अपुत्र) दुहितृगामि + (तदभावे दौहित्रगामि) (तदभावे बन्धुगामि०) (तदभावे सहा...राजगामि०); **दीक.**४५ त्रस्य (त्र) 'भ्रातृगामि' इत्यन्तम्, **विचि.**२३५ अपुत्र (अनपत्य) (तदभावे भ्रातृपुत्रगामि०) शेष विरवत्, **व्यनि.** अपुत्रस्य (अनपत्यस्य प्रमीतस्य) तदभावे सकुल्यगामि, तदभावे बन्धुगामि इति क्रमः; **स्मृचि.**३२, **नृप्र.**४० 'मातृगामि' इत्यन्तम्; **दात.** १८९ दुहितृगामि + (तदभावे दौहित्रगामि) शेष दावत्; **मच.**९।२१७; **चन्द्र.**९३ तदभावे भ्रातृगामि, तदभावे सगोत्रगामि, तदभावे बन्धुगामि, तदभावे शिष्यगामि, तदभावे सहाध्यायिगामि इति क्रमः; **वीमि.**२।१३६ 'मातृगामि' इत्यन्तम्; **व्यप्र.**४९४ त्रस्य (त्र) सकुल्यगामि + (शिष्यगामि); **व्यउ.**१५१-२ 'दुहितृगामि' इत्यन्तम्, बृहद्विष्णुः :१५६ (तदभावे सहाध्यायिगामि) एतावदेव; **व्यम.**६२३ त्रस्य (त्र) दुहितृगामि + (दौहित्रगामि) (तदभावे बन्धुगामि०) 'सकुल्यगामि' इत्यन्तम्; **विता.**३८४ त्रस्य (त्र) बृहद्विष्णुः; **बाल.** २।१३६ (पृ.१८९,२०५,२०९); **सेतु.**३२(=),४५ अपुत्र (अनपत्य) दुहितृगामि + (दौहित्रगामि) 'मातृगामि' इत्यन्तम्; **समु.**१४२ बृहद्विष्णुः; **विच.**१२१-२ दुहितृगामि + (दौहित्रगामि) शेष दावत्.

(१) **विस्मृ.**१७।१४; **व्यनि.** (ब्राह्मणधनं ब्राह्मणा एव गृह्णीयुः); **व्यउ.**१५६; **समु.**१४२ व्यनिवत्, बृहद्विष्णुः.

पुत्रपौत्रप्रपौत्रानुपक्रम्य 'सत्स्वङ्गेषु तद्गामी ह्यर्थो भवति' इत्युक्तम्। दात.१८९

(४) 'अपुत्रस्य धनं पत्न्यभिगामि, तदभावे मातृगामि, तदभावे पितृगामी'ति वचनजातविरोधाद्विभज्य पितरौ गृह्णीयातामिति कुल्लूकः। मातापित्रोरयोगव्यवच्छेदमात्र पत्नीगामित्वेऽपि संगतं त्रयाणा सत्त्वे त्रितयमधिकारीति। अन्याभावमहकृतविकल्पस्याभावादिति तु तत्त्वम्। मच.९।२१७

(५) बन्धुरत्र सपिण्डः। सकुल्यः सगोत्रः। बन्धुपदेन वक्ष्यमाणपितृबन्ध्वादिग्रहणे योगीश्वरोक्तक्रमविरोधापत्तेः। व्यप्र.४९४

अपुत्रमृतधनभाक् न पुत्रिका बान्धवा वा किन्तु ज्ञातयः

अनपत्यरिक्थं न बान्धवगामि। न पुत्रिकागामि न बान्धवगामि। किन्त्वपुत्रस्य रिक्थिनो ज्ञातयो धनं हरेयुः *।

अपुत्रमृतधनभाक् दौहित्रः

अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः।
पूर्वेषां तु स्वधाकारे पात्रदौहित्रकाः समाः +॥

अपुत्रपौत्रेति दुहितृपर्यन्ताभावोपलक्षणम्।

व्यप्र.५२१

* सवि.व्याख्यान 'पत्नी दुहितरः' इति याज्ञवल्क्यवचने द्रष्टव्यम्।

+ दा.व्याख्यान 'यथा पितृधने' इति बृहस्पतिवचने द्रष्टव्यम्। सवि.व्याख्यानं 'अकृता वा' इति मनुवचने (पृ.१३००) द्रष्टव्यम्।

(१) **सवि.४२४.**

(२) **मिता.**२।१३६ पौत्र...समाः (पौत्रा दौहित्रिका मताः); **दा.**१८१ त्रसतांने (त्रे ससारे); **स्मृच.**२९५ पौत्र ...समाः (पौत्रा दौहित्रका मताः); **पमा.**५२५ मितावत्; **मपा.**६७२ समाः (मताः); **रत्न.**१५४ स्मृचवत्; **व्यनि.** पौत्र ..समाः (पुत्रा दुहितृकाः स्मृताः); **नृप्र.**४० स्मृचवत्; **दात.**१९१-२ तु (हि) शेषं दावत्; **सवि.** ४१३ उत्त.: ४१४, ४२५ स्मृचवत्; **व्यप्र.**५१८ स्मृचवत्, उत्त. : ५२१ पौत्रदौ (पौत्रा दौ); **व्यउ.**१५४ स्मृचवत्; **व्यम.**६२ स्मृचवत्; **विता.**४०१-२ स्मृचवत्; **बाल.**२।१३५ (पृ.१८७ पू. : २२३) स्मृचवत्; **सेतु.**४४(=) दावत्, पू.; **समु.**१४१ स्मृचवत्; **विच.**१२५ दातवत्.

मृतवानप्रस्थधनभाजौ क्रमेण आचार्यशिष्यौ

वानप्रस्थधनमाचार्यो गृह्णीयात् शिष्यो वा।
शङ्खः शङ्खलिखितौ च

अपुत्रमृतधनभाजः क्रमेण भ्रातृपितृसगोत्रशिष्यसब्रह्मचारिणः।

भ्रात्रभावे ज्येष्ठा पत्नी वा।

अपुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यम्। तदभावे पितरौ हरेतां पत्नी वा ज्येष्ठा। सगोत्रशिष्यसब्रह्मचारिणः *।

* गौमि.व्याख्यान 'असंसृष्टिविभाग.' इति गौतमवचने (पृ.१४६५) द्रष्टव्यम्। उ. व्याख्यान 'पुत्राभावे' इति आपस्तम्बवचने (पृ.१४६७) द्रष्टव्यम्। सवि.व्याख्यान 'भिन्नोदराणां' इति विष्णुवचने द्रष्टव्यम्। व्यवहारप्रकाशे मिताक्षरापक्षः चन्द्रिकापक्षश्चोपन्यस्तः। स्वमत च भ्रात्रधिकारे 'पत्नी दुहितर' इति याज्ञवल्क्यवचने द्रष्टव्यम्।

(१) **विस्मृ.**१७।१५-१६; **व्यक.**१६१; **विर.**६००; **स्मृसा.**७५,१३८,१४४; **व्यनि.**; **स्मृचि.**३३; **चन्द्र.**९३; **व्यप्र.**५३२; **व्यम.**६५वानप्रस्थ (वनस्थस्य); **बाल.**२।१३७; **समु.**१४३.

(२) **विश्व.**२।१४० अपुत्रस्य स्वर्यातस्य (स्वर्यातस्य अपुत्रस्य) रेतां (रेयातां) पत्नी वा ज्येष्ठा (ज्येष्ठा वा पत्नी) (सगो ...रिणः०) शखः; **मिता.**२।१३५ विश्ववत्, शंखः; **दा.** १५४ शखलिखितपैठीनसियमाः; **अप.**२।१३६ अपु (अपापु) भावे + (माता) हरे (लभे) (सगो...रिणः०) (पृ.७४१ शंखः), (पृ.७४४ शखलिखितपैठीनसयः); **गौमि.**२८।२५ भावे+ (माता) शिष्यस (शिष्यस्य) रिणः (रिणश्च) शखलिखितपैठीनसयः; **उ.**२।१४।२ भ्रातृगामि द्रव्यम् (द्रव्य भ्रातृगामि) भावे+ (माता) (सगो...रिणः०) शखः; **स्मृच.**२९९ (पत्नी...रिणः०) शेष विश्ववत् : ३७५ विश्ववत्, शखः; **विर.**५९२ (स्वर्यातस्य०) भावे + (माता) हरे (लभे) पैठीनसिः; **स्मृसा.**१३१ अपुत्रस्य स्वर्यातस्य (स्वर्यातस्य अपुत्रस्य) तृगामि द्रव्यम् (तृणामेव तद्धनम्) पत्नी वा ज्येष्ठा (ज्येष्ठा वा पत्नी) (सगो...रिणः०) शंखः : १४१ भावे + (माता) हरे (लभे); **पमा.**५४० अपुत्रस्य स्वर्यातस्य (स्वर्यातस्य अपुत्रस्य) हरेतां...ज्येष्ठा (तदभावे त्वसंसृष्टः पिता तदभावे माता तदभावे ज्येष्ठा पत्नी) (सगो...रिणः०) शखः; **रत्न.**१६० अपुत्रस्य स्वर्यातस्य (स्वर्यातस्य अपुत्रस्य) तां (याता) पत्नी वा ज्येष्ठा (तदभावे ज्येष्ठा पत्नीति) (सगो... रिणः०); **व्यनि.** भावे + (माता) रेतां + (तदभावे); **सवि.** ४३४ (तदभावे,...रिणः०) शखः; **व्यप्र.**४९४ तां (यातां)

(१) उक्तलक्षणपत्नीदुहित्रभावे सोदर्यभ्रात्रभिप्राय तत्। यदि च पितुरन्या पत्नी स्यात्, तदभावे तु पितरौ, तत्र पिता हरेदपुत्रस्येति वचनात् पितैव वा पूर्वोऽस्तु। तदनुमते तु तत्पत्नी, अननुमते तु ज्येष्ठा वा पत्नीति। ज्येष्ठाशब्दः सवर्णार्थः। सर्वा वा, वाशब्दाद् यदि सवर्णाः स्युः। *विश्व.२।१४०

(२) शङ्खवचनमपि संसृष्टभ्रातृविषयमिति।

*मिता.२।१३५ (पृ.२२०)

(३) शखादिवचनेषु व्यवहितयोजना कार्या, अपुत्रस्य स्वर्यातस्य धन ज्येष्ठा पत्नी हरेत्, तदभावे पितरौ हरेता, तदभावे भ्रातृगामीति। तदभाव इति मध्यपठित पूर्वेण भ्रातृगामीत्यनेन परेण च पितरौ हरेतामित्यनेन संबध्यते अविरोधात् न्यायस्योक्तत्वाच्च। न त्वश्रुताविभक्तसंसृष्टगोचरत्वकल्पना। अतोऽविशेषेणैव विभक्तत्वाद्यनपेक्षयैव अपुत्रस्य भर्तुः कृत्स्नधने पत्न्यधिकारो जितेन्द्रियोक्त आदरणीयः। *दा.१६६

(४) तत्पितृधनानुपघातेनार्जितावविभक्तधनेषु भ्रातृषु द्रष्टव्यम्। अतादृशभ्रातृभावे च पितरौ ज्येष्ठा वा पत्नी। तदुक्तलक्षणभ्रातृविलक्षणास्तु याज्ञवल्क्योक्तक्रमानतिक्रमेण रिक्थभाजो मन्तव्याः। +अप.२।१३५

(५) तत्सामान्यविशेषन्यायेन विभक्तसस्थितविषयादन्यत्र ससृष्टस्वर्यातविषयेऽवतिष्ठते इत्यविरोधः।

स्मृच.२९९

यदा तु पिता पितृव्यो वा संसृष्टो न विद्यते तदा त्वससृष्टिभिन्नोदरो भ्राता गृह्णीयात्। तदभावे त्वसंसृष्टः पिता, तदभावे माता, तदभावे पत्नी। तथा च शंखः—स्वर्यातस्येति। स्वर्यातस्यापुत्रस्य पितृव्येण पित्रा भ्रात्रा वा संसृष्टस्य ससृष्टाभावे भिन्नोदरासंसृष्टभ्रातृगामि द्रव्यमित्यर्थः। तथा च नारदः— 'संसृष्टाना तु यो भागस्तेषामेव च इष्यते। अतोऽन्यथा नाशभाजो निर्बीजेष्वितरानियात्॥' अतोऽन्यथा ससृष्टेषु सत्सु भिन्नोदरभ्रात्र्यससृष्टिनो नाशभाजः। यदा तु सर्वे ससृष्टा निर्बीजाः सतानरहिता भवन्ति तदा चेतरान् भिन्नोदरान् भ्रातृनियात्। ससृष्टाना भागं प्राप्नुयादित्यर्थः। तत्र चाय 'भ्रातृगामि द्रव्यमि'त्यादिशखवचने क्रमो द्रष्टव्यः। ज्येष्ठग्रहण सुसयतत्वादिगुणवत्याः कथनार्थं न पुनर्मध्यमादिनिवृत्त्यर्थम्। पुनरपि तदभाव इति वक्तव्ये वाशब्दः प्रयुक्तः। फलसाम्यात्। तथाहि वाशब्दाद्विकल्पोऽवगम्यते। तथा च स्वाम्यनुरूपवस्तुनि तुल्यवद्विकल्पः संभवति। न हि वस्तुनि विकल्पते इति न्यायशास्त्रसिद्धत्वात्। तस्मादत्र वाशब्दादभावविकल्पावगतेः फलस्वाम्यमस्त्येव। एव चाय क्रमः। भ्रात्रभावे पिता हरेत्। तदभावे माता। तदभावे पत्नी। ततश्च विभक्तविषयोक्तपत्नीदुहित्रादिक्रमविरुद्धत्वात् तदविरोधायैतत्ससृष्टाशविषयमिति कल्प्यते। विभक्तविषयोक्तनैयायिकपत्नीदुहित्रादिक्रमोऽस्मिन्विषये शंखोक्तवाचनिकक्रमेण बाध्यते। वाचनिक एवाय क्रमः। अस्मिन्क्रमे कस्यचिन्न्यायस्याभावात्। पत्नीनामभावे तु ससृष्टापुत्राश तद्भगिनी लभेत। +स्मृच.३०५-६

(६) [बालरूपमते] अविभक्तससृष्टविषयम्।

स्मृसा.१३१

[हलायुधमते] यच्च 'अपुत्रधनं पत्न्यभिगामी'त्यादि विष्णुवाक्येन भ्रातृसद्भावेऽप्यपुत्रधन पत्न्यभिगामीति प्रतिपादितं तत् 'अपुत्रा शयन भर्तुरि'त्यादिवृद्धमनुवाक्यपर्यालोचनया भर्तृशयनपरिपालनश्राद्धकरणादिगुणोपेता या पत्नी तद्विषयम्। या चैवविधा न भवति तस्या विद्यमानायामपि भ्रातृगाम्येव तद्धनम्। ×स्मृसा.१४१

(७) यद्यप्येकशेषात् पितरावित्यत्र न क्रमः प्रतीयते तथाऽप्येतत्समानार्थे मातापितरौ इति शब्दे मातृशब्दस्य पूर्वपातदर्शनादस्त्येवात्र पाठक्रमः। ÷रत्न.१६०

---

* शेष 'पत्नी दुहितरः' इति याज्ञवल्क्यवचने द्रष्टव्यम्।

+ विर.५९४ अपगतम्।

पत्नी वा ज्येष्ठा (ज्येष्ठा वा पत्नी) (सगो....रिणः०) शंखलिखितपैठीनसयः :५२६ शंखपैठीनसी :५३८विश्ववत्, शंखः; व्यम.६८ विश्ववत्, शंखः; विता.३९२ अपुत्रस्य स्वर्यातस्य (स्वर्यातस्य अपुत्रस्य) पत्नी वा ज्येष्ठा (ज्येष्ठा वा पत्नी) (सगो....रिणः०) शंखः : ४२५ अपुत्रस्य स्वर्यातस्य (स्वर्यातस्य अपुत्रस्य) द्रव्यम् (धन) तां+(तदभावे) पत्नी वा ज्येष्ठा (ज्येष्ठा पत्नी) (सगो...रिणः०) शंखः; बाल.२।१३५ (पृ.२२१) विश्ववत्, शंखः; समु.१४४ शंखः.

+ पमा. स्मृचगतम्। × हलायुधमते शेषं अपगतम्। ÷ शेषं स्मृचवत्। व्यम. रत्नगतम्।

(८) तानि (वचनानि) अधिकारिमात्रपराणि न क्रमपराणि। एषामभावे पूर्वस्येति श्रौतक्रमेण पाठक्रमस्य बाधात्। न त्वेवासुराद्यूढस्त्रीपराणीति सर्वसिद्धान्तः।

*विता.३९२३

अपुत्रस्त्रीणां प्रजीवनमात्रम्

भ्रातृभार्याणां स्नुषाणां च न्यायतः प्रवृत्तानामनपत्यानां पिण्डमात्रं गुरुर्दद्याज्जीर्णानि वासांस्यविकृतानि=।

ब्रह्मस्व ब्राह्मणपरिषदः न राज्ञः। बालस्त्रीधनादीन्यपि न राज्ञः।

[1]अकृत्वा प्रेतकार्याणि प्रेतस्य धनहारकः।
वर्णानां यद्वधे प्रोक्तं तद्व्रतं नियतश्चरेत्॥

[2]परिपद्वामि वा श्रोत्रियद्रव्यं न राजगामि, न हार्यं राज्ञा देवब्राह्मणसंस्थितं सनिक्षेपोपनिधिक्रमागतं न बालस्त्रीधनानि। एवं ह्याह—

न हार्यं स्त्रीधनं राज्ञा तथा बालधनानि च।
नार्याः षडागमं वित्तं बालानां पैतृकं धनम्॥

परिपद्ब्राह्मणाः। उपनिधिर्निक्षेपविशेषः। पारिजाते क्रमागतं पितृपरम्परया आगतम्। षडागममध्यन्यादि षडागमलब्धम्। +विर.५९८

अनपत्यमृतभ्रातृधनभाजो भ्रातरो न भार्या दुहितरो वा। ताः प्रजीवनमात्रभाजः।

×[3]भ्रातॄणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा।
विभजेरन्धनं तस्य शेषास्ते स्त्रीधनं विना॥

[4]भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्।
रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्नुरितरासु च॥
[5]या तस्य दुहिता तस्याः पित्र्यंशो भरणे मतः।
आसंस्काराद्धरेद्भागं परतो विभृयात्पतिः॥

महाभारतम्

मृतापुत्रधनहारिणः दुहितृदौहित्राः

[6]युधिष्ठिर उवाच—

अथ केन प्रमाणेन पुंसामादीयते धनम्।
पुत्रवद्धि पितुस्तस्य कन्या भवितुमर्हति॥

भीष्म उवाच—

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्॥
दौहित्र एव तद्रिक्थमपुत्रस्य पितुर्हरेत्।
ददाति हि स पिण्डान्वै पितुर्मातामहस्य च॥
पुत्रदौहित्रयोरेव विशेषो नास्ति धर्मतः॥

कौटिलीयमर्थशास्त्रम्

धर्म्यविवाहजाः पुत्रा दुहितरो वा रिक्थभाजः। अपुत्रधनभाजः सोदरभ्रातरः कन्याश्च। तदभाव पिता भ्रातरो तत्पुत्राश्च क्रमेण। अदायकं राजा हरेत्। ब्रह्मस्वं ब्राह्मणानामेव।

[7]द्रव्यमपुत्रस्य सोदर्या भ्रातरः सहजीविनो वा हरेयुः कन्याश्च। रिक्थं पुत्रवतः पुत्रा दुहितरो

---

* बाल. वितावद्भावः।

= व्याख्यान स्थलादिनिर्देशश्च दायानर्हप्रकरणे (पृ १३९०) द्रष्टव्यः। + विचि. विरगतम्।

× 'भ्रातॄणामप्रजाः' इति श्लोकत्रयव्याख्यासंग्रहः नारदे संसृष्टिविभागे द्रष्टव्यः, निबन्धकारैस्तत्र नीतत्वात्।

(१) दात.१७२ शखः; विच.८० शखः.

(२) व्यक.१६१ सनि (न नि); विर.५९८; स्मृसा.१३७ वा श्रोत्रियद्रव्य (ब्रह्मस्व) ब्राह्मण (तागण) सनि (न नि) : १४३-४ सनि (न नि) ह्याह (वा); विचि.२४३ (वा०) न+(तु) (न हार्यं राज्ञा...धनम्०) :२४४ (परिपद्वामि...ह्याह०) शखः.

(३) व्यक.१६२ स्ते (स्तु)शंख.; विर.६०३ व्रजे (ध्रिये) शंखः; स्मृसा.७९ जाः (जः) शखः : १३९ जाः (जः) प्रेयात्कश्चिच्चेत् (कश्चित् म्रियेत) स्ते (स्तु) शखः :१४५,१४६ स्ते (स्तु) शखः; मपा.६८० व्यकवत्, शंखः; विचि.२४९-५०

भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्। रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्नुरितरासु च॥ या तस्य दुहिता तस्याः पित्र्यंशो भरणे मतः। आसंस्काराद्धरेद्भागं परतो बिभृयात्पतिः॥

व्यकवत, शख., चन्द्र.९८(=) जा. (जः) त्कश्चिच्चे (यः कश्चि) स्ते (स्तु); व्यप्र.५४१ शखनारदौ, व्यम.६८ शखनारदौ.

(१) व्यक १६० सु च (सु तत्) शख. .१६२ शखः; विर.५९३ जीवन (जीवित) शखः : ६०३ व्यकवत्, शखः; स्मृसा.७९, १४२,१४५,१४६ रन् (त) सु च (सु तत्) शखः :१३४ रन् (त) शय्या (शयनं) सु च (सु तत्) शखः : १३९ व्यकवत्, शखः, मपा.६८० चा (वा) शखः, दीक. ४५ रन् (त) शखः; विचि.२५० व्यकवत्, शखः; चन्द्र.९८ (=) वन (वित); व्यप्र ५४१ शखनारदौ; व्यम.६८ सु च (सु तु) शखनारदौ; विता.४२५ चा (वा) पृ., शखनारदौ.

(२) व्यक.१६२ शखः, विर.६०३ पू., शखः; स्मृसा. ७९,१३९,१४५,१४६ शखः; विचि.२५० शो भरणे मतः (शे भरण मतम्) शंखः; चन्द्र.९८ (=)णे (ण); व्यप्र.५४१ त्रशो (त्र्योऽशो) शखनारदौ; व्यम.६८ त्रंशो भरणे मतः (त्र्यशद्भरण मतम्) शंखनारदौ; विता.४२५ शंखनारदौ.

(३) भा.१३।४५।१०-१३.

(४) कौ.३।५.

वा धर्मिष्ठेषु विवाहेषु जाताः । तदभावे पिता धरमाणः, पित्रभावे भ्रातरो भ्रातृपुत्राश्च ।

अदायादकं राजा हरेत् स्त्रीवृत्तिप्रेतकार्यवर्जमन्यत्र श्रोत्रियद्रव्यात् । तत् त्रैविद्येभ्यः प्रयच्छेत् ।

द्रव्यमिति । अपुत्रस्य प्रमीतस्य द्रव्यं, सोदर्या भ्रातरः सहजीविनः एकोदरजा भ्रातरः संसृष्टिनः हरेयुः । वेति वाक्यभूषणम् । कन्यानामपि सत्वे प्रतिपत्तिमाह—कन्याश्चेति । तासु विवाहाद्यपेक्षितं द्रव्य हरेयुः । रिक्थमिति । रिक्थं दायं, पुत्रवतः प्रमीतस्य, पुत्राः, हरेयुरिति वर्तते । दुहितरो वा, धर्मिष्ठेषु ब्राह्मादिषु चतुर्षु विवाहेषु जाताः, हरेयुः पुत्राभावे । तदभावे दुहित्रभावे, पिता, धरमाणो जीवन्, हरेत् । पित्रभावे भ्रातरः, भ्रातृपुत्राश्च भ्रात्रभावे, हरेयुः ।

दायादस्याप्यभावे धनस्य गतिमाह—अदायादकमेति । दायादरहितं धन, राजा हरेत्, कथं हरेत् स्त्रीवृत्तिप्रेतकार्यवर्जं स्त्रीदेहयात्रार्थं प्रमीतौर्ध्वदैहिकार्थं च धनमपेक्षितं वर्जयित्वा । तत्रापवादमाह—अन्यत्र श्रोत्रियद्रव्यादिति । छन्दोध्यायिधनं तु न हरेत् । कुतोर्हि तद् विनियुक्तीतेत्याह—तत् त्रैविद्येभ्यः प्रयच्छेदिति । तेभ्यो विद्या अधीयते त्रैविद्यास्तेभ्यो दद्यात् । श्रीमू.

मनुः

मृतापुत्रधनहारिणः दुहितृदौहित्राः

+यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ॥
दौहित्र एव च हरेदपुत्रस्याखिलं धनम् ।
दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् ।
स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च ॥
पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः ।
तयोर्हि मातापितरौ संभूतौ तस्य देहतः ॥

अनपत्यमृतधनभाजौ क्रमेण माता पितामही च

अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् ।
मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम् ॥

+ 'यथैवात्मे'त्यादिचतुर्णां श्लोकाना व्याख्यान स्थलादिप्रदर्शनञ्च 'पुत्रप्रकाराः तेषां दायहरत्वविचारश्च' इति प्रकरणे पृ.१२९४-७) द्रष्टव्यः ।

(१) **मस्मृ.**९।२१७; **विश्व.**२।१३९ दायमवा (दायाद्यमा) मातर्य (तस्याम); **मिता.**२।१३५ (पृ.२१७,२२२); **दा.** १८५:१८८ उत्त.; **अप.**२।१३५ हरेद्धनम् (धन हरेत्); **व्यक.**१६० दायमवा (दायाद्यमा); **स्मृच.**२९८ अपवत: ३०० अपवत्, उत्त., **विर.**५९१-२ व्यकवत्; **स्मृसा.** १३१ च (नि): १३५ च वृत्तायां (मृतायां च) शेषं व्यकवत: १४१ च वृत्तायां (मृतायां च); **पमा.**५२७ (=) अपवत्, उत्त.; **रत्न.**१५५ हरेद्धनम् (धन हरेत्) उत्त.; **सुबो.**२।१३६ उत्त.; **विचि.**२३९-४० अपवत्; **व्यनि. पू.**; **स्मृचि.**३२; **नृप्र.**४१ उत्त.; **दात.**१९५ अपवत्; **सवि.**४१६ अपवत्; **व्यप्र.**४९४,५२५:५२६ तृतीयपादः:५२८ उत्त.; **व्यउ.** १५२,१५५; **व्यम.**६३ उत्त.; **विता.**३९२:४०४ उत्त.: ४०७; **बाल.**२।१३५ (पृ.२२१); **सेतु.**४७; **समु.**१४२; **विच.**१३१.

(१) सर्वथा चापत्याभावेऽनपत्य इत्ययमेवास्य विषयः। **विश्व.**२।१३९

(२) व्याख्यातोऽयं श्लोकः । ***मेधा.**

(३) न च सपिण्डेष्वेव प्रत्यासत्तिर्नियामिका अपि तु समानोदकादिष्वपि, अविशेषेण धनग्रहणे प्राप्ते प्रत्यासत्तिरेव नियामिकेत्यस्मादेव वचनादवगम्यत इति ।

यत्पुनर्धारेश्वरेणोक्त— 'अनपत्यस्य पुत्रस्य' इति मनुवचनाज्जीवत्यपि पितरि मातरि वृत्तायां पितुर्माता पितामही धन हरेन्न पिता । यतः पितृगृहीत धन विजातीयेष्वपि पुत्रेषु गच्छति, पितामहीगृहीत तु सजातीयेष्वेव गच्छतीति पितामह्येव गृह्णातीति । तदप्याचार्यो नानुमन्यते । विजातीयपुत्राणामपि धनग्रहणस्योक्तत्वात् 'चतुस्त्रिद्येकभागाः स्युः' (मस्मृ.९।१८९) इत्यादिनेति । यत्पुनः 'अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः' इति मनुस्मरण तन्नृपाभिप्रायं न तु पुत्राभिप्रायम् । +मिता.२।१३५(पृ.२२२)

(४) तत् पितृपर्यन्ताभावे बोद्धव्यम् । न्यायागतं चैतत्, दौहित्रात् परतो मातृतश्च पूर्वं पितुरधिकार इति मृतपिण्डमृतभोग्यान्यपिण्डद्वयदातुर्दौहित्रात् मृतभोग्यान्यपिण्डद्वयमात्रदातृतया पितुर्जघन्यत्वात्, मात्रा-

* 'पिता हरेदपुत्रस्य' (मस्मृ.९।१८५) इति श्लोके मेधातिथिव्याख्यान नोपलभ्यते, लुप्तश्च सोऽशः तत्रास्य श्लोकस्य व्याख्यायाः सम्भवः ।

+ पमा., सवि., व्यउ., व्यम., विता. मितागतम् ।

दिभ्यस्तु मृतभोग्यान्यपिण्डद्वयदातृतया 'बीजस्य चैवं योन्याश्च बीजमुत्कृष्टमुच्यते' (मस्मृ. ९।३५) इति मनुवचनावगतोत्कर्षेण च बलवत्त्वात्। दा.१८६

ससतानायां वृत्तायामित्यर्थः। अपिशब्दचकारयोश्चोभयत्रान्वयः कार्यः, तेन मातरि च वृत्ताया पितामह्यपि गृह्णीयात् किं पुनर्भ्रात्रादयः पितामहपर्यन्ता इति, अपिशब्दसूचिताः भ्रात्रादयः। तदयं वचनार्थः—दौहित्रान्तात् मृतसतानात् परतः स्वसतानाच्च पूर्वं उक्तक्रमेण पित्रोरधिकारः, अतः स्वसंतानात् पूर्वं पितामहपितामह्योरधिकारोऽनेनैव दर्शितः। अत एव याज्ञवल्क्येन मातुरधिकारप्रदर्शनेनैव पितृव्यादिभ्यः पूर्वं पितामहपितामह्योरधिकारस्याप्युक्तत्वात् न पृथगुक्तः। दा.१८८

(५) पत्नीदुहित्रभावेऽपुत्रस्य धनं पितृगामीति प्राक्सूचितं तत्र विशेषमाह—अनपत्यस्येति। मातर्यपि वृत्ताया पश्चात्पितरि तद्ग्रहीतरि वृत्ते भ्रातृतत्सुतेष्वसत्सु तस्य वित्तान्तरोपार्जनासंभवे चायमनुग्रह उक्तः। मवि.

(६) भ्रातृसतानानन्तरमपि तेषा गोत्रजाना च बद्धक्रमत्वाविशेषात्पितामह्या सहैवात्र क्रमो निबध्यते इति संबद्धम्। स्वरूपैकशेषत्वेन पुसामेव गोत्रजाना भ्रातृसुतसहक्रमबन्धनात्। न ह्यन्यगोत्रजा पितामही मृतगोत्रजाऽपीत्यल बहुना। ×स्मृच.३००

(७) अनपत्यस्य पुत्रस्य धनं माता गृह्णीयात्पूर्वं 'पिता हरेदपुत्रस्य ऋक्थमि'त्युक्तत्वात्। इह माता हरेदित्यादि याज्ञवल्क्येन पितरावित्येकशेषकरणात्। विष्णुना च—'अपुत्रस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामी'त्येकशेषस्यैव कृतत्वात्, मातापितरौ विभज्य गृह्णीयाताम्। मातरि मृताया पत्नीपितृभ्रातृभ्रातृजाभावे पितुर्माता धन गृह्णीयात्। +ममु.

(८) अनपत्यत्वमत्र पुत्रपत्न्यादिशून्यत्वं विवक्षितम्। पितामह्यधिकारः पितृभ्रातृसपिण्डाभावे द्रष्टव्यः। मातुरभावे पित्रादीनामधिकारस्य स्थितत्वात्। दायार्यं दायादग्राह्यमृक्थम्। विर.५९२

(९) (बालरूपमते) पित्रभावे मातुः। मातुरभावे भ्रातृतत्पुत्राभावे वचनमिदम्। *स्मृसा.१३१

(१०) सकुल्यान्तशून्यस्य धनं पितामही हरेदित्यर्थः। ÷विचि.२४०

(११) यथा पित्रभावे माता तथा पितामहाभावे पितामही। दात.१९५

(१२) तदभावे पिता। तदभावे भ्रातरो धनभाजः। मातृसोदराः प्रथम गृह्णीयुः। व्यनि.

(१३) मम तु प्रतिभाति 'मातर्यपि च वृत्तायां' इति मनुवाक्ये 'तदभावे मातापितरौ' इति शंखपैठीनसिवचनयोः, 'ततो दायमपुत्रस्य विभजेरन् सहोदराः। तुल्या दुहितरो वापि म्रियमाणः पितापि वा॥ सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम्। तेषामभावे गृह्णीयुः कुल्याना सहवासिनः॥' इति देवलवचने, सर्वत्रापि 'वृत्तायां' 'तदभावे यथाक्रमम्' इत्यादिपदैः क्रमप्रतीतेर्योगीश्वरबृहद्विष्णुवचनयोरेव क्रमपरत्वमितरेषा त्वधिकारमात्रपरत्वेन तदविरोधेन तत्तत्स्थाननिवेशेऽप्यक्षतिरिति समाधिर्नैव साधुः, किन्तु क्षेत्रजादिपुत्रस्थले यथा स्मृतिवचनक्रमविपर्यास औरसानुकूल्यप्रातिकूल्यगुणवत्त्वागुणवत्त्वादिभिर्व्यवस्थापितस्तथात्रापि दायभागप्रकरणे पुत्रादीना पित्राद्युपकारकत्त्वकीर्तनस्य गुणवत्त्वादिकीर्त्तनस्य वाऽनन्यप्रयोजनत्वात्प्रत्यासत्तितारतम्यवत् धनस्वाम्युपकारातिशयानतिशयगुणवत्त्वागुणवत्त्वादिभिर्यथावचन स सर्वोऽपि क्रमविपर्यासः समाधेयोऽन्ये तु समाधयः कुशकाशावलम्बनमात्रतुल्या अनुपादेया इति। एवमग्रेऽपीति सर्वं सुस्थम्।

व्यप्र.५२६—७

अपुत्रमृतधनभाजः पिता भ्रातरः प्रत्यासन्नाः सपिण्डाः सकुल्या आचार्यशिष्यौ राजा च क्रमेण। ब्रह्मस्व श्रोत्रियाणामेव न राज्ञः।

[1]**पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा॥**

× स्वमत 'न भ्रातरो न पितरः' इति मनुवचने 'पत्नी दुहितरश्चैव' इति याज्ञवल्क्यवचने च द्रष्टव्यम्।

+ सवि. (पृ.४१६) श्रीकरमतं ममुवत्।

* स्मृतिसारोद्धृतपारिजातमत, बाल.२।१३५ (पृ २२२) व्याख्यान च विरगतम्।

÷ शेष विरगतम्।

(१) मस्मृ.९।१८५ वा (च) उत्त.; विश्व.२।१३९; मिता.

(१) मातर्यसत्यामेतद् द्रष्टव्यम्। विश्व.२।१३९

(२) विकल्पस्मरणान्नेद क्रमपरं वचनमपि तु धनग्रहणेऽधिकारप्रदर्शनमात्रपरम्। तच्चासत्यपि पत्न्यादिगणे घटत इति व्याचक्षते। *मिता.२।१३५(पृ.२२०)

(३) भ्रातर एव हरेयुर्न तु भ्रातृपुत्रोऽधिकारीत्याह। दा.१९०

(४) पिता हरेदविभक्तस्य। भ्रातर एव वा पित्रनुमत्या। विभक्तत्वे तु पत्न्येव तदभावे तु दुहित्रादेर्याज्ञल्क्योक्तेः। मवि.

(५) अक्षरार्थो व्यक्तः। तात्पर्यार्थस्त्वव्यक्तः सग्रहकारेण दर्शितः 'अशेषात्मजहीनस्य मृतस्य धनिनो धनम्। केनेदानी ग्रहीतव्य इत्येतन्मनुनोच्यते॥' अस्यायमर्थः। मुख्यगौणपुत्रविहीनस्य धनवतो मृतस्य धनमिदानीं तन्मरणानन्तर केन हर्तव्यमित्याकाङ्क्षाया पित्रादिना हर्तव्यमित्येतदधुना पित्राद्यपेक्षया बहुविधोपकारकासन्नजनाभावे मनुनोच्यत इति। अत एव पित्रादिभ्यो गौण पुत्राणामासन्नतरत्व ज्ञात्वा सग्रहकारेण 'पिता हरेदपुत्रस्य' इत्यस्याशेषात्मजहीनस्येति तात्पर्यमुक्त तदनवद्यमेव। किन्तु यथा गौणपुत्राणा दृष्टादृष्टोपकारकत्वेन पित्राद्यपेक्षयाऽग्रेसरत्वात् तदपेक्षया चासन्नतरत्व तथा पत्न्या अपि दृष्टादृष्टोपकारकरणे श्रुतिस्मृत्यादिपर्यालोचनया पित्राद्यपेक्षया आसन्नतरत्वमस्ति। पत्न्या अभावे 'पिता हरेदपुत्रस्य' इति एतन्मनुनोच्यते इत्येव तात्पर्यमूह्यम्। स्मृच.२९०

(६) अविद्यमानमुख्यपुत्रस्य पत्नीदुहितृरहितस्य च पिता धन गृह्णीयात्तेषा मातुश्चाभावे भ्रातरो धन गृह्णीयुः। एतच्चानन्तर प्रपञ्चयिष्यामः। ×मनु.

(७) (बालरूपमते) इत्येवमादिवाक्यमपि भार्यासुताभावे बोद्धव्यम्। स्मृसा.७३

मात्रभावे भ्रातर इति। पित्रभावे मातुः। स्मृसा.१३०

(८) पित्रभावे भ्रातरो धनभाजः। +सवि.४१६

(९) 'तदभावे पिता तदभावे माता' इति प्राग्दर्शितबृहद्विष्णुवचनात्। योगीश्वरवचने तु पितरावित्यत्र विज्ञानेश्वरोक्तरीत्या प्राङ्माता तदनु पिता। अन्यमते सभूय विभागः पितुर्वा प्राथम्यमिति विप्रतिपत्तौ पितुरधिकमान्या या माता सा पितुरपेक्षया प्रथमाधिकारिणी। या तु पितुरपेक्षया न्यूनमानभाक् सा पितुः पश्चात्। युक्त चैतत्। वृत्त्यादिसविधानमकुर्वतः पितुरपेक्षया मातुरेवाधिकोपकारकत्वाद्धनग्रहणम्। वृत्त्यादिसविधानकर्तुस्तु तस्य यावज्जीव भरणपोषणादिनाऽतिशयितोपकारकस्य धनग्रहणमिति सर्वस्मृतीना सर्वनिबन्धाना चादुःस्थता भातीत्यादि सुधीभिर्विभाव्यम्। व्यप्र.५२६

(१०) मिताटीका— (पक्षान्तरम्) पितेति मनुवाक्यं ...समृष्टिविषयमेव। ...। संसृष्टत्व च यतो न येनकेनचित्सह अपि तु पित्रा भ्रात्रा पितृव्येण वा।

बाल.२।१३५(पृ.२२२)

(११) भ्रातरः सोदराः, एवशब्देनापुत्रस्य रिक्थहरणे भ्रातृणा पितृतो विशिष्टत्व सूचितम्। नन्द.

मृतापुत्रधनभाजः क्रमेण प्रत्यासन्नाः सपिण्डाः सकुल्या आचार्यः शिष्यः ऋत्विजः सब्रह्मचारिणश्च

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्।
अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा॥

---

* पमा. मितागतम्। × मच. ममुगतम्।

+ सवि. (पृ.४०५) स्मृचगतम्।

२।१३५ (पृ.२१७,२२०); **दा.**१९०, **अप.**२।५१; **व्यक**१६०; **गौमि.**२८।२५ मस्मृवत्; **स्मृच.**२८८,२९०,२९८, **विर.**५९२; **स्मृसा** ७३,१३०,१४१,१४५,१४७; **पमा.** २७२,५२६ मस्मृवत्: ५३१; **विचि.**२४०; **व्यनि.**; **स्मृचि.** ३२ मस्मृवत्, **नृप्र.**४०,४१ मस्मृवत्; **सवि.**४०५ मस्मृवत्: ४१६; **वीमि.**२।१३५; **व्यप्र.**४९४,५२६; **व्यउ.**१५९, **विता.**३९२; **राकौ.**४५६ मस्मृवत्; **बाल.**२।१३५(पृ.२२१); **समु.**१४२.

(१) **मस्मृ.**९।१८७; **मिता.**२।१३५(पृ.२२२)पू.; **दा.** २११:२१३ अत ऊर्ध्वं (तदभावे) उक्त.; **अप.**२।१३५ पू.; **व्यक.**१६०-१; **स्मृच.**३०१ अनन्तरः सपिण्डाद्यस्त (यो यो ह्यनन्तरः पिण्डात्त) ल्यः स्यादा (ल्याः स्युरा): ३०६ रः (र) पू.; **विर.**५९२; **स्मृसा.**१३३ पू. :१३५:१४१ तस्य धन (वै तद्धनं).१४७; **पमा.**५२७ पू. :५२९ अनन्तरः सपिण्डाद्यस्त (यो यो ह्यनन्तर. पिण्डात्त) वा (च): ५४१(=) पू.; **रत्न.**१५५ पिण्डाद्यस्त (पिण्डो यस्त) पू.; **विचि.**२४० पू.; **व्यनि.** ण्डाद्य (ण्डो य) भवे (हरे) पू.; **स्मृचि.**११ ण्डाद्य (ण्डो य) तस्य धन (त सधन); **नृप्र.**४० पू.,४१ उत्त.; **दात.** १९५ भवे (हरे) पू.; **सवि.**४१६ रः (र) भवे (हरे) पू.:

हरेरनृत्विजो वापि न्यायवृत्ताश्च याः स्त्रियः ॥

(१) न च सपिण्डेष्वेव प्रत्यासत्तिर्नियामिका अपि तु समानोदकादिष्वप्यविशेषेण धनग्रहणे प्राप्ते प्रत्यासत्तिरेव नियामिकेत्यस्मादेव वचनादवगम्यत इति ।

×मिता.२।१३५(पृ.२२२)

(२) सकुल्यो विभक्तपिण्डः प्रतिप्रणप्तृतः प्रभृति पुरुषत्रयमधस्तनं वृद्धप्रपितामहादिसंततिश्च । तत्रापि प्रतिप्रणप्त्रादेरानन्तर्यं पिण्डलेपद्वारेण तेषामुपकारकत्वात् । तदभावे च वृद्धप्रपितामहादिसंततिः मृतदेयपिण्डलेपभोगिभ्यो वृद्धप्रपितामहादिभ्यः पिण्डदातृत्वात् । एवंविधसकुल्याभावे च समानोदकाः सकुल्यपदेनैवोपात्ता मन्तव्याः । तेषामभावे आचार्यः, तस्याप्यभावे शिष्यः, 'आचार्यः शिष्य एवे'ति मनुवचनात् । तदभावे सब्रह्मचारी, 'शिष्यः सब्रह्मचारिण' इति निर्देशात् । तदभावे चैकगोत्राः, तदभावे चैकप्रवराः, 'पिण्डगोत्रर्षिसम्बन्धा ऋक्थं भजेरन्नि'ति (गौध.२८।१९) गोतमवचनात् । +दा.२१३

(३) एषा मध्ये सपिण्डाना मतो योऽनन्तरो यथा पुत्रस्य पिता तस्य तत्पितेत्यादि । तस्य तस्य तु तद्धनम् । असति तु पितरि पितामहस्य तदभावे तत्पितुरपि । अत्र च पितामहापेक्षया भ्रातुर्भ्रातृपुत्रस्य च सनिकृष्टत्वात्पित्रभावे भ्राता तदभावे तत्सुतस्तदभावे पितामहादर्यो यः सनिकृष्टस्तदभावे च समानोदकः स गोत्रो मातुलादिबन्धुरिति क्रमात्पूर्वपूर्वाभावे। एवं पितामहे वृत्ते तद्धन पुत्रस्यैव धन न पौत्रस्याधिकारः । यत्तु 'तत्र स्यात्सदृश स्वाम्यमि'ति तत्पुत्रेच्छया विभजनीयं तदित्येतत्परम्। सकुल्यो मातुलादिर्बन्धुः तदभावे चाचार्योऽपि शिष्यो वा, यस्तदा प्रत्यासन्न इत्यर्थः । मवि.

(४) अस्य सामान्यवचनस्यौक्तौरसादिसपिण्डमात्रविषयत्वे वैयर्थ्यात्ततश्चानुक्तपत्न्यादिदायप्राप्त्यर्थमिदम् । सपिण्डमध्यात्सनिकृष्टतरो यः सपिण्डः पुमान् स्त्री वा तस्य मृतधन भवति । तत्रैक एवौरसः पुत्र इत्युक्तत्वात्सा एव मृतधने स्वाधिकारी । क्षेत्रजगुणवद्दत्तकयोस्तु यथोक्त पञ्चम षष्ठ वा भागं दद्यात् । कृत्रिमादिपुत्राणा संवर्धनमात्र कुर्यात् । औरसाभावे पुत्रिका तत्पुत्रश्च । 'दौहित्र एव च हरेदपुत्रस्याखिल धनमि'त्युक्तत्वादौरसपुत्ररहित एव तत्रापुत्रो विवक्षितः। तदभावे क्षेत्रजादय एकादश पुत्राः क्रमेण पितृधनाधिकारिणः परिणीतशूद्रापुत्रस्तु दशमभागमात्राधिकारी 'नाधिक दशमाद्याच्छूद्रापुत्राये'त्यायुक्तत्वाद्दशमभागावशिष्ट धन सनिकृष्टसपिण्डो गृह्णीयात् । त्रयोदशविधपुत्राभावे पत्नी सर्वभर्तृधनभागिनी । यदुक्त 'स्त्रीणा तु जीवन दद्यादि'ति सवर्धनमात्रवचन, तद्दुःशीलाधार्मिकसविकारयौवनस्थपत्नीविषयम् । अतो यन्मेधातिथिना पत्नीनामशभागित्व निषिद्धमुक्त तदसबन्धम् । 'पत्नीनामशभागित्व बृहस्पत्यादिसंमतम् । मेधातिथिर्निराकुर्वन्न प्रीणाति मता मनः॥' पत्न्यभावेऽप्यपुत्रिका दुहिता तदभावे पिता माता च तयोरभावे सोदर्यभ्राता तदभावे तत्सुतः । 'मातर्यपि च वृत्ताया पितुर्माता हरेद्धनमि'ति वक्ष्यमाणत्वात्। पितृमाता तदभावेऽन्योऽपि संनिकृष्टसपिण्डो मृतधन गृह्णीयात् । तद्यथा पितामहसंतानेऽविद्यमाने प्रपितामहसतान एव । तदप्युक्तं—अत ऊर्ध्व, सपिण्ड संतानाभावे समानोदक आचार्यः शिष्यश्च क्रमेण धनं गृह्णीयात् । ×ममु.

(५) धनमपुत्रस्य, सकुल्योऽत्र समानोदकः ।

विर.५९२

(६) सकुल्यपदं बन्धोरप्युपलक्षणम् । शिष्यपद तु तीर्थानाम् । मच.

(७) अत्र सकुल्यशब्देन सगोत्रसमानोदकाना मातुलादीना बन्धुत्रयस्य च ग्रहणम् । व्यप्र.५३०

× पमा., सवि. मितावद्भावः ।

+ अधिकं दा.व्याख्यान तथा अप.व्याख्यान 'त्रयाणामुदक' इति मनुवचने (पृ.१३१५) द्रष्टव्यम् ।

४१७ भवे (हरे) पू.; **व्यप्र.**५२२,५२७ पू.: ५३० अत ऊर्ध्वं (तदभावे) उत्त.; **व्यम.**६३,७२ पू.; **विता.**४०५ पू.: ४०७ रः (र) पू.: ४६८ पू.; **बाल.**२।१३४ भवे (हरे) पू.:२।१३५ (पृ.२१५ उत्त., २२२ पू.); **सेतु.**४८ पू.; **समु.**१४२ ण्डाद्य (ण्डो य); **विच.**११८,१३२ पू. :११३ चतुर्थपादः.

(१) **मस्मृ.**९।१८७ इत्यस्योपरिष्टात् प्रक्षिप्तश्लोकोऽयम्।

× दात. ममुगतम् ।

(८) इति मृतनिरूपिताया एव प्रत्यासत्तेः धनाधिकारितावच्छेदकत्वेनाभिधानम्। व्यम.७२

(९) प्रेतवचनोऽत्र पिण्डशब्दस्तयोरभेदोपचारात् पिण्डादनन्तरः प्रत्यासन्नो यः सपिण्डस्तस्य धन देय भवेत्। द्विवचनं क्रमप्राप्त्यर्थम्। नन्द.

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः।
त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते *॥

(१) उक्तपर्यन्ताना तु सर्वेषामभावे ब्राह्मणाः तद्धन गृह्णीयुः। भोगेन क्षीयमाणोऽपि धर्मस्तदीयधनस्य ब्राह्मणगामित्वेनापरधर्मप्राप्त्या आपूर्यमाणो न हीयत इति। अत्रापि धनस्य तादर्थ्यमेव पुरस्करोति। तदभावे ब्राह्मणधनवर्जं राजा गृह्णीयात्। गोत्रर्षिसबन्धाना ब्राह्मणाना चाभावः तद्ग्रामे बोद्धव्यः। अन्यथा राजाधिकारस्य निर्विषयत्वापत्तेः। तत्र यदि त्रयाणामित्यादिना पितृदौहित्र मातुलादीनामधिकारो नोक्तः स्यात्, तदा सकुल्यादीना नियतक्रमाणा मध्येऽनुप्रवेशाभावादधिकार एव न स्यात्। न च मा भूदिति वाच्य, याज्ञवल्क्येन तेषा गोत्रजबन्धुपदाभ्या दर्शितत्वात्। तस्मात् मनुनापि त्रयाणामित्यादिनैव दर्शितमिति वाच्यम्। तस्मात् यथायथा मृतधनस्य तदुपयुक्तत्व भवति तथातथा अधिकारक्रमोऽनुसरणीयः। अत एव पुत्रपौत्रप्रपौत्राणा तुल्यवदेवाधिकारः सिध्यति 'पुत्रेण लोकान् जयती'त्यादिवाक्येभ्यस्तुल्योपकारश्रुतेः तत्पिण्डदानाविशेषात्। अत एव जीवत्पितृकयोः पौत्रप्रपौत्रयोरनधिकारः सिध्यति। न जीवन्तमतिदद्यादिति श्रुत्वा जीवन्तं पितरमतिक्रम्य तयोः पार्वणनिषेधादनुपकारकत्वात् अन्यथा मृतपितृकयोरिव तयोरपि स्यात् जननक्रमेण च सपिण्डानन्तर्यात् पुत्रस्यैव स्यात् न पौत्रप्रपौत्रयोः। न च पुत्रादीना त्रयाणां युगपदधिकारप्रतिपादक वचनमस्ति तस्मात् उपकारकत्वाविशेषादेव तुल्यवद्धनसबन्धोऽभिधेयः। एव च सर्वत्रोक्तरीत्या मृतधनस्य मृतार्थत्वमनुसधेय उक्तक्रमेण। स चायमर्थः दायभागप्रकरणे पुत्रादीनामुपकारकत्वातिशयाभिधानस्य अनन्यप्रयोजनकत्वात् 'पितृणामनृणश्चैव स तस्माल्लब्धुमर्हती'त्यानृण्यकरणस्य धनलाभहेतुत्वेन कीर्तनात् 'दौहित्रोऽपि ह्यमुत्रैन सतारयति पौत्रवत्' (मस्मृ.९।१३९) इत्यनेनापि सतारणस्य धनसंबन्धहेतुत्वेन निर्देशात् पुत्रादीना च त्रयाणा सतारणादन्यस्य तुल्यवद्धनसंबन्धकारणस्याभावात् 'त्रयाणामुदकमि'त्यादेश्चानर्थक्यापत्तेः, क्लीबपतितजात्यन्धादीना चानुपकारकत्वादेवानंशित्वाभिधानस्योपपत्तेः, प्रतिसंबन्धिना चाधिकारार्थं वचनकल्पनागौरवात्, तदर्जितधनस्य च तदुपकारतारतम्येन तादर्थ्यसंपादनस्य न्याय्यत्वात्, उपकारकत्वेनैव धनसबन्धो न्यायप्राप्तो मन्वादीनामभिमत इति मन्यते। इति निरवद्यविद्याद्योतेन द्योतितोऽयमर्थो विद्वद्भिरादरणीयः। अथात्रापरितोषो विदुषा वाचनिक एवायमर्थः तथापि यथोक्त एव वचनयोरर्थो ग्राह्य इत्यस्तु किं विस्तरेण। दा.२१४-६

(२) ब्राह्मणास्तद्ग्रामवासिनः। त्रैविद्याऋग्वेदिनः। शुचयः स्वाचाराः। दान्ताः नियतेन्द्रियाः। एतच्च ब्राह्मणधनविषयम्। इतरधन राजगामि। *मवि.

(३) एषामभाव इति वक्तव्ये सर्वेषामभाव इति यदुक्त तत्सत्रह्मचार्यादेरपि धनहारित्वार्थम्। सर्वेषामभावे ब्राह्मणा वेदत्रयाध्यायिनो बाह्यान्तरशौचयुक्ता जितेन्द्रिया धनहारिणो भवन्ति। ते एव च पिण्डदाः। तथा सति धनिनो मृतस्य श्राद्धादिधर्महानिर्न भवति। ममु.

अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः।
इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः॥

---

* व्यप्र, व्यम. व्याख्यानं 'अहार्यं ब्राह्मणधन' इत्यग्रिमश्लोकस्य ममु.व्याख्याने गतम्।

(१) **मस्मृ**.९।१८८;**मिता**.२।१३५(पृ.२२३);**दा**.२१४ भागिनः (हारिणः) **तथा** (एव); **अप**.२।१३५; **स्मृच**.३०१ स्तथा (स्तदा); **विर**.५९७; **स्मृसा**.१३७; **पमा**.५२९; **मपा**.६७५; **रत्न**.१५६; **नृप्र**.४१ पू.;**सवि**.४२०; **वीमि**.२।१३५ नारदः; **व्यप्र**.५३१; **व्यउ**.१५६; **व्यम**.६५ कात्यायन, **विता**.४१० पू.; **बाल**.२।१३५ (पृ.२२४ पू.); **सेतु**.४९ रिक्थ (धन) शेषं दायवत्; **समु**.१४३; **विच**.१३४ सेतुवत्.

* मच. मविगतं, ममुगत च।

(१) **मस्मृ**.९।१८९; **मिता**.२।१३५ (पृ.२२४); **दा**.२१७; **अप**.२।१३५ (=); **स्मृच**.३०१ पू., ३०२ उत्त.; **विर**.५९७ द्रव्य (धन); **स्मृसा**.१३७ अहा (अनाहा) द्रव्य (स्व) नित्य (इत्यर्थ्य); **पमा**.५३०; **मपा**.६७५; **रत्न**.१५६

(१) न कदाचिदपि ब्राह्मणद्रव्य राजा गृह्णीयात्—अहार्यमिति। क्षत्रियादिधनं सब्रह्मचारिपर्यन्तानामभावे राजा हरेत्। न ब्राह्मणः। * मिता.२।१३५(पृ.२२३-४)

(२) सर्वशब्देन ब्राह्मणपर्यन्तस्योपादानम्। दा.२१७

(३) सर्वाभावे शिष्यपर्यन्ताभावे। मवि.

(४) ब्राह्मणसबन्धिधन न राज्ञा कदाचिद्ग्राह्यमिति शास्त्रमर्यादा। किन्तूक्तलक्षणब्राह्मणाभावे ब्राह्मणमात्रेभ्योऽपि देयम्। क्षत्रियादिधन पुनः पूर्वोक्तरिक्थहराभावे राजा गृह्णीयात्। ममु.

याज्ञवल्क्यः

अपुत्रमृतधनभाज. क्रमेण पत्नी दुहितरः पितरौ भ्रातरः तत्सुता गोत्रजा बन्धुः शिष्यः सहाध्यायिनश्च

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुता गोत्रजा बन्धुः शिष्यः सब्रह्मचारिणः॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः।

* स्मृच., पमा., मपा., विचि., सवि., व्यउ मितागतम् विरवत्; **विचि.**२४३ राज्ञा(राज्ञा) शेषं विरवत्; **सवि.**४२० अहा (नाहा) स्थितिः (स्मृते.); **वीमि.**२।१३५ नारदः; **व्यप्र.**५३१ विरवत्; **व्यउ.**१५६ विरवत्, पृ.,१५७ उत्त.; **विता.**४१०; **समु.**१४३; **विच.**१३४ विरवत्.

(१) **यास्मृ.**२।१३५; **अपु.**२५६।२२ ता (तो) जा (जो); **विश्व.**२।१३९ जा (जो); **मिता.**; **दा.**१५१ ता (तो) जा (जो): १८३पू.; **अप.** जा (जो) न्धुः शिष्यः (न्धुशिष्य); **व्यक.**१६०, उ.२।१४।२ प्रथमपादः; **स्मृच.**२९७ पू.: ३०१ चतुर्थपादः; **ममु.**९।१८२: ९।१८७ दावत्; **विर.**५९४ दावत्; **स्मृसा.** ७२,१२८,१३६,१४३ दावत्; **पमा.**५२३ दावत्; **मपा.** ६७२ दावत्; **सुबो.**२।१३२; **रत्न.**१५२; **विचि.**२४० दावत्; **व्यनि.** दावत्; **नृप्र.**४०; **दात.**१६२,१८८-९ दावत्; **सवि.**३९६ दावत्, **मच.**९।१८२ पू.: ९।१८५; **चन्द्र.**९२ दावत्; **दमी.**३९ पू.; **वीमि.** दावत्; **व्यप्र.**४८८ न्धुः शिष्यः (न्धुशिष्य); **संप्र.**२१३; **व्यउ.**१५१ व्यप्रवत्; **व्यम.**६० व्यप्रवत्; **विता.**३७० पू.: ३८१ ष्यः (ष्य); **राकौ.**४५६ दावत्, **बाल.**२।१३५ (पृ.२२१) व्यप्रवत्; **सेतु.**४२,४५ दावत्; **समु.**१४२; **विच.**१२१ दावत्, **कृभ.**८८०.

(२) **यास्मृ.**२।१३६; **अपु.**२५६।२३ वैश्य (वैः स्यात्); **विश्व.**२।१४०; **मिता.**; **दा.**१५१; **अप.**; **व्यक.**१६०;

स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः॥

(१) एव तावद् वैशेषिकः शूद्रस्य विधिरुक्तः। अविशेषेणैव तु—पत्नीत्यादि। पत्नीत्यत्र गृहीतगर्भाभिप्रेता। तथा च वसिष्ठः—'अथ भ्रातृणा दायविभागः याश्चानपत्याः स्त्रियः स्युस्तासा चापुत्रलाभादि'ति। गर्भिण्यो रिक्थार्हा इति दर्शयति। पुत्रशब्दश्चायं अनपत्या इति वचनाद् गर्भोपलक्षणमेव। उत्पन्न वा स्त्र्यपि पुत्रिका यथा स्यात्। तथा च गौतमः—'स्त्री चानपत्यस्ये'त्युक्त्वाह—'बीज वा लिप्सेत' इति। अनेन स्त्रीवचन गर्भिण्यर्थमिति ज्ञापयति। दुहितरश्च पुत्रिका एव। तथा च स्वायम्भुव पुत्रिकाभिप्रायेणैवाह—'यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा। तस्यामात्मनि तिष्ठन्त्या कथमन्यो धन हरेत्॥' इति। पुत्रजन्माशङ्कायां त्वपत्याभावे तदधिकारः। बहुवचनं पुत्रिकाबहुत्वज्ञापनार्थम्। चशब्दः समुच्चयेनापीच्छातो द्रव्यसबन्धार्थः। एवकारः सर्वत्रावधारणार्थः। माता च पिता च पितरौ। सहाधिकारात्तु द्वन्द्वकरणमेकैकप्राप्त्यर्थम्। द्वन्द्वनिर्देशेऽपि मातुरेव प्राथम्यम्। यथाह—'अनपत्यस्य पुत्रस्य माता दायाद्यमाप्नुयात्। तस्यामपि च वृत्तायां पितुर्माता हरेद्धनम्॥' इति। सर्वथा चापत्याभावेऽनपत्य इत्ययमेवास्य विषयः। नन्वेतदप्यस्ति—'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा' इति। मातर्यसत्यामेतद् द्रष्टव्यम्। कथं, शंखवचनं 'स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यम्। तदभावे पितरौ हरेयाता ज्येष्ठा वा पत्नी'ति। उक्तलक्षणपत्नीदुहित्रभावे सोदर्यभ्रात्रभिप्रायं तत्। यदि च पितुरन्या पत्नी स्यात्। तदभावे तु पितरौ, तत्र 'पिता हरेदपुत्रस्ये'ति वचनात् पितैव वा पूर्वोऽस्तु। तदनुमते तु तत्पत्नी, अननुमते तु ज्येष्ठा वा पत्नीति।

ममु.९।१८७; **विर.**५९४; **स्मृसा.**७२,१३६: १२८, १४३ वैस्य (वैषां); **पमा.**५२३; **मपा.**६७२ विधिः (क्रमः); **विचि.**२४०; **व्यनि.**; **स्मृचि.**३२ उत्त.; **नृप्र.**४०; **दात.** १६२-३,१८९; **सवि.**३९६; **मच.**९।१८५; **चन्द्र.**९३ वैस्य (वैषा) पू.; **वीमि.**; **व्यप्र.**४८८ : ५०२ पू.; **व्यउ.** १५१; **व्यम.**६०; **विता.**३७० उत्त.: ३८१; **बाल.**२।१३५ (पृ.२२१); **राकौ.**४५६, **सेतु.**४२,४५; **समु.**१४२; **विच.**१२१.

ज्येष्ठाशब्दः सवर्णार्थः। सर्वा वा, वाशब्दाद् यदि सवर्णाः स्युः। एतेनैतदपि व्याख्यातम्–'भ्रातृणामप्रजः प्रेयात् कश्चिच्चेत् प्रव्रजेत वा। विभजेरन् धनं तस्य भ्रातरः स्त्रीधनं विना॥' इति। क्षत्रियादिषु पुत्राणा तु पितरि मातुरभावे पितुर्माता हरेद् धनमित्यस्य विषयः। भ्रातरस्तथेति तथाशब्दः प्रकारार्थः सापत्नादिसर्वभ्रातृसंग्राहकः। तत्सुतास्तदनुसारेणैव गोत्रजा अपि सपिण्डसमानोदकैकपुरुषैकर्षिसबन्धाः क्रमेण द्रष्टव्याः। बन्धुर्मातुलादिः। आचार्योऽप्यर्थादनुक्तोऽपि पितृसंस्तवाद् गृह्यते। शिष्य उपनीतः। सब्रह्मचार्येकाचार्योपनीतः। एतेषा पूर्वाभावे पराधिकार इति। स्पष्टमन्यत्। विश्व.२।१३९-४०

(२) मुख्यगौणसुता दायं गृह्णन्तीति निरूपितम्। तेषामभावे सर्वेषां दायादक्रम उच्यते—पत्नीति। पूर्वोक्ता द्वादशपुत्रा यस्य न सन्ति असावपुत्रः, तस्यापुत्रस्य स्वर्यातस्य परलोकं गतस्य धनभाक् धनग्राही एषा पत्न्यादीनामनुक्रान्ताना मध्ये पूर्वस्य पूर्वस्याभाव उत्तर उत्तरो धनभागिति संबन्धः। सर्वेषु मूर्धावसिक्तादिषु अनुलोमजेषु प्रतिलोमजेषु वर्णेषु च ब्राह्मणादिषु अयं दायग्रहणविधिर्दायग्रहणक्रमो वेदितव्यः। तत्र प्रथमं पत्नी धनभाक्। पत्नी विवाहसस्कृता 'पत्युर्नो यज्ञसंयोगे' इति स्मरणात्। एकवचन च जात्यभिप्रायेण। ताश्च बहव्यश्चेत्सजातीया विजातीयाश्च तदा यथांश विभज्य धनं गृह्णन्ति। वृद्धमनुरपि पत्न्याः समग्रधनसंबन्धं वक्ति—'अपुत्रा शयन भर्तुः पालयन्ती व्रते स्थिता। पत्न्येव दद्यात्तत्पिण्ड कृत्स्नमंशं लभेत च॥' इति। वृद्धविष्णुरपि—'अपुत्रधनं पत्न्यभिगामि सदभावे दुहितृगामि तदभावे पितृगामि तदभावे मातृगामि' इति। कात्यायनोऽपि—'पत्नी पत्युर्धनहरी या स्यादव्यभिचारिणी। तदभावे तु दुहिता यद्यनूढा भवेत्तदा॥' इति। तथा 'अपुत्रस्यार्यकुलजा पत्नी दुहितरोऽपि वा। तदभावे पिता माता भ्राता पुत्राश्च कीर्तिताः॥' इति। बृहस्पतिरपि–'कुल्येषु विद्यमानेषु पितृभ्रातृसनाभिषु। असुतस्य प्रमीतस्य पत्नी तद्धारिणी॥' एतद्विरुद्धानीव वाक्यानि लक्ष्यन्ते–'भ्रातृणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा। विभजेरन्धनं तस्य शेषास्ते स्त्रीधनं विना॥ भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्। रक्षन्ति शय्या भर्तुश्चेदाच्छिन्द्युरितरासु तु॥' इति पत्नीसद्भावेऽपि भ्रातृणा धनग्रहण पत्नीना च भरणमात्र नारदेनोक्तम्। मनुना तु–'पिता हरेदपुत्रस्य रिक्थ भ्रातर एव वा'। (मस्मृ.९।१८५)। इत्यपुत्रस्य धन पितुर्भ्रातुर्वेति दर्शितम्। तथा–'अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम्॥' (मस्मृ.९।२१७) इति मातुः पितामह्याश्च धनसबन्धो दर्शितः। शङ्खेनापि—'स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयाता ज्येष्ठा वा पत्नी' इति भ्रातृणा पित्रोर्ज्येष्ठायाश्च पत्न्याः क्रमेण धनसंबन्धो दर्शितः। कात्यायनेनापि–'विभक्ते सस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा जननी वाथ माता वा तत्पितुः क्रमात्॥' इत्येवमादीना विरुद्धार्थाना वाक्याना योगीश्वरेण व्यवस्था दर्शिता–'पत्नी गृह्णीयात्' इत्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्। सा च यदि नियोगार्थिनी भवति। कुत एतत् नियोगसव्यपेक्षायाः पत्न्या धनहरण न स्वतन्त्राया इति। 'पिता हरेदपुत्रस्य' इत्यादिवचनात्तत्र व्यवस्थाकारणं वक्तव्यम्। नान्यद्व्यवस्थाकारणमस्ति इति गौतमवचनाच्च 'पिण्डगोत्रर्षिसंबन्धा रिक्थ भजेरन् स्त्री वानपत्यस्य बीज लिप्सेत' इति। अस्यार्थः–पिण्डगोत्रर्षिसंबन्धा अनपत्यस्य रिक्थ भजेरन्स्त्री वा रिक्थ भजेत् यदि बीज लिप्सेतेति। मनुरपि–'धन यो विभृयाद्भ्रातुर्मृतस्य स्त्रियमेव वा। सोऽपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम्॥' (मस्मृ.९।१४६) इति। अनेनैतद्दर्शयति विभक्तधनेऽपि भ्रातर्यपरतेऽपत्यद्वारेणैव पत्न्या धनसबन्धो नान्यथेति। यथाऽविभक्तधनेऽपि—'कनीयाञ्ज्येष्ठभार्याया पुत्रमुत्पादयेद्यदि। समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः॥' (मस्मृ.९।१२०) इति। तथा वसिष्ठोऽपि 'रिक्थलोभान्नास्ति नियोगः' इति रिक्थलोभान्नियोगं प्रतिषेधयन् नियोगद्वारक एव पत्न्याः धनसंबन्धो नान्यथेति दर्शयति। नियोगाभावेऽपि पत्न्या भरणमात्रमेव नारदवचनात् 'भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्' इति। योगीश्वरेणापि किल वक्ष्यते–'अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः। निर्वास्या

व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥' इति। अपि च। द्विजातिधनस्य यथार्थत्वात्स्त्रीणां च यज्ञेऽनधिकाराद्धनग्रहणमयुक्तम्। तथा च केनापि स्मृतम् —'यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये। अरिक्थभाजस्ते सर्वे ग्रासाच्छादनभाजनाः॥ यज्ञार्थं विहितं वित्तं तस्मात्तद्विनियोजयेत्। स्थानेषु धर्मजुष्टेषु न स्त्रीमूर्खविधार्मिषु ॥' इति। तदनुपपन्नम्। 'पत्नी दुहितर' इत्यत्र नियोगस्याप्रतीतेरप्रस्तुतत्वाच्च।

अपि चेदमत्र वक्तव्यम्। पत्न्याः धनग्रहणे नियोगो वा निमित्तं तदुत्पन्नमपत्यं वा। तत्र नियोगस्यैव निमित्तत्वे अनुत्पादितपुत्रायाः अपि धनसंबन्धः प्राप्नोति। उत्पन्नस्य च पुत्रस्य धनसंबन्धो न प्राप्नोति। अथ तदपत्यस्यैव निमित्तत्वं तथा सति पुत्रस्यैव धनसंबन्धात्पत्नीति नारब्धव्यम्। अथ स्त्रीणा पतिद्वारको धनसंबन्धः पुत्रद्वारको वा नान्यथेति मतम्। तदप्यसत्। 'अध्यग्न्यध्यावहनिक दत्तं च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्॥' (मस्मृ.९।१९४) इत्यादिविरोधात्। किं च। सर्वथा पुत्राभावे 'पत्नी दुहितर' इत्यारब्धम्। तत्र नियुक्तायां धनसंबन्धवदता क्षेत्रजस्यैव धनसंबन्ध उक्तो भवति। स च प्रागेवाभिहित इत्यपुत्रप्रकरणे 'पत्नीति' नारब्धव्यम्। अथ 'पिण्डगोत्रर्षिसंबन्धा रिक्थं भजेरन् स्त्री वाऽनपत्यस्य। बीजं वा लिप्सेते'ति गौतमवचनान्नियुक्तायां धनसंबन्ध इति। तदप्यसत्। न हि यदि बीजं लिप्सेत तदाऽनपत्यस्य स्त्री धनं गृह्णीयादित्ययमर्थोऽस्मात्प्रतीयते किं तु अनपत्यस्य धनं पिण्डगोत्रर्षिसंबन्धा भजेरन्स्त्री वा सा स्त्री बीजं वा लिप्सेत, संयता वा भवेदिति तस्या धर्मान्तरोपदेशः। वाशब्दस्य पक्षान्तरवचनत्वेन यत्रर्थाप्रतीतेः। अपि च संयताया एव धनग्रहणं युक्तम्। न नियुक्तायां स्मृतिलोकनिन्दितायाः। 'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च ॥' इति संयताया एव धनग्रहणमुक्तम्। तथा नियोगश्च निन्दितो मनुना—'नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः। अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥' इत्यादिना (मस्मृ.९।६४)। यत्तु वसिष्ठवचनं —'रिक्थलोभान्नास्ति नियोगः' इति तदविभक्ते संसृष्टिनि वा भर्तरि प्रेते तस्य धनसंबन्धो नास्तीति स्वापत्यस्य धनसंबन्धार्थं नियोगो न कर्तव्य इति व्याख्येयम्। यदपि नारदवचनं—'भरणं चास्य कुर्वीरन् स्त्रीणामा जीवनक्षयादि'ति। तदपि 'संसृष्टाना तु यो भागस्तेषामेव स इष्यते' इति। संसृष्टाना प्रस्तुतत्वात्तत्स्त्रीणामनपत्यानां भरणमात्रप्रतिपादनपरम्। न च 'भ्रातृणामप्रजाः प्रेयादि'त्येतस्य संसृष्टिविषयत्वे 'संसृष्टाना तु यो भाग'इत्यनेन पौनरुक्त्यमाशङ्कनीयम्। यतः पूर्वोक्तविवरणेन स्त्रीधनस्याविभाज्यत्व तत्स्त्रीणा च भरणमात्र विधीयते। यदपि 'अपुत्रा योषितश्चैषामि'त्यादिवचन तत् क्लीवादिस्त्रीविषयमिति वक्ष्यते।

यत्तु द्विजातिधनस्य यज्ञार्थत्वात्स्त्रीणा च यज्ञेऽनधिकारात् धनग्रहणमयुक्तमिति तदसत्। सर्वस्य द्रव्यजातस्य यज्ञार्थत्वे दानहोमाद्यसिद्धेः। अथ यज्ञशब्दस्य धर्मोपलक्षणत्वात् दानहोमादीनामपि धर्मत्वात्तदर्थत्वमविरुद्धमिति मतम्। एवं तर्ह्यर्थकामयोर्धनसाध्ययोरसिद्धिरेव स्यात्। तथा सति 'धर्ममर्थं च काम च यथाशक्ति न हापयेत्'। तथा 'न पूर्वाह्णमध्यन्दिनापराह्णानफलान् कुर्याद्यथाशक्ति धर्मार्थकामेभ्यः'। तथा 'न तथैतानि शक्यन्ते संनियन्तुमसेवये'त्यादियाज्ञवल्क्यगौतममनुवचनविरोधः। अपि च धनस्य यज्ञार्थत्वे हिरण्य धार्यमिति हिरण्यसाधारणस्य क्रत्वर्थतानिराकरणेन पुरुषार्थत्वमुक्तं तत्प्रत्युद्धृतं स्यात्। किं च यज्ञशब्दस्य धर्मोपलक्षणपरत्वे स्त्रीणामपि पूर्तधर्माधिकाराद्धनग्रहणं युक्ततरम्। यत्तु पारतन्त्र्यवचनं 'न स्त्री स्वातन्त्र्यमर्हती'त्यादि तदस्तु पारतन्त्र्यं, धनस्वीकारे तु को विरोधः? कथ तर्हि यज्ञार्थं द्रव्यमुत्पन्नमित्यादिवचनम्। उच्यते। यज्ञार्थमेवार्जित यद्धन तद्यज्ञ एव नियोक्तव्य पुत्रादिभिरपीत्येवंपरं तत्। 'यज्ञार्थं लब्धमददद्भासः काकोऽपि वा भवेदि'ति दोषश्रवणस्य पुत्रादिष्वप्यविशेषात्।

यदपि कात्यायनेनोक्तम्— 'अदायिकं राजगामि योषिद्भृत्यौर्ध्वदेहिकम्। अपास्य श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्तदर्पयेदि'ति। अदायिक दायादरहितं यद्धनं तद्राजगामि राज्ञो भवति, योषिद्भृत्यौर्ध्वदेहिकमपास्य तत्स्त्रीणामशनाच्छादनोपयुक्तं और्ध्वदेहिकं धनिनः श्राद्धाद्यु-

पयुक्त चापास्य परिहृत्य राजगामि भवतीति संबन्धः। अस्यापवादः उत्तरार्धे। श्रोत्रियद्रव्य च योषिद्भृत्यौर्ध्वदेहिकमपास्य श्रोत्रियायोपपादयेदिति। तदप्यवरुद्धस्त्रीविषयम्। योषिद्ग्रहणात्। नारदवचन च 'अन्यत्र ब्राह्मणार्थिक तु राजा धर्मपरायणः। तत्स्त्रीणा जीवनं दद्यादेष दायविधिः स्मृतः॥' इत्यवरुद्धस्त्रीविषयमेव। स्त्रीशब्दग्रहणात्। इह तु पत्नीशब्दादूढायाः सयताया धनग्रहणमविरुद्धम्। तस्माद्विभक्तासंसृष्टिन्यपुत्रे स्वर्याते पत्नी धनं प्रथमं गृह्णातीत्ययमर्थः सिद्धो भवति। विभागस्योक्तत्वात्संसृष्टिना तु वक्ष्यमाणत्वात्। एतेनाल्पधनविषयत्वं श्रीकरादिभिरुक्त निरस्तं वेदितव्यम्। तथा ह्यौरसेषु पुत्रेषु सत्स्वपि जीवद्विभागे अजीवद्विभागे च पत्न्याः पुत्रसमाशग्रहणमुक्तम्—'यदि कुर्यात्समानशान् पत्न्यः कार्याः समाशिकाः' इति। तथा— 'पितुरूर्ध्वं विभजता माताऽप्यश सम हरेदि'ति च। तथा सत्यपुत्रस्य स्वर्यातस्य धन पत्नी भरणादतिरिक्त न लभत इति व्यामोहमात्रम्। अथ 'पत्न्यः कार्याः समाशिकाः' इत्यत्र 'माताऽप्यश सम हरेत्' इत्यत्र च जीवनोपयुक्तमेव धन स्त्री हरतीति मत, तदसत्। अंशशब्दस्य समशब्दस्य चानर्थक्यप्रसङ्गात्। स्यान्मतम्। बहुधने जीवनोपयुक्त धन गृह्णाति अल्पे तु पुत्राशसमाश गृह्णातीति। तच्च न विधिवैषम्यप्रसङ्गात्। तथाहि 'पत्न्यः कार्याः समाशिकाः' 'माताप्यश सम हरेत्' इति च बहुधने जीवनमात्रोपयुक्त वाक्यान्तरमपेक्ष्य प्रतिपादयति, अल्पधने तु पुत्राशसममश प्रतिपादयतीति। यथा चातुर्मास्येषु 'द्वयोः प्रणयन्ति' इत्यत्र पूर्वपक्षिणा सौमिकप्रणयनातिदेशे हेतुत्वेन प्राप्तायाः उत्तरवेद्याः 'न वैश्वदेवे उत्तरवेदिमुपकिरन्ति न शुनासीरीये' इत्युत्तरवेदिप्रतिषेधे दर्शिते राद्धान्तैकदेशिना 'न सौमिकप्रणयनातिदेशप्राप्तायाः उत्तरवेद्याः प्रथमोत्तमयोः पर्वणोरेव प्रतिषेधः किं तूपात्र वपन्तीति प्राकरणिकेन वचनेन प्राप्तायाः उत्तरवेद्याः प्रतिषेधोऽयमित्यभिहिते पुनः पूर्वपक्षिणोपात्र वपन्तीति प्रथमोत्तमयोः पर्वणोः प्रतिषेधमपेक्ष्य पाक्षिकीमुत्तरवेदिं प्रापयति मध्यमयोस्तु निरपेक्षमेव नित्यवदुत्तरवेदिं प्रापयती'ति विधिवैषम्य दर्शितम्। राद्धान्तेऽपि विधिवैषम्यभयात्प्रथमोत्तमयोः पर्वणोरुत्तरवेदिप्रतिषेधो नित्यानुवादो द्वयोः प्रणयन्तीत्याद्यर्थवादपर्यालोचनयोपात्र वपन्तीति मध्यमयोरेव वरुणप्रघाससाकमेधपर्वणोरुत्तरवेदिं विधत्त इति दर्शितम्।

यदपि मत 'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा' इति (मस्मृ.९।१८५) मनुस्मरणात्, तथा— 'स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयाता ज्येष्ठा वा पत्नी' इति शखस्मरणाच्च, अपुत्रस्य धनं भ्रातृगामीति प्राप्त, 'भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्' इत्यादिवचनाच्च भरणोपयुक्त धन पत्नी लभत इत्यपि स्थितम्। एवं स्थिते बहुधने अपुत्रे स्वर्याते भरणोपयुक्त पत्नी गृह्णाति शेषं च भ्रातरः। यदा तु पत्नीभरणमात्रोपयुक्तमेव द्रव्यमस्ति ततो न्यूनं वा तदा किं पत्न्येव गृह्णात्युत भ्रातरोऽपीति विरोधे पूर्वबलीयस्त्वज्ञापनार्थ 'पत्नी दुहितर' इत्यारब्धमिति। तदप्यत्र भगवानाचार्यो न मृष्यति। यतः—'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा' (मस्मृ.९।१८५) इति विकल्पस्मरणान्नेदं क्रमपरं वचनमपि तु धनग्रहणेऽधिकारप्रदर्शनमात्रपरम्। तच्चासत्यपि पत्न्यादिगणे घटत इति व्याचचक्षे। शखवचनमपि ससृष्टभ्रातृविषयमिति। अपि चाल्पविषयत्वमस्माद्वचनात्प्रकरणाद्वा नावगम्यते। 'धनभागुत्तरोत्तरः' इत्यस्य च पत्नी दुहितर इति विषयद्वये वाक्यान्तरमपेक्ष्याल्पधनविषयत्व, पित्रादिषु तु धनमात्रविषयत्वमिति पूर्वोक्त विधिवैषम्यं तदवस्थमेवेति यत्किंचिदेतत्। यत्तु हारीतवचनम्—'विधवा यौवनस्था चेन्नारी भवति कर्कशा। आयुषः क्षपणार्थं तु दातव्यं जीवन तदा॥' इति, तदपि शङ्कितव्यभिचारायाः सकलधनग्रहणनिषेधपरम्। अस्मादेव वचनादनाशङ्कितव्यभिचारायाः सकलधनग्रहणं गम्यते। एतदेवाभिप्रेत्योक्त शखेन 'ज्येष्ठा वा पत्नी' इति। ज्येष्ठा गुणज्येष्ठा अनाशङ्कितव्यभिचारा, सा सकलं धनं गृहीत्वा अन्यां कर्कशामपि मातृवत्पालयतीति सर्वमनवद्यम्। तस्मादपुत्रस्य स्वर्यातस्य विभक्तस्यासंसृष्टिनो धन परिणीता स्त्री सयता सकलमेव गृह्णातीति स्थितम्।

तदभावे दुहितरः, दुहितर इति बहुवचन समानजातीयानामसमानजातीयानां च सप्तविधमाशप्राप्त्यर्थम्। तथा च कात्यायनः—'पत्नी भर्तुर्धनहरी या स्याद्व्यभिचारिणी।

तदभावे तु दुहिता यद्यनूढा भवेत्तदा ॥' इति। बृहस्पतिरपि—'भर्तुर्धनहरी पत्नी ता विना दुहिता स्मृता। अङ्गादङ्गात्संभवति पुत्रवद्दुहिता नृणाम्। तस्मात्पितृधन त्वन्यः कथ गृह्णीत मानवः ॥' इति। तत्र चोढानूढासमवायेऽनूढैव गृह्णाति। 'तदभावे तु दुहिता यद्यनूढा भवेत्तदा' इति विशेषस्मरणात्। तथा प्रतिष्ठिताप्रतिष्ठिताना समवाये अप्रतिष्ठितैव तदभावे प्रतिष्ठिता। 'स्त्रीधन दुहितृणामप्रत्तानामप्रतिष्ठिताना च' इति गौतमवचनस्य पितृधनेऽपि समानत्वात्। न चैतत्पुत्रिकाविषयमिति मन्तव्यम्। 'तत्समः पुत्रिकासुत' इति पुत्रिकायास्तत्सुतस्य चौरससमत्वेन पुत्रप्रकरणेऽभिधानात्। चशब्दाद्दुहित्रभावे दौहित्रो धनभाक्। यथाह विष्णुः—'अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः। पूर्वेषा तु स्वधाकारे पौत्रा दौहित्रिका मताः ॥' इति। मनुरपि—'अकृता वा कृता वापि य विन्देत्सदृशात्सुतम्। पौत्री मातामहस्तेन दत्त्वापिण्डं हरेद्धनम् ॥' इति (मस्मृ.९।१३६)।

तदभावे पितरौ मातापितरौ धनभाजौ। यद्यपि युगपदधिकरणवचनताया द्वन्द्वस्मरणात् तदपवादत्वादेकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते तथापि विग्रहवाक्ये मातृशब्दस्य पूर्वनिपातादेकशेषाभावपक्षे च मातापितराविति मातृशब्दस्य पूर्वं श्रवणात् पाठक्रमादेवार्थक्रमावगमाद्धनसंबन्धेऽपि क्रमापेक्षाया प्रतीतक्रमानुरोधेनैव प्रथम माता धनभाक् तदभावे पितेति गम्यते। किं च पिता पुत्रान्तरेष्वपि साधारणो माता तु न साधारणीति प्रत्यासत्त्यतिशयात् 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धन भवेत्' इति वचनान्मातुरेव प्रथम धनग्रहण युक्तम्। न च सपिण्डेष्वेव प्रत्यासत्तिर्नियामिका अपि तु समानोदकादिष्वपि, अविशेषेण धनग्रहणे प्राप्ते प्रत्यासत्तिरेव नियामिकेत्यस्मादेव वचनादवगम्यत इति। मातापित्रोर्मातुरेव प्रत्यासत्त्यतिशयाद्धनग्रहण युक्ततरम्। तदभावे पिता धनभाक्।

पित्रभावे भ्रातरो धनभाजः। तथा च मनुः—'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा' इति। (मस्मृ. ९।१८५)। यत्पुनर्धारेश्वरेणोक्तम्। 'अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम्॥' इति (मस्मृ.९।२१७)मनुवचनाजीवत्यपि पितरि मातरि वृत्तायां पितुर्माता पितामही धनं हरेन्न पिता। यतः पितृगृहीत धन विजातीयेष्वपि पुत्रेषु गच्छति, पितामहीगृहीत तु सजातीयेष्वेव गच्छतीति पितामह्येव गृह्णातीति। तदप्याचार्यो नानुमन्यते। विजातीयपुत्राणामपि धनग्रहणस्योक्तत्वात् 'चतुस्त्रिद्व्येकभागाः स्युः' (मस्मृ. ९।१८९) इत्यादिनेति। यत्पुनः—'अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः' इति मनुस्मरण तन्नृपाभिप्राय, न तु पुत्राभिप्रायम्। भ्रातृष्वपि सोदराः प्रथम गृह्णीयुः भिन्नोदराणा मात्रा विप्रकर्षात्। 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धन भवेत्' इति स्मरणात्।

सोदराणामभावे भिन्नोदरा धनभाजः। भ्रातॄणामप्यभावे तत्पुत्राः पितृक्रमेण धनभाजः। भ्रातृभ्रातृपुत्रसमवाये भ्रातृपुत्राणामनधिकारः। भ्रात्रभावे भ्रातृपुत्राणामधिकारवचनात्। यदा त्वपुत्रे भ्रातरि स्वर्याते तद्भ्रातॄणामविशेषेण धनसबन्धे जाते भ्रातृधनविभागात्प्रागेव यदि कश्चिद्भ्राता मृतस्तदा तत्पुत्राणा पितृतोऽधिकारे प्राप्ते तेषा भ्रातॄणा च विभज्य धनग्रहणे पितृतो भागकल्पनेति युक्तम्।

भ्रातृपुत्राणामप्यभावे गोत्रजा धनभाजः। गोत्रजाः पितामही सपिण्डाः समानोदकाश्च। तत्र पितामही प्रथमं धनभाक्। 'मातर्यपि च वृत्तायां पितुर्माता धनं हरेत्' (मस्मृ.९।२१७) इति मात्रनन्तर पितामह्या धनग्रहणे प्राप्ते पित्रादीना भ्रातृसुतपर्यन्ताना बद्धक्रमत्वेन मध्येऽनुप्रवेशाभावात् 'पितुर्माता धनं हरेत्' इत्यस्य वचनस्य धनग्रहणाधिकारप्राप्तिमात्रपरत्वादुत्कर्षे तत्सुतानन्तरं पितामही गृह्णातीत्यविरोधः। पितामह्याश्चाभावे समानगोत्रजाः सपिण्डाः पितामहादयो धनभाजः भिन्नगोत्राणा सपिण्डाना बन्धुशब्देन ग्रहणात्। तत्र च पितृसतानाभावे पितामही पितामहः पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः। पितामहसंतानाभावे प्रपितामही प्रपितामहस्तत्पुत्रास्तत्सूनवश्चेत्येवमसप्तमात्समानगोत्राणा सपिण्डाना धनग्रहण वेदितव्यम्। तेषामभावे समानोदकाना धनसंबन्धः। ते च सपिण्डानामुपरि सप्त वेदितव्याः। जन्मनामज्ञानाविधका वा। यथाह बृहन्मनुः—'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते। समानोदकभावस्तु निवर्तेताचतुर्दशात्॥ जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते॥' इति।

गोत्रजाभावे बन्धवो धनभाजः । बन्धवश्च त्रिविधाः आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति । यथोक्तम्— 'आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः । आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥ पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥ मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः । मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥' इति । तत्र चान्तरङ्गत्वात्प्रथममात्मबन्धवो धनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो वेदितव्यः । बन्धूनामभावे आचार्यः । तदभावे शिष्यः । 'पुत्राभावे यः प्रत्यासन्नः सपिण्डस्तदभावे आचार्यः आचार्याभावेऽन्तेवासी' इत्यापस्तम्बस्मरणात् ।

शिष्याभावे सब्रह्मचारी धनभाक् । येन सहैकस्मादाचार्यादुपनयनाध्ययनतदर्थज्ञानप्राप्तिः स सब्रह्मचारी । तदभावे ब्राह्मणद्रव्यं यः कश्चित् श्रोत्रियो गृह्णीयात् । 'श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्' इति गौतमस्मरणात् । तदभावे ब्राह्मणमात्रम् । यथाह मनुः— 'सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः । त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते ॥' (मस्मृ.९।१८८) इति । न कदाचिदपि ब्राह्मणद्रव्यं राजा गृह्णीयात् 'अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः' (मस्मृ.९।१८९) इति मनुवचनात् । नारदेनाप्युक्तम्— 'ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन । ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा ॥' इति । क्षत्रियादिधनं सब्रह्मचारिपर्यन्तानामभावे राजा हरेत् । न ब्राह्मणः । यथाह मनुः— 'इतरेषा तु वर्णानां सर्वाभावे हरेन्नृपः' (मस्मृ.९।१८९) इति । +मिता.

(३) अथापुत्रस्य मृतस्य धने परस्परविरुद्धवचनदर्शनेन व्याख्यातारो विवदन्ते । तथा बृहस्पतिः— 'आम्नाये स्मृतितन्त्रे चे'त्यादयः (सप्त श्लोकाः) । दा.१४९

तथा याज्ञवल्क्यः —पत्नीति । अनेन पूर्वपूर्वस्याभावे परस्परस्याधिकारं वदन् सर्वेभ्यः पूर्वं पत्न्या एव धनाधिकारमभिधत्ते ।

न च वर्तनोपयुक्तधनमात्राधिकारार्थं पत्नीवचनमिति वाच्यं सकृच्छ्रुतस्य धनपदस्य पत्न्यपेक्षमकृत्स्नपरत्वं कृत्स्नपरत्वं च भ्रात्राद्यपेक्षमिति तात्पर्यभेदस्यान्याय्यत्वाद् । अतः कृत्स्नधनगोचर एव पत्न्या अधिकारो वाच्यः । दा.१५१

अत्र केचिदविभक्तससृष्टगोचरो भ्रात्रधिकारः प्रथमं विभक्तासंसृष्टगोचरश्च पत्न्यधिकार इति समादधति । तद्बृहस्पतिविरुद्धम् । यदाह—'विभक्ता भ्रातरो ये च सप्रीत्येकत्र सस्थिताः । पुनर्विभागकरणे तेषां ज्यैष्ठ्यं न विद्यते ॥ यदा कश्चित् प्रमीयेत प्रव्रजेद्वा कथंचन । न लुप्यते तस्य भागः सोदरस्य विधीयते ॥ या तस्य भगिनी सा तु ततोंऽशं लब्धुमर्हति । अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च ॥ संसृष्टाना तु यः कश्चिद्विद्याशौर्यादिना धनम् । प्राप्नोति तस्य दातव्यो ह्यंशः शेषाः समांशिनः ॥' अत्रोपक्रमोपसंहारयोः संसृष्टत्वकीर्तनात् तत्संदंशपतित, 'न लुप्यते तस्य भागः सोदरस्य विधीयते' इति वचनं संसृष्टविषयं वाच्यम् । अत्र च 'अनपत्यस्य धर्मोऽयमभार्यापितृकस्य चे'ति पुत्रदुहितृपत्नीपितृणामभावे संसृष्टस्य सोदरस्य भ्रातुरधिकार बोधयतीति कथं तस्य पत्नीबाधकत्वम् । किं च न लुप्यते इति अविभक्तत्वे संसृष्टत्वे च भ्रात्रन्तरीयद्रव्यमिश्रीभूतस्य द्रव्यस्य पृथग्प्रतीतौ लोपाशङ्काया न लुप्यत इति वचनमुपपद्यते, विभक्तस्यासंसृष्टस्य तु धने विभक्तत्वप्रतीतौ का लोपाशङ्का तस्मात् संसृष्टविषयत्वमेवामीषां वचनानाम् ।

किं च पत्न्यादेः पूर्वं भ्रात्रधिकारज्ञापकशङ्कादिवचनानां संसृष्टभ्रातृविषयत्व वचनाद्वा न्यायाद्वा । तत्र न तावद्वचनात् विशेषवचनाभावात्, 'संसृष्टिनस्तु संसृष्टी'त्यादिवचनानां तु भ्रात्रधिकारावसरे विशेषज्ञापनपरत्वेन भ्रात्रधिकारमात्रपरत्वानुपपत्तेः। अनन्तरोपन्यस्तबृहस्पतिवचनानां च संसृष्टविषयत्वे पुत्रदुहितृपत्नीपितृपर्यन्ताभावे सोदर भ्रात्रधिकारज्ञापकत्वात् तद्विरुद्धत्वात् असंसृष्टविषयत्वमेव तावद्युक्त न तु संसृष्टविषयत्वम् । अथ न्यायादिदमभिधीयते, तथाहि, संसृष्टत्वे यदेकस्य भ्रातुर्धन तदपरस्यापि । तत्रैकस्य मरणेन स्वत्वनाशेऽपि जीवतस्तत्र स्वामित्वानपायात् तस्यैव तद्भवति न तु पत्न्याः, भर्तृमरणेन पत्नीस्वत्वस्यापि नाशात् यथा सत्सु पुत्रादिषु न तद्धनं पत्न्या इति । तन्मन्दं, न हि संसृष्टत्वेऽपि यदेवैकस्य तदेवापरस्यापि, किन्तु अविज्ञातैकदेशं तत्

+ व्यनि, मितागतम् ।

द्वयोः न तु समग्रमेव समग्रस्वत्वकल्पनायां प्रमाणाभावात्, इत्युक्तमादावेव । परिणयनोत्पन्न भर्तृधने पत्न्याः स्वामित्वं भर्तृमरणात् नश्यतीत्यत्र च प्रमाणाभावात्, सति तु पुत्रे तदधिकारशास्त्रादेव पत्नीस्वत्वनाशोऽवगम्यते । अत्रापि संसृष्टभ्रात्रधिकारशास्त्रात् तद्विनाशोऽवगम्यते इति चेन्न, संसृष्टभ्रातृगोचरत्वस्याद्याप्यसिद्धेः, सिद्धे हि भ्रातृसंसृष्टभर्तृमरणेन पत्नीस्वामित्वनाशे भ्रात्रधिकारशास्त्रस्य संसृष्टविषयत्व सति तु तद्विषयत्वे शास्त्रस्य पत्नीस्वामित्वनाश इतीतरेतराश्रयत्वम् ।

किञ्च शंखलिखितादिवचनानामविभक्तसंसृष्टगोचरत्वे अविभक्तस्य संसृष्टस्य च धन तद्विधभ्रातृगामि । तस्य तु तथाविधस्याभावे पितरौ हरेतामित्यन्वयो वाच्यः, तदा च विकल्पनीयं, किं विभक्तासंसृष्टौ पितरौ गृह्णीयाता उताविभक्तसंसृष्टौ, तत्र न प्रथमः कल्पः 'पत्नीदुहितरश्चे'त्यादिना विभक्तासंसृष्टयोः पित्रोः पत्नीद्वाध्यत्वात् कथ पत्नीतः पूर्व तयोरधिकारः, नापि द्वितीयः, अविभक्तसंसृष्टभ्रातृसद्भावेऽपि अविभक्तसंसृष्टपितृग्राह्यत्वस्य सर्वेषामविवादात् ।

किञ्च यथा पित्रा भ्रात्रा च विभक्तासंसृष्टधने शरीरदातृतया 'आत्मा वै जायते पुत्र' इत्येकत्वश्रुतेर्धनशरीरयोश्च प्रभुत्वात् तत्पितृदेयपितामहपिण्डद्वये च सपिण्डनेन मृतस्य भोक्तृत्वात् जीवति च पितरि पुत्राणा पार्वणपिण्डदानाभावात् भ्रातृभ्यः पूर्व पितुरधिकारः तथेतरत्रापि युक्तः, अविभागससर्गयोर्वा अविशेषात् पितृभ्रात्रोस्तुल्यवदधिकारो युक्तः न तु भ्रातुरभावे पितुरिति युक्तम् ।

किञ्चाविभक्तसंसृष्टौ पितरौ गृह्णीयातामिति द्विवचनमप्यनुपपन्न, मात्रा सह विभागाविभागयोरभावात् अत एव धनसंसर्गाभावोऽपि । यदाह बृहस्पतिः--'विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः । पितृव्येणाथवा प्रीत्या स तु संसृष्ट उच्यते ॥' अनेनैतदर्शयति । येषामेव हि पितृभ्रातृपितृव्यादीना पितृपितामहार्जितद्रव्येणाविभक्तत्वमुत्पत्तितः संभवति त एव विभक्ताः सन्तः परस्परप्रीत्या यदि पूर्वकृतविभागध्वंसेन यत्तव धनं तन्मम धनं यन्मम धन तत्तवापीति एकत्र गृहे एकगृहिरूपतया संस्थिताः संसृज्यन्ते, न पुनरनेवंरूपाणा द्रव्यसंसर्गमात्रेण सभूयकारिणा वणिजामपि ससर्गित्वं, नापि विभक्ताना द्रव्यससर्गमात्रेण पूर्वोक्तप्रीतिपूर्वकामिसधानं विना, अतः ससर्गित्वाविभक्तत्वयोर्मात्रा सहासंभवात् कथ मातृगतो भ्रातृसद्भावाधिकारविरोधः समाधेयः । संप्रति धीमद्भिः समाधीयते । तत्र विष्ण्वादिवचनेभ्यः पुत्राद्यभावमात्रेण पत्न्यधिकारः स्पष्टमवगम्यते, युक्त चैतत् यन्मृतधन पुत्रपौत्रप्रपौत्राणामेव प्रथम भवति । दा.१५५-१६१

प्रपौत्रपर्यन्ताभावे तु वैधव्यात् प्रभृति व्रतादिना भर्तुः परलोकहिताचरणेन पुत्रादिभ्यो जघन्येति तेषामभावे धनहारिणी पत्नी । तदाह व्यासः--'मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्यव्रते स्थिता । स्नाता प्रतिदिन दद्यात् स्वभर्त्रे सतिलाञ्जलीन् ॥ कुर्याच्चानुदिन भक्त्या देवताना च पूजनम् । विष्णोराराधन चैव कुर्यान्नित्यमुपोषिता ॥ दानानि विप्रमुख्येभ्यो दद्यात् पुण्यविवृद्धये । उपवासाश्च विविधान् कुर्यात् शास्त्रोदितान् शुभे ॥ लोकान्तरस्थ भर्त्तारमात्मान च वरानने । तारयत्युभय नारी नित्य धर्मपरायणा ॥' तदेवमादिभिर्वचनैः पत्न्या अपि नरकनिस्तारकत्वश्रुतेः धनहीनतया वा अकार्य कुर्वती पुण्यापुण्यफलसमत्वेन भर्त्तारमपि पातयतीति तदर्थं तद्धनं पूर्वस्वाम्यर्थमेव भवतीति युक्त पत्न्याः स्वाम्यम् । अतः शंखादिवचनेषु व्यवहितयोजना कार्या, अपुत्रस्य स्वर्यातस्य धन ज्येष्ठा पत्नी हरेत् तदभावे पितरौ हरेता तदभावे भ्रातृगामीति । तदभाव इति मध्यपठितं पूर्वेण भ्रातृगामीत्यनेन परेण च पितरौ हरेतामित्यनेन सबध्यते अविरोधात् न्यायस्योक्तत्वाच्च न त्वश्रुताविभक्तसंसृष्टगोचरत्वकल्पना । अतोऽविशेषेणैव विभक्तत्वाद्यनपेक्षयैव अपुत्रस्य भर्तुः कृत्स्नधने पत्न्यधिकारो जितेन्द्रियोक्त आदरणीयः ।

पत्नीत्व च प्रथमं उक्तमवर्णायाः । ज्येष्ठा पत्नीत्यभिधानात् वर्णक्रमेण ज्येष्ठत्वात्, तदाह मनुः--'यदि स्याश्च पराश्चैव विन्देरन् योषितो द्विजाः । तासा वर्णक्रमेणैव ज्यैष्ठ्यं पूजा च वेश्म च ॥' (मनु.९।८५) । अतः परिणयनकनिष्ठापि सवर्णा ज्येष्ठैव तस्या एव यज्ञादिषु व्यापाराधिकारात् पत्नीत्वम् । तथा च मनुः--'भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यिकम् । स्वा स्वैव

कुर्यात् सर्वेषा नान्यजातिः कथञ्चन ॥ यस्तु तत् कारयेन्मोहात् स्वजात्या स्थितयान्यया। यथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः ॥' (मस्मृ.९।८६ ७) सवर्णायाः पुनर्भावे अनन्तरवर्णा पत्नी । यथा विष्णुः—'सवर्णाया अभावे त्वनन्तरयैवापदि न त्वेव द्विजः शूद्रया ।' (विस्मृ.२६।३) 'धर्मकार्यं कुर्यादि'त्यनुवर्तते । (विस्मृ. २६।१) तेन ब्राह्मणस्य ब्राह्मणी पत्नी तदभावे क्षत्रियाप्यापदि न तु परिणीते अपि वैश्याशूद्रे, क्षत्रियस्य क्षत्रिया पत्नी तदभावे वैश्यापि अनन्तरवर्णत्वात् न शूद्रा, वैश्यस्य वैश्यैवैका। न त्वेव द्विजः शूद्रयेति द्विजमात्रस्यैव शूद्रानिषेधात् ।

अनेनैव पत्नीभावक्रमेण धनाधिकारिता बोद्धव्या । अतः परिणीतस्त्रीणामप्यपत्नीत्वात् तदभिप्रायकमेव नारदवचनम् । यथा 'भ्रातृणामप्रजाः प्रेयात् कश्चित् वै प्रव्रजेद् यदि । विभजेरन् धन तस्य शेषास्ते स्त्रीधन विना ॥ भरण चास्य कुर्वीरन् स्त्रीणामाजीवितक्षयात् । रक्षन्ति शय्या भर्तुश्चेदाच्छिन्द्युरितरासु च ॥' (नास्मृ. १६।२५-६) । तथा तस्यैव । 'अन्यत्र ब्राह्मणात् किन्तु राजा धर्मपरायणः । तत्स्त्रीणा जीवन दद्यादेष दायविधिः स्मृतः ॥' (नास्मृ.१६।२५) । तदीय स्त्रीणामपत्नीना वर्त्तनधनदान पत्नीना पुनः कृत्स्नधनेऽधिकारितेत्यविरोधः । अत एव बृहस्पतिः—'येऽपुत्राः क्षत्रविट्शूद्राः पत्नीभ्रातृविवर्जिताः । तेषा धन हरेद्राजा सर्वस्याधिपतिर्हि सः ॥' पत्न्यभावे राज्ञो धनसबन्ध दर्शयति । नारदस्तु तत्स्त्रीणा जीवन दद्यादिति वर्त्तनधन दत्त्वा राज्ञा सर्वधनं ग्रहीतव्यमिति यो विरोधः स पत्नीस्त्रियोर्भेदेन समाधेयः, अत एव पत्न्यधिकारवचनेषु पत्नीपदानुस्मृतिः वर्तनवचनेषु च स्त्रीनार्यादिशब्दप्रयोगः । यदपि देवलवचनम्—'ततो दायमपुत्रस्य विभजेरन् सहोदराः । तुल्या दुहितरो वापि म्रियमाणः पितापि वा ॥ सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम् । एषामभावे गृह्णीयुः कुल्याना सहवासिनः ॥' तुल्याः सवर्णा दुहितरः । सवर्णा भ्रातरः सापत्ना अभिमताः । सोदरभ्रातृणा स्वपदोपात्तत्वात् विशेषणानुपपत्तेः । तत्रापि सहोदरादिभार्यान्तस्य लिखनक्रमो नाधिकारक्रमार्थः विष्ण्वादिविरोधात्, किन्तु विष्ण्वाद्युक्तक्रमेण गृह्णीयुरित्येतदर्थः, लिखनक्रमेऽनास्थाव्यङ्गनार्थमेव दुहितरो वापि पितापि वेति अपि वा शब्दमुभयत्र प्रयुक्तवान्, तच्चान्यत्राप्यनुपज्यते तेन सहोदरा वा दुहितरो वा पिता वेत्यनास्था कीर्तनक्रमस्य देवलवचनेन दर्शिता ।

यच्च बालकेनोक्त असवर्णाविषय वा युवत्यभिप्राय वा अविभक्तसमृष्टविषयं वा शंखादिवचनमिति । तेन अव्यवस्थितशास्त्रार्थकथनेनात्मनो बालरूपत्वमेव प्रकटीकृत सदेहादेकतरानुष्ठानानुपपत्तेः । यदप्यनूढावरुद्धाभिप्रायं वर्त्तनवचनं वर्णित तदपि धर्मपत्नीनामनुग्रहार्थमिति हेयमेव वर्त्तनविधानविषयस्य स्त्रीणा पूर्वमेव दर्शितत्वात् । कि च सवर्णत्वासवर्णत्वाभ्या पत्नीकृतविशेषेऽपि पित्रोर्भ्रातृणा चाधिकारे कथं विरोधः समाधेयः । ससर्गासंसर्गाभ्या चेत् स एव विशेषः सर्वव्यापी भवतु कि पत्नीगोचरसवर्णादिविशेषपरिकल्पनेन अयमपि विशेषो दूषितोऽस्माभिः पूर्वप्रपञ्चेन । सोदरासोदरकृतश्च विशेषो बृहस्पतिना पराहृतः । तदाह—'सकुल्यैर्विद्यमानेस्तु पितृमातृसनाभिभिः । असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी ॥' सनाभयः सहोदराः । तेषु सत्स्वपि पत्न्या धनसबन्धं बोधयति तद्भागशब्दात् कृत्स्न एव भर्तृभागोऽवगम्यते न पुनस्तदेकदेशः । तस्मादस्मदीर्शितैव व्यवस्था शास्त्रार्थः । पत्नी च भर्तृधन भुञ्जीतैव पर न तु तस्य दानाधानविक्रयान् कर्तुमर्हति । तदाह कात्यायनः—'अपुत्रा शयन भर्तुः पालयन्ती गुरौ स्थिता । भुञ्जीतामरणात् क्षान्ता दायादा ऊर्ध्वमाप्नुयुः ॥' गुरौ श्वशुरादौ भर्तृगृहे स्थिता यावजीवं भर्तृधन भुञ्जीत न तु स्त्रीधनवत् स्वच्छन्द दानाधानविक्रयानपि कुर्वीत, तस्या तु मृताया पत्न्यभावे ये दुहित्रादयो दायाधिकारिणस्ते गृह्णीयुः न पुनर्ज्ञातयः तेषा दुहित्रादिभ्यो जघन्यत्वात् तद्बाधकत्वानुपपत्तेः पत्नी हि तेषा बाधिका तदधिकारस्य प्रागभावे प्रध्वंसे च बाधकाभावस्याविशेषात् बाधानुपपत्तेः ।

नापि स्त्रीधनाधिकारिणो गृह्णीयुः तेषा स्त्रीधनविषयत्वात् कात्यायनेनैव च स्त्रीधनाधिकारिणा वचनान्तरैरुक्तत्वात् पुनरुक्तत्वापत्तेश्च । अतः पत्नी दुहितरश्चेत्यादिना ये पूर्वपूर्वस्याभावे परभूताधिकारिणो निर्दिष्टास्ते यथा पत्न्यधिकारप्रागभावे गृह्णीयुस्तथा जाताधि-

कारायाः पत्न्या अधिकारप्रध्वसेऽपि भोगावशिष्टं धनं गृह्णीयुः तदानीं दुहित्रादीनामेवान्यापेक्षया मृतोपकारकत्वात् युक्तो धनाधिकारः। तथा दानधर्मे। 'स्त्रीणा स्वपतिदायस्तु उपभोगफलः स्मृतः। नापहार स्त्रियः कुर्युः पतिदायात् कथंचन॥' उपभोगोऽपि न सूक्ष्मवस्त्रपरिधानादिना किन्तु स्वशरीरधारणेन पत्युरुपकारकत्वात् देहधारणोचितोपभोगाभ्यनुज्ञानम्। एवं च भर्तुरौर्ध्वदेहिकक्रियाद्यर्थं दानादिकमप्यनुमतम्। अत एव नापहारं स्त्रियः कुर्युरित्यपहारवचनम्। अपहारश्च धनस्वाम्यनुपयोगे भवति।

अत एव वर्त्तनाशक्तौ आधानमप्यनुमत तत्राप्यशक्तौ विक्रयणमपि न्याय्यस्याविशेषात् भर्तुरौर्ध्वदेहिकक्रियार्थं अर्थानुरूप भर्तृपितृव्यादिभ्यो दद्यात्। तदाह बृहस्पतिः—'पितृव्यगुरुदौहित्रान् भर्तुः स्वस्रीयमातुलान्। पूजयेत् कव्यपूर्त्ताभ्या बृद्धानाथातिथीन् स्त्रियः॥' पितृव्यपद भर्तुः सपिण्डपरम्। दौहित्रपद भर्तुर्दुहितृसतानपरम्। स्वस्रीयपद भर्तुः स्वसृसतानपरम्। मातुलपद च भर्तुर्मातृकुलपरम्। तदेवमादिभ्यो दद्यात् न पुनरेतेषु सत्स्वेव स्वपितृकुलेभ्यः पितृव्यादिवचनानर्थक्यात्। तदनुमत्या तु स्वपितृमातृकुलेभ्योऽपि दद्यात्। तदाह नारदः—'मृते भर्तर्यपुत्रायाः पतिपक्षः प्रभुः स्त्रियाः। विनियोगेऽर्थरक्षासु मरणे च स ईश्वरः॥ परिक्षीणे पतिकुले निर्मनुष्ये निराश्रये। तत्सपिण्डेषु चासत्सु पितृपक्षः प्रभुः स्त्रियाः॥' विनियोगे दानादौ। पतिपुत्राभावे भर्तृकुलपरतन्त्रता तस्याः।

एव च दुहितुरप्यधिकारे जाते तस्या मृताया तदभावोक्ताः पितृधनाधिकारिणो गृह्णीयुः न तु दुहितृधनाधिकारिणः। पत्न्या च भर्तृधनात् कन्यायै विवाहार्थं तुरीयाशो देयः, पुत्राणामेव तद्दानप्रतिपादनात् दण्डापूपायितं पत्न्यादीना दानम्। इति पत्न्यधिकारः।

पत्न्यभावे दुहितुरधिकारः। दौहित्रश्च तत्पिण्डदाता, न च तत्पुत्रः नापि दौहित्री, तत्पर्यन्ते न पिण्डविच्छेदात्। अतः 'पुत्रवती संभावितपुत्रा चाधिकारिणी। वन्ध्या विधवा दुहितृप्रसूत्यादिना विपर्यस्तपुत्रा पुनरनधिकारिण्येवेति' दीक्षितमतमादरणीयम्। तत्र प्रथमं कन्यैवैका पितृधनहारिणी। यथा पराशरः—

'अपुत्रस्य मृतस्य कुमारी रिक्थं गृह्णीयात्, तदभावे चोढा।' ऊढापद पूर्वोक्तविशेषपरम्। युक्तं चैतत्। धनमन्तरेणापरिणीतायाः कन्याया ऋतुदर्शने पित्रादीना नरकपातश्रुतेः।

तस्मात् विवाहोपयुक्तत्वेन पित्रादीना नरकनिस्तारकत्वात् परिणीतायाश्च पुत्रद्वारेणाप्युपकारकत्वात् तदर्थं धन स्वाम्यर्थमेव भवतीति पत्न्यभावे न्याय्यं कन्यास्वत्वम्। कन्यायास्त्वभावे संभावितपुत्रायाः पुत्रवत्या श्राधिकारः।

पुत्रिकापुत्रस्य तु पुत्रवदेवोपकारकत्वातिशयेन पुत्रिकायाः पुत्रतुल्यत्वात् पुत्रिकौरसयोः समधनाधिकारः। अपुत्रिकायास्तूढायाः पुत्रादिन्यूनोपकारकस्वपुत्रद्वारेणोपकारकत्वमिति कन्यापर्यन्तानामभाव एव धनाधिकारिता युक्ता। यत एव स्वपुत्रद्वारेण पिण्डदातृतया दुहितुः पितृधनाधिकारः। अत एव पुत्रिकाया अपि पितुरपरमजातधनसम्बन्धायाः पश्चाद्वन्ध्यात्वेन तद्भर्तुर्वा प्रवासासामर्थ्येन विपर्यस्तपुत्राया मरणे तद्धन न भर्तुः। शंखलिखितौ यथा 'प्रेतायाः पुत्रिकायास्तु न भर्ता द्रव्यमर्हति।' अपुत्रायाः। तथा पैठीनसिः—'प्रेताया पुत्रिकाया तु न भर्ता द्रव्यमर्हति। अपुत्राया कुमार्या वा स्वस्रा ग्राह्यं तदन्यथा॥' ततः कुमार्या स्वस्रा अन्यया वा पुत्रवत्या संभवितपुत्रया स्वस्रा तद्धन ग्राह्यम्। अतः स्व्यधिकारे व्यावृत्तिरन्याधिकारस्य। यत्तु मनुवचन—'अपुत्राया मृताया तु पुत्रिकाया कथंचन। धनं तत् पुत्रिकाभर्ता हरेतैवाविचारयन्॥' तदविपर्यस्तपुत्राया उत्पन्नमृतपुत्रायाः पुत्रिकाया मरणे वेदितव्यम्। स्मृतिषु दौहित्रपदमपुत्रिकाजातपरं नियतम्। यथाह बौधायनः—अभ्युपगम्येति। दा.१६४-८१

यत्तु बालकवचन 'पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।' इत्यादिनियतक्रमादधस्तन एव दौहित्रस्याधिकार इति, तद्बृहस्पतिवचनेन विरोधात् बालवचनमेव बहुवचनान्तदुहितृपदेनैव कन्योढादौहित्राणां निर्दिष्टत्वात् क्रमविरोधाभावात् यथा 'स्वर्यातस्य ह्यपुत्रस्ये'ति पुत्रपद प्रपौत्रपर्यन्तपरं पिण्डदत्वाविशेषात्, तथा दौहित्रस्यापि पिण्डदत्वात् तत्पर्यन्तपरं दुहितृपदं यथा वा 'पुत्राभावे तु दुहिता तुल्यसंतानदर्शनात्।' इत्यत्र

पुत्रपदं पत्नीपर्यन्तपरं अन्यथा दुहितर इति बहुवचनमनर्थकं स्यात्, पत्नी तत्सुत इत्यादिवदेकवचनमेव कुर्यात्, भ्रातर इत्यस्यापि बहुवचनस्यार्थवत्ता वक्ष्यामः।

किं च पित्रादीना राजपर्यन्ताना क्रमनियमात् राज्ञोऽभावे दौहित्रस्याधिकारो वाच्यः। न च कदाचिद्राज्ञोऽभावोऽस्तीत्यनधिकार एवाभिहितो भवेत्। तस्मात् विश्वरूपजितेन्द्रियभोजदेवगोविन्दराजैर्दुहित्रभावे दौहित्रस्याधिकारो निरूपित आदरणीयः। यदा च कन्या जाताधिकारा पश्चात् परिणीता सती म्रियते तदा तद्धन कन्याया अनुत्पन्नाधिकारायाः अभावे येषामूढादीना प्रतिपादितं उत्पन्नाधिकारायां अप्यभावे तेषामेव तद्धन न तु तद्भर्त्रादीना भवति, तस्य स्त्रीधनविषयत्वात् 'भुञ्जीतामरणात् क्षान्ते'ति वचनेन जाताधिकारायाः पत्न्या अभावे अनुत्पन्नाधिकारपत्न्यभावोक्ताना पूर्वधनस्वामिदायग्राहिणा दुहित्रादीनां धनाधिकारस्य दर्शितत्वात् पत्नीतो जघन्यदुहितृदौहित्रयोरधिकारे दण्डापूपन्याय सिद्धोऽयमर्थः। यद्वा पत्नीत्युपलक्षण स्त्रीमात्राधिकारे अयमर्थो बोद्धव्य इति तात्पर्यम्। इति दुहितृदौहित्रयोरधिकारः।

दौहित्रस्याभावे पितुरधिकारो न मातुः नापि युगपन्मातापित्रोः 'तदभावे मातृगामी'ति विष्णुवचनविरोधात्। पितरावित्यत्र च पितृक्रम एवावगम्यते। तथाहि पितृपदात् प्रातिपदिकात् प्रथम पितुरवगतेः पश्चात्तु द्विवचनबलेनैकशेषकल्पनया मातुरवगमात्। अतः क्रमज्ञानं क्रमाभिधानव्याप्तं तत् निवर्तमानं क्रमज्ञानं निवर्तयतीत्यनुमान तदप्रमाण व्यापकनिवृत्तेरसिद्धत्वात् विष्णुवचनविरोधाच्च। इति पितुरधिकारः।

पितुरभावे मातुरधिकारः, पितुरधिकारानन्तर 'तदभावे मातृगामी'ति विष्णुश्रुतेः। युक्त चैतत्। गर्भधारणपोषणात् कृतोपकारतया तन्निष्क्रयस्यावश्यकर्त्तव्यत्वात् पुत्रभोग्यान्यपिण्डदजननेनाप्युपकारकत्वाच्च भ्रात्रादिभ्यः पूर्वमधिकारस्य न्याय्यत्वात्। अतः पितृतो गौरवातिरेकश्रुतेः मातुरधिकारः पितृतः पूर्वमिति हेयम्। गौरवातिरेकस्य धनसंबन्धहेतुत्वे 'उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मद' पिते'ति (मस्मृ.२।१४६), पितृतः पूर्वमाचार्यस्याधिकारापत्तेः, कनिष्ठे च भ्रातरि भ्रातृसुते वा सत्यपि पितृव्यादीनामधिकारापत्तेश्च। अतः पितृतः परत एव मातुरधिकार इति, एव च मृतस्य पितृसतानात् पूर्वं पितुश्च परतो मातुरधिकार इति वदता पितामहसतानात् पूर्वं पितामहाच्च परतः पितामह्या धनाधिकारः सूचितः। अन्यथा पितरौ भ्रातरस्तथेति क्रमविरोधः स्यात्। याज्ञवल्क्येन मातुरधिकारप्रदर्शनेनैव पितृव्यादिभ्यः पूर्वं पितामहपितामह्योरधिकारस्याप्युक्तत्वात् न पृथगुक्तः। इति मातुरधिकारः।

मातुरभावे भ्रातुर्धनम्। मातृगामीत्यभिधाय 'तदभावे भ्रातृगामी'ति विष्णुवचनात्। तदिति मातुः परामर्शः 'पितरौ भ्रातरस्तथे'त्यत्रापि पित्रोरभावे भ्रातुरधिकारावगतेः। न च भ्रातरस्तथा तत्सुत इति यथा भ्रातरोऽधिकृतास्तथा भ्रातृपुत्रोऽपि मातुरनन्तरमधिकारी स्यादिति वाच्यम्। भ्रातृगामीत्यभिधाय 'तदभावे भ्रातृपुत्रगामी'ति विष्णुविरोधात्। तदिति भ्रातुः परामर्शः। न्याय्य चैतत्। मृतधनभोग्यपित्रादित्रयपिण्डदानेन भ्रातुरुपकारकत्वात् तथा तद्देयमातामहादिपिण्डत्रयदानेन तत्स्थानपातात्च अनेवरूपात् भ्रातृपुत्रात् बलवत्त्वात् मातृमूलत्वाच्च भ्रातुरेवरूपस्य मातृतो जघन्यतेति मातृतः परत एवाधिकारो युक्तः। किं च तथापद भ्रात्रैव कुतो न सबध्यते? तेन यथा पितरौ भ्रातरोऽपि तथेति पित्रोर्भ्रातृणा च तुल्याधिकारः स्यात्। तस्मात् विष्णुवचनविरोधेनैवाय पर्यनुयोगः परिहर्तव्यः स चान्यत्रापि समानः। तथा च मनुः—'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा।' भ्रातर एव हरेयुर्न तु भ्रातृपुत्रोऽधिकारीत्याह। किं च जीवत्पितृकस्यापि भ्रातृपुत्रस्य किमधिकारो नेष्यते? न चात्रान्यो हेतुः जीवत्पितृकस्य पिण्डदत्वाभावेनानुपकारकत्वादित्यतः एव चेन्मृतपितृकस्यापि भ्रातृतुल्योपकारकत्वाभावात् कथ तुल्यवदधिकारिता। तस्मात् भ्रातुरेव प्रथमाधिकारः। तत्रापि प्रथमं सोदरस्यैव तदुक्तं 'सोदरस्य तु सोदरः'। भ्रातरस्तथेत्युक्तभ्रातुरधिकारावसरे प्रथमं सोदरो गृह्णीयादित्यर्थः। तस्य त्वभावे सापत्नो भ्राता। एकप्रभवत्वेन तस्यापि भ्रातृशब्दार्थत्वात्। तथा च 'संसृष्टिनस्तु ससृष्टी सोदरस्य तु सोदरः। दद्याच्चापहरेदंश जातस्य च मृतस्य च॥' इदमपि याज्ञवल्क्यवचनं सोदरासोदरयोर्भ्रातृशब्दार्थत्वं दर्शयति।

अन्यथा सोदरमात्रस्य तदर्थत्वे 'सोदरस्य तु सोदर' इति न पुनर्विशेषणीयमिति। भ्रातृशब्दादेव सोदरावगतेः। तस्मात् पितरौ भ्रातर इत्यनेन सोदरासोदरयोरेवाधिकारो दर्शितः। सोदरवचनेन तु सोदरस्य प्रथममधिकारः। सापत्नस्य च सोदरात् मृतदेयषाट्पौरुषिकपिण्डदातृमृतभोग्यमातृपित्रादिपिण्डत्रयदातृतया जघन्यत्वात् भ्रातृपुत्राच्च मृतभोग्यपिण्डद्वयदातृमृतभोग्यपिण्डत्रयदातृतया उपकारकत्वातिरेकेण बलवत्त्वात् मध्य एवाधिकारः श्रीकरविश्वरूपोक्त एवादरणीयः। तत्र किं संसृष्टिनोऽप्यसोदरस्य सोदराज्जघन्यत्व न वेत्यपेक्षायामाह याज्ञवल्क्यः—'अन्योदर्यस्तु संसृष्टी नान्योदर्यो धन हरेत्। असंसृष्टयपि चादद्यात् संसृष्टो नान्यमातृजः॥' (यास्मृ.२।१४०)। अस्यार्थः संसृष्टी पुनरन्योदर्यः प्रथम हरेत्, न पुनरन्योदर्यमात्रः। प्रथमं च हरन् सोदरं वाधित्वैव वा तेन सह वेत्यपेक्षाया उत्तरार्द्ध, असंसृष्टयपि सोदरो गृह्णीयात्। सोदरपदमनुवर्तते। नान्यमातृज एव संसृष्टी गृह्णीयात्। संसृष्टपदमेव वा सोदरममिधत्ते। अत एव बृहद्याज्ञवल्क्यवचनं 'सोदरो नान्यमातृज' इति जितेन्द्रियेण लिखितम्। तथा च पूर्वार्द्धस्य संसृष्टीत्यनुवर्तते। तेन न केवलमन्योदर्य एव संसृष्टी गृह्णीयात्, किन्त्वसंसृष्टयपि सोदरो गृह्णीयादित्यर्थः। तेनासंसृष्टिना सोदरेण संसृष्टिना चासोदरेण विभज्य ग्रहीतव्यम्। अत एव अपिचशब्द प्रयुक्तवान्।

दा.१८३-९३

तथा मनुरप्येतदेव दर्शयति—'सोदर्या विभजेयुस्त समेत्य सहिताः समम्। भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः॥' तस्मात् सोदरासोदरमात्रसद्भावे सोदराणामेव। अत एव बृहन्मनुः—'एकोदरे जीवति तु सापत्नो न लभेद्धनम्। स्थावरेऽप्येवमेव स्यात् तदभावे लभेत वै॥' स्थावरेऽप्येवमेवेति विभक्तस्थावराभिप्रायेण, यस्मादनन्तरमेवाह यमः—'अविभक्त स्थावरं यत्सर्वेषामेव तद्भवेत्। विभक्तं स्थावरं ग्राह्य नान्योदर्यैः कथंचन॥' सर्वेषां सोदरासोदराणामित्यर्थः। सोदराणामेव मध्ये एकस्य संसृष्टत्वे तस्यैव, असंसृष्टिसोदरासोदरसंसृष्टिसद्भावे च द्वयोरेव, सापत्नमात्रसद्भावेऽपि प्रथम संसृष्टिनः तदभावे चासंसृष्टिनोऽसोदरस्य मृतधन प्रत्येतव्यम्। अत एव उक्तक्रमेण बहूनामधिकारप्रतिपत्त्यर्थं भ्रातर इति बहुवचनमुक्त अन्यथानर्थकं भवेत्। संसृष्टिनस्तु संसृष्टीत्येतच्च तुल्यरूपसंबन्धिसमवाये संसर्गकृतविशेषप्रतिपत्त्यर्थम्। तेन सोदराणा सापत्नाना वा तथा भ्रातृपुत्राणा पितृव्यादीना वा तुल्याना सद्भावे संसर्गो गृह्णीयात् वाक्यादविशेषश्रुतेः पूर्ववचनेन सर्वेषामेव प्रकृतत्वात् सर्वेष्वेव चापेक्षासद्भावात्। अतो भ्रातृमात्रविषय वचनमित्यनादरणीयम्। इति भ्रात्रधिकारः।

तदभावे भ्रातृपुत्रस्य, भ्रातृगामीत्यभिधाय 'तदभावे भ्रातृपुत्रगामी'ति विष्णुवचनात्। तत्रापि प्रथम सोदरभ्रातृपुत्रस्य तस्य चाभावेऽसोदरभ्रातृपुत्रस्याधिकारः 'सोदरस्य तु सोदर' इति वचनात्। असोदरभ्रातृपुत्रो हि धनिनो मृतस्य मातरं विहाय स्वपितामहीविशिष्टस्य धनिपितुः पिण्डदातेति सोदरभ्रातृपुत्राज्जघन्यस्तदनन्तरं धनमधिकरोति। न च सपत्नीकत्वेन सपत्नीमातुः सपत्नीपितामह्याः सपत्नीप्रपितामह्याश्च श्राद्धेऽनुप्रवेशः मात्रादिशब्दाना स्वजननीपितृजननीपितामहजननीष्वेव मुख्यत्वात् तैरेव च पदैः श्राद्धे अनुप्रवेशात्। यथा—'स्वेन भर्त्रा सह श्राद्धं माता भुङ्क्ते स्वधामयम्। पितामही च स्वेनैव स्वेनैव प्रपितामही॥' सपत्नीमात्रादीना च पार्वणश्राद्धानुप्रवेशो निषिद्ध एव। यथा पठन्ति 'अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च देय स्यादेकोद्दिष्ट न पार्वणम्॥' किं च सपत्नीकस्य श्राद्धविधानस्य नित्यत्व सर्वजनसिद्धत्वात् सपत्नीमात्रादीना चानित्यत्वात् नित्यानित्यसंयोगविरोधेन मात्राद्यपेक्षमेव सपत्नीकश्राद्धविधान युक्तम्।

ननु सोदरभ्रातृपुत्रवत् सोदरपितृव्यस्यापि धनिदेयसपत्नीकपूर्वपुरुषद्वयस्य पिण्डदातृत्वात् धनिपितृव्यभ्रातृपुत्रयोः समानोऽधिकारः स्यात्। उच्यते, पितृव्यो हि धनिनः पितामहप्रपितामहयोः पिण्डदः, भ्रातुः पुत्रस्तु धनिनः प्रधान पितरमेवादाय पुरुषद्वयस्य पिण्डदातेति स एव बलवानिति पितृव्यात् पूर्वमधिक्रियते। अत एव भ्रातुर्नप्तापि पितृव्यस्य बाधकः मृतधनिकस्य पितुः प्रधानस्यैव पिण्डदातृत्वात्। भ्रातुः प्रतिनप्ता तु धनिनः पितृसततिरपि पितृव्येण बाध्यते पञ्चमत्वेन पिण्डदातृत्वाभावात्। तथा च मनुः—'त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते। चतुर्थः संप्रदातैषां पञ्चमो

नोपपद्यते ॥' इत्यनेन पञ्चमो निषिद्धः । किन्तु पितुरपि प्रपौत्रपर्यन्ताभावे पितृदौहित्रस्याधिकारो बोद्धव्यः धनिदौहित्रस्येव । एवं पितामहप्रपितामहसततेरपि दौहित्रान्तायाः पिण्डप्रत्यासत्तिक्रमेणाधिकारो बोद्धव्यः । 'दौहित्रोऽपि ह्यमुत्रैन सतारयति पौत्रवदि'ति हेतोरविशेषात् । स्वदौहित्रवत् पित्रादिदौहित्रस्यापि तद्भोग्यपिण्डदानेन सतारकत्वात् । अत एव मनुना पृथगमीषामधिकारो न दर्शितः । 'त्रयाणामि'ति 'अनन्तर' इति (मस्मृ.९। १८६-७) वचनद्वयेनैव संगृहीतत्वात् । याज्ञवल्क्येन च पित्रादिदौहित्रस्यापि तद्गोत्रजातस्य पिण्डदानानन्तर्यक्रमेणाधिकारप्रतिपत्त्यर्थं गोत्रजपद कृतं सपिण्डस्त्रीणा च व्युदासार्थं तासामतद्गोत्रजातत्वात् । अत एव अर्हति स्त्रीत्यनुवृत्तौ, बौधायनः–'न दाय निरिन्द्रिया अदायाश्च स्त्रियो मताः इति श्रुतेः।' न दायमर्हति स्त्रीत्यन्वयः, पत्न्यादीना त्वधिकारो विशेषवचनादविरुद्धः । प्रपितामहसंतानस्य दौहित्रान्तस्य मृतभोग्यपिण्डदातुरभावे मृतदेयमातामहादिपिण्डदानेन पिण्डानन्तर्यात् मातुलादिग्रहणार्थं बन्धुपद प्रयुक्तवान् याज्ञवल्क्यः, मनुना तु पिण्डदानानन्तर्यवचनेनैव दर्शितम् ।

मृतदेयमातामहादिपिण्डत्रयस्य मातुलादिभिर्दीयमानत्वात् मातुलाद्यर्थत्व धनस्य धनद्वारेण तस्यापि तत्पिण्डदातृत्वात् । धनार्जनस्य हि प्रयोजनद्वय भोगार्थत्वं दानाद्यदृष्टार्थत्व च । तत्रार्जकस्य तु मृतत्वात् धने भोग्यत्वाभावेनादृष्टार्थत्वमेव शिष्टम् । अत एव बृहस्पतिः–'समुत्पन्नाद्धनादर्द्धं तदर्थं स्थापयेत् पृथक्। मासषाण्मासिके श्राद्धे वार्षिके च प्रयत्नतः ॥' तथा आपस्तम्बः––'अन्तेवासी वाऽर्थान् तदर्थेषु धर्मकृत्येषु प्रयोजयेत् दुहिता वा ।' मासिकादिना तद्भोगार्थं धर्मकृत्येष्विति अदृष्टार्थत्वे हेतुः । अत एव दत्तभुक्तफल धनमिति स्मरन्ति । तस्मात् तद्भोग्यपिण्डदातुरभावे तद्देयपिण्डदातुर्मातुलादेरधिकारो न्याय्य एव । अत एव 'त्रयाणामि'ति 'अनन्तर' इति वचनद्वयेनैवायमर्थो दर्शित इति मत्वा तदनन्तर मनुनोक्त––'अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा ।' (मस्मृ.९।१८९)। सकुल्यो वृद्धप्रपितामहादिसंततिः समानोदकाश्च भण्यन्ते । तेषामुपन्यासक्रमेणाधिकारक्रमः । तदभावे आचार्यशिष्यादीनाम् । अन्यथा कथं मातुलादीना मनुविरुद्धोऽन्तर्भावः शक्यते । तस्मात् मनुना पूर्ववचनद्वयप्रतिपादितोऽयमर्थ इत्यविरोधः । *दा.२०३-११

(४) 'अपुत्राशयनं भर्तुः' इत्यादिमनुवाक्योक्तगुणा पत्नी पितृभ्रातृसद्भावेऽपि स्वयमेव पतिधनं समग्र गृह्णाति, पत्युश्च श्राद्धादि करोति । अनेनैवाभिप्रायेण बृहस्पतिनाऽप्युक्त 'पितुः पुत्रेण कर्तव्या पिण्डदानोदकक्रिया । पुत्राभावे तु पत्नी स्यात्तदभावे सहोदरः ॥' इति । तथा या पितृधनानुपघातेन स्वयमर्जयितुर्भर्तुः परिचर्या यथावत्कृतवती सयतेन्द्रिया च सा भर्तुः सकलमेव धन देवरेषु विद्यमानेष्वपि गृह्णाति । या तु तारुण्यादिना सभावितव्यभिचारा तस्या विद्यमानायामपि मृतकस्य भर्तुर्भ्रातृगाम्येव वित्त, न तु पत्नीगामि । तत्रापि चेया व्यवस्था–यदि तद्भ्रातृभिः स्वपितृधनानुपघातेन सभूय समुत्थानेन धनमर्जित, तदा पित्रोः सद्भावेऽपि भ्रातर एव धनग्राहिणः । यदा तु पितृपितामहाद्यर्जित धन, तदा न भ्रातृणा धनभागित्व किन्तु पित्रोरिति, एव विषयव्यवस्थाया सर्ववाक्याविरोधः ।

यदपि चार्थवादवचनम्–'तस्माल्लिय्यो निरिन्द्रिया अदायादाः' इति । तदपि यथाप्राप्ति वर्णनीयमनुवादकत्वादिति पुत्रसद्भावविषयत्वेन व्याख्येयम् । अस्ति च स्त्रीणामेकाकिनीनामपि पतिधर्माधिकारः । तेन तत्र धन ता उपयोक्ष्यन्ते । यत्तु नारदेन –'भ्रातृणामप्रजाः प्रेयात्' इत्यभिधायोक्तम्– 'भरण चास्य कुर्वीरन्स्त्रीणामा जीवितक्षयात्' । इत्यादि, तत्पुनर्भस्वैरिण्यादिविषय वेदितव्यम् । स्त्रीशब्दमात्रप्रयोगात् । एव पत्न्यामसत्या पितृसमानवर्णा दुहितरोऽपुत्रधनस्वामिन्यः । अप. (पृ.७४२ ३)

माता च पिता च पितरौ तौ पुत्रस्य पत्न्या दुहितृभिश्च रहितस्य धनग्राहिणौ । पित्रोरभावे भ्रातरस्ते तु सोदरा एव प्रत्यासन्नतरत्वात् । ते हि मृतभ्रात्रपेक्षयैकस्यैव मातृवर्गस्य श्राद्धकारिणो न तु सापत्नाः । यत्तु शखलिखितपैठीनसिवचः–'अपुत्रस्य स्वर्यातस्य भ्रातृगामि धन तदभावे मातापितरौ लभेता पत्नी वा ज्येष्ठः' । इत्यादि,

* शेष जीमूतवाहनमत मृतापुत्रधनाधिकारक्रमस्थमनुबृहस्पतिवचनेषु द्रष्टव्यम् । दात. दाव. क्रमः उपपत्तिश्च । सप्तष्ठौ विशेषः संसृष्टिविभागेऽनुसंधेयः ।

तत्पितृधनानुपघातेनार्जित(ता)विभक्तधनेषु भ्रातृषु द्रष्टव्यम्। अतादृशभ्रातृभावे च पितरौ ज्येष्ठा वा पत्नी उक्तलक्षणभ्रातृविलक्षणास्तु भ्रातरो याज्ञवल्क्योक्तक्रमानतिक्रमेण रिक्थभाजो मन्तव्या इति सर्वमविरुद्धम्।

यदपि देवलेनोक्त—'ततो दायमपुत्रस्य विभजेरन्सहोदराः। तुल्या दुहितरो वाऽपि म्रियमाणः पिताऽपि वा॥ सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम्॥' इति। तत्रापि शखवचनव्यवस्थाप्रकारेण सोदराणा पूर्वं दायग्राहित्व ज्ञातव्यम्। भ्रात्रभावे तत्सुतास्तदभावे गोत्रजाः। अप. (पृ.७४४)

एवं भ्राता तत्पुत्रस्तत्पौत्र इति पितृमततौ त्रयः प्रत्यासन्नाः सपिण्डाः। एवं पितामहसततौ प्रपितामहसततौ च। एषामभावे पित्रादित्रयस्य ये प्रपौत्रास्तेषा पुत्रादित्रय सापिण्ड्याद्धनग्राहकम्। गोत्रजाभावे बन्धुः पितृष्वसा मातृष्वसा मातुलसुतादिः। तदभावे शिष्य उपनीय वेदमध्यापितो धनभाग्भवति। तदभावे सब्रह्मचारी एकाचार्यकः। यत्तु कात्यायनेनोक्त—'विभक्ते सस्थिते द्रव्य पुत्राभावे पिता हरेत्। भ्राता वा जननी वाऽथ माता वा तत्पितुः क्रमात्॥' इति। तत्र पुत्राभाव इत्येतत्प्रदर्शनार्थम्। तेन पत्न्या दुहितृणामभाव इति द्रष्टव्यम्। पितुरभावे माता, मात्राऽनुमतो वा मा(भ्रा)तैव। 'माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञया' इति वचनात्। एषामभावे मृतस्य पितामही। अप. (पृ.७४५)

पत्नी दुहितर इत्यत्र वाक्ये केचित्पर्यनुयुञ्जते, यथा—स्त्रियाः समर्तृकाया एवेष्टापूर्तयोरधिकारो न तु केवलायास्तस्या भर्तृरहितत्वादेव च तया न कामः सेवनीयः किन्तु तपस्तीव्रम्। न च धर्मकामयोरनुपयुज्यमानोऽर्थो भवति पुरुषार्थः। तस्मात्पित्रादिषु धर्मकामोपयोगिधनभाजनेषु सत्सु न पत्न्या धनभाक्त्व, तस्मादपुत्रस्य मृतकस्य धन पत्नी निर्वाहमात्रसमर्थमादत्ताऽधिक, तद्विषयं पत्न्या धनभाक्त्ववचनम्। यस्य तु पत्नीरहितस्य धन दुहितृविवाहमात्रपर्याप्त तद्विषयं दुहितृणा धनग्राहित्वमनेनोच्यते। अतोऽधिकस्य मृतकधनस्य पत्नीदुहितृसद्भावेऽपि सपिण्डाः पित्रादय एव ग्राहकाः शंखादिवाक्यसामर्थ्याद्भवन्तीति मन्तव्यमिति।

तदयुक्तं, धनस्वामिनः प्रमये सति तद्धनेऽन्यस्य स्वामित्वोत्पत्तौ विधेयाया यथाऽऽह भगवान्—पत्न्या दुहितृणा स्वामितोत्पत्तेरेव न तूत्पाद्या 'पाणिग्रहणाद्धि सहत्वम्' इत्यादिनाऽऽपस्तम्बवाक्येन भर्तृधने स्त्रीणा स्वामित्व पाणिग्रहणमेव साधयतीति विधीयते। दुहितृणा पुत्रवज्जन्मनैव पितृधने स्वामिभावसिद्धिरिति वेदितव्यम्। ततश्च पत्न्या दुहितरि सत्या तयोः स्वामित्व बाधित्वा पित्रादिस्वामित्वविधिरनेन वाक्येन कार्यः। अभावे तु पत्नीदुहित्रोर्वाधनिरपेक्षं विधायकत्वमस्येति वैरूप्यमापद्यते, ततस्तत्परिहारार्थं पत्न्याद्यभाव एव पित्रादीना धनभाक्त्वमिह प्रमेयम्। यत्तु शखादिभिः पित्राद्यभावे पत्न्या धनग्राहकत्वमुच्यते, तत्कारणान्तरेण भर्तृधने यस्या अधिकारादिपदास्पद स्वामित्वमपेत तद्विषय द्रष्टव्यम्। उक्त च कारणान्तर—'हृताधिकारा मलिना' इत्यत्र भर्तृधने पत्न्याः स्वामित्वभ्रश प्रति। तस्मादुक्तैव व्यवस्था युक्ता। यदुक्त स्त्रीणा स्वनिर्वाहसमर्थादधिकोऽर्थो निरर्थक इति, तदपि नैव युक्तम्। उक्तं हि स्त्रीणामभर्तृकाणा मन्त्राग्निसाध्यधर्मादन्यत्र धर्मे दानादावस्त्यधिकार इति। तेन स्वतन्त्रोपयुज्यमानेऽर्थे तासामुपयोगः। *अप. (पृ.७४६-७)

(५) एवं च पत्न्येव कृत्स्नमंशं लभेतेति विभक्तासमृष्टविषयमिति मन्तव्यम्। तथा संग्रहकारः—'भ्रातृषु प्रविभक्तेषु समृष्टेष्वप्यसत्सु च। गुर्वादेशान्नियोगस्था पत्नी धनमवाप्नुयात्॥' इति। गुर्वादेशान्नियोगस्थेति धारेश्वरमत विश्वरूपादिभिः सम्यक् दूषितत्वादुपेक्षणीयम्। ततश्च संग्रहकारोक्तविषये वृद्धमनूक्तगुणविशिष्टा पत्नी भर्तृधनमखिलमवाप्नुयादित्येतदेव मतमादर्तव्यम्।

यत्तु श्रुतौ च उक्त—'तस्मात्स्त्रियो निरिन्द्रिया अदायादा' इति। तदपि न वृद्धमन्वादिवचनबाधकम्। निरिन्द्रियपुत्रसाहचर्यादपत्यभूतस्त्रीविषयत्वावगतेः। भवतु वा सर्वस्त्रीविषयत्वावगतिः तथापि दायादतया शृङ्गग्राहो-

* 'एषामभावे' इति श्लोकव्याख्यान मितागतम्। धारेश्वरमत तन्निरसन च मितागतम्। दुहितृपदार्थो दायवत्। धनस्य पुरुषार्थत्वविचारो मितावत्। विशेषश्च 'त्रयाणामुदकं कार्यम्' इति मनुवचने (पृ.१३१५) द्रष्टव्यः। ममु. अपवद्भावः। विशेषश्च 'अनन्तरः सपिण्डाद्यः' इति मनुवचने (पृ.१४७७) द्रष्टव्यः। मच. ममुगतम्।

क्तपत्न्यादिस्त्रीव्यतिरिक्तविषयार्थवादश्रुतिरिति सर्वं सुस्थम्। पत्नीबहुत्वे समं विभज्य अपुत्रभर्तृधनग्रहण सर्वासा युक्तम्। स्मृच.२९४

चशब्देन सूचितस्य दौहित्रस्यानन्तरमेव माता पितरौ समसमये धनभाजौ तयोरवान्तरक्रमन्यायाभावादित्यवमन्तव्योऽभिप्रायः।

याज्ञवल्क्योक्ताभिप्रायमबुध्वा केश्चित्पण्डितम्मन्यैः कश्चिन्न्याय उत्प्रेक्षितो मातुर्गर्भपोषणधारणद्वाराऽत्यन्तोपकारित्वादेव 'सहस्र तु पितुर्माता गौरवेणातिरिच्यते' इति स्मरणाच्च, पितरि विद्यमानेऽपि मातुरंशग्रहणाधिकार इति नाय, न्यायो मातुरादावंशग्रहणाधिकारापादनायालम्। पितुरपि बहुधा सनिधातृत्वात् विद्याप्रदत्वात् 'तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात्' इति स्मरणाच्च। अन्यैः पुनरन्यथोत्प्रेक्षितम्। पिता सपत्नीपुत्रेष्वपि साधारणः। माता तु न साधारणीति प्रत्यासत्तिशयोऽस्तीति विप्रलम्भमसदृशमिद न हि जननीजनकयोर्जन्य प्रति सनिकर्षतारतम्यमस्ति। न च बहुसम्बन्धेन साक्षात्सबन्धनिबन्धनायाः प्रत्यासत्तिशयो व्यपैति।

यदपि तैरेवोक्त 'एकशेषग्रहणेऽपि कथञ्चिन्मातुः प्राथम्यमवगम्यते' इति। तदपि मन्दम्। 'मात्वती भवत' इत्युत्पत्तिवाक्ये क्रमावगत्यभावेन याज्यात्क्रमात् प्रधानयोः क्रमः पञ्चमे दर्शितो न पुनः मात्वतावित्येकशेषत एव कथञ्चित्क्रमावगतिरूपपादितेति न निबन्धमेव (?) मातुः प्राथम्यसमर्थनम्। अत एव श्रीकरेण पित्रोर्विभज्य धनग्रहणमुक्त तदप्ययुक्तम्। 'पिता हरेदपुत्रस्य ऋक्थं' 'स्वर्यातस्य ह्यपुत्रस्य माता दायमवाप्नुयात्' इत्येताभ्यां व्रीहियवयोर्निरपेक्षसाधनत्ववन्निरपेक्षस्वामित्वप्रतीतेः। अपरे पुनरन्यथा मातुः प्रत्यासत्तिमुन्नयन्ति। 'सोदरस्य तु सोदर' इत्यत्र मातृद्वारेण सोदरवचनान्मातुः प्रत्यासत्तिर्गम्यते इति। तदपि कुशावलम्बनमात्रे। तथाहि भ्रातुर्भिन्नोदरादेकोदरयोरभिन्नमातृकत्वेन प्रत्यासत्तौ विशेषोऽस्तु। जनकात्पुनर्जनन्याः पुत्र प्रति प्रत्यासत्तौ विशेषः किं निबन्धनो भविष्यतीति न विद्मः। तस्मादत्र पित्रोः सद्भावे कः क्रम इत्यपेक्षाया वक्तव्यो विशेषः। यत्तूक्त शम्भुना अव्यक्तयवनत्वाद्दम्पत्योर्येनकेनचिद् गृह्यमाणमुभयार्थमिति न विशेषो वक्तव्य इति। तदयुक्तम्। मात्रा गृह्यमाणं मात्रार्थमेव अध्यग्न्यादिस्त्रीधनवत् नोभयार्थमिति विशेषो वक्तव्य एव सोऽभिधीयते। न्यायाभावादत्र क्रमे वचनमेव शरणम्। वचने च प्रथम पितुरेव धनग्रहणाधिकारः प्रतिपाद्यते। तथा च 'अपुत्रस्य धन पत्न्यभिगामि तदभावे दुहितृगामि' इत्यनुवृत्तौ बृहद्विष्णुः 'तदभावे तु पितृगामि तदभावे मातृगामी'ति। यद्यप्यपुत्रधनस्य दुहित्रभावे पितृगामित्वमुक्त तथापि दुहित्रभावे दौहित्रगामित्वस्य न्यायवचनाभ्यामुक्तत्वाद्दौहित्राभावे पितृगामित्वमवगन्तव्यम्। दौहित्रस्यापि दुहितृकोष्टित्वात्प्रथमदौहित्रगामित्वानभिधान बृहद्विष्णोरिति च मन्तव्यम्। मात्रभावे सोदरभ्रातृगामित्वं एकमातृकत्वेन मृतभ्रातुः प्रत्यासत्यतिशयलक्षणन्यायात्प्राप्तम। तदभावे भिन्नोदरगामित्व च। यद् याज्ञवल्क्येन न्यायमूलक्रममेवाभिदधताऽभिहित 'पितरौ भ्रातरस्तथा' इति भ्रातरः सोदरा एवात्र भिन्नोदरापेक्षया धनिन प्रति प्रत्यासन्नत्वादभिप्रेताः। ततश्च मात्रभावे सोदरभ्रातृगाम्यपुत्रधनमित्युत्सर्गो याज्ञवल्क्येन दर्शितः। तदा सोदरत्वस्वरूपविशेषविवक्षायामपि भ्रातर इति सामान्यशब्दप्रयोगेण सोदराभावे भिन्नोदरा इत्युत्सर्गस्तेनैव दर्शितः। उत्सर्गस्य वक्ष्यमाणविषयद्वयेऽपवादमाह कात्यायनः— 'विभक्ते संस्थिते द्रव्य पुत्राभावे पिता हरेत्। भ्राता वा जननी वाऽथ माता वा तत्पितुः क्रमात्॥' तत्पितुर्माता विभक्तमृतापुत्रस्य पितुर्माता पितामहीति यावत्। पुत्रग्रहणमासन्नतरोपलक्षणार्थम्। तेन पुत्रादिदौहित्रान्तानां पित्रपेक्षया दृष्टादृष्टोपकारादिसंबन्धेनासन्नतराणामभावे प्रथम पिता हरेत् इत्यर्थः। वाशब्दोऽत्र योग्याभावविकल्पार्थः स्वाम्याख्ये सिद्धरूपे वस्तुनि, न हि वस्तुनि विकल्प इति न्यायेन तुल्यबद्विकल्पासंभवात्।

एव चैतदुक्त भवति। पित्रभावे भ्राता तदभावे जननी तदभावे पितामहीति क्रमादुक्त पाठक्रमेणेत्यर्थः। अनेनैव क्रमेण विभक्तसंस्थितविषये मनुरपि पुत्रपत्नीदुहितृदौहित्राणामासन्नतराणामभावमपुत्रस्येत्युपलक्षणशब्देनोक्त्वा पितृभ्रातृमातृपितामहीना धनग्रहणं सार्द्धश्लोकेनाह 'पिता हरेदपुत्रस्य ऋक्थ भ्रातर एव वा। अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि च

वृत्तायां पितुर्माता धनं हरेत् ॥' (मस्मृ.९।१८५,२१७) इति । अपुत्रस्य पुत्रपत्नीदुहितृदौहित्ररहितस्येत्यर्थः ।

एवं च कात्यायनमनुप्रतिपादितः पित्रादिपितामह्यन्तानां धनग्रहणक्रमः वचनैकनिबन्धनत्वविरुद्धनयायिकक्रमबाधक इति न्यायविरोधशङ्का तु न कार्या । याज्ञवल्क्यीयमेव वचनं क्रमपरं तत्परत्वस्य तत्र 'पूर्वाभावे परः परः' इति कण्ठोक्त्या व्यक्तत्वात् । तेन च तद्विरुद्धानि 'पिता हरेदपुत्रस्य' इत्येवमादीन्यधिकारमात्रपराणि न क्रमपराणीति व्याख्याऽप्युपेक्षणीया । 'माता वा तत्पितुः क्रमात्' इति 'मातर्यपि च वृत्तायाम्' इति च, कात्यायनमनुवचनयोरपि कण्ठोक्त्या क्रमस्मृतेः । मातुः पूर्वं भ्राता धनहारीत्यत्र विशेषमाह बृहस्पतिः 'भार्यासुतविहीनस्य तनयस्य मृतस्य तु । माता ऋक्थहरी ज्ञेया भ्राता वा तदनुज्ञया ॥' इति । भार्याग्रहण न्यायवचनतो बद्धक्रमाणा दुहितृदौहित्रपितृणामुपलक्षणार्थम् । तेन सुतभार्यादुहितृदौहित्रपितृविहीनस्येत्यर्थो विज्ञेयः । एवं च 'पितरौ भ्रातरस्तथा' इत्युक्तक्रमस्य मातुरनुज्ञाविषये विद्यमानेन पितामहीविषये च कात्यायनाद्युक्तक्रमेणापवादोऽनुसंधेयः ।

एतेनेदं निरस्तं यत्कैश्चिदुक्तं मातृपितृभ्रातृभ्रातृसुताना 'पितरौ भ्रातरस्तथा तत्सुता' इति वचनेन बद्धक्रमत्वान्मध्येऽप्यनुप्रवेशाभावात् भ्रातृसुतानन्तरं हि पितामही गृह्णाति,तस्याः क्रमविशेषोक्त्यभावेनाविरोधादिति । न हि पितामह्याः क्रमविशेषोक्त्यभावः । कात्यायनवचनपाठस्तद्वृतार्थशब्देन मानवीये 'मातर्यपि च वृत्तायां' इति पदद्वयेन च पितामह्याः क्रमविशेषोक्तेः प्राक्प्रदर्शितत्वाद्बद्धक्रमत्वान्न्यायमूलस्य मध्ये वचनमूलक्रमविशेषसंभवाच्च । स्मृच.२९७-९

ततश्च सोदरभ्रातृसुताभावे सापत्न्यभ्रातृसुता धनभाजः । तेषामप्यभावे के धनभाज इत्यपेक्षिते याज्ञवल्क्यः 'गोत्रजा' इति 'धनभाज' इति शेषः । गोत्रजशब्दोऽत्र गोवलीवर्दन्यायात्पूर्वोक्तपितृभ्रातृतत्सुतव्यतिरिक्तपितामहसुतादिगोत्रजेषु वर्तते । तत्रापि स्वरूपैकशेषस्य स्वतोऽवगतेः पितामहदुहित्रादिस्त्रीव्यतिरिक्तेषु वर्तते । कारणान्तरादेव हि कुक्कुटौ वायसौ मिथुनीकरिष्याम इत्येवमादौ विरूपैकशेषावगतिः । न चेह तथास्ति कारणान्तरं, प्रत्युत भ्रातृतत्सुतसहचर्यात्पुमास एव गोत्रजा गम्यन्ते । किं च पत्नीदुहित्रादीनां शब्दग्रहणेन दायादत्वस्मृतेरगत्या 'तस्मात्स्त्रियो निरिन्द्रिया अदायादीरिति श्रुतेः तनैव स्वरूपैकशेषतया स्मृतेः सत्या गतौ श्रुतिविरोधिनी विरूपैकशेषता दूरोत्सारिता । अत एव 'जीवत्पुत्रेभ्यो दायं विभजेत्' इत्यापस्तम्बसूत्रव्याचक्षाणेन तद्भाष्यकारेण पुत्रेभ्य एव दायं विभजन् न स्त्रीभ्यो दुहितृभ्य इत्युक्तम् ।

यद्यपि 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' इति शाब्दस्मृत्या पुत्रेभ्य इत्यत्र विरूपैकशेषं कृत्वा दुहितॄणामनुप्रवेशोऽत्र कर्तुं शक्यते तथापि पुमासो दायादा न स्त्रियस्तस्मात् 'स्त्रियो निरिन्द्रिया अदायादीरिति श्रुतेरिति, एतेनेदं निरस्तम् । यत्कैश्चिदुक्तम् । गोत्रजाः पितामही तत्सपिण्डाः समानोदकाश्च । तत्र पितामही प्रथमं धनभाक् । 'मातर्यपि च वृत्तायां पितुर्माता धनं हरेत्' इति मातुरनन्तरं पितामह्या धनग्रहणे प्राप्ते पित्रादीनां भ्रातृसुतपर्यन्तानां बद्धक्रमत्वेन मध्येऽनुप्रवेशाभावात् उत्कर्षे तत्सुतानन्तरं पितामही गृह्णाति अविरोधात् इति । भ्रातृसुतानानन्तरमपि तेषां गोत्रजानां च बद्धक्रमत्वाविशेषात्पितामह्या सहैवात्र क्रमो नियम्यते इति संबद्धम् । स्वरूपैकशेषत्वेन पुंसामेव गोत्रजानां भ्रातृसुतसहक्रमबन्धनात् । न त्वन्यगोत्रजा पितामही मृतगोत्रजाऽपीत्यलं बहुना ।

गोत्रजा इत्येकशेषकरणमपि पितराविवित् न्यायमूलावान्तरक्रमाभावादेव याज्ञवल्क्यस्येति मन्तव्यम् । न हि भ्रातृसुताभावे पितामहसुतो धनभागित्येवमाद्यवान्तरक्रमे कश्चिन्न्यायोऽस्ति । न हि पितामहमतिक्रम्य तत्सुतो धनभागिति केनोच्यते । 'भ्रातरस्तत्सुता' इत्यभिधाय गोत्रजा इत्यभिदधता याज्ञवल्क्येनैवोच्यते । गोत्रजशब्देनैव भ्रातृतत्सुतयोर्निर्देशे गम्यमानेऽपि पृथक्तयोरभिधानस्य गोत्रजेषु पितामहादिषु तस्य तस्य संततौ पितृसततावपि च पुत्रपौत्रयोर्धनभागित्वज्ञापनार्थत्वात् । मनुनाऽप्ययमेवार्थः सूच्यते 'यो यो ह्यनन्तरः पिण्डात्तस्य तस्य धनं भवेत् । अत ऊर्ध्वं सकुल्याः स्युराचार्यः शिष्य एव वा ॥'

अत्राय दायप्राप्तिक्रमः । भ्रातृसुताभावे पितामह-

सुतस्य दायप्राप्तिः, तस्याभावे तत्सुतस्य तस्याभावे वृद्धप्रपितामहसुतस्य, तस्याभावे तत्सुतस्य, तस्याभावे सपिण्डातीतपुरुषसुतस्य, तस्याभावे तत्सुतस्य, तस्याभावे समानोदकाद्यपुरुषसुतस्य, तस्याभावे तत्सुतस्य, एवमेवोपरितनषट्समानोदकसततावप्यनुसधेयम् । ज्ञातिसकुल्यबन्धुषु वाचनिकासन्नन्तराभावे यथाकथचिदप्यासन्नन्तरा मुख्याः।

अस्मन्मते तु पितर्यविद्यमाने तु मातुर्धन, तदभावे पितामह्यास्तदभावे तु धनिकपितृसततेर्भ्रातृतत्सुतात्मिकाया इत्यनुसधेयम् । एवमुक्तमपुत्रधनविषय सर्व यथायोग्य अनुपनीतोपकुर्वाणकब्रह्मचारिसमावृत्तगृहस्थाश्रमान्तर्वहिर्भूतस्नातकस्वामिविषयम् । *स्मृच.३००–२

(६) अनपत्यस्य मृतस्य पत्नी सगोत्राद्देवरसपिण्डयोरन्यतरस्मात् अपत्यमुत्पाद्य अस्मै मृतस्वामिस्वत्वोपलक्षितमृक्थजात दद्यान्न स्वयमाददीतेति पारिजातः ।

विर.५८९

एवमपुत्रधने विद्यमानाया साध्व्या भार्याया तस्या अधिकारः । तदभावे तु विद्यमानाया दुहितुरधिकारः ।

विर.५९१

पितामह्यधिकारः पितृभ्रातृसपिण्डाभावे द्रष्टव्यः । मातुरभावे पित्रादीनामधिकारस्य स्थितत्वात् । दायाद्य दायादग्राह्यमृक्थम् । गौतमः 'असस्रष्टविभागः प्रेतानां ज्येष्ठस्य ।' असस्रष्टाना विभक्ताना भ्रातृणा मध्ये योऽनपत्यः प्रैति, तस्य भागो ज्येष्ठस्यैव भवतीत्यर्थः । एतदपि पत्नीमातापित्रसत्वे बोद्धव्यम् । पैठीनसिः–'अपुत्रस्य भ्रातृगामि द्रव्य तदभावे मातापितरौ लभेताम् । पत्नी वा ज्येष्ठा सगोत्रशिष्यसब्रह्मचारिणः ।' अज्येष्ठा पतिव्रतात्वान्य स्वल्पविधवाकर्तव्यनियमवती, न तु सर्वतत्कर्तव्यवती, तस्या भ्रात्रपेक्षया पतिऋक्थग्रहणे मुख्यत्वात् । नापि व्यभिचारिणी, तस्या निर्वास्यत्वात् । सब्रह्मचार्यत्र सहाध्यायी, यच्च 'भरण चास्य कुर्वीरन् स्त्रीणामाजीवित क्षयात् । रक्षन्ति शय्या भर्तुश्चेदाच्छिन्द्युरितरासु च ॥' इति, भरणमात्र शखेनोक्त तद्वैधव्यव्रतादिरहिताव्यभिचारिणीमात्रविषयम् । यत्तु याज्ञवल्क्येन, 'पितरौ भ्रातरस्तथे'ति भ्रातृसद्भावे पित्रोरेवाधिकार उक्तः, स पितृपितामहार्यार्जितधनविषयः । यच्च पितृद्रव्याविरोधेनार्जित, तत्पित्रोः सद्भावे भ्रातृणामेव । देवलः–'ततो दायमपुत्रस्य विभजेरन् सहोदराः । तुल्या दुहितरो वापि म्रियमाणः पितापि वा ॥ सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम् । एषामभावे गृह्णीयुः कुल्याना सहवासिनः ॥' तुल्याः सोदर्याः । पिता म्रियमाणः सस्पृहश्चेति शेषः । अत्र हलायुधेन यथाक्रम यथा याज्ञवल्क्यादिक्रममिति विरोधमाशङ्क्य परिहृतम् । अत्रेद शास्त्रतत्वमित्युपक्रम्य लिखित च पत्नीमारभ्य श्रोत्रियपर्यन्तस्यापुत्रब्राह्मणधने राजपर्यन्तस्यापुत्राब्राह्मणधनेऽधिकारित्वम् । एतद्दर्शनाच्च शखलिखितवचनेऽपि व्यवहितकल्पना कार्येति । देवलवचने अलब्धक्रमे याज्ञवल्क्यविष्णूक्तः क्रमोऽन्वेतीति देवलवचनलिखनानन्तर याज्ञवल्क्यविष्णुवचने लिखितवतः कल्पतरुकारस्याभिप्रेतम् । वस्तुतस्तु पैठीनसिवाक्ये 'अपुत्रस्य प्रमीतस्य भ्रातृगामि द्रव्यमि'ति पितृपितामहार्यार्जितधनेतरधने, तदभावे मातापितरावित्यपि अन्यत्र खण्डे क्रमादर्शनमेवेति न विरोधः ।

पत्नी चात्रोत्तमगुणा विवक्षिता । अपुत्रत्वमत्र पौत्रप्रणप्तृशून्यत्वमपि विवक्षितमिति प्रकाशकारेण द्योतितम् । युक्त चैतद्व्यवहारिकत्वात् । यद्यपि पितराविति समुच्चितनिर्देशेन समुच्चिताधिकार आपाततो भाति तथापि 'भार्यासुतविहीनस्य तनयस्य मृतस्य च । माता ऋक्थहरी ज्ञेये'ति पितृनरपेक्ष्येणैव भार्यासुताभावे मातुरधिकारबोधनात्, मात्रभावे पित्रधिकारबोधनमनेनेति ।

+विर.५९२–५

* दुहितृपदार्थविशेषणानि अस्मिन्नेव प्रकरणे बृहस्पतौ कात्यायने च द्रष्टव्यानि । पत्नीपदार्थः दुहितृपदस्य पुत्रिकापदार्थत्वपक्षनिरसन च बृहस्पतौ नारदे च द्रष्टव्यम् । पत्नीदुहितृदौहित्रोपकारकत्वं नारदे द्रष्टव्यम् । 'शिष्य' इत्यादिवाक्यशेषव्याख्यानं मिताक्षरागतम् ।

+ भ्रातृपितृविकल्पः अपवत् । स्मृसा. विवादरत्नाकरीयापुत्रधनाधिकारप्रकरणोक्तवचनक्रमानुसार्येव । स्मृतिसारोक्तकल्पतरुपारिजातहलायुधमतेषु वचनोपन्यास एव न व्याख्या दृश्यते । पारिजातमते मातृपितृक्रमः न विवादरत्नाकरानुसारी तथैव भ्रातृपितृक्रमे विषयविभागो न रत्नाकरवत् । श्रीकरमतं 'त्रयाणामुदकम्' इति मनुवचने (पृ.१३१५) द्रष्टव्यम् ।

(७) या च श्रुतिः 'तस्मात्स्त्रियो निरिन्द्रिया अदायादाः' इति सा पात्नीवतग्रहे तत्पत्न्या अंशो नास्तीत्येवंपरा। इन्द्रियशब्दस्य 'इन्द्रियं वै सोमपीथः' इति सोमे प्रयोगदर्शनात्। ×पमा.५३६

(८) यथा मात्रनन्तरमेव पितुरधिकारस्तथा पितामह्यनन्तरं पितामहस्याधिकारः। पितुरभावे भ्रातृणामिव पितामहस्याभावे पितृव्यास्तत्रापि सोदरभिन्नोदरव्यवस्था पूर्ववदेव। साक्षात्पितामहीपुत्राः प्रथम धनभाजस्तदभावे सापत्न्यपितामहीपुत्रास्तेषामप्यभावे भ्रातृपुत्रन्यायेन पितृव्यपुत्रास्तेषामभावे प्रपितामही। तस्या अभावे प्रपितामहस्तदभावे प्रपितामहपुत्राः भ्रातृन्यायेनैव तदभावे तत्पुत्रा इत्येवं सप्तमपुरुषपर्यन्त वेदितव्यम्। एव सप्तमपुरुषाधिकसपिण्डाभावे समानोदकाः। तत्रापि पूर्वोक्तरीत्या प्रत्यासत्तिविशेषो द्रष्टव्यः। *मपा.६७३४

(९) मिताटीका—विवाहसंस्कृतैव पत्नीत्युच्यत इति। यद्यपि ज्येष्ठायामनिषिद्धायां सत्यां कनीयसीना यज्ञे नाधिकारः तथापि तदभावे सद्भावेऽपि वा दीर्घरोगग्रस्तायां तस्यां पतितायां वाऽन्यासा क्रमेणाधिकारोऽस्तीति यज्ञसाधनत्वयोग्यताऽस्तीति 'यज्ञसयोग' इत्यत्र यज्ञसाधनत्वयोग्यता विवक्षितेत्यर्थः। अथवा यज्ञशब्देन विवाह एव कथ्यते। तत्रापि देवतोद्देशेन द्रव्यस्य दीयमानत्वात् तद्रूपत्वाच्च यागस्य। एवमपि विवाहितैव पत्नी नान्या तदा स्त्रियमन्तरेण विवाहस्यैवाभावात् यज्ञसाधनत्वमिति द्रष्टव्यम्। यथाश विभज्य धन गृह्णन्तीति। यथाश 'चतुस्त्रिद्येकभागाः स्युः' इत्यनेन क्रमेण ब्राह्मणी क्षत्रिया वैश्या शूद्रा च गृह्णीयुरित्यर्थः। सुबो.(पृ.६२)

व्यामोहमात्रमिति। यदा भर्तरि जीवति मृते च पुत्रेषु सत्स्वपि पुत्रसमाशभाक्त्व न भरणमात्रोपयुक्तधनभाक्त्व पत्न्याः तदा किमु वक्तव्यमपुत्रस्य धन सकलमाप्नोतीत्येवं कैमुतिकन्यायेनैव पत्न्याः सकलधनभाक्त्वे सिद्धे ग्रासाच्छादनातिरिक्तं न प्राप्नोतीत्युक्तिः भ्रान्तेत्यर्थः। किं च अंशग्रहणाधिकारिणा पुत्रान्तराभावे सकलरिक्थ ग्रहणाधिकारेण पुत्रेण सह समाशभाक्त्वस्योक्तत्वात् पुत्राभावे विभक्तस्यानपत्यस्य धन पत्नी गृह्णातीति युक्तियुक्त चैतत्। तस्मात्पूर्वापरविचारशून्यानामिदं वचनमुपेक्षणीयमेव। सुबो.(पृ.६६-७)

आचार्यो विश्वरूपाचार्यः। सुबो.(पृ.६९)

(चन्द्रिकादिमत खण्डयति) एतदखिलमप्यचतुरस्रम्। तथा हि। न तावदेकशेषे क्रमप्रतीतिः विग्रहवाक्ये चानेकशेषपक्षे च मातुः पूर्वपाठादेव क्रमप्रतीतेः। ननु 'सारस्वतौ भवत' इत्युक्तं इति चेत् न, तन्न्यायः विरोधाभावात्। तथाहि सारस्वतश्च सारस्वतश्च सारस्वताविति 'सरूपाणामेकशेष एकविभक्तौ' इति सरूपैकशेषत्वात् क्रमस्तत्र विग्रहवाक्येऽपि न प्रतीयते, अतः कोऽत्र क्रम इत्याकाङ्क्षाया श्रौतो मन्त्रक्रमो युक्त इति याज्यानुवाक्यायुगलक्रमेण यागानुष्ठानक्रमो निरूपितः, न तु सर्वत्रैकशेषे क्रमप्रतीत्यभाव इत्यभिप्रायः।

प्रकृते तु 'पितरौ' इत्यत्र 'पिता मातेति' विजातीयैकशेषत्वाद्विग्रहवाक्येऽवश्यं क्रमप्रतीतेः, स क्रमो ग्राह्य एव। यच्चोक्तम्। न हि जननीजनकयोर्जन्य प्रति सनिकर्षतारतम्यमस्तीति तदपि स्ववीयः। गर्भधारणपोषणादिभिरत्यावश्यकत्वेन जन्येऽतिशयान्तरमुत्पादयति माता। पिता तु निषेककृदेव। अदृष्टात् दृष्टस्यैव प्राबल्यात् दृष्टोपकाराधिक्यान्मातुः सनिकर्षातिशयोऽस्तीति।

यदपि चोक्त गोत्रजा इति सरूपैकशेषत्वात् भ्रातृतत्सुतादिभिः सह बद्धक्रमत्वात् पितामह्या भ्रातृसुतानन्तरमपि प्रवेशाभाव इति तदसाधु। विजातीयानामपि स्त्रीणा पुसा च गोत्रजाश्च गोत्रजाश्च इत्येकविभक्त्यन्तत्वाविरोधात्। जातिद्रव्यगुणा इतिवत्। नापि बद्धक्रमता। पित्रादिभ्रातृसुताना गोत्रजाना च न बद्धक्रमता। अतः पत्न्यभावे दुहिता तदभावे दौहित्रस्तदभावे माता तदभावे पिता तदभावे भ्रातरस्तदभावे भ्रातृसुतास्तदभावे पितामहीति च क्रमः। यथाह बृहस्पतिः—'भार्यासुतविहीनस्य तनयस्य मृतस्य तु। माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञया॥' इति। अस्यार्थः। सुतविहीनस्य मृतस्यास्य रिक्थहरी भार्या। तदभावे तनया। तदभावे तत्पुत्रः। तदभावे माता। मात्रनुज्ञया मृतस्य भ्राता वा। भ्रात्रा गृहीतेऽपि मात्रनुज्ञया गृहीतत्वादेव मात्रा गृहीतमेवेति मातुरेव पितुः पूर्व रिक्थभाक्त्वमिति। केचन बृहस्पति-

× मातृपितृक्रमः मिताक्षरवत्, दायच्चापक्षपातेनोपन्यस्तः। शेषं मिताक्षरागतम्। * सर्वं व्याख्यान मिताक्षरागतम्।

वचनेऽपि तनयशब्दो दौहित्रपितॄणामुपलक्षक इति कथयन्ति। तन्मन्दम्। अनुपपत्त्या हि लक्षकत्व शब्दानाम्।एवं च सर्वत्राविवादेन दुहितुरभावे दौहित्रस्य धनभाक्त्वं वचनेष्वविशिष्टमिति दुहित्रनन्तरं वचनान्तरविरोधरूपया दुहितृसंततिरूपया चानुपपत्त्या दुहितृदौहित्रयोरेवोपलक्षको न तु पितुः। तावतैवानुपपत्तेः परिक्षीणत्वात्। परिक्षयश्च मानवादिवचनान्तरेषु पितुर्दौहित्रानन्तर्यस्यानियतत्वेन। अतो यावत्यर्थे लक्षितेऽनुपपत्तिः शाम्यति तावानेव तनयशब्देन लक्ष्यत इति। न पितुर्दौहित्रानन्तरं प्रतीतिः।

यच्च कात्यायनवचनम्–'विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा जननी वाऽथ माता वा तत्पितुः क्रमात्॥' इति। अत्रापि वाशब्दस्य श्रवणान्न क्रमपरता। अपि तु वचनोपात्ता एतेऽधिकारिण इत्यधिकारमात्रप्रदर्शनपरतैव। स्वाम्याख्ये सिद्धरूपे वस्तुनि विकल्पाभावादपिशब्दार्था वाशब्दाः। न तु परोक्तरीत्या पूर्वपूर्वाभावपरा वाशब्दाः। अभावे वा शब्दस्य शिष्टप्रयोगाभावात्। अप्यर्थे प्रयोगाच्च। अथशब्दोऽप्यानन्तर्यपरो न मात्रनन्तरमेव पितामह्या धनसबन्ध बोधयति। वाक्यस्योक्तरीत्या क्रमपरत्वाभावात्। अतो भ्रातृसुतानन्तरमेवाविरोधात् धनसबन्ध बोधयतु। तथापि स्वार्थाहानात् क्रमादिति च पदं 'पूर्वाभावे परः पर' इति योगीश्वरवचनवाक्यशेषपर्यालोचनया तत्रत्यमविरुद्धमेतत्क्रमं बोधयति न स्ववाक्यस्थम्। अत्र क्रमादिति सामान्येनाभिधानात्। योगीश्वरेण 'पूर्वाभाव' इति विशेषोपादानात्सामान्य प्रति विशेषस्य बाधकत्वात्। तस्मादन्यैर्यत्किञ्चिदुक्तमिति मिताक्षराव्याख्यानमेव युक्ततरमिति सर्व सुस्थम्। गोत्रजाभावे बन्धवो धनभाज इति। पितामही–पितामह–पितृव्य–तत्पुत्राणा, प्रपितामही–प्रपितामह–पितामह–भ्रातृ–तत्पुत्राणा, प्रपितामहमातृ–प्रपितामहपितृ—प्रपितामहभ्रातृ—तत्पुत्राणा, प्रपितामहपितामही—प्रपितामहपितामह— प्रपितामहपितृव्य–तत्पुत्राणा, प्रपितामहप्रपितामही– प्रपितामहप्रपितामह–प्रपितामहपितामहभ्रातृ—तत्पुत्राणा समानोदकेष्वप्येनेन न्यायेन तेषां भाव इत्यर्थः। सुबो.(पृ.७३-४)

(१०) अविभक्तप्रमीते तु पत्यौ तस्याश एव नाभूदतः किमिय गृह्णातु। न च सैवाशप्रतियोगिनी, प्रापकाभावात्। न चैतान्येव वाक्यानि प्रापकाणि। एषा विभक्तधनपरत्वेनाप्युपपत्तेः। अत एव 'भ्रातॄणां दायभागो याश्चानपत्याः स्त्रियस्तासा चापुत्रलाभात्' इति वसिष्ठसूत्र भ्रातृभार्याया विधवाया पत्याहितगर्भाया तद्देवरादीना विभागे प्राप्ते तस्या अपि शङ्कितपुत्रप्रसवाया भाग आप्रसवं स्थाप्यः, स च तस्याः पुत्रे अनुत्पन्ने देवरादिभिर्ग्राह्य इति रत्नाकरादौ व्याख्यातम्। विचि.२३७-८

मनुरपि—'अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि च वृत्तायां पितुर्माता धन हरेत्॥' दुहितृशून्यस्य माता धन हरेत्। सकुल्यान्तशून्यस्य धन पितामही हरेदित्यर्थः। मात्रभावे पित्राद्यधिकारस्य व्यवस्थापितत्वात्। 'मात्रभावे पितृगामी'ति विष्णुवचनात्। विचि.२३९-४०

तदय सक्षेपः। पुत्रस्तदभावे पौत्रस्तदभावे प्रपौत्रस्तदभावे सार्वी भार्या तदभावे दुहिता तदभावे माता तदभावे पिता तदभावे भ्राता तदभावे तत्पुत्रः तदभावे आसन्नसपिण्डस्तदभावे यथाक्रम व्यवहितसपिण्डस्तदभावे आसन्नसकुल्यस्तदभावे यथाक्रम व्यवहितसकुल्यस्तदभावे मातृकुलादिः, सर्वाभावे ब्राह्मणधनवर्ज राजा। ब्राह्मणधने तु सद्ब्राह्मणान्तरमेव धनाधिकारीति। *विचि.२४३४

(११) ननु पत्नीदुहितरन्यायावलम्बनेन पत्न्याः पत्यशहरत्व स्यात्। सवि.४०५

एव स्त्रीणा यद्धरणप्रतिपादकं वचनजात तदविभक्तपत्नीविषय च वेदितव्यम्। यच्च 'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। भुञ्जीतामरण क्षान्ता दायादा ऊर्ध्वमाप्नुयुः॥' इति। 'स्थावर जङ्गम चैव कुप्यधान्यरसाम्यरम्। मृते भर्त्तरि भर्त्तश लभते कुलपालिका॥ यावज्जीव तु तत्स्वाम्य दानाधमनविक्रये॥' इति वचनद्वय दुहितृरहितपत्नीविषय वेदितव्यम्। 'दायादा ऊर्ध्वमाप्नुयुरि'ति 'यावज्जीव हि तत्स्वाम्यम्' इति स्मरणद्वयसामर्थ्यात्। यद्यपि सतानहीनाया उपरमे ज्ञातीनामेव

* दुहितृपदार्थो मिताक्षरागतः। पितृभ्रातृविकल्पः अपवत् विरवच्च। देवलवचन विरवत् व्याख्यातम्। अपुत्रधनव्यवस्था विरवत्।

धनं तथाऽपि दुहितृसहितायाः पत्न्या उपरमे तद्दुहितृदौहित्रादीनामेव तद्धनप्राप्तिः। तद्वदत्रापि दुहितृरहितपत्न्या उपरमे दुहित्रादीनामभावे तत्पित्रादीना धनप्राप्तिर्मा भूदिति दायादा ऊर्ध्वमाप्नुयुरित्यवगन्तव्यम्। सवि.४११

भारुच्यादयस्तु सब्रह्मचारिणा भ्रातृतुल्यतया तत्पुत्राणा तत्पत्न्यादीनामभावे श्रोत्रियब्राह्मणगामित्वमाहुः। असहायादयस्तु योनिसबन्धानन्तर विद्यासबन्धादाचार्यगामि त्वेतद्धनम्। तदभावे आचार्यपुत्रगामि तदभावे तत्पत्नीगामि तदभावे सब्रह्मचारिगामि तदभावे सच्छ्रोत्रियब्राह्मणगामि तदभावे श्रोत्रियमात्रगामि तदभावे ब्राह्मणमात्रगामीत्याहुः। सवि.४१९–२०

शूद्रस्य तु भ्रातृपर्यन्ताभावे राजगामि धनम्। शूद्रस्यैकोदराभावे राजा तद्धनमाप्नुयात् इति। सवि.४२०

अत्राह भगवान् लक्ष्मीधरः—अशेषात्मजहीनस्य मृतस्यासंसृष्टिनो धन प्रथम पत्न्यभिगामि तदभावे दुहितृगामि तदभावे चकारादौहित्रगामि तदभावे मातापितरौ हरेयाता तदभावे भ्रातृगामि तदभावे बन्धवो यथाक्रमं गृह्णीयुरिति। प्रथमं रिक्थस्यात्मवर्गे पत्न्यादौ संक्रमस्तदनन्तरं पितृवर्गे पितृपितृव्यतत्पुत्रादौ संक्रमस्तदनन्तरं पितामहवर्गे आसप्तम संक्रमः तदनन्तर समानोदकेषु तदभावे आत्मबन्धुषु तदभावे पितृबन्धुषु तदभावे मातृबन्धुषु श्रोत्रियान्तेषु सक्रम इति। एव स्थिते पत्न्यनन्तरं दुहितृगामि धन तद्दुहितृणा सापत्यानपत्यतामनपेक्ष्यैव संक्रामति। तथा च 'दुहितर' इति वचनं सार्थकं भवति। अत एव भ्रातर इति बहुवचनमपि सापत्यानपत्यभ्रातृत्वविवेकमनपेक्ष्यैव प्रयुक्तम्। अत एव पत्नीत्येकवचनम्। सापत्यानपत्यपत्नीद्वयसनिपाते सापत्यायाः स्थावरं नानपत्यायाः। अत एव तत्सुत इत्यत्रापि भ्रातृसुताना सापत्यानपत्याना संनिपाते सापत्यस्यैव रिक्थग्रहणम्। एवमुत्तरत्रापि। सब्रह्मचारिणा इति बहुवचनं तु एकवासिनामिव अनेकवासिनामप्यादरार्थम्। तच्च दुहितृस्वाम्यतिरिक्त स प्रतिबन्धमपि दौहित्रसद्भावे दुहितृगामित्वावस्थाया अप्रतिबन्धदायतामापद्यते। चकारेणानुक्तसमुच्चयार्थेन समुच्चितदौहित्रस्यापि समकालमेव स्वत्वप्राप्तिरिति ज्ञापयत्येवकारः। 'तथैव भ्रातरस्तथे'ति तथाशब्दः तत्सुतपदेनान्वीयमानो यथा शब्दसंबन्धोऽन्वेति यत्तदोर्नित्यसंबन्धात्। तथा चायमन्वयः— पितृगामित्वानन्तरं दायस्य भ्रातृशब्दवाच्याना तत्सुतानामप्रतिबन्धेनैव दायाधिकारः। तथा तत्पुत्रसद्भावेऽप्यप्रतिबन्ध एव दाय इति। यत्तु विज्ञानयोगिनोक्त—पितराविति्यत्र एकशेषमहिम्ना पूर्व मातृगामि धन तदभावे पितृगामीति। तन्न, बहुवचनवद्द्विवचनस्यापि समप्राधान्यस्य द्योतकत्वात्तयोस्तद्रिक्थे तुल्यमेव स्वाम्यम्। किन्तु 'पुमान् पुसोऽधिके शुक्ले' इति वचनात् 'बीजग्रहणानुविधायिनं अंश गृह्णीयादि'ति वैष्णववचनानुरोधेन तादृशग्रहणस्य न्याय्यत्वादिति सोमशेखरः। तन्न। तथा सति पितृवर्गे भ्रातृपुत्रान्ते मातुलादिषु मात्रवयवानुवृत्तेस्तत्रैव दायग्रहणं स्यान्न प्रपितामहवर्गे। यथाऽऽह भारुचिः विष्णुवचनव्याख्यानावसरे—'बीजशब्दः पिण्डवाची' इति। अत्र निर्वाप्यपिण्डान्वय एव विवक्षितः। मातुः पित्रा सापिण्ड्यात्। उभयग्रहणात्पितुरेव प्राधान्य तदभावे मातुरेवेति। अयमेवाशयः चन्द्रिकाकारोदाहृतवैष्णववचनस्यापीति ध्येयम्। अत्रेद तत्व—यथा पितृद्रव्ये पुत्राणा दायस्वीकारोऽप्रतिबन्धः। पुत्रः पुत्रत्वेनैव पितृद्रव्यस्वामी दुहित्रादिस्थलेऽपि पुत्रसंततिसद्भावे तत्स्वामित्वं तत्पुत्रत्वेनैव। अत उक्तं तत्सुता इति। नन्वत्र तच्छब्देनापुत्रभ्रातैव परामृश्यते। न तु भ्रातृमात्रमिति तत्पुत्रस्याप्रतिबन्धदायार्हता नास्तीति प्रतिभातीति चेन्मैवम्। भ्रातृशब्दस्य संबन्धिशब्दत्वादपुत्रस्य भ्रातेति गम्यते भ्रातृपदेन। न तु तत्पदेन अपुत्रसंबन्धविशेषणविशिष्टभ्रातृपरामर्शः तावत्पर्यन्त शब्दतात्पर्याभावात्। न चात्र रिक्थग्राहितयाऽपि तद्भ्रातृसुताना तत्कृतमृणमपाकरणीयं स्यात्तथात्वे 'रिक्थग्राही ऋणं दाप्य' इति सामान्येन स्मरण व्याहन्येत। न च तथाङ्गीकारः। सर्वलोकसिद्धत्वात्तद्दणापाकरणस्येति वाच्यम्। भूतपूर्वगत्या तदीयरिक्थग्राहित्वात्तेषा तद्दणमपाकरणीयम्। अत्रेदमुपतिष्ठते वैष्णव वचनं— 'दौहित्रान्तानामपाये मातापितरौ हरेयाताम्' इति। 'पत्नी दुहितरश्चैवे'ति याज्ञवल्कीयवचनगतचकारानुकृष्टाना दौहित्रान्तानामभावे मातापितरौ पिण्डानुरोधेन धनं हरेयाताम्। दौहित्रसंक्रान्त्यनन्तरं तत्पुत्रगाम्येव धनं न मातापितृगामि। अत्रेदं तत्वं—सप्रतिबन्धस्थलेऽपि पुत्रसंततिसद्भावेऽपि अप्र-

तिबन्ध एव दाय इति चकारैवकाराभ्यां याज्ञवल्क्यीय-वचनतात्पर्यमवधार्यम्। 'रिक्थग्राही ऋण दाप्य' इति वचनबलाद्वास्तव रिक्थग्राहित्वमवलम्ब्य तद्दर्शसशोधन न्याय्यम्। स्वाम्य त्वप्रतिबन्धमेव। अतश्च दौहित्र-स्याप्रतिबन्धो दायग्रहः न दुहितुः। यदि दुहितुरपि स्यात् दौहित्रसक्रान्तरिक्थ तदभावे मातापितृगामि स्यात्। तच्च सर्वविद्वदसंमतम्। सततिहीनाया दुहितुः पुत्रिकारूपसंततिहीनाया वा रिक्थसंक्रान्तौ तन्मृत्यनन्तरं तद्दुहितुर्वा तज्जातीन्वा ऋक्थ प्राप्नुयात्। तच्च न्याय्य न भवति। तथा च स्मर्यते —'अपुत्रायाश्च दुहितुः पितृरिक्थं हरन्ति ते! पितृभ्रातृसुतायाश्च गोत्रजा नैव बान्धवाः॥' इति। बान्धवा मातुलादयः पैतृष्वसेयादयश्च। तथा च विष्णुः—'अनपत्यरिक्थ न बान्धवगामी'ति। अयमर्थः—अनपत्याना स्त्रीणामनपत्यस्य वा रिक्थं सप्रतिबन्धो दायः सगोत्रान् ज्ञातीनेव संक्रामति। न त्वनपत्याना पुत्रिकासततियुक्ताना वा दुहितृणा ज्ञातीन् तेषा सगोत्रत्वाभावादिति। अत एव पत्नीविषये हारीतः —'अपुत्रा शयन भर्तुः पालयन्ती व्रते स्थिता। भुञ्जीतामरणात् क्षान्ता दायादा ऊर्ध्वमाप्नुयुः॥' इति। अत्रापुत्राया इति स्मृतेरनपत्यरिक्थ न बान्धवगामीति स्मृतेरपुत्रानपत्यशब्दयोः एकार्थत्वाङ्गीकाराद्दुहितुरपि पुत्रिकासततिसहितायास्तद्दुहित्रनन्तर तत्पुत्रिकागामि न भवति धनमिति। अत एवाह स एव—'न पुत्रिकागामि न बान्धवगामि किन्त्वपुत्रस्य रिक्थिनो ज्ञातयो धन हरे-युरि'ति। अत्र केचिदाहुः—'पत्नी दुहितरश्चैवे'त्यत्र चकारेणानुक्तो दौहित्रः एवकारेणावधारणार्थेनावधारितः। अतश्च दौहित्रगाम्यपि धन दौहित्राभावे मातापितृगाम्येव न तत्पुत्रगामीति। तत्र सहन्ते वृद्धाः—दौहित्रगामि धनं दौहित्राभावे तत्पुत्रगाम्येवेति त्रैविद्यवृद्धव्यवहार-सिद्धम्। अतश्च दुहितृगामि सत् दौहित्रमेव सक्रान्त तत्सुतसंभवे तमेव कटाक्षीकरोति तद्रिक्थम्। इयास्तु विशेषः—दौहित्रान्तानामभावे दौहित्रपुत्र न संक्रामति, किं तु ततोऽप्यन्तरङ्गत्वात् मातापितरावेवावलम्बते रिक्थम्। *सवि.४२१–५

(१२) वस्तुतस्तु अङ्काद्या चाऽङ्कुता मानसीपुत्रिका संदिग्धतया पुत्रमध्येऽपरिगणितैवाऽत्र दुहितृपदार्थः। 'निरिन्द्रियाया अदायः स्त्रियः' इत्यौत्सर्गिकवचनात्। 'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा'। इति मनुवच-नस्य सकोचलाघवाच्चेति मैथिलादीनामाचारानुसारी पन्थाः। पितरौ मातापितरौ। तत्र 'निरिन्द्रिया' इत्यादि-वचनद्वयात्—'अपुत्रस्याऽथ कुलजा पत्नी दुहितरोऽपि वा। तदभावे पिता माता भ्राता पुत्राश्च कीर्तिताः॥' इति कात्यायनीयपाठक्रमाच्च यद्यपि पितुस्तदसत्वे च मातुर्धनभागित्वम्। 'अपुत्रस्य धन पत्न्यभिगामि तद-भावे दुहितृगामि तदभावे पितृगामि तदभावे मातृगा-मी'ति विष्णुवचनेन चैतदिति स्फुटम्। इत्थं च विग्रह-वाक्ये 'मातृशब्दस्य पूर्वनिपातात् पित्रपेक्षया वैमात्रेया-जनकत्वेन साधारणप्रत्यासत्तिसत्त्वाच्चे'ति मिताक्षरालिखनं चिन्त्यम्। मातुरभावे सहोदरास्तदभावे भ्रातृसुतः।

×वीमि.

(१३) गौणमुख्यपुत्राभावे मृतपतितपरिव्राजकादि-धनग्रहणाधिकारिण उच्यन्ते। तत्र योगीश्वरः—पत्नीति। पत्नीशब्दादासुरादिविवाहोढाया धनग्रहणं धर्म्यविवाहो-ढपत्न्यन्तरसद्भावे नास्तीति गम्यते। तथा च स्मृतिः—'क्रयक्रीता तु या नारी न सा पत्नी विधीयते। न सा दैवे न सा पित्र्ये दासी ता कवयो विदुः॥' इति।

अत्र च दासीत्वकथनमदृष्टार्थकर्मसु सहाधिकाराभा-वाभिप्रायेण। न तु दासीवद्गम्यत्वाभिप्रायेण। विवाहि-तात्वेन परदारत्वबाधात्। अत एव मनुर्धर्म्यार्थधर्मविवा-हाननुक्रम्य सतानगतावेव गुणदोषावाह—'अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा। निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत्॥' इति। प्रजाया निन्दितत्वमपि सद्वृत्तस्वभावत्वाभावो न तु वर्णजात्यभावः। परिणेतुः परिणीतायामुत्पन्नत्वमात्रस्य वर्णजातिव्यञ्जकत्वात्। 'विन्नास्वेष विधिः स्मृतः' इत्युक्तेः। अत एव 'न सा दैवे न सा पित्र्ये' इति सहाधिकार एव प्रतिषिद्धः। तथा च पित्र्यादिकर्माहतापि पतिदायहरत्वप्रयोजिकेति

* स्मृतिचन्द्रिकामिताक्षरोभयव्याख्यानमुपन्यस्य मिता.व्या-ख्यानमेव 'सम्यग्' इत्युक्तम्। -ल.क्ष्मीधरमतभावार्थो विस्तरेणो-पन्यस्तोऽप्यत्रागतः। सगृहीतः। स्थावरजङ्गमविभागः पत्नी-विषये स्मृतिचन्द्रिकानुसारेणोपपादितः बृहस्पतौ द्रष्टव्यः।

× शेष मितागतम्।

पत्नीपदेन ज्ञापितम्। व्यप्र.४८८

'अपुत्रा शयनं भर्तुः पालयन्ती गुरौ स्थिता। भुञ्जीतामरणात्क्षान्ता दायादा ऊर्ध्वमाप्नुयुः॥' इति।

व्यप्र.४९०-१

(अत्र चन्द्रिकाजीमूतवाहनादिमतमुपन्यस्योक्तम्।)

तत्रेदं वाच्यम्। किं तस्य तया कृतेऽपि दानादौ तत्स्वरूपानिष्पत्तिरेव। न तावदेवं युक्तम्। मन्वादिवचनैः सकलभर्तृधनग्रहणे तस्या उक्ते सति तस्यास्तत्र स्वत्वे दानादिस्वरूपानिष्पत्तेर्बाधितत्वात्। अत एव जीमूतवाहनेनैव 'स्थावरस्य समस्तस्य' 'विभक्ता वाऽविभक्ता वा' 'स्थावरं द्विपदं चैव' इत्यादीनि स्थावरविषयाणि दानादिनिषेधवचनान्युपन्यस्याधर्मभागिताज्ञापनार्थमेतानि दुर्वृत्तं पुरुषं प्रति। कुटुम्बदुःखदानार्थमेव दानविक्रयादिप्रवृत्तं प्रति प्रतिषेधकानि न तु दानादिस्वरूपानिष्पत्ति प्रतिपादकानि। यथेष्टविनियोगार्हत्वलक्षणस्वत्वस्य द्रव्यान्तर इव स्थावरेऽप्यविशेषाद्वचनशतेनापि वस्तुनोऽन्यथाकरणाशक्त्या तत्प्रतिपादनानुपपत्तेरिति निरूपितम्। तदुक्तरीत्यापि दुर्वृत्ततया दायाददुःखदानार्थमेव भर्तृरिक्थदानादिप्रवृत्ताया अस्तु प्रतिषेधातिक्रमादधर्मः। धर्मार्थं दानप्रवृत्तायाः स्वजीवनाद्यर्थं विक्रयाधाने कुर्वन्त्याश्च नास्त्येवाधर्मोऽपि। न च भुञ्जीतैवेति नियमाद्दायादा ऊर्ध्वमाप्नुयुरित्यभिधानाच्च दानाद्यनधिकार एव तस्या अविभक्तधन इव तत्रेति वाच्यम्। साधारणस्वत्वाश्रयाविभक्तधनेनासाधारणस्वत्वाश्रयस्यास्य वैषम्यात्। न च स्वभोगस्य प्राप्तत्वेनाविधेयत्वाद्दानादिपरिसंख्यार्थ एव विधिस्तथा चानधिकारस्तत्रागत एवेति वाच्यम्। वस्त्वन्यथाकरणाशक्तेर्नियमस्य वृथादानादिना द्रव्यनाशनिवृत्यर्थतयैवोपपत्तेरवश्यवाच्यत्वात्। अन्यथाऽनधिकारे 'दमदानरता' 'पूजयेत्कव्यपूर्त्ताभ्यां' इत्यनेन दानविधिना विरोधोऽपरिहार्यः। यच्च दायादाः पत्न्यनन्तरा विकारिणः 'पत्नी दुहितर' इत्यत्र निर्दिष्टास्ते गृह्णीयुः, प्रागभावप्रध्वंसयोः प्रतिबन्धकपत्न्यभावत्वस्याविशेषात्तदधिकारोद्भवादित्युक्तम्। तदतिस्थवीयः। दायादपदेन स्त्रीधनाधिकारिग्रहणे यथा वचनान्तरोक्तत्वात् पौनरुक्त्यं, तथा तेषामपि कात्यायनेन वचनान्तरोक्तत्वात्पौनरुक्त्याऽविशेषात्। वस्तुतस्तु जातस्वत्वे स्वामिनि मृते तत्प्रत्यासन्नानामेव तद्धनग्रहणमुचितम्। पत्न्यादिशब्दाना संबन्धिशब्दत्वेन द्रव्यस्वामित्वे पत्न्या उपजाते पूर्वस्वामिदुहित्रादीना कः प्रसंगः। तेन यद्यपि पूर्वाभावः प्रागभावः प्रध्वंसश्चात्यन्ताभावश्च प्रतिबन्धकसंसर्गाभावतया तुल्यस्तथापि यो द्रव्यस्वामी तस्मिन् मृते तत्सबन्धिपत्न्यादिकमपुत्रस्य तस्य धनं लभेतेत्येव वाक्यार्थः। अन्यथा दुहित्रादिभिरपुत्रपितृधने लब्धे तन्मरणे तत्संतत्यतिलङ्घनेन तद्धनं पूर्वस्वामिनः पितुर्वा पित्रादयस्त एव लभेरन्निति महत्व्यवस्था प्रसज्येत। तस्माद्भर्तृरिक्थे पत्न्या लब्धं तस्या मृतायां तद्भोगावशिष्टं 'मातुर्दुहितर' इत्यादिवचनाद् दुहित्रादिग्राह्यत्वेन प्रसक्तं 'दायादा ऊर्ध्वमाप्नुयुः' इत्यनेनापोद्यते। अयं च वचनार्थः। दायादा इत्यत्र कस्येत्यपेक्षाया शयनान्वितं भर्तुरित्येवोपस्थितत्वादनुपज्यते। तथा चैवं वचनव्यक्तिः। तस्या ऊर्ध्वं भर्तुर्दायादा अविभक्तद्धनाधिकारिणो विभक्तभ्रातृधनमपि तत्पत्नीभोग्यावशिष्टं गृह्णीयुर्न पत्नीरिक्थहरा दुहित्रादय इति। एव चापूर्वार्थत्वाच्चतुर्थचरणस्यार्थवत्वं भवति। अन्यमते वचनान्तरोक्तार्थानुवादमात्रमनर्थकं स्यात्। तस्माददृष्टार्थे दाने दृष्टादृष्टावश्यककार्यार्थमाधौ विक्रये चास्त्येव पत्न्याः सकलभर्तृधनविषयोऽधिकारः। नियमस्तु नटनर्त्तकादिदानानावश्यकाधिविक्रयनिवृत्यर्थ इति सिद्धम्। अत एव क्षान्तेत्युक्तम्। द्रव्यप्राप्तितृष्णा वृथाद्रव्यव्ययकारिणी न भवेदित्यर्थः। दानधर्मस्थं महाभारतवचनं तु सुतरामस्मदुक्तमेवार्थमुपोद्बलयति। तथा हि स्त्रीणा स्वपतिदायः स्वभर्तृरिक्थं, उपभोगफलः उपभोगो धर्मप्रत्यासन्नो भोगो न त्वसद्भोगः, फलं प्रयोजनं यस्य तादृशः, स्मृत उक्तो मन्वादिभिः। उत्तरार्द्धे तदेव व्यनक्ति—स्त्रियः पतिवित्तादपहारं वृथाव्ययं न कुर्युः। कथंचनेत्यनेनापहारस्य सर्वथैवाश्रेयस्करतामाह। अपहारो हि चौर्यम्। नटनर्त्तकादौ वृथादान सूक्ष्मवस्त्रादिपरिधित्सा मिष्टभक्ष्यादिबुभुक्षेत्येवमाद्यपि संयताया अनौचित्याच्चौर्यतुल्यमित्यपहारशब्दो गौणः। धर्मार्थव्ययदानादिकं तु न तथेति नापहारशब्देन बोधयितुं शक्यते। तस्मात्सर्वं सुस्थम्। व्यप्र.४९२–३

'पत्नी दुहितर' इत्यस्य विभक्तासंसृष्टिविषयत्वं

विभागस्य पूर्वमुक्तत्वात् संसृष्टिविभागस्य च सर्वापवादेनाग्रे वक्ष्यमाणत्वादर्थाद्व्यवतिष्ठत इति विज्ञानेश्वरलक्ष्मीधरस्मृतिचन्द्रिकाकारविश्वरूपमेधातिथिमदनरत्नकारादीनां भूयसा समतम्। व्यप्र.५०३

[विभक्ताविभक्तसंसृष्टासंसृष्टसाधारणपुत्रधनाधिकारः पत्न्याः, इति जीमूतवाहनमत पूर्वोपन्यस्तं खण्डयति।]

तत्रेदमालोचनीयम्। नारदशङ्खादिवचनानामविभक्तसंसृष्टिविषयत्वेन या व्यवस्था तत्र न्यायविरोधो वा दूषण वचनविरोधो वा? न तावन्न्यायविरोधः। बाधकन्यायस्याभावात्। प्रत्युत साधको न्यायोऽस्ति। तथाहि—अविभक्तप्रमीते तावत्तस्याश एव नाभूत्किमिय गृह्यातु, संसृष्टे जातोऽप्यंशः पुनः साधारणस्वत्वात्पत्न्या अपगतः। न च साधारणस्वत्वाश्रयोऽप्य विविक्तस्तद्भागोऽस्त्येवेति वाच्यम्। अस्तु, तावतापि यत्प्रतियोगिक साधारण स्वत्व तदपगमे विद्यमानस्वत्वकः संक्रम एवोचितो न त्वन्यस्वत्वोत्पत्ति कल्पना। 'पाणिग्रहणाद्धि सहत्व कर्मसु तत्फलेषु द्रव्य परिग्रहेषु च।' इति गौतम(?)वचनात्पत्न्या अपि तद्भागेऽविविक्तेऽपि स्वत्वमुत्पन्नं तन्नाशः किमिति तत्सत्त्वे कल्प्यत इति चेत्। न। औपपत्तिकोऽस्ति न तु तात्त्विकः। पत्न्याः पतिद्रव्ये स्वत्व क्षीरनीरवदेकलोलीभावापन्नं सहाधिकारिककर्मोपयोगि न तु भ्रातृणामिव परस्परम्। तत एव तेषा विभागो न तु जायापत्योः। एतन्न्यायमूलकमेव 'जायापत्योर्न विभागो विद्यते' इति वचनम्। तथा च पत्युः स्वत्वापगमे तस्याः स्वत्वापगमस्तत्रावश्यकः। एव चाविभक्तसंसृष्टि पतिस्वापतेये पत्न्याः स्वत्वोत्पत्तिः कल्प्यतामविभक्तसंसृष्टिस्वत्वस्य सतोऽसाधारण्य वेति वीक्षायामुत्तरपक्ष कक्षीकरणमेवोचितं लाघवात्। न च पत्न्येव विभाग प्रतियोगिनी। प्रापकप्रमाणाभावात्। न चैतान्येव वचनानि प्रापकाणि। तेषा विषयविवादाद्विभक्तासंसृष्टि विषयत्वेनाप्युपपत्तेः। अत एवान्योन्याश्रयोऽपि दवीयान्। विमर्शदशाया तदप्रसङ्गात्। सति विमर्शे तद्विषयत्वनिश्चयादेव। अविभागससर्गवतामपीत्यादि च यदुक्तं तन्नासमत्यक्षक्षतिक्षमम्। प्रतिनियताविविक्तस्वत्व स्वीकारेऽपि संसृष्टाविभक्तविषयताया न्यायान्तरसिद्धत्वात्। न चाश्रुतविभक्तासंसृष्टविषयत्वं पत्नीत्यादिवाक्यानामप्रमाणकम्। विरुद्धनारदादिवचनाना व्यवस्थान्तरासंभवे पूर्वोपपादितन्यायोपबृंहितार्थापत्तेरेव प्रमाणत्वात्। व्यवस्थान्तरासंभव च वक्ष्यामः। न च यथा विभागस्योक्तत्वात्संसृष्टिना च वक्ष्यमाणत्वादर्थाद्विभक्तासंसृष्टिधनपरत्व पत्नीत्यादेरायातीति तदनुपादानं, तथा मुख्यगौणपुत्रविभागमुक्त्वा पत्नीत्यादिवचनारम्भात्पुत्रधनविषयत्वमपि सिध्यति, तेषामित्यपुत्रस्येत्यपि न वाच्यमिति वाच्यम्। 'एक एवौरसः पुत्रः' 'न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः' इत्यस्यार्थस्य स्मृत्यन्तरोक्तस्य योगीश्वरेण वचनान्तरेणानुक्तेस्तदवबोधनार्थत्वात्। अन्यथा जीवज्जीवद्विभागयोः सत्स्वपि पुत्रेषु पितृपत्नीना यथाशभाक्त्वं तथात्रापीति शङ्का स्यात्। पुत्रविभागपर्यवसान उक्तत्वान्न तच्छङ्कावसर इति यदि, तर्हि, स्मृत्यन्तरेषु—'एक एवौरसः' 'न भ्रातरो न पितर' इति स्वतन्त्रस्य मुख्यगौणपुत्रसत्त्वे पत्न्याद्यनधिकारप्रतिपादकशास्त्रस्य सुतरामानर्थक्य स्यात्। स्पष्टीकरणार्थमर्थन्यायसिद्धमपि निबध्यते व्यवहारशास्त्र इति समाधिः पदमात्रे सुतरा सुवदः। स्पष्टार्थ विभक्तासंसृष्टत्वे अपि कुतो नोपात्त इति चेत्, स्वतन्त्रेच्छत्वान्मुनीनाम्। आरोपे सति निमित्तानुसरणमिति न्याये च यत्र न्यायार्थसिद्धनिबन्धनमस्ति तत्र सिद्धस्य गतिश्चिन्तनीयेति रीत्या स्पष्टीकरणार्थतया वैयर्थ्य परिहियते न तु तदभिधानापादन सर्वत्रोचितम्।

यच्च 'ससृष्टिनस्तु ससृष्टी' इत्यस्य भ्रात्रधिकारावसरे विशेषविधानमात्रार्थत्व न पत्न्याद्यपवादकत्वमित्युक्तं, तदतिवार्त्तम्। तुशब्दविरोधात्, उत्तरोत्तरं पूर्वपूर्वापवादसदर्भाच्च। अत एव प्रतिवाक्य तुशब्दोपादानम्। क्लीवादिवाक्य पुत्रादिसकलदायग्रहणाधिकारिणा क्लीवत्वादिनाधिकारापवादकमिति। अत एव मिताक्षराकृता तथैव तानि वचनान्यवतारितानि व्याकृतानि च। यत्तु किञ्चेत्यादिना शङ्खलिखितवचने भ्रात्रभावे पित्रोरधिकारो विकल्प्य खण्डितः, तदप्यतिफल्गु। भवद्भन्मयापि व्युत्क्रमेण विभक्तासंसृष्टपितृपरत्वेन तस्य व्याख्यातुं शक्यत्वेनैकापर्यनुयोगात्। यच्चापि चेत्यादि। तदपि तुल्ययोगक्षेममित्युपेक्ष्यम्। यदपि किञ्चेत्यादि। तदपि

मात्रंशे विशेषणासंबन्धेऽपि योग्यतया पित्रंशे संबन्धादचोद्यम् ।

वस्तुतस्तु साक्षान्मात्रा विभागाभावेऽपि जीवद्विभागे पित्रिच्छया तस्या अपि भागसद्भावादजीवद्विभागे तु साक्षादेव विभागोक्तेः प्रीत्याऽभिसंधिविशेषपूर्वकं पुत्रैः सह ससर्गसंभवात् । न चैवं 'विभक्तो य' इत्यादिबृहस्पतिवचनविरोधः, अत एव मिताक्षराकृताप्युक्तम्—'संसर्गश्च न येन केनापि किन्तु पित्रा भ्रात्रा पितृव्येण वा' इत्यत्र समतित्वेन तद्वचनमुपन्यस्यतेति वाच्यम् । यतस्तथा सति सकललोकव्यवहारसिद्धो दौहित्रादिससर्गोऽप्यन्याय्यः स्यात् । तस्मादेषा परस्परविभागस्तेषामेव तत्पूर्वकः परस्परससर्गोऽप्यभिसंधिविशेषपूर्वको न परस्परद्रव्यमिश्रीकरणमात्रेण वणिगादीनामिवेत्यत्र बृहस्पतिवचनतात्पर्य न मात्रादिनिवृत्तौ । त्रिदोषपरिसख्यापत्तेः । अत एव 'भ्रात्रा वा' 'पितृव्येणाथ वा' इत्यनास्थाया वादिशब्दस्तत्रोपात्तः । रत्नाकरे चण्डेश्वरेणाप्युक्तम् । अनास्थाया वाकारः । तेन पितृव्येनाशिना कृतविभाग एकत्र स्थितः संसृष्टः सर्वलोकगृहीतो लभ्यत इति । वाचस्पतिरप्येवमेवाह ।

यत्तु तेनोक्तं पृथग्धनानामेकत्र मेलनमेव ससर्गो लाघवात् । न तु विभागपूर्वकत्वं तत्र विशेषणं, परस्परानुमतिश्च तत्र हेतुरिति । तन्न । पुनःशब्दविरोधात्, विभागेऽपि संसर्गशब्दप्रयोगापत्तेः । जन्मना स्वत्वानङ्गीकारेण तत्रापि पृथग्धनमेलनात् । अन्यथा विकल्प उभयस्य शास्त्रार्थत्वात्पित्रादिसमुच्छ्रितससर्गोऽपि सकललोकसिद्धो व्याहन्येत । मिताक्षराकृतोऽपि 'न येन केनापि' इति वदतो यथाकथञ्चित्तद्द्रव्यमिश्रणसंसर्गव्यावृत्त्या विभागपूर्वकाभिसंधिविशेषकृतसंसर्गनियम एवाभिप्रेतो न मात्रादिव्यावृत्तिः । भ्रात्रधिकारावसरे संसृष्टिसोदरत्वादिविशेषविधानार्थत्व च यदस्य 'संसृष्टिनस्तु संसृष्टी'त्यादिवचनस्य भवताभिहितं तत्त्वतितुच्छम् । पित्रादिषु गोत्रजादिषु चास्य प्रवृत्त्यविरोधात् । तच्च तत्रैव विस्तरेण वक्ष्यामः । न च तावन्न्यायविरोधो दूषणम् । नापि वचनविरोधः । संसृष्टस्याप्यभार्यापितृकस्येति तेन विशेषणादपत्याभाव इव भार्यापित्रभाव एव संसृष्टभ्रातृधनेऽधिकार आयातीति वाच्यम् ।

यतः संसृष्टिधनग्रहण 'संसृष्टिना तु यो भागः स तस्या नेष्यते बुधैः' इति नारदेन साक्षादेव तद्व्यावर्तायाः प्रतिषिद्धम् । 'संसृष्टिना तु यो भागस्तेषामेव स इष्यते' इति कल्पतर्वादिधृतपाठेऽप्येवकारेण पत्न्यादिप्रतिषेध आयात्येव । न चैवं नारदवचनं 'भ्रातृणामप्रजा' इत्यस्य प्रक्रमबलात् 'संसृष्टिना तु यो भाग' इत्यनेन पौनरुक्त्यं स्यादतः स्त्रीशब्दस्याश्रवणादन्यत्र च पत्नीशब्दस्य पत्नीविषयत्वेन व्यवस्थैव साधीयसीति वाच्यम् । पूर्वोक्तविवरणेन स्त्रीधनाविभाज्यत्वतद्धरणमात्रविधानपरतया तदप्रसक्तेः । स्त्रीमात्रस्य तद्धनग्रहणस्य पत्नीत्यादिवाक्यैः पत्नीपदोपेतैरप्रसक्तत्वेन तत्प्रतिषेधासंभवाच्च । वसिष्ठवचने च रिक्थलोभादिति नियोगविशेषण भवन्मतेऽनुपपन्नम् । पुत्रादिरहिततद्धनग्रहणे यदि विभागाविभागससर्गाद्यविशेषेणैव तस्याः सर्वादौ(?), तर्हि रिक्थलोभेन नियोगाङ्गीकारस्तस्याः कदा प्रसक्तो यो निषिध्यते । मन्यते तु ससृष्टाविभक्तभ्रातृसत्वे नारदादिवचनात्तस्या अपुत्रभर्तृधनसंबन्धाभावेन पुत्रद्वारैव तत्संबन्धात्प्रसक्तो रिक्थलोभेन नियोगस्वीकारः प्रतिषिध्यते । न चात्रापि पत्नीभिन्नाया भार्याया भर्तृधनानधिकारात्तस्या एव रिक्थलोभेन प्रसक्तो निषिध्यते नियोगस्वीकार इति न भवदुक्तप्रसक्तिप्रतीक्षेति वाच्यम् । पत्न्या एव तत्र प्रस्तुतत्वात्तद्भिन्नभार्यापरत्वानुपपत्तेः । अतश्च धारेश्वरादिभिर्नियोगार्थिपत्नीपरत्वे पत्नीत्यादिवाक्यस्येदमेव वशिष्ठवचन प्रमाणतयोपन्यस्तम् । तस्मान्नारदवसिष्ठवाक्यबलात् संसृष्टिभर्तृधनग्रहणप्रतिषेधः पत्न्याः । बृहस्पतिवचने च—'अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च' इति कथनात्पत्न्या सत्या सोदरस्यापि संसृष्टिभ्रातृधनग्रहणप्रतिषेध इति विरोध आवश्यकः कथञ्चिद्विषयव्यवस्थया परिहर्त्तव्योऽपरिहृतोऽन्यैः परिहियते । सदंशोत्थितप्रकरणबलात्प्रसक्तमप्यभार्यापितृकस्य संसृष्टिविशेषणत्वमन्यथासिद्धनारदादिवाक्यानुरोधादसंसृष्टिपरत्वावश्यकतया बाध्यते । वाक्यविरोधे प्रकरणस्याप्रयोजकत्वात् । न चायमिति सर्वनाम्ना संसृष्टिधनग्रहणरूपधर्मस्य प्रक्रान्तस्यानेन विशेषाभिधानादनपत्यस्येतिवदभार्यापितृकस्येत्यस्यापि संसृष्टिप्रमीतविशेषणत्वमिति वाक्ययोरेवायं विरोधो न वाक्यप्रकरणयोरिति वाच्यम् । सर्वनाम्नः

संसृष्टिधनग्रहणपरामर्शकत्वेऽपि सोऽयमनपत्यसंसृष्टिस्वामिकधनग्रहणरूपो धर्मो भार्यापितृरहितस्यासंसृष्टिनोऽप्यनपत्यस्य प्रमीतस्य। असंसृष्टिविभक्तप्रमीतस्य धनं तु भार्यापितृसहितस्यैवानपत्यस्य सोदरो गृह्णीयान्न भार्यापित्रन्यतरवत इति वाक्यार्थोपपत्तेः। चकारोऽप्येवमनुक्तासंसृष्टिसमुच्चयार्थो व्याख्येयः। अतश्चासंसृष्टविषयेणानेन प्रकरणविच्छेदे जाते 'संसृष्टाना तु यः कश्चित्' इत्यग्रिमवाक्ये संसृष्टपदोपादानमपि सार्थक भवति। अन्यथा प्रक्रमादेवात्रापि तल्लाभे तन्मन्दप्रयोजन स्यात्। अत एव तार्तीये निविदधिकरणेऽसबद्धनिविद्विच्छिन्नसामिधेन्यवान्तरप्रकरणाग्राह्यमुपवीत न सामिधेन्यङ्गमपि तु महाप्रकरणाद्दर्शपूर्णमासाङ्गम्। ये तु पश्वाप्तना गुणास्ते पुनर्वचनादेव दूरस्थानुवादेनैव द्वादशोपसत्त्ववत्सामिधेन्यनुवादेन विधीयन्त इति भट्टमतेन सिद्धान्तितम्।

वस्तुतस्तु 'या तस्य भगिनी' इत्यनेन सोदराभावे यो भगिन्यधिकारः संसृष्टिधने प्रतीयते तस्यैवाव्यवहितस्यानपत्यस्येति वाक्यशेषस्थेनायमिति सर्वनाम्ना परामर्शस्तत्र च न कोऽपि विरोधः। स्मृतिचन्द्रिकायामप्येवमेवोक्तम्। अविभक्तापुत्रपतिस्वामिकक्रुत्स्नधनग्रहणं तु पत्न्याः कात्यायनवचनविरुद्धम्। यदाह— 'स्वर्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी। अविभक्ते धनाशे तु प्राप्नोत्यामरणान्तिकम्॥' इति। तुशब्दो वाशब्दार्थे। तथा चायमर्थः। ग्रासाच्छादनमेव साक्षाल्लभते आमरणान्तिकं यावज्जीव यावता धनेन जीवन स्व्यधिकारिकमावश्यक च कर्म सिध्यति तावन्तं धनाशं वा प्राप्नोति। धनाशमामरणान्तिकमित्युक्तेः कृत्स्न धनमविभक्तस्य पत्युर्लभत इति निरस्तम्। न च स्त्रीशब्दश्रवणात्पत्नीव्यतिरिक्तस्त्रीपरमिदमपीति वाच्यम्। अविभक्त इति विशेषणानर्थक्यापत्तेः। विभक्तेऽपि भर्त्तरि पत्नीभिन्नाया अपुत्राया भरणमात्रोक्तेः। अत एव कृतेऽप्यंश इत्यनुवृत्तौ बृहस्पतिः— 'प्रदद्यात्त्वेव पिण्डं च क्षेत्राशं वा यदीच्छति।' इति। अस्य व्याख्यानं स्मृतिचन्द्रिकायाम्। पिण्डग्रहणमशनाच्छादनोपलक्षणार्थम्। तत्पर्याप्त धन तत्सपादक क्षेत्राशं वा स्वरुच्या भर्त्राशार्हपत्नीव्यतिरिक्तविधवायै भ्रात्रादिस्तद्धनग्राही प्रदद्यात्। एवकारः प्रदानस्यावश्यकत्वार्थ इति। एतद्विषययकमेव नारदवचनं'—यावत्यो विधवाः साध्व्यो ज्येष्ठेन श्वशुरेण वा। गोत्रजेनापि वान्येन भर्त्तव्याश्छादनाशनैः॥' इति। भर्तृधनग्राहिणेति सर्वत्र शेषः। धनग्रहणनिमित्तत्वाद्भरणं स्यात्। साध्व्य इत्यनेन सर्वत्र साध्वीनामेव भरणमसाध्वीना तु पत्नीना च न। तदपि 'आच्छिन्द्युरितरासु तु' इति प्रागुक्तनारदवचनवाक्यशेषादिभ्यः। अत एव साध्वीना जीवनार्थ श्वशुरादिभिर्दत्तमन्यैरपि दायादैर्नापहरणीयमित्याह बृहस्पतिः— 'स्थावरादि धन स्त्रीभ्यो यद्दत्त श्वशुरेण तु। न तच्छक्यमपाहर्तुं दायादैरिह कर्हिचित्॥' इति। अन्यादृशीना तु दत्तमप्यपहर्त्तव्यमित्याह कात्यायनः— 'भोक्तुमर्हति क्लेशाश गुरुशुश्रूषणे रता। न कुर्याद्यदि शुश्रूषा चैलपिण्डे नियोजयेत्॥ अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिका। व्यभिचाररता या च स्त्रीधनं न च साईति॥' नार्हतीत्यनेन न देय जीवनपर्याप्तमपि दत्तमपि च तादृश्याः सकाशादपहरणीयमिति द्वयमप्युक्त भवति। यत्तु 'तस्मात् स्त्रियोऽनिन्द्रिया अदायादा' इति श्रुतिवचन,तन्मूलक च—'निरिन्द्रिया ह्यदायादाः स्त्रियो नित्यमिति स्थितिः।' (मस्मृ.९।१८) इति मनुवचनं, तद्द्वयमपि यासा शृङ्गग्राहिकया धनग्रहण नोक्तं तद्विषयमवसेयम्। गौतममिताक्षराया हरदत्तोऽप्येवमेवाह।

केचित्तु निरिन्द्रियपदसमभिव्याहारान्निन्दामात्रपर तदित्याहुः। तन्न। दायादत्वाशे निन्दाया निषेधकल्पनावश्यम्भावात् रागाद्ययग्रहणप्राप्तेर्नित्यानुवादासभवात्। अनिन्द्रियत्व तु पुम्पारतन्त्र्यात्कथञ्चिदनुवादः। वस्तुस्वभावविपरीतनिषेधकल्पनस्य बाधात्। तस्मात्पूर्वोक्त एव समाधिः। पराशरस्मृतिटीकाया विद्यारण्यश्रीचरणास्तु श्रुतिमेवैनामन्यथा व्याचख्युः। पात्नीव्रतग्रहे पत्न्या अंशो नास्तीत्यदायादपदस्यार्थः। तत्र हेतुरनिन्द्रिया इति। 'इन्द्रियं वै सोमपीथ' इति सोमेऽपीन्द्रियशब्दप्रयोगात्ततो निर्गता इति सोमपानानधिकृता इति पात्नीव्रतग्रहप्रशंसेति। व्यप्र.५१०-७

पत्न्यभावे दुहितरोऽपुत्राविभक्तासंसृष्टिधनभाजः। व्यप्र.५१७

जीमूतवाहनस्तु, पुत्रवती संभावितपुत्रा वा दुहिता धनाधिकारिणी। तदपि चिन्त्यम्। प्राथमिक-

कन्याधिकारस्य 'अपुत्रमृतस्य कुमारी रिक्थं गृह्णीयात्तदभावे चोढा' इति पराशरवचनात् 'कन्याभ्यश्च पितृद्रव्यात्' इति देवलवचनाच्च तेनैव प्रथमं कन्यैवैका पितृधनाधिकारिणीत्यनेन ग्रन्थेनाभिधानात्। तदानीं च पुत्रसंभावनानिश्चयाभावात्। हेतुनिर्देशस्य प्रत्यासत्यतिशयमात्रप्रदर्शकतयाप्युपपत्तेः। किं च स्वयमेव कन्याया असंभवे सभावितपुत्रायाः पुत्रवत्याश्चाधिकार इति वदन् हेतोरव्यभिचारिता दर्शयति । व्यप्र.५१८-९

यत्तु सकलपितृधनग्रहणाधिकारप्रतिपादकतया 'कन्याभ्य' इत्यादि देवलवचन जीमूतवाहनेनोपन्यस्तं तत्पूर्वापरविरुद्धम्। जीवद्विभागे कन्याना विवाहमात्रोपयुक्तधने तस्य प्रमाणतयोपन्यासात्। व्यप्र.५२०

दुहितुरभावे दौहित्रः। चशब्दादनुक्तसमुच्चयार्थात्। व्यप्र.५२१

दौहित्राभावे पितरौ धनभाजौ। व्यप्र.५२२

नैयायिकक्रमस्यात्राव्यवस्थितत्वाद्बृहद्विष्णुवचनोक्तः क्रम आदरणीयः। तत्र च दुहितृगामीत्युक्त्वा तदभावे पितृगामि तदभावे मातृगामीत्युक्तम्। मिताक्षराकारस्य तु प्रथमत एव तादृशपाठेनैव बृहद्विष्णुवचन लिखतस्तद्विरुद्धन्यायमात्रावलम्बनेन पितरावित्यत्र पितृतः प्राङ्मातुः पुत्रधनाधिकारं सिद्धान्तयतो महत्येव हृदयशून्यता प्रतिभाति। दौहित्रस्यापि दुहितृकोटिनिविष्टत्वाद्बृहद्विष्णुना पृथगनभिधानम्। तेन दौहित्राभावोऽपि दुहित्रभावेनोपलक्ष्यत इति मन्तव्यम्। तस्मात् स्मृतिचन्द्रिकामदनरत्नाकरकल्पतरुरत्नाकरपारिजातकारप्रभृतीना बहूना पितुरभावे मातुः पुत्रधनाधिकार इत्येव सिद्धान्तः। वाचस्पतिना तु 'तदभावे मातृगामि तदभावे पितृगामि' इति बृहद्विष्णुवचन पठित्वा यथामिताक्षरमेव सिद्धान्तितम्। तत्तु कुत्रापि तदतिरिक्तग्रन्थे तथापाठस्यालिखनाद् भ्रान्तिविलसितमेव। विग्रहवाक्ये मातृशब्दस्य पूर्वनिपातादित्यपि मिताक्षराग्रन्थो दुष्टः, विग्रहवाक्ये पूर्वनिपातनियमाभावात्, समासे हि तन्नियमः शाब्दिकैः स्मर्यते न तु विग्रहवाक्य इत्यादिविज्ञानेश्वरोक्तन्याये यद्दूषणमन्यैरुक्तं तत्परिहाराय पराक्रम्यते । युगपदधिकरणवचनता तावद्द्वन्द्वस्य वचनाधिकरणे वार्तिके तन्त्ररत्ने च महता प्रबन्धेन निरस्ता। इतरेतरयोगोऽपि पदान्तरान्वये द्वन्द्वाच्छाब्दरीत्या प्रतीयते। तेन पितरौ धनभाजावित्यनेन युगपदन्वयोऽपि। वस्तुगत्या तयोः क्रमेऽपि न वाक्यदोषः। सर्वैश्च श्रीकरमिश्रादिभिस्तदभ्युपगमात्सर्व समाधेयमिदम्। एकशेषाभावपक्षे च मातापितरौ मातरपितराविव्यत्र मातृशब्दस्य पूर्वं श्रवणात्समासैकशेषयोश्च तुल्यप्रतीतिजनकत्वाभावे विकल्पायोगादत्रापि तथा प्रतीतिरभ्युपेया। विग्रहवाक्ये यद्यपि पूर्वनिपातनियमो नानुशासनसिद्धस्तथापि व्याख्यातृसप्रदायसिद्धोऽस्त्येव। न हि क्वापि पिता च माता च पितराविति विगृह्णन् दृश्यते किन्तु माता च पिता च पितराविव्येवेत्यणुरपि विशेषोऽध्यवसायकर इति न्यायेन तस्यापि विनिगमकता संभवतीत्यनेनाशयेन तथोक्तेः सभवः। पितुः पुत्रान्तरसाधारण्यं मातुस्त्वसाधारण्यमिति प्रत्यासत्तिरपि जनकताया अव्यासज्यवृत्तित्वेऽपि तदभिप्रायेणैवोक्ता। साधारण्यासाधारण्ये हि संबन्धकृते व्यपदेशप्रतीतिविलम्बाविलम्बने भवत एव तथानुभवात्। वाक्यार्थबोधे क्रमाभावे किमिति वस्तुक्रम आश्रीयत इति श्रीकरोक्तिस्तु वचनान्तरे निरपेक्षस्वाम्यावगत्या क्रमापेक्षया स्मृतिचन्द्रिकाकारादिभिरप्यवश्य निरस्यैव। बृहद्विष्णुवचनविरोधः पर दुरुत्तरोऽवशिष्यते। तत्रापि यथाशक्ति प्रतिविधीयते । गौरवप्रतिपादकानि वचनानि तावन्मातापितृविषयाणि विरुद्धानि दृश्यन्ते। तानि विषयव्यवस्थयावश्यमविरोध नेयानि। तथाहि—'उपाध्यायाद्दशाचार्य आचार्याणा शत पिता। सहस्रं तु पितुर्माता गौरवेणातिरिच्यते ॥ गर्भधारणपोषाभ्या तेन माता गरीयसी ॥' इत्यादीनि मातुरभ्यर्हितत्वप्रतिपादकानि। 'तयोरपि पिता श्रेयान्बीजप्राधान्यदर्शनात्' इत्यादिस्मृतिवचनानि, पित्राज्ञया परशुरामेण मातुः शिरश्छिन्नं, रघुनाथेन कौशल्यया निवारितेनापि पित्राज्ञया राज्य विहाय वनवास आदृत इत्यादिपौराणिकान्यर्थदर्शनानि च पितृपूज्यतापत्ययकानि। तेषा चायमविरोधप्रकारः। यथा पिता महागुरुलक्षणोपेतः 'स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति' इत्यादियोगीश्वरादिवचोभिः प्रतिपादितो माता च तदाज्ञावशवर्त्तित्वादिपतिव्रतात्वप्रयोजकसमस्तलक्षणरहिता। तयोर्मध्ये मातुरपेक्षया पितैवाधिकोऽभ्यर्हितः। यत्र तु

माताऽरुन्धत्यादिवत्समस्तपतिव्रतागुणोपेता पिता तु जन्ममात्रप्रदः तत्र मातैव पितुरपेक्षयाभ्यधिकमान्या। चिरकारिकोपाख्यानादौ महाभारतादिष्वेवमुपाख्यानस्वरसादयमर्थ उन्नीयते। तदत्रापि मन्वादिवचनेष्वपुत्रपुत्रधनग्रहणाधिकारः क्वचिन्मातुः प्रथमं क्वचित्पितुः प्रतीयमान एवमेव व्यवस्थापयितुमर्हः। तथाहि —'अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम्॥' (मस्मृ.९।२१७) इति मनुः। 'भार्यासुतविहीनस्य तनयस्य मृतस्य च। माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञया॥' इति बृहस्पतिः। पुनर्मनुरेव 'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा।'(मस्मृ.९।१८५) इति। 'तदभावे पिता तदभावे माता' इति प्राग्दर्शितवृहद्विष्णुवचनात्। योगीश्वरवचने तु पितरावित्यत्र विज्ञानेश्वरोक्तरीत्या प्राङ्माता तदनु पिता। अन्यमते संभूय विभागः पितुर्वा प्राथम्यमिति विप्रतिपत्तौ पितुरधिकमान्या या माता सा पितुरपेक्षया प्रथमाधिकारिणी। या तु पितुरपेक्षया न्यूनमानभाक् सा पितुः पश्चात्। युक्तं चैतत्। वृत्त्यादिसविधानमकुर्वतः पितुरपेक्षया मातुरेवाधिकोपकारकत्वाद्धनग्रहणम्। वृत्त्यादिसंविधानकर्तुस्तु तस्य यावज्जीवं भरणपोषणादिनातिशयितोपकारकस्य धनग्रहणमिति सर्वस्मृतीना सर्वनिबन्धाना चादुःस्थता भातीत्यादि सुधीभिर्विभाव्यम्।

पित्रोरभावे भ्रातरो धनभाजः। मम तु प्रतिभाति 'मातर्यपि च वृत्तायां' इति मनुवाक्ये 'तदभावे मातापितरौ' इति शंखपैठीनसिवचनयो., 'ततो दायमपुत्रस्य विभजेरन् सहोदराः। तुल्या दुहितरो वापि म्रियमाणः पितापि वा॥ सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम्। तेषामभावे गृह्णीयुः कुल्याना सहवासिनः॥' इति देवलवचने सर्वत्रापि 'वृत्तायां' 'तदभावे यथाक्रमम्' इत्यादिपदैः क्रमप्रतीतेर्याज्ञवल्क्यबृहद्विष्णुवचनयोरेव क्रमपरत्वमितरेषा त्वधिकारमात्रपरत्वेन तदविरोधेन तत्तत्स्थाननिवेशेऽप्यक्षतिरिति समाधिनैव साधुः। किन्तु क्षेत्रजादिपुत्रस्थले यथा स्मृतिवचनक्रमविपर्यास औरसानुकूल्यप्रातिकूल्यगुणवत्त्वागुणवत्त्वादिमिर्व्यवस्थापितस्तथात्रापि दायभागप्रकरणे पुत्रादीनां पित्राद्यपकारकत्वकीर्त्तनस्य गुणवत्त्वादिकीर्त्तनस्य वाऽनन्यप्रयोजनत्वात्प्रत्यासत्तिरतम्यवत् धनस्वाम्युपकारातिशयानतिशयगुणवत्त्वागुणवत्त्वादिभिर्यथावचनं स सर्वोऽपि क्रमविपर्यासः समाधेयोऽन्ये तु समाधयः कुशकाशावलम्बनमात्रतुल्या अनुपादेया इति। एवमग्रेऽपीति सर्वं सुस्थम्।

भ्रात्रभावे तत्सुता भ्रातृसुता धनभाजः। न च 'तथा तत्सुता' इति तथाशब्देन भ्रातृभ्रातृपुत्रयोः सादृश्यप्रतिपादनात् 'अनेकपितृकाणा तु पितृतो भागकल्पना' इति वचनाच्च तयोः पित्रभावे विभज्य धनग्रहणमस्त्विति वाच्यम्। विष्णुवचनाविरोधेन तथाशब्दस्य चशब्दार्थत्वात्। अन्यथा तथापदस्य पूर्वत्राप्यन्वयसंभवेन पित्रोर्भ्रातृणा च विभज्य ग्रहणमित्यपि कुतो न स्यात्। तच्चेद्विष्णुवचनविरोधान्नेत्युच्यते सोऽत्रापि तुल्यः।

+व्यप्र.५२४-७

(१४) पितुरभावे मातृगामि। मातुरभावे पितामही। पितामह्यभावे सवर्णा भ्रातरो गृह्णीयुः। 'तदभावे भ्रातृगामी'ति विष्णुस्मृतेः। 'भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभय' इति स्मृत्या संसृष्टिधने सनाभय इत्यनेन सोदरभगिनीना समानाशग्राहकत्व, 'सवर्णा भ्रातरो माता पितृभार्या चे'ति देवलस्मरणात्सापत्नमातापि अंश गृह्णीयात्। तदभावे असवर्णो भ्रातेति। *व्यउ.१५४-५

(१५) तत्र विभक्तस्यासंसृष्टिनो धनग्रहणे क्रममाह याज्ञवल्क्यः—पत्नी दुहितर इति। व्यम.६०

पत्नी पतिव्रता धनहारिणी न व्यभिचारिणी। व्यम.६१

तस्या अभावे दुहिता। दुहित्रभावे दौहित्रः। दौहित्राभावे पिता। तदभावे माता। व्यम.६२

मातुरभावे भ्राता सोदरः। तदभावे तत्पुत्रः। यत्तु विज्ञानेश्वरादयः 'सोदराभावे भिन्नोदराः। तदभावे सोदरसुताः' इत्याहुः। तन्न। भ्रातृपदस्य सोदरे शक्त्या भिन्नोदरे च गौण्या वृत्तिद्वयविरोधात्। केचित्तु भ्रातर इत्यत्र 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' इत्यनुशासनात्

+ दायग्रहणोपयोगि सपिण्डत्वं सकुल्यत्व च दावत्। अपुत्रपदस्य अपुत्रपौत्रप्रपौत्रपरत्वं दावत्। पत्नीदुहितृणामुपकारकत्व स्मृतिवत्। दुहितृपदार्थः मितावत् स्मृतिवच्च।

* अन्यत सर्वं मितागतम। अपत्रपदार्थः दावत।

भ्रातरश्च स्वसारश्च भ्रातर इति विरूपैकशेषेण भ्रात्रभावे भगिन्य इत्याहुः। तन्न। विरूपैकशेषे मानाभावात्। भ्रातृपुत्राभावे गोत्रजाः सपिण्डाः। तत्राप्यादौ पितामही तदभावे भगिनी। 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्' इति मनूक्तेः (मस्मृ.९। १८७)। 'बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा। यस्त्वासन्ननरस्तेषां सोऽनपत्यधनं हरेत्॥' इति बृहस्पत्युक्तेः। तस्या अपि भ्रातृगोत्र उत्पन्नत्वेन गोत्रजत्वाविशेषाच्च। सगोत्रता परं नास्ति। न च साऽत्र धनग्रहणप्रयोजकत्वेनोक्ता। तदभावे पितामहसापत्नभ्रातरौ विभज्य गृह्णीतः स्वजनकजनकत्वेन स्वजनकजन्यत्वेन च समानप्रत्यासत्तेः। प्रत्यासत्तिसाम्ये पाठक्रमाद्गुणविशेषान्तराभावे वा अन्यत्रापीयमेव। तेन तयोरभावे प्रपितामहपितृव्यभिन्नोदरभ्रातृपुत्रा विभज्य गृह्णीयुः। व्यम.६३

ननु पत्न्यादीनां सर्वेषां मृतनिरूपितानामेव धनभाक्त्वम्। बान्धवानामपि तथैवास्तु। अतः कथं पितुर्मातुश्च बान्धवाना धनसबन्धः। 'पितुः पितृष्वसुः पुत्रा' इत्यादि तु सज्ञासज्ञिसबन्धमात्रार्थं न धनसबन्धार्थमिति चेत्। उच्यते। विनाप्येतद्वचन पितृमातुलपितृव्यादिष्विव पितृमातृबान्धवेष्वपि योगेनैव तच्छब्दप्रवृत्तिसंभवे संज्ञासंज्ञिसबन्धबोधनानर्थक्यापत्तिः। तेन बन्धूनुद्दिश्य धनसबन्धविधौ पितृमातृबन्धुप्रापणेनैव वचोऽर्थवत्ता। बन्धूद्देशेनाशौचादिविधावप्येवमेवेति दिक्। *व्यम.६४

(१६) अपरार्कस्तु पितृमातृबन्धुषु तच्छब्दपूर्वकं सोपपदबन्धुशब्दोक्तानां न केवलेनात्र बन्धुशब्देन ग्रहण युक्तम्। न चाशौचे 'पितृबन्धौ मातृबन्धौ मण्डलेऽधिपतौ तथे'ति तद्विशेषग्रहणमस्ति। न च मुख्यगौणयोर्युगपद् ग्रहणं युक्तम्। मुख्यासभवकृतत्वादितरस्य युगपत्सभवासभवविरोधात्। परंपरयात्मसंबन्धः शिष्येऽपि तुल्यः। तेनात्मबन्धूनामेव ग्रहणमित्याह। +विता.४०८-९

(१७)मिताटीका—पत्नीत्वत्र एवकारस्य सर्वत्र प्रत्येक संबन्धः। तेनाद्यादिसत्वे द्वितीयादिव्यावृत्तिः। चेन दौहित्रसमुच्चयः। 'भ्रातर' इत्यत्रैकशेषेण भगिनीनामपि ग्रहणं बोध्यम्। तथेति भ्रातृविशेषणं विभक्ता असंसृष्टिनश्चेत्यर्थकम्। अत एव सफलम्। न तु समुच्चयार्थकम्। तं विनाऽप्यन्यत्रैवात्रापि तत्प्रतीत्या तथा साफल्याभावात्। 'तत्सुता' इत्यत्र तयोः सुता इत्यर्थः। 'सुता' इत्यत्र तथैकशेषेण तयोः कन्यानामपि ग्रहणम्। बन्धुशब्देन बान्धववदाचार्यस्य गुरोरपि ग्रहणम्। तस्यानेकार्थत्वात्। हिः त्वर्थे, पूर्वतो वैलक्षण्यसूचकः। 'अपुत्रस्य' इत्यत्र मुख्यपुत्रशून्यत्वमात्रं न विवक्षितं प्रकरणविरोधात्, किन्तु मुख्यगौणपुत्राणा अभाव एव।

अत्र पुत्रग्रहण पौत्रप्रपौत्रयोरप्युपलक्षणम्। जीवति मृते च पुत्रे पौत्राणा भागस्य 'भूयां पितामहे'ति 'अनेकपितृकाणामि'ति चोक्तत्वात्। 'अविभक्तविभक्ताना कुल्याना वसता सह। भूयो दायविभागः स्यात् आचतुर्थादिति स्थितिः॥' इति देवलात्। 'अपुत्रपौत्रसताने दौहित्रा धनमाप्नुयुः।' इति विष्णुः। पिता 'सवर्णायाः पुत्रः पौत्रः पुत्रपौत्र' इत्युपक्रम्य 'सत्स्वन्येषु तद्वामी'ति बौधायनोक्तेश्च (बौध.१।५।९५,९७)। विवाहसंस्कृतेति। धर्मविवाहपूर्वकश्रौतस्मार्तकर्मसहाधिकारवतीत्यर्थः। तदेतत् ध्वनयन्नाह—पत्युर्नो यज्ञेति। स्मरणात्, पाणिनिस्मृतेः (व्यासू.४।१।१३३)। पतिशब्दस्य नकारादेशो भवति यज्ञसंयोगे गम्ये। दम्पत्योः सहाधिकारेण यज्ञसाधनत्वात्तत्कर्तृकयज्ञफलभोक्तृत्वाच्च तस्या यज्ञसंयोगः। 'यज्ञसंयोगे' इत्यस्य यज्ञेन सबन्धे इत्यर्थः। स्त्रिया इति शेषः। संयोगपदं सबन्धोपलक्षणम्। सबन्धश्च यज्ञफलप्रतियोगिकैश्वर्यवत्वम्। तथा च विलक्षणविवाहसंस्कृतैव यज्ञसाधन नान्येति सैव पत्नीत्युच्यत इति भावः। 'सवर्णासु विधौ धर्म्ये' इत्युक्त्या ज्येष्ठा विनाऽन्यासामनधिकारेऽपि तया सहाधिकारात् तदभावेऽप्यधिकाराच्चासामपि तत्संबन्धो बोध्यः। सवर्णाया अभावेऽसवर्णाऽपि पत्नी। तेन शूद्राव्यवच्छेदः। तस्याः परिणीतात्वेऽप्यपत्नीत्वात्। अत एव विष्णुः—'सवर्णाऽभावे त्वनन्तरया चापदि न त्वेव द्विजः शूद्रयेति धर्मकार्यं कुर्यादित्यनुवर्तते। आचाराध्याये मूले चोक्तमिदम्। अतस्तस्या जीवनोपयुक्तांशभागित्वं, न कृत्स्नाशभागित्वमिति बोध्यम्।

बाल.(पृ.१८७-९)

---

* शेष मितागतम्।

+अन्यत् सर्वं मितागतम्। अत्रोद्धृतमपरार्कमतं 'पत्नी दुहितर' इति श्लोकव्याख्याने नोपलभ्यते।

माताऽरुन्धत्यादिवत्समस्तपतिव्रतागुणोपेता पिता तु जन्ममात्रप्रदः तत्र मातैव पितुरपेक्षयाभ्यधिकमान्या । चिरकारिकोपाख्यानादौ महाभारतादिष्वेवमुपाख्यानस्वरसादयमर्थ उन्नीयते । तदत्रापि मन्वादिवचनेष्वपुत्रपुत्रधनग्रहणाधिकारः क्वचिन्मातुः प्रथमं क्वचित्पितुः प्रतीयमान एवमेव व्यवस्थापयितुमर्हः । तथाहि —'अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् । मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम् ॥' (मस्मृ.९।२१७) इति मनुः । 'भार्यासुतविहीनस्य तनयस्य मृतस्य च । माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञया ॥' इति बृहस्पतिः । पुनर्मनुरेव 'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा ।'(मस्मृ.९।१८५) इति । 'तदभावे पिता तदभावे माता' इति प्रागुदीरितबृहद्विष्णुवचनात् । योगीश्वरवचने तु पितरावित्यत्र विज्ञानेश्वरोक्तरीत्या प्राङ्माता तदनु पिता । अन्यमते संभूय विभागः पितुर्वा प्राथम्यमिति विप्रतिपत्तौ पितुरधिकमान्या या माता सा पितुरपेक्षया प्रथमाधिकारिणी । या तु पितुरपेक्षया न्यूनमानभाक् सा पितुः पश्चात् । युक्तं चैतत् । वृत्त्यादिसविधानमकुर्वतः पितुरपेक्षया मातुरेवाधिकोपकारकत्वाद्धनग्रहणम् । वृत्त्यादिसंविधानकर्तुस्तु तस्य यावज्जीवं भरणपोषणादिनातिशयितोपकारकस्य धनग्रहणमिति सर्वस्मृतीना सर्वनिबन्धाना चादुःस्थता भातीत्यादि सुधीभिर्विभाव्यम् ।

पित्रोरभावे भ्रातरो धनभाजः । मम तु प्रतिभाति 'मातर्यपि च वृत्तायां' इति मनुवाक्ये 'तदभावे मातापितरौ' इति शंखपैठीनसिवचनयो., 'ततो दायमपुत्रस्य विभजेरन् सहोदराः । तुल्या दुहितरो वापि म्रियमाणः पितापि वा ॥ सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम् । तेषामभावे गृह्णीयुः कुल्याना सहवासिनः ॥' इति देवलवचने सर्वत्रापि 'वृत्तायां' 'तदभावे यथाक्रमम्' इत्यादिपदैः क्रमप्रतीतेर्योगीश्वरबृहद्विष्णुवचनयोरेव क्रमपरत्वमितरेषा त्वधिकारमात्रपरत्वेन तदविरोधेन तत्तत्स्थाननिवेशोऽप्यक्षतिरिति समाधिर्नैव साधुः । किन्तु क्षेत्रजादिपुत्रस्थले यथा स्मृतिवचनक्रमविपर्यास औरसानुकूल्यप्रातिकूल्यगुणवत्त्वागुणवत्त्वादिमिर्व्यवस्थापितस्तथात्रापि दायभागप्रकरणे पुत्रादीना पित्रादुपकारकत्वकीर्त्तनस्य गुणवत्त्वादिकीर्त्तनस्य वाऽनन्यप्रयोजनत्वात्प्रत्यासत्तितारतम्यवत् धनस्वाम्युपकारातिशयानतिशयगुणवत्त्वागुणवत्त्वादिभिर्यथावचनं स सर्वोऽपि क्रमविपर्यासः समाधेयोऽन्ये तु समाधयः कुशकाशावलम्बनमात्रतुल्या अनुपादेया इति । एवमग्रेऽपीति सर्वं सुस्थम् ।

भ्रात्रभावे तत्सुता भ्रातृसुता धनभाजः । न च 'तथा तत्सुता' इति तथाशब्देन भ्रातृभ्रातृपुत्रयोः सादृश्यप्रतिपादनात् 'अनेकपितृकाणा तु पितृतो भागकल्पना' इति वचनाच्च तयोः पित्रभावे विभज्य धनग्रहणमस्त्विति वाच्यम् । विष्णुवचनाविरोधेन तथाशब्दस्य चशब्दार्थत्वात् । अन्यथा तथापदस्य पूर्वत्राप्यन्वयसंभवेन पित्रोर्भ्रातृणा च विभज्य ग्रहणमित्यपि कुतो न स्यात् । तच्चेद्विष्णुवचनविरोधान्नेत्युच्यते सोऽत्रापि तुल्यः ।

+व्यप्र.५२४-७

(१४) पितुरभावे मातृगामि । मातुरभावे पितामही । पितामह्यभावे सवर्णा भ्रातरो गृह्णीयुः । 'तदभावे भ्रातृगामी'ति विष्णुस्मृतेः । 'भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभय' इति स्मृत्या संसृष्टिधने सनाभय इत्यनेन सोदरभगिनीना समानाशग्राहकत्व, 'सवर्णा भ्रातरो माता पितृभार्या चे'ति देवलस्मरणात्सापत्नमातापि अंश गृह्णीयात् । तदभावे असवर्णा भ्रातेति । *व्यउ.१५४-५

(१५) तत्र विभक्तस्यासंसृष्टिनो धनग्रहणे क्रममाह याज्ञवल्क्यः—पत्नी दुहितर इति । व्यम.६०

पत्नी पतिव्रता धनहारिणी न व्यभिचारिणी।

व्यम.६१

तस्या अभावे दुहिता । दुहित्रभावे दौहित्रः । दौहित्राभावे पिता । तदभावे माता । व्यम.६२

मातुरभावे भ्राता सोदरः । तदभावे तत्पुत्रः । यत्तु विज्ञानेश्वरादयः 'सोदराभावे भिन्नोदराः । तदभावे सोदरसुताः' इत्याहुः । तन्न । भ्रातृपदस्य सोदरे शक्त्या भिन्नोदरे च गौण्या वृत्तिद्वयविरोधात् । केचित्तु भ्रातर इत्यत्र 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' इत्यनुशासनात्

+ दायग्रहणोपयोगि सपिण्डत्वं सकुल्यत्व च दावत् । अपुत्रपदस्य अपुत्रपौत्रप्रपौत्रपरत्व दावत् । पत्नीदुहितृणामुपकारकत्व स्मृत्यवत् । दुहितृपदार्थः मितावत् स्मृत्यवच्च ।

* अन्यत् सर्वं मितागतम् । अपुत्रपदार्थः दावत् ।

भ्रातरश्च स्वसारश्च भ्रातर इति विरूपैकशेषेण भ्रात्रभावे भगिन्य इत्याहुः। तन्न। विरूपैकशेषे मानाभावात्। भ्रातृपुत्राभावे गोत्रजाः सपिण्डाः। तत्राप्यादौ पितामही तदभावे भगिनी। 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्' इति मनूक्तेः (मस्मृ.९। १८७)। 'बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा। यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत्॥' इति बृहस्पत्युक्तेः। तस्या अपि भ्रातृगोत्र उत्पन्नत्वेन गोत्रजत्वाविशेषाच्च। सगोत्रता पर नास्ति। न च साऽत्र धनग्रहणप्रयोजकत्वेनोक्ता। तदभावे पितामह सापत्नभ्रातरौ विभज्य गृह्णीतः स्वजनकजनकत्वेन स्वजनकजन्यत्वेन च समानप्रत्यासत्तेः। प्रत्यासत्तिसाम्ये पाठक्रमाद्गुणविशेषान्तराभावे वा अन्यत्राप्येवमेव। तेन तयोरभावे प्रपितामहपितृव्यभिन्नोदरभ्रातृपुत्रा विभज्य गृह्णीयुः। व्यम.६३

ननु पत्न्यादीना सर्वेषा मृतनिरूपितानामेव धनभाक्त्वम्। बान्धवानामपि तथैवास्तु। अतः कथ पितृमातृश्च बान्धवाना धनसबन्धः। 'पितुः पितृष्वसुः पुत्रा' इत्यादि तु सज्ञासज्ञिसबन्धमात्रार्थ न धनसबन्धार्थमिति चेत्। उच्यते। विनाप्येतद्वचन पितृमातुलपितृव्यादिष्विव पितृमातृबान्धवेष्वपि योगेनैव तच्छब्दप्रवृत्तिसंभवे सज्ञासंज्ञिसबन्धबोधनानर्थक्यापत्तिः। तेन बन्धूनुद्दिश्य धन संबन्धविधौ पितृमातृबन्धुप्रापणेनैव वचोऽर्थवत्ता। बन्धूद्देशेनाशौचादिविधावप्येवमेवेति दिक्। *व्यम.६४

(१६) अपरार्कस्तु पितृमातृबन्धुषु तच्छब्दपूर्वक सोपपदबन्धुशब्दोक्ताना न केवलेनात्र बन्धुशब्देन ग्रहण युक्तम्। न चाशौचे 'पितृबन्धौ मातृबन्धौ मण्डलेऽधिपतौ तथे'ति तद्विशेषग्रहणमस्ति। न च मुख्यगौणयोर्युगपद् ग्रहणं युक्तम्। मुख्यासभवकृतत्वादितरस्य युगपत्संभवासंभवविरोधात्। परंपरयात्मसंबन्धः शिष्येऽपि तुल्यः। तेनात्मबन्धूनामेव ग्रहणमित्याह। +विता.४०८-९

(१७)मिताटीका—पत्नीत्यत्र एवकारस्य सर्वत्र प्रत्येक संबन्धः। तेनाद्यादिसत्वे द्वितीयादिव्यावृत्तिः। चेन दौहित्रसमुच्चयः। 'भ्रातर' इत्यत्रैकशेषेण भगिनीनामपि ग्रहणं बोध्यम्। तथेति भ्रातृविशेषणं विभक्ता असंसृष्टिनश्चेत्यर्थकम्। अत एव सफलम्। न तु समुच्चयार्थकम्। तं विनाऽप्यन्यत्रेवात्रापि तत्प्रतीत्या तथा साफल्याभावात्। 'तत्सुता' इत्यत्र तयोः सुता इत्यर्थः। 'सुता' इत्यत्र तथैकशेषेण तयोः कन्यानामपि ग्रहणम्। बन्धुशब्देन बान्धववदाचार्यस्य गुरोरपि ग्रहणम्। तस्यानेकार्थत्वात्। हिः त्वर्थे, पूर्वतो वैलक्षण्यसूचकः। 'अपुत्रस्य' इत्यत्र मुख्यपुत्रशून्यत्वमात्र न विवक्षितं प्रकरणविरोधात्, किन्तु मुख्यगौणपुत्राणा अभाव एव।

अत्र पुत्रग्रहण पौत्रप्रपौत्रयोरप्युपलक्षणम्। जीवति मृते च पुत्रे पौत्राणा भागस्य 'भूर्या पितामहे'ति 'अनेकपितृकाणामि'ति चोक्तत्वात्। 'अविभक्तविभक्ताना कुल्याना वसता सह। भूयो दायविभागः स्यात् आचतुर्था'दिति स्थितिः॥' इति देवलात्। 'अपुत्रपौत्रसताने दौहित्रा धनमाप्नुयुः।' इति विष्णुः। पिता 'सवर्णायाः पुत्रः पौत्रः पुत्रपौत्र' इत्युपक्रम्य 'सत्स्वन्येषु तद्वामी'ति बौधायनोक्तेश्च (बौध.१।५।९५,९७)। विवाहसंस्कृतेति। धर्मविवाहपूर्वकश्रौतस्मार्तकर्मसहाधिकारवतीत्यर्थः। तदेतत् ध्वनयन्नाह—पत्युर्नो यज्ञेति। स्मरणात्, पाणिनिस्मृतेः (व्यासू.४।१।१३३)। पतिशब्दस्य नकारादेशो भवति यज्ञसंयोगे गम्ये। दम्पत्योः सहाधिकारेण यज्ञसाधनत्वात्तत्कर्तृकयज्ञफलभोक्तृत्वाच्च तस्या यज्ञसंयोगः। 'यज्ञसंयोगे' इत्यस्य यज्ञेन संबन्धे इत्यर्थः। स्त्रिया इति शेषः। संयोगपद सबन्धोपलक्षणम्। सबन्धश्च यज्ञफलप्रतियोगिकैश्वर्यवत्वम्। तथा च विलक्षणविवाहसंस्कृतैव यज्ञसाधन नान्येति सैव पत्नीत्युच्यत इति भावः। 'सवर्णासु विधौ धर्म्ये' इत्युक्त्या ज्येष्ठा विनाऽन्यासामनधिकारेऽपि तया सहाधिकारात् तदभावेऽप्यधिकाराच्चासामपि तत्संबन्धो बोध्यः। सवर्णाया अभावेऽसवर्णाऽपि पत्नी। तेन शूद्राव्यवच्छेदः। तस्याः परिणीतात्वेऽप्यपत्नीत्वात्। अत एव विष्णुः—'सवर्णाऽभावे त्वनन्तरया चापदि न त्वेव द्विजः शूद्रये'ति धर्मकार्य कुर्यादित्यनुवर्तते। आचाराध्याये मूले चोक्तमिदम्। अतस्तस्या जीवनोपयुक्ताशभागित्वं, न कृत्स्नाशभागित्वमिति बोध्यम्।

बाल.(पृ.१८७-९)

---

* शेष मितागतम्।

+अन्यत् सर्वं मितागतम्। अत्रोद्धृतमपरार्कमतं 'पत्नी दुहितर' इति श्लोकव्याख्याने नोपलभ्यते।

तथा चावरुद्धग्रहणं पत्नीत्वाभाववदुपलक्षणम्। तथा च यत्र पत्नीत्वाभावः पुनर्भ्वादावपि तत्र सर्वत्र इदमेव। बाल.(पृ.१९७)

(जीमूतवाहनमत खण्डयति) तन्न। उक्तबृहस्पतिवाक्यस्य 'संसृष्टिनस्त्वि'ति मूलस्य 'विभक्ताः सहजीवन्त' इत्यादिमनोरुक्तनारदस्य च समानार्थकत्वेन प्रकृताविषयत्वात्। अपत्यसत्त्वे नैवमित्युक्तम्। तत्र अनपत्येत्यपवादप्रसंगादसंसृष्टविभक्तस्थलेऽप्यपवाद उक्तः, अभार्यापितृकेति। लोपशङ्काऽपि मनुवद्रोध्या। पत्नीति मूलस्य पूर्वोत्तरवचनैस्तत्त्वे सति परिशेषन्यायेन शङ्खादेस्तद्विषयत्वं सिद्धमिति न दोषश्च। किं च भ्रात्रंशे एवेदं न पित्र्यंशे। तत्र त्वनुपदमेव प्रकाशे वक्ष्यमाण इति न कोऽपि दोष इति दिक्। नन्वेतावता प्रपञ्चेन पत्नीत्वस्य भ्रात्रंशे विरोधे परिहृते नारदसंगतावपि पित्र्यांशे विरोधस्यापरिहृतत्वेन तदवस्थत्वेन मनुशंखकात्यायनादेः का गतिरिति चेत्। न। नेदं क्रमपरमित्याद्याचार्योक्त्यनुवादकेन भगवता विज्ञानेश्वरेण सर्वविरोधपरिहारस्य सूचितत्वात्।

तथा हि। तत्र तावत् 'पिता हरेदि'ति मनुविरोधस्तु कण्ठतः परिहृत एव। तथा च तत्र वाशब्दो व्यवस्थितविकल्पे न त्वैच्छिकविकल्पे। व्यवस्था च मूलोक्तैवेति बोध्यम्। एवमनपत्यस्य पुत्रस्य मातेति मनुरपि न विरुद्धः। तस्यापि क्रमाबोधकत्वात्। मानाभावात्, अधिकारप्रदर्शनमात्रपरत्वात्। तथा च मूलानुरोधेन तत्र चकारेण च वृत्तायामित्यस्य पूर्ववत्रापि संबन्धेन पत्न्या दुहितरि च वृत्तायां दौहित्रे च वृत्ते माता तस्य दायमाप्नुयादित्यर्थः। अग्रेऽपि अपिशब्दात्पित्रादिसमुच्चयेन पितरि भ्रातृषु सत्सु तेषु च वृत्तेषु पितामही हरेदित्यर्थः। इदमग्रेऽपि व्यक्तम्। तथैव 'मातर्यपी'त्यत्र कण्ठतो विज्ञानेश्वरेण तथोक्तत्वान्मात्रंशेऽपि तथैव तस्यामितम्। एवं शंखवचनमपि न विरुद्धम्। तस्याविभक्तसंसृष्टभ्रातृविषयत्वस्य भ्रात्रंशे कण्ठतस्तेनोक्तत्वात्।

किं च तत्र वाशब्दस्य समुच्चयार्थत्वेन तदभावे इत्यस्योभयत्रान्वयेन क्रमवैपरीत्येन च तदभावे अविभक्तसंसृष्टभ्रात्रभावे ज्येष्ठा संयता पत्नी हरेत् तदभावे पत्न्यभावे चेन दुहितृदौहित्रयोरभावे पितरौ हरेयातामित्यर्थात् यथाश्रुतक्रमाबोधकत्वात्। कात्यायनवचनमपि न विरुद्धम्। तत्र पुत्राभावे इत्यत्र पुत्रपदस्य पौत्रोपलक्षकत्वावश्यकत्वात् 'अपुत्रा पुत्रवत्पत्नी' 'यथैवात्मा तथा पुत्रः' 'पुत्रेण दुहिता समा' 'पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते' इत्याद्युक्त्या पुत्राभावे इत्यस्य पुत्रस्य पौत्रस्य पत्न्या दुहितुर्दौहित्रस्य चाभावे इत्यर्थेनाग्रे क्रमवैपरीत्येन वाशब्दाना तदभावरूपवक्ष्यान्तरबोधकत्वेनादौ जननी हरेत्, वा तदभावे पिता हरेत्, वा तदभावे भ्राता हरेत्, पुनरन्वयेनाथशब्दस्य समुच्चयार्थत्वेन वा तदभावेऽथ तत्सुता हरेयुः, वा तदभावे तत्पितुर्माता पितामही हरेदित्यर्थात्। एतादृशक्रमबोधनार्थमेव क्रमादिति सफलम्। अन्यथोक्तक्रमस्य पाठत एव लाभे तदुक्तिरफलेति स्पष्टमेव। गौतमवचनमपि न विरुद्धम्। तत्र वाशब्दस्य चार्थत्वेनाधिकारमात्रप्रदर्शनपरत्वेनोक्तरीत्यैव क्रमस्य विवक्षितत्वात्। तत्र पिण्डशब्दः सापिण्ड्यपरः। गोत्रशब्दसमभिव्याहारात्। न केवलं मूलस्यैव नारदादिविरोधः, किं तु तेषामपि मिथो भूयानिति तत्रैकस्य सिद्धान्तत्वे सर्वनिर्वाहाभावात् व्यापकत्वान्मूलाद्यनुरोधेनोक्तव्यवस्थयैव सर्वैकवाक्यतासंपादनमुचितमिति गूढाकूतम्।

अत्रेदं तत्त्वम्। यद्यपि पूर्वविरोधदानावसरे नारदमनुशंखकात्यायनविरोधः क्रमेण व्याख्यात्रा संभवात्सामान्यतो बहुविषये दत्तस्तथापि उपक्रमोक्तनारदवाक्याद्विशिष्य भ्रातृपत्न्योः क्रमबोधकशंखाच्च मुख्यतया भ्रात्रंशे एवाभिमतः। मनुकात्यायनोल्लेखस्तु मूलवत्तेषामपि मिथो विरोधो यथाश्रुत इति न तयोरपि क्रमव्यवस्थापकत्वमिति सूचयितुमानुषङ्गिकः। तत्र मनुद्वयांशे विरोधपरिहारोऽग्रे व्याख्यात्राऽन्यप्रसंगेन कण्ठतः कृत एवेति नात्र पुनर्विशिष्योक्तिः। तेनैव पित्रादौ शंखकात्यायनविरोधोऽपि परिहृतप्राय इति न तथा। भ्रात्रंशे तदुभयविरोधोऽपि अन्यप्रसंगेन तयोः संसृष्टविषयत्वमुक्तवता परिहृत एव। तत्र संसृष्टेत्युपलक्षणं विभक्तस्यापि। इदमप्यन्यत्र विभक्ते संसृष्टिनि वेति उक्तवता तेन सूचितमेव। एवं च मुख्यतातात्पर्यविषयतया भ्रात्रंशे

एव फलितार्थकथनपरं न तु शाब्दार्थकथनपरम्। तल्लाभो यद्यपि प्रागुक्तरीत्या सिद्धः तथापि अत्रापि गमकमस्तीत्याशयेनाद्योपसंहारार्थं हेतुद्वयमुक्तं विभागेत्यादि। स च मुख्यतया भ्रातृणामेव प्रतिपादितः। शब्दतस्तथैव लाभात्। अत एवाग्रे 'एवं विभागं चे'दित्यादिना प्रबन्धेन समानजातीयाना भ्रातृणां परस्परं पित्रा च सह विभागकल्पतिरुक्ता इत्युक्त तेन।

किं च भ्रातृणा तयोरूर्ध्वमनन्तरं विभाग उक्त इति तस्यैव विभागस्यात्र ग्रहणम्। अत एवैकवचनम्। एवं च भ्रात्रंशे तादृशप्रकरणात्तथेति तद्भावः। ननु शाब्दमुख्यविभक्तत्वस्य तत्रोक्तत्वेऽपि अर्थानुपङ्क्तिकविभक्तत्वस्य पितरि मातरि च सत्त्वेन तादृशविषये तयोरधिकारापत्तिः। पत्नीत्यस्य सर्वविषयत्वेनाप्रवृत्त्या वचनान्तरादित्यत उक्तं संसृष्टिनामिति। ससृष्टिनस्त्वित्यस्य पत्नीत्यादिसर्वापवादत्व न पत्नीमात्राशपरम्। अत एव 'पत्न्यादयो धनभाज इत्युक्तम्। अस्यापवादमाह' इति वक्ष्यते तेन। एव च तादृशपितृभ्रातृपितृव्यान्यतमस्थलेऽस्य वचनस्य सपूर्णस्याप्रवृत्तावप्यन्यत्र विभागेऽविभागे च सर्वत्र प्रवृत्तिः। अत एव वैरूप्यमपि नेदानीम्। अत एव ससृष्टविषयत्वमेव नारदशंखयोः कण्ठत उक्त न त्वविभक्तविषयत्वमपि। इयमरुचिरुपसंहारद्वयमध्ये विभक्ते ससृष्टिनि वेत्यत्रापि बोध्या। अत एवाद्ये उपसहारेऽयमर्थः सिद्धो भवतीत्युक्तं, न तु पत्नीत्यादेरेतद्विषयतया व्यवस्थितिरित्युक्तम्। द्वितीयोपसंहारस्तु साकल्याशे इति न पौनरुक्त्यम्।

किं च विभक्तभ्रातृस्त्रीविषयत्वं पत्नीत्यस्य धारेश्वरसंमतत्वेन प्रागुक्त न स्वसंमतत्वेन। यद्यपि तत्र नियोगो दूषितः कण्ठतो 'नान्यस्मिन्नि'त्यादिना तथापि तदितराशस्य संभवदुक्तिकत्वेऽपि उक्तवक्ष्यमाणयुक्तिभ्या स्वानभिमतत्वमेव। एतेन "पत्नीत्यादिमूलस्य 'अपुत्राशयनमि'ति मनोश्च व्याख्याया विभक्तासंसृष्टधनविषयतया स्थवस्थापितत्वेन तद्विन्नस्थले तयोरप्रवृत्त्योक्तनारदमन्वादिना तत्र निर्वाह इति मिताक्षरासंमतसिद्धान्त" इति भ्रान्तोक्तमपास्तम्। तदभिमतार्थाज्ञानात्। विभागोक्त्या मूलस्य तद्विषयत्वलाभेऽपि उक्तमनोस्तद्विषयत्वासभवात्। तथा तेनानुक्तत्वात्। मूलैकवाक्यतया तस्य तत्त्वेऽपि विरुद्धवाक्यजातान्तर्गते विभक्ते संस्थिते इत्यत्र विभक्ते इत्युक्त्या तदेकवाक्यतया नारदमन्वादेरपि तद्विषयत्वापत्त्या त्वदुक्तार्थस्य बाधितत्वात्। अन्यथा तेषां मिथो विरोधस्य स्पष्टत्वेनाव्यवस्था तदवस्थैव।

किं च। तावताऽपि तैः सर्वत्रानिर्वाहः। तत्र स्वल्पोपादानात् पत्नीत्यादेस्तु त्वदुक्तरीत्योत्तरोत्तरस्य पूर्वपूर्वसापेक्षत्वेन तद्विषयत्वस्यैव युक्तत्वेन च सपूर्णस्यैव तद्विषयत्वापत्त्या तत्राप्रवृत्तेः। मूलसमानार्थविष्णुना निर्वाहे तु अस्मत्पक्षस्यैव सिद्धया द्रविडप्राणायामस्यासांगत्यापत्तेः। किं च अन्यत्र तेन निर्वाह इति न विज्ञानेश्वरसमतम्। यदपि नारदवचनमित्यादितदुक्तिविरोधापत्तेः। तदप्यत्रभवानाचार्यो न मृष्यतीत्यादिविरोधापत्तेः। तत्र पितामही प्रथम धनभाक् 'मातर्यपि च वृत्तायाम्' इत्यादितदुक्तिविरोधापत्तेश्च। वचनस्यैकत्वेनोत्तरार्द्धस्यापि तन्मात्रविषयतया साकर्यस्यैवाभावात्। एतेन अविभक्तैकपुत्रस्य स्वार्जितधनकस्य मृतपितृकस्य मातृपत्नीभगिनीसमवाये उक्तरीत्या पत्नीत्यादेरप्रवृत्त्या 'अनपत्यस्य पुत्रस्य माते'ति मनोर्मातैव धनभाक्, न पत्नी इत्यपास्तम्। तद्विरोधात्। त्वन्मते मात्रभावे तत्सत्त्वे तत्प्रवृत्तेः।

किं च। तथा सति तत्रैव पत्न्यां जीवन्त्यामपि त्वदुक्तरीत्या धनभाक्त्वेन मातृधनस्य दुहितृगामित्वेन तत्कन्यासत्त्वे तद्गामित्वेन पत्न्या निरंशत्वापत्त्या जीवनाभावापत्तेः।

किं च। पितुः स्वत्वमित्यव्यवस्था दुर्वारैव। निर्वाहकवचनान्तराभावात्। विष्णोर्मूलसमानार्थत्वात्। 'अनन्तरः सपिण्डाद्यः' इति मनूक्तप्रत्यासत्तेस्तत्वाङ्गीकारेऽपि तस्यास्तत्र तुल्यत्वेन तत्तादवस्थ्यमेव। अस्मन्मतप्रवेशापत्तिश्च। तदुक्तप्रत्यासत्यङ्गीकारेऽपि तद्वत्पितुरपि असमर्थस्य उक्तरीत्या निरंशत्वापत्तिः 'अर्द्धो वा एष आत्मनो यः पत्नी' इत्यादिश्रुत्यादिबोधितप्रत्यासत्त्यतिशयस्य पत्न्यामेव सत्त्वं च।

किं च। पुत्रपौत्ररहितस्य दुहित्रादिगणाभावे पत्नीसत्वे विभागस्याभावे त्वदुक्तरीत्या पत्नीत्यादेरप्रवृत्त्या 'श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्' इति गौत-

मात् (गौध.२८।३९) तस्य तत्त्वापत्योक्तदोषापत्तेः। किं च। तादृशस्य तस्य पत्नीसत्त्वे सपिण्डान्तर्गतदूरतरयत्किंचित्सत्त्वे विभागाभावे मूलप्रवृत्या--'पुत्राभावे प्रत्यासन्नः सपिण्ड' इत्यापस्तम्यात् (आध. २।१४।२) तस्य तत्त्वापत्योक्तदोषापत्तिरेव। वचनान्तरं तु न साधकमस्ति। उक्तश्रुत्या पत्न्याः प्रत्यासन्नत्वादिना तत्त्वे तु तत्रापि तन्नेद वारितमित्यलं तदनभिज्ञोक्तिखण्डनेनेति।

बाल.(पृ.२०२-४)

यत्तु 'पत्न्यभावे स्नुषैव न दुहिता। तदधिकारस्य पुत्रपत्न्यभावायत्ततया पत्न्यभावेऽपि पुत्राधशरीरसत्त्वेन पुत्राभावविरहात्। तथा च बृहस्पतिः—'यस्य नोपरता भार्या देहार्धं तस्य जीवति। जीवत्यर्द्धे शरीरे तु कथमन्यः समाप्नुयात्॥' इति। न च दुहितुः साक्षात्पित्रवयवारब्धत्वेन पित्रवयवारब्धपुत्रसहकारिस्नुषापेक्षया संनिकृष्टत्वमिति वाच्यम्। दुहित्रपेक्षया सगोत्रसपिण्डायाः स्नुषायाः प्रत्यासत्यतिशयात्। पित्रादिष्वतिप्रसङ्गस्तु न। तेषा वचनेनैव व्यवस्थानविशेषस्य नियमितत्वात्। यत्रापि पतिमरणानन्तरं पत्न्येव लभते तत्रापि मातृधनत्वेन तद्धनं दुहितृगामीति न भ्रमितव्यम्। जन्मना पुत्रस्येव विवाहात् स्नुषाया अपि भर्तृद्वारा श्वशुरधने स्वत्वोत्पत्या श्वशुरमरणे श्वश्रूस्नुषयोः स्वत्वसाम्येन श्वशुरमरणे स्नुषायाश्च साधारणस्वाम्यात्' इति श्वशुरमरणे भ्रान्तः।

तन्न। वस्तुतस्तथा सत्त्वेऽपि तदभावायत्तत्वस्य तस्याशाब्दत्वात्। पत्नीतः प्रागपि तदधिकारापत्त्या सकलव्याकुलीभावापत्तेः। 'अर्धो वा एष आत्मनः' इति श्रुतिमूलकस्योक्तबृहस्पतेः प्रत्यासत्या तादृशपतिधनविषये पत्न्या अधिकारबोधकत्वेन प्रकृतेऽप्राप्तेः। तत्प्रत्यासत्त्यपेक्षया स्नुषाया तादृशप्रत्यासत्यतिशयाङ्गीकारे दुहितुरपि प्राक् पित्रादेरधिकारापत्त्या स्मृतिविरोधव्याहुल्यापत्तेः। स्थानविशेषनियमितत्वस्य स्नुषायामपि तुल्यत्वात्। तस्या अपि गोत्रजत्वात्। एतेन यत्रापीत्याद्यग्रिममपि निरस्तमिति दिक्।

बाल.(पृ.२०६)

अत्रेद बोध्यम्। यद्यपि मानवे पुस्त्वैकवचनाभ्यां दौहित्रस्यैव धनभाक्त्वमायातीति तावदेव विज्ञानेश्वरेण चशब्दसमुच्चेयमुक्तं तथापि दौहित्राभावे दौहित्र्यास्तत्वमपि चसमुच्चेयम्। 'अप्रजःस्त्रीधनं भर्तुरि'ति वक्ष्यमाणेनाप्रजःस्त्रीधनोद्देशेन भर्तृदुहितृदौहित्र्यादेश्च संबन्धविधानेनोद्देश्यविशेषणत्वेन स्त्रीत्वादेरविवक्षितत्वेन 'दुहितृणा प्रसूता चेदि'त्यस्य पितृधनेऽपि तुल्यत्वात्। एवरीत्या 'मातुर्दुहितर' इति नारदस्थाप्यत्रानुकूलत्वात्। युक्त चैतत्। यथा मातृधनग्रहणे दुहितृदौहित्रपुत्रपौत्रादि क्रमस्तथा पितृधने पुत्रपौत्रप्रपौत्रपत्नीदुहितृदौहित्रदौहित्र्यादिक्रमस्य प्रत्यासत्तितारतम्येन न्यायप्राप्तत्वात्। 'स्त्रीधन दुहितृणामप्रत्तानामप्रतिष्ठितानां चे'ति (गौध. २८।२२) गौतमवचनस्य पितृधनेऽपि समानत्वादित्यनुपदमेवोक्तवता विज्ञानेश्वरेण सूचितत्वात्तत्संमतमपीदम्। अन्यथा दौहित्र्याः पूर्वत्र वक्ष्यमाणेषु च स्वतो नोक्तत्वादनन्तर्भावाच्च पितृधनविषये तस्या अनधिकारस्यैवापत्तिरिति महान् दोषः। अग्रे यथाकथञ्चिदन्तर्भावे तु प्रथम धनग्रहणे प्रत्यासत्तेर्नियामकत्वबोधकमन्वादिविरोधः स्पष्ट एव। अत एवाग्रे भ्रात्रनन्तरमेव तत्सुतोक्तिरितीति।

बाल.(पृ.२०७)

वस्तुतस्तु आदौ पिता तदभावे मातेति क्रमो युक्तः। किं चेत्स्यावतरणोक्तयुक्तेः। किं चेत्यावुक्ततारतम्यसत्त्वेऽपि पुत्रे पित्रवयवव्याहुल्यान्मात्रपेक्षया तत्र प्रत्यासत्यतिशयात् तदपेक्षया तस्य अभ्यर्हितत्वात्। क्षेत्रजविशेषविषये उक्तवैपरीत्यस्य सत्त्वेन तथा तस्यापि दुर्वचत्वाच्च। किं च। तदेव हि प्रत्यासत्तेर्मूलकारणं, 'मातुर्दुहितर' इत्यत्रापि तथैव विज्ञानेश्वरेण प्रतिपादितं च। अग्रे बन्धुपदव्याख्यावसरे 'आत्मवान्धवाः पितृवान्धवा मातृवान्धवाः' वृद्धशातातपायुक्तक्रमेणैव प्रतिपादिताः। स्त्रीधनविभागवैपरीत्येनात्रैवमेवोचितं च। अत एव च विष्णुकात्यायनौ प्रागुक्तौ, 'अपुत्रधनं पत्न्यभिगामि, तदभावे दुहितृगामि, तदभावे दौहित्रगामि, तदभावे पितृगामि, तदभावे मातृगामी'ति। 'अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा। तदभावे पिता माता भ्राता पुत्राश्च कीर्तिताः॥' इति च। अन्यथा तयोरपि क्रमबोधकत्वेन तद्विरोधो दुष्परिहर एव। एतदनुरोधेन तयोरन्यथानयनस्य कर्तुमशक्यत्वात्। इदं तु तदनुरोधेनोक्तरीत्या सुयोजमेव।

'भ्रातृपुत्रौ' इत्येकशेषेण प्रागुक्तसिद्धान्तरीत्या पूर्व

भ्राता, तदभावे स्वसा। अत एव—'भ्रातरो गे च संसृष्टा भगिन्यश्च सनाभयः' इति संसृष्टिधनविषये वक्ष्यमाणं संगच्छते इति बोध्यम्। बाल.(पृ.२०९)

अनुप्रवेशाभावादिति। यद्यपीद तदग्रेऽपि तुल्यं तथापि बन्ध्वाद्युत्तरं तस्याः प्रवेशस्योक्तरीत्याऽन्तरङ्गत्वेन चासंभवेन बन्धुशब्देन वक्ष्यमाणरीत्या ग्रहणासभवेन गोत्रजानन्तरं प्रवेशस्य तथैवासंभवेन गोत्रजात्वस्य तत्र सत्वेनान्तर्भावसंभवात् तत्रैव ग्रहण युक्तमिति भावः। बाल.(पृ.२११)

[चन्द्रिकादिनिराकरणपरसुबोधिन्यामरुचिर्दर्शयति]

वस्तुतस्तु प्रागुक्तरीत्या स क्रमो न युक्तः किं तु स एवेति प्रागुक्तमेव। एकशेषे क्रमाप्रतीत्या द्वयोर्युगपत्तत्वप्रतीतावपि प्रागुक्तविष्णुकात्यायनाभ्या तथा क्रमस्य स्फुटतया प्रतीतेः। विभक्ते संस्थिते इति कात्यायनवचनमप्युक्तार्थेऽनुकूलतरम्। तस्य चार्थः प्रागुक्त एव न भवदुक्तः। मूले एकशेषस्तु लाघवेन छन्दोनुरोधेन च कृतो नोक्ताशयकः। पाञ्चमिकन्यायस्य तूक्तरीत्यैव विषय इति न न्यायमूलकत्वमपि मूलस्य। किं च। प्रागुक्तरीत्या जननीजनकयोर्जन्य प्रति सनिकर्षतारतम्यमस्त्येवेति तदुक्तमयुक्तमेव। यत्तु गर्भधारणेत्यादि तन्न। गर्भधारणस्य पोषणस्य चातिप्रसक्तत्वेनाकिंचित्करत्वात्। अत एव बीजस्यैव प्राधान्य सिद्धान्तित मनुना। अत एव च माता न स्त्रीत्यादि सगच्छते। यत्तु गोत्रजा इति सरूपैकशेषत्वेन पुंसामेव ग्रहणमिति तन्न। तथा सति पितरावित्यत्रापि तदापत्तेः। अथ अत्र 'पिता मात्रे'त्येकशेषो विशेषविहित इति चेत्, इहापि 'पुमान् स्त्रिये'ति विशेषविहित इति पश्य। यदपि विजातीयानामपीत्यादि। तदपि न। सरूपैकशेषाभावेनैकविभक्त्यन्तत्वानुपयोगात्। तत्रापि तस्यानिमित्तत्वाच्च। दृष्टान्ते द्वन्द्वसत्वेन लिङ्गभेदेऽपि प्रथमान्तत्वस्यावश्यकस्य सत्त्वेन ततो वैषम्याच्च। गोत्रजाना तत्सुतैः सह बद्धक्रमत्वाभावस्तूक्तरीत्यैव। बृहस्पतिवचनमप्यस्माकमेवानुकूलं न भवताम्। यतो मात्रनन्तरं तत्र भ्रातैवोक्तो न पितेति। तत्र तुशब्दस्य चार्थकत्वेन तनया चेत्यन्वयेन चेन दुहितृदौहित्रदौहित्रीपितृणा समुच्चयेन विरोधलेशोऽपि न। एतेन तनयाशब्दस्योपलक्षकत्वोक्तिः तद्दूषणोक्तिश्चापास्ता। उक्तरीत्यैव निर्वाहात्। तस्मात्तत्र तथैव क्रमो युक्तो न व्याख्याकारोक्त इति बोध्यम्।

यद्यपि कल्पतरौ दायविभागे च विष्णुवाक्ये 'भ्रातृपुत्रगामी'त्यग्रे 'तदभावे बन्धुगामि तदभावे सकुल्यगामी'ति पाठेन तद्विरोधस्तथापि 'तदभावे सकुल्यगामि तदभावे बन्धुगामी'ति मदनरत्नधृतपाठे न विरोधः। युक्तश्चायं मूलसंवादात्। संभवतीति न्यायात्। एवं च स पाठश्चिन्त्य एवेति न कश्चिद्दोषः। गोत्रजपदार्थसकुल्यपदार्थयोस्तुल्यवात्। एतेन तथा पाठं धृत्वाऽन्यथा व्याख्यात यद् भ्रान्तेन, तदपास्तं इति दिक्।

'पितामह्याश्चे'ति चेन स्नुषायाः समुच्चयः।

यथोक्तमिति। अत्र पुत्रादिग्रहणेन कन्यानामपि ग्रहणं प्रागुक्तरीत्येति बोध्यम्। अत एव गार्गीबन्धुः कारीषगन्धीबन्धुरित्यादिसगतिः। बाल. (पृ.२१३–४)

तदयं निर्गलितोऽर्थः। तत्रादौ दायग्रहणक्रमः। औरसपुत्रस्तत्पुत्रस्तत्पुत्रः। तत एकादश पुत्रिकापुत्रादयः पूर्वपूर्वाभावे क्रमेण। एव तत्पुत्रादयोऽपि। अत एव मनुशखलिखिताः—'श्रेयसः श्रेयसोऽलाभे पापीयान् रिक्थमर्हति। बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः॥' (मस्मृ.९।१८४) इति। तदभावे पत्नी। ततो दुहिता। ततो दौहित्रः। ततो दौहित्री। ततः पिता। ततो माता। ततो भ्राता। ततो भगिनी। ततस्तयोः क्रमेण सुतः सुता च। ततो गोत्रजादय इति।

×बाल.२।१३५(पृ.२३६-७)

मृतवानप्रस्थयतिब्रह्मचारिणा धनभाजः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः

वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः।
क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः॥

× उपर्युक्तसुबोधिनीव्याख्यानं बालम्भट्टयामनुदितम्।

(१) **यास्मृ.**२।१३७; **अपु.**२५६।२४; **विश्व.**२।१४१; **मिता.**; **दा.**२१७, **अप.**; **व्यक.**१६१; **स्मृच.**१०२; **विर.**६००; **स्मृसा.**७५,१३८,१४४; **पमा.**५४२; **मपा.** ६७६; **रत्न.**१५६; **विचि.**२४४; **व्यनि.**; **स्मृचि.**३३; **सवि.**४२० च्छिष्य (च्छिष्या); **मच.**९।१८५; **चन्द्र.**९४; **वीमि.**; **व्यप्र.**५३१; **व्यउ.**१५७; **व्यम.**६५; **विता.** ४१२; **राकौ.**४५७; **सेतु.**४९; **समु.**१४३; **विच.**१३५ रिक्थभागिनः (धनहारिणः).

(१) एवं तावद् वर्णाश्रयो विभागविधिरुक्तः। अधुनाऽऽश्रमाश्रय उच्यते—वानप्रस्थेति। ब्रह्मचारी नैष्ठिकोऽभिप्रेतः। एकाचार्यसबद्धो धर्मभ्राता। एकाश्रमसंबद्ध एकतीर्थी। स्पष्टमन्यत्। नैष्ठिकवनस्थयतिव्यतिरिक्ताना तु वर्णाना पारिशेष्यात् प्रागुक्तो विभागविधिः। विश्व.२।१४१

(२) पुत्राः पौत्राश्च दाय गृह्णन्ति, तदभावे पत्न्यादय इत्युक्तं, इदानीं तदुभयापवादमाह—वानप्रस्थेति। वानप्रस्थस्य यतेर्ब्रह्मचारिणश्च क्रमेण प्रतिलोमक्रमेणाचार्यः सच्छिष्यो धर्मभ्रात्रेकतीर्थी च रिक्थस्य धनस्य भागिनः। ब्रह्मचारी नैष्ठिकः उपकुर्वाणस्य तु धनं मात्रादय एव गृह्णन्ति। नैष्ठिकस्य तु धनं तदपवादत्वेदाचार्यो गृह्णातीत्युच्यते। यतेस्तु धन सच्छिष्यो गृह्णाति। सच्छिष्यः पुनरध्यात्मशास्त्रश्रवणधारणतदर्थानुष्ठानक्षमः। दुर्वृत्तस्याचार्यादेरपि भागानर्हत्वात्। वानप्रस्थस्य धन धर्मभ्रात्रेकतीर्थी गृह्णाति। धर्मभ्राता प्रतिपन्नो भ्राता, एकतीर्थी एकाश्रमी, धर्मभ्राता चासावेकतीर्थी च धर्मभ्रात्रेकतीर्थी। एतेषामाचार्यादीनामभावे पुत्रादिषु सत्स्वप्येकतीर्थ्येव गृह्णाति। ननु 'अनंशास्त्वाश्रमान्तरगताः' इति वसिष्ठस्मरणादाश्रमान्तरगताना रिक्थसबन्ध एव नास्ति कुतस्तद्विभागः। न च नैष्ठिकस्य स्वार्जितधनसबन्धो युक्तः। प्रतिग्रहादिनिषेधात्। 'अनिचयो भिक्षुः' इति गौतमस्मरणात्। भिक्षोरपि न स्वार्जितधनसबन्धसंभवः। उच्यते। वानप्रस्थस्य तावत्—'अह्नो मासस्य षण्णा वा तथा सवत्सरस्य वा। अर्थस्य निचय कुर्यात्कृतमाश्वयुजि त्यजेत्॥' इति वचनाद्धनसंबन्धोऽस्त्येव। यतेरपि—'कौपीनाच्छादनार्थं वा वासोऽपि बिभृयाच्च सः। योगसभारभेदाश्च गृह्णीयात्पादुके तथा॥' इत्यादिवचनाद्वस्त्रपुस्तकसबन्धोऽस्त्येव। नैष्ठिकस्यापि शरीरयात्रार्थं वस्त्रादिसबन्धोऽस्त्येवेति तद्विभागकथन युक्तमेव। +मिता.

(३) ब्रह्मचारी च नैष्ठिकोऽभिमतः पित्रादिपरित्यागेन यावज्जीवमाचार्यकुलनिवासपरिचर्यानिष्ठायाः तेन कृतत्वात्, उपकुर्वाणस्य तु धन पित्रादिभिरेव ग्राह्यम्। दा.२१७

(४) अथ गृहस्थव्यतिरिक्तानामाश्रमिणा परेताना धनग्राहकान् सक्रमकानाह—वानप्रस्थेति। वानप्रस्थादीनामन्यतमस्य मृतस्य रिक्थमाचार्यादयः क्रमेण गृह्णीयुः। पूर्वस्य पूर्वस्याभाव उत्तर उत्तरो गृह्णीयादित्यर्थः। सद्गुणवान् शिष्यः सच्छिष्यः। धर्मभ्राता समानाचार्यः। एकतीर्थी एकसिद्धान्तः। एकवाराणसीप्रभृतितीर्थनिवासी वा। वानप्रस्थस्य धनमस्तीति वचनात्—'त्यजेदाश्वयुजे मासि उत्पन्नं पूर्वसंचितम्' इत्यस्माद्गम्यते। यतिब्रह्मचारिणोरपि कन्थादि किंचिदस्त्येव। +अप.

(५) यत्तु वसिष्ठेनोक्तम्—'अनशास्त्वाश्रमान्तरगताः' इति। तदन्याश्रमिणामन्याश्रमिधनग्रहणनिषेधपरम्। न तु समानाश्रमिणा परस्परकन्थग्रहणनिषेधपरम्।

*पमा.५४३

(६) अस्माक तु 'वानप्रस्थधनमाचार्यो गृह्णीयात् शिष्यो वे'ति विष्णुवाक्यदर्शनात् क्रमशब्दो अनुलोमक्रमपर इति प्रतिभाति, शिष्यस्य वानप्रस्थधनग्राहकत्वं विष्णुक्रम आचार्याभावे ज्ञातव्यम्। रत्न.१५६

(७) मिताटीका—योगसभारभेदाश्चेति। योगप्रतिपादकग्रन्थादीनित्यर्थः। सुबो.

(८) नैष्ठिकस्य धनमाचार्य इति। तत्र विद्यासंबन्धस्यैव योनिसबन्धाद्वरीयस्त्वात्। यतेस्तु धन सच्छिष्या गृह्णन्ति। यतिश्चतुर्विधः—कुटीचक-बहूदक हस-परमहंसभेदात्। कुटीचकबहूदकहसाना आचार्याभावे शिष्यस्य धनग्रहः। परमहसस्य तु आचार्याभावात् शिष्य एव गृह्णाति। ×सवि.४२१

(९) अन्ये तु वानप्रस्थस्यापि 'दीक्षितो गुरुणाऽज्ञातो दिशमुपनिष्क्रम्ये'ति वृद्धहारीतेन। 'तत्रैनं विधिवद्राजा प्रत्यगृह्णात्कुरूद्वह। स दीक्षा तत्र संप्राप्य राजा कौरवनन्दनः॥ शतरूपाश्रमे तस्मिन्निवासमकरोत्तदा। तस्मै सर्वविधिं राज्ञे राजा चख्यौ महामतिः॥' इति भारतीय-

+विर., मपा., विचि., चन्द्र., व्यम., विता. मितागतम्। स्मृतिसारे पारिजातमत स्वमतं च मितागतम्। व्यवहारप्रकाशे स्वमतं मितागतम्।

+स्मृच. अपगतम्। वीमि. वाक्यार्थः अपगतः।

* प्रथमपक्षो मितावत्, द्वितीयः अपवत्।

×शेष मितागतम्।

पुराकल्पार्थवादेन च, वानप्रस्थस्याप्याचार्यसत्वात्तद्धनमाचार्यो गृह्णीयादित्याहुः । व्यउ.१५७

(१०) मिताटीका—यद्यपि वानप्रस्थस्याचार्यः संभवति 'दीक्षितो गुरुणाऽऽज्ञातो दिशमुपनिष्क्रम्य' इति वृद्धहारीतलिङ्गात् । 'तत्रैव विधिवद्राजा प्रत्यगृह्णात्कुरूद्वह' इत्यादि । धृतराष्ट्रस्य तत्त्वे भारताच्च । एव च तत्र दीक्षयिता यः स तदाचार्यः । यतेरपि महावाक्योपदेष्टा सः । 'संन्यस्याचार्यमुपतिष्ठेत ब्रह्मजिज्ञासायामि'ति शंखात् । एव चाचार्यादिचतुर्णा द्वन्द्वे क्रमेणेत्यस्याचार्यक्रमेणेत्यर्थसंभवः, आदावाचार्यादिस्ततः शिष्यस्ततो धर्मभ्राता तत एकतीर्थीति । अत एव शिष्यसब्रह्मेत्येकवाक्यता । 'वानप्रस्थधनमाचार्यो गृह्णीयाच्छिष्यो वे'ति विष्णुसगतिश्च, तथापि वानप्रस्थस्य ब्रह्मचारिणश्च शिष्याभावात्तथा व्याख्यानस्यात्रासंभवः । बाल.

नारदः

अनपत्यमृतधनभाक् पतिव्रता पत्नी

रक्षेत शय्यां भर्तुर्या नित्यमेव व्रते स्थिता ।
दद्यात्तस्यैव तत्पिण्डं कृत्स्नमर्थं लभेत सा ॥

अपुत्रमृतधनभाजः क्रमेण दुहिता सकुल्या बान्धवाः सजातीया राजा च । ब्रह्मस्व ब्राह्मणानामेव । तत्स्त्रियो प्रजीवनमात्रभाजः ।

पुत्राभावे तु दुहिता तुल्यसंतानदर्शनात् ।
पुत्रश्च दुहिता चोभौ पितुः संतानकारकौ ॥

(१) दुहितुरधिकारे संतानदर्शन हेतुतया निगदित, सतानश्च पिण्डदोऽभिमतः अपिण्डदस्य अनुपकारकत्वेन अन्यसतानादसंतानाच्चाविशेषात् ।

दा.१७५

अत्र पुत्रपद पत्नीपर्यन्तपरम् । ×दा.१८३

(२) नारदेन तयोरप्यभावे दुहितेति क्रमानुसारिन्यायः स्वयमूहितो मन्दानुग्रहाय प्रदर्शितः । 'पुत्राभावे' इति स्वयमेव न्यायं विवृणोति 'पुत्रश्चे'ति । उभौ स्वपितृश्रेयस्करसतानकारकाविति्यर्थः । तथाहि पौत्रदौहित्रयोः पुत्रदुहितृसंतानयोः स्वरूपतस्तुल्यत्वाभावात्कार्यतोऽत्र तुल्यत्वमभिप्रेतम् । न ऋणापाकरणऋक्थग्रहणलक्षणकार्यतस्तुल्यत्वं संभवति । 'पुत्रपौत्रैर्ऋणं देयम्' इति स्मरणात् । तथा पितामहद्रव्यमधिकृत्य 'तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः' इति स्मरणाच्च पौत्रस्याधिक्यप्रतीतेः । तेनादृष्टकार्यतस्तुल्यत्वमभिप्रेतं तत्र श्राद्धदातृत्वं 'पूर्वेषा तु स्वधाकारे पौत्रा दौहित्रका मता' इति विष्णुस्मरणात् । एवं च दुहितृषु सतानमुखेनादृष्टोपकारकसंबन्धनेनासन्नता । न चैतावता निमित्तेन पुत्राभावे तिष्ठन्त्या पत्न्या दुहिता धनमर्हति । पत्न्याः साक्षादग्निहोत्रादिजन्यादृष्टोपकारसहकारित्वात् । तेन पुत्राभावे दुहितेत्यत्र पुत्रग्रहणं पत्न्या अपि प्रदर्शनार्थमिति मन्तव्यम् । ननु पिता श्राद्धदानेन स्वयमेवादृष्टोपकारक इति दुहितुरपेक्षया आसन्नत्वात् पत्न्यभावे 'पिता हरेदपुत्रस्य' इत्यस्यावसर इति कथ दुहितुरर्थग्रहणम् । मैवम् । 'तस्यामात्मनि तिष्ठन्त्या कथमन्यो हरेद्धनम्' इत्यनेनैवादातृत्वात् । तथाहि यद्यदृष्टोपकारकसबन्धेन व्यवहिता तथापि शरीरसबन्धेनाव्यवहितेति उभयथा दुहितैवाग्रेसरी । एव तर्हि दुहित्रभावे 'पिता हरेत्' इत्यस्यावसरत्वात् नाधुनाऽपि तस्यावसरः । दुहित्रभावेऽपि दौहित्रस्य तत्कोटित्वेन पित्राद्यपेक्षयाऽऽसन्नत्वात् । 'अपुत्रपौत्रसताने दौहित्रा धनमाप्नुयुः । पूर्वेषा तु स्वधाकारे पौत्रा दौहित्रका मताः ॥' इति विष्णुस्मरणाच्च ।

+स्मृच.२९५

(३) [बालरूपमते] पुत्रतुल्यतया स्तुतिपरमिदं वचन, न पुनः पत्नीसद्भावेऽपि पुत्रवद्दुहितृसंबन्धा-

(१) **अभा.४१.**

(२) **नास.**१४।४७ भौ (क्तौ); **नास्मृ** १६।५० दर्शनात् (कारणात्); **दा.**८१ तु (च) पृ. १७५ तु (च) भौ (भे) रकौ (रिके): १८३ पू.; **अप.**२।१३६; **स्मृच.**२९५ पितुः (तुल्य); **विर.**५९१ भौ (भे) रकौ (रिके); **स्मृसा.**७१, १३०:१३४ मनुः: १४१ मनुनारदौ; **दीक.**४५; **रत्न.**१५४ वे तु (वेऽपि); **विचि.**२३८ विरवत्; **व्यनि.**; **स्मृचि.**३२; **दात.**१८५ पू.; **सवि.**४१३ स्मृचवत्; **वीमि.**२।१३६ पू.; **व्यप्र.**५१८ तुः (तु); **व्यउ.**१५४ स्मृचवत्, उत्त.; **विता.**४००; **बाल.**२।१३५ (पृ.२०६ नास्मृवत्, २२३): २।१४५ (पृ.२६०) तु (च) पू.; **सेतु.**४४ विरवत् : ५६ पू.; **समु.**१४१ स्मृचवत्; **विच.**११५ पू., देवलः :१२४ भौ (भे) कौ (के).

× अप., विर., विचि. दा (पृ.१८३) वङ्गावः । दात., सेतु. दागतम् ।

+ सवि., व्यप्र. स्मृचगतम् ।

र्थम्। स्मृसा.१३०

(४) पुत्रग्रहणं पत्न्या अप्युपलक्षणम्। केचिदाहुः दुहितृरिक्थभाक्त्वबोधकान्येतानि वचनानि पुत्रिकाविषयाणीति तदसत्, 'तृतीयः पुत्रः पुत्रिका विज्ञायते' इति वसिष्ठवचनात् पुत्रकोटिनिविष्टायाः पुत्रिकायाः औरसपुत्रवत् सत्यामपि पत्न्या पितृरिक्थहरायाः पत्न्यभावे रिक्थग्राहितावोधकेषु पत्नीदुहितरश्चेत्यादिषु वचनेषु दुहितृशब्देन ग्रहीतुमुपयुक्तत्वात्। रत्न.१५४

(५) पुत्राभावे सर्वाननुक्रम्य वचनात् सर्वाभावे दुहिता हरेत्। अपुत्रस्य पुत्रिकापुत्रेण तुल्यसतानदर्शनात्। 'तस्यामात्मनि तिष्ठन्त्या कथमन्यो धनं हरेत्' इति, '(स) दौहित्रोऽप्यमुत्रैन सतारयति पौत्रवत्' इति चोक्तः। द्वावपि संतानकारकौ। तस्मात् पुत्राभावे तत्तुल्यत्वादन्येभ्यः प्रत्यासत्तेर्दुहिता हरेत्। नाभा.१४।४७

(६) पत्न्या व्यभिचारिणीत्वे त्वाह नारदः—पुत्राभाव इति। वीमि.२।१३६

[1]यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्॥
[2]अभावे तु दुहितॄणां सकुल्या बान्धवास्तथा।
ततः सजात्याः सर्वेषामभावे राजगामि तत्॥
[3]अन्यत्र ब्राह्मणात् किन्तु राजा धर्मपरायणः।
तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः॥

(१) इत्यवरुद्धस्त्रीविषयम्। स्त्रीशब्दग्रहणात्। ×मिता.२।१३५

(२) तदीयस्त्रीणामपत्नीना वर्त्तनधनदान, पत्नीना पुनः कृत्स्नधनेऽधिकारितेत्यविरोधः। दा.१६८

(३) अत्र अभावे दुहितॄणामिति पित्रोरप्यभाव उपलक्ष्यते। तत्स्त्रीणामपरिणीतानां स्वैरिणीना वा पुनर्भ्वा वा। अप.२।१३६

(४) तत्स्त्रीणा ब्राह्मणेतरधनस्वामिस्त्रीणा धनभागेत्वानर्हाणामित्यर्थः। +स्मृच.३०२

(५) सकुल्याः पितृव्यपुत्रादयः, सजात्या एकजातीयाः, किन्त्वित्यादिनिर्धनब्राह्मणस्त्रीविषयम्। विर.५९७

(६) दुहित्रभावे सकुल्याः सपिण्डाः। तदभावे बान्धवाः सबन्धिनः। तदभावे सजात्याः समानजातीया मित्रभूताः। तदभावे राजा हरेत्। राजगामीत्युक्त, तदन्यत्र ब्राह्मणात्। तत्तु ब्राह्मणेभ्य एव देय, न भाण्डागारं प्रवेशयेद् धार्मिकः। इतरो हरेदपि धर्मनिरपेक्षः। यदेतरेपा हरति तदा स्त्रीणा जीवनं दत्त्वा शेष हरेत्। एप दायधर्मः। नाभा.१४।४९

[4]ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन।
ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा॥

तन्नाशे अर्थस्वामिनाशे। स्मृच.३०२

[5]क्षत्रियादेस्तु राजैव गृह्णीयात् ब्राह्मणस्य न॥

बृहस्पतिः

अपुत्रमृतसर्वधनभाक् पत्नी साध्वी एव

*[6]आम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः।

(१) **दा.**१७५ तिष्ठ (जीव) धनं हरेत् (हरेद्धनम्) मनु. नारदौ; **अप.**२।१३६; **व्यनि.**; **विच.**१२४ दावत्.

(२) **नासं.**१४।४८ तु दुहितृणा (दुहितॄणां तु); **नास्मृ.**१६।५१ था (तः) त्याः (ति), **अप.**२।१३६ तु (च); **व्यक.**१६१ तु दुहितृणा (दुहितॄणां च); **विर.**५९७, **स्मृसा.**१३६-७ व्यकवत् : १४३, **स्मृचि.**३३अभावे तु (पुत्राभावे); **बाल.**२।१३५ (पृ.१९६) तु दुहितृणा (दुहितॄणां वै).

(३) **नासं.**१४।४९ त्र (त्तु) किन्तु (तत्तु); **नास्मृ.**१६।५२ णात् किन्तु (णेभ्यः स्याद्) त्स्त्रीणा (त्स्त्रीभ्यो); **मिता.**२।१३६; **दा.**१६८; **अप.**२।१३६, **गोमि.**२८।१९ बृहस्पतिः; **उ.**२।१४।२ बृहस्पतिः; **स्मृच.**३०२; **विर.**५९७; **स्मृसा.**१२८,१३७,१४३; **पमा.**५३५ किन्तु (किञ्चित्); **व्यनि.**(=); **नृप्र.**४१ दाय (दान); **व्यप्र.**५१०, **व्यउ.**१५३ दायविधिः स्मृतः (धर्मः सनातनः); **व्यम.**६१ पमावत्, **विता.**१८६ पमावत्; **समु.**१४३.

× पमा., व्यउ., व्यम. मितागतम्। स्मृसा. बालरूपमत हलायुधमतं मितागतम्। पारिजातमत विरगतम्।

+ व्यप्र. स्मृचगतम्।

* एषां सप्तश्लोकानां मनु.व्याख्यान 'अनन्तरः सपिण्डाद्यः' इति मनुवचने (पृ.१४७७) द्रष्टव्यम्।

(१) **मिता.**२।१३६; **स्मृच.**३०२; **पमा.**५३०; **मपा.**६७५ र्थस्य (र्थं च); **सवि.**४२०; **व्यप्र.**५३१ णायै (णस्यै); **व्यउ.**१५६; **विता.**४१०; **राकौ.**४५७; **बाल.**२।१३५ (पृ.२२४) प्रथमपादः; **समु.**१४३.

(२) **विव्य.**३०.

(३) **दा.**१४९; **अप.**२।१३५ जाया (भार्या); **व्यक.**

शरीरार्धं स्मृता जाया पुण्यापुण्यफले समा ॥
यस्य नोपरता भार्या देहार्धं तस्य जीवति ।
जीवत्यर्धशरीरेऽर्थं कथमन्यः समाप्नुयात् ॥
कुल्येषु विद्यमानेषु पितृभ्रातृसनाभिषु ।
असुनस्य प्रमीतस्य पत्नी तद्भागहारिणी ॥
पूर्वं प्रमीताग्निहोत्रं मृते भर्तरि तद्धनम् ।
विन्देत्पतिव्रता नारी धर्म एष सनातनः ॥

जङ्गमं स्थावरं हेम कुप्यं धान्यं रथाम्बरम् ।
आदाय दापयेच्छ्राद्धं मासषाण्मासिकादिकम् ॥
पितृव्यगुरुदौहित्रान् भर्तुः स्वस्रीयमातुलान् ।
पूजयेत्कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः ॥

---

१६०. **स्मृच.**२९०; **ममु.**९।१८७, **विर** ५८९; **स्मृसा.** १३४ र्धं स्मृता (र्धहरा : १४०; **रत्न.**१५२; **व्यनि.** प्रचेता.; **स्मृचि.**३२; **सवि.**४०६ (=), **व्यप्र.**४९३, **विता.** ३८३ र्धं (र्ध.) जाया (भार्या); **समु.**१४० जाया (भार्या) समा (पु च)

(१) **दा.**१४९; **अप.**२।१३५; **व्यक.**१६०; **स्मृच.** २९०ऽर्थं (च); **ममु.**९।१८७ऽर्थ (तु) समा (स्वमा), **विर.** ५८९; **स्मृसा.**१३४ऽर्थं (तु) : १४०; **रत्न.**१५२ रेऽर्थं (रस्य); **स्मृचि.**३२ऽर्थं (र्द्धं); **व्यनि.** प्रचेताः, **सवि.**४०६ (=)ऽर्थं (ऽपि); **व्यप्र** ४९३; **विता.**३८३ हार्धं (हार्धः) र्ध-शरीरेऽर्थं (र्धे शरीरस्य); **बाल** २।१३५ (पृ.२०६) र्धशरीरेऽर्थं (र्धे शरीरे तु); **समु.**१४० रता (हता)ऽर्थं (च).

(२) **मिता.**२।१३५; **दा.**१४९-५० : १७० पूर्वार्धे (सकुल्यैर्विद्यमानैस्तु पितृमातृसनाभिभिः); **अप.**२।१३५ कुल्येषु विद्यमानेषु (सकुल्यैर्विद्यमानैस्तु) भिषु (भिभिः); **व्यक.**१६० पूर्वार्धे (सकुल्यैर्विद्यमानैस्तु पितृभ्रातृसनाभिभिः); **स्मृच.**२९०; **ममु.**९।१८७ सुत (पुत्र) शेष दावत्; **विर.** ५९० दावत्; **स्मृसा.७१** अपवत् : १२८,१३४ दावत्: १४०-४१ ममुवत्; **पमा.५२३** तद्भाग (तद्धन); **दीक.** ४५ (=) दावत्; **रत्न.**१५२; **विचि.**२३६ सुत (पुत्र) शेष अपवत्, **व्यनि.** पितामहः; **स्मृचि.**३२ अपवत्; **नृप्र.**४० पमावत्; **सवि.**४०६ (=) पत्नी तद्भा (तत्पत्नी भा), **मच.** ९।१८७ ममुवत्; **व्यप्र** ४९३ पू. ४९४ उत्त., ममुवत्, **व्यउ.**१५२ तद्भा (स्याद्भा), **विता.**३८३; **राकौ.**४५५ सनाभि (सुतादि); **समु.**१४०.

(३) **दा.**१५० प्रमी (प्रमी) नारी (साध्वी); **अप.**२।१३५ प्रमीता (मृता त्व); **व्यक.**१६०, **स्मृच.**२९१ पूर्वं (पूर्व) विन्दे (लभे) प्रजापतिः; **ममु.**९।१८७ पूर्वं (पूर्व); **विर.** ५९०; **स्मृसा.**१३४ एष (एव) : १४१; **रत्न.**१५२ विन्दे (लभे) शेषं अपवत्, प्रजापति.; **विचि.**२३६; **व्यनि.** (पूर्वं मृता हरेदग्निमनूढा च हरेदधम्) पू.; **मच.**९।१८७ ममुवत्; **व्यप्र.**४८९ प्रमीता (मृता त्व) विन्दे (लभे) प्रजापतिः; **व्यम.** ६१ व्यप्रवत्, प्रजापति; **विता.**३८३-४ एष (एव) प्रजापतिबृहस्पती; **बाल.**२।१३५ (पृ.२३०) व्यप्रवत्, प्रजापतिः; **समु.**१४० व्यप्रवत्, प्रजापतिः : १४० (पूर्वं मृता हरेदग्नि-मन्वारूढा हरेदधम्) पू.

(१) **दा** १५० रथा (रस्या); **अप.**२।१३५ कुप्य धान्यं रथा (रूप्यधान्यरस्या); **व्यक.**१६० कुप्य धान्य रथा (कुप्य-धान्यरस्या); **स्मृच** २९१ दावत्, प्रजापतिः; **ममु** ९।१८७ रथा (अथा); **विर.**५९० कुप्य (रूप्यं); **स्मृपा.**१३४ रथा (रस्या) दापये (दद्यात्त) : १४१ कुप्य धान्य रथा (कुप्यधानरस्या) दापये (दद्यात्त), **पमा.**५२४ रथा (अथा) षाण्मासिका (संव-त्सरा) प्रजापतिः : ५३६ कुप्य धान्यं रथा (रूप्य धान्यरस्या) षाण्मासिका (सवत्सरा); **रत्न.**१५२ प्रजापतिः; **विचि.**२३६ दावत्, **व्यनि.** द्ध (द्धे) दिकम् (दिके) शेषं अपवत्; **नृप्र.**४० द्ध... कम् (द्धे मासवत्सरादिके) शेष व्यकवत्; **सवि.**४०८ कुप्य धान्यं रथा (रौप्यधान्यरस्या) प्रजापतिः : ४०९ व्यकवत्; **व्यप्र.**४८९ दावत्, प्रजापतिः; **व्यम.**६१ हेम (सर्वं) धान्यं रथा (हेमरस्या) दिकम् (ब्दिकम्) प्रजापतिः; **विता** ३८४ द्धं (द्धे) दिकम् (दिके) शेष व्यकवत्, प्रजापतिबृहस्पती; **बाल.** २।१३५ [(पृ.१९३) दावत् : (पृ.२३०) व्यमवत्, प्रजा-पतिः : (पृ.२३८) हेम कुप्यं धान्य रथा (सर्वं हेम रूप्यं रस्या) दिकम् (ब्दिकम्) प्रजापतिः]; **समु.**१४० धान्य रथा (धान्य-रस्या) प्रजापतिः.

(२) **दा.**१५०,१७३; **अप.**२।१३५ भर्तुः स्वस्रीय (स्वसृभर्तृीय), **व्यक.**१६० त्रान् (त्र); **स्मृच.**२९१ स्त्रियः (तथा) प्रजापतिः; **ममु.**९।१८७ तुः (तृ) नाथा (नप्तृ); **विर.**५९०; **स्मृमा.**१३४,१४१ भर्तुः (भ्रातृ); **पमा.** ५२४ स्वस्रीय (श्वशुर) स्त्रियः (तथा) शेषं ममुवत्, प्रजा-पतिः : ५३६ (=) भर्तुः (भर्तृ) स्त्रियः (तथा); **रत्न.**१५२ द्धानाथा (द्धाश्चाप्य) प्रजापतिः; **विचि.**२३६ स्मृमावत्; **नृप्र.** ४० र्तुं स्वस्रीय (तृश्वशुर) स्त्रियः (तथा); **सवि.**४०८ नृप्रवत्, प्रजापतिः; **व्यप्र.**४८९ रत्नवत्, प्रजापतिः; **व्यम.**६१ रत्नवत्, प्रजापतिः; **विता.**३८४ (=) पू.; **बाल.**२।१३५ (पृ.१९३: २३० प्रजापतिः, २३८ प्रजापतिः) रत्नवत्; **समु** १४० स्मृचवत्, प्रजापतिः; **विच.**१२२ स्मृचवत्, प्रजापतिः.

तत्सपिण्डा बान्धवा वा ये तस्याः परिपन्थिनः। हिंस्युर्धनानि तान् राजा चोरदण्डेन शासयेत्॥

(१) तदेतैः सप्तवचनैरपुत्रस्य मृतस्य यद् यावद्धनं स्थावरजङ्गमहेमादिकं भर्तुस्तत्सर्वं सोदरभ्रातृपितृव्यदौहित्रादिषु सत्स्वपि पत्न्या एवेति, ये तु तद्धनग्रहणे प्रतिपक्षाः स्वयमेव वा गृह्णन्ति ते चोरवद्दण्डनीया इति ब्रुवाणो बृहस्पतिः पत्नीसद्भावे पितृभ्रातृप्रभृतीना धनाधिकारं सुदूरं निरस्यति। दा.१५०-५१

पितृव्यपदं भर्तुः सपिण्डपरम्। दौहित्रपद भर्तुर्दुहितृसतानपरम्। स्वस्रीयपद भर्तुः स्वसृसतानपरम्। मातुलपद च भर्तुर्मातृकुलपरम्। तदेवमादिभ्यो दद्यात् न पुनरेतेषु सत्स्वेव स्वपितृकुलेभ्यः पितृव्यादिवचनानर्थक्यात्। दा.१७३

(२) अत एव दृष्टादृष्टोपकारकत्वलक्षणसबन्धेनान्यापेक्षया पत्न्याः प्रत्यासन्नत्वमभिधाय बृहस्पतिना गौणपुत्राभावे तिष्ठत्स्वपि पित्रादिषु सकुल्यान्तेषु पत्न्या एव पतिधनभागित्व दर्शितं—आम्नाये स्मृतितन्त्रे चेत्यादिभिः। अत्र द्वितीयार्धेन दृष्टादृष्टोपकारसपादने पित्रादिभ्यः पत्न्याः प्रत्यासन्नत्वमभिहितम्। अवयवार्थस्तु आम्नाये वेदे 'अर्धो वा एष आत्मनो यज्जाये'त्येवमादौ आत्मनो देहस्येत्यर्थः। एतदुक्तं भवति। देहार्ध अर्धाङ्गं यथा दृष्टादृष्टोपकारि तद्वज्जायाऽपीति। स्मृतितन्त्रे धर्मशास्त्रे 'पतेदर्धं शरीरस्य यस्य भार्या सुरा पिबेत्। पतिताधशरीरस्य निष्कृतिर्न विधीयते॥' इत्येवमादौ। लोकाचारे लोकाचारानुमतार्थशास्त्रे 'शरीरार्धमर्धी जाया को हि हास्यति पण्डितः' इत्येवमादौ। पुण्यापुण्यफले समा कर्मणि समाधिकारात्। असुतस्य मुख्यगौणसुतहीनस्य पत्नी यज्ञाधिकारापादकप्रशस्तब्राह्मादिविवाहसंस्कृता 'पत्युर्नो यज्ञसंयोगे' इति पाणिनिस्मरणात्। तेन क्रीता भार्या पत्नीपदेन व्यावर्तिता। तस्याः पत्नीत्वायोगात्। तथा च स्मृत्यन्तरं 'क्रयक्रीता तु या नारी न सा पत्नी विधीयते। न सा दैवे न सा पित्र्ये दासी तां कवयो विदुः॥'[1] पत्नीत्वाभावे केवल दृष्टोपकारकत्वमेव नादृष्टोपरकारकत्वं स्त्रिया इति दर्शयितु दासी विदुरित्युक्तम्। एव च पित्र्यादिकर्मण्यर्हताऽपि पतिभागहारित्वे प्रयोजिकेति पत्नीग्रहणेन ज्ञापितम्। अत एव श्रौतस्मार्तादिकर्मणि पातिव्रत्येन परीक्षिताधिकारार्हतया एव पत्न्याः पतिधनलाभ इत्याह प्रजापतिः—पूर्वप्रमीतामग्निहोत्रमित्यादि। अग्निहोत्रशब्देन तत्साधनाग्निर्लक्ष्यते। पतिव्रता सुसंयता। व्रतनिमि(त्त)त्वेन श्रौतस्मार्तकर्माधिकारार्हता भर्त्रा सह वासेन स्थितेति यावत्। नारी पत्नी। स्मृच.२९०-९१

(३) केचित्स्त्रियाः पार्वणमप्यादुस्तन्निषेधाय श्राद्धानि परिगणयति—मासपाण्मासिकादिकमिति। अत्र मासशब्देन द्वादशमासिकान्युच्यन्ते। षाण्मासिकशब्देन द्वे ऊनषाण्मासिके। आदिशब्देन एकादशसपिण्डनप्रत्यब्दकर्त्तव्यक्षयाहश्राद्धानि गृह्यन्ते। अतो नान्यत्कुर्यात्, अन्यथा वचनान्तरैरेव एतेषा श्राद्धाना सिद्धत्वाद्वचनमिदमनर्थक स्यादिति। तथा दापयेदिति स्वार्थे णिच्, रामो राज्यमकारयदितिवत्। पतिव्रता साध्वी। उदयकरस्तु मनुटीकाया पतिव्रताशब्द मुख्यार्थ विवक्षन्ननुमरणान्तत्वात्पातिव्रत्यस्य दापयेदिति पारार्थ्यमेवाह। एव च पतिव्रतात्वेतरगुणसंपन्नानामप्यधिकारो न स्यादिति बहवं नादियन्ते। एवमपुत्रधने विद्यमानाया साध्व्या भार्याय. तस्या अधिकारः। *विर.५९०-९१

(४) कुप्य त्रपुसीसादिकम्। कव्यं पित्रुद्देशेन त्यक्त अन्नादिकम्। पूर्तमत्र खातादिकर्माङ्गभूतदानादिकम्। +रत्न.१५२

(५) इद च विभक्तपतिधनपरम्। पतिव्रता साध्वी। न तु पतिव्रतैव। अनुमरणपर्यन्तेन पतिव्रतत्वनिश्चयाद्धनग्रहणाभावापत्तेः। तथा च साध्वी भार्या पत्युः प्रणी-

(१) **दा.**१५०; **अप.**२।१३५ वा वा (वाश्च); **व्यक.**१६० तस्याः (ऽन्ये स्युः), **स्मृच.**२९४ वा वा (वाश्च) चोर (चौर्य) प्रजापतिः; **ममु.**९।१८७; **स्मृसा** ७१ वा ये तस्याः (ये तस्याः स्युः) तान् राजा (राजा तान्):१३४ वा ये तस्याः (ये तस्याः स्युः):१४१ वा ये तस्याः (ये तस्याः स्युः) शास (शात); **रत्न** १५४ शास (दण्ड) प्रजापतिः; **विचि.**२३७ स्मृसा (पृ १३४) वत्; **व्यनि.** रत्नवत्; **स्मृचि.**३२ तत्स (स) वा ये तस्याः (ये च तस्याः स्युः); **व्यप्र.**४८९ तत्स (स) वा ये तस्याः (ये तु तस्याः स्युः) प्रजापतिः; **विता.**३८४ (—); **बाल.**२।१३५ (पृ.१९३) शास (घात) शेष व्यप्रवत्; **समु.**१४१ प्रजापतिः.

* स्मृतिसारोद्धृतपारिजातमतस्थं हरिहरव्याख्यानं विरगतम्। + शेष स्मृचगतम्।

त्रान्ताभावे तद्धनार्हा । विचि.२३७

(६) अत्र केचित् विवाहसंस्कृता जाया पत्नीत्युच्यत इति चन्द्रिकाकारोक्तमित्यनुपपन्नम् । विवाहसस्कारस्य पत्नीत्वोपपादकत्वाभावात् । पत्नीत्व नाम पतिभार्यासम्बन्धव्यतिरेकेण न किञ्चिदस्ति । तच्चार्याजकरूपक्रियागर्भः सबन्धः । स च लौकिक एव । अत एव महापातकादौ भार्यात्वस्य निवृत्तिः । भूतपूर्वगत्या भार्याभिमानः । न च विवाहे मन्त्रनियमो भार्यात्वोत्पादकः, तस्य वैधदानसिद्धत्वादित्युक्तं लिप्मासूत्रे गुरुणेत्याहुः । तन्न, गुरुणा तु पत्नीगत स्वत्वमेव लौकिकमित्युक्त न पत्नीत्व, स्वत्वपत्नीत्वयोर्भेदात्, यज्ञसंयोगात् पत्नी, स्वामिसबन्धात्स्वमिति । महापातकादौ भार्यात्वस्यापि वियोग इति । गुरुग्रन्थस्यायमर्थः—भार्यात्व नाम स्वत्व, न तु पत्नीत्व, अन्यथा प्रायश्चित्ते कृते पुनः पत्नीत्व न स्यादित्युक्त भारुचिना । अयमेवाभिप्रायः चन्द्रिकाकारादीनामिति सुष्ठूक्त ब्राह्मादिविवाहे संस्कृता जाया पत्नीत्युच्यत इति । सवि.४०७

(७) दापयेद्विप्रद्वारा कारयेन्न स्वय कुर्यादिति स्मृत्यर्थसारः । 'अनुपेतश्च पत्नी च वाहमात्रममन्त्रकम् । कुर्यातामितरत्सर्वं कारयेदन्यमेव हि ॥' इति सुमन्तूक्तेः । विता.३८४

पत्न्यभावे दुहिता दौहित्रश्चापुत्रमृतधनभाक्

भर्तुर्धनहरी पत्नी तां विना दुहिता स्मृता ।
अङ्गादङ्गात्संभवति पुत्रवद्दुहिता नृणाम् ।
तस्मात् पितृधनं त्वन्यः कथं गृह्णीत मानवः ॥

ता विना तस्या अप्यभाव इत्यर्थः । शरीरावयवसबन्धेन दुहिता पुत्रसमा । पुत्रे हि पित्रवयवा बाहुल्येन संक्रामन्ति । दुहितरि त्वल्पाः 'पुमान्पुसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः' इति स्मरणात्तेन किञ्चित्साम्यात्पुत्रवदित्युक्तम् । अन्यः पुत्रपत्नीभ्यतिरिक्तः । पित्रादिः मानवः तिष्ठन्त्या दुहितरि कथमपुत्रधन गृह्णीतेत्यर्थः । नन्वेवमपि गौणपुत्रपत्न्योरभावे दुहितेति क्रमे न्यायो नोक्तः । औरसाभावमात्रे दुहितेत्येतावन्मात्रसाधकत्वादुक्तन्यायस्य । सत्यम् । किन्त्वेवमेव गौणपुत्रपत्न्योरभावे दुहितेत्यत्रापि क्रमे न्याय ऊहनीय इत्यभिप्रायेणोक्तम् ।

दुहितृषु सतानमुखेनादृष्टोपकारसबन्धनेनासन्नता । न चैतावता निमित्तेन पुत्राभावे तिष्ठन्त्या पत्न्यां दुहिता धनमर्हति । पत्न्याः साक्षादग्निहोत्रादिजन्यादृष्टोपकारसहकारित्वात् ।

एव सोपपत्तिकीं पत्न्यभावे दुहितृगामिता ब्रुवता बृहस्पतिनैव यद्दुहितृगामि धनमिति विधायक वचनजात तत्पुत्रिकाविषयमेव न पुनरपुत्रिकादुहितृविषयमिति धारेश्वरदेवस्वामिदेवरातमतम् । स्मृतितन्त्राभिज्ञत्वाभिमानोन्मादकल्पित निरस्तं वेदितव्यम् ।

तथाहि 'तृतीयः पुत्रः पुत्रिका विज्ञायते' इति (वस्मृ. १७।१५) वसिष्ठस्मृत्या गौणपुत्रकोटिनिविष्टायाः पुत्रिकायाः पत्न्या सत्यामपि क्षेत्रजादिरिव 'न भ्रातरो न पितरः पुत्रा ऋक्थहराः पितुः' इत्यादिवचनान्तरैरेव औरसाभावे ऋक्थग्राहिण्याः पत्न्या अभावे दण्डापूपन्यायेन धनभागित्वे सिद्धे पुनः कि सोपपत्तिक धनभागित्वं स्मर्तु बृहस्पत्यादीना वचनान्तरारम्भेण, तेन तैरेव तन्मत निरस्तमिति अल धारेश्वरादिमतान्तरनिराकरणयत्नेनाश्राद्धीयेन । यत्तु नारदेन पुत्रहीनपत्नीमधिकृत्योक्त 'स्यात्तु चेद्दुहिता तस्याः पित्र्योंऽशो भरणे मतः । आसंस्काराद्धरेद्भागं परतो विभृयात्पतिः ॥' इति । तस्यार्थः । तस्याः पत्न्याः पुत्ररहिताया गताया यदि दुहिता विद्यते तदा दुहितुर्भरणाय पित्र्यशोऽभिमतः । तस्मादाविवाहसंस्काराद्धरणार्थमेव दुहिता पितृभागहरा न पुनर्यथेष्टवियोगार्थमिति । एवं च सर्वासामेव कन्याना पितृभ्रातृरहितानां पितृधनप्राप्तिरुत्सर्ग इति

(१) **मिता.**२।१३५; **दा.**१७८ स्मात् (स्याः) अन्त्यार्धद्वयम्; **अप.**२।१३५ स्मात् (स्या) अन्त्यार्धद्वयम्, **स्मृच.** २९४:२९९ द्वितीयार्धम्; **वीर.**५९१ दावत्, अन्त्यार्धद्वयम्; **स्मृसा.**१२९,१४१ दावत्, अन्त्यार्धद्वयम्; **पमा.**५२४; **रत्न.**१५४ अन्त्यार्धद्वयम्; **विचि.**२३८ दावत्, अन्त्यार्धद्वयम्; **व्यनि.** भर्तुर्धन (पत्युर्य) स्मात् (स्या.), **नृप्र.** ४० प्रथमार्धद्वयम्; **सवि.**४१२ वति (वन्ती) पितृ (पितु·); **वीमि.**२।१३५ तृतीयार्धे (तस्यामात्मनि जीवन्त्या कथमन्यो धन हरेत्) अन्त्यार्धद्वयम्; **व्यप्र.**५१७ अन्त्यार्धद्वयम्; **व्यउ.** १५४ प्रथमार्धः, मनुः; **विता.**४०० पितृ (पितुः) अन्त्यार्धद्वयम्; **बाल.**२ १३५ (पृ.२२३) गृह्णीत (गृह्णाति); **समु.** १४१.

गम्यते । ततश्चास्यापवादकानि दुहितुः पितृधनप्राप्ति-प्रतिपादकानि वचनानि सर्वाणि पुत्रिकाविषयाण्येवेति वाच्यम्। दौहित्रमातृविषयत्वे तु उत्सर्गवत्सामान्यतया तदपवादाक्षमत्वादनर्थकानि भवेयुः। तस्माद्धारेश्वरादीनामेव मतमनुसर्तव्यम्। स्यादेव यदि नारदवचनं विभक्तविषय स्यात्। ससृष्टविषय तु तदिति तस्यैव पूर्वापरपर्यालोचनया स्पष्टमवगम्यते । ततश्च विभक्तविषये यानि दुहितृदायप्रतिपादकानि वचनानि तेषा तत्र प्रापकत्वमेव नापवादकत्वमिति न पुत्रिकाविषयत्वकल्पने किञ्चिन्मूलमुपलभामहे इत्यलमतिबहुना ।

*स्मृच.२९४ ६

सदृशी सदृशेनोढा साध्वी शुश्रूषणे रता ।
कृताऽकृता वाऽपुत्रस्य पितुर्धनहरी तु सा ॥

(१) सदृशी पितृसवर्णा । सदृशेनोढेति उत्तमाधमवर्णपरिणीतानिरासार्थं, उत्तमाधमपरिणीतादुहितृजातस्य अधमोत्तमवर्णमातामहादिश्राद्धनिषेधात् सवर्णेनोढायास्तु पुत्रद्वारेण पित्रुपकारकत्वात्। पुत्रिकापुत्रस्य तु पुत्रवदेवोपकारकत्वातिशयेन पुत्रिकायाः पुत्रतुल्यत्वात् पुत्रिकौरसयोः समधनाधिकारः, अपुत्रिकायास्तूढायाः पुत्रादिन्यूनोपकारकस्वपुत्रद्वारेणोपकारकत्वमिति कन्यापर्यन्तानामभाव एव धनाधिकारिता युक्ता । न च वाच्य एवं तर्हि पुत्रवत्या एव प्रथमाधिकारोऽस्तु तदभावे तु सभावितपुत्राया इति यतस्तस्याः पश्चादुत्पन्नस्य दौहित्रस्यानधिकारापत्तेः, न च तद्युक्तं दौहित्रतया द्वयोरप्युपकाराविशेषात्। भर्तृशुश्रूषापरत्वेनावैधव्य प्रदर्शयन् सभावितपुत्रता प्रदर्शयति । सेति च पूर्ववचनोपात्ता दुहिता परामृश्यते, तदेवं सदृशी सदृशेनोढा इत्यादिविशेषणात् न दुहितृमात्रतया पितृधनाधिकारितेति दर्शयति । अन्यथा 'अङ्गादङ्गात् सभवति पुत्रवद्दुहिता नृणाम्। तस्याः पितृधन त्वन्यः कथ गृह्णीत मानवः॥' इत्यनेन दुहित्रधिकारे कथिते सदृशी सदृशेनोढेत्यादिना तस्यैवाभिधान पुनरुक्त स्यात्। सामान्यप्राप्तेस्तु विशेषकथनमपुनरुक्तमेव । यत एव स्वपुत्रद्वारेण पिण्डदातृतया दुहितुः पितृधनाधिकारः। अत एव पुत्रिकाया अपि पित्रुपरमजातधनसंबन्धायाः पश्चाद्वन्ध्यात्वेन तद्भर्तुर्वा प्रसवासामर्थ्येन विपर्यस्तपुत्राया मरणे तद्धन न भर्तुः। *दा.१७७–८

(२) सदृशी सवर्णा । अतोऽसवर्णाया दुहितुरनधिकारो दायहरत्वे। कृताऽकृता पुत्रिकेत्यर्थः। अत्र च कृताऽकृता वेत्यनेन पुत्रिका दृष्टान्ततयोपादीयते, न पुनस्तस्या अपुत्रपितृधनग्राहित्वं विधीयते। न हि पुत्रिकापिताऽपुत्र इति शक्यते वक्तु, पुत्रिकाया अपि पुत्रत्वात् । +अप.२।१३५ (पृ.७४३–४)

(३) बृहस्पतिस्तु पत्न्या ऊर्ध्वमर्थग्राहिणीना मुख्यपुत्रायूर्ध्वमर्थग्राहिणीना च दुहितृणा विशेषणान्याह— सदृशीति । सदृशी पितुः सवर्णा । यानि चत्वारि विशेषणानि पत्न्य ऊर्ध्वं धनहरीदुहितृविषयाणि । प्राग्धनग्राहिण्या दुहितुर्विशेषणत्वेनावशिष्टकृताकृतेत्यत्र पुत्रिकेति विशेष्यस्याध्याहारः कार्यः । इतरत्र दुहितेति विशेष्यस्याध्याहारः कार्यः । वाशब्दोऽत्र व्यवस्थितविकल्पाभिधानार्थः । एवं चायमर्थः । औरसपुत्रविहीनस्य पितुर्धन द्विविधाऽपि पुत्रिका पत्न्याः पूर्वं गृह्णीयात्। सवर्णादिविशेषणोपेता दुहिता तु ऊर्ध्वमिति। एव च पत्न्या ऊर्ध्वं सवर्णादिविशेषणोपेताप्रतिष्ठितानूढाना दुहितृणा समवाये अनूढैव गृह्णाति । पित्रा भर्तव्यत्वात्। तदभावे त्वप्रतिष्ठिता भर्त्रा भर्तव्यत्वेऽपि भर्तुर्भरणसमर्थत्वाभावेनाप्रतिष्ठितत्वात्। तदभावे सवर्णादिविशेषणोपेता प्रतिष्ठितत्वेऽपि धनग्रहणयोग्यत्वात्। तदभावे दौहित्रस्तत्कोटित्वादित्यनुसंधेयम्। दौहित्र-

---

* शेष 'पुत्राभावे तु दुहिता' इति नारदवचने (पृ. १५११) द्रष्टव्यम् । सवि. स्मृचवद्भावः । व्यप्र. स्मृचगतम् ।

(१) **दा.**१७६ साध्वी (भर्तृ); **अप.**२।१३५; **व्यक.**१६०; **स्मृच.**२९६; **विर.**५९१; **स्मृसा.**७१,१३०,१३५ उत्तरार्धे (अकृता वा कृता वापिपितृधनहरी तु सा) · १४१ कृता...त्रस्य (कृता वाप्यकृता वाऽपि); **पमा.**५२४ पू.; **रत्न.**१५४ सदृशी (सदृशा) पू.; **दीक.**४५ रता (तथा); **विचि.**२३८ तु सा (भवेत्); **स्मृचि.**३२ कृता...त्रस्य (अकृता वा कृता वापि); **वीमि.**२।१३५ तु सा (मता); **व्यप्र.**५१९ (=); **व्यउ.** १५४ पू.; **सेतु.**४४; **समु.**१४१-२ तु सा (सुता).

* विच., सेतु. दागतम् ।

+ स्मृसा. अपगतम् । बालरूपमते य ऊढानूढाक्रमः स स्मृचगतः । विचि. अपगतम् । बालरूपमतं स्मृचगतम् ।

स्याभावे तु पित्रपेक्षयाऽन्यस्यासन्नत्वाभावात् 'पिता हरेदपुत्रस्य ऋक्थं' इत्युक्तस्यावसरत्वात्पितृगामि धनं भवतीति अस्मिन्नेवावसरे मात्रपेक्षयाऽन्यस्यासन्नतरत्वाभावात् 'अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्' इति उक्तस्यावसरसत्वान्मातृगामि धन भवति ।

*स्मृच.२९६–७

यथा पितृधने स्वाम्यं तस्याः सत्स्वपि बन्धुषु ।
तथैव तत्सुतोऽपीष्टे मातृमातामहे धने+ ॥

(१) यथा येन दौहित्रदेयपिण्डेन दुहिता पितृधनाधिकारिणी तथैव तेनैव पिण्डदानेन दुहितृसुतोऽपि मातामहधने स्वामी सत्स्वपि पित्रादिषु । न च पुत्रिकापुत्राभिप्रायेणेद वचन 'कृताऽकृता वाऽपुत्रस्य पितुर्धनहरी तु सा' एतद्वचनोपात्तकृताऽकृतदुहित्रोरेव तस्या इति तत्सुत इति तत्पदेन परामर्शात् प्रत्यासत्त्यतिरेकाद्वा अकृतापरामर्श एव युक्तो न तु तत्परित्यागः ।

दा.१८०

किञ्च स्मृतिषु दौहित्रपदमपुत्रिकाजातपरं नियतम् । यथा बौधायनः—'अभ्युपगम्य दुहितरि जातं पुत्रिकापुत्रम् । अन्य दौहित्रम् ।' विद्यादित्यनुवर्त्तते । अत एव भोजदेवेनापि कृताऽकृतदुहित्रधिकारे बृहस्पतिरित्यभिधाय 'यथा पितृधने स्वाम्यमि'ति वचन लिखितम् । तथा गोविन्दराजेनापि मनुटीकायाम्—'अपुत्रपौत्रे ससारे दौहित्रा धनमाप्नुयुः । पूर्वेषा तु स्वधाकारे पौत्रदौहित्रकाः समाः ॥' एतद्विष्णुवचनबलेन ऊढातः प्रागेव दौहित्रस्याधिकारो दर्शितः । स चास्मभ्यं न रोचते 'सदृशी सदृशेनोढे'त्यादिविरोधात् । किन्तु ऊढायाः प्रागुक्तरूपाया अभाव एव सत्स्वपि पित्रादिषु दौहित्र स्याधिकारः तथैवेति दुहितृवद्भावविधानात् तत्सुतोऽपीत्यप्यर्थतया च निर्देशात् दौहित्रस्य जघन्यताधगनेः । अतो दुहित्रनन्तरं दौहित्रस्याधिकार इति सिद्धम् । सत्स्वपि बन्धुष्वित्यनेन पित्रोरधिकारः पत्न्यभावे न्याय्योऽपि दुहितृदौहित्राभ्या बाधित इति बाधकाभावे पित्रोरधिकारः सूचितः । +दा.१८१–२

(२) कृताकृतदुहित्रधिकारे बृहस्पतिः—यथेति ।

व्यक.१५६

अपुत्रमृतधनभाजः क्रमेण माता भ्राता तत्पुत्रः प्रत्यासन्ना. सपिण्डाः सकुल्या बान्धवाः शिष्याः श्रोत्रियाश्च

भार्यासुतविहीनस्य तनयस्य मृतस्य तु ।
माता ऋक्थहरी ज्ञेया भ्राता वा तदनुज्ञया*॥

(१) तत् पितृपर्यन्ताभावे बोद्धव्यम् । न्यायगत चैतत् दौहित्रात् परतो मातृतश्च पूर्व पितुरधिकार इति मृतपिण्डमृतभोग्यान्यपिण्डद्वयदातुर्दौहित्रात् मृतभोग्यान्यपिण्डद्वयमात्रदातृतया पितुर्जघन्यत्वात्, मात्रादिभ्यस्तु मृतभोग्यान्यपिण्डद्वयदातृतया 'बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते' (मस्मृ.९।३५) इति मनुवचनावगतोत्कर्षेण च बलवत्त्वात् । दा.१८६

(२) पित्रोरभावे भ्रातरस्ते तु सोदरा एव प्रत्यासन्नतरत्वात् । ते हि मृतभ्रात्रपेक्षयैकस्यैव मातृवर्गस्य श्राद्धकारिणो न तु सापत्नाः । अप.(पृ.७४४)

पितुरभावे माता, मात्राऽनुमतो वा भ्रातैव ।

अप.२।१३५(पृ.७४५)

(३) भार्याग्रहण न्यायवचनतो बद्धक्रमाणा दुहितृदौहित्रपितृणामुपलक्षणार्थम् । तेन सुतभार्यादुहितृदौहित्रपितृविहीनस्येत्यर्थो विज्ञेयः । स्मृच.२९९

---

* व्यप्र. स्मृचगत, जीमूतवाहननिरासः 'पत्नी दुहितरश्चैव' इति याज्ञवल्क्यवचने (पृ.१५०२) द्रष्टव्यः ।

+ स्मृतिसारोद्धृतबालरूपमत 'पत्नी दुहितरश्चैव' इति याज्ञवल्क्यवचनस्य दा.व्याख्याने गतम् ।

(१) **दा.**१८०; **व्यक.**१५६, **विर.**५६१; **स्मृसा.** १३०, **विचि.**२३९, **व्यप्र.**५२१; **व्यउ.**१५४ म्य(मी) स्या. (स्याऽ); **विता.**४०२ मद्दे धने (मद्दं धनम्); **बाल.**२।१३५ (पृ.२०७) उत्तरार्धे (तथैव तत्सुतानां च तदभावे तु धर्मतः); **सेतु.** ४४ पितृधने (पितृधन) स्याः (स्याऽ); **विच.**१२५ तथै (तनै).

* सुबो. व्याख्यान 'पत्नी दुहितरश्चैव' इति याज्ञवल्क्यवचने (पृ.१४९५) द्रष्टव्यम् । बाल. सुबोगतम् ।

(१) **दा.**१८६ तु (च); **अप.**२।१३५; **व्यक.**१६०दावत्; **स्मृच.**२९९; **विर.**५९१ दावत्; **स्मृसा.**७२-३,१३०, १३१ उत्त : १३५ ज्ञेया (प्रोक्ता) बृद्धबृहस्पतिः :१४१ दावत्; **सुबो.**२।१३५; **विचि** २३९ सुत (सुता); **व्यनि.** तनय (पुरुष); **व्यप्र.**५२६ दावत्, **व्यउ.**१५४-५ (=), **बाल.** २।१३५ [(पृ.२०९,२१३) नयस्य (नयाऽस्य)]; **समु.**१४२ तनय (विभक्त) हरी (हरा); **विच.**१२५-६ **विचिवत्.**

(४) [पारिजातमते] मातृपद पितुरप्युपलक्षणम् । तदनुज्ञया मातापित्रोरनुज्ञया । ×स्मृसा.१३५

तदभावे भ्रातरस्तु भ्रातृपुत्राः सनाभयः ।
सकुल्या बान्धवाः शिष्याः श्रोत्रियाश्च धनार्हकाः ॥

(१) तच्छब्देन दौहित्रस्य पित्रोश्च सूचितयोः परामर्शः । तेनामीषामभावे भ्रात्रादीनामधिकारः । दा.१८३

(२) दुहितृदौहित्रानन्तरं बृहस्पतिः–तदभावे इति । अप.२।१३५

(३) [बालरूपमते] इति भ्रातृतत्पुत्रयोः समानाधिकारः । एतत्पित्रोरनधिकारे । स्मृसा.७२

(४) तच्छब्दः दौहित्रपितृपरः । विश्वरूपभोजराजगोविन्दराजा अप्येवम् । केचित्तु 'भ्रातृपुत्रौ स्वसृदुहितृभ्यामि'ति स्वस्रा सह भ्रातुरेकशेषाद्भगिन्योऽपि सतत्यर्थमाहुः । ते मूर्खा एव, एकशेषे भ्रातृभगिन्योरेकशब्दोक्तेः पौर्वापर्याभावेन सहविभागापत्तेः । तत्सुता इत्यत्र स्वस्रीयभ्रातृपुत्रयोर्भागापत्तेश्च । ससृष्टिभागे 'भगिन्यश्च सनाभयः' 'भगिन्यश्च निजादशादि'त्यत्र पृथङ्निर्देशवैयर्थ्याच्च । विता.४०५

बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा ।
यस्त्वासन्नतरस्तेषा सोऽनपत्यधनं हरेत् ॥

(१) ज्ञातयः सपिण्डाः । सकुल्याः समानोदकाः । स्मृच.३०१

(२) बान्धवाः पितृस्वस्रीयादयः । *रत्न.१५५

अब्राह्मणानां पत्नीभ्रात्रभावे राजाऽपुत्रमृतधनभाक्

[1]येऽपुत्राः क्षत्रविट्शूद्राः पत्नीभ्रातृविवर्जिताः ।
तेषां धनहरो राजा सर्वस्याधिपतिर्हि सः ॥

पत्नीना त्वब्राह्मणस्त्रीणामपि कृत्स्नभर्तृधनाधिकारमाह–येऽपुत्राः इति । पत्नीभ्रातृविवर्जिता इति सब्रह्मचारिपर्यन्ताभावोपलक्षकम् । तेषा बद्धक्रमत्वान्मध्ये राज्ञोऽननुप्रवेशात् । व्यप्र.५१०

विभक्तापुत्रमृतस्थावरातिरिक्तधनभाक् पत्नी

यद्विभक्ते धनं किंचिदाद्यादि विविधं स्मृतम् ।
तज्जाया स्थावरं मुक्त्वा लभेत मृतभर्तृका ॥
वृत्तस्थापि कृतेऽप्यंशे न स्त्री स्थावरमर्हति ॥

(१) यत्किञ्चिदाद्यादि विविधं धन स्थावरजङ्गमात्मक भर्तृस्वामिकं स्मृत सत्सर्वं पत्न्या एव । विभक्तग्रहणादविभक्तविषये तु सहवासिन एव पितृभ्रात्रादयो मृतापुत्रधनं लभेरन्निति गम्यते । जाया पत्नी । 'स्थावर मुक्त्वे'त्येतद्दुहितृरहितपत्नीविषयम् । पत्नीमात्रविषये 'जङ्गम स्थावर हेम कुप्य धान्य रसाम्बरम् । आदाये'ति पूर्वोक्तवचनविरोधः स्यात् । न च तद्विरोधादविभक्तपत्यशविषय वृत्तहीनपत्नीविषय चेद वचनमस्त्विति वाच्यम् । यत एव प्रकारान्तरव्यवस्था निराकर्तुमाह स एव–वृत्तस्थापीति । सतानवृत्तिभूतस्थावरलब्धार्हता तु सतानशालित्वायत्तेति तच्छून्या स्त्री वृत्तस्थाऽपि विभक्तविषयेऽपि स्थावर नार्हतीत्यर्थः । *स्मृच.२९१-२

× विचि. स्मृसागतम् ।

* शेष स्मृचवत् ।

* व्यम. स्मृचगतं पमागत च ।

(१) दा.१६८ नहरो (न हरेत्); अप.२।१३५; व्यक.१६१; विर.५९८ दाक्त; स्मृसा.१२८ धन (अर्थ), रत्न.१५५; विचि.२४३; स्मृचि.३३ क्षत्र (ब्रह्म) स्याधि (स्यापि), व्यप्र.५१० दाक्त; व्यउ.१५७ येऽ (अ) भ्रातृवि (भ्रात्रादि), व्यम.६५ स्याधि (स्यापि), समु.१४३ व्यमक्त

(२) स्मृच.२९१; पमा.५३६ न (ने) विविध स्मृतम् (विधिसस्मृतम्) मृत (गत); सवि.४०८ क्ते (क्त); व्यप्र.४८९-९० भेत (भते); व्यम.६१; विता.३९० क्ते (क्त) मृत (गत); बाल.२।१३५ [पृ.१९३) विविध स्मृतम् (विधिसभवम्) भेत मृत (भते गत) : (पृ.२३८) व्यप्रवत्]; समु.१४०.

(३) स्मृच.२९२; सवि.४०९; व्यप्र.४९० (=); व्यम.६१; विता.३९०; बाल.२।१३५ (पृ.२३८); समु.१४०.

(२) तदितरदायादानुमतिमत्तन्नेरेण स्थावरविक्रयनिषेधपरम्। अन्यथा 'जङ्गम स्थावर हेम' इत्यनेन विरोधप्रसङ्गात्। पमा.५३६

(३) अत्र चन्द्रिकाकारस्यायमाशयः—दुहितृरहितदुहितृसहितपत्न्योः संनिपाते दुहितृसहिताया एव पत्न्याः स्थावरं न दुहितृरहितायाः। दुहितृरहितायास्तु जङ्गमांशः, जङ्गमद्रव्ये यथांशस्वीकारः। यदा दुहितृरहितैव पत्नी स्यात्तदा तस्या एव स्थावर जङ्गम च, नान्यस्याः दुहितृसहिताया मात्रादेः। तस्यास्तु पत्न्यपेक्षया बहिरङ्गत्वस्योक्तत्वादिति। न च तद्विरोधपरिहाराय विभक्तपत्न्यशविषय चेद वचनमस्त्विति वाच्यम्। यत एवप्रकारा व्यवस्था निराकर्तुमाह स एव—वृत्तस्थापीति। सतानवृत्तिभूतस्थावरार्हता सतानशालित्वायत्तेति तच्छून्या स्त्री वृत्तस्थापि विभक्तविषयेऽपि स्थावरं नार्हतीति वचनार्थः। सवि.४०९

(४) स्मृतिचन्द्रिकाया 'यद्विभक्ते धनमि'ति वचनं लिखितम्। तत्र मदनरत्नकारेण मिताक्षराकल्पतरुहलायुधादिसर्वग्रन्थान्तरेष्वलिखनान्निर्मूलत्वमस्य 'जङ्गम स्थावरं' इति प्राजापत्यस्य च सर्वत्र लिखनात्समूलत्वमिति दूषणमुक्त्वा तदुक्तव्यवस्थायाश्च स्वोत्प्रेक्षामात्रकल्पित्वेनायुक्तत्वमभिधाय समूलत्वेऽपि स्थावरादिसमग्रधनग्रहण ब्राह्मादिविवाहोढाविषयम्। तद्वचनेषु पत्नी शब्दप्रयोगात्। स्थावरग्रहणप्रतिषेधकबृहस्पतिवचन तु जायास्त्रीशब्दमात्रप्रयोगादासुरादिविवाहोढाविषयमिति स्वय व्यवस्था कृता। (सा तु) आसुरादिविवाहोढायाः पत्नीशब्देनाग्रहणाज्जायादिशब्दोपेतवचनानामपि तदेकमूलकतया तत्परत्वात् स्मृतिचन्द्रिकायामेव निरस्ता। यत्तु तदुक्तव्यवस्थायामौत्प्रेक्षिकत्वमुक्त, तदपि न। दुहितृसत्त्वे तत्संतानद्वारेण स्थावरस्योपभोगधनस्वाम्युपकारयोः संभवाद्दुहितृमत्या स्थावरमपि ग्राह्यं तद्रहितायास्तु तदभावान्न तद्ग्रहणमिति तत्रापि बीजसभवात्। अत एव पितुरपि स्थावरे स्वर्जितेऽपि पुत्रानुमतिमन्तरेणानधिकारः प्रागुक्तः। व्यप्र.४८९-९०

(५) तन्निर्मूलमासुरादिविवाहोढस्त्रीपरं वापुत्रविभागोत्तरं विभक्तपुत्राभावे पित्रर्जितस्थावरपरं वा। अन्यथा 'जङ्गम स्थावरं मुक्त्वे'ति पूर्वोक्तविरोधापत्तेः। पत्नीशब्दाभावाच्चेति मदनरत्ने दुहितृहीनपत्नीपरो निषेधः। तयुक्तपरो विधिरिति चन्द्रिका। सा मूलाभावादयुक्ता। दायादानुमतौ स्थावरे साम्यं प्रागुक्तम्। ता विना तु स्वातन्त्र्यनिषेधः। 'विभक्ता वाविभक्ता वा दायादाः स्थावरे समाः' इत्युक्तेरिति माधवाचार्याः। विता.३९०

(६) मिताटीका—एवं च तत्स्थावरं विभक्तस्यापि भ्रातुरेव न पत्न्याः। इदमपि वचनं वक्ष्यमाणसिद्धान्तव्यशसाधक बोध्यम्। एतेन 'इदमविभक्तस्थावरविषय, वृत्तहीनपत्नीविषय वा, दुहितृरहितपत्नीविषय वा, दायादानुमतिं विना स्थावरदानविक्रयादिनिषेधपरं वा' इति परास्तम्। आद्यान्त्ययोर्वचनविरोधात्। मानाभावस्यान्ययोः सत्त्वात्। बाल.२।१३५(पृ.१९३)

अपुत्रमृतविधवा प्रजीवनभाक्

प्रदद्यात्येव तत्पिण्डं क्षेत्रांशं वा यदिच्छति॥

कृतेऽप्यंशे इत्यनुवृत्तौ बृहस्पतिः—प्रददात्येवेति। पिण्डग्रहणं अशनाच्छादनोपलक्षणार्थम्। एव चायमर्थः। अशनाच्छादनं पूर्वोक्तपरिमाणक पूर्वोक्तधनाशसंपादकक्षेत्राशं वा स्वरुच्या भर्त्रशार्हपत्नीव्यतिरिक्तविधवायै विभक्तविषये जीवनार्थं प्रदद्यादिति। एवकारः प्रदानस्यावश्यकत्वज्ञापनार्थः। श्वश्वाद्यशुश्रूषकस्त्रीविषयोऽत्राद्यः पक्षः तत्र ज्ञापकमुपरिष्टाद्वक्ष्यति। दत्तं च दायकेतरैरपि पालनीय इत्याह 'स्थावराज्जीवनं स्त्रीभ्यो यद्दत्तं श्वशुरेण तु। न तच्छक्यमपाकर्तुमितरैः श्वशुरे मृते॥' *स्मृच.२९३

पित्र्यकर्माधिकारः पत्न्याः सोदरस्य तत्पुत्रस्य सपिण्डस्य शिष्यस्य च क्रमेण

प्रजाभावे तु पत्नी स्यात्पत्न्यभावे तु सोदरः॥

(१) अग्निहोत्रलाभोक्तेः पत्नीत्यागमार्थत्वात् कर्माहतायाः पित्र्ये कर्मणि भ्रात्राद्यपेक्षया अग्रेसरत्वं बृहस्पतिना

* सवि., व्यप्र. स्मृचगतम्।

(१) **स्मृच.**२९३ दिच्छति (वृच्छया); **पमा.**५४९ प्रददात्येव तत्पिण्डं (दथाद्धन च पर्यांसं); **सवि.**४१० ददात्येव तत् (दथाद्वत्सरे) शेष स्मृचवत्; **व्यप्र.**५१६ (प्रदद्यात्त्वेव पिण्डं च क्षेत्रांशं वा यदीच्छति); **बाल.**२।१४३ (दथाद्धन वा पर्यांसं क्षेत्रांशं वा यदीच्छति); **समु.**१४१ (प्रदद्यात्त्वेव पिण्ड वा क्षेत्रांशं वा यदृच्छया).

(२) **स्मृच.**२९१; सवि.४०८ प्रज्ञा (पुत्रा).

दर्शितम्। स्मृच.२९१

(२) पिण्डदान इति शेषः। सवि.४०८

[1]भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा।
सह पिण्डक्रियां कृत्वा कुर्यादभ्युदयं ततः॥

विधवायाः प्रजीवनस्वरूपम्

[2]अन्नार्थं तण्डुलप्रस्थमपराह्णे तु सेन्धनम्।
वसनं त्रिपणक्रीतं देयमेकं त्रिमासतः।
एतावदेव साध्वीनां चोदितं विधवाधनम्॥
[3]वसनस्याऽशनस्यैव तथैव रजकस्य च।
धनं व्ययोह्य तच्छिष्टं दायादानां प्रकल्पयेत्॥
[4]धूमावसानिकं प्राह्णं सभायां स्नानतः पुरा।
वसनाशनवासांसि विगणय्य धवे मृते॥

मिताक्षरा—तथा च सर्वेषामभावे ब्राह्मणात्तदीयधनादन्यत्र तद्धनं राजगामि, किन्तु धर्मपरायणो राजा तत्रापि तत्स्त्रीणां जीवनं दद्यादित्यर्थः। साध्वीनामित्युक्तत्वाऽसाध्वीनां तदपि नेति सूचितम्। एतेनान्यत्र ब्राह्मणादिति बृहस्पतिः क्षत्रियादिपरिणीतशूद्राविषय इति भ्रान्तोक्तमपास्तम्। एव च सामान्यतः परिणीतशूद्राविषयकमपीदं द्वयम्। तस्या अप्यपत्नीत्वात्। तथा चावरुद्धग्रहणं पत्नीत्वाभावदुपलक्षणम्। तथा च यत्र पत्नीत्वाभावः पुनर्भ्वादावपि तत्र सर्वत्र इदमेव।

बाल.२।१३५ (पृ.१९६-७)

कात्यायनः

मृतापुत्रधनभाक् पत्नी

*भर्तृदायं मृते पत्यौ विन्यसेत्स्त्री यथेष्टतः।
विद्यमाने तु संरक्षेत् क्षपयेत्तत्कुलेऽन्यथा॥

[5]अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता।
भुञ्जीतामरणात् क्षान्ता दायादा ऊर्ध्वमाप्नुयुः×॥

(१) गुरौ श्वशुरादौ भर्तृगृहे स्थिता यावज्जीवं भर्तृधनं भुञ्जीत न तु स्त्रीधनवत् स्वच्छन्दं दानाधानविक्रयानपि कुर्वीत, तस्यां तु मृतायां पत्न्यभावे ये दुहित्रादयो दायाधिकारिणस्ते गृह्णीयुः, न पुनर्ज्ञातयः, तेषां दुहित्रादिभ्यो जघन्यत्वात् तद्बाधकत्वानुपपत्तेः, पत्नी हि तेषां बाधिका तदधिकारस्य प्रागभावे प्रध्वंसे च बाधकाभावस्याविशेषात् बाधानुपपत्तेः। दा.१७१

(२) क्षान्ता दायादकारितधनविनियोगप्रतिबन्धं सहमानेत्यर्थः। तदविभक्तदशायां रक्षणभरणासमर्थेषु कार्यान्तरव्यग्रेषु वा श्वशुरादिषु पत्न्या स्वयमेव जीवनार्थमुपात्ताविभक्तद्रव्यविषयम्। विभक्तद्रव्यविषयत्वे वृद्धमन्वादिवचनविरोधापत्तेः। स्मृच.२९२

(३) अत्र भर्तृदायो भर्तृसबन्धेन स्त्रीस्वत्वाश्रयो धन, तच्च द्विधा, मृते भर्तरि अधिकार्यन्तराभावात्स्त्रीस्वत्वाश्रयः, जीवत्येव भर्तरि तत्संबन्धेन वा स्त्रीस्वत्वाश्रयः। तत्र प्रथमे स्त्री स्थावरादन्यत् यथेष्ट विन्यसेद्विनियुञ्जीत, गुरुसमीपे स्थिता भर्तुः शय्या पालयन्ती समय क्षपयेत्। स्थावरमधिकृत्याह भुञ्जीतामरणात्, अग्रे दायादा आप्नुयुः। द्वितीये त्वाह विद्यमाने तु संरक्षेत्। व्यये भर्तुरनुज्ञा पालयन्ती तद्धनरक्षा कुर्यादिति प्रकाशानुसारः। हलायुधपारिजातौ तु भर्तृदत्त स्त्रीधनमाहतुः। तदत्रापुत्रसंक्रान्ते स्त्रीस्वत्वाश्रयेऽपि धने आकाङ्-

---

* पूर्व रुगृहीतोऽपि उत्तरश्लोकस्य अन्वयबोधार्थमत्रोद्धृतोऽस्य श्लोकः। वस्तुत इद श्लोकद्वय स्त्रीधनप्रकरणे एव सगतं कल्पतरुदिसमतत्वात्।

× व्यप्र.व्याख्यानं 'पत्नी दुहितरः' इति याज्ञवल्क्यवचने (पृ.१४९९) द्रष्टव्यम्।

[1] (१) विर.६००; स्मृसा.१३८,१४४ सह पि (स सपि) वृद्धमनुः.

(२) गौमि.२८।१९ विधवाधनम् (विधिनाऽशनम्); उ.२।१४।२; पमा.५३६ प्रथमार्धम्; व्यनि. प्रथमार्धम्; बाल.२।१३५ (पृ.१९६); समु.१४१ प्रथमार्धम्.

[2] (३) गौमि.२८।१९कस्य (तस्य) धन (त्रय); उ.२।१४।२; बाल.२।१३५ (पृ.१९६).

(४) गौमि.२८।१९ (धूमावसानिक द्रव्यं सहायास्तान्तः पुरा) वसना (तथैवा) धवे मृते (धने मृता); उ.२।१४।२; व्यनि. व्यासः.

[3] (१) दा.१७१ व्रते (गुरौ); व्यक.१४७ दावत्; स्मृच.२९२; विर.५११ दावत्; स्मृसा.६२ नारदः : ७१ उत्त., नारदः; पमा.५३४ दावत्; रत्न.१६२; विचि.२१८ दावत्; दवि.३१९; नृप्र.४१ ऊर्ध्व (भाग) शेष दावत्; दात.१९०; सवि.३६३ चतुर्थपादः, स्मृतिः : ४१० णात् (ण): ४२४ हारीतः; चन्द्र.८२; व्यप्र.४९० पू. ४९१ उत्त., दावत्; विता.३८९ णात् क्षा (णं शा): ४४३ क्षा (शा) शेष दावत्; बाल.२।११७ णात् क्षा (ण दा) शेष दावत्; समु.१४१ दावत्, विच.१२२.

क्षायाः सत्त्वात्प्रकाशस्वरसो बलीयान्, प्रकरणानुरोधश्चाकाङ्क्षाया बलवत्त्वात् निर्हारनिषेधवद्दृश्यतेऽपीति।

*विर.५११-२

(४) प्रपौत्रपर्यन्तानामभावे पत्नी धनाधिकारिणी।

दात.१९०

(५) स्थावरे भर्तृदाये भोग एव न दानम्। 'अपुत्रा शयनं भर्तुः' इति वचनात्। पतिसामान्ये बाधकाभावाच्च वाक्यान्तरालब्धदायादगामित्वाभिधानायास्य वचनस्य साफल्यसंभवाच्च। कृतनिवृत्तिप्रकरणे कुलज्येष्ठपर्यन्तानुमतौ अनापदि स्त्रीकृतमात्रस्यैवाप्रामाणिकत्वोक्तेश्च, सौदायिकप्रीतिलब्धयोः स्वातन्त्र्यप्रतिपादनस्य च सांव्यवहारिकदानपरत्वेनाप्युपपत्तेः। पणद्विसहस्रोपरिधने स्त्रीणामस्वातन्त्र्यम्। चन्द्र.८२

भर्तृधनभाक् पत्नी दुहिता च क्रमेण

पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी।
तदभावे तु दुहिता यद्यनूढा भवेत्तदा॥

(१) एवं च तानि वचनानि अनूढदुहितृविषयाणि। अथवा निर्धनोढादुहितृविषयाणीति मन्तव्यम्। निर्धनत्वेनैवाप्रतिष्ठिताऽत्र व्यवस्थिता। न पुनर्वन्ध्यात्वादिना सतानराहित्येनाप्रतिष्ठिता। तस्याः सतानमुखेनाद्दष्टोपकारकसंबन्धाभावेन धनहारित्वायोगात्। तदभाव इत्यनेन पूर्वोक्ताया अव्यभिचारिण्याः पत्न्या अभावः प्रत्यवमृश्यते न पत्नीस्वरूपमात्रस्य। तेन न केवलं पत्न्याः स्वरूपाभावे दुहिता धनहारिणी किं तु अव्यभिचारित्वरूपविशेषणाभावेऽपीति मन्तव्यम्। अत एव संग्रहकारेण 'तादृक्पत्न्या अभावे तु पुत्रिका धनमर्हति' इत्युक्तं, न परं पत्नीस्वरूपाभावे। किन्तु धनभागिनीति निरूपणार्थमुक्तविशेषणविशिष्टपत्न्यभावे पुत्रिका धनमर्हतीत्यर्थः। पुत्रिका धनमर्हतीति तु प्रागेव निरस्तत्वादुपेक्षणीयम्। तेन पत्नीस्वरूपाभावे दुहितृगामि द्रव्य, विशेषणाभावे तु 'पिता हरेत्' इत्यादिवचनोक्तपित्रादिगामीति कैश्चित्कृता विषयव्यवस्थाऽप्युपेक्षणीया।

स्मृच.२९६

(२) अनूढाया एव सापिण्डयं 'अनन्तरः सपिण्डो यस्तस्य तस्य धनं हरेदि'ति मनुवचनात्। 'पुत्राभावे प्रत्यासन्ने न्यायसपिण्डे' इत्यापस्तम्बवचनाच्च सपिण्डस्यैव धनग्रहण प्रतीयते। अनूढाया अभावे असपिण्डयाऽपि ग्राह्यम्। व्यनि.

(३) मिताटीका—धनहरीति तु पचाद्यचष्टित्वेन बोध्यम्। विभागकथनानन्तरमस्योक्तत्वाद्विभक्तत्वस्य लाभः। पत्नीत्याद्यपवादस्य 'संसृष्टिनस्तु संसृष्टी'त्यस्य वक्ष्यमाणत्वादसंसृष्टित्वलाभः। बाल.२।१३५(पृ.२२१)

अपुत्रमृतधनभाजः क्रमेण पत्नी दुहितरः पिता माता भ्राता तत्पुत्राश्च

अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा।
तदभावे पिता माता भ्राता पुत्राश्च कीर्तिताः॥

(१) अस्मिन्विषये कात्यायनेन सुबोधतया क्रमो दर्शितः। पुत्रशब्दः संबन्धिशब्दत्वादिन्यायेन भ्रातृपुत्रेष्वेव वर्तते। अत एव याज्ञवल्क्येन 'भ्रातरस्तथा तत्सुता' इत्युक्तम्। स्मृच.२९९

(२) [बालरूपमते] पत्नी च सवर्णा सैव ज्येष्ठा। यथोक्तम्—'सवर्णा चेद्द्विजातीनां प्रशस्ता दारकर्मणि'। एतदभिप्रायमेव शखः—'ज्येष्ठा वा पत्नी'ति।

स्मृसा.१२८

---

* स्मृसा. विरवद्भावः। विचि. विरवत्।

(१) **मिता.**२।१३६ भर्तु (पत्यु); **स्मृच.**२९६ भवेत्तदा (प्रतिष्ठिता); **स्मृसा.**७१ उत्त.; **पमा.**५२४ मितावत्; ५३२ पत्नी...हरी (भर्तुर्धनहरी पत्नी) पू.; **मपा.**६७२; **रत्न.**१५४; **व्यनि.** मितावत्; **नृप्र.**४०त्तदा (त्तथा) शेषं मितावत्; ४१ पत्नी... हरी (पत्युर्धनहरी पत्नी) पू.; **सवि.**४१२; **बीमि.** २।१३६; **व्यप्र.**४९४,५२० मितावत्; **व्यउ.**१५२ पमा. (पृ.५३२) वत्; १५४ उत्त., याज्ञवल्क्यः; **व्यम.**६१ पू.: ६२; **विता.**८५ पू.: ४०१; **बाल.**२।१३५ (पृ.२२१); **समु.**१४१ मितावत्.

(१) **मिता.**२।१३६ थ (र्थं); **स्मृच.**२९९; **स्मृसा.** १२८ थ (र्थं) माता भ्राता (भ्राता भ्रातुः); **पमा.**५२६ वा (च) श्रा (त्रः; ५२८ (=); **व्यनि.** बृहस्पतिः; **नृप्र.**४० पि वा (थ वा); **बीमि.**२।१३६; **व्यप्र.**४९४ स्मृत्यन्तरम्; **व्यउ.**१५२ भ्राता (भ्रातृ): १५४ स्याथ (स्य च) भ्राता पुत्राश्च (पुत्राश्च परि), **व्यम.**६२ स्याथ (स्यास्य) त्राश्च (त्राः प्र); **विता.**३८५ भ्राता पुत्राश्च कीर्तिताः (भ्रातरः पुत्रकास्तथा); **बाल.**२।१३५ [पृ.२०९: २२१ वा (च) पू.]; **समु.** १४२.

अपुत्रविभक्तमृतधनभाजः क्रमेण पिता भ्राता जननी पितामही च

[1]विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा जननी वाथ माता वा तत्पितुः क्रमात् +॥

(१) तत्र पुत्राभाव इत्येतत्प्रदर्शनार्थम्। तेन पत्न्या दुहितृणामभाव इति द्रष्टव्यम्। पितुरभावे माता, मात्रानुमतो वा भ्रा(भ्रा)तैव। *अप.२।१३५

(२) कात्यायनवचन तु पत्न्या व्यभिचारिण्यां पित्रादेरनपत्यधनग्राहित्वप्रतिपादनपरम्। पमा.५३२

(३) (बालरूपमते) पुत्राभाव इति तु प्राक्तनान्तरङ्गभूतपुत्रपत्नीदुहित्रभावोपलक्षणम्। प्राचीनतया अन्तरङ्गत्वाविशेषात्। अतः पित्रादिभिर्विभक्तद्रव्ये मृते पुत्रपत्नीदुहित्रभावे पिताऽधिकारीति, पित्रभावे भ्राता मात्रानुमते, अननुमतौ च मातैव, तदभावे भ्राता। 'माता ऋक्थहरी ज्ञेया भ्राता वा तदनुज्ञया' इति वचनात्। एषामभावे मृतस्य पितामही। स्मृसा.१३१

(४) पित्रर्जित पिता, भ्रात्रर्जित भ्रात्रादिरिति व्यवस्थितो विकल्पः। विचि.२४१

(५) तान्यधिकारिमात्रपराणि न क्रमपराणि। एषामभावे पूर्वस्येति श्रौतक्रमेण पाठक्रमस्य बाधात्। न त्वेवासुराद्यूढस्त्रीपराणीति सर्वसिद्धान्तः। ×विता.३९२

अविभक्तापुत्रमृतस्त्री अंश भरण वा प्राप्नोति

स्वर्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी।

+ मिता., स्मृच., सुबो.व्याख्यान 'पत्नी दुहितरः' इति याज्ञवल्क्यवचने (पृ.१४८०, १४९२, १४९६) इत्यत्र क्रमेण द्रष्टव्यम्। * व्यनि. 'पुत्राभावे' इति अपवत्।

× बाल. विताबद्भावः।

(१) **मिता.**२।१३६; **अप.**२।१३६; **स्मृच.**२९८; **स्मृसा.**१३१ बाथ (वापि); **पमा.**५३२; **सुबो.**२।१३६; **विचि.**२४१ बाथ (वापि) वा तत् (बाथ); **व्यनि.**; **नृप्र.** ४१; **व्यप्र** ४९५; **व्यउ.**१५२ स्मृसावत्; **विता.**३९२ व्यं (ञ्ये); **राकौ.**४५६; **बाल.**२।१३५(पृ.२२१); **समु.**१४२; **विच.**१२६ द्रव्य (वित्त) पू.

(२) **स्मृच.**२९२ क्ते (क्त); **रत्न** १५३; **सवि.**४१० स्मृचवत्; **व्यप्र.**५१६; **व्यम.**६१; **विता.**३९१ स्मृचवत्; **समु.**१४१.

अविभक्ते धनांशं तु प्राप्नोत्यामरणान्तिकम् ÷॥

(१) धनांश यावता धनेन क्लृप्तजीवन धनसाध्यं तु नित्यनैमित्तिककर्मकाम्य व्रतादिक सिध्यति तावद्धनमित्यर्थः। तुशब्दो वाशब्दार्थे। धनांश वा स्त्र्यधिकारिक प्राप्नोतीत्यर्थः। एतावद्धनसपादकक्षेत्राश वा प्राप्नोतीत्यर्थः। धनग्रहणस्य वर्तनाद्युपायोपलक्षणार्थत्वात्। अत्राद्यः पक्षः पत्नीव्यतिरिक्तभार्याविषयः।

स्मृच.२९२

(२) अविभक्तग्रहण ससृष्ट्स्याप्युपलक्षणम्। तुशब्दोऽत्र वाशब्दार्थे। निपातानामनेकार्थत्वात्। स्त्री मरणान्तिकं अन्नवस्त्रभागिनी। 'अविभक्तधनांश तु प्राप्नोत्यामरणान्तिकम्'। अविभक्तग्रहण ससृष्ट्स्याभवति (?) अक्लेशेन जीवन धनसाध्यनित्यनैमित्तिक कर्म स्त्रीभिः कर्तु योग्य पूर्तादि काम्य कर्म च यावता धनेन सिध्यति स्वभर्तुर्धनात् तावन्तमशमवाप्नोतीत्यर्थः। अत्राद्यः पक्षः पत्नीव्यतिरिक्तभार्याविषयः। स्त्रीणा जीवनमात्रोपयोगिद्रव्यभागित्वाभिधानात्। द्वितीयः पक्षः पत्नी विषय इति व्यवस्था। +रत्न.१५३

(३) स्त्रीणा तु विभक्तदशायामपि भरणमेव। संभोगार्थमानीता स्त्रीत्युच्यते। 'क्रयक्रीता तु या नारी संभोगार्थ सुतार्थिना। गृहीता वाऽन्यदीया वा सैव स्त्री परिकीर्त्यते॥' अन्यदीया परकान्ता 'योपिद्ग्राह ऋण दाप्य' इत्यत्र योपिच्छब्दार्थतया निरूपिता। तस्याः स्त्रिया नाशभागित्वमित्याह कात्यायनः— स्वर्याते स्वामिनि स्त्री इत्यादि। उत्तरार्धः पत्नीविषयः। अविभक्तायाः पत्न्या अप्यशोऽस्ति। यथाऽऽह स एव—'अपुत्रा शयनं भर्तुरि'ति। सवि.४१०

(४) धनाशमामरणान्तिकमित्युक्तेः कृत्स्न धनमविभक्तस्य पत्युर्मृत इति निरस्तम्। न च स्त्रीशब्दश्रवणात् पत्नीव्यतिरिक्तस्त्रीपरमिदमपीति वाच्यम्। अविभक्त इति विशेषणानर्थक्यापत्तेः। विभक्तेऽपि भर्तरि पत्नीभिन्नाया अपुत्राया भरणमात्रोक्तेः। *व्यप्र.५१६

÷ विता.व्याख्यानं 'विभक्ता भ्रातरो' इति बृहस्पतिवचने द्रष्टव्यम्।

+ व्यम. रत्नगतम्। * वाक्यार्थः स्मृचवत्।

[1]**भोक्तुमर्हति क्लृप्तांशं गुरुशुश्रूषणे रता ।**
न कुर्याद्यदि शुश्रूषां चैलपिण्डे नियोजयेत् ॥

(१) क्लृप्ताशमपहृत्येति शेषः । स्मृच.२९३

(२) पत्न्यपि यदि श्वश्वादिशुश्रूषा न करोति तदा ग्रासाच्छादनमात्रभागिन्येव। तथा च स एव—भोक्तुमर्हतीत्यादि । रत्न.१५३

(३) गुरुः श्वश्वादिः । तदिच्छायामंशभाक्त्वं, अन्यथा ग्रासाच्छादनमात्रमित्यर्थः । व्यम.६२

(४) विभक्तापि गुर्वादिप्रतिकूला नाशभागित्याह । विता.३९८

मृते भर्तरि भर्त्रंशं लभेत कुलपालिका ।
यावज्जीवं न हि स्वाम्यं दानाधमनविक्रये ॥

(१) कुलपालिका वंशपालिका । वृत्तस्थेति यावत्। तद्वृद्धानाथान्धाद्युपजीवनाया व्रतदृष्टार्थदानविधानात् तदितरदृष्टार्थदानादावस्वातन्त्र्यप्रतिपादनार्थमिति मन्तव्यम्। एवं च धर्मार्थदाने स्वातन्त्र्यमस्त्येव । अत एव धर्मार्थदानमनिशमावर्तनीयमित्याह स एव–'व्रतोपवासनिरता ब्रह्मचर्ये व्यवस्थिता। धर्मदानरता नित्यमपुत्राऽपि दिवं व्रजेत्॥' इति। न हि पारतन्त्र्ये नित्यनैमित्तिकक्रिया युज्यते । एव चादृष्टसाधकद्रव्यसपादनार्थकयोगाधिक्रययोरपि स्वातन्त्र्यमप्रतिषिद्धमिति मन्तव्यम्। +स्मृच.२९२

(२) तदवरुद्धस्त्रीपरमिति विज्ञानेश्वरः । गौडास्तु स्थावरादौ पत्न्या यावज्जीव भोग एव न तु दायादानुमतिं विना दानविक्रयादौ स्वातन्त्र्यम् । 'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। भुञ्जीतामरणं शान्ता दायादा ऊर्ध्वमाप्नुयुः॥' इति कात्यायनोक्तेः। भर्तुः श्राद्धौर्ध्वदेहिकार्थं तु दानविक्रयादीन् कुर्यादेव। 'पत्न्येव दद्यात्तत्पिण्डमि'त्युक्तेः। अत एव 'विभक्ता वाविभक्ता वा दायादाः स्युरवरे समाः' इति नारदीय विभक्तपत्नीस्थावरपरमित्याहुः। जीमूतवाहनोऽप्येवम् । तदपरार्कमदनरत्नमाधवीयादावभावान्निर्मूलम्। समूलत्वेऽप्यासुरादिविवाहोढस्त्रीपरमविभक्तस्त्रीपरं व्यभिचारिणीपर वा न पत्नीपरम्। 'विधवा यौवनस्था चेन्नारी भवति कर्कशा । आयुष्यक्षपणार्थं तु दातव्यं जीवन तदा ॥' इति हारीतोक्तेः। विभक्तभर्तृपत्नीपरं विधिनिषेधादिति सर्वसिद्धान्तः। मातुरूर्ध्वं दुहित्रादेस्तद्धनहारित्वायोगात्स्वातन्त्र्याभावे विभागवैयर्थ्यात्। किं च जीवति मृते वा पत्यौ पुत्रे सत्यपि तत्समोंऽश उक्तः मृते तु कथ न स्यात्। विता.३८९-९०

भर्तुरौर्ध्वदेहिककरणाधिकारः

[2]**नारी खल्वननुज्ञाता पित्रा भर्त्रा सुतेन वा ।**
विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदेहिकम् ॥

अवस्थाविशेष एव पितृभर्त्राद्यनुज्ञोक्ता । और्ध्वदेहिक पारलौकिकम् । अतो यस्यामवस्थाया भर्तुरनुज्ञाप्राप्ता सैवात्रानूद्यते । न त्वपूर्वा विधीयते । अतो विधवाया भर्तुरनुज्ञा विनाऽप्यधिकारः । व्यम.५०

[3]**असंस्कृतेन पत्न्या च ह्यग्निदानं समन्त्रकम् ।**
कर्तव्यमितरत्सर्वं कारयेदन्यमेव हि ॥

ब्राह्मणद्रव्यमदायिकं श्रोत्रियगामि । अब्राह्मणादायिकद्रव्यं राज्ञः । मृतसस्कर्ता धनहारी ।

[4]**अदायिकं राजगामि योषिद्भृत्यौर्ध्वदेहिकम् ।**
अपास्य श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्तदर्पयेत्*॥
[5]**अन्यो यदि दहेत्कश्चित्पुत्राच्छिष्याच्च सोदरात्।**

+ व्यप्र. स्मृचपतमुपन्यस्तम् । व्यम. स्मृचवद्भावः । बाल. स्मृचवत् ।

(१) **स्मृच** २९३ वदि (त्यति); रत्न.१५३; **सवि** ४११; **व्यप्र.**५१६; **व्यम.**६२ चैलपिण्डे (चैल पिण्ड), **विता.**३९८ व्यमवत्; **समु.**१४१.

(२) **स्मृच.**२९२ बृहस्पतिः; रत्न.१५३ न हि (हि न); **सवि.**४०९ (=) लभेत (लभते) न हि (हि तत्); **दानि.** २; **व्यप्र.**४९०; **व्यम.**६१, **विता.**३८९ रत्नवत्; **बाल.** २।१३५ (पृ.१९३) लभेत (लभते): (पृ.२३८); **समु.**१४१ रत्नवत्.

* मिता.व्याख्यान 'पत्नी दुहितरः' इति याज्ञवल्क्यवचने (पृ. १४८१) द्रष्टव्यम्। पमा. मितावत्। व्यम. मितावद्भावः । विता.व्याख्यानं 'मृते भर्तरि' इति कात्यायनवचने द्रष्टव्यम्।

(१) **व्यम.**५०; **समु.**१२३.

(२) **बाल.**२।१३५ (पृ.२३०).

(३) **मिता.**२।१३६; **पमा.**५३५; **व्यउ** १५३; **व्यम.** ६१; **विता.**३८५-६ यिक (यक); **बाल.**२।१३५ (पृ.२३०) भू (द्व); **समु.**१४३ वितावत्.

(४) **व्यनि.** (सोद...तस्य तु०) (दशमांशं...मेव वा०) क्रमेण देवलः; **समु.**१४३.

संस्कारोदककृद्विप्रः प्रमीतस्य तु तद्धनात् ॥
दशमांशं हरेताथ पञ्चमं सर्वमेव वा ॥
बहुरक्ष्यस्य दशममल्परक्ष्यस्य पञ्चमम् ।
अपुत्रपितृभार्यस्य सर्वमेवेति शौनकः ॥
क्षत्रियादेस्तु राजैव गृह्णीयाद् ब्राह्मणस्य न ॥

व्यासः

अपुत्रमृतधनभाजः क्रमेण पत्नी दुहिता दौहित्रश्च, तेषा श्राद्धकृत्व च

अपुत्रस्य परेतस्य पत्नी तद्भागहारिणी ।
तदभावे तु दुहिता यद्यनूढा भवेत्तदा ॥
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्यव्रते स्थिता ।
स्नाता प्रतिदिनं दद्यात् स्वभर्त्रे सतिलाञ्जलीन् ॥
कुर्याच्चानुदिनं भक्त्या देवतानां च पूजनम् ।
विष्णोराराधनं चैव कुर्यान्नित्यमुपोषिता ॥
दानानि विप्रमुख्येभ्यो दद्यात् पुण्यविवृद्धये ।
उपवासांश्च विविधान् कुर्यात् शास्त्रोदितान् शुभान् ॥
लोकान्तरस्थं भर्तारमात्मानं च वरानने ।
तारयत्युभयं नारी नित्यं धर्मपरायणा ॥

(१) तदेवमादिभिर्वचनैः पत्न्या अपि नरकनिस्तारकत्वश्रुतेः धनहीनतया वा अकार्यं कुर्वती पुण्यापुण्यफलसमत्वेन भर्तारमपि पातयतीति तदर्थं तद्धन पूर्वस्वाम्यर्थमेव भवतीति युक्तं पत्न्याः स्वाम्यम् । दा.१६५

(२) तस्मात्पत्न्या अपि पतिनरकनिस्तारकत्वाद्धनहीनतया वा अकार्यं कुर्वती स्वीयापुण्येनार्द्धशरीरसंस्तवात् 'पतत्यर्द्ध शरीरस्य यस्य भार्या सुरा पिबेत्' इत्यादिलिङ्गदर्शनात्पतिमपि पातयेदिति तया गृहीतं स्वाम्यर्थमेव तद्धनं भवतीति सर्वेभ्योऽन्येभ्यः पूर्वं पत्न्या एव पतिधनग्रहण युक्तम् । व्यप्र.५०९

(३) न चेद स्त्रीधनपरं 'मृते भर्त्तरी'ति वैयर्थ्यात् । विता.३०३

(४) मिताटीका—अनेन च पुत्रादिवत्स्वोपकारकतया नरकादिनिस्तारकत्वेन च तदभावेऽन्यतः पूर्वं पत्न्या एव तत्त्वम् । अन्यथा दानाद्यसभव इति बोधितम् । बाल.२।१३५(पृ.१८८)

श्राद्धं मातामहानां तु अवश्यं धनहारिणा ।
दौहित्रेणार्थनिष्कृत्यै कर्तव्यं विधिवत्सदा ॥

सोमेश्वरभारुचिमतावलम्बनेन अयमस्यार्थः— अर्थशब्देन प्रयोजनमुद्देश्यं ऋणमिति यावत् । तस्य निष्कृत्यै आनृण्याय बहुपूपप्लवमानेषु दौहित्रेषु एक एव शक्तो धनहारी धनं हृत्वा आहृतद्रव्येण षोडशश्राद्धं नवश्राद्धानि पन्थापरिव्ययणं कुर्यात् । पुत्रेष्वसंनिहितेषु अविद्यमानेषु पत्न्या अविद्यमानाया समनन्तरकर्तृषु विद्यमानेषु इतरस्य व्यवहितकर्तुरधिकारनिषेधात् । तथा च विष्णुः 'सति कर्तर्यन्यस्य कर्तृत्वं समनन्तरकर्तर्यनन्तरकर्तृत्वं न स्मृतम्' इति । श्राद्ध इति शेषः, संस्कारकर्मणीति केचित् । तथा च व्यासः—पितृमातामहांश्चैव द्विजः श्राद्धेन तर्पयेत् । अनृणः स्यात्पितृणा तु यज्ञलोकं स ऋच्छति ॥' इति । अत्रानृण्यं 'त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इति प्रतीतं दौहित्रस्यापि पौत्रवन्मातामहप्रजारूपत्वेन सिद्धं नान्यथा । दुहितुस्त्वग्निविद्यासाध्यकर्मण्यनधिकारात् दौहित्रस्यैव तत्राधिकार इति दुहितृद्वारा दौहित्रस्य संपादनादानृण्यं मातामहस्य । अत एव पौत्राद्दौहित्रस्य व्यवधानम् । अत एव पौत्रवद्दौहित्रस्य साक्षादप्रतिबन्धेन दायस्वीकारार्हता नास्ति, किन्तु दुहितृद्वारा ।

---

(१) विव्य.३०. (२) विता.३८५.

(३) दा.१६४-५; व्यप्र.५०९ र्यव्रते (र्ये व्यव) दद्यात्...ला (भक्त्या भर्त्रे दद्याज्जला); विता.३९३ सति (सलि); बाल.२।१३५ (पृ.१८८) र्यव्रते (र्ये व्यव) शेषं वितावत्.

(४) दा.१६५; व्यप्र.५०९ च्चा (द्वा) नां च (तिथि) मुपोषिता (मनुव्रता); विता.३९३ उक्त.; बाल.२।१३५ (पृ.१८८) च्चा (द).

(५) दा.१६५ भान् (भे); व्यप्र.५०९; विता.३९३; बाल.२।१३५ (पृ.१८८).

(६) दा.१६५; दात.१९०; व्यप्र.५०९; विता. ३९३; बाल.२।१३५ (पृ.१८८) स्थ (स्थ).

(१) सवि ४२६, ४२९; बाल.२।१३५ (पृ.२२५) तु अ (च ब) णार्थनिष्कृत्यै (ण विधिवेन) लौगाक्षिः.

अतो दौहित्रोऽपीषत्कल्पः पौत्र एवेति तस्याप्यानृण्यं पुत्रवन्मातामहौर्ध्वदेहिकक्रियाकरणात्सेत्स्यतीति । अत एव श्रुतिः—'दुहिता पुत्रकल्या च पौत्रा दौहित्रकाः स्मृताः' इति । न चैषा पुत्रिकाकरणविषयेति शङ्कनीयम् । कल्पप्रत्ययानन्वयात् । पुत्रिकाकरणे पुत्रिकैव पुत्र इति न पुत्रकल्पता पुत्रिकायाः । अत एवेषत्कल्पपुत्रः पुत्रिका ईषत्कल्पपौत्रो दौहित्र एवेति सिद्धम् । यत्तु संनियोगशिष्टमातामहश्राद्धप्रतिपादकं वचनं—'पितरो यत्र पूज्यन्ते तत्र मातामहा अपि । अविशेषेण कर्तव्य विशेषान्नरकं व्रजेत् ॥' इति । तत्तु जीवपुत्राजीवपुत्रमातामहद्वयसाधारणम् । तथा च याज्ञवल्क्यः—'द्वौ दैवे प्राक्त्रयः पित्र्ये उदगेकैकमेव वा । मातामहानामप्येवं तन्त्र वा वैश्वदैविकम् ॥' इति । 'कुर्यान्मातामहश्राद्ध नियमात्पुत्रिकासुतः' इत्यादिवचनमेतद्वचना(नु)विरोध्येव । विज्ञानयोगिप्रभृतयस्तु संनियोगशिष्ट श्राद्ध मातामहोद्देश्य पाक्षिकमित्याहुः । अतश्च दौहित्रस्य मातापितृतोऽपि दृष्टादृष्टोपकारकतया प्रत्यासत्यतिशयात्तद्वाम्येव धनमिति सिद्धम् । एतच्च लक्ष्मीधराचार्यमतमतिगम्भीर दिङ्मात्रमुदाहृतम् ।

सवि.४२९-३०

देवलः

अपुत्रमृतधनहरौ दुहिता

अपुत्रस्य च कन्या स्वं धर्मजा पुत्रवद्धरेत् ॥

(१) विभक्तस्य पितृद्रव्य कन्यायै दद्यादित्यर्थः ।

स्मृसा.५९

(२) मिताटीका—स्वा सवर्णा । धर्मजा धर्मपत्नीजा ।

बाल.२।१३५ (पृ.२०५)

(१) **दा.**१७६ त्रस्य च (त्रिकस्य) स्वं (स्वा); **विर.**४९३; **स्मृसा.**५९ (अपुत्रकस्य कन्या या धर्मपुत्रवदुद्धरेत्); **दीक.**४४ स्य च (कस्य) स्वं (या) मैजा (मार्थ); **व्यनि.** च कन्या स्वं (स्वयं कन्या); **स्मृचि.**३५ त्रस्य च (त्रिकस्य) स्व (वा); **दात.**१७१ स्य च (कस्य) स्वं (स्वा); **चन्द्र.**७५ (अपुत्रस्य तु कन्या या धर्मतः पुत्रवद्धरेत); **विता.**३३४ स्य च (कस्य) स्वं धर्मजा (तु तद्दुहित्र्ये); **बाल.** २।१३५ (पृ.२०५) च (तु) स्वं (स्वा)द्धरे (द्धरेत्); **विभ.**९०; **समु.**१४१ स्य च (कस्य स्वं) (स्वं०).

अपुत्रमृतधनभाजः क्रमेण सोदराः दुहितरः पिता भ्रातरः माता भार्या कुल्याः सहवासिनश्च

*ततो दायमपुत्रस्य विभजेरन् सहोदराः ।
तुल्या दुहितरो वापि म्रियमाणः पितापि वा ॥
सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम् ।
एषामभावे गृह्णीयुः कुल्यानां सहवासिनः ॥

(१) इत्यनेन भार्यासवर्णादुहितृपितृमातृसहोदरभ्रातृसापत्नभ्रातृपर्यन्ताधिकारिशुद्धलाया भ्रातृपुत्रस्याकीर्त्तनात् सापत्नभ्रातृपर्यन्ताभाव एव भ्रातृपुत्राणामधिकारः कथितः । दा.१९१

तुल्याः सवर्णा दुहितरः । सवर्णा भ्रातरः सापत्ना अभिमताः सोदरभ्रातृणा स्वपदोपात्तत्वात् विशेषणानुपपत्तेः । तत्रापि सहोदरादिभार्यान्तस्य लिखनक्रमो नाधिकारक्रमार्थः विष्ण्वादिविरोधात्, किन्तु विष्ण्वाद्युक्तक्रमेण गृह्णीयुरित्येतदर्थः लिखनक्रमेऽनास्थाव्यञ्जनार्थमेव दुहितरो वापि पितापि वेति अपिवाशब्दमुभयत्र प्रयुक्तवान्, तच्चान्यत्रापि नुषज्यते । तेन सहोदरा वा दुहितरो

* अप., विर., व्यप्र. व्याख्यान 'पत्नी दुहितरश्चैव' इति याज्ञवल्क्यवचने (पृ.१४९१,१४९४,१५०४) इत्यत्र क्रमेण द्रष्टव्यम् । विच. विरवत् ।

(१) **दा.**१५४ रन् (युः): १६९, १९१; **अप.**२।१३५ [पृ.७४१ : ७४४ भ्रि (भ्रि)]; **व्यक.**१६० तु (कु); **गौमि.**२८।२५ तुल्या दुहितरो (सकुल्या दुहिता) पि वा (पि च); **उ.**२।१४।२ तु (कु) पि वा (पि च); **स्मृच.**२९९; **विर.**५९३; **स्मृसा.**७३,१३५, १४२; **दीक.**४५; **विचि.**२४१; **व्यनि.** तुल्या दुहितरो (सकुल्या दुहिता) तापे (तैव); **दात.**१९१; **सवि.**४३४ पू.; **व्यप्र.**४९५, ५२७; **विता.**३९२ व्यकवत्; **बाल.**२।१३५ (पृ.१९० : २०९ उत्त.); **समु.**१४२ वापि (वाथ).

(२) **दा.**१५४, १६९: १९१ पू.; **अप.**२।१३५ (पृ.७४१, ७४४) पू.; **उ.**२।१४।२ पू.; **व्यक.**१६० चेति (वेति) प (ते); **स्मृच.**२९९ पू.; **विर.**५९३; **स्मृसा.**७३ माता (वापि) प (ते): १३५ प (ते): १४२; **विचि.**२४१ कुल्यानां (सकुल्याः); **व्यनि.** र्णा (र्णात्) ति (त्) प (ते); **दात.**१९१ प (ते); **व्यप्र.**४९५ पू.: ५२७ दातवत्; **व्यउ.**१५५; **विता.**३९२ चेनि (चैते) प (ते); **बाल.**२।१३५ (पृ.१९०) दातवत्; **समु.**१४२.

वा पिता वेत्यनास्था कीर्तनक्रमस्य देवलवचनेन दर्शिता।
×दा.१६९

(२) यद्यप्यत्राव्यवहितान्वयो वचनसामञ्जस्येनावगम्यते तथापि पूर्वोक्तसर्ववचनन्यायाविरोधाय व्यवहितान्वयेनैवार्थोऽवगन्तव्यः। तथाहि अपुत्रस्य दायं भार्या पत्नी अवाप्नुयात्। अथवा तुल्याः सवर्णा दुहितरो विभजेरन्। अपि वा म्रियमाणो विद्यमानः पिता हरेत्। अनर्थकः म्रियमाणशब्दोऽम्रियमाणे पितरि मातेत्यन्वयावगमाय पितुरभावे माता अवाप्नुयात्। पितुः सवर्णा सहोदराश्च भ्रातरो यथाक्रमं पूर्वं सहोदरास्तदभावे सवर्णाः सहोदरा इति क्रमानतिक्रमेण विभजेरन्निति। मात्रनुज्ञायाः पितामह्याश्चाभावविषये एव एतद्द्रष्टव्यम्।
स्मृच.२९९

(३) तुल्याः सहोदराः। म्रियमाणः सस्पृहस्येति शेषः। सवर्णा भ्रातरोऽत्र वैमात्रेयाः। भार्याऽत्र ब्रह्मचर्यमात्रस्था, अपकृष्टवर्णा वा। कुल्याना मध्ये यः संनिकृष्टः इति शेषः। स्मृसा.१३५–६

अदायिकमत्राह मनु राजा हरति। ब्रह्मस्व श्रोत्रियाः।

सर्वत्रादायकं राजा हरेद्ब्रह्मस्ववर्जितम्।
अदायकं तु ब्रह्मस्वं श्रोत्रियेभ्यः प्रदापयेत्॥

अदायिक यथोक्तपत्न्यादिदायग्राहकरहितम्।
स्मृसा.१४३

मृतसंस्कर्ता धनहारी

अथ चेद्दक्षिणाथा स्यात्संस्कर्ता मृतवित्ततः।
अंशं हरेत्तदशमं पञ्चमं सर्वमेव वा।
गोसहस्रं शतं वार्थात् गृह्णीयात्तस्य दक्षिणाम्॥

उशना

अपुत्रमृतधनभाक् पत्नी

अपुत्रा पुत्रवत्पत्नी।

प्रजापतिः

अपुत्रमृतधनभाक् पत्नी

***पूर्वं प्रमीतान्निहोत्रं मृते भर्तरि तद्धनम्।**
विन्देत्पतिव्रता नारी धर्म एष सनातनः॥
जङ्गमं स्थावरं हेम कुप्यं धान्यं रसाम्बरम्।
आदाय दापयेच्छ्राद्धं मासषाण्मासिकादिकम्॥
पितृव्यगुरुदौहित्रान् भर्तुः स्वस्रीयमातुलान्।
पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः॥
तत्सपिण्डा बान्धवा वा ये तस्याः परिपन्थिनः।
हिंस्युर्धनानि तान्राजा चौरदण्डेन शासयेत्॥

विधवा भरणभाक्

आढकं भर्तृहीनाया दद्यादामरणान्तिकम्॥

यदपि प्रजापतिवचनम्—'आढकमिति। यदपि स्मृत्यन्तरे–'अन्नार्थं तण्डुलप्रस्थमपराह्णे तु सेन्धनम्' इति। तदेतद्वचनद्वयं हारीतवचनेन ('विधवा यौवनस्था' इत्यादि) समानार्थम्। पमा.५३५–६

यमः

अपुत्रमृतधनभाजः क्रमेण भ्राता पितरौ ज्येष्ठपत्नी सगोत्राः शिष्याः सब्रह्मचारिणश्च

अपुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेतां पत्नी वा ज्येष्ठा सगोत्रशिष्यसब्रह्मचारिणः×।

वृद्धहारीतः

विभक्तापुत्रमृतधनभाजः क्रमेण पत्नी दुहितरः पितरौ भ्रातरः तत्सुताः सपिण्डाः सबन्धिबान्धवाश्च

विभक्तस्यास्य पुत्रस्य पत्नी दुहितरस्तथा।

× दात. दागतम्।

(१) धिर.५९७ तु (च) मनुः; स्मृसा.७४ यक (यादक) म्यः प्रदाप (प्रतिपाद) उक्त., विष्णुः : १३७,१४३ य (यि), रत्न.१५६ यक तु (यिक तु); विचि.२४३; स्मृचि.३३ त्रा (स्य) उत्तरार्धं (आदाय तत्तु सर्वस्व नादद्दीत कथंचन), चन्द्र.९३ म्यः प्रदाप (प्रतिपाद) उक्त.: व्यम ६५ य (यि) नारदः; विता.४१० त्रा (त्र) य (यि), समु.१४३ नारदः.

(२) व्यनि.; समु.१४३ र्थो स्यात (देया) तद् (तु द) प्रथमार्धस्य.

* 'पूर्वं प्रमीते'त्यादिचतुर्णां श्लोकानां व्याख्यासंग्रहः स्थलादिनिर्देशश्च एष्वेव बृहस्पतिवचनेषु (पृ.१५१३-५) द्रष्टव्यः।

× व्याख्यासंग्रहः अस्मिन्नेव शंखलिखितवचने (पृ.१४७२) द्रष्टव्यः।

(१) बाल.२।१३५ (पृ.२३४,२३६,२४२).

(२) पमा.५३५; व्यनि. दद्यादामरणान्तिकम् (दातव्यं विधवाऽशनम्); बाल.२।१३५(पृ.१९७) मरणान्तिकम् (भरणं स्त्रियाः); समु.१४१ न्तिकम् (स्त्रियाः). (३) दा.१५४ शंखलिखितपैठीनसिन्यमाः. (४) बृहास्मृ.७।२६१-२.

पितरौ भ्रातरश्चैव तत्सुताश्च सपिण्डिनः ।
संबन्धिबान्धवाश्चैव क्रमाद्वै रिक्थभागिनः ॥

लघुहारीतः

मृतापुत्रधनभाजः क्रमेण पत्नी दुहितरः पितरौ भ्रातरः तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥
भार्याऽव्यभिचारिणी यावत् यावच्च नियमे स्थिता ।
तावत्तस्या भवेद्द्रव्यमन्यथाऽस्या विलुप्यते ॥

पराशरः

अपुत्रमृतधनभाक् कुमारी ऊढा च क्रमेण

अपुत्रस्य मृतस्य कुमारी रिक्थं गृह्णीयात् तदभावे चोढा ।

पैठीनसिः

अपुत्रमृतधनभाजः क्रमेण भ्राता पितरौ ज्येष्ठा पत्नी सगोत्राः शिष्याः सब्रह्मचारिणः श्रोत्रियाः ।

अब्राह्मणद्रव्य राजगामि ।

अपुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यं तदभावे मातापितरौ लभेताम् । पत्नी वा ज्येष्ठा सगोत्रशिष्यसब्रह्मचारिणः ।

परिषद्गामि वा श्रोत्रियद्रव्यं न राजगामि, न हार्यं राज्ञा देवतागणसंस्थितं न निक्षेपोपनिधिक्रियाक्रमागतं न बालस्त्रीधनानि एवं ह्याह—

न हार्यं स्त्रीधनं राज्ञा तथा बालधनानि च ।
नार्याः षडागमं वित्तं बालानां पैतृकं धनम् ॥

बृहन्मनुः

सपिण्डता सोदकता सगोत्रता च

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
समानोदकभावस्तु निवर्तेताचतुर्दशात् ।
जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते ॥

अपुत्रमृतधनभाक् पत्नी

अपुत्रा शयन भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च +॥

(१) बृद्धमनुरपि पत्न्याः समग्रधनसबन्धं वक्ति—अपुत्रेति । मिता.(पृ.२१७)

संयताया एव धनग्रहणमुक्तम् ।

*मिता.२।१३५(पृ.२१८)

(२) तत्पिण्डमित्यतस्तदित्यनुषज्यते । तच्छब्देन भर्तुः परामर्षात् भर्तुः कृत्स्नमंश पत्नी लभेत । न तु स्वांशकृत्स्नमित्यर्थः, कृत्स्नस्वांशोद्देशेन लभेतेति विधा-

---

(१) लहास्मृ.६६,६९.

(२) दा.१७५; स्मृसा.१३०; विचि.२३९; दात.१९१; व्यप्र.५१८ त्रस्य (त्र); विता.४०१ चो (तृ); बाल.२।१३५ (पृ.२०५) त्रस्य (त्र) रिक्थ (ह्यर्थ); सेतु.४३; विच.१२३ (तदभावे चोढा०).

(३) दा.१५४ (माता०) लभे (हरे) शंखलिखितपैठीनसियमाः; अप.२।१३६ द्रव्यं (धन) (सगो...रिणः०) शंखलिखितपैठीनसी; व्यक.१६० स्वर्यातस्य (जातस्य); गौमि.२८।२५ लभे (हरे) व्यस (व्यस्य) णः+(च) शंखलिखितपैठीनसी; विर.५९२ (स्वर्यातस्य०); स्मृसा.७२:१३५ द्रव्य (धनं); दीक.४५ (सगो...रिणः०) शेषं दावत्; विचि.२४१ स्वयोतस्य (अभार्यस्य) (पत्नी ... रिणः०); व्यप्र.४९४ (माता०) लभेतां पत्नी वा ज्येष्ठा (हरेयातां ज्येष्ठा वा पत्नी) (सगो. .. रिणः०) शंखलिखितपैठीनसयः : ५२६ (माता०) (लभे... रिणः०). (४) अप.२।१३६.

+ ममु. व्याख्यान 'अनन्तरः सपिण्डाद्यः' इति मनुवचने (पृ.१४७७) द्रष्टव्यम् ।

* विचि. मितावद्भावः । विता. मितागतम् ।

(१) मिता.२।१३५ नाम (नाम्नोः); स्मृसा.१३३ मितावत्: १४७; पमा.५२८; रत्न.१५५; विचि.२३६ बृहस्पतिः, व्यनि. ता तु (दातुः) बृहस्पतिः; नृप्र ४१ मितावत्; व्यउ.१५५ (=); विता.४०८ वस्तु (वश्च) ताच (त च) नाम (नाम्नोः); समु.१४२ मितावत्, मनुः.

(२) मिता.२।१३५; दा.१५१-२; अप.२।१३५; व्यक.१६० मशं (मर्थ); स्मृच.२९१, ममु.९।१८७ व्यकवत्; विर.५८९ व्यकवत्; स्मृसा.७१,१२८,१३४ व्यकवत्: १४० व्यकवत्, मनुः; पमा.५२४,५३४, दीक.४५; रत्न.१५२; विचि.२३६; व्यनि., स्मृचि.३२ च (सा); नृप्र.४०,४१; दात.१९१; सवि.४०८ लभे (हरे): ४२७ उत्त.; मच.९।१८५; व्यप्र.४८९ : ५०९ उत्त., मनुः; व्यउ.१५१; विता.३८२ मनुः; बाल.२।१३५ (पृ.२२१) पत्न्येव दद्यात्तत्पि (पत्ये दद्याच्च सा पि), सेतु.४२: ४३ व्रते (गुरौ); समु.१४०; विच.१२३; कुभ.८७६.

नानुपपत्तेः स्वामिभावज्ञापनार्थत्वादस्य, न च स्वाशे स्वामिभावज्ञापनमर्हति स्वाशज्ञापनेनैव ज्ञातत्वात्। न च ग्रहणविधानार्थं तदिति वाच्यं, स्वधनग्रहणस्य रागादेव प्राप्तत्वात्। न च नियमार्थं वचनमिति वाच्यं, अदृष्टार्थत्वापत्तेः। नियमे च नियोज्यादिकल्पनमपि स्यात्। यच्चोक्तं न ह्यनन्धादिः पुत्रोऽश कृत्स्नं लभेत इत्युक्ते पित्र्यं कृत्स्नमंशमिति, किं तर्हि कृत्स्न स्वाशमिति तथात्रापि कृत्स्नं स्वांशापेक्षमिति, तन्न, अनन्धादिः पुत्रोंऽश कृत्स्न लभेतेति वचनाभावात् दृष्टान्तानुपपत्तेः। भवतु वा तथापि पूर्वोक्तहेतुना स्वाश लभेतेति विध्यनुपपत्तेः पित्रंशापेक्षमेव वर्णनं युक्तम्। अत एव सर्वत्रान्यधन एव अन्यस्वत्वसंबन्धज्ञापनं मुनयः कुर्वन्ति। यथा पितृधने पुत्राणा अपुत्रधने पत्न्यादीनामित्यादि, न पुनः स्वाशग्रहणे प्रेरयन्ति। यच्च सबन्धिशब्दत्वेन स्वसंबन्ध्युपस्थापकत्वं यथा मातेति न परमातावगम्यते इत्युक्त तदप्ययुक्तम्। अनुपात्तसंबन्धिविषयत्वात् तस्य, न हि डित्थस्य मातरमानयेत्युक्ते प्रयोज्यस्य माता प्रतीयते प्रयोजकस्य वा, तद्वदत्रापि तत्पिण्डमिति तत्पदोपात्तत्वात् सबन्धिनः कथं पत्न्यपेक्षिता विधानानुपपत्तिश्च पूर्वमुक्तैव। तस्मात्कृत्स्नतदशग्रहणमेव पत्न्या वृद्धमनुर्बोधयति। दा.१५२–४

(३) इति वदन्नियोगार्थिन्या नास्ति रिक्थग्राहित्वमिति स्पष्टयति। तथा हि सति भर्तुः शयनं पालयन्तीति न वाच्यं स्यात्। तस्मान्नेयं व्यवस्था युज्यते। कथ तर्हि विरोधपरिहारः। उच्यते—'अपुत्रा शयनं भर्तुः' इत्यादिमनुवाक्योक्तगुणा पत्नी पितृभ्रातृसद्भावेऽपि स्वयमेव पतिधनं समग्रं गृह्णाति, पत्युश्च श्राद्धादि करोति। अप.२।१३६

(४) उत्तरार्धे त्वर्थक्रमेण पाठक्रमबाधो द्रष्टव्यः। ततश्चायमर्थः। उक्तलक्षणा पत्न्येव भर्त्रंश कृत्स्नं पूर्व लभेत्। पश्चात्पिण्डं दद्यात्। न पुनस्तस्या सत्या भ्रात्रादिरिति। भर्तुः शयनं पालयन्ती सुसंयतेत्यर्थः। व्रते स्थिता पत्यौ जीवत्यपि भर्तुरनुज्ञया व्रतादिपरा। 'कामं भर्तुरनुज्ञया व्रतोपवासनियमेज्यादीनामारम्भः स्त्रीधर्मः' इति शंखलिखितस्मरणात्। अनेनास्तिकताऽपि पत्यशलाभे प्रयोजिकेति वचोभङ्ग्या ज्ञापितमिति मन्तव्यम्। यद्यपि विवाहादेव पतिधने कृत्स्ने च पत्न्या अपि स्वाम्यमाजीवनात् परतन्त्रतया सिद्ध तथापि स्वतन्त्रतया स्वामित्वं लभते इत्येवमर्थ चेत्युक्तम्। तत्पिण्डकृत्स्नपदयोरर्थः प्रजापतिना प्रपञ्चितः 'जङ्गमं स्थावरमि'त्यादिना। *स्मृच.२९१

(५) अपुत्रस्य द्वादशविधपुत्रशून्यस्य। व्रते विधवानियमे। विर.५८९

(६) [पारिजातमते] तत्र विधवानियमे या चैवविधा न स्यात्तत्सत्वेऽप्यनपत्यधन मातृगामि। ×स्मृसा.१३४

(७) कृत्स्नमंशं जङ्गमस्थावरात्मकम्। तदयं अपुत्रदायग्रहणक्रमः। ÷पमा.५२४

(८) पत्नी सवर्णा, ज्येष्ठा पत्नीत्यभिधानात्। +दात.१९१

(९) [चन्द्रिकामतं खण्डयति] तद्धेयम्। क्रमे तात्पर्याभावात्। उभयाधिकारप्रतिपादनमात्रपरत्वाद्वचनस्य। अन्यथा यावदंशलाभ भर्त्रन्तेष्टिविलम्बोऽपि प्रसज्येत। स चानेकस्मृतिनिषिद्धः। अदृष्टकल्पनापत्तिश्च। पत्न्येवेत्येवकारेणापुत्रस्यान्त्यकर्मण्यपि 'अपुत्रा पुत्रवत् पत्नी' इत्यादिवचनाद्भ्रात्रादिसत्त्वेऽपि सैवाधिकारिणीति दर्शितम्। व्यप्र.४८९

वृद्धशातातपः

आत्मबान्धवपितृबान्धवमातृबान्धवाः

आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः॥

---

* सवि. स्मृचवद्भावः।

× स्वमत 'अनन्तरः सपिण्डाद्यः' इति मनुवचनव्याख्याने मन्वर्थमुक्तावल्या (पृ.१४७७) गतम्।

÷ शेष मितागतम्। + दाबद्भावः।

(१) **मिता.**२।१३६ (=); **स्मृच.**३०१ स्मृत्यन्तरम्; **स्मृसा.**१३३ (=) तृष्व (तुः स्व); **पमा.**५२८ बौधायनः; **मपा.**६७४ स्मृसावत्; **रत्न.**१५५ स्मृत्यन्तरम्; **विचि.** २४२ (=); **व्यनि.** बौधायनः; **दात.**१९६ (=) स्मृसावत्; **सवि.**४१८ स्मृत्यन्तरम्; **वीमि.**२।१३६ (=); **व्यप्र.**५३० स्मृतिः; **व्यउ.**१५६ स्मृति.; **व्यम.**६३ स्मृत्यन्तरम्; **समु.** १४२ बौधायनः.

[1]पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
[2]मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः ।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥

स्मृत्यन्तरम्

माता धनहारिणी । पत्नी श्राद्धकरी । अविभक्तसुता-पुत्रधनहरी पत्नी । विधवा भरणार्हा ।

[3]पितुः सकाशादन्येभ्यो येभ्यो माता गरीयसी ॥
[4]सर्वेषां पुत्रहीनानां स्वभर्तृणाममन्त्रकम् ।
सर्वबन्धुविहीनस्य पत्नी कुर्यात्सपिण्डनम् ॥
[5]अविभक्तपत्नीनां तदायहरत्वम् ।

अनिर्दिष्टकर्तृकवचने

माता मृतापुत्रधनभाक् । दायः सापिण्डयरूपः ।

[6]स्वर्यातस्य ह्यपुत्रस्य माता दायमवाप्नुयात्+ ।
[7]आसप्तमादृक्थाविच्छित्तिः ।

संग्रहकारः (स्मृतिसंग्रहः)

विभक्तासंसृष्टापुत्रमृतधनभाजः क्रमेण पत्नी नियोगकर्त्री पुत्रिका माता पितामही पिता च

[8]अशेषात्मजहीनस्य मृतस्य धनिनो धनम् ।
केनेदानीं ग्रहीतव्यं इत्येतन्मनुनोच्यते*॥
[9]भ्रातृषु प्रविभक्तेषु संसृष्टेष्वप्यसत्सु च ।
गुर्वादेशान्नियोगस्था पत्नी धनमवाप्नुयात्× ॥
[10]तादृक्पत्न्या अभावे तु पुत्रिका धनमर्हति+॥
[11]तावद्दुहित्रभावे तु माता धनमवाप्नुयात् ।
विद्यमानेऽपि पितरि सपत्नीसुतसंततौ ॥
[12]तादृङ्मातुरभावेऽपि पितुर्माता हरेद्धनम् ।
विद्यमानेऽपि पितरि क्षत्रियासुतसंततौ ॥
[13]पितामह्या अभावेऽपि पिता धनमवाप्नुयात् ॥

सुतसंततावित्यत्र विद्यमानायामित्यध्याहारे कृते सति अस्यार्थः सुगमः । तदेतद्धारेश्वरोत्प्रेक्षितन्यायमूलत्वात् विश्वरूपादिभिस्तन्यायनिराकरणान्मूलभूतन्यायेऽसति अनादर्तव्यमेव । ÷स्मृच.३००

मृतापुत्रधनभाजः क्रमेण सोदराः पितृसंततिः पितामह-संततिः सापिण्डाः सकुल्याः आचार्यः शिष्यः सब्रह्मचारी श्रोत्रियश्च ब्राह्मणे । सोदकाभावे राजा शूद्रे । आचार्याभावे राजा क्षत्रियवैश्ययोः ।

[14]सोदर्याः सन्त्यसोदर्या भ्रातरो द्विविधा यदि ।
विद्यमानेऽप्यसोदर्ये सोदर्या एव भागिनः ॥

+ स्मृच., व्यप्र. व्याख्यान 'पत्नी दुहितरश्चैव' इति याज्ञवल्क्यवचने क्रमेण (पृ.१४९२,१५८४) द्रष्टव्यम् ।

(१) **मिता.**२।१३६ (=); **स्मृच.**३०१ स्मृत्यन्तरम्, **स्मृसा.**१३३(=)तृष्व (तुः स्व); **पमा.**५२८ बौधायनः;**मपा.** ६७४ स्मृसावत् ; **रत्न.**१५५ स्मृत्यन्तरम्; **विचि.**२४२ (=) स्मृसावत्; **व्यनि.** बौधायनः; **दात.**१९६ (=) स्मृसावत्; **सवि.**४१८ स्मृत्यन्तरम्; **व्यप्र.**५३० स्मृतिः; **व्यउ.**१५६ स्मृतिः; **व्यम.**६४ स्मृत्यन्तरम्; **समु.**१४२ बौधायनः.

(२) **मिता.**२।१३६ (=); **स्मृच.**३०१ स्मृत्यन्तरम्; **स्मृसा.**१३३ (=) पितृष्व (मातुः स्व) तुर्मातृष्व (तुः पितृस्व) तुर्मातु (तुमातु); **पमा.**५२८ बौधायनः; **मपा.**६७४तृष्व (तु स्व); **रत्न.**१५५ स्मृत्यन्तरम्; **विचि.**२४२ (=); **व्यनि.** बौधायनः; **दात.**१९६ (=) पितृष्व (मातुः स्व) तुर्मातृष्व (तुः पितुः स्व); **सवि.**४१८ स्मृत्यन्तरम्; **व्यप्र.**५३० स्मृतिः; **व्यउ.**१५६ स्मृतिः; **व्यम.**६४ स्मृत्यन्तरम्; **समु.**१४२ बौधायनः. (३) **सवि.**४१९

(४) **बाल.**२।१३५ (पृ.२३०). (५) **सवि** ४०५.

(६) **स्मृच.**२९७; **व्यप्र.**५२३; **समु.**१४२.

(७) **स्मृसा.**७४.

(८) **स्मृच.**२९०; **सवि.**४०५ न्मनुनो (दधुनो) पू.:

---

* स्मृच. व्याख्यानं 'पिता हरेदपुत्रस्य' इति मनुवचने (पृ.१४७६) द्रष्टव्यम् । सवि. स्मृचवत् ।

× स्मृच. व्याख्यान 'पत्नी दुहितरश्चैव' इति याज्ञवल्क्यवचने (पृ.१४९२) द्रष्टव्यम् ।

+ स्मृच. व्याख्यान 'पत्नी भर्तुर्धनहरी' इति कात्यायनवचने (पृ.१५२१) द्रष्टव्यम् ।

÷ सवि. स्मृचवत् ।

४१५ पू.; **समु.** १४० सविवत्

(१) **स्मृच** २९४; **पमा.**५३३ च (वा) देशान्नि (देशनि); **समु.**१४१.

(२) **स्मृच.**२९६; **समु.**१४१.

(३) **स्मृच.**३००; **सवि.**४१८ तावद् (तासां) तु (ऽपि); **समु.**१४१ तावद् (तादृक) तु (ऽपि).

(४) **स्मृच.**३०० वेऽपि (वे तु) मा (भ्रा);**सवि.**४१८; **समु.**१४२.

(५) **स्मृच.**३००; **सवि.**४१८; **समु.**१४२.

(६) **स्मृच.**३००; **सवि.**४१८; **व्यप्र.**५२७ एव (धन); **समु.**१४२.

[1]पितर्यविद्यमानेऽपि धनं तत्पितृसंततेः ।
तस्यामविद्यमानायां तत्पितामहसंततेः ॥
[2]असत्यामपि तस्यां तु प्रपितामहसंततेः ।
एवमेवोपरितनाः सपिण्डा धनभागिनः ॥
[3]तदभावे सकुल्याः स्युराचार्यः शिष्य एव वा ।
सब्रह्मचारी सद्विप्रः पूर्वाभावे परः परः ॥
[4]शूद्रस्यैकोदकाभावे राजा धनमवाप्नुयात् ।

(१) स्मृच ३०२; पमा.५३०; समु.१४३.
(२) स्मृच.३०२; पमा ५३० तनाः (तना) धन (ऋक्थ); समु.१४३ तु (तत्).
(३) स्मृच.३०२; पमा.५३० सकुल्याः (ऽसपिण्डाः); समु.१४३.
(४) स्मृच.३०२; पमा.५३०; सवि.४२० (=) दका

आचार्यस्याप्यभावे तु तथा क्षत्रियवैश्ययोः ॥

मार्कण्डेयपुराणम्

साप्तपौरुषनिरुक्तिः

[1]पिता पितामहश्चैव तथैव प्रपितामहः ।
पिण्डसंबन्धिनो ह्येते विज्ञाताः पुरुषास्त्रयः ॥
[2]पिण्डलेपभुजश्चान्ये पितामहपितामहात् ।
प्रभृत्युक्तास्त्रयस्तेषां यजमानश्च सप्तमः ।
इत्येवं मुनिभिः प्रोक्तः संबन्धः साप्तपौरुषः ॥

(दरा) धनमवा (तद्धनमा) पू.; समु.१४३ दका (दरा).
(१) स्मृसा.१३३.
(२) दा.१६४; स्मृसा.१३३ त्युक्ता (त्याद्या) त्येवं (त्येष).

---

*स्मृतिसारः

मृतापुत्रधनाधिकारक्रमः ससृष्टिविभागश्च

अथ बालरूपमते अपुत्रधनाधिकारः— तत्र याज्ञवल्क्यः—'पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥ एषामभावे पूर्वेषा धनभागुत्तरोत्तरः । स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥' कात्यायनः—'अपुत्रस्यार्यकुलजा पत्नी दुहितरोऽपि वा । तदभावे पिता भ्राता भ्रातुः पुत्राश्च कीर्तिताः ॥' पत्नी च सवर्णा सैव ज्येष्ठा । यथोक्तम्—'सवर्णा चेद्द्विजातीना प्रशस्ता दारकर्मणि ।' एतदभिप्रायमेव शंखः—'ज्येष्ठा वा पत्नी'इति । बृहस्पतिः—'सकुल्यैर्विद्यमानैस्तु पितृमातृसनाभिभिः । असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी ॥' बृहन्मनुः—'अपुत्रा शयन भर्तुः पालयन्ती व्रते स्थिता । पत्न्येव दद्यात्तत्पिण्ड कृत्स्नमर्थं लभेत च ॥' यच्चेदं नारदवचन —'अन्यत्र ब्राह्मणात्किन्तु राजा धर्मपरायणः । तत्स्त्रीणा जीवन दद्यादेष दायविधिः स्मृतः ॥' तदूढेतरावरुद्धाभिप्रायेण । तथा च बृहस्पतिः—'येऽपुत्राः क्षत्रविट्शूद्रा: पत्नीभ्रातृविवर्जिताः । तेषामर्थहरो राजा सर्वस्याधिपतिर्हि सः ॥' तथा च नारदः—'भ्रातृणामप्रजः प्रेयात्कश्चिच्चेत्प्रव्रजेदपि । विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना ॥ भरणं चास्य कुर्वीरन् स्त्रीणामाजीवितक्षयात् । रक्षन्ति शय्या भर्तुश्चेदाच्छिन्द्युरितरासु च ॥' इति । तदसवर्णपत्न्यभिप्रायम् । 'सवर्णा चेद्द्विजातीनामि'ति वचनात् । सवर्णा ज्येष्ठा इत्यभिप्रायः । 'सकुल्यैर्विद्यमानैरि'त्यादिवचनेनैव विरोधात् । अथवाऽत्यन्तयुवत्यपुत्राभिप्रायं नारदवचन भरणमात्रविधायकम् । अन्यत्र सकलार्थहारिण्येव । तथा च शंखः—'भ्रातृभार्यास्नुषाणा च न्यायप्रवृत्तानामनपत्यानां पिण्डमात्र गुरुर्दद्याज्जीर्णानि वासास्यविकृतानी'ति । हारीतः—'विधवा यौवनस्था च नारी भवति कर्कशा । आयुषः क्षपणार्थं च दातव्य जीवनं सदा ॥' अथवा संसृष्टयभिप्रायं 'भ्रातृणामप्रज' इति नारदवचनम् । 'पत्नी दुहितर' इति विभक्तासंसृष्टिविषयम् । तथा हि 'पत्नी दुहितर'इति बाधनार्थं 'संसृष्टिनस्तु संसृष्टी'ति पठितम् । न च 'सोदरस्य तु सोदर' इत्यनेन ससृष्टिसंबन्धबाधनात् पत्नीत्व(त्त)स्यापि बाधात् पत्नीत्यस्य विरोधः । सोदराणा संसृष्टिनां तुल्यसंबन्धावगमात् । 'येषां ज्येष्ठः कनिष्ठो वा हीयेताशप्रदानतः । म्रियेतान्यतरो वापि तस्य भागो न लुप्यते ॥ सोदर्या

* हरिनोपेन स्मृतिसारे ये अधुनाऽनुपलब्धानिबन्धाशाः समुद्धृतास्तेऽत्र सगृह्यन्ते ।

विभजेयुस्तं समेत्य सहिताः समम्। भ्रातरो ये च संसृष्टाः भगिन्यश्च सनाभयः॥' इति मनुवचनात्। न चाप्यस्य वचनस्यायमर्थो यत्सोदराणा सद्भावे त एव विभजेयुः। संसृष्टिना तु सद्भावे संसृष्टिन इति सोदराणा विशेषेण समभागस्य प्राप्तत्वात्। 'समेत्य सहिताः समभि'ति पदमभिधेयार्थमर्थवादमात्रमनर्थकं स्यात्। सोदराणा संसृष्टिना परस्परं समभागस्य प्राप्तत्वात्। 'समेत्य सहिताः समम्' इति अर्थवत्। इतरेतरयोगाश्रयणेऽपि विभजेयुरित्यत एव इतरेतरयोगावगतिः। चकाराच्च न 'संसृष्टिनस्तु संसृष्टी'ति केवलसंसृष्टिविषयो निरपेक्षविधिः। तथा 'सोदराणा तु सोदर' इति केवलसोदरविषयो निरपेक्षविधिः। उभयमेलके सापेक्षत्वापत्तेः। एकस्य विधेः सापेक्षत्वनिरपेक्षत्वाद्वैषम्यदोषः, केवलविषये निरपेक्षविधेः पर्यवसानात्, उभयमेलके तु समुच्चयो विद्धयन्तरेण, न च केवलविधेरेव समुच्चयेऽपि प्रापकत्व यथा गोसव उभे कुर्यादिति बृहद्रथन्तरयेः केवलयोरपि निरपेक्षस्तुतिसाधनतया विहितयोः समुच्चयविधान विद्धयन्तरेणेति नैकविधौ वैषम्यमिति विश्वरूपमतम्। ...परिहारेण समाधीयमानमपि न त्याज्यम्। असवर्णपत्नीदुहित्रभिप्रायेण लक्ष्मीधरमते। तन्मते विधवायौवनस्थाभिप्रायेण 'भ्रातृणामप्रजः प्रेयादि'ति नारदवचनस्योपपत्तेः। न च 'पत्नी दुहितर' इति बाधनार्थं 'संसृष्टिनस्तु संसृष्टी'ति प्राप्तम्। पत्न्याद्यभावे सत्युपपत्तौ बाधसमाश्रयणानुपपत्तेः। न च स्वल्पबलत्वे 'पत्नी दुहितर' इति, बहुधनत्वे 'भ्रातृणामप्रज' इति वचनमिति श्रीकरमतमुचितम्। न, परस्वल्पत्वभूयस्त्वादिविशेषाश्रवणात्। उभयस्मिन्नपि धने उक्तविशेषवचनयोर्विरोधात्। पतिदाये च न स्त्रीणा विक्रयादि, 'स्त्रीणा स्वपतिदायस्तु उपभोगफलः स्मृतः। नापहारं स्त्रियः कुर्युः पतिवित्तात्कथंचन॥' इति भारतवाक्यात्। पत्न्यभावे तु दुहिता 'भर्तुर्वित्तहरी पत्नी ता विना दुहिता स्मृता।' 'अङ्गादङ्गात्संभवति पुत्रवद्दुहिता नृणाम्। तस्याः पितृधन त्वन्यः कथ गृह्णीत मानवः॥ यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा। तस्यामात्मनि तिष्ठन्त्या कथमन्यो धनं हरेत्॥' नारदः—'पुत्राभावे तु दुहिता तुल्यसंतानदर्शनात्। पुत्रश्च दुहिता चोभौ पितुः सतानकारकौ॥' पुत्रतुल्यतया स्तुतिपरमिदं वचनम्। न पुनः पत्नीसद्भावेऽपि पुत्रवद्दुहितृसबन्धार्थम्। पराशरः—'अपुत्रस्य मृतस्य कुमारी ऋक्थं गृह्णीयात् तदभावे चोढा।' बृहस्पतिः—'सदृशी सदृशेनोढा साध्वी शुश्रूषणे रता। कृता वाऽप्यकृता वापि पितुर्धनहरी तु सा॥' यच्चेदं नारदवचन— 'भ्रातृणामप्रजः प्रेयात्कश्चिच्चेत्प्रव्रजेदपि। विभजेयुर्धन तस्य शेषास्ते स्त्रीधन विना॥ यदि स्यादुहिता तस्य पित्रंशो भरणे मतः। आसंस्काराद्धरेद्भाग परतो बिभृयात्पतिः॥' तदसवर्णदुहित्रभिप्राय अनेकवचनविरोधात्। संसृष्टिविषयमिति विश्वरूपः (पक्षः)। बहुधनविषयमिति श्रीकरः। असवर्णाभिप्रायमिति युक्तम्। 'सदृशी सदृशेनोढे'ति सवर्णश्रवणात्। अन्धादीश्च प्रक्रम्य — 'मृताश्चैषा प्रभर्तव्या यावद्वै भर्तृसात्कृताः' इत्यादिविशेषवैसामर्थ्यापत्तेः(?)। इतरत्र भ्रातृसभवेऽपि दुहितुरधिकारः। बृहस्पतिः—'यथा पितृधने स्वाम्य तस्याः सत्स्वपि बन्धुषु। तथैव तत्सुतोऽपीष्टे मातृमातामहे धने॥' मनुः—'दौहित्रो ह्यखिल ऋक्थमपुत्रस्य पितुर्हरेत्। स एव दद्यात्तत्पिण्डं पित्रे मातामहाय च॥' इदं पित्राद्यभावे एव 'पत्नी दुहितर' इति क्रमाविरोधात्। दुहित्रभावे च पितुः, बृहद्विष्णुः—'अपुत्रस्य धन पत्न्यभिगामि, तदभावे दुहितृगामि तदभावे मातृगामि' एतस्मिन्नेव क्रमे। मनुः—'पिता हरेदपुत्रस्य ऋक्थं भ्रातर एव वा।' मात्रभावे भ्रातर इति। पित्रभावे मातुः पूर्वपठितबृहद्विष्णुक्रमात्। तथा च बृहस्पतिः—'भार्यासुताविहीनस्य तनयस्य मृतस्य च। माता ऋक्थहरी ज्ञेया भ्राता वा तदनुज्ञया॥' इति क्रमः। 'अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि निवृत्ताया पितुर्माता हरेद्धनम्॥' मातुरभावे भ्रातृतत्पुत्राभावे वचनमिदम्। यद्यपि याज्ञवल्क्ये 'पितरौ' इति द्वन्द्वनिर्देशस्तथापि द्वयोरधिकारे वचनान्तरात्क्रमावगतिः। मातुरभावे भ्रातुः 'पितरौ भ्रातरः' इति वचनात्। तथा च मनुः (विष्णुः)—'अपुत्रस्य धनं पितृगामि, तदभावे मातृगामि, तदभावे भ्रातृगामि, तदभावे तत्पुत्रगामि' इदमस्मभ्य न रोचते। एव हि कात्यायनः—'विभक्ते संस्थिते द्रव्य पुत्राभावे पिता हरेत्। भ्राता वा जननी वापि माता वा तत्पितुः क्रमात्॥'

पुत्राभाव इति तु प्राक्तनान्तरङ्गभूतपुत्रपत्नीदुहित्रभावोपलक्षणम्। प्राचीनतया अन्तरङ्गत्वाविशेषात्। अतः पित्रादिभिर्विभक्तद्रव्ये मृते पुत्रपत्नीदुहित्रभावे पिताऽधिकारीति, पित्रभावे भ्राता मात्रानुमते, अननुमतौ च मातैव तदभावे भ्राता। 'माता ऋक्थहरी ज्ञेया भ्राता वा तदनुज्ञया' इति वचनात्। एषामभावे मृतस्य पितामही। अतः 'पत्नी दुहितर' इति याज्ञवल्क्यवचनमपि क्रमपरं विभक्तमृतविषयम्। तथा सति यदेतत् शङ्खलिखनं 'स्वर्यातस्य ह्यपुत्रस्य भ्रातृणामेव तद्धनं, तदभावे पितरौ हरेता ज्येष्ठा वा पत्नी'ति तदविभक्तसंसृष्टिविषयम्। अत्रापि चापुत्रस्येति पुत्रदुहितृपत्न्यभावोपलक्षणम्। विभक्तविषये पितुस्तदभावे भ्रातेत्युक्तेः, अर्थादविभक्ते संसृष्टे वा पितुरधिकारो भवति। ततोऽनेन वचनेन यद्यन्यस्य भ्रातुः इति प्राप्तम्। भ्रातुरभावे भ्रातुः सकाशाद्बहिरङ्गयोरपि मातापित्रोरधिकारः ज्येष्ठपत्न्यनुमतौ। अतो याज्ञवल्क्यवचने दुहितुरभावे पित्रधिकारो विभक्तविशेषानादरेणेति व्याख्यानमयुक्तम्। स्वर्यातस्येति वचनव्याख्यानं श्रीकरादिमते न मनोहरम्। भ्रात्रधिकारे चायं विशेषः सोदरयोः सोदराणामधिकारः न सापत्न्याना 'सोदरस्य तु सोदर' इति वचनात् आनन्तर्याच्च। सोदरेष्वेव बहुषु संसृष्टी सोदरो गृह्णीयात् 'संसृष्टिनस्तु संसृष्टी'ति वचनात्। तदयमर्थः—सोदरस्य मृतस्य संसृष्टिनः सोदरो गृह्णन्नसंसृष्टी गृह्णीयात्। नासंसृष्टी सोदरोऽपीति।

यदा च सपत्नः संसृष्टी सोदरश्चासंसृष्टी तदा केन प्राप्तव्यमित्यपेक्षायामुभाभ्या ग्रहणमाह मनुः—'येषा ज्येष्ठः कनिष्ठो वा हीयेताशप्रदानतः। म्रियेतान्यतरो वाऽपि तस्य भागो न लुप्यते॥ सोदर्या विभजेयुस्त समेत्य सहिताः समम्। भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः॥' इति, एव च योजनाया विधिवैषम्यदोषः श्रीकरोक्तो नात्मान लभते विधिभेदाच्च पूर्वं परिहृतत्वात्। 'अन्योदर्यस्तु संसृष्टी नान्योदर्यधन हरेत्। असंसृष्टयपि चादद्यात्संसृष्टो नान्यमातृजः॥' इति याज्ञवल्क्यस्यायमर्थः। अन्योदर्यः सापत्न्यः धनं हरन् असंसृष्टी स न हरेत्। अर्थादसंसृष्टयन्योदर्यो न हरेत्। तच्च हरन् सोदर्यसद्भावे मनुवचनानुसारेण तेन समं हरेत्। सोदराभावे सकलमेव, न तत्र सोदरभ्रातृपुत्रादेरधिकार इत्यत्र तात्पर्यम्। असंसृष्टित्वे भ्रातृपुत्रस्याधिकारस्तदानीं तत्सुत इति वचनानुसारात्। नन्वेव असंसृष्टस्य सापत्न्यस्यानधिकार एव किमित्यत्राह 'असंसृष्टयपि चादद्यात्सोदर्यो नान्यमातृजः।' संसृष्टश्चेदन्यमातृजो नास्ति।

संसृष्टिना पुनर्विभागे विशेषमाहतुर्मनुविष्णू—'विभक्ताः सह जीवन्तो विभजेयुः पुनर्यदि। समस्तत्र विभागः स्यात् ज्यैष्ठ्य तत्र न विद्यते॥' बृहस्पतिः—'संसृष्टिना तु यः कश्चिद्विद्याशौर्यादिनाधिकम्। प्राप्नोति तस्य दातव्यो द्व्यशः शेषाः समाशिनः॥' वृद्धहारीतः—'संसृष्टी गृह्णाति स्थावरवर्जं स्थावराणा सपिण्डसमते'ति भ्रातृपर्यन्ताभावे भ्रातृपुत्राणामधिकारः तत्सुत इति वचनात्। अत उभयोर्भ्रातृपुत्रयोः सद्भावेऽपि न समोऽधिकारः, भ्रातृसद्भावेऽपि मृतपितृकभ्रातृजभ्रातृपुत्राणामधिकारः। भ्रातृपुत्राणा तु पितरि जीवति मृते पुत्रे तस्यापि भ्रातृधने अधिकारः पितृतः। तत्पुत्राणामपि पितृद्वारक एव संबन्धः। पितृत इति भ्रातृपुत्रयोस्तुल्यसंबन्धाद्विभज्य ग्रहणम्, विभागे च 'अनेकपितृकाणां तु पितृतो भागकल्पने'त्यस्य विषयः, भ्रातृपुत्रपर्यन्ताभावे गोत्रजस्याधिकारः। 'तत्सुतो गोत्रज' इति वचनात्। गोत्रजश्च सपिण्ड एवाभिप्रेतः, गोत्रं चातीतपित्रादिषट्पुरुषपर्यन्त सप्तमान्निवर्तते। 'सपिण्डता तु पुरुषात्सप्तमाद्विनिवर्तते' इति मनुवचनात्। षट्पुरुषस्य तत्संततेश्च गोत्रजसपिण्डशब्दवाच्यता, तत्पितृसंततिः पितामहसंततिः प्रपितामहसंततिः वृद्धप्रपितामहसंततिः पञ्चमपुरुषसंततिश्च, पूर्वोत्तरस्य सपिण्डगोत्रजाः सप्त पूर्वात् सप्तमात् सपिण्डतानिवृत्तिः। यथोक्त मार्कण्डेयपुराणे—'पिता पितामहश्चैव तथैव प्रपितामहः। पिण्डसंबन्धिनो ह्येते विज्ञाताः पुरुषास्त्रयः॥ सपिण्डलेपभुजश्चान्ये पितामहपितामहात्। प्रभृत्याद्यास्त्रयस्तेषा यजमानश्च सप्तमः॥ इत्येष मुनिभिः प्रोक्तः सबन्धः सप्तपौरुषः।' तत्रापि वचनान्तरम्। 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्' इति मनुवचनात् पित्रादिसंततिक्रमेणाधिकारः। यत्र पितामहपुत्रसंततिः अपरपुत्रस्य च पुत्रास्तत्र भ्रातृपुत्राणा वित्तग्रहणमिति श्री-

करः, पितामहसंतत्यपेक्षयाऽऽनन्तर्यात् । तदसत् । यथा तदपेक्षयाऽऽनन्तर्य, तथा पितृभ्रातृपुत्रापेक्ष भ्रातुरानन्तर्यमविशिष्टमिति न भ्रातृपुत्राणामधिकारः । सपिण्डाभावे च समानोदकानामधिकारः । समानोदकाश्च सपिण्डेभ्यः प्राङ्नोऽज्ञायमानजन्मनामानः 'समानोदकभावस्तु जन्मनाम्नोरवेदनात् ।' बृहन्मनुः—'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । समानोदकभावस्तु निवर्तेताचतुर्दशात् ॥ जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते ॥' इति समानोदका अपि गोत्रजा एव । गोत्रजाभावे बन्धूनामधिकारः 'गोत्रजो बन्धुरि'ति वचनात् । बन्धुश्च त्रिविधः आत्मबन्धुः पितृबन्धुर्मातृबन्धुश्च । तत्रान्तरङ्गत्वात् आत्मबन्धूनामेव । आत्मबन्धुश्च 'आत्मपितुः स्वसुः पुत्रा आत्ममातुः स्वसुः सुताः । आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥' तदभावे पितृबन्धूनामधिकारः । पितृबन्धुश्च—'पितुः पितुः स्वसुः पुत्राः पितुर्मातुः स्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥' तदभावे मातृबन्धूनाम् । 'मातुर्मातुः स्वसुः पुत्रा मातुः पितृस्वसुः सुताः । मातृमातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥' स्मृसा.१२८–३४

पारिजातेऽपुत्रधनाधिकारः— तत्र मनुः—'संस्थितस्यानपत्यस्य सगोत्रात्तन्तुमाहरेत् । तत्र यद् ऋक्थजातं स्यात् तत्तस्मै प्रतिपादयेत् ॥' अनपत्यमृतपत्नी सगोत्रादेवरसपिण्डान्यतरसपिण्डात्तन्तुं संतानमुत्पाद्यास्मै सर्वमृक्थं दद्यात्, स्वय नाददीतेत्यस्यार्थः । बृद्धमनुः 'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता । पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमर्थं लभेत च ॥' व्रते विधवानियमे, या चैवविधा न स्यात्तत्सत्वेऽप्यनपत्यधनं मातृगामि । यच्च 'भरण चास्य कुर्वीत स्त्रीणामाजीवितक्षयात् । रक्षन्ति शयन भर्तुश्चेदाच्छिन्द्युरितरासु तत् ॥' इति भरणमात्रं शखोक्तं तद्विधवाव्रतादिरहितव्यभिचारिणीमात्रविषयं अविभक्तभार्याविषयमनूढाविषय वा । बृहस्पतिः—'आम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः । शरीरार्द्धहरा जाया पुण्यापुण्यफले समा ॥ यस्य नोपरता भार्या देहार्धं तस्य जीवति । जीवत्यर्द्धशरीरे तु कथमन्यः समाप्नुयात् ॥ सकुल्यैर्विद्यमानैस्तु पितृमातृसनाभिभिः । असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी ॥ पूर्वं प्रमीताग्निहोत्रं मृते भर्तरि तद्धनम् । विन्देत्पतिव्रता नारी धर्म एवं सनातनः ॥ जङ्गमं स्थावरं हेम कुप्य धान्यं रसाम्बरम् । आदाय दद्यात्तच्छ्राद्धं मासषाण्मासिकादिकम् ॥ पितृव्यगुरुदौहित्रान् भ्रातृस्वस्रीयमातुलान् । पूजयेत् कव्यपूर्त्ताभ्या बृद्धानाथातिथीन् स्त्रियः ॥ तत्सपिण्डा बान्धवा ये तस्याः स्युः परिपन्थिनः । हिस्युर्धनानि तान् राजा चौरदण्डेन शातयेत् ॥' कुप्यमसारं द्रव्यजातम् । केचित्स्त्रियाः पार्वणमित्याहुः । अतस्तद्वारणाय षाण्मासिकादीत्युक्तम् । अतो द्वादश मासिकानि षाण्मासिके द्वे आदिशब्दात्प्रत्यब्द तच्छ्राद्ध, अतो नान्यत्कुर्यात् । अन्यथा वचनान्तरैरेषा श्राद्धाना निषिद्धत्वादिद वचनमनर्थक स्यादिति हरिहरः । मनुः—'पुत्राभावे तु दुहिता तुल्यसंतानदर्शनात् । पुत्रश्च दुहिता चोभौ पितुः सतानकारकौ ॥ यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा । तस्यामात्मनि तिष्ठन्त्या कथमन्यो धन हरेत् ॥' पुत्राभावे पुत्रिकाया अनुत्पन्नपुत्राया धनहरत्वमप्राप्तमनेन विधीयते इति मेधातिथिः । बृहस्पतिः—'सदृशी सदृशेनोढा साध्वी शुश्रूषणे रता । कृता वाप्यकृता चापि पितुर्धनहरी तु सा ॥' बृद्धबृहस्पतिः—'भार्यासुतविहीनस्य तनयस्य मृतस्य च । माता रिक्थहरी प्रोक्ता भ्राता वा तदनुज्ञया ॥' मातृपदं पितुरप्युपलक्षणम् । तदनुज्ञया मातापित्रोः प्रेरणया । मनुः—'अनपत्यस्य पुत्रस्य माता दायाद्यमाप्नुयात् । मातर्यपि मृताया च पितुर्माता हरेद्धनम् ॥' अनपत्यत्वमत्रापुत्रपत्नीदुहितृत्वमभिप्रेतम् । पितामह्यधिकारः पितृभ्रातृसपिण्डाभावे सति द्रष्टव्यः । मात्रभावे पित्राद्यधिकारस्यैव याज्ञवल्क्येनोक्तत्वात् । दायाद्यं दायादग्राह्यमृक्थम् । गौतमः—'असंसृष्टिभागः प्रेतानां ज्येष्ठस्य ।' असंसृष्टाना भ्रातृणा मध्ये यः प्रेयादनपत्यस्तस्य भाग ज्येष्ठ एव गृह्णीयादित्यर्थः । एतदपि पत्नीमातापित्रसंभवविषयम् ।

मनुः—'पिता हरेदपुत्रस्य ऋक्थ भ्रातर एव वा । त्रयाणामुदकं कार्य त्रिषु पिण्डः प्रवर्त्तते ॥ चतुर्थः संप्रदातैषा पञ्चमो नोपपद्यते ॥ अनन्तरः सपिण्डाद्यः तस्यैवैतद्धनं भवेत् । अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा ॥' अनन्तरः सपिण्डाद्यपेक्षया संनिकृष्टः । धनमपुत्रस्येति शेषः । सकुल्यः समान-

कुलः। पैठीनसिः—'अपुत्रस्य स्वर्यातस्य भ्रातृगामि धनं, तदभावे मातापितरौ लभेता, पत्नी कन्येष्ठा, सगोत्रशिष्यसब्रह्मचारिणः।' भ्राताऽत्र मातृपित्रादिकुटुम्बभर्ता। अज्येष्ठाऽत्र ब्रह्मचर्यविधवाधर्महीना, न तु कृत्स्नविधवा धर्मकरी, तस्याः पतिरिक्थहरणे मुख्यत्वात्। नापि व्यभिचारिणी तस्या निवार्यत्वात्। सब्रह्मचारी पितृसहाध्यायी। देवलः—'ततो दायमपुत्रस्य विभजेरन् सहोदराः। तुल्या दुहितरो वापि म्रियमाणः पितापि वा॥ सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम्। तेषामभावे गृह्णीयुः कुल्याना सहवासिनः॥' तुल्याः सहोदराः। म्रियमाणः सस्पृहश्चेति शेषः। सवर्णा भ्रातरोऽत्र वैमात्रेयाः, भार्याऽत्र ब्रह्मचर्यमात्रस्था अपकृष्टवर्णा वा, कुल्याना मध्ये यः संनिकृष्ट इति शेषः। याज्ञवल्क्यः—'पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजो बन्धुः शिष्यसब्रह्मचारिणः॥ एषामभावे पूर्वस्य धनभागुत्तरोत्तरः। स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः॥' पत्न्यत्र विधवा धर्मचारिणी। दुहितरोऽत्र पुत्रिकात्वेनाकृताः। पितरौ द्वावपि जीवतश्चेत् सस्पृहौ च। अतीते त्वेकस्मिन् अन्यतरो गृह्णीयात्।

विष्णुः— 'अपुत्रस्य धनं पत्न्यभिगामि, तदभावे बन्धुगामि, तदभावे कुल्यगामि, तदभावे ब्राह्मणधनवर्जं राजगामि'। दुहितृदौहित्रानन्तरं बृहस्पतिः—'तदभावे भ्रातरस्तु भ्रातृपुत्राः सनाभयः। सकुल्या बान्धवाः शिष्याः श्रोत्रियाश्च धनार्हकाः॥ मृतोऽनपत्योऽभार्यश्चेद्भ्रातृपितृमातृकः। सर्वं सपिण्डास्त दाय विभजेरन् यथाशतः॥ समुत्पन्नाद्धनादर्द्धं तदर्थं स्थापयेत्पृथक्। मासषाण्मासिके श्राद्धे वार्षिके वा प्रयत्नतः॥ बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा। यस्त्वासन्नतरस्तेषा सोऽनपत्यधन हरेत्॥' तदर्थमनपत्यश्राद्धकरणार्थम्। आपस्तम्बः—'पुत्राभावे यः प्रत्यासन्नः सपिण्डः तदभावे त्वाचार्यस्तदभावे अन्तेवासी ऋत्विग्वा तदर्थेषु चोपयोजयेत् दुहिता वा।' बौधायनः—'प्रपितामहः पितामहः पिता स्वयं सोदर्यभ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्रः तत्पुत्रवर्ज्यं तानविभक्तदायान् सपिण्डानाचक्षते। विभक्तदायान् सकुल्यानाचक्षते। असत्स्वङ्गजेषु तद्वामी ह्यर्थो भवति। सपिण्डाभावे सकुल्यः, तदभावे पिता आचार्योऽन्तेवासी ऋत्विग्वा धनं हरेत् तदभावे राजा'। तान् उक्तान्, तत्पुत्रवर्ज्यं प्रपौत्रपुत्र वर्जयित्वा। इय च परिभाषा विभागमात्रविषया नाशौचादिषु। तत्र तु समानपिण्डाः सपिण्डा गृह्यन्ते। तेन विभक्तदाया अप्याशौचादिषु भवन्ति सपिण्डाः। अङ्गजेष्वौरसादिषु। तद्वामी सपिण्डगामी। पिताऽत्र पितृतुल्यः, अन्यथा सपिण्डत्वादेव सिद्धे तदुपादानमफलम्।

नारदः—'अभावे दुहितॄणां च सकुल्या बान्धवास्तथा। ततः सजात्यः सर्वेषामभावे राजगामि तत्॥ अन्यत्र ब्राह्मणात्किन्तु राजा धर्मपरायणः। तत्स्त्रीणा जीवनं दद्यादेष दायविधिस्स्मृतः॥' सकुल्याः पितृव्यपुत्रादयः, सजात्यस्तुल्यजातीयः, किन्त्वित्यादि निर्धनब्राह्मणस्त्रीविषयम्। मनुः—'सर्वेषामप्यभावे तु ब्राह्मणा ऋक्थभागिनः। त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते॥ अनाहार्यं ब्राह्मणस्वं राज्ञाऽस्वर्ग्यमिति स्थितिः। इतरेषा तु वर्णाना सर्वाभावे हरेन्नृपः॥' देवलः—'सर्वत्रादायिक राजा हरेद् ब्रह्मस्ववर्जितम्। अदायिक तु ब्रह्मस्व श्रोत्रियेभ्यः प्रदापयेत्॥' अदायिक दायादशून्यम्। बौधायनः—'ब्रह्मस्व पुत्रपौत्रघ्न हन्यादेकाकिन विषम्। तस्माद्राजा ब्राह्मणस्व नादद्दीत कथचन॥' शखलिखितौ 'परिषद्गामि ब्रह्मस्वं न राजगामि, न हार्यं राज्ञा देवतागणसंस्थितम्। न निक्षेपोपनिधिक्रमागत न बालस्त्रीधनानि, एव ह्याह—न हार्यं स्त्रीधन राज्ञा तथा बालधनानि च। नार्याः षडागम वित्तं बालाना पैतृकं धनम्॥' परिषद् ब्राह्मणाः। उपनिधिर्निक्षेपविशेषः। तत्क्रमागत क्रमप्राप्त, षडागममध्यग्र्यादि षड्विधायलब्धम्। मनुः—'बालदायादिक ऋक्थ तावद्राजानुपालयेत्। यावत्स स्यात्समावृत्तो यावद्वातीतशैशवः॥' बालदायादिक बालस्वामिक, अनुपालयेद्दायादेभ्यो रक्षयेत्। विष्णुः 'बालानाथस्त्रीधनानि च राजा परिपालयेत्।' शखलिखितौ— 'संप्रेक्षेद्राजा बालाना धनान्यप्राप्तव्यवहाराणा, श्रोत्रियवीरपत्नीना, प्रहीणस्वामिकानि राजगामीनि भवन्ति।' श्रोत्रियवीरपत्नीना श्रोत्रिये वीरे च प्रोषिते मृते वा तत्पत्नीना, पुत्राधिकारे बौधायनः—'तेषामप्राप्तव्यवहाराणा अंशान्सोपचयान् सुगुप्तान् निद-

ध्यात् ।' सोपचयान् सवृद्धिकान्, सुगुप्तान् सुरक्षितान् । कात्यायनः—'प्रोषितस्य हि यो भागो रक्षेयुः सर्व एव तम् । बालपुत्रे मृते रक्ष्यमृक्थं तत् तैश्च बन्धुभिः ॥ पोगण्डात्परतस्तं तु विभजेरन् यथांशतः ॥' बालपुत्रः बालः पुत्रो यस्य, पोगण्डो व्यवहारानभिज्ञः । विष्णुः—'यश्चार्थहरः स पिण्डदायी स्मृतः । यो यस्यादद्यात स तच्छ्राद्ध कुर्यात् । पिण्ड च त्रिपुरुषं दद्यात् ।' श्राद्धमेकोद्दिष्ट मासिक सपिण्डीकरणं च । वृद्धमनुः—'भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा । स सपिण्डक्रिया कृत्वा कुर्यादभ्युदय ततः ॥' विष्णुः—'पुत्रः पितृधनालाभेऽपि पिण्ड दद्याद्धानप्रस्थधनमाचार्यो गृह्णीयाच्छिष्यो वा ।' याज्ञवल्क्यः—'वानप्रस्थयतिब्रह्मचारिणामृक्थभागिनः । क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः ॥' क्रमेण प्रतिलोमक्रमेण, तेन ब्रह्मचारिणो नैष्ठिकस्याचार्यः, यतेः सच्छिष्यः, वानप्रस्थस्य धर्मभ्राता एकतीर्थी, धर्मभ्राता भ्रातृत्वेन प्रतिपन्नः, एकतीर्थी एकाश्रमी, 'अनशाश्चाश्रमान्तरगताः' इति वसिष्ठवचनादनशत्वेऽपि वानप्रस्थस्य पाक्षिकसचयविधानाच्चतेश्च कौपीनकन्थादिसभवादक्थमस्त्येव तेषामिति न दोषः ।

स्मृसा.१३४-८

तत्रैव संसृष्टिविभागः— तत्र नारदः—'विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि । समस्तत्र विभागः स्याज्ज्यैष्ठ्य तत्र न विद्यते ॥' सह जीवन्तः संसृज्य जीवन्तः, समः (अ)न्यूनानतिरिक्तः, समं सज्यैष्ठविषमः (?), ज्यैष्ठ्य विंशोद्धारादिहेतुविशेषः । 'येषा ज्येष्ठः कनिष्ठो वा हीयेताशप्रदानतः । म्रियेतान्यतरो वापि तस्य भागो न लुप्यते ॥' हीयेत प्रोषितत्वादिहेतोर्विभागकाले अनुपस्थितत्वाद्भ्रश्येत । अन्यतरो विभजतामेव, न लुप्यते । देयमेवेति शेषः । कस्तर्हि त भाग गृह्णीयादित्यत्राह—'सोदर्या विभजेरंस्ते समेत्य सहिताः समम् । भ्रातरो ये च संसष्टा भगिन्यश्च सनाभयः ॥' सोदर्या भ्रातर इत्यर्थः । अतो भ्रातृणामेव मध्ये पुनर्विभागानन्तरं ये संसृष्टा मिश्रीकृतधनत्वेनैकयोगक्षेमास्ते सोदरसंसृष्टित्वोभयविशेषणवन्तः संगृह्णीयुरित्यर्थः । भगिन्यश्च सनाभयः सोदराः, ताश्चाप्रत्ताः, प्रत्ताः पुनः पतिगोत्रभावमनुभवन्त्यो असनाभय इति हरिहरः ।

व्य. कां. १९१

बृहस्पतिः—'संसृष्टी यौ पुनः प्रीत्या तौ परस्परभागिनौ ।' तथा 'विभक्ता भ्रातरो ये तु संप्रीत्यैकत्र संस्थिताः । पुनर्विभागकरणे तेषा ज्यैष्ठ्यं न विद्यते ॥ यदि कश्चित् प्रमीयेत प्रव्रजेद्वा कथंचन । न लुप्यते तस्य भागः सोदरस्य विधीयते ॥ या तस्य भगिनी सा च ततोऽश लब्धुमर्हति । अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च ॥ ससृष्टिना तु यः कश्चिद्विद्याशौर्यादिनाधिकम् ॥ प्राप्नोति तस्य दातव्यो द्व्यशः शेषाः समाशकाः ॥' नारदः—'संसृष्टिना तु यो भागस्तेषामेव स इष्यते । अतोऽन्यथानशभाजो निर्वीजेष्वितरानियात् ॥' भागो मृतस्येति शेषः । अतोऽन्यथाऽसंसृष्टिनः, अनशभाजः अंशानर्हाः, निर्बीजेषु सतानशून्येषु मृतेषु ससृष्टिषु, इतरान् ससृष्टिनः । शंखः—'भ्रातृणामप्रजः कश्चित् म्रियेत प्रव्रजेत वा । विभजेरन् धनं तस्य शेषास्तु स्त्रीधनं विना ॥ भरण चास्य कुर्वीरन् स्त्रीणामाजीवितक्षयात् । रक्षन्ति शय्या भर्तुश्चेदाच्छिन्द्युरितरासु च ॥' स्त्रियोऽत्रासवर्णाः । इतरासु शय्यामरक्षन्तीषु 'या तस्य दुहिता तस्याः पित्र्यशो भरणे मतः । आसस्काराद्धरेद् भाग परतो बिभृयात्पतिः ॥' आसस्काराद्विवाहमभिव्याप्य, तावतो भागस्य ग्रहणं यावतो विवाहाभिनिवृत्तिरित्यर्थः । याज्ञवल्क्यः—'ससृष्टिनस्तु ससृष्टी सोदरस्य तु सोदरः । दद्यादपहरेच्चाशं जातस्य च मृतस्य च ॥' विभज्य मिश्रीकृतं धन संसृष्टं यद्यस्यास्त्यसौ ससृष्टी, तस्य मृतस्य भागं ससृष्टी गृह्णीयात् । न भार्यादिः । अस्यापवादः—'सोदरस्य तु सोदरः' सोदरस्य तु संसृष्टिनः सोदर एव संसृष्टी गृह्णीयात् सोदरासोदरसंसर्गेऽपि, न तु भिन्नोदर इत्यर्थः ।

इदानीं सोदरस्यासंसृष्टिनः सापत्नस्य संसृष्टिनः सद्भावे सत्याह—'अन्योदर्यस्तु संसृष्टी नान्योदर्यधनं हरेत् । असंसृष्टयपि वादद्यात्संसृष्टो नान्यमातृजः ॥' अन्योदर्यः सापत्नभ्राता संसृष्टी धनं हरेत् । न त्वन्योदर्योऽसंसृष्टी । अनेनान्वयव्यतिरेकतोऽन्योदर्यस्य संसृष्टित्व धनग्रहणे हेतुरित्युक्तम् । असंसृष्टयपीत्युत्तरेणापि संबध्यते । अतश्चासंसृष्टयपि गृह्णीयात् । कोऽसावित्याह—ससृष्ट इति । एकस्मिन्नुदरे संसृष्टः सबद्धः सोदर इति यावत् । अनेनासंसृष्टस्यापि सोदरस्य धनग्रहणे सोदरत्वं हेतुरिति दर्शितम् । कात्यायनः—'संसृष्टिनां तु संसृष्टाः पृथक्स्थानां पृथक्स्थिताः ।

अभावेऽर्थहरा ज्ञेया निर्बीजान्योन्यभागिनः ॥' संसृष्टिनां मृतानामर्थं संसृष्टा आदद्युः, एतेषामभावे पृथक्स्थानस्थिता अप्यसंसृष्टिन आदद्युः। यदि च संसृष्टिना मध्ये कश्चिन्निरन्वयः प्रेयात्तदा तस्यार्थं संसृष्टिन एव गृह्णीयुः, सति अन्वय एव। बृहस्पतिः—'विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः। पितृव्येणाथवा प्रीत्या स तु संसृष्ट उच्यते ॥' अत्र विभागानन्तरमेकत्रावस्थानमुपयुक्तं, न तु पित्राद्यादरः। परस्परव्यभिचारात्। अतो मात्रादिनापि ससृष्टः ससृष्टी स्यात्। स्मृसा.१३८-४०

हलायुधे अपुत्रधनाधिकारः— तत्र मनुः—'सस्थितस्यानपत्यस्य सगोत्रात्तन्तुमाहरेत्। तत्र यदृक्थजातं स्यात्तत्तस्मै प्रतिदापयेत् ॥' अस्यायमर्थः—अनपत्यस्य मृतस्य भार्या सगोत्रात्तन्तुं पुत्रमुत्पाद्य तस्मै ऋक्थमर्पयेत्। न तु स्वयं गृह्णीयात्। एतेनानियुक्तायाः पुत्रमुत्पादयितुमनिच्छन्त्याः पत्न्याः न भर्तृधनभागितेति प्रतिपादितम्। यादृशी पत्नी भर्तृधनं गृह्णीयात् तामाह मनुः—'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। पत्न्येव दद्यात्तत्पिण्ड कृत्स्नमर्थं लभेत च ॥' बृहस्पतिः—'आम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः। शरीरार्धं स्मृता जाया पुण्यापुण्यफले समा ॥ यस्य नोपरता भार्या देहार्धं तस्य जीवति। जीवत्यर्धशरीरेऽर्थं कथमन्यः समाप्नुयात् ॥ सकुल्यैर्विद्यमानैस्तु पितृमातृसनाभिभिः। अपुत्रस्य प्रमीतस्य पत्नी तद्धागहारिणी ॥ पूर्वं प्रमीताग्निहोत्रं मृते भर्तरि तद्धनम्। विन्देत्पतिव्रता नारी धर्म एष सनातनः ॥ जङ्गमं स्थावरं हेम कुप्यधान्यरसाम्बरम्। आदाय दापयेत् श्राद्धं मासषाण्मासिकादिकम् ॥ पितृव्यगुरुदौहित्रान् भ्रातृस्वस्रीयमातुलान्। पूजयेत्कव्यपूर्ताभ्यां ब्रह्मनाथातिथीन् स्त्रियः ॥ तत्सपिण्डा बान्धवा ये तस्याः स्युः परिपन्थिनः। हिंस्युर्धनानि तान् राजा चौरदण्डेन शातयेत् ॥' मनुनारदौ—'पुत्राभावे तु दुहिता तुल्यसंतानदर्शनात्। पुत्रश्च दुहिता चोभौ पितुः संतानकारकौ ॥' मनुः—'यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा। तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ॥' इदं च पत्न्यभावे वेदितव्यम्। बृहस्पतिः—'अङ्गादङ्गात्संभवति पुत्रवद्दुहिता नृणाम्। तस्याः पितृधनं त्वन्यः कथं गृह्णीत मानवः ॥ सदृशी सदृशेनोढा साध्वी शुश्रूषणे रता। कृता वाप्यकृता वापि पितुर्धनहरी तु सा ॥' कृता पुत्रिकात्वेन भाषिता। बृहस्पतिः—'भार्यासुताविहीनस्य तनयस्य मृतस्य च। माता ऋक्थहरी ज्ञेया भ्राता वा तदनुज्ञया ॥' मनुः—'अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि मृतायां च पितुर्माता हरेद्धनम् ॥ पिता हरेदपुत्रस्य ऋक्थं भ्रातर एव वा। त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते ॥ चतुर्थः संप्रदातैषां पञ्चमो नोपपद्यते। अनन्तरः सपिण्डाद्यस्तस्य वैतद्धनं भवेत् ॥' शङ्खलिखितौ—'अपुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यं, तदभावे मातापितरौ लभेता, पत्नी वा ज्येष्ठा, सगोत्रशिष्यसब्रह्मचारिणः।'

यच्च 'अपुत्रधनं पत्न्यभिगामी'त्यादि विष्णुवाक्येन भ्रातृसद्भावेऽप्यपुत्रधनं पत्न्यभिगामीत्यादि प्रतिपादितं, तदपुत्रा शयनं भर्तुरित्यादि वृद्धमनुवाक्यपर्यालोचनया भर्तृशयनपरिपालनश्राद्धकरणादिगुणोपेता या पत्नी तद्विषयम्। या चैवविधा न भवति तस्या विद्यमानायामपि भ्रातृगाम्येव तद्धनम्। यच्च—'भरण चास्य कुर्वीत स्त्रीणामाजीवितक्षयात्। रक्षन्ति शय्या भर्तुश्चेदाच्छिन्द्युरितरासु तत् ॥' इति भरणमात्रं शङ्खेनोक्त तद्वैधव्यव्रतादिरहितव्यभिचारिणीमात्रविषयम्। यच्च याज्ञवल्क्येन 'पितरौ भ्रातर' इति भ्रातृसद्भावे पित्रोरधिकार उक्तः स पितृपितामहार्जितधनविषयः। यत्पितृद्रव्याविरोधार्जितं तत्पित्रोः सद्भावेऽपि भ्रातृणामेव। देवलः—'ततो दायमपुत्रस्य विभजेरन् सहोदराः। तुल्या दुहितरो वापि म्रियमाणः पितापि वा ॥ सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम्। एषामभावे गृह्णीयुः कुल्याना सहवासिनः ॥' 'अपुत्रस्य धन पत्न्यभिगामि, तदभावे दुहितृगामि, तदभावे पितृगामि, तदभावे मातृगामि, तदभावे भ्रातृगामि, तदभावे भ्रातृपुत्रगामि, तदभावे बन्धुगामि, तदभावे सकुल्यगामि, तदभावे सहाध्यायिगामि, तदभावे ब्राह्मणधनवर्जं राजगामि'।

दुहितृदौहित्रानन्तरं बृहस्पतिः— तदभावे भ्रातरस्तु भ्रातृपुत्राः सनाभयः। सकुल्या बान्धवाः शिष्याः श्रोत्रियाश्च धनार्हकाः ॥ मृतोऽनपत्योऽभार्यश्चेदभ्रातृपितृमातृकः। सर्वे सपिण्डास्तद्दायं विभजेरन्यथाशतः ॥ समुत्पन्नाद्धनादर्धं तदर्धं स्थापयेत्पृथक्। मासषाण्मासिक-

श्राद्धे वार्षिके च प्रयत्नतः ॥ बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा । यो ह्यासन्नतरस्तेषां सोऽनपत्यधन हरेत् ॥' आपस्तम्बः—'पुत्राभावे यः प्रत्यासन्नः सपिण्डः, तदभावे आचार्यस्तदभावे अन्तेवासी, ऋत्विग्वा हृत्वा तदर्थेषु धर्मकृत्येषु प्रयोजयेत् दुहिता वा ।' बौधायनः—'प्रपितामहः पितामहः पिता स्वयं सोदर्या भ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्रः तानविभक्तदायान् सपिण्डानाचक्षते । विभक्तदायान् सकुल्यानाचक्षते । सत्सु सपिण्डेषु तद्ग्रामी ह्यर्थो भवति । सपिण्डाभावे सकुल्यः । तदभावे आचार्योऽन्तेवासी ऋत्विग्वा हरेत् । तदभावे राजा ।' नारदः—'अभावे दुहितृणा च सकुल्या बान्धवास्तथा । ततः सजात्यः सर्वेषामभावे राजगामि तत् ॥ अन्यत्र ब्राह्मणात् किन्तु राजा धर्मपरायणः । तत्स्त्रीणा जीवनं दद्यादेष दायविधिः स्मृतः ॥' याज्ञवल्क्यः—'पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुतो गोत्रजो बन्धुः शिष्यसब्रह्मचारिणः ॥ एषामभावे पूर्वेषा धनभागुत्तरोत्तरः ॥' अत्रेदं शास्त्रार्थतत्त्वम् । पत्नीमारभ्य श्रोत्रियपर्यन्तमपुत्रब्राह्मणधनं, राजपर्यन्तं वाऽपुत्रक्षत्रियादिधने अधिकारित्वम् । विष्णुबृहस्पतियाज्ञवल्क्येरस्य क्रमस्य मुक्तकण्ठमभिधानात् । एतद्दर्शनाच्च शङ्खलिखितवचने व्यवस्था कार्या 'अपुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यं, तदभावे मातापितरौ पत्नी वा ज्येष्ठे'त्येवंरूपे । देवलेनापि सोदरं प्रथममन्ते पत्नीमुपादाय यथाक्रममिति यदुक्त तदपि याज्ञवल्क्याद्युक्तक्रमाभिप्रायं, न स्वीयपाठे क्रमाभिप्रायमिति बोद्धव्यम् ।

यत्तु नारदेन 'तत्स्त्रीणा जीवनं दद्यादि'ति तच्च विवाहितेतरस्त्रीणामुन्नेयम् । देवलः— 'सर्वत्रादायिकं राजा हरेद्ब्रह्मस्ववर्जितम् । अदायिकं तु ब्रह्मस्व श्रोत्रियेभ्यः प्रदापयेत् ॥' अदायिकं यथोक्तपत्न्यादिदायग्राहकरहितम् । बौधायनः—'ब्रह्मस्व पुत्रपौत्रघ्नं हन्यादेकाकिनं विषम् । तस्माद्राजा च ब्रह्मस्वं नाददीत कथंचन ॥' परिषद्विषयं यद्ब्रह्मस्वमिति । शंखलिखितौ— 'परिषद्गामि वा श्रोत्रियद्रव्यं न राजगामि, न हार्य राज्ञा देवब्राह्मणसंस्थितं, न निक्षेपोपनिधिक्रमागतं, न बालस्त्रीधनानि, एवं ह्याह—न हार्य स्त्रीधनं राज्ञा तथा बालधनानि च । नार्याः षडागमं वित्तं बालानां पैतृकं धनम् ॥' मनुः 'बालदायादिकं रक्थं तावद्राजानुपालयेत् । यावत्स स्यात्समावृत्तो यावद्वातीतशैशवः ॥' विष्णुः—'बालानाथस्त्रीधनानि राजा परिपालयेत् ।' कात्यायनः—'प्रोषितस्य हि यो भागो रक्षेयुः सर्व एव तम् । बालपुत्रे मृते रिक्थ रक्ष्यं तत्तैस्तु बन्धुभिः ॥ पोगण्डात्परतस्तु विभजेरन् यथाशतः ॥' पोगण्डात्परतः षोडशवर्षादूर्ध्वमिति यावत् । विष्णुः— 'यश्चार्थहरः स पिण्डदायी स्मृतः । यो यस्यार्थमादत्ते स तस्य श्राद्धं कुर्वीत । पिण्ड च त्रिपुरुषं दद्यात् ।' बृद्धमनुः—'भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा । स सपिण्डक्रियां कृत्वा कुर्यादभ्युदय ततः ॥' विष्णुः—'पुत्रः पितृवित्तालाभेऽपि तत्पिण्ड दद्यात् । वानप्रस्थधनमाचार्यो गृह्णीयात् शिष्यो वा ।' याज्ञवल्क्यः—'वानप्रस्थयतिब्रह्मचारिणामुक्थभागिनः । क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः ॥' धर्मभ्राता प्रतिपन्नो भ्राता, एकतीर्थी सहाध्यायी । स्मृता.१४०–४४

तत्रैव संसृष्टिविभागः—तत्र मनुः—'विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि । समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते ॥ येषा ज्येष्ठः कनिष्ठो वा हीयेताशप्रदानतः । म्रियेतान्यतरो वापि तस्य भागो न लुप्यते ॥ सोदर्या विभजेरस्तं समेत्य सहिताः समम् । भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥' अयमर्थः—ससृष्टानां पुनर्भागे ज्यैष्ठ्यनियन्धनोद्धारादिकल्पन त्यक्त्वा समांशकल्पनया विभागः कार्यः । यदि तेषामेव मध्ये कश्चित्प्रव्रज्यादिना अनंशो भवति म्रियेत वा तदा तद्दायभागो असंसृष्टिनापि सोदरेण सापत्न्येन च संसृष्टिना सोदराभिश्च भगिनीभिर्विभज्य ग्राह्यः । बृहस्पतिः—'विभक्ता भ्रातरो ये च संप्रीत्यैकत्र संस्थिताः । पुनर्विभागकरणे तेषा ज्येष्ठयं न विद्यते ॥ यदि कश्चित् प्रमीयेत प्रव्रजेच्च कथचन । न लुप्यते तस्य भागः सोदरस्य विधीयते ॥ या तस्य भगिनी सा तु ततोऽशं लब्धुमर्हति । अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च ॥ ससृष्टो बान्धवः कश्चिद्विद्याशौर्यादिनाधिकम् । प्राप्नोति तस्य दातव्यो द्व्यंशः शेषाः समाशकाः ॥' नारदशंखौ— 'भ्रातृणामप्रजः प्रेयात्कश्चिच्चेत् प्रव्रजेत वा । विभजेरन् धनं तस्य शेषास्तु स्त्रीधनं विना ॥ भरणं चास्य कुर्वीत

स्त्रीणामाजीवितक्षयात्। रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु तत् ॥' स्त्रीशब्दोऽत्रासवर्णभार्यापरः। तथा–'या तस्य दुहिता तस्याः पित्रंशो भरणे मतः। आसंस्काराद्धरेद्भागं परतो बिभृयात् पतिः ॥' अयमप्यसवर्णादुहितृपरः। याज्ञवल्क्यः—'संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः। दद्याच्चापहरेच्चाश जातस्य च मृतस्य च ॥' या तस्येति विद्यमानस्येत्यर्थः। पूर्वोक्तमेव विस्फोरयति। 'अन्योदर्यस्तु ससृष्टी नान्योदर्यधनं हरेत्। असंसृष्टयपि चादद्यात् संसृष्टश्चान्यमातृजः ॥' ससृष्टो गर्भसंसृष्टः सोदर इति यावत्। कात्यायनः 'ससृष्टाना तु ससृष्टः पृथक्स्थाना पृथक्स्थिताः। अभावेऽर्थहरा ज्ञेया निर्बीजान्योन्यभागिनः ॥' बृहस्पतिः–'विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः। पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते ॥' स्मृसा.१४४-५

कल्पतरौ संसृष्टिविभागः— मनुः—'विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि। समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते ॥ येषा ज्येष्ठः कनिष्ठो वा हीयेताशप्रदानतः। म्रियेतान्यतरो वापि तस्य भागो न लुप्यते ॥ सोदर्या विभजेरंस्त समेत्य सहिताः समम्। भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥' [अयमर्थः। ज्येष्ठाना पुनर्भागकरणे ज्येष्ठत्वनिबन्धनोद्धारादिकल्पन त्यक्त्वा समाशकल्पनया विभागः कार्यः। यदि तेषामेव मध्ये कश्चित्प्रव्रज्यादिना अनशो भवति म्रियेत वा तदा तद्भागो असंसृष्टिनापि सोदरेण सापत्न्येनापि संसृष्टिनापि सोदराभिर्भगिनीभिर्विभज्य ग्राह्यः।] बृहस्पतिः–'संसृष्टौ यौ पुनः प्रीत्या तौ परस्परभागिनौ।' तथा– 'विभक्ता भ्रातरो ये तु सप्रीत्यैकत्र संस्थिताः। पुनर्विभागकरणे ज्यैष्ठ्यं तत्र न विद्यते ॥ यदि कश्चित् प्रमीयेत प्रव्रजेद्वा कथंचन। न लुप्यते तस्य भागः सोदरस्य विधीयते ॥ या तस्य भगिनी सा तु ततोंऽशं लब्धुमर्हति। अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च ॥ संसृष्टिना तु यः कश्चिद्विद्याशौर्यादिनाधिकम्। प्राप्नोति तस्य दातव्यो द्वयंशः शेषाः समाशिकाः ॥' [नारदः–संसृष्टिनां तु यो भागस्तेषामेव स इष्यते।] अतोऽन्यथानशभाजो निर्बीजेष्वितरानियात्॥' अतोऽन्यथा संसृष्टिनामभावे, निर्बीजेषु संतानरहितेषु संसृष्टिषु तेषां भाग इतरान् संसृष्टिन इयात्। शखः— 'भ्रातृणामप्रजः प्रेयात्कश्चिच्चेत् प्रव्रजेत वा। विभजेरन् धनं तस्य शेषास्तु स्त्रीधनं विना ॥ भरणं चास्य कुर्वीत स्त्रीणामाजीवितक्षयात्। रक्षन्ति शय्या भर्तुश्चेदाच्छिन्द्युरितरासु तत् ॥' [स्त्रीशब्दोऽत्रासवर्णभार्यापरः।] 'या तस्य दुहिता तस्याः पित्रंशो भरणे मतः। आसंस्काराद्धरेद्भागं परतो बिभृयात् पतिः ॥' इतरासु शय्यामरक्षन्तीषु, आसंस्काराद्विवाहमभिव्याप्य तावन्तं भागं हरेद् यावद् विवाहस्यापि निष्पत्तिरित्यर्थः। याज्ञवल्क्यः— 'संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः। दद्यादपहरेच्चाश जातस्य च मृतस्य च ॥' अत्रानन्तरं याज्ञवल्क्यः—'अन्योदर्यस्तु संसृष्टी नान्योदर्यधनं हरेत्। असंसृष्टयपि चादद्यात् संसृष्टो नान्यमातृजः ॥' संसृष्टोऽत्र एकोदरस्य सबन्धः। कात्यायनः—'ससृष्टिना तु संसृष्टाः पृथक्स्थाना पृथक्स्थिताः। अभावेऽर्थहरा ज्ञेया निर्बीजान्योन्यमातृजाः ॥' अभावे स्त्रीपुत्रादीनामर्थहराणामभावे। बृहस्पतिः— 'विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः। पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते ॥' स्मृसा.१४५-७

श्रीकरनिबन्धे–'पिता हरेदपुत्रस्य ऋक्थं भ्रातर एव वा। त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते ॥ चतुर्थः सप्रदातैषा पञ्चमो नोपपद्यते। अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्॥ अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा ॥' इद वचनमनियमप्रातौ नियम विदधाति तत्रायं नियमः। त्रयाणा पिण्डोदकदानप्रतियोगित्वेन तदूर्ध्वं त्रयाणा लेपभागित्वेन पिण्डदातृत्वेन पिण्डदस्येति। सप्तमाना सपिण्डत्वेनासपिण्डव्यावृत्तत्वेनोपस्थितौ नियमे सत्यपि तद्रूपापन्नाना अतद्रूपापन्नानामपि एतत्त्वात्कस्येत्यनियमप्रसक्तौ तत्राप्यानन्तर्येण नियम विदधाति। तत्रायमानन्तर्यक्रमः। मृतसतानाभावे तत्पितृसततेस्तद्धनं, तदभावे च तत्पितामहसंततेः, तदभावे तत्पि (तत्प्रपि)तामहसंततेः, इति 'त्रयाणामुदकं कार्यमि'त्यादिना दर्शितम्। एतदूर्ध्वं त्रयाणामपि जन्यजनकक्रमेणैव पूर्ववत्संनिधानादर्थग्राहितेति सपिण्डाभावे सकुल्यानां धनभागितेति। 'अनन्तरः सपिण्डाद्यः तस्य तस्य धनं भवेदि'-

[ ] एतच्चिह्नमध्यस्थो भागः अस्मद्व्यवहारकल्पतरौ नास्ति।

त्यादिना दर्शितम्। 'सपिण्डता तु सप्तमे पुरुषे विनिवर्तते। समानोदकभावस्तु निवर्तेताचतुर्दशात्। जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते॥' स्मृसा.१४७

धर्मकोषे लिखितम्—यत्र कियत्सु धनेषु विभागो वृत्तस्तत्र कयोश्चित्ससर्गो वृत्तस्तत्र एकः ससर्गी विनष्टः प्रव्रजितो वा तदा किं सामान्यमुपस्थितपुरुषैरेव गृह्यताम्। तन्मतं, प्रव्रजितयोरप्यशः कर्तव्यः। सोऽपि केन ग्राह्य इत्याह बृहस्पतिः— 'यदा कश्चित्प्रमीयेत प्रव्रजेद्वा कथंचन। न लुप्यते तस्य भागः सोदरस्य विधीयते॥' सोदरस्यापि पत्न्याद्यभावे 'अनपत्यस्य धर्मोऽयमभार्यापितृकस्य चे'ति वचनात्। सोदराणामपि मध्ये संसृष्टयेव गृह्णीयात्। 'भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः' इति वचनात्। यदा तु पित्रैव केनचित्पुत्रेण संसृष्टी तदा केनचित्संसृष्टी पुत्रो गृह्णीयात् नासंसृष्टी। न चानपत्यस्य धर्मोऽयमिति वचनेन व्युदासः। पितापुत्रयोरपि संसर्गकथनादेतदितरविषयतया तस्य संकोच्यत्वात्। किञ्च 'ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव धनं हरेत्। संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह॥' इति मनुवचनं निर्विषयं स्यात्। तेन पित्रा ये पुत्राः संसृष्टास्तैर्भ्रातृभिः सह विभागोत्तरजातो गृह्णीयादित्यर्थः। तेन विभागानन्तरजातस्य संप्रदाने पितृसंसृष्टधनत्वं प्रयोजकम्। मृताग्रहणे सोदरत्वम्। 'संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः। दद्यादपहरेच्चाश जातस्य च मृतस्य च॥' इति यथासंख्याभिधानात्। तथा विभागलब्धं वस्तु यद्यदीयतया प्रत्यभिज्ञायते तत्तस्यैवावस्थाप्यम्। 'संसृष्टिना तु यो भागस्तेषामेव स इष्यते' इति वचनात्। अतोऽन्यथा प्रत्यभिज्ञातम्। यदा सोदरोऽसंसृष्टी अन्योदर्यस्तु संसृष्टी तदा तद्धन को गृह्णीयात् इत्यत्र याज्ञवल्क्यः— 'अन्योदर्यस्तु संसृष्टी नान्योदर्यधनं हरेत्। असंसृष्ट्यपि चादद्यात् सोदरो नान्यमातृजः॥' प्रकाशे तु—मृतस्य संसृष्टिनो धनं संसृष्ट्यपहरेत् गृह्णीयात्। विभागकाले अज्ञातगर्भायां पितृभार्यायां पश्चादनुत्पन्नस्याश संसृष्टयेव दद्यात्। सोदरस्य तु संसृष्टिनो धनं संसृष्टी सोदरो गृह्णीयात् दद्याच्च, न भिन्नोदरः संसृष्टीति पूर्वोक्तस्यापवादः। अन्योदर्यस्तु संसृष्टी धनं गृह्णीयादिति शेषः। नान्योदर्यधनं हरेदिति संसृष्ट्यपीत्यनेन संबध्यते। अन्योदर्यः सापत्नः संसृष्टी धनं हरेत्, न पुनस्संसृष्ट्यपि, तेनान्योदर्यस्य धनग्रहणे संसृष्टत्वं प्रयोजकमुक्तम्। असंसृष्ट्यपीत्युत्तरेणापि संबध्यते। स्मृसा.१४७-९

प्रकाशे लिखितम्—'स्थावरं जङ्गमं चैव यद्यपि स्वयमर्जितम्। असंभूय सुतान्सर्वान्न दानं न च विक्रयः॥ ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः। वृत्तिं च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः॥' अस्यापवादः—'एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थे तु विशेषतः॥' इति लिखित्वा व्याख्यातम्। अप्राप्तव्यवहारेषु भ्रातृषु विभक्तेष्वपि सकलकुटुम्बव्याप्तिन्यामापदि तत्पोषणार्थं पितृश्राद्धादिरूपधर्मार्थं स्थावरस्यैकोऽपि दानादि कुर्यात्। यत्तु 'विभक्ता अविभक्ता वा दायादाः स्थावरे समाः। एको ह्यनीशः सर्वत्र दानाधमनविक्रये॥' इति, तदपि विभक्तेपूत्तरकाल विभक्ताविभक्तसंशयनिरासेन सर्वार्थज्ञानमर्थवत्। न पुनरेककर्तृदानमेवाममीचीनमिति व्याख्येयम्। न पुनरनुमतिं विना दानाद्यसिद्धिरिति। सामन्तानुमतिस्तु सीमाविप्रतिपत्तिनिरासाय इति दायादानुमतिप्रयोजनमसाधारण्यख्यापनार्थमेवेत्युक्तं प्राक्। 'हिरण्योदकदानेनेति तस्यापि संप्रतिपत्तेरित्यर्थः। 'स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञये'ति स्थावरस्य विक्रयनिषेधात् 'भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति। उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ॥ षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः। आक्षेप्ता चानुमन्ता च तत्काल नरके वसेत्॥' इति दानप्रशंसादर्शनात् विक्रयेऽपि कर्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपता कुर्यात् स्थावरस्येत्यर्थः। स्मृसा.१४९

श्रीकरनिबन्धे लिखितम्— [आदर्शपुस्तके १४७ पृष्ठे पूर्वोद्धृतश्रीकरग्रन्थः 'मनुः—पिता' इत्यारभ्य 'तत्परं गोत्रमुच्यते' इत्यन्तः—प्रमादेन पुनः अग्रिमोद्धृतसदर्भपूर्वमुद्धृतः १४९-५० पृष्ठयोः सोऽस्माभिरत्यक्तः।] सपिण्डाधिकारे व्यवस्था—तदभावे पितराविति मातापितरावित्यर्थः। यद्यपि युगपदधिकरणवचनतायां द्वन्द्वस्मरणात् पितरावित्येकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते तथापि विग्रहवाक्ये मातृशब्दस्य पूर्वनिपाता देकशेषाभावपक्षे च मातापितराविति मातृशब्दस्य पूर्वश्रवणात्

स्त्रीणामाजीवितक्षयात्। रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु तत् ॥' स्त्रीशब्दोऽत्रासवर्णभार्यापरः। तथा–'या तस्य दुहिता तस्याः पित्रंशो भरणे मतः। आसंस्काराद्धरेद्भागं परतो बिभृयात् पतिः ॥' अयमप्यसवर्णादुहितृपरः। याज्ञवल्क्यः—'संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः। दद्याच्चापहरेच्चांश जातस्य च मृतस्य च ॥' या तस्येति विद्यमानस्येत्यर्थः। पूर्वोक्तमेव विस्फोरयति। 'अन्योदर्यस्तु ससृष्टी नान्योदर्यधन हरेत्। असंसृष्टयपि चादद्यात् संसृष्टश्चान्यमातृजः ॥' ससृष्टो गर्भसंसृष्टः सोदर इति यावत्। कात्यायनः 'संसृष्टाना तु संसृष्टः पृथक्स्थाना पृथक्स्थिताः। अभावेऽर्थहरा ज्ञेया निर्बीजान्योन्यभागिनः ॥' बृहस्पतिः–'विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र सस्थितः। पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते ॥' स्मृसा.१४४-५

कल्पतरौ संसृष्टिविभागः— मनुः—'विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि। समस्तत्र विभागः स्याज्ज्यैष्ठ्य तत्र न विद्यते ॥ येषा ज्येष्ठः कनिष्ठो वा हीयेताशप्रदानतः। म्रियेतान्यतरो वापि तस्य भागो न लुप्यते ॥ सोदर्या विभजेरंस्तं समेत्य सहिताः समम्। भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥' [अयमर्थः। ज्येष्ठाना पुनर्भागकरणे ज्येष्ठत्वनिबन्धनोद्धारादिकल्पन त्यक्त्वा समाशकल्पनया विभागः कार्यः। यदि तेषामेव मध्ये कश्चित्प्रव्रज्यादिना अनशो भवति म्रियेत वा तदा तद्भागो असंसृष्टिनापि सोदरेण सापत्न्येनापि संसृष्टिनापि सोदराभिर्भगिनीभिर्विभज्य ग्राह्यः।] बृहस्पतिः–'संसृष्टौ यौ पुनः प्रीत्या तौ परस्परभागिनौ ।' तथा– 'विभक्ता भ्रातरो ये तु सप्रीत्यैकत्र सस्थिताः। पुनर्विभागकरणे ज्यैष्ठ्य तत्र न विद्यते ॥ यदि कश्चित् प्रमीयेत प्रव्रजेद्वा कथंचन। न लुप्यते तस्य भागः सोदरस्य विधीयते ॥ या तस्य भगिनी सा तु ततोंऽशं लब्धुमर्हति। अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च ॥ संसृष्टिना तु यः कश्चिद्विद्याशौर्यादिनाधिकम्। प्राप्नोति तस्य दातव्यो द्वयशः शेषाः समांशिकाः ॥' [नारदः–संसृष्टिनां तु यो भागस्तेषामेव स इष्यते।] अतोऽन्यथानशभाजो निर्बीजेष्वितरानियात् ॥' अतोऽन्यथा संसृष्टिनामभावे, निर्बीजेषु संतानरहितेषु संसृष्टिषु तेषां भाग इतरान् संसृष्टिन इयात्। शंखः— 'भ्रातृणामप्रजः प्रेयात्कश्चिच्चेत् प्रव्रजेत वा। विभजेरन् धनं तस्य शेषास्तु स्त्रीधनं विना ॥ भरणं चास्य कुर्वीत स्त्रीणामाजीवितक्षयात्। रक्षन्ति शय्या भर्तुश्चेदाच्छिन्द्युरितरासु तत् ॥' [स्त्रीशब्दोऽत्रासवर्णभार्यापरः।] 'या तस्य दुहिता तस्याः पित्रशो भरणे मतः। आसस्काराद्धरेद्भाग परतो विभृयात् पतिः ॥' इतरासु शय्यामरक्षन्तीषु, आसंस्काराद्विवाहमभिव्याप्य तावन्तं भाग हरेद् यावद् विवाहस्यापि निष्पत्तिरित्यर्थः। याज्ञवल्क्यः— 'संसृष्टिनस्तु ससृष्टी सोदरस्य तु सोदरः। दद्यादपहरेच्चांशं जातस्य च मृतस्य च ॥' अत्रानन्तरं याज्ञवल्क्यः—'अन्योदर्यस्तु ससृष्टी नान्योदर्यधन हरेत्। असंसृष्टयपि चादद्यात् ससृष्टो नान्यमातृजः ॥' संसृष्टोऽत्र एकोदरस्य संबन्धः। कात्यायनः—'ससृष्टिना तु ससृष्टाः पृथक्स्थाना पृथक्स्थिताः। अभावेऽर्थहरा ज्ञेया निर्बीजान्योन्यमातृजाः ॥' अभावे स्त्रीपुत्रादीनामर्थहराणामभावे। बृहस्पतिः— 'विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र सस्थितः। पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते ॥' स्मृसा.१४५-७

श्रीकरनिबन्धे–'पिता हरेदपुत्रस्य ऋक्थ भ्रातर एव वा। त्रयाणामुदक कार्यं त्रिषु पिण्डः प्रवर्तते ॥ चतुर्थः सप्रदातैषा पञ्चमो नोपपद्यते। अनन्तरः सपिण्डाद्यस्तस्य तस्य धन भवेत् ॥ अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा ॥' इद वचनमनियमप्रातौ नियम विदधाति तत्रायं नियमः। त्रयाणा पिण्डोदकदानप्रतियोगित्वेन तदूर्ध्वं त्रयाणा लेपभागित्वेन पिण्डदातृत्वेन पिण्डदस्येति। सप्तमाना सपिण्डत्वेनासपिण्डव्यावृत्तत्वेनोपस्थितौ नियमे सत्यपि तद्रूपापन्नाना अतद्रूपापन्नानामपि एतत्त्वात्कस्येत्यनियमप्रसक्तौ तत्राप्यानन्तर्येण नियमं विदधाति। तत्रायमानन्तर्यक्रमः। मृतसतानाभावे तत्पितृसततेस्तद्धनं, तदभावे च तत्पितामहसंततेः, तदभावे तत्पि (तत्प्रपि)तामहसंततेः, इति 'त्रयाणामुदकं कार्यमि'त्यादिना दर्शितम्। एतदूर्ध्वं त्रयाणामपि जन्यजनकक्रमेणैव पूर्ववत्संनिधानादर्थग्राहितेति सपिण्डाभावे सकुल्याना धनभागितेति। 'अनन्तरः सपिण्डाद्यः तस्य तस्य धनं भवेदि'-

[ ] एतच्चिह्नमध्यस्थो भागः अस्मद्व्यवहारकल्पतरौ नास्ति।

त्यादिना दर्शितम्। 'सपिण्डता तु सप्तमे पुरुषे विनिवर्तते। समानोदकभावस्तु निवर्तेताचतुर्दशात्। जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते॥' स्मृसा.१४७

धर्मकोषे लिखितम्—यत्र कियत्सु धनेषु विभागो वृत्तस्तत्र कयोश्चित्सप्तगों वृत्तस्तत्र एकः ससर्गी विनष्टः प्रव्रजितो वा तदा किं सामान्यमुपस्थितपुरुषैरेव गृह्यताम्। तन्मतं, प्रव्रजितयोरप्यशः कर्त्तव्यः। सोऽपि केन ग्राह्य इत्याह बृहस्पतिः— 'यदा कश्चित्प्रमीयेत प्रव्रजेद्वा कथंचन। न लुप्यते तस्य भागः सोदरस्य विधीयते॥' सोदरस्यापि पत्न्याद्यभावे 'अनपत्यस्य धर्माऽयमभार्यापितृकस्य चे'ति वचनात्। सोदराणामपि मध्ये संसृष्टयेव गृह्णीयात्। 'भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः' इति वचनात्। यदा तु पित्रैव केनचित्पुत्रेण संसृष्टी तदा केनचित्संसृष्टी पुत्रो गृह्णीयात् नासंसृष्टी। न चानपत्यस्य धर्मोऽयमिति वचनेन व्युदासः। पितापुत्रयोरपि संसर्गकथनादेतदितरविषयतया तस्य संकोच्यत्वात्। किञ्च 'ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव धनं हरेत्। संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह॥' इति मनुवचनं निर्विषयं स्यात्। तेन पित्रा ये पुत्राः संसृष्टास्तैर्भ्रातृभिः सह विभागोत्तरजातो गृह्णीयादित्यर्थः। तेन विभागानन्तरजातस्य सप्रदाने पितृसंसृष्टधनत्वं प्रयोजकम्। मृताशग्रहणे सोदरत्वम्। 'संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः। दद्यादपहरेच्चाश जातस्य च मृतस्य च॥' इति यथासंख्याभिधानात्। तथा विभागलब्धं वस्तु यद्यदीयतया प्रत्यभिज्ञायते तत्तस्यैवावस्थाप्यम्। 'संसृष्टिना तु यो भागस्तेषामेव स इष्यते' इति वचनात्। अतोऽन्यथा प्रत्यभिज्ञातम्। यदा सोदरोऽसंसृष्टी अन्योदर्यस्तु संसृष्टी तदा तद्धनं को गृह्णीयात् इत्यत्र याज्ञवल्क्यः— 'अन्योदर्यस्तु संसृष्टी नान्योदर्यधनं हरेत्। असंसृष्टयपि चादद्यात् सोदरो नान्यमातृजः॥' प्रकाशे तु—मृतस्य संसृष्टिनो धनं संसृष्टयपहरेत् गृह्णीयात्। विभागकाले अज्ञातगर्भाया पितृभार्याया पश्चादनुत्पन्नस्याश संसृष्टयेव दद्यात्। सोदरस्य तु संसृष्टिनो धनं संसृष्टी सोदरो गृह्णीयात् दद्याच्च, न भिन्नोदरः संसृष्टीति पूर्वोक्तस्यापवादः। अन्योदर्यस्तु संसृष्टी धनं गृह्णीयादिति शेषः। नान्योदर्यधनं हरेदिति संसृष्टयपीत्यनेन संबध्यते। अन्योदर्यः सापत्नः संसृष्टी धनं हरेत्, न पुनस्संसृष्टयपि, तेनान्योदर्यस्य धनग्रहणे संसृष्टत्वं प्रयोजकमुक्तम्। असंसृष्टयपीत्युत्तरेणापि संबध्यते। स्मृसा.१४७-९

प्रकाशे लिखितम्—'स्थावरं जङ्गमं चैव यद्यपि स्वयमर्जितम्। असंभूय सुतान्सर्वान्न दानं न च विक्रयः॥ ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः। वृत्तिं च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः॥' अस्यापवादः—'एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थे तु विशेषतः॥' इति लिखित्वा व्याख्यातम्। अप्राप्तव्यवहारेषु भ्रातृषु विभक्तेष्वपि सकलकुटुम्बव्यापिन्यामापदि तत्पोषणार्थं पितृश्राद्धादिरूपधर्मार्थं स्थावरस्यैकोऽपि दानादि कुर्यात्। यत्तु 'विभक्ता अविभक्ता वा दायादाः स्थावरे समाः। एको ह्यनीशः सर्वत्र दानाधमनविक्रये॥' इति, तदपि विभक्तेपूत्तरकाल विभक्ताविभक्तसंशयनिरासेन सर्वार्थज्ञानमर्थवत्। न पुनरेककर्तृदानमेवाममीचीनमिति व्याख्येयम्। न पुनरनुमतिं विना दानाद्यसिद्धिरिति। सामन्तानुमतिस्तु सीमाविप्रतिपत्तिनिरासाय इति दायादानुमतिप्रयोजनमसाधारण्यख्यापनार्थमेवेत्युक्तं प्राक्। 'हिरण्योदकदानेने'ति तस्यापि संप्रतिपत्तेरित्यर्थः। 'स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञये'ति स्थावरस्य विक्रयनिषेधात् 'भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति। उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ॥ षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः। आक्षेप्ता चानुमन्ता च तत्काल नरके वसेत्॥' इति दानप्रशंसादर्शनात् विक्रयेऽपि कर्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपतां कुर्यात् स्थावरस्येत्यर्थः। स्मृसा.१४९

श्रीकरनिबन्धे लिखितम्— [आदर्शपुस्तके १४७ पृष्ठे पूर्वोद्धृतश्रीकरग्रन्थः 'मनुः—पिता' इत्यारभ्य 'तत्परं गोत्रमुच्यते' इत्यन्तः—प्रमादेन पुनः अग्रिमोद्धृतसंदर्भपूर्वमुद्धृतः १४९-५० पृष्ठयोः सोऽस्माभिरुत्सृष्टः।] सपिण्डाधिकारे व्यवस्था—तदभावे पितराविति मातापितरावित्यर्थः। यद्यपि युगपदधिकरणवचनतायां द्वन्द्वस्मरणात् पितरावित्येकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते तथापि विग्रहवाक्ये मातृशब्दस्य पूर्वनिपातादेकशेषाभावपक्षे च मातापितराविति मातृशब्दस्य पूर्वश्रवणात्

पाठक्रमादेवानुक्रमावगमाद्धनसंबन्धेऽपि क्रमापेक्षायां प्रतीतिक्रमानुरोधेनैव प्रथमं माता धनभाक्। तदभावे पितेति गम्यते। किं च पिता पुत्रान्तरेष्वपि साधारणो, माता तु न साधारणीति, प्रत्यासत्त्यतिशयात् 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेदि'ति वचनान्मातुरेव प्रथमं धनग्रहण युक्तम्। अविशेषप्राप्तौ प्रत्यासत्तिरेव नियामिकेत्येतस्मादेव वचनादवगम्यत इति। पितृसंतानाभावे पितामही पितामहः पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः। पितामहसंतानाभावे प्रपितामही। प्रपितामहतत्सुतास्तत्सूनवश्चेति। एवमासप्तमात्सपिण्डाना वेदितव्यम्। शूद्रधनविभागे विशेषमाह—'जातोऽपि दास्या शूद्रेण कामतोऽशहरो भवेत्। मृते पितरि कुर्युस्तं भ्रातरस्त्वर्द्धभागिनम्॥ अभ्रातृको हरेत्सर्वं दुहितृणां सुताद्दते॥' अयमर्थः—शूद्रेण दास्यामुत्पन्नः पुत्रः कामतः पितुरिच्छया भाग लभेत। पितरि मृते यदि परिणीतापुत्रास्तं स्वांशार्धभाजं कुर्युः। अपरिणीतादासीपुत्रमर्द्धभागिनं कुर्युः। स्वभागार्धं दद्युरित्यर्थः। अथ परिणीतापुत्रा न सन्ति तदा सर्वं पितृधनं गृह्णीयात्। यदि परिणीतादुहितरस्तपुत्रा वा न सन्ति। तत्सद्भावे त्वर्धभागिक एव दासीपुत्रः। अत एव च शूद्रग्रहणाद्द्विजातिना दास्यामुत्पन्नः... ...। किन्त्वनुकूलश्चेत् जीवनमात्रं दद्यात्। पारिजाते व्याख्यातम्—'भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृण साक्ष्यमविभक्ते न च स्मृतम्॥ ननु दम्पत्योर्विभागनिषेधात् कथमविभक्त इति युज्यते विशेषण, (तदुक्तं प्राजापत्येषु कर्मसु विभागो निषिध्यते, न पुनः सर्वकर्मसु द्रव्ये वा। तथाहि?) 'जायापत्योर्न विभागो विद्यते' इति विभागाभावस्तयोः प्रतीयत इति चेन्न। 'जायापती अग्निमादधीयातां नित्याधाने साहित्यस्मृतेरग्निसाधारण्यान्न पृथगधिकारः। फलेऽपि भागा.....ये स्वामित्वमित्यत्र तात्पर्यम्। यतो भर्तुः प्रवासे भार्यया आवश्यकं भिक्षादानादिकं कर्तव्यं, नैतावता स्तेयत्वमुपदिशन्ति मन्वादय इति कीर्तनात्। तस्माद्भर्त्रनुज्ञया भार्यायां अपि द्रव्यविभागो भवत्येव, न स्वेच्छया, पारतन्त्र्यात्। तदुक्त—'यदि कुर्यात्समानशान् पत्न्यः कार्या. समाशिकाः॥' इति।

स्मृसा.१४९-५२

संसृष्टिविभागः, मृतापुत्रसंसृष्टिधनाधिकारश्च

वेदाः

संसृष्टधनं प्रार्थयति

[1]संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः।

(१) संसृष्टमविभागमापन्नमुभयमुभयविधं धनं समाकृतं सम्यगानीतमस्मभ्यं दत्ताम्। कः। वरुणश्च देवो मन्युश्च। ऋसा.

(२) वरुणो मन्युश्च उभौ। उभयं उभयविधं आत्मीयं धनं संसृष्ट मिश्रितं कृत्वा समाकृतं समानीतं अस्मभ्यं दत्ता प्रयच्छताम्। असा.

(३) यदेकं सदुभौ याति तदुभयम्। विभक्तमिति यावत्। तत्समाकृतं साधारणीकृतं संसृष्टमिति तदर्थः।

बाल. २।१३८

गौतमः

मृतापुत्रसंसृष्टिधनभाक् संसृष्टी

[2]संसृष्टिनि प्रेते संसृष्टी रिक्थभाक्।

(१) भ्रात्रादिभिः संसृष्टं धनं यस्य स संसृष्टी साधारणधनोऽविभक्तो विभज्य संसृष्टश्च। 'विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र सवसेत्। पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते॥' इति बार्हस्पत्ये दर्शनात्। अनपत्यस्येति वर्तते। संसृष्टीत्यनपत्ये प्रेते तस्य रिक्थ

(१) ऋसं.१०।८४।७, असं.४।३१।७ दत्तां (धत्तां); आगृ.१।१०।१२.

(१) गौध.२८।२९; मभा.; गौमि.२८।२६; स्मृच. ३०५ ष्टी (ष्टो); पमा.५४० स्मृचवत्; व्यम.६७ स्मृचवत्; समु.१४४.

संसृष्टी भजेत् । तत्रापि सोदर्येणासोदर्येण च संसृष्टे सोदर्यो भजेत् । सोदरस्य तु सोदर इति याज्ञवल्क्यदर्शनात् । तदेव विभक्ते भ्रातर्यनपत्ये मृते तद्धनं ज्येष्ठस्य । असति ज्येष्ठ इतरेषा भ्रातृणाम् । अविभक्ते तु मृते तदंशः सर्वेषा भ्रातृणामिति । ×गौमि.

(२) यदा तु शेषभूतससृष्टभिन्नोदराभावस्तदा पिता पितृव्यो वा यः संसृष्टः स एव गृह्णीयात् 'ससृष्टिनी'त्यादि गौतमस्मरणात् । *स्मृच.३०५

वृद्धहारीतः

मृतापुत्रस्थावरं न ससृष्टिनः

[1]**संसृष्टी गृह्णाति स्थावरवर्जं, स्थावराणां सपिण्डसमता ।**

विष्णुः

ससृष्टिधनविभागः सम एव

[2]**विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि ।**
समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते ॥

ये पित्रा स्वयं वा विभक्ताः सन्तः सह संसृष्टीभूय जीवन्ति ते यदा पुनर्विभजेरन् तदा तेषा सम एव विभागो नाद्यविभागवत्पित्रिच्छया । किञ्च, ज्यैष्ठ्यं ज्येष्ठताप्रयुक्त उद्धारविशेषोऽपि तत्र संसृष्टिविभागे नास्ति । अयं च ज्येष्ठाय श्रेष्ठमुद्धारं दद्युरित्यस्यापवादः । अनेन विभक्तानामेकीभवनमेव संसर्गः । स च धनसाधारण्यानुमतिपर्यवसन्न इत्युक्तमेव प्राक् । समविधानादेव सिद्धौ ज्यैष्ठ्यनिषेधो बहूल्पधनसंसर्गनिमित्तकभागवैषम्यानुज्ञानार्थः । तेन संसर्गसमवायेन यावद्धनं संसृष्टं तस्य तावत एवोपचयापचयौ विचार्य विभागः कार्यः । क्वचित्साम्यापवादमाह बृहस्पतिः— 'ससृष्टाना तु यः कश्चिद्विद्याशौर्यादिनाऽधिकम् । प्राप्नोति तस्य दातव्यो द्व्यशः शेषाः समाशिनः ॥' इति । वै.

× मभा. गौमिगतम् ।

* पराशरमाधवस्थं अन्यमतं स्मृचगतम् ।

(१) **स्मृसा.१३२; चन्द्र.१७४** ससृष्टी (ससृष्टिनः ससृष्टी) (स्थाव....ता०); **बाल.२।१३८.**

(२) **विस्मृ.१८।४१; दा.२१९** मनुविष्णू; **स्मृसा.१३२** रन् (युः) मनुविष्णू; **सेतु.८०** मनुविष्णू; **विच.१०१** मनुविष्णू.

संसृष्टिजननमरणयोः ससृष्टिधनविभागः

[1]**संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ।**
दद्यादपहरेच्चांशं जातस्य च मृतस्य च ॥

ससर्गार्हाः

[2]**पितृव्यपितृभ्रातृभिरेव संसर्गो नान्यैः ।**

अत्र भारुचिः— वैकल्पिकोऽयं ससर्गविधिरिति ।

सवि.४३१

मृतससृष्टिधनहारी पिण्डदः

[3]**संसृष्टिनां पिण्डकृदंशहारी ।**

(१) अत्र भारुचिः– 'पिण्डदोऽशहरश्चैषामि'त्यत्र पिण्डदत्वमेवाशग्रहणे प्रयोजकमिति । अय भावः—पिण्डदोऽशहरश्चैषामित्यत्र पाठक्रमादर्थक्रमो बलीयानित्यंशहरत्वमेव पिण्डदत्वप्रयोजकमिति सकलस्मृतिसिद्धम् । तथाप्यससृष्टिस्थले पाक्षिकापचयभाराभ्युपगमसाहसशालित्वरूपन्यायस्य पिण्डदत्वरूपान्तरङ्गन्यायो बाधक इति प्रदर्शनमात्रपर इत्युक्तम् । न तु वस्तुवृत्त्या पिण्डदत्वमंशग्रहणप्रयोजकमिति । अतोऽस्मिन् प्रकरणे ससृष्टिन्यायान्तरङ्गन्यायौ यथार्थ प्रवर्तेते । अतश्च क्वचित् संसृष्टिन्यायेन ससृष्टिन एव धनग्राहित्वं क्वचिदन्तरङ्गन्यायेनैवासससृष्टिन एव धनग्राहित्वमुक्तम् । एवं त्रैविध्येऽपि न पत्न्यादिर्धनग्राहीति प्रतिपदं न्यायफलं सिद्धम् । अतश्च संसृष्टिनोऽपुत्रस्यापितृकस्य धन पितृव्यगाम्येवेति विष्णुवचनस्यार्थः। अत एवाह याज्ञवल्क्यः— 'संसृष्टिनस्तु संसृष्टी' इति । यत्र पुनः पितृव्यसोदरौ ससृष्टौ तत्र ससृष्टिधनं सोदरगाम्येव । न पितृव्यगामीत्याह याज्ञवल्क्यः— 'सोदरस्य तु सोदरः' इति । सोदरस्य ससृष्टस्य धन सोदर एव गृह्णीयात्, ससृष्टिपितृव्यादिस्तु संसृष्टोऽपि न गृह्णीयात् । तस्यैव तत्पिण्डदानाधिकारादिति वचनार्थः । संसृष्टिनो मरणानन्तरं जातस्य पुत्रस्यैवाशो दातव्यः न ग्रहीतव्य इत्याह याज्ञवल्क्यः—'दद्याच्चापहरेच्चाश जातस्य च मृतस्य च ।' इति । यत्र पुनः भिन्नोदरा भ्रातरः केचन संसृष्टाः सोदरभ्रातरो न सन्ति, पितृव्यादयोऽपि संसृष्टाः, तत्र भिन्नोदरभ्रातृगाम्येव धनमित्याह याज्ञवल्क्यः— 'अन्योदर्यस्तु संसृष्टी नान्योदर्यो धन हरेत् ।' इति ।

(१) **विस्मृ.१७।१७.** (२) **सावि.४३१.**
(३) **सवि.४३२.**

असंसृष्टीति शेषः । सवि.४३२

असहोदरससृष्टिनोऽपि मृतससृष्टिधनहारिणः

[1]भिन्नोदराणां संसृष्टिनो गृह्णीयुः ।

अत्र भारुचिः—भिन्नोदराणामिति निर्धारणे षष्ठी । भिन्नोदराणा मध्ये संसृष्टिन एव धन गृह्णीयुः । अय भावः—यद्यपि भिन्नोदराणा संसृष्टिना असंसृष्टिना च तत्पिण्डदानेऽधिकारस्तुल्य एव, पिण्डदाने ज्येष्ठकनिष्ठत्वादिविवेकानपेक्षया अधिकारस्य तुल्यत्वादित्युक्तेः । पिण्डदानाधिकाररूपान्तरङ्गन्यायतौल्येऽपि पाक्षिकापचयभाराभ्युपगमसाहसशालित्वरूपन्यायस्याधिकस्य विद्यमानत्वात्तत्रैव धनग्राहित्वमिति न कान्चिदनुपपत्तिः । ननु पित्रा भ्रात्रा पितृव्येण च ससृष्टधन न पितृगामि नापि पितृव्यगामि अपि तु भ्रातृगाम्येवेत्युक्तम् । एव च सति वाचनिकस्वत्वसंक्रमः स्यात , स नैयायिक इति प्रागुक्त निरुन्ध्यात् । अतः ससृष्टिविषयेऽपि पित्राद्यपेक्षया भ्रातुः प्राथम्ये न्याय एव वक्तव्यः, उच्यते — उक्त तावद्विभक्ताना पुनः ससर्गप्रवृत्तिः पाक्षिकापचयभाराभ्युपगमसाहसपूर्विकेति । भ्रातृणामेव च ससर्गप्रवृत्तिस्तादृशी न पितुः । पितापुत्रयोरसत्यपि ससर्गेऽन्यतरापचयनिबन्धनापचयसक्रान्तेरवर्जनीयत्वेन कृताकृतप्रसङ्गित्वात् । श्रूयतेऽपि 'तथा पिता पुत्र क्षित उपधावति । यथा पुत्रः पितरं क्षित उपधावति ।' इति । अतो भ्रातृणामेव ससर्गे प्रवृत्तिः पाक्षिकापचयभाराभ्युपगमसाहसपूर्विका न पितुरिति भ्रातृप्राथम्यं नैयायिकमेव । नन्वेव पुत्राद्विभक्तस्य पितुः स्वभ्रातृभिः ससृष्टस्य मरणे तद्धनस्य भ्रातृगामित्वमेव स्यात् न पुत्रगामित्यमिति । मैवं, पत्नीदुहितरन्यायवत् ससृष्टन्यायस्यापुत्रविषयत्वात् । यथाह संसृष्टिप्रकरणे नारदः — 'भ्रातृणामप्रजाः प्रेयात् कश्चिच्चेत्प्रव्रजेत वा ।' इति । देवलोऽपि— 'ततो दायमपुत्रस्य विभजेरन् सहोदराः ।' इति । शङ्खोऽपि—'अपुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यमि'ति । पुत्रो विद्यमानो विभक्तो न संसृष्टः इत्युक्तमिति चेत् किमसंसृष्टः पुत्रो न पुत्रः पुत्रस्य हि पुत्रत्वेनैव प्राबल्य न संसृष्टत्वेन वा विभक्तत्वेन वा 'अङ्गादङ्गात्सभवसि' इति मन्त्रवर्णात्तस्यात्मतया निरूपितत्वात् धनस्वामिनो मृतस्यात्मभूते तस्मिन्वर्तमाने सत्यन्यस्य तद्धनग्राहित्वशङ्कानुदयात् । एवं च यथा विभक्तोऽपि पुत्रः पुत्रत्वेनैव पत्न्याद्यपेक्षया प्रबलः । तथैव ससृष्टोऽपि पुत्रः पुत्रत्वेनैव संसृष्टभ्रात्रपेक्षया प्रबल इति तद्ग्राम्येव धनम् । ननु पितृव्यादिभिः संसृष्टस्य पितुर्धन पुत्रैकनियतमित्युक्ते किमर्थं ससर्गः पित्रा तद्भ्रात्रादीनामिति चेन्मैवम् । जीवदृशायामुपचयार्थमेव संसर्गविधान न तु भाविमरणाभिसधिना । अतो मरणानन्तरं न्यायतो विविच्यमान स्वत्वं यत्र पर्यवसित स्यात्तदेव ग्राह्यमिति । मृते पितरि ससृष्टे तत्ससृष्टैः पितृव्यादिभिः ससृष्टिदशाया भुक्तावशिष्ट धनमपाकृतावशिष्ट ऋण पुत्रैरेव विभक्तैरप्यसंसृष्टिभिरपि स्वीकार्यमिति न कश्चिद्विरोधः । सवि.४३३-४

मृतापुत्रसभूयसमुत्थातृधनभाक् पत्न्यादिः

[2]संभूयकारिणां मध्ये मृतस्य पत्न्यादिरेव धनांशभागी ।

अयमर्थः—'पितृव्यपितृभ्रातृभिरेव ससर्गो नान्यैरिति ससृष्टधन न पत्न्यभिगामी'ति विष्णुस्मरण पत्नीदुहितरन्यायस्य बाधक सन्नियामकं पित्रादिभिरेव संसर्गो नान्यैरिति । संभूयकारिणामयं न्यायो नावतरतीति । सवि.४३१

मृतापुत्रससृष्टिधनभाक् न पत्नी

[3]संसृष्टधनं न पत्न्यभिगामि ।

अथ पत्नीदुहितरन्यायस्यापवादमाह विष्णुः— ससृष्टधन न पत्न्यभिगामीति । अत्र भारुचिः—अविभागदशायामिव ससृष्टिदशायामपि धनं अनेकपुरुषस्वत्वसमावेशादेकपुरुषापायेन तत्स्वत्वनिवृत्तावपि पुरुषान्तरस्वत्वाना तथैवावस्थानात् को गृह्णीयादित्यपेक्षाया अनुत्थानात्तादृगपेक्षोपनिपातिनः पत्नीदुहितरन्यायस्य बाधकत्वेनान्यससृष्टिन्यायस्यावतार इति । अयं भावः—विभागोत्तरकाल पुनर्द्रव्याणि मिश्रीकृत्य ससारयात्रायामनुवर्तमानाया प्राप्नुवन्नुपचयोऽपचयो वा यथाजातोऽनुभाव्य इति सविदं कृत्वा ससर्गे प्रवृत्तेः (?) पाक्षिकापचयभाराभ्युपगमसाहसशालित्वं संसृष्टिन्याय इति । एवमनेन न्यायेन ससृष्टिना पत्नीदुहित्रपेक्षया तत्क्रमपतितासंसृष्टिपित्राद्यपेक्षया च प्राबल्यमिति

(१) सवि.४३३.

(१) सवि.४३१. (२) सवि.४३०,३१.

नैयायिकोऽयं संसृष्टिनां स्वत्वसंक्रमक्रमः। संसृष्टी नाम विभक्तद्रव्यं विभक्तेन द्रव्यान्तरेण पुनर्मिश्रीकृत संसृष्ट तदस्यास्तीति संसृष्टी, तस्यापुत्रस्य धनमितरः संसृष्टी गृह्णीयात् न पत्न्यादिरित्यर्थः। संसृष्टित्व न सर्वेषा अपि तु पितृभ्रातृपितृव्याणामेव। तथा च बृहस्पतिः—'विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः। पितृव्येणाऽपि वा प्रीत्या स तत्संसृष्ट उच्यते ॥' इति।

सवि. ४३०–३१

कौटिलीयमर्थशास्त्रम्

संसृष्टिभिः पुनर्विभागः कर्तव्यः। संसृष्टिना उत्थाता द्वयंशभाक्।

अपितृद्रव्या विभक्तपितृद्रव्या वा सहजीवन्तः पुनर्विभजेरन्। यतश्चोत्तिष्ठेत स द्व्यंशं लभेत।

अविद्यमानपितृद्रव्याः, विभक्तपितृद्रव्या वा, सहजीवन्तः संसृज्य जीवन्तः, पुनर्विभजेरन् पुनरपि विभाग कुर्युः। तत्र विशेषमाह—यतश्चेति। यत्प्रयत्नाद्, उत्तिष्ठेत धनं वर्धेत, सः, द्व्यंशं द्विरावृत्तमंशं लभेत। अन्ये तु व्याचक्षते—धनपिण्डस्यैकमर्धमुत्थापको लभेत, अन्यदर्धमितरे सर्वे विभजेरन्निति। श्रीमू.

मनुः

संसृष्टिधनविभागः सम एव

[1]विभक्ताः सह जीवन्तो विभजेरन्पुनर्यदि।
समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते×॥

(१) स्पष्टार्थः श्लोकः। विभागधर्मे विभागस्योद्धारप्रत्याशङ्कानिवृत्त्यर्थम्। 'अपित्र्य इति धारणे'ति वचनात् पित्र्यस्य सर्वधनस्योद्धारः। इह तु भूतपूर्वगत्या पित्र्यं नास्तीत्याशङ्क्या वचनम्। मेधा.

(२) समस्तत्रेति सवर्णभ्रातृसंसर्गाभिप्रायेण, ब्राह्मणक्षत्रिययोस्तु संसर्गे पूर्वकल्पितभागानुसारेणेव भागव्यवस्था बोद्धव्या, पूर्वकल्पितज्येष्ठाशनिषेधमात्रपरं हि समवचनम्। दा.२१९

(३) अनेन ज्यैष्ठ्यनिमित्तं विभागवैषम्यं निषिध्यते नान्यनिमित्तं, तेन संसर्गसमये तदीयं यावद्धनं संसृष्टं विभागसमये तदनुसारेणैव भागं लभते।

अप.२।१३९

(४) सह जीवन्तः सहवासेन जीवन्तः। विभजेरन् संसृष्टं धनं इति शेषः। संसृष्टधनविभागे समभागविधानादेव सिद्धे ज्यैष्ठ्यनिमित्तकभागाग्रहणे पुनर्ज्यैष्ठ्यनिमित्तकवैषम्यनिषेधः बहुल्पधनसंसर्गनिमित्तकभागवैषम्यानुज्ञानार्थः। तेन संसर्गसमये यदीयं यावत्संसृष्टं तदनुसारेण संसृष्टविभागवैषम्य कल्पनीयम्। एवं च धनस्येदतापनोदाय संसर्गो न पुनरियत्तापनोदायेति मन्तव्यम्। ×स्मृच.३०३

(५) पूर्वं सोद्धारं निरुद्धारं वा विभक्ता भ्रातरः पश्चादेकीकृत्य धनं सह जीवन्तो यदि पुनर्विभागं कुर्वन्ति तदा तत्र समो विभागः कार्यः ज्येष्ठस्योद्धारो न देयः। *ममु.

(६) समस्तत्र विभागो, ज्येष्ठोद्धारादिकं न स्यादित्यर्थः। विर.६०१

(७) सह जीवन्तः संसृज्य जीवन्तः, समो न्यूनाधिकससर्गेऽप्यविषमः, ज्यैष्ठ्यं आधिक्यप्रयोजकहेतुमात्रोपलक्षणम्। स्मृसा.७५

(८) ज्यैष्ठ्यमित्यादेरर्थवादमात्रत्वात् द्रव्यन्यूनाधिक्येऽपि सम एव भागः। आचारोऽप्येवम्। तेनाचारमूलकत्वेऽस्य वचसः संभवति तद्विरुद्धश्रुतिकल्पनमन्याय्यम्। व्यवहारशास्त्रस्य व्याकरणवत्प्रायेणाचारमूलकत्वाचेति तु परे। +व्यम.६५-६

संसृष्टिनः विभागानधिकारप्राप्तौ मरणे वा

तदीयांशविभागः

[1]येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः।

× मवि. यथाश्रुतं व्याख्यानम्।

(१) कौ.३।५.

(२) मस्मृ.९।२१०; मिता.२।१३९ पू.; दा.२१९ मनुविष्णू; अप.२।१३९; व्यक.१६१; स्मृच.३०३; विर.६०१ रत् (युः); स्मृसा.७५: १३२ मनुविष्णू, १३८ नारदः: १४४,१४५; पमा.५३७; मपा.६७८; दीक.४६; रत्न.१५६; व्यनि.; स्मृचि.३५; नृप्र.४१ न्युनयं (न्यनं य); चन्द्र.९५ विरवत्; दानि.६; व्यप्र.५३२, ५३४ पू.; व्यउ.१५८ पू.; व्यम.६५ विभक्ताः (संसृष्टाः); विता. ४१६ पू.; बाल.२।१३९ उत्त.; सेतु.८० मनुविष्णू; संमु.१४३; विच.१०१ मनुविष्णू.

× पमा., चन्द्र., व्यप्र., विता. स्मृचगतम्।

*मच. ममुगतम्। +अत्र केचिदित्युद्धृतं मतं स्मृचगतम्।

(१) मस्मृ.९।२११; विश्व.२।१४४; मिता.२।१३९;

म्रियेतान्यतरो वापि तस्य भागो न लुप्यते ॥

(१) अनेन प्राप्तस्याशस्य विनियोगाशक्तावौचित्यप्राप्तमपहारं दर्शयति । अत एव च 'तस्य भागो न लुप्यते' इति । एवं च स्वयमेवैते (अन्धादयः) निरंशकाः । विश्व.२।१४४

(२) येषां भ्रातृणा, ज्येष्ठः कनिष्ठो वा भ्राताऽशप्रदानाद्धीयते । अंशप्रदान विभागकालः । हीयेत पातित्या द्यविभागार्थं च हेतुमासादयेत् म्रियेत वा तस्य भागो न लुप्यते । तस्येय प्रतिपत्तिः । +मेधा.

(३) येषां भ्रातृणा संसृष्टिना मध्ये ज्येष्ठः कनिष्ठो वा मध्यमो वांऽशप्रदानतोंऽशप्रदाने । सार्वविभक्तिकस्तसिः । विभागकाल इति यावत् । हीयेत स्वाशात् भ्रश्येत, आश्रमान्तरपरिग्रहेण ब्रह्महत्यादिना वा, म्रियेत वा, तस्य भागो न लुप्यते । अतः पृथगुद्धरणीयो न संसृष्टिन एव गृह्णीयुरित्यर्थः । *मिता.२।१३९

(४) हीयेत विभागानन्तरोत्पन्नक्लीवत्वादिना, म्रियेतान्यतरो विभागानन्तरं तस्य भागो यः पूर्व व्यवस्थितः स न लुप्यते, न सर्वैर्विभज्य लोप्यः । मवि.

(५) येषां संसृष्टिना भिन्नोदराणा भ्रातृणा मध्ये यः कोऽपि ज्येष्ठः कनिष्ठो मध्यमो वा विभागकाले देशान्तरगमनादिना स्वाशाद्भ्रश्येत तस्य भागो न लुप्यते पृथगुद्धरणीयः । न संसृष्टिन एव गृह्णीयुः । ×पमा.५३९

(६) अंशप्रदानतो विभागात् पूर्वं हीयेत प्रव्रज्यादिनेति शेषः । दात.१९२

(७) येषां सोदराणा, निर्धारणे षष्ठी । न लुप्यते संसृष्टिभिरेव न ग्राह्यः । किं तु सोदर्यभ्रातृभगिन्यादिभिरपि विभज्य ग्राह्य इत्यर्थः । व्यउ.१५८-९

[1]सोदर्या विभजेरंस्तं समेत्य सहिताः समम् ।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥

(१) सोदर्या भ्रातरो ये च संसृष्टास्ते गृह्णीयुः । भगिन्यश्च सनाभयः सोदर्याः । अप्रत्तास्ता हि सनाभिव्यपदेश्याः । प्रत्ताः पुनः पतिगोत्रभावमनुभवन्तीति न भ्रातृणा सनाभयः । ये च संसृष्टा इति । चशब्दो भगिनीं समुचिनोति । न त्वियमाशङ्का कर्तव्या । सोदर्या गृह्णीयुर्ये च भ्रातरः ससृष्टा इति । तथा सत्यसोदर्याणामपि संसृष्टाना भागः प्रसज्येत । सन्त्येव सोदर्या असंसृष्टाः ससृष्टाश्चासोदर्याः, यत्र सन्ति तत्रोभयोरपि विभागेन विभागं गृह्णीयुः । न चेदं विरुध्येत 'अन्योदर्यस्तु संसृष्टी नान्योदर्यो धन हरेत् । असंसृष्टोऽपि वादद्यात्सोदर्यो नान्यमातृकः ॥' अस्यायमर्थः । सापत्नो भ्राता सत्यपि ससृष्टित्वे न गृह्णाति, यदा सोदर्योऽससृष्टोऽपि विद्यते । सोदार्याणा मध्याद्येन संसृष्टः स एव, नान्यः, सत्यपि सोदर्यत्वे । तदुक्त 'संसृष्टिनस्तु ससृष्टी सोदर्यस्य तु सोदरः' इति । यदा तु सोदरा नैव सन्ति तदा यैरेव सापत्नैः ससृष्टस्त एव गृह्णीयुर्न त्वितरे । सोदर्यविभक्तानां सह वसता महानिकटभावसत्यपि सान्निध्य विशेषकार्यसामान्योत्थविभक्तानामपि विज्ञायत इत्याहुः(?)। तेन विभक्तानामप्यन्यतरस्मिन् प्रमीते सोदर्य एव गृह्णीयान्नास्य भागः परिलुप्यते । न चैतच्चोदनीय नैवास्य तदानीं भाग उत्थितः परिलोपो वा चिन्यते । यत उक्तम् 'समुत्पन्ने वाच्यः स्वामी'ति । 'अनीशास्ते हि जीवतोः' इति । तत्र पितुरूर्ध्वं समनन्तरमेव पुत्राणा स्वाम्य

+ ममु. मेधावत् ।

* विर., मपा., व्यनि., सवि., व्यप्र. मितावद्भाव. ।

× मितावद्भावः ।

अप.२।१३९ बृहस्पतिः; व्यक.१६१; स्मृच.२९३ येषा (एषां) : ३०४; विर.६०१; स्मृसा.७५, १२८, १३२, १३८, १४४, १४६; पमा.५३९; मपा.६७८; रत्न.१५८; व्यनि. वापि (वा तु); स्मृचि.३५; नृप्र.४१ : ४२ पू.; दात.१९२; सवि.४३६ स्मृचवत्; चन्द्र.९५ बृहस्पतिः; व्यप्र.५३४; व्यउ.१५८; व्यम.६६ द्वितीयतृतीयपादौ : ६७ लुप्य (लिप्य); विता.४१६; समु.१४४ स्मृचवत्; विच.१२९.

(१) मस्मृ.९।२१२; मिता.२।१३९ रंस्त (युस्तं); दा.२०३ मितावत्; अप.२।१३९ बृहस्पतिः; व्यक.१६१; स्मृच.२९३, ३०४; विर.६०१; स्मृसा.७५ : १२८, १३२ मितावत् : १३८, १४४, १४६ : १४८ उत्त.; पमा.५३९ मितावत्; मपा.६७९ मितावत्; रत्न.१५८ मितावत्; विचि.२४६; व्यनि. मितावत्; स्मृचि.३५ रंस्त (रस्तु); नृप्र.४१; दात.१९२-३; सवि.४३७ मितावत्; चन्द्र.९५; व्यप्र.५३४ मितावत्; व्यउ.१५५ उत्त. : १५८ मितावत्; व्यम.६७ रस्तं (युस्ते); विता.४१६-७ मितावत्; बालं.२।१३५ (पृ.२०९ उत्त.) (=); समु.१४४; विच.१३९.

दर्शयति । +मेधा.

(२) तस्योद्धृतस्य विनियोगमाह—सोदर्या विभजेयुस्तमिति । तमुद्धृतं भागं, सोदर्याः सहोदरा असंसृष्टा अपि, समेत्य देशान्तरगता अपि समागम्य, सहिताः संभूय, समं न न्यूनाधिकभावेन । ये च भ्रातरो भिन्नोदराः संसृष्टास्ते च सनाभयो भगिन्यश्च विभजेयुः । समं विभज्य गृह्णीयुरिति स्पष्टोऽर्थः । *मिता.२।१३९

(३) सोदर्यमात्राणा सोदर्या इति असोदराणा च संसृष्टाना संसृष्टा इति बहुवचनान्तस्वपदादेवेतरेतरयोगावगतेः समेत्य सहिता इति पदं उभयसाहित्यार्थमेव युक्त अन्यथानर्थक्यात् । अत उभयोरितरेतरयोगस्याश्रवणादिति अहृदयव्याहृतम् । किं च ये चेति चकारश्रुतेः चार्थे द्वन्द्वसमासस्यापि श्रवणात् इतरेतरयोगस्याश्रवणाभिधान द्वन्द्वस्याप्यतदर्थतामापादयति ।

दा.२०४

(४) यत्कार्यं तदाह—सोदर्या इति । संसृष्टिनः सोदराः सापत्ना वा । सनाभयः सोदराः । तत्र च संसृष्टिसोदरसद्भावे तस्यैव तत् । तदभावे सापत्नस्यापि संसृष्टिनः । तदभावे भगिनीमा सोदर्याणाम् । तदभावे तद्भ्रातृ (?) भ्रातृपुत्राणां तदभावे त्वसोदरादेरपि । एतच्च सर्वं पुत्रपत्नीदुहितृमातृपितृभावे, तत्सद्भावे तु तेषामेव । केचित्तु वचनद्वयमेतदप्राप्तविभागस्य क्षेत्रादेर्विभागाद्वा प्रागेव मृतस्य विभागकाले भागमाकृष्य सोदरादिभिर्ग्राह्यमित्येतत्परं व्याचक्षते । अपरे तु विभक्ता एव यदि पुनः संसृष्टास्तन्मध्ये एकस्य भ्रातुर्मरणे तद्भागव्यवस्था श्लोकद्वयेन दर्शितेत्याहुः । मवि.

(५) यत्तु याज्ञवल्क्येनोक्तम्— 'अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत्' इति तत्सोदरासद्भावविषयमित्यविरुद्धम् । यत्र संसृष्टिनामेकोदराणामभाव एव संसृष्टिभिन्नोदराणा धनग्रहणं, तर्हि 'येषा ज्येष्ठः कनिष्ठो वा हीयेताशप्रदानतः । म्रियेतान्यतरो वाऽपि तस्य भागो न लुप्यते ॥' (मस्मृ.९।२११) । 'सोदर्या विभजेरंस्तं समेत्य सहिताः समम् । भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥' (मस्मृ.९।२१२) इति मनुवचनविरोधः स्यात् । चशब्दद्वयेन सर्वेषा श्लोकोक्ताना सोदरभ्रातृभगिन्यसोदरभ्रातृणामितरेतरयुक्ताना विभागकर्तृत्वावगतेः। किं च ये संसृष्टा भिन्नोदरभ्रातरस्तैः सहिताः सोदर्याः सनाभयो भगिन्यश्च समेत्य तमलुप्तभागं समं विभजेरन्नित्येवान्वयात् संमिलितानामेव कर्तृता सहितसमेत्यशब्दाभ्या सुव्यक्तेति व्यक्तो विरोधः । केचिद्विरोधपरिहारार्थमिदं वचनमेवं व्याचक्षते । तमलुप्तभागं सोदरा यदि संसृष्टिनस्तदा त एव गृह्णीयुर्नासंसृष्टिनः सोदर्या अपि संसृष्टाना सोदराणामभावे सर्वे सोदराः समेत्य मिलित्वा सहिताः समप्रधानभावेन सममन्यूनाधिक विभजेरन् । सोदराणामभावे भगिन्यः सनाभयो विभजेरन् । तासामप्यभावे अन्योदर्या भ्रातर इति । तदेतदनेकाध्याहारकरणादत्यन्तासमञ्जसत्वाच्च उपेक्षणीयम् । स्मृच.३०४

मनुवचन तावत्स्थावरतदितरधनसद्भावविषयम् । प्रजापतिना तत्रैव संसृष्टासंसृष्टाना विभज्य ग्रहणाभिधानात् । 'अन्तर्धनं च यद्द्रव्यं संसृष्टाना च तद्भवेत् । भूमिं गृहं त्वसंसृष्टा विभजेयुर्यथाशतः ॥' इति । संसृष्टाना भिन्नोदरभ्रातृणा यथाशतो गूढधनं जङ्गमं च द्विपदादिरूपं भवेत् । असंसृष्टाः सोदरभ्रातृभगिन्यस्तु गृहं क्षेत्रं यथांशतो गृह्णीयुरित्यर्थः । एवं च पारिशेष्यात्केवलस्थावरसद्भावविषये केवलस्थावरेतरद्रव्यसद्भावविषये वा याज्ञवल्क्यवचनं द्रष्टव्यम् । स्मृच.३०५

(६) सोदर्या भ्रातरः समागम्य सहिताः भगिन्यश्च सोदर्यास्तमंशं समं कृत्वा विभजेरन्, सोदर्याणां सापत्न्यानामपि मध्याद्ये मिश्रीकृतधनत्वेनैकयोगक्षेमास्ते विभजेयुः समं सर्वे सोदर्याः सापत्न्या वा । एतच्च पुत्रपत्नीपितृमात्रभावे द्रष्टव्यम् । ममु.

(७) सोदरभ्रातृणा मध्ये संसृष्टा एव गृह्णीयुः, नासंसृष्टा इत्यर्थः । तेऽपि पत्न्यभावे । भगिन्यत्राविवाहिता, तस्याः संस्कारार्थं दद्युरिति । *स्मृसा.७५-६

(८) सोदर्या इति भ्रातर इति च पदद्वयोपादानात् सोदर्यशब्देनैकोदरा भ्रातृशब्देन च भिन्नोदरा अभि-

+ विवादरत्नाकरोद्धृत प्रकाशमत मेधागतम् । चन्द्र. स्वमतं मेधागत, बालरूपमत मितागतम् ।

* विचि., रत्न., व्यप्र., व्यउ., विता. मितागतम् । पराशरमाधवे मिताक्षरामत स्मृतिचन्द्रिकामतं चोद्धृतम् ।

* विश्वरूप-बालरूप-हलायुध-कल्पतरुमतं मितागतम् । पारिजातमत मेधागतम् ।

धीयन्ते, अन्यथा वैयर्थ्यापत्तेः। 'भ्रातरो ये च संसृष्टा' इत्यत्र संसृष्टपदोपादानात् तत्प्रतियोगीभूते 'सोदर्या विभजेयुरि'त्यत्र च संसृष्टपदानुपादानात्सोदर्या असंसृष्टा अपि गम्यन्ते। असमानजातीयाना भिन्नोदरसंसृष्टिभ्रातृणा तु चतुस्त्रिद्येकभागाः स्युरित्यनेन क्रमेण विभागः। समशब्दस्य भिन्नजातीयभ्रातृव्यतिरिक्तसमानजातीयभिन्नोदरभ्रातृजातीयभिन्नोदरभ्रातृविषयत्वेनापि चरितार्थत्वे चतुस्त्रिद्येकभागाः स्युरित्यस्य बाधकाभावात्।

+मपा.६७९

(९) भ्रातरो ये च संसृष्टाः इति भ्रातृग्रहणमन्येन पित्रा पितृव्येण वा संसर्गे तत्पत्न्यादिप्राप्त्यर्थं इत्याचार्यविश्वरूपैरुक्तम्। व्यनि.

(१०) तदयमर्थः—भिन्नोदरसंसृष्टिनामपचयभारसहिष्णुत्वमंशग्रहणे निमित्तम्। एकोदराणा तु पिण्डदानाधिकारनिबन्धनान्तरङ्गन्याय एवाशग्रहणे निमित्तम्। उभयनिमित्तं ससृष्टस्यैकोदरभावे वेदितव्यम्। भगिनीना तु संसृष्टधनविभागसमये दायविभागसमय इव यत्किञ्चित्प्रीत्या देयं न तु विभागः। तासा ससर्गाप्रसक्तेः। प्रसक्तानामेव विभागः। अतश्च भिन्नोदराणा संसृष्टानामसंसृष्टानामेकोदराणां समविभाग इति सिद्धम्।

सवि.४३७

(११) सोदर्या भ्रातर इत्यन्वयः। ये च ससृष्टाः पत्नीपितृपितामहसापत्नभ्रातृपितृव्यादयः। ×व्यम.६७

(१२) सोदर्या भ्रातरो विभागकाले सहिता भूत्वा समेत्यैकमत्यमुपागम्य तं प्रोषितप्रव्रजितादिभ्रातृभागं संविभजेरन्। सोदराभावे संसृष्टास्तदभावे सनाभयो भगिन्यः, समविभागविषयत्वादेवास्य संसृष्टिविभागोऽनन्तरमुक्तः, न पुनः संसृष्टिविषयत्वेन। अपुत्रभ्रातृविभागविषयं चैतत्स्मृत्यन्तरानुगुण्यात्। नन्द.

याज्ञवल्क्यः

संसृष्टिजननमरणयोः संसृष्टिधनविभागः। मृतापुत्रससृष्टिधनविभागाधिकारः।

[1]संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः।
दद्यादपहरेच्चांशं जातस्य च मृतस्य च॥
अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत्।
असंसृष्टयपि चाऽऽदद्यात्संसृष्टो नान्यमातृजः*॥

(१) विभक्तः सन् निमित्तान्तराद् यः पित्रा भ्रात्रा वा सहार्थं ससृज्य वसति, स संसृष्टी। तत्र यद्येवं सहवसता पितापुत्राणा पितुः पुत्रो जायेत, तस्याप्यंशो देयः। मृतस्य च हर्तव्यः। सोदरस्य च सोदर इत्ये-

+ वाक्यार्थो मितागतः। × शेष मितागतम्।

(१) **यास्मृ**.२।१३८; **अपु**.२५६।२५; **विश्व**.२।१४२ तु सो (च सो) द्यात (द्याच्चा); **मेधा**.९।२१२ दरस्य (दर्यस्य)

* मेधा. व्याख्यान 'सोदर्या विभजेरस्त' इति मनुवचने (पृ.१५४४) द्रष्टव्यम्।

पू.; **मिता**.; **दा**.१९१ द्यात (द्याच्चा) च्चां (दं); **अप**.; **उ**.२।१४।२ दरस्य (दर्यस्य) द्यात (द्याच्चा); **व्यक**.१६२; **स्मृच**.३०३ पू.; **विर**.६०४ च्चांशं (द्भाग); **स्मृसा**.७७: १३१ पू. : १३९, १४६, १४८ : १४५ द्यात (द्याच्चा); **पमा**.५३८ द्यात (द्याच्चा); **मपा**.६७६ पू.; **रत्न**.१५७, १६० पू.; **विचि**.२४७ दावत्; **व्यनि**. उक्त; **स्मृचि**.३५ (=) पू.; **नृप्र**.४२; **दात**.१९२ दावत्; **सवि**.४३२ पमावत्; **मच**.९।२११ दावत्; **चन्द्र**.९६ सृष्टी (सर्गी) च्चां (द्भां); **वीमि**.; **व्यप्र**.५११ (=) प्रथमपादः, ५३३; **व्यउ**.१५७ दावत्; **व्यम**.६६ पमावत्; **विता**.४१३ पमावत्; **राकौ**.४५७ पू.; **सेतु**.४५ दावत्; **समु**.१४४ पमावत्; **विच**.१२७ दावत्.

(१) **यास्मृ**.२।१३९; **अपु**.२५६।२६ यों (यै) त्संसृष्टो (त्सोदर्यो); **विश्व**.२।१४३ स्तु (स्य) त्संसृष्टो (त्सोदरो); **मेधा**.९।२१२ द्यपि (द्योऽपि) चा (वा) तृजः (त्रिकः) शेषं अपुवत्; **मिता**.चा (वा); **दा**.१९३; **अप**. तृजः (तृकः) शेषं अपुवत्; **व्यक**.१६२ यों (यै); **उ**.२।१४।२ अपुवत्; **स्मृच**.३०४; **विर**.६०४; **स्मृसा**.७८ यों (यै) चा (वा) त्संसृष्टो (त्सोदरो) : १३२, १३९-४०, १४७ यों (यै) : १४५ यों (यै) ष्टो ना (ष्टाश्चा) : १४८ यों (यै) त्संसृष्टो (त्सोदरो); **पमा**. ५३८ चा (वा) क्रमेण नारदः : ५३९ (=) उक्त.; **मपा**.६७६ चा (वा) : ६७७; **दीक**.४५ यों (यै); **रत्न**.१४३, १५७; **विचि**. २४८-९ स्मृसा(१४८)वत्; **व्यनि**. अपुवत्; **स्मृचि**.३५ (=) पू.; **नृप्र**.४२ विचिवत्; **दात**.१९२ : १९४ पू.; **सवि**.४३३ यों (यै) पू. : ४३४ तृतीयः पादः : ४३५ चतुर्थः पादः; **मच**.९।२११; **चन्द्र**.९७ संसृष्टी (ससर्गी) द्यपि (द्योऽपि) त्संसृष्टो (त्सोदरो); **दमी**.३२ उक्त.; **वीमि**.; **व्यप्र**.५३३-४ : ५३७ पू.; **व्यउ**.१५८; **व्यम**.६६; **विता**. ४१६ यों (यांत्) चा (वा) त्संसृष्टी (त्सोदर्यो); **सेतु**.४५; **समु**.१४४; **विच**.१२७, १२८.

तत्तु मातृतो विभागपक्षे द्रष्टव्यं, निर्धने च पितरि विभक्तजविषयम्। यत्तु गौतमीयम्–'अथ ससृष्टिविभागः। प्रेताना ज्येष्ठस्ये'ति। अत्र ज्येष्ठः पितैवोच्यते। तस्य सोदर्यभ्रात्रन्तराभावे प्रेताना पुत्राणा भ्रात्रन्तरासंसृष्टाना च धनभाक्त्वम्। तदुक्तं 'पिता हरेदपुत्रस्ये'ति। अन्ये तु ज्येष्ठशब्दं भ्रातर्याहुः। तत् पुनर्विचार्यम्। स्पष्टमन्यत्।

अत्रापरे पूर्वश्लोकविवरणस्थानीयमिम श्लोकं पठन्ति —अन्योदर्यस्येति। संसृष्टयप्यन्यमातृजः सोदर्ये सति न धनभाक्। असंसृष्टयपि सोदर्य एव धनभागित्यर्थः।

विश्व.२।१४२-३

(२) इदानीं स्वर्यातस्यापुत्रस्य पत्न्यादयो धनभाज इत्यस्यापवादमाह—संसृष्टिनस्तु इति। विभक्तं धनं पुनर्मिश्रीकृतं संसृष्टं तदस्यास्तीति संसृष्टी। संसृष्टत्वं च न येन केनापि किन्तु पित्रा भ्रात्रा पितृव्येण वा। यथाह बृहस्पतिः–'विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः। पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते॥' इति। तस्य संसृष्टिनो मृतस्यांशं विभागं विभागकाले अविज्ञातगर्भाया भार्यायां पश्चादुत्पन्नस्य पुत्रस्य संसृष्टी दद्यात्। पुत्राभावे संसृष्टयेवापहरेद् गृह्णीयान्न पत्न्यादिः। संसृष्टिनस्तु संसृष्टीत्यस्यापवादमाह—सोदरस्येति। संसृष्टिनः संसृष्टीत्यनुवर्तते। अतश्च सोदरस्य संसृष्टिनो मृतस्यांशं सोदरः संसृष्टी संसृष्टानुजातस्य सुतस्य दद्यात्। तदभावे अपहरेदिति पूर्ववत् सबन्धः। एवं च सोदरासोदरसंसर्गे सोदरसंसृष्टिनो धनं सोदर एव संसृष्टी गृह्णाति न भिन्नोदरः ससृष्टयपीति पूर्वोक्तस्यापवादः। इदानीं ससृष्टिन्यपुत्रे स्वर्याते संसृष्टिनो भिन्नोदरस्य सोदरस्य चासंसृष्टिनः सद्भावे कस्य धनग्रहणमिति विवक्षाया द्वयोर्विभज्य ग्रहणे कारणमाह—अन्योदर्यस्तु इति। अन्योदर्यः सापत्नो भ्राता संसृष्टी धनं हरेत् न पुनरन्योदर्यो धनं हरेदसंसृष्टी। अनेनान्वयव्यतिरेकाभ्यामन्योदर्यस्य संसृष्टित्वं धनग्रहणे कारणमुक्तं भवति। असंसृष्टीत्येतदुत्तरेणापि संबध्यते। अतश्चासंसृष्टयपि संसृष्टिनो धनमाददीत। कोऽसावित्यत आह—संसृष्ट इति। संसृष्टः एकोदरसंसृष्टः। सोदर इति यावत्। अनेनासंसृष्टस्यापि सोदरस्य धनग्रहणे सोदरत्वं कारणमुक्तम्। संसृष्ट इत्युत्तरेणापि संबध्यते। तत्र च संसृष्टः ससृष्टीत्यर्थः। नान्यमातृजः। अत्रैवशब्दाध्याहारेण व्याख्यानं कार्यम्। संसृष्टयप्यन्यमातृज एव संसृष्टिनो धनं नाददीतेति। एवं चासंसृष्टयपि वाऽऽदयादित्यपिशब्दश्रवणात् ससृष्टो नान्यमातृज एवेत्यवधारणनिषेधाच्चासंसृष्टसोदरस्य संसृष्टभिन्नोदरस्य च विभज्य ग्रहणं कर्तव्यमित्युक्तं भवति। द्वयोरपि धनग्रहणकारणस्यैकैकस्य सद्भावात्। एतदेव स्पष्टीकृतं मनुना—विभक्ता इत्यादिना। ×मिता.

(३) सोदरस्य तु सोदरः। भ्रातरस्तथेत्युक्तभ्रातुरधिकारावसरे प्रथमं सोदरो गृह्णीयादित्यर्थः। दा.१९१

तत्र किं संसृष्टिनोऽप्यसोदरस्य सोदराजघन्यत्वं न वेत्यपेक्षायामाह याज्ञवल्क्यः–अन्योदर्यस्तु इति। दा.१९२

यच्च श्रीकरमिश्रैरुक्तं 'संसृष्टिनस्तु संसृष्टी'त्यस्य असोदरसंसृष्टिमात्रविषयत्वे अन्यानपेक्षत्वात्, 'सोदरस्य तु सोदर' इत्यस्यापि असंसृष्टसोदरमात्रविषयत्वे नैरपेक्ष्यात्, असोदरे संसृष्टिनि सोदरे चासंसृष्टिनि उभयोः प्राप्तौ यदि द्वयमेव प्रवर्त्तते तदा अन्योन्यसापेक्षमुभयोर्विधायकत्वं भवेत्। न चैकस्य सापेक्षं निरपेक्ष च विधायकत्वमुचित, विधिवैषम्यप्रसङ्गात्। यथा दर्शितं द्वयोः प्रणयन्तीत्यधिकरणे पर्वचतुष्टयविहिताया उत्तरवेदेर्न पर्वद्वये प्रतिषेध उपपद्यते, तत्र पर्वद्वये विकल्पसापेक्ष विधान पर्वद्वये च निरपेक्षमिति उत्तरवेदिविधिवैषम्यापत्तेः। तथा चात्र यत्रैव निरपेक्षविधायकत्व तत्रैव 'संसृष्टिनस्तु संसृष्टी'त्यस्य, 'सोदरस्य तु सोदर' इत्यस्य च प्रवृत्तिः स्यात्। तत्रासोदरे संसृष्टिनि, सोदरे चासंसृष्टिनि सत्युभयोरप्रवृत्तेस्तद्धनं न कश्चिदपि गृह्णीयादित्यापद्यते, तस्मात् संसृष्टिनस्तु संसृष्टीति संसृष्ट धने संसृष्टिनः सामान्यतो भागप्राप्तौ तदपवादार्थं'सोदरस्य तु सोदर' इति वचनम्। एवं च संसृष्टिनोऽप्यसोदरस्य सोदरे सति न प्राप्तिः, किं तर्हि विभागसंसृष्टस्य असंसृष्टस्य च सोदरस्यैवेत्यन्तम्। तदसंगतं, न हि द्वयोरुभयत्रैकैकशः प्रवृत्तयोर्युगपदेकत्र प्रवृत्तिमात्रेण विधिवैरूप्यम् केवलोद्भातृप्रतिहर्त्रपच्छेदेन निरपेक्षप्रवृत्तयोः सर्वस्व

× मपा., व्यनि., व्यउ. मितागतम्। पराशरमाधवे स्वमत मितागतम्, अन्यमतं स्मृचगतम्।

दाक्षिण्यादाक्षिण्यशास्त्रयोर्युगपदुभयापच्छेदे सति नैकमपि शास्त्रं प्रवर्त्तेत विधिवैरूप्यात् । तथा चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्रा अमावास्यामिति शास्त्रयोरुपांशुयाजाग्नीषोमीययोरैन्द्रदध्यैन्द्रपयसोरेकैकशः प्रवृत्तयोर्द्वयोराग्नेये प्रवृत्तौ विधिवैषम्यापत्तेर्नैकमपि प्रवर्त्तेत । तस्मात् बाधनिरपेक्षं नित्यवद्विधान क्वचित् क्वचित् विध्यन्तरबाधसापेक्षमिति वैरूप्यलक्षणम् । तथा हि उपात्र वपन्तीति वेदिविधिसापेक्षो निषेधः तद्बाध विना विधिरेव न स्यादिति वेदिविधिबाधसापेक्ष विधान, न च नित्यवदेव तस्य बाधः । तथा सति निषेधो विफलः । निषेधं विनापि वेद्यकरणस्य प्राप्तेः । ततश्च वेदिविधिरपि निषेधविधिबाधसापेक्षविधिभावः पर्वद्वये, पर्वद्वये तु निरपेक्ष इति भवति विधिवैषम्य विकल्पश्च स्यात्, रागप्राप्ते तु नित्यवद्बाधः कादाचित्कस्याकरणस्य निषेधमन्तरेणापि प्राप्तेः । अत एव षोडशिग्रहणाग्रहणशास्त्रयोर्विकल्पः ।

ये तु ब्रुवते प्राप्तिपूर्वकत्वात् निषेधस्य न निमित्तं विधिरपबाधत इति न्यायेन विकल्प इति, तेषा मते न तौ पशौ करोतीत्यादौ रागप्राप्तनिषेधे च विकल्पः स्यात् । किं च एव निमित्तिनः स्वनिमित्तबाधाक्षमत्वात् कथ पक्षेऽपि बाधः अतुल्यबलत्वात्, अथ निषेधस्यैवायं स्वभावः यत् स्वनिमित्तमुन्मूलयतीति तदा सर्वदैवोन्मूलयेत् प्राप्तेरेव दुर्बलत्वात् । ये तु ब्रुवते याद्दच्छिकग्रहणप्राप्तिनिषेधोऽय न तु विधितः प्राप्तस्येति तदतीवाज्ञवचन, वैधग्रहणस्य अवैधग्रहणनिषेधस्य च युगपदुपसहारासभवात् विकल्पाभावप्रसक्तेः क्रत्वर्थतया च याद्दच्छिकग्रहणप्रसक्त्यभावात् निषेधो न क्रत्वर्थः स्यात् । तस्मादसदुक्तन्यायादेव विकल्पः । तदस्तु कि विस्तरेण ।

यच्च स्वयमेव वर्णितं असोदरे ससृष्टिनि सोदरे चाससृष्टिनि ससृष्टिनस्तु संसृष्टीत्यनेन असोदरस्य धनसंबन्धप्राप्तौ तदपवादार्थ सोदरस्य तु सोदर इति वचन, तदप्ययुक्तम् । अस्मिन्नेव विषये सोदरस्य तु सोदर इति सोदरस्य धनसंबन्धप्रसक्तौ तदपवादार्थं संसृष्टिवचनस्यापि संभवात् विनिगमनाकारणाभावात् । यच्च ससृष्टिनस्तु संसृष्टीत्येतद्विवरणार्थत्वेन अन्योदर्य इति वचनं व्याख्यातं तदप्यतीवायुक्तम् । अन्योदर्यवचनादेव विवक्षितार्थलाभात् संसृष्टिनस्त्वित्यस्यानर्थक्यापत्तेः । किञ्च अन्योदर्यस्तु ससृष्टी इत्यस्यायमर्थः—अन्योदर्यस्तु संसृष्टी यः स नान्योदर्यधन हरेत्, किन्त्वससृष्टयपि सोदरपदानुषङ्गात् सोदर एव गृह्णीयात्, ससृष्टोऽपि नान्यमातृजो गृह्णीयादिति व्याख्यातं, तदपि न, पूर्वार्धे एकस्य अन्योदर्यपदस्य पुनरुक्तत्वात् तथोत्तरार्धेऽपि नान्यमातृज इत्यस्यानर्थक्यापत्तेः । अपिशब्दस्य चैवकारार्थेऽवर्णनात् । किं च सोदरे चासंसृष्टिनि असोदरस्य संसृष्टिनोऽपवादार्थ सोदरवचनस्य वर्णितत्वात् सोदरासोदरयोरसंसृष्टिनोरप्रवृत्तत्वात् तुल्यवदेवाधिकारः स्यात्, न वा कस्यचिदपि स्यात् ।

अथात्रापि सोदरवचनमेव प्रवर्त्तते तदैकत्र संसृष्टिवचनबाधसापेक्षं, अन्यत्र तु बाधानपेक्षमिति भवतामेव विधिवैरूप्य, यथा सोमे विधीयमाना वेदिः दीक्षणीयादिष्वतिदेशप्राप्तवेदिविधिबाधेन अन्यत्र बाध विनैवेति वैरूप्यात् अवेदिमता तद्द्रष्टव्यमित्युक्तम् । अस्मन्मते तु श्रीकरसमतमपि विधिवैरूप्य नास्ति ससृष्टिसोदरवचनयोरेकैकविषयत्वात्, अन्योदर्यवचनस्य च सोदरस्यासंसृष्टिनः ससृष्टिनश्चासोदरस्य तुल्यवदधिकारज्ञापनार्थत्वात् । तथाहि अन्योदर्यस्तु ससृष्टी सन् सत्यपि सोदरेऽसंसृष्टिनि धन हरेत् नान्योदर्योऽससृष्टयपि गृह्णीयादिति पूर्वार्धस्यार्थः । तत्र कि सोदरस्तदानीं न गृह्णीयादित्यपेक्षायां उत्तरार्धेनोत्तरम् — 'असंसृष्टयपि चादद्यात्', सोदर इत्यनुषज्यते, संसृष्टोऽन्यमातृज एव न केवलः किन्त्वंशभ्या विभज्य ग्रहीतव्यमित्यर्थः । अतो विधिवैषम्यमपि परिहृतम् । =दा.१९४–२०३

(४) अपुत्रस्य भ्रातुः पत्नीदुहितृणा पित्रोश्चाभावे भ्रातृणा भवतीत्युक्तं, तत्र विशेषमाह—संसृष्टिनस्तु इति । विभक्तस्य धनस्य विभक्तैनैव धनान्तरेण मिश्रणं संसृष्टं, तद्वान्संसृष्टी, तस्य मृतस्य धनं ससृष्टयेव भ्राता हरेत् । भ्रातोऽत्र सोदर एव न पुनरन्योदर्यः ससृष्टयपि । संसृष्टिनस्तु जातस्य तन्मरणोत्तरकालमुत्पन्नस्य पुत्रस्य तद्भागं तत्पुत्राय जीवन् संसृष्टी दद्यात् । एतच्चात्र प्रसङ्गादुक्तम् । अत्र

= मिताक्षरावः । दीपकलिकाव्याख्यानं अत्रोद्धृतश्रीकरमते गतार्थम् ।

बृहस्पतिः—'विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः। पितृव्येणाथवा प्रीत्या तत्संसृष्टः स उच्यते ॥' अनेन त्रिविधाः संसृष्टिनो भवन्तीत्यनूद्यते। तेषा मध्या दपुत्रस्य ससृष्टिनोंऽशः सोदरेण ससृष्टिना ग्राह्य इति यदुच्यते तत्किं मृतस्य पत्न्यादिसद्भावे तद्विपर्यये चेति जिज्ञासायामाह—'यदा कश्चित्प्रमीयेत प्रव्रजेद्वा कथंचन। न लुप्यते तस्य भागः सोदरस्य विधीयते ॥ या तस्य भगिनी सा तु ततोंऽश लब्धुमर्हति। अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च ॥' इति। अतश्च संसृष्टिनोऽपि यदि पत्न्यादयः सन्ति तदा पत्नी दुहितर इत्ययमेव क्रमः। यत्र भ्रातृणा रिक्थग्राहित्वे प्राप्ते ससृष्टिसोदरत्वसभवे तद्विशिष्टस्यैव भ्रातुर्धनभाक्त्वं नियम्यते। भगिन्याः सोदरभ्रात्रभावेऽधिकारिता मन्तव्या। अन्यथा 'तस्मान्निरिन्द्रियाः स्त्रियोऽदायादाः' इति श्रुतिविरोधः स्यादिति। उक्तमेतत्ससृष्टिनो मृतकस्याश सोदर्यः ससृष्टी हरेदिति। एतदेव व्यतिरेकतः स्पष्टयितुमाह—'अन्योदर्यस्तु ससृष्टी नान्योदर्याद्ध(र्यध)न हरेत्'। निगदव्याख्यातमेतत्। यदा पुनरन्योदर्यः ससृष्टी न सोदरश्चेत्तदा कोऽशहर इत्यपेक्षायामाह— 'असंसृष्टयपि चाऽऽदद्यात्सोदर्यो नान्यमातृजः(कः)'। सोदर्यो यद्यप्यससृष्टी तथाऽपि स एवाऽऽददीत न पुनरन्योदर्यः ससृष्टयपि। अन्योदर्यस्य संसृष्टित्व विशेषणमससृष्टयपीत्यपिशब्दाद्गम्यते, तेनायमर्थः सिद्धः—यदि सोदरत्व ससर्गित्व च विद्यते तदा स एव तादृशस्याशं हरति। यदा पुनः ससृष्टित्व अन्योदर्यस्य तदा सोदरत्वमेवाशहरत्वे निमित्त नेतरदिति। अप.

(५) यत्र त्वसंसृष्टाः सर्वे सोदरा भिन्नोदरास्तु संसृष्टास्तत्र सोदरा एवासंसृष्टा अपि तस्य धन विभजेरन् न तु भिन्नोदराः ससृष्टाः। 'असंसृष्टयपि चादद्यात्सोदर्यो नान्यमातृजः' इति याज्ञवल्क्यस्मरणात्। असंसृष्टयपीत्यपिशब्दात् अन्यमातृजस्य ससृष्टित्वविशिष्टस्याऽऽदानप्रतिषेधो गम्यते। स्मृच.३०३-४

यत्तु याज्ञवल्क्येनोक्तम्— 'अन्योदर्यस्तु ससृष्टी नान्योदर्यो धनं हरेत्' इति तत्सोदरासद्भावविषयमित्यविरुद्धम्। स्मृच.३०४

तदेतदेव व्याख्यातृभ्यस्तेभ्य एव रोचते। न पुनः प्रतिवक्तृभ्यो वचनतोऽत्यन्ताप्रतीतस्यैव स्वप्रज्ञाबलाद्वचनार्थत्वाङ्गीकरणात्। तस्मादत्र मनुयाज्ञवल्क्यवचनयोर्यथाप्रतीयमानार्थयोर्विषयव्यवस्थयैवाविरोधो वाच्यः। न पुनरर्थैक्याभिधानवशादिति। +स्मृच.३०५

(६) यस्तु कल्पतरौ 'नान्योदर्यधन हरेदि'ति [पाठो दृश्यते स मूलभूतयाज्ञवल्क्यमिताक्षरापारिजातप्रकाशहलायुधेषु 'नान्योदर्यो धन हरेत्' इति पाठदर्शनात्तदनुसारिव्याख्यादर्शनाच्च लिपिप्रमाद एवेति।]

*विर.६०४-५

(७) मिताटीका— विभागकालेऽविज्ञातगर्भायामिति। इदमत्राकूतम्। यदा त्रिचतुरो भ्रात्रादयः ससृष्टिनस्तदा तेष्वेकस्मिन् भ्रातरि स्वभार्याया गर्भमाधाय दिव गते संसृष्टिना जीवतामनेकत्वादैक्याभावात् च विभागः प्राप्तः। एकत्वे ऐक्ये च विभागाभावात्। तस्मिन् विभागकालेऽस्पष्टगर्भत्वेन यदि गर्भो न विज्ञातो विभागश्च निष्पन्नः कालान्तरे पुत्र उत्पन्नः तदा तस्मै तत्पित्रशो दातव्यः। तदभावे संसृष्टिव्यक्तिपर्यालोचनयाऽशकल्पनया संसृष्टिनो गृह्णीयुरिति।

ससृष्ट एकोदरसंसृष्ट इति। एकस्मिन् मातुरुदरे मिलित इत्यर्थः। एतत्पितुरप्युपलक्षणपरम्। 'पतिर्जाया प्रविशति गर्भो भूत्वा स मातरमि'ति जायाया अपि मातृत्वश्रवणस्य श्रौतत्वात्पिताऽससृष्टयपि पुत्रस्य। एव पुत्रोऽप्यससृष्टी पितुः भ्रातुः परेतस्यान्यस्मात् ससृष्टिनो भागं हरेदिति तात्पर्यार्थः। सुबो.

[तन्न। अनिष्टापत्तेः। तदेतत् ध्वनयन्नेवाह-सोदर इति। यावदिति। इति बालम्भट्टी (पृ.२४७ पंक्तिः २०)।]

(८) विभज्य मिश्रीकृत संसृष्टं तदस्यास्यसौ संसृष्टी। तस्य मृतस्य भागं संसृष्टी गृह्णीयात्, नाससृष्टी विभक्तः पुत्रः सहोदरो वा। यदा तु पितैव केनचित्पुत्रेण संसृष्टी तदा तद्धन ससृष्टी पुत्रो गृह्णीयान्नासंसृष्टी। ससृष्टि-

+ 'ससृष्टिनस्तु ससृष्टी' इत्यस्य व्याख्यान मितागतम्। विशेषश्च 'सोदर्या विभजेरंस्त' इति मनुवचने (पृ.१५४४) द्रष्टव्यः।

* स्वमत मितागतम्। अन्यपक्षः 'अन्योदर्यस्तु' इति श्लोकस्य विश्वरूपव्याख्याने गतः। अत्रोद्धृतः [ ] एतच्चिन्ताङ्कितो ग्रन्थः मूलग्रन्थे पादटिप्पण्यां द्रष्टव्यः।

नस्तु संसृष्टीत्यविशेषेणाभिधानात्। पितापुत्रयोरपि संसर्ग-कथनात्। 'अनपत्यस्य धर्मोऽयमभार्यापितृकस्य चे'त्यस्य वा बाधस्य पित्रा विभक्तससर्गानन्तरजातविषयत्वात्।

तदेव संसृष्टित्वे प्रमीतसंसृष्टित्वमेव ससृष्टिनोऽधिकारः संसृष्टिनस्तु संसृष्टीत्यनेन प्रतिपादितः। अत्रैव विशेषः सोदरस्य तु सोदरः, सोदराऽसोदरससर्गे संसृष्टी सोदरो गृह्णीयात् न तु भिन्नोदरसंसृष्टीत्यर्थः। स्मृसा.७७-८

[बालरूपमते] अन्योदर्यः सापत्न्यः धनं हरेत् संसृष्टी सन् हरेत्। अर्थादसंसृष्टयन्योदर्यो न हरेत्। तच्च हरन् सोदर्यसद्भावे मनुवचनानुसारेण तेन सम हरेत्। सोदराभावे सकलमेव। न तत्र सोदरभ्रातृपुत्रादेरधिकार इत्यत्र तात्पर्यम्। असंसृष्टित्वे भ्रातृपुत्रस्याधिकारस्तदानीं तल्लुप्त इति वचनानुसारात्। नन्वेवमसंसृष्टस्य सापत्न्यस्यानधिकार एव किमित्यत्राह—'असंसृष्टयपि वादद्यात् सोदर्यो नान्यमातृजः।' संसृष्टश्चेदन्यमातृजो नास्ति। स्मृसा.१३२

[हलायुधमते] जातस्येति विद्यमानस्येत्यर्थः। पूर्वोक्तमेव विस्फोरयति—अन्योदर्यस्त्विति। *स्मृसा.१४५

(९) अन्ये तु पितापुत्रयोः ससर्गे पितुश्च भागानन्तरं पुत्रे जाते पितरि च प्रमीते संसृष्टी पुत्रः पितुरंशं तस्मै जातकाय दद्यादित्यर्थमाहुः। ×विचि.२४७

(१०) सोदरे त्वसंसृष्टिनि संसृष्टिन्यसोदरे च सति कतरस्तावद् गृह्णीयात्, एवं सोदरासोदरयोः संसृष्टयोः सद्भावे कतर इत्यत्र प्रथमत आह—अन्योदर्यस्त्विति। अन्योदर्यः पुनः संसृष्टी सन् गृह्णीयात् नान्योदर्यमात्रः किन्तु असंसृष्टयपि पूर्ववचनस्थसोदरपदानुषङ्गात् प्राप्तः सोदरश्च गृह्णीयात्। तेनैकत्र विषये पूर्ववचनोक्तससृष्टत्वसोदरत्वयोरेकशः संबन्धेन तुल्यत्वादुभयोर्विभज्य ग्रहणं, तदुभयसत्त्वे चासोदर्यस्यासंसृष्टिनोऽतुल्यरूपत्वान्नेति द्वितीये आह— संसृष्टो नान्यमातृज इति। सोदरे संसृष्टिनि सति अन्यमातृजः संसृष्टयपि न गृह्णीयात्, अर्थात्तत्र संसृष्टी सोदर एव गृह्णीयात् संसृष्टत्वाविशेषेऽपि सोदरत्वेन तस्यैव बलवत्त्वात्। दात.१९४

(११) यस्तु वैमात्रेयस्य भाग एव नास्तीति मुख्योऽर्थः सोऽपि ससर्गव्यवस्थाविरोधादनाहतः। संसृष्टिपरोक्षेऽसाध्वीना तत्पत्नीना भरणमात्रं विधेयम्। +चन्द्र.९७

(१२) [अत्र भारुचिः—इत्युपक्रम्योक्तम्] संसृष्टिनोऽपुत्रस्यापितृकस्य धनं पितृव्यगाम्येवेति विष्णुवचनस्यार्थः। अत एवाह याज्ञवल्क्यः—'संसृष्टिनस्तु ससृष्टी' इति। यत्र पुनः पितृव्यसोदरौ संसृष्टौ तत्र ससृष्टिधन सोदरगाम्येव, न पितृव्यगामीत्याह याज्ञवल्क्यः—'सोदरस्य तु सोदर' इति। सोदरस्य ससृष्टस्य धनं सोदर एव गृह्णीयात्। संसृष्टिपितृव्यादिस्तु संसृष्टोऽपि न गृह्णीयात्। तस्यैव तत्पिण्डदानाधिकारादिति वचनार्थः। संसृष्टिनो मरणानन्तर जातस्य पुत्रस्यैवाशो दातव्यः न ग्रहीतव्य इत्याह याज्ञवल्क्यः—'दद्याच्चापहरेच्चाशं जातस्य च मृतस्य च।' इति। यत्र पुनः भिन्नोदरा भ्रातरः केचन संसृष्टाः, सोदरभ्रातरो न सन्ति, पितृव्यादयोऽपि ससृष्टाः, तत्र भिन्नोदरभ्रातृगाम्येव धनमित्याह याज्ञवल्क्यः—'अन्योदर्यस्तु ससृष्टी नान्योदर्यधनं हरेत्।' इति। असंसृष्टीति शेषः। सवि.४३२-३

अन्तरङ्गन्यायेनासंसृष्टिनामेव धनग्राहित्वमाह याज्ञवल्क्यः— असंसृष्टयपि चादद्यात्, इति। अपिशब्देन 'सोदरस्य तु सोदर' इत्यत्र सोदरोऽनुकृष्यत इति भारुचिः। लक्ष्मीधरस्तु—अपिशब्देन 'ससृष्टो नान्यमातृज' इत्यन्यमातृजपदसामर्थ्यात् सोदर एव समुच्चीयत इत्याह। तदयमर्थः—ससृष्टिनो धनं असंसृष्टसोदर एव गृह्णीयात्। अन्यमातृजस्तु संसृष्टोऽपि न गृह्णीयात्। असंसृष्टिनः सोदरस्य पाक्षिकापचयभाराभ्युपगमसाहसशालित्वाभावेऽपि पितृपिण्डदानाधिकारस्तस्यैवेति तदुक्तिः। अनेनैव न्यायेन एकोदराणामपि संसृष्टस्य मध्यमस्य मरणे कनिष्ठस्यासंसृष्टिनः तदौर्ध्वदेहिकाधिकारात् संसृष्टज्येष्ठस्य विद्यमानत्वेऽपि तस्य न मध्यमांश-

* स्वमत (पृ.७८) 'अन्योदर्यस्तु' इति श्लोकस्य मिताभ्याख्याने गतम्। पारिजातमतं (पृ.१३९-४०) मितागतम्। प्रकाशमतं (पृ.१४८) मितागतम्। धर्मकोशमत 'यदा कश्चिदि'ति बृहस्पतिवचने द्रष्टव्यम्। बालरूपीयं 'संसृष्टिनस्तु' इति श्लोकव्याख्यानं मितागतम्।

× शेषं स्मृतिसारस्वमते गतम्।

+ 'संसृष्टिनस्तु' इत्यस्य व्याख्यान मितागत स्मृचगतं च। 'अन्योदर्यस्तु' इत्यस्य व्याख्यानं मितागतम्।

ग्राहित्वमिति ध्येयम्। *सवि.४३४–५

(१३) यस्य तु सोदरो वैमात्रेयश्च संसृष्टी तस्य सोदर एव संसृष्टी धनं हरेन्नान्योदर्यः संसृष्टी। अत्र हेतुरसंसृष्टयपि संसृष्टः सोदर एव पत्नीदुहितृहीनस्य धन गृह्णाति, न तु तत्सत्वेऽन्यमातृज इति। तथा च संसृष्टित्वाविशेषेऽपि संबन्धसान्निध्यकृतोऽयं विशेष इति भावः। अपिचेत्यनेनाऽविभक्तस्य भ्रातुः सोदरस्य सत्त्वे पत्न्यादिर्धनं नाऽऽदद्यादिति प्राग्लिखितवसिष्ठवचनसिद्धमपवादं समुच्चिनोति। आद्येन तुशब्देन पत्न्यादेर्धनहारित्वं, द्वितीयेन पितृव्यादिसंसृष्टिनो धनहारित्वं, तृतीयेनाऽविभक्तवैमात्रेयस्य धनहारित्वाभावं व्यवच्छिनत्ति। चकारैः पत्न्यादिसत्त्वेऽपि संसृष्टिनो वैमात्रेयसंसृष्टिसत्त्वे सोदरसंसृष्टिन एव, संसृष्टिसत्त्वेऽपि संसर्गोत्तरजातसंसृष्टिपुत्रस्य ऋणप्रदानं समुच्चिनोति। वीमि.

(१४) (स्मृतिचन्द्रिकामतं खण्डयति) तदसत्। अध्याहारक्लिष्टतादिदोषस्य तवाप्यनपायात्। प्रजापतिवचनोक्तव्यवस्थाया विज्ञानेश्वरीयव्याख्यानेऽप्यविरोधात्। अत एव मदनरत्नकृता तद्व्याख्यानमभ्युपेत्यैव प्रजापतिवचनमपि व्यवस्थापकतया पठितम्। प्रत्युत भवद्व्याख्याने योगीश्वरवचने पौनरुक्त्य दुष्परिहरमापद्यते। 'अन्योदर्यस्तु संसृष्टी नान्योदर्यो धन हरेत्' इत्यनेनोक्तस्यैवार्थस्य 'संसृष्टो नान्यमातृजः' इत्यनेनान्यूनानतिरिक्तस्य प्रतिपादनात्। मानवसंवादिनोऽपुनरुक्तस्यार्थस्य क्लेशेनापि वक्तुं शक्यत्वे मूलभूतश्रुत्यन्तरकल्पनागौरवापादकस्यार्थान्तरस्य कल्पयितुमनुचितत्वाच्च।

+व्यप्र.५३७

(१५) ससृष्टिधनहरणाधिकारिण आह याज्ञवल्क्यः 'संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः'। 'पत्नी दुहितर' इत्यादेरपवादोऽयम्। तेनायमर्थः। ससृष्टधनहरणाधिकारितावच्छेदकं न पत्नीत्वादि। किं तु संसृष्टित्वमिति। यत्तु विज्ञानेश्वरमदनादयोऽपवादस्योत्सर्गसमानविषयत्वनियमात्पूर्वोक्तस्वर्यातस्यापुत्रस्येत्येतत्पदानुषङ्गाच्चैतदपि पुत्रपौत्रप्रपौत्रहीनविषयं, अतस्तादृशमृतसंसृष्टिधनमससृष्टिसंनिहितपत्न्यादिसद्भावेऽप्यन्यः संसृष्टयेव गृह्णीयादिति, तच्चिन्त्यम्। तेन विनाऽपि गतौ संभवन्त्यामनुषङ्गे मानाभावात्। समानविषयत्वं तु न सर्वांशेऽपेक्षितं किं तु यथाकथञ्चित् मृतसपिण्डविषयतया। अपुत्रस्येति पदस्यानुषङ्गाभावे स्वर्यातस्येत्यस्याप्यनुषङ्गाभावेन मृतस्येति न लभ्येतेति चेन्न। 'ह्रीयेतांशप्रदानतः' 'म्रियेतान्यतरो वाऽपी'ति वक्ष्यमाणमनूक्त्या तल्लाभात्। अनुषङ्गे तु पित्रा सह संसृष्टासंसृष्टिनोः पुत्रयोः पुत्रपौत्रयोर्वा तुल्याशापत्तिः। सपुत्रं प्रत्येतद्वचनाप्रवृत्तेः। तत्र च व्यवहारशास्त्रप्रामाण्यनिदानव्यवहारविरोधः। नन्वनुषङ्गाभावे सपुत्रं प्रत्यप्येतद्वचनप्रवृत्तेरसंसृष्टिपुत्रसंसृष्टिभ्रात्रादीना समवाये भ्रात्रादिरेव लभेत, न पुत्रादिरिति चेन्न। उत्तरार्धव्याख्यायां परिहरिष्यमाणत्वात्। अमुं प्रथमपादार्थमपवदति। सोदरस्येति। संसृष्टिनः संसृष्टीत्यनुषज्यते। मृतससृष्टिनो धनं ससृष्टिनोः सोदरासोदरयोः समवाये सोदर एव संसृष्टी गृह्णीयादित्यर्थः। 'दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च' इति। मृतससृष्टिनो द्रव्यविभागकाले तत्पत्न्यामस्पष्टगर्भायां पश्चादुत्पन्नस्य पुत्रस्याशं तस्मै संसृष्टः पितृव्यादिर्दद्यात्तदभावे तु स्वयमेवाशं हरेत् इत्यर्थः। अत्र पुत्रत्वमात्रं पित्रंशग्रहणाधिकारितावच्छेदक न विभागोत्तरोत्पन्नत्वम्। अप्रयोजकत्वाद्गौरवाद्देशान्तरे विभागात्प्रागुत्पन्ने ज्ञाते चाज्ञानाधिकारितापत्तेः। अतः पूर्वोत्पन्नायासंसृष्टिनेऽपि पुत्राय संसृष्टयपि पितृव्यादिस्तदंशं दद्यादेव। असंसृष्टिसोदरसंसृष्टिभिन्नोदरयोर्विभज्य धनग्रहणमाह स एव—'अन्योदर्यस्तु ससृष्टी नान्योदर्यो धन हरेत्। असंसृष्टयपि चादद्यात्संसृष्टो नान्यमातृजः॥' इति। अत्रान्योदर्यान्यमातृजादिपदैर्न सापत्नो भ्रातैवोच्यते। किं तु पितृव्यादिरपि। योगाविशेषात्। अन्यथा पितृव्यादिभिः संसर्गप्रतिपादनस्यानर्थक्यापत्तिः संसृष्टिताप्रयुक्तकार्यान्तराभावात्। असंसृष्टयपीति देहलीदीपवत्पूर्वोत्तरपदाभ्या अन्वेति। संसृष्टपदं चावृत्त्या द्रव्यसंसर्गवत उदरसंसर्गवतश्च सोदरस्य बोधकम्। आद्येऽर्थेऽपिशब्दोऽपि तदनन्तरं बोध्यः। श्लोकान्ते एवकारोऽध्याहार्यः। तदेते वाक्यार्थाः।

* शेषं अस्मिन्नेव प्रकरणे विष्णुवचनेषु (पृ.१५४१-३) द्रष्टव्यम्।

+ मितागतम्। जीमूतवाहनमतखण्डनं च 'पत्नी दुहितर' इति श्लोके (पृ.१५००) द्रष्टव्यम्।

अन्योदर्यो भिन्नोदरः पत्नीपितृपितामहसापत्नभ्रातृपितृव्यादिः संसृष्टी चेद्धनं हरेत् । असंसृष्टयष्यन्योदर्यो नेति। तेनान्योदरस्यान्वयव्यतिरेकाभ्या ससर्गे धनग्रहणे कारणमुक्तम् । असंसृष्टयपि संसृष्टयाख्यः सोदरो गृह्णीयात् । अनेन सोदरत्वमात्रमेव कारणमुक्तम् । संसृष्टो द्रव्यसंसर्गवान् अन्यमातृज एव केवलं न गृह्णीयात् इति । तेनैकः संसृष्टत्वेन परः सोदरत्वेनेति द्वावपि विभज्य गृह्णीयातामिति निगर्वः । असंसृष्टिसोदरपुत्रे संसृष्टयसोदरपुत्रे चायमेव पन्थाः । एतमेवार्थं ससृष्टयधिकारे स्पष्टयति मनुः—'येषां ज्येष्ठ'इत्यादिना। व्यम.६६–७

(१६) अपरार्ककल्पतरुजीमूतवाहनादयस्तु पित्रादित्रिविधसंसृष्टयनन्तरं 'विभक्ता भ्रातरो ये च सप्रीत्यैकत्र संस्थिताः' इत्युपक्रम्य बृहस्पतिना 'यदा कश्चित्प्रमीयेत प्रव्रजेद्वा कथंचन । न लुप्यते तस्य भागः सोदरस्य विधीयते ॥ या तस्य भगिनी सा तु ततोंऽश लब्धुमर्हति । अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च ॥' इत्युक्तेः संसृष्टस्य पत्नीपुत्रादिसत्त्वे असंसृष्टिपुत्रादिरेव लभते । अपुत्रस्य तु पत्नी दुहितरश्चेत्ययमेव क्रमः । अपत्यपदेन दुहितुरप्युक्तेः । पत्न्या अभावे तु भ्रातुः ससृष्टसोदरस्य तदभावे चासंसृष्टसोदरस्य तदभावे सोदरभगिन्यास्तदभावे सापत्नभ्रातुर्ग्राहित्वम् । 'अन्योदर्यस्तु संसृष्टी नान्योदर्याद्धनं हरेत्। असंसृष्टयपि वादद्यात्सोदर्यो नान्यमातृजः ॥' इति याज्ञवल्क्येनासंसृष्टसोदरस्य ग्रहणोक्तेः । सपत्नसंसृष्टस्य निषेधाच्चेत्याहुः । +विता.४१५–६

(१७) मिताटीका–अत्रायं निष्कर्षः। भिन्नोदरसंसृष्टिभ्रात्रभावे सोदराणा मध्ये यः संसृष्टिसोदरः स एव संसृष्टिनः सोदरस्य मृतस्य धनमादद्यात् इत्यादि।भिन्नोदरेषु तु सजातीयासजातीयत्वकृतभेद उक्त एव। यदा सोदरा असोदराश्च संसृष्टिनस्तदा सोदरा एव गृह्णीयुः । यदा त्वसंसृष्टिनः सोदराः संसृष्टाश्च भिन्नोदरास्तदोक्तरीत्या उभाभ्या ग्राह्यम् । एतद्वैपरीत्ये तु सोदरैरेव । सोदराणा मध्येऽपि केचित्संसृष्टा नान्ये तदा सोदरत्वसंसृष्टत्वाभ्या संसृष्टिभिरेवेति । यत्तु एकमातृजत्वभिन्नमातृजत्वरूपविशेषेण भ्रातृषु या व्यवस्था दर्शिता सा साक्षात्पितृव्यसापत्नपितृव्येऽपि योज्या, न्यायस्य तुल्यत्वादिति। तन्न। 'सोदरस्य त्वि'ति विधिवाक्ये सोदरत्वस्याविवक्षायां बीजाभावात्सोदरपदस्य पितृव्योपलक्षकत्वाभावात् । लोकेऽत्यन्तविरुद्धवचनविरोधाच्च न्यायस्य तत्राप्रवृत्तेरिति दिक् ।

अस्य भ्रातृमात्रविषयत्वे पित्रादिसंसर्गविध्यानर्थक्यापत्तेः तन्निर्णायकवचनान्तराभावात्। प्रकरणविच्छेदकतुशब्दद्वयवैयर्थ्यात् । 'वानप्रस्थे'त्यादिना तद्विच्छेदात् । सोदर्यनियमादेवान्यव्यावृत्तौ तदुक्तिवैयर्थ्यात् । संसृष्टिसत्त्वेऽप्यससृष्टिनोंऽशभाक्त्वे नारदादिविरोधाच्च । एतेन 'इदानीमि'त्यादावतरणं अन्योदर्य इत्यस्य चिन्त्यम् । अतोन्यथेत्यादिनारदादिविरोधात् । पूर्वान्वितयोरग्रेऽनुषङ्गे संसृष्टपदस्यार्थद्वयकल्पने एवकाराध्याहारे च प्रमाणाभावाच्च । अनेन अन्वयव्यतिरेकाभ्यामित्याद्यपि चिन्त्यम्। संसृष्टिवाक्यस्य पत्न्याद्यपवादत्वोक्त्यैव तदर्थसिद्धेः वाक्यानर्थक्यात् । पित्रादेरपि संसृष्टित्वे पृथक् अन्योदर्यं तदुक्तिवैयर्थ्याच्च । विभक्ता इति मनोः तथाव्याख्यानमपि चिन्त्यम् । तयोर्विशेष्यविशेषणभावेनैव बृहस्पत्येकवाक्यतयाऽर्थान्तरकल्पनाया अन्याय्यत्वात् । चकारात् तथा कल्पने नारदादिविरोधात् । चद्वयस्य द्वन्द्वविग्रहवदुपपत्तेः । विशेषणानर्थक्यं तु न, भगिनीविशेषणवद्भिन्नोदरवारणार्थत्वात् । तस्मात्सापत्नो धनं हरेत्, अन्योदर्यः सोदरः संसृष्टी न चेत्, असंसृष्टयपि आदद्यात्, संसृष्टो नान्यमातृजश्चेदिति व्याख्यानमुचित इति भ्रान्तोक्तमपास्तम्। आशयानवबोधात् । अत्राशमिति सामान्योक्त्या स्थावरेऽप्येवम्। अत एव प्रागुक्तयमादिसगतिः । एतेन 'अशमिति सामान्योक्तावपि स्थावरे विशेषो वृद्धहारीतादयुक्त' इति भ्रान्तोक्तमपास्तम्। बाल.

नारदः

असंसृष्टिविभागः । मृतापुत्रसंसृष्टिधनविभागाधिकारः ।

[1]संसृष्टानां तु यो भागस्तेषामेव स इष्यते ।
अतोऽन्यथांशभाजस्तु निर्बीजेष्वितरानियात् ॥

+ शेषं मितागतम् ।

(१) नासं.१४।२३ द्वा (ष्टि) जस्तु (जो द्वि) जे (जि); नास्मृ.१६।२४ अतो...जस्तु (अनपत्योंऽशभाग्योऽपि); मिता. २।१३६ पू.; व्यक.१६२ द्वा (ष्टि); स्मृच.२९४, ३०३ पू. : ३०५ थांशभाजस्तु (था नांशभाजो); विर.६०२; स्मृसा.७८, १३९,१४५, १४६ द्वा (ष्टि) शेषं स्मृचवत् : १४८ द्वा (ष्टि)

(१) अतोऽन्यथा संसृष्टेषु सत्सु भिन्नोदरभ्रात्राद्यसंसृष्टिनो नाशभाजः। यदा तु सर्वे संसृष्टा निर्बीजाः संतानरहिता भवन्ति तदा चेतरान् भिन्नोदरान् भ्रातृनियात्। ससृष्टाना भागं प्राप्नुयादित्यर्थः। स्मृच.३०५

(२) अतोऽन्यथा ससृष्टिनामभावे, निर्बीजेषु सतानरहितेषु, इतराननंशभाजोऽससृष्टिनो भाग इयाद्गच्छेत्। प्रकाशकारस्तु अतोऽन्यथा पुत्रवत्त्वेऽपि त एवाशभाजः। निर्बीजेषु सतानरहितेषु भ्रातॄन् भाग इयाद्गच्छेदित्याह। पारिजाते तु अतोन्यथा अनशभाज इति पठित, तत्तु बहुग्रन्थविसंवादात्त्यक्तम्। ×विर.६०२–३

(३) भागो मृतस्येति शेषः सदशात्। अतोऽन्यथा संसृष्टिनोऽनंशभाजो अंशानर्हाः। निर्बीजेषु संतानरहितेषु मृतेषु ससृष्टिषु, इतरान् ससृष्टिनः। केचित्तु संसृष्टाना पुनर्विभागे प्रत्यभिज्ञायमानपूर्वविभागे यो यस्य स तस्यैव। अन्यथा अप्रत्यभिज्ञायमाने इत्यन्वय इति नारदवाक्यार्थमाहुः। तत्तु न युक्तम्। मृतधनसंदशात्। दृष्टमूलत्वासभवाच्च। साधारणता गते धने एवंविधनियमे प्रमाणाभावात्। *स्मृसा.७८

(४) तेषामेव संसृष्टानामेव। अतोऽन्यथा ससृष्टानामभावेऽशभाजस्तदशभाजस्तत्पुत्रान्स भाग इयात्। निर्बीजेषु निरपत्येषु संसृष्टेषु प्रमीतेषु स भाग इतरान् ससृष्टिन इयात् गच्छेदित्यर्थः। ससृष्टकाले यो यस्य भाग आसीत् स पुनर्विभागकाले प्रतिज्ञायमानस्तस्यैव रक्षणीय इति तु न पूर्वार्थार्थः। ससर्गे समीभाव एतादृशनियमे वाक्यस्यादृष्टार्थत्वापत्तेः। विचि.२४९

(५) विभक्ताः पुनरेकीभूताः संसृष्टिनः। तेषामनपत्यस्य दायं ससृष्टिन एव विभजेरन्। तेषामन्याभावेऽशभाजो भ्रातरोऽन्ये विभक्ता असससृष्टाः, न तानियात्। निर्बीजेषु भ्रातृणामप्यभावे इतरान् दायादान् गच्छेत्। नाभा.१४।२३

(६) संसृष्टिधनग्रहण 'संसृष्टिनां तु यो भागः स तस्या नेष्यते बुधैः।' इति नारदेन साक्षादेव तद्भार्यायाः प्रतिषिद्धम्। 'ससृष्टिना तु यो भागस्तेषामेव स इष्यते' इति कल्पतर्वादिधृतपाठेऽप्येवकारेण पत्न्यादिप्रतिषेध आयात्येव। व्यप्र.५१३

(७) पत्न्यादिसद्भावेऽपि भ्रात्रादिरेवाविभक्तधनवदपुत्रससृष्टिधन गृह्णातीति मदनरत्नविज्ञानेश्वरौ। 'समृटस्य तु यो भागः स तस्या नेष्यते बुधैरि'ति नारदोक्तेः। तुशब्देन पत्नी दुहितरश्चैतस्यापवादाच्च। विता.४१५

मृतापुत्रस्त्रीणा दुहितॄणां च भरणाशभाक्त्वम्

भ्रातृणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा।
विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना×॥
भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्।
रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु च॥

× बाल. विरगत, वितागत च।

* पारिजातमतं कल्पतरुमतं च पृ.७८ वत्।

× विश्व. व्याख्यान 'पत्नी दुहितरः' इति याज्ञवल्क्यश्लोके (पृ.१४८०) द्रष्टव्यम्।

(१) **नासं.**१४।२४ त वा (त्तथा) रन् (युः) स्त्रीधन (स्त्रीधनाद्); **नास्मृ.**१६।२५ त वा (तु वा) स्ते (स्तु); **विश्व.**२।१४० (=) जाः (जः) शेषास्ते (भ्रातरः); **मिता.** २।१३५; **दा.**१६८ च्चेत...त वा (द्वै प्रव्रजेद्वा); **अप.**२। १३५ (पृ.७४१:७४३ प्रथमपादः); **स्मृच.**२९४ त्कश्चि (त्कचि) रन् (युः): ३०३; **स्मृसा.**१२८ जाः (जः) त वा (दपि): १४५ जाः (जः) स्ते (स्तु) नारदशंखौ; **पमा.**५३१; **सुबो.**२।१३५; **रत्न.**१५३ प्रेयात्... वा (कश्चित् प्रव्रजेत म्रियेत वा) स्ते (स्तु): १६० स्ते (स्तु) शखनारदौ; **नृप्र.**४१ धन तस्य (ततस्तेन) शेष दावत्; **दात.**१९१ जाः (ज·) त वा (च्च वा); **सवि.**४३४ पू.; **दानि.**२ व्रव्र (त्स व्र); **व्यप्र.**४९४, ५४१; **व्यउ.**१५२ प्रेयात् (यायात्); **व्यम.** ६१, ६८, **विता.**३८५ प्रेया...व्रजे (कश्चित्प्रव्रजेत म्रियेत); **राकौ.**४५६; **बाल.**२।१३५ (पृ.२२१) स्ते (स्तु), **स्मु.** १४३-४; **विच.**१२३ दातवत्.

(२) **नासं.**१४।२५ वन (वित) सु च (सु तु); **नास्मृ.** १६।२६ वन (वित); **मिता.**२।१३५ [पृ.२१७ न्यु (नु) सु च (सु तु): २१८ पू.]; **दा.**१६८ वन (वित) न्यु (न्दु); **अप.**२। १३५ [पृ.७४१ वन (वित) सु च (सु तत्) : ७४३ वन (वित) पू.]; **स्मृच.**३०३ सु च (सु तत्); **स्मृसा.**७३, १२८ सु च

पू.; **पमा.**५३१ नास्मृवत्; **सुबो.**२।१३६ पू., **विचि.**२४९; **व्यनि.** ष्टा (ष्टि) स (न) पू.; **चन्द्र.**९६ ष्टा (ष्टि); **व्यप्र.**४९७ तेषा ...ष्यते (स तस्या नेष्यते बुधैः) पू.: ५१३ ष्टा (ष्टि) शेष पूर्ववत्; **विता.**३८५ पू., ३९१ पू. व्यप्र (४९७) वत्, ४१५पू., ४२७ पू., ष्टानां (ष्टस्य) शेष व्यप्र (४९७)वत्; **बाल.** २।१३५ (पृ.२२२) पू.: २।१३९ न्यथांशभाजस्तु (न्यथाऽनंशभाजो); **समु.**१४४ स्मृचवत्.

यो तस्य दुहिता तस्याः पित्र्योऽशो भरणे मतः।
आ संस्कारात् हरेद्भागं परतो बिभृयात्पतिः॥

(१) (या तस्येति) अस्यायमर्थः। यत्र स्वल्पं धनमस्ति भ्रातुर्भगिन्याश्च न चतुर्भागे कन्याया भरणं भवति, तत्र समभाग कन्या हरेदा संस्कारात्। परतस्तु स्मृत्यन्तराच्चतुर्भागं गृह्णीयात्स्वल्पमपि। कथ तर्हि भरणमात्र कुर्यादत उक्त 'परतो बिभृयात्पतिः' इति।
मेधा.९।११८

(२) तदपि 'ससृष्टाना तु यो भागस्तेषामेव स इष्यत' इति संसृष्टाना प्रस्तुतत्वात् तत्स्त्रीणां अनपत्यानां भरणमात्रप्रतिपादनपरम्। न च 'भ्रातृणामप्रजाः प्रेयादि'त्येतस्य संसृष्टिविषयत्वे 'ससृष्टाना तु यो भाग' इत्यनेन पौनरुक्त्यमाशङ्कनीयम्। यतः पूर्वोक्तविवरणेन स्त्रीधनस्याविभाज्यत्वं तत्स्त्रीणा च भरणमात्र विधीयते।
*मिता.२।१३५

(३) परिणीतस्त्रीणामप्यपत्नीत्वात् तदभिप्रायकमेव नारदवचनम्। दा.१६८

बालकेनोक्तं असवर्णाविषयं वा युवत्यभिप्रायं वा अविभक्तसंसृष्टविषयं वा शंखादि(नारद)वचनमिति।
+दा.१६९

(४) तत्पुनर्भूस्वैरिण्यादिविषयं वेदितव्यम्। स्त्रीशब्दमात्रप्रयोगात्। पत्नीशब्दस्तु विवाहयज्ञसंयोगिन्यामेव वर्तते 'पत्युर्नो यज्ञसंयोगे'इति शब्दस्मृतेः। अप.२।१३५

(५) शेषाः संसृष्टिनः सोदरभ्रातरः। 'संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः' इति याज्ञवल्क्यस्मरणात्। संसृष्टिनो भ्रातुर्धनं संसृष्टी चाहरेन्न पत्न्यादिः तत्रापि सोदर एवेत्यर्थः। एवं तर्ह्यस्य मृतस्य पत्नीना अप्रत्तदुहितृणा च का गतिरित्यपेक्षितेऽप्याह नारदः—भरणं चास्येति। या तस्येति। तस्य मृतस्य प्रव्रजितस्य वा या दुहिता तस्याः परिणयनं ततः पूर्वं भरणं च शेषा एव कुर्वीरन्निति द्वितीयश्लोकस्य तात्पर्यार्थः प्रत्येतव्यः। यत्र पुनः शेषेषु भ्रातृषु असंसृष्टा अपि सोदराः केचित्सन्ति तत्र ये संसृष्टाः सोदरा त एव विभजेयुः। 'संसृष्टानां तु यो भागस्तेषामेव स इष्यते' इति प्रस्तुत्य 'भ्रातृणामप्रजाः' इत्याद्युक्तेः। स्मृच.३०३

(६) स्त्रियोऽत्र वैधव्यव्रतादिरहिताव्यभिचारिण्यः। अभार्यापितृकस्य चेत्यत्र भार्याशब्दो वैधव्यव्रतादिसहिताऽव्यभिचारिणीपरः। पारिजाते तु स्त्रियोऽत्रासवर्णा इत्युक्तम्। तेन तन्मते भार्याशब्दः पूर्वसवर्णभार्यापर इति लक्ष्यते। इतरासु शय्यामरक्षन्तीषु। आसंस्काराद्विवाहमभिव्याप्य तावन्त भागं हरेद्यावता विवाहस्य निष्पत्तिरिति कल्पतरुः। विर.६०३

(७) [हलायुधमते] स्त्रीशब्दोत्रासवर्णभार्यापरः। तथा—या तस्येति। अयमप्यसवर्णादुहितृपरः। *स्मृसा.१४५

(८) अथवा अविभक्तविषयत्वमस्तु। ×पमा.५३१

(९) यानि तु 'भ्रातृणामप्रजाः' इत्येवंरूपाणि नारदादिवचनानि तान्यविभक्तभर्तृकस्त्रीविषयाणि संसृष्टभर्तृकस्त्रीविषयाणि वा यथासभवं ज्ञातव्यानि। तथा प्रस्तुत्य तेषा प्रापणात्। रत्न.१५३

इतरासु शय्यामरक्षन्तीषु व्यभिचारिणीष्वित्यर्थः।
रत्न.१६०

---

* सुबो., चन्द्र., व्यउ., बाल. मितागतम्। व्यप्र. स्वमतं मितागतम्।

(सु तत्) शेष दावत्: १४५रत्न(त)सु च (सु तत्) नारदशंखौ; **पमा.**५३१,५३८स्मृचवत्; **सुबो.**२।१३५ पू.;**रत्न.**१५३-४ स्मृचवत्: १६० स्मृचवत्, शखनारदौ; **व्यनि.**; **नृप्र.**४१ वन (वित) पू.; **दात.**१९१; **सवि.**४११ न्यु (यु) सु च (सु तत्); **दानि.**२ दावत्; **व्यप्र.**४९४ सु च (सु तु): ५०२ पू.: ५४१; **व्यउ.**१५२ (=) रत्न (त) पू.; **व्यम.**६१, ६८ व्यप्रवत्; **विता.**३८५ व्यप्रवत्: ४२५ चा(वा) पू.: ४५० पू.; **राकौ.**४५६ वन (वित) पू.; **बाल.**२।१३५ (पृ.२२१); **समु.**१४४ स्मृचवत्; **विच.**१२३ व्यप्रवत्.

(१) **नासं.**१४।२६ या तस्य (स्याद् यस्य) त्र्योऽ (त्रं) हरेद्भाग (भरेतैना); **नास्मृ.**१६।२७ रात् हरेद्भाग (रं भजेरंस्ता); **मेधा.**९।११८ पू.; **स्मृच.**२९६ या तस्य (स्यात्तु चेत्): ३०३ त्र्योंऽ(त्र); **स्मृसा.**१३० या तस्य...त्र्योऽ (यदि स्याद्दुहिता तस्य पित्र): १४५ त्र्योऽ (त्रं) नारदशंखौ; **पमा.**५३८ या तस्य दुहिता (यदा दुहितरः): ५४१ (=) प्रथमपादः; **रत्न.**१६० शखनारदौ; **व्यप्र.**५१९ स्मृच (२९६) वत्; **व्यम.**६८ त्र्यों...मतः (त्र्यशात् भरणं मतम्); **विता.**४२५ त्र्योऽ (त्रं); **बाल.**२।१३५ (पृ.२०५) त्र्योऽ (त्र्यां) शेषं स्मृच (२९६) वत्; **समु.**१४३.

+ दात. दागतम्।

* बालरूपमतं (पृ.१२८) दागतम्। पारिजातमतं हलायुधमतं च विरगतम्। × शेषं मितागतम्।

(१०) शेषाः संसर्गिणः । तत् स्त्रीधनम् । तेन व्यभिचारिणीना भरणं न कार्यम् । स्त्रीधनमपि प्रत्युत ग्राह्यम् । दुहिताऽत्र कुमारी । तेन तस्या भरणमारभ्य विवाहपर्यन्तं कार्यमित्यर्थः । विचि.२५०

(११) तत् भरणं । एवं स्त्रीणां यद्भरणप्रतिपादकं वचनजातं तदविभक्तपत्नीविषयं च वेदितव्यम् । सवि.४११

(१२) विभक्तेष्वसंसृष्टेषु कश्चिदनपत्यः प्रेयात् प्रव्रजेद्वा, शेषा भ्रातरो विभजेयुस्तदीयं धनम् । स्त्रीधनाद् यथोक्ताद्दते । न स्त्रीधनं रूढमेव गृह्यते, स्व्यर्थं धन तद्भार्याया जीवन मुक्त्वा । तस्या मृताया तदपि विभाज्यम् । +नाभा.१४।२४

(१३) तत् प्राग्विभक्तसंसृष्टस्त्रीपराणि । अवरुद्धासुरादिविवाहोढासवर्णास्त्रीपरं चेति विज्ञानेश्वरप्राच्यादयः । विता.३८५

मृतापुत्रपत्न्याः पतिपक्षः पितृपक्षो राजा वा प्रभुः

मृते भर्तर्यपुत्रायाः पतिपक्षः प्रभुः स्त्रियाः ।
विनियोगात्मरक्षासु भरणे च स ईश्वरः ॥
परिक्षीणे पतिकुले निर्मनुष्ये निराश्रये ।
तत्सपिण्डेषु चासत्सु पितृपक्षः प्रभुः स्त्रियाः ॥
पक्षद्वयावसाने तु राजा भर्ता स्मृतः स्त्रियाः ॥
स तस्या भरणं कुर्यान्निगृह्णीयात्पथश्च्युताम् ॥

+ शेष यथाश्रुत व्याख्यानम् ।

(१) **नारं.**१४।२७; **नास्मृ.**१६।२८; **मेधा.**८।२८ गात्म (गोऽस्ति) उत्त.; **दा.**१७३-४ गात्म (गेऽर्थ); **व्यक.**१२९ पू.; **स्मृच.**२४०; **विर.**४११; **रत्न.**१३३ स्त्रियाः (स्त्रियाम्) च स (पु च); **व्यनि.** स्मृत्यन्तरम्; **मच.** ८।२८ मेधावत्, उत्त.; **व्यप्र.**४०६,४९१च स (पु च); **व्यउ.**१४० व्यप्रवत्; **विता.**८२१ स्त्रियाः (स्त्रियः) पू.; **सेतु.** ४३ गात्म...च (गेऽर्थरक्षाया भरणे तु) : २८१ गात्म (गार्थ); **विभ.३**; **समु.**१२० पू.

(२) **नारं.**१४।२८; **नास्मृ.**१६।२९ चा (वा); **मेधा.** ८।२८ नास्मृवत्; **दा.**१७४; **स्मृच.**२४०; **विर.**४११-२ तत्स (वंश); **रत्न.**१३३; **मच.**८।२८ तत्सपिण्डेषु (सपिण्डेष्वपि); **व्यप्र.**४०६, ४९१; **व्यउ.**१४०; **सेतु** ४३, २८१; **विभ.३** प्रथमपादत्रयम्; **समु.**१२० निर्मं (निर्मो).

(३) **नारं.**१४।२९; **व्यक.**१२९ भरणं (रक्षणं); **स्मृच.** २४० त्पथश्च्यु (त्पथि च्यु); **विर.**४१२ तु (च) शेषं व्यकवत्;

(१) विनियोगे दानादौ । पतिपुत्राभावे भर्तुकुलपरतन्त्रता तस्याः । दा.१७४

(२) मृते इति । पत्यौ मृतेऽपुत्रायाः । मृत इति वचनात् जीवन् स एव पतिः । अपुत्राया इति वचनात् सपुत्रायाः पुत्र एव । पतिपक्षः श्वशुरादिः, न पित्रादिः प्रभवति । विनियोगे क्षेत्रजार्थे, तस्या रक्षायां भरणे च स एव पतिपक्ष ईष्टे, न पितृपक्षः । पितृविनियोगादि पितृपक्षेण कारयितव्यं, व्यवहार इत्येवमर्थ उपन्यासः । परिक्षीण इति । असति पतिपक्षे भरणसमर्थे, निर्मनुष्ये, तत्सपिण्डः प्रभुः । तदभावे पितृपक्ष एव भरणं दाप्य इति । पक्षेति । उभयपक्षाभावे राजा बिभृयाद् रक्षेच्च । न स्वतन्त्रा कार्या ।

नाभा.१४।२७-९

स्वातन्त्र्याद्विप्रणश्यन्ति कुले जाता अपि स्त्रियः ।
अस्वातन्त्र्यमतस्तासां प्रजापतिरकल्पयत्* ॥
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
रक्षन्ति वार्धके पुत्रा न स्त्री स्वातन्त्र्यमर्हति* ॥

मृतापुत्रभ्रातृपितृमातृकधनभाजः पत्न्यः सपिण्डाश्च

मृते भर्तरि भार्यास्तु अभ्रातृपितृमातृकाः ।
सर्वे सपिण्डाः स्वधनं विभजेरन् यथांशतः ॥

भार्याः पत्न्यः । अभ्रातृपितृमातृका याः पत्युः पितृमातृभ्रातृणामभावविशिष्टा इत्यर्थः । अनेन द्वन्द्वसमासेन भ्रात्रपेक्षया अभ्यर्हितपित्रादिपदस्य पूर्वनिपातनं परित्यज्य वैपरीत्येन समासवचनं कुर्वता नारदेन संसृष्टापुत्रद्रव्यं प्रथमं भ्रातृमातृपितृगामि तदभावे सर्वत्र वृत्तस्थपत्न्यभिगामीति दर्शितम् । एवं च संसृष्टविषये पत्नीना न गौणपुत्राभावे दायहरत्व किन्तु भिन्नोदरसंसृष्टभ्रातृपितृमातृणामभाव इति मन्तव्यम् । सर्वे सपिण्डा

* व्याख्यासंग्रहः स्थलादिनिर्देशश्च स्त्रीपुंधर्मप्रकरणे (पृ. १०९८-९) द्रष्टव्यः ।

रत्न.१३३; **व्यप्र.**४०६; **व्यउ.**१४०; **विता.**८२१ वसाने (पपाते) स्मृतः (प्रभुः) स्त्रियाः (स्त्रियः); **सेतु.**२८१ यावसाने च (ये चावसत्रे) शेषं व्यकवत्; **विभ.**२ स्मृतः (प्रभुः) शेषं व्यकवत्; **समु.**१२० स्मृचवत्.

(१) **स्मृच.**३०६; **पमा.**५४१ भर्तरि भार्यास्तु (पतौ तु भार्याः स्युः) जरन् (जेयुः); **व्यप्र.**५३९ भर्तरि (पत्यौ तु) स्व (तु) जेरन् (जेयुः); **समु.**१४४ भर्तरि भार्यास्तु भ (पत्यौ तु भार्याश्च ह्य) जेरन् (जेयुः).

इत्यादेरयमर्थः । संसृष्टापुत्रस्य ये भ्रातृमातृव्यतिरिक्ताः सपिण्डाः भ्रातुः पुत्रादयस्ते सर्वे स्वधनं पूर्वमपुत्रधनेन सह स्वपित्रादीना संसृष्टं तदूर्ध्वं तत्पत्नीभिः सह यथाशतो भ्रातृपुत्राणा भ्रात्रशः भ्रातृभार्याणा भर्त्रशः इत्येवमंशादिक्रमेण विभजेयुरिति । पत्नीनामभावे तु संसृष्टापुत्राश तद्धनिनी लभेत । ×स्मृच.३०६

बृहस्पतिः

संसर्गाहा.

[1]विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः।
पितृव्येणाथवा प्रीत्या स तु संसृष्ट उच्यते ॥

(१) ससृष्टत्वं च न येन केनापि किं तु पित्रा भ्रात्रा पितृव्येण वा । *मिता.२।१३८

(२) अनेनैतद्दर्शयति, येषामेव हि पितृभ्रातृपितृव्यादीना पितृपितामहार्जितद्रव्येणाविभक्तत्वमुत्पत्तितः समवति त एव विभक्ताः सन्तः परस्परप्रीत्या यदि पूर्वकृत विभागध्वसेन यत्तव धनं तन्मम धन यन्मम धन तत्तवापीति एकत्र गृहे एकगृहिरूपतया सस्थिताः ससृज्यन्ते । न पुनरनेवरूपाणा द्रव्यससर्गमात्रेण संभूयकारिणा वणिजामपि संसर्गित्वं, नापि विभक्ताना द्रव्यसंसर्गमात्रेण पूर्वोक्तप्रीतिपूर्वकाभिसंधानं विना । दा.१६०

परिगणितव्यतिरिक्तेषु संसर्गकृतो विशेषो नादरणीयः परिगणनानर्थक्यात् । +दा.२२०

(३) अनेन त्रिविधाः संसृष्टिनोऽनूद्यन्ते । अप.२।१३८

(४) यः पुत्रादिः पित्रादिना सह विभक्तः सन् पुनः प्रीत्यादिनिमित्तेन विभक्तेनैव येन पित्रादिना सहवासमापन्नः स तेन संसृष्ट उच्यत इत्यर्थः । इदं चात्रार्थादवगम्यते । पितृभ्रातृपितृव्यव्यतिरिक्तभ्रातृपितृव्यपुत्रादिना सह ससर्गो न विद्यते इति । सहवासे पुरुषाणामाहत्य संसर्गभावाद्धनद्वारेण ससर्गो वाच्य इति तन्निमित्तभूतावच्छेदकापनोदेन विभक्ताना धनादीना पूर्ववदेकराशीकरणपर्यन्तः ससर्गो न पुनः सहवासमात्रमिति मन्तव्यम् । –स्मृच.३०२

(५) अनास्थाया वाकारः, तेन पितृव्यजेनाप्यशिना कृतविभाग एकत्र स्थितः संसृष्टः सर्वलोके परिगृहीतो लभ्यते । प्रकाशे तु वचनबलेन नियम एवात्रेत्युक्तम्। *विर.६०५-६

(६) अत्र संसृष्टत्वे विभागानन्तरमेकीकृतधनत्वमेवोपयुज्यते । न तु पित्राद्यादरः परस्परव्यभिचारात् । अतो मात्रा सापत्नभ्रात्रादिनापि संसृष्टो भवत्येव । आवृत्तिवाचिपुनःपदादेव विभागपूर्वदशातुल्यत्वार्थमिति तेन भूतभवत्भावि स्व तव ममापि मम स्वं तवापीत्यनुमतिः ससर्गः, विभागेन पार्थक्यम्। बाले तु विभागवत् संसर्गोऽपि । ×स्मृसा.७५

(७) अस्माकमेकतमस्यापि स्वं सर्वेषामस्माकं स्वमित्युपगमस्तावत्संसर्गः । स च व्याहारादिवानन्यथासिद्धाद्व्यवहारादपि गम्यते । तेषा भूतभाविभवद्धनेष्वेकैकार्जितेष्वपि सर्वेषा स्वत्वानि जनयति । नव्यास्तु पृथग्धनाना धनमेलनमेव संसर्गः, लाघवात् । न तु प्राग्-

× पमा., व्यप्र. स्मृचगतम् ।

* मपा., रत्न., व्यनि., सवि., मच., बाल. मितागतम् ।

(१) **मिता.**२।१३८ चै (वै) तु (तत्); **दा.**१६०, २२०; **अप.**२।१३८ स तु संसृष्ट (तत् ससृष्टः स); **व्यक.** १६२ स्थितः (स्थितिः) तु (तत्); **स्मृच.**३०२ तु (वै); **विर.** ६०५ चै (वै) णा (ना); **स्मृसा.**७५, १४०, १४५, १४७; **पमा.**५३७ अपवत्; **मपा.**६७७ तु (च); **दीक.**४५; **रत्न.** १५७ मितावत्; **विचि.**२४४-५; **व्यनि.** पित्रा भात्रा (भ्रात्रा पित्रा) चै (वै) थवा प्रीत्या (पि वा चापि); **स्मृचि.**३५ तु (तत्); **नृप्र.**४१ स्मृचिवत्; **दात.**१६२, १९२; **सवि.**४३१ थवा (पि वा) तु (तत्); **मच.**९।२११ णा(ना); **चन्द्र.**९४ स्मृचिवत्, **दानि.**६ स्थितः (स्थितिः) उत्तरार्धं (पितृद्रव्येणाथवा प्रीत्या तत्सृष्टः स उच्यते); **वीमि.**२।१३८ स्मृचिवत्; **व्यप्र.** ४३० : ५०९ **स्मृचिवत् : ५३३** प्रथमपादः; **व्यउ.**१५७-८ स्मृचिवत्; **व्यम.**६५ सविवत्; **विता.**४१५ स्मृचिवत्; **राकौ.**४५७ मितावत्; **बाल.**२।१३५ (पृ.२२२) मितावत्; **सेतु.**७९; **समु.**१४३ चै (वै) स्थितः (स्थितिः) तु(तत्); **विच.** ३०, १००.

+ दात. दागतम् । ÷ पमा. स्मृचगतम् ।

* व्यवहारप्रकाशकाराणां स्वमत विरगत विचिगत च । शेष 'पत्नी दुहितरः' इति याज्ञवल्क्यवचने (पृ.१४९४) द्रष्टव्यम्। सेतु. विरगतम्, स्वमतं मितागतं च ।

× पारिजातमत विवादरत्नाकराणां स्वमते गतम्। चन्द्र. स्मृसागत विचिगतं च ।

विभागे सति, गौरवात्। पृथग्धनत्वं तु निसर्गतो वा विभागतो वेत्यन्यदेतत्। संसर्गे तु संसृजतोरनुमतिर्मूलम्। सा च निसर्गतः पृथग्धनयोरपि न दण्डवारिता। अन्यथा पित्रा विभक्तः तदुत्तरजेन भ्रात्रा संसृष्टो न स्यात्। बाढमिति चेत्। न। दृश्यन्ते हि तथा संसृष्टा अपीति। बाले तु भागिनि मात्राद्यनुमत्यैव विभागवत्संसर्गोऽपि व्यवहारसंवादात्। +विचि.२४५

(८) अत्र पितृभ्रातृपितृव्यैरेव सह संसृष्टता नान्येन। वचनेऽनुपादानादिति मिताक्षरादिषु। विभागकर्तृसामानाधिकरण्येनैव सेति युक्तम्। पित्रादिपदानि तु विभागकर्तृमात्रोपलक्षकाणि। 'अर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदि'इतिवत्। अन्यथा वाक्यभेदात्। तेन पत्नीपितामहभ्रातृपौत्रपितृव्यपुत्रादिभिरपि सह संसृष्टता भवति। विभक्तो य एकत्र स्थितः स संसृष्ट इति सामानाधिकरण्याद्विभक्तभ्रातोः पुत्रादीना न ससर्गः। विद्यमान भावि वा धनभावयोः पुनर्विभागावधि साधारणमित्याकारिका बुद्धिरिच्छा वा ससर्गः। व्यम.६५

(९) यत्तु संसृष्टिपद विभागकर्तृकमात्रपर पित्रादित्रिकपरत्वे वाक्यभेदादिति। तन्न। वाशब्दादेव पिता पितामहो वेतिवद्वाक्यभेदेऽप्यदोषात्। तेन त्रिभिरेव सह संसृष्टी, नान्येन वणिगादिना धनससर्गमात्रेणेत्यर्थः। तत्र तु संभूयसमुत्थानादि ज्ञेयम्। भ्रात्रा सापत्नेनापि। अन्यथाऽन्योदर्यस्तु संसृष्टीत्ययोगात्। तेन मातुः सपत्नमातुर्वा संसर्गात्तद्धनं दुहित्रभावे सोदरास्तदभावे सापत्नाः सर्वे भ्रातरो गृह्णन्तीति सिद्धम्। विता.४१५

[1]संसृष्टौ यौ पुनः प्रीत्या तौ परस्परभागिनौ ॥

(१) यदा तु शेषेषु सोदराभावस्तदा भिन्नोदराः संसृष्टा विभजेयुः। अत्र भिन्नमातृजाविति पौनरुक्त्यपरिहारायावगम्यते। स्मृच.३०४

(२)यत्र तु सोदरेष्वपि केचित्संसृष्टिनः केचिदसंसृष्टिनः तत्र धनग्रहणकारणयोः सोदरत्वसंसृष्टित्वयोरुभयोरपि सद्भावात् संसृष्टिनः सोदराः गृह्णीयुः न त्वसंसृष्टिनः सोदराः। अत एव बृहस्पतिः—ससृष्टौ यौ इति। गौतमोऽपि —'ससृष्टिनि प्रेते ससृष्टी रिक्थभागि'ति। संसृष्टिनि प्रेते अपुत्र इत्यनुषङ्गः। रत्न.१५८

(३) अत्रार्थे निर्गलितोऽर्थः। पुत्रः पिता संसृष्टोऽसंसृष्टो वा कृत्स्नं पित्र्यमंशं गृह्णीयात्। पुत्रत्वस्यैवांशग्रहणाधिकारितावच्छेदकत्वात्। पुत्रेष्वप्येकः संसृष्टः परो न चेत्ससृष्ट एव। ससृष्टिनस्तु ससृष्टीत्युक्तेः। ससृष्टपुत्रापुत्रसमवाये पुत्र एव। 'दद्याच्चापहरेच्चांशमि'त्यत्र व्याख्यातत्वात्। पुत्रभिन्नसंसृष्टपितृभ्रातृपितृव्यादीना समवाये पितरावेव। तत्राप्यादौ माता ततः पितेति मदनः। भ्रातृपितृव्यादयस्तु विभज्यैव गृह्णीयुः। सर्वेषु संसृष्टत्वरूपग्रहणाधिकारितावच्छेदकसद्भावात्। असंसृष्टभ्रातुः ससृष्टपितृव्यसापत्नभ्रात्रादीना च समवायेऽपि विभज्यैव। 'असंसृष्टयपि चादद्यात्सृष्टो नान्यमातृजः' 'ससृष्टिनस्तु ससृष्टी सोदरस्य तु सोदरः' इत्युक्तेः। केवलायाः पत्न्या एव संसृष्टत्वे सैव गृह्णीयात्। 'ससृष्टिनस्तु ससृष्टी' इत्युक्तेः। ससृष्टयाऽपि तया सहान्येषा ससृष्टिना समवाये त एव, न सा। तथा च ससृष्टिप्रक्रमे शखनारदौ 'भ्रातृणामप्रजाः प्रेयात्कश्चित्' इत्यादि (श्लोकत्रय)। अथ 'यथा यस्य हविर्निरुप्त पुरस्ताच्चन्द्रमा अभ्युदियात्स त्रेधा तण्डुलान्विभजेत्' इत्यत्र हविरभि उदियादित्यनेनैव हविःप्रवृत्त्यवगमान्निर्वापावित्रक्षा तथा प्रक्रमादेव मरणप्रव्रज्याविभागादिषु संसृष्टिना कर्तृत्वावगमाद्भ्रातृणामित्यविवक्षितम्।

व्यम.६७-८

ससृष्टिधनविभागः सम एव। अनपत्याभार्यापितृकससृष्टिनः विभागानधिकारप्राप्तौ मरणे वा तदीयांशविभागः। तदीयभगिन्या अंशः। ससृष्टिना उत्थाता द्वयंशभाक्।

***[1]विभक्ता भ्रातरो ये च संप्रीत्यैकत्र संस्थिताः। पुनर्विभागकरणे तेषां ज्यैष्ठ्यं न विद्यते ॥**

+प्रकाशमतं मितागतम्।

(१) व्यक.१६१; स्मृच.३०४,३०७; विर.६०२; स्मृसा.११९,१४६; रत्न.१५८; व्यम.६७; विता.४२२; समु.१४४.

* 'विभक्ता'इत्यादिश्लोकाना बाल. व्याख्यानं 'पत्नी दुहितरः' इति याज्ञवल्क्यवचने (पृ.१५०६) द्रष्टव्यम्।

(१) दा.१५५ छ्य (ष्ठ): २१९ च (तु); व्यक.१६१ तेषा ज्यैष्ठ्य (ज्यैष्ठं तेषां), स्मृच.३०३ छ्य (ष्ठं); विर.६०२ च (तु) तेषां ज्यैष्ठ्य (ज्यैष्ठ तेषां); स्मृसा.१३९ च (तु) छ्यं (ष्ठं): १४५:१४६ च (तु) तेषां ज्यैष्ठ्यं (ज्यैष्ठ्यं तत्र); विचि. २४६ पुनर्वि (तत्पुनः) तेषां ज्यैष्ठ्यं (ज्यैष्ठ्य तेषां); दात.१९३

यदा कश्चित्प्रमीयेत प्रव्रजेद्वा कथंचन ।
न लुप्यते तस्य भागः सोदरस्य विधीयते ॥
या तस्य भगिनी सा तु ततोऽशं लब्धुमर्हति ।
अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च ॥
सा च दत्ताऽप्यदत्ता वा सोदरे तु मृते सति ।
तस्यांशं तु हरेत्सैव द्वयोर्यक्तं हि कारणम् ॥
संसृष्टानां तु यः कश्चिद्विद्याशौर्यादिनाऽधिकम् ।
प्राप्नोति तस्य दातव्यो द्व्यंशः शेषाः समांशिनः॥

स्मृचवत्; **व्यप्र.**५०६-७; **व्यउ.**१५९ तेषां ज्यैष्ठ्य (ज्यैष्ठ्य तत्र); **विता.**३९१ तेषां ज्यैष्ठ्य (ज्यैष्ठ्य तेषा) :४१५ रो (रौ) ये च (चैव) पू.; **बाल.**२।१३५(पृ.२००) :२।१३८ व्यउवत्; **सेतु.**८०; **समु.**१४३ च (तु); **विच.**१०१.

(१) **दा.**१५५; **अप.**२।१३८(–); **व्यक.**१६१; **स्मृच.** ३०३; **विर.**६०२ यदा कश्चित् (कदाचिद्वा); **स्मृसा.**७८, १३९ यदा (यदि) :१४५,१४६ यदा (यदि) वा (च्च) : १४८; **दीक.**४६ यदा (यदि); **विचि.**२४६ विरवत्; **व्यनि.** यदा (कदा) दर (दर्य); **दात.**१९३ दीकवत्; **चन्द्र.**९८ उत्त.; **व्यप्र.**५०७ दर (दर्य); **व्यउ.**१५९ यदा (यदि) दर (दर्य); **विता.**३९१ कथंचन (ऽपि कश्चन) दर (दर्य):४१५; **बाल.**२।१३५ (पृ.२००),२।१३८; **समु.**१४३ उत्तरार्धे(लुप्यते नास्य भागस्तु सोदरस्य विधीयते); **विच.**१२९ दीकवत्.

(२) **दा.**१५५; **अप.**२।१३८ यौ (यै); **व्यक.**१६२ तोंऽश(तोऽन्य); **स्मृच.**३०६; **विर.**६०२; **स्मृसा.**७६ उत्त.: १३९ सा तु (सा च):१४५,१४६,१४८ उत्त.; **पमा.**५४१; **दीक.** ४६ उत्त.; **रत्न.**१६०; **विचि.**२४६; **व्यनि.**; **दात.** १९३; **चन्द्र.**९८ पू., ९७ उत्त.; **व्यप्र.**५०७,५३९:५१३ उत्त.; **व्यउ.**१५९; **व्यम.**६८; **विता.**३९१ तोंऽश (तोऽर्ध) : ४१५,४२६; **बाल.**२।१३५(पृ.२००) सा तु (मातुः): २।१३८; **समु.**१४४; **विच.**१२९ तु (च).

(३) **स्मृच.**३०६; **समु.**१४४.

(४) **दा.**१५५-६ऽधिकम् (धनम्); **अप.**२।१३८ दावत्; **व्यक.**१६२; **स्मृच.**३०३; **विर.**६०२ प्राप्नो... व्यो (धन प्राप्नोति तत्रास्य); **स्मृसा.**७६,१३२ ष्टा (ष्टि) : १३९ ष्टा (ष्टि) शिनः (शकाः) : १४५ ससृ...यः (संसृष्टो बान्धवः) शिनः (शकाः): १४६ ष्टा (ष्टि) शिनः (शकाः); **पमा.**५३७ स्य (त्र); **मपा.**६८०; **दीक.**४६ ष्टा(ष्टि)भ्यो व्यशः शेषाः (व्योंऽशः शेषास्ते); **रत्न.**१५७; **विचि.**२४६ विरवत्; **व्यनि.** ष्टा (ष्टि) शेषं दावत्; **नृप्र.**४२ ष्टा (ष्टि) स्य (त्र);

(१) अत्र केचिदविभक्तसंसृष्टगोचरो भ्रात्रधिकारः प्रथमं विभक्तासंसृष्टगोचरश्च पत्न्यधिकार इति समादधति। अत्रोपक्रमोपसंहारयोः संसृष्टत्वकीर्तनात् तत्संदंशपतित, 'न लुप्यते तस्य भागः सोदरस्य विधीयते' इति वचनं संसृष्टविषयं वाच्यम्। अत्र च 'अनपत्यस्य धर्मोऽयमभार्यापितृकस्य चे'ति पुत्रदुहितृपत्नीपितृणामभावे संसृष्टस्य सोदरस्य भ्रातुरधिकारं बोधयतीति कथं तस्य पत्नीबाधकत्वम्। किं च न लुप्यते इति अविभक्तत्वे संसृष्टत्वे च भ्रात्रन्तरीयद्रव्यमिश्रीभूतस्य द्रव्यस्य पृथग्प्रतीतौ लोपाशङ्काया न लुप्यते इति वचनमुपपद्यते, विभक्तस्यासंसृष्टस्य तु धने विभक्तत्वप्रतीतौ का लोपाशङ्का, तस्मात् संसृष्टविषयत्वमेवामीषा वचनानाम्।

*दा.१५५–६

(२) तेषा मध्यादपुत्रस्य ससृष्टिनोऽशः सोदरेण संसृष्टिना ग्राह्य इति यदुच्यते तर्किं मृतस्य पत्न्यादिसद्भावे तद्विपर्यये चेति जिज्ञासायामाह–'यदा कश्चित्प्रमीयेत' इत्यादि। अतश्च संसृष्टिनोऽपि यदि पत्न्यादयः सन्ति तदा पत्नी दुहितर इत्ययमेव क्रमः। यत्र भ्रातृणा रिक्थग्राहित्वे प्राप्ते संसृष्टिसोदरत्वसंभवे तद्विशिष्टस्यैव भ्रातुर्धनभाक्त्वं नियम्यते। भगिन्याः सोदरभ्रात्रभावेऽधिकारिता मन्तव्या। अन्यथा 'तस्मान्निरिन्द्रियाः स्त्रियोऽदायादाः' इति श्रुतिविरोधः स्यादिति। अप.२।१३८

(३) यथा प्रथमविभागात्पूर्वं प्रमीतस्यापुत्रस्य प्रव्रजितस्य वा भागो लुप्यते विभागाभावेन विभागहेतुकाया इयत्ताया अभावात्तेन सर्वं रिक्थं सहवासिन एव तत्र सर्वे गृह्णन्ति न तथाऽत्र विभागहेतुकाया इयत्ताया अभावः। प्रथमविभागेनैवेयत्तायाः कृतत्वात्। न च संसर्गादपैति तस्येदतामात्रापनोदकत्वात्। तेन सर्वं रिक्थं ससृष्टिन एव सर्वे गृह्णीयुः। किन्तु विभागकाले तद्भागः

* चन्द्र. दावद्भावः। विच. दागतम्।

दात.१९३ दावत्; **चन्द्र.**९९ यः (यत्) शेषं विरवत्; **दानि.**६ ष्टा (ष्टि) नाऽधिकम् (भिर्धनम्); **व्यप्र.**५०७ दावत्: ५३३; **व्यम.**६६ दानिवत्; **विता.**३९१ दावत्: ४२०; **बाल.**२।१३५(पृ.२००) प्रा (आ) : २।१३८; **सेतु.**८० दावत्; **समु.**१४३ नाऽधिकम् (भिर्धनम्) भ्यो व्यशः (व्यं व्यशं); **विच.**१०२ दावत्.

पृथगुद्धरणीयः। स च विभक्तपतिभागविषय इवादौ न पत्न्याः, किं तु संसृष्टसोदरभ्रातुर्वचनेन विधीयते। सोदरस्येत्येकवचनमविवक्षितम्। स्मृच.३०३

अभार्यापितृकस्य चेति चशब्दार्थः भगिन्यभावे तु केवलाः सपिण्डाः संसृष्टाः 'अनन्तरं सपिण्डाद्यस्तस्य तस्य धनं भवेत्' इत्युक्तक्रमेणैव विभजेरन्निति, प्रतिपदोक्तानामभावात्। स्मृच.३०६

अस्मिन्प्रात्तामिकथने इति शेषः। संसृष्टद्रव्यानुपरोधेनार्जितेऽपि विभाज्यत्वविधानार्थमेतत्। संसृष्टानां मध्ये पुनर्विभागकरणादर्वाक् प्रमीतस्य पुत्रादिसद्भावे 'प्रमीतपितृकाणा तु पितृतो भागकल्पना' इति विधिना विभागः कर्तव्यो, विधानान्तरस्मरणात्। पुत्राद्यभावे तु न पत्न्यादुहितृन्यायः। विधानान्तरस्मरणात्। तथा च बृहस्पतिः— विभक्ता इति। स्मृच.३०३

(४) विद्याशौर्यादिना असाधारण्यप्रयोजकरूपवदन्येन। विर.६०२

(५) एतत्संसृष्टद्रव्यानुपरोधेनार्जितेऽपि विभाज्यत्वप्राप्त्यर्थम्। *पमा.५३७

पत्नीनामभावे संसृष्टपुत्राश्च तद्भ्रातृभगिनी गृह्णाति। तथा च बृहस्पतिः—या तस्येति। चशब्दो भ्रातृमात्रभावसमुच्चयार्थः। केचित्तु 'या तस्य दुहिता' इति पठित्वा पत्नीनामभावे दुहिता गृह्णीतेत्याहुः। दुहितृभगिन्योरभावे— 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धन भवेत्' इति। उक्तप्रत्यासत्तिक्रमेण सर्वे सपिण्डादयो धनं गृह्णीयुः। प्रतिपक्षे दोषाणामभावात्। *पमा.५४१ २

(६) अत्र संसृष्टिषु विद्याशौर्यादिना योऽधिक लभते स तस्मिन् द्रव्ये अंशद्वयभाक्, इतरे समाशा इत्याह बृहस्पतिः—संसृष्टाना त्विति। एतदर्जकस्य द्वौ भागौ इत्येतदर्थविधायकवसिष्ठादिवाक्यबलादेव सिद्धौ पितृद्रव्यानुपरोधेनार्जित तथा न विभाज्य, न तथेद, किं तर्हि संसृष्टद्रव्यानुपरोधेन यदर्जितं तदप्यनेन प्रकारेण विभाज्यमिति ज्ञापनार्थम्। रत्न.१५७

(७) सोदरस्येति। संसृष्टिसोदरस्येत्यर्थः। 'सोदर्या विभजेरंस्तं समेत्य सहिताः समम्। भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः॥' इति मनुवचनेनैकमूलकल्पन लाघवात्। तथा च सोदर्या अप्यसंसृष्टिनो लभन्त इति भावः। केचित्तु किञ्चिद्धनविभागानन्तरं संसर्गे वृत्ते तत एकस्मिन् संसर्गिणि प्रमीते स्थालीपुलाकन्यायेना-विभक्तेष्वपि धनेषंशेयत्तावधारणरूपो विभागो वृत्त एवेति कृत्वा शृङ्गग्राहिकतया तस्याप्यंशः कर्तव्यः। स च सोदरसंसृष्टिग्राह्यः। तत्रैव चानपत्यस्येत्यादिपर्युदास इत्याहुः। तन्न। न हीयत्तावधारणरूपं विभागफलं तस्य तत्कालजीवितयैव सिद्धत्वात्। किन्त्विदंत्वावधारणं, तच्च शृङ्गग्राहिकतयाऽक्षपातं विना न भवत्येव। तस्मात्प्रमृतस्य प्राचीनस्य सर्वभागित्वत्वनिवहस्य संकोचो वा, प्रादेशिकतत्तत्पुरुषीयस्वत्वान्तरोत्पत्तिर्वा विभागफलम्। तच्च त्वदक्षपातविषयो न मम, मदक्षपातविषयो न तवेति भागिना योऽयमभ्युत्थितोऽभ्युपगमस्तद्रूपाद्विभागात्। स च तत्तदक्षपातोपहितस्तदक्षपातः अक्रमिकश्चेत्तदा राशिरेव विभक्तः। अथ क्रमिकस्तदा क्व स्थालीपुलाकन्याय सामग्रीभेदादिति। विचि.२४६-९

(८) संसृष्टिविषये पत्नीदायनिमित्ते तासामामरणाद्धरणं कर्तव्यम्। तथा संसृष्टिन प्रत्याह—'भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयादि'ति। यदिदं संसृष्टिने धनग्रहणमुक्त तत्पुत्रपितृदुहितृणामभाव इति केचित् तथा च—'यदा कश्चित्प्रमीयेत' इति। ननु 'भरणं चास्य कुर्वीरन् स्त्रीणामि'ति नारदवचनात् भार्यासद्भावे एव ससृष्टिनो धनग्रहण लभ्यते। सत्यं पत्नीदायायोग्यस्त्रीणां नारदवचनमित्यविरोधः। यासु स्मृतिषु योषिद्विधवानार्य स्त्री भार्येति शब्दप्रयोगः तासु तासा भरणमेव। यासु स्मृतिषु पत्नीशब्दप्रयोगः तासु दायग्रहणमिति वृद्धाः। व्यनि.

मृतापुत्रधनभाजः क्रमेण पत्नी सोदरा दायादा दौहित्राश्च

पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदराः।
तदभावे तु दायादाः पश्चादौहित्रकं धनम्॥

तत्पत्न्याः पूर्वं सोदरनिवृत्त्यर्थं, न पुनर्दायादशब्दनिर्दिष्टदुहितृभ्यः पूर्वं सोदरप्राप्त्यर्थं, तथात्वे 'अङ्गादङ्गात्संभवति पुत्रवद्दुहिता' इत्यादिस्ववचनविरोधापत्तेः। *स्मृच.२९९

* व्यम. पमागतं, जीमूतवाहनखण्डनं 'पत्नी दुहितरः' इति याज्ञवल्क्यवचने (पृ.१५००) द्रष्टव्यम्। व्यम. पमागतम्।

* इदं वचनं स्मृतिचन्द्रिकाकारेण विभक्तापुत्रधनाधिकारे (१) स्मृच.२९९; समु.१४२;

मृतानपत्याभार्याभ्रातृपितृमातृकधनभाजः सपिण्डाः

मृतोऽनपत्योऽभार्यश्चेद्भ्रातृपितृमातृकः ।
सर्वे सपिण्डास्तद्दायं विभजेरन् यथांशतः ॥

(१) तद्दायं संसृष्टिदायं, मृतोऽनपत्यो भिन्नमातृकश्च । भ्रात्रादिप्रतिपदोक्तधनग्राहिरहितश्चेदिति तात्पर्यार्थः । सपिण्डाभावे तु विभक्तसंस्थितद्रव्यवदेव संसृष्टस्वर्यातद्रव्यमपि समानोदकादिगामीत्यनुसंधेयम् । संसृष्टद्रव्यमधिकृत्य सपिण्डेभ्य ऊर्ध्वं विशेषास्मृतेः । स्मृच.३०६

(२) यथेति शब्दात् पूर्वप्रसिद्धभागानुसारेण । तेन पित्रादिभागानुसारेण गृह्णीयुः । पितृभागमिव विभजेदित्यर्थः । स्मृसा.७३

(३) ननु सत्यपि पत्न्यादौ वचनान्मृतससृष्टिधनस्य ससृष्टिभ्रात्रादिग्राह्यत्ववत् संसृष्टासंसृष्टपुत्रसद्भावेऽपि पितृधनस्याप्येतद्वचनबलात् संसृष्टिपुत्रमात्रग्राह्यत्वमस्त्विति चेत्, न । अपुत्रस्येति पूर्ववचनस्थस्यानुषङ्गादपुत्रसंसृष्टिमरणस्य धनग्रहणकारणत्वात् संसृष्टिनश्च पुत्रेणापुत्रत्वाभावात् 'ससृष्टिनस्तु' इत्यस्याप्रवृत्तेः, 'विभजेरन् सुताः पित्रोः' इति वचनात्पित्रंशे पुत्रयोर्द्वयोरत्रापि समभागभागित्वम् । प्राक्तनः स्वाशः परं संसृष्टपुत्रेण भुक्तावशिष्टः पृथगुद्धरणीयः । पितुर्यावांस्तदानीं विद्यमानोऽशः स संसृष्टाभ्यां विभज्य ग्राह्यः । न च ससृष्टिनस्त्वित्यत्रापुत्रपदानुषङ्गोऽस्त्विति वाच्यम् । सपुत्रससृष्टिभ्रात्रादिधनेऽपि पुत्रादिबाधेन तदंशस्य भ्रात्रादिग्राह्यतापत्तौ सकलदेशीयानादित्यव्यवहारबाधापत्तेः । अन्यथा पुत्रवदपुत्रसाधारणस्यापुत्रमात्रविषयपत्नीत्यादिवाक्यापवादकत्वानुपपत्तेस्तद्बोधकतुशब्दविरोधापत्तेश्च । न च भ्रात्रादिससृष्टिन एवापुत्रविशेषणं व्यावर्त्तकत्वात् । पुत्रससृष्टिनस्तु न व्यावर्त्यभावात् असंभवाच्च । 'सभवे व्यभिचारे च स्याद्विशेषणमर्थवत् ' इत्यभियुक्तोक्तेरिति वाच्यम् । पृथग्वाक्यद्वयाभावात्, एकत्र च वाक्ये क्वचिद्विशेषणपुरस्कारेण क्वचिच्च तदपुरस्कारेण विधिप्रवृत्तौ विशेषणघटितावाक्यार्थद्वयनिबन्धनविधिवैषम्यरूपवाक्यभेदापत्तेः । किं च पित्रादिद्रव्यस्वाम्ये पुत्रत्वादिकमेवापतितत्वादिविशिष्टं प्रयोजकं न तु संसृष्टत्वविशिष्टमपि गौरवात् । तच्च सर्वेषां संसृष्टानामसंसृष्टानां च तुल्यमिति सर्वेषामेव पुत्रादीना विशेषेण तद्धनग्रहणमुचितम् । न च विभागेन पित्रादिद्रव्याहित्वापगमः । सर्वेषु पुत्रेषु विभक्तासंसृष्टेष्वपुत्रवद्भार्यादीनामेव तत्र धनाधिकारापत्तेः । प्रत्युतापस्तम्बेन हारीतेन च विभागोत्तरमपि पितापुत्रयोः परस्परधनाधिकारप्रातिपादनाच्च । व्यप्र.५४०

मृतरिक्थांशः श्राद्धे विनियोज्यः

संसृत्पन्नाद्धनादर्धं तदर्धं स्थापयेत्पृथक् ।
मासषाण्मासिके श्राद्धे वार्षिके वा प्रयत्नतः ॥

मासषाण्मासिके इत्यादौ निमित्तसप्तमी । विर.५९६

कात्यायनः

मृतापुत्रससृष्टिधनविभागाधिकारः । संसृष्टिनामुत्थाता द्व्यंशभाक् ।

संसृष्टानां तु संसृष्टाः पृथक्स्थानां पृथक्स्थिताः ।
अभावेऽर्थहरा ज्ञेया निर्बीजान्योऽन्यभागिनः ॥

(१) संसृष्टाना मृताना संसृष्टा अंशहराः, पृथक्स्थाना मृताना पृथक्स्थिता अंशहरा ज्ञेयाः, अभावे भार्याद्यभावे । निर्बीजान्योन्यभागिन इति द्वन्द्वसमासः । विर.६०५

(२) संसृष्टिना मृतानामर्थं ससृष्टा आदद्युः । एतेषामभावे पृथक्स्थानस्थिता अपि असंसृष्टिन आदद्युः । यदि च ससृष्टिना मध्ये कश्चिन्निरन्वयः प्रेयात्तदा तस्यार्थं संसृष्टिन एव गृह्णीयुः । सति अन्वय एव । स्मृसा.१४०

अभावे स्त्रीपुत्राणामशहराणामभावे । स्मृसा.१४७

(३) एकस्याभावे यदपरस्यार्थहरत्वमुक्तं तद्वि-

निविष्टमपि अस्माभिः तत्रान्यवचनाना समावेशानुपपत्तेरत्रोद्धृतम् ।

(१) **अप.**२।१३५; **व्यक.**१६१ (=); **स्मृच.**३०६; **विर.**५९५ पत्योऽ (पत्य); **स्मृसा.**७३,१३६,१४२; **पमा.** ५४२ रन् (युः); **व्यप्र.**५४०; **समु.**१४४.

(१) **दा.**२०९ तदर्थं (तदर्धं) वा प्र (च प्र); **व्यक.**१६१ (=) तदर्धं...पृथक् (स्थापयेत्पृथक् पृथक्) वा प्र (च प्र); **विर.** ५९५ तदर्धं (तदर्धं); **स्मृसा.**७३,१३६,१४२; **व्यनि.** दर्धं तदर्धं (दर्धं तदर्धं) मास (मासि) श्राद्धे वार्षिके वा (चैव अब्दके च); **चन्द्र.**९३ तदर्थं (तदूर्ध्वं) वा प्र (वापि); **समु.** १३२ दावत्, कात्यायनः.

(२) **व्यक.**१६२; **विर.**६०५ वेऽर्थं (वेंऽश); **स्मृसा.** ७८: १४०,१४७ द्या (ष्टि): १४५; **विचि.**२५०; **व्यनि.**; **चन्द्र.**९६ द्या (ष्टि); **बाल.**२।१३९ विरवत्; **समु.**१४४.

शिनष्टि—निर्बीजेति। ते हि परस्परं निरन्वयापरभागभाज इत्यर्थः। × विचि.२५०

[1]**विभक्ताः पितृवित्तात्तेदेकत्र प्रतिवासिनः।**
विभजेयुः पुनर्य्यंशं स लभेतोदयो यतः॥

(१) इदं ससृष्टस्य साधारणधनोपघातेनार्जकस्य भागद्वय इतरेषामेकैको भाग इति श्रीकरेण व्याख्यातम्। * दा.११०

(२) शौर्यविद्याधनयोरेवार्जकस्य भ्रातुर्द्वावंशौ, न मैत्रादौ विशेषवचनात्। एवं ससृष्टिनामपि। तदाह कात्यायनः—विभक्ताः पितृवित्तादिति। इदं सामान्यधनपरमिति श्रीकराचार्याः। तेन घटकस्य दातुर्वा पित्रादिमैत्रीप्रतिग्रहार्जित चेद्विभाज्यमेव। विता.३४३

[2]**मृते प्रव्रजिते नष्टे गृह्णीयुस्तस्य बान्धवाः।**
द्वयोर्नौवेशिकत्वं चेत् द्वितीयो ऋक्थमर्हति॥

मृतापुत्रपत्न्याः पतिपक्षः पितृपक्षो वा प्रभुः

[3]**पतिपक्षः प्रभुः स्त्रीणां पितृपक्षस्तदन्वये।**
विनियोगात्मरक्षासु भरणे च स ईश्वरः॥

प्रजापतिः

मृतापुत्रसंसृष्टिधनाधिकारः

[4]**अन्तर्धनं च यद्द्रव्यं संसृष्टानां च तद्भवेत्।**
भूमिं गृहं त्वसंसृष्टाः प्रगृह्णीयुर्यथांशतः+॥

(१) द्रव्यमित्यनेन गोबलीवर्दन्यायेन प्रकृष्टद्विपदचतुष्पदादिद्रव्यरूपजङ्गमद्रव्यग्रहणम्। संसृष्टाना भिन्नोदराणामिति शेषः। असंसृष्टाः सोदरभ्रात्रादय इति शेषः। स्मृतिचन्द्रिकाकारस्तु—'अन्योदर्यस्तु संसृष्टी नान्योदर्यधनं हरेत्। असंसृष्टयपि चादद्यात् सोदर्यो नान्यमातृजः॥' इति याज्ञवल्क्यवाक्य पठितम्। केवलस्थावरसद्भावे केवलजङ्गमसद्भावे वाऽस्माद्याज्ञवल्क्यवचनादसंसृष्टोऽपि सोदर एव गृह्णाति, न त्वसंसृष्ट सोदरसद्भावे संसृष्टयपि भिन्नोदरो गृह्णीयात्। स्थावरजङ्गमात्मकोभयविधस्य द्रव्यस्य सद्भावे मनुवचनान्न प्रजापत्युक्तव्यवस्थया असंसृष्टाः सोदरभ्रात्रादयः संसृष्टा भिन्नोदराश्च विभज्य गृह्णीयुरित्याह। अत्र स्मृतिचन्द्रिकाकारमते याज्ञवल्क्ये पौनरुक्त्य दुष्परिहर स्यात्। 'अन्योदर्यस्तु संसृष्टी नान्योदर्य' इत्यनेनोक्तस्य 'नान्यमातृज' इत्यनेन पुनरभिधानात्। किञ्च मनुवचनसवाद्यर्थलाभे अर्थान्तरकल्पनाया कल्पनागौरवदोषः प्रादुःष्यात्। रत्न.१५८

(२) अन्तर्धनं भूनिक्षेपादिना गोपितुं शक्य सुवर्णरूप्यादि संसृष्टो भिन्नोदरो गृह्णीयात्। भुवं तु सोदरभ्रातरः। गवाश्वादि तु सोदरासोदर इत्यर्थः। भिन्नोदरः संसृष्टयेव गृहाश्वाद्यपीति मदनः। तत्त्वेतद्वचनानारूढम्। अन्तर्धनभूमिगवाद्यन्यतरमात्रसत्वे त्वसंसृष्टोऽपि सोदर एवेति स्मृतिचन्द्रिकायाम्। तत्र मानं चिन्त्यम्। व्यम.६७

यमः

मृतापुत्रसंसृष्टिधनाधिकारः

[5]**अविभक्तं स्थावरं यत् सर्वेषामेव तद्भवेत्।**
विभक्तं स्थावरं ग्राह्यं नान्योदर्यैः कथञ्चन॥

(१) सर्वेषा सोदरासोदराणामित्यर्थः। सोदराणामेव मध्ये एकस्य संसृष्टत्वे तस्यैव, असंसृष्टिसोदरासोदरसंसृष्टिसद्भावे च द्वयोरेव, सापत्नमात्रसद्भावेऽपि प्रथमं संसृष्टिनः तदभावे चासंसृष्टिनोऽसोदरस्य मृतधनं प्रत्येतव्यम्। दा.२०४

(२) सर्वेषां सोदरासोदराणां स्थावरातिरिक्तं तु विभक्ताविभक्तं सोदराणामेवेत्यर्थतः सिद्धं तेषां तत्पिण्डदातृत्वेन तन्मातृभोग्यपार्वणपिण्डदातृत्वेन चाधिकारात्। दात.१९४

× व्यनि., बाल. विचिवद्भावः।

* शेष 'पितृद्रव्याविरोधेन' इति याज्ञवल्क्यवचने (पृ. १२१६) द्रष्टव्यम्।

+ स्मृच., व्यप्र. व्याख्यान 'सोदर्या विभजेरंस्त' इति मनुवचने (पृ. १५४५) 'अन्योदर्यस्तु संसृष्टी' इति याज्ञवल्क्यवचने (पृ. १५५१) क्रमेण द्रष्टव्यम्। पमा. स्मृचवत्।

(१) दा.११०; विता.३४३ प्र (प्री) यतः (यतः).

(२) स्मृचि.१६. (३) समु.१२०.

(४) स्मृच.३०५ प्रगृह्णी (विभजे); पमा.५४० च यद् (तु यद्); रत्न.१५८ त्वसंसृष्टाः (च संसृष्ट); व्यप्र.५३७ च (तु); व्यम.६७ व्यप्रवत्; विता.४२० च तद्भ (तु तद्भ); बाल.२।१३८ त्व (च) शेषं पमावत्; समु.१४४ च यद् (चल) च तद्भ (तु तद्भ) त्व (चा).

(१) दा.२०४; दात.१९२ ग्राह्य (प्राप्त) कथञ्च (कदाच); बाल.२।१३८; सेतु.४६; विच.१२९.

वृद्धयाज्ञवल्क्यः

मृतापुत्रसंसृष्टिधनाधिकारः

[1]अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत् ।
असंसृष्टयपि चादद्यात् सोदरो नान्यमातृजः*॥

*"संसृष्टपदमेव वा सोदरमाभिधत्ते । अत एव वृद्धयाज्ञवल्क्यवचनं 'सोदरो नान्यमातृज' इति जितेन्द्रियेण लिखितम् । तथा च पूर्वार्धस्य संसृष्टीत्यनुवर्तते ।" इत्यादिदायभाग (पृ.१९३)-व्याख्यानात् उपर्युक्तवृद्धयाज्ञवल्कीयश्लोकोऽनुमीयते । अन्य-

(१) दा.१९३ (सोदरो नान्यमातृजः) एतावदेव; सेतु. ४६ दावत्.

बृहन्मनुः

मृतापुत्रसंसृष्टिधनाधिकारः

[1]एकोदरे जीवति तु सापत्नो न लभेद्धनम् ।
स्थावरेऽप्येवमेव स्यात्तदभावे लभेत वै ॥

स्थावरेऽप्येवमेवेति विभक्तस्थावराभिप्रायेण ।

दा.२०४

निबन्धकारैस्तु 'सोदरो नान्यमातृज' इति याज्ञवल्क्यवचनस्यैव पाठभेदो दर्शितः ।

(१) दा.२०४; बाल.२।१३८.

विभक्तजविभागः

गौतमः

विभागानन्तरजातः पैतृकादेवांश गृह्णाति

[1]विभक्तजः पित्र्यमेव ।

(१) विभागानन्तरं यस्य गर्भाधान स विभक्तजः विभक्तेन जनितः गर्भाधानादृते जनकस्य जननव्यापाराभावात्, अतो यद्यज्ञातगर्भायामेव स्त्रिया विभक्ताः पुत्राः तदनन्तरं जातो भ्रातृभ्य एव भागं गृह्णीयात् । न केवलमेक एव किन्तु बहवोऽपि विभक्तजाताः पित्र्यमेव धनं गृह्णीयुः । दा.१३०

(२) यस्तु विभागादूर्ध्वं जातः पुत्रस्तस्यामन्यस्या वा भार्यायां स पित्र्यमेव गृह्णीयात् । विभागादूर्ध्वं पित्रा यदर्जितं विभागकाले वा गृहीतं तदेव भजेदल्पं प्रभूतं वा । यदा तु पितुर्न किञ्चिदस्ति तदा वैष्णवम्—'पितृविभक्ता विभागोत्तरोत्पन्नस्य भागं दद्युरि'ति । गौमि.

(३) 'निवृत्ते रजसि मातुः' इत्यनेन पुत्राणां विभज्य पुनः दारक्रियया यदि पश्चात्पुत्रो जायते स पित्र्यमेव लभेत । एवं जीवद्विभागपक्षे पितुरप्यंशभाक्त्वमर्थासिद्धम् । तदाऽपि 'द्वौ भागौ पितुः' इति स्मृत्यन्तरात् द्वौ भागौ पितुर्द्रष्टव्यौ । मभा.

(४) तदेतत्पितृविभक्तपुत्रैर्विभक्तजस्य भागदानात्प्रागेव पितरि मृते द्रष्टव्यम् । तथा च पूर्वजैर्भागो न देयः पित्र्यमेवेत्येवकारकरणात् । +स्मृच.३०६

विष्णुः

विभागानन्तरजातः विभक्तभ्रातृभागेभ्योऽशं गृह्णीयात्

[1]पितृविभक्ता विभागानन्तरोत्पन्नस्य भागं दद्युः*।

+ शेषं 'पितृविभक्ता' इति विष्णुवचने द्रष्टव्यम् । व्यप्र. स्मृचगतम् ।

* गौमि. व्याख्यानं 'विभक्तजः पित्र्यमेव' इति गौतमवचने द्रष्टव्यम् । विर., व्यम. व्याख्यानं 'विभक्तेषु सुतो जातः' इति याज्ञवल्क्यवचने द्रष्टव्यम् ।

(१) विस्मृ.१७।३; दा.१३१ विभागात (विभक्तान) भागं (विभाग); अप.२।१२२ क्ता वि (क्तवि) भागं (विभागं); व्यक.१५२ दावत्; गौमि.२८।२७ गानन्तरो (गोत्तरो); स्मृच.३०६ पितृ (पितुः) न्तरो (न्तरकालो); विर.५३९ विभागा...भागं (अनन्तरोत्पन्नस्य विभागं); दीक.४३ भागं (सम); स्मृसा.६६; रत्न.१४४ भागं (विभागं); विचि.२२८ रोत्प (रमुत्प); व्यनि.तृ (त्रा) रोत्प (रमुत्प) भागं (विभागं); दात.१६८ रत्नवत्; चन्द्र.७२; व्यप्र.४१२ ष्यस्य भा (ष्याय

(१) गौध.२८।३०; विश्व.२।१२५ (एव०); दा.१३०; मभा.; गौमि.२८।२७; स्मृच.३०६; व्यम.४६२; व्यम. ४६ ष्य (त्रिय); समु.१४४.

(१) तत्र जीवद्विभागोत्तरकालजातं पुत्रं प्रत्याह विष्णुः—पितृविभक्ता इति । अस्यार्थः । अविस्पष्टगर्भाया पितृभार्यायां ये पुत्रा विभक्तास्ते स्वविभागोत्तरकालजातस्य पुत्रस्य तत्सद्भावाज्ञानतः स्वभागप्रविष्टतद्भागाशानुद्धृत्य दद्युरिति । पिता तु स्वभागप्रविष्टतद्भागाशं न दद्यात् । किन्तु पूर्वजैर्दत्तानंशान् गृहीत्वा विभक्तजेन सह वसेत् । तस्याप्राप्तव्यवहारस्य सहवासेन पालनीयत्वात् । अत एव पितृविभक्ता भागं दद्युरित्युक्तम् । न पुनः पिता पितृविभक्ताश्च भाग दद्युरिति । यत्तु गौतमेनोक्तम्—'विभक्तजः पित्र्यमेव' इति । भाग गृह्णीयादिति शेषः । तदेतत्पितृविभक्तपुत्रैर्विभक्तजस्य भागदानात्पागेव पितरि मृते द्रष्टव्यम् । तथा च पूर्वजैर्भागो न देयः पित्र्यमेवेत्येवकारकरणात् । स्मृच.३०६

(२) यस्तु विभागकाले गर्भस्थो न ज्ञातो, ज्ञातोऽपि न तस्याशो धृतस्तस्य भागमाह विष्णुः— पितृविभक्ता इति । विभागानन्तरं यस्य गर्भाधान स पित्र्यमेवांशं लभते । +स्मृसा.६६

(३) जीवति तु पितरि मातरि तत्सपत्न्या वाऽविस्पष्टगर्भाया विभक्तैर्विभागानन्तरोत्पन्नोऽय स्वस्वभागादाकृष्य स्वभागसमभागभाक् कार्यः । तथा च विष्णुः— पितृविभक्ता इति । तं च भ्रातृदत्तं तद्विभागं पितैव गृहीत्वा तं परिपालयेत् । तस्यैव तत्राधिकारात् । 'अप्राप्तव्यवहाराणा' इत्यादिप्रागुक्तवचनाच्च । यच्च वचनं 'अनीशः पूर्वजः पित्रोर्भ्रातुर्भागे विभक्तजः ।' इति, तस्याप्ययमेव विषयः । व्यप्र.४६२

मनुः

विभागानन्तरजातः पैतृकांशमात्रभाक् । ससृष्टिनश्चेत् भ्रात्रादयः तेभ्यः समो भागो ग्राह्यः ।

ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम् ।
संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह *॥

(१) विभागोत्तरकालं पित्रा यद्विभागद्वयं गृहीतं 'द्वावंशौ प्रतिपद्येत' इति तदेव सत्या पितुरिच्छाया ग्रहीतव्यम् । पितुरूर्ध्वं वा, न तत्र भ्रातृभिर्वाच्य किमित्ययं द्वावंशौ गृह्णातीति । अथ च नास्ति पितुरिच्छा, तदा सम च, स्वसमोऽस्य भाग उद्धर्तव्यः । ये पितुरूर्ध्वं ससृष्टास्तेषामेव स पैतृकोंऽशस्तदुक्त 'दद्यादपहरेच्चाश जातस्य च मृतस्य च' इति जातस्य संसृष्टिन एव दद्युः । पितुरूर्ध्वं तदीयमश च सममेव, 'विभक्ताः सह' इत्यनया तु बुद्धया (?) । 'भगिन्या आ प्रसवान्नैव विभागोऽस्ति' इति वसिष्ठेन दर्शितम् (?) । मेधा.

(२) पित्रोरिदं पित्र्यमिति व्याख्येयम् । ये च विभक्ताः पित्रा सह संसृष्टाः तैः सार्धं पितुरूर्ध्वं विभक्तजो विभजेत् । *मिता.२।१२२

(३) 'ऊर्ध्वं विभागाज्जातस्त्वि'त्यनेन (मस्मृ.९।२१६, नास्मृ.१६।४४) च सस्नेहे पितरि तदिच्छया विभागकालोऽपरो दर्शितः । दा.२४

यदि पिता पुत्रान् विभज्य स्वय च यथाशास्त्र भाग गृहीत्वा पुत्रैरसंसृष्ट एव मृतः तदा विभागानन्तरं जातः पितृधनमेव गृह्णीयात्, स एव तस्य भागः । अथ कैश्चित् पुत्रैः सह संसृष्टः पिता मृतः तदा संसृष्टेभ्यो भागं गृह्णीयात् । ×दा.१३०

(४) विभक्तेषु जातः पितृधनमेव हरेन्न भ्रातृधन, पितुर्भ्रातॄणा चाभावे पित्रा सह ये संसृष्टास्तैः सह पितृभाग विभजेत । जात इत्येकवचनमविवक्षितम् । अप.२।१२२

+ चन्द्र. स्मृसाव्याख्यावः ।

* व्यउ. व्याख्यानं 'विभक्तेषु सुतो जातः' इति याज्ञवल्क्यवचने मितागतम् ।

विभा); व्यम.४६ दातवत्; सेतु.७६ रोत्प(रुत्प); विभ.६७ सेतुवत्; समु.१४४ भाग (भागान्); विच.३७ रत्नवत्.

(१) मस्मृ.९।२१६; मिता.२।१२२; दा.२४ प्रथमपादः : १३०; अप.२।१२२; गौमि.२८।२७ स्नुः (ऽस्य);

* पमा., मपा. मितागतम् ।

× मसु. दागतम् ।

व्यक.१५२ मनुनारदौ; स्मृच.३०७ वा ये (ये वा); विर.५३८ हरेद्धनम् (धनं हरेत्); स्मृसा.६६,७७,१४८ विरवत्; पमा.४९९ पू., ५०० उत्त.; मपा.६५५; दीक.४३; रत्न.१४४; विचि.२२८,२४८ विरवत्; व्यनि.; स्मृचि.३५; नृप्र.३६; सवि.३७५ विरवत्, स्मृतिः : ४३५ पू., ४३६ उत्त., स्मृचवत्; चन्द्र.७२ विरवत्; वीमि.२।१२२ विरवत्; व्यप्र.४३४,४६२ पू. : ४६३ उत्त.; व्यउ.१५० पू., १५१ उत्त.; व्यम.४६; विता.३२२,४२८; राकौ.४५१ पू., ४५२ उत्त.; सेतु.७३,७५,८०.८१; विभ.६६ पू.; समु.१४४; विच.३३ पू. : १०१.

(५) पित्र्यमेव पितृभागमेव। एतेन विभागकाले पितुरपि भागो दर्शितः। यदि तु विभागादूर्ध्वमनेकेषां जन्म तदापि स एव भागो विभज्य तैर्ग्राह्यः। संसृष्टा इति। यदि पुनः संसृष्टास्तेन सह क्वचिद्भ्रातरः स्युस्तदा तद्धनान्तर्भावेन पितृधनं संसृष्टैः सह विभज्य ग्राह्यमित्यर्थः। मवि.

(६) पित्र्यमेवेत्युत्तरार्धेऽपि संबध्यते। अतो न प्राक्तनेन विरुद्धम्। तदेतद्विभक्तजेन पितुः सहवासदशायां मृते पितरि द्रष्टव्यम्। अजीवद्विभागोत्तरकालजं तु पुत्रं प्रत्याह याज्ञवल्क्यः— 'विभक्ते तु सुतो जात' इत्यादि। स्मृच.३०७

(७) मृते पितरि पित्र्यं सर्वं हरेत्। जीवति पितरि पितृधनादंशमात्रम्। विर.५३८

(८) यावानंशः पितृभागः तावन्तं विभज्य संसृष्टाना सकाशात् गृह्णीयात् इत्यर्थः। स्मृसा.६६

विभागानन्तरजातः पितृसंसृष्टयश्च विभजेदिति मनूक्तत्वात्। युक्त चेद, पुत्रस्वत्वस्य पितृधने संसर्गेण जातत्वात्। भूतवद्भाविधने आवयोः साधारण्य इत्येवरूपाभ्युपगमस्य विभागानन्तरभाविनः संसर्गरूपत्वात्, इतरेषा विभागेन स्वाम्यनिराकरणात्। अत एव 'सोदर्या विभजेरंस्तं समेत्ये'त्यादिवाक्येन सोदरसंसृष्टिनोस्तुल्याधिकारप्रतिपादनम्। स्मृसा.७७

(९) यथा भ्रात्रंशाद्वर्भस्थः प्राप्नोति तथा नाऽयं प्राप्नोतीत्येवकारेण द्योत्यते। किं तु पितृधनमेव लभेत। अत्रापि विशेषः। यदि जीवत्येव पितरि तद्भागादि ग्रहीतुमिच्छति। तथापि च भागाकाङ्क्ष्येव। तदा पितृभागे पितुर्विभक्तजस्य चाशौ कार्यौ। पितरि प्रमीते तु तद्भागः समग्रो विभक्तजस्यैव। स्वपिता चेत् स्वभ्रात्रा स्वपुत्रेण वा सह संसृष्टीभूतस्ततः प्रमीतस्तदा विभक्तजः पितुरंश ततो लभत इति वाक्यार्थः। *विचि.२२८

(१०) ननु पित्रा संसृष्टाना पुत्राणा धनग्राहित्वं, असंसृष्टाना पुत्राणा पितृधनग्राहित्वं नास्ति। यथा अविभक्तजपुत्रस्य पितृधनग्राहित्वं, नान्येषा पुत्राणामिति। मैवम्। याज्ञवल्क्यः 'विभक्तेषु सुतो जातः सवर्णाया विभागभाक्'। मनुः 'ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्'। इति। मनुः—'पुत्रैः सह विभक्तेन पित्रा यत्स्वयमार्जितम्। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः॥' इत्यादिवचनशतेभ्यः विभक्तजस्य पितृधनग्राहित्वं प्रतीयते। एतादृश संसृष्टपुत्रस्य पितृधनप्रापकं वचनमेकमपि न प्रदृश्यते। नन्वेवं विभक्तजस्य पितृधनस्वामित्वं वाचनिक स्यादिति पूर्वोक्तं विरुध्येत इति चेन्मैवम्। अत्र विभागो वाचनिकः। 'विभागे धर्मवृद्धिः स्यात्' इत्यादिवचनाद्धर्मवृद्धिकामाना विभागः कार्य इति विभागस्य वाचनिकत्वप्रतीतेः। अतो विभक्तजस्य स्वामित्वं नैयायिकम्। तथाहि विभक्तजस्य पितृद्रव्यस्वीकारसमये इतरे विभक्ता भ्रातरः तद्द्रव्यं सममंशं स्वयमपि यदि गृह्णीयुः तदा विभक्तजस्याल्पीयानेव विभागः स्यादिति विषमविभागः स्यात्। तद्दोषपरिजिहीर्षया यदि ते सर्वे विभक्तजेन सार्धं पुनर्विभागं कुर्युस्तदा पूर्वविभागस्य पितृकृतस्यानर्थक्य स्यात्। भ्रातरः संसृष्टाशमवयुत्य संसृष्टिनो दत्वा पितृद्रव्यमेव गृह्णीयुरिति। अतोऽयुक्त संसृष्टिनामसंसृष्टिना पुत्राणा पितृद्रव्ये तुल्यमेव स्वाम्यमिति। एतदेवाभिप्रेत्याह भारुचिः—संसृष्टानामसंसृष्टाना पुत्राणां पितृकृतर्णापाकरणं तुल्यतया न्याय्यमिति पित्रार्जितद्रव्यस्याधिक्ये लोभाद्विभागापेक्षायामप्यपचयभारसहिष्णुत्वाभावात् अपचये सत्यप्रवृत्तेः विभागो नास्ति। किं तु विभक्तजस्यैव पितृद्रव्यमिति पितृधनग्रहणे मनुवचनं ज्ञापकमित्याहुः। +सवि.४३५-६

(११) मृते पितरि पित्र्य विभजनकाले यःपितृभागस्तं, जीवति तु इच्छाया अनियतत्वेन ये तेन पित्रा सह संसृष्टास्तैः सह समं तं स पिता विभजेतेत्यन्वयः। तत्र च स्पष्टगर्भाया मातरि पितृभागाभावे मृते पितरि विभक्तैरप्यंशो देयः(!)। अस्पष्टगर्भायां तु प्रसूतिपर्यन्तं विभागाभावः(!)। मच.

(१२) विभागोत्तरजातानां पित्र्य एवांशो भवति। तत्सत्त्वे चान्यपुत्राणां न तद्भागिता। चन्द्र.७२

(१३) ये तु विभक्ताः पित्रा संसृष्टाः पुत्रास्तैः सह तु तस्य विभागो, न सकलपित्र्यधनग्रहणमित्याह मनुः—संसृष्टा इति। व्यप्र.४६३

(१४) पित्र्यमेव हरेत्, पुनर्विभक्तं भ्रातृधनमंश-

* वीमि. विचिगतम्।

+ शेषं मितागतम्।

साम्याय विभज्य हरेत्। अस्यापवाद उत्तरार्धेनोच्यते, तेन पित्रा ये विभक्ताः संसृष्टास्तैः सम वा विभजेत्। नन्द.

याज्ञवल्क्यः

विभागानन्तरजातः पैतृकधनात् भ्रातृविभक्तधनाद् अंश गृह्णाति

[1]**विभक्तेषु सुतो जातः सवर्णायां विभागभाक्।**
दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्॥

(१) यस्माच्च स्वत्वे सति विभागः, तस्मात्—'विभक्तेऽपि सवर्णायाः पुत्रो जातो विभागभाक्। दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्।' अनिवृत्तरजस्काया मातरि विभजता विभागोत्तरकाल यदि पुत्रो जायेत, तस्यापि द्रव्यसंबन्धोऽस्त्येव। तस्मात् स्वत्वे सत्येव इत्युक्तम्। यदि हि विभागेन स्वत्वसंबन्धोऽभविष्यत्, ततो विभक्तजस्य द्रव्यसबन्धो नोपापत्स्यत। अस्मिन् पुनरस्त्येव तस्यापि द्रव्यसबन्धः। अतः स्वत्व इति। अतोऽयं श्लोकस्तद्विवेकायारभ्यते। 'विभक्तेऽपि सवर्णायाः पुत्रो जातो विभागभाक्।' स्यादिति शेषः। अविशेषेऽपि पित्र्यविभागभागित्वबसेयम्। यथाह गौतमः—'विभक्तजः पित्र्यम्' इति। विभक्तजोऽपि च पितुर्निर्धनत्वे भ्रातृद्रव्यादेव दृश्यमानात् तस्य विभक्तजस्य विभागः स्यात्। अयं तु विशेषः—आयव्ययविवर्जितात्। यत् स्वयमार्जितं, स आयः। यत् तस्माद् द्रव्यमुपक्षीण स व्ययः। आयव्ययविशुद्ध विभक्तजेन सह सम विभजनीयमित्यर्थः। विश्व.२।१२५

(२) विभागोत्तरकालमुत्पन्नस्य पुत्रस्य कथ विभागकल्पनेत्यत आह—विभक्तेष्विति। विभक्तेषु पुत्रेषु पश्चात्सवर्णायां भार्यायामुत्पन्नो विभागभाक्। विभज्यत इति विभागः। पित्रोर्विभागस्तं भजतीति विभागभाक्। पित्रोरूर्ध्वं तयोरंशं लभत इत्यर्थः। मातृभागं चासत्या दुहितरि। 'मातुर्दुहितरः शेषम्' इत्युक्तत्वात्। असवर्णायामुत्पन्नस्तु स्वाशमेव पित्र्याल्लभते। मातृकं तु सर्वमेव। एतदेव मनुनोक्तम्—'ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्' (मस्मृ.९।२१६)इति। पित्रोरिदं पित्र्यमिति व्याख्येयम्। 'अनीशः पूर्वजः पित्रोर्भ्रातुर्भागे विभक्तजः' इति स्मरणात्। विभक्तयोर्मातापित्रोर्विभागे विभागात्पूर्वमुत्पन्नो न स्वामी विभक्तजश्च भ्रातुर्भागे न स्वामीत्यर्थः। तथा विभागोत्तरकालं पित्रा यत्किञ्चिदर्जितं तत्सर्वं विभक्तजस्यैव। 'पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितम्। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः॥' इति स्मरणात्। ये च विभक्ताः पित्रा सह संसृष्टाः तैः सार्धं पितुरूर्ध्वं विभक्तजो विभजेत्। यथाह मनुः—संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह' इति। पितुरूर्ध्वं पुत्रेषु विभक्तेषु पश्चादुत्पन्नस्य कथ विभागकल्पनेत्यत आह—दृश्याद्वेति। तस्य पितरि प्रेते भ्रातृविभागसमयेऽस्पष्टगर्भाया मातरि भ्रातृविभागोत्तरकालमुत्पन्नस्यापि विभागः। तद्विभागः कुत इत्यत आह। दृश्याद्भ्रातृभिर्गृहीताद्धनात्। कीदृशात् आयव्ययविशोधितात्। आयः प्रतिदिवस प्रतिमास प्रत्यब्दं वा यदुत्पद्यते, व्ययः पितृकृतर्णापाकरणं, ताभ्यामायव्ययाभ्यां यच्छोधित तत्तस्माद्धृत्य तद्भागो दातव्यः स्यात्। एतदुक्तं भवति। प्रातिस्विकेषु भागेषु तदुत्थमाय प्रवेश्य पितृकृत चर्णमपनीयावशिष्टेभ्यः स्वेभ्यः स्वेभ्यो भागेभ्यः किञ्चिकिञ्चिदुद्धृत्य विभक्तजस्य भागः स्वभागसमः कर्तव्य इति। एतच्च विभागसमयेऽप्रजस्य भ्रातुर्भार्यायामस्पष्टगर्भाया विभागादूर्ध्वमुत्पन्नस्यापि वेदितव्यम्। स्पष्टगर्भाया तु प्रसवं प्रतीक्ष्य विभागः कर्तव्यः। यथाह वसिष्ठः—'अथ भ्रातृणा दायविभागो याश्चानपत्याः स्त्रियस्तासामापत्प्रलाभात्' इति। गृहीतगर्भाणामाप्रसवात्प्रतीक्षणमिति योजनीयम्। +मिता.

(१) **यास्मृ.**२।१२२; **अपु.**२५६।८; **विश्व.**२।१२५ पूर्वार्धे (विभक्तेऽपि सवर्णायाः पुत्रो जातो विभागभाक्); **मिता.**२।१२२;२।१४० पू.; **दा.**१३२; **अप.**; **व्यक.**१५२; **गौमि.**२८।२७; **स्मृच.**३०७ क्तेषु (क्ते तु); **विर.**५३९; **पमा.**४९९ पू., ५०० उत्त.; **मपा.**६५६ उत्त.; **रत्न.**१४४, १४५; **विचि.**२२७; **व्यनि.** तद्वि(ऽथ वि) धितात् (धनात्); **स्मृचि.**३५; **नृप्र.**३६; **सवि.**३७५ पू., ३७६ उत्त.;४३५ पू.; **वीमि.**; **व्यप्र.**४६२ पू., ४६३ उत्त.; ५५८ (=) उत्त.; ५५९ (=) पू.; **व्यड.**१५० पू., १५१ उत्त.; **व्यम.**४६; **बिता.**३२२ पू., ३२५; **राकौ.**४५१; **सेतु.**७८ उत्त., नारदः; **समु.**१४४; **विच.**५८:७५ उत्त., नारदः.

+ पमा., मपा., व्यनि., सवि., व्यड., बिता. मितागतम्।

(३) पित्र्यमेव हरेद्धनमिति विरोधात् उक्तयुक्तेश्च क्रमागतधनविषयमिदम्। ×दा.१३२

(४) विभक्तधनेषु पुत्रेषु यः सवर्णाया पुत्रो जातः स पितृविभागभाग्भवति, पितृविभागाभावे तु यदि विभक्तं क्षेत्रादिकं कृते विभागे पश्चाद्दृश्यते तदुत्पन्नाद्विशोधितायव्ययाद्विभागः कार्यः। अप.

(५) अस्यायमर्थः—यो विभागकाले गर्भस्थः न ज्ञातः पश्चाज्जातः स सर्वेभ्यो...(अंश)हरेभ्यः सकाशात् स्वांशं तदंशसम लभेत्। यदाह विष्णुः—'पितृविभक्ता विभक्तानन्तरोत्पन्नस्य विभागं दद्युरि'ति। विभागानन्तरकालं च यस्य गर्भाधानं स पित्र्यमेवांशं लभते न तु पूर्वजादंशादपि। 'अनीशः पूर्वजः पित्र्ये भ्रातृभागे विभक्तजः' इति बृहस्पतिवचनात्। विभागकाले प्राप्ताप्राप्तमायव्ययविशोधितं यावद्विद्यमानं धनमुपलभ्यते ततो वा धनात्स्वांशं लभत इति। व्यक.१५२

(६) अजीवद्विभागोत्तरकालजं तु पुत्र प्रत्याह याज्ञवल्क्यः—'विभक्ते तु सुतो जातः सवर्णाया विभागभाक्। दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्॥' पितुरूर्ध्वमविस्पष्टगर्भाया पितृभार्याया भ्रातृषु परस्परं विभक्तेषु पश्चात्सुतो यो जातः स विभागभाक्। भाग एव विभागोंऽश इति यावत्। सर्वस्माद्विभक्तधनादुद्धृतभागभागीति यावत्। यद्वा दृश्याद्दृश्यमानगृहोपस्करवाह्यदोह्याभरणभृत्यादेः सकाशादेवायव्ययविशोधितादुपचयव्ययाभ्यामवधारितेयत्तादिकाद्विभक्ताद्धृतो भागस्तस्य विभक्तजस्य स्यादित्यर्थः। दृश्यग्रहण गूढद्रव्यजाताद्विभक्ताद्धृताशकल्पनानिवृत्त्यर्थम्। विभक्तजस्य श्रुतत्वाविशेषेऽपि विभागकाले दुर्विज्ञेयेऽपि सद्भावशालित्वात्तद्भागे ह्रासकरणं न्याय्यमिति मन्येत न पक्षान्तरयुक्तमिति मन्तव्यम्। दुर्विज्ञेयसद्भावात्तद्दोषकृतेति प्रथमपक्षोऽपि नात्यन्तानुचित इति मन्तव्यम्।

स्मृच.३०७

(७) याज्ञवल्क्यः— 'विभक्तेषु सुतो जात' इत्यादि। विष्णुः— 'पितृविभक्ता अनन्तरोत्पन्नस्य विभागं दद्युः।' एतद्द्वयमपि विभागसमयगर्भस्थविभागानन्तरोत्पन्नविषयम्। अनेन विभागसमयगर्भस्थस्य विभागानन्तरजस्य विभक्तैः सन्धिः स्वभागादाकृष्य तद्भागपूरणं कर्तव्यमित्युक्तं, तदन्यस्य विभागानन्तरजस्य विभक्तस्य पितुर्धनभागितेति मन्वादिमत विभागसमयोत्पन्नस्यास्पष्टतामादाय, स्पष्टगर्भाया तु विभाग एव नास्तीति प्रकाशकारः। हलायुधस्तु विष्णुवाक्यलिखनानन्तरं याज्ञवल्क्यं लिखित्वाह— अस्यार्थः सवर्णायामुत्पन्नो विभक्तजो यदि गुणवान्, तदा सर्वस्माद्दृश्यादृश्यरूपात्पूर्वविभक्तरूपाद्भागं लभते, यदि तु मन्दगुणस्तदा दृश्यादेव परिदृश्यमानादेव भूम्यादेर्भूमिरूपधनादुत्पन्नधान्यादिरूपाद्भ्रातृकृतमृण पातयित्वा अवशिष्टभाग लभते इति। ÷ विर.५३९-४०

(८) मिताटीका— अत्र मूलवचनस्थवाशब्दोऽवधारणे। आयव्ययविशोधितात् दृश्यादेव तद्विभाग इत्यर्थः। सुबो.

(९) पितुरूर्ध्वं मातर्यस्पष्टगर्भाया भ्रातृषु विभक्तेषु पश्चादुत्पन्नः सर्वस्माद्दृश्यादृश्यरूपात् विभक्तधनात् उद्धृत विभक्तभ्रातृभागसममंशं तेभ्यो लभत इत्याह याज्ञवल्क्यः—विभक्तेष्विति। सवर्णाग्रहणेनासवर्णाया विभागादूर्ध्वं उत्पन्नः 'चतुस्त्रिद्येकभागा' इति पूर्वोक्तं स्वांशमेव लभते, न तु विभक्तभ्रातृभागसमं भागमिति दर्शितम्। अनेनैव न्यायेन जीवद्विभागेऽपि विभक्तजस्यासवर्णापुत्रस्य न सकलपित्र्यधनभागित्वं इति ज्ञातव्यम्। अथवा परिदृश्यमानगृहोपस्करवाह्याभरणादिरूपाद्धनात् उपचयापचयाभ्यां निर्णीतेयत्तादिकाद्धनादुद्धृत भागं लभते। न तु गुप्तादपीत्यस्मिन्नेव विषये पक्षान्तरमाह स एव—दृश्याद्वेति। अयं पक्षो विभक्तभ्रात्रपेक्षया योऽल्पगुणस्तद्विषय इति व्यवस्था कृता हलायुधेन। एव भ्रातृविभागकाले प्रमीतभ्रात्रन्तरभार्यायामप्रजस्य स्पष्टगर्भाया पश्चादुत्पन्नो भ्रातुः पुत्रः स्वपित्र्यंशं तेभ्यो लभते। स्पष्टगर्भाया तु भ्रातृभार्याया न प्रसवपर्यन्तं विभागः कार्यः। तथा च वसिष्ठः—'अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्तासामापुत्रलाभादि'ति। रत्न.१४४-५

(१०) अथ 'मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च'। इति नारदेन भ्रातृसंभावनायां विभागस्यार्थतः प्रति-

× विशेषः 'पुत्रैः सह' इति बृहस्पतिवचने द्रष्टव्यः।

÷ विचि. विरगतम्।

षेधात्कथं विभक्तजस्य सभव इति चेत् उच्यते । पितुरिच्छया बलवत्या नारदवचनमपोह्यते । अन्यथा प्रकृतवचनस्य निर्विषयत्वापत्तेः । इदं प्रकृतवचनं विभागकाले गर्भस्थमधिकृत्य । +वीमि.

(११) [हलायुधं खण्डयति] तन्निर्बीजत्वात् गुप्तस्यापि विभागानन्तरं ज्ञातस्य समभागेन विभजनीयत्वादत्र तदप्रवृत्तौ प्रमाणाभावान्नियमकल्पनेऽदृष्टार्थतापत्तेर्विज्ञानेश्वरोक्तार्थकतया वचनसामञ्जस्यादुपेक्ष्यम् ।

*व्यप्र.४६३

(१२) पितृमरणोत्तरविभागकालेऽस्पष्टगर्भायां मातरि तत्सपत्न्यां वाऽनन्तरसमुत्पन्ने विशेषमाह याज्ञवल्क्यः 'विभक्तेषु सुतो जातः सवर्णाया विभागभाक्' । विभागश्च सर्वैर्भ्रात्रादिभिः स्वस्वाशाकिञ्चित्किञ्चिदुद्धृत्य यथा स्वांशसमो भवति तथा कार्यः । विष्णुः– 'पितृविभक्ता विभागानन्तरोत्पन्नस्य विभागं दद्युः' । इदं च तदशेषु रेकसेकसहितेषु ज्ञेयम् । तत्सत्त्वे तु स एवाह 'दृश्याद्धा तद्विभागः स्यादायव्ययविशोधितात्' । दृश्याद्विद्यमानद्रव्यात् । व्यम.४६

नारदः

विभागानन्तरजातः पैतृकांशमात्रभाक् । संसृष्टिनश्चेद् भ्रात्रादयः समो भागो ग्राह्यस्तेभ्यः ।

ऊर्ध्वं विभागात् जातस्तु पित्र्यमेव हरेद्धनम् ।
संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह ॥

बृहस्पतिः

विभागानन्तरजातः पैतृकद्रव्यादेवांश गृह्णाति, नैव पूर्वं विभक्तः

[२]पित्रा सह विभक्ता ये सापत्ना वा सहोदराः ।
जघन्यजाश्च ये तेषां पितृभागहरास्तु ते ।

अनीशः पूर्वजः पित्र्ये भ्रातृभागे विभक्तजः ॥

(१) विभक्तयोर्मातापित्रोर्विभागे विभागात्पूर्वमुत्पन्नो न स्वामी, विभक्तजश्च भ्रातुर्भागे न स्वामीत्यर्थः ।

*मिता.२।१२२

(२) तत्र यदि पूर्वं विभक्तानां महान् भागो जघन्यानां तु पितृभागमेव विभज्य गृह्णतामल्पस्तथाऽपि पूर्वविभक्तभ्रातृभागान्न तैर्ग्राह्यमिति स एवाह– अनीशः पूर्वज इति । अप.२।१२२

(३) तत्र पितृभागहरा इत्यस्य पितृभाग एव भागहरा इत्यर्थोऽवगन्तव्यः । तदेतद्विभागादूर्ध्वमेव ये गर्भस्था भूत्वा जातास्तद्विषयम् । जघन्यजाना पितृभागादेव भागहरत्वे कारणमप्याह स एव 'अनीशः' इति । अनीशः अस्वामी । 'अनीशः पूर्वजः पित्र्य' इत्यत्र पित्रा सह विभक्तत्वादित्यभिप्रायः प्रत्येतव्यः । 'भ्रातृभागे विभक्तजः' इत्यत्र भ्रातृभागे विभक्तजधनसंक्रमणाभावादित्यभिप्रायोऽध्यवसेयः । +स्मृच.३०७

(४) जघन्यजा इति । विभक्तजवदेते पितृभागमात्रं लभन्त इत्यर्थः । विभक्तज इति । विभक्तः सन्नित्यर्थः । विचि.२२९

(५) विभागात्पूर्वजातः पित्रोर्भागे स्वामी न, विभक्तजश्चासंसृष्टः भ्रातुर्भागे स्वामी नेत्यर्थः । विता.३२२

(६) विभागानन्तरं गर्भाधानेन जातः, गर्भाधानादते

* दा., विर., पमा., सवि., व्यप्र., व्यउ. मितागतम् ।
+ दात. स्मृचगतम् ।

१५२ श्च (स्तु); **स्मृच.**३०७ त्ना (त्न्या) श्च ये ते (स्तु एते); **विर.**५३८; **स्मृसा.**६६ तृतीयार्थः; **पमा.**४९९ (अनीशाः पूर्वजाः पित्रोर्भ्रातृभागे विभक्तजाः) स्मरणम्, तृतीयार्थः; **रत्न.** १४४:१५९ शः (शाः) जः (जाः) तृतीयार्थः; **बिचि.**२२९: २४८ (–) क्तजः (क्तजे) तृतीयार्थः; **व्यनि.** साप (सप) श्च ये ते (स्तु एते) भाग (दाय); **स्मृचि.**३५ भक्तजः (भागतः); **नृप्र.**३६ तृतीयार्थः; **दात.**१६८; **सवि.**३७५ मितावत्, स्मरणम्, तृतीयार्थः; **वीमि.**२।१२२ सापत्ना (संपन्ना) प्रथमार्धद्वयम्; **व्यप्र.**४६३ श्च (स्तु) प्रथमार्धद्वयम् : ४६२ मितावत्, तृतीयार्थः : ५४१ पमावत्, तृतीयार्थः; **व्यउ.**१५० मितावत्, स्मरणम्, तृतीयार्थः; **विता.**३२३ श्च (स्तु) प्रथमार्धद्वयम्: ३२२ मितावत्, नारदः, तृतीयार्थः; **सेतु.**७५ त्ना (त्न्या) पित्र्ये (पैत्रे); **विभ.**६६; **समु.**१४४ श्च (स्तु); **विच.**५७-८ त्ना (त्न्या).

+ वाक्यार्थे विवादरत्नाकरोद्धृतहलायुधमतवद्भावः ।

* शेषं मितागतं, 'विभक्तजः पित्र्यमेव' (गौध.२८।३०), 'पितृविभक्ता' (विस्मृ.१७।३) इति वचनयोः स्मृचव्याख्याने च गतम् ।

(१) **नास्मृ.**१६।४४ त स तैः सह (रन्निति स्थितिः); **दा.**१३९ मनुनारदौ; **व्यक.**१५२ मनुनारदौ; **गौमि.**२८।२७ ये स्युर्वि (येऽस्य वि) मनुनारदौ.

(२) **मिता.**२।१२२ ध्ये भ्रातृभा (त्रोर्भ्रातुर्भा) स्मरणम्, तृतीयार्थः; **दा.**१३०; **अप.**२।१२२ न्यजाश्च (न्याश्चैव); **व्यक.**

जनकस्य जननव्यापारासंभवात् । अतो यद्यविज्ञातगर्भायामेव स्त्रिया विभक्ताः पुत्रास्तद्गर्भजातो विभक्तेभ्य एष भ्रातृभ्यः पूर्वविभक्तद्रव्याण्येकीकृत्य पुनर्विभज्य स्वांशं गृह्णीयात् । न तु विभक्तजेन सह पितृद्रव्येऽप्यंशित्वं, पैतामहधने तु मातुर्विमातुश्च रजोनिवृत्तिमन्तरेण विभागस्याशास्त्रीयत्वेनानुपादेयत्वात् तत्र विभक्तजाविभक्तजाना सर्वेषामेवाशभागित्वमिति । अत एव यदि दैवात् पैतामहधनं विभज्य यथाशास्त्रं अंशद्वयं गृहीत्वा पिता पृथक् स्थितः तदापि पितामहसंबन्धिधनविभाग भ्रातृभ्यो विभक्तजोऽपि गृह्णीयात् । अत्रैव विषये 'पितृविभक्ताः पुत्रा विभागानन्तरोत्पन्नस्य विभागं दद्युरि'ति । विच.५८

विभक्तपितृधनव्यवहारे न विभक्तानां संबन्धः

पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितम् ।
विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः ॥

(१) इदं च पित्रुपात्तधनमात्रविषयम् । यदि तु पैतामहधनमपि भूम्यादिकं विभक्तं तदा तद्धनविभागं भ्रातृभ्य एव गृह्णीयात्, मातुर्निवृत्ते रजसि तद्विभागविधानात् । दा.१३१

(२) सर्वग्रहणं विभागात्पश्चादर्जिते पित्र्ये पूर्वजसुतानामगृहीतांशोऽस्तीति शङ्कानिवृत्त्यर्थम् । स्मृच.३०७

(३) विभागसमये गर्भस्थस्य विभागानन्तरमुत्पन्नस्य विभक्तैर्भागिभिः स्वस्वभागेभ्य आकृष्य भागपूरणं कर्तव्यम् । तदन्यस्य तु विभक्तजस्य पितृधनमात्रभागितेति मन्वादिमतमिति स्थितम् । विचि.२२९

यथा धने तथर्णेऽपि दानाधानक्रयेषु च ।
परस्परमनीशास्ते मुक्त्वाशौचोदकक्रियाः ॥

(१) अशौचोदकक्रियामात्रप्रदर्शनेन सुदूरमेव धनाधिकारं निरस्यति । दा.१३१

(२) एवं च पूर्वजास्तदितराश्चान्योन्यमसबन्धिजनवदस्वामिनः परस्परधने, किं तु ईषदत्र भेदोऽस्तीत्याह स एव– यथा धन इति । केवलमाशौचोदकक्रियादौ परस्परमीशा न धनादावित्यर्थः । आधानं आधिः । उक्तं ऋणादानादौ अनीशत्वं संसर्गाभावे सतीत्याह स एव 'संसृष्टौ यौ पुनः प्रीत्या तौ परस्परभागिनौ' इति ।
स्मृच.३०७

(३) विभक्तजस्य पित्र्यधनाभावे स्वांशेभ्यो भागकल्पनेति । व्यनि.

(४) ऋणमात्रसत्त्वे तु पूर्वविभक्तेभ्यो विभागग्रहणं विना तेन ऋणं नैव देयम् । व्यम.४६

वृद्धहारीतः

विभागानन्तरजातः अंशभाक्

[2]**विभक्तेष्वनुजो जातः स्ववर्णो यदि भागभाक् ॥**

लघुहारीतः

विभागानन्तरजातः अंशभाक्

[3]**ये जाता येऽपि चाजाता ये च गर्भे व्यवस्थिताः ।**
वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिदानं न सिध्यति ॥

---

(१) **मिता.**२।१२२ स्मरणम्; **दा.**१३१; **अप.**२।१२३, **व्यक.**१५२; **गौमि.**२८।२८; **स्मृच.**३०७; **विर.**५३९; **पमा.**४९९ मनुः; **मपा.**६५५; **रत्न.**१४४, १५९; **विचि.**२२९; **व्यनि.** मर्जि (मार्जि) भक्तज (भक्त त) स्मृत्यन्तरम्; **स्मृचि.**३५; **नृप्र.**३६ मनुः; **सवि.** ३७५ विष्णुः : ४३५ मर्जि (मार्जि); **वीमि.**२।१२२; **व्यप्र.**४६२ पूर्वजाः स्मृताः (तत्र पूर्वजाः) : ५४१; **व्यउ.**१५०-५१ मनुः; **व्यम.**४६ तत्स (यत्स); **विता.**३२२ व्यासः; **सेतु.**७५, ८१; **समु.** १४४ मर्जि (मार्जि); **विच.**१०२.

(१) **दा.**१३१; **व्यक.**१५२ याः (याम्); **स्मृच.**३०७ थर्णेऽपि (था चर्णे) याः (याम्); **विर.**५३९ऽपि (वा); **स्मृसा.** ६६ धानक्रयेषु च (धमनविक्रये) याः (याम्); **रत्न.**१४४, १५९ऽपि (च) याः (याम्); **विचि.**२२९; **व्यनि.** धानक (दानक्रि) याः (याम्) स्मृत्यन्तरम्; **दात.**१६८ क्त्वा (क्ता); **वीमि.**२।१२२ क्रये (क्रिये); **व्यप्र.**४६२, ५४१ऽपि (च) याः (याम्); **व्यम.**४६ऽपि (च) धा (दा); **विता.**३२२ थर्णेऽपि (र्णे च) धान (धाने) याः (याम्) व्यासः; **बाल.**२।१२२ मु (त्य) याः (याम्); **सेतु.**७५ क्त्वा (क्ता) : ८१ पू.; **विभ.**६६ ऽपि (च) पू.; **समु.**१४४ थर्णेऽपि (था चर्णे); **विच.**५८ धानक्रयेषु (दानक्रियासु): १०२ धा (दा).

(२) **बृहास्मृ.**७।२६०. (३) **लहास्मृ.**११५

विभागानन्तरागतविभागः

विष्णुः

[1]मौलाः सामन्ता अन्वयिनं विदुः ।
तस्यागतस्य दातव्या गोत्रजैर्महीं ।

बृहस्पतिः

[2]कृतेऽकृते विभागे वा ऋक्थी यत्र प्रवर्तते ।
सामान्यं चेद्भावयति तत्र भागहरस्तु सः ॥
[3]ऋणं लेख्यं गृहं क्षेत्रं यस्य पैतामहं भवेत् ।
चिरकालप्रोषितोऽपि भागभागागतस्तु सः ॥
[4]गोत्रसाधारणं त्यक्त्वा योऽन्यदेशं समाश्रितः ।
तद्भंशस्यागतस्यांशः प्रदातव्यो न संशयः ॥
[5]तृतीयः पञ्चमश्चैव सप्तमो वापि यो भवेत् ।
जन्मनामपरिज्ञाने लभेतांशं क्रमागतम् ॥

[1]यं परम्परया मौलाः सामन्ताः स्वामिनं विदुः ।
तदन्वयस्यागतस्य दातव्या गोत्रजैर्मही ॥

(१) तदनेन चिरप्रोषितवंश्येन समन्ताद्वासिभिर्मौलैरात्मज्ञापनपूर्वकं भागग्रहणं कार्यम् । दा.१३३

(२) यत्र पुनर्विभक्तागतादौ पुरुषदोषकृतो विभागात्पश्चादागमः तत्र विभक्तागतस्य ह्रासपक्ष एव न समानभागपक्षान्तरोन्मेषः । अत एव तत्र भागह्रासमेवाह बृहस्पतिः 'गोत्रसाधारणमि'ति । गोत्रसाधारणं त्यक्त्वा सर्वसहवासिनिवासदेशमुत्सृज्य योऽत्यन्तदूरदेशनिवासी तस्य सद्भावाज्ञानतः शेषैरेव विभज्य सर्वस्मिन्धने गृहीते पश्चादागतस्य तस्याशोऽर्धतो विभक्तद्रव्यार्धादुद्धृत्य दातव्य इत्यर्थः । अत्र इतरेषा विभक्तागतसद्भावाज्ञानं तद्दोष इति पक्षान्तरोन्मेषः । अत एव न संशय इत्युक्तम् । एवमतिदीर्घकालप्रोषितस्य सद्भावाज्ञानतः कृते विभागे सत्यागतस्येत्याह स एव 'ऋणं लेख्यमि'ति । भागभाक् अर्धभागित्यर्थः । आगतो विभागादूर्ध्वमागतः । पौत्रादिस्तु विभक्तागतः क्रमायातद्रव्यमात्रेऽशभागित्याह स एव 'तृतीयः पञ्चमश्चैवे'ति । कस्यचिद्विभक्तागतस्य क्रमागतेष्वपि भूमात्राशो देय इत्याह स एव—यमिति । आगतस्य विभागादूर्ध्वमिति शेषः । विभागादूर्ध्वमागतस्य पूर्वमागतस्य वा स्वभागं ग्रहीतुं प्रवृत्तस्य दृष्टादृष्टप्रमाणेनादौ तावदात्मनः परायत्ते द्रव्ये स्वाम्यं साध-

---

(१) सवि ३७७.

(२) **दा.**१३२ वर्त (वृत्तय) द्भावयति (द्भवेद् यत्तु); **व्यक.** १५२ तत्र (ऋक्थ); **स्मृच.**२७६ विभागे वा (वा विभागे) व्यासः : ३०८ विभागे वा (वा विभागे) द्भावयति (द्भवेद्यत्तु); **विर.**५४०; **रत्न.**१४५; **विता.**३३१ वा (च): ३३७; **सेतु.८१** चेद्भावयति (च भवेद्यत्तु); **समु.**१४४ स्मृच-(२७६) वत्; **विच.**९३ चेद्भावयति (तु भवेद्यत्तु).

(३) **दा.**१३२-३ लेख्य गृहं क्षेत्रं (क्षेत्र गृह लेख्यं); **व्यक.**१६२ लप्रो (लात्प्रो); **स्मृच.**३०८; **विर.**५४०; **रत्न.** १४५; **सवि.**३७६-७ काल (काल); **व्यनि.** भागभागागत (तत्र भागहर); **व्यम.**४५ऽपि (वा); **विता.**३३७; **सेतु.** ८१; **समु.**१४४; **विच.**९३.

(४) **दा.**१३३; **व्यक.**१५२; **स्मृच.**३०७ तद्भंशस्या (अर्थशस्त्वा); **विर.**५४०; **स्मृसा.**५८ गोत्र (क्षेत्रं) कात्यायनः : ८२ द्वश (द्वश्य); **रत्न.**१४५; **विचि.**२०५-६ गोत्र (क्षेत्र) त्यक्त्वा (कृत्वा) कात्यायनः; **दात.**१८०; **सवि.** ३७६ ण (णान्) तद्भंशस्या (अर्धशस्त्वा); **चन्द्र.**७४ गोत्र (क्षेत्रं) कात्यायनः; **व्यम.**४५ न्य (न्य); **विता.**३३७ त्र (त्रं) न्य (न्यं); **सेतु.** ८१; **समु.**१४४ न्य (न्य) शेष स्मृचवत्; **विच.** ९३.

(५) **दा.**१३३; **व्यक.**१५२ वापि यो (यदि वा); **स्मृच.** ३०८ वापि यो (योऽपि वा) शं (शः) गतम् (गते); **विर.** ५४०; **स्मृसा.**५७ मश्चैव सप्तमो वापि (मो वापि सप्तमश्चैव) कात्यायनः : ८२; **रत्न.**१४१ : १४५ मश्चैव (मः षष्ठः); **विचि.**२०६ मश्चैव (मो वापि) कात्यायनः; **व्यनि.** विचिवत्, पू.; **दात.**१८०; **सवि.**३७७ वापि यो (योऽपि वा) गतम् (गते); **चन्द्र.**७४ पि (थ) कात्यायनः; **व्यम.**४५ मो वा (मश्चा); **विता.**३१६ : ३३७ मश्चैव (मः षष्ठः); **सेतु.८१-२** विचिवत्; **समु.**१४४ गतम् (गते) शेष विचिवत्; **विच.९३.**

(१) **दा.**१३३; **व्यक.**१५२ सामन्ताः (सापत्नाः) दन्वय (द्वंश); **स्मृच.**३०८; **विर.**५४१; **स्मृसा.८२; रत्न.१४५; विचि.**२०६ क्रमेण कात्यायनः; **व्यनि.** उक्त.; **दात.१८०; विता.**१३८; **सेतु.८२; समु.**१४४; **विच.९३.**

यन् भागग्रहणाधिकारी भवति नान्यथेत्याह स एव—'कृतेऽकृते वे'ति। स्मृच.३०७-८

(३) भावयति विभावयति ममाप्यत्रांश इति। विर.५४०

यस्त्वाचतुर्थादविभक्तविभक्तानामित्यादि देवलोक्तनियमः, स सहवासादौ, अय तु दूरदुर्गमवासादाविति विरोधः। *विर.५४१

(४) यद्धनं भ्रातृव्यतत्पुत्रादिः साधारणमिद द्रव्य ममाप्यत्राशोऽस्तीति साधयति तद्धनेऽशाश तद्विभागे कृतेऽपि विभक्तेभ्य उद्धृत्य स लभते। तथा च बृहस्पतिः—कृत इति। विभागसमये देशान्तरस्थिते भ्रातृतत्पुत्रादिः पश्चाच्चिरेणागतोऽपि विभक्तेभ्यः स्वांशं लभते इत्याह स एव—ऋणमिति। रत्न.१४५

(५) गोत्रसाधारणं, द्रव्यमिति शेषः। दात.१८०

(६) केचिदत्र क्रमागतस्य भूमात्रस्यांशो नान्यस्येत्याहुः। यथाऽऽह विष्णुः— 'मौलाः सामन्ता अन्वयिनं विदुस्तस्यागतस्य दातव्या गोत्रजैर्मही' इति। क्रमागतद्रव्योपलक्षकमित्यपरे। *सधि.३७७

(७) यत्तु बृहस्पतिः—तृतीयः पञ्चमश्चैवेति। तद् दूरदेशस्थस्थावरपरमिति मदनरत्ने। अन्ये नैतन्मन्यन्ते। यद्वा देयऋणपरं वर्णक्रमेण विजातीयपरमिदमिति तत्त्वम् (!)। विता.३१६

* स्मृसा. विरगतम्।

* शेष स्मृचगतम्।

विभागदोषे पुनर्विभागादिविधिः

वेदाः

भागानर्हः

एव भ्रातृव्यं निर्भजति तस्माद्भागं निर्भजन्ति।

तस्याः पृथिव्या एतावतः प्रदेशादनेन स्तम्बयजुर्हरणेन भ्रातृव्यं निःसारितवानेव भवति। यस्मादत्र भ्रातृव्यो भागार्थीति कृत्वा निःसार्यते तस्माल्लोकेऽभागं भागाभिलाषरहितं(तम)विरोधित्वान्निः(न्र निः)सारयन्ति। तैसा.

पर्वे भागार्हा भागिनः कर्तव्याः

मनोर्वै दश जाया आसन्। दशपुत्रा नवपुत्राष्टपुत्रा सप्तपुत्रा षट्पुत्रा पञ्चपुत्रा चतुष्पुत्रा त्रिपुत्रा द्विपुत्रैकपुत्रा। ये नवासꣳस्तानेक उपसमक्रामद्योऽष्टौ तान्द्वौ ये सप्त तासꣳस्त्रयो ये षट् तासꣳश्चत्वारोऽथ वै पञ्चैव पञ्चासꣳस्ता इमाः पञ्च दशत इमान्पञ्च निरभजन्यदेव किंच मनोः स्वमासीत्तस्मात्ते वै मनुमेवोपाधावन्मना अनाथन्त। तेभ्यः एताः समिधः प्रायच्छत्ताभिर्वै ते तान्निरदहꣳस्ताभिरेनान्पराभावयन्परा पाप्मानं भ्रातृव्यं भावयति य एवꣳ विद्वानेताः समिध आदधाति।

भागार्हो भागी कर्तव्य एव, अन्यथा दोषः

यो वै भागिनं भागान्नुदते चयते वैनं स यदि वैनं न चयतेऽथ पुत्रमथ पौत्रं चयते त्वेवैनमिति॥

(१) यो भागिनं भागार्हं भागान्नुदते भागादपाकरोति भाग तस्मै न प्रयच्छति स भागान्नुन्न एनं नोत्तारं चयते नाशयति दोषिणं करोति। यदि तं न नाशयति तदा तस्य पुत्रं पौत्रं वा नाशयतीति ज्येष्ठविशेषमन्तरेणैव साधारणद्रव्यापहारिणो दोषः श्रुतः। अथ साधारणं द्रव्यमात्मनोऽपि स्वं भवतीति स्वबुद्ध्या गृह्यमाणं न दोषमावहतीति स्मृतम्। तदसत्। स्वबुद्ध्या गृहीतेऽप्यवर्जनीयतया परस्वमपि गृहीतमेवेति निषेधानुप्रवेशादोषमावहत्येव। यथा मौद्रे चरौ विपन्ने सदृशतया माषेषु गृह्यमाणेषु 'अयज्ञिया वै माषाः' इति निषेधो न प्रविशति मुद्गावयवबुद्ध्या गृह्यमाणत्वादिति पूर्वपक्षिणोक्ते मुद्गावयवेषु गृह्यमाणेष्ववर्जनीयतया

(१) तैसं.२।६।४।१-२. (२) मैसं.१।५।८.

(१) ऐब्रा.६।७; मिता.२।१२६ गौतमः.

माषावयवा अपि गृह्यन्त एवेति निषेधः प्रविशत्येवेति राद्धान्तिनोक्तम् । तस्माद्वचनतो न्यायतश्च साधारणद्रव्यापहारे दोषोऽस्त्येवेति सिद्धम् । मिता.२।१२६

(२) यः पुमान्भागिन भागार्ह सन्तमन्यं पुरुषं तदीयाद्भागान्नुदते नाशयत्येनं विनाशयितारं स नष्टभागः संश्रयते वैनं च्यावयत्येव । यदि वा यदाकदाचिद्विनाशयितुः प्राबल्ये सति तदानीमेनं न चयते न च्यावयति । अथापि कालान्तरे तदीयं पुत्रं पितृद्वेषेण विनाशयति । तदाप्यशक्तौ पौत्र वा विनाशयति । किं बहुना भागभ्रष्टो मनसि द्वेष गृहीत्वा स्वविरोधिनमेन भ्रंशयितार यदा कदाचित्केनापि द्वारेण चयते त्वेव विनाशयत्येव । ऐव्रासा.

कौटिलीयमर्थशास्त्रम्

ससाक्षिको विभागः कर्तव्यः । विभागदोषे पुनर्विभागः ।

एतावानर्थः सामान्यस्तस्यैतावान् प्रत्यंशः इत्यनुभाष्य ब्रुवन् साक्षिषु विभागं कारयेत् । दुर्विभक्तमन्योन्यापहृतमन्तर्हितमविज्ञातोत्पन्नं वा पुनर्विभजेरन् ।

अपुत्रादिकधनस्य दायादविभागमाह—एतावानित्यादि । एतावद् धनं सामान्यमस्ति तत्रैतावत् प्रतिव्यक्ति अंश उत्पद्यत इति अनुभाष्यानूद्य ब्रुवन् प्रकट कीर्तयन्, साक्षिसंनिधौ विभाग कारयेत् । दुर्विभक्तमिति । विषमविभक्त, अन्योन्यापहृत परस्परगुप्तं, अन्तर्हित देशकालान्तरितं, अविज्ञातोत्पन्नं वा धन, पुनर्विभजेरन् । श्रीमू.

मनुः

विभागानन्तरोपलब्धस्य समो विभागः

ऋणे धने च सर्वस्मिन्प्रविभक्ते यथाविधि ।
पश्चाद्दृश्येत यत्किञ्चित्तत्सर्वं समतां नयेत् ॥

(१) अविज्ञानान्न्यूनमधिक वा विभक्ते परतो ज्ञातं समांशकीकर्तव्यम् । किं च विभागोत्तरकालं लब्धे नास्ति ज्येष्ठस्योद्धार इति । मेधा.

(२) पूर्व यथा यस्य विभागकल्पना कृता तत्समानैव कार्या, न पुनरपहर्तुरपहर्तृतया अल्पभागो दातव्यो न दातव्य एव वेति समता नयेदित्यस्यार्थः । न पुनस्तत्र द्रव्ये सर्वेषा समभागार्थ वचनमिदं विंशोद्धारादिबाधे हेत्वभावात् ब्राह्मणक्षत्रियादीना च समभागापत्तेः । दा.२२१

(३) पश्चाद्दृश्येत पूर्वनिह्नुतं यत्किञ्चिदृणं वा तत्सर्वं सम विभाज्य न तु निह्नवकर्तुरपराधाद्भागाभावः । ऋण इत्यभिधानेन च ऋणमप्यर्थविभागकाले अर्थाभावे वा ऋणमात्रमपि विभजनीयम् । तत्र च ज्येष्ठत्वादिना विशेषो नास्तीत्यर्थात्कथितम् । मवि.

(४) विभागकाले यद्दृश्यते ऋणं वा धनं वा सर्वस्मिन्यथाविधि 'पितृरिक्थहराः पुत्राः सर्व एव समांशिनः । विद्याकर्मयुतस्तेषामधिकं लब्धुमर्हति ॥' इत्यादिविध्यनतिक्रमेण विभक्ते पश्चात्कालान्तरे यत्किञ्चिदृणं प्रोषितोत्तमर्णस्य यत्किञ्चिद्धनं प्रोषितनिक्षेपधारकादिसमोपस्थ तयोः समागमादिवशाद्दृश्यते तत्सर्व समतां नयेत् । न पुनर्विद्याकर्मयुतेऽधिकधनदानमित्यर्थः । 'पश्चाद्दृश्येते'ति समताभिधानात्पूर्वदृष्टे ऋणे धने वा विषमताऽस्तीत्यवगम्यते । स्मृच.३०८

(५) ऋणे पित्रादिधार्यमाणे धने च तदीये सर्वस्मिन्यथाशास्त्रं विभक्ते सति पश्चाद्यत्किञ्चित्पैतृकमृणं धनं वा विभागकालेऽज्ञातमुपलभ्येत तत्सर्व सम कृत्वा विभजनीय, न तु शोध्यं ग्राह्यं न वा ज्येष्ठस्योद्धारो देयः । ममु.

(६) अपहृतद्रव्यवच्छास्त्रोक्तानतिक्रमेण विषमभागतया विभक्तमपि समता नयेत् । पमा.५६६

(७) विभागकाले यत्केनचिद्व्ययित्वा स्थापितं विभागानन्तरं ज्ञात तत्सर्वैः समतया विभज्य ग्राह्यम् । तथा च मनुः—ऋण इति । रत्न.१४९

(८) यदि पित्रादिकृतमादेयं देय वा ऋणमस्ति तदा कथं विभागस्तत्राह—ऋण इति । अज्ञाते ऋणे देये वा सति सर्वस्मिन् धने च विभक्ते यदि पश्चादृणं परिज्ञातं सर्वं समतामुपशमता नयेच्छोधयेत् । सर्वमधमर्णेभ्यः प्राप्तमृण समं कृत्वा नयेदिति । दुहितरि धनान्वयेऽपि न ऋणान्वयः । मच.

---

(१) कौ.३।५.

(२) मस्मृ.९।२१८; दा.२२१; व्यक.१५०; स्मृच.३०८; विर.५२५; पमा.५६६; दीक.४४; रत्न.१४९; स्मृचि.१५; नृप्र.३८; सवि.४३८; व्यप्र.५५४; सेतु.८४-५; समु.१४५; विच.९४.

विभागोत्तरलब्धसाधारणधनं पुनर्विभजनीयम्

[1]**विभागे तु कृते किञ्चित्सामान्यं यत्र दृश्यते ।**
नासौ विभागो विज्ञेयः कर्तव्यः पुनरेव हि ॥

तद्विभक्तैर्विभक्तद्रव्येष्वाव्ययादिकरणात्प्रागेव दृष्टविषये द्रष्टव्यम् । अन्यथा पूर्वोक्तसर्ववचन ('अन्योन्यापहृतमि'त्यादि) विरोधापत्तेः । पुनर्विभागविधानस्य प्रयोजन पश्चाद्दृष्टाशेऽप्युद्धारादिकरणम् । स्मृच.३०९

याज्ञवल्क्यः

विभागानन्तरोपलब्धापहृतद्रव्यविभागः समः कर्तव्यः

[2]**अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते ।**
तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः ॥

(१) असमाशभाक्तवेऽपि तु–अन्योन्यापहृतं द्रव्यं विभक्तैर्यत्र दृश्यते । तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः ॥ स्थितिवचनं निर्विचिकित्सं समविभागप्रतिपत्त्यर्थम् । विश्व.२।१३०

(२) अथ सर्वविभागशेषं किञ्चिदुच्यते–अन्योन्येति । परस्परापहृतं समुदायद्रव्य विभागकाले चाज्ञातं विभक्ते पितृधने यद्दृश्यते तत्समैरंशैर्विभजेरन्नित्येवं स्थितिः शास्त्रमर्यादा । अत्र समैरंशैरिति वदतोद्धारविभागो निषिद्धः । विभजेरन्निति वदता येन दृश्यते तेनैव न ग्राह्यमिति दर्शितम् । एवं च वचनस्यार्थवत्त्वान्न समुदायद्रव्यापहारे दोषाभावपरत्वम् । तथा चाविशेषेणैव दोषः श्रूयते । गौतमः—'यो वै भागिनं भागान्नुदते चयते चैन स यदि वैनं न चयतेऽथ पुत्रमथ पौत्र चयत' इति । यो भागिनं भागार्हं भागान्नुदते भागादपाकरोति भाग तस्मै न प्रयच्छति स भागान्नुन्न एनं नोत्तारं चयते नाशयति दोषिण करोति । यदि त न नाशयति तदा तस्य पुत्र पौत्र वा नाशयतीति ज्येष्ठविशेषमन्तरेणैव साधारणद्रव्यापहारिणो दोषः श्रुतः । अथ साधारण द्रव्यमात्मनोऽपि स्वं भवतीति स्वबुद्धया गृह्यमाणं न दोषमावहतीति स्मृतम् । तदसत् । स्वबुद्धया गृहीतेऽप्यवर्जनीयतया परस्यमपि गृहीतमेवेति निषेधानुप्रवेशाद्दोषमावहत्येव । यथा मौद्गे चरौ विपन्ने सदृशतया माषेषु गृह्यमाणेषु 'अयज्ञिया वै माषाः' इति निषेधो न प्रविशति, मुद्गावयवबुद्धया गृह्यमाणत्वादिति पूर्वपक्षिणोक्ते मुद्गावयवेषु गृह्यमाणेष्ववर्जनीयतया माषावयवा अपि गृह्यन्त एवेति निषेधः प्रविशत्येवेति राद्धान्तिनोक्तम् । तस्माद्वचनतो न्यायतश्च साधारणद्रव्यापहारे दोषोऽस्त्येवेति सिद्धम् । *मिता.

(३) अत्र च साधारणधने परधनमप्यस्तीति तन्निह्नवे स्तेन एव भवति किल्बिषी चेति ये मन्यन्ते तान् प्रत्युच्यते, य एव हि परस्येदमिति विशेष जानानः परस्वे स्वत्वहेतुमन्तरेणैव स्वत्वमारोपयति स स्तेन इति लोकप्रसिद्धोऽर्थः । न चात्रेद परकीयं इदं वा ममेति विवेक्तुं शक्नोति द्रव्यस्याविभक्तत्वात् । यथा यदेव हि ममेदमिति विशेष जानानः परस्वत्वापत्तये स्वामी त्यजति, परश्च विशेषेणेद ममेति स्वत्व प्रत्येति तत्रैव दाननिष्पत्तिः, न च साधारणधने तथा संभवतीति साधारणधनमदेयमुक्त, तथा स्तेयमपि नैतन्मम धन परस्येदमिति जानत एव भवतीति न साधारणधनापहारे स्तेयनिष्पत्तिः । अपहारपद तु संगोपनाभिप्रायं, न हि संगोपन स्तेयमुक्तं असगुप्तग्रहणेऽपि स्तेयपदप्रयोगप्रदर्शनात् । तथा च कात्यायनः—'प्रच्छन्न वा प्रकाशं वा निशायामथ वा दिवा । यत् परद्रव्यहरणं स्तेयं तत् परिकीर्तितम् ॥' अत एव राज्ञा बलात् न दाप्य इति पूर्वमुक्तं, चौरत्वे तु 'चौर प्रदाप्यापहृतं घातयेद्विविधैर्वधैरि'ति (याज्ञ्स्मृ.२।२९८) वचनादास्ता सामादिना दापन, घातनमपि कार्यम् । एतच्च मुनिभिरपहर्तुरपि विभागदानप्रतिपादनादुन्नीयते । तदुक्तं विश्वरूपेणापि अतः तस्करदोषो नास्तीति वचनारम्भसामर्थ्यात् स्तेनधात्वर्थानिष्पत्तेरित्यभिप्रायः । अत एव प्रायश्चित्तकाण्डे जितेन्द्रियेण भणित, यदि स्वर्णमेव परकीय लौहा-

---

(१) **स्मृच.**३०९; **पमा.**५६६; **व्यम.**५८ यत्र (यत्तु); **समु.**१४५.

(२) **याज्ञ्स्मृ.**२।१२६; **अपु.**२५६।१३; **विश्व.**२।१३० प (पा) क्ते यत्तु (क्तैर्यत्र), **मिता.**; **दा.**२२१ क्ते यत्तु (क्तैर्यत्र); **अप.** यत्तु (यदि); **स्मृच.**३०८; **विर.**५४५ दावत्; **पमा.**५६५; **मपा.** ६८८ अपवत्; **रत्न.**१४९; **विचि.**२२४ यत्तु (यत्र); **नृप्र.**३८, **सवि.**४३८; **दानि.**५ नस्ते (नस्तैः), **वीमि.**; **व्यप्र.**५५४-५; **व्यउ.**१४७ दानिवत्; **व्यम.**६६, **विता.**३११ अन्योन्या (अन्येना) : ४७१; **राकौ.**४५३; **समु.**१४५.

* पमा., मपा. मितागतम् । व्यप्र. मितावद्भावः । व्यप्र., व्यम., विता. अपहारदोषप्रतिपादनं मितावत् ।

दिबुद्ध्या गृह्णाति, असुवर्णं सुवर्णबुद्ध्या, आत्मीयसदृशं परकीयमेव आत्मीयबुद्ध्या गृह्णाति सर्वत्र नापहारनिष्पत्तिः सर्वत्र यथावस्तु परकीयबुद्धेरभावात्, तद्वदत्रापि समान, विभागात् पूर्वं तद्व्यङ्ग्यैकदेशविशेषगतस्वत्वस्यापरिज्ञानात् अतो नात्र स्तेयनिष्पत्तिः। सत्यपि वा स्तेयेऽपहर्तुरपि विभागवचनदर्शनात् न स्तेयदोषः, अन्यथा सुवर्णादिनिह्नवे पतितस्य भागो न स्यात्। अथ पातकहेतुसुवर्णापहारेऽपि स्तेनस्य भाग इति विशेषवचनाभावात् द्रव्यान्तरस्तेयविषयो भागविधिर्वर्ण्यते, एवं तर्हि सुवर्णादिस्तेयनिषेध एव किमिति असाधारणपरकीयमात्रद्रव्यगोचरो न व्यवस्थाप्यते, तथापि किं विनिगमना प्रमाणमिति चेत् उच्यते, परद्रव्यहरणं स्तेयमिति परशब्दात् आत्मीयत्वव्यवच्छेदेनैव परकीयत्वस्यावगमात् साधारणासाधारणयोश्चासाधारणस्यैव शीघ्रप्रतीतेः। यथेष्टिपूर्वकमेवादः पौर्णमास हविरिति अग्नीषोमीयपुरोडाशस्यैवोत्कर्षः नोपांशुयाजीयाज्यस्य अग्नीषोमीयानग्नीषोमीयस्य साधारणत्वात्। अत एव लोकेऽपि नैवविधविषये क्वचिद्विनिगमनादिकं दृश्यते। अतो यद् बालकवचनं, यथा मुद्रापचारे माषप्रतिनिधौ मुद्राना माषाणा च यज्ञसंबन्धे 'अयज्ञिया वै माषा' इति माषा निषिद्धाः, तथा आत्मीयानात्मीयहरणेऽपि अनात्मीयापहारो निषिद्धः। तद्बालकवचनमेव पूर्वव्याहृतस्य स्तेयपदार्थस्यैवाभावात् माषगतमुद्रावयवोपादानेऽपि माषाणा यज्ञसंबन्धो नास्तीति न शक्यते वक्तुं माषामिश्रितानामेव यज्ञसबन्धप्रतीतेः। *दा.२२२-८

(४) एतावत्यर्थे प्रमिते वचनमिदमुपपन्नमिति नापहर्तुर्दोषाभावं प्रति प्रमाणतामुपैति। अथोच्यते—विभक्तारो ब्राह्मणा, विभजनीयं सुवर्ण, ततश्च ब्राह्मणसुवर्णापहारेऽपहर्तुः पातित्ये सति तत्पुनस्ते समैरंशैर्विभजेरन्निति वचनमनुपपन्नं स्यात्। पतितस्यानंशत्वादिति। तन्न। द्रव्यान्तरविषयत्वेनापि वचनोपपत्तेः। न च सामान्यविषयत्वे वचनस्य विशेषोपसंहारो विरुध्यते। भवतु वा ब्राह्मणसुवर्णविषयमप्येतद्वाक्यं, तथाऽपि नापहर्तुर्दोषाभावं गमयति, प्रायश्चित्तेन व्यवहार्यस्य सतः समाशविभागविधानोपपत्तेः। अथ वाऽपहर्तृव्यतिरिक्तविषयं तत्पुनस्ते समैरंशैरित्यस्तु वचनम्। न च वाच्यं प्राग्विभागात्तन्न कस्यापीति, यत उक्तं—स्वमेव साधारणं सद्विभज्यते न विभागात्सत्त्वमुत्पद्यत इति। अप.

(५) अनेन वचनेनैव समुदितद्रव्यापहारे दायादाना न दोष इति ज्ञायत इति भारुच्यपरार्कसोमेश्वरादय आहुः। सवि.४३८

अत्र भारुच्यादिमतमेव सम्यक्। मनुस्मृतिश्रुत्योर्भागमात्रप्रदानविषयत्वादवलुप्तविभागविषयत्वा(भावा)दिति। सवि.४३९

(६) समैः पूर्वजातविभागसदृशैः। वीमि.

बृहस्पतिः

अपहृतसाधारणद्रव्यसाधनम्

साधारणऋणन्यासनिह्नवे छद्मना क्रियाम्।
पार्श्वहानिकरीं कृत्वा बलान्नैव प्रदापयेत्॥
मायाविनो धृतधनाः क्रूरा लुब्धाश्च ये नराः।
संप्रीत्या साधनीयास्ते स्वार्थहान्या छलेन वा॥

साधारणेति। साधारणऋणन्यासनिह्नवे केनचित्कृते छद्मना पार्श्वहानिकरीं निह्नवकर्तृस्वत्वहानिकरीं क्रिया कृत्वा तन्निह्नुतमपहारकं दापयेन्न तु बलादित्यर्थः। विर.५२७

कात्यायनः

प्रच्छादितापहृतनष्टहृतसाधारणधनविभागः समः विभागानन्तरापलम्भे

प्रच्छादितं तु यद्येन पुनरासाद्य तत्समम्।
भजेरन् भ्रातृभिः सार्धमभावे हि पितुः सुताः॥

(१) असम्यग्विभक्तस्यापि पुनर्विभाग दर्शयति। 'सकृदंशो निपतती'ति तु सम्यग्विभागविषयम्। दा.२२१

(१) **व्यक.**१५० बलान्नैव (पश्चाच्छेष) क्रूरा (क्रीडा) **विर.**५२६-७.

(२) **दा.**२२१ साध्व (गत्य) हि पितुः (ऽपि हि तत्); **अप.**२।१२६ येन (दृढ्यर्थे); **व्यक.**१४९ साध्व (गत्य), **स्मृच.**३०८; **विर.**५२६ साध्व (गत्य) हि (तु); **स्मृसा.**५८ साध्व तत्समम् (गत्य सवदेत्) हि पितुः (ऽपि च तत्); **रत्न.**१४९ सार्ध (सर्व); **विचि.**२०५ दावत्; **स्मृचि.**३५ विरवत्; **दात.**१८१ विरवत्; **सवि.**४३८ तं तु (तं च); **चन्द्र.**७५ (प्रच्छादित च यद्येन दुर्विभक्तं च यद्भवेत्) पू.; **सेतु.**८५ **विरवत्; समु.**१४५ अपवत्.

* विर., विचि. इत्यधिकं दागतम्।

(२) एवं विभागकाले यद्वस्तु येनकेनचिद्व्यञ्जकेन परकीयमिति बुद्ध्युत्पादनादिना प्रच्छादितं विभागोत्तरकाले विचार्यमाणे स्वकीयमेवेति ज्ञात चेत्तत्समता नयेदित्याह कात्यायनः—प्रच्छादितं तु यत्नेन इति। पितुरभावेऽपि सर्वे सुता एव तदासादितं विभजेरन्नित्यर्थः। स्मृच.३०८

अन्योन्यापहृतं द्रव्यं दुर्विभक्तं च यद्भवेत्।
पश्चात्प्राप्तं विभज्येत समभागेन तद्भृगुः॥

(१) पश्चात् प्राप्तमिति न पुनः पूर्वविभक्तमपि विभजनीयमित्यर्थः। दा.२२१

(२) दुर्विभक्तं शास्त्रोक्तप्रकारान्तरेण विषमतया विभक्तं मिथोऽपहृतं दुर्विभक्तवदन्यापहृत नष्टं लब्धं च समतां नयेत्। स्मृच.३०९

(३) अन्योन्यापहृतं यच्चेति दृष्टान्तार्थं पुनरुपादानम्। अत्र समभागविधानपूर्वं विषमविभागकरणेऽप्यस्मिन् लब्धे समभाग एवेति नियमार्थम्। रत्न.१४९

(४) पश्चात्प्राप्तमित्युपादानात् विभक्ते सति लौकिकप्रमाणेन यस्यकस्यचिन्निह्नुतस्य प्रदर्शन विनापि न पुनर्विभागो न वा तत्र दिव्यं विना क्वचिदप्यनिश्चितद्रव्यत्वेन सम्यग्विभागो न स्यात्। दात.१८१

(५) एवमन्यापहृतदुर्विभक्तनष्टमिथोपहृतदुर्लब्धाना विभागानन्तरं जायमानाना भ्रातृभिः समाशेनैव विभागः कर्तव्य इति शास्त्रमर्यादा। सवि.४३९

[२]विभक्तेनैव यत्प्राप्तं धनं तस्यैव तद्भवेत्।
हृतं नष्टं च यल्लब्धं प्रागुक्तं च पुनर्भजेत्॥

(१) प्रागुक्तमिति मिथोपहृतं दुर्विभक्तं च। दृष्टान्तार्थमत्र पुनरुक्तोपादानम्। एवं च प्रागुक्तवद्विभजेदित्यर्थः। तेन परापहृतस्य नष्टलब्धस्य च सममेव विभजनमनेनोक्तमिति मन्तव्यम्। एवं मन्वादिभिर्विभागात्पश्चाद्दृश्यमानस्यैव साधारणद्रव्यस्य पुनर्विभागविधानात्पूर्वोक्तकृतविभागः सम्यक् जात इति गम्यते। अनेन विभागादूर्ध्वं किञ्चित्सामान्यद्रव्यदर्शनेऽपि पुरुषाणा विभक्तत्वं पूर्वमेव संपन्नं मन्तव्यम्। स्मृच.३०९

(२) हृतं परेणापहृतम्। नष्टमदृश्यमानं यल्लब्धं, प्रागुक्तं पैतामहम्। विर.५२६

[३]बन्धुनापहृतं द्रव्यं बलान्नैव प्रदापयेत्।
बन्धूनामविभक्तानां भोगं नैव प्रदापयेत्॥

(१) सामादिना दाप्यो न बलात्, अविभक्तेन तु यदधिकं भुक्तं तदसौ न दाप्यः। दा.२२२

(२) बलान्नैव प्रदापयेदित्यनेन छलादिना तद्ग्राह्यमित्यभिप्रेतम्। विर.५२६

(३) भोगं गृहसाधारणधनभोग, भोक्ता न दाप्य इत्यर्थः। विचि.२२४

(४) राज्ञे तु भागिभिर्न निवेदनीयं, राज्ञे निवेदितमपि तेन सामादिनैव दापनीयमिति प्रीत्यविच्छेदादिदृष्टप्रयोजनकमेव। अविभागकालेऽनेन बहु भुक्तमित्यपि न वक्तव्यम्। भुक्तमपि राज्ञा न ग्राह्यमित्याशयेनाह स एव—बन्धूनामिति। न हि न्यूनाधिकभोगो वारयितुं शक्योऽवर्जनीयत्वादिति भावः। व्यप्र.५५६

---

(१) **दा.**२२१; **अप.**२।१२६ पू.; **व्यक.**१४९ पश्चात (यथा); **स्मृच.**३०९; **विर.**५२६ द्रव्य (यच्च); **स्मृसा.**५८; **पमा.**५६६; **रत्न.**१४९; **विचि.**२०५: २२४ दु (नि); **स्मृचि.**३५ पू.; **दात.**१८१; **सवि.**४३९; **चन्द्र.**७५ विभज्येत (च विभजेत्) उत्त. : ८९ विरवत्; **सेतु.**८५ भृगुः; **समु.**१४५; **विच.**९५.

(२) **अप.**२।१२६ उत्त.; **व्यक.**१४९; **स्मृच.**३०९ यल्ल (तल्ल); **विर.**५२६; **स्मृचि.**३५ गुप्तं ..जेत् (क्तं च न पुनर्हरेत्) उत्त.; **सवि.**४३९ नष्टं च यल्लब्धं (लब्धं च यन्नष्टं); **चन्द्र.**८९ धनं तस्यैव तत् (तत्तस्यैव धनं) प्रागुक्तं च (पैतामहं); **दानि.**५ धनं तस्यैव तत् (तत्तस्यैव धनं) नारदः; **व्यम.**५८ दानिवत्, नारदः; **समु.**१४५.

(१) **दा.**२२२; **व्यक.**१५० नाप (वर्गं) दाप (वर्तं) क्रमेण मनुः; **विर.**५२६; **विचि.**२२४ उत्त.; **दात.**१६४ उत्त.:१८३; **चन्द्र.**९० उत्त.; **व्यप्र.**४३१ उत्त. : ५५६ प्रदाप (निवर्तं); **सेतु.**७८ उत्त., नारदः : ८६; **विभ.**९२; **विच.**३० उत्त. : ७५ उत्त., नारदः : ९६.

विभागसंदेहे निर्णयविधिः

विष्णुः

प्रमाणसंदेहे पुनर्विभागः

[1]सर्वाभावेऽपि पुनर्विभागः कर्तव्यः ।

सर्वेषां लिखितादिज्ञापकहेतूनां कारकहेतूनां चाभावे । विभागशब्दः पत्नीविभागवदसमर्थेषु भ्रातृषु दरिद्रेषु स्वरुच्या यत्किञ्चिद्दातव्यमित्येवंपरः इति सोमेश्वरादय आहुः । तन्न । सर्वाभावे दिव्यानवतारात् स्वरुचिपक्षस्यानवताराच्छुद्ध एव विभागः कर्तव्य इत्याह भारुचिः । अयमेव पक्षः सम्यक् । केचित्तु सोमेश्वरादीनामभिसंधिमेवमाहुः—व्यपगते विभागसंदेहे विभागस्य सिद्धत्वे भ्रातरः पोष्या इति यत्किञ्चिद्देयमित्याहुरिति सर्वमनवद्यम् । सवि.४४६

विभागहेतवः

[2]क्रयविक्रयदानग्रहणप्रातिभाव्यसाक्षित्वसंभूयकारित्वनिध्याधानादिकं परस्परकृतं विभागहेतुः ।

शंखः शंखलिखितौ च

विभागसंदेहे साक्षित्वाधिकारनिर्णयः

[3]गोत्रभागविभागार्थे संदेहे समुपस्थिते ।
गोत्रजैश्चापरिज्ञाते कुलं साक्षित्वमर्हति ॥

(१) गोत्रजैर्ज्ञातिभिरित्यर्थः, तैरज्ञाते कुल बन्धुः साक्षित्वमर्हति न पुनरसंबन्धी, तेनाप्यपरिज्ञाते अन्यः साक्षीत्यर्थः । अत एव मुख्यभूता ज्ञातय एव नारदेन निर्दिष्टाः । ज्ञातृभिरिति पाठोऽनाकरः । दा.२२९-३०

(२) गोत्रभागविभागार्थे संदेह इति गोत्रलब्धविभजनीयविभजनविषयके वृत्तविभागवैपरीत्यसंदेहे विभागकारणसंदेहे च, कुलं बन्धुः, एषामभाव एव अन्यः साक्षी । दात.१७९

(१) सवि.४४६. (२) सवि.४४०.

(३) दा.२२९ गार्ग्ये (गेऽर्ये) शंखः; दात.१७९ शंखः; व्यम.५६३ यें (र्यं) परि (प्यवि) शंखः; सेतु.८७ ज्ञाते (ज्ञाने) शखः; विच.१०३ शखः.

मनुः

विभागसंदेहे पुनर्विभागः कर्तव्यः

[1]विभागे यत्र संदेहो दायादानां परस्परम् ।
पुनर्विभागः कर्तव्यः पृथक्स्थानस्थितैरपि ॥

कथं तर्हि युक्तिष्वसमर्थासु निर्णय इत्यपेक्षिते मनुः—विभाग इति । यत्र संदेहो युक्तिभिरसमर्थाभिर्नापैतीति शेषः । ×स्मृच.३११

पुनर्विभागनिषेधः

सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् *॥

तद्युक्त्यादिभिरपगतसंदेहविषयम् । स्मृच.३११

याज्ञवल्क्यः

विभागनिर्णये प्रमाणानि

[2]विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः ।
विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥

(१) एवमयं रिक्थविभागो निरूपितः । यदि तु कश्चिदविभक्तोऽहमित्येवं विभागनिह्नवं कुर्यात्, तत्र कथमित्यपेक्षित आह—विभागनिह्नवे इति । विभागनिह्नवे ज्ञात्यादिभिर्विभागभावना कार्या । ज्ञातिर्मातुलादिः । बन्धुः

× पमा. स्मृचवत् ।

* अवशिष्टव्याख्यासंग्रहः स्थलादिनिर्देशश्च स्त्रीपुंधर्मप्रकरणे (पृ.१०७२) द्रष्टव्यः ।

(१) स्मृच.३११; पमा.५७१; दानि.६ स्थान (स्थानैः); व्यप्र.५६४; व्यम.६०; विता.४७५; बाल.२।१४९; विता.४७५; समु.१४६.

(२) यास्मृ.२।१४९; अपु.२५६।३६; विश्व.२।१५१ ज्ञेया गृहक्षेत्रैश्च (देयगृहक्षेत्रक); मिता.; दा.२२९; अप.; व्यक.१६२ यौत (यौतु); स्मृच.३१०; विर.६०७; स्मृसा. ८१ पूर्वार्धे (विभागस्य तु संदेहे ज्ञातिसाक्ष्यभिलेख्यकैः); पमा. ५६९; मपा.६८९ व्यकवत्; विचि.२५२ स्मृसारवत्; स्मृचि.३६ साक्ष्यभि (साक्षिवि) यौत (यौतु); सवि.४४० खितैः (ख्यकैः); दानि.५; वीमि.; व्यप्र.५६३; व्यम. ५८; विता.४७४-५ व्यकवत्; राकौ.४५९; बाल. २।१३५ (पृ.२१७) उक्त.; २।१४५ (पृ.२६७) उक्त.; सेतु. ८७ व्यकवत्; समु.१४५; विच.१०३ व्यकवत्.

पितृव्यपुत्रादिः। एते हि प्रायशो विभागमध्यपातिनः संनिहिताश्च भवन्ति। अन्ये वा साक्षिणः। लेख्यं वा यद् विभागप्रज्ञापकं कृतम्। यथाह बृहस्पतिः—'कार्यमुच्छ्रावणालेख्यं विभक्तैर्भ्रातृभिर्मिथः। साक्षिणो वाऽविरोधार्थं विभजद्भिरनिन्दिताः॥' इति। अन्यत्र वा साक्ष्यमन्योन्यमुपलभ्यमानं विभागचिह्नमभिलिखितं वा प्रतिग्रहव्यवस्थाद्यर्थम्। तथाऽऽदेयगृहक्षेत्रकयौतकैः। आदेय दानग्रहणम्। गृहक्षेत्रकयौतक पृथक् क्षेत्रगृहादिपरिग्रहेणावस्थितिः। तथा च नारदः—'साक्षित्व प्रातिभाव्य च दानं ग्रहणमेव च। विभक्ता भ्रातरः कुर्युर्नाविभक्ताः कथंचन॥' इति। विश्व.२।१५३

(२) एवं विभागमुक्त्वा इदानीं तत्संदेहे निर्णयहेतूनाह—विभागनिह्नवे इति। विभागस्य निह्नवे अपलापे ज्ञातिभिः पितृबन्धुभिर्मातृबन्धुभिः मातुलादिभिः साक्षिभिः पूर्वोक्तलक्षणैर्लेख्येन च विभागपत्रेण विभागभावना विभागनिर्णयो ज्ञातव्यः। तथा यौतकैः पृथक्कृतैर्गृहक्षेत्रैश्च। पृथक् कृष्यादिकार्यप्रवर्तनं पृथक्पञ्चमहायज्ञादिधर्मानुष्ठान च नारदेन विभागलिङ्गमुक्तम्। तथाऽपराण्यपि विभागलिङ्गानि तेनैवोक्तानि। *मिता.

(३) प्रथम ज्ञातयः सपिण्डाः साक्षिणः। तदभावे बन्धुपदोपनीताः संबन्धिनः। तदभावे उदासीना अपि साक्षिणः। तुल्यवद्भावे साक्षिपदेनैवोपात्तत्वात् ज्ञातिबन्धुपदानर्थकतापत्तेः। दा.२२९

(४) ज्ञात्यादयः साक्ष्यादयो, विभागे ज्ञातीना साक्षित्वात्। अप.

(५) विभागग्रहणं तद्धर्माणा प्रदर्शनार्थम्। स्मृच.३१०

(६) विष्णुरपि—'क्रयविक्रयदानग्रहणप्रातिभाव्यसाक्षित्वसंभूयकारित्वनिध्याधानादिकं परस्परकृतं विभागहेतुरि'ति। अयं क्रयविक्रयाधिकारहेतुः। अतश्च साक्षित्वप्रातिभाव्यदानग्रहणादीनि परस्परमेव न कार्याणि। भ्रातृणां मध्ये इतराभ्यनुज्ञया एकस्य विभक्तपितृव्यादिकं प्रति प्रातिभाव्यादेः विहितत्वात्। तथा च स्मृतिः—'इतरेणानुजानानः प्रातिभाव्यं हरेत्परः' इति। अनेनाभिप्रायेणाह याज्ञवल्क्यः—'भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम्॥' इति। परस्परमिति शेषः। अत एवाह स एव—'विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेख्यकैः। विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः॥' विभागस्य निह्नवे अपलापे ज्ञातिभिः पितृसंबन्धिभिः विभक्तपितृव्यादिभिः, बन्धुभिः मातृसंबन्धिभिः मातुलादिभिः, साक्षिभिः पूर्वोक्तलक्षणैः लेख्येन च विभागपत्रेण विभागभावना विभागनिर्णयो ज्ञातव्यः। तथा च यौतकैः पृथक्कृतैः गृहक्षेत्रैश्च चकारेण पृथक्पृथक् कृष्यादिप्रवर्तन पृथक्पृथक् पञ्चमहायज्ञादिधर्मानुष्ठानं समुच्चीयते।

तथा च नारदः— 'विभागधर्मसंदेहे दायादाना विनिर्णयः। ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात्॥' इति। अत्र लिखितसाक्ष्यादेः ज्ञापकहेतुत्वम्। विभागसंदेहे सिद्धस्यैव विभागस्य ज्ञापकत्वात्। कारकहेतूना त्वविद्यमानस्यापि विभागस्य निष्पादकत्व पुरस्तान्निवेदयिष्यते। गृहक्षेत्रैश्च यौतकैरिति चकारसमुच्चितार्थस्तु दशवर्षपर्यन्तावस्थिताः कारका इति च पुरस्तान्निवेदयिष्यते। नन्वस्मिन् वचनद्वये लेख्यसाक्षिभ्या तुल्यतया लिङ्गाना गमकत्वमुक्तं तन्न सगच्छते। लिङ्गाना तर्करूपेण प्रमाणानुग्राहकतया तद्वत्प्रमापकत्वायोगादिति चेन्मैवम्। अस्मिन् विवादपदे लिङ्गानामपि प्रमापकत्वमेव न त्वितरसप्तदशविभागपदेष्विव लिङ्गानां प्रमाणानुग्राहकत्वम्। तथाहि विभागार्हेषु भ्रातृषु परस्परमृणप्रातिभाव्यसाक्ष्यदानप्रतिग्रहपितृदेवार्चनक्रियाः षोढा दर्शन उक्ताः हस्तादिलिङ्गतुल्या न भवन्ति। ततश्चैतानि 'नाविभक्ताः कथञ्चन' इति स्मृतिविशदविभक्ताना निषिद्धानि 'विभागनिह्नव' इत्यादिवचने साक्षिलिखितसमानयोगक्षेमतया लिङ्गान्युक्तानि भवन्ति। इतरेषु विवादपदेषु लिखितसाक्ष्यादीनामेव प्रमापकत्वात् इतरेषा तदनुग्राहकत्वं, अत्र तु न तथेति। किं च अनेनैव वचनेन ज्ञायते—अस्मिन्विषये लिङ्गानामपि लेख्यसाक्षिभ्यामन्तरेणापि प्रमापकत्वमभ्युपगतमिति। अत एव बृहस्पतिः—'साहस स्त्रावरस्वाम्य प्राग्विभागश्च रिक्थिनाम्। अनुमानेन विज्ञेयं न स्युर्यस्य च साक्षिणः॥' न स्युरिति

* पमा., मपा. मितगतम्।

लिखितसाक्षिणावन्तरेणेत्यर्थः । साक्षिग्रहणं प्रबलप्रमाणस्योपलक्षणम् । अत एव लेख्यमपि संगृहीतम् । अत एवानन्तरमुक्त तेनैव—'तेषामेताः क्रिया लोके प्रवर्तन्ते स्वरिक्थिषु । विभक्तानवगच्छेयुः लेख्यमप्यन्तरेण तान् ॥' लेख्यग्रहणं साक्षिणामुपलक्षणम् । केचिदाहुः—अत्र विभागनिह्नवे लेख्य(लिखित)साक्षिभ्यां तुल्यबलत्वं लिङ्गानामप्यवगन्तव्यम् । अत एवाहैतद्याख्याने चन्द्रिकाकारः—प्रवर्तन्ते व्यक्ताः समस्ता इति शेष इति । तन्न । परस्परकर्तृकसाक्षित्वप्रातिभाव्यादीना ज्ञापकहेतुभ्यो विलक्षणत्वेनोक्तत्वात् । साक्षिग्रहणेनैव ज्ञात्यादीना तटस्थसाक्षिणामपि साक्षित्वेऽपि विभागनिर्णये तेषा प्राबल्यज्ञापनार्थं पृथग्ग्रहणमिति विज्ञानेशः । साक्षिग्रहण कृतसाक्षिपरमिति केचित् । बृहस्पतिः—'एकपाकेन वसता पितृदेवद्विजार्चनम् । एक भवेद्विभक्ताना तदेव स्याद् गृहे गृहे ॥' एवं च पृथक्पृथग्वैश्वदेवादिकार्यप्रवर्तन अविभक्तेष्वविद्यमानं विभक्तत्वमवगमयतीति विभागसंदेहनिर्णययुक्तिर्युक्तेत्यनवद्यमिति चन्द्रिकाकारः । अस्यायमाशयः—पितृदेवद्विजार्चनमित्यत्र पितृशब्देन प्रत्याब्दिकमुच्यते । अमावास्याश्राद्धादीनामविभक्तामा मध्ये इतराभ्यनुज्ञया इतरस्याधिकारात् । अत्र देवशब्देन तत्सनियोगशिष्ट वैश्वदेवश्राद्धमुच्यते । न तु देवयज्ञादिकं, तस्याविभक्तानामपि विहितत्वात् । 'अविभक्तैश्च कर्तव्या वैश्वदेवादिकाः क्रियाः ।' इति स्मरणादिति । एतच्च वैवाहिकाग्नियेषा मते अलौकिकः । लौकिकत्वपक्षे तु विभागानन्तरमेव अग्निहोत्रवैश्वदेवादिकाः कार्या इति तेषा कारकहेतवो वैश्वदेवादिकाः । उभयेषा प्रत्याब्दिकं कारकहेतुरिति । अत्र केचिदाहुः—चन्द्रिकाकारेण श्रेष्ठनिर्णायकप्रमाणाभावे लिङ्गाना प्रवेश इत्युक्तं त(त्त)च्च लिखितसाक्षिसद्भावे ताभ्या निर्णय औत्सर्गिक इति तेषा प्राथम्य(प्राधान्य)मुक्तम् । न तु प्रमापकत्वे लिखितसाक्षिलिङ्गानाम् । विभागनिह्नवस्थले लिङ्गादितरप्राबल्यस्य स्मृत्याचारयोर्वेदानुमापकत्वे तुल्ये आचारमूलवेदानुमानात् स्मृतिमूलवेदानुमानस्य सुकरत्ववदित्यनुसधेयमिति । तन्न । चन्द्रिकाकारस्य लिङ्गशब्देन हेतुरभिप्रेतः । स च ज्ञापक एव । कारकहेतूना लिखितादतिशयित्वान्न तुल्यतेति ।

अत्र कात्यायनः—'वसेयुर्दश वर्षाणि पृथग्धर्माः पृथक्क्रियाः । भ्रातरस्तेऽपि विज्ञेया विभक्ताः पैतृकाद्धनात् ॥' भ्रातृशब्दोऽत्र रिक्थसंबन्ध्युपलक्षणार्थम् । पैतृकग्रहण दायग्रहणोपलक्षणार्थमिति चन्द्रिकाकारः । तन्न । स्वत्वानुत्पत्तेरिति वक्ष्यते । ननु कार्यानुपयङ्गाद्वा अशक्त्या वा दशवर्षपर्यन्त दायग्रहणाभावे व्यवहारः सिद्ध एवेति पूर्वप्रकरणोक्तं विरुन्ध्यादिति चेन्मैवम् । परमार्थतो दायग्रहणाभावे । 'पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी । परेण भुज्यमानाया धनस्य दशवार्षिकी ॥' इतिवत् छलानुसारेण विभक्ता एवेति चन्द्रिकाकारः । अत्र छल स्वोपेक्षानिमन्धनम् । नन्वेव 'पश्यतोऽब्रुवतो भूमेरित्यत्र न व्यवहारहानिः स्वस्वरूपहानिः, अपि तु फलहानिरित्युक्त विज्ञानयोगिना । तद्वदत्राऽपि फलहानिरेव न स्वरूपहानिः न व्यवहारहानिरिति चेन्मैवम् । भूमेर्हानिरित्यत्र कर्मणि षष्ठीविधानाद्विंशतिवार्षिको भोगो भूमिं हन्यादिति वाक्यार्थस्य निष्पन्नत्वात् । दशवार्षिको भोगो धनं हन्यादिति स्वरूपहानिरेवोक्ता । ननु—'छल निरस्य भूतेन व्यवहारान्नयेन्नृपः ।' इति तत्त्वानुसरणेनैव न्यायः कर्तव्य इति चेन्मैवम् । अत्र छलमतस्वात्मकं विवक्षितम् । न तु तत्त्वात्मकम् । तत्त्वात्मकछलावलम्बनेन तु व्यवहारनिर्णयदर्शनात् । तथाहि—'भूतच्छलानुरोधेन द्विगतिः समुदाहृतः' । इति व्यवहारस्य छलावलम्बनमप्येका गतिर्युक्ता । अन्यथा—'धर्मश्च व्यवहारश्च चरित्र राजशासनम् । चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वबाधकः ॥' इति स्मृत्या उत्तरेषा व्यवहारचरित्रराजशासनाना धर्मबाधकत्वं छलानुसरणनिबन्धनं निरुन्ध्यात् । एतस्य छलानुसरणस्य तात्त्विकत्वे स्मृतिकाराणामप्रामाणिकत्वं स्यात् । अत एव छलं निरस्य भूतेनेत्यत्र छलग्रहणमतत्त्वात्मकछलविषयमिति मन्तव्यम् । अत एव चन्द्रिकाकारविज्ञानयोगिभ्या—'निह्नवे भाविनो दव्यादेकदेशविभाविनः' इति वचनव्याख्यानावसरे छलानुसरणमत्र कार्यमित्युक्तम् । विज्ञानयोगिनापि 'स्थावरेषु विवादेषु दिव्यानि परिवर्जयेत् ।' इत्यत्र अवष्टम्भविषये दिव्यं नास्तीति वदता, पश्यतोऽब्रुवतो भूमेरित्यत्राऽपि तु फलहानिरिति वदता, छलानुसारेण निर्णयोऽङ्गीकृत इति दिङ्मात्रमुदाहृतम् ।

तत्र केचिदाहुः दशवर्षपर्यन्तं पृथक्क्रियाकरणं पृथग्धर्मानुष्ठानं च रिक्थक्रयसंविभागपरिग्रहाद्यन्यतमत्वाभावात् स्वत्वहेतुत्वाभावात् पृथक्क्रियस्य पृथग्धर्मकस्य पुरुषस्य कथं स्वत्वापादकमिति चेत्, उच्यते—विभक्ताः पैतृकाद्धनादिति वचनादवगम्यते स्वत्वम्। तथा हि विभागो नाम समुदायद्रव्यविषयाणामनेकस्वाम्यानामेकैकत्रावस्थापनं इत्युक्तं प्राक्। तच्च वचनादवगम्यते। यथा—'आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते।' इत्यत्र वाचनिकी स्वत्वनिवृत्तिः परस्वत्वापत्तिश्चेत्युक्तं विज्ञानयोगिना। चन्द्रिकाकारेणापि छलानुसारेण विभागो नास्तीति वदता वाचनिकस्वत्वापत्तिरित्युक्तम्। न चैवं चन्द्रिकाकारेण आधिः प्रणश्येद्द्विगुण इत्यत्र तिलविनिमयादिदृष्टान्तेन आधेर्विनिमयान्तमङ्गीकृत्य तस्य विनिमयस्य स्वत्वहेतुता लोकसिद्धेत्युक्तमिति, एवमत्रापि लोकसिद्धयाश्रयेण प्रकारान्तरेणौदासीन्यस्वोपेक्षानिबन्धनस्वीकारोऽपि स्वत्वहेतुर्भवत्विति वाच्यम्। पश्यतोऽब्रुवतो भूमेरित्यनेनैव दत्तोत्तरत्वात्। किं च तत्रापि चन्द्रिकाकारस्य वाचनिकदानान्तत्वं वा विनिमयद्रव्यस्य क्रयमूल्यतया क्रयान्तत्वं वा स्वीकर्तव्यमित्युक्तं प्राक्। स्वत्वस्य वाचनिकत्वं नाम पारिभाषिकत्वमित्युक्तं 'आधिः प्रणश्येदि'त्यादिवचनव्याख्यानावसरे। तच्च पारिभाषिकत्वमत्र न वक्तुं शक्यते। दशवर्षपर्यन्तं तूष्णीमेवावस्थितत्वात्। परमार्थतोऽपि दायग्रहणाभाव इति चन्द्रिकाकारग्रन्थस्यायमर्थः—परमार्थतो वस्तुवृत्त्या। दायग्रहणं विभागः। तस्याभावेऽपि पैतृकाद्धनाद्भ्रातरो विभक्ता एवेति। अयमाशयः—यथेष्टविनियोगार्हत्वमेव स्वत्वम्। तच्च जन्मनैव सिद्धम्। कारकहेतूनां परस्परकर्तृकसाक्षित्वप्रातिभाव्यदानग्रहणक्रयविक्रयसंभूयकारित्वनिध्यादीनां सद्भावे सत्येव विभागोत्पत्तिः। तेषां कारकत्वेनैव ज्ञापकत्वाभ्युपगमात्।

'विभक्ता भ्रातरः कुर्युः नाविभक्ताः परस्परम्' इति अविभक्तानां निषिद्धाः सन्तो विभाग निष्पाद्य ज्ञापयन्ति। यथा द्वैतीयिकसाध्यानुबन्धाः शास्त्रभेदमुत्पाद्य भेदज्ञापका इति कारकहेतुत्वेनाभिमता मीमांसकैः तद्वदत्रापीति मन्तव्यम्। अत्र जन्मनैव स्वत्वं उत्पन्नं भ्रातृणां तथाऽपि विभागकारकहेत्वभावाद्दशवर्षपर्यन्तमवष्टम्भहेतुना विभागकारकत्वे सिद्धे स्वत्वस्याऽपि विभागः सिद्धः संस्कुरतीति चन्द्रिकाकारस्य अभिमतियोग्यं मतमनूदितम्। अतश्च तेषा लिङ्गाना सद्भावे संविभागोऽवश्यमस्तीत्यपिशब्दं प्रयुञ्जानस्य भाव इति।

यत्तु चन्द्रिकाकारेणोक्तं—दशवर्षादर्वागित्यादिना ग्रन्थकलापेन—विभागसंदेहे दिव्यानवतारात् पुनर्विभागः कर्तव्य इति लिङ्गाना सामर्थ्यमसामर्थ्यं चोक्तं, तत्तु दशवर्षादर्वागपि लिङ्गाना साक्षिलिखितप्रमाणाभ्या सामर्थ्यं तुल्यमेव, किं तु दशवर्षस्योपरि लिङ्गानां प्राबल्यात् लिखितसाक्षिसद्भावेऽपि तदपेक्षा नास्तीत्येवपरम्। दिव्यानवतारस्तु वाचनिकः। 'सर्वाभावेऽपि पुनर्विभागः कर्तव्य' इति विष्णुस्मरणात्। सर्वेषां लिखितादिज्ञापकहेतूना कारकहेतूना चाभावे। विभागशब्दः पत्नीविभागवदसमर्थेषु भ्रातृषु दरिद्रेषु स्वरुच्या यत्किञ्चिद्दातव्यमित्येवंपरः इति सोमेश्वरादय आहुः। तन्न। सर्वाभावे दिव्यानवतारात् स्वरुचिपक्षस्यानवतारात् शुद्ध एव विभागः कर्तव्य इत्याह भारुचिः। अयमेव पक्षः सम्यक्। केचित्तु सोमेश्वरादीनामभिसंधिमेवमाहुः। व्यपगते विभागसंदेहे विभागस्य सिद्धत्वे भ्रातरः पोष्या इति यत्किञ्चिद्देयमित्याहुरिति सर्वमनवद्यम्। एतच्चन्द्रिकाकाराभिमतियोग्यं मतद्वयमनूदितम्।

'वसेयुर्दश वर्षाणि पृथग्धर्माः पृथक्क्रियाः। विभक्ता भ्रातरस्तेऽपि विज्ञेयाः पैतृकाद्धनात्॥' इत्यनेन द्रव्याभावेऽत्यन्तनिस्स्वाना धर्मविभागः कर्तव्यः। 'विभागे धर्मवृद्धिः स्यात्' इत्यादिस्मृतिभ्यः। अतश्च पितृद्रव्याविरोधेन दशवर्षपर्यन्त ये पृथग्धर्माः पृथक्क्रियाः ते विभक्ता एव। धर्मविभागस्य इतराभ्यनुज्ञामन्तरेणाप्येकेनैव स्वीकर्तुं शक्यत्वादित्युक्तं भारुचिना। एतादृशस्य विभागशब्दवाच्यत्वमप्यस्तीत्युक्तं प्रकरणादावेव। पितृद्रव्याविरोधेनार्जिते द्रव्ये दायादानामनधिकार इत्युक्तम्। अतश्च पितृद्रव्याविरोधेनार्जितस्य सद्भावेऽपि तस्याविभाज्यत्वात् धर्मविभागात्मक एवात्र विभागोऽवतिष्ठत इत्यवगन्तव्यम्। पैतृकाद्धनादिति ल्यब्लोपे पञ्चमी। अत्रेदं भारुचेर्मततत्त्वं—'वसेयुर्दश वर्षाणि' इत्यत्र ल्यब्लोपे पञ्चम्याश्रयणात् पितृधनं विहाय ये दशवर्षपर्यन्तं धर्मविभागवन्तः तेषा

तदूर्ध्वं मैत्रादिना यल्लब्धं तदेवाविभाज्यं दशवर्षमध्ये लब्धं मैत्रादिकं विभाज्यमेव । अविभागदशाया स्वयमार्जितं मैत्रादिकं विभाज्यमिति कैमुतिकन्यायसिद्धम् । यथाह विष्णुः—'अपित्र्यं गार्भं धार्मं मैत्रं वैद्यमाकस्मिकमादशाब्दं प्रविभाज्यमत ऊर्ध्वं सर्वमविभाज्यम्' इति । अत्राह भारुचिः—अपित्र्यं अविद्यमानपितृद्रव्यम् । एतत् त्रितयविशेषणम् । गार्भं स्त्रीधनम् । धार्मं इष्टापूर्तादिकम् । मैत्रं मित्रसकाशाल्लब्धम् । वैद्यं विद्यातो लब्धम् । आकस्मिकं अकस्माल्लब्धं निध्यादिकम् । प्रतिग्रहादिना लब्धम् । एतत्त्रिविधद्रव्यमध्ये उत्तरत्रयं धर्मविभागाभावेऽविभक्तत्वात् विभाज्यम् । दशवर्षपर्यन्तावस्थितिरूपधर्मविभागसद्भावेऽप्यविभाज्यमेव इति । अयमाशयः—आ दशवर्षमिति धर्मविभागोपलक्षणमिति । न चैतद्वचनम्—'संधिश्च परिवृत्तिश्च विभागश्च समा अपि । आदशाद्दानिवर्तन्ते विषमा नववत्सरात् ॥' इति विषमविभागस्य नववर्षपर्यन्तं निवृत्तिप्रतिपादकभरद्वाजवचनानुसारेण नववर्षादुपरि विषमविभागो न परावर्तत इत्येवम्परमिति वाच्यम् । एतद्वचनस्य तत्परत्वाभावात् । तथाहि—एतद्वचन विभागसंदेहं प्रक्रम्योक्तम् । वचनसामर्थ्यं चापि तथैव प्रतिभाति । 'वसेयुर्दश वर्षाणि पृथग्धर्माः पृथक्क्रियाः । विभक्ता भ्रातरः...॥' इति पृथग्धर्मकत्वपृथक्क्रियत्वलक्षणविशेषणविशिष्टदशवर्षपर्यन्त वसतिर्विभागहेतुः प्रतिपादितः विषमविभागप्रतिपादनपरत्वे व्याहन्येत । विभक्ता भ्रातर इति लिङ्गसामर्थ्यात् लिङ्गी विभागो व्याहन्येत । विभागलिङ्गाना परस्वत्वापादकत्वायोगात् । छलानुसारेणापि व्यवहारस्य न्याय्यत्वादिति तत्र ल्यब्लोपे पञ्चम्येव समाश्रयणीयेति। तन्न । विभागलिङ्गानां कारकरूपहेतुत्वाद्विभागोत्पादने सामर्थ्यस्योक्तेः । स्वत्वस्यापि पुत्राणां जन्मनैव सिद्धत्वात् । तत्त्वात्मकछलानुसरणस्य न्याय्यत्वेनोदाहृतत्वात् । तदयमत्र निष्कर्षः—विभागसंदेहे क्वचित् लिखितेन निर्णयः, क्वचित्साक्षिभिः, क्वचित् ज्ञातिभिः, क्वचिद्बन्धुभिः, क्वचिन्मिश्रितैर्निर्णयः कर्तव्यः, एतेषामभावे कारकहेतुभिर्निर्णयः । उभयसद्भावे कारकहेतुरौत्सर्गिक एव । ज्ञापकहेतुभिस्तु दशवर्षपर्यन्तं परिवर्तितैरेव निर्णयो नान्यैः । दशवर्षपर्यन्तावस्थितानां ज्ञापकहेतूना कारकत्वात्तनाऽवस्थितैः **कारकहेतुभिरेव** निर्णय इत्यर्थादुक्तम् । इयांस्तु विशेषः—**स्वभावतः** कारकहेतुभिः सद्य एव विभागसिद्धेस्तन्निर्णयः, ज्ञापकहेतुरूपकारकाणा दशवर्षपर्यन्त इति । सर्वाभावे **दिव्या**नवतारात् शुद्धो विभागः कर्तव्यः । उक्तहेतुभिः विभाग सिद्धावपि व्यवहर्तृभ्रातृभ्यो यत्किञ्चिद्देयमिति सर्वं मनवद्यम् । सवि.४४०–९

(७) यौतकैर्यौतकवदसाधारणीभूतैः । चकारेण नारदोक्तविभागलिङ्गाना दिव्यस्य च संग्रहः । +वीमि.

(८) यद्यपि ज्ञातिबन्धवोऽपि साक्षिविधयैव निर्णयकारणं तथापि बहिरङ्गसाक्ष्यपेक्षयाऽन्तरङ्गास्ते श्राद्धादिपृथग्भावरूपविभागलिङ्गतत्त्वज्ञा विभागकर्तारश्चेति गोबलीवर्दन्यायेन पृथगुपात्ताः । +व्यप्र.५६३

(९) मिताटीका—ज्ञातिभिरित्यादि । तेषा बहूनामेकसाधकत्वात् पितृबन्धुभिरिति । इदमुपलक्षणमन्यद्वयस्यापि। वस्तुतस्तु ज्ञातिभिरित्यस्योदासीनैः सजातीयैरित्यर्थः । बन्धुभिरित्यस्य बन्धुत्रयैर्भ्रात्रादिभिश्चेत्यर्थ उचित इति बोध्यम् । बाल.

नारदः

विभागनिर्णये प्रमाणानि

[1]**विभागधर्मसंदेहे दायादानां विनिर्णयः ।**
ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात् *॥
[2]**भ्रातृणामविभक्तानामेको धर्मः प्रवर्तते ।**
विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक्॥

+ शेषं मितागतम् ।

* सवि. व्याख्यानं 'विभागनिह्नवे' इति याज्ञवल्क्यवचने (पृ.१५७६) द्रष्टव्यम् ।

(१) **नासं.**१४।३६ पैयः (पैये) ख्येन (ख्यैस्तु) कार्यप्रवर्तनात् (कार्या प्रकल्पना); **नास्मृ.**१६।३६ ख्येन (ख्यैश्च); **दा.**२२९ 'ज्ञातृभिः' इति पाठः; **व्यक.**१६२, **स्मृच.**३१०; **विर.**६०६; **स्मृसा.**८०; **पमा.**५६९; **मपा.**६८९; **विचि.** २५२; **स्मृचि.**३६; **सवि.**४४०; **दानि.**५ देहे (देहो); **व्यप्र.**५६३; **व्यम.**५८; **विता.**४७३; **राकौ.**४६०; **सेतु.** ८६; **समु.**१४५; **विच.**१०२.

(२) **नासं.** १४।३७ त्तेषां (देषां); **नास्मृ.**१६।३७ ऽपि भवेत्तेषां (हि तेषां भवेद्); **मिता.**२।१४९; **व्यक.**१६२; **स्मृच.**२५९ ऽपि (हि) त्तेषां (देषां) : ३१०; **विर.**६०६

[1]दानग्रहणपक्वान्नगृहक्षेत्रपरिग्रहाः ।
विभक्तानां पृथग्ज्ञेयाः पाकधर्मागमव्ययाः ॥
[2]साक्षित्वं प्रानिभाव्यं च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम् ॥
[3]येषामेताः क्रिया लोके प्रवर्तन्ते स्वऋक्थतः ।
विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान् ॥

ऽपि (ऽर्थं); स्मृसा.८० विरवत्, पमा ५६९; मपा.६८९; विचि.२५२ विरवत्, व्यनि. नासवत्; स्मृचि.३६; दात. १६४; सवि.३५२; व्यप्र.४३१,५६३; व्यम.५९; विता. ४७३; राकौ.४६०; समु.१२६ ऽपि (हि); विच.३१,३२.

(१) नासं.१४।३८; नास्मृ.१६।३८; दा.२३०; अप. २।१४९ दान (दार); व्यक.१६२; विर.६०६ व्ययाः (क्रियाः); स्मृसा.८०; पमा.५६९ परि (प्रति) पाक (दान); विचि.२५३; स्मृचि.३६; दात.१७९; चन्द्र.१००, व्यप्र.५६३ श्वत्र (श्वर्थ); व्यम.५९ पमावत्; विता.४७४ परि (प्रति), सेतु.८३,८७; समु.१४५ पमावत्, बृहस्पतिः; विच.३३,१०४.

(२) नासं.१४।३९; नास्मृ.१६।३९; विश्व.२।१५३ परस्परम् (कथञ्चन); मिता.२।१४९ विश्ववत्; दा. २३०; अप.२।१५२ दानं (दान): २।१४९; व्यक.११६ (Wai), १६२ (Bikaner); स्मृच.१३६, ३१०; विर.४०: ६०६ व च (व वा); स्मृसा.८१, पमा.२५५, ५६९; मपा.६८९ दानं (दान) शेष विश्ववत्; दीक.३७ (=); विचि.२५३; स्मृचि.३६ अपवत्; दात.१६४, १७९ अपवत्; सवि.३४७ (=) विश्ववत्, उत्त.: ४३९: ४४६ (=) उत्त.; चन्द्र.१०० दानं (दान) व च (व वा); दानि. ५; व्यप्र.४४,४३१: २५५ अपवत्: ५६३ विश्ववत्, व्यउ. २७; व्यम.५९ व्यं च (व्य तु); विता.४७४ विश्ववत्; राकौ.४६० विश्ववत्; सेतु.८७; प्रका.८५; समु.१६; विच.३१, १०४.

(३) नासं.१४।४० षामेताः (षां द्विधा) ऋक्थतः (रिक्थिनाम्); नास्मृ.१६।४० ऋक्थतः (रिक्थिनाम्); दा.२३०-३१; अप.२।५२ येषामे (एषां चै) शेष नास्मृवत्: २।१४९ येषा (एषा) ऋक्थतः (रिक्थिषु); व्यक.१६२; स्मृच.३१० ऋक्थतः (रिक्थिषु); विर.६०७; स्मृसा.८१ स्वऋक्थतः (हि ऋक्थिनाम्); पमा.५७० स्मृचवत्; विचि.२५३ नवग (नभिग) शेषं स्मृसावत्; स्मृचि.४६ क्थतः (रिक्थनः) न्तरेण (न्तरेऽपि); दात.१७९ स्व (स); सवि.४४१ येषा (तेषा) ऋक्थतः (रिक्थिषु) बृहस्पतिः; व्यप्र.५६३; व्यम.६०

(१) ज्ञातीना कीर्तनं तेषु सत्सु नान्यसाक्षिग्रहणमित्येतदर्थम् । दा.२२९

(२) धर्मः पितृदेवद्विजार्चनजन्यः । स्मृच.२५९

नासीदावयोर्विभाग इति स्वरूपापलापादिना सर्वस्माद्विभाज्यात् नावयोर्विभाग इति धर्मापलापादिना वा तद्धर्मसंदेहे दायादाना ज्ञात्यादिसाक्षिभिर्विभागलेख्येन वा पृथक्कार्यप्रवर्तनादियुक्तिभिर्निर्णयो ज्ञेयः । पृथक्कार्यप्रवर्तनं दायादाना पृथक् पृथक् वैश्वदेवभिक्षादानातिथिपूजादिधर्मप्रवर्तनम् । कथं तस्य युक्तित्वमित्यपेक्षिते अनन्तरमुक्तं तेनैव—भ्रातृणामित्यादि । एवं च पृथक् वैश्वदेवादिप्रवर्तनमविभक्तेष्वविद्यमानं विभक्तत्वमवगमयेदिति भागसदेहनिर्णायकयुक्तितयोक्तिर्युक्तेत्यनवद्यम् । युक्त्यन्तराणि वक्तु परस्परसाक्षित्वादिकं तावद्विभक्तानां विधास्यन् तत्प्रतिषेधमविभक्तेषु स एवाह—साक्षित्वमिति । ग्रहण प्रतिग्रहः । एवं च परस्परसाक्षित्वादियुक्तिभ्यो विभागसद्भावावगतिः सिध्यत्येव । प्रवर्तन्ते व्यस्ताः समस्ता वेति शेषः । एवं ऋणग्रहणमपि ऋक्थिषु प्रवर्तमानं विभक्तत्वावगमकं अविभक्तेष्वप्रवर्तनात् । स्मृच.३१०

(३) विभागरूपो धर्मः विभागधर्मः, तस्य संशये जातो न वेत्याकारे, दायादाना ज्ञातिभिः निर्णयः कर्तव्यः । भागलेख्यं विभागज्ञापक लेख्यं, पृथक्कार्यप्रवर्तनात् पृथगायव्ययादिकार्यप्रवृत्तिदर्शनात् । धर्मो वैश्वदेवादिक्रियाकलापः । आगमोऽर्थप्राप्तिः, व्ययस्त्यागः, अनन्यथासिद्धौ तात्पर्यम् । +विर.६०७

(४) विभागरूपो धर्मो विभागधर्मः । ज्ञातयो विभागद्रष्टारः । भागलेख्यमक्षपत्रादि पृथक्कार्यम् । पृथगायव्यया विभागनान्तरीयकम् । धर्मो वैश्वदेवादिक्रिया । परस्परनैरपेक्ष्येण दानग्रहणम् । पशुः क्रयादि । अन्नोपादानं गृह च पृथक् । क्षेत्रं च पृथक् । परिग्रहो बन्धकादेः । पाकधर्मः पार्वणादिः । आगमो धनार्जनादिः । व्ययो धनविनियोगः । तथा एकस्य ऋणादिप्रयोगे परः साक्षी चेत्, प्रतिभूश्चेत्, एकेन दत्तमपरश्चेद् गृह्णाति, तदा तौ

+ स्मृसा विरगतम् ।

स्मृचवत्, विता ४७४; सेतु.८७; समु.१४५ स्मृचवत्, बृहस्पतिः; विच.१०४.

परस्परविभक्तौ ज्ञेयौ । विचि.२५३

(५) दानात् पूर्वमपि तद्भने प्रतिग्रहीतृस्वत्वसंभवात् दानग्रहणयोरसंभवः । एवं साक्षित्वप्रातिभाव्ययोर्ज्ञेयम् । स्वत्वाविशेषादेवाविभक्तद्रव्येण यत् कृतं तत्र दृष्टादृष्टे कर्मणि सर्वेषा फलभागित्वम् । दात.१६४

(६) अत्राविभक्तानामित्येवोद्देश्यसमर्पकम् । भ्रातृणामिति तु तद्विशेषणत्वादविवक्षितम् । तेन पितृपितामहपुत्रपौत्रपितृव्यभ्रातृपुत्रादिष्वविभक्तेष्वेक एव धर्मः । अत्र देशकालकर्त्रादीनामैक्ये कर्मणोऽनेकप्रयोगविषयिणी न्यायेन प्राप्ताऽपि तन्त्रताऽविभक्तकर्तृभेदेऽपि वचनेन बोध्यते । तेन श्रौतस्मार्ताग्निसाध्यास्तावद्धर्मा अविभक्तानां पृथगेव । आहवनीयत्वावसथ्यत्वादीना ससंबन्धिकत्वेन भेदात् । एव श्राद्धमपि पितृव्यभ्रातृपुत्रादीनाममावास्यादौ देवताभेदात् पृथगेव । भ्रातृणा तु निरग्निकाना तन्त्रेणैव देवतैक्यात् । प्रवासादिना देशभेदे तु पृथगेव । साग्निकानामग्निसाध्यान्यपि पृथगेव । गृहदेवतापूजावैश्वदेवादि तु तन्त्रेणैव । व्यम.५९

दानग्रहणे ऋणविषये । ते एव दानग्रहणे द्वितीयश्लोकेऽनूद्येते स्पष्टार्थम् । पश्वादिप्रतिग्रहा विभक्ताना पृथक्पृथगनुष्ठिता एव स्वत्वोत्पादकाः । अविभक्ताना त्वेकेन कृताः परस्यापि स्वत्वजनका इत्यर्थः । दानधर्मो लेख्यादिः । आगमो मूलकलाप्रवेशादिः । व्यम.६०

[1]**छिन्नभोगे गृहे क्षेत्रे संदेहो यत्र जायते ।**
लेख्येन भोगविद्भिर्वा साक्षिभिर्वा समाहरेत् ॥
वसुयुर्ये दशाब्दानि पृथग्धर्माः पृथक्क्रियाः ।
विभक्ता भ्रातरस्ते तु विज्ञेया इति निश्चयः ॥

बृहस्पतिः

विभागनिर्णये प्रमाणानि

साहसं स्थावरं न्यासः प्राग्विभागश्च रिक्थिनाम् ।
अनुमानेन विज्ञेयं न स्यातां पत्रसाक्षिणौ *॥

कुलानुबन्धव्याघातहोढं साहसमाधकम् ।
स्वस्य भोगः स्थावरस्य विभागस्य पृथग्धनम् ॥
पृथगायव्ययधनाः कुसीदं च परस्परम् ।
वणिक्पथं च ये कुर्युर्विभक्तास्ते न संशयः ॥

(१) एको भ्राता ददाति अपरश्च गृह्णाति गृहादिक, आयव्ययस्थितिश्च पृथक् पृथक्, एकेन ऋणादिषु क्रियमाणेषु अपरश्च साक्षी प्रतिभूर्वा क्रियते परस्पर वा ऋणादिकव्यवहारः, एको यत्किञ्चिद्द्रव्यं अन्यतः क्रीत्वा वाणिज्यार्थं भ्रातरि विक्रीणीते एवमादिका एकैकापि क्रिया परस्पर विभक्तानामेव संभवति, तया विभागानुमान धीमद्भिरनुसधेयमिति । न च येषामेताः क्रिया इत्येतच्छब्देन बहूनामुपादानात् मिलितानामेव गमकत्व वाच्यं न्यायमूलत्वात् वचनाना, एकैकत्रापि च तारतम्याविशेषात् । न स्याता पत्रसाक्षिणावित्यनेन पत्रसाक्षिणोरभावे अनुमानमनुसरणीयमित्युक्तम् ।

दा.२३१.२

(२) कुसीद वृद्ध्यर्थं धनप्रयोगः । वणिक्पथो वाणिज्यम् । परस्परमित्युभयत्र संबध्यते । एव हेतुतो निर्णयः स्वतः श्रेष्ठनिर्णायकप्रमाणाभावे कार्य इत्याह स एव—साहसं स्थावरस्वाम्यमिति । प्राग्विभागो विभागविवादात् प्राक् ज्ञातो विभागः । अनुमान युक्तिः साहसा-

---

* सवि.व्याख्यानं 'विभागनिह्नवे' इति याज्ञवल्क्यवचने (पृ.१५७६) द्रष्टव्यम् ।

(१) **नास्मृ.**१६।४८. (२) **नास्मृ.**१६।४१.

(३) **दा.**२३१; **स्मृच.**३१० रं न्यासः (रस्वाम्य) स्यातां...णौ (स्युर्यत्र च साक्षिणः); **पमा.**५७० स्मृचवत्;

सवि.४४१ र न्यासः (रस्वाम्य) स्या...णौ (स्युर्यत्र च साक्षिणः); **व्यप्र.**५६४; **विता.**४७५ र न्यासः (रे स्वाम्य) गश्च (गं च) स्याता...णौ (स्युर्यत्र हि साक्षिणः); **समु.** १४५-६ न्यासः (स्वाम्य) स्याता...णौ (स्युर्यत्र च साक्षिणः); **विच.**१०४.

(१) **दा.**२३१ कुला (बला) साध (भाव); **स्मृच.**३११ पृथग्धनम् (पृथक् पृथक्); **पमा.**५७० स्वस्य भोगः (स्वस्वभोग·); **समु.**१४६.

(२) **दा** २३१; **अप.**२।१४९; **व्यक** १६२ वणिक्पथं च (वाणिज्यमथवा); **स्मृच.**३१०; **विर.**६०८ विभ...शयः (रते विभक्ताः परस्परम्); **स्मृसा.८१** विभ...शयः (विभक्तास्ते परस्परम्); **पमा.**५७०; **दीक.४७ नारदः**; **विचि.**२५५ पू.; **स्मृचि.**३६; **सवि.**४३९-४० द च (दश्च); **वीमि.**२।१४९ कुर्यु (दद्यु) **नारदः**; **व्यप्र.**५६४; **व्यम.६०** यधनाः (याधान); **विता.**४७५ वणिक्पथ च (वाणिज्यं चैव) शेषं व्यमवत्; **समु.**१४५; **विच.**१०५.

दौ युक्तिप्रदर्शनार्थं कांश्चित्साधकानाह स एव—'कुलानुबन्धव्याघातहोढं' इति। कुलानुबन्धः पूर्वपुरुषवैरानुबन्धः। व्याघातः परस्परस्य। होढं बलादपहृत लोप्त्रप्रदर्शनम्। स्वस्य भोग आत्मनो भोगः।

*स्मृच.३१०-११

(३) परस्परं साहित्यं विना अन्योन्यनैरपेक्ष्येणेति यावत्। पृथगायव्ययधना इति पृथक्पदमुत्तरत्रापि संबध्यते। विर.६०८

(४) अनुमानेनाप्यनिर्णये दिव्यैः शपथैश्च विषयाल्पत्वभूयस्त्वानुसारेण निर्णयः। 'युक्तिष्वप्यसमर्थासु शपथैरेनमर्दयेत्' इति परिभाषायां निरूपितम्।

×व्यप्र.५६४

कात्यायनः

विभागनिर्णये प्रमाणानि

[1]शङ्काविश्वाससंधाने विभागे रिक्थिनां यदा।
क्रियासमूहकर्तृत्वे कोशमेव प्रदापयेत्॥
[2]वसेयुर्दश वर्षाणि पृथग्धर्माः पृथक्क्रियाः।
भ्रातरस्तेऽपि विज्ञेया विभक्ताः पैतृकाद्धनात्॥+॥

शङ्केति। सामान्यसिद्धिसंभावनया निर्णयाभावे 'युक्तिष्वपि असमर्थासु शपथैरेव निर्णयेदि'ति वचनात् यद्यपि शपथप्राप्तिः तथापि शपथेन निर्णयो न कार्यः। यत आह बृहद्याज्ञवल्क्यः—'विभागधर्मसंदेहे बन्धुसाक्ष्यभिलेखितैः। विभागभावना कार्या न भवेद्दैविकी क्रिया॥' इति। कथं तर्हि युक्तिष्वसमर्थासु निर्णय इत्यपेक्षिते मनुः—'विभागे यत्र संदेहो दायादाना परस्परम्। पुनर्विभागः कर्तव्यः पृथक्स्थानस्थितैरपि॥' यत्र संदेहो युक्तिभिरसमर्थामिर्नापैतीति शेषः। यत्पुनस्तेनैवोक्तम्—'सकृदंशो निपतति सकृत्कन्या प्रदीयते। सकृदाह ददानीति त्रीण्येतानि सकृत् सकृत्॥' (मस्मृ.९।४७) इति। तद्युक्त्यादिभिरपगतसदेहविषयमिति सर्वमनवद्यम्।

स्मृच.३११

भारद्वाजः

समविषमविभागनिवर्तनकालावधिः

[3]संधिश्च परिवृत्तिश्च विभागश्च समा यदि।
आदशाहान्निवर्तन्ते विषमा नववत्सरात्॥

बृद्धयाज्ञवल्क्यः

विभागनिर्णये प्रमाणानि, तत्र दिव्य न देयम्

[4]विभागधर्मसंदेहे बन्धुसाक्ष्यभिलेखितैः।
विभागभावना कार्या न भवेद्दैविकी क्रिया×॥

एतल्लिङ्गाभावे तु दिव्यम्। 'एषामन्यतमाभावे दिव्यान्यतममुच्यत' इति तेनैवोक्तत्वात्। यत्तु बृद्धयाज्ञवल्क्यः 'विभागधर्मसंदेह' इति तल्लिङ्गान्तरसद्भावपरम्। व्यम.६०

सुमन्तुः

समविषमविभागनिवर्तनकालावधिः

संधिश्च परिवृत्तिश्च विभागश्च समा यदि।
आदशाहान्निवर्त्याः स्युर्वैषम्ये नववत्सरात्*॥

---

* पमा. स्मृचगतम्। × शेष दागतम्।

+ सवि.व्याख्यान 'विभागनिह्नवे' इति याज्ञवल्क्यवचने (पृ.१५७७,७८) द्रष्टव्यम्।

(१) स्मृच.२७३ मेव (मेव); पमा.५५७; व्यम.५५ यदा (सदा).

(२) अप.२।१४९ दंश वर्षाणि (यें दशाब्दानि) उत्तरार्धे (विभक्ता भ्रातरस्ते च विज्ञेयाः पैतृके धने); स्मृच.३११; सवि.४४३ : ३४८ (–), ४४७,४४८ उत्तरार्धे (विभक्ता भ्रातरस्तेऽपि विज्ञेयाः पैतृकाद्धनात्); समु.१४५.

×स्मृच. व्याख्यानं 'शङ्काविश्वास' इति कात्यायनवचने द्रष्टव्यम्। पमा. स्मृचवत्।

* व्याख्यानं स्थलनिर्देशश्च क्रयविक्रयानुशये (पृ.८९९) द्रष्टव्यः।

(१) सवि.३१४ ह्यान्निवर्तन्ते (हं निवर्तेत) पमा (षमे): ३१९ यदि (अपि) पमा (षमे): ४४८ यदि (अपि).

(२) स्मृच.३११; पमा.५७१; दानि.६; व्यम.६०; विता.४७५; समु.१४६.

विभक्ताविभक्तकृत्यम्

नारदः

पृथग्धर्माक्रियाकर्मगुणा असंमतकार्यकारिणो भ्रात्रादयः दानविक्रयादौ स्वतन्त्राः

यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः ।
पृथक्कर्मगुणोपेता न चेत्कार्येषु संमताः ॥
स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै *॥

(१) अस्यार्थः—यदि भ्रातरः पृथक्परस्परानुमतिमृते धनसाध्यधर्मकर्मिणो, यदि च तथैव पृथग्वित्तव्ययात्मककृष्यादिक्रियाकारिणस्तथा कर्मगुणे लाभः क्षयो वा तेनोपेताः स्युः, तथा कार्यान्तरेष्वपि पर्षद्ग्रामादिविषयेषु विरुद्धास्ते विभक्ता इति ज्ञेयम् । अथ ते स्वभागविक्रयादिकं यथेष्टं कुर्युः । अप.२।१४९

* दा. व्याख्यान 'स्थावरस्य समस्तस्य' इति व्यासवचने द्रष्टव्यम् ।

(१) **नासं.**१४।४१ चेत्कार्ये (तेऽकृत्ये); **नास्मृ.**१६।४२ चेत्कार्ये (ते कृत्ये); **दा.**३५; **अप.**२।१४९; **व्यक.**१६२ सम (सग); **स्मृच.**३०९ कर्म (कार्य); **विर.**६०८ पृथक्कर्म (सम्यक्कर्म) त्कार्येषु समताः (त्कृत्येषु सगताः); **पमा.**५६७; **मपा.**६८९ व्यकवत्; **रत्न.**१५०, **विचि.**२५५ पृथक्कर्म (सम्यक्कर्म) त्कार्येषु (त्कृत्येषु); **व्यप्र.**४६० सम (सयु): ५६१; **व्यम.**६०; **विता.**४७७ उत्तरार्धे (पृथक्कर्मगुणोपेता भवेत्कार्येषु सयुताः); **बाल.**२।१४९ चेत्का (ते का) सम (सग); **सेतु.**८१; **समु.**१४५; **विच.**५२.

(२) **नासं.**१४।४२ स्वभागा (स्वानशा) शास्ते (शते) वै (ते); **नास्मृ.**१६।४३ स्वभा (स्वान् भा) युरथा (रन्नथा) वै (वु); **दा.**३५; **अप.**२।१४९ दद्युस्ते विक्रीणी (वा दद्युस्ते विक्री); **व्यक.**१६२; **स्मृच.**३०९ क्रीणीयुर (क्रेतारस्त); **विर.**६०९ दद्युस्ते (ते दद्युः); **स्मृसा.**७९ गान् (गं) ष्टं तत्स (ष्टतः स) वै (हि) शेष विरवत्; **पमा.**५६७ वै (च); **मपा.**६९० यदि (अपि); **रत्न.**१५० गान् य (वाध); **विचि.**२५५ विरवत्; **स्मृचि.**३५ गान् (गं) वै (हि) शेष विरवत्; **दात.**१७७ विरवत्; **व्यप्र.**४६०,५६१ वै (हि); **व्यम.**६० गान् य (वाध) वै (वा); **विता.**४७७; **बाल.**२।१४९ मपावत्; **सेतु.**८१; **समु.**१४५ युरथा (रन्नथा); **विच.**५२.

(२) अस्यार्थः । एकस्माज्जाता यदि बहवोऽनेकधा विभक्तास्तथा पृथक् पृथक् परस्परानुमतिमन्तरेण धनसाध्याग्निहोत्रादिकर्मकारिणः स्युः, तथैव विभक्तव्ययायत्तकृष्यादिलौकिककक्रियाकारिणो भवेयुस्तथा विभिन्नभाण्डादिकर्माङ्गद्रव्योपेताः स्युस्तथा स्वस्वकार्येषु भ्रातरो न चेत्संमतास्तदा तान्नादृत्य स्वकार्यं कुर्युस्तथा ते विभक्ता यदि स्वभागान्+क्रीणीयुरादद्युरथापि वा तत्सर्वं यथेष्टं कुर्युः यतस्ते विभक्ताः स्वधने स्वतन्त्राः स्वामिन इति । +स्मृच.३०९

(३) एकजातत्वं बहुत्वं चाविवक्षितम् । पृथग्धर्माः भिन्नभिन्नमहायज्ञादियुक्ताः। पृथक्क्रियाः पृथक्कुसीदादिवृत्तिमन्तः। पृथक्कर्मगुणोपेताः पृथक्प्रजारक्षणकृषिशुश्रूषादियुक्ताः । न चेत्कृत्येषु संगताः न चेत्संभूयकारिण इत्यर्थः । अस्योक्तस्य फलमाह । अत्र वाक्यान्तरपरामर्षात्सर्वपद सकोच्यम् । संकोचकानि च दत्ताप्रदानिकप्रकरणस्थबृहस्पत्यादिबहुवाक्यानि 'विभक्ता अविभक्ता वे'त्यादीनि तत्रैवानुसंधेयानि । विर.६०८-९

(४) एकस्माज्जाता विभक्ता भ्रातरः परस्परानुमतिमन्तरेण धनसाध्येष्टापूर्तादिधर्मकारिणो भवेयुः । तथा धनसाध्यकृष्यादिकर्मकारिणो भवेयुः । तथा विभिन्नोलूखलमुसलादिकर्मोपसर्जनद्रव्योपेताः स्युः। तथा च कार्येषु भ्रातरो यदि न समताः तदा तान्नादृत्य कार्ये कुर्युः। तथा विभक्ता भ्रातरः स्वभागान्यदि दद्युर्विक्रीणीयुर्वा न दद्युर्वा तत्सर्वं यथेष्टं कुर्युः । यस्मात्ते विभक्ताः स्वधनस्येशाः स्वतन्त्राः स्वामिन इत्यर्थः । ×पमा.५६७-८

(५) विभक्ताश्चेन्न संसृष्टास्तदा । एतत्सर्वं पृथक्कर्तुमर्हतीत्यर्थः । विचि.२५५

(६) भ्रातरो बहवो यदि, पृथग्धर्मवैश्वदेवपितृकार्यादयः पृथक्कर्षणादिक्रियाश्च, कर्मफलेनापि पृथगेव संबध्यन्ते चेत्, न तेऽकृत्येषु अकार्येषु चौर्यादिष्वेकत्वेन मताः । त एव ग्राह्याः, नेतरे । नाभा.१४।४१

+रत्न. स्मृचगतम् । ×व्यम. पमागतम् ।

(७) अस्यार्थः। एकस्माज्जाता बहवो भ्रातरो यदि विभक्ता इति शेष इति केचित्। वय तु पृथग्धर्मा इत्यादेरेव विभक्ता इत्यर्थः। तद्विधानस्यात्राप्रतीतेरानर्थक्याच्च। पृथग्विभिन्नो धर्मो देवपितृद्विजार्चनरूपो येषा न त्वग्निहोत्रादिरूपः। तस्य द्रव्यसाध्यत्वेऽप्यविभागेऽपि पृथक्त्वात्। *व्यप्र.५६१

(८) कर्मगुणः, क्षयो लाभो वा। विता.४७७

अनुजसंस्कारार्थं पैतृकस्य स्वार्जितस्य वा धनस्य विनियोगः

[1]येषां तु न कृताः पित्रा संस्कारविधयः क्रमात्।
कर्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात्॥
[2]अविद्यमाने पित्र्येऽर्थे स्वांशादुद्धृत्य वा पुनः।
अवश्यकार्याः संस्कारा भ्रातृभिः पूर्वसंस्कृतैः॥

(१) येषा तेषामिति पुंलिङ्गनिर्देशात् एतदनन्तरमेवाविद्यमान इति वचनारम्भात् भ्रातृसंस्कारार्थमेवेद वचनम्। दा.७० ७१

अस्मान्नारदवचनादवश्यकर्तव्यत्वाद्भगिनीना संस्कारस्य निरंशतापि न दोषायेति। तदयुक्तं, भ्रातृसंस्कारार्थत्वादस्य वचनस्य भ्रातृणा पूर्वसंस्कृतैरिति पाठस्यानाकरत्वात् भ्रातृसंस्कारस्य च प्रकृतत्वात्। दा.७०

(२) संस्कारा जातकर्माद्या उपनयनान्ता विवक्षिताः। अवश्यकार्या इत्यभिधानात्। विवाहादिसंस्कारस्य तु नैष्ठिकत्वादिपक्षान्तरदर्शनात् अवश्यकार्यत्वाभावात्संस्कारशब्दस्य सकोचोऽत्र विवक्षित इत्यनवद्यम्। कन्यकाना तु विवाहान्ताः संस्कारा उपनयनरहिताः पित्र्यार्थाभावे स्वार्थादुद्धृत्य कार्याः। विवाहस्योपनयनस्थानत्वेनावश्यकार्यत्वात्। ×स्मृच.२६९

(३) अत्र संस्कारविधयो जातकर्माद्युपनयनान्ताः। +विर.४९३

(४) भ्रातृग्रहण भगिनीनामप्युपलक्षणम्। रत्न.१४४

(५) भ्रातृणा... संस्काराः... भ्रातृभिः पितृधनादुपादाय साधारणात् कर्तव्याः। संस्कारार्थं धन मुक्त्वाऽन्यद् विभजेरन्नित्यर्थः। पितृद्रव्याभावे स्वाशात् स्तोकं स्तोक गृहीत्वा, वाशब्दादन्यतो वा याचित्वा, ज्येष्ठैरवश्यं कर्तव्याः संस्काराः। अकरणे कारयितव्या राज्ञा। नाभा.१४।३३-४

कुटुम्बोपकारकोऽन्यो भरणीयः

कुटुम्बार्थेषु चोद्युक्तस्तकार्यं कुरुते तु यः।
स भ्रातृभिर्वृहणीयो ग्रासाच्छादनवाहनैः*॥

बृहस्पतिः

विभागपत्रसाक्षिक्रिया

कार्यमुच्छ्रावणालेख्यं विभक्तैर्भ्रातृभिर्मिथः।
साक्षिणो वाविरोधार्थं विभजद्भिरनिन्दिताः॥

भोगः भागनिर्णये प्रमाणम्। स्वेच्छाकृतभागविसवादी दण्ड्यः।

[3]येनांशो यादृशो भुक्तस्तस्य तन्न विचालयेत्।
स्वेच्छाकृतविभागो यः पुनरेव विसंवदेत्।

---

* शेष पमागतम्, व्यप्र.४६० अत्रोद्धृत व्याख्यान 'स्थावरस्य समस्तस्य' इति व्यासवचने द्रष्टव्यम्।

(१) **नासं.**१४।३३ तु (च); **नास्मृ.**१६।३३ तद् (ते); **दा.**७०; **अप.**२।१२४ तु (च) तद् (ते), **व्यक.**१४४; **स्मृच.**२६९ तु (वै); **विर.**४९३ पित्रा (पूर्वैः), **स्मृसा** ५९ तद् (वै); **रत्न.**१४४; **विचि.**२०५ पित्रा (पूर्व); **स्मृचि.** ३५ तु (च) पित्रा (पूर्वैः) पृ., मनुः; **दात.**१७१; **चन्द्र.** ७५ स्मृसावत्; **व्यप्र.**४५७; **विता.**३३३ विचिवत्; **सेतु.** ७८ व्यासः; **विभ.**८९; **समु.**१२९ तु (वै) तद् (वै); **विच.७७.**

(२) **नासं.**१४।३४ व्येऽ(त्र) तृभिः (तृणा); **नास्मृ.**१६। ३४; **दा.**७० व्येऽ (त्र); **अप.**२।१२४ व्येऽर्थे (व्यशे) तृभिः (तृणा); **व्यक.**१४५ तृभिः (तृणा); **स्मृच.**२६९ नासंवत्; **विर.**४९३ व्येऽ (व्य) तृभि. (तृणा); **स्मृसा.**५९ विरवत्; **पमा.**५११ भ्रातृ...तैः (सकोचोऽत्र विवक्षितः), **रत्न.**१४४ व्यकवत्; **विचि.**२०५ नासवत्: २०९ दावत्; **व्यनि.** व्यकवत्; **नृप्र.**३७ पमावत्; **दात.**१७१ दावत्; **चन्द्र.**७५ वा (वै) शेषे नासंवत्; **व्यप्र.**४५४-५; **विता.**३३३ व्यकवत्; **विभ.** ८९ व्येऽ (व्य); **समु.**१२९ नासंवत्; **विच.७७** दावत्.

× मपा., चन्द्र., व्यप्र., विता. स्मृचगतम्।

+ विचि. विरगतम्।

* व्याख्यासग्रहः स्थलादिनिर्देशश्च भ्रातृणां सहवासविधिप्रकरणे (पृ.११९८) द्रष्टव्यः।

(१) **विश्व.**२।१५३.

(२) **अप.**२।१४९; **व्यक.**१६२; **स्मृच.**३०९ राज्ञांशे

स राज्ञांशे स्वके स्थाप्यः शासनीयोऽनुबन्धकृत् ॥

(१) अनुबन्धः आग्रहः । अप.२।१४९

(२) स्वेच्छाकृतविभागेन येनाशो यादृशो भुक्तस्तस्य स एव भागः, न तु विचालयेदिति स्थैर्यार्थमुक्तं स्वेच्छाकृतविभाग इत्यादिनाऽनुबन्धकृदित्यन्तेन । विर.६०९

(३) विभक्तानां मध्ये योंऽशातिक्रमं करोति स राज्ञा स्वीयेऽशे स्थापनीयः । औद्धत्ये दण्डनीयश्च । रत्न.१५०

विभागे वृत्तेऽपि स्थावरमविभाज्यं, तत्र नैकः कश्चित् स्वतन्त्रो विभक्तोऽपि

[1]विभक्ता अविभक्ता वा दायादाः स्थावरे समाः । एको ह्यनीशः सर्वत्र दानाधमनविक्रये ॥

स्वके (च राज्ञाऽशके). **विर.**६०९, **स्मृसा**७९ भु (भ) **नुबन्ध** (र्थबन्धु); **पमा.**५७२ राज्ञांशे स्वके (राज्ञां शक्येत) **बन्धकृत्** (बन्धतः) अन्त्यार्धद्वयम्; **रत्न**१५०; **स्मृचि.**३५ भु (भ); **दात.**१८२; **चन्द्र.**१०० प्रथमार्धः; **दानि.**६ स्वेच्छा (स्वेच्छया) बन्धकृत् (बन्धतः) शेषं स्मृचवत्, अन्त्यार्धद्वयम्; **व्यप्र.**५६२ भुक्तस्तस्य (लब्धः प्राप्य) स्वेच्छाकृत (स्वेच्छागत); **व्यम.**६० अन्त्यार्धद्वयम्; **विता.**४७५ बन्धकृत् (बन्धतः); **बाल.**२।१४९ अन्त्यार्धद्वयम्; **समु.**१४५, **विच.**९५ अन्त्यार्धद्वयम्.

(१) **मिता.**२।११४ विभक्ता अविभक्ता (अविभक्ता विभक्ता) दायादाः (सपिण्डाः), **अप.**२।१४९ अवि (वाऽवि) धम (दाप) कात्यायनः : २।१७५ (=) अवि (वाऽवि) धम (दाप); **व्यक.**१४५ (Wai) अवि (वाऽवि) : १६२ (Bikaner) अवि (ह्यवि), **स्मृच.**१९२ अवि (वाऽवि): ३०९ विभक्ता अविभक्ता (अविभक्ता विभक्ता) ह्य (ऽत्य); **विर.**१३० विभक्ता अविभक्ता (अविभक्ता विभक्ता); **स्मृसा.**७९, १४९; **पमा.**३१६ अवि (वाऽवि) ह्य (ऽत्य) : ५६८ अवि (वाऽवि); **मपा.**६९०, **सुबो.**२।११४ अवि (वाऽवि) प्रथमपादः; **रत्न.**१५०; **विचि.** ५९ : २५१ अवि (ह्यवि) मनुः; **स्मृचि.**१९ सुबोवत्; **चन्द्र.**४२, १७३; **व्यप्र.**३०८ ह्य (त्य): ४५८ दायादाः (सपिण्डाः) स्मरणम् : ५६२ अवि (वाऽवि) दायादाः (सपिण्डाः); **व्यम.**६० सुबोवत्; **विता.**२८९ व्यप्र(५६२)वत्,

(१) तदप्यविभक्तेषु द्रव्यस्य मध्यस्थत्वादेकस्यानीश्वरत्वात् सर्वाभ्यनुज्ञाऽवश्यं कार्या । विभक्तेषु तूत्तरकालं विभक्ताविभक्तसशयव्युदासेन व्यवहारसौकर्याय सर्वाभ्यनुज्ञा न पुनरेकस्यानीश्वरत्वेन । अतो विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिध्यत्येवेति व्याख्येयम् । *मिता.२।११४

(२) क्रमायाताविभक्तस्थावरविषयमेतत् । विभक्ता अपि समाः किं पुनरविभक्ता इति व्याख्येयम् । अन्यथा विभागोऽनर्थकः स्यात् । एवं च सति विभक्तानां साम्याभिधानेनेतद्गमयति— दानादियोग्येषु विभक्तेषु दायादेषु सत्सु तेभ्य एव स्थावरमर्पणीयमयोग्येषु निरपेक्षेषु वाऽन्येभ्य इति । आपदादौ तु स्थावरविषय दानादिकमविभक्तधनेर्दायादैरनुज्ञात एकोऽपि कुर्यात् । तथा च स्मृत्यन्तरे—'एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम् । आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः ॥' अप.२।१७५

(३) आधमनमाधीकरणम् । तदेतद्यत्र समतया स्थावरविभागमतिदुष्करं मत्वा तत्फलमेव फलकाले ग्रहीष्यामो विभज्येत्यभिसधिना तदितरधनविभागतो दायादा विभक्ता भवन्ति तद्विषयम् । तत्र स्थावरे त्वेकैकस्य स्वतन्त्रस्वामित्वाभावात् । ×स्मृच.३०९

(४) इत्यप्यविभक्तस्थावरविषयम् । तथा च विभक्ताविभक्तसदेहवारणार्थमनुमत्यपेक्षा । +स्मृसा.७९

(५) यत्तु 'विभक्ता' इत्यादिबृहस्पतिवचन, तत्र स्थावरेतरधन विभज्य गृहीत्वा स्थावरविभागस्य दुष्करता मन्वानाः तत्फलमेव फलकाले ये विभज्य गृह्णन्ति तेषा विभक्तत्वे सत्यपि स्थावरे स्वातन्त्र्याभावात् परस्परानुमतिमन्तरेण तद्दानादिकं न कर्तव्यमित्येवम्परम् । रत्न.१५०

---

* पमा. (पृ.५६८), मपा. मितावत् ।

× स्मृच. (पृ.१९२) अपवत् ।

+ मितावद्भावः । (पृ.१४९) प्रकाशमनं मितावत् । नारदः : ३२३ सुबोवत्, पृ., स्मृतिः : ३८९ सुबोवत्, पृ., नारदः; **राकौ.**४४४ त्र (स्य) शेषं व्यप्र(५६२)वत्, मनुः; **बाल.**२।१४९ अवि (ह्यवि) प्रथमपादः; **सेतु.**१५१; **समु.**९४ सुबोवत्; **विच.**१९.

(६) विभक्तानामपि यत्रांशपरिच्छेदो न जातस्तन्मध्यगमेव तिष्ठति, तेन तत्र साधारणत्वमेव । तत्रैकोऽनीशः । पृथग्भूतेषु सर्वेष्वेव द्रव्येषु स्वतन्त्रकृतस्य सिद्धिरेव । *विचि.५९

(७) वस्तुतस्तु स्थावरविक्रयनिषेधोऽविभक्तस्थावरविषयः । तत्रापि यदि विक्रय विनाऽवस्थितिर्न भवति तदा विक्रये कर्तव्ये दायादानां दुरन्ततानिवृत्त्यर्थं क्रेतुरिच्छया दानमप्युक्तम् । दात.१७७

(८) तत्राविभक्ताना मध्यकद्रव्ये स्वाम्यसाम्यादनीशत्वमन्यानुमतिं विना सिद्धमपि स्थावरे विशेषतस्तदादरार्थमुच्यते । विभक्ताना तु व्यवहारसौकर्यार्थम् । कालान्तरे हि विभक्ताविभक्तसंशये विभागभावनाऽवश्य साक्ष्यादिप्रमाणेन तथा सति कार्या स्यादन्यथा साधारणद्रव्यदानाद्यसंभवात् । अनुमतौ तु सत्या तदनपेक्ष एव व्यवहारः सिद्धयति । न तु यथाश्रुतं स्थावरे विभक्तानामपि समं साम्यम् । विभागस्यादृष्टार्थताप्रसङ्गात् । अतश्चान्यानुमतिमन्तरेणापि दानादिस्वरूपं सिद्धयत्येव । विभागभावनाया व्यवहारोऽपि । यथा—'स्वग्रामज्ञातिसामन्तदायादानुमतेन वा । हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी ॥' इति वचने ग्रामानुमतिः सामन्तानुमतिश्च । सामान्तानुमतिस्तु सीमाविप्रतिपत्तिनिरासायापि । ज्ञातिदायादानुमतेस्तु पूर्ववदेव व्यवस्था । अत एव स्मृत्यन्तरम्—'प्रतिग्रहः प्रकाशः स्यात् स्थावरस्य विशेषतः' इति । अन्यथाऽत्रापि ग्रामसामन्तानुमतिमन्तरेण दानाद्यसिद्धिः प्रसज्येत । 'हिरण्योदकदानेने'ति, 'स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञया' इति स्थावरस्य विक्रयप्रतिषेधात्, 'भूमिं यः प्रतिगृह्णाति भूमिं यश्च प्रयच्छति । तावुभौ पुण्यकर्माणौ नियत स्वर्गगामिनौ ॥' इति दानप्रशंसनाच्च कुटुम्बभरणाद्यर्थमवश्यकर्त्तव्येऽपि विक्रये सहिरण्यमुदकं क्षेत्रे दत्त्वा दानाशोऽपि कश्चिद्यथा तत्र भवति तथा दानरूपेण स्थावरविक्रय कुर्यादिति सूचितम् । व्यप्र.४५८-९

[स्मृतिचन्द्रिकामतं खण्डयति] तत्कल्पनामात्रम् । अविभक्तत्वादेव तत्रानुमत्यपेक्षणात् । +व्यप्र.५६२

(९) तदुक्तापवादादिव्यतिरेकेण विभक्तोक्तिस्तु यत्र देशान्तरे प्रतिबन्धाद्वा स्थावरं न विभक्त अन्यद्धनं विभक्त तत्र यः कश्चित्स्वीयमशं गृह क्षेत्रं वा ददाति विक्रीणीते वा तत्परा । अंशानिश्चयाद्विवादाक्रान्तत्वाच्चेति मदनरत्नप्राच्यादयः । ×विता.२८९

पूर्वजैरनुज्ञाना संस्काराः कार्या मध्यगाद्धनात्

असंस्कृता भ्रातरस्तु ये स्युस्तत्र यवीयस. ।
संस्कार्याः पूर्वजैस्ते वै पैतृकान्मध्यगाद्धनात् ॥

(१) तत्राजीवत्पितृकेषु भ्रातृष्वित्यर्थः । असंस्कृताः पित्रेति शेषः । स्मृच.२६९

(२) यवीयसो यवीयासः, आर्षत्वान्नुमदीर्घयोरभावादित्येके । अन्ये तु यवीयसः कनिष्ठस्य मध्यगादित्याहुः । फलतश्च न कश्चिद्विशेषः । विर.४९२

(३) भ्रातृग्रहणमत्र भगिनीनामुपलक्षणम् । रत्न.१४३

(४) अत्र च संस्कार्यसाहचर्यात् 'अनूढाना दुहितृणा' 'कन्यकाना त्वदत्तानाम्' इत्यनूढत्वविशेषणोपादानाच्चापरिणीता एव चतुर्थांशभागिन्यो भगिन्योऽन्यास्तु यत्किञ्चिदौचित्यालभन्त इति बोध्यम् । व्यप्र.४५८

(५) स च विभागः सर्वभ्रातृभगिनीसंस्कारोत्तरं कार्यः । विता.३३३

व्यासः

विभागे वृत्तेऽपि स्थावरमविभाज्य, तत्र नैकः कश्चित्स्वतन्त्रो विभक्तोऽपि

[२]स्थावरस्य समस्तस्य गोत्रसाधारणस्य च ।
नैकः कुर्यात् क्रयं दानं परस्परमतं विना ॥

---

* विचि. (पृ.२५२) मितावत् ।

+ व्यप्र. (पृ.३०८) अपवत्, (पृ.५६२) मितावत्, (पृ.४५८) मिताक्षराव्याख्यानमेतत् ।

× मिताक्षरामत चोपन्यस्तम् ।

(१) **स्मृच.**२६९ पूर्वजैस्ते वै (भ्रातृभिश्चैव); **विर.**४९२; **रत्न.**१४३ गा (का); **व्यप्र.**४५८ रत्नवत्; **व्यम.**४६ जैस्ते वै (जैनैव) गा (मा); **विता.**३३३ (=) रत्नवत्; **विभ.**९०; **समु.**१२९.

(२) **दा.**३४; **दात.**१६४,१७६; **व्यप्र.**४११, ४५९; **सेतु.**८२-३; **विभ.**६१ मत (मति); **विच.**५० विभवत्,

विभक्ता अविभक्ता वा सपिण्डाः स्थावरे समाः।
एको ह्यनीशः सर्वत्र दानाधमनविक्रये ×॥

(१) न च एतद्व्यासवचनद्वयेन एकस्य विक्रयाद्यनधिकार इति वाच्यं, यथेष्टविनियोगार्हत्वलक्षणस्य स्वत्वस्य द्रव्यान्तर इवात्राप्यविशेषात् । व्यासवचनं तु स्वामित्वेन दुर्वृत्तपुरुषगोचरविक्रयदानादिना कुटुम्बविरोधात् अधर्मभागिताज्ञापनार्थं निषेधरूपं न तु विक्रयाद्यनिष्पत्त्यर्थम् । एवं च 'स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम् । असंभूय सुतान् सर्वान् न दानं न च विक्रयः ॥' इत्येवमादिकं तदप्येवमेव वर्णनीयम् । तथाहि कर्तव्यपदमवश्यमत्राध्याहार्यम् । तेन दानविक्रयकर्तव्यतानिषेधात् तत्करणात् विध्यतिक्रमो भवति न तु दानाद्यनिष्पत्तिः वचनशतेनापि, वस्तुनोऽन्यथाकरणाशक्तेः ।

दा.३४-५

(२) [जीमूतवाहनं परामृशति] तत्सम्यगेव । परं त्वधर्मभागिताज्ञापनार्थमित्ययुक्तम् । वृथास्थावरविक्रयस्य बहून् प्रत्यपि निषेधादेकग्रहणापार्थक्यापत्तेः । व्यवहारशास्त्रस्य व्यवहारसौकर्यादिदृष्टप्रयोजनसंभवेऽदृष्टकल्पनानुपपत्तेः अन्यथाऽनुमतावपि तदापत्तेः। कुटुम्बविरोधजन्यवचनान्तरप्रतिपादिताधर्मप्रयोजकतापरमस्तु । व्यप्र.४६०

मध्यगधनात् असंस्कृतसंस्कारः कर्तव्यः

असंस्कृतास्तु ये तत्र पैतृकादेव ते धनात्।
संस्कार्या भ्रातृभिर्ज्येष्ठैः कन्यकाश्च यथाविधि* ॥

सुतानुमति विना स्थावरदासविक्रयदानादौ न स्वातन्त्र्यम्

[२]स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम् ।
असंभूय सुतान् सर्वान् न दानं न च विक्रयः ॥
[१]ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः।
वृत्तिं च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः ॥

(१) स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतन्त्र्यमेव । ×मिता.२।११४

(२) इत्यप्यविभक्तविषय परस्परनिरपेक्षव्यवहारार्थमेव विभागात् । अत एव पैतामहेऽपि विभक्ताना स्वातन्त्र्यम् । *स्मृसा.७९

(३) पूर्वपुरुषार्जितनष्टोद्धारे विशेषयति ।

दात.१७७

मरीचिः

विभक्तैः श्राद्धादि पृथक् कार्यम्, विभक्तानां स्वेच्छेन ज्येष्ठेन

[२]विभक्तैस्तु पृथक्कार्यं प्रतिसंवत्सरादिकम् ।
एकेनैवाविभक्तेषु कृते सर्वैस्तु तत्कृतम् ॥

+ दा.व्याख्यान 'स्थावरस्य समस्तस्य' इति व्यासवचने द्रष्टव्यम् ।

× पमा., चन्द्र., व्यप्र., व्यम., विता. मितावत् । विचि. मितावद्भावः ।

* प्रकाशमत (पृ.१४९) मितावत् ।

(=); **विचि.**२५१ प्रकाशे इति; **व्यनि.** पदं (विधं) मर्जि (मार्जि) सुतान् सर्वान् (सुताः सर्वे) विक्र (विक्रि) **बृहस्पतिः**; **स्मृचि.**५९ कात्यायनः; **दात.**१६७, १७७ (=); **सवि.** ३७४ उत्त., स्मरणम्; **चन्द्र.**१७२ भूय (बोध्य); **व्यप्र.** ३०९: ४१९ (=); **व्यउ.**८५; **व्यम.**४० (=); **विता.** २८९ नारदः : ६०४; **राकौ.**४४५ स्मरणम्; **सेतु.**७४ (=); **विभ.**४५,४६ (=) मर्जि (मार्जि); **समु.**९४; **विच.**५४ (=).

(१) **मिता.**२।११४ स्मरणम्; **दा.**२४ श्च (वा) उत्तरार्धे (वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपो विगर्हितः) मनुः; **स्मृसा.**८०, १४९ (=); **पमा.**४८५ (=); **विचि.**२५१ प्रकाशे इति; **स्मृचि.**५९ कात्यायनः; **दात.**१७७ (=) दावत्; **चन्द्र.**१७२ श्च (वा) च तेऽ (तेऽप्य); **व्यप्र.**३०९: ४१९ (=) : ४३४ (=) न दानं...यः (वृत्तिलेपो न विद्यते); **व्यउ.**८५; **व्यम.**८९ व्यव (ध्वव) क्रयः (क्रयम्); **विता.**२८९ नारदः : ६०४; **राकौ.**४४५; **विभ.**६६ न दान....यः (वृत्तिलोपो विगर्हितः) मनुः; **समु.**९४ऽभि (हि) क्रयः (क्रयम्); **विच.**३४(=)विभवत् : ९१ उत्तरार्धं दावत्.

(२) **विता.**४७७.

× व्याख्यानान्तराणि 'विभक्ता अविभक्ता वा' इति बृहस्पतिवचने द्रष्टव्यानि ।

* व्याख्यानं स्थलादिनिर्देशश्च पैतृकदव्ये भागिनीनां भागप्रकरणे (पृ.१४२२) द्रष्टव्यः ।

(१) **दा.**३४; **दात.**१७६; **व्यप्र.**४५९ प्रथमपादः; **विता.** ६०४ अविभ (वाविभ) सपिण्डाः (दायादाः) पू.; **सेतु.**८३ विभक्ता अविभक्ता (अविभक्ता विभक्ता); **विभ.**६१; **विच.**५०.

(२) **मिता.**२।११४ स्मरणम्; **दा.**३५ (=); **स्मृसा.** ७९ क्रमेण बृहस्पतिः : १४९ (=) द्विपदं (जङ्गमं); **पमा.**४८५

सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् ।
द्रव्येण वाऽविभक्तेन सर्वैरेव कृतं भवेत् ॥

इदं द्रव्यसाध्ये । तदसाध्ये संध्योपवासादौ तु नानुज्ञापेक्षा । विता.३११

वृद्धयाज्ञवल्क्यः

कुलक्रमायातस्थावरादेर्विक्रयदानादौ न कश्चित् स्वतन्त्रो विभक्तोऽपि

कौले रिक्थविभागेऽपि न कश्चित्प्रभुतामियात् ।
भोग एव तु कर्तव्यो न दानं न च विक्रयः ॥

कौले कुलक्रमायाते स्थावरादौ न कश्चित् पित्रादिरपि, रिक्थविभागेऽपि अपिशब्दात् विक्रयादावपि न प्रभुतामियात् । तेन तत्र दायादानुमतिमन्तरेण विभागविक्रयाधानानि न कुर्यादिति तस्यार्थः ।

*स्मृच.२७८

बृहद्यमः

ससृष्टिकृत्यम्

अनेके यस्य ये पुत्राः संसृष्टा हि भवन्ति च ।
ज्येष्ठेन हि कृतं सर्वं सफलं पैतृकं भवेत् ॥
वैदिकं च तथा सर्वं भवत्येव न संशयः ॥
पृथक्पिण्डं पृथक्श्राद्धं वैश्वदेवादिकं च यत् ।
भ्रातरश्च पृथक्कुर्युः नाविभक्ताः कदाचन ॥

लघुहारीतः

विभक्तकृत्यम्

कौलोत्सवविभक्तेऽपि न कश्चित् प्रभुतां व्रजेत् ।
भाग एव हि कर्तव्यो न दानं न च विक्रयः ॥

शाकलः

अविभक्ताना देवकार्यमेकमेव, विभक्ताना पृथक्

एकपाकेन वसतामेकं देवार्चनं गृहे ।
वैश्वदेवं तथैवैकं विभक्तानां गृहे गृहे ॥

आश्वलायनः

एकपाकानां विभक्तानामेकः पञ्चयज्ञान् करोति । अनेकानां तु पृथगनुष्ठानम् ।

एकपाकेन वसतां विभक्तानामपि प्रभुः ।
एकस्तु चतुरो यज्ञान् कुर्याद्वाग्यज्ञपूर्वकान् ॥
अविभक्ता विभक्ताश्च पृथक्पाका द्विजातयः ।
कुर्युः पृथक् पृथक् यज्ञान् भोजनात्प्राग् दिने दिने ॥

तत् ससृष्टिपरम् । विभक्तानामप्येकपाकेन वसतामित्यनेन विभक्ता अविभक्ताश्चेत्यनेन च तत्प्रतिपादनात् । अतः संसृष्टिना कदाचित् पृथक्पाके पृथङ्महायज्ञाः । वाग्यज्ञो ब्रह्मयज्ञः । तत्पूर्वकानित्यतद्गुणसविज्ञानः । तद्गुणसविज्ञाने तु वाग्यज्ञेत्याद्यनर्थकम् । प्रथमत्यागे कारणाभावादिति न्यायादेव चतुर्णा प्राप्तिसंभवात् । अतो ब्रह्मयज्ञः पृथगेव कार्यः । इद तु वचनद्वयं शिष्टैस्तथा नाद्रियते । व्यम.५९

स्मृत्यन्तरम्

अविभक्तस्थावरस्य दानविक्रयार्थी स्वातन्त्र्यनिमित्तानि

एकोऽपि स्थावरे कुर्यात् दानाधमनविक्रयम् ।
आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः ॥

(१) अस्यार्थः । अप्राप्तव्यवहारेषु पुत्रेषु पौत्रेषु वा, अनुज्ञादानादावसमर्थेषु भ्रातृषु वा, तथाविधेष्वविभक्तेष्वपि सकलकुटुम्बव्यापिन्यामापदि तत्पोषणे वाऽवश्यं कर्तव्येषु पितृश्राद्धादिषु स्थावरस्य दानाधमनविक्रयमेकोऽपि समर्थः कुर्यादिति । +मिता.२।११४

(२) तत्क्रमायाताविभक्तस्थावरविषयम् । सप्तानधिकस्थावरविषयं चेति मन्तव्यम् । अपेः काकाक्षिवदुभ-

---

* सवि. स्मृचवत् ।

(१) विता.३११.

(२) स्मृच.२७८; सवि.३७१ (=); समु.१३४.

(३) बृयस्मृ.५।१४-६. (४) लहास्मृ.११३.

(५) व्यम.५९.

+ पमा., व्यप्र., विता. मितागतम् । स्मृसा. स्वमतं प्रकाशमत च मितावत् ।

(१) व्यम.५९; समु.१४५.

(२) मिता.२।११४ (=); अप.२।१७५ धमन (दापन); स्मृच १९२; स्मृसा.८० (=) थें च (थेंपु) : १४९ (=) च (तु); पमा.४८५ थें च (थेंषु); विचि. २५१ (=) स्वार्थे (स्वार्थं) च (तु); व्यनि. मनुः, वृात.१७७ (=); चन्द्र.१७३ (=); व्यप्र.३०९ : ४५८ (=); विता. २८९ (=) : ६०४ नारदः; सेतु.८४, विच.५४.

यत्र संबन्धात्। यदा परेण सबन्धस्तदाऽयमर्थः, स्थावरेऽपि स्थावरबहुत्वाभावेऽपि एको दानादिक कुर्यात् इति। आधिरपि दान तेन रूपेण स्वत्वावगतेः 'बन्धाचारेण बन्धकमि'ति स्मरणाच्च देयमित्यनुषज्यते। एव चाधेरदेयत्व पूर्वस्मिन् प्रकरणेऽभिहितं आधिरूपाद्रूपान्तरेणेति मन्तव्यम्। स्मृच.१९२

(३) विभक्तस्यापि स्थावरमपि साधारण्यामापदि तत्कन्यादानाद्यर्थं वा देय विक्रेय वेत्यर्थः।

*विचि.२५१

अविभक्तैः परस्परानुमत्या क्षेत्रादिर्देयम्

[1]इतरेणानुजानानः प्रातिभाव्यं हरेत्परः ॥
[2]अविभक्तैश्च कर्तव्या वैश्वदेवादिकाः क्रियाः ॥
[3]क्रमागतं गृहक्षेत्रं पित्र्यं पैतामहं तथा।
पुत्रपौत्रसमृद्धस्य न देयमननुज्ञया ॥

भूमिविक्रये ग्रामज्ञातिसामन्तदायादानामनुमतिग्राह्या

स्वग्रामज्ञातिसामन्तदायादानुमतेन च।
हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी ×॥

* चन्द्र. विचिवद्भावः।

× व्याख्यासग्रहः स्थलादिनिर्देशश्च (पृ.९०१) क्रयविक्रयानुशये द्रष्टव्यः।

(१) सवि.४४०. (२) सवि.४४२.
(३) समु.९४.

अनिर्दिष्टकर्तृकवचनानि

स्थावरमविक्रेयम्। अविभक्तानां पृथग्ग्रामदेशानां दैवपित्र्यकर्मपृथक्त्वम्।

[1]स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञया ॥
[2]अविभक्ताः सुताः पित्रोरेकं कुर्युर्मृताहिकम्।
देशान्तरे पृथक्कुर्युर्दर्शश्राद्धानुमासिकम् ॥
ग्रामान्तरं व्रजेयुश्चेदविभक्ताः सदैव हि।
[3]दर्शं च मासिकं श्राद्धं कुर्युः पित्रोः पृथक् पृथक् ॥
अविभक्ताः पृथग्ग्रामाः स्वस्वार्जितधनाशिनः।
कुर्युस्ते भ्रातरः श्राद्धं पार्वणं च पृथक् पृथक् ॥
[4]वैश्वदेवः क्षयाहश्च महालयविधिस्तथा।
देशान्तरे पृथक्कार्यो दर्शश्राद्धं तथैव च ॥

तान्यपि देशान्तरस्थससृष्टिविषयाणीति केचित्। वस्तुतस्त्वेतानि निर्मूलान्येव। अथवा देशकालकर्त्रादीनामैक्ये न्यायेन प्राप्ता तन्त्रता। कर्तृभेदे तु वाचनिकी, देशभेदे तु वचनस्य न्यायस्य चाभावात्पृथगेव श्राद्धादीनि युक्तिमूलकानि केनचित्कृतानीति दिक्। व्यम.५९

(१) मिता.२।११४; पमा.५६९; विचि.२५२; दात.१७६; चन्द्र.१७३; व्यप्र.४५९; विता.२९०; समु.९४ स्मृत्यन्तरम्.

(२) व्यम.५९ धर्मप्रवृत्तौ; समु.१४५ धर्मप्रवृत्तौ.

(३) व्यम.५९ स्मृतिसमुच्चये; समु.१४५ देवः (देव) स्मृतिसमुच्चये.